DAMAGE BOOK

UNIVERSAL
LIBRARY

OU_184213

UNIVERSAL
LIBRARY

OUP—390--29-4-72—10,000.

OSMANIA UNIVERSITY LIBRARY

Call No. S294.1 V41R Accession No. PG 8773

Author

Title ईशोपनिषद् - भाष्य 1955

This book should be returned on or before the date last marked below

RGARTHADIPIKA

A pre-Sāyaṇa and hitherto unpublished commentary
ON
RGVEDASAMHITĀ

BY
MĀDHAVA, SON OF ŚRĪVEṄKAṬĀRYA

EDITED
From Original palm-leaf Malayalam MSS. with extracts from other commentaries.

BY
LATE DR. LAKSHMAN SARUP

M. A. (Panj.), D. Phil. (Oxon.), Officier d' Academie (France), formerly, Principal, Oriental College, Head of the Sanskrit Department, and Professor of Sanskrit Literature at the University of the Panjab, Lahore.

Vol. IV
Published

Under the supervision of Prof. Jagdishlal Shastri, M. A., M. O. L. formerly Mcleod-Kashmir Research Scholar, University of the Panjab, Lahore and at present Lecturer in Sanskrit in the Madhyapradesh Educational Service, at the Mahakoshal Mahavidyalaya, Jabalpur, Madhya Pradesh.

MOTILĀL BANARSIDASS
ORIENTAL BOOKSELLERS & PUBLISHERS
Post Box No. 75, Nepalikhapra, BANARAS
1955

पंजाब ओरियन्टल सीरिज़ नं० २७

ऋक्संहिताव्याख्यातुस्सायणाचार्यात्प्राग्भवेन
श्रीवेङ्कटार्यतनूद्भवेन श्रीमाधवेन
विरचिता

अप्रकाशितपूर्वा, ऋग्वेदसंहिताव्याख्या

ऋग्वेदार्थदीपिका

पञ्चनदीये विश्वविद्यालये पुरा संस्कृताचार्यैस्संस्कृतविभागाध्यक्षैश्च कदाचित्पाञ्चनद-
प्राच्यमहाविद्यालयस्य मुख्याधिष्ठातृभिर्यशश्शरीरैर्दिवङ्गतैः

श्रीलक्ष्मणस्वरूप, एम० ए० (पंजाब), डी० फिल० (ऑक्सफोर्ड)
आफिसर एकेडेमी (फ्रांस) इत्येतैः
मलयलिपिलिखितानि प्राचीनतालपत्रादर्शपुस्तकानि पर्यालोच्य
पूर्वापरव्याख्यानोद्धृतैः सन्दर्भैश्चालङ्कृत्य सम्पादिता ।

तस्या अयं

चतुर्थो भागः

मध्यप्रदेशान्तर्गतमहाकोशलविषयान्तर्निपातिजाबालिपुरान्तर्वर्तिनि महा-
कोशलमहाविद्यालये संस्कृताचार्यस्य एम० ए०, एम० ओ० एल०
इति बिरुदभाजः श्रीजगदीशलालशास्त्रिणो निरीक्षकत्वे

काशीयसंस्कृतपुस्तकालयाध्यक्षैः
मोतीलाल बनारसीदास इत्येतैः
प्रयागस्थे 'ला जर्नल' इति नाम्नि
मुद्रणालये मुद्रापयित्वा प्रकाशितः
१९५५

TABLE OF CONTENTS

I.	A list of Abbreviations	XI-XIV
II.	Publisher's Preface	XV-XVI
III.	The Fifth Mandala	1—366
1.	The first hymn	1— 7
2.	The second hymn	7— 16
3.	The third hymn	17— 22
4.	The fourth hymn	23— 29
5.	The fifth hymn	29— 32
6.	The sixth hymn...	32— 37
7.	The seventh hymn	37— 41
8.	The eighth hymn	42— 45
9.	Introductory remarks of the commentator to the first chapter of the fourth Aṣṭaka ...	45— 48
10.	The ninth hymn	49— 53
11.	The tenth hymn	54— 58
12.	The eleventh hymn	58 — 61
13.	The twelfth hymn	62— 65
14.	The thirteenth hymn	65— 66
15.	The fourteenth hymn	67— 68
16.	The fifteenth hymn	68— 70
17.	The sixteenth hymn	71— 72
18.	The seventeenth hymn	73— 75
19.	The eighteenth hymn	75— 77
20.	The nineteenth hymn	77— 80
21.	The twentieth hymn	80— 81
22.	The twenty-first hymn	82— 83
23.	The twenty-second hymn	83— 84
24.	The twenty-third hymn	85— 86
25.	The twenty-fourth hymn	87— 90
26.	The twenty-fifth hymn	90— 93
27.	The twenty-sixth hymn	94— 96
28.	The twenty-seventh hymn... ...	97— 99
29.	The twenty-eighth hymn	100—103
30.	The twenty-ninth hymn	103—110
31.	The thirtieth hymn	111—118
32.	The thirty-first hymn	118—124
33.	The thirty-second hymn	125—131
34.	Introductory remarks to the second chapter of the fourth Aṣṭaka	132—134
35.	The thirty-third hymn	134—138
36.	The thirty-fourth hymn	139—144
37.	The thirty-fifth hymn	144—147
38.	The thirty-sixth hymn	147—150
39.	The thirty-seventh hymn... ...	150—153
40.	The thirty-eighth hymn	153—154
41.	The thirty-ninth hymn	155—159
42.	The fortieth hymn	160—164
43.	The forty-first hymn	164—174
44.	The forty-second hymn	175—183
45.	The forty-third hymn	183—191
46.	The forty- fourth hymn	191—202
47.	The forty-fifth hymn	202—208
48.	The forty-sixth hymn	209—212

49-50.	Introductory remarks to the third chapter of the fourth Aṣṭaka	213—215
51.	The forty-seventh hymn	215—219
52.	The forty-eighth hymn	219—222
53.	The forty-ninth hymn	223—225
54.	The fiftieth hymn	225—227
55.	The fifty-first hymn	228—232
56.	The fifty-second hymn	232—239
57.	The fifty-third hymn	240—245
58.	The fifty-fourth hymn	246—253
59.	The fifty-fifth hymn	253—257
60.	The fifty-sixth hymn	257—260
61.	The fifty-seventh hymn	261—264
62.	The fifty-eighth hymn	264—268
63.	The fifty-ninth hymn	268—272
64	The sixtieth hymn	272—276
65.	The sixty-first hymn	276—287
66.	The sixty-second hymn	287—291
67.	Introductory remarks to the fourth chapter of the fourth Aṣṭaka	292—294
68.	The sixty-third hymn	294—297
69.	The sixty-fourth hymn	297—299
70.	The sixty-fifth hymn	300—302
71	The sixty-sixth hymn	302—304
72.	The sixty-seventh hymn	304—306
73.	The sixty-eighth hymn	306—307
64.	The sixty-ninth hymn	308—309
75.	The seventieth hymn	310—311
76.	The seventy-first hymn	311—312
77.	The seventy-second hymn.. ...	312—313
78.	The seventy-third hymn	313—317
79.	The seventy-fourth hymn... ...	317—321
80.	The seventy-fifth hymn	321—324
81.	The seventy-sixth hymn	324—326
82.	The seventy-seventh hymn.. ...	327—330
83.	The seventy-eighth hymn	330—333
84.	The seventy-ninth hymn	333—337
85.	The eightieth hymn	337—339
86.	The eighty-first hymn	339—344
87.	The eighty-second hymn	344—342
88.	The eighty-third hymn	348—357
89.	The eighty-fourth hymn	353—354
90.	The eighty-fifth hymn	355—360
91.	The eighty-sixth hymn	360—362
92.	The eighty-seventh hymn... ...	363—366
IV.	The Sixth Maṇḍala	367—755
93.	The first hymn	367—373
94.	Introductory remarks to the fifth chapter of the fourth Aṣṭaka	373—375
95.	The second hymn	375—380
96.	The third hymn	380—384
97.	The fourth hymn	384—388
98.	The fifth hymn	388—392
99.	The sixth hymn	392—396
100.	The seventh hymn	396—400

101. The eighth hymn	... ...	401—405
102. The ninth hymn	... ...	405—410
103. The tenth hymn	... ...	411—413
104. The eleventh hymn	... ...	413—416
105. The twelfth hymn	... ...	416 -419
106. The thirteenth hymn	... ...	420 -422
107. The fourteenth hymn	... ...	423 -425
108. The fifteenth hymn	... ...	425—434
109 The sixteenth hymn	... ...	435 -451
110. Introductory remarks to the sixth chapter of the fourth Aṣṭaka	... ...	452 - 453
111. The seventeenth hymn	... ...	454—460
112. The eighteenth hymn	... ...	461 —467
113 The nineteenth hymn	... ...	468 -475
114. The twentieth hymn	... ...	476 -482
115. The twenty-first hymn	... ...	482 —488
116. The twenty-second hymn	... ...	488- 494
117. The twenty-third hymn	... ...	494—498
118. The twenty-fourth hymn	... ...	499—504
119. The twenty-fifth hymn	... ...	504—508
120. The twenty-sixth hymn	... ...	508—511
121. The twenty-seventh hymn	... ...	512— 516
122. The twenty-eighth hymn	... ...	517— 520
123. Introductory remarks to the seventh chapter of the fourth Aṣṭaka	... ..	521—522
124. The twenty-ninth hymn	... ...	522—525
125. The thirtieth hymn	... ...	525- 528
126. The thirty-first hymn	... ...	528—531
127. The thirty-second hymn	... ...	531—533
128. The thirty-third hymn	... ...	533—535
129. The thirty-fourth hymn	... ...	535—537
130 The thirty-fifth hymn	... ...	537—539
131. The thirty-sixth hymn	... ...	540—542
132. The thirty-seventh hymn	... ...	542—545
133. The thirty-eighth hymn	... ...	545—547
134. The thirty-ninth hymn	... ...	547—549
135. The fortieth hymn	... ...	550—552
136. The forty-first hymn	... ...	553—554
137. The forty-second hymn	... ...	555—556
138. The forty-third hymn	... ...	556—557
139. The forty-fourth hymn	... ...	558—569
140. The forty-fifth hymn	... ...	569—578
141. The forty-sixth hymn	... ...	579—585
142. The forty-seventh hymn	... ...	586—605
143. Introductory remarks to the eighth chapter of the fourth Aṣṭaka	... ...	606—608
144. The forty-eighth hymn	...	608—619
145. The forty-ninth hymn	... ...	619—628
146. The fiftieth hymn	... ...	628—635
147. The fifty-first hymn	... ...	636—442
148. The fifty-second hymn	... ...	643—649
149. The fifty-third hymn	... ...	650—652
150. The fifty-fourth hymn	... ...	653—656
151. The fifty-fifth hymn	... ...	656—659
152. The fifty-sixth hymn	... ...	659—661

153. The fifty-seventh hymn ... ... 662—663
154. The fifty-eighth hymn ... ... 663—666
155 The fifty-ninth hymn ... ... 666—671
156. The sixtieth hymn ... ... 671—677
157. The sixty-first hymn ... ... 677—683
158. Introductory remarks to the first chapter of the fifth Aṣṭaka ... ... 684—687
159. The sixty-second hymn ... ... 687—692
160. The sixty-third hymn ... ... 693—698
161 The sixty-fourth hymn ... ... 698—701
162. The sixty-fifth hymn ... ... 701—703
163 The sixty-sixth hymn ... ... 704—709
164. The sixty-seventh hymn ... ... 710—714
165. The sixty-eighth hymn ... ... 715—719
166. The sixty-ninth hymn ... ... 719—722
167 The seventieth hymn ... ... 723—726
168. The seventy-first hymn ... ... 726—730
169. The seventy-second hymn... ... 731—733
170. The seventy-third hymn ... ... 733—734
171. The seventy-fourth hymn... ... 735—736
172 The seventy-fifth hymn ... ... 737—755
V The Seventh Mandala ... ... 756—1181
173. The first hymn ... ... 756—766
174 Introductory remarks to the second chapter of the fifth Aṣṭaka ... ... 767—769
175. The second hymn ... ... 769—774
176. The third hymn ... ... 775—779
177. The fourth hymn ... ... 780—786
178 The fifth hymn ... ... 786—789
179 The sixth hymn ... ... 790—793
180 The seventh hymn ... ... 793—795
181 The eighth hymn ... ... 796—799
182 The ninth hymn ... ... 799—802
183. The tenth hymn ... ... 802—804
184. The eleventh hymn ... ... 804—806
185. The twelfth hymn ... ... 806—807
186. The thirteenth hymn ... ... 807—808
187. The fourteenth hymn 809
188. The fifteenth hymn ... ... 810—813
189. The sixteenth hymn ... ... 814—818
190. The seventeenth hymn ... ... 818—820
191. The eighteenth hymn ... ... 820—833
192. The nineteenth hymn ... ... 833—838
193. Introductory remarks to the third chapter of the fifth Aṣṭaka ... ... 838—843
194. The twentieth hymn ... ... 843—847
195. The twenty-first hymn ... ... 848—852
196. The twenty-second hymn... ... 853—856
197. The twenty-third hymn ... ... 856—859
198. The twenty-fourth hymn... ... 859—861
199. The twenty-fifth hymn ... ... 861—864
200. The twenty-sixth hymn ... ... 864—866
201. The twenty-seventh hymn... ... 866—868
202. The twenty-eighth hymn... ... 868—870
203. The twenty-ninth hymn ... ... 870—872

204. The thirtieth hymn ... ... 872—874
205. The thirty-first hymn ... ... 874—876
206. The thirty-second hymn ... ... 877—888
207. The thirty-third hymn ... ... 889—898
208. The thirty-fourth hymn ... ... 898—906
209. The thirty-fifth hymn ... ... 906—911
210. Introductory remarks to the fourth chapter of the fifth Aṣṭaka 911—914
211. The thirty-sixth hymn ... ... 914—919
212. The thirty-seventh hymn... ... 919—922
213. The thirty-eighth hymn ... ... 923—928
214. The thirty-ninth hymn ... ... 928—934
215. The fortieth hymn ... ... 934—937
216. The forty-first hymn ... ... 937—942
217. The forty-second hymn ... ... 942—945
218. The forty-third hymn ... ... 945—947
219. The forty-fourth hymn ... ... 947—949
220. The forty-fifth hymn ... ... 949—951
221. The forty-sixth hymn ... ... 951—954
222. The forty-seventh hymn ... ... 954—956
223. The forty-eighth hymn ... ... 956—958
324. The forty-ninth hymn ... ... 959—960
225. The fiftieth hymn ... ... 960—962
226. The fifty-first hymn ... ... 962—963
227. The fifty-second hymn ... ... 964—965
228. The fifty-third hymn ... ... 965—966
229. The fifty-fourth hymn ... ... 967—968
230. The fifty-fifth hymn ... ... 968—973
231. The fifty-sixth hymn ... ... 974—983
232. The fifty-seventh hymn ... ... 983—986
233. The fifty-eighth hymn ... ... 986—989
234. The fifty-ninth hymn ... ... 990—996
235. Introductory remarks to the fifth chapter of the fifth Aṣṭaka 996—1001
236. The Sixtieth hymn ... ... 1002—1008
237. The sixty-first hymn ... ... 1008—1010
238. The sixty-second hymn ... ... 1011—1014
239. The sixty-third hymn ... ... 1014—1017
240. The sixty-fourth hymn ... ... 1017—1019
241. The sixty-fifth hymn ... ... 1019—1021
242. The sixty-sixth hymn ... ... 1021—1028
243. The sixty-seventh hymn ... ... 1028—1032
244. The sixty-eighth hymn ... ... 1033—1036
245. The sixty-ninth hymn ... ... 1036—1040
246. The seventieth hymn ... ... 1040—1043
247. The seventy-first hymn ... ... 1043—1045
248. The seventy-second hymn... ... 1046—1048
249. The seventy-third hymn ... ... 1048—1050
250. The seventy-fourth hymn... ... 1050—1052
251. The seventy-fifth hymn ... ... 1053—1056
252. The seventy-sixth hymn ... ... 1057—1060
253. The seventy-seventh hymn... ... 1060—1062
254. The seventy-eighth hymn... ... 1063—1064
255. The seventy-ninth hymn ... ... 1065—1067
256. The eightieth hymn ... ... 1067—1068
257. Introductory remarks to the sixth chapter of the fifth Aṣṭaka ... ... 1068—1072

258.	The eighty-first hymn	1073—1075
259.	The eighty-second hymn	1075—1081
260.	The eighty-third hymn	1081—1085
261.	The eighty-fourth hymn	1086—1087
262.	The eighty-fifth hymn	1088—1090
263.	The eighty-sixth hymn	1090—1094
264.	The eighty-seventh hymn... ...	1095—1099
265.	The eighty-eighth hymn	1099—1103
266.	The eighty-ninth hymn	1103—1104
267.	The ninetieth hymn	1105—1109
268.	The ninety-first hymn	1109—1112
269.	The ninety-second hymn	1113—1116
270.	The ninety-third hymn	1117—1120
271.	The ninety-fourth hymn	1120—1124
272.	The ninety-fifth hymn	1124—1128
273.	The ninety-sixth hymn	1128—1131
274.	The ninety-seventh hymn... ...	1131—1135
275.	The ninety-eighth hymn	1135—1138
276.	The ninety-ninth hymn	1138—1143
277.	The hundredth hymn	1144—1151
278.	Introductory remarks to the seventh chapter of the fifth Aṣṭaka	1151—1155
279.	The one hundred and first hymn ...	1156—1159
280.	The one hundred and second hymn ...	1159—1160
281.	The one hundred and third hymn ...	1160—1165
282.	The one hundred and fourth hymn ...	1166—1181

LIST OF ABBREVIATIONS

Ā Ātmanepada
AĀ Aitareya Āraṇyaka
AB. Aitareya Brāhmaṇa
abl. ablative case
acc. accusative case
AGS. Āpastambagṛhyasūtra
Amara. Amaraḳoṣa
Anu. Anuvākānukramaṇī
Apr. Atharvavedaprātiśākhya
Apś. Āpastambaśrautasūtra.
Āśs. Āśvalāyanaśrautasūtra
At. Ātmānanda's Commentary on RV. I. 164
Au. Aitareyopaniṣad
BD. Bṛhaddevatā
Bṛh. U. / Bu. } Bṛhadāraṇyakopaniṣad
BS. Bṛhaspati Smṛti.
Caus. Causal
Cha. U. Chāndogyopaniṣad
CHMB Chāndogyamantrabhāṣya by Guṇaviṣṇu.
D. A palm-leaf Malayam ms. at the Lalachand Library of the D.A.V. College, Lahore.
DDN. Dyādviveda's Nītimañjarī.
DP. Dhātupāṭha
dat. dative case
Dur. Durgācārya's Commentary on the Nirukta
Ed. Editor
F. A fragment of a Devanāgarī ms.
fem. feminine gender
GB. Gopatha Brāhmaṇa
GGS. Gobhilagṛhyasūtra
gen. genitive case
imf. imperfect
inj. injunctive
inst. instrumental case
KAS. Kauṭalya's Arthaśāstra
Kā Śr. Kātyāyana's Śrautasūtra
Katha U. Kathopaniṣad
Kau. Br. Kauṣītaki Brāhmaṇa
Kau. Up. Kauṣītaki Upaniṣad
Ken. U. Kenopaniṣad
KS. / KSA. } Kātyāyana's Sarvānukramaṇī
Lit. Literally
Loc. Locative case
M. A Devanāgarī transcript of a Madras ms.
Mah. Mahīdhara, a commentator of the Śukla Yajurveda
Mahānār Up. Mahānārayaṇopaniṣad
Maitr. Up. Maitrāyaṇī Upaniṣad
Maitri Up. Maitrī Upaniṣad
Manu. Manusmṛiti
Mas. Masculine gender

MS. Manuscript
Maitrāyaṇī Saṃhitā
MSS. Manuscripts
Mu. U. } Muṇḍakopaniṣad
Muṇḍaka U. }
N. Nirukta of Yāska
Ngh. Nighaṇṭu
nom. nominative case
Nrs. U. Nrsimhottaratāpinī Upanisad
NS. Nidāna Sūtra
O M. Oriental College Magazine.
P. A palm-leaf Malayalam ms. at the Punjab University Library.
P. page
pa. Pānini's Aṣṭādhyāyī
perf. perfect.
pers. Person
pl. plural number
PMBH. Patañjali's Mahābhāṣya
PP. Padapātha
Parāśara Parāśara Smṛti
Praśna U. Praśnopaniṣad
R. The Ṛgvedānukramanī of Mādhavabhatta edited by C. Kunhan Raja, Madras University Sanskrit Series No. 2.
red. reduplicated
Rgvidh. Ṛgvidhāna, edited by Meyer
RPR. Ṛgvedaprātiśākhya
RV. Ṛgveda
S. K. Sāmbaśiva Śāstri's edition of the Rksamhitā with the Bhāsya of Skandasvāmin and the commentary of Veṇkaṭamādhavārya, Trivandrum Sanskrit Series, No. 96.
S. Saṃhitāpāṭha
ŚA. Śānkhyāyana Āranyaka
ŚB. Śatapatha Brāhmana
Śān Br. Śāṇkhāyana Brāhmaṇa
Śāṭ. Śāṭyāyana Brāhmaṇa
ṢVB. Ṣadvimśa Brāhmana
SDS. Sarvadarśanasaṃgraha
Sing. Singular number
SK. Skandasvāmin's commentary on the Ṛgveda
SKN. Skandasvāmin's commentary on the Nirukta of Yāska
Skr. Skandasvāmin's Ṛgvedabhāsya, edited by C. Kunhan Raja, Madras University Sanskrit Series, No. 8.
Skt. Skandasvāmin's Bhāṣya on the Ṛgveda, Trivandrum edition.
Śr. Sū. Śrauta Sūtra
ŚŚS. Śāṅkhāyana Śrauta Sūtra
St. Śuddhitattva
Śve. U. Śvetāśvataropaniṣad
Sy. Sāyaṇācārya's commentary on the Ṛgveda, Poona edition.
TA. Taittirīya Āraṇyaka
TB. Tattirīya Brāhmaṇa
Tāṇdya. } Tāndya Mahābrāhmaṇa
TMB }
TS. Taittirīya Samhitā
T. U. Taittirīyopaniṣad
U. Uvvaṭa

Uṇādi	Uṇādi Sūtras
Vaij.	Vaijayantíkoṣa
V. / Var. / Vpa.	Vārtika on Pāṇini's Aṣṭādhyāyi
VD.	Vedārthadīpikā
VM.	Mādhava, son of Śrī-Veṇkaṭārya
VNS.	Vararuci's Niruktasamuccaya
Voc.	Vocative case
Vol.	Volume
VPR	Vājasaneyiprātiśākhya
VS.	Vājasaneyi samhitā
YPR.	Yajurveda prātiśākhya
YV.	Yajurveda

अ. / अध्या	अध्याय
आर्य	आर्यभटीय
आ. श्रौ. सू.	आश्वलायनश्रौतसूत्र
उ / उणा	उणादिसूत्र
ऋ. / ऋ. सं.	ऋग्वेदसंहिता
ऋ. प्रा.	ऋक्प्रातिशाख्य
ऐ. ब्रा.	ऐतरेयब्राह्मण
क.	कण्डिका
का.	कात्यायनश्रौतसूत्र
का. स.	कात्यायनसर्वानुक्रमणी
का. स. द्वा. का.	कात्यायनसर्वानुक्रमणी द्वादशकाण्डिका
कौ. ब्रा.	कौषीतकिब्राह्मण
गो.	गोपथब्राह्मण
गो. गृ. सू.	गोभिलगृह्यसूत्र
गो. स्मृ.	गोभिलस्मृति
तां. ब्रा.	ताण्ड्यब्राह्मण
तै. आ.	तैत्तिरीय आरण्यक
तै. सं.	तैत्तिरीयसंहिता
नि. / निरु	निरुक्त
निघ.	निघण्टु
पा.	पाणिनि—अष्टाध्यायी
पार.	पारस्करगृह्यसूत्र
पा. वा.	पाणिनिवार्तिक

भ. गी.	भगवद्गीता
मनु.	मनुस्मृति
म. भा. शा. प.	महाभारत शान्तिपर्व
वे. दी.	वेदार्थदीपिका (षड्गुरुशिष्यविरचिता सर्वानुक्रमणीव्याख्या)
श. श. ब्रा	शतपथब्राह्मण
शा आ.	शाङ्खायन आरण्यक
शा. ब्रा.	शाङ्खायन ब्राह्मण
शा. श्रौ. सू.	शाङ्खायन श्रौतसूत्र
सा. भा.	सायणभाष्य

PUBLISHER'S PREFACE

By

Sundar Lal Jain

The present volume completes the commentary of Mādhava, son of Shrīveṅkaṭa, on the fifth, sixth and seventh maṇḍalas of the Ṛgveda.

Two factors have been responsible for the unprecedented delay in bringing out this volume.

The learned Editor of the commentary, Dr. Lakshmana Sarup, left this mortal world when the present volume was under its career of print. His unexpected demise was a stern blow to Indology which resulted in the set-back in the progress of the work of this volume.

The task of publishing the volume was heavy and laborious. In the process of printing, the accented text of the Ṛgveda and the commentary of Mādhava thereon were to be compared with their originals. In the footnotes the relevant parts of the Śatapatha Brāhmaṇa, the Nirukta and the commentaries of Uvvaṭa, Mahīdhara, Bhaṭṭabhāskara, Dyādviveda and the rest had to be verified. References to Śrauta and Gṛhya Sūtras, Anukramaṇīs and Bṛhaddevatā had to be traced out. No less hard was the task of tracing to their original the quotations that exist in the commentary of Mādhavārya. The process of printing itself involved a careful reading with regard to the proper adjustment and correction of the varied and complex material so composed.

This heavy and responsible task was assigned to and willingly shouldered by Shri Jagdishlal Shastri, M.A., M.O.L., who, as the Mcleod-Kashmir Research scholar, University of the Panjab, had the benefit of training under the learned doctor and as the reader of proofs of the first three volumes was acquainted with the technique of the work.

The work was resumed. But as the prospects of its completion were in sight, there was a revolution in the political life of our country. India became free, but was partitioned. The West Punjab, the home of Vedic learning and culture in ancient days, was cut off from the rest of India. The partition involved bloodshed, arson and loot. Under the lawless duration of power-transfer in 1947, our firm of Lahore was set on fire on the thirteenth of August and was reduced to ashes. In the holocaust that ensued, the non-Muslim personnel of our firm had to flee for life and take shelter in India, homeless and penniless. Rehabilitation of the displaced was a Herculean task even for the mighty Indian Government.

The re-establishment of the firm upon the scratch was a difficult project. However the difficulty had to be faced and overcome. The firm started its new career in Banaras, the holy city of Shri Viśvanātha. The selection of the city, site and situation and the management of money, might and material was made under the grace and goodwill of the glorious Goddess of Learning.

From 1947 to 1955, it has been a period of persistent struggle. Under the storm and stress of pressing occupations and in the turmoil and confusion that followed displacement, the work of printing remained suspended for an indefinite period. But it was not long before the work was re-started. Shri Jagdishlal Shastri, who having left his hearth and home in Pakistan, had settled in India and joined Madhyapradesh Educational

Service, resumed and maintained the charge of supervision till the completion of the work.

The present volume is embued with all the characteristics of the foregoing three volumes except that it has not been possible to include padapāṭha in the appendix as it has been done hitherto. In excluding padapāṭha we wished to avoid further delay in bringing out the volume. We were afraid of increasing the extent of this volume which is bigger than any one of its sister volumes already published. We shall make amends for this omission and include the padapāṭha of the hymns of this volume in the fifth volume of this work.

It is pleasing to note that in the unaccountable losses that our firm has sustained we have had the moral support of Indologists from all over the world. They have taken our losses as their own and have patronised us in our efforts to serve the cause of Indology.

Nepali Khapra,
Banaras, 5th January, 1955.

V.१.

अबोध्यग्निः समिधा जनानां प्रति धेनुमिवायतीमुषासम् ।
यह्वाइव प्र वयामुज्जिहानाः प्र भानवः सिस्रते नाकमच्छ ॥ १ ॥

नमोऽत्रिभ्योऽस्त्वबोधीति सूक्त बुधगविष्ठिरौ ।
अनुक्तगोत्र आत्रेय पञ्चमे मण्डले भवेत् ॥

[अबोध्यग्निः] धेनुमिव । आगच्छन्तीम् । उषसम् । प्रति । जनैर्निधीयमानया । समिधा । प्रबुद्धो भवति ।
अग्निः । महान्त एव वृक्षाः । शाखाम् । उद्गमयन्त. । अग्नेर्भानवः । अन्तरिक्षम् । प्रति । प्रसिस्रते ।

---

१. तेमोत्रि० P. २. ०स्त्वाबो० P.D.

३. आत्रेये पञ्चमे मण्डले षडनुवाकाः । तत्र प्रथमेऽनुवाके चतुर्दश सूक्तानि । तत्र 'अबोध्यग्निः' इति द्वादशर्चं प्रथमं सूक्तम् । आत्रेयमनुक्रमणिका—'अबोधि द्वादश बुधगविष्ठिरौ' (KSA.24.1.p.19.) इति । पञ्चमे मण्डलेऽनुक्तगोत्रमात्रेयं विद्यादिति परिभाषितत्वादात्रेयौ बुधगविष्ठिरावृषी । अनादेशपरिभाषया त्रिष्टुप् (Cf. KSA.12.6.p.5.) । मण्डलादिपरिभाषया (Cf. KSA.12.12.p.5.) अग्निर्देवता । प्रातरनुवाके आग्नेये ऋतौ त्रैष्टुभे छन्दस्याश्विनशस्त्रे चैतदादि चत्वारि सूक्तानि । तथा च सूत्रितम् 'अबोध्यग्निः समिधेति चत्वारि' (ASS.4.13.)इति। अध्यायोत्सर्जनोपाकरणयोर्धामन्ते विश्वमिति द्वयचत्वेन विनियोग उक्तः Sy. ४. The *pratīka* is supplied by the Editor.

५. अग्निहोत्रार्थधेनुं प्रति यथा प्रातर्बुध्यते तद्वत् Sy. आगच्छन्तीं धेनुं यथा वत्सः प्रतिबुध्यते Mah.यथा धेनुमागच्छन्तीं वत्सः प्रतिबुध्यतेU.

६. ०सः M. यथा चोषसमागच्छन्तीं प्रति मनुष्याः प्रतिबुध्यन्तेMah.U. ७. उषःकाले इत्यर्थः Sy.

८. अध्वर्व्वादीनाम् Sy. ज्ञानश्रद्धाद्विजतर्पणसत्यादिसम्पन्नानामग्निहोत्रिणाम् Mah. अग्निहोत्रिणां सत्यातिथिज्ञानश्रद्धासम्पन्नानाम् U

९. समिद्भिः Sy. समिन्धनेन Mah. U.

१०. प्रबुद्धोऽभूत् Sy. कर्मणि स्वमधिकारं जानातीत्यर्थः Mah. प्रतिबुध्यते कर्मणि स्वमधिकारम् U. ११. Sy. adds अयम ॥ योऽयमग्निः U. १२. दृष्टान्तमाह । यह्वा महान्तः Mah. यह्व इति महन्नाम (Ngh.3.3.)

१३. वयः M. जातपक्षाः पक्षिणः Mah., U.

१४. वृक्षशाखाम् Mah., U.

१५. उद्गमय P. प्रोद्गमयन्तो वृक्षाः स्वाधिष्ठानं त्यजन्तः Sy. प्रोद्गच्छन्तो नाकमाकाशं प्रति प्रसरन्ति तद्वत् Mah. परित्यज्योर्ध्वं गच्छेयुः U.

१६. दीप्तस्य तस्याग्नेःMah. तस्याहुतिभिर्दीप्तस्यU.

१७. अथ प्रबुद्धस्याग्नेः ज्वालाः Sy. भानवो रश्मयः Mah. अर्चींषि महान्ति U.

१८. स्वर्गम् Mah. स्वर्गलोकम् U.

१९. आभिमुख्येन Sy. अभितः Mah. अभि U. अच्छाभेराप्तुमिति शाकपूणिः N. 5.28.

२०. प्रसिस्रेतो P. प्रसिस्रेस्रेतेः D. प्रसरन्ति Sy., Mah. प्रसर्पन्ति U.

२१. ऋचोऽर्थान्तरं वा । जनानामुत्त्विजां सम्बन्धिन्या समिधाऽग्निरबोधि प्रतिबोधितः प्रज्वलित आयतीमुषसं प्रातःकालम्प्रति धेनुं यथा प्रतिबोधयन्त्युत्थापयन्ति । तस्य भानवः प्रोज्जिहाना नाकमभि प्रसिस्रते । दृष्टान्तः । वयं पक्षिणां मध्ये यह्वा महान्तः पक्षिणो यथा प्रोद्गच्छन्तः प्रसरन्ति । विःपक्षी तस्यामि छान्दसे गुणे वयामिति रूपम् । एकः प्रशब्द उज्जिहाना इत्यत्र सम्बध्यते द्वितीयः सिस्रत इत्यत्र । 'सृ गतौ' ह्वादि? (भ्वादि)र्लट् । 'ओहाङ् गतौ' शानच् जिहानाः । उषासमिति संहितायां दीर्घः Mah. This stanza=YV. 15.24.

अबोधि होता यजथाय देवान्ॠध्वो अग्निः सुमनाः प्रातरस्थात् ।
समिद्धस्य रुशददर्शि पाजो महान्देवस्तमसो निरमोचि ॥ २ ॥

अबोधि । देवान् । यष्टुम् । प्रबुद्ध आसीत् । अग्निः । प्रातः । ऊर्ध्वः । तिष्ठति । सुमनाः । समिद्धस्याग्नेः । श्वेतम् । दृश्यते । तेजः । सोऽयं महान् । देवः । तमसः । निर्मुक्तः ।

यदीं गणस्य रशनामजीगः शुचिरङ्क्ते शुचिभिर्गोभिरग्निः ।
आद्दक्षिणा युज्यते वाजयन्त्युत्तानामूर्ध्वो अधयज्जुहूभिः ॥ ३ ॥

यदीं गणस्य । यदा । प्राणिजातस्य । नियमनी निद्राम् । निगिरति । तदानीमग्निः । शुद्धैः । तेजोभि ।

---

१. बुधगविष्ठिरयोरार्षम् SKN. गविष्ठिरबुधयोरार्षम् Dur.
२. यष्टव्यान् Sy. यष्टव्यतया देवान् Dur.
३. यजनाय ।....अग्निहोत्रादिना होमेन यागेन च देवान् यष्टुमित्यर्थः SKN. यजमानाय Dur.
४. बुध्यते Sy. बुध्यति SKN. बुध्यते होता Dur.
५. प्रातःकाले Sy. प्रत्यूषस्येव, उषस उदयवेलायाम् SKN.
६. उत्तिष्ठति Sy. बुध्वा चोर्ध्वम् ऊर्ध्वज्वालोऽग्निः तिष्ठति ज्वालामालः सन्नित्यर्थः SKN. ऊर्ध्वो ज्वलनक्रियायोगात् । अग्निहोत्रिणां गृहेषु यो वितिष्ठते Dur.
७. शोभनमनस्को यजमानानुग्रहबुद्धिः सन् Sy. सुचित्तो होमकारिणामनुग्रहपरचित्त इत्यर्थः SKN. शोभनमनाः Dur.
८. समिद्धस्यास्य Sy. समिद्धस्य च यस्य Dur.
९. रोचमानम् Sy. दीप्तवर्णम् SKN. रोचिष्णुवर्णः । एवमग्न्यधिकारादत्र शब्दसारूप्याच्च 'रुशत्' इत्येतद् वर्णनामेत्युपपद्यते Dur. रुशदिति वर्णनाम रोचतेर्ज्वलतिकर्मणः N.6.13.
१०. बलं ज्वालालक्षणम् Sy. बलं ज्वालासमूहलक्षणम् SKN. बलं यस्याप्रमितम् Dur.
११. एवम्भूतः Sy. यश्च Dur.
१२. तेन च महान् SKN. प्रभावतो महान् Dur.
१३. अन्धकारात् Sy. तमसः सकाशात् SKN. तमसश्च सर्वमिदम् Dur.
१४. The passage beginning with प्रातः and ending with निर्मुक्तः is omitted by M. ॥ निर्मुक्तोऽभूत् Sy. निर्मोचयति, प्रकाशयतीत्यर्थः SKN. निर्मोचयति बुध्यते देवान् यष्टव्यतया Dur. N. 6. 13., SKN. II. 433.
१५. VM. ignores होता ॥ अयं होता होमनिष्पादकः Sy. होता 'अग्निर्देवो होता' इति श्रुतेर्होताग्निः । मानुषस्तु तदधिष्ठितो होत्रं करोति । अतः स होतेत्युच्यते । अथवा होतृशब्दोऽत्र तृन्प्रत्ययान्तः क्रियाशब्दः। साधुकारिणि च तृन्प्रत्ययः । साधुहोमस्य कर्ता SKN.
१६. यदि P.
१७. ०स्यं D.
१८. सङ्घात्मकस्य जगतः Sy.
१९. रज्जुमिव व्यापारप्रतिबन्धकं तमः Sy.
२०. निगरति P. निरगति D. गिरति गृह्णाति वा समिद्धो भवतीत्यर्थः Sy.
२१. तदा Sy.
२२. This passage beginning with यदीं and ending with अग्निः is omitted by M.
२३. दीप्तैः Sy.
२४. रश्मिभिः Sy.

जगद् अङ्क्ते[१]। शोचमानः[२]। तदनन्तरम्[३]। दरिद्राणामन्नमिच्छन्ती[४]। उदाराणा[५] दक्षिणा। युज्यते[६]। सोऽयमग्निरुत्ताना[७] दिवम। तेजोभि.। धयति[८] दिवम्[९]।

अग्निमच्छा देवयतां मनांसि चक्षूंषीव सूर्ये सं चरन्ति।
यदीं सुवाते उषसा विरूपे श्वेतो वाजी जायते अग्रे अह्नाम् ॥ ४ ॥

अग्निमच्छ। अग्निम्[११]। अच्छ[१२]। यजमानानाम्[१३]। मनांसि। सह चरन्ति[१४]। यथोदिते[१५] सूर्ये। मनुष्याणा चक्षूंषि[१६]। यदि[१७] एनम्[१८]। जनयत·। अहोरात्रे[१९] भिन्नरूपे[२०]। तदानी श्वेतवर्ण·[२१]। बलवान्[२२]। अह्नाम्। अग्रे[२३]। उषसि[२४]। प्रादुर्भवति[२५]।

जनिष्ट हि जेन्यो अग्रे अह्नां हितो हितेष्वरुषो वनेषु।
दमेदमे सप्त रत्ना दधानोऽग्निर्होता नि षसादा यजीयान् ॥ ५ ॥

जनिष्ट हि। अजायत[२६]। जनयितव्योऽग्नि·[२७]। अग्रे[२८]। अह्नाम्। निहित.[२९]। निहितेषु[३०] च। काष्ठेषु।

---

१. व्यनक्ति विश्वं जगत् Sy.
२. दीप्तः Sy.
३. अनन्तरमेव Sy.
४. ०न्ति M.
आज्यधारा Sy.
५. दरिद्राणा ने मिच्छन्त्यादाराणदान् P. दरिद्राणान्नेमिच्छन्त्यादाराणदान् D. प्रवृद्धा अथवा दक्षिणा प्रवृद्धाज्यधारा युज्यते तां धाराम् Sy.
६. युक्ता भवति Sy.
७. सायम० D.
८. उक्तां P., D. तां च धाराम् ऊर्ध्वतानामुपरि विस्तृताम् Sy.
९. पिबति Sy.
१०. VM. ignores ईम् and ऊर्ध्वः ॥ ईम्-अयमग्निः। ऊर्ध्वः उन्नतः सन् Sy.
११. देवम् Sy.
१२. अग्निम् । अच्छ is omitted by P. आभिमुख्येन Sy.
१३. देवानात्मन इच्छतां यजमानानाम् Sy.
१४. देवा यष्टव्यास्तदर्थं कदायं वर्धिष्यतीति ध्यायन्तीत्यर्थः Sy.
१५. यथोदये P.,D.
१६. चक्षुग्रषि P. ०णाश्चक्षुग्रषि D. चक्षूंषीव सर्वेषां प्राणिनां यथा सूर्ये सञ्चरन्ति तद्वत् Sy.
१७. यदा Sy.
१८. एनमग्निम् Sy.
१९. ०रात्र P., D.
२०. नानारूपे द्यावापृथिव्यौ Sy.
२१. ०र्णो M.
प्रकृष्टवर्णोपेतः Sy.
२२. वेजनवानग्निः Sy.
२३. अग्रमि P.D.
उदयकाले Sy.
२४. VM. seems to explain उषसा as उषसि ॥ उषसा सह Sy.
२५. प्रवर्धत इत्यर्थः Sy.
२६. अजात P.,D.
प्रादुरभूत् Sy.
२७. अयमग्निः जेन्यः उत्पादनीयः Sy.
२८. उदयकाले Sy.
२९. ०ते P.
स्थापितः Sy.
३०. पश्चात् वनोत्थेषु काष्ठेषु Sy.

आरोचमानः[1] । गृहे गृहे[2] । सप्त । रत्नानि । प्रयच्छन्[4] । अग्निः । होता[5] । निषीदति[6] । यष्टृतरः[7] ।

अग्निर्होता न्यसीदद्यजीयानुपस्थे मातुः सुरभा उ लोके ।
युवा कविः पुरुनिःष्ठ ऋतावा धर्ता कृष्टीनामुत मध्य इद्धः ॥ ६ ॥

अग्निर्होता[9] । अग्निः[10] । आह्वाता[11] । निषण्णः[12] । यष्टृतरः[13] । पृथिव्याः[14] । उपस्थे[15] । सुरभौ[16] । देशे[17] गुग्गुलुना[18] सुगन्धितेजनेन च सुरभित्वम्[19] । युवा[20] । कविः[21] । पुरुषु[22] मनुष्येषु च निष्ठितः । सत्यकर्मा[23] । धर्ता[24] । मनुष्याणाम्[25] । अपि च । तेषां जठरे[26] । इद्धः[27] ।[28]

प्र णु त्यं विप्रमध्वरेषु साधुमग्निं होतारमीळते नमोभिः ।
आ यस्ततान रोदसी ऋतेन नित्यं मृजन्ति वाजिनं घृतेन ॥ ७ ॥

प्र णु त्यम्[29] । प्रस्तुवन्ति[30] । तम् । मेधाविनम् । यज्ञेषु[31] । साधयितारम्[32] । अग्निम् । ह्वातारम्[33] । हविर्भिः

---

१. Sy. adds सन् ।
२. ग्रहे D. पश्चात् तत्तद्यागगृहे Sy.
३. रमणीयाः ज्वालाः Sy.
४. धारयमाणः । अथवा यजमानेभ्यः सप्तविधानि रत्नानि दधानः Sy.
५. प्रयच्छन्नग्निहतः P.
होमनिष्पादकः सन् Sy.
६. निषण्णो भवति Sy.
७. The passage beginning with अग्निः । होता and ending with यष्टृतरः is omitted by M. यष्टव्यः सन् Sy.
८. VM. ignores हि ।
९. जीवति यजमाने मृत इति शब्दो यदि स्यात्तदानीं सुरभिमतीष्टिः कार्या । तत्रेयमनुवाक्या । सूत्रितञ्च 'अग्निर्होता न्यसीदद्यजीयान् साध्वीमकर्वेव वीतिं नो अद्य' (AB. 4. 9.) इति Sy.
१०. अयमग्निः Sy.
११. ह्वाता M. होमनिष्पादकः सन् Sy.
१२. निषसाद Sy.
१३. The passage beginning with अग्निर्होता and ending with यष्टृतरः is omitted by D. यष्टव्यश्च सन् Sy.
१४. कुत्रेति ? तदुच्यते सर्वस्य निर्मातुर्भूम्याः Sy.
१५. उत्सङ्गे Sy.
१६. तत्रापि आज्यादिसौरभ्ययुक्ते Sy.
१७. सर्वेर्ष्टव्ये स्थाने वेदिलक्षणे Sy.
१८. गुल्गुलुना P.
गुद्गुलुना D.
१९. The passage गुग्गुलुना . .सुरभित्वम् should immediately follow सुरभौ and precede देशे ।
२०. नित्यतरुणः सर्वत्र मिश्रितो वा Sy.
२१. कपिः D. मेधावी Sy.
२२. पुरु० P. बहुस्थानः Sy.
२३. यज्ञवान् Sy.
२४. सर्वस्य धारक एवम्भूतः सन् Sy.
२५. ऋत्विग्यजमानानाम् Sy.
२६. तेषा जरे P., D. मध्ये Sy.
२७. समिद्धः सन् । वर्तत इति शेषः Sy.
२८. VM. ignores उ ।
२९. वृ D.
३०. स्तुवन्ति Sy.
३१. ०वि नये (नो य) ज्ञे० M. अध्वरेषु Sy.
३२. फलसाधकम् Sy.
३३. होमनिष्पादकम् Sy.
३४. स्तुतिभिः Sy.

सह । योऽग्निः[1] । द्यावापृथिव्यो[2] । आततनोति[3] । उदकेन तेजसा[4] वा[5] । तं नित्यमिद्धम् । परिचरन्ति । बलिनम् । घृतेन[6] ।

मार्जाल्यो मृज्यते स्वे दमूनाः कविप्रशस्तो अतिथिः शिवो नः ।
सहस्रशृङ्गो वृषभस्तदोजा विश्वाँ अग्ने सहसा प्रास्यन्यान् ॥ ८ ॥

मार्जाल्यः[9] । मार्जन्य[10] । मृज्यते परिचर्यते । स्वे[11] स्थाने । दममना[12] । कविभि प्रशस्तम्[13] । अतिथि[14] । अस्माकम्[15] । शिवो भवतु । सहस्रज्वाल[16] । वर्षिता[17] । ज्वालाबलस्त्वम्[18] । अग्ने[19] । सर्वान्[20] । अन्यान्[21] । बलेन[22] । प्रभवसि-अतिगच्छसि[23] ।

प्र सद्यो अग्ने अत्येष्यन्यानाविर्यस्मै चारुतमो बभूथ ।
ईळेन्यो वपुष्यो विभावा प्रियो विशामतिथिर्मानुषीणाम् ॥ ९ ॥

प्र सद्यः[24] । शीघ्रमेव[25] । अग्ने[26] । त्वम् । अन्यान् प्रात्येषि[27] । शत्रून्[28] तस्य । यस्मै यजमानाय[29] । चारुतम[30] । आविर्भवसि[31] । स्तुत्यः[32] । वपुषे हित[33] । दीप्तिमान्[34] । प्रियः[35] । विशाम्[36] । मानुषीणाम्[37] । अतिथि[38] ।

---

१. देवः Sy.
२. ०थिवी M.
३. विस्तारितवान् । अग्नौ प्रास्ताहुतेरादित्यद्वारा वृष्टचुत्पादकत्वात् । अथवा ऋतेन सत्यभूतेन हविषा दिवं तथाभूतेन वृष्टयादिफलेन भुवं चाततान Sy.
४. च P. ५. ता P.
६. अन्नवन्तं देवं यजमानाः Sy.
७. उदकेनाज्येन वा Sy.
८. VM. ignores नु ॥ नु क्षिप्रम् Sy.
९. मर्मन्यः P. मर्मजे अन्यः D. मार्जनीयः is suggested for मार्जन्यः ॥ सम्मार्जनीयोऽयमग्निः Sy.
१०. स्वकीये Sy.
११. कीदृशोऽयम् ? दानमना दान्तमना वा Sy.
१२. प्रशस्तः is suggested for प्रशस्तम् ॥ कविभिर्मेधाविभिः प्रशस्तः प्रकर्षेण स्तुत्यः Sy.
१३. अतिथिवत्पूज्यः Sy.
१४. सुखकरश्च Sy.
१५. अपरिमितज्वालः Sy.
१६. वर्विता M. वर्षिता फलानाम् Sy.
१७. यत्प्रसिद्धं बलं तेजो वास्ति तदेवौजो यस्य तादृशः । सर्वबलस्वरूप इत्यर्थः Sy.
१८. अथ प्रत्यक्षवादः हे अग्ने ! Sy.
१९. स्वव्यतिरिक्तान् Sy.
२०. सर्वानद्यात्फलेन M.
२१. असिग० M. प्रेति परेत्यर्थे । पराभवसि । व्याप्तुं वा प्रभवसि Sy.
२२. तदानीमेव Sy.
२३. हे अग्ने ! त्वं यज्ञमासाद्य Sy.
२४. स्वसमानान् Sy. प्रत्येषि P. अतिक्रामसि Sy.
२५. शत्रुं M.
२६. यज्ञाय Sy.
२७. चारुतमः सन् Sy.
२८. आविर्बभूथ Sy.
२९. ०त्ये P. किञ्च त्वं स्तुत्यः Sy.
३०. ०षो P. वपुष्करो दीप्तिकरो वा Sy.
३१. विशिष्टदीप्तिमान् Sy.
३२. प्रियभूतः Sy.
३३. सर्वेषां प्राणिनाम् Sy.
३४. प्रजानाम् Sy.
३५. पूज्यः भवसि Sy.

तुभ्यं भरन्ति क्षितयो यविष्ठ बलिमग्ने अन्तित ओत दूरात् ।
आ भन्दिष्ठस्य सुमतिं चिकिद्धि बृहत्ते अग्ने महि शर्म भद्रम् ॥ १० ॥

तुभ्यं भरन्ति । तुभ्यम् । हविः । भरन्ति । क्षितय । अग्ने । अन्तात् । अपि । च । दूरात् स्तोतृतमस्य । सुमतिम् । आभिमुख्येन । जानीहि । बृहितम् । महच्च । तव । सुखम् । भजनीयम् ।

आद्य रथं भानुमो भानुमन्तमग्ने तिष्ठं यजतेभिः समन्तम् ।
विद्वन्पथीनामुर्विन्तरिक्षमेह देवान्हविरद्याय वक्षि ॥ ११ ॥

आद्य रथम् । आतिष्ठ । अद्य । रथम् । हे दीप्तिमन् ! तम् । अग्ने ! यष्टव्यैर्देवैः । समावृतपर्यन्तम् । विद्वान् । देवयानान् । मार्गान् । विस्तीर्णं च । अन्तरिक्षम् । आवह । अस्मिन् यज्ञे । देवान् । हविषो भक्षणाय ।

अवोचाम कवये मेध्याय वचो वन्दारु वृषभाय वृष्णे ।
गविष्ठिरो नमसा स्तोममग्नौ दिवीव रुक्ममुरुव्यञ्चमश्रेत् ॥ १२ ॥

अवोचाम । अवोचाम । कवये । यज्ञियाय । स्तोत्रम् । वन्दनशीलम् । वर्षणशीलाय । पुंसे ।

---

१. किम् ? पूजां हविर्लक्षणाम् Sy.
२. सम्पादयन्ति Sy.
३. मनुष्या यजमानाः Sy.
४ ०तयोन्नेताद् P. D. अन्तिकात् Sy.
५. Omitted by D. आ इति चार्थे Sy.
६. अतिशयेन स्तोतुः Sy.
७. स्तुतिम् Sy.
८. आजानीहि Sy.
९. अस्मभ्यं दातव्यम् Sy.
१०. स्तुत्यं च Sy.
११. VM. ignores यविष्ठ and explains अग्ने once ॥ हे युवतम ! अग्ने ! Sy.
१२. अद्य D.
१३. आरोह Sy.
१४. अस्मिन् यागदिने Sy.
१५. तम् probably stands for भानुमन्तम् । दीप्तिमन्तम् Sy.
१६. यष्टव्यैर्देवैः सह ।
१७. समीचीनप्रान्तोपेतम् Sy.
१८. यष्टव्यदेवपरिज्ञानवांस्त्वम् Sy.
१९. देवजानन् P. देवयजनमार्गान् प्रति । द्वितीयार्थे षष्ठी Sy. २०. प्रभूते Sy.
२१. विस्तीर्णान्तरिक्षेम् P. ०क्षेम् D. अन्तरिक्षे Sy. २२. आवहसि Sy.
२३. यष्टव्यान् Sy.
२४. हविर्भक्षणाय Sy.
२५. वयमात्रेया अवोचाम Sy. उद्गातारो वदन्ति-वयम्...उक्तवन्तः Mah. उक्तवन्तो वयम् U.
२६. मेधाविने Sy. क्रान्तदर्शिनेऽग्नये Mah. क्रान्त-दर्शनाय U.
२७. यज्ञिय P. मेधार्हाय Sy. मेधे यज्ञे योग्याय Mah.
२८. न्तोत्रं P., D. स्तुतिरूपं वाक्यम् Mah. स्तुतिलक्षणं वाक्यम् U.
२९ वन्दनीयम् M. वन्दनशीलं स्तुतितत्परम् Mah.
३०. वर्षकाय फलानाम् Sy. श्रेष्ठाय कामानां वर्षयित्रे Mah. वर्षित्रे । आहुतिपरिणामाभि-प्रायमेतत् U.
३१. सेक्त्रे यूने Sy. वृष्णे सेक्त्रे यूने परिणामरहिताय Mah., U.

अथैकवदाह—गविष्ठिरः[२] । हविषा[३] सह । स्तोमम्[४] । अग्नौ[५] । श्रयति[६] । यथा पुरुषे दीप्ते[७] । विस्तीर्णव्यञ्जनम्[८] । रुक्मालङ्कार[९] श्रयति अपि वा[१०] या दिव्यादित्य श्रयन्ति देवा बहुव्याप्तिम्[११] ।

V.2.

कुमारं माता युवतिः समुब्धं गुहा बिभर्ति न ददाति पित्रे ।
अनीकमस्य न मिनज्जनासः पुरः पश्यन्ति निहितमरतौ ॥ १ ॥

कुमारं माता[१३] । शौनकः—

कुमारमिति कौमार[१४] सूक्त जनोऽथवा वृशः ।
कौमारे सति वार्श्ये[१५] द्वे कमेत वीत्यृचाविमे[१६] ॥१॥ इति ।

---

१. अर्थाधिरात्मानं परोक्षेणैव निर्दिश्य स्तुतिमुपसंहरति Sy.
२. अयमृषिः Sy. इदानीं गविष्ठिरो गवि वाचि स्थिरोऽप्रच्याव्यो होता Mah. इदानीं गविष्ठिरो होता गवि वाचि स्थिरोऽप्रच्याव्यः । तस्य ह्यग्निरधिष्ठात्री देवता U.
३. नमस्कारेण हविषा वा युक्तम् Sy. नमसाऽन्नेन युतम् Mah. अन्नेन संयुक्तम् U.
४. स्तोत्रम् Sy. स्तुतिम् Mah., U.
५. आहवनीये Mah. आहवनीयाख्ये U.
६. श्रयति स्म Sy. अन्तर्भूतण्यर्थः श्रयतिः । लङ् लडर्थे । . . . . होताग्नौ स्तोममापयिष्यति, आसञ्जयिष्यति याज्यानुवाक्याभिरग्नमग्निसम्बद्धं करिष्यतीत्यर्थः Mah. आसञ्जयिष्यति । अग्निसम्बद्धं करिष्यते U.
७. ०षो M.
८. Omitted by P. D. दिवि Sy. दिवि द्युलोके Mah. यथा द्युलोके U.
९. उरुगमनमादित्यम् Sy. सन्ध्यावन्दनसूर्योपस्थानादिषु विप्रयुक्ता उरवो बहवो व्यञ्चाः स्तुतयो गतयो वा यस्येति तमिवेत्युत्प्रेक्षा Mah. बहुभिः स्तुतिभक्तिभिर्युक्तं स्वरसौष्ठवादियुक्तम् U.
१०. रुक्षाल० M. D. रोचमानम् Sy. रुक्ममुत्प्रेक्षते । रुक्मं रोचमानमादित्यम् । स्तोमः सूर्येणोपमीयते Mah. रोचनमादित्यम् । . . . . स्तोम आदित्येनोपमीयते U.
This stanza=YV.15.25.
११. ये is suggested for या ।
१२. Ms. D. puts the figure ॥१॥ here to indicate the end of the first hymn. No such number is given in P. and M.
१३. 'कुमारं माता' इति द्वादशर्चं द्वितीयं सूक्तम् । अत्रेः पुत्रः कुमार ऋषिः जननाम्नः पुत्रो वृशो वोभौ वात्र ऋषी । 'कमेतं त्वम्', 'वि ज्योतिषा' इत्यनयोस्तु वृश एव नोभौ न कुमारः । अन्त्या षट्पञ्चाशदक्षरा शक्वरी शिष्टास्त्रिष्टुभः । अग्निर्देवता । अत्रानुक्रमणिका—'कुमारं कुमारो वृशो वा जान उभौ वा शक्वर्यन्तं कं वीत्यृचोस्तु वृश एव' (KSA.24.2.p.19.) इति । प्रातरनुवाकाश्विनशस्त्रयोरस्यापि सूक्तस्य विनियोग उक्तः पूर्वसूक्तेन सह Sy.
१४. कुमारम्मारम्माता D.
१५. ०रकं P. D.
१६. पाश्ये P. वाश्ये D. वावेश्य M.
१७. कमेवकं तवीत्यृचा० P. कमेतं रवीत्यृचा० D. कमेकं तृचा० M.

अत्र शाटयायनोक्त इतिहास.—

ऐक्ष्वाकस्त्र्यरुणो[1] राजा त्रैवृष्णो रथमास्थित.।
सञ्जग्राहास्य[2] रश्मीश्च वृषो[3] जानः[4] पुरोहितः[5] ॥१॥

स्वयमेव नियच्छन्ति पुरो राज्ञां पुरोहिताः।
नेदय[6] करवत्[7]पापमिति रश्मीन् समाहिताः ॥२॥

रथचक्रेण गच्छन्तौ तौ विचिच्छिदतुः शिरः।
आत्रेयस्य कुमारस्य क्रीडतः कस्यचित् पथि ॥३॥

त्व हन्तासीत्युवाचैकस्त्वं[8] हन्तासीति चापरः।
राजाब्रवीद् वृश[9] जानमपायंसमह[10] रथम् ॥४॥

प्रायौषीस्त्व[11] त्वभि[12] च तं[13] त्वमेवातोऽवधी[14] द्विजम्।
तौ वै पृच्छावहा[15] इति[16] इक्ष्वाकून् प्रश्नमेयतु. ॥५॥

ते हेक्ष्वाकव ऊचुश्च सङ्गृह्णातीह यो रथम्।
स रथस्येश्वर इति वृशमेव[17] पराब्रुवन् ॥६॥

सोऽथ[18] वार्शानि[19] सामानि दृष्ट्वा सञ्जीव्य[20] तं शिशुम्।
क्रोधात् सन्त्यज्य राजानमन्यदेश[21] समाश्रित ॥७॥

हरोऽथाग्नेर्ननाशात्र[22] तस्यापक्रमणाद् ऋषेः।
अग्नौ[23] प्रास्तानि पाक्यानि[24] नह्यपच्यन्त[25] कानिचित् ॥८॥

---

१. ऐक्ष्वाकु० BD.
२. स ज० P.
३. ०हाश्वर० BD.
४. BD. reads वृशो for वृषो।
५. The Śloka: 'ऐक्ष्वाकः. . .पुरोहितः' is found in BD. also.
६. देवयं P.
७. वत् is omitted by P.,D.
८. ०कं त्वं P. ९. पृशं M.
१०. जन० D. ११. त्वपि P.
१२. ०धीस्त्वमभि चं M.
१३. ०धीद्विजम् M. ०धीर्द्वि० is suggested for ०धी द्वि०।
१४. ०वह M.
१५. Omitted by P., D.
१६. इतीक्ष्वा० M.
१७. पृश० D. भृश० M.
१८. सोध P. M.
१९. वर्शा० P. २०. त्वं M.
२१. ०न्यं दे० P.
२२. पहरोथाग्नेर्निनाशात P. पहरोथाग्नेर्ननाशात D. २३. अग्नेन P.
२४. वाक्या० P. D. वाक्यानि वाक्या M.
२५. नह्यपश्यन्त P. D.

अधिश्रयन्ति य साय[1] प्रातः सोऽपच्यतौदन[2]. ।
ततः प्रव्यथितो राजा सोऽभिगम्य प्रसाद्य च ॥ ९ ॥
आनीय त वृश जान[3] पुनरेव पुरो दधे ।
जानो[3] वृषोऽकामयत[4] पश्याम्यग्नेरह हरः ॥१०॥
इति वार्शान्यथो[5] दृष्ट्वा ददर्शाग्नेर्हरश्च[6] तत् ।
प्रविष्ट तद्धरो भार्यां[7] पिशाची तस्य भूपतेः ॥११॥
निषण्ण स तया[8] सार्धमासन्द्यां काशिपावधि[9] ।
तामुपामन्त्रयाञ्चक्रे कमेतत्त्वमितीत्यृचा[10] ॥१२॥

क चन कुमारम्[11] ब्राह्मणकुमारस्य[12] मम हननात् तदनुरूप कुमाररूपेण राज्ञो भार्यामनुप्रविश्य वर्तमानम् । युवति[13]. । समुब्धम्[14] आच्छादितम् । गुहायाम् । बिभर्ति । न । ददाति । पित्रे[15] राज्ञे । ततश्चास्य कुमारस्य । हिसकम्[16] । जनाः[17] । न[18] । पुरः[19] । पश्यन्ति[20] । निहितम्[21] । अन्तर्हिते देशे[22 23] । अत्र शाट्यायनकम्—स आगच्छन् यथा राज्ञा[24]

---

१. सोऽयं P. D.
२. ०पच्यतो० P.
३. जनो D.
४. ०मय P.
५. पार्शा० D.
६. ०रस्य M.
७. ०र्या D.
८. तर्हा M.
९. BD. reads कशिपावपि ।
१०. तै तन्त्वमितीत्युता P.
कतमन्त्वमितित्यृता D.
The Śloka is found in BD. also.
BD. reads कमेतं त्वमिति त्वृचा ।
११. ०रः P., D. पथि सञ्चरन्तम् Sy.
१२. ०ण ज्ञारस्य P., D.
१३. यौवनोपेता Sy.
१४. समुखम् P. चक्रेण हतम्, यद्वा सम्यग् निगूढम् Sy.
१५. धारयति Sy.
१६. पित्रे पिजे D., M. तस्य जनकाय । यद्वा समुब्धं सम्यग् निगूढं गुहा बिभर्ति न ददाति पित्रे Sy.
१७. हिंसितम् Sy.
१८. M. reads जजान for जनाः । न ।
१९. पुरोदेशे Sy.
२०. ०न्ती P. अथवाऽयं वृशेन पुनरुज्जीवितः कुमार आत्मानमपरोक्षतया वक्ति कथयति, जानो वा तं जीवयित्वा वक्ति, अथवा सूक्तस्याग्नेयत्वात् कुमार इत्यग्निरुच्यते, तं माता अरणिर्युवतिर्मिश्रयन्ती समुब्धं निगूढं गुहायां बिभर्ति पित्रे उत्पादकाय यजमानाय न ददाति । अस्याग्नेर्मिनत् हिंसत् वाहकमनीकं तेजो जना न पश्यन्ति । किन्तु अरतौ अरण्यां हितं पश्यन्ति Sy.
२१. स्थितम् Sy.
२२. अरमणे Sy.
२३. VM. ignores माता and अनीकम् ॥ माता कुमारस्योत्पादयित्री । यद्वा सर्वस्य निर्मात्री पृथिवी । अनीकम् रूपम् Sy.
२४. Omitted by D.

ब्राह्मणोऽनुमन्त्र्यमाण आगच्छेदेव स आगत्याकामयत पश्येयमग्नेर्हरं[1][2] इति, स एतत् सामापश्यत्, तदभ्यगायत[3], तदपश्यत्, पिशाची[4] वा व्यरुणस्य[5] जाया सैनत् कशिपुना छादयित्वाऽध्यास्त इति तदभिव्याहरत्, 'कुमार माता युवतिः समुब्धम्[6]' 'कमेत त्व युवते कुमारम्' इत्यादि।

कमेतं त्वं युवते कुमारं पेषीं बिभर्षि महिषी जजान।
पूर्वीर्हि गर्भः शरदो ववर्धापश्यं जातं यदसूत माता॥ २॥

कमेतं त्वम्। वृशः पिशाची[7] पृच्छति—कम्[8]। एतम्[9]। त्वम्। युवते! कुमारम्। पेशी[10]—पिशाचिका। बिभर्षि[11]। महिषी[12]। क्षिप्र जनयतु[13]। एनमिति परोक्षमाह—बह्वीः[14]। हि[15]। शरदः[16]। गर्भोऽयम्[17]। प्रवृद्ध आसीत्[18]। पश्याम्येनम्[19]। अथ जातम्[20]। यद्येनम्[21]। जनयति[22]। इयं माता[23]।

हिरण्यदन्तं शुचिवर्णमारात्क्षेत्रादपश्यमायुधा मिमानम्।
ददानो अस्मा अमृतं विपृक्वत्किं मामनिन्द्राः कृणवन्ननुक्थाः॥ ३॥

हिरण्यदन्तम। अथ जात कुमारस्य व्यरुणस्य[24] राष्ट्रमुपप्लुत[25] दृष्ट्वाग्नि स्तौति—हितरमणीय-ज्वालादन्तम्[26]। शोचमानवर्णम्[27]। समीपभूते[28]। क्षेत्रे[29]। पश्येयम्[30]। तेजांसि[31]। प्रयच्छन्[32]। अग्नये[33]।

---

१. पश्येतम० M. २. ०भंर P., D., M.
३. तद्यद्यगाय P. तद्यभ्यगंयत D.
४. तत पश्यं P. तदवश्यं D.
५. विचाशाची D.
६. राजा M. Omitted by P.
७. तदतिव्या० P., D. ८. सुमु० M.
९. क्षारं P., D. १०. अत्राग्नेरुत्पद्यमानत्वात् कुमारशब्देन व्यवहारः Sy. ११. एं D.
१२. अवेषि P. एवेशी D. अपेषि M. हिंसिका पिशाचिका सती Sy.
१३. बभर्षि P. D. एवं वृशाख्यो महर्षिः कशिपुनाच्छन्नमग्नेर्हरो ब्रूते। त्वयानुत्पादितत्वाद्धारणमनुचितमित्यर्थः Sy.
१४. महती पूजनीयारणिः Sy.
१५. अजनयन् Sy. १६. गताननेकान् Sy.
१७. यस्मात् Sy. १८. संवत्सरान् Sy.
१९. शिशोर्ग्राहकोऽरण्याः सम्बन्धीगर्भः Sy.
२०. ववृधे Sy. २१. अहं च ततो जातमपश्यम् Sy. २२. यस्मात् Sy.
२३. ०ति यं D. उदपादयत्। राजकुमारपक्षे हे युवते! भूदेवि! कमेतं कुमारं पेषी सती बिभर्षि। अवशिष्टं कुमारजननपरतया योज्यम्। एवमुत्तरत्रापि कुमाराग्निहरसोः परत्वेन यथोचितं व्याख्येयम् Sy.
२४. अरणिः Sy.
२५. Omitted by M. स्त्रिवरुणस्य P. त्रिवरुणस्य D.
२६. ०मप० D.
२७. ०ज्वाद० P., D., ०यं ज्वा० M. हिरण्यसदृशदन्तस्थानीयज्वालोपेतम् Sy.
२८. ०नाव० P. D. प्रदीप्तवर्णम् Sy.
२९. समीपे Sy.
३०. समीपे भूक्षे P. ०भूक्षे D. क्षेत्रे देशे।
३१. पश्येयम्। एवं वृशः कामयते Sy.
३२. तेजांसि seems to be the explanation of आयुधा॥ आयुधस्थानीयान् स्फुलिङ्गान् ज्वाला वा Sy. ३३. दाताऽस्मि Sy.
३४. अहमग्नये Sy.

हविः[1] । विपर्चनवद्[2] उपस्तृताभिरभिधारितम् । किम् । माम् । इन्द्रवर्जिता[3] । स्तोत्रवर्जिताश्च[4] । कुर्वन्तु[5] राष्ट्रं दूषयन्तः[6] ।

क्षेत्रादपश्यं सनुतश्चरंन्तं मसुद्यूथं न पुरु शोभमानम्[7] ।
न ता अगृभ्रन्नजनिष्ट हि षः पलिक्नीरिद्युवतयो भवन्ति ॥ ४ ॥

क्षेत्रादपश्यम्[8] । समीपे[9] । पश्येयम्[10] । अन्तर्हितम्[11] । चरन्तम्[12] । कल्याणम्[13] । गवा यूथम्[14] । इव । बहु । शोभमानम् । न । ता ज्वाला[15] । गृह्णन्तु[16] राक्षसा । जातः[17] । हि । अग्निः[18] । ततश्च पलिताः[19] । एव ज्वाला[20] । युवतयः । भवन्ति ।

के मे मर्यकं वि यवन्त गोभिर्न येषां गोपा अरणश्चिदासं[21] ।
य ईं जगृभ्रुरव ते सृजन्त्वाजाति पश्च उप नश्चिकित्वान् ॥ ५ ॥

के मे[22] । के । मे[23] । राष्ट्रम्[24] । गोभिः[25] । वियुक्त कुर्वन्ति दाहाभावाद् दुर्बलासु प्रजासु । येषाम्[26] ।

---

१. अविनाश्यमृतत्वसाधनं वा Sy.
२. विवचं० P. विवच्चबवद् M. सर्वतो व्याप्तं हविः स्तोत्रं वा Sy.
३. M. omits the words between भिधा and प्रवर्जिताः M. इन्द्रः परमेश्वरोऽग्निः तद्रहिता अनिन्द्राः । इन्द्रमयजन्त इत्यर्थः Sy.
४. स्तोत्रवर्जिता (गृहीतवन्तस्ते तदवसृजन्तु तथापहृतान् पशूनुपातृजातं जत्रुः वसां राजानं वसतां राजानमावासस्थान् जनानां शत्रवो निहितवन्तो मारकेषु पाशेषु पितरं मदीयं तत्पुरोहितस्यात्रे वृशस्य स्तोत्राण्यवसृजन्तु निन्दितारः शत्रवः स्वयमेव निन्द्या भवन्तु शुनचित् शुनःशेफमृषिनिबद्ध)श्च D.
The additional reading in D. has a striking resemblance with the commentary on RV. II. 5. 2,3 and 4. ॥ अस्तुतय इन्द्रमस्तुवन्तश्च Sy.
५. कुर्युः Sy. ६. दूरयन्तः M.
७. VM. ignores मिमानम् ॥ निर्मिमाणमग्निम् Sy. ८. क्षेत्रां P.,D.
९. अहं वृश इदानीं क्षेत्रात् क्षेत्रे Sy.
१०. पश्यामि Sy.
११. निगूढम् Sy. सनुतः, अन्तर्हितनामैतत् Ngh. 3.25.
१२. चरन्तमरण्याम् Sy.
१३. सुमत् स्वयमेव Sy.
१४. समूहम् Sy.
१५. पुरा हरसः पिशाच्याक्रमणकाले ता ज्वाला निर्वीर्याः Sy.
१६. अगृह्णन्त नराः Sy.
१७. हरसा प्रादुरभूत् Sy.
१८. खलु Sy.
१९. इदानीं सोऽग्निः Sy.
२०. अतएव हेतोः पलिक्न्यः पलिता जीर्णाः ज्वाला एवेदानीम् Sy.
२१. पलिताः । एव and ज्वालाः missing in M.
२२. मदीयम् Sy.
२३. मर्त्यसङ्घं राष्ट्रम् Sy.
२४. गोभिः सह Sy.
२५. वियुक्तमकुर्वन् । गा भृत्यांश्च व्ययोजयन् Sy.
२६. एषां P., D. अस्माकम् Sy.

गोपायिता । न । भवति । गमनशीलोऽग्निः । ये । एतद् राष्ट्रम् । गृहीतवन्तः । ते तत् । अवसृजन्तु । तथापहृतान् पशून् । उपाजातु । जातशत्रुः ।

वसां राजानं वसतिं जनानामरातयो नि दधुर्मर्त्येषु ।
ब्रह्माण्यत्रेरव तं सृजन्तु निन्दितारो निन्द्यासो भवन्तु ॥ ६ ॥

वसां राजानम् । वसताम् । राजानम् । आवासस्थानम् । जनानाम् । शत्रव । निहितवन्त । मारकेषु पाशेषु पितर मदीयम् । तम् । पुरोहितस्यात्रेर्वृशस्य । स्तोत्राणि । अवसृजन्तु । निन्दितार शत्रव स्वयमेव । निन्द्याः । भवन्तु ।

शुनश्चिच्छेपं निदितं सहस्राद्यूपादमुञ्चो अशमिष्ट हि षः ।
एवास्मदग्ने वि मुमुग्धि पाशान्होतश्चिकित्व इह तू निषद्य ॥ ७ ॥

शुनश्चित् । शुनःशेपमृषिम् । निबद्धम् । पाशसहस्रात् । यूपात् । अमुञ्च । स. । खलु । त्वा

---

१. बभूव Sy.
२. अभिगन्ता सोऽयमग्निः Sy.
३. द्वेषिणः Sy.
४. एनं जनसङ्घं राष्ट्रम् Sy.
५. गृह्णन्ति Sy. ६. नश्यन्तु Sy.
७. Missing in M.
८. उपागच्छति Sy.
९. उपात जातच्छत्रुः P. उपातु जातं जत्रुः D. ज्ञातशत्रुः is suggested for जातशत्रुः। ज्ञातशत्रुः will explain चिकित्वान् and will be the epithet of अग्निः ।
१०. VM. ignores चित् । नः चिकित्वान् ॥ नः अस्माकम् । चिकित्वान् चेतनावानस्मद्विषयज्ञानवानग्निः Sy.
११. वसतां प्राणिनाम् Sy. १२. स्वामिनम् Sy.
१३. आवसस्थात् P. आवासभूतं त्र्यरुणमुक्तलक्षणमग्निं वा Sy.
१४. प्राणिनाम् Sy. १५. अरातयः Sy.
१६ अगोपयन् Sy. १७. लोकेषु मध्ये Sy.
१८. तत् P., D. कुमारमग्निं वा Sy.
१९. अग्ने P. अत्रिगोत्रस्य वृषस्य Sy.
२०. मन्त्राः स्तोत्राणि वा Sy.
२१. M. omits the words between अत्रेः an सृ० M. अथवा अत्रेः अत्रिगोत्रस्य कुमारं ब्रह्माणि । यद्वा वृशस्य ब्रह्माण्यत्रेरत्रिगोत्रम् । कर्मणि षष्ठी । तं कुमारमवसृजन्तु विसृजन्तु Sy.
२२. निहितारः M. अस्मन्निन्दकाः Sy.
२३. अस्माभिर्निन्द्याः Sy.
२४. भवत P. भवन्त D. अत्रेर्ब्रह्माणीत्येतदुपजीव्य वृशमप्यात्रेयं वदन्ति । आत्रेयः कुमार इति पक्षे स एव प्राणमयमात्मानमवसृजन्त्विति त्याशास्ते Sy.
२५. अञ्जःसवे आहवनीयोपस्थाने 'शुनश्चिच्छेपम्' इत्येषा । 'अग्निमाहवनीयमुपस्थापयाञ्चकार शुनश्चिच्छेपं निदितं सहस्रात्' (AB. 7.17.) इति ब्राह्मणम् Sy.
२६. Omitted by P.
२७. ०शेफमृषि D. ०शेपमृषि P.
२८. न ब० M. न बध्नमं P. नितरां बद्धम् Sy.
२९. चाशस० D. शास० P. अनेकरूपात् Sy.
३०. अमोचयः Sy. ३१. ऋषिः Sy.
३२. ता P., त्वा D.

प्रति शशाम[1]। एवम्। अस्मत्तोऽपि[2]। पाशान्[3]। विमोचय। होतः[4]! प्राज्ञ[5]! इह[6]। निषद्य[7]।

हूणीयमानो अप हि मदैयेः प्र मे देवानां व्रतपा उवाच।
इन्द्रो विद्वाँ अनु हि त्वा चचक्ष तेनाहमग्ने अनुशिष्ट आगाम् ॥ ८ ॥

हूणीयमानः[9]। ब्रह्महत्यया क्रुध्यन्[11]। मत्त[12]। अपागमस्तत्[13]। मह्यम्[14]। देवानाम्[15]। व्रतपा[16]। प्रोवाच[17]। स्पष्टमाह—इन्द्र[18]। जानन्[19]। त्वा[20]। हि। अन्वाचचक्ष[21]। तेनेन्द्रेण। अनुशिष्टः। अहम्। अग्ने[22]! गच्छामि त्वा स्तौमि, यद्वा यत्र त्वमग्निर्हितस्तदुक्तं[23] ममेन्द्रेणेति[24]।

वि ज्योतिषा बृहता भात्यग्निराविर्विश्वानि कृणुते महित्वा।
प्रादेवीर्मायाः सहते दुरेवाः शिशीते शृङ्गे रक्षसे विनिक्षे ॥ ९ ॥

वि ज्योतिषा[25]। कुमारेण स्तुतोऽग्निर्यथापूर्व

---

१. शान्तवान्। यद्वा स हि यस्मादशमिष्ट, स्तुतिकर्मैतत्। अस्तावीत् तस्मादमुञ्च इति सम्बन्धः Sy.
२. शमैतस्मात्तोपि P. शशमेतस्मात्तोपि D. शशमेत ..त्तोऽपि M.
३. शाचान् P.
४. होनं P.
५. हे चेतनावन्! Sy.
६. इहं P., M. वेद्याम् Sy.
७. श्रिष० D. अवस्थाय Sy.
८. VM. ignores चित्। अग्ने and तु ॥ चिदिति पूरणः। शुनश्शेपमिति पदस्य मध्ये पदान्तरस्य संहितायां व्यत्ययेनावस्थितिः Sy.
९. वृणीयमाणः P., D.
१०. हे अग्ने! Sy.
११. क्रोध्यन् P. क्रुध्यंस्त्वम् Sy.
१२. अपागाः। ऐयेः, 'ई गतौ' इत्यस्मात् श्यन्विकरणात् लङि मध्यमे छान्दसे परस्मैपद आडागमे वृद्धौ व्यत्ययेन श्यनोऽकारस्यैकारे च कृते रूपम् Sy.
१३. मध्यं P.
१४. Omitted by P.
१५. कर्मणः पालकः Sy.
१६. प्रवोच P.
१७. स एव विद्वान् Sy.
१८. त्वाम् Sy.
१९. अन्याच० P. त्याह्यन्वापवते M. ददर्श Sy.
२०. गजामि D. आगाम् इति। एवं वृश आह Sy
२१. ०र्हितदुक्तं P., D.
२२. महेन्द्रे० P.
२३. VM. ignores हि ॥ हि खलु Sy.
२४. शाटयायनब्राह्मणोक्त इतिहास इहोच्यते।
राजा त्रैवृष्ण ऐक्ष्वाकस्त्र्यरुणोऽभवदस्य च ॥१॥
पुरोहितो वृशो जान ऋषिरासीत्तदा खलु।
सङ्गृह्णन्ति रथान् राज्ञां रक्षणाय पुरोहिताः॥२॥
त्र्यरुणस्य वृशो रश्मिं सञ्जग्राह पुरोहितः।
कुमारो वर्त्मनि क्रीडन् रथचक्रेण घातितः ॥३॥
छिन्नः कुमारश्चक्रेण ममाराथ पुरोहितः।
त्वं हन्ताऽस्येति राजानं राजा वापि[चापि] पुरोहितम् ॥४॥
त्वं हन्ताऽस्य कुमारस्य नाहमित्यब्रवीत्तदा।
यतस्त्वं रथवेगस्य नियन्ताऽतस्त्वया हतः ॥५॥
रथस्वामी यतो राजन्! तस्मात्त्वं तस्य घातकः।
एवं विवदमानौ तावैक्ष्वाकून् प्रष्टुमागतौ ॥६॥
तौ पप्रच्छतुरिक्ष्वाकून् केनासौ निहतो द्विजः।
तेऽब्रुवन् रथयन्तारं हन्तारं वृशसंज्ञकम् ॥७॥

प्रजज्वाल[1] तत्र वृशो वदति—विभाति[2] । ज्योतिषा[3] । महता । अग्नि[4] । आविष्करोति[5] च । महत्त्वेन[6] ।
सर्वाणि[7] । प्रकाश्यानि[8] । राक्षसीश्च[9] । माया । अभिभवति[10] । दुष्टगमना[12] । तीक्ष्णीकरोति[13] च ।

स वृशो वार्शसाम्ना तं कुमारं समजीवयत् ।
एवमाख्याय तत्रैव पुनरन्यदुदीरितम् ॥८॥
यत् तमिक्ष्वाकवो रागाद्धन्तारमृषिमब्रुवन् ।
(यत इक्ष्वाकवो Sy.)
तस्मात्तेषां गृहेष्वग्नेस्तेजो निर्गतमेषु च ॥९॥
गृहे पाकादयो नासन् तत्कारणमचिन्तयन् ।
वृशं कुमारहन्तारं यदवोचाम तेन नः ॥१०॥
अपाक्रामद्धरो वह्नेराह्वयाम वृशं वयम् ।
इति निश्चित्य तमृषिमाह्वयामासुरादरात् ॥११॥
स आगत्य ततः शीघ्रं तेषामग्नेर्हरो भवेद् ।
इति वार्शेन साम्नाऽसावकामयत पूर्ववत् ॥१२॥
एवं गायन् स ऋषिर्ब्रह्महत्यां
भार्याजातां त्रसदस्योर्नृपस्य ।
पिशाचवेषां हर आदाय चाग्ने-
र्गृहाग्नीत्वा कशिपौ स्थापयन्तीम् ॥१३॥
वृष्ट्वा सम्यक्तद्धरस्तोषयित्वा
साम्ना पश्चाद्योजयामास चाग्निम् ॥१॥
ततः सतेजाः सञ्जातोऽभवत्पाकादिपूर्ववत् ।
एवं शाट्यायनेनोक्तं ताण्डकोक्तमथोच्यते ॥१४॥
अथ ताण्डके—
वृशः पुरोधा ह्यभवत् त्रसदस्योर्महीपतेः ।
स रथं धावयन् राजा ब्राह्मणस्य कुमारकम् ॥१५॥
चिच्छेद रथचक्रेण प्रमादात् सोऽब्रवीद् वृशम् ।
पुरोहिते वर्तमाने त्वयि हत्या समागता ॥१६॥
एषा त्वयापनेतव्या वृशमित्यब्रवीन्नृपः ।
स ऋषिर्वार्शसाम्ना तं कुमारमुदजीवयत् ॥१७॥

DDN. quots here the Ślokas of Śātyāyanaka and Tāndya quoted in Sāyana's commentary on RV. V.2.1.

१. ०ज्वल M. २. वृशे P.,D. प्रवृषस्यार्षम् । उभयोर्वा कुमारप्रवृषयोः SKN. वृषो नाम जनपुत्रस्तस्येदमार्षम् । आत्रेयस्य वा कुमारस्य, उभयोर्वा Dur.

३. विशेषेण दीप्यते Sy. DDN. वेर्भातिना सम्बन्धः । विविधं दीप्यते SKN. नानाप्रकारं भाति Dur. विशेषेणाभाति महाननेनास्मदीयेन हविषा BB.

४. तेजसा Sy., DDN., BB.

५. अयम् Sy., DDN., BB.

६. अथ तथाभूतः सन् प्रकटीकरोति Sy., DDN. आविश्शब्दः कृणुत इत्यनेन सम्बध्यते । आविष्करोति च SKN. स एवं विभासमानः किं करोति ? प्रकाशीकरोति Dur. इत्थम्भूतः सन् आविष्कुर्वीत BB. ७. स्वमहत्त्वेन Sy. महत्त्वेनेत्यर्थः Dur. माहात्म्यानि BB.

८. सर्वं P. सर्वा D. पदार्थजातानि Sy.,DDN.

९. प्रकाशयति D. भूतजातानि SKN. भूतानि Dur. १०. अदेवनशीला आसुरीः Sy., BB. एवं प्रवृद्धोऽग्निः DDN. देवेभ्योऽन्येऽदेवा असुरादयस्तेषां स्वभूताः । सोऽयमित्यभिसम्बन्धेनादेव्य उच्यन्ते ता अदेवीरितिसन्धानप्रज्ञाः SKN. आसुरीरित्यर्थः Dur.

११. अभिभवति प्रपरेत्येतस्य प्रातिलोम्यमिति यास्केनोक्तत्वात् N. 1.3., DDN. प्र सहिना सम्बध्यते । प्रकर्षेणाभिभवति SKN., Dur. अभिभवेत् BB.

१२. दुष्टाथमनाः P. दुःखगमनाः Sy., DDN. मायाविशेषणमेतत् अवते रक्षणार्थस्य दूरक्षा इत्यर्थः । अग्नेर्वा विशेषणम् । अवतिरपि तर्पणार्थः, दुस्तर्यः SKN. दुरवा दुस्तर्या वा, नह्यग्नेस्तृप्तिरस्ति Dur. दुःखेनैतव्याः । दुष्प्रधर्षा इति यावत् BB.

१३. तीक्ष्णीकरोतीत्यर्थः । 'निश्यति भृङ्गे रक्षसो विनिक्षणाय । रक्षो रक्षितव्यमस्मात्' इति यास्कोक्तेः N. 4. 18., DDN. निश्यति च SKN. एवमग्निरपि दारूणि दहंस्तीक्ष्णीकरोति ज्वालाः । अत्र भृङ्गशब्दसन्निधानाच् 'शिशीते' इत्यस्य तीक्ष्णार्थत्वम् । तीक्ष्णीकृतैर्ह्यर्चिर्भिर्विनक्षणमुपपद्यत इति Dur. तीक्ष्णीकुरुते BB.

[1] [2] [3] [4]
शृङ्गे । रक्षस. । विनाशाय ।

उत स्वानासो दिवि षन्त्वग्नेस्तिग्मायुधा रक्षसे हन्तवा उ ।
मदे चिदस्य प्र रुजन्ति भामा न वरन्ते परिबाधो अदेवीः ॥ १० ॥

[5] [6] [7] [8] [9] [10] [11] [12]
उत स्वानासः । अपि च । स्वननशीला । दिवि । भवन्तु । अग्नेर्भानव । रक्षसाम् । विनाशाय ।
[13] [14] [15] [16] [17] [18] [19]
यानि भवन्ति तिग्मान्यायुधानि । सोममदे । अस्य । प्रहिंसन्ति राक्षसान् । भानव । ततश्च न । वारयन्ति ।
[20] [21] [22] [23]
राक्षस्यः । माया एनम् ।

---

१. शृङ्गं P. शृङ्गाणि । शृङ्गसदृशीर्हिंसिका वा ज्वालाः Sy. शृङ्गाणि डादेशः 'सुपां सुलुक्' (Pa. 7.1.39.) शृङ्गसदृशीर्ज्वालाः DDN. यथा हि वृषभस्तटाञ्शिघ्नञ् शृङ्गे तीक्ष्णीकरोति Dur. शृङ्गस्थानीये प्रधाने आत्मीये ज्वाले BB.

२. रक्षसे षष्ठ्यर्थे चतुर्थी । रक्षस इति DDN.

३. विराजाय P. विराश (नाशा) य M. विराशय D. नाशाय । 'निश्यति शृङ्गे रक्षसो विनिक्षणाय' N. 4.18. इति यास्कः Sy. विहिंसनायेत्यर्थः Dur. रक्षो विनाशार्थम् । . . विनिक्षे 'णिक्षि चुम्बने' । . .ज्वालाभ्यां रक्षसश्चुम्बनं दाह एव । रक्षसो दाहार्थं शृङ्गे तीक्ष्णीकरोत्विति । यद्वा णिजेश्शोधनकर्मणः । . . विनाशे बन्धनं विनाशनमेव BB.

४. "निश्यति शृङ्गे रक्षसो विनिक्षणाय । रक्षो रक्षितव्यमस्मात् । रहसि क्षणोतीति वा । रात्रौ नक्षत इति वा" N. 4.18., SKN. II.247.
This stanza=TS. 1.2.14.7.

५. स्वनासः D. शब्दं कुर्वाणा ज्वालाः Sy. स्वनं कुर्वन्तः । हविःप्रक्षेपसमुपजनितमहाशब्दाः स्वाना इति रश्मिनामेति केचित् BB.

६. Omitted by P. अपि BB.

७. सःननशी० P.

८. द्युलोके Sy. सर्वत्राकाशे BB.

९. प्रादुर्भवन्तु Sy. विजृम्भन्ताम् । छान्दसं षत्वम् BB.

१०. भागवः P. ईदृशाः . . रश्मयः BB.

११. रक्ष P. रक्षसः M. रक्षसः Sy.

१२. हननाय Sy. रक्षोवधार्थम् । हन्तेः कृत्यार्थे भावे तवैप्रत्ययः BB.

१३. तिमन्या० P. तीक्ष्णायुधस्थानीया ज्वालाः Sy. तीक्ष्णायुधाः । तिग्मं तैक्ष्ण्यमेवायुधस्थानीयं शत्रूणां वेधकत्वाद्येषां ते तव रश्मयो दिव्यपि प्रकाशन्ताम् BB.

१४. हर्षे सति Sy. मदायैवास्य । यद्वोपमानार्थश्चिच्छब्दः BB.

१५. सोममदेवस्य M. अग्नेः Sy.

१६. प्रकर्षेण भङ्गं गच्छन्ति पीडयन्ति वा रक्षांसि Sy. प्रकर्षेण भक्षयन्तु 'रुजो भङ्गे' तौदादिकः । यद्वा . रुत्वा (क्त्वा?) अस्य रश्मयः प्ररुजन्तु प्रकर्षेण रक्षःप्रभृत्यपि भक्षयन्तु । . महस्ये (मध्याह्ने) वर्तमानस्यास्य यथा रश्मयो विश्वं दहन्ति एवमस्मद्रिपून् भक्षयन्त्विति BB.

१७. हवींषि BB.

१८. भानवस्तुतश्च M. क्रोधा दीप्तयो वा Sy. क्रोधनशीलाः BB.

१९. न वृण्वन्तु न प्राप्नुवन्ति BB.

२०. अदेवना आसुर्यः सेनाः Sy. अदेव्य आसुर्यः BB.

२१. परितो बाधिकाः Sy. पीडाः BB.

२२. एकं P., D. एवमस्मद्विषये प्रवर्तमानमेनमग्निम् BB.

२३. VM. ignores उ and चित् ॥ उ इति पूरणः Sy.
This stanza=TS. 1.2.14.7..

एतं ते स्तोमं तुविजात विप्रो रथं न धीरः स्वपा अतक्षम् ।
यदीदग्ने प्रति त्वं देव हर्याः स्वर्वतीरप एना जयेम ॥ ११ ॥

एतं[1] ते[1] । स्तोमम्[2] । वहुजनन[3] ! मेधावी[4] । रथम् । इव । धृष्ट[5]. । सुकर्मा[6] । कृतवानस्मि[7] । यदि । स्तोमम्[8] । त्वम् । कामयेथा[9] । शोभनगुणा[10]. । अपः[11] । स्तोमेनानेन[12] । जयेम[13] [14] ।

तुविग्रीवो वृषभो वावृधानोऽशत्रुर्यः समजाति वेदः ।
इतीममग्निममृता अवोचन्बर्हिष्मते मनवे शर्म यंसद्बर्हिष्मते मनवे शर्म यंसत् ॥१२॥

तुविग्रीवः[15] । वहुकण्ठ[16] । वृषभः[17] । वर्धमानः[18] । शत्रुरहितम् । धनम् । सङ्गमयति[19] । स्वामी[20] । इति । इमम्[21] । अग्निम् । देवा[22] । ब्रुवन्ति[23] । तथाऽयं च बर्हिष्मते[24] । हविष्मते[25] च । मनुष्याय[26] । सुखम् । प्रयच्छतु[27], सूक्त यदा वृशार्ष[28] भवति तदात्यन्त सङ्गत भवति[29] [30] ।

---

१. एकस्ते P., D.
२. स्तोत्रम् Sy.
३. हे बहुभावमापन्न ! अग्ने ! Sy.
४. मेधावी स्तोता Sy.
५. धीरः Sy.
६. शोभनकर्माऽहम् Sy.
७. ०नसि M. समपादयम् Sy.
८. स्तोमं seems to be the explanation of इत् ॥ एनं स्तोमम् Sy.
९. ०था M. प्रतिकामयेथाः Sy.
१०. स्वरणवतीर्व्याप्तिमतीः Sy.
११. अपि D.
१२. एनेन Sy.
१३. प्राप्नुयाम Sy.
१४. VM. ignores एतम् । ते । अग्ने । देव and प्रति ॥ एतम्, एतत् । ते त्वदर्थम् । Sy.
१५. बहुज्वालः प्रभूतग्रीवो वा Sy.
१६. वर्धिता कामानाम् Sy.
१७. वर्धमानोऽग्निः Sy.
१८. अकण्टकम् Sy.
१९. संयोजयति Sy.
२०. अरेः Sy.
२१. मम P. अर्थम् Sy.
२२. अन्ये देवाः Sy.
२३. अवोचन् । यस्मादेवं तस्मात् Sy.
२४. यथा यच्च D., P.
यस्मादेवं तस्मात् Sy.
२५. यागवते Sy.
२६. Omitted by P.
२७. यजमानाय Sy.
२८. यच्छतु Sy.
२९. पृशार्षं M.
३०. VM. ignores the repeated words मनवे । शर्म and यंसत् ॥ Ms.D. puts the figure ॥२॥ here to indicate the end of the second hymn. No such number is given in P. and M.

V. 3.

त्वमग्ने वरुणो जायसे यत्त्वं मित्रो भवसि यत्समिद्धः ।
त्वे विश्वे सहसस्पुत्र देवास्त्वमिन्द्रो दाशुषे मर्त्याय ॥ १ ॥

[1]त्वमग्ने । त्वम् । अग्ने [2] तदा । वरुणो भवसि । यदा । प्रादुर्भवसि । तथा [3]त्वम् । मित्रश्च [4] । भवसि । यदा । समिध्यसे [5] । तथा त्वयि । विश्वे [6] । देवा सन्ति [7] । "यदग्निमुद्धरति [8] वसवस्तर्ह्यग्निं [9]" इत्यध्वर्युब्राह्मणम् [10] । त्वम् । इन्द्रश्च भवसि । यजमानाय [11] ।

त्वमर्यमा भवसि यत्कनीनां नाम स्वधावन्गुह्यं बिभर्षि ।
अञ्जन्ति मित्रं सुधितं न गोभिर्यद्दम्पती समनसा कृणोषि ॥ २ ॥

[12]त्वमर्यमा [13] । त्वम् । अर्यमा [14] । भवसि । यदा । कन्यकानामर्थाय [15] समिध्यते तदा । गुह्यम् [16] । नाम [17] च । बिभर्षि 'यविष्ठ इति वास्य तद्गुह्य नाम' इति वाजसनेयकम् । अञ्जन्ति । सखायम् [18] । इव दृढम् । सुष्ठु निहितम् । गोविकारै [19] पय-प्रभृतिभि [20] । यस्मात् [21] त्वम् । जायापती । समानमनस्कौ । करोषि [22] ।

---

१. 'त्वमग्ने वरुणः' इति द्वादशर्चं तृतीयं सूक्तमात्रेयस्य वसुश्रुतस्यार्षं त्रैष्टुभमाग्नेयम् । 'त्वमग्ने वसुश्रुतः' (KSA. 24.3.p.19.) इत्यनुक्रान्तम् । प्रातरनुवाकाश्विनशस्त्रयोर्विनियोगः 'अबोध्यग्निः' इत्यत्रोक्तः Sy.

२. तमसां वारको रात्र्यभिमानी देवोऽपि त्वमेवSy.

३. जायसे Sy.

४. यथा P.

५. त्वमितश्च P., D. अहरभिमानी देवः प्रमीतेस्त्राता Sy.

६. त्वमुत्पन्नमात्रः सन् तमो निवारयसि प्रवृद्धः सन् हितकारी भवसीत्यर्थः Sy.

७. तदा P., D.

८. सर्वेऽपि Sy.

९. वर्तन्ते । त्वद्दत्तेन हविषा तेषां जीवनात् । 'ते देवा बिभ्यतोऽग्निं प्राविशन्' (TS. 6.2.2.6.) इति हि श्रुतेः Sy.

१०. ०मृद्धति P. ०मुद्धति D.

११. ०स्तर्ह्यग्निः P.

१२. इत्यध्युब्रा० P. इत्यर्युब्रा० D.

१३. स्वामी Sy.

१४. VM. ignores सहसः । पुत्र and दाशुषे ॥ हे सहसस्पुत्र ! बलेन मथ्यमानत्वात् । दाशुषे हविर्दात्रे Sy.

१५. 'विवाहे चतुर्थ्यामाज्याहुतौ' 'त्वमर्यमा' इत्येषा । सूत्रितञ्च—'त्वमर्यमा भवसि यत्कनीनामिति विवाहे चतुर्थीम्' (AGS. 1.4.7.) इति Sy.

१६. हे अग्ने ! Sy.

१७. त्वम् and अर्यमा are omitted by P., D. सर्वेषां नियमितासि Sy.

१८. कन्यकानां सम्बन्ध्यसि Sy.

१९. गोपनीयम् Sy.

२०. वैश्वानर इति तन्नाम Sy.

२१. मित्रमिव त्वाम् Sy.

२२. गोपितारैः P. विकारे प्रकृतिशब्दः । गोविकारैः क्षीरादिभिः Sy.

२३. पर्यप्र० P. पर्यः प्र० D. क्षीरादिभिः Sy.

२४. यस्मान् P.

२५. VM. ignores स्वधावन् ॥ किञ्च हे स्वधावन् ! हविर्लक्षणान्नवन् ! Sy.

तवं श्रिये मरुतो मर्जयन्त रुद्र यत्ते जनिम चारु चित्रम् ।
पदं यद्विष्णोरुपमं निधायि तेन पासि गुह्यं नाम गोनाम् ॥ ३ ॥

तव श्रिये[1] । तव श्र्यर्यम्[2] । मरुतः[3] । परिचरन्ति[4] । रुद्र[5] ! यदा । तव । जननम्[6] । चारु[7] । चित्र[8] भवति प्रादुर्भूत समेधयन्ति मरुत । पदम् । यत् । विष्णोः[9] । अन्तिकम्[10] । निधायि[11] । तेन पृथिव्यान्तरिक्षेण[12] वा "अन्तरिक्षदेवत्या. खलु वै पशवः" इति च ब्राह्मणम्, ओषध्युत्पादनेन[13] । गावो[14] यत् तव । नाम[15] कृतवन्त । पशुपतिरिति[16] । रक्षसि[17] ।

तवं श्रिया सुदृशो देव देवाः पुरू दधाना अमृतं सपन्त ।
होतारमग्निं मनुषो नि षेदुर्दशस्यन्त उशिजः शंसमायोः ॥ ४ ॥

तव श्रिया[18] । तव । ज्वालया[19] । सुदर्शाः[20] । हे देव[21] ! देवा[22] । पुरु[23] धनम । प्रयच्छन्त[24] । हविः[25] । सचन्ते[26] । ह्वातारम्[27] । अग्निम । मनुष्या । परिनिषीदन्ति[28] । प्रयच्छन्तो हविः । कामयमाना[30] । मनुष्यस्य[31] । शसनीयम्[32] ।

---

१. अनयाग्नेर्माध्यमिकी मूर्तिरुच्यते । हे अग्ने ! Sy.
२. श्रियर्थं P., D. श्रयणाय Sy.
३. अपोऽन्तरिक्ष्याः Sy.
४. मार्जयन्ति Sy.
५. हे रुद्र ! वृष्टघा रुद्रवद्वर्धितरग्ने ! Sy.
६. जन्म वैद्युतलक्षणम् Sy.
७. चरणीयम् Sy.
८. चायनीयं च Sy.
९. व्यापनशीलस्य देवस्य Sy.
१०. अत्रिः M.
११. अनेनान्तरिक्षमुक्तम् 'उपमेयमिव विष्णोर्मध्यमं पदं तस्मान्नान्तरिक्षं पश्यन्ति' इति ब्राह्मणम् Sy.
१२. ०व्या अ० D., M.
१३. ०दैव० D.
१४. ओषद्युत्या० D. ०ध्युल्पा० P.
१५. गोनामुदकानाम् Sy.
१६. नामानि Sy.
१७. VM. seems to explain गुह्यम् by पशुपतिः ॥ गुह्यम् अगम्यम् Sy.
१८. व्रक्षसि P., D.
१९. समृद्ध्या Sy.
२०. सुदृशः Sy.
२१. Omitted by D. हे अग्ने ! Sy.
२२. इन्द्रादयः Sy.
२३. अत्यधिकम् Sy.
२४. त्वयि प्रीतिं धारयन्तः Sy.
२५. अमृतम् Sy.
२६. स्पृशन्ति Sy.
२७. पातारम् P. होमनिष्पादकम् Sy.
२८. ०वन्तः P. ०वन्त D. परिचरन्त्यृत्विजः Sy.
२९. हविर्वितरन्तः Sy.
३०. कामयमानस्य Sy.
३१. मनुष्यस्य यजमानस्यार्थम् Sy.
३२. M. omits व्यस्य and शंसनीयम् ॥ फलम् Sy.

न त्वद्धोता[1] पूर्वो अग्ने यजीयान्न काव्यैः परो अस्ति स्वधावः[2]।
विशश्च यस्या अतिथिर्भवासि स यज्ञेन वनवद्देव मर्तान् ॥ ५ ॥

न त्वद्धोता[3]। न[4]। त्वत्तः[5]। होता। प्रथमः। अग्ने! विद्यते। यष्टृतरः[6]। न च। स्तोत्रैः[7]। परो[8] विद्यते। अन्नवन्[9]! स त्वम्। यस्या। विशः[10]। अतिथि[11]. भवसि। मनुष्या[12] साधयित[13] तेन। यज्ञेन[14]। मनुष्यानाश्रितान्[15]। भजते[16]।[17]

वयमग्ने वनुयाम[18] त्वोता वसूयवो हविषा बुध्यमानाः[19]।
वयं समर्ये विदथेष्वह्नां वयं राया सहसस्पुत्र मर्तान् ॥ ६ ॥

वयमग्ने[20]। वयम्। अग्ने! प्रयच्छेमहि[21]। त्वया रक्षिता[22]। धनकामा[23]। हविषा दीयमानेन। त्वया बुध्यमाना[24]। वयम्। सङ्ग्रामे। अह्ना सम्बन्धिषु[25]। यज्ञेषु[26] च शत्रून् अभिभवेम। मनुष्यान्[27]। धनेन[28]। हे सहस.। पुत्र[29]!

---

१. त्वद्धो M. त्वद्धो तां P., D.
२. Omitted by P.
३. अन्यः Sy. ४. त्वद्धोता P.
५. वृश्नः P. प्रश्नः D. पूरकः पुराणो वा Sy.
६. अस्ति Sy.
७. यष्टा वा Sy.
८. स्तोत्रैः स्तुत्यः Sy.
९. परस्तात् परस्मिन्नपि काले Sy.
१०. अन्नवान् P.
११. प्रजाया ऋत्विग्रूपायाः Sy.
१२. ०शेति० P., D. अतिथिवत्पूज्यः Sy.
१३. ०पि D. मनुष्याः साधयित seems to be unnecessary.
१४. The passage beginning with त्वत्तः and ending with यज्ञेन is omitted by M.
१५. ०ष्याणा श्रि० P. अस्मद्द्वेष्टॄन् Sy.
१६. वृश्चति हिनस्ति। यद्वा मर्तान् परिचारकान् सम्भजेत् Sy.
१७. VM. ignores च। and देव।
१८. यजमानाः Sy.
१९. ०च्छाम० P. प्रयच्छेम is suggested for प्रयच्छेमहि ॥ शत्रून् पीडयाम सम्भजेमहि वा धनम् Sy.
२०. त्वया रक्षिताः सन्तः Sy.
२१. वसुकामाः Sy.
२२. P. adds दीक्षाञ्जहि प्राज्ञाभिशस्तिमेते क्रियमाणा माग्नेयोस्मानागते सेनसा च बाध after हविषा। D. adds दीक्षाञ्जहि प्राज्ञाभिशस्तिमेतैः क्रियमाणामग्नेयोस्मानागसेन सा च बाध after हविषा। The additional passage in P. and D. has a striking resemblance with the commentary on RV. V.3.7.
२३. त्वां बोधयन्तः Sy.
२४. समरणे जयेम शत्रूनिति शेषः Sy.
२५. सं बि षु P. सञ्चिषु D. संवि (सर्वे)षु M. सर्वेष्वहःसु Sy.
२६. यज्ञेषु च is missing in M. यागेषु प्राप्नुयाम बलम्। यद्वा वनुयामेत्येवनुषज्यते Sy. २७. पुत्रभृत्यादींल्लभेमहि Sy.
२८. धनेन सह Sy.
२९. ०त्रः P. किञ्च हे बलस्य पुत्र! पालक! वाग्ने! Sy.

यो न आगो अभ्येनो भरात्यधीदघमघशंसे दधात ।
जही चिकित्वो अभिशस्तिमेतामग्ने यो नो मर्चयति द्वयेन ॥ ७ ॥

यो नः । यः[1] । अस्माकम्[2] । आग[3] । पाप च[4] । अभिप्रापयति[5] । तस्मिन्, अघशसे । अघम्[6] । अग्निरधिधत्तात्[7] । जहि । प्राज्ञ[8] ! अभिशस्तिम्[9] । एतेन क्रियमाणाम्[10] । अग्ने[11] ! यः[12] । अस्मान्[13] । आगसैनसा[14] च[15] । बाधते[16] ।

त्वामस्या व्युषि देव पूर्वे दूतं कृण्वाना अयजन्त हव्यैः ।
संस्थे यदग्न ईयसे रयीणां देवो मर्तैर्वसुभिरिध्यमानः ॥ ८ ॥

त्वामस्या व्युषि । त्वाम् । रात्रेः । विवासे[17] । देवम् । पूर्वे[18] । कवयः[19] । दूतम् । कृण्वानाः[20] । अयजन्त । हविर्भिः[21] । यत् त्वम्[22] । रयीणाम्[23] । सस्थाने[24] युद्धे । गच्छसि । देवः[25] । वासयितृभिः[26] । मनुष्यैः[27] । समिध्यमानः[28] ।

---

१. मर्त्यः Sy.
२. अस्मभ्यम् Sy.
३. अपराधम् Sy.
४. अभितः करोति Sy.
५. पापम् Sy.
६. ०धिधत्तात् P. ०ग्निधिधत्तात् M. ददात्वग्निः । आगोऽपराधं यो मह्यमिदं करोति तस्मा एवाग्निस्तत् करोत्वित्यर्थः Sy.
७. अथ प्रत्यक्षेणोच्यते Sy.
८. प्रज्ञ M.
९. उत्तरत्र यच्छब्दश्रवणात्तदानुगुण्येनैनमभिशंसकमिति व्याख्येयम् Sy.
१०. ०णम् P.
११. M. omits क्रियमाणाम् and अ of अग्ने ।
१२. अभिशस्ता Sy.
१३. ये स्मान् P., D.
१४. द्वयेन उक्तेन आगसा एनसा वा Sy.
१५. बाधते । तमिति Sy.
१६. VM. ignores इत् ॥ इदिति पूरणः Sy.
१७. प्युषि P., D.
१८. व्युष्टायामुषसीत्यर्थः Sy.
१९. पुरातना यजमानाः Sy.
२०. देवानां प्रेरकम् Sy.
२१. कुर्वाणाः Sy.
२२. हविर्भिः साधनैः Sy.
२३. यत्वं P. युतं D.
२४. रयीणां हविर्लक्षणानाम् Sy.
२५. संसास्थाने P. Missing in M. आसादने सति Sy.
२६. द्योतमानः Sy.
२७. वासकैः Sy.
२८. ऋत्विग्भिः Sy.
२९. ०यितृदिम्मनुष्यैस्समृध्यमानः D.
३०. VM. explains देव as देवम् and ignores अग्ने ।

अवं स्पृधि पितरं योधि विद्वान्पुत्रो यस्ते सहसः सून ऊहे ।
कदा चिकित्वो अभि चक्षसे नोऽग्ने कदाँ ऋतचिद्यातयासे ॥ ९ ॥

[1]अव स्पृधि । [2]अवप्रीणय । मदीय [3]पितरम् । [4]सम [5]पृथक् कुरु च । तस्य शत्रू जानन् । योऽहम् । [6]तव । [7]पुत्रस्तुभ्य हवि. । [8]वहामि । सहस. । पुत्र [9]! कदा । [10]प्राज्ञ [11]! अभिपश्यसि । अस्मान् । अग्ने [12]! कदा वा । सत्य-[13]ज्ञस्त्वम् । युद्धाय [14]निर्गमयसि ।

भूरि नाम वन्दमानो दधाति पिता वसो यदि तज्जोषयासे ।
कुविद्देवस्य सहसा चकानः सुम्नमग्निर्वनते वावृधानः ॥ १० ॥

[15]भूरि नाम । [16]भूरि । [17]हवि । [18]स्तुवन् । प्रयच्छति । अस्मदीय [19]पिता । हे [20]वासयित [21]! यदि त्वम् । [22]तत । सेवसे । [23]कुवित् । [24]देवस्य । [25]सहसा । [26]दीप्यमान प्रयच्छसि । [27]सुखम् । अग्निश्च तस्मै । प्रयच्छति । [28]वर्धमान ।

---

१. अप P.
२. अप० P. पारय Sy.
३. पालकं पितृभूतम् Sy.
४. तम् is suggested for सम ।
५. प्रथ P., D. Sy. adds पापात् ।
६. M. omits सम् पृथक् कुरु च तस्य ।
७. जानह्योहं तस्य P. तस्य D. यो हन्त M.
८. पुत्रस्थानीयस्तव यो यजमानः, त्वाम् Sy.
९. वहति । तमेवं कुर्वित्यृषिरात्मानं परोक्षेणाह । 'हव्यवाळग्निरजरः पिता नः' (RV.V.4.2.) इति हि वक्ष्यति । यद्वा पितृपुत्रभावो व्यत्यस्तः । पितरं पितृवद्रक्षकं यजमानमव स्पृधि योधि च । यस्त्वं पुत्रः पुत्रवत् सदा रक्षणीयः 'त्वं पुत्रो भवसि यस्तेऽविधत्' (RV. II.1.9.) इति हि श्रुतिः Sy.
१०. हे बलस्य पुत्र अग्ने ! त्वम् Sy.
११. तदा M.
१२. हे चेतनावन् ! Sy.
१३. अने M.
१४. यज्ञस्योदकस्य वा चेतयिता Sy.
१५. Omitted by M. प्रेरयसि सन्मार्गेण Sy.
१६. नामं D. १७. प्रभूतम् Sy.
१८. त्वदीयं नाम Sy.
१९. वन्दमानः सन् Sy.
२०. धारयति । सामर्थ्याद्धविः । अथवा नामकं हविः प्रभूतं धारयति दातुम् Sv.
२१. पालकस्त्वम् Sy.
२२. हे वासकाग्ने ! Sy.
२३. हविः Sy.
२४. M. omits the words between प्रयच्छति and सेवसे ।
२५. बहु हविः Sy.
२६. कविर्वे० P. व्यवहर्तुर्यजमानस्य Sy.
२७. बलेन युक्तः सन् Sy.
२८. कामयमानः । यद्वा कर्मणि षष्ठी । देवं यजमानं कामयमानः Sy.
२९. प्रयच्छत सुम् P., D. सुम्नम् Sy.
३०. यजमानं वर्धयन् वा Sy.

त्वमङ्ग जरितारं यविष्ठ विश्वान्यग्ने दुरितातिं पर्षि।
स्तेना अदृश्रन्रिपवो जनासोऽज्ञातकेता वृजिना अभूवन् ॥ ११ ॥

त्वमङ्ग। त्वम्। क्षिप्रम्। स्तोतारम्। युवतम। विश्वानि। अग्ने। दुरितानि। अतिपार्य। स्तेनाः। दृश्यन्ते। रिपवः। जनासः। अज्ञातनिवासस्थाना। चोदकाः। भवन्तीति।

इमे यामासस्त्वद्रिगभूवन्वसवे वा तदिदागो अवाचि।
नाहायमग्निरभिशस्तये नो न रीषते वावृधानः परा दात् ॥ १२ ॥

इमे यामासः। स्वपितर प्रत्याह—अमी शत्रवः। गन्तार। त्वदभिमुखाः। भवन्ति। तच्चैतत्। उपद्रवम्। वासयित्रेऽग्नये मया। उक्तम। समुच्चयार्थीयो वाशब्द। न। एव। अयम्। अग्नि। अस्मान्। अभिशस्तये। प्रयच्छति। न। हिंसते। वर्धमानोऽग्नि. प्रयच्छति।

---

१. अङ्ग ! हे स्वामिन् ! Sy.
२. स्तोतारमनुग्रहीतुम् Sy.
३. अतिपारयसि Sy.
४. तस्कराः Sy.
५. अद्० P. आद्० D.
६. शत्रुभूताः Sy.
७. M. omits जनासः ॥ मनुष्याः Sy.
८. ०सोज्ञान्तनि० P. जातनि० M. अप्रज्ञातचिह्नाः Sy.
९. अस्माभिर्वर्जिताः Sy.
१०. ०त्विति P. भवन्ति Sy.
११. गन्तारः स्तोमाः Sy.
१२. ०द्रवत् P., D. उपद्रव is in the mas. gend. and as such it should be उपद्रवः। Similarly एतत् and उक्तं going with उपद्रवः should be एषः and उक्तः ॥ अपराधमाशासनरूपम्। इदं देहीति याचनमेवापराधः, यद्वा तदिदं वक्ष्यमाणं शत्रुभिः कृतमागोऽवाचि Sy.
१३. वासकाय Sy.
१४. उक्तवानहमग्निम् Sy.
१५. ०यामीयो D.
अथवा Sy.
१६. अग्निना P. M. omits the words between थीयो वा and अग्निः।
१७. निन्दकाय Sy.
१८. परादद्यात् Sy.
१९. हिंसकाय Sy.
२०. स्तुत्या वर्धमानः सन् Sy.
२१. VM. ignores इत् ॥ इदिति पूरणः ॥३॥ Ms. D. puts the figure ॥३॥ here to indicate the end of the third hymn. No such number is given in P, and M.

V. 4.

त्वामग्ने वसुपतिं वसूनामभि प्र मन्दे अध्वरेषु राजन् ।
त्वया वाजं वाजयन्तो जयेमाभि ष्याम पृत्सुतीर्मर्त्यानाम् ॥ १ ॥

त्वामग्ने । त्वाम् । अग्ने ! धनपतिम् । आभिमुख्येन प्रस्तौमि । यज्ञेषु । दीप्यमान ! त्वया ।
सङ्ग्रामम् । युद्ध कर्तुकामा । जयेम । अभिभवेम । पृतना । मनुष्याणाम् ।

हव्यवाळग्निरजरः पिता नो विश्वुर्विभावा सुदृशीको अस्मे ।
सुगार्हपत्याः समिषो दिदीह्यस्मद्यू१क्सं मिमीहि श्रवांसि ॥ २ ॥

हव्यवाट् । हविषां वोढा । अग्नि । जरारहित । पालयिता । अस्माकम् । विविध भवन् । दीप्तिमान् ।

---

१. 'त्वामग्ने' इत्येकादशर्चं चतुर्थं सूक्तमात्रेयस्य वसुश्रुतस्यार्षं त्रैष्टुभमाग्नेयम् । अनुक्रान्तञ्च 'त्वामग्न एकादश' (KSA. 24.4. p. 19.) इति । प्रातरनुवाकाश्विनशस्त्रयोर्विनियोगः 'अबोध्यग्निः' इत्यत्रोक्तः Sy.

२. त्वम० P.

३. ईदृशं त्वाम् BB.

४. P. omits त्वाम् । अग्ने ।

५. धनवतिम् P., D. वृत्त्यवृत्तिभ्यां वसूनां बाहुल्यं तत्स्वामित्वं चोक्तम् । बहूनां धनानां स्वामिनम् Sy. वसूनां सर्वेषां सम्बन्धिनं नैकस्य द्वयोर्वा वसुपतिं वसूनां नित्यस्वामिनम् । इदं समासव्यासाभ्यां प्रतिपाद्यते कश्चिदाह वसूनां देवानां मध्ये वसुपतिमिति BB.

६. प्रस्तौति D. स्तौमि Sy. तर्पयामि 'मदि स्तुतिमोदस्वप्नकान्तिगतिषु' BB.

७. यागेषु Sy.

८. ०मानः D. ०मानं M. हे राजन् ! Sy. चरुपुरोडाशादिभिर्दीप्यमान ! Sy.

९. अनुकूलेन Sy. त्वयैव BB.

१०. वाजम् Sy.

११. अन्नमिच्छन्तो वयम् Sy. वाजमन्नमात्मन इच्छन्तः ।. . . यद्वा वयं वाजमिच्छामस्तदा BB.

१२. त्वया वाजं जयेम . प्राप्नुयाम BB.

१३. ०कामाभि० P.

१४. ममृतानां P. वृतानाम् D. सेनाः Sy. पृतनां कर्तुं या अस्माभिरिच्छन्ति ताश्शत्रुसेनाः । पृदिति सङ्ग्रामकर्म । तस्मात्सङ्ग्रामयितुमिच्छन्तीति सन् ।. . यद्वा पृतनास्सूयन्त उत्पाद्यन्ते याभिस्ताः पृत्सुतयः । छान्दसं ह्रस्वत्वम् । पृ-ङ्वावश्च । बहुविकारत्वान्नावगृह्यते BB.

१५. ०णा D. मरणधर्मकाणाम् Sy. मर्त्यानां मध्ये BB.

१६. VM. ignores वसूनाम् ।
This stanza=TS. 1.4.46.2.

१७. दर्शपूर्णमासे पत्नीसंयाजे गृहपतेर्याज्यैषा । सूत्रितञ्च—'हव्यवाळग्निरजरः पिता न इति पत्नीसंयाजाः' (ASS. 1.10.) इति । देवसुवां हविःष्वप्यग्नेरेषैव याज्या । सूत्रितञ्च—'हव्यवाळग्निरजरः पिता नस्त्वं च सोम नो वशः' (ASS. 4.11.) इति Sy.

१८. हव्यवान् D.

१९. अङ्गनादिगुणयुक्तः BB.

२०. ०तं P. अजीर्णः सन् Sy. जरारहितः BB.

२१. पिता भवत्विति शेषः Sy.

२२. भवं P. भव D. व्याप्तः Sy. भुवनस्य व्यापी BB.

२३. विशेषेण भानशीलः । भातेर्वनिप् BB.

सुदर्शनीय[1] । अस्माक भवतु । शोभनगृहपतिकानि[2] । अन्नानि[3] । सन्दिदीहि[4] अस्मभ्यम् । अस्मदभिमुखानि[5] । अन्नानि[6] । सह कुरु[7] ।

विशां कविं विश्पतिं मानुषीणां शुचिं पावकं घृतपृष्ठमग्निम् ।
नि होतारं विश्वविदं दधिध्वे स देवेषु वनते वार्याणि ॥ ३ ॥

विशां कविम्[8] । मानुषीणाम्[9] । विशाम्[10] । स्वामिनम् । क्रान्तप्रज्ञम्[11] । दीप्तम्[12] । शोधकम्[13] । घृतपृष्ठम्[14] । अग्निम्[15] । निदधिध्वे[16] । ह्वातारम्[17] । सर्वज्ञम्[18] । सः । देवेषु[19] । मनुष्याणा धनानि[20] । भजते[21] ।

जुषस्वाग्न इळया समोषा यतमानो रश्मिभिः सूर्यस्य ।
जुषस्व नः समिधं जातवेद आ च देवान्हविरद्याय वक्षि ॥ ४ ॥

जुषस्व[22] । जुषस्व[23] । अग्ने ! समिद्ध ! इडया[24] । सङ्गत[25] । यतमानश्च[26] । सूर्यरश्मिभिः[27] सह । तथा

---

१. शोभनदर्शनः Sy. सुखदर्शनः । वृशीकादयो निपात्यन्ते BB.
२. अथ प्रत्यक्षवादः, शोभनगार्हपत्ययुक्तानि Sy. शोभनगृहपतित्वहेतुभूताः BB.
३. ०पतिकोन्नानि P.
४. सम्यक् प्रकाशय ददस्व वा Sy. एकीकृत्य दीपय वेहीत्यर्थः । दिदेतिर्दीप्तिकर्मा छान्दसः । ददातेर्वा रूपं छान्दसविकारः BB.
५. अस्मदभिमुखम् Sy. अस्मदाभिमुख्येनागतिमत् BB.
६. यशांस्यन्नानि वा BB.
७. ह P. सम्यक् प्रयच्छ Sy. सम्यङ् निष्पादय । 'माङ् माने', जौहोत्यादिकः BB. This stanza=TS. 3.4.11.1.
८. सर्वासां मनुष्यरूपाणां पालकं स्वामिनं वा Sy.
९. प्रजानाम् Sy.
१०. मेधाविनम् Sy.
११. शुद्धं दीप्तं वा Sy.
१२. अन्येषां शोधकम् Sy.
१३. प्रदीप्तपृष्ठोपलक्षितशरीरम् । अथवोपरितनभागे आज्योपेतम् Sy.
१४. धारयथ हे ऋत्विजः ! Sy.
१५. होमनिष्पादकम् Sy.
१६. विश्वस्य वेत्तारम् Sy.
१७. देवः Sy.
१८. देवेषु मध्ये Sy.
१९. वरणीयानि धनानि Sy.
२०. सम्भजतेऽस्मदर्थम् । स्वयं वा वार्याणि हवींषि वनते Sy.
२१. युषस्व D.
२२. जू० D. सेवस्व स्तुतिम् Sy.
२३. M. adds समिद्धमस्मदीयाम् after अग्ने.
२४. ळलया P., D. वेदिलक्षणया भूम्या वाचा वा Sy.
२५. सङ्गच्छत P., D. समानप्रीतिः Sy.
२६. प्रयत्नमुषःकाले कुर्वन् Sy.
२७. VM. explains सूर्यस्य and रश्मिभिः together as सूर्यरश्मिभिः सह ।

हे जातवेद[1] ! अस्माकम्[2] । समिधम् । सेवस्व । आवह[3] । च । देवान् । हविषे[4] भक्षणाय ।

जुष्टो दमूना अतिथिर्दुरोण इमं नो यज्ञमुप याहि विद्वान् ।
विश्वा अग्ने अभियुजो विहत्या शत्रूयतामा भरा भोजनानि ॥ ५ ॥

जुष्टः[5] । पर्याप्त[6] । दममन[7] । अतिथिर्भवन् । गृहे[8] । इमम् । नः[9] । यज्ञम् । उपगच्छ[11] । जानन्[12] ।

---

१. जातस्य वेदितरग्ने ! Sy.

२. अस्मदीयाम् Sy.

३. VM. explains आ and वक्षि together as आवह but Sy. explains these separately आ as आवह and वक्षि as वहसि तद्वविः ।

४. ०षे P. हविरदनाय Sy.

५. अथ पवित्रेष्टचां स्विष्टकृतोऽनुवाक्यैषा । सूत्रितञ्च—'जुष्टो दमूना अग्ने शर्ध महते सौभगायेति संयाज्ये' (ĀŚS 2.12.) इति । मरुद्भ्यः पुरोडाशं सप्तकपालमित्यत्रापि स्विष्टकृतोऽनुवाक्या । 'अत्यासो न ये मरुतः स्वञ्चो जुष्टो दमूनाः' (ĀŚS.2.18.) इति Sy. वसुश्रुतस्यात्रेयस्य SKN. वसुश्रुतस्यात्रेयस्येदमार्षम् Dur.

६. अत्रैकवाक्यतायै यत्तच्छब्दावध्याहार्यौ । यस्त्वं जुष्टः सेवितः सर्वेण, प्रियो वा सर्वस्य SKN. आ सेवितस्त्वमस्माभिः स्तुतिभिः Dur.

७. दमना M. दममनाः is suggested for दममनः ॥ दानमना दान्तमना वा Sy. अक्रूरमना भूत्वा Dur.

८. अतिथिः तद्वत् पूज्यः सन् Sy. अतिथिस्थानीयश्च सायंप्राप्तश्चाग्निहोत्रिणाम् । . . . अततिर्गतिकर्मा अभिगतो हि स नूनं निवासं गृहाण्यतिथिः । अभ्येति तिथिषु वा कुलानि । अभ्येति तिथिषु सुष्ठु गच्छतीत्यर्थः । अतिथिर्हि यावद् गन्तव्यं तावद् याति परकुलानीतिSKN. अतिथिश्च त्वमग्निहोत्रिणां दान्तमनसां प्रातः सायं चोद्वोध्यमानो भवसि । स्वभाव एवैष तवाग्निहोत्रिणामतिथित्वेनोपस्थातव्यमिति । . . . . आह, अतिथिः कस्मात् ? उच्यते, गृहानभि आभिमुख्येनासौ अततो भवति गत इत्यर्थः । 'अतति पतति' गतिकर्मसु पठितम् । अथवैवमन्यथा स्यात्—'अभ्येति' अभ्यागच्छति तिथिषु पौर्णमास्याद्यासु परकुलानि यजमानकुलानीत्यतिथिः Dur.

९. ग्रहे D. गृहेऽस्मदीये SKN. अतो ब्रूमो वयमपि दान्तमनसोऽग्निहोत्रिणश्च । अस्माकमपि य एषः यज्ञगृहे यज्ञस्तन्यते तं त्वमुपायाहि तमागच्छ । .दुरोण इत्येतद् गृहनाम (Ngh.3.4.) आह—किं कारणम् ? उच्यते ते हि गृहाः दुरवा भवन्ति । अवतिस्तर्पणार्थः, दुस्तर्पा इत्यर्थः । उक्तञ्च 'कुटुम्बतन्त्राणि हि दुर्भराणि' इति । एवमेतस्मिन्मन्त्रे 'जुष्टः दमूनाः, अतिथिः विद्वान्, हे अग्ने ! यज्ञमुपयाहि' इत्येतस्मिन्नधिकारे वर्तमानः 'दमूनाः' शब्दः कमन्यमग्निविशेषणादर्थं ब्रूयात् ? न कञ्चिदपि । परिशेषाद् दमूना इत्येतदग्निविशेषणमेवेति सिद्धम् Dur.

१०. अस्मदीयम् Sy.
अस्माकं स्वभूतम् SKN.

११. उपागच्छ Sy. अथवा गृहं ममेदमिति चेतोऽवस्थाप्य तत उपयाहि । अथवा दान्तेष्वेव हि तव मनो वयं च दान्ताः Dur.

१२. जानन् स्वमधिकारं भक्ततां वाऽस्माकम् SKN. जानानः स्वमधिकारं भक्ततां चास्माकम् Dur.

सर्वा.। अग्ने ! अभियोक्त्री. सेना । विहत्य । शत्रूयता तेषाम् । अन्नान्यस्माकम् । आहर ।

वधेन दस्युं प्र हि चातयस्व वयः कृण्वानस्तन्वे३ स्वायै ।
पिपर्षि यत्सहसस्पुत्र देवान्त्सो अग्ने पाहि नृतम वाजे अस्मान् ॥ ६ ॥

वधेन । आयुधेन । दस्युम् । प्रकर्षेण पीडय । स्वस्मै । शरीराय । गमनम् । कुर्वाण । पारयसि । यत् ! सहस.। पुत्र ! देवाः । तदा स त्वम् । अग्ने ! अस्मान् । रक्ष । युद्धे । नेतृतम ।

वयं ते अग्न उक्थैर्विधेम वयं हव्यैः पावक भद्रशोचे ।
अस्मे रयिं विश्ववारं समिन्वास्मे विश्वानि द्रविणानि धेहि ॥ ७ ॥

वयं ते । वयम् । तुभ्यम् । अग्ने ! उक्थै । परिचरण कुर्म । वयम । हविर्भि. । पावक ।

---

१. सर्वान् Sy. उपगम्य च .सर्वाः SKN.
२. हे अग्ने ! Sy.
हे भगवन्नग्ने ! Dur.
३. ०यो० suggested for ०यौ० अभियोक्तॄन् Sy. स्त्रीलिङ्गनिर्देशादभियोक्त्रीरस्मच्छत्रुसेना इत्यर्थः SKN. अभितः सर्वतो युजोऽभियोक्त्र्यः। शत्रुसेनास्त्वदागमनप्रतिबन्धेन वर्तमानाः Dur.
४. विविधं हत्वा SKN. नानाप्रकारं हत्वा तत उपयाहि Dur.
५. ०त्रुय० P. शत्रूयतां येऽस्माकमिच्छन्ति तेषां स्वभूतानि SKN. किञ्च एवमागच्छंस्त्वं शृणु यत् कुरुष्व ।. . .येऽस्माकं शत्रुत्वं कामयन्ते कर्तुं तान् विहत्य तेषां बलानि Dur.
६. अन्नानि धनानि Sy. अथवा भोजनमिति धननाम (Ngh.2.10.) धनानि SKN. ततो यानि तेषां भोजनान्यन्नानि धनानि वा Dur.
७. तान्यस्मभ्यमाभर, आहरेति समस्तार्थः Dur.
८. दमूना दममना वा । दानमना वा । दान्तमना वा । अपि वा दम इति गृहनाम (Ngh. 3.4.) । तन्मनाः स्यात् । मनो मनोतेः । . . . .अतिथिरभ्यतितो गृहान् भवति । अभ्येति तिथिषु परकुलानीति वा । (पर)गृहाणीति वा । (अयमपीतरोऽतिथिरेतस्मादेव) दुरोण इति गृहनाम (Ngh.3.4.) । दुरवा भवन्ति दुस्तर्पाः । इमं नो यज्ञमुपयाहि विद्वान् । सर्वा अग्ने ! अभियुजो विहत्य शत्रूयतामाभर भोजनानि । विहत्यान्येषां बलानि शत्रूणां भवनादाहर भोजनानीति वा । धनानीति वा N. 4.4.,5., SKN. II.208.
९. हे अग्ने ! Sy.
१०. उपक्षपयितारम् Sy.
११. विय P., D. प्रणाशय Sy.
१२. स्व M. स्वीयाय Sy.
१३. अथवा स्वायै तन्वे यजमानादिरूपाय पुत्राय Sy.
१४. वयः अन्नम् Sy.
१५. तर्पयसि Sy.
१६. यस्मात् Sy.
१७. पुत्रा P., D. अग्ने ! Sy.
१८. भवान् P. दवान् D. देवान् is suggested for देवाः ।
१९. Omitted by D.
२०. सङ्ग्रामे Sy.
२१. VM. ignores हि ॥ हि इति पूरणः Sy.
२२. त्वाम् Sy.
२३. ०भ्यमन्न उ० P. शस्त्रैः Sy.
२४. परिचरेम Sy.
२५. हविर्भिर्विधेम Sy.
२६. शोधक ! Sy.

भजनीयदीप्ते ! अस्मासु[२] । धनम् । सर्ववरणीयम्[३] । सङ्गमय[४] । अस्मासु[५] । सर्वाण्येव[६] । धनानि[७] । स्थापय[८] ।

अस्माकमग्ने अध्वरं जुषस्व सहसः सूनो त्रिषधस्थ हव्यम् ।
वयं देवेषु सुकृतः स्याम शर्मण्णा नस्त्रिवरूथेन पाहि ॥ ८ ॥

अस्माकम्[९] । अस्माकम् । अग्ने ! यज्ञम्[१०] । सेवस्व । सहस[११] । पुत्र ! त्रिस्थान[१२] ! हविश्च[१३] । वयम[१४] । देवेषु[१५] । शोभनकर्मणि[१६] । स्याम[१७] । सुखेन[१८] । त्रिगुणेन[१९] । रक्ष[२०] ।

विश्वानि नो दुर्गहा जातवेदः सिन्धुं न नावा दुरितातिं पर्षि ।
अग्ने अत्रिवन्मनसा गृणानोऽस्माकं बोध्यविता तनूनाम् ॥ ९ ॥

विश्वानि[२१] । सर्वाणि । अस्मान्[२२] । दुःखेन । गाहितव्यानि । हे जातवेदः[२३] ! सिन्धुम[२४] । इव । नावा । दुरितानि । अतिपारय । अग्ने ! अत्रिणेव[२५] । मनसा[२६] । स्तूयमान[२७] । अस्माकम् । अङ्गानाम्[२९] । रक्षिता भवामीति[३०] । बुध्यस्व ।

---

१. हे कल्याणदीप्ते ! Sy.
२. ०प्तो स्मा० D. अस्मभ्यम् Sy.
३. विश्ववैवरणीयम् Sy.
४. प्रापय Sy.
५. अस्मभ्यम् Sy.
६. विश्वानि Sy.
७. द्रविणानि Sy.
८. स्थापयः P., D.
९. अस्माकमग्ने M.
१०. अध्वरम् Sy.
११. हे बलस्य पुत्र ! Sy.
१२. त्रिषु क्षित्यादिषु स्थानेषु स्थित ! Sy.
१३. M. notes here असमग्रम् इतः परं ग्रन्थपातः ॥ हविः जुषस्व । यद्वा अध्वरं हविरिति योज्यम् । अहिंसितं हविरिति Sy.
१४. यजमानाः Sy.
१५. Sy. adds मध्ये ।
१६. ०कर्म P., D. शोभनापूर्वकर्तारः Sy.
१७. स्योम D. भवेम Sy.
१८. ०नन् D.
१९. त्रिगुणे मृगेन P. त्रिगुणेमूडेन D. वाचिकादिभेदेन त्रिधा वरणीयेन त्रिच्छविष्केण गृहेण वा Sy.
२०. VM. ignores नः ।
२१. अस्माकम् Sy.
२२. दुःखेन गाह्यानि दुःखेन भोग्यानि Sy.
२३. ०द D.
२४. नदीम् Sy.
२५. नाविको यथा तद्वत् Sy.
२६. अत्रेर्यथा तथास्माकम् Sy.
२७. नमसा is suggested for मनसा ॥ स्तोत्रेण Sy.
२८. मानः is suggested for ०मान ॥ स्तूयमानः सन् Sy.
२९. तनूनाम् Sy.
३०. रक्षकः Sy.

यस्त्वा हृदा कीरिणा मन्यमानोऽमर्त्यं मर्त्यो जोहवीमि ।
जातवेदो यशो अस्मासु धेहि प्रजाभिरग्ने अमृतत्वमश्याम् ॥ १० ॥

यस्त्वा हृदा । यः । त्वा । हृदयेन । विक्षिप्तेन । स्तुन्वन् । अमर्त्यम् । मर्त्य । भृशमाह्वयामि । जात । तेनास्मासु । कीर्तिम् । धेहि । प्रजाभिः । अग्ने । अमृतत्व च । प्राप्नुयाम् ।

यस्मै त्वं सुकृते जातवेद उ लोकमग्ने कृणवः स्योनम् ।
अश्विनं स पुत्रिणं वीरवन्तं गोमन्तं रयिं नशते स्वस्ति ॥ ११ ॥

यस्मै त्वम् । यस्मै । त्वम् । कर्मणे । जातवेदः । कृणोषि । लोकम्–आवासस्थानम् । सुखकरम् ।

---

१. पुत्रकामेष्टचां 'यस्त्वा' इत्येषा प्रधानस्य याज्या । सूत्रितञ्च—'यस्त्वा हृदा कीरिणा मन्यमानोऽग्निस्तुविश्रवस्तमम' (ASS. 2 10.) इति Sy.

२. हृता P. ३. योऽहम् BB.

४. यः and त्वा are omitted by P. त्वाम् Sy. BB.

५. दयेन P. हृदयेन युक्तः Sy. मनसा BB.

६. स्तुत्यादिषु विक्षिप्तेन Sy. कीर्तयता गुणकीर्तनशीलेन BB.

७. ईदृशेन हृदयेन. मन्यमानो जानन् BB.

८. अविनाशम् Sy. अमरणधर्माणम् BB.

९. ०र्त्यमर्त्यः P. मरणधर्माहम् Sy. मरणधर्मा मनुष्यः BB.

१०. अत्यर्थमाह्वयामि । यद्वा स्तोतृवाचकेन कीरिणाशब्देन स्तुतिरुपलक्ष्यते । स्तुतियुक्तेन मनसा त्वां मन्यमानो जोहवीमि Sy. यद्वा त्वदर्थमिदं हविर्जुहोमि BB.

११. जातवेदः is suggested for जातः ॥ हे जातवेदः ! Sv. जातानां वेदितो जातधनं वा BB. १२. येषां सम्बन्धी तवाह्वाताहं तेष्वस्मासु पुत्रपौत्रेषु BB.

१३. धनं प्रजां वा Sy.

१४. स्थापय । यशस्विनस्सर्वानस्मान् कुरु BB.

१५. पूजा० P. त्वदृत्ताभिः Sy. ताभिः प्रजाभिः पुत्रादिभिरविच्छिन्नाभिः सहाहम् BB.

१६. सन्तत्यविच्छेदलक्षणम् Sy दीर्घायुष्यम् BB.

१७. ०याम D., P. and D. add यश्च after प्राप्नुयाम् ॥ 'प्रजामनु प्रजायसे तदु ते मर्त्यामृतम्' (TB. 1.5.5.6.) इति हि श्रुतिः Sy. व्यत्ययेन परस्मैपदम् BB.

१८. तस्यामेव पत्रकामेष्टचां 'यस्मै त्वम्' इत्येषाग्नेः पुत्रवतोऽनुवाक्या । 'यस्मै त्वं सुकृते जातवेदो यस्त्वा हृदा कीरिणा मन्यमानः' (ASS. 2.10.) इति हि सूत्रितम् Sy.

१९. सुकर्मणे is suggested for कर्मणे । यजमानाय Sv. शोभनानि कर्माणि कृतवते BB.

२०. ०वेदः is suggested for ०वेद । हे जातवेदः ! Sy.

२१. अकरोः । यद्वा । लोकमालोकेन स्योनं कृणवः । अनुग्रहेण कुर्वित्यर्थः Sv. कुर्याः ॥ 'कृवि हिंसाकरणयोः' लेट् BB.

२२. ०कवावास० D. स्थानम् BB.

२३. सुखम् BB.

स[1] । अश्ववन्तम्[2] । पुत्रवन्तम्[3] । वीरवन्तम्[4] । गोमन्तं[5] च । रयिम्[6] । अविनाशेन[7] । प्राप्नोति[8] ।

V. 5.

सुसमिद्धाय शोचिषे घृतं तीव्रं जुहोतन । अग्नये जातवेदसे ॥ १ ॥

सुसमिद्धाय[10][11] । सुष्ठु समिध्यमानाय[12] । घृतम्[13] । तीव्ररसम्[14] । जुहोतन[15] । अग्नये[16] । जातप्रज्ञाय[17][18] ।

नराशंसः सुषूदतीमं यज्ञमदाभ्यः । कविर्हि मधुहस्त्यः ॥ २ ॥

नराशंसः[19] । नरैः शसनीयम्[20] । सुष्ठु प्रेरयतीति । इमम्[21] । यज्ञम्[22] । अर्हस्य[23] । कविं[24] । ह्ययम्[25] । मादयितृहस्ताङ्गुलिक[26] ।

---

१. यजमानः Sy. स एव BB.

२. बह्वश्वोपेतम् Sy. अश्वादिसहितम् BB.

३. बहुपुत्रोपेतम् Sy.

४. वीरवीर्येण वोपेतम् Sy.

५. शोभन्तम् P. गोभिर्युक्तम् Sy.

६. धनम् Sy. ७. ०यिसवि० D. अविनश्वरम् Sy. अविच्छेदेन BB.

८. नशतिर्गतिकर्मा । स एव त्वत्प्रसादाद्बह्वश्वो भवति, अश्वादिपुत्रपौत्रादिमांश्च भवति, अन्यैश्च विक्रान्तैः पुरुषैस्तद्वान् भवति । गोमहिष्यादिसङ्घातस्वामी महाधनश्च भवतीति BB.

९. VM. ignores उ and अग्ने ॥ उ इति पूरणः Sy. उ इत्यवधारणे । यस्मा एव यदर्थमेव BB.
The stanza=TS. 1.4.46.1.
Ms. D. puts the figure ॥४॥ here to indicate the end of the fourth hymn. No such number is given in P.

१०. 'सुसमिद्धाय' इत्येकादशर्चं पञ्चमं सूक्तमात्रेयस्य बहुश्रुतस्यार्षं गायत्रमिध्माश्वुक्तदेवताकम् । आप्रमित्युक्तत्वात्तन्नूनपाद्वर्जितम्। (Cf.KSA. 1.13. p. 6.) 'सुसमिद्धायाप्रं गायत्रम्' (KSA. 24.5. p. 19.) इत्यनुक्रमणिका। अत्रीणामिदमाप्रीसूक्तम्। 'समिद्धो अग्नेति सर्वेषां यथर्षिं वा' (ASS. 3.2.) इत्युक्तत्वात् Sy.

११. ०द्धय D.

१२. सुष्ठु समिद्धायंतश्नामकायाग्नये Sv. शोभनतया सम्यग् दीप्ताय साधु समिद्धाय U.

१३. ०तवत् P. आज्यम् Sy. घृतेन Mah.

१४. प्रभूतम् Sy. तीव्रं स्वादुतमं समग्रं वा पटुतरं वा। ग्रहणोद्वासनाधिश्रयणावेक्षणादिभिः संस्कृतमित्यर्थः Mah. तीव्रं पटुतरं गव्यं ग्रहणोद्वासनाधिश्रयणावेक्षणादिभिः संस्कारैः संस्कृतमित्यर्थः U.

१५. जुहोतन हे ऋत्विजः ! Sy. जुहुत Mah. कुरुत । नेत्यर्थका उपजना भवन्ति कर्तन हन्तन यातनेति U.

१६. अङ्गनादिगुणयुक्ताय Sy.

१७. जातधनाय Sy. जातं वेत्ति वेदयति वा जातवेदास्तस्मै जातप्रज्ञानाय वा Mah. जातप्रज्ञानाय U.

१८. VM. ignores शोचिषे ॥ दीप्तिमते Sy. अत एव शोचिषे शोचिष्मते दीप्तिमते ज्वलिताय Mah. शोचिषे शोचिष्मते ज्वलनाय U.
This stanza=YV. 3.2.

१९. ०नीयः is suggested for नीयं ॥ नरैः शंसनीयोऽयमग्निः Sy.

२०. रयसीति P. D. २१. इदं हविर्वा Sy.

२२. ०स्य P. ०स्या D. स देवः अर्हिस्यः केनापि Sy. २३. मेधावी Sy.

२४. मधुरहस्त्यः Sy.

ईळितो अग्न आ वहेन्द्रं चित्रमिह प्रियम् । सुखै रथेभिरूतये ॥ ३ ॥

ईळितः[1] । स्तुत[2] । अग्ने[3] ! आवह[4] । चित्रम्[5] । अस्मिन् यज्ञे । सुद्वारे[6] । रथै[7] । रक्षणाय[8] ।

ऊर्णम्रदा प्रथस्वाभ्यर्का अनूषत । भवा नः शुभ्र सातये ॥ ४ ॥

ऊर्णम्रदा[9] । हे ऊर्णवन्मृदु[10] ! त्वम् बर्हिरिव । विस्तीर्ण[11] भव । त्वा मन्त्राः[12] । अभ्यस्तुवन्[13] । भव । अस्माकम् । शोभन[14] ! मानाय[15] ।

देवीर्द्वारो वि श्रयध्वं सुप्रायणा न ऊतये । प्रप्र यज्ञं पृणीतन ॥ ५ ॥

देवीः[16] । हे देव्य[17] ! द्वार[18] ! विघटिता[19] भवत । सुप्रगमना[20] । अस्माकम् । रक्षणाय[21] । यज्ञ[22] च । प्रपूरयत[23] ।

सुप्रतीके वयोधा यह्वी ऋतस्य मातरा । दोषामुषासमीमहे ॥ ६ ॥

सुप्रतीके[24] । शोभनावयवे[25] । अन्नस्य वर्धयित्र्यौ । यज्ञस्य[26] । निर्मात्र्यौ । महत्यौ । रात्रिम्[27] । उषस[28] च । अभिलषित याचामहे[29] ।

---

१. स्तुतः सन् Sy.
२. ०हन् चि० P. ०हञ्चि० D.
चायनीयम् Sy.
३. सुखैः Sy.
४. अस्मद्रक्षणाय Sy.
५. VM. ignores इन्द्रम् and प्रियम् ।
६. ०र्णामृ० P. ०र्णम्मृ० D.
७. ०वामृदु P. ऊर्णाकम्बलवत् मृदु हे बर्हिः ! Sy.
८. प्रथय Sy.
९. स्तोतारः Sy.
१०. स्तुवन्ति Sy.
११. शोभ P.
हे दीप्त ! Sy.
१२. दानाय is suggested for मानाय ॥
धनाय तद्दानाय वा Sy.
१३. दे P.
१४. हे यज्ञस्य द्वाराभिमानिन्यः ! Sy.
१५. द्याविता P.
वियुक्ता भवत Sy.
१६. शोभनगमनसाधनाः Sy.
१७. रक्षायै Sy.
१८. यं P. यजमानम् Sy.
१९. पूरयत कामैर्यज्ञमेव वा फलैः Sy.
२०. VM. explains प्र once only.
२१. हे अह्नो रात्रेश्चाभिमानिन्यौ ! देव्यौ ! Sy.
२२. सुरूपे ! शोभनाङ्गे ! वा Sy.
२३. ०यव स्र० D.
२४. यज्ञस्य उदकस्य वा Sy.
२५. तयोर्मध्ये प्रत्येकं रात्रिदेवीम् Sy.
२६. अहर्देवीम् Sy.
२७. स्तुमः Sy.

वातस्य पत्मन्नीळिता दैव्या होतारा मनुषः । इमं नो यज्ञमा गतम् ॥ ७ ॥

वातस्य[1] । वातस्य[2] । पतनेऽन्तरिक्षे वर्तमानौ । स्तुतौ[3] । देव्यौ । होतारौ[4] । मनुष्यस्य[5] । युवाम् । अस्मदीयम्[6] । इमम् । यज्ञम् । आगच्छतम ।

इळा सरस्वती मही तिस्रो देवीर्मयोभुवः । बर्हिः सीदन्त्वस्रिधः ॥ ८ ॥

इळा सरस्वती । इमा[7] । तिस्र । देव्य । अक्षीणा । बर्हिरिदम्[8] । अधितिष्ठन्तु[9] ।[10]

शिवस्त्वष्टरिहा गहि विभुः पोष उत त्मना । यज्ञेयज्ञे न उदव ॥ ९ ॥

शिवस्त्वष्टः[12] । कल्याण[13] । त्वष्ट[14] । इह । आगच्छ । पोषणे[15] । ईश्वरस्त्वम्[16] । आत्मनैव[17] । यज्ञे[18] यज्ञे[19] । च[20] । अस्मान्[21] । रक्ष[22] ।

---

१. वस्ये P.

२. वातस्य पत्मन्—लप्तोपमैषा । वायुगमनसदृशगमनार्थम् Sy.

३. अस्माभिः स्तुतौ । यद्वा पतनसाधनेऽन्तरिक्षे गच्छन्तौ Sy.

४. देवादग्नेरादित्याच्च समुद्भूतौ Sy.

५. देवानामाह्वातारौ युवाम् Sy.

६. अस्माकम् । नो मनुषो यज्ञमिति व्यधिकरणे षष्ठ्यौ । अस्माकं यजमानस्य यज्ञमित्यर्थः Sy.

७. It is the explanation of इळा, सरस्वती and मही ॥ इळा पृथिवी । सरस्वती सर उदकम् । तस्मात् सरस्वान् वायुः । तस्य स्त्री सरस्वती । मही महती भारती भरतस्यादित्यस्य पत्नी । अत्र यद्यप्येषा नोक्ता तथापि सर्वत्र सहदृष्टत्वात्, त्रिसंख्याश्रवणाच्च सा गृह्यते । अथवैताः क्षित्यन्तरिक्षद्युस्थाना वाग्देव्यः Sy.

८. ०यो दक्षिणाः P. अहिंसिकाः सत्यः Sy.

९. बर्हिषि Sy.

१० उपविशन्तु Sy.

११ VM. ignores मयोभुवः ॥ मयोभुवः सुखस्य भावयित्र्यः Sy.

१२. ०स्तुष्टः D.

१३. कल्याः P. कल्या D. सुखकरः सन् Sy. सुखकरः BB.

१४. हे त्वष्टः ! देव ! Sy., BB.

१५. अस्मद्यज्ञम् Sy. अस्मिन् कर्मणि BB.

१६. पोषकरणे Sy. पुष्टयर्थमस्माकम् निमित्तात्सप्तमी BB.

१७. व्याप्तस्त्वम् Sy. व्याप्तिमान् BB.

१८. स्वयमेव Sy. आत्मना केवलेनापि, आत्मनाऽन्यनिरपेक्ष एव पोषं कर्तुं समर्थः BB.

१९. यज्ञ D. सर्वेषु यज्ञेषु Sy. सर्वस्मिन् यज्ञे BB.

२०. आगत्य च Sy.

२१. रक्ष Sy. पाहि प्रतियज्ञमुत्कृष्टं पाहीत्यर्थः BB. This stanza=TS. 3.1.11.2.

२२. VM. ignores उत् ॥ उत् उत्कृष्टम् Sy., BB.

यत्र वेत्थ वनस्पते देवानां गुह्या नामानि । तत्र हव्यानि गामय ॥ १० ॥

यत्र वेत्थ[1] । स्थितानां देवानाम् । गुह्यानि । इमानि[3] । तत्र गत्वा तैर्नामभिः । हव्यानि । तान् गमय[4] ।

स्वाहाग्नये वरुणाय स्वाहेन्द्राय मरुद्भ्यः । स्वाहा देवेभ्यो हविः ॥ ११ ॥

स्वाहा[6] । स्वाहुतमस्तु[7] । तेभ्यः[8] । देवेभ्यः । हविरपि वा स्वाहाकृणोमि[9] ।[10]

V. 6.

अग्निं तं मन्ये यो वसुरस्तं यं यन्ति धेनवः ।
अस्तमर्वन्त आशवोऽस्तं नित्यासो वाजिन इषं स्तोतृभ्य आ भर ॥ १ ॥

अग्निम्[11] । अग्निम् । तम् । स्तौमि[12] । यः[13] । वासयिता[14] । यज्ञं च गृहभूतम्[15] । धेनवः[16] । समागच्छन्ति[17] ।

---

१. अग्निहोत्रे उत्तराहुतिस्कन्दने 'यत्र वेत्थ' इत्यनया समिधमादध्यात् । सूत्रितञ्च 'यत्र वेत्थ वनस्पत इत्युत्तरस्या आहुत्याः स्कन्दने' (ĀSS. 3.11.) इति Sy.

२. वेथ P., D.

३. मानि P. नामानि is suggested for इमानि ॥ नामकानि रूपाणि Sy.

४. प्रापय Sy.

५. VM. ignores यत्र । वेत्थ and वनस्पते ॥ यस्मिन् स्थाने । हे वनस्पते ! यूपाभिमानिदेव ! Sy.

६. ०हां P. D. ७. ०मस्ते P. D.

८. तेभ्यः refers to अग्नये । वरुणाय । इन्द्राय and मरुद्भ्यः ॥ अग्न्यादिविश्वे देवाः, तेभ्यः Sy.

९. करोमीति शेषः, स्वाहुतं करोमीत्यर्थः, एवं स्वाहाकृतेः स्तुतिः Sy.

१०. Ms. D. puts the figure ॥५॥ here to indicate the end of the fifth hymn. No such number is given in P.

११. 'अग्निं तं मन्ये' इति दशर्चं षष्ठं सूक्तं वसुश्रुतस्यार्षमाग्नेयं पाङ्क्तम् । 'अग्निं तं दश पाङ्क्तम्' इत्यनुक्रमणिका (KSA. 24.6. p. 19.) । प्रातरनुवाके आग्नेये ऋतौ पाङ्क्ते छन्दस्याश्वनशस्त्रे चेदं सूक्तम् । 'अग्निं तं मन्य इति पाङ्क्तम्' (AŚS. 4.13.) इति हि सूत्रितम् । आश्वमेधिके मध्यमेऽहनीदमेव आज्यशस्त्रम् । सूत्रितञ्च 'अग्निं तं मन्य इत्याज्यं तस्यैकाहिकमुपरिष्टात्' (AŚS. 10.10.) इति । आद्य आभिप्लविकेषूक्थ्येषु मैत्रावरुणस्यानुरूपस्तृचः । सूत्रितञ्च—'अग्निं तं मन्ये यो वसुराग्ने स्थूरं रयिं भर' (AŚS. 7.8.) इति Sy.

१२. जानामि Mah. जाने U.

१३. अग्निः Sy.

१४. वासकः Sy. तापपाकप्रकाशैरुपकुर्वन् धनरूपो वसुरित्युच्यते । वसुर्वासयिता वा Mah. तापपाकप्रकाशैरुपकुर्वन् धनमित्युच्यते । यद्वा वसुर्वासयिता U.

१५. सर्वेषां गृहवदाश्रयभूतम् Sy. गृहम् Mah., U.

१६. धेनवो गावो यमग्निमुद्भृतं ज्ञात्वा Mah., U.

१७. गच्छन्ति प्रीणयितुम् Sy. गच्छन्ति दोहकालोऽस्माकं होमार्थं प्राप्त इति Mah. प्राप्तोऽस्माकं दोहदकाल इति....यन्ति U.

तथाश्वाश्च[1]। शीघ्रगन्तारः[2]। अजस्राः[3]। बलवन्तः[4]। त्वमन्नम्[5]। स्तोतृभ्यः[6]। आभर[7]।[8]

सो अग्निर्यो वसुर्गृणे सं यमायन्ति धेनवः।
समर्वन्तो रघुद्रुवः सं सुजातासः सूरय इषं स्तोतृभ्य आ भर ॥ २ ॥

सो अग्निः[9]। यः। गमनशील[10]। स्तूयते[11]। यश्च। निवसन्[12]। य च[13]। समागच्छन्ति[14]। धेनवः। सम्[15]। अश्वाः। शीघ्र गच्छन्ति[16]। सह गच्छन्ति[17]। शोभनजननाः[18]। प्राज्ञाः[19]।[20]

---

१. अरणवन्तोऽश्वाः Sy. अश्वा यं वृष्ट्वाऽस्तं यजमानगृहं यन्ति गच्छन्ति Mah. स्वामी हि पशूनामग्निः। यत्तज्जातः पशूनविन्दतेत्युपक्रम्य 'तस्मात्सर्वानृतून्पशवोऽग्निमभिसंयन्ति इति श्रुतिः U.

२. शीघ्रगामिनः Sy., Mah. शीघ्राः U.

३. तथा नित्यप्रवृत्तयः Sy. नित्याः शाश्वताः सर्वकालभाविनः Mah. शाश्वतिकाः U.

४. हविर्लक्षणान्नवन्तो यजमानाः यमस्तं यान्ति तं मन्ये Sy. बलवन्तोऽश्वाः। सैन्धवाभिप्रायेण पुनर्वचनम्। यं वृष्ट्वाऽस्तं यन्ति। यमुपास्य गवाश्वादिकं लभ्यत इत्यर्थः Mah. सुहयाः। सैन्धवाभिप्रायमेतत्। य उपास्यमान एतत् सर्वं यजमानस्योत्पादयति तमग्निं मन्ये U.

५. बन्त रल वन्तस्त्वम् P.
यदि स त्वमग्निः U.

६. अस्मभ्यम् Sy. स्तुतिकारिभ्यो यजमानेभ्यः Mah.

७. आभर अग्ने Sy.
देहि Mah., U.

८. VM. ignores यम् and explains अस्तम once only. This stanza=YV. 15.41.
तस्य प्रातः सवनम्। अग्निं तं मन्ये यो वसुरिति होता पाऽक्तमाज्य ँ शस्त्रवैकाहिकमुपस ँ शꣳसति बार्हतं च प्रउगं माधुच्छन्दसं च त्रिचश उभे सꣳ शꣳसति यश्च बार्हते प्रउगे कामो य उ च माधुच्छन्दसे तयोरुभयोः कामयोराप्त्यै क्लृप्तं प्रातःसवनम्। ŚB. 13.5.1.8. p. 988.

९. सोग्निः D.

१०. VM. seems to explain सः as यः and अग्निः as गमनशीलः॥ स खल्वग्निः Sy.

११. स्तौमि 'गृ? (गृ)शब्दे' स्वादिः? (त्रचादिः)... यद्वा सोऽग्निर्गृणे स्तूयतेऽस्माभिः। कर्तृप्रत्ययस्य कर्मत्वं विधेयम् Mah. गीयते स्तोतृभिः U.

१२. VM. seems to explain वसुः as निवसन्॥ योऽग्निर्वसुर्वासयिता सोऽग्निः। विभक्तिव्यत्ययः। तमग्निम् Mah. स एवाग्निर्यो वसुरिति U.

१३. यमग्निम् Mah.

१४. समायन्ति होमार्थम् Sy.

१५. It should come immediately before गच्छन्ति। समायन्ति होमार्थम् Sy.

१६. VM. explains रघुद्रवः as शीघ्रं गच्छन्ति। लघुगमनाः Sy. रलयोरैक्यम्। 'लघु क्षिप्रमरं द्रुतम् (Amar. 1.128.) लघु शीघ्रं द्रुवन्ति गच्छन्ति लघुद्रुवः, 'द्रु वधगत्योः' स्वादिः? (cf. द्रु द्रु गतौ भ्वादिः, द्रुञ् हिंसायाम्, त्रचादिः) Mah. लघुद्रवणाः U.

१७. समायान्ति Sy. यदुपासकं सर्वे भजन्त इत्यर्थः Mah.

१८. सुजातासः Sy. शोभनं जातं जन्म येषां ते सुजातासः सुजाताः Mah. कल्याणजन्मानः U.

१९. मेधाविनश्च स खल्वग्निरिति Sy. सूरयः पण्डिताः। एतदुक्तं भवति। किं तेनाग्निना य एतत्सर्वमात्मद्वारा यजमानस्य नोपनयति। स चेत् त्वम्। इषं स्तोतृभ्य आभर U.

२०. This stanza=YV. 15.42.

अग्निर्हि वाजिनं विशे ददाति विश्वचर्षणिः ।
अग्नी राये स्वाभुवं स प्रीतो याति वार्यमिषं स्तोतृभ्य आ भर ॥ ३ ॥

अग्निर्हि । अग्नि । हि । अश्वम् । मनुष्याय । प्रयच्छति । विश्वस्य द्रष्टा । अग्नि । धनार्थम् । शोभनभवनम् । वरणीय हविः । गच्छति । सु । प्रीत ।

आ ते अग्न इधीमहि द्युमन्तं देवाजरम् ।
यद्ध स्या ते पनीयसी समिद्दीदयति द्यवीषं स्तोतृभ्य आ भर ॥ ४ ॥

आ ते अग्ने । हे अग्ने ! तव । दीपयाम । दीप्तिमन्तम् । जरारहित भानुम् । यत् । खलु । त्वदीय तेज । इयम् । समित् । अह्नि । सन्दीपयति । स्तुत्या । तमाम् ।

आ ते अग्न ऋचा हविः शुक्रस्य शोचिषस्पते ।
सुश्चन्द्र दस्म विश्पते हव्यवाट् तुभ्यं हूयत इषं स्तोतृभ्य आ भर ॥ ५ ॥

आ ते अग्ने । हे शुक्रस्य, शोचिष, पते ! अग्ने ! तुभ्यम् । ऋचा । हवि. । आहूयते । हे सुकान्त ! दर्शनीय ! विशा पते ! हविषा वोढ ! हविस्तुभ्यम् । हूयते ।

---

१. ०ग्नि D. अयमग्निः Sy.
२. खलु Sy.
३. अश्ववन्तं पुत्रमश्वमन्नं वा Sy.
४. यजमानाय Sy. ५. ददाति Sy
६. विश्वे चर्षणयो मनुष्या रक्षणीया अर्चका वा यस्य स तथोक्तः । यद्वा पश्यतिकर्मैतत् । सर्वस्य द्रष्टा Sy.
७. धनार्थिने । अथवा द्वितीयार्थे चतुर्थी, धनम् Sy.
८. सुष्ठु सर्वत्र व्याप्तम् Sy.
९. सर्वैर्वरणीयम् Sy.
१०. यमयति । दातुं वा गच्छति Sy.
११. सः is suggested for सु ।
१२. प्रीतः सन् Sy.
१३. आभिप्लविकेषूक्थ्येषु तृतीयसवने स्तोत्रियतुचस्य 'आ ते अग्न इधीमहि' इत्यादिके प्रथमाद्वितीये । सूत्रितञ्च भवति—'आ ते अग्ने इधीमह्यभे सुचन्द्रसर्पिष इति द्वे एका च' (ĀSS. 7.8.) इति Sy.
१४. त्वाम् Sy. १५. बाहुं P. अजीर्णम् Sy.
१६. तव Sy १७. इदं D. सा Sy.
१८. दीप्तिः Sy. १९. द्युलोके Sy.
२०. दीप्यते Sy.
२१. तमाम् seems to be a part of the verb सन्दीपयति, i.e. the verb should be read as सन्दीपयतितमाम् as an explanation of दीदयति ।
२२. VM. ignores आ and देव ॥ and आ सर्वतः Sy. २३. दीप्तस्य Sy.
२४. दीप्तेः Sy. २५. स्वामिन् ! Sy.
२६. ऋचा D. मन्त्रेण सह Sy.
२७. हूयते Sy.
२८. सुकर्मन P. सुष्ठ्वाह्लादक ! शोभनहिरण्य ! वा Sy.
२९. हे शत्रूणामुपक्षपयितः ! Sy.
३०. प्रजानां पालक ! Sy.
३१. वोढा D. हविषो वोढः ! Sy.

प्रो त्ये अग्नयोऽग्निषु विश्वं पुष्यन्ति वार्यम् ।
ते हिन्विरे त इन्विर त इषण्यन्त्यानुषगिषं स्तोतृभ्य आ भर ॥ ६ ॥

प्रो त्ये । प्रपुष्यन्ति । तेऽमी मदीया । अग्नयः । अग्नीनां मध्ये । वरणीयं धनम् । सर्वम् । ते । धनं प्रेरयन्ति । तेऽस्मान् । प्रीणयन्ति । तेऽस्माकम् । अन्नम् ।, अनुपक्तम्, इच्छन्ति ।

तव त्ये अग्ने अर्चयो महिं वाधन्त वाजिनः ।
ये पत्वभिः शफानां व्रजा भुरन्त गोनामिषं स्तोतृभ्य आ भर ॥ ७ ॥

तव त्ये । तव । त्ये । अग्ने । अर्चय । अत्यन्तम् । वर्धयन्ति । बलवन्तः । ये । शफानाम् । पतनैः । गवाम् । व्रजाः । आगच्छन्ति तान् प्रयच्छन्ति पशूनित्यर्थः ।

नवा नो अग्न आ भर स्तोतृभ्यः सुक्षितीरिषः ।
ते स्याम य आनृचुस्त्वादूतासो दमेदम इषं स्तोतृभ्य आ भर ॥ ८ ॥

नवा नः । नवाः । अस्मभ्यम् । आभर । अग्ने । स्तोतृभ्यः । सुप्रजाः । इषः । ते वयं समृद्धाः । भवाम । ये त्वाम् । आनृचुः । यज्ञे यज्ञे । त्वं दूतो येषामिति ।

---

१. त्यो P.
२. प्रो प्रेव Sy.
३. धिष्ण्याः Sy.
४. गार्हपत्यादिषु । यद्वा लौकिका अग्नयस्तेजःपदार्थोऽग्निषु वैदिकेषु Sy.
५. वरणीयमपेक्षितं धनं पुष्यन्ति Sy.
६. अग्नयः Sy.
७. ०ति D. प्रीणयन्ति Sy.
८. तस्मात् D.
९. ०ति णि D. प्रीणयन्ति is suggested for प्रीणयति ॥ व्याप्नुवन्ति च Sy.
१०. VM. seems to explain इषण्यन्ति and आनृषक् together as अन्नमनुषक्तमिच्छन्ति ॥ सर्वत्रानुषक्तम् । तत्राग्निसामान्याभिप्रायेणैकवचनम् Sy.
११. त्वदीयाः Sy.
१२. ते Sy.
१३. रश्मयः Sy
१४. महदत्यधिकम् Sy.
१५. वर्धन्ते Sy
१६. ०वतः P. Omitted by D. अन्नवन्तो वा । यद्वा लुप्तोपमा वाजिनोऽश्वा इव Sy.
१७. यूथानि Sy.
१८. भुरन्त इच्छन्ति । आयाता ज्वाला होमाय काङ्क्षन्त इत्यर्थः । ते वर्धन्ते Sy.
१९. स्तुत्या नूतना वा Sy
२०. प्रयच्छ Sy.
२१. सुनिवासाः सुप्रजा वा Sy.
२२. उक्तलक्षणान्यन्नानि Sy.
२३. भूयास्म । दमेदमे स्यामेति वा योज्यम् Sy.
२४. ये वयम् (?) Sy.
२५. अनृ० P. अर्चयन्ति Sy.
२६. सर्वेषु यागगृहेषु Sy.
२७. त्वां दूतं फलसूचकं लब्धवन्तः सन्तः Sy.

उ॒भे सु॑श्चन्द्र स॒र्पिषो॒ दर्वी॑ श्रीणीष आ॒सनि॑ ।
उ॒तो न॒ उत्पु॑पूर्या उ॒क्थेषु॑ शवसस्पत॒ इषं॑ स्तो॒तृभ्य॒ आ भ॑र ॥ ९ ॥

उभे सुश्चन्द्र । जुहूपभृतौ । सुकान्त ! सर्पिष. पूर्ण । त्वामास्ये । श्रयसि । अपि च । अस्मान् । उत्पूरय । शवस. । पुत्र !

ए॒वाँ अ॒ग्निम॑जुर्यमु॒र्गीभि॑र्य॒ज्ञेभि॑रानु॒षक् ।
दधदु॒स्मे सु॒वीर्य॑मु॒त त्यदा॒श्वश्व्यं॑ मि॒षं स्तो॒तृभ्य॒ आ भ॑र ॥ १० ॥

एवाँ अग्निम् । एवम् । अग्निम् । अस्तुवन् , अपि वा स्तुवन्ति यच्छन्तीत्याख्यात द्वेजय पदम् ।

---

१. आभिप्लविकेषूक्थ्येषु तृतीयसवने वैकल्पिकस्तोत्रियतृचे 'उभे सुश्चन्द्र' इत्येषा तृतीया । सूत्रमुक्तम् (Cf. Ā. S. 7.8.) Sy.

२. दर्व्याकारौ हस्तौ Mah. उभौ हस्तौ दर्व्याकारौ कृत्वा U. दर्वी हनू सर्पिषः सम्बन्धिन्यौ सर्पिस्संसिक्ते । दीर्यते भक्ष्यतेऽनेनाभ्यामिति दर्वी ते BB.

३. हे शोभनाह्लादन ! शोभनहिरण्य वाग्ने ! Sy. चन्द्रमिति हिरण्यनाम (Ngh. 1.2.) शोभनं चन्द्रं हिरण्यं यस्मात् । यद्वा शोभनश्चन्द्र इव चन्द्रो धनदाता । शोभने चन्द्रे धनप्राप्तिर्भवतीति ज्योतिश्शास्त्र उक्तम् । यद्वा शोभनं चन्द्रत्याह्लादयति सुचन्द्रः । हे सुचन्द्र ! Mah. शोभनचन्द्र इव धनानामुत्पादक ! शोभने हि चन्द्रमसि धनान्युत्पद्यन्त इति ज्योतिश्शास्त्रविदः प्रतिजानन्ति । यद्वा कल्याणाह्लादन ! U. हे सुश्चन्द्र ! सुकान्त ! BB.

४. घृतस्य पानाय Mah.
सर्पिषः पानाय U.

५. आस्ये मुखे । सर्पिषः पानायेति शेषः Mah. आस्ये मुखे U. आस्ये BB.

६. श्रयसि पचसि वा Sy. आश्रयसि सेवसे । 'श्री पाके' क्र्यादिः । अत्राश्रयार्थः Mah. आश्लेषसि U. सदा सेवसे । यद्वा, उभे दर्वी सर्पिषः श्रीणीषे, सर्पिः प्रापयसि, सर्पिषा मिश्रीकुरुष्व BB.

७. नोऽस्मान् Mah. अस्माकम् BB.

८. उत्पूरय फलैः Sy. उत्कर्षेण पूरय धनैरिति शेषः Mah. अपि च त्वं ब्रूषे यदि नामोत्क्षिप्य सर्पिषो भाण्डमत्यर्थमञ्जलि पूरयेरस्माकं साधु कृतं स्यात् U. उच्छ्रितं पूरय, सामर्थ्याद् धनं बलमेव वा, अविशेषणात् सर्वम् । अनिरुक्तत्वात् प्रजापतिरामन्त्र्यते । 'पूरी आप्यायने' BB.

९. हे बलस्य पालयितः ! Sy. बलस्याधिपते ! Mah. बलस्य पते ! U. बलस्य पातः ! BB.

१०. VM. ignores उभे and उक्थेषु ॥ यागेषु Sy. उक्थेषु शस्त्रवत्सु यज्ञेषु Mah. उक्थेषु यज्ञेषु U. उक्थेषु स्तोत्रवत्सु यज्ञेषु इषमन्नं स्तोतृभ्य आभर स्तोतृभ्य ऋत्विग्भ्य आभर BB.
This stanza=YV. 15.43.=TS. 2.2.12.7.

११. एषामग्नि D. एषां अग्नि P.

१२. यम् P. एषाम् D.
उक्तरीत्या Sy.

१३. स्तु० D. गच्छन्ति Sy.

१४. गच्छन्ति तथा कृत्वा यमुः यमयन्ति स्थापयन्ति । हविर्भिर्यजन्तीत्यर्थः । एवमात्रेयाः स्वान् परोक्षतया निर्दिशन्ति । अजुर्यमुरित्यत्र 'आख्यातमाख्यातेन क्रियासातत्ये' (Cf. Pa. 2.1.79.) इति समासः Sy.

१५. oत P.

१६. द्विजातं is suggested for द्वेजयम् ।

स्तुतिभिः । हविर्भिश्च । अनुषक्तम् । स त्वं दधत् । अस्मभ्यम् । शोभनवीर्यम् । अपि च । आशुगन्तारमश्वसङ्घम् । अपि वा द्वे एते पदे 'अजुः' 'यमु.' इति तत्र द्वितीयस्यापि निघातो दृष्टो यथा हिरण्यकर्ण मणिग्रीवमिति नाम्न ।

V. 7.

सखायः सं वः सम्यञ्चमिषं स्तोमं चाग्नये ।
वर्षिष्ठाय क्षितीनामूर्जो नप्त्रे सहस्वते ॥ १ ॥

सखायः सं वः । हे सखाय ! सम्प्रयच्छत । यूयम् । समीचीनम् । स्तोमम् । अन्नम् । च ।

---

१. यज्ञैर्वा तत्साधनैर्हविर्भिर्वा Sy.

२. धारयति Sy.

३. अस्मासु Sy.

४. शोभनपुत्रादिकम् Sy.

५. आशवोऽश्वा यस्य भवन्ति स आशवश्वः । तस्य भाव आशवश्व्यं तदपि Sy.

६. ०कर्ष P. ०कण्ठं D.

७. VM. ignores त्यत् । इषम् etc. त्यत् तत् Sy.
Ms. D. puts the figure ॥६॥ here to indicate the end of the sixth hymn. No such number is given in P.

८. 'सखायः सं वः' इति दशर्चं सप्तमं सूक्तम् । आत्रेय इष ऋषिः । अन्त्या पङ्क्तिः, शिष्टाः पङ्क्त्यन्तपरिभाषयानुष्टुभः । तथा चानुक्रान्तम् —'सखाय इषः पङ्क्त्यन्तम्' (KSA. 24.7. p. 19.) इति । प्रातरनुवाके आग्नेये क्रतावानुष्टुभे छन्दस्याश्विनशस्त्रे चोत्तमावर्जमिदं सूक्तम् । सूत्रितञ्च—'सखायः सं वस्त्वामग्ने हविष्मन्त इति सूक्ते' (ĀŚS. 4.13.) इति Sy.

९. P. and D. read इषः for सं वः ।

१०. हे सखिभूताः ! ऋत्विजः ! Sy. ऋत्विजः प्रति यजमानो ब्रूते—हे सखायः ! ऋत्विजः ! Mah. यजमान ऋत्विजः सम्बोधयति हे सखायः ! U. समानख्यानाः ! ऋत्विग्यजमानाः ! BB.

११. सं is omitted by P. संस्कुरुत । उपसगश्रुतेर्योग्यक्रियाध्याहारः Sy. सम्पादयत । अग्न्यर्थं हविः कुरुत । त्रिवृत्पञ्चदशादिस्तोम च वदतेत्यर्थः । समित्युपसर्गस्यापेक्षितः क्रियाशब्दोऽध्याहर्तव्यः Mah. सङ्गत्य शृणुत U. समारभध्वं कुरुत । एतत्क्रियाया अश्रुतत्वात्साकाङ्क्षत्वादुपसर्गसामर्थ्यादुत्तरस्मिंश्च मन्त्रे विशेषस्य श्रुतत्वात् । तत्रायं विवेकः—अग्न य इषं स्तोमं च संहराम इत्यत्रोच्यते । सोऽग्निरस्मभ्यं विश्वानि वसूनि समाहरत्वित्युत्तरत्र वक्ष्यते BB.

१२. व्यत्ययेन प्रथमास्थाने द्वितीयाबहुवचनं कृत्वा वसादेशो व इति Mah. वो युष्मान् ब्रवीमि U. वो युष्मदर्थं युष्माकं श्रेयोऽर्थमस्मासु BB.

१३. सम्यञ्चम् Sy. सङ्गतमेकीभूतम् U. समीचीनमतिगुणम् BB.

१४. स्तोत्रम् Sy. स्तोमं चाग्नये Mah. स्तोमं च त्रिवृत्पञ्चदशादि U. स्तोत्रम् BB.

१५. अन्नम् is suggested for अन्तम् । हविर्लक्षणमन्नम् Mah., U. अन्नं पुरोडाशादिकं हविश्च BB.

अग्नये[1] । प्रजाम्[2] । अत्यन्त[3] वर्षित्रे । अन्नस्य[4] । पौत्राय[5] । बलवते[6] ।

कुत्रा चिद्यस्य समृतौ रण्वा नरो नृषदने[7] ।
अर्हन्तश्चिद्यमिन्धते[8] संजनयन्ति जन्तवः[9] ॥ २ ॥

कुत्रा[10] चित् । भवति[11] । यस्य । सङ्गमने[12] । नरः । रममाणाः[13] । नृणा सदने[14] गृहे वर्तन्ते । यम्[15] । च ।
अर्हन्तो[16] यजमानाः । समिन्धते[17] । सङ्गताः जनयन्ति[18] च । जाताः, यामिति[19] ।[20] [21]

सं यदिषो वनामहे सं हव्या मानुषाणाम् ।
उत द्युम्नस्य शवस ऋतस्य रश्मिमा ददे ॥ ३ ॥

सं यदिषः[22] । सम्भजामहे[23] । यदा । अन्नानि । ददेवाह—सवनामिहे[24][25] । हवनीयानि[26] हवींषि ।

---

१. अग्ने P. अग्नये भरत U.
२. प्रजानाम् is suggested for प्रजाम् ॥ यजमानानामर्थाय Sy. मनुष्याणाम् । क्षियन्ति निवसन्ति भूमाविति क्षितयो नराः कर्तरि क्तिन् Mah.
निवासहेतूनां मध्येBB.
३. अतिशयेन प्रवृद्धाय प्रवृद्धतमाय Sy. श्रेष्ठाय वृद्धतमाय । सर्वपूज्यायेत्यर्थः Mah. पृथुतमाय U. प्रवृद्धतमाय BB.
४. अन्न P. बलस्य Sy. ऊर्जो जलस्य Mah. अपाम् U.
५. न पातयित्रे तत्पुत्राय वा Sy. अद्रुघो वनस्पतयो जायन्ते तेभ्योऽग्निरित्यपां पौत्रोऽग्निः Mah. अद्रुघ ओषधिवनस्पतयो जायन्ते ताभ्योऽग्निः U. नप्त्रे चतुर्थाय यथाऽऽज्याहुतिः, आहुतेरादित्य आदित्यादग्निरिति BB.
६. बलवते संस्कुरुतेति Sy. सहो बलमस्यास्तीति Mah. अतिशयेन बलवत ईदृशायास्मै BB.
७. This stanza =YV. 15.29.=TS. 2.6.11.4.
८. कुत्र P., D.
९. सोऽग्निः कुत्र वर्तत इति शेषः । कुत्रास्ते ? Sy. कुत्रचिदपि सर्वत्रापीति यावत् BB.
१०. अग्नेः Sy.
११. सम्प्राप्तौ Sy. BB.
१२. नेतार ऋत्विजः Sy. मनुष्याः BB.
१३. ममाणाः P रमणा भवन्ति । रणनवन्तो वा गतिमन्तो वा 'रवि गतौ' BB.
१४. यागगृहे Sy. नरास्सीदन्ति यत्र यत्र सर्वत्र प्रदेशे BB.
१५. यमेवाग्निम् BB.
१६. अर्हन्तो is suggested for अहन्तो ॥ पूज्याः पूजयन्तो वा सन्तः Sy. महन्तः पूजयन्तो वा मनुष्याः BB.
१७. दीपयन्ति Sy., BB.
१८. सञ्जनयन्ति च अरण्याम् Sy. आधानादिना सम्यगुत्पादयन्ति BB.
१९. प्राणिनः Sy. यमग्निं जन्तवो मनुष्याः BB.
२०. यम् is suggested for याम् ।
२१. VM. ignores कुत्रा and चित् ॥ चिदिति पूजायाम् Sy.
This stanza=TS. 2.1.11.3.
२२. यमिषः D.
२३. सभ० D.
२४. तदेवाह is suggested for ददेवाह ।
२५. संवनामहे is suggested for संवनामिहे ॥ संसेवते Sy.
२६. वननीयानि P.

यजमानानाम्[1]। तदानीमयम्[2]। अन्नस्य[3]। बलस्य[4] च साधयितारम्। यज्ञस्य सम्बन्धिनम्[5]। रश्मिम्[6]। आदत्ते[7] इति।

स स्मा कृणोति केतुमा नक्तं चिद्दूर आ सते।
पावको यद्वनस्पतीन्प्र स्मा मिनात्यजरः॥ ४॥

स स्मा कृणोति। स[8]। खलु[9]। कृणोति। प्रज्ञानम्। रात्रौ। अपि[10]। दूरे। अपि[11]। आसीन[12]। अय पावक[13]। यदा। काष्ठानि[14]। प्रकर्षेण हिनस्ति[15]। समिद्ध[16]।

अव स्म यस्य वेषणे स्वेदं पथिषु जुह्वति।
अभीमह स्वजेन्यं भूमा पृष्ठेव रुरुहुः॥ ५॥

अव स्म[17]। अवजुह्वति[18] भूम्याम्। मार्गेषु[19] स्थिता वनस्पतय। दावरूपस्य[20]। व्याप्तौ[21]। स्वेदजलम्[22]। तेन[23] दग्ध्वा[24] अपि स्वभूतजायमानपदार्थान्[25]। भूमिम्। एनाम्[26]। पुनश्चाभ्याहारोहयन्ति[27]। एव। यथाश्वपृष्ठान्यश्वारोहा[28]।

---

१. मनुष्याणामस्माकम् Sy
२. ०नी यम् P.
३. द्योतमानस्यान्नस्य Sy.
४. बलेन सामर्थ्येन Sy
५. उदकस्य ग्राहकम् Sy अस्माकमस्य ऋतस्य सत्यस्य BB
६. रश्मिमिममग्निम् BB.
७. आदत्तेऽग्निः। फलजनक तेजः स्वीकृतवान् यद्वा ऋतस्य यज्ञस्य रश्मिं रश्मिवत् ग्राहक स्तवम्, आददे स्वीकरोति Sy. आदवीमहे। वचनव्यत्ययः। आश्रयामह इत्यर्थः BB This stanza=TS. 2.1 11 3.
८. अग्निः Sy.
९. सः। खलु and कृणोति are omitted by P. करोति Sy.
१०. VM. seems to explain आ as अपि॥ आ सर्वतः Sy.
११. चिदप्यर्थे Sy.
१२. वर्तमानाय मनुष्याय Sy.
१३. अयमग्निः Sy
१४. एधांसि Sy.
१५. प्रकर्षेण दहति Sy.
१६. अजीर्णोऽनभिभाव्यः सन् Sy.
१७. VM. ignores स्म॥ स्मेति पूरणः Sy.
१८. भव स्म D भवन् P.
१९. अपजु० P अधोमुख जुह्वति अध्वर्यवः Sy
२०. होममार्गेषु रश्मिषु Sy.
२१. दा वरुणस्य P दावरूपस्य seems to be the explanation of यस्य which stands for अग्नेः।
२२. परिचर्यायाम् Sy.
२३. स्रवदाज्यम् Sy.
२४. P. reads ते तेन ते for तेन।
२५ दग्धाः is suggested for दग्ध्वा।
२६. ०मानाः पदार्थं P. स्वोत्पन्नम् Sy
२७. बहु भवतीति भूमापत्यम्। तत् Sy.
२८. तदानीमेनमग्निम् Sy.
२९. अभ्यारोहन्त्येवाज्यधाराः Sy.
३०. अह इति विनिग्रहार्थीयः Cf. N. 1.5.
३१. पृष्ठेव। पितुः पृष्ठवेशानिव, पुत्रा यथा पितुरङ्कमारोहन्ति तद्वत् Sy.
३२. VM. ignores स्म।

यं मर्त्यः[1] पुरुस्पृहं[2] विदद्विश्वस्य[3] धायसे[4]।
प्र स्वादनं[5] पितूनामस्तंतातिं[6] चिदायवे[7] ॥ ६ ॥

यं मर्त्याः[8]। यम्। मनुष्या। बहुभि स्पृहणीयम्। प्रविदन्ति। विश्वस्य। धारणार्थम्। अन्नानाम्। स्वादुकर्तारम्[9]। च। मनुष्याय। निरस्तधनम् —दत्तधनमुत्तरत्र सम्बन्धः।

स हि ष्मा[10] धन्वाच्चितं[11] दाता न दात्या पशुः[12]।
हिरिश्मश्रुः[13] शुचिदन्नृष्वरनिभृष्टतविषिः[14] ॥ ७ ॥

स हि ष्म[15]। सः। हि। खलु। निरुदक देशम्। वनस्पतिभिरधिष्ठितम्। छेत्ता[16]। इव। आच्छिनत्ति[17]। पशुरित्यग्निमाह[18]। हरितवर्णज्वाल। शुचिदन्[19]। दीप्यमानः[20]। अनवभ्रष्टबल.।

शुचिः ष्म[21] यस्मा अत्रिवत्प्र स्वधितीव[22] रीयते[23]।
सुपूरंश्चत[24] माता क्राणा[25] यदानशे[26] भगम्[27] ॥ ८ ॥

शुचिः। शुचि—भानु[28]। यस्मा अग्नये। अदनीययुक्ता भूमिम्। परशुरिव छिन्दन्[29]। प्रगच्छति तम्। सुषू[30]। मातौषधि[31]। असूत। कर्म कुर्वाणा। यत्। एनं भजनीय पुत्रम्। व्याप्तवती तस्मात् सुसूतिरिति।

---

१. यं मर्त्याः omitted by P. VM. reads मर्त्याः for मर्त्यः of the Vedic hymn.
२. अग्निम् Sy.
३. ०ष्यो P. यजमानः Sy.
४. वेत्ति Sy.
५. सर्वस्य Sy.
६. व्यापारार्थम् Sy.
७. प्रकर्षेण स्वादूकर्तारम् Sy.
८. चित् पूरणः Sy.
९. अन्नार्थं यजमानार्थं वा Sy.
१०. ०न P. अस्ते गृहे निवासकर्तारम् Sy.
११. अग्निः Sy.
१२. निरुदकं प्रदेशम् Sy.
१३. तृणकाष्ठादिभिराक्षिप्तम् Sy.
१४. तृणादि खण्डयिता Sy.
१५. सर्वतः खण्डयति दहतीत्यर्थः Sy.
१६. पशुरिव पशुर्यथा तृणजातं क्रमेण भक्षयति तद्वत् Sy.
१७. हिरण्यश्मश्रुः Sy.
१८. दीप्तदन्तः Sy.
१९. उरु भवन्। महानित्यर्थः Sy.
२०. अनवभ्र० D. अपीडितबलः Sy.
२१. अयमग्निः शुचिः दीप्तः Sy.
२२. अत्रिरिव यजमानो हविर्वातुम् यद्वा शुचिर्यस्मै। प्रथमार्थे चतुर्थी। दीप्तो योऽत्रिवत्, अत्ति तृणमित्यत्रिः पशुः। स इव। स यथा तृणानि खादमानो गच्छति तद्वद्हतीत्यर्थः Sy.
२३. द्यित् P.
२४. सुप्रसवा Sy.
२५. मातोतोषधीः P. अरणिः Sy.
२६. ०णः P. कुर्वाणं जगदुपकारकम् Sy.
२७. यस्माद्य इति वा। योऽग्निः Sy.
२८. भगम् अन्नम् Sy.
२९. अश्नुते Sy. ३०. सुसूतीति P.
३१. VM. ignores स्म ॥ खलु यद्वा स्मेति पूरणः Sy.

आ यस्ते सर्पिरासुतेऽग्ने शमस्ति धायसे ।
ऐषु द्युम्नमुत श्रव आ चित्तं मर्त्येषु धाः ॥ ९ ॥

आ यस्ते । आधेहि तम् । यः[1] । ते[2] । हे सर्पिरासुते ! सर्पिर्यस्मिन्नासूयते हूयते । अग्ने ! शमयिता-रोहणम्[3] । अस्ति रस्मि[4] । तद्धारणार्थम् । तर्थष[5] । द्योतमानम् । अन्नम्[6] । त्वदीय वित्तम्[7] । च । आधेहि । मनुष्येषु[8] ।

इति चिन्मन्युमधिजस्त्वादातमा पशुं ददे ।
आदग्ने अपृणतोऽत्रिः सासह्यादस्यूनिषः सासह्यान्नॄन् ॥ १० ॥

इति चित् । इति[13] । चित् । पूज्यम्[14] । अत्रिकुलजात छान्दसो धकार । त्वया[15] दत्तम् । पशुम् । आददे[16] । अनन्तरम्[17] । अग्ने ! अप्रयच्छत[18] । दस्यून्[19] । अयमात्रेय[20] । इष ऋषि[21] । भिर्भवतु[22] । मनुष्यान्[23] ।

---

१. D. reads **अयन्ते** for **आयस्ते**

२. **यस्त्वम्** Sy.

३. **तुभ्यम्** Sy

४. **सर्पिर्यस्मिन्** is suggested for **सर्पिय-स्मिन् ॥ हे घृताख्यान्न** ? Sy.

५. **शं सुखमस्ति । स्तुतेः सकाशात्** Sy.

६. **रश्मिः** is suggested for **रस्मिः ।**

७. **सर्वस्य धात्रे** Sy.

८. **तर्थषु** is suggested for **तर्थष । स्तोतृ-ष्वात्रेयेषु** Sy.

९. **द्युम्नं यशः** Sy.

१०. **०य** P.

११. **चित्तम्** is suggested for **वित्तम् । त्वदीयामनुग्रहबुद्धिमपि** Sy.

१२. VM. ignores **आ ॥ सर्वतो भवसि** Sy.

१३. **इत्थं कृतप्रकारेण** Sy.

१४. **मन्युं मननसाधनं स्तोत्रम्** Sy.

१५. **अधिजः अधृतमन्यैरग्निव्यतिरिक्तैर्दुधृष्यं वा जनयिता ऋषिः** Sy.

१६. **त्वया दातव्यम्** Sy.

१७. **आदत्ते । आददीत वा** Sy

१८. **अनन्तरमेव** Sy.

१९. Sy. seems to read **अग्नेः** for **अग्ने** of the Vedic hymn.

२०. **अददतः** Sy.

२१. **नस्यून्** P.

२२. **तद्गोत्रः** Sy.

२३. **अभिभवतु** is suggested for **भिर्भवतु भृशमभिभवेत्** Sy.

२४. **इष एष्टृन् विरोधिनः** Sy.

२५. VM. explains **ससह्यात्** once. **॥ पुन-रुक्तिरादरार्था** Sy.

Ms. D. puts the figure **॥८॥** here to indicate the end of the seventh hymn. No such number is given in P.

V. 8.

त्वामग्न ऋतायवः समीधिरे प्रत्नं प्रत्नास ऊतये सहस्कृत ।
पुरुश्चन्द्रं यजतं विश्वधायसं दमूनसं गृहपतिं वरेण्यम् ॥ १ ॥

त्वामग्ने । त्वाम् । अग्ने ! यज्ञमिच्छमानाः । सन्दीपयन्ति । प्रत्नम् । प्रत्नाः । रक्षणार्थम् । सहसा कृत ! बहुना हर्षकम । यजनीयम् । विश्वस्य धर्तारम । दममनसम् । गृहपतिम् । वरणीयम् ।

त्वामग्ने अतिथिं पूर्व्यं विशः शोचिष्केशं गृहपतिं नि सेदिरे ।
बृहत्केतुं पुरुरूपं धनस्पृतं सुशर्माणं स्ववसं जरद्विषम् ॥ २ ॥

त्वामग्ने । त्वाम् । अग्ने ! अतिथिमस्यम् । ज्वालाकेशम् । गृहपतिम् । मनुष्याः । प्रतिनिषीदन्ति । बृहज्वालम् । बहुरूपम् । धनस्य स्प्रष्टारम् । सुसुखम् । स्वन्नम् । जीर्णशत्रुकम् ।

---

१. 'त्वामग्ने' इति सप्तर्चमष्टमं सूक्तमात्रेयस्य इषस्यार्षं जागतमाग्नेयम् । 'त्वामग्ने सप्त जागतम्' (KSA. 24.8. p. 19.) इत्यनुक्रमणिका । प्रातरनुवाके आग्नेये ऋतौ जागते छन्दस्याश्विनशस्त्रे चेदं सूक्तम् । तथा च सूत्रितम्—'जनस्य गोपास्त्वमग्न ऋतायवः' (ĀSS. 4.13.) इति Sy.

२. त्वाम् । अग्ने are omitted by P.

३. इच्छन्तः is suggested for इच्छमानाः ॥ यज्ञकामा ऋषयः Sy.

४. सम्यग्दीपितवन्तः Sy.

५. प्रश्नम् P. पुरातनम् Sy.

६. प्रश्नाः P.
पुरातनाः Sy.

७. स्वरक्षणाय Sy.

८. हे बलस्य कर्तः ! Sy.

९. कीदृशं त्वाम् P. बहुधनमतिशयेनाह्लावकं वा Sy.

१०. यष्टव्यम् Sy.

११. बह्वन्नम् Sy.

१२. दानमनसम् Sy.

१३. यजमानगृहस्य पालकम् Sy.

१४. ०थिम् is suggested for ०थि ॥ कीदृशं त्वाम् ? अतिथिवत् पूज्यम् Sy.

१५. पुरातनम् Sy.

१६. दीप्तज्वालम् Sy.

१७. ग्रह० D.
गृहस्वामिनम् Sy.

१८. यजमानाः Sy.

१९. गार्हपत्यरूपेण स्थापितवन्त इत्यर्थः Sy.

२०. ०हज्ज्वा० is suggested for ०हज्वा० ॥ प्रभूतप्रज्ञानम् Sy.

२१. आहवनीयादिरूपेण बहुरूपम् Sy.

२२. स्पृ० P.
धनानां स्पर्शितारम् Sy.

२३. शोभनसुखम् Sy.

२४. ०न्न P. सुरक्षणम् Sy.

२५. जरतः वृक्षाणां व्यापकं जीर्णोदकं वा Sy.

त्वामग्ने मानुषीरीळते विशो होत्राविदं विविचिं रत्नधातमम् ।
गुहा सन्तं सुभग विश्वदर्शतं तुविष्वणसं सुयजं घृतश्रियम् ॥ ३ ॥

त्वामग्ने । त्वाम् । अग्ने ! मनुष्यसम्बन्धिन्यः । विशः । स्तुवन्ति । स्तोत्रविदम् । विवेचकम् । रत्नाना धातृतममग्निरणेषु गुहायाम् । वर्तमानम् । हे सुधन ! विश्वस्य दर्शनीयम् । महास्वनम् । सुष्ठु यष्टारम् । यस्त्वं घृत श्रयति ।

त्वामग्ने धर्णसिं विश्वधा वयं गीभिर्गृणन्तो नमसोप सेदिम ।
स नो जुषस्व समिधानो अङ्गिरो देवो मर्तस्य यशसा सुदीतिभिः ॥ ४ ॥

त्वामग्ने । त्वाम् । अग्ने ! धारयितारम् । सर्वदा । वयम् । गीर्भि । स्तुवन्तः । नमस्कारेण च । उप सेदिम । स । अस्मान् । सेवस्व । समिध्यमान । अङ्गिरसाम् । एकदेवः । मनुष्यस्य । यशोऽर्थम् । शोभनदानै ।

---

१. अग्नीनां परस्परं संसर्गे विविचयेऽग्नये काचिदिष्टिः । तत्र 'त्वामग्ने मानुषीः' इति याज्या । सूत्रितञ्च 'त्वामग्ने मानुषीरीळते विशोऽग्न आयाहि वीतये' (ĀŚS 3.13.) इति Sy.
२. मानुषसम्बन्धिन्यः Sy. मनुष्याः BB.
३. सर्वाः प्रजाः Sy. प्रजाः BB.
४. कीदृशं त्वाम् ? होत्राणां होमानां सप्तहोत्रकाणां वा वेत्तारम् Sy वाग्विशेषज्ञम् BB.
५. विवेचकं सदसतोः Sy. मिश्रितानां शोधकम् BB.
६. रमणीयानां धनानां दातृतमम् Sy. रमणीयानां धनानां धातृतमं दातृतमम् BB.
७. अग्निम् । अरणिष् is suggested for अग्निरणेष् ॥ अरण्यां हृदयेषु वा Sy. गुहायां सन्तं गुह्यम् । सप्तम्या आकारः BB.
८. सर्वदा वर्तमानम् Sy.
९. शोभनधन ! Sy. सर्वस्य प्रिय ! यद्वा शोभनधन ! BB.
१०. सर्वैर्द्रष्टव्यम् Sy. विश्वस्य दर्शितारम् । विश्वं दर्शनमस्येति बहुव्रीहिः BB.
११. प्रभूतध्वनिम् Sy. प्रवृद्धमनसं, महाबलमित्येके । बहूनां मन्तारमिति मन्ये BB.
१२. वैगुण्यापनोदनम् BB.
१३. यं स्त्वं P.
१४. श्रयसि is suggested for श्रयति ॥ घृतं श्रयन्तम् Sv. घृतस्य श्रयितारम् ईदृशं त्वामीडते प्रजाः त्वं चाभिप्रेतैर्योजय सर्वतोऽस्मदभिप्रेतमपि साधयसि BB.
This stanza=TS. 3.3.11.2.
१५. सर्वस्य धारकम् Sy
१६. बहुप्रकारेण Sy.
१७. आत्रेयाः Sy.
१८. उपसन्ना भवेम Sy.
१९. स त्वम् Sy.
२०. ०त् D.
२१. सेवस्व धनादिभिः Sy.
२२ सम्यग्दीप्तो दीप्यमानोऽस्माभिः Sy.
२३. हे सर्वत्र गन्तः ! अङ्गिरसः पुत्र ! वा Sy.
२४. दीप्यमानस्त्वम् Sy.
२५. यजमानस्य Sy.
२६. यंशात्यं P.
यशसा Sy.
२७. ज्वालाभिः सह जुषस्व Sy.

त्वमग्ने पुरुरूपो[1] विशेविशे[2] वयो दधासि[3] प्रत्नथा[4] पुरुष्टुत[5]।
पुरूण्यन्ना[6] सहसा[7] वि राजसि त्विषिः सा ते[8] तित्विषाणस्य[9] नाधृषे[10] ॥ ५ ॥

त्वमग्ने। त्वम्। अग्ने[1]। बहुरूप। मनुष्याय। अन्नम्। प्रयच्छसि[3]। प्रत्न[4] इव। पित्रादिभि स्तुत[5]। बहूनि। अन्नानि। बलन भक्षयन्। विराजसि। दीप्ति। सा। तव[8]। दीप्यमानस्य[9]। न। धर्षयित शक्यते[10]।

त्वामग्ने समिधानं यविष्ठ्य देवा दूतं चक्रिरे हव्यवाहनम्।
उरुज्रयसं घृतयोनिमाहुतं त्वेषं चक्षुर्दधिरे चोदयन्मति ॥ ६ ॥

त्वामग्ने। त्वाम्। अग्न[1]। समिध्यमानम्[11]। युवतम[12]। देवा। दूतम्। कृतवन्त[13]। हविषा वोढारम्। बहुवेगम[14]। घृतस्थानम्[15]। आहुतम्। दीप्यमानम्[16]। चक्षु[17]। दधिरे[18]। चोदयन्मति शत्रो यस्य बलमेन चोदयति।

त्वामग्ने प्रदिव आहुतं घृतैः सुम्नायवः सुषमिधा समीधिरे।
स वावृधान ओषधीभिरुक्षितोऽभि ज्रयांसि[19] पार्थिवा वि तिष्ठसे ॥ ७ ॥

त्वामग्ने। त्वाम्। अग्ने[1]। पुराणम्[20]। घृतै। आहुतम्। सुखमिच्छमाना[21]। शोभनया समिधा।

---

१. पुरुरूपः सन् Sy.
२. सर्वस्मै यजमानाय Sy
३. धारयसि Sy.
४. पुराण इव Sy.
५. बहुभिः स्तुत ! Sy.
६. चरुपुरोडाशादीनि Sy
७. ईश्वरो भवसि स्वीकर्तुम् Sy.
८. प्रसिद्धा Sy.
९. त D.
१०. दीप्तस्य Sy.
११. अन्यैरधृष्या भवति Sy.
१२. VM. explains विशे once only.
१३. सम्यगिध्यमानम् Sy
१४. ०मं D.
१५. त्रयाणामग्नीनां मध्ये हव्यवाहनः खलु पूर्वं देवैर्हविर्वहनाय दूतः कृतः। 'हव्यवाहनो देवानाम्' (TS. 2.5.8 6.) इति हि श्रुतिः Sy
१६. प्रभूतवेगम् Sy.
१७. घृतं योनिः कारणं यस्य तम् Sy.
१८. आहुतं त्वाम् Sy.
१९. दीप्तम् Sy.
२०. उक्तलक्षणं सर्वप्रकाशक चक्षुःस्थानीयं कृत्वा Sy.
२१. दधिरे देवा मनुष्याश्च Sy
२२. ०दयन् पति P ०दयनवति D. चोदयन्ती मतिर्यस्य तच्चोदयन्मति। मत्या हि चक्षुश्चोद्यते Sy.
२३. शत्रोर्य० is suggested for शत्रोय।
२४. पुरातनाः Sy.
२५. इच्छन्तः is suggested for इच्छमानाः॥ सुखमिच्छन्तो यजमानाः Sy.
२६. शोभनेनेध्मेन Sy.

सम्[1] । वर्धमान. । ओषधीभि । उक्षित[2] । पार्थिवानि[3] । यजमानाना शत्रुबलानि[4] । अभि । विविध गच्छसि[5] ।

ऋगर्थदीपिका चेय तृतीयश्चायमष्टक[6] ।

कर्ता श्रीवेङ्कटार्यस्य[7] तनयो माधवाह्वय ॥

[अथ चतुर्थोऽष्टकः ॥]

चतुर्थोऽथाष्टकस्तस्मिन्नध्यायादिषु वक्ष्यते[8] ।

शब्देष्वावर्तमानेषु यद्वाच्यमिह वैदिकैः[9] ॥१॥

समानशब्दा आवृत्ता[10] भवन्ति पदपूरणा[11] ।

पर्यायेषु तु निर्ब्रूयादिच्छयान्यतम बुध[12] ॥२॥

अप्रसिद्ध प्रसिद्धश्च सङ्गच्छेते यदि क्वचित् ।

तत्राप्रसिद्धं निर्ब्रूयान्न प्रसिद्धमिति स्थिति ॥३॥

जायते त्वष्टुरर्वाशुरश्व इत्यत्र सङ्गता[13] ।

अर्वन्तमाशु निर्ब्रूयान्नत्वश्वं सार्वलौकिकम्[14] ॥४॥

---

१. Something seems to be omitted after **सम्** ।

२. **उक्षितः** is suggested for **उक्षित** ॥ **सिक्तः** Sy.

३. **पार्थिवान् वृक्षान्** । **यद्वा पार्थिवेति त्र्ययोविशेषणम्** । **पार्थिवानि चरुपुरोडाशादिकानि** Sy.

४. **त्र्ययांसि अन्नानि** Sy.

५. **अभिभूय वर्तसे** Sy.

६. VM. ignores **ईधिरे** ॥ **समीधिरे सम्यक् दीपितवन्तः** Sy. Ms. D. puts the figure ॥ ८ ॥ here to indicate the end of the eighth hymn. No such number is given in P. and M.

७. **व्याख्या श्रीवेंकिटार्य** P.

८. The matter within brackets is supplied by the Editor.

९. **०र्थाष्ट०** P.

१०. **०कै** D.

११. **०वर्ता** P., D.

१२. **पाद०** P.

१३. **निर्ब्रूया०** is suggested for **निब्रूया०**

१४. **०ष्ट्र०** P., D.

१५. **रञ्च** P. Cf. VS. 29.9.

१६. **अर्वं अर्वमाशुम्निब्रू०** P.

ऋचि "विश्वस्य ही"त्यस्यां सूनरित्यादिषु त्रिषु ।
उषसो नामधेयेषु निर्ब्रूयादिच्छया बुधः ॥५॥
नापेक्षते निर्वचनं भिन्नास्वृक्षु यथा नरः ।
तथैव पादभेदेऽपि केचिन्नेच्छन्ति निर्वचं ॥६॥
नामाख्यातोपसर्गाणां निपातानां तथैव च ।
पारुच्छेपीषु दृश्यन्ते बहवः पादपूरणाः ॥७॥
सहसो जातवेदसं विप्रं न जातवेदसम् ।
नान्यस्तत्रोभयोरर्थो द्वयोर्ह्यर्थोत्र कीर्त्यते ॥८॥
जातप्रज्ञ विप्रमिव जातप्रज्ञमितीदृशी ।
वचनव्यक्तिरत्रास्ति तस्यान्यावप्यपेक्षितौ ॥९॥
नैतच्च युज्यते यस्मात् कवितात्र प्रतीयते ।
'यदिन्द्राग्नी अवमस्याम्' इत्यृचोः कविता यथा ॥१०॥
एवमत्रापि कविता विपर्यासात् प्रतीयते ।
ननु श्रद्धातिरेको ऽत्र पुनरुक्त्या प्रतीयते ॥११॥

---

१. ०नरीत्या० is suggested for ०नरित्या०।
२. निर्ब्रूया० is suggested for निब्रूया० ।
३. ०न्ते R.
४. नराः R.
५. निर्वचः is suggested for निर्वच ॥
६. नोमा० P. D.
७. पाद is omitted by P. D. Cf. RV.I. 127.1.
८. ०सि P.
९. ना P.
१०. ०स P. D.
११. ०स्यत्रोरुभ० P. D.
१२. ०शि P.
१३. ०न्वावप्य० P. D.
१४. D. adds निस्थिराणि चिदोजसा पादस्तर्ह्यस्तु पूरणः after अपेक्षितौ ।
P. adds निस्थिराणि चिदोजसा अभ्यासाश्नु चात्रापि भूयानर्थः प्रतीयते after अपेक्षितौ ।
१५. Omitted by P.
१६. अमस्याम् P. D. RV.I. 108.9.
१७. ०चो D.

आ द्वाभ्यां हरिभ्यामिन्द्र याहीत्यादौ यथा तथा ।
सत्यर्थे कविता तस्मान्नासतीति विपश्चितः ॥१२॥
एवं च पूरणः पादो "नि स्थिराणि चिदोजसा" ।
अभ्यासान्ननु चात्रापि भूयानर्थः प्रतीयते ॥१३॥
नेति ब्रुवन्त्यप्रतीतेः पादोऽयं पूरणस्ततः ।
ऋषिप्रयुक्ता चावृत्तिर्नन्वन्यत्र च दृश्यते ॥१४॥
अया रुचा हरिण्येति तृचस्तत्र निदर्शनम् ।
परुच्छेपस्य तनयस्तमद्राक्षीदनानतः ॥१५॥
ततः पितृवदभ्यासात्तच्छीलस्यात्र युज्यते ।
परुच्छेपोऽपि ननु च नावर्तयति तद्यथा ॥१६॥
'उभे पुनामि रोदसी' 'पिशङ्गभृष्टिमम्भृणम्' ।
तस्माच्छन्दःस्वभावोऽयमिति वृद्धेभ्य आगमः ॥१७॥
ऊर्ध्वं जगत्याश्छन्दांसि पूर्यन्ते सदृशैः पदैः ।
तानि द्रष्टुमशक्यानि वृत्तदैर्घ्याद् भवन्त्यतः ॥१८॥
तैरेव शब्दैः पूर्यन्ते प्रायेणेति विनिश्चयः ।
वामदेवो मण्डलादावृचस्तिस्रो ददर्श ताः ॥१९॥

---

१. RV.II.18.4.
२. तस्मादस० R.
३. RV.I.127.4.
४. ०वृत्ति न्वत्र P. ०र्नत्वन्यत्र R.
५. RV.IX. 111.1.
६. पार० D. पारुच्छेप P.
७. ०यतम० P.
८. ०त्तच्छिवस्या० P. ०भ्यासस्तत्सुतस्या० R.
९. Omitted by P. D.
१०. भेनामि D.
११. RV.I. 133.1.
१२. पिशंगभूषिमभ्रिणं P. पिशंगभूषितमभ्रिणं D. RV.I. 133.5.
१३. ०न्वस्व० P., D.
१४. ०त्याच्छ० P. D.
१५. D. reads पातानिदैः for पदैः । तानि ।
१६. D. reads निदर्शिताः for ददर्श ताः ।

अष्टिं तथातिजगतीमर्थभेदात् प्रयुज्यते ।
न पादपूरणाशङ्का[1] तत्र को ऽयं परिश्रमः ॥२०॥
पारुच्छेपीसु[2] सर्वासु[3] शक्यं[4] द्वैरूप्यमञ्जसा ।
जातवेदःशब्द इव न प्रदर्शयितु बुधैः ॥२१॥
यथाकथंचिद्[5] द्वैविध्यं प्रतिपादयितु बुधः[6] ।
नेच्छन्ति तेन[7] सर्वे ऽमी भवन्ति पदपूरणाः[8] ॥२२॥
तमेवार्थ ब्रुवाणाना वचनव्यक्तयः पृथक् ।
मन्त्रेषु केषुचित् सन्ति केषुचित्तु[10] न सन्ति[11] च[12] ॥२३॥
इच्छन्ति काव्यवद् वृद्धा न वेदे बहुभाषणम्[13] ।
तस्माच्छब्दस्य तस्यार्थं तमेवाहुर्विपश्चितः ॥२४॥
पारुच्छेपी ऋचः[14] सर्वा यदा पश्यति पण्डितः ।
न[15] तदा प्रतिपाद्यो ऽस्य सो ऽयमर्थ इति स्थितिः ॥२५॥
वेदमुद्रामजानन्तः[16] कुतर्कगतमानसाः[17] ।
आपाततो भाषमाणास्ते हास्या वैदिकैरिह ॥२६॥
अभ्यासादाह भूयांसमर्थ यस्ककुलोद्भवः[18] ।
अन्यानर्थान्[19] नतु ब्रूते व्याख्यातारो वदन्ति यान् ॥२७॥
दर्शनीयो दर्शनीय[20] इत्यभ्यासात् प्रतीयते ।
भूयानर्थोऽत्यन्तमिति निर्वाहो ऽयं च केषु चित् ॥२८॥ इति ॥

---

१. ०जगती वर्तमानानामर्त्थ भेदान्न प्रयुज्यते पादपूरणात् शंका D.
०जगती वर्तमानानामवर्तमानानामर्त्थभेदान्न प्रयुज्यते पादपूरणान् शंका P.
२. ०च्छपी० P. ३. सर्वान्न P. D.
४. शक्य P. ५. चिद्वैवि० P. D.
६. बुधाः is suggested for बुधः ।
७. ने P. ८. पाद० P. ९. केनचित् P.
१०. P. reads तेषु चित्त for केषु चित्तु ।
११. यन्ति P. D. १२. Omitted by P.
१३. ववहु० P. १४. ०च्छेमी ततः P.
१५. Omitted by D. १६. ०ग्रम० P. D.
१७. ०न्त D. १८. Cf. N. 10.42.
१९. अन्या.र्था D. अन्यमर्थं R. २०. वर्शाय P.

V 9

त्वामग्ने हविष्मन्तो देवं मर्तास ईळते।
मन्ये त्वा जातवेदसं स हव्या वक्ष्यानुषक् ॥ १ ॥

त्वामग्ने । ॥ गय ॥ त्वाम् । अग्न ! हवि सम्भरणानन्तरम् । देव ! मनुष्या । स्तुवन्ति हविर्वहनाय सामधेनीभि । अहं च त्वामेव । स्तौमि । जातप्रज्ञम् । स त्वम् । हव्यानि । वह । अनुषक्तम् ।

---

१ पञ्चमे मण्डले प्रथमेऽनुवाके पूर्वमष्टौ सूक्तानि व्याख्यातानि । 'त्वामग्ने हविष्मन्त' इति सप्तर्चं नवम सूक्तमात्रेयस्य गयस्यार्षम् । सप्तमीपञ्चम्यौ पङ्क्ती, शिष्टा अनुष्टुभ । अग्निर्देवता । तथा चानुक्रम्यते 'त्वामग्ने गयोऽन्त्यापञ्चम्यौ पङक्ती' (KSA. 25 9 p 19) इति । प्रातरनुवाके आश्विनशस्त्रे च एतदादिके द्वे सूक्ते शसनीये । तथैव सूत्रितञ्च—'त्वामग्ने हविष्मन्त इति सूक्ते' (ĀŚS 4 13) इति Sy

२ VM seems to explain हविष्मन्त by हवि सम्भरणानन्तरम् ॥ होमसाधनद्रव्यसमेता । हविष्मन्त —हवि शब्द औणादिक इस्प्रत्ययान्त । 'तदस्यास्ति' इति मतुप् । पदसज्ञाया अपवादत्वेन 'तसौ मत्वर्थे' इति भसज्ञाया रुत्वाभाव । मतुब्जसोरनुदात्तत्वात् प्रत्ययस्वर एव शिष्यते Sy

३ देवम् is suggested for देव ॥ दीप्यमानम् । देवम्—अच्प्रत्ययान्तत्वाद् देवशब्दोऽन्तोदात्त Sy

४ मर्त्या । मर्तास —'मृङ् प्राणत्यागे' 'असिहसिमृड०' इत्यादिना तन् । गुण । मर्त । जसेरसुक् मर्तास । नित्त्वादाद्युदात्त Sy

५ ईळते—'ईड स्तुतौ' अदादित्वाच्छपो लुक् 'आत्मनेपदेष्वनत', टेरेत्वम् । अत्र डकारस्य अध्येतृसम्प्रदायप्राप्तो ळकार । लसार्वधातुकानुदात्तत्वेन धातुस्वरे प्राप्ते आष्टमिको निघात Sy ६ Omitted by P

७ त्वा—'युषि मिश्रणे' मदिक्प्रत्ययान्तो युष्मच्छब्द प्रत्ययस्वरेणान्तोदात्त । 'त्वमावेकवचने' इतिमपर्यन्तस्य त्वादेश । 'द्वितीयायाञ्च' (Pa 7 2 87) इत्याकार । 'एकादेश उदात्तेनोदात्त' इत्येकादेशोऽप्युदात्त एव । 'त्वामौ द्वितीयाया' इति त्वादेश । स्थानिवद्भावेनान्तोदात्तत्वे प्राप्ते 'अनुदात्त सर्वमपादादौ' इत्यनुदात्तत्वम् Sy

८ मनिरत्र स्तुत्यर्थे वर्तते, धातूनामनेकार्थत्वात् । मन्ये—श्यनो नित्त्वादाद्युदात्तत्वम् Sy

९ जातमुत्पन्न चराचर भूतजात वेत्तीति जातवेदा । अथवा जातानि स्थावरजङ्गमात्मकान्येन विदुरिति जातवेदा । यद्वा वेद इति धननाम । जात सर्वं वेदो धन यस्यासौ जातवेदा । एवविधम् । जातवेदसम्—'जनी प्रादुर्भावे' क्त । 'श्वीदितो निष्ठायाम्' इतीट्प्रतिषेध । 'जनसनखना सञ्झलो' इत्यात्वम् । प्रत्ययस्वरेणान्तोदात्त । वेदस्शब्दोऽपि असुनप्रत्ययान्तत्वादाद्युदात्त । कमधारयपक्षे समासान्तोदात्तापवादत्वेन 'तत्पुरुषे तुल्यार्थ०' इत्यादिना पूर्वपदप्रकृतिस्वरत्वे प्राप्ते कृदुत्तरपदप्रकृतिस्वरत्वम् । तदपवादत्वेन 'गतिकारकयोरपि पूर्वपदप्रकृतिस्वरत्व च' इति पूर्वपदप्रकृतिस्वरत्वम् । बहुव्रीहिपक्षे 'बहुव्रीहौ प्रकृत्या पूर्वपदम्' इति Sy

१० हवनसाधनानि हवींषि । हव्या-हवमहतीत्यस्मिन्नर्थे 'य' इत्यनुवर्तमाने 'छन्दसि च' इति य । नपुसकत्वाच्छिरादेश । 'शेश्छन्दसि बहुलम्' इति लोप । प्रत्ययलक्षणेन नुम । दीघनलोपौ । प्रत्ययस्वरेणान्तोदात्त Sy

११ वहसि । वक्षि—'वह प्रापणे' सिप् । लुगनुवृत्तौ 'बहुल छन्दसि' इति शपो लुक् । ष्टुत्वकत्वषत्वानि । सिप पित्त्वादनुदात्तत्वेन धातुस्वरेण आद्युदात्तत्वे प्राप्ते निघात Sy

१२ निरन्तरतया अनुषक्त यथा तथा । आनुषक्—अनपूर्वस्य षञ्जे क्विप् नकारलोप कुत्व च । धात्वादे सकारस्य 'उपसर्गात्सुनोति०' इत्यादिना षत्वम् । दीर्घश्छान्दस । कृदुत्तरपदप्रकृतिस्वरत्वम् Sy

अग्निर्होता दास्वतः क्षयस्य वृक्तबर्हिषः ।
सं यज्ञासश्चरन्ति यं सं वाजासः श्रवस्यवः ॥ २ ॥

अग्निर्होता[1] । अग्नि । होता भवति । दानवतः[2] । यजमानस्य[3] । स्तीर्णबर्हिषः[4] । यमग्निम् । यज्ञाः[5] । यज्ञाधारा वाजश्च[6] । यजमानानामन्नमिच्छमानानामन्नमिच्छमानाः[7] । सङ्गच्छन्ति[8] ।

उत स्म यं शिशुं यथा नवं जनिष्टारणी[9] ।
धर्तारं मानुषीणां विशामग्निं स्वध्वरम् ॥ ३ ॥

उत स्म यम्[10] । यथा[11] काचित् । नवतरम्[12] । पुत्र जनयति । एव यम् । अरणी[13] । जनय[14], उपमानेन

---

१. देवानामाह्वाता भवति Sy.

२. D. repeats दानवतो दानवत. ॥ हविष्प्रक्षेपणादिदानवतः । दास्वतः—'दा दाने' असुन्प्रत्ययान्तः । मतुप आदुपधत्वाद् वत्वम् । धातुस्वरेणाद्युदात्त एव Sy.

३. क्षियन्ति निवसन्त्यस्मिन् स्वर्गसाधनफलानीति क्षयः । तस्य यजमानस्य यागार्थम् । क्षयस्य—'क्षि निवासगत्योः' 'क्षयो निवासे' इत्याद्युदात्तत्वम् Sy.

४. वृक्तानि लूनानि बर्हींषि दर्भा येनासौ वृक्तबर्हिः । तस्य । 'वृजी वर्जने' वर्जनमत्रोपचाराच्छेदनम् । निष्ठा । प्रत्ययस्वरेणान्तोदात्तः । बहुव्रीहित्वात् पूर्वपदप्रकृतिस्वरत्वम् Sy.

५. सर्वे यज्ञाः । यज्ञासः—यज्ञशब्दः 'यजयाच०' इत्यादिना नङ्प्रत्ययान्तोऽन्तोदात्तः Sv.

६. वाजाश्च is suggested for वाजश्च । वाजासः—वजेर्घञ् । वाजः । 'कर्षात्वतः' इत्यन्तोदात्तत्वम् । छान्दसत्वात 'ञ्नित्यादिर्नित्यम्' इत्याद्युदात्तः Sy.

७. इच्छ् (इषु) being parasmaipada, the reading should be इच्छताम् and इच्छन्तः respectively.

८. यजमानस्य प्रभूतां कीर्तिं सम्पादयन्तः श्रवस्यवः —'छन्दसि परेच्छायाम्' इति क्यच्, 'क्याच्छन्दसि' इत्युप्रत्ययः । प्रत्ययस्वरेणान्तोदात्तः Sy.

९. सहिता गच्छन्ति । सञ्चरन्ति प्राप्नुवन्ति ॥ चरन्ति—'चर गतिभक्षणयोः' अदुपदेशाल्लसार्वधातुकानुदात्तत्वम् । 'यद्वृत्तान्नित्यम्' इति निघाताभावः Sy.

१०. VM. explains सम् once only.

११. 'यथेति पादान्ते' इति सर्वानुदात्तः Sv.

१२. नूतनम् Sy

१३. अपत्यम् । शिशुम्—'शो तनूकरणे' 'आदेचः०' इत्यादिनात्वम् । 'शः कित् सन्वच्च' इत्युप्रत्ययः सन्वद्भावश्च । द्विर्भावोऽभ्यासस्य ह्रस्वश्च । 'सन्यतः' इतीत्वम् । 'आतो धातोः' इत्याकारलोपः । नित्त्वादाद्युदात्तः Sy.

१४. द्वे अरणी । 'ऋ गतौ' 'अतिसृभृधृधम्यश्यवितृभ्योऽनिः' इत्यनिप्रत्यय आद्युदात्तः । आभ्यामर्तिं ? (इयर्तिं) गच्छत्यग्निरित्यरणिः । कथमपादानार्थे औणादिकोऽनिः 'ताभ्यामन्यत्रोणादयः' (Pa. 3.4.75.) इति नियमात् ? भीमादित्वात् सिद्धम् Sy.

१५. जन्याः i.e. gen. sing. of जनी (mother) is suggested for जनयः ।

समन्वयाज् जनिष्टेत्येकवचनमपि भवति । मनुष्यसम्बन्धिनीनाम् । प्रजानाम् । धर्तारम् । अग्निम् । सुयज्ञ पूर्ववत्रान्वयः ।

उत स्मं दुर्गृभीयसे पुत्रो न ह्वार्याणाम् ।
पुरू यो दग्धासि वनाग्ने पशुर्न यवसे ॥ ४ ॥

[उत स्म] अपि च । दावरूपस्त्व दुर्ग्रहमात्मानमिच्छसि । तथागच्छतस्तस्य ? अश्वानाम् । इव । पुत्रो युवा । पुरूणि । यः । दग्धा । भवसि । अरण्यानिव यथा । पशु । यवसे विमृष्ट. सर्व यवस विनाशयति ।

---

१. या P.

२. अजनिषाताम् । अरणी प्रजानां पोषणार्थं चैतमग्निमसूजतामित्यर्थः । जनिष्ट—'जनी प्रादुर्भावे' लुङ्, छान्दसत्वाद्वचनव्यत्ययः Sy.

३. मनोर्जातानाम् । मानुषीणाम् । 'मनोर्जातावञ्यतौ षुक् च' इत्यञ्प्रत्ययः षुगागमश्च 'ञ्नित्यादिर्नित्यम्' इत्याद्युदात्तत्वम् Sy.

४. विशन्ति प्रविशन्ति गर्भाशयमिति विशः प्रजाः । तासाम् । विशाम् 'विश प्रवेशने' कर्तरि क्विप् । 'सावेकाचः' इति विभक्तेरुदात्तत्वम् Sy.

५. तासां धर्तारम् आहारादिपाकद्वारेण शरीरधातूनां पोषकम् Sy.

६. शोभनयज्ञम् । स्वध्वरम्—हिंसार्थस्य ध्वरतेः पचाद्यच् । न विद्यते ध्वरो यागहिंसा यस्मिन्नित्यध्वरः । बहुलमहिंस्वरापवादत्वेन 'नञ्सुभ्याम्०' इत्यन्तोदात्तः Sy.

७. VM. ignores उत and स्म । अपि च Sy.

८. The *pratīka* is supplied by the Editor.

९. तापरूप० P.

१०. दुःखेन गृह्यसे । दुर्गृभीयसे—'ग्रह उपादाने' यक् । 'ह्रुव ईट्' इत्यनुवृत्तौ 'बहुलं छन्दसि' इतीडागमः । ग्रहिज्यादिना सम्प्रसारणम् । 'हृग्रहोर्भश्छन्दसि' इति भकारः । निघातः Sy.

११. गच्छतस्य P. तथागच्छतस्तस्य is not clear. तथा गच्छतां तेषाम् or तथा गच्छन्तीनां तासाम् is suggested.

१२. कुटिलं गच्छतां सर्पाणाम् । यद्वा आस्कन्दितादिगतिविशेषेण वक्रगमनानामश्वानाम् । ह्वार्याणाम्—'ह्वृ कौटिल्ये' 'ऋहलोर्ण्यत्', आदिवृद्धिः । 'तित्स्वरितम' इति स्वरितम् Sy.

१३. Omitted by D. बालसर्प इवाशिक्षितबालाश्व इव वा Sy.

१४. बहूनि । परु—'पॄ पालनपूरणयोः' 'पृभिदिव्यधिगृधिधृषिद्शिभ्यः' इति कुप्रत्ययः । 'उवोष्ठ्यपूर्वस्य' इत्युत्वम् । प्रत्ययस्वरेणान्तोदात्तत्वम् Sy.

१५. यस्त्वम् Sy १६. दाहकः Sy.

१७. असि—'यद्वृत्ताच्चित्यम्' इति न निघातः Sy.

१८. अरण्यानीव is suggested for अरण्यानिव ॥ वनानि Sy.

१९. था P.

२०. अयमर्थः । अत्यन्तक्षुधार्तः पशुस्तृणविषये विसृष्टः सन् यथा सर्वं भक्षयति तद्वदित्यर्थः Sy.

२१. तृणे Sy.

२२. VM. ignores अग्ने !

अधं स्म यस्यार्चयः सम्यक्संयन्ति धूमिनः ।
यदीमह त्रितो दिव्युप ध्मातेव धर्मति शिशीते ध्मातरी यथा ॥ ५ ॥

अध स्म । धमनानन्तरम् । एव । यस्य । अर्चय । समीचीनम् । सङ्गच्छन्ते । धूमयुक्तस्य । यदि । एनम् । एवाग्निम् । त्रिस्थान त्रयाणां वाग्न्यादीनामेको वायु । अन्तरिक्षे । यथायस्कारो लोह भस्त्रयावधमत्येवम् । उपधमति । तीक्ष्णीकरोति च । यथा । अयस्कारे ।

तवाहमग्न ऊतिभिर्मित्रस्य च प्रशस्तिभिः ।
द्वेषोयुतो न दुरिता तुर्याम मर्त्यानाम् ॥ ६ ॥

तवाहम् । तव । अहम् । अग्ने । रक्षणे । मित्रस्य । च देवस्य । स्तुतिभि । द्वेषसो मिश्रयितृन्

---

१. अपि च Sy.

२. अहेति पादपूरणः Sy.

३. अग्नेः Sy.

४. अर्चीषि Sy.

५. शोभनम् Sy.

६. सर्वतः प्राप्नुवन्ति । यन्ति—'इण् गतौ', यच्छब्दयोगान्निघाताभावः Sy.

७. धूमवतः Sy.

८. यदा Sy.

९. अयमात्मानम् Sy.

१०. त्रिषु स्थानेषु ततो व्याप्तः त्रीणि स्थानानि वातीत्य Sy.

११. वा is omitted by P.

१२. कर्मारो यथा भस्त्रादिभिरग्निं संवर्धयति तद्वत्स्वात्मानं वर्धयतीत्यर्थः Sy.

१३. उपवर्धयति तदा ज्वालाः सर्वतो निर्गच्छन्तीत्यर्थः । धमति—'ध्मा शब्दाग्निसंयोगयोः' पाघ्राधिना धमादेशः । पूर्ववत् निघाताभावः Sy.

१४. तद्वत्स्वयमेव स्वात्मानं तीक्ष्णीकरोतीत्यर्थः । शिशीते—'शो तनूकरणे' व्यत्ययेनात्मनेपदी । 'श्लौ' इत्यनुवर्तमाने 'बहुलं छन्दसि' इति विकरणस्य श्लुः । 'आदेच उपदेशेऽशिति' इत्यात्वम् । 'श्लौ' इति द्विर्वचनम् । 'बहुलं छन्दसि' इत्यभ्यासस्येत्वम्, 'उभे अभ्यस्तम्' इत्यभ्यस्तसंज्ञायामातः 'ई हल्यघोः' इतीत्वम् । तिङ उत्तरत्वान्निघाताभावः Sy.

१५. यथा ध्मातृसमीपे विद्यमानोऽग्निस्तेन ध्मायमानः स आत्मानं शिशीते Sy.

१६. युष्मत्कर्तृकरक्षणैः । ऊतिभिः—'अव रक्षणे' क्तिन् । 'ज्वरत्वरस्रिव्यविमवामुपधायाश्च' इत्यूठ् । 'ऊतियूतिजूतिसातिहेतिकीर्तयश्च' इत्यन्तोदात्तत्वेन निपातितः Sy.

१७. सर्वेषां मित्रभूतस्य Sy.

१८. अस्मत्कृतैः स्तोत्रैश्च । प्रशस्तिभिः—'शंसु स्तुतौ' क्तिन् । कृदुत्तरपदप्रकृतिस्वरापवादत्वेन 'तादौ च निति कृत्यतौ' इति गतेरुदात्तत्वम् Sy.

१९. द्वेषयुक्तान् शत्रून् । द्वेषोयुतः—'द्विष् अप्रीतौ' भावेऽसुन्प्रत्ययः, 'यु मिश्रणे' कर्तरि क्विप् । तुक् । कृदुत्तरपदप्रकृतिस्वरत्वम् Sy.

शत्रून्[1] । इव । दुःखानि[2] । अतितरेम[3] । यान्येतानि मर्त्यानां[4] दृश्यन्ते, यथा परोक्षोपक्रमाः प्रत्यक्षापवर्गा मन्त्रा भवन्त्येवमेकवचनबहुवचनयोरपि[5] द्रष्टव्यमिति[6] ।

तं नो अग्ने अभी नरो रयिं सहस्व आ भर ।
स क्षेपयत्स पोषयद्भुवद्वाजस्य सातय उतैधि पृत्सु नो वृधे ॥ ७ ॥

तं नो अग्ने । तम् । अस्मभ्यम् । अग्ने[7] । अभ्याभर[8] । नेता[9] त्वम् । हे बलवन्[10] । रयिम्[11] । स रयिं । शत्रून् क्षपयतु[12] । पोषयतु[13] चास्मान् । भवतु[14] च । अन्नस्य[15] । भजनाय । अपि च । भव[16] । सङ्ग्रामेषु[17] । अस्माकम् । वर्धनाय[18] ।

---

१. दुरितानि तत्कर्तृकानि पापसाधनकर्माणि Sy.

२. तरेयम् । अयमर्थः । त्वद्रक्षणैः त्वत्सम्बन्धिस्तुतिभिश्च बाह्याभ्यन्तरशत्रून् तरेयमित्यर्थः । तुर्याम—'तॄ प्लवनतरणयोः' प्रार्थनायां लिङ् । यासुट् 'लिङः सलोपोऽनन्त्यस्य' इति सकारलोपः । 'बहुलं छन्दसि' इति शपो लुक् । 'उदोष्ठ्यपूर्वस्य' 'बहुलं छन्दसि' इत्युत्वम् । यासुडागमस्योदात्तत्वाच्छेषनिघातः 'ञपादादौ' इति प्रतिषेधात् निघाताभावः Sy.

३. अतिरेयमान्येतानि मर्त्यान् P. शत्रुभूतानां मनुष्याणाम् Sy. ४. ञचनोः अपि D.

५. The passage : यथापरोक्षो० मिति is VM's addition.

६. आभिमुख्येनाहर Sy.

७. हविषां नेता त्वम् Sy.

८. सहस्व—'षह मर्षणे' असुन् । सहत्य ? (तेऽ)नेन शत्रून्, इति सहो बलम् । मतुप् 'मादुपधायाः०' इति वत्वम् । 'मतुवसो रुः सम्बुद्धौ छन्दसि' इति रुत्वम्, 'आमन्त्रितस्य च' इति निघातः Sy.

९. लोके प्रसिद्धं पश्वादिलक्षणं धनम् Sy.

१०. रयिरं P. पूर्वोक्तः सोऽग्निः Sy.

११. अस्मदीयान् शत्रून् क्षपयतु । क्षेपयत्—'क्षिप प्रेरणे' णिजन्तात्लेट् 'इतश्च लोपः' । 'लेटोऽडाटौ' इत्याडागमः । शप् गुणायावेशौ । पररूपत्वं च Sy.

१२. पोषयत्—'पुष पुष्टौ' Sy.

१३. भुवत्—'भू सत्तायाम्' 'भूसुवोस्तिङि' इति गुणप्रतिषेधः । उवङ् Sy.

१४. अन्यस्य P.

१५. लाभाय Sy.

१६. सङ्ग्रामे शत्रुविजयार्थं सत्वं समृद्धिं कुर्वित्यर्थः । एधि—'अस् भुवि' 'ध्वसोरेद्धावभ्यासलोपश्च' इत्येत्वम् । तस्यासिद्धत्वात् 'हुझल्भ्यो हेर्धिः' इति धिरावेशः । निघातः Sy.

१७. पृतनासु युद्धेषु । पृत्सु—'पदादिषु०' इत्यादिना पृतनाशब्दस्य पृदादेशः । सावेकाच्त्वात् अन्तोदात्तत्वम् Sy.

१८. समृद्धये Sy.

१९. VM. explains सः once only. Ms D. puts the figure ॥९॥ here to indicate the end of the ninth hymn. No such number is given in P

V.10.

अग्न॒ ओजि॑ष्ठमा भर द्यु॒म्नम॒स्मभ्य॑मध्रिगो ।
प्र नो॑ रा॒या परी॑णसा॒ रत्सि॒ वाजा॑य॒ पन्था॑म् ॥ १ ॥

अग्न ओजिष्ठम् । अग्ने । बलवत्तमम् । आभर । अन्नम् । अस्मभ्यम् । अधृतगमन । प्रलिख । अस्माकम् । धनेन । महता सह । अन्नाय । पन्थानम् ।

१. 'अग्न ओजिष्ठम' इति सप्तचं दशमं सूक्तम् । ऋष्यादिविनियोगश्च पूर्ववत् । चतुर्थीसप्तम्यौ पङ्क्ती । 'अग्न ओजिष्ठमन्त्याचतुर्थ्यौ च' (KSA 25.10 p. 19.) इत्यनुक्रान्तम् Sy.

२. आ० D.

३. ओजिष्ठम्—'उब्ज आर्जवे' 'उब्जेर्बले बलोपश्च' इत्यसुन् बलोपश्च । गुणः । ओजः । 'तदस्यास्ति०' इत्यर्थे 'अस्मायामेधा' इत्यादिना विनिः । 'अतिशायने०' इतीष्ठन् । 'विन्मतोर्लुक्' 'टेः' इति टिलोपः । नित्त्वादाद्युदात्तः Sy

४. आहर Sy.

५. द्योतते कटकमुकुटादिरूपेण सर्वत्र प्रकाशत इति द्युम्नं धनम् । द्युम्नम्—'द्युत दीप्तौ' इत्यस्माद् धातोः 'सुम्नद्युम्ननिम्न०' इत्यादिना नक्प्रत्ययो नकारश्चान्तादेशो निपात्यते । प्रत्ययस्वरेणान्तोदात्तः Sy.

६. अस्मान् Sy.

७. उधतगमनं P. अधृतमप्रतिहतं गमनं यस्येत्यधृता अनिवारिता गावो रश्मयो यस्येति वा अधृतगुः अध्रिगुः । तस्य सम्बोधनम् । अधृतशब्दस्य अध्रघादेशः । गोशब्दस्योपसर्जनह्रस्वत्वम् । आमन्त्रितस्य निघातः Sy.

८. Sy explains प्र and रत्सि separately: प्र as प्रकर्षेण योजय and रत्सि as विलिख कुर्वित्यर्थः । रत्सि—'रद विलेखने' भौवादिकः । 'बहुलं छन्दसि' इति शपो लुक् । पादादित्वान्निघाताभावः ।

९. परितो व्यापकेन । परीणसा—'णस कौटिल्ये' अत्र व्याप्त्यर्थो धातूनामनेकार्थत्वात् । अस्मात्सम्पदादिलक्षणो भावे क्विप् । परि प्राप्तं नस् व्यापनं यस्य तत्तथोक्तम् । 'उपसर्गादसमासे०' इति णत्वम् । अत्र प्रापणक्रियया युक्तस्य परेर्णसंति प्रत्युपसर्गसंज्ञा नास्ति यत्क्रियायुक्तास्तं 'प्रति गत्युपसर्गसंज्ञा' (Pa. 1.4.60.3.) इति न्यायात् । अतः कथं णत्वम् ? एवं तर्हि 'उपसर्गाद्बहुलम्' इति वचनात् णसो णत्वं भविष्यति । 'निपातस्य च' इति पूर्वपदस्य दीर्घः, 'बहुव्रीहौ प्रकृत्या०' इति पूर्वपदप्रकृतिस्वरत्वम् Sy.

१०. अन्नलाभाय Sy.

११. अन्नस्य मत्समीपप्राप्तिसाधनं मार्गम् । पन्थाम —द्वितीयैकवचने 'इतोऽत्सर्वनामस्थाने' इत्यत् । नकारलोपश्छान्दसः । 'पथिमथोः सर्वनामस्थाने' इत्याद्युदात्तत्वम् Sy.

त्वं नो अग्ने अद्भुत क्रत्वा दक्षस्य मंहना ।
त्वे अंसुर्यमारंहत्क्राणा मित्रो न यज्ञियः ॥ २ ॥

त्वं नो अग्ने । त्वम् । अस्माकम् । अग्ने ! आश्चर्यभूत । प्रज्ञया । बलस्य च । महत्त्वेन । कर्माणि कुर्वाणः । यज्ञियो भवसि । सखा । इव । त्वयि । असुराणा हन्तृरूपम् । अरुहद् हि ।

त्वं नो अग्न एषां गयं पुष्टिं च वर्धय ।
ये स्तोमेभिः प्र सूरयो नरो मघान्यानशुः ॥ ३ ॥

त्वं नो अग्ने । अस्माकम् । एषाम् । अग्ने ! गृहम् । पुष्टिम् । च । वर्धय । केषामित्याह—

---

१. त्वं नेताग्ने D.

२. सामर्थ्यातिशयेन सर्वेषामाश्चर्यभूत ! अद्भुत—आमन्त्रितस्याद्युदात्तत्वम् Sy.

३. प्रज्ञां P. कर्मणास्मत्कृतेन यज्ञादिव्यापारेण प्रीतः सन् । क्रत्वा—'डुकृञ् करणे' 'कृञः कतुः' इति कतुप्रत्ययः । ककारो गुणवृद्धिप्रतिषेधार्थः । यणादेशः । क्रतुः कर्म । तृतीयैकवचने 'जसादिषु वावचनम्' इति वचनान्नाभावाभावः Sy.

४. धनस्य वा । दक्षस्य—'दक्ष गतिहिंसनयोः' दक्ष्यन्ते हिंस्यन्तेऽनेन शत्रव इति दक्षं बलम् । 'करणाधिकरणयोश्च' इति घञ् । ञित्त्वादाद्युदात्तः Sy.

५. ०त्त्वे० is suggested for ०त्वे० । मंहनं नाम दानं कुर्विति शेषः । मंहना—मंहतिर्दानकर्मा । 'सुपां सुलुक्०' इत्याकारादेशः Sy.

६. यज्ञघातुकराक्षसापनोदनलक्षणानि कर्माणि कुर्वाणो भव । क्राणा—'डुकृञ् करणे' शानच् । 'बहुलं छन्दसि' इति विकरणस्य लुक् । यणादेशः 'सुपां सुलुक्०' इत्यात्वम् । 'चितः' इत्यन्तोदात्तः Sy.

७. यज्ञार्हस्त्वम् । यज्ञियः—यज्ञमर्हतीत्यस्मिन्नर्थे 'यज्ञर्त्विग्भ्यां घखञौ' इति घः । प्रत्ययस्वरेणान्तोदात्तः Sy.

८. मित्रः सूर्यः Sy.

९. यतः कारणात् त्वयि । त्वे—'सुपां सुलुक्०' इत्यादिना ङेः शेआदेशः । सुबादेशत्वादनुदात्तः । त्वशब्दः प्रत्ययस्वरेणान्तोदात्तः 'एकादेश उदात्तेनोदात्तः' इत्येकादेशस्योदात्तत्वम् Sy.

१०. असुरघ्नं बलम् Sy.

११. त्वर्याणां हनूरुपमरुचिद्धि P. अरुहत्—रुहेर्धातोर्लुंडि 'कृमृदृरुहिभ्यश्छन्दसि' इति च्लेरङादेशः । ङित्त्वाद् गुणाभावः Sy.

१२. VM. ignores आ ।

१३. पोषम् P.
त्वत्स्तावकानाम् Sy.

१४. गृहम् is suggested for गृह ॥ गम्यते निवासायेति गयं गृहम् । गीयते स्तूयते इति वा गयं धनम् । गयम्—गृहपक्षे गमेः 'अन्याद्यश्च' इति यत्प्रत्ययान्तो मकारलोपश्च निपात्यते । धनपक्षे 'गा स्तुतौ' अस्माद्यत्प्रत्ययः । ह्रस्वत्वम् । 'यतोऽनावः' इत्याद्युदात्तत्वम् Sy.

१५. गवादिविषयां पुष्टिम् । पुष्टिम्—'पुष पुष्टौ' 'स्त्रियां क्तिन्' । छान्दसत्वादन्तोदात्तत्वम् Sy.

१६. वृद्धिं प्रापय Sy.

हे[1] स्तोतार[2] । स्तोत्रैस्त्वन[3] । धनानि[4] । प्रकर्षेण व्याप्नुवन्[5] तेषामेषामिति[6] ।

ये अग्ने चन्द्र ते गिरः शुम्भन्त्यश्वराधसः ।
शुष्मेभिः शुष्मिणो नरो दिवश्चिद्येषां बृहत्सुकीर्तिर्बोधति त्मना ॥ ४ ॥

ये अग्ने[7] । ये[8] । अग्ने[9] ! कान्त[10]. । तुभ्यम् । स्तुतिगिर[11]. । शोधयन्ति[12] । लब्धाश्वधना[13] । बलैश्च[14] । बलिन[15] । येषा[16] च । कीर्ति[17] । स्वयमेव[18] । दिव[19]: । अपि । महद्भूता[20] । प्रकाशते[21] तेषामेषा गय[22] पुष्टिमिति[23] ।

तव त्ये अग्ने अर्चयो भ्राजन्तो यन्ति धृष्णुया ।
परिज्मानो न विद्युतः स्वानो रथो न वाजयुः ॥ ५ ॥

तव त्ये[24] । तव । इमे[25] । अग्ने[26] ! अर्चय[27]: । दीप्यमाना[28]. । यन्ति[29] । तमसो धर्षणशीला[30] । परितो

---

१ Omitted by P. ये is suggested for हे ।

२. सूरयो लब्धवर्णाः Sy. ३. स्तोमैः स्तोत्रैः । स्तोमेभिः—'ष्टुञ् स्तुतौ' 'अर्तिस्तुसुहु' इत्यादिना मन् । गुणः । नित्त्वादाद्युदात्तः Sy.

४. मंहनीयानि गवादिधनानि Sy.

५. यथा प्राप्नुवन् तद्वद्व्यमपीत्यर्थः । आनशुः—'अशू व्याप्तौ' लिट् द्विर्वचनम् । हलादिशेषः । 'अत आदेः' इत्यात्वम् 'अश्नोतेश्च' इति नुडागमः । निघातः Sy.

६. VM. ignores त्वम् । ये and नरः ॥ ये लोके प्रसिद्धाः । नरः स्तोतारो मनुष्याः Sy.

७. Omitted by P.

८. कान्त ! is suggested for कान्तः ॥ सर्वेषां प्राणिनामाह्लादकर ! Sy.

९. त्वत्सम्बन्धिस्तोत्ररूपा वाचः Sy.

१०. शाधयन्ति P. शोभनाः कुर्वन्ति । शुम्भन्ति—'शुभ शुम्भ दीप्तौ' तुदादिः । पादादित्वान्निघाताभावः । लसार्वधातुकानुदात्तत्वे प्राप्ते सति शिष्टत्वाद्विकरणस्वर एव Sy.

११. लब्धाश्च धानाः P. ते अश्वधना भवन्ति । एतेन सर्वसमृद्धिरुपलक्ष्यते । अश्वराधसः—'अशू व्याप्तौ' 'अशूप्रुषि०' इत्यादिना क्वन् । अश्नुते व्याप्नोत्यध्वानमित्यश्वः । नित्त्वादाद्युदात्तः । 'राध साध संसिद्धौ', असुन् । राध्नुवन्ति साधयन्त्यनेन धर्मादीनीति राधो धनम् । बहुव्रीहित्वात्पूर्वपदप्रकृतिस्वरत्वम् Sy.

१२. शुष्मैः स्वकीयैर्बलैः सत्त्वैः शत्रुशोषका भवन्ति Sy. १३. बलवन्तः सन्तः Sy. १४. त्वत्सम्बन्धिनं स्तवं कुर्वताम् Sy. १५. सुकीर्तिर्भवति सर्वदिगन्तरालवर्तिनी कीर्तिर्भवतीत्यर्थः Sy.

१६. एवंविधं त्वां गयः आत्मना स्वयमेव । त्मना—'मन्त्रेष्वाङ्यादेरात्मनः' इत्याकारलोपः Sy. १७. आकाशात् Sy.

१८. ०भूत्वा P. महती । बृहत्—'बृह बृहि वृद्धौ' । शतृ । ङीपो लोपश्छान्दसः । प्रत्ययस्वरः Sy.

१९. बोधयति । बोधति—'बुध अवगमने' ण्यन्तात् शपि कृते तस्य 'छन्दस्युभयथा' इति सार्वधातुकसंज्ञायां णिलोपः । 'यद्वृत्तान्नित्यम्' इति निघाताभावः । धातुस्वरेणाद्युदात्तः Sy.

२०. VM. ignores नरः ।

२१. मे P. ते प्रसिद्धाः Sy.

२२. अधश्च P. त्वदीया रश्मयः Sy.

२३. सर्वतो गच्छन्ति । यन्ति 'इण् गतौ' Sy.

२४. धृष्णवोऽत्यन्तप्रगल्भाः । धृष्णुया—'ञिधृषा प्रागल्भ्ये' । 'त्रसिगृधिधृषि०' इत्यादिना क्नुप्रत्ययः । 'आदितश्च' (Pa. 7.2.16.) इतीट्प्रतिषेधः । बहुवचने 'सुपां सुलुक्' इत्याजादेशः । 'चितः' इत्यन्तोदात्तत्वम् Sy.

२५ परिगतो P.D.

गन्त्र्य । विद्युतः । इव । स्वनवान् । इव च । रथः । शत्रुभ्योऽन्नमिच्छन् ।

नू नो अग्न ऊतये सबाधसश्च रातये ।
अस्माकासश्च सूरयो विश्वा आशास्तरीषणि ॥ ६ ॥

नू नो अग्ने । क्षिप्रम् । अस्माकम् । रक्षणाय भव । धनाभावाद् बाधायुक्तस्य । धनदानाय । च । अस्मदीया । च । मेधाविनः पुत्रा. । सर्वा । दिश । तरितु शक्ता भवन्तु ।

त्वं नो अग्ने अङ्गिरः स्तुतः स्तवान आ भर ।
होतर्विभ्वासहं रयिं स्तोतृभ्यः स्तवसे च न उतैधि पृत्सु नो वृधे ॥ ७ ॥

त्वं नो अग्ने । त्वम् । अस्मभ्यम् । अग्ने ! अङ्गिरसामेक ! स्तुत. । स्तूयमानश्चाहम् । रयिम् ।

---

१. बलिन्त्यः P. परितो गन्त्र्यः, सर्वतो व्याप्ताः । परिज्मानः, 'अज व्रज गतौ' परिपूर्वाद्धातोः 'अन्येभ्योऽपि दृश्यन्ते' इति मनिन् । आकार-लोपश्छान्दसः । नित्त्वादाद्युदात्तः Sy.

२. अचिरप्रभाः । अनेन प्रकाशातिशय उक्तः Sy.

३. शब्दायमानः । अनेनार्चिषां स्वनाधिक्यमुक्तम् Sy.

४. अन्नकाम इवान्नार्थं युद्धेषु शत्रुविजयाय यथा प्रवर्तते तद्वदित्यर्थः । अनेनाहुतिविषयोऽभिलाष उक्तः । वाजयुः—वाजमात्मन इच्छति इति क्यच् 'न छन्दस्यपुत्रस्य' इतीत्वदीर्घयोः प्रति-षेधः । 'क्याच्छन्दसि' इत्युप्रत्ययः Sy.

५. रक्षायै भव Sy.

६. दारिद्र्यनिमित्तबाधसहितस्य । सबाधसः—बाधेरसुन् । बाधसा सह वर्तते इति सबाधाः । 'वोपसर्जनस्य' इति सहस्य सभावः । कृदुत्तर-पदप्रकृतिस्वरत्वम् Sy.

७. धनानां दानाय भव । रातये—'रा दाने' क्तिन् 'मन्त्रे वृषेषपचमनविदभूवीरा उदात्तः' इत्यन्तोदात्तः Sy.

८ किञ्च Sy.

९. अस्माकाः पुत्रमित्रादयः । अस्माकासः—'तस्मि-न्नणि च युष्माकास्माकौ' इत्यणि कृतेऽस्माकादेशः । छान्दसत्वादणो लोपः । बहुवचनेऽसुगागमः । षष्ठीबहुवचने मध्योदात्तत्वेन वृष्टत्वात्तथाविध-मावेशमत्रापि कृतवानाचार्यः Sy.

१०. स्तोतारः Sy.

११. विश्वाः—विशेः 'अशिप्रुषि०' इत्यादिना क्वन् । नित्त्वादाद्युदात्तः Sy.

१२. तासां तरणे क्षमा भवन्तु । अथवा आशाः कामाः । अयमर्थः—स्वाभिलषितप्रशस्तसमस्त-वस्तु सम्पादनं कुर्वित्यर्थः Sy. तरीषणि—'तॄ प्लवनतरणयोः' 'कृतॄभ्यामीषन्' (Unādi 4.466.) इतीषन् । बहुलवचनान्नलोपाभावः । अन्तोदात्तश्छान्दसः Sy.

१३ VM. ignores अग्ने ।

१४. अस्माकम् Sy.

१५. कार्यकारणयोरभेदोपचारादङ्गिरसां प्रकृतिभूतो-ऽप्यग्निरङ्गिरा इत्युच्यते । हे अङ्गिरः ! Sy.

१६. पूर्वैर्महर्षिभिः स्तुतः Sy.

१७. इदानीन्तनैश्च स्तूयमानस्त्वम् । स्तवानः—'ष्टुञ् स्तुतौ' शानचि कर्मणि व्यत्ययेन शप्प्रत्यय आद्युदात्तश्च Sy.

१८. धनम् Sy.

महतामभिभवितारम्[1]। तथा स्तोतृभ्यः। अस्मभ्यम्[2]। बलाय। च भव[3]। उत[4]। एधि। वृत्सु[5]। न.। वृधे[6]।

V.11.

जनस्य[7] गोपा अजनिष्ट[8] जागृविर्[9]अग्निः सुदक्षः[10] सुविताय[11] नव्यसे।
घृतप्रतीको बृहता दिविस्पृशा द्युमद्वि भाति भरतेभ्यः[12] शुचिः॥ १॥

[13]जनस्य॥ [14]सुतम्भरः॥ जनस्य। गोपायिता। [15]जातः। [16]जागरणशील। [17]शोभनबलः। अभ्युदयाय।

---

१. महतामप्यभिभवितारम्। अभिभवहेतुत्वादभिभवितृ धनमुच्यते। विभ्वासहम्—संहितायां विभूनामिति षष्ठीबहुवचनस्य 'सुपाम्०' इत्यादिनाऽऽकारादेशः। 'तत्पुरुषे कृति बहुलम्' इति षष्ठ्या अलुक्। पदकारास्तु विपूर्वाद्भवतेः अगागमे 'अन्येषामपि दृश्यते' इति दीर्घत्वं च मत्वावग्रहं कुर्वन्ति। कृदुत्तरपदप्रकृतिस्वरत्वम् Sy.

२. स्तोतृ सामर्थ्यं च प्रयच्छ। स्तवसे—'ष्टुञ स्तुतौ' तुमर्थेऽसेन्प्रत्ययः। नित्त्वादाद्युदात्तः Sy.

३. अपि च Sy.

४. भव Sy.

५. वृतत्सु P. पृत्सु is suggested for वृत्सु॥ युद्धेषु Sy.

६. अस्माकम् Sy.

७. समृद्धये Sy.

८. VM. ignores आ। भर and होतः॥ आ हर हे देवानामाह्वातः! Sy.
Ms. D. puts the figure ॥१०॥ here to indicate the end of the tenth hymn. No such number is given in P.

९. 'जनस्य गोपाः' इति षडृचमेकादशं सूक्तमात्रेयस्य सुतम्भरस्यार्षं जागतमाग्नेयम्। तथा चानुक्रान्तम्—'जनस्य षट् सुतम्भरो जागतम्' (KSA. 25.11. p. 19.) इति। प्रातरनुवाके आश्विनशस्त्रे चास्य सूक्तस्य विनियोगः। 'जनस्य गोपास्त्वामग्न ऋतायवः' (ĀŚS 4.13. इति) Sy.

१०. यजमानस्य Mah., U.

११. रक्षिता। गोपाः—'गुपू रक्षणे' आयप्रत्ययः। गोपायतेः क्विप्। परत्वादतो लोपः। अत्र परत्वादपक्तस्य लोपे कृते वर्णाश्रयत्वात् प्रत्ययलक्षणाभावेन यलोपो न स्यात् 'लोपो व्योर्वलि' इति प्रथमं लोपग्रहणात् ज्ञापकाद्यलोप एव भवति। लोपाजादेशस्य यलोपविधिं प्रति न स्थानिवद्भावः। प्रत्ययस्वरः Sy. गोपायति रक्षतीति गोपाः Mah. योऽयं गोपायिता U.

१२. तेर्मथितत्वात्तेभ्यो जात इत्युच्यते Mah.

१३. जागरणशीलः सदा प्रबुद्धः। जागृविः—'जागृ निद्राक्षये' 'जृशृस्तृजागृभ्यः क्विन्' इति क्विन्प्रत्ययः। 'जागोऽविचिण्णल्ङित्सु' इति प्रतिषेधाद् गुणाभावः नित्त्वादाद्युदात्तः Sy. कर्मणि सावधानः Mah. अग्निष्टज्ञानोऽग्निः U.

१४. सुबलः सर्वैः श्लाघनीयबलः। सुदक्षः—'आद्युदात्तं द्व्यच्छन्दसि' इत्युत्तरपदाद्युदात्तत्वम् Sy. शोभनो दक्ष उत्साहो यस्य, अतिकुशलो वा Mah. शोभनोत्साहः U.

१५. लोकानां कल्याणाय। सुविताय—'तन्वादीनां छन्दस्युपसंख्यानम्' इति सोरुवङादेशः' 'सूपमानात क्तः' इत्युत्तरपदान्तोदात्तत्वम् Sy. सूताय प्रसूताय कर्मणे यागाय। सूतेरिडागम आर्षः Mah. सुप्रभूताय कर्मणे U.

नवतराय[1]। घृतलिङ्गः[2]। दिव स्पृशता तेजसा[3] सह। दीप्तियुक्तम्[4]। विभाति[5] सोऽयम्। मनुष्येभ्य[6]। शुचिः[7]।

यज्ञस्य[8] केतुं प्रथमं पुरोहितमग्निं नरस्त्रिषधस्थे[9] समीधिरे।
इन्द्रेण देवैः सरथं[10] स बर्हिषि[11] सीदन्नि होता यजथाय[12] सुक्रतुः॥ २॥

यज्ञस्य। 'यज्ञस्य केतुमित्येष ह वै यज्ञस्य केतुर्यत्र ह वै क्वच सूयते तदेष ह वै पुरस्तात् केतुरुच्छ्रीयते। प्रथम पुरोहितमिति पुर इव वा एतमेत[13] दधते यमग्निमादधते' इति विज्ञायते। त्रयाणा बर्हिषो धातूना सहस्थाने। दीपयन्ति[14]। सोऽयम्। इन्द्रेण। देवैश्च। सरथमागत्य। बर्हिषि[15]। निषीदतु[16]। यज्ञा[17]। सुकर्मा[18]।

---

१. नव्यसे—नवशब्दादतिशायनेऽर्थे ईयसुन्प्रत्ययः। ईकारलोपश्छान्दसः। अतो लोपः। आद्युदात्तः Sy. नवीयसे अभिनवं नवीयस्तस्मै। ईलोप आर्षः Mah.

२. घृतेन प्रज्वलिताङ्गः Sy. घृतं प्रतीके मुखे यस्य Mah. घृतमुखः U.

३. अभ्रंलिहेन तेजसा युक्तः। दिविस्पृशा—'हृद-द्युभ्यां ङेरुपसंख्यानम्' इत्यलुक्। कृदुत्तरप्रकृति-स्वरत्वम् Sy. द्युलोकस्पर्शिना Mah. दिवं स्पृशतीति दिविस्पृक् तेन दिविस्पृशा U.

४. दीप्तिमत् यथा भवति तथा। द्युमत्—'ह्रस्व-नुड्भ्यां मतुप्' इति ह्रस्वात्परस्य मतुपोऽन्तो-दात्तत्वम् Sy. कान्तिमद्यथा तथा Mah. द्युतिमद् U.

५. प्रकाशते Sy. विविधं दीप्यते Mah., U.

६. ऋत्विग्भ्यस्तदर्थम् Sy. भरतेभ्य ऋत्विग्भ्यः सकाशात् Mah. ऋत्विग्भ्योऽर्थाय U. भरता इत्यृत्विङ्नाम (Ngh. 3.18.)

७. शुद्धः, एवंविधोऽग्निः Sy. शुद्धो बहूनि हवींषि भक्षयन्नपि, उच्छिष्टो न स्याच् शोधको वा Mah. बहून्यपि हवींषि भक्षयन्नुच्छिष्टो न भवति शोधको वा। यद्वा योऽसौ यजमानस्य गोपायिताऽजनिष्ट भरतेभ्यः ऋषिभ्यः सकाशात्। ऋत्विग्यजमानेभ्यो वा। जागृविरग्निः सुदक्षः। सुप्रभूताय कर्मणे नवतराय। सोऽयं घृतमुखो महता भानुना दिविस्पृशा द्युतिमद्वि-भाति। 'शुचिः शोचतेः। ज्वलतिकर्मणः' (N.6.1.) यद्वा मनुष्येभ्यो विजायमानो मनुष्यसम्बद्धैर्दोषैर्न लिप्यते। U.

८. VM. ignores अग्निः and बृहता॥ बृहता महता Sy. बृहता ज्वालासमूहेन Mah. महता भानुना U.
This stanza=YV. 15.27.

९. यागस्य Sy.

१०. प्रज्ञापकम्। 'कित ज्ञाने' औणादिक उप्रत्ययः Sy. ११. ०तुं इष P.

१२. यजमानैः पुरस्कृतम्। पुरोहितम्—"पुरोऽव्य-यम्' इति गतिसंज्ञायां 'गतिरनन्तरः' इति पूर्वपदप्रकृतिस्वरत्वम् Sy.

१३. ०मेतद् P.

१४. त्रिस्थाने विहारप्रदेशे। त्रिषधस्थे—आहवनी-यादिलक्षणेन त्रिप्रकारेणानेन सह तिष्ठतीति त्रिषधस्थः। कप्रत्ययः। 'सधमादस्थयोश्छन्दसि' इति सधादेशः। कृदुत्तरपदप्रकृतिस्वरत्वम् Sy.

१५. मिव यन्ति P. समैन्धत Sy.

१६. तेषां मान्यत्वात् समानरथम् Sy.

१७. बर्हिर्युक्ते तस्मिन् स्थाने Sy.

१८. प्रतिष्ठितोऽभवदिति यावत्। सीदत्—सदेः पाद्यादिना सीदादेशः। 'बहुलं छन्दस्यमाङ्-योगेऽपि' इत्यडभावः। पादावित्वाभ्यिधाताभावः Sy. १९. यज्ञाय is suggested for यज्ञा॥ यजथाय—यजेरौणादिकोऽथप्रत्ययः। प्रत्ययस्वरेण मध्योदात्तः Sy.

२०. ०र्माः P. शोभनकर्मा Sy.

२१. VM. ignores नरः and होता॥ नरः ऋत्विजः। होता देवानामाह्वाता Sy.

असंमृष्टो जायसे मात्रोः शुचिर्मन्द्रः कविरुदंतिष्ठो विवस्वतः।
घृतेनं त्वावर्धयन्नग्न आहुत धूमस्ते केतुरंभवद्दिवि श्रितः॥ ३॥

असम्मृष्टः। शत्रुभिरसम्मृष्टस्त्वम्। अरण्यो। जायसे। निर्मल। क्रान्तस्त्वम्। उत्थितवानसि जननानन्तरम्। यजमानात्। अथ घृतेन। त्वाम्। अवर्धयन्। अग्ने! आहुत! धूमश्च। ते। प्रज्ञापक दिवि। अभवत्। व्याप्तः।

अग्निर्नो यज्ञमुपं वेतु साधुयाग्निं नरो वि भंरन्ते गृहेगृहे।
अग्निर्दूतो अंभवद्धव्यवाहंनोऽग्निं वृणाना वृणते कविक्रंतुम्॥ ४॥

अग्निनः। अग्निः। अस्माकम्। यज्ञम्। उपगच्छतु। सुष्ठु। अग्निम्। मनुष्या। विविध धारयन्ति। अनुग्रहम। अग्निम्। दूत। अभवत्। हविषा वोढा। अग्निमेव। यज्ञाय वृणाना। वृणते होतारम्। क्रान्तप्रज्ञम्।

---

१. ०समृ० D.
२. ०त्रुसमृ० P. अबाधित एव Sy.
३. स्वजननिमित्तत्वावरणी मातरावित्युच्येते। ताभ्याम्। मात्रोः—'उदात्तयणोः हल्पूर्वात्' इति विभक्तेरुदात्तत्वम् Sy.
४. प्रादुर्भूतो भवसि Sy. ५. निर्मदः P.
६. का० D. सर्वत्र व्याप्तः। अथवा मेधावी। कविः—क्रमेः 'इन् सर्वधातुभ्यः' इतीन्प्रत्ययः। बाहुलकान्मकारस्य वत्वं रेफलोपश्च। व्यत्ययेनान्तोदात्तत्वम् Sy.
७. उदितोऽभवः। उदतिष्ठः—उत्पूर्वाद्भ्वंकर्मवाचिनस्तिष्ठतेरात्मनेपदाभावः Sy.
८. अग्निहोत्राद्यर्थं गृहे विशेषेण वसतः यजमानात्। विवस्वतः—विपूर्वाद्वसतेः सम्पदादिलक्षणो भावे क्विप्। 'तदस्यास्ति०' इति मतुप् 'मादुपधायाश्च०' इति वत्वम्। मतुपोऽनुदात्तत्वाद् धातुस्वरः Sy
९. पूर्वे महर्षयस्त्वाम् Sy.
१०. आव० P. वृद्धिमनयन् Sy.
११. हे आहुतिभिर्हुत! Sy.
१२. तव Sy.
१३. प्रज्ञापकः.....अग्न्यनुमापकत्वाद् धूमस्य Sy.
१४. अन्तरिक्षे Sy.
१५. दीप्य भव व्याप्तः P.
१६. VM. ignores मन्द्रः॥ सर्वैः स्तुतः। मन्द्रः—'मदि स्तुतिमोदमदस्वप्नकान्तिगतिषु' स्तुत्यर्थादस्मात् 'स्फायितञ्चि०' इत्यादिना रक्। अन्तोदात्तः Sy.
१७. नः is omitted by P.
१८. अस्मदीयम् Sy. १९. यागं प्रति Sy.
२०. उदग० P. आगच्छतु Sy.
२१. सर्वपुरुषार्थानां साधकः। साधया—'सुपां सुलुक्०' इत्यादिना विभक्तेर्यादेशः Sy.
२२. विहरन्ति विहरणं कुर्वन्तीत्यर्थः Sy.
२३. ०गृहं is suggested for ०ग्रहम्॥ अनगृहम् Sy.
२४. अग्निः is suggested for अग्निम्।
२५. देवानां दूतः Sy.
२६. Both P. and D. read वद् only, which evidently stands for अभवत्।
२७. हव्यानां वोढा Sy.
२८. अग्नि वै P. २९. सम्भजमानाः सन्तः Sy.
३०. ०तो P. सम्भजन्ते Sy.
३१. कान्त०.P. क्रान्तयज्ञम् Sy.

तुभ्येदमग्ने मधुमत्तमं वचस्तुभ्यं मनीषा इयमस्तु शं हृदे ।
त्वां गिरः सिन्धुमिवावनीर्महीरा पृणन्ति शवसा वर्धयन्ति च ॥ ५ ॥

तुभ्येदम् । तुभ्यमेव । अग्ने । मधुमत्तमम् । इदम् । वच । तथा सति तुभ्यमेव । स्तुति । इयम् । अस्तु । सुखकरी । हृदयाय । त्वाम् । स्तुतय । समुद्रमिव । आप । महत्य । आपूरयन्ति । वेगेन । वर्धयन्ति । च ।

त्वामग्ने अङ्गिरसो गुहा हितमन्वविन्दञ्छिश्रियाणं वनेवने ।
स जायसे मथ्यमानः सहो महत्त्वामाहुः सहसस्पुत्रमङ्गिरः ॥ ६ ॥

त्वामग्न । त्वाम् । अग्ने । अङ्गिरसः । गुहायाम् । निहितम । अन्वविन्दन् । श्रयमाणम् । काष्ठे । काष्ठे । स त्वम् । जायसे । मथ्यमानः । त त्वाम् । महत् । बलम् । आहु । सहस । पुत्रम् । अङ्गिरसामेक ।

---

१. त्वदर्थम् Sy.
२. अत्यन्तं मधुरम् Sy.
३. ०चः स्त० D. वचः क्रियते Sy.
४. कर D. सुखं कुर्वती Sy.
५. हृदि Sy.
६. स्तुतिरूपा वाचः Sy.
७. अवन्यो नद्यः Sy. ८. बलेन Sy.
९. यं त्वाम् Mah., U.
१०. ऋषयः Sy. अङ्गिरोवंशोद्भवा ऋषयः Mah. अङ्गिरस ऋषयः U.
११. निगूढे प्रदेशे Mah., U.
१२. नि is omitted by P. निगूढम् Sy. स्थितम् । अप्सु प्रविष्टमित्यर्थः । 'अग्निर्देवेभ्यः उदक्रामत्सोऽप आविशत्' इत्यादिश्रुतेः Mah. अवस्थितम । अप्सु, 'अग्निर्देवेभ्य उदक्रामत् सोमः प्राविशत्' इत्येवमादिनिदानमस्य मन्त्रस्य U. १३. ०न्दं P. अलभन्त Sy. लेभिरे । अन्विष्य प्रापुरित्यर्थः Mah. लब्धवन्तः U.
१४. आश्रितम् । शिश्रियाणम्—'श्रिञ् सेवायाम्' लिटः कानच् । शपः श्लुः । 'श्लौ' इति द्विर्वचनम् । इयङादेशः । चित्स्वादन्तोदात्तः Sy. श्रितम् Mah. अवस्थितम्....अन्वविन्दन्नङ्गिरस इति वर्तते U.
१५. वृक्षे वृक्षे Sy. पुनर्नष्टं त्वां वने वने नानावनस्पतिषु Mah. पुनरपि नष्टं सन्त वने वने ओषधिवनस्पतिषु U.
१६. य त्वामङ्गिरसोऽलभन्त स त्वम् Mah. स त्वमिदानीमपि U.
१७. अधुनाप्यरणिभ्य उत्पद्यसे Mah. जायसेऽरणिकाष्ठेभ्यो मथ्यमानः U.
१८. मथ्यमानो जायस इत्यर्थः Mah.
१९. महता Sy. महता बहुना Mah. महतेति विभक्तिव्यत्ययः U. २०. बलेन युक्तः Sy. सहसा बलेन मथ्यमानः । महत्सहश्शब्दाभ्यां तृतीयालोपः Mah. बलेन U.
२१. अत एव त्वामाहुर्वदन्ति मुनयः । बलेन मन्थनाज्जायमानत्वाद् बलपुत्रं वदन्तीत्यर्थः Mah. अतश्च कारणात्त्वामाहुर्ऋषयः U.
२२. बलस्य Mah., U.
२३. ०कः D. अङ्गिरसां प्रकृतिभूत ! Sy. अङ्गिरस इत्यग्नेः सम्बोधनम् । हे अङ्गिरः ! U. Ms. D. puts the figure ॥११॥ here to indicate the end of the eleventh hymn. No such number is given in P.
This stanza=YV. 15.28.

V. 12.

प्राग्नये बृहते यज्ञियाय ऋतस्य वृष्णे असुराय मन्मं ।
घृतं न यज्ञ आस्ये सुपूतं गिरं भरे वृषभायं प्रतीचीम् ॥ १ ॥

प्राग्नये । प्रभरामि । अग्नये । महते । यज्ञार्हाय । उदकस्य । वर्षित्रे । बलवते । मननीयाम् । घृतम् । इव । सुपूतम् । आस्ये । स्तुतिम् । कामाना वर्षित्रे । अग्नि प्रति गच्छन्तीम् ।

ऋतं चिकित्व ऋतमिच्चिकिद्ध्यृतस्य धारा अनु तृन्धि पूर्वीः ।
नाहं यातुं सहसा न द्वयेन ऋतं संपाम्यरुषस्य वृष्णः ॥ २ ॥

ऋतं चिकित्वः । ऋतस्य । ज्ञात ! ऋतम् । एव । जानीहि । तथा ऋतस्य । धारा । पूर्वी । अनुतृन्धि, बह्वी । न । अहम् । आरोचमानस्य । वृष्णोऽग्ने । सत्यभूतम् । मार्गम् । समा अविचारेण । स्पृशामि । नापि । सत्येन चानृतेन च, ऋतमिति शास्त्रीयमकुटिल कर्मोच्यते ।

---

१. 'प्राग्नये बृहते' इति षडृच द्वादशं सूक्तं सुतम्भरस्यार्षं त्रैष्टुभमाग्नेयम् । 'प्राग्नये' (KSA 25 12. p. 19) इत्यनुक्रान्तम् प्रातरनुवाके आग्नेये ऋतौ त्रैष्टुभे छन्दस्याश्विनशास्त्रे चेद सूक्तं विनियुक्तम् । सूत्रितञ्च—'प्राग्नये बृहते प्र वेधसे कवये' (ĀSS. 4.13.) इति Sy.

२. प्रणयामि Sy.

३. सामर्थ्यातिशयेन महते Sy.

४. oर्हा नया द० P. ऋतमित्युदकनाम Ngh. 1.12.

५. असुराय असेरौणादिक उरन्प्रत्ययः Sy.

६. ज्ञानसाधनम् Sy.

७. आस्ये प्रहुतं घृतं यथा प्रीतिकरं भवति तथा प्रीतिकरीं स्तुतिमित्यर्थः Sy.

८. सम्यक् संस्कृतम् Sy.

९. स्तुतिरूपां वाचम् Sy.

१०. गच्छति P. अभिमुखीम् Sy.

११. VM. ignores यज्ञे ।

१२. ऋतं स्तोत्रम् । ऋतमिति पदस्य परस्मिन्नामन्त्रिते विद्यमानेऽपि छान्दसत्वात्पराङ्गवद्भावाभावः Sy.

१३. हे चिकित्वः ! जानन्नग्ने ! त्वम् Sy.

१४. मया क्रियमाणमिदं स्तोत्रम् Sy.

१५. इदिति पूरणः Sy.

१६. चिकिद्धि—'कित ज्ञाने' । जुहोत्यादिः । लोटि रूपम् Sy.

१७. तथार्तस्य P.
उदकस्य Sy.

१८. सस्यपोषणार्थमुत्पादयितुम् मेघाननुविध्य Sy.

१९. बह्वी P. बह्वीः refers to पूर्वीः, therefore it should immediately follow पूर्वीः and precede अनुतृन्धि ।

२०. कामानां वर्षितुस्तव Sy

२१. स्तोत्रमेव Sy.

२२. यातुं कर्मणां नाशकरीं हिंसाम् Sy.

२३. सहसा is suggested for ससा ॥ बलेन युक्तः Sy.

२४ स्पृशामि करोमीति यावत् । 'षप समवाये' इति धातुः Sy.

२५. सत्यानृताभ्यां यत्किञ्चिदवैदिकं कृत्यम् Sy.

२६. The passage, ऋतमिति शास्त्रीयमकुटिलं कर्मोच्यते, should immediately follow सत्यभूतम् and precede मार्गम् ।

कया नो अग्न ऋतयन्नृतेन भुवो नवेदा उचथस्य नव्यः ।
वेदा मे देव ऋतुपा ऋतूनां नाहं पतिं सनितुरस्य रायः ॥ ३ ॥

कया नः । कीदृशा[1] वाचा । अस्माकम्[2] । अग्ने । सत्येनैव । सत्य[3] कर्मेच्छन्[4] । भवसि[5] । ज्ञाता । उक्तस्य[6] । स्तुत्यः कीदृश्या वाचा स्तुत उक्त[7] शृणोतीत्यर्थ । जानाति । माम् । ऋतूनाम्[8] । ऋतुपा[9] । पतिम्[10] । न । अहं वेद्मि[11] । धनस्य[12] । अस्य[13] । पालयितारम्[14] । प्रदातारमिति[15] ।

के ते अग्ने रिपवे बन्धनासः के पायवः सनिषन्त द्युमन्तः ।
के धासिमग्ने अनृतस्य पान्ति क आसतो वचसः सन्ति गोपाः ॥ ४ ॥

के ते । के[16] । तव[17] । अग्ने । शत्रो[18] । बन्धका[19] रश्मय ? के वा[20] रश्मय[21] । प्रयच्छन्ति[22] धनानि ।

---

१. केनापि Sy.
२. अस्मदीयस्य Sy.
३. क्रियमाणेन कर्मणा Sy.
४. सत्य P. सर्वप्राणिनां जीवनहेतुकमुदकं कुर्वन् Sy.
५. भवेः । भुवः—'भू सत्तायाम्' लिङर्थे लेटचडागमः । उवङादेशः Sy.
६. नवेदाः—न न वेत्तीति वेत्तीत्यस्मिन्नर्थे वर्तते । कथमेतल्लभ्यते ? निपातनात् । द्विनञ्पूर्वस्यासुन्प्रत्ययान्तस्य वेदेरेकस्य नञो लोपोऽन्यस्य प्रकृतिभा च स्कन्दस्वामिना निपातितः । पाणिनिना तु 'नभ्राण्नपात्' इति सूत्रे न वेत्तीत्येतस्मिन्नर्थे निपातितः । अस्यार्थस्यानुपपन्नत्वात् स्कन्दस्वामिपक्ष एवाश्रीयते Sy.
७. उचथस्य is suggested for उक्तस्य ॥ स्तोत्रस्य Sy.
८. उक्थं M.
९. वेत्तु Sy.
१०. ०पः P. द्वितीय ऋतुशब्दोऽनुवादकः Sy.
११. स्वामिनं तमग्निम् Sy.
१२. जानामि Sy.
१३. पश्वादिलक्षणस्य धनस्य Sy
१४. मम Sy.
१५. पालयितारम् seems to be the explanation of पतिम् and should immediately follow it.
१६. प्रदातारम् seems to be the explanation of सनितुः ॥ सनितुः भजमानस्य Sy.
१७. VM. ignores देवः ॥ देवो द्योतमानोऽग्निः Sy.
१८. कीदृशाः । सामर्थ्यातिशयादेवंविधा इति केनापि ज्ञातुं न शक्यन्त इत्यर्थः Sy.
१९. त्वत्सम्बन्धिनस्ते पुरुषाः Sy.
२०. Sy. adds स्वकीयस्य ।
२१. ०करा P.
बन्धकाः स्युः Sy.
२२. VM. seems to explain पायवः as रश्मयः ॥ Sy. explains पायवः as जनानां रक्षितारः ।
२३. दीनेभ्यो धनं प्रयच्छन्ति ते त्वदीयाः कीदृशाः ? Sy.

दीप्तिमन्त ? के[1] वा। अनृतकर्मण[2]। धारकं पुरुषम्[3]। रक्षन्ति ? के[4] वा। असत्यस्य[5]। वचस। गोपायितारः[6]। भवन्तीति प्रश्न।

सखायस्ते विषुणा अग्न एते शिवासः सन्तो अशिवा अभूवन्।
अधूर्षत स्वयमेते वचोभिर्ऋजूयते वृजिनानि ब्रुवन्तः॥ ५॥

सखायः। सखाय[7]। ते। अग्ने! विष्वग्गमना अभूवन् पराबभूवुः स्वदोषा[8]। तथा पुरा भद्रा। सन्त। पश्चाद् अभद्रा[9]। अभूवन्। क एषा दोष इत्याहाधूर्षतेति। स्वयमेव। अशिवैर्वचोभि। हिंसितवन्त[10]। ऋजुकर्माचरते तुभ्यम्[11]। अनृतानि। ब्रुवन्त यदा त्वा निन्दन्ति नाय स्तोतॄन् रक्षतीति तदा पराभवन्तीत्यर्थ।

यस्ते अग्ने नमसा यज्ञमीट्टे ऋतं स पात्यरुषस्य वृष्णः।
तस्य व्रतानि पृथुरा साधुरेतु प्रसर्स्राणस्य नहुषस्य शेषः॥ ६॥

यस्ते अग्ने। य[12]। ते[13]। अग्ने! नमस्कारेण सह[14]। यज्ञम्[15]। स्तौति साधु देवानग्नियजतीति। स।

---

१. को D. ये Sy.
२. असत्यस्य Sy.
३. जनम् Sy.
४. ते त्वदीया जनाः के सन्ति ? न के ऽपीत्यर्थः। अथवा ये के जना रिपोर्बन्धकाः, ये के पायवो रक्षितारः सनिषन्त धनं प्रयच्छन्ति। ये के ऽनृतस्यासत्यस्य धासि धारकं जनं पान्ति, अनृतजनितपापात् परिहृत्य सन्मार्गप्रदानेन रक्षन्ति, ये केऽसतोऽभिशापादिलक्षणाद्वचसो गोपायितारः सन्ति ते सर्वे त्वदीयाः। त्वदुपासका इत्यर्थः Sy.
५. स० P. ये असतः दुष्टस्याभिशापादिलक्षणस्य Sy.
६. गोपायितारः रक्षितारः Sy.
७. स्तोतारः Sy.
८. तव Sy.
९. विप्रकीर्णाः सर्वत्र व्याप्ताः Sy.
१०. ०वु D.
११. स्वे P.। स्वदोषान् is suggested for स्वदोषाः।
१२. इदानीं त्वत्परिचर्यां कुर्वन्तः शिवा आढ्याः Sy.
१३. पूर्वं परनिन्दादीनि कुर्वाणास्त्वत्परिचर्यां त्यजन्तोऽभद्राः Sy.
१४. दोह P.
१५. ०ह्व धू० P.
१६. ०वशि० P. असाधूक्तिभिः Sy.
१७. अहिंस्यन्त। धूर्वतेर्हिंसाकर्मण इदं रूपम् Sy.
१८. ऋजु सम्यगाचरतेऽपि मह्यम् Sy.
१९. कुटिलानि Sy.
२०. ०वती० D.
२१. VM. ignores एते twice ॥ एते मम सपत्नाः Sy.
२२. मनुष्यः Sy.
२३. त्वाम् Sy.
२४. Omitted by P.
२५. ननम० P. स्तोत्रेण Sy.
२६. ०ज्ञ D. यजनीयम् Sy.
२७. यद्वा ते तुभ्यं यज्ञं यागं नमसान्नरूपेण हविषा ईट्टे यजति। अस्मिन् पक्षे यजेः 'बहुलं छन्दसि' इति शपः श्लुः, 'श्लौ' इति द्विर्वचनम्। 'बहुलं छन्दसि' इति सम्प्रसारणं सवर्णदीर्घः। जकारस्य टकारः Sy.

आरोचमानस्य[1] । वर्षितुस्तव[2] । आत्मविषयप्रजापश्वादिदानात्मक शोभनकर्म[3] । अविच्छेदेनैव रक्षति[4] । तस्य[5] । निवासः[6] । विस्तीर्णः[7] । धनसमृद्धः[8] । आगच्छतु[9] । त्वां प्रति पुन पुनः सरत[9]. । मनुष्यस्य । शेषभूतः[10] ।[11]

V.13.

अर्चन्तस्त्वा हवामहेऽर्चन्तः समिधीमहि । अग्ने अर्चन्त ऊतये ॥ १ ॥

[12] अर्चन्तः[13] । पूजयन्तः[14] । त्वाम[15] । हवामहे[16] । अर्चन्त एव[17] । सन्दीपयाम[18]. । परिचरन्तः[19] । रक्षणाय[20] ।[21]

अग्नेः स्तोमं मनामहे सिध्रमद्य दिविस्पृशः । देवस्य द्रविणस्यवः ॥ २ ॥

अग्नेः[22] । अग्ने[23] ! स्तोमम्[24] । उच्चारयामः[24] । कामानां साधकम्[25] । ज्वालाभिर्दिव स्पृशत[26] । देवस्य[27] । द्रविणमिच्छमानाः[28] ।[29]

---

१. कामानां वर्षितुरग्नेः Sy.
२. ऋतं स्तोत्रम् Sy.
३. रिर० P., D.
४. यजमानस्य Sy.
५. गृहम् Sy.
६. विस्तीर्णं भवति । पश्वादिलक्षणैर्धनैः सम्पूर्णं भवतीत्यर्थः Sy.
७. कामानां साधकः Sy.
८. भवत्वित्यर्थः Sy.
९. सरन्तः P. प्रकर्षेण त्वत्परिचर्यां गच्छतः Sy.
१०. शिष्यत इति शेषः पुत्रः Sy.
११. Ms. D. puts the figure ॥१२॥ here to indicate the end of the twelfth hymn. No such number is given in P.
१२. 'अर्चन्तस्त्वा' इति षड्चं त्रयोदशं सूक्तं सुतम्भरस्यार्षं गायत्रमाग्नेयम् । अनुक्रान्तञ्च— अर्चन्तो गायत्रं तु' (KSA. 25.13. p. 19.) इति । प्रातरनुवाके आग्नेये ऋतौ गायत्रे छन्दसि आश्विनशस्त्रे इदमादिके द्वे सूक्ते । सूत्रितञ्च 'अर्चन्तस्त्वेति सूक्ते' (ĀŚS. 4.13.) इति । आहवनीयोपस्थाने 'त्वमग्ने सप्रथा असि' इत्येका । सूत्रितञ्च 'सं नः सृज सुमत्या वाजवत्या त्वमग्ने सप्रथा असीति च' (ĀŚS. 3.10.) इति । अश्वमेधे पौष्णेष्टौ 'त्वमग्ने सप्रथाः' इति प्रथमाज्यभागानुवाक्या । 'त्वमग्ने सप्रथा असि सोम यास्ते मयोभुव इति सद्वन्तौ' (ĀŚS. 10.6.) इति Sy.
१३. अर्चयन्तः P.
१४. पूजयन्तो वयम् Sy.
१५. त्वा P
१६. आह्वयामः Sy.
१७. ०न्तं देवः P. स्तुवन्तो वयम् Sy.
१८. समिद्भिः सन्दीपयामः Sy.
१९. अर्चन्त इति तृतीयं पदमादरातिशयार्थम् Sy.
२०. रक्षणाय तर्पणाय वा Sy.
२१. VM. ignores अग्ने !
२२. VM. explains gen. by voc.
२३. स्तोत्रम् Sy.
२४. ब्रूमः Sy.
२५. साधक P. पुरुषार्थानां साधकम् Sy.
२६. सूर्यरूपेणाऽऽकाशं व्याप्नुवतः Sy.
२७. द्योतमानस्य Sy.
२८. See footnote no. 7. on RV.V.9.2. p. 50. धनमिच्छन्तो वयम् Sy.
२९. VM. ignores अद्य ॥ अस्मिन्नहनि Sy.

अग्निर्जुषत नो गिरो होता यो मानुषेष्वा । स यक्षद्दैव्यं जनम् ॥ ३ ॥

अग्निः । अग्नि. । अस्माकम् । स्तुती॑ । सेवताम् । होता॑ । धन्यः । मानुषेषु । आवर्तते । सं॑ । यजतु । दैव्यम् । जनम् ।

त्वमग्ने सुप्रथा असि जुष्टो होता वरेण्यः । त्वया यज्ञं वि तन्वते ॥ ४ ॥

त्वमग्ने । सर्वत पृथुतम । असि । पर्याप्ता । होता । वरणीय । त्वया । यज्ञम् । कुर्वन्ति ।

त्वामग्ने वाजसातमं विप्रा वर्धन्ति सुष्टुतम् । स नो रास्व सुवीर्यम् ॥ ५ ॥

त्वामग्ने । त्वाम् । अग्ने ! अतिशयेनान्नस्य दातारम् । मेधाविन । वर्धयन्ति । सुष्ठु स्तुतम् । सं॑. । अस्मभ्यम् । देहि । शोभन वीर्यम ।

अग्ने नेमिरराँइव देवांस्त्वं परिभूरसि । आ राधश्चित्रमृञ्जसे ॥ ६ ॥

अग्ने नेमिः । त्वम् । अग्ने ! अरानिव । नेमि । देवान् । परितो भवसि । चित्रम् । अन्न च । प्रसाधयसि ।

---

१. **देवानामाह्वाता** Sy.
२. **सन् यः** is suggested for **धन्यः** ।
३. **मानुषो गत्य व०** P., D **आवसति** Sy
४. **अग्निः** Sy.
५. **देवसम्बन्धिनम्** Sy.
६. **जन** P.
७. **सुतम्भरस्यार्षम् । हे अग्ने** ! SKN.
८. **सर्वतः पृथुरसि प्रियश्च** SKN.
९. **भवसि** Sy.
१०. **पर्याप्तः** is suggested for **पर्याप्ता** ॥ **सर्वदा प्रीतः** Sy.
११. **सर्वैर्वरणीयः** Sy.
१२. Omitted by P. **किं च सर्वे यजमानाः त्वया साधनेन** Sy. **त्वया च हेतुना तव प्रसादेनेत्यर्थः** SKN.
१३. **वितन्वते** Sy. **सर्वयष्टारो वितन्वते कुर्वन्ती-त्यर्थः** SKN.
१४. VM. ignores **त्वम्** and **अग्ने** ॥ **सप्रथाः सर्वतः पृथुः** । **'त्वमग्ने सुप्रथा असि' इत्यपि निगमो भवति** N. 6.7., SKN. II.415.
१५. **वाजोऽन्नम् । तद्वतम्** Sv.
१६. **मेधाविनः स्तोतारः** Sy.
१७. **स्तोत्रैर्वर्धयन्ति** Sy.
१८. **पूर्वैर्महर्षिभिः सम्यक् स्तुतम्** Sv.
१९. **स त्वम्** Sy.
२०. **०न** P. **सर्वैः श्लाघनीयं बलम्** Sy.
२१. **नाभावर्पितान् सूक्ष्मान् स्थासकानिव** Sy.
२२. **प्रकाशमानः चक्रस्य बाह्यो वलयः** Sy.
२३. **स्वतेजसा परिभवसि** Sy.
२४. **नानाविधम्** Sy.
२५. **राध्नुवन्ति साधयन्त्यनेन पुरुषार्थानिति राधो धनम्** Sy. **राध इति धननाम** Ngh. 2.10.
२६. **आ ऋञ्जसे स्तोतृभ्यः प्रसाधय** Sy.
२७. Ms. D. puts the figure ॥१३॥ here to indicate the end of the thirteenth hymn. No such number is given in P.

V.14.

अग्निं स्तोमेन बोधय समिधानो अमर्त्यम् । हव्या देवेषु नो दधत् ॥ १ ॥

अग्निं[1] स्तोमेन[2] । अग्निम् । स्तोतः[3] ! स्तोमेन । बोधय । काष्ठे समिधान[4] । अमर्त्यम्[5] । सः[6], हव्यानि[7] । देवेषु[8] । अस्माकम् । प्रयच्छतु[9] ।

तमध्वरेष्वीळते देवं मर्ता अमर्त्यम् । यजिष्ठं मानुषे जने ॥ २ ॥

तमध्वरेषु[10] । तम् । यज्ञेषु[11] । स्तुवन्ति । यष्टृतमम् । मानुषे[12] । जने[13] वर्तमानम्[14] ।

तं हि शश्वन्त ईळते स्रुचा देवं घृतश्चुता । अग्निं हव्याय वोळहवे ॥ ३ ॥

तं हि[15] शश्वन्तः[16] । तम् । हि । वहवः[17] । स्तुवन्ति । घृतश्चुता[18] । जुह्वा सह । अग्निम् । हविषे[19] । वहनाय[20] ।

---

१. 'अग्नि स्तोमेन' इति षड्चं चतुर्दशं सूक्तं सुतम्भरस्यार्षं गायत्रमाग्नेयम्। 'अग्निं स्तोमेन' इत्यनुक्रमणिका (KSA. 25.14. p. 19.) प्रातरनुवाकाश्विनशस्त्रयोः पूर्वसूक्तेन सहोक्तो विनियोगः Sv.

२. हे स्तोतः ! हे अध्वर्यो ! Mah., U.

३. स्तोत्रेण Sy. स्तुत्या Mah स्तुतिभिः U.

४. स्वाभिलषितार्थसिद्धये प्रबोधय Sv. अवगतार्थं कुरु Mah., U.

५. योऽग्निः स्तोत्रैः सम्यक् प्रकाशमानः Sy. समिन्द्धे स समिधानः सन्दीपयन् Mah. सन्दीपयन् U.

६. अमरणधर्माणम् Sy. मरणधर्मरहितम् Mah. U.

७. सोऽग्निर्बोधितः सन् Mah.

८. हवींषि Sy., Mah. किमर्थं पुरस्कृत्येति चेद् हव्या हवींषि U.

९. अस्मदीयानि Sy. अस्मत्सम्बन्धीनि U.

१०. निदधातु Sy. धारयतु। अस्य सोऽधिकारोऽस्ति Mah. दधातु। स ह्यस्याधिकार इति U. This stanza=YV. 22.15.•

११. अथाह्याग्नेयेऽनुब्रूहीति । आग्नेयमाज्यभाग ँ सोऽन्वाहाग्निꣳ स्तोमेन बोधय समिधानोऽमर्त्यम् । हव्या देवेषु नो दधदिति स्वपितीव खलु वाऽएतद्यद्बुद्धासितो भवति सम्प्रबोधयत्येवैनमेतत्समदीर्यति जुषाणोऽग्निराज्यस्य वेत्वित्ति यजति । SB. 2.2.3.21. p. 150

१२. अग्निम् Sv.

१३. सप्ततन्तुषु Sy.

१४. मनुष्याणां सम्बन्धिनि Sv.

१५. लोके Sv

१६. VM. ignores देवम् । मर्ताः and अमर्त्यम् ॥ देवं द्योतमानम् । मर्ता मनुष्याः । अमर्त्यम् अमरणधर्माणम् Sv.

१७. ०न्त P.

१८. बहवः स्तोतारः Sy.

१९. घृद्युता P.,D. कीदृशास्ते ? घृतं क्षरन्त्या Sy.

२०. स्रुचा सहिताः Sy.

२१. किमर्थं स्तुवन्ति ? हव्याय हव्यवहनार्थं चरुपुरोडाशादिलक्षणं हविः Sy.

२२. वोढुम् Sy.

२३. VM. ignores देवम् ।

अग्निर्जातो॑ अरोचत घ्नन्दस्यूञ्ज्योतिषा॒ तमः॑ । अवि॑न्दद्गा अपः स्वः॑ ॥ ४ ॥

अग्निर्जातः[1] । अग्निः[2] । जात[3] । दीप्यते[4] । राक्षसान्[5] । तमश्च । तेजसा[6] । घ्नन्[7] । अविन्दच्च[8] । गन्त्रीः[9] । अपः[10] । स्वर्लोकात्[11] ।

अग्निमी॑ळेन्यं क॒विं घृ॒तपृ॑ष्ठं सपर्यत । वेतु॑ मे शृ॒णव॒द्धव॑म् ॥ ५ ॥

अग्निमीळेन्यम्[12] । अग्निम[13] । ईड्यम[14] । कविम्[15] । घृतेन घृतपृष्ठम्[16] । परिचरत[17] । स पिबतु[18] । मम सोमम्[19] । शृणोतु च । आह्वानम् ।

अग्नि घृ॒तेन॑ वावृधुः स्तोमे॑भिर्विश्वच॑र्षणिम् । स्वा॒धीभि॑र्वच॒स्युभिः॑ ॥ ६ ॥

अग्नि घृतेन । अग्निम[20] । घृतेन । स्तोमैश्च यजमानाः[21] । वर्धयामासुः[22] । सर्वस्य द्रष्टारम्[23] । सुकर्मभिश्च । स्तुतिवचनमिच्छन्ति ऋत्विग्भिः[24] ।

V.15.

प्र वे॒धसे॑ क॒वये॒ वेद्या॑य॒ गिरं॑ भरे य॒शसे॑ पू॒र्व्याय॑ ।
घृ॒तप्र॑सत्तो॒ असु॑रः सु॒शेवो॑ रा॒यो धर्ता॑ धरु॒णो वस्वो॑ अ॒ग्निः ॥ १ ॥

प्र वेधसे ॥ धरुण आङ्गिरस. ॥ प्रभरामि[25] । विधात्रे[26] । कवये[27] । वेदितव्याय[28] । स्तुतिम्[29] । यशस्विने[30] ।

---

१. अरण्योर्मथनेन प्रादुर्भूतः Sy.
२. अदीप्यत Sy.
३. यज्ञविघ्नकारिणः शत्रून् Sy.
४. स्वेन तेजसा Sy. ५. हिंसन् Sy.
६. अवेदयत् Sy. ७. गाः Sy.
८. उदकानि Sy. ९. सूर्यं च Sy.
१०. हे जनाः ! Sy. ११. स्तुत्यम् Sy.
१२. क्रान्तदर्शिनम् Sy.
१३. दीप्तोपरिभागम् Sy.
१४. पूजयत Sy.
१५. सोऽग्निः कामयताम् Sy.
१६. मदीयम् Sy. १७. सोम P.
१८. स्तोत्रैः Sy.
१९. ऋत्विजः Sy. २०. अवर्धयन् Sy.
२१. शोभनाध्यानैः Sy.
२२. स्तुतिकामैर्वेदैः समेतम् Sy.
२३. Ms. D. puts the figure ॥१४॥ here to indicate the end of the fourteenth hymn. No such number is given in P.
२४. द्वितीयेऽनुवाकेऽष्टादश सूक्तानि । तत्र 'प्र वेधसे' इति पञ्चर्चं प्रथमं सूक्तमाङ्गिरसस्य धरुणस्यार्षं त्रैष्टुभमाग्नेयम् । अत्रानुक्रमणिका—'प्र वेधसे पञ्चाङ्गिरसो धरुणः' (KSA. 25.15. p. 19.) इति । प्रातरनुवाके आग्नेये क्रतौ त्रैष्टुभे ॥ छन्दस्याश्विनशस्त्रे चेदं सूक्तम् । सूत्रितञ्च—'प्र वेधसे कवये त्वं नो अग्ने वरुणस्य विद्वान्' (ĀŚS. 4.13.) इति Sy.
२५. प्रणयानि Sy. २६. क्रान्तदृशे Sy.
२७. वेद्याय स्तुत्याय । विदिरयं मनिना समानार्थो, मनिश्च स्तुतिकर्मा Sy.
२८. स्तुतिः P.

पुरातनाय[1]। सोऽय[2] घृतेन निषण्ण। प्राज्ञ[3]। सुसुखः[4]। धनस्य। धर्ता[5] गवात्मकस्य। तथाऽन्यस्यापि धनस्य। धर्ता[6]। अग्निः[7]।

ऋतेनं ऋतं धरुणं धारयन्त यज्ञस्यं शाके परमे व्योमन्।
दिवो धर्मन्धरुणे सेदुषो नॄञ्जातैरजाताँ अभि ये ननक्षुः॥ २॥

ऋतेन। ऋतेन[8] कर्मणा। सत्यकर्माणम्[9]। धारकमग्निम्। धारयन्ति। यज्ञस्य[10]। सहायभूते[11]। परमे[12] स्थाने उत्तरवेद्याम्। द्युलोकस्य। धारके। यज्ञकर्मणि[13]। स्थितान्[14]। नेतॄन्। देवान्[15] मनुष्येष्वजातान्। जातै[16]। पश्वादिभिर्व्याप्नुवन्ति[17]।

अंहोयुवंस्तन्वंस्तन्वते वि वयो महद्दुष्टरं पूर्व्यायं।
स संवतो नवजातस्तुतुर्यात्सिहं न क्रुद्धमभितः परिष्ठुः॥ ३॥

अंहोयुवः[18]। अग्ने पाशमिश्रयितारो राक्षसा युयुत्सया[19]। आत्मशरीराणि[20]। विस्तारयन्ति। यानि शरीराणि पूर्व्यायाग्नये[21]। महत्[22]। दुःखेन च तरणीयम्[23]। खादनीयमन्नमिव भवन्ति। ततोऽयम्[24]। सवत सङ्गतान् राक्षसान्[25]। नवजननम्[26]। तरति[27]। ते सिंहम्। इव। क्रुद्धम्। अभित[28]। परिवर्ज्याग्निम्। तिष्ठन्ति सर्वत. पालयन्ते[29]।

---

१. मुख्याय तस्मा अग्नये Sy.
२. हवीरूपेण घृतेन प्रसन्नः Sy.
३. प्राज्ञ P. बलवान् Sy.
४. शोभनं शेवं सुखं यस्यासौ सुशेवः Sy. सेवमिति सुखनाम Ngh. 3.6.
५. पोषकः Sy.
६. वासकोऽग्निर्भवति Sy.
७. हविषां धारकः Sy.
८. यः अग्निः Sy. ९. स्तोत्रेण Sy.
१०. सत्यरूपमग्निम् Sy.
११. ते यजमाना यज्ञम् Sy.
१२. कर्मणि निमित्ते Sy.
१३. उत्कृष्टे Sy. १४. यज्ञे Sy.
१५. स्थिता P. आसीनान् Sy.
१६. आजातम् P.
१७. मनुष्यैर्ऋत्विग्भिः Sy.
१८. अभिप्राप्नुवन्ति Sy.
१९. VM. ignores ये ॥ ये यजमानाः Sy.
२०. ये यजमानाः Sy.
२१. ०सया P. अंहसा वियोजिकाः Sy.
२२. ते यजमानाः स्वास्तनूः Sy.
२३. वस्ता० D.
२४. मुख्यायास्मा अग्नये Sy.
२५. मह P., D. अधिकम् Sy.
२६ ०य P. राक्षसैर्दुष्प्रापम् Sy.
२७. हवीरूपमन्नं प्रयच्छन्ति Sy.
२८. अग्निः Sy.
२९. ताम्रक्ष० P., D. सङ्गतान् शत्रून् Sy.
३०. ०नः P. नवजातः Sy.
३१. तरतु Sy.
३२. कथमिव ? मृगाः सिंहम् इव Sy.
३३. सर्वतो वर्तमानाः शत्रवो माम् Sy.
३४. ०र्ज्यग्निम् P. वर्जयित्वा Sy.
३५. तिष्ठेयुः Sy. ३६. पावयन्ते P.

मातेव[1] यद्भरसे[2] पप्रथानो[3] जनंजनं[4] धायसे[5] चक्षसे[6] च[7]।
वयोवयो जरसे[8] यद्दधानः[9] परि[10] त्मना[11] विषुरूपो[12] जिगासि[13] ॥ ४ ॥

मातेव[14]। मातेव[15]। यदा[16]। बिभर्षि[17]। प्रथमान[18]। सर्वं जनम्[19]। धारणाय जीवनाय[20]। दर्शनाय[21]। च[22]। तदा नानाजातीयमन्न हविर्लक्षणम्[23]। जरयसि[24]। यत् यदात्मनि[25]। धारयसि[26]। हुतदा तेन[27]। नानारूप मन[28]। स्वयमेव[29]। परितो गच्छसि[30] रक्षमान् हन्तु[31] यज्ञे सर्वतश्चरसि जगतो धारक इति[32]।

वाजो[33] नु त शवसस्पात्वन्तमुरुं दोधं धरुणं[34] देव रायः[35]।
पदं न तायुर्गुहा[36] दधानो महो राये चितयन्नत्रिमस्पः[37] ॥ ५ ॥

वाजः[38]। हविर्लक्षणमन्नम्[39]। तव[40]। बलस्य[41]। अन्नम्[42]। रक्षतु[43]। विस्तीर्णम्[44]। कामाना[45] दोहम्[46]। कामाना[47] धारक च[48]। हे देव[49]! धनस्य। यथा। स्तेन[50]। गुहायाम्[51]। पदम्[52]। निधत्ते[53] एवम्[54]। अत्रिमृषिममुरैजिघांसित तद्दुःखेनैव गुहाया निधाय[55]। पश्चात् महते[56]। धनाय[57]। चेतयन्[58]। तम् अस्प[59], महःशब्द मकारान्तोऽप्यस्ति ततश्चतुर्थ्या लुक्[60], स्पृणोति[61] पारकर्मा तत उत्तारयामासेति[62]।

---

१. जननीव Sy. २. यस्त्वम् Sy.
३. सर्वत्र प्रथमानः Sy.
४. सर्वैः प्रार्थ्यसे Sy.
५. सर्वमन्नम् Sy
६. जयसि P ७. ०त्मन P.
८. ते P. हुतदत्तेन is suggested for हुतदा तेन ॥ धार्यमाणो भवसि Sy
९. सायमेव D. आत्मना Sy.
१०. सर्वभूतानि परिगच्छसि Sy.
११. हन्त D.
१२. जं D. १३. त्वदीयस्य Sy.
१४. समाप्तिं सम्पूर्तिम् Sy.
१५. पृथुम् Sy. १६. कामान् P.
१७. दोग्धारम् Sy. १८. कामसाधकं D.
१९. हे द्योतमानाग्ने ! Sy.
२०. तस्करः Sy.
२१. द्रव्यम् Sy.
२२. धारयन् रक्षति तद्वत् Sy.
२३. ऋषिम् is omitted by P
२४. तद्व० P.
२५. धनलाभार्थम् Sy.
२६. सन्मार्गं प्रकाशयन् Sy
२७. अत्रिमृषिम् Sy.
२८. चेतन्तमप्सा P, D. अप्रीणयः । यद्वा तमापद्भ्योऽपारयः । "स्पृ प्रीणनपारणयोः' इति धातुः Sy.
२९. The passage, महः लुक्, should immediately follow महते and precede ध्वनाय ।
३०. प्स्पृणोति P. D.
३१. वार P.
३२. ०त्ताख्यामा० P. The passage, स्पृणोतिः उत्तारयामास refers to अस्पः and should therefore immediately follow अस्पः ।
३३. VM. ignores नु ॥ नु अद्य Sy. Ms. D. puts the figure ॥१५॥ here to indicate the end of the fifteenth hymn. No such number is given in P.

V.16.

बृहद्वयो हि भानवेऽर्चा देवायाग्नये ।
यं मित्रं न प्रशस्तिभिर्मर्तासो दधिरे पुरः ॥ १ ॥

बृहत् ॥ पुरुः ॥ महत् । अन्नम् । दीप्ताय । प्रयच्छ । देवाय । अग्नये । यमग्निम् । सखायम् । इव । यज्ञे स्तुतिभि । मनुष्याः । आहवनीये धारयन्ति ।

स हि द्युभिर्जनानां होता दक्षस्य बाह्वोः ।
वि हव्यमग्निरानुषग्भगो न वारमृण्वति ॥ २ ॥

स हि । स.। हि। दीप्तैस्तेजोभि । जनाना मध्ये । बाह्वो । दक्षस्य समर्थस्य कर्मपरस्य यजमानस्य । होता भवति । ततश्च हवि । वरणीय देवेषु । व्यृण्वति प्रक्षिपति । यथा । भगः=भाग्य मनुष्येष्विति ।

अस्य स्तोमे मघोनः सख्ये वृद्धशोचिषः ।
विश्वा यस्मिन्तुविष्वणि समर्ये शुष्ममादधुः ॥ ३ ॥

अस्य । अस्य । स्तोमे सति । धन प्रयच्छत । सख्ये सति । सख्यु शत्रुविजयार्थ प्रवृद्धतेजस ।

---

१. 'बृहद्वयः' इति पञ्चर्चं द्वितीयं सूक्तमात्रेयस्य पूरोरार्षम् । अन्त्या पङ्क्तिः शिष्टा अनुष्टुभः । अग्निर्देवता । तथा चानुक्रान्तम्—'बृहत् पूरुः पङ्क्त्यन्तं हि' (KSA. 25.16. p. 19) इति । प्रातरनुवाके आग्नेये क्रतावानुष्टुभे छन्दस्याश्विनशस्त्रे चेदमादीनि दश सूक्तानि चतुर्थनवमवर्जितानि । आदितस्त्रिषु सूक्तेष्वन्त्यामुद्धरेत् । तथा च सूत्रितम्—'बृहद्वय इति दशानां चतुर्थनवमे उद्धरेदुत्तमामुत्तमां चादितस्त्रयाणाम्' (ĀŚS. 4.13.) इति Sy.
२. हं D.
३. हवीरूपमन्नं दीयते Sy.
४. ०प्त० P. दीप्तिमते Sy.
५. वयः प्रयच्छ Sy.
६. द्योतमानाय Sy.
७. प्रकृष्टाभिः स्तुतिभिः Sy.
८. आवहनीये P. पुरस्कुर्वन्ति Sy.
९. VM. ignores हि ॥ हि अतस्त्वम् Sy.
१०. अग्निः Sy.
११. ०प्तैस्तोभिः P. द्युतिभिर्युक्तः Sy.
१२. यजमानानाम् Sy.
१३. बहोः P. भुजयोः Sy.
१४. बलस्य Sy.
१५. देवानामाह्वाता भवति Sy.
१६. वारं वरणीयं धनम् Sy.
१७. ०व्युण्वति P. विशेषेण प्रयच्छति मनुष्येषु Sy.
१८. ०न्ति D. १९. इव Sy.
२०. सूर्यः Sy.
२१. VM. ignores अग्निः and आनुषक् ॥ आनुषक् देवेष्वनुषक्तं करोति Sy.
२२ अस्यं D. २३. स्तोत्रे Sy.
२४. प्रयच्छतः is suggested for प्रयच्छत ॥ मघवतो धनवतः Sy.
२५. सख्ये च स्याम Sy.
२६. P. reads सख्युर्विजयार्थं for शत्रुविजयार्थम् ।
२७. वृद्धानि प्रवृद्धानि शोचींषि तेजांसि यस्यासौ वृद्धशोचिः । एवंविधस्याग्नेः Sy.

कस्येत्याह—विश्वेति, सर्वाणि भूतानि पञ्चजना अपि। यस्मिन्नग्नौ। महास्वनौ ? महास्वने युद्धे। सञ्जाते सति शत्रुविजयार्थं हविर्भिः, बलम्। आदधुः, उत्तरत्र सम्बन्धः।

अधा ह्यंग्न एषां सुवीर्यस्य मंहना।
तमिद्यह्वं न रोदसी परि श्रवो बभूवतुः ॥ ४ ॥

अधा हि। अधा। हि। अग्ने! एषा भूताना मध्ये। तम्। एव स्तोमकर्तारं त्वया सिद्धसख्यम्। सुवीर्यस्य तव। महत्त्वेन। महान्तम्। न। द्यावापृथिव्यावपि। परिभवत.। अपि च शत्रूणा यशश्च परिभवति।

नू न एहि वार्यमग्ने गृणान आ भर।
ये वयं ये चं सूरयः स्वस्ति धामहे सचोतैधि पत्सु नो वृधे ॥ ५ ॥

नू न एहि। क्षिप्रम। अस्मान। आगच्छ। वरणीय धनम्। अग्ने! स्तूयमान। आभर। ये। वयम्। ये। चास्मदीया। स्तोतारः। सह। त्वा धारयाम। त्व च। अस्माकम्। युद्धेषु। वर्द्धनाय। भव।

---

१. सर्वे ऋत्विजः। 'सुपां सुलुक्०' इति डादेशः Sy.
२. It seems to be unnecessary.
३. बहुशब्दे Sy.
४. हविर्भिः स्तोत्रैश्च Sy.
५. सम्यगावधति Sy.
६. VM. ignores अर्ये ॥ अर्ये स्वामिनि Sy.
७. अथ Sy.
८. अस्माकं यजमानानाम् Sy.
९. अग्निम् Sy.
१०. सर्वैः स्पृहणीयस्य बलस्य Sy.
११. संहनायं दानाय भव Sy. संहतिर्दानकर्मा Cf. N. 1.7.
१२. महान्तं सूर्यम् Sy.
१३. इव Sy.
१४. ०व्याव D.
१५. परिगृह्णीतः Sy.
१६. ०तो न D.
१७. सर्वैः श्रवणीयम् Sy.
१८. परिभवतः is suggested for परिभवति।
१९. आगत्य चास्मभ्यम् Sy.
२०. यज्ञं प्रत्यागच्छ Sy.
२१. स्तूयमानः सन् Sy.
२२. सम्पादय Sy.
२३. यजमानाः Sy.
२४. वयं चोस्म० P.,D.
२५. हविर्भिः सहिता उभे ये वयम् Sy.
२६. कुर्मः Sy.
२७. अपि च Sy.
२८. पूतनासु Sy.
२९. समृद्धये Sy.
३०. VM. ignores स्वस्ति ॥ स्तोत्रम् Sy. Ms. D. puts the figure ॥१६॥ here to indicate the end of the sixteenth hymn. No such number is given in P.

V.17.

आ यज्ञैर्देव मर्त्य इत्था तव्यांसमूतये ।
अग्निं कृते स्वध्वरे पुरुरीळीतावसे ॥ १ ॥

आ यज्ञैः । आभिमुख्येन[1] स्तौति । हविर्भिः[2] सह । हे देव ! मनुष्यः[3] । इत्थम् । प्रवृद्धम्[4] । रक्षणाय[5] । अग्निम् । शोभनाध्वरे[6] हविषि । पुरुर्नामायमृषिः[7] । अन्नाय रक्षकाय[8] ।[9]

अस्य हि स्वयंशस्तर आसा विधर्मन्मन्यसे ।
तं नाकं चित्रशोचिषं मन्द्रं परो मनीषया ॥ २ ॥

अस्य हि । अग्ने ! स्वभूतकीर्तिस्त्वत्पुरः[12] । विविधकर्मन्[13] ! आस्येन[14] । स्तोत्र करोषि[15] । ततश्च तमग्निम्[16] । अविद्यमानदुःखम्[17] । चित्रतेजसम्[18] । मोदनम्[19] । स्तुत्या[20] त्वम्[21] । परो[22] भवसि, परः[23] पारणात्[24] ।[25]

---

१. 'आ यज्ञैः' इति पञ्चर्चं तृतीयं सूक्तमात्रेयस्य पूरोरार्षमाग्नेयम् । अन्त्या पङ्क्तिः, शिष्टाः पङ्क्त्यन्तपरिभाषयानुष्टुभः । 'आ यज्ञैः' (KSA. 25.17.p. 19.) इत्यनुक्रमणिका । अन्त्यावर्जं प्रातरनुवाकाश्विनशस्त्रयोः 'बृहद्वयः' इत्यादिदशसूक्तमध्ये विनियोग उक्तः Sy.

२. VM. explains **आ** and **ईळीत** together as **आभिमुख्येन स्तौति** but Sy. seems to explain the words separately **आ** as **आह्वयति** and **ईळीत** as **स्तौति** ।

३. **स्तोत्रैः** Sy.

४. Omitted by D.

५. **ऋत्विक्** Sy.

६. **स्वतेजोभिः प्रवृद्धम्** Sy.

७. **तर्पणाय** Sy.

८. **शोभने क्रतौ तमग्निम्** Sy.

९. **मनुष्यः स्तोता** Sy.

१०. **रक्षणाय** Sy.

११. VM. seems to explain **कृते** by **हविषि**. If **हविषि** is in opposition to **शोभनाध्वरके** then **कृते** is ignored.

१२. **कीतिस्त्वत्पुरः** P. **०कीर्तिमत्तरः** is suggested for **०कीर्तिस्त्वत्पुरः ॥ सुयशसां मध्येऽतिशयेन सुयशास्त्वम्** Sy.

१३. **विशिष्टो धर्मो यस्यासौ विधर्मा स्तोता । तस्य सम्बोधनम् । हे स्तोतः** ! Sy.

१४. **०र्माऽस्ये०** P. **आस्येन वाचा** Sy.

१५. **स्तौषि** Sy.

१६. **प्रसिद्धम्** Sy.

१७. **नाकं सुखम् । अकं दुःखम् । न विद्यतेऽकं यस्य सः । तम्** Sy.

१८. **०तेजस** P. १९. **स्तुत्यम्** Sy.

२०. **प्रकृष्टबुद्धया साधनेन** Sy.

२१. **त्यं** P.

२२. **परस्तात् स्थितम्** Sy.

२३. **परा** P., D.

२४. **वार०** P.

२५. VM. ignores **अस्य** and **हि** । **अमुं हि, अग्निम्** Sy.

अस्य वासा उ अर्चिषा य आयुक्त तुजा गिरा ।
दिवो न यस्य रेतसा बृहच्छोचन्त्यर्चयः ॥ ३ ॥

अस्य वं । अग्ने. । एव[1] । अर्चिषा[2] । असौ लोकोऽर्चिष्मान् भवति । सोऽस्य[3] देवान् । हविषो दानेन । स्तुत्या च । सयुनक्ति[4] । दिव. आदित्यस्य[5] । इव । यस्य[6] । शरीरान्निर्गच्छता[7] । अत्यन्तम्[8] । दीप्यन्ते[9] । अर्चयः[10] ।[11]

अस्य क्रत्वा विचेतसो दस्मस्य वसु रथ आ ।
अधा विश्वासु हव्योऽग्निर्विक्षु प्र शस्यते ॥ ४ ॥

अस्य क्रत्वा । अस्य[12] । प्रज्ञानेन[13] । विशिष्टबुद्धेः[14] । दर्शनीयस्य । धनम्[15] । स्तोतृणा रथे । आगच्छति[16] । ततोऽयम्[17] । विश्वासु[18] प्रजासु । हवनार्हः[19] सन् । अग्नि. । विक्ष[20] । स्तूयते ।

नू न इद्धि वार्यमासा सचन्त सूरयः ।
ऊर्जो नपादभिष्टये पाहि शुग्धि स्वस्तय उतैधि पृत्सु नो वृधे ॥ ५ ॥

नू न इद्धि । क्षिप्रम्[21] । एव । अस्माकम्[22] । स्तोतार[23] । वरणीय धनम् । आस्येन स्तोत्रेण । सेवन्त[24] ।

---

१. खलु Sy. २. प्रभया Sy.
३. आदित्यः Sy.
४. अग्निः Sy.
५. जगद्रक्षणसमर्थेन बलेन Sy.
६. सम्बद्धो भवति Sy
७. द्योतमानस्यादित्यस्येव Sy.
८. अग्नेः Sy.
९. प्रभया कृत्स्नं जगद्व्याप्तम् Sy.
१०. बृहन्तः Sy.
११. प्रकाशन्ते Sy.
१२. दीप्तयः Sy.
१३. VM. ignores उ ॥ उ इति पूरणः Sy.
१४. अग्नेः Sy.
१५. कर्मणा यागादिना Sy.
१६. सुमतयः ऋत्विजः Sy.
१७. वसूनि धनानि Sy.
१८. आ दधति Sy.
१९. अथ उत्पत्त्यनन्तरमेव Sy.
२०. सर्वासु Sy.
२१. यज्ञार्थमाह्वातव्यः सः Sy.
२२. प्रजासु Sy.
२३. हे अग्ने ! Sy.
२४. क्षिप्रं प्रयच्छ Sy.
२५. अस्मभ्यम् Sy.
२६. यतः स्तोतारः त्वत्तः सकाशात् Sy.
२७. सेवते P. सेवन्त would be inj. ॥ धनं लभन्ते Sy.

तथा सति हे अन्नस्य, पौत्र ! अभिलषितसिद्धयर्थम् । रक्षास्माकम् । शक्तश्च भव । अविनाशाय । उतेति गतम् ।

V.18.

प्रातरग्निः पुरुप्रियो विशः स्तवेतातिथिः ।
विश्वानि यो अमर्त्यो हव्या मर्तेषु रण्यति ॥ १ ॥

प्रातः ॥ मुक्तवाहाः ॥ प्रातरेव । अग्नि. । बहुना प्रियः । यजमानस्य । अतिथिर्भवन् । ऋत्विग्भि स्तूयते । यं । सर्वाणि । हवींषि । अमर्त्यः सन् । मर्त्येषु स्थितानि । देवेभ्यो रमयति ।

द्विताय मृक्तवाहसे स्वस्य दक्षस्य मंहना ।
इन्दुं स धत्त आनुषक्स्तोता चित्ते अमर्त्य ॥ २ ॥

द्विताय । द्वित इति चास्य नाम तस्मै । मह्य यजमानाय । होता । स्वस्य । महत्वे । सोमम् ।

---

१. किञ्च हे अन्नस्य न पातयितः ! बलस्य पुत्र ! वा Sy.
२. अभीच्छते मह्यमन्नं प्रयच्छेति शेषः Sy.
३. अस्मानापद्भ्यो रक्ष Sy.
४. त्वां याचे । व्यत्ययेन मध्यमः । शक्तो भवेति वा Sy. ५. शय D. क्षेमाय पश्वादि-लक्षणस्य धनस्य क्षेमार्थम् Sy.
६. अपि च Sy.
७. VM. ignores हि and the repeated words—एधि । पृत्सु । नः and वृधे ॥ इद्धीति पूरणौ । पृत्सु पृतनासु । नो वृधे समृद्धये । एधि भव Sy.
Ms. D. puts the figure ॥१७॥ here to indicate the end of the seventeenth hymn. No such number is given in P.
८. 'प्रातरग्निः' इति पञ्चर्चं चतुर्थं सूक्तम् । अत्रेयमनुक्रमणिका—'प्रातर्मृक्तवाहा द्वितः' (KSA. 25.18. p. 19.) इति । मृक्त-वाहा इति विशेषणविशिष्ट आत्रेयो द्वित ऋषिः । 'पङ्क्त्यन्तं हि' इति हिशब्दात् (Cf. KSA.12.3. p. 5.) अस्यापि सूक्तस्य पञ्चमी पङ्क्तिः, पङ्क्त्यन्तपरिभाषया शिष्टा अनुष्टुभः । उक्तो विनियोगः प्रातरनुवाका-श्विनशस्त्रयोः Sy.
९. मृक्तावहाः P.
१०. बहुप्रियः Sy.
११. यजमाने धनस्य निवेशकः Sy.
१२. यजमानानां गृहान्प्रति तिथिष्वभ्येतीत्यतिथिः । एवंविधः Sy. अतिथिरभ्यतितो गृहान्भवति । अभ्येति तिथिषु परकुलानीति वा । (पर) गृहाणीति वा N.4.5.
१३. या P. अग्निः Sy.
१४. हव्यानि हवींषि Sy.
१५. अमत्यः P. अमरणधर्मा Sy.
१६. मनुष्येषु यजमानेषु स्थितानि Sy.
१७. कामयते Sy.
१८. हे अग्ने ! Sy. १९. द्वितपुत्राय Sy.
२०. मृक्तं शुद्धं हविर्देवेभ्यो वहति प्रापयतीति मृक्त-वाहाः । तस्मै Sy.
२१. It stands for सः ॥ मृक्तवाहाः Sy.
२२. आत्मीयस्य Sy.
२३. ०त्वेन is suggested for ०त्वे ॥ मंहनायं दानाय भव Sy.

प्रयच्छति[1]। स्तोता[2] सन्। तुभ्यम[3]। अग्न[4]! अनुषक्तं[5] मदर्थं होता त्वा यजतीत्यर्थः।

तं वो दीर्घायुशोचिषं गिरा हुवे मघोनाम्[6]।
अरिष्टो येषां रथो व्यश्ववदावन्नीयते ॥ ३ ॥

तं वः[8]। तम। युष्मदर्थम। दीर्घगमनयुक्ततेजसम[9]। स्तुत्या[10]। ह्वयामि। हविष्मतामर्थाय[11]। अथ प्रत्यक्षमाहारिष्ट इति—हे अश्ववान दात[12]! येषा स्तोतृणाम[13]। रथ। सङ्ग्रामे विविध गच्छन्ति[14] तेषामर्थायाह्वयामि[15]।

चित्रा वा येषु दीधितिरासन्नुक्था पान्ति ये।
स्तीर्णं बर्हिः स्वर्णरे श्रवांसि दधिरे परि ॥ ४ ॥

चित्रा वा। चित्रा[16]। वा[17]। येष[18] स्तोतृषु। स्तुति[19]। आस्ये वा। य। शस्त्राणि[20]। रक्षन्ति। ते स्तीर्णम[21]। बर्हिर्लक्षीकृत्य[22]। अन्नानि[23]। धारयन्ति[24]। सर्वनरे[25]। परि[26]।

---

१. धारयति Sy.
२. स्तोता भवति Sy.
३. यतः कारणात् तुभ्यम् Sy
४. हे अमर्त्य! नित्याग्ने! Sv
५. सर्वदानुषक्तम् Sv.
६. VM ignores दक्षस्य and चित्॥ बलस्य धनस्य वा। चित् च Sv
७. हे अग्ने! Sv
८. वः पूजायां बहुवचनम्। त्वाम् Sv
९. ०क्ततेजसं P दीर्घगमनदीप्तिम् Sv
१०. स्तोत्रेण Sy.
११. आह्वयामि Sv.
१२. धनिनां कृते Sv.
१३. ०तामर्ताय P.
१४ शत्रुभिरहिंसितः Sv
१५. हेश्ववान् P. हे अश्वानां दातः! Sv.
१६. धनिनाम् Sv.
१७. युद्धेषु Sy.
१८. विगच्छतु Sv
१९. ०षा मत्ताया० P.
२०. The passage beginning with युष्मदर्थम् and ending with आह्वयामि is omitted by D.
२१. नानाविधा Sv
२२. ऋत्विक्षु Sv
२३. यज्ञविषया क्रिया भवति Sy.
२४. उक्थानि स्तोत्राणि Sy.
२५. तैर्ऋत्विग्भिः स्तीर्णम् Sv.
२६. बर्हिषः Sy
२७. ०त्य नावन्नानि P. अन्नानि हवींषि Sv
२८. निधीयन्ते Sv.
२९. स्वः स्वर्गं नरं यजमानं नयतीति स्वर्णरो यज्ञः। तस्मिन् Sy.
३०. उपरि Sv.
३१. The commentary on this stanza is omitted by D.

ये मे पञ्चाशतं दुदुरश्वानां सधस्तुति ।
द्युमदग्ने महि श्रवो बृहत्कृधि मघोनां नृवदमृत नृणाम् ॥ ५ ॥

ये मे । येऽमी । मह्यम् । मया याचिताश्वानाम् । पञ्चाशतम् । ददृ । स्तुतिभिः सह. त्वयि मया स्तूयमान इत्यर्थ । तेषामेषाम् । धनवताम् । दीप्तिमत् । महत् । बृहितम् । अन्नम् । अग्ने । कुरु । यथा मनुष्या याचिता प्रयच्छन्ति तद्वदिति ।

V.19.

अभ्यंवस्थाः प्र जायन्ते प्र वव्रेर्वव्रिश्चिकेत । उपस्थे मातुर्वि चष्टे ॥ १ ॥

अभ्यंवस्थाः ॥ वव्रि ॥ वव्रे । अवस्था । अभिप्रजायन्ते । वव्रेरमं जरा च । ज्ञायते अकाल विकृता वार्धक्यादय शरीरावस्था । सोऽय वव्रि । पृथिव्या । उपस्थ आसीन । समीपस्थ पश्यति दूरस्थमसञ्चरान्न पश्यति ।

---

१. **मघवानो दातारः** Sy.
२. **०ह्व** P.
३. The passage beginning with **ये मे** and ending with **याचिता** is omitted by D D begins **वाश्वानां** etc
४. **स्तुत्या सहितं त्वत्स्तोत्रसमनन्तरम्** Sy.
५. **तेषमे०** P. It seems to be the explanation of **नृणाम् ।**
६. **मघोनाम्** Sy.
७. **बृहि०** P. **परिवृढम्** Sy.
८. **कुरु । देहीत्यर्थः** Sy.
९. **परिचारकमनुष्ययुक्तम्** Sy.
१०. VM. ignores **अमृत ॥** Ms. D. puts the figure **॥१८॥** here to indicate the end of the eighteenth hymn. No such number is given in P.
११. **'अभ्यवस्थाः' इति पञ्चर्चं पञ्चमं सूक्तम । अत्रेयमनुक्रमणिका—'अभ्यवस्था वव्रिर्गायत्र्यावनुष्टुभौ विराड्रूपा'** (KSA. 25.19. p 19.) **इति । आत्रेयो वव्रिर्ऋषिः । प्रथमाद्वितीये गायत्र्यौ तृतीयचतुर्थ्यावनुष्टुभौ पञ्चमी विराड्रूपा—'एकादशिनस्त्रयोऽष्टकश्च विराड्रूपा'** (KSA 9.6. p. 4.) **इत्युक्तलक्षणोपेतत्वात्** Sv.
१२. **०व्रि** D.
१३. **ऋषेः** Sy.
१४. **अशोभना दशाः** Sy.
१५. **अभि उत्तरोत्तरं जायन्ते** Sy.
१६. **प्रजानीयात् । ज्ञात्वा चापनयत्विति भावः** Sy.
१७. **वव्रिः हविषां सम्भक्ता सोऽग्निः** Sy.
१८. **योऽग्निः पृथिव्याः** Sy.
१९. **समीपे स्थितं पदार्थजातम्** Sy.

जुहुरे वि चितयन्तोऽनिमिषं नृम्णं पान्ति । आ दृळ्हां पुरं विविशुः ॥ २ ॥

जुहुरे । तेऽमी यौवने शत्रून् बुध्यन्त । विजुहुरे आहूतवन्तो युद्धार्थम् । तदानीमेष । बल च । रक्षन् । दृढाम् । शत्रुपुरी च । विविशु ।

आ श्वैत्रेयस्य जन्तवो द्युमद्वर्धन्त कृष्टयः ।
निष्कग्रीवो बृहदुक्थ एना मध्वा न वाजयुः ॥ ३ ॥

आ श्वैत्रेयस्य । अश्वित्रायामपत्यम्य मे वंत्र । जाता । मनुष्या । दीप्तियुक्तम् । आवर्धयन्त

---

१. वत्रेरात्रेयस्यार्षम् SKN., Dur.

२. जुरे P. ३. ये Sy.

४. बध्, being Ātmanepada, the reading should be बुध्यमानाः ॥ तव प्रभावं जानन्तो जनाः Sy. विविधं जानन्तः । किम् ? होमकर्मैव ब्रह्म वाऽऽत्मारूयम् SKN. कर्मकर्तृसाधनानां याथात्म्यं वेददर्शनेन जानानाः Dur

५. विजुरे P. जुहुविरे यज्ञार्थं त्वामाह्वयन्ति Sy.

६. oहु P. अत्रैकवाक्यतायै यत्तच्छब्दावध्याहार्यौ । ये जुहुरे हुतवन्तो जुह्वति वा हवींषि SKN. जुह्वति येऽग्निम् । शब्दसारूप्यमपि च 'जुहुरे' इत्येतस्मिञ्छब्देऽस्त्येव । प्रकरणाच्चेयमाग्नेयी ऋक् । तस्मात् 'जुहुरे' इत्येष शब्दो हवनार्थ एवेत्युपपद्यते Dur. जुह्विरे विचेतयमानाः N. 4.19.

७. बुद्धा० P

८. तदानावानीमेषः P. तदानिमिषम् or तदानिमेषम् is suggested for तदानीमेषः ॥ सर्वदा Sy. अनिमेषं निमेषवर्जितं च महता यत्नेनेत्यर्थः ।

९. आहूय च तव बलं हविर्भिः स्तोत्रैश्च Sy. नृम्ण बल योगसामर्थ्यलक्षणम् SKN. ये नरा अनिमिषम्, आदरवदवस्थानमात्मनः कृत्वा युक्तात्मानो नृम्णं योगबलमात्मनः Dur.

१०. रक्षन् seems to be the explanation of पान्ति । It should be अरक्षन् unless रक्षन् is construed as an injunctive form. रक्षन्तिSy. रक्षन्ति । सततं च योगमभ्यस्यन्तीत्यर्थः SKN. कर्मणि वर्तमाने पान्ति रक्षन्तीत्यर्थः Dur.

११. वृढं P. ते दृढा शत्रुभिः साधयितुमशक्याम् Sy. दृढा दुर्भेदाम् SKN. आह य एवं गुणयुक्ताः किं तेषाम् ? इत्युच्यते, ते दृढां नित्याम् Dur

१२. पुरीम् Sy. पुरं परमात्मारूयम् SKN. अनावृत्तये परब्रह्ममयीं पुरम् । इमामदृढां शरीरपुरं पापिष्ठां हत्वेत्यभिप्रायः Dur.

१३. प्रविशन्ति । 'शतं पूर्भिरायसीर्भिर्नि पाहि' (RV VII 3.7.) इति निगमः Sy. ते ज्ञानकर्मसमुच्चयकारिणः । आविशन्ति परमात्मनि लीयन्ते मोक्ष गच्छन्तीत्यर्थः SKN. विचेतयमाना हि वेदप्रामाणिकाः सन्तो हवनादृते किमन्यत् कुर्युः ? तेन दृढां पुरमाविशेयुः Dur. १४. VM. ignores आ ॥ आकारो विविशुरित्यनेन सम्बध्यते SKN. जुह्विरे विचेतयमानाः N. 4.19., SKN. II.252. १५. अ D.

१६. अश्वित्राया अपत्यस्य is suggested for अश्वित्रायामपत्यस्य ॥ पदपाठ and सायण read आ । श्वैत्रेयस्य । which is explained as श्वित्रमन्तरिक्षम् । तत्र भवस्य वैद्युतस्याग्नेः Sy १७. मप P.

१८. Omitted by P. १९. जाताः is suggested for ज्ञाताः । जायन्त इति जन्तवः Sy.

२०. ऋत्विजः Sy. २१. दीप्तिमद्बलम् Sy.

पुत्राश्च मम वृद्धा आसन्नित्यर्थ । पुत्राणा नामानि—निष्कग्रीवः । बृहदुक्थ । अनेन । मधुना सह । वाजयुश्चेति चत्वार. पुत्राः, नकारः समुच्चयार्थीय. ।

प्रियं दुग्धं न काम्यमजामि जाम्योः सचा ।
घर्मो न वाजजठरोऽदंभ्धः शश्वतो दभः ॥ ४ ॥

प्रियं दुग्धम् । प्रियम् । दुग्धम् पय । इव । कमनीयम । पुन पुनर्दर्शनेऽपि यत् श्रद्धामावहति तद् अजामि तादृश मम शरीरम् । द्यावापृथिव्यो । सहायभूत शत्रुनिरसनात् तथाभम् । पुरा घर्म । इव । अन्त सक्तहविष्को दीप्यमान । शत्रुभिरहिंसित । अनेकेषाम् । हिंसको भव ।

क्रीळन्नो रश्म आ भुवः सं भस्मना वायुना वेविदानः ।
ता अस्य सन्धृषजो न तिग्माः सुसंशिता वक्ष्यो वक्षणेस्थाः ॥ ५ ॥

क्रीळन् । इद्ध वृद्ध सम्प्रति मुमूर्षुरग्नि प्रार्थयते—हे रश्मे ! रमणशील । अस्माकम् । क्रीळन् । प्रादुर्भव । चिताभस्मना । वायुना च । सह ज्ञायमाना । ताश्च । अस्य । धर्षणशीला । सुसंशिताः ।

---

१. अभिवर्धयन्ति Sy.
२. निष्केण सुवर्णेनालङ्कृतग्रीवाः । व्यत्ययेनैकवचनम् Sy.
३. बृहत्स्तोत्राः Sy.
४. एनया स्तुत्या Sy.
५. मधुना Sy.
६. अन्नकामाः Sy.
७. इव, यद्वा नकारश्चार्थे Sy.
८. प्रियम् अस्मदीयं स्तोत्रं शृणोतु Sy.
९. ०मावति P.
१०. दोषरहितम् Sy.
११. सहायभूतोऽग्निः Sy.
१२. शत्रुनिरसनात् तथाभं should be construed as an epithet of शरीरम्, i.e. तथाभूता आभा यस्य तत् तथाभं i.e. 'having that kind of brilliance on account of the slaughter of the enemy'.
१३. प्रवर्ग्यः Sy.
१४. ०विरेष्का D. वाजोऽन्नं जठरे यस्य सः । घर्मो यथा हव्येनाज्येन पयसा सिक्तो वाजजठरस्तद्वत् । हविर्जठर इत्यर्थः Sy
१५. शत्रुभिः स्वयमहिंसितः Sy.
१६. शाश्वतो नित्यः Sy.
१७. शत्रूणां हिंसकः Sy.
१८. भवं D.
१९. द्ध P.
२०. रश्मिमन्नग्ने ! Sy.
२१. शाने P.
२२. वनेषु क्रीडन् Sy.
२३. अभिमुखो भव Sy.
२४. स्वकार्येण भसितेन Sy.
२५. प्रेरकेण मरुता च Sy.
२६. जज्ञाय० D. सम्यग्ज्ञायमानस्त्वम् Sy.
२७. ताश्च P. ज्वालाः Sy.
२८. यजमानस्य मम Sy.
२९. शत्रूणां धर्षिकाः Sy.
३०. सुतीक्ष्णाः Sy.

वहनशीला[1]। वहनशीलेऽग्नौ स्थिता[2]। न। तिग्मा[3]:। भवन्तु[4] सुखं दुहन्तु[5] मामिति[6]।

V.20.

यमग्ने[7] वाजसातम त्वं चिन्मन्यसे रयिम्।
तं नो गीर्भिः श्रवाय्यं देवत्रा पनया युजम्॥ १॥

यमग्ने॥ प्रयस्वन्तः॥ यम्। अग्ने! अन्नाना[8] दातृतम! त्वम्। एव[9]। बुध्यसे। रयिम्[10]। तम्। अस्माकम्[11]। स्तुतिभि। श्रवणीयम्[12]। देवेषु। ब्रूहि। योग्यम्[13], अमीभ्य[14] प्रयच्छतेति देवान् ब्रूहीति।

ये अग्ने नेरयन्ति ते वृद्धा उग्रस्य शवसः।
अप द्वेषो अप ह्वरोऽन्यव्रतस्य सश्चिरे॥ २॥

ये अग्ने। ये[15]। अग्ने![16]। नः। ईरयन्ति[17] काष्ठादिकम्। तव। आढ्या[18] अपि। उद्गूर्णस्य[19]। तेजसः न त्वा प्रज्वलयन्ति यागार्थमित्यर्थः, अथवा शव[20]: अन्न तद् उद्गूर्णस्य तव न प्रयच्छन्तीति। द्वेष[21] पापम्। यज्ञभ्रशनिमित्त उपद्रव ह्वर[22]:। यस्य यजमानस्य प्रमादाद् व्रतादन्यदसत्यादिकम्। उपनसोन्यमतिव्रत[23]?

---

१. हवनशी० D. हविर्वहन्तीति वक्ष्यो ज्वालाः Sy.
२. वक्षणे वह्नौ स्थिताः Sy.
३. तिमाः P. तीक्ष्णाः Sy.
४. सन् सन्तु। अस्तेर्लेटि रूपम् Sy.
५. सुखं दुहन्तु is omitted by P.
६. Ms.D. puts the figure ॥१६॥ here to indicate the end of the nineteenth hymn. No such number is given in P.
७. 'यमग्ने' इति चतुर्ऋचं षष्ठं सूक्तमत्रीणां प्रयस्वतामार्षमाग्नेयम्। अन्त्या पङ्क्तिः। शिष्टा अनुष्टुभः। तथा चानुक्रान्तम्—'यमग्ने चतुष्कं प्रयस्वन्तः पङ्क्त्यन्तं ह' (KSA. 25.20 p. 19.) इति। प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः। अत्रेश्चतुर्वीराख्येऽहीनं द्वितीयेऽहनीदं सूक्तमाज्यशस्त्रम्। सूत्रितञ्च—'यमग्ने वाजसातमेति द्वितीयेऽहन्याज्यम्' (ĀSS. 10.2.) इति Sy.
८. D. repeats यमग्ने।
९. हे अत्यन्तमन्नद! Sy.
१०. चिदिति पूरणः Sy.
११. धनमस्माभिर्वीयमानं हवीरूपं धनम् Sy
१२. अस्मदीयं हविर्लक्षणं धनम् Sy.
१३. प्रशस्यम् Sy.
१४. प्रापयेत्यर्थः Sy.
१५. युक्तम् Sy.
१६. अमिमेभ्यः P.
१७. जनाः Sy.
१८. प्र P. D.
१९. हवींषि (न) प्रयच्छन्ति ते Sy.
२०. तुभ्यम् Sy.
२१. पश्वादिलक्षणैर्धनैः समृद्धाः सन्तः Sy.
२२. अधिकेन Sy.
२३. बलेनाभेन वा Sy.
२४. शववः P.
२५. प्रेद्वेषः D. प्रेद्वेषः P. त्वत्सम्बन्धिनं विरोधम् Sy. २६. अतिहिंसां च Sy.
२७. अन्यद्वैदिकाद्विभक्तं व्रतं कर्म यस्य तस्यासुरस्य Sy. २८. ०मिति० P.

सश्चतिरास्वादनकर्मा यजमानस्य प्रमादकृत पाप तत आददत इत्यर्थः ।

होतारं त्वा वृणीमहेऽग्ने दक्षस्य साधनम् ।
यज्ञेषु पूर्व्यं गिरा प्रयस्वन्तो हवामहे ॥ ३ ॥

होतारम् । होतारम् । त्वा । वृणीमहे । अग्ने ! बलस्य । साधयितारम् । यज्ञेषु । पूर्वकालभव मुख्यम् । स्तुत्या । प्रयस्वन्तो नाम्ना वयम् । हवामहे च ।

इत्था यथा त ऊतये सहसावन्दिवेदिवे ।
राय ऋतायं सुक्रतो गोभिः ष्याम सधमादो वीरैः स्याम सधमादः ॥ ४ ॥

इत्था । इत्थमेव । तव । तर्पणाय । हे बलवन् ! अन्वहम् । स्याम ! तथास्मान् तथ्यभूताय । धनाय च कुरु । सुप्रज्ञ ! वयं त्वत्प्रसादाद् गोभि । वीरैश्च । सहमोदितार । स्याम ।

---

१. अपसश्चिरे । आत्मानं प्रापयन्ति Sy.
२. VM. ignores अप twice.
अप नीता बलान्नहीना भवन्तीत्यर्थः Sy.
३. Omitted by P. देवानामाह्वातारम् Sy.
४. त्वाम् Sy.
५. अग्ने D.
६. साधकं साधयितारं त्वाम् Sy.
७. ०लं० P.
८. मय्यं P.
त्वाम् Sy.
९. स्तुतिरूपया वाचा Sy.
१०. अन्नवन्त एतन्नामका वयम् Sy.
११. स्तुमः Sy.
१२. इत्या P.
१३. इत्थं कुरु Sy.
१४. रक्षणाय Sy.
१५. हे अग्ने ! Sy.
१६. Sy. adds वयम् ।
१७. यथा स्याम तथा कुरु Sy.
१८. तस्य भू० P. D.
यज्ञाय च Sy
१९. यज्ञाय च Sy.
२०. हे सुक्रतो ! Sy.
२१. किञ्च वयम् Sy.
२२. होभिः P.D. Sy. adds सह माद्यन्तः स्याम
२३. पुत्रैश्च Sy.
२४. सह माद्यन्तः Sy.
२५. VM. ignores यथा and explains सधमादः once only. Ms. D. puts the figure ॥२०॥ here to indicate the end of the twentieth hymn. No such number is given in P.

V.21.

मनुष्वत्त्वा नि धीमहि मनुष्वत्समिधीमहि ।
अग्ने मनुष्वदङ्गिरो देवान्देवयते यज ॥ १ ॥

मनुष्वत्[1][2] । स मनुर्यथा । त्वाम्, आदधे । यथा च समिधे[4] । वयं च तथा कुर्मस्त्वा च । अग्ने ! अङ्गिर[5] ! तद्वत्[6] । देवानिच्छते[7] यजमानाय । देवान् । यज ।

उत्तरा निगदसिद्धा

त्वं हि मानुषे जनेऽग्ने सुप्रीत[8] इध्यसे ।
स्रुचस्त्वा यन्त्यानुषक्सुजात सर्पिरासुते ॥ २ ॥

[त्वं हि] यस्मिन् सर्पिरासूयते[10] हूयते स तथोक्त. ।[11]

त्वां विश्वे सजोषसो देवासो दूतमक्रत ।
सपर्यन्तस्त्वा कवे यज्ञेषु देवमीळते ॥ ३ ॥

त्वां विश्वे[12] । देवाश्च । सङ्गता हविर्वहनाय । त्वाम् । दूतम् । अकृण्वन्[13] । मनुष्याश्च त्वामेव । पूजयन्तः[14] । स्तुवन्ति[15][16] ।

---

१. 'मनुष्वत्त्वा' इति चतुर्ऋचं सप्तमं सूक्तमात्रेयस्य ससस्यार्षम् । 'मनुष्वत्ससः' (KSA. 25. 21. p. 19.) इत्यनुक्रमणिका । 'षड्कृत्यन्तं ह' (KSA. 25.20 p. 19.) इति । पूर्वत्रोक्तत्वादिदमादीनि त्रीणि सूक्तानि षड्कृत्यन्तानि, शिष्टा अनुष्टुभः । अग्निर्देवता । प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः Sy.

२. ०ष्यात् स D. ३. मनुरिव । मनुःशब्दो मनुपर्यायः । 'नभोऽङ्गिरोमनुषां वत्युपसंख्यानम्' इति भसंज्ञायां रुत्वाभावः Sy.

४. समिन्धे is suggested for समिधे ॥ समिद्भिः सन्दीपयामः Sy.

५. ०रसः D. हे अङ्गारात्मकाग्ने ! Sy.

६. तद्व P. D. मनवे मनोरपत्याय Sy.

७. देवकामाय यजमानाय Sy.

८. The *pratika* is supplied by the Editor.

९. यमस्मिन् P.

१०. ०रासुते P.

११. Sy. explains the stanza in the following manner—हे अग्ने ! त्व मानुषे जने मनुष्यलोके सुप्रीतः स्तोत्रैः सुष्ठु प्रीतः सन् इध्यसे दीप्यसे । स्रुचः हविर्भिः सम्पूर्णाः आनुषक् अनुषक्तं यथा भवति तथा त्वा त्वां यन्ति प्राप्नुवन्ति । हे सुजात ! हे सर्पिरासुते ! घृतयुक्ताग्न ! इति ।

१२. देवा श्वां गता P. ०श्चासं० D. सह प्रीयमाणाः Sy.

१३. अकुर्वन् Sy.

१४. परिचरन्तो यजमानाः Sy.

१५. देवानाह्वातुं याचन्ते Sy.

१६. VM. ignores विश्वे । कवे । यज्ञेषु and देवम् ॥ विश्वे सर्वे । अतः कारणात् हे कवे ! क्रान्तदर्शिन् ! द्योतमानम् Sy.

देवं वो देवयज्यायाग्निमीळीत मर्त्यः ।
समिद्धः शुक्र दीदिह्यृतस्य योनिमासदः ससस्य योनिमासदः ॥ ४ ॥

देवं वः । हे मनुष्या ! युष्माकम् । मर्त्यो होता । देवयागार्थम् । अग्निम् । स्तौति । अथ प्रत्यक्ष-
म त्वमग्ने ! शुक्रवर्ण ! समिद्ध । दीप्यस्व । यज्ञस्य । स्थानम् । आसीद । ससनाम्नः । गृहम् ।
आसीद ।

V. 22.

प्र विश्वसामन्नत्रिवदर्चा पावकशोचिषे ।
यो अध्वरेष्वीड्यो होता मन्द्रतमो विशि ॥ १ ॥

प्र विश्वसामन् ॥ विश्वसामा ॥ हे विश्वसामन् ! यथैनमत्रिरस्तौद् एवम् ।
अस्मै शोधकतेजसे । प्रस्तुहि । य । यज्ञेषु । स्तोतव्य । ह्वाता । मादयितृतमश्च ।
मनुष्येषु ।

---

१. त्वाम् Sy.
२. मनुष्यः Sy.
३. मर्त्यो हता P. Ms. D. adds the following passage between मर्त्यो and होता । जातप्रज्ञं देवं काले यष्टारं प्रैयत्वयमग्निर्यष्टानुषक्तमतिशयेन । The additional passage is the explanation of RV. V.22.2.
४. देवयज्यायै Sy.
५. अग्रगण्यम् Sy.
६. स्तोतुमर्हति Sy.
७. हे शोचिष्मन् ! Sy.
८. ०द्धन् P. समिद्धः is suggested for समिद्ध ॥ हविर्भिः प्रवृद्धः सन् Sy.
९. सत्यभूतस्य Sy.
१०. कारणं स्वर्गसाधनं यज्ञस्थानम् Sy.
११. देवतारूपेणासीद Sy.
१२ ०नामः D. ऋषेर्मंम Sy.
१३. गुमम गृहम् P., D.
१४. आदरातिशयद्योतनार्थं पुनर्वचनम् Sy.
१५. VM. ignores देवम् ॥ द्योतमात्रम् Sy. Ms. D. puts the figure ॥२१॥ here to indicate the end of the twenty-first hymn. No such number is given in P.
१६. 'प्र विश्वसामन्' इति चतुर्ऋचमष्टमं सूक्तम् । आत्रेयो विश्वसामा ऋषिः । चतुर्था पङ्क्तिः, शिष्टा अनुष्टुभः । अग्निर्देवता । तथा चानुक्रान्तम्—'प्र विश्वसामन् विश्वसाम' (KSA. 25.22. p.19.) इति । उक्तो विनियोगः प्रातरनुवाकाश्विनशस्त्रयोः Sy.
१७. ऋषेः सम्बोधनमेतत् । त्वम् Sy.
१८. यथै० D. अत्रिरिव Sy.
१९. एवौ चस्मे P.
२०. शोधकवीप्तये तस्मा अग्नये Sy.
२१. ०स्त० P. प्रगाय Sy.
२२. अग्निः Sy.
२३. सर्वैर्यज्वभिः स्तुत्यः Sy.
२४. देवानामाह्वाता Sy.
२५. स्तुत्यतमः Sy.
२६. जने Sy.

न्य१ग्निं जातवेदसं दधाता देवमृत्विजम् ।
प्र यज्ञ एत्वानुषगद्या देवव्यचस्तमः ॥ २ ॥

न्यग्निम्[1] । निधत्त । अग्निमायतने । जातप्रज्ञम् । देवम् । कालं यष्टारम् । प्रेत्वग्नि । यष्टा । अनुषक्तम्[6] । अतिशयेन, अद्य, देवाना व्यापक. ।

चिकित्विन्मनसं त्वा देवं मर्तास ऊतये ।
वरेण्यस्य तेऽवस इयानासो अमन्महि ॥ ३ ॥

चिकित्विन्मनसम्[11] । यस्य मन सर्वं विजानाति तम् । त्वा । देवम् । मनुष्या वयम् । तृप्तये । वरणीयम्[17] । तव । रक्षणम्[19] । भजमाना । स्तुम ।

अग्ने चिकिद्ध्य१स्य नं इदं वचः सहस्य ।
तं त्वा सुशिप्र दम्पते स्तोमैर्वर्धन्त्यत्रयो गीर्भिः शुम्भन्त्यत्रयः ॥ ४ ॥

अग्ने चिकिद्धि[20] । अग्ने ! बुध्यस्व । न अस्माकमत्रीणाम्[21] । अस्य विश्वसाम्न[22] । उदम्[23] । स्तुतिवच[24] । ह सहसो जात[25] ! तम् । त्वाम् । सुहनो[26] ! गृहपते ! स्तोमै[27] । वर्धयन्ति । अत्रय[28] । गीर्भि । अलङ्कुर्वन्ति अत्रय[31] ।

---

१. न्या० P.
२ हे यजमानाः ! Sy
३. जातधनं वा Sy.
४. द्योतमानम् Sy.
५. ऋतुयष्टारम् Sy
६. प्रैयत्वमग्निः P., D. प्रगच्छतु Sy
७. यज्ञसाधनमस्माभिर्वीयमानं हविः Sy
८. अनुषक्तं यथा भवति तथा Sy.
९. अस्मिन्नहनि Sy.
१०. देवानामाप्ततमः Sy.
११ हे अग्ने ! Sy.
१२. चिकित्विज्जानत् मनो यस्यासौ चिकित्विन्मनाः तम् Sy १३. त्वाम् Sy.
१४. देव P. १५. रक्षणार्थम् Sy.
१६. भजनीयम् P. सम्भजनीयस्य Sy
१७ रणम् P. अवसे तर्पणाय Sy
१८. उपगच्छन्तः Sy.
१९. अग्नि P
२०. जानीहि Sy
२१. ०मन्त्रिणाम् P अस्मदीयम् Sy
२२. ०श्वससा० P
२३. परिचरणमिदम् Sy
२४. स्तोत्रं च Sy.
२५. जा P, D बलस्य पुत्र ! Sy.
२६. शोभने शिप्रे हनू नासिके वा यस्यासौ सुशिप्रः । तस्य सम्बोधनम् । सुशिप्र ! Sy.
२७. ग्रह० P. ०तेः D.
२८. स्तोत्रैः Sy.
२९. अत्रिपुत्राः Sy.
३०. अबलकु० P.
३१. Ms. D. puts the figure ॥२२॥ here to indicate the end of the twenty-second hymn. No such number is given in P.

V.23.

अग्ने सहन्तमा भर द्युम्नस्य प्रासहा रयिम् ।
विश्वा यश्चर्षणीरभ्यासा वाजेषु सासहत् ॥ १ ॥

अग्ने सहन्तम् ॥ द्युम्न ॥ अग्ने । शत्रूनभिभवन्तम् । रयिम् । आभर । द्युम्नस्य मम शत्रून् । प्रसह्य । यो रयि । सर्वान् । मनुष्यान् । निरसनेन । सङ्ग्रामेषु । अभिभवति ।

उत्तरा निगदव्याख्याता

तमग्ने पृतनाषहं रयिं सहस्व आ भर ।
त्वं हि सत्यो अद्भुतो दाता वाजस्य गोमतः ॥ २ ॥

[तमग्ने]

---

१. 'अग्ने सहन्तम्' इति चतुर्ऋचं नवमं सूक्तम् । अत्रानुक्रमणिका—'अग्ने द्युम्नो विश्वचर्षणिः' (KSA. 25.23 p. 19) इति । द्युम्न ऋषिः । चतुर्थी पङ्क्तिः । आद्यास्तिस्रोऽनुष्टुभः । अग्निर्देवता । प्रातरनुवाकाश्विनशस्त्रयोर्दशसूक्तान्तःपातित्वादुक्तो विनियोगः Sy

२. पराभिभवक्षमं पर्याप्तमित्यर्थः BB.

३. पुत्रम् Sy. ईदृश रयि धनम् BB.

४. आहर Sy. BB.

५. द्युम्नाय महामृषये, चतुर्थ्यर्थे षष्ठी Sy द्युम्नस्य यशस्विनः पुरुषस्यास्मदमित्रभूतस्य BB.

६. प्रकृष्टेन बलेन Sy. प्रहस(सह)नेन तादृशमस्मदमित्रमभिभूय तदीयं रयिमस्मभ्यमाहर । 'सह मर्षणे' चौरादिकः BB

७. पुत्रः Sy. यो भवान् BB.

८. विश्वाः BB.

९. शत्रून् Sy. मनुष्यसेना अस्मद्विपक्षभूताः BB.

१०. आस्येन स्तोत्रेण युक्तः सन Sy. किं कुर्वन्नित्याह आसनमात्रेणैव । आसेः क्विप् BB.

११. युद्धेषु Sy. अन्नेषु निमित्तभूतेषु ।, उपलक्षणं चैतत् । अस्माकमन्नादिकं साधयितुम् BB

१२. ०भवति is suggested for ०भवन्ति । अभि आभिमुख्येन गतान् अभिभवति Sy अभिभवतु BB.

This stanza=TS 1.3.14.6

१३. The *pratika* is supplied by the Editor

१४. हे अग्ने ! सहस्वः ! बलवन् ! पृतनासह पृतनाः सेना अभिभवितारम् । रयि पुत्र त्वम् । आ भर आहर । त्वं हि । सत्यः सत्यभूतः । अद्भुतः महान् । गोमतः गोभिर्युक्तस्य । वाजस्य अन्नस्य दाता Sy.

हे अग्ने ! सहस्वो महाबल ! पृतनासह सर्वशत्रुसेनाभिभवनसमर्थं तत्र पर्याप्त रयि धनमाभर आहर । पूर्ववद्भूत्वम् । यस्मात्त्वमेव सत्योऽवितथः, अद्भुत आश्चर्यभूतो वाजस्यान्नस्य दाता, गोमतो गोसहितस्य वाजस्य दातेत्यर्थः । तस्मात्तादृशमन्नमस्मभ्यं देहि येन वयं शत्रूनभिभविष्याम इति BB.

This stanza=TS.1.3.14.7.

विश्वे हि त्वा सजोषसो जनासो वृक्तबर्हिषः ।
होतारं सप्तसु प्रियं व्यन्ति वार्या पुरु ॥ ३ ॥

विश्वे । सर्वे । हि । सङ्गता । जना । यज्ञार्थं स्तीर्णबर्हिषः । त्वाम् । आत्मगृहे । पुरूणि । धनानि । कामयन्ते याचन्ते ।

स हि ष्मा विश्वचर्षणिरभिमाति सहो दधे ।
अग्ने एषु क्षयेष्वा रेवन्नः शुक्र दीदिहि द्युमत्पावक दीदिहि ॥ ४ ॥

स हि ष्म । अग्नि । सर्वस्य द्रष्टा । शत्रूणामभिमननशीलम् । बलम् । धारयति । प्रत्यक्षशिष्ट—अग्ने । अस्माकमेषु । गृहेषु । धनयुक्तम् । अस्माकम् । दीप्यस्व । दीप्तियुक्तं चेति ।

---

१. हे अग्ने ! Sy.

२. P. reads हिंसागताः for हि सङ्गताः ॥ सह प्रीयमाणाः Sy.

३. ऋत्विजः Sy.

४. तीर्णबर्हिषं P.
लूनबर्हिषः Sy

५. यज्ञगृहेषु Sy.

६. बहूनि Sy.

७. वरणीयानि धनानि Sy.

८. VM. ignores होतारम् and प्रियम् ॥ होतारं देवानामाह्वातारम् । प्रियं सर्वेषां प्रीतिकरम् Sy.

९. स प्रसिद्धः Sy.

१०. ऋषिः Sy.

११. शत्रूणां हिंसकम् Sy.

१२. धारयतु Sy.

१३. शि P. Omitted by D.

१४. ग्ने P.
हे अग्ने ! Sy.

१५. धनयुक्तं यथा भवति तथा Sy.

१६. अस्मदीयेषु Sy.

१७. आदीप्यस्व Sy.

१८. दीप्तियुक्तं यशोयुक्तं वा Sy.

१९. VM. ignores हि । स्म । आ । शुक्र । पावक and दीदिहि ॥
हि स्म इति पूरणौ । हे शुक्र शोचिष्मन् ! हे पावक ! पापानां शोधकाग्ने ! त्वम् दीप्यस्व Sy.
Ms. D. puts the figure ॥२३॥ here to indicate the end of the twenty-third hymn. No such number is given in P.

V. 24.

अग्ने त्वं नो अन्तम उत त्राता शिवो भवा वरूथ्यः ।
वसुरग्निर्वसुश्रवा अच्छा नक्षि द्युमत्तमं रयिं दाः ॥ १ ॥ २ ॥

अग्ने त्वं नः ॥ गौपायनाः बन्धु सुबन्धु श्रुतबन्धुर्विप्रबन्धुरिति क्रमेण चतसृणामृषय. ॥ अग्ने त्वम् । अस्माकम् । अन्तिकतमः । अपि च । रक्षिता । भव । कल्याणकारी गृहहितः ।

---

१. 'अग्ने त्वं नः' इति चतुर्ऋचं दशमं सूक्तम् । अत्रानुक्रमणिका 'अग्ने त्वं गौपायना लौपायना वा बन्धुः सुबन्धुः श्रुतबन्धुर्विप्रबन्धुश्चैकर्चा द्वैपदम्' (KSA. 25.24. p. 19.) इति । 'विंशतिका द्विपदा विराजः' (KSA.12.8. p. 5.) इत्युक्तत्वाच्चतस्रो द्विपदा विराजः । बन्धुः सुबन्धुः श्रुतबन्धुर्विप्रबन्धुश्च क्रमेण चतसृणामृषयः, ते च गौपायना लौपायना वा । अग्निर्देवता । महापितृयज्ञे आहवनीयं प्रति गच्छन्त ऋत्विज इदं सूक्तं जपेयुः । तथा च सूत्रितम् 'अथैनमभिसमायन्ति मा प्र गामाग्ने त्वं न इति जपन्तः' (ĀSS. 2. 19.) इति । दशरात्रे षष्ठेऽहनि तृतीयसवने मैत्रावरुणस्य 'अग्ने त्वम्' इति द्वे, 'तं त्वा शोचिष्ठ' इत्येका, एवं मिलितो द्वैपदस्तृचः स्तोत्रियः । तथैव सूत्रितम्—'अग्ने त्वं नो अन्तमोऽग्ने भव सुषमिधा' (ĀSS. 8. 2.) इति Sy.

२. गोपायनः P.

३. ०र्वप्र० P.

४. ०सू० P. A fragment of KSA. 25. 24. p. 19.

५ हे अग्ने ! Sy., BB. हे अग्ने ! गार्हपत्य ! Mah. हे भगवन्नग्ने ! U.

६. अन्तमोऽन्तिकतमः सर्वदा समीपवर्ती भव । 'अम गतौ' भजने शब्देऽमति समीपं प्राप्नोति, इत्यम् क्विप् । अतिशयितोऽम् अन्तमः, अम्शब्दात्तमप् । यद्वाऽन्तिकशब्दात्तमपि पृषोदरादित्वेन साधुः Mah. त्वमस्माकं निकटतमः । अन्तिकशब्दस्य तमप्येतद्रूपम् । ब्रह्मचर्यप्रभृत्यग्निमुपासते तदभिप्रायमेतत् । देशविवक्षया वा सन्निकृष्टो ह्याग्निर्विप्रकृष्टा ह्यन्या देवताः U. सन्निकृष्टतमः BB.

७. रक्षकः Sy. पालयिता Mah. स्वभावत एव सर्वप्राणिनां पालयितासि । यत एवमतो ब्रूमः U. रक्षको भयेष्विति गम्यते BB.

८. सुखकरश्च भव Sy. शान्तः Mah. शान्तो भव U. सुखकरः सर्वदा भवास्माकम् BB.

९. वरणीयः सम्भजनीयः । यद्वा वरूथैः परिधिभिर्वृतः Sy. वरूथाय हितो वरूथ्यस्तादृशश्च भव । पुत्रादिसमूहो वरूथः । यद्वा वरूथं गृहम्, तस्मै हितो भव Mah. वरूथमिति गृहनाम (Ngh. 3. 4.) वरूथाय हितो वरूथ्यः U. गृहे भवो नित्यसन्निहितः । दिगादित्वाद्यत् । वरूथाय गृहाय वा हितो वरूथ्यः । उगवादिर्द्रष्टव्यः BB.

This stanza=YV. 3.25.=TS. 1. 5.6.2.

अथ द्विपदाः । अग्ने त्वं नोऽअन्तम उत त्राता शिवो भवा वरूथ्यः ! वसुरग्निर्वसुश्रवा अच्छा नक्षि द्युमत्तमꣳ रयिं दाः । तं त्वा शोचिष्ठ दीदिवः सुम्नाय नूनमीमहे सखिभ्यः । स नो बोधि श्रुधी हवमुरुष्या णोऽअघायतः समस्मादिति[1] । ŚB.2.3.4.31. p. 166.

---

[1] RV. reads स नो समस्मात् before तं त्वा.. सखिभ्यः ।

वसुः । वासयिता । अग्नि । वस्वग्ने स त्वमस्मान् । अभिव्याप्नुहि । दीप्ततमम् । रयिं च । देहि ।

स नो बोधि श्रुधी हवमुरुष्या णो अघायतः समस्मात् ।
तं त्वा शोचिष्ठ दीदिवः सुम्नायं नूनमीमहे सखिभ्यः ॥ ३ ॥ ४ ॥

स नः । स त्वम् । अस्मान् । बुध्यस्व । शृणु च । आह्वानम् । रक्ष च । अस्मान् ।

---

१. वासकः Sy. वासयतीति वसुः । जनानां वासयिता Mah यस्त्व वसुर्वासयिता जनानाम् । यद्वा वसु धनम् । तापपाकप्रकाशेष्वपकुर्वंश्चुपस्कर इव भवसि । वसुमान् । मत्वर्थीयो लुप्यते BB.

२. ०ग्नि P. सर्वेषामग्रणीः Sy. अङ्गत्तीत्यग्निः । 'अगि गतौ' आहवनीयादिरूपेण गमनशीलः Mah अग्निशब्द आमन्त्रितविभक्तघा विपरिणम्यते वाक्यसम्बन्धात् । हे अग्ने ! U. अङ्गनादिगुणयुक्तः BB.

३. व्याप्ताग्नस्त्वम् Sy. वसुना धनेन श्रवः कीर्तिर्यस्यासौ वसुश्रवाः । धनप्रदोऽयमिति यस्य कीर्तिरित्यर्थः Mah वसुना धनदानेन यः श्रूयते स वसुश्रवाः । धनदानेरित्यर्थः U. वासयतीति वसुः । तादृश श्रवणं यस्य तादृशः । वसुभिर्वा श्रूयत इति वसुश्रवाः BB.

४. ०स्माभि० P. आभिमुख्येन अस्मान् व्याप्नुहि Sy. अच्छ आभिमुख्येन BB. अच्छाभेराप्नुमिति शाकपूणिः N. 5. 28

५. अभिव्याप्नुह्यस्मान् । नशतिराप्नोतिकर्मा । यद्वा हे अच्छ ! निर्मलभावाग्ने !, नक्षि, अस्मद्धोमस्थानं गच्छ । 'नक्ष गतौ' । यदा यदा वयं जुहयाम तदा समागच्छेत्यर्थः Mah. नशतिराप्नोतिकर्मा । अभिव्याप्नुह्यस्मान् U. प्राप्नुहि । नशतिर्गतिकर्मा BB.

६. अतिशयेन दीप्तिमन्तम् Sy. अतिदीप्तियुक्तम् Mah. दीप्तिमन्तम् U अस्मान् प्राप्य चास्मभ्यं द्युमत्तमो दीप्तिमत्तमस्त्वम् BB

७. पश्वादिलक्षणं धनम् Sy. धनम् Mah.U.BB

८. अस्मभ्य देहि Sy ददातेर्लुंडि रूपम् Mah दधातेर्लिटि पूर्ववच्छपो लुक् BB.

This stanza=YV. 3.25.=TS 1.5.6.3.

RV. V. 24. 1.=SB. 2. 3. 4. 31. इदमुपरितनमेव ब्राह्मणमासां चतसृणामपि ऋचाम्। For SB. see previous stanza.

९. इय द्विपदा श्रुतबन्धोः । सापि च प्रसङ्गाद् व्याख्यायते । य उक्तगुणोऽसि SKN. श्रुतबन्धोरार्षम् । यस्त्वमेवंप्रभावो यथाप्रभाव त्वां वयमवोचाम Dur.

१०. हे अग्ने ! Sy., SKN. यस्त्वमुक्तगुणः सः U. स त्व हे भगवन्नग्ने ! Dur.

११. ०स्मा P. अस्मान् भवत्सेवकान् Mah. अस्माकम् U. अस्माक स्वभूतां स्तुतिमिति शेषः SKN.. अस्माकमभिप्रायम् Dur.

१२. बुध्यस्वाभिप्रायम् U

१३. बुध्वा च शृणु U.

१४. अस्मदीयमाह्वानम् Sy., Mah., U. आह्वानम् SKN. आह्वानमिदम् Dur.

१५. उरुष्यती रक्षणकर्मा Mah. श्रुत्वा चाह्वानम्, उरुष्या णः, उरुष्यती रक्षतिकर्मा, रक्षास्मान U. रक्ष चास्मान् SKN. आहूतश्च उपगम्यास्मान् पाहि Dur.

अघमिच्छत[1] । सर्वस्माद्[2] अपि ।

तं[4] त्वा[5] । तम्[4] । त्वा[5] । शोचिष्टम[6] ! दीप्त[7] ! पुत्रादिभ्य[8]. । सुखार्थम्[9] । याचामहे[10] । सम्प्रति[11] ।[12]

---

१. अघायतः शत्रोः. . . . .अघं परस्येच्छत्यघायति । . . .अघायतीत्यघायंस्तस्मादघायतः शतृप्रत्यये (वा) रूपम् Mah. अघं पापं य इच्छति सोऽघायत्? (न्)तस्मादघायतः शत्रोः U. कुतः ? . . .पापमिच्छतः SKN.; Dur.

२. सर्वस्माज्जनात् Sy. सर्वस्मात् . . समशब्दः सर्वपर्यायः Mah. U. सर्वस्माद्रक्षआदेः SKN. सर्वस्मात्. . . .एवमत्र 'समस्मात्' इति पञ्चम्यां व्यत्ययो वृष्टः । तस्मात् व्यत्ययदर्शनाद् 'वृष्टानुविधिश्छन्दसि भवति' इति कृत्वा अनुदात्तप्रकृतित्वेऽपि सति नामैतद् भवतीत्युपपद्यते Dur.

'उरुष्या णो' अघायतः समस्मात्' इति पञ्चम्याम् । उरुष्यतिरकर्मकः N.5.23.; SKN. II.373. This stanza=YV. 3.26.

३. त्वां D.

४. तं पूर्वोक्तगुणकम् Mah. यस्त्वमुक्तगुणस्तम् U. तादृशमन्तिकतमादिगुणविशिष्टम् BB.

५. त्वाम् Sy. त्वां ब्रवीमि U. य उक्तगुणोऽसि तं त्वाम् SKN.

६. शोचिष्टत्तम P. हे अतिशयेन शोचिष्मन् ! Sy. दीप्तिमत्तम ! शोचिरस्यास्तीति शोचिष्मान्, मतुप् Mah. शोचिष्मत्तमः । शोचिरिति ज्वालानामसु पठितम् । छान्दसो मतुब् लोपः U. अतिशयेन शोचितः SKN. दीपयितृतम । . . .यद्वा शोचस्वितम, ! BB. शोचिरिति ज्वालानाम (Ngh. 1.17.) ।

७. स्वतेजोभिर्दीप्ताग्ने ! Sy. सर्वस्य दीपयितः ! Mah. सन्दीपयस्व । दिवेर्ज्वलनार्थस्य लिटि क्वस्वन्तस्य रूपम् U. दीप्तिमत् SKN. दीप्यमान ! जिगीवन् ! वा BB.

८. ०दिभिः P. समानख्यातिभ्यः पुत्रेभ्यस्तदर्थम् Sy. सखिभ्योऽर्थाय Mah., U. सखीनामर्थाय SKN. समानख्यानेभ्यः सुहृदयसुहृद्-द्रूपः BB.

९. सुखाय । तदर्थम् Sy. द्वितीयार्थे चतुर्थी । सुम्नं सुखम्, यद्वा सुखार्थम् Mah., U. द्वितीयार्थे चात्र चतुर्थी । सुखम् SKN. धनाय सुखाय वा । 'क्रियाग्रहणं कर्तव्यम्' इति कर्मणः सम्प्रदानत्वात् सुम्नायेति चतुर्थी BB. सुम्नमिति सुखनाम Ngh. 3.6.

१०. यद्वाऽस्मत्सखीनामुपकाराय च त्वामीमहे Mah. त्वत्तोऽवश्यं सुखं भवतीत्यभिप्रायः । . . .सुम्नं नूनमीमह इत्यनुषङ्गः U. याचामहे SKN.

११. नूनम् Sy. नूनं निश्चयेन Mah., U., SKN. नूनमिति पादपूरणे निश्चये वा । यद्वा नूनं नूतनमभूतपूर्वं तं त्वाम् BB. This stanza =YV.3.26.=TS.1.5.6.3.=N.5.23., SKN. II. 373.

१२. Ms. D. puts the figure ॥२४॥ here to indicate the end of the twenty-fourth hymn. No such number is given in P.

V.25.

अच्छा वो अग्निमवंसे देवं गासि स नो वसुः ।
रासत्पुत्र ऋषूणामृतावा पर्षति द्विषः ॥ १ ॥

अच्छा[1] वः[2] । ॥ वसूयव[3] ॥ युष्माकम्[4] । रक्षणाय । त्वमग्निम्[5] । देवम् । अभिगच्छ[6] । स[7] । अस्माकम्[8] । वासयिता[9] । स ऋषीणाम[10] । पुत्रः[11] । अस्मभ्यमभिमतं प्रयच्छति[12] । सत्यकर्मा[13] । शत्रूश्चास्माकम् । तरति[14] ।

स हि सत्यो यं पूर्वे चिद्देवासश्चिद्यमीधिरे ।
होतारं मन्द्रजिह्वमित्सुदीतिमिर्विभावसुम् ॥ २ ॥

स हि सत्यः[15] । स[16] । हि । सत्यकर्मा[17] । यम्[18] । पूर्वे[19] । च ऋषय[20] । समीधिरे[21] । यम्[22] । देवा । अपि[23] । होतारम्[24] । मोदनवाचम्[25] । एव[26] । शोभनदानैर्हविर्भि[27] । विभावसुमिति[28] ।

---

१. 'अच्छा वो अग्निम्' इति नवर्चमेकादशं सूक्तम् । अत्रानुक्रमणिका—'अच्छा वो नव वसूयव आनुष्टुभम्' (KSA. 25.25.p.19.) इति । आत्रेया वसूयुनामान ऋषयः । अनुष्टुप् । मण्डलादिपरिभाषयाग्निर्देवता (KSA. 12. 12. p. 5.) । प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः । प्रातःसवनेऽच्छावाक वदस्वेत्युक्ते 'अच्छा वो अग्निमवसे' इत्यृचमनुब्रूयात् । तथा च सूत्रितम्—'अच्छा वो अग्निमवस इत्यृचमन्वाह' (ĀŚS 5.7.) इति Sy.

२. हे वसूयवः ! Sy.

३. यूयम् Sy.

४. अभिगायत Sy.

५. अग्निः Sy.

६. अस्मभ्यम् Sy.

७. अग्निहोत्रार्थं यजमानानां गृहे वासयिता Sy.

८. ०म P.

९. ऋषिभिर्मन्थनेन जनितत्वात् पुत्र इत्युपचर्यते Sy.

१०. कामान् ददातु Sy.

११. ऋतवान् सत्यवानुदकवान्वा सोऽग्निः Sy.

१२. पारयतु Sy.

१३. अग्निः Sy.

१४. सत्यप्रतिश्रवो भवति Sy.

१५. अग्निम् Sy.

१६. महर्षयः Sy.

१७. ०मि० P. D. समैन्धत Sy.

१८. P. and D. read वा अपि for देवाः । अपि ।

१९. ०र P. देवानामाह्वातारम् Sy.

२०. हविषां प्रदानेन देवानां मादयित्री जिह्वा यस्य स तम्, यद्वा मोदनजिह्वम् Sy.
'मन्द्रजिह्वं मन्वनजिह्वं मोदनजिह्वमिति वा N.6.23.

२१. इदिति पूरणः Sy.

२२. शोभनदीप्तिभिर्युक्तम् Sy.

२३. प्रभाषनम् Sy.

२४. शोभनानैर्हविर्भिर्भावसुमति P.

स नो धीती वरिष्ठया श्रेष्ठया च सुमत्या ।
अग्ने रायो दिदीहि नः सुवृक्तिभिर्वरेण्य ॥ ३ ॥

स नो धीती[1] । स त्वम् । अस्मभ्यम्[2] । वरणीयतमेन[3] । कर्मणा[4] । त्वदीयया श्रेष्ठया[5] । सुमत्या[6] । च । अग्ने ! धनानि । प्रज्वलय[7] । पुनर्न इति पूरणम् । स्तोत्रैरस्मदीयैः[8] । वरणीय !

अग्निर्देवेषु[9] राजत्यग्निर्मर्तेष्वाविशन्[10] ।
अग्निर्नो हव्यवाहनोऽग्निं धीभिः सपर्यत ॥ ४ ॥

अग्निर्देवेषु[9] । उभयेषु देवमनुष्येषु । आविशन्[10] । अग्नि[11] । विराजति[12] । सोऽयमग्नि[13] । अस्माकम् । हविषा[14] वोढा । तमिममग्निम्[15] । पूजयत[16] । कर्मभि[17] ।

अग्निस्तुविश्रवस्तमं तुविब्रह्माणमुत्तमम् ।
अतूर्तं श्रावयत्पतिं पुत्रं ददाति दाशुषे ॥ ५ ॥

अग्निः[18] । अयम् अग्नि । अतिशयेन प्रवृद्धकीर्तिम्[19] । प्रवृद्धस्तोत्रम्[20] । उत्तमम्[21] । शत्रुभिरहिंसितम्[22] । श्रावयितृणा यशस्विना पतिम्[23] । पुत्रम् । प्रयच्छति[24] । यजमानाय[25] ।

---

१. स नो धीती is omitted by P.
२. अस्मदीयेन Sy.
३. वरतमेन Sy.
४. कर्मा P.
परिचरणात्मकेन कर्मणा Sy.
५. श्रेष्ठा D.
अतिशयेन प्रशस्येन Sy.
६. सुमतिरिति शस्त्रमुच्यते शस्त्रेण च प्रीतः सन् Sy.
७. देहि Sy.
८. अस्मभ्यम् Sy.
९. त्रैर० P.
स्तुतिभिः स्तूयमान ! Sy.
१०. देवानां मध्ये, मनुष्येषु Sy.
११. अवि० D. आहवनीयादिरूपेण प्रविष्टो भवति Sy.
१२. ०ग्नि P. यः अग्निः Sy.
१३. देवतारूपेण प्रकाशते Sy.
१४. Omitted by P. यः अग्निः Sy.
१५. अस्मदीयेषु यज्ञेषु देवतार्थं हव्यानां वोढा भवति Sy.
१६. हे यजमानाः ! तमग्निम् Sy.
१७. परिचरत Sy.
१८. स्तुतिभिः Sy.
१९. पुत्रकामेष्टया 'अग्निस्तुविश्रवस्तमम्' इति द्वे स्विष्टकृतो याज्यानुवाक्ये । सूत्रितञ्च— 'अग्निस्तुविश्रवस्तममिति द्वे सयाज्ये' (ĀŚS. 2.10.) इति Sy.
२०. बह्वन्नम् Sy.
२१. बहुस्तोत्रम् Sy.
२२. उत्कृष्टम् Sy.
२३. श्रावयति विश्रुतान्करोति पत्नीः पालयितॄन् पितॄनिति स्वकर्मणा पितॄणां प्रख्यापक इति श्रावयत्पतिः । तथाविधम् Sy.
२४. ददातु Sy.
२५. हवींषि दत्तवते यजमानाय Sy.

अग्निर्ददाति सत्पतिं सासाह्यो युधा नृभिः ।
अग्निरत्यं रघुष्यदं जेतारमपराजितम् ॥ ६ ॥

अग्निः । अग्निः । ददाति । सता पतिं पुत्रम् । यः । शत्रून् । युद्धेन । सहते । तथाग्निः । अश्वम् । क्षिप्रगामिनम् । जेतारम् । अपराजितं च प्रयच्छति ।

यद्वाहिष्ठं तदग्नये बृहदर्च विभावसो ।
महिषीव त्वद्रयिस्त्वद्वाजा उदीरते ॥ ७ ॥

यद् वाहिष्ठम् । यत् । तद् वा । दृढतम स्तोतृणाम् । अग्नये निहित तेज । अथ प्रत्यक्ष —हे विभावसो ! महत्तत् तेजोऽन्नेन हविषा । पूजय । यथा राजस्त्री स्वगृहालङ्कृता निर्गच्छति तद्वत् । स्तोतृणा त्वत्त ।

---

१. अस्मभ्यं ददातु Sy.
२. पालयितारं तथाविधं पुत्रम् Sy.
३. पुत्रः Sy. ४. नृभिः परिजनैः Sy.
५. Mss. P. and D. add पुम् between सहते and तथा ॥ शत्रूनभिभवति Sy.
६. अतति सततं गच्छतीत्यत्योऽश्वः । तं ददातु Sy.
७. रघुलंघुः स्यदो जवो यस्य तम् Sy.
८. जतारम् P. जेतारं शत्रून् Sy.
९. अराजितम् P., D. अपराजितं शत्रुभिः Sy.
१०. अश्वमेधे पौष्ण्यामिष्टौ 'यद्वाहिष्ठम्' इति स्विष्टकृतो याज्या । सूत्रितञ्च—'यद्वाहिष्ठं तदग्नय इति संयाज्ये' (ĀŚS. 10.6.) इति Sy.
११. ०हिष्मं P. १२. स्तोत्रम् Sy. तस्मादीदृशं यत् स्तोत्रम् BB. १३. तदग्नये क्रियते Sy.
१४. वोढृतमम् Sy. वाहयति प्रापयतीष्टमिति वाहयितृ । वहेर्ण्यन्तात्तृच् । अत्यन्तं वाहयितृ वाहिष्ठम् Mah. वोढृतमम् U. वाहयितृतमं प्रीतेः प्रापयितृ । स्तोत्रमेव चेदृशं भवति BB.
१५. हे उद्गातः ! अग्न्यर्थं तत् Mah. अग्नयेऽर्थाय U. अग्न्यर्थमेव । अग्निरेव रमणीयं स्तोत्रमर्हति तस्मादीदृशेन स्तोत्रेण त्वामेव स्तौमीति भावः BB.
१६. अतो हे प्रभाधनाग्ने ! Sy. सामगानेन प्रत्यक्षमग्निं ब्रूहि । हे विभावसो ! विभा कान्तिरेव वसु धनं यस्य स विभावसुः । हे अग्ने ! Mah. ततो वृष्ट्वाऽग्निं ब्रूहि—हे विभावसो ! विभूतधनाग्ने ! U. तेजोधन ! BB.
१७. बह्वन्नं धनं च Sv. बृहत्साम Mah., U. त्वमपि बृहत् प्रशस्तं मदीयं स्तोत्रम् BB.
१८. अस्मभ्यं प्रयच्छ Sy. बृहत् साम्नो गानं कुरु Mah. गाय U. बहु मन्यस्व । अङ्गीकुरु BB.
१९. इवेति पूरणः Sy.
२०. महती Sy. तत्र दृष्टान्तः । महिषीव यथा महिषी प्रथमपरिणीता स्त्री Mah. महिषी प्रथमवित्ता, यथा प्रथमपत्नी धर्मार्थकामात्मिका U. महान्नृषिर्महर्षिर्महेश्वरः । पृषोदरादित्वादाकारस्येत्वम्, रेफलोपश्च । ततः पञ्चम्येकवचनस्य 'सुपां सुलुक्०' इति लुक् । महाराजादिव त्वत्तो धनमुत्पद्यते । वृषादित्वादाद्युदात्तत्वम् । यद्वा महिष्येव गृह्यते, यथा राजभार्याया रत्नादिकं लभते एवं त्वत्तोऽपि BB.
२१. गृहाद् भोगार्थं पतिं प्रति Mah.
२२. ०ताग्निर्ग० D. उद्गच्छति Mah. उदीरत उत्तिष्ठति सुखात्मिका भवति । . अथवा महिषी यथा सर्वान् भोगान् . .उत्क्षिपति परोपकाराय U.
२३. कथमस्यान्नधनप्रदातृत्वमित्यपेक्षायामाह यतः त्वत्तः सकाशात् Sy. त्वत्तः सकाशात् Mah. किमिति देवतान्तरं मुक्त्वाऽग्निरेव स्तूयत इत्यत आह. . . .त्वत्तः BB.

रयिः[1]। उद्गच्छति। तथान्नानि च। त्वत्तः[2]। उद्गच्छन्ति[3]।

तवं द्युमन्तो[4] अर्चयो ग्रावेवोच्यते बृहत्।
उतो तें तन्यतुर्यथा स्वानो अर्त[5] त्मना दिवः॥ ८॥

तव द्युमन्तः[6]। तव। दीप्तिमन्त[7]। रश्मयस्तथा। शैल[8] इव। उच्यते[9]। महत्वम्। अपि च। तवारण्ये। दीप्तस्य[10]। शब्द। सर्व देश व्याप्नोति[11]। स्वयमेव[12]। यथा मेघानां गर्जितशब्द[13]।

एवाँ अग्निं वसूयवः सहसानं वेवन्दिम[14]।
स नो विश्वा अति द्विषः पर्षन्नावेव सुक्रतुः॥ ९॥

एवाँ अग्निम्[15]। एवम्। अग्निम्। वसूयवो[16] नाम्ना वयम्। बलाचरणशीलम्[17]। स्तुतवन्त[18]। स च[19]। अस्मान। विश्वान्[20]। द्वेष्ट्री[21] सेना। अतिनयन्तु[22]। नावेव[23] सिन्धुम्। सुकर्मा[24]।

---

१. धनम् Sy. एवं त्वद्रयिः सुखात्मिका, उदीरत उत्तिष्ठति U. रयिर्धनमुत्पद्यते। उदीरत इति वक्ष्यमाणबहुवचनान्तमत्रैकवचनान्तविपरिणामेन सम्बध्यते BB.

२. एकं त्वत्पदं पादपूरणम्। रयिस्त्वदुदीतं इति वा Mah. अन्नान्यपि त्वत्तः BB.

३. 'ईर गतौ कम्पने च' Mah. उद्गच्छन्ति परोपकाराय U. उत्पद्यन्ते BB.
This stanza=VV. 26. 12.=TS. 1.1.14.4.

४. ०न्तं D.

५. हे अग्ने ! Sy.

६. दीप्तिमन्तो भवन्ति Sy.

७. शैव P. अभिषवग्रावेव Sy.

८. स्तूयसे Sy.

९. ०त्वम् is suggested for ०त्वम्॥ महान् त्वम् Sy.

१०. द्योतमानस्य Sy.

११. उद्गच्छति Sy.

१२. आत्मना Sy

१३. मेघगर्जितमिव Sy.

१४. उक्तप्रकारेण Sy.

१५. वसूवः P. वसुकामा वयम् Sy.

१६. ना P.

१७. अस्माकं बलमाचरन्तम् Sy.

१८. स्तुमः Sy.

१९. अग्निः Sy.

२०. सर्वान् Sy.

२१. शत्रून् Sy.

२२. ०शयन्तु P. ०नयतु is suggested for ०नयन्तु॥ अतिपारयतु Sy.

२३. नानेव P.
नावा साधनेन सिन्धुम् Sy.

२४. शोभनकर्मा Sy.

२५. Ms. D. puts the figure ॥२५॥ here to indicate the end of the twenty-fifth hymn. No such number is given in P.

V.26.

अग्ने पावक रोचिषा मन्द्रया देव जिह्वया । आ देवान्वक्षि यक्षि च ॥ १ ॥

अग्ने पावक । इति निगदव्याख्याता ।

तं त्वा घृतस्नवीमहे चित्रभानो स्वर्दृशम् । देवाँ आ वीतये वह ॥ २ ॥

त त्वा । तम् । त्वाम् । उदकस्य प्रापयित. ! याचामहे । चित्रदीप्ते ! सर्वस्य द्रष्टारम् । त्वमिह

---

१. 'अग्ने पावक' इति नवर्चं द्वादशं सूक्तम् । वसव ऋषयः । गायत्री छन्दः । अग्निर्देवता । तथा चानुक्रान्तम्—'अग्ने गायत्रम्' (KSA. 25.26. p. 19.) इति । प्रातरनुवाके आग्नेये ऋतौ गायत्रे छन्दस्याश्विनशस्त्रे चेदं सूक्तम् । सूत्रितञ्च—'अग्ने पावक दूत व इति सूक्ते' (ĀŚS. 4. 13.)इति । आधाने द्वितीयायामिष्टौ प्रथमस्य हविषः 'अग्ने पावक' इत्येषा याज्या । सूत्रितञ्च—'स नः पावक दीदिवोऽग्ने पावक रोचिषा' (ĀŚS. 2.1.) इति Sy.

२. ०वर्कति D.

३. This stanza is explained in the following manner:—हे पावक ! शोधक ! रोचिषा स्वदीप्त्या । मन्द्रया देवानामादयित्र्या जिह्वया च । हे देव ! द्योतमान ! अग्ने ! देवान् आ वक्षि यज्ञार्थमावह । यक्षि च तान् यज Sy. हे अग्ने ! पावक ! शोधक ! हे देव ! रोचिषा रोचनेन ज्वालासमूहेनाहवनीयात्मना स्थित इति शेषः । मन्द्रया मदनीयया जिह्वया होतृवाग्रूपेणावस्थित इति शेषः । देवानावक्षि आवह यक्षि यज च । द्वावग्नेरधिकारौ हौत्रमाहवनीयरूपेण हविर्ग्रहणं चात एव स्तूयते Mah. हे अग्ने ! पावक ! पावयितः ! रोचिषा रोचनेन ज्वालासमूहेन । आहवनीयात्मना स्थित इति शेषः । मन्द्रया च मदनीयया च देवजिह्वया होतृत्वेनावस्थित इति शेषः । आ देवान् वक्षि यक्षि च देवान् वक्षि चावह देवान् यज चेति । द्वौ ह्यग्नेराकारौ हौत्रं चाहवनीयरूपेण हविर्वहणं चात एवं स्तूयते U. हे अग्ने ! पावक ! शोधक ! रोचिषा रोचनशीलया मन्द्रया श्लक्ष्णया मदनशीलया वा हे देव ! जिह्वया त्वदीयया वाचा वा देवानावक्षि आवह आह्वय यक्षि च यज च । इष्ट्वा च देवान् यजमानस्याभिमतं रसं सम्पादयेति भावः BB.

This stanza=YV. 17.8.=TS. 1.3.14.8.

अभ्यात्मं पक्षपुच्छानि विकर्षति । अभ्यात्ममेव तच्छान्तिं धत्ते । परस्तादर्वाक्परस्तादेव तदर्वाचीꣳ शान्तिं धत्तेऽग्ने पावक रोचिषेति वक्षिणं पक्षꣳ स नः पावक दीदिव इति पुच्छं पावकया यश्चितयन्त्या कृपेत्युत्तरं पावकं पावकमिति यद्वै शिवꣳ शान्तं तत्पावकꣳ शमयत्येवैनमेतत् ŚB. 9.1. 2.30. p. 708.

४. उदकस्य P. घृतस्य प्रेरक ! यद्वा घृतेन जनित ! Sy.

५. चित्रा नानाविधा भानवो रश्मयो यस्यासौ चित्रभानुः, तस्य सम्बोधनम् Sy.

६. सर्वद्रष्टारम् Sy.

देवान् । हविर्भक्षणाय । आवह ।

वीतिहोत्रं त्वा कवे द्युमन्तं समिधीमहि । अग्ने बृहन्तमध्वरे ॥ ३ ॥

वीतिहोत्रम् । प्रिययज्ञम् । त्वाम् । कवे । दीप्तिमन्तम् । दीपयामः । अग्ने । महान्तम् । अध्वरे ।

अग्ने विश्वेभिरा गहि देवेभिर्हव्यदातये । होतारं त्वा वृणीमहे ॥ ४ ॥

अग्ने विश्वेभिः । अग्ने । यजमानायास्मै । सर्वैः । देवैः सह । आगच्छ । त्वाम् । होतारम् । वृणीमहे ।

उत्तरा निगदव्याख्याता

यजमानाय सुन्वत आग्ने सुवीर्यं वह । देवैरा सत्सि बर्हिषि ॥ ५ ॥

[यजमानाय]

---

१. हविषां भक्षणाय Sy.

२. कान्तयज्ञम् Sy. 'इण गतौ' इतिर्गतिर्व्याप्तिः पुत्रपौत्रपशुधनादिभिः समृद्धिरित्यर्थः । वीतये समृद्धयै होत्रं होमो यस्य स वीतिहोत्रस्तं, यत्र होमे कृते समृद्धिप्राप्तिः स्यादित्यर्थः । यद्वा वीतिरभिलाषो होत्रे होतृकर्मणि यस्य तम् Mah. 'वी गतिप्रजननकान्त्यसनखादनेषु' वीतिरभिलाषो होतृकर्मणि यस्य स वीतिहोत्रः । अथवा विविधा ईतिर्गतिर्होतृप्रशास्त्रादिषु होत्रासु यस्य स वीतिहोत्रः । वीतिहोत्रं त्वाम् U. वीतिहोत्रमिष्टस्तोत्रम् वेतव्या कमितव्या होत्रा वाक् स्तोत्ररूपा होतृव्यापारो वा यस्य तम् BB. ३. त्वा P.

४. हे क्रान्तदर्शिन् ! Sy. अतीतानागतदूरवर्तिपदार्थानां यस्य युगपज् ज्ञानं स कविः Mah. अतीतानागतदूरवर्तिपदार्थानां यस्य युगपज् ज्ञानं स क्रान्तदर्शनः U. मेधाविन् ! BB.

५. द्यौः कान्तिरस्यास्तीति द्युमांस्तं स्वत एव द्युत्युपेतम् Mah.

६. समिद्धिः सन्दीपयामः Sy. अनेनेध्मकाष्ठेन दीपयामः Mah. 'इन्धी दीप्तौ' सन्दीपयामः । अनेनेध्मकाष्ठेन U. प्रागेव दीप्तिमन्तं सन्तमनया समिधा सम्यग्दीपयामः BB.

७. हे भगवन्नग्ने ! U.

८. यज्ञे Sy., U. यागे निमित्ते Mah. अध्वरार्थम् । निमित्तात्सप्तमी । 'ध्वृ हूर्छने', हूर्छनं कौटिल्यम् । ध्वरन्तीति ध्वरा रक्षःप्रभृतयः । पचाद्यच् । ते यत्र न सन्ति सोऽध्वरः । तादृशाय यज्ञाय त्वां समिधीमहि BB.
सोभ्यादधाति । वीतिहोत्रं त्वां कवे द्युमन्तꣳ समिधीमहि । अग्ने बृहन्तमध्वरऽइत्येतया गायत्र्या गायत्रीमेवैतत्समिन्धे सा गायत्री समिद्धान्यानि छन्दाꣳसि समिन्धे छन्दाꣳसि समिद्धानि देवेभ्यो य वहन्ति । ŚB 1.3.4.6. p. 30. This stanza=YV. 2.4.=TS. 1. 1.11.2.

९. हविषां दात्रे यजमानाय, तदर्थम् Sy.

१०. सर्वं P.

११. ०च्छन् P. त्वं यज्ञं प्रत्यागच्छ Sy.

१२. यतः देवानामाह्वातारम् Sy.

१३. प्रार्थयामहे Sy. १४. ताः P.

१५. The *pratika* is supplied by the Editor. हे अग्ने ! सुन्वते अभिषवं कुर्वते । यजमानाय । सुवीर्यं शोभनं बलम् । आ वह प्रापय । किञ्च देवैः सह । बर्हिषि यज्ञे । आ सत्सि आसीदेति Sy.

समिधानः सहस्रजिदग्ने धर्माणि पुष्यसि । देवानां दूत उक्थ्यः ॥ ६ ॥

समिधानः[1] । सन्दीप्यमान. । शत्रुसहस्रस्य तेज.[2] ! त्वम्[3] । अग्ने ! कर्म[4] । प्रवर्तयसि[5] । देवानाम् । दूत[6] । प्रशस्य[7] ।

न्यग्निं जातवेदसं होत्रवाहं यविष्ठ्यम् । दधाता देवमृत्विजम् ॥ ७ ॥

न्यग्निम्[8] । निदधात धत्त । अग्निम् । जातप्रज्ञम्[10] । सप्ताना होत्राणा वोढारम्[11] । युवतमम् । देवम्[12] । ऋतौ च[13] यष्टारम्[14] ।

प्र यज्ञ एत्वानुषगद्या देवव्यचस्तमः । स्तृणीत बर्हिरासदे ॥ ८ ॥

प्र यज्ञः[15] । यज्ञ[16] । प्रगच्छतु[17] । अद्य[18] । अनुषक्तम्[19] । अतिशयेन देवव्यापी[20] । तदर्थमनुषक्त बर्हि । स्तृणीत[21] ।

एदं मरुतो अश्विना मित्रः सीदन्तु वरुणः । देवासः सर्वया विशा ॥ ९ ॥

एवं मरुतः । अश्विनौ[22] । मित्रावरुणौ[23] । अन्ये च देवा[24] । सर्वै[25] । अनुचरै.[26] सह । इदं बर्हि[27] । अग्ने ! सीदन्तु[28] ।

---

१. हविर्भिः समिद्धयमानः Sy.
२. जेतः is suggested for तेजः ॥ हे सहस्रस्य जेतः ! Sy.
३. तुम् P.
४. कर्मा P. नः कर्माणि यज्ञादिक्रियाः Sy.
५. पोषयसि Sy.
६. दूतः सन् Sy.
७. प्रशस्यः is suggested for प्रशस्य ॥
८. हे यजमानाः ! Sy.
९. निधत्त Sy.
१०. जातानि भूतानि वेत्तीति जातवेदास्तम् Sy.
११. होत्रस्य यज्ञस्य वोढारम् Sy.
१२. द्योतमानम् Sy.
१३. Omitted by D.
१४. जष्टारं P.
१५. यज्ञसाधनं हविः Sy.
१६. देवान् गच्छतु Sy.
१७. अस्मिन्नहनि Sy.
१८. अनुषक्तं यथा भवति तथा Sy.
१९. देवैः प्रकाशमानैः स्तोतृभिर्व्याप्ततमः Sy.
२०. स्तृ० D.
२१. VM. ignores आसदे ॥ हे ऋत्विजः ! अग्नेरासदनार्थम् Sy.
२२. देवानां भिषजौ Sy.
२३. सूर्यः । वरुणश्च Sy.
२४. एते सर्वे देवाः Sy.
२५. सर्वः P. समस्तेन Sy.
२६. स्वीयेन परिजनेन सार्धम् Sy.
२७. ०हम् P.
२८. VM. ignores आ and मरुतः । आ सीदन्तु । मरुतो मरुद्गणाः Sy. Ms. D. puts the figure ॥२६॥ here to indicate the end of the twenty-sixth hymn. No such number is given in P.

V.27.

अनस्वन्ता सत्पतिर्मामहे मे गावा चेतिष्ठो असुरो मघोनः।
त्रैवृष्णो अग्ने दशभिः सहस्रैर्वैश्वानर व्यरुणश्चिकेत ॥ १ ॥

अनस्वन्ता[1]। कात्यायनः—"त्रैवृष्णपौरुकुत्स्यौ द्वौ व्यरुणत्रसदस्यू राजानौ भारतश्चाश्वमेधः" इति व्यरुणत्रसदस्युरग्निप्रसादान्महद् धन लब्ध्वा वदति—अनस्वन्तेति।

अनोवहनयोग्यौ। अनुड्वाहौ[10]। सता पतिस्व्यरुण[11]। मह्यम्। अददात्[12]। अतिशयेन देवान् प्रति स्तोत्रवतो ज्ञाता[13]। निरसिता शत्रूणाम्[14]। किं चायम्, अग्ने! त्रैवृष्ण[15]। व्यरुण[16]। दशभि गवा सहस्रैर्मह्य प्रदित्सितैः। ममाग्रतः प्रादुरभूत्[17]।

---

१. 'अनस्वन्ता' इति षड्चं त्रयोदशं सूक्तम्। अत्रानुक्रमणिका—'अनस्वन्ता षट् त्रैवृष्णपौरुकुत्स्यौ द्वौ व्यरुणत्रसदस्यू राजानौ भारतश्चाश्वमेधोऽन्त्यास्तिस्रोऽनुष्टुभो नात्मात्मने दद्यादिति सर्वास्वित्रिं केचिदन्त्यैन्द्राग्नी' (KSA. 25.27. p. 19.) इति। त्रिवृष्णस्य पुत्रस्त्र्यरुणः—पुरुकुत्सस्य पुत्रस्त्रसदस्युर्भरतस्य पुत्रोऽश्वमेध एते त्रयोऽपि राजानः सम्भूयास्य सूक्तस्य ऋषयः, यद्वात्रिरेव ऋषिः। आद्यास्तिस्रस्त्रिष्टुभः चतुर्थ्याद्यास्तिस्रोऽनुष्टुभः। षष्ठीन्द्राग्निदेवत्या शिष्टाः पञ्चाग्नेय्यः। विनियोगो लैङ्गिकः Sy.

२. त्रैवृष्ण्यः P., D.

३. ०स्यु P.

४. ०श्चश्व० P., D.

५. A fragment of KSA. 25.27. p. 19.

६. ०त्रसदस्यू is suggested.

७. वादति P. वदतः is suggested for वदति।

८. ०स्वान्ताविति P. ०स्वन्ताविति D. अत्री राजर्षीणां दानमग्नेः पुरतोऽनेन सूक्तेनावर्ण्यत् Sy.

९. अनसा शकटेन संयुक्तौ Sy.

१०. ०हो P. अनड्वाहौ is suggested for अनुड्हौ॥ गावावनड्वाहो गवां हिरण्यानां वा Sy.

११. पीवति P.
पालयिता Sy.

१२. ददौ। 'महि दाने' Sy.

१३. ज्ञातृतमः Sy.

१४. बलवान् Sy.

१५. चयम् P.

१६. त्रैवृण्यं P. त्रैवृण्यः D.
त्रिवृष्णपुत्रः Sy.

१७. ०ण P.
इत्येतन्नामा राजर्षिः Sy.

१८. ०त्सित्रैतमभा० P.

१९. स राजर्षिः सर्वैर्जनैरनेन दानेन ज्ञायते Sy.

२०. VM. ignores मघोनः and वैश्वानर॥ मघवा धनवान्, प्रथमार्थे ङसिः॥ हे विश्वेषां नराणां नेतः! Sy.

यो मे शता चं विंशतिं च गोनां हरी च युक्ता सुधुरा ददाति ।
वैश्वानर सुष्टुतो वावृधानोऽग्ने यच्छ त्र्यरुणाय शर्म ॥ २ ॥

यो मे । यः । मे । पूर्वोक्तेभ्योऽधिक शतानि । विंशतिम् । च । गवाम् । अश्वौ । च । रथे युक्तौ । शोभनधूर्वहनसमर्थौ । ददाति । तस्मै त्र्यरुणाय । अग्ने ! वैश्वानर ! मया सुष्ठु स्तुतः । ववृधानः । सुखम् । प्रयच्छ ।

एवा ते अग्ने सुमतिं चकानो नविष्ठाय नवमं त्रसदस्युः ।
यो मे गिरस्तुविजातस्य पूर्वीर्युक्तेनाभि त्र्यरुणो गृणाति ॥ ३ ॥

एवा ते । एवम् । अग्ने ! नविष्ठाय । तुभ्यम् । स्तोतव्याम् । सुमतिम् । त्रसदस्युम् । चकानो भवति निवेदयतीत्यर्थः । कं सुमतिमित्याह यो म इति—यः । मम । याज्ञा गिरः । बहुपुत्रस्य । पूर्वप्रयुक्ता । युक्तेन वचनेन । अय त्र्यरुण । अभिगृणाति—इद ददामीति वदतीत्यर्थः ।

यो म इति प्रवोचत्यश्वमेधाय सूरये ।
ददद्रचा सनिं यते ददन्मेधामृतायते ॥ ४ ॥

यो म इति ॥ सोऽयमेकाश्वमेधस्य ॥ यो याचक. । मह्यम् । इति । प्रवोचति । अश्वमेधाय ।

---

१. त्र्यरुणः Sy.
२. मह्यम् Sy.
३. शतानि सुवर्णानाम् Sy.
४ ०ति P.
५. रथेन युक्तौ Sy.
६ ०भोजनधू० P. सुधुरौ सुष्ठु धुरं वहन्तौ Sy.
७. अववात् Sy.
८. हे वैश्वानर ! Sy.
९. ०ता P.
अस्माभिः सम्यक् स्तुतः Sy.
१०. हविर्भिर्वर्धमानस्त्वम् Sy.
११. अत्यन्तं स्तुत्याय Sy.
१२. ०तव्यं D. नवतमाम् Sy.
१३. स्तुतिम् Sy.
१४. त्रसदस्युरपीदं गृहाणेदं गृहाणेति मां प्रार्थितवान् Sy.
१५. त्रसदस्युः is suggested for त्रसदस्युम् ॥ कामयमानः Sy.
१६. कां is suggested for कं ।
१७. ०ज्ञां P. याच्ञा is suggested for याज्ञाः ।
१८. स्तुतीः श्रुत्वा प्रीतः सन् Sy.
१९. बह्वपत्यस्य Sy.
२०. बह्वीः Sy.
२१. अभियुक्तेन मनसा Sy.
२२ Omitted by P. इदं गृहाणेदं गृहाणेति यथा मां ब्रवीति Sy.
२३. सेयमेकाश्व० or सोऽयमेकोऽश्व० is suggested for सोऽयमेकाश्व० ।
२४. भिक्षमाणोऽर्थी Sy.
२५. मह्यं देहि Sy.
२६. प्रब्रवीति Sy.
२७. राजर्षये Sy.

प्रज्ञाय[1] मह्य दातव्यमिति वदतीत्यर्थ[2] । तस्मा अयमश्वमेध ऋचा[3] । सनिम्[4] । प्रतिगच्छते[5] देवबलेन धनं याचते । धनं प्रयच्छति । तथा धनप्रदाने मेधाम्[6] । प्रयच्छति[7] । यज्ञमिच्छत[8] इत्यात्मस्वभावान्मनुकथनमश्वमेधस्य[9] यस्य अश्वमेधस्त्र्यरुणाय महद्धनमददात्[10] ।[11]

यस्य मा परुषाः शतमुद्धर्षयन्त्युक्षणः ।
अश्वमेधस्य दानाः सोमाइव त्र्याशिरः ॥ ५ ॥

ततस्त्र्यरुणो वदति[12] । यस्य अश्वमेधस्य[13] । माम् । परुषा बलोत्सिक्ता[14] । शतसख्या.[15] । उक्षण.[16] । अत्यन्त हर्षयन्ति[17] । तस्याश्वमेधस्य[18] । दाना.[19] । सोमा इव भवन्ति[20] । त्र्याशिरः[21] सक्तवः पयोधाना इति सोममिश्राणि त्रीणि ।

इन्द्राग्नी शतदाव्न्यश्वमेधे सुवीर्यम् ।
क्षत्रं धारयतं बृहद्दिवि सूर्यमिवाजरम् ॥ ६ ॥

इन्द्राग्नी । निगदव्याख्याता । क्षत्रमिति धनानामेति[22], अश्वमेधेनान्येभ्यो दीयमानेन[23] धनेन[24] तुष्यति

---

१. प्राज्ञाय is suggested for प्रज्ञाय ॥ प्रेरकाय धनानां दात्रे वास्मै Sy.
२. वदति seems to be the explanation of प्रवोचति। योऽश्वमेधं धनानि भिक्षत इत्यर्थः Sy.
३. अग्नेः स्तोत्रेण सह Sy.
४. ससनिं D. धनम् Sy.
५. आत्मनः समीपं गच्छते तस्मा अर्थिने Sy.
६. यज्ञविषयां प्रज्ञाम् Sy.
७. देहि Sy.
८ हे अग्ने ! ऋतायते यज्ञमिच्छते तस्मा अश्वमेधाय Sy.
९. ०स्वभावानुकथन० is suggested for ०स्वभावान्मनुकथन० ।
१०. यः is suggested for यस्य ।
११. The commentary on this stanza is omitted by P.
१२. ततः .वदति is omitted by P.
१३. यस्य । अश्वमेधस्य is omitted by P. यस्य येन Sy.
१४. ०क्ता P. कामानां पूरकाः Sy.
१५. शतस्य संख्याः P. शतम् Sy.
१६. उक्षाणो बलीवर्दाः Sy.
१७. उत्कर्षेण हर्षयन्ति Sy.
१८. अश्वमेधेन Sy.
१९. दत्ताः Sy.
२०. सोमा इव तव प्रीणनाय भवन्तु Sy.
२१. हे अग्ने ! ते उक्षाणः दधिसक्तुपयोरूपास्तिस्र आशिरोऽधिश्रयणसाधनभूता येषां ते त्र्याशिरः Sy.
२२. Omitted by D.
२३. धननाम is suggested for धनानाम ॥ Ngh. 2.10.
२४. ०माना P. २५. चनेन नेन P.

व्यरुण इत्यपरमन्त्रमिति ।

V.28.

समिद्धो अग्निर्दिवि शोचिरश्रेत्प्रत्यङ्डुषसमुर्विया वि भाति ।
एति प्राचीं विश्ववारा नमोभिर्देवाँ ईळाना हविषा घृताची ॥ १ ॥

समिद्धः । विश्ववारा ॥ सूर्ये तिरोहितेऽत्रिरुषसमजनयत्तत आत्रेय्युषा विश्ववारोच्यते । अग्निरुषसि । समिद्धः । तथा दिवि । चौषम तेज । श्रयति । सूर्यश्च महान् । उपसम् । प्रकाशयति । अभिमुख । तथा सर्ववरणीयोषाश्च । अभिमुखम् । आगच्छति । पुरुषाणा प्रबुद्धाना देवविषयेनमस्कारै सह । देवान् । स्तुवती । हविषा सह । घृत चाञ्चन्ती प्रवयन्ती प्रवर्तयन्ती यज्ञमित्यर्थ ।

---

१. ०खन्त इति P. ०मन्त्र० इति is suggested for ०मन्त्रमिति ।
२. हे इन्द्राग्नी ! शतवाज्नि शतमपरिमितमर्थिभ्यो धनं ददातीति शतदावा तस्मिन् । अश्वमेधे राजर्षौ । सुवीर्यं शोभनवीर्यसहितम् । बृहत् महत् । अजरं जरारहितम् । क्षत्रं धनम् । धारयतं निधारयतम् । कथमिव ? दिवि अन्तरिक्षे । सूर्यमिव Sy.
Ms. D. puts the figure ॥२७॥ here to indicate the end of the twenty-seventh hymn. No such number is given in P.
३. 'समिद्धो अग्निः' इति षड्चं चतुर्दशं सूक्तम् । अत्रेयमनुक्रमणिका—'समिद्धो विश्ववारात्रेयी त्रिष्टुब्जगती त्रिष्टुबनुष्टुब्गायत्र्यौ' (KSA. 25. 28. p. 19.) इति । अत्रिगोत्रोत्पन्ना विश्ववारानामिकास्य सूक्तस्य ऋषिः । आद्या तृतीये त्रिष्टुभौ द्वितीया जगती चतुर्थ्यनुष्टुप् अन्त्ये गायत्र्यौ । अग्निर्देवता । सूक्तविनियोगो लैङ्गिकः Sy.
४. समिन्धः P.
५. P. and D. add न before सूर्ये ।
६. तिरोहिते is omitted by P.
७. ०तिर० P., D.
८. ०मजत्त० P., D.
९. अत्रेर्युषा D.
१०. सम्यग्दीप्तः Sy.
११. द्योतमानेऽन्तरिक्षे Sy.
१२. उरु विस्तीर्णम् Sy.
१३. विशेषेण भ्राजते Sy.
१४. अभिमुखः सन् Sy.
१५. अभिमुखस्तथा । सर्ववरणीया । उषाश्च are omitted by P. सर्वमपि पापरूपं शत्रुं वारयित्र्येतन्नामिका Sy.
१६. प्राङ्मुखी सती Sy.
१७. एवंभूतमग्निं प्रति गच्छति Sy.
१८. प्रयुद्धानां P.
१९. स्तोत्रैः Sy.
२०. इन्द्रादीन् Sy.
२१ ०न्ति P.
२२. हविषा पुरोडाशादिलक्षणेन युक्तया Sy.
२३. ०ञ्चान्ति P. घृताच्या स्रुचा सहिता Sy.
२४. प्रपयन्ति P.
२५. प्रवर्तयन्ति P.

समिध्यमानो अमृतस्य राजसि हविष्कृण्वन्तं सचसे स्वस्तये ।
विश्वं स धत्ते द्रविणं यमिन्वस्यातिथ्यमग्ने नि च धत्त इत्पुरः ॥ २ ॥

समिध्यमानः । दीप्यमानस्त्वम् । अन्नस्य । ईश्वरो भवसि । हवि. । कृण्वन्तम् । सेवसे । अविनाशाय । स विश्वम् । धनम् । धारयति । यम् । त्व व्याप्नोषि । तथातिथीना योग्यमन्नादिकम् । च । अतिथीनामग्रत । निधत्ते । एव ।

अग्ने शर्ध महते सौभगाय तव द्युम्नान्युत्तमानि सन्तु ।
सं जास्पत्यं सुयममा कृणुष्व शत्रूयतामभि तिष्ठा महांसि ॥ ३ ॥

अग्ने । अग्ने ! अस्माकमभ्युदयाय । महते । उद्युक्तो भव । तव । अन्नानि । उत्तमानि । अस्मासु

---

१. सम्यगिद्धमानस्त्वम् Sy.
साकमेधेषु मरुद्भ्यः क्रीडिभ्यः पुरोडाशं सप्त-
२. उदकस्य Sy.
३. ईशिषे Sy.
४. पुरोडाशादिहविष्कर्तारं यजमानम् Sy.
५. सेवसे वसे D.
६. यजमानः Sy.
७. समस्तम् Sy.
८. पश्वादिलक्षणं धनम् Sy.
९. यजमानम् Sy.
१०. गच्छसि Sy.
११. अतिथिरूपस्य तव योग्यं हविः Sy.
१२. तव पुरस्तादेव Sy.
१३. स्थापयति च Sy.
१४. एवं P.
१५. VM. ignores अग्ने ।
१६. पवित्रेष्टयां स्विष्टकृतः 'अग्ने शर्ध' इति याज्या । सूत्र्यते हि—'जुष्टो दमूना अग्ने शर्ध महते सौभगायेति संयाज्ये' (ĀSS. 2.12.) इति । कपालमित्यत्राप्येवंव स्विष्टकृतो याज्या । सूत्रितञ्च—'जुष्टो दमूना अग्ने शर्ध महते सौभगायेति संयाज्ये' (ĀSS. 2. 18.) इति Sy.
१७. हे अग्ने ! त्वम् Sy.
हे भगवन्नग्ने ! U.
१८. शोभनधनत्वाय Sy. महत्सौभाग्यं लोकस्थितिः Sy.
१९. प्रभूताय Sy.
२०. शत्रून् सहस्व Sy. उत्सहस्व । बलमाविष्कुरु Mah. U.
२१. तव सम्बन्धीनि Sy. उद्यच्छतस्तव Mah. एवं कुर्वतस्तव U.
२२. धनानि तेजांसि वा Sy. हविर्लक्षणान्यन्नानि यशांसि वा सन्तु Mah. हविर्लक्षणानि धनानि सन्तु यशांसि वा U. 'द्युम्नं द्योततेर्यशो वाऽन्नं वा' N.5.5.
२३ अन्नन्युमन्युत्त० P. अन्नं न्युमन्युत्त० D. उत्कृष्टानि Sy. उत्कृष्टानि सन्तु Mah.

भवन्तु । धनप्रदानेन जायापत्योर्द्वन्द्वम्[1] । सुष्ठु सयुक्तम्[2] । ममाकुरु मा च जाया च सङ्गतौ कुरु[3] । शत्रुत्वमिच्छता[4] च । तेजांसि[5] । अभितिष्ठ[6] ।

समिद्धस्य[7] प्रमहसोऽग्ने[8] वन्दे[9] तव[10] श्रियम्[11] ।
वृषभो द्युम्नवाँ[12] असि[13] समध्वरेष्विध्यसे[14][15] ॥ ४ ॥

समिद्धस्य[16] । सन्दीप्तस्य । प्रकृष्टतेजस । अग्ने ! स्तौमि । तव[17] । कान्तिम्[18] । स त्व वर्षिता कामानाम्[19] । अन्नवान्[20] । असि[21] । यज्ञे[22] च । समिध्यसे[23] ।

उत्तरा निगदसिद्धा

समिद्धो अग्न आहुत[24] देवान्यक्षि[25] स्वध्वर[26] । त्वं हि हव्यवाळसि[27] ॥ ५ ॥

[समिद्धः[28]]

---

१. ०यावत्योर्द्वन्द्व P. ०यापत्यो द्वन्द्वम् D. किञ्च हे अग्ने ! त्वं जास्पत्यम्—जा जाया च पतिश्च जायापती । तयोः कर्म जास्पत्यम् । तत् Sy. जायापत्यमित्यर्थे जास्पत्यमिति निपातः । जायापत्यं पत्नीयजमानरूपम् Mah. जायापतिमिति प्राप्ते, आकारयकारयोर्लोपः सुक् च U.

२. सुष्ठु नियमनोपेतम् । अन्योन्यं संश्लिष्टमित्यर्थः Sy. सुनियमं जितेन्द्रियमन्योन्याबद्धरागम् । सुष्ठु यम्यते सुयमम् Mah. सुनियममन्योन्यबद्धरागम् U.

३. ०तो P., D. सम्यक् कुरुष्व Sy. कुरु Mah. कूरुष्व U.

४. शत्रुमात्मन इच्छतां सपत्नानाम् Sy.

५. महत्त्वानि U.

६. आक्रमस्व Sy., Mah. पद्भ्यामभिभव U. This stanza=YV. 33.12.

७. ०मिध्यस्य P.

८. प्रवृद्धस्य Sy.

९. अहं यजमानः स्तौमि Sy.

१०. तव सम्बन्धिनीम् Sy.

११. दीप्तिम् Sy.

१२. धनवान् Sy.

१३. भवसि Sy. १४. यज्ञेषु Sy.

१५. सम्यग्दीप्यसे Sy.

१६. दर्शपूर्णमासयोः 'समिद्धो अग्न आहुत' इति द्वे सामिधेन्यौ । सूत्रितञ्च—'समिद्धो अग्न आहुतेति द्वे' (ĀŚS. 1. 2.) इति Sy.

१७. The *pratika* is supplied by the Editor. हे आहुत ! यजमानैरा समन्ताद्धुत ! हे स्वध्वर ! शोभनयज्ञोपेत ! हे अग्ने ! समिद्धः सम्यग्दीप्तः । त्वम् । देवान् द्योतमानानिन्द्रादीन् । यक्षि यजस्व यस्मात् कारणात् हे अग्ने ! त्वम् । हव्यवाट् असि हव्यानां वोढा । भवसि । अतः कारणाद्देवान् यजस्वेति सम्बन्धः Sy. इयमृक् परिधिस्थानीया । परिधानं विधानसमापनम् । समिद्ध इति च समाप्तिलिङ्गम् । अत एवानुयाजे वेदितव्या । परिधेर्बहिः बहिःपरिधिः BB. This stanza=TS.2.5.8.6.

आ जुहोता दुवस्यताग्निं प्रयत्यध्वरे । वृणीध्वं हव्यवाहनम् ॥ ६ ॥

आ जुहोत । प्रयति वर्तमाने । यज्ञे । जुहुत । "यजध्व च यस्मै कामाय समैधिध्वम्" इति वाजसनेयकम्, देवान् । अग्निं, हव्यवाहनस्तम् । वृणीध्वम् । न तु कव्यवाहनं नाप्यसुराणामग्निं सहरक्षसमिति ।

V.29.

अर्यमा मनुषो देवताता त्री रोचना दिव्या धारयन्त ।
अर्चन्ति त्वा मरुतः पूतदक्षास्त्वमेषामृषिरिन्द्रासि धीरः ॥ १ ॥

अर्यमा ॥ गौरिवीतिः शाक्त्य ॥ अर्यमशब्द प्रेरयितृवचन । मनुष्यम् । यज्ञे । त्रीणि । तेजास्यग्न्यादीनि । प्रेरयन्ति । तथा त्रीण्येव तानि । अन्तरिक्षस्थानि । वर्तन्ते । तथा मरुतश्च । शुद्धबला स्वकार्यं कुर्वाणाः । त्वाम् । पूजयन्ति । त्वम् । एषामग्न्यादीनाम् । न्यूनातिरिक्तावेक्षणम् । प्रभुः सन्

---

१ ०ता P.
२. हे ऋत्विजः ! यूयम् Sy.
३. प्रति P. प्रवृत्ते सति Sy.
४. अस्मदीययागे Sy.
५. जुहोत Sy. ६. परिचरत Sy.
७. देवाग्निः D.
८. हविषां वोढारमेतन्नामकम् । हव्यवाहननामकस्यैवाग्नेर्देवतासम्बन्धो यजमानैर्वरणीयत्वं च तैत्तिरीये स्पष्टमाम्नातम्—'त्रयो वा अग्नयो हव्यवाहनो देवानां कव्यवाहनः पितृणां सहरक्षा असुराणाम् । त एतर्ह्याशंसन्ते मां वरिष्यन्ते मामिति वृणीध्वं हव्यवाहनमित्याह य एव देवानां तं वृणीते' (TS. 2.5.8.6.) इति Sy.
९. प्रणी० P. वृणी D. सम्भजध्वञ्च हव्यवाहनम् Sy. १०. व्यावहन्न P.
११. ०रसमिति P.
१२. VM. ignores आ ॥
आ समन्तात् Sy.
Ms. D. puts the figure ॥२८॥ here to indicate the end of the twenty-eighth hymn. No such number is given in P.
१३. 'अर्यमा' इति पञ्चदशार्चं पञ्चदशं सूक्तम् । अत्रानुक्रमणिका—'अर्यमा गौरिवीतिः शाक्त्य ऐन्द्रमुशना यवौशनसो वा पादः' (25.29. p. 19.) इति । शक्तिगोत्रोत्पन्नो गौरिवीतिर्नाम ऋषिः । अनुक्तत्वात्त्रिष्टुप् (KSA. 12.6. p. 5.) । इन्द्रो देवता मण्डलादिपरिभाषया (KSA. 12.12. p. 5.) निवृत्तत्वात् । 'उशना यत्सहस्यैः' इति पाद औशनस ऐन्द्रो वा । आभिप्लविके तृतीयेऽहनि मरुत्वतीये एतन्निविद्धानम् । सूत्रितञ्च—'तृतीयस्य अर्यमा यो जात इवेति मध्यन्दिनः' (ĀŚS. 7.7.) इति Sy.
१४. ०ति P.
१५. The passage, अर्यम . . वचनः, should follow प्रेरयन्ति ॥ अर्यमाणि यानि तेजांसि सन्ति Sy. १६. मनोः सम्बन्धिनि Sy.
१७. देवतातौ Sy.
१८. रोचमानानि वाय्वग्निसूर्यात्मकानि Sy.
१९. दिव्यन्तरिक्षे भवानि तानि तेजांसि Sy.
२०. मरुतो धारयन्ति Sy.
२१. ०बलाः is suggested for ०बला ।
२२. स्तुवन्ति Sy. २३. मरुताम् Sy.
२४. It seems to be the explanation of ऋषिः ॥ द्रष्टा Sy.

करोषि[1] । प्राज्ञ[2] ।

अनु यदीं[3] मरुतो मन्दसानमार्च्चन्निन्द्रं[4] पपिवांसं[5] सुतस्य[6] ।
आदत्त[7] वज्रमभि यदहिं[8] हन्नपो[9] यह्वीरसृजत्सर्तवा[10] उं[11] ॥ २ ॥

अनु यदीम्[12] । यदा । एनम्[13] । इन्द्रम् । मोदमानम् । सोमम्[14] । पपिवासम् । मरुतः । सोमपानानन्तरमाहु[15] । "प्रभर भगवो जहि वीरयस्व"* इति । तदानी वज्रम्[16] । अभ्यादत्त[17] । यदायमिन्द्रः । अहिम्[18] । हतवान् तेन वज्रेण । अथाहिं[19] स हत्वा बह्वी[20] । अपः सरणाय[21] । असृजत्[22] ।

उत ब्रह्माणो[23] मरुतो मे अस्येन्द्रः सोमस्य[24] सुषुतस्य पेयाः[25] ।
तद्धि हव्यं मनुषे[26] गा अविन्दद्धन्नहिं[27] पपिवाँ इन्द्रो[28] अस्य ॥ ३ ॥

उत ब्रह्माणः[29] । अपि च । हे ब्राह्मणा[30] ! हे मरुत[31] ! मम[32] । इमम्[33] । सोमम्[34] । सुष्ठु सुतम्[35] । इन्द्रः[36] । पिबतु[37] । तत् । हि[38] । सोमाख्यं हविः[39] । मनुष्यार्थम्[40] । पणिभिरपहृतान् पशून्[41] । अविन्दत्[42] । तथाहि[43] च । इमम्[44] । पीत्वा[45] । जघान[46] । इन्द्रः ।

---

१. VM. seems to explain इन्द्र असि as प्रभुः सन् करोषि ॥ हे इन्द्र ! भवसि Sy.
२. धीमान् Sy.
३. ०वि D.
४. ०देन० D.
५. तृप्यन्तम् Sy.
६. अभिषुतं सोमम् Sy.
७. पीतवन्तम् Sy.
८. अन्वस्तुवन् Sy.
* AB. 3.20.
९. तदेन्द्रः Sy.
१०. आदवौ Sy.
११. वृत्रम् Sy.
१२. अभिहतवान् Sy.
१३. Omitted by D.
१४. बहिः P. महतीः Sy.
१५. वृत्रेण निरुद्धान्युदकानि Sy.
१६. स्वैरत्वेन सर्तुं गन्तुम् Sy.
१७. सृ० D. निरोधाच्चामुञ्चत् Sy.
१८. VM. ignores उ ।
१९. Omitted by P.
२०. ०ण P.
हे बृहन्तः ! Sy.
२१. हे मरुतः ! यूयम् Sy.
२२. मदीयस्य Sy.
२३. अस्य Sy.
२४. सोमस्य । इमं सोमम्, द्वितीयार्थे षष्ठी Sy.
२५. सुष्ठ्वभिषुतम् Sy.
२६. इन्द्रश्च Sy.
२७. पिबत । पेयाः—पिबतेराशीर्लिङि मध्यमबहुवचनस्यैकवचनम् Sy.
२८. खलु Sy.
२९. युष्माभिः पीतं सोमात्मकं हविः Sy.
३०. मनुष्याय यजमानाय Sy.
३१. धेनूर्वृष्टिलक्षणान्युदकानि वा Sy.
३२. वेदयति । यजमानं गा लम्भयतीत्यर्थः Sy.
३३. वृत्रम् Sy.
३४. सोमम् Sy.
३५. पीतवान् Sy.
३६. अवधीत् Sy.

आद्रोदसी वितरं वि ष्कभायत्संविव्यानश्चिद्रयिसे मृगं कः ।
जिगर्तिमिन्द्रो अपजर्गराणः प्रति श्वसन्तमवं दानवं हन् ॥ ४ ॥

आद्रोदसी । सोमपानानन्तरम् । एव । द्यावापृथिवी । पुराऽत्यन्त विश्लिष्टम । विस्कभायत्--स्थापितवान् अत्र पथिवीम्परि द्याम् । तथा बलिन मिहादिकम । अरण्येनाच्छादयन् । भयाय । करोति भीतो यथा जनपदेन निर्गच्छति । तथा गरणशीलम् । अपबाधमानम् । श्वगन्तम् । वत्रम् । प्रत्यवहन् प्रतिमख गत्वा भूम्यामचूर्णयत ।

अध क्रत्वा मघवन्तुभ्यं देवा अनु विश्वे अददुः सोमपेयम् ।
यत्सूर्यस्य हरितः पतन्तीः पुरः सतीरुपरा एतशे कः ॥ ५ ॥

अध क्रत्वा । अथ । तव महतानन कर्मणा । हे मघवन् ! तुभ्यम् । सर्वे । देवा । राज्ञ इव कर सोमपानम् । अन्वददु । यदा । सूर्य स्वस्य । अश्वा । सर्वदा गच्छन्ती । सूर्यस्य पुरोभागे । वर्तमाना ।

---

१. अन्द्रोसि P.
२. चिदित्येवेत्यस्यार्थे वर्तते Sy.
३. द्यावापृथिव्यौ Sy.
४. अतिशयेन । वितरम्--'अम च छन्दसि' इति वेस्तरपि कृतेऽम्प्रत्ययः Sy
५. व्यस्तभ्नात्, चलनरहिते अकरोत् Sy
६. द्या D
७. मृगं मृगवत्पलायमान वृत्रम् Sy
८. संवृण्वानः सङ्गच्छमानो वेन्द्रः । संविव्यान.--व्ययतेर्वा संवरणकर्मणो वेतेर्वा रूपम् Sy.
९. अकार्षीत् । क.--करोतेर्लुडि 'मन्त्रे घसह्वर०' इत्यादिना च्लेर्लोपः 'बहुल छन्दस्यमाङ्योगेऽपि' इत्यडभावः Sy.
१०. जागर० is suggested for गर० ॥ गिरन्तमाच्छादयन्तम् Sy.
११. आच्छादनाद्विमोचयन् Sy.
१२. भयार्थं श्वासं कुर्वन्तम Sy
१३. दनोः पत्र वृत्रम् Sy
१४. प्रतिगत्य अवहतवान् Sy.
१५. ०य D.
१६. VM. ignores इन्द्रः ॥ इन्द्रः परमैश्वर्ययुक्तः Sy.
१७. ०धः P.
१८. अपि च Sy.
१९. क्रतुना त्वदीयेन कर्मणा Sy.
२०. हे धनवन्निन्द्र ! Sy.
२१. त्वदर्थम् Sy.
२२. सर्व P.
२३. द्योतमाना वह्न्यादय Sy.
२४. आनुपूर्व्येण दत्तवन्त. । ततः प्रभृतीन्द्रो देवेभ्यः सर्वेभ्योऽधिकोऽभवदित्यर्थः । तथा च श्रूयते--'स महान् भूत्वा देवता अब्रवीदुद्धारं म उद्धरत' (ÂB. 3.21.) इत्यादि Sy.
२५. P. and D add त्वा after यदा ॥ यस्त्वम् Sy
२६. स्वस्व P.
सूर्यस्य सम्बन्धिनीः Sy.
२७. अश्वा P. D
वडवाः Sy.
२८. ०न्तीः is suggested for ०न्ती ।
२९. पुरस्तात् Sy.
३०. भवन्तीः Sy.

एतशस्य विजयार्थं तस्मिन्नृषौ । उप्ता । कृतवानसि सूर्यादादाय तत्र स्थापितवानसि ।

नव यदस्य नवतिं च भोगान्त्साकं वज्रेण मघवा विवृश्चत् ।
अर्चन्तीन्द्रं मरुतः सधस्थे त्रैष्टुभेन वचसा बाधत द्याम् ॥ ६ ॥

नव यत् । नव । नवतिम् । च । अस्य प्रकृतस्याहे । भोगाय तानि पुराणि । युगपदेव । वज्रेण । यदा । मघवा । विवृश्चत् । तदानीमर्चन्ति । इन्द्रम् । मरुत । अन्तरिक्ष । अथ मरुद्भिरुच्यमानेन वीर्यहेतुना त्रैष्टुभेन । स्तुतिवचनेन प्रवृद्धवीर्यं इन्द्र । दीप्तमहिम् । बाधितवान् इति ।

सखा सख्ये अपचत्तूर्यमग्निरस्य क्रत्वा महिषा त्री शतानि ।
त्री साकमिन्द्रो मनुषः सरांसि सुतं पिबद्वृत्रहत्याय सोमम् ॥ ७ ॥

सखा सख्ये । सखा । सख्ये च यत् । क्षिप्रम् । अग्नि । इन्द्रस्य । कर्मणाऽहिहननेन हेतुना । त्रीणि । शतानि । महिषान् । तथा मनुषो यजमानस्य । त्रीणि । सरांसि । यथा पूर्णानि भवन्ति तथा सुतम् । अपिबत् । वृत्रहननाय । सोममिति ।

---

१. एतशाख्याय ऋषये । एतशो हि स्वश्वपुत्रेण सूर्येण सह स्पर्धामकरोदिति यावत् । तथा च निगमान्तरे—'प्रैतशं सूर्ये पस्पृधानं सौवश्व्ये सुष्विमावदिन्द्रः' (RV I.61.15.) इति Sv २. उपरता मन्दगतीः Sv.
३. नवसंख्याकानि Sv
४. नवतिसंख्याकानि च Sv.
५. अस्येत्यनेन शम्बर उच्यते, शम्बरस्य सम्बन्धीनि Sy. ६. भोगान् इत्यन्तोदात्तः पुरवचनः Sv.
७. धनवानिन्द्रः Sy.
८. व्यवृश्चत्, अभिनत् Sv.
९. अस्तुवन् Sv.
१०. सहस्थाने युद्धे वा स्थितम् Sv.
११. ०ञ्चि च्य० P.
१२. त्रिष्टुप्छन्दस्केन Sy.
१३. वायूपेण स्तोत्रेण Sy.
१४. Omitted by P. इन्द्र एवं स्तुतः सन् Sv.
१५. ०प्ति० D. मरुद्भिः प्रयुज्यमानेन मन्त्रेण दीप्तं शम्बराख्यमसुरम् Sy.
१६. अबाधत पिपीडे Sy.
१७. इन्द्रस्य मित्रभूतः Sy.
१८. सख्युर्मित्रभूतस्य Sy.
१९. च यत् seems to be a corrupt reading which originally stood for अपचत्, अ being elided after ए of सख्ये ॥ पपाच Sy.
२०. निमित्तभूतेन Sv.
२१. शतसंख्याकानि Sy.
२२. महिषाणां पशूनाम् Sy.
२३. ०षांस्थ P.
२४. मासुषो P., D. मनोः सम्बन्धीनि Sy.
२५. पात्राणि । अत्र सरःशब्देन पूतभृदाधवनीयद्रोणकलशसंज्ञानि पात्राण्युच्यन्ते । तेषु स्थितम Sy. २६. यथा P.
२७. अभिषुतम् Sy.
२८. अपि P., D पपौ Sy.
२९. ०त्रन० P.
३०. VM. ignores अपचत् । साकम् and इन्द्रः ॥ साकं युगपदेव । इन्द्रः परमैश्वर्ययुक्तः Sy.

त्री यच्छता महिषाणामघो मास्त्री सरांसि मघवा सोम्यापाः ।
कारं न विश्वे अह्वन्त देवा भरमिन्द्राय यदहिं जघानं ॥ ८ ॥

त्री यत् । यदा । त्रीणि । शतानि । महिषाणाम् । अभक्षयत् । इन्द्र । मासम् । यदा वा त्रीणि । सरांसि । सोममयानि । अपिबत् । अथ शङ्खम् । इव । विश्वे । देवा । भरमपि । अह्वयन्त । इन्द्रार्थम् । यदा । अहिम् । हतवानसाविति । भरश्च शङ्खवत् वाममन्यमन्यविशेष ।

उशना यत्सहस्यैरयातं गृहमिन्द्र जूजुवानेभिरश्वैः ।
वन्वानो अत्र सरथं ययाथ कुत्सेन देवैरवनोर्ह शुष्णम् ॥ ९ ॥

उशना । इन्द्र । त्वं च । उशना च । यदा । बलकरणयोग्यैः । वेगवद्भिः । अश्वैः । कवयस्य गृहम् । अगच्छतम् । वनोतिर्वधकर्मा, अथ कुत्सस्य शस्त्रेण । शुष्णं । देवैश्च । एकं रथमास्य शुष्ण हन्तुकाम ।

---

१. त्रि P.
२. हे इन्द्र ! त्वम् Sy.
३. त्रयाणाम् Sy.
४. शतसंख्याकानाम् Sy.
५. पशूनाम् Sy.
६. अघः भक्षितवानसि। घसेरत्तेर्वा रूपम् Sy.
७. मघवा धनवांस्त्वम् Sy.
८. मासानि Sy.
९. पात्राणि Sy.
१०. पीतवानसि Sy
११. तदा Sy.
१२. तत्र दृष्टान्तः कार न स्वामिनः कर्मकरमिव तद्वत् Sy.
१३. सर्वे Sy.
१४. सोमपानादिना पूर्णम् Sy.
१५. आह्वयन्त Sy.
१६. इन्द्रं युद्धार्थम् Sy.
१७. यदेन्द्रः Sy.
१८. अहम् P. वृत्रम् Sy.
१९. वाद्यम् i.e. to be uttered, a cry, is suggested for वामम् ।
२०. ०विशिष्टम् is suggested for विशेषः । The meaning seems to be that *Bhara* is the name of Indra's war-cry which resembles a conch but is different from anything else.
२१. उशनसः स्तोमे 'उशना यत्सहस्यैः' इति मरुत्वतीये सूक्तमुखीया। सूत्रितञ्च—'उशनसस्तोमेन गरगीर्णमिवात्मानं मन्यमानो यजेतोशना यत्सहस्यैरयातम्' (ĀŚS 9.5.) इति Sy.
२२. काव्यश्च Sv.
२३. अभिभवनशीलैः Sy.
२४. जूजुवानैर्गच्छद्भिः Sv.
२५. कुत्सस्य Sy.
२६. ०त P., D. आगच्छत तदा हे इन्द्र ! त्वम् Sy.
२७. वेनो० P. वेनोनिर्व० D. The passage, वनोतिर्वधकर्मा should follow हतवानसि and precede च त याना०
२८. शस्त्रौ P. कुत्सेन Sy.
२९. शुष्ण D. अत्र, अस्मिन् काले Sy
३०. P. and D. add कुत्सो after देवैः ॥ देवैश्च सह Sy.
३१. चक्रं for च एकं P. समानमेक रथम् Sy
३२. आस्थाय is suggested for आस्य ।
३३. शत्रून् हिंसन् Sy.

ययाथ[1]। हतवानसि[2] च त यानानन्तरम्। शुष्णम्[3]।

प्रान्यच्चक्रमवृहः सूर्यस्य कुत्सायान्यद्वरिवो यातवेऽकः।
अनासो दस्यूँरमृणो वधेन नि दुर्योण आवृणङ्मृध्रवाचः॥ १०॥

[प्रान्यच्चक्रमवृहः] प्रावह[4] शत्रुवधार्थम्। अन्यत्[5]। चक्रम्[6]। अथान्यत् सूर्यस्य चक्रम्[7]। कुत्साय[8]। धनस्य[9]। आगमनाय[10]। कृतवानसि[11]। तत्र शुष्णानुगाननशीलान् स्वसत[12]। दस्यून्[13]। तेन चक्रेण हननसाधनेन। हतवानसि मृधिहिंसाकर्मा। दुर्योणाख्य[14] दश[15]। निहिंसितवानसि[16]। पस्पवाभ्यानिति[17]।

स्तोमासस्त्वा गौरिवीतेरवर्धन्नरन्धयो वैदथिनाय पिप्रुम्।
आ त्वामृजिश्वा सख्याय चक्रे पचन्पक्तीरपिबः सोममस्य॥ ११॥

स्तोमासः[18]। स्तोत्राणि। त्वाम्। गौरिवीतेर्मम स्वभूतानि। वर्धयन्त[19]। वर्धमनयन्त्वम्[20]। विदथिन पुत्राय ऋजिश्वन[21]। पिप्रुं नाम शत्रुम्। अथ त्वाम्। ऋजिश्वा[22]। सख्याय[23]। आचक्रे[24]। तुभ्य पक्तव्यानि हवींषि[25]। पचन्[26]। त्व चास्य[27]। अपिब[28]। सोमम्[29]।

---

१. जगन्थ Sy.
२. अहिंसीः खलु Sy
३. एतन्नामानमसुरम् Sy.
४ VM ignores ह॥ खलु Sy.
५. The *pratika* is supplied by the Editor. हे इन्द्र ! S\
६. पृथक् चकर्थ S\
७. एकम् S\
८. एकं चक्रम् S\
९. पूर्वं द्विचक्रस्य सूर्यस्य S\
१०. कुत्सस्य S\.
११. ध स्या० P
धनम् S\.
१२. प्राप्तुम् S\
१३. अकार्षीः S\
१४. आस्यरहितान्। आस्यशब्देन शब्दो लक्ष्यते। अशब्दान् मूकान् S\.
१५. असुरान् Sy.
१६. आयुधेन वज्रेण S\.
१७. अहिंसीः Sy.
१८. सङ्ग्रामे S\.
१९ ०वा सि P नितरा छिन्नवानसि। अमणो न्यवणगिति द्विरुक्तिरादरार्था S\
२०. हिंसितवागिन्द्रियानसुरान S\
२१. हे इन्द्र ! S\
२२. एतन्नामकस्य मन्त्रद्रष्टुर्मम सम्बन्धीनि S\.
२३. वर्धयन्तु S\.
२४. ० य त्व P, D
२५. ० दधिनः P., D
२६. ऋजिश्वनाम्ने S\.
२७. विप्र P. D.
एतन्नामकमसुरम् S\.
२८ हे इन्द्र ! ऋजिश्वनामा कश्चिदृषिः Sy.
२९. तव सख्यित्वाय S\
३०. अभिमुखीचकार S\.
३१. पक्तव्यानि पुरोडाशादीनि S\.
३२. पाकं कुर्वन् S\.
३३. Omitted by P. ऋजिश्वनः सम्बन्धिनम् S\
३४. अपाः Sy.

नवग्वासः सुतसोमास इन्द्रं दशग्वासो अभ्यर्चन्त्यर्कैः ।
गव्यं चिदूर्वमपिधानवन्तं तं चिन्नरः शशमाना अप व्रन् ॥ १२ ॥

नवग्वासः । गवामयनेन यन्तोऽङ्गिरस केचन नवसु मास्सूदतिष्ठन् दशसु केचित्तेन नवग्वासश्च दशग्वासश्च भवन्ति ते । सुतसोमाः । इन्द्रम् । स्तोत्रे । अभ्यर्चन्ति । तथा कृत्वा गोसङ्घम् । च । महान्तम् । अपिधानवन्त पणिभिराहृतम् । तम् । अङ्गिरस । त्वा परिचरन्त । अप व्रन्--विवृतद्वार कृतवन्त ।

कथो नु ते परि चराणि विद्वान्वीर्या मघवन्या चकर्थ ।
या चो नु नव्या कृणवः शविष्ठ प्रेदु ता ते विदथेषु ब्रवाम ॥ १३ ॥

कथो । कथम् । न । खलु । तुभ्यम् । परिचराणि । जानन् । यानि । त्व मघवन् । वीर्याणि । परा कृतवानसि । यानि । च । सम्प्रतिनानि । कृणोषि । प्रब्रवाम । तुभ्यम् । यज्ञेषु । तानि ।

---

१. दशपेयेऽहनि मरुत्वतीये शस्त्रे 'नवग्वासः' इति सूक्तमुखीया । सूत्रितञ्च--'नवग्वासः सुतसोमास इन्द्रं सखा ह यत्र सखिभिर्नवग्वैरिति निविद्धानयोराद्ये' (ĀŚS. 9.3.) इति Sy
२ गमायनेन P. सत्रयागमनुतिष्ठन्तो ये नवभिर्मासैः समाप्य गतास्ते नवग्वाः । दशभिर्मासैः समाप्य ये गतास्ते दशग्वाः । एते उभयविधा अङ्गिरसः Sy.
३. ०स P. D.
४. ०दितिष्ठत्तं D.
५. रेचि० D.
६ अभिषुतसोमाः सन्तः Sy.
७. अर्चनीयैः स्तोत्रैः Sy.
८. अभिष्टुवन्ति Sy.
९. गोसम्बन्धिनमपि Sy.
१०. चित् अपि Sy.
११. समूहम् Sy.
१२. ०न्त D. वलेनासुरेणाच्छादितवन्तम् Sy
१३ ०भिरं हतं D.
१४. बहुषु प्रदेशेषु प्रसिद्धमपि Sy.
१५. नेतारः Sy.
१६. स्तुवन्तः Sy.
१७. अव D.
१८. प्रन् P
अपावृण्वन् Sy.
१९. परिक्रीनाम्न्येकाहे मरुत्वतीयनिष्केवल्ययोः सूक्तमुखीये 'कथो नु ते' इत्याद्ये द्वे ऋचौ । सूत्रितञ्च--'कथो नु ते परि चराणि विद्वानिति द्वे' (ĀŚS 9.5) इति Sy.
२०. कथोन्नु P.
२१. परिचर्या करवाणि Sy.
२२. जाननन् P.
२३. हे धनवन्निन्द्र ! Sy
२४. चकृषेऽह तानि वीर्याणि Sy.
२५. चैव Sy.
२६. नव्यानि नूतनानि वीर्याणि Sy.
२७. कुर्याः Sy.
२८. ०ब्रु० D.
प्रैव वदाम Sy.
२९. त्वदीयानि Sy.
३०. वीर्याणि Sy.
३१. VM. ignores उ । नु । इत and शविष्ठ ॥ नु क्षिप्रम् । हे शविष्ठ ! बलवत्तमेन्द्र ! त्वम् Sy.

एता विश्वा चकृवाँ इन्द्र भूर्यपरीतो जनुषा वीर्येण ।
या चिन्नु वज्रिन्कृणवो दधृष्वान्न ते वर्ता तविष्या अस्ति तस्याः १४ ॥

एता विश्वा । एतानि । विश्वानि । कृतवानसि । हे इन्द्र ! भूरीणि त्वम् । अपरिगत । जातेन । केनचिद् वीर्येण । यानि । च । इदानीम् । करोषि शत्रूणा धर्षणान् । धर्षणशील । तव । तेषा निदानभूतस्य । बलस्य । वारयिता । न । कश्चिदस्ति ।

इन्द्र ब्रह्म क्रियमाणा जुषस्व या ते शविष्ठ नव्या अकर्म ।
वस्त्रेव भद्रा सुकृता वसूयू रथं न धीरः स्वपा अतक्षम् ॥ १५ ॥

इन्द्र ब्रह्म । इन्द्र ! स्तोत्राणि । क्रियमाणानि । सेवस्व । यानि । तव । बलवत्तम ! नूतना । वय कृतवन्त । वस्त्राणीव । कल्याणानि । धनमिच्छन् । रथम् । इव च । प्राज्ञ । शोभनकर्मा । कृतवानस्मि । स्तोत्राणि ।

---

१. प्रत्यक्षोपलभ्यमानानि Sy.
२. व्याप्तानि भुवनजातानि Sy.
३. पुरीणि P., D. बहूनि Sy.
४. परि० P., D. शत्रुभिरपरिगतस्त्वम् Sy.
५. जननसिद्धेनात्मीयेन Sy.
६. बलेन Sy.
७. च विश्वानि Sy.
८. कुर्याः Sy.
९. ०णं P. धर्षणानि is suggested for धर्षणान् ।
१०. सपत्नान् धर्षयंस्त्वम् Sy.
११. त्वदीयस्य Sy.
१२. निवारयिता Sy.
१३. ०दा० D. कोऽपि Sy.
१४. VM. ignores नु and वज्रिन् ॥ नु क्षिप्रम् । हे वज्रवन्निन्द्र ! तस्य Sy.
१५. ब्रह्माणि तानि स्तोत्राणि Sy.
१६. अस्माभिः क्रियमाणानि Sy.
१७. स्तोत्राणि Sy.
१८. तुभ्यम् Sy.
१९. हे बलवत्तम ! शूरतम ! वा Sy.
२०. नूतनानि is suggested for नूतना ॥ नूतना अद्यतनाः Sy.
२१. अकुर्म Sy.
२२ भद्राणि भजनीयानि Sy.
२३. धनकामोऽहम् Sy.
२४. धीमान् Sy.
२५. अकरवम् । स्तोत्राण्युपहारवद् ग्राह्याणीत्यभिप्रायेण वस्त्रनिदर्शनमुक्तम् । रथदृष्टान्तस्त्वागमनसाधनत्वप्रतिपादनाय । स्तोत्राणि स्वीकृत्य मह्यं धनं प्रयच्छेत्यर्थः Sy.
२६ सुष्ठु कृतानि स्तोत्राणि Sy.
२७. Ms. D. puts the figure ॥२९॥ here to indicate the end of the twenty-ninth hymn. No such number is given in P.

V.30.

क्व१ स्य वीरः को अपश्यदिन्द्रं सुखरथमीयमानं हरिभ्याम् ।
यो राया वज्री सुतसोममिच्छन्तदोको गन्ता पुरुहूत ऊती ॥ १ ॥

क्व स्यः ॥ बभ्रु ॥ सोऽयमृणञ्चयनाम्नो राज्ञश्चत्वारि गवां सहस्राण्यलभत, नमुचिस्तान्यपजहार तेन युद्धार्थं शीघ्रं निर्गच्छन् बभ्रुर्वदति क्व । स । वीर इन्द्र । क । अपश्यत् । इन्द्रम् । सुद्राररथम् । अश्वाभ्याम् मम शत्रून् प्रति । गच्छन्तम् । य. । धनेन । वज्री । सुतसोम यजमानम् । अन्विच्छन् । तत् । गृहम् । पुन पुनर्गच्छति । बहुभिराहृत । रक्षणार्थम् ।

अवाचचक्षं पदमस्य स्वरुग्रं निधातुरन्वायमिच्छन् ।
अपृच्छमन्याँ उत ते म आहुरिन्द्र नरो बुबुधाना अशेम ॥ २ ॥

अवाचचक्षम् । युद्ध प्रविशङ्कयास्येन्द्रस्य । पदम् । अन्तर्हितम् । किमिहास्ति किमिहेति पृथिव्या-

---

१. 'क्व स्य वीरः' इति पञ्चदशर्चं षोडशं सूक्तम् । अत्रानुक्रमणिका—'क्व स्य बभ्रुर्ऋणञ्चयोऽप्यत्र राजा स्तुतः' (KSA. 25.30.p.20.) इति । बभ्रुर्ऋषिः । अनुक्तत्वात्त्रिष्टुप् (KSA. 12.6. p. 5.) । इन्द्रो देवता । ऋणञ्चयनामा राजापि क्वचित् स्तूयते । अतः सोऽपि देवता । तीव्रसोमाख्ये एकाहे मरुत्वतीयशस्त्र इदं सूक्तं निविद्धानम् । सूत्रितञ्च—'तीव्रसोमेनान्नाद्यकामः क्व स्य वीरः' (ĀŚS. 9.7.) इति Sy.

२. बभ्रूः D.

३. तान्यपहारते D.

४. P. and D. add गमन् between निर् and गच्छन् ।

५. कुत्र विद्यते Sy.

६. इन्द्रः Sy.

७. विक्रान्तः Sy.

८. ववृशे Sy.

९. शोभनाक्षद्वारो रथो यस्य स सुखरथः । सुष्ठु खनति लिखति भूमिमिति वा सुखम् । तादृग्रथम् Sy. 'सुहितं खेभ्यः खं पुनः खनतेः' N.3.13.

१०. स्ववाहनाभ्याम् Sy.

११. श्रून् D.

१२. देयेन धनेन सह Sy.

१३. वज्रवान् Sy.

१४. अभिषुतसोमं यजमानम् Sy.

१५. तस्तत् D. तस्य यजमानस्य Sy.

१६. प्राप्तो भवति Sy.

१७. रक्षायै Sy.

१८. प्रवशको स्ये० P.

१९. स्थानम् Sy.

२०. It seems to be the explanation of सस्वः ॥ सस्वरित्यन्तर्हितनाम Ngh. 3.25.

२१. ०हास्तीति हेति P.

मघवञ्चक्षणपश्यम । तथा निरीक्षमाणश्चाह पदमन्विच्छन् । उद्गूर्ण पदम् । निधातुम्लव पदम् । अनगनवानस्मि । तदानीं त्व स्य वीर इति पृच्छम् । अन्यान् । अपि च । ते । मम । आहु । वयमपि मनसा । उन्द्र । ज्ञातुकामा एव । स्थितवन्त महान्वप कार्य इति ।

प्र नु वयं सुते या ते कृतानीन्द्र ब्रवाम यानि नो जुजोषः ।
वेददविद्वाञ्छृणवच्च विद्वान्वहंतेऽयं मघवा सर्वसेनः ॥ ३ ॥

प्र नु वयम् । उन्द्र दृष्ट्वा स्तौति प्रब्रवाम । क्षिप्रम् । वयम् । यज्ञ पुरा । यानि । तव । कृतानि । यानि च परा । अस्माभि कृतानि । उन्द्र ! त्वम । सेवितवानसि । परोक्ष उत्तमार्थ —अजानन । तानि जानातु । विद्वानपि । अस्माभिरुच्यमानानि शृणोतु । प्रविशति । अयम । मघवा । समग्रधनस्त्वेव वय तानि प्रब्रवाम ।

स्थिरं मनश्चकृषे जात इन्द्र वेषीदेको युधये भूयसश्चित् ।
अश्मानं चिच्छवसा दिद्युतो वि विदो गवामूर्वमुस्रियाणाम् ॥ ४ ॥

स्थिर मनः । यद्ध प्रादुर्भूतस्त्वम् । आत्मीय मन । स्थिरम् । करोषि । तथा त्वमेक । एव सन् ।

---

१. अहमवाद्राक्षम् Sy. २. नरी० P
३. अन्व० P. इन्द्रमन्विच्छन्नहम् Sy.
४. स्व स्थापयितुरस्येन्द्रस्य पदम् Sy.
५. अन्वगमम् Sy. ६. इ P
७. पृच्छम् can be taken as an imp अपृच्छम् would be a better reading॥ पृष्ठवानस्मि Sy. ८ विदुषोऽपि मार्गे इन्द्रम् Sy.
९. पृष्टास्ते Sy. १०. महाम् Sy.
११. किमाहु. ? इत्युच्यते—यज्ञाना नेतारः Sy.
१२. इन्द्रम् is suggested for इन्द्र ।
१३ बुभुत्समाना वयम् Sy.
१४. इन्द्रं प्राप्तवन्तः स्म । यद्यपीन्द्रो विद्यते तथापि दुर्लभश्चेदनुपगन्तव्यः इति बुभुत्समान. स्वभावमपृच्छत् । पृष्टश्च सुलभ इत्युक्त इन्द्रप्राप्त्यर्थं सूक्तशेषमपश्यदित्यर्थः Sy.
१५ ०प्रब्रु० D तानि कर्माणि प्रकर्षेण वदाम Sy.
१६. अद्य Sy. १७. स्तोतारः Sy.
१८. It seems to be the explanation of सुते ॥ सोमेऽभिषुते सति Sy.
१९. त्वदीयानि Sy.
२०. कृतानि कर्माणि सन्ति Sy.
२१. त्वमपि अस्मदर्थं यानि कर्माणि Sy.
२२. असेवथाः Sy.
२३. तानि कर्माणि इत. पूर्वमजानन् जन. Sy.
२४. तनि P २५. अन्वस्मा० P.
२६. शृणुयाच्च । यद्वा विद्वान् जानन् पुरुष. शृणवच्च । अजानन्तमपि जन श्रावयेच्च Sy.
२७ अश्वैरुह्यते । व्यत्ययेन कर्तृप्रत्ययः । प्रापयति Sy. २८. अस्य P. इन्द्रो जानतश्च शृण्वतश्च तान् जनान् प्रति Sy.
२९. ०व P. धनवान् विद्वान् जानन् Sy.
३०. सङ्ग्रामसेव. P सर्वाभिः सेनाभिर्युक्तः Sy.
३१ प्रब्रु० D.
३२. VM. ignores च ।
३३ ०र P
३४, ०त त्व० P. उत्पन्नमात्र एव त्वम् Sy.
३५ चित्तम् Sy. ३६. चलनरहितम् Sy.
३७. चकर्थ । सर्वान् बलिष्ठान् जयेयमितीदृशम् । तथा हे इन्द्र ! Sy.
३८. असहायः Sy. ३९. एव त्वम् Sy.

युद्धाय । बहून् । अपि । गच्छसि । तत आयुधबलेन । धनम् । विद्युत प्रकाशीकृतवानसि । तत शत्रून् जित्वा गवाम् । उत्सरणशीलानाम् । सङ्घातम् । अविन्दः ।

परो यत्त्वं परम आजनिष्ठाः परावति श्रुत्यं नाम बिभ्रत् ।
अतश्चिदिन्द्रादभयन्त देवा विश्वा अपो अजयदासपत्नीः ॥ ५ ॥

परः । परं । त्वम् । यथा । यद्वम्य परमे स्थाने । आजायथाः प्रादुर्भवसि । दूरे । श्रुत्यम् । इन्द्राग्न्य नाम । बिभ्रत् । तत आरभ्यास्मात् । इन्द्रात् । अभयन्त । देवा । कि चाय सर्वाण्येव । उदकानि । अजयत् । येषा दास पति ।

तुभ्येदेते मरुतः सुशेवा अर्चन्त्यर्कं सुन्वन्त्यन्धः ।
अहिमोहानमप आशयानं प्र मायाभिर्मायिनं सक्षदिन्द्रः ॥ ६ ॥

तुभ्येत् । तुभ्यम् । एव । एते । मरुत । सुसुखा । स्तोत्रम् । उच्चारयन्ति । सुन्वन्ति च । सोम यजमाना । अहिम् । ओहान युध्यन्तम् । अप । आवृत्य शयानम् । मायाविनम् । मायाभि । इन्द्र । प्र सक्षत् अभिव्याप्तवानिति ।

---

१. बहुतरान् राक्षसादीन् Sv. २. अवे., अगम Sv. ३ अयुब० P.,D. बलेन Sv.
४. धम D. अश्मान चित् गवामावरक पर्वतमपि Sy. ५. ०त D. व्यभिनः Sy.
६. धेनूनाम् Sv ७. क्षीरमुत्सारयन्तीनाम् Sv
८. संधा० P. समूहम् Sv
९. अवेदयोऽलम्भय Sy.
१०. VM. ignores इन्द्र and explains चित् once.
११. परस्तादुपरिष्टात्स्थितः Sv.
१२. यदा हे इन्द्र ! Sv १३. उत्कृष्टतमः Sv
१४. आ समन्तादजायथाः Sv
१५. श्रवणीयम् Sv १६. नामधेयम् Sv.
१७. धारयन् Sv. १८. शेषः परोक्षकृतः Sv.
१९. अत आरभ्यैव Sv. २०. बिभ्युः Sv
२१. द्योतमाना अग्न्यादयः Sv.
२२. चान्ययं P., D. २३. वशीचक्रे Sy.
२४. द्रासः D. दासो वृत्रः पतिः पालयिता षासामपां ता इति Sy २५. VM. ignores चित् ॥ चित् एव Sv.
२६. तुभ्ये D. २७. तुम् P.
२८. महद्रवन्ति वदन्तीति मरुतः स्तोतारः Sv.
२९. सुखाः P शोभनसुखा. सन्तः । स्तोत्रेण शोभन सुखमुत्पादयन्त सन्तः Sv. शेवमिति सुखनाम Ngh 3.6.
३०. अर्चनीयं स्तोत्रम् Sv.
३१. स्तुवन्ति कुर्वन्तीत्यर्थः Sv.
३२. अभिषव कुर्वन्ति Sv
३३. सोमलक्षणमन्नम् Sv.
३४. ०नः P. ३५ वृत्रम् Sv.
३६. अहिममाहानं P. देवान् बाधमानम् Sv
३७. उदकानि Sv.
३८. आवृत्य शयनं कुर्वन्तम् Sv.
३९. कपटवन्तम् Sy.
४०. स्वकीयाभिः शक्तिभिः Sv.
४१. परमैश्वर्ययुक्तः Sv. ४२. अभ्यभवत् Sy.

वि पृ मृधो जनुषा दानमिन्वन्नहन्गवा मघवन्त्संचकानः ।
अत्रा दासस्य नमुचेः शिरो यदवर्तयो मनवे गातुमिच्छन् ॥ ७ ॥

वि षू मृधः । इन्द्र मित्र यद्वार्थ भजमानम् मृधं परिक्षेत्र तान् । मघवन् ! त्वम् । सेवमान । विविध सुष्ठ हतवानसि । जनुषा जातेन । तेजसा । सन्दीप्यमान । दानव खण्डयिता । यदा त्वम् । अस्मिन् लोके । उपक्षपयितु । नमुचे । शिरश्च छित्त्वा । अगमय । मनवे नमुचिना सग्रहाय यज्ञाय । गमनमार्गम् । इच्छन् तदानीमिति ।

युजं हि मामकृथा आदिदिन्द्र शिरो दासस्य नमुचेर्मथायन् ।
अश्मानं चित्स्वर्यं वर्तमानं प्र चक्रियेव रोदसी मरुद्भ्यः ॥ ८ ॥

युजं हि । इन्द्र ! नमुचे । असुरस्य । शिर । मथितुमिच्छन् । सहायम् । मा वभूम । अकृथा । स्वच्छतया स्वरणकुशलम् । अभिमते देशे गच्छन्तम् । वज्रम् । च सहायमकृथा । तदानी तव साहाय्य कर्तुकामेभ्यो मरुद्भ्यः । द्यावापृथिवी । चक्रे इव । आस्ताम् उभयतो भवताम, अन्तरिक्ष सर्व मरुद्भिर्व्याप्तमासीदित्यर्थ ।

---

१. मृधः तवनुचरान् राक्षसादीन् शत्रून् Sy.
२. हे धनवन्निन्द्र ! Sy.
३. अस्माभिः स्तूयमानस्त्वम् । सञ्चकानः—सम्पूर्वः कायतिः शब्दकर्मा । तस्य लडर्थे लिटि रूपम् Sy. ४. विजघन्थ Sy.
५. जन्मना । इन्द्रस्यासुरा जन्मारभ्य शत्रव इत्यर्थः Sy.
६ The word **गौः** means 'a ray' N 2.6 VM. seems to explain **गवा** as **तेजसा** and **इन्वन्** as **सन्दीप्यमानः** । The literal meaning of **इन्वन्** is of course 'going,' **वज्रेण** Sy.
७. प्रेरयन् हिसन् Sy.
८. देवानां बाधकं वृत्रमसुरम् Sy.
९. हे इन्द्र ! त्वं युद्धे Sy.
१०. उपक्षपयितुरसुरस्य सम्बन्धि Sy.
११. एतन्नामकस्य Sy
१२. शीर्षम् Sy
१३. लोक वे क्षपयितान्नमुचे शिरश्शित्वं गयः P.
अचूर्णयस्तदा शत्रून् विजघन्थेति पूर्वेण सम्बन्धः Sy. १४. नमुचिनापहृतगोधनाय मह्यम् Sy
१५. सुखम् Sy.
१६. अभिलषन् Sy
१७. हे इन्द्र ! त्वम् Sy.
१८. असुरस्य Sy
१९. उपक्षपयितुः Sy
२० चूर्णयन् Sy.
२१. सखायम् Sy.
२२. ०था P. चकृषे खलु Sy.
२३. तथा च्छ० D. स्वरेण सहितम् Sy.
२४. भ्रमन्तम् Sy.
२५. मेघमिव स्थितम् Sy.
२६. त्वत्सहायेभ्यः Sy.
२७. द्यावापृथिव्यौ Sy
२८ प्र आस्ताम् । उपसर्गश्रुतेर्योग्यक्रियाध्याहारः Sy. २९. ०क्षः P.
३०. VM. ignores हि । आत् and इत् ॥ हि खलु । आत् अनन्तरमेव Sy.

स्त्रियो हि दास आयुधानि चक्रे किं मा करन्नबला अस्य सेनाः ।
अन्तर्ह्यख्यदुभे अस्य धेने अथोप प्रैद्युधये दस्युमिन्द्रः ॥ ९ ॥

स्त्रियः । नमुचि । प्रथममिन्द्रस्य स्त्रिय । आयुधानि । चक्रे युद्धार्थ निरगमयत् । इन्द्रश्च । किम् । माम् । कुर्वन्तु । स्त्रीभूता । अस्य । सेना इति मन्यमान । तासु स्त्रीषु रूपयुक्ते । ते स्त्रियावादाय । अन्त । चकार । अथ सम्भ्रान्त सन् । दस्युम् । युद्धार्थम् । उपप्रागादिति ।

समत्र गावोऽभितोऽनवन्तेहेह वत्सैर्वियुता यदासन् ।
सं ता इन्द्रो असृजदस्य शाकैर्यदीं सोमासः सुषुता अमन्दन् ॥ १० ॥

समत्र । अस्मिन्नसुरे । समगच्छन्त । गाव । यदा । इह चेह च । वत्सै । वियुक्ता । आसन् । सङ्गतपर्वकाले ? नगरात् बहिस्सङ्गता अपजहार । अथ ता गा । अस्य स्वभूता । ता जित्वा मरुद्भि सह, जित्वा स्वामिना मया समसृजत् । यदा । एनम् । सोमा । सुता । अमन्दन् । बभ्रोर्मम ।

---

१. उपक्षपयिता नमुचिरसुरः Sy
२. स्त्री Sy.
३. युद्धसाधनानि Sy.
४. कृतवान् । इन्द्रेण सह योद्धु प्रहितवानित्यर्थ Sy
५. कुर्युरिति मन्यमान इन्द्रः Sy.
६. स्त्रीरूपाः Sy.
७. असुरस्य सम्बन्धिन्यः Sy.
८. तासा मध्ये Sy.
९. प्रीणयित्र्यौ सुरूपे Sy
१०. गृहमध्ये निदधे Sy.
११. अनन्तरम् Sy.
१२. दस्यु P.,D. नमुचिम् Sy.
१३. युद्धाय Sy
१४. उपप्रागच्छत् Sy.
१५. VM. ignores हि ॥ हि खलु Sy
१६. अस्मिन् काले Sy.
१७. अत्यन्तमगच्छन् Sy.
१८. नमुचिनापहृता गावः Sy
१९. सर्वतः Sy.
२०. वत्सैर्वियुक्ता P ,D
२१. अभवन् Sy
२२. सङ्गत वच P अस्मिन् काले Sy
२३. आप० P
२४. बभ्रोः सम्बन्धिनोर्नमुचिनापहृता. Sy
२५. शक्तैर्मरुद्भिः Sy
२६. यमा समसुत् P. वत्सै. सह समयोजयत् Sy.
२७. इन्द्रम् Sy.
२८. सुषुता बभ्रुनाम्ना ऋषिणा सुष्ठ्वभिषुताः Sy
२९. अमादयस्तदा Sy.
३०. ०भ्रो म० P. बभ्रोर्मम seems to refer to अस्य; therefore the word should immediately follow अस्य and precede स्वभूताः ।
३१. VM. ignores अभितः and इन्द्रः ॥ सर्वतः Sy.

यदीं सोमा॑ बभ्रु॒धूता॒ अम॑न्दन्नरो॒रवीद्वृष॒भः सा॒दने॑षु ।
पु॒रंद॒रः पपि॒वाँ इन्द्रो॑ अस्य पुन॒र्गवा॑मददादु॒स्रिया॑णाम् ॥ ११ ॥

यदीं सोमाः । यदा । एनम् । बभ्रुनाम्ना मया स्तुता । सोमा । अमन्दन् । अथाय वृषभ । युद्धेषु । अत्यन्त शब्द करोति । पुरन्दर । पपिवान् । इम सोमम् । पुनश्च । असुरैरपहृता गा आहृत्य । प्रायच्छदिति ।

भद्रमि॒दं रु॒शमा॑ अग्ने अक्र॒न्गवां॑ च॒त्वारि॒ ददं॑तः स॒हस्रा॑ ।
ऋ॒णं॒च॒यस्य॒ प्रय॑ता म॒घानि॒ प्रत्यं॑ग्रभीष्म॒ नृत॑मस्य॒ नृ॒णाम् ॥ १२ ॥

सम्प्रति गवा दातारमृणञ्चय स्तौति--

भद्रमिदमिति । ऋणञ्चयेन दत्तानि गवाम् । चत्वारि । सहस्राणि । मह्य गृहमानीय प्रयच्छन्त तस्य भटा । दीप्ता । भद्रम् । इद कर्म । कृतवन्त । वयम् ऋणञ्चयस्य । प्रत्तानि । महनीयानि गोधनानि । प्रतिगृहीतवन्त । नृणाम् । नृतमस्य ।

सुपेश॑सं मा॒व सृ॑जन्त्यस्तं॒ गवां॑ स॒हस्रै॑ रु॒शमा॑सो अग्ने ।
तीव्रा इन्द्र॑ममन्दुः सु॒तासो॑ऽक्तोर्व्यु॑ष्टौ॒ परि॑तक्म्यायाः ॥ १३ ॥

सुपेशसम् । सुरूपम् । माम् । मदीय गृहम् । आनीय प्रविशेत्यवसृजन्ति । गवाम् । सहस्रैः सह ।

---

१. सोम D. २. इन्द्रम् Sy.
३. बभ्रुणाभिषुताः Sy.
४. अमावयंस्तदा Sy.
५. मन्द यथा च मघं P. कामानां वर्षितेन्द्रः Sy.
६. अत्यर्थं शब्दमकरोत् Sy.
७. पुरां दारयिता Sy.
८. पीतवान् Sy.
९. प्राच्छदिति P., D. बभ्रवे ददौ Sy.
१०. VM. ignores उस्रियाणाम् ॥ क्षीरमुत्स्राविणीः Sy. ११. ऋणयेन P., D.
१२. धेनूनाम् Sy.
१३. चतुःसंख्यायुक्तानि Sy.
१४. प्रायच्छन्त or प्रयच्छन्तः nom. pl. is suggested for प्रयच्छन्त ॥ मह्यं प्रयच्छन्तः । राज्ञा हि दीयमानानि धनानि राजपुरुषा एव प्रयच्छन्ति Sy.
१५. रुशम इति कश्चिज्जनपदविशेषः । अत्र रुशमशब्देन तत्रत्या जना उच्यन्ते । ऋणञ्चयनाम्नो राज्ञः किङ्कराः Sy.
१६. कल्याणम् Sy. १७. अकुर्वन् Sy.
१८. एतन्नामकेन राज्ञा Sy.
१९. प्रयतानि दत्तानि Sy.
२०. मह० D.
२१. गोरूपाणि धनानि Sy.
२२. प्रतिगृहीतवन्तः स्मः । पूजार्थं बहुवचनम् Sy.
२३. नेतृणां मध्ये Sy.
२४. अतिशयेन नेतृतमस्य Sy.
२५. VM. ignores अग्ने ।
२६. स्वरू० P. अलङ्काराच्छादनादिभिः संस्कृतम् Sy. २७. मा P.
२८. एव० P. प्रापयन्ति स्म Sy.
२९. धेनूनाम् Sy.

अमी रुशमा. । अग्ने ! इति स्वायतनस्थानायाग्नये निवेदयति । तकतिर्गतिकर्मा ऋणञ्चयमपहाय बभ्रुर्यस्या रात्र्यामागतः सा परितक्म्योच्यते अस्या. । रात्रे । व्युच्छने धनसद्भावादपरेद्युर्मया । सुता । तीव्ररसाः सोमा· । इन्द्रम् । अममन्दु ।

औच्छत्सा रात्री परितक्म्या याँ ऋणंचये राजनि रुशमानाम् ।
अत्यो न वाजी रघुरज्यमानो बभ्रुश्चत्वार्यसनत्सहस्रा ॥ १४ ॥

औच्छत् । मदीयात् गृहात् प्रतिनिवृत्ताना रुशम्य ? करेषु ।

चतुःसहस्रं गव्यस्य पश्वः प्रत्यग्रभीष्म रुशमेष्वग्ने ।
घर्मश्चित्तप्तः प्रवृजे य आसीदयस्मयस्तम्वादाम् विप्राः ॥ १५ ॥

चतुःसहस्रम् । रुशमेषु । प्रतिगृहीतवन्त· । प्रवर्जज्ञायनाय ? तप्त । घर्म. । इव । य । आसीत् ।

---

१. ऋणञ्चयस्य किङ्कराः Sy.
२. तकृति० P., D.
३. ०तक्ष्योच्य० P., D. तमसा भूतानि परितस्तकति गच्छतीति परितक्म्या । तस्याः Sy.
४. व्युच्छने सति । उषःकाल इत्यर्थः Sy.
५. ०द्युर्मय P. ०द्युर्माया D.
६. लब्धबहुधनेन मयाभिषुताः Sy.
७. रसवन्तः Sy
८. अमन्दुः P., D. अमादयन् । बभ्रुः गवा प्राप्यनन्तरमवलम्बितमेव सोमेनेज इत्यर्थः Sy.
९. ०तान P. ०ताना D.
१०. रुशमानाम् is suggested for रुशस्य ।
११. कारेषु is suggested for करेषु ।
१२. VM. practically ignores the whole of the stanza. रुशमानां रुशमनाम्नां जनानाम् । राजनि प्रभौ । ऋणञ्चये एतत् संज्ञके तत्समीप एव । या रात्रिः । परितक्म्या परितो गन्त्री भवति । सा रात्रीः । औच्छत् व्युष्टाभवत् । अत्यः सततगामी । वाजी न अश्व इव । रघुः शीघ्रगामी । अज्यमानः प्रेर्यमाणः । बभ्रुरेतन्नामक ऋषिः ॥ चत्वारि चतुःसंख्याकानि । सहस्रा सहस्राणि गोरूपाणि धनानि । असनत् अलभत Sy.
१३. 'क्व स्य बभ्रुर्ऋणञ्चयोऽप्यत्र राजा स्तुतः' (KSA. 25.30. p. 19.) इत्यनुक्रमणिकाकारः । तथा बृहद्देवता (5.33.36.)
अत्रेः सुतमृषिं बभ्रुमार्त्विज्याय ऋणञ्चयः ।
सहस्रदक्षिणे सोमे वव्रे तं सोऽप्ययाजयत ॥३३॥
ददौ च रौशमो राजा सहस्राणि शतानि तु ।
तस्मै चत्वारि चत्वारि महावीरं च काञ्चनम्॥३४॥
प्रवर्ग्येषु महावीराः सौवर्णास्तस्य चाभवन् ।
प्रतिगृह्य ऋषिर्गच्छन् मध्यमेनाग्निना पथि॥३५॥
पृष्ट इन्द्रेण चाचख्यौ भद्रं चतसृभिश्च यत् ॥३६॥
'भद्रमिदं रुशमाः' इत्यादिभिः 'चतुःसहस्रम्' इत्यन्ताभिः (RV. V. 30. 12-15.) बभ्रुऋणञ्चयं त्रिष्टुभा तुष्टाव DDN.
१४. एतत्संज्ञकेषु जनेषु Sy., DDN.
१५. प्रतिगृहीतवन्तः स्मः Sy.
१६. प्रवर्ग्याय or प्रवर्ग्यज्ञानाय is suggested for प्रवर्जज्ञायनाय ॥ प्रवृञ्जनायेम् Sy. DDN.
१७ तप्तः is suggested for तपः ॥ सन्तप्तः शोभनवर्णः Sy., DDN.
१८ महावीरः Sy.
१९. पूजनीयो महावीरः । चिदयं पूजायाम्, आचार्यश्चिदिदं ब्रूयादिति यास्कः (N.64.) DDN.
२०. कलशः Sy. २१. अभवत् Sy.

हिरण्येन निर्मित । तादृग्भवा पय । भुक्तवन्तो वयम् । दीप्तिवन्तो वय मेधाविन इति ।

V.31.

इन्द्रो रथाय प्रवतं कृणोति यमध्यस्थान्मघवा वाजयन्तम् ।
यूथेव पश्वो व्युनोति गोपा अरिष्टो याति प्रथमः सिषासन् ॥ १ ॥

इन्द्रः ॥ अपस्यु ॥ इन्द्र । आत्मीयाय रथाय । प्रवणवन्त देशम् । करोत्यग्रत स्थिता घनन् । यम् । अधितिष्ठति । सङ्ग्राममिच्छन्तम् । गोयूथानिव । गोपाल । विविध प्रेरयत्येव सङ्ग्रामिकानश्वपुरुषान विविध प्रेरयतेति । स्वमग्रेऽरिष्ट । गच्छति । सर्वेषामग्रत । शत्रून् सिषासन् ।

आ प्र द्रव हरिवो मा वि वेनः पिशङ्गराते अभि नः सचस्व ।
नहि त्वदिन्द्र वस्यो अन्यदस्त्यमेनांश्चिज्जनिवतश्चकर्थ ॥ २ ॥

आ प्र द्रव । आभिमुख्येन प्रद्रव । हरिव ! मा । विगतकामोऽभू श्रद्धधान आगच्छ ।

---

१. अयोमयो हिरण्मयः Sy. DDN
२. तादृग् गवां is suggested for तादृग्भवां ॥ तमु दोहनार्थं कलशञ्च Sy.
३. आदत्तवन्तः Sy., DDN. ४. य P.
५. ०ने D. विप्रा मेधाविनो वयम् DDN.
६. VM. ignores चतुःसहस्रम् । गव्यस्य । पश्वः । अग्ने and उ ॥ हे अग्ने ! गव्यस्य गवात्मकस्य । पश्वः पशोः पशूनाम्, जातावेकवचनम् । चतुःसहस्रं चत्वारि सहस्राणि Sy., DDN. चतुःसहस्रमिति—'सहस्रं सनिता०' (RPR.5.27.) इति निषेधान्न षत्वम् DDN. Ms. D. puts the figure ॥३०॥ here to indicate the end of the thirtieth hymn. No such number is given in P.
७. 'इन्द्रो रथाय' इति त्रयोदशर्चं सप्तदशं सूक्तम् । अवस्युर्नाम आत्रेय ऋषिः । त्रिष्टुप् छन्दः । इन्द्रो देवता । 'उग्रमयातम्' 'सं ह यद्वाम्' इति पादयोः क्रमेण कुत्सोशनसौ विकल्पेन देवता । 'इन्द्राकुत्सा वहमाना' इत्यस्या इन्द्रः कुत्सश्च । तथा चानुक्रान्तम्—'इन्द्रो रथाय सप्तोनावस्युरुग्रमिति कौत्स्यौशनसौ वा पादौ परेन्द्राकौत्सी' (KSA. 25.31.p.20.) इति । विनियोगो लैङ्गिकः Sy.
८. अवस्युः is suggested for अपस्युः ।
९. तस्मै रथाय Sy १०. प्रवणभाजिम् Sy.
११. स्थितान् is suggested for स्थिता ।
१२. रथम् Sy. १३. घनमतितिषति P.
१४. अग्रमिच्छन्तम् Sy. १५. VM. explains यूथेव and पश्वः together as गोयूथानिव ॥ पशूनां यूथानि यथा Sy.
१६. सा० is suggested for स० ॥ यथा प्रेरयति तथा शत्रुसैन्यानि प्रेरयति Sy.
१७. प्रेरय० is suggested for प्रेरय ।
१८. स्वयम् is suggested for स्वम् ॥ शत्रुभिः स्वयमहिंसितः Sy.
१९. ०ता P. देवानां मुख्य इन्द्रः Sy.
२०. विषा० P. शत्रुधनानीच्छन् Sy.
२१. VM. ignores मघवा ॥ मघवा धनवान् Sy. २२. ०वः D.
२३. अस्मानभिमुखं प्रकर्षेण गच्छ Sy.
२४. हे हरिवन्निन्द्र ! त्वम् Sy.
२५. विशतकामो भू P., D. वेनतिः कान्तिकर्मा । अस्मासु विगतकामः(मा) भूः Sy.

हे[1]। माम्[2]। धनदानादिभि[3] सेवस्व[4]। नहि। त्वत्त[5]। अन्यत्[6]। प्रशस्तनरम्[7]। अस्ति भूतम्[8]। त्वमस्त्रीकान्[9]। अपि। जायावत[10]। करोषि[11]।

उद्यत्सहः सहस आजनिष्ट देदिष्ट इन्द्रं इन्द्रियाणि विश्वा।
प्राचोदयत्सुदुघा वव्रे अन्तर्वि ज्योतिषा संववृत्वत्तमोऽवः ॥ ३ ॥

उद्यत्[12]। उदाजनिष्ट[13]। यदा[14]। सहस[15] उपादानात्। इन्द्राय[16] सह[17] प्रारथ[18] प्रबुद्धाना पञ्चाना जनानाम्। बलानि[19]। इन्द्रः। दीषयति[20]। प्रमोदयति[21]। गाश्च[22]। वव्रे व्रजे[23]। अन्त स्थिता सञ्चरणार्थम्। तथा ज्योतिषा। वष्टमानम्[24]। तमश्च[25] मसर्वम्[26]। विवृणोति[27]।

अनंवस्ते रथमश्वाय तक्षन्त्वष्टा वज्रं पुरुहूत द्युमन्तम्।
ब्रह्माण इन्द्रं महयन्तो अर्कैरवर्धयन्नहये हन्तवा उ ॥ ४ ॥

अनवः[28]। मनुष्या ऋभवः[29]। तव[30]। अश्वानुगुणम्[31]। रथम्। कृतवन्त[32]। त्वष्टा च[33]। वज्रम्[34]।

---

१. Something, probably पिशङ्गराते, seems to be missing after हे। At present हे stands alone and is incomplete.
२. अस्मान् Sy.
३. ०भि P. ४. अभिसेवस्व Sy
५. वस्तुजातम् Sy.
६. वसीयः श्रेयस्करम् Sy.
७. ०त P.
८. अस्तिकान् P., D. मेनाशब्दः स्त्रीवाची। अपगतस्त्रीकांश्च Sy.
९. ०पतः D.
१०. अ क० P., D.
११. VM. ignores पिशङ्गराते। अभि and इन्द्र ॥ किञ्च हे बहुरूपधन ! इन्द्र ! Sy.
१२. उपरिष्टात् प्रादुर्बभूव तदा Sy.
१३. उषःसम्बन्धिनस्तेजसः Sy.
१४. सह D. सूर्यसम्बन्धि तेजः Sy.
१५. प्रातरथ is suggested for प्रारथ।
१६. धनानि। इन्द्रियमिति धननाम Ngh. 2.10.
१७. देदिष्टे यजमानेभ्यो दिशति Sy.
१८. प्रमोयति P. प्रचोदयति is suggested for प्रमोदयति ॥ प्रेरयत् Sy.
१९. सुष्ठु वोग्ध्रीर्गाः Sy.
२०. वप्रे P. निवारके पर्वते Sy.
२१. व्रजन्तः P. मध्ये बलेन निरुद्धाः Sv.
२२. ०ता P. २३. तेजसा Sy.
२४. संवरणशीलम् Sy.
२५. सर्वं is suggested for मसर्वम्।
२६. पिवृ० D. निवारितवान् Sy.
२७. VM. ignores विश्वा ॥ विश्वानि सर्वाणि Sy. २८. अनपः D.
२९. अनव इति मनुष्यनाम Ngh. 2.3.
३०. त्वदीयम् Sy.
३१. तथाश्वाननुगुणं P.D. अश्वाभ्यां संयोगार्हम् Sy. अश्वं योक्तुं यथा योग्यो भवति तथा संस्कुर्वन्ति। यद्वा अश्वाय व्याप्तिमते तुभ्यं यथा पर्याप्तो भवति BB.
३२. अतक्षन्। अकुर्वन् Sy. तक्षन्तु संस्कुर्वन्तु। लङ् लोडर्थे। अडभावश्छान्दसः BB.
३३. देवानां शिल्पी BB.
३४. त्वदीयं वज्रम् Sy. वज्रं तक्षतु तीक्ष्णीकरोतु BB.

दीप्तिमन्त कृतवान्[1]। ब्राह्मणाश्च[2]। मन्त्रै[3]। इन्द्रम्[4]। पूजयन्तः[5]। अहिम्[6]। हन्तुम्[7]। अवर्धयन्[8]।

वृष्णे यत्ते वृषणो अर्कमर्चानिन्द्र ग्रावाणो अदितिः सजोषाः।
अनश्वासो ये पवयोऽरथा इन्द्रेषिता अभ्यवर्तन्त दस्यून् ॥ ५ ॥

वृष्णे[9]। वृष्णे। यदा। तुभ्यम्। वर्षितारः[10]। ग्रावाणः[11], अधिषवणफलकाः। गौश्च[12]। सङ्गता[13]। अर्चनीयं सोमम्[14]। अर्चन्ति अभिषुण्वन्ति[15]। अथाश्वरथवर्जिताः[16]। इन्द्रप्रेषिताः[17]। पवय—आयुधानि[18]। दस्यून्[19]। अभ्यवर्तन्त शीघ्रमेक एव गत्वायुधानि शत्रुषु विमृजतीनि[20]।

---

१. अकरोत् Sy.
२. ०णात्व D., P अङ्गिरसः परिवृढा मरुतो वा Sy.
३. स्तोत्रैः Sy.
हविर्लक्षणैरन्नैर्वा BB.
४. मन्त्रैरिन्द्रं P.
ईश्वरम् BB.
५. अहि P., D. वृत्रम् Sy. किमर्थम्? अहये, अघाय। अहिंसनाय। आगत्य हन्तीत्यहिस्सर्पादिः। 'आडि श्रृहनिभ्यां ह्रस्वश्च' इतीण्प्रत्ययः, कर्मणि चतुर्थी BB.
६. हन्तवै—'तुमर्थे सेसेन्०' इति तवैप्रत्ययः BB.
७. वर्धितवन्तः Sy. यशसा। त्वं चास्माकं महायज्ञमुपनयेति BB.
८. VM. ignores पुरुहूत and उ॥ हे बहुभिराहूतेन्द्र! Sy., BB. अपि च Sy. उः पादपूरणे BB.
This stanza=TS. 1.6.12.6.
९. वर्षित्रे कामानाम् Sy.
वर्षित्रे, अभिमतदात्रे। षष्ठ्यर्थे चतुर्थी। तव वर्षितुः BB.
१०. सेचनसमर्था मरुतः Sy.
वर्षितारो मेघा वृष्टिं कुर्वन्तः, तवार्कमर्चयन्ति मेघाः इत्यर्थः BB.
११. अभिषवपाषाणाः Sy.
१२. अदितिः अदीनाः, वचनव्यत्ययः Sy. अदितिः पृथिवी च BB.
१३. सङ्गता बभूवुरिति शेषः Sy. समानप्रीतिस्त्वया तैर्वा मेघैरानुकूल्यं भजमानाः सस्याद्युत्पादयतस्तव कर्मार्कमर्चयति BB.
१४. ०ना घनीयं P. ०ता अघनयं D. स्तोत्रम् Sy अर्चनीयामाज्ञामर्चनीयं वा ते तव यागम् BB.
१५. अस्तुवन्। अकुर्वन्नित्यर्थः Sy. अर्चयन्ति पूजयन्ति BB.
१६. यद्यदैवमेते कुर्वन्ति तदानीं दुष्टात्मानो दस्यवोऽपि त्वयैव हन्तव्या इति तत्प्रार्थयते BB.
१७. रथवर्जिताः P. VM. seems to explain अनश्वासः and अरथाः together as अश्वरथवर्जिताः॥ अश्वरहिताः। अरथा रथरहिता अश्वरथमनपेक्षमाणाः BB.
१८. ०तां P. इन्द्रेण प्रेषिताः Sy. सर्वदेन्द्रेणैव प्रेषिता अन्येन प्रेषितुमशक्यास्ते BB.
१९. अधानी P. आधानि D. पवमाना गच्छन्तः Sy. ये पवयस्तवायुधविशेषाः BB.
२०. शत्रून् Sy.
२१. अभिभूतान् कुर्वन्तो वर्तन्ते स्म ते मरुतोऽर्चानिति सम्बन्धः Sy. आभिमुख्येन हन्तुं वर्तन्ताम्। स्वरणादिद्वारोऽस्मदुपक्षपयितारो दस्यवस्तानभिभूय पराजितान् कृत्वा सर्वदाऽस्मानुक्षन्तो वर्तन्तामिति भावः। छान्दसो लङ्। एवं सर्वस्य लोकस्य रक्षको महात्मा त्वमतोऽस्माकमपि महायज्ञमुपनयेति BB.
२२. VM. ignores इन्द्र and ये॥ हे इन्द्र! ये मरुतः Sy.
This stanza=TS. 1.6.12.6.

प्र ते पूर्वाणि करथानि वोचं प्र नूतना मघवन्या चकर्थ ।
शक्तीवो यद्विभरा रोदसी उभे जयन्नपो मनवे दानुचित्राः ॥ ६ ॥

प्र ते[1]। प्रब्रवीमि[2]। तव[3]। वृत्रवधादीनि पुरातनानि। कर्माणि। तथा ब्रवीमि[4]। नूतनानि[5] च। मघवन्[6]! यानि। कृतवानसि कर्माणि। शक्तिमन्[7]! यस्त्वम्। द्यावापृथिवी[8]। विविध[9] बिभर्षि[10]। जयन्[11]। उदका[12]। चित्रदानानि[13]। तस्माद् ब्रवीमीति[14]।

तदिन्नु ते करणं दस्म विप्राहिं यदुग्रोजो अत्रामिमीथाः ।
शुष्णस्य चित्परिं माया अगृभ्णाः प्रपित्वं यन्नप दस्यूँरसेधः ॥ ७ ॥

तदित्[15]। तत्। एव। तव[16]। कर्म[17]। दर्शनीय[18]! मेधाविन्[19]! अहिम्[20]। घ्नन्[21]। यत् त्वम्[22]। तस्मिन्[23]। बलम्[24]। कृतवानसि[25]। शुष्णस्य[26]। अप्यसुरस्य[27]। माया। परिगृहीतवानसि। बलिन प्राप्तिम्[28]। गच्छन्[29]। अन्यानप्यसुरान्। अपासेध[30][31]।

त्वमपो यदवे तुर्वशायारमयः सुदुघाः पार इन्द्र ।
उग्रमयातमवहो ह कुत्सं सं ह यद्वामुशनारन्त देवाः ॥ ८ ॥

त्वमपः। पारयिता[32]। त्वम्। उदकानि[33]। सुदोहनानि[34]। यदुतुर्वशाभ्याम्[35]। अरमय[36]। किञ्चेन्द्र!

---

१ हे इन्द्र! Sy.
२. अहं प्रकर्षेण ब्रवीमि Sy.
३. त्वदीयानि Sy. ४. प्रब्रवीमि Sy.
५. नूतनानि नवानि कर्माणि Sy.
६. हे धनवन्निन्द्र! Sy.
७. यानि कर्माणि कृतवानसि तानि प्रवोचमिति सम्बन्धः।
८. शक्तिमन् P. हे शक्तिमन्! शक्तिवज्रं कर्म वा तद्वन्निन्द्र! Sy.
९. द्यावापृथिव्यौ Sy. १०. विविच्य Sy.
११. बभ० P. १२. वशीकुर्वन् Sy.
१३. उदकानि is suggested for उदका।
१४. चित्रदानाः Sy.
१५. VM. ignores उभे and मनवे ॥ मनवे मनुष्याय Sy.
१६. त्वदीयम् Sy.
१७. कर्म विद्यते Sy. १८. ०यम् D.
१९. मेधाविन्! इन्द्र! त्वम् Sy.
२०. वृत्रमसुरम् Sy. २१. हिंसन् Sy.
२२. यत्वं D. यन्त्वं P. यत् Sy.
२३. अस्मिँल्लोके Sy.
२४. बलं बलं P., D.
२५. प्रकाशितवानसि Sy.
२६. अपि च एतन्नामकस्याप्यसुरस्य सम्बन्धिनीः Sy.
२७. ०या D. प्रज्ञाः Sy.
२८. हे इन्द्र! त्वं प्रपित्वं सङ्ग्रामं समीपं वा Sy.
२९. प्राप्नुवन् Sy.
३०. अपाबाधथाः Sy.
३१. VM. ignores नु ॥ नु खलु Sy.
३२. पारे नदीनां तीरे। प्रवृद्धा इति शेषः Sy.
३३. अवानि P.
३४. ओषधिवनस्पतीन् सुष्ठु दुहतीः Sy.
३५. यदुनामकाय राज्ञे, तुर्वशायैतन्नामकाय राज्ञे च Sy. ३६. रमितवानसि Sy.

त्वं च कुत्सश्च । उग्र शुष्णासुरम् । अगच्छतम् । त्व हि शुष्ण प्रति गच्छन् कुत्सम् । अपि । नीतवानसि । यदा तत्र गतौ । वाम् । उशना । देवाः । च । समागच्छन्त ।

इन्द्राकुत्सा वहमाना रथेना वामत्या अपि कर्णे वहन्तु ।
निः पीमद्भ्यो धमथो निः पथस्थान्मघोनो हृदो वरथस्तमांसि ॥ ९ ॥

इन्द्रा० । इन्द्राकुत्सौ । गच्छन्तौ । रथेन । वाम् । अश्वा । कर्णकुलजाते मयि । अपि । आवहन्तु । तौ युवा तमांसि । अन्तरिक्षात् । सर्वत । निर्धमथ. । तथा पृथिव्या । च । महत. । अस्माक हृदयाच्च ।

---

१. ०ञ्च D. युवाम् । त्वं कुत्सश्चेति शेषः Sy.

२. उद्गुर्णं शुष्णम् Sy.

३ च्छन्तं P., D.

४. तदनन्तरं त्वं शुष्णं हत्वा Sy.

५. खलु Sy.

६. स्वगृहं प्रापितवानसि Sy.

७ युवामिन्द्राकुत्सौ Sy.

८. भार्गवः Sy.

९. सम्भेजिरे Sy.

१० इन्द्राः P. अवस्योः SKN. कुत्सेन संस्तवः । अवस्योरार्षम् Dur.

११. द्रावूत्सौ P. हे इन्द्राकुत्सौ ! Sy., SKN., Dur.

१२. वहमानावुह्यमानौ Sy. वहमानौ प्रापयन्तौ SKN. उह्यमानौ युवां वुवे Dur.

१३. रथेनात्मानम् SKN.

१४. युवाम् Sy.

१५. अश्वाः is suggested for अश्वा ॥

१६. स्तोत्राणि कृणोति करोतीति कर्णः स्तोता यजमानो वा तत्समीपेऽपीति यावत् Sy. अपठितमपि कर्मनामैतत् । करणमित्यस्य वा कर्मनाम्नश्छान्दसोऽकारलोपः । कर्मण्यस्मदीये SKN. नित्यं कर्मणे । ततश्च कर्मणा परितोषितौ Dur.

१७ आ समन्ताद्वाहका भवन्तु Sy. आ इत्युपसर्गो वहन्त्वित्येतेन सम्बध्यते SKN.

१८. अज्ञानरूपाणि पापानि Sy. तमोरूपाणि । असत्यां वृष्टौ कथं जीविष्यामः कथं पुत्राः कथं पौत्राः इत्येवमादीनि मानवानि दुःखानि SKN. एतानि तमांसि Dur.

१९. अप्सु प्रविष्टम् Sy. अद्भ्य इति द्वितीयार्थे चतुर्थी, पञ्चमी वा, अपः अपो वृष्टिलक्षणाः SKN.

२०. एनं शुष्णासुरम् । सीमिति शुष्णासुरो बुद्धिस्थः परामृश्यते Sy. सीमिति परिग्रहार्थीयः सर्वपर्यायः SKN. सर्वतोऽरीन् Dur.

२१. अबाधेथाम् Sy. निरुपसर्गाभ्यासावत्राख्यातस्याभ्यासो द्रष्टव्यः । अभ्यासाच्चार्थभूयस्त्वम् । .एतदुक्तं भवति—सुष्ठु सर्वान् निर्धमथो निर्गमयथः SKN.

२२. स्वकीयात् स्थानात् Sy. कुतः ? सधस्थात् सहस्थान्मेघात् SKN. समानस्थानादन्तरिक्षात् Dur.

२३. निः अबाधेथाम् Sy.

२४ VM. seems to explain मघोनः as महतः ॥ मघवतः हविष्मतो यजमानस्य Sy. एतच्च कुर्वंतौ मघोनो हविराढ्येन धनेन धनवन्तौ SKN. तत ओषध्याद्युत्पत्त्या सुकाले कुर्वाणौ मघोनः, महान्त्येतानि Dur.

२५. वृतयाच्च P. पृदयाच्च D. यजमानस्य हृदो हृदयात् SKN. हृदयस्याच्छादकानि, अनाकालभयकृतानि Dur.

निवारयथ[1]। कुत्सश्च साहचर्याद् देवता भवति[2]।

वातस्य युक्तान्त्सुयुजश्चिदश्वान्क्विश्चिदेषो अजगन्नवस्युः।
विश्वे तु अत्र मरुतः सखाय इन्द्र ब्रह्माणि तविषीमवर्धन् ॥ १० ॥

वातस्य[3]। गच्छतस्तव। योग्यान्[4]। सुयुज[5]। अश्वान्। अयम्[6]। अवस्युऋषिः[7]। क्रान्तदर्शन[8]। मनसा गच्छति स्मरति तवागमनमिच्छन्नित्यर्थ। अस्मिन्नवसरे। विश्वे[9]। मरुत[10]। तव। गमनोद्युक्तसहाया आगमन्। तथा ब्राह्मणै[11]. प्रयुक्तानि स्तोत्राणि च। तव बलम्। अवर्धयन्निति[12]।

सूरश्चिद्रथं परितक्म्यायां पूर्वं करदुपरं जूजुवांसम्।
भरच्चक्रमेतशः सं रिणाति पुरो दधत्सनिष्यति क्रतुं नः ॥ ११ ॥

सूरश्चित्[13]। सूर्यस्य। रथम्। रात्र्याम्। अग्रत प्रादुर्भूत चक्र प्रह्वी[14]। तत्रोप्तमवस्थितम्, अगमत्[15]। वेगेन गच्छन्तम्। तस्य चक्र च। भरत् अबृहत्[16] शत्रूणा जयार्थम्। अस्मिन् काले सूर्येण स्पर्धमान एतश ऋषि[17]। इन्द्रेण सङ्गच्छते। एवविध इन्द्रोऽस्मान्। सर्वेषा पुरत[18]। स्थापयन्[19]। अस्मद्यज्ञम्। आगमिष्यति[20]।

---

१. ०थः is suggested for ०थ ॥ वारयथोऽपनयथः SKN. वारयथ इत्येतदाशास्महे Dur.

२. अथवा मघोन इत्याद्यन्यथा योज्यते। उदकलक्षणेन धनेन धनवतो मेघस्य। हृदो हृच्छब्देन सामीप्यादुदकं लक्ष्यते। उदकाद् वरथोऽपनयथस्तमांसि तमोरूपाणि तमस्स्थानि यान्यावरणानि N.7.10.; SKN. III.58.59.

३. वातस्म P., D.

४. वायोर्वेगेन Sy. ५. संयुक्तान् Sy.

६. सुष्ठु योजनीयान् Sy. ७. मन्त्रद्रष्टा Sy.

८. ०वस्वः P. एतन्नामकः Sy.

९. ऋषि D. १०. कान्त० D. प्राज्ञः Sy.

११. प्राप्नोत् Sy. १२. वाग० D.

१३. अस्मिल्लोके Sy.

१४. सर्वे Sy. १५. बहवः स्तोतारः Sy.

१६. गमनोद्युक्तस्य सहा० is suggested for गमनोद्युक्तसहा० ॥ अवस्योः सखायः Sy.

१७. ब्रह्मभिः स्तोत्रैः Sy.

१८. त्वदीयम् Sy.

१९. VM. ignores चित् (twice) and इन्द्र ॥ चिद् अपि Sy.

२०. सूरस्य P. एतशाख्येन ऋषिणा सह योद्धुः सूर्यस्यापि सम्बन्धिनम् Sy.

२१. इन्द्रः सङ्ग्रामे। परितो गच्छन्त्यस्या भटा इति परितक्म्या सङ्ग्रामः Sy.

२२. बह्वी P. प्रह्वीचक्रे is suggested for चक्रं प्रह्वी।

२३. उपरतव्यापारम् Sy.

२४. अगत् P., D. पुराकरोत् Sy.

२५. अपृहत् D. अहरत् is suggested for अबृहत्।

२६. शिश्रुणां P. २७. एवश P. एवतश D. एतशाय। विभक्तिव्यत्ययः। इन्द्रः पूर्वं द्विचक्रस्य रथस्यैकं चक्रम् Sy.

२८. स इन्द्रस्तेन चक्रेणासुरान् हिनस्ति Sy.

२९ पुतस्तवयन् P. अपि चास्मान् पुरस्कुर्वन् Sy

३०. अस्मदीयं यज्ञम् Sy.

३१. सम्भजतु Sy.

३२. VM. ignores चित्।

आयं जना अभिचक्षे जगामेन्द्रः सखायं सुतसोममिच्छन् ।
वदन्ग्रावाव वेदिं भ्रियाते यस्य जीरमध्वर्यवश्चरन्ति ॥ १२ ॥

आयम् । हे जना [1] अयम् । इन्द्रः । अभिदर्शनार्थम् । सुतसोमम् । सखायम् । अन्विच्छन् । आजगाम । आगते चास्मिन्, अभिषवग्रावा [2] शब्दं कुर्वन् । वेदिं प्रति वेद्यामित्यर्थस्तत्र । अधस्ताद् भ्रियते दीर्घश्छान्दस आर्यतेऽभिषवार्थम् । यस्येन्द्रस्य पानाय । क्षिप्रम् । अध्वर्यव । चरन्ति यज्ञ इतस्तत ।

ये चाकनन्त चाकनन्त नू ते मर्ता अमृत मो ते अंह आरन् ।
वावन्धि यज्यूँरुत तेषु धेह्योजो जनेषु येषु ते स्याम ॥ १३ ॥

ये चाकनन्त । ये च पुरा त्वाम् इन्द्र ! कामितवन्त [16] । ते लब्धकामा । क्षिप्रम् । पुनश्च कामितवन्त [17] । तेऽमी । मर्त्या [18] । हे अमर्त्य [19] ! मा [20] । पापम् । प्राप्नुवन्तु । तदर्थं भजस्व । तानस्मान् यष्टॄन् । अपि च । तेषु [21] । बलम् । धेहि । जनेषु [22] । येषु [23] । त्वदीया वयम् । स्याम सहायाना बलं धेहीति [24] ।

---

१. युष्मानभिद्रष्टुम् Sy.
२. अभिषुतसोमं यजमानम् Sy.
३. स्तोतारम् Sy.
४. अभिलषन् Sy.
५. आगच्छति Sy. ६. गते D.
७ ०वाः D. स सोमाभिषवपाषाणः Sv.
८. वेद्यमि प्रति P.
९. वेद्यमादित्यर्थस्तत्र P.
१०. अभिह्रियते Sy.
११. ०र्घं छा० P.
१२. ते षवार्त्थं P.
१३. यस्य प्राण्णः Sv.
१४ क्षेपणं प्रेरणम् Sy.
१५. कुर्वन्ति Sy.
१६. ०न्तः D.
१७. हे इन्द्र ! धनार्थिनः ये जनाः Sy.
१८. अकामयन्त Sy.
१९. क्षिप्रमेव Sy.
२०. त्वां चाकनन्त Sy.
२१. जनाः Sy.
२२. ते मित्याः P. मरणधर्माणः Sy.
२३. हे अमरणशीलेन्द्र ! Sv.
२४. भा P., D. मा उ इति निपातसमुदायो मेत्येकनिपातार्थे वर्तते Sy.
२५. वाव P. वावम् D. अनर्थम् Sy.
२६. म्नाप्नु० P. माप्नु० D. गमन् Sy.
२७. सम्भजस्व Sy.
२८. न्तनस्मान्यष्टृतम् P. यजमानान् Sy.
२९. जनेषु Sy.
३० येषां जनानां मध्ये स्तोतारः Sv.
३१. भवाम Sy.
३२. हायानाम P.
३३. Ms. D. puts the figure ॥३१॥ here to indicate the end of the thirty-first hymn. No such number is given in P.

V.32.

अदर्दरुत्समसृजो वि खानि त्वमर्णवान्बद्बधानाँ अरम्णाः ।
महान्तमिन्द्र पर्वतं वि यद्वः सृजो वि धारा अवं दानवं हंन् ॥ १ ॥

अदर्दः ॥ गातु ॥ दारितवानसि । अपामुत्सम् । मेघद्वाराणि चास्य । व्यसृज । तथा महतोदकेन बाध्यमानान् । सिन्धून् वज्रे नियम्य । स्वे स्वे स्थानेऽरमय । इत्येतदेवाह महान्तमिति यदा । त्वम । महान्तम् । मेघम् । दारितवानसि, अस्यापामपिधानानि द्वाराण्यपावृण्वन् । उदकधाराश्च । व्यसृजः । तथा

---

१. 'अवदर्दरुत्सम्' इति द्वादशर्चमष्टादशं सूक्तम् । गातुर्नामात्रेय ऋषिः । त्रिष्टुप् छन्दः । इन्द्रो देवता । तथा चानुक्रान्तम्—'अवदर्द्वादश गातुः' (KSA 25.32. p. 20) इति । गतो विनियोगः Sy.

२. ०तुं D. गतुं P. गातोरार्षम् SKN. गातोरात्रेयस्यार्षम् Dur.

३. हे इन्द्र ! त्वम् Sy. हे भगवन्निन्द्र ! त्वम् Dur.

४. विदारितवानसि Sy. दारयसि SKN. दारितवानसि त्वम् Dur.

५. अवाम् D. उत्स्यन्दमानं मेघम् Sy. 'उत्सं दुहन्ति स्तनयन्तम्' इत्यादौ दर्शनादुत्सशब्दोऽपठितमपि मेघनाम SKN. उत्सो मेघः । स कस्मात् ? 'उत्सदनाद् वा' उत्पूर्वस्य सदेः' ऊर्ध्वमसौ सन्न इत्युत्सः । 'उत्स्यन्दनाद् वा' उत्पूर्वस्य वा स्यन्दतेः' उपर्यसाववस्थितः स्यन्दतीत्युत्सः । 'उनत्तेर्वा' 'उन्दी क्लेदने' इत्यस्य, क्लेदयत्यसौ । तमुत्सं मेघम् Dur.

६. तदनन्तरं मेघस्योदकनिर्गमनद्वाराणि Sy. अवकाशान्मेघस्य, यैरुदकं निर्गच्छति । उदकनिर्गमनबिलानीत्यर्थः SKN. बिलानि Dur.

७. विशेषेण सृष्टवानसि Sy. मेघं दारयित्वा चासृजो विसृजसि विवृणोषि । छान्दसत्वात्परो विः पुरस्ताद् द्रष्टव्यः SKN. दारयित्वा च जर्जरीकृत्य तस्योत्सस्यासृजः विवृतानि त्वमकरोः Dur.

८. बाध्यमानान् Sy. निर्गमननिरोधं कुर्वता मेघेनात्यर्थं बाध्यमानान् SKN. उदकभारेणातिगुरुणा बाध्यमानान् Dur.

९. उदकवतो मेघान् Sy. विवृत्य च त्वमर्णवान्, भूम्नि त्वयं मत्वर्थीयो द्रष्टव्यः, 'अर्णसो लोपश्च' इति । अर्ण उदकम् । अवयवभूतं बहूदो येष्वस्ति तेऽर्णवाः । के पुनस्ते ? मेघाः । ये महार्णाः उदकसङ्घातास्तान् SKN. स त्वममुना प्रकारेण अर्णस्वतः, अर्णसोदकेन तद्वतः 'एतान्माध्यमिकान् संस्त्यायान्' मेघसङ्घातान् Dur.

१०. विसर्जयसि क्षारयसीत्यर्थः । अत्र रम्णातिर्विसर्जनकर्मा Sy. रम्णाति संयमनकर्माऽन्यत्र 'सविता यन्त्रैः' इत्यादौ । इह तु विसर्जनकर्मा विसर्जयसि क्षारयसीत्यर्थः SKN. यथाकालमरम्णा विसृष्टवानसि । रम्णातिर्धातुः संयमनकर्मा, अन्यत्र । तद्यथा 'सविता यन्त्रैः पृथिवीमरम्णात् (RV. X. 149.1.) इत्यत्र । इह पुनर्मेघविदारणसम्बन्धाद् विसर्जनकर्मा Dur.

११. यस्त्वम् । यदिति लिङ्गव्यत्ययः Sy., SKN

१२. प्रभूतम् Sy. योऽप्यतिमहान् Dur.

१३ पर्वतो मेघः । केनचिदप्यन्येनाशक्यो विवृतद्वारः कर्तुं तमपि Dur.

१४. विवृतवानसि Sy. 'वि'इत्याख्यातेन सम्बध्यते । 'मन्त्रे घसह्वर०' (Pa. 2.4.80.) इत्येवं लेर्लुकि रलोपे रूपम् । पूर्वेष्वपि कालेषु विवृतवानसि SKN. विवृतमपावृतोदकनिर्गमनद्वारमकरोः Dur. १५. अस्वापा० D.

१६. अपां धाराः Sy. धारा उदकस्य SKN.

१७. विसृष्टवानसि Sy. विवृत्य च सृजः, विपूर्ववदुपसर्गः । मेघाद् विसर्जितवानसि SKN., Dur.

वृत्र चापि । हतवानसि । अत्र यास्क —'त्वमर्णवानर्णस्वत. । एतान् माध्यमिकान् सत्यायान् । बाढध्यमानानरम्णा. । रम्णातिः सयमनकर्मा महान्तमिन्द्र ! पर्वत मेघ यद् व्यवृणो । व्यसृजोऽस्य धारा' । अपाहन्नेन दानकर्माणम्' इति ।

त्वमुत्साँ ऋतुभिर्बद्बधानाँ अरँह ऊधः पर्वतस्य वज्रिन् ।
अहिं चिदुग्र प्रयुतं शयानं जघन्वाँ इन्द्र तविषीमधत्थाः ॥ २ ॥

त्वमुत्सान् । मेघान् । वर्षनृभि । बाधमानान् । शिलोच्चयस्य । अधसि । प्रेरितवानसि । वज्रिन् ! अहिम् । चित् । उद्गूर्ण ! प्रवृद्ध । शयानम् । जघन्वान् । इन्द्र ! बलम् । अकृणो ।

त्यस्य चिन्महतो निर्मृगस्य वधर्जघान तविषीभिरिन्द्रः ।
य एक इदप्रतिर्मन्यमान आदस्मादन्यो अजनिष्ट तव्यान् ॥ ३ ॥

त्यस्य चित् । त्यस्य । चित् । महत. शत्रो' । मृगरूपस्य वधार्थम् । आत्मीय वज्रम् । बलै ।

---

१. दनोः पुत्रं वृत्रमसुरं यद्वोदकस्य दातारं मेघं वा Sy. दनोः पुत्रो दानवोऽसुरो वृत्रोऽन्यो वा कश्चिन्मेघस्य रक्षिता, तञ्च SKN. उदकदातारं मेघम् Dur.

२. अभिहतवानसि Sy. अवेत्यर्थं हन्नित्येतेन सम्बध्यते । हतवानसि । अथवा दानवं दातारं चोदकस्य महान्तमपि मेघं सर्वमधो हतवान् SKN. पुनः पुनः अवघ्नन् . य एतदकार्षीस्त्वं स इवं नामास्माकं कुरुष्वेति Dur

३. VM. ignores इन्द्र and अव ।

४. बाध्य० D. उवृणा उत्सम् । उत्स (उत्सरणाद्वा) उत्सवनाद्वा । उत्स्यन्दनाद्वा । उनत्तेर्वा । व्यसृजोऽस्य खानि । त्वम् . . (शेषं मूले) N.10. 9.; SKN. III. 11, 12.

५. The passage, beginning with सिन्धून् and ending with संयमन is omitted by P. P. begins कर्मा etc.

६. N. adds विसर्जनकर्मा वा after संयमनकर्मा ।

७. यन्वृणो व्य० P. यद्यवृ० D.

८. N. reads अवाहन्नेनं for अपाहन्नेनम् ।

९. N. reads (दानवं) दानकर्माणम् for दानकर्माणम् ।

१०. मेघान् प्रतिबन्धनादमोचय इति शेषः Sy.

११. ऋतुषु वृष्टिकालेषु Sy. १२. प्रतिबध्यमानान् Sy. १३. मेघस्य सम्बन्धि Sy.

१४. ऊधसि is suggested for अधसि ॥ जलम् Sy. १५. अगमयः Sy.

१६. हे वज्रवन्निन्द्र ! Sy. १७ वृत्रम् Sy.

१८. च Sy. १९. गूर्ण P. हे उद्गूर्णबलेन्द्र ! Sy.

२०. प्रबन्ध P. प्रवृद्धं is suggested for प्रवृद्ध ॥ उद्युक्तम् Sy.

२१. जले शयनं कुर्वन्तम् Sy.

२२. ०न्वां P. D. हतवानसि Sy.

२३. अधारयः । वृत्रवधानन्तरमिन्द्रो लोके प्रख्यातो भवतीत्यर्थः Sy.

२४. VM. ignores त्वम् ।

२५. निर्जघानायुधं शक्रो वृत्रेण क्षिप्तमोजसा ।
वृत्रस्य गात्रावन्यो यः प्रादुर्भूतो महासुरः ॥
वृत्रं पूर्वं निहत्येन्द्रो द्वितीयं शुष्णसंज्ञकम् ।
पुनर्जघानेन्द्र इति पराभिः कीर्तयत्यृषिः ॥इति॥
Sy. २६. तस्य वृत्रस्य सम्बन्धि Sy.

२७. प्रभूतस्य Sy. २८. शत्रं P.

२९. मृगवच्छीघ्रगामिनः Sy.

३०. ०मत्मी० P. ३१. आयुधम् Sy.

३२. वज्रत्ववैः D. स्वकीयैर्बलैः Sy.

निजघान[1]। यः। एक[2]। एवाहि[3]। अप्रतिरहमस्मीति। मन्यमान[4] आसीत्। अस्मादहे[5] सकाशात्। अनन्तरम्[6]। अन्यः शुष्णो नाम। अजनिष्ट[7]। वृद्धतरः[8]।[9]

त्यं चिदेषां स्वधया मदन्तं मिहो नपातं सुवृधं तमोगाम्।
वृषप्रभर्मा दानवस्य भामं वज्रेण वज्री नि जघान शुष्णम् ॥ ४ ॥

त्यं चित् ॥ अत पर शुष्णवध उच्यते ॥ तम्[10]। च। एषा[11] मनुष्याणा स्वभूतेन। उदकेन[12]। मदन्तम्[13]। मिहः[14]। पौत्रम्[15]। सुष्ठु। वर्धमानम्[16]। तमसो निर्गमयितारम्[17]। वर्षणशीलप्रहरण[18]। अहे[19]। क्रोधम्[20], क्रोधो ह्यहेः शुष्णो भूत्वाजायत एवविधम्[21]। शुष्णमसुरम्[22]। वज्रेण[23]। वज्री[24]। निजघानेति[25]।

त्यं चिदस्य क्रतुभिर्निषत्तमम्मर्णो विददिदंस्य मर्म।
यदीं सुक्षत्र प्रभृता मदस्य युयुत्सन्तं तमसि हर्म्ये धाः ॥ ५ ॥

त्यं चित्। निषत्तशब्द आवासवचनः[26], शुष्णासुरस्य[27]। तम्[28]। निषत्त तमसि[29] स्थितमिन्द्र[30]। प्रजाभिः[31]।

---

१. निःशेषेणावधीत् Sy.
२. असहायः Sy.
३. प्रतिद्वन्द्विरहितः Sy.
४. मन्यमान आत्मानं यः अस्तीति शेषः Sy.
५. ०वेहेः D. वृत्रात् Sy.
६. अन्तरम् P.
तदानीम् Sy.
७. असुरः शुष्णः Sy.
८. ज्येष्ठ D. अजनिष्ट is suggested for अजष्ट ॥ प्रादुरभूत् Sy.
९. प्रवृद्धतरः Sy.
१०. VM. ignores इन्द्रः।
११. उष्ण० D.
१२. तं च वृत्रं जघानेति शेषः Sy.
१३. प्राणिनाम् Sy.
१४. D. and P. add मदान्तनोदकेन after उदकेन ॥ अन्नेन Sy.
१५. मदन्त P.,D. मोदमानं सर्वप्राणिनामन्नं स्वयमेव भुञ्जानम् Sy.
१६. महः P. सेचनसमर्थस्य मेघस्य Sy.
१७. पातारं रक्षितारम्। अत्र नपाच्छब्दः ,पातरि वर्तते 'प्राणो वै तनूनपात्स हि तन्वः पाति' (AB.2.4.) इति ब्राह्मणम् Sy.
१८. प्रवृद्धम् Sy.
१९. P. and D. add वर्षणशीलं after निर्गमयितारम् ॥ तमोऽन्धकारं गच्छन्तम् Sy.
२०. वर्षणशीलस्य मेघस्य प्रहर्ता Sy.
२१. दनुजस्य वृत्रस्य Sy.
२२. क्रो D. अत्र क्रोधवाचिभामशब्देन क्रोधादुत्पन्नः शुष्णासुरो लक्ष्यते। तं शुष्णासुरम् Sy.
२३. ०तेवं० D.
२४. स्वकीयेनायुधेन Sy.
२५. वजिन् P. वज्रवानिन्द्रः Sy.
२६. ०घातेनेति P.
हतवान् Sy.
२७. ०न D. The passage, निषक्त.... वचनः should immediately follow तमसि स्थितम् and precede इन्द्रः।
२८. वृत्रस्य Sy.
२९. त्यक्तवेव। लिङ्व्यत्ययः Sy.
३०. त सिषक्तं P. निषक्तं D. निषण्णम् Sy.
३१. प्रज्ञानैः हे इन्द्र ! त्वम् Sy.

अविन्दत्[1]। तथा गूढमर्मण[2]। अपि। शुष्णस्य। मर्म[3] चाविदत्। अथ प्रत्यक्ष —यदा। एन[4] शुष्णम्। युयुत्सन्तम्। हे सुबल[5]! सोममदस्य। प्रादुर्भावे। हरणशीले[6]। तमसि। निहितवान् अस्योत्तरा[7] भूयसे निर्वचनाय।

त्यं चिदित्था कत्पयं शयानमसूर्ये तमसि वावृधानम्।
तं चिन्मन्दानो वृषभः सुतस्योच्चैरिन्द्रो अपगूर्या जघान॥ ६॥

त्यं चित्[14]। तम्[15]। चित्[16]। इत्थम्[17]। 'कत्पय सुखपयम सुखमस्योदकम्' इति यास्कः[18]। तम्। शयानम्[21]। असूर्ये[22]। तमसि[23]। वर्धमानम्। तम्[24]। चित्[25]। सुतेन[26] सोमेन। तृप्यन्[27]। तमुच्चै[28]। आयुधमपगूर्य[29]। हतवानिति[30]।

---

१. अज्ञासीः Sy.
२. गूढमर्मणो मर्मणः P.,D. मर्महीनमात्मानं मन्यमानस्य Sy ३ एव Sy
४. मं P. प्राणस्थानम्। यत्र स्थाने विद्धो म्रियते तन्मर्मेत्युच्यते Sy
५. P. reads ववह for अविन्दत्। अथ।
६. वृत्रम् Sy.
७. योद्धुमिच्छन्तम् Sy.
८. सुमल P.,D. हे सुबल! इन्द्र! त्वम् Sy.
९. मादकस्य सोमस्य Sy.
१०. प्रभूतौ प्रभरणे सति Sy.
११. हारके Sy.
१२. न्यदधाः। वृत्र इन्द्रस्य भयात्तमसि प्राविशदित्यर्थः Sy.
१३. अस्यन्योत्तरा P.
१४. गातुर्नामात्रेयस्तस्यार्षम् SKN. गातुर्नामात्रेयस्तस्येदमार्षम् Dur.
१५. त्यमिति मेघस्य निर्देशस्तच्छब्दसमानार्थः। त्यच्छब्दश्रुतेर्योग्यार्थसम्बन्धो यच्छब्दोऽध्याहार्यः SKN. तं मेघम् Dur.
१६. एव वृत्रम् Sy. चिदेवार्थे। यं पश्यति त्यं तमेव SKN.
१७. अमुत्रान्तरिक्षलोके Sy. अमुत्रान्तरिक्षे SKN. अमुना प्रकारेण, अथवा—अमुष्मिन्नन्तरिक्षलोके Dur. १८. कत्पयं D.
१९. ०सः P.,D. कत् सुखकरं पयो यस्य तम् Sy. सुखं पयो यस्य तं मेघम् SKN. सुखोदकम्। ...एवमत्रेन्द्रो जघानेति, अनेन सम्बन्धात् —'कत्पयः—सुखपयो मेघः' इत्युपपद्यते, तस्य वधस्याभीष्टत्वात् Dur.
२०. N.6.3. reads सुखमस्य पयः।
२१. अप्सु शयनं कुर्वन्तम् Sy. शयतिरत्र स्थानार्थः। आमाशयो जलाशय इति यथा। तिष्ठन्तमित्यर्थः SKN
२२. सूर्यरहिते Sy. यत्ने मेघेन सूर्यस्य गमन कृतं तेनाच्छादितत्वात् सूर्यो यत्र न दृश्यते तदसूर्यं तमस्तस्मिन् SKN. असूर्यं तमश्च कृत्वा Dur. २३. अन्धकारे Sy.
२४. तं चित् इति पुनर्वचनं पूरणार्थम् Sy. तृतीयार्थेषा द्वितीया। तच्छृतेश्च योग्यार्थसम्बन्धो यच्छब्दोऽध्याहार्यः। येन यज्ञा उपकल्प्यन्ते तेन सोमेन SKN.
२५. चित् पदपूरणः SKN.
२६. अभिषुतेन सोमेन Sy. सुतस्य, तृतीयार्थे षष्ठ्येषा, सुतेनाभिषुतेन सोमेन SKN. अभिषुतस्य सोमस्य स्वमंशं पीत्वा Dur.
२७. मोदमानः Sy. तृप्तः सन् SKN. मन्दमानः Dur. २८. ऊर्ध्वम् Sy.
२९. ०र्या P. वज्रमुद्यम्य Sy. किम्? सामर्थ्याद् वज्रम् उद्यम्य SKN. वज्रम् अवगूर्य Dur.
३०. अवधीत् Sy. तेन....हतवान् हन्ति वा SKN. य एवंगुणयुक्त इन्द्रः सोऽस्माकमिदं नाम करोत्वित्येवमाशीर्योज्या Dur.
३१. VM. ignores वृषभः and इन्द्रः॥ कामानां वर्षिता Sy. वृषभो वर्षिता SKN. Dur. N. 6.3., SKN. II.393.,394

उद्यदिन्द्रो महते दानुवाय वधर्यमिष्ट सहो अप्रतीतम् ।
यदीं वज्रस्य प्रभृतौ ददाभ विश्वस्य जन्तोरधमं चकार ॥ ७ ॥

उद्यत् । महते । सूर्याय । यदा । उदयच्छत् । आयुधम् । शत्रूणां सहनशीलम् । अप्रतिगतम् । यदा च । एनम् । वज्रस्य । प्रहरेण । हिंसितवान् । तदानीमेनं सर्वस्य । प्राणिजातस्य । अधः । चकार निम्ने प्राक्षिपदिति ।

त्यं चिदर्णं मधुपं शयानमसिन्वं वत्रं मह्यादंदुग्रः ।
अपादमत्रं महता वधेन नि दुर्योण आवृणङ्मघवाचम् ॥ ८ ॥

त्यं चिदर्णम् । त्यम् । चित् । उदकं प्रति । शयानम् । उदकस्य पातारम् । अबन्धनम् । वारकम् । महान्तम् । अभक्षयत् । इन्द्रः । अपादम् । भक्षणशीलम् । महता । वज्रेण । दुर्योणाख्ये देशे । न्यवृणग् इन्द्रः । परुषवाचम् ।

---

१. प्रभूताय Sy.
२. असुराय is suggested for सूर्याय ॥ वृत्रासुराय Sy.
३. आयधं P. वज्रम् Sy.
४. शत्रूणामभिभवित् Sy.
५. ०लमप्रतिगवं P. केनाप्यप्रतिगतम् Sy.
६. वृत्रम् Sy.
७. प्रहरणे is suggested for प्रहरेण ॥ प्रहृतौ प्रहरणे सति । प्रभृतौ—'हृग्रहोर्भः' इति भत्वम् Sy.
८. अहिंसीत् Sy.
९. तदा Sv.
१०. प्राणिनः Sy.
११. नीचम् Sy.
१२ अकरोत् Sy.
१३. प्रक्षि० P.
१४. VM. ignores इन्द्रः and दानवाय ॥ दानवाय वृत्रासुराय Sy.
१५. तम् Sy.
१६. एव वृत्रम् Sy.
१७. गन्तारं जलं मेघं वावृत्य Sy.
१८. शयनं कुर्वन्तम्, स्थितवन्तमित्यर्थः Sy.
१९. मधुनोऽम्भसः पातारं पालयितारम् Sy.
२०. असिन्वं सपत्नानवक्षेप्तारम् । अस्यतेरिदं रूपम् Sy.
२१. पार० D. वृण्वन्तं सर्वमप्याच्छादयन्तम् । 'स इमांल्लोकानवृणोद्यदिमांल्लोकानवृणोत्तद्वृत्रस्य वृत्रत्वम्' (TS. 2.5.2.2.) इति हि तैत्तिरीयकम् Sy.
२२. आददौ, प्रत्यग्रहीत् Sy.
२३. उद्गूर्णबलः Sy.
२४. पादरहितम् Sy.
२५. अमत्रम् अमात्रं परिमाणरहितम् Sy. It reads अमत्रम् for अत्रम् of the text.
२६. प्रभूतेन Sy.
२७. दुर्योणा० P., D. तदनन्तरमिन्द्रः सङ्ग्रामे Sy.
२८. न्यावृणग् P. न्यावृणद् D. नितरामहिंसीत् । 'तस्माज्जज्ञभ्यमानादग्नीषोमौ निरक्रामतां प्राणापानौ वा एनं तदुज्जिहाताम्' (TS. 2.5.2.4.) इति तैत्तिरीयकम् Sy.
२९. हिंसितवागिन्द्रियम् । जृम्भाभिभूतमित्यर्थः Sy.

को अस्य शुष्मं तविषीं वरात एको धना भरते अप्रतीतः ।
इमे चिदस्य जयसो नु देवी इन्द्रस्यौजसो मियसा जिहाते ॥ ९ ॥

को अस्य । इन्द्रस्य । शोषकम् । तेजो बलं च । वारयितु शक्नोति । सोऽयमसहायः । एव । शत्रुधनानि । आहरति । अप्रतिगतः । द्यावापृथिव्यौ । इन्द्रस्य । वेगात् । क्षिप्रम् । देव्यौ । बलाच्च । भयेन । कम्पेते इति वेगबलयोर्भयात् कम्पनमिति ।

न्यस्मै देवी स्वधितिर्जिहीत इन्द्राय गातुरुशतीव येमे ।
सं यदोजो युवते विश्वमाभिरनु स्वधाव्ने क्षितयो नमन्त ॥ १० ॥

न्यस्मै । इन्द्राय । देवनशीलम् । आयुधम् । स्वयमेव हस्तं प्रति निगच्छति । तथेन्द्राय । पृथिवी । स्वयमेवात्मानं नियत् । यथा कामयमाना स्त्री पुरुषाय । किं चासौ सर्वम् । आत्मीयं बलम् । क्षितिभिः । सम्मिश्रयति । ततः । अस्मा अन्नवते । ताः प्रजाः । प्रह्वीभवन्ति ।

---

१. इन्द्रस्य सम्बन्धिनीम् Sy.
२. शुष्मं शोषणाम् । शुष्मशब्दस्य स्त्रीलिङ्गविशेषणत्वेऽपि नियतलिङ्गत्वात् पुंल्लिङ्गत्वमेव Sy.
३. पार० D. निवारयेत् Sy.
४. शत्रूणां वसूनि Sy.
५. बिभर्ति हरते वा Sy.
६. केनाप्यप्रतिगत इन्द्रः Sy.
७. इन्द्रस्य सम्बन्धिनः Sy.
८. वेगवतः Sy.
९. द्योतमाने Sy.
१०. बलाद् उद्भूतेन Sy.
११. भयेन Sy.
१२. कम्पते D. गच्छतः । चलत इत्यर्थः Sy.
१३. को पिन० D.
१४. VM. ignores कः and इन्द्रस्य ।
१५. द्योतमाना द्यौः Sy.
१६. ०धः P. स्वधृतिः स्वेन धृता Sy.
१७. नीचत्वेन याति Sy.
१८. भूमिः Sy.
१९. यथेष्टमात्मानं विनियोक्तुं योग्या भवतीत्यर्थः Sy.
२०. योषेविव Sy.
२१. समस्तम् Sy.
२२. प्रजाभिः Sy.
२३. संयोजयति । इन्द्रः स्वकीयं बलं सर्वासु प्रजासु निहितवानित्यर्थः Sy.
२४. VM. seems to explain अनु as ततः ॥ आनुकूल्येन वर्तमानाः Sy.
२५. बलवत इन्द्राय Sy.
२६. मनुष्याः Sy. क्षितय इति मनुष्यनाम Ngh. 2.3.
२७. सन्नमन्ति प्रह्वीभवन्ति Sy.
२८. VM. ignores यत् ॥ यदेन्द्रः Sy.

एकं नु त्वा सत्पतिं पाञ्चजन्यं जातं शृणोमि यशसं जनेषु ।
तं मे जगृभ्र आशसो नविष्ठं दोषा वस्तोर्हवमानास इन्द्रम् ॥ ११ ॥

एकं नु[1]। एकम्[2]। एव। त्वाम्। सता पतिम्[3]। पञ्चजनहितम्[4]। जातम्[5]। शृणोमि[6]। यशस्विनम्[7]। जनेषु[8] त्वमेक एवैवंविधो जात इत्यर्थः। त त्वाम्। महामित्यर्थः[9]। स्तुत्यम्[10]। स्वीकुर्वन्ति[11]। आशसितारः[12] ऋत्विजः रात्रौ[13]। अह्नि[14] च। स्तुतिभिराह्वयन्तः[15]। इन्द्रम्।

एवा हि त्वामृतुथा यातयन्तं मघा विप्रेभ्यो ददतं शृणोमि ।
किं ते ब्रह्माणो गृहते सखायो ये त्वाया निदधुः काममिन्द्र ॥ १२ ॥

एवा हि[16]। एवम्। हि। त्वा। काले काले। शत्रून्[17] घ्नन्तम्। तद्धनानि[18] च। स्तोतृभ्य.[19]। ददतम्। शृणोमि[20]। तुभ्यम्[21]। ब्राह्मणाः[22]। ते सखायः[23]। गृह्णते[24] तुभ्यं प्रदानाय किमाददत इत्यर्थः। ये विप्राः। त्वत्कामनया[25]। प्रजापश्वादिकं काममात्मनि[26]। निदधुः[27]। इन्द्रेति[28][29]।

व्याख्यत् प्रथममध्यायं चतुर्थस्याष्टकस्य सः।
जजान यो जह्नुकुले[30] लौहित्यो माधवाह्वयः[31]॥

---

१. हे इन्द्र ! Sy.
२. मुख्यम् Sy.
३. पालकम् Sy.
४. पञ्चजनेभ्यो मनुष्येभ्यो हितम् Sy.
५. उत्पन्नम् Sy.
६. शृणोमि ऋषिमुख्येभ्यः Sy.
७. यशन्यं P.
यशोयुक्तम् Sy.
८. सर्वेषु मनुष्येषु मध्येऽहं मन्त्रद्रष्टा Sy.
९. ०कमेवै० P.
१०. ०त्य D. मे मदीयाः प्रजाः Sy.
११. अतिशयेन स्तुत्यम् Sy.
१२ गृह्णन्तु । स्वीकुर्वन्तु Sy.
१३ आशसितारं P., D.
कामानां शंसमानाः Sy.
१४. क्षपायाम् Sy.
१५. वासरे च Sy.
१६. स्तुवन्तः Sy.
१७. उक्तप्रकारेण Sy.
१८. शत्रुं P. जन्तून् प्रेरयन्तम् Sy.
१९. मघानि धनानि Sy.
२०. यच्छन्तम् Sy.
२१. निशामयामि । एतन्मृषैव प्रतिभाति Sy.
२२. त्वदीयाः Sy.
२३. ०णः P., D. बृहन्तः Sy.
२४. स्तोतारः Sy.
२५. त्वत्तः किं गृह्णते । ऋषिः स्वकीयाभिलाष-प्राप्तिविलम्बनादेवमुक्तवानित्यर्थः Sy.
२६. त्वयि Sy.
२७. स्वकीयाभिलाषम् Sy.
२८ न्यक्षिपन् Sy.
२९. हे इन्द्र ! Sy.
३०. Ms. D. puts the figure ॥३२॥ here to indicate the end of the thirty-second hymn. No such number is given in P.
३१. जुकुले P. जुहुकुले D.
३२. ०त्ये P.

अथ चतुर्थाष्टके द्वितीयोऽध्यायः ॥

महि मह्े तवसे[1] ऽथ व्याचिख्यासति माधवः ।
समासविषये वाच्यमादितः सम्प्रदर्शयन् ॥१॥
समास उपसृष्टानां निवर्तन्ते विभक्तयः ।
विस्पष्टमभिधानाय निर्दिश्यन्ते पुनश्च ताः ॥२॥
'द्रविणोदा द्रविणसः'[2], 'ता सोमं सोमपातमा'[3] ।
'गवां गोपतिः'[4] इत्येवं न तु ते पादपूरणाः ॥३॥
उपादातुमशक्योऽयं प्रत्ययः प्रकृतिं विना ।
ततोऽन्येन गतार्थापि प्रकृतिः सम्प्रयुज्यते ॥४॥
'वसोरिन्द्रं वसुपतिं'[5] 'पुरूतमं पुरूणां'[6] च ।
'रथीतमं रथीनां'[7] च पादाश्चात्र निदर्शनम् ॥५॥
'वाजेभिर्वाजिनीवती'[8] वाजेभिरिति पूरणम् ।
युक्तान्नैर्बहुभिः सेयं यज्ञं वष्टु धियावसुः ॥६॥
नन्वत्र विग्रहः सोऽयमस्त्यस्या वाजिनीति यः ।
तृतीयान्तस्य सम्बन्धः पुंल्लिङ्गस्य च तत्र कः ॥७॥

---

१. This line is supplied by the Editor.
२. RV. V.33.1.
३. ०वसोश्च R.
४ ०वाः P.,D.
५. RV. I.15.7.
६. ०माः D. RV. I.21.1.
७. RV. I.101.4.
८. ०पावोयम० P.,D.
९ ०र्थपि D.
१०. RV. I.9.9.
११. ०णां D. RV. I.5.2.
१२. RV. I.11.1.
१३. रथिनातमं पञ्च P. रथीनातमञ्च D.
१४. पादास्तत्र R.
१५. ०नीपती P. RV. I.3.10.
१६. ०णः R.
१७. पुल्लिङ्गस्य P.,D.,R.

तस्मादन्नैरस्मदीयं हविर्भूतैः सरस्वती ।
वहतामिति मन्त्रार्थो नत्वन्नैरन्नवतीति ॥८॥
किमत्र तव वक्तव्यं 'त्वं सो[1]म ऋतुभिः' इति ।
किं वेह तव वाच्यं स्याद् 'यज्ञेभिर्यज्ञवाहसम् ॥९॥
तर्ह्येवं विग्रहः कार्यो वाजिनीभिः समन्विता ।
या सा वाजिनीवतीति तृतीयान्तस्तथान्वितः ॥१०॥
ऋतुभिर्युक्तैः सुऋतुर्बहुव्रीहेश्च विग्रहः ।
नत्वस्य सन्ति ऋतवस्तृतीयाश्च तथान्विताः ॥११॥
ऋतवो यस्य सन्तीति योऽयं लौकिकविग्रहः ।
स विस्पष्टाभिधानाय सत्त्वमात्रं ह्यपेक्षितम् ॥१२॥
अन्वयो वाजशब्देन पुंल्लिङ्गेनापि सिध्यति ।
वाजेभिरिति पुंल्लिङ्गं तथा सति न दुष्यति ॥१३॥
यद्वान्नवत्त्वं बहुभिः कृतमन्नैस्तथा सति ।
'वृषा' वृषत्वेभिः' इति समीचीनो भविष्यति ॥१४॥
'गोभिर्व्वपावान् मधुना तत्र स्पष्टं प्रतीयते ।
कृतं गोभिर्वपावत्त्वं गोभिरेवान्नवानिति ॥१५॥

---

१. ०न्त्रोर्थो D.
२. ०न्नैर० P. ३. से P. सो D.
४. RV. I.91.2.
५. ०वासं P. RV. VIII.12.20.
६. समीवता P.
७. ०क्त D.
८. P. and D. add इति after सुऋतुः ।
९. सं त्वमा० D. सन्त्वमा० P.
१०. ०न्नमपे० R.
११. अन्वायो P. १२. वज्ञ० P.
१३. पुंलिगोपि सि० D. पुल्लि० R.
१४. सिद्धय० R.
१५. पुल्लि P.,R. १६. यद्वन्नाव० P.
१७. ऋतुम० R. १८. RV. I.91.2.
१९. ०पा माधुना D. ०पान्माधुना P. VS. 20. 37. २०. ०तिय० D.
२१. Omitted by P. ऋतोः R.
२२. ०त्वं P., D.

'यज्ञेभिर्यज्ञवाहसं सोमेभिः सोमपातमम्'[२] ।
यज्ञैर्यज्ञस्य वोढा यो यज्ञवाहा भवेदिति ॥१६॥
'अश्विना यज्वरीः'[४] अस्यां प्रत्ययार्थं विनिर्दिशन्[५] ।
चनशब्दमुपादत्ते सन्त्यन्येऽपि च तादृशाः ॥१७॥ इति॥

V.33.

महि महे तवसे दीध्ये[११] नृनिन्द्रायेत्था तवसे अतव्यान्[१२] ।
यो अस्मै सुमतिं वाजसातौ स्तुतो जने समर्यश्चिकेत[१३] ॥ १ ॥

महि महे[७] । संवरणः प्राजापत्यः ॥ मम महते[९] । बलाय[१०] । अत्यन्तम्[११] । तीक्ष्णीकरोमि । कर्मणो नेतॄन्[१२] ऋत्विजः । इन्द्राय । इद्धम्[१३] । वृद्धाय कर्म कर्तुम्[१४] । अहमवृद्धः[१५] । यः[१६] । अस्मै स्तोत्रे । सङ्ग्रामे[१७] । स्तुतः सन्[१८] । जनानां मध्ये । मरुद्भिः[१९] सहागत्य । सुमतिम्[२०] । प्रज्ञापयति[२१] ।

स त्वं न इन्द्र धियसानो अर्कैर्हरीणां वृषन्योक्त्रमश्रेः[२४] ।
या इत्था मघवन्नु जोषं वदो अभि प्रायः सत्सि[२५] जनान्[२६] ॥ २ ॥

स त्वं नः[२१] । सः[२२] । त्वम् । अस्माकम्[२३] । स्तोत्रैः[२४] । इन्द्र ! प्रीयमाण[२५] । अश्वानाम्[२६] । योक्त्रम्[२७] ।

---

१. ०भिय० P.
२. RV. VIII.12.20.
३. P. D. read उह्यमानैर्यो for यज्ञैर्यज्ञस्य वोढा यो ।
४. ०रीत्यस्यां R. RV. I.3.1.
५. ०र्दिशेत् R.,P. ६. चनः० R.
७. तत्राग्नेः पञ्चमे मण्डले तृतीयेऽनुवाके द्वादश सूक्तानि । तत्र 'महि महे' इति दशर्चं प्रथमं सूक्तम् । प्रजापतिपुत्रः संवरणाख्य ऋषिः । त्रिष्टुप् छन्दः । इन्द्रो देवता । तथा चानुक्रान्तम्—'महि दश प्राजापत्यः संवरणः' (KSA. 26. 33. p. 20.)। विनियोगो लैङ्गिकः Sy. ८. अहं संवरणः Sy.
९. बलवते Sy. १०. महत् प्रभूतं स्तोत्रम् Sy.
११. दीपयामि प्रकाशयामि Sy.
१२. नॄन्—षष्ठ्यर्थे द्वितीया मनुष्याणामस्मदीयानाम्। यद्वा नॄनस्मद्विरोधिनामभिभवायेति शेषः Sy. १३. इत्थम् is suggested for इद्धम् ॥ वक्ष्यमाणप्रकारेण Sy.
१४. बलाय तदर्थं तवसेऽस्मद्बलाय Sy.
१५ अत्यन्तमिव दुर्बलः सन् Sy. १६. इन्द्रः Sy.
१७. वाजस्यान्नस्य वा लाभे निमित्ते सति Sy.
१८. जने जनाय संवरणाय Sy.
१९. मर्त्यैः स्तोतृभिः सहितो यद्वा सह म्रियमाणैर्युध्यमानैर्मरुदादिभिरथवा समरार्हैः Sy.
२०. जानाति Sy. २१. प्रसिद्धः Sy.
२२. अस्मान् Sy. २३. अर्चनसाधनैः स्तोत्रैर्निमित्तभूतैः Sy. २४. ध्यायन् Sy.
२५ रथे नियोज्यानामश्वानाम् Sy.
२६. नियोजनरज्जुम् Sy.

रथयुगैः समयोजयः[1]। युक्त्वा वाश्वान्[2] याहि[3]। इत्थम्। मघवन्! सेव्यं[4] मा प्रति। अभिवह[5] चास्मदीयान्। जनान्। स्वामी सन् तान्। प्रसक्षि[6] च सचिः[7] सेवाकर्मेति[8]।

न ते त इन्द्राभ्यस्मद्दृष्वायुक्तासो अभ्रयता यदसन्।
तिष्ठा रथमधि तं वज्रहस्ता रश्मिं देव यमसे स्वश्वः॥ ३॥

न ते। दर्शनीय[10]! इन्द्र! तव[11]। तेऽश्वाः[12]। न[13]। अस्मान्[14]। अभ्यागच्छन्ति[15]। यस्मादस्माकम्[16]। स्तोत्रवर्जिततया[17]। रथेऽयुक्ताः[18]। अभवन्[19]। सम्प्रति स्तोत्रे क्रियमाणे वज्रहस्त[20]! तम्[21]। रथम्। अधितिष्ठ। य चाश्वानां[22] रश्मिमागमनार्थम्[23]। आयच्छ[24]। देव! शोभनाश्वस्त्वमिति।

पुरू यत्त इन्द्र सन्त्युक्था गवे चकर्ष्वर्वरासु युध्यन्।
ततक्षे सूर्याय चिदोकसि स्वे वृषा समत्सु दासस्य नाम चित्॥ ४॥

पुरू[25] यत्[26]। पणिभिरपहृतेषु गोषु तज्जयार्थमङ्गिरोभिः[27] प्रयुक्तानि बहूनि[28]। स्तोत्राणि[29]। यदा। तव। भवन्ति[30]। यदा च पणिनां[31] तेषु तेषु[32] क्षेत्रेषु प्रविश्य। युद्धं[33] कुर्वन्। अङ्गिरसो[34] गवे। कृतवानसि[35]। तदानी

---

१. ०य P. आश्रयसि Sy.
२. वा is used in the sense of च i.e. aggregation N. 1. 4, 5.
३. यहि P. याहि seems to be the explanation of याः॥ याः लिङ्व्यत्ययः। यानर्कान् Sy.
४. जोषं प्रीतिम् Sy.
५. VM. seems to explain अनु with जोषम् and अभि with वक्षः but Sy. explains अनु with वक्षः and अभि with प्रसक्षि॥ अनु वक्षः अवहः। तैर्निमित्तैर्योक्त्रमश्वेरिति Sy.
६. अस्मदरीन् Sy.
७. आभिमुख्येन प्रकृष्टं पराभव Sy.
८. समिः P. सचि D.
९. VM. ignores वृषन्॥ हे वर्षक! Sy.
१०. हे महत्! Sy.
११. त्वदीयाः Sy. १२. ते नराः Sy.
१३. न भवन्ति Sy.
१४. अस्मत्तस्त्वद्भूतेभ्योऽन्ये Sy.
१५. अतोऽस्मद्यज्ञम् अभि आगन्तुम् Sy.
१६. यद् ये Sy.
१७. ०र्जितयो P. ब्रह्म परिवृढं कर्म तद्रहितत्वात् Sy.
१८. त्वयाऽसंयुक्ताः Sy.
१९. आसन् अभवन् Sy.
२०. हे वज्रहस्त! इन्द्र! Sy.
२१ प्रसिद्धम् Sy.
२२. ०धिष्ठिताय चा० P. ०धिष्ठाय चा० D.
२३. त्वं यं रथमारोढुं प्रग्रहम् Sy.
२४. नियमयसि तमधितिष्ठ Sy.
२५. पुरु यव D. २६. पा० P.
२७. स्वभूतानि पुरूणि बहूनि Sy.
२८. उक्थानि शस्त्राणि Sy.
२९. सन्ति Sy.
३०. यदो D.
३१. पाणीनां P. वाणिनां D.
३२. सस्योपेतासु भूमिषु निमित्तभूतासु Sy.
३३. युक्तं P. जलप्रतिबन्धकान् संहरन् Sy.
३४. वृष्टपुदकाय Sy.
३५. करोषि भेदनम् Sy.

सूर्याय[1] । स्वे[2] । स्थाने स्थिराय । असुरैरुत्पादितेन तमसावृता प्रकाशार्थं तक्षणं[3] कृतवानसि[4] । इन्द्रः सेक्ता[5] युद्धेषु[6] । दासस्य उपक्षपयितुरस्य[7] । नमयिता[8] । च[9] । उत्तरार्धः परोक्षः[10] ।

वयं ते त इन्द्र ये च नरः शर्धो अज्ञाना यातास्व रथाः ।
आस्माञ्जगम्यादहिशुष्म सत्वा भगो न हव्यः प्रमृथेषु चारुः ॥ ५ ॥

वयं ते । वयम्[11] । ते भवामः[12] । तव । ये । चास्मदीयाः । योद्धारः[13] । त्वदीयं वेगम्[14] । जानन्तः[15] । अस्मदीया[16] रथाः सङ्ग्राम प्रति[17] । गनाः[18] । चासन् । तथा सतीन्द्र ! अस्मान् । आगच्छतु[19] । अहेः शोषक ! शत्रूणां सदान[20] बलम्[21] । भाग्यम्[22] । इव । ह्वातव्यम्[23] । सङ्ग्रामेषु[24] । कल्याणमिति[25] ।

पपृक्षेण्यमिन्द्र त्वे ओजो नृम्णानि च नृतमानो अर्यतः ।
स न एनीं वसवानो रयिं दाः प्रार्यः स्तुषे तुविमघस्य दानम् ॥ ६ ॥

पपृक्षेण्यम्[26] । भीरूणां ससेव्यम्[27] । इन्द्र ! त्वयि । हि[28] । ओजः[29] । बलानि[30] । च[31] विद्यन्ते । स त्वं कर्मसु नर्तनशीलः[32] । अमरणधर्मा । स त्वम् । श्वेतां[33] निर्मलाम् । रयिम्[34] । अस्मभ्यम् । देहि । हे वासयितः[35] !

---

१. सूर्यस्य Sy.
२. स्व P. स्वकीये Sy.
३. ०वृताय, going with सूर्याय or वृतेः gen. sing. is suggested for वृता ।
४. प्रकाश्यं P.
५. सम्पादयसि Sy.
६. निम्नः P.
७. वर्धिता सन् Sy.
८. सङ्ग्रामेषु Sy.
९. वृष्टिप्रतिबन्धकर्तुरेतन्नामकस्यासुरस्य Sy.
१०. नामापि ततक्षे नाशयसीत्यर्थः Sy.
११. चिद् अपि Sy.
१२. VM. ignores इन्द्र ।
१३. वयं स्मः Sy.
१४. त्वदीयाः Sy.
१५. नरः कर्मणां नेतार ऋत्विग्यजमानाः Sy.
१६. बलम् Sy.
१७. उत्पादयन्तः स्तुतिभिः Sy.
१८. रंहणशीलाश्च Sy.
१९. होतुं त्वां प्राप्ताश्च Sy.
२०. इन्द्रानाग० D. इन्द्रनाग० P. आगच्छेत् Sy.
२१. हेः P.,D. अहिरयनात् । सर्वतो व्याप्त-बलेन्द्र ! त्वदनुग्रहात् Sy.
२२. सदानवं is suggested for सदानं ॥ भृत्यादिः Sy.
२३. भग इव हव्यश्चारुः । भगदेवो यथास्मत्सहाय आगच्छति तथा भृत्यादिरागच्छेत् Sy.
२४. स्तुत्यः प्रतिभटैराह्वातव्यो वा Sy.
२५. सङ्ग्रामेषु यज्ञेषु वा Sy.
२६. सङ्क्रन्ता Sy.
२७. पवृक्षे० D. ववृषेण्यम् P.
२८. सम्पर्कार्हं पूज्यं वा Sy.
२९. खलु । त्वदधीनमित्यर्थः Sy.
३०. बलम् Sy.
३१. नृम्णानि नृमणानि द्रविणानि Sy.
३२. वक्ष्यमाणरय्यपेक्षया वशब्दः Sy.
३३. नृत्यन् Sy.
३४. शेतां P. एतवर्णां श्वेतवर्णाम् Sy.
३५. धनम् Sy.
३६. आच्छादयन् स्वतेजसा जगत् Sy.

स्तोतृणाम्। प्रकर्षेणाह स्तौमि। स्तोता मानामीश्वरः। बहुधनस्य तव। दानम्।

एवा नं इन्द्रोतिभिरव पाहि गृणतः शूर कारून्।
उत त्वच ददतो वाजसातौ पिप्रीहि मघवः सुषुतस्य चारोः ॥ ७ ॥

एवा नः। एवम्। अस्मान्। इन्द्र! रक्षणैः। अव सुरक्ष। स्तुवतः। शूर! स्तोतॄन्। अपि च। सङ्ग्रामे शत्रुभ्यः। आत्मीय त्वचम्। ददतः प्रदर्शयतो मम। सुष्ठु सुतेन। चारुणा। सोमेन त्वम्। पिप्रीहि। धारणकर्मा वा ददतिः, त्वच बिभ्रत इति।

उत त्ये मा पौरुकुत्स्यस्य सूरेस्रसदस्योर्हिरण्यिनो ररांणाः।
वहन्तु मा दश श्येतासो अस्य गैरिक्षितस्य क्रतुभिर्नु संश्चे ॥ ८ ॥

उत त्ये। अपि च। अमी। माम्। पुरुकुत्सपुत्रस्य। त्रसदस्योर्मम साहाय्यार्थमागतस्य। प्राज्ञस्य। युक्ता अश्वाः। माम्। रममाणा भवन्ति। तेषाम्, वहन्तु। दश। श्वेतवर्णाः। त्रसदस्योः स्वभूताः। किं चाहम्, गैरिक्षितस्य सहायस्य। कर्मभिः। क्षिप्रम्। सक्तो भवामि।

---

१. मा means 'wealth' 'इन्दिरा लोकमाता मा क्षीरोदतनया रमा' Amara 'मः शिवे मा रमायां च' Viśva. मानामीश्वरः would mean 'lord of wealth'. It seems to be the explanation of अर्यः॥ अहं च अर्यः ईश्वरस्य Sy.

२. प्रभूतधनस्य Sy.

३. ०णेः P. ४. पालय Sy.

५. ०वन्तः P. ६. कर्तॄनृत्विजः Sy.

७. आच्छादकं रूपम् Sy.

८. प्रयच्छतः Sy.

९. सुष्ठु तेन P. सुष्ठु तो D. सुष्ठ्वभिषुतस्य Sy.

१०. ०णं P. D. मनोहरस्य Sy.

११. सोमस्य Sy.

१२. प्रीणयात्मानम्। द्वितीयार्थे षष्ठी। उक्तलक्षणं सोमं पिबेत्यर्थः। अथवा तृतीयार्थे षष्ठी। उक्तलक्षणेन सोमपानेन प्रीणय Sy.

१३. ०ति P.

१४. The passage, धारण..बिभ्रतः, refers to ददतः, therefore it should immediately follow प्रदर्शयतो मम and precede सुष्ठु सुतेन।

१५. त्रसदस्युश्च विदथो ध्वन्यश्चेति त्रयो नृपाः। अश्वान्धनानि गाश्चादुर्ऋषये तद्वदत्यृषिः॥ Sy. १६. ते Sy.

१७. माम्—चतुर्थ्यर्थे द्वितीया। मह्यमित्यर्थः Sy.

१८. मरुतश्वस्य P. पुरुत्सपु० D. पुरुकुत्सापत्यस्य Sy.

१९. रसदस्यन्योः P. एतन्नामकस्य राजर्षेः Sy.

२०. प्रेरकस्य Sy.

२१. अश्वाः seems to be the explanation of हिरण्यिनः, i.e. horses swift like deer॥ हिरण्यवतः Sy. २२. मार D.

२३ रातेर्दानार्थस्य कर्मणि क्विटः कानचि रूपम्। दत्ता इत्यर्थः Sy. २४. प्रापयन्तु Sy.

२५. दश अश्वाः Sy.

२६. श्येत० P. शुभ्रवर्णाः Sy.

२७. ०हुं D.

२८. गिरिक्षितगोत्रोत्पन्नस्य Sy.

२९. अहं च कर्मभी रथनियोजनादिभिर्यज्ञादिभिर्वा Sy. ३०. गच्छेयम् Sy.

उत त्ये मां मारुताश्वस्य शोणाः क्रत्वामघासो विदथस्य रातौ ।
सहस्रा मे व्यवतानो ददान आनूकमर्यो वपुषे नाचैत् ॥ ९ ॥

उत त्ये । अपि च । ते । माम् । मारुताश्वस्य राज्ञः सम्बन्धिनः । शोणाः । विदथमिति ।

उत त्ये मां ध्वन्यस्य जुष्टा लक्ष्मण्यस्य सुरुचो यतानाः ।
महा रायः संवरणस्य ऋषेर्व्रजं न गावः प्रयता अपि ग्मन् ॥ १० ॥

उत त्ये । अपि च । ते । मा । ध्वन्यस्य । लक्षणवतो राज्ञ । पर्याप्ताः । शोभनदीप्तयः । यतमाना अश्वा वहन्तु । तेऽमी सवरणस्य । ऋषेर्मम । धनस्य । महत्त्वेन हेतुना । व्रजम् । इव । गावः । अपि । ग्मन् । मम सङ्गता आसन् । साहाय्यार्थं राजभिः प्रहिता अश्वा इति ।

---

१. अश्वा वक्ष्यमाणाः Sy.
२. मरुत्सदृशवेगाश्ववान् मरुताश्वः । तदपत्यस्य Sy.
३. शोणवर्णाः Sy.
४. The reading, विदथमिति, is doubtful. विदथमिति can be suggested in its place, but in that case विदथम् would be the paraphrase of विदथस्य ॥ विदथस्य एतन्नामकस्य राज्ञः Sy.
५. It appears that a part of the commentary on this stanza is accidentally omitted by the scribe due to the phenomenon of omissio ex homoeoteleuto. VM. ignores क्रत्वामघासः । रातौ । सहस्रा । मे । व्यवतानः । ददानः । आनूकम् । अर्यः । वपुषे । न and आचैत् ॥ क्रतुना कर्मणा शीघ्रगमनादि-लक्षणेन माहनीया अश्वाः । दाने विनियुक्ताः । मां वहन्तीति शेषः । सहस्राणि अपरिमितानि धनानि । पूज्यस्य । मे, चतुर्थ्यर्थे षष्ठी, पूज्याय मह्यम् । व्यावयन् प्रयच्छन् सः । आभरणम् । स्वशरीरालङ्काराय । प्रायच्छत् । न इति चार्थे Sy.
See my Introduction to the Nirukta, Oxford university press, 1920, and Preface to my edition of the Sanskrit text of the Nirukta, p. 13.
६. वक्ष्यमाणा रायः Sy.
७. ध्वनस्य D.
ध्वन्यनामकस्य Sy.
८. लक्ष्मणपुत्रस्य राज्ञः सम्बन्धिनोऽश्वाः Sy.
९. मां प्राप्ताः Sy.
१०. वहनाय यतमानाः Sy.
११. मे P.
१२. ऋषिर्मम P.
१३. ममहत्त्वेन P. ०त्वेन D.
१४. P. adds देवता before हेतुना ॥ महत्त्वेन युक्ताः Sy.
१५. गोष्ठम् Sy.
१६. यद्वा नेति वार्थे । गावश्च मम व्रजमपि ग्मन् । अत्रैन्द्रे सूक्ते 'प्रायेणैन्द्रे मरुतां राज्ञां च दान-स्तुतयः' (Anu. 2.22.) इत्युक्तत्वाद्राज्ञां दानस्तुतिरविरुद्धा Sy.
१७. गताः प्राप्ताः । मद्गृहमिति शेषः Sy.
१८. संहता P. वत्ताः सत्यः Sy.
१९. Ms. D. puts the figure ॥३३॥ here to indicate the end of the thirty-third hymn. No such number is given in P.

V.34.

अजातशत्रुमजरा स्वर्वत्यनु स्वधामिता दुस्मभीयते ।
सुनोतन पचत ब्रह्मवाहसे पुरुष्टुताय प्रतरं दधातन ॥ १ ॥

[1]अजातशत्रुम् । [2]अविद्यमानशत्रुम् । दर्शनीयम् । [3]अजरा । [4]सुखवती । महती । [5]स्वधा हविर्लक्षणमन्नम् । [6]अनुगच्छति । तथा सति सुनोतन सोमम् । पचत च पक्तव्यानि । स्तोत्रं यस्य वाहकम्, इन्द्राय । [7]पुरुष्टुताय [8]तस्मै । [9]प्रकर्षेण च । [10]दत्त च तानि ।

आ यः सोमेन जठरमपिप्रतामन्दत मघवा मध्वो अन्धसः ।
यदीं मृगाय हन्तवे महावधः सहस्रभृष्टिमुशना वधं यमत् ॥ २ ॥

आ यः सोमेन । [11]आपूरयत् । [12]यः । सोमेन । [13]उदरम् । [14]मत्त आसीत् । स इन्द्रः । [15]मधुसदृशेन । [16]सोमेन । [17]यत् । [18]एनम् । [19]मृगासुरस्य । [20]हननाय । [21]महाप्रहरणः । [22]उशना । [23]सहस्रधारम् । [24]वधम् आयुधम् । [25]इन्द्राय, [26]आयच्छत्तदेति ।

---

१. 'अजातशत्रुम्' इति नवर्चं द्वितीयं सूक्तं प्राजापत्यस्य संवरणस्यार्षमैन्द्रम् । नवमी त्रिष्टुप् । शिष्टास्त्रिष्टुबन्तपरिभाषया जगत्यः (KSA. 12.13. P.5.) । 'अजातशत्रुं नव त्रिष्टुबन्तम्' (KSA. 26.34.p.,20.) इत्यनुक्रमणिका । विनियोगो लैङ्गिकः Sy.

२. अनुत्पन्नाः शातयितारो यस्य तम् Sy.

३. शत्रूणामुपक्षपयितारम् Sy.

४. अक्षीणा Sy.

५ स्वरणवती Sy.

६. अपरिमिता Sy.

७. ०विल० D. अन्नं हविः Sy.

८. अनुप्राप्नोति Sy.

९. तदर्थं हे ऋत्विजः ! अभिषुणुत Sy.

१०. वक्त० D. पुरोडाशादिकम् Sy.

११. वाहम् P. ब्राह्मणः परिवृढस्य स्तोत्रस्य वाहकाय Sy.

१२. पुष्टु० P. बहुभिः स्तुतायेन्द्राय Sy.

१३. तस्मै should immediately follow स्तो० वाहकम् and precede इन्द्राय ।

१४. Omitted by P. प्रकृष्टतरम् Sy.

१५. धारयत स्वस्वोचितकर्म Sy.

१६. सर्वतः अपूरयत् Sy.

१७. यां P.

१८. ०नाद्र P. जठरं स्वकीयम् Sy.

१९. मर्तं P., D. अतृप्यत् Sy.

२०. मधुररसस्य Sy.

२१. सोन P., D. सोमस्य पानेन Sy.

२२. यदा Sy.

२३. ०न P., D. अयम् Sy.

२४. एतन्नामकायासुराय Sy.

२५. तं हन्तुम् Sy.

२६. महावज्रः Sy.

२७. कामयमानः शत्रुं यद्वोशनसा सह Sy.

२८. अपरिमिततेजाः Sy.

२९. वज्रम् Sy.

३०. इन्द्र P.

३१ उदयच्छत् तदापिप्रत अमन्वत च Sy.

यो अस्मै ध्रंस उत वा य ऊधंनि सोमं सुनोति भवति द्युमाँ अहं ।
अपाप शुक्रस्ततनुष्टिमूहति तनूशुभ्रं मघवा यः कवासखः ॥ ३ ॥

यो अस्मै । यः । इन्द्राय । अहनि । सोमम् । सुनोति । यः । वा रात्रौ । सः दीप्तिमान् । एव । भवति । अपोहति । शक्र । ततनुष्टि ततस्य धर्मसन्तानस्य दाहक धर्मसन्तानादपेतम् । तनूनां शोभयितारम-

---

१. संवरण इन्द्रं तुष्टाव जगत्या। अच्छावाकमध्यमपर्याये जागतं सूक्तम् । 'अजातशत्रुमिति जागतस्येति' सूत्रम् (SSS. 9.14.3.) DDN. संवरणस्य प्रजापतेः पुत्रस्यार्थम् SKN. प्राजापत्यस्य संवरणस्यार्थम् Dur.

२. यजमानः Sy., DDN., SKN.

३. ध्रंसे गृह्यन्तेऽस्मिन् रसा इति ध्रंसः । तस्मिन् Sy. अहनि DDN. ध्रंस इति पठ्यमानस्य निर्वचनार्थं उपक्षेपः । रसा अवश्याया आदित्येन SKN. ध्रंसे—ग्रस्यन्तेऽस्मिन् रसाः सूर्येण Dur. ध्रंस इत्यहर्नाम Ngh.6.19.

४. सोमाभिषवं करोति DDN. सर्वदा यजत इत्यभिप्रायः SKN.
अभिषुणोति, नित्यकालमेव यः सोमाभिषवे प्रयतत इत्यर्थः Dur.

५. उत वा अथवा Sy.

६. उद्धततरं भवत्युह्यमिति बोधो रात्रिः । स्नेहप्रदानरसाभ्यामूषसि रात्रौ च समत्वाद्रात्रिरप्यूध उच्यते । अहनि रात्रौ च Sy.
रात्रौ अहोरात्रयोरित्यर्थः DDN. रात्रौ रात्रिशब्दनिर्वचनार्थं प्रसिद्धं तावदाह गोरूधः, प्रसवकालेऽङ्गान्तरेभ्य उच्छिततरं भवति । यद्वा उपश्लिष्टमुद्धृतमुद्धृतमिव केनचित् । ततः स्नेहरसानुप्रदानसामान्याद्रात्रिरप्यूध उच्यत इति निर्वचनार्थं उपक्षेपः पठ्यमानस्यैव SKN. गोरूधः, उद्धततरमिति शब्दसारूप्यप्रसक्तम् । तद्धि, अन्येभ्योऽङ्गेभ्य उद्धततरं भवति । उपोह्यमिति वा, तद्धि विज्ञायते केनचिदुपश्लिष्य गोरुदरे नद्धमिति । 'स्नेहानुप्रदानसामान्याद्रात्रिरप्यूध उच्यते' सापि ह्यवश्यायानोषधिवनस्पतिस्नेहकान्वधाति Dur.

७. यच्छुब्दश्चतेस्तच्छब्दोऽध्याहार्यः, सः SKN. तस्य किमिति ? स एव Dur.

८. ऐश्वर्ययुक्त इत्यर्थः SKN.

९. अहेति पदपूरणो विनिग्रहार्थीयो वा, एवार्थे । भवत्येव दीप्तिमान् SKN. निश्चयेन Dur. अह इति विनिग्रहार्थीयः N 1.5.

१०. अपोहित P. 'प्रसमुपोदः पादपूरणे' (Pa. 8.1.6.) इत्येवमेतच्छान्दसत्वादप्शब्दस्यापि पादपूरणे द्विर्वचनम् । अपोहति सर्वतोऽपनयति विनाशयतीत्यर्थः SKN. उपसर्गाभ्यासदर्शनादूहतेरप्यभ्यास आदरार्थं कृतः । पुनः पुनरपोहति नाशयतीत्यर्थः Dur.

११. शक्र P. शक्र शक्रः D. शक्तोऽयमिन्द्रः Sy. समर्थोऽयमिन्द्रः DDN. अन्यस्तु शक्त इन्द्रः SKN. शक्त इन्द्रः Dur.

१२ तदवुष्टं P. ततवुष्टं D.
ततं धर्मसन्तंति नुवति वष्टि कामयते कामानिति ततनुष्टिः । तम् Sy.
धर्मसन्तानादपेतम् DDN.

१३. ०पेवं P. ततो नुभ्रधर्ममिन्द्रियविषयभोगसन्तानकाम वा SKN. अथ पुनरितो यो विपरीतो भवति, पूर्वैश्च पूर्वतरैश्च . . . अनुष्ठितावपेतं तम् । अलं कर्मभिरित्येवंवादिनम्, अयजनशीलमात्ममण्डनपरं वा विषयोपभोगपरतया स्ववित्तं तितनिषुम् । अनेकैः प्रकारैर्यो वित्तानि तनितुमिच्छति तमश्रद्दधानं धर्मे । एवमत्र ततनुष्टिशब्देन विषयोपभोगप्रधान उच्यते शब्दार्थविरोधादित्युपपत्तेः Dur.

१४. ०नामशोदयि० P. ०नामशोभयि० D. तनूः शुभ्रा शोभनीया अलंकारादिभिर्यस्य तम् । तादृशं स्वपोषकमयज्यानम् Sy. DDN.

लङ्कुरिण्णुम् । इन्द्रः । यः । कुत्सितः सखा न यजते तमिति ।

यस्यावधीत्पितरं यस्य मातरं यस्य शुक्रो भ्रातरं नात ईषते ।
वेतीद्वस्य प्रयता यतंकरो न किल्बिषादीषते वस्व आकरः ॥ ४ ॥

यस्यावधीत् । अयमिन्द्रः । यस्य । पित्रादीन् । अवधीत् पापकारिण । तस्मात् । न । पलायते । वेति, इत् कामयते एव । अस्य । अपि । प्रत्नानि हवीषि । यमनकरः शत्रूणाम् । न । पुरातनात् पितृवधादिकात् किल्बिषात् । पलायते । धनस्य । आकरः ।

---

१. स्वस्यास्तन्वाः लगनुलेपनादिभिः शोभयितारम् । . . . ततनुष्टिशब्दार्थप्रदर्शनमलङ्कुरिण्णुमित्यादि । तनुं शोभयितारमिति पाठः SKN. ततनुष्टेरेवैतद् विशेषणम् Dur.

२. धनवान् Sy.
धनस्वामी इन्द्रः Dur.

३. यश्चान्योऽपि Dur.

४. कुत्सितपुरुषसहायस्तमपोहतीति Sy. परित्यजति कवासख इति 'कवर्दुधान्यमिथुन०' (RPR.9.8.) इति दीर्घः DDN.
कुशब्दस्यायं 'कवञ्चोष्णे' (Pa.6.3.107.) इति सखिशब्दे कवादेशश्छान्दसत्वाद् द्रष्टव्यः । कुसखा स्वयं भोगप्रवृत्तः । वृष्टप्रसाधनसखायोऽपि तस्य भोगप्रधाना एव न यागशीला इत्यर्थः SKN. कपूयसखो भवति तमप्यपोहति । . . . . अवश्यम्भावी तस्य हि विनाश इत्यभिप्रायः । केचित्तु कवासखशब्दं तनूशुभ्रविशेषणमेव वर्णयन्ति । इतरो विषयप्रधानोऽपि भूत्वा साधुसम्पर्कात् कदाचित् प्रत्यापद्येत, इतरस्त्वसाधुसम्पर्कादत्यन्तनष्ट एवेत्यनेनाभिप्रायेण Dur.

५. VM. explains अप once and ignores उत ॥
अपरोऽपशब्दः पूरणः Sy. आदरार्थमभ्यासः DDN. ध्रंस इत्यर्हनाम । ध्रस्यन्तेऽस्मिन् रसाः। गोरुध उद्धततरं भवति । उपोन्नद्धमिति वा । स्नेहानुप्रवानसामान्याद्घारिरप्युध उच्यते । स योऽस्मा अहन्यपि वा रात्रौ सोमं सुनोति भवत्यह द्योतनवान् । अपोहत्यपोहति शक्रः । तितनिषुं धर्मसन्तानावपेतमलङ्कुरिण्णुमयज्वानम् । तनूशुभ्रं तनूशोभयितारम् । मघवा यः । कवासखो यस्य कपूयाः सखायः N.6.19., SKN. II.459.

६. शक्तोऽयम् Sy.

७. अयज्वनः Sy.

८ आदि refers to मातरं and भ्रातरम् ॥
पितरम् । यस्य च मातरमवधीत् । यस्य च भ्रातरमवधीत् Sy.

९. हतवान् Sy.

१०. यस्मादयज्वनः सकाशात् Sy.

११. बिभेति गच्छति वा Sy.

१२. P. D. read सुनोति चेत् for वेति इत् ।

१३. ०य D. अयज्वानं शिक्षयित्वा नियोजयतीत्यर्थः Sy.

१४. प्रदत्तानि हवींषि Sy.

१५. ०नकाः P. D. यमनकर्ता Sy.

१६. किल्बिषात् P. कित्विषात् D. पित्राविवधयुक्तात् Sy.

१७. चलति बिभेति वा । इन्द्रस्यास्तोतृणां हतिः, 'इन्द्रो यतीन् सालावृकेभ्यः प्रायच्छत्, अन्तरिक्षे पौलोमान् पृथिव्यां कालकाञ्ज्यानरुन्मुखान्यतीन् सालावृकेभ्यः प्रायच्छम्' इत्यादिभ्रुतिषु प्रसिद्धा Sy.

१८. वसुनः धनस्य Sy.

१९. आभिमुख्यकर्ता यः Sy.

२०. VM. explains यस्य once only.

न पञ्चभिर्दशभिर्विष्टयारभं नासुन्वता सचते पुष्यंता चन ।
जिनाति वेदमुया हन्तिं वा धुनिरा देवयुं भजति गोमति व्रजे ॥ ५ ॥

न पञ्चभिः । अयमिन्द्र. पञ्चभिः । दशभिः पञ्चदशभिर्वा कर्मभि. । पुरुषमारब्धुम् । न । इच्छति । किन्तु सुन्वन्तमेवारभत इत्याह पुष्टेन । अपि । न । असुन्वता । सङ्गतो भवतीति । हिनस्ति । वा । अमुमसुन्वन्तम् । हन्ति । वा । कम्पयिता शत्रूणाम् । देवकामं पुनः । गोमति । व्रजे । प्रवेशयति ।

वित्वक्षणः समृतौ चक्रमासजोऽसुन्वतो विषुणः सुन्वतो वधः ।
इन्द्रो विश्वस्य दमिता विभीषणो यथावशं नयति दासमार्यः ॥ ६ ॥

वित्वक्षणः । विविधमसाधूना तनूकरणकारी । सङ्ग्रामे । आयुधस्यासक्ता सोऽयम् । असुन्वतः । पराङ्मुखः । सुन्वतः । वर्धयिता । इन्द्रः । विश्वस्य शत्रो. । दमयिता । भयङ्करः । आत्मीयानुगुणम् । करोति । स्वामी ।

समीं पणेरजति भोजनं मुषे वि दाशुषे भजति सूनरं वसु ।
दुर्गे चन ध्रियते विश्व आ पुरु जनो यो अस्य तविषीमचुक्रुधत् ॥ ७ ॥

समीम् । पणेः सकाशात् । पशून् । इन्द्र. । समजति बलात् । आहर्तुम् । आहृत्य च दाशुषे ।

---

१. ०भि D.
२. पञ्चभिर्दशभिः वा सहायैः Sy.
३. आरभम् आरम्भं शत्रुहननायालम्बनम् Sy.
४. इच्छन्निति P· साहाय्यं नापेक्षत इत्यर्थः । यद्वा अमुमिन्द्रं पञ्चभिर्दशभिर्वा यज्ञावन्यैरुपायैरारभम्, आरब्धुमुद्योगं कर्तुं न वष्टि न कामयते Sy. ५. ०रभवत P.
६. बन्ध्वादीनपोषयतापि Sy.
७. अभिषवमकुर्वता सह Sy.
८. सङ्गच्छते । असुन्वन्तमभिषवमकुर्वाणमयष्टारमपुष्णन्तं च (न) प्राप्नोतीत्यर्थः Sy.
९. न केवलमप्राप्तिमात्रम् किन्तु बाधते Sy.
१०. वाशब्दश्चार्थे Sy. ११. अयष्टारम् Sy.
१२. कम्पकः Sy. १३. देवमिन्द्रं कामयमानं यजमानम् Sy. १४. व्राजे P.
१५. योजयतीत्यर्थः Sy. १६. VM. ignores इत् ॥ इतिति पूरणः Sy. १७. वी० P.
१८. ०नु० P. विशेषेण तनूकर्ता शत्रूणां तदर्थम् Sy.
१९. रथचक्रस्यासञ्जयिता Sy.
२०. ०न्तः P. D. अयजमानस्य Sy.
२१. यजमानस्यSy. २२. दमिताD. शिक्षयिताSy.
२३. भयजनकः Sy. २४. यथेच्छम् Sy.
२५. नयति स्ववशम् Sy. २६. VM. ignores दासम् ॥ दासं दासकर्माणं जनम् Sy.
२७. संवरणो जगत्या इन्द्रं तुष्टाव DDN.
२८. पर्णे P. वर्णे D. वणिज इव लुब्धकस्यावातुः Sy. वणिज इव लुब्धकस्यायजमानस्य DDN.
२९. धनमन्नं वा गृहे धनम् Sy. भोजनं तनेति धननाम Ngh.2.10. ३०. अयमिन्द्रः Sy.
३१ ०जनि P.D. सम्यग्गच्छति Sy. सम्यग्गच्छति 'अज गतौ' । गत्वा च तस्य पणेर्धनमपहृत्य DDN. ३२. चोरयितुम् Sy. DDN.
३३. गत्वा चादाय हविर्दात्रे यजमानाय Sy. हविर्दत्तवते यजमानाय DDN.

विभजति[1]। शोभननृयुक्तम्[2]। धनम्[3]। किं च यः[4]। जनः। अस्य[5]। बलम्। क्रोधयति[6]। स विश्वः। अपि[7] शत्रुजन इन्द्रेण। पुरूणि[8]। दुर्गेणाध्रियते[9][10][11] कष्टे स्थाने[12] तं प्रवेशयतीति।

सं यज्जनौ सुधनौ विश्वशर्धसावव[13]दिन्द्रो मघवा गोषु शुभ्रिषु।
युजं ह्य[14]न्यमकृत प्रवेपन्युदीं गव्यं सृजते सत्वभि[15]र्धुनिः॥ ८॥

सं यत्[16]। यदा। द्वौ मनुष्यौ। शोभनधनौ। परिपूर्णबलौ[17]। शोभावत्सु[18]। गोषु निमित्तेषु। सङ्ग्रामे[19] सयुक्तौ जानाति[20]। तदानी तयोरन्यं यजमानम्[21]। आत्मना युक्तम्[22]। कृणोति। प्रवेपनवानिन्द्रः[23]। कृत्वा च तस्य[24]। गोसङ्घम्[25]। शत्रुत उदाजति[26]। बलैः[27]। उत्क्षेपणशीलः[28]।

---

१. विशेषेण ददाति DDN.

२. शोभनमनुष्यम्Sy. शोभनैर्नरैरुपेतम् DDN.

३. अयष्टुर्धनमाकृष्य यष्ट्रे प्रयच्छतीत्यर्थः Sy. DDN.

४. योऽयष्टा जनः DDN.

५. इन्द्रस्य. Sy.

६. विहिताकरणाविना तस्य पणेरजतीति पूर्वशेषः यद्वा योऽस्य तविषीमचुक्रुधत् स सर्वोऽपि जनो दुर्गे चनाध्रियत इन्द्रेण Sy. विहिताकरणाविनाऽचुक्रुधत् DDN.

७. सर्वोऽपि ?(अ)वातृजनः Sy. सर्वः अयष्टा जनः DDN.

८. चनेत्येकपदमध्येतृसम्प्रदायप्राप्तम् Sy. चनेति पादपूरणः। तस्मादयष्टारं निर्धनं कृत्वा इन्द्रो यष्टारं धनिनं करोतीति भावः DDN.

९. पुरुणि loc. sing. as an attributive of दुर्गे is suggested for पुरूणि॥ न केवलं वणिग् धनप्रदानमात्रम्, पुरुणि Sy. किन्तु पुरूणि DDN.

१०. दुर्गे is suggested for दुर्गेण॥ दुःखेन गन्तव्य आपन्नपि Sy. महति दुःखे आपन्नपि DDN.

११. अधि० P. आस्थाप्यते Sy. DDN.

१२. स्थाने P.

१३. सु D.

१४. परस्परप्रतिद्वन्द्विनौ Sy.

१५. ०णौ बलौ P.
व्याप्तबलौ बहूत्साहौ वा Sy.

१६. शोभनासु गोषु निमित्तभूतासु Sy.

१७. ०म P.

१८. सञ्जानाति Sy.

१९. यष्टारम् Sy.

२०. सहायम् Sy.

२१. कृतवान् Sy.

२२. शत्रूणां प्रवेपनवान् Sy.

२३. अस्मै Sy.

२४. गोसमूहम् Sy.

२५ उत्सृजते Sy.

२६. मरुद्भिः सह Sy.

२७. बलेरुक्षे० P. मेघानां कम्पयिता इन्द्रो यजमानमयजमानं वायं जानाति गोनिमित्तं ज्ञात्वा यज्वने गोसमूहं प्रयच्छतीत्यर्थः Sy.

२८. VM. ignores इन्द्रः, मघवा and हि॥ मघवा धनवानिन्द्रः Sy.

सहस्रसामाग्निवेशिं गृणीषे शत्रिमग्न उपमां केतुमर्यः ।
तस्मा आपः संयतः पीपयन्त तस्मिन्त्क्षत्रमममवत्त्वेषमस्तु ॥ ९ ॥

सहस्रसाम् । अग्ने ! त्वमिन्द्रम् । सहस्रस्य दातारम् । यजमानानां सम्भक्तारम् । वदसि । शत्रूणा शातयितारम् । उपमानभूत वीराणाम् । केतुभूतम् । अर्यस्त्वम् । तस्मा इन्द्राय । आपः । सङ्गता. स्वांशम् । आप्याययन्ति । तस्मिन्निन्द्रे । बलम् । सहाययुक्तम् । दीप्त च । अस्त्विति ।

V.35.

यस्ते साधिष्ठोऽवस इन्द्र क्रतुष्टमा भर ।
अस्मभ्यं चर्षणीसहं सस्मिन् वाजेषु दुष्टरम् ॥ १ ॥

यस्ते ॥ प्रभूवसुराङ्गिरसः ॥ यः । तव । साधयितृतमः । रक्षणाय । इन्द्र ! क्रतुर्भवति । तम् ।

---

१. ०साः P.
अग्निवेशिसुतं शत्रिमसंख्यातधनप्रदम् ।
आशास्त ऋषिरन्त्यर्चा प्रजापतिसुतः सुधीः ॥ Sy., DDN.
संवरणस्त्रिष्टुभा शत्रि तुष्टाव DDN.
२. अङ्गनादिगुणविशिष्टेन्द्र ! Sy.
हे अग्ने ! DDN.
३. अपरिमितधनप्रदम् Sy., DDN.
४. अग्निवेशिसुतम् Sy., DDN.
५. गृणे स्तौमि Sy. स्तौमि कीदृशं तम् ? DDN.
६. शत्रिमेतन्नामकं राजर्षिम् Sy., DDN.
७. प्रज्ञापकम् । प्रख्यातमित्यर्थः Sy. प्रज्ञापकम् । प्रख्यातम् DDN. केतः केतुरिति प्रज्ञानामनी Ngh. 3.9. ८. अर्यः अहम् Sy.
९. तस्मै शत्रये DDN.
१०. वः P. आवः D.
११. ०ता P., D. सम्यग् गच्छन्त्यः Sy., DDN.
१२. स्वाशम् P. १३. ०न्ती P. प्यायन्ताम् Sy., DDN. १४. राज्ञि Sy.
१५. धनम् Sy., DDN. क्षत्रं भग इति धननाम Ngh. 2.10.
१६. ०क्त D. बलसहितम् Sy., DDN.
१७. दीप्तियुक्तमस्तु । इति शत्रेः कीर्त्तिस्तिष्ठेदित्युक्तम्—
उक्तञ्च—
काये पातिनि का रक्षा यशो रक्ष्यमपाति यत् ।
नरः पतितकायोऽपि यशसा सोऽपि धार्यते ॥ DDN. १८. Ms. D. puts the figure ॥३४॥ here to indicate the end of the thirty-fourth hymn. No such number is given in P.
१९. 'यस्ते साधिष्ठः' इत्यष्टर्चं तृतीयं सूक्तम् । अङ्गिरोगोत्रः प्रभूवसुर्नाम ऋषिः । अन्त्या पङ्क्तिः । षड्क्त्यन्तपरिभाषया शिष्टा अनुष्टुभः । इन्द्रो देवता । 'अस्तेऽष्टौ प्रभूवसुराङ्गिरसः षड्क्त्यन्तम्' (KSA.26.35. p.20.) इत्यनुक्रान्तम् । सूक्तविनियोगो लैङ्गिकः । आभिप्लविकेषूक्थ्येषु तृतीयसवने आद्यस्तृचोऽच्छावाकस्य वैकल्पिकोऽनुरूपः । सूत्रितञ्च 'यास्ते साधिष्ठोऽवसे पुरां भिन्दुर्युवा कविः' (ĀŚS.7.8.) इति । द्वितीयातृतीययोः स्वरसाम्नोश्चाद्यौ तृचावनुरूपौ । 'यस्ते साधिष्ठोऽवस इति षळनुष्टुभः' (ĀŚS. 8.5.) इति हि सूत्रितम् Sy.
२०. ०रानिरसं P. ०राङ्गिरसं D.
२१. अतिशयेन साधकः Sy. २२. अस्मद्रक्षणाय Sy. २३. क्रतुभिर्भ० P. उक्तलक्षणं कर्म प्रज्ञा वास्ति Sy. २४. क्रतुम् Sy.

आहर । अस्मभ्यम् । मनुष्याणामभिभवितारम् । सम्भजनशीलम् । सङ्ग्रामेषु । दुस्तरम् । ऋतु कर्म ।

यदिन्द्र ते चतस्रो यच्छूर सन्ति तिस्रः ।
यद्वा पञ्च क्षितीनामवस्तत्सु न आ भर ॥ २ ॥

यदिन्द्र । इन्द्र । यत् । तव । चतस्र । रक्षा । सन्ति । यदि वा । तिस्रः । यत् । वा । पञ्च । स्तोतृणामर्थाय । तत् सर्वम् । अस्मभ्यम् । सुष्ठु आहर बह्वयस्तव रक्षाः सन्ति सर्वास्ता अस्मासु कुर्विति ।

आ तेऽवो वरेण्यं वृषन्तमस्य हूमहे ।
वृषजूतिर्हि जज्ञिष आभूभिरिन्द्र तुर्वणिः ॥ ३ ॥

आ तेऽवः । आह्वयामहे । तव । रमणीयम् । रक्षणम् । कामानामतिशयेन वर्षितु । त्व हि । वर्षितृवेगः । आभवनशीलैर्मरुद्भिः सह । प्रादुर्भवसि । क्षिप्रकारी ।

वृषा ह्यसि राधसे जज्ञिषे वृष्णि ते शवः ।
स्वश्चित्रं ते धृषन्मनः सत्राहमिन्द्र पौंस्यम् ॥ ४ ॥

वृषा ह्यसि । वर्षिता । हि । असि । धनाय च । प्रादुर्भवसि । वर्षणशीलम् । तव । बलम् ।

---

१. सर्वेषां मनुष्याणामभिभवितारम् Sy.
२. ०ल P. संस्नातं शुद्धम् Sy.
३. अन्यैरनभिभाव्यम् Sy.
४. ०तु D.
५. ०र्मः P., D. The passage, ऋतुः कर्म should immediately follow ऋतुर्भवति and precede तम् ।
६. ०द्रः P.,D.
७. या ऊतयः Sy.
८. चतुर्षु वर्णेषु संश्रिताः Sy.
९. रक्षणः P. रक्षणम् Sy.
१०. याश्च Sy.
११ त्रिषु लोकेषु वर्तमानाः Sy.
१२. वाशब्दश्चार्थे Sy.
१३. पञ्चजनसम्बन्धिन्य ऊतयः सन्ति Sy.
१४. Omitted by P.
१५. रक्षाणि P.
१६. सर्वस्मः P. १७. कुर्वति P.
१८. VM. ignores शूर ।
१९. आह्वयामः Sy.
२०. रक्षणं गमनं वा Sy.
२१. फलानां वर्षकतमस्य Sy.
२२. खलु Sy.
२३. ०तुवे० P. वर्षणगमनः Sy.
२४. सर्वतो भवद्भिर्व्याप्तैर्मरुद्भिः Sy.
२५. उत्पादयसि, तेऽव आह्वयाम इति । यद्वा वृषगमनः सन् यस्माद्यज्ञमागत्य फलं जज्ञिषे तस्मात्तेऽवो हूमह इति Sy.
२६. ०रि P. तुर्वणिः तूर्णवनिर्हिंसको वा त्वम् Sy
२७. VM. ignores इन्द्र ।
२८. फलस्य वर्षकः, यद्वा वृषा Sy.
२९. खलु Sy.
३०. वर्षिता । हि । असि are omitted by P.
३१. यजमानानां समृद्धये धनार्थम् Sy.
३२. उत्पद्यसे Sy.
३३. वर्षितु Sy.

तथा स्वभूतबलम्[1]। धृष्टम्[2]। तव। मन। बलं च। सत्यमेवाहन्तृ[3]।

त्वं तमिन्द्र मर्त्यममित्रयन्तमद्रिवः[4]।
सर्वरथा शतक्रतो[5] नि याहि शवसस्पते[6] ॥ ५ ॥

त्वं तमिन्द्र। त्वम्। तम्। इन्द्र[7]! मनुष्यम्। शत्रूयन्तम्। वज्रिन्[8]! सर्वरथैस्त्वदीयै[9]। अभिगच्छ। शतक्रमन्[10]! बलस्य। पते[11]!

त्वामिद्वृत्रहन्तम[12] जनासो[13] वृक्तबर्हिषः[14]।
उग्रं पूर्वीषु[15] पूर्व्यं[16] हवन्ते वाजसातये ॥ ६ ॥

त्वामित्। त्वाम्। एव। अतिशयेन वृत्रस्य हन्तः[17]! जनाः। छिन्नबर्हिषः[18]। उद्गूर्णम्[19]। पूर्वीणामपि। पूर्व्यं प्रजानाम्[20]। युद्धार्थम्[21]। हवन्त इति।

अस्माकमिन्द्र दुष्टरं[22] पुरोयावानमाजिषु[23]।
सुयावानं धनेधने[24] वाजयन्तमवा[25] रथम् ॥ ७ ॥

अस्माकम्। अस्माकम्। इन्द्र[26]! शत्रुभिर्दुस्तरम्। सङ्ग्रामेषु[27]। पुरो गन्तारम्[28]। सह गच्छन्तम्। धने धने[29]। अन्नमिच्छन्तम्[30]। रथम्[31]। रक्ष।

---

१. स्वायत्तबलम् Sy.
२. धर्षकं विरोधिनाम् Sy
३. हे इन्द्र! ते पुंस्त्वम् Sy.
४. सत्येमेवाहनः P. सङ्घहन्तृ Sy
५. VM. ignores इन्द्र।
६. मर्त्यम् Sy.
७. शत्रुत्वमाचरन्तं शत्रुं वेच्छन्तम् Sy.
८. वज्रिन् D. हे वज्रवन्निन्द्र! Sy.
९. सर्वत्र व्याप्तेन रथेन। 'सुपां सुलुक्०' इत्याकारः Sy.
१०. नितरां गच्छाभिभवितुम् Sy.
११. तत P. हे शतक्रतो! Sy.
१२. पालक! Sy.
१३. हे अतिशयेन शत्रूणां हन्तः! इन्द्र! Sy.
१४. हननात् P. हः D.
१५. Omitted by P. जनान् D.
१६. आच्छादितदर्भाः। प्रवृत्तयज्ञा इत्यर्थः Sy.
१७. उद्गूर्णबलम् Sy.
१८ बर्हीषु प्रजासु मध्ये Sy.
१९. पूर्वस्य P. पुरातनं सन्तम् Sy.
२०. सङ्ग्रामाय Sy.
२१. हन्तवन्त P. आह्वयन्ते Sy.
२२ Omitted by P.
दुःखेन तरणीयम् Sy.
२३. P. adds भवसि वर्षणशीलं तव बलं तथा before सङ्ग्रामेषु। It is a part of the commentary on RV. V. 35.4.
२४. पुरतो मिश्रयितारम् Sy.
२५. अनुचरैः सह गन्तारम् Sy.
२६. धनं P. सर्वेषु धनेषु Sy.
२७. सङ्ग्रामं धनं वेच्छन्तम् Sy.
२८. रथं रंहणस्वभावं वा पुत्रम् Sy.

अस्माकमिन्द्रेहि नो रथमवा पुरंध्या ।
वयं शविष्ठ वार्यं दिवि श्रवो दधीमहि दिवि स्तोमं मनामहे ॥ ८ ॥

अस्माकम् । अस्मदर्थम् । इन्द्र । आगच्छ । अस्मदीयम् । रथम् । रक्ष । प्रज्ञया । वयम् । बलवत्तम । दीप्ते त्वयि । हविः । निधीमहि । तथा दीप्ते । स्तोमं च । उच्चारयाम ।

V.36.

स आ गमदिन्द्रो यो वसूनां चिकेतदातुं दामनो रयीणाम् ।
धन्वच्चरो न वंसगस्तृषाणश्चकमानः पिबतु दुग्धमंशुम् ॥ १ ॥

स आ गमत् । स । आगच्छतु । इन्द्र । यः । वासयितृणि । धनानि । यजमानस्य दातुम् । बुध्यते, दास्यामीति मन्यत इत्यर्थः । निरुदके देश इव वर्तमानः । तृष्णायुक्तः । कामयमानः । पिबतु । दुग्धम् । सोमम् ।

---

१. अस्मदीय एव सन् Sy.
२. अस्माकम् Sy.
३. आगत्य च शोभनबुद्धया Sy.
४. अतिशयेन बलवन् ! Sy.
५. द्योतमाने Sy.
६. त्वदनुग्रहात् अन्नं कीर्तिं वा Sy.
७. स्थापयामः Sy.
८. दीप्तेथा दीप्ते D. दिवि त्वयि Sy.
९. स्तोत्रम् Sy.
१०. करवामह इत्यर्थः Sy.
११. VM. ignores वार्यम् ॥ वार्यं वरणीयम् Sy.
Ms. D. puts the figure ॥३५॥ here to indicate the end of the thirty-fifth hymn. No such number is given in P.
१२. 'स आगमत्' इति षड्चं चतुर्थं सूक्तम् । आङ्गिरसः प्रभूवसुरृषिः । तृतीया जगती शिष्टा अनुक्तत्वात् त्रिष्टुभः । इन्द्रो देवता । अनुक्रान्तञ्च—'स आ गमत् षट् तृतीया जगती' (KSA. 26.36. p 20) इति । विनियोगो लैङ्गिकः Sy.
१३. ०गमतु P. अस्मद्यज्ञं प्रत्यागच्छतु Sy
१४. देवः Sy १५. वसूनां धनानाम्, कर्मणि षष्ठी । वसूनि धनानि Sy.
१६. यजमानाय is suggested for यजमानस्य ।
१७ प्रदातुम् Sy.
१८. जानाति Sy.
१९. VM. paraphrases दामनः as दास्यामीति मन्यते ॥ दाता दानमना वा Sy.
२०. गमने दृष्टान्तः । धनुषा सह सञ्चरन् धानुष्क इव Sy.
२१. ०नो स्तृष्णा० P. अत्यन्तं तृषितः Sy.
२२. कामयमानः सन् Sy.
२३ अभिषुतम् Sy.
२४. VM. ignores वंसगः ॥ वंसगः वननीयगमनः Sy.

आ ते हनूं हरिवः शूर शिप्रे रुहत्सोमो न पर्वतस्य पृष्ठे ।
अनुं त्वा राजन्नर्वतो न हिन्वन् गीर्भिर्मदेम पुरुहूत विश्वे ॥ २ ॥

आ ते । नवान्नस्य भक्षितस्य । हननसाधने । शिप्रे । हे हरिवः ! शूर । सोम । आरोहतु । न । पर्वतस्य । पृष्ठे वृथा तिष्ठतु । स्तुतिभि । त्वाम् । अनुमदेम । राजन् ! विश्वे वयम् । यथा । अश्वान् । युद्धे प्रेरयन् अनुमदति ।

चक्रं न वृत्तं पुरुहूत वेपते मनो मिया मे अमतेरिदद्रिवः ।
रथादधि त्वा जरिता सदावृध कुविन्नु स्तोषन्मघवन्पुरूवसुः ॥ ३ ॥

चक्रम् । चक्रम् । इव । वर्तमानम् । पुरुहूत ! अमते । एव । भयेन । मम । मन । कम्पते स्तुतिभिरमतिरिन्द्र दृष्ट्वा किमह न स्तोमीति भयम् । तथा सति रथात् । यावदेव त्व नावतरसि । तावदेवाय जरिता । हे सदा वर्धमान ! मघवन् ! कुवित् । पुरुवसुरिति—द्वे सञ्ज्ञेऽस्य म. ।

---

१. हे इन्द्र ! Sy. २. ०नेन P. D. यद्यप्ययं शिप्रावचनस्तथापि पुनः शिप्राभिधानाद् गौणोऽवगन्तव्यः । उक्तरूपे संहते वा Sy
३. हे हरिभ्यां तद्वन् ! Sv.
४. शूर is suggested for शूरः ।
५. अस्मद्दत्तः Sy. ६. प्राप्नोतु Sy.
७. न तिष्ठतीत्यर्थः । यद्वा नशब्दः पुरस्तात्प्रयुक्तोऽप्यत्रोपमार्थः । पर्वतस्य पृष्ठे उपरि प्रदेशे सोमो न, तत्र यथा विलम्भेण प्रसरति तद्वत् Sv.
८. Sy. explains अनु and मदेम separately, त्वाम् अनु as त्वया सह and मदेम as हृष्येम ॥ त्वामनु—'तृतीयार्थे' इत्यनोः कर्मप्रवचनीयत्वम् Sy.
९. हे राजमानेन्द्र ! Sv.
१०. यथान् for यथा अश्वान् D. अश्वान् तृणादिभिः Sv
११. हिन्वन् हिन्वन्तस्त्वां प्रीणयन्तः सन्तः Sy.
१२. The passage beginning with अश्वान् and ending with अनुमदति is omitted by P.
१३. VM. ignores पुरुहूत ।
हे पुरुहूत ! बहुप्रकारं बहुभिर्वाहूतेन्द्र ! Sy.
१४. भूमौ वर्तमानं चक्रमिव । यस्मादेवं तस्मात् Sy.
१५. हे बहुभिराहूत ! Sy.
१६. दारिद्र्यादस्तोतुर्वा सकाशात् Sy.
१७. भीत्या Sy. १८. ना D
१९. त्व नावपसि D अवतरसि seems to be an explanation of अधि, रथादुपरि स्थितं त्वाम् Sy. २०. स्तोता Sy.
२१. सर्वदा Sv. २२. इन्द्र ! Sy.
२३. कुवित् D बहु Sy. २४. अहमृषिः Sv.
२५. द्वे संज्ञेऽस्य may be taken as an explanation of पुरुवसुः, i.e पुरु being explained by द्वि and वसु by संज्ञा. This explanation seems to be rather farfetched, if it is meant to be the explanation of पुरुवसुः । Or the phrase may be read as अमतिः पुरुवसुरिति etc., i.e., the seer who has two names of अमतिः and पुरुवसुः may praise Indra. In that case, अमतिः is not a proper noun. It is a common noun, meaning thoughtless.
२६. There should be no sandhi on account of the *Sūtra* ईदूदेद्द्विवचनं प्रगृह्यम् । The reading should be संज्ञे अस्य instead of संज्ञेऽस्य ।

क्षिप्रम् । त्वाम् । स्तौतु ।[1]

एष ग्रावेव जरिता तं इन्द्रेयर्ति वाचं बृहदाशुषाणः ।
प्र सव्येन मघवन्यंसि रायः प्र दक्षिणिद्दरिवो मा वि वेनः ॥ ४ ॥

एषः ।[3] एषः ।[4] जरिता । अभिषवग्रावेव ।[5] तुभ्यम् । इन्द्र ! वाचम् । प्रेरयति ।[8] अत्यर्थम् ।[9] त्वाम्-इनुवानः ।[10] तस्मै सव्येन हस्तेन ।[11] प्रयच्छ ।[12] धनानि । दक्षिणेन च,[13] प्रदक्षिण ![14] हरिवः ! मा । विगतकामो भूः स्तोतरि ।[15][16]

वृषा त्वा वृषणं वर्धतु द्यौर्वृषा वृषभ्यां वहसे हरिभ्याम् ।
स नो वृषा वृषरथः सुशिप्र वृषक्र तो वृषा वज्रिन्भरे धाः ॥ ५ ॥

वृषा ।[18] वर्षिता ।[19] द्यौ ।[20] वर्षणशीलम् ।[21] त्वाम् ।[22] वर्धयतु ।[23] तथा वृषा सन् ।[24] वर्षितृभ्याम् ।[25] अश्वाभ्याम् ।[26] गच्छसि । सः । अस्मान् । वर्षितृरथ ।[27] हे सुहनो ![28] वृषकर्मन् ![29] वज्रिन् ![30] सङ्ग्रामे ।[31] धारय ।[32]

---

१. स्तोष्यति स्तूयात् । अत्र कुविच्छब्दयोगेऽपि, आख्यातस्य बहुलग्रहणान्निघातः Sy.
२. This hymn is omitted by P. VM. ignores अग्निवः ॥ हे वज्रवन्निन्द्र ! Sy.
३. एषः । एषः are omitted by P.
४. रिता P. गरिता स्तोता Sy.
५. अभिषवाश्मेव । स यथा रसं जनयति तद्वत् Sy.
६. ०ग्रावे तुम् P.,D.
७. वां P.,D.
स्तुतिम् Sy.
८. प्रेरति D. प्रेरयतीत्यर्थः Sy.
९. अत्यं P.
महत्प्रभूतं फलम् Sy.
१०. आशु सम्भक्ता सन् Sy.
११. सेव्यहनस्तेन P.
१२. प्रयच्छसि Sy.
१३. अपि Sv.
१४. प्रयच्छ or प्रदक्षस्व is suggested for प्रदक्षिण ॥ प्रयंसीति शेषः Sy.
१५. विगतकामं मा कार्षीः Sy.
१६. स्तोतुरिति D.
१७. VM. ignores मघवन् ।
१८. हे इन्द्र ! Sy.
१९. वर्षित्री Sy.
२०. द्योतयित्री स्तुतिः । द्योततेर्वीभ्यतेर्वा स्तुत्यर्थस्येदं रूपम् Sy.
२१. कामानां वर्षकम् Sy.
२२. त्वा P.
२३. यथा P.
२४. वृषा त्वम् Sy.
२५. सेक्तृभ्याम् Sy.
२६. वर्षितृभ्यमश्वास्या P. ०तृभ्यमश्वाभ्या D.
हरिभ्याम् Sy.
२७ यज्ञं प्रत्युह्यसे Sy.
२८. वर्षिरथा P. वृषीरथा D.
वृषरथश्च सन् Sy.
२९. शोभनहनो ! Sy.
३०. वर्षणकर्मन् ! Sy.
३१. वज्रायुक्तेन्द्र ! Sy.
३२. भरणवति यज्ञे वा Sy.
३३. यारं य P.
३४. VM. explains वृषा once.

यो रोहितौ वाजिनौ वाजिनीवान्त्रिभिः शतैः सचमानावदिष्ट ।
यूने समस्मै क्षितयो नमन्तां श्रुतरथाय मरुतो दुवोया ॥ ६ ॥

यो रोहितौ । यः । रोहितौ । अन्नवान् । त्रिभि । अश्वशतै । सयुज्यमानौ युद्धे । अतिदिशति । अस्मा इन्द्राय । यूने । क्षितयो मरुत । मनमन्ताम् । ह मरुत । विश्रुतरथायेन्द्राय । युष्मासु परिचरणेच्छा भवत्विति ।

V.37

सं भानुना यतते सूर्यस्याजुह्वानो घृतपृष्ठः स्वञ्चाः ।
तस्मा अमृध्रा उषसो व्युच्छान्य इन्द्राय सुनवामेत्याह ॥ १ ॥

सं भानुना ॥ अत्रिर्भौम ॥ सूर्यस्य । तेजसा । सङ्गच्छते । आहूयमानोऽग्नि । स्वञ्चन, "वैश्वानरो यतते सूर्येण" *इत्युक्तम् । एतस्मिन् काल उषसि यं । इन्द्राय । सोम सुनवामि । इति ।

---

१. इयं श्रुतरथस्य राज्ञो दानस्तुतिः Sv
२. राजा Sy.
३. रोहितवर्णौ Sy.
४. श्रुतरथः Sy.
५. गवां धनानां वोक्तसख्याभिः Sv
६. सङ्गच्छमानौ Sy.
७. अविष्ट, दवातेर्विशतेर्वा लुङीदं रूपम् Sv
८. सर्वत्र मिश्रयित्रे नित्यतरुणाय वा Sv
९. सर्वाः प्रजाः Sy
१०. समग्रमन्ताम P ०न्ताम D प्रणता भवन्तु । सेवन्तामित्यर्थः Sy.
११. इतीन्द्रसहायभूतानां मरुता सम्बोधनम् Sv.
१२. विश्रुरथावेन्द्र P. श्रुतरथाय Sy
१३. VM. ignores वाजिनौ ॥ वेजनवन्तावश्वौ Sy.
१४. 'स भानुना' इति पञ्चर्चं पञ्चम सूक्तमत्रेरार्षं त्रैष्टुभमैन्द्रम् । 'सं भानुना पञ्चात्रिः' (KSA 26 37 p.20.) इत्यनुक्रमणिका । विनियोगो लैङ्गिकः Sy.
१५. आङ्गिरसस्यात्रेरार्षम् SKN. अत्रेरार्षम् Dur.
१६. सूर्यस्य स्वभूतया SKN.
१७. तेजसा सह Sy. दीप्त्या रश्म्या SKN. भास्वता सूर्येण Dur.
१८. सम्यक् प्रयत्न करोति । उदयकाले ह्यग्नयः प्रज्वाल्यन्ते Sy. संस्पर्द्धते वा सूर्येण, अतिदीप्तत्वात् Dur.
१९. सर्वत्र हूयमानः, कर्मणि कर्तृप्रत्ययः Sv. 'तस्मा अमृध्राः' इति तच्छब्दश्रुतेर्यच्छब्दोऽध्याहार्यः । यस्य यजमानस्य आहूयमान आहवनीयः SKN. अभिहूयमानो वा Dur
२०. सञ्च० P., D. अग्निः Sy. अञ्चतिर्गत्यर्थः । सुगमनः, सुष्ठु प्रज्वाल्येन्द्रं यजत इत्यर्थः SKN शोभनगमनः स्वेन प्रकाशेन एवमस्मिन् 'सूर्येण संयतते' इत्यनेन सम्बन्धात् 'स्वञ्चाः, सु अञ्चनः स्वञ्चनः' अञ्चतेर्गत्यर्थस्य रूपदर्शनादित्युपपद्यते Dur.
* RV.I. 98.1.
२१ तस्मात् कारणात् यः यजमानः Sy. नच केवलाय तस्मै । किं तर्हि ? यो दारिद्र्याद् यष्टुमशक्नुवन् केवलं श्रद्धालुतया SKN. अपिच यः अयज्वापि श्रद्धाद्वितीयो दरिद्रः कश्चित् Dur. २२. इन्द्रार्थम् Dur.
२३ सोमं सुनवानि is suggested for सोम सुनवामि ॥ अभिषुणुमः सोममिति Dur.
२४. सोम सुनवां मवि P. इत्येवमाशंसनम् SKN. एवम् Dur.

वदति[1]। तस्मै[2]। अमृध्राः[3]। उषस । व्युच्छन्तु[4] या न हिंसन्ति[5] ता अमृध्रा[6] इति[7]।

समिद्धाग्निर्वनवत्स्तीर्णबर्हिर्युक्तग्रावा सुतसोमो जराते।
ग्रावाणो यस्येषिरं वदन्त्यध्वर्युर्हविषा सिन्धुम् ॥ २ ॥

समिद्धाग्निः। यज्ञार्थं समिद्धाग्नि[8]। स्तीर्णबर्हि[9] सन्। इन्द्र भजते[10]। तथाभिषवाय युक्तग्रावा[11]। सुतसोमश्च[12]। एनं[13] स्तौति[14]। यस्येन्द्रस्य[15]। ग्रावाण[16]। अभिषुत[17] सोमम्। वदन्ति[18]। तस्मै[19] स्यन्दनशीलं सोमम्। पुरोडाशादिना[20] सह। अवगमयति[21]। अध्वर्यु[22]।

वधूरियं पतिमिच्छन्त्येति य ईं वहाते महिषीमिषिराम्।
आस्यं श्रवस्याद्रथ आ च घोषात्पुरु सहस्रा परि वर्तयाते ॥ ३ ॥

वधूः[23]। वधू। इयम्। पतिम्[24]। इच्छन्ती[25]। गच्छति[26]। य[27]। एनामिन्द्र[28] उषसम्। वहाते[29]। महिषीम्।

---

१. बूतेऽध्वर्युं प्रति Sy. आह तस्मा अपि SKN. ब्रवीति तस्यापि कल्याणाभिव्याहारिणः सुप्रभाता एवोषसः, किमुत यः सुनोतीत्यभिप्रायः Dur.

२. यजमानाय Sy. तादर्थ्यं एषा चतुर्थी षष्ठ्यर्थे वा। तदर्थं तस्य वा SKN. तस्य यजमानस्य किम् ? इत्युच्यते तस्मा एव Dur.

३ अमृध्राः P. अहिंसिताः Sy. मृधिर्हिंसार्थः। अहिंसिताः SKN. अम्रृता अम्लानाः Dur

४. उदयकालेऽग्निः प्रज्वालितस्तस्मात् सोमयागं कुर्म इति यो ब्रूते तस्य सुदिनानि भवन्तीत्यर्थः Sy. व्युच्छन्ति कुर्वन्तीत्यर्थः SKN. विभान्तीत्यर्थः। यस्यैवमभिहूयमानोऽग्निर्नित्यकालमेव सूर्येण संयतते तस्यैव पुण्यकृतः सुप्रभाता रात्रयो भवन्ति नेतरस्यायज्वन इत्यभिप्रायः Dur.

५. हिंसिता P.

६. अमृध्रा P. The passage, या न . . . अमृध्राः, should immediately follow अमृध्राः and precede उषसः।

७ VM. ignores घृतपृष्ठः ॥ प्रदीप्तज्वालो घृतयुक्तपृष्ठप्रदेशो वा Sy. घृतमाहुतिलक्षणं पृष्ठे यस्य स घृतपृष्ठो घृतेन वा स्पृष्टो घृतपृष्ठः SKN. यस्य यजमानस्य नित्ययायजूकत्वात् तेषु तेषु कर्मसु ज्वलितोऽग्निः. . .घृताक्तपृष्ठः Dur. 'स्वञ्चाः सु अञ्चनः' N.5.7., SKN. II.323.

८. प्रदीप्ताग्निः Sy.

९. ०र्हिषः P. प्रस्तृतबर्होऽयं यजमानः Sy.

१०. सम्भजते Sy.

११. नियुक्ताभिषवपाषाणः Sy.

१२. अभिषुतसोमः Sy.

१३. ०सोमोऽचैनं P. १४. जरति स्तौति Sy

१५. यस्य अध्वर्योः Sy.

१६. अभिषवसाधनाः Sy

१७. एषणीयं गमनशीलं वा शब्दम् Sy.

१८. Omitted by P.

१९. यदन्ति P. २०. स्मै P.

२१. हविषा सह Sy.

२२. अवनेजनीरवगच्छति Sy.

२३. सः अध्वर्युः Sy.

२४. इन्द्रस्य पत्नी Sy.

२५. स्वप्रियम् Sy.

२६. ०न्ति० P. यज्ञगमनाय प्रवृत्तमिच्छन्ती Sy.

२७. अनुगच्छति Sy.

२८. इन्द्रः Sy. २९. य हिना० P.D.

३०. वाता P. वाहा० D. वहति Sy.

इष्टाम्[1]। अस्मिन्नवस इन्द्रस्य। रथोऽस्माकम्। अन्नमिच्छतु[2]। आघोषयतु[3]। च। पुरूणि धनानि[4]। सहस्राणि। स्तोतृभ्य परिवर्तयति[5] स्वस्मान्निर्गमयति[6]।

न स राजा व्यथते यस्मिन्निन्द्रस्तीव्रं सोमं पिबति गोसखायम्।
आ सत्वनैरजति हन्ति वृत्रं क्षेति क्षितीः सुभगो नाम पुष्यन् ॥ ४ ॥

न स राजा[7]। चलति[8]। यस्मिन् राजनि[9]। इन्द्र.। तीव्ररसम्[10]। सोमम्। पिबति। पयोमिश्रणम्[11]। सोऽयमिन्द्र। भूतैः[12] सह[13]। आगच्छति[14]। हन्ति च। उपद्रवम्[15]। अधिवसति च[16]। भूमीः[17]। सधनः[18]। उदकम्[19]। पुष्यन्[20]।[21]

पुष्यात्क्षेमे अभि योगे भवात्युभे वृतौ संयती सं जयाति।
प्रियः सूर्ये प्रियो अग्ना भवति य इन्द्राय सुतसोमो ददाशत् ॥ ५ ॥

पुष्यात्[24]। क्षेमे[25] लब्धपरिपालनापेक्षायाम्। स पोष पुष्यति[26]। अभिभवति[27] च शत्रून्। अलब्धलिप्सायाम्[28]। द्वौ[29] च। मार्गौ[30]। सङ्गच्छमाने[31]। यजति[32]। तथा सूर्ये। अग्नौ च। प्रिय.। भवति। सुतसोम।

---

१. महीवीमिष्टाम् P. गमनवतीम् Sy.
२. अन्नमिच्छति Sy.
३. आघुष्यति, शब्दयति Sv.
४. अत्यधिकम् Sy.
५. निधाना P. निधना D.
६. परितो वर्तयति। प्रापयति Sv.
७. स्वास्मा० P.,D.
८. VM. ignores आ ॥ आ अर्वागस्मदभिमुखम् Sy.
९. व्यथितो भवति Sy.
१०. तदीये यज्ञे Sy.
११. मदजनकम् Sy.
१२. गोसखायम्—विकारे प्रकृतिशब्दः, क्षीरादिभिर्मिश्रणवन्तम् Sy.
१३. स राजा Sy.
१४. भूतैः P. सत्त्वभिरनुचरैः Sv.
१५. सर्वतो गच्छति Sy.
१६. पापं वैरिणं वा Sv.
१७. गच्छति Sy.
१८. Omitted by P.
१९. प्रजाः। अथवा क्षितीर्निवासान्निवसते Sy.
२०. शोभनसुखः Sy
२१. नामकं धनमिन्द्रस्य स्तोत्रं वा Sy.
२२. पोषयन् Sy
२३. VM. ignores न। and राजा।
२४. Omitted by D.
२५. प्राप्तस्य धनस्य रक्षणे Sy.
२६. पोषयेत् बन्ध्वादीन् Sy.
२७. भवति। अभीत्यनर्थको धात्वर्थानुवादी वा। प्रभुर्भवतीत्यर्थः Sy.
२८. अलब्धलिप्सायां P. अलब्धस्य प्राप्तौ च Sy.
२९. उभे Sy. ३०. वर्तमाने Sy.
३१. सङ्गच्छमाने qualifying मार्गौ should have been सङ्गच्छमानौ but VM. has probably used the fem. as going with वृति of the original ॥ नियते अहोरात्रे Sy.
३२. जयति is suggested for यजति ॥ सम्यग्जयति। ते सुखकरे स्यातामित्यर्थः Sy.
३३. यथा P.

सन् । यः[1] । इन्द्राय । प्रयच्छति[2] । "द्वे स्तुती[3] अशृणवम्" इति मन्त्र[4] ।[5]

V. 38.

उरोष्टे[6] इन्द्र राधसो विभ्वी रातिः शतक्रतो ।
अधा नो विश्वचर्षणे द्युम्ना सुक्षत्र मंहय ॥ १ ॥

उरोष्टे[6] । इन्द्र ! तव । महतः[7] । धनस्य । महत्[8] भवति । दानम् । शतप्रज्ञ[9] ! तथा[10] सत्यम् । अस्मभ्यम् । सर्वमनुष्य[11] ! सुबल[12] ! अन्नानि[13] । प्रयच्छ[14] ।

यदीमिन्द्र श्रवाय्यमिषं शविष्ठ दधिषे ।
पप्रथे दीर्घश्रुत्तमं हिरण्यवर्ण दुष्टरम् ॥ २ ॥

यदीमिन्द्र । यदि[15] । एतत् । इन्द्र ! श्रवणीयम्[16] । इष्यमाण[17] धनम् । बलवत्तम[18] ! धार्य[19] । दीर्घकाल श्रोतव्यम्[20] । शत्रुदुस्तरम्[21] । हे हितरमणीयवर्ण[22] ![23]

---

१. सत्यः for सन् । यः P.,D.

२. सोमं ददाति Sy.

३. श्रुती P.

४. RV. X.88.15.

५. VM. explains प्रियः once only and ignores सम् । Ms. D. puts the figure ॥३७॥ here to indicate the end of the thirty-seventh hymn. No such number is given in P.

६. 'उरोष्टे' इति पञ्चर्चं षष्ठं सूक्तमत्रेरार्षमानुष्टुभमैन्द्रम् । 'उरोरानुष्टुभम्' (KSA. 26.38. p.20.) इत्यनुक्रान्तम् । विनियोगो लैङ्गिकः Sy.

७. प्रभूतस्य Sy.

८ मह P. महती Sy.

९. बहुकर्मन् ! Sy.

१०. ०प्रज्ञात्वा P.
अतः कारणात् Sy.

११. हे सर्वस्य द्रष्टः ! Sy. Ngh. 2.3.

१२. शोभनधनेन्द्र ! Sy. क्षत्रमिति धननाम Ngh. 2.10.

१३. द्युम्नानि धनानि Sy. द्युम्नमिति धननाम Ngh. 2.10. द्युम्नं द्योततेः । यशो वान्नं वा N.5.5.

१४. ०च्छः P.

१५. यत् Sy.

१६. ईं सर्वतः Sv.

१७. श्रवणीयमाणयम् P., D.

१८. इष्यामाणं P. अन्नम्, इषशब्दो नपुंसकलिङ्गोऽप्यस्ति Sy.

१९. अतिशयेन बलवन् ! Sy.

२०. ददासि वा Sy.

२१. अतिदूरश्रवणीयतमम् । सर्वत्र कीर्त्यमित्यर्थः Sy.

२२. अनभिभाव्यमुक्तलक्षणं प्रथते Sy.

२३. ०र्णः P., D. इन्द्र ! Sy.

२४. VM. ignores पप्रथे ॥ प्रथते Sy.

शुष्मासो[1] ये ते[2] अद्रिवो मेहना[3] केतसापः[4]।
उभा देवावभिष्टये दिवश्च[5] गम्श्च[6] राजथः[7] ॥ ३ ॥

शुष्मासः[8]। रश्मय। ये। तव। वज्रिन्! महनीय[9]! विज्ञानस्पृश[10]। तैस्त्व तादृशैरग्निश्चौभौ। द्यावापृथिव्यौ[11]। अभीष्टसिद्ध्यर्थम्। राजथ[12]।

उतो नो[13] अस्य कस्य[14] चिद्दक्षस्य[15] तव[16] वृत्रहन्।
अस्मभ्यं[17] नृम्णमा भर[18] अस्मभ्यं[19] नृमणस्यसे[20] ॥ ४ ॥

उतो नः। अपि च। अस्मभ्यम्। बलस्य प्रयच्छ बल प्रयच्छेत्यर्थ। किं च। अस्मभ्यम्[21]। धनम्[22]। आहरेति। अस्मभ्यम्[23]। धनप्रदानमिच्छसि[24]।

नू[25] ते[26]। क्षिप्रम्[27]। तव। अभीष्टाभि[28]। आभिः स्तुतिभि। त्वदीयमुखे[29]। स्याम[30]। शोभनगोपनाः[31]। शूर[32]! स्याम[33]। सुगोपाः[34]।

---

१. बलभूता मरुतः सन्ति Sy.
२. त्वदीयाः Sy.
३. हे वज्रवन्निन्द्र! Sy.
४. महनीयाः Sy.
५. प्रज्ञापकं कर्मान्तरिक्षं वा स्पृशन्तः Sy.
६. वाशराग्निश्च P. त्वं च मरुत्समूहश्चेत्युभौ युवाम् Sy.
७. ०थिवीः P. द्युलोकात् गमश्च भूमेः सकाशात् Sy. ८. अभितो गमनाय Sy.
९. ईशाथे Sy.
१०. VM. ignores देवौ and च।
११. प्रवृद्धस्य वातुर्वा Sy.
१२. पुनःश्रुतिरादरार्था Sy.
१३. नृमणं धनम् Sy.
१४. ०हरेत्यंह्यस्मभ्यं त्वं P. हे इन्द्र! यतस्त्वमस्मभ्यम् Sy.
१५. धनमिच्छसि Sy.
१६. VM. ignores अस्य। कस्य। चित्। तव and वृत्रहन्॥ अस्य तव स्वभूतेभ्यः॥ कस्यचित् अनिर्देश्यस्य हे इन्द्र Sy.
१७. ते P.,D.
१८. शीघ्रं समृद्धा भवेमेति शेषः Sy.
१९. अभिगमनैः Sy.
२०. त्वदिसु० P. VM. explains तव and शर्मन् together as त्वदीयसुखे॥ तव शर्मणि सुखे सति Sy.
२१. भवेम Sy.
२२. शोभनरक्षणाः Sy.
२३. हे शूर! तव शर्मणि Sy.
२४. स्यमा P. भवेम। पुनरुक्तिरादरार्था Sy.
२५. ०पा P.
२६. VM. ignores शतक्रतो and इन्द्र। Ms. D. puts the figure ॥३८॥ here to indicate the end of the thirty-eighth hymn. No such number is given in P.

V. 39.

यदिन्द्र चित्र मेहनास्ति त्वादातमद्रिवः ।
राधस्तनो विदद्वस उभयाहस्त्या भर ॥ १ ॥

यदिन्द्र ॥ यास्कः—'यदिन्द्र चायनीय महनीय धनमस्ति । यन्म इह नास्तीति वा । त्रीणि मध्यमानि

---

१. 'यदिन्द्र चित्र' इति पञ्चर्चं सप्तमं सूक्तमत्रेरार्षमैन्द्रम् । अन्त्या पङ्क्तिः शिष्टाः पङ्क्त्यन्तपरिभाषयानुष्टुभः । 'यदिन्द्र पङ्क्त्यन्तम्' (KSA. 26.39.p.20.) इत्यनुक्रमणिका । आभिप्लविकेषूक्थ्येषु तृतीयसवने आद्यस्तृचोच्छावाकस्य वैकल्पिकः स्तोत्रियः । सूत्रितञ्च 'यदिन्द्र चित्र मेहना यस्ते साधिष्ठोऽवसे' (ĀSS. 7.8.) इति Sv.

२. ०न्द्रः P. D. अत्रेर्भौमस्येयम् SKN. अत्रेर्भौमस्यार्षम् Dur.

३. The longer recension of the *Nirukta* adds चित्रम् immediately before चायनीयम् ॥ पूज्यम्SKN. पूजार्हम् Dur.

४. मंहतेर्दानकर्मणः । अकारस्येकारोऽनुस्वारलोपश्च । शाकल्यपक्षे—मंहनीयं दानार्हमस्ति तव SKN.

५. अस्ति किञ्चित् Dur.

६. छन्दोगानान्तु—मेहनाशब्दो नैवास्ति । 'यदिन्द्र चित्र मेहनास्ति' इत्येवंरूपः पाठः । तेषा 'चित्र म इह न अस्ति' इत्येषां पञ्चानां पदानां 'म इह न' इत्येवंरूपाणि मध्यानि पदानि । यन्मे मम गृहे नास्तीत्यर्थः । परार्थं वा प्राप्यते । असद्वेत्यर्थिधर्मप्रसङ्गेन चेदमस्या ऋचश्शाखान्तरे वेदान्तरे वाऽधीतस्यावयवस्येदं व्याख्यानं द्रष्टव्यम् SKN. अथवा 'यन् म इह नास्तीति' एतस्मिन्वाक्यैकदेशे 'त्रीणि पदानि मध्यमानि' मध्ये भवन्तीत्यर्थः । कथं 'मेहना' इत्येषा संहिता ? 'मे इह न' इति, एतान्यस्याः संहितायाः पदानि ४ एवमेष वाक्यावयवः पञ्चपदो भवति । अत्र 'यत्' इति प्रथमं पदम् । अतः परं 'मे इह न' इत्येतानि त्रीणि मध्यमानि पदानि । 'अस्ति' इति पञ्चमं पदम् । एवमभिप्रेत्य 'इन्द्र चित्र' शब्दादपकृष्योक्तं—'त्रीणि मध्यमानि पदानि' इत्याह । यदेवं पदविभागस्तदा कोऽर्थः ? इत्युच्यते—यन्मे मम गृहे नास्ति धनं तव च तदस्ति धनम्, दातव्यं च त्वया तावत् स्तोतृभ्यः । बह्वृचानां—'मेहना' इत्येकं पदम् । छन्दोगानां—त्रीण्येतानि पदानि 'म इह न' इति तदुभयं पश्यता भाष्यकारेणोभयोः शाकल्यगार्ग्ययोरभिप्रायावत्रानुविहितौ । एवञ्जातीयनिर्वचनोपदर्शनमुभयोश्च प्रामाण्यख्यापनार्थम् । आह—पदकारयोः पदविकल्पे कोऽभिप्राय इति ? उच्यते विद्यावान् विद्यमानधनो वा प्रतिविशिष्टतरं प्रार्थ्यते—यच्च यस्य गृहे नास्ति स तद्विशिष्टमविशिष्टं वा प्रार्थयेत । नचानयोरुभयोरपि विशेषलिङ्गमस्ति तस्माद् 'मंहनीयम्' इत्येतयार्थवत्या 'मेहना' इत्येवमेकं पदमभिप्रेतं शाकल्यस्य । गार्ग्यस्य पुनः—यन्म इह (गृहे) नास्ति तदाहरेत्यभिप्रायः । एवमत्र विशेषलिङ्गाभावाद् विप्रतिपत्तिः । एवमन्येष्वपि शाखान्तरपदविकल्पेष्वनुविधानमर्थाविरोधेन कर्तव्यम् । एवमयं मेहनाशब्दो राधःशब्दसामानाधिकरण्ये वर्तमानो यन्महनीय राधः, यद्वा मद्गृहे नास्तीति धनविशेषणत्वात् कमन्यमर्थं ब्रूयात् ? तस्मान्मेहनेति सामर्थ्याद्धनविशेषणमेतदित्युपपत्तिः Dur.

पदानि । त्वया नस्तद् दातव्यम् । अद्रिवन् ! अद्रिरादृणात्येनेन । अपि वात्तेः स्यात् । ते सोमादो । इति ह विज्ञायते । राध इति धननाम । राध्नुवन्त्यनेन । तन्नस्त्व वित्तधनोभाभ्या हस्ताभ्यामाहर इति ।

यन्मन्यसे वरेण्यमिन्द्र द्युक्षं तदा भर ।
विद्याम तस्य ते वयमकूपारस्य दावने ॥ २ ॥

यन्मन्यसे । यत् । मन्यसे । वरणीय धनम् । इन्द्र ! दीप्तम् । तदस्मभ्यम् । आभर ।

---

१. अस्मभ्यम् Dur. २ त्वयास्तदा० P. कृत्यार्थे प्रत्ययः । यद्देयं त्वया स्तोतृभ्यो यष्टृभ्यश्च दातुं सङ्कल्पितमित्यर्थः SKN. दातव्यमेवावश्यं सुचिरमपि स्थित्वा Dur

३. अद्रिवः P., D. अद्रिर्ग्रावा तद्विकाराद्वा दारणाद्वा । वज्रोऽत्राद्रिरुच्यते, तेन तद्वता । अद्रिः, आवृणाति विदारयत्यनेन सोमादि गवादि वा । अपि वात्तेः स्याद् भक्षणार्थस्य । अद्रयो ह्यभिषवकाले सोममदन्ति । तथा च मंत्रेऽपि 'सोमादो' (RV. X. 94. 9.) इत्यस्ति । सोमादनमेषां विज्ञायते SKN. अतो ब्रूमो हे अद्रिवो वज्रिन् ! अद्रिसारमयमेव ह्यायुधं भवतीति अद्रिवज्र उच्यते । आह—अद्रिः कस्मात् ? उच्यते—आवृणात्यादरयतीत्यर्थः । अथवा सोमाभिषवग्रावभिस्तद्वानद्रिवान् स्यात् । तैरपि हि सोम आदार्यते । 'अपि वा' 'अत्तेः स्यात्' अद्रिः । कुत एतत् ? निगमात् । कतमोऽसौ निगम इति ? 'ते सोमादो हरी इन्द्रस्य निसते' (RV X 94.9.) इत्येतस्मिन्मन्त्रे विचार्यमाणे ज्ञायतेऽत्तेरद्रिः स्यादिति व्याख्यात एव शेषः Dur.

४. ०ह्रीणात्ये० P. ०वृणात्यं० D.

५. ०त्ते P., D.

६. RV. X. 94. 9. P. and D. add हि between ते and सोमादः ।

७. विज्ञाते P. विज्ञाति D.

८. राध्नुवत्यनेन P. राध्नुवत्येनेन D. राधो धनम् किमर्थमेतदुच्यते ? पठितमेवं ह्येतदुच्यते प्रसङ्गेन निर्वचनप्रदर्शनार्थम् । राध्नुवन्ति साधयन्त्येतेन धर्मादीन् पुरुषार्थानिति SKN राध इत्येतद् धननाम स्मारयति । व्यभिचारित्वाद्वा शब्दानां धननामसु पठितमपि सदेतदवधारयति, इहाप्येतद्धननामैव नात्र व्यभिचारोऽस्तीति । पठितामिधाननिरूपणेषु सर्वेष्वेतौ समाधी योज्यौ Dur.

९. वतस्त्वं P. तनस्त्वं D. अस्मदर्थमस्मभ्यं दातुमित्यर्थः SKN.

१०. विदद्वसो P., D धम is added after वित्तधन by P. and D. विन्दति लभते वसूनि धनानि यो विदद्वसुर्धनाना लब्धा, तस्येदं सम्बोधनम् । लब्धधनेत्यर्थः SKN हे आप्तधन ! साम्प्रतमेव प्राप्तधन ! Dur.

११. द्विवण्डघादियम् । उभाभ्या हस्ताभ्यामित्यर्थः । 'उभौ समुब्धौ भवतः । 'उभ उम्भ पूरणे' सम्पूरितौ परस्परेण । उभशब्दस्य द्विगत साहित्यमित्यर्थः । यो यश्च साहित्यसम्पूरितौ भवतः SKN. 'उभौ समुब्धौ भवतः' सम्पूर्णावित्यर्थः Dur.

१२. ०माभर P., D. आभर प्रभूतमित्यर्थः SKN. अकृपणमाभर, आहर मा चिरायेत्यभिप्रायः Dur. उभौ समुब्धौ भवतः N.4.4.; SKN. II.206. १३. अत्रेरार्षम् SKN. अत्रेर्भौमस्येदमार्षम् Dur. १४. जानीषे त्वम् Dur.

१५. अत्यन्तोत्कृष्टमित्यर्थः । किं पुनस्तत् ? सामर्थ्यादिदम् SKN. वरणीयमेतद्धनमिति Dur.

१६. हे इन्द्र ! Sy., SKN., Dur.

१७. अन्नम् Sy. द्युशब्दो दीप्तिवचनः । 'क्षि निवासगत्योः' । दीप्तेर्निवासभूतमत्यन्तोज्ज्वलमित्यर्थः SKN. यद् द्युतिनिवासभूतं द्युतिमदित्यर्थः Dur. १८. द्युक्षम् Sy.

तस्य[1] । तव[2] दातुः प्रसादेन । वयम् । अकूपारम्[3] । लभेमहि[4] ।

---

१. तादृशस्योक्तलक्षणस्य Sy. कदाचित् त्वमाहृत्यापि न दद्याः ? अतो ब्रूमस्तस्य त्वयाऽऽहृतस्य धनस्य Dur. २. तव सम्बन्धिनः Sy. तव स्वभूतस्य SKN. Dur.

३. अरूपारं P. अकुत्सितः पारोऽन्तो यस्य तादृशस्यान्नस्य Sy. 'पॄ पालनपूरणयोः' इत्यकुपरणं पारणं पूरणं वा यस्य तदकूपारं तस्याकुत्सितपालस्य सारवत्त्वात् सम्यक् पालितस्येत्यर्थः । अकुत्सितपूरणस्य वा प्रभूतत्वात् सर्वजनभाजनपूरणसमर्थस्येत्यर्थः । भाष्ये अकूपरणस्येति निर्वचनं वरणस्येत्यर्थकथनम् । यद्धि, अकुत्सितं वरणं परणं तद् भवति । अकुत्सितपालितं सम्यक् पूरणसमर्थं चेत्यर्थः । अनेकार्थतां दर्शयितुमाह--आदित्योऽपीत्यादि अकूपारः सन्नकूपारो भवति । अकुत्सितं पालयितेत्यर्थः । आदित्यो ह्यकुत्सितं रश्मिभिः पालयति पूरयति वा । दूरपार इति हेतुवचनं यतोऽसौ दूरं पालयिता पूरयिता वा । आपूर्ता त्रयाणामपि लोकानाम् । समुद्रोऽपीत्यादि । सोऽपि ह्यकूपारो भवति, यतो महापारः । अत्रापि पारशब्देन पालनमुच्यते पूरणं वा । महापालनो महापूरणो वेत्यर्थः । समुद्रो हि पालनं बहुसत्त्वाश्रयत्वात् पूरणं वोदकप्रभूतत्वात् । कच्छपोऽपीत्यादि । स तु न कूपमृच्छति गच्छतीत्यकूपारः । कूपशब्द उपपदे ऋतेर्गत्यर्थस्य कर्मणि कूपारः । अकूपारः कच्छपो हि सति सम्भवे न नदीं गच्छति न कूपमल्पोदकत्वात् SKN. किंलक्षणस्य ? अकुत्सितपूरणस्येत्यर्थः । येन लब्धेन सुपूर्णमात्मानं मन्यामहे पर्याप्तमैहिकाय च श्रेयसे आमुष्मिकाय चेत्यर्थः ।

तस्मादकूपारस्येत्येष शब्दोऽतिपरोक्षवृत्तिः । 'अकूपरणस्य' इत्येवं परोक्षवृत्तित्वेनावस्थाप्य ततः 'अकुत्सितपूरणस्य' इत्येवं प्रत्यक्षवृत्तित्वेन व्याख्यायते । अत्र 'कुः' इति कुत्सार्थः, परणं पूरणमुच्यते, कुत्सितं परणं कुपरणं, न कुत्सितं परणमकुपरणम् । तस्याकुपरणस्य प्रभूतस्येत्यर्थः एतस्मिन्मन्त्रे 'अकूपारस्य, दावने' इत्ययमनयोः पदयोरनुक्रमः । समाम्नाये पुनः 'दावने' 'अकूपारस्य' इति मन्त्रपाठव्यतिक्रमेणानुक्रमः । तेन ज्ञायते --अन्यैरेवायमृषिभिः समाम्नायः समाम्नातः, अन्य एव चायं भाष्यकार इति । एको हि समाम्नानं भाष्यं च कुर्वन् प्रयोजनस्याभावादेकमन्त्रगतयोः पाठानुक्रमं नाभङ्क्ष्यत् । अविवक्षितार्थाश्चैते मन्त्रे निगमाः । तेषु सम्पत्त्या काकतालीयन्यायेन कस्मिंश्चिदेकस्मिन्नेव निगमे द्वे पदे आगच्छतस्ते यथोपागते एव भाष्यकारो व्याचष्टे, इत्यदोषः Dur.

४. स्याम Sy. आहृतस्य च सतो विद्याम । विदिलाभे विन्देमहि लभेमहि SKN.

५. VM. ignores दावने ॥ दावने दाने Sy. दीयत इति दावं देयमुच्यते । चतुर्थी षष्ठ्यर्थे । तच्छृतेश्चैकदेशमिति शेषः । देयस्यैकदेशमित्यर्थः । अथवा दावन इति द्वितीयार्थे चतुर्थी । तस्य तव स्वभूतस्य धनस्यावयवभूतं यद् धनं दावं देयं तदित्यर्थः SKN. दानस्येत्यर्थः । ईदृशस्य भावत्कस्य धनस्य वयमेव लब्धारः स्यामेत्यभिप्रायः । एवमिह यन्मन्यसे वरेण्यं द्युक्षं च तदाभरेतीन्द्र उच्यमानो धनसन्निधानाद् दानादन्यत् किमुच्यते ? धनमेव हि प्रायेण मनुष्यैः प्रार्थ्यते । तस्मादत्राश्रूयमाणोऽपि धनशब्दोऽध्याहृतः । तच्च पुनः प्रार्थ्यमानं बहु प्रार्थ्यते । दानसम्बन्धादेव 'दावने' इत्येष शब्दो दानार्थ इत्युपपत्तिः Dur.

अत्र शाटचायनकम् । 'ऋषयो ह वै सत्रादुत्थायायन्त[1] । प्रयुञ्जानास्ते होचु[2]: एत, किञ्चिदेव यक्षं पश्यामेति[3] । ते होचु —अकूपारो वा[4] अय काश्यप. समुद्रे तन्महद्[5] यक्षम्[6] । एत, तं पश्यामेति[7] । त हान्वभ्युपेयु[8] । तेभ्यो ह[9] नाविरास । ते होचु —एत, इन्द्रमेव स्तवाम । स वा अस्येशे । स एव न इम[10] दर्शयिष्यतीति । तेऽत्रिमब्रुवन् ऋषे ! त्व स्तुतादिति । स एतमत्रिस्तृचमपश्यत् । तेनैनमुपायन् । यदिन्द्र चित्र मेहनेति । स हेक्षाञ्चक्रे[11] महद् बत म[12] ऋषयो याचन्त्युभयाहस्त्याभरेति वा आहुरिति 'यत्ते' दित्सु[13] प्रराध्यम्[14]' इति स हेक्षाञ्चक्रे दृढ बत मामृषयो याचन्त इति[15] । न वै जज्ञौ[16] । अकूपार दिदृक्षन्त इति यन्मन्यसे वरेण्यमिति । स ह जज्ञौ[17] । अकूपार वै दिदृक्षन्त इति । त ह यदोदम्यब्रुवाच[18] । इममेव मामृषयो महदिवोभयाहस्त्याभरेत्यवोचन्निति[19] तमपश्यन्त । एता कामसनय ऋच इति ।

तत्र **यास्कः**—'अकूपरणस्य[20] दानस्य[21]' इति । यद्वा—अकूपारस्य तव दानाय[22] सम्भरेमेति ।

यत्ते दित्सु प्रराध्यं मनो अस्ति श्रुतं बृहत् ।
तेन दृळ्हा चिदद्रिव आ वाजं दर्षि सातये ॥ ३ ॥

यत्ते दित्सु[23]**[24]** । यत् । ते[25] । दानेच्छु । प्रकर्षेण पूजनीयम् । मन[26] । विद्यते[27] । विश्रुतम् । महत् । तेन

---

१. **तत्रादुवस्थात्यायन्ते** P. **तत्रादुपस्थात्यायन्ते** D.
२. **होतुः** P.,D.
३. **वाग्याम इति** P. **०म इति** D.
४ **वायं क०** P.,D.
५ **तमु हव्** P. **तम्म हव्** D.
६. **०म इ०** P.,D.
७. **हान्युभवेः** P.
८. Satya omits it but Jaiminīya reads it.
९. **एवकमत्रिचमप०** P.
१०. Śātya and Jaiminīya omit **अत्रिः** ।
११. **०वी०** D. १२. **मम्** P.,D.
१३. **चान्तम्** P. **चान्त** D.
१४. **०रेति** P. **रिति** is crossed by D. cf. B. Ghoṣa. Op. Cit. XVI, p. 46.
१५ **दिक्षु** P.,D.
१६. RV. V. 39. 3.
१७. **इतीति** P. **इति इति** D.
१८. **गा** P.,D.
१९. **ज्ञौ** P.
२०. **सहाज्ञौ** P.,D.
२१. **पदो०** P.,D.
२२. **महादि०** P.,D.
२३. **०त्यपोवन्नि०** D.
२४. **अकूवर०** D.
२५ **विद्याम तस्य ते वयमकूपरणस्य दानस्य । आदित्योऽप्यकूपार उच्यते । अकूपारो भवति दूरपारः । समुद्रोऽप्यकूपार उच्यते । अकूपारो भवति महापारः । कच्छपोऽप्यकूपार उच्यते । अकूपारो न कूपमुच्छतीति** N. 4. 18., SKN. II. 246
२६. **वाजपेये अतिरिक्तोक्थ्ये 'यत्ते दित्सु' इत्येषा । सूत्रितञ्च—'यत्ते दित्सु प्रराध्यं त्वामिच्छवसस्पते' (ĀŚS.9.9.) इति** Sy.
२७. **हे इन्द्र !** Śy.
२८. **तव** Sy. २९. **दाने च** P.,D.
३०. **प्रकर्षेण स्तुत्यम्** Sy.
३१. **अस्ति** Sy.

मनसा। दृढानि[1]। अपि शत्रुपुरादीनि। अस्मभ्यं दानाय[2]। अन्नम्। आदरय[3], आदृणातिर्द्विकर्मकश्च भवति[4]।

मंहिष्ठं वो मघोनां राजानं चर्षणीनाम्।
इन्द्रमुप प्रशस्तये पूर्वीभिर्जुजुषे गिरः॥ ४॥

मंहिष्ठम्[6]। दातृतमम्[7]। युष्माकम्। हविष्मताम[8]। राजानम्। मनुष्याणाम्। इन्द्रम्। स्तोतुम्[9]। बह्वीभिः[10] स्तुतिभिः। उपसेवते[11]। स्तोताय होता[12]।

अस्मा इत्काव्यं वचं उक्थमिन्द्राय शंस्यम्।
तस्मा उ ब्रह्मवाहसे गिरो वर्धन्त्यत्रयो गिरः शुम्भन्त्यत्रयः॥ ५॥

अस्मा इत्[13]। अस्मै। एव। कविकृतम्[14]। वचः। शसनीयम्। उक्थं[15] च। ततश्च[16] तस्मै। एव[17]। स्तोत्रैरुह्यमानाय[18]। स्तुती। वर्धयन्ति। अत्रय[20]। स्तुती[21]। अलङ्कुर्वन्ति[22]। अत्रय इति[24]।

---

१. वृढम् Sy.
२. अस्मत्सम्भजनाय लाभाय वा Sy.
३. आदरयसि Sy.
४. ०ति द्वि० P.
५. VM. ignores अत्रिवः॥ हे वज्रवन्निन्द्र! Sy.
६. ०ष्ठमं P.
७. मद्दातृ० D.
अतिशयेन पूज्यम् Sy.
८. हविर्लक्षणधनवताम् Sy.
९. प्रशंसितुम् Sy.
१०. पुरातनीभिर्वाग्भिः Sy.
११. उपेत्य सेवन्ते Sy.
१२. ०पसे स्तोत्रयं P.
स्तोतारः Sy.
१३. कवेः स्तोतुः सम्बन्धि, यद्वा 'कु शब्दे' शब्दनीयम् Sy.
१४. वाग्रूपम् Sy.
१५. उक्तं P.,D. शस्त्रम् Sy.
१६. यस्मादेवं तस्मात् Sy.
१७. इन्द्राय Sy.
१८. ए D.
१९. ०रू० D.
परिवृढस्य स्तोत्रस्य वाहकाय Sy.
२०. ०या D. अत्रिगोत्राः Sy.
२१. गिरः Sy.
२२. दीपयन्ति Sy.
२३. ०वंत्यः त्रय P.,D.
पुनरुक्तिरादरार्था Sy.
२४. VM. ignores इन्द्राय।
Ms. D. puts the figure ॥३६॥ here to indicate the end of the thirty-ninth hymn. No such number is given in P.

V.40.

आ याह्यद्रिभिः सुतं सोमं सोमपते पिब ।
वृषन्निन्द्र वृषभिर्वृत्रहन्तम ॥ १ ॥

[1]आ याहि । आगच्छ । आगत्य च ग्रावभि[2] । सुतम् । सोमम् । सोमस्य पते[3] ! मरुद्भि[4] सह । अतिशयेन वृत्रस्य हन्त[5] ! [6]

उत्तरे निगदव्याख्याते—

वृषा ग्रावा वृषा मदो वृषा सोमो अयं सुतः ।
वृषन्निन्द्र वृषभिर्वृत्रहन्तम ॥ २ ॥

[वृषा ग्रावा[7] ।]

वृषा त्वा वृषणं हुवे वज्रिंश्चित्राभिरूतिभिः ।
वृषन्निन्द्र वृषभिर्वृत्रहन्तम ॥ ३ ॥

[वृषा त्वा[8] ।] द्वयोरेक क्रियापद हुव इति[9] । हेतौ तृतीया—ऊतिभिरिति[10] ।

---

१. 'आ याह्यद्रिभिः' इति नवर्चमष्टमं सूक्तम् । अत्रेयमनुक्रमणिका—'आ याहि नव त्र्युष्णिगाद्यन्त्यानुष्टुब्मध्ये च सा सौरी तवादीतिहासः स्तुतिकर्मकत्वादत्रिर्देवतैव' (KSA. 26.40. p.20.) इति । कृत्स्नस्य 'ऋषिश्चान्यस्मात्' (KSA.12.2.p.5.) इति परिभाषया अत्रिर्ऋषिः । आद्यास्तिस्र उष्णिहः पञ्चमीनवम्यावनुष्टुभौ शिष्टाश्चतस्रस्त्रिष्टुभः । अत्रेः स्तूयमानत्वात् षष्ठ्याद्या अत्रिदेवताका अभ्यार्धेयाश्च, पञ्चमी सूर्यदेवत्या शिष्टा ऐन्द्र्यः । दशरात्रे तृतीयेऽहनि प्रउगशस्त्र आद्यस्तृच ऐन्द्रः पञ्चमः । सूत्रितश्च 'आ याह्यद्रिभिः सुतं सजूर्विश्वेभिर्देवेभिः' (ĀSS. 7.10.) इति । महाव्रतेऽप्यौष्णिहतृचाशीतावयं तृचः Sy.

२. आगच्छ is omitted by D. अस्मद्यज्ञमागच्छ Sy.

३. अभिसुतम् Sy.

४. Omitted by D. सोमस्य स्वामिन्निन्द्र ! Sy.

५. वर्षकैर्मरुद्भिः सह आयाहि पिब च Sy.

६. अतिशयेन शत्रूणां हन्तृतम ! Sy.

७. VM. ignores पिब । वृषन् and इन्द्र ॥ वृषन् ! फलस्य वर्षयितः । हे इन्द्र ! Sy.

८. This stanza is not explained by VM. The *pratika* is supplied by the Editor.

९. ग्रावा अभिषवसाधनः पाषाणः । वृषा वर्षकः सोमरसस्य फलस्य वा । मदः सोमपानेन जनितः । वृषा वर्षकः । अयम् । सुतः अभिषुतः । सोमः । वृषा । तं सोमं वृषभिः सह पिब Sy.

१०. हे वज्रिन् ! वज्रवन् ! इन्द्र ! सोमरसस्य सेक्ताहम् । वृषणं त्वाम् । हुवे आह्वयामि । किमर्थम् ? चित्राभिः चायनीयाभिः । ऊतिभिः रक्षाभिर्निमित्तभूताभिः । शिष्टं स्पष्टम् Sy.

११. द्वयोः refers to RV.V.40.2,3.

ऋजीषी वज्री वृषभस्तुराषाट्छुष्मी राजा वृत्रहा सोमपावा ।
युक्त्वा हरिभ्यामुप यासदर्वाङ्माध्यंदिने सवने मत्सदिन्द्रः ॥ ४ ॥

ऋजीषी । क्षिप्रकारिणो योऽभिभवतीति स तुराषाट् । अवशिष्ट स्पष्टमिति ।

यत्त्वा सूर्य स्वर्भानुस्तमसाविंध्यदासुरः ।
अत्रेत्रविद्यथा मुग्धो भुवनान्यदीधयुः ॥ ५ ॥

यत् त्वा सूर्य । यत् त्वा सूर्येति चात्रीणा पञ्चर्चं कर्म कीर्त्यते । यदा । त्वाम् । हे सूर्य ! असुरपुत्रः ।

---

१. 'ऋजीषी वज्री' इत्येषा ब्राह्मणाच्छंसिनः शस्त्र-याज्या । 'ऋजीषी वज्री वृषभस्तुराषाळिति याज्या' (ĀŚS.5.16.) इति हि सूत्रितम् Sy

२ ०षाढव० P. By अवशिष्टं VM. means the whole of the stanza. He does not explain any word of this stanza except तुराषाट् । For the complete explanation of the stanza see the following: ऋजीषी सवनद्वयेऽभिषुतस्य गतसारस्य सोमस्य तृतीय-सवने आप्यायाभिषुतो योऽस्ति स ऋजीषः सोमः । सोऽस्यास्तीत्यृजीषी । वज्री वज्र-वान् । वृषभः वर्षिता । तुराषाट् तुराणां त्वरमाणानां शत्रूणां सोढा । शुष्मी बलवान् । राजा ईश्वरः सर्वस्य । वृत्रहा वृत्रस्य हन्ता । सोमपावा सोमरसस्य पाता, एवं महानुभाव इन्द्रः । हरिभ्याम् । युक्त्वा रथं योजयित्वा । उप यासत् उपगच्छतु । अर्वाड् अस्मदभिमुख-मागच्छतु । आगत्य च माध्यन्दिने सवने । मत्सत् माद्यतु सोमेन इन्द्रः Sy. अत्रेरार्षम् । ऋजीषी ऋजीषवान् । वृषभो वर्षिता । तुराषाट्—सहेरभिभवार्थस्य ण्विः । तूर्णमभि-भविता शत्रूणाम् । शुष्मी बलवान् । राजा, ईश्वरः । वृत्रहा, असुरस्य मेघस्य वा हन्ता । सोमपावा सोमानां च पाता । युक्त्वा हरि-भ्याम्, कथम् ? सामर्थ्यात् सरथम् । लोडर्थेऽयं पञ्चमः । उपयातु । अर्वागस्मदभि-मुखः । उपगम्य च माध्यन्दिने सवने मत्सत् । अयमपि लोडर्थ एव, तृप्यतु । कः ? इन्द्रः । हर्योरश्वयोरस्येन्द्रस्य स्वभूतयोः स भाग ऋजीष धानाश्च । एवं हि हर्योर्ऋजीषित्वम् । इन्द्रे किमायातम् ? उच्यते, तद्वन्तो यस्य सन्ति स तद्वान् भवति । यथा साधनवन्तो भृत्या यस्य सन्ति तत्साधनेन राजापि साधनवान् व्यप-दिश्यते । धनवन्तश्च यस्मिन् सन्ति तन्नगर धनवदिति तद्वत्यभिप्रायः SKN. अत्रेरिद-मार्षम् । ऋजीषेण तद्वानृजीषी । वज्रेण तद्वान् वज्री । वृषभो वर्षिता कामानां शुष्मी बलवान् राजा, अधिपतिर्वृत्रहा शत्रुहा सोमपावा सोमस्य पातेत्यर्थः । य एवंगुणयुक्त इन्द्रः स युक्त्वा हरिभ्यामश्वाभ्यां रथं तमधिरुह्यो-पयासदुपागच्छत् । अर्वाडस्मानाभिमुख्येन मा-ध्यन्दिने सवने, एतस्मिन् प्राप्ते । उपगम्य च मत्सद् माद्यतामस्मत्प्रदत्तेन सोमेनेत्यर्थः । एव-मेतस्मिन् मन्त्रे, ऋजीषी इन्द्र उक्तः । तत्पुन-रेतदृजीषित्वमिन्द्रस्य न विज्ञायते केन कारणे-नेत्यतस्तदुपपादनार्थमाह —'हर्योरस्य स भागः' इति हर्योरेवाश्वयोरस्येन्द्रस्य स भागो यदृजी-षम् । तेन हरिसंयोगेन ऋजीषेण लक्षित-लक्षणया वृत्त्या इन्द्रस्य ऋजीषित्वम् Dur. N.5.12., SKN. II.337,338.

३. य P.,D. ४. सूयः P. सूर्यः D. ५. य D.

६. त्वया for यत् त्वा P. ७. चात्रिणा P. ०त्रि० D. ८. ०ञ्चर्धे D. ०ञ्चर्धं P.

९. कं D. १०. BD. V. 28 इदमाद्वितु-र्भिर्मन्त्रैरत्रीणां कर्म कीर्त्यते Sy. ११. प्रेरक ! देव ! Sy. १२. ०त्र P.,D. असुरस्य प्राणापहर्तुरसुर्या वा पुत्रः Sy.

स्वर्भानुः[1] मैहिकेय.[2] । अन्धकारेण[3] । अविध्यत्[4] । तदानीं[5] यथा[6] । अक्षेत्रज्ञ[7] । मुग्धो[8] ध्यायत्येव । सूर्ये नष्टे भूतानि[9] । ध्यानपराण्यभवन्[10] ।

स्वर्भानोरध यदिन्द्र माया अवो दिवो वर्तमाना अवाहन्[11] ।
गूळ्हं सूर्यं तमसापव्रतेन तुरीयेण[12] ब्रह्मणाविन्ददत्रिः[13] ॥ ६ ॥

स्वर्भानोः[14] । इन्द्र[15] । सूर्ये तमसाऽभिभूते तदनन्तरमेव[16] । स्वर्भानो[17] । तिस्रस्ता[18] मायास्तमोरूपेण परिणता[19] । सूर्यस्य[20] । अवस्तात्[21] तमाच्छाद्य[22] । वर्तमाना[23] । यदा[24] त्वम्[25] । अपनीतवानसि[26] । तत[27] शिष्टेन तमसा[28] । अपगपकर्मणास्थ्यन्तर्गतेन[29] । निगूढम्[30] । सूर्यम्[31] । अत्रि[32] । चतुर्थेन[33] । ब्रह्मणा[34] । अलभत[35] लौकिकैस्त्रिरुपायैस्त्रिरुक्त्वा[36] इन्द्रस्तमोऽपानयत्[37] अवशिष्टमत्रिर्मन्त्रेणेति[38]। "स्वर्भानुर्वै[39] सूर्यं तमसाविध्यत्[40] तस्मै देवा प्रायश्चित्तिमैच्छन्[41] । तस्य यत् प्रथम तमोऽपाघ्नन्[42] सा कृष्णाविरभवत्[43] । यद् द्वितीय सा फल्गुनी[44] । यत् तृतीय सा बलक्षी[45] । यदधस्तादपाकृन्तन्[46] ? सावित्रिशादमभवत्[47] ?" इति ब्राह्मणम् ।

---

१. स्वर्भानुसंज्ञकः Sy.
२. सहि० P.
३. मायानिर्मितेन Sy.
४. आवृणोदित्यर्थः Sy.
५. तदा Sy.
६. तत्रत्यः सर्वो जनः Sy.
७. स्वस्वस्थानमजानन् Sy.
८. मूढो भवति तथा Sy.
९. भुवनानि सर्वाणि Sy.
१०. वृथ्यन्ते Sy.
११. इन्द्र is suggested for इन्द्रः ।
१२. जगन्मोढ्यानन्तरम् Sy.
१३. असुरस्य Sy.
१४. मायाः सन्ति Sy.
१५. ०र्भास्तिस्रस्तुमायांस्तुमो० P. ०र्भास्तिस्रस्तमायास्तमो D.
१६. द्योतमानादादित्यात् Sy.
१७. तदुपरि तिरोधानासामर्थ्यादिति भावः Sy.
१८. याः Sy.
१९. ०नीयतवा० P.
ताः सर्वा अवहंसि Sy.
२०. अथात्रेरेव परोक्षवादः Sy.
२१. अन्धकारेण Sy.
२२. अन्धकारस्यावरणरूपत्वादपव्रतत्वम् Sy.
२३. तथाविधम् Sy.
२४. तुरीयेण 'ब्राह्मणो ब्रह्मा' (RV. V. 40.8.) इत्यनेन Sy.
२५. लब्धवान् । आवरणापगमोपायं निरावरणं शुद्धं वा सूर्यमिति । पूर्वमन्त्रापेक्षया अस्य तुरीयत्वम् । एकैकं मायांशमेकैकेन मन्त्रेणापनोद्य चतुर्थेन मन्त्रेण निलीनं तमोऽप्यनुवदित्यर्थः Sy.
२६. ०स्त्रिभिरुपायैस्त्रि० is suggested for ०स्त्रिरुपायै त्रि० ।
२७. ०त्व P.
२८. ०ष्टमन्त्रिर्मन्त्रेण P.
०त्रिमन्त्रेणेत D.
२९. ०नुरा P., D.
३०. ०यच्छत्तिमं० D.
३१ Omitted by P. य D.
३२ हव्गुनी P. हल्गुनी D.
३३ यं P.
३४. स P.
३५. ०क्षि P.
३६. यवुध्यस्ता० D. यवस्यस्थापपाकृन्तत् P.

मा मामि॒मं तव॒ सन्तमत्र इर॒स्या द्रु॒ग्धो भि॒यसा॒ नि गा॑रीत् ।
त्वं मि॒त्रो अ॑सि स॒त्यरा॑धास्तौ मे॒हाव॑तं॒ वरु॑णश्च॒ राजा॑ ॥ ७ ॥

मा माम् । अत्रि॑ सूर्यो यथोक्तवान् तदत्रिर्वदति—हे अत्रे॑[1] ! तव । आश्रयभूतम् । तम्[2] । माम् । मनुष्यै-भयेन[3] । द्रु॒ग्धो[4] निन्दितोऽसुर । अन्नेच्छया । मा । निगिरतु[5] । त्वम् । मम मित्र[6] । भवसि । सत्यधनस्त्व च । बन्धनाना स्वामी वरुण[7] । च । राजा । माम् । रक्षतम्[8] ।

ग्राव्णो॑ ब्रह्मा यु॑युजा॒नः स॑प॒र्यन् की॒रिणा॑ दे॒वान्नम॑सोपशिक्षन् ।
अत्रि॒: सूर्य॑स्य दि॒वि चक्षु॒राधा॒त्स्वर्भानो॒रप॒ माया॑ अघुक्षत् ॥ ८ ॥

ग्राव्ण: । 'तुर्येण ब्रह्मणा' उद्युक्तोऽर्थ स्पष्टमुच्यते, सोमाभिषवार्थ ग्राव्ण[9] । यु॒ञ्जान[10] । अत्रि[11] । देवान् पूजयन् । वेद्या विक्षिप्तेन[12] । अन्नेन । देवान्[13] । उपसाधयन्[14] । अत्रि[15] । सूर्यस्य[16] । दिवि । तेज[17] । कृत-वान्[18] । तथा स्वर्भानो[19] । मायाश्च तमोरूपा गूहन्[20] ।

---

१. अत्रि: D. २. ०थोकवान् D.
३. इदं सूर्यवाक्यम् Sy.
४. ०त्र P. ५. व P.
६. आश्रयभूतम् seems to be the explanation of सन्तम् ॥ स्वभूतम् Sy.
७. तम् seems to be the explanation of इमम् । इममीदृगवस्थं माम् Sy.
८. भयजनकेन तमसा Sy.
९. तद्रुद्धः D. तद्रुद्धा P. द्रोग्धासुरः Sy.
१०. निन्द्रितः P. ११. गिरतु Sy.
१२. किञ्च हे मित्र ! Sy.
१३. त्रा P. प्रमीतेः सकाशात् त्राता Sy.
१४. ०ना P.,D. १५. मारतं क्षतं P.
१६. VM. ignores तौ and इह ॥ वरुणश्च त्वञ्च तौ युवाम् । यद्वा अत्रिरेव मित्र उच्यते । सच्च वरुणश्च युवाम् Sy.
१७. तुरीयेन D. तुरीयेण is suggested for तुर्येण । It refers to RV.V. 40.6.
१८. अभिषवसाधनानि Sy.
१९. युञ्जन् । इन्द्रार्थं सोममभिषुण्वन्नित्यर्थः Sy.
२०. ब्राह्मणः Sy.
२१. कीर्यते विक्षिप्यते इति कीरि स्तोत्रम्, तेन Sy.
२२. अन्नेन हविर्लक्षणेन, नमस्कारेण वा Sy.
२३. उपशिक्षन् । शिक्षतिर्दानार्थोऽत्र प्रसाधने वर्तते प्रसाधयन् Sy.
२४. सूर्यस्य D. सर्वप्रेरकस्य Sy.
२५. अन्तरिक्षे Sy.
२६. चक्षुः सर्वस्य रूपाकं मण्डलम् Sy.
२७. कृतवन्तः P. निस्तमस्कं कृतवानित्यर्थः Sy.
२८. तदेव स्पष्टयति—एतन्नामकस्यासुरस्य Sy.
२९ स्वाश्रयमव्यामोहयन्ती, परांस्तु तथा कुर्वती मायेत्युच्यते । तादृशीर्मायाः । यत्'तुरीयेण ब्रह्मणा' इत्युक्तम् । तदेतदुक्तं तुरीयं ब्रह्म तेनात्रिसहाय इन्द्रः Sy.
३०. अपजुगोप न्यवारयदित्यर्थः । अथवा तृतीयपाद एवं व्याख्येयः—सूर्यस्य दिवि पूर्वमावृते प्रकाशे तदपनोद्य स्वकीयं चक्षुराधात् । निरावरणं तेजःसंस्त्यायं वृष्टवानित्यर्थः । स्वर्भानुमायया सूर्यस्यावृतिर्हारिद्रविके समाम्नाता—'स्वर्भा-नुश्चासुरः सूर्यं तमसाविध्यत्तस्मै देवाः प्राय-श्चित्तमैच्छन् । तस्य यत् प्रथमं तमोऽपाघ्नन् सा कृष्णाविरभवत् । यद्द्वितीयं सा फाल्गुनी यत्तृतीयं सा वलक्षो यदध्यस्थादपाकृन्तन्नित्यादि Sy.
३१. VM. ignores आ and अप ।

यं वै सूर्यं स्वर्भानुस्तमसाविंध्यदासुरः ।
अत्रयस्तमन्वविन्दन्नह्यन्ये अशक्नुवन् ॥ ६ ॥

यं वै । स्वर्भानुना तमसा विद्धम् । सूर्यं तमसोऽपनयनाय । अत्रय । तम् । अन्वविन्दन् । न । अन्ये तु । शक्ता आसन् । निवि स्वर्भानुरासुर आदित्य तमसाविध्यत् । तद् देवाश्चर्षयश्चाभिषज्यन्तोऽत्रिमब्रुवन्, ऋषे ! त्वमिदमपजहीति । तथेति । तदत्रिरपानुपा ।

वैश्वदेवान्येकादश पराण्यत ---

V.41.

को नु वां मित्रावरुणावृतायन्दिवो वा महः पार्थिवस्य वा दे ।
ऋतस्य वा सदसि त्रासीथां नो यज्ञायते वां पशुषो न वाजान् ॥ १ ॥

को नु । मनुष्य । हे मित्रावरुणौ ! वाम् । यज्ञं कर्तुमिच्छन् । महत । द्युलोकस्य । वृष्ट्यादिकाय दानाय भवति । पार्थिवस्य । वा लोकस्योषध्यादिदानाय भवति । तौ युवा सत्यस्य । स्थानेऽकौटिल्ये

---

१. अत्रिकृत सामर्थ्यमनुवदति Sy.
२. ०र्यंस्त० D.
३. निगदव्याख्यातैषा---अत्रयस्त सूर्यमन्वविन्दन् । इन्द्रार्थं सोमयागदेवतास्तुतिनमस्कारैरनुक्रमेणेषदीषत् तमोऽवरुध्य लब्धवन्त इत्यर्थः । अन्ये नहि अशक्नुवन् न लब्धवन्तः खलु Sy.
४. न is omitted by P.,D.
५. आस D.
६. The two prepositions, निवि should be joined with अविध्यत् । Following probably the usage of the Samhitās and Brāhmaṇas, the prepositions are separated from the verb by a few intervening words.
७. देवाभिष० P. न लब्धवन्तः खलु Sy. अभिषज्यन्तः, i.e. 'not being able to find a remedy.' ८. ०मवज० D.
९. खानुवां D. ०रपानुवत् is suggested for ०रपानुपां ।
१०. VM. ignores यम् । वै । आसुरः and हि ।
११. The following eleven hymns are addressed to विश्वे देवाः ।
१२. 'को नु वाम' इति विंशत्यृचं नवमं सूक्तं भौमस्यात्रेरार्षम् । षोडशीसप्तदश्यावतिजगत्यौ । विंश्येकपदा विराट् । शिष्टाः सप्तदश त्रिष्टुभः । विश्वे देवा देवता । तथा चानुक्रान्तम्---'को नु विंशतिर्वैश्वदेवं वै तत् षोळश्याद्यतिजगत्यावन्त्यैकपदा' (KSA. 26. 41.p.20.) इति विनियोगो लैङ्गिकः Sy.
१३. मनुष्यः refers to कः ॥ यजमानः Sy.
१४. हे मित्रावरुणौ ! देवौ !
१५. युवाम् Sy.
१६. यज्ञमिच्छन् शक्नुयादिति शेषः Sy.
१७. तस्मात् कृपयैव द्युलोकसम्बन्धिनि स्थाने Sy
१८. ०या P.
१९. पार्थिवस्य सदसि Sy.
२०. वाशब्दश्चार्थे Sy.
२१. ०स्यौष० is suggested for ०स्योष ।
२२. उत्पादकस्यान्तरिक्षस्य Sy.
२३. तद्धेतुत्वात्तच्छब्दम् । त्रिषु स्थानेषु Sy.

वर्तमानान्। तेन प्रीतौ वा। अस्मान्। रक्षतम्। यज्ञमिच्छते। वा मह्यम्। अन्नानि प्रयच्छतम्। आढ्य. पशुषु सीदतीति पशुष आर्षो ड ।

ते नो मित्रो वरुणो अर्यमायुरिन्द्रं ऋभुक्षा मरुतो जुषन्त ।
नमोभिर्वा ये दधते सुवृक्तिं स्तोमं रुद्राय मीळ्हुषे सजोषाः ॥ २ ॥

ते नः। मित्रादय.। वायु। इन्द्र। महान्। अस्मान्। सेवन्ताम्। ये। च। नमस्कारै. सह। सङ्गताः। सेक्त्रे। रुद्राय। सुप्रवृक्तम्। स्तोमम्। धारयन्ति रुद्रस्य नत्वा नत्वा न एवविधा इति द्रष्टव्यमिति।

आ वां येष्ठाश्विना हुवध्यै वातस्य पत्मन्नर्य्यस्य पुष्टौ ।
उत वां दिवो असुराय मन्म प्रान्धांसीव यज्यवे भरध्वम् ॥ ३ ॥

आ वां येष्ठा। हे अश्विनौ! यातृतमौ। वामहम्। आह्वातुमागतोऽस्मि। युवयोर्जिगमिषतोर्वेगो वातस्य। पतने। रथे नियुज्यमानस्याश्वस्य सुहितस्य। पुष्टौ युवयोरागमनप्रारम्भेऽहमाह्वातु प्रवृत्त इत्यर्थ ।

---

१. तौ P.
२. P., D. read वयास्मान् for वा। अस्मान्।
३. किञ्च हविर्दात्रे च मह्यम् Sy.
४. अन्नानि क्षीरदध्यादीनि Sy.
५. ०ढ्य P.,D.
६. पशुषु P. पशुषु सीदतो वाजान्। तत्र यथा प्रयच्छथस्तद्वदवतमिति। यद्वा (न शब्दश्चार्थे) पशून् वाजांश्च दत्तमित्यर्थः Sy.
७. आर्षढ्य P.,D.
८. VM. ignores नु and न॥ नु खलु। न इव, यद्वा नशब्दश्चार्थे Sy.
९. न P.,D.
१०. आदि refers to वरुणः, अर्यमा, and मरुतः॥ देवाः Sy.
११. आयुः सततगतिर्वायुरुच्यते Sy.
१२. It stands for ऋभुक्षाः।
१३. अस्माकम् Sy.
१४. हविर्भिः Sy.
१५. सजोषसः सह प्रीयमाणाः। तेवां पुत्रत्वादिति भावः। केचन रुद्राय सजोषा इत्येतन्मित्रादिसर्वदेवताविशेषणमिति कथयन्ति Sy.
१६. अथ मरुत एव वियुत्य विशेष्यन्ते —रुद्राय मीळ्हुषे—तृतीयार्थे चतुर्थी। रुद्रेण सह Sy.
१७. ०वृत्तं D. शोभनपापविवर्जनवत् Sy.
१८. सोमं P. स्तोत्रम् Sy.
१९. धारयन्त्युक्तलक्षणं स्तोत्रम्। देवा द्विविधाः स्तोत्रभाजो हविर्भाजश्च, अत्र स्तोत्रभाज उच्यन्ते Sy.
२०. अनयाश्विनौ रुद्रश्चोच्यन्ते Sy.
२१. कामानां यन्तृतमौ Sy.
२२. हुवे आह्वयामि, आह्वातुं प्रभवामि Sy.
२३. ०र्जिगमिषतोर्वे ग वातस्य P. ०र्जगमिषतो वेगवानस्य D. वातस्य धर्मसाम्याद्वर्मिग्रहणम्। वायुसमानगतेरश्वस्य Sy.
२४. गमने प्राप्तौ Sy.
२५. रथस्य। अथवा वायुवद्युवयोः शीघ्रगमनसाधनरथस्य Sy.
२६. पोषे च निमित्ते सति Sy.
२७. ०रभेमाह्वा० D.

अथ मित्रादीन् सर्वानेव अपि[1] । च[2] ये मित्रादय । दिव आगत्य[3] । प्राज्ञाय[4] स्तोत्रे मह्यम् । महनीयानि[5] धनानि । प्रभरध्वम्[6] । यथा यजमानाय[7] । अन्नानि[8] प्रयच्छथेति[9] ।

प्र सक्षणो[10] दिव्यः कण्वहोता[11] त्रितो[12] दिवः[13] सजोषा[14] वातो[15] अग्निः[16] ।
पूषा भगः[17] प्रभृथे[18] विश्वभोजा[19] आजिं[20] न जग्मुराश्वश्वतमाः[21] ॥ ४ ॥

प्र सक्षणः[10] । सचनशील सविता । दिवि भव । कण्व[11] इति मेधाविनाम प्राज्ञा यस्य सवितुर्ह्वातारो भवन्ति । त्रितस्त्रिस्थान[12] इन्द्र इति यास्क । सवितेन्द्रस्ताभ्याम्[13] । सहित[14] । वात[15] । अग्नि[16] । पूषा[17] । भग इत्येते । विश्वस्य रक्षका[19] देवा । यज्ञगृहे[18] दिव प्रगच्छन्तु[20] । अतिशयेन वेगवदश्वा[21] । यथा । युद्धम्[22] । गच्छन्ति[23] तद्वदिति ।

प्र वो[24] रयिं[25] युक्ताश्वं[26] भरध्वं[27] राय एषेऽवसे[28] दधीत[29] धीः ।
सुशेव[30] एवैरौशिजस्य[31] होता[32] ये व[33] एवा[34] मरुतस्तुराणाम्[35] ॥ ५ ॥

प्र वो रयिम् । हे मरुत[1] ! यूयम् । अस्मभ्य युक्ताश्वम्[26] । रयिम्[25] । प्रभरध्वम्[27] । तथास्माक धनस्य[29] ।

---

१. सर्व ने ह्यपि P. उत वा किञ्चेत्यर्थः Sy.
२. हे is suggested for ये ।
३. द्योतमानस्य । चतुर्थ्यर्थे षष्ठी Sy.
४. असुराय प्राणापहत्रे रुद्राय । यद्वा द्युलोकसम्बन्धिनेऽसुराय प्राणदात्रे सूर्याय वायवे वा Sy.
५. मननीयं स्तोत्रम् Sy.
६. सम्पादयत हे ऋत्विजः ! Sy.
७. यागसाधकाय Sy.
८. हविर्लक्षणानि हवींषि स्तोत्रं चेत्यर्थः Sy.
९. ०थति P.
१०. अत्र लिङ्गोक्ता देवताः । प्रजग्मुरिति सम्बन्धः Sv.
११. सवन० D. यज्ञं सेवमानः शत्रूणां सोढा वा Sy.
१२. कण्ड्व P. कण्वा ऋषयो मेधाविनो वा होतार आह्वातारो यस्य स तथोक्तः Sy.
१३. ०वि नं D. Ngh. 3. 4.
१४. त्रिषु क्षित्यादिस्थानेषु तायमानः Sy.
१५. Omitted by P. N. 9. 25.
१६. ०वित्रेन्द्र० D. दिवः सूर्येण सह Sy.
१७. समानगतिः समानप्रीतिर्वा Sy.
१८. उक्तलक्षणो वायुः Sy.
१९. पोषक एतन्नामा Sy.
२०. उक्ताः सर्वदेवाः विश्वरक्षकाः कृतस्नात्तारो वा Sy.
२१. प्रभरणवत्यस्मिन्यज्ञे Sy.
२२. प्रकृष्टगमनाश्ववतां श्रेष्ठाः सन्तः Sy.
२३. इव Sy.
२४. सङ्ग्रामम् Sy.
२५. गच्छति P. प्रगच्छन्ति Sy.
२६. ०श्वा P., D. अश्वसहितमश्वयोग्यं पुत्रं वा Sy.
२७. धनम् Sy.
२८. ०रस्यं P. सम्पादयत Sy.
२९. धनानि गवाश्वादिलक्षणानि Sy.

अन्वेषणाय[1]। रक्षणाय[2]। धारयत[3]। कर्माणि। हे मरुत ! क्षिप्रगन्तृणाम्[4]। युष्माकम्। ये। एवा[5] गतयः। तैरेवै[6]। औशिजस्य[7] कक्षीवत। होताऽत्रि। सुसुखो[8] भवतु।

प्र वो वायुं रथयुजं कृणुध्वं प्र देवं विप्रं पनितारमर्कैः।
इषुध्यवं ऋतसापः पुरंधीर्वस्वीर्नो अत्र पत्नीरा धिये धुः॥ ६॥

प्र वो वायुम्[11]। यूयम्। वायुम्[13]। रथयोजनम्[14]। प्रकृणुध्वम्[15] अभिमुख कुरुत। तथाऽर्कै[16]। देवाना स्तोतारम्[17]। मेधाविनम्। अग्निञ्च देवम्[18]। प्रकृणुध्वम्[19]। इषुध्यतिरिच्छाकर्मा 'विश्वो[20] राय इषुध्यति' इति मन्त्र,* इच्छन्त्य[21]। यज्ञ स्पृशन्त्य[22]। बहुप्रज्ञा[23]। वसुमत्य[24]। अस्मान्[25]। अत्र[26]। देवपत्न्य। कर्मणे[27]। अदधु[28]।

उप व एषे वन्द्येभिः शूषैः प्र यह्वी दिवश्चितयद्भिरर्कैः।
उषासानक्ता विदुषीव विश्पमा हो वहतो मर्त्याय यज्ञम्॥ ७॥

उप व एषे। उपप्रगच्छत[30]। युष्मान्[31]। स्तुत्यै[32]। सुखै[33] कल्याणैर्गन्तुम्। दिव सकाशात्[34]। महत्यो

---

१. ०णायञ्च P. प्राप्तुम् Sy.
२. D. adds म immediately after रक्षणाय॥ अन्नाय प्राप्तानां धनानां रक्षणाय वा Sy. अव इत्यन्ननाम Ngh. 2. 7.
३. धायत P. धारयति स्तुतिम् Sy.
४. धीः स्तोता Sy. ५. त्वरमाणानाम् Sy.
६. कामा अश्वा वा सन्ति, तैरिति Sy.
७. गत तैः P. गतय तैः D. कामैर्गमनसाधनैरश्वैर्वा Sy.
८. औशिजनस्य P. औशिजनस्य D.
९. का० D.
१०. शेवमिति सुखनाम Ngh. 3. 6.
११. 'प्र वो वायुम्' इति षष्ठी वायव्ये पशौ हविषो याज्या। 'प्र वो वायुं रथयुजं कृणुध्वमुत त्वामविते महि' (ĀSS. 3.8.) इति सूत्रितम् Sy. १२. हे मदीया ऋत्विजः ! Sy.
१३. देवम् Sy.
१४. वायुरजजं P. वायुरजनं D. यज्ञगमनाय रथसम्बद्धम् Sy.
१५. ०कृध्वं P.,D. VM. seems to explain प्र by प्रकृणुध्वम्॥ कुरुध्वम् Sy.
१६. अर्कैः P.,D. अर्चनसाधनैर्मन्त्रैः Sy.
१७. पनितारम्—कर्मणि कर्तृप्रत्ययः। स्तुत्यमित्यर्थः। फलप्रदातारं वा Sy.
१८. विशेषेण कामानां पूरकं विप्रवत्पूज्यं वा Sy.
१९. द्योतमानम् Sy. २०. स्तुत Sy.
* RV. V. 50.1.
२१. गन्त्र्यः Sy. २२. यज्ञस्पृशः Sy.
२३. पुरन्ध्यः स्त्रीरूपा रूपवत्यो वा Sy.
२४. प्रशस्याः Sy. २५. अस्मदीयाय Sy.
२६. अस्मिन् यज्ञे Sy.
२७. कर्मणे तन्निष्पत्तये Sy
२८. ०र्णा अ० P. आगतवत्यः Sy.
२९. VM. ignores आ।
३०. प्र is omitted by P. उपप्रापयामि हविः। इषिः प्रापणकर्मा स्यादुपप्राभिः समन्वितः Sy.
३१. युष्मभ्यम् Sy.
३२. वन्दनार्हैरितरैर्वैः सह Sy.
३३. सुखकरैः। यद्वा शूषैरित्यादितृतीयाबहुवचनान्तानि वन्द्येभिरित्यस्य विशेषणानि केचिदाहुः Sy. ३४. दिवसकात् P.,D. अन्तरिक्षादविशेषेण सर्वप्रदेशात् Sy.

द्यावापृथिव्यौ स्तोत्रैर्मया प्रयुज्यमाने[1]. । आत्मगुणांश्चेतयद्भिर्मया स्तूयमानैर्युष्मान् सुस्वर्गन्त[2] गमनोद्योग कुरुता ? स्वर्गान्[3] लोकादित्यर्थ. । उपासानक्ता[4] । मनुष्याय[5] । विश्वम्[6] । यज्ञम् । आवहत[7] । जानत्याविव[8] द्वे स्त्रियौ यज्ञ नयत[9] इत्यर्थ[10] ।

अभि वो अर्चे पोष्यावतो नॄन्वास्तोष्पतिं त्वष्टारं ररा॑णः[11] ।
धन्या सजोषा धिषणा नमोभिर्वनस्पतीँरोषधी राय एषे ॥ ८ ॥

अभि वः । अभिष्टौमि[12] । युष्मान् । पोष्यधनयुक्तान्[13] । नेतॄन्[14] देवान् । वास्तो । पतिम्[15] । त्वष्टारम्[16] । ररा॑ण[17]. । धननिमित्तनया । स्तुत्या । हविर्भिश्च[18] । सङ्गतोऽहम्[19] । ओषधी । वनस्पतीश्च । धनानि । गन्तु[20] स्तौमि ।

तुजे नस्तने पर्वताः सन्तु स्वैतवो ये वसवो न वीराः[21] ।
पनित आप्यो यजतः सदा नो वधैर्नः शंसं नयो अभिष्टौ ॥ ९ ॥

तुजे[22] । पुत्रे । तत्पुत्रे च । अस्माकम् । मेघा[23] वर्षार्थम्[24] । भवन्तु । ये मेघा । वासयितार[25] । वीरा । इव । स्वायत्तगतयो[26] भवन्ति । तथाऽस्माभि. स्तुत[27] । अद्भ्यो जात[28]. । यष्टव्योऽपा[29] नपात् । अस्माकम्[30] ।

---

१. मन्त्रैः सहोपप्रापयामि Sv.
२. ज्ञापयद्भिः Sy.
३. ०ने P.
४. स्वर्गलो० D.
५. हे अहोरात्राभिमानिदेवते ! Sv
६. यजमानाय Sy.
७. विश्व P.,D. हे उक्तदेवते ! सर्वं कर्तव्यजातम् Sy.
८. आवहेतो P.,D. अभिमुखं प्रापयतः Sv.
९. जाना० P.
१०. नय P.,D.
११. VM. ignores ह ॥ हेति पूरणः Sv.
१२. अभिपूजयामि स्तौमीत्यर्थः Sv.
१३. अहं बहुपोष्यजनयुक्तान् Sv.
१४. कर्मनेतॄन् Sy.
१५. ०तिः D.
१६. P. reads त्वरमणः for त्वष्टारम् । ररा॑ण । D. reads त्वरमाणः for त्वष्टारम् । ररा॑णः ॥ स्तोत्रादिभिः क्रीडन् । हविर्वद्वाहम् Sy. १७. धनकारी Sy.
१८. वाग्देवता । एता द्वितीयार्थे प्रथमाः । उक्तलक्षणां वाणीम् Sy. धिषणेति वाङ्नाम Ngh. 1.11.
१९. नमोभिः सह अर्चे इति सम्बन्धः Sy.
२०. इतरदेवैः सह गच्छन्ती प्रीणयन्ती वा Sy.
२१. गन्तं D. प्राप्तुम् Sy.
२२. तने विस्तृते । तुजे दाने, यद्वा तनेति पुत्रनाम । षष्ठ्यर्थे चतुर्थी । पुत्रस्य दाने इत्यर्थः । अथवा नः तुजे पुत्रे तने तत्पुत्रे च Sy.
२३. मेघवर्षणार्त्थं P. पर्ववन्तः पूरणवन्तो वा मेघाः Sy.
२४. सवितारे P. जगतो वासयितारः Sy.
२५. वीरायत P.
२६. शोभनगमनाः Sy.
२७. यथा० P.
२८. आप्तव्यः सर्वैः Sy.
२९. यजनीय आदित्यः Sy.
३०. नपात्मा० P. ०व्ये पात्रपाद् वस्मा० D.

सदा भवतु । वर्धयतु च । अस्माकम् । कामम् । नरहितोऽपां नपात् । अभीच्छायाम् ।

वृष्णो अस्तोषि भूम्यस्य गर्भं त्रितो नपातमपां सुवृक्ति ।
गृणीते अग्निरेतरी न शूषैः शोचिष्केशो नि रिणाति वना ॥ १० ॥

वृष्णः । भूमिहितस्य । पर्जन्यस्य । पुत्रम् । अपाम्, नपातम् । त्रिस्थानोऽहमग्निः । सुवृक्तिभि । स्तुतवानस्मि । सोऽयमपा नपाद् अग्नि स्तोत्रैः । एतरि पुरुषे । सुखैः । गृणीते । प्रत्यक्ष न वदति । किन्तु शोचिष्केशः । उदका । निर्गमयति ।

कथा महे रुद्रियाय ब्रवाम कद्राये चिकितुषे भगाय ।
आप ओषधीरुत नोऽवन्तु द्यौर्वना गिरयो वृक्षकेशाः ॥ ११ ॥

कथा महे । कथम् । महते । रुद्रपुत्राय मरुद्गणाय । स्तोत्र ब्रूमः । कथ वा स्तोत्रम् । स्तोतृणा स्तोत्र धनाय । जानते । भगाय ब्रूमः । अपि च । अस्मान् । आपः । ओषधयश्च । रक्षन्तु । तथा द्यौः । वनानि । शिलोच्चयाश्च । वृक्षकेशाः ।

---

१. सर्वदा Sy.
२. वर्धयेत् Sy.
३. स्तुतिम् Sy.
४. नरेभ्यो हितो देवः Sy.
५. ०तोऽप्राप्तयावदभिच्छयां P. ०तो वाप्तवावदभीच्छयां D. अभित एषणेऽभिगमने वा सति Sy.
६. भूमिरन्तरिक्षम्। तदर्हस्य। तादृशस्य। अथवा भूम्यो भूमेरेवार्हः, तदुचितवृष्टिप्रदानात् Sy.
७. वर्षकस्य पर्जन्यस्य । यद्वा तादृशस्य मेघस्य Sy. ८. गर्भस्थानीयम् Sy.
९. नपत P., D. रक्षकं वैद्युतमग्निम् Sy.
१०. त्रि is omitted by P., D. स त्रितः तीर्णतमः त्रिषु स्थानेष्वन्येषु त्रित्वापन्नेषु तायमानः Sy.
११. ०हमत्रिसुमत्रि P.
१२. सुवृक्ति स्तोत्रकर्मैतत्। शोभनपापादिवर्जनवता स्तोत्रेण Sy.
१३. स्तुतवानहम् Sy.
१४. सोय पाप्तपादनि P.
१५. गन्तरि मयि Sy.
१६. सुखैर्भत्व P. सुखैद्वत्वं D. सुखकरैः रश्मिभिः Sy.
१७. ग्रणे P. ग्रणेत D. गरणं कुरुते, क्रुध्यतीत्यर्थः Sy.
१८. ०चिष्के P. ०चष्के D. प्रदीप्तरश्मिः सन् Sy.
१९. वनानि Sy.
२०. हिनस्ति वहतीत्यर्थः Sy
२१. वयमत्रयः Sy.
२२. केन प्रकारेण Sy.
२३. ब्रवाम स्तुतीः Sy.
२४. व P., D. किं च स्तोत्रम् Sy.
२५. धनलाभाय Sy.
२६. सर्वं जानते Sy.
२७. भयाय P., D. एतन्नामकाय देवाय ब्रवाम Sy.
२८. अब्देवताः Sy.
२९. रक्षतु P., D.
३०. द्युदेवता Sv.
३१. गिरयः Sy.
३२. वृक्षा एव केशस्थानीया येषां ते । एता उक्ता देवताः Sy.

शृणोतु न ऊर्जां पतिर्गिरः स नभस्तरीयाँ इषिरः परिज्मा ।
शृण्वन्त्वापः पुरो न शुभ्राः परि स्रुचो बबृहाणस्याद्रेः ॥ १२ ॥

शृणोतु । शृणोतु । अस्माकम् । स्तुतीः । अन्नानाम् । पतिर्वायुः । स वायुः । नभसः । अतिशयेन तरित्रा । गमनशील । परितो गन्ता । तथापश्च । शृण्वन्तु सौधर्मयः । पुरः । इव । शोभनोऽस्ति, शरीरवचनो वा पुरशब्दः, तानि । स्रवन्त्य आपः । परितो भवन्ति । वर्धमानस्य । मेघस्य ।

विदा चिन्म॑ महान्तो वे व एवा॒ ब्रवा॑म दस्मा॒ वार्यं॑ दधा॒नाः ।
वय॑श्च॒न सु॒भ्वः॑ आवं॑ यन्ति॒ तुभा॑ मर्त॒मनु॑यतं॒ वध॒स्नैः ॥ १३ ॥

विदा चित् । जानीत । क्षिप्रम् । हे महान्तः ! ये पुरुषाः । युष्मान् प्रति । गन्तारः वयं च स्तोत्रम् । प्रब्रवामहे । दर्शनीयाः ! वरणीय हविः । दधानाः । परोक्ष उत्तर.—पक्षिण इव वृक्षात् । द्युलोकात् महान्तो देवाः । अधस्तादागच्छन्ति । क्षोभकेण शत्रुणा । प्रहारैः । अनुबद्धम् । यजमानम्, मरुतः ।

---

१. बलानाम् । अथवा अन्नानां पतिः । प्राणोपाधिकस्य वायोः कृत्स्नान्नत्वं प्रसिद्धम् । श्रुतिश्च भवति—'प्राणस्यान्नमिदं सर्वं प्रजापतिरकल्पयत्' (Manu.5.28.) इति Sy.
२. सम P.
३. नभसि चारी Sy.
४. तरितव्यः Sy.
५. आवश्च P.
६. शृणोतु P. शृण्वन्तु गिरः Sy.
७. सौधम्मर्य P. The reading is doubtful. सौधर्म्याः, 'Honest' going with आपः or वाचः understood is suggested for सौधर्मयः ।
८. पुराणीव Sy.
९. दीप्ताः Sy. शोभनः sing., seems to be the paraphrase of शुभ्राः pl. VM. also takes पुरः in the sing., whereas Sy. construes it in the pl.
१०. ०स्ती D. ११. वायु P., D.
१२. सरणशीलाः Sy.
१३. मेघस्य वा पर्वतस्य वा Sy.
१४. जानीथ स्तोत्रम् Sy.
१५. यूयम् Sy.
१६. महन्तः P. मरुतः ! Sy.
१७. पुषाः P.
१८. भजमानाः Sy.
१९. ०ब्रु० D. प्रब्रूमहे is suggested for प्रब्रवामहे ।
२०. ०य P.
२१. ०ना P. ददाना धारयन्तो वा वयम् Sy.
२२. आगन्तारश्चैते मरुतः Sy.
२३. वृक्षा P., D.
२४. महतन्तः P. It seems to be the explanation of सुभ्वः ॥ सुष्ठु भवन्तः प्रवृद्धाः Sy.
२५. अस्मदभिमुखं गच्छन्ति Sy.
२६. क्षोभकेण सहितम् Sy.
२७. शत्रूणां D.
२८. आयुधैः परिहरन्तः अवयन्ति Sy.
२९. ०बन्धं P. अभिगतम् Sy.
३०. मरणधर्माणं वैरिणम् Sy.
३१. मरुतः goes with महान्तो देवाः ।
३२. VM. ignores चित् ॥ चिदिति पूरणः Sy.

आ दैव्यानि पार्थिवानि जन्मापश्चाच्छा सुमतये वोचम् ।
वर्धन्तां द्यावो गिरश्चन्द्राग्रा उदा वर्धन्तामभिषातो अर्णाः ॥ १४ ॥

आ दैव्यानि । सुयज्ञाय मरुद्गणायाहम् । दैव्यानि । पार्थिवानि च । जातानि धनानि । वृष्टिलक्षणा अपः । च । अभिब्रवीमि दातव्यमिति । ततो मम द्योतमाना । हिरण्याग्रा । वाचः । वर्धन्ता हिरण्यं दातव्य वस्त्र दातव्यमित्याद्या वाचः सफला भवन्तु । अपि च । वर्धन्ताम् । मरुद्दत्ता । आपः ।

पदेपदे मे जरिमा नि धायि वरूत्री वा शक्रा या पायुभिश्च ।
सिषक्तु माता मही रसा नः स्मत्सूरिभिर्ऋजुहस्ता ऋजुवनिः ॥ १५ ॥

पदेपदे । पदनिधाने पदनिधाने । मे । जीर्णा । निधीयते । शत्रूणा वारयित्री । या । शक्ति । सा च जीर्णा भवति । तेजोभि. । च सह । तथा सत्यात्मीयै रसै । अस्मान् । माता । पृथिवी । सेवताम् । शोभनम् । देवैः सह । प्रसारितहस्ता । प्रसारिदाना ।

---

१. शोभनयज्ञाय Sy.
२. देवसम्बन्धीनि Sy.
३. पृथिवीसम्बन्धीनि च Sy.
४. जन्मानि Sy.
५. अपसा Sy.
६. अभिप्रब्र० P. अभिप्राप्तुं ब्रवीमि Sy.
७. तावव्य० P., D.
८. स्वप्रतिपाद्यार्थप्रकाशिन्यः Sy.
९. आह्लादनं हिरण्यं वाग्रे यासां ताः । तादृश्यः सत्यो वर्द्धन्ताम् Sy.
१०. स्तुतयः Sy.
११. ०न्ताम P.
१२. वसून् D.
१३. VM. seems to take उदा as उत । अपि च seems to be the explanation of उदा ॥ उदकेन Sy.
१४. समृद्धा भवन्तु Sy.
१५. मरुद्भिः सम्भक्ताः Sy.
१६. P. and D. add वनोः कथा दाशेम कथं निधीभहि न after आपः ॥ नद्यश्च Sy.
१७. VM. ignores आ ।
१८. मद P., D.
१९. तदा तदा भूमौ Sy.
२०. मवीया Sy.
२१. स्तुतिः Sy.
२२. स्थाप्यते क्रियत इत्यर्थः Sy.
२३. अस्मदुपद्रववारयित्री भवति Sy.
२४. य D.
२५. शक्ता सती Sy.
२६. वाशब्दश्चार्थे Sy.
२७. रक्षणैः Sy.
२८. Something seems to be omitted before सति । The phrase should be तथा सति ।
२९. रसा सारभूता भूमिः Sy.
३०. अस्माकं स्तुतिम् Sy.
३१. सर्वस्य निर्मात्री Sy.
३२. महती पूज्या Sy.
३३. स्मच्छब्दः प्रशस्तवचनः । प्रशस्तैः Sy.
३४. मेधाविभिः स्तोतृभिर्निमित्तैः । तेषां परिचर्यया प्रीतेत्यर्थः Sy.
३५. प्रतारि० P., D. अस्मदनुकूलहस्ता Sy.
३६. ०नाः P., D. कल्याणदाना भवतु Sy.

कथा दाशेम नमसा सुदानूनेवया मरुतो अच्छोक्तौ प्रश्रवसो मरुतो अच्छोक्तौ।
मा नोऽहिर्बुध्न्यो रिषे धादस्माकं भूदुपमातिवनिः ॥ १६ ॥

कथा दाशेम[1] । कथम् । **निधीमहि**[2] । नमस्कारेण । **शोभनदानान्**[3] । एवं गच्छतः । **मरुतः**[4] । प्रशस्तकीर्तने । **अच्छोक्तौ**[5] सत्याम् कथमिमेऽस्मत्स्तोत्रमुपगच्छन्तीत्यर्थं, दाशिर्दानकर्मा निधाने पर्यवस्यति[6] । **मा**[7] । अस्मान् । **अहिर्बुध्न्यः**[8] । हिंसार्थम् । **निदधातु**[9] । किन्त्वस्माकम्[10] । **भवतु**[11] । **वस्तुते**[12] सम्भक्ता[13] ।

इति चिन्नु प्रजायै पशुमत्यै देवासो वनते मर्त्यो वु आ देवासो वनते मर्त्यो वः।
अत्रा शिवां तन्वो धासिमस्या जरां चिन्मे निर्ऋतिर्जगृभीत ॥ १७ ॥

इति चित्[14] । हे देवाः[15] ! इत्थम् । युष्मान् । आभिमुख्येन भजते । **पशुयुक्तायै**[16] । **प्रजायै**[17] रक्षार्थम् । **अस्मिन्**[18] भजनेऽत्रेः[19] । अस्य[20] । शरीरस्य । जराम् । देवी निर्ऋतिः[21] । आस्येन ग्रसताम्[22] । **यास्याजरं**[23] शिवम्[24] । अन्नं भवति[25] ।

---

१. वयं कथा केन प्रकारेण Sy.
२. परिचरेम Sy.
३. स्तोत्रेणान्नेन वा Sy.
४. ०दानोन् P., D.
५. क्रियमाणप्रकारेण Sy.
६. मरुतः कथा केन प्रकारेण दाशेम Sy.
७. प्रश्रवसः प्रकृष्टान्ना भवन्ति । यद्वा प्रश्रवसः प्रकृष्टान्नस्य मम Sy.
८. ०र्तेनच्छो० P., D. आभिमुख्येन वचने निमित्ते सति तान् मरुतः कथं परिचरेम । तेषां दुराराध्यत्वादिति भावः Sy.
९. The passage दाशिर्दान.... पर्यवस्यति, should immediately follow निधीमहि and precede नमस्कारेण ।
१०. देवः Sy.
११. हिंसकाय Sy.
१२. स्थापयतु Sy.
१३. स देवः अस्माकम् Sy.
१४. भवतो P., D.
१५. वस्तुतः or स्वस्तुतेः is suggested for वस्तुतेः ॥ शत्रूणां हन्ता Sy.
१६. VM. explains अच्छोक्तौ once. ॥ अभिगन्त्र्युक्तिः स्तुतिर्यस्य तादृशे मयि । यद्वा स्तोत्रनिमित्ते सति । पुनरुक्तिरादरार्था Sy.
१७. हे देवाः is omitted by P.
१८. पशुसहिताय Sy.
१९. Omitted by P.
अपत्याय Sy.
२०. अस्मिन् यज्ञे Sy.
२१. ०त्रेयस्य P.
२२. देवैरनुगृहीतस्य पुत्रस्य Sy.
२३. ०स्य राजा स्रि० P. देवता Sy.
२४. ग्रसतु Sy.
२५. ०र D.
२६. Omitted by P.
२७. VM. ignores चित् । नु । मर्त्यः । देवासः । वनते । मर्त्यः । वः । मे and चित् ॥ चित् एव । नु क्षिप्रम् । मर्त्यः यजमानः । आदेवासः—वः, पुनरुक्तिरादरार्था । मे मम । चित् च Sy.

तां वो देवाः सुमतिमूर्जयन्तीमिषंमश्याम वसवः शसा गोः ।
सा नः सुदानुर्मृळयन्ती देवी प्रति द्रवन्ती सुविताय गम्याः ॥ १८ ॥

तां वः । हे देवाः ! युष्माकम् । ताम् । सुमतिम् । स्तोतृणामन्न कुर्वाणम् । स्तोतृभिरिष्यमाणम् । स्तुतिवाचः । शसने । सा । सुमतिः । अस्मान् । शोभनदाना । सुखयन्ती । स्तोतून् प्रति । गच्छन्ती । अभ्युदयार्थं प्रतिगच्छन्ती । अभिगच्छतु ।

अभि न इळा यूथस्य माता स्मन्नदीभिरुर्वशी वा गृणातु ।
उर्वशी वा बृहद्दिवा गृणानाभ्यूर्ण्वाना प्रभूथस्यायोः ॥ १९ ॥

अभि नः । प्रजापश्वादीना सङ्घस्य । माता । भूमिः । नदीभिः सह । अस्मान् स्तुवतः । प्रशस्तम् । अभिगृणात्वेवम् । उर्वशी चाप्सराः । किंच । उर्वशी । बृहद्दिवा । चाप्सराः । स्तोत्र

---

१. वा P., D. २. स्वभूतां तां प्रसिद्धाम् Sy.
३. शोभनमननसाधनाम् । अन्नेन मतिवृद्धिः 'अन्नमयं हि सौम्य मनः' (Chā U.6.5.4.) इत्यादिषु प्रसिद्धा Sy. ४ बलकरीम् Sy.
५. एषणसाधनमन्नं क्षीरदध्यादिलक्षणम् Sy.
६. ०वम् D. गोः सकाशात् Sy.
७. स्तुत्या Sy. ८. It seems to be the explanation of देवी ।
९. अस्मदभिमुखं गच्छन्ती Sy.
१०. सुखाय Sy. ११. अभिगच्छेत् Sy.
१२. VM. ignores अश्याम and वसवः ॥ अश्याम प्राप्नुयाम हे वासयितारः ! Sy.
१३. अत्रेरार्षम् Dur.
१४. गोसङ्घस्य । यद्वा यूथस्य मरुद्गणस्य Sy. गजादेः पशुजातस्य यत्किञ्चिद् यूथं तस्य सर्वस्य SKN. मेघयूथस्य Dur.
१५. निर्मात्री Sy. मातृभूता । मेघयूथस्य वा निर्मात्री SKN. किंलक्षणा ?...निर्मात्री मध्यमा Dur.
१६. ०मि P. यद्वा इळा गोरूपधरा मनोः पुत्रीत्याहुः । यद्वा यूथस्य मरुद्गणस्य निर्मात्रीळा माध्यमिकी वाक् Sy. का गृणातु ? इळा माध्यमिका वाक् SKN. कोऽसौ ? इळा Dur.
१७. गङ्गादिभिः सह गृणातु Sy. गङ्गाद्याभिः SKN. केनाभिगृणातु ?...नदनाभिरद्भिः Dur. १८. अस्मा स्तुवन्तः P.
१९. स्मच्छब्दः प्रशस्तवचन इत्युक्तम् । प्राशस्त्यं गृणातु Sy. स्मच्छब्दः सहार्थे । सह SKN.
२०. ०णात्वमेवम् P., D. अभिगृणात्विति सम्बन्धः । नान्ये, ईदृशः स्तोतार इत्येवम् । अभिगृणातिः स्तुतिकर्मा । अभिष्टौतु नोऽस्मान् SKN. अभिशब्दयत्वस्मान् Dur.
२१. माध्यमिकी वाक् Sy. उर्वशीशब्दश्चाइनोतिः क्रियाशब्द इळाया विशेषणार्थः ।....यूथस्य माता उर्वशीति बह्वाकाशव्यापिनी चेत्यर्थः । अभिष्टौत्विति वर्शितः सम्बन्धः SKN. उर्वशीति वा योच्यते इळेति वा सा गृणातु नोऽस्मानित्यभिस्तनयतु Dur.
२२. वा अथवा Sy. वाशब्दः समुच्चये । यूथस्य मातेत्येतदपेक्षश्च समुच्चयः SKN. उपमार्थे वा वाशब्दो भेदापेक्षया Dur.
२३. न च केवलेळा, किं तर्हि ? उर्वशी वा, अयमपि वाशब्दः समुच्चय एव । उर्वशी मध्यमस्थाना विद्युत् SKN. उर्वशी Dur.
२४. प्रभूतदीप्तिः Sy. दिवाशब्दो दीप्तिवचनः । बृहदिति दीप्तिर्यस्याः सा महादीप्तिरित्यर्थः SKN. बृहद् महद् गृणातु दिवा द्योतनवता विद्युत्सहितेनोदकसमूहेन Dur.

भरमाणस्य मम । मनुष्यस्याभिगृणातु । स्वतेजसा जगदभिच्छादयन्ती । स्तूयमाना मयेति ।

सिषक्तु न ऊर्ज्व्यस्य पुष्टेः ॥ २० ॥

सिषक्तु । इत्थ देवान् स्तुत्वा स्वाभिलषितमूर्जव्यस्य राज्ञो निवेदयति—सेवताम् । अस्मान् । ऊर्जव्यस्य । पुष्टेः सकाशात् पुष्टिरिति । यास्कः—"बृहद्दिवा महद्दिवा गृणाना । अभ्यूर्ण्वाना । प्रभृतस्य । चायोरयनस्य ज्योतिषो वोदकस्य वा । सेवतां नोऽन्नस्य पुष्टेः" इति ।

---

१. तेजसो वोदकस्य वा दानेन । 'प्रभृथस्य तेजसो वोदकस्य' N.11.49. अथवा प्रभृथस्य प्रभरणवत आयोर्यज्ञम् आच्छादयन्ती Sy. प्रकर्षेण सम्भृतस्य Dur.

२. आयुं मनुष्यं यजमानम् Sy. गमनशीलस्योदकस्य समूहेन Dur.

३. सते० P.

४. ०भिच्छादयन्ति P. 'ऊर्णुञ् आच्छादने' आभिमुख्येन छादयन्ती, अस्मान् कृत्स्नां वा पृथिवीम् SKN. सर्वमिदमभिप्रच्छादयन्ती Dur.

५. शब्दयन्त्यस्मदीयं कर्म प्रशंसन्ती Sy. कर्मणि कर्तृप्रत्ययः । गीर्यमाणा स्तूयमानाऽस्माभिः SKN. शब्दयन्ती Dur.

६. 'अभिगृणातु न इळा । यूथस्य माता (सर्वस्य माता) स्मदभि नवीभिः । उर्वशी वा गृणातु उर्वशी वा । बृहद्दिवा महद्दिवा । गृणाना । अभ्यूर्ण्वाना । प्रभृथस्य प्रभृतस्य । आयोरयनस्य (मनुष्यस्य) ज्योतिषो वोदकस्य वा । सेवतां नोऽन्नस्य पुष्टेः' N.11.49.; SKN. 4.94.

७. जर्म्यस्य P. ८. सेवताम् । सामर्थ्याद्दिवसङ्घ इति गम्यते । अथवोर्वशी मरुद्गणो वा गृह्यते प्रकृतत्वादिति Sy.

९. एतन्नामकस्य राज्ञः Sy. यवादेरन्नस्य Dur.

१०. 'षोषकस्य सम्बन्धिनः' षष्ठी चतुर्थ्यर्थे । पुष्टये अस्माकमन्नस्य वृद्धय इत्यर्थः Sy.

११. पुष्टिरिति पुष्टिरिति D.

१२. बृहदिव P. पोषणाय Dur.

१३. ०हवि P., D.

१४. ०ना व्यूण्वाना P. ०नाप्यूण्वाना D.

१५. N. adds प्रभृथस्य before प्रभृतस्य ।

१६. च is omitted by N.

१७. ज्ञोतिषोषो D.

१८. The passage of the *Nirukta*, quoted by VM. beginning with 'बृहद्दिवा and ending with वोदकस्य वा' belongs to the previous stanza, no. 19. According to the Sarvānukramanī (26.41.p.20) the hymn V.41 contains 20 stanzas, the twentieth stanza consisting of one pāda (Virāṭ) only. The *Nirukta* however, reads the 19th and the 20th stanzas as one stanza and explains both together.

१९. सेवन्तां P., D.

२०. N. 11. 49.; SKN. 4. 94.

२१. Ms. D. puts the figure ॥४१॥ here to indicate the end of the forty-first hymn. No such number is given in P.

V.42.

प्र शंतमा वरुणं दीधिती गीर्मित्रं भगमदितिं नूनमश्याः ।
पृषद्योनिः पञ्चहोता शृणोत्वतूर्तपन्था असुरो मयोभुः ॥ १ ॥

प्र शन्तमा । प्राप्नोतु । सुखतमा । दीप्ता । स्तुति । इदानीम् । वरुणादीश्च । उरुः ? किं चास्मदीया गिर पृषद्वर्णाश्वस्थान । वायुश्च । शृणोतु । अन्यैरतीर्णमार्ग । बलवान् । सुखस्यभावयिता, 'वायुः पञ्चहोता सप्रणः' इति ब्राह्मणम् ।

प्रतिं मे स्तोममदितिर्जगृभ्यात्सूनुं न माता हृद्यं सुशेवम् ।
ब्रह्म प्रियं देवहितं यदस्त्यहं मित्रे वरुणे यन्मयोभु ॥ २ ॥

प्रति । मदीयम् । स्तोमम् । अदिति । प्रतिगृह्णातु । पुत्रम् । इव । माता । हृद्यम् । सुसुखम् ।

---

१. 'प्र शन्तमा' इत्यष्टादशर्चं दशमं सूक्तं भौमस्यात्रेरार्षं त्रैष्टुभम् । पूर्वसूक्ते 'वै तत्' (KSA. 26.41.p.20.) इत्युक्तत्वाद् इदमपि वैश्वदेवम् । 'तमु ष्टुहि' इत्येकादशी रुद्रदेवत्या । सप्तदश्येकपदा 'एतयोरुपान्त्यैकपदा' (KSA. 26.43.p.20.) इत्यनुक्रमिष्यमाणत्वात् । अत्रानुक्रमणिका—'प्र शन्तमा द्वयूनैकादशी रौद्री' (KSA.26.42.p.20.) इति । विनियोगो लैङ्गिकः Sy.

२. ०माः D.

३. अत्यन्तं सुखकरी Sy.

४. दीधित्या कर्मणा हविष्प्रक्षेपणात्मकेन सह Sy.

५. स्तुतिरूपा वाक् Sy.

६. अचिंतथम् Sy.

७. वरुणं मित्रं भगमदितिं च Sy.

८. The reading is doubtful.

९. पृषद्वर्णान्तरिक्षस्थः Sy.

१०. पञ्चहोता । पञ्चविधस्य प्राणापानादिहोमस्य साधको वायुः । यद्वा, पञ्चहोतेति वायोर्नाम । 'वायुः पञ्चहोता स प्राणः' इति हि श्रुतेः Sy.

११. शृणोतु स्तोत्रमिति Sy.

१२. अहिंसितगतिः Sy.

१३. ०वा D.
प्राणस्य दाता Sy.

१४. सुखस्यास्पदभूतः । एवमुक्तलक्षणो वायुः Sy.

१५. सव्रणः P. सप्राणः is suggested for संप्रणः

१६. The passage 'वायुः.....ब्राह्मणम् should follow immediately वायुश्च and precede शृणोतु ।

१७. प्रतिप्रति D., P.

१८. स्तोत्रम् Sy.

१९. ०ति P. देवता Sy.

२०. स्वतनुजम् Sy.

२१. मात्रा D. जननीव । सा यथा प्रतिगृह्यालिङ्ग्य परितुष्यति तद्वदित्यर्थः Sy.

२२. हृदयङ्गमम् Sy.

२३. शोभनसुखकरम् । एतद्द्वयं साधारणम् Sy.

अहमदितेः प्रसादेन । देवैर्निहितम्[१] । प्रियम्[२] । यद् । अन्नम्[३] । अस्ति तत् प्राप्नवानि[४] । तथा मित्रे च[५] । वरुणे च । यत्[६] । अस्य सुखस्योत्पादकं तदपीति ।

उदीरय कवितमं कवीनामुनत्तनमभि मध्वा घृतेन ।
स नो वसूनि प्रयता हितानि चन्द्राणि देवः सविता सुवाति ॥ ३ ॥

उदीरय[१०] । हे स्तोतारः[११] ! उत्थापयत । अत्यन्तं कवितमम्[१२] । अभ्युनत्त[१३] । एनम्[१४] । मोदकेन । आज्येन[१५] । सः । अस्मभ्यम्[१६] । धनानि[१७] । शुद्धानि । हितानि । आह्लादनानि[१८] । देवता[१९] प्रेरयति[२०] ।

समिन्द्र णो मनसा नेषि गोभिः सं सूरिभिर्हरिवः सं स्वस्ति ।
सं ब्रह्मणा देवहितं यदस्ति सं देवानां सुमत्या यज्ञियानाम् ॥ ४ ॥

समिन्द्र[२४] । हे इन्द्र[२५] ! त्वम् । अस्मान्[२६] । मनसा । गोभिः[२७] । सन्नय[२८] । तथा हरिवः[२९] ! प्राज्ञैश्च[३०] । सन्नय[३१] ।

---

१. देवैः प्राप्यम् Sy. २. प्रियकरम् Sy.
३. ०वैर्निहितयर्चया वर्चयान्नम् P. ०वैर्निहितया-वर्चयान्नम् D. मन्त्रजातम् Sy.
४. प्राप्तवानि P., D. प्रापयामीति शेषः । यद्वा मित्रे वरुणे चाहोरात्राभिमानिदेवयोर्युक्तलक्षणं ब्रह्म परिवृढं यज्ञादिरूपं कर्मास्ति तवहं धारयामीति Sy. ५. Omitted by P.
६. ब्रह्म Sy. ७. सुखसाधनम् Sy.
८. 'उदीरय' इत्येषैकादशिने सावित्रे पशौ वपायाज्या। सूत्रितञ्च—'उदीरय कवितमं कवीनां भगं धियं वाजयन्तः पुरन्धिमिति द्वे' (ĀśS. 3.7.) इति Sy.
९. अनया सविता च स्तूयते Sy.
१०. हे ऋत्विजः ! Sy.
११. ऊर्ध्वं प्रापयत हर्षयतेत्यर्थः Sy.
१२. कान्तदर्शिनमग्निं पुरोवर्तिनमग्निं सवितारं वा Sy.
१३. अभिषिञ्चत । तर्पयतेत्यर्थः Sy.
१४. अभ्युक्तेनम् P. अभ्युनक्तेनं D. देवम् Sy.
१५. मधुरेण सोमरसेन Sy. १६. घृतेन Sy.
१७. आज्यौन्न सोलभ्यं P. आज्येन सोलभ्यं D.
१८. धना D. निवासयोग्यानि गवादिधनानि Sy.
१९. प्रयतानि Sy. २०. आहादानानि P. आहादनानि D. आह्लादकानि हिरण्यानि Sy.
२१. देवः सविता is suggested for देवता ।
२२. प्रयच्छत्वित्यर्थः Sy.
२३. VM. ignores कवीनाम् ।
२४. ०न्नं P., D. २५. हे भगवन्निन्द्र ! U.
२६. प्रकृष्टेन चेतसा Sy. मनसाऽनुग्रहयुक्तेन Mah. प्राणेन समीचीनेन BB.
२७. गोभिः सह Sy. वाग्भिर्गवादिपशुभिर्वा Mah. वाग्भिर्गवादिभिः पशुभिः U. शब्दैः स्तुतिलक्षणैः BB.
२८. सन्न P. नयसि । अस्मान् गाः प्रापयसीत्यर्थः Sy. समित्युपसर्गो नेषीत्यनेन सम्बध्यते।... सन्नयसि संयोजयसि Mah. समित्ययमुपसर्गो नेषीत्यनेन क्रियापदेन सम्बध्यते ।....सङ्गमयसि U. सन्नय संयोजय। मनस्विनो वाग्मिनश्च कुरु स्तोतुमित्यर्थः BB.
२९. कथा P. D.
३०. हे हरिभ्यां तद्वन्निन्द्र ! Sy. हे मघवन् ! धनवन् ! Mah. महाधन ! BB.
३१. मेधाविभिः पुत्रैर्ऋत्विग्भिर्वा Sy. पण्डितैर्होत्रादिभिः Mah. पण्डितैः U. विद्वद्भिर्होतृप्रभृतिभिस्स्तोत्रकुशलैश्च BB.
३२. सन्नाय P. D. सन्नेषि Sy. संयोजयसि Mah. सङ्गमयसि U.

अविनाशेन[1]। तथाऽग्नेन[2] च। सन्नय[3]। यच्च[4] यादृक्[5] च। अस्ति। देवैर्निहितम्[6]। तथा यज्ञार्हणाम्[7]। देवानाम्। सुमत्या[8] च। सन्नय[9]।

देवो भगः सविता रायो अंश इन्द्रो वृत्रस्य संजितो धनानाम्।
ऋभुक्षा वाजं उत वा पुरंधिरवन्तु नो अमृतासस्तुरासः॥ ५॥

देवः[11]। भगः[12]। देवः[13]। तथा[14]। धनस्य[15]। प्रेरयिता[16]। अंशः[17]। तथा[18] वृत्रस्य। धनाना[19] च। सह[20] जेता। इन्द्रश्च। ऋभु[21]। वाजः[22]। विभ्वा[23] च। बहुप्रज्ञः[24]। एते देवा[25]। रक्षन्तु। अस्मान्। त्वरमाणा[26]।

मरुत्वंतो अप्रतीतस्य जिष्णोरर्जुर्यतः प्र ब्रवामा कृतानि।
न ते पूर्वे मघवन्नापरासो न वीर्यं नूतनः कश्चनाप॥ ६॥

मरुत्वतः[27]। मरुद्भिर्युक्तस्य[28]। शत्रुभिरप्रतिगतस्य। जयशीलस्य[29]। जरारहितस्य[30] तव। प्रब्रूमः[31]।

---

१. स्वस्तिभिः क्षेमैः Sy. क्षेमेण Mah. अविनाशेन वा BB. स्वस्तीत्यविनाशनाम N. 3. 21.

२. प्रभूतेनान्नेन Sy. अर्थज्ञानसहितेन वेदेन Mah. ब्रह्मणा वेदेन वेदार्थज्ञानेन वा तदर्थानुष्ठानेन वा BB.

३. सङ्गमयसि U. अस्मान् सन्नेषि BB.

४. अन्नम् Sy. यदस्ति यन्नित्यमित्यर्थः U. यच्चान्यत् BB. ५. दच्च P.

६. देवहितम् Sy देवार्थं कृतं कर्म यदस्ति यज्ञाख्यं देवैः कृतं दृष्टं वा यत्कर्म तेन सन्नेषि Mah. देवैर्दृष्टं त्रयीलक्षणम् U. देवार्थं कृतमस्ति कर्माग्निहोत्रादिकं तेनापि BB.

७. यज्ञसम्बन्धिनाम् Mah. यज्ञसम्पादिनाम् U. यज्ञार्हाणं यज्ञसम्पादितानामन्न्यादीनाम् BB.

८. अनुग्रहबुद्ध्या Sy.; Mah. तृतीयया विपरिणामः। शोभनया मत्या U. कल्याणमत्याऽनुग्रहबुद्ध्या BB.

९. संनेषि Sy. संयोजयसि Mah. अस्मान् संयोजय BB.

सु जुहोति। सुमिन्द्र णो मनसा नेषि गोभिरिति मनसेति तन्मनसा रिरिचानमाप्याययति गोभिरिति तद्गोभी रिरिचानमाप्याययति सु शु सूरिभिर्मघवन्त्सु शु स्वस्त्या। सं ब्रह्मणा देवकृतं यदस्तीति ब्रह्मणेति तद्ब्रह्मणा रिरिचानमाप्याययति सं देवा ना शु सुमतौ यज्ञियाना शु स्वाहा

१०. This stanza=YV.8.15.=TS.1.4.44.1. ŚB.4.4.4.7.p.387.

११. देव P., D.

१२. अत्र लिङ्गोक्ता देवताः Sy.

१३. हेहो P., D.

१४. सन्नस्य P. धनस्य स्वामी Sy.

१५. सविता Sy. १६. त्वष्टा Sy.

१७. ०ता शशत० P. ०ताशशवत्त० D.

१८. वृत्रस्य हन्ता Sy.

१९. सम्यग्जेतारः Sy.

२०. एते देवाः Sy.

२१. वाजः P., D. २२. अपि च Sy.

२३. बहुधीर्विभ्वोच्यते Sy.

२४. एते च अमृता अमरणधर्माणो भगादिदेवाः Sy.

२५. अस्मद्यज्ञं प्रति त्वरमाणाः सन्तः Sy.

२६. वयं यजमानाः Sy.

२७. मरुद्भिस्तद्वत इन्द्रस्य Sy.

२८. युद्धेऽपलायमानस्य Sy. २९. न केवलं तावन्मात्रम्। जिष्णोः जयनशीलस्य Sy.

३०. अजीर्यमाणस्य। सर्वदा यून इत्यर्थः Sy.

३१. प्रख्यापयाम Sy.

कर्माणि । हे मघवन्[1] ! तव । वीर्यम्[2] । न । पूर्वे[3] । प्राप्नुवन्[4] । नापि । अपरे[5] प्राप्स्यन्ति । नापि सम्प्रतिनः[6] । कश्चिद्[7], आप्नोति[8] ।

उप॑ स्तुहि प्रथ॒मं र॑त्न॒धेयं॑ बृह॒स्पति॑[9] सनि॒तार॑[10] धना॑नाम्[11] ।
यः शंस॑ते स्तु॒वते॑ शंभ॑विष्ठः पुरू॒वसु॑रा॒गम॒ज्जोहु॑वानम्[12] ॥ ७ ॥

उपस्तुहि[13] । उपस्तुहि । मुख्यम्[14] । रत्नाना धातारम्[15] । बृहस्पतिम्[16] । प्रदातारम्[17] । धनानाम्[18] । यः[19] । शस्त्रैः शसते । स्तोत्रैः स्तुवते[20] च । अतिशयेन श[21] भावयन्[22] । बहुधन[23] । आगच्छति[24] । अत्यन्तमाह्वयन्तमिति[25] ।

तवो॒तिभि॒॑[26] सच॑मानाऽ अरि॑ष्टा॒ बृह॑स्पते म॒घवा॑नः सु॒वीराः॑ ।
ये अ॑श्व॒दा उ॒त वा॑ सन्ति गो॒दा ये व॑स्त्र॒दाः सु॒भगा॒स्तेषु॒ रायः॑ ॥ ८ ॥

तवोतिभिः[26] । तव । रक्षणैः[27] । सङ्गच्छमाना. । अरिष्टा[28] भवन्ति । बृहस्पते ! धनवन्तः । सुपुत्राश्च[29] । ये[30] जना. याचितृभ्य. विद्यन्ते[31] । अश्ववाना दातारः[32] । अपि[33] । वा । विद्यन्ते[34] । गवा दातारः । ये च । वस्त्रदाः[35] । तेषु[36] त्वया प्रीयमाणेषु । कल्याणा[37] भवन्ति । राय[38] ।

---

१. अथ प्रत्यक्षेणोच्यते हे इन्द्र ! Sy.
२. पराक्रमम् Sy.
३. पुरातनाः पुरुषाः Sy.
४. आपुः Sy.
५. अपरेऽपि नापुः Sy.
६. सम्प्रतिनः is suggested for सम्प्रतिनः । किम्बहुना नूतनः Sy.
७. कश्चनाश्चर्यभूतः Sy.
८. यः कोऽपि वीर्यं न प्राप्नोति Sy.
९. हे अन्तरात्मन् ! त्वम् Sy.
१०. प्रकृष्टतममित्यर्थः Sy.
११. रमणीयधनदातारम् । अथवा रत्नशब्देन मणिमुक्तादयो गृहीता इह धनशब्देन गवादयः । गवादिदातारम् Sy.
१२. बृहतो मन्त्रस्य पतिं स्वामिनं देवम् Sy.
१३. सम्भक्तारम् Sy.
१४. धनानां हविर्लक्षणानाम् Sy.
१५. देवः Sy.
१६. स्तुवते सामभिर्यजमानाय Sy.
१७. सं P.
सुखस्य भावयितृतमो भवति Sy.
१८. प्रभूतधनः सन् Sy.
१९. आगच्छति तमुपस्तुहि Sy.
२०. ०यत० P. यश्च आह्वयन्तं यजमानम् Sy.
२१. रक्षाभिः Sy.
२२. अहिंसिताः Sy.
२३. शोभनपुत्राश्च भवन्ति Sy.
२४. त्वदनुगृहीताः Sy.
२५. सन्ति Sy.
२६. बहूनामश्वानाम् Sy.
२७. अश्वान्दाता ते तारः P.
२८. उत वा अथवा Sy.
२९. नवां P., D.
३०. वसूदाः P., D.
३१. तेषु सर्वेषु Sy.
३२. ०मानेषु P., D.
३३. शोभनधनाः सन्ति Sy.
३४. राया P., D. धनानि सम्भवन्त्विति शेषः Sy.

विसर्माणं कृणुहि वित्तमेषां ये भुञ्जते अप्रयन्तो न उक्थैः ।
अपव्रतान्प्रसवे वावृधानान्ब्रह्मद्विषः सूर्याद्यावयस्व ॥ ९ ॥

विसर्माणम् । विसरणशीलं विनश्यमानम् । कुरु । एषाम् । धनम् । ये स्वयमेव । भुञ्जते । अस्मभ्यम् । अप्रयच्छन्त. । एतै प्रयुज्यमानैरुक्थै । अपगतकर्मण सर्वदा । स्वनिर्गम एव । वर्धमानान् । ब्रह्मद्विषः । अस्मात् सूर्यात् । पृथक् कुरु, मारय ।

य ओहते रक्षसो देववीतावचक्रेभिस्तं मरुतो नि यात ।
यो वः शमीं शशमानस्य निन्दात्तुच्छ्यान्कामान्करते सिष्विदानः ॥ १० ॥

य ओहते । यं । देवैरशितव्ये अन्ने । राक्षसान् । प्रापयति । तम् । हे मरुत ! चक्रैरहितैर्भवता रथैः । नियात, यातिर्वधकर्मसु पठितः । य । युष्मान् । भजमानस्य । कर्म । निन्दति । स काण्व्यादीनामात्मीयाना कर्मणां कामान् । अल्पफलान् । करोति । कार्येषु स्विद्यद्गात्रः प्रवर्तमान इति ।

---

१. विसंमरण शीलं D. विसर्माणशीलः P.
२. विनग्यमा० P.
३. कुरु हे ब्रह्मणस्पते ! Sy.
४. वक्ष्यमाणानाम् Sy.
५. धनानां D.
६. विशिष्टेभ्योऽस्मभ्यम् Sy.
७. ०युमा० D.
८. स्तुतिप्रतिपादकैः शस्त्रैः Sy.
९. अवगतकर्म P.
१०. ०र्गं P. प्रसवे । उत्पत्तिमति मनुष्यलोके Sy.
११. ब्राह्मणद्वेष्टून् मन्त्रद्वेष्टून् वा Sy.
१२. Omitted by P. ०स्मात् D.
१३. अन्धकारे स्थापयेत्यर्थः Sy.
१४. यजमानः Sy.
१५. देवानां वीतिः प्राप्तिर्भक्षणं वा यत्र स तथोक्तः। तस्मिन् यज्ञे । अन्यथानुष्ठानादिना आसुरं करोतीत्यर्थः Sy.
१६. बलिनो राक्षसान् Sy.
१७. यजमानम् Sy.
१८. अचक्रै रथैः Sy.
१९. नियतयात P. नितरां प्रापयतान्धकारम् । यद्वा । अचक्रेभिरिति पूर्वत्रान्वयः । चक्रशब्देनाङ्गान्युच्यन्ते । पुनः पुनरङ्गरहितैः केवलैरेव प्रधानैरोहते प्रापयति, साङ्गं हि कर्म देवानभ्येति Sy. २०. युष्माकम् Sy.
२१. शंसमानस्य मम सम्बन्धि Sy.
२२. कर्म स्तुतिलक्षणम् Sy.
२३. ०न्ति D. निन्देत् वैदिकं ज्योतिष्टोमादिरूपं कर्म निन्दति Sy.
२४. काण्या० P. ०काण्र्या० or ०कुण्या० is suggested for ०काण्व्या० ।
२५. कृण्वाद्विजनितभोगान् Sy.
२६. स्वयञ्च तुच्छ्यान् नश्वरान् Sy.
२७. कुरुते, यद्वा युष्मासु कमनीयान् भोगान् तुच्छ्यान् करोति Sy.
२८. ०ञ्जन गा० D. स्विद्यन्नात्मानं क्लेशयन् Sy.

तमु ष्टुहि यः स्विषुः सुधन्वा यो विश्वस्य क्षयति भेषजस्य।
यक्ष्वा महे सौमनसाय रुद्रं नमोभिर्देवमसुरं दुवस्य ॥ ११ ॥

तमु ष्टुहि[1] । तम्[2] । एव । स्तुहि[3] । यः । शोभनेषुः[4] । शोभनधनुष्कश्च भवति । यो वा । सर्वस्य । भेषजस्य[5] । ईश्वरो[6] भवति । यज च । महे[7] । सौमनस्याय[8] । रुद्रम्[9] । नमस्कारैः[10] । देवम्[11] । क्षेप्तारम्[12] । परिचर[13] ।

दमूनसो अपसो ये सुहस्ता वृष्णः पत्नीर्नद्यो विभ्वतष्टाः।
सरस्वती बृहद्दिवोत राका दशस्यन्तीर्वरिवस्यन्तु शुभ्राः ॥ १२ ॥

दमूनसः[14] । दममनसः[15] । व्यापनशीलाः[16] । ये[17] । कल्याणहस्ताः[18] । याश्च पर्जन्यस्य[19] । पत्न्यः[20] । नद्य[21] । महतामपि तनूकर्त्र्यः[22] । तथा सरस्वती[23] । बृहद्दिवा चाप्सराः[24] । तथा[25] । राका ता सर्वाः[26] । प्रयच्छन्त्यो धनम्[27] । अस्माकमपि धनं दातुमिच्छन्तु[28] । शोभमानाः[29] ।

---

१. हे आत्मन् ! Sy.
२. शत्रुम् Sy.
३. स्तुतिं कुरु Sy.
४. ०नेषु P., D. शोभनबाणः Sy.
५. विरोधिहन्तृत्वात् सुष्ठुत्वम् Sy.
६. औषधस्य Sy.
७. ०रस्य P. शारीरस्य सांसारिकस्य चारिष्टस्य शमनायेश्वरव्यतिरिक्तस्यौषधस्याभावाद्भिषक्तमत्वाच्चास्य भेषजस्वामित्वम् । 'भिषक्तमं त्वा भिषजां' शृणोमि' (RV.II. 33.4.) इत्यादिश्रुतेः Sy.
८. महते Sy.
९. सुमनस्त्वाय । ईश्वराराधनाज्जिघत्सशान्तिः प्रसिद्धा Sy.
१०. दुःखात्साधनाद्दुरितात्वा मोचयितारं देवम् Sy.
११. हविर्भिर्नमस्कारैर्वा Sy.
१२. देवैः D. द्योतमानम् Sy.
१३. प्रकृष्टायुम् । बलवन्तमित्यर्थः । यद्वा प्राणदातारं शत्रुम् Sy.
१४. ०च P.
१५. अत्र लिङ्गोक्ता देवताः Sy.
१६. दानमनसो दान्तमनसो वा Sy.
१७. व्यावन० D. चमसाश्वरथगवादिशोभनकर्मवन्तः । मत्वर्थो लुप्यते Sy.
१८. सन्ति Sy.
१९. अत एव कुशलहस्ताः Sy.
२०. ते ऋभवो वर्षकस्येन्द्रस्य Sy.
२१. वश्यः P. पालयित्र्यः Sy.
२२. द्यः P. नवनशीला गङ्गाद्याः Sy.
२३. ऋभूणां मध्यमेन कृताः Sy.
२४. ०ति P. सरस्वती एतन्नामिका नदी वाग्देवी वा Sy. २५. प्रभूतदीप्तिः Sy.
२६. ०रसा P. ०रः D.
२७. अपि च Sy.
२८. ०काः P. देवी च Sy.
२९. दशस्यन्त्यः कामान् प्रयच्छन्त्यः Sy.
३०. अस्मभ्यं धनमिच्छन्तु Sy.
३१. दीप्तास्ताश्च Sy.

प्र सू महे सुशरणाय मेधां गिरं भरे नव्यसीं जायमानाम् ।
य आहना दुहितुर्वक्षणासु रूपा मिनानो अकृणोदिदं नः ॥ १३ ॥

प्र सु[1]। प्रकर्षेण, सुष्ठु, भरामि[2]। महते। सुनिलयाय बुद्धिम्। तथा स्तुतिं च। बुद्धेर्जायमानाम्[4]। यः[5]। आहननशील इन्द्रः। दुहितृभूमेः[8]। नदीषु। रूपाणि, ओषधिवनस्पत्यादीनाम्। मिमानः[9] उत्पादयन्। अस्मदर्थम्[10]। इदम्[11]। कृतवान्[12], इदमित्युदकनामेति[13]।

प्र सुष्टुतिः स्तनयन्तं रुवन्तमिळस्पतिं जरितर्नूनमश्याः ।
यो अब्दिमाँ उदनिमाँ इयर्ति प्र विद्युता रोदसी उच्चमानः ॥ १४ ॥

प्र सुष्टुतिः[15]। सुष्टुतिः[16]। जरितः[17]! स्तननशब्दम्[18], अवस्फूर्जनशब्दं च कुर्वन्तम्। पृथिव्याः[21]। पतिम्[22]। यः[23]। मेघवान्[24]। उन्दनवान्[25]। प्रगच्छति[26]। विद्युता सह[27]। द्यावापृथिवी[28]। सिञ्चन्निति[29]।

---

१. सुः P.
२. सम्पादयामि Sy.
३. सुखनि० P. शोभनरक्षकायेन्द्राय पर्जन्याय वा सुसुखाय वा Sy.
४. मतौ धीयमानाम् Sy.
५. इदानीमुत्पाद्यमानाम्। नूतनामित्यर्थः Sy.
६. इन्द्रः पर्जन्यो वा Sy.
७. ०हनशी० P., D. अहन्ता सेक्ता Sy.
८. दुहितृस्थानीयायाः पृथिव्या हिताय Sy.
९. ०स्पति नोन्निम्मिदयत् P. ०स्पती नोनिंमिदयत् D. कुर्वाणः Sy.
१०. अस्मभ्यम् Sy.
११. उदकम् Sy.
१२. करोतु Sy.
१३. इत्युदकेनामेति P. D. Ngh. 1.14. The passage इद....नाम should immediately follow इदम् and precede कृतवान्।
१४. VM. ignores नव्यसीम्। नव्यसीं नवतरामतिशयेन स्तुत्यां वा Sy.
१५. सुः P. सुष्ठुरिति D.
१६. अत्र पर्जन्यः स्तूयते Sy.
१७. सुष्ठुरिति P. शोभना स्तुतिः Sy.
१८. हे स्तोतः! त्वदीया स्तुतिः Sy.
१९. गर्जन्तम् Sy.
२०. अपस्पूर्वनशब्दं P. वर्षणजनितं शब्दं कुर्वाणम् Sy.
२१. अन्नस्योदकस्य वा Sy.
२२. स्वामिनम् Sy.
२३. पर्जन्यः Sy.
२४. मेघेष्वपान् P., D. अम्बिरपां दानवान् मेघः। तद्वान् Sy.
२५. उदकवान् Sy.
२६. गच्छति Sy.
२७. तडिता Sy.
२८. द्यावापृथिव्यौ Sy.
२९. VM. ignores प्र। नूनम् and अश्याः॥ प्रकर्षेण। व्याप्नोतु Sy.

एष स्तोमो मारुतं शर्धो अच्छा रुद्रस्य सूनूँर्युवन्यूँरुदश्याः ।
कामो राये हवते मा स्वस्त्युपं स्तुहि पृषदश्वाँ अयासः ॥ १५ ॥

एष स्तोमः । अयम् । स्तोमः । मरुताम् । वेगम् । अभिगच्छत्वित्येतदेवाह—रुद्रस्य । पुत्रान् । मिश्रणमिच्छतः । उद्व्याप्नोति । किं मदीयः कामः । माम् । धनाय । आह्वयति । सुष्ठु तथा सति त्वम् । उपस्तुहि । पृषदश्वान् । गच्छतो मरुतः ।

प्रैष स्तोमः पृथिवीमन्तरिक्षं वनस्पतीँरोषधीः राये अश्याः ।
देवोदेवः सुहवो भूतु मह्यं मा नो माता पृथिवी दुर्मतौ धात् ॥ १६ ॥

प्रैषः । पृथिव्यादीन् । अयम् । स्तोमः । धनार्थम् । प्राप्नोतु । तथा सर्वो देवः । मह्यम् । स्वाह्वान । भवतु । मा । अस्मानस्मदीया । माता । भूमिः । दुष्टे मनने । दधातु ।

उरौ देवा अनिबाधे स्याम ॥ १७ ॥

उरौ । इयमेकपदा ॥ हे देवाः ! वयम् । बाधारहिते । विस्तीर्णे स्थाने । स्यामेति ।

---

१. मया सम्पादितः Sy.
२. स्तोत्रम् Sy.
३. बलम् Sy.
४. अग० P., D. अभिमुखं प्राप्नोतु । समुदायरूपेण स्तुत्वा समुदायिरूपेणाह Sy.
५. पुत्रा P. एषां रुद्रेण पुत्रत्वेन परिकल्पितरसकृद्वक्तृता Sy.
६. यूनो मिश्रणेच्छून्वा Sy.
७. उव्याप्नो D. उन्नतमत्यधिकमहया व्याप्नुहि हे मनः ! Sy.
८. किं P., D.
९. संकल्पः Sy.
१०. धनार्थम् Sy.
११. धनान् धारयति P. प्रेरयतीत्यर्थः । यस्मादेवं तस्मात् Sy.
१२. अविनश्वरम् Sy.
१३. त्व P., D.
१४. वस्तु० P., D. उपेत्य स्तुहि Sy.
१५. पृषद्वर्णाश्वोपेतान् Sy.
१६. यज्ञगन्तॄन् Sy.
१७. स्तुतिः Sy.
१८. सर्वोऽपि देवः Sy.
१९. मदर्थम् Sy.
२०. ०ह्वानः P.
२१. Omitted by P. सर्वस्य निर्मात्री । यद्वा अत्रेर्भोमत्वाद्विशेषेण माता तादृशी Sy.
२२. ०मिं P. पृथिवी Sy.
२३. मनने P., D. दुर्मतौ Sy.
२४. ०तुं P., D. (मा) स्थापयतु Sy.
२५. युष्माकं सम्बन्धिनि नितरां बाधरहिते सुखे Sy.
२६. महति Sy.
२७. स्था P., D.
२८. ०मिति P.
भवेम वयमन्नयः Sy.

समश्विनोरवसा नूतनेन मयोभुवा सुप्रणीती गमेम ।
आ नो रयिं वहतमोत वीराना विश्वान्यमृता सौभगानि ॥ १८ ॥

समश्विनोः[1] । सङ्गमेम[2] हि । अश्विनो । रक्षणेन[3] । नवतरेण[4] । सुखस्य भावयित्रा[5] । शोभनप्रणयनेन[6] । आवहतम्[7] । अस्मभ्यम् । धनम् । अपि च । आवहतम् । वीरान्[8] । आवहत च । विश्वानि । अमरणानि[9] । सुधनत्वानि[10] च[11] ।

V.43.

आ धेनवः पयसा तूर्ण्यर्था अमर्धन्तीरुप नो यन्तु मध्वा ।
महो राये बृहतीः सप्त विप्रो मयोभुवो जरिता जोहवीति ॥ १ ॥

आ धेनवः[12] । धेनवः[13] । तूर्णगमनाः[14] । अहिंसन्त्यः[15] । अस्मान् । मधुरसेन[16] । पयसा सह[17] । उपायन्तु[18] । महते । धनाय । महतीः । सप्त नदीः[19] । सुखस्य भावयित्रीः । मेधावी[20] । स्तोता । अत्यन्तमाह्वयति[21] ।

आ सुष्टुती नमसा वर्तयध्यै द्यावा वाजाय पृथिवी अमृध्रे ।
पिता माता मधुवचाः सुहस्ता भरेभरे नो यशसावविष्टाम् ॥ २ ॥

आ सुष्टुती[22] । आह्वयामः[23] । सुस्तोत्रे[24] । नमस्कारेण[25] वयम् । सुखेन वर्तयितुम् । अहिंसित्र्यौ[26] ।

---

१. ०नो D. २. गमे P. वयं सङ्गच्छेमहि Sy. ३. ०णे P. ४. पूर्वमन्यैरननुभूतेन Sy. ५. सुखस्याम P. ६. शोभनप्रणयनवता Sy. ७. वह० P. प्रापयतम् Sy. ८. सुवीर्यवतः पुत्रानपि Sy. ९. हे अमरणावश्विनौ ! Sy. १०. सौभगान्यपि, आवहतम् Sy. ११. Ms. D. puts the figure ॥४२॥ here to indicate the end of the fortysecond hymn. No such number is given in P. १२. 'आ धेनवः' इति सप्तदशर्चमेकादशं सूक्तमत्रेरार्षं त्रैष्टुभं वैश्वदेवम् । अत्रानुक्रमणिका—'आ धेनवस्त्र्यूनैतयोरुपान्त्यैकपदा' (KSA. 26.43.p.20.) इति । विनियोगो लैङ्गिकः । अपोनप्त्रीये एकधनासु हविर्धानं प्रति नीयमानास्वाद्यानुवचनीया । सूत्रितञ्च—'आ धेनवः पयसा तूर्ण्यर्थाः समन्या यन्त्युप यन्त्यन्याः' (ĀŚS.5.1) इति Sy. १३. प्रीणयित्र्यो नद्यः Sy. १४. त्वरमाणगमनाः Sy. अर्थोऽस्तेः (N.1.18.) १५. अहिंसन्त्यः सत्यः Sy. १६. ०सन P. मधुरेण Sy. १७. रसेन सहिताः Sy. १८. उपागच्छन्तु Sy. १९. महिस्तप्त नदी P. सर्पणस्वभावाः । सप्तसंख्याकाः 'इमं मे गङ्गे' (RV.X.75.5.) इति मन्त्रोक्ता गङ्गाद्या वा । तत्र हि प्राधान्येन सप्तैवोक्ताः Sy. २०. विशेषेण प्रीणयिता Sy. २१. स्तो त्यन्त० P. २२. ०तीः P. २३. Sy. seems to explain आ and वर्तयध्यै together as अहम्..... आवर्तयितुमिच्छामि । २४. सुस्तोत्रेण is suggested for सुस्तोत्रे ॥ सुष्टुत्या शोभनस्तोत्रेण Sy. २५. हविषा च Sy. २६. हिंसारहिते Sy.

द्यावापृथिव्यौ । अन्नार्थम्[1] । तौ च मातापितरौ[2] । मधुवचसौ । शोभनहस्तौ[4] । अस्मान् । सङ्ग्रामे सङ्ग्रामे[5] । यशस्विनौ[6] । अवताम्[7] ।

अध्वर्यवश्चकृवांसो मधूनि प्र वायवे भरत चारु शुक्रम् ।
होतेव नः प्रथमः पाह्यस्य देव मध्वो ररिमा ते मदाय ॥ ३ ॥

अध्वर्यवः[9] । हे अध्वर्यवः[9] ! यूयम् । अभिष्टुतवन्तः[10] । सोमान्[11] । अथा[11] वायवे । यज्ञमुखे प्रभर[12] । कल्याणमभिषुतम्[13] । त्वञ्च वायो[15] ! होतेव[16] वषट् कर्ता[17] । प्रथममेव[18] । अस्य[19] । पिब । हे देव[20] ! एतत् मधु[21] । वयम्[22] । तुभ्यम् । मदाय । दत्तवन्तः[23] ।

दश क्षिपो युञ्जते बाहू अद्रिं सोमस्य या शमितारा सुहस्ता ।
मध्वो रसं सुभगास्तिगिरिष्ठां चनिश्चदद्दुद्दुहे शुक्रमंशुः ॥ ४ ॥

दश क्षिपः[25] । दश[25] । अङ्गुलयः[26] । बाह्वोः[27] । ग्रावाणम्[28] । अभिषवाय युञ्जते[29] पशो शमितार इव[30] ।

---

१. ०र्थं D. 'अन्नं वै वाजः' (TB.1.3.6.6.) इति हि श्रुतिः Sy.
२. पालयित्री द्यौः । निर्मात्री पृथिवी Sy.
३. प्रियवचना Sy.
४. ०नस्तौ P. अभिमतदानेन शोभनहस्तौ । एते उभयविशेषणे Sy.
५. सर्वेषु सङ्ग्रामेषु यज्ञेषु वा Sy.
६. यशोयुक्तौ ? (०युक्ते) द्यावापृथिव्यौ Sy.
७. अवताय P. अवातय D. रक्षताम् Sy.
८. हे अध्वरं युञ्जानाः ! Sy.
९. कुर्वाणाः यूयम् Sy.
१०. मधुररसानि सोमाज्यादीनि Sy.
११. अथ is suggested for अथा ।
१२. ०भरत is suggested for ०भर । प्रथमं प्रकर्षेण सम्पादयत Sy.
१३. चरणीयम् Sy.
१४. ०त P. ०भिष्टुत D.
१५. वायो P., D.
१६. होता यथा प्रथमं पिबति तद्वत् Sy.
१७. ०षड्० D.
१८. इतरदेवेभ्यः पूर्वम् Sy.
१९. म P. अमुं सोमम् Sy.
२०. वायो ! Sy.
२१. मधुरं सोमरसम् Sy.
२२. वयम् seems to be the explanation of नः ॥ नः अस्मदर्थम् Sy.
२३. ददाम । वायोः पूर्वपानमसकृत् प्रपञ्चितम् Sy.
२४. VM. ignores शुक्रम् ॥ दीप्तं सोमम Sy.
२५. अत्राभिषवस्य प्रतिपाद्यमानत्वात् सोमो देवता । यद्वा ऐन्द्री Sy.
२६. दशसंख्याकाः Sy.
२७. क्षेप्त्र्योऽङ्गुलयः Sy.
२८. ०ह्वो D. बाहू अप्यध्वर्युसम्बन्धिनौ अद्रिं युञ्जाते Sy.
२९. अभिषवग्रावाणम् Sy.
३०. यज्ञते P., D. गृह्णन्ति, यद्वा परस्परं युक्ता भवन्ति Sy.

सोमस्य । यौ[1] बाहू । शमितारौ[2] । शोभनपाणी[3] । ततः शोभनबाहुपरिगृहीतः । अंशु[4] । गिरिस्थितम्[5] । मध्वः[6] । रसम्[7] । दुदुहे[8] मूजवति स्थितमुत्तम रस दुग्धे[9] । तदेवाह—चनिश्चददिति[10] चदतिर्गतिकर्मा, अत्यन्तं[11] निर्गच्छत्[12] । शुक्रं[13] दुदुह[14] इति ।

असावि ते जुजुषाणाय सोमः क्रत्वे दक्षाय बृहते मदाय ।
हरी रथे सुधुरा योगे अर्वागिन्द्र प्रिया कृणुहि हूयमानः ॥ ५ ॥

असावि[15] । अभिष्टुत । तुभ्यम् । सेवमानाय[16] । सोम । प्रज्ञार्थम्[17] । बलार्थं[18] च । तथा महते[19] च । मदाय[20] । ततस्त्वमश्वौ[21] । शोभनबन्धुरौ[22] । रथे[23] । योगनिमित्तम्[24] । अभिमुखम्[25] । कुरु । इन्द्र ! प्रियौ । अस्माभिर्हूयमान[26]-[27] ।

आ नो महीमरमतिं सजोषा ग्नां देवीं नमसा रातहव्याम् ।
मधोर्मदाय बृहतीमृतज्ञामाग्ने वह पथिभिर्देवयानैः ॥ ६ ॥

आ नः[28] । आवह । अस्माकम्[29] । महतीम् । अनुपरमा[30] सर्वदा गच्छन्तीम् । तया सहित[31]-[32] । ग्नाम् ।

---

१. यो P., D.
२. अभिषोतारौ तौ बाहू युञ्जाते Sy.
३. शोभनहननौ ? (हस्तौ) Sy.
४. शोभनाङ्गुलिरध्वर्युः Sy.
५. ०तांशु P.
६. गिरिस्थायिनं गिरिवदुन्नतप्रदेशस्थितं वा Sy.
७. मधुरस्य सोमस्य Sy.
८. ०त मध्व रोसं P.
९. दोग्धि Sy.
१०. सरं P.
११. ०वदति P., D.
१२. चदन्तिर्गतिकर्म त्यन्तं P. आह्लादयन्—'चदि आह्लादने' इत्यस्माद्यङ्लुकि छान्दसं रूपम् Sy.
१३. श० P. निर्मलं रसम् Sy.
१४. दुग्धे । यद्वैकं वाक्यम् । अंशुर्व्याप्तः सुगभस्तिः । सुहस्तोऽध्वर्युर्मध्वो रसं दुदुहे दोग्धि Sy.
१५ हे इन्द्र ! Sy.
१६. सोमपानाय D.
१७. क्रतवे वृत्रवधादिकर्मणे Sy.
१८. बलाय Sy.
१९. महत्वे P., D.
२०. मादाय P., D.
२१. तस्त्वं P.
यस्मादेवं तस्मात् Sy
२२. शोभनायां धुरि नियुक्तौ Sy.
२३. रथे योजयित्वा तं रथम् Sy.
२४. याग० D. योग is omitted by P.
योगार्हं युक्ते वा Sy.
२५. अस्मदभिमुखम् Sy.
२६. ०याया स्मा० D.
२७. ०नं D. हूयमानः सन् Sy.
२८. अत्राग्नि सम्बोध्य ग्नादेवताया आवाह्यत्वादस्याग्निर्ग्ना वा देवता Sy.
२९. अस्मदर्थम् Sy.
३०. आ समन्ताद्रममाणां सर्वत्र गन्त्रीं वा Sy.
३१. अस्माभिः सह प्रीयमाणस्त्वम् Sy.
३२. सर्वैर्गन्तव्यामेतन्नामिकां देवताम् Sy. मेना ग्ना इति स्त्रीणाम् N.3.21.

देवीम्[1] । नमस्कारेण[2] सह । दत्तहविष्काम्[3] । सोमस्य[4] । मदाय सोमं पातुम् । उच्छिताम्[5] । सत्यज्ञाम्[6] । देवयानैः[7] । मार्गैः[8] ।

अञ्जन्ति यं प्रथयन्तो न विप्रा वपावन्तं नाग्निना तपन्तः ।
पितुर्न पुत्र उपसि प्रेष्ठ आ घर्मो अग्निमृतयन्नसादि ॥ ७ ॥

अञ्जन्ति[9] । आज्येन, अञ्जयन्ति[10] । य घर्मम्[11] । ब्राह्मणा[12] । प्रथनीय[13] मृदादिकमिव । प्रथयन्तः[14] । वपाशब्दः[15] सारवचन., यथा वपावन्त[16] भाण्डम्[17] । अग्निना[18] । तपन्तः[19] । सवितुः[20] । इव । पुत्रः । उपस्थे । प्रियतमः[21] । अग्निं प्रति[22] । घर्मः[23] । यज्ञमिच्छन् । अध्वर्युभिरासादि[24] ।

अच्छा मही बृहती शंतमा गीर्दूतो न गन्त्वश्विना हुवध्यै ।
मयोभुवा सरथा यातमर्वाग्गन्तं निधिं धुरमाणिर्न नाभिम् ॥ ८ ॥

अच्छ[25] । महती[26] । बृंहिता । सुखतमा । स्तुतिः[27] । दूतः[28] । इव राजप्रेषित । अश्विनौ । अभिगच्छतु[29] ।

---

१. स्तोत्रेण सह Sy.
२. रातं दत्तं दानाय सङ्कल्पितं हव्यं यस्यास्ताम् । दत्तहविष्कामित्यर्थः Sy.
३. मधुरस्य सोमस्य Sy.
४. प्रवृद्धाम् Sy.
५. यज्ञमभिजानतीम् Sy.
६. देवैर्गन्तव्यैः Sy.
७. VM. ignores आ and अग्ने ॥ आ अभिमुखम् । हे अग्ने ! Sy.
८. प्रवर्ग्ये महावीरेऽज्यमाने 'अञ्जन्ति यम्' इत्येषा । सूत्रितञ्च—'अञ्जन्ति यं प्रथयन्तो न विप्रा इत्यज्यमाने' (ĀŚS.4.6.) इति Sy.
९. ०न्ती P., D.
अञ्जन्ति Sy.
१०. महावीरम् Sy.
११. ०णं P. ०णाः is suggested for ०णा ॥ मेधाविन ऋत्विजोऽध्वर्यवः Sy.
१२. पृथनीयाम् P., D.
१३. उदाकमिव P. इदानीं प्रथयन्तः Sy. नेति सम्प्रत्यर्थे । अस्त्युपमार्थस्य सम्प्रत्यर्थे प्रयोगः N. 7. 31.
१४. ०न्ता P.
१५. ववाश० P.
पवाश० D.
१६. सकारव० P.
१७. प्रवृद्धं पशुं यथाग्नौ तपन्ति तद्वत् Sy.
१८. बाधवनिना P.
१९. ०न्त D.
२०. पितुः Sy.
२१. ०तमनः P.
२२. प्रीति P. अग्नौ Sy.
२३. महावीरः । 'यद्ध्रामित्यपतत्तद्वृधर्मस्य धर्मत्वम्' (TĀ. 5. 1. 5.) इति हि श्रुतिः Sy.
२४. आसावितः । अत्र पितृपुत्रवृष्टान्तः स्फोटादिराहित्येन सुखवासप्रख्यापनार्थः Sy.
२५. ०ति D. पूज्या Sy.
२६. महती Sy.
२७. ०तिं D.
अस्मदीया स्तुतिः Sy.
२८. आह्वाता Sy.
२९. अभिमुखं गच्छतु Sy.

आह्वातुम्[1]। ततो युवां सुखस्य भावयितारौ। सरथौ[2]। इतोमुखम्[3]। आयातम्[4]। अधिगच्छन्तम्। निहितं[5] हविः। यथा। शकटस्य रथहननसाधनीम्[6]। धुरम्[7]। आणिरुभयोरनिःसरणार्थं गच्छतीति।

प्र तव्यसो नमउक्तिं तुरस्याहं पूष्ण उत वायोरदिक्षि।
या राधसा चोदितारा मतीनां या वाजस्य द्रविणोदा उत त्मन् ॥ ९ ॥

प्र तव्यसः[9]। अतिशयेन वृद्धस्य। क्षिप्रस्य वायोः[12]। पूष्णः[13]। च। अहम्[14]। नमस्कारवचनम्[15]। प्रकर्षेणातिसृजामि[16]। यौ[17]। अन्नेन[18]। चोदयितारौ[19]। स्तुतीनाम्[20]। यौ च। बलस्य दातारौ[21]। यौ च। आत्मनैव[22]। द्रविणसो[23] धनस्य दातारावितिः।

---

१. ०विश्वानभिगच्छत्यां ह्वातुं P. स्विनाभिग० D. २. एकरथौ सन्तौ Sy.
३. अभिमुखम् Sy. ४. गच्छतम् Sy. ५. निहितं सोमम् Sy.
६. स्थन० D. स्थानहननान्धनीं P. ७. मुरम् P. भारवाहिकाम् Sy.
८. कील इव। यथा निष्कीला नाभी रथं न निर्वहति तद्वद्युवाभ्यां वियुक्तः सोमो यागं न निर्वहतीति ज्ञापयितुमेव दृष्टान्तितम् Sy.
९. तव्यसरः P. तव्यरसः D. आङ्गिरसोऽत्रिरपश्यत् SKN.
१०. प्रकृष्टबलस्य Sy. तवस इति तवतेर्वृद्ध्यर्थस्य तृचि 'तुश्छन्दसि' इतीयसुनि 'तुरिष्ठेमेयस्सु' इति लोपः। छान्दसत्वादीयसुन आदिलोपेन रूपम्। तवीयसोऽतिशयेन वर्धितुः। तवश्शब्दस्य बलनाम्नो मत्वन्तस्यापकर्षणेन बलवत इत्यर्थः SKN.
११. त्वरमाणस्य Sy. त्वरणस्य। तुपूर्वस्य रिषतेर्वा हिंसार्थस्य, हिंसितुस्तमसाम् SKN.
१२. उक्तलक्षणाय Sy.
१३. पोषकस्य देवस्य उक्तगुणाय देवाय Sy.
१४. अपि च Sy. उतशब्द एवार्थे SKN.
१५. ऋषिः Sy.
१६. नम इति वचनं स्तोत्रम् Sy. स्तुत्युक्तिम् SKN.
१७. प्रविशामि Sy. प्रेत्ययमदिक्षीत्यनेन सम्बध्यते। ....'दिश अतिसर्जने' प्रकर्षेण दिशाम्यतिसृजाम्युच्चारयामीत्यर्थः SKN.
१८. पूषवायू Sy.
१९. P. reads वायन्नेन for यौ। अन्नेन ॥ हविर्लक्षणेन निमित्तेन Sy. धनेन SKN.
२०. प्रेरयितारौ Sy. चोदितारौ SKN.
२१. मतीनाम्। यद्वा राधसेति षष्ठ्यर्थे तृतीया। राधसो धनस्य मतीनां च चोदयितारौ तौ देवौ Sy. धनं ददतौ तरतिक्रियायां स्तोत्रं चोदयत इत्यर्थः SKN.
२२. अन्नस्य सङ्ग्रामस्य वा चोदयितारौ तौ देवौ Sy. वाजस्यान्नस्य साकाङ्क्षत्वाद् दातारावितिः शेषः SKN.
२३. आत्मबेनव P. आत्मन्यनन्यप्रेरणयैव Sy. 'मन्त्रेष्वाङि०' (Pa. 6. 4. 141.) इत्यादिलोपः, तृतीयायाश्च लुक्।....आत्मनैवेत्यर्थः SKN.
२४. ०सा D. द्रविणोदौ भवतमिति शेषः Sy.

आ नामभिर्मरुतो वक्षि विश्वाना रूपेभिर्जातवेदो हुवानः ।
यज्ञं गिरो जरितुः सुष्टुतिं च विश्वे गन्त मरुतो विश्व ऊती ॥ १० ॥

आ नामभिः । आत्मीयैः[1] नामधेयैः विद्योतमानान् । मरुतः[2] । सर्वांस्त्वम्[3] । आवह[4] । तथाऽलङ्कृतैः[5]स्तेषां रूपैश्च[6] सह । अस्माभिर्हूयमान[7] । अथ मरुत्[8] आह—यज्ञम् । उक्थगिरः[9] । सुष्टुतिम्[10] । च[11] । जरितुः[12] । सर्व एव । गच्छत[13] यूयम् । हे मरुतः ! रक्षणार्थम्[14] । विश्व इति पूरणम्[15] ।

आ नो दिवो बृहतः पर्वतादा सरस्वती यजता गन्तु यज्ञम् ।
हवं देवी जुजुषाणा घृताची शृग्मां नो वाचमुशती शृणोतु ॥ ११ ॥

आ नः[16] । आगच्छतु[17] । अस्माकम् । महत[18] । दीप्तात्[19] । स्वावासात्[20] पर्वतात्[21] । सरस्वती[22] । यष्टव्या[23] ।

---

१. ०यैः P. इन्द्रवरुणेत्यादिलक्षणैः Sy.
२. देवान् Sy.
३. ०र्वां त्वाम् P. सर्वानपि स्तोत्रभाजो हविर्भाजश्च Sy.
४. आवहसि Sy.
५. ०हं जयं तथा० P.
०हञ्जनन्तथा० D.
६. सहस्राक्षबाहस्तत्वादिलक्षणं रूपैः आ वहसि यज्ञम् Sy.
७. भूय० P., D. अस्माभिराहूयमानः सन् Sy.
८. ०तम् D.
९. अस्मदीयं यज्ञसम्बन्धि हविर्वा Sy.
१०. उक्था० P. स्तुतिवचांसि Sy.
११. स्तुतिं P. तत्साध्यां शोभनफलां स्तुतिं च । अवयविन्याः स्तुतेरेकत्वादेकवचनम् । अवयवानां बहुत्वाद् बहुवचनम् Sy.
१२. Omitted by P.
१३. स्तोतुः सम्बन्धिनीः Sy.
१४. ०त P. उक्ते यज्ञस्तुती अभिलक्ष्य आगच्छत Sy.
१५. ऊत्या रक्षया च सह गन्त Sy.
१६. पारयितं P.
१७. VM. ignores आ and जातवेदः ॥ हे जातप्रज्ञाग्ने ! Sy.
१८. 'आ नो दिवः' इत्येकादशी व्यूढे दशरात्रे नवमेऽहनि प्रउगशस्त्रे सारस्वततृचे द्वितीया । सूत्रितञ्च 'आ नो दिवो बृहतः पर्वतादा सरस्वत्यभि नो नेषि वस्यः, (ĀŚS. 8. 11.) इति Sy.
१९. ०च्छ त्वम् P. येद्यप्यनुच्छिते प्रवेशे स्थिता (तथापि) शीघ्रमागच्छतु BB.
२०. महतोऽपि BB.
२१. ०त्तान् P. द्योतमानाद् द्युलोकात् Sy.
२२. ०सान् P.
२३. ०तान् P. पर्ववतः पूरणवतः प्रीणनवतो वान्तरिक्षान्मेघाद्वा सरस्वती आगच्छतु । अनेन माध्यमिकी वागुच्यते । यद्वैतद्दिव इत्यस्य विशेषणम् । सन्ति हि द्युलोके त्रीणि पर्वाणि 'तिस्रो दिवः पृथिवीः' इत्याविभुतेः । अस्मिन् पक्षे द्वितीय आकारः पूरणः Sy. प्रकृष्टाद्विषमाच्च प्रदेशादागच्छत्वित्यर्थः BB.
२४. देवी Sy.

आह्वानम्[1] । देवी । सेवमाना[2] । उदकमञ्चन्ती[3] । सुखाम्[4] । अस्मदीयाम्[5] । वाचम्[6] । कामयमाना[7] । शृणोत्विति[8] ।

आ वेधसं नीलपृष्ठं बृहन्तं बृहस्पतिं सदने सादयध्वम् ।
सादद्योनिं दम आ दीदिवांसं हिरण्यवर्णमरुषं सपेम ॥ १२ ॥

आ वेधसम्[9] । आसादयध्वम्[10] । विधातारम्[11] । नीलपृष्ठम्[12] । महान्तम्[13] । बृहस्पतिम्[14] । यज्ञे । अध्वर्युभिः साद्यस्थानम्[15] । यज्ञगृहे[16] । देदीप्यमानम्[17] । हिरण्यसदृशम्[18] । आरोचमानम्[19] । स्पृशाम[20] ।

आ धर्णसिर्बृहद्दिवो रराणो विश्वेभिर्गन्त्वोमभिर्हुवानः ।
आ वसानः ओषधीरमृध्रस्त्रिधातुः शृङ्गो वृषभो वयोधाः ॥ १३ ॥

आ धर्णसिः[21] । आगच्छतु[22] । धारयिता[23] । बृहद्दीप्तिः[24] । रममाणः[25] । विश्वैः[26] । पितृभिः[27] सह देवैः । आह्वयमानः । पत्नीभूताः[28] । ओषधीः[29] । राजयन् । अहिंसिकोऽग्निः[30] । त्रिगुणदीप्तिरत्यन्तमुज्वलः[31] । वर्षिता । अन्नस्य[32] धाता[33] ।

---

१. अस्मदीयमाह्वानम् Sy. अस्माकमाह्वानम् BB.
२. स्तुतिं सेवमाना Sy. प्रीयमाणा वा BB.
३. ०कञ्चती P., D. घृतमुदकमञ्चती Sy. घृतमाज्यभागं प्रत्यञ्चन्ती BB.
४. सुखकरीम् Sy. सुखां समर्थां वा BB.
५. अस्माकम् BB.
६. ०चम P., D. स्तुतिम् Sy. स्तुतिरूपाम् BB.
७. ०नाः P., D. कामयमाना सती Sy. कामयमाना अस्मत्प्रत्तानि हवींषि स्तोत्राण्येव वा BB.
८. VM. ignores आ and यज्ञम् । This stanza=TS. 1. 8. 22. 1.
९. एषा बार्हस्पत्या । हे ऋत्विजः ! यूयम् Sy.
१०. स्थापयध्वम् Sy.
११. विधारि P. विधार D. विविधकर्तारम् Sy.
१२. णीवपृष्ठं P. स्निग्धाङ्गम् Sy.
१३. महान्तम् । तथा सन्तम् Sy.
१४. बृहतो मन्त्रस्य स्वामिनं देवम् Sy.
१५. साद्ययानं P., D. योनौ सीदन्तम् Sy.
१६. अस्मद्यागगृहे Sy. १७. दीप्य० D.
१८. ०शः P. हितरमणीयवर्णम् Sy.
१९. वयमृत्विग्यजमानाः परिचरेम। अथवेयमाग्नेयी। बृहतः परिवृढस्य कर्मणः स्वामीति बृहस्पतिरग्निरुच्यते । तथा नीलवर्णधूमपृष्ठत्वसदनसादनहिरण्यवर्णत्वादिलिङ्गैरप्यग्निरेव बृहस्पतिः Sy.
२०. VM. ignores आ ॥ सर्वतः Sy.
२१. इदमाद्यृक्त्रयमाग्नेयम् Sy.
२२. अग्निः आगच्छत्वस्मद्यज्ञम् Sy.
२३. सर्वस्य धारकः Sy.
२४. ०प्ति D. प्रभूतदीप्तिः Sy.
२५. रममाणः कामान् प्रयच्छन्वा Sy.
२६. सर्वैः Sy. २७. पितृ० D. रक्षणैः Sy.
२८. गन्त्रीज्वालाः Sy. २९. राजयन्तम् P., D.
३०. अहिंसितः Sy. ३१. ०कोनिः D.
३२. ०णं दी० P., D. त्रिप्रकारश्शुक्लवदुज्ज्वलतलोहितशुक्लकृष्णवर्णज्वालः Sy.
३३. उज्वलः is omitted by P. उज्ज्वलः is suggested for उज्वलः ।
३४. ०तोज्ञ० P.
३५. अन्नस्य दाता हविषो वा धारकः Sy.

मातुष्पदे परमे शुक्र आयोर्विपन्यवो रास्पिरासो अग्मन् ।
सुशेव्यं नमसा रातहव्याः शिशुं मृजन्त्यायवो न वासे ॥ १४ ॥

मातुः । पृथिव्याः[1] । उत्तमे[2] । स्थाने । शोचमाने[3] । यजमानस्य[4] स्वभूते वेद्यामग्निम् । स्तोतारः[5] । रास्पिराः[6] 'रास्पी रासतेर्दानकर्मण' इति यास्कः, हविषो दातारः[7] । उपगच्छन्ति[8] । शोभनसुखसाधनम्[9] । नमस्कारेण[10] । दत्तहविष्काः । कञ्चन शिशुम्[11] । हस्तेन मृजन्ति[12] । मनुष्याः[13] । इव[14] पुत्रम्[15] । वेश्मनि[16] ।

बृहद्वयो बृहते तुभ्यमग्ने धियाजुरो मिथुनासः सचन्त ।
देवोदेवः सुहवो भूतु मह्यं मा नो माता पृथिवी दुर्मतौ धात् ॥ १५ ॥

बृहत्[17] । महते[18] । अन्नम् । महते । तुभ्यम् । अग्ने[19] । बुध्या[20] त्वा स्तुवन्तः । मिथुनाः[21] । सेवन्ते दानाय पत्नीयजमानाः[22] । शिष्टं स्पष्टम्[23] ।

उरौ देवा अनिबाधे स्याम ॥ १६ ॥

[उरौ देवाः ।][24][25]

---

१. निर्मातुः Sy.
२. उत्तरवेद्यां स्थितम् Sy.
३. दीप्ते Sy.
४. मनुष्यस्य Sy.
५. विपन्यवः स्तोतृनामैतत् । Cf. Ngh. 3. 15. होत्रादयः Sy.
६. ०तारो सरा P., D. रा धनं हविर्लक्षणम् । तत् स्पृशन्ति रास्पा जुह्वादयः । तद्वान् रास्पी तद्वन्तो रास्पिराः । उक्तविधा ऋत्विजः Sy.
७. Cf. N. 6. 21.
८. अगमन् भजन्ते Sy.
९. ०नस्सु० P. सुखाय हितम् Sy.
१०. रैः D. स्तोत्रेण Sy.
११. उत्पन्नमात्रम् Sy.
१२. सम्मार्जयन्ति Sy.
१३. ष्यौ P., D.
१४. तत्र दृष्टान्तः । लौकिका मनुष्या इव । ते यथा शिशुं वासाय मृजन्ति तद्वत् Sy.
१५. ०त्र P.
१६. इवेति P. वासाय Sy.
१७. प्रभूतम् Sy. १८. बृहते Sy.
१९. कर्मणा जीर्णाः Sy.
२०. सुवन्तः P.
२१. मथुधना P. पत्नीभिः सहिताः Sy. 'जायापती अग्निमादधीयाताम्' इत्यादिश्रुतेः । अधिकाराध्याये षष्ठे स्त्रिया अप्यधिकारः स च पत्या सह (पू० मी० 6.1.24.) इति हि प्रतिपादितम् Sy.
२२. ०न्त. D.
२३. पत्नीयजमानाः refers to मिथुनाः ।
२४. By शिष्टं VM. means देवोदेवः । सुहवः । भूतु । मह्यम् । मा । नः । माता । पृथिवी । दुर्मतौ and धात् ॥ अवशिष्टं गतम् Sy.
It has already been explained. See RV. V. 42. 16.
२५. The *pratika* is supplied by the Editor.
२६. The stanza has already been explained. See RV. V. 42. 17.

सम॒श्विनो॒रव॑सा॒ नूत॑नेन मयो॒भुवा॑ सु॒प्रणी॑ती॒ गमेम ।
आ नो॑ र॒यिं व॑हतु॒मोत वी॒राना विश्वा॑न्यमृता॒ सौभ॑गानि ॥ १७ ॥

[समश्विनोः ।]

V.44.

तं प्र॒त्नथा॑ पू॒र्वथा॑ वि॒श्वथे॒मथा॑ ज्ये॒ष्ठता॑तिं बर्हि॒षदं॑ स्व॒र्विद॑म् ।
प्र॒ती॒चीनं॑ वृ॒जनं॑ दोहसे गि॒राशुं॑ जय॑न्त॒मनु॒ यासु॒ वर्ध॑से ॥ १ ॥

तं प्रत्नथा । सूक्तमदिष्टैक्षत्रप्रभृतिभि (?) सहावत्सार॰ । काश्यप इद सूक्तमपश्यत् ॥

---

१. The *pratīka* is supplied by the Editor.

२. The stanza has already been explained. See RV. V. 42. 18.

३. 'तं प्रत्नथा' इति पञ्चदशर्चं द्वादशं सूक्तम् । अवत्सारो नाम ऋषिः स च कश्यपगोत्रः । यासु ऋक्षु सदापृणबाहुवृक्तादयः श्रुतास्तासु तेऽपि समुच्चीयन्ते । चतुर्दशीपञ्चदश्यौ त्रिष्टुभौ शिष्टास्त्रिष्टुबन्तपरिभाषया (KSA. 12. 13.p.5.) जगत्यः । विश्वे देवा देवता । अनुक्रान्तञ्च 'तं प्रत्नथा पञ्चोना काश्यपोऽवत्सारोऽन्ये च ऋषयोऽत्र वृष्टलिङ्गा द्वित्रिष्टुबन्तम्' (KSA. 26.44.p.20.) इति । वाजपेये अतिरिक्तोक्थ्ये आदितस्त्रयोदशर्चः शंसनीयाः । सूत्रितञ्च 'तं प्रत्नथेति त्रयोदशानामेका शिष्ट्वाहूय दूरोहणं रोहेत्' (ĀSS.9.9.) इति Sy.

अपि वा 'तस्मै सूर्याय हविराजुहोत' इति हवनमन्त्रे सूर्यश्रवणात् सूर्यदेवतोऽयम् । शौनकस्तु वाशतये समाम्नाये मन्त्रदेवता अनुक्रममाणः . . . . वैश्वदेवान्येकादश सूक्तान्यवोचत् (Cf. KSA.26.41.p.20.) । तेषां 'तं प्रत्नथा' इत्येनच्चतुर्थं सूक्तम् । तेन तन्मत्या वैश्वदेव एव मन्त्रः स्यात्, वाजसनेयिनां पुनरनया शुक्रो गृह्यते । स च 'सा प्रथमा संस्कृतिः' इत्यनेनैन्द्रेण हूयते, तेन तेषामप्यैन्द्र एव । . . . . स एव सर्वथाप्येवं दुःखधारदेवतो मन्त्रः । अनिरुक्तदेवतालिङ्गत्वात् । शण्डामर्कस्त्वसुरपुरोधसोः सम्मोहनार्थमनेनानिरुक्तदेवतालिङ्गेन मन्त्रेणान्यतरः शुक्रामन्थिनोर्गृह्यते । . . . . तस्मात्तावनेनानिरुक्तदेवतालिङ्गेन मन्त्रेण समोह्येते । सौम्यो वा स्यादयं, सोमो ह्युच्यते मन्थिपात्रेण शुक्रपात्रेण गृह्यमाणो गृहीतो वा सप्तदशशस्त्रशंसनाभिप्रायेण Dur.

४. Cf.KSA. 26.44.p.20.

५. इयमुत्तरा च द्वे ऐन्द्र्यावित्याहुः । तत्रोपपत्तिमेवमाहुः । 'तं प्रत्नथा' इत्येषा शुक्रामन्थिग्रहणे विनियुक्ता । ऐन्द्रौ च शुक्रामन्थिनौ । 'यदैन्द्रं शंसति तेन शुक्रामन्थिना उक्थवन्तौ' (AB.3.1.) इति हि ब्राह्मणम् । अध्वर्युसम्प्रैषोऽपि भवति । 'प्रातःप्रातः सवस्य शुक्रवतो मधुश्चुत इन्द्राय सोमान् प्रस्थितान् प्रेष्य' (ŚB.4.2.1.23.) इति प्रशास्तृप्रैषश्च भवति । 'होता यक्षदिन्द्रं प्रातः प्रातःसावस्य (ĀSS.5.5.) इत्यादि 'प्रस्थिता इन्द्राय सोमाः' इति याज्या चैन्द्री 'इदं ते सौम्यं मधु' (ĀSS.5.5.) इति । तस्मादैन्द्र्यौ Sy.

अवत्सारस्य । वर्षकर्मसम्बन्धादिन्द्रोऽस्य देवता । 'दोहसे' इति मध्यपुरुषश्रुतेः प्रत्यक्षकृतोऽयं मन्त्रः SKN. अवत्सारः पञ्चदशर्चं सूक्तमपश्यद् वैश्वदेवम् । . . . . चरकाध्वर्यवः पुनरनया मन्थिनं गृह्णन्ति । . . . . इत्येवं चन्द्रदैवतोऽयं मन्त्रः Dur.

तमिन्द्रम्[1] । यथात्यन्तं पुरातनाः[2] हुवुवुः[3] । यथा वा ततोऽर्वाचीनाः[4] । यथा वा सम्प्रतितना अदृश्यमाना[5] । सर्वे यथा वा दृश्यमाना इमे तद्वत् । त्वमपि स्तोतः[6] । प्रशस्तम्[7] । मम । बर्हिषि

---

१. तं मिन्द्रं P. तं त्वा स्तुम इति शेषः Mah. तमेवंगुणविशिष्टमिन्द्रम् U. अत्रापि स एवेन्द्रः प्रत्यक्षेण स्तूयते.. तमित्यत्र त्वां स्तुम इति शेषः BB. तं हे भगवन् ! सोम ! तमिन्द्रं वा वैश्वदेवं गणं वा Dur. तं त्वामिन्द्रं स्तुम इति शेषः SKN.

२. पुरातना यजमाना इव Sy. थाल्प्रत्यय उपमार्थीयः । प्रत्नशब्दः पुराणवचनः । चिरन्तनानां भृग्वादीनामिव फलं दोहसे Mah. था उपमार्थीयः । प्रत्नशब्दः पुराणवचनः । चिरन्तनानामिव ऋषीणां भृगुप्रभृतीनाम् U. अयमर्थः—यथा शक्त्यादयः पुराणास्तामस्तुवंस्तथा वयमपि त्वां स्तुमः BB. कथं पुनर्धोक्षि, इन्द्रं वैश्वदेवं वा गणम् ? चिरन्तना इव ये महर्षयो भृग्वादयस्तेषां यथा दुग्धवानसि तथाऽस्माकमपि धोक्षि Dur.

३. हुवुवुः P. वुवुहुः is suggested for हुवुवुः ।

४. तो० D. ५. अस्मदीयाः पूर्वे यथा Sy. पूर्वेषामिवर्षीणां साध्यादीनामिव Mah. यथा च ततोऽपि पूर्वे भृगुप्रभृतयो मदीयाः पित्रादयो वा त्वामस्तुवंस्तथा वयं स्तुमः BB. पूर्व इव च शक्तिप्रभृतय ऋषयः । ते हि पूर्वे न च पुराणाः । अत्रिप्रभृतीनामपत्यत्वात् SKN.

६. इदानीं वर्तमाना यजमानाः । ते यथेन्द्रस्य स्तुत्या फलमलभन्त तद्वदयमपि Sy. इदानींन्तनानां यजमानानामिवास्य फलं दोहसे Mah. इदानीन्तनानामिव यजमानानाम् U. यथा वेमे वर्तमानास्त्वां स्तुवन्ति तथा स्तुमः BB. यथा वर्तमानकालीनानां यजमानानां धोक्षि तथैवास्माकमपीति Dur. इम एव वर्तमानाः । ....इमयेति निगमप्रसक्तस्य प्रकृतिं निराह —'अयमेततरः' आगततर इव भवति । प्रत्यक्षात्यन्तासन्नोपाधित्वाविदमः । आपेक्षिकत्वाद् दूरासन्नव्यपदेशस्य । अत्यन्तविप्रकृष्टापेक्षायामीषद्विप्रकर्षप्रतिलब्धासन्नव्यपदेशविषयोऽदृशब्दोऽत्र आह—अमुष्माद् अवस इत्यर्थः । 'असावस्ततरः क्षिप्ततरः इव । कुतः ? अस्मादिदम इत्यर्थः । अत्राप्युक्तेनैव प्रकारेण प्रकर्षप्रत्ययप्रयोजना । असाविति प्रसङ्गेनाह— अमुयेत्यादि । यथा इमथा, इतीदमवस्था भवत्युपमायाम् । एवमदसोऽप्यमुथा, इति पदं व्याख्यातम् । यथा असावित्यनेन कृतनिर्वचनेन पदद्वयेनासावस्ततर इति प्रकृत्यर्थो, यथेत्युपमायामिति थाशब्दार्थः । एवममुयेति, यथासावित्यनेन व्याख्यातम् । ननु 'था इति चोपमायाम्' इत्यनेनैव, अमुथा, अन्यथा, इत्यादिकं प्रत्नथेत्यादिवद् व्याख्यातं, किमुच्यते, अमुथा यथासाविति व्याख्यातमिति ? उच्यते येति च, इत्यस्यैवायं प्रपञ्चो भाष्यग्रन्थत्वान्नातिमहते दोषाय SKN. ७. प्राणिनो यथा Sy. विश्वेषां सर्वेषामृषिपुत्राणामिव Mah. यथा विश्वेऽपि त्वां स्तुवन्ति तथा तथा च स्तुमः BB. ऋषिपुत्रकाणामृषीणां च सर्वेषां यथा दुग्धवानसि तथाऽस्माकमपि धोक्षि Dur. विश्व इव सर्व इव भविष्यन्तश्चर्षयः SKN.

८. सर्वे यथा वा दृश्यमाना is omitted by P.

९. हे अन्तरात्मन् ! त्वमपि Sy.

१०. ०स्त P., D. ज्येष्ठम् Sy. ततनं तातिर्विस्तारः । ज्येष्ठा उत्कृष्टा तातिर्विस्तारो यस्य तम् । ..प्रशस्तो ज्येष्ठो ज्येष्ठेषु प्रशस्यो वा ज्येष्ठतातिः Mah. उत्कृष्टतातिमुत्कृष्टविस्तारम् । अथवा ...ज्येष्ठतातिं ज्येष्ठप्रशस्यम् U. प्रशस्यतमम् BB. अतिशयेन वृद्धः प्रशस्यो वा ज्येष्ठः । ज्येष्ठ एव ज्येष्ठतातिरतिशयेन प्रशस्यं वृद्धं वा । अथवा तातिशब्दस्तनोतेः सन्तानवचनः । अतिशयेन वृद्धः प्रशस्तो वा वृष्टिसन्तानो यस्य तम् SKN. ज्येष्ठवीप्तिम् । अथवा ज्येष्ठः श्रेष्ठः सर्वेषां देवानामिन्द्रः स यस्य राजा सोऽयं ज्येष्ठराट् वैश्वदेवगणस्तं ज्येष्ठराजम् Dur.

सीदन्तम्[1] । सर्वज्ञम्[2] । त्वदभिमुखम्[3] । शत्रूणां जेतारम्[4] । स्तुत्या[5] वृष्टिलक्षणानि उदकानि । दोहसे[6] । यासु[7] स्तुतिषु

---

१. यज्ञेषु बर्हिषि सीदतीति बर्हिषदस्तम् Mah., U. बर्हिषि यागे सीदतीति बर्हिषदं, पृषोदरादित्वात्सकारलोपः BB. बर्हिष्याहूतो यज्वभिर्यः सीदति स बर्हिषत्तं बर्हिषदम् Dur. वेदिस्तरणे सत्तारम् SKN.

२. सर्वज्ञं सर्वस्य लम्भयितारं वा Sy. स्वर्द्युलोकं वेत्ति जानातीति स्वर्वित्तम् । तत्र हि तस्य निवासः Mah. स्वःशब्देन द्युलोकोऽभिधीयते । द्युलोकं जानाति तत्र हि तस्य निवासः U. सुवः स्वर्गमादित्यं वा वेत्तीति सुर्वाविदम् BB. स्वरिव यो दृश्यते स स्वर्वृक् तं स्वर्वृशं सूर्यसमानदर्शनमित्यभिप्रायः Dur. दिव आदित्यस्य वा स्वरशब्दवाच्यस्य वेदितारम् SKN.

३. प्रत्यस्मदभिमुखमञ्चन्तम् Sy. आत्मनोऽभिमुखम् Mah. आत्मनोऽभिमुखमिन्द्रमवस्थाप्य स्ववीर्येण तर्पयित्वा अस्मै यजमानाय U. अधुनाऽर्धर्चान्तरेण स्तुतिहेतुमाह । त्वां खलु प्रतीचीनं प्रतीचीनगतिं पराङ्मुखमपि सामर्थ्यान्मेघम् । प्रतीचीना गतिरस्यास्तीति प्रतीचीनम् । मत्वर्थीयोऽकारो लुप्यते BB. यज्ञाभिमुखमिन्द्रं वैश्वदेवं वा गणमवस्थाप्य स्ववीर्येण तर्पयित्वा Dur. तच्छब्दभुतेर्यच्छब्दोऽध्याहार्यः । यः प्रतीचीनम्, अञ्चेर्गत्यर्थस्येदं रूपम् । प्रतिगतमन्तरिक्षे, पराङ्मुखमित्यर्थः SKN.

४. शत्रूणां जेतारम् seems to be the explanation of वृजनम् ॥ बलनामैतद्बलवति वर्तते। बलवन्तम् Sy. बलं बलवद्यज्ञफलम् Mah. बलवच्च यज्ञफलम् U. धनम् Dur. बलनामैतत् । तस्मादर्शआदित्वादच्, बलवन्तम् SKN. वृजनमिति बलनाम Ngh. 2.9.

५. गिरा स्तुत्या साधनेन Sy. YV. reads धुनिम् for गिरा in RV. धुनिम् । 'धूञ् कम्पने' कम्पितारं शत्रूणाम् Mah. कम्पयितारं शत्रूणाम् U. गिरा गर्जितलक्षणया शब्देन BB, स त्वं क्रियासु तासु तथावस्थितस्त्वं गिरा स्तुत्या सहितः Dur. वाचा हुङ्कारमात्रेणैवेत्यर्थः । वाचा वा माध्यमिकया SKN.

६. धुक्ष्व सर्वदा सर्वान् कामान् । इत्यन्तरात्मनः प्रैषः Sy. क्षारयसि । ददासीत्यर्थः । यजमानायेति शेषः Mah. प्रक्षारयसि U. ईदृशं मेघं दोहसे क्षारयसि । विकरणव्यत्ययेन शप् । स्वरितेत् । य इति वाऽध्याहृियते यस्त्वं धोक्षि तं स्तुमः BB. अस्मै यजमानाय. . .धोक्षि प्रक्षारयसि Dur. क्षारयसि कम् ? सामर्थ्यान्मेघमुदकम् । द्विकर्मकोऽयं 'दुहियाचि' PMBH. 1.4.3.p.334. on Pa.1.4.51. इत्यादिस्मरणात् SKN.

७. यासु यज्ञक्रियासु Mah. यासु विक्षु येषु यजमानेषु U. यासु क्रियासु यागलक्षणासु BB. तमेवं गुणसंयुक्तमिन्द्रं वैश्वदेवं सगणं हे सोम ! यासु क्रियासु Dur. यास्विति स्त्रीलिङ्गनिर्देशाद् दिशः प्रतिनिर्दिश्यन्ते । यासु विक्षु SKN.

त्वम्। आशुकारिणम्। शत्रून् जयन्तम्। अनुवर्धयसि, इदमिहापि स्मर्तव्यं यथा द्वयोर्मन्त्रयोरेकस्यैवार्थस्य विरम्याभिधानात् एकवचनबहुवचनाभ्यां निर्देशः, एवमेकस्मिन्नपि मन्त्रे विरम्याभिधानाद् भिन्नपादस्थयोरेकवचनबहुवचनयोरन्वयो भवतीति।

---

१. शीघ्रगामिनं व्याप्तं वा Sy. शीघ्रम् Mah., U., Dur. व्यापकं वा दिगन्तानाम् BB. शीघ्रम् Dur. शीघ्रं महत्त्वेनोदकेन वा मेघाञ्जनयन्तम् SKN.

२. शत्रुं P.

३. सर्वमभिभवन्तमिन्द्रम् Sy. जयन्तं जेतव्यानि वस्तूनि Mah., U. लोकानभिभवन्तम् BB. जेतव्यानसुरादीन् Dur.

४. प्रवृद्धो भवसि वर्धयसि वेन्द्रं यथा स्तुत्येति यास्विति व्यत्ययेन बहुवचनम् Sy. पुनः पुनः सोमपानेन वृद्धिं प्राप्नोषि तासु Mah. वर्धसे पुनः पुनः संस्क्रियसे तासु तासु क्रियासु त्वमवस्थितस्तत्र प्रतीचीनं वृजनं दोहसे U. त्वमनुवर्धसे। अनुक्रमेण वृद्धिं गच्छसि, स्तुत्यनन्तरं वा वृद्धिं गच्छसि तासु स्तुमः। यद्वा यासु स्तुतिषु त्वमनुवर्धसे स्तुतो वृद्धिं गच्छसि तास्स्तुतीः कुमं इति शेषः। स्तुत्या हि स्तोतव्यो वर्धते। यथा 'वर्धन्तु त्वा सुष्टुतयः' इति। यद्वा—ईदृशं मेघं दोहसे कम्? वृजनं बलकरमुदकं गिरा गर्जितेनोपलक्षितः BB. स्तुतिभिर्हविर्भिश्चानुपूर्व्येण वर्धसे। येषु देशेषु मनुष्यैः स्तूयस इज्यसे च तेष्वित्यर्थः SKN. पुनः पुनः संस्क्रियसे Dur.

५. ०हावि P.

६. एकवचनाभ्यां P., D.

७. ०रेकवचनयोर० P., D.

८. यद्वा। अस्या ऋचोऽर्थान्तरम्। हे इन्द्र! यस्त्वं प्रतीचीनं प्रतिगमनमस्मत्प्रतिकूलं वृजनं वर्जनीयमालस्याश्रद्धादिकं दोहसे रिक्तीकरोषि विनाशयसि 'दुह प्रपूरणे' प्रपूरणं रिक्तकरणमिति क्षीरस्वामी। किञ्च यासु क्रियासु धुनिं त्वदनुग्रहाच्छत्रून् कम्पयन्तमाशुं क्षिप्रकारिणं जयन्तं सम्यगनुष्ठानेन यजमानान्तराण्यतिशयानमेनं यजमानमनु सोमपानेन स्तुत्या च यस्त्वं वर्धसे तासु क्रियासु तं त्वां स्तुम इति शेषः। कथमिव प्रत्नथा थाप्रत्यय उपमार्थः। प्रत्नाः पुरातना भृग्वादयो यथा त्वामस्तुवन् पूर्वथा पूर्वे पित्रादय इव। विश्वथा अतीताः सर्वे यजमाना इव। इमथा इदानीन्तना वर्तमानाः यजमाना इव वयं त्वां स्तुम इत्यर्थः। कीदृशं त्वाम्। ज्येष्ठतातिं स्वार्थे तातिः। ज्येष्ठमित्यर्थः। बर्हिषदं यागे सन्निहितत्वेन तिष्ठन्तम्। स्वर्विदं यजमानाय दातव्यं स्वर्गं वेत्तीति स्वर्वित् Mah.

प्रत्न इव पूर्व इव विश्व इवेम इवेति। अयमेततरोऽमुष्मात्। असावस्ततरोऽस्मात्। अमुथा यथासाविति व्याख्यातम् N. 3. 16., SKN. II. 175, 176.

इमां त्वेव शुक्रस्य पुरोरुचं कुर्यात्। तं प्रत्नथा पूर्वथा विश्वथेमथा ज्येष्ठतातिं बर्हिषद ँ स्वर्विदमित्यत्ता ह्येतमन्वत्ता हि ज्येष्ठस्तस्मादाह ज्येष्ठतातिं बर्हिषद ँ स्वर्विदम् प्रतीचीनं वृजनं दोहसे धुनिमाशुं जयन्तमनु यासु वर्धसे। उपयामगृहीतोऽसि शण्डाय त्वैष ते योनिर्वीरतां पाहीति सावयत्यत्ता ह्येतमन्वत्ता हि वीरस्तस्मादाहैष ते योनिर्वीरतां पाहीति दक्षिणार्धे सावयत्येता ँ ह्येष दिशमनु संचरति। ŚB. 4.2.1.9.,P.353. This stanza= YV. 7. 12.=TS. 1. 4. 9.1.

अत्र 'वर्धसे' इत्यन्त एव पाठ ऋग्वेदस्य, ततोग्रे यजुरनुरोधेन। अथचार्थे 'गिराशुम्' इत्यस्ति परं यजुषि 'धुनिमाशुम्' इत्यस्ति पाठः।

श्रिये सुदृशीरुपरस्य याः स्वर्विरोचमानः कुकुभामचोदते ।
सुगोपा असि न दभाय सुक्रतो परो मायाभिर्ऋत आस नाम ते ॥ २ ॥

श्रिये । भूम्याश्रयणार्थम् । सुदर्शनाः । मेघस्य स्वभूताः । यास्त्वमिन्द्र ! अपः प्रेरयसि । ककुभा सम्बन्धिने । अचोदते चोदयशब्द ओषधिवनस्पतिवचनोऽभिलषितस्य चोदयित्र्या वाचा रहितमिति ता. स्तोतारस्त्वां दुहन्तीति । एवं च त्वमिन्द्र ! जगतः सुष्ठु गोपयिता । भवसि । सुकर्मन् ! न च । हिंसायै भवसि तरसि च शत्रून् । प्रज्ञाभिः । तथा इन्द्रः शक्र इत्यादिक तव । नाम । उदकनिमित्तम् । अभूत् कीर्त्यमानमिति ।

अत्यं हविः सचते सच्च धातु चारिष्टगातुः स होता सहोभरिः ।
प्रसर्स्राणो अनु बर्हिर्वृषा शिशुर्मध्ये युवाजरो विसुहा हितः ॥ ३ ॥

अत्यम् । पार्थिवाल्लोकाद्देवान् प्रति गमन निहितम् ? हविः । सेवते । जङ्गमं पश्वादिकम् । स्थावरमोषध्यादिकम् । च । अहिंसितमार्गः । सः । होता राक्षसानार्थम् । बलस्य भर्ता । तथा बार्हिः । लक्षीकृत्य ।

---

१. श्रीये D.
२. हे इन्द्र ! Sy.
३. प्राणिनां श्रयणाय प्रेरको भवेति शेषः Sy.
४. ०न P., D.
सुरोचमानाः Sy.
५. मेघस्य सम्बन्धिन्यः Sy.
६. यस्त्व० P. या आपः सन्ति तासामपाम् Sy.
७. सर्वासां दिशां मध्ये Sy.
८. अचोदते चोदते P. अप्रेरयितुः । षष्ठ्यर्थे चतुर्थी Sy.
९. चोदच्छब्द P.
१०. प्राणिनां सुष्ठु गोपायितासि Sy.
११. शोभनवृष्टिप्रदानादिकर्मञ्जिन्द्र ! Sy.
१२. दम्भनाय वधाय प्राणिनाम् Sy.
१३. प्रभवसि Sy.
१४. त्वं च मायाभिः आसुरीभिः Sy.
१५. त्वदीयं नामकं रूपम् Sy.
१६. It seems to be the explanation of ऋते ॥ सत्यलोके Sy.
१७. भवत् P. ०त्त भूत D. आस्ते Sy.
१८. ०न इ० P.
१९. VM. ignores स्वः । विरोचमानः and परः ॥ स्वः स्वर्गे । परः मायाभ्यः परस्ताद् वर्तमानः Sy.
२०. अत्य P.
२१. इयमाग्नेयी होतृत्वयुक्त्वादिलिङ्गैः । अयमग्निः Sy.
२२. सततमतनार्हम् Sy.
२३. आज्यादिकम् Sy.
२४. सत्फलसाधनत्वाद्धविरपि सत् Sy.
२५. जंगमः पश्वादि P.
२६. धारकं सर्वस्य । हूयमानस्य हविष आदित्यद्वारा वृष्टिसाधनत्वात् । तया च वृष्ट्या प्रजोत्पत्तेर्धारकत्वम् । तथा हि 'अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः' (Manu.3.76.) Sy.
२७. अहिंसितगमनः । सति तस्य गमने यज्ञनिष्पत्त्या फलसिद्धेरिष्टगमनत्वम् Sy.
२८. स खलु Sy.
२९. होमनिष्पादकः Sy.
३०. बर्हि D.

प्रसर्ज्राणः[1]। कामानां वर्षिता[2]। शिशुः[3]। सोऽयमन्तरिक्षस्थानामपाम्[4]। मध्ये[5]। निहितः[6]। अजरः[7]। युवतिः[8]।

प्र वं एते सुयुजो यामन्निष्टये नीचीरमुष्मै यम्यं ऋतावृधः।
सुयन्तुभिः सर्वशासैरभीशुभिः क्रिविर्नामानि प्रवणे मुषायति ॥ ४ ॥

प्र वः। समीपस्थानृषीन्वत्सारो वदति—हे ऋषय[9]! अग्ने। एते रश्मय। दिव प्रति गमने। युष्माकम्। अभ्युदयार्थं[10] भवन्ति। सुयोजना[11] यस्मात्। अस्मै[12] अग्नये, अन्तरिक्षे वर्तमानाय। नीचीनाग्रा[13]। उदकस्य यन्त्र्यो[14]? ज्वाला विद्यते। इत्येतदेव विस्पष्टमाह शोभनयमनै[15]। सर्वस्य[16] जगत शासितृभि। रश्मिभि। कूपसदृशोऽय पार्थिवोऽग्नि। अन्तरिक्षस्थान्युदकानि[17]। पृथिव्याम्[18]। आहरति[19]।

संजभ्राणास्तरुभिः सुतेगृभं वयाकिनं चित्तगर्भासु सुस्वरुः।
धारवाकेष्वृजुगाथ शोभसे वर्धस्व पत्नीरभि जीवो अध्वरे ॥ ५ ॥

संजभ्राणः। ज्वलनसाधैस्तरुभिरात्माश्रयै[21]। सम्भरन्[22]। सुते[23] गृहीतम्। वयाकशब्दो मिश्रणवचन व्याधारणशेषेणाज्येन मिश्रित[24] पात्नीवतो[25] भवति। विचित्तगर्भा[26] षष्ठौही[27] दक्षिणेत्यत्र प्रज्ञातगर्भेत्यर्थ.

---

१. प्रसर्ज्राणः P., D. प्रकर्षेण सरन् Sy.
२. वर्षकः फलस्य Sy.
३. स इव रक्षणीयोऽप्रौढो वा Sy.
४. It seems to be the explanation of विलुहा ॥ विलुहाणामोषधीनाम् Sv.
५. स्थापितः Sy.
६. ०रा P. जरारहितः Sy.
७. सर्वत्र मिश्रयिता Sy.
८. VM. ignores च।
९. एषा सौरी वा Sy.
१०. यज्ञगमने Sy.
११. एषणाय Sy.
१२. सुष्ठु परस्परं संयुक्ताः Sy.
१३. यजमानाय Sy.
१४. नीचं गच्छन्तीति शेषः Sy.
१५. यम्यः यम्या गमनार्हाः। अथवा यमो नियमितादित्यः। तस्य सम्बन्धिनः Sy.
१६. ०भननय० P. सुगमनैः Sy.
१७. सर्वस्य शासकैः Sy.
१८. क्रिविः कर्ता Sy.
१९. नामान्युदकानि Sy.
२०. निम्ने भूप्रदेशे Sy.
२१. मुष्णाति। आदत्त इत्यर्थः। अथवाग्निनावाह्यस्याग्नेरेतेऽश्वा इष्टये यज्ञागमनाय यामनि रथे सुयुजः प्रगच्छन्ति। शिष्टं समानम्। क्रिविः क्रिविसदृशोऽग्निः प्रवणे नामानि हवींष्युक्तलक्षणाभिर्ज्वालाभिर्मुषायत्यादत्ते Sy.
२२. ०लसा० P.
२३. तरभि० P., D.
तरुविकारैर्ग्रहैः Sy.
२४. ०त्मश्र० D.
२५. संभेरन् P. गृभ्णन् गृह्णन् Sy.
२६. अभिषुतेन रसेन गृहीतम् Sy.
२७. ह्वं P.
२८. श्रितः P., D. कुत्सिता वयाः शाखा वयाका लता। तद्वन्तं सोमम् Sy.
२९. वन्तीवतो P.
३०. चित्तग्राहिणीषु स्तुतिषु, स्तुतिभिः सह Sy.
३१. षष्टौह P.
३२. ०ज्ञागत० P.

मूत्रकारैरुक्तः इह तु युवतिष्वित्यर्थः। शोभनस्वरणस्त्वमग्ने[1] ! स्तुतिवाक्यानां धारकेष्वस्मासु। शोभनस्तुते ! शोभसे[2] स त्वम्। पत्नीः। लक्षीकृत्य। तद्यागार्थम्। जीवमानोऽनुपशान्तः। वर्धस्वेति।

यादृगेव ददृशे तादृगुच्यते सं छायया दधिरे सिध्रयाप्सा।
महीमस्मभ्यमुरुषामुरु ज्रयो बृहत्सुवीरमनपच्युतं सहः॥ ६॥

यादृक्॥ सूर्यो देवता॥ यादृक्[11]। एव। ददृशे[12]। तादृगेव। अस्माभिरुच्यते यथा दृष्टमेव ब्रूम इत्यर्थस्तमाह। आदित्यस्य रश्मयोऽस्मभ्यम्। महतीम्[14]। उरूणामर्थाना सातिम्[15]। महच्च[16]। वेग शारीरम्। महत्[17]। शोभनपुत्रयुक्तम्[18]। अप्रस्खलितम्[19]। सह इत्येतत्[21] त्रयम्। अप्सु[22]। सह धारयन्ति[23]। आत्मीयया कामाना धारयित्र्या[24]। छाययेति[25]।

वेत्यग्रुर्जनिवान्वा अति स्पृधः समर्यता मनसा सूर्यः कविः।
घ्रंसं रक्षन्तं परि विश्वतो गयमस्माकं शर्म वनवत्स्वावसुः॥ ७॥

वेति[26]। अतिगच्छति[27]। गमनशीलः[28]। उदितः[29]। शत्रुभि[30]। सङ्ग्राममिच्छता[31]। मनसा[32]। प्राज्ञस्तमिमम्[33]।

---

१. ०नः स्व० D. शोभनगमनः शोभनस्तुतिको वा त्वम् Sy.
२. धारयन्ति वाकान् स्तोत्राणीति धारवाका ऋत्विग्यजमानाः। तेषु मध्ये Sy.
३. शोभनस्तुतिक अग्ने ! Sy.
४. सुशोभनसे P.
५. Omitted by P.
६. पालयित्रीरोषधीर्ज्वाला वा Sy.
७. अभिमुखम् Sy.
८. सर्वस्य जीवयिता Sy.
९. अभिवर्धय Sy.
१०. एषा वैश्वदेवी Sy.
११. दक् P. दृक् D.
१२. यादृग्रूपमेव दृश्यते तादृग्रूपमेवोच्यते। यथा दृष्टमेव स्तूयते नतु परवचनप्रत्ययेन Sy.
१३. प्रयच्छन्त्वित्यर्थः Sy.
१४. पूज्याम् Sy.
१५. ०णामनां सातिः P. ०तिः D. बहुवात्रीं रयिम् Sy.
१६. प्रभूतम् Sy.
१७. मह P.
१८. शोभनवीर्यमपत्यम् Sy.
१९. अप्रच्छल्युतं P., D. अनुपक्षीणम् Sy.
२०. बलं चाभिभावुकम् Sy.
२१. इत्यूतं P. ०त्येत D.
२२. व्यापिकासु स्तुतिषु अप्स्वेव वा Sy.
२३. सम्यग्धारयन्ति स्वीयं रूपं स्तुतिं वा Sy.
२४. साधिकया सह Sy.
२५. दीप्त्या Sy.
२६. इयं सौरी Sy.
२७. अतिगच्छति मन्वेहानसुरान् योद्धुम् Sy.
२८. अग्रगामी Sy.
२९. जन्मवान् जायावान् वा। उषा ह्यस्य जाया। वा इति प्रसिद्धौ Sy.
३०. शत्रू P. शत्रु D.
३१. ०त P. समरमिच्छता Sy.
३२. मसास्त P. मनसान्त D.
३३. प्र० P. क्रान्तदर्शी Sy.
३४. ०मिम् P.

अहः । सर्वमेव मनुष्याणा गृहम् । सर्वतः । रक्षन्तम् । अस्माकम् । सुखम् । परि । वनवत् । स्वभूत-हविर्धानोऽस्मदीयो होता ततो यथा यजमानमभिगच्छति तथा याचन परिवननम् ।

ज्यायांसमस्य यतुनस्य केतुनं ऋषिस्वरं चरति यासु नाम ते ।
यादृश्मिन्धायि तमंऽस्यया विदद्य उ स्वयं वहंते सो अरं करत् ॥ ८ ॥

ज्यायांसम् । अस्य । यजमानस्य । प्रज्ञानेन । अतिशयेन प्रशस्यं त्वाम् । ऋषिभिः कीर्त्यमानम् । नाम । चरति त्वामुपतिष्ठतीत्यर्थः । यास्वप्सु । तव । नाम कीर्तिं भवति एधयत्युदकानीत्यर्थः । परोक्ष

---

१. दीप्तम् Sy.
२. गह P. गृहमन्तरिक्षं वा Sy.
३. रक्षन्तं परिचरेमेति शेषः Sy.
४. ०क्ष P.
५. सम्यक् Sy.
६. दद्यात् Sy.
७. स्वायत्तधनः सन् Sy.
८. य P., D.
९. VM. ignores वै । स्पृधः and सूर्यः ॥ स्पृधः सङ्ग्रामान् । सूर्यः देवः Sy.
१०. इयमाग्नेयी सौरी वा । हे देव ! Sy. अवत्सारस्यार्षम् । आदित्यस्वरूपेणाग्निरूपेण चोच्यते SKN. अवत्सारस्येदमार्षम् Dur.
११. माज्यां० P.
१२. जमस्य D. यततिर्गतिकर्मा गन्तुरस्य सूर्यस्य । कर्मणि षष्ठ्यौ । अमुं गन्तारम् Sy. यततिर्गत्यर्थः । गमनशीलस्य तव स्वभूतमण्डलस्य यदा त्वमग्निस्तदाऽस्य यतुनस्यादित्यस्यैव SKN. कर्मणि षष्ठ्यौ वा । यतनशीलस्य भगवतः सूर्यस्य Dur.
१३. प्रज्ञापकेन कर्मणा । उदयादिलक्षणेन विशिष्टम् Sy. कर्मणोदयलक्षणेन । आदित्यमण्डलस्यैवोदयवेलायामुदितमात्रे मण्डले SKN. कर्मणा प्रज्ञया वा Dur.
१४. ०नेतिन P. अतिशयेन प्रवृद्धम् Sy. अत्र चैकवाक्यतासिद्ध्यर्थं यत्तच्छब्दावध्याहार्यौ । यं सर्वतो ज्यायांसमतिशयेन प्रशस्यं वृद्धं वा महान्तमादित्यमग्निं वा SKN. महत्तरम् Dur.
१५. ऋषिभिः स्तुत्यं त्वाम् Sy. स्वरतीत्यर्चतिकर्मा । ऋषिस्तुत्यम् SKN.
ऋषिभिः स्वर्यते स्तूयत इत्यृषिस्वरस्तमृषिस्वरं स्तुवन् Dur.
१६. नमनं नामकं वा रूपं वर्तते ताभिरित्यर्थः । यद्वास्य यतुनस्य गमनशीलस्य तव केतुना तमोनिर्हरणादिकर्मणा विशिष्टं त्वां चरति Sy. देवताभूतस्य स्तूयमानस्य....अभिधानम् । ..तव नमनं वा प्रह्वीभावमागत्य .तव तासु त्वमिज्यसे चेत्यर्थः SKN. नमनं.... तव हे भगवन्नग्ने Dur.
१७. गच्छति । भजते यजमानः Sy. चरतिरत्र शुद्धोऽपि सोपसर्गार्थो द्रष्टव्यः । आहुतिप्रदानकर्मणोपस्थानं चरति SKN. प्रचरति Dur.
१८. यास्वाप्सु P. केन साधनेन ? यासु स्तुतिषु Sy. अग्निहोत्रहोमोपस्थानयागादिक्रियासु SKN. यासु क्रियासु Dur.
१९. स्वकीयम् Sy.
२०. कीर्ति P.

उत्तरार्द्धः यादृशे[1] कामे[2] मम[3]। सूर्यो निहितो[4] भवति। तं काम[5]म्। तदीयकर्मेच्छया। स लभते[6]। यः[7]। एवास्मै[8]। स्वयं[9] हविः[10]। वहते[11]। स[12] स्वयमेव। पर्याप्तं[13] धनमात्मनः[14]। करोति[15]।

समुद्रमासामव तस्थे अग्रिमा न रिष्यति सवनं यस्मिन्नायता।
अत्रा न हार्दि क्रवणस्य रेजते यत्रा मतिर्विधते पूतबन्धनी ॥ ९ ॥

समुद्रम्[16]। यासु[17] नाम त उच्चारयन्ति, आसामपाम्[18]। अग्रिमा[19]। अन्तरिक्षम्[20]। प्रत्यवतस्थे[21] अधो गच्छति[22]। किं च ता इमा आपो यस्मिन् सवने[23]। वितता भवन्ति[24]। तत् सवनम्[25]। न। रिष्यतीति[26]। किं च

---

१. यादृशे यादृशे D. यादृश एव कामे SKN. स एवं सरंस्तासु क्रियासु. . .यादृशे कामे ....एवमत्र शब्दसारूप्याद् 'यादृक्षिन्' इत्यस्य 'यादृशे' इत्येवं विपरिणाम उपपद्यते Dur.

२. ०मे मनुं P. ०मेनुं D.

३. ममनु P.

४. धायि धत्ते। कर्तरि क्विण्। सामर्थ्यान्मनो गम्यते Sy. व्यत्ययेनायं कर्तरि क्विण् द्रष्टव्यः। धत्ते, किम्? सामर्थ्यान्मनः SKN. मनो धत्ते Dur.

५. यथानिवेशं प्रतिनिवेष्टव्यत्वात्तादृशमित्यर्थो ज्ञातव्यः। तादृशं कामम् Sy. यादृक्षिन्नित्युद्देशादुद्दिष्टस्य च प्रतिनिवेष्टव्यत्वात् तादृक्शब्दस्यार्थे तादृशमेव SKN. तादृशं कामम् Dur.

६. कामयत् P., D.

७. कर्मणा हविःस्तुत्यादिलक्षणेन Sy. अपः कर्म, अप एवापस्या, स्वार्थिकस्तद्धितः। तयाऽपस्यया तेन परिचारेण कर्मणेत्यर्थः SKN. तयाऽपस्यया क्रियया हविःस्तुत्यादिलक्षणया Dur.

८. विन्वते Sy. विदेर्लाभार्थस्येदम्। विन्वति लभते यः SKN. तव प्रसादात्....अलभतेत्यर्थः Dur.

९. Omitted by P. य एव स्वयमनन्यप्रेरितः सन् स्वमनीषयैव Sy.

१०. उकारोऽत्र चार्थे। यश्च SKN.

११. स्वयमेव श्रद्धया न परेण प्रेरितः सन् SKN.

१२. पविः D. किम्? सामर्थ्यादाहुतीः स्तुतीश्च SKN. स्तुतीः Dur.

१३. P. reads वन्निहते for हविः। वहते॥ धारयति फलम् Sy. त्वां प्रति प्रापयति SKN. त्वां प्रत्यादरवान् प्रापयति Dur.

१४. सए P. स एव Dur.

१५. अलमत्यर्थम् Sy. पर्याप्तं बहु SKN. पर्याप्तमात्मनः Dur.

१६. अथवा य उ य एव स्वयं वहते स्वयमेवानुतिष्ठति सोऽत्यर्थं कुर्यात्। न ह्यन्येन कारितं फलवद्भवति Sy. आत्मनः....करोति नेतारः SKN. अभिप्रेतमर्थं करोति Dur.
यादृशोऽधायि तमपस्ययाविदत् N.6.15., SKN. II.440.

१७. इयमपि सौरी Sy.

१८. सु P.

१९. स्तुतीनाम्। यद्वासां प्रजानामृत्विजां स्तुतिरिति सम्बन्धः Sy.

२०. अत्यन्तं श्रेष्ठास्मदीया स्तुतिः Sy.

२१. अग्रन्तरिक्षम P., D. समुद्रवत् पर्यवसानभूतं सूर्यम् Sy.
समुद्रमित्यन्तरिक्षनाम Ngh. 1.3.

२२. अवगच्छति Sy.

२३. गच्छ D.

२४. आयता विस्तीर्णानि स्तोत्राणि तत्सवनमिति Sy.

२५. भवति P., D.

२६. सूयते सोमोऽत्रेति सवनं यज्ञगृहम् Sy.

२७. न हिंस्यते किन्तु प्रवर्धते इत्यर्थः Sy.

अप्स्वेव[1] । हृदयाभिलषितम्[2] । वर्षणशीलस्य स्तोतुः[3] । न[4] । चलते[5], अपामेव स्तोत्रेऽभिलषितं सिध्यतीत्यर्थः । या स्वप्सु[6] । विद्यते । स्तुतिः[7] । पवनस्य[8] बन्धनी शोधयन्तीति ह्यपां स्तुतिः[9] ।

स हि क्षत्रस्य मनुमस्य चित्तिभिरेवावदस्य यजतस्य सप्रेः ।
अवत्सारस्य स्पृणवाम रण्वभिः शविष्ठं वाजं विदुषा चिदर्ध्यम् ॥ १० ॥

स हि[11] । 'चित्तिः स्रुक्[12]' 'चित्तमाज्यम्[13]' 'चित्तं च चित्तिश्च[14]' इत्यादिषु चित्तशब्दश्चिन्तितवचनो दृष्टः[15] । सः । हि[16] सूर्यः । पञ्चानाम्[17] । अभिलषितैः सहाजगामेति शेषः । सम्प्रति ममावत्सारस्यापि[18] । रमणीयैः[19] स्तोत्रैः । स्पृशाम[20] । सूर्यादस्माद् बलवत्तमम्[21] । अन्नम्[22], यदन्नम् । जानता सर्वेण । पूजनीयमिति[23] ।

श्येन आसामदितिः कक्ष्यो३ मदो विश्ववारस्य यजतस्य मायिनः ।
समन्यमन्यमर्थयन्त्येतवे विदुर्विषाणं परिपानमन्ति ते ॥ ११ ॥

श्येनः[24] । द्यावापृथिव्योः[25] कक्ष सेवमान । मेघः । अदीनः[26], अद्भिः । आसां[27] विशाम् । मदयिता[28] भवति

---

१. अप्स्वोप P.
२. हृदयसम्बन्धि हृदयगतं काम्यं फलम् Sy.
३. स्तुतिकर्तुः Sy.
४. स्तोत्रं P., D.
५. मलते P. न विचलति । न मृषा भवति Sy.
६. यस्मिन् स्तोतृगृहे Sy.
७. अत्र न रेजत इति Sy.
८. ०ति P.
९. ववनस्य P.
१०. ०ति P.
११. इयमपि सौरी Sy.
१२. ०त्ति स्रुत् P. ०ति स्रु० D. MS. 1.9.1.
१३. चित्त० P., D. MS.1.9.1.
१४. ०त्त P.
१५. चित्तश्च P. चित्तं च D. MS.1.4.14.
१६. The passage चित्तिः . . . . दृष्टः should immediately follow अभिलषितैः सहाजगामेति शेषः ।
१७. हितो P. हिता D. खलु सविता देवः सर्वैः स्तुत्यः सर्वकामपूरक इत्यर्थः । हिशब्दो लोकवेदयोः प्रसिद्धिद्योतकः Sy. तस्मात् सकाशात् Sy. पञ्चानाम् refers to five saints as क्षत्रस्य । मनसस्य । एवावदस्य । यजतस्य and सप्रेः ।
१८. ०ञ्चनाम् P., D. अत्र 'अन्ये च ऋषयोऽत्र दृष्टलिङ्गाः' इत्युक्तत्वात् क्षत्रादय ऋषयः । क्षत्रस्य मनसस्य एवावदस्य यजतस्य सप्रेः . . . . चैषामृषीणामस्माकम् Sy.
१९. व० P., D.
२०. रमणीयाभिः Sy.
२१. पूरयाम Sy.
२२. अतिशयेन बलवत् Sy.
२३. 'अन्नं वै वाजः' (TB.1.3.6.6.) इति श्रुतेः Sy. २४. विपश्चिता Sy.
२५. समर्धनीयं स्पृणवाम । क्षत्रादयो वयमिति सम्बन्धः Sy.
२६. VM. ignores चित् ।
२७. मददेवत्येयम् Sy.
२८. ०थिव्याः D. कक्ष्यपूरकश्च भवतीति शेषः Sy.
२९. शंसनीयगमनः शीघ्रं पातृसकाशं गन्ता Sy.
३०. ०दिनः P. अतिसमृद्धः Sy.
३१. अपां सोमरसलक्षणानाम् Sy.
३२. विश्ववारादीनां त्रयाणामृषीणां स्वभूतः मदः Sy. ३३. ०न्ति P.

कासामित्याह—विश्ववारस्य । यजतस्य च । कर्मवतः[1] त इमे[2] क्षत्रप्रभृतय इतः[3] पूर्वमज्ञानात्[4] त्वत्तो व्यतिरिक्तम्[5] । अन्यमन्यमात्मनोऽभ्युदयार्थम्[6] । गन्तुम्[7] । समर्थयन्ति । ते सम्प्रति विशेषेण प्रयच्छन्तम्[8] । परितो रक्षितारम्[9] । अन्तिके । त्वाम्[10] । विदुरिति ।

सदापृणो यजतो वि द्विषो वधीद्बाहुवृक्तः श्रुतवित्तयौ वः सचा ।
उभा स वरा प्रत्येति भाति च यदीं गणं भजते सुप्रयावभिः ॥ १२ ॥

सदापृणः[11] । सदापृणोऽयम्[12] । शत्रून्[13] । अवधीत्[14] । ततो[15] यजतश्च[16] । तथा बाहुवृक्त[17] । तथा श्रुतवित्[18] । वः, एवं सदापृणादीनाम्[19] । सहायभूतः[20] । सूर्यश्च[21] । उभौ[22] । स[23] । वारकौ[24] । शत्रून् प्रति[25] । गच्छति[26] । भाति । चान्तिकस्थो दूरस्थश्चोभौ शत्रू भवत । यदि[27] । एनम्[28] । इन्द्रादीना गणम्[29] । भजते[30] । सुप्रगमनै[31] ।

सुतंभरो यजमानस्य सत्पतिर्विश्वासामूधः स धियामुदञ्चनः ।
भरद्धेनू रसवच्छिश्रिये पयोऽनुब्रुवाणो अध्येति न स्वपन् ॥ १३ ॥

सुतम्भरः[32] । अय सुतभरः[33] । यजमानस्य[34] ममावत्सारस्य । सता[35] पतिः । सर्वासामेव[36] विद्यानाम् ।

---

१. ०र्भवः P.
२. ते विश्ववारादयः सत्रे प्रवृत्ताः Sy.
३. इतः पूर्वमज्ञानात् is omitted by P. ०ना D.
४. परस्परम् Sy.
५. सोमं प्राप्तुं तत्पानाय Sy.
६. याचन्तेऽनुज्ञाम् Sy.
७. विशेषेण मदस्य दातारम् Sy.
८. परिपानम् Sy.
९. त्वा P.
१०. जानन्ति लभन्ते वा Sy.
११. ०दावृण P. ०दावृणं D.
१२. ०वृणो० P., D. सदापृणः सर्वदा दानशील एतन्नामा Sy.
१३. हिंस्यात् Sy.
१४. ततः P., D.
१५. यजत० P. यष्टा च Sy.
१६. ०क्तः P.
बाहुभ्यां वृक्तबर्हिश्च Sy.
१७. श्रुतस्य वेत्ता च Sy.
१८. सदावृणादीनाम P. एतेषां पञ्चानां परस्परापेक्षया प्रत्येकमेकवचनम् । सः स ऋषिः Sv.
१९. ०त P., D. युष्माभिः सहित इत्यर्थः Sy.
२०. तर्यश्च is suggested for सूर्यश्च ।
२१. इह लोकपरलोकविषयौ कामौ Sy.
२२. Omitted by D. ऋषिः Sy.
२३. वारणौ P. श्रेष्ठौ Sy.
२४. शत्रू P.
२५. अभिगच्छति Sy.
२६. यस्मात् Sy.
२७. देवसङ्घम् Sy.
२८. ०त P. तस्मादेवं भवतीति Sy.
२९. ०नं D. सुष्ठु प्रकर्षेण मिश्रयन्द्भिः Sy.
३०. VM. ignores वि ।
३१. यागनिर्वाहक एतन्नामा ऋषिः Sy.
३२. अवत्सारस्य मम Sy.
३३. ०रस्य (पि रमणीयैः स्तोत्रैः) सतां P. सतां विद्यमानानां फलानां पालयिता होता भवतीत्यर्थः Sy.
३४. सर्वेषां कर्मणाम् Sy.

ऊर्ध्वोऽभवत्[1]। ततश्च स[2]। कर्मणाम्। ममोदञ्चन[3] उत्थापक आसीत्। तथा मया[4] दत्ता धेनु[5] च[6]। भरत्[7]। तस्या रसवत्[8]। पयश्च[9]। शिश्रिये[10]। सोऽय[11] मन्त्राणामर्थमनुब्रुवाणो[12] मन्त्रान् विस्पष्टम्। अधीते[13]। न। स्वपन्[14] अविस्पष्टमिति।

यो जागार तमृचः कामयन्ते यो जागार तमु सामानि यन्ति।
यो जागार तमयं सोम आह तवाहमस्मि सख्ये न्योकाः॥ १४॥

यः। प्रसङ्गाज् जागरणगुणानाह—इति। सख्येऽभिमुखस्थान[15] सख्ये न्योका इति[16]।

अग्निर्जागार तमृचः कामयन्तेऽग्निर्जागार तमु सामानि यन्ति।
अग्निर्जागार तमयं सोम आह तवाहमस्मि सख्ये न्योकाः॥ १५॥

उक्तमर्थमुदाहरणेन द्रढयति—अग्निरिति[17]।

V. 45.

विदा दिवो विष्यन्नद्रिमुक्थैरायत्या उषसो अर्चिनो गुः।
अपावृत व्रजिनीरुत्स्वर्गाद्वि दुरो मानुषीर्देव आवः॥ १॥

[18]विदा॥ मदापृण[19]॥ "अहर्देवानामासीद् रात्रिरसुराणा तेऽसुरा यद् देवानामवित्तमवेद्यमासीत्

---

१. उद्गततरं फलम् Sy. २. उदकञ्चनः P., D. ऊर्ध्वमुद्गमयिता फलप्रापक इत्यर्थः Sy.
३. ममया P., D. ४. गोः Sy.
५. दत्तानण्डनुच्च P. ६. अहरत् Sy.
७. तस्य P. ८. सारवत् Sy.
९. वय० D. १०. श्रयति चास्य सामर्थ्यात् Sy. ११. सोमं P., D.
१२. तत्सर्वम्—अनुक्रमेण सङ्कीर्तयन् Sy.
१३. स्मरत्यवत्सारः सुतम्भरस्तावृश इति Sy.
१४. स्वापमकुर्वन्ननवरतम् Sy. १५. ०स्थने P.
१६. VM. does not explain this stanza. यः देवः। जागार सर्वदा विनिद्रो जागरूको गृहे वर्तते। तम्। ऋचः सर्वशास्त्रात्मिकाः। कामयन्ते। यश्च जागार तमु तमेव सामानि स्तोत्ररूपाणि यन्ति प्राप्नुवन्ति। यो जागार तमयमभिसुतः सोमः, आह वक्ति मां स्वीकुर्विति। हे अग्ने! तावृशस्य। तव सख्ये समानाख्याने हितकरणे न्योकाः नियतस्थानः अहमस्मि भवामि Sy.
१७. Ms. D. puts the figure ॥४४॥ here to indicate the end of the forty-fourth hymn. No such number is given in P. पूर्वयैव निगदितव्याख्या। य इत्यस्य स्थानेऽग्निरिति विशेषः Sy.
१८. अथ चतुर्थेऽनुवाके द्वादश सूक्तानि। तत्र 'विदा दिवः' इत्येकादशर्चं प्रथमं सूक्तम्। सदापृणो नामात्रेय ऋषिः। त्रिष्टुप् छन्दः। 'वै तत्' (KSA. 26.41. p. 20.) इत्युक्तत्वादिदमपि वैश्वदेवम्। 'विदा एकादश सदापृणः' (KSA. 26.45.p.20.) इत्यनुक्रमणिका। विनियोगो लैङ्गिकः। अत्रेन्द्राग्नयो लिङ्गोक्तदेवताः। अत्राङ्गिरसां पणिभिरपहृत्य गिरेरुचः स्थापितानां गवामिन्द्रेण विमोकः प्रतिपाद्यते Sy.
१९. ०वृणः P., D.

तेन[1] सह[2] रात्रिं प्राविशन्" इति ब्राह्मणं तत्रेदं सूक्तं प्रवर्तते। हे स्तोतः ! स्तोत्रैः[3]। शिलोच्चयम्[4]। विमुञ्चन्[5]। स्वर्गाल्लोकाद् देवैः[6] सह शिलोच्चयम्। लभस्व गच्छ प्रकाशीकरणार्थम्[7]। आगच्छन्त्या[8]। उषसः[9]। दीप्तयश्च[10]। आगताः[11]। तथा सूर्यश्च। उदगात्। उद्गतश्च अपावृतवान्[12]। व्रजवती[13] शिलोच्चयपरिवृता गा। स्वरित्यादित्यनाम[14]। तथा तमसा तिरोहिता मानुषीश्च[15]। दुरः[16]। विवृतवानिति[17]।

वि सूर्यो अमतिं न श्रियं सादोर्वादृगवां माता जानती गात्।
धन्वर्णसो नद्यः खादोअर्णाः स्थूणेव सुमिता दंहत द्यौः ॥ २ ॥

वि सूर्यः[18]। यथालङ्कृतः कश्चित्। आत्मीय[19] रूप प्रकाशयत्येवम्। सूर्यः[20]। आत्मीया तेजोभिः[21] कृता श्रियम्[22]। प्रकाशीकरणार्थं व्यमुञ्चत्[23]। अथ गवाम्[24]। ऊर्वात्[25] उरोः[26] महतः सङ्घात्[27]। माता सरमा[28] पणिभिरपहृता गा इव[29]। जानती[30]। आजगाम[31]। अथ शिलोच्चय प्रति गच्छतां देवानां गमनविघ्नकारिणीर्गच्छदुदकाः[32]।

---

१. सहा P., D.
२. Omitted by P.
३. ०त्रै P. अङ्गिरसां स्तुतिभिर्निमित्तभूताभिः Sy.
४. ०य P. वज्रम् Sy.
५. विवुञ्चन् P., D. प्रक्षिपन्। रक्षकाणामुपरि गिरिभेदनाय च विध्यन् Sy.
६. ०स्वे P. अवेदयदिन्द्रः। किम्, गा निगूढा इति सम्बन्धः Sy.
७. ०श० P.
८. आगामिन्याः Sy.
९. उषसः सम्बन्धिनः Sy.
१०. ०प्ति० D. रश्मयः Sy.
११. अगच्छन् सर्वत्र प्रसृता अभवन् Sy.
१२. अपावृणोत् Sy.
१३. सूश्वादकादुद्गतञ्चपावृतावान् व्रजपतीः P. उदकादुद्गतं चापावृतवान् प्रजपती D. तमः पुञ्जवतीर्निशाः Sy.
१४. ०त्यादिना P. यादिनाम D. The passage स्वरित्यादित्यनाम should immediately follow सूर्यश्च and precede उदगात्॥ सरणशील आदित्यः Sy.
१५. मनुष्यसम्बन्धिनीः Sy.
१६. द्वाराणि Sy.
१७. व्यावृणोत्। अन्धकारायनयनेन मनुष्यादिव्यवहारायाकरोदित्यर्थः Sy.
१८. VM. ignores देवः।
१९. ०थाङ्क० P. यथा seems to be the explanation of न।
२०. अमतिम्। रूपमिव द्रव्यम्। यथा द्रव्याणि घटपटादीनि नीलपीतादिरूपं लभन्ते तद्वत् Sy. अमतिरिति रूपनाम Ngh. 3.7.
२१. देवः Sy.
२२. ०भि D.
२३. ०ताः P.
२४. ०यः P. दीप्तिम् Sy.
२५. विभजते प्रकाशयतीत्यर्थः Sy.
२६. रश्मीनाम् Sy.
२७. ०रो P. महतोऽन्तरिक्षात् Sy.
२८. उषाः Sy.
२९. रमा P.
३०. सूर्यं उदेष्यति मया च व्युच्छनं कर्तव्यमिति जानती Sy.
३१. आगच्छति Sy.
३२. धन्वर्णसः। ध्वनतिर्गतिकर्मा। धन्वन्ति गच्छन्त्यर्णांसि यासु तास्तथोक्ताः। दीर्घाभावश्छान्दसः Sy.

शब्दकारिणीः[1]। खादोऽप्रर्णसा[2] इति नदीनाम[3] ताः। द्यौ। आदृंहत[4] यथा स्थिरोदका निश्चला गमनयोग्या भवन्ति[5] यथा चक्र आत्मनीव हन्ति[6]। यथा सुमिता[7]। स्थूणा[8] वशमत्याहित[9] निश्चलं धारयत्येवमिति।

अस्मा उक्थाय पर्वतस्य गर्भो[10] महीनां जनुषे[11] पूर्व्याय[12]।
वि पर्वतो[13] जिहीत[14] साधत[15] द्यौरविवासन्तो दसयन्त भूमं॥ ३॥

अस्मै[16]। अस्मै वक्तव्याय[17]। प्रशस्यायेन्द्राय। पर्वतस्य[18]। गर्भः[19] प्रकाश आसीदिति शेषः। गवाम्[20]। पूर्व्याय[21]। जन्मने स्वामिन इत्यर्थः। तदा पर्वते प्रविशत इन्द्रस्य पर्वते विजिहीत[22] द्वारप्रदेशमपहायोभयतो गत इत्यर्थः। प्रकाशीकरणार्थं द्यौश्च। अभिलषितम्। साधितवती[23]। तत एन परिचरन्त[24]। बहु शत्रुजातम्। उपक्षपितवन्तः[25]।

सदाप्रणस्वर्यूंष्यान्[26] अवत्सारस्य गृहपतेर्यज्ञ प्रति गन्तुमिदमाह—

सुक्तेभिर्वो[27] वचोभिर्देवजुष्टैरिन्द्रा न्वग्नी अवसे हुवध्यै[28]।
उक्थेभिर्हि ष्मा कवयः सुयज्ञा आविवासन्तो मरुतो यजन्ति॥ ४॥

सूक्तेभिः[29]। गवामपहर्तृभिः[30] पणिभिरभिभूताना युष्माकम्। रक्षार्थम्[31]। सुवचनैः[32]। वचोभि.। देवैः

---

१. नद्यः Sy.
२. भक्षितकूलोदकाः। कूलङ्कषा इत्यर्थः। नद्य इत्वंरूपा भवन्ति Sy.
३. Ngh. 1.13.
४. अग्रंहत P. अग्रंमहत D. वृद्धाऽभवत्। एतत् सर्वं सूर्यस्याज्ञयेति भावः Sy.
५. यता P.
६. ०न्तिः P. ०न्ती D.
७. सुहिता P.
सुष्ठु गृहे स्थापिता
८. गृहाधारस्तम्भ इव Sy.
९. ०मन्त्या० P.
१०. महाम् Sy.
११. ०ये P.
१२. स्तोत्रे Sy.
१३. पर्वतो मेघस्य Sy.
१४. ०र्भं D.
गर्भस्थानीयमुदकम् Sy.
१५. पूर्वगवां P. पूगवां D. महतीनां स्तुतीनाम् Sy.
१६. प्रत्नाय Sy.
१७. उत्पादयित्रे Sy.
१८. पर्वतो मेघः Sy.
१९. पिजीहित P., D. जिहीत। चलति। चालयति वेन्द्रः Sy.
२०. ०योभवतो P. द्वारमपहा० D.
२१. साधयति वृष्टिम् Sy.
२२. सर्वतः परिचरन्तोऽङ्गिरसः Sy.
२३. अत्यधिकम् Sy.
२४. उपक्षपयन्त्यात्मानं कर्मभिः Sy.
२५. सूर्यभिः P.
२६. सदापृणः स्वपूर्व्यान् is suggested for सदापृण स्वर्यूंष्यान्।
२७. वः युवां व्यत्ययेन बहुवचनम् Sy.
२८. अस्मद्रक्षणाय Sy.
२९. सूक्तैः सुवचनैः शोभनगुणप्रकाशनप्रवणैः Sy.

सेवितैः[1]। इन्द्राग्नी[2]। क्षिप्रम्। आह्वातुमेते प्रवृत्ता[3] इति शेषः। तथोक्तैर्मिः[4]। क्रान्तप्रज्ञा[5] एते। शोभनयाः[6]। परिचरन्तः[7]। मरुतश्च। यजन्ति[8] पणिभिरपहृतेषु पशुष्ववत्सार। 'म हि क्षत्रस्य' इत्यस्यामृचि निर्दिष्टैर्ऋषिभिर्यष्टुमुद्युक्तस्ततः[9] 'सदापृणो[10] यजत' इत्यस्यामृचि निर्दिष्टान् ऋषीन् प्रतीत्य[11] वदतीति, अस्याख्यातस्योदात्तत्वादुत्तरत्र सम्बन्धः[12]।

एतो न्व१द्य सुध्यो३ भवाम प्र दुच्छुना मिनवामा वरीयः।
आरे द्वेषांसि सनुतर्दधामायाम प्राञ्चो यजमानमच्छ॥ ५॥

एतो नु[13]। आगच्छत[14]। क्षिप्रम्। अद्य[15]। वय सुकर्माणः[16]। भवाम। कृत्वा च कर्माणि[17] प्रहिंसामो[18] वयम्। राक्षसान्[19]। वरीयः[20] वरीयसः[21]। इत्येतदेवाह—आरे इति दूरे। द्वेष्टृणि[22] रक्षांसि। अन्तर्हितानि[23]। दधाम[24]। तदर्थं यजमानमवत्सारम्[25]। प्रति। गच्छाम इति[26]।

---

१. देवैः सेवनीयैः Sy.
२. परस्परापेक्षया प्रत्येकं द्विवचनम्। यद्यप्येकमेव पदं मध्ये व्यवधानं छान्दसम्। हे इन्द्राग्नी! Sy. ३. आह्वयामि Sy.
४. वृत्ता P.
५. स्तोत्रैः Sy.
६. कान्त० D. अनूचानाः पूर्वे ऋषयः Sy.
७. शोभयानाः D. शोभनयागाः is suggested for शोभनयाः।
८. स्तुत्यादिना परिचरन्तः Sy.
९. मरुत्सदृशाः कर्मसु शीघ्राः Sy.
१०. जयति P. पूजयन्ति Sy.
११. ०त्यस्यामिचि P., D. RV. V. 44. 10.
१२. ०ष्टेः ऋ० P.
१३. ०ष्ट० D.
१४. सदावृणो P. तदावृणो D.
१५. RV. V. 44. 12.
१६. ०ष्टाम् P., D.
१७. पतित्वं D.
१८. आख्या० P.
१९. ०त्तत्वमु० P.
२०. VM. ignores हि and स्म॥ हि स्मेति पूरणौ Sy.
२१. अयमङ्गिरसां वादः Sy.
२२. गच्छत Sy.
२३. अस्मिन् यागदिने Sy.
२४. शोभनकर्माणः Sy.
२५. र्माणि P.
२६. प्रकर्षेण हिंसाम Sy.
२७. द्विषः Sy.
२८. परीयः D. अत्यन्तमित्यर्थः Sy.
२९. परी० D.
३०. ०सेत्ये० P.
३१. यजमानस्य द्वेष्टॄन् Sy.
३२. सम्भक्तून्। यद्वा पूर्वं प्रकाशवैरिणां वध उक्त इदानीं प्रच्छन्नानामिति विवेकः Sy. सनुतरित्यन्तर्हितनाम Ngh. 3.25.
३३. स्थापयाम Sy.
३४. वत्सं P. ०र्हितन्निधामवत्सं D.
३५. ०नव० D. सदापृणमवत्सारं च Sy.
३६. अभिमुखम् Sy.
३७. VM. ignores प्राञ्चः।

एता धियं कृणवामा सखायोऽप या मातॉं ऋणुत व्रजं गोः ।
ययां मनुर्विशिशिप्रं जिगाय ययां वणिग्वङ्कुरापा पुरीषम् ॥ ६ ॥

एतां धियम् । कर्म । कर्तुमागच्छत । कृणवाम । कर्म । हे सखाय ! मातृस्थानीयम् । यत् कर्म । पणिभिरपहृताना गवाम् । वज्रम् । अप ऋणोति विवृतद्वार करोतीत्यर्थ । विक्षु भक्षणार्थं हनू प्रवेशयतीति विशिशिप्रो नाम कश्चिदसुरस्तम् । मनु । पुरिरा ? येन कर्मणा । जिगाय । येन वा । असुरोऽयम् । वङ्कु-नाम । उदकम् । प्राप्तवान् ।

अनूनोदत्र हस्तयतो अद्रिरार्चन्येन दश मासो नवग्वाः ।
ऋतं यती सरमा गा अविन्दद्विश्वानि सत्याङ्गिराश्चकार ॥ ७ ॥

अनूनोत् । इन्द्रस्य हस्तेन यत । वज्र । गवामरणम् । अस्मिन् कर्मणि । अनूनोत्, नुदतिः प्रेरणकर्मा विवृतद्वारमकरोत् । येन कर्मणा । अङ्गिरस गवामयनेन यन्त । दश । मासान् । अर्चितवन्त । अथ भिन्न-द्वारे शिल्लोच्चये सत्यभूतं गोधन प्रति । गच्छन्ती । सरमा नाम देवशुनी । पणिभिरपहृता गा । अविन्दत् ।

---

१. इदमप्यङ्गिरसां वाक्यम् Sy.
२. आगत्य च करवाम Sy.
३. स्तुतिम् Sy.
४. हे सखायः ! परस्परं सखिभूताः ! अङ्गिरसः ! इत्यङ्गिरसां वचनम् Sy.
५. गवां निर्मात्री Sy.
६. या धीः Sy.
७. पणिभिरपहृतम् Sy.
८. अव P. अपावृणोत् Sy.
९. वित० P.
१०. विगतहनुं शत्रुम् Sy.
११. यद्वा मनुः सर्वस्य मन्तेन्द्रो विशिशिप्रो वृत्रः । स तमस्माभिः कृतया स्तोमलक्षणया धिया जिगाय Sy.
१२. ०स्तमानुः परिरा P.
१३. जितवान् Sy.
१४. नेन P., D. यया च Sy.
१५. अयम् is omitted by P. वणिगिवाल्पेन कर्मणा बहुफलाकांक्षी कक्षीवान् Sy.
१६. गुना० P. पंगुना० D. जलेच्छया वनगामी Sy. १७. पूरकमुदकम् Sy.
१८. आप । 'याभिः सुदानू औशिजाय वणिजे दीर्घश्रवसे मधु कोशः' (RV. I.112.11.) इति हि श्रुतम् Sy.
१९. हनूनोत् P.
२०. इन्द्रोस्य P. इन्द्रेस्य D.
२१. हस्तेन संहतः सन् Sy.
२२. अभिषवग्रावा Sy.
२३. अस्मिन् यज्ञे Sy.
२४. नौतिरत्र शब्दमात्रे वर्तते । अशब्दयत् Sy.
२५. ग्राव्णा तदभिषवेण Sy.
२६. नवमासपर्यन्तं गवार्थमनुतिष्ठन्तोऽङ्गिरसो नवग्वाः । नवगोयुक्ता वा Sy.
२७. दशमासपर्यन्तम् । यद्वा दशसंख्याकमासोपेता दशमासानुष्ठाना अङ्गिरसोऽपरे नवग्वाश्चैते सर्वेऽपि येनार्चन्ति । 'नवग्वासः सुतसोमास इन्द्रम्' (RV. V.29.12.) इति हि निगमः Sy. २८. अपूजयन्निन्द्रम् Sy.
२९. सत्यं यज्ञं वा Sy.
३०. प्राप्नुवती Sy.
३१. रसामा D. सरणशीला स्तुतिरूपा वागङ्गिरसां गवार्थमिन्द्रेण प्रहिता देवशुनी वा Sy.

[1]अथ पणिभिरुत्पादिता माया विनाशयन् सर्वाण्येव[2]। सत्यानि। अङ्गिरा[3]। चकार यद्यथा दृश्यते तत्तथाविधमेव यथा भवति नानृत तथा कृतवानिति।

विश्वे अस्या व्युषि माहिनायाः सं यद्गोभिरङ्गिरसो नवन्त।
उत्सं आसां परमे सधस्थ ऋतस्य पथा सरमा विदद्गाः॥ ८॥

[4]विश्वे[5]। यदा। अस्या[6] उषस। महत्या[7]। व्युच्छने[8]। आत्मीयाभिर्गोभिः। सङ्गता आसन्[9]। तदानीमासां गवाम्। उत्सः[10]। परमे दूरे[11]। स्थानेऽभूत्। तत सरमा[12]। गोधनसाधकेन[13]। मार्गेण गत्वा। अविदत्[14]। गा नष्टा इति[15][16]।

आ सूर्यो यातु सप्ताश्वः क्षेत्रं यदस्योर्विया दीर्घयाथे।
रघुः श्येनः पतयदन्धो अच्छा युवा कविर्दीयद्गोषु गच्छन्॥ ९॥

आ सूर्यः। यज्ञगृह प्रति, सूर्य[17]। आगच्छतु[18]। सप्ताश्वः[19]। यत्[20]। अस्य[21]। क्षेत्रम्[22]। सूर्यविस्तीर्णं[23]। दीर्घं[24] मार्गं[25] भवति। आगत्य च लघु[26]। श्येनो[27] भूत्वा। सोमलक्षणमन्नम्[28]। प्रति[29]। पततु[30]। पीत्वा च युवा[31]। कविः[32]।

---

१. अथो P., D.
२. स्तुत्यादिलक्षणानि Sy.
३. विश्ये P., D.
४. अस्य P.
५. मंहनीयायाः Sy.
६. व्युच्छने सति गवामावरकेऽन्धकारेऽपवृते सति Sy.
७. सञ्जग्मिरे Sy.
८. तदा Sy.
९. क्षीराद्युत्स्रावः Sy.
१०. उत्कृष्टे Sy.
११. सहस्थाने यज्ञ उपयुक्तोऽभवदित्यर्थः Sy.
१२. वाग् देवशुनी वा Sy.
१३. सत्यस्य Sy.
१४. ०वं P., D. अलभत यद्वाऽऽसां गवां परमे स्थाने व्रजस्य निगूहनप्रदेश उत्स उदकस्य प्रस्रवणो वर्तते। बिलमित्यर्थः। तेन ऋतस्योदकस्य पथा मार्गेण सरमा गा विवत् Sy.
१५. गा निगूढाः Sy.
१६. VM. ignores विश्वे and अङ्गिरसः॥ विश्वे सर्वे Sy.
१७. सर्वस्य प्रेरको देवः Sy.
१८. अस्मदभिमुखमागच्छतु Sy.
१९. सर्पणस्वभावाश्वोपेतः सप्तसंख्याकाश्वो वा Sy.
२०. यस्मात् Sy.
२१. सूर्यस्य Sy.
२२. क्षत्रम् P., D.
गन्तव्यप्रदेशः Sy.
२३. उरु अतिप्रभूतायामः। स एव देवः Sy.
२४. ०र्घो P.
दीर्घगमने Sy.
२५. मार्गो P., D.
२६. लघु P., D.
लघुगमनः सन् Sy.
२७. शंसनीयगमनः Sy.
२८. दीयमानं हविः Sy.
२९. अभिलक्ष्य Sy.
३०. आगच्छति Sy.
३१. सर्वत्र मिश्रयिता Sy.
३२. ०वि P. क्रान्तदर्शी सन् Sy.

दीप्तः[1]। गोषु[2] गच्छन्निति[3]।

आ सूर्यो अरुहच्छुक्रमर्णोऽयुक्त यद्धरितो वीतपृष्ठाः।
उदूना न नावमनयन्त धीरा आशृण्वतीरापो अर्वागतिष्ठन् ॥ १० ॥

आ सूर्यः। आरुहत्[4] गमनार्थम्। रसाया देवनद्याः शुक्रम्[5]। उदकम्[6]। सूर्य[7]। यदा[8]। स्वरथे योजितवान्[9]। अश्वाः[10]। कान्तपृष्ठा[11]। ततहिनम्[12]?। उदकेन। इव। नावम्। शीघ्र पार प्रत्यनयन्त। धीरा[13]। तदानी देवानां वचनम्, आभिमुख्येन शृण्वत्यः[14]। आपः। अर्वाक्[15]। अतिष्ठन्[16] अवहन्त्य[17]।

धियं वो अप्सु दधिषे स्वर्षां ययातरन्दश मासो नवग्वाः।
अया धिया स्याम देवगोपा अया धिया तुतुर्यामात्यंहः ॥ ११ ॥

धियं वः[18]। युष्माकम्। अन्तरिक्षे[19]। उदकस्य सम्भक्त्रीम्[20]। धिय[21] कर्म। त्व धारयसि[22]। येन[23] कर्मणा। अङ्गिरसः। दश। मासान्[24]। अतरन्[25]। अनेन[26]। कर्मणा[27] त्वया क्रियमाणेन। वय देवैर्गुप्ताः[28]। स्याम[29]। तथा अनेनैव। कर्मणा। पाप च। अतितरेम[30]।

---

१. दीप्यते Sy.
२. रश्मिषु Sy.
३. मध्ये वर्तयन्। यद्वा श्येनः सुपर्णोऽन्धोऽच्छ पतयत् द्युलोकस्थं सोमलक्षणं देवानामन्नमस्माद्यागार्थमानेतुं तदभिमुखमागात् Sy.
४. सर्वतः प्रादुर्भवति Sy.
५. दीप्तम् Sy.
६. उदकं प्रति Sy.
७. देवः Sy.
८. यस्मात्, यदा वा Sy.
९. योतवान् P. रथेऽयोजयत्। तदा तं सूर्यम् Sy.
१०. अश्ववान् Sy.
११. कान्तपृष्ठान् Sy.
१२. ०नाम् P.
१३. धीमन्तो यजमानाः Sy.
१४. सर्वतोऽनुज्ञां कुर्वाणाः Sy.
१५. अवाङ्मुखाः Sy.
१६. अभवन् Sy.
१७. ०त्यः P.
१८. हे देवाः! Sy.
१९. अग्निमित्ताम् Sy.
२०. सर्वस्य दात्रीम् Sy.
२१. ०त्रीं D.
२२. स्तुतिम् Sy.
२३. धारयामि। व्यत्ययेन मध्यमः Sy.
२४. यया धिया Sy.
२५. मासः Sy.
२६. अतरन् सत्रमनुतिष्ठन्तः Sy.
२७. अन्तरमनेके P. अन्तरश्नेके D. अनया Sy.
२८. धिया Sy.
२९. ०णेनन P.
३०. ०वेर्गु० D.
३१. देवगुप्ता न्यम P. भवेम Sy.
३२. Ms. D. puts the figure ॥४५॥ here to indicate the end of the forty-fifth hymn. No such number is given in P.

V. 46.

हयो न विद्वाँ अयुजि स्वयं धुरि तां वहामि प्रतरणीमवस्युवम् ।
नास्या वश्मि विमुचं नावृतं पुनर्विद्वान्पथः पुरएत ऋजु नेषति ॥ १ ॥

हयो[1] न ॥ प्रतिक्षत्रः[2] ॥ अश्वः । इव । विद्वान्[3]हम् । यज्ञधुरि[4] । युक्तोऽभवम्[5] । ताम् यज्ञधुरम्[6] । वहामि[7] । प्रतरणीम्[8] । रक्षिकाम्[9] । न । अस्याः[10] । विमोचनम्[11] । इच्छामि[12] । न[13] च[14] । पुनः । आवर्तनम्[15] । प्रतिगमनमार्गम्[16] । विद्वान्[17] । अकुटिलम् । नयति[18] । पुरो गन्ता[19] ।[20]

अग्न इन्द्र वरुण मित्र देवाः शर्धः प्र यन्त मारुतोत विष्णो ।
उभा नासत्या रुद्रो अध ग्राः पूषा भगः सरस्वती जुषन्त ॥ २ ॥

अग्ने[21] । हे अग्नीन्द्रादयः[22] ! मह्यम् । बलम्[23] । प्रयच्छताम्[24] । मरुता गणः मारुत[25] । उभौ । अश्विनौ[26] । रुद्रश्च । देवपत्न्यः[27] । च । पूषा च । भगश्च । सरस्वती च सेवन्तामिति[28] ।[29]

---

१. 'हयो न' इत्यष्टर्चं द्वितीयं सूक्तं प्रतिक्षत्रस्यार्षम् । अष्टमी द्वितीया च त्रिष्टुभौ शिष्टाः षट् जगत्यः । आदितः षड् वैश्वदेव्यः सप्तम्यष्टम्योर्देवपत्न्यो देवता । तथा चानुक्रान्तम्— 'हयोऽष्टौ प्रतिक्षत्रोऽन्त्यो द्वृचो देवपत्नीस्तवोऽन्त्या त्रिष्टुप् द्वितीया च' (KSA. 26.46. p.20.) इति । सूक्तविनियोगो लैङ्गिकः Sy.

२. ०क्षेत्रः P., D. ३. सर्वज्ञः प्रतिक्षत्रः Sy.

४. यंज्ञरधुरि D. धुरि यज्ञात्मिकायाम् Sy.

५. ०भव P. युक्तोऽभवत् Sy.

६. धुरम् Sy. ७. यज्ञंपुर P. यज्ञमपुर D.

८. धारयाम्यहमध्वर्युर्होता वा Sy.

९. ०णिम् P. प्रकर्षेण तारयित्रीम् Sy.

१०. रक्षकां P., D. रक्षयित्रीम् Sy.

११. धुरः Sy.

१२. विमोचनम् P. परित्यागम् Sy.

१३. कामये Sy. १४. व P., D.

१५. पुनः पुनरावरणं धारणमपि वश्मि Sy.

१६. यज्ञमार्गान् Sy.

१७. मार्गाभिज्ञोऽन्तर्यामी देवः Sy.

१८. प्रापयति Sy.

१९. पुरतो गन्ता सन् Sy.

२०. VM. ignores स्वयम् ॥ स्वयम् अनन्यप्रेरितः सन् Sy.

२१. प्रत्यक्षकृतोऽयमर्धर्चः । द्वितीयस्तु परोक्षकृतो वाक्यभेदात् U.

२२. अग्न्यान्मारुतः P. By आदि VM. includes वरुण । मित्र । देव । and विष्णु ॥ हे अग्ने ! इन्द्र ! वरुण ! मित्र ! हे विष्णो ! हे सर्वे देवाः ! यूयम् Sy.

२३. बले P., D. बलमस्माकम् Sy. बलं सङ्गृह्य U.

२४. VM. explains प्र यन्त as प्रयच्छताम् and construes it with मरुताम् ॥ प्रापयत Sy. प्रयच्छत दत्त । यमेः शपो लुक् Mah. प्रगच्छत । स्वामिनो गृहं सोमं पातुम् U.

२५. भारु P., D. हे मारुतानि मरुतां बलानि ! Sy. हे मारुत ! गण ! U.

२६. सत्यभूतौ Sy. एवं प्रत्यक्षमुक्त्वा परोक्षमाह Sy.

२७. ०वाप० P. एतेषां देवानां स्त्रियश्च Sy. अध अथ . . . . देवपत्न्यः Mah., U.

२८. सेवन्तामस्मदीयं यज्ञं स्तुतिं वा Sy. सेवन्तां हवींषि Mah. सेवन्ते यज्ञं पानाय U.

२९. This stanza=YV.33.48

इन्द्राग्नी मित्रावरुणादितिं स्वः पृथिवीं द्यां मरुतः पर्वतॉं अपः ।
हुवे विष्णुं पूषणं ब्रह्मणस्पतिं भगं नु शंसं सवितारमूतये ॥ ३ ॥

इन्द्राग्नी । एतान् । आह्वयामि । सवितार च । शसनीयम् ।

उत नो विष्णुरुत वातो अस्रिधो द्रविणोदा उत सोमो मयस्करत् ।
उत ऋभव उत राये नो अश्विनोत त्वष्टोत विभ्वानं मंसते ॥ ४ ॥

उत नः । अपि च । अस्मभ्यम् । विष्णु । सुखम् । करोतु । वात । च । अक्षीण. । तथा । द्रविणोदा । सोमश्च । तथा । ऋभव । च । अपि च । धनाय । अस्माकम् । अश्विनौ भवताम् । अपि च । त्वष्टा । विभ्वा च तच्छिष्य । सर्वमिद मन्यताम् ।

उत त्यन्नो मारुतं शर्ध आ गमदविक्षयं यजतं बर्हिरासदे ।
बृहस्पतिः शर्म पूषोत नो यमद्वरूथ्यं१ वरुणो मित्रो अर्यमा ॥ ५ ॥

उत । अपि च । स । मारुत । वेग । अस्मान् । आगच्छतु । दिवि वर्तमानम् । यष्टव्यमस्माकम् । बर्हिः ।

---

१. इन्द्राविसवित्रन्तान् चतुर्दश देवान् । स्वरित्यादित्य उच्यते स्वरणात् Sy.
वरुणो च अदितिं च स्वः आदित्यं च पृथिवीं च द्यां च मरुतश्च पर्वतांश्च अपश्च । . . . विष्णुं च पूषणं च ब्रह्मणस्पतिं च सवितारं च U.
२. स्तौमि वा Sy. ३. सशः० P.
सशं D. स्तुत्यम् Mah. शंसितव्यम् U.
४. VM. ignores नु and ऊतये ॥ नु क्षिप्रम् । ऊतये अवनाय Mah., U.
This stanza=ŖV.33.49.
५. अस्माकम् Sy.
६. व्यापको देवः Sy.
७. मय इति सुखनाम Ngh. 3.6.
८. अपि च वायुः Sy.
९. अहिंसकः सन् मयस्करत् Sy.
१०. किं च Sy. ११. धनस्य दाता Sy.
१२. सोमोऽपि मयस्करत् Sy.
१३. द्रविणस्य P. अपि च Sy.
१४. अस्मभ्यम् Sy. १५. ०नो P.
१६. ई P. १७. त्वष्टा देवः Sy.
१८. ऋभूणामन्यतमो देवः Sy.
१९. ०व P., D. एते सर्वेऽप्यनुमंसते । यद्वा अनुमंस्त इति प्रत्येकं सम्बन्धनीयम् Sy.
२०. VM. ignores अनु ।
२१. तत् Sy. २२. मरुताम् Sy.
२३. वेगेन D. बलं सङ्घः Sy.
२४. द्युलोके Sy. २५. ०नः P., D.
२६. पूज्यम् Sy. २७. बहु P. बहि D.
किमर्थमागमनमिति ? तदुच्यते बर्हिषि Sy.
२८. VM. ignores आसदे । बृहस्पतिः । शर्म । पूषा । आ । नः । यमत् । वरुण्यम् । वरुणः । मित्रः and अर्यमा ॥ आसदे उपवेष्टुम् । उपविश्य हविःस्वीकारायेत्यर्थः । किंच बृहस्पतिः—देवः शर्म सुखं यमत् यच्छतु । उत नः अस्मभ्यं पूषापि यमत् । कीदृशं शर्म ? वरूथ्यम् । वारयति शीतवातादिकमिति वरूथं गृहम् । तदर्हं वरूथ्यम् । किं च वरुणादयस्त्रयोऽपि प्रत्येकं शर्म यच्छन्तु Sy.

उ॒त त्ये नः॑ पर्व॒तासः॑ सु॒शस्त॑यः सु॒दीत॑यो॒ नव्य॑स्वामंणे भुवन् ।
भगो॑ विभ॒क्ता शव॑सावसा॒ गम॑दुरु॒व्यचा॒ अदि॑तिः॒ श्रोतु॑ मे॒ हव॑म् ॥ ६ ॥

[उत त्ये ।] अस्मान् आगच्छतु । अग्नेन च । बहुव्याप्ति । अदितिश्च । मम । आह्वानम् । शृणोतु ।

दे॒वानां॑ पत्नीरुशतीरवन्तु नः॒ प्राव॑न्तु नस्तु॒जये॒ वाज॑सातये ।
याः पार्थि॑वासो॒ या अ॒पामपि॒ व्रते ता नो॑ देवीः सुहवाः॒ शर्म॑ यच्छत ॥ ७ ॥

देवानाम् । देवानाम् । पत्न्यः । उशत्यः । अवन्तु । नः । प्रावन्तु । नः । अपत्यजननाय । अन्नाय च । याः । पार्थिवासः । या । अपाम् । अपि । कर्मणि व्रत उद्युक्ता । ता । नः । देव्यः । स्वाह्वानाः । मम सुखम् । प्रयच्छत ।

---

१. The *pratīka* is supplied by the Editor. २. रक्षणेन च सह Sy.
३. प्रभूतव्याप्तिः Sy. ४. अदीना देवमाता Sy.
५. स्तुतिमाह्वानं वा Sy.
६. VM. ignores उत । त्ये । नः । पर्वतासः । सुशस्तयः । सुदीतयः । नव्यः । ग्रामणे । भुवन् । भगः । विभक्ता and शवसा ॥ उत अपि च । त्ये ते । पर्वतासः पर्ववन्तोऽद्रयः । सुशस्तयः शोभनस्तुतयः । सुदीतयः सुदानाः । नव्यश्च । ग्रामणे पालने । नः अस्माकम् । भुवन् भवन्तु । भगो देवः । विभक्ता धनानां विभागकर्ता वाता सन् शवसा अन्नेन Sy.
७. पत्नीसंयाजेषु देवपत्नीनां 'देवानां पत्नीः' इत्यादिके द्वे याज्यानुवाक्ये । सूत्रितञ्च—'देवानां पत्नीरुशतीरवन्तु न इति द्वे' (ĀŚS. 1.10.) इति । आग्निमारुतशस्त्रेऽप्येते । 'देवानां पत्नीरुशतीरवन्तु न इति द्वे राकामहमिति द्वे' (ĀŚS.5.20.) इति Sy. प्रतिक्षत्रस्येदमार्षम् Dur. प्रतिक्षत्रस्यार्षम् SKN.
८. देवानाम् इन्द्रादीनाम् Sy.
९. या एता देवपत्न्यः Dur. प्रथमार्थे द्वितीया । देवानां पत्न्यो भवत्यः SKN.
१०. अस्मदीयां स्तुतिं कर्म वा कामयमाना Sy. अस्मत्तो हविरुशन्ति कामयन्ते Dur. उशत्यो हविः स्तुतीश्च कामयमानाः SKN.
११. रक्षन्तु Sy. ता अस्मत्तो हविरुपभुज्य ततोऽस्मानवन्तु प्रतितर्पयन्तु धनेन Dur. अवतिर्गतिकर्मा, गच्छन्तु SKN. १२. अस्मान् Sy. अस्मान् प्रति SKN. १३. प्रवन्तु P. प्रकर्षेण रक्षन्तु गच्छन्तु वा Sy. प्रकर्षेणावन्तु रक्षन्तु Dur. गत्वा च प्रावन्तु प्रकर्षेण रक्षन्तु SKN. १४. अस्माकम् Sy. अस्मान्SKN.
१५. ०पत्यपत्यज० P., D. बलवते पुत्राय Sy. किमर्थम् ? ...तुजय इति तुक्शब्दस्यापत्यनाम्नो जनेश्च रूपमिदम् । तेनायमर्थः—अपत्यजननाय SKN. १६. अन्नायनाय P. अन्नलाभाय सङ्ग्रामाय वा Sy. अन्नसम्भजनाय Dur. सातिर्लाभार्थः, अन्नलाभाय SKN.
१७. कतमास्ताः ? याः Dur. १८. पृथिवीसम्बन्धिन्यः Sy. पृथिव्यां भवाः SKN., Dur.
१९. उदकानाम् Sy. अपां वृष्टिलक्षणानाम् SKN.
२०. अपिशब्दश्चार्थे SKN.
२१. अन्तरिक्षे वर्तन्ते Sy. कर्मणि वृष्योत्सर्गे व्यापृताः सर्वाः Dur. कर्मणि जननाख्ये जन्मनीत्यर्थः । सप्तमीश्रुतेर्वर्तध्वमिति शेषः । वृष्टिं कुरुतेत्यर्थः SKN. २२. वत P., D.
२३. अस्मभ्यम् Sy., SKN. अस्माकम् Dur.
२४. देव्य P., D. Sy. २५. स्वाहूना P. हे शोभनाह्वानाः ! यूयम् Sy. सुह्वानाः SKN.
२६. म P., D. २७. गृहं सुखं त्राणं वेत्येतदाशास्महे Dur. गृहं सुखनाम वा SKN.
२८. यच्छत Sy. ददतु Dur. देवानां पत्न्य उशत्योऽवन्तु नः । प्रावन्तु नः । (तुजये)अपत्यजननाय चान्नसंसननाय च । याः पार्थिवासो या अपामपि व्रते कर्मणि ता नो देव्यः सुहवाः शर्म यच्छन्तु शरणम् N.12.45., SKN. IV.145.

उत ग्ना[1] व्यन्तु देवपत्नीरिन्द्राण्य[2]ग्नाय्यश्विनी राट्।
आ रोदसी वरुणानी शृणोतु व्यन्तु देवीर्य ऋतुर्जनीनाम् ॥ ८ ॥

उत ग्नाः[3]। अपि[4] च। ग्नाः[5]। व्यन्तु[6]। देवपत्न्यः[7]। इन्द्राणीन्द्रपत्नी। अग्नायी अग्नेः[8] पत्नी। अश्विनी अश्विनोः पत्नी। राट्[9] राजते. दीप्तिः। रोदसी द्यावापृथिवी। "रुद्रस्य पत्नी[10]" इति यास्कः। वरुणानी च वरुणस्य पत्नी। शृणोतु[12]। व्यन्तु[13]। देव्यः[14] कामयन्ताम्। यः। ऋतुकाल.[15]। जायाना[16] सोमपानस्य[17]।

इति षड्विंशमध्याय व्याख्यदार्येषु कश्चन[18]।
दक्षिणापथमाश्रित्य वर्तमानेषु माधव.[19]॥

---

१. पुरुषैः पीतमग्न्यादिभिरपि Dur. उताप्यर्थे SKN. २. Omitted by D.
३. स्त्रियः Sy. स्त्रियः Dur. ग्नाशब्दः स्त्रीवचनः। अपि स्त्रियः SKN.
४. हविर्भक्षयन्तु। ता विविच्योच्यन्ते Sy. पिबन्त्येतदाज्यम् Dur. कामयन्ताम्। किम्? सामर्थ्याद् हविः SKN. ५. देवपत्न्यो देवाः पतयो यासां ताः Sy. कतमाः स्त्रियः? ....देवानां पत्न्यः कामयमानाश्च SKN.
६. इन्द्रस्य पत्नी Sy., SKN. ७. ०ग्ने P.
८. राजमाना Sy. सा च राड् दीप्तिः। राडित्यस्य प्रत्येकं वा सम्बन्धः SKN.
९. रा सृजते दीप्ति P. रासृजतेर्दीप्ति D.
१०. 'रुद्रस्य पत्नी' (N.11.49.) इति यास्केनोक्तम्। एवं सति 'विषितस्तुका रोदसी' (RV.I.167.5.) इत्यत्र यथाद्युदात्तप्रगृह्यते न स्तस्तद्वदत्रापि भाष्यम्। तथापि शाकल्येन महर्षिणैवमुक्तत्वात्तथैव द्रष्टव्यम् Sy. आथर्वणे रोदसीति, अप्रगृह्यं पदं तदपेक्ष्यैकवचनेन भाष्यकारो निराह—रोदसी रुद्रस्य पत्नीति Dur. रुद्रस्य पत्नी। रोदसीति रुद्रस्य पत्नीवचनो व्याख्यातः। तत् किल नोपपद्यते। यतोऽन्तोदात्तो रोदसीशब्दो रुद्रपत्नीवचनो दृष्टः। 'विषितस्तुका रोदसी' (RV.I.167.5.) 'मिम्यक्ष येषु रोदसी' (RV.I.167.3.) इत्यादावन्तोदात्तस्य दर्शनात्। आद्युदात्तस्तु 'अतप्यमाने अवसावन्ती अनु ष्याम रोदसी देवपुत्रे' (RV.I.185.4.) इत्यादौ सर्वत्र द्यावापृथिवीवचनः। अस्याद्युदात्तत्वाद् द्यावापृथिवीवचन एव न रुद्रपत्नीवचनः। तथा च पदकारेण द्विवचनत्वं प्रदर्शितमिति। कर्मणा वा दानेन प्रशस्यताऽस्य दर्शितेति। भाष्यकारस्तु देवपत्नीप्रकरणानुविधानेन पदकारमनवेक्ष्य रोदसीशब्दं रुद्रपत्नीवचनमुदाजहारेति SKN.
११. रोदसी। रुद्रस्य पत्नी N.11.49.,12.46.
१२. आभिमुख्येन च स्थित्वा शृणोतु Dur. आकारः शृणोत्विति सम्बध्यते SKN.
१३. खादयन्तु हविः Sy. सर्वा अप्येता व्यन्तु पिबन्त्वेतदाज्यम् Dur.
१४. देव्य D. पत्नीसंयाजदेव्यः Sy.
१५. यामित० P., D. तदभिमानी देवोऽपि शृणोतु वेतु च Sy. भोजनकालः।....तस्मिन् काले दीयमानम्। कश्चासौ? भुक्तवत्सु पुरुषेष्विति Dur.
१६. जनायां P. जनीनां देवजायानाम् Sy.
१७. अपि च ग्ना व्यन्तु देवपत्न्यः। इन्द्राणीन्द्रस्य पत्नी। अग्नाय्यग्नेः पत्नी। अश्विन्यश्विनोः पत्नी। राड् राजतेः। रोदसी रुद्रस्य पत्नी। वरुणानी च वरुणस्य पत्नी। व्यन्तु देव्यः कामयन्तां य ऋतुकालो जायानां य ऋतुकालो जायानाम् N. 12.46., SKN. IV. 146.
१८. ०ख्याद्वा० P. १९. Ms. D. puts the figure ॥४६॥ here to indicate the end of the forty-sixth hymn. No such number is given in P.

[चतुर्थाष्टके तृतीयोऽध्यायः ॥]

'प्रयुञ्जती दिव एति'[1] व्याचिख्यासति माधवः ।
द्विरुच्यमानशब्देषु वक्तव्यं सम्प्रदर्शयन् ॥१॥
पदद्विर्वचने वीप्सा[2] नित्यता वा प्रतीयते ।
ततो द्वितीयं न पदं तत्र स्यात् पादपूरणम्[3] ॥२॥
'पथस्पथः परिपतिं[4] वचस्या'[5] 'धीवतोधीवतः सखा'[6] ।
'शृण्वे वीर उग्रमुग्रम्'[7] 'पन्यंपन्यमित्[8] सोतारः'[9] ॥३॥
'यज्ञायज्ञा वो अग्नये'[10] गिरागिरा च[11] दक्षसे'[12] ।
'विशोविशो वो[13] अतिथिम्'[14] वीप्सा सर्वेषु विद्यते ॥४॥
प्रायेण व्यक्तिभेदस्य[15] वीप्सैकस्यामपि[16] क्वचित् ।
'अग्निमग्निं हवीमभिः'[17] इति तत्र निदर्शनम् ॥५॥
'देवंदेवं वोऽवसे इन्द्रमिन्द्रं[18] गृणीषणि'[19] ।
'तंतमिद्राधसे महे'[20] पादाश्चात्र[21] निदर्शनम् ॥६॥

---

१. This line is supplied by the Editor.
२. RV. V.47.1.
३. विरम्यो नच श० P. विरच्यो न श० D.
४. वीप्सा P.
५. पादाग्रारणम् P.
६. ०तीं P. ०पथीं D.
७. RV. VI. 49.8.
८. RV. VI. 55.3.
९. उग्र ग्रग्रं P. RV. VI. 47.16.
१०. वन्यं वन्य० P.
११. स्तोता० P., D. RV. VIII. 2.25.
१२. RV. VI. 48.1.
१३. पो D.
१४. ग्रथिं P. RV. VIII. 74.1.
१५. ०वस्यात् D.
१६. द्विस्पेकस्यानपि P. ०स्या ग्रपि R.
१७. RV. I.12.2.
१८. वोपसे चेन्द्र० D. वोवस्ये चेन्द्र० P. ०से चेन्द्र० R.
१९. RV. VIII.12.19.
२०. ०मिन्द्रा० R. D.
२१. RV. VIII. 68.7.

सुबन्तस्य द्विर्वचने तिङन्तस्यात्र नित्यता ।
एवंविधेऽपि नित्यार्थे[१] द्विरुक्तिरिति केचन ॥७॥

वदन्त्यन्ये कालभेदादग्निरेकोऽपि[२] भिद्यते ।
विद्यते[३] तत्र वीप्सेति देशभेदादथापरे ॥८॥

संप्रोपोदां[४] द्विर्वचनं स्मर्यते पादपूरणे ।
'संसमिद्युवसे वृषन्'[५] 'प्रप्र यज्ञ पृणीतन'[६] ॥९॥

'उपोप मे[७] परा मृश'[८] 'कि नोदुदु हर्षसे'[९] च[१०] ।
न पादपूरणा अन्ये परापाभीति[११] ते त्रयः ॥१०॥

'अपाप शक्रः'[१२] 'अभ्यभि हि'[१३] 'मो षु णः परापरा'[१४] ।
वीप्साविशेष एतेषु द्विरुक्तेरवगम्यते[१५] ॥११॥

अधो ऽधो निर्ऋतिर्मास्मान् सर्वथा दुर्हणा[१६] वधीत् ।
एवमभ्यभि हीत्यत्र[१७] पुनः पुनरभिक्रमः[१८] ॥१२॥

योऽलङ्करिष्णुः पुरुषस्ततनुष्टिः स उच्यते ।
मघवा[१९] यजमानं तं पुनः पुनरपोहति[२०] ॥

---

१. नित्यर्थे D.
२. ०रेकापि P.
३. Omitted by D.
४. दश० P., D. ५. ०दा P.
६. RV. X. 191.1.
७. वृणी० P. वृणीतन D. RV. V. 5.5. Cf. 'प्रसमुपोदः पादपूरणे' (Pa.8.1.6.)
८. उपोव मेव D.
९. RV. I.126.7.
१०. ०र्षते D. RV. IV.21.9.
११. ०र्षं न सदा च P.
१२. ०भिति P.
१३. RV. V. 34.3.
१४. RV. IX. 110.5
१५. णश्च P., D.
१६. RV. I.38.6.
१७. ०रेव ग० P.
१८. ०ति मास्मास्त्वघ्नक्तं दूर्हणा P. ०तिर्मास्मास्त्व नक्तान्दुर्हणा D.
१९. RV. IX.110.5.
२०. ०हीत्तत्र P.
२१. मेघवान P. २२. ०हिति P.

'इन्द्रावरुण नू नु वाम्' इति नुः पूरणो यथा ।
तद्वत् सर्वानिमानाहुरपरे पादपूरणान् ॥
उदाहरणबाहुल्यात् प्रादीनामेव पाणिनिः ।
अनुशास्ति द्विर्वचनमिति केचिदवस्थिताः ॥ इति ॥

V.47.

प्रयुञ्जती दिव एति ब्रुवाणा मही माता दुहितुर्बोधयन्ती ।
आविर्वासन्ती युवतिर्मनीषा पितृभ्य आ सदने जोहुवाना ॥ १ ॥

प्रयुञ्जती । प्रतिरथ ॥ कार्येषु मानुष्यान् प्रयुञ्जाना । दिव । आगच्छति । प्रबुद्धानां शब्दैः शब्द कुर्वाणा । महती । माता । दुहितृस्थानीया सुप्तजना पृथिवीम् । बोधयति । परिचरन्ती मनुष्यान् । युवतिरुषाः । प्रज्ञया । पालयितृभ्यो देवेभ्यस्तदर्थम् । अग्न्यायतने । अग्निहोत्रेण हूयमाना ।

---

१. ०नू नपाम् P. RV. I.17.8.
२. Omitted by P.
३. ०निनाहु P. ०र्वनिनाहुर० D.
४. उदारहरण० D.
५. चाणिनिः D.
६. ०शास्ति D. Cf. 'प्रसमुपोदः पादपूरणे' (Pa. 8.1.6.)
७. अथ तृतीयोऽध्याय आरभ्यते । तत्र 'प्रयुञ्जती' इति सप्तर्चं तृतीयं सूक्तं प्रतिरथस्यार्षं त्रैष्टुभम् । पूर्वत्र 'वैश्वदेवं वै तत्' (KSA. 26. 41. p. 20.) इत्युक्तत्वादिदमपि वैश्वदेवम् । 'प्रयुञ्जती सप्त प्रतिरथः' (KSA. 27. 47. p. 20.) इत्यनुक्रमणिका । विनियोगो लैङ्गिकः । ..एषोषस्या Sy. ८. पयं० D.
९. मनु० is suggested for मानु० ।
१०. प्रयुञ्जती प्राणिनः प्रस्तुतेषु कर्मसु Sy.
११. द्युलोकात् Sy. १२. ०णां P. स्तूयमाना । कर्मणि कर्तृप्रत्ययः Sy. १३. हती P.
१४. प्रकाशस्य देवानां वा निर्मात्री Sy.
१५. भूम्याः । तदुपजीव्यत्वाद् दुहितृत्वमुपचर्यते । यद्वा दुहितुर्दिव इति सम्बन्धः । उषसो दिवो दुहितृत्वं 'व्युच्छा दुहितर्दिवः' (RV.I.48.1.) इत्यादिषु प्रसिद्धम् । अन्यत्र च 'दिवो दुहिता भुवनस्य पत्नी" (RV.VII.75.4.) इत्युषसः द्युदुहितृत्वमाम्नातम् । अत इदमधिगम्यते । कदाचिद् द्यौरुषसो जायत उषाश्च दिव इति । 'प्रजापतिर्वै स्वां दुहितरमभ्यध्यायद्दिवमित्यन्य आहुरुषसमित्यन्ये (AB. 3. 33.) इति हि श्रूयते । लिङ्गं च दृश्यते कार्यकारणभावव्यत्यये 'अदितेर्दक्षो अजायत दक्षाद्वदितिः (RV. X.72.4.) इति Sy.
१६. बोधती D. बोधयन्ती is suggested for बोधयति ॥ बोधं कुर्वाणा Sy.
१७. युवदन्ति P. युवतीन्तिः D. मिश्रयन्ती सर्वत्र । नित्यतरुणी वा Sy.
१८. ०षा D. १९. स्तुतिमती Sy.
२०. तृतीयार्थे पञ्चमी । पितृभिः पालकैर्देवैः सह Sy. २१. अग्नयत० P. यागगृहे Sy.
२२. भूयमानाः P. भूय D. आहूयमाना । यद्वा पितृभ्यः कर्मणां पालकेभ्यो यजमानेभ्यः इष्टप्रापणेन पालकेभ्यो वा तेषामर्थाय जोहुवाना Sy.
२३. VM. ignores आ ॥ सर्वतः Sy.

अजिरासस्तदप ईयमाना आतस्थिवांसो अमृतस्य नाभिम् ।
अनन्तासः उरवो विश्वतः सीं परि द्यावापृथिवी यन्ति पन्थाः ॥ २ ॥

अजिरासः । गमनस्वभावाः । गमनकर्माणो मनुष्यान् । अभिगच्छन्तः । अमृतस्य । नाभिमादित्यम् । बहवः । विस्तीर्णाः । सर्वत एव । द्यावापृथिवी । परियन्ति । पतनशीला रश्मयः ।

उक्षा समुद्रो अरुषः सुपर्णः पूर्वस्य योनिं पितुरा विवेश ।
मध्ये दिवो निहितः पृश्निरश्मा वि चक्रमे रजसस्पात्यन्तौ ॥ ३ ॥

उक्षा । "विक्रियमाणो वा एष एषां लोकानामन्तान् पाति" इति वाजसनेयकम् । सेक्ता । समुद्द्रवन्त्यस्मादापः । आरोचमान. सवने । आदित्यभ्यः प्रत्नस्य । पितुः । स्वोत्पत्तिस्थानम् । उदयायाविशति ।

---

१. गमनशीलाः । अजिः इरच् प्रत्ययान्तः । 'अजिरशिशिर०' (Uṇādi 1.53.) इत्यादिना निपातितः Sy.

२. तदेव प्रकाशनरूपं कर्म यस्य तत्तादृशमहः Sy.

३. कर्मेणो मनुष्या भिग० P. ०च्छतः D. गच्छन्तः Sy.

४. सूर्यस्य उदकस्य वा Sy.

५. संनाहकं मण्डलम् । अन्तरिक्षम् (वा) Sy.

६. अपरिमिताः Sy.

७. व्याप्ताः Sy.

८. दिवं च पृथिवीं चान्तरिक्षं च Sy.

९. गच्छन्ति Sy.

१०. VM. ignores आतस्थिवांसः and सीम् ॥ आतिष्ठन्तः । सीमिति पूरणः Sy.

११. सौर्योऽयं तृचः Sy.

१२. ŚB. reads विक्रममाणः ।

१३. ŚB. 9. 2. 3. 18. p. 717.

१४. उदकस्य कामानां वा सेक्ता Sy. वृष्टिद्वारा सेक्ता Mah. य उदयकाल उक्षा सेचनः U.

१५. ०मुद्र० P., D. समुन्दनः । यद्वा सम्मोदन्तेऽस्मिन् देवा इति समुद्रः Sy. समुनत्ति क्लेदयति समुद्रः । उदयकालेऽवश्यायपतनेन क्लेदनकर्ता Mah. समुद्रः समुन्दनो भवति तस्मिन् कालेऽवश्याया अतितरां पतन्ति तदभिप्रायमेतत् U.

१६. ०स्मदा० P.

१७. उदयकालेऽरुणवर्णः Mah. अरुणो वर्णतो निर्देशः U.

१८. अवयवलक्षणेयम् । पूर्वदिगवयवस्य Sy. य आदित्यः पूर्वस्य पूर्वदिशि स्थितस्य Mah. यश्च पूर्वस्य द्युलोकस्य U.

१९. वितुः D. पालकस्यान्तरिक्षस्य Sy. पितुर्द्युलोकस्य . . . . द्यौः पितेत्युक्तेः पितुःशब्देन द्युलोक उदयसमये द्युलोकाज्जायमान उपलभ्यते सूर्य इति द्युलोकपूर्वभागः सूर्यस्य पितृभूत उच्यते Mah. पितुः पितृभूतस्य । ततो हि जायमान उपलभ्यत आदित्य इति पिता द्युलोकः U.

२०. उत्पादकमवयवम् Sy. योनिं स्थानम् Mah., U.

२१. उदयाय is omitted by D.

२२. आविष्टवान् Sy.

मध्ये[1]। दिवः[2]। निहितः[3]। पृश्निवर्णः[4]। मणिभिरिवेत्यौपमिकम्[5], सोऽयमुदितः[6]। लोकान्[7]। विचक्रमे[8]। लोकस्य पूरापरौ[9] पर्यन्तौ[10] च। रक्षति प्रकाशनः[11]।

चत्वार ईं बिभ्रति क्षेमयन्तो दश गर्भं चरसे धापयन्ते।
त्रिधातवः परमा अस्य गावो दिवश्चरन्ति परि सद्यो अन्तान् ॥ ४ ॥

चत्वारः[12]। देवाः[13]। आदित्यम्[14]। बिभ्रति[15]। क्षेममस्य कुर्वन्तः[16]। दिशश्च। पुत्रभूतम्[17]। चरणाय[18]।

---

१. उदितमात्रो यश्च मध्ये द्युलोकस्य U.

२. अवस्थितः Mah., U.

३. पृश्निपर्णी P. प्राश्नुत एनं वर्ण इति पृश्निरादित्यः Sy. पृश्निर्विचित्रवर्णो नानारश्मिसङ्कुलः Mah. समस्तरश्मिसङ्कुलो विचित्रः U.

४. सर्वत्र व्याप्तः। लुप्तोपमा वा। अश्मसदृशः Sy. अश्नुते व्याप्नोति नभ इत्यश्मा व्यापकः। एवंविधः सन् Mah. अश्मा अशनो व्यापकः स्यात् U.

५. अन्तरिक्षस्य Sy. यश्च विक्रममाणो रजसो रञ्जनस्य लोकत्रयस्य Mah. रञ्जनस्य लोकत्रयस्य U. ६. विक्रमते Sy. विक्रमते नभः Mah. चङ्क्रममाणः U.

७. पूर्वापरौ is suggested for पूरापरौ।

८. पूर्वापरभागौ Sy. अन्तौ वचनव्यत्ययः। अन्तान् पर्यन्तान् Mah. अन्तान् U.

९. जगद्रक्षार्थं क्रमत इत्यर्थः Sy. यो ह्यन्तान् पाति स मध्यं पात्येवेत्यर्थः Mah. गोपायति U.

१०. अथाश्मपक्षे व्याख्यानम्। अयं पृश्निर्विचित्रवर्णोऽश्मा पाषाणः पितुः कर्मपालकस्य पूर्वस्य पूर्वदिग्वर्तिन आहवनीयस्य योनिं कारणभूतमाग्नीध्रमाविवेश प्रविष्टवान्। यदाऽऽहवनीयमुद्वपेदाग्नीध्रावुद्धरेदित्याहवनीययोनित्वमाग्नीध्रस्यान्नातमन्यत्र। अयमश्मा दिवो मध्ये, आग्नीध्रस्थानीयस्यान्तरिक्षस्य मध्ये निहितः स्थापितः सन् रजसो रञ्जनीयस्य जगतोऽन्तावुत्पत्तिप्रलयरूपकोटिद्वयं विचक्रमे पाति रक्षति च परमेश्वररूपेण। कीदृशः उक्षा सेक्ता यागद्वारेण फलाभिवर्षक इत्यर्थः। समुद्रो बहुव्यापकत्वात्समुद्रसदृश इत्यर्थः। अरुणः पूर्वमन्त्रे सूर्यसाम्यात् अरुणसदृशः। सुपर्णः स्वर्गं प्रत्युद्गमनहेतुत्वात्पक्षिसदृशः Mah. ११. VM. ignores सुपर्णः॥ सुपर्णः शोभनं पर्ण पतनं गमनं यस्य स सुपर्णः Mah. सुपर्णः सुपतनः U. उक्षा समुद्रोऽ'रुणः सुपर्ण इति। उक्षा ह्येष समुद्रोऽरुणः सुपर्णः पूर्वस्य योनिं पितुराविवेशेति पूर्वस्य ह्येष एतं योनिं पितुराविशति मध्ये दिवो निहितः पृश्निरश्मेति मध्ये ह्येष दिवो निहितः पृश्निरश्मा विचक्रमे रजसस्पात्यन्ताविति विक्रममाणो वाऽएष एषां लोकानामन्तान्याति। ŚB.9.2.3.18.p.717.

This stanza=yv. 17.60.

१२. ०र D. १३. ऋत्विजः Sy.

१४. एनमादित्यम् Sy.

१५. धारयन्ति हविर्भिः स्तुतिभिश्च Sy.

१६. क्षेममात्मन इच्छन्तः Sy.

१७. गर्भवन्मध्ये उत्पन्नमेनम् Sy.

१८. चरणाय उदयास्तमयव्यवहाराय Sy.

---

[1] ऋचि 'अरुषः' इति, परं यजुषि 'अरुणः' इति YV.p.328.

स्वरसं पाययन्ति[1] । निधीयमानवर्षातपहिमाः[2] । परमाः[3] । अस्य[4] । रश्मयः[5] । दिव[6] । अन्तान्[7] । सद्यः[8] । परिचरन्ति[9] ।

इदं वपुर्निवचनं जनासश्चरन्ति यन्नद्यस्तस्थुरापः[10] ।
द्वे यदीं विभृतो मातुरन्ये इहेह जाते यम्या[11] सबन्धू ॥ ५ ॥

इदं वपुः । इदम्[12] । अस्य रूपम्[13] । आभिमुख्येन वक्तव्यम्[14] । हे जनाः[15] ! यदिदमस्मिन्[16] । आपः[17] । तिष्ठन्ति[18] । निश्चरन्ति[19] च ताभ्य[20] । नद्यः[21] । यच्च[22] । एनम्[23] । मातुः[24] । अन्य[25] । बिभ्रत[26] । अहोरात्रे[27] । अत्र चात्र[28] च सर्वत्र । प्रादुर्भूते[29] । मिथनभूते[30] । समानबन्धने[31] ।

वि तन्वते धियो अस्मा अपांसि वस्त्रा पुत्राय मातरो वयन्ति[32] ।
उपप्रक्षे वृषणो मोदमाना दिवस्पथा वध्वो यन्त्यच्छ ॥ ६ ॥

वि तन्वते । वितन्वते[33] । ध्यातार[34] । अस्मै[35] । कर्माणि । तेजांसि[36] । पुत्राय[37] । दिशः[38] । वयन्ति[39] । उपपर्चनाय[40] । मनुष्यान्[41] । अभिगच्छन्ति[42] । मोदमानाः[43] । आदित्यादस्मात्[44] । मार्गेण[45] । वध्व[46] इत्यभिप्रायम् ।

---

१. गमयन्ति Sy.
२. ०तवहिमा D. त्रिप्रकाराः शीतोष्णवर्षभेदेन त्रिविधाः Sy. ३. उत्कृष्टाः Sy.
४. आदित्यस्य Sy.
५. दिवः D. अन्तरिक्षस्य Sy.
६. उदयानन्तरमेव Sy.
७. परितो गच्छन्ति Sy.
८. पुरतो दृश्यमानम् Sy.
९. शरीरं मण्डलम् Sy.
१०. स्तुत्यं भवतीति शेषः Sy.
११. हे जनाः ! ऋत्विजः ! Sy.
१२. मण्डलम् Sy.
१३. आविः P.
१४. अधितस्थुः । मण्डलाधीनत्वात्तासाम् Sy.
१५. प्रवहन्ति Sy.
१६. यन्मण्डलमुपजीव्य नद्यः Sy.
१७. एतदुक्तलक्षणं यन्मण्डलम् Sy.
१८. निर्मातुर्मातृस्थानीयादन्तरिक्षात् Sy.
१९. बिभृतः is suggested for बिभ्रतः ॥ धारयतः Sy.
२०. अहोरात्रे seems to be the explanation of द्वे ।
२१. पात्र D. इह चेह च Sy.
२२. सूर्ये जाते निष्पन्ने Sy.
२३. यम्ये नियमनीये युग्मभूते वा Sy.
२४. समानबले समानबन्धने । उभयोरप्येकः सूर्यो बन्धकोऽक्षो ययोस्तादृश्यौ Sy.
२५. विस्तारयन्ति यजमानाः Sy.
२६. स्तुतीः Sy.
२७. सूर्याय Sy.
२८. वस्त्राणि Sy.
२९. पुत्रस्थानीयाय Sy.
३०. निर्माय्य उषसो दिशो वा Sy.
३१. निष्पादयन्ति । वस्त्रसदृशानि तेजांसि निबिडानि सम्पादयन्तीत्यर्थः Sy.
३२. उपवर्च० D. उपपर्चने सम्पर्के सति Sy.
३३. It seems to be the explanation of वृषणः ॥ सेक्तुः सूर्यस्य Sy.
३४. अस्मदभिमुखं यन्ति गच्छन्ति प्रसरन्ति Sy.
३५. हृष्यन्तः Sy.
३६. आदित्या अस्यद० P.
३७. Sy. explains दिवः and पथा together as सूर्यसम्बन्धिना मार्गेण ।
३८. वधूस्थानीया रश्मयः Sy.

तदस्तु मित्रावरुणा तदग्ने शं योरस्मभ्यमिदमस्तु शस्तम् ।
अशीमहि गाधमुत प्रतिष्ठां नमो दिवे बृहते सादनाय ॥ ७ ॥

[1]तवस्तु । मित्रावरुणौ ! तत् । अग्ने ! किमित्याहास्माभिः शस्त्रम्[2] । इदं सूक्तम् । अस्मभ्यम् । शं[3] च । योश्च[4] । अस्तु तदुभय करोतु । वयमशीमहि[5] । उदकमध्य स्थलम्[6] । अपि च । प्रतिष्ठाम्[7] । नमः[8] । आदित्याय[9] । महते । सर्वेषां वासयित्रे[10] ।

V.48.

कदु प्रियाय धाम्ने मनामहे स्वक्षत्राय स्वयशसे महे वयम् ।
आमेन्यस्य रजसो यदभ्र आँ अपो वृणाना वितनोति मायिनी ॥ १ ॥

[14]कदु प्रियाय ॥ प्रतिभानुः[15] ॥ कदा[16] । वयम् । खलु[17] । प्रियाय । तेजसे[18] । स्तुति कुर्मः[19] ।

---

१. अत्र लिङ्गसिद्धा देवताः Sy.
२. शस्तम् is suggested for शस्त्रम् ॥ स्तुतम् Sy. ३. सुखाय Sy.
४. यो श्व D. दुःखानामभिश्रणाय Sy.
५. भवतु Sy. ६. प्राप्नुयाम Sy.
७. ०शीमध्युक० P.
८. स्थितिम् Sy.
९. तिष्ठं P. तिष्ठां D. स्थितेरविच्छित्तिं च Sy.
१०. नमस्करोमि Sy. ११. द्योतमानाय सूर्याय Sy.
१२. आश्रयाय विश्वस्य Sy.
१३. VM. explains तत् and अस्तु once only. Ms. D. puts the figure ॥४७॥ wrongly after कदु प्रियाय प्रतिभानुः RV. V. 48.1. to indicate the end of the forty-seventh hymn. No such number is given in P.
१४. 'कदु प्रियाय' इति पञ्चर्चं चतुर्थं सूक्तम् । प्रतिभानुर्नामात्रेय ऋषिः । जगती छन्दः । विश्वे देवा देवता । अत्रानुक्रमणिका 'कदु पञ्च प्रतिभानुर्जागतम्' (KSA. 27.48.p.20.) इति । आभिप्लविके पञ्चमेऽहनि वैश्वदेवशस्त्रे इदं सूक्तं निविद्धानम् । सूत्रितञ्च—'कदु प्रियायेति वैश्वदेवम्' (ĀŚS.7.7.) इति Sy.
१५. प्रतिभानोरात्रेयस्येदमार्षम् Dur. प्रतिभानोरार्षम् SKN.
१६. अत्र वैद्युताग्निसंस्तवः Sy. अत्र पुनः प्रायेणाप एव स्तूयन्ते । 'आपो वै विश्वे देवाः सर्वा एव वा देवताः' इत्यनेन ब्राह्मणदर्शनेनापां विश्वदेवत्वमुपपद्यते Dur.
१७. कमिति सुखनाम (Ngh. 3.6.) अतश्चतुर्थ्या अदादेशः । . . . . सुखाय SKN., Dur.
१८. य P. यः D.
१९. लखु P., D. उ इति पूरणः Sy. उकारः पदपूरणः SKN.
२०. यया P. सर्वेषां प्रियभूताय । वृष्टिद्वारा हविरादिप्रयोजकत्वात् सर्वप्रियत्वमस्य प्रसिद्धम् । तादृशाय Sy.
२१. वैद्युताय । उत्तरवाक्ये अभ्रे अपो वितनोति इति वक्ष्यमाणत्वादिदं लभ्यते । कीदृशाय ? Sy. धाम्नः स्थानाय स्वर्गाय, सुखं प्रियं च स्वर्गाख्यं स्थानं प्राप्तुमित्यर्थः SKN. स्थानाय वैश्वदेवाय, तत्प्राप्त्यर्थम् Dur.
२२. कुर्व P., D. स्तवाम Sy. तानेव च विश्वान्देवानपो मनामहे, त एव ह्यूपास्यमानास्तत् स्थानं प्रापयितुं समर्था इत्यर्थं मनामहे Dur. याच्ञाकर्माऽयं याचामहे । कान् ? विश्वेदेवान् । कुत एतत् ? सूक्तस्य वैश्वदेवत्वात् SKN.

स्वबलाय । स्वकीर्त्यै । महत्यै । सर्वतो मातव्यस्य । अन्तरिक्षस्य । यत् तेजः ऐन्द्र विद्युद्रूपेण परिणतम् "विद्युदेवेन्द्रः" इति वाजसनेयकम् । उदकानि । प्रार्थयन्ती । कर्मवती माध्यमिका वाक् । अभ्रे । विस्तारयति ।

---

१. स्वभूतबलाय Sy. धाम्ने स्वबलायेत्यर्थः । यत्र स्वमेव बलं भवति न तत्र परकीयं बलमाशास्यते यथेह लोके Dur. कीदृशाय धाम्ने ? उच्यते, स्वक्षत्राय, क्षत्रं धनं स्वयमेव यस्मिन्नाश्रितं धनम् SKN.

२. स्वभूताम्नाय । सर्वमप्यन्नं ह्यस्य स्वम् Sy. यत्र स्वमहिमकृतमेव यशो भवति न सांयौगिकद्रव्यकृतम् Dur.
स्वयमेव च यशः कीर्तिलक्षणं यस्मिंस्तस्मै SKN.

३. P. reads स्वमहरिम कीर्तीः ये for स्वकीर्त्यै । महत्यै ॥ D. reads स्वमहरिमकीर्त्याय ये for स्वकीर्त्यै । महत्यै ॥ महते पूज्याय Sy. महते धाम्ने । तत्प्राप्त्यर्थमेव ता एवापो वयं मनामहे मत्वा चोपास्महे इत्यभिप्रायः Dur.

४. माताप्यस्य P., D. समन्तान्मातव्यस्य Sy. मेना माध्यमिका वाक् सा यत्र तस्य Dur. मेन्यं मातव्यम्, अतिमहत्त्वात् । सर्वदेवाभिमुख्येन मातव्यं न कदाचिदपि मितं निर्मातृतया जगतः SKN.

५. अन्तरिक्षस्य अपरिमितमपि नभ इयत्तिति सर्वैर्मीयते । सम्बन्धिनि Sy.
रजो लोकः, अन्तरिक्षलोक इत्यर्थः । तस्य Dur.
रजोऽन्तरिक्षलोकस्तस्य रजसः, षष्ठीश्रुतेः सम्बन्धिनि SKN.

६. यत् । उत्तरत्र स्त्रीलिङ्गनिर्देशाद् या इति विपरिणमयितव्यम् । याग्नेयी शक्तिः । यस्य सम्बन्धिनी माध्यमिकी वागिति वा योज्यम् Sy. यो मेघः Dur. यदुक्तविशेषणं स्थानम् SKN.

७. विद्यान् रूपेण P.
विद्याद्रूपेण D.

८. Unt.

९. वृष्टिलक्षणानि Sy. तत्र या आपोऽवस्थितास्ता अपः Dur. उदकादीनि SKN.

१०. आच्छादयन्ती सेव्यमाना वा Sy. सम्भजमाना Dur. सम्भजमाना वृष्टिं ददतीत्यर्थः SKN.

११. प्रज्ञावती सती Sy. प्रज्ञावती माध्यमिका वाक् Dur.
माया प्रज्ञा प्रज्ञावती । का पुनरसौ ? सामर्थ्यान्माध्यमिका वाक् SKN.

१२. मेघे Sy. अभ्र एव ह्यधि आपो वर्तन्त इत्याद्यध्यर्थ इत्युपपद्यते Dur. रजस्सम्बन्धिनोऽभ्रस्याधि उपरि स्थितेति वाक्यशेषः SKN. मायेति प्रज्ञानाम Ngh. 3.9.

१३. विस्तृणाति सर्वभावेन । ...ता अपो वयमेवमादिगुणयुक्तास्तासामेव सर्वगतस्य धाम्नः प्राप्त्यर्थं मनामहे याचामहे । ...अथवैवमन्यथाऽस्य मन्त्रस्यार्थः स्यात्—कदु प्रियाय सुखाय प्रियाय चैतस्मै धाम्ने स्थानाय यत्र वयं वर्तामहे । कथं नामैतत् स्थानं सुखं च प्रियं च स्वक्षत्रञ्च स्वमहत्त्वञ्च स्यादित्येवमर्थं विश्वान् देवान् मनामहे । 'मवेमहि मनामहे' इति याच्ञाकर्मसु पठितम् (Ngh. 3.19.) । कतमाः पुनरपो याचामह इति ? उच्यते, आमेन्यस्य रजस आभिमुख्येन मननीयस्य रजसोऽन्तरिक्षलोकस्य यदभ्रमुपरि वर्तते तस्मिन्नभ्रे, अपो वृणाना सम्भजमाना मायिनी माध्यमिका वाग् वितनोति वृष्टिभावेन ता मन्यामहे याचामहे Dur.
तत् प्राप्तिस्थितिहेतुभूतसम्पादनद्वारेण वितनोति विस्तारयति SKN.

१४. VM. ignores आ ॥ आ अधि, मेघस्योपरि Sy. आ इत्याकार उपसर्गः पुरस्तादेव व्याख्यातः । अथाप्यध्यर्थे दृश्यते 'अभ्र आँ अपः' अभ्रा आ अपोऽभ्रे ध्यय इति । (अभ्रे आ अपोऽपोऽभ्रेऽधीति) । N. 5.5, SKN. II.316.

ता अत्नत व्युनं वीरवक्षणं समान्या वृतया विश्वमा रजः ।
अपो अपाचीरपरा अपेजते प्र पूर्वाभिस्तिरते देव्युर्जनः ॥ २ ॥

ताः । उषसः । आतन्वन्ति । ज्ञानसाधनं तेजः । येन कर्मसूद्युक्तो वीरो जन उह्यते । समान्या । छादयित्र्या दीप्त्या । सर्वम् । लोकम् । आतन्वन्ति । तत्र देवकामः । जनः । पूर्वा उषसः । अपगमयन्ति । पराङ्मुखीः । वर्धते । चाग्राऽऽगताभिः कर्मयोग्याभिः, उषस्यागताया कर्मपर आसीदिति ।

आ ग्रावभिरहन्येभिरक्तुभिर्वरिष्ठं वज्रमा जिघर्ति मायिनि ।
शतं वा यस्य प्रचरन्त्स्वे दमे संवर्तयन्तो वि च वर्तयन्नहा ॥ ३ ॥

आ ग्रावभिः । अभिषवग्रावभिः । अह्नि भवैः । सोमार्त्तैः ? प्रीयमाण इन्द्रः । वरिष्ठम् । वज्रम् । अभिमुखं पातयति । मायायुक्ते शत्रौ । शतम् । अपि यजमानाः । अस्य । स्वे स्वे । दमे । प्रचरन्ति सत्रेषु । अहानि । सङ्गमयन्तः, एकाहानामनुष्ठानाद् । वि । च । वर्तयन् ।

---

१. इयमुषस्या Sy.
२. Sy. explains आ as अपि and अत्नत as वितन्वन्ति ।
३. प्रज्ञानम् Sy.
४. कर्मद्यु० P.
५. ऊह्यते P. वीरैर्ऋत्विग्भिर्वहनीयम् । यद्वा वक्षणाः कार्यवोढारो येन प्रेर्यन्ते तत्तादृशम् Sy.
६. न्यः D. एकरूपया Sy.
७. आवरकया दीप्त्या Sy.
८. सर्वं P. ९. जगदत्नत Sy.
१०. एवं सति Sy.
११. अन्या आगामिनीरुषसः Sy.
१२. अवग० P. अपचालयति Sy.
१३. परम्मुखी P. अपाञ्चनाः प्रतिनिवृत्तमुखीः Sy.
१४. प्रपूर्वस्तिरतिर्वर्धनार्थः, वर्धयति स्वमनीषाम्, वर्धते वा स्वयम् Sy.
१५. पूर्वाभिस्ताभिः Sy.
१६. VM. ignores अपो ॥ अपरोऽपशब्दः पूरणः Sy. १७. अत्र पूर्वार्धे इन्द्र उच्यते, उत्तरार्धे इन्द्रात्मा सूर्यः Sy.
१८. अ D.
१९. साध्ये साधनशब्दः । ग्रावसाध्यैरभिषवैर्नामिभूतैः । आगत्यात्र सोमी सन् Sy.
२०. ०ह्निर्भ० D. अहनि सम्पादितैः Sy.
२१. सोमार्ह्नैः is suggested for सोमार्त्तैः ॥ अक्तुभिः रात्रिभिः । तत्र निष्पन्नैरित्यर्थः । तथाविधैः Sy. २२. उरुतरम् Sy.
२३. सर्वतः जिघर्ति दीपयति Sy.
२४. वृत्रे निमित्ते सति Sy.
२५. गतम् P. शतसंख्याका रश्मयः Sy.
२६. किञ्च वाशब्दश्चार्थे Sy.
२७. इन्द्रात्मकस्यावित्यस्य Sy.
२८. स्वकीये Sy.
२९. मदे P. गृह आकाशे Sy.
३०. किं कुर्वन्तः ? संवर्तयन्तः Sy.
३१. दिवसान् Sy.
३२. संवर्तयन्तः प्राणिनो नाशयन्तः । यद्वा अहा अहानि दिवसान् सम्यक् प्रवर्तयन्तः Sy.
३३. ०काहानाद्वि P.
३४. ०यः P. ०य D. अहानि निवर्तयन्ति गतान्येव पुनः प्रापयन्ति च । तपनपरिस्पन्दाधीनत्वात् प्राणिनामायुःक्षयस्याहोरात्रादिव्यवहारस्य Sy.
३५. VM. ignores आ ॥ आ ह्वयते इति शेषः Sy.

तामस्य रीतिं परशोरिव प्रत्यनीकमरव्यं भुजे अस्य वर्पसः ।
सचा यदि पितुमन्तमिव क्षयं रत्नं दधाति भरहूतये विशे ॥ ४ ॥

[1]तामस्य । [2]तत् । [3]अस्य युद्धे । [4]गमनमार्गम् । अरण्ये परशोरिव मार्गम् । [5]प्रतिपश्यामि । [6]तथानीकञ्च । [7]अस्य मरुल्लक्षणम् । [8]रक्षणायागतम् । प्रतिपश्यामि । [9]शत्रून् आच्छादयतः । [10]सह । [11]यदि । [12]अन्नवन्तमिव । [13]गृहम् । [14]रत्नम् । [15]प्रयच्छति । या विधिन्द्र ? [16]सङ्ग्रामार्थमाह्वयति तस्यै । [17]विश यदि साहाय्य कर्तुमागच्छति [18]शत्रून् विनाशयतीति ।

स जिह्वया चतुरनीक ऋञ्जते चारु वसानो वरुणो यतन्नरिम् ।
न तस्य विद्म पुरुपत्वता वयं यतो भगः सविता दाति वार्यम् ॥ ५ ॥

[19]स जिह्वया । [20]सः । [21]वरुणः । काकुदेन जल रक्षता । [22]चतुरनीकस्तस्य रश्मयोऽनीकानि चतसृष्वपि [23]दिक्षु स्थितानि । [24]जगत् प्रसाधयति । [25]चारु । [26]उदकमाच्छादयन् । [27]हिसन् । [28]शत्रून् । न । [29]तमुपायम् । वयम् । [30]पौरुषेण । जानीमः । [31]येनोपायेन [32]रत्नप्रदौ । [33]भगः । [34]सविता च । [35]रत्नम् । [36]प्रददौ भगः सविता च रत्नं [37]प्रयच्छतः ।

---

१. इयमाग्नेयी Sy.
२. तम् P. तां प्रसिद्धाम् Sy.
३. अग्नेः Sy. ४. स्वभावं गतिं वा Sy.
५. परशोः प्रतिनिधिमिव पश्यामि । परशुर्यथा स्वस्वामिनोऽभिमतं साधयति तद्वदित्यर्थः Sy.
६. रश्मिसमूहम् Sy. ७. आदित्यस्य Sy.
८. लक्ष० P. भुजे भोगाय Sy.
९. कथयाम्यहम् Sy.
१०. ०त P. रूपवतः Sy.
११. अस्मत्सहायः सन् Sy.
१२. वदि P. यस्मात् स च देवः Sy.
१३. निवासमिव Sy.
१४. तत्न P. रमणीयं धनम् Sy.
१५. धारयति । उभयमपि ददातीत्यर्थः Sy.
१६. विडिन्द्रं is suggested for विधिन्द्रं ।
१७. सङ्ग्रामे यज्ञे वाह्वानयुक्ताय Sy.
१८. यजमानाय Sy.
१९. ०न D. २०. अग्निः Sy.
२१. तमोवारकः सन् Sy.
२२. चतुर्दिक्षु प्रसृतज्वालः सन् Sy.
२३. ०नीतका० P. २४. जनत् P.
२५. गच्छति घृतादिकम् । यद्वा जिह्वया चतुरनीकः सन् ऋञ्जते अलङ्करोति स्वात्मानम् Sy.
२६. रमणीयं तेजः Sy.
२७. ०रुव० P. २८. उद्धरन् Sy.
२९. अमित्रम् Sy.
३०. तस्य, तमित्यर्थः Sy.
३१. पौर्षण P. पुरुषत्वेन कामानां पूरकत्वेन वा युक्तम् । अपरो भावप्रत्ययः पूरणः Sy.
३२. यतोऽयम् Sy.
३३. येनोवायौ P.
३४. अयं भगः महान् भजनीयः Sy.
३५. प्रेरको देवः Sy.
३६. रत्न P. वरणीयं धनम् Sy.
३७. प्रदौ P., D. यच्छति Sy.
३८. Ms. D. puts the figure ॥४८॥ wrongly after देवं वः प्रतिप्रभः (RV.V. 49.1.) to indicate the end of the forty-eighth hymn. No such number is given in P.

V. 49.

देवं वो अद्य सवितारमेषे भगं च रत्नं विभजन्तमायोः ।
आ वां नरा पुरुभुजा ववृत्यां दिवेदिवे चिदश्विना सखीयन् ॥ १ ॥

[1]देवं वः ॥ प्रतिप्रभः ॥ [2]देवम् । [3]युष्माकम् । [4]अद्य । सवितारम् । [5]आगमयामि । तथा भगम् । च देवम् । [6]मनुष्यस्य । [7]रत्नम् । [8]विभजन्तम् । [9][10][11]

प्रति प्रयाणमसुरस्य विद्वान्त्सूक्तैर्देवं सवितारं दुवस्य ।
उप ब्रुवीत नमसा विजानञ्ज्येष्ठं च रत्नं विभजन्तमायोः ॥ २ ॥

[12][प्रति प्रयाणम्]

---

१. 'देवं वः' इति पञ्चर्चं पञ्चमं सूक्तमात्रेयस्य प्रतिप्रभस्यार्षम् । त्रैष्टुभं वैश्वदेवम् । 'देवं वः प्रतिप्रभोऽन्त्या तृणपाणिः' (KSA. 27. 49.p.20.) इत्यनुक्रमणिका । विनियोगो लैङ्गिकः Sy.

२. द्योतमानम् Sy.

३. त्वामित्यर्थः । यद्वा होतुरिव वाक्यम् । वो यजमानेभ्यो युष्मभ्यमर्थाय Sy.

४. इदानीम् Sy.

५. सर्वस्याभ्यनुज्ञातारम् Sy.

६. ०मिया० D.

उपगच्छामि Sy.

७. भजनीयं देवम् Sy.

८. मनुष्यस्य यजमानस्य । यद्वा चतुर्थ्यर्थे षष्ठी Sy.

९. रमणीयं हविः Sy.

१०. 'भगो वां विभजतु' इति हि भगस्य विभजनं प्रसिद्धम् । 'रायो विभक्ता सम्भरश्च वस्वः' (RV.IV.17.11.) 'भगो विभक्ता शवसा' (RV. V.46.5.) इति च श्रुतिः । यद्वा चतुर्थ्यर्थे षष्ठी । यजमानार्थं रत्नं रमणीयं धनं विभजन्तम् Sy.

११. VM. ignores the second hemistich of this stanza॥ हे नरा नेतारौ ! हे पुरुभुजा ! पुरु भुञ्जाते इति पुरुभुजौ । हे अश्विनौ ! वां युवाम् । दिवेदिवे प्रतिदिनम् । आववृत्यामावर्तयाम्यस्मदभिमुखम् । सखीयन् युवयोः सखित्वमिच्छन् । चिदिति पूरणः Sy.

१२. The *pratīka* is supplied by the Editor. The stanza is not explained in P., D.

असुरस्य शत्रूणां निरसितुः सवितुः प्रति प्रयाणं प्रत्यागतिम् । विद्वान् जानन् सूक्तैः सवितारं देवम् । दुवस्य परिचर हे अन्तरात्मन् ! किं च । आयोः मनुष्याय ज्येष्ठं रत्नं धनम् । विभजन्तम् । गमयन्तमित्यर्थः । नमसा नमस्कारेण हविषा वा विजानन् । विशेषेण भावयन्नित्यर्थः । यद्वान्तर्णीतण्यर्थोऽयम् । ज्ञापयन् । उप ब्रुवीत स्तौतु भवान् Sy.

अदत्रया दयते वार्याणि पूषा भगो अदितिर्वस्त उत्सः ।
इन्द्रो विष्णुर्वरुणो मित्रो अग्निरहानि भद्रा जनयन्त दस्माः ॥ ३ ॥

अदत्रया[1] । जिह्वया[2] । प्रयच्छति[3] । धनानि[4] । पूषा[5] । भगः[6] । अदितिश्च[7] । वस्ते[8] तेजांसि[9] । उत्सरण-शीलः[10] । शिष्टं[11] स्पष्टम्[12] ।

तन्नो अनर्वा सविता वरूथं तत्सिन्धव इषयन्तो अनु ग्मन् ।
उप यद्वोचे अध्वरस्य होता रायः स्याम पतयो वाजरत्नाः ॥ ४ ॥

तं[13] नः[14] । तम्[15] । अस्मभ्यम्[16] । शत्रु[17] । सविता[18] । वरणीयम्[19] । अनुगच्छतु[20] । नद्यश्च[21] । गच्छन्तः[22] । यत्[23] । अरस्य[24] । होतास्मदर्थम्[25] । उपब्रवीति[26] । किं तत्[27] ? धनस्य[28] । पतयो वयम्[29] । स्याम[30] । रमणीयान्नाः[31] ।

---

१. अरयाः D.
२. अयमग्निः Sy.
३. ०ह्वाया P. अदत्रया अदनीयानि । अदेरौणादिकोऽत्रप्रत्ययः । 'सुपां सुलुक्०' इति याजादेशः । अथवात्तीत्यदत्रा जिह्वा तया Sy.
४. प्र याच्छ यच्छति P. प्रयाच्छ यच्छति D. दयतिरनेककर्मात्र वहने वर्तते । वहतीत्यर्थः सामर्थ्यादग्निरिति गम्यते । यद्वा अदनीयानि वरणीयान्यन्नानि दयते ददाति यजमानाय 'दय दानगतिर्हिंसाबलाख्यानेषु' Sy.
५. वरणीयानि काष्ठानि Sy.
६. पोषकः Sy.
७. भजनीयः Sy.
८. अखण्डनीयः । यद्वा पूषादयस्त्रयोऽपि प्रत्येकमदनीयानि वार्याणि चान्नानि दयते Sy.
९. ०ति च वस्तवः P. आच्छादयति सामर्थ्यात्तेजांसि Sy.
१०. जांसि D.
११. सूर्यः Sy.
१२. By शिष्टं VM. means the second hemistich of the stanza.
इन्द्रादयः पञ्चापि देवाः । दस्माः दर्शनीयाः । अहानि सर्वाण्यागन्तूणि । भद्रा शोभनानि । जनयन्त जनयन्ति । दिवसानां यागदानादिविशिष्टत्वमेव भद्रत्वम् Sy.
१३. न P.
१४. तत् P.
तत् प्रसिद्धम् Sy.
१५. अप्रत्यृतः केनाप्यतिरस्कृतः Sy.
१६. देवः प्रयच्छत्विति शेषः Sy.
१७. अस्मदभिमतं धनम् Sy.
१८. अनुसृत्य गच्छन्तु । धनं दातुं गच्छन्त्वित्यर्थः Sy.
१९. स्यन्दनशीलाः Sy.
२०. गच्छन्त्यो नद्यः Sy.
२१. यस्मात् Sy.
२२. अध्वरस्य is suggested for अरस्य ॥ यागस्य Sy.
२३. होमनिष्पादकोऽहम् Sy.
२४. होस्म० P.
२५. उपेत्य ब्रवीमि तस्मात्तत्प्रयच्छन्त्विति शेषः Sy.
२६. बहुविधस्य Sy.
२७. स्वामिनः Sy.
२८. अत्रयः Sy.
२९. वयस्योद P. भवेम Sy.
३०. अन्नेन बलेन वा रमणीयाः । अथवा यद्यस्माद्वोचे स्तौमि तस्मात् सविता नो वरूथमागच्छतु । तस्मान्नद्यश्च नो वरूथं यज्ञमनु ग्मन् अनुगच्छन्त्विति वा योज्यम् Sy.
३१. VM. ignores तत् ।

प्र ये वसुभ्य ईवदा नमो दुर्ये मित्रे वरुणे सूक्तवाचः ।
अवैत्वभ्यं कृणुता वरीयो दिवस्पृथिव्योरवसा मदेम ॥ ५ ॥

प्र ये । प्रयच्छन्ति[1] । ये[2] । वसुभ्यः[3] । गमनवत् । अन्नं पशुम्[4] । ये च मित्रावरुणयोः । सूक्तं वदन्ति[5] ते वयम् । द्यावापृथिव्योः । रक्षणे । माद्येम[6] । तेषामस्माकमपगच्छतु[7] । महदन्धकारम्[8] । कुरुतं[9] च । विस्तृत[10] तेजो हे देवाः ![11]

V. ५०.

विश्वो देवस्य नेतुर्मर्तो[12] वुरीत सुख्यम् ।
विश्वो राय इषुध्यति द्युम्नं वृणीत पुष्यसे ॥ १ ॥

विश्वः[13] ॥ स्वस्त्यात्रेयः[14] ॥ विश्वः । मनुष्यः[15] । देवस्य[16] । नेतुः[17] । सख्यम्[18] । वृणीते[19] । विश्वश्चैनम् । धनार्थम्[20] । इच्छति[21] । विश्वश्चान्नम्[22] । वृणीते[23] । अस्मात् त्व च सर्व विश्वस्मै पुष्यसि[24] सवितः[25] ! इति[26] ।

---

१. प्रायुः Sy. २. यजमानाः Sy.
३. यज्ञनिवासेभ्यो देवेभ्यः Sy.
४. पश्वात्मकम् Sy. ५. मित्रे देवे वरुणे च Sy.
६. वदति P. सूक्तवचसो भवन्ति तानस्मान् Sy.
७. हृष्येम Sy. ८. अवगच्छतु Sy.
९. महद्धनम् Sy. १०. कुरुत चैतेभ्यः Sy.
११. उरुतरं सुखम् Sy.
१२. VM. ignores आ ।
Ms. D. puts the figure ॥४९॥ here to indicate the end of the forty-ninth hymn. No such number is given in P.
१३. 'विश्वो देवस्य' इति पञ्चर्चं षष्ठं सूक्तं स्वस्त्यात्रेयमुनेरार्षं वैश्वदेवम् । पञ्चमी पङ्क्तिः, आद्याश्चतस्रोऽनुष्टुभः । तदुक्तमनुक्रमण्याम्—'विश्वः स्वस्त्यात्रेयः पङ्क्त्यन्तम्' (KSA. 27.50.p.20.) इति । पृष्ठ्याभिप्लवषडहयोः प्रथमेऽहनि वैश्वदेवशस्त्रे विश्वो देवस्येति प्रतिपत्तृचस्याद्यः । सूत्रितञ्च—'विश्वो देवस्य नेतुरित्येका' (ĀŚS.7.6.) इति । आभिप्लविकेषु द्वितीयचतुर्थषष्ठेष्वहःस्वेषैव वैश्वदेवस्य शस्त्रस्य प्रतिपत् । 'युग्मेष्वेवमभिप्लवे' (ĀŚS.7.6.) इति सूत्रितत्वात् Sy.
१४. ०यं P. D.
१५. विश्वश्चवन्नम P. सर्वः Sy., Mah., U.
१६. ०स्मा० P. मर्तः Sy. जनः U.
१७. सवितुरित्यर्थः Sy. दानादिगुणयुक्तस्य सवितुः Mah. दानादिगुणयुक्तस्य U.
१८. फलप्रापकस्य Mah. प्रणेतुः सवितुः U.
१९. सखिभावम् Mah. सखिताभावम् U.
२०. वृणीत Sy. वृणुते प्रार्थयते । 'वृञ् वरणे' Mah.
२१. धनस्य Sy. धनाय Mah., U.
२२. इषुध्यति । पञ्चमलकारः । ईशीत Sy. सवितारं प्रार्थयते । इषुध्यतिर्याच्ञाकर्मसु पठितः (Ngh.3.19.)Mah. प्रार्थयते सवितारम् U.
२३. तस्यानुग्रहात् सर्वो जनो धनम् Sy. द्युम्नं द्योतते यशो वान्नं वा N.5.5.
२४. प्रार्थयते Mah. U.
२५. P. adds तत् before सर्वं ।
२६. पुष्ट्यै पर्याप्तं धनम् Sy. पोषाय स्वप्रजापालनाय । पुषेस्तुमर्थेऽसेप्रत्ययः Mah. पोषाय स्थितये U.
स जुहोति । विश्वो देवस्य नेतुर्मर्तो वुरीत सख्यम् । विश्वो राय इषुध्यति द्युम्नं वृणीत पुष्यसे स्वाहेति । ŚB. 3.1.4.18. p. 232. The stanza=YV.4.8.

ते तें देव नेतर्यें चेमाँ अनुशसें । ते राया ते ह्या॒पृचे सचेमहि सचध्यैः ॥ २ ॥

ते ते । तव स्वभूता. । देव ! नेत. ! ये । च । इमान् । अनुशंसितुम् आशासितुमुपतिष्ठन्ति । त उभये वयम् । धनेन सम्पृक्ता भवाम । ते । हि । आपर्चनाय योग्या. । तथा सति सवनीयैर्धनैः । ससृष्टा भवामेति ।

अतो न आ नृनतिथीनतः पत्नीर्दशस्यत ।
आरे विश्वं पथेष्ठां द्विषो युयोतु यूयुविः ॥ ३ ॥

अतो नः । अस्माद् धनात् । अस्माकम् । दासान् । अतिथीन् । पत्नीश्च । आभिमुख्येन प्रयच्छत देवाः । धनसम्भावेति सर्वत एव भवन्ति ? दूरे । विश्वम् । मार्गवर्तिन स्तेनम् । शत्रूंश्च । पृथक् करोतु । पृथक्करणशीलः सविता पूषा वा ।

---

१. त P.
२. नेः P. हे नेतः ! Sy.
३. अन्ये Sy.
४. विभक्तिव्यत्ययः । इमे होत्रादयः Sy.
५. शंसितुं प्रभवन्ति तेऽपि त्वदीयाः । यद्वा इमानन्यानिन्द्रादीननुशसे क्रमेण शंसितुं प्रभवन्ति । एकैव वा महानात्मा देवता स सूर्यः स हि सर्वभूतात्मा, इत्युक्तत्वादितरासां देवतानां तदन्तर्भावादिति भावः । न केवलं त्वच्छंसका एवेत्यर्थः Sy.
६. ०शसि० P., D.
७. ति P.
८. संपूर्णकता P. सचेमहीति सम्बन्धः Sy.
९. खलु Sy.
१०. आपर्चनीयाः कृत्यार्थे केन्प्रत्ययः 'कृन्मेजन्तः' इत्यव्ययत्वाद्विभक्तेरदर्शनम् Sy.
११. तथा तथा P. तथास्तथा D.
१२. समनी० P. सर्वैः कामैः Sy.
१३. सङ्गच्छेमहि Sy.
१४. VM. ignores ते ॥ ते वयं यजमानाः Sy.
१५. अस्मान् P. अस्मिन् यज्ञे । सार्वविभक्तिकस्तसिः Sy.
१६. अस्माकमृत्विजाम् Sy.
१७. नेतृन् Sy.
१८. तद्वत् पूज्यान् देवान् Sy.
१९. देवानां पत्नीरपि दशस्यत हविष्प्रदानादिना, यद्वा, नः अस्मभ्यं नॄन् पुत्रभृत्यादीनतिथीन् पत्नीश्चैतत्त्रयमत्र दशस्यत । हे देवाः ! प्रयच्छत Sy.
२०. सर्वतः परिचरत Sy.
२१. सर्वम् Sy.
२२. ०र्गाव० P. मार्गे वर्तमानं वैरिणम् Sy.
२३. Omitted by P.
२४. शत्रुश्च P.
अन्यानपि द्विषो द्वेष्टॄन् Sy.
२५. पृथक् करोतु देवसङ्घः सविता वा Sy.
२६. सर्वस्यामिश्रयिता पृथक्कर्ता Sy.
२७. VM. explains अतः once only.

यत्र वह्निरभिहितो दुद्रवद्द्रोण्यः पशुः ।
नृमणा वीरपस्त्योऽर्णा धीरेव सनिता ॥ ४ ॥

यत्र वह्निः । यत्र[1] । अग्निः[2] । अध्वर्युभिरभिहितः[3] । द्रवत्युत्तरवेदिम्[4] । द्रोण्यः[5] । पशुरित्यौपमिकम्, द्रोणदुग्धा धेनुरिव ह्यग्निस्तत्र । नृषु[6] मनोऽस्य[7] सवितुः । वीरयुक्तो गृहोऽस्य[8] । उदकानि[9] । दाता[10] भवति[11] । यथा धीरा स्त्री[12] स्तन्य कुमाराय[13] प्रयच्छति ।

एष ते देव नेता रथस्पतिः शं रयिः ।
शं राये शं स्वस्तय इषःस्तुतो मनामहे देवस्तुतो मनामहे ॥ ५ ॥

एषः । एषः[14] । ते[15] । देव! नेतः । सवितः । स्वामी[16] रथानाम्[17] । रयिः[18] । सुखकृत्[19] भवति । तं[20] सुखस्य कर्तारम्[21] । धनार्थम्[22] । भजामहे[23] । तम्[24] । अनाशाय[25] । इच्छन्तः[26] । देवान् स्तुवन्तः[27] ।

---

१. यस्मिन् यज्ञे Sy.
२. यज्ञस्य वोढा Sy.
३. यूयं प्रापितः Sy.
४. द्रुद्रव P. गच्छति यूपं प्रति Sy.
५. यूपार्हः Sy.
६. सुषु P.
७. मनेस्य P., D.
यजमानमनाः सविता Sy.
८. ०क्तगृहस्य P. ०क्तागृहस्य D. वीरा ऋत्विग्यजमानाः पुत्रभृत्यादयो वा तद्वत् पस्त्यं गृहं यस्य स तादृशः । प्रेरितगृहो वा । पुत्राद्युपेतगृहप्रद इत्यर्थः Sy.
९. अरणकुशलः Sy.
१०. सम्भक्ता दाता Sy.
११. भवन्ति P. भवन्ती D.
१२. Omitted by P. योषिदिव । यद्वा अर्णानि हवींष्यभि लक्ष्य सनिता भवति Sy.
१३. कामाराय P.
१४. तव Sy.
१५. सवितः ! Sy.
१६. सर्वस्य पालकः Sy.
१७. दातव्यधनवान्, मत्वर्थो लुप्यते Sy.
१८. रयि सुखकृध P. शं करोत्विति शेषः Sy.
१९. शम् is suggested for तम् ।
२०. सुखाय च Sy.
२१. धनस्य । यद्वा धनाय Sy.
२२. स्तुमः Sy.
२३. अविनाशाय Sy.
२४. एषणीयस्य सवितुः स्तोतारो वयम् Sy.
२५. इच्छतो देवा स्तुवन्तं P. देवानां देवस्य वा सवितुः स्तोतारः Sy.
२६. VM. explains मनामहे once only. Ms. D. puts the figure ॥५०॥ here to indicate the end of the fiftieth hymn. No such number is given in P.

V.51.

अग्ने सुतस्य पीतये विश्वैरूमेभिरा गहि । देवेभिर्हव्यदातये ॥ १ ॥

अग्ने । अग्ने ! सोमस्य । पानाय । विश्वैः । पित्रिभिः । देवैः । आगच्छ । "यजमानो वै हव्यदातिः" इति ब्राह्मणम् ।

ऋतधीतय आ गत सत्यधर्माणो अध्वरम् । अग्नेः पिबत जिह्वया ॥ २ ॥

ऋतधीतयः । हे सत्यबुद्धयः ! सत्यकर्माणः । आगच्छत । यज्ञम् । अग्ने ! जिह्वया । पिबत सोमम् ।

विप्रेभिर्विप्र सन्त्य प्रातर्यावभिरा गहि । देवेभिः सोमपीतये ॥ ३ ॥

विप्रेभिः । मेधाविभिः । प्रजननशील ! प्रातर्यावभि. । देवैः । सोमपानाय । आगच्छ ।

अयं सोमश्चमू सुतोऽमत्रे परि षिच्यते । प्रिय इन्द्राय वायवे ॥ ४ ॥

अयं सोमः । अयम् । सोम । अधिषवणफलकयोः । सुत. । पात्रे । परिसिच्यते । प्रियः । इन्द्रवायुभ्याम् ।

---

१. 'अग्ने सुतस्य' इति पञ्चदशर्चं सप्तमं सूक्तम् । अत्रेयमनुक्रमणिका—'अग्ने पञ्चोना चतस्रो गायत्र्यः षळुष्णिहस्तिस्रो जगत्यस्त्रिष्टुभो वान्त्ये अनुष्टुभौ' (KSA.27.51. p. 20.) इति । 'ऋषिश्चान्यस्मात्' (KSA.12.2.p.5.) इति परिभाषया स्वस्त्यात्रेय ऋषिः । आदितश्चतस्रो गायत्र्यः—पञ्चमाद्याः षडुष्णिह एकादश्याद्यास्तिस्रो जगत्यस्त्रिष्टुभो वा चतुर्दशीपञ्चदश्यावनुष्टुभौ । विश्वेदेवा देवता Sy.

२. Omitted by P.

३. सोमपानाय Sy. ४. सर्वैरपि Sy.

५. पानाइवैर वित्रिभिः P. पितृभिः is suggested for पित्रिभिः ॥ ऊमैः रक्षकैः Sy.

६. इन्द्रादिभिः सह Sy.

७. Omitted by D.

८. ŚB. 1.4.1.24., p. 35. हस्यादा० P. हव्यादा० D. अस्माकं हविर्दानाय तद्दात्रे यजमानाय वा Sy.

९. हे सत्यस्तुतयोऽबाध्यकर्माणो वा देवाः ! Sy.

१०. त्यक० P. आगत्य च हे सत्यस्य धारयितारः ! यूयम् Sy. ११. अस्मद्यज्ञम् Sy.

१२. VM. reads अग्ने ! for अग्नेः ।

१३. आज्यसोमादिकम् Sy.

१४. ०भिषि P. उक्तलक्षणैः Sy.

१५. प्रजनशी० D. हे सन्त्य ! सम्भजनीयाग्ने ! Sy. १६. ०तर्वाभिः P. प्रातःकाले आगन्तृभिः Sy.

१७. देवैः सार्धम् Sy.

१८. VM. ignores विप्र ॥ हे मेधाविन् ! विविधकामानां वा पूरक ! Sy.

१९. पुरतो वर्तमानः Sy.

२०. चम्वोरस्योः अधिषवणफलकयोः Sy.

२१. अभिषुतः सन् Sy. २२. पात्र P.

२३. पूर्यते Sy. २४. ष्टुयः P. वुयः D.

२५. स चेन्द्राय वायवे च प्रियः । तं पातुं हे इन्द्रवायू ! आगच्छतमिति शेषः Sy.

वायवा याहि वीतये जुषाणो हव्यदातये ।
पिबा सुतस्यान्धसो अभि प्रयः ॥ ५ ॥

वायो[1] । वायो ! आगच्छ[2] । पानाय[3] । प्रीयमाणः । यजमानाय[4] । पिब । सुतम्[5] । सोमम्[6] । अन्नम्[7] । प्राप्तुम्[8] ।

इन्द्रश्च वायवेषां सुतानां पीतिमर्हथः । ताञ्जुषेथामरेपसावभि प्रयः ॥ ६ ॥

इन्द्रश्च[9] । अपापौ[10]—अरेपसाविति[11] ।[12]

सुता इन्द्राय वायवे सोमासो दध्याशिरः ।
निम्नं न यन्ति सिन्धवोऽभि प्रयः ॥ ७ ॥

सुता इन्द्राय । यथा । निम्नम्[13] । प्रति[14] । नद्यः । गच्छन्ति तथा । इन्द्रवायू[15] प्रति । सोमः[16] ।[17]

---

१. 'वायवा याहि' इत्येषा पृष्ठ्यस्य तृतीयेऽहनि प्रउगशस्त्रे वायव्यतृचस्याद्या । सूत्रितं च वायवा याहि वीतये इत्येका वायो याहि शिवा दिव इति द्वे' (ĀŚS. 7.10.) इति Sy.

२. आयाहि Sy.

३. भक्षणाय Sy.

४. हविर्वात्रे यजमानाय तदर्थम् Sy.

५. आगत्य च सुतस्य अभिषुतम् Sy.

६. अन्धसः अन्धः अन्नं सोमलक्षणम् Sy.

७. अन्नं सोमाख्यम् Sy.

८. प्रप्तवन्तुं P. प्राप्तुवन्तुं D.
अभिलक्ष्य Sy.

९. पृष्ठ्यस्य तृतीयेऽहनि प्रउगशस्त्रे ऐन्द्रवायवतृचे 'इन्द्रश्च' (RV.V.५१.6.) इत्यादिके द्वे ऋचौ शंसेत् । तयोः प्रथमां द्वितीयां वावर्त्य तृचं सम्पादयेत् । तथा च सूत्रितम्—'इन्द्रश्च वायवेषां सुतानामिति द्वयोरन्यतरां द्विः' (ĀŚS. 7.10.) इति Sy.

१०. अपावौ D.

११. ०पपावि० P. अहिंसकौ Sy.

१२. VM. ignores all the words of this stanza except अरेपसौ ॥ Sy. explains the stanza in the following manner:—
हे वायो त्वं च । इन्द्रश्च एषां पुरतो गृहीतानां सुतानामभिषुतानां सोमानाम् । पीतिं पानमर्हथः । यस्मादेवं तस्मात् तान् सोमरसान् । जुषेथां सेवेथाम् । अरेपसावहिंसकौ । तदर्थं प्रयः सोमाख्यमन्नमभिलक्ष्यागच्छतमिति शेषः । यद्वा प्रयोऽन्नरूपान् ।

१३. गर्तम् Sy.

१४. प्रस्व P. प्रिस्व D. हे इन्द्रवायू ! युवामभि Sy.

१५. इन्द्राय वायवे च Sy.

१६. सोमाः is suggested for सोमः ।

१७. VM. ignores सुताः । दध्याशिरः । and प्रयः ॥ सुताः अभिषुताः सम्पादिताः । दध्याशिरः दध्याश्रयणाः । प्रयः अन्नरूपाः Sy.

सजूर्विश्वेभिर्देवेभिरश्विभ्यामुषसा सजूः । आ याह्यग्ने अत्रिवत्सुते रंण ॥ ८ ॥

[१] सजूः [२]। सहितः । विश्वैः [३]। देवैः । अश्विभ्याम् । उषसा च । आगच्छ [५]। अत्रेरिव यज्ञम् । सुते [६] च । रमस्व [७]।

उत्तरे सिद्धे [१०]।

सजूर्मित्रावरुणाभ्यां सजूः सोमेन विष्णुना । आ याह्यग्ने अत्रिवत्सुते रंण ॥ ९ ॥

[सजूर्मित्रावरुणाभ्याम् ।] [११]

सजूरादित्यैर्वसुभिः सजूरिन्द्रेण वायुना । आ याह्यग्ने अत्रिवत्सुते रंण ॥ १० ॥

[सजूरादित्यैः ।] [११]

स्वस्ति नो मिमीतामश्विना भगः स्वस्ति देव्यदितिरनर्वणः ।
स्वस्ति पूषा असुरो दधातु नः स्वस्ति द्यावापृथिवी सुचेतुना ॥ ११ ॥

[१२] स्वस्ति नः । स्वस्ति [१३] । अस्माकम् [१४] । कुर्वन्ति । अश्विनौ । भगश्च । स्वस्ति [१५] । देवी । अदितिः [१६] करोतु । अशत्रोर्मम [१८] । स्वस्ति । पूषा । प्राज्ञः [१९] । दधातु । स्वस्ति [२०] । सुप्रज्ञानेन [२१] [२२] ।

---

१. तृतीयेऽहनि प्रउगशस्त्रे 'सजूर्विश्वेभिः' इति वैश्वदेवस्तृचः । सूत्रितञ्च—'सजूर्विश्वेभिर्देवेभिरुत नः प्रिया प्रियासु' (ĀŚS.7.10.) इति Sy.

२. सजु P.

३. सङ्गतः सन् , समानप्रीतिः सन् Sy.

४. सर्वैः Sy.

५. आयाहि Sy.

६. अत्रि० P. अत्रेर्यज्ञे यथा तथेत्यर्थः । यद्वा अत्रिर्यथा यज्ञे रमते तद्वत् Sy.

७. अभिषुते सोमे Sy.

८. रंस्व P., D.

९. VM. explains सजूः once only and ignores अग्ने ॥

१०. उत्तरे द्वे नवमीदशम्यौ स्पष्टे Sy.

११. The *pratīka* is supplied by the Editor. VM. does not explain both the stanzas.

१२. पृष्ठ्यस्य षष्ठेऽहनि वैश्वदेवशस्त्रे 'स्वस्ति नः' इति तृचः । सूत्रितञ्च—'स्वस्ति नो मिमीतामश्विना भग इति तृच इति वैश्वदेवम्' (ĀŚS. 8. 1.) इति । बृहस्पतिसवे वैश्वदेवनिविद्धानार्थोऽयं तृचः । 'स्वस्ति नो मिमीतामश्विना भग इति वैश्वदेवम्' (ĀŚS. 9.5.) इति सूत्रितत्वात् Sy.

१३. अविनाशं क्षेमम् Sy.

१४. अस्मभ्यम् Sy. १५. कुरुताम् Sy.

१६. क्षेमं मिमीताम् Sy.

१७. अमिति P., ०ति D. अदितिश्च स्वस्ति मिमीताम् Sy.

१८. ०र्मम त्व P. अप्रत्यृतः Sy.

१९. शत्रूणां निरसिता प्राणानां बलानां दाता वा Sy.

२०. स्वस्ति मिमीताम् Sy.

२१. शोभनेन प्रज्ञानेन विशिष्टे Sy.

२२. VM. explains नः once only and ignores द्यावापृथिवी ॥ नः द्यावापृथिवी द्यावापृथिव्यावपि Sy.

उत्तरा निगदसिद्धा—

स्वस्तये वायुमुप ब्रवामहै सोमं स्वस्ति भुवनस्य यस्पतिः ।
बृहस्पतिं सर्वगणं स्वस्तये स्वस्तय आदित्यासो भवन्तु नः ॥ १२ ॥

[स्वस्तये वायुम्][1]

उत्तरे निगदसिद्धे[2]—

विश्वे देवा नो अद्या स्वस्तये वैश्वानरो वसुरग्निः स्वस्तये ।
देवा अवन्त्वृभवः स्वस्तये स्वस्ति नो रुद्रः पात्वंहसः ॥ १३ ॥

[विश्वे देवाः][3]

स्वस्तीति चतुर्थ्यन्तम्[4] ।

स्वस्ति मित्रावरुणा स्वस्ति पथ्ये रेवति ।
स्वस्ति न इन्द्रश्चाग्निश्च स्वस्ति नो अदिते कृधि ॥ १४ ॥

[स्वस्ति मित्रावरुणा][5]

---

१. The *pratīka* is supplied by the Editor. Sy. explains this stanza in the following manner :— स्वस्तये क्षेमाय वायुमुपब्रवामहै स्तुम इत्यर्थः । सोमं चोपब्रवामहै । यश्च सोमः भुवनस्य पतिः पालकः । सर्वलोकजीवनस्य सोमायत्तत्वात् । तथा सर्वगणं सर्वदेवगणोपेतं बृहस्पतिं बृहतः कर्मणो मन्त्रस्य पालयितारं स्वस्तये स्तुमः । आदित्यासः आदित्या अदितेः पुत्राः सर्वे देवा अरुणावयो द्रावश्व वा । नः अस्माकं स्वस्तये भवन्तु ।

२. VM. does not explain these two stanzas (RV.V.51.13,14.) because they are very easy.

३. सत्रमध्ये दीक्षिते व्याधिते सति तस्मिन्नहनि वैश्वदेवशस्त्रेऽप्यं तृचो निविद्धानार्थः । सूत्रितं च—'स्वस्त्यात्रेये निविदं दध्यात्' (ĀŚS. 6.9.) इति । स्वस्त्यात्रेयशब्देनायं तृचो विवक्षित इति तत्र व्याख्यातम् । तथा भयादिके सत्यप्यं तृचो जप्यः Sy.

४. The *pratīka* is supplied by the Editor. Sy. explains this stanza in the following manner :— विश्वे सर्वेऽपि देवाः । नोऽस्मान् । अद्य अस्मिन् यागदिने स्वस्तये क्षेमायावन्तु । वैश्वानरः । विश्व एनं नरा नयन्तीति वैश्वानरः । वसुः सर्वस्य वासयिता । अग्निः देवः । सोऽपि स्वस्तयेऽवतु । देवाः ऋभवोऽपि स्वस्तयेऽवन्तु, रुद्रः दुःखात् द्रावयिता देवोऽपि । अंहसः पापात् स्वस्ति पातु नोऽस्मान् Sy. 'अयमेवाग्निर्वैश्वानर इति शाकपूणिः' (N.7.23.)

५. It refers to स्वस्तये in the *mantra*.

६. The *pratīka* is supplied by the Editor ॥ हे मित्रावरुणा ! अहोरात्राभिमानिदेवौ ! स्वस्ति कुरुतम् । हे पथ्ये ! पन्था अन्तरिक्षमार्गः । तत्र हिता मार्गाभिमानिनी देवी हे तादृशि ! रेवति ! धनवति ! देवि ! स्वस्ति कृधि । इन्द्रश्चाग्निश्च प्रत्येकं नोऽस्मभ्यं स्वस्ति कृधि । हे अदिते ! देवि ! नः स्वस्तिं कृधि कुरु Sy.

स्वस्ति पन्थामनु चरेम सूर्याचन्द्रमसाविव ।
पुनर्ददताघ्नता जानता सं गमेमहि ॥ १५ ॥

स्वस्ति[1] । अविनाशेन । पन्थानम् । अनुगच्छामः । यथेमौ[2] स्वस्ति गच्छतः । तत्र[3] च पुनः पुनः । प्रयच्छतोदारेण । अहिंसित्रा[4] । मदीयोऽयमिति जानता[5] । सङ्गमेमहि[6] ।

V.५२.

प्र श्यावाश्व धृष्णुयार्चा मरुद्भिर्ऋक्वभिः ।
ये अद्रोघमनुष्वधं श्रवो मदन्ति यज्ञियाः ॥ १ ॥

प्र श्यावाश्व[9] ॥ श्यावाश्वः[10] ॥ प्रस्तुहि[11] । हे श्यावाश्व[12] ! धर्षणशीलेभ्यः[13] । मरुद्भ्यः[14] । रसाहरणशीलेभ्यः[15] । हे मरुतः[16] ! अद्रोग्धारम्[17] । हविषोऽनन्तरम्[18] । अन्नेन[19] । मादयन्ति[20] । यज्ञियाः[21] ।

---

१. क्षेमेण Sy.
२. सूर्याचन्द्रमसाविव । तौ यथा निरालम्बे मार्गे राक्षसादिभिरनुपद्रुतौ सञ्चरतस्तद्वत् Sy.
३. त P.
४. किञ्च वयं प्रवसन्तः पुनर्ददताभिमतम् Sy.
५. अभिसिता P. ०सिता D. चिरकालविलम्बकोपेनाहिंसिता Sy.
६. अविस्मरता मदीयश्चिरकालं गतः कोऽयमिति सन्देहमकुर्वता । मदीयोऽयमिति बुद्धयमानेनेत्यर्थः । उक्तलक्षणेन बन्धुजनेन Sy.
७. सङ्गच्छेमहि । यद्वा पूर्वार्धं प्रवसतां वाक्यमुत्तरार्धं बन्धूनाम् । वयं बन्धवो ददताभिमतमुपार्जितं यच्छताघ्नता प्रवासकोपेनाहिंसता जानता सस्नेहमधिगच्छता प्रवसता सङ्गमेमहि Sy.
८. Ms. D. puts the figure ॥५१॥ here to indicate the end of the fifty-first hymn. No such number is given in P.
९. 'प्र श्यावाश्व' इति सप्तदशर्चमष्टमं सूक्तम् । अत्रेयमनुक्रमणिका 'प्र श्यावाश्व त्र्यूना श्यावाश्वो मारुतं ह तत् पङ्क्तिः षष्ठ्यन्त्या च' (KSA. 27. 52. p. 20.) इति । आत्रेयः श्यावाश्व ऋषिः । 'ह तत्' इति प्रयोगात् इदमादीनि दशसूक्तानि मरुद्देवत्यानि । षष्ठी सप्तदशी च पङ्क्त्यौ शिष्टाः पङ्क्त्यन्त्यपरिभाषयानुष्टुभः । गतो विनियोगः Sy.
१०. ०श्वः D.
११. ०श्व P., D.
१२. अर्च Sy.
१३. हे एतन्नामक ऋषे ! Sy.
१४. ०लोभ्यः P.
धृष्णुस्त्वम् Sy.
१५. मरुद्भिः मरुतः । द्वितीयार्थे तृतीया । एवं स्वयमेव सम्प्रेष्यति । यद्वा यजमानो होतारं श्यावाश्वं ब्रूते । यद्वा मरुद्भिर्मरुत्सदृशैर्ऋक्वभिः स्तोतृभिः सह स्तोत्रैर्वा अर्च स्तुहीत्यर्थः Sy.
१६. स्तुत्यान् स्तोतृभिः Sy.
१७. ये is suggested for हे ।
१८. अहिंसकम् Sy.
१९. प्रत्यहम् । हविर्लक्षणान्नप्रदानं स्वधा । अनु पश्चाद्वा Sy.
२०. अन्नं लब्ध्वा Sy.
२१. हृष्यन्ति Sy.
२२. ०यः D.
यज्ञार्हाः Sy.

ते हि स्थिरस्य शर्वसः सखायः सन्ति धृष्णुया ।
ते यामन्ना धृषद्विनस्मनां पान्ति शश्वतः ॥ २ ॥

ते हि स्थिरस्य । ते[1]। हि। स्थिरस्य[2]। बलस्य। सखायः। भवन्ति[3]। धर्षणशीलाः[4]। ते[5]। आगमने[6]। धर्षणशीलबलयुक्ताः[7]। आत्मनैव[8]। रक्षन्ति। बहून्[9]।

ते स्पन्द्रासो नोक्षणोऽति ष्कन्दन्ति शर्वरीः ।
मरुतामधा महो दिवि क्षमा च मन्महे ॥ ३ ॥

ते स्पन्द्रासः[10]। ते। स्पन्दनशीलाः[11]। इव। वृषभा अस्वपन्तः[12]। रात्रीः[13]। अतिगच्छन्ति[14]। सम्प्रति[15]। तेषां मरुताम्। दिवि[16]। भूम्याम्[17]। च वर्तमानम्। महः[18]। स्तुमः।

मरुत्सु वो दधीमहि स्तोमं यज्ञं च धृष्णुया ।
विश्वे ये मानुषा युगा पान्ति मर्त्यं रिषः ॥ ४ ॥

मरुत्सु[19]। युष्माकम्[20]। स्तोमम्[21]। दधीमहि[22]। यज्ञम्[23]। च। धर्षकेषु। व्याप्ताश्च[24]। ये[25]। मानुषाणि। युगानि[26] अहोरात्राणि। रक्षन्ति। मनुष्यम्[27]। हिसकात्[28][29]।

---

१. खलु Sy.
२. अविचलितस्य Sy.
३. भवन्ति मह्यम् Sy.
४. धृष्णवः Sy.
५. ०लाः स्ते P.
६. आ इति चार्थे । गमनेऽपि Sy.
७. धर्षणवन्तः Sy.
८. अनुग्रहेणैवास्मदुपकारमनपेक्ष्यैव Sy.
९. बहू P. बहून् अस्मान् पुत्रभृत्यादीन् Sy.
१०. मरुतः Sy.
११. नेति चार्थे । यस्मात् स्पन्द्रा अन्येषां तस्मात् Sy.
१२. जलस्य सेक्तारः Sy.
१३. शर्वर्यो रात्रयः । कालावयवानित्यर्थः Sy.
१४. तान् अतिक्रम्य गच्छन्ति । नित्या इत्यर्थः । यस्मादेत एवंविधास्तस्मात् Sy.
१५. अधुना Sy.
१६. द्युलोके Sy.
१७. क्षमायां भूमौ च Sy.
१८. तेजः Sy.
१९. हे अध्वर्युहोत्रादयः ! Sy.
२०. यूयम् Sy.
२१. स्तोत्रम् Sy.
२२. दधीमहि, व्यत्ययेनोत्तमः । धत्त Sy.
२३. इज्यतेऽनेनेति यज्ञं हविः । तदुभयं किमर्थं दीयत इति Sy.
२४. ०प्तस्ता P., D. विश्वे सर्वेऽपि Sy.
२५. ये मरुतः Sy.
२६. सर्वेषु कालेष्वित्यर्थः Sy.
२७. मरणधर्माणं यजमानम् Sy.
२८. कां P. ०काः D. हिंसकात् सकाशात् Sy.
२९. VM. ignores मरुत्सु ।

अर्हन्तो ये सुदानवो नरो असामिशवसः ।
प्र यज्ञं यज्ञियेभ्यो दिवो अर्चा मरुद्भ्यः ॥ ५ ॥

अर्हन्तः[1] । पूजार्हाः[2] । ये । सुदानाः[3] । नेतारः[4] । परिपूर्णबलाः[5] । तेभ्यः । यज्ञियेभ्यः[6] । दिव आगतेभ्यः[7] । हविः[8] । प्रयच्छ[9] ।

आ रुक्मैरा युधा नर ऋष्वा ऋष्टीरसृक्षत ।
अन्वेनाँ अह विद्युतो मरुतो जज्झतीरिव भानुरर्त त्मना दिवः ॥ ६ ॥

आ रुक्मैः[10] । वक्षोऽलङ्करणैः[11] । योधनसाधनेनायुधेन सह । दर्शनीयाः[12] । मरुतः[13] । ऋसेषु शक्तीः[14] । आसृजन्ति[15] । ततो विद्योतमानान् । मरुतः । एनान्[16] । एव[17] । स्वभानुः[18] । अनुगच्छति[19] । यथा जझशब्दं[20] कुर्वाणा[21]

---

१. हर्षन्तः P.
२. हे होतः ! हे आत्मन् ! वा Sy.
३. पूज्याः Sy.
४. शोभनदानाः Sy.
५. नेतारः कर्मणाम् Sy.
६. परिपुस्तेबालाः P. अनल्पबलाः सन्ति तेभ्यः Sy.
७. VM. explains मरुद्भ्यः as तेभ्यः ।
८. यज्ञार्हेभ्यः Sy.
९. द्योतमानेभ्यः । विभक्तिवचनयोर्व्यत्ययः । यद्वा कर्मणि षष्ठी । दीप्तम् । अथवान्तरिक्षादागतेभ्य इति सम्बन्धः Sy.
१०. यज्ञसाधनं हविः Sy.
११. पूजय । प्रयच्छेत्यर्थः Sy.
१२. श्यावाश्वस्यार्षम् Dur.
श्यावाश्वस्य SKN.
१३. ०कार० D. रोचमानैराभरणविशेषैः । आरोचन्त इति शेषः । उपसर्गश्रुतेः सङ्गतक्रियाध्याहारः Sy. रुक्मैर्विकृतानि Dur. 'ऋसे'षु व ऋष्टयः पत्सुखादयो वक्षःसु रुक्माः' (RV.V. 54.11.) इति दर्शनान्मरुतामुरस्थाः SKN.
१४. प्रहरणसाधनेनायुधेन Sy.
एतान्यायुधानि Dur.
१५. महान्तो मरुतः Sy. शातयितव्यान्मेघान्प्रति Dur.
१६. वृष्टेर्नेतारः Sy.
हे नरः ! मरुतः ! Dur.
१७. एते मरुतः ऋष्टीः आयुधविशेषान् Sy. एताश्च ....शक्तीः Dur.
१८. आभिमुख्येन Dur. एकोऽत्राकारोऽसृक्षतेत्येतेन सम्बध्यते । अपरः, ऋतं इत्येतेन SKN.
१९. प्रक्षिपन्ति मेघभेदार्थम् Sy. असृजन्त Dur. 'सृज विसर्गे' आभिमुख्येन मेघस्योपरि विसृजन्ति विक्षिपन्ति SKN.
२०. एनान् प्रहारान् Dur. एतच्छक्तिविक्षेपलक्षणव्यापारादनन्तरमेवेत्यर्थः SKN.
२१. अर्हेति विनिग्रहार्थीयत्वादेवशब्देन समानार्थः । अन्वेव SKN.
२२. दीप्तिः Sy. आदित्यः Dur. स्वभूता भानुर्दीप्तिः SKN.
२३. अनुगच्छन्त्येव Sy. अपगच्छन्तु, मेघेभ्यो हन्यमानेभ्यस्तदन्वेव चापोऽपि, ऋतं आगच्छन्तु Dur. अन्विति पश्चाद्भावे....छान्दसत्वाद् वर्तमाने लङ्, आत्मनेपदम् । आगच्छति SKN.
२४. यथ P. यथैव SKN.
२५. जज्ञुःश० P. जझंश० D. शब्दकारिण्य आप इव Sy. शब्दकारिण्य इव स्रोतस्या आप ऋष्वः प्रभूता इत्यर्थः । एवमत्र शब्दानुकरणादापो जज्झतीरित्युपपद्यते Dur. मेघस्था आप आयन्ति ततस्तथैव विद्युतः SKN.

धेनूऋषभः[1]। स्वयमेव[2]। दिवः[3]। आगच्छति[4], इन्द्रो भानुरग्निर्वेति[5]।

ये वावृधन्त पार्थिवा य उरावन्तरिक्ष आ।
वज्रे वा नदीनां सधस्थे वा महो दिवः॥ ७॥

ये वावृधन्त। ये[6]। वर्धन्ते। पृथिव्यां वर्तमानाः। ये। च[7]। विस्तीर्णे[8]। अन्तरिक्षे। नदीनाम्[9]। वा। वेगे[10]। महतः। वा[11]। दिवः[12]। स्थाने[13] उत्तरत्र सम्बन्धः।

शर्धो मारुतमुच्छंस सत्यशवसमृभ्वसम्।
उत स्म ते शुभे नरः प्र स्पन्द्रा युजत त्मना॥ ८॥

शर्धः[14]। मारुतम्। वेगम्[15]। सत्यबलम्[16]। महत्[17]। अन्तर्मुखः[18] सन्। स्तुहि। अपि च[19]। ते मरुतः[20]। नेतारः[21]। स्पन्दनशीलाः[22]। स्वयमेव[23]। शोभार्थम्[24]। प्रयुञ्जत[25] अभिगच्छन्तीत्यर्थः।

---

१. ०नू ऋ० P. ०नू ऋषभ D.
२. आत्मनः Dur. 'मन्त्रेष्वाङ्यादेरात्मनः' इत्याकारलोपे, आत्मनैव SKN.
३. द्योतमानस्य मरुद्गणस्य Sy. द्युलोकात् Dur. कुत आगच्छति ? दिवो दीप्तादन्तरिक्षात् SKN.
४. दि आगति P., D. निरगात् Sy.
५. The passage, 'इन्द्रो भानुरग्निर्वा' should immediately follow स्वभानुः and precede अनुगच्छति॥ जज्झतीरापो भवन्ति। शब्दकारिण्यः। 'मरुतो जज्झतीरिव' इत्यपि निगमो भवति N.6.16., SKN. II.446.
६. मरुतः Sy.
७. पृथिवीसम्बद्धाः सन्तः Sy.
८. च ववृधन्त। आ इति चार्थे Sy.
९. ये व पिस्त्रस्तीर्णे D. महति Sy.
१०. नदनवतीनाम् Sy.
११. बले ववृधन्त Sy.
१२. व P. उभयत्र वाशब्दश्चार्थे Sy.
१३. द्युलोकस्य Sy.
१४. सह स्थाने च ववृधन्त। एवं सर्वत्र वर्धमाना मरुतो वृष्टयर्थमृष्टीरसृक्षतेति पूर्वत्र सम्बन्धः Sy.
१५. हे स्तोतः ! Sy.
१६. बलम् Sy.
१७. सत्यवेगम् Sy.
१८. सत्यं महाबलम् P., D. अतिप्रवृद्धम् Sy.
१९. अन्तमुखमुः P. VM. seems to explain उत् as अन्तर्मुखः सन्॥ उत्कृष्टम् Sy.
२०. अपि च refers to both उत and स्म.
२१. मेरुतः D.
२२. नेता P., D. वृष्टेर्नेतारः Sy.
२३. चलनस्वभावाः पृषतीरित्यर्थः Sy.
२४. आत्मनैव जगद्रक्षाबुद्धयैव Sy.
२५. उदकार्थम् Sy.
२६. प्रायुंज० P. समयोजयन् Sy.

उत स्म ते परुष्ण्यामूर्णा वसत शुन्ध्यवः ।
उत पव्या रथानामद्रिं भिन्दन्त्योजसा ॥ ६ ॥

उत[1] । अपि[2] च । स्म[3] । परुष्ण्यां[4] नद्याम् । प्रच्छन्नाः[5] । अवसमग्नन गर्वौ[6] भूत्वा ? अपि च । रथानाम्[7] । चक्रधारया[8] गमने । अद्रिमपि[10] । भिन्दन्ति[11] । बलेन[12] । मेघो वाद्रिः[13][14] ।

आपथयो विपथयोऽन्तस्पथा अनुपथाः ।
एतेभिर्मह्यं नामभिर्यज्ञं विष्टार ओहते ॥ १० ॥

आपथयः[15] । अभिमुखगमनादापथयो[16] नामानः । एवम्[17] विपथयश्च । मह्यम्[19] । एतैश्चतुर्भिः[20] ।

---

१. ०तः P. इयावाश्वस्यार्षम् Dur. SKN.
२. उतशब्दोऽप्यर्थे SKN.
३. स्मशब्दश्चार्थे SKN.
४. एतन्नामिकायां नद्यां वर्तन्ते ये Sy. हे मरुतो, येषां वस्तिरोभवितुमाविर्भवितुं च काले शक्तिरस्ति ते यूयम्...कस्मिंश्चित्काले...परुष्ण्यां नद्यां माध्यमिकायां वाचि पर्ववत्याम् Dur. ते प्रकृता मरुतः....इरावती परुष्णीत्याहुः । माध्यमिका वा वाक् परुष्णी पर्ववत्वात्, तस्याम्
५. प्रयच्छन्नाः P. दीप्तीः Sy. चित्रास्तिरोहिताः Dur. छन्नाः SKN.
६. आच्छादयन्ति Sy. मद्गव इव । ..यूयमेव शुन्ध्यवः शोधयितारः'।....वसथ, एतस्मिन्नन्तरिक्षलोके Dur. वसत, व्यत्ययेनायं मध्यमपुरुषः । वसन्ति न्यवतिष्ठन्तीत्यर्थः । शुन्ध्यवः शोधयितारो मेघस्य यावत्तत्रोदकं सञ्चार्यस्यापनेतार इत्यर्थः । अथवा शुन्ध्युर्मद्गुरुच्यते । लुप्तोपमं चेदं द्रष्टव्यम्, शुध्यव इव । यथा मद्गव इरावत्यां नद्यां छन्ना वसन्ति व्यवतिष्ठन्ते तद्वन्मरुत इत्यर्थः SKN.
७. गवो D. शोधिकाः Sy.
८. स्वकीयानां रथचक्रेण Sy. कस्मिंश्चिदभ्युद्गमनकाले प्राप्ते युष्माकं रथानाम् Dur. रथानामवयवभूतया SKN.
९. नेम्या Sy. या रथनेमयस्ता एव....एवमेत स्मिन्नर्थसंयोगात्पविशब्देन रथचक्रनेमिरभिसम्बध्यते Dur. नेम्या चक्रधारया SKN.
१०. अविमवि P. मेघं गिरिं वा Sy. मेघम् Dur., SKN.
११. विदारयन्ति Sy. किमुत यूयमित्यभिप्रायः Dur. मेघस्योपरि रथेन चङ्क्रम्यमाणा रथचक्रधारया मेघान् विदारयन्तीत्यर्थः ।. .. कालभेदाद् द्वे कर्मणी मरुताम् । वर्षाभ्योऽन्यत्राष्टौ मासाञ्छन्ना वसन्ति न स्वयं दृश्यन्ते नाप्येषां किञ्चित्कर्मेत्यर्थः । वर्षासु त्वाविर्भूतरूपा रथचक्रधारयाऽद्रिं भिन्दन्ति । ब्राह्मणमप्यस्मिन्नर्थे उदाहरन्ति । सान्तपनीयं हविः प्रकृत्य श्रूयते 'देवा वै वृत्रस्य मर्म नाविन्वन्, तं मरुतः क्षुरवं तीक्ष्णधारया व्ययुः (Maitra. 5.1. 10. 14.)....विश्लिष्टसर्वाङ्गबन्धनं कृतवन्त इत्यर्थः SKN.
१२. बलेन च Sy.
१३. वाद्रिः P. ०द्रि D. The passage मेघो वाद्रिः should immediately follow अद्रिमपि ।
१४. VM. ignores ते ॥ ते मरुतः Sy. पवी रथनेमिर्भवति । यद्विपुनाति भूमिम् N. 5.5., SKN. II. 311.
१५. अस्मदभिमुखा मार्गा येषां ते तादृशाः Sy.
१६. ०नादपथयो नामानम् P. ०नादवपथयो नामानम् D. १७. ऐवम् P.
१८. विश्वङ्मार्गाः Sy.
१९. मदर्थम् Sy.
२०. चतुर्विधैः Sy.

नामभिर्युक्तः[1]। मरुतां विस्तारः[2]। यज्ञम्[3]। वहति[4]।

अधा नरो न्योहतेऽधा नियुत ओहते।
अधा पारावता इति चित्रा रूपाणि दर्शयन्॥ ११॥

अध[5]। मरुतः[6]। कदाचित्[7]। नरः[8]। वहन्ति[9]। कदाचित्। नियुतः[10]। कदाचित्। पारावताः[11]। इत्थम्[12]। चित्राणि[13]। एषा दर्शनीयानि[14][15]। रूपाणि[16] पुमासश्च नरः[17][18]।

छन्दःस्तुभः कुभन्यव उत्समा कीरिणो नृतुः।
ते मे के चिन्न तायव ऊमा आसन्दृशि त्विषे॥ १२॥

छन्दःस्तुभः। छन्दःस्तुवतः[19]। उदकमिच्छतो गोतमस्य[20]। कूपम्[21]। आनिन्यु[22]। करणशीलाः[23]। ते[24]। मे[25]। के। चन[26]। तस्कराः[27]। इव। रक्षकाः। चक्षुषि[28]। दीप्तये[29]। अभवन्[30]।

---

१. नामकैः स्वरूपैः Sy.
२. विस्तृताः सन्तः Sy.
३. वहन्ति । यद्वैतैर्नामभिरुदकैः सार्धं यज्ञमोहते Sy.
४. VM. ignores अन्तःपथाः and अनुपथाः॥ अन्तस्पथाः दरीसुषिरादिमार्गाः । अनुपथाः अनुकूलमार्गाश्च ये मरुतः सन्ति ते Sy.
५. ०धः P.
६. ०त D.
७. कचित् P. कदाचित् seems to be the explanation of अध ॥ अथ Sy.
८. अभिमतवृष्ट्यादिनेतारः Sy.
९. वहन्ति जगत् Sy.
१०. स्वयमेव मिश्रयितारः सन्तः Sy.
११. अपारवताः P., D. परावद्दूरदेशः । तत्सम्बन्धिनश्चान्तरिक्षादिदूरदेशे ग्रहतारामेघादिधारकाः सन्त ओहत इत्यर्थः Sy.
१२. उक्तप्रकारेण Sy.
१३. नानाविधानि चायनीयानि वा Sy.
१४. ०षा P.
१५. स्वव्यापारैर्दर्शनीयानि भवन्त्विति शेषः Sy.
१६. तेषां रूपाणि Sy.
१७. पुमश्चानरः P. पुमश्चानरः D.
१८. VM. ignores नि and ओहते॥ नितरां वहन्ति Sy.
१९. छान्दा स्तु० D. छन्दोभिः स्तोतारः Sy.
२०. उदकेच्छवः Sy.
२१. उत्सं कूपमपेक्ष्य तृषिताय गोतमाय यान्मरुतः Sy.
२२. सर्वतोऽकुर्वन्ननयन् वा स्तोत्रम् । यद्वा ये छन्दःस्तुभश्छन्दोभिः स्तुत्याः । स्तोभतिः स्तुतिकर्मा । कुभन्यवः सेक्तारो वृष्टचुदकस्य । कुभिरुन्दनकर्मा । कीरिणः स्तोतुर्गोतमस्य पानार्थमुत्सं कूपमानृतुः आनीतवन्तः । 'अर्षिञ्चन्नुत्सं गोतमाय तृष्णजे" (RV. I.85.11.) इति ह्युक्तम् 'नृ नये' इत्यस्य वा नर्ततेर्वा विक्षेपमात्रार्थस्येवं रूपम् Sy.
२३. स्तोतारः Sy.
२४. मरुतः Sy.
२५. मह्यम् Sy.
२६. कवचन P., D.
२७. कदाचिदप्यदृश्यास्तस्करा इव स्थिताः Sy.
२८. चक्षुष P., D. दर्शने Sy.
२९. शरीरदीप्त्यै बलाय वाऽऽसन्। प्राणरूपेणेति भावः Sy.
३०. विषयभूता अभवन् Sy.

य ऋष्वा ऋष्टिर्विद्युतः कवयः सन्ति वेधसः ।
तमृषे मारुतं गणं नमस्या रमया गिरा ॥ १३ ॥

[य ऋष्वाः] हिरण्मयैरलङ्कृताः । ये महान्तः । ऋष्टया विद्योतमानाः । कवयः । भवन्ति । वेधसः । तमिति स्पष्टम् ।

अच्छ ऋषे मारुतं गणं दाना मित्रं न योषणा ।
दिवो वा धृष्णव ओजसा स्तुता धीभिरिषण्यत ॥ १४ ॥

अच्छ ऋषे । अभिगच्छ । ऋषे ! मारुतम् । गणम् । धनदानाय । मित्रम् । इव । शत्रूणा पृथक्करणार्थम् । दिवः । च । हे धृष्णवो मरुत. ! बलेन । स्तुताः । कर्मभि. । गच्छत ।

नू मन्वान एषां देवाँ अच्छा न वक्षणा ।
दाना संचेत सूरिभिर्यामश्रुतेभिरञ्जिभिः ॥ १५ ॥

नू मन्वानः । क्षिप्रम् । मरुताम् । स्तोत्र कुर्वन् । अन्यान् देवान् । प्रति । न गच्छति । वक्षणाय वक्षण धनम् । किन्तु दानाय । सङ्गच्छते । प्राज्ञैः । विश्रुतगमनैः । उदकेनाञ्जद्भिः ।

---

१. The *pratīka* is supplied by the Editor.
२. It seems to be the explanation of ऋष्वाः ॥ दर्शनीयाः Sy.
३. हे P. मरुतः Sy.
४. आयुधैर्विद्योतमानाः Sy.
५. मेधाविनः Sy. ६. सन्ति Sy.
७. विधाः P., D. सर्वस्य विधातारः Sy.
८. VM. ignores the second hemistich of the stanza. तं तेषां मारुतं गणं रमया रमणीयया गिरा स्तुत्या हे ऋषे ! श्यावाश्व ! नमस्य परिचर स्तुहि Sy.
९. अभिगच्छेति शेषः Sy.
१०. अभिगच्छ and ऋषे are omitted by D.
११. मारुतं मारुतं P.
१२. मरुत्सङ्घम् Sy.
१३. हविर्दानेन Sy. १४. आदित्यम् Sy.
१५. यौतेरिदं रूपम् । यौतीति योषा स्तुतिस्तया च Sy.
१६. द्युलोकाद्वा । वाशब्दश्चुतेरितरलोकद्वयाद्वा Sy.
१७. ऋषेरुत्तरार्धः प्रत्यक्षवादः । धर्षकाः ! मरुतः ! Sy. १८. बले P., D.
१९. अस्मदीयाभिः स्तुतिभिः Sy.
२०. गच्छः P. गच्छ D. गच्छत यज्ञम् Sy.
२१. एतान् मरुत इत्यर्थः Sy.
२२. स्तुवन् Sy.
२३. मरुद्व्यतिरिक्तान् Sy.
२४. अभिप्राप्तुम् Sy.
२५. Omitted by D. न मनुते Sy.
२६. वहनेन निमित्तेन Sy.
२७. ०णान्ध० P., D.
२८. दानोय P. अभिमतदानानि Sy.
२९. स स्तोता मेधाविभिः Sy.
३०. शीघ्रगमनेन विश्रुतैः Sy.
३१. फलस्य व्यञ्जकैर्मरुद्भिः । सर्वाः पञ्चम्यर्थे तृतीयाः । उक्तलक्षणेभ्यो मरुद्भ्यः Sy.

प्र ये मे॑ बन्ध्वे॒षे गां वो॑चन्त सू॒रयः॑ पृ॒श्निं वो॑चन्त मा॒तर॑म् ।
अधा॑ पि॒तर॑मि॒ष्मिणं॑ रु॒द्रं वो॑चन्त शिक्वसः ॥ १६ ॥

प्र ये मे॑ । प्रावोचन् । ये॑ । मम॑ । बन्धूनामन्वेषणे । पृ॒श्नि॑ । गौः । अस्माकं मातेति ताम् । पि॒तर॑म् । एषणशीलम् । रु॒द्रम् । वो॑चन्त । शकुनशीलाः ।

स॒प्त मे॑ स॒प्त शा॒किन॒ एक॑मेका श॒ता द॑दुः ।
य॒मु॒नाया॒मधि॑ श्रु॒तमु॒द्राधो॒ गव्यं॑ मृजे॒ नि राधो॒ अश्व्यं॑ मृजे ॥ १७ ॥

सप्त मे । एकोनपञ्चाशत् । मरुतः । मह्यम् । एकैकम् । धनशतानि । प्रयच्छन्तु । यमुनायाः । समीपे वर्तमानाः । गव्यम् । धन मरुद्भिर्दत्तम् । उन्मृजे । नितरा च मृजे । अश्व्यम् पाणिना पृष्ठ उन्मार्जनम्, "कक्षीवन्त उदमृक्षन्त पज्रा" इत्युक्तम् ।

---

१. म D. २. मरुतः Sy.
३. मह्यम् Sy.
४. स्वेषां बन्धूनामन्वेषणे सति Sy.
५. द्युदेवतां पृश्निवर्णां गां वा 'पृश्नियै वै पयसो मरुतो जाताः' (TS.2.2.11.4.) इति श्रुतेः Sy.
६. ता P., D. गां माध्यमिकां वाचं गोदेवतां वा Sy.
७. अवशिष्टमृषेर्वाक्यम् । ऋषिर्मरुद्वाक्यमनुवदति । तस्मादुत्तरयोराख्यातयोर्यच्छब्दानन्वयान्निघातः Sy.
८. अथ स्वकीयं पितरम् Sy.
९. गमनवन्तमन्नवन्तं वा Sy.
१०. शकनशीलाः is suggested for शकुनशीलाः ॥ शक्तास्ते । मरुतां रुद्रेण पुत्रत्वपरिग्रहो बहुकृत्व उपपादितः Sy.
११. VM. ignores सूरयः and वोचन्त ॥ सूरयः प्रेरकाः । वोचन्त अब्रुवन् Sy.
१२. VM. seems to explain सप्त and सप्त together as एकोनपञ्चाशत् ॥ सप्तसङ्ख्याकाः सङ्घाः । 'सप्तगणा वै मरुतः' (TS.2.2.11.1.) इति श्रुतेः । अदितिगर्भे वर्तमानं वायुमिन्द्रः प्रविश्य सप्तधा विदार्य पुनरेकैकं सप्तधा व्यदारयत् त एकोनपञ्चाशन्मरुद्गणा अभवन्निति पुराणेषु प्रसिद्धम् । ते च सप्तसङ्ख्याकाः Sy.
१३. शाकिनः सर्वमपि कर्तुं शक्ताः Sy.
१४. एकैको गणः Sy.
१५. शतसङ्ख्याकानि गवाश्ववयूथानि Sy.
१६. दत्तवन्तः । प्रयच्छन्तिवति वा आशीः Sy.
१७. यमुनायां नद्याम् Sy.
१८. अधि । अयं सप्तम्यर्थानुवादी Sy.
१९. गोसमूहात्मकं गोसम्बन्धि वा Sy.
२०. अमृ० P. उन्मार्जयामि Sy.
२१. अश्व्यां P., D. तथा तैर्दत्तम् अश्व्यम् अश्वसमूहात्मकं तत्सम्बन्धि वा Sy.
२२. इन्मा० P. निमार्ज्मि Sy.
२३. क्षीवन्त उदकमुक्षन्त वज्रः P. वज्राः D. RV. I. 126. 4ª.
२४. VM. ignores श्रुतम् and राधः ॥ श्रुतं प्रसिद्धम् । राधो धनम् Sy.
Ms. D. puts the figure ॥५२॥ here to indicate the end of the fifty-second hymn. No such number is given in P.

V.53.

को वेद जानमेषां को वा पुरा सुम्नेष्वास मरुताम् । यद्युयुज्रे किलास्यः ॥ १ ॥

को वेद[1] । कः[2] । वेद[3] । जनम्[4] । एषाम्[5] । क. । वा । पुरा[6] । मरुताम्[7] । सुखेषु । अभूत्[8] । यदा । युज्यन्ते[9] । श्वेता वडवाः[10] ।

ऐतान्रथेषु तस्थुषः कः शुश्राव कथा ययुः ।
कस्मै सस्रुः सुदासे अन्वापय इळाभिर्वृष्टयः सह ॥ २ ॥

ऐतान्[11] । आशुश्राव[12] । एतान्[11] । रथेषु[13] । स्थितवन्त । क. । कथ[14] च । यान्ति[15] । कस्मै । शोभनदानाय[16] । बन्धवः[17] । अनुसस्रुः[18] । कस्मै[19] च मरुद्दत्ता[20] वृष्टयो भवन्ति[21] । अन्नै[22] । सह[23] ।

---

१. 'को वेद जानम्' इति षोडशर्चं नवमं सूक्तम् । श्यावाश्व ऋषिः । आद्यापञ्चमीदशम्येकादशीपञ्चदश्यः ककुभः षष्ठीसप्तमीनवमीत्रयोदशीचतुर्दशीषोडश्यः सतोबृहत्योऽष्टमी द्वादशी च गायत्र्यौ द्वितीया बृहती तृतीयानुष्टुप्चतुर्थी पुरउष्णिक् । मरुतो देवता । तथा चानुक्रान्तम् 'को वेदे षोळश ककुब्बृहत्यनुष्टुप् पुरउष्णिक् ककुप्सतोबृहत्यौ गायत्री सतोबृहती ककुभौ गायत्री सतोबृहत्यौ ककुप्सतोबृहती' (KSA. 27.53.p.20.) इति । विनियोगो लैङ्गिकः Sy.

२. पुमान् Sy.

३. जानाति Sy.

४. जाननम् P.
उत्पत्तिम् Sy.

५. मरुतां पूर्वसूक्ते प्रस्तुतत्वादत्रान्वादेशविषयत्वादेषामित्यस्य निघातता Sy.

६. पूर्वमपि Sy.

७. एषां मरुताम् Sy.

८. भवति Sy.

९. ताः रथे योजितवन्तः । तदेषां स्थितिं बललक्षणानि सुखानि च को जानातीत्यर्थः । वेगविषये सर्वत्र वायोरुपमास्पन्दत्वादिति भावः Sy.

१०. वधवाः P.
किलासीः पूषतीरित्यर्थः Sy.

११. ए० P., D.

१२. श्रावयेदित्यर्थः । यद्वा एतेषां क्रोशध्वनिं रथध्वनिं च कः शृणुयात् ? Sy.

१३. मरुतः Sy.

१४. ऋतेषु P.

१५. कञ्चन P., D.

१६. गच्छन्ति तदपि को जानाति ? यद्वा तान् कथमन्ये देवावयोऽनुगच्छेयुः ? Sy.

१७. सुदानाय Sy.

१८. बन्धुभूता व्याप्ताः Sy.

१९. अनुक्रमेणावतरेयुः Sy.

२०. तस्मै P.

२१. ०त्तां P.

२२. वर्षकाः । अयं कर्तरि क्तिच् Sy.

२३. अन्नैः P.
बहुविधैरन्नैः Sy.

२४. सहिताः Sy.

ते मं आहुर्य आयुयुरुप द्युभिर्विभिर्मदे । नरो मर्या अरेपस इमान्पश्यन्निति ष्टुहि ॥ ३ ॥

ते[1] मे[2] । ते[3] मम[4] । आहुः । ये । उपगताः[5] । दीप्तैः[6] । अश्वैः[7] । सोमार्थम्[8] । नेतारः । मारकाः[9] । अपापाः[10] । इमानस्मान् । पश्यन्ति । इत्थम्[11] । त्व स्तुहीति ।

ये अञ्जिषु ये वाशीषु स्वभानवः स्रक्षु रुक्मेषु खादिषु । श्राया रथेषु धन्वसु ॥ ४ ॥

ये[12] । ये[13] । आभरणेषु । ये च । वाश्यायुधेषु[14] । स्वदीप्तय । मालासु[15] । रुक्मेषु[16] । पादाभरणेषु[17], आयुधविशेषो वा खादिः[18] । श्रयमाणा भवन्ति, अन्नै[19]. सहन्ति[20] रथेषु । धनु.षु चोत्तरत्र सम्बन्ध ।[21]

युष्माकं स्मा रथाँ अनु मुदे दधे मरुतो जीरदानवः । वृष्टी द्यावो यतीरिव ॥ ५ ॥

[युष्माकम्][22] । युष्माकम् । स्म[23] । रथान् । मुदे[24] । अनुधारयामि[25] । हे मरुत[26]· । क्षिप्रदानाय[27] । अथ[28] वर्षणाय[29] । रश्मयो[30] वो धारयन्ति[31] ।

---

१. ऋषिर्ऋग्द्वयाभ्यां मरुत्प्रादुर्भावमाख्यास्यन्नया प्रादुर्भूतान् पश्यन्नाह Sy. २. मरुतः Sy.

३. इत्थं लपते मह्याम् Sy.

४. मां प्राप्ताः Sy. ५. द्योतमानैः Sy.

६. विभिः गन्तृभिरश्वैः Sy. ७. मदाय सोमपानजनिताय किमाहुरिति तदनुब्रूते Sy.

८. माकाः P. मनुष्येभ्यो हिताः Sy.

९. अलेपास्ते । हे ऋषे ! Sy.

१०. तथा स्थितान् चक्षुषावलोकयन् Sy.

११. इस्थं P. स्थं D. इत्थं पश्यन् स्तुहीति Sy.

१२. अनया मरुतां स्वरूपं निरूपयति Sy.

१३. हे मरुतः ! युष्माकं ये प्रसिद्धाः Sy.

१४. वास्यायुधषु P. वास्यायु० D.

१५. माल्येषु Sy.

१६. रुक्षेषु P. क्षेषु D. उरोभूषणेषु Sy.

१७. हस्तपादस्थितकटकेषु । 'हस्तेषु खादिश्च कृतिश्च' (RV.I.168.3.) 'पत्सु खादयः' (RV.V.54.11.) इति हि श्रुती भवतः Sy.

१८. ०दि P., D.

१९. आश्रयभूताः सन्ति Sy.

२०. अनैः P., D.

२१. धन्वसु च ये च स्वभानवः श्रायाः सन्ति । 'सुधन्वान इषुमन्तः' 'सुरथाः पृश्निमातरः' (RV.V.57.2.) इति च निगमः । तान् सर्वान् स्तुम इति शेषः । यद्वा ये स्वभानवः स्वायत्तदीप्तयो मरुतोऽञ्जिष्वाभरणेषु निमित्तेषु श्राया श्राश्रया भविष्यामः । ये च वाशीषु निमित्तेषु । एवं सर्वत्र योज्यम् । तादृग्विधानिमान् पश्यन् स्तुहीति पूर्वत्र सम्बन्धः । तेषामेव इदं वाक्यम् Sy.

२२. The *pratika* is supplied by the Editor.

२३. स्व P. स्मेति पूरणः Sy. २४. मोदाय Sy.

२५. उद्दिश्य धारयामि करोमीत्यर्थः । सामर्थ्यात् स्तुतीरिति लक्ष्यते Sy. २६. ०थान् ममुद्धे निधा० P. ०थान् ममुद्धेन धा० D.

२७. P. adds ते ममाहुर्य उपगता दीप्तैरश्वैस्सोमार्थं नेतारः after मरुतः । The additional passage in P. has a striking resemblance with the commentary on RV.V.53.3.

२८. हे शीघ्रदानाः ! Sy.

२९. ०था D. ३०. वृष्ट्या Sy.

३१. दीप्तीरिव वृश्यमानान् रथानिति सम्बन्धः Sy.

३२. VM. ignores यतीरिव ॥ यतीरिव सर्वत्र गच्छन्तीः Sy.

आ यं नरः सुदानवो ददाशुषे दिवः कोशमचुच्यवुः ।
वि पर्जन्यं सृजन्ति रोदसी अनु धन्वना यन्ति वृष्टयः ॥ ६ ॥

आ यम् । आच्यावयन्ति । यम् । मेघम् । सुदानाः । नेतारः । यजमानाय । द्युलोकात् । ते पर्जन्यम् । विसृजन्ति । द्यावापृथिव्योरर्थाय । अन्तरिक्षेण । यन्ति । वृष्टयः । यं मेघ च्यावयन्ति तस्मात् पर्जन्यं च सृजन्तीति ।

ततृदानाः सिन्धवः क्षोदसा रजः प्र सस्रुर्धेनवो यथा ।
स्यन्ना अश्वाइवाध्वनो विमोचने वि यद्वर्तन्त एन्यः ॥ ७ ॥

ततृदानाः । रुजन्त । सिन्धवः । उदकेन । कूलस्था मृद रेणुश. । प्रसरन्ति । धेनवः । इव । गच्छन्त्यः । अश्वा इव । अध्वनो गमनाय । विमोचने । भवन्ति विगच्छन्ति । यदा । नद्यः एभिर्वृष्टे. सतीति ।

---

१. कारीर्या तिस्रः पिण्डयो होतव्याः । तत्र द्वितीयायाः 'आ यं नरः' इत्यनुवाक्या । सूत्रितं च— 'आ यं नरः सुदानवो ददाशुषे विद्युन्महसो नरो अश्मदिध्वः' (ĀSS.2.13.) इति Sy.
२. आप्याव० P. आप्यापय० D. आच्यावयन्ति स्थानात् BB.
३. अपां कोशवद्धारकम् Sy. कोशमुदकस्याधारं मेघम् BB. कोशम्, मेघनामैतत् Ngh. 1.10.
४. शोभनदाना मरुतः Sy. शोभनहविषां दातारः BB.
५. दातारः D. ऋत्विजः BB.
६. हविर्ददतवते यजमानाय Sy. हविषां दात्रे । तादर्थ्ये चतुर्थी यजमानार्थम् BB.
७. अन्तरिक्षात् Sy. यद्वा दिव आदित्याद् गृहीतं रश्मिषु नरो नेतारो मरुतश्च्यावयन्ति BB.
८. ०कार्ते P. ततः कोशात् पर्जन्याः BB.
९. मेघम् Sy. उदकम् BB.
१०. विमोक्षयन्ति Sy. मुञ्चन्ति BB.
११. द्यावापृथिव्यौ Sy., BB.
१२. सर्वत्र गच्छतोदकेन सह Sy. विसर्जनानन्तरं धन्वनाऽनुदकेन देशेन । विभक्तिव्यत्ययो वा । निरुदके देशे BB.
१३. सर्वत्र व्याप्नुवन्ति Sy. नद्यो भूत्वा प्रवहन्ति BB. १४. वृष्टिप्रदा मरुतः Sy. वृष्टानि जलानि BB. १५. य P.
१६. व्रज० P. पृज० D.
१७. VM. ignores अनु ॥ अनु अनुसृत्य Sy. लक्षयित्वा BB.
This stanza=TS.2.4.8.1.
१८. रुजः P. निर्भिन्दन्तो मेघान् मरुतः Sy.
१९. स्यन्दमाना अपः Sy.
२०. उदकेन सह Sy.
२१. अन्तरिक्षम् Sy.
२२. पयः सिञ्चन्त्यो नवप्रसूता गावः Sy.
२३. किञ्च वृष्टान्तान्तरम् Sy.
२४. आशुगतयः Sy.
२५. यथा Sy.
२६. ०नो P. मनुष्याणामध्वविमोकाय सञ्चरन्ति तथेत्यर्थः Sy.
२७. नद्यः वि वर्तन्ते विविधं सञ्चरन्ति । अथवा प्रतिनिवृत्य वर्तन्ते । प्रवर्धन्त इत्यर्थः । तवैवं कुर्वन्तीति पूर्वत्रान्वयः Sy.
२८. एन्य इति नदीनाम Ngh. 1.13.

आ यात मरुतो दिव आन्तरिक्षादमादुत । माव स्थात परावतः ॥ ८ ॥

आ यात । आगच्छत । मरुतः ! दिव[२] । अन्तरिक्षात्[३] । च[४] । अमशब्दो गृहवचन इति, इह[५] तु पृथिवीमाह[६] । मा । अवतिष्ठत[७] । अधिगन्तव्यदूरदेशात्[८] ।

मा वो रसानितभा कुभा क्रुमुर्मा वः सिन्धुर्नि रीरमत् ।
मा वः परि ष्ठात्सरयुः पुरीषिण्यस्मे इत्सुम्नमस्तु वः ॥ ९ ॥

मा वः[९] । एताः सप्त नद्यः[१०] । मा । युष्मान् । आत्मनि रमयन्तु[११] । परिष्ठात्[१२] निरोधनाय[१३] भवति । अस्मासु । एव । युष्माकम्[१४] । सुखम्[१५] । अस्तु ।

तं वः शर्धं रथानां त्वेषं गणं मारुतं नव्यसीनाम् ।
अनु प्र यन्ति वृष्टयः ॥ १० ॥

तं वः शर्धम् । तम्[१६] । युष्माकम्[१७] । रथानाम् । शर्धम्[१८] । तथा भवताम् । दीप्तम् । गणं[१९] च । नव-तराणामपाम्[२०] । वृष्टयः[२१] । अनुगच्छन्ति[२२] [२३] ।

---

१. ०तः P., D.
२. द्युलोकात् Sy.
३. ०क्षत् P. अन्तरिक्षाद् आयात Sy.
४. उत अपि च Sy.
५. मश० (cf. Ngh. 3. 4.) अस्माल्लोकादायात Sy.
६. ह P.
७. अपात० P. अवस्थिति (मा) कुरुत Sy.
८. व्यं दूरदेशाद् P. गन्तव्यदूरदेशाः D. परावतः अत्यन्त दूरदेशात् । परावत इत्यत्रापि वा योज्यम् । दूरदेशे तत्र तत्र द्युलोकादौ Sy.
९. हे मरुतः ! Sy.
१०. रसा । नदीनामैतत् । 'रसा नदी भवति' । रसनवती शब्दवती । अनितभा इता प्राप्ता भा यस्याः सा इतभा । न तादृश्यनितभा । कुभा कुत्सितदीप्तिश्च । क्रुमुः सर्वत्र क्रमणः । सिन्धुः समुद्रश्च । पुरीषिणी पुरीषमुदकम्, तद्वती । सरयुरपि Sy. रसा नदी रसतेः शब्दकर्मणः N. 11. 25.
११. निकृष्टं रमतु Sy.
१२. परिष्टायत् P. परिष्ठानात् D. परितस्तिष्ठतु मा निरुणद्धु Sy.
१३. ०या P.
१४. युष्माकं सम्बन्धि युष्मत्स्वभूतम् Sy.
१५. त्ववागमनजनितं सुखम् Sy.
१६. तं मारुतमित्यनेन सम्बध्यते Sy.
१७. युष्माकं प्रेरकम् Sy.
१८. बलम् Sy.
१९. गवं P. मारुतं गणं च स्तौमि । यद्वा रथानां रंहणशीलानां वो युष्माकं शर्धं परेषामभिभावुकं गणं स्तौमीत्येकमेव वाक्यम् Sy.
२०. नवरा० P., D. नूतनानाम् Sy.
२१. अथ परोक्षकृतः Sy.
२२. युष्मान्, प्रकर्षेण गच्छन्ति । यद्वा वर्षका मरुतोऽनु अनुकूलं प्रकृष्टं यन्ति गच्छन्ति Sy.
२३. VM. ignores प्र ॥ प्र प्रकर्षेण, प्रकृष्टम् Sy.

शर्धंशर्धं व एषां व्रातंव्रातं गणंगणं सुशस्तिभिः । अनु क्रामेम धीतिभिः ॥ ११ ॥

शर्धंशर्धम् । मरुतः ! शर्धंशर्धम्, आगच्छन्ति । तथा व्रातंव्रातम् । गणंगणं च । एषाम् । युष्माक तत्सर्वम् । अनुगच्छामः । सुस्तोत्रैः । कर्मभिः ।

उत्तरा निगदव्याख्याता—

कस्मा अद्य सुजाताय रातहव्याय प्र ययुः । एना यामेन मरुतः ॥ १२ ॥

[कस्मा अद्य]

येन तोकाय तनयाय धान्यं बीजं वहध्वे अक्षितम् ।
अस्मभ्यं तद्धत्तन यद्व ईमहे राधो विश्वायु सौभगम् ॥ १३ ॥

येन तोकाय । येन धनेन । पुत्राय । तत्पुत्राय । धान्यम् । तत्कारण बीज च । अक्षितम् । वहध्वे । अस्मभ्यम् । तत् । धत्त । धनम् । यत् । वः । याचामहे । सर्वगम् । सुभगत्वावहम् ।

अतीयाम निदस्तिरः स्वस्तिभिर्हित्वावद्यमरातीः ।
वृष्ट्वी शं योरप उस्रिय भेषजं स्याम मरुतः सुह ॥ १४ ॥

अतीयाम । अतिगच्छाम । निन्दित्रीः । अरातीः । अवद्यम् । हित्वा । स्वस्तिभिः । तिरस्कुर्वन्तः ।

---

१. तत्तद्बलम् Sy.
२. अविवक्षितगणो व्रातः । तं तं व्रातम् Sy.
३. Omitted by P. तं तं सप्तसप्तसमुदायात्मकम् Sy.
४. ०मं P. अनुगच्छेम Sy.
५. सुप्तोस्तो० P., D., शोभनस्तुतिभिः Sy.
६. कर्मभिर्हविष्प्रदानादिलक्षणैः Sy.
७. ०र P.
८. The *pratīka* is supplied by the Editor. VM. does not explain the stanza.
अद्यास्मिन् दिने कस्मै सुजाताय रातहव्याय दत्तहविष्काय । प्र ययुः प्रकर्षेण गच्छेयुः । एना अनेन यामेन रथेन मरुतः Sy.
९. हे मरुतः ! Sy.
१०. सदयेन मनसा Sy.
११. तत्पुत्राय धनाय वा Sy.
१२. अक्षीणम् Sy.
१३. धारयध्वे तेन चित्तेन Sy.
१४. तत्तद् D. धान्यं बीजम् Sy.
१५. युष्मान् Sy.
१६. सर्वाभ्रोपेतम् कृत्स्नायुष्योपेतं वा Sy.
१७. सौभाग्यं च तद्धत्तनेति सम्बन्धः Sy.
१८. अतिक्रम्य गच्छेम तिरस्कुर्म इत्यर्थः । अनेनानिष्टपरिहारः प्रार्थित उत्तरेणेष्टप्राप्तिरुच्यते Sy.
१९. निन्दितीः P. निन्दकान् Sy.
२०. निन्दितीरातीः D शत्रून् Sy.
२१. पापम् Sy.
२२. अद्यं हत्वा P. परित्यज्य Sy.
२३. क्षेमैः Sy.
२४. प्राप्तान् । यद्वा तिरोऽन्तर्हितम् Sy.

व्याप्य[1] । शम्[2] । योः[3] । उदकानि[4] । गोयुक्तम्[5] । अन्न च सर्वदा । तै. सह[6] । स्यामावियुक्ताः[7,8] ।

सुदेवः समहासति सुवीरो नरो मरुतः स मर्त्यः ।
यं त्रायध्वे स्याम ते ॥ १५ ॥

सुदेवः । हे पूजामसत[9] ? मरुद्गण ! स. । मर्त्य । शोभनदेवः[10] । भवति । बन्वदाह[11] ? हे नरः[12] ! मरुत. ! स सुपुत्रश्च[13] भवति । यम्[14] । त्रायध्वे[15] । स्व च तादृशा[16] । स्याम त्रातव्याः[17,18] ।

स्तुहि भोजान्स्तुवतो अस्य यामनि रणन्गावो न यवसे ।
यतः पूर्वाँइव सखीरनु ह्वय गिरा गृणीहि कामिनः ॥ १६ ॥

स्तुहि भोजान्[19] । स्तुहि । भोजयितॄन्[20] । स्तोतुर्मरुत[21] । अस्य[22] मरुद्गणस्य । आगमने[23] । मरुतो रमन्ताम् । गाव[24]: । इव । यवसे[25] त्वयि । गच्छत[26]. । प्रत्नानिव[27] । सखीन् । अनुक्रमेण । आह्वय[28] । वाचा[29] । स्तुहि च । कामिन[30]: ।[31]

---

१. वृष्टिषु युष्मत्प्रेरितासु सतीषु Sy.
२. सुखम् Sy.
३. पापानां यावनम् Sy.
४. आपः उदकानि । शसः स्थाने जस् Sy.
५. भेषजम् । यद्यप्येतदुदकनाम (Ngh.1.12.) तथापि पृथगपामभिधानादत्र तद्धेतुकार्यमन्न-मुच्यते । तत् सर्वम् Sy.
६. सह स्याम लभेमहि—वयम् । यद्वा आपो युष्मत्प्रेरिता उक्तं सर्वं कुर्वन्तु । वयं सर्वे सहैव स्याम भवेम युष्मत्स्वभूताः Sy.
७. ०क्ता P.
८. VM. ignores मरुतः ।
९. प्रशस्तवचनः समहशब्दः । हे पूजित ! मरुतां गण ! Sy.
१०. कल्याणमरुत्संज्ञकदेवोपेतः Sy.
११. बहुवदाह is suggested for बन्वदाह ।
१२. हे नेतारः ! Sy.
१३. शोभनपुत्राद्युपेतश्च Sy.
१४. मर्त्यम् Sy. १५. पालयध्वे Sy.
१६. वयम् is suggested for स्वम् ।
१७. ०श्च P. ०वृत D. एवं भवति ते वयम् Sy.
१८. स्याम युष्मदीयाः Sy.
१९. हे ऋषे ! Sy.
२०. ०तॄं P. दातॄन् मरुतः Sy.
२१. स्तुतिं कुर्वतः Sy.
२२. अस्य यजमानस्य Sy.
२३. यज्ञे Sy.
२४. गावो यथा रमन्ते तद्वन्मरुतोऽपि Sy.
२५. तृणादि भक्षणाय गच्छन्त्यः Sy.
२६. गच्छगच्छतः P. मरुतः Sy.
२७. पुरातनान् Sy.
२८. ह्वय D.
२९. स्तुत्या Sy.
३०. स्तुतीच्छावतो मरुतः Sy.
३१. Ms. D. puts the figure ॥५३॥ here to indicate the end of the fifty-third hymn. No such number is given in P.

V.54.

प्र शर्धाय मारुताय स्वभानव इमां वाचमनजा पर्वतच्युतें ।
धर्मस्तुभें दिव आ पृष्ठयज्वने द्युम्नश्रवसे महि नृम्णमर्चत ॥ १ ॥

[1] **प्र शर्धाय** । प्रगमय[2] । मारुताय[3] । वेगाय[4] । स्वदीप्तये[5] । स्तुतिम् । इमाम् । मेघानां[6] च्यावयित्रे[7] । यज्ञे स्तोतव्याय[8] । दिवः[9] । आगत्य । स्पृष्ठयजमानाय[10] पृष्ठं स्पृशते । द्योतमानायान्नाय[11] । महत्[12] । धनम्[13] । प्रयच्छत[14] ।

प्र वो मरुतस्तविषा उदन्यवो वयोवृधो अश्वयुजः परिज्रयः ।
सं विद्युता दधति वाशति त्रितः स्वरन्त्यापोऽवना परिज्रयः ॥ २ ॥

[15] **प्र वो मरुतः** । प्र स्वरन्ति[16] प्रगमयन्ति । युष्माकम्[17] । हे मरुत. ! महान्त.[18] । उदकमिच्छन्तः[19] । अन्न-वृधः[20] । अश्ववैर्युक्ताः[21] । परितो गन्तारो रथाः । सन्दधति[22] चोदकानि । विद्युता सम्भृताश्च । पृथिव्याम्[23] । विसृ-जन्ति[24] । इति मध्येऽपां सन्धारणानन्तर प्राक् विसर्गात् त्रिस्थान इन्द्रः[25] । गर्जितशब्दं करोति । परितो गन्त्र्यः[26] । आप[27] इति[28] ।

---

१. 'प्र शर्धाय' इति पञ्चदशर्चं दशमं सूक्तं श्यावाश्वस्यार्षं मरुद्देवताकम् । चतुर्दशी त्रिष्टुप्, शिष्टा जगत्यः । 'प्र शर्धाय पञ्चोना जागतमुपान्त्या त्रिष्टुप्' (KSA.27.54.p.20.) इत्यनुक्रान्तम् । सूक्तविनियोगो लैङ्गिकः । आग्नेन्द्रा-मारुत्यां प्रधानस्य याज्या । सूत्रितञ्च 'प्र शर्धाय मारुताय स्वभानव इत्यैन्द्रीमनूच्य मारुत्या यजेत्' (ĀŚS. 2.11.) इति Sy.

२. प्र अनजेति सम्बन्धः । प्रापय Sy.

३. मरुत्सम्बन्धिने Sy.

४. बलाय Sy.

५. स्वायत्ततेजसे Sy.

६. क्रियमाणाम् Sy.

७. पर्वतस्य च्यावयित्रे Sy.

८. धर्मस्य स्तोभयित्रे Sy.

९. द्युलोकादागच्छते Sy.

१०. यद् पृष्ठैः रथन्तरबृहदादिभिरीजानाय Sy.

११. ०नायान्नाय P. द्योतमानान्नाय Sy.

१२. प्रभूतम् Sy.

१३. धनं हविर्लक्षणम् Sy.

१४. ०तः P., D. ददतेत्यर्थः Sy.

१५. कारीर्यां प्रथमस्याः पिण्डधाः 'प्र वो मरुतः' इति याज्या । सूत्रितञ्च—'प्र वो मरुतस्त-विषा आ यं नरः' (ĀŚS. 2.13.) इति Sy.

१६. प्रादुर्भवन्ति Sy.

१७. युष्माकं गणाः Sy.

१८. महवन्तः P. दीप्ताः महान्तो वा Sy.

१९. उदकेच्छवः Sy.

२०. ०च्छतो वृधः P. जगद्रक्षणार्थमन्नस्य वर्धयि-तारः Sy.

२१. गमनाय रथेऽश्वानां योक्तारः Sy.

२२. सङ्गच्छन्ते Sy.

२३. भूमौ Sy.

२४. स्वरन्ति अधः पतन्ति Sy.

२५. त्रिषु स्थानेषु तायमानो मेघो मरुद्गणो वा Sy.

२६. शब्दयति । अस्मिन् पक्षे सङ्ग्रवाबोऽयम् Sy.

२७. गन्त्रीरप P. गन्त्रीरपि D.

२८. इव P.

विद्युन्महसो[1] नरो अश्मदिद्यवो[2] वातत्विषो[3] मरुतः[4] पर्वतच्युतः[5]।
अब्दया[6] चिन्मुहुरा[7] ह्वादुनीवृतः[8] स्तनयदमा[9] रभसा उदौजसः[10]॥ ३॥

विद्युन्महसः[1]। विद्योतमानतेजसः। होतारः[2]। व्याप्तायुधा[3]। निश्चरत्तेजसः[4]। मरुतः[5]। पर्वतच्युतः[6]। अपां दातारः। च[7]। मुहु[8]। आगच्छन्ति। ह्वादुनेर्वर्तयितारः[9]। शब्दायमानगृहाः[10]। वेगवन्तः[11]। उद्भूतबलाः[12]। शरीरं गृहमिति[13]।

व्यक्तून्[14] रुद्रा व्यहानि शिक्वसो व्यन्तरिक्षं वि रजांसि धूतयः[15]।
वि यदजाँ[16] अजथ[17] नावं[18] हं[19] यथा वि दुर्गाणि[20] मरुतो नाह[21] रिष्यथ॥ ४॥

व्यक्तून्[14]। व्यजथ[15]। रात्री[16]। हे रुद्राः! तथाऽहानि[17] च। हे शक्ताः[18]! तथाऽन्तरिक्षम्। तथा सर्वानेव लोकान्[19]। हे कम्पयितारः! यदा यूयम्। अजान्[20] वृक्षान्[21]। व्यजथ[22]। यथा[23]। इमानि उदकानि। नावः[24]। यदा च दुर्गाणि[25]। व्यजथ। तदानीं[26] न[27]। एव[28]। श्रमेण जीर्णा भवथ[29]।[30]

---

१. 'विद्युन्महसः' इति तृतीया करीयमिव द्वितीयस्याः पिण्डधा याज्या। सूत्रितञ्च 'विद्युन्महसो नरोऽश्मदिद्यवः कृष्णं नियानं हरयः सुपर्णाः' (ĀSS. 2. 13.) इति Sy.

२. वृष्टद्यादेर्नेतारः Sy.

३. अश्मसारमयायुधा वा Sy.

४. प्राप्तदीप्तयः Sy.

५. मरुतो वृष्टयर्थं प्रादुर्भवन्तीत्यर्थः Sy.

६. पर्वतः P. ०तोच्यु० D. पर्वतानां मेघानां वा च्यावयितारः Sy.

७. अब्दया उदकानां दातारः। जसो याजादेशः Sy.

८. चिदिति पूरणः Sy.

९. प्रादुने वर्तयितयः P. प्रादु० D. ह्वादुन्या अशनेः प्रवर्तकाः Sy.

१०. ०मानयनगु० P. अमाशब्दः साहित्यवाची। शब्दोपेतगणा इत्यर्थः Sy.

११. वेगन्तः P. वृष्टयर्थमुद्युञ्जानाः Sy.

१२. ०तबाला P. उद्धतबलाः Sy.

१३. The passage शरीरं गृहम् should immediately follow शब्दायमानगृहाः and precede वेगवन्तः।

१४. व्याक्तून् P. व्या० D.

१५. व्याजहा P. व्याजथा D. वि अजथ इत्युत्तरार्धगतेन सम्बध्यते। एवं सर्वत्र। क्षिपथेति तस्यार्थः Sy.

१६. रात्रिः P.

१७. हे रुद्रपुत्राः! मरुतः! Sy.

१८. अहानि अपि व्यजथ Sy.

१९. शक्ताः सर्वमपि कर्तुम् Sy.

२०. सर्वानिवोकान् P.

२१. हे कम्पकाः! Sy.

२२. अभ्यान् P., D. मेघान् Sy.

२३. गमयथ Sy.

२४. यथा तद्वत् Sy.

२५. समुद्रम् Sy.

२६. शत्रुनगराणि Sy.

२७. Omitted by P.

२८. इव D.

२९. ०थः P., D. (नैव) हिंसथ Sy.

३०. VM. ignores मरुतः।

तद्वीर्यं[1] वो मरुतो महित्वनं दीर्घं ततान[2] सूर्यो न योजनम् ।
एता न यामं[3] अगृभीतशोचिषोऽनंश्वदां यय्यातना गिरिम् ॥ ५ ॥

तद्वीर्यम्[1] । तत् । वीर्यम्[2] । युष्माकम् । हे मरुत[3] ! महत्वम्[4] । विस्तृतम्[5] । ततनोति । सूर्य. । इव । तेज । अश्वा[6] । इव । गमने[7] । अन्यैरगृहीतबला[8] । अश्वस्यादातारम्[9] । गिरम्[10] । यत्[11] । न्ययातन[12] पणिभिरपहृतानश्वानाहर्तुम् ।

अभ्राजि[13] शर्धो मरुतो यदर्णसं मोषथा[19] वृक्षं कंपनेव[21] वेधसः ।
अधं स्मा नो अरमतिं सजोषसश्चक्षुरिव[14] यन्तमनु[15] नेषथा सुगम् ॥ ६ ॥

अभ्राजि[13] । दीप्यते । बलम्[15] । हे मरुत[16] ! यदा[17] । उदकं मेघस्थम्[18] । शनै शनैर्मेघम्[18] । मोषथ[19] । यथा वृक्षमन्तर्जात[21]

---

१. प्रसिद्धम् Sy.
२. सामर्थ्यम् Sy.
३. ०स्वम् is suggested for ०त्वम् ।
४. अत्यन्तमायतम् Sy.
५. तनोति लोके Sy.
६. एतवर्णा देवानामश्वास्ते यथा Sy.
७. गमने योजनं दीर्घं तन्वन्ति तद्वदित्यपरो वृष्टान्तः Sy.
८. अगृहीततेजस्काः । यद्वैतन्मरुतां विशेषणम् । हे मरुतः ! यूयमगृभीतशोचिषः सन्तः Sy.
९. व्यापकोदकादातारं पणिभिरपहृतानामश्वानामप्रदातारं वा Sy.
१०. गिर P., D. गिरिम् is suggested for गिरम् ॥ मेघं पर्वतं वा Sy.
११. य P., D. यदा Sy.
१२. निहतवन्तः स्थ Sy.
१३. श्यावाश्वस्यात्रेयस्यार्षम् Dur.
१४. भ्राजते Sy; Dur.; SKN.
१५. भवतां गणम् Sy. तद्बलम् Dur. बलं युष्मदीयं सेनालक्षणम् SKN.
१६. यस्मात् Sy. तृतीयाया अत्र लुक् । येन बलेन Dur., SKN.
१७. ०कं मेघ० P. उदकवन्तम् Sy. मेघं वृद्धमुदकपूर्णमनुप्रविश्य Dur. अर्ण उदकम् । सकारो मत्वर्थीयः । उदकवन्तम्, कम् ? सामर्थ्यान्मेघम् SKN.
१८. वृक्षम् । वृश्च्यते विदार्यत इति वृक्षो मेघः । तम् Sy. कथं पुनर्मोषयेति ? वृक्षम् Dur. कथमिव ? वृक्षम् SKN.
१९. मेघमोष P. ताडयथेत्यर्थः Sy. मुष्णीथ यूयं, निरुदकं कुरुतेत्यभिप्रायः Dur. मुष्णीथ, निरुदकं कुरुतेत्यर्थः SKN.
२०. इवेत्यनर्थकः । कम्पनाः सन्तः । यद्वा कपनाः कृमयो वृक्षं घुणादयः । ते यथा मुष्णन्ति तद्वत् Sy. इव Dur.
२१. ०तं P., D. यथा वृक्षमनुप्रविश्य क्रिमयोऽन्तर्गतं दारुचूर्णं रसं वा मुष्णन्ति, एवं यूयमुदकं मुष्णीथ. . .एवमत्र वृक्षसम्बन्धात् क्रिमयः कम्पनाः । ते हि वृक्षं मुष्णन्ति मोषयन्ति च कम्पयन्ति च यं खादन्ति । स्वयमेव वा कम्पन्ते चलनस्वाभाव्यात् Dur. कम्पना घुणक्रिमयस्ते वृक्षं यथा मुष्णन्ति निस्सारीकुर्वन्ति तद्वत् SKN.

कृमिर्मुष्णाति । हे विधातारः[१] ! तत[२]. । अस्मान्[३] । सजूर्[४]ता यूयम् । पर्याप्तमतिमुदारम्[५] । नयत[६] । यथा चक्षुः । यन्तम्[७] । शोभनमार्गम्[८] । अनुनयति[९] ।[१०][११]

न स जीयते मरुतो न हन्यते न स्रेधति न व्यथते न रिष्यति ।
नास्य राय उप दस्यन्ति नोतय ऋषिं वा यं राजानं वा सुषूदथ ॥ ७ ॥

न स जीयते[१२] । न[१३] । सः[१४] । शत्रुभिर्जीयते[१५] । हे मरुतः[१६] ! न च । हन्यते[१७] । न । क्षीणो[१८] भवति । न । चलति[१९] । न च । हिंसितो[२०] भवति । न । अस्य । धनानि[२१] । उपदस्तानि[२२] भवन्ति । न च[२३] । रक्षणम्[२४] । ऋषिम्[२५] । वा । यम् । राजानम् । वा । सुष्ठु प्रेरयथ[२६] ।

---

१. हे वृष्टेर्विधातारः ! Sy. वेधसो वेद्धारः । .अथवा हे वेधसो मेधाविनः ! इति मरुद्विषयमेतत् सम्बोधनं स्यात् Dur. मेधाविनो य ईदृग्बलाः SKN.

२. अपि च Sy. यस्माद्यूयमेवमादिना प्रभावेण युक्ता अथैतस्मात् कारणात् Dur. अस्मात् SKN.

३. मामित्यर्थः Sy. अस्माकम् Dur.

४. ०तो P. युष्मासु परस्परं समानप्रीतयो यूयम् Sy. हे सजोषसः ! सह प्रीताः ! Dur. हे सजोषसः सम्प्रीताः परस्परतः SKN.

५. ०मदिमु० P. आरमणं धनादिकं प्रति Sy. एताम्. . . .अलमिति पर्याप्तमतिम् । परिसमाप्तविद्यं यजमानम् Dur. व्यत्ययेनैकवचनं बहुवचनस्य स्थाने । अरमतीननल्पमतीन् पर्याप्तज्ञानान् स्वर्गापवर्गप्राप्तावधिकृतानित्यर्थः SKN.

६. अनुक्रमेण नयथ Sy. यूयमप्यनुनेषथ. . . गमनानुग्रहेऽस्य वर्तध्वमित्यभिप्रायः Dur. अनुरत्र धात्वर्थानुवादी । नयथ SKN

७. तत्र दृष्टान्तः । चक्षुरिव तद्यथा मार्गप्रदर्शनेन नायकं भवति तद्वत् Sy. कथं च पुनर्नेषथ ? . . . .यथा गच्छतः पुरुषस्य चक्षुः Dur.

८. गच्छन्तम् Sy. स्वकृतेनैव कर्मणा विद्यया वा यान्तमितो लोकादमुं लोकम् Dur. गच्छन्तं मनुष्यं नयेत् तद्वत् SKN.

९. ०नं मा० D. सुगमनं मार्गम् Sy. शोभनगमनं स्थानम् Dur. सुखगमनं, यत्र वा गतानां सुखं भवति स सुगः स्वर्गो मोक्षो वा तम् SKN.

१०. गमनानुग्रहे वर्तते, एवमनुनेषथैनं सुगमिति Dur. यथा स्वेनैव यत्नेन पथि गच्छन्तं मनुष्यं पथि प्रदर्शनमात्रेण चक्षुर्नयत्येवं स्वीकृतेन कर्मणा स्वर्गं मोक्षं वा गच्छतोऽस्माननुग्रहमात्रक्रियया यूयं नयतेत्यर्थः SKN.

११. VM. ignores स्म ॥ स्मेति पूरणः Sy. स्मशब्दः पूरणः SKN. कपनाः कम्पनाः क्रिमयो भवन्ति N. 6. 4., SKN. II. 400.

१२. Omitted by P.

१३. ऋषी राजा वा Sy.

१४. अन्यैर्न पराभाव्यते । 'जि जये' 'ज्या वयोहानौ' इत्यस्य वा रूपम् Sy.

१५. हे मरुतः ! यूयम् Sy.

१६. हिंस्यते अत्यर्थं प्राणैर्न वियुज्यते Sy.

१७. क्षीयते Sy.

१८. वलति P. पीड्यते Sy.

१९. Omitted by P.

२०. हिंस्यते । अत्र हिंसा बाधमात्रम् Sy.

२१. धागानि P.

२२. नोपक्षीयन्ते Sy. २३. व P.

२४. रक्षा अप्युप दस्यन्ति Sy.

२५. ०क्षन्मृषी P. ०णम्मृषिं D. मन्त्रद्रष्टारं ब्राह्मणम् Sy.

२६. क्षारयथ प्रेरयथ सत्कर्मसु Sy.

नियुत्वन्तो ग्रामजितो यथा नरोऽर्यमणो न मरुतः कवन्धिनः ।
पिन्वन्त्युत्सं यदिनासो अस्वरन्व्युन्दन्ति पृथिवीं मध्वो अन्धसा ॥ ८ ॥

नियुत्वन्तः[1]। अश्ववन्त[2]. । सङ्ग्रामजितः[3] । मनुष्याः[4] सहाश्वानधिष्ठाय गच्छन्ति । उदाराः[5]। इव । मरुत. । उदकवन्त[6] । पिन्वन्ति[7] । मेघम्[8] । यदि[9] । ईश्वरा । निर्गच्छन्ति[10]। व्युन्दन्ति । पृथिवीम् । उदकस्य[12] । अन्नेन[13] हेतुना[14] ।

प्रवत्वतीयं पृथिवी मरुद्भ्यः प्रवत्वती द्यौर्भवति प्रयद्भ्यः ।
प्रवत्वतीः पथ्या अन्तरिक्ष्याः प्रवत्वन्तः पर्वता जीरदानवः ॥ ९ ॥

प्रवत्वती[15] । विस्तीर्णा । इयम् । पृथिवी । भवति । मरुद्भ्यः[16] कामं सञ्चरणाय । द्यौश्च । गच्छद्भ्यः[17]। प्रवत्वन्त[18] । अन्तरिक्षस्थाः[19] । मार्गा[20] । पर्वताश्च[21] । क्षिप्रोदकदानाः[22] ।

---

१. कारीर्यामेव तृतीयस्याः पिण्डधा याज्या 'नियुत्वन्तः' इत्येषा । सूत्रितञ्च—'नियुत्वन्तो ग्रामजितो यथा नरोऽग्ने बाधस्व वि मृधो वि दुर्गहा' (ĀŚS.2.13.) इति Sy.

२. नियुत्संज्ञकैरश्वैस्तद्वन्तो मरुतः । अयं शब्दोऽश्वसामान्ये वर्तते । नितरां यवनवन्तोऽश्ववन्तः Sy.

३. ०मिजि० P., D. सङ्घात्मकस्य पदार्थस्य विश्लेषयितारः . . ग्रामजितः, ग्रामस्य जेतारः Sy.

४. नराकारा नेतारो वा । मरुतो नियुत्वन्तः । नर इव मनुष्या इव तथा भवन्ति Sy.

५. यथाश्वा० is suggested for सहाश्वा०

६. अर्यमप्रभृतय आदित्याः इव । दीप्ता इति शेषः । तादृशाः Sy.

७. उदकवन्तो भवन्ति Sy.

८. पिबन्ति D.
प्याययन्त्युदकेन Sy.

९. कूपादिनिम्नप्रदेशं मेघं वा Sy.

१०. यदा Sy.

११. शब्दयन्ति यदा Sy.

१२. मधुरस्योदकस्य Sy.

१३. सारेण तदैवं भवति । यद्वा यदास्वरन् तदा पिन्वन्त्युत्समिनासः तदान्धसः पृथिवीं व्युन्दन्तीति Sy.

१४. VM. ignores यथा ।

१५. प्रवन्तः प्रकर्षवन्तो विस्तीर्णाः प्रदेशा यस्यां सा प्रवत्वती । तादृशी । कृत्स्नापि भूमिर्मरुत्परा भवतीत्यर्थः । तां सर्वामपि व्याप्नुवन्तीति यावत् Sy.

१६. मरुतामर्थाय Sy.

१७. गच्छद्भ्यः P. प्रकर्षेण गच्छद्भ्यस्तेभ्यः Sy.

१८. प्रवत्वती भवति। सापि मरुतां सञ्चाराय Sy.

१९. अन्तरिक्षे भवाः Sy.

२०. स्नुगतयोऽपि Sy.

२१. अद्रयो मेघा वा Sy.

२२. प्रवत्वन्तो भवन्ति क्षिप्रदाना मरुद्भ्यः Sy.

यन्मरुतः सभरसः स्वर्णरः सूर्य उदिते मदथा दिवो नरः ।
न वोऽश्वाः श्रथयन्ताह सिस्रतः सद्यो अस्याध्वनः पारमंशुथ ॥ १० ॥

यन् मरुतः । यत् । मरुत । सभाराः । सर्वनरा. । सूर्ये । उदिते यज्ञे । दिव आगत्य । मदथ । नेतारः । ततो युष्माकम् । अश्वा मार्गे । न । एव । श्रथयन्त । सरन्त । तदानीमेव । अस्य । अध्वनः । पारम् । प्राप्नुथ तैरिति ।

अंसेषु व ऋष्टयः पत्सु खादयो वक्षःसु रुक्मा मरुतो रथे शुभः ।
अग्निभ्राजसो विद्युतो गभस्त्योः शिप्राः शीर्षसु वितता हिरण्ययीः ॥ ११ ॥

अंसेषु । अंसेषु । युष्माकम् । शक्तयो भवन्ति । पत्सु च । खादय· । तथा वक्षःसु । रुक्माः । हे मरुतः ! भवतां रथे वा । अलङ्काराः । अग्निदीप्तय. । विद्युत. । बाह्वोः । शिप्राश्च । हिरण्मय्यः । शिरस्त्राणाय । विततां. ।

तं नाकमर्यो अगृभीतशोचिषं रुशत्पिप्पलं मरुतो वि धूनुथ ।
समच्यन्त वृजनातित्विषन्त यत्स्वरन्ति घोषं विततमृतायवः ॥ १२ ॥

तं नाकम् । तम् । आदित्यम् । गन्तार· । शत्रुभिरगृहीतबलम् । हे मरुतः ! शुक्लम् । उदकम् ।

---

१. यदा Sy.
२. हे मरुतः ! Sy.
३. ०रा P. सहबलाः Sy.
४. सर्वस्य नेतारो यूयम् Sy.
५. उद्गते मध्याह्ने Sy.
६. द्युलोकस्य Sy.
७. मा० P., D. यदा सोमेन मदथ Sy.
८. हे नेतारः ! यदा सोमं पातुमिच्छथेत्यर्थस्तदा Sy.
९. ०ता P.
१०. श्लथयन्ति Sy.
११. देवयजनमार्गस्य Sy.
१२. व्याप्नुथ । यद्वा यदा सोमेन मदथ तदा त्वदीया अश्वा न शिथिला भवन्ति । यूयं च कृत्स्नस्य लोकत्रयमार्गस्य पारमश्नुथ Sy.
१३. आयुधानि भासन्त इति शेषः Sy.
१४. वात्सु P. वाक्सु D.
१५. याद० D. कटकाः Sy.
१६. रुग्माः D. हाराः Sy.
१७. मधुराप्रुषा आपः Sy.
१८. अग्निदीप्ताः Sy.
१९. P. reads बलो बाह्वाः for बाह्वोः ॥ हस्तयोर्भासन्त इत्यर्थः Sy.
२०. ०प्राश्च P. उष्णीषमय्यः Sy.
२१. ०ण्मयः P. हिरण्मयाः Sy.
२२. ०सःस्त्रा० D. VM. seems to explain शीर्षसु as शिरसस्त्राणाय ॥ शिरःसु Sy.
२३. विस्तृताः । प्रतिवाक्यं विततता इति वा सम्बन्धनीयम् Sy.
२४. प्रसिद्धम् Sy.
२५. नास्मिन्नकमस्तीति नाकः Sy.
२६. गन्तारो यूयम् Sy.
२७. असुरैरनपहृततेजस्कं तम् Sy.
२८. शुभ्रवर्णम् Sy.

कम्पयथ[1]। अथ परोक्ष —सङ्गतानि[2] भवन्ति। बलानि। दीप्यन्ते[3] च। यदा। स्वरन्ति[4]। शब्दम्[5]। विततम्[6]। उदकमिच्छन्त[7]।

युष्मादत्तस्य मरुतो विचेतसो रायः स्याम रथ्यो३ वयस्वतः।
न यो युच्छति तिष्यो३ यथा दिवो३स्मे रारन्त मरुतः सहस्रिणम्॥ १३॥

युष्मादत्तस्य। युष्माभिर्दत्तस्य[8]। हे मरुत[9]! सुमतय[10]। धनस्य। अन्नवत। रथिन[11]। स्याम[12] लभेम[13] धनेन पूर्णं रथम्। न[14]। यो[15] रयिं। गच्छति[16]। यथा। तिष्य[17] प्रज्वलित[18]। दिवो न पतति[19] त रयिम्। अस्मासु। रमयन्तु[20]। सहस्रपशुम्[21][22]।

यूयं रयिं मरुतः स्पार्हवीरं यूयमृषिमवथ सामविप्रम्।
यूयमर्वन्तं भरताय वाजं यूयं धत्थ राजानं श्रुष्टिमन्तम्॥ १४॥

यूयं रयिम्। यूयम्। धनम्। मरुत[23]। स्पृहणीयवीरम्[24]। धत्त[25]। यूयम्। ऋषिम्। रक्षथ[26]। सामविप्रं[27] नाम। यूयम्[28]। अश्वम्। भरताय[29] राज्ञे। बलवन्तम्[30]। तथा श्रुष्टिमन्त[31] च। राजान[32] धृतवन्तः[33]।

---

१. विविधं चालयथ। अयं द्विकर्मकः Sy.
२. सङ्गता बलिनो भवथ। हविर्भिरस्मद्दत्तैरिति भावः Sy. ३. दीप्ता भवथ। उभयत्र पुरुषव्यत्ययः। यद्वा यदासुरा वृजना बलैः समक्ष्यन्त अतित्विषन्त तदा Sy.
४. कुरुतेत्यर्थः Sy.
५. भयजनकं शब्दम् Sy.
६. विस्तृतम् Sy.
७. उदकमिच्छन्तो यूयम्। यद्वा उत्तरार्धं ऋत्विग्यजमानपरतया व्याख्येयः। यत् यदा ऋतायवो यज्ञकामाः यजमानादयो यदा समक्ष्यन्त सङ्गता वृजना बलान्यतित्विषन्त च स्वरन्ति घोषं स्तोत्रं विततं तदानीं पिप्पलं वि धूनुथेति सम्बन्धः Sy.
८. ०भिः तस्य P. ०भि त्तस्य D.
९. हे विविधप्रज्ञाः Sy.
१०. रथिन P. रथस्वामिनो वयम् Sy.
११. भवेम स्वामिनः Sy.
१२. लभेमहि is suggested for लभेम।
१३. P. and D. add यः before न।
१४. युष्माभिर्दत्तो रायः Sy.
१५. च्यवते Sy.
१६. आदित्यो न युच्छति Sy.
१७. या तिष्यं प्रज्वलिता P., D.
१८. दिवः सकाशात् Sy.
१९. पति P. २०. रमन्तु P. रमयत Sy.
२१. अपरिमितम् Sy.
२२. VM. ignores मरुतः।
२३. हे मरुतः! Sy.
२४. स्पृहणीयैर्वीरैः पुत्रभृत्यादिभिरुपेतम् Sy.
२५. दत्थ Sy. २६. रक्ष P. ररक्ष D.
२७. ०मपिवं P. ०विपं D. साम्नां विविधं प्रेरयितारम्। यद्वा सामसहिता विप्रा यस्य तादृशम् Sy.
२८. हे मरुतः! यूयम् Sy.
२९. देवान् बिभ्रते श्यावाश्वाय धत्थ Sy.
३०. अन्नं च Sy.
३१. सुखवन्तं पुत्रमित्यर्थः Sy.
३२. दीप्तं स्वामिनं वा Sy.
३३. धत्थ Sy.

तद्वो यामि द्रविणं सद्यऊतयो येना स्वर्णं ततनाम नृभि ।
इदं सु मे मरुतो हर्यता वचो यस्य तरेम तरसा शतं हिमाः ॥ १५ ॥

तद्वो यामि । तत् । युष्मान् । याचामि । धनम् । हे क्षिप्रगन्तारः ! येन । आदित्यं । इव । मनुष्येषु । विस्तृता भवाम । इदम् । सुष्ठु कामयत । मरुत ! मदीयम् । वचनम् । यस्य धनस्य । बलेन । शतसंवत्सरान् । तीर्णा भवाम ।

V.५५.

प्रयज्यवो मरुतो भ्राजदृष्टयो बृहद्वयो दधिरे रुक्मवक्षसः ।
ईयन्ते अश्वैः सुयमेभिराशुभिः शुभं यातामनु रथा अवृत्सत ॥ १ ॥

प्रयज्यवः । प्रकर्षेण यष्टव्या । मरुत । दीप्यमानशक्तयः । बृहत् । अन्नम् । प्रयच्छन्ति । रुक्मालङ्कृतवक्षसः । गच्छन्ति । अश्वैः । सुयमैः । क्षिप्रैः । कल्याणम् । गच्छतो मरुतः । अनुवर्तन्ते । रथाः ।

---

१. याचामहे Sy
२. तदानीमेव रक्षा येषां ते तादृशाः । सद्योगमनाः ! वा Sy.
३. धनेन Sy.
४. आदित्य इव रश्मीन् Sy.
५. रश्मीन् Sy.
६. नॄन् अस्मत्पुत्रभृत्यादीन् Sy.
७. ०त P. ततनाम Sy.
८. अवेदं P. इदानीं क्रियमाणम् Sv.
९. कामयध्वम् Sy.
१०. मम स्वभूतम् Sy.
११. स्तोत्रम् Sy.
१२. स्तोत्रवचसः Sy.
१३. शस P. VM. seems to explain शतं हिमाः together as शतसंवत्सरान् ॥ शतसङ्ख्याकान् हेमन्तान् Sy.
१४. शतसंवत्सरं जीवेमेत्यर्थः Sy.
१५. VM. ignores अभि ।
Ms. D. puts the figure ॥५४॥ here to indicate the end of the fifty-fourth hymn. No such number is given in P.
१६. 'प्रयज्यवः' इति दशर्चमेकादशं सूक्तं श्यावाश्वस्यार्षं मारुतम् । दशमी त्रिष्टुप्, शिष्टा जगत्यः । 'प्रयज्यवो दशान्त्या त्रिष्टुप्' (KSA. 27.55.p.20.) इत्यनुक्रमणिका । आभिप्लविके षष्ठेऽहन्याग्निमारुत इदं सूक्तं मारुतनिविद्धानीयम् । सूत्रितं च—'प्रयज्यव इमं स्तोममित्याग्निमारुतम्' (ĀSS. 7.7.) इति Sy.
१७. प्रयवः P., D.
१८. प्रकर्षेण यष्टारः Sy.
१९. दीप्तायुधाः Sy.
२०. प्रभूतम् Sy.
२१. यौवनलक्षणं प्रभूतमन्नं वा Sy.
२२. धारयन्ति Sy.
२३. रुक्षालं० D. हारायतवक्षस्काः । ते मरुतः Sy.
२४. प्राप्यन्ते Sy.
२५. सुखेन नियमितुं शक्यैः Sy.
२६. शीघ्रगैः Sy.
२७. शोभनं यथा भवति तथा । यद्वा उदकमभिलक्ष्य Sy.
२८. यातां गच्छतां मरुताम् Sy.

स्वयं दधिध्वे तविषीं यथा विद बृहन्महान्त उर्विया वि राजथ ।
उतान्तरिक्षं ममिरे व्योजसा शुभे यातामनु रथा अवृत्सत ॥ २ ॥

स्वयं दधिध्वे । स्वयमेव परानपेक्ष यूय सङ्घीभूता. । बलम् । धारयथ । यथा । प्रत्यक्षमह वेधि । तथा बृहन्तः । महान्त । विस्तीर्णतया । विराजथ । अपि च । अन्तरिक्षम् । बलेनेते । परिच्छिन्दन्ति ।

साकं जाताः सुभ्वः साकमुक्षिताः श्रिये चिदा प्रतरं वावृधुर्नरः ।
विरोकिणः सूर्यस्येव रश्मयः शुभे यातामनु रथा अवृत्सत ॥ ३ ॥

साकं जाताः । आदित्या एकस्मिन् काले । जाता । शोभनभवना । साकम् । च । निषक्ता । श्र्यर्थम् । च । शीघ्रम् । वृद्धाश्चासन् । नेतार । विरोचमाना । सूर्यस्येव । रश्मय आभरणै ।

आभूषेण्यं वो मरुतो महित्वनं दिदृक्षेण्यं सूर्यस्येव चक्षणम् ।
उतो अस्माँ अमृतत्वे दधातन शुभे यातामनु रथा अवृत्सत ॥ ४ ॥

आभूषेण्यम् । स्तुतिभिराभूषणीयम् । वः । मरुत । महत्वम् । दर्शनीय च । सूर्यस्येव । तेज । अपि च । अस्मान् । अमृतत्वे । स्थापयथ ।

---

१. हे मरुतः ! यूयम् Sy.
२. असहायेनैव Sy.
३. सखीभू० P.
४. बलं सामर्थ्यम् Sy.
५. धारयध्वे कुरुध्व इत्यर्थः Sy.
६. जानीथ । अप्रतिबद्धसामर्थ्या इत्यर्थः Sy.
७. हे महान्तः ! यूयम् Sy.
८. उरवः सन्तः Sy.
९. बाले० P., D.
१०. ०च्छ० D. व्याप्नुथ Sy.
११. सहैव Sy.
१२. उत्पन्नाः Sy.
१३. सुष्ठु भवन्तः । महान्त इत्यर्थः Sy.
१४. कं D.
१५. एव Sy.
१६. सेक्तारो वर्षकाः Sy.
१७. श्रियर्थं P., D. शोभायाः Sy.
१८. आ सर्वतः Sy.
१९. प्रकृष्टतरम् Sy.
२०. अवर्धयन् Sy.
२१. कर्मणां नेतारः Sy.
२२. सूर्यरश्मय इव Sy.
२३. अभ० D.
२४. ०भूष० D.
२५. ०तिराभू० P., D. स्तुत्यम् Sy.
२६. युष्माकम् Sy.
२७. ०त्वम् is suggested for ०त्वम् ।
२८. तेजोभिः P. तेजोभि D.
रूपमिव Sy.
२९. वि D.
३०. मोक्षे स्वर्गे इत्यर्थः Sy.
३१. ०यत P.

उदीरयथा मरुतः समुद्रतो यूयं वृष्टिं वर्षयथा पुरीषिणः ।
न वो दस्रा उप दस्यन्ति धेनवः शुभं यातामनु रथा अवृत्सत ॥ ५ ॥

उदीरयथ[1] । उद्गमयथ । हे मरुतः ! समुद्रतः[4] । यूयम् । वृष्टिम्[5] । वर्षयथ[6] मेघान् । उदकवन्तः[7] ! न[8] । युष्माकम्[9] । दर्शनीयाः[10] मेघरूपाः । धेनवः[11] । शुष्यन्ति[12] ।[13]

यदश्वान्धूर्षु पृषतीरयुग्ध्वं हिरण्ययान्प्रत्यष्काँ अमुग्ध्वम् ।
विश्वा इत्स्पृधो मरुतो व्यस्यथ शुभं यातामनु रथा अवृत्सत ॥ ६ ॥

यदश्वान्[14] । यथा[15] । अश्वान् । रथधूर्षु[16] । पृषतीश्च[17] । अयुग्ध्वम्[18] । यदा च हिरण्मयान्[19] । अष्कान् कवचान् अङ्गेषु प्रत्यमुग्ध्वम्[20] । तदनन्तरं[21] सर्वान् । एव[22] । शत्रून्[23] । मरुतः ! उत्क्षिपथ[24] ।

---

१. कारीर्यां प्रथमस्याः पिण्डघाः 'उदीरयथा' इत्यनुवाक्या । सूत्रितञ्च—'उदीरयथा मरुतः समुद्रतः प्र वो मरुतस्तविषा उदन्यवः' (ĀSS.2.13.) इति Sy.

२. ०वीय० D.

३. ०मनय० P. प्रेरयथ Sy. प्रेरयथ वृष्टिम् BB.

४. समुद्रवणसाधनादन्तरिक्षात् Sy. समुन्दनान्मेघात् BB.

५. वृष्टीः P. अयमेवार्थः पुनरुच्यते Sy.

६. ततो वर्षयथ पर्जन्यात् BB.

७. अयमेवार्थः पुनरुच्यते—हे पुरीषिणः ! पृणतेः प्रीणातेर्वा पुरीषमुदकम् । हे तद्वन्तः ! यूयम् Sy. हे पुरीषिण उदकवन्तः ! उदकेन हि सर्वं पूर्यते BB.

८. न हि BB.

९. वो युष्मदीयाः BB.

१०. शत्रुणामुपक्षपयितारो वा Sy. वंसनशीला वानशीला वा BB.

११. प्रीणयितारो मेघाः Sy. प्रीणनहेतवोऽपः BB.

१२. उपक्षीयन्ते....अतो वर्षयतेति BB.

१३. VM. ignores शुभम् । etc. रथा रंहणशीला यातां गतिं कालानुकूलप्रवृत्तां शुभं शोभाम् । सम्पदादिलक्षणः क्विप् । अनुवर्तध्वम् । यद्वा यातां गतिं शुभमनुवर्तध्वम् । सुष्ठु अविच्छेदं कुरुध्वम् । पूर्वप्रवृत्तमार्गं मा मुञ्चत । यस्मादिदानीमपि रंहणाः स्थ । तस्माच्छक्तत्वात् स्वभावो न त्याज्य इति BB. This stanza=TS.2.4.8.2.

१४. हे मरुतः ! यूयम् Sy.

१५. यदा is suggested for यथा ।

१६. रथसम्बन्धिनीषु Sy.

१७. वृष० P. ०तीश्च D. पृषत्यो मरुतामित्युक्तत्वात् (Ngh. 1.15.) । पृषद्वर्णा वडवाः । सारङ्गी वात्राश्वशब्दवाच्या Sy.

१८. युद्धं P. अयुध्वं D.
योजितवन्तः स्थ Sy.

१९. हिरण्यवर्णान् Sy.

२०. ०मुध्वं P. प्रत्यमुञ्चत Sy.

२१. तदन्तरं P. एवं कृत्वा Sy.

२२. अपि Sy.

२३. सङ्ग्रामान् Sy.

२४. विक्षिपथ Sy.

न पर्वता न नद्यो वरन्त वो यत्राचिध्वं मरुतो गच्छथेदु तत् ।
उत द्यावापृथिवी याथना परि शुभं यातामनु रथा अवृत्सत ॥ ७ ॥

न पर्वताः । न । वारयन्ति । पर्वताः । नद्यश्च । युष्मान् । यत्र गन्तुम् । सङ्कल्पयथ । तत्र । गच्छथ । एव । हे मरुत ! अपि च । द्यावापृथिवी च । परित । गच्छथ ।

यत्पूर्व्यं मरुतो यच्च नूतनं यदुद्यते वसवो यच्च शस्यते ।
विश्वस्य तस्य भवथा नवेदसः शुभं यातामनु रथा अवृत्सत ॥ ८ ॥

यत् पूर्व्यम् । यत् । प्रत्न भवता कर्म । यत् । च । नूतनम् । हे वासयितारः ! यद् ऋग्भिः । अभिधीयते । यत् । च । शस्त्रैः शस्यते । सर्वस्य । तस्य । भवथ । ज्ञातारः ।

मृळत नो मरुतो मा वधिष्टनास्मभ्यं शर्म बहुलं वि यन्तन ।
अधि स्तोत्रस्य सख्यस्य गातन शुभं यातामनु रथा अवृत्सत ॥ ९ ॥

मृळत । सुखयत । अस्मान् । मरुत ! मा च । हत । अस्मभ्यम् । सुखम् । बहुलम् । विविध यच्छत । अधिगच्छत च । स्तोत्रम् । सख्य च ।

यूयमस्मान्नयत वस्यो अच्छा निरंहतिभ्यो मरुतो गृणानाः ।
जुषध्वं नो हव्यदातिं यजत्रा वयं स्याम पतयो रयीणाम् ॥ १० ॥

यूयम् । यूयम् । अस्मान् । अभिनयत । अभ्युदयम् । प्रति । पापेभ्यः । निर्नयत । मरुतः !

---

१. पार० D. वारयन्तु Sy.
२. शिलोच्चयाः Sy. ३. ष्माकन् P.
४. यज्ञावस्थाने Sy.
५. संकंप० P. जानीथ सङ्कल्पयथ Sy.
६. तत्स्थानम् Sy.
७. ०थः P. थाथ वृष्टयर्थमिति Sy.
८. VM. ignores न । उ and शुभं etc.
९. पूर्वतनं पूर्वमनुष्ठितम् Sy.
१०. कर्मास्ति तदित्यर्थः Sy.
११. वास वास० P., D. हे वासकाः ! Sy.
१२. ऋग्भिः P.
१३. ऊर्ध्वं प्राप्यते स्तूयत इत्यर्थः Sy.
१४. शंसनं क्रियते Sy. १५. उक्तस्य Sy.
१६. Omitted by P. १७. जानन्तः Sy.
१८. VM. ignores मरुतः and शुभं etc.
१९. ०तः P.
२०. असम्यक्करणाविजनितेन कोपेन मा वधिष्वम् Sy. २१. हातस्म० P.
२२. ०ह० D. अत्यधिकम् Sy.
२३. P. reads विविधं बहुलं for बहुलम् । विविधम् ॥ कुरुत Sy. २४. स्तुतिमनुभूयास्मासु सख्यं कुरुतेत्यर्थः Sy. २५. व P.
२६. अभियत P. अभिलक्ष्य प्रापयत Sy.
२७. वस्यः वसीयो धनं स्वर्गादिलक्षणं स्थानं वा Sy.
२८. ०भ्य P. किञ्च पापेभ्यः Sy.
२९. निर्गमय P. निर्नमयत D. निर्गमयत Sy.

स्तूयमानाः[1] ! सेवध्वं च । नः[2] । हविषां[3] दानम् । हे यष्टव्याः[4] ! वयमिति गतम् ।

V.56.

अग्ने शर्धन्तमा गणं पिष्टं रुक्मेभिरञ्जिभिः ।
विशो अद्य मरुतामवं ह्वये दिवश्चिद्रोचनादधि ॥ १ ॥

अग्ने । अग्ने ! वेगमनुतिष्ठन्तम्[5] । आभिमुख्येन[6] । दिवोऽवह्वयामि[7] । गणम्[10] । पिष्टम्[11] अलिप्तम् रुक्ममयैः[12] । आभरणैः । अस्मिन्नहनि[13] । दिव[14] । रोचमाना[15] । मनुष्या[16] वयमिति ?[17] ।

यथा चिन्मन्यसे हृदा तदिन्मे जग्मुराशसः ।
ये ते नेदिष्ठं हवनान्यागमन्तान्वर्ध भीमसंदृशः ॥ २ ॥

यथा चित् । अग्ने ! त्वम् । यथा[19] । पूजयसि मरुतः । हृदयेन तथा । तदा[21] । एव । मे[22] । गच्छन्तु मरुतः । आशसनीयाः[23] । ये[24] । तव । समीपम्[25] । हवींषि[26] च । आगच्छन्ति । तान् । वर्धय[27] । भीमरूपान्[28] ।[29]

---

१. गृणानाः स्तूयमानाः । कर्मणि कर्तृप्रत्ययः Sy.
२. अस्माकम् Sy.
३. हविर्वानवन्तं यज्ञम् Sy.
४. हे यष्टव्याः ! यूयम् Sy.
५. VM. ignores वयम् । स्याम । पतयः । रयीणाम् ॥ वयं च रयीणां बहुविधानां धनानां पतयः स्याम भवेम Sy.
Ms. D. puts the figure ॥५५॥ here to indicate the end of the fifty-fifth hymn. No such number is given in P.
६. 'अग्ने शर्धन्तम्' इति नवर्चं द्वादशं सूक्तं श्यावाश्वस्यार्षं मारुतम् । तृतीयासप्तम्यौ सतोबृहत्यौ शिष्टा बृहत्यः । 'अग्ने नव बार्हतं तृतीयासप्तम्यौ सतोबृहत्यौ' (KSA.27.56.p.21.) इत्यनुक्रमणिका Sy.
७. शत्रूनभिभवन्तं यज्ञायोत्सहमानं वा Sy.
८. आह्वयेति शेषः Sy.
९. ०ह्वामि P. अवस्तादस्मदभिमुखं ह्वये आह्वयामि Sy.
१०. मरुतां गणम् Sy.
११. अवयवितम्, युक्तमित्यर्थः Sy.
१२. रुक्म० is suggested for रुग्म० ॥ रुक्मैः रोचमानैः Sy.
१३. अस्मिन् यागदिने Sy.
१४. द्युलोकात् Sy.
१५. ०मानात् is suggested for ०माना ।
१६. प्रजाः । गणानित्यर्थः Sy.
१७. यमि० P.
१८. VM. ignores मरुताम् । चित् and अधि ॥ अधीति पञ्चम्यर्थानुवादी । चित् पूरणः Sy. १९. येन प्रकारेण Sy.
२०. अतिपूजितं जानासि । तेष्वावरं करोषीत्यर्थः Sy. २१. तथा Sy.
२२. मदर्थम् Sy.
२३. ०शंस० is suggested for ०शास० ॥ आशंसितार इच्छन्तः शत्रून् हिंसन्तो वा Sy.
२४. अनन्तरं ये मरुतः Sy.
२५. अत्यन्तान्तिकं सन्निधावेव Sy.
२६. आह्वानानि श्रुत्वा Sy.
२७. वर्धय हविष्प्रापणेन Sy.
२८. कालविलम्बासहनेन भयङ्करदर्शनान् Sy.
२९. VM. ignores चित् ॥ चिद् इति पूजायाम् Sy.

मीळ्हुष्मतीव पृथिवी पराहता मर्दन्त्येत्यस्मदा ।
ऋक्षो न वो मरुतः शिमीवाँ अमो दुधो गौरिव भीमयुः ॥ ३ ॥

मीळ्हुष्मतीव । भर्तृमतीव स्त्री । भवद्भि पराहता । पृथिवी । माद्यन्ती । आगच्छति । अस्मान् सम्यपूर्णा । हे मरुत ! भवताम् । बलम् । ऋक्षं । इव भयङ्करम् । उत्क्षेपणकर्मवत् । दुर्धर च । गौरिव । भीमयु भययुक्तो भयङ्कर ऋषभ इव ।

नि ये रिणन्त्योजसा वृथा गावो न दुर्धुरः ।
अश्मानं चित्स्वर्यं पर्वतं गिरिं प्र च्यावयन्ति यामभिः ॥ ४ ॥

नि ये । निगच्छन्ति । ये । बलेन । अनायासेन । बलीवर्दा । इव । दुर्धुर, ये युक्ता धुर उत्क्षिपन्ति ते दुर्धुर उच्यन्ते ते । व्याप्तम् । स्वरणकुशलम् । मेघम् । शिलोच्चयम् । च । प्रच्यावयन्ति । गमनै ।

उत्तिष्ठ नूनमेषां स्तोमैः समुक्षितानाम् ।
मरुतां पुरुतमममपूर्व्यं गवां सर्गमिव ह्वये ॥ ५ ॥

उत्तिष्ठ । उत्तिष्ठ । क्षिप्रम्, आसीनेति समीपस्थामाह । स्तोमै । ससिक्तानाम् । एषाम् ।

---

१. मीळ्हुषः P. मीळ्हुः D.
२. प्रबलस्वामिका Sy
३. अन्यैरभिभूता Sy.
४. अत्र पृथिवीशब्दस्तदधिष्ठितां प्रजां लक्षयति । सा यथा स्वस्वामिनमुपद्रुताभिगच्छति तद्वदिति । मरुतां साकल्येन सर्वथा प्राप्तेर्वृष्टान्तः Sy.
५. हृष्यन्ती मरुत्सेना Sy.
६. ०र्ण P., D.
७. युष्माकम् Sy
८. बलं गणः Sy
९. अग्निः Sy.
१०. कर्मवान् Sy.
११. उक्षेपणकर्म वर्ध० P. दुर्धरः Sy.
१२. गो० P.
१३. भीमैर्वृषभैर्युक्तो गौरिव स यथा शिमीवान् कर्मवान् Sy.
१४. हिंसन्ति शत्रून् Sy
१५. मरुतः Sy.
१६. स्वीयेन बलेन Sy.
१७. स्वसञ्चारमात्रेण Sy.
१८. बलि० P. गावः Sy.
१९. दुर्धरः P दुःखेन हिंस्या अश्वा इव ते मरुतः Sy २०. दुर्धरः P., D.
२१. शब्दयन्तम् Sy
२२. जगत्पूरकोदकवन्तम् । 'पर्ववान् पर्वतः । पर्व पुनः पृणातेः प्रीणातेर्वा' (N.1.20.) इति निरुक्तम् । तादृशम् Sy.
२३. मेघम् । यद्वा पर्वतमिति विशेष्यं गिरिमिति विशेषणम् । निगिरत्युदकमिति गिरिः । तम् Sy.
२४. प्रच्यावयन्ति उदकनिर्गमनार्थम् Sy.
२५. ०ष्ठः P.
२६. हे मरुतः ! यूयम् Sy.
२७. उत्तिष्ठत । व्यत्ययेनैकवचनम् Sy.
२८. निश्चयम् Sy.
२९. ०मह P.
३०. स्तोत्रैः । यद्वा स्तोमैरुपह्वय इति सम्बन्धः Sy.
३१. वर्धितानाम् Sy.

मरुताम्[1]। बहुतमम्[2]। नूतन[3] गणम्। गवामिव[4]। सङ्घम्। आह्वयामि[5]।

युङ्ग्ध्वं ह्यरुषी[6] रथे युङ्ग्ध्वं रथेषु[7] रोहितः[8]।
युङ्ग्ध्वं हरी[9] अजिरा[10] धुरि वोळ्हवे[11] वहिष्ठा[12] धुरि वोळ्हवे॥ ६॥

युङ्ग्ध्वम्[13]। युङ्ग्ध्वम्। आरोचमाना वडवाः[14]। रथे। रोहितवर्णाश्च[15]। युङ्ग्ध्व च। अश्वौ[16]। गमनशीलौ[17]। धुरि। वहनाय। वोढृतमौ[18]।

उत स्य वाज्यरुषस्तुविष्वणिरिह स्म धायि दर्शतः[19]।
मा वो यामेषु[20] मरुतश्चिरं करत्प्र तं रथेषु[21] चोदत॥ ७॥

उत स्य। अपि च। सः। अश्वः[22]। आरोचमान। बहुशब्दः[23]। इह धुरि। निधीयताम्[24]। दर्शनीयः[25]। मा। युष्माकम्। यामेषु[26]। स[27] वाजी कालदैर्घ्यम्[28]। करोतु। तदर्थं तम्[29]। रथेषु[30]। प्रचोदत युङ्ग्ध्वमिति[31]।

---

१. तावृशां मरुताम् Sy.
२. ०तम P. प्रभूततमम् Sy.
३. न विद्यते पूर्वो येभ्यस्तमपूर्व्यम् Sy.
४. उदकानां प्रसिद्धानां गवां वा Sy.
५. आह्वये Sy.
६. युङ्ध्वं P., D. योजयध्वम् Sy.
७. हे मरुतः ! यूयम् Sy.
८. युङ्ध्वं P., D. योजयध्वम् Sy.
९. वधव P. वधव D.
१०. युष्मदीये। सर्वेषां साधारणभूते Sy.
११. होतितवर्णाश्च P. ०र्णाश्च D.
१२. श्वो P. अश्वो D.
१३. अजिरावाशुगमनौ Sy.
१४. ०लो P., D.
१५. अश्वौ Sy.
१६. VM. ignores हि and explains रथेषु। धुरि। युङ्ध्वम् and वोळ्हवे once only. तथा रथेषु युष्मदीयेषु। आवरार्थं पुनर्वचनम् Sy.
१७. वेजनवान् Sy.
१८. प्रभूतध्वनिरश्वः। अरुष इत्यनेन रोहित इत्युक्तं भवति। 'प्रष्टिर्वहति रोहितः' (ṚV.I. 39.6.) इति ह्युक्तम् Sy.
१९. इदानीम् Sy.
२०. ०ता P. रथे नियोजितः Sy.
२१. वृशनिश P. दर्शनीयः सन् Sy.
२२. गमनेषु Sy.
२३. अश्वः Sy.
२४. विलम्बम् Sy.
२५. त P., D.
२६. रथे युक्तमिति शेषः Sy.
२७. प्रयोक्त P. प्रेरयत। यथा विलम्बं न कुर्यात्तथा प्रेरयत Sy.
२८. युङ्ध्व० P., D.
२९. VM. ignores स्म॥ स्म इति पूरणः Sy.

रथं नु मारुतं वयं श्रवस्युमा हुवामहे ।
आ यस्मिन्तस्थौ सुरणानि बिभ्रती सचा मरुत्सु रोदसी ॥ ८ ॥

रथम् । रथम् । क्षिप्रम् । मारुतम् । वयम् । स्तोतृणामन्नेच्छम् । आह्वयाम । आतिष्ठति । यस्मिन् । सुरमणीयानि धनान्युदकानि वा । धारयन्ती । सह । मरुत्सु । रुद्रस्य पत्नी मरुतां माता ।

तं वः शर्धं रथेशुभं त्वेषं पनस्युमा हुवे ।
यस्मिन्त्सुजाता सुभगा महीयते सचा मरुत्सु मीळ्हुषी ॥ ९ ॥

तं वः शर्धम् । तम् । व । वेगम् । रथे शोभमानम् । दीप्तम् । स्तुतिकामम् । आह्वयामि । यस्मिन् । शोभनजनना । सुधना । स्तूयते । सह । मरुत्सु स्थिता । मीळ्हुष. पत्नी । निरुक्त द्रष्टव्यम् ।

---

१. Omitted by P. श्यावाश्वस्यार्षम् Dur. श्यावाश्वस्य SKN.

२. रंहणस्वभावम् Sy. रंहतेर्गतिकर्मणो रथस्तं मेघम् SKN. ३. ०प्र P. नु अद्य Sy. स्तोता ब्रवीति नु क्षिप्रम् Dur.

४. मरुतां सम्बन्धिनं रथम् Sy. मरुत्संयुक्तम् Dur. मरुतां सम्बन्धिनम् SKN.

५. आत्रेयाः Sy.

६. यशस्विनम् Dur. तेन सम्बन्धेन घनकलकल-लक्षणेन. . .श्रवस्युं श्रवणीयम् SKN.

७. आह्वयः P. 'ह्वः सम्प्रसारणम्' बाहुलकेन गुणाभावेन । तत उवङ् । आह्वयामहे SKN.

८. आस्थितवती तं रथमाहुवे Sy. यस्मिन् किमिति? ....यस्मिन्नातिष्ठति Dur. आ तस्थाविति सम्बन्धः. . . .आभिमुख्येन तिष्ठति SKN.

९. रथे Sy., SKN. रंहणे गमने Dur.

१०. सर० P. सुष्ठु रमणीयानि Dur., SKN.

११. सकान्यु० P. धकान्यु० D.

१२. जलानि Sy. कानि ? सामर्थ्याद्युदकानि Dur., SKN.

१३. धारयन्त्यातिष्ठतीति । तं वयं मेघं रथमाह्वयामहे वर्षार्थम् Dur. १४. सहिता Sy.

१५. सहिता मरुद्भिः Dur. सप्तमी तृतीयार्थे । मरुद्भिः सह SKN.

१६. यद्वा रुद्रो वायुः । तत्पत्नी माध्यमिका देवी Sy. का ? रोदसी रुद्रस्य पत्नी माध्यमिका वाक् । अध्यायपरिसमाप्तिसूचनार्थः द्विरुक्तिरिति सिद्धम् SKN.

१७. रथं क्षिप्रं मारुतं (मेघं) वयं श्रवणीयमाह्वयामहे । आ यस्मिंस्तस्थौ सुरमणीयान्युदकानि बिभ्रती सचा मरुद्भिः सह रोदसी ॥ N.11.50., SKN.IV.95. १८. त P.

१९. हे मरुतः ! Sy. २०. शर्धम् Sy.

२१. तपः P. युष्मदीयम् Sy.

२२. बलं गणम् Sy.

२३. शोभनमान P. रथे शोभनम् Sy.

२४. स्तुत्यम् Sy. २५. आह्वये Sy.

२६. शर्धे Sy. २७. सुष्ठु प्रवृद्धा Sy.

२८. शोभनभाग्यातिमहती Sy.

२९. पूज्यते तं शर्धमाहुवे Sy.

३०. 'मीळ्हुष्टम शिवतम' इत्यादौ दर्शनान्मीढ्वान् रुद्रः तत्पत्नी मीळ्हुषी । आपस्तम्बोऽपि रुद्रपत्नीं मीळ्हुषीसंज्ञया व्याजहार—'उत्तरया दक्षिणस्यामीशानमावाहयति लौकिक्या वाचोत्तरस्यां मीळ्हुषीं मध्ये जयन्तम्' (AGS.20.1.3.) इति Sy. ३१. The stanza is not found in the N. I wonder if the words निरुक्तं द्रष्टव्यम् are misplaced and originally were put after मरुतां माता in stanza no. 8.

३२. Ms. D. puts the figure ॥५६॥ here to indicate the end of the fifty-sixth hymn. No such number is given in P.

V.५७.

आ रुद्रास इन्द्रवन्तः सजोषसो हिरण्यरथाः सुविताय गन्तन ।
इयं वो अस्मत्प्रति हर्यते मतिस्तृष्णजे न दिव उत्सा उदन्यवे ॥ १ ॥

आ[1] रुद्रासः । आगच्छत । रुद्रपुत्रा. ! इन्द्रेण[2] सहिताः । सङ्गता.[3] । हिरण्मयरथाः[4] । सुप्रसूताय[5] कर्मणे । युष्मान्[6] । अस्मदीया । इयम्[7] । स्तुतिः । प्रतिकामयते[8] । यथा । तृष्णजे तृष्णा जाता यस्य तस्मै[9] । उदकमिच्छते[10] । दिव[11] । मेघा[12] आगच्छन्ति तद्वदागच्छतेति ।

वाशीमन्त ऋष्टिमन्तो मनीषिणः सुधन्वान इषुमन्तो निषङ्गिणः ।
स्वश्वाः स्थ सुरथाः पृश्निमातरः स्वायुधा मरुतो याथना शुभम् ॥ २ ॥

वाशीमन्तः[13] । वास्यायुधयुक्ता. । शक्तिमन्त[14] । प्रज्ञा[15] । शोभनधनुष्काः[16] । इषुमन्तः[17] । इषुधिमन्तः[18] । स्वश्वाः[19] । स्थ[20] । सुरथा[21] । हे गोमातर[22] ! इत्थम् । स्वायुधा.[23] । यूयम्[24] । गच्छथ[25] । कल्याणम्[26] ।

---

१. पञ्चमेऽनुवाके षोडश सूक्तानि। तत्र 'आ रुद्रासः' इत्यष्टर्चं प्रथमं सूक्तं श्यावाश्वस्यार्षं मारुतम्। सप्तम्यष्टम्यौ त्रिष्टुभौ शिष्टाः षट् जगत्यः। 'आ रुद्रासोऽष्टौ त्रिष्टुबन्तम्' (KSA.27.57. p.21.) इत्यनुक्रमणिका। विनियोगो लैङ्गिकः Sy.

२. इन्द्रेण युष्मत्स्वामिना तद्वन्तः Sy.

३. परस्परं समानप्रीतयः Sy.

४. हिरण्मयरथाः सन्तः Sy.

५. सुगमनाय तत्साधनाय सुष्ठु सर्वैर्गन्तव्याय यज्ञाय तदर्थम् Sy.

६. ०ष्मद् P.

७. किमत्र विद्यते ? इति तदुच्यते इयमिति Sy.

८. तस्मादागच्छत Sy.

९. तस्य D. गोतमाय Sy.

१०. उदकेच्छवे Sy.

११. द्युलोकसकाशात् Sy.

१२. उत्सा उदकनिष्यन्दा यथा युष्माभिः प्रेरितास्तद्वदस्मदर्थमप्यागत्याभिमतं ददतेत्यर्थः Sy.

१३. हे मरुतः ! यूयम् Sy.

१४. वाशीति तक्षणसाधनमायुधम्। तद्वन्तः स्थ Sy.

१५. ऋष्टिर्नाम छुरिका तद्वन्तः स्थ, एवं सर्वत्र योज्यम् Sy.

१६. मनस ईश्वरा मनस्विनः Sy.

१७. ०मन्तः is suggested for ०मन्त ॥ बाणवन्तः Sy.

१८. निषङ्गवन्तः Sy.

१९. स्वश्वास्वस्व P.
शोभनाश्वा भवथ Sy.

२०. भवथ Sy.

२१. शोभनरथाः Sy.

२२. पृश्नेः पुत्राः Sy.

२३. सायु० P. खड्गपरश्वादिसकलायुधोपेताः। एवं महात्मानः सन्तः Sy.

२४. यूयम् seems to be the explanation of मरुतः ।

२५. गच्छ P. रथेन गच्छथ Sy.

२६. शोभनं यथा भवति तथा शुभमुदकाय वा Sy.

धूनुथ द्यां पर्वतान्दाशुषे वसु नि वो वना जिहते यामनो भिया ।
कोपयथ पृथिवीं पृश्निमातरः शुभे यदुग्राः पृषतीरयुग्ध्वम् ॥ ३ ॥

धूनुथ[1] । कम्पयथ[2] । दिवम्[3] । मेघाश्च । यजमानाय[5] । धनम्[6] । तथा युष्माकम् । गमनात्[7] । भयेन[8] । वृक्षाः । निजहते[9] नीचीन[10] गच्छन्ति । कोपयथ[12] । पृथिवी वृक्षयुक्ताम् । गोमातर[11]. ! उदकाय[14] । यदा । उग्राः[15] । पृषतीः[16] । अयुग्ध्वम्[17] ।

वातत्विषो मरुतो वर्पनिर्णिजो युमाइव सुसंदृशः सुपेशसः ।
पिशङ्गाश्वा अरुणाश्वा अरेपसः प्रत्वक्षसो महिना द्यौरिवोरवः ॥ ४ ॥

वातत्विषः[18] । निर्गच्छद्दीप्तयः[19] । मरुत[20] । वर्षरूपाः[21] । यमलजाता[22] इव । अत्यन्त सदृशाः[23] । सुरूपा[24]. । तेषु केचित् पिशङ्गाश्वाः[25] । केचिदरुणाश्वा. । अपापा । प्रकर्षेण शत्रूणा तनूकर्तारः[26] । महत्त्वेन[27] । द्यौरिव[28] । विस्तीर्णा[29] ।

---

१. धूनु० P.
२. हे मरुतः ! Sy.
३. प्रापयथ Sy.
४. दिवीत्यर्थः Sy.
५. हविर्दात्रे यजमानाय Sy.
६. धनानि च Sy.
७. गमनस्य Sy.
८. भीत्या Sy.
९. वनानि वृक्षादिसमूहाः Sy.
१०. निजिह० is suggested for निजह० ॥ नितरां कम्पन्ते अवनता भृशं शंसन्तीत्यर्थः Sy.
११. निपीनं P.
१२. अतिवृष्ट्या क्षोभयथ Sy.
१३. हे पृश्नेः पुत्राः ! 'पृश्नियै वै पयसो मरुतो जाताः' (TS.2.2.11.8.) इति हि श्रुतिः Sy.
१४. उदकार्थम् Sy.
१५. ०ग्रा D. हे उद्गूर्णबलाः ! यूयम् Sy.
१६. वृष० P. युष्मदीया अश्वाः Sy.
१७. अयूयुग्ध्वम् P. योजयथ तदा कोपयथ पृथिवीम् Sy.
१८. पात० D.
१९. ०च्छन्ति दीप्तायः P. सर्वदा सम्प्राप्तदीप्तयः Sy.
२०. Omitted by P.
२१. वषरु० P. वृष्टेः शोधयितारः 'अथवा निर्णिगिति रूपनाम (Ngh. 3.7.1.) वर्षमेव रूपं येषां ते तादृशा वृष्टिप्रदा इत्यर्थः Sy.
२२. युगलोत्पन्ना इव Sy.
२३. परस्परबललरूपादिभिरत्यन्तं सरूपाः Sy.
२४. शोभनरूपाः Sy.
२५. विशगाः अश्वाः P. ०शंगा अश्वा D. पिशङ्गवर्णाश्वोपेताः Sy.
२६. प्रकृष्टं तनूकर्तारो द्वेष्टृणाम् Sy.
२७. ०त्त्वेन is suggested for ०त्वेन ।
२८. अन्तरिक्षमिव Sy.
२९. ०र्णाः is suggested for ०र्णा ॥ विस्तीर्णाः । उक्तलक्षणा 'नाम भेजिरे' इत्युत्तरेण सम्बन्धः Sy.

पुरुप्रुष्पा अञ्जिमन्तः सुदानवस्त्वेषसंदृशो अनवभ्ररार्धसः ।
सुजातासो जनुषा रुक्मवक्षसो दिवो अर्का अमृतं नाम भेजिरे ॥ ५ ॥

पुरुप्रुष्पाः । अनेकोदकविन्दव[1] । आभरणवन्त । सुदानाः[2] । दीप्तसन्दर्शना[3] । अनपभ्रंशितयजमानधनाः[4] । जन्मनैव[5] । शोभनाः[6] । रुक्मालङ्कृतवक्षस[7] । द्युलोकस्य[8] । अर्चनीयाः[9] । अमरणसाधनम् । उदकम्[10] । भजन्ते[11] ।

ऋष्टयो वो मरुतो अंसयोरधि सह ओजो बाह्वोर्वो बलं हितम् ।
नृम्णा शीर्षस्वायुधा रथेषु वो विश्वा वः श्रीरधि तनूषु पिपिशे ॥ ६ ॥

ऋष्टयः[12] । युष्माकम् । असयोः[13] । अधिहिता[14] । ऋष्टयः[15] । तथा बाह्वोः[16] । सह[17] । ओजः[18] । बलम्[19] । इति त्रीणि निहितानि[20] तेषामल्पो भेदः[21] । शीर्षसु[22] । नृम्णानि निहितानि नृम्णमिति धननाम[23] हिरण्मयशिप्रा हिता इत्यर्थः । रथेषु च । आयुधानि[24] । सर्वा[25] । युष्माकम् । अङ्गेषु[26] । श्रीः[27] । आश्लिष्टाभरणैरलङ्कृतानामिति[28][29][30][31] ।

---

१. प्रभूतोदकाः Sy.
२. शोभनदानाः Sy.
३. दीप्तरूपाः Sy.
४. आपभ्रंशितजनधनाधनाय P.
अपभ्रंशितयजमानधनाधनाः D. अनवभ्रष्टधनाः Sy.
५. जन्मनैवोक्तरूपाः Sy.
६. ०न P. शोभनजननाः Sy.
७. लंकारव० P.
हारवक्षस्काः Sy.
८. द्युलोकादागत्य Sy.
९. ०य P. पूज्या मरुतः Sy.
१०. उदकं नमनहेतुकमुक्तलक्षणं हविर्वा Sy.
११. लब्धवन्तः Sy.
१२. अधीति सप्तम्यर्थानुवादी । हिताः आश्रिताः । वक्ष्यमाणहितशब्दो विपरिणन्तव्यः Sy.
१३. आयुधविशेषाः Sy.
१४. अधि Sy.
१५. स P., D. शत्रूणामभिभावुकम् Sy.
१६. ओजो नामाष्टमो धातुः । तद्रूपम् Sy.
१७. निहितम् Sy.
१८. The passage तेषामल्पो भेदः refers to सहः, ओजः and बलम् ।
१९. शिरःसु Sy.
२०. हिरण्ययानि पट्टोष्णीषादीनि निहितानि Sy.
२१. P. reads ति only for निहितानि नृम्णमिति ।
२२. धनाम P. Ngh. 2.10.
२३. ०यः शि० P. ०यं शि० D.
२४. युद्धसाधनानि निहितानि Sy.
२५. सार्वा D.
२६. अङ्गेषु कामंगोषु P.
तनूषु युष्मदीयेषु Sy.
२७. कान्तिः Sy.
२८. अधिष्ठिता आश्रिता Sy.
२९. ०ष्ट भ० P.
३०. The passage आभरणैरलङ्कृतानाम् should immediately follow युष्माकम् and precede अङ्गेषु ।
३१. VM. ignores मरुतः ।

गोमदश्वावद्रथवत्सुवीरं चन्द्रवद्राधो मरुत ददा नः।
प्रशस्तिं नः कृणुत रुद्रियासो भक्षीय वोऽवसो दैव्यस्य ॥ ७ ॥

गोमत्। गवादियुक्तम्[1]। धनम्[2]। अस्मभ्यम्। मरुत[3]! दत्त चन्द्रं हिरण्यम्। प्रशस्तिम्[5]। अस्माकम्[6]। कृणुत। रुद्रपुत्राः! जनेषु भजेयाहम्। युष्माकम्[8]। रक्षणम्[9]। देवार्हम्[10]।

हुये नरो मरुतो मृळता नस्तुविमघासो अमृता ऋतज्ञाः।
सत्यश्रुतः कवयो युवानो बृहद्गिरयो बृहदुक्षमाणाः ॥ ८ ॥

हुये[11]। हुये इति निपातोऽयमामन्त्रितवत् पर सम्बोधयत्यविद्यमानवच्च[12] भवति। हुये[13]! नेतारः! मरुतः! सुखयत[14]। अस्मान्। बहुधनाः[15]। अमरणाः[16]। सत्यप्रज्ञाः[17]। सत्यस्य श्रोतारः[18]। कवयः[20]। युवानः[21]। महामेघाः[22]। अत्यन्तम्[23]। सिञ्चन्तः[24]।[25]

V.58.

तमु नूनं तविषीमन्तमेषां स्तुषे गणं मारुतं नव्यसीनाम्।
य आशवश्चा अर्वद्वहन्त उतेशिरे अमृतस्य स्वराजः ॥ १ ॥

तमु[26] नूनम्[27]। तम्। एव[28]। सम्प्रति[29]। बलवन्तम्। एषाम्। मरुताम्[30]। गणम्। स्तौमि[31]।

---

१. आदि refers to अश्व, रथ, वीर and चन्द्र ॥ बहुभिर्गोभिरुपेतम्। अश्ववत्, बहुभिरश्वैरुपेतम्। रथवत् रथोपेतम्। सुवीरं सुष्ठु पुत्रोपेतम्। चन्द्रवत् हिरण्योपेतम् Sy.
२. अन्नम् Sy.
३. ददत। व्यत्ययेनैकवचनम्। अथवा लोडर्थस्य लिटो मध्यमबहुवचनम् Sy.
४. चन्द्रमिति हिरण्यनाम Ngh. 1.2.
५. समृद्धिमित्यर्थः। ताम् Sy.
६. अस्मां P., D. अस्मदीयाम् Sy.
७. हे मरुतः! Sy. ८. युष्माकं स्वभूतम् Sy.
९. अवसः अवः रक्षणम् Sy.
१०. रक्षन्मेवाहं P. दैव्यस्य दैव्यम् Sy.
११. पातो० P., D. १२. ०मानच्च P.
१३. हे Sy. १४. सुखयत। अस्मभ्यं हिताय वा सुखिनो भवत Sy.
१५. प्रभूतधनाः Sy. १६. अमरणस्वभावाः Sy.
१७. Omitted by P. ऋतज्ञाः उदकस्य यज्ञस्य वा ज्ञातारः कर्तार इत्यर्थः Sy.
१८. सत्येन सत्यफलत्वेन प्रसिद्धाः Sy.
१९. श्रोतारुव P. २०. मेधाविनः Sy.
२१. नित्यतरुणाः Sy. २२. प्रभूतस्तुतयः Sy.
२३. अत्यधिकम् Sy. २४. ०न्त D. हविर्भिः सेविताः। उदकं वा सिञ्चन्तो यूयं मूळत Sy.
२५. Ms. D. puts the figure ॥५७॥ here to indicate the end of the fifty-seventh hymn. No such number is given in P.
२६. 'तमु नूनम्' इत्यष्टर्चं द्वितीयं सूक्तं श्यावाश्वस्यार्षं त्रैष्टुभं मारुतम्। 'तमु' (KSA. 27.58.p.21.) इत्यनुक्रमणिका, विनियोगो लैङ्गिकः Sy. २७. पूर्वं स्तुतमेव Sy.
२८. अद्य Sy. २९. दीप्तिमन्तम् Sy.
३०. मरुतां सम्बन्धिनं तम् Sy. ३१. स्तुषे Sy.

नवतराभिः[1] स्तुतिभिः । ये[2] । क्षिप्राश्वाः[3] । बलयुक्त[4] धनम् । सहन्ते[5] । अपि च । ईश्वरा भवन्ति । अमृतत्वस्य[6] । स्वराजः[7] ।

त्वेषं गणं तवसं खादिहस्तं धुनिव्रतं मायिनं दातिवारम् ।
मयोभुवो ये अमिता महित्वा वन्दस्व विप्र तुविराधसो नॄन् ॥ २ ॥

त्वेषं गणम्[8] । दीप्तम् । गणम्[9] । बलिनम् । खाद्यायुधहस्तम्[10] । धनूनकर्माणम्[11] ? धुनोति हि वृक्षादीन् । कर्मवन्तम्[12] । दत्तधनम्[13] । विप्र ! वन्दस्व[14] । प्रकारान्तरेणाह—सुखस्य भावयितारः[15] । ये । महत्वेन[16] । अमिता अपरिच्छिन्नास्तान् वन्दस्व । बहुधनान्[17] । नेतॄन् ।

आ वो यन्तूदवाहासो अद्य वृष्टिं ये विश्वे मरुतो जुनन्ति ।
अयं यो अग्निर्मरुतः समिद्ध एतं जुषध्वं कवयो युवानः ॥ ३ ॥

आ वः[20] । आगच्छन्तु । युष्माकम्[21] । उदकस्य वोढार[22] । तदानीम्[23] । वृष्टिम्[24] । ये । व्याप्ताः[25] । मरुतः[26] । प्रेरयन्ति । अयम्[27] । यः । अग्निः[28] । मरुतः । अन्तरिक्षे वैद्युतः[29] समिद्धः[30] । एतमिति[31] स्पष्टम्[32] ।

---

१. कीदृशां मरुताम् ? नव्यसीनाम्—लिङ्व्यत्ययः । नवतराणां स्तुत्यानां वा एषां मारुतं गणम् Sy.
२. गणावयवभूता मरुतः कीदृशाः ? इत्युच्यते मरुतः Sy.
३. शीघ्रगाम्यश्ववोपेताः Sy.
४. बलवन्तो यथा भवन्ति तथा Sy.
५. वहन्ते is suggested for सहन्ते ॥ गच्छन्ति Sy. ६. उदकस्य Sy.
७. ०ज P. स्वायत्तदीप्तयः स्वयमेव राजमानास्तेषां गणं स्तुषे Sy.
८. गणं मारुतम् Sy.
९. बलवन्तम् Sy.
१०. कटकहस्तम् Sy.
११. धूननकर्माणम् is suggested for धनूनकर्माणं ॥ कम्पयितृकर्माणम् Sy.
१२. प्रज्ञावन्तम् Sy.
१३. हे होतः ! Sy.
१४. स्तुहीति सम्बन्धः Sy.
१५. ०र P.
१६. मरुतः Sy.
१७. ०त्वे० is suggested for ०त्वे० ।
१८. ०रिछि० P.
१९. प्रभूतधनान् Sy.
२०. हे ऋत्विग्यजमानाः ! Sy.
२१. युष्मान् Sy.
२२. वोढाः P., D. उदकस्य वोढारो मरुतः Sy
२३. इदानीम् Sy.
२४. ०ष्टि P. २५. ०प्त P.
२६. अथ प्रत्यक्षवादः Sy.
२७. प्रसिद्धः Sy.
२८. ०ग्नि P.
२९. ०द्युतमः P.
३०. समिधः P., D. सम्यग्दीपितः Sy.
३१. By एतमिति VM. means एतम् । जुषध्वम् । कवयः and युवानः ॥ एतम् अग्निम् । जुषध्वं सेवध्वम् । हे कवयः ! मेधाविनः ! हे युवानः ! नित्यतरुणाः ! सर्वत्र व्याप्ताः ! वा Sy.
३२. पृष्ठं P.

यूयं राजानमिमं जनाय विभ्वतष्टं जनयथा यजत्राः ।
युष्मदेति मुष्टिहा बाहुजूतो युष्मत्सदश्वो मरुतः सुवीरः ॥ ४ ॥

यूयं राजानम्[1] । यूयम् । राजानम्[2] । स्वामिनम्[3] । जनाय[4] । जनयथ[5] । महतां कर्मणां कर्तारम् । हे यष्टव्या ! युष्मत्त[6] ! गच्छति । मुष्टिभिः[7] शत्रूणा हन्ता । आकृष्टशत्रुबाहुः[8] । युष्मत्त[9] एव । शोभनाश्वः[10] । हे मरुत. ! सुवीरः[11], मरुत्प्रेरिता[12]. कर्माणि कुर्वन्तीति ।

अराड्वेदचरमा अहेव प्रप्र जायन्ते अकवा महोभिः ।
पृश्नेः पुत्रा उपमासो रभिष्ठाः स्वया मत्या मरुतः सं मिमिक्षुः ॥ ५ ॥

अराड्वेत्[13] । यथा रथचक्रस्था अराः[14] सदृशरूपा भवन्ति । यथा[15] वाहानि । एवम्[16] । अचरमाः[17] । प्रादुर्भवन्ति[18] ।

---

१. हे मरुतः ! Sy.
२. स्वामिनं राजमानं वा Sy.
३. शत्रूणां प्रेरकं व्यावयितारम् Sy.
४. यजमानाय Sy.
५. जनायन् जनयथा P. जनायञ्जनयथा D. उत्पादयथ Sy.
६. विभ्वा नाम ऋभूणां मध्यमः । स कुशली तेन निर्मितम् । अत्यन्तरूपवन्तमित्यर्थः । तादृशं पुत्रम् Sy.
७. कीदृशाः ? मुष्टिशब्दो बाहूपलक्षकः । स्वभुजबलेनैव हन्ता शत्रूणाम् Sy.
८. ०हु P. बाहुः प्रेरकः शत्रूणां यस्य तादृशः पुत्र एति Sy. ९. ०ष्मन्त P.
१०. ०नाश्वे P. ०नाश्चे D. विद्यमानाश्वः । बह्वश्व इत्यर्थः Sy.
११. शोभनवीर्यः पुत्र एति । जायत इत्यर्थः Sy.
१२. प्रातः P. मरु. . . . प्रेरिताः D.
१३. वरुणप्रघासे मारुत्या आमिक्षायाः 'अराड्व' इति याज्या । सूत्रितञ्च 'अराड्वेदचरमा अहेवेमं मे वरुण श्रुधि (ĀŚS.2.17.) इति । एकादशिने मारुते पशावेवैव पशुपुरोडाशस्य याज्या । सूत्रितञ्च 'अराड्वेदचरमा अहेव या वः शर्म शशमानाय सन्ति' (ĀŚS. 3.7.) इतिSy.
१४. श्यावाश्वो मरुतः स्तौति SKN.
१५. रथशङ्कव इव Sy. यथा अराश्चक्रस्य तुम्बस्य वा तद्वत् SKN.
१६. बाहा० P., D. अहानीव । दिवसा यथा सर्वेऽपि षष्टिघटिकात्मकास्तद्वत्सप्तसंख्योपेतसप्तगणरूपेण समा इत्यर्थः । अनेन वृष्टान्तद्वयेन वैसादृश्याभावः प्रतिपादितः Sy. अहानीव च संवत्सरस्य सहजातत्वाद्धि तुल्यकाला मरुतः । नैषामग्रिमो न पश्चिमोऽप्यस्ति कश्चित् SKN.
१७. अनिकृष्टाः । सर्वसमाः सहैवोत्पन्नाश्चेत्यर्थः Sy. चरमः पश्चिमः स येषां नास्ति तेऽचरमाः । पश्चिमाभावादेवाग्रिमस्याप्यभावः, अनग्रिमपश्चिमा इत्यर्थः SKN.
१८. प्रकर्षेण प्रादुर्भवन्ति । एकः 'प्रसमुपोदः पादपूरणे' (Pa.8.1.6.) इत्युपसर्गाभ्यासः स च पूरणः Sy. एकः प्रशब्दः 'प्रसमुपोदः पादपूरणे' इति पादपूरणः । अपरः प्रकर्षार्थः । प्रकृष्टा जायन्ते प्रतिदिवसं वर्द्धमानाः प्रकृष्टा भवन्तीत्यर्थः SKN.

अकुत्सिताः[1]। तेजोभिः[2]। पृश्नेः[3]। पुत्राः[4]। परस्पर सदृशा[5]। वेगवन्त.[6]। स्वेन[7]। मानेन[8]। संमिता भवन्ति[9]।

यत्प्रायासिष्ट पृषतीभिरश्वैर्वीळुपविभिर्मरुतो रथेभिः।
दोदन्त आपो रिणते वनान्यवोस्रियो वृषभः क्रन्दतु द्यौः॥ ६॥

यत्[11] प्र। यत्[12], प्रायासिष्ट यदा प्रगच्छथ। पृषतीभिः[13]। अश्वैश्च[14]। तथा दृढचक्रपविभिः[15]। मरुतः। रथैश्च[16]। तदानीमापः। गच्छन्ति[17]। वृक्षाश्च[18]। उद्गच्छन्ति[19]। अथैकवदाह—उस्राया गो. पुत्र[20]। वृषभः[21]। मरुत् कि गणः[22]? अवक्रन्दतु[23]। द्योतमान[24]।

प्रथिष्ट यामन्पृथिवी चिदेषां भर्तेव गर्भं स्वमिच्छवो धुः।
वातान्ह्यश्वान्धुर्यायुयुज्रे वर्षं स्वेदं चक्रिरे रुद्रियासः॥ ७॥

प्रथिष्ट[25]। प्रथिता भवति। पृथिवी। एषाम्[26]। गमने[27]। ओषधीभिर्भर्तेव[28]। गर्भं जायायाम्[29]। स्वम्[30]।

---

१. ०तां P., D. अनल्पाः। यद्वा महोभिरित्यस्य विशेषणम् Sy.
२. स्वैर्महात्म्यैः SKN.
३. माध्यमिकाया वाचो गोरूपाया अन्तरिक्षस्य वा पुत्रस्थानीयाः Sy. दिवः SKN.
४. ०त्रा P.
५. प्रत्येकं समानाः Sy. उपमाभूताः सर्वस्य। अथवा—उपमेत्यन्तिकनाम। (cf. Ngh. 2.16.) दिवः पुत्राः सन्निकृष्टाश्चेत्यर्थः SKN.
६. प्रकृष्टवेगाः। एवंमहानुभावा मरुतः Sy. अतिशयेन वेगवन्तः SKN.
७. स्वकीयया Sy.
८. अनुग्रहबुद्धया Sy. प्रज्ञया SKN.
९. वृष्ट्या सम्यक् सिञ्चन्ति Sy. भिक्षतेर्गतिकर्मण एतद्रूपं सङ्क्रन्दन्ते। यादृश्येषां योग्या प्रज्ञा परानुग्रहात्मिका तादृश्येषामुत्पद्यत इत्यर्थः। अथवा मन्यतेरर्चतिकर्मणो मतिः स्तुतिस्तया सङ्क्रन्दन्ते स्तोतृभिः स्तूयन्त इत्यर्थः SKN.
१०. VM. ignores मरुतः and explains प्र once only॥ एवम्महानुभावा मरुतः Sy. N.2.14., SKN. II.87.
११. प्रा P., D. १२. यत यत् P. यदा Sy.
१३. पृष्टती० P. पृषत्संज्ञकैः Sy.
१४. वाहनसाधनैरश्वैः। अश्वशब्दोऽत्र वाहनसामान्यवचनः। अतः पुंल्लिङ्गता। तथान्यत्र—'यदश्वान्धूर्षु पृषतीरयुग्ध्वम्' (RV.V.55.6.) रोहिदश्वोऽजाश्व इति सामानाधिकरण्यप्रयोगः। एवम्भूताश्चयुक्तैः Sy.
१५. वृढरथनेमिभिः Sy.
१६. रथैश्च प्रायासिष्ट। यद्वा अश्वैः रथैश्च सह मरुतो यदा प्रायासिष्ट तदा Sy.
१७. क्षरन्ति Sy. १८. वृक्षसमूहाः Sy.
१९. हिंस्यन्ते वेगेन भज्यन्ते Sy.
२०. ऐक० P.
२१. सूर्यरश्मयः। तत्सम्बन्धी पर्जन्यः Sy.
२२. अपां वर्षिता Sy. २३. मरुत्क्रीगणः P.
२४. अवाङ्मुखं शब्दयतु वृष्ट्यर्थम् Sy.
२५. ०नाः P. द्यो द्योतमाना D.
२६. प्रख्याताऽभवत्। गर्भयोग्याऽभवदित्यर्थः। ते च मरुतः Sy.
२७. ०त्रा P. मरुताम् Sy.
२८. यामनि Sy.
२९. लौकिकः पतिः Sy.
३०. भार्यायास्तथा भूम्याः Sy.
३१. स्वभूतं गर्भं गर्भस्थानीयम् उदकम् Sy.

उदकम् । पृथिव्या[1] निदधाति[2] । गच्छतः[3] । अश्वान्[4] । रथधुर्यौ[5] ? युञ्जन्ति[6] । ततो वर्षाख्यम्[7] । स्वेदम्[8] । चक्रिरे[9] । मरुतः[10] ।[11]

हुये नरो मरुतो मृळता नस्तुविमघासो अमृता ऋतज्ञाः ।
सत्यश्रुतः कवयो युवानो बृहद्गिरयो बृहदुक्षमाणाः ॥ ८ ॥

[हुये नरः][12]

V. 59.

प्र वः स्पळक्रन्त्सुविताय दावनेऽर्चा दिवे प्र पृथिव्या ऋतं भरे ।
उक्षन्ते अश्वान्तरुषन्त आ रजोऽनु स्वं भानुं श्रथयन्ते अर्णवैः ॥ १ ॥

प्र वः स्पट्[13] । स्तोत. ! युष्माकम्[15] । कल्याणाय[16] । दानाय[17] । वन्धन मरुत प्रकुर्वन्तु[18] । दीप्ताय मरुद्-गणाय[19] । स्तुहि[20] । अहं पृथिव्यै[21] । अन्नम्[22] । मरुद्भ्य. प्रभरामि[23] । तदनन्तर तत्र गमनायाश्वान्[24] । स्नापयन्ति[25] । तरन्ति[26] । च[27] । लोकान्[28] । अनु श्रथयन्ते[29] । स्वम्[30] । तेज. । मेघैः सह सम्पष्मयन्ति[31] ?

---

१. ०थिन्या P. २. स्थापितवन्तः Sy.
३. गन्तून् Sy.
४. गच्छाताश्वान् P. ०ताश्वान् D.
५. धुरि रथसम्बन्धिन्याम् Sy.
६. आयोजितवन्तः Sy.
७. वृष्टिसंस्त्यायम् Sy.
८. स्वे स्वे० P. तस्मात् स्वेदस्थानीयम् Sy.
९. कुर्वन्ति Sy. १०. रुद्रपुत्राः Sy.
११. VM. ignores चित् । इत् and हि ॥ चिदिति पूरणः । हि यस्मात् Sy.
Ms. D. puts the figure ॥५८॥ here to indicate the end of the fifty-eighth hymn. No such number is given in P.
१२. The *pratika* is supplied by the Editor. The stanza has already been explained. See RV.V.57.8.
१३. 'प्र वः स्पट्' इत्यष्टर्चं तृतीयं सूक्तं श्यावाश्व-स्यार्षं मारुतम् । अष्टमी त्रिष्टुप्, शिष्टाः सप्त जगत्यः । 'प्र वः स्पट् त्रिष्टुबन्तम्' (KSA.27.59.p.21) इत्यनुक्रमणिका । विनियोगो लैङ्गिकः Sy.
१४. प्रवस्वः P. प्रवस्वदे D.
१५. हे मरुतः ! Sy.
१६. युष्मभ्यम् Sy.
१७. सुष्ठु प्राप्तव्याय Sy.
१८. हविष्प्रदानाय Sy.
१९. प्रकर्षेण क्रन्दति स्तौति Sy.
२०. द्योतमानाय द्युदेवाय Sy.
२१. प्रकर्षेण स्तुहि हे आत्मन् ! Sy.
२२. आपृ० P. पृथिव्याश्च द्यावापृथिव्यावपि मरु-तामाधारत्वादत्र निपातभाजौ भवतः Sy.
२३. स्तोत्रम् Sy.
२४. सम्पादयामि, किंच ते मरुतः ! Sy.
२५. व्यापकानुदकसङ्घान् Sy.
२६. सिञ्चन्ति Sy.
२७. क्तूरन्ति P. ररन्ति D. तरन्ति सञ्चरन्ति Sy.
२८. आ सर्वतः Sy. २९. अन्तरिक्षम् Sy.
३०. अनुश्लेषयन्ति, अनुकूलं प्रापयन्तीत्यर्थः Sy.
३१. ०कानस्य नु श्लथयस्तेश्वं P. ०कानश्व नु श्नथयन्ते स्वं D. स्वकीयम् Sy.
३२. संवष्मयन्ति P.

अमादेषां भियसा भूमिरेजति नौर्न पूर्णा क्षरति व्यथिर्यती ।
दूरेदृशो ये चितयन्त एमभिरन्तर्महे विदथे येतिरे नरः ॥ २ ॥

अमादेषाम् । बलात् । एषाम् । भयेन । भूमिरोषधिवनस्पतियुक्ता । कम्पते । नौः । इव । उदकपूर्णा । जीर्णा नद्याम् । गच्छन्ती । क्षरति अवशीर्णा भवति । दूरे पश्यन्तः । ये । गमनैः । जायन्ते । ते नेतारः । यज्ञे महतेऽन्नाय । गच्छन्ति ।

गवामिव श्रियसे शृङ्गमुत्तमं सूर्यो न चक्षू रजसो विसर्जने ।
अत्यांइव सुभ्वश्चारवः स्थन मर्यांइव श्रियसे चेतथा नरः ॥ ३ ॥

गवामिव । गवामिव । शृङ्गं शिरसि स्थितम् । श्रयणाय भवति मरुता शृङ्गम् । सूर्य । इव भवति । एषां तेजः । उदकस्य । विसर्जने । अश्वा इव । शोभनभवना यूयमागच्छन्त । कल्याणाः । भवथ । मनुष्या इव । श्रयणाय । बुद्धि कुरुथ । हे नेतारः ! सहिता ।

---

१. ०षाम P., D. एषाम्—अन्वादेशविषयत्वावनुदात्तः । एषां मरुताम् Sy.
२. कं व P. कंप D.
३. पूर्णा प्राणिभिः । सा यथोदकमध्ये Sy.
४. व्यथिता Sy.
५. ञ्जीणा नद्यो P., D.
६. ०न्ति P. एतदुभयं नौविशेषणम् Sy.
७. रक्षति P., D. चलति Sy.
८. वशीर्णो P. विशतृणा D.
९. दूरे दृश्यमाना अपि Sy.
१०. मरुतः Sy.
११. ज्ञायन्ते is suggested for जायन्ते ॥ ज्ञायन्ते ते महान्तो मरुतः Sy.
१२. गन्तारः P.
ये मरुतः Sy.
१३. महते हविषे हविर्भक्षणाय Sy.
१४. यतन्ते Sy.
१५. VM. ignores अन्तः ॥ द्यावापृथिव्योर्मध्ये Sy.
१६. हे मरुतः ! यूयम् Sy.
१७. उष्णीषपट्टादिकम् Sy.
१८. स्थिति P.
१९. श्रिये, धारयथेति शेषः Sy.
२०. ०ता P.
२१. भृंग P., D.
२२. स यथा Sy.
२३. दर्शनसाधनं मण्डलं धत्ते । तद्वद्रजसो वृष्टेर्विसर्जने विसर्जनाय चक्षुः सर्वस्य प्रकाशकं तेजो धारयथ Sy.
२४. तेजसः Sy.
२५. अश्व P.
२६. सुष्ठु सर्वत्र भवन्तो वेगवन्तः Sy.
२७. ०च्छत P.
२८. दर्शनीयाः Sy.
२९. मर्त्या यजमानाः । ते यथा Sy.
३०. जानन्ति यज्ञादिकं तद्वच्छ्रिये Sy.
३१. मरुतः Sy.
३२. VM. ignores उत्तमम् ॥ उत्कृष्टम् Sy.

को वो महान्ति महतामुदश्नवत्कस्काव्या मरुतः को ह पौंस्या ।
यूयं ह भूमिं किरणं न रेजथ प्र यद्धरध्वे सुविताय दावने ॥ ४ ॥

को[1] वः[2]। क[3]। व[4]। महताम्[5]। महान्ति धनानि। उदश्नवत्[6]। उद्व्याप्नोति। कश्च[7]। कविकर्माणि[8]। क। वा[9]। वीर्याणि[10]। यूयम्। खलु। सूर्यं किरणम्[11]। इव। पृथिवीमोषधिवनस्पतियुक्ताम्। कम्पयथ। प्रगच्छथ[12]। यदा[13]। कल्याणाय[14]। दानाय[15]।

अश्वाइवेदरुषासः सबन्धवः शूराइव प्रयुधः प्रोत युयुधुः ।
मयीइव सुवृधो वावृधुर्नरः सूर्यस्य चक्षुः प्र मिनन्ति वृष्टिभिः ॥ ५ ॥

अश्वाइव[16]। अश्वा इव[17]। आरोचमाना[18]। समानबन्धव[19], एकस्मादुत्पन्ना। शूरा इव[20]। च[21]। प्रकर्षेण योद्धारः[22]। प्रयुयुधुमरुत[23]। यथाश्वा वीराश्चाजि[24] प्रयुद्धार्थं[25] प्रगच्छन्तीत्यर्थ, तथा राजान[26] इव। सुष्ठु वर्धमाना[27]। वर्धन्ते। नेतारस्तदानीम्। सूर्यस्य[28]। तेज[29]। प्रहिंसन्ति[30]। वृष्टिभि[31]।[32]

---

१. वा P.
२. यजमानः Sy.
३. युष्माकम् Sy.
४. ०तं P. ०तम् D. पूज्यानाम् Sy.
५. श्रेयांसि Sy.
६. उत्कृष्टं प्राप्नुयात् Sy.
७. कश्च तदर्थम् Sy.
८. काव्यानि, कवीनां युष्माकं सम्बन्धीनि स्तोत्राणि उदश्नवत् Sy.
९. च Sy.
१०. पौंस्यानि पराक्रमान् उदश्नवत् । आदरार्थं पुनर्वचनम् Sy.
११. किरणं यथा वृष्टयर्थं चालयथ तद्वद्भूमिं रेजथ Sy.
१२. प्रकर्षेण सम्पादयथ वृष्टिम् । यस्माच्चूयमेवं कुरुथ तस्मात्क एवं करोतीत्यर्थः Sy.
१३. यस्मात् Sy.
१४. सुष्ठु प्राप्तव्याय । प्राप्तव्यस्येत्यर्थः । तादृशस्य धनस्य वृष्टयुदकस्य वा Sy.
१५. VM. ignores मरुतः ।
१६. मरुत एते Sy.
१७. शीघ्रगन्तारः Sy.
१८. रोमानाः P.
१९. समान एक एव बन्धुर्बन्धको रुद्रो येषां ते तादृशाः । परस्परं बन्धवः । स्नेहयुक्ता वा Sy. २०. भटाः Sy.
२१. अपि च Sy.
२२. प्रयोद्धारो वैरिभिः सह तादृशाः Sy.
२३. प्रययुः P. प्रयुयुः D. प्रकर्षेण युध्यन्ते Sy.
२४. ०राश्वाजि D.
२५. ०र्त्थपा P.
२६. मनुष्या यथा वर्धन्ते तथा Sy.
२७. सुष्ठु वर्धयितारो वर्धमाना वा Sy.
२८. एवं महात्मानः Sy.
२९. तेजःसमूहं मण्डलं वा Sy.
३०. प्रकर्षेण हिंसन्ति । आवृण्वन्तीत्यर्थः Sy.
३१. ०भि D.
३२. VM. ignores इत् ।

ते अज्येष्ठा अकनिष्ठास उद्भिदोऽमध्यमासो महसा वि वावृधुः ।
सुजातासो जनुषा पृश्निमातरो दिवो मर्या आ नो अच्छा जिगातन ॥ ६ ॥

ते अज्येष्ठाः । ते[1] ज्येष्ठरहिता[2] । कनिष्ठानामपि मध्यमा[3] । किं तर्हि ? सहोत्पन्नाः । उद्भेत्तारः[4] शरीराणाम् । तेजसा । वर्धयन्ते[5] । सुजाता[6] । जन्मना । गोमातरः[7] । दिवः[8] । पुत्राः[9] । अस्मान् । अभ्या-गच्छत[10][11] ।

वयो न ये श्रेणीः पप्तुरोजसान्तान्दिवो बृहतः सानुनस्परि ।
अश्वास एषामुभये यथा विदुः प्र पर्वतस्य नभनूँरचुच्यवुः ॥ ७ ॥

वयो न ये । पक्षिण । इव । स्वावासान्[12] प्रति । ये[13] । बलेन । पतन्ति । दिवः[14] । अन्तान्[15] प्रति । महतः । समुच्छ्रितात्[16] दिव । अश्वाः । एषाम् । शिलोच्चयस्य[17] । सानूनि[18] । प्रच्यावयन्ति । यथा । उभय-पार्श्वस्था[19] जनाः[20] । विदु[21], दक्षिणत उत्तरतश्चावासस्थान सभवति पार्श्वयोरन्ययो पर्वत एव तिष्ठति[22][23] ।

---

१. मरुतः Sy.
२. अज्येष्ठाः Sy.
३. अकनिष्ठाः Sy.
४. ०मा D.
५. अमध्यमाः सर्वप्रकारैः समाः Sy.
६. उद्भेदयितारः Sy.
७. तेसं P. तज० D.
८. विवर्धन्ते Sy.
९. ०जानाः P. सुष्ठु सम्भूताः Sy.
१०. गोतमात० P. पृश्नेः पुत्राः Sy.
११. दिवः सकाशात् Sy.
१२. मनुष्येभ्यो हिता यूयम् Sy.
१३. अभिमुखम् आ जिगातन सर्वतः प्रशंसत साध्वनुष्ठितमिति । उत्तरार्धः प्रत्यक्षकृतः । यद्वा ये सुजाता जनुषा पृश्निमातरश्च तान् दिव आगतान् हे ऋत्विजः ! मर्याः ! यूयमाजिगातन आगच्छत ते नोऽच्छ आगच्छतास्मदभिमुखम् Sy. १४. VM. ignores वि ।
१५. पङ्क्तयः सन्तः Sy.
१६. मरुतः Sy.
१७. अन्तरिक्षस्यादित्यस्य वा Sy.
१८. पर्यन्तान् Sy.
१९. समुन्नतस्याकाशवलयस्य Sy.
२०. मेघस्य Sy.
२१. नभनून् भनतेः शब्दकर्मणो नभ्राडितिवत् नभनवः । उदकानि Sy.
२२. ०स्थ P.
२३. जननाः P., D. देवा मनुष्याश्च Sy.
२४. जानन्ति तथा । मनुष्याणां ज्ञानं प्रसिद्धम् । देवाश्च वृष्टौ सत्यामाग्रयणावौ हविष्प्रदानेन जानन्ति । देवानां वृष्टिसम्पूर्तिपरिज्ञानमाश्वलायनेनोक्तम्—'यदा वर्षस्य तृप्तः स्यादथाग्रयणेन यजेत' इत्युपक्रम्य 'अपि हि देवा आहुस्तृप्तो नूनं वर्षस्याग्रयणेन हि यजते' (ĀŚS.2.9.) इति Sy.
२५. वाश्व० D.
२६. ०न्ति P.
२७. VM. ignores परि ॥ परितः Sy.

मिमातु द्यौरदितिर्वीतये नः सं दानुचित्रा उषसो यतन्ताम् ।
आचुच्यवुर्दिव्यं कोशमेत ऋषे रुद्रस्य मरुतो गृणानाः ॥ ८ ॥

मिमातु[1] । द्यावापृथिवी[2] । भक्षणाय[3] । अस्मान्[4] । सङ्गच्छताम्[5] । अस्मान् । चित्रदाना[6] । उषसश्च । दिवि भवम् । मेघम्[7] । मरुत । आच्यावयन्तु[8] । हे श्यावाश्विन[9] । रुद्रसम्बन्धिन[10] । मरुत ! त्वया स्तूयमाना, उक्त एकवचनबहुवचनयोः समन्वयः[11][12] ।

V. 60.

ईळे अग्निं स्ववसं नमोभिरिह प्रसत्तो वि चयत्कृतं नः ।
रथैरिव प्र भरे वाजयद्भिः प्रदक्षिणिन्मरुतां स्तोममृध्याम् ॥ १ ॥

ईळे[13][14] । स्तौमि[15] । अग्निम् । सुरक्षणम्[16] । नमोभि सह[17] । अत्र[18] । प्रसन्नः[19] सन् । विचिनोतु[20] । कर्म[21] । अस्मदीयम्[22] । रथैरिव[23] । प्रभरामि[24] । अन्न कुर्वद्भि[25] स्तोम यथा बह्वन्न रथे प्रभरन्ति तद्वत् बहून् स्तोमान् प्रभराम्येतदेवाह—प्रदक्षिणम्[26] । मरुताम् । स्तोमम्[27] । वर्धयामीति[28][29] ।

---

१. कृता P., D.
२. द्यौरन्तरिक्षम् । कीदृशी ? अदीना । यद्वा द्यौर्मिमात्वदितिर्भूमिश्च मिमातु सुखम् Sy.
३. उत्पत्तये प्रजननाय वा Sy.
४. अस्मदर्थम् Sy.
५. ०न्ताम् P., D. निर्मिमातु वृष्टिम् । तदनुकूलं करोत्वित्यर्थः Sy.
६. ०दानायश्च P. ०दानायश्व D. विचित्रप्रकाशादिदानाः Sy.
७. उदकम् Sy.
८. आच्यावयन्ति । द्विकर्मकोऽयम् Sy.
९. हे श्यावाश्विन् ! Sy.
१०. रुद्रस्य पुत्रा इति शेषः Sy.
११. ०योरन्वयः P. ०नयामन्वयः D.
१२. VM. ignores यतन्ताम् ।
१३. 'ईळे अग्नि स्ववसम्' इत्यष्टर्चं चतुर्थं सूक्तं श्यावाश्वस्यार्षम् । सप्तम्यष्टम्यौ जगत्यौ शिष्टाः षट् त्रिष्टुभः । मरुद्देवताकमग्निमरुद्देवताकं वा । 'ईळे द्विजगत्यन्तमाग्नेयं च वा' इति (KSA.27.60.p.21.) सूक्तविनियोगो लैङ्गिकः । आद्या कारीर्यां त्रामिधेनीषु याज्या । सूत्रितञ्च—'ईळे अग्नि स्ववसं नमोभिरिति धाय्ये' (ĀŚS.2.13.) इति Sy.
१४. अहं श्यावाश्वः Sy.
१५. स्तो० D.
१६. स्वायत्तरक्षणम् Sy.
१७. स्तोत्रैः Sy.
१८. इदानीम् Sy.
१९. ०न्नाः P. प्रसन्नः प्रकर्षेण यज्ञं प्राप्तो वा सन् Sy.
२०. विजानातु Sy.
२१. तत्स्तोत्रं कृतम् Sy.
२२. अस्मदर्थम् Sy.
२३. रवेरिव D. रथैर्यथाभिमतं प्राप्नुवन्ति तद्वद्गृहणसाधनैः Sy.
२४. प्रकर्षेण सम्पादयाम्यभिमतम् Sy.
२५. अन्नमिच्छद्भिः स्तोत्रैः Sy.
२६. Omitted by P.
२७. ०क्षिणि P. प्रादक्षिण्येन गच्छन् Sy.
२८. स्तोत्रम् Sy.
२९. वर्धयेयम् Sy.

आ ये तस्थुः पृषतीषु श्रुतासु सुखेषु रुद्रा मरुतो रथेषु ।
वनाचिदुग्रा जिहते नि वो भिया पृथिवी चिद्रेजते पर्वतश्चित् ॥ २ ॥

आ ये । आतिष्ठन्ति । ये । पृषद्वर्णासु । विश्रुतासु । सुद्वारेषु च । मरुतः । रथेषु । वृक्षाः । च । वः । भयेन । हे उद्गूर्णा ! निजिहते । पृथिवी । अपि । कम्पते । शिलोच्चय । च ।

पर्वतश्चिन्महि वृद्धो बिभाय दिवश्चित्सानु रेजत स्वने वः ।
यत्क्रीळथ मरुत ऋष्टिमन्त आपइव स्वयंश्चो धवध्वे ॥ ३ ॥

पर्वतः । शिलोच्चय । च । अत्यन्तम् । वृद्ध । बिभेति । तथा पर्वतस्य , अन्तरिक्षात् । सानु । कम्पते । भवताम् । शब्दे । यदा यूयम् । क्रीडथ । मरुत ! ऋष्टिमन्त । तदानीमुदकानीव । सहाञ्चन्त । गच्छथ ।

---

१. मरुतां वाहनेषु Sy.
२. श्रान्तासु प्रसिद्धासु वा Sy.
३. सु is omitted by P., D. खमाकाशं छिद्रम् । शोभनरथाक्षद्वारेषु Sy.
४. रथान् आ तस्थुः आतिष्ठन्ति Sy.
५. ०क्षः D. वनानि Sy.
६. अपि Sy.
७. युष्माकम् Sy.
८. भीत्या Sy.
९. ०र्ण P., D. हे उद्गूर्णबलाः ! मरुतः ! यूयं यदा रथमारूढाः स्थ तदानीम् Sy.
१०. ०जह्र० P., D. न्यग्गच्छन्ति Sy.
११. ०थिष्यापि P.
१२. पर्वतोऽपि रेजते कम्पते Sy.
१३. ०च्चय स्वं P. अपि रेजते कम्पते । उत्तरार्द्धः प्रत्यक्षकृतः, पूर्वार्द्धे य एवमकुर्वन् तेषां स्तोममृध्यामिति पूर्वत्रान्वयः Sy.
१४. VM. ignores रुद्राः ॥ रुद्रा रुद्रपुत्राः Sy.
१५. कारीर्यां मारुतस्य सप्तकपालस्य 'पर्वतश्चित्' इत्येषा याज्या । सूत्रितञ्च 'पर्वतश्चिन्महि वृद्धो बिभाय सृजन्ति रश्मिमोजसा' (ĀSS. 2.13.) इति Sy.
१६. अपि Sy. अप्यर्थे चिच्छब्दः BB.
१७. महान् Sy. महत् BB.
१८. वृद्धः सन्नपि Sy.
१९. अन्तरिक्षस्यापि Sy. उपरिगतस्य पर्वतस्य BB.
२०. सानुम् D. समुच्छ्रितः प्रदेशः Sy.
२१. कंपिते P., D. कम्पते स्वने युष्माकम् । 'रेजृ कम्पने' BB.
२२. भवनां P. युष्माकम् Sy.
२३. भयङ्करशब्दे सति Sy. गर्जिते BB.
२४. Omitted by P.
२५. ळित P. यूयं क्रीडथ, तदानीं युष्माकं गर्जितं श्रुत्वा पर्वतोऽपि बिभेति सान्वपि कम्पत इति BB.
२६. हे मरुतः ! Sy. यदा हे मरुतः ! BB.
२७. आयुधवन्तः सन्तः Sy. वज्रायुधवन्तः BB.
२८. तदा Sy. तस्मिन्काले BB.
२९. आप इव व्यापका इव BB.
३०. सहाञ्चनाः Sy. सहाञ्चन्त्यः BB.
३१ उदकानीव सहाञ्चन्तो गच्छथः P. ०थः D. धावध्वे Sy. धावत । छान्दसं ह्रस्वत्वम् । धुनोतिर्वा गतिकर्मा । व्यत्ययेन शप् । तस्मादस्माकं वृष्टयर्थं गर्जन्तः क्रीडन्तश्च धावध्वमिति BB.
३२. VM. ignores चित् ॥ चिद् अपि Sy. This stanza=TS.3.1.11.5.

वराइवेद्रैवतासो हिरण्यैरभि स्वधाभिस्तन्वः पिपिश्रे ।
श्रिये श्रेयांसस्तवसो रथेषु सत्रा महांसि चक्रिरे तनूषु ॥ ४ ॥

वराइवेत् । कन्याया उद्वोढार इव । रेवतः पुत्राः । अथा । हिरण्मयैराभरणैः । उदकैश्च । आत्मीयानि शरीराणि । सश्लिष्टानि कुर्वन्ति । प्रशस्ताः । बलवन्तः । रथेषु । श्रयणाय वा स्थातुम् । सत्यमेव । महनीयान्याभरणानि । अङ्गेषु । कुर्वन्ति ।

अज्येष्ठासो अकनिष्ठास एते सं भ्रातरो वावृधुः सौभगाय ।
युवा पिता स्वपा रुद्र एषां सुदुघा पृश्निः सुदिना मरुद्भ्यः ॥ ५ ॥

अज्येष्ठासः । अमी । सववृधुः । सुधनत्वाय । तेषाम् । सुकर्मा । रुद्रः । पिता । अर्थेभ्यः । सुदोहा । पृश्निः । सुदिनमिति सुखनाम सुखकरी माता भवति ।

यदुत्तमे मरुतो मध्यमे वा यद्वावमे सुभगासो दिवि ष्ठ ।
अतो नो रुद्रा उत वा न्वस्याग्ने वित्ताद्धविषो यद्यजाम ॥ ६ ॥

यदुत्तमे । त्रयो लोका भवन्ति तेषु यत्र इदानी वर्तयध्वे । ततः । अस्मान् । हे रुद्राः ! आगत्य ।

---

१. परा P., D. २. ०ढा P., D. विवाहयोग्या युवान इव ते यथा Sy.
३. धनवन्तः Sy. ४. हिरण्मयैराभरणविशेषैः Sy.
५. उककै० D. ६. स्वीयानि Sy.
७. संयोजयन्ति । अलङ्कुर्वन्ति तद्वदेते मरुतोऽपि रैवतासो धनवन्तो हिरण्यैः हिरण्मयस्थानीयैर्विद्युद्वाख्यैराभरणैः स्वधाभिश्च तन्वः स्वीयानि शरीराणि पिपिश्रे Sy. ८. श्रेष्ठाः Sy.
९. प्रस्ताबलन्तः P., D. बलवन्तो मरुतः Sy.
१०. शोभायै Sy.
११. सत्यमेव P. सत्यं सह वा Sy.
१२. कृतवन्तः सर्वाभरणैरुदकैश्चोपेता रथानधिष्ठाय शरीरेषु तेजांस्यधारयन्नित्यर्थः Sy.
१३. VM. ignores इत् ।
१४. मरुतः Sy.
१५. संवर्धुः P. संवृद्धुः D. वर्धन्ते Sy.
१६. सुभगत्वाया P. सुभगत्वाय Sy.
१७. मरुताम् Sy. १८. शोभनकर्मा Sy.
१९. तथा P. मरुद्वर्धम् Sy.
२०. सुष्ठु द्रोग्ध्री Sy.
२१. गोदेवता मातृभूता Sy.
२२. (Ngh. 3.6.) शोभनदिनानि । अकुत्सितामिति शेषः Sy.
२३. VM. ignores अज्येष्ठासः । अकनिष्ठासः । भ्रातरः and युवा ॥ अज्येष्ठासः अकनिष्ठासः परस्परज्येष्ठकनिष्ठभावरहिताः सहैवोत्पन्नाः समानबलाः । परस्परं भ्रातृभूताः । युवा नित्यतरुणः Sy.
२४. By the passage त्रयो लोकाः....यत्र VM. seems to refer to उत्तमे, मध्यमे, अवमे दिवि ॥ यदुत्तमे उत्कृष्टे उत्तमे चरमे वा । दिवि द्युलोके । मध्यमे वा दिवि स्थ भवथ । 'त्रयो वा इमे त्रिवृतो लोकास्तिस्रो दिवः पृथिवीः' Cf. AB. 2.17 इत्यादिश्रुतेर्द्युलोकस्य त्रैविध्यम् Sy.
२५. अस्मात् स्थानत्रयात् Sy.
२६. तथास्मान् P. तरोस्मान् D. अस्मदर्थम् Sy.
२७. हे रुद्राः ! आगच्छतेति शेषः Sy.

अस्य । हविषा[1] । क्षिप्रम्[2], जानीत[3] । हे अग्ने ! त्वं च । वेत्थ[4] हविः[5] । यदा[6] । यजाम[7] ।

अग्निश्च[8] यन्मरुतो विश्ववेदसो दिवो[9] वहध्वे[10] उत्तरा[12]दधि[11] ष्णुभिः[13] ।
ते मन्दसाना धुनयो रिशादसो वामं धत्त[14] यजमानाय सुन्वते ॥ ७ ॥

अग्निः । अग्निः । च । यदा[15] । हे मरुतः ! यूय च । विश्वधनाः[16] । दिवः[17] । आगच्छथ[18] । समुच्छ्रितेभ्यः[19] प्रदेशेभ्य उच्छ्रितेषु वा देशेषु, इति स्पष्टम् ।

अग्ने[14] मरुद्भिः[15] शुभयद्भिर्[16]ऋक्वभिः[17] सोमं पिब मन्दसानो गणश्रिभिः[18] ।
पावकेभिर्विश्वमिन्वेभिरायुभिर्वैश्वानर[20] प्रदिवा[21] केतुना सजूः ॥ ८ ॥

अग्ने[14] । अग्ने ! मरुद्भिः[15] । अङ्गानि शोभयद्भिः[16] । रसाहरणपरैः सह[17] । मोदमानः[18] । सोमम् । पिब ।

---

१. एतद्धविः Sy.
२. अद्य Sy.
३. विद्धि Sy.
४. वेत्थं D.
५. यद् हविः Sy.
६. प्रक्षिपाम Sy.
७. VM. ignores यत् । मरुतः । वा । सुभगासः । उत and वा ।
८. यूयम् Sy.
९. सर्वस्य ज्ञातारो विश्वधना वा Sy.
१०. विवः P. द्युलोकात् Sy.
११. ०धो P. ०धोत् D.
१२. उत्तरात् उत्कृष्टतरात् । अधि उपरि । सानुभिरुपरिप्रदेशे । वहध्वे उह्यध्वे । तत्र निवसथेत्यर्थः । यद्वा स्नुशब्देन तत्सदृशा अश्वा उच्यन्ते । तैर्वोह्यध्वे Sy.
१३. VM. ignores the second hemistich of the stanza॥ ते यूयम् । मन्दसाना मोदमाना अस्मदीयैः स्तोत्रैर्हविर्भिश्च । धुनयः शत्रूणां कम्पयितारः । रिशादसोऽस्मद्धिंसकानामत्तारः सन्तः । वामं वननीयं धनम् । धत्त दत्त यजमानाय सुन्वते अभिषवं कुर्वते Sy.
१४. 'अग्ने मरुद्भिः' इत्यष्टम्याग्निमारुतस्य याज्या । 'अग्ने मरुद्भिः शुभयद्भिर्ऋक्वभिः' (ĀSS. 5.20.) इति सूत्रितत्वात् Sy.
१५. Omitted by D. श्रावास्यस्य ? (इयावाश्वस्य) SKN.
१६. हे अग्ने ! Sy. हे भगवन्नग्ने ! वैश्वानर ! त्वम् Dur.
१७. मरुद्भिः सह Sy. मितरोचिभिरर्चिर्भिः.... अर्चिषोऽत्र मरुतः । अन्यथा ह्यनुवाहरणमेवैष मन्त्रोऽग्नेः सोमपाने स्यात् । इतरैर्मरुद्भिः सम्बन्धावृत्विजो वा मरुतः Dur.
१८. शोधयद्भिः P. शोभमानैरन्यान् शोभयद्भिर्वा Sy. शुम्भयद्भिर्भवन्तम् Dur. आत्मानं रुक्मभिराभरणविशेषैर्मण्डयद्भिः SKN.
१९. स्तुत्यैः Sy. रसहर्तृभिः Dur. अर्चनमृक् स्तुतिस्तया तद्वद्भिः सह SKN.
२०. ०हा D.
२१. माद० P., D. मन्दसानः सन् Sy.

गणभावं ये श्रयन्ते । शोधकैः । विश्वस्य प्रीणयितृभिः । गन्तृभिः । वैश्वानर ! प्रत्नेन । तेजसा । सङ्गतः ।

V.61.

के ष्ठा नरः श्रेष्ठतमा य एकएक आयय । परमस्याः परावतः ॥ १ ॥

के ष्ठ । शौनकः—

राजर्षिरभवत् दाभ्यो रथवीतिरिति श्रुतः ।
स यक्ष्यमाणो राजर्षिरभिगम्य प्रसाद्य च ॥
आत्मानं कार्यमर्थं च ख्यापयन् प्राञ्जलिः स्थितः ।
अवृणीतर्षिमात्रेयमार्त्विज्यायार्चनानसम् ॥

---

१. गणभ्यवं P., D. गणभावमाश्रयन्तिः Sy. गणशो भवन्तमाश्रयन्तिः Dur. गणत्वमाश्रितैः SKN.
२. पावयितृभिः Dur. पावनैः SKN.
३. विश्वं वृष्ट्या प्रीणयन्तिः Sy. सर्वमिदमागच्छन्तिः Dur. इन्वतेर्व्याप्तिकर्मण एतद्रूपम् । सर्वव्याप्तिभिः SKN.
४. आयुष्मन्तिः Sy. यद् वग्वुम्. . . . .अयनशीलैः Dur. गन्तृभिश्चेत्यर्थः SKN.
५. ०रः P. हे विश्वनरहिताग्ने ! Sy.
६. पुराणेन Sy. चिरन्तनैः Dur. पुराणेन SKN.
७. ज्वालापुञ्जेन Sy. प्रज्ञया कर्मणा वा Dur. प्रज्ञानेन चरितया प्रज्ञयेत्यर्थः SKN.
८. संगत्स P. सहितः Sy. संयुक्तः Dur. संसेवमानः । अस्माद्वा सम्प्रीयमाणो वा SKN.
९. अन्ये तु—'अग्ने' मरुद्भिः' (RV.V.6o.8.) इत्यत्राग्नेरर्चिष ऋत्विजो वा मरुत इति मन्यन्ते । इतरथा पार्थिवस्य मध्यमैः सह सोमपानेऽनुवाहरणमेष मन्त्रोऽग्नेः स्यादिति । तदसत् । मरुतां गुणभावात् सहस्तुतेश्चाविरोधात् । शौनकस्तु मारुतत्वान्मन्त्रस्य मरुता संसेव्यमानो न स्वतन्त्र इत्येवमग्नेरप्राधान्यं मन्यते। सर्वथा त्वग्नेः सोमपानसम्बन्धोऽस्तीत्येतावान् प्रकृत उपयुज्यत इति भाष्यकाराभिप्रायः SKN. N. 8.2., SKN. III. 121.

Ms. D. puts the figure ॥६०॥ here to indicate the end of the sixtieth hymn. No such number is given in P.

१०. 'के ष्ठठा नरः' इत्येकोनविंशत्यृचं पञ्चमं सूक्तम् । अत्रानुक्रमणिका—'के ष्ठठैकोना गायत्रं श्यावाश्वोऽत्र वैवदश्वी तरन्तपुरुमीळ्हौ दाभ्यं (दाल्भ्यं) रथवीतिं मरुतश्च दानतुष्टः प्रशशंस बुध्वा च तरन्तमहिषीं शशीयसीं पञ्चम्यनुष्टुप् नवमी सतोबृहती' (KSA.27.61.p.21.) इति । श्यावाश्व ऋषिः । पञ्चम्यनुष्टुप् नवमी सतोबृहती शिष्टा गायत्र्यः । आद्याश्चतस्रो मरुद्देवताकाः । 'सनत्सा' इत्यादीनां चतसृणां शशीयसी नाम तरन्तस्य राज्ञो भार्या देवता । 'उत मेऽरपत्' इत्यस्या वैवदश्विः पुरुमीळ्हो देवता । 'यो मे धेनूनाम्' इत्यस्या वैवदश्विस्तरन्तो नाम राजा देवता । 'य ईं वहन्ते' इत्याद्याः षण्मारुत्यः । 'एतं मे' इत्यस्य तृचस्य दाभ्यो रथवीतिर्नाम राजा देवता । विनियोगो लैङ्गिकः Sy.
११. DDN. reads तथा च बृहद्देवता (BD. 5.5o-81.) for शौनकः ।
१२. दग्यो P. दादभ्यो D.
१३. राजात्रिमभि० BD.
१४. ख्यापत् D. १५. ०ज्यायर्चनास्मान् P.

स[1] सपुत्रो[2]ऽभ्यगच्छत् त राजान यज्ञसिद्धये[3]।
यज्ञे च वितते[4]ऽपश्यद् राजपुत्री[5] यशस्विनीम्।
स्नुषा मे राजपुत्री स्यादिति तस्य मनोऽभवत्[6]॥
संयुज्यस्व मया राजन्निति याज्य वचो[7]ऽब्रवीत्[8]।
प्रत्याचष्ट[9] स त राजा सह सम्मन्त्र्य भार्यया।
अनृषिर्नो[10]ऽत्र जामाता कश्चिद् भवितुमर्हति॥
प्रत्याख्यात ऋषिस्तेन[11] वृत्ते यज्ञे न्यवर्तत।
श्यावाश्वस्य तु कन्याया मनो नैव न्यवर्तत[12]॥
ततस्तौ[13] ? उनिव्याशु भावेनैवाभिजग्मतुः[14][15]।
तरन्तपुरुमीळ्हौ तु राजानौ[16] वैददश्विनौ[17][18]।
ताभ्या तौ चक्रतुः पूजाम् ऋषिभ्यां नृपती स्वयम्॥
ऋषिपुत्र महिष्याश्च दर्शयामास त नृपः।
तरन्तानुमता चैव प्रादाद् बहुविधं वसु॥

---

१ Omitted by P. २. सुपु० P.
३. DDN. adds the following verses of BD.
श्यावाश्वश्चात्रिपुत्रस्य पुत्रः खल्वर्चनानसः॥५२॥
साङ्गोपाङ्गान् सर्ववेदान् यः पित्राध्यापितो मुदा।
अर्चनानाः सपुत्रोऽथ गत्वा नृपमयाजयत्॥५३॥
४. ०श्य P. ५. राज्यो च (न् राज्ञः) पुत्रीं P.
६. DDN. adds the following verse of BD.
'श्यावाश्वस्य च तस्यां वै सक्तमासीत्तदा मनः'।
७. BD. reads च सोऽब्र० for वचोऽब्र०।
८. DDN. adds, after this hemistich, the following verses of BD.
श्यावाश्वाय सुतां वित्सु-
र्महिषीं स्वां नृपोऽब्रवीत्॥५५॥
किं ते मतमहं कन्यां
श्यावाश्वाय ददामि हि।
अत्रिपुत्रोऽर्वुबलो हि
जामाता त्वावयोरिति॥५६॥
राजानमब्रवीत्सापि
नृपर्षिकुलजा ह्यहम्।
नानृषिर्नो तु जामाता
नैष मन्त्रान् हि दृष्टवान्॥५७॥
ऋषये दीयतां कन्या
वेदस्याम्बा भवेत्तथा।
ऋषिं मन्त्रदृशं वेद
पितरं मन्यते यतः॥५८॥
९. प्रत्याचष्टे BD., DDN.
१०. ०नैव BD., DDN.
११. ०तम्० D. १२. ०यां D.
१३. त P. १४. भवे० P.
१५. BD. and DDN. read 'ततस्तौ तु निवर्तेतामुभावेवाभिजग्मतुः' and add after that 'शशीयसीं तरन्तं च पुरुमीळ्हं च पार्थिवम्'
१६. BD. adds तु before राजानौ।
१७. वेद० P.
१८. वैददश्व्यृषी BD., DDN.

अजाविकं गवाश्वं च श्यावाश्याय[1] शशीयसी[2]।
ददर्श संस्थितान् पार्श्वे तुल्यरूपानिवात्मनः[3] ॥
समानवयसश्चैव[4] मरुतो रुक्मवक्षसः[5]।
तान् तुल्यवयसो[6] दृष्ट्वा देवान् पुरुषविग्रहान् ॥
श्यावाश्वो विस्मितोऽपश्यत् के ष्ठेति मरुतस्ततः[7]।
ततस्तु मरुतो देवान् रुद्रसूनूनबुध्यत[8] ॥
'य ईं[9] वहन्त[10]' इत्याभिबुंध्वा[11] तुष्टाव तांस्तथा ॥
अतिक्रमं हि त मेने ऋषिर्विपुलमात्मनः ॥
यन्न दृष्ट्वैव तुष्टाव यत्[12] 'के ष्ठ' इति तु पृष्टवान्।
स्तुताः स्तुत्यानया[13] प्रीता[14] गच्छन्तः[15] पृश्निमातरः[16] ॥
अवमुच्य स्ववक्षोभ्यो रुक्मं[17] तस्मै तदा ददुः।
मरुत्सु तु[18] प्रयातेषु श्यावाश्वः सुमहायशाः ॥
रथवीतेर्दुहितरमगच्छन् मनसा तदा।
स सद्य ऋषिरात्मानं[19] प्रवक्ष्यन् रथवीतये ॥

---

१. ०श्याय D.
२. DDN. adds, after this hemistich, the following verses of BD.
'अत्रि याज्यार्चितौ गत्वा पितापुत्रौ स्वमाश्रमम्।६४।
अभ्यवादयतामत्रि महर्षि दीप्ततेजसम् ॥
श्यावाश्वस्य मनस्यासीन्मन्त्रस्यादर्शनावहम्।६५।
न लब्धवांस्तु तां कन्यां हन्त सर्वाङ्गसुन्दरीम्।
अप्यहं मन्त्रदर्शी स्यां भवेद्यद्यो महान्मम।६६।
इत्यरण्ये चिन्तयतः प्रादुरासीन्मरुद्गणः'।
३. तुल्यरूपान् महात्मनः DDN.
४ समायसश्चैव (समानवयसश्चैव) P.
५. रुग्मव D.
६. स तास्तुल्य (तांस्तुल्य) वयसो P. तांस्तुल्य-वयसो BD.
७. तदा DDN.; RV.V.61.1.
८. रुद्रस्तनून० P.
९. ईं P., D.
१०. RV.V.61.11.
११. ०र्बुध्या D. बुद्ध्वा BD.; DDN.
१२. BD.; DDN. read यच्च के ष्ठेति पृष्टवान् RV.V.61.1.
१३. स्त्यान० D. स्तुत्या तया BD.
१४. प्रीत्या D.
१५. ०न्त D.
१६. ०मारुतः P.
१७. रुग्मं D.
१८. सु P. वरुत्सु सु D.
वाभ्यो यो रथवीत्याख्यः सप्त ये मरुतां गणाः।
ते तस्मै यद्दुस्तुष्टास्तत्के ष्ठेत्यत्र वर्ण्यते ॥ Sy. DDN. also quotes the ślokas with a few variations.
१९. सद्यर्षि० P. सद्यर्षि० D.

'एत मे स्तोमम्'[1] इत्याभ्या दौत्ये[2] रात्रि[3] न्यवेदयत् ।
रथवीति तपस्यन्त[4] सम्प्रेक्ष्यार्षेण[5] चक्षुषा ॥
रम्ये हिमवतः[6] पृष्ठे 'एष क्षेति'[7] इति[8] चाब्रवीत् ।
ऋषेर्नियोगमाज्ञाय देव्या रात्र्या प्रचोदित ॥
आदाय कन्या ता दार्भ्य[9] उपेयायार्चनानसम्[10] ।
पादौ तस्योपसङ्गृह्य[11] स्थित्वा प्रह्वकृताञ्जलि[12]. ॥
रथवीतिरह दार्भ्य[13] इति नाम शशस च ।
मया[14] संयोगमिच्छन्त[15] त्वा प्रत्याचक्षि यत् पुरा ॥
त[16] क्षमस्व नमस्तेऽस्तु मा च मे भगवन् ! क्रुधः ।
ऋषे. पुत्र स्वयमृषि पितासि भगवन्नृषे[17] ॥
अतः[18] प्रतिगृहाणेमा स्नुषामित्येवमब्रवीत् ।
पाद्यार्घ्यमधुपर्कैस्तमर्चयित्वा[19] स्वय नृपः[20] ॥

---

१. RV.V.61.17. एतं मे स्तोममित्याभ्यां (RV.V.61.17,18) DDN.
२. दो० P. D.
३. रात्री P. रात्रीं न्ययोजयत् BD., DDN.
४. DDN. adds, after this hemistich, the following verse of VD.
रात्रावनिद्रां जानामि मम रात्रि महाद्युते ।
रथवीतिमहिष्या मां मन्त्रयुक्तं निवेदय ॥
५. BD., DDN. read रथवीतिमपश्यन्तीं।
६. ०प्रष्यार्षे० D.
७. रम्यति महतः D.
८. P. reads हिषा वक्षेति for एष क्षेतीति । D. reads एहिवाक्षेति for एष क्षेतीति । RV.V.61.19.
९. दभ्यः P. दाद्भ्यः D.
१०. ०र्यना० P.
११. ०स्योह(प)०सं० P.
१२. प्रह्वः BD., DDN.
१३. दाभ्य P. दाद्भ्य D.
१४. मया D. मयासङ्गतिमिच्छन्तम् DDN.
१५. DDN. reads सङ्गति० for संयोग०
१६. तत् BD., DDN.
१७. ऋषेः BD., DDN.
१८. हन्त BD., DDN.
१९. ०पर्कैश्च पूजयित्वा BD., DDN. स्तमार्चना P. स्तमर्चना D.
२०. नृपम् P., D.

शुक्लमश्वशतं दत्त्वा अनुजज्ञे गृहान् प्रति ।
शशीयसी तरन्त च पुरुमीळ्ह च पार्थिवम् ॥
षड्भि 'सनत्' इति स्तुत्वा जगामर्षिरपि क्षयम् । ॥ इति ॥

---

१. ०दित D. ०दिता P. RV. V.61.5.
२. BD.V.50-81.

अत्र वेदार्थदीपिकायां षड्गुरुशिष्यः—
पाद्यार्घ्यं मधुपर्कं च शुक्लमश्वशतं तथा ।
पूर्वं दत्त्वाऽत्रिपुत्राय श्यावाश्वाय ददौ सुताम् ।३२।
रुक्माभरणयुक्तं तु सोऽत्रिर्दृष्ट्वा स्वपौत्रकम् ।
महान्प्रसादो मरुतामिति हृष्टो बभूव ह ॥३३॥
अथात्रिः पुत्रमित्येवं श्यावाश्वं बह्वमन्यत ।
श्यावाश्वः कृतदारोऽस्तौत् स्वोपकारकरान्बहून् ॥३४॥
[अतः प्रष्टव्यरूपेण वाच्यत्वे मरुता स्तुतेः ।
चतुष्के देवताः के ष्ठ य ईं षट्के च ते स्तुताः ॥
सनत्साश्व्यचतुष्के च तरन्तमहिषी स्तुता ।
उत मे पुरुमीळ्हस्तु स्तुतो यो मे तरन्तकः ॥
एतं मे तत्तुचे वाल्भ्यो रथवीतिः स्तुतस्तथा ।
उक्ता बृहद्देवतायां शौनकेन कथा त्वियम् ॥]
तथानुक्रमणिका—'के ष्ठकोना गायत्रं श्यावाश्वोऽत्र बै ? (वै०) ददश्वी तरन्तपुरुमीळ्हौ वाल्भ्यं रथवीतिं मरुतश्च दानतुष्टः प्रशशंस बुध्वा च तरन्तमहिषीं शशीयसी पञ्चम्यनुष्टुप् नवमी—सतोबृहती' इति (KSA. 5.61. or. 27.61.p.21.)
तथा पुरुषमेधे नाराशंसमेतत्सूक्तं विनियुक्तम् ।
तथा सूत्रम्, 'श्यावाश्वं तृतीयं यथा । श्यावाश्व अर्चनानसो बि ? (वि) ददश्वौ सनि ससान । के ष्ठा नर इति च सूक्तमिति च (SSS. 16.11.7-9.)
येन नराः प्रशस्यन्ते स नराशंसो मन्त्रः (N. 9.9.) इति यास्कवचनान्नराशंससंज्ञा ज्ञेया DDN.
अत्राश्चर्यं पुरावृत्तमाहुरागमपारगाः ।
अर्चनानाः पुराऽत्रेयो वार्भ्येण (वाल्भ्येन) रथवीतिना ॥
आत्विज्याय वृतो यज्ञे वितते हौत्र आस्थितः ।
रथवीतिसुतां कन्यां ददर्श पितुरन्तिके ॥
ययाचे स्वकुमाराय श्यावाश्वाय च तां सुताम् ।
स प्रदान(सम्प्रदान०)मना भार्यामपृच्छत्पितं प्रयच्छसि ॥
इति पृष्टा पुनः प्राह कथमस्मै प्रदास्यसि ।
इतः पूर्वं सुता दत्ता नासीदनृषये क्वचित् ॥
तत्तथैवेति निश्चित्य प्रत्याचष्टार्चनानसम् ।
श्यावाश्वः संस्थिते यज्ञे तेन राज्ञा निराकृतः ॥
तत्प्रत्याशान्वितो विप्रस्तपस्तेपे सुदारुणम् ।
ब्रह्मचर्यरतः शान्तो भिक्षार्थं पर्यटन् द्विजः ॥
तरन्तमहिषीं साध्वीं बिभिक्षेऽसौ शशीयसीम् ।
सा सम्प्राप्यान्तिकं पत्युः प्रोवाचागतवानृषिः ॥
इत्युक्तो नृपतिर्भार्यां प्रत्याहैनं प्रपूजय ।
सानुज्ञाता गवां यूथं प्रादाद्वाभरणानि च ॥
तरन्तोऽपि पुनस्तस्मै प्रादाद्धनमपेक्षितम् ।
दत्त्वा च पुरुमीळ्हस्य स्वानुजस्यान्तिकं प्रति प्रेरयामास (प्रेषयामास) तमृषिं सोऽपि त्वां मानयिष्यति ॥
तथेति राज्ञो वचनं निशम्य तद्भार्यया दर्शित सर्वमार्गः ।
गच्छन् शनैरर्धपथे मरुद्गणान् समानरूपान् (पांश्च) स्व विवृक्षयागतान् ॥
विलोक्य विप्रः सभयः प्रणम्य कृताञ्जलिः कण्टकिताङ्गसङ्गः ।
तुष्टाव हृष्टान् (दृष्टान्) मरुतो विशिष्टैरर्थैर्वचोभिः परितुष्टचित्तः ॥
सम्प्राप्य सर्वं स्वमनीषितं तदा मरुद्गणेभ्यो मुदितात्मवद्भृशः ॥
तदाभववृषिः सूक्तद्रष्टा श्यावाश्वनामकः ।
पश्चात्पुनर्गृहं गत्वा भूयो (पुरुमीळ्हगृहं पश्चाद्गत्वा) लब्ध्वा गवां शतम् ॥
वार्भ्यो (वाल्भ्यो) मन्त्रदृशे राज्ञा चोदितः स्वसुतां ददौ ।
पुरुमीळ्हस्तरन्तश्च तद्भार्या च शशीयसी ॥
वार्भ्यो (वाल्भ्यो) यो रथवीत्याख्यः सप्त ये मरुतां गणाः ।
ते तस्मै यद् ददुस्तुष्टास्तत् के ष्ठेत्यत्र वर्ण्यते ॥
इति ॥ Sy., DDN.

के[1] यूयम्[2]। स्थ। हे नरः[3]! श्रेष्ठतमा[4]। ये यूयम् एते। एकः[5]। आगताः स्यु[6]:। तं मार्गेण परमस्याः[7]। परावतः[8]।

क्व[9] वोऽश्वाः क्वाभीशवः[12] कथं शेक[13] कथा यय[14]। पृष्ठे[15] सदो[16] नसोर्यमः[17] ॥ २ ॥

क्व वोऽश्वाः। अवरुह्य तेनेव[10] वेषेण प्राय दूरादभवत् तत्र पृच्छति—क्व[11]। युष्माकम्। अश्वा स्थिताः। क्व च। अभीशव[12]:। कथम्। गन्तु शक्नुथ[13] सभाराभ्या पादाभ्याम्। कथम्। गच्छथ[14]। पृष्ठे[15]। ये सीदन्ति। नासिकयो[16]:। यच्छन्त्यश्वान् ते तथोक्ताः[17]।

जघने[20] चोद[18] एषां वि सक्थानि[23] नरो[22] यमुः। पुत्रकृथे[26] न जनयः[27] ॥ ३ ॥

जघने। जघने। अश्वाजनि[21]। एषामवलम्बते। सक्थानि। वियच्छन्ति[24]। यथा[25]। पुत्रकरणाय। जायाः सक्थिनी[28] वियच्छन्ति[29]।

---

१. श्यावाश्वो गायत्र्या मरुतोऽपृच्छत् DDN.
२. भवथ। एवं स्वरूपानिश्चयात् सन्दिह्य ब्रवीति Sy. 'के ष्ठेति 'सितां सधस्तात्तनिहि०' (RPR.5.12.) इति षत्वे प्राप्ते '०अन्यैरेकारात्' (RPR.5.1.) इति निषिद्धे '०सूरिभिष्याम दिवि षन्तु के ष्ठ०' (RPR.5.17.) इति निपातनात्—षत्वम्। दधिम मदतादित्वाद्दीर्घः (Cf. RPR.8.15.) DDN.
३. स्थ हे नरः P. नर D. नेतारो मरुतः Sy., DDN.
४. अत्यन्तं श्रेष्ठा यूयम् Sy. अत्यन्तश्रेष्ठाः DDN.
५. प्रत्येकम् Sy., DDN.
६. ०ता स्यु D., P. आगच्छथ Sy., DDN.
७. परमस्यास्यः P., D. अत्यन्तदूरदेशात्। अन्तरिक्षादित्यर्थः Sy. कस्मादित्युच्यते DDN. परावत इति दूरनाम Ngh. 3.26.
८. क्वा P., D.
९. तेनैव is suggested for तेनेव।
१०. हे मरुतः! Sy.
११. कुत्रत्याः Sy.
१२. बन्धनरज्जवः Sy.
१३. शीघ्रं गन्तुं शक्ता भवथ Sy.
१४. याताः स्थ Sy.
१५. अश्वानां पृष्ठदेशे Sy.
१६. सीवति तिष्ठत्यत्रेति सदः पर्याणम्। तच्च दृश्यते Sy.
१७. संसिक० P., D.
१८. नियमिता पलायनप्रतिबन्धकारी पशोर्नासिकयोर्दृश्यते। तस्मादश्वादिलिङ्गैः कुत्रापि त्वरितगमना इव प्रतिभान्ति के यूयमिति देवत्वमनवधार्याह Sy. १९. ०क्ता D.
२०. हन्तव्यप्रदेशे Sy.
२१. प्रेरिका कशा अग्राग्रकाष्ठविशेषो वा वर्तते। शीघ्रगमनाय ताडयन् वर्तत इत्यर्थः Sy.
२२. अश्वानाम् Sy.
२३. ऊरुप्रदेशान् Sy.
२४. विविच्य नियच्छन्ति। आशुधावनेन विवृता भवन्तीत्यर्थः। विवृतौ दृष्टान्तः Sy.
२५. इव Sy.
२६. पुत्रकरण उत्पादने Sy.
२७. अपत्योत्पादयित्र्यो योषितः इव। ता यथा पुत्रोत्पादनकामाः सङ्गमसमये ऊरू विवृतौ कुर्वन्ति तद्वदित्यर्थः Sy.
२८. ०नि D.
२९. VM. ignores नरः ॥ Sy. explains नरः as नेतारो मरुतः।

परा वीरास एतन मर्यासो भद्रजानयः । अग्नितपो यथासथ ॥ ४ ॥

परा वीरासः । परागच्छत । हे वीराः ! स्वगृहं प्रति । मर्याः ! भद्रा जाया येषां ते भद्रजानयः, आभरणैरलङ्कृता यूयम् । यथा । भवथ तथा । अग्नितप्ता इव वर्णत ।

सनत्साय्यं पशुमत गव्यं शतावयम् ।
श्यावाश्वस्तुताय या दोर्वीरायोपबर्हत् ॥ ५ ॥

सनत सा । प्रायच्छत् । तरन्तभार्या शशीयसी श्यावाश्वाय । अश्वसमूहम् । पशुम् । अपि । शतावियुक्तम् । गोसङ्घं च । श्यावाश्वेन भिक्षमाणेन स्तुताय । वीराय तरन्ताय । स्वबाहुम् । उपबर्हं कृतवती तस्य भार्येत्यर्थः ।

उत त्वा स्त्री शशीयसी पुंसो भवति वस्यसी । अदेवत्रादराधसः ॥ ६ ॥

उत त्वा । अपि खलु । एका । स्त्री । शशीयसी नाम । पुंसोऽपि । भवति । प्रशस्ता । देवानामत्रातुः । अधनात् ।

---

१. कशाताडनादिलिङ्गेन जिगमिषून् मत्वा ब्रूते Sy. २. ०रा P. हे वीराः ! अमित्राणामीरयितारः ! Sy. ३. हे मर्त्येभ्यो हिताः ! Sv. ४. भद्राय P. मद्राय D. ५. भद्रः स्तुत्यो जानिर्जन्म येषां ते तथोक्ताः । रुद्रपुत्रा इत्यर्थः Sv. ६. रथा P., D. यथा दीप्तास्तद्वत् प्रदीप्ताः Sv. ७. अथवाग्नितप्ता दग्धदेहा यथा पलायन्ते तथा भवथेति Sy. ८. अग्निना तप्तास्ताम्रादयः Sy. ९ साः D. १०. प्रादात् Sv. ११. सा तरन्तमहिषी महाम् Sy. १२. अश्वात्मकं तत्समूहात्मकं वा Sv. १३. पशुम्–जातावेकवचनम् Sy. १४. अपि च Sy. १५. शतयुक्तं P., D. अनेकैरविभिर्युक्तं सनदिति Sy. १६. गोसमूहात्मकं पशुम् Sy. १७. ०वाश्वा P. ०श्वे D. श्यावाश्वेन मया स्तुताय Sy. १८. वीरा P. १९. स्वकीयं भुजम् Sy. २०. उपोदयच्छदालिङ्गनाय सा सनदिति । यतो भर्तृप्रेमास्पदा तस्मादेव बहु धनं दातुं शक्तेत्यर्थः Sy. २१. VM. ignores या । २२. श्यावाश्वो गायत्र्या शशीयसीं तुष्टाव DDN. २३. अपि च । यद्वा । उतेत्ययमेवकारार्थे । स्त्रीषु सैव प्रशस्येत्यर्थः । 'त्वसमसिमनेमेत्यनुज्ञानि' इति वचनात् त्वेति निघातः Sy. २४. त्वशब्द एकपर्यायः, 'त्वसमसिमेत्यनुज्ञानि' इति निघातः DDN. अप्येकः पश्यन् N.1.19. २५. इत्येतन्महिष्या नाम Sy. २६. पुरुषात् Sy., DDN. २७. अपि is omitted by P. २८. वसीयसी Sy. वरीयसी श्रेष्ठा भवति तस्माद् गुणेष्वेवादरं कुर्यादित्यर्थः DDN. २९. कस्मात्पुंसः ? इत्युच्यते । देवा अनेन त्रायन्ते स्तुत्यादिना स देवत्रः । न देवत्रः अदेवत्रः । तस्मात् Sy. सा एव, देवान् यस्त्रायते स्तुत्यादिना स देवत्रः, ततोऽन्योऽदेवत्रः । तस्मात् DDN. ३०. अयनात् P., D. राधो धनम् । दानार्हधनरहितात् । लुब्धकादित्यर्थः Sy. न विद्यते यजनयोग्यं राधो धनं यस्य सः अराधाः । तस्मात् DDN.

वि या जानाति जसुरिं वि तृष्यन्तं वि कामिनम् । देवत्रा कृणुते मनः ॥ ७ ॥

वि या जानाति । विजानाति । या । उपक्षीणम् । पिपासुम् च । धनकामुकं चातिथिम् । सा । देवेषु । कृणुते । मनः ।

उत घा नेमो अस्तुतः पुमाँ इति ब्रुवे पणिः । स वैरदेय इत्समः ॥ ८ ॥

उत घा नेमः । अपि च । खलु । अस्या शशीयस्या अर्धभूत । पुमान् भर्ता । मयाऽस्तुत । इति । न च स्तौमि । स्तोताहम् । स । वीरस्य मम दत्ते धने । समान । एव भवति समान साम्यमनयोरिति ।

उत मेऽरपद्युवतिर्ममन्दुषी प्रति श्यावाय वर्तनिम् ।
वि रोहिता पुरुमीळ्हाय येमतुर्विप्राय दीर्घयशसे ॥ ९ ॥

उत मे । अपि च । मह्यम् । प्रति । अकथयत् । युवति । माद्यन्ती हृष्टा । श्यावाश्व एव

---

१. Omitted by P.

२. Omitted by D. अनुकम्पयाभिमतं दत्तवतीत्यर्थः Sy.

३. शशीयसी Sy.

४. यो पक्षिणं P. व्यथितम् । जसिस्ताडनकर्मा उपक्षपणकर्मा वा Sy.

५. तृष्यन्तम् Sy.

६. धनाममुदक P. धनाद्यभिलाषवन्तम् Sy.

७. स P.

८. कुरुते देवप्रीत्यर्थं प्रदानबुद्धिं करोति या सैव स्त्रीति पूर्वत्र सम्बन्धः Sy.

९. श्यावाश्वस्तरन्तं गायत्र्या तुष्टाव DDN.

१०. घेति पूरणः Sy.

११. ०यस्यार्थभू० P., D. नेमोऽर्धः । जायापत्योर्मिलित्वैककार्यकर्तृत्वावेक एव पदार्थः । 'अर्धं शरीरस्य भार्या' इत्यादिस्मृतेः । शशीयस्या अर्धभूतस्तरन्तःSy. शशीयस्या आदेशवर्तिन्या अर्धभूतः त्वो नेम इत्यर्धवाचिनौ (Cf.N.3.20.) जायापत्योर्मिलितयोरेककार्यकर्तृत्वावेक एव । 'अर्द्धो ह वा एष आत्मनो यज्जायेति' शतपथे (cf.B.5 2 1 10.) तस्माच्चेम इत्युक्तम् DDN.'त्वो नेम इत्यर्धस्य' N.3.20.

१२. बहुधा स्तुतोऽपि गुणस्यातिबाहुल्यादस्तुत एवेति ब्रुवे Sy.

१३. पणिः स्तोता । पण स्तुतौ DDN.

१४. सत P. सव D. तरन्तः Sy., DDN.

१५. वीरा धनानां प्रेरयितारो दानशीलाः । तैर्दातव्यं धनं देय तस्मिन् धने Sy. अमित्रान् वारयन्तीति वीरास्तैर्दातव्य धनं वैरदेयं तस्मिन् धने DDN.

१६. सर्वेभ्यो दातेत्यर्थः Sy.

१७. इदिति पूरणः Sy., DDN.

१८. The passage समानं साम्यमनयोः should immediately follow समानः and precede एव भवति ।

१९. ०कथय० P., D. अलपत् । स्पष्टमाचष्ट Sy.

२०. प्रवृत्तयौवना Sy.

२१. ०न्ति P. प्रतिमोदमाना Sy.

श्यावस्तस्मै[1]। मार्गम्। अथ मा रोहितवर्णावश्वौ। दीर्घकीर्तिम्[2]। मेधाविनम्। पुरुमीळ्हं[3] च प्रति। भक्षणाय गन्तु तेन मार्गेण वि येमतु[4]।

यो मे[5] धेनूनां शतं वैददश्विर्यथा ददत्। तरन्तइव मंहना[6] ॥ १० ॥

यो मे[7]। यः। मे[8]। धेनूनाम्। शतम्। विददश्वस्य पुत्रस्तरन्त[9]। इव। प्रायच्छत्[10] तं प्रति गन्तु तदवाह[11] तरन्त[12] इव। महत्त्वेन[13]।

य ईं[14] वहन्त आशुभिः पिबन्तो मदिरं मधु। अत्र श्रवांसि दधिरे ॥ ११ ॥

य ईम्[15]। ये[16]। यच्छन्ति[17]। आशुभिरश्वैः[18]। मदकरम्। मधु[19]। पिबन्तस्ते[20]। अस्यां[21] पृथिव्याम्[22]। अन्नानि। स्थापयन्ति[23]।

येषां श्रियाधि[24] रोदसी विभ्राजन्ते[25] रथेष्वा। दिवि रुक्मइवोपरि[26] ॥ १२ ॥

येषां श्रिया[27]। यषाम्[28]। श्रिया[29]। अधिष्ठिते[30]। द्यावापृथिवी[31]। य[32] च। रथेषु। विभ्राजन्ते[33]। दिवि[34]। आदित्य[35] इव, उत्तरत्र सम्बन्ध[36]।

---

१. श्यावश्चवस्तस्मै P. श्यावाश्वाय Sy.
२. शशीयस्या वत्तो Sy.
३. ०तिः P. प्रभूताय प्रभूतकीर्तये वा Sy.
४. एतन्नामकाय प्रभूतगृहाय। 'क्रियार्थोपपदस्य च कर्मणि स्थानिनः' (Pa.2.3.14) इति चतुर्थी। पुरुमीळ्हं प्राप्तुमित्यर्थः Sy.
५. ०मतः P., D. धृतवन्तावित्यर्थः। या अश्वाभ्यां युक्ते रथे स्थापयित्वा पुरुमीळ्हगृहस्य मार्गं प्रदर्शयन्ती पुरतो गता सैव पुंसो भवति वस्यसीति पूर्वत्र सम्बन्धः Sy. ६. Omitted by D. ७. इयं पुरुमीळ्हस्तुतिः Sy.
८. मह्यम् Sy. ९. पुरुमीळ्होऽपि Sy.
१०. स यथा धेनुशतं बहुविधं च वत्तवान् तद्वद्ददश्विः पुरुमीळ्होऽपि ददत्। तं स्तुव इति शेषः Sy.
११. This seems to be the explanation of यथा ॥ येन प्रकारेण Sy.
१२. वत्तवान् Sy. १३. प्रतु गन्त तदेवाह P.
१४. स यथा धेनुशतं बहुविधं च धनं वत्तवान् तद्वद्ददश्विः पुरुमीळ्होऽपि ददत्। तं स्तुव इति शेषः Sy.
१५. ०त्स्वेन is suggested for त्स्वेन॥ मंहनीयानि धनान्यपि ददत् Sy.
१६. इदानीं मरुत एवैत इति निश्चित्य जनप्रसिद्धैर्माहात्म्यैः स्तौति Sy.
१७. Omitted by D. मरुतः Sy.
१८. च्छन्ति P उह्यन्ते Sy. १९. शीघ्रगामिभिरश्वैः Sy.
२०. सोमरसम्। पाथेयत्वेन धृत सोममित्यर्थः। ते मरुतः Sy. २१. अस्मिन् देशे Sy.
२२. स्तुतिजनितानि यशांसि Sy.
२३. ०ति D. धारयन्ति Sy.
२४. VM. ignores ईम्॥ इदानीम् Sy.
२५. मरुताम् Sv. २६. कान्त्या Sy.
२७. अधिते P. भवत इति शेषः Sy.
२८. द्यावापृथिव्यौ Sy.
२९. आ इति चार्थे Sy.
३०. यस्मादेते मरुतः विशेषेण दीप्यन्ते Sy.
३१. द्युलोके Sy.
३२. तत्र दृष्टान्तः। रोचमान आदित्य इव Sy.
३३. VM. ignores उपरि॥ उपरिभूते। यद्वा उपरि रथस्योपरीति वा योज्यम् Sy.

युवा॒ स मारु॑तो ग॒णस्त्वेषर॑थो॒ अने॑द्यः । शुभं॑यावाप्र॑तिष्कुतः ॥ १३ ॥

युवा स मारुतः । युवा[1] । स. । मारुत[2] । गण. । दीप्तरथ । अकुत्स्य[3] । शुभं गच्छन् । शत्रुभिरप्रतिकृतः[5] ।

को वे॑द नू॒नमे॑षां॒ यत्रा॒ मद॑न्ति॒ धूत॑यः । ऋ॒तजा॑ता अरे॒पसः॑ ॥ १४ ॥

को वेद[6] । क. । वेद[7] । एषा तत् स्थानम् । यत्र[9] । मदन्ति[10] । कम्पयितार[11] । यज्ञार्थं जाता । अपापाः[12] ।

यू॒यं मर्ता॑ विपन्यवः प्रण॒ेतार॑ इ॒त्था धि॒या । श्रोता॑रो॒ याम॑हूतिषु ॥ १५ ॥

यूयम् । यूयम् । मनुष्यम्[14] । हे मेधाविन[15] । प्रणयथ[16] । सत्यमेव[17] । कर्मणा[18] । श्रोतारश्च[19] तस्यागमनम् । आगमनार्थेषु[20] तस्याह्वानेषु ।

ते नो॒ वसू॑नि॒ काम्या॑ पुरुश्च॒न्द्रा रि॑शादसः । आ य॑ज्ञियासो वव्रुत्तन ॥ १६ ॥

ते नः[21] । ते[22] । अस्मभ्यम् । वसूनि[23] । कमनीयानि[24] । बहूना ह्लादयितार. । रिशतामसितारः[25] । त आवर्तन[26] ? हे यज्ञियाः[28] ! -

---

१. सर्वत्र मिश्रयिता नित्यतरुणो वा Sy.
२. ०तोंगेणः D.
३. ०त्स्य D. अनिन्द्यः Sy.
४. शोभनं गन्ता Sy.
५. अप्रतिगतोऽप्रतिशब्दितो वा । एवं महानुभावो गणो दीप्यत इति Sy.
६. को वेद omitted by P.
७. जानाति Sy.
८. मरुताम् Sy.
९. स्थाने Sy.
१०. हृष्यन्ति Sy.
११. शत्रूणां कम्पकाः Sy.
१२. जलार्थमुत्पन्ना यज्ञे वा प्रादुर्भूताः Sy.
१३. VM. ignores नूनम् ॥ इदानीम् Sy.
१४. ०ष्या P. ०ष्य D. मरणस्वभावं यजमानम् Sy.
१५. हे स्तुतिकामाः ! मरुतः ! Sy.
१६. प्रणेतारः । प्रकर्षेण प्रापयितारोऽभिमतं स्वर्गादिकम् Sy.
१७. अनया Sy.
१८. इदानीं कृतप्रकारयानुग्रहबुद्धया ईदृशेन स्तुतिकर्मणा वा निमित्तेन Sy.
१९. श्रोतार आह्वानानाम् Sy.
२०. यामो गमनम् । तदर्था हूतयो यस्मिन्निति यामहूतयो यज्ञाः । तेषु Sy.
२१. न P., D. २२. यूयम् Sy.
२३. निवासयोग्यानि धनानि Sy.
२४. स्पृहणीयानि Sy.
२५. प्रभूताह्लादकधनाः Sy.
२६. हे हिंसकानां शत्रूणामत्तारः ! Sy.
२७. ०तनं D. आववृत्तन is suggested for आवर्तन ॥ आवर्तयथेत्यर्थः । मरुतां दानप्रशंसाया अपेक्षितत्वान्न प्रार्थनोचिता Sy.
२८. हे यज्ञार्हाः ! Sy.

एतं मे स्तोममूर्म्ये दाभ्र्याय परा वह । गिरो देवि रथीरिव ॥ १७ ॥

एतं मे । एतम् । मे । स्तोमम् । हे रात्रि ! दाभ्र्याय राज्ञे रथवीतये । अवगमय । गिरश्चेमा दुहितृयाचनविषयाः । रथान् इव शीघ्रम् ।

उत मे वोचतादिति सुतसोमे रथवीतौ । न कामो अप वेति मे ॥ १८ ॥

उत मे वोचतात् । अपि च । मे । ब्रूहि । इत्थम् । सुतसोमे । रथवीतौ । न । कामस्तव दुहितृविषय. । मम । अपगच्छतीति ।

---

१. श्यावाश्वो गायत्र्या रात्रिं विवाहंवौत्ये प्रेरयति DDN.

सम्पन्नऋषिभावस्य श्यावाश्वस्यार्चनानसः ।
रथवीतिसुतायाश्च विवाहं शौनकोऽब्रवीत् ॥
मरुत्सु तु प्रयातेषु श्यावाश्वः सुमहायशाः ।
प्रादुर्भूतार्षमात्मानं ज्ञात्वात्रिकुलनन्दनः ॥
रथवीतेर्दुहितरमगच्छन्मनसा तदा
स सत्यमृषिमात्मानं प्रवक्ष्यन् रथवीतये ॥
'एतं मे स्तोमम्' इत्याभ्यां दौत्ये रात्रिं
न्यवेदयत् ।
ऋषेर्नियोगमाज्ञाय देव्या रात्र्या प्रचोदितः ॥
आदाय कन्यकां दातुमुपेयायार्चनानसम् ।
पादौ तस्योपसंगृह्य स्थित्वा प्रह्वः कृताञ्जलिः ॥
रथवीतिरहं दाभ्र्य इति नाम शशंस सः ।
मया संयोगमिच्छन्तं त्वां प्रत्याचक्षि यत् पुरा ॥
तत्क्षमस्व नमस्तेऽस्तु मे मा स्म भगवन् क्रुधः ॥
ऋषेः पुत्रः स्वयमृषिः पितासि भगवन्नृषेः ।
हन्त प्रतिगृहाणेमां स्नुषामित्येनमब्रवीत् ॥
तस्मै ददावश्वशतं स राजा स्वलङ्कृतां
चापि सुतां स्नुषार्थम् ।
विवाहकालेऽपि ददौ नरेन्द्रः शतं हयानां
दुहितुः सहस्रम् ॥
गवां सहस्रं वसु च प्रभूतं तप्तुं तपोऽन्तेऽथ
वनं जगाम ॥ इति Sy.

These stanzas are already quoted on RV.V.61.1. by VM. DDN. also quotes these stanzas with some variations.

२. मदीयम् Sy., DDN.

३. मरुद्भ्यः कृतं स्तोत्रमहं मन्त्रदृग् भूत्वा मरुतः स्तुतवानित्येवम् Sy. मदीयमेतं स्तोमं मरुद्भ्यः कृतं स्तोत्रमहं मन्त्रदृग्भूत्वा मरुदादीन् स्तुतवानित्येवंपरा मत्तः पराङ्मुखी दाभ्र्याभिमुखी भूत्वा DDN.

४. रात्री P. रात्रि ! देवि ! Sy., DDN. ऊर्म्येति रात्रिनाम Ngh. 1.7.

५. दाढ्राय D., P.
श्यावाश्वाय Sy.

६. अपगम P. अवगमि D. प्रापयेत्यर्थः । तदेवादरार्थमुच्यते Sy. प्रापय DDN.

७. स्तुतीर्मरुद्विषयाः Sy. तत्र वृष्टान्तः हे देवि ! स्तुतीः मरुद्विषयाः DDN.

८. रथी यथा रथेऽभिप्रेतं वसु स्थापयित्वाभिमतं देशं प्रापयति तद्वत् Sy. रथेऽभिप्रेतं वस्तु रथीर्यथा स्थापयित्वा अभिमतप्रदेशं प्रापयति तद्वत् । एवं प्रेरकात्कार्यसिद्धिर्जाता DDN.

९. VM. ignores देवि ।

१०. हे ऊर्म्ये ! Sy.

११. माम् Sy.

१२. ब्रूहि किमित्युच्यते Sy.

१३. कृतसोमयागे Sy.

१४. राज्ञि Sy.

१५. तत्पुत्रीविषयः Sy.

१६. ०न्तीति D. (न) अपगच्छति (न) विरमत इतीत्थं वोचतात् Sy.

एष क्षेति रथवीतिर्मघवा गोमतीरनु । पर्वतेष्वपश्रितः ॥ १६ ॥

एषः ।[1] एष । निवसति । रथवीति धनवान् । गोमतीर्नदी । लक्षीकृत्य गोमत्या. समीपेऽभि तस्या-वासस्तत्र च तपोऽर्थम् ।[2] पर्वतेषु[3] । अपश्रितम्[4] गत्वा मदीय वचन ब्रूहीति ।[5]

V.62.

ऋतेन ऋतमपिहितं ध्रुवं वां सूर्यस्य यत्र विमुचन्त्यश्वान् ।
दश शता सह तस्थुस्तदेकं देवानां श्रेष्ठं वपुषामपश्यम् ॥ १ ॥

ऋतेन[6] ॥ श्रुतवित् ॥ हे मित्रावरुणौ ! उदकेन । युवयो[7] । स्थानम्[8] । अपिहितम्[9] उदकमध्ये वर्तत इत्यर्थ । सूर्यस्य । यत्र[10] । अश्वान् पश्चिमाया दिशि । देवा विमुञ्चन्ति[11] मरुतो वा[12] तत्र च । तत् स्थानमभव-दिति । तच्च[13] । एक स्थानम्[14] । दश[15] । शतानि देवानाम्[16] । सह । अधितिष्ठन्ति तेषा देवाना तस्मिन् स्थाने ।

---

१. कन्यां दत्वा कृतार्थं तं श्यावाश्वोऽथ वनं गतम् । रथवीतिं तपस्यन्तं सम्प्रेक्ष्यार्षेण चक्षुषा । रम्ये हिमवतः पृष्ठे 'एष क्षेति' इति सोऽब्रवीत् Sy., DDN.

२. तत्रान्ते वयसि निवासमकरोदित्यर्थः । एष क्षेति—'एषस्य स च०' इति 'ऊष्मा परिलुप्यते त्रयाणाम्०' (RPR 2.8;11.) इत्यूष्मलोपः DDN.

३. गोमतीर्नं० P. उदकवतीः Sy., DDN.

४. अनुसृत्य नदीनां तीरे Sy. अनुसृत्य DDN.

५. तस्य वा० P.

६. हिमवत्पर्वतप्रान्तेषु Sy. हिमवत्प्रान्तेषु DDN.

७. र्वतेष्व व श्रित० P. आश्रितः Sy., DDN

८. Ms. D. puts the figure ॥६१॥ here to indicate the end of the sixty-first hymn. No such number is given in P.

९. 'ऋतेन ऋतम्' इति नवर्चं षष्ठं सूक्तमात्रेयस्य श्रुतविद आर्षं त्रैष्टुभं मैत्रावरुणम् । तथा चानुक्रम्यते 'ऋतेन नव श्रुतविन्मैत्रावरुणं वै तत्' (KAS.27.62.p.21.) इति । 'वै तत्' इत्युभयोः प्रयोगात्तुह्यादिपरिभाषयैतदा-दीन्येकादश सूक्तानि मित्रावरुणदेवत्यानि (Cf. KSA.12.3.p.5.) । विनियोगो लैङ्गिकः Sy.

१०. यत्र वां युवाभ्यां स्थितिस्तदित्यर्थः । सूर्य-मण्डले मित्रावरुणयोः स्थितिः 'चित्रं देवाना-मुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः' (RV. I.115.1.) 'उद्वां चक्षुर्वरुण सुप्रतीकं देवयोः' (RV.VII.61.1.)इति 'चक्षुर्मित्रस्य वरुणस्य' (RV.VII.63.1.) इत्यादिषु प्रसिद्धा Sy.

११. ऋतं सत्यभूतं मण्डलम् Sy.

१२. आच्छादितम् Sy.

१३. ० हितदक० D.

१४. यस्मिन् मण्डले स्थितान् Sy.

१५. देव D.

१६. विमोचयन्ति स्तोतारः । मन्वेहादिभिर्निरुद्धा-नित्यर्थः । अथवा शीघ्रधावनाय स्तुत्या प्रेरयन्ति Sy.

१७. ०यो वा P., D.

१८. ०मभवति P.

१९. मण्डलम् Sy.

२०. यस्मिंश्च मण्डले दशशता शतानि सहस्र-संख्याका रश्मयः Sy.

उप्तानाम्[1] । श्रेष्ठ[2] तत् स्थानम् । पश्यामि[3] ।

तत्सु वां मित्रावरुणा महित्वमीर्मा तस्थुषीरहर्भिर्दुदुह्रे ।[4]
विश्वाः पिन्वथः स्वसरस्य धेना अनु वामेकः पविरा ववर्त ॥ ३ ॥

तत् सु वाम् । तत्[5] । सुष्ठु[6] । वाम्[7] । दोग्धि[8] । हे मित्रावरुणौ ! महत्त्वम्[9] । आदित्यः । तत्र स्थिता[10] अप[11] । अहर्भि[12], आदित्यो मैत्रावरुण तेजो दोग्धीति[13] । विश्वा[14] । पिन्वथश्च युवाम्[15] । आदित्यस्य । अप[16] । तौ वाम्[17] । आदित्यस्यैक[18] । रश्मि[19] । अनुवर्तते[20] ।[21]

अधारयतं पृथिवीमुत द्यां मित्रराजाना वरुणा महोभिः ।[22]
वर्धयतमोषधीः पिन्वतं गा अव वृष्टिं सृजतं जीरदानू ॥ ३ ॥

[**अधारयतम्**[23] ।] अधारयतम्[24] । पृथिवीम्[25] । अपि च । द्याम्[26] । हे मित्रावरुणौ[27] ! राजानौ[28] ! हविर्भि[29] ।

---

१. वपुष्मतां तेजोवतामग्न्यादीनाम् । मत्वर्थलक्षणा, अथवा व्यधिकरणषष्ठी । देवानां वपुषां शरीराणां श्रेष्ठम् । मण्डलं हि सूर्यस्य वपुःस्थानीयम् Sy.

२. प्रशस्यम् Sy.

३. अपश्यम् । अथवा वां युवयोर्मध्ये सूर्यस्य मण्डलमपश्यमिति व्याख्येयम् । 'मैत्रं वा अहः' (TB.1.7.10.1.) इति श्रुतेर्मित्रस्यैव सूर्यत्वादित्याशयेन Sy.

४. VM. ignores ध्रुवम् ॥ ध्रुवं शाश्वतमपश्यमिति सम्बन्धः Sy.

५. अतिप्रशस्तमित्यर्थः Sy.

६. वं P. युवयोः Sy.

७ वाश्व P. दुग्धे Sy.

८. किं तदित्युच्यते । सततगन्ता सर्वस्य प्रेरको वादित्यः Sy.

९. महत्त्वानन्तादित्यन्तत्र P. दहत्त्वागन्तादित्यस्तत्र D. १०. स्थावरभूता अपः Sy.

११. अहोभिर्वर्षर्तुसम्बन्धिभिः Sy.

१२. अपो हभि रादित्य P. अपो हरादित्या D.

१३. सर्वाः Sy. १४. वर्धयथः Sy.

१५. स्वयं सर्तुरादित्यस्य Sy.

१६. अद्रुस्तौ P. धेनाः लोकानां प्रीणयित्रीर्द्युतीः Sy. १७. युवयोः Sy.

१८. अप्रतियोगी Sy.

१९. पविः । पविरिति रथस्य नेमिः 'पवी रथनेमिर्भवति' (N.5.5.) इति यास्कवचनात् । तथाप्यत्र लक्षितलक्षणया रथे वर्तते केवलचक्रस्यावर्तनायोगात् । युवयोरेको रथः Sy.

२०. अनुक्रमेण परिभ्रमति Sy.

२१. VM. ignores आ ।

२२. The *pratika* is supplied by the Editor.

२३. हे देवौ ! युवाम् । वरुणौ । प्रतियोग्यपेक्षया द्विवचनम् । अत्र पादादित्वादाद्यं पदं न निहन्यते । वरुणेत्येतस्य तु 'आमन्त्रितं पूर्वमविद्यमानवत्' इति पूर्वस्याविद्यमानवत्त्वेनास्यैव पादादित्वादनिघातत्वं युक्तम् । नैवं भवति । 'नामन्त्रिते समानाधिकरणे सामान्यवचनम्' इति वरुणेत्येतस्यामन्त्रितसमानाधिकरणत्वादस्य च सामान्यवचनत्वादविद्यमानवत्त्वाभावेन पादादित्वाभावादुत्तरस्य निघातत्वं युक्तम् Sy.

२४. राजानौ P., D. मित्रभूताः स्तोतारो राजानः स्वामिन ईश्वरा भवन्ति ययोः सकाशात्तौ मित्रराजानौ Sy.

२५. Omitted by D. तेजोभिः स्वसामर्थ्यैः Sy.

वर्धयतम्[1]। ओषधी । पशूंश्चापि । पिन्वतम्[2]। वृष्टिं च । अवसृजतम्[3]। क्षिप्रदानो !

आ वामश्वासः सुयुजो वहन्तु यतरश्मय उप यन्त्ववर्वाक्[4]।
घृतस्य निर्णिगनु वर्तते वामुप सिन्धवः प्रदिवि[5] क्षरन्ति ॥ ४ ॥

आ वाम्। आवहन्तु[6]। वाम्[7]। अश्वा । सुयुज । नियतप्रग्रहा । उपगच्छन्तु[8]। अभिमुखम्[9]।
घृतस्य[10]। रूपम्[11]। वाम्। अनुवर्तते[12]। परिवृतेनावामुदकेन[13] ? उपक्षरन्ति[14] युवयो सकाशात्। प्रदीप्तेऽन्तरिक्षे[15]।

अनु श्रुतामतिं वर्धदुर्वीं बर्हिरिव यजुषा रक्षमाणा।
नमस्वन्ता धृतदक्षाधि गर्ते मित्रासाथे वरुणेळास्वन्तः ॥ ५ ॥

अनु श्रुताम्[17]। विश्रुतम्। भवतो रूपम्[18]। वर्धत्[19]। विस्तृतम्। बर्हिरिव[20]। यजुषाऽध्वर्युरूपम्[21]।
रक्षमाणौ[22] हविष्मन्तौ[23]। धृतवन्तौ[24]। रथस्योपरि[25]। अन्वासाथे[26]। पृथिवीषु[27]। अन्तर्देवयजनेषु[28]।

अक्रविहस्ता सुकृते परस्पा यं त्रासाथे वरुणेळास्वन्तः।
राजाना क्षत्रमहृणीयमाना सहस्रस्थूणं बिभृथः सह द्वौ ॥ ६ ॥

अक्रविहस्ता[31]। क्रविर्हिंसाकर्माऽहिंसितहस्तौ[32]। यजमानाय[33]। अत्यन्त[34] रक्षकौ[35]। ह मित्रावरुणौ[36]।

---

१. ०यत P., D वर्धयत वृष्टिप्रेरणेन Sy.
२. ०तः D. गवाश्वादीन् वर्धयतम् Sy.
३. अवाङ्मुखं प्रेरयतम् Sy.
४. हे मित्रावरुणौ ! Sy. ५. युवाम् Sy
६. सुष्ठु रथे युक्ताः सन्तः Sy.
७. निगत० P. सारथिनियतप्रग्रहास्ते Sy.
८. उपयन्तु Sy. ९. अर्वाक् Sy.
१०. पृघृतस्य P. प्रघृतस्य D. उदकस्य Sv.
११. रूपाः P. रूपाग् D.
१२. अनुगच्छति Sy. १३. ०तेनौवा० P.
१४. उपगच्छन्ति युवयोरनुग्रहात् Sy.
१५. पुराणाः Sy. 'प्रदिवि' इति पुराणनाम Ngh. 3.27. १६. VM. ignores सिन्धवः।
१७. विश्रुताम् Sy.
१८. ०प P., D. शरीरदीप्तिमित्यर्थः Sv. अमतिम्। रूपनामैतत् Ngh. 3.7.
१९. वर्धतद् P. अनुवर्धयन्तौ Sy.
२०. यज्ञः । स यथा Sy.
२१. मन्त्रेण रक्ष्यते तद्वत् Sy.
२२. ०र्युपरु० P. ०र्युवरु० D.
२३. पालयन्तौ Sy. २४. अन्नवन्तौ Sy.
२५. हे आत्तबलौ ! Sy.
२६. रथे Sy. 'रथोऽपि गर्त उच्यते' (N. 3.5.)। 'आ रोहथो वरुण मित्र गर्तम्' (RV. V. 62.8.) इति Sy.
२७. उपरि सा साथे P. उपविशथः Sy.
२८. यागभूमिषु Sy.
२९. ०वीस्वन्त दे० P. मध्ये Sy.
३०. VM. ignores मित्र and वरुण॥ हे मित्रावरुणौ ! युवामुक्तलक्षणौ सन्तौ Sy.
३१. अकवि० D. ३२. ०विर्हिंसाकर्मा हिंसाकर्मा हिं० P. कविर्हिंसाकर्मा हिं० D.
३३. अकृपणहस्तौ । दानशूरावित्यर्थः Sy.
३४. शोभनस्तुतिकर्त्रे Sy.
३५. परस्तात् पातारौ रक्षितारौ Sy.
३६. हे मित्रावरुणौ ! युवाम् Sy.

यम्[1] । रक्षथ[2] । देवयजनेषु[3] । तस्मै यजमानाय धनम्[4] । अक्रुध्यन्तौ[5] प्रयच्छथः । तौ युवाम् । सहस्रस्थूणम्[6] । रथ[7] च । सह[8] । धारयथः[9] ।

हिरण्यनिर्णिगयो अस्य स्थूणा वि भ्राजते दिव्यश्वाजनीव ।
भद्रे क्षेत्रे निमिता तिल्विले वा सनेम मध्वो अधिगर्त्यस्य ॥ ७ ॥

हिरण्यनिर्णिक्[10] । हिरण्यरूपा[11] । अयोमयी च । अस्य रथस्य । स्थूणा[12] । विभ्राजते च । सान्तरिक्षे[13] । अश्वाजनीव[14] । अवलम्बमाना[15] । भद्रे सुकल्याणे[16] । उद्गतान्न[17] । प्रारूढमस्य उप्तव[18] ? वाशब्द उपमार्थीयः । तिलतिर्गतिकर्मा[19] । अन्नमिव । भजेम[20], उदकम्[21] । रथे स्थितम्[22] ।

हिरण्यरूपमुषसो व्युष्टावयःस्थूणमुदिता सूर्यस्य ।
आ रोहथो वरुण मित्र गर्तमतश्चक्षाथे अदितिं दितिं च ॥ ८ ॥

हिरण्यरूपम्[23] । हिरण्यरूपम्[24] । उषसि[25] । व्युष्टायाम्[26] । अयस्थूणम्[27] । सूर्ये । उदिते प्रातरित्यर्थ[28] ।

---

१. यजमानम् Sy. २. तस्मै सुकृते अक्रविहस्ता परस्पा च भवथ इति सम्बन्धः Sy.
३. VM. seems to explain इलासु and अन्तः together as देवयजनेषु ॥ यागभूमिषु मध्ये Sy. ४. धन P.
५. द्वौ परस्परम् Sy. ६. अनेकावष्टम्भकस्तम्भोपेतं सौधादिरूपं गृहं च Sy.
७. साहित्येन Sy. ८. ०थ P., D. सुकृते यजमानाय । अथवा क्षत्रं बलमपरिमिताभिः स्थूणाभिरुपेतं रथं चागमनार्थं सह धारयथः Sy.
९. VM. ignores राजाना ॥ राजाना राजमानौ Sy. १०. अनयो रथो हिरण्यनिर्णिक् हिरण्यरूपः Sy. निर्णिगिति रूपनाम Ngh. 3.7. ११. ०पयो मयि D. अयोविकारा इत्यर्थः । अयोमया वा तादृशो रथः Sy. अय इति हिरण्यनाम Ngh. 1.2.
१२. कीलकादयः Sy. १३. चासावन्त० P.
१४. अश्वा व्यापनशीला मेघाः । तानजति गच्छतीत्यश्वाजनी विद्युत् । सेव दिवि भ्राजते Sy.
१५. स्थूणा यूपयष्टिरवस्थितः Sy.
१६. ०णा P. कल्याणे स्तुत्ये वा Sy.
१७. क्षेत्रे देवयजने Sv.
१८. 'तिल स्नेहने' । तिलुः स्निग्धा इला भूमिर्यस्य तत् क्षेत्रं तिल्विलं देवयजनम् । घृतसोमादिना स्निग्धे भद्रे च क्षेत्रे Sy.
१९. The passage, तिलतिर्गतिकर्मा should immediately follow प्ररूढसस्ये ।
२०. ०न्नभिला P. मध्वः मधुपूर्णम् Sy.
२१. सम्भजेम Sy.
२२. गर्तस्य गर्तं रथम् । कर्मणि षष्ठ्यौ । अधीति पूरणः । अथवा गर्तस्याधि रथस्योपरि मध्वो मधु सोमरसं सनेम स्थापयेमेत्यर्थः Sy.
२३. श्रुतविदात्रेय एतया त्रिष्टुभा मित्रावरुणावस्तौत् । राजसूयेऽभिषेचनीयो नाम ऋतुः, तत्र यजमानस्य रथमारुरुक्षतो गृहीतेषुधनुष्कौ बाहू अनयाऽभिमन्त्र्येते । तावेवात्र मित्रावरुणाभिप्रेतावधिदेवताभिप्रायेण ।. . .इति तावुच्येते Dur. श्रुतविद आर्षम् SKN.
२४. हिरण्यसदृशवर्णम् Dur. २५. उषसः Dur.
२६. प्रातःकाल इत्यर्थः Sy. व्युच्छेदकाले Dur. व्युच्छनवेलायाम् SKN.
२७. अयोमयशङ्कुम् Sy. एवंरूपम् अयोमयं स्थूणम् Dur. अयोमयी स्थूणा, अतिस्थूला वा यस्य तम् SKN. २८. उदितौ उदये । स एव कालः प्रकारान्तरेणोक्तः Sy. उदयकाले Dur. उदयवेलायाम् SKN. २९. प्रेतरि० P.

हे मित्रावरुणौ[1] ! रथम्[2]। आरोहथः[3]। अस्माद्[4] रथात्[5]। पश्यथ[6]। अदीनम्[7]। दीनम्[8]। च जनम्[9]।

यद्बंहिष्ठं नातिविधे[10] सुदानू अच्छिद्र[11] शर्म[12] भुवनस्य गोपा[15]।
तेन[16] नो मित्रावरुणावविष्टं सिषासन्तो जिगीवांसः[21] स्याम ॥ ६ ॥

यद् बंहिष्ठम्[10]। यत्। अतिशयेन बहुलं विस्तृतम्। न च। शत्रूणामतिविधातु शक्यं[12] भवति। हे शोभनदानौ ! अच्छिद्रम्[13]। गृहम्[14]। हे भुवनस्य, गोपायितारौ[15] ! तेन[16]। अस्मासु[17]। हे मित्रावरुणौ ! रक्षत शत्रून्। सम्भक्तुमिच्छन्तौ[18] वयम्[19]। तेषा जेतार[20]। स्याम[21]।

इत्थं व्याख्यत् सप्तविंशमध्याय माधवाह्वय[22]।
जगतामेकवीरस्य विषये निवसन्[23] सुखम्[23] ॥

---

१. हे मित्र ! हे वरुण ! युवाम् Sy. हे वरुण ! हे मित्र ! SKN.

२. स्वम्...रथम् Dur. रथमात्मीयम् SKN.

३. आरोहथः यज्ञं प्राप्तुम् Sy. यौ युवामेतस्मिन् काले....आरोहथस्तौ युवां ब्रवीमि ममाप्येवं रथं गर्तमेतस्मिन् विधावङ्गभूतं तत्सरूपमेव साम्प्रतमारोहतम् Dur. आरोहथो युवाम् SKN.

४. अस्माद्धेतोः Sy. अत एनमारुह्य Dur. अनन्तरमिति शेषः SKN.

५. रथं P. रथां D.

६. कुरुतमित्यर्थः Dur. लोकपालौ हि मित्रावरुणौ, यश्च यत् करोति शुभमशुभं वा तत्सर्वं पश्यथः SKN.

७. ०दि० P. अदीनमनुपक्षीणमात्मपक्षम् Dur. 'दीङ् क्षये'....अक्षीणं च कर्म। अथवा, अदितिं दितिं चेति ददातेरेते रूपे। अदातारं दातारं च हविषाम् SKN.

८. खण्डितां प्रजादिकां च Sy. दीनं चोपक्षीणमित्रपक्षमित्यर्थः Dur. क्षीणम् SKN.

९. Omitted by D. गर्तः सभास्थाणुः। गृणातेः। सत्यसङ्गरो भवति।... रथोऽपि गर्त उच्यते। गृणातेः स्तुतिकर्मणः। स्तुततमं यानम्। 'आ रोहथो वरुण मित्र गर्तम्' इत्यपि निगमो भवति N.3.5., SKN. II.132.

१०. दाक्षायणयज्ञे 'यद्बंहिष्ठम्' इति नवमी द्वितीयस्यामावास्यायां मैत्रावरुणस्य हविषो याज्या। सूत्रितञ्च—'आ नो मित्रावरुणा यद्बंहिष्ठं नातिविधे सुदानू' (ĀśS. 2.14.) इति। मैत्रावरुणे पशौ हविष एषैव याज्या। सूत्रितञ्च—'यद्बंहिष्ठं नातिविधे सुदानू हिरण्यगर्भः समवर्तताग्रे' (ĀśS.3.8.) इति Sy.

११. बहुतमम् Sy.

१२. अतिवेद्धुमशक्यं शर्मेति शर्मविशेषणम्। 'व्यध ताडने' इत्यस्मादत्युपपदे कृत्यार्थे केन् सम्प्रसारणं च। तादृशं शर्म धारयथः Sy.

१३. अनवच्छिन्नम् Sy.

१४. सुखं गृहं वा Sy.

१५. गोपा युवाम् Sy.

१६. शर्मणा Sy.

१७. ०स P. अस्मान् Sy.

१८. धनानि सम्भक्तुमिच्छन्तो वयम् Sy.

१९. ०तो P.

२०. शत्रूणां धनानि जेतुमिच्छन्तः Sy.

२१. भवेम Sy.

२२. ०सत् P.

२३. Ms. D. puts the figure ॥ ६२ ॥ here to indicate the end of the sixty-second hymn. No such number is given in P.

[चतुर्थोऽध्यायः ॥]

'ऋतस्य गोपौ'[1] अध्यायं व्याचिख्यासति माधवः ।
पूरणत्वापूरणत्वे वाच्यमेव प्रदर्शयन् ॥१॥
अवान्तरेषु वाक्येषु बहुष्वावर्तते क्रिया ।
'अश्याम तं काममग्ने'[2] इत्याद्यत्र निदर्शनम्[3] ॥२॥
'येनाव तुर्वशं यदु येन कण्वं धनस्पृतम्'[4] ।
एवंविधेऽनुषङ्गेण वाक्यार्थस्य प्रदर्शनम् ॥३॥
अनुषङ्गाय येनेति पुनरावर्तते पदम् ।
अतो न तादृशेष्वस्ति पूरणत्वमिति स्थितिः[5] ॥४॥
'नहि ते[6] क्षत्रं न सहः' 'न जातो न जनिष्यते'[7] ।
एवम् 'अन्वह[8] मासाः'[9] च तादृशाश्च न पूरणाः[10] ॥५॥
'भवन्तु नः सुत्रात्रासः सुगोपाः'[11] इति दृश्यते ।
त्राणगोपनयोर्भेदान्न गोपा इति पूरणः[12] ॥६॥
'समानो वां जनिता'[13] इति ततश्च 'भ्रातरा युवम्'[14] ।
इत्यर्थो भ्रातरेत्येतत्ततश्चात्र न पूरणम् ॥७॥

---

१. पोध्या० D. बोध्या० P. गोपावध्या० R.
२. RV.VI.5.7.; RV.V.63.1.
३. P. reads अश्युग्निदर्शन and D. reads अश्युग्निवर्शनं for अश्याम तं काममग्ने इत्याद्यत्र निवर्शनम् ।
४. ०श P. तुवश D.
५. कण्ड्वन्धस्पृतं D. RV.VIII.7.18.
६. ०ति D.
७. RV.I.24.6.
८. P. reads न जात्र प्रकृष्यते and D. reads न जात्र प्रकृष्यते for न जातो न जनिष्यते । RV.I.81.5.
९. अन्वाह् D.
१०. RV.X.89.13.
११. ०णः P.
१२. ०प D. RV.VI.51.11.
१३. त्राणनावनयोः D. १४. ०णं P., D.
१५. RV.VI.59.2.
१६. तत P., D.
१७. RV.VI.59.2.

सूर्याश्वानामियं संज्ञा या 'भद्रा अश्वा हरितः'[1]।
हरिन्नामधेया अश्वा अस्येत्यर्थ प्रदर्शयेत् ॥८॥
एवंविधेषु नैकस्य प्राज्ञा इच्छन्ति निर्वचः[3]।
'तूयं[4] श्येनेभिराशुभिः' निर्ब्रूयात्तादृशानिति[7] ॥९॥
'पशु न नष्टमिव' दृश्यते नश्विवौ[9] सह[10]।
विशेषणे विशेष्ये च पशुमिव नष्टमिव ॥१०॥
तत्रैकं पूरणं केचिदिच्छन्त्यन्ये तु[11] मन्वते।
ऋषिस्वभावाद्[12] दृश्येते विशेषणविशेष्ययो. ॥११॥
'अर्चन्तस्त्वा हवामहेऽर्चन्तः[13] समिधीमहि'[14]।
तृतीयोऽर्चन्त इत्येष[15] केषांचित् पूरणो मतः ॥१२॥
ह्वानं समिन्धनं चैव[16] कुर्महेऽर्चनपूर्वकम्।
रक्षणायेति मन्त्रार्थस्तत्रैकमतिरिच्यते[18] ॥१३॥
'न ते[20] वर्तास्ति राधस इन्द्र देवो[21] न मर्त्यः[22]'।
पादस्य प्रथमस्यात्र प्रपञ्चस्तदनन्तरः ॥१४॥

---

१. हरतः P. हरित्व D. RV.I.115.3.
२. नेच्छ० D.
३. निर्वंचि P. नर्वंचि D.
४. रूचं P.
५. श्येनाभि० D.
६. RV. VIII.5.7.
७. निब्रू० P., R.
८. RV.I.116.23.
९. दृश्यते P.
१०. नश्विजीवौ P., D.
११. ०चिमच्छन्य ते P.
०चिमिच्छन्य ते D.
१२. ऋषिप्रभावाद् P.
१३. ०स्त्वां D.
१४. RV.V.13.1.
१५. इत्येषः R.
१६. पानं R.
१७. पानसमिद्धेनञ्चप P.
वानसमिद्धेनञ्चव D.
१८. ०क श्रति० R.
१९. ०रिष्यति P.
२०. वर्तात्रि P. वत्तास्ति D.
२१. देवे D.
२२. RV.VIII.14.4.

एवं पादो द्वितीयोऽत्र न पूरण इति स्थितिः ।
देवशब्दस्य पादेन मुख्येनैकेऽन्वयं विदुः ॥१५॥
'शिक्षेयमस्मै दित्सेयं शचीपते मनीषिणे" ।
दद्यामपि च दित्सेयमेवञ्चात्र न पूरणम् ॥१६॥
'विश्वे गन्त मरुतो विश्वे" विश्वे अद्य मरुतः ।
आवर्तते विश्वशब्दस्तं चेच्छति न पूरणम् ॥१७॥
गमने रक्षणे चैव सर्वेषां ह्यन्वयो मतः ।
व्युत्पत्त्यर्थमृचोऽस्माभिरित्थं बह्व्यः प्रदर्शिताः ॥१८॥इति॥

V.63.

ऋतस्य गोपावधि तिष्ठथो रथं सत्यधर्माणा परमे व्योमनि ।
यमत्र मित्रावरुणावथो युवं तस्मै वृष्टिर्मधुमत्पिन्वते दिवः ॥ १ ॥

ऋतस्य गोपौ । अर्चनाना ॥ सत्यस्य । गोपायितारौ । अधितिष्ठथ । रथम् । सत्यकर्माणौ । परमे । अन्तरिक्षे । यम् । अस्मिन् लोके । मित्रावरुणौ ! रक्षथ । युवम् । तस्मै । वृष्टिः । उदकवती । दिवः । पतति ।

---

१. एवञ्चनद्वितीयो नू P. एवञ्चनव द्वि० D. २. तव० P. ०दव० D.
३. पादने P., D. ४. ०के द्वयं P., D.
५. RV.VIII.14.2.
६. गन्त गन्त D.
७. RV.V.43.10. ८. विश्वेद्य P., D.
९. RV.X.35.13.
१०. ०त्यर्थ० P., D.
११. 'ऋतस्य गोपौ' इति सप्तर्चं सप्तमं सूक्तम् । अत्रेयमनुक्रमणिका 'ऋतस्य सप्तार्चनाना जागतम्' (KSA.28.63.p.21.) इति । आत्रेयोऽर्चनाना नाम ऋषिः । जगती छन्दः । तुह्यादिपरिभाषया (KSA.12.3.p.5.) मित्रावरुणौ देवता । विनियोगो लैङ्गिकः Sy.
१२. ०नानः P., D.
१३. हे ऋतस्य उदकस्य रक्षितारौ ! Sy.
१४. अधितिष्ठतिष्ठतः D. आरोहथोऽस्मद्यज्ञमागमनार्थम् Sy.
१५. सत्यधर्माणौ युवाम् Sy.
१६. निरतिशये Sy.
१७. आकाशे Sy.
१८. यजमानम् Sy.
१९. अस्मिन् यज्ञे Sy.
२०. युवाम् Sy. २१. यजमानाय Sy.
२२. पर्जन्यः Sy.
२३. उद्रक० P. उदकम् Sy.
२४. द्युलोकात् Sy.
२५. सिञ्चति वर्षयति Sy.

सम्राजा॑वस्य भुवनस्य राजथो मित्रावरुणा विदथे स्वर्दृशा ।
वृष्टिं वां राधो अमृतत्वमीमहे द्यावापृथिवी वि चरन्ति तन्यवः ॥ २ ॥

सम्राजौ । अस्य । भूतजातस्य । ईश्वरौ । सर्वद्रष्टारौ । हे मित्रावरुणौ ! यज्ञे । राजथः । तौ वाम् । वृष्टिम् । धनम् । अमृतत्व च । याचामहे । द्यावापृथिवी । चरन्ति । गर्जितशब्दा ।

सम्राजा उग्रा वृषभा दिवस्पती पृथिव्या मित्रावरुणा विचर्षणी ।
चित्रेभिरभ्रैरुप तिष्ठथो रवं द्यां वर्षयथो असुरस्य मायया ॥ ३ ॥

सम्राजौ । सम्राजौ । उद्गूर्णौ । वर्षितारौ । दिव । पती । पृथिव्याश्च । मित्रावरुणौ । विद्रष्टारौ । चित्रै । मेघै महे । गर्जितशब्दम् । उपतिष्ठथ । वर्षयथश्च । पर्जन्यस्य । कर्मणा । द्युलोकम् ।

माया वां मित्रावरुणा दिवि श्रिता सूर्यो ज्योतिश्चरति चित्रमायुधम् ।
तमभ्रेण वृष्टया गूहथो दिवि पर्जन्य द्रप्सा मधुमन्त ईरते ॥ ४ ॥

माया वाम् । कर्म । युवयोः । हे मित्रावरुणौ ! दिवि । श्रितम् । किं च भवत्प्रेषित सूर्यं । ज्योतिः । विसृजति । चित्रम् । आयुधमन्तरिक्षे । तम् । अभ्रेण । वृष्ट्या च । गूहथ । दिवि तत्र । पर्जन्य ! उदकद्रप्साः । मधुमन्तः । पतन्ति ।

---

१. भुवनस्य Sy.
२. सम्यग्राजमानौ युवाम् Sy.
३. स्वर्गस्य द्रष्टारौ युवाम् Sy.
४. अस्मद्यज्ञे सम्राजाविति सम्बन्धः Sy.
५. ईशाथे Sy.
६. यज्ञारायथस्तौ P. युवाम् Sy.
७. वृष्ट्याख्यं धनम् Sy.
८. स्वर्गं च Sy. ९. प्रार्थयामहे । अथवा वृष्टिं धनममृतत्वं चेमहे Sy.
१०. वि is omitted by P., D. विविधं प्राप्नुवन्ति Sy. ११. ०शब्दां P., D. युवयोः विस्तृता रश्मयः Sy.
१२. VM. ignores वि ।
१३. सम्यग् राजमानौ Sy.
१४. उद्गूर्णबलौ Sy.
१५. द्युलोकस्य Sy. १६. स्वामिनौ Sy.
१७. पृथिव्याश्च पती Sy. १८. सर्वस्य द्रष्टारौ मित्रावरुणौ । एवं महानुभावौ Sy.
१९. चायनीयैः Sy. २०. स्तोत्रम् Sy.
२१. उदकनिरसितुः पर्जन्यस्य Sy.
२२. प्रज्ञया सामर्थ्येन Sy. २३. माया Sy.
२४. आश्रिता, कैषा युवयोर्माया ? उच्यते Sy.
२५. ०तःसू० D. सूर्यः सर्वस्य प्रेरकः Sy.
२६. ०ति P. दीप्यमानः Sy.
२७. परिभ्रमत्यन्तरिक्षे Sy.
२८. चायनीयम् Sy.
२९. चितामायायुधं P. उक्तलक्षणायुधरूपः । शत्रुमारकत्वादायुधमुच्यते Sy. ३०. सूर्यम् Sy.
३१. अभ्रेषण D. मेघेन Sy.
३२. Omitted by P.
३३. ०थे च D. गोपायथः Sy.
३४. हे पर्जन्य ! देव ! मित्रावरुणाभ्यां वृष्टयर्थं प्रेरितेन त्वया Sy.
३५. ईर्यन्ते । त्वत्सृष्टा वा गच्छन्ति Sy.

रथं युञ्जते मरुतः शुभे सुखं शूरो न मित्रावरुणा गविष्टिषु ।
रजांसि चित्रा वि चरन्ति तन्यवो दिवः सम्राजा पयसा न उक्षतम् ॥ ५ ॥

रथं युञ्जते[1]। रथम् । युञ्जते[2] । मरुत । उदकाय[4] । सुद्वारम्[5] । शूर[6] । इव युद्धाय । हे मित्रावरुणौ ! दिवसागमनेषु[7] । ततो लोकान् । चित्रा[8] । विचरन्ति[9] । तन्यव[10] । दिव[11] । सम्राजौ[12] । पयसा[13] । अस्मान् । सिञ्चतम् ।

वाचं सु मित्रावरुणाविरावतीं पर्जन्यश्चित्रां वदति त्विषीमतीम् ।
अभ्रा वसत मरुतः सु मायया द्यां वर्षयतमरुणामरेपसम् ॥ ६ ॥

वाचं सु[14][15]। वाचम्[16] । सुष्ठु । वदति[17] । हे मित्रावरुणौ[18] ! अन्नवतीम्[19] । पर्जन्य[20] । चित्राम्[21] । दीप्तिमतीम् । अभ्राणि[22] । आच्छादयत[23] । हे मरुत. ! सुकर्मणा[24] । द्याम् । वर्षयतम् । अरुणवर्णाम्[25] । निर्मला[26] मित्रावरुणौ !

धर्मणा मित्रावरुणा विपश्चिता व्रता रक्षेथे असुरस्य मायया ।
ऋतेन विश्वं भुवनं वि राजथः सूर्यमा धत्थो दिवि चित्र्यं रथम् ॥ ७ ॥

धर्मणा[27]। कर्मणा[28]। हे मित्रावरुणौ ! प्राज्ञौ[29] ! व्रतानि। रक्षेथे[30]। पर्जन्यस्य। प्रज्ञया[31] च।

---

१. रथं युञ्जते omitted by P.
२. हे मित्रावरुणौ ! युवयोरनुग्रहात् Sy.
३. अश्वैर्योजयन्ति Sy
४. उदकार्थम् Sy.
५. शोभनाक्षद्वारम् Sy.
६. स यथा युद्धार्थं रथं युनक्ति तद्वत् Sy.
७. गवामुदकानामेषणेषु निमित्तेषु Sy.
८. चायनीयानि Sy.
९. विविधं चरन्ति Sy.
१०. ततास्ते मरुतः Sy.
११. द्युलोकात् Sy.
१२. ०जो P. तस्मात्तैः सहितौ हे सम्राजौ ! युवाम् Sy.
१३. उदकेन Sy. १४. पापं P.
१५. सु पं P. सुं वा D.
१६. गर्जनशब्दम् Sy.
१७. ०न्ति P., D. शब्दयति वृष्ट्यर्थम् Sy.
१८. हे मित्रावरुणौ ! युवयोरनुग्रहात् Sy.
१९. अन्नसाधिकाम् Sy. २०. मेघः Sy.
२१. ०त्रा D. चायनीयाम् Sy.
२२. मेघान् Sy. २३. आच्छादयन्ति Sy.
२४. ०र्णम् P. In padapātha सु । मायया । cf. Sy. (RV.V.64.2. and V.65.3.) on सुचेतुना which he analyses in PP. as सुञ्चेतुना and सु । चेतुना respectively. ॥ स्वप्रज्ञया युवां पर्जन्येन मरुद्भिश्च सह Sy.
२५. ०तंमरूण० D. ०र्णम् P.
२६. ०ला P., D. अपापां वृष्टिविघातिनीम् Sy.
२७. जगद्धारकेण वृष्ट्यादिलक्षणेन कर्मणा Sy.
२८. प्रज्ञौ D. प्राज्ञौ युवाम् Sy.
२९. व्रा० P. यज्ञादिकर्माणि Sy.
३०. पालयथः Sy.
३१. वर्ज P. मेघानां निरसितुः पर्जन्यस्य Sy.

तेजसोदकेन वा । विश्वम्[२] । भुवनम्[३] । विराजथ[४]. । दिवि[५] । आधत्थ[६]. । सुवीर्यम्[७] । चित्रवर्णम्[८] । रथम्[९] ।

V.64.

वरुणं वो रिशादसमूचा मित्रं हवामहे ।
परि व्रजेव बाह्वोर्जगन्वांसा स्वर्णरम् ॥ १ ॥

वरुणम्[११] । वरुणम्[१२] । युष्माकम्[१३] । रिशतामसितारम्[१४] । स्तुत्या[१५] । मित्र[१६] चान्येभ्य । परिभवामहे[१७] ।

बाह्वोः[१८] । व्रजानीव[१९] यथा बाहुभ्या कश्चिद् गच्छन्त निरुणद्धि[२०] । गच्छन्तौ[२१] । सर्वजनोपेत[२२] त देशम् ।

ता बाहवा सुचेतुना प्र यंन्तमस्मा अर्चते ।
शेवं हि जार्यं वां विश्वासु क्षासु जोगुवे ॥ २ ॥

ता बाहवा[२३] । तौ । बाहू[२४] । सुप्रज्ञानौ[२५] । प्रयच्छतम्[२६] । अस्मै । स्तुवते । सुखकरम्[२७] । हि । स्तोत्रम्[२८] ।

युवयोः[२९] । सर्वासु । भूमिषु[३०] । शब्द्यते[३१] ।

---

१. उदकेन यज्ञेन वा निमित्तेन Sy.
२. सर्वम् Sy. ३. भूतजातम् Sy.
४. ०था P. विदीपयथ इत्यर्थः Sy.
५. द्युलोके Sy.
६. VM. construes आ with धत्थः but Sy. explains आ as च ॥ सूर्यं च Sy.
७. बाधार्त्थः P. धाबाधर्त्थत्थ D. धारयथो जगदुपकारार्थम् Sy. ८. सू० D.
९. पूज्यम् Sy. १०. रंहणस्वभावम् Sy. Ms. D. puts the figure ॥६३॥ here to indicate the end of the sixty-third hymn. No such number is given in P.
११. 'वरुणं वः' इति सप्तर्चमष्टमं सूक्तमर्चनानस आर्षं मैत्रावरुणम् । षड्क्त्यन्तपरिभाषयानुष्टुभम् । अन्त्या पङ्क्तिः । 'वरुणं पड्क्त्यन्तं तु' (KSA.28.64.p.21.) इत्यनुक्रमणिका, विनियोगो लैङ्गिकः Sy.
१२. एवंविधं वरुणम् Sy
१३. युवयोर्मध्ये । व्यत्ययेन बहुवचनम् Sy.
१४. ०शाम० P., D. रिशन्ति हिंसन्तीति रिशाः शत्रवः । तेषां प्रेरकम् Sy. १५. मन्त्रेण Sy.
१६. उक्तलक्षणं मित्रं च Sy.
१७. ०रिहवा० is suggested for परिभवा० ॥ आह्वयामः Sy.
१८. माह्वो P. ०ह्वो D. बाह्वोर्बलेन Sy.
१९. प्रजने P. व्रजेने D. अथ अवयुत्योच्यते गोयूथानीव Sy. २०. निरुद्धि D.
२१. परिगच्छन्तौ Sy.
२२. ०नोवेकान्तं P. स्वर्गस्य नेतारम् । एतद् व्यवहितमप्युभयत्र सम्बध्यते Sy.
२३. युवाम् Sy. २४. बहु P. बाहुना Sy.
२५. सुप्रजानौ D. सुष्ठु प्रज्ञात्रा । प्रयासभूयस्त्वं जानता इत्यर्थः । यद्यप्यात्मैव ज्ञाता न हस्तस्तथापि तद्धर्ममत्रारोप्य स्तूयते । यद्वैतत् तावित्यस्य विशेषणम् । सुज्ञानावित्यर्थः । शोभनहस्तेन Sy.
२६. अभिमतं सुखं प्रगमयतम् । अन्तर्भावितण्यर्थो द्रष्टव्यः । यमिर्वानकर्मा वा द्रष्टव्यः । प्रयच्छतमित्यर्थः Sy. २७. स्तुवते महाम् Sy.
२८. सुखम् Sy. २९. स्तुत्यम् Sy.
३०. युवयोः सम्बन्धि युवाभ्यां कृतं वा Sy.
३१. गच्छति व्याप्नोति । अयं गतिकर्मा । अथवा जोगुवे सर्वत्र शब्दयामीत्यर्थः Sy. अवते गवते इति गतिकर्माणौ Ngh. 2.14.

यन्नूनम॒श्यां गति॑ मि॒त्रस्य॑ यायां प॒था ।
अ॒स्य प्रि॒यस्य॒ शर्म॑ण्यहि॒ंसानस्य सश्चिरे ॥ ३ ॥

यन्नूनम्[1] । यदि[2] । खलु[3] । गतिम्[4] । प्राप्नुयाम्[5] । तदानी मित्रप्रदिष्टेन[6] । पथा[7] । यायाम्[8] । अस्य । प्रियस्य[9] । सुखे हि[10] । अहिंसत·[11] । सक्ता[12] भवन्ति स्तोतारम्[13] ।

युवाभ्यां॑ मित्रावरुणोप॒मं धेया॑मृचा ।
यद्ध क्षये॑ मघोनां॑ स्तोतॄ॒णां च॑ स्पृधसे ॥ ४ ॥

युवाभ्याम्[14] । हे मित्रावरुणौ ! युवाभ्याम्[15] । उपमानभूत हवि प्रयच्छामि[16] । ऋचा[17] । यत् । खलु[18] हविष्मताम्[19] । स्तोतॄणाम् । च । गृहे । भवतो. पूरणा भवति[20] तदिति[21] ।

आ नो॑ मित्र सुदी॒तिभि॒र्वरु॑णश्च स॒धस्थ॒ आ ।
क्षे क्षये॑ म॒घोना॑ सखी॒नां च॑ वृधसे ॥ ५ ॥

आ नः[22] । आगच्छतम् । अस्मान्[23] । सुदानैः । मित्रावरुणौ ![24] गृहे[25] तदेवाह—स्वे[26] । गृहे । हविष्मताम्[27] । स्तोतॄणाम्[28] । चास्माकम् । वर्धनायेति[29] ।

---

१. यासुनम P. यासूनम D.
२. यदा Sy. ३. इदानीम् Sy.
४. गमनम् Sy.
५. अश्यां प्राप्नुयाम् । यद्योगादनिघातः Sy.
६. तदा मित्रभूतस्य Sy.
७. मार्गेण । मित्रप्रापकेण मार्गेण Sy.
८. गच्छेयम् । 'मित्रो नयतु विद्वान्' (RV. I.90.1.) इत्यादिषु मित्रस्येष्टदेशगमयितृत्वं प्रसिद्धम् । न केवलमहमेक एव गन्ता किन्तु सर्वेऽपि तथागमिष्यन्त्याह Sy.
९. मित्रस्येत्यर्थः Sy.
१०. गृहे स्थाने वा Sy.
११. ०त P., D. यतोऽयमहन्ता अतः प्रिय इत्यर्थः । तस्य॰ Sy. १२. सङ्गताः Sy.
१३. स्तोरम् P.
१४. दातव्यम् Sy.
१५. उप समीपे मीयमानं धनम् Sy.
१६. धारयामि Sy.
१७. उचा D. स्तुत्या साधनेन Sy.
१८. युवाभ्यां सकाशादाप्तं धनम् Sy.
१९. धनवतामदातॄणाम् Sy.
२०. स्पर्धनाय भवति । धनिकानां स्तोतॄणां च धनाधिक्यविषये स्पर्धा भवतीत्यर्थः । अपरिमितं धनं भवतीति भावः Sy.
२१. Omitted by P. २२. अस्माकम् Sy.
२३. सुदीप्त्युक्तौ युवाम् Sy.
२४. VM. explains मित्र and वरुण together as मित्रावरुणौ but Sy. explains them separately as हे मित्र ! त्वं च वरुणश्च ।
२५. सहस्थाने यज्ञे Sy.
२६. Omitted by P. स्वकीये Sy.
२७. धनवताम् Sy.
२८. युवयोः सखिभूतानाम् Sy.
२९. VM. explains आ and च once only. द्वितीय आकारोऽनर्थक आवरार्थो वा Sy.

युवं नो येषु वरुण क्षत्रं बृहच्च बिभृथः ।
उरु णो वाजसातये कृतं राये स्वस्तये ॥ ६ ॥

युवम् । युवाम् । **अस्मभ्यम्**[1] । **येषु स्तोत्रेषु**[2] **सत्सु**[3] । **बलम्** । **महत्**[4] । **च धनम्** । **बिभृथः**[5] । **तेषु सत्स्विदानीमस्माकम्**[6] । **सङ्ग्रामार्थम्**[7] । **बहु कर्तव्यम्** । **कृणुतम्**[8] । **धनाय** । **अविनाशाय च**[9] ।[10]

उच्छन्त्यां मे यजता देवक्षत्रे रशद्गवि ।
सुतं सोमं न हस्तिभिरा पड्भिर्धावतं नरा बिभ्रतावर्चनानसम् ॥ ७ ॥

उच्छन्त्याम्[11] । उच्छन्त्यामुषसि[12] । **मम**[13] । **यष्टव्यौ**[14] । **देवक्षत्र** आदित्यस्तस्मिन्[15] । **दीप्यमानतेजसि** । **पाणिभिः**[16] ? **हस्तवद्भिः**[17] । **सुतसोममाधातुम्**[18] । **बिभ्राणौ**[19] । **पतद्भिरश्वैरिति**[20] ।[21]

---

१. **अस्माकम्** Sy.

२. **येषु स्तोत्रेषु निमित्तेषु** Sy.

३. **सं सु** P., D.

४. **बह्म परिवृढमन्नम्** Sy.

५. **विभ्रथ०** P. **विभ्रत०** D.
धारयथः Sy.

६. **युवाभ्यां धृतमन्नं च नः अस्मभ्यम्** Sy.

७. **अन्नस्य लाभाय यज्ञाय वा** Sy.

८. **विस्तीर्णम्** Sy.

९. **कुरुतम्** Sy.

१०. Omitted by P.
क्षेमाय च Sy.

११. VM. ignores **वरुण ॥ हे मित्रावरुणौ !** Sy.

१२. **उच्छन्त्याम् उषसि मे सोममिति सम्बन्धः** Sy.

१३. **मदीयम्** Sy.

१४. **य व्यौ** D.

१५. **देवानां क्षत्रं बलं यस्मिन् यज्ञे तद्देवक्षत्रम् । तस्मिन्** Sy.

१६. **रोचमानरश्मौ प्रातःसवने** Sy.

१७. **पड्भिः** is suggested for **पाणिभिः ॥ पादवद्भिश्च । पादचतुष्टयोपेतैरश्वैः** Sy.

१८. **हस्तिभिः हस्तवद्भिः । हन्तेर्गतिकर्मणो हस्तशब्दः । गमनसाधनपादवद्भिरित्यर्थः** Sy.

१९. **सुतं सोमmा०** is suggested for **सुतसोमmा० ॥ अभिषुतं सोमम्** Sy.

२०. **आधावतम्** is suggested for **आधातुम् ॥ आगच्छतम्** Sy.

२१. **धारयन्तौ युवाम्** Sy.

२२. VM. seems to explain **पड्भिः** as **पतद्भिरश्वैः** । Therefore **पतद्भिरश्वैः** should follow **पाणिभिः** and precede **हस्तवद्भिः** ।

२३. VM. ignores **न । नराः** and **अर्चनानसम् ॥ नेति सम्प्रत्यर्थे । इदानीम् । हे नेतारौ ! मित्रावरुणौ ! अर्चनानसमृषिम्** Sy. Ms. D. puts the figure ॥६४॥ here to indicate the end of the sixty-fourth hymn. No such number is given in P.

V.65.

यश्चिकेत[1] स सुक्रतुर्देवत्रा स ब्रवीतु नः।
वरुणो यस्य दर्शतो मित्रो वा वनते गिरः॥ १॥

यश्चिकेत[1]॥ रातहव्य[2]॥ यः[3]। जानाति[4]। सः। सुप्रज्ञः[5]। देवौ[6] मित्रावरुणौ। सः[7]। अस्माकम्। ब्रवीतु[8] यदि जानाति। किं वक्तव्यमित्याह—वरुणः[9]। मित्रः[10]। वा[11]। दर्शनीयः[12]। यादृशस्य[13]। स्तुतीः[14]। भजते[15], कस्य स्तुतीरेतौ[16] शृणुतः? इति प्रश्नः।

ता हि श्रेष्ठवर्चसा राजाना दीर्घश्रुत्तमा।
ता सत्पती ऋतावृधा ऋतावाना जनेजने॥ २॥

ता हि। तौ। हि[17]। श्रेष्ठतेजसौ[18]। राजानौ[19]। अतिशयेन दीर्घश्रुतौ[20]। सत्पती[21]। यज्ञवृधौ[22]। सत्यकर्माणौ[23] भवतः। जने[24] जने[25]।

ता वामियानोऽवसे पूर्वा उपं ब्रुवे सचा।
स्वश्वासः सु चेतुना वाजाँ अभि प्र दावने॥ ३॥

ता वाम्। तौ। वाम्[26]। गच्छन्। रक्षणमुख्यौ[27] युवाम्[28]। स्तौमि[29]। सह[30]। स्वश्वा[31] युवयो रथाः।

---

१. 'यश्चिकेत' इति षड्चं नवमं सूक्तं रातहव्यस्यात्रेयस्यार्षं मैत्रावरुणम्।' यश्चिकेत षड्रातहव्यः' (KSA.28.65.p.21.)। इत्यनुक्रमणिका 'षड्क्त्यन्तं तु' इत्युक्तत्वात् षड्क्त्यन्तपरिभाषयाऽऽनुष्टुभम्। अन्त्या पङ्क्तिः। विनियोगो लैङ्गिकः Sy.
२. राहव्यः P., D. ३. स्तोता Sy.
४. जानाति स्तुतिं युवयोः Sy.
५. शोभनकर्मा Sy.
६. देवेषु स्तोतृमध्ये। यद्वा देवेषु मध्ये। युवयोरेव स्तुतिं यश्चिकेत स सुक्रतुरिति Sy.
७. सुकर्मा Sy. ८. स्तुतिपरमुपदिशतु Sy.
९. वरुणो दर्शनीयः Sy. १०. मित्रश्च Sy.
११. व P. वाशब्दश्चार्थे Sy. १२. ०य P.
१३. Sy. seems to take यस्य as यश्च।
१४. अस्मदीयाः स्तुतीः Sy.
१५. सम्भजते Sy. १६. ०ताः D.
१७. खलु मित्रावरुणौ Sy.
१८. श्रेष्ठो तेजसो P. प्रशस्ततेजस्कौ Sy.
१९. ईश्वरौ Sy.
२०. दीघ्रश्रु० D. दूरदेशादाह्वानश्रोतृतमौ Sy.
२१. सतां यजमानानां स्वामिनौ Sy.
२२. ०वृद्धो P. ०वृद्धौ D. यज्ञस्योदकस्य वा वर्धयितारौ Sy.
२३. ०कर्मणो P. गमनवन्तौ Sy.
२४. सर्वेषु स्तोतृषु निमित्तेषु Sy.
२५. VM. ignores ता॥ ता तौ Sy.
२६. युवाम् Sy.
२७. ऋक्षणामुख्या P., D. VM. seems to explain अवसे and पूर्वी together as रक्षणमुख्यौ॥ रक्षणाय पुरातनौ Sy.
२८. युव P., D.
२९. उपेत्य स्तौमि Sy. ३०. सवि P.
३१. श्वा P., D. वयमात्रेयाः Sy.

सुप्रज्ञौ[1] भवतः । हवीषि[2] । प्रतिदानाय[3] । प्रणयन्तु[4] ।

मित्रो अंहोश्चिदादुरु क्षयाय गातुं वनते ।
मित्रस्य हि प्रतूर्वतः सुमतिरस्ति विधतः ॥ ४ ॥

मित्रः । मित्र[5]. । पापस्य[6] । अपि भजमानस्य[6] । विस्तीर्णम्[7] । पन्थानम्[8] । गृह[9] प्रति गन्तुम् । ददाति[10] । मित्रस्य[11] । हि[12] । प्रहिसत[13]. । सुमतिः[14] । अस्ति[15] । परिचरत[16] । पर्यति[17] परिचरति ये यात[18] युनक्ति[19] ?[20]

वयं मित्रस्यावसि स्याम सप्रथस्तमे ।
अनेहसस्त्वोतयः सत्रा वरुणशेषसः ॥ ५ ॥

वयं मित्रस्य । वयम्[21] । मित्रस्य[22] । रक्षणे । भवाम[23] । सर्वत पृथुतमे[24] । अनुपद्रवा[25] । त्वद्रक्षका[26]. । सत्रा[27] । वरुणशेषसश्च[28] वरुण[29]ः शासिता[30] येषाम् ।

---

१. शोभनप्रज्ञानौ युवाम् Sy.
२. हविषि D. अन्नान्यभिलक्ष्य Sy.
३. दानाय Sy.
४. The passage beginning with युवयोः and ending with प्रणयन्तु is omitted by P. प्रकर्षेण स्तुम इति शेषः। यद्वा स्वश्वासः स्वश्वौ । द्वितीयाद्विवचनस्य जसादेशः । उप ब्रुव इति सम्बन्धः Sy.
५. देवः Sy.
६. अंहस्वतोऽपि स्तोतुः Sy.
७. उरवे Sy.
८. उपायम् Sy.
९. गृहाय निवासाय वा Sy.
१०. The passage beginning with मित्रः (first) and ending with ददाति is omitted by P. प्रयच्छति Sy.
११. देवस्य Sy.
१२. खलु Sy.
१३. ०र्हिसितः P., D. प्रकर्षेण हिंसतोऽपि Sy.
१४. शोभनबुद्धिः Sy.
१५. भवति खलु Sy.
१६. रपरचमता P. रपचरतः D. शुश्रूषकस्य Sy.
१७. पर्यदि P. प० D.
१८. ०त P.
१९. The passage : पर्यति . .युनक्ति is doubtful and unnecessary.
२०. VM. ignores आत् ॥ आत् अनन्तरमेव Sy.
२१. यजमानाः Sy.
२२. दुःखनिवारकस्य देवस्य Sy.
२३. भवेम Sy.
२४. प्रथुन्ते D.
२५. अपापाः Sy.
२६. त्वया रक्षिताः Sy.
२७. मित्रत्य P. वयं सर्वे सहैव भवेम Sy.
२८. ०षः सश्वर P. ०षः सश्च D. वरुणशेषसः वारकाः पुत्रा येषां ते । तादृशाः Sy. शेष इत्यपत्यनाम Ngh. 2.2.
२९. वरणः P.
३०. शाप्तो P. शास्तो D.

युवं मित्रेमं जन यतथुः सं च नयथः ।
मा मघोनः परि ख्यतं मो अस्माकमृषीणां गोपीथे न उरुष्यतम् ॥ ६ ॥

युवं मित्रा । हे मित्रावरुणौ ! युवाम् । इमम् । जनम्[1] । पृथक् कुरुथो विश्लिष्टम्[2] । च । संनयथः[3] । मा[4] । हविष्मतोऽस्मान्[5] । वर्जयत[6] स्तुती[7]. । सोमपाने[8] । अस्मान् । रक्षतम्[9][10] ।

V.66.

आ चिकितान सुक्रतू देवौ मर्त रिशादसा ।
वरुणाय ऋतपेशसे दधीत प्रयसे महे ॥ १ ॥

आ चिकितान[11][12] । हे जानन्[13] ! मर्त्य[14] ! आगतौ[15] ! सुप्रज्ञौ । रिशादसौ[16][17] । परोक्ष उत्तरार्ध —तयोर्वरुणाय । सत्यपेशसे[18] मित्राय च सत्यरूपाय । महते[19] । अन्नाय महदन्न लब्धुम्[20][21] । हवि. प्रयच्छतु[22] यजमानेस्तववाहेतेति ?[23][24]

---

१. स्तोतारं मां प्रति Sy.
२. यतथः गच्छथः Sy.
३. आगत्य च संनयथश्च । कामान् प्रापयथः । यद्वा, यतथ इत्यन्तर्णीतण्यर्थोऽयम् । अहनि यतथः व्यापारेषु गमयथः । रात्रौ च संनयथः । निर्व्यापारं कारयथः Sy.
४. म P.
५. हावि० P. हविर्लक्षणान्नवतोऽस्मान् Sy.
६. वर्जणां P. पर्ज . . . . णां D. परित्यजतम् Sy.
७. गौः सोमरसः । तस्य पानं यस्मिन् स गोपीथो यज्ञः तस्मिन् Sy.
८. ०पानस्मा० P., D. ९. रतं P.
१०. VM. ignores **मो** । **अस्माकम्** and **ऋषीणाम्** ॥ **मो मैव** । **ऋषीणामस्माकं पुत्रानपि परिख्यतम्** Sy.
Ms. D. puts the figure ॥६५॥ here to indicate the end of the sixty-fifth hymn. No such number is given in P.
११. 'आ चिकितान' इति षड्चं दशमं सूक्तं रातहव्यस्यार्षमानुष्टुभं मैत्रावरुणम् । अत्रानुक्रमणिका 'आ चिकितानानुष्टुभं तु' (KSA. 28.66. p. 21.) इति । आद्यस्तृचो दशरात्रे चतुर्थेऽहनि प्रउगशस्त्रे मैत्रावरुणस्य । सूत्रितञ्च —'आ चिकितान सुक्रतू त्यमु वो अप्रहणम्' (ĀSS. 7.11.) इति Sy.
१२. ०नः P. चिकेतानः D.
१३. जानन् स्तुतिम् Sy.
१४. हे मनुष्य ! रातहव्य ! त्वमिति तस्यैव सम्बोधनम् Sy.
१५. आकारयेति शेषः Sy.
१६. शोभनकर्माणौ Sy.
१७. हिंसकानां हिंसकौ Sy.
१८. ०त्यवेश० P., D. आहूय च ऋतमुदकम् । उदकमेव रूपं यस्य तादृशाय Sy. पेश इति रूपनाम Ngh. 3.7.
१९. महते पूज्याय Sy.
२०. प्रयसे । मत्वर्थो लुप्यते । हविर्लक्षणान्नवते Sy.
२१. ०ब्धं P.
२२. ०त D. दद्याः हविरिति शेषः । द्वितीयार्थे वा चतुर्थी । महद्धविर्वर्धीत । महतोऽन्नस्य लाभायेति वा योज्यम् Sy.
२३. ०वपाहे० P. The reading is doubtful. **यजमानो रातहव्य इति** is suggested for **यजमानेस्तववाहेतेति** ।
२४. VM. ignores **देवौ** ।

ता हि शत्रमविंहुतं सम्यगंसुर्यंमाशाते ।
अधं व्रतेव मानुषं स्वर्णं धायि दर्शतम् ॥ २ ॥

ता हि । तौ । हि । बलम् । अबाधितम् । सम्यक् । असुराणा हन्तृ । प्राप्नुत । तदानीम् । यथा, मानुषम् । कर्म । दर्शनीय भवति । यथा वा । आदित्यस्तथा तद् बलमनयो । निहितमिति ।

ता वामेषे रथानामुर्वीं गव्यूंतिमेषाम् ।
रातहंव्यस्य सुष्टुति दुधृक्स्तोमैंर्मनामहे ॥ ३ ॥

ता वाम् । तौ । वाम् । एषाम् । रथानाम् । विस्तीर्णम् । मार्गम् । हन्तुम् । रातहव्यस्य । सुष्टुतिं प्रति । धृष्टम् । स्तोमैश्च । पूजयाम ।

अधा हि काव्या युवं दक्षस्य पूर्भिरंद्रुहा ।
नि क्रेतुना जनानां चिकेथे पूतदक्षसा ॥ ४ ॥

अधा हि । अथ । खलु । काव्या । युवाम् । दक्षस्य प्रजापते । पूरकैर्हविर्भि सह । हे आश्चर्यभूतौ ! नियमेन जानीथः । जनाना चापि वा जनाना मध्ये समर्थस्येति । हे पूतबलौ ! प्रज्ञानेन ।

---

१. हीति हेतौ । यस्मात् Sy.
२. अहिंस्यम् Sy.
३. असुरविघाति । महद्बलम् Sy.
४. हर्तृ P. ५. व्याप्नुतः Sy.
६. अतो हेतोः Sy.
७. मनुष्येषु प्रवृत्तम् Sy.
८. व्रतेव कर्मेव तद्यथा मनुष्येषु नियतम् Sy.
९. दर्शनीयं बलम् Sy.
१०. सूर्य इव स यथा दिवि दृश्यते तद्वत् Sy.
११. ०मश्नयोः P.
१२. यज्ञे निहितम् Sy.
१३. हे मित्रावरुणौ ! Sy.
१४. प्रसिद्धौ Sy. १५. युवाम् Sy.
१६. पुरतो वर्तमानानाम् Sy.
१७. अस्मदीयानाम् Sy.
१८. प्रभूतमतिविस्तृतं मार्गम् Sy.
१९. गन्तुम् । मार्गरक्षणायेत्यर्थः । तुमर्थेऽसेन्प्रत्ययः । तदर्थं वाम् Sy.
२०. राहतस्तस्य P. रातहव्यस्य ऋषेः रातहव्यसम्बन्धिभिः Sy.
२१. ०ति P. सुष्टुतिं सुष्टुतिभिः शोभनस्तुतिसाधनैः Sy.
२२. धर्षकौ युवाम् Sy.
२३. स्तुमः Sy.
२४. ०था D. अपि च Sy.
२५. हि प्रसिद्धौ Sy.
२६. काव्यानि P. स्तुत्यौ Sy.
२७. प्रवृद्धस्य मम Sy.
२८. ०ते D.
२९. पूरकैः स्तवैः Sy.
३०. ०तो D. हे महान्तौ ! आश्चर्यभूतौ ! सन्तौ ! Sy. ३१. नितरां जानीथः Sy.
३२. यजमानानामित्यर्थः । स्तोत्रम् Sy.
३३. हे शुद्धबलौ ! युवाम् Sy.
३४. ०लो P., D.
३५. प्रज्ञानेनानुकूलेन मनसा Sy.

तदृतं पृथिवि बृहच्छ्रवएष ऋषीणाम् ।
ज्रयसानावरं पृथ्वतिं चरन्ति यामभिः ॥ ५ ॥

तदृतम् । तत् । सत्यभूतम् । पृथिवि ! महत् । अन्नम् । ऋषीणाम् । एषम् ? विस्तीर्णम् । पर्याप्तम् । अन्तरिक्ष प्रति गच्छन्तौ मित्रावरुणौ । स्तोतार उदकानि क्षारयन्ति । गमनै. ।

आ यद्वामीयच्चक्षसा मित्र वयं च सूरयः ।
व्यचिष्ठे बहुपाय्ये यतेमहि स्वराज्ये ॥ ६ ॥

आ यद् वाम् । आगच्छाम. । यदि । वाम् । हे गच्छत्तेजसौ ! वयम् । चास्मदीयाः सूरयश्च । ततो विस्तीर्णे । बहुरक्ष्ये । स्वराज्ये । वर्तेमहि ।

V.67.

बळित्था देव निष्कृतमादित्या यजतं बृहत् ।
वरुण मित्रार्यमन्वषिष्ठं क्षत्रमाशाथे ॥ १ ॥

बळित्था । यजतम् ॥ सत्यम् । इत्थम् । हे देवौ ! सकृतः सूनं यजतो वद्ध सह्यौवनमलभत ?

---

१. सर्वैरर्थ्यमानत्वेन प्रसिद्धम् Sy. २. उदकम्Sy.
३. ०वी P., D. हे पृथिवि ! देवि ! त्वयि Sy.
४. प्रभूतम् Sy. ५. अन्नस्य Sy.
६. ०न्नं मृषी० P. स्तोतृणामस्माकम् Sy.
७. Padapāṭha reads श्रवःऽएषे but VM. explains separately, श्रवः by अन्नम् and एषे by एषम् ॥ एष्टम् D. एषणे सति Sy. ८. पृथु यथा भवति तथा Sy.
९. अलमत्यर्थम् Sy.
१०. ०न्तं P. ज्रयसानौ गच्छन्तौ। 'छन्दस्यसानच् शुजुभ्याम्' (Uṇādi. 2.243.) इत्यसानच् ज्रयतेरपि भवति । 'चितः' इत्यन्तोदात्तः Sy.
११. अत्यर्थं वर्षतः । व्यत्ययेन बहुवचनम् Sy.
१२. आश्वां P. यश्चां D.
१३. ०च्छा D. आह्वयामः Sy. १४. ये Sy.
१५. युवाम् Sy. १६. हे व्याप्तदर्शनौ ! Sy.
१७. ०या P., D. १८. ०र इव P. स्तोतारः Sy.
१९. अत्यन्तविस्तृते Sy.
२०. बहुभिर्गन्तव्ये बहुभी रक्षितव्ये वा Sy.
२१. स्वराज्ये स्वराट्त्वायैवंविधराज्यार्थम् Sy.
२२. गच्छेम Sy.
२३. VM. ignores मित्रा ॥ हे मित्रावरुणौ ! Sy. Ms. D. puts the figure ॥ ६६ ॥ here to indicate the end of the sixty-sixth hymn. No such number is given in P.
२४. 'बळित्था देव' इति पञ्चर्चमेकादशं सूक्तम् । अत्रेयमनुक्रमणिका—'बळित्था पञ्च यजतः' (KSA.28.67.p.21.) इति । यजतो नामात्रेय ऋषिः । 'आनुष्टुभं तु' (KSA. 28.66.p.4.) इत्युक्तत्वादिदमप्यानुष्टुभम् । मित्रावरुणौ देवता । विनियोगो लैङ्गिकः Sy.
२५. बलित्था D. २६. यजतः, the name of a saint, is suggested for यजतम् ।
२७. बट् इति सत्यनाम Ngh. 3.10.
२८. इदानीं वर्तमानप्रकारेण Sy. २९. हे द्योतमानौ ! Sy. ३०. निष्कृतम् अबाध्यम् Sy.
३१. वर्धः P. ३२. ०ह्यौरवन० P.

अदितेः पुत्रौ ! यजमानं माम् । महान्तम् । वृद्धतमम् । क्षत्रियम् । मित्रावरुणौ । आशार्थे । अर्यमन् ! त्व च ताभ्यां सहितः ।

आ यद्योनिं हिरण्ययं वरुण मित्र सदथः ।
तर्धारा चर्षणीनां युन्तं सुम्नं रिशादसा ॥ २ ॥

आ यत् । आसीदथ । यदि । गृहम् । हितरमणीयम् । हे मित्रावरुणौ ! मनुष्याणाम् । धर्तारौ भवथः । यच्छतम् । सुखम् । रिशतामसितारौ !

विश्वे हि विश्ववेदसो वरुणो मित्रो अर्यमा ।
व्रता पदेव सश्चिरे पान्ति मर्त्यं रिषः ॥ ३ ॥

विश्वे । सर्वे । हि । सर्वधना । वरुणादय । यज्ञान् । गृहानिव । गच्छन्ति । रक्षन्ति च । मर्त्यम् । हिसायाः ।

ते हि सत्या ऋतस्पृश ऋतावानो जनेजने ।
सुनीथासः सुदानवोऽहोश्चिदुरुचक्रयः ॥ ४ ॥

ते हि । ते । हि । सत्याः । यज्ञस्पृशः । सत्यकर्माणः । सर्वेषु जनेषु । सुनयनाः । शोभनदानाः ।

---

१. यष्टव्यम् Sy.
२. अतिप्रवृद्धम् Sy.
३. प्रवृद्धतमम् Sy.
४. ०य P. बलम् Sy.
५. हे देव ! हे वरुण ! युवाम् Sy.
६. ०थे ने P., D. अश्नुवाथे Sy.
७. हे अरीणां नियमितः ! यद्वार्यमा पृथगेव निर्देष्टव्यः । द्विवचनं बहुवचनीकर्तव्यम् Sy.
८. आगच्छथस्तस्मात् Sy.
९. यस्मात् Sy.
१०. यज्ञभूमिम् Sy.
११. हे वरुण ! हे मित्र ! Sy.
१२. धारकौ च Sy.
१३. कुरुतमित्यर्थः Sy.
१४. हे हिंसकानां क्षेप्तारौ ! युवामस्मभ्यम् Sy.
१५. सर्वेऽपि Sy.
१६. हीति चार्थे Sy.
१७. सर्वविदः सर्वधना वा Sy.
१८. आदि refers to मित्रः and अर्यमा ॥ वरुणो मित्रोऽर्यमा चैते त्रयः सर्वे Sy.
१९. अस्मदीयानि कर्माणि Sy.
२०. पदानीव स्थानानीव Sy.
२१. सङ्गता भवन्ति Sy.
२२. आगत्य च मां मर्त्यम् Sy.
२३. हिंसकात् Sy.
२४. P. adds सत्याः after हि ।
२५. खलु । हीति प्रसिद्धवाची सर्वत्र सम्बन्धनीयः Sy.
२६. सत्यभूताः सत्यफला वा Sy.
२७. उदकस्पर्शस्य कर्तारः Sy.
२८. यज्ञवन्तः Sy.
२९. सर्वेषु यजमानेषु Sy.
३०. सुदानाः । एवं महानुभावा वरुणादयः Sy.

दरिद्रस्य[1] । महद् धन कर्तार[2] ।

को नु वां मित्रास्तुतो[3] वरुणो वा तनूनाम्[4] ।
तत्सु वामेषते[5] मतिरत्रिभ्य[6] एषते[7] मतिः ॥ ५ ॥

को नु[8] । हे मित्र[9] ! वरुण. । च । वाम्[10] । अङ्गानाम्[11] । किमङ्गम्[12] । अस्तुतमृषिभि[13] । युवयो[14] ।
तद् अङ्गम्[15] स्तोतुम्[16] । अत्रिभ्य[17] । स्तुति[18] । सुष्ठु[19] । आभिमुख्येन गच्छति[20] ।

V.68.

प्र वो मित्राय[21] गायत[22] वरुणाय[23] विपा[24] गिरा[25] । महिक्षत्रावृतं[26] बृहत् ॥ १ ॥

प्र[27] वः[28] । प्रगायत[29] । मित्रावरुणाभ्याम्[30] । मेधया[31] । गिरा[32] । महाधनौ[33] । महत्[34] । उदक प्रयच्छत[35] ।

---

१. पापिनोऽपि स्वस्तोतुः Sy.
२. कतारः D. प्रभूतधनादिकर्तारः Sy.
३. VM. ignores चित् ॥ चिदप्यर्थे Sy.
४. मित्रा D. अत्र मित्रशब्देन मित्रस्यैकस्यैव सम्बोधनम् । 'वरुणेळास्वन्तः' (RV.V.62.6.) इत्यत्रेवात्र द्विवचनसूचकस्याकारस्यानाम्नानात्। लोकेषु बहुषु संनिहितेषु एकमेव सम्बोध्य युवयोरिदं युष्माकमिदमिति प्रयुञ्जते Sy.
५. युवयोर्मध्ये त्वं च Sy.
६. तनूनामिति तृतीयार्थे षष्ठी । तनुभिः स्तुतिभिः अस्तुत इति सम्बन्धः । तनूनामल्पमतीनामस्माकम् । तनूनामित्येतद् व्यवहितमप्युत्तरत्र वा योज्यम् Sy. ७. को नु Sy.
८. स्तुतिमृ० P. अस्तुतः । सर्वैरस्तूयमानः कोऽस्ति । उभावपि स्तुत्यावित्यर्थः Sy.
९. ०भि D.
१०. तत् तस्मात् यस्मात्सर्वे स्तुवन्ति तस्मात् Sy.
११. ततंग P. तदंग D.
१२. अत्रिगोत्रेभ्योऽस्मभ्यम् Sy.
१३. ०ति P.
१४. सोष्वभि० P. सोष्ट्वाभि० D.
१५. अभिगच्छति Sy.
१६. VM. ignores नु and the repeated words as आ । ईषते । मतिः ॥ एषते आदरार्थं पुनर्वचनम् Sy. Ms. D. puts the figure ॥ ६७ ॥ here to indicate the end of the sixty-seventh hymn. No such number is given in P.
१७. 'प्र वो मित्राय' इति पञ्चर्चं द्वादशं सूक्तमात्रेयस्य यजतस्यार्षं गायत्रं मैत्रावरुणम्। तथा चानुक्रम्यते 'प्र वो गायत्रम्' (KSA. 28.68. p. 21.) इति । अग्निष्टोमे प्रातःसवने मैत्रावरुणशस्त्रे एतत्सूक्तम् । सूत्रितञ्च—'प्र वो मित्राय प्र मित्रयोर्वरुणयोः' (ĀŚS.5.10.) इति । अभिप्लवषडहे पृष्ठ्यषडहे च स्तोमनिमित्तावापार्थमिदमादीनि द्वितीयवर्जितानि चत्वारि सूक्तानि.। तथैव सूत्रितम्—'प्र वो मित्रायेति चतुर्णां द्वितीयमुद्धरेत्' (ĀŚS.7.5.)इति Sy.
१८. हे मदीया ऋत्विजः ! Sy.
१९. ०तं P., D. स्तुतिं कुरुत । स्तुत्या स्तुवतेत्येतत् पाकं पचतीतिवत् Sy.
२०. मित्राय वरुणाय च Sy.
२१. व्याप्तया Sy.
२२. स्तुत्या Sy.
२३. महान्तौ P. प्रभूतबलौ युवाम् Sy.
२४. अतिप्रशस्तम् । स्तुत्यर्थमागच्छतमिति शेषः । अथवा महत् प्रभूतमृतं स्तोत्रं शृणुतमिति शेषः Sy. २५. यज्ञम् Sy.
२६. VM. ignores वः ॥ वः यूयमित्यर्थः Sy.

सम्राजा या घृतयोनी मित्रश्चोभा वरुणश्च । देवा देवेषु प्रशस्ता ॥ २ ॥

सम्राजा । सम्राजौ[1] । यौ । उदकस्थानौ[2] । मित्र[3] । च[4] । वरुण । च[5] । उभौ । देवौ[6] । देवेषु[7] ।
प्रशस्तावुत्तरत्र सम्बन्धः ।

ता नः शक्तं पार्थिवस्य महो रायो दिव्यस्य । महि वां क्षत्रं देवेषु ॥ ३ ॥

ता नः शक्तम्[8] । तौ[9] । अस्मभ्यम्[10] । दत्तम् । पार्थिवम्[11] । रयिम्[12] । दिव्य च[13] । महान्तम्[14] । महद्
हि[15] । युवयो[16] । देवाना[17] मध्ये । धनम्[18] ।

ऋतमृतेन सपन्तेषिरं दक्षमाशाते । अद्रुहा देवौ वर्धेते ॥ ४ ॥

ऋतमृतेन । यज्ञम् । यज्ञेनानुस्यूतम्[19] । स्पृशन्तौ । एषणशीलम्[21] । बलम्[20] । आशाते[22] । अद्रोग्धारौ ।
वर्धयतः[24] स्तोतृन्[25] ।

वृष्टिद्यावा रीत्यापेषस्पती दानुमत्याः । बृहन्तं गर्तमाशाते ॥ ५ ॥

वृष्टिद्यावा[26] । वृष्टिमती[27] ययोर्द्यौर्भवति[28] । श्रितजला च[29] पृथिवी तौ तथोक्ताविति वाजसनेयक उक्तम् ।
अन्नस्य । दानवत्या[30] प्रजाया । महान्तम्[31] । रथम् । आशाते[32][33] ।

---

१. सर्वस्य स्वामिनौ Sy.
२. उदकस्योत्पादकौ Sy.
३. ०त्राः D.
४. परस्परापेक्षया चशब्दः Sy.
५. द्योतमानौ Sy.
६. देवेषु मध्ये Sy.
७. प्रकर्षेण स्तुत्यौ । तौ गायतेति पूर्वत्रान्वयः Sy.
८. तौ देवौ Sy. ९. अस्मदर्थम् Sy.
१०. समर्थौ भवतम् । दातुमिति शेषः Sy.
११. पृथिवीसम्बद्धस्य Sy.
१२. पात्नीयं (वरणीयं) रयिं P. धनस्य Sy.
१३. दिवि भवस्य च Sy. १४. महतः Sy.
१५. पूज्यम् Sy. १६. हे देवौ ! Sy.
१७. देवेषु प्रसिद्धं स्तुम इति शेषः Sy.
१८. बलम् Sy. १९. उदकेन निमित्तेन Sy.
२०. अनुसूतं P. अनुस्सूतं D.
२१. एक्षण० P., D. एषणवन्तम् Sy.
२२. दक्षं प्रवृद्धं यजमानं हविर्वा Sy.
२३. व्याप्नुतः Sy. २४. प्रवृद्धौ भवतः Sy.
२५. VM. ignores देवौ ॥ मित्रावरुणौ युवाम् Sy. २६. ०ष्टिद्याव P.
२७. ०मत P., D. वृष्ट्यर्था द्यौः स्तुतिर्ययोस्तौ वृष्टिद्यावा । अथवा वृष्टिर्वर्षिका द्यौरन्तरिक्षं याभ्यां तौ तादृशौ Sy. २८. ययो द्यौः D.
२९. रीत्यापा । 'री गतिरेषणयोः' । रीतिः प्राप्तिः सैव आपा आप्तिः अभिमतप्राप्तिर्ययोस्तौ तादृशौ Sy. ३०. वनस्पत्याः P. पनवत्याः D. दातुमुचिताया इत्यर्थः । एतदिड्विशेषणम् Sy.
३१. महतं P., D.
३२. व्याप्नुतः । अधितिष्ठतो यागार्थम् Sy.
३३. VM. ignores पती ॥ पती स्वामिनौ । वृष्टिप्रदत्वात् स्वामित्वम् Sy.
Ms. D. puts the figure ॥६८॥ here to indicate the end of the sixty-eighth hymn. No such number is given in P.

V.69.

त्री रोचना वरुण त्रीरुत द्यून्त्रीणि मित्र धारयथो रजांसि ।
वावृधानावमतिं क्षत्रियस्यानु व्रतं रक्षमाणावजुर्यम् ॥ १ ॥

[1][2] त्री रोचना ॥ उरुचक्रि ॥ रोचयन्तीति लोका रोचनान्युच्यन्ते । द्योतनाद् द्यावः । रजनाद् रजांसि । त्रीन् । लोकान् । धारयथ इत्यर्थः । वर्धयन्तौ । बलं मम । क्षत्रियस्य । अमिरभिभवकर्मा । कर्मणि । रक्षमाणौ । शत्रून् जरयितुमशक्यम् ।

इरावतीर्वरुण धेनवो वां मधुमद्वां सिन्धवो मित्र दुहे ।
त्रयस्तस्थुर्वृषभासस्तिसृणां धिषणानां रेतोधा वि द्युमन्तः ॥ २ ॥

इरावतीः । अन्नवत्यो हि । वरुण ! युवयोः । धेनवः । तदेवाह—मधूदकम् । युवयोः स्वभूताः । सिन्धवः । क्षरन्ति । त्रयः । ऋषभा अग्निवायुसूर्याः । तिसृणाम् । धिषणानां धारका लोका धिषणा उक्ताः ।

---

१. 'त्री रोचना' इति चतुर्ऋचं त्रयोदशं सूक्तम् । उरुचक्रिर्नामात्रेय ऋषिः । त्रिष्टुप् छन्दः । मित्रावरुणौ देवता । अनुक्रम्यते च—'त्री रोचना चतुष्कमुरुचक्रिः' (KSA.28.69.p.21.) इति । विनियोगो लैङ्गिकः Sy.
२. त्रि P. श्री D.
३. ०क्रीः P.
४. रोचना रोचनानि द्युलोकान् धारयथ इति सम्बन्धः Sy.
५. लोचनन्यव्यते P
६. ०ना P., D.
७. द्यून् द्योतमानानन्तरिक्षलोकान् Sy.
८. ऋजा० P.
९. रजांसि भूलोकान् Sy.
१०. त्रिलोकं P.
११. वर्धमानौ Sy.
१२. बल P. रूपम् Sy. अमतिरिति रूपनाम Ngh. 3.7.
१३. क्षत्रं बलम् । तद्वत इन्द्रस्य । यद्वा क्षत्रियजातीयस्य यजमानस्य Sy.
१४. मिर० P. This passage should immediately follow बलं मम and precede क्षत्रियस्य ।
१५. कर्म च Sy.
१६. अजीर्णमविरतं वा Sy.
१७. VM. ignores वरुण । त्रीन् । उत । त्रीणि and मित्र ॥ हे वरुण ! अपि च हे मित्र ! युवाम् । उत अपि च Sy.
१८. ०ती P., D.
१९. ०त्यौ D. इरा क्षीरलक्षणा । तद्वत्यो भवन्ति Sy.
२०. युवयोराज्ञया Sy.
२१. गावः Sy.
२२. ०स्तेदे० D.
२३. मधुररसमुदकम् Sy.
२४. Omitted by P. स्यन्दनशीला मेघा नद्यो वा Sy.
२५. दुहन्ति Sy.
२६. त्रिसंख्याकाः Sy.
२७. वर्षितारः Sy.
२८. ०सृ० P., D. त्रिसंख्याकानाम् Sy.
२९. स्थानानां पृथिव्यन्तरिक्षद्युलोकानां स्वामिनः सन्तः Sy.

तासा[1] रेतसो[2] निधातारः, अग्निः पृथिव्या गर्भ दधाति वायुरन्तरिक्षस्यादित्यो दिवः । दीप्तिमन्तः[3] ।[4] [5]

प्रातर्देवीमदितिं जोहवीमि मध्यंदिन उदिता सूर्यस्य ।
राये मित्रावरुणा सुवृतातेळे तोकाय तनयाय शं योः ॥ ३ ॥

प्रातर्देवीम्[6] । मित्रावरुणसाहचर्यादितेराह्वानम्[7] । धनार्थम्[8] । हे मित्रावरुणौ[9] ! यज्ञे । पुत्राय । तत्पुत्राय[10] । श[11] च । योश्च[12] । याम[13] । शिष्ट[14] स्पष्टमिति[15] ।

या धर्तारा रजसो रोचनस्योतादित्या दिव्या पार्थिवस्य ।
न वां देवा अमृता आ मिनन्ति व्रतानि मित्रावरुणा ध्रुवाणि ॥ ४ ॥

या धर्तारा[16] । यौ । धर्तारौ । दीप्तस्य[17] । लोकस्य । अपि च । आदित्यौ[18] । दिवि भवौ[19] । पार्थिवस्य लोकस्य भर्तारौ[20] । न । युवयो । देवा[21] । व्रतानि[22] । हिंसन्ति[23] । अमृताः[24] । मित्रावरुणौ ! स्थिराणि वर्षादीनि[25] ।

---

१. उक्ताः सा P. उक्तासां D.
२. रेधसो P., D. उदकस्य धारकाः Sy.
३. ०थिव्यां D.
४. ०न्ते D. अग्निवाय्वादित्याः Sy.
५. VM. ignores मित्र । वि and तस्थुः ॥ हे मित्र ! विविधं प्रत्येकम् । तिष्ठन्ति । युवयोरनुग्रहात् त्रयोऽपि देवास्त्रिषु स्थानेषु वर्तन्त इत्यर्थः Sy.
६. ०तदे० P.
७. अहमृषिः Sy.
८. मित्रावरुणसहपर्याददि० P. ०र्यादतिते० D.
९. धनप्राप्तये Sy.
१०. युवाम् Sy. ११. ०त्रा D.
१२. अरिष्टशमनाय Sy.
१३. सुखस्य मिश्रणाय चेळे इति Sy.
१४. यामि is suggested for याम ॥ स्तौमि Sy. Cf. Ngh. 3.19. यामि इति याच्ञाकर्मा ।
१५. By शिष्टं VM. means प्रातः । देवीम् । अदितिम् । जोहवीमि । मध्यन्दिने । उदिता and सूर्यस्य ॥ प्रातः प्रातःकाले । अदितिम् अखण्डनीयां देवानां जननीम् देवीं द्योतमानां जोहवीमि आह्वयामि । तथा मध्यन्दिने सूर्यस्य । उदिता उदितौ तत्समृद्धिकाले माध्यन्दिने सवने जोहवीमि Sy.
१६. रोचमानस्य Sy.
१७. लोकस्य स्वर्गाख्यस्येत्यर्थः Sy.
१८. अदितेः पुत्रौ Sy.
१९. दिवि भवौ is omitted by P. तौ युवामीळ इति पूर्वत्र सम्बन्धः Sy.
२०. ०रो P. पार्थिवस्य रजसः यौ धर्तारौ Sy.
२१. अन्ये इन्द्रादयः Sy.
२२. वृता० D. कर्माणि Sy.
२३. (न) हिंसन्ति यतो ध्रुवाण्यत इत्यभिप्रायः Sy.
२४. मात्रा P. मित्रा D. अमरणधर्माणोऽपि Sy.
२५. Ms. D. puts the figure ॥६९॥ here to indicate the end of the sixty-ninth hymn. No such number is given in P.

V.70.

पुरूरुणा चिद्ध्यस्त्यवो नूनं वां वरुण । मित्र वंसि वां सुमतिम् ॥ १ ॥

पुरूरुणा[1] । पुरुणोरुत्वेनात्यन्तव्याप्त्या लक्षितम् । पालनम्[4] । युवयो । हि[5] । अस्ति । तथा सति भजेयाहम्[6] । युवयो[7] । सुमतिम्[8] ।

ता वां सम्यगद्रुह्वाणेषमश्याम धायसे । वयं ते रुद्रा स्याम ॥ २ ॥

ता वाम्[10] । तौ[11] । वाम्[12] । भर्तुम्[13] । हे अद्रोग्धारौ[14] ! अन्नम् । प्राप्नुयाम । हे स्तुत्यौ[15] ! ते[16] । वयम् । युवयो परिचारकाः समृद्धा भवेम[17] ।

पातं नो रुद्रा पायुभिरुत त्रायेथां सुत्रात्रा । तुर्याम दस्यूंन्तनूभिः ॥ ३ ॥

पातम्[19] । रक्षतम् । अस्मान् । स्तुत्यौ[20] । रक्षणे[21] । अपि च । रक्षतमस्मान् । शोभनेन त्राणेन । तरेम[22] । शत्रून् । अङ्गैः[23] ।

---

१. 'पुरूरुणा' इति चतुर्ऋचं चतुर्दशं सूक्तमुरुचक्रेरार्षं गायत्रं मैत्रावरुणम् । 'पुरूरुणा गायत्रं तु' (KSA.28.70.p.21.) इत्यनुक्रमणिका । पृष्ठ्याभिप्लवषडहयोः प्रातःसवने आवापार्थत्वेनेदमपि सूक्तं पूर्वसूक्तेन सह । 'प्र वो मित्रायेति चतुर्णां द्वितीयमुद्धरेत्' (ĀSS.7.5.) इति ह्युक्तम् । चातुर्विंशिकेऽहनि प्रातःसवने मैत्रावरुणशास्त्रे आद्यस्तृचः षडहस्तोत्रियसंज्ञकः । सूत्रितञ्च 'पुरूरुणा चिद्ध्यस्ति प्रति वां सूर उदिते' (ĀSS.7.2.) इति Sy.

२. हे मित्रावरुणौ ! Sy.

३. पुरूरुणा । अत्र सोः 'सुपां सुलुक्०' इत्याकारः । पुरोरपि बहु उरु बहुतरम् । अथवा पुरु च तदुरु च पुरूरु । अत्यन्तमुरुतरमित्यर्थः तादृक् Sy.

४. रक्षणम् Sy.

५. हि प्रसिद्धौ Sy.

६. सम्भजेय । यस्मादवोऽस्ति तस्माद्वंसीति भावः Sy.

७. युवतया P.

८. अनुग्रहबुद्धिम् Sy.

९. VM. ignores चित् । नूनम् । वरुण and मित्र ॥ चिदिति पूरणः । नूनं निश्चयेन । हे वरुण ! हे मित्र ! युवयोः Sy.

१०. वा P.

११. प्रसिद्धौ Sy.

१२. युवाम् Sy.

१३. धायसे पानाय भोजनाय Sy.

१४. स्तोतारो वयम् इषम् अन्नम् Sy.

१५. हे रुद्रा ! दुःखात् द्रावयितारौ ! रुदद्भिर्द्रवणीयौ ! वा Sy.

१६. स्तोतारः Sy.

१७. सम्राडा P. स्याम भवेम । समृद्धा इति शेषः । युवाभ्यां स्वभूता वा स्याम Sy.

१८. VM. ignores सम्यक् ॥ सम्यक् स्तुम इति शेषः Sy.

१९. स्तुत्येन D. हे उक्तरूपौ ! देवौ ! युवाम् Sy.

२०. ०णौः P.

२१. पालयेथाम् । इष्टप्राप्त्यनिष्टपरिहारभेदेन भेदः । स्तोत्रादिवैकल्यात् शत्रोर्वा त्रायेथामभिमतप्रापणेन रक्षतमित्यर्थः Sy.

२२. हिंस्याम तरेम वा Sy.

२३. वयं च पुत्रादिभिः सहिताः स्वीयैरङ्गैर्वा Sy.

मा कस्याद्भुतक्रतू यक्षं भुजेमा तनूभिः । मा शेषसा मा तनसा ॥ ४ ॥

मा कस्य । मा । कस्यचिदन्यस्य । हे आश्चर्यकर्माणौ ! विद्धि[3] याजया[4] ? भुजेम[5] । शरीरैः[6] । मा च । पुत्रेण[7] । मा च[8] । तत्पुत्रेणात्मार्थं सन्तानार्थं[10] वा[11] परं न याचेमहि[12] ।

V.71.

आ नो गन्तं रिशादसा वरुण मित्र बर्हणा । उपेमं चारुमध्वरम् ॥ १ ॥

आ नः[13] । आगच्छतम्[14] । अस्मान्[15] । हे रिशतामसितारौ[16] ! मित्रावरुणौ[17] ! वृद्धया[18] । यज्ञं[19] च । उपागच्छतम् । कल्याणम्[20] । अस्माकं[21] यज्ञमुपागच्छतमिति वा[22] ।

विश्वस्य हि प्रचेतसा वरुण मित्र राजथः । ईशाना पिप्यतं धियः ॥ २ ॥

विश्वस्य । सर्वस्य[23] । एव जगत[24] । प्रवृद्धज्ञानौ[25] । मित्रावरुणौ[26] । राजथस्तथाविधौ[27] । आप्याययतम्[28] । कर्माणि[29] ।[30]

---

१. Omitted by P.
२. अन्यस्य कस्यचन Sy. ३. विद्धि P.
४. यज्ञया P. यक्षं पूजितं धनम् Sy.
५. तुजेम P., D. मा भुञ्जीमहि Sy.
६. अस्मदीयैरवयवैः । युवयोरनुग्रहात् समृद्धा वयमन्ययाचितधनेन शरीरपोषं न कुर्म इत्यर्थः Sy.
७. अपत्येन सहिता मा भुजेम Sy.
८. P. reads मास्सोमन्तदेवाहा च for मा च ।
९. पौत्रादिना सहिता मा भुजेम । अस्मत्कुले न केऽपि भुञ्जीमहीत्यर्थः Sy.
१०. सन्तनार्थं सन्तानार्थं D.
११. चा P.
१२. Ms. D. puts the figure ॥७०॥ here to indicate the end of the seventieth hymn. No such number is given in P.
१३. 'आ नो गन्तम्' इति तृचात्मकं पञ्चदशं सूक्तं बाहुवृक्तस्यात्रेयस्यार्षं गायत्रं मैत्रावरुणम् । 'आ नस्तृचं बाहुवृक्तः' (KSA. 28.71.p.21.) इत्यनुक्रमणिका । उक्तः सूक्तविनियोगः । अग्निष्टोमे प्रातःसवने मैत्रावरुणशस्त्रे अयमनुरूपस्तृचः । सूत्रितं च—'आ नो मित्रावरुणा नो गन्तं रिशादसा' (ĀŚS.5.10.) इति Sy.
१४. उपागच्छतम् Sy. १५. अस्माकम् Sy.
१६. शत्रूणां प्रेरकौ युवाम् Sy.
१७. हे मित्र ! हे वरुण ! Sy.
१८. वृध्या P., D. बर्हणा परिबर्हणौ निबर्हणौ हन्तारौ शत्रूणाम् Sy.
१९. अहिंसकं यज्ञम् Sy.
२०. चरणीयम् Sy.
२१. अस्माकम् seems to be another explanation of नः (अस्मान्) ।
२२. VM. ignores इमम् ।
२३. हीति प्रसिद्धौ Sy.
२४. ए जतः for एव जगतः P.
२५. प्रकृष्टज्ञानौ युवाम् Sy.
२६. हे मित्र ! हे वरुण ! Sy.
२७. स्वामिनौ भवथः Sy.
२८. प्याययतं फलैः Sy.
२९. अस्मदीयानि कर्माणि Sy.
३०. VM. ignores ईशाना ॥ हे ईशाना ! अस्माकमीश्वरौ युवाम् Sy.

उप॑ नः सु॒तमा ग॑तं॒ वरु॑ण मि॒त्र दा॒शुषः॑ । अ॒स्य सोम॑स्य पी॒तये॑ ॥ ३ ॥

[1]उप नः । उपागच्छतम् । अस्माकम् । अस्य । यजतोऽध्वर्योः । [3]सोमं तदेवाह—[4]अस्य सोमस्य [5]पानाय ।

V.72.

आ मि॒त्रे वरु॑णे व॒यं गी॒र्भिर्जु॒हुमो अत्रि॒वत् । नि ब॒र्हिषि॑ सदतं॒ सोम॑पीतये ॥ १ ॥

[6]आ मित्रे । [7]मित्रे । वरुणे च । वयम् । [9]स्तुतिभिः । [11]आह्वान कुर्मः । [12]नो यथाऽत्रिराजुहाव । [13]शिष्टं स्पष्टम् ।

व्र॒तेन॑ स्थो ध्रुव॒क्षेमा॑ धर्म॒णा या॒तय॑ज्जना ।
नि ब॒र्हिषि॑ सदत॒ सोम॑पीतये ॥ २ ॥

[14]व्रतेन । [15]कर्मणा । [16]भवथः । [17]ध्रुवरक्षणौ । [18]कर्मणैव । [19]निहितशत्रुजनौ चरतः । [20]

---

१. व P.
२. जयतो० D. हविर्दातुर्मम Sy.
३. अभिषुतं सोमं प्रति Sy.
४. सोन्तदे० D.
५. VM. ignores वरुण and मित्र ॥ हे वरुण ! हे मित्र ! युवाम् Sy.
Ms. D. puts the figure ॥७१॥ here to indicate the end of the seventy-first hymn. No such number is given in P.
६. 'आ मित्रे वरुणे' इति तृचात्मकं षोडशं सूक्तं बाहुवृक्तस्यार्षमौष्णिहं मैत्रावरुणम् । 'आ मित्र औष्णिहम्' (KSA.28.72.p.21.) इत्यनुक्रमणिका । दशरात्रे तृतीयेऽहनि प्रउगशस्त्रेऽयं मैत्रावरुणस्य तृचः । सूत्रितञ्च 'आ मित्रे वरुणे वयमश्विनावेह गच्छतम्' (ĀśS.7.10) इति Sy.
७. मित्रा P.
८. मित्रावरुणयोरर्थाय Sy.
९. भयं P. आत्रेयाः Sy.
१०. स्तुतिः P. स्तुतीः D. मन्त्रैः Sy.
११. आजुहुमः Sy.
१२. ०त्रीरा० P. अस्मद्गोत्रप्रवर्तकोऽत्रिरिव Sy.
१३. Omitted by P. By शिष्टं VM. means नि । बर्हिषि । सदतम् and सोमपीतये ॥ तस्माद्धे मित्रावरुणौ ! सोमपीतये बर्हिषि नि सदत निषीदतम् Sy.
१४. हे मित्रावरुणौ ! युवाम् Sy.
१५. कर्मणा योगेन Sy.
१६. भवेथः P., D.
१७. ०णे P. अविचलितस्थानौ भवथः Sy.
१८. Omitted by P. जगद्धारकेण Sy.
१९. वहित० P. निहत० is suggested for निहित० ॥ यातयन्तः कर्मसु प्रवर्तयन्तो जना ऋत्विजो ययोस्तौ यातयज्जनौ । अथवा यातयन्तः शत्रून् हिंसन्तो जना भृत्या ययोस्तौ Sy.
२०. चरतौ P. चरत D.

उत्तरा सिद्धा

मित्रश्च नो वरुणश्च जुषेतां यज्ञमिष्टये ।
नि बर्हिषि सदतां सोमपीतये ॥ ३ ॥

[मित्रश्च][1] याग इतीष्टिः[2] ।

V.73.

यदद्य स्थः परावति यदर्वावत्यश्विना ।
यद्वा पुरू पुरुभुजा यदन्तरिक्ष आ गतम् ॥ १ ॥

यदद्य स्थः[4] ॥ पौर[5] ॥ यत्[6] । इदानीम्[7] । दूरे[8] । भवथ । यद्वा । अन्तिके[9] । हे पुरुभोजनौ[10] ! विस्तीर्णेऽन्यस्मिन्[11] । वा[12] देशे । यदि वा । अन्तरिक्षे[13] । तत[14] आगच्छतम्[15] ।

इह त्या पुरुभूतमा पुरू दंसांसि बिभ्रता ।
वरस्या याम्यध्रिगू हुवे तुविष्टमा भुजे ॥ २ ॥

इह त्या[16] । इह[17] । तौ । बहूनां भावयितारौ[18] । बहूनि[19] कर्माणि । धारयन्तौ । धनेच्छया[20] । याचामि[21] ।

---

१. The *pratīka* is supplied by the Editor. मित्रश्च वरुणश्चोभौ नोऽस्माकम् । यज्ञम् । इष्टयेऽभीष्टाय जुषेतां सेवेताम् । आगत्य च बर्हिषि नि सदतां निषीदतां सोमपानाय Sy.

२. इति ष्टि P.
Ms. D. puts the figure ॥७२॥ here to indicate the end of the seventy-second hymn. No such number is given in P.

३. षष्ठेऽनुवाके पञ्चदश सूक्तानि । तत्र 'यदद्य स्थः' इति दशर्चं प्रथमं सूक्तमात्रेयस्य पौरनाम्न आर्षमानुष्टुभमाश्विनम् । अनुक्रान्तञ्च 'यदद्य दश पौर आश्विनं तदानुष्टुभं तु' (KSA. 28.73.p.21.) इति । 'तत्' इत्युक्तत्वादिदमादीनि षट् सूक्तान्याश्विनानि । 'आनुष्टुभं तु' इति तुशब्दादिदमुत्तरं च द्वे आनुष्टुभे । प्रातरनुवाक आश्विने क्रतावानुष्टुभे छन्दस्याश्विनशस्त्रे चेदमादिके द्वे सूक्ते । 'यदद्य स्थ इति सूक्ते' (ĀSS.4.15.) इति सूत्रितम् Sy.

४. स्थ D.

५. ०र P.

६. यदि Sy.

७. अस्मिन् काले Sy.

८. अत्यन्तं दूरदेशे द्युलोके Sy.

९. अरणवति गन्तुं शक्ये प्रदेशेऽन्तिके स्थः Sy.

१०. हे बहुषु यज्ञेषु भोक्तारौ ! अधिकं रक्षितारौ ! वा Sy.

११. बहुप्रदेशेषु स्थः Sy.

१२. अथवा Sy.

१३. अन्तरिक्षे स्थः Sy.

१४. त P. तस्मात्सर्वस्मादद्य Sy.

१५. VM. ignores आश्विना ।

१६. अस्मिन् यज्ञे Sy.

१७. पुरूणां बहूनां यजमानानां भावयितृतमौ Sy.

१८. पुरूणि Sy.

१९. वरणीयौ Sy.

२०. उपागच्छामि Sy.

अधृतगमनौ[1] । ह्वयामि[2] । बहुतमौ[3] । भोगाय[4] ।

ईर्मान्यद्वपुषे[5] वपुश्चक्रं[6] रथस्य[7] येमथुः[8] ।
पर्यन्या[9] नाहुषा[10] युगा[11] मह्ना[12] रजांसि[13] दीयथः[14] ॥ ३ ॥

ईर्मान्यत्[15] । समितम्[16] । अन्यत् । उदकार्थम् । उप्यमानम्[17] । रथस्य[18] । चक्रम् । अश्विनौ[19] ! येमथुः[20] । परिगच्छथः[21] । अन्येन[22] । महता[23] । अहोरात्राणि[24] । लोकाश्च, द्विकर्मको वा लोकेष्विति[25] ।

तद्[26] षु[27] वामेना[28] कृतं[29] विश्वा[30] यद्वामनु[31] ष्टवे[32] ।
नाना जातावरेपसा समस्मे[33] बन्धुमेयंथुः[34] ॥ ४ ॥

तद्[35] षु[36] । तत् । सुष्ठु । एतत्[37] । युवयो[38] । कर्म[39] । व्याप्तौ[40] । यत्[41] । वाम्[42] । अहमनु स्तौमि[43] । पृथक्[44] । उत्पन्नौ[45] । अपापौ[46] । अस्मासु[47] । धनम्[48] । सङ्गमयथः[49] ।

---

१. अधुत० P. अन्यैरधृतगमनकर्माणौ Sy.
२. आह्वयामि Sy.
३. प्रभूततमौ Sy.
४. भोगाय पालनाय वा Sy.
५. ईम्मा० D.
६. हे अश्विनौ ! युवाम् Sy.
७. समीतम् P. ईर्मा । अर्तेः ईर्मा इति रूपम् । गन्तर्यावित्ये Sy.
८. अप्यमानं P. तस्य शोभायै Sy.
९. रथस्य युष्मदीयस्य Sy.
१०. येमधु D. नियमितवन्तौ स्थः Sy.
११. ०च्छतः D. परिगच्छथः । 'न्य१द्यन्यस्य मूर्धनि चक्रं रथस्य येमथुः' (RV.I.30.19.) इत्युक्तम् Sy.
१२. चक्रेण Sy.
१३. महत्त्वेन स्वसामर्थ्येन Sy.
१४. युगा युगोपलक्षितान् कालान् प्रातराविसवनानहोरात्रादिकालान् वा Sy.
१५. कोवांश्च P.
१६. VM. ignores नाहुषा ॥ नहुषा मनुष्याः । तेषाम् Sy.
१७. कवुष P. कवुषु D.
१८. अनेन पौरेण Sy.
१९. युवाभ्याम् Sy.
२०. कृतं सम्पादितं भवतु Sy.
२१. हे व्याप्तौ ! Sy.
२२. येन स्तोत्रेण Sy.
२३. युवाम् Sy.
२४. अहस्तौमि P. अनुस्तुवे Sy.
२५. पृथगेव Sy.
२६. समृद्धौ Sy.
२७. ०श्रा च पा० D.
२८. अस्मभ्यम् Sy.
२९. अन्नं धनं वा Sy.
३०. सहग० D. सम्यक् गमयथः । सम्यक् प्रयच्छतमित्यर्थः Sy.
३१. VM. ignores उ and आ ॥ उ इति पूरणः Sy.

आ यद्वां सूर्या रथं तिष्ठद्रघुष्यद् सदा ।
परि वामरुषा वयो घृणा वरन्त आतपः ॥ ५ ॥

आ यद्वाम्[1] । आतिष्ठत्[2] । यदा । युवयो[3] । सूर्यस्य[4] दुहिता । रथम् । सदा[5] । शीघ्र गच्छन्तम्[6] । तदा वाम्[7] । पर्यवृण्वन्[8] । आरोचमाना । गन्तारो रश्मय[9] छन्दासि[10] वा । दीप्त्या[11] । तापयितार[12] ।

युवोरत्रिश्चिकेतति नरा सुम्नेन चेतसा ।
घर्मं यद्वामरेपसं नासत्यावहा भुरण्यति ॥ ६ ॥

युवोः[13] । युवाम्[14] । अत्रिः[15] । जानाति । हे नरौ[16] ! सुखयुक्तेन[17] । चेतसा[18] । यदा[19] । अग्निम्[20] । अरेपस[21] गतौष्ण्यम्[22] । हे नासत्यौ ! आस्येन[23] । भुरण्यति बिभर्ति[24] । आस्यमुदकम्[25] । अश्विभ्यामस्तमिति[26] ।

उग्रो वां ककुहो ययिः शृण्वे यामेषु संतनिः ।
यद्वां दंसोभिरश्विनात्रिर्नरावर्वतति ॥ ७ ॥

उग्रः[27] । उद्गूर्णः[28] । युवयोः । महान्[29] । रथः । श्रूयते[30] । गमनेषु । सन्तन्यमानः[31] । यदा[32] । वाम्[33] ।

---

१. यद्वा P.
२. हे अश्विनौ ! Sy.
३. आस्थितवती Sy.
४. युवयोः पत्नी Sy.
५. ०न्त P., D. शीघ्रगम् Sy.
६. वा D.
७. परितो वृण्वन्ति Sy.
८. वयः अश्वाः Sy.
९. ०सी D.
१०. वाम् P.
११. दीव्या P. दीप्ताः Sy.
१२. आतपनाः शत्रूणाम् । अथवा आतप इति विशेष्यम् । वयो गन्तारः उक्तलक्षणा आतपः सर्वतस्तापयित्र्यो दीप्तयः परिवरन्ते Sy.
१३. युवयोः । युवामित्यर्थः Sy.
१४. अस्मत्पिता ऋषिः Sy.
१५. जानाति स्तुतवानित्यर्थः । सति दुःखे सुखमपेक्षते Sy.
१६. हे नेतारावश्विनौ ! Sy.
१७. ०क्तौ P. सुखेनाग्निदाहोपशमरूपेण हेतुना Sy.
१८. आदरयुक्तेन मनसा Sy.
१९. दुःखस्य कः प्रसङ्गः ? इत्यत आह यस्मात् Sy.
२०. दीप्तं दहन्तमग्निम् Sy.
२१. अरेवसं P., D. असुरः स्वदाहाय प्रक्षिप्तम् अरेपसम् अपापं सुखकरम् Sy.
२२. ०ष्ण्या P.
२३. आस्येन तन्निष्पन्नेन स्तोत्रेण Sy.
२४. प्राप्तवान् । भुरण्यतिर्गतिकर्मा । अत्रेरग्नेः सकाशात् रक्षणम् 'हिमेनाग्नि घ्रंसम्' (RV. I.116.8.) 'युवमुबीसमुत तप्तमत्रये' (RV.X.39.9.) इत्यादिभिः स्पष्टं प्रदर्शितम् Sy. २५. ०ति P.
२६. The passage आस्यमुदकम् should immediately follow आस्येन and precede भुरण्यति ।
२७. उद्गूर्णबलः Sy.
२८. उच्छ्रितो महान् Sy. २९. गन्ता Sy.
३०. गमनेषु यज्ञेषु वा Sy.
३१. सततं गच्छन् रथः Sy.
३२. यस्मात् Sy. ३३. युवाम् Sy.

कर्मभिः । हे अश्विनौ ! अत्रिः । आवर्तयति स्म ।

मध्व ऊ षु मधूयुवा रुद्रा सिषक्ति पिप्युषी ।
यत्समुद्राति पर्षथः पक्वाः पृक्षो भरन्त वाम् ॥ ८ ॥

मध्वः । हे सोमेच्छौ ! स्तुत्यौ । वाम् । सोमस्य धारा । सेवते । प्याययन्ती । यदा युवाम् । अन्तरिक्षम् । अभिगच्छथः । तदानीं पक्वानि । अन्नानि । वाम् । ददति ।

सत्यमिद्वा उ अश्विना युवामाहुर्मयोभुवा ।
ता यामन्यामहूतमा यामन्ना मृळयत्तमा ॥ ९ ॥

सत्यम् । सत्यम् । एव । हे अश्विनौ ! युवाम् । आहुः । सुखस्य भावयितारौ । गमने । अतिशयेन गमनार्थं स्तोतृभिर्ह्वातव्यौ भवथः । एव सुखयितृतमौ च ।

इमा ब्रह्माणि वर्धनाश्विभ्यां सन्तु शंतमा ।
या तक्षाम रथाँइवावोचाम बृहन्नमः ॥ १० ॥

इमा ब्रह्माणि । इमानि । स्तोत्राणि । वर्धनानि । अश्विभ्याम् । सन्तु । सुखतमानि । यानि ।

---

१. अस्मत्पिता Sy.
२. आवर्तयति Sy.
३. VM. ignores नरा ॥ हे नरा ! नेतारौ ! Sy.
४. ०ध्व D.
५. ०च्छ D., P. हे मधुरस्य सोमादेर्मिश्रयितारौ ! Sy.
६. स्नुत्यौ P. स्तुत् स्तुतिः । तया द्रवणीयौ रुद्रपुत्रौ वा Sy.
७. वा P.
८. मधुररसेन Sy.
९. ०यन्ति P. प्याययन्ती स्तुतिरस्मत्कृता Sy.
१०. समुद्द्रवणसाधनान्यन्तरिक्षाणि Sy.
११. अतिपारयथः । यज्ञं प्राप्नुथ इत्यर्थः Sy.
१२. पक्वाः Sy.
१३. अन्नानि हविर्लक्षणानि Sy.
१४. म्रियन्ते यजमानैः Sy.
१५. VM. ignores उ and सु ॥ सुष्ठु Sy.
१६. आहुः पुराविदः Sy.
१७. अस्मद्यज्ञेऽस्मदर्थागमने वा Sy.
१८. P. and D. repeat the word अतिशयेन ।
१९. ०भिह्वा० D. गमनार्थं भृशमाह्वातव्यौ भवतमिति शेषः Sy.
२०. अतिशयेन सुखयितारौ भवतम् Sy.
२१. VM. ignores वै । उ । ता । यामन् and आ ॥ वै इति पूरणः । ता तौ सुखकरत्वेन प्रसिद्धौ युवाम् । यामन् यज्ञे । आकारश्चार्थे Sy.
२२. अथ स्तुतिं निगमयति Sy.
२३. इमानि इदानीं कृतानि Sy.
२४. परिवृढानि स्तोत्राणि Sy..
२५. समर्धकानि Sy.

कृतवन्तौ[1] वयम्[2]। रथानिव[3]। अवोचाम[4]। आभ्या महान्तम्[5]। नमस्कार स्तुति वा[6]।

V.74.

कूष्ठौ[7] देवावश्विनाद्या दिवो मनावसू[8]।
तच्छ्रेवथो[9] वृषण्वसू अत्रिर्वामा विवासति ॥ १ ॥

कूष्ठः[10]। क्व स्थितौ। देवौ ! अश्विनौ ! अद्य[11]। दिव[12]। मा वर्तयति[13] ? हे पूजनीयधनौ ! तत्[14]। शृणुतम्[15]। हे वृष्यमाणधनौ ! अयमत्रिकुलजात[16]। वाम्। परिचरति स्तोत्रेण, तत्स्तोत्रमिति[17]।[18]

कुह[19] त्या कुह[20] नु श्रुता दिवि[21] देवा[22] नासत्या[23]।
कस्मिन्ना[24] यतथो[25] जने[26] को वां[27] नदीनां[28] सचा[29] ॥ २ ॥

कुह त्या[30]। कस्मिन्[31]। दीप्ते लोके। तौ। नासत्यौ भवत[32]। कस्मिन्[33]। वा[34]। विश्रुतौ[35]। कस्मिन्[36]

---

१. कृतवन्तो० is suggested for कृतवन्तौ ॥ सम्पादयाम Sy.
२. रथा इव P. राथा इव D. रथानिव शिल्पी तद्वत्तक्षाम तानि सन्तु Sy.
३. अवाचाम P.
४. वयं प्रभूतं प्रभूतफलप्रदम् Sy.
५. नमस्कारोक्तिम् Sy.
६. Ms. D. puts the figure ॥७३॥ here to indicate the end of the seventy-third hymn. No such number is given in P.
७. 'कूष्ठः' इति दशर्चं द्वितीयं सूक्तं पौरस्यार्धम्। 'कूष्ठः' (KSA. 28.74.p.21.) इत्यनुक्रमणिका। पूर्वत्र तुशब्दात्—इदमप्यानुष्टुभम्। 'आश्विनं तत्' (KSA.28.73.p.21.) इति पूर्वोक्तत्वात्। प्रातरनुवाकाश्विनशस्त्रयोः पूर्वसूक्तेन सहोक्तो विनियोगः Sy.
८. ०तो P., D. कूष्ठः—व्यत्ययेनैकवचनम्। कौ भूमौ तिष्ठन्तौ सन्तौ। अथवा कू इत्यस्य निपातस्य स्थ इत्याख्यातेन 'सह' इति योगविभागात् समासः। ऐकस्वर्यं चाध्येतृसमयप्राप्तम्। 'अराइव' (RV.V.58.5.) इत्यत्र यथेवशब्दः। 'कूचिज्जायते' (RV.X.4.5.) 'कूचित्सन्तम्' (RV.X. 93.11.) इत्यादिवदत्रापि द्रष्टव्यम्। क्व स्थितौ भवथः Sy.
९. यद्य P. अस्मिन् यागदिने Sy.
१०. द्युलोकादागत्य Sy.
११. मा वर्तयति seems to be unnecessary.
१२. हे स्तुतिधनौ ! Sy.
१३. स्तोत्रम् Sy.
१४. शृणुथः Sy.
१५. हे वर्षकधनौ ! Sy.
१६. अत्रेः पुत्रः Sy.
१७. अत्रिर्युवां स्तौति तं शृणुथ इत्यर्थः Sy.
१८. स्तोत्रं should immediately follow तत् and precede शृणुतम्।
१९. VM. ignores आ ॥ आ सर्वतः Sy.
२०. द्युलोके निवसत इति शेषः Sy.
२१. अश्विनौ Sy.
२२. तिष्ठतः Sy.
२३. कुत्र Sy.
२४. वा seems to be the explanation of नु ॥ अद्य Sy.
२५. ०तो P. श्रुतौ Sy.
२६. Omitted by P., D. अथ प्रत्यक्षकृतः, हे देवौ ! युवां कस्मिन् Sy.

वा । जनं[1] । आगच्छथः । कश्च[2] । युवयोः । स्तुतीनाम् । सेविता[3] । स्तुतयो नद्य[4]. ।[5]

कं याथुः कं ह गच्छथुः कमच्छा युञ्जाथे रथम् ।
कस्य ब्रह्माणि रण्यथो वयं वामुश्मसीष्टये ॥ ३ ॥

कं याथः[6] । कम्[7] । प्राप्नुथः[8] । कम्[9] । च प्राप्तुम्[9] । गच्छथः[10] । कं च । अभिगन्तुम्[11] । युञ्जाथे[12] । रथम्[13] । कस्य वा ब्रह्माणि[14] । कामयते[15] । वयमिदानीम् । वाम्[16] । कामयामहे[17] । यज्ञार्थम्[18] ।

पौरं चिद्धयुदप्रुतं पौरं पौराय जिन्वथः ।
यदीं गृभीततातये सिंहमिव द्रुहस्पदे ॥ ४ ॥

पौरम्[19] । पौरो मेघः[20] पूरणात् तम् । उदप्रुतम्[21] । पौरेत्यामन्त्रित[22] वाक्येनान्वितमित्युक्तम् । पौरनाम्ने मह्यमुदकेन । पूरयथः[23] । यदि[24] । एनमनुदके[25] देशे । गत्रो[26] । स्थाने[27] । सिंहमिव[28] लीनम्[29] । युद्धार्थं प्रापयथ[30]. ।

---

१. यजमाने Sy.
२. स्तोता Sy.
३. सहायः स्यात् Sy.
४. वो P., D. The passage स्तुतयो नद्यः should immediately follow स्तुतीनाम् and precede सेविता । Cf. Ngh. 3.16. नव इति स्तोतृनाम and also cf. N.5.2. ऋषिर्नदो भवति । नदतेः स्तुतिकर्मणः ।
५. VM. ignores देवा ।
६. हे अश्विनौ ! युवाम् Sy.
७. कं यजमानं यज्ञं वा प्रति Sy.
८. अध्वानमुल्लङ्घ्य याथः Sy.
९. प्राप्नु P. च seems to be the explanation of ह ॥ ह कं च प्रति Sy.
१०. ०च्छतः P., D. गत्वा च केन सह सङ्गतौ भवथः Sy.
११. अभिप्राप्तुम् Sy.
१२. योजयथः Sy.
१३. रथम् अश्वैः Sy.
१४. परिवृढानि स्तोत्राणि Sy.
१५. कामयते P. कामयेथे is suggested for कामयेते ॥ रमेथे Sy.
१६. वा P. युवाम् Sy.
१७. कामयामहे । तस्मात् कस्यचन यागं प्रति न गन्तव्यमित्यर्थः Sy.
१८. गमनायैषणाय वा Sy.
१९. मेघ P. पौरेण वृष्टयर्थं प्रार्थ्यमानत्वेन सम्बन्धात् मेघोऽपि पौरः । तम् Sy.
२०. उदकप्लावकं मेघम् Sy.
२१. हे पौर ! इदमश्विनोः सम्बोधनम् । पौरेण स्तुत्यत्वेन सम्बन्धात् । अश्विनावपि पौरौ । उभयोः छान्दसमेकवचनम् । हे पौरसम्बन्धिनावश्विनौ ! युवाम् Sy.
२२. पौराय ऋषये मह्यम् Sy.
२३. प्रेरयथः Sy.
२४. यौ युवाम् Sy.
२५. मेघं प्रति गच्छथः Sy.
२६. द्रोहस्य Sy.
२७. अरण्यदेशे Sy.
२८. गर्जन्तं प्रबलं सिंहं यथा बलाच् च्यावयन्ति शूरास्तद्वत् जिन्वथ इति Sy.
२९. लिनं P.
३०. प्र० P.

सङ्गृहीतं[1] धनं तायते[2] यत्र भटेभ्यस्तत्रेति[3] ।

प्र च्यवानाज्जुजुरुषो[4] वव्रिमत्कं न मुञ्चथः ।
युवा[11] यदी कृथः[12] पुनरा[13] कामंमृण्वे[14] वध्वः[15] ॥ ५ ॥

प्र च्यवानात्[5] । प्रमुञ्चथ[6] । दीप्ता । च्यवनात्[7] । जराम्[8] । कवचम् । इव कार्यान्ते[9] । यदाऽयं च्यवानः[10] । पुनः । युवा[11] । भवद्भ्या कृथ[12], श्रौणादिकस्थप्रत्यय । अनन्तर[13] म[14] युवतीः[15] यथाकाममात्मानम्[16] । प्रापयामास प्राप्तयौवन. । "जुजुरुषो[17] नासत्या"[18] इत्युक्तम् ।

अस्ति[20] हि वां[21] इह[22] स्तोता[23] स्मसि[24] वां सुदृशि[25] श्रिये[26] ।
नू श्रुतं[29] म[30] आ गंतमवोभिर्वाजिनीवसू[32] ॥ ६ ॥

अस्ति हि[20] । भवति[21] । हि । वाम् । अत्र । स्तोता[23] । तथा सति भवामः[24] । युवयोः । सुदर्शने[25] । श्रयत्यमुत्तमे[26], उक्तमेकवचनबहुवचनयो. समन्वय[27] । क्षिप्रम्[28] । श्रूयमाणम्[29] । मदीय[30] स्तोत्रम् । आगच्छतम् । पालनैः[31] । हे अश्वधनौ[32] !

---

१. ०हीति P.
२. ०यत्रे P.
३. The passage, **सङ्गृहीतं. तत्र** seems to be the explanation of **गृभीततातये** which VM. has already explained by **युद्धार्थम्** । The passage should therefore immediately follow **युद्धार्थम्॥ गृहीतयज्ञसन्तानाय पौराय** Sy.
४. VM. ignores **चित्** and **हि** ॥ **चिदिति पूरणः** Sy.
५. ०नत् D.
६. **प्रामुञ्चतः** P., D. **प्रमुञ्चतम्** । 'प्रामुञ्चतं व्रापिमिव च्यवानात्' (RV.I.116.10.) **इत्यादि मन्त्रान्तरम्** Sy.
७. **ऋषेः** Sy.
८. **हेयं पुराणं रूपम्** Sy
९. **कार्यन्ते** P. १०. ०ना P.
११. **युवानम्** Sy.
१२. **कुरुथ इत्यर्थः** Sy.
१३. ०प्रत्योन्तरं D. १४. तं P. सं D.
१५. **सुरूपायाः स्त्रियः** Sy.
१६. **कामयात्मानम्** P. **कमनीयं रूपम्** Sy.
१७. **प्राप्तवान्** Sy.
१८. जुजु० P., D.
१९. RV.I.116.10.
२०. **हे अश्विनौ** ! Sy.
२१. **वर्तते** Sy. २२. **खलु** Sy.
२३. Sy. adds **पौरः**.
२४. **स्मो भवेम** Sy.
२५. **सन्दर्शने सन्निधाने** Sy.
२६. **श्र्यर्थम्** is suggested for **श्रयत्यमुत्तमे॥ किमर्थम् ? श्रिये** Sy.
२७. **उक्त एकवचनबहुवचनयोः समन्वयः** is suggested for **उक्तमेकवचनबहुवचनयो समन्वयः** ॥
२८. **अद्य** Sy.
२९. **श्रुणुतम्** Sy.
३०. **मदीयमाह्वानम्** Sy.
३१. **किं तूष्णीम् ? नेत्याह—अवोभिः रक्षणैः सह** Sy. ३२. **अश्ववसू** Sy.

को वामद्य पुरूणामा वव्ने मर्त्यानाम् ।
को विप्रो विप्रवाहसा को यज्ञैर्वाजिनीवसू ॥ ७ ॥

को वाम् । वहूनाम् । मनुष्याणा मध्ये । क । वाम् । अद्य । भजते । क । मेधावो स्तोत्रेण । हे विप्रैरुह्यमानौ ! को वा यजमानः । यज्ञैः । अन्नवसू !

आ वां रथो रथानां येष्ठो यात्वश्विना ।
पुरू चिदस्मयुस्तिर आङ्गूषो मर्त्येष्वा ॥ ८ ॥

आ वाम् । आयातु । युवयो । रथ । रथाना मध्ये । अतिशयेन गन्ता । बहु धनम् । अस्मभ्य प्रयच्छतु । अस्मत्कामः प्राप्त । तस्य रथस्य स्तोमः । मर्त्येषु भवति ।

शमू षु वां मधूयुवास्माकमस्तु चर्कृतिः ।
अर्वाचीना विचेतसा विभिः श्येनेव दीयतम् ॥ ९ ॥

शमू षु । सुखकर्त्री । एव । सुष्ठु । भवतु । युवयोः । हे सोमेच्छू ! अस्माकम् । कृतिः पुनः पुन क्रियमाणा । अभिमुखौ ! सुमती ! युवाम् । अश्वैः । श्येनाविव । आगच्छतम् ।

---

१. पुरूणाम् Sy.
२. मर्त्यानाम् Sy.
३. युवाम् Sy.
४. अस्मिन् विने Sy.
५. भजति Sy.
६. ०रू० P., D. हे विप्रैर्मेधाविभिर्वहनीयौ ! Sy.
७. यजमानो यजमानः P.
८. यज्ञैर्वव्ने । अत्यन्तविलम्बमसहमानः पुनः पुनर्भूते Sy.
९. VM. ignores आ ॥ सर्वतः Sy.
१०. एको रथः Sy.
११. रथ P. रथाम् D. इतरदेवरथानां मध्ये Sy.
१२. अतिशयेन गन्ता सन् Sy.
१३. बहूनपि अस्मद्विरोधिनः Sy.
१४. प्रयच्छतु seems to be the explanation of तिरः ॥ तिरः हिंसकः, तिरस्कर्ता वा Sy.
१५. अस्मान् कामयमानः Sy.
१६. प्राप्तस्य P.
१७. आङ्गूषः स्तुत्यः । आकारः पूरणः । अथवा आङ्गूषः स्तोमः । स्तवोऽस्मयुरस्मान् बलैर्योक्तुं कामयमानो मर्त्येषु मर्त्यैरस्मदीयैर्ऋत्विग्भिः प्रेरितः सन् । उक्तलक्षणाश्विनो रथस्य वा स्तुतिरा सर्वतः पुरु चित् पुरूण्यपि शत्रुबलानि तिरः तिरस्करोति Sy.
१८. सर्वेषु यजमानेषु मध्ये Sy.
१९. VM. ignores अश्विना । चित् and आ ॥
२०. सुखकरम् Sy.
२१. सु कव P. सुकर्तेव D.
२२. युवाभ्याम् Sy. २३. हे मधुमन्तौ ! Sy.
२४. पुनः पुनः करणं युवाभ्यामर्थाय पुनः पुनः क्रियमाणं स्तोत्रं युवयोरागमनस्याभ्यासो वा Sy.
२५. ०खेन D. हे अर्वागस्मदभिमुखाञ्चनौ ! Sy.
२६. हे विशिष्टप्रज्ञौ ! Sy.
२७. विभिः गन्तृभिरश्वैः Sy.
२८. गच्छतम् Sy.
२९. VM. ignores उ

अश्विना यद्ध कर्हि चिच्छ्रुयातमिमं हवम् ।
वस्वीरू षु वां भुजः पृञ्चन्ति सु वां पृचः ॥ १० ॥

अश्विना । अश्विनौ ! यदि । कदा । चित् । इमम् । आह्वानम् । शृणुयातम् । प्रशस्तानि । भोजनानि । सुष्ठु । युवाभ्याम् । पृञ्चन्ति तदेवाह पृञ्चन्तीति । सुष्ठु । वाम् । अन्नानि प्रयच्छन्तीति ।

V.75.

प्रति प्रियतमं रथं वृषणं वसुवाहनम् ।
स्तोता वामश्विनावृषिः स्तोमेन प्रति भूषति माध्वी मम श्रुतं हवम् ॥ १ ॥

प्रति प्रियतमम् ॥ अवस्यु ॥ प्रतिभूषति स्तुतिभिरलङ्करोति । प्रियतमम् । रथम् । वर्षितारम् । धनाना प्रापयितारम् । युवयो । स्तोत्राज्यम् । ऋषि । हे अश्विनौ ! हे मधुमन्तौ ! मम । शृणुतम् । ह्वानम् ।

---

१. हे अश्विना ! युवाम् Sy.
२. यत्र Sy.
३. कर्हिचित् स्थितवन्तौ भवथः Sy
४. इववम् P. तत्र इमं मे Sy.
५. शृणुतम् । श्रुत्वागच्छतमित्यर्थः Sy.
६. किमर्थम् ? इत्युच्यते प्रशस्याः Sy
७. धनानि हविर्लक्षणानि Sy.
८. युवाम् Sy.
९. वृञ्चति P., D.
मिश्रयन्ति प्राप्नुवन्ति Sy.
१०. पिबन्तीति P. पूबन्तीति D.
११. युवाम् Sy.
१२. P. reads पानानि and D. reads वानन्नानि for वाम् । अन्नानि ॥ पृचः सम्पर्चनाः । युवां प्राप्तुं कामयमाना इत्यर्थः । अथवा सुपृचः सुसम्पर्चनाः स्तोतारो वस्वीर्भुजो वां सुष्ठु पृञ्चन्ति सम्पर्चयन्ति Sy.
१३. VM. ignores ह and उ ॥ उ इति पूरणः Sy.
Ms. D. puts the figure ॥७४॥ here to indicate the end of the seventy-fourth hymn. No such number is given in P.
१४. 'प्रति प्रियतमम्' इति नवर्चं तृतीयं सूक्तम् । अवस्युर्नमात्रेय ऋषिः । पङ्क्तिश्छन्दः । अश्विनौ देवता । अनुक्रान्तं च—'प्रति नवावस्युः पाङ्क्तम्' (KSA.28.75.p.21.) इति । प्रातरनुवाके आश्विने क्रतौ पाङ्क्ते छन्दस्याश्विनशस्त्रे चेदं सूक्तम् । 'प्रति प्रियतममिति पाङ्क्तम्' (ĀŚS.4.15.) इति हि सूत्रितम् Sy.
१५. प्रयतं D.
१६. अपस्युः D.
१७. ०रखंक० P.
१८. प्रय० P.
१९. वर्षितारं फलानाम् Sy.
२०. ०नां अप्रा० P. ०नामप्रा० D. धनानां वाहकम् Sy.
२१. ईदृश रथमागमनाय स्तौतीत्यर्थः Sy.
२२. ऋषिभिः P., D.
ऋषिः अवस्युः Sy.
२३. तस्माद्धे मधुविद्यावेदितारौ ! Sy.
२४. आह्वानम् Sy.
२५. VM. ignores प्रति and स्तोमेन ॥ एकः प्रतिशब्दोऽनुवादः Sy.

अत्यायातमश्विना तिरो विश्वा अहं सना ।
दस्रा हिरण्यवर्तनी सुषुम्ना सिन्धुवाहसा माध्वी मम श्रुतं हवम् ॥ २ ॥

अत्यायातम् । अत्यागच्छतम् । अश्विनौ ! तिरस्कृत्य । अन्याः प्रजाः । अह हि । युवयोः पुरातन· । दस्रौ हिरण्ययुक्तमार्गौ । सुमुखौ । सिन्धूना प्रापयितारौ ।

आ नो रत्नानि बिभ्रतावश्विना गच्छतं युवम् ।
रुद्रा हिरण्यवर्तनी जुषाणा वाजिनीवसू माध्वी मम श्रुतं हवम् ॥ ३ ॥

आ नः । आगच्छतम् । अस्माकम् । रत्नानि । धारयन्तौ । अश्विनौ ! युवाम् । रुद्रपुत्रौ । हिरण्य-वर्तनी । प्रीयमाणौ । अन्नवसू ।

सुष्टुभो वां वृषण्वसू रथे वाणीच्याहिता ।
उत वां ककुहो मृगः पृक्षः कृणोति वापुषो माध्वी मम श्रुतं हवम् ॥ ४ ॥

सुष्टुभः । कल्याणस्य स्तोतु· । युवयो । हे वृष्यमाणधनौ ! रथे । स्तुतिः । आहिता । वाणीचीति वाङ्नाम । अपि च । युवयो· । उच्छ्रित· । अश्वः । अन्नम् । कृणोति । उदकहितम् ।

---

१. अतिग० P., D. सर्वान् यजमाननतिक्रम्या-गच्छतम् Sy.
२. सदा तिरस्करोमि । अथवाहं तिरः । 'तिरः सत इति प्राप्तस्य' (N.3.20.) इति निरुक्तम् । प्राप्ता विश्वाः सर्वाः· क्रिया युष्मदीया अनुतिष्ठेयमित्यर्थः । सना सनातनौ Sy.
३. सर्वा अस्मद्विरोधिप्रजाः Sy.
४. यथा अहम् ऋषिः Sy.
५. युवां याव P.
६. दस्रे P., D. शत्रूणामुपक्षपयितारौ Sy.
७. हिरण्यरथौ Sy.
८. सुधनौ Sy.
९. नदीनां प्रवाहयितारौ वृष्टिप्रेरणेन । तादृशौ युवामत्यायातम् Sy.
१०. अस्मभ्यम्, अस्मान् वा Sy.
११. रमणीयानि धनानि Sy.
१२. रुद्रपुत्रौ स्तुत्यौ वा Sy.
१३. हिरण्यरथौ Sy. १४. प्रय० P.
यज्ञं सेवमानौ सन्तौ आगच्छतमिति Sy.
१५. ०सूः P. १६. सुस्तोतुर्मम Sy.
१७. हे वर्षधनौ ! वर्षितारौ ! वा वसूनां हे अश्विनौ ! Sy. १८. वाग्रूपा स्तुतिः Sy.
१९. ०त P., D. स्थापिता । अस्माभिः कृतेत्यर्थः Sy.
२०. पाणीवीति P., D. The passage वाणी-चीति वाङ्नाम (Ngh. 1.11.) should immediately follow स्तुतिः and precede आहिता ।
२१. युवाभ्याम् Sy. २२. ककुहः महान् Sy.
२३. मृगयिता Sy.
२४. अन्नं हविः Sy.
२५. करोति । तस्मान्मम हवं श्रुतमिति Sy.
२६. ०कमहितः P. उदकहितम् seems to be the explanation of वापुषः । cf. N. 1.12 वपुरिति जलनाम ॥ वपुष्मान् यजमानः Sy.

बोधिन्मनसा रथ्येषिरा हवनश्रुता ।
विभिश्च्यवानमश्विना नि यथो अद्वयाविनं माध्वी मम श्रुतं हवम् ॥ ५ ॥

बोधिन्मनसा । बुध्यमानमनसौ[1] । रथ्यौ[2] । गन्तारौ[3] । स्तुते । श्रोतारौ[4] । च्यवनमृषिम् । अश्वैः । नयाथः[5] । असहायम्[6] ।

आ वां नरा मनोयुजोऽश्वासः प्रुषितप्सवः ।
वयो वहन्तु पीतये सह सुम्नेभिरश्विना माध्वी मम श्रुतं हवम् ॥ ६ ॥

आ वां नरा[7] । आवहन्तु । वाम् । नेतारौ[8] । मनोवेगाः[9] । अश्वाः[10] । प्रुषितरूपाः[11] बिन्दुभिर्युक्ताः[12] । गन्तारः[13] । सोमपानाय । सह । सुखैः[14] ।

अश्विनावेह गच्छतं नासत्या मा वि वेनतम् ।
तिरश्चिदर्यया परि वर्तिर्यातमदाभ्या माध्वी मम श्रुतं हवम् ॥ ७ ॥

अश्विनौ[15] । अश्विनौ ! इह[16] । आगच्छतम्[17] । नासत्यौ ! मा । विगतकामौ[18] भवतम्[19] । तिरस्कृत्यान्यान्[20] यजमानान् । स्वामिनौ[21] ! मार्गम्[22] । परियातम्[23] । हे अहिंसितौ[24] ।[25]

---

१. ध्यमानसौ D. बुध्यमानमनस्कौ Sy.
२. रथ्यौ P. रथस्वामिनौ Sy.
३. शीघ्रगन्तारौ सर्वैर्गन्तव्यौ वा Sy.
४. ०ते स्तोतारौ P. हवनस्य स्तुतेः श्रोतारौ युवाम् Sy.
५. यथा तमृषिं प्राप्तवन्तौ तद्वत् मां प्रति पथि नियाथः नितरामागच्छतम् । 'प्र च्यवानाज्जुजुरुषो' वन्रिम्' (RV. V. 74.5.) इति ह्युक्तम् Sy.
६. अद्वयाविनं मायारहितम् Sy.
७. वा D.
८. आपन्नराः P.
९. त्वां D. युवाम् Sy.
१०. हे नरा ! कर्मणां नेतारौ ! Sy.
११. मनोमात्रेण युज्यमानाः सुशिक्षिता इत्यर्थः Sy.
१२. अश्वां D.
१३. प्रुतरूपाः P.
विचित्ररूपाः Sy.
१४. वि० D.
१५. शीघ्रगन्तारः Sy.
१६. ०खै D. अस्मभ्यं देयैः सुखैस्तत्साधनैर्धनादिभिर्वा सह वहन्तु Sy.
१७. Omitted by D.
१८. अस्मिन् यज्ञे Sy.
१९. वेनतिः कान्तिकर्मा N. 10.38.
२०. तिरश्चित् अन्तर्हितावदूरदेशादपि युवाम् Sy.
२१. ०नो P. अर्ययाऽर्यौ स्वामिनौ युवाम् । 'सुपां सुलुक्०' इत्यादिना सुपो याजादेशः Sy.
२२. अस्मद्यज्ञगृहम् Sy.
२३. आगच्छतम् Sy.
२४. अहिंस्यौ पूज्यौ Sy.
२५. VM. ignores चित् ।

अस्मिन्यज्ञे अदाभ्या जरितारं शुभस्पती ।
अवस्युमश्विना युवं गृणन्तमुप भूषथो माध्वी मम श्रुतं हवम् ॥ ८ ॥

अस्मिन् यज्ञे । अस्मिन् । यज्ञे । अहिंसितौ[२] ! स्तोतारम् । उदकपती[३] । अवस्युम्[४] । अश्विनौ ! युवाम् । स्तुवन्तम्[५] । उपभवथ[६], मध्यमपुरुषेऽपि सन् दृश्यते ।

अभूदुषा रुशत्पशुरग्निरधाय्यृत्वियः ।
अयोजि वां वृषण्वसू रथो दस्रावमर्त्यो माध्वी मम श्रुतं हवम् ॥ ९ ॥

अभूत् । अभूत् । उषाः[७] । दीप्तपशुः[८] । आहितश्च । अग्निः[९] । प्राप्तकालो होमाय । युक्तश्च[११] तस्मिन् । युवयोः[१२] । रथः । दर्शनीयौ[१३] ! अमरणः[१४] ।[१५]

V.76.

आ भात्यग्निरुषसामनीकमुद्विप्राणां देवया वाचो अस्थुः ।
अर्वाञ्चा नूनं रथ्येह यातं पीपिवांसमश्विना घर्ममच्छ ॥ १ ॥

आ भाति[१६] ॥ अत्रि ॥ प्रकाशयति । अग्निः[१७] । उषसाम् । मुख्यम्[१८] । उदस्थुः[१९] । स्तोतॄणाम्[२०] । देवान्[२१]

---

१. Omitted by P.
२. हे अहिंस्यौ ! Sy.
३. उदकमती P., D. हे उदकस्य स्वामिनौ ! Sy.
४. अपस्युर्मा P., D.
५. सुन्वम् P. माम् Sy.
६. उप प्राप्नुतम् Sy. ७. व्युष्टिः Sy.
८. अग्निश्च दीप्तपशुमान् । प्रकाशितहविरित्यर्थः । अथवा पशवः किरणाः । रुशद्रश्मिः सन् Sy.
९. वेद्यामधीयत Sy. १०. आहवनीयः Sy.
११. ऋतौ काले भवः Sy.
१२. अश्वैर्युक्तो भवत्वित्यर्थः । 'छन्दसि लुङ्लङ्लिटः' इत्यनेकेष्वर्थेषु लुङ् भवति । इह प्रार्थनायाम् Sy. १३. हे वस्वौ ! Sy.
१४. अमरणधर्मा ध्रुवः Sy. १५. VM. ignores वृषण्वसू ॥ हे प्रदत्तधनौ ! Sy. Ms. D. puts the figure ॥७५॥ here to indicate the end of the seventy-fifth hymn. No such number is given in P.
१६. 'आ भात्यग्निः' इति पञ्चर्चं चतुर्थं सूक्तं भौमस्यात्रेरार्षं त्रैष्टुभमाश्विनम् । अत्रानुक्रमणिका —'आ भाति पञ्चात्रिः' (KSA.28.76. p.21.)इति । प्रवर्ग्येऽभिष्टवार्थमिदं सूक्तम् । सूत्रितञ्च—'आ भात्यग्निर्ग्रावाणेव' (ĀŚS. 4 6.) इति । प्रातरनुवाके आश्विने क्रतौ त्रैष्टुभे छन्दस्याश्विनशस्त्रे चेदमादिके द्वे सूक्ते । सूय्यते हि—'आ भात्यग्निरिति सूक्ते' (ĀŚS.4.15.) इति । आप्तोर्यामे होतुररतिरिक्तोक्थ्ये इदं सूक्तम् । सूत्रितं च—'आ भात्यग्निः क्षेत्रस्य पतिना वयमिति परिधानीया' (ĀŚS. 9.11.) इति । प्रवर्ग्येऽस्य सूक्तस्य विनियोगः Sy.
१७. दीप्यते । यद्वा उषसां मुखमाभाति दीपयति । उषःकाले ह्यग्नयः प्रतिबोध्यन्ते Sy.
१८. अग्नि P. १९. अनीकभूतः । अनीकं मुखम् । उषसि प्रबुद्धचमान इत्यर्थः । तादृशः Sy.
२०. ०सा मुखमुदस्तुः P. उत्तिष्ठन्ति यस्मादेवं तस्मात् Sy. २१. मेधाविनां स्तोतॄणाम् Sy.

गच्छन्त्यौ[1] । वाचः[2] । अभिमुखौ[3] । इदानीम् । रथ्या[4] । इह । यातम्[5] । यज्ञम्[6] । प्रति[7] ।

न संस्कृतं प्र मिमीतो गमिष्ठान्ति नूनमश्विनोपस्तुतेह ।
दिवाभिपित्वेऽवसागमिष्ठा प्रत्यवर्तिं दाशुषे शंभविष्ठा ॥ २ ॥

न संस्कृतम्[8] । न । मस्कृत सोमम् । प्रहिमत[9] । गन्तारौ[10] । अन्तिकं[11] । इदानीम् । अश्विनौ । मयोपस्तुतौ[12] । अत्र दिवसे । पराह्णे[13] च । रक्षणेन[14] । आगन्तृतमौ[15] । यजमानस्य[16] । अर्वतिम्[17] । प्रति । सुखस्य भावयितारौ[18] ।

उता यातं संगवे प्रातरह्नो मध्यंदिन उदिता सूर्यस्य ।
दिवा नक्तमवसा शंतमेन नेदानीं पीतिरश्विना ततान ॥ ३ ॥

उतायातम्[19] । अपि च । आगच्छतम् । सङ्गवकाले[20] । प्रातःकाले च । अह्न[21] । तथा मध्यन्दिने[22] ।

---

१. ०न्तौ D. ०न्त्यः is suggested for ०न्त्यौ ॥ देवकामाः Sy.
२. स्तोत्राणि Sy
३. अस्मदभिमुखाञ्चनौ Sy.
४. अद्यास्मिन् यागदिने Sy.
५. हे रथस्वामिनौ ! अश्विनौ ! Sy
६. आयातम् Sy.
७. प्रदीप्तं यज्ञम् । यद्वा प्रवर्ग्यम् Sv.
८. अभिलक्ष्येह यातम् Sy.
९. VM. ignores पीपिवांसम् and अश्विना ॥ पीपिवांसं स्वाङ्गैः परिवृढम् । यद्वा पीपिवांसम् आप्यायितं वसतीवरीभिः क्षरद्रूपं सोमरसम् । अथवा घृतादिना पीपिवांसम् Sy.
१०. Omitted by P.
११. अश्विनौ Sy.
१२. संस्कृतं घर्मम् Sy.
१३. हिंस्ताम् Sy.
१४. गन्तृतमौ Sy.
१५. घर्मसमीपे Sy.
१६. उपस्तुतौ भवतः Sy.
१७. यज्ञे Sy.
१८. VM. seems to explain दिवा and अभिपित्वे together as पराह्णे च ॥ दिवसस्याभिपतने प्रातःकाले Sy.
१९. रक्षणेन सह Sy.
२०. आगन्तृतमौ Sy.
२१. आगत्य च हविर्दत्तवते यजमानाय Sy.
२२. अर्वत्ति P. द्वन्द्वभूतौ । वर्तिर्जीवनम् । तदभावोऽवर्तिः । तद्रहितमन्नं यथा भवति तथा गन्तृतमौ Sy
२३. सुखस्य भावयितारौ भवतम् Sy.
२४. अह्नो द्वेधा त्रेधा पञ्चधा पञ्चदशधा समाना विभागाः सन्ति । इह पञ्चधा विभाग आत्तः Sy.
२५. सङ्गपका० P. सङ्गवकाले सङ्गच्छन्ते गावो दोहभूमिं यस्मिन् काले स सङ्गवः । राज्यपरकाले हि गावो वने हिमतृणानि भक्षयित्वा पुनर्दोहाय सङ्गवे प्रतिनिवर्तन्ते Sy.
२६. ०ध्यदि० D.
मध्यकाले Sy.

सूर्यस्य[1] । उदये[1] च । दिवा[2] । नक्तं[2] च । रक्षणेन[3] । सुखतमेन । न । इदानी[4] सायङ्काले । सोमपीतिः[5] । अश्विनौ[6] । आतनोति[7] ।

इदं हि वां प्रदिवि स्थानमोकः[8] इमे गृहा[9] अश्विनेदं दुरोणम्[10] ।
आ नो दिवो बृहतः पर्वतादाद्भ्यो यातमिषमूर्जं वहन्ता ॥ ४ ॥

इदं हि[11] । इदम् । हि । युवयोः । पुराणेन[12] । यज्ञे स्थानम्[13] । मेध्यमानम्[14] । तथेमे । गृहाः[15] । इदं च । दुरोणम्[16], इत्यल्पो भेदम्[17] । आयातम्[18] । अस्मान्[19] । द्युलोकात्[20] । महतः[21] । पर्वतात्[22] । अन्तरिक्षाद्[23] वा । अन्नम् । रसं[24] च । वहन्तौ[25] ।

उत्तरा गता

समश्विनोरवसा नूतनेन मयोभुवा सुप्रणीती[26] गमेम[27] ।
आ नो रयिं वहतमोत वीराना विश्वान्यमृता सौभगानि ॥ ५ ॥

[समश्विनोः[28] ।][29]

---

१. उदितावभ्युदयेऽत्यन्तप्रवृद्धसमयेऽपराह्ण इत्यर्थः। सायाह्नस्याप्युपलक्षणम् Sy.
२. न केवलमुक्तेष्वेव कालेषु, किं तर्हि ? दिवा नक्तं सर्वदा Sy.
३. रक्षणेन हविषा वा निमित्तेन आयातम् । किमर्थमागम्यते ? पूर्वमेवान्यैर्देवैः स्वीकृतत्वात् नेत्याह Sy. ४. इदानीमपि Sy.
५. इतरदेवानां पानम् Sy.
६. अश्विनौ विहायेति शेषः Sy.
७. आतानो० P., D. (न) तनोति Sy.
८. पुराणम् Sy.
९. स्थानम् उत्तरवेद्याख्यम् Sy.
१०. ओकः निवासयोग्यम् Sy.
११. ०हम् P. अथ सौमिकवेद्यभिप्रायेणाह इमे गृहाः प्राचीनवंशादयः Sy.
१२. देवयजनगृहम् Sy.
१३. भेदः is suggested for भेदम् ।
१४. आगच्छतम् Sy.
१५. अस्मा P., D. अस्मदर्थम् Sy.
१६. बृहतः Sy.
१७. पर्ववतो मेघात् Sy.
१८. अक्षिद्वा P. अपां कारणादन्तरिक्षात् Sy.
१९. सं P. ऊर्जं बलं च । बलसाधनमन्नं सारभूतमित्यर्थः । तादृशम् Sy.
२०. VM. ignores अश्विना and आ ।
२१. The *pratika* is supplied by the Editor. The stanza has already been explained by VM. See, RV. V. 42.18. Sy. explains again the stanza in the following manner:— वयं सं गमेम सङ्गच्छेम । अश्विनोः । नूतनेन अवसा अनन्यकृतेन रक्षणेन । मयोभुवा सुखस्य भावयित्र्या । सुप्रणीती सुप्रणीत्या सुष्ठ्वागमनेन च । अपि वैते उभे अवसो विशेषणे । उक्तलक्षणेन सं गमेम । नोऽस्मभ्यम् । रयिम् । आ वहतम् । उत वीरान् पुत्रादीन् । आ वहतम् । हे अमृता ! अमरणधर्माणौ ! विश्वानि सौभगानि सुभगत्वानि आ वहतम् ।
२२. Ms. D. puts the figure ॥७६॥ here to indicate the end of the seventy-sixth hymn. No such number is given in P.

V.77.

प्रातर्यावाणा प्रथमा यजध्वं पुरा गृध्रादररुषः पिबातः ।
प्रातर्हि यज्ञमश्विना दधाते ऽग्र शंसन्ति कवयः पूर्वभाजः ॥ १ ॥

[1]प्रातर्यावाणा [2]। प्रातर्गन्तारौ । मुख्यावश्विनौ [4]। यजध्वम् । [5]अप्रयच्छतोऽपि कदर्यात् [6]। सोमपानमभिकाङ्क्षतो यजमानान् [7]। क्षिप्रम् [8]। अश्विनौ सोम पिबत [9]। प्रात । हि । यज्ञम् [10]। अश्विनौ । धारयतः [11]। कवय [12]। प्रातरश्विनौ । प्रशसन्ति । पूर्वमेव भजमाना [13]।

प्रातर्यजध्वमश्विना हिनोत न सायमस्ति देवया अजुष्टम् ।
उतान्यो अस्मद्यजते वि चावः पूर्वः पूर्वो यजमानो वनीयान् ॥ २ ॥

[14]प्रातर्यजध्वम् [15]। प्रात. । यज्ञ कुरुत [16]। तस्मिन् यज्ञेऽश्विनौ [17]। प्रापयत [18]। न [19]। सायम् [20]। अस्ति । देवयजनम् [21]।

---

१. 'प्रातर्यावाणा' इति पञ्चचं पञ्चमं सूक्तमात्रेयं त्रैष्टुभमाश्विनम् । 'प्रातर्यावाणा' (KSA. 28.77.p.21.) इति ह्यनुक्रान्तम् । प्रातरनुवाकाश्विनशस्त्रयोः पूर्वसूक्तेन सहोक्तो विनियोगः । अप्तोर्यामे मैत्रावरुणातिरिक्तोक्थ्ये इदमेव शस्यम् । तथा च सूत्रितम् —'प्रातर्यावाणा क्षेत्रस्य पते मधुमन्तमूर्मिम् (ĀSS.9.11.) इति Sy.

२. हे मदीया ऋत्विजः ! Sy.

३. प्रातरेव यज्ञं गन्तारौ Sy.

४. अत एवेतरेभ्यो देवेभ्यः पूर्वभाविनौ प्रकृष्टतमौ वा Sy.

५. प्रय० D. किमर्थं प्रथमयागविनियोगः ? उच्यते अदातू रक्षःप्रभृतेः Sy.

६. ०र्याव P., D.

७. ०मानान् P.
अभिकाङ्क्षतः Sy.

८. VM. seems to explain पुरा as क्षिप्रम् ॥ पूर्वम् Sy.

९. पिबताम् ॥ अनागतौ कथं यष्टुं शक्यौ ? इत्यत आह Sy.

१०. यजम् P.

११. धारयतः सम्भजतः Sy.

१२. अनचाना ऋषयः प्रातरेवैतौ । 'ये वानूचानास्ते कवयः' (AB.2.38.) इति हि निगमः Sy.

१३. यज P. पूर्वकालीनाः Sy.

१४. हे मदीयाः पुरुषाः ! Sy. अत्रेरार्षम् । . . . . हे स्तोतारो यूयमुच्यध्वे ! Dur. अत्रेः । . . . . हे ऋत्विजः ! SKN.

१५. प्रातरेव Sy., SKN., Dur.

१६. पूजयध्वं स्तुध्वम् Sy.

१७. तावश्विनौ Dur.
कौ ? अश्विनौ SKN.

१८. प्रहिणुत हवींषि Sy. कथमिति ? यतो ब्रवीमि प्रहिणोत प्रकर्षेण तौ प्रति स्तुतीर्हवींषि च गमयतेति Dur. तदर्थं च हिनोत, 'हि गतौ' हिनुत गच्छत, आहवनीयं प्रति मा विलम्बध्वम् SKN.

१९. Omitted by P. किमित्येवं ब्रवीमि प्रातर्यजध्वमिति ? इतो यस्माद्, न Dur.

२०. साम् P., D.
सायङ्काले हविः Sy.

२१. विद्यते । देवा (न) स्वीकुर्वन्तीत्यर्थः Sy.

२२. देवगामि Sy. अनयोर्देवयोः Dur. किम् ? देवया, देवावश्विनौ तयोर्या यानं गतिर्देवया: । यजेर्वा न यातेः । देवयोरश्विनोर्यागो देवया: । यतः प्रातरश्विनोर्यज्ञं प्रति गतिरिज्या वा नास्तीत्यर्थः SKN.

तत्रत्य हि यजमानमजुष्ट देवै । अस्मत्त । अपि च । यजते तथाविध चाह्वयति । आवं यजमानस्तत्र । पूर्वंपूर्वं । यजमान । अश्विनोरत्यन्त सम्भर्क्ता भवति तस्मात् प्रातरेव यजध्वमिति ।

हिरण्यत्वङ्मधुवर्णो घृतस्नुः पृक्षो वहन्ना रथो वर्तते वाम् ।
मनोजवा अश्विना वातरंहा येनातियाथो दुरितानि विश्वा ॥ ३ ॥

[11] हिरण्यत्वक् । [12] हिरण्यरूप । [13] हिरण्यच्छवि । [14] क्षरदुदक । [15] अन्नम् । [16] वहन् । [17] आवर्तते ।

---

१. जुष्टं D. असेव्यं तद्भवति 'पूर्वाह्णो वै देवानाम्' ŚB. 2.4.2.8. P. 170 इति हि श्रुतिः Sy. यद्यपि कथञ्चित् स्यादजुष्टमनासेवितं च तदश्विभ्यां कर्म Dur. कुतः ? यदजुष्टम्, लिङ्गव्यत्ययः । अजुष्टा अप्रियाऽवासावश्विनोः । अन्यकालत्वात् । अन्याद्यसेवितपूर्वा वा ताभ्यामित्यर्थः SKN.

२. Omitted by P., D अपि चानाहूते त्वयि Dur.

३. यजेत सोमेन Sy. एतावश्विनौ यजते Dur. यजत एवाश्विनौ SKN.

४. आपः P. वितर्पयेच्च हविषा । अतोऽस्मास्वन्येषु च मध्ये Sy. व्यावयति च तर्पयति हविर्भिः Dur. वि चावो वि च आवः, विविधं चाधितर्पयन्ति सोमेन SKN

५. प्रथमःप्रथमः Dur. बहूनां च यजतां मध्ये पूर्वःपूर्वः SKN

६. यष्टा भवति सः Sy. बहूनां यजमानाना मध्ये यश्च यश्च पूर्वो यजते स चाश्विनौ यजते सादरत्वाच्च तस्यैव यज्ञमश्विनो गच्छतो नेतरस्येत्यर्थः SKN.

७. अश्विनो अश्विनौः P., D.

८. देवानां सम्भजनीयः सम्भाव्यो भवति Sy. सम्भक्तृतमः आदृतत्वात्तस्यैव हविरासेवेते अश्विनौ नेतरस्येति Dur. अश्विनोः सम्भक्तृतरः SKN.

९. एतदुभयं ज्ञात्वा प्रातरेव यजध्वम् । तयो कालः प्रागुक्तः । ऊर्ध्वमर्धरात्रात्प्रकाशीभावस्यानुविष्टम्भमिति सम्प्रति तु परावधिप्रदर्शनाय तयोः स्तुतिकाल ऊर्ध्वमर्धरात्राद्यः सूर्योदयपर्यन्तो द्रष्टव्यः । उदिते यागकालः । तत्र वोषसां प्रकाशप्रभृति यावत्सूर्योदयस्तावदन्या देवता आश्विने शस्त्रे स्तुतिं लभन्ते, ता अप्यन्ते ? (ओप्यन्ते) स तासामावापकालः । काः पुनस्ताः ? उषःप्रभृतयः । तत्रोषाः प्रथममुच्यते । उषः कस्मात् ? वष्टेः कान्त्यर्थस्य । कान्ता ह्यसौ । उच्छतेर्वा । यथोक्तम् 'उषः कस्मात् ? उच्छतीति सत्याः ? (सतः)' (N.2.18.) इति द्युस्थानाया विकल्पः । मध्यमस्थाना उच्छतेरेव । तदाह उच्छतेरितरेति । सा ह्युदकानि विवासयति, विवास्यते वा मेघान् मध्यमेन । तस्या एषा प्रकृतत्वात्तस्या उत्तमस्या एषा SKN. प्रातर्यजध्वमश्विनौ प्रहिणुत न सायमस्ति देवेज्या अजुष्टमेतत् । अप्यन्यो अस्मद्यजते वि चावः । पूर्वःपूर्वो यजमानो वनीयान् वनयितृतमः N 12 5., SKN IV.100.

१०. VM. ignores अन्यः । वि and च ॥ अन्यः कोऽपि Sy.

११. 'हिरण्यत्वक्' इत्येषाश्विने पशौ हविषो याज्या । 'हिरण्यत्वङ्मधुवर्णो घृतस्नुरभि क्रत्वेन्द्र भूरधज्मन् (ĀŚS. 3. 8.) इति हि सूत्रितम् Sy.

१२. ०ण्यक् P. ण्यकः D.

१३. हिरण्याच्छादितरूपो हिरण्यावृतः Sy.

१४. मनोहरवर्णः Sy.

१५. उदकस्य प्रस्नवनः Sy.

१६. अन्नममृतम् Sy.

१७. P. and D. read अन्नवन् for अन्नम् । वहन् ।

१८. अस्मदभिमुखमागच्छति । कीदृशो रथः ? Sy.

युवयोः । रथः । मनोवेगः । हे अश्विनौ ! वातसदृशवेगः । येन । अतिगच्छथः । विश्वानि । दुरितानि ।

यो भूयिंष्ठ नासत्याभ्यां विवेष चनिंष्ठं पित्वो ररते विभागे ।
स तोकमस्य पीपरच्छमींभिरनूर्ध्वभासुः सदमित्तुतुर्यात् ॥ ४ ॥

यो भूयिष्ठम् । यः । बहुतरम् । अन्नम् । नासत्याभ्याम् । प्रापयति । यो वा चनिष्ठम् अन्नम् । प्रयच्छति । देवेभ्योऽन्ने विभज्यमाने । स यजमानः । पुत्रम् । कर्मभिः । अस्यान्नस्य । पूरयति पुत्रस्यान्न कर्मभि साधयति । तथानुच्छिन्ततेजस्कान् शत्रून् । सदा । एव । तरति चनिष्ठमाज्यमाहरल्पमित्यपरमिति ।

समश्विनोरवसा नूतनेन मयोभुवा सुप्रणीती गमेम ।
आ नो रयिं वहतमोत वीराना विश्वान्यमृता सौभगानि ॥ ५ ॥

[समश्विनोः]

---

१. रथेन Sy.
२. ०च्छतः D.
अतिक्रम्य गच्छथः Sy.
३. सर्वाणि Sy.
४. दुर्गमनान् मार्गान् Sy.
५. यजमानः Sy.
६. भूयिष्ठम् Sy.
७. पित्वः । कर्मणि षष्ठी । अन्नम् Sy.
८. अश्विभ्याम् Sy.
९. विवेष करोति Sy.
१०. चनिष्ठम् P., D. बह्वन्नं कर्म Sy. चन इत्यन्ननाम Ngh. 6.16.
११. ददाति Sy.
१२. हविर्विभागवति यागे Sy.
१३. अस्य आत्मन एव Sy.
१४. पालयेत् Sy.
१५. अनुन्नततेजस्कान् । यद्वा ऊर्ध्वभासोऽग्नयः । अग्निरहितानयष्टॄन् Sy.
१६. हिंस्यात् Sy.
१७. ०रप्पमित्य० P.
०रल्प० D.
१८. Ms. D. puts the figure ॥७७॥ here to indicate the end of the seventy-seventh hymn. No such number is given in P.
१९. The *pratīka* is supplied by the Editor. The stanza has already been explained. See RV. V. 42. 18,76.5.

V.78.

अश्विनावेह गच्छतं नासत्या मा वि वेनतम् ।
हंसाविव पततमा सुताँ उप ॥ १ ॥

अश्विनौ ॥ सप्तवध्रि ॥ तिस्रो गतार्था ।

अश्विना हरिणाविव गौराविवानु यवसम् । हंसाविव पततमा सुताँ उप ॥ २ ॥

[अश्विना]

अश्विना वाजिनीवसू जुषेथां यज्ञमिष्टये । हंसाविव पततमा सुताँ उप ॥ ३ ॥

[अश्विना]

अत्रिर्यद्वामवरोहन्नबीसमजोहवीन्नाधमानेव योषा ।
श्येनस्य चिज्जवसा नूतनेनागच्छतमश्विना शंतमेन ॥ ४ ॥

अत्रिर्यत् । अत्रिः । यदा । वाम् । असुरे क्षिप्यमाण ऋबीसम् । प्रत्यवरोहन् । आजुहाव । याचमानेव ।

---

१. 'अश्विनावेह' इति नवर्चं षष्ठं सूक्तम् । अत्रानुक्रमणिका 'अश्विनौ नव सप्तवध्रिस्त्र्युष्णिगादि चतुर्थी त्रिष्टुप्पञ्चानुष्टुभः' (KSA. 28.78.p.21.) इति । सप्तवध्रिर्नामात्रेय ऋषिः । आदितस्तिस्र उष्णिहश्चतुर्थी त्रिष्टुप् शिष्टाः पञ्चानुष्टुभः । प्रातरनुवाक आश्विने क्रतौ औष्णिहे छन्दसि आश्विने शस्त्रे चाद्यस्तृचो विनियुक्तः । सूत्रितञ्च—'अश्विना वर्तिरस्मदाश्विनावेह गच्छतमिति तृचौ' (ĀSS. 4.15.) इति । दशरात्रे तृतीयेऽहनि प्रउगशस्त्रेऽप्यमाश्विनस्तृचः । सूत्रितञ्च—'अश्विनावेह गच्छतमा याह्यद्रिभिः सुतम्' (ĀSS. 7.10.) इति Sy.

२. VM. does not explain the three stanzas. Sy. explains this stanza in the following manner:—
हे अश्विनौ ! इह अस्मिन् यागे । आगच्छतम् । हे नासत्या ! मा वि वेनतम् । वेनतिः कान्तिकर्मा । मा विकामौ भवतम् । निःस्पृहावकामौ वा न भवतमित्यर्थः । हंसाविव तौ यथा निर्मलोदकमागच्छतस्तद्वत् । सुतान् अभिषुतान् सोमान् । उप आ पततम् उपागच्छतम् ।

३. The *pratika* is supplied by the Editor. Sy. explains the stanza in the following manner:—
हे अश्विनौ ! हरिणाविव गौराविव गौरमृगाविव च । तौ यथा यवसं घासम् । अनुधावतस्ताविव हंसाविव च सोममागच्छतम् ।

४. The *pratika* is supplied by the Editor. Sy. explains the stanza in the following manner:—
हे वाजिनीवसू ! अन्नार्थं वासयितारौ ! अश्विना ! यज्ञमस्मदीयम् । इष्टयेऽभीष्टायैषणाय वा जुषेथां सेवेथाम् ।

५. अस्मत्पिता Sy.

६. युवाम् Sy.

७. ०बीषं D. तुषाग्निमग्निकुण्डे क्षिप्तः सन् Sy.

८. विमुञ्चन् अजोहवीत् Sy.

९. अस्तौषीत् Sy.

१०. यजमानेव P. यजचमानेव D.

स्त्री परित्राणम्। तदा श्येनस्य[1]। इव। जवसा[2]। नवतरेण[3]। आगच्छतम्। अश्विनौ! सुखतमेन[4]।

वि जिहीष्व वनस्पते योनिः सूष्यन्त्याइव।
श्रुतं मे अश्विना हवं सप्तवध्रिं च मुञ्चतम् ॥ ५ ॥

वि जिहीष्व[5]। शौनक —

सप्तकृत्वोऽपराद्धे[6] तु विफलो दारसङ्ग्रहे।
ऋषिः कृतोऽश्वमेधेन[10] भारतेनेति[11] वै श्रुति ॥
तमष्टमेऽपराद्धे[12] तु वृक्षद्रोण्यां स पार्थिवः।
ऋबीषे[13] ह विनिक्षिप्य स्विन्न[14] रात्रौ न्यधापयत्[15] ॥
सो "ऽश्विनावि"ति[16] सूक्तेन तुष्टावर्षिः शुभस्पती।
तौ तं तस्मात्समुत्सृज्य[17] चक्रतुः सफलं पुनः ॥
तृचस्तस्यैष[18] गर्भार्थं[19] स्वपतस्तस्य गर्भवत्।
यथा वात इति ज्ञेये अश्विभ्यामितरे[20] ऋचौ[21] ॥ इति ॥

---

१. स्त्रि P. योषिदिव। सा यथा पतिं प्रीणयति तद्वत् कुर्वन् Sy.
२. गरुत्मतः Sy.
३. चिदित्युपमार्थे Sy.
४. वेगेन Sy. ५. प्रथमोत्पन्नेन सततं गच्छतः श्येनस्य प्रथमजवेन Sy.
६. अस्माकं सुखतमेन च रथेन तं रक्षितुम् Sy.
७. अत्र ब्रुवन्तीतिहासं सप्तवध्रेः पुराविदः।
भ्रातृव्याः पेटिकायां तमृषिं प्रक्षिप्य यत्नतः ॥
मुद्रां कृत्वा गृहे स्वीये रक्षयित्वा न्यवेशयन्।
न सङ्गच्छेत भार्यां स्वां यथा रात्रौ तथा कृतम् ॥
प्रातःप्रातः समुद्घाटच निर्मथिष्यन्ति तं मुनिम्।
एवं स्थित्वा चिरं कालं पेटायां दुःखितः कृशः ॥
उपायं चिन्तयामास निर्गमस्य चिरं मुनिः।
हृदि निश्चित्य नासत्यावस्तौषीद् धृष्टमानसः ॥
तमश्विनौ समागत्य समुद्घाटच च पेटिकाम्।
उद्धृत्य तमृषिं शीघ्रं तावदृष्टौ बभूवतुः ॥
स ऋषिर्भार्यया सार्धं रमित्वाथ पुनर्भयात्।
प्रातरेत्य पुनः पेटां प्रविश्य प्रागिव स्थितः ॥
पेटानिवाससमये दृष्टवानृग्द्वयं तदा Sy., DDN.
८. विजीगीष्व D.
९. ०राधें P. ०राद्धें D. BD. reads सप्तकृत्वापराधान् वै विफले।
१०. कृणोऽश्व० P.
११. भर० P.
१२. ०राधें P. BD. reads ०ऽपराधे०
१३. BD. reads ऋबीसे।
१४. ०सेनातिसंस्विन्नं रात्रौ रात्रौ P. ऋबि सनादि संस्थिस्थिन्न रात्रौ रात्रौ D.
१५. ०धावयत् P. BD. reads स्कन्नं रात्रौ न्यधारयत्।
१६. RV.V.78.
१७. ०त्समुद्धृत्य BD.
१८. त्रच० P. तृचः स्वस्यैव BD.
१९. ०र्भार्त्थः P. गर्भार्त्थं D.
२०. ०योश्वि P., D. ०ये त्वश्वि० BD.
२१. BD. V.82cd.—86ab.

विवृतद्वारो भव[1] । वनस्पते[2] ! योनिरिव[3] । सूष्यन्त्याः[4] । श्रुतमिति स्पष्टम्[5] ।

भीताय नाधमानाय ऋषये सप्तवध्रये ।
मायाभिरश्विना युवं वृक्षं सं च वि चाचथः ॥ ६ ॥

भीताय । भीताय[6] । याचमानाय[7] । मह्यम् । ऋषये । कर्मभि[8] । अश्विना[9] ! युवम्[10] । मञ्जूषा[11] वृक्षकृताम्[12] । निर्गमनार्थं पुनः प्रवेशार्थं च । विघटयतम्[13] । सङ्गमयतम्[14] । च । अग्नौ मञ्जूषा निधाय सायं निर्गच्छन्त्यक्षा निर्गतेषु तेषु मञ्जूषा विघटिता भवति तत ऋषिश्च निर्गत्य भार्यया सह रमते प्रातश्च विशति[15] रक्षिणां प्रवेशात् पूर्वमेव[16] ततः सङ्घटिता मञ्जूषा भवतीति ।

यथा वातः पुष्करिणीं समिङ्गयति सर्वतः ।
एवा ते गर्भ एजतु निरैतु दशमास्यः ॥ ७ ॥

यथा[17] । यथा । वात[18] । पुष्करिणीम्[19] । सञ्चालयति[20] । सर्वत । एवम् । तव । गर्भ[21] । चालयतु[22] । निर्गच्छतु[23] च सम्भृत[24] । दशमास्य[25] इति भार्यामाहाधृतगर्भामश्विभ्या[26] सफल[27] कृतः ।

---

१. सप्तवध्रिरश्विनावनुष्टुभा तुष्टाव । तथा ऋग्विधाने-विजिहीष्व वनस्पते तदिदं च्यावनं स्मृतम् । यं च्यावयितुकामः स्याच्च्यावयेत्तदिदं जपन् ॥ RVidh. 2.87^{cd}.88^{ab} DDN.

२. विगच्छ । विवृता भव Sy., DDN.

३. हे वनस्पतिविकाररूपे ! पेटिके ! Sy., DDN.

४. भगो यथा विव्रियते तथा त्वमपि विवृता भवSy. प्रसवकाले यथा स्त्रिया योनिर्विवृता भवति तथा भवेति । 'षूङ् प्राणिप्रसवे' लृटि शतरि रूपम्' प्रसोष्यन्त्या इति DDN.

५. ०न्त्या P., D. प्रसवोन्मुख्याः स्त्रियाः Sy. प्रसोष्यमाणायाः स्त्रियाः DDN.

६. VM. ignores श्रुतम् । मे । अश्विना । हवम् । सप्तवध्रिम् । च and मुञ्चतम् ॥ तदर्थं हे अश्विना ! अश्विनौ ! मे हवम् । शृणुतम् । श्रुत्वा च सप्तवध्रिं च मामृषिं मुञ्चतं मोचयतम् Sy. तदर्थं हे अश्विनौ ! मम आह्वानं शृणुतम् । श्रुत्वा आगत्य च सप्तवध्रिं मामृषिं मोचयतमिति DDN.

७. निर्गमात् बिभ्युषे Sy.

८. विमोक्षं याचमानाय Sy.

९. मायाभिः Sy.

१०. हे अश्विनौ ! Sy.

११. युवाम् Sy.

१२. वृक्षविकारां पेटिकाम् Sy.

१३. ०यत D. च विभक्तं कुरुथः Sy.

१४. ०तां D. मम निर्गमार्थं सङ्गच्छथः Sy.

१५. विशरति P., D.

१६. पूर्वमेव पूर्वमेव P.

१७. एतदादि ऋक्त्रयं गर्भस्राविण्युपनिषत् । एतदाद्यृक्त्रयेणासौ सप्तवध्रिः स्वयोषितः । गर्भिण्या प्रसवायाशु स्तुतवानश्विनावृषिः ॥ Sy.

१८. सरआदिकम् Sy.

१९. सम्यक् चालयति Sy.

२०. कम्पताम् । इतस्ततः सञ्चरतु Sy.

२१. Omitted by P.

२२. दश मासान् गर्भे स्थितः Sy.

२३. ०धृतगामश्वि० P.

यथा॑ वातो॒ यथा॒ वन॒ं यथा॑ समु॒द्र एज॑ति ।
ए॒वा त्वं द॑शमास्य सु॒हावे॑हि जु॒रायु॑णा ॥ ८ ॥

[यथा] यथा । वातः । यथा । वृक्षः । यथा । सिन्धु । चलति । एवम् । त्वम् । दशमास्यो भूत्वा । जरायुणा । सह । सम्पूर्णो भव । गच्छति निषिक्त रेतो वदति ।

उत्तरा निगदसिद्धेति

दश॒ मासाञ्छ॒शया॒नः कु॑मा॒रो अधि॑ मा॒तरि॑ ।
नि॒रैतु॑ जी॒वो अक्ष॑तो जी॒वो जीव॑न्त्या॒ अधि॑ ॥ ९ ॥

[दश मासान्]

V.79.

म॒हे नो॑ अ॒द्य बो॑धयो॒षो रा॒ये दि॒वित्म॑ती ।
यथा॑ चि॒नो अबो॑धयः स॒त्यश्र॑वसि वा॒य्ये सुजा॑ते अश्वसूनृते ॥ १ ॥

महे नः ॥ सत्यश्रवाः ॥ महतः । अस्मान् । अद्य । बोधय । धनाय । उष. ! दीप्ता त्वम् । यथा ।

---

१. The *pratīka* is supplied by the Editor. सप्तवध्रिरात्रेयोऽपश्यदेतामनुष्टुभम् Dur. सप्तवध्रेरार्षम् । प्रमूढगर्भाया गर्भच्यावनेऽस्या विनियोगः SKN.

२. वातो यथा कम्पमानो वनं कम्पयति स्वयम् । यथा समुद्रश्चलति चाल्यते वाथ वायुना ॥ स्थित्वा दशैव मासांस्त्वं गर्भोल्बेन सुवेष्टितः । निर्गच्छ जठरान्मातुर्जरया सहितः पतेत् ॥ Sy.

३. वातवनसमुद्राः Dur. वायुः SKN.

४. वनमुदकं निम्नप्रदेशं प्रति SKN.

५. यथा च समुद्रो नदीमुखानि प्रति SKN.

६. कम्पते Dur. गच्छति SKN.

७. चलनदेवं P.

८. ०मस्यः D. दशमाससम्भूत ! गर्भ ! Dur. दशभिर्मासैर्निष्पन्न ! गर्भ ! SKN.

९. उल्बेन प्रजायस्व । मा स्थास्त्वमेतस्मिन्नुदर इत्यभिप्रायः Dur. १०. समम् SKN.

११. एतस्माद् मातुरुदरावदुःखयन्नेतामेजञ्चलन्नवेहि, अर्वाङ् एहि Dur. १२. ०न्ति D.

१३. वदाति P. यथेति कर्मोपमा N.3.15.,SKN. II.167. १४. अक्ता P. उक्ता D.

१५. Ms. D. puts the figure ॥७८॥ here to indicate the end of the seventy-eighth hymn. No such number is given in P.

१६. The *pratīka* is supplied by the Editor. Sy. puts a śloka for the explanation of the stanza.
दश मासानुषित्वासौ जननीजठरे सुखम् ।
निर्गच्छतु सुखं जीवो जननी चापि जीवतु ॥

१७. 'महे नो अद्य' इति दशर्चं सप्तमं सूक्तमात्रेयस्य सत्यश्रवस आर्षं पाङ्क्तमुषस्यम् । अनुक्रम्यते च 'महे दश सत्यश्रवा उषस्यं तु पाङ्क्तम्' (KSA.28.79.p.21.) इति । प्रातरनुवाके उषस्ये क्रतौ पाङ्क्ते छन्दस्याश्विनशस्त्रे चेदं सूक्तम् । सूत्र्यते हि—'महे नो अद्येति पाङ्क्तम्' (Ā. S.4.14.) इति Sy. १८. महते Sy.

१९. अस्मिन् यागादिने Sy. २०. प्रज्ञापय । प्रकाशयेत्यर्थः । सति प्रकाशे क्रतुद्वारा द्रव्यस्योपार्जयितुं शक्यत्वात् Sy. २१. धनप्राप्तये Sy.

२२. ०षा D. हे उषोदेवि ! Sy.

२३. दीप्तिमती Sy. २४. दीप्तित्वं P., D.

वा[1] । अस्मानेव । पुरा बोधयसि[2] । सत्यश्रवसि[3] मयि । वय्यकुलजे[4] । शोभनजनने[5] । मदर्थं कल्याणनिर्गच्छ[6]-च्छब्दे कल्याणा[7] अश्वे[8] वा ।

या सुनीथे शौचद्रथे व्यौच्छो[9] दुहितर्दिवः[10] ।
सा व्युच्छ[11] सहीयसि सत्यश्रवसि वाय्ये सुजाते[12] अश्वसूनृते ॥ २ ॥

या सुनीथे । या त्वम् । सुनीथे[13] राजनि । शुचद्रथपुत्रे[14] । व्युष्टासि[15] दिव[16] । दुहित[17]. ! कल्याणम् । सा[18] तथाद्य । व्युच्छ[19] । अत्यन्त[20] बलवति । मयि[21] ।

सा नो अद्याभरद्वसुर्व्युच्छा दुहितर्दिवः ।
यो व्यौच्छः सहीयसि सत्यश्रवसि वाय्ये सुजाते अश्वसूनृते ॥ ३ ॥

सा नः । अस्माकम् । अद्य[22] । आहियमाणधना[23] । व्युच्छ[24] । दिवः । दुहित[25] ! यैव[26] । पुरा[27] । व्यौच्छ[28]. ! मयि[29] ।

अभि ये त्वा विभावरि स्तोमैर्गृणन्ति[30] वह्नयः ।
मघैर्मघोनि सुश्रियो दामन्वन्तः सुरातयः[31] सुजाते अश्वसूनृते ॥ ४ ॥

अभि ये त्वा । अभिगृणन्ति[25] । ये । त्वा[26] । उषः[27] ! स्तोमै[28] । वोढार[29] । हे धने[30], धनवति[31] !

---

१. यथैव पूर्वम् Sy. २. ०यति D. अतीतेषु दिवसेषु यथा बोधितवती तद्वदद्यापीत्यर्थः Sv.
३. सत्यवति P. सत्यश्रवसि मय्यनुगृहाणेत्यर्थः Sy. ४. वर्यकु० P. वय्यपुत्रे Sy. ५. हे शोभनप्रादुर्भूते ! Sy.
६. कल्याणं जते निर्ग० P. ७. कल्याणाश्वे is suggested for कल्याणा अश्वे ।
८. ०व P. अश्वार्था प्रियसत्यात्मिका स्तुतिवाक् यस्याः सा । हे तादृशि ! देवि ! Sy.
९. एतन्नामके Sy.
१०. ०चन्द्रथ० P. शुचद्रथस्यापत्ये Sy.
११. पूर्वं व्यवासयस्तमांसि Sv. १२. सूर्यस्य Sy.
१३. हे पुत्रि ! उषः ! Sy. १४. सा त्वम् Sy.
१५. पूर्वं तमो विवासय । 'उच्छी विवासे' । विवासो वर्जनम् Sy. १६. अतिशयेन बलवति Sy.
१७. VM. ignores वाय्ये । सुजाते and अश्वसूनृते ॥ वय्यपुत्रे, शिष्टमुक्तम् Sy.
१८. अस्मिन् दिने Sy.
१९. ह्रिय० P. आहृतधना Sy.
२०. तमो विवासय Sy.
२१. हे दुहितः ! उषः ! Sv.
२२. उकारोऽनर्थकः । या त्वम् Sy.
२३. या त्वं पूर्वं व्यौच्छः साद्यापीति Sy.
२४. ०च्छे P.D.
२५. ०गृह्णन्ति D. प्रतिस्तुवन्ति ते स्तोतारः Sy.
२६. त्वाम् Sy
२७. हे विभावरि ! प्रकाशोपेते ! विभाशब्दात् 'छन्दसीवनिपौ' इति वनिप् । भातेर्वा कर्तरि वनिप् Sy.
२८. त्वे स्तोमैः P. त्वेष स्तोमैः D. स्तोत्रैः Sy.
२९. वोढार ऋत्विजः स्तोतारः Sy.
३०. भवति P., D.
३१. ते स्तोतारः त्वदनुग्रहात् सुष्ठ्वर्थिभिराश्रयणीया भवन्ति Sy.

शोभनश्रीकाः[1] । दानवन्तः[2] । शोभनज्ञातिकाः शोभनदाना[3] वा ।

यच्चिद्धि ते गणा इमे छदयन्ति मघत्तये ।
परि चिद्वष्टयो दधुर्ददतो राधो अह्रयं सुजाते अश्वसूनृते ॥ ५ ॥

यच्चिद्धि[4] । यत्[5] । चित् । हि[6] । ते[7] । गणा[8] । इमे[9] । छन्न कुर्वन्ति । धनदानाय[10] । तदानी परितो धारयन्ति । कामिनः[11] । प्रयच्छन्त[12] । धन[13] याचमानेभ्य । अलज्ज[14] प्रभूतम् ।

ऐषु धा वीरवद्यश उषो मघोनि सूरिषु ।
ये नो राधांस्यह्रया मघवानो अरासत सुजाते अश्वसूनृते ॥ ६ ॥

ऐषु धाः[15] । आधेहि[16] । एषु[17] । वीरवत्[18] । अन्नम् । उषः[19] ! धनवति[20] ! प्राज्ञेषु[21] । ये । अस्मभ्यम्[22] । धनानि । बहूनि[23] । अथाऽऽढ्या[24] । प्रयच्छन्ति[25] ।

तेभ्यो द्युम्नं बृहद्यश उषो मघोन्या वह ।
ये नो राधांस्यश्व्या गव्या भजन्त सूरयः सुजाते अश्वसूनृते ॥ ७ ॥

तेभ्यो द्युम्नम् । तेभ्यः[26] । द्योतमानम्[27] । महत्[28] । अन्नम्[29] । उषः ! मघोनि[30] ! आवह[31] । ये । अस्मभ्यम् ।

---

१. दानवन्तो भवन्ति Sy.
२. ०दानो P. रातिर्दानम् । सुदानाश्च भवन्ति Sy. ३. हे उषः ! Sy.
४. ये केचन Sy.
५. हीति पूरणः Sy.
६. तव स्वभूताः Sy.
७. सङ्गभूताः Sy.
८. पुरतो वर्तमानाः Sy. ९. चन P. च्चन D. उपच्छन्दयन्ति ते सर्वेऽप्यस्मान् Sy.
१०. धनदाधानाय P. धनदातये धनदानाय धनवत्त्वाय वा Sy.
११. अस्मानेव कामयमानाः Sy.
१२. यजन्त इत्यर्थः । अर्थिभ्योऽक्षीणं ददतो वा । ये त्वां हविर्ददतः स्तुवन्ति ते सर्वेऽप्यस्मदर्थमेव फलं धारयन्ति । स्तुवन्तीत्यर्थः । अथवा यच्चिद्धीत्यत्र यद्यपीति व्याख्येयम् । तस्मिन् पक्षे उत्तरवाक्ये तथापीत्यध्याहार्यम् Sy.
१३. धनं हविर्लक्षणम् Sy.
१४. अलज्जं P. अह्रियमाणमक्षीणमलज्जावहं वा Sy. १५. ऐष P., D.
१६. अधे० P. आवेहि । आनय Sy.
१७. ०ष P.
१८. वीरैः पुत्रादिभिरुपेतमन्नं यशो वा Sy.
१९. हे उषः ! देवि ! Sy.
२०. धवति P., D. हे मघवति ! त्वम् Sy.
२१. स्तोतृषु वा Sy.
२२. ०ज्ञ येषुषेस्म० P. तव स्तोतृभ्यः Sy.
२३. अक्षीणानि Sy.
२४. धनवन्तः सूरयः Sy.
२५. ददुस्तेभ्यित्यर्थः Sy.
२६. यजमानेभ्यः Sy.
२७. द्योतमानं हिरण्यादिरूपं धनम् Sy.
२८. महतीं कीर्तिं वा Sy.
२९. मनि P. Sy. adds त्वम् ।
३०. तेभ्यो यजमानेभ्यः आवह Sy.
३१. आढ्याः Sy.

धनानि । अश्वसमूहान्[1] । गोसमूहाश्च[2] । प्रापयन्ति[3] ।

उत्तरा निगदसिद्धा

उत नो गोमतीरिष आ वहा दुहितर्दिवः ।
साकं सूर्यस्य रश्मिभिः शुक्रैः शोचद्भिरर्चिभिः सुजाते अश्वसूनृते ॥ ८ ॥

[उत नः][5]

व्युच्छा दुहितर्दिवो मा चिरं तनुथा अपः ।
नेत्त्वा स्तेनं यथा रिपुं तपाति सूरो अर्चिषा सुजाते अश्वसूनृते ॥ ९ ॥

व्युच्छा दुहितः । व्युच्छ[6] । दिव । दुहित[7] ! मा । चिरम्[8] । कुरु[9] । उदयलक्षण कर्म शीघ्र व्युच्छेत्यर्थः । न । एव । त्वाम् । यथा[11] । स्तेनम्[12] । रिपु च पुरुषो बाधते एवम्[14] । सूर्य । अर्चिषा[15] । तपतु[16] व्युष्टाया तापोऽत्यन्त न भवत्विति ।

एतावद्वेदुषस्त्वं भूयो वा दातुमर्हसि ।
या स्तोतृभ्यो विभावर्युच्छन्ती न प्रमीयसे सुजाते अश्वसूनृते ॥ १० ॥

एतावत् । यावदस्मिन् सूक्त उक्तमेतावत् । वा[18] । भूय[19] । वा । त्वम्[20] । उष[21] ! दातुम् । अर्हसि[22] ।

---

१. अश्वैर्युक्तानि Sy.
२. गोभिर्युक्तानि Sy.
३. यति P. भजेरन्, वहुः Sy.
४. VM. ignores सूरयः ॥ सूरयः दातारः Sy.
५. The *pratika* is supplied by the Editor. Sy. explains this stanza in the following manner :—
उत अपि च । नोऽस्मभ्यम् । गोमतीः गोभिरुपेतानि । इषः अन्नानि । आवह आनय । हे दिवः, दुहितः ! उषः ! कदा । सूर्यस्य रश्मिभिः साकं शोचद्भिः दीपयद्भिः । शुक्रैर्निर्मलैः । अर्चिभिः अग्नेस्तेजोभिश्च साकम् । सूर्योदयकालेऽग्नीन्धनकाले चेत्यर्थः ।
६. विभातं कुरु Sy.
७. हे उषः ! त्वम् Sy.
८. विलम्बम् Sy
९. कृथाः Sy.
१०. अस्मदीयं कर्म प्रति Sy.
११. सन्तापयन्ति राजादिस्तद्वत् Sy.
१२. स्तेनम् is suggested for स्त्नेनम् ।
१३. पुर्षो P.
१४. एव P.
१५. तेजसा Sy.
१६. तवत P. तप्यात् शीघ्रं नोदेत्वित्यर्थः Sy.
१७. व्युष्टां P.
१८. वो P. अथवा दित्सितं किम् Sy.
१९. दातुमर्हसि ! अप्रार्थितमपि यद्दातव्यमस्ति तत्सर्वं देहीत्यर्थः Sy.
२०. त्वाम P.
२१. हे उषः ! त्वमस्मभ्यम् Sy.
२२. अर्हसि P.

या त्वम्[1] । स्तोतृभ्यः । उषः ! व्युच्छन्ती[2] । न । शत्रुभिर्हिंस्यते[3] सा[4] ।[5]

V.80.

द्युतद्यामानं बृहतीमृतेनर्तावरीमरुणप्सुं[6] विभातीम्[7] ।
देवीमुषसं स्वरावहन्तीं प्रति विप्रासो मतिभिर्जरन्ते ॥ १ ॥

द्युतद्यामानम्[8] । दीप्तगमनाम्[9] । महतीम्[10] । उदकेन । उदकवती सत्यमृतम्[11] । अरुणरूपाम् । व्युच्छन्तीम्[12] । देवीम्[13] । उषसम् । कल्याणम्[14] । आवहन्तीम्[15] । प्रति । स्तुवन्ति । मेधाविनः[16] । स्तुतिभिः ।

एषा जनं दर्शता बोधयन्ती सुगान्पथः कृणवती यात्यग्रे[17] ।
बृहद्रथा बृहती विश्वमिन्वोषा ज्योतिर्यच्छत्यग्रे अह्नाम् ॥ २ ॥

एषा जनम्[18] । एषा । सुप्त जनम्[19] । दर्शनीया । बोधयन्ती । सुगमान्[20] । मार्गान्[21] । कृण्वती । गच्छति । अग्रे[22] । महारथा[23] । महती । सर्वव्यापिनी[24] । उषा[25] । ज्योतिः[26] । नियच्छति । अह्नाम्[27] । अग्रे[28] ।

---

१. तेषां लौकिकवैदिकव्यवहारार्थम् Sy.
२. ०न्ति P., D. तमो विवासयन्ती Sy.
३. हिंस्यसे is suggested for हिंस्यते ॥ न हंसि । न क्रुध्यसीत्यर्थः । स त्वं दातुमर्हसीति । 'मीङ् हिंसायाम्' इत्यस्मात् इनास्थाने व्यत्ययेन श्यन् Sy.
४. सः P., D.
५. VM. ignores इत् ॥ इच्छब्द एवकारार्थः । अस्मिन् सूक्ते प्रार्थितमेवेत्यर्थः Sy. Ms. D. puts the figure ॥७९॥ here to indicate the end of the seventy-ninth hymn. No such number is given in P.
६. 'द्युतद्यामानम्' इति षड्चमष्टमं सूक्तम् । अत्रानुक्रमणिका 'द्युतद्यामानं षट्' (KSA. 28.80.p.21.) इति । सत्यश्रवा ऋषिः । अनुक्तत्वात् त्रिष्टुप् । 'उषस्यं तु' (KSA. 28.79.p.21.) इत्युक्तत्वात् उषा देवता । प्रातरनुवाके उषस्ये क्रतौ त्रैष्टुभे छन्दस्याश्विनशस्त्रे चेदं सूक्तम् । सूत्रितञ्च—'द्युतद्यामानमुषो वाजेन' (ĀśS.4.14.) इति Sy.
७. दीप्तरथाम् Sy.
८. ०नामहीं P. महीं D.
९. सत्येन यज्ञेन वा Sy.
१०. ऋतवतीम् Sy.
११. द्योतमानाम् Sy.
१२. सूर्यम् Sy.
१३. गच्छन्तीम् । एवंमहानुभावामुषसम् Sy.
१४. मेधाविन ऋत्विजः Sy.
१५. उषाः Sy.
१६. कम् ? प्रसुप्तमित्यर्थः Sy.
१७. सुगमनान् Sy.
१८. पथः Sy. १९. सूर्यस्य पुरस्तात् Sy.
२०. प्रभूतरथा Sy.
२१. विश्वं व्याप्नुवाना विश्वतर्पणा वा Sy.
२२. Omitted by P. उ D.
२३. तेजः Sy.
२४. नयच्छन्नामग्रे P. ०च्छन्नामग्रं D.

एषा गोभिंररुणेभिर्युजानास्रेधन्ती रयिमप्रायु चक्रे ।
पथो रदन्ती सुवितायं देवी पुरुष्टुता विश्ववारा वि भाति ॥ ३ ॥

एषा गोभिः । एषा[1] । गोभि[2] । अरुणवर्णै[3] । युज्यमाना[4] । अक्षीयमाणा[5] । रयिम्[6] । अप्रगमनस्वभावम्[7] । स्तोतृभ्य करोति । मार्गान् । तेजसा विलिखन्ती[8] । धनाय[9] । देवी[10] । बहुभि. स्तुता । विश्ववैवरणीया[11] । व्युच्छति[12] ।

एषा व्येनी भवति द्विबर्हा आविष्कृण्वाना तन्वं पुरस्तात् ।
ऋतस्य पन्थामन्वेति साधु प्रजानतीव न दिशो मिनाति ॥ ४ ॥

एषा व्येनी[13] । एषा[14] । अत्यन्त श्वेतवर्णा[15] । प्रादुर्भवति[16] । द्वयो स्थानयो परिवृढा[17] । आविष्कृण्वाना[18] । शरीरम्[19] । प्राच्याम्[20] । आदित्यस्य । पन्थानम् । अनुगच्छति । साधु[21] । प्रागेवावगच्छन्ती[22] । दिश । न । हिनस्ति[23] यथा रात्रिरन्धकारेण[24] दिशो हिनस्ति नैव हिनस्ति ।

एषा शुभ्रा न तन्वो विदानोर्ध्वेव स्नाती दृशये नो अस्थात् ।
अप द्वेषो बाधमाना तमांस्युषा दिवो दुहिता ज्योतिषागात् ॥ ५ ॥

एषा शुभ्रा[25] । एषा[26] । शोभमानालङ्कृता । इव स्त्री । शरीराणि[27] । ज्ञापयन्ती[28] । उदस्थात्[29] । यथा

---

१. उषाः Sy.
२. बलीवर्दैः Sy.
३. ०र्णै D.
४. रथं योजयन्ती Sy.
५. अशुष्यन्ती अक्षीणा वा Sy.
६. धनम् Sy.
७. ०भावा P. प्रगमनस्वभाव D. अप्रगन्तृ अविचलितम् Sy.
८. प्रकाशयन्ती Sy.
९. सुष्ठु गमनाय Sy.
१०. दवी P., D. द्योतमाना Sy.
११. सर्ववैवरणीया Sy.
१२. प्रकाशं करोति Sy.
१३. व्येति P.
१४. उषाः Sy.
१५. विशेषेण श्वेता Sy.
१६. भवति Sy.
१७. प्रथममध्यमयोः स्थानयोः परिवृढोषाः Sy.
१८. पश्चात् प्रकटीकुर्वती Sy.
१९. स्वीयां तनूम् Sy.
२०. प्राप्याम् D.
पूर्वस्यां दिशि Sy.
२१. सम्यक् Sy.
२२. अपगच्छन्ति P. विश्वं प्रज्ञापयन्ती । इवेति सम्प्रत्यर्थे Sy.
२३. प्रत्युत दिशः प्रकाशयति । अथवा प्रजानतीव अनुगन्तव्यमिति प्रकर्षेणावगच्छन्ती च ऋतस्य पन्थामन्वेति Sy.
२४. रात्रीर० P.
२५. उषाः Sy.
२६. शुभ्रवर्णा निर्मला स्वलङ्कृता योषिदिव Sy.
२७. अङ्गानि Sy.
२८. प्रज्ञापयन्ती Sy.
२९. उन्नतेव स्नानादुत्तिष्ठन्तीव Sy.

वा ज्ञानं[1] कुर्वाणा[2] जलात्। दर्शनाय[3]। ऊर्ध्वमुत्तिष्ठति[4]। शत्रून्[5]। बाधमाना। तमासि। ज्योतिषा[6]। अपगमयति[7]। उषाः[8]। दिवः। दुहितेति[9]।

एषा प्रतीची दुहिता दिवो नॄन्योषेव भद्रा नि रिणीते अप्सः।
व्यूर्ण्वती दाशुषे वार्याणि पुनर्ज्योतिर्युवतिः पूर्वथाकः॥ ६॥

एषा प्रतीची। एषा[10]। अभिमुखा[11]। दिवः। दुहिता। मनुष्यानभ्येति[12]। योषेव[13]। भजनीया[14]। निर्गमयति[15]। रूपम्। प्रकाशयन्ती[16]। यजमानाय[17]। धनानि[18]। पुनश्च[19]। ज्योति[20]। युवति[21]। गतेवोषा। करोति[22]।

V.81.

युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः।
वि होत्रा दधे वयुनाविदेक इन्मही देवस्य सवितुः परिष्टुतिः॥ १॥

युञ्जते॥ श्यावाश्व॥ युञ्जते[24]। मन[25]। सवितु। अपि च। युञ्जते[26]। कर्माणि[27]।

---

१. स्नानं is suggested for ज्ञान॥
२. ०णां P. ३. सर्वेषां दर्शनाय Sy.
४. पूर्वस्यां दिशि उत्तिष्ठति Sy.
५. द्वेष्याणि Sy. ६. तेजसा सह Sy.
७. अवग० P. आगच्छति Sy.
८. VM. ignores नः and आ॥ अस्मदर्थमस्माकं पुरतो वा Sy.
९. उषाः Sy.
१०. एषामुखा P., D. अभिमुखा सती Sy.
११. सर्वान् प्राणिनः प्रति Sy.
१२. योषिदिव Sy.
१३. कल्याणवेषा Sy. १४. प्रेरयति Sy.
१५. प्रयच्छन्ती Sy.
१६. किञ्च हविर्दात्रे यजमानाय Sy.
१७. वरणीयानि धनानि Sy.
१८. अद्यापि Sy.
१९. तेजः Sy. २०. नित्ययौवना सर्वत्र मिश्रयन्ती वा Sy. २१. पूर्वमिव Sy.
२२. Ms. D. puts the figure ॥८०॥ here to indicate the end of the eightieth hymn. No such number is given in P.
२३. 'युञ्जते मनः' इति पञ्चर्चं नवमं सूक्तम्। अत्रेयमनुक्रमणिका—'युञ्जते पञ्च श्यावाश्वः सावित्रं तु जागतम्' (KSA.28.81.p.21.) इति। श्यावाश्वो नामात्रेय ऋषिः। जगती छन्दः। सविता देवता। पृष्ठ्याभिप्लवषडहयोः प्रथमेऽहनि वैश्वदेवशस्त्रे सावित्रनिविद्धानमिदम्। सूत्रितञ्च 'युञ्जते मन इहेह व इति चतस्रः' (ĀŚS. 7.5.) इति। आद्या ग्रावस्तोत्रेऽपि। सूत्रितञ्च—'युञ्जते मन उत युञ्जते धिय आ तू न इन्द्र क्षुमन्तम्' (ĀŚS. 5.12.) इति Sy.
२४. सर्वेषु कर्मसु योजयन्ति। सवित्रनुग्रहाय सङ्कल्पं कुर्वन्तीत्यर्थः Sy. लौकिकचिन्ताभ्यो मनो निवार्य यज्ञचिन्तायां नियमयन्ति Mah. विषयेभ्यः प्रत्याहृत्येष्टे विषये स्थापयन्ति BB.
२५. मनः स्वीयम् Sy. मनांसि U. २६. प्राप्नुवन्ति Sy. यज्ञार्थेषु नियमयन्ति Mah. प्रेरयन्ति U.
२७. कर्माण्यपि Sy. इन्द्रियाण्यपि Mah. धियो वाचः U. यागादिलक्षणानि कर्माणि कुर्वते। यद्वा धियः प्रज्ञा धर्मार्थकाममोक्षविषया युञ्जते भावयन्ति। यद्वा धिय इतीन्द्रियाण्युच्यन्ते तानि युञ्जत इष्टे विषये प्रवर्तयन्ति, अनिष्टेभ्यश्च निवर्तयन्ति BB.

मेधाविनः[1] । विप्रस्य[2] । महतः[3] । स्तोत्रविदः[4] । विदधे[5] । सप्त होत्राः[6] । मार्गवित्[7] । एकः[8] । एव सवितेत्थम्[9] । महती[10] । देवस्य[11] । सवितुः[12] । परितः[13] क्रियमाणा[14]

१. मेधा P. ऋत्विग्यजमानाः Sy. ब्राह्मणा ऋत्विजः Mah. कथम्भूता ऋत्विजः प्रेरयन्ति ? विप्रा ब्राह्मणाः शुश्रुवांसोऽनूचानाः U.

२. कस्यानुज्ञया ? इत्युच्यते मेधाविनः Sy. ब्राह्मणस्य यजमानस्य सम्बन्धिनः Mah. प्राप्तक्रियाशक्तेः फलदानं प्रति यज्ञस्य कर्मणि ब्राह्मणस्य। श्रुतौ वैश्यक्षत्रियावपि यजमानावग्निष्टोमे दीक्षितोऽयं ब्राह्मण इत्युच्यतेऽतस्तावपि ब्राह्मणशब्देनोच्येते U. विप्रस्य मेधाविनः BB.

३. बृहतो यजमानस्य सम्बन्धिनः BB.

४. स्तुत्यस्य ज्ञानवतो वा सवितुरनुज्ञयेति। 'सविता वै प्रसवानामीशे' (ΑΒ.7.16.) इति हि श्रुतिः Sy. सर्वज्ञस्य । अधीतवेदत्वाद् बृहत्त्वमर्थाभिज्ञत्वाद्विपश्चित्त्वम् Mah. मेधाविनः सर्वस्य यज्ञस्य U. विपश्चितः पण्डिता ऋत्विजः । . . .एवमेतत्कुर्वाणा बृहतो विपश्चितो भवन्ति BB.

५. करोति । पृथक् पृथगवधारयति Sy. तदिदं विप्राणां मनोनियमनादिसामर्थ्यम्. .ससर्ज Mah. किञ्च त एव सवित्रा प्रसूता ऋत्विजः विदधत इति वचनविपर्ययः U. विदधे विदधाति विविधमुत्पादयति । छान्दसो लिट् । यद्वा–होत्रा ऋत्विग्विशेषान् होमस्य कर्तॄन् मैत्रावरुणादीन् विदधाति विभज्य स्थापयति BB.

६. स एव सविता सप्तहोत्रकाणामुचिताः क्रियाः Sy. होत्रा होमकर्तारः Mah. सप्त वषट्कर्तारो होत्रा इत्युच्यन्ते । 'अथ होत्राः संयोजयन्ति' इति श्रुतिः 'सोत्येऽहनि सप्त होतारो वषट् कुर्वन्ति' तदेतदुच्यते U. होत्राः स्तुतिलक्षणा वाचः BB.

७. तत्तदनुष्ठानविषयप्रज्ञावेत्ता Sy. वयुनं प्रज्ञां सर्वभूतानां मनोवृत्तिं वेत्तीति वयुनवित् । संहितायां दीर्घः । सर्वधीसाक्षीत्यर्थः Mah. त्रिवेदज्ञानान्वितो भेषज्यं करोति U. वयुनानां ज्ञानोपायानां वेदिता BB. वयुनमिति प्रज्ञानाम Ngh. 3.9. 'वयुनं वेत्तेः कान्तिर्वा प्रज्ञा वा' N. 5.14.

८. इच्छब्द एवार्थे U.

९. सर्वेषामेवर्त्विजां मध्ये सवित्रा प्रसूतो ब्रह्माख्य एक एव ऋत्विक् U. एतत्तु कर्तुं न सर्वे शक्नुवन्ति, एक एव वयुनविदेवंविधं कर्तुं शक्नोतीति BB.

१०. अतिप्रभूता । स्तुत्यगोचरेत्यर्थः Sy. महनीया खलु BB.

११. दानादिगुणयुक्तस्य U.

१२. देवस्य Sy. नन्वेकस्य सर्वसृष्टौ कथं सामर्थ्यम् ? तत्राह यतः सवितुः प्रेरकस्यान्तर्यामिणो देवस्य Mah. सर्वस्य प्रसवितुः U.

१३. सर्वदा Mah. सर्वतः BB.

१४. ०माण P. उक्ता स्तुतिः । . .तथा चाथर्वणिकाः—'यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः' इति । बृहदारण्यकेऽपि 'स एव सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः सर्वमिदं प्रशास्ति यदिदं किञ्च' (Bṛh. U. 4.4.22; Ibid. 5.6.1.) Mah. परिष्टुतिः परिस्तवनम् । को हि नाम यज्ञं प्रेर्त्यात्विजः प्रस्तूय समाप्स्यति यज्ञम् । यज्ञो हि वृष्टिद्वारेण समस्तं जगद्बिभर्तीति सवितुर्महती स्तुतिरित्युक्तम् U. रूपकर्मबान्धवाध्यवसायेन कर्तुं न शक्यते, तस्मादेक एव वयुनविद् होत्रा विधातुं शक्नोति । तस्मान्महानयं देव इति सवितुः प्रशंसा BB.

स्तुतिः ।

विश्वा रूपाणि प्रति मुञ्चते कविः प्रासावीद्भद्रं द्विपदे चतुष्पदे ।
वि नाकमख्यत्सविता वरेण्योऽनुं प्रयाणमुषसो वि राजति ॥ २ ॥

विश्वा । नानाविधानि । रूपाणि । प्रतिमुञ्चते । कविं । प्रस्तौति च । भद्रम् । द्विपदे । चतुष्पदे ।

---

१. यद्वा अस्य मन्त्रस्यार्थान्तरम् । विप्रा ऋत्विजो विपश्चितो यज्ञस्य कर्मणीति शेषः । मनो धियो वाचश्च युञ्जते प्रयुञ्जते । 'यज्ञो वै विपश्चित्' (ŚB. 3.5.3.12. p. 273) इति श्रुतेः । किम्भूतस्य विपश्चितः ? विप्रस्य विशेषेण प्राति पूरयति फलमिति विप्रस्तस्य । फलदानं प्रति प्राप्तक्रियाशक्तेः । 'प्रा पूर्तौ' । तथा बृहतो महतः सर्वसाधनसम्पन्नस्य । होत्रा होतारः सप्त वषट्कर्तारो विदधे विदधते स्वस्वकर्माणीति शेषः । पुरुषवचनव्यत्ययः । तन्मध्ये वयुनविदेकवित् त्रिवेदज्ञानवान् ब्रह्माख्य एक एव । सवितुर्देवस्य मही महती परिष्टुतिः स्तवनम् । ब्रह्माद्या ऋत्विजो यत्कर्म कुर्वते तत्सवितुः प्रेरणेनैवेति सवितुर्महती स्तुतिरित्यर्थः Mah. अन्य आह—मेधाविनो यजमानस्य सम्बन्धिनो विपश्चितो विप्रा युञ्जते । एक एव वयुनविद् होत्रा विदधाति । सा खलु सर्वा देवस्य सवितुर्महती परिष्टुतिः सर्वतः प्रस्तुतिः प्रेरणेति यावत् । तस्मात्तदनुज्ञाता वयमिवं कर्मारभामह इति भावः BB.

स जुहोति । युञ्जते मन उत युञ्जते धिय इति मनसा च वै वाचा च यज्ञं तन्वते स यदाह युञ्जते मन इति तन्मनो युनक्त्युत युञ्जते धिय इति तद्वाचं युनक्ति धिया धिया ह्येतया मनुष्या जूयूषन्त्यनूक्तेनेव प्रकामोद्येनेव गाथाभिरिव ताभ्यां युक्ताभ्यां यज्ञं तन्वते ŚB.3.5.3.11.p.273.

This stanza=YV.5.14.=TS.1.2.13.1.

२. हविर्धानप्रवर्तने रराटघामवनद्धायां 'विश्वा रूपाणि' इत्येषानुवचनीया । सूत्रितञ्च—'विश्वा रूपाणि प्रति मुञ्चते कविरिति व्यवस्तार्याम्' (ĀŚS. 4.9) इति Sy. श्यावाश्वस्यार्षम् Dur. श्यावाश्वस्य SKN.

३. विश्वाः P., D.

४. सर्वाणि Sy., Mah., U. यान्यनेन सङ्गच्छता तमसा पिहितानि, अनुपलभ्यमानत्वादगृहीतानि... तानि विश्वानि सर्वाणि SKN.

५. रूपवत्स्वर्थेषु Dur. रूपाणि घटपटस्तम्भादीनि SKN.

६. आत्मनि बध्नाति धारयति Sy. द्रव्येषु प्रतिबध्नाति । रात्रितमोऽपहृत्य रूपाणि प्रकाशयतीत्यर्थः Mah. द्रव्येष्वपहृत्य शार्वरं तमः प्रकाशयतीत्यर्थः U. आबध्नाति तमोऽपनन् रूपाण्याविष्कुर्वन् Dur. मनाक् क्रमापनयेनोपलभन् प्रतिमुञ्चतीव SKN.

७. मेधावी सविता Sy. विद्वान् क्रान्तदर्शनः Mah. क्रान्तदर्शनः U. क्रान्तदर्शनः । अथवा कवतेर्धातोर्गत्यर्थस्य कविः । कवति गच्छत्यसौ नित्यम् Dur. मेधावी SKN.

८. अनुजानाति Sy. प्रेरयति Mah. कवित्वादेव ...जनयति, अभ्यनुजानाति च Dur. प्रसवोऽभ्यनुज्ञा । अभ्यनुजानाति च ..सर्वं हि भद्रं कर्म उदिते सवितरि क्रियते नानुदिते तदुदयेनानुजानातीव SKN.

९. कल्याणं गमनादिविषयम् Sy. कल्याणं स्वस्वव्यवहारप्रकाशनरूपं श्रेयःMah. भन्वनीयम्U. यद्यत्तेषां भद्रं कल्याणं तत्तत् प्रसुवति Dur. स्वं स्वं कर्म SKN. १०. मनुष्याय Sy., SKN. द्विपाद्भ्यः U. मनुष्यादिभ्यः Dur.

११. गवाश्वादिकाय Sy. द्विपाद्भ्यश्चतुष्पाद्भ्यो मनुष्यपश्वादिभ्यः Mah. चतुष्पाद्भ्यश्च U. गवादिभ्यः Dur. गवादये च । सर्वेभ्यो द्विपाद्भ्यश्चतुष्पाद्भ्यश्च SKN.

व्यख्यच्च[1]। नाकलोकम्[2]। सविता[3]। वरणीय[4] सोऽयम्। उषसि[5]। गतायाम्, स्वकाले। विराजति[6]।

यस्यं प्रयाणमन्वन्य इद्ययुर्देवा देवस्यं महिमानमोजसा।
यः पार्थिवानि विममे स एतशो रजांसि देवः सविता महित्वना ॥ ३ ॥

यस्य प्रयाणम्[10]। यस्य। प्रयाणम्। अनुगच्छन्ति[11]। अन्ये। देवा[12]। देवस्य[13]। महिमानमात्मीयम्[14]।

---

१. ख्यापयति प्रकाशयति Sy. विख्याति प्रकाशयति Mah. विख्यापयति प्रकाशयति U. विख्यापयति....विदर्शयति, तदा हि तस्यां विकीर्णरश्मयो भवन्ति Dur. ख्यातिरत्रान्तर्णीतण्यर्थः। विख्यापयति प्रकाशयतीत्यर्थः SKN.

२. नास्मिन्नकं दुःखमस्तीति नाकः स्वर्गः। यजमानार्थं स्वर्गं प्रकाशयतीत्यर्थः Sy. यश्च नाकं स्वर्गम् Mah. द्युलोकम् U. द्यां च Dur. दिवम् SKN.

३. सर्वस्य प्रेरको देवः Sy. सर्वस्य प्रसविता सूर्यः Mah., U. कः ? सविता SKN.

४. oयं D. वरणीयः सन् Sy. वरेण्यः श्रेष्ठः Mah.

५. उषःकालस्य Mah. उषसः Dur.

६. उदयम् Sy. प्रभाणं गमनमनु पश्चात्, उषःकाले व्यतीते सति Mah. प्रयाणं प्रगमनमनु पश्चात् U. प्रयाणमनु Dur. व्यतीतायामित्यर्थः SKN.

७. प्रकाशते। सवितुरुदयात् पूर्वं ह्युषा उदेति Sy. विशेषेण दीप्यते। 'उषाः सवितुः पुरोगामिनी' इति सवितुः स्तुतिः। ईदृशः सविता शिक्यं प्रति मुञ्चत्विति शेषः Mah. दीप्यते। . . य इत्थम्भूतः सविता स शिक्यं प्रतिमुञ्चत्वित्यर्थः U. प्रकाशते सोऽस्माकं नामेदं करोत्वित्याशिषा स्तुतिर्निराकाङ्क्षा Dur. अनु पश्चात् प्रयाणस्य....विराजति विशेषेण दीप्यते SKN.

८. भाष्ये सर्वाणि प्रज्ञानानीति घटपटादिरूपाविष्कृतेस्तद्विषयाणि प्रज्ञानानि प्रतिमुञ्चतीत्याह। कविः कस्मात् ? क्रान्तदर्शन इत्यादि क्रमतेः कवतेर्वा गतिकर्मण इदं रूपम्। क्रान्तं दूरं गतं दर्शनं प्रकाशरूपं विज्ञानमस्य। यदा कवतेस्तदा कविर्गन्ता गच्छत्यसौ नित्यम्। अवगन्ता वा सर्वस्य ज्ञाता। क्वचित्तु कवतेः शब्दकर्मणः। अस्मिन्नेव नामकरणे शब्दकारी कविरुच्यते SKN. सर्वाणि प्रज्ञानानि प्रतिमुञ्चते। मेधावी। कविः क्रान्तदर्शनो भवति। कवतेर्वा। प्रसुवति भद्रं द्विपाद्द्युधश्च चतुष्पाद्द्युधश्च। व्यचिख्यपन्नाकं सविता वरणीयः। प्रयाणमनूषसो विराजति N.12.13., SKN. IV.111.

अथ शिक्यपाशं प्रतिमुञ्चते। विश्वा रूपाणि प्रतिमुञ्चते कविरित्यसौ वाऽआदित्यः कविर्विश्वा रूपा शिक्यं प्रासावीद्भद्रं द्विपदे चतुष्पदऽइत्युद्यन्वाऽएष द्विपदे चतुष्पदे च भद्रं प्रसौति वि नाकमख्यत्सविता वरेण्य इति स्वर्गो वै लोको नाकस्तमेष उद्यन्नेवानुविपश्यत्यनु प्रयाणमुषसो विराजतीत्युषा वाऽअग्रे व्युच्छति तस्याऽएष व्युष्टि विराजन्नुदेति SB. 6. 7. 2. 4. p. 557.

This stanza=YV.12.3.

९. यस्य सवितुः Mah. देवस्य U.

१०. प्राप्नुवन्ति Sy. प्रयाणं प्रवृत्तिम् Mah. प्रगमम् U.

११. अनुययुरित्, अवश्यमनुगच्छन्त्येव। यत् प्रवृत्तिमनुवर्तन्त इत्यर्थः Mah. अनु ययुर्जग्मुः। इच्छब्दोऽनर्थकः U. १२. अन्यादयः Sy.

१३. देवस्य D. द्योतमानस्य सवितुः Sy.

१४. महत्त्वम्। सवितुरुदयाभावेऽग्निहोत्राद्यनिष्पत्तेस्तेषां हविःस्तुत्याद्यभावात् Sy. महत्त्वं च Mah. महाभाग्यं विभूतिम् U.

सवितुर्बलेन[1] । यश्च[2] । पार्थिवान्[3] लोकान् । निर्ममे[4] । सः[5] । श्वेतवर्णः[6] । सर्वान् लोकान् । महत्त्वेन[7] । विमिमीते[8] ।[9]

उत यासि सवितस्त्रीणि रोचनोत सूर्यस्य रश्मिभिः समुच्यसि ।
उत रात्रीमुभयतः परीयस उत मित्रो भवसि देव धर्मभिः ॥ ४ ॥

उत यासि । अपि च । गच्छसि[10] । सवितः[11] । त्रीणि । तेजांसि लोकान् वा[12] । अपि च । सूर्यस्य[13] । रश्मिभिः । सङ्गच्छसे[14] स्वरूपेण । अपि च । रात्रिम्[15] । उभयतः[16] । परिगच्छसि । उत[17] । मित्रश्च[18] । देवः[19] । भवति । कर्मभिः[20] ।

---

१. बलेन च युक्ता भवन्ति Sy.
२. सविता Mah. सविता देवः U.
३. पृथिव्यादिलोकान् Sy. पृथिवीप्रभृतीस्त्रींल्लोकान् Mah. पृथिवीप्रभृतींल्लोकान् U. 'लोका रजांस्युच्यन्ते' N.4.19.
४. निर्मेध P. परिच्छिनत्ति Sy. मिमीते Mah., U.
५. देवः Mah.
६. ०र्ण P., D. एतवर्णः शोभमानः सन् । राजत इति शेषः । 'युवशा ताकृणोतन (RV.I. 161.7.) इत्यादिवत् एतश इत्यादिशकारोपजनश्छान्दसः Sy.
एतज्जगत्त्रयं स्थावरजङ्गमं प्राणभावेन शेते व्याप्नोतीत्येतशः । . . . . यद्वा एतश इत्यश्वनामसु पठितम् । स देव एतशोऽश्वरूपेण सर्वं जगदवष्टभ्य स्थितः । 'उषा वाऽश्वस्य मेध्यस्य शिरः (ŚB.10.6.4.1.p.807) इति श्रुतेः Mah. एतज्जगत्स्थावरजङ्गमं प्राणभावेन शेत इति सविता एतश इत्युच्यते । यद्वा एतश इत्यश्वनामसु पठितम् । सोऽश्वरूपेण समस्तमेतज्जगदवष्टभ्य स्थितस्तदुक्तम् U.
७. ०त्वेन P., D. स्वमहत्त्वेन Sy. स्वकीयेन महाभाग्येन । . . . . महेर्महतो भावो महित्वं तेन । भावे छान्दसस्त्वन्प्रत्ययः Mah. स्वकीयेन महाभाग्येन U.
८. विमिमीयते P., D.
९. VM. ignores इत् । देवः and सविता । यस्य प्रयाणमन्वन्यऽइद्ययुरिति । प्रजापतिर्वाऽएतदग्रे कर्माकरोत्ततो देवा अकुर्वन्देवा देवस्य महिमानमोजसेति यज्ञो वै महिमा देवा देवस्य यज्ञं वीर्यमोजसेत्येतद्यः पार्थिवानि विममे स एतश इति यद्वै किं चास्यां तत्पार्थिवं तदेष सर्वं विमिमीते रश्मिभिर्ह्येनदभ्यवतनोति रजाꣳसि देवः सविता महित्वनेतीमे वै लोका रजाꣳस्यसावादित्यो देवः सविता तानेष महिम्ना विमिमीते ŚB. 6.3.1.18.p.520.
This stanza=YV. 11.6.
१०. 'तिस्रो दिवः पृथिवीः' (RV. IV. 53.5.) इत्युक्तम् Sy.
११. हे देव ! Sy.
१२. रोचमानान् द्युलोकान् Sy.
१३. सूर्यश्च P.
१४. सङ्गच्छसि 'उच समवाये' इत्यस्येदं रूपम् । उदयात् पूर्वभावी सविता उदयास्तमयवर्ती सूर्य इति Sy.
१५. रात्रीम् P.
१६. ०यन्तः P. उभयपार्श्वे Sy.
१७. अपि च Sy.
१८. मित्राख्यो देवो भवसि । अथवा प्रकाशादिप्रदानेन सखा जगताम् Sy.
१९. VM. seems to read देवः for देव ॥ हे देव ! सवितः ! त्वम् Sy.
२०. Omitted by P. जगद्धारकैः कर्मभिः Sy.

उतेशिषे प्रसवस्य त्वमेक इदुत पूषा भवसि देव यामभिः ।
उतेदं विश्वं भुवनं वि राजसि श्यावाश्वस्ते सवितः स्तोममानशे ॥ ५ ॥

उतेशिषे[1] । अपि च । ईशिषे[2] । अनुज्ञाया[3] । त्वम् । एक । एव । अपि च । पूषा[4] । भवसि । देव[5] । आगमने । अपि च । इदम् । विश्वम् । भुवनम्[6] । विराजसि[7] । श्यावाश्व[8] । ते[9] । सवितु[10] । स्तोमम्[11] । व्याप्नोति कुरुते[12] ।[13]

V.82.

तत्सवितुर्वृणीमहे वयं देवस्य भोजनम् । श्रेष्ठं सर्वधातमं तुरं भगस्य धीमहि ॥ १ ॥

तत्[14] सवितुः[15] । तत्[16] । सवितु[17] । वृणीमहे[18] । वयम्[19] । देवस्य[20] । भोजनम्[21] । श्रेष्ठम् । सर्वेषामतिशयेन

---

१. हे सवितः ! Sy.

२. समर्थो भवसि । ये लौकिकं गमनादिरूपं वैदिकमग्निहोत्रादिरूपं कर्मानुतिष्ठन्ते तेषां सर्वेषामनुज्ञातुमेक एव प्रभवसि Sy.

३. ०याम् D.
सर्वकर्मानुज्ञाकरणस्य Sy.

४. पोषकः Sy.

५. देवैः P.

६. भूतजातम् Sy.

७. ईशिषे धारयितुम् । यस्मादेवंमहानुभावस्तस्मात् Sy.

८. ०वाश्च P.
ऋषिः Sy.

९. तुभ्यम् Sy.

१०. VM. takes सवितुः for सवितः ॥ हे सवितः ! Sy.

११. स्तोत्रम् Sy.

१२. करोति इत्येवमात्मानं परोक्षतया निर्दिशन्नाह Sy.

१३. Ms. D. puts the figure ॥८१॥ here to indicate the end of the eighty-first hymn. No such number is given in P.

१४. 'तत्सवितुः' इति नवर्चं दशमं सूक्तं श्यावाश्वस्यार्षम् । अत्रेयमनुक्रमणिका—'तत्सवितुर्नव गायत्रमाद्यानुष्टुप्' (KSA. 28.82.p.21.) इति । प्रथमानुष्टुप्, शिष्टा गायत्र्यः । 'सावित्रं तु' (KSA. 28.81.p.21.) इत्युक्तत्वात्सावित्रम् । अग्निष्टोमे वैश्वदेवशस्त्रस्याद्यस्तृचः प्रतिपत् । 'अद्या नो देव' इत्यनुचरः । सूत्रितञ्च—'तत्सवितुर्वृणीमहेऽद्या नो देव सवितरिति वैश्वदेवस्य प्रतिपदनुचरौ' (ĀŚS.5.18.) इति Sy.

१५. प्राप्यत्वेन प्रसिद्धम् Sy.

१६. प्रेरकस्य Sy.

१७. प्रार्थयामः Sy.

१८. मय D.
स्तोतारः Sy.

१९. देवस्य स्वभूतम् Sy.

२०. भजना P. ०ना D.
भोग्यं धनम् Sy.

२१. प्रशस्यम् Sy.

धारकम्[1] । भजनीयस्य सवितुः[2] । प्रेरकं[3] तेजश्च । धारयामः[4] ।

अस्य॒ हि स्वयं॑शस्तरं सवि॒तुः क॒च्च॒न प्रि॒यम् । न मि॒नन्ति॑ स्व॒राज्य॑म् ॥ २ ॥

अस्य हि । अस्य । हि । अत्यन्त स्वभूतयशस्कम्[5] । सवितुः । कदा[6] । चिदपि । प्रियम्[7] । न । हिंसन्ति । स्वराज्यम्[8] ।[9]

स हि रत्नानि॑ दा॒शुषे॑ सुवाति॑ सवि॒ता भगः॑ । तं भा॒गं चि॒त्रमी॑महे ॥ ३ ॥

स हि रत्नानि । सः[10] । हि[11] । रत्नानि[12] । यजमानाय[13] । प्रसौति[14] । सविता । भजनीयः[15] । तत्[16] । धनम्[17] । चित्रम्[18] । याचामहे ।

अ॒द्या नो॑ देव सवितः प्र॒जाव॑त्सावीः सौभ॒गम् । परा॑ दुः॒ष्वप्न्यं॑ सुव ॥ ४ ॥

अद्या[19] नः । अद्य[20] । अस्माकम्[21] । देव ! सवितः ! प्रजायुक्तम्[22] । धनम् । देहि[23] । विनाशय[24] च । दुःस्वप्न्यम्[25] ।

---

१. सर्वधाततमम् । सर्वभोगप्रदमित्यर्थः Sy.

२. भजनीयस्य सवितुरनुग्रहात् Sy.

३. शत्रूणां हिंसकम्। धनेन शत्रून् हन्तुं शक्यत्वात्। तादृशं धनम् Sy.

४. प्रेरकं तेजश्च and धारयामः are omitted by P. धारयाम । उपभोगं करवामेत्यर्थः । अथवा धनं वृणीमहे, अर्थित्वाच्च लभेमहीति Sy.

५. स्वय ? (स्व)मसाधारणं यशो यस्यातिशयेन भवति तत्तादृशम् Sy.

६. केचिदप्यसुरादयः Sy.

७. सर्वेषां प्रियभूतम् Sy.

८. स्वयमेव राजमानत्वमैश्वर्यम् Sy.

९. The commentary on this stanza is omitted by P.

१०. खलु Sy.

११. रमणीयानि धनानि Sy.

१२. P. omits upto नाय प्रसौति ॥ हविर्वात्रे मह्यम् Sy.

१३. प्रेरयति प्रयच्छति Sy.

१४. भजनीयो देवः Sy.

१५. तं देवम् Sy.

१६. भजनीयम् Sy.

१७. याचनीयं धनम् Sy.

१८. 'अद्या नः' इति चतुर्थीपञ्चमीभ्याममनोज्ञ-स्वप्नदर्शने प्रत्यृचं जुहुयात् । 'अद्या नो देव सवितरिति द्वाभ्याम्' (AGS. 3.6.6.) इति हि सूत्रितम् Sy.

१९. अस्मिन् यागदिने Sy.

२०. अस्मभ्यम् Sy.

२१. पुत्राद्युपेतम् Sy.

२२. प्रेरय Sy. २३. दूरे प्रेरय Sy.

२४. दुस्वप्नम् P. दुदुस्वप्नम् D. दुःस्वप्नं दुःस्वप्न-वद्दुःखकरं दारिद्र्यम् Sy.

उत्तरा निगदसिद्धा[1]

विश्वानि देव सवितर्दुरितानि परा सुव । यद्भद्रं तन्न आ सुव ॥ ५ ॥

[विश्वानि देव ।][2]

अनागसो अदितये देवस्य सवितुः सवे । विश्वा वामानि धीमहि ॥ ६ ॥

अनागसः[3][4] । अनागसः[5] । अस्यै पृथिव्यै[6] । देवस्य । सवितुः[7] । प्रसवे[8] । विश्वानि[9] । धनानि[10] । धीमहि[11] ।

---

१. The commentary on this stanza is omitted by P.

२. The *pratīka* is supplied by the Editor. Sy. explains the stanza in the following manner:—

हे सवितः ! देव ! त्वम् । विश्वानि । दुरितानि । परासुव । यद्भद्रं प्रजापशुगृहादिकम् । तत् । नोऽस्मभ्यम् । आ सुव अस्मदभिमुखं प्रेरय । 'प्रजा वै भद्रं पशवो भद्रं गृहं भद्रम्' इति श्रुतिः ॥

हे देव ! सवितः ! विश्वानि सर्वाणि दुरितानि पापानि परासुव दूरे गमय । यद्भद्रं कल्याणं तन्नोऽस्मान्प्रति, आसुवागमय Mah. विश्वानि सर्वाणि हे देव ! सवितः ! दुरितान्यसत्यानि परासुव पराञ्चि च गमय । यच्च भद्रं भन्दनीयं तन्नोऽस्माकमासुवागमय U.

तस्यै सप्तदश सामिधेन्यो भवन्ति । सद्वन्ताज्यभागौ सुवेवावरुन्द्धे विश्वानि देव सवितः स घा नो देवः सविता सहावेत्युपाꣳशु हविषो याज्यानुवाक्येऽग्नुष्टुभौ संयाज्ये रजतꣳ हिरण्यं दक्षिणा नानारूपतायाऽग्रथोऽ उत्क्रमायानपक्रमाय शतमानं भवति शतायुर्वै पुरुषः शतेन्द्रिय आयुरेवेन्द्रियं वीर्यमात्मन्धत्ते SB.13.4.2.10.p.982.

[अत्रास्या ऋचः 'विश्वानि देव सवितः' एतावानेव भागः, 'स घा नो _वः सविता सहावा' (RV.VII.45.3.) इत्यृचा साकमस्ति ।]

This stanza=YV.30.3.

३. Omitted by P.

४. वयमनुष्ठातारः Sy.

५. अनागसः स्याम अनपराधिनो भवेम । भूम्यां हि पापाः सम्भवन्ति Sy.

६. ०गस्येस्यै D. अखण्डनीयायै देव्यै भूम्यै Sy.

७. प्रेरकस्य Sy.

८. अनुज्ञायां सत्याम् Sy.

९. अपगतेष्वागःसु सर्वाणि Sy.

१०. The passage, सवितुः प्रसवे विश्वानि धनानि is written twice in P. वननीयानि धनानि Sy.

११. निधी० P.
धारयाम Sy.

उत्तरा निगदसिद्धा[1]

आ विश्वदेव सत्पतिं सूक्तैरद्या वृणीमहे । सत्यसवं सवितारम् ॥ ७ ॥

[आ विश्वदेवम् ।][2]

य इमे उभे अहनी पुर एत्यप्रयुच्छन् । स्वाधीर्देवः सविता ॥ ८ ॥

य इमे[3] । य. । इमे । उभे । अहोरात्रे[4] । पुर[5] । एति[6] । अप्रमाद्यन्[7] । सुकर्मा[8] । देव । सविता[9] ।

य इमा विश्वा जातान्याश्रावयति श्लोकेन । प्र च सुवाति सविता ॥ ९ ॥

य इमा[10] । य.[11] । इमानि । विश्वानि[12] । जातानि[13] । शौनक[14] श्रावयति[15] । प्रसौति[16] । च देव । सविता

---

१. P. repeats निगदसिद्धा ।

२. चातुर्मास्येषु वैश्वदेवे पर्वणि सावित्रस्य द्वादशकपालस्य 'आ विश्वदेवम्' इत्यनुवाक्या । सूत्रितञ्च—'आ विश्वदेवं सत्पतिं वामद्य सवितः' (ĀŚS.2.16.) इति । प्रायणीये एषैव सवितुरनुवाक्या । सूत्रितञ्च—'आ विश्वदेवं सत्पतिं य इमा विश्वा जातानि' (ĀŚS.4.3.) इति । देवसुवां हविःषु एषैव सवितुरनुवाक्या । सूत्रितञ्च—'आ विश्वदेवं सत्पतिं न प्रमिये सवितुर्वैव्यस्य तत्' (ĀŚS.4.11.) इति Sy.

३. The stanza is not explained by VM. Sy. explains this stanza in the following manner:—
विश्वदेवम् । विश्वे देवा यस्य वशे भवन्ति तं तादृशम् । स हि सर्वात्मा, 'इन्द्रं मित्रं वरुणमग्निमाहुः' (RV.1.164.46.) इत्यादि श्रुतेरितरेषां तद्विभूतित्वात् । सत्पतिं सतामनुष्ठातॄणां पालकम् । सत्यसवं सत्यानुज्ञं सवितारं देवम् । अद्यास्मिन् यागदिने सूक्तैरावृणीमहे सम्भजामहे ॥
विश्वदेवं विश्वेऽपि देवा दीव्यन्तेऽस्मिन्निति विश्वदेवः सविता । सत्पतिं सतां विदुषां पातारम् । . . . . सूक्तैस्सम्यगुक्तैः स्तोत्रैरद्यास्मिन्यज्ञे वृणीमहे सत्यसवं सत्यानुज्ञं सवितारं देवम् BB.
This stanza=TS.3.4.11.2.

४. रात्र्यहनी Sy.

५. तयोः पुरस्तात् Sy.

६. गच्छति । तमावृणीमह इति सम्बन्धः Sy.

७. पुर हित्यप्र० P., D.

८. शोभनाध्यानः सुकर्मा वा सन् Sy.

९. P. reads भजनीयस्य सवितुः प्रसवे विश्वानि धनानि निधीमह्युत्तरा निगदसिद्धा य इमे य इमे उभे सुकर्मा नाय प्रसौति पृथिव्यै देवस्य सवितुः प्रसवे विश्वानि धनानि निगदसिद्धा देवस्सविता । (RV.V.82.1–8.)

१०. प्रायणीये 'य इमा विश्वा' इति सवितुर्याज्या । सूत्रितं च—'य इमा विश्वा जातानि सुत्रामाणं पृथिवीं द्यामनेहसम्' (ĀŚS.4.3.) इति । अश्वमेधेऽश्वमुत्सृज्यानुसवनं सावित्रीष्टिः कार्या । तस्यामेषा माध्यन्दिने सवनेऽनुवाक्या । सूत्रितञ्च—'य इमा विश्वा जातान्या देवो यातु सविता सुरत्नः' (ĀŚS.10.6.) इति Sy.

११. देवः Sy. १२. सर्वाणि Sy.

१३. उत्पन्नान् प्राणिनः । जङ्गमानित्यर्थः । तान् Sy.

१४. ०का P. श्लोकेन is suggested for शौनकः ।

१५. सर्वेऽप्यस्य स्तुतिं शृण्वन्तीत्यर्थः । अथवा गर्जनशब्देन सर्वाणीमान्युत्पन्नान्याश्रावयति वृष्ट्युन्मुखः सन् Sy.

१६. प्रेरयति तं वृणीमहे इति Sy.

तमावृणीमह इति ।

V.83.

अच्छा वद तवसं गीर्भिराभिः स्तुहि पर्जन्यं नमसा विवास ।
कनिक्रदद्वृषभो जीरदानू रेतो दधात्योषधीषु गर्भम् ॥ १ ॥

अच्छ ॥ अत्रिः ॥ अभिवद । वृद्धम् । गीर्भिः । आभिः । स्तुहि । पर्जन्यम् । नमसा च । परिचर । शब्दं कुर्वन् । वर्षिता । क्षिप्रदानः । उदकम् । दधाति । ओषधीषु । गर्भं च गर्भहेतुं वोदकम् ।

वि वृक्षान् हन्त्युत हन्ति रक्षसो विश्वं बिभाय भुवनं महावधात् ।
उतानागा ईषते वृष्ण्यावतो यत्पर्जन्यः स्तनयन् हन्ति दुष्कृतः ॥ २ ॥

वि वृक्षान् । 'विहन्ति । वृक्षान् । विहन्ति । च । रक्षासि । सर्वाणि चास्मात् । भूतानि । बिभ्यति ।

---

१. VM. ignores अा and श्लोकेन ॥ श्लोकेन यशसा Sy.
Ms. D. puts the figure ॥८२॥ here to indicate the end of the eighty-second hymn. No such number is given in P.

२. 'अच्छा वद' इति दशर्चमेकादशं सूक्तं भौमस्यात्रेरार्षम् । अत्रेयमनुक्रमणिका 'अच्छ दशात्रिः पार्जन्यमुपाद्यास्तिस्रो जगत्य उपान्त्यानुष्टुप्' (KSA. 28.83.p.21.) इति । 'यत्पर्जन्य' इत्येषा नवम्यनुष्टुप् । 'वि वृक्षान्' इत्याद्यास्तिस्रो जगत्यः, शिष्टाः षट् त्रिष्टुभः । पर्जन्यो देवता । अनेन सूक्तेन प्रत्यृचं वा दिशः उपस्थेयाः । सूत्रितञ्च—'संस्थितायां सर्वा दिश उपतिष्ठेताच्छा वद तवसं गीर्भिराभिरिति चतसृभिः प्रत्यृचं सूक्तेन वा' (ĀŚS. 2.13.) इति Sy.

३. ०च्छः P.

४. अभिप्राप्य प्रार्थय Sy.

५. वृद्धं P. हे स्तोतः ! बलवन्तम् Sy.

६. स्तुतिवाग्भिः Sy.

७. पर्जन्यस्तृपेः आद्यन्तविपरीतस्य । तर्पयिता जन्यः । परो जेता वा । जनयिता वा । प्रार्जयिता वा रसानाम् N. 10.10.

८. अग्नेन हविर्लक्षणेन Sy.

९. गर्जनशब्दं कुर्वन् Sy.

१०. वर्षिदा D. यः पर्जन्यः वृषभः अपां वर्षिता Sy.

११. स्थापयति तं स्तुहि Sy.

१२. गर्भस्थानीयम् Sy.

१३. VM. ignores अा ॥ अा सर्वतः Sy.

१४. अत्रेरार्षम् Dur. For the commentary on this stanza Sy. quotes N. 10.12.

१५. वह० P., D. विहन्ति. . अशनिपातैः Dur. विविधं हन्ति SKN.

१६. वह० D. विविधं हन्ति क्रूरकर्मणः Dur.

१७. अपि च SKN.

१८. ०स्मान् P. सर्वस्मात् SKN.

१९. त्रिभुवनं भूतजातं न केवलं हन्यमानानि रक्षांसि SKN.

महावधात्[1], महान् ह्यस्य वधः। अपि[2]। अनपराध[3]। भीत. पलायते[4]। वर्षकर्मवतः[5]। यत्[6]। पर्जन्यः[7]। स्तनयन्[8]। हन्ति[9]। दुष्कृत· पापकृत[10] इति यास्क[11]।

रथीव कशयाश्वाँ अभिक्षिपन्नाविर्दूतान्कृणुते वृष्याँ३ अह।
दूरात्सिहस्य स्तनथा उदीरते यत्पर्जन्यः कृणुते वर्ष्यं नभः ॥ ३ ॥

रथीव। सारथिरिव[12]। कशया। अश्वान्[13]। अधिक्षिपन्[14]। आविष्कृणुते[15]। वर्षणनिमित्तान्[16]। मरुत्प्रभृतीन्[17]। अहेत्याश्चर्ये[18]। दूरादेव। सिहसदृशस्य[19] मेघस्य। शब्दा[20]। उद्गच्छन्ति[21]। यदा[22]। पर्जन्यः। करोति[23]। वर्षणहेतुम्[24]। आशम्[25]।

प्र वाता वान्ति पतयन्ति विद्युत उदोषधीर्जिहते पिन्वते स्वः।
इरा विश्वस्मै भुवनाय जायते यत्पर्जन्यः पृथिवीं रेतसावति ॥ ४ ॥

प्र वाताः[26]। प्रवान्ति[27]। वाता[28]। विद्युतश्च। पतन्ति[29]। ओषध्यश्च[30]। उद्गच्छन्ति[31]। सर्वं च[32]।

---

१. पर्जन्यात् Dur. महान् दृढो वधः प्रहारो यस्य तस्माद् दृढप्रहारादित्यर्थः SKN.
२. उतशब्दोऽपि चेत्यस्यार्थे SKN.
३. एवं नाम महावधादस्मात् सर्वाणि भूतानि बिभ्यति येनानागा अपि अनपराधोऽपि सन् सर्व एव Dur. अनपराधोऽपि चास्मात् SKN. ४. ०त D.
५. पलायते माममं स्तनयन् हन्तीति मन्यमानः Dur. ईषति हन्तीति गतिकर्माणौ (Ngh. 2.14.) इह भीतिपूर्विकायां गतौ पलायने वर्तते। भीतः सन् पलायते गच्छतीति SKN.
६. स्तनयित्नुशब्दैरशनिं मुञ्चतः Dur. वृष्ण्यं वर्षकर्म बलं वा तेन तद्वतः SKN.
७. कदैतत् सर्वं भवति ? उच्यते यत् यदा Dur., SKN. ८. योऽयमेवमतिमहानुभावो भगवान् पर्जन्यः स वर्षत्वस्माकमिति Dur.
९. गर्जितलक्षणं शब्दं कुर्वन् SKN.
१०. वर्षेण, ओषधीरभिनिष्पादयन् स्तनयन् हन्ति, उपशमयति सुभिक्षं कुर्वंस्तदा Dur. अशनिपातैर्हन्ति SKN. ११. तस्करादीननाकालप्रभवान् Dur. पापकारिणः SKN.
१२. N. 10.11., SKN. IV. 14.
१३. रथस्वामीव। स यथा कशयाश्वानभिक्षिपन् दूतान् भटानाविष्करोति तद्वदसौ पर्जन्योऽपि Sy. १४. मेघान् Sy.
१५. अभिप्रेरयन् Sy.
१६. अवि० D. प्रकटयति Sy.
१७. वर्षकान् Sy.
१८. दूतवत् वृष्टिप्रेरकान् मेघान् मरुतो वा Sy.
१९. अह्वोत्या० P., D. अह इति पूरणः Sy.
२०. सहतेर्हिंसतेर्वा शब्दकर्मणः सिंहशब्दः। अवर्षणेनाभिभवितुः शब्दयितुर्वा मेघस्य Sy.
२१. गर्जनशब्दाः Sy.
२२. कदा ? यत् यदा Sy.
२३. करोति तदा Sy. २४. वर्षोपेतम् Sy.
२५. आकाशम् is suggested for आशम् ॥ अन्तरिक्षम् Sy.
२६. पाता P.
२७. प्रावन्ति P.
२८. पाता P. Sy adds वृष्ट्यर्थम्।
२९. तन्ति P. गच्छन्ति समन्तात् सञ्चरन्ति Sy.
३०. ओषधयः Sy.
३१. प्रवर्धन्ते Sy.
३२. अन्तरिक्षम् Sy.

स्वरसं रक्षन्ति[1]। अन्नं[2] च। विश्वस्मै[3]। भुवनाय[4]। जायते। यदा। पर्जन्य[5]। पृथिवीम्। उदकेन। रक्षति[6]।

यस्य व्रते पृथिवी नन्नमीति यस्य व्रते शफवज्जर्भुरीति।
यस्य व्रत ओषधीर्विश्वरूपाः स नः पर्जन्य महि शर्म यच्छ ॥ ५ ॥

यस्य व्रते। यस्य[8]। कर्मणि। पृथिवी। अत्यन्तमार्द्रीभूता[9] नमति। यस्य। कर्मणि। शफवत्[10] पश्वादि[11]। पुष्ट[12] भवति। यस्य[13]। व्रते[14]। ओषध्य[15]। विश्वरूपा[16] जायन्ते[17]। स त्वम्[18]। न[19]। पर्जन्य! महत्। सुखम्। प्रयच्छ।

दिवो नो वृष्टिं मरुतो ररीध्वं प्र पिन्वत वृष्णो अश्वस्य धाराः।
अर्वाङेतेन स्तनयित्नुनेह्यपो निषिञ्चन्नसुरः पिता नः ॥ ६ ॥

दिवः[20]। दिव.[21]। न.। वृष्टिम्[22]। मरुत[23]! प्रयच्छत। प्रप्यायत[24]। वर्षितुः[25]। अश्वस्य[26] पर्जन्यस्य[27]। धारा[28]। अर्वाड्[29]। एतेन[30]। स्तनयित्नुना[31]। एहि[32]। अप[33]। निषिञ्चन्[34]। प्राज्ञ[35]। पालयिता। अस्माकम्[36]।

---

१. क्षरति is suggested for रक्षन्ति॥ cf. 'पिवि सेचने' DP.
२. भूमिः Sy.
३. सर्वस्मै Sy.
४. सर्वजगद्धिताय Sy.
५. समर्था भवति। कदैवमिति ? Sy.
६. देवः Sy.
७. रक्षति अभिगच्छति वा तदैवं भवति Sy.
८. पर्जन्यस्य Sy.
९. अत्यर्थं नमति, सर्वेषामधो भवति Sy.
१०. पादोपेतं गवादिकम् Sy.
११. पश्चात् P.
१२. भ्रियते पूर्यते गच्छतीति वा Sy.
१३. ०स्यं P.
१४. कर्मणि Sy.
१५. व्रतदष० D.
१६. नानारूपाः Sy.
१७. भवन्ति Sy.
१८. महांस्त्वम् Sy.
१९. त्वंन्नः D. अस्मभ्यम् Sy.
२०. अन्तरिक्षसकाशात् Sy.
२१. अस्मदर्थम् Sy., BB.
२२. वृष्टीः P.
२३. हे मरुतः! यूयम् Sy., BB.
२४. प्राय० P., D. दत्त Sy. स्रावयत। 'रीङ् स्रवणे' व्यत्ययेन शपश्श्लुः। वर्णव्यत्ययेनाभ्यासस्येत्वम् BB.
२५. प्राप्या० P., D. प्रक्षरत Sy. प्रकर्षेणासिञ्चत। 'पिवि मिवि सेचने' BB.
२६. वर्षकस्य Sy. इन्द्रस्य BB.
२७. व्यापकस्य मेघस्य सम्बन्धिन्यः Sy. व्याप्तिमतः BB.
२८. उदकधाराः Sy. वर्षधाराः BB.
२९. अस्मदभिमुखम् Sy., BB.
३०. हे पर्जन्य! त्वम् मेघेन सह Sy. हे वृषन्निन्द्र! त्वमपि मेघेन BB.
३१. गर्जता मेघेन सह Sy. शब्दयता सह BB.
३२. आगच्छ Sy., BB. ३३. अम्भांसि Sy.
३४. निषिञ्चन् स देवः Sy. निषिञ्चन् वर्षन् BB.
३५. उदकानां निरसितापि सन् Sy. असनकुशलः। असेरुरन्। असुमान् वा। असुप्रदो वा BB.
३६. पालकश्च Sy. पाता BB.
३७. प्रजानाम् BB.
This stanza=TS.3.1.11.2

अभि क्रन्द स्तनय गर्भमा धा उदन्वता परि दीया रथेन ।
दृतिं सु कर्ष विषितं न्यञ्चं समा भवन्तूद्वतो निपादाः ॥ ७ ॥

अभिक्रन्व[1] । अभिक्रन्द[2] । स्तनितशब्द च कुरु[3] । ओषधीनां गर्भम्[4] । आधेहि । परितो गच्छ[5] उदकवता । रथेन[6] । दृतिसदृशं मेघम्[7] । सुष्ठु[8] । कर्ष[9] । विषितास्यम्[10] । नीचीनमुखम्[11] । समा[12] । भवन्तु[13] । उदकेनोच्छ्रिताः[14] । निम्नाश्च[15] देशा. ।

महान्तं कोशमुदचा नि षिञ्च स्यन्दन्तां कुल्या विषिताः पुरस्तात् ।
तेन द्यावापृथिवी व्युन्धि सुप्रपाणं भवत्वघ्न्याभ्यः ॥ ८ ॥

महान्तम्[16] । महान्तम्[17] । मेघम्[18] । उत्सिञ्च[19] । उत्सिक्तमुदक च पृथिव्या[20] निषिञ्च[21] । स्यन्दन्ताम्[22] । कुल्या[23] । विमुक्ताः[24] । पुरस्तात्[25] । उदकेन । द्यावापृथिवी[26] । विविध[27] वलेदय । सुप्रपाणम्[28] । भवतु । गोभ्यः ।

---

१. Omitted by P.
२. भूम्यभिमुखं शब्दय Sy. अभितः सर्वतः शब्दं कुरु BB.
३. तदेव पुनरुच्यते दाढर्याय, गर्ज Sy. उच्चैर्गर्ज BB.
४. गर्भस्थानीयमुदकम् ओषधीषु Sy. ततश्च गर्भं मेघस्योदकम् BB.
५. परिदीय सर्वतो गच्छ। दयतिश्छान्दसो गतिकर्मा BB.
६. रंहणेन BB.
७. दृतिवदुदकधारकं मेघम् Sy. चर्ममयो जलाधारविशेषो दृतिस्तद्वत् BB.
८. ततस्तं मेघम् BB.
९. सुखेन BB.
१०. कर्षत P. आकर्ष वृष्टयर्थम्। यद्वा विषितं विमुक्तबन्धनमेवं कर्ष Sy. निपादा निम्ना उदकेन सर्वं समीकृतमस्तु एवमश्वात्मनाऽग्निः स्तूयते BB.
११. विषता० P. वर्षितास्य D. विशेषेण सितं बद्धम् Sy. विमुक्तद्वारम् BB.
१२. सीची० D. न्यगधोमुखम् Sy. अवाङ्मुखीकृतम् BB.
१३. एकस्थाः उदकपूर्णा भवन्त्वित्यर्थः Sy. ततश्चैवं त्वया कृते समा भवन्तु । तुल्या भवन्तु BB.
१४. एवं कृते, ऊर्ध्वबन्त उन्नतप्रदेशाः Sy. उन्नतेन स्थलेन BB.
१५. न्यग्भूतपादा निकृष्टपादा वा निम्नोन्नतप्रदेशाः Sy.
This stanza=TS.३.१.११.६.
१६. हे पर्जन्य ! त्वम् Sy.
१७. प्रवृद्धम् Sy.
१८. कोशस्थानीयं मेघम् Sy.
१९. उद्गच्छ । उद्गमय वा Sy.
२०. ०थिव्या P.
२१. तथा कृत्वा नीचैः क्षारय Sy.
२२. प्रवहन्तु Sy.
२३. नद्यः Sy.
२४. ०क्ता D. विष्यूताः सत्यः Sy.
२५. पूर्वाभिमुखम् । प्रायेण नद्यः प्राच्यः स्यन्दन्ते Sy.
२६. दिवं च पथिवीं च Sy.
२७. अत्यधिकम् Sy.
२८. सुप्राणं D. सुष्ठु प्रकर्षेण पातव्यमुदकम् Sy.

यत्पर्जन्य कनिक्रदत्स्तनयन् हंसि दुष्कृतः ।
प्रतीदं विश्वं मोदते यत्किं च पृथिव्यामधि ॥ ९ ॥

यत् पर्जन्यः[1] । यदा[2] । पर्जन्य[3] । शब्द कुर्वन्[4] । स्तनयश्च[5] । हंसि[6] । रक्षांसि[7] । प्रमोदते[8] तदा । एनम्[9] । विश्वम्[10] । यत् । किम् । चित्[11] । पृथिव्याम्[12] । अधिवसति ।

अवर्षीर्वर्षमुदु षू गृभायाकर्धन्वान्यत्येतवा उ ।
अजीजन ओषधीर्भोजनाय कमुत प्रजाभ्योऽविदो मनीषाम् ॥ १० ॥

अवर्षीः[13] । अवर्षीः[14] । वर्षम्[15] । सुष्ठु । च । उद्गृहीतवानसि[16] । तथा[17] निरुदकानपि देशान्[18] । करोति[19] । गन्तुम्[20] । तथौषधीश्च । भोजनाय[21] । अजीजनः[22] । उत[23] । प्रजाभ्यः[24] । प्रज्ञाम्[25] । अलम्भयः[26][27] ।

---

१. VM. seems to take पर्जन्य as पर्जन्यः।
२. यदा त्वम् Sy.
३. ०न्य P., D.
हे पर्जन्य ! Sy.
४. अत्यर्थं शब्दयन् Sy.
५. स्तनयित्वंश्च P.
६. विदारयसि Sy.
७. पापकृतो मेघान् Sy.
८. तदानीं प्रति मोदते Sy.
९. तदेनं D. एनत् is suggested for एनम् ॥
इदम् Sy.
१०. जगत् Sy.
११. च P.
१२. भूम्यामधिष्ठितं यच्चराचरात्मकं तदिदं विश्वं मोदते हृष्यति । वृष्टेः सर्वजगत्प्रीतिकारणत्वं प्रसिद्धम् Sy.
१३. Omitted by D.
१४. इयमतिवृष्टिविमोचनी । हे पर्जन्य ! त्वम् Sy.
१५. ०र्षी D.
वृष्टवानसि Sy.
१६. उत्कृष्टं गृहाण । परिहरेत्यर्थः Sy.
१७. यथा P.
१८. निरुदकप्रदेशान् Sy.
१९. अन्तरोपि P. करोषि is suggested for करोति ॥ जलवतः कृतवानसि Sy.
२०. अतिक्रम्य गन्तुम् Sy.
२१. धनाय भोगाय वा Sy.
२२. उदपादयः Sy.
२३. अपि च Sy.
२४. प्रजाभ्यः सकाशात् Sy.
२५. स्तुतिम् Sy.
२६. ०य P.
प्राप्तवानसि Sy.
२७. VM. ignores कम् ॥ कम् इत्ययं 'शिशिरं जीवनाय कम्' इतिवत्पादपूरणः (N. 1.10.) Sy.

*Ms. D. puts the figure ॥८३॥ here to indicate the end of the eighty-third hymn. No such number is given in P.

V.84.

बळित्था पर्वतानां खिद्रं बिभर्षि पृथिवि ।
प्र या भूमिं प्रवत्वति मह्ना जिनोषि महिनि ॥ १ ॥

[1]बळित्था । [2]सत्य त्वम् । [3]मेघानाम् । [4]छेदनम् । [5]अमुत्र । [6]धारयसि । [7]पृथिवी ! [8]प्रजिन्वसि । [9]या । [10]भूमिम् । [11]प्रवणवति । [12]महत्त्वेन । [13]उदकवति ! [14]इति पृथिव्या अधिदेवता मध्यस्थानपठिता पृथिवीमाह । [15]

---

१. 'बलित्था' इति तृचात्मकं द्वादशं सूक्तं भौमस्यात्रेरार्षं पृथिवीदेवताकमानुष्टुभम् । अनुक्रान्तञ्च 'बळित्था तृचं पार्थिवमानुष्टुभम्' (KSA.28. 84.p.21.) इति । सूक्तविनियोगो लैङ्गिकः । आद्या देवीनां हविःषु पृथिव्या अनुवाक्या । 'बळित्था पर्वतानां दृळ्हा चिद्या वनस्पतीन्' (ĀŚS.6.14.)इति हि सूत्रितम् । भूमिस्तोमे चैषा मरुत्वतीयशस्त्रे सूक्तमुखीया' (ĀŚS.9. 5.) इति Sy. आत्रेरार्षम् Dur., SKN.

२. द्विरूपा पृथिवी चैषा प्रत्यक्षा देवतापि च । मध्यस्थाना देवतोक्ता सा च सम्बोध्य वर्ण्यते Sy.

३. यथाभूतम् Dur. सत्यम् SKN. बळिति सत्यनाम Ngh. 3.10. ४. पर्वतानाम् P. पर्वतानां मेघानां वा । येन पर्वता मेघाः Dur. मेघानाम् SKN. मेघनामैतत् Ngh.1.10.

५. च्छे० D. खेदनं भेदनम् Sy. बिलं हिरण्यादिपूर्णम् BB. छेत्तुं शक्यन्ते तद्बलम् Dur. खेदनकरम् । किम् ? सामर्थ्याद् बलम् SKN.

६. ०त्रं P. इत्थम् अमुत्र अन्तरिक्षे वा Sy. इत्थमिदं यद्वक्ष्यामः BB. अमुत्रेत्यर्थः, अमुष्मिन्नन्तरिक्षलोके वर्तमानाः Dur. इत्थाशब्दोऽमुत्रेत्यस्मिन्नर्थे । अमुत्रान्तरिक्षे वर्तमानानाम् SKN. ७. या त्वं द्रविणवती धारय विस्तीर्णा खलु त्वम् BB.

८. VM. seems to take पृथिवि as पृथिवी ॥ हे प्रथनवति ! मध्यस्थानदेवते ! Sy. विस्तीर्णे BB. हे पृथिवि ! माध्यमिके ! Dur. विद्युत्स्तनयित्नुलक्षणया वाचोऽधिदेवते SKN.

९. ०ज० P. प्रकर्षेण प्रीणयसि Sy. प्रकर्षेण प्रजास्तर्पयसि, यस्मात् प्रवणवती, अत एव पूजिता 'जिवि प्रीणने' BB. प्रजिन्वसि वर्षमुत्सृजन्ती Dur. प्रजिनोषीति सम्बन्धः । . . जिन्वतेः प्रीतिकर्मण इदं रूपम् । प्रजिन्वसि प्रकर्षेण प्रीणयसीत्यर्थः SKN.

१०. या त्वम् BB., Dur., SKN.

११. प्रत्यक्षां पृथिवीम् Sy. हे भूमे ! BB.

१२. ०णपति P. हे प्रकर्षवति ! प्रवणोदकवति ! वा Sy. प्रवत् प्रगतम् । प्रवणम् । हे तद्वति ! BB. गमनवति Dur. प्रवणार्थस्य प्रवत इति । प्रवद्गात्रोदकम् । प्रवणमागमनम् । तेन तद्वति हे उदकवति ! गमनवति ! वेत्यर्थःSKN. १३. ०त्त्वे० is suggested for ०त्वे० ॥ महत्त्वेन महतोदकेन वा Sy. या त्वं मह्ना माहात्म्येन BB. महतोदकेन SKN.

१४. अन्नवति P. महति ! Sy. महेरौणादिको निप्रत्ययः BB. महति ! अथवा, उदकवति ! या त्वमेवं भूमिं प्रजिन्वसि सा कथं न मेघानां पर्वतानां छेदनसमर्थं बलं धारयिष्यसि ? अवश्यं धारयसीत्यभिप्रायः Dur. महो महत्त्वमुदकं वा प्रभूतं तेन तद्वति । तदाह भाष्यकारः—'महतीत्युदकवती वेति' SKN.

१५. केचिदाहुः । सत्यमित्थं पर्वतानां मेखलानां खिन्द्रं छेदनप्रवहमुदकं बिभर्षि । पृथुत्वात्प्रभूतं वर्षोदकं बिभर्षि । या त्वं प्रवणवती प्रवणगामिनी, उदकेन मह्ना महता विश्वमिदं प्रकर्षेण जिनोषि तर्पयसि, अत एव महनीयासि । अनेनैव क्रमेण सर्वहिरण्यादिलाभहेतुत्वात् BB. सत्यं त्वं पर्वतानां मेघानां खेदनं छेदनं (भेदनं) बलममुत्र धारयसि पृथिवि ! प्रजिन्वसि या भूमिम् । प्रवणवति । महत्त्वेन । महतीत्युदकवतीति वा N. 11.37.; SKN. IV.84. This stanza=TS.2.2.12.2.

स्तोमासस्त्वा विचारिणि प्रति ष्टोभन्त्यक्तुभिः ।
प्र या वाजं न हेषन्तं पेरुमस्यंस्यर्जुनि ॥ २ ॥

स्तोमासः[1] । स्तोमाम[2] । त्वा[3] । विचरणस्वभावे[4] ! प्रत्यर्चन्ति[5] । हविर्भि[6] सह । प्रक्षिपसि[7] । या[8] । अश्वम्[9] । इव । शब्द[10] कुर्वन्तम् । पूरक मेघम् । शुक्लवर्ण[11] !

दृळ्हा चिद्या वनस्पतीन्त्स्मया दर्धर्ष्योजसा ।
यत्ते अभ्रस्य विद्युतो दिवो वर्षन्ति वृष्टयः ॥ ३ ॥

वृढा[12] चित्[13] । दृढान्[14] । अपि । वनस्पतीन्[15] । अनया पृथिव्या[16] । यान्[17] । त्वं धारयसि[18] । बलेन[19] । यदा[20] । तव[21] । अभ्रस्य[22] । विद्योतमानस्य[23] । द्युलोकस्य[24] । वर्षन्ति[25] । उदकानि पर्जन्य पतन्ति[26] वोदकानि[27] तदा धारयसि[28] ।

---

१. स्तोतारः Sy. स्तोमास्तोत्राणि BB.
२. त्वाम् Sy.
३. पिचर० P. हे विविधं चरणशीले ! पृथिवि ! देवि ! Sy. विविधं चरणं गमनं भक्षणं वा विचारः । हे तद्वति ! BB.
४. प्रत्यर्धन्ति D. अभिष्टुवन्ति Sy. प्रत्येकं प्रतिमुखा वा स्तुवन्ति BB.
५. गमनशीलैः स्तोत्रैः Sy. त्वदीयैः कर्मभिरपवादनैः स्तुतिभिः स्तोत्रभक्तिभिः BB.
६. प्रतिक्षि० D.
७. त्वम् Sy. या त्वं तथा स्तूयमाना BB.
८. उद्वृत्तम् Sy. यथा दुष्टो वाजी निरर्थकाऽच्छब्दान्करोति, एवं निरर्थकशब्दाभिधायिनममन्त्रार्थज्ञमिति । किञ्च वाजमिव बलमिव पेरुमश्वमिव पानशीलमुपलक्षणत्वात् पानाशनमात्रकृतार्थमयज्ञार्हं पुरुषं प्राप्स्यसि त्वं खल्वर्जुनीति । सर्वे स्तोत्रादयस्त्वामेव स्तुवन्ति । तेषां च मध्ये वाजिनमिव हेषन्तमिव पेरुं त्वं नाद्रियसे तस्मात्तादृशानस्मांस्त्वामेव स्तुवतो हिरण्यादिदानेन तृप्तान् कुर्विति BB.
९. शब्दयन्तम् Sy. शब्दवन्तम् BB.
१०. दुष्टम् BB.
११. हे शुभ्रवर्णे ! गमनशीले ! वा Sy. हे अर्जुनि ! निर्मले ! BB.
This stanza=TS.2.2.12.3.
१२. देवानां हविःषु 'वृळ्हा चित्' इति पृथिव्या याज्या । एषैव भूमिस्तोमे निष्केवल्ये सूक्तमुखीया । सूत्रं तु पूर्वमेवोदाहृतम् Sy.
१३. हे पृथिवि ! Sy.
१४. वृळ्हा । 'सुपां सुलुक्०' इति तृतीयाया आकारः । वृढया Sy.
१५. वृक्षान् Sy. १६. भूम्या सह Sy.
१७. या Sy.
१८. धारयसि । अथवा वृढेति विधेयविशेषणम् । वनस्पतीन् वृढान् कृत्वा धारयसीत्यैर्थः Sy.
१९. बालो P. २०. यस्याः Sy.
२१. तव सम्बन्धिनः Sy.
२२. पञ्चम्यर्थे षष्ठी । अभ्रावपां हर्तुः Sy.
२३. विद्योतमानात् Sy.
२४. अन्तरिक्षादादित्याद्वा Sy.
२५. वर्ष० D. वर्षति is suggested for वर्षन्ति ।
२६. वर्षन्त्वयि तानि P. वर्षका मेघाः Sy.
२७. चोद० P. अथवा । यत् यस्यास्ते तवाभ्रस्य मेघस्य वृष्टय उदकसङ्घाता विद्युतो विद्योतमानाया दिवः सकाशाद् वर्षन्ति पतन्ति Sy.
२८. Ms. D. puts the figure ॥८४॥ here to indicate the end of the eighty-fourth hymn. No such number is given in P.

V.85.

प्र स॒म्राजे॑ बृह॒दर्चा॑ गभी॒रं ब्रह्म॑ प्रि॒यं वरु॑णाय श्रु॒ताय॑ ।
वि यो ज॒घान॑ शमि॒तेव॒ चर्मोप॒स्तिरे॑ पृथि॒वीं सूर्या॑य ॥ १ ॥

प्र सम्राजे[1]। प्रोच्चारय[2]। सर्वेषां राज्ञे[3]। बृहत्[4]। गम्भीरम्[5]। प्रियम्[6]। ब्रह्म[7]। वरुणाय[8]। श्रुताय[9]। विहन्ति[10]। यः[11]। शमितेव[12]। मध्यमस्थानपठिता पृथिवीम्[13]। सूर्याय पर्जन्याय[14]। उपस्तरणार्थमविभिः[15] पृथिवी छादयितुम्[16], अपि वा मेघश्चर्म त विहन्ति पृथिवी तेजसा छादयितुमिति[17]।

वने॑षु व्य॒न्तरि॑क्षं तता॒न वाज॒मर्वत्सु॒ पय॑ उ॒स्रिया॑सु ।
हृ॒त्सु क्रतुं॑ वरु॒णो अ॒प्स्व॑ग्निं दि॒वि सूर्य॑मदधा॒त्सोम॒मद्रौ॑ ॥ २ ॥

वनेषु[18]। वनेषु हीदमेषु वृक्षाग्रेषु[19]। अन्तरिक्षम्[20]। विततम्[21]। तस्मादाह—'वने॒षु व्यन्त॒रिक्ष ततान'[22]। इत्यादि

---

१. 'प्र सम्राजे' इत्यष्टर्चं त्रयोदशं सूक्तमात्रेयं त्रैष्टुभं वारुणम्। अनुक्रम्यते च 'प्र सम्राजेऽष्टौ वारुणम्' (KSA. 28.85. p. 21.) इति। विनियोगो लैङ्गिकः Sy.
२. अत्रिः स्वात्मानं सम्बोध्य ब्रवीति। हे अत्रे ! त्वम् Sy.
३. प्रार्चय। प्रोच्चारयेत्यर्थः Sy.
४. सम्यग्राजमानायेश्वराय Sy.
५. प्रभूतम् Sy.
६. वुरवगाहं बह्वर्थोपेतम् Sy.
७. प्रियभूतम् Sy.
८. स्तोत्ररूपं कर्म Sy.
९. उपद्रवस्य निवारकाय जनानामावरकाय चेतनामकाय देवाय Sy.
१०. श्रुता P.
सर्वत्र श्रूयमाणाय Sy.
११. विस्तारयामास। विस्तृतं हि व्यवहारयोग्यं भवति, तस्मात् व्यवहारायान्तरिक्षं विस्तारितवान्। 'उरुं हि राजा वरुणश्चकार' (RV. I. 24.8.) इति ह्युक्तम् Sy.
१२. वरुणः Sy.
१३. शिवतेव P. शमिता पशुविशसनकर्ता यथोपस्तरणाय चर्म हन्ति तद्वत् Sy.
१४. विस्तीर्णमन्तरिक्षम्। 'तृतीयस्यां पृथिव्याम्' ('TS. 1.2.12.1.) इति श्रुतेरन्तरिक्षस्यापि पृथिवीशब्दवाच्यत्वम् Sy.
१५. सूर्यस्य Sy.
१६. ०मविभि P., D.
१७. छापितुम् P. छादितुम् D.
आस्तरणाय Sy.
१८. वह० P., D.
१९. ०वी P.
२०. वृक्षाग्रेषु Sy. वनगतवृक्षाग्रेषु Mah. वृक्षेषु वृक्षखण्डेषु वा BB.
२१. अन्तरिक्षमाकाशम् Mah., U. भूताकाशम् BB.
२२. बन्धनहेतुना वस्त्रेण परितो वेष्टयित्वेत्यर्थः। वि उपसर्गस्ततानेत्यनेन सम्बध्यते। . . . यद्यपि सर्वगतमन्तरिक्षं तथापि तत्र मूर्तद्रव्याभावादत्यन्तं विस्तारितवान् Mah. वीत्ययमुपसर्गस्ततानेत्यनेन सम्बध्यते। वितनोति। यद्यपि सर्वगतमन्तरिक्षं तथापि तत्र मूर्तद्रव्याभावादुपलभ्यत एव U. विस्तारितवान् BB.
२३. ०दाह पतेषु ह्यन्तरिक्षं तद्वान P. Cf. ŚB. 3.3.4.7 p. 253. विस्तारितवान् Sy.

वाजसनेयकम्। वलम्[1]। अश्वेषु[2]। पयः। गोषु[3]। प्रज्ञानम्[4]। वरुणः। अप्सु[5]। अग्निम्[6]। दिवि[7] च। अर्यमणम्[8]। अदधात्[9]। सोमं च। अद्रौ[10]। तत्र ब्राह्मणम्—'अद्रिषु[11] हीदमेषु गिरिषु सोमो हित' इति[12]।

---

१. वाजं बलं वितताने॰त्यनुवर्तते। यद्वाऽर्वत्सु पुरुषेषु वाजं वीर्यं वितताने। 'व॒र्यं वै वा॒जः पुमासोऽर्वन्तः' (SB. 3.3.4.7.p.253) इति श्रुतेः Mah. वाजं वीर्यम् U.
वाजं वेगम् BB.

२. अश्वेषु वितताने Sy. BB.
पुरुषेषु तताने॰त्यनुवर्तते U

३. क्षीरम् Sy., Mah.,U., BB.

४. उस्रियेति गोनाम (Ngh 2.11.)। उत्स्राविणोऽस्यां भोगा इति तद्व्युत्पत्तिः Sy. उस्रियाशब्दो गोनामसु पठितः Mah. अहन्तव्या अघ्न्यायाः BB.

५. कर्मसङ्कल्पम्। यद्धि मनसा ध्यायति तत्कर्मणा करोति Sy. क्रतुं सङ्कल्पं तच्छक्तियुक्तं मनः Mah. क्रतुः सङ्कल्पः, हृदयेषु सङ्कल्पम् U. विज्ञानम् BB.

६. अयं वरुणः Sy. य एवं मन्त्रद्वयोक्तद्युलोकस्तम्भनादिसामर्थ्यवान् परब्रह्मलक्षणो वरुणस्तं वयं स्तुम इति शेषः Mah. य एवं परब्रह्मलक्षणो वरुणस्तं वयं स्तुम इति शेषः U. वरुणशब्दवाच्यः सोमः BB.

७. वरुणेषु P. वरुणेप्सु D. उदकेषु Sy. प्रजासु Mah.,U. मर्त्येषु BB.

८. वैद्युतमीवं वा सर्वत्र वितताने॰ति सम्बन्धः Sy. जठराग्निम् Mah.

९. द्युलोके Sy., Mah.,U.

१०. P. reads चर्यम् for च। अर्यमणम्॥ चार्यमम् D. सूर्यम् Sy.

११. स्थापितवान् Sy. स्थापितवान्। पर्वतपाषाणसन्धिषु सोमवल्ल्योत्पद्यमानत्वादद्रौ सोमस्थापनमुक्तम्। तदाह तित्तिरिः—'सोममद्रावित्याह ग्रावाणो वाऽद्रयस्तेषु वा एष सोमं निदधाति' इति Mah. स्थापितवान् U., BB.

१२. सोम वल्लीरूपम् Mah. लतारूपमात्मानम् BB.

१३. अत्रौ P. पर्वते Mah. अद्रिषु U. अद्रावदधादित्येव। त्वमेव यथैतत्सर्वमकरोस्तथा वासाऽऽत्मान वेष्टयामि BB.

१४. अद्रिषु P., D.
पर्वतेऽदधात् Sy.

१५. VM. ignores हृत्सु॥ हृत्सु हृदयेषु Sy., Mah.
स प॒र्याण॒ह्यति। व॒नेषु॒ व्यन्तरिक्षं ततानेति व॒नेषु॒ हीद॒मन्तरिक्ष॑ वि॒तत॑ वृ॒क्षाग्रेषु॒ वा॒ज॒मर्वत्सु॒ प॒य॒ उस्रि॒यास्वि॑ति वी॒र्यं॑ वै वा॒जाः॒ पुमाꣳसो॒ऽर्व॒न्तः॒ पृ॒ꣳस्व॒वे॒वैत॒द्वी॒र्यं॑ दधाति प॒य॒ उस्रि॒यास्वि॑ति प॒यो॒ हीद॒मुस्रि॒यासु॒ हि॒त॒ꣳ हृत्सु॒ क्रतुं॑ व॒रु॒णो॒ वि॒क्ष्व॒ग्निमि॒ति॒ हृ॒त्सु॒ ह्ये॒यं॒ क्रतु॒र्मनो॒जवः॒ प्र॒विष्टो॑ वि॒क्ष्व॒ग्निमि॑ति॒ वि॒क्षु॒ ह्ये॒यं॒ प्र॒जास्व॒ग्निर्दिवि॑ सू॒र्य॒मद॑धात्सो॒ममद्रा॑वि॒ति॒ दिवि॒ ह्यसौ॑ सू॒र्यो॑ हितः॑ सो॒ममद्रा॑वि॒ति॒ गि॒रि॒षु॒ हि॒ सो॒मस्तस्मा॑दाह॒ दिवि॑ सू॒र्य॒मद॑धात्सो॒ममद्रा॑वि॒ति॒ SB.3.3.4.7. p.253.
This stanza=YV. 4. 31.=TS. 1. 2. 8. 1.

नीचीमंबारं वरुणः कवंन्धं प्र संसज रोदसी अन्तरिक्षम् ।
तेन विश्वस्य भुवनस्य राजा यवं न वृष्टिर्व्युनत्ति भूमं ॥ ३ ॥

नीचीनद्वारम् । नीचीनद्वारम् । वरुण । मेघम् । प्रसृजति । त्रीन् लोकान् प्रति । तेन । सर्वस्य । भुवनस्य । राजा । यवम् । इव । वृष्टि । व्युनत्ति । पृथिवीम् ।

१. अत्रेरार्षम् Dur. VM reads ०द्वारम् for ०बारम् of the text.

२. अधोमुखबिलम् Sy. न्यगञ्चते द्वारं यस्य स भवति नीचीनद्वारोऽधोद्वारस्तम् अधोबिलं कृत्वा Dur. नीचीनमधोमुखं वारं द्वारं सदादिलोपेन वर्णव्यापत्त्या च वारमुदकनिर्गमनम् । नीचं वारं यस्य स नीचीनवारोऽधोमुखबिलस्तम् SKN. ३. मध्यमः Dur.

४. कवनमुदकं तत् धीयतेऽत्रेति कवन्धो मेघः । तं तथाकरोत् । अथवा कवन्धमुदकम् । तदुदकं निर्गमनबिलं चकार । मेघं विदार्योदकमधोमुखं चकारेत्यर्थः Sy. कवन्धो मेघः कवतेर्गतिकर्मणः । कवनमुदकं तस्मिन्धीयत इति । द्वितीयाश्रुतेः कृत्वेति शेषः । अधोमुखबिलं कृत्वा वरुणः SKN. अत एव मेघसम्बन्धात् कवनमुदकम् Dur.

५. कृतवान् Sy. प्रसृजति महत्त्वेन, नह्यमहानेतच्छक्नुयात् कर्तुम् Dur. प्र इत्येष वीप्सेतरस्य स्थाने । विसृजति विक्षिपति । किम् ? सामर्थ्यादुदकम् । अथवा—कवन्ध इत्येतेनोदकमेवोच्यते । उदकनामसु पाठात् (Ngh. 1.12.) नीचीनवारमित्येषा द्वितीया पञ्चम्यर्थे । नीचीनवारमेघाद् वरुणः कवन्धमुदकं मुञ्चति SKN.

६. VM. seems to explain रोदसी and अन्तरिक्षम् together as त्रीन् लोकान् ॥ द्यावापृथिव्यावन्तरिक्षं च प्रति लोकत्रयहितायेत्यर्थः Sy. द्यावापृथिव्यौ चान्तरिक्षं च महत्त्वेन सर्वमापूरयिष्यन्निव Dur. द्वितीयाश्रुतेरत्र कर्मप्रवचनीयप्रतिशब्दाध्याहारः । द्यावापृथिव्यौ प्रति SKN.

७. प्रति तौ P. उदकेन Sy. ततस्तेनातिप्रभूतेनोदकेन विसृष्टेन Dur. यत्तेन चोदितेन SKN.

८. भवस्य P. भूतजातस्य Sy. SKN. भूतजातस्योदकस्य वा Dur.

९. स्वामी Sy. ईश्वरः Dur. ईश्वरो वरुणः SKN.

१०. यवान् यथा प्ररोहाय सर्वत्र प्रसारयति तद्वद्भूमिं सर्वत्रोनत्ति । अथवा वृष्टिर्वरुण इति सम्बन्धः । वर्षकः पर्जन्य इत्यर्थः । अस्मिन् पक्षे यवं पुरुष इवेति पुरुषशब्दोऽध्याहार्यः Sy. यवग्रहणमत्र यवादेर्धान्यबीजस्योपलक्षणार्थम् । यथा यवादिधान्यबीजम् SKN.

११. सेक्ता पुमान् Sy.

१२. वृष्टिं व्युनक्ति P., D. क्लेदयति Sy. कश्चित्सत्कर्षी स्वल्पं व्युनत्ति विविधमुनत्ति क्लेदयति Dur. विविध क्लेदयति SKN.

१३. भूमिम् Sy. भूमिं कृत्स्नां यः सोऽस्माकमिदं नाम करोतु । अथ चैवमन्यथा योज्यम्—प्रसृजति द्यावापृथिव्यौ चान्तरिक्षं च प्रकर्षेण सृजत्युत्पादयति महत्त्वेन । यस्माच्चोत्पादयति तस्मात् स एष भुवनस्य राजा विश्वस्य भुवनस्य भूतजातस्य तेन हेतुना तदनुग्रहाय नीचीनद्वारमधोबिलं मेघं कृत्वा यवमिव वृष्टिर्व्युनत्ति भूमिमिति समानं पूर्वेण Dur. भूमिशब्दपर्यायोऽयमत्र द्रष्टव्यो बहुशब्दपर्यायो वा । भूमिं समस्तां बहुधा यावत् किञ्चित्प्रसङ्गात्पठ्यमानस्यैव निर्वचनार्थमुपक्षेपः SKN. नीचीनद्वारं वरुणः । कवन्धं मेघम् । कवनमुदकं भवति । तदस्मिन् धीयते । उदकमपि कवन्धमुच्यते । वन्धिरनिभृतत्वे । कमनिभृतं च । प्रसृजति । द्यावापृथिव्यौ चान्तरिक्षं च महत्त्वेन । तेन सर्वस्य भुवनस्य राजा यवमिव वृष्टिर्व्युनत्ति भूमिम् N.10.4.; SKN.IV.5.

उनत्ति[1] भूमिं पृथिवीमुत द्यां यदा दुग्धं वरुणो वष्ट्यादित्[2] ।
समभ्रेण वसत[3] पर्वतासस्तविषीयन्तः[4] श्रथयन्त वीराः ॥ ४ ॥

उनत्ति[5] । क्लेदयति । पृथिवीम्[6] । अन्तरिक्षं च । दिवम्[7] । च[8] । यदा[9] । वृष्टयुदकम्[10] । कामयते । वरुण । अनन्तरम्[11] । एव । सवास कुर्वन्ति[12] । शिलोच्चया[13] । मेघेन । शत्रुषु बलमिच्छन्त । पार्थिवा । वर्षसद्भावाय श्लथन कुर्वन्ति भिन्ना[14] स्वेषु राष्ट्रेषु गच्छन्ति[15] ।

इमामू ष्वासुरस्य श्रुतस्य महीं मायां वरुणस्य प्र वोचम्[16] ।
मानेनेव तस्थिवाँ अन्तरिक्षे वि यो ममे पृथिवीं सूर्येण ॥ ५ ॥

इमाम्[17] । इमाम् । एव[18] । सुष्ठु । असुराणा हन्तु[19] । विश्रुतस्य । वरुणस्य । महतीम् । मायाम्[20] । प्रब्रवीमि[21] । मानदण्डेनेव । तस्थिवान्[22] । अन्तरिक्षे । परिच्छिनत्ति[23] । य[24] । सूर्येण । अन्तरिक्षम्[25] ।

इमामू नु कवितमस्य मायां महीं देवस्य नकिरा दधर्ष[26] ।
एकं यदुदना न पृणन्त्येनीरासिञ्चन्तीरवनयः समुद्रम् ॥ ६ ॥

इमाम्[27] । इमाम्[28] । खलु[29] । कवितमस्य[30] । मायाम्[31] । महतीम्[32] । देवस्य[33] । न कश्चित्[34] । आधर्षयति[35] ।

---

१. ०क्ति P, D. २. प्रथितम् Sy.
३. अन्तरिक्षस्यापि पृथिवीशब्दवाच्यत्वं पूर्वमुक्तम् Sy. ४. द्युलोकम् Sy.
५. अपि च Sy. ६. यदा अयम् Sy.
७. उदकपूरणं अथवा दुग्धमुदकम्। तेन तत्कार्यमोषध्यादिक लक्ष्यते। ओषध्यादयः प्रवर्धन्तामिति यदा कामयते Sy.
८. ०नरम् D.
९. समाच्छादयन्ति Sy.
१०. पर्ववन्तोऽद्रयः Sy.
११. ०लिमि० P., D.
१२. श्रथयन्ति मेघान् Sy.
१३. ०ष्ना P. विशेषेण वृष्टेः प्रेरयितारो मरुतः Sy.
१४. ए P.
१५. सुराणा हन्तु P. असुरसम्बन्धिनः। असुराणामस्य च वध्यघातकभावः सम्बन्धः। असुरहन्तुरित्यर्थः। अथवासुरो मेघः प्राणदानात् तत्सम्बन्धिनः Sy. १६. प्रज्ञाम् Sy.
१७. कैषा माया ? सोच्यते Sy.
१८. तिष्ठन् Sy
१९. परिच्छिनति तस्यैषा माया Sy
२०. वरुणः ०Sy २१. ०रिक्षय P.
२२. अत्रेरार्षम् Dur.
२३. सर्वप्रसिद्धाम् Sy.
२४. It seems to be the explanation of उ ॥ ऊनू पादपूरणौ SKN.
२५. प्रकृष्टप्रज्ञस्य Sy. मेधावितमस्य Dur. अतिशयेन मेधाविनः SKN.
२६. प्रज्ञाम् Sy., Dur., SKN.
२७. महती मायाम् Dur.
२८. द्योतमानस्य स्तुत्यस्य वा वरुणस्य Sy. द्योतमानस्य Dur. वरुणस्य समुद्राधिपतेः SKN.
२९. कञ्चित् D. नैव Sy. न कश्चिदपि Dur. कश्चिदपि SKN.
३०. हिनस्ति कश्चिदपि Sy. आधर्षयितुं शक्नोति Dur. आधर्षत्यभिभवति SKN.

यत्[1] । एकम्[2] । समुद्रम्[3] । उदकेन[4] । पूरयन्ति[5] । गच्छन्त्यश्चैतवर्णाः[6] । आभिमुख्येन[7] गच्छन्त्यः । तद्यः[8] ।

अर्यम्यं वरुण मित्र्यं वा सखायं वा सदमिद्भ्रातरं वा ।
वेशं वा नित्यं वरुणारणं वा यत्सीमागश्चकृमा शिश्रथस्तत् ॥ ७ ॥

अर्यम्यम्[10] । अर्यमैवार्यम्यो योऽस्मभ्यम् प्रयच्छति य. । वा[11] । मित्र[12] भवति । यो वा[13] । समानख्यानः[14] । यो वा । भ्राता । यो वा । समीपगृहस्थ[15] । यो वा । गृहस्थ । यो वा । गृहमागत[16] एतान् सर्वान् । यद् वयम् । पापम्[17] । कृतवन्तः । तत् । विश्लथय[18] ।[19]

---

१. यस्मात् Sy.

२. कतमां मायामिति ? एकमेतं सन्तं वरुणमादित्यम् Dur. एकं सन्तम् SKN.

३. उदधिम् SKN.

४. एता उध्ना उदकेन रश्मिना Dur.

५. न पूरयन्ति Sy. न प्रीणयन्ति बुद्धया Dur. न पूरयन्ति SKN.

६. एन्यः शुभ्रा गमनशीला वा Sy. नद्य एनीर्गमनशीलाः सततमुदकमादायादित्यमण्डलं गच्छतेत्येवं नामाहर्निशमेता गच्छन्त्यः Dur. 'इण् गतौ' इत्यस्यैतद्रूपम् । एनशब्दस्य च शुक्लपर्यायस्य 'वर्णादनुदात्तात्०' (Pa.4.1.39.) इत्येवमीकारः । व्यत्ययेन द्वितीया प्रथमस्यार्थे । एन्यो गमनस्वभावाः शुक्लवर्णा वा । अधोभिगमनस्वभावाः शुक्लोदकवर्णस्वभावत्वाच्छुक्लवर्णाः SKN.

७. ०न्त्यश्चैतवर्णाभि० P., D. उदकमासेचयन्त्यः Sy. समुद्रं सिञ्चन्त्यः Dur. आभिमुख्येन सिञ्चत्यः पूरयन्त्य इत्यर्थः SKN.

८. बह्वृचो नद्यः सर्वतोदकेन पूरयन्त्योऽपि नैकमपि समुद्रं पूरयन्तीति । इदं वरुणस्य महत्कर्मेति । अत्रान्तरिक्षविस्तारादिसमुद्रापूरणपर्यन्तं कर्म परमेश्वरस्यैवोचितं न वरुणस्येति न वाच्यं तस्य वरुणादिरूपावस्थानात् । एष ब्रह्मेत्यादिश्रुतेः Sy. नद्य इव ।....तेषां रश्मीनां मायामेवंलक्षणां भगवतो वरुणस्याधर्षयितुमभिभवितुं विज्ञातुं न शक्नोति कश्चिदपि कथयितुम् । कथमप्ययं न सम्पूर्यत इति । एवमत्र वरुणः प्रज्ञया स्तूयते Dur. नवीनामेवम् (Ngh. 1.13.) । गङ्गाद्या नद्यः । ... गङ्गाद्या हि नद्यः प्रभूतेन स्वेन स्वेनोदकेन सततमापूरयन्त्यस्तत् समुद्रं जलाद् धारयन्ति । सैषा वरुणस्य माया एतां न कश्चिदभिभवति SKN. N. 6.13; SKN. II.432.

९. VM. ignores नु and न ॥ ऊनु इति पूरणौ Sy.

१०. ०र्यमेवा० P. प्रदातारमित्यर्थः । अथवेरणात् मननाच्च शास्तीत्यर्यमा गुरुः । तम् । स्वार्थिको यत् । अर्तेरिवं रूपम् Sy.

११. अथवा Sy.

१२. 'ञिमिदा स्नेहने' इत्यस्मात् मित्रम् । स्वार्थिको यत्, अनुरक्तमित्यर्थः Sy.

१३. अथवा Sy.

१४. समानख्यानम् Sy.

१५. ०ग्रह० P. निकटनिकेतनवर्तिनम् Sy.

१६. ग्रह० P. अरणं वा अशब्दमित्यर्थः । अथवारणमदातारं वा Sy.

१७. अपराधम् Sy.

१८. अस्मत्तो विनाशय Sy.

१९. VM. ignores वरुण and इत् ॥

कितवासो यद्रिरिपुर्न दीवि यद्वा घा सत्यमुत यन्न विद्म ।
सर्वा ता वि ष्य शिथिरेव देवाधा ते स्याम वरुण प्रियासः ॥ ८ ॥

कितवासः । कितवा । अस्मासु दलित पणिमिव पापम् । देवने तत्रत्य यदृणमस्माकमस्तीत्यर्थ । तत्र तस्यावश्यकर्तव्यत्वान्न शब्द, तथा च मन्त्र —'यददो व्यन्नृणमह बभूव' इति । यत् । वा । खलु । सत्यमृण वा बुद्धिपूर्व कृतम् । अपि वा । यत् । न । जानीम । सर्वाणि । तानि । विस्रंसथय । शिथिलानीव बन्धनानि । अत ऊर्ध्वम् । तव । स्याम । वरुण । प्रियास ।

V.86.

इन्द्राग्नी यमवथ उभा वाजेषु मर्त्यम् ।
दृळ्हा चित्स प्र भेदति द्युम्ना वाणीरिव त्रितः ॥ १ ॥

इन्द्राग्नी । ह इन्द्राग्नी ! पालयथ । उभौ सहितौ । सङ्ग्रामेषु । मनुष्यम् । दृढानि । अपि ।

---

१. स P., D. २. किता P. कितवा द्यूतकृतः । किं तवास्ति सर्वं मया जितमिति वदतीति कितवः Sy. स्वार्थसाधनतत्पराः कितवेति प्रवर्तमाना ऋत्विजः BB. ३. पणिनिव D.
४. द्यूते यथा यद्रिरिपुः लेपयन्ति पापमारोपयन्ति तथास्मासु द्वेष्टारो मयि त्वमेतत् पापमकरोः इत्याक्षिपन्ति । अत्र पुरस्तादुपचारोऽपि नकार उपमार्थीयः Sy न तु देवने सम्यग्व्यवसिताः प्रवर्तन्ते । विवेरौणादिकेसिचि छान्दसं दीर्घत्वम् BB. ५. तत्रस्तस्यावश्याप्रति०P., D.
६. ०दीप्यमृ० P., D. यद् येन रिरिपुर्नाशितवन्तोऽस्मान् BB. ७. AV.VI.119 1ª, TA.2.4.1ª.AV reads कृणोमि for बभूव ८. पापम् Sy.
९. अथवा Sy. च BB. १०. घ इति पूरणः Sy. घ इति पादपूरणः प्रसिद्धो वा BB.
११. आरोपमन्तरेण कृतवन्तः स्मः Sy. बुद्धिपूर्वमेव कृतं पापमश्रद्धादिना BB. १२. अपि च BB.
१३. अपि चायम् P. कृतं पापम् Sy. कृतमपि BB.
१४. न जानीमः सौकर्म्यात् BB.
१५. तानि तस्माद्दश्चरितानि । 'शेश्छन्दसि' इति लोपः BB.
१६. विमोचय । स्यतिरुपसृष्टो विमोचने Sy. विमुक्तबन्धनानि कुरु क्षमस्वेति यावत् BB.
१७. शिथिलबन्धनानि फलानीव Sy. सुमोचनानीव विमुञ्च । कपिलकादित्वाल्लत्वविकल्पः BB.
१८. अर्ध अनन्तरम् Sy. अथानन्तरं विमुक्तैनसो वयम् BB. १९. स्मा P., D. भवेम Sy.BB.
२०. हे देव वरुण ! BB.
२१. प्रयास P. प्रियाः Sy. इष्टाः BB.
२२. This stanza=TS 3.4.11.6. MS. D puts the figure ॥ ८५ ॥ here to indicate the end of the eighty-fifth hymn. No such number is given in P.
२३. 'इन्द्राग्नी यम्' इति षड्चं चतुर्दशं सूक्तमत्रेरार्षमानुष्टुभमैन्द्राग्नम् । षष्ठी विराट्पूर्वा । 'आद्यौ दशकावष्टकास्त्रयः' (KSA. 9.11. p. 4.) इति परिभाषितत्वात् । तथा चानुक्रान्तम्—'इन्द्राग्नी षळैन्द्राग्नमानुष्टुभं विराट्पूर्वान्तम्' (KSA. 28.86.p.21.) इति । विनियोगो लैङ्गिकः Sy. २४. रक्षथः Sy.
२५. ०भे P., D. परस्पराविवियुक्तौ युवाम् Sy.
२६. मर्त्यम् Sy.

सः[1]। प्रभिनत्ति[2] शत्रूणामन्नानि[3]। उदकानीव[4]। त्रितः ऋषिजननकाले स ह्यद्भ्य उत्पन्नः।

या पृतनासु दुष्टरा[6] या वाजेषु[7] श्रवाय्या[8]।
या पञ्च चर्षणीरभीन्द्राग्नी[9] ता हवामहे[10] ॥ २ ॥

या पृतनासु। यौ। सेनासु[5]। दुष्टरौ[6]। यौ। सङ्ग्रामे[7]। श्रवणीयौ[8]। पञ्च। जनान्[11]। अभिभवतः[12]। तौ[13]। इन्द्राग्नी। हवामहे[14]।

तयोरिदमवच्छवस्तिग्मा[15] दिद्युन्मघोनोः[16]।
प्रति द्रुणा[17] गभस्त्योर्गवां[18] वृत्रघ्न एषते ॥ ३ ॥

तयोरित्[15]। तयो। एवेदम्। अभिभवत्। बलम्। तीक्ष्णं[17] च। आयुधम्[18]। धनवतो[19]। तत्र हस्तयोः स्थितेन। द्रुममयेन चमसेनाध्वर्युः। प्रत्यभिमुखं गच्छति। इन्द्राय। गोसिद्ध्यर्थम्[20]।

ता वामेषे[21] रथानामिन्द्राग्नी[22] हवामहे[23]।
पतीं तुरस्य राधसो विद्वांसा[24] गिर्वणस्तमा ॥ ४ ॥

ता वाम्[21]। तौ[25]। वाम्[26]। रथेन[27]। आगमनाय[28]। अस्मदीयाम्[29]। इन्द्राग्नी[30]। हवामहे[31]। स्वामिनौ[32]।

---

१. मर्त्यः Sy.
२. भिनत्ति Sy.
३. अन्नाम्म् D. द्योतमानानि धनानि शत्रुसम्बन्धीनि Sy.
४. प्रतिवादिवाक्यानीव। अथवा त्रिषु स्थानेषु वर्तमानोऽग्निः शत्रूणां वाक्यानीव Sy.
५. VM. ignores यम्।
६. पृतनासु Sy.
७. अनभिभाव्यौ Sy.
८. येन P.
९. सङ्ग्रामेष्वस्मेषु वा Sy.
१०. श्रवाय्यौ स्तुत्यौ Sy.
११. चर्षणयो मनुष्याः। तान् Sy.
१२. अभिरक्षत इति शेषः Sy.
१३. महानुभावौ Sy.
१४. स्तुमः Sy.
१५. ०रिदिति P. ०रिति D.
१६. अभिभावुकम् Sy.
१७. तीक्ष्णं वर्तते Sy.
१८. वज्रम् Sy.
१९. मघवतोरस्मवतोः धनवतोर्वा तयोः Sy.
२०. ०वतोस्तोत्र P.
२१. द्रुमविकारेण गमनशीलेन वा एकेन रथेन Sy.
२२. ०न्ति P. प्रतिगच्छतः Sy.
२३. आवरकमेघहननाय तथाविधवृत्रासुरवधाय वा Sy.
२४. ०सिध्य० D., P. एवम्भूतौ देवौ उदकानां पणिभिरपहृतानां वा गवां लाभाय Sy.
२५. हे देवौ ! Sy.
२६. वक्ष्यमाणगुणौ Sy.
२७. युवाम् Sy.
२८. रथानाम् Sy.
२९. युद्धे रथानां प्रेरणाय Sy.
३०. स्म० P.
३१. इन्द्रमग्निं च परस्परयुग्मभूतौ Sy.
३२. स्तुमः Sy.

तारकस्य[1] । धनस्य[2] । विद्वासौ[3] । अतिशयेन गीर्भिर्वननीयौ[4] ।

ता वृधन्तावनु द्यून्मर्तीय देवावदभा[5] ।
अहन्ता चित्पुरो दधेऽशेव देवावर्वते ॥ ५ ॥

ता वृधन्तौ । तौ । वर्धमानौ[6] । दिवसेषु[7] । मनुष्याय । देवौ[8] । हिमारहितौ । पूज्यौ[9] । पुर[10] । स्थापयामि । अशाविव[11] । देवौ यथैकस्याशौ समानाकारौ[12] तथेन्द्राग्नी भवतो यद्वद्वाश्वश्च भगश्चादित्यौ द्वौ । भ्रातृव्याय मर्तीय[13] [14] ।

एवेन्द्राग्निभ्यामहावि हव्यं शूष्यं घृतं न पूतमद्रिभिः ।
ता सूरिषु श्रवो बृहद्रयिं गृणत्सु दिधृतमिषं गृणत्सु दिधृतम् ॥ ६ ॥

एवेन्द्राग्निभ्याम्[15] । एवम्[16] । इन्द्राग्निभ्याम्[17] । हव्यम्[18] । हूयते[19] । बलकरम्[20] । घृतम्[21] । इव[22] । ग्रावभि । अभिषुतम्[23] । सोममयम्[24] । तौ[25] । स्तोतृषु[26] । महतीम्[27] । कीर्तिम्[28] । धन च[29] । सुन्वत्सु[30] । धारयतम्[31] । अन्नम्[32] । च[33] ।

---

१. जङ्गमरूपस्य Sy.
२. धनादिलक्षणस्य Sy.
३. सर्वज्ञौ Sy.
४. गीर्भिर्वननीयतमौ । ईदृशौ युवां हवामहे Sy.
५. सर्वदा प्रवृद्धावित्यर्थः । वर्धने दृष्टान्तः । मनुष्याविव । तौ यथा वर्धेते Sy.
६. प्रतिदिनम् Sy.
७. द्योतमानौ Sy.
८. अहिंस्यौ Sy.
९. प्रकर्षेण पूज्यौ तादृशौ महानुभावौ Sy.
१०. पुरस्कुर्वे Sy.
११. अंशो नाम द्वादशादित्यमध्यवर्ती देवः । स भगस्याप्युपलक्षकः अंशाविवादित्याविव । दीप्तावित्यर्थः Sy.
१२. ०मानाकरौ P.
१३. भतो P.
१४. यद्वद्वा० P.
१५. अर्वतेऽश्वलाभाय Sy.
१६. VM. ignores चित् ॥ चिदिति पूजायाम् Sy.
१७. ०ग्नी० P., D.
१८. इदानी क्रियमाणप्रकारेण स्तुतिसाहित्येनेत्यर्थः Sy.
१९. ०ग्नी० D.
२०. हविः Sy.
२१. भूयते P. परित्यक्तमासीत् Sy.
२२. सोमरसमिव । तद्यथा युवाभ्यां प्रदीयते तद्वच्चरुपुरोडाशादिकमपि Sy.
२३. देवौ Sy.
२४. मेधाविष्वस्मासु Sy.
२५. प्रभूतम् Sy.
२६. अन्नं यशो वा Sy.
२७. VM. ignores गृणत्सु । दिधृतम् ॥ स्तुवत्सु । पुनरुक्तिरादरार्था Sy.
Ms. D. puts the figure ॥८६॥ here to indicate the end of the eighty-sixth hymn. No such number is given in P.

V.87.

प्र वो॑ म॒हे म॒तयो॑ यन्तु विष्ण॑वे मरुत्व॑ते गिरि॒जा ए॑वया॑मरुत् ।
प्र शर्धा॑य॒ प्रय॑ज्यवे सुखा॒दये॑ त॒वसे॑ भन्ददि॑ष्टये॒ धुनि॑व्रताय॒ शव॑से ॥ १ ॥

प्र वो महे ॥ एवयामरुत् ॥ प्रगच्छन्तु । युष्माकम् । स्तुतय । विष्णवे । मरुत्वते । गिरेर्जनयिता भवत्ययम् । एवयामरुत्, गिरिति वाचमाह । प्रगच्छन्तु । प्रकृष्टयज्ञाय । मारुताय शर्धाय । शोभनखादये । वृद्धाय । स्तूयमानयज्ञाय । धूननकर्मणे । वेगवते मारुत सूक्तम्, विष्णुन्यङ्क्तमिति ।

प्र ये जा॒ता म॑हि॒ना ये च॒ नु स्व॒यं प्र वि॒ब्रुवा॑ ब्रुव॑त एव॒या॑मरुत् ।
क्रत्वा॒ तद्वो॑ मरुतो॒ नाधृ॑षे॒ शवो॑ दा॒ना म॒ह्ना तदे॑षामधृ॒ष्टासो॒ नाद्र॑यः ॥ २ ॥

प्र ये जाताः । प्रब्रुवते । महता यज्ञेन । प्रादुर्भूता । ये । च । स्वयम् । एव प्रादुर्भूता । प्रब्रुवते । वेदनेनैव । अथ प्रत्यक्ष.—कर्मणा । तत् । व. । मरुत । न । आधर्षणाय भवति । बलम् । दानेन । महता ।

---

१. 'प्र वो महे' इति नवर्चं पञ्चदशं सूक्तमेवयामरुदाख्यस्य आत्रेयस्य मुनेरार्षं मरुद्देवताकमतिजगतीच्छन्दस्कम् । तथा चानुक्रमणिका—'प्र वो नवैवयामरुन्मारुतमतिजागतम्' (KSA. 28. 87.p.21.) इति । दशरात्रे षष्ठेऽहनि तृतीयसवनेऽच्छावाकशस्त्रे इदं सूक्तम् । सूत्रितञ्च 'एवयामरुक्तो वृषाकपिना' (ĀSS. 8. 4.) इति Sy. २. तुभ्यम् । वचनव्यत्ययः Sy.
३. व्याप्तायेन्द्राय विष्णवे वा Sy.
४. मरुत्वते P. मरुद्भिस्तद्वते । कस्य स्तुतयः ? इत्युच्यते Sy. ५. वाचि निष्पन्नाः Sy.
६. एतन्नामकस्य ऋषेः । षष्ठ्या लुक् । अथवायमृषिर्गिरिजाः स्तुतेर्जनयिता भवति । उत्तरार्धं मरुत्स्तुतिः Sy. ७. गीरिति or गिरिरिति is suggested for गिरिति ।
८. The passage गिरिति वाचमाह should immediately follow गिरेर्जनयिता भवत्ययम् ।
९. प्रयन्तु स्तुतयः । कस्मै ? Sy.
१०. प्रकर्षेण यष्टव्याय Sy.
११. बलाय मारुताय । इतरत् सर्वं बलविशेषणम् Sy.
१२. ०खादाय D. शोभनाभरणाय । खादिराभरणविशेषः । 'हस्तेषु खादिश्च' (RV. I.168.3.) 'पत्सु खादयः' (RV. V.54.11.) इति च श्रुतेः Sy. १३. बलवते Sy.
१४. ०मानाययज्ञा० P., D. स्तुतिरूपेष्टिर्यस्य तद्वृन्दविष्टि । तस्मै Sy. १५. कर्म P., D. मेघानां चालनं कर्म यस्य तादृशाय Sy.
१६. गमनवते Sy. १७. VM. ignores महे ।
१८. ०ता D.
१९. महता विष्णुना इन्द्रेण वा सह Sy.
२०. नु क्षिप्रम् Sy. २१. ०ता P., D.
२२. ब्रुवत इति व्यत्ययेन बहुवचनम् । एकवचने वा छान्दसः शः । निघाताभावश्छान्दसः । प्रेत्ययमाख्यातेन वा सम्बन्धनीयः Sy.
२३. यज्ञगमनविषयज्ञानेन सह Sy.
२४. अथ प्रत्यक्षवादः Sy.
२५. चालनादिरूपेण कर्मणा युक्तम् Sy.
२६. प्रसिद्धम् Sy.
२७. युष्माकम् Sy. २८. ०तौ P., D.
२९. कैश्चिदप्याधर्षणीयं न भवति । अन्येषामसुरादीनां कृत्वा कर्मणा वानभिभाव्यं भवति । कृत्यार्थे केन् Sy. ३०. अभिमतदानेन Sy.
३१. महत्त्वेन चोपेतम् । यूयं प्रबलाः Sy.

तत् । एषां बलं प्राप्यते तेऽमी भवन्ति । अनाधृष्टाः[1] । इव[2] । अद्रय । प्राबल्येनैतदिदमेवयामरुतोक्तमित्युक्तमेवयामरुदिति[3] ।

प्र ये दिवो बृहतः शृण्विरे गिरा सुशुक्वानः सुभ्वः एवयामरुत् ।
न येषामिरी सधस्थ ईष्टे आँ अग्नयो न स्वविद्युतः प्र स्पन्द्रासो धुनीनाम् ॥ ३ ॥

प्र ये दिवः । प्रशृण्वन्ति[4] । ये[5] । शब्देन । महतः । दिव आगन्तः[6] । सुष्ठु शोचयितारः[7] । महान्तः[8] । न । येषाम्[9] । शत्रुः[10] । ईश्वरो[11] भवति । स्थाने[12] । च[13] । अग्नय । इव । स्वयमेव दीप्ताः[14] । नदीनाम् । कम्पयितारः[15] । प्रकर्षेण[16] ते[17] भवन्ति । समानमेवयामरुदिति[18] ।

स चक्रमे महतो निरुरुक्रमः समानस्मात्सदस एवयामरुत् ।
यदायुक्त त्मना स्वादधि ष्णुभिर्विष्पर्धसो विमहसो जिगाति शेवृधो नृभिः ॥ ४ ॥

स चक्रमे । सः[19] । निश्चक्रमे[20] । महतः[21] । समानात्[22] । स्थानात्[23] । उरुक्रमणः[24] । एवयामरुदित्युक्तार्थम्[25] । यदा । युक्तः[26] । स्वयमेव[27] । स्वस्मात् स्थानात्[28] । गन्तृभिः । अश्वैः[29] । विगतस्पर्धाम्[30] । विशिष्टपूजाम्[31] । गच्छति[32] । सुखस्य वर्धयिता स गणो यजमानाना[33] तदानीमिति[34] ।

---

१. ०त्येना० P. भन्त्येना० D. अधर्षणीयाः Sy.
२. तत्र वृष्टान्तः । ते यथा अधृष्यास्तद्वत् यूयमपि Sy.
३. ०त्येऽयनतदिव० P.
४. ०मरुतोदि० P.
५. शृण्वन्ति तान् मरुतः Sy.
६. मरुतः Sy.
७. ०तः P. आगच्छन्तः is suggested for आगन्तः ॥ द्युलोकादागच्छन्तः Sy.
८. ०रौ P., D. दीप्ताः Sy.
९. सुष्ठु भवन्तः Sy.
१०. मरुताम् Sy. ११. ईरिता प्रेरिता Sy.
१२. ईशते च चालयितुम् Sy.
१३. सहस्थाने स्वकीये निवासे तिष्ठताम् Sy.
१४. आ इति चार्थे Sy.
१५. स्वयमेव विद्योतमानाः Sy.
१६. वर्षणेन चालयितारश्च Sy.
१७. Omitted by D.
१८. समानवेयाम० P. समानमेयाम० D. एवयामरुत् स्तुतवान् Sy.
१९. मरुद्गणः Sy. २०. निरगच्छत् Sy.
२१. प्रवृद्धात् Sy.
२२. सर्वेषां साधारणात् Sy.
२३. अन्तरिक्षात् Sy.
२४. ०मेणः P., D. विस्तीर्णक्रमणः सन् Sy.
२५. एव मरुद्भिरित्यु० P. ऋषिः Sy.
२६. युक्तोऽभवदागमनप्रार्थनाय Sy.
२७. आत्मनैव Sy.
२८. स्वकीयस्थानात् Sy.
२९. स्वनेतृभिरश्वैः Sy.
३०. वगतस्पर्धान् D. अथ बहुवदुच्यते तदानीं विविधस्पर्धाः । अहं पुरतो गच्छाम्यहं पुरतो गच्छामीति तेषां स्पर्धा । अथवा विगतस्पर्धाः, न ह्येषां सार्धं स्पर्धकाः सन्ति Sy.
३१. विशिष्टबलाः Sy.
३२. निर्गच्छन्ति । व्यत्ययेनैकवचनम् Sy.
३३. ०मानान् P. ०मानां D.
३४. VM. ignores अधि ॥ अधि इति पञ्चम्यर्थानुवादी Sy.

स्वनो न वोऽमवान्रेजयद्वृषा त्वेषो ययिस्तविष एवयामरुत् ।
येना सहन्त ऋञ्जत स्वरोचिषः स्थारश्मानो हिरण्ययाः स्वायुधासं इष्मिणः ॥ ५ ॥

स्वनो न वः[1] । स्वन[2] । न । युष्माकम् । बलवान् । कम्पयतु[4] । वर्षिता[5] । दीप्त । भन्ता । वृद्ध[6] । एवयामरुदित्युक्तार्थम् । येन[7] । शत्रून् सहन्ते[8] । तमलङ्कार कुर्वन्ति[9] । स्वदीप्तय[10] । स्थितरश्मय[11] । हिरण्मयालङ्काराः[12] । शोभनायुधा[13] । गमनशीला[14] ।

अपारो वो महिमा वृद्धशवसस्त्वेषं शवोऽवत्वेवयामरुत् ।
स्थातारो हि प्रसितौ संदृशि स्थन ते नं उरुष्यता निदः शंशुक्वांसो नाग्नयः ॥ ६ ॥

अपारः[15] । अपर्यन्त[16] । व[17] । महिमा । हे वृद्धबल[18] । दीप्तम् । बलम्[19] । रक्षतु । माम्[20] । स्थातार[21] । हि[22] । प्रबद्धे[23] । सन्दर्शने[24] । भवथ । ते । अस्मान् । रक्षत[25] । निन्दितु[26] । दीप्ता[27] । इव । अग्नय ।

ते रुद्रासः सुमखा अग्नयो यथा तुविद्युम्ना अवन्त्वेवयामरुत् ।
दीर्घं पृथु पप्रथे सद्म पार्थिवं येषामज्मेष्वा महः शर्धास्यद्भुतैनसाम् ॥ ७ ॥

ते रुद्रासः[28] । ते । रुद्रपुत्रा । सुयज्ञा[29] । अग्नय । इव । बहुदीप्तय[30] । रक्षन्तु । दीर्घाकारम्[31] । विस्तीर्णम् । प्रथते[32] । पार्थिवम्[33] । सद्मौषध्यादिकम्[34] । येषाम् । गमनेषु । महान्ति । बलानि । तेषामभूतपापानाम्[35] ।

---

१. हे मरुतः ! Sy. २. वेगजनितः शब्दः Sy.
३. Omitted by D.
४. कम्पयत्वेवयामरुतं माम् । 'सुपा सुलुक्०' इति द्वितीयाया लुक् Sy. ५. वर्षिता वृष्टेः Sy.
६. वृद्धः D. प्रवृद्धः Sy. ७. स्वनेन Sy.
८. शत्रूनभिभवन्तो यूयम् Sy.
९. ऋञ्जथ प्रसाधयथ । लडर्थे लोट् Sy.
१०. स्वायत्तरश्मयः Sy.
११. स्थिररश्मयः Sy. १२. हिरण्याभरणाः Sy.
१३. ०ध P., D. स्वायत्तायुधाः Sy.
१४. अप्रवन्तो गमनवन्तो वा Sy.
१५. हे मरुतः ! Sy.
१६. अनवधिकः Sy. १७. युष्माकम् Sy.
१८. हे प्रवृद्धबलाः ! Sy. १९. युष्माकं बलम् Sy.
२०. एवयामरुतं माम् । द्वितीयैकवचनस्य लुक् Sy.
२१. स्थाननियमेन तिष्ठन्तो भवथ Sy.
२२. खलु Sy.
२३. प्रबलबन्धने नियमनवति यज्ञे Sy.
२४. निमित्ते Sy. २५. ऋक्षत P. ०त D.
२६. ०तु P., D. निन्दकात् शत्रोः सकाशात् Sy.
२७. शुशुक्वासो यूयमिति Sy.
२८. मरुतः Sy. २९. शोभनयज्ञाः Sy.
३०. प्रभूतदीप्तयः । अथवाग्निसदृशास्तुविद्युम्नाः प्रभूतधनाः Sy ३१. आयतम् Sy.
३२. मरुद्भिः प्रथितमभूत् Sy.
३३. पृथिव्यन्तरिक्षम् । तत्सम्बन्धि Sy.
३४. संमौष० P., D. सदनम् Sy.
३५. तषाम् P.
३६. अपूतवयानाम् P. अपूतपा० D. अपापानाम् Sy.
३७. VM. ignores एवयामरुत् and आ ॥ एवयामरुत् एतन्नामकमृषिं माम् । आ गच्छन्तीति शेषः Sy.

अद्वेषो नो मरुतो गातुमेतन श्रोता हवं जरितुरेवयामरुत् ।
विष्णोर्महः संमन्यवो युयोतन स्मद्रथ्यो न दंसनाप द्वेषांसि सनुतः ॥ ८ ॥

अद्वेषः[1]। द्वेषवर्जिता । अस्माकम् । हे मरुत ! गमनम्[2] । आभिमुख्येन प्राप्नुत[3] । शृणुत च । स्तोत्रम् । जरितु[4] । विष्णो[5]. । महत[6] । समानस्तुतिका[7] हे मरुतः ! अस्मत्त[8]. । शत्रून्[9] । अन्तर्हितान्[10] । अप-युयोत[11] । रथिन[12]. । इव । कर्मभि[13] ।

यद्वा लुप्तविभक्तिकमेवयामरुदिति[14], येनान्वित भवति तत्तदनुगुण विभक्तिरनुषञ्जनीया यथा जरितुरे-वयामरुत इति, यत्र[15] तु न कथञ्चिदप्यन्वय तत्र स्वयमेव वाऽऽक्षिपतीति ।

गन्ता नो यज्ञं यज्ञियाः सुशमि श्रोता हवंमरत्त एंवयामरुत् ।
ज्येष्ठासो न पर्वतासो व्योमनि यूयं तस्यं प्रचेतसः स्यातं दुर्धर्तवो निदः ॥ ९ ॥

[**गन्ता नः**][16] गच्छत[17] । अस्माकम्[18] । यज्ञम् । हे यज्ञिया[19] ! सुकर्माण[20]. । शृणुत च । स्तुतिम्[21] । राक्षस-वर्जिता[22] । एवयामरुत्[23] । श्रेष्ठा[24] । इव । मेघा[25] । अन्तरिक्षे[26] । यूयम् । तस्य शत्रा[27] भवत । हे सुमतय । शत्रो-र्मदीयस्य भवत । दुर्धरा । निन्दितु[28] ।

---

१. **अद्वेषसो यूयम्** Sy.
२. **नम०** D. **गमनस्वभावं स्तोत्रं प्रति** Sy.
३. **आगच्छत** Sy.
४. **स्तोतुः** Sy.
५. **०ष्णो** P. **व्यापकस्येन्द्रस्य** Sy.
६. **०त** P.
७. **समानयज्ञा यूयम्** Sy.
८. **स्मत् । अयं प्रशस्तनाम । प्रशस्ताः** Sy.
९. **द्वेष्टॄन्** Sy.
१०. **०न्तरिहि०** P. **सनुतरिति अन्तर्हितनाम** Ngh. 3.25.
११. **०हिता न च यूयं यात न** D. **दूरे वियोजयत पृथक्कुरुत** Sy.
१२. **योद्धार इव । ते यथा शत्रूनपाकुर्वन्ति तद्वदस्मा-कम्** Sy. १३. **कर्मणा** Sy.
१४. **०क्तितमेव०** P.
१५. **त्र** P.
१६. **अध्यायोपाकरणोत्सर्गयोर्विनियुक्ता** (AGS. 3.5.) Sy.
१७. The *pratika* is supplied by the Editor.
१८. **आगच्छत** Sy.
१९. **हे यज्ञियाः ! मरुतः ! यूयम्** Sy.
२०. **शोभनकर्म यथा भवति तथा सुकर्मत्वायेत्यर्थः । तदर्थम्** Sy.
२१. **अस्मदीयमाह्वानम्** Sy.
२२. **०तो** P. **रक्षोवर्जिता यूयम्** Sy.
२३. **यमस्तुपेपयामरुत्** P. **यमस्तुवेवयामरुत्** D. **लिङ्गवचनयोर्व्यत्ययः** Sy.
२४. **ज्येष्ठाः** Sy.
२५. **विन्ध्यादय इवातिप्रवृद्धाः** Sy.
२६. **अन्तरिक्षे वर्तमानाः** Sy.
२७. **श्रता** P. **शत्रवः** is suggested for **शत्रा** ।
२८. **निन्दकस्य** Sy.
२९. Ms. D. puts the figure ॥८७॥ here to indicate the end of the eighty-seventh hymn. No such number is given in P.

VI.१.

॥ अथ षष्ठं मण्डलम् ॥

त्वं ह्यग्ने प्रथमो मनोतास्या धियो अभवो दस्म होता ।
त्वं सीं वृषन्नकृणोर्दुष्टरीतु सहो विश्वस्मै सहसे सहध्यै ॥ १ ॥

त्वं ह्यग्ने ॥ बार्हस्पत्यो भरद्वाज षष्ठं मण्डलमपश्यत् ॥ त्वम् । हि । अग्ने ! मुख्यः । मनोता यस्मिन् देवाना मनास्युतानि स मनोता । अस्य । कर्मण । अभव । भो दर्शनीय ! होता । त्वम् । सर्वत । कृणोषि । वर्षिष्ठ । तरितुमशक्यम् । बलम् । विश्वस्मै । बलाय । शत्रूणा सोढवे ।

अधा होता न्यसीदो यजीयानिळस्पद इषयन्नीड्यः सन् ।
तं त्वा नरः प्रथमं देवयन्तो महो राये चितयन्तो अनु ग्मन् ॥ २ ॥

अधा होता । अथ । होता । निषण्णो भवसि । यष्टृतमः । इडाया । पदे वेद्याम् ।

---

१. भारद्वाजे षष्ठे मण्डले षडनुवाकाः । तत्र प्रथमेऽनुवाके पञ्चदश सूक्तानि । तत्र 'त्वं ह्यग्ने' इति त्रयोदशर्चं प्रथमं सूक्तम् । 'त्वं ह्यग्ने सप्तोनेति बार्हस्पत्यो भरद्वाजः षष्ठं मण्डलमपश्यत्' (KSA. 28.1. p. 22.) इत्यनुक्रान्तत्वात् । मण्डलद्रष्टा स एव भरद्वाज ऋषिः । अनादेशपरिभाषया (KSA.12. 6.p.5.) त्रिष्टुप् । मण्डलादिपरिभाषयाग्निर्देवता (KSA.12.12.p.5.) । पशोर्हविष्यवदीयमाने मैत्रावरुणेनानुवचनीयमिदं मनोतासूक्तम् । सूत्रितञ्च 'त्वं ह्यग्ने प्रथम इत्यन्वाह' (ĀŚS.3.6.) इति । प्रातरनुवाक आग्नेये क्रतौ त्रैष्टुभे छन्दस्येतदादिसूक्तषट्कं द्वितीयवर्जम् । सूत्रितञ्च—'त्वं ह्यग्ने प्रथम इति षण्णां द्वितीयमुद्धरेत्' (ĀŚS. 4.13.)इति । आद्योपाकरणे विनियुक्ता । सूत्रं तु पूर्वं मन्त्र उक्तम् (cf. AGS.3.5.) Sy.

२. ०ष्ठ P.

३. The passage बार्हस्पत्यो० ०पश्यत् is a fragment of KSA.28.1.p.22.

४. हिशब्दः 'अग्निः सर्वा मनोताग्नौ मनोता सङ्गच्छन्ते' (AB.2.10.) इत्यादिब्राह्मणप्रसिद्धिद्योतनार्थः Sy. ५. देवानां मध्ये प्रथमः प्रतमः प्रकृष्टतमः पूर्वभावी वा Sy.

६. देवानां मनो यत्रोतं सम्बद्धं भवति तादृशो भवसि Sy. ७. ०ना P.

८. मनास्यो० is suggested for मनास्यु० ।

९. मानो० P.,.D.

१०. Omitted by P. भ D. भवसि Sy.

११. हे Sy. १२. हेता P. देवानामाह्वाता Sy.

१३. त्वा पर्वतः P., D. १४. अकरोः Sy.

१५. हे कामानां वर्षितः ! त्वम् Sy.

१६. दुर्हिस्यमर्हिस्यम् Sy. १७. सर्वस्यापि Sy.

१८. बलवतः Sy. १९. शत्रोः Sy.

२०. शत्रून् सोढुम् or शत्रूणां सहनाय is suggested for शत्रूणां सोढव ॥ अभिभवनाय Sy.

२१. भरद्वाजस्यार्षम् SKN. २२. अध P. अधुना हे अग्ने ! Sy. एतस्मादेव पूर्वोक्ताद् रक्षोऽसुराभिभवनसमर्थबलत्वात्कारणात् SKN.

२३. होमनिष्पादकः सन् Sy. त्वं होता SKN.

२४. निषण्णवानसि Sy. निषण्णो निषीदसि वा SKN.

२५. अतिशयेन यष्टा त्वम् Sy. यष्टृतरः SKN.

२६. भूम्या वेदिलक्षणायाः Sy. इळाशब्दस्य छान्दसत्वादाकारलोपः । इळायाः पृथिव्याः SKN.

२७. स्थानेSy. अवयवभूते पदे स्थाने वेद्याख्येSKN.

हविरिच्छन्[1] । स्तुत्य । सन्[2] । तम्[3] । त्वाम् । मनुष्या[4] । प्रथममेव यज्ञेषु मुखे । देवकामाः[6] । महते[7] । धनाय । बुध्यमाना[8] । अनुगच्छन्ति[9] ।

वृतेव यन्तं बहुभिर्वसव्यैस्त्वे रयिं जागृवांसो अनु ग्मन् ।
रुशन्तमग्निं दर्शतं बृहन्तं वपावन्तं विश्वहा दीदिवांसम् ॥ ३ ॥

वृतेव[10] । मार्गेणेव[11] । गच्छन्तम्[12] । बहुभि[13] । धनसमूहै[14] सह । उदार त्वयि[15] स्थितम् । धनम् । सर्वेऽनुगच्छन्ति[16] । जागरणशीला[17] । दीप्यमानम्[18] । अग्निम्[19] । दर्शनीयम्[20] । महान्तम्[21] । अन्नवन्तम्[22] । सर्वदा[23] । क्रीडन्तमनुगच्छन्ति[24] धनार्थमिति ।

पदं देवस्य नमसा व्यन्तः श्रवस्यवः श्रवं आपन्नमृक्तम् ।
नामानि चिद्दधिरे यज्ञियानि भद्रायां ते रणयन्त संदृष्टौ ॥ ४ ॥

पदं[25] **देवस्य**[26] । स्थानम् । देवस्य[27] । हविषा[28] । गच्छन्त[29] । अन्नमिच्छ-

---

१. पुरोडाशादिलक्षणमन्नमिच्छन् Sy. इषयन्, अकार उपजनः । अन्नानि हविर्लक्षणानीच्छन् SKN.

२. Omitted by P. तन् D. ईडयः सन् य एवङ्कर्मासि SKN. ३. तादृशम् Sy.

४. नेतारो मनुष्या ऋत्विग्यजमानाः Sy.

५. इतरदेवताभ्यः पूर्वम् Sy. अन्याभ्योऽपि देवताभ्यः प्रथमम् SKN. ६. देवं त्वामात्मन इच्छन्तः Sy. देवान् यष्टुमिच्छन्तः SKN.

७. महः, चतुर्थ्यर्थ एषा प्रथमा । महते SKN.

८. जानन्तः स्तुत्या ज्ञापयन्तो वा Sy. चेतयन्तो जानन्तः । किम् ? सामर्थ्यात् तव माहात्म्यम् SKN. ९. अन्वगच्छन् पूर्वम् Sy. अनुगच्छन्ति त्वामेवाश्रयन्तीत्यर्थः SKN. N.2.7., SKN.II.57.

१०. प्रतेव P. ११. वृतेव मार्गेण । इवेति सम्प्रत्यर्थे लोकद्वयमध्यगतेन मार्गेण Sy.

१२. गच्छन्तं त्वाम् Sy. १३. अनेकैः Sy.

१४. वसुभिः । स्वार्थिकस्तद्धितप्रत्ययः । यजमानानां निवासयोग्यैर्वा सार्धम् Sy. १५. सहोदरं D.

१६. देवे Sy. १७. सम्भजन्ते यजमानाः Sy.

१८. प्रयच्छन्त इत्यर्थः Sy. १९. दीप्तवर्णम् Sy.

२०. अङ्गनादिगुणविशिष्टम् Sy. २१. व्य P.

२२. अन्ववन्त P., D. वपावन्तम् Sy.

२३. सर्वेषु कालेषु Sy. २४. दीप्यमानम् Sy.

२५. भरद्वाजस्यैदमार्षम् Dur. भरद्वाजस्य SKN.

२६. आहवनीयस्थानम् Sy. अवस्थानं याथात्म्यमग्नेः Dur. स्थानमग्निलोके स्वर्गे वा SKN.

२७. द्योतमानस्याग्नेः Sy. दानादिगुणयुक्तस्य Dur. भगवतोऽग्नेः SKN.

२८. हविषा स्तोत्रेण वा Sy. केन ? नमसा नमस्कारेण स्तुत्या मन्त्रेणेत्यर्थः । मन्त्रार्थपरिज्ञानादेव ह्यग्नेराध्यात्माधिदैवाधिभूताधियज्ञेष्ववस्थानं याथात्म्यतो दृश्यते । पदशब्दो हि स्थाने प्रसिद्धः । पदस्थोऽयमिति हि वक्तारो भवन्ति लोके । अथवा नमसा, अन्नेन हविराख्येनाभ्युद्यतेनेति योज्यम् Dur. स्तुत्या मन्त्रलक्षणया SKN.

२९. पश्यन्तो जानानाः Dur. पश्यन्तो जानन्त इत्यर्थः । देवानां हि यावत्किञ्चित् तत्सर्वं स्तुतिपूतेभ्यो मन्त्रेभ्यो ज्ञायते, अत एतदुच्यते पदं स्तुत्या जानन्त इति SKN.

मानाः[1] । अन्नम्[2] । प्राप्नुवन्तः[3] । अहिंसितं[4] शत्रुभिर्देवाः । नामानि[5] । च[6] । दधिरे[7] । यज्ञार्हाणि[8] । भद्रायाम्[9] । तै[10] सन्दृष्टौ[11] सन्दर्शने[12] । रमन्ते[13], 'पश्वा[14] न तायु'मित्युक्तम् ।

त्वां वर्धन्ति क्षितयः पृथिव्यां त्वां रायं उभयासो जनानाम् ।
त्वं त्राता तरणे चेत्यो भूः पिता माता सदमिन्मानुषाणाम् ॥ ५ ॥

त्वाम्[14] । त्वाम्[15] । वर्धयन्ति । मनुष्याः[16] । पृथिव्याम्[17] । त्वामाश्रयन्ते[18] । जनानाम्[19] । धनानि । उभयविधानि[20] स्थावरजङ्गमात्मकानि[21] । त्वम् । रक्षक[22] । हे क्षिप्र[23] ! ज्ञातव्य[24] । भवसि[25] । पिता[26] । माता[27] च । सदा । एव । मानुषाणाम्[28] ।

---

१. ०इच्छन्तः is suggested for ०इच्छमानाः॥ अन्नमिच्छन्तः पूर्वे यजमानाः Sy. श्रव इच्छमानाः अन्नमात्मनः प्रार्थयमानाः । यमेवमन्नेः स्तुतिविद्वांसो याथात्म्यम्, अन्नैर्वाऽभ्युद्यतैः श्रव इच्छमानाः पश्यन्तोऽग्निमुपासते Dur. श्रवोऽन्नं यशो वा SKN.

२. सर्वत्र श्रूयमाणमन्नम् Sy.

३. आप्नुवन्ति Sy. किं तेषामिति ? उच्यते, श्रव आपन् Dur. प्राप्नुवन्तम् SKN.

४. अन्यैरपरिबाध्यम् Sy. किंलक्षणं पुनराप्नुवन्ति ? अमृक्तम्, अमृदितमनुपभुक्तमन्यैः Dur. कीदृशम् ? अमृक्तम् । अमृतशब्दस्यायं छान्दसः ककारः उपजनः । अमृतसदृशम् । अथवा 'मृजू शुद्धौ' इत्यस्येदं रूपम् । 'व्रश्चभ्रस्जसृजमृज०' (Pa. 8.2.36.) इति षत्वे प्राप्ते छान्दसं 'चोः कुः' (Pa. 8.2.30) इति कुत्वम् । शुद्धं केवलं धनादिभिः सहितमित्यर्थः । अमृतं वा परैरपरामृष्टमित्यर्थः । अत्रैकवाक्यतायै यत्तच्छब्दावध्याहार्यौ SKN.

५. नमनीयानि वैश्वानरो जातवेदा इत्यादीनि । अथवा नमनसाधनानि स्तोत्राणि दधिरे Sy. ये चैते ग्रन्थमात्राध्येतारः केवलच्छान्दसाः नामान्यपि च मन्त्रभावेनावस्थितानि Dur. किं बहुना... जना नामान्यपि SKN.

६. चिदप्यर्थे Dur.

७. धारयन्ति Sy. धारयन्त्यनर्थज्ञाः Dur. भगवतोऽग्नेर्धारयन्ति कीर्तयन्तीत्यर्थः SKN.

८. यज्ञयोग्यानि Sy.

९. स्तुत्यायाम् Sy. भन्दनीयायाम् Dur.

१०. हे अग्ने ! तव Sy. तेऽपि Dur., SKN.

११. Omitted by P. सन्दृष्टौ निमित्तायाम् Sy. अनुग्रहबुद्धावित्यर्थः । सप्तमीश्रुतेः स्थिता इति शेषः SKN. अग्नेः....सन्दर्शने Dur.

१२. ०न्तत P. ०न्त D. रमयन्ति Sy. रमयन्त्येवात्मानम् । तानपि भद्रेण चक्षुषः पश्यत्येवाग्निरित्यभिप्रायः Dur. त्वयानुगृह्यमाणाः सुखिनो भवन्तीत्यर्थः SKN.

१३. वश्वा० D. RV. 1.65.1. व्यन्त इत्येषोऽनेककर्मा । 'पवं देवस्य नमं । व्यन्तः" इति पश्यतिकर्मा N. 4.19.,SKN.II.253.

१४. हे अग्ने ! Sy. १५. त्वा P.

१६. मनुष्या ऋत्विजः Sy.

१७. वेदिलक्षणायाम् Sy.

१८. ऋत्विजोऽध्वर्व्वादयस्त्वामुद्दिश्य वर्धन्ति प्राप्तुं त्वां वर्धन्ति Sy.

१९. यजमानानां सम्बन्धीनि, पुत्रादीनामर्थाय (वा) Sy. २०. पश्वपशुरूपाणि । अथवोभयविधानि धनानि गवादीनि Sy.

२१. ०त्मि० P. २२. रक्षिता Sy.

२३. हे दुःखात्तारकाग्ने ! त्वं च Sy.

२४. ज्ञातव्यः स्तुत्यः सन् Sy.

२५. ०ति D. २६. मातृपितृस्थानीयः Sy.

२७. सर्वदा Sy.

२८. मनुष्याणां स्तोतृणामस्माकम् Sy.

सपर्येण्यः स प्रियो विक्ष्वग्निर्होता मन्द्रो नि षसादा यजीयान् ।
तं त्वा वयं दम आ दीदिवांसमुप ज्ञुबाधो नमसा सदेम ॥ ६ ॥

सपर्येण्यः । परिचरणीयः । सः । प्रियश्च । मनुष्येषु । अग्निः । निषीदति । होता । मादयिता । यजीयान् । तम् । त्वा । वयम् । गृहे । दीप्यमानम् । उपसीदेम । जान्वो बोधिनारः—सम्भग्नजानुकाः । नमस्कारेण ।

तं त्वा वयं सुध्यो३ नव्यमग्ने सुम्नायवं ईमहे देवयन्तः ।
त्वं विशो अनयो दीद्यानो दिवो अग्ने बृहता रोचनेन ॥ ७ ॥

तं त्वा वयम् । तम् । त्वा । वयम् । सुकर्माणः । स्तुत्यम् । अग्ने ! सुखकामाः । याचामहे । देवानिच्छन्त । त्वम् । मनुष्यान् । नयसि । दीप्यमानः । द्युलोकात् । अग्ने ! महता । तेजसा ।

विशां कविं विश्पतिं शश्वतीनां नितोशनं वृषभं चर्षणीनाम् ।
प्रेतीषणिमिषयन्तं पावकं राजन्तमग्निं यजतं रयीणाम् ॥ ८ ॥

विशाम् । बह्वीनाम् । विशाम् । विश्पतिं स्वामिनम् । कविम् । हन्तार शत्रूणाम् । वर्षितार

---

१. सवर्ये० P.
२. पूज्यः Sy. ३. अग्निः Sy.
४. कामानां पूरकः Sy.
५. प्रजासु Sy.
६. निषण्णोऽभूत् Sy.
७. होमनिष्पादकः Sy.
८. मद० P. मदनीयः Sy.
९. यजनीयं P. यजनीयान् D. अतिशयेनेतरदेवानां यष्टा यजनीयो वा । एवं महानुभावोऽग्निर्नानिषसाद Sy.
१०. अथ प्रत्यक्षकृतः । तादृशम् Sy.
११. त्वाम् Sy.
१२. वयं D. यजमानाः Sy.
१३. ०सवे० D. आसादयेम । अथवोपासीदेमेत्येवमाशास्ते Sy.
१४. जन्वो बो० or जान्वोर्बाधि० is suggested for जान्वो बोधि० ॥ जानुनी बाधयन्तोऽवनतजानवः प्रणताः सन्तः Sy.
१५. संभजनजा० D.
१६. स्तोत्रेण Sy.
१७. VM. ignores आ ।
१८. तादृशं महानुभावम् Sy.
१९. त्वाम् Sy.
२०. सुष्ठु क० P. शोभनबुद्धयः Sy.
२१. सुखमिच्छन्तः Sy.
२२. स्तुम इत्यर्थः Sy.
२३. देवं त्वामिच्छन्तः Sy.
२४. प्रजाः स्तोतॄनस्मान् Sy.
२५. अगमयः Sy.
२६. दीप्यमानः सन् Sy.
२७. स्वर्गम् Sy.
२८. रोचमानेन तेजसा । रोचनेनादित्येन दिवमगमय इति वा सम्बन्धः । आदित्यमार्गेणेत्यर्थः Sy. २९. नित्यानाम् Sy.
३०. ०शाम D. विशाम् ऋत्विग्यजमानलक्षणानाम् Sy.
३१. क्रान्तदर्शिनम् Sy.
३२. हिंसकम् Sy. ३३. वर्षकम् Sy.

कामानाम्[1]। मनुष्याणाम्[1]। प्रेतिर्गमन[2] तस्मिन्निच्छा यस्य तम्। गच्छन्तम्[3]। पावकम्[4]। राजन्तम्[5]। अग्निम्[6]। दातारम्[7]। धनानाम्[8]।

सो अग्न ईजे शशमे च मर्तो यस्त आनट् समिधा हव्यदातिम्।
य आहुतिं परि वेदा नमोभिर्विश्वेत्स वामा दधते त्वोतः॥ ९॥

सो अग्ने। स एव। अग्ने[9]! ईजे[10]। तुष्टाव[11]। च। मर्तः। यः[12]। तुभ्यम्[13]। प्रापयति[14]। हविषो दातिम्[15]। यः[16]। आहुतिम्[17]। परितो लम्भयिता। नमस्कारैः[18]। विश्वानि[20]। एव। धनानि[21]। धारयति। त्वया रक्षितः[23][24]।

अस्मा उ ते महि महे विधेम नमोभिरग्ने समिधोत हव्यैः।
वेदी सूनो सहसो गीर्भिरुक्थैरा ते भद्रायां सुमतौ यतेम॥ १०॥

अस्मा उ। अस्मै। एव। तुभ्यम्। महते। पूजाम्[25]। विधेम[26]। नमोभिः[27]। अग्ने! समिधा। अपि च। हव्यैः[28]। वेद्याम्। हे सहसः पुत्र[29]! स्तोत्रशस्त्रैः[30]। आगच्छेम[31]। तव। कल्याण्याम्[32]। सुमतौ[33]।

---

१. स्तोतॄणाम् Sy.
२. ०मं P. प्राप्तगमनम् Sy.
३. अन्नं कुर्वन्तम् Sy.
४. शोधकम् Sy.
५. जातं तम् P.
दीप्यमानं दीपयन्तं वा Sy.
६. अग्निं स्तुम इति शेषः Sy.
७. यजतं यष्टव्यम् Sy.
८. रयीणां लाभाय Sy.
९. हे अग्ने! त्वाम् Sy.
१०. यजते Sy.
११. स्तौति Sy. Cf Ngh. 3.14. शशमान इति स्तुतिकर्मा।
१२. यजमानः Sy.
१३. तव Sy.
१४. करोति Sy.
१५. हविषां दानम् Sy.
१६. यज्ञः P., D.
१७. आज्यादिलक्षणाम् Sy.
१८. परितो वेत्ति। ददातीत्यर्थः Sy.
१९. स्तुतिभिः Sy.
२०. सर्वाणि Sy.
२१. ०रैश्वान्येव P., D.
२२. वननीयानि Sy.
२३. ०तं D.
त्वया रक्षितः सन् Sy.
२४. VM. ignores समिधा and सः॥ समिधा सह यजमानः Sy.
२५. महि महदत्यधिकम् Sy.
२६. परिचरेम Sy.
२७. नमस्कारैः Sy.
२८. अपि वैः P. अपि पैः D.
हविर्भिः Sy.
२९. सूनो! Sy.
३०. स्तोत्रैः शस्त्रैश्च। विधेमेति सम्बन्धः Sy.
३१. आगच्छेम भवेमेत्यर्थः Sy.
३२. स्तुत्यायाम् Sy.
३३. शोभनानुग्रहबुद्धौ Sy.

आ यस्ततन्थ रोदसी वि भासा श्रवोभिश्च श्रवस्यस्तरुत्रः ।
बृहद्भिर्वाजैः स्थविरेभिरस्मे रेवद्भिरग्ने वितरं वि भाहि ॥ ११ ॥

आ यः[1] । व्याततन्थ[1] । यस्त्वम् । रोदसी[2] । तेजसा[3] । अन्नैः[4] । च । अन्नहितः[5] । तारकः[6] । बृंहितैः[7] । अन्नैः । वृद्धैः[8] । अस्माकम्[9] । अग्ने ! धनयुक्तैः[10] । अत्यन्तम्[11] । दीप्यस्व[12] ।

नृवद्वसो सदमिद्धेह्यस्मे भूरि तोकाय तनयाय पश्वः ।
पूर्वीरिषो बृहतीरारेअघा अस्मे भद्रा सौश्रवसानि सन्तु ॥ १२ ॥

नृवद्वसो[13] । नृयुक्तम्[14] । प्रशस्य[15] । सदा । एव । प्रयच्छ[16] । अस्मभ्यम्[17] । पुत्राय[18] । तत्पुत्राय च । पशो[19] । भूरि, पशुसङ्घ प्रयच्छेत्यर्थः[20] । बहूनि[21] । अन्नानि[22] । बृंहितानि[23] । दूरे पापं[24] येषा तानि । अस्मासु । सौश्रवसानि[25] । कल्याणानि[26] । सन्तु[27] ।

पुरूण्यग्ने पुरुधा त्वाया वसूनि राजन्वसुता ते अश्याम् ।
पुरूणि हि त्वे पुरुवार सन्त्यग्ने वसु विधते राजनि त्वे ॥ १३ ॥

पुरूणि[28] । बहूनि । अग्ने ! बहुधा[29] । त्वत्कामनया । वसूनि[30] । राजन् ![31] वसुतायै[32] निवासार्थम्[33] ।

---

१. व्यातत P. ०ततथ D. व्यतनोः Sy.
२. द्यावापृथिव्यौ Sy.
३. दीप्त्या Sy.
४. स्तुतिभिः Sy.
५. श्रवस्यश्च भवसि हे तादृशाग्ने ! Sy.
६. तारकस्त्वम् Sy.
७. बृहि० D. महद्भिः Sy.
८. वर्धैः P. स्थविरैः स्थूलैः Sy.
९. अस्मदर्थम् Sy.
१०. रयिमद्भिः Sy.
११. विशिष्टतरम् Sy.
१२. विशेषेण दीप्यस्व Sy.
१३. मनुष्यरूपेतम् Sy.
१४. हे वसो ! वासक ! धनवन् ! वाग्ने ! Sy.
१५. सर्वदा Sy.
१६. स्थापय Sy.
१७. अस्मासु Sy.
१८. अस्मत्पुत्राय Sy.
१९. पशो P. पशंश्च धेहि Sy.
२०. प्रभूतान् Sy.
२१. पूरयित्र्यः कामानाम्, बह्वृचो वा Sy.
२२. उक्तलक्षणान्यन्नानि Sy.
२३. महत्यः Sy.
२४. वापं D. आरे दूरे अघानि यासु ताः । तादृश्यः Sy.
२५. सुश्रवस्त्वानि Sy.
२६. भद्राणि Sy.
२७. भवन्तु Sy.
२८. 'पुरूण्यग्ने' इति त्रयोदश्युक्तासम्भरणीयेष्टावग्नेः क्षत्रवतोऽनुवाक्या । सूत्रितञ्च—'पुरूण्यग्ने पुरुधा त्वाया स चित्र चित्रं चितयन्तमस्मे' (ĀŚS.4.1.) इति Sy.
२९. गवाश्वादिरूपेण बहुप्रकाराणि Sy.
३०. त्वं का० P.
३१. धनानि Sy.
३२. राज P., D.
३३. वसुमत्त्वाय Sy.
३४. निवसात्यं P. वसात्यं D.

त्वत्त[1]. । प्राप्नुयाम्[2] । बहूनि । हि । त्वयि[3] । हे बहुभिर्वरणीय ! सन्ति[4] । अग्ने ! वसूनि । परिचरते[5] । राजनि[6] । पुनस्त्वयीति पूरणम् ।

इत्थ व्याख्यदष्टाविंशमध्याय माधवाह्वयः ।
चोलेषु निवसन् कश्चित् सस्यमालिषु सर्वदा ॥

[अथ पञ्चमोऽध्यायः ॥]

'त्वं हि क्षैतंव्[7]द्यशो[8]'' अथ व्याचिख्यासति माधवः ।
पादभेदे पूरणेषु वक्तव्यं सम्प्रदर्शयन् ॥१॥
अवान्तराः केचिदर्था ऋक्पादेषु व्यवस्थिताः ।
समुदायस्तु तेषां यः स वाक्यार्थ इति स्थितिः ॥२॥
क्रियापदान्वयः पादे यावतापीह सिध्यति ।
अवान्तरार्थ[9] तं प्राहुः 'अग्निमीळे पुरोहितम्[10] ॥३॥
अपेक्षा जायते[11] पादे 'यज्ञस्यं देवमृत्विजम्[12]' ।
कं किं च तस्य कर्तव्यं तत्रैतदुपतिष्ठति[13] ॥४॥
पुरोहिते रहिमग्निमीळे[14] पदद्वयम् ।
पश्येत् तयोरन्यतरत् पादे ऽन्यस्मिन्नवस्थितम्[15] ॥५॥

---

१. तव Sy.
२. व्याप्नुयां भुञ्जीय वा । अत्र भरतस्वामी 'वसुताते' इत्येकपदं सप्तम्यन्तं चकार । भट्टभास्करमिश्रोऽप्येकपदं सम्बुद्ध्यन्तं चकार Sy.
३. P. reads त्वं हे for हि । त्वयि ॥ त्वाम् Sy.
४. सत्वम् P. सति D.
५. परिचरते महां दातव्यानि सन्ति Sy.
६. राजमाने Sy.
७. ०स्त्वमिति P.
८. RV.VI.2.1ª. ०वद्येशो० D. ०वदेशो० P. अथ is omitted by R.
९. तत् D.
१०. RV.I.1.1.
११. यायते P.
१२. देमृ० P. RV.I.1.1.ᵇ.
१३. ०त्रैकमु० P.
१४. R. reads पुरोहितेन रहितम० ।
१५. ०स्मिन्यव० P.

नापेक्षते पदं पूर्वं[1] नतरामुभयं यदि ।
तस्मात् पादान्तरेणैतदुभयं[2] पूरणं विदुः ॥६॥
ता मित्रस्य[3] प्रशंस्तय इन्द्राग्नी ता हवामहे[4] ।
न पूरणोऽत्र तच्छब्दः पादे[5] यस्मिन् व्यवस्थितः[6] ॥७॥
'अस्माकमद्य[7] वामयं[8] स्तोमो वाहिष्ठो अन्तम[9]' ।
पुनर्युवाभ्यामित्युक्तं न तदिच्छन्ति पूरणम् ॥८॥
'यदा ते मारुतीर्विशस्तुभ्यमिन्द्र[10] नियेमिरे[11]' ।
आवर्तते पद तेऽत्र[12] नोभयोः पूरणे पदे ॥९॥
वेत्था[13] हि वेधो अध्वनः पथश्च[14] देवाञ्जसा[15] इति ।
पथोऽध्वनश्च भेदश्च[16] चकारेण प्रतीयते ॥१०॥
'प्रोतये वरुणं मित्रमिन्द्रं[17]' 'कृष्वावसे[18]' इति ।
पुनः प्रयुज्यते तत्र भेदः सूक्ष्मोऽस्ति कश्चन ॥११॥
'स नो' नियुद्भिरा पृण[19] कामं वाजेभिरश्विभि[20] ।
स्त्रीपुविभेदादत्रापि[21] नास्ति कश्चन पूरणः[22] ॥१२॥

---

१. ०र्वं P.
२. ०रे नैत० P., D.
३. ०यः D.
४. RV.I.21.3.
५. पदे D.
६. पादे यस्मिन् व्यवस्थितः is omitted by P.
७. वमयं D. वयं P.
८. ०ष्ठोन्त० D. RV.VIII.5.18.
९. पुनः युवाभिमि० P.
१०. यदा ते मारुतश्च न पूरणः मारुतीर्विशस्तुत्य-मिन्द्र P.
११. RV.VIII.12.29.
१२. आववर्तदवसेवाग्नो० P. आमवर्तदवसेवाग्नो०D.
१३. वेत्था P., D.
१४. रथश्च P.
१५. सेवा० P., D. RV.VI.16.3.
१६. भेदोऽत्र R.
१७. RV.VI.21.9.
१८. मित्रस्य मुष्यवसे P. मित्रस्य मृष्यवसे D. RV. VI.21.9.
१९. वृण P., D.
२०. ०रश्व० D. RV.VI.45.21.
२१. स्त्रींपुंविभेदोत्रापि P. ०दात्रा० D.
२२. ०णं P.

'पुरूण्यग्ने पुरुधा' इति मन्त्रान्ते श्रूयते पदम् ।
त्वे इत्येतत् पादभेदाद् बहवः सन्ति तादृशाः ॥१३॥
'वयं शूरेभिरस्तृभिरिन्द्र त्वया युजा वयम्' ।
आवर्तते वयमिति सन्ति चान्येऽपि तादृशाः ॥१४॥
इत्थं व्युत्पत्तिसिद्ध्यर्थमृचोऽस्माभिरुदाहृताः ।
तासामाकृतिविद्विप्रो न मन्त्रार्थेषु मुह्यति इति ॥१५॥

VI.2.

त्वं हि क्षैतवद्यशोऽग्ने मित्रो न पत्यसे ।
त्वं विचर्षणे श्रवो वसो पुष्टिं न पुष्यसि ॥ १ ॥

त्वं हि क्षैतवत् ॥ भरद्वाजः ॥ त्वम् । हि । निवासवत् । धनम् । अग्ने ! सखा । इव । पातयसि । त्वम् । विद्रष्टः ! अन्नम् । वासयित. ! पुष्टिम् । च । पोषयसि ।

---

१. RV.VI.1.13.
२. त्वा P.
३. RV.I.8.4.
४. वयति P.
५. Omitted by P.
६. अथ पञ्चमोऽध्याय आरभ्यते । षष्ठमण्डलस्य षडनुवाकात्मकस्य प्रथमेऽनुवाके पञ्चदश सूक्तानि । तत्र 'त्वं हि' इत्येकादशर्चं द्वितीयं सूक्तं भरद्वाजस्यार्षमाग्नेयम् । अन्या षट्पञ्चाशदक्षरा शक्वर्याद्यितो दशानुष्टुभः । अनुक्रम्यते हि 'त्वं ह्येकादशानुष्टुभं शक्वर्यन्तम्' (KSA. 29.2.p.22.) इति । प्रातरनुवाक आग्नेये ऋतावानुष्टुभे छन्दसीदं सूक्तमुत्तमावर्जं विनियुक्तम् । सूच्यते हि—'त्वं हि क्षैतवदग्ना यो होताजनिष्ट (ĀŚS. 4.13.) इति । आश्विनशस्त्रे चैतत् शंसनीयं प्रातरनुवाकन्यायेनेत्यतिदिष्टत्वात् । अङ्गिरसां द्वित्रात्रे द्वितीयेऽहनीदमेव सूक्तमाज्यशस्त्रम् । सूत्रितञ्च—'त्वं हि क्षैतवदिति चाज्यम्' (ĀŚS. 10.2.) इति Sy.
७. खलु Sy.
८. क्षितिः क्षयोऽपचयः । तत्सम्बन्धि क्षैतं शुष्कं काष्ठं तद्युक्तम् Sy.
९. ०स वर्धनम् P. ०सं वर्द्धनम् D. अन्नं हविर्लक्षणम् Sy.
१०. तत्र दृष्टान्तः । अहरभिमानी देवो मित्रः । स इव । यद्वा यश इति गृहनाम । (cf Ngh. 1.12.,2.7.,2.10.) क्षैतवत् । क्षैतं निवासकं हविर्लक्षणमन्नम् । तद्युक्तं यजमानगृहं मित्रभूतः पुरुष इवाभिपतसि । यद्वा पत्यतिरैश्वर्यकर्मा । ईदृशमन्नं पत्यसे ईशिषे Sy.
११. पालय० D. अभिपतसि, गच्छसि Sy.
१२. हे विशेषेण सर्वस्य द्रष्टः ! Sy.
१३. श्रवणीयमन्नं यजमानगृहस्थम् Sy.
१४. वासितः P., D. वासकाग्ने ! त्वम् Sy.
१५. वष्टिम् P. अन्नकार्यभूतां पुष्टिम् Sy.
१६. अयं नशब्दश्चार्थे Sy.
१७. वर्धयसि Sy.

त्वां हि ष्मा चर्षणयो यज्ञेभिर्गीर्भिरीळते ।
त्वां वाजी यात्यवृको रजस्तूर्विश्वचर्षणिः ॥ २ ॥

त्वां हि ष्म[1] । त्वाम्[2] । हि[3] । खलु । मनुष्याः । हविर्भिः[4] । स्तुतिभिश्च । स्तुवन्ति । त्वाम् । वेगवान्[5] । अनगच्छति[6] । स्तेनवर्जितः[7] । लोकाना तरिता[8] । सर्वस्य द्रष्टा वायु ।

सजोषस्त्वा दिवो नरो यज्ञस्य केतुमिन्धते ।
यद्ध स्य मानुषो जनः सुम्नायुर्जुह्वे अध्वरे ॥ ३ ॥

सजोषः[9] । सङ्गताः[10] । त्वाम् । दिव[11] । नेतारो मरुतः[12] । यज्ञस्य । ऋतुभूतिम्[13] । इन्धते[14] । यदा । खलु । अयम्[15] । मानुष[16] । जन[17] । सुखमिच्छन्[18] । आह्वयति[19] । यज्ञे[20] ।[21]

ऋधद्यस्ते सुदानवे धिया मर्तः शशमते ।
ऊती प बृहतो दिवो द्विषो अंहो न तरति ॥ ४ ॥

ऋधत्[22] । ऋद्धम्[23] । य[24] । तुभ्यम् । शोभनदानाय[25] । कर्मणा[26] । मनुष्य[27] । अर्चन करोति[28] । सः[29] ।

---

१. ष्मा P.
२. हे अग्ने ! Sy.
३. एव Sy.
४. यज्ञसाधनैर्हविर्भिः Sy.
५. वाजो गमनम् । तद्वान् सूर्यः Sy.
६. गच्छति प्रविशतीत्यर्थः । तथा च श्रूयते 'अग्नि वावादित्यः सायं प्रविशति तस्मादग्निर्दूराल्लक्तं ददृशे' इति । वाजिशब्दश्च सूर्यवाचकत्वेन क्वचित् श्रूयते—'अग्निर्वायुः सूर्यस्ते वै वाजिनः' (TB.1.6.3.9.) इति वायुः सप्तिरादित्यो वाजीति च Sy.
७. हिंसकरहितः Sy.
८. ०कानन्त० D. उदकमत्र रज उच्यते (N. 4.19.) तस्य वृष्टिलक्षणस्य प्रेरयिता यद्वा रजसां लोकानां तरिता गन्ता Sy.
९. हे अग्ने ! Sy.
१०. सजोषसः सह प्रीयमाणाः Sy.
११. स्तुतेः Sy.
१२. ऋत्विजः Sy.
१३. ०ते D.
१४. कतुभूतिम् D. केतुभूतम् is suggested for ऋतुभूतिम् ॥ प्रज्ञापकम् Sy.
१५. इद्धते P., D. समिद्धं कुर्वन्ति कदेति चेत् ? उच्यते Sy.
१६. सः Sy.
१७. मनोरपत्यभूतः Sy.
१८. जातो यजमानो होता वा Sy.
१९. सुम्नं सुखमात्मन इच्छन् Sy.
२०. त्वामाह्वयति तदेत्यर्थः Sy.
२१. हिंसाप्रत्यवायरहिते यज्ञे Sy.
२२. ऋधक् P.
२३. ऋधत् स यजमान ऋध्नुयात् हे अग्ने ! Sy.
२४. यत् D.
२५. सुदानवे शोभनदानाय तुभ्यम् । षष्ठ्यर्थे चतुर्थी । तव सम्बन्धिना Sy.
२६. ०ण D.
२७. मरणधर्मा यजमानः Sy.
२८. ०ष्येर्च्च० D. शाम्यति । यद्वा शमतिः स्तुतिकर्मा । त्वदर्थं कर्मणा युक्तः सन् स्तौति Sy.
२९. यजमानः Sy.

दीप्तस्य । महतः । तव पालनेन । शत्रून् । पापम् । च । तरति ।

समिधा यस्त आहुतिं निशितिं मर्त्यो नशत् ।
वयावन्तं स पुष्यति क्षयमग्ने शतायुषम् ॥ ५ ॥

समिधा । समिधा । यः । तुभ्यम् । आहुतिम् । मन्त्रेण संस्कृताम् । प्रापयति । सः । कान्तिमत् । गृहम् । पुष्यति । अग्ने ! बह्वन्नं शरीरम् ।

त्वेषस्ते धूम ऋण्वति दिवि षञ्छुक्र आततः ।
सूरो न हि द्युता त्वं कृपा पावक रोचसे ॥ ६ ॥

त्वेषः । दीप्तः । ते । धूमः । गच्छति । अन्तरिक्षे । सन् । शुक्लवर्णः । विस्तृतः । सूर्यः । इव । दीप्तया । त्वम् । ज्वालया । पावक ! रोचसे ।

अधा हि विक्ष्वीड्योऽसि प्रियो नो अतिथिः ।
रण्वः पुरीव जूर्यः सूनुर्न त्रयायाय्यः ॥ ७ ॥

अधा हि । अथ । हि । मनुष्येषु । स्तोतव्यः । असि । प्रियश्च । अस्माकम् । अतिथिः ।

---

१. तव सम्बन्धिन्या ऊत्या रक्षया Sy.
२. द्वेष्टॄन् Sy.
३. आहननशीलं पापम् Sy.
४. इव Sy.
५. अतिक्रामति Sy.
६. ०धां P., D.
७. हे अग्ने ! समिधा समिन्धनहेतुभूतेनेध्मेन सह Sy. ८. त्वदीयाम् Sy.
९. ०तिः D.
१०. निशितां तनूकृतां मन्त्रसंस्कृताम् Sy.
११. व्याप्नुयात् Sy. नशतिर्व्याप्तिकर्मा Ngh. 2.18.
१२. मनुष्यो यजमानः Sy.
१३. वयाः शाखाः पुत्रपौत्रादिलक्षणाः । तदुक्तम् Sy. १४. पोषयति वर्धयति । तत्र चिरकालमवतिष्ठत इत्यर्थः Sy.
१५. बहुविधान्नं चिरकालजीवनं वा Sy.
१६. VM. ignores मर्त्यः ॥ मर्त्यः मनुष्यः Sy.
१७. हे अग्ने ! Sy.
१८. त्वेषो दीप्तस्य Sy.
१९. तव Sy.
२०. मेघात्मना परिणतो गच्छति Sy.
२१. सच्छुक्लवर्णा P., D. निर्मलः शुभ्रवर्णो वा Sy. २२. विस्तीर्णः सन् Sy.
२३. दीप्ताया D. दीप्त्या Sy.
२४. अभिमुखीकरणसमर्थया स्तुत्या स्तूयमानस्त्वम् Sy. २५. हे शोधकाग्ने ! Sy.
२६. दीप्यसे Sy.
२७. VM. ignores हि ॥ हि खलु Sy.
२८. अपि च Sy.
२९. यस्मादर्थे । यस्मादेवं तस्मात् Sy.
३०. प्रजासु हे अग्ने ! त्वम् Sy.
३१. स्तुत्यः Sy. ३२. भवसि Sy.
३३. लुप्तोपममेतत् । अतिथिरिव प्रियोऽसि । यद्वा हविर्वहनाय सततगामी भूत्वास्माकं प्रियोऽसि Sy.

रमणीयस्त्वं भवसि। पुर इव राजा। स्तोतव्यः। सूनुः। इव च। त्रिभिर्यातव्यः पित्रादिभिः। यथा त्रिषु जीवत्सु जातः पुत्रो लालनीयः।

क्रत्वा हि द्रोणे अज्यसेऽग्ने वाजी न कृत्व्यः।
परिज्मेव स्वधा गयोऽत्यो न ह्वार्यः शिशुः॥ ८॥

क्रत्वा हि। कर्मणा। हि। गृहे। त्वमाज्येन अज्यसे। अग्ने! अश्वः। इव। कर्मणि साधुः। परितो गन्तेव। अन्नार्थम्। गयो गौर्वा रथो वा। अतनशीलः। इवाश्वः। युवा त्वमिति।

त्वं त्या चिदच्युताग्ने पशुर्न यवसे।
धामा ह यत्ते अजर वना वृश्चन्ति शिक्वसः॥ ९॥

त्वं त्या। त्वम्। तानि। अच्युतानि। अपि काष्ठानि भक्षयसि। अग्ने! पशुः।

---

१. रमणीयो गन्तव्यो वा Sy.
२. नगर्याम् Sy.
३. जीर्णो वृद्धो हितोपदेष्टा राजेव Sy.
४. तथा पुत्रः Sy.
५. ०तव्य D. त्रययाय्यः यजमानैस्त्रातव्यः पालयितव्यो भवसि। त्रायतेरेतद् रूपम्। यद्वैतत् सूनोर्विशेषणम्। विद्यातपःकर्मलक्षणं त्रयं यातीति त्रययाय्यः। यातेरौणादिक आय्यप्रत्ययः स्पृहयाय्य इति यथा। अथवा त्रययाय्यः जन्मत्रयं प्राप्तः। जन्मत्रयं स्मर्यते 'मातुरग्रेऽधिजननं द्वितीयं मौञ्जिबन्धनात्। तृतीयं यज्ञदीक्षाया इति जन्मत्रयं स्मृतम्। (Manu 2.169.) इति। तादृशः पुत्र इति Sy.
६. पित्रादिभिः is suggested for पित्रादिभि।
७. यथ P. ८. जातनीयः P.
९. भिः P. कृत्वा भिः D.
१०. कर्मणा मन्थनरूपेण Sy.
११. खलु Sy.
१२. द्रुमे काष्ठेऽरण्यां विद्यमानस्त्वम् Sy.
१३. व्यज्यसे Sy. १४. वेजनवानश्वः Sy.
१५. क्रत्वीति कर्मनाम। हविर्वहनादीनां कर्मणां कर्ता। स यथा पुरुषं वहति तद्वद्धविर्वहनमग्नेरश्वसादृश्यम् Sy. १६. सर्वत्र गन्ता वायुरिव दावानलादिरूपेण सर्वत्र गन्ता त्वम् Sy.
१७. अन्नमित्यर्थः Sy. स्वधा अन्ननामैतत् Ngh. 2.7. १८. गौर्वोवा P. गृहं च भवसि। उभयोर्वतित्यर्थः Sy.
१९. ०तेनशी० P., D. सततगामी जात्यश्वः Sy.
२०. शिशुर्जातमात्रो बालोऽपि Sy.
२१. VM. ignores ह्वार्यः॥ ह्वार्यः कुटिलमितस्ततो गन्तासि। 'ह्वृ कौटिल्ये' इत्यस्यैतद्रूपम् Sy.
२२. कारीर्यामग्नेर्धामच्छदो वैकल्पिक्यनुवाक्या 'त्वं त्या' इति। सूत्रितञ्च—'त्वं त्या चिदच्युता धामन्ते विश्वं भुवनमधिश्रितम्' (ĀSS. 2. 13.) इति Sy.
२३. हे अग्ने! त्वम् Sy. त्वमेव BB.
२४. काष्ठानि Sy. तान्यपि BB.
२५. P., D. read ताप्युतानि for तानि। अच्युतानि॥ अच्युतानि च्यावयितुमशक्यानि। अत्तीति शेषः Sy. 'अच्युता' इति प्रथमपादान्तः।....अच्युतान्यविनाशीनि BB.
२६. चिच्छब्दोऽपिशब्दसमानार्थो भिन्नक्रमः Sy.
२७. अग्ने इति पादादित्वान्न निहन्यते। हे अग्ने! BB.
२८. पशुरेव भवति सोऽपि पश्वात्मनाऽवतिष्ठते BB.

इव[1] । यवसे[2] विसृष्टः । तेजासि[3] । यथा[4] । जरावर्जित[5] ! वृक्षान्[6] । छिन्दन्ति[7] । शक्तस्य[8] ।

वेषि[9] ह्यध्वरीयतामग्ने होता[10] दमे[11] विशाम्[12] ।
समृधो[13] विश्पते कृणु[14] जुषस्व[15] हव्यमङ्गिरः[16] ॥ १० ॥

वेषि[17] हि[18] । गच्छसि[19] । हि[20] । अध्वरमिच्छताम्[21] । अग्ने ! होता[22] । गृहे[23] । मनुष्याणाम्[24] । समृद्धान्[25] । विशां[26] पते ! कृणु[27] । सेवस्व[28] । हविश्च[29] । अङ्गिर[30] !

अच्छा[31] नो मित्रमहो देव देवानग्ने वोचः सुमतिं[32] रोदस्योः[33] ।
वीहि[34] स्वस्तिं[35] सुक्षितिं[36] दिवो नृन्द्विषो[37] अंहांसि दुरिता[38] तरेम[39] ता तरेम[40] तवावसा तरेम ॥११॥

अच्छ[41] । हे मित्राणां पूजयित[42] ! अग्ने ! अस्माकम्[43] । दिवि पृथिव्या च[44] । देवान्[45] । प्रति[46] । सुमतिम्[47] । ब्रूहि[48] । कामयस्वास्मदर्थम्[49] । दिवः[50] । नेतॄन्[51] देवान्[52] । स्वस्ति[53] । सुनिवास[54] च । शत्रून्[55] । पापानि[56] । दुरितानि[57]

---

१. तत्र वृष्टान्तः । स यथा सर्वं भक्षयति तथा त्वं प्रौढकाष्ठादीनि क्षणमात्रेण वहसीत्यर्थः Sy.
२. यवसे D. घासे Sy. यथा यवसे घासे भक्षिते ...यद्वा तान्यपि त्वमेव यवसे मिश्रयसि स्थापयसि BB.
३. धामानि तेजांसि Sy. तस्मात्तवैवात्र धाम जन्म स्थानं वा, त्वमेव तत्तदात्मना जायसे तिष्ठसि वा BB.
४. यस्य 'सुपां सुलुक्०' इति षष्ठ्या लुक् Sy.
५. राजावर्जित P. हे जरारहिताग्ने ! Sy. हे अजर ! विनाशरहित ! त्वं खल्ववनाश उदकात्मना वर्षकाले जायसे अथवा तान्यप्युपसंहृत्य स्वरूपेणावतिष्ठस इति....स त्वमस्मदर्थं वर्षेति BB.
६. वननीयानि सम्भजनीयान्यरण्यानि Sy. तानि यानि वनानि BB.
७. छन्द० D. भक्षन्ति स त्वमिति पूर्वेणान्वयः Sy. वृश्चन्ति भक्षयन्ति, तानि त्वमेव भूत्वाऽद्युतानि तिष्ठन्ति BB.
८. दीप्तस्य Sy. तव शिक्वसोऽर्चींषि BB.
९. VM. ignores ह and ते ॥ तेँ तव । हेत्येतत्पादपूरणम् Sy.
This stanza=TS. 3.1.11.6.
१०. वेष P. पेष D. ११. हे अग्ने ! Sy.
१२. स्तुतिं हवींषि वा यतः कामयसे । अतः कारणात् Sy.
१३. ०तम् P. यज्ञमात्मन इच्छताम् Sy.
१४. त्वं देवानामाह्वाता सन् Sy.
१५. यजमानानाम् Sy.
१६. समिद्धिः P., D. समृद्धान् अस्मान् यजमानान् Sy. १७. विशां पालकाग्ने ! Sy.
१८. कुरु Sy. १९. अस्मदीयं हविः Sy.
२०. हविश्चागिरः P. कृत्वा च हे अङ्गनादिगुणयुक्त ! अङ्गाररूप ! वाग्ने ! Sy.
२१. अच्छः P., D.
२२. पूजपूजयितः P., D. हे अनुकूलदीप्ते ! Sy.
२३. द्यावापृथिव्योर्वर्तमानस्त्वम् Sy.
२४. यष्टव्यानिन्द्रादीन् Sy.
२५. आभिमुख्येन Sy.
२६. स्तुतिम् Sy.
२७. गमय । वेतिरत्रान्तर्भावितण्यर्थो द्रष्टव्यः Sy.
२८. स्तुतेः Sy. २९. नेतॄन् अस्मान् Sy.
३०. अविनाशम् Sy.
३१. शोभननिवासयुक्तम् Sy.
३२. वयञ्च द्वेष्टॄन् शत्रून् Sy.
३३. तत्फलरूपाणि दुर्गमनानि Sy.

च। तरेम[1]। अत्यन्तं[2] च तरेम। तव। रक्षणेन[3]। तरेम[4]।

VI.३.

अग्ने स क्षेषदृतपा ऋतेजा उरु ज्योतिर्नशते देवयुष्टे।
यं त्वं मित्रेण वरुणः सजोषा देव पासि त्यजसा मर्तमंहः॥ १॥

अग्ने[5] सः। अग्ने ! सः[6]। निवसति[7]। यज्ञस्य[8] पालयिता। यज्ञार्थं[9] जातः। विस्तीर्णम्। ज्योतिः[10]। प्राप्नोति। यस्ते[11]। देवकामयामिच्छति[12]? यः[13]। त्वम्। मित्रेण। सहितः[14]। वारयिता[15]। देव ! रक्षसि[16]। क्रोधेन[17]। मनुष्यम्[18]। आहन्तुः शत्रोः[19]।

ईजे यज्ञेभिः शशमे शमीभिर्ऋधद्वारायाग्नये ददाश।
एवा चन तं यशसामजुष्टिर्नाहो मर्तं नशते न प्रदृप्तिः॥ २॥

ईजे[21]। यजते[22]। यज्ञैः[23]। स्तौति[24] च। स्तुतिभिः[25]। समृद्धवरणीयधनाय[26]। अग्नये[27]। हविश्च[28] प्रयच्छति[29]।

---

१. अतिक्रामेम Sy.
२. द्वेष्ट्रप्रभृतीन् अत्यन्तं तरेम Sy.
३. क्षणेन P., D. उक्त एवार्थो दार्ढ्याय पुनरुच्यते। हे अग्ने ! Sy.
४. VM. ignores देव ॥ ता तानि व्यवहितानि जन्मान्तरकृतानि च पापावीनि। दानादिगुणयुक्ताग्ने ! Sy.
५. 'अग्ने स क्षेषत्' इत्यष्टर्चं तृतीयं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमाग्नेयम्। अनुक्रान्तञ्च 'अग्नेऽष्टौ' (KSA 29.3.p.22.) इति। प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः Sy.
६. यजमानः Sy.
७. क्षियति निवसति। चिरकालं जीवेदित्यर्थः Sy.
८. ऋतस्य यज्ञस्य पालकः Sy.
९. यज्ञनिमित्तं जातः Sy.
१०. जाति P., D. सूर्याख्यम् Sy.
११. उषित्वा च त्वदीयम् Sy.
१२. देवानात्मन इच्छन् Sy.
१३. यम् Sy.
१४. सह प्रीयमाणस्त्वम् Sy.
१५. वरुणः—तृतीयार्थे प्रथमा। वरुणेन च Sy.
१६. हे द्योतमानाग्ने ! Sy.
१७. स यजमान इति पूर्वत्र सम्बन्धः Sy.
१८. त्याजनसाधनेनायुधेन Sy.
१९. यजमानम् Sy.
२०. ०त्रो P. अंहसः पापात् Sy.
२१. भरद्वाजस्त्रिष्ट्वभाग्नि तुष्टाव DDN.
२२. नजे P.
२३. यो यजमानः Sy., DDN.
२४. जयते P., D. इष्टवान् भवति Sy., DDN.
२५. यज्ञे P. स यजमानः यज्ञेभिः सर्वैर्यज्ञैः Sy. स यजमानः सर्वैर्ज्योतिष्टोमादिभिः DDN.
२६. शान्तश्च भवति। आग्नेयेन यागेन सर्वं फलं लभत इत्यर्थः Sy. अग्निहोत्रहोमात्सर्वं फलं भवतीत्यर्थः। अपि च तं यजमानम् DDN.
२७. तथा कर्मभिः कृच्छ्रचान्द्रायणादिभिः Sy. तीर्थकृच्छ्रचान्द्रायणादिभिः कर्मभिः DDN.
२८. ०द्धव० P. ऋधत्समृद्धं वारं वरणीयं धनं यस्य तादृशाय Sy. ऋधत्समृद्धं वारं वरणीयं धनं यस्यासौ ऋधद्वारोऽग्निः तस्मै अग्नये DDN. २९. हवींषि Sy.
३०. ददाति Sy. प्रातराहुत्यादिना निमित्तेन ददाति DDN.

एवम्[1] । च क्रियमाणे । अन्नानाम्[2] । अपर्याप्तिः[3] । पापम् । दृप्तिरित्येतानि । न । व्याप्नुवन्ति[4] ।

सूरो न यस्य दृशतिररेपा भीमा यदेति शुचतस्त आ धीः ।
हेषस्वतः शुरुधो नायमक्तोः कुत्रा चिद्रण्वो वसतिर्वनेजाः ॥ ३ ॥

सूरो न । सूर्यः[7] । इव । यस्य[8] । दर्शनम्[9] । अपापम्[10] । यस्य च[11] । तव । दीप्ति[12] । भीमा[13] । आगच्छति[14] । दीप्यमानस्य[15] । शब्दवतः[16] । तेजसो रोधयितुः[17] । काष्ठानामङ्क्तुरग्नेः[18] । वने जातः । निवासः[19] । अयम्[20] । कुत्र[21] । चिदपि[22] । न[23] । रमणीयो भवति ।

तिग्मं चिदेम महि वर्पो अस्य भसदश्वो न यंमसान आसा ।
विजेहमानः परशुर्न जिह्वां द्रविर्न द्रावयति दारु धक्षत् ॥ ४ ॥

तिग्मं चित्[24] । तिग्मम् । खलु । अस्य[25] । गमनम्[26] । महच्च[27] । रूपं दावभूतस्य । भक्षयति[28] । अश्वः । इव ।

---

१. 'एवा चन भजा रायेo' (RPR. 8.35.) इति दीर्घः DDN.
२. यशस्विनां पुत्राणाम् Sy. यशोयुक्तानां पुत्राणां वा DDN.
३. अप्राप्तिः Sy.
४. अनर्थहेतुः प्रवर्पश्च तं न प्राप्नोति Sy. प्रदृप्तिः गर्वश्च DDN.
५. व्याप्युवo D. (नैव) प्राप्नोति । पुत्रवान् भवत्येवेत्यर्थः DDN.
६. VM. ignores तम् । न and मर्तम् ॥ अपि च तं यजमानम् Sy. तं मर्तं मनुष्यं यजमानम् ॥ तथा च महाभारते—
गजाश्वरथदानानि हेमभारशतानि च ।
गवां कोटिसहस्राणि तुल्यानि प्रातराहुतेः ॥१॥
यो दद्यात्काञ्चनं मेरुं पृथिवीं च ससागराम् ।
तत्सायंप्रातर्होमस्य तुला भवति वा न वा ॥२॥
स य एवंविधं विराट्सम्पन्नमग्निहोत्रं जुहोति सर्वान् कामानाप्नोति' (Kau. B. 2.3.) इति श्रुतेः DDN.
७. सूर्यस्य Sy.
८. अग्नेः Sy.
९. दिशम् P. दिशनम् D.
१०. पापरहितम् Sy.
११. हे अग्ने ! यस्य Sy.
१२. oप्ति P., D.
धीः धारयित्री ज्वाला Sy.
१३. भिमा P. भयङ्करा सती Sy.
१४. समन्तात् गच्छति Sy.
१५. ज्वलतः Sy.
१६. योऽयमग्निः शब्दयुक्ताः Sy.
१७. धयितुः P. शुचः शोकस्य रोधयित्रीर्गाश्च Sy.
१८. अक्तुरिति रात्रिनाम (Ngh. 1.7.) । तेन च तत्र सञ्चारी राक्षसमविलंक्ष्यते राक्षसावेः स्वभूता । ददातीति शेषः Sy.
१९. अरण्ये जायमानः Sy.
२०. सोऽयं सर्वेषामावासभूतः Sy.
२१. oसायायां P. oसायं D.
२२. क्वचिदेव स्थाने पर्वताग्रादौ Sy.
२३. Omitted by D.
२४. तीक्ष्णं स्प्रष्टुमशक्यत्वात् Sy.
२५. अग्नेः Sy.
२६. एम गमनभूतो मार्गः Sy.
२७. प्रभूतम् Sy.
२८. दीप्यते । 'भस भर्त्सनदीप्त्योः' इति धातुः Sy.

यच्छन्[1] । आस्येन । विगमयन्[2] । परशुः[3] । इव । अस्य ज्वालाम्[4] । क्षेत्ता[5] । इव । गमयति । दारु[6] । दहन् ।

स इदस्तेव[7] प्रति धादसिष्यञ्छिशीत[8] तेजोऽयसो[9] न धाराम् ।
चित्रध्रजतिररतिर्यो[10] अक्तोर्वेर्न[11] द्रुषद्वा[12] रघुपत्मजंहाः ॥ ५ ॥

स इत् । सोऽग्निः । वर्धेव[13] । शरान् । क्षेप्स्यन्[14] । प्रतिदधाति तेजः । तीक्ष्णीकरोति[15] । तेजः । परशोः[16] । इव । धाराम् । चित्रगमनः[17] । अभिगन्ता[18] । यः । रात्रेः । पक्षी । इव । द्रुम प्रति गच्छन्[19] । शीघ्रगमनजङ्घः[20] ।

स ईं[21] रेभो न प्रति वस्त उस्राः शोचिषा रारपीति मित्रमहाः ।
नक्तं य ईमरुषो यो दिवा[22] नृनमर्त्यो अरुषो यो दिवा[23] नृन् ॥ ६ ॥

स ईम्[24] । सः । अयम्[25] । ज्वालाः[26] । आच्छादयति । वन्दी[27] । इव वस्त्राणि सङ्घ प्रविशन् । तेजसा । अत्यन्त[28] शब्द करोति । मित्राणां पूजनीयः[29] । रात्रौ । यः । अयम्[30] । दीप्यमानो भवति । यो वा । दिवा । नेतृन्[31] देवान् । अमर्त्यः[32] । आरोचमानो[33] यज्ञं प्रति नयतीति[34] ।

---

१. तृणादिकं नियच्छन् Sy.
२. तरुगुल्मादौ प्रक्षिपन् Sy.
३. यथा परशुः स्वकीयां धारां काष्ठे प्रक्षिपति तथा Sy.
४. स्वकीयां ज्वालाम् Sy.
५. द्रविद्रावयिता स्वर्णकारः । स यथा स्वर्णादिकं द्रावयति तथा सर्वं वनं द्रावयति मूर्तभूतं भस्मसात्करोतीत्यर्थः Sy.
६. काष्ठम् Sy.
७. वर्धेव P. वद्धेव D. बाणादेः क्षेप्तेव Sy.
८. प्रतिधाय च ज्वालां प्रक्षेप्स्यन् Sy.
९. स्वकीयज्वालां प्रतिधत्ते । यथा धन्वी लक्ष्याभिमुख्येन बाणं सन्धत्ते तथा ज्वालां सन्धत्त इत्यर्थः Sy.
१०. निश्यति । तीक्ष्णीकरोति Sy.
११. तत्र दृष्टान्तः । यथाऽयोमयस्य परश्वादेर्धारां प्रक्षेप्तुकामस्तीक्ष्णीकरोति तद्वत् Sy.
१२. तीक्ष्णीकृत्य च विचित्रगतिः Sy.
१३. अभि is omitted by D.
१४. वृक्षेषु सीदन् Sy.
१५. लघुपतनसमर्थपादः । एवम्भूतः सन् योऽग्निर्वर्तते स इति पूर्वत्रान्वयः Sy.
१६. VM. ignores इत् ॥ इत् खलु Sy.
१७. ई P., D.
१८. ०य P., D. अग्निः Sy.
१९. दीप्ता ज्वालाः Sy.
२०. स्तुत्यः सूर्यः Sy.
२१. भृशं शब्दं करोति Sy.
२२. मित्रौणां P.
२३. ०यौ D. सर्वेषामनुकूलप्रकाशः सन् Sy.
२४. अग्निः Sy.
२५. आरोचमानः सन् Sy.
२६. पुनर्यच्छब्दः पूरकः Sy.
२७. देवा P., D. अहनीव Sy.
२८. मनुष्यान् स्वस्वकार्ये प्रेरयति । यः अग्निः दिवा द्योतमानेन तेजसा नेतृनात्मीयान्रश्मीन् प्रेरयति स इति पूर्वत्र सम्बन्धः । यद्वा नक्तं रात्रौ योऽयमग्निररुष आरोचमानो यश्च मरणरहितोऽग्निर्दिवाह्नि नृन् नेतृन् देवान् हविर्भिः संयोजयति ।
२९. तथा अमरणधर्मा Sy.
३०. आरोचमानः रोषरहितो वा Sy.
३१. VM. ignores यः । दिवा and नृन् ॥ यो दिवा नृनिति पुनरुक्तिरादरार्था Sy.

दिवो न यस्य विधतो नवींनोद्धृषा रुक्ष ओषधीषु नूनोत् ।
घृणा न यो ध्रजसा पत्मना यन्ना रोदसी वसुना दं सुपत्नी ॥ ७ ॥

दिवो[1] न । द्युलोकस्य[2] । इव । यस्य[3] । देवान् परिचरतो[4] महत्वम्[5] । स्तोता स्तौति[6] । स वृषाग्निः[7] । दीप्तः । ओषधीषु[8] । शब्दं करोति[9] । तेजसा[10] । वेगेन[11] । च । सह यः । मार्गेण[12] च । गच्छन्[13] । आपूरयति[14] । शोभनपतिके । द्यावापृथिवी[15] । मदयिता[16] । वासयितृणा[17] तेजसाम्[18] ।

धायोभिर्या यो युज्येभिरर्कैर्विद्युन्न दंविद्योत्स्वेभिः शुष्मैः ।
शर्धो वा यो मरुतां ततक्ष ऋष्वो न त्वेषो रंभसानो अद्यौत् ॥ ८ ॥

धायोभिः[21] । धारकैः[22] । इव मित्रैः । योऽग्निः[23] । अर्चनीयैः[24] । तेजोभिर्युक्तः सः । विद्युत् । इव । विद्योतते । स्वैः[25] । शोषकैस्तेजोभिः । यश्च । मरुताम्[26] । अपि[27] । बलम् । करोति[28] । स आदित्यः[29] । इव । दीप्तः । बलमाचरन्[30] । द्योतते[31] ।

---

१. नः P.
२. दीप्तस्य सूर्यस्य Sy.
३. अग्नेः Sy.
४. विधातू रश्मीकुर्वतः Sy.
५. ०त्वम् is suggested for ०त्वम् ।
६. भृशं शब्दोऽभूत् । एतदेव व्याचष्टे Sy.
७. कामानां वर्षिता Sy.
८. ०ग्नि P. ०ग्निः D.
९. ओषधीषु वह्यमानासु Sy.
१०. भृशं शब्दमकरोत् Sy.
११. सञ्चलनशीलेन दीप्तेन Sy.
१२. गमनशीलेन तेजसा Sy.
१३. इव Sy.
१४. इतस्ततः उत्पतता Sy.
१५. गच्छन् वर्तते सोऽग्निः Sy.
१६. आपूरयति Sy.
१७. द्यावापृथिव्यौ Sy.
१८. वमिता D. वमयिता is suggested for मदयिता ॥ अस्मच्छत्रून् वमयन् Sy.
१९. वासयितृणा is suggested for वासयितृणाम् ।
२०. धनेन Sy.
तेजसा is suggested for तेजसाम् ॥
२१. धारयोभिः P. धारयाभिः D.
२२. धारकैरश्वैः Sy.
२३. दीप्तिभिर्गच्छति सोऽग्निः Sy.
२४. ०भियु० P. स्वयमेव युज्यमानैः Sy.
२५. स्वकीयैः Sy.
२६. मरुताम् एतत्संज्ञकानां देवानाम् Sy.
२७. वा इव Sy.
२८. तनूकरोति, सर्वं तीक्ष्णीकरोति । शोषयतीति यावत् Sy.
२९. सोऽयमभुः उरु भासमानः सूर्यः Sy.
३०. वेगं कुर्वन् Sy.
३१. विद्योतते प्रकाशते Sy.

VI.4.

यथा होतर्मनुषो देवताता यज्ञेभिः सूनो सहसो यजासि ।
एवा नो अद्य समना समानानुशन्नग्न उशतो यक्षि देवान् ॥ १ ॥

यथा होतः । यथा । होतः ! पुरा । मनुषः । यज्ञे देवान् । हविर्भिः । हे सहसः, पुत्र ! अयजः । एवम् । अस्माकम् । अद्य यज्ञे । समानकालीनान् । कामयमानस्त्वम् । अग्ने ! यज । देवान् ।

स नो विभावा चक्षणिर्न वस्तोरग्निर्वन्दारु वेद्यश्नो धात् ।
विश्वायुर्यो अमृतो मर्त्येषूषर्भुद्भूदतिथिर्जातवेदाः ॥ २ ॥

सः नः । दीप्तिमान् । आदित्य । इव । अह्नि । अग्निः । वन्दनीयम् । अन्नम् । दधातु । विदितः । सर्वान्नः । यः । अमरणधर्मा । मनुष्येषु । उषसि बुध्यमानः । भवति । अतिथिः । जातप्रज्ञः ।

द्यावो न यस्य पनयन्त्यभ्वं भासांसि वस्ते सूर्यो न शुक्रः ।
वि य इनोत्यजरः पावकोऽश्नस्य चिच्छिश्नथत्पूर्व्याणि ॥ ३ ॥

द्यावः । दीप्ता देवाः । च । यस्य । स्तुवन्ति । महत्वम् । सः तेजांसि । आच्छादयति । सूर्यः ।

---

१. 'यथा होतः' इत्यष्टर्चं चतुर्थं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमाग्नेयम् । 'यथा होतः' (KSA. 29. 4.p.22.) इत्यनुक्रान्तम् प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः Sy.
२. येन प्रकारेण Sy. ३. हे देवानामाह्वातः ! Sy.
४. मा० P. मनोः प्रजापतेर्यजमानस्य Sy.
५. देवताता इति यज्ञनाम Ngh. 3.17.
६. ०भि P. यजमानसाधनैर्हविर्भिः Sy.
७. बलस्य Sy. ८. पुत्र ! अग्ने ! Sy.
९. देवान् यजसि Sy.
१०. अत्र D. अस्मिन् यज्ञे Sy.
११. स्वत्संवृशानिन्द्रादीन् Sy.
१२. ०वान् न D. यष्टव्यान् देवान् Sy.
१३. VM. ignores समना and उशतः ॥ समना क्षिप्रम् । यद्वा समानं मन्यन्तेऽस्मिन् देवानिति समनो यज्ञः । तस्मिन्निति योज्यम् । उशतः कामयमानान् Sy.
१४. वः P. १५. विशेषेण दीप्यमानः Sy.
१६. प्रकाशकः सूर्यः Sy.
१७. अहनि Sy.
१८. इव ह्लयर्व० P. स्तुत्यम् Sy.
१९. ०न्न P. २०. प्रयच्छत्वित्यर्थः Sy.
२१. सर्वैर्ज्ञातिव्यो लम्भनीयो वा Sy.
२२. सर्वान्नः सर्वेषां जीवनहेतुर्वा Sy.
२३. अग्निः Sy. २४. मरणरहितः Sy.
२५. मनुष्येषु यजमानेषु Sy.
२६. उषःकालेऽग्निहोत्रहोमार्थं प्रबुद्धो भवति स इति पूर्वत्रान्वयः Sy.
२७. हविर्वहनाय सततगामी Sy.
२८. जातानां वेदिता जातधनो वा Sy.
२९. VM. ignores सः and नः ॥ सः अग्निः । नः अस्मभ्यम् Sy. ३०. Omitted by P.
३१. स्तोतारः Sy.
३२. ०वश्च P. नेति सम्प्रत्यर्थे । सम्प्रतीदानीम् Sy. अस्त्युपमार्थस्य सम्प्रत्यर्थे प्रयोगः N.7.31.
३३. अग्नेः Sy.
३४. ०त्स्वम् is suggested for ०त्स्वम् ॥ महत्कर्म Sy. ३५. अग्निः Sy.

इव। दीप्यमानः[1]। विविधम्[2]। यः। गच्छति[3]। अजरः[4]। पावकः[5], प्रीणयति[6] वा। सः[7] मेघस्य[8]। अपि। इनथति[9]। चिरन्तनान्युदकानि[10]।

वघ्रा हि सूनो अस्यघ्रसद्वा चक्रे अग्निर्जनुषाज्मान्नम्।
स त्वं नं ऊर्जसन ऊर्जं धा राजेव जेरवृके क्षेष्यन्तः॥ ४॥

वघ्रा[11] हि। वदिता। हि। हे सहसः सूनो[12]! भवसि त्वम्। अघ्नेषु[13] सीदन्। अथ परोक्षः[14], करोति[15]। अघ्नम्[16]। जन्मना[17]। अभिगन्तव्यम्[18]। सः[19]। त्वम्। अस्मभ्यम्। अघ्नस्य[20] दातः! अघ्नम्[21]। धेहि[22]। राजेव[23]।

---

१. शुक्लवर्णः सन् Sy.
२. भासा सर्वं व्याप्नोति Sy.
३. जरारहितः Sy.
४. सर्वस्य शोधकोऽग्निः Sy.
५. प्रीणयति should immediately follow गच्छति and precede अजरः।
६. अयम् Sy.
७. व्यापनशीलस्य राक्षसादेः Sy.
८. ०थाति D. हिनस्ति। 'इनथ क्नथ हिंसायाम्' इति धातुः Sy.
९. ०रस्त० P.
चिरन्तनानि पुराणि Sy.
१०. विद्वा P.
११. वदनीयः स्तुत्योऽसि Sy. स त्वं वघ्रासि, वदत्यनयेति वघ्रा वाक्, त्वं वागिन्द्रियम्। तस्यापि कारणं प्राणो वा त्वया हि सर्वे वदन्ति। असीत्यस्य 'हि च' इति निघातप्रतिषेधः। वघ्राशब्द उञ्छादिषु द्रष्टव्यः BB.
१२. हे सूनो! सहसः पुत्र! यद्वा 'षू प्रेरणे' सर्वस्य प्रेरकाग्ने Sy. हे सूनो पुत्र! कस्य? सहसो यजमानस्य वा। यद्वा पुत्रवत्सर्वेषामभिमतकारिन्! सूनुवत् सूनुः, उपचारपदं वा। अथवा सोता सूनुः सर्वस्योत्पादकः। सूतेः 'सुवः कित्' इति नुप्रत्ययः BB.
१३. अघ्नस्वदनीयेषु हविःषु सीदन् हविःस्वीकरणायोपविशन्नग्निः Sy.
पुनश्चाग्निर्विशेष्यते। अघ्नसद्वा, अद्यत इत्यघ्रा अघ्नम्। अदेर्मनिन् प्रत्ययः। अघ्नानि सीदन्तीत्यघ्नसद्वा।...'सोऽग्रभुग्विभजंस्तिष्ठन्नाहारमजरः कविः' इति जन्तूनां स्थितिहेतुत्वेन प्रवर्तक इत्यर्थः। यद्वा हवीरूपेऽघ्ने प्राणिनां स्थित्यर्थमेव त्वं सीदसीति। यस्मादेवमत एव खलु, अग्निर्भगवान् BB.
१४. परः पावः परोक्षकृतः Sy.
१५. चक्र उत्पादितवान्। मध्यमस्य वा प्रथमव्यत्ययः BB.
१६. अज्मेति गृहनाम। Ngh. 3.4. गृहमन्नं च यजमानानाम् Sy.
१७. स्वभावत एव Sy. जायमान एव BB.
१८. कीदृशमन्नम्? अज्म, अजन्त्येतत्सर्वेऽपि भोक्तृत्वेनेत्यज्म, सर्वाभिलषितमित्यर्थः। अजेर्मनिन् BB.
१९. तादृशः Sy. यस्मादेवं त्वं सर्वेषां प्राणभूतोऽसि प्राणस्य च स्थित्यर्थमन्नमुत्पादितवान्, तस्मात्स तादृग्विधस्त्वम् BB.
२०. ऊर्जस्यान्नस्य दातः अग्ने! Sy. ऊर्जसोऽन्नस्य दाता सम्भक्ता वा।....पृषोदरादित्वाद् व्यञ्जनस्य लोपः। यद्वा ऊर्जा रसेन तद्वतां रसवतामन्नादीनां दातः! ऊर्क्शब्दान्मत्वर्थीयोऽकारः BB.
२१. अन्नं रसं वा BB.
२२. दातारन्धेहि P. देहि Sy.
२३. पुनरपि प्रार्थितस्य शीघ्रप्रदानार्थं प्ररोचयन् स्तौति। हे अग्ने! राजेव जेः, यथा राजा सन्निधिमात्रेणानायासेन शत्रुं जयत्येवम् BB.

शत्रून्[1] जय[2]। स्तेनरहिते[3] गृहे। अन्त[4]। निवसेति[5]।

नितिंक्ति[6] यो वारणमन्नमत्ति[7] वायुर्न[8] राष्ट्र्यत्येत्यक्तून्[9]।
तुर्याम[10] यस्तं आदिशामरातीरत्यो न ह्रुतः[11] पतंतः परिह्रुत्[12] ॥ ५ ॥

नितिक्ति[13]। मन्त्रेण संस्कृतम्[14]। यं[15]। वरणीयम्[16]। अन्नम्[17]। अत्ति[18]। सं[19] वायु। इव। राष्ट्रवान्[20]। अतिगच्छति[21]। तमांसि[22] शत्रून् वा। तरेमातितरेमाभियान्ति। तुभ्यम्[23]। आभिमुख्येन हवींषि दिशतामस्माकम्। अरातीश्च[24]। इव। हिंसितं[25]। अभिगच्छत[26] सैनिकान्। सर्वतो हिंसिता[27][28]।

आ सूर्यो न भानुमद्भिरर्कैरग्ने ततन्थ[29] रोदसी वि भासा।
चित्रो नयत्परि तमांस्यक्तः शोचिषा पत्मन्नौशिजो न दीयन्[30] ॥ ६ ॥

आ सूर्यः। आततन्थ[31]। सूर्य[32]। इव। दीप्तिमद्भिस्तेजोभि[33]। अग्ने[34]। द्यावापृथिवी[35]। तेजसा[36]।

---

१. अस्मच्छत्रून् Sy.
२. त्वं शत्रुं जयसि BB.
३. एतत्सर्वार्थमवके राक्षसादिभिर्बाधकैर्वियुक्तेऽस्मदीयेऽन्यागारे Sy. वृकाः हिंसकाः कामक्रोधादयः, तद्रहिते पुरुषे स्वात्मनिरते BB.
४. Omitted by P. मध्ये Sy. मध्ये तवीये हृदये BB.
५. क्षयसि निवससि तमनुगृहीतुम्। 'क्षि निवासगत्योः' पूर्ववच्छपो लुक्। स त्वं यजमानमन्नवन्तं कुर्विति BB.
६. VM. ignores अग्निः ॥
This stanza=TS.1.3.14.7.
७. निश्यति तीक्ष्णीकरोति। 'तिज निशाने' इति धातुः Sy.
८. अग्निः Sy.
९. तमसां निवारकं स्वकीयं तेजः Sy.
१०. यश्च अन्नं यष्टृभिर्दीयमानं हविर्लक्षणम् Sy.
११. भक्षयति। तथा च श्रूयते 'अन्नादो वा एषोऽग्नपतिर्यदग्निः' (AB. 1.8) इति Sy.
१२. ष्टुवान् P. अष्ट्रवान् D. राष्ट्रं राज्यं तद्वान्। वायुर्यथा स्वमाहात्म्येन सर्वमीष्टे तद्वत्। सर्वस्येश्वर इत्यर्थः। तादृशः सन् Sy. राष्ट्रीति ईश्वरनाम Ngh. 2.22.
१३. अतिक्रामति तद्गतमन्धकारं तिरस्करोतीत्यर्थः Sy.
१४. रात्रीः Sy.
१५. वयञ्च त्वत्प्रसादात् तुर्याम तं हिंस्याम यो जनः Sy.
१६. ०न्तिस्तु० P., D.
१७. तुभ्यमादिश्यमानानां दीयमानानां हविषाम् Sy.
१८. अरातिरदाता। छान्दसो दीर्घः। यद्वा अरातीर्धनस्यादातॄन्। ते त्वां प्रत्यादिशामावेष्टृणामाचक्षाणानामस्माकं यो जनः विरोधी तं हिंस्याम Sy.
१९. हिंसतः P. हिंसकान् Sy.
२०. आभिमुख्येन गच्छतः शत्रून् Sy.
२१. ०ताः P. परिगत्य हन्ता भव। ह्वरतेर्हिंसार्थस्येदं रूपम् Sy.
२२. VM. ignores अत्यः ॥ अत्यः शीघ्रगामी जात्यश्व इव Sy.
२३. ०न्ध P. ०न्धे D. विशेषेणाच्छादयसि Sy.
२४. तत्र दृष्टान्तः। यथा सूर्यं आततनोति तद्वत् Sy.
२५. प्रभावद्भिः Sy.
२६. ०ग्नं D. अर्चनीयैः किरणैः Sy.
२७. द्यावापृथिव्यौ Sy.
२८. दीप्त्या Sy.

परोक्षः[1] शेषः—चित्रवर्णः[2]। परितो[3] नयति[4] विनाशयति। तमांसि[5]। हविर्भिरक्तः[6]। तेजसा। दिवि गच्छन्[7]। स्तोतॄणां[8] कामानाम्। प्रदाता[9]। इव[10]।

त्वां हि मन्द्रतममर्कशोकैर्ववृमहे महि नः श्रोष्यग्ने।
इन्द्रं न त्वा शवसा देवता वायुं पृणन्ति राधसा नृतमाः॥ ७॥

त्वां[11] हि। त्वाम्[12]। हि। स्तुत्यतमम्[13]। अर्चनीयैस्तेजोभि[14]। भजामहे[15]। महत्[16]। स्तोत्रमस्माकम्[17]। शृणोषि[18] हि। अग्ने[19]! त्वाम्। इन्द्रः[20]। इव[21]। बलेन[22]। देवता[23]। गन्तारम्[24]। पूरयन्ति[25]।

---

१. परोऽर्धर्चः परोक्षकृतः Sy.
२. चायनीयोऽग्निः Sy.
३. परिणयति। परितो गमयति सर्वस्मादपि दिग्भागाग्निवर्तयतीत्यर्थः Sy.
४. नैशान्यन्धकाराणि Sy. ५. संश्लिष्टः Sy.
६. It seems to be the explanation of पत्मन्॥ पतत्यस्मिन्निति पत्म मार्गः। तस्मिन् Sy. ७. उशिजः स्तोतारः। स्तुत्यतया तत्सम्बध्यौशिजः सूर्यः! स इव Sy.
८. It seems to be the explanation of दीयन्॥ गच्छन् Sy.
९. VM. ignores अग्ने।
१०. त्वं P. बार्हस्पत्यस्य भरद्वाजस्यार्षम् Dur. भरद्वाजस्यार्षम् SKN.
११. यस्मात् Sy., Mah. एव U., Dur. हिर्यस्मादर्थे। यस्मात् SKN.
१२. त्यत० P. अतिगम्भीरम् Mah. मन्वनीयतमं मृदुहृदयं वा U. मृदुतमं सुखाराध्यतमम् Dur. अतिशयेन स्तुत्यम् SKN.
१३. ०नीयस्ते० P. अर्चनीयैः पूजनीयैः शोकैर्दीप्तिभिर्युक्तम् Sy. अर्कवच्छोचन्तेऽर्कशोका मन्त्रास्तैरविप्लुतब्रह्मचर्यैः। यथोक्तमधीता मन्त्रा अर्कवद् दीप्ताः स्युः Mah. मन्त्रैर्दीप्तैः यथोक्तस्थानकर्णानुप्रदानवद्भिः देवताद्यात्मविज्ञसन्तानगर्भगुरुशुश्रूषाधिगताविप्लावितब्रह्मचर्यैः। एवं हि मन्त्रा दीप्ताः स्युः U. एकपदमेतत्। अर्चनैर्मन्त्रैः शोकैर्दीप्तैर्यथोक्तब्रह्मचर्यजनितवीर्यैः Dur. अर्को मन्त्रः शोको दीप्तिः। अर्काश्च ते शोकाश्चार्कशोकास्तैः स्वदीप्त्या दीप्तैर्मन्त्रैरित्यर्थः SKN.
१४. वृणीमहे। सम्भजामहे। यद्वा अर्कशोकैरर्चनीयैः प्रशस्यैर्दीप्तिकरणैः स्तोत्रैः साधनभूतैस्त्वां सम्भजामहे। तस्मात् Sy. वबृमहे वृतवन्तः Mah. वृतवन्तो वयम् U. त्वं हि देवेषु सर्वेषु मृदुहृदयतमो यतोऽतस्त्वामेव. .सम्भजामहे Dur. सम्भजामहे नित्यं स्तुम इत्यर्थः SKN.
१५. महत्स्तोत्रं तैरेव मन्त्रैर्युष्मद्गुणानुस्मृतिसन्तानगर्भैरुपग्रथितम् Dur. यस्मादिति श्रुतेस्तस्मादित्यध्याहार्यम्। तस्मान्महि महत्स्तुतिरूपम् SKN. १६. अस्मदीयम् Sy. अतस्त्वं भज्यमानस्तैर्मन्त्रैः संसेव्यमानो नोऽस्माकम् Dur.
१७. शृणु Sy. शृणोषि। विकरणव्यत्ययः Mah. श्रुत्वा च प्रभावयसि कर्म U. शृणु Dur., SKN. १८. त्वं च वृतः सन् U.
१९. इन्द्रम् Sy. इन्द्रमिव वायुमिव च स्थितम् Mah. कतम उच्यते? इन्द्रमिव Dur., SKN.
२०. VM. seems to take इन्द्रम् as इन्द्रः।
२१. न इवार्थे। उभयोः सम्बध्यते Mah. उपमार्थीयो नकारः U. २२. बलवतीभिः स्तुतिभिरभ्यर्चन्ति। किं पुनः स्वैः कर्मभिः Dur. शव इति बलनाम (Ngh. 2.9.) अन्तर्हितमत्वर्थं चेह द्रष्टव्यम्। बलवता सारवतेत्यर्थः SKN.
२३. ०ता D. देवतात्मानं त्वाम्। देवताशब्दाद् द्वितीयायाः 'सुपां सुलुक्०' इति लुक् Sy.
२४. यद्वा वायुमिव शवसा युक्तम् Sy. लुप्तोपममेतत्। वायुसदृशम् SKN.
२५. प्रीणयन्ति Sy. वायुमिव च पूरयन्ति U. तेऽपि च त्वामेव पृणन्ति पालयन्ति पूरयन्ति वा Dur. प्रीणयन्ति SKN.

नेतृतमाः[1]। अग्ने[2]।

नू नो अग्नेऽवृकेभिः स्वस्ति वेषि रायः पथिभिः पर्ष्यंहः।
ता सूरिभ्यो गृणते रासि सुम्नं मदेम शतहिमाः सुवीराः॥ ८॥

नू[3] नः[4]। क्षिप्रम्। अस्माकम्[5]। अस्तेनैः[6]। पथिभिरागत्य। अविनाशेन[7]। धनानि। कामयस्व[8]। पर्षि[9]। रक्षः सः[10]। देवेभ्यः[11]। स्तुवते मह्यम्[12]। सुखम्[13]। प्रयच्छ[14]। मोदेम[15]। शतसंवत्सराः[16]। सुपुत्राः[17]।[18]

VI.5.

हुवे वः सूनुं सहसो युवानमद्रोघवाचं मतिभिर्यविष्ठम्।
य इन्वति द्रविणानि प्रचेता विश्ववाराणि पुरुवारो अध्रुक्॥ १॥

हुवे[19] वः सूनुम्। ह्वयामि[20]। युष्माकम्[21]। सहसः[22]। सूनुम्[23]। युवानम्[24]। अहिंसितवाचम्[25]। स्तुतिभिः[26]।

---

१. हे अग्ने ! नूतमाः स्तुतीनां नेतृतमा ऋत्विजः Sy. मनुष्यश्रेष्ठाः Mah. मनुष्यतमाः U. येऽपि च केचिदन्ये त्रिलोके नृणां मध्ये बलधनश्रुतैर्नूतमाः Dur. प्रकृष्टनराः SKN.

२. हविर्लक्षणेन धनेन Sy. हवीरूपेणान्नेन Mah. हविर्लक्षणेन धनेन U. हविर्लक्षणेन धनेन। एवं सदेवमनुष्यस्य जगतः पूज्यस्त्वं न केवलमस्माकमिति Dur. धनेन हविर्लक्षणेन SKN. अथापि यज्ञे दैवतेन बहवः प्रदेशा भवन्ति। तदेतेनोपेक्षितव्यम्। ते चेद् ब्रूयुर्लिङ्गमत्र स्म इति। 'इन्द्रं न त्वा शवसा देवता वायुं पृणन्ति'। इति। वायुलिङ्गं चेन्नलिङ्गं चाग्नेये मन्त्रे N. 1.17.SKN. I. 108.

३. नाः P.

४. हे अग्ने ! Sy.

५. ०क P. अस्मान् Sy.

६. स्तेनैः P., D. वृकाः स्तेनाः। तद्रहितैः Sy.

७. ०रग० P., D. मार्गैः Sy.

८. अविनाविनाशेन P. क्षेमेण Sy.

९. वेषि गमय प्रापय Sy.

१०. पर्षी P. वषि D. उक्तलक्षणैर्मार्गैः पारय चास्मान् Sy.

११. सत् D. रक्षसः or राक्षसात् is suggested for रक्षःसः॥ पापात् Sy.

१२. देव्यभ्यः P. यानि त्वया स्तोतृभ्यः देयानि Sy.

१३. सुम्नानि सुखानि Sy.

१४. देहि Sy.

१५. हृष्याम Sy.

१६. वयं च शतं हेमन्तान् संवत्सरान् Sy.

१७. संपु० P. वीर्याज्जायन्त इति वीराः पुत्रादयः। शोभनपुत्रपौत्रादिसहिताः सन्तः Sy.

१८. VM. ignores अग्ने and ता॥ ता तानि Sy.

१९. 'हुवे वः' इति सप्तर्चं पञ्चमं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमाग्नेयम्। तथा चानुक्रम्यते 'हुवे (वः) सप्त' (KSA.29.5.p.22.) इति। प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः Sy.

२०. ह्वायत्यमि P. आह्वयामि Sy.

२१. वः, व्यत्ययेन बहुवचनम्। त्वाम् Sy.

२२. बलस्य Sy.

२३. पुत्रम्। अग्निर्हि बलेन मथ्यमानो जायते Sy.

२४. नित्यतरुणं फलस्य मिश्रयितारं वा Sy.

२५. अद्रोग्धव्या प्रशस्ता स्तुतिरूपा वाक् यस्मिन् प्रयुज्यते तादृशम् Sy.

२६. मननीयैः स्तोत्रैः Sy.

युवतमम् । यः । प्रयच्छति । धनानि । सुमतिः । सर्ववरणीयानि । बहुभिर्वरणीयः । अद्रोघा ।

त्वे वसूनि पुर्वणीक होतर्दोषा वस्तोरेरिरे यज्ञियासः ।
क्षामेव विश्वा भुवनानि यस्मिन्त्सं सौभगानि दधिरे पावके ॥ २ ॥

त्वे वसूनि । त्वयि । धनानि । बहुरश्म्यनीक ! ह्वात. । अह्नि । रात्रौ च स्थितानि । आभिमुख्येन प्रापयन्ति । यज्ञमानाः । क्षीणानीव भूतानि । आढ्ये विश्वानि । भूतानि । सन्दधिरे । यस्मिन् । पावके । वसूनि ।

त्वं विक्षु प्रदिवः सीद आसु क्रत्वा रथीरभवो वार्याणाम् ।
अतं इनोषि विधते चिकित्वो व्यानुषग्जातवेदो वसूनि ॥ ३ ॥

त्वं विक्षु । त्वम् । मनुष्येषु । पुराण. । सीदसि । कर्मणा । रथी च । भवसि । धनाना नेता ।

---

१. युवमं P., D. अतिशयेन युवानम् Sy.
२. अग्निः Sy.
३. प्रेरयति स्तोतृभ्यो ददातीति यावत् । तं त्वां हुव इति पूर्वत्र सम्बन्धः Sy.
४. प्रकृष्टज्ञानः Sy.
५. सर्ववरणीयानि सम्भजनीयानि प्रशस्यानि Sy.
६. पुरुभिर्बहुभिर्वरणीयः सम्भजनीयः Sy.
७. ०णीयानिद्रो० P., D. अद्रोग्धा यजमानानामेवम्भूतः Sy. ८. त्वयि खलु BB.
९. हविर्लक्षणानि धनानि Sy. वासहेतुत्वाद्वरिष्ठानि वा धनानि हविर्लक्षणानि BB.
१०. ०रश्यनिकं P. ०कं D. हे बहुज्वाल ! Sy. बहुबल ! BB.
११. देवानामाह्वातः ! अग्ने ! Sy.,BB.
१२. अहनि Sy.
१३. ०न्ती D. आभिमुख्येन प्रेरयन्ति । प्रापयन्ति । जुह्वतीत्यर्थः Sy. प्रक्षिपन्तीत्यर्थः BB.
१४. यज्ञार्हा यजमानाः Sy. यज्ञार्हाः BB.
१५. दक्षिणा० P. क्षमायां भूम्यामिव Sy. त्वंवनुग्रहात्पूर्वं किमिवावस्थितानीति चेत् ? उच्यते—क्षामेव क्षामं क्षीणं दग्धबहुलमस्माकं शत्रुबलं (बलेन) यादृशं बलं, पूर्वापरजनमरणं वा यादृशं, गृहं वा दग्धं यादृशं तदिव पूर्वमसुभगानि भुवनानि त्वत्प्रसादेन सुभगानि भवन्तीति । तस्मादस्माकं शत्रुबलं पूर्वापरमरणं गृहदाहं च शमयित्वा सुभगानस्मान्कुरु श्रीमतो यशस्विनश्च कुरु BB.
१६. सर्वाणि Sy., BB.
१७. भूतजातानि Sy.
१८. देवाः सम्यग्निहितवन्तः । 'अग्नौ वामं वसु संन्यदधत' (TS.1.5.1.1.) इति ब्राह्मणम् । तस्मिंस्त्वयीति पूर्वत्र योज्यम् Sy. सम्यग् धारयन्ति BB.
१९. शोधकेऽग्नौ Sy. पावके त्वयि सति BB.
२०. धनानि Sy. सौभाग्यानि BB.
This stanza=TS. 1.3.14.2.
२१. हे अग्ने ! Sy. २२. प्रजासु Sy.
२३. ०ण P. पुरातनकालीनासु Sy. प्रदिव इति पुराणनाम Ngh. 3.27.
२४. वैश्वानरात्मना वर्तसे Sy.
२५. तथात्मीयेन कर्मणा Sy.
२६. रथिश्च P. रंहयिता यजमानेभ्यः प्रापयिता Sy. २७. अभवः Sy.
२८. वरणीयानां धनानाम् Sy.
२९. नेता seems to be the explanation of रथीः ॥

[1]अत आदाय । [2]प्रयच्छसि । परि[3]चरते । [4]ज्ञातः ! विविधमनुषक्तम् । जातधन ! [5]वसूनि । [6]

योंं नुः सनुत्यो अभिदासदग्ने यो अन्तरो मित्रमहो वनुष्यात् ।
तमजरेभिर्वृषभिस्तव स्वैस्तपा तपिष्ठ तपसा तपस्वान् ॥ ४ ॥

[7]यो नः [10]सनुत्यः । [11]यः । अस्मान् । अन्तर्हिते देशे दूरे वर्तमानः । [12]अभिदासति । अग्ने ! [13]बाधते । [14]यः । समीपस्थः । मित्राणां पूजयितः ! [15]हन्ति । [16]तम् । जरारहितैः । [17]वर्षितृभिः । तव । स्वभूतैस्तेजोभिः । [18]तप । [19]तप्ततम ! तेजसाम् । [20]तपसा । सन्तापवान् ।

यस्ते यज्ञेन समिधा य उक्थैरर्केभिः सूनो सहसो ददाशत् ।
स मर्त्येष्वमृत प्रचेता राया द्युम्नेन श्रवसा वि भाति ॥ ५ ॥

यस्ते यज्ञेन । [21]यः । [22]तुभ्यम् । [23]यज्ञेन । [24]समिधा । [25]दान करोति । [26]यश्च । स्तोत्रशस्त्रैः । [27]सहसः, [28]सूनो ! [29]सः । मनुष्येषु । [30]अमृत ! प्रकृष्टज्ञानः । धनेन । [31]अन्नेन । [32]कीर्त्या च । विभाति । [33]

---

१. नेतः त P. २. विविधं प्रेरयसि Sy.
३. परिचरते यजमानाय Sy.
४. अतः कारणात् हे विद्वन् ! Sy.
५. सततं यथा भवति तथा वीनोषि विविधं प्रेरयसि Sy. ६. ज्ञातुधनं P. ०नं D. जातानां प्राणिनां वेदितरग्ने ! Sy.
७. धनानि Sy.
८. VM. ignores आसु ॥ आसु परिदृश्यमानासु Sy.
९. प्रवर्ग्येऽभिष्टवे 'यो नः सनुत्यः' इति द्वृचः । सूत्रितञ्च—'यो नः सनुत्यो अभिदासदग्ने भवा नो अग्ने सुमना उपेताविति द्वृचाः' (ĀŚS.4.6.) इति Sy. १०. सुनु० D.
११. शत्रुः Sy.
१२. अन्तर्हिते देशे वर्तमानः सन् Sy. सनुतरित्यन्तर्हितनाम Ngh. 3.25.
१३. ०माभि० P. उपक्षपयति बाधते Sy.
१४. बाधते should immediately follow अभिदासति and precede अग्ने ।
१५. यश्च अभ्यन्तरवर्ती सन् Sy.
१६. ०त P. हे अनुकूलदीप्ते ! मित्राणां महयितः ! वाग्ने ! Sy.
१७. हिंस्यात् Sy.
१८. उभयविधम् Sy.
१९. वृष्टिहेतुभूतैः Sy.
२०. असाधारणैस्तेजोभिः Sy.
२१. तव P., D. वह Sy.
२२. ०प्तत P. तमुभयविधं हे तप्ततमाग्ने ! Sy.
२३. तेजसा Sy.
२४. न्तपवान् P. तेजस्वी त्वम् Sy.
२५. यजमानः Sy.
२६. त्वाम् Sy.
२७. यागेन Sy.
२८. समिन्धनसाधनेनेध्मेन Sy.
२९. समिदाधानं P. परिचरति Sy.
३०. यच्च P., D.
३१. शस्त्रैः, अर्चनीयैः स्तोत्रैश्च परिचरति Sy.
३२. बलस्य Sy.
३३. सूः P. सूनोः D. हे पुत्राग्ने ! Sy.
३४. ०तः D. हे मरणधर्मरहिताग्ने ! Sy.
३५. प्रकृष्टज्ञानः सन् Sy.
३६. द्योतमानेन Sy.
३७. श्रवणीयेनान्नेन यशसा वा Sy.
३८. विशेषेण प्रकाशते Sy.

स तत्कृधीषितस्तूयमग्ने स्पृधो बाधस्व सहसा सहस्वान् ।
यच्छस्यसे द्युभिरक्तो वचोभिस्तज्जुषस्व जरितुर्घोषि मन्म ॥ ६ ॥

स तत् कृधि । सः । तत् । कुरु । प्रेषित । क्षिप्रम् । अग्ने ! किमित्याह, शत्रून् । बाधस्व । बलेन । बलवान् । यदा । स्तूयसे । दीप्तै । वचोभि । अक्त । तदानी तत् । स्तोत्रम् । घुष्यमाणम् । स्तोतुः । सेवस्व ।

अश्याम तं काममग्ने तवोती अश्याम रयिं रयिवः सुवीरम् ।
अश्याम वाजमभि वाजयन्तोऽश्याम द्युम्नमजराजरं ते ॥ ७ ॥

अश्याम । प्राप्नुयाम । तम् । कामम् । अग्ने । तव । रक्षणेन । अश्याम । धनम् । धनवन् । सुपुत्रम् । अभ्यश्याम । अन्नम् । अन्नमिच्छमाना ।

---

१. तस्कृ० P. स तधत् कृधिः D.
२. त्वम् Sy.
३. तत् किं तत् ? इत्यत आह Sy.
४. प्रेषितः सन् Sy.
५. स्पर्धमानान् Sy. ६. विनाशय Sy.
७. परेषामभिभवनसामर्थ्येन तेजसा वा Sy.
८. बलवांस्त्वम् Sy.
९. त्वामुद्दिश्य यत् स्तोत्रं स्तोतृभिः क्रियत इत्यर्थः Sy. १०. द्योतमानैस्तेजोभिः Sy.
११. स्तुतिरूपैर्वाक्यैः Sy.
१२. संसिक्तस्त्वम् Sy.
१३. मननीयम् Sy.
१४. ०ण P. ०णः D. घोषणीयम् Sy.
१५. जरितुः स्तोत्रम् Sy.
१६. अग्नये कामाय पुरोडाशमष्टाकपालमित्यस्य 'अश्याम' इत्येषा याज्या । सूत्रितञ्च—'अश्याम तं काममग्ने तवोतीति कामाय' (ĀŚS.2.10.) इति Sy.
१७. प्राप्नुयाम तमेव कामं विवृणोति Sy. प्राप्नुयाम यमिच्छाम इत्यर्थः Mah. तं काममश्याम, अश्नुवीमहि BB.
१८. अभिलाषम् Mah. यत्कामा एतत्कर्मः U. यदर्थमात्मा तुभ्यं निवेदितः BB.
१९. तव सम्बन्धिन्या Sy.
२०. ऊत्या रक्षया Sy. ऊत्या अवनेन पालनेन Mah. अवनेन तर्पणेन च U. तवोती तव रक्षया BB.
२१. प्राप्नुयाम Sy. 'अशूङ् व्याप्तौ' विकरणव्यत्ययेन लोटि श्यन्प्रत्ययः Mah. 'अशू व्याप्तौ' व्यत्ययेन परस्मैपदम् BB.
२२. पुत्रसहितं धनम् Mah. पुत्रपौत्रादिसमृद्धिहेतुधनम् BB.
२३. हे धनवन्नग्ने ! Sy. रयि धनमस्यास्तीति रयिवांस्तत् सम्बुद्धौ हे रयिवः ! धनवन् ! Mah. हे रयिवो रयिमन् ! BB.
२४. शोभनपुत्रादियुक्तम् Sy. शोभना वीराः पुत्राः यत्र तम् Mah. कल्याणपुत्रम् U. शोभना वीराः पुत्रादयो यस्मिंस्तम् BB.
२५. आभिमुख्येन प्राप्नुयाम Sy. वयं प्राप्नुयाम Mah. प्राप्नुयाम BB.
२६. त्वया दत्तमन्नम् Sy.
२७. इच्छन्तः is suggested for इच्छमानाः ॥ अन्नमात्मन इच्छन्तो वयम् Sy. वाजयतिरर्चतिकर्मा । वाजयन्तो वह्निमर्चयन्तः सन्तो वयम् Mah. वाजतिरर्चतिकर्मा । अभिपूजयन्तोऽग्निमन्यानपि पूजयितव्यान् U. वाजमन्नमात्मन इच्छन्तः । . . . . यद्वा वाजमाचक्षत इति णिच् BB.

[1]अश्याम । [2]यश । [3]जरावर्जितम् । [4]त्वत्तस्तव स्वभूतम् । [5]

VI.6.

प्र नव्यसा सहसः सूनुमच्छा यज्ञेन गातुमवं इच्छमानः ।
वृश्चद्वनं कृष्णयामं रुशन्तं वीती होतारं दिव्यं जिगाति ॥ १ ॥

[6]प्र नव्यसा । प्रगच्छति । [7]नवतरेण । [8]अग्निम् । [9]प्रति । [10]यज्ञेन । [11]गमनीयम् । [12]अन्नम् । [13]इच्छमान । [14]छिद्यमानवृक्षम् । [15]कृष्णगमनमार्गम् । [16]श्वेतम् । [17]कामेन । [18]दैव्यम् । [19]होतार मनुष्य. ।

स श्वितानस्तन्यतू रोचनस्था अजरेभिर्नानदद्भिर्यविष्ठः ।
यः पावकः पुरुतमः पुरूणि पृथून्यग्निरनुयाति भर्वन् ॥ २ ॥

[20]स श्वितानः । [21]स दावरूप । शुक्लवर्णोऽभवत् । [22]विस्तारयिता । [23]रोचनेऽन्तरीक्षे तिष्ठन् । जरा-

---

१. समन्तात् प्राप्नुयाम Mah. यदा वयं वाजं लिप्सामहे तदा वाजमन्नमाभिमुख्येनाश्नुवीमहि लिप्सीमहि । स्वरानवग्रहो दुर्घटो BB.

२. द्योतमानं यशः Sy. द्युम्नं यशो वयमश्याम । सर्वदा यशस्विनो भवामेत्यर्थः Mah.

३. जरारहितम् Sy. नास्ति जरा यस्य सोऽजरः । अजरमक्षीणम् Mah. अजरं द्युम्नविशेषणमेतत् । अक्षीणं द्युम्नम् U. अजरमक्षयं द्युम्नं यशः BB. ४. त्वदीयम् Sy. तव प्रसादात् U. त्वत्प्रसादादश्याम बिभृयाम् BB.

५. वस्तुभू० P. वास्तुभू० D.

६. VM. ignores अजर । हे जरारहिताग्ने ! Sy., Mah., U., BB.
This stanza=YV.18.74.; TS. 1.3.14.3.
RV.VI.5.7.=SB.9.5.2.7.p.748.
अश्याम तं काममग्ने तवोतीति। एकया कामवत्यैतद्वै देवाः षड्भिश्चेन पाप्मानमपहत्यैकया कामवत्यैकधान्ततः सर्वान्कामानात्मन्नकुर्वत तथैवैतद्यजमानः षड्भिश्चेन पाप्मानमपहत्यैकया कामवत्यैकधान्ततः सर्वान्कामानात्मन्कुरुते ।

७. 'प्र नव्यसा' इति सप्तचं षष्ठं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमाग्नेयम् । 'प्र नव्यसा' (KSA.29.6.p.22.) इत्यनुक्रान्तम् । प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः Sy.

८. प्रकर्षेण गच्छति Sy. ९. नवतरेण Sy.

१०. अग्निम् seems to be the explanation of सहसः सूनुम् ॥ बलस्य पुत्रम् Sy.

११. आभिमुख्येन Sy. १२. यज्ञेन युक्तः सन् Sy.

१३. उपगन्तव्यं स्तोतव्यं वा Sy. १४. अन्नं रक्षणं वा Sy. १५. ०ना P. इच्छन् स्तोता Sy.

१६. छिद्यामनवृक्षम् P. वृक्णं छिन्नं दग्धं वनं येन तादृशम् Sy. १७. कृष्णवर्त्मानम् Sy.

१८. श्वेतवर्णम् Sy. १९. वीत्या कान्तेन यज्ञेन Sy. २०. दिवि भवम् Sy.

२१. यष्टारम् Sy. २२. श्चितासः D.

२३. अग्निः Sy. स खल्वयमग्निर्हविःप्रियोऽस्माभिर्हविषाऽराध्यत इत्यर्थः । तस्मादयमस्मच्छत्रून् विनाशयत्विति भावः BB.

२४. श्वेतमानः श्वेतवर्णो वर्तते Sy. अधुना तस्यैव हवींषि भुञ्जानस्य गुणानाह । श्वितानो दीप्यमानः । श्वेता वर्णे अनुवास्तेत् । ताच्छीलिकश्चानश् BB. २५. शब्दकारी Sy. तनिता विस्तारयिता सिद्धीनां दीप्तीनां वा BB.

२६. रोचन्तेऽस्मिन् ग्रहनक्षत्रादीनीति रोचनमन्तरिक्षम् । तत्र स्थितः Sy. रोचनेषु दीप्तिमत्स्थानेषु स्थितः ।....रोचनेषु तिष्ठतीति वा । तिष्ठतेः क्विप् BB.

वर्जितैस्तेजोभि । शब्दं[२] कुर्वद्भि[३] । युवतम । य[४] । पावक[५] । बहूनां ग्लपयिता[६] । बहूनि काष्ठानि । अनु-गच्छति[७] । विस्तीर्णानि । भक्षयन्[८] ।[९]

वि ते विष्वग्वातंजूतासो अग्ने भामासः शुचे शुचयश्चरन्ति ।
तुविम्रक्षासो दिव्या नवंग्वा वना वनन्ति धृषता रुजन्तः ॥ ३ ॥

वि ते विष्वक्[१०] । विचरन्ति[११] । तव[१२] । इतस्तत[१३] । वाताकृष्टा[१४] । अग्ने ! रश्मय[१५] । दीप्यमान[१६] ! दीप्यमाना[१७] । बहूना स्प्रष्टार[१८] । दिवि भवा[१९] । नवगमना[२०] । अरण्यानि[२१] । भजन्ते[२२] । धृष्टेन तेजसा[२३] । भञ्जन्तु[२४] ।

---

१. जरारहितैः Sy. अक्षीणैः BB.

२. शतं P. अत्यर्थं शब्दं कुर्वद्भिर्मरुद्भिर्युक्तो रश्मिभिर्वा Sy. अत्यर्थं नदद्भिः स्तुवद्भि-र्ऋत्विग्भिर्यजमानगणैर्वा परिवृतः BB.

३. दयः P., D. सोऽयमेवंविधोऽस्मदीयेन हविषा तृप्तोऽस्मच्छत्रून् विनाशयत्विति शेषः BB.

४. शोधकोऽग्निः Sy. पावयिता शोधयिता BB.

५. अतिशयेन प्रभूतः सन् Sy. बहुतमः । सर्वात्म-कत्वात् । यद्वा पुरूणां पूरणः । छान्द-सस्तमप्प्रत्ययः BB.

६. अनुगच्छति । स इत्थमित्थं वर्तत इति पूर्वत्र सम्बन्धः Sy. अनुक्रमेण गच्छति यजमानगृहान् BB.

७. स्थूलानि काष्ठानि Sy. विस्तीर्णानि पुरोडाशा-दीनि हवींषि BB.

८. 'भर्व हिंसायाम्' BB.

९. VM. ignores अग्निः ॥
This stanza=TS. 1.3.14.4.

१०. गार्हपत्यादीनां मिथः संसर्गेऽग्नये विविचय इष्टिः कर्तव्या। तत्र 'वि ते' इत्येषानुवाक्या (ĀŚS. 3.13.) इति Sy.

११. विचरन्ति, विविधं गच्छन्ति Sy. विचरन्ति विश्वग्गमनाः BB.

१२. त्ववीयाः Sy.

१३. सर्वतः Sy. विष्वग् नानागतिः BB.

१४. वातेन प्रेरिताः Sy. वातेन जूताः प्रेरिता वातजूतासः। जु इति सौत्रो धातुः। यद्वा वातस्येव जूतं वेगो येषामिति वातजूतासः BB.

१५. निर्मलाः Sy. शुचयो दीप्तयस्तव BB.

१६. ०माना P. ०मानाः D. हे शुद्ध ! दीप्त ! वाग्ने ! Sy. हे शुचे ! दीप्त ! BB.

१७. प्यमान P. दप्यमा० D. दीप्तयः Sy. भासन-शीलाः क्रूररूपा वा BB.

१८. स्पृ० P., D. बहुकाष्ठानि स्पृशन्तः Sy. बहुशुद्धयो बहूनां वा शोधनाः । बहुसेचका वृष्टया BB.

१९. भा० P. विवि द्योतमानेऽग्नौ भवाः Sy. विव-मर्हतीति दण्डादिभ्यो यत् BB.

२०. नूतनगमनास्ते रश्मयः Sy. नवगतयो नित्या-भिनवाः BB.

२१. वनानि Sy. उदकानि BB.

२२. सम्भजन्ते वहन्तीत्यर्थः Sy. वनन्ति सम्भव ? (ज)न्ति BB.

२३. धर्षकेण तेजसा Sy. धर्षणेन प्रसहनेन BB.

२४. वनानि भञ्जयन्तः Sy. रुजन्तो वैगुण्यं भजन्तः। तया समृद्धया वृष्टिमुत्पादयन्तु तव शुचय इति BB.
This stanza=TS. 3.3.11.1.

ये ते शुक्रासः शुचयः शुचिष्मः क्षां वपन्ति विषितासो अश्वाः ।
अधं भ्रमस्तं उर्विया वि भाति यातयमानो अधि सानु पृश्नेः ॥ ४ ॥

ये ते शुक्रासः[1] । ये[2] । ते[3] । शोचमानाः[4] । रश्मयः[5] । दीप्तिमन्[6] ! पृथिवीमोषधिवनस्पतियुक्ताम्[7] । वपन्ति[8] । विमुक्ता । अश्वा इत्यौपमिकम् । तदनन्तरम्[9] । उरु[10] । तव[11] । भ्रमः[12] । विभाति[13] । पृथिव्याः[14] । सानुनि[15] स्थितं स्थावरम् । गमन्[16] ।

अधं जिह्वा पापतीति प्र वृष्णो गोषुयुधो नाशनिः सृजाना ।
शूरस्येव प्रसितिः क्षातिरग्नेर्दुर्वर्तुर्भीमो दयते वनानि ॥ ५ ॥

अध जिह्वा[17] । अथ[18] । ज्वाला[19] । पतति[20] । अग्नेः[21] । गोनिमित्तं युध्यतः शूरस्य[22] । इव[23] । आयुधम्[24] । सृज्यमानम्[25] । किं च शूरस्येव[26] । बाहुः[27] । अग्नेः[28] ।

---

१. शुक्रा P. शुक्राः D. २. तव Sy.
३. शुभ्राः Sy. ४. दीप्तयः Sy.
५. ०मान् P. हे दीप्तिमन् ! अग्ने ! Sy.
६. भूमिम् Sy.
७. मुण्डयन्ति । केशस्थानीयानोषधिवनस्पतीन् वहन्तीत्यर्थः । 'अग्निर्हं वाति रोमा पृथिव्याः' (RV.I.65.4.) इति निगमान्तरम् Sy.
८. अश्वा इव इतस्ततो गच्छन्तीति शेषः Sy.
९. अस्मिन् काले Sy. १०. अरुः P. बहुलम् Sy.
११. त्वदीयः Sy. १२. भ्रमणशीलो ज्वालासमूहः Sy. १३. विशेषेण प्रकाशते Sy.
१४. नानारूपाया भूमेः Sy.
१५. समुच्छ्रितं देशं पर्वताग्रादिकं प्रति Sy.
१६. गमयन् is suggested for गमन् ॥ स्वकीयमग्रं व्यापारयन् Sy.
१७. भरद्वाजस्यार्षम् Dur. भरद्वाजस्यार्षम् । दावरूपस्याग्नेः स्तुतिरेषा SKN.
१८. अध P. अपि च Sy. अथानन्तरमेव Dur. प्रवृत्तश्च दावरूपोऽग्निः । अथानन्तरमेव SKN.
१९. उपज्वलितस्याग्नेः....तस्य जिह्वा ज्वाला Dur. अस्य ...जिह्वास्थानीया ज्वाला SKN.
२०. प्रकर्षेण पुनः पुनः पतति । गच्छति Sy. दारुषु पापतीति पुनः पुनः पतति Dur. वीप्सेत्यर्थः । प्रपतति गच्छति SKN.
२१. वर्षितुरग्नेः Sy. प्रवर्षितुरिन्द्रस्य Dur. हविर्वहनद्वारेण वर्षितुः SKN.
२२. तत्र वृष्टान्तः । असुरैरपहृतासु गोषु युध्यन्निन्द्रो गोषुयुत् । तस्मात् सृज्यमानाशनिर्वज्र इव Sy. गवार्थं वा देवपणिभिः सहासुरैर्युध्यतः । अथवा गोष्वप्सु मेघेन सह युध्यत इत्यर्थः Dur. गाव आपः । तासु निमित्तभूतासु योद्धृत्वाद् गोषुयुविन्द्र उच्यते SKN.
२३. नेत्युपमा । इन्द्रस्य गोषु युध्यत इव Dur.
२४. वज्रः Dur. तस्यैव स्वभूताऽशनिः SKN.
२५. तेनैव सृज्यमाना यथा पतति....तथाऽग्नेर्ज्वाला दारुषु पापतीतीति Dur. तेन विसृज्यमाना क्षिप्यमाणेत्यर्थः SKN.
२६. शौर्योपेतस्य नरस्य Sy. यथा कस्यचिच्छूरस्य विक्रान्तस्य वाऽप्रतिहतगतेः Dur. यादृशी शूरस्य मनुष्यस्य SKN.
२७. प्रबन्धनं यथान्यैर्दुःसहम् Sy. प्रसहनं सङ्ग्रामानुप्रवेशमार्गश्छिन्नभिन्नावरुग्णैः शत्रुभिः प्रकीर्णः स्यात् Dur. स्यतेरिदं रूपम् । स्यतिश्चोपसृष्टो विमोचने । हता हताः शत्रवो यत्र विमुच्यन्ते सा प्रसितिः सङ्ग्रामभूमिः सा हताहतैः शत्रुभिराकीर्णा SKN.
२८. ०ग्ने P. एवमस्याग्नेः Dur. अग्नेर्दावरूपस्य SKN.

ज्वाला[1] । प्रसितिर्बाहुः प्रबन्धनात्[2] । क्षातिर्विनाशनात्[3] । दुर्वार[4] । भीम[5] । भक्षयति । काष्ठानि[6] । दहति वा[7] ।

आ भानुना[9] पार्थिवानि[13] ज्रयांसि[14] महस्तोदस्य[15] धृषता[22] ततन्थ[10] ।
स बाधस्वापं[16] भया[17] सहोभिः[19] स्पृधो[20] वनुष्यन्वनुषो[21] नि जूर्व[18] ॥ ६ ॥

आ भानुना । आततन्थ[10] । तेजसा[11] । पार्थिवानि[12] वनानि । ज्रयतिर्गतिकर्मा, पृथिव्या उत्थितानि । महत । व्यथयितुस्तव स्वभूतेन । सः । अपबाधस्व[16] । भयानि[17] । बलै[19] । शत्रून्[20] । हिसन् । हन्तून्[21] । निजहि[22] ।

---

१. सोढुमशक्येत्यर्थः । क्षीयन्ते दह्यन्तेऽस्यामोषधिवनस्पतय इति क्षायतेरधिकरणे क्तिन् Sy. दहनमार्गः । ईषत्प्लुष्टार्धदग्धभस्मीभूतैर्वृक्षैर्गुल्मादिभिराकीर्यते Dur. ईदृशी क्षातिः, क्षिप्यन्ते द्रव्यमाना ओषधिवनस्पतयो यस्यां सा क्षातिर्भोगभूमिः । सा दग्धादग्धैरोषधिवनस्पतिभिराकीर्णा SKN.

२. The passage 'प्रसितिर्बाहुः प्रबन्धनात्' should immediately follow बाहुः and precede अग्ने ।

३. ०ना P. क्षातिर्विनाशना D. The passage क्षातिर्विनाशनात् should immediately follow ज्वाला ।

४. अन्यैर्वारयितुमशक्यः Sy. कदा पुनरेतद् भवति ?....दुर्वारो दावाग्नीभूतः Dur. दुर्वारो दावरूपोऽग्निः SKN.

५. भयङ्करोऽग्निः Sy.
सर्वप्राणिभयङ्करः Dur.
भयानकः SKN.

६. कानि P., D. वनानि Sy. किम् ? वनानि Dur.

७. The passage दहति वा should immediately follow भक्षयति ॥ वयतिरत्र दहतिकर्मा Sy. यदाऽयमग्निर्वयते दहति।.... एवमयमाग्नेये मन्त्रे वनशब्दसन्निकर्षे श्रूयमाणे वयतिशब्दो दहनादन्यत् किमभिदध्यात् ? तस्मात् सामर्थ्याद्विहायं दहनकर्मा इत्युपपत्तिः Dur. दुर्वर्तुर्भीमो वयते वनानि । इति दहतिकर्मा । दुर्वर्तुर्दुर्वारः N.4.17.; SKN. II.241.

८. VM. ignores प्र ॥ प्र प्रकर्षेण Sy.

९. हे अग्ने ! Sy.

१०. ०न्थं P., D. आस्तृणासि आच्छादयसि । स त्वम् Sy.

११. दीप्त्या Sy.

१२. पृथिव्यां भवानि Sy.

१३. Omitted by P.

१४. ज्रय० P., D.
गन्तव्यानि स्थानानि Sy.

१५. प्रेरकस्य Sy.

१६. अवबा० P.

१७. भयकरणानि Sy.

१८. अभिभवनसमर्थैस्तेजोभिर्वा Sy.

१९. स्पर्धमानान् Sy.

२०. हिंसकान् । शत्रूनिति Sy.

२१. जूर्वतिर्हन्तिकर्मा Sy.

२२. VM. ignores धृषता ॥ धृषता धर्षकेण रश्मिना सह Sy.

स चित्र चित्रं चितयन्तमस्मे चित्रक्षत्र चित्रतमं वयोधाम् ।
चन्द्रं रयिं पुरुवीरं बृहन्तं चन्द्र चन्द्राभिर्गृणते युवस्व ॥ ७ ॥

स[1] चित्र[2]। स[3] त्वम्। चायनीय[4]! चायनीयम्[5]। महत्तया जनान् बोधयन्तम्[6]। मह्यम्[7]। चित्रबल[8]! अतिशयेन चित्रम्[9]। अन्नस्य धारकम्[10]। कान्तम्[11]। रयिम्[12]। बहुपुत्रम्[13]। महान्तम्[14]। ह्लादकम्[15]। चन्द्राभिर्ज्वालाभि.[16]। स्तुवते[17]। मिश्रय[18] देहि।

VI.7.

मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आ जातमग्निम् ।
कविं सम्राजमतिथिं जनानामासन्नापात्रं जनयन्त देवाः ॥ १ ॥

मूर्धानम्[19]। द्युलोकस्य[20]। उच्छ्रितम्[21]। तत पृथिव्याश्च[22]। गन्तारम्[23]।

---

१. उखासम्भरणीयेष्टावग्नेः क्षत्रवतः 'स चित्र' इत्येषा याज्या। सूत्रितञ्च—'स चित्र चित्रं चितयन्तमस्मे अग्निरीशे बृहतः क्षत्रियस्य' (ĀŚS.4.1.) इति Sy.
२. मित्रः P. मित्र D. ३. तादृशस्त्वम् Sy.
४. र्यानं P. ०यं D. हे चायनीय! Sy.
५. ०नियं P. ६. ज्ञापयन्तम्। धनेन हि पुरुषः प्रख्यायते Sy. ७. अस्मभ्यं दातुम् Sy.
८. हे विचित्रबल! चायनीयधन! वा Sy.
९. अतिशयेन आश्चर्यभूतम् Sy.
१०. ०का D. धातारं प्रदातारम् Sy.
११. तं P. आह्लावकम् Sy. १२. धनम् Sy.
१३. पुरुभिर्बहुभिर्वीरैः पुत्रपौत्रादिभिर्युक्तम् Sy.
१४. ईदृशं धनमस्मभ्यं प्रयच्छेत्यर्थः Sy.
१५. हे आह्लावकाग्ने! Sy.
१६. ०भिज्वाभिः P. आह्लादयित्रीभिः स्तुतिभिः Sy. १७. गृणते स्तुवते। वचनव्यत्ययः। स्तुवद्भ्यः Sy. १८. पृथक्कुरु Sy.
१९. 'मूर्धानम्' इति सप्तर्चं सप्तमं सूक्तं भरद्वाजस्यार्षं वैश्वानराग्निदेवताकम्। षष्ठीसप्तम्यौ जगत्यौ शिष्टा पञ्च त्रिष्टुभः। तथा चानुक्रान्तम् 'मूर्धानं वैश्वानरीयं हि द्विजगत्यन्तम्' (KSA.29.7.p.22.) इति। गतः सूक्तवैकल्पिकः स्तोत्रियः। तथैव सूत्रितं 'मूर्धानं दिवो अरतिं पृथिव्या मूर्धा दिवो नाभिरग्निः पृथिव्या इति वा' (ĀŚS.8.6.) इति Sy.
२०. वैश्वानरश्चात्र सर्वात्मना स्तूयते Mah., U.
२१. शिरोभूतम् Sy. शिरोवदुन्नतप्रदेशे सूर्यरूपेणावस्थाय भासकम् Mah. सूर्यात्मनावस्थितं मूर्धानं शिर आहुर्ब्रह्मविदः U. मूर्धानं शिरोभूतम् BB.
२२. प्रथिताया भूमेः Sy. पृथिवीशब्देनात्रान्तरिक्षमभिधीयते। पठितञ्चैतदन्तरिक्षनामसु U. एतद् अन्तरिक्षम्। आकाशम्। आपः। पृथिवी इत्यन्तरिक्षनामानि Ngh. 1.3.
२३. गन्तारम्। यद्वा गन्तव्यं स्वामिनम् Sy. रतिरुपरतिस्तद्रहितम्। नहि पृथिव्या उपरि कदाचिदप्यग्निरुपरमते किन्तु दाहपाकप्रकाशैः सर्वाननुगृह्णन् सर्वदा वर्तत एव। यद्वा पृथिवीशब्देनान्तरिक्षमुच्यते। आकाशमापः पृथिवीत्यन्तरिक्षनामसु पठितत्वात् पृथिव्या अन्तरिक्षस्यारतिमलमतिं पर्याप्तमतिं पूरकमित्यर्थः। तत्र स्थितोऽसौ यथाकालं वृष्टया भूतानि पुष्णाति Mah. अलमतिं पर्याप्तमतिं पृथिव्या अन्तरिक्षलोकस्याहुः। तत्र ह्यसौ स्थितो यथाकालं वृष्टया पुष्णाति भूतानि U. अरतिं गन्तारम्।....पृथिव्याश्च गन्तारं प्रजानां

वैश्वानरम्[1] । यज्ञपूजितम्[2] । अग्निम् । कविम्[3] । सम्राजम्[4] । अतिथिस्थानीयम्[5] । जनानामस्माकम्[6] । आस्येन[7] । जनयन्त[8] । देवाः[9] । भुक्तस्य पात्रभूतम्[10] ।[11]

---

१. विश्वेषां नराणां सम्बन्धिनम् Sy. विश्वेभ्यः सर्वेभ्यो नरेभ्यो हितो वैश्वानरस्तम् । जठराग्निरूपेणान्नपाचकत्वात् Mah. यं वैश्वानरम् U. विश्वेषां नराणां सम्बन्धिनम् BB.

२. VM. seems to explain ऋते and आ जातम् together as यज्ञपूजितम् ॥ ऋतमिति सत्यस्य यज्ञस्य वा नाम । निमित्तसप्तम्येषा । ऋतनिमित्तम् आ आभिमुख्येन जातं सृष्टयादावुत्पन्नम् Sy. यज्ञे यज्ञनिमित्तमाजातमुत्पन्नमरणिद्वयात् Mah. यज्ञ आजातमुत्पन्नमरणिद्वयादग्निमाहुः U. ऋताय सत्याय यज्ञाय वा जातम् BB.

३. क्रान्तदर्शिनम् Sy. कविं क्रान्तदर्शनं स्वभक्तानानुग्रहीतुमभिज्ञमित्यर्थः Mah. यं च कविं क्रान्तदर्शनमाहुः U. मेधाविनम् BB.

४. सम्यग्राजमानम् Sy. सम्यग्दीप्यमानमैश्वर्येण युक्तमित्यर्थः Mah. सम्यगैश्वर्येण युक्तमाहुः U. सम्यग्राजन्तम् BB.

५. हविर्वहनाय सततं गन्तारम्, यद्वा, अतिथिवत्पूज्यम् Sy. हविर्भिः सत्कारयोग्यम् । विज्ञायते ह्यग्निरतिथिरूपेण गृहान् प्रविशति तस्मात्तस्योदकमाहरन्ति Mah.,U. यजमानगृहान् सातत्येन गच्छन्तम् । . . . . यजमानगृहेष्वतन्तमित्यर्थः BB.

६. यजमानानाम् Sy., Mah. यजमानलक्षणानाम् BB.

७. अस्ये P. आसनि आस्ये । द्वितीयार्थे सप्तमी । आस्यभूतम् । अग्निलक्षणेनास्येन हि देवा हवींषि भुञ्जते Sy. आसनि, आस्ये मुखे Mah.,U. कीदृशं तत्पात्रमित्यत आह—आस्ये । द्वितीयार्थे सप्तमी । तस्याश्च लुक् । अग्निमास्यं कृतवन्त इति यावत् । . . यद्वा निमित्तसप्तम्येषा, आस्यनिमित्तमास्यत्वाय, अग्निरस्माकमास्यमिव भूयादिति । अग्निना ह्यास्येन देवा आहुतीः पिबन्ति । अग्निमुखत्वात्तेषाम् BB.

८. यज्ञाभिमुख्येनाजीजनन् । अरण्योः सकाशाद्यु दपादयन् Sy. ईदृशमग्निं जनयन्त उत्पादितवन्तः । अडागमाभाव आर्षः Mah. योऽयमुक्तगुणो वैश्वानरस्तम् जनयन्त U. ईदृशमग्निम् . . . आभिमुख्येन जनितवन्तः । . . सोमं पातुं तत्पात्रतयाऽग्निं कृतवन्त इत्यर्थः BB.

९. देव P. स्तोतार ऋत्विजो देवा एव वा Sy. ईदृशमग्निं देवा इन्द्रादयोऽजनयन्तेत्यर्थः Mah. देवा इन्द्रादयः U.

१०. पातारं रक्षकम् । यद्वा आस्येन धारकम् । एवंगुणविशिष्टं वैश्वानराग्निम् Sy. आभिमुख्येन पीयतेऽनेनेत्यापात्रम् । विज्ञायते हि चमसो देवपान इति 'चमसेन ह वा एतेन भूतेन देवा भक्षयन्ति' (1.4.2.14.) इति श्रुतेः Mah. पीयतेऽनेनेति पात्रम् U. पिबत्यनेनेति पात्रम् BB.

This stanza=YV. 7. 24.=TS.1. 4.13.1.

११. अथातो गृह्णात्येव । मूर्धानं दिवोऽअरतिं पृथिव्या वैश्वानरमृतऽआ जातमग्निम् । कविꣳ सम्राजमतिथिं जनानामासन्ना पात्रं जनयन्त देवाः । उपयामगृहीतोऽसि । ध्रुवोऽसि ध्रुवक्षितिर्ध्रुवाणां ध्रुवतमोऽच्युतानामच्युतक्षित्तम एष ते योनिर्वैश्वानराय त्वेति सावयति व्युह्य न तृणं चिनान्तर्धाय वैश्वानराय ह्येनं गृह्णाति ŚB.4.2.4.24.p.363.

---

१. अत्र 'जनयन्त देवाः' इत्यन्ताया ऋचः पाठ एव, अग्रे YV.7.25. इति मन्त्रस्य पूर्वार्द्धभागः समुपात्तः ।

नाभिं यज्ञानां सदनं रयीणां महामाहावमभि सं नवन्त ।
वैश्वानरं रथ्यमध्वराणां यज्ञस्य केतुं जनयन्त देवाः ॥ २ ॥

नाभि यज्ञानाम् । नाभिस्थानम् । यज्ञानाम् । आवासस्थानम् । रयीणाम् । महान्तम् । आहावभूतं निपानमाहावस्तम् । अभिपतन्ति । वैश्वानरम् । नेतारम् । यज्ञानाम् । यज्ञस्य । केतुभूतम् । अजनयन्त । देवाः ।

त्वद्विप्रो जायते वाज्यग्ने त्वद्वीरासो अभिमातिषाहः ।
वैश्वानर त्वमस्मासु धेहि वसूनि राजन्त्स्पृहयाय्याणि ॥ ३ ॥

त्वद्विप्रः । त्वत्तः । मेधावी । अश्वः । जायते । अग्ने ! त्वत्त एव । अभिमातीना सोढारः । नर । वैश्वानर ! त्वम् । अस्मासु । धेहि । धनानि । राजन् । स्पृहणीयानि ।

त्वां विश्वे अमृत जायमानं शिशुं न देवा अभि सं नवन्ते ।
तव क्रतुभिरमृतत्वमायन्वैश्वानर यत्पित्रोरदीदेः ॥ ४ ॥

त्वां विश्वे । दीदेतिर्दीप्तिकर्मा । शिष्टः स्पष्टः ।

---

१. ना P. नहनं बन्धकम् Sy.
२. ज्योतिष्टोमादियागानाम् Sy.
३. स्थानमेकनिलयम् Sy. ४. तथा धनानाम् Sy.
५. महान्तं महान्तमावहनभूतन्निपानमहात् स्तम् P. आहावम् आहूयन्तेऽस्मिन्नाहुतय इत्याहावः । तादृशम् । यद्वा वृष्टघुदकधारणमाहावं निपानस्थानीयम् । एवम्भूतम् Sy.
६. अभितः स्तोतारः सम्यक् स्तुवन्ति Sy.
७. विश्वेषां नराणां सम्बन्धिनम् Sy.
८. रथिनम् । यथा रथी स्वरथं नयति तद्वन्नेतारं ग्राहयितारं गमयितारम् Sy.
९. प्रज्ञापकम् । एवंविधमग्निम् Sy.
१०. जनयन्ति । मथनेनोत्पादयन्ति Sy.
११. The passage beginning with यज्ञानाम् and ending with देवाः is omitted by P. स्तोतार ऋत्विजो देवा एव वा Sy. १२. VM. ignores सम् ।
१३. त्वत्तः सकाशात् Sy.
१४. हविर्लक्षणान्नवान् पुरुषः Sy.
१५. जायते । तुभ्यं हविर्दानेन मेधावी भवति Sy.
१६. शत्रूणामभिभवितारो जायन्ते । यस्मादेवं तस्मात् Sy. १७. वीराः Sy.
१८. सोढा नरो श्वानर D. १९. त्वद्भूक्तेषु Sy.
२०. निधेहि Sy. २१. राजमानाग्ने ! Sy.
२२. The commentary on this stanza is omitted by P.
२३. तिदी० P. दीप्यसे Sy.
२४. हे अमृत ! मरणधर्मरहिताग्ने ! विश्वे सर्वे देवाः स्तोतारो जायमानमरण्योः सकाशादुत्पद्यमानं त्वां शिशुं न पुत्रमिवाभि सं नवन्ते । अभिसंस्तुवन्ति । यद्वा दीव्यन्तीति देवा रश्मयः । ते सर्वे जायमानं त्वामभि सं नवन्ते, अभिसङ्गच्छन्ते यथा पितरः पुत्रमभिगच्छन्ति । अपि च हे वैश्वानराग्ने ! यद्यदा पित्रोः पालयित्र्योर्द्यावापृथिव्योर्मध्येऽदीदेः दीप्यसे तदानीं तव त्वदीयैः क्रतुभिः कर्मभिर्ज्योतिष्टोमादिभिर्यागैरमृतत्वं देवत्वमायन् । यजमानाः प्राप्नुवन्ति Sy.

वैश्वानर तव तानिं व्रतानिं महान्यग्ने नकिरा दधर्ष ।
यज्जायमानः पित्रोरुपस्थेऽविन्दः केतुं वयुनेष्वह्नाम् ॥ ५ ॥

[वैश्वानर] वैश्वानर ! तव । तानि । कर्माणि । महान्ति । अग्ने ! न कश्चित् । आधर्षयति । यदा । जायमान. । द्यावापृथिव्योः । उपस्थे प्रातः सूर्यात्मना । लम्भयसि । प्रज्ञानम् । अह्नाम् । गमनेषु ।

वैश्वानरस्य विमितानि चक्षसा सानूनि दिवो अमृतस्य केतुना ।
तस्येदु विश्वा भुवनाधि मूर्धनि व्याइव रुरुहुः सप्त विस्रुहः ॥ ६ ॥

वैश्वानरस्य । वैश्वानरस्य । निर्मितानि । तेजसा । प्रज्ञापकेन । समुच्छ्रितानि तेजांसि ।

---

१. The *pratika* is supplied by the Editor.

२. हे विश्वेषां नराणां सम्बन्धिन्नग्ने ! Sy.

३. त्वदीयानि Sy.

४. प्रसिद्धानि Sy.

५. न कश्चनान्यः Sy.

६. धर्षयति । बाधते Sy.

७. यदा त्वम् Sy.

८. जायमानः सन् Sy.

९. ०थिवीचरुप० P.
उपस्थानेऽन्तरिक्षे Sy.

१०. अलम्भयः । तमोरूपमसुरं स्वतेजसा निवारयन्नस्थापय इत्यर्थः । तदा तानि व्रतानीति पूर्वत्रान्वयः Sy.

११. प्रज्ञापकं सूर्यं स्वर्भानुनावृतम् Sy.

१२. अह्नो D.

१३. गन्तव्येषु मार्गेषु Sy.

१४. भरद्वाजस्येदमार्षम् Dur. भरद्वाजस्यार्षम् SKN.

१५. विश्वनरहितस्याग्नेः Sy. भगवतोऽग्नेः Dur., SKN.

१६. निर्मितानि । यद्वा दिवोऽन्तरिक्षस्य सानूनि समुच्छ्रितप्रदेशा मेघात्मका विमितानि निर्मिताः। धूमविकारत्वात्तेषाम् Sy. तानि विनिर्मितानीत्यर्थः । अग्निप्रकाश्यमानविषयो हि लोकः कर्मणि प्रवर्तते साधुन्यसाधुनि वा । साधुभ्यः साधुना च पापेभ्यः पापेन च सार्वलौकिकेन कर्मणा स्वकर्मफलभोगायेदं सर्वं विनिर्मीयत इत्यनयापेक्षयोक्तम् Dur. निर्मितान्युत्पादितानि SKN.

१७. चक्षुषा दर्शनेन Dur. दर्शनेन देवतामाहात्म्यादतिशयवत्या कयापि प्रज्ञयेत्यर्थः SKN.

१८. कर्मणा Dur. न च केवलया प्रज्ञया किं तर्हि ? केतुना कर्मणा व्यापारेण च हविर्वहनादिना । एतदुक्तं भवति—तदधीनत्वाद् यागादेर्धर्मस्य धर्माधीनत्वाच्च कृत्स्नस्य जगतो निर्माणस्य । अथवा अपि च सत्त्वानां प्रकृतिभूता ऋषयः स्तुवन्तीत्याहुरिति प्रकृतिमाहात्म्येनेयं विकारस्य स्तुतिः । यो हि जगतः स्रष्टा कारणात्मा तस्य प्रज्ञाव्यापाराभ्यां दिवः सानूनि निर्मितान्युच्यन्ते SKN.

१९. समुच्छ्रितस्थलानि नक्षत्ररूपाणि Sy. यानि सानूनि समुच्छ्रितानि स्थानानि Dur. समुच्छ्रिताः प्रदेशाः SKN.

द्युलोकस्य । तस्य । एव । विश्वानि । भुवनानि । मूर्धनि । अधिरुहुः । शाखा इव । सप्त च । नद्यः ।

वि यो रजांस्यमिमीत सुक्रतुर्वैश्वानरो वि दिवो रोचना कविः ।
परि यो विश्वा भुवनानि पप्रथेऽदब्धो गोपा अमृतस्य रक्षिता ॥ ७ ॥

वि यो रजांसि । विममे । यः । लोकान् । सुप्रज्ञः । वैश्वानरः । विममे स । दिवः । रोचनानि । कविः । परिप्रथे । यः । विश्वानि । भुवनानि । अहिंसिता । गोपायिता । उदकस्य । रक्षिता ।

---

१. वैश्वानरस्य Sy. अग्निरेव वाच्यधिदेवताभावेनावस्थितः सर्वमिदं ख्यापयति ततः कर्म प्रतायते । तदुक्तम्—'अग्निर्वाग्भूत्वा मुखं प्राविशत्' इति ।.. तस्यैव वैश्वानरस्य पृथिवीभावेनावस्थितस्य । अयं चाग्निर्वैश्वानर इत्युक्तम् Dur. तस्यैव वैश्वानरस्य पृथिव्यामनुप्रविष्टस्य SKN.

२. इच्छब्द एवार्थे SKN.

३. व्याप्तानि Sy. सर्वाणि SKN.

४. भुवनान्युदकान्यधिवसन्ति । यद्वा वैश्वानरात्मकस्य परब्रह्मणो मूर्धन्युपरि प्रदेशे सर्वाणि भूतजातान्यधिवसन्ति Sy. सर्वभूतभावयितृण्युदकानि । भुवनमिति ह्युदकनामसु पठितम् । (Ngh. 1.12.) भुवनशब्देन भूतान्येवोच्यन्त इति केचिद् वर्णयन्ति । चतुर्विधश्च भूतग्रामः Dur. भूतजातानि SKN.

५. मूर्धस्थानीय उपरि वर्तमाने धूमे मेघात्मना परिणते Sy. उपरि Dur. मूर्ध्नः उपरि तस्य प्रकृतत्वाद् वैश्वानरस्यैव SKN.

६. अद्धरुरुहु P. रोहन्ति । अस्मादेव वैश्वानरात् प्रादुर्भवन्ति । आहुतिद्वारा सकलं जगदग्नेः सकाशादुत्पद्यत इत्यर्थः Sy. रुहिर्जन्मार्थः, विरोहन्ति जायन्त इत्यर्थः ।....कथं पुनरिदमुभयं वैश्वानरस्य मूर्धनि विरोहति ? उच्यते, उभयमिदं पृथिव्या मूर्धनि तथा 'ऋबीसे अत्रिमश्विनौ' (RV.I.116.8.) इति मन्त्रवर्णः SKN.

७. शाखा इव वृक्षस्य SKN.

८. सर्पणशीलाः सप्तसंख्याका वा Sy. सप्त सर्पणाः ।....सप्तशब्देनापि समुद्रानेव केचिद् वर्णयन्ति । ते हि पृथिव्याः शाखा इव लक्ष्यन्ते विस्रवन्ति च Dur. न च भूतान्येव केवलानि, किं तर्हि ?. . सप्तसङ्ख्याकाः ।.. कथं पुनरपां सप्तसङ्ख्याकत्वम् ? उच्यते, आधारभेदात् प्रधानभूता गङ्गाद्याः सप्त नद्यः । तासां समुद्राणां सप्तसङ्ख्याकत्वं प्राधान्याच्च । तत्स्थानामपां भूयस्त्वाद् गणनान(?)र्हत्वादिति SKN.

९. गङ्गाद्याः Sy. विविधस्रवणा भूत्वा ततः शाखा इव रुरुहुरस्यां पृथिव्यां नद्यादिभावेन, ततः शाखा इव ह्येता पृथिव्या उपरि यथा निम्नं विस्रवमाणा आपो लक्ष्यन्ते इत्येतद् दृष्ट्वैवमवोचत् ।....एवमत्र शब्दसारूप्यादर्थोपपत्तेश्च विस्रुह आपो भवन्तीत्युपपद्यते Dur. आपः SKN. विस्रुह आपो भवन्ति विस्रवणात् N.6.3., SKN. II.3.94.

१०. VM. ignores अमृतस्य and उ॥ अमृतस्य उदकस्य Sy. ११. निर्मितवान् Sy.

१२. अग्निः Sy. १३. उदकानि लोकान् वा Sy.

१४. ०ज्ञे D. सुकर्मा Sy.

१५. विश्वेषां नराणां हितः Sy.

१६. विवोद P., D. द्युलोकस्य सम्बन्धीनि Sy.

१७. रोचमानानि दीप्यमानानि नक्षत्रादीनि Sy.

१८. क्रान्तदर्शी सन् Sy. १९. परिवृढो P. परितोऽप्रथयत् Sy. २०. सर्वाणि Sy.

२१. भूतजातानि व्याप्तान्युदकानि वा Sy.

२२. केनाप्यहिंसितः Sy.

२३. सर्वस्य गोपायिता Sy.

२४. ०यितो यस्य P. अमरणहेतोरुदकस्य Sy.

२५. पालयिता सन् वर्तत इति शेषः Sy.

VI.8.

पृक्षस्य वृष्णो अरुषस्य नू सहः प्र नू वोचं विदथा जातवेदसः ।
वैश्वानराय मतिर्नव्यसी शुचिः सोमइव पवते चारुरग्नये ॥ १ ॥

पृक्षस्य[1] । सम्पर्चयितुः[2] । वृष्णः[3] । आरोचनस्य[4] । क्षिप्रम् । सहः[5] । प्र वोचम्[6] । विज्ञानेन[7] । जातवेदसः[8] । एको नुः पूरणः[9] । वैश्वानराय[10] । स्तुतिः[11] । नवतरा । शुचिः[12] । सोम इव । चारुः[13] । निर्गच्छति[14] ।

उत्तरा निगदसिद्धा

स जायमानः परमे व्योमनि व्रतान्यग्निर्व्रतपा अरक्षत ।
व्यन्तरिक्षममिमीत सुक्रतुर्वैश्वानरो महिना नाकमस्पृशत् ॥ २ ॥

[स जायमानः][15]

---

१. 'पृक्षस्य' इति सप्तर्चमष्टमं सूक्तं भरद्वाजस्यार्षं वैश्वानराग्निदेवताकम् । आदितः षड् जगत्यः सप्तमी त्रिष्टुप् । तथा चानुक्रान्तम् 'पृक्षस्यान्त्या त्रिष्टुप्' (KSA.29.8.p.22.) इति । चातुर्विंशिकेऽहन्याग्निमारुत इदं सूक्तं वैश्वानरीयनिविद्धानम् । सूत्रितञ्च—'पृक्षस्य वृष्णो वृष्णे शर्धाय' (ĀŚS. 7.4.) इति । आभिप्लविके पृष्ठ्याभिप्लवषडहयोः पञ्चमेऽहनीदमेव सूक्तं वैश्वानरनिविद्धानम् । सूत्रितञ्च—'पृक्षस्य वृष्णो वृष्णे शर्धाय नू चित्सहोजा इत्याग्निमारुतम्' (ĀŚS. 7.7.) इति । विषुवत्याग्निमारुत आद्यौ तृचौ स्तोत्रियानुरूपौ' (ĀŚS. 8.6.) इति Sy.

२. वृक्षस्य P., D.

३. संवर्च० P., D. सम्पृक्तस्य व्याप्तस्य । यद्वा पृक्षं हविर्लक्षणमन्नम् । तद्वतः Sy.

४. वर्षितुः Sy.

५. आरोचमानस्य Sy.

६. बलमभिभवनसमर्थम् Sy.

७. प्रब्रवीमि । प्रकर्षेण स्तौमीत्यर्थः Sy.

८. विदथे यज्ञे Sy.

९. ०दः P. जातानां वेदितुर्वैश्वानराग्नेः Sy.

१०. एको नुशब्दः पूरकः Sy.

११. अस्मै वैश्वानराय Sy.

१२. मतिर्मननीया स्तुतिः Sy.

१३. ०चि P., D. निर्मला यद्वा स्तोतॄणां शोधयित्री Sy.

१४. यथा सोमो दशापवित्रात्स्रवति तद्वत् Sy.

१५. शोभना Sy.

१६. मत्सकाशात् स्रवति । स्वयमेव निर्गच्छतीत्यर्थः Sy. १७. VM. ignores अग्नये ।

१८. The *pratika* is supplied by the Editor. स वैश्वानरोऽग्निर्व्रतपा व्रतस्य पालकः परम उत्कृष्टे व्योमनि व्योम्याकाशे जायमानः सूर्यात्मना प्रादुर्भवन् व्रतानि कर्माणि लौकिकानि वैदिकानि चारक्षत । अन्तरिक्षं च व्यमिमीत । एतदुपलक्षितांस्त्रीन् लोकान्निर्मितवान् । तथा सुक्रतुः शोभनकर्मा वैश्वानरोऽग्निर्महिना स्वमहिम्ना । तेजसा नाकं द्युलोकमस्पृशत् । स्पृशति स्म Sy.

व्यस्तभ्नाद्रोदसी मित्रो अद्भुतोऽन्तर्वावदत्कृणोज्ज्योतिषा तमः ।
वि चर्मणीव धिषणे अवर्तयद्बृश्चानरो विश्वमधत्त वृष्ण्यम् ॥ ३ ॥

व्यस्तभ्नात् । अधश्चोर्ध्वं च चकार । द्यावापृथिव्यौ । मित्रभूत । महान् । अन्तर्गतम् । अकरोत् । ज्योतिषा । तमः । विवर्तयति । द्वे चर्मणीइव । द्यावापृथिवी । विश्लिष्टे करोति । वैश्वानरः । विश्वम् । धारयति । वर्षणनिमित्तम् ।

अपामुपस्थे महिषा अगृभ्णत विशो राजानमुप तस्थुर्ऋग्मियम् ।
आ दूतो अग्निमभरद्विवस्वतो वैश्वानरं मातरिश्वा परावतः ॥ ४ ॥

अपाम् । अन्तरिक्षे । महान्तो देवा वैश्वानरम् । धारयन्ति । तत्र विशः । राजानम् । उपतस्थुः ।

---

१. विशेषेण स्तम्भितवान् । यथाधो न पततस्तथा स्वकीयदेशे स्थापितवानित्यर्थः Sy.
२. ०ते P., D.
३. सर्वेषामद्भुतो महान् आश्चर्यभूतो वा Sy.
४. अन्तर्हितं तिरोहितम् । वावदिति वातेर्गतिकर्मणो यङ्लुगन्तस्य रूपम् Sy.
५. ०रो P.
६. तेजसा Sy.
७. अन्धकारम् Sy.
८. यथा पशोर्विशसिता द्वे चर्मणी शोषणार्थं प्रसारयति तथा Sy.
९. अपि च धारयित्र्यौ द्यावापृथिव्यौ Sy.
१०. The passage विश्लिष्टे करोति refers to विवर्तयति ॥ विवृते विस्तृतेऽकरोत् Sy.
११. किं बहुना, अयमग्निः Sy.
१२. सर्वम् Sy.
१३. धत्ते धारयति Sy.
१४. वीर्यम् Sy.
१५. भरद्वाजस्यार्षम् Dur.
१६. VM. seems to explain अपामुपस्थे together as अन्तरिक्षे ॥ अपामन्तरिक्षस्य, उपस्थाने मध्ये Sy. यत्रोपगम्य तिष्ठन्त्यापः सोऽपामुपस्थोऽन्तरिक्षलोकः । तस्मिन्नपामुपस्थे Dur. आप इत्यन्तरिक्षनाम (Ngh. 1.3.)
१७. महान्तो मरुतः Sy. महति विस्तीर्णे सभा महिषा माध्यमिका देवगणाः । अथवा महिषास्त एव महान्तः Dur. महिषा महन्नामैतत् । (वा) महान्तो माध्यमिका देवगणाः SKN. महिषा इति महन्नाम Ngh. 3.3.
१८. धार P. अगृह्णन् । इमं वैश्वानरं वैद्युतात्मना वर्तमानमजानन्नित्यर्थः Sy. किं कुर्वन् ? अगृह्णन् Dur. परिगृह्णन्ति परिचारयन्तीत्यर्थः SKN.
१९. गृहीत्वा च प्रजाः Sy. गृहीत्वा च मनुष्या इव Dur. परिचार्य च विशो, मनुष्यनामैतत्, लुप्तोपमं च मनुष्या इव SKN. विश इति मनुष्यनाम Ngh. 2.3.
२०. स्वामिनम् Sy.
राजानं परिवार्य Dur.
२१. अस्तुवन् Sy. उपपूर्वस्तिष्ठतिः स्तुतौ । स्तुतवन्तः स्तुवन्ति वा SKN.

स्तुत्यम्[1]। इमम्[2]। अग्निम्[3]। दूतः[4]। मातरिश्वा[5]। दूराद् दिव.[6]। विवस्वतः[7]। आहृतवान्[8]।

१. अर्चनीयम् Sy. ऋग्भिः स्तुतिभिस्तद्वन्तम् .. अर्चनार्हं वा Dur. अर्चतेः स्तुतिकर्मण ऋक् ततो मत्वर्थीयो नामकरणः । तया ऋचा तद्वन्तं स्तुतिमन्तमित्यर्थः । अर्चार्हं वा स्तुत्यमित्यर्थः SKN.

२. इमम् seems to stand for वैश्वानरम् ॥ अपि चेमं वैश्वानरमग्निं पुरा सूर्यसमीपे विद्यमानम् Sy. कतमिति ? यम् Dur. अत्रैकवाक्यतायै भाष्यकारेण तच्छब्दोऽध्याहृतः । तच्छुतेश्च यच्छब्दोऽध्याह्रियते । यमुपतस्थुः.. ..तम् । वैश्वानरमग्निविशेषणमेतत् SKN.

३. वेगवान् देवानां दूतो वा Sy. दूतो देवानाम् Dur. दूतः । कस्य ? सामर्थ्याद् देवानाम् SKN.

४. वायुः Sy. मातरिश्वा वायुः । .. स हि मातर्यन्तरिक्षेऽप्रतिबध्यमानशक्तिः श्वसिति गच्छति । अथवा मातरि, आशु अनिति गच्छति Dur. कतमो दूतः ? उच्यते मातरिश्वा वायुः ।....मातर्यन्तरिक्षे । श्वसितिः शब्दकर्मा । मातर्युपपदे श्वसेर्धातोः 'श्वसृधृक्षन् पूषन्०' (Uṇādi. 1.159.) इत्यादिनिपातनात् ।....यद्वा मातरि शुशब्दे चोपपदे, अनितेर्गतिकर्मणो विच् । शुशब्दस्य वाशुशब्देनार्थवचनम् SKN.

५. दूरदेशात् Sy. प्रकर्षेणेरितवतः प्रेरिततरात् 'परागताद्वा' दूरतरात् Dur दूरनामैतत् । दूरादर्चनीयमित्यर्हार्थं दर्शयितुं कृत्यः । प्रपूर्वस्येरयतेः परापूर्वस्य वा वेतेर्गतिकर्मणः परावच्छब्द इति दर्शयति प्रेरितवत इत्यादिना 'पञ्चम्यास्तसिल्' (Pa.5.3.7.)। प्रकर्षेणेरितादादित्यात् परागतादस्याग्नेरित्यादिना SKN.

६. आदित्यात् Sy. आदित्यात् विवासनक्रिया या तमसां तद्वतस्तं पर्यगृह्णन्नन्तरिक्षे लोके गृहीत्वा चोपतस्थुर्विश इव राजानम् Dur. विवस्वत आदित्यस्य सकाशात् । ...विवासनमपनयनं तमसां तेन तद्वान्। . आह्रियमाणस्य चाग्नेर्वैश्वानरत्वविशिष्टस्य यतश्चाह्रियते विवस्वतस्तेषामन्यत्वमाह मन्त्रः । अतश्च मध्यमोत्तमाभ्यामन्यत्वं सिद्धं वायुरित्यभिधेयवचनम् SKN.

७. इमं लोकं प्रत्याजहार Sy. एवमेतस्मिन्मन्त्रे यत आह्रियते येन चाह्रियते यश्चाह्रियते सर्वे ते पृथग् व्यपदिष्टाः । अत्र विवस्वत आह्रियते मातरिश्वना वैश्वानर इति। तस्मादेतयोर्विवस्वन्मातरिश्वनोः सन्निधानव्यपदेशे सति साक्षाद् वैश्वानरशब्देन पार्थिव उक्त इति व्यवतिष्ठते पार्थिवो वैश्वानर इति Dur. आकारोऽभरदित्येतेन सम्बध्यते ।....अभरत् हरतेर्हंकारस्य भकारः। आहरत्, आहृतवान् SKN.

८. अपामुपस्थ उपस्थाने महत्यन्तरिक्षलोक आसीना महान्त इति वाऽगृह्णत माध्यमिका देवगणाः । विश इव राजानमुपतस्थुः । ऋग्मियमृग्मन्तमिति वा । अर्चनीयमिति वा (पूजनीयमिति वा ।) आहरद्यं दूतो देवानां विवस्वत आदित्यात्। विवस्वान् विवासनवान्। प्रेरितवतः परागताद्वा (अपि वा) अस्याग्नेर्वैश्वानरस्य मातरिश्वानमाहर्तारमाह । मातरिश्वा वायुः । मातर्यन्तरिक्षे श्वसिति । मातर्याश्वनितीति वा N. 7. 26., SKN. III. 104,105.

युगेयुगे विदथ्यं गृणद्भ्योऽग्ने रयिं यशसं धेहि नव्यसीम् ।
पव्येव राजन्नघशंसमजर नीचा नि वृश्च वनिनं न तेजसा ॥ ५ ॥

युगे युगे[1] । दिवसे दिवसे[2] । गृहयोग्यम्[3] । स्तुवद्भ्यः[4] । अग्ने ! रयिम्[5] । अन्नं[6] च । प्रयच्छ[7] । तथा नवतरां[8] भार्यां च । आयुधेनेव[9] । राजन्[10] ! अगर[11] ! तेजसा[12] । स्तेनम्[13] । नीचा[14] । विवृश्च[15] । यथा । वृक्षवदरण्यमायुधेनेति[16] ।

अस्माकमग्ने मघवत्सु धारयानामि क्षत्रमजरं सुवीर्यम् ।
वयं जयेम शतिनं सहस्रिणं वैश्वानर वाजमग्ने तवोतिभिः ॥ ६ ॥

अस्माकम्[17] । अस्माकम्[18] । अग्ने ! धनवत्सु[19] शत्रुषु । धारय[20] । अनतम्[21] । बलम्[22] । जरारहितम्[23] । शोभनवीर्यम्[24] । वयम् । जयेम[25] । शतिनम्[26] । सहस्रिण[27] च । सङ्ग्रामम्[28] । तव । रक्षणैः[29] ।[30]

---

१. हे अग्ने ! Sy.
२. काले काले Sy.
३. विदथो यज्ञः । तदर्हं त्वामुद्दिश्य Sy.
४. उच्चारयितृभ्योऽस्मभ्यम् Sy.
५. धनम् Sy.
६. यशसं यशस्विनं पुत्रं च Sy.
७. विधेहि, कुरु Sy.
८. नवतरां P., D. नवतरां स्तुतिम् Sy.
९. युधे० P. वज्रेणेव Sy.
१०. हे राजमान ! Sy.
११. अगरं D. अजर ! is suggested for अगर ॥ हे जरारहित ! Sy.
१२. आत्मीयेन तेजसा Sy.
१३. स्ते P., D. It seems to be the explanation of अघशंसम् ॥ अघस्यानर्थस्य शंसितारं शत्रुम् Sy.
१४. नीच P. नीचीनो न्यग्भूतो यथा भवति तथा Sy.
१५. वृश्च P. विवृच्छ D. निजहि Sy.
१६. वृक्षमिव Sy.
१७. अस्माकम्, सप्तम्यर्थे षष्ठी । अस्मासु Sy. अस्माकं पुत्रादीन् BB.
१८. हे अग्ने ! Sy. हे अग्ने ! हे अञ्जनादिगुण ! वैश्वानर ! BB.
१९. हविर्लक्षणेन धनेन युक्तेषु Sy. प्रथमं तावद्धनवतः कुरु ततो मघवत्सु धनवत्सु कृतेषु BB.
२०. स्थापय Sy., BB.
२१. अतनम् P., D. अनमनीयमनपहार्यम् Sy. अनमनशीलम् BB.
२२. धनम् Sy. क्षत्रमिति धननाम Ngh.2.10.
२३. अनश्वरम् Sy.
अविनाशम् BB.
२४. शोभनवीर्योपेतम् Sy. अनभिभवनीयपुत्रादिपुरुषकर्मकम् BB.
२५. लभेमहि Sy.
२६. शतसङ्ख्यायुक्तं शतपुरुषयुक्तं वा Sy. शतपोषवन्तम् BB.
२७. सहस्रपोषवन्तं च BB.
२८. अन्नम् Sy., BB.
२९. त्वत्सम्बन्धिभी रक्षणैः Sy. रक्षाविशेषैस्तृप्तिविशेषैर्वा BB.
३०. VM. ignores वैश्वानर and अग्ने ॥ This stanza=TS. 1.5.11.2.

अदब्धेभिस्तव गोपाभिरिष्टेऽस्माकं पाहि त्रिषधस्थ सूरीन् ।
रक्षा च नो दुदुषां शर्धो अग्ने वैश्वानर प्र च तारीः स्तवानः ॥ ७ ॥

अदब्धेभिः । अहिंसितैः । तव । गोपनैः । हे यष्टव्य ! अस्माकम् । पाहि । हे त्रिस्थान ! स्तोतॄन् पुत्रान् । रक्ष । च । अस्माकम् । यजमानानाम् । बलम् । अग्ने ! वैश्वानर ! प्रतारय । चास्मान् । स्तूयमानः ।

VI.9.

अहश्च कृष्णमहरर्जुनं च वि वर्तेते रजसी वेद्याभिः ।
वैश्वानरो जायमानो न राजावातिरज्ज्योतिषाग्निस्तमांसि ॥ १ ॥

अहश्च । अहः । च । कृष्णवर्णम् । अहः । श्वेतवर्णम् । चेत्यहोरात्रे वदति । ते विवर्तेते तेजसा

---

१. ०भि P. २. केनाप्यहिंसितैः Sy.
३. त्वदीयैः Sy.
४. ०नै P. गोपकै रक्षकैस्तेजोभिः Sy.
५. हे यष्टव्य ! एषणीय ! वा Sy.
६. ०कम P. अस्मदीयान् Sy.
७. रक्ष Sy.
८. त्रिषु लोकेषु सहावस्थायिन् ! यद्वाहवनीयादिषु त्रिष्वायतनेषु यष्टव्यैर्देवैः सहावतिष्ठमानाग्ने ! Sy. ९. ०तॄ P.
१०. ०माना D. हवींषि दत्तवताम् Sy.
११. व्रताय P., D. प्रवर्धय च Sy.
१२. 'अहश्च इति सप्तर्चं नवमं सूक्तं भरद्वाजस्यार्षं वैश्वानराग्निदेवताकम् । अनुक्रान्तञ्च 'अहश्च' (KSA.29.9.p.22.) इति । व्यूळ्हे दशरात्रे षष्ठेऽहन्यग्निमारुतशस्त्रे वैश्वानरनिविद्धानमिदम् । सूत्र्यते हि 'अहश्च कृष्णं मध्वो वो नाम' (ĀŚS.8.8.) इति Sy. भरद्वाजस्येदमार्षम् Dur. भरद्वाजस्यार्षम् SKN.
१३. आहरति पुरुषोऽस्मिन् कर्माणीत्यहः, रात्रिश्च Sy. आद्योऽत्राहशब्दो रात्रिवचनः SKN.
१४. कृष्णं कृष्णवर्णम् । एतत्सामानाधिकरण्यावहःशब्दो रात्रिवाचकः । तमसा कृष्णवर्णा Sy. कुत एतत् ? कृष्णमिति विशेषणात् । रात्रेश्च तमस्सम्बन्धात् कृष्णत्वम् SKN.
१५. ०ह P., D. दिवसश्च Sy.
१६. श्चत P. सौरेण तेजसा शुक्लवर्णम् Sy. अर्जुनशब्दो हि शुक्लपर्यायः Dur. अर्जुनशब्दो रूपनाम । कृष्णप्रतियोगित्वेनोपादानात् । शुक्लमत्र रूपमाह न यत्किञ्चित् । शुक्लपर्याय एव वाऽर्जुनशब्दः SKN. अर्जुनमिति रूपनाम Ngh. 3.7.
१७. त्येहो० P. कृष्णं चाहः शुक्लञ्च । रात्रिश्च दिवसश्चेत्यर्थः SKN. १८. यदति P.
१९. विविधं पर्यावर्तेते Sy. विपर्ययेण वर्तेते । रात्रिरतीता, अहरायातम् । अहरतीतं रात्रिरायाता, इत्येवम् Dur. किं कुरुतः ? उच्यते, विवर्तेते । विशब्दोऽत्र विविधवचनोऽसहायार्थो वा । विविक्ते वर्तेते उपजायेते क्रमेण वा न सह । यदा रात्रिर्न तदाहः, यदाऽहर्न तदा रात्रिः SKN.

तमसा च। रञ्जके। 'वेदितव्याभि. प्रवृत्तिभिः' इति यास्क.। वैश्वानर.। जायमान। इवोद्यन्। आदित्यः। सर्वेषां ज्योतिषां। विनाशयति। अग्निः। तमासि।

---

१. P. reads समासा तेजसा for तेजसा तमसा।

२. स्वस्वभासा सर्वं जगद्रञ्जयन्तौ। यद्वा, रजसी द्यावापृथिव्यौ। उपलक्षणमेतत्। लोकत्रयं प्रत्यावर्तेते। एतच्च वैश्वानराग्नेराज्ञयेति शेषः। स हि देवतात्वेनात्र प्रतिपाद्यः Sy. ज्योतिषा हि भूतान्यहो रञ्जयति तमसा रात्रिः Dur. यथाकालं स्वेन तमसा ज्योतिषा च रञ्जके भूतानाम् SKN.

३. विवि० P. वेद्याभिर्वेदितव्याभिरनुकूलतया ज्ञातव्याभिः स्वप्रवृत्तिभिः Sy. नहि तासां प्रवृत्तीनामन्तोऽस्ति, अहनि च रात्रौ च प्राणिनामतस्ता वेदितव्या एव भवन्ति, बहुत्वात्। न हि विदितानामन्ताः कदाचित् Dur. स्त्रीलिङ्गनिर्देशात् प्रवृत्तिभिरिति वाक्यशेषः। तृतीयानिर्देशाच्च युक्ते इति। वेदितव्याभिः प्रवृत्तिभिर्युक्ते। कस्य प्रवृत्तिभिः ? सामर्थ्यादनयोरेव। कथं पुनरेतत् प्रवृत्तीनां वेदितव्यत्वम् ? उच्यते, आनन्त्याद् वैचित्र्याद्वा। अवश्यं तवेकरूपत्वं विदितत्वान्न वेदितव्यम्। यत्त्वनन्तं विचित्रं वा तवेकस्मिन्विदितेऽन्यदविदितमस्त्येवेति सर्वदैव वेदितव्यम्। अहोरात्रयोश्च प्रवृत्तयोऽनन्ता विचित्राश्च, अतस्ता वेदितव्याः। अथवा शुभेषु कर्मसु याः प्राणिनां प्रवृत्तयस्ता अत्र शोभनत्वाद् वेद्या इत्युच्यन्ते। सहयोगलक्षणा च तृतीया। वेदितव्याभिः प्राणिप्रवृत्तिभिः सह विवर्तेते इति। सूक्तस्य वैश्वानरीयत्वात् केवलस्य चार्धर्चस्य वैश्वानरस्तुत्यर्थस्यासम्भवात्। उत्तरार्धर्चेनैकवाक्यताप्रसिद्ध्यर्थं यत्तच्छब्दावध्याहार्यौ। ये शुक्लकृष्णे अहनी विवर्तेते तयोर्द्वयोरपि SKN.

४. पृपृभिः P. प्रवर्तिभिः D. N. 2.21.

५. अग्निः Sy., Dur.

६. प्रादुर्भवन् प्रवर्धमानः Sy. कथं पुनरपहन्ति ? . . जायमान इवोद्यन् Dur. जन्मात्रोदयोऽभिप्रेतः SKN.

७. It seems to be the explanation of राजा ॥ राजेति चादित्यार्थ उच्यते। सर्वभूतानां राजाऽऽदित्यः। दीप्तत्वात् सर्वेषां ज्योतिषामधिपत्वाच्च। उद्यन्निवादित्य इत्यर्थः SKN.

८. आनित्य सर्वे षे ज्योतिषि P. ज्योतिषि D. तेजसा Sy. स्वेन ज्योतिषा SKN.

९. विशाययति P. अवतिरतिर्वधकर्मा। अवतिरति Sy. यथा ह्युद्यन्नादित्यस्तमांस्यपहन्ति दिवा, एवमग्निरपि रात्रावपहन्तीत्यग्निरादित्येन तमउपघातं प्रत्युपमीयते Dur. अवतिरतिर्वधकर्मा। अपहन्ति, अपनयति स्वेन ज्योतिषा तमांसि दिवा, एवमग्नी रात्रावपहन्ति SKN.

१०. अहः कस्मात् ? उपाहरन्त्यस्मिन् कर्माणि। तस्यैष निपातो भवति वैश्वानरीयायामृचि। . . . . अहश्च कृष्णं रात्रिः। शुक्लं चाहरर्जुनम्। विवर्तेते रजसी वेद्याभिर्वेदितव्याभिः प्रवृत्तिभिः। वैश्वानरो जायमान इव। उद्यन्नादित्यः। सर्वेषां ज्योतिषां राजा। अवाहन्नग्निर्ज्योतिषा तमांसि N.2.21., SKN. II.102.

नाहं तन्तुं न वि जानाम्योतुं न यं वयन्ति समरेऽतमानाः ।
कस्य स्वित्पुत्र इह वक्त्वानि परो वदात्यवरेण पित्रा ॥ २ ॥

नाहं[1] तन्तुम्[2] । वैश्वानरस्य रश्मिभिरिद भूतजात प्रोतम्, तत्रेदमाह—न । अहम्[3] । पटस्य[4] दीर्घ-तन्तुम्[5] । जानामि । न । तिर्यक् तन्तुम्[6] । न । यं तन्तुम्[7] । वयन्ति[8] । तन्तुवायसङ्घ प्रति[9] । गच्छन्त[10] । कस्य[11] । वा[12] । पुत्र[13] । इह[14] । वक्तव्यानि[15] वाक्यानि । परस्मिन् स्थाने स्थित[16] । अपरस्मिन् स्थाने स्थितेन[17] । पित्रा[18] । वदति[19] ।[20]

---

१. ०हस्त० D.

२. ०श्मिरि० D.

३. वैश्वानरस्य महत्त्वमाख्यास्यन्नृषिस्तदर्थं यज्ञं वस्त्रात्मकतया रूपयन् तस्य दुर्ज्ञानत्वमनया प्रतिपादयतीति यज्ञवादिनो मन्यन्ते Sy.

४. प्रोतन्त्रैवो नहाहं P.
प्रोततन्त्रे तदा नहाहं D.

५. पदस्य P.

६. तन्तवः पटस्य प्रागायतानि सूत्राणि । तानि च यज्ञात्मकस्य वस्त्रस्य गायत्र्यादीनि छन्दांसि स्तुतशस्त्राणि च, तानि Sy.

७. ०र्यक्षन्तुं P., D. ओतवस्तिरश्चीनानि सूत्राणि। तानि चात्र यजूंष्याध्वर्यवाणि कर्माणि च । तान्यहं न विजानामि । अपि चैतदुभयसाध्यं तं पटं यज्ञलक्षणं न विजानामि Sy.

८. ययन्ततु P. पटं यज्ञलक्षणम् Sy.

९. तन्तूनोतूंश्च सन्तन्वन्ति वस्त्ररूपेण निष्पादयन्तीत्यर्थः Sy.

१०. न्तुवयवाय सं P. It seems to be the explanation of समरे ॥ सङ्गमने देवयजने Sy.

११. सततं चेष्टमाना ऋत्विजः Sy.

१२. स्विदिति वितर्के । खलु Sy.

१३. मनुष्यः Sy.

१४. अस्मिन् लोके Sy.

१५. वक्तव्यानि तानीमानि Sy.

१६. परस्तादमुष्मिन् लोके वर्तमानो यः सूर्यस्तस्य Sy.

१७. स्थितोन P. अवस्तादस्मिन् लोके वर्तमानेन Sy.

१८. चित्रं P. चित्रा D. वैश्वानराग्निनानुशिष्टः सन् Sy.

१९. वदेत् । न कश्चिदपि प्रवदितुं शक्नोतीत्यर्थः । एतच्च सम्प्रदायविद्भिरुक्तम्—,
वैश्वानरस्य पुत्रोऽसौ परस्ताद्दिवि यः स्थितः ।
छन्दांस्यध्वरवस्त्रस्य स्तुतशस्त्राणि तन्तवः ॥
यजूंषि चेष्टाश्चौतुः स्याद्वस्त्रं वातव्यमध्वरः ।
परः परः स्थितः सूर्यः पिताग्निः पार्थिवो मतः ॥
इति ॥
रूपकतया जगत्सृष्टेर्दुर्ज्ञानत्वमनया प्रतिपादयतीत्यात्मविदो मन्यन्ते । तन्तुं तन्तून् तन्तुस्थानानि सूक्ष्माणि वियदादीन्यपञ्चीकृतानि भूतानि न विजानामि । ओतुमोतून् पञ्चीकृतानि स्थूलान्योतुस्थानीयान्यपि वियदादीनि न विजानामि । न च तत्कार्यं पटस्थानीयं प्रपञ्चं विजानामि यं प्रपञ्चं समरे तन्तूनामोतूनां च सङ्गमनेऽतमाना सततं चेष्टमानाः संसारिणो वयन्ति उत्पादयन्ति। तेषां भोगार्थमीश्वरः सृजतीति कर्तृत्वमुपचर्यते । इहास्मिन् विषये परः परस्ताद्बुद्धेरविषये वर्तमानानि वक्त्वानि वक्तव्यानि इमान्यवरेणार्वाचीनेन सृष्टपुत्तरकालमुत्पन्नेन पित्रा स्वजनकेनानुशिष्टः सन् कस्य खलु पुत्रो ववाति वदेत् । स्वोत्पत्तेः प्राचीनं वृत्तान्तमजानानः कश्चिदपि न वदेदित्यर्थः Sy.

२०. VM. ignores वि।

स इत्तन्तुं स वि जानात्योतुं स वक्त्वान्यृतुथा वदाति ।
य ईं चिकेतदमृतस्य गोपा अवश्चरन्परो अन्येन पश्यन् ॥ ३ ॥

स इत्[१] । सः । एव वैश्वानरः[२] । तन्तुम्[३] । विजानाति । ओतुं[४] च । स एव । वाक्यानि[५] । ऋतौ[६] । वदति[७] पर्जन्यो भूत्वाऽन्तरिक्षे शब्द कुर्वन् । यो वैश्वानरः[८] । एतं तन्तुमोतु च । वेत्ता[९] । अमृतस्य[१०] । गोपायिता[११] । पृथिव्याम्[१२] । वर्तमानः[१३] । परो[१४] भूत्वा । अन्येनादित्यरूपेण[१५] । सर्वं जगत्[१६] पश्यन् वैश्वानरोऽह्नयादित्यो भूत्वा जगत् पश्यतीति त तस्य पुत्रमाह तथा स एव पर्जन्यो भूत्वा । वर्षतीति ।

अयं होता प्रथमः पश्यतेममिदं ज्योतिरमृतं मर्त्येषु ।
अयं स जज्ञे ध्रुव आ निषत्तोऽमर्त्यस्तन्वा३ वर्धमानः ॥ ४ ॥

अयं होता । अयम्[१७] । होता[१८] । प्रथम[१९] । पश्यत[२०] । इमम्[२१] । इदम्[२२] । ज्योतिः[२३] । अमृतम्[२४] ।

---

१. यद्यप्युक्तेन प्रकारेण बुज्ञानानि तथाप्येतानि वैश्वानरोऽग्निर्जानाति वदति चेत्यनया प्रतिपादयति Sy.
२. वैश्वानरोऽग्निः Sy.
३. तन्तुस्थानीयानि गायत्र्यादीनि छन्दांसि स्तुतशस्त्राणि Sy.
४. ओतुस्थानीयानि यजूंष्याध्वर्यवाणि च कर्माणि विजानाति Sy.
५. वक्तव्यानि च तानि Sy.
६. काले काले तत्तदनुष्ठानसमये Sy.
७. वदेत् Sy.
८. योऽयं वैश्वानरः Sy.
९. ईम् इमानि परिदृश्यमानानि सर्वाणि भूतानि Sy.
१०. वेता P. जानाति स एवेति पूर्वत्र सम्बन्धः Sy.
११. उदकस्य Sy.
१२. रक्षिता Sy.
१३. अवस्ताद् भूलोके Sy.
१४. ०न D. पार्थिवाग्निरूपेण सञ्चरन् Sy.
१५. परस्ताद्दिवि Sy.
१६. सूर्यात्मना Sy.
१७. सर्वं जगत् प्रकाशयन् यद्वा स इत् स एव तन्तुं तन्तुस्थानीयानि सूक्ष्मभूतानि विजानाति नान्यः कश्चित् । तथौतुमोतुस्थानीयानि स्थूलभूतानि स एव विजानाति । स एव वक्त्वानि वक्तव्यान्युपदेष्टव्यानि इमान्यृतुथा काले काले यदा यदा विद्यासम्प्रदायोच्छेदस्तदा तदा वदाति वदेत् । कोऽसौ यो विजानीयाद्वदेच्चेत्यत आह, यो वैश्वानरो विश्वनरात्मकः परमात्मामृतस्यामृतत्वस्य विमोक्षणस्य गोपा रक्षितावोऽवस्तात्संसारदशायां चरन्, अन्तःकरणोपेतो जीवात्मभावेन सञ्चरन् परः परस्तादविद्यायाः ऊर्ध्वं वर्तमानेनान्येनोक्तविलक्षणेन निरुपाधिकेन सच्चिदादिलक्षणेन रूपेण पश्यन् सर्वं जगत् प्रकाशयन् ईमिमानि चिकेतत् जानाति। तथा च परमात्मानं प्रकृत्य श्रूयते । 'तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति' (Śve.U.6.14.) इति Sy.
१८. P. reads तत्रस्य for तं तस्य ।
१९. वैश्वानरोऽग्निः Sy.
२०. होता । मानुषो हि होता द्वितीयः Sy.
२१. आद्यः Sy.
२२. हे मनुष्याः ! तमिमं भजतेत्यर्थः Sy.
२३. वैश्वानराख्यम् Sy.
२४. जाठररूपेण वर्तत इत्यर्थः Sy.
२५. मरणरहितम् Sy.

मरणधर्मिषु[1] । अयम्[2] । सः । जायते । मेधीभूतः[3] । सर्वतः[4] । निषण्णः[5] । अमरणधर्मा[6] । शरीरेण[7] । वर्धमानः[8] ।

ध्रुवं ज्योतिर्निहितं दृशये[9] कं मनो जविष्ठं पतयत्स्वन्तः[10] ।
विश्वे देवाः समनसः[11] सकेता[12] एकं क्रतुमभि वि यन्ति साधु ॥ ५ ॥

[ध्रुवम्][13] ध्रुवम्[14] । ज्योतिर्वैश्वानराख्यम् । स्थापितम्[15] । दर्शनाय[16] । कमिति पूरणम् । मनसोऽपि[17] । वेगवत्तरम्[18] । जङ्गमेषु[19] । अन्तः[20] । विश्वे । देवाः । समनसः । सप्रज्ञाः[21] । एकं वैश्वानरम् । कर्तारम्[22] । अभि विविधं गच्छन्ति[23] । कल्याणम् ।

---

१. मरणस्वभावेषु शरीरेषु Sy.
२. अपि च सोऽयमग्निः Sy.
३. निश्चलः Sy.
४. समन्तात् Sy.
५. ०तो धिष० P.
सर्वव्यापी Sy.
६. ०धर्म P. अत एव मरणरहितोऽपि Sy.
७. शरीरेण सम्बन्धात् Sy.
८. जायते वर्धमानश्च भवतीत्युपचर्यते Sy.
९. The *pratīka* is supplied by the Editor.
१०. निश्चलम् Sy.
११. प्रजापतिना स्थापितम् Sy.
१२. दर्शनार्थम् Sy.
१३. मनसस्तस्मादपि Sy.
१४. अतिशयेन वेगवत् Sy.
१५. गच्छत्सु जङ्गमेषु प्राणिषु Sy.
१६. मध्ये Sy.
१७. सर्वे Sy.
१८. समानमनस्काः Sy.
१९. वश्वे देवस्समानं सस्स ए प्रज्ञा P. स एप्रज्ञाः D. समानप्रज्ञाश्च सन्तः Sy.
२०. मुख्यं गन्तारं वा Sy.
२१. कर्मणां कर्तारम् Sy.
२२. ०ति P. ०णः P. आभिमुख्येन विविधं प्राप्नुवन्ति । सेवन्त इत्यर्थः । यद्वा पतयत्सु गच्छत्सु प्राणिष्वन्तर्मध्ये हृदये मनो जविष्ठं मनसोऽप्यतिशयेन वेगयुक्तं ध्रुवं निश्चलं निर्विकल्पकम् । तथा च वाजसनेयकम् । 'अनेजदेकं मनसो जवीयः' (YV. 40.4.) इति । ज्योतिर्ब्रह्म चैतन्यं निहितम् । न केनचित् स्थापितम् । 'यो वेद निहितं गुहायां परमे व्योमन्' (TĀ.8.1.) इति हि श्रूयते । किमर्थम् ? दृशये दर्शनार्थम् । ज्ञानेन हि सर्वं जानन्ति । अपि च दीव्यन्तीति देवा इन्द्रियाणि । विश्वे सर्वे देवाः सर्वाणीन्द्रियाणि चक्षुराद्याः समनसो मनसा सह वर्तमानाः सकेताः सतेजस्काः सन्त एकमद्वितीयं क्रतुं सृष्टयादीनां कर्मणां कर्तारं विश्वनरात्मकं परमात्मानमभिलक्ष्य साधु सम्यक् वियन्ति । विविधं गच्छन्ति । देवा एव वेममभि वियन्ति । आभिमुख्येन विविधमुपयन्ति । उपासत इत्यर्थः । तथा च श्रूयते 'तद्देवा ज्योतिषां ज्योतिरायुर्ह्युपासतेऽमृतम्' (ŚB. 14. 7. 2. 20. p. 1090) इति Sy.
२३. सम्यक् Sy.

वि मे कर्णा पतयतो वि चक्षुर्वीदं ज्योतिर्हृदय आहितं यत् ।
वि मे मनश्चरति दूरआधीः किं स्विद्वक्ष्यामि किमु नू मनिष्ये ॥ ६ ॥

वि मे कर्णा । विपततः । मम । कर्णौ श्रोतव्यं प्रति वैश्वानरेणाधिष्ठितस्य । विपतति । चक्षुश्च तथेदम् । ज्योतिश्च । हृदये । आहित परबुद्ध्याख्यम् । तथा मनश्च । विचरति । यत् मनः । दूरे आधीय तस्मिन्नाश्चर्ये । किम् । स्विदहम् । वक्ष्यामि । किम् । वा । मनिष्ये बोधनकर्मा मनिः ।

विश्वे देवा अनमस्यन्भियानास्त्वामग्ने तमसि तस्थिवांसम् ।
वैश्वानरोऽवतूतये नोऽमर्त्योऽवतूतये नः ॥ ७ ॥

विश्वे देवाः । विश्वे । देवा । अनमस्यन् । बिभ्यत । त्वाम् । अग्ने ! तमस्युदकस्यान्तरपक्रम्य तस्थिवांसम् । स वैश्वानर । गच्छतु । रक्षणाय । अस्मान् । मरणवर्जित ।

---

१. वितपेततः P.
२. वैश्वानरं श्रोतुकामस्य मम Sy.
३. ०णधितिथितस्य P., D.
४. विविधं गच्छतः । श्रोतव्यानां तदीयगुणानां बहुत्वात् Sy.
५. ०क्ष० D. तथा वैश्वानरं विवृक्षमाणस्य मम चक्षुरिन्द्रियं विविधं गच्छति द्रष्टव्यानां तदीयरूपाणां बहुत्वात् Sy.
६. प्रकाशकम् Sy.
७. हृदयपुण्डरीके Sy.
८. निहितं यद्बुद्ध्याख्यं तत्त्वमिदमपि विपतयति । विविधं गच्छति वैश्वानरात्मानं ज्ञातुम् Sy.
९. विविधं प्रवर्तते Sy.
१०. दूरे विप्रकृष्टे विषये आधीराध्यानं यस्य तादृशम् । छान्दसो लिङ्लुव्यत्ययः Sy.
११. आनीय० P.
१२. एवमहमहमिकया सर्वेष्विन्द्रियेषु प्रवृत्तेषु किं स्विदहं वैश्वानरस्य रूपमिति Sy.
१३. कक्ष्या० P.
१४. Omitted by P.
१५. खलु Sy.
१६. निष्येव P. ०ष्येव D. मनसा प्रपत्स्ये वैश्वानरस्य गुणानामनन्तत्वान्मन्दप्रज्ञेन मया ज्ञातुं न शक्यत इत्यर्थः Sy.
१७. VM. ignores वि । मे and नु ॥ मदीयम् Sy.
१८. हे वैश्वानर ! Sy.
१९. सर्वे Sy.
२०. अनमस्य P. नमस्कुर्वन्ति Sy.
२१. कुतो हेतोः ? अन्धकाराद्भीताः Sy.
२२. अन्धकारे Sy.
२३. स्थितवन्तम् Sy.
२४. Omitted by P.
२५. अग्निः Sy.
२६. रक्षतु Sy.
२७. ऊत्या रक्षणेन Sy.
२८. ०णायां P. ०णायान् D.
२९. तादृशो मरणरहितः Sy.
३०. VM. explains अवतु । ऊतये and ३ once only.

VI.10.

पुरो वो मन्द्रं दिव्यं सुवृक्तिं प्रयति यज्ञे अग्निमध्वरे दधिध्वम् ।
पुर उक्थेभिः स हि नो विभावा स्वध्वरा करति जातवेदाः ॥ १ ॥

पुरो वः । पुरः । दधिध्वम् यूयम् । मदयितारम् । दिवि भवम् । सुष्टुतिम् । वर्तमाने । यज्ञे । अग्निम् । अहिंसिते । अग्रतः । अस्मान् । अग्निः । दीप्तिमान् । सुयज्ञान् । करोति । सञ्जातप्रज्ञः ।

तमु द्युमः पुर्वणीक होतरग्ने अग्निभिर्मनुष इधानः ।
स्तोमं यमस्मै ममतेव शूषं घृतं न शुचि मतयः पवन्ते ॥ २ ॥

तमु । तं स्तोमं शृणु । दीप्तिमन् ! बहुज्वालानीक ! होतः ! अग्ने ! अन्यैरग्निभिः सह । मनुष्यस्यार्थम् । दीप्यमानः । स्तोमम् । यम् । अस्मै तुभ्यम् । दीर्घतमसो माता ममतेव । सुखकरम् । घृतम् । न । शुद्धम् । स्तोतारः । प्रेरयन्ति ।

---

१. 'पुरो वः' इति सप्तचं दशमं सूक्तं भरद्वाजस्यार्षमाग्नेयम् । सप्तमी विशिका द्विपदा विराट् शिष्टास्त्रिष्टुभः । तथा चानुक्रान्तम् 'पुरो वा द्विपदान्तम्' (KSA.29.10.p.22.) इति । प्रातरनुवाके आग्नेये ऋतौ त्रैष्टुभे छन्दसीदमादीनि चत्वारि सूक्तानि । सूत्रितञ्च— 'पुरो वा मन्द्रमिति चत्वारि तं सुप्रतीकमिति षट्' (ĀSS.4.13.) इति Sy.

२. हे ऋत्विग्यजमानाः ! Sy.

३. पुरस्तात् Sy.

४. आहवनीयरूपेण धारयत । यद्वा पुरोधसं कुरुत Sy.

५. मोदनं स्तुत्यं वा Sy.

६. सुष्ठु दोषैर्वर्जितं सुखेनावर्जनीयं वा Sy.

७. प्रगच्छति प्रवर्तमाने Sy.

८. अस्मिन् यज्ञे Sy.

९. एवङ्गुणमग्निम् Sy.

१०. अग्निसिते P., D. रक्षःप्रभृतिभिरहिंस्ये हिंसाप्रत्यवायरहिते वा Sy.

११. विशेषेण दीप्यमानः Sy.

१२. शोभनयागान् Sy.

१३. करोति । तस्मात् पुरो दधिध्वमित्यन्वयः Sy.

१४. जातानां वेदिता Sy.

१५. VM. ignores उक्थेभिः and हि ॥ उक्थेभिः स्तुतशस्त्रैश्च पुरो दधिध्वम् । हि यस्मात् Sy.

१६. तं स्तोमं शृण्विति शेषः Sy.

१७. हे दीप्तिमन् ! Sy.

१८. ज्वानिक P. बहुज्ञानिक D. बहुज्वाल ! Sy.

१९. देवानामाह्वातः ! Sy.

२०. तवावयवभूतैरन्यैरग्निभिः सार्द्धम् Sy.

२१. स्तोतुः Sy.

२२. ०ना P. समिध्यमानो दीप्तः सन् Sy.

२३. स्तोत्रम् Sy.

२४. अग्नये Sy.

२५. ममता नाम ब्रह्मवादिनी दीर्घतमसो माता, सेव Sy.

२६. ०त P., D. पवित्राभ्यामुत्पूतं घृतम् Sy.

२७. इव Sy.

२८. मन्तारः स्तोतारः Sy.

२९. पुनन्ति संस्कुर्वन्ति । दोषवर्जितमुज्ज्वारयन्तीत्यर्थः । तं स्तोममित्यन्वयः Sy.

३०. VM. ignores उ ॥ उ इति पादपूरणम् Sy.

पीपाय स श्रवसा मर्त्येषु यो अग्नये ददाश विप्र उक्थैः ।
चित्राभिस्तमूतिभिश्चित्रशोचिर्व्रजस्य साता गोमतो दधाति ॥ ३ ॥

पीपाय[1] । वर्धते । सः[2] । अग्नेन । मनुष्येषु[3] । यः[4] । अग्नये । हविः[5] प्रयच्छति । मेधावी । उक्थैः[6] सह । चित्रैः । तम्[7] । रक्षणैः[8] । चित्रदीप्ति[9] । गोमतः[10] । व्रजस्य[11] । लाभे[12] । स्थापयति[13] ।

आ यः पप्रौ[14] जायमान[15] उर्वी द्यावापृथिव्यौ[16] दूरेदृशा[17] भासा[18] कृष्णाध्वा[19] ।
अध[20] बहु[21] चित्तम[22] ऊर्म्यायास्तिरः[23] शोचिषा[24] ददृशे पावकः ॥ ४ ॥

आ यः पप्रौ[14] । आपूरयति । यः[15] । जायमान[16] । द्यावापृथिव्यौ[17] । दूरे दृश्यमानया । भासा[18] । कृष्णवर्त्मा[19] । अथ[20] । बहु[21] । चित्[22] । तमः[23] । रात्रेः[24] । तिरस्कृत्य[25] । शोचिषा[26] । दृश्यते । पावकः ।

नू नश्चित्रं[27] पुरुवाजाभिरूती अग्ने रयिं मघवद्भ्यश्च धेहि[28] ।
ये राधसा श्रवसा चात्यन्यान्त्सुवीर्येभिश्चाभि सन्ति जनान् ॥ ५ ॥

नू नश्चित्रम्[27] । क्षिप्रम्[28] । अस्मभ्यम् । हविः, चित्रम्[29] । बह्वन्नैः[30] । रक्षणैः सह । अग्ने ! धनम् । प्रयच्छ[31] । ये । धनेन । अग्नेन । च[32] । अति[33] । अन्यान् । अभिभवन्ति । जनान्[34] । सुवीर्यैः[35] । चाभिभवन्ति

---

१. पीवाय P. वीपायः D.
२. यजमानः Sy.
३. मनुष्येषु मध्ये Sy.
४. हवींषि प्रयच्छति Sy.
५. मेधास्तुक्थैः P. स्तुतिभिः सार्धम् Sy.
६. आश्चर्यभूताभिः Sy.
७. यजमानम् Sy.
८. P., D. read तनूः क्षणैः for तम् । रक्षणैः ॥ रक्षाभिः Sy.
९. ०प्त P. ०प्तैः D. विचित्रदीप्तिरग्निः Sy.
१०. गोभिर्युक्तस्य Sy.
११. प्रज्ञस्य P., D. गोष्ठस्य Sy.
१२. सातौ सम्भजने Sy.
१३. धारयति Sy.
१४. पप्रौ P. १५. अग्निः Sy.
१६. प्रादुर्भवन् Sy.
१७. विस्तीर्णे द्यावापृथिव्यौ Sy.
१८. दीप्त्या Sy.
१९. अनन्तरम् Sy.
२०. अपि Sy.
२१. P. reads बलितमः and D. reads बपितमः for बहु । चित् । तमः ॥ अन्धकारम् Sy.
२२. रात्रेः P. रात्रेः सम्बन्धि Sy. ऊर्म्येति रात्रिनाम Ngh. 1.7.
२३. तिरस्कुर्वन् Sy.
२४. शोषय P., D.
२५. ०श्चितं D. २६. हे अग्ने ! Sy.
२७. चायनीयम् Sy.
२८. बह्वन्नैः P., D. -
२९. देहि Sy.
३०. चशब्दो वक्ष्यमाणेन समुच्चयार्थः Sy.
३१. Omitted by P. अतिशयेन Sy.
३२. अतिभ० P., D.
३३. जनात् P. मनुष्यान् Sy.
३४. शोभनैर्वीर्यैश्च Sy.
३५. चाभव० P., D. तादृशान् पुत्रांश्चास्मभ्यं देहीत्यर्थः Sy.

तेभ्योऽस्मभ्यम्, इति ।

इमं यज्ञं चनो धा अग्न उशन्यं तं आसानो जुहुते हविष्मान् ।
भरद्वाजेषु दधिषे सुवृक्तिमवीर्वाजस्य गध्यस्य सातौ ॥ ६ ॥

इमं यज्ञम् । इमम् । यज्ञम् । चनश्च । धारय । अग्ने ! कामयमानः । यं सोमाख्यं यज्ञम् । तुभ्यम् । आसीनो होता । प्रयच्छति । हविष्मान् । भरद्वाजेषु । धारयसि । स्तुतिम् । रक्षिता । अन्नस्य । त्वयि क्षेप्तव्यस्य । भजने । गधिर्मिश्रीभावकर्मा ।

वि द्वेषांसीनुहि वर्धयेलां मदेम शतहिमाः सुवीराः ॥ ७ ॥

वि द्वेषांसि । शत्रून् । विगमय । वर्धय । अन्नमस्माकम् । मदेमहि । शतसंवत्सराः । सुपुत्राः ।

VI.११.

यजस्व होतरिषितो यजीयानग्ने बाधो मरुतां न प्रयुक्ति ।
आ नो मित्रावरुणा नासत्या द्यावा होत्रायं पृथिवी ववृत्याः ॥ १ ॥

यजस्व । यजस्व । होतः ! प्रेषितः । यष्टृतरस्तत्र त्वम् । यथा । मरुताम् ।

---

१. ०भ्य P., D. २. VM. ignores मघवद्भ्यः ॥ हविर्लक्षणधनयुक्तेभ्यः Sy.
३. हे अग्ने ! Sy. ४. पुरोवर्ति Sy.
५. यागसाधनम् Sy.
६. चगश्च P., D. हविर्लक्षणमन्नम् Sy.
७. धेहि । स्वात्मनि धारय Sy.
८. अग्ने म P., D. ९. कामयमानस्त्वम् Sy.
१०. पुरोडाशादिकम् Sy.
११. तुभ्यं त्वदर्थम् Sy. १२. उपविशन् Sy.
१३. जुहोति तमिममित्यन्वयः Sy.
१४. हविर्युक्तो यजमानः Sy.
१५. अपि च भरद्वाजेषु ऋषिषु Sy.
१६. धारय Sy.
१७. स्तुति P. सुष्ठु दोषैर्वर्जितां स्तुतिम् Sy.
१८. अवीः । तानूवीन्रक्ष च Sy.
१९. ०प्तस्य P. मिश्रणीयस्य प्राप्यस्य Sy. गध्यतिर्मिश्रीभावकर्मा N. ५.१५.
२०. सम्भजने निमित्तभूते Sy.
२१. गतिर्मि० P. The passage गधिर्मिश्रीभावकर्मा should immediately follow त्वयि क्षेप्तव्यस्य and precede भजने ।
२२. हे अग्ने ! Sy. २३. द्वेष्टॄन् Sy.
२४. विविधं गमय Sy.
२५. अन्नं चास्मदीयम् Sy.
२६. मेदे० P. मोदेम तृप्ता भूयास्म Sy.
२७. शतं हेमन्तान् संवत्सरान् Sy.
२८. शोभनैर्वीरैः पुत्रपौत्रादिभिरुपेताः सन्तः Sy.
२९. 'यजस्व होतः' इति षड्ऋचमेकादशं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमाग्नेयम् । अनुक्रम्यते च 'यजस्व षट्' (KSA.२९.११.p.२२.) इति । प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः Sy.
३०. Omitted by P., D. ३१. ०ता D.
३२. प्रो० D. अस्माभिः प्रार्थितः सन् Sy.
३३. यष्टृतमस्त्वम् Sy.
३४. नेति सम्प्रत्यर्थे cf N.७.३१. सम्प्रति Sy.
३५. देवानाम् Sy.

शर्धः[1]। प्रयुज्यमानं[2] प्रादुर्भवन्। यथा देवानां वर्तयति[3] तद्वदावर्तय[4]। अस्माकम्। मित्रावरुणौ[5]। अश्विनौ[6]। द्यावापृथिव्यौ[7] च[8] यथा[9] तान् यजस्वेति[10]।

त्वं होता मन्द्रतमो नो अध्रुगन्तर्देवो विदथा मर्त्येषु।
पावकया जुह्वा३ वह्निरासाग्ने यजस्व तन्वं१ तव स्वाम्॥ २॥

त्वं होता। त्वम्[11]। होता[12]। मादयितृतमः[13]। अस्माकम्। अद्रोग्धा[14]। मनुष्येषु। अन्तः[15]। यज्ञे[16]। देवो वर्तसे[17]। स शोधयित्र्या[18]। ज्वालया[19]। आस्यभूतया[20]। वह्निस्त्वम्[21]। अग्ने[22]! तव। स्वभूताम्[23]। तन्वम्[24]। यजस्व।

धन्या चिद्धि त्वे धिषणा वष्टि प्र देवाञ्जन्म गृणते यजध्यै।
वेषिष्ठो अङ्गिरसां यद्ध विप्रो मधुच्छन्दो भनति रेभ इष्टौ॥ ३॥

धन्या चिद्धि। धननिमित्ता[25]। स्तुतिः। त्वाम्। कामयते। तथा सति[26] प्रगच्छ[27]। देवान्[28]। जन्मनि

---

१. शत्रूणां बाधकं गणं यजस्व। यद्वैतद्वाक्यद्वयम्। हे होतरग्ने! यजस्व देवानित्येकं वाक्यम्। प्रयुज्यत इति प्रयुक्ति बलम्। मरुतां न प्रयुक्ति मरुतां बलमिवास्मच्छत्रून् बाधः बाधस्वेति द्वितीयं वाक्यम् Sy.

२. ०नः P.
प्रयुक्तौ प्रयुज्यमाने यज्ञे Sy.

३. देवानावर्त० is suggested for देवानां वर्त०।

४. आवहेत्यर्थः Sy.

५. वरुणौ P. अपि च मित्रावरुणौ अहरभिमानी देवो मित्रो वरुणो रात्र्यभिमानी तौ च Sy.

६. सत्यस्य नेतारौ सत्यस्वभावावेव वा नासिकाप्रभवौ वाश्विनौ Sy.

७. दिवं च पृथिवीं च एतांश्च देवान् Sy.

८. Omitted by P.

९. याथ D.

१०. VM. ignores अग्ने and होत्राय॥ होत्राय अस्मद्यज्ञाय तदर्थम् Sy.

११. हे अग्ने! त्वम् Sy.

१२. देवानामाह्वाता भवसि Sy.

१३. स्तुत्यतमः Sy.

१४. अद्रोग्धा, अस्मदर्थं द्रोहरहितो वा। सर्वदा मित्रभूत इत्यर्थः Sy.

१५. मध्ये वर्तमानः Sy.

१६. विदथे यज्ञे Sy.

१७. दानादिगुणयुक्तः Sy.

१८. वर्धसे P.

१९. हूयन्तेऽस्यामाहुतय इति जुहूर्ज्वाला। तया Sy.

२०. ज्वालाचस्य० P. ज्वालास्य० D. देवानामास्यभूतया Sy.

२१. वहनिस्त्वमू P., D.
हविषां वोढा Sy.

२२. अपि च हे अग्ने! Sy.

२३. स्विष्टकृदाख्याम् Sy.

२४. तनुवं P., D. तनूम् Sy.

२५. धनमिच्छन्ती धनहेतुभूता Sy.

२६. था D.

२७. प्रकर्षेण यष्टुम् Sy.

२८. यष्टव्यानिन्द्रादीन् Sy.

जातस्त्वम्[१]। स्तुवते मह्यम्। यष्टुम्[३]। अङ्गिरसाम्[४]। अत्यन्तं कम्पयिता। यस्मात्[५]। खलु। विप्रो[६] भरद्वाजः। मधुसदृशम्[७]। छन्दः[८]। उच्चारयति[९]। स्तोता। यज्ञे[१०]।

अदिद्युतत्स्वपाको बिभावाग्ने यजस्व रोदसी उरूची।
आयुं न यं नमसा रातहव्या अञ्जन्ति सुप्रयसं पञ्च जनाः॥ ४॥

अदिद्युतत्[११]। द्योतते[१२]। सुष्ठु[१३]। अपक्तव्यप्रज्ञः। दीप्तिमान्। प्रत्यक्षोऽग्निरथ त्वमग्ने[१५]! यजस्व[१६]। द्यावापृथिव्यौ। विस्तीर्णे[१७]। मनुष्यम्[१८]। इव। अग्नेन[१९]। यं[२०] त्वाम्। दत्तहविष्काः[२१]। आज्येनाञ्जन्ति[२२]। शोभनाग्नम्[२३]। पञ्च। जनाः[२४] संयजस्वेति[२५]।

वृञ्जे ह यन्नमसा बर्हिरग्नावयामि स्रुग्घृतवती सुवृक्तिः।
अम्यक्ति सद्म सदने पृथिव्या अश्रायि यज्ञः सूर्ये न चक्षुः॥ ५॥

वृञ्जे[२६] ह। स्तृणामि[२७]। अग्नेन सह[२८]। यदा[२९]। बर्हिः। अग्निसमीपे। तदा हस्ताभ्यां यथा भवति[३०]।

---

१. त्वदीयं प्रादुर्भावम् Sy.
२. यजमानायेदृग्भूतयजमानार्थम् Sy.
३. यष्टृतमं गिरसाम् P.
ऋषीणां मध्ये Sy.
४. अतिशयेन स्तुतेः प्रेरयिता Sy.
५. यस्मान् P. यदा Sy.
६. मेधावी Sy.
७. मधुमन्मदकरम् Sy.
८. ०दश उञ्छदन्तः P. स्तोत्रम् Sy.
९. उच्चारयति। तदा धिषणा वष्टीत्यन्वयः Sy.
१०. VM. ignores चित् and हि॥ चिद्धीत्येतत् पादपूरणम् Sy.
११. अभिद्युत् तत् D.
१२. ०न्ते D. अयमग्निः सुष्ठु दीप्यते Sy.
१३. वक्तव्य० P. अवक्त० D. पाकः पक्तव्यप्रज्ञो मूर्खः, तद्विलक्षणोऽपाकः Sy.
१४. शेषः प्रत्यक्षकृतः Sy.
१५. हे अग्ने! स त्वम् Sy.
१६. हविषा पूजय Sy.
१७. उरु विस्तीर्णमञ्चन्त्यौ विस्तृते Sy.
१८. मनुष्यमतिथिम् Sy.
१९. अग्नेन हविर्लक्षणेन Sy.
२०. ये D.
२१. दत्तहविष्काः सन्तः Sy.
२२. सिञ्चन्ति तर्पयन्ति। स त्वं यजस्वेत्यन्वयः Sy.
२३. शोभनहविर्लक्षणाग्नमग्निम् Sy.
२४. मनुष्या ऋत्विग्यजमानलक्षणाः Sy.
२५. तं यजस्वेति is suggested for संयजस्वेति।
२६. पृथञ्जे P. पृञ्जे D.
२७. तृ० P. वृजिश्छेदनार्थः। छिद्यते। आच्छिद्यत इत्यर्थः Sy.
२८. हविषा Sy.
२९. वा P.
३०. यता is suggested for यथा॥
३१. अयामि, नियम्यते, बर्हिष्यासाद्यते Sy.

स्रुक्[१]। घृतवती[२]। सुप्रवृत्ता[३]। गम्यते[४]। स्वं स्वं स्थानम्[५]। देवैर्वेद्याम्[६]। अथ तत्र यज्ञश्च[७]। श्रितोऽभितो[८] भवति। सूर्ये[९]। इव[१०]। तेजः[११]।

दशस्या नः पुर्वणीक होतर्देवेभिरग्ने अग्निभिरिधानः।
रायः सूनो सहसो वावसाना अतिं स्रसेम वृजनं नांहः॥ ६॥

दशस्य[१२]। देहि[१३]। अस्मभ्यम्। पुर्वनीक[१४]! होतः[१५]! दीप्यमानैरग्नैः[१६]। अग्निभिस्त्वानुचरैः[१७] सह। दीप्यमानः[१८]। धनानि। हे सहसः, सूनो! स्वगृहे वर्तमानाः[१९]। अतितरेम[२०]। उपद्रवम्[२१]। च[२२]। आहन्तृ[२३]।[२४]

VI.12.

मध्ये होतां दुरोणे बर्हिषो राळग्निस्तोदस्य रोदसी यजध्यै।
अयं स सूनुः सहस ऋतावा दूरात्सूर्यो न शोचिषा ततान॥ १॥

मध्ये होता[२५][२६]। मध्ये[२७]। होता[२८]। गृहे[२९]। यज्ञस्य। राजा। अग्निः। हविषः[३०] प्रेरयितुः[३१]। यज्ञाय[३२]। दीप्यमानौ द्यावापृथिवी तेजसा तनोति तदेवाह—अयम्। सहसः। सूनुः[३५]। यज्ञवान्[३६]। दूरे स्थितोऽपि ततः[३७]।

---

१. सु P. २. घृतपूर्णा Sy.
३. सुष्ठु दोषैर्वर्जिता Sy.
४. म्यक्षतिर्गतिकर्मा। गम्यते परिगृह्यते Sy.
५. हविरासादनार्था वेदिः Sy.
६. वद्याम् P. VM. seems to explain पृथिव्याः and सदने together as वेद्याम्॥ तथा भूमेः स्थाने Sy.
७. ०भतो D. यजमान आश्रितो भवति Sy.
८. आर्ये P. सर्वस्य प्रेरक आदित्ये Sy.
९. तत्र दृष्टान्तः। यथा Sy.
१०. प्रकाशकं तेजः समवैति तद्वत् Sy.
११. VM. ignores ह॥ ह खलु Sy.
१२. प्रयच्छ Sy.
१३. हे बहुज्वाल! Sy.
१४. पर्वनीक तोतव् P., D. देवानामाह्वातरग्ने! Sy.
१५. ०रग्नैः D. द्योतमानैः Sy.
१६. त्वद्विभूतिभूतैः सार्धम् Sy.
१७. इध्यमानो दीप्यमानः सन् Sy.
१८. हे बलस्य पुत्राग्ने! Sy.
१९. हविषा त्वामाच्छादयन्तो वयम् Sy.
२०. अतिगच्छेम। अतिक्रामेमेत्यर्थः Sy.
२१. उपद्रवोवम् P. शत्रुम् Sy.
२२. इव Sy. २३. पापम् Sy.
२४. VM. ignores अग्ने।
२५. 'मध्ये होता' इति षड्चं द्वादशं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमाग्नेयम्। 'मध्ये' (KSA. 29. 12.p.22.)। इत्यनुक्रान्तम्। प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः Sy.
२६. Omitted by P.
२७. निषीदतीति शेषः Sy.
२८. देवानामाह्वाता Sy.
२९. गृहे मध्ये निषीदतीति शेषः Sy.
३०. ०षा P.
३१. तुद्यते तपसा पीड्यत इति तोदो यजमानः। तस्य Sy. ३२. यष्टुम् Sy.
३३. द्यावापृथिव्यौ Sy.
३४. तनेताति P. ३५. पुत्रः Sy.
३६. सत्यवान् यज्ञवान् वाग्निः Sy.
३७. दूरत एव Sy.

सूर्यः । इव । तेजसा । तनोति ।[1] [2]

आ यस्मिन्त्वे स्वपाके यजत्र यक्षद्राजन्त्सुर्वतातेव नु द्यौः ।
त्रिषधस्थस्ततुरुषो न जंहो हव्या मघानि मानुषा यजध्यै ॥ २ ॥

आ यस्मिन् । आभिमुख्येनेज्यते[3] । यस्मिन् । त्वयि । सुष्ठु[4] । अपक्तव्यप्रज्ञे[5] । यष्टव्य[6] ! दीप्यमान[7] ! यज्ञ इव । द्युलोकम्[8] । त्रिस्थानः[9] स त्वम्[10] । द्युलोक[11] तरत[12] आदित्यस्य[13] । इव[14] । वेग[15] । हवींषि[16] । महनीयानि । मनुष्यसम्बन्धीनि[17] । यष्टु[18] वेगयुक्तो[19] भवसि[20] ।

तेजिष्ठा यस्यारतिर्वेनेराट् तोदो अध्वन्न वृधसानो अद्यौत् ।
अद्रोघो न द्रविता चेतति त्मन्नमर्त्योऽवर्त्र ओषधीषु ॥ ३ ॥

तेजिष्ठा । अतिशयेन तेजस्विनी[21] । यस्य[22] । ज्वाला[23] । वने राजते[24] । तुद्यमानोऽश्व[25] । इव । अध्वनि[26] शीघ्रं गच्छन् । वर्धमानोऽग्नि[27] । द्योतते[28] । द्रोहरहित[29] । इव वायु । गच्छन्[30] । आत्मनैव[31] भक्ष्यम् । जानाति[32] ।

---

१. आतनोति विस्तारयति । दूरदेशे वर्तमानोऽपि सूर्य इव सर्वं जगद्भासयतीत्यर्थः Sy.
२. VM. ignores सः ॥ स तादृशः Sy
३. आयजति हवींषि जुहोति Sy.
४. अत्यन्तम् Sy.
५. अवक्त० P., D. प्राज्ञे Sy.
६. हे यष्टव्य ! Sy.
७. यष्टव्य दीप्यमाना यष्टव्यन्दीप्यमाना P. यष्टव्य दीप्यमाना यष्टव्य दीप्यमान D. राजमानाग्ने ! Sy.
८. इवशब्दः पूरकः । सर्वतातौ सर्वैस्तायमाने यज्ञे । यद्वा सर्वशब्दात्स्वार्थिकस्तातिल्प्रत्ययः । सर्वः स्तोता Sy. सर्वतातेति यज्ञनाम Ngh. 3.17.
९. ०के P. स्तोता Sy.
१०. ०न P. त्रिषु लोकेषु सह स्थितः । यद्वा गार्हपत्यादिरूपेण त्रिधावस्थितः Sy.
११. त्व P.
१२. तरिता सूर्यः । यद्वा तरतुः सूर्यस्य 'तॄ प्लवनतरणयोः' इत्यस्मात् क्वसौ रूपं ततर्वानिति, तस्य षष्ठ्यां रूपं ततरुष इति Sy.
१३. आदित्य व P., D.
१४. शीघ्रं गन्ता भव । जंह इति हन्तेर्गतिकर्मणो रूपम् । यद्वा जंहो वेगस्तव भवत्वित्यर्थः Sy.
१५. हव्यानि हवींषि Sy.
१६. मंहनीयानि प्रशस्यानि Sy.
१७. ०ष्यास० P. मनुष्याणां सम्बन्धीनि Sy.
१८. ०ष्टु P., D. देवेभ्यो दातुम् Sy.
१९. वंग० P., D.
२०. VM. ignores नु ॥ क्षिप्रम् Sy.
२१. अतिशयेन तेजस्विनी सती Sy.
२२. अग्नेः Sy.
२३. गन्त्री ज्वाला Sy.
२४. वावरूपेणारण्ये राजमाना वर्तते Sy.
२५. तुभ्यमा० P. तोदः सर्वस्य प्रेरकः सूर्यः Sy.
२६. Omitted by D. स्वमार्गेऽन्तरिक्षे Sy.
२७. अग्निः is omitted by P. वर्धमानः सोऽग्निः Sy. २८. प्रकाशते Sy.
२९. अपि च अद्रोग्धव्यः, यद्वा प्राणरूपेण सर्वेषामद्रोग्धा वायुः Sy.
३०. द्रविता शीघ्रगामी सन् Sy.
३१. आत्मना स्वप्रकाशेनैव Sy.
३२. जना० P., D. चेतयति । सर्वं जगत् ज्ञापयति Sy.

अमर्त्यः[1] । ओषधीषु[2] शुष्कासु । आवरणीयः[3] ।

सास्माकेभिरेतरी न शूषैरग्निः स्तवे दम आ जातवेदाः ।
द्रुवन्नो वन्वन् क्रत्वा नार्वोस्रः पितेव जारयायि यज्ञैः ॥ ४ ॥

सास्माकेभिः[4] स । अग्निः । अस्मदीयैर्वचनैः[5] । सुखकरैः[6] । स्तूयते[7] । यज्ञगृहे[8] । जातवेदाः[9] । यथा । एतन्नामधेय ऋषौ । दार्वन्न[10] । भजमान[11] । प्रज्ञया[12] । इव । अश्व[13] । सङ्ग्रामम्[14] । वलीवर्दः[15] । इव[16] । पालयिता[17] गोयूथस्य । जातयान्येव(?)बलीवर्देनाधिष्ठिता[18] गोवधूः[19] गच्छन् यज्ञानुद्दिश्य[20] शीघ्रं गच्छतीत्यर्थः । ह्रस्वश्छान्दसः[21] ।

---

१. मरणरहितः Sy.
२. ओषः पाकः एषु धीयत इत्योषधयो वनानि । तेषु Sy.
३. ०य P. केनाप्यवारणीयश्च भवन् Sy.
४. भरद्वाजस्यार्षम् Dur. भरद्वाजस्य SKN.
५. स्तोतृभिः Sy. छान्दसमात्वम् Dur. अस्मदीयैः पुत्रपौत्रादिभिर्ऋग्भिर्वा SKN.
६. सुखकरैः स्तोत्रैः Sy. सुखैः स्तोत्रैः Dur. शूषमिति सुखनाम । (Ngh. 3.6.) सुखैः सुखहेतुभिः । कैः ? सामर्थ्यात्स्तोत्रैः SKN.
७. आभिमुख्येनावस्थितैः स्तूयते Dur. व्यत्ययेनेवं कर्मणि प्रथमैकवचनस्य स्थान उत्तमैकवचनं द्रष्टव्यम् । स्तूयते, आकारः स्तव इत्येतेन सम्बध्यते । आभिमुख्येन मर्यादया वा यथाशास्त्रं स्तूयते SKN.
८. अस्मदीये यज्ञगृहे Sy. यज्ञगृहे यज्ञे Dur. यज्ञे तद्गृहे SKN.
९. जातधनो जातप्रज्ञो वा Sy. जातविद्यो जातधनो वा Dur., SKN.
१०. ०एतृना० P. गन्तरि याचमाने पुरुषे विद्यमानानि स्तोत्राणि यथात्यन्तं सुखकराणि तथा Sy. अतिथिरिव Dur. एताऽत्र सततगामित्वादतिथिरुच्यते । प्रथमार्थे चेयं सप्तमी । गन्तेव सततगामीवातिथिर्गृहस्थैः SKN.
११. द्रुर्द्रुमः । स एवान्नं यस्य स तथोक्तः Sy. द्रुमान्नः Dur. काष्ठान्नः काष्ठभक्ष इत्यर्थः SKN.
१२. ०न P. वनानि सम्भजन् Sy. वन्वन्निति 'वन षण सम्भक्तौ' इत्यस्य रूपम् । सम्भज्यमानः SKN.
१३. क्रतुनात्मीयेन कर्मणा Sy. वननीयकर्मा वननीयप्रज्ञानो वा Dur. क्रत्वेति कर्मनाम । (Ngh. 2.1.) कर्मणेव शीघ्रगमनलक्षणेन SKN.
१४. अश्व P., D. गन्ता च भवति Sy. अनर्वाञ्चाश्रितः कश्चिदन्यम् Dur. अर्वेत्यश्वनाम Ngh. 10.14. १५. वृषभः Sy.
१६. तत्र दृष्टान्तः । वत्सानां जनको वोळ्हो वृषभ इव । स यथा मैथुनार्थं शीघ्रं गच्छति तद्वत् Sy. साण्ड इव Dur. उपमानानन्तरं चेदम् । उस्र इति गोनाम (Ngh. 2.11.) यथा च गौर्बलीवर्दः SKN.
१७. गवां पिता Dur. पिता गोपायिता स्वापत्यानां पालयिता वा स्वकर्मणा स्तूयते तद्वत् SKN.
१८. यज्ञैर्यज्ञवद्भिर्यजमानैश्च जारयायि । स्तूयते । जरतेः स्तुतिकर्मण एतद्रूपम् Sy. यथा साण्डः पुत्रपौत्रादिभिरनेकधा प्रजायते ।....एवमत्र 'जारयायि' इत्यस्य 'अजायि' इत्यर्थप्रतीतिः Dur. अजायत, जायतेऽग्निराहवनीयात्मना SKN. १९. ०नधि० D.
२०. Omitted by P. शोव० D.
२१. एवं यज्ञेषु विह्रियमाणोऽनेकधा जायतेऽग्निः Dur. यज्ञेषु यज्ञैर्वा सह SKN. उस्र इव गोपितापाजायि यज्ञैः N.6.15., SKN.II.441.
२२. VM. ignores आ ॥ आभिमुख्येन Sy.

अधं स्मास्य पनयन्ति भासो वृथा यत्तच्चंदनुयाति पृथ्वीम् ।
सद्यो यः स्पन्द्रो विषितो धवीयानृणो न तायुरति धन्वा राट् ॥ ५ ॥

अध स्म । अथ[1]। खलु[2]। एनम्[3]। स्तुवन्ति[4]। दीप्यमानम्[5]। अनायासेन । यदा। छिन्दन्[6]। अनुयाति[7]। भूतिम्[8]। सद्य एव[9]। यः[10]। स्यन्दनशीलः[11]। विमुक्तः[12]। अत्यन्त गन्ता[13]। मनुष्यसकाशाद् गच्छन्[14]। इव[15]। स्तेनः[15]। धन्व[16]। अतिक्रम्यारण्यं प्राप्य[17]। राजते ।

स त्वं नो अर्वन्निदाया विश्वेभिरग्ने अग्निभिरिधानः ।
वेषि रायो वि यासि दुच्छुना मदेम शतहिमाः सुवीराः ॥ ६ ॥

स त्वं नः । सः[18]। त्वम्। अस्मान्। गन्तः[19]! निन्दित्र्या. प्रजाया. परिरक्ष[20]। विश्वेभि[21]। अग्ने! अग्निभिः शाखाभूतैः। दीप्यमान.[22]। कामयस्व[23] च। धनानि। विजहि[24] च। शत्रून्[25]। मदेम[26]। शतहिमा[27]। सुवीराः[28]।

---

१. अस्मिंल्लोके Sy.
२. स्मेति पूरकः Sy.
३. अस्याग्नेः Sy.
४. स्तोतारः स्तुवन्ति Sy.
५. विध्यम् P.
भासो रश्मीन् Sy.
६. तक्षन् तनूकुर्वन् । वनानि सम्यग्दहन् Sy.
७. अनुगच्छति तदानीं पनयन्तीत्यन्वयः Sy.
८. भूरि P. भूमिम् is suggested for भूमिम् ॥ विस्तीर्णामरण्यभुवम् Sy.
९. अत एव शीघ्रम् Sy.
१०. य D. अग्निः Sy.
११. स्यन्द० P., D.
स्यन्दनवान् Sy.
१२. प्रतिबन्धरहितः Sy.
१३. अन्ता P., D.
गन्तृतमो भवति Sy.
१४. ऋणोतिर्गतिकर्मा । शीघ्रं गन्ता भवति Sy.
१५. यथा स्तेनः, तद्वत् Sy. तायुरिति स्तेननाम Ngh. 3.24.
१६. मरुभूमिम् । यद्वा धन्वन्त्यस्मादाप इति धन्वान्तरिक्षम् । अतिशयेनान्तरिक्षमाक्रम्य Sy.
१७. रज० D.
१८. तादृशः Sy.
१९. हे अर्वन्! गन्तः! अग्ने! Sy.
२०. ०न्तश्चिन्द्रीत्र्याः P. ०न्तश्चिन्दि० D. निन्दाया एव वा पाहीति शेषः Sy.
२१. सर्वैः Sy.
२२. इध्यमानः सन् Sy.
२३. गमय । यद्वा हविर्लक्षणानि धनानि वेषि कामयसे Sy.
२४. विविधं गमयसि च Sy.
२५. दुःखकारिणीः शत्रुसेनाः Sy.
२६. मोदेम Sy.
२७. शतं संवत्सरान् Sy.
२८. वयं च सुवीराः शोभनपुत्रपौत्राः सन्तः Sy.

VI.13.

त्वद्विश्वा सुभग सौभगान्यग्ने वि यन्ति वनिनो न वयाः ।
श्रुष्टी रयिर्वाजो वृत्रतूर्ये दिवो वृष्टिरीड्यो रीतिरपाम् ॥ १ ॥

त्वद्विश्वा[1] । त्वत्तः । विश्वानि[2] । सुभग[3] ! सौभाग्येन[4] । विविध गच्छन्ति[5] । वृक्षादिशाखाः[6] । क्षिप्रम् । बलम्[7] । धनं च । सङ्ग्रामे त्वत्तो भवति । तथा[10] त्वत्प्रसादादेव दिवः[11] । वृष्टिर्निपतति[12] । स्तुत्यस्त्वं भवसि[13] । अपाम्[14] । प्रेरयिता[15] ।

त्वं भगो न आ हि रत्नमिषे परिज्मेव क्षयसि दस्मवर्चाः ।
अग्ने मित्रो न बृहत ऋतस्यासि क्षत्ता वामस्य देव भूरेः ॥ २ ॥

त्वं भगो नः[16] । त्वम् । भजनीय. । अस्माकम्[18] । त्वत्तो हि[19] । रत्नम्[20] । आभिमुख्येनेष्यते[21] । वायुरिव[22]

---

१. 'त्वद्विश्वा' इति षड्चं त्रयोदशं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमाग्नेयम् । 'त्वद्विश्वा' (KSA. 29.13.p.22.) । इत्यनुक्रान्तम् । प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः Sy.

२. विश्वा P., D. सर्वाणि Sy.

३. हे शोभनधनाग्ने ! Sy.

४. ०ग्यानि is suggested for ०ग्येन ॥ धनानि Sy.

५. विविधं निर्गच्छन्ति । हिरण्यमूलत्वात्सर्वेषां धनानाम् । हिरण्यं चाग्नेः सकाशादुत्पन्नम् । 'तस्य रेतः परापतत्तद्धिरण्यमभवत्' (TB. 1.1.3.8.) इति श्रुतेः Sy.

६. ०खा D. वृक्षात् । इव । शाखाः is suggested for वृक्षाविशाखाः ॥ निर्गमने वृष्टान्तः । यथा वृक्षाच्छाखा विविधं निर्गच्छन्ति तद्वत् Sy.

७. बलम् seems to be the explanation of वाजः ॥ Sy. also explains वाजः by बलम् ॥

८. तथा पशुसङ्घश्च त्वत्सकाशादेव भुष्टी व्येति निर्गच्छति । 'पशवो वै रयिः पशूनेवावरुन्धे' (TS.1.5.7.2) इति तैत्तिरीयकम् Sy.

९. वृत्रतूर्ये वृत्राणां हिंसके सङ्ग्रामे शत्रून् जेतुम् Sy.

१०. यथा P.

११. अन्तरिक्षात् Sy.

१२. या वृष्टिः सापि त्वत्त एव व्येति । 'अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः' । (Manu. 3. 76; Maitr U. 6.37) इति स्मरणात् Sy.

१३. अतस्त्वमीड्यः सर्वैः स्तुत्यः सन् Sy.

१४. उदकानाम् Sy.

१५. गमयिता भवसि Sy.

१६. VM. ignores अग्ने and न ।

१७. हे अग्ने ! Sy. १८. अस्मभ्यम् Sy.

१९. हीति पूरकः Sy.

२०. रमणीयं धनम् Sy.

२१. त्वत्तोभिमुख्यानिष्येते P. ०ष्येते D. आगमय । प्रयच्छ । 'इण् गतौ' इत्यस्यैतद्रूपम् Sy.

२२. परितो गन्ता वायुरिव Sy.

त्वम्[1] । सर्वत्र निवससि[2] । दर्शनीयतेजाः[3] । अग्ने ! सखा[4] । इव । बृंहितस्य[5] । सत्यभूतस्य[6] । भवसि । दाता[7] । धनस्य[8] । देव[9] ! बहोः[10] ।

स सत्पतिः शवसा हन्ति वृत्रमग्ने विप्रो वि पणेर्भर्ति वाजम् ।
यं त्वं प्रचेत ऋतजात राया सजोषा नप्त्रापां हिनोषि ॥ ३ ॥

स सत्पतिः[11] । सः[12] । सत्पतिः[13] । बलेन । हन्ति । शत्रुम्[14] । अग्ने ! मेधावी[15] । विविधं हरति[16] । पणेः[17] । अन्नम्[18] । पणिः पणनादयजमानः[19] । यम्[20] । प्रकृष्टज्ञान ! यज्ञार्थं जात[21] ! अपाम् । नप्त्रा[22] देवेन । सहितः[23] । सङ्ग्रामे प्रेरयसि[24] । धनार्थम्[25] ।

यस्ते सूनो सहसो गीर्भिरुक्थैर्यज्ञैर्मर्तो निशितिं वेद्यानट् ।
विश्वं स देव प्रति वारमग्ने धत्ते धान्यं पत्यते वसव्यैः ॥ ४ ॥

यस्ते । यः । तुभ्यम्[26] । हे सहसः, सूनो[27] ! स्तोत्रशस्त्रैः[28] । सर्वं वेद्याम्[29] । सस्कृत हवि[30] । सोमैः[31] सह[32] ।

---

१. यद्वा क्षयतिरैश्वर्यकर्मा । सर्वस्येशिषे Sy.
२. दर्शनीयदीप्तिस्त्वम् Sy.
३. मित्रः प्रमीतेस्त्रायको देव इव Sy.
४. प्रहितस्य P. पृंहि D. महतः Sy.
५. उक्थस्य यज्ञस्य वा Sy.
६. क्षदतिरत्र दानकर्मा Sy.
७. वननीयस्य धनस्य च दाता भवतीत्यनुषङ्गः Sy.
८. हे द्योतमानाग्ने ! Sy.
९. बहुलस्य Sy.
१०. सन्पतिः P.
११. पुरुषः Sy.
१२. सतां पालयिता Sy.
१३. ०ति ब० D.
१४. आवरकं शत्रुम् Sy.
१५. ०वि P. स च मेधावी सन् Sy.
१६. वि भर्ति वियुज्य हरति। 'हृग्रहोर्भः' इति भत्वम् Sy.
१७. वणिजः एतन्नाम्नोऽसुरस्य Sy.
१८. अन्नं बलं वा Sy.
१९. The passage पणिः पणनाद्वयजमानः should immediately follow पणेः and precede अन्नम् ।
२०. पुरुषम् Sy.
२१. ऋतमिति यज्ञनाम । तदर्थं जातोग्ने ! Sy.
२२. अवाप्तप्ता P. अवाप्तप्ता D. न पातयित्रा पुत्रेण मध्यमस्थानेन वैद्युताग्निना Sy.
२३. सङ्गतस्त्वम् Sy.
२४. प्रेरयसि स हन्तीत्यन्वयः Sy.
२५. वनार्थं P., D. चतुर्थ्यर्थे तृतीया Sy.
२६. तव Sy.
२७. हे बलस्य सूनो ! पुत्राग्ने ! Sy.
२८. ०त्रं श० P., D. स्तुतिभिः शस्त्रैः Sy.
२९. स D. ३०. यज्ञभूमौ Sy.
३१. तैक्ष्ण्यम् Sy.
३२. यजमानसाधनैर्हविर्भिश्च Sy.

प्रापयति । सर्वविधम्[१] । सः[२] । देव[३] ! पर्याप्तम्[४] । धान्यम् । आत्मानं[५] प्रति च । धत्ते[६] । तथा वसुसमूहैः[७] सह[८] च । गच्छति[९] ।[१०]

ता नृभ्य आ सौश्रवसा सुवीराग्ने सूनो सहसः पुष्यसे धाः ।
कृणोषि यच्छवसा भूरि पश्वो वयो वृकायारये जसुरये ॥ ५ ॥

ता नृभ्यः[११] । अन्धहितानि[१२] तानि । नृभ्यः[११] । धनानि[१२] । सुपुत्राणि[१३] । अग्ने ! सहसः । सूनो ! पुष्ट्यर्थम्[१४] । करोषि[१५] । यस्त्वम् । बलेन[१७] । बहु[१८] । पशोः[१९] । अभिगन्ता[२०] । स्तेनाय[२१] । अभिगन्त्रे[२२] । उपक्षपित्रे[२३] जयाय[२४] ।[२५]

वघ्रा सूनो सहसो नो विहाया अग्ने तोकं तनयं वाजि नो दाः ।
विश्वाभिर्गीर्भिरभि पूर्तिमश्यां मदेम शतहिमाः सुवीराः ॥ ६ ॥

वघ्रा[२६] सूनो[२७] । वदिता[२८] । सहसः । सूनो ! महान्[२९] । अस्माकम्[३०] । अग्ने ! पुत्रम्[३१] । तत्पुत्रं च । अन्नवत्[३२] । अस्माकम्[३३] । धारय[३४] । सर्वाभिः । स्तुतिभिः[३५] । पूर्तिं[३६] पूरणम् । अभिप्राप्नुयाम्[३७] ।

---

१. सर्वम् Sy.
२. मर्तः Sy.
३. हे द्योतमानाग्ने ! Sy.
४. ०प्त P., D.
५. धन्यमात्मी च P. ०मात्मी D.
६. प्रतिधारयति Sy.
७. वसुभिश्च Sy.
८. स P. ९. सङ्गच्छते Sy.
१०. VM. ignores मर्तः । वा and अग्ने ॥ मनुष्यो यजमानः । वाशब्दश्चार्थे । हे अग्ने ! Sy.
११. शत्रुजनेभ्यः । यद्वा नृभ्यः स्तुतीनां नेतृभ्य आहृत्य Sy.
१२. सुश्रवांसि शोभनान्यन्नानि Sy.
१३. शोभनैः पुत्ररूपेतानि Sy.
१४. हे सहसः सूनो ! पुत्राग्ने ! Sy.
१५. पोषार्थम् Sy.
१६. करोषि । तदन्नमाहृत्य प्रयच्छेत्यर्थः Sy.
१७. बाले P. वाले D.
बलेन युक्तस्त्वम् Sy.
१८. बहुलम् Sy.
१९. पशोः सम्बन्धि दध्यादिलक्षणं यत् Sy.
२०. ०न्तृ P., D. दध्यादिलक्षणं यद् अन्नम् Sy.
२१. अदात्रे Sy.
२२. शत्रवे Sy.
२३. उपक्षपयित्रे Sy.
२४. जनाय is suggested for जयाय ।
२५. अस्मासु धेहि । आभिमुख्येन प्रयच्छ । अस्मभ्यमाधेहि Sy.
आनिहितानि is suggested for अन्धहितानि ।
२६. पघ्र P. वघ्र D.
२७. स्तनो P.
२८. विता P.
वविता हितोपदेष्टा भव Sy.
२९. महन्नामैतत् Ngh. 3.3.
३०. अस्मोदकम् P.
३१. अपि च पुत्रम् Sy
३२. अन्नयुक्तम् Sy.
३३. अस्मभ्यम् Sy.
३४. देहि Sy.
३५. गीर्भिः त्वद्विषयाभिः Sy.
३६. कामानां पूर्तिम् Sy.
३७. अहं स्तोता अभिप्राप्नुयाम् । अन्यद्गतम् Sy.

VI.14.

अग्ना यो मर्त्यो दुवो धियं जुजोष धीतिभिः ।
भस॒न्नु स प्र पूर्व्य इषं वुरीतावसे ॥ १ ॥

अग्ना यः[1] । अग्नौ[2] । य । मनुष्य[3] । परिचर्यम्[4] । कर्म[5] च । सेवते[6] । प्रज्ञाभि[7] । प्रदीप्यते[8] । शीघ्रम्[9] । स[10] । मुख्य[11] । अन्न च । वृणीते[12] । रक्षणाय[13] पुत्रादीनाम् । [14]

अग्निरिद्धि प्रचेता अग्निर्वेधस्तंम ऋषिः ।
अग्निं होतारमीळते यज्ञेषु मनुषो[15] विशः[16] ॥ २ ॥

अग्निरित् । मनुष[15] । विश[16] ऋत्विज । स्पष्टं शिष्टम्[17] ।

---

१. 'अग्ना यः' इति षड्चं चतुर्दशं सूक्तं भरद्वाजस्यार्षमाग्नेयम् । षष्ठी शक्वरी, शिष्टाः पञ्चानुष्टुभः । तथा चानुक्रान्तम् 'अग्ना य आनुष्टुभं शक्वर्यन्तम्' (KSA. 29.14.p.22.) इति । प्रातरनुवाक आग्नेये ऋतावाश्विनशस्त्रे चेदं सक्तम् । सूत्रितञ्च—'अग्ना यो होताजनिष्ट' (ĀSS. 4.13.) इति । अत्रेश्चतुर्वीराख्ये चतूरात्रेऽहीने तृतीयेऽहनीदं सूक्तमाज्यशस्त्रम् । सूत्रितञ्च—'अग्ना यो मर्त्यो दुव इति तृतीये' (ĀSS. 10. 2.) Sy.

२. अग्नौ अग्निविषयम् Sy.

३. ०ष्य D.

४. परिचरणम् Sy.

५. कर्म च यज्ञादिलक्षणम् Sy.

६. सेवते । आचरति Sy.

७. स्तुतिभिः सार्धम् Sy.

८. प्रकाशते प्रकृष्टप्रकाशवान् भवेत् Sy.

९. क्षिप्रम् Sy.

१०. मर्त्यः Sy.

११. पूर्वेषां मुख्यः सन् Sy.

१२. वृणीत । सम्भजेत । शत्रुसकाशाल्लभेतेत्यर्थः Sy.

१३. पुत्रादीनां रक्षणार्थम् Sy.

१४. VM. ignores प्र ।

१५. मनुष्यस्य यजमानस्य Sy.

१६. प्रजा ऋत्विग्लक्षणाः Sy.

१७. By शिष्टम् VM. means अग्निः । इत् । हि । प्रचेताः । अग्निः । वेधस्तमः । ऋषिः । अग्निम् । होतारम् । ईळते and यज्ञेषु ॥ अग्निरेव प्रचेताः प्रकृष्टज्ञानवान् नान्यः कश्चित् । हि यस्मादेवं तस्माद्वेधस्तमो विधातृतमोऽतिशयेन हविर्वहनादीनां कर्ता ऋषिः सर्वस्य द्रष्टा च भवति ।....होतारं देवानामाह्वातारं तादृशमग्नि यज्ञेषु यागेष्वीळते स्तुवन्ति Sy.

नाना॑ ह्य॑ग्ने॒ त्वसे॒ स्पर्धन्ते॒ रायो॒ अर्यः॑ ।
तूर्व॑न्तो॒ दस्यु॑मा॒यवो॒ व्र॒तैः सी॒दन्तो॒ अव्र॑तम् ॥ ३ ॥

नाना॑[1] हि॑ । ना॑ना[2] । हि॑ । अग्ने॑ ! रक्षणा॑य[3] । स्पर्ध॑न्ते[4] । त्वया॑ दत्ता॑ रायः॑[5] । अभिगन्तार॑[6] । स्तोतृषु॑ तथा॑ त्वया॑ हिसन्त॑[7] । शत्रु॑म्[8] । मनु॑ष्याः॑[9] । कर्म॑भिः॑[10] । सहमा॑ना[11] भवन्ति । अयजमा॑नम्[12] ।

अग्निरप्सामृ॒तीषहं॑ वी॒रं द॑दाति॒ सत्प॑तिम् ।
यस्य॒ त्रस॑न्ति॒ शव॑सः सं॒चक्षि॒ शत्रवो॒ भिया ॥ ४ ॥

अग्निः॑[13] । अग्नि॑[14] । कर्मण॑ सम्भक्ता॑रम्[15] । हिसाया॑[16] सोढा॑रम्[17] । पुत्र॑म्[18] । द॑दाति[19] । सता॑ पति॑म्[20] । यस्य॑ पुत्र॑स्य[21] । बला॑त्[22] । त्रस्य॑न्ति[23] । सन्दर्श॑ने[24] । शत्रव॑ः[25] । भय॑न[26] ।

अग्निर्हि॑ वि॒प्रना॑ नि॒दो दे॒वो मर्तं॑मुरुष्यति॑ ।
सहा॒वा॑ यंस्यावृ॒तो र॒यिर्वाजे॑ष्ववृ॒तः ॥ ५ ॥

अग्निः॑[27] । अग्नि॑ । हि॑[28] । प्रज्ञा॑नेन[29] । निन्दि॑तु[30] । स्तोतार॑म्[31] मनुष्य॑म्[32] । दे॑व[33] । रक्षति॑ । शत्रू॑णा[34] सोढा॑ । यस्य॑[35] । र॒यि॑[36] । सङ्ग्रामे॑षु[37] । अना॑वृतो[38] भवति धृष्णु॒भ्यो दीयते ।

---

१. नना D.
२. शत्रुसकाशात्पृथग्भूताः Sy.
३. त्वत्स्तोतृणां रक्षणार्थम् Sy.
४. अहमेव पालयान्यहमेव पालयानीति स्पर्धां कुर्वन्ति Sy.
५. धनानि Sy.
६. अरेः शत्रोः Sy.
७. उपक्षपयितारं शत्रुम् Sy.
८. ष्या दु P., D. ते च स्तोतारः Sy.
९. त्वद्देवत्यैर्यागैः Sy.
१०. सोढुमभिभवितुमिच्छन्तो भवन्ति Sy.
११. व्रतविरोधिनं च पुरुषम् Sy.
१२. अयमग्निः Sy.
१३. आप्तव्यानां कर्मणां सनितारं सम्भक्तारम् Sy.
१४. ऋतीनामरातीनां सोढारमभिभवितारम् Sy.
१५. स्तोतृभ्यः प्रयच्छति Sy.
१६. सतां कर्मणां पालयितारम् Sy.
१७. वीरस्य Sy.
१८. बला P.
१९. त्रसन्ति D. उद्विजन्ते तं वीरमित्यन्वयः Sy.
२०. सन्दर्शने सति Sy.
२१. शत्रवो भवो P., D.
२२. भीत्या Sy.
२३. हीति पूरकः Sy.
२४. ब्रज्ञानेन P.
ज्ञानेन युक्तः सन् Sy.
२५. तः P., D. निन्दकात् Sy.
२६. तं मनुष्यं यजमानम् Sy.
२७. दानादिगुणयुक्तः Sy.
२८. सहो बलम्, तद्वान् Sy.
२९. मर्तस्य Sy.
३०. ०यि P., D. हविर्लक्षणं धनम् Sy.
३१. यज्ञेष्ववृतोऽन्यैर्यजमानैरसम्भक्तं तं हविष्मन्तं यजमानमुरुष्यतीत्यन्वयः Sy.
३२. ०मेर्धना० P. रक्षःप्रभृतिभिरनाच्छादितम् Sy.

अच्छा नो मित्रमहो देव देवानग्ने वोचः सुमतिं रोदस्योः ।
वीहि स्वस्तिं सुक्षितिं दिवो नृन्द्विषो अंहांसि दुरिता तरेम ता तरेम तवावसा तरेम ॥६॥

[अच्छा नः]

VI.15.

इममू षु वो अतिथिमुषर्बुधं विश्वासां विशां पतिमृञ्जसे गिरा ।
वेतीद्विवो जनुषा कच्चिदा शुचिर्ज्योक्चिदत्ति गर्भो यदच्युतम् ॥ १ ॥

[1] इमम् [2] ॥ वीतहव्यस्य भरद्वाजस्य [3] वेद [4] सूक्तम् [5] ॥ इमम् [6] । एव । युष्माकम् [7] । अतिथिम् [8] । उषसि बुध्यमानम् [9] । विश्वासाम् [10] । विशाम् [11] । पतिम् [12] । ऋषे [13] स्तुत्या । ऋञ्जतिः [14] प्रसाधनकर्मा । सोऽस्य शुचिरग्निः [15] । अरण्योर्जन्मना [16] । यदि । आगच्छति [17] । यदि दिवः [18] आगत्यारण्यो प्रादुर्भवति । चिरं गृहे स्थित्वा ।

---

१. The *pratika* is supplied by the Editor. The stanza has already been explained. See RV.VI.2.11. Sy. explains it again in the following manner:—
व्याख्यातेयम् । अक्षरार्थस्तु—अनुकूलदीप्ते ! दानादिगुणयुक्ताग्ने ! द्यावापृथिव्योरभिगतस्त्वमस्मदीयां सुष्टुतिं यष्टव्यान् देवान् प्रति वोचः प्रब्रूहि । स्तुतेर्नेतृनस्मांश्च सुनिवासमविनाशं गमय । वयं च त्वत्प्रसादाद् द्वेष्टॄन् पापानि तत्फलानि दुर्गमनानि चातिक्रामेम । व्यवहितानि जन्मान्तरकृतानि च तान्यतिक्रामेम । त्वदीयेन रक्षणेनात्यन्तमतिक्रामेमेति ।

२. 'इममू षु वः' इत्येकोनविंशत्यृचं पञ्चदशं सूक्तमाङ्गिरसस्य वीतहव्यस्य भरद्वाजस्य वार्षमाग्नेयम् । आदौ नव जगत्यस्तृतीयाषष्ठ्यौ तु शक्वर्यतिशक्वर्यौ पञ्चदशी शक्वरी सप्तदश्यनुष्टुबष्टादशी बृहती दशमाद्याः पञ्च षोडश्येकोनविंशी चेति सप्त त्रिष्टुभः । तथा चानुक्रान्तम् 'इममू त्वेकोना वीतहव्य ऋषिर्वा जागतं प्राग्दशम्यास्तृतीयापञ्चदश्यौ शक्वर्यौ षष्ठ्यतिशक्वर्यनुष्टुब्बृहत्या उपान्त्ये' (KSA. 29.15.p.22.) इति । प्रातरनुवाक आग्नेये क्रतावाश्विनशस्त्रे चादितो नवर्चः । सूत्रितञ्च—'इममू षु वो अतिथिमुषर्बुधमिति नव' (ĀŚS.4.13.) इति । दशरात्रे पञ्चमेऽहनि नवर्चमाज्यशस्त्रम् । सूत्रितञ्च—'इममू षू वो अतिथिमुषर्बुधमिति नवाज्यम्' (ĀŚS. 7.12.) इति ।

३. इदम् P.

४. Omitted by P., D.

५. हे वीतहव्य ! ऋषे ! भरद्वाज ! वा Sy.

६. अग्निम् Sy.

७. वा त्वम् । विभक्तिवचनयोर्व्यत्ययः Sy.

८. सततं गन्तारम् । यद्वा अतिथिवत् पूज्यम् Sy.

९. उषसि प्रबुद्धम् Sy.

१०. सर्वासाम् Sy.

११. प्रजानाम् Sy.

१२. पालयितारम् Sy.

१३. ०र्वत्या० D. प्रसाधय Sy. ऋञ्जतिः प्रसाधनकर्मा । N.6.21.

१४. शुद्धो निर्मलो वाग्निः Sy.

१५. जन्मना स्वत एव Sy.

१६. आगच्छति । तदानीं प्रसाधयेत्यन्वयः Sy.

१७. द्युलोकात् Sy.

१८. चिरकालम् Sy.

पुत्रभूत[1]. । अच्युतमग्निहोत्र साय प्रातश्च हवनाद् यदच्युत[2] भवति तत् । भक्षयति[3]।

मित्रं न यं सुधितं भृगवो दधुर्वनस्पतावीड्यमूर्ध्वशोचिषम् ।
स त्वं सुप्रीतो वीतहव्ये अद्भुत प्रशस्तिभिर्महयसे दिवेदिवे ॥ २ ॥

मित्रं न यम्[4] । सुहृदम्[5] । इव । यम्[6] । सुनिहितम्[7] । भृगव[8]. । निदधु[9]. । वानस्पत्येषु[10] सम्भारेषु । स्तुत्यम् । ऊर्ध्वतेजसम्[11] । सः । त्वम् । सुप्रीत[12] । वीतहव्य[13] ऋषौ । आश्चर्यभूत[14] ! स्तुतिभि[15]. । पूज्यसे । अन्वहम्[16] ।

स त्वं दक्षस्यावृको वधो भूरर्यः परस्यान्तरस्य तरुषः ।
रायः सूनो सहसो मर्त्येष्वा छर्दिर्यच्छ वीतहव्याय सप्रथो भरद्वाजाय सप्रथः ॥ ३ ॥

स त्वं दक्षस्य[17] । सः[18] । त्वम् । स्तुत्या प्रवृद्धस्य[19] मम । स्तेनरहित[20]. । वर्धयिता । अभवः[21] । अरेः[22] । परस्य[23] । हिंसकस्य[24] । तरिता च भव[25] । धनानि च । हे सहसः, सूनो ! मदीयेषु[26] मर्त्येषु । आधेहि । गृहम् । प्रयच्छ[27] । सर्वतः पृथुतमम्[28] । दत्तहविष्काय[29] । भरद्वाजाय, भरद्वाजकुलजाताय वा वीतहव्याय[30] ।

---

१. ०भूताच्यु P., D. च्युतिरहितं नित्यमग्निहोत्रादिसाधनभूतं पयःप्रभृतिकम् Sy.
२. युत् P. हविः Sy.
३. VM. ignores सु । कत् and चित् ॥ सु सुष्ठु । कत् चित् कदाचित् कस्मिंश्चिद् यागकाले Sy.
४. सखिभूतम् Sy.
५. अग्निं त्वाम् Sy.
६. सुष्ठु निहितम् Sy.
७. महर्षयः Sy.
८. आदधुः गृहे स्थापितवन्तः Sy.
९. अरण्याम् Sy.
१०. ०र्ध्वं ते० D. उच्छ्रिततेजस्कम् Sy.
११. तादृशः Sy.
१२. सुष्ठु प्रीयमाणो भव Sy.
१३. वीतहव्य एतत्संज्ञे ऋषौ भरद्वाज ऋषिश्चेत् वीतहव्ये दत्तहविष्के भरद्वाज इति योजनीयम् Sy.
१४. हे महाग्ने ! Sy.
१५. प्रकृष्टैः स्तोत्रैः Sy.
१६. ०न्वनं D. यतः प्रतिदिनम् Sy.
१७. हे अग्ने ! Sy.
१८. तादृशः Sy.
१९. प्रवर्द्धस्व D. अनुष्ठानसमर्थस्य Sy.
२०. बाधकरहितस्त्वम् Sy.
२१. भवसि Sy.
२२. वर्धयति भावारेः P., D. शत्रोः Sy.
२३. विप्रकृष्टस्य Sy.
२४. अन्तिकतरस्य सन्निकृष्टस्य शत्रोः Sy.
२५. अतः कारणात् हे सहसः सूनो ! Sy.
२६. मनुष्येषु मध्ये Sy.
२७. ०च्छत P.
२८. सर्वतः पृथुस्त्वम् Sy.
२९. वीतं गमितं हव्यं हविर्येन तादृशाय भरद्वाजायेति वा योज्यम् Sy.
३०. भरद्वाया P. सम्भृतहविर्लक्षणायान्नाय Sy.

द्युतानं वो अतिथिं स्वर्णरमग्निं होतारं मनुषः स्वध्वरम् ।
विप्रं न द्युक्षवचसं सुवृक्तिभिर्हव्यवाहमरतिं देवमृञ्जसे ॥ ४ ॥

द्युतानम् । स्तोतः[1] ! दीप्यमानम्[2] । युष्माकम् । अतिथिम्[3] । सर्वमनुष्यम्[4] । दीप्तम् । ह्वातारम्[5] । मनुष्यस्य[6] । शोभनयज्ञम्[7] । मेधाविनम्[8] । इव । दीप्तवचसम्[9] । स्तुतिभिः[10] । हव्यवाहम्[11] । अलङ्कुरु[12] [13] ।

पावकया यश्चितयन्त्या कृपा क्षामन्रुरुच उषसो न भानुना ।
तूर्वन्न यामन्नेतशस्य नू रण आ यो घृणे न ततृषाणो अजरः ॥ ५ ॥

पावकया । शोधयित्र्या[14] । यः[15] । प्रज्ञापयन्त्या[16] । ज्वालया[17] । शुष्केऽरण्ये[18] । रोचते[19] । यथा[20] । उषसः[21] । भानुना[22] रोचते परिचरन्निव[23] । गमने[24] । यथा[25] । हिंसको हिंस्यं प्रति शीघ्रं गच्छति तथा गच्छन् । एतशस्य ऋषेः[26] ।

---

१. हे वीतहव्य ! त्वम् Sy.
२. स्तोत व्यमानम् P., D.
३. अतिथिवत्पूज्यम् Sy.
४. स्वर्गस्य नेतारम् Sy.
५. देवानामाह्वातारम् Sy.
६. मनोः प्रजापतेर्यज्ञे Sy.
७. ०ज्ञ P.
८. मेधाविनं विपश्चितम् Sy.
९. दीप्तेर्निवासभूतं द्युक्षम् । तादृशवाक्योपेतम् Sy.
१०. शोभनाभिः स्तुतिभिः Sy.
११. हविषां वोढारम् Sy.
१२. प्रसाधय Sy.
१३. VM. ignores अरतिम् and देवम् ॥ अरतिमर्यं स्वामिनम् Sy.
१४. किम्भूतया कृपा ? पावकया, पावयतीति पावका तया पावयित्र्या Mah. पावयित्र्या U.
१५. अग्निः Sy.
१६. चेतयन्त्या प्रज्ञापयन्त्या Sy. चेतयन्त्या । यद्वा चित्तं करोति चितयन्ती तया दृढचयकारिण्या Mah. परिवृढकारिण्या U.
१७. दीप्त्या Sy. 'कृपू सामर्थ्ये' कल्पनं कृप्, क्विप् । तया कल्पनया सामर्थ्येन दीप्त्या वा Mah. कृपा समर्थया । 'कृपू सामर्थ्ये' अस्य क्विपि तृतीया U.
१८. भूम्याम् Sy. क्षाम्णि पृथिव्याम् Mah. क्षामेति पृथिवीनाम U. (cf. N.2.6.)
१९. दीप्यते Sy.,U. शोभते Mah.
२०. रोचने दृष्टान्तः । न इवार्थे Mah. इव U.
२१. ०चते थोष P. ०चते रथोष० D. उषसः कालाः Mah.
२२. प्रकाशेन भासन्ते तद्वत् Sy. स्वप्रकाशेन रोचन्ते तद्वत् Mah. ज्योतिषा U.
२३. रोचसं परिचरतिन्निव P. रोचसं परिचरन्निव D.
२४. अपि च यामनि सङ्ग्रामे Sy. यामनि नियामको.. यद्वा यामशब्दः कर्मवाचकः । .. यामनि कर्मणि तुर्वन्न त्वरमाण इव Mah. आधानकर्मणि । यामशब्दः कर्मवचनः U.
२५. न इवार्थे Mah. इव U.
२६. शत्रून् हिंसन् पुरुष इव Sy. 'तूर्व हिंसायाम्' परबलानि हिंसन् ।....शत्रूंन्हिंसन्निव रोचते Mah. त्वरमाणः U.
२७. एतत्संज्ञकस्य Sy. एतीत्येतशो गमनकुशलस्याश्वस्य Mah. एतशस्याज्यस्य U.

सूर्येण सह युद्धे[1] । यः[2] । क्षिप्रम्[3] । आजगाम[4] । निरुदके इव देशे । तृष्यन्[5], अध्वगो यथा ततः शीघ्रमागच्छति तद्वत् । जरावर्जित उत्तरत्र[6] सम्बन्धः ।

अग्निमग्निं वः समिधा दुवस्यत प्रियंप्रियं वो अतिथिं गृणीषणिं ।
उप वो गीर्भिरमृतं विवासत देवो देवेषु वनते हि वार्यं देवो देवेषु वनते हि नो दुवः ॥६॥

अग्निमग्निम्[7] । तमग्निमेव[8] । यूयम् । समिधा[9] । परिचरत । प्रियम्[10] । अतिथिम्[11] । स्तुत्या जने गृणी[12] स्तुतीस्तस्यामतिथिरयमागच्छति[13] । यूयम् । उपपरिचरत[14] । स्तुतिभिः । अमृतम्[15] । देवः[16] । देवेषु[17] । वनते[18] । हि[19] । धनम्[20] । अस्माकम्[21] ।

---

१. सङ्ग्रामे सहायार्थम् Sy. रणे रमणीये पद आहितोऽध्वर्युणा Mah. रमणीये पदे U.

२. यं P. अग्निः Sy. य ईदृशोऽग्निस्तं कृषाम इत्यर्थः Mah. अध्वर्युणाऽऽहितश्च यः U.

३. नु निश्चितं रुरुच इत्यनुषङ्गः । . . . . यद्वा नु अनर्थकम् Mah. नू अनर्थकः U.

४. आवीप्यते । 'प्रैतंशं सूर्यं पस्पृधानम्' (RV. 1.61.15.) इति निगमान्तरम् । नूनं सर्वे देवास्तस्य साहाय्यमकार्षुः Sy. आसमन्तात् Mah. आधीयते U.

५. यश्चाग्निर्घृणिः । घृणिरिति दीप्तिनाम । . . . घृणिना दीप्त्या . . . . नकारश्चार्थः Mah. घृणिरिति दीप्तिनाम । न इत्यनर्थकः U.

६. तृषितः प्रभावेन सर्वभक्षणशीलः Sy. तृष्यतीति ततृषाणः । 'अतृषा पिपासायाम्' . . . पूर्णाहुतिं पिपासुः Mah. तृष्यन् पिपासुः U.

७. जरारहितश्च भवति तं देवमृञ्जस इति पूर्वस्यामृचि सम्बन्धः Sy. जरारहितः Mah. पीत्वा चाजरः सम्पद्यते U.

८. P. adds इव before उत्तरत्र ॥ This stanza=YV.17.10. RV.VI.15.5.=ŚB.9.1.2.30.p.708. See RV. V. 26.1.=ŚB.9.1.2.30. p.708.

९. हे अस्मदीयाः स्तोतारः ! Sy.

१०. अग्निमेव । नान्यं देवमित्यर्थः Sy.

११. समिन्धनेन समिद्भिर्वा Sy.

१२. अत्यन्तं प्रियम् Sy.

१३. अतिथिवत्पूज्यम् Sy.

१४. शब्दनीयं स्तुत्यम्, यद्वा गृणीषणीति सप्तम्यन्तम् । गृणीषणि स्तोत्रे विषयतया वर्तमानम् Sy. १५. ०स्यमतिथरयमानगच्छति P.

१६. उपेत्य परिचरत Sy.

१७. अमरणमग्निम् Sy.

१८. दानादिगुणयुक्तोऽग्निः Sy.

१९. देवेषु मध्ये Sy.

२०. सम्भजते Sy.

२१. यस्माच्च देवेषु मध्ये देवोऽग्निर्नोऽस्माकं दुवः परिचरणं वनते सम्भजते तस्माद्दुवस्यतेत्यन्वयः Sy. २२. वरणीयं समिदादिकम् Sy.

२३. देवो देवहिते नः अस्माकम् P. देवो देवेहि भतेनमस्माकम् D.

२४. VM. ignores वः । देवः । देवेषु । वनते। हि and दुवः ।

समिद्धमग्निं समिधा गिरा गृणे शुचिं पावकं पुरो अध्वरे ध्रुवम् ।
विप्रं होतारं पुरुवारमद्रुहं कविं सुम्नैरीमहे जातवेदसम् ॥ ७ ॥

[1]समिद्धम् । [2]समिद्धम् । अग्निम् । [3]समिद्धया । स्तुत्या । स्तौमि । [4]शुचिम् । [5]पावकम् । पुरः । [6]यज्ञे । निश्चलमाहवनीयम् । विप्रम् । [7]होतारम् । [8]बहुना वरणीयम् । [9]अद्रोग्धारम् । कविम् । [10]सुखैः [11]स्तोत्रैरभिलषितम् । [12]याचामहे । [13]जातप्रज्ञम् ।

त्वां दूतमग्ने अमृतं युगेयुगे हव्यवाहं दधिरे पायुमीड्यम् ।
देवासश्च मर्तासश्च जागृविं विभुं विश्पतिं नमसा नि षेदिरे ॥ ८ ॥

त्वां [14]दूतम् । त्वाम् । दूतम् । अग्ने ! [15]अमृतम् । [16]अहन्यहनि । हव्यवाहम् । [17]धारयन्ति । [18]पालकम् । स्तुत्यम् । देवाः । च । मनुष्याः । च । [19]जागरणशीलम् । [20]विभुम् । [21]विश्पतिम् । [22]अन्नेन । निषीदन्ति ।

विभूषन्नग्न उभयाँ अनु व्रता दूतो देवानां रजसी समीयसे ।
यत्ते धीतिं सुमतिमावृणीमहेऽध स्मा नस्त्रिवरूथः शिवो भव ॥ ९ ॥

[23]विभूषन् । [24]व्रतेषु । देवमनुष्यान् । [25]विविधं भावयितुमिच्छन् । देवानाम् । [26]दूतस्त्वम् । द्यावा-

---

१. दशमेऽहन्याग्निमारुते 'समिद्धम्' इति तृचो जातवेदस्यनिविद्धानार्थः । सूत्रितञ्च—'समिद्धमग्निं समिधा गिरा गृण इति तृचश्च' (ĀSS.8.12.) इति Sy.
२. समिधं P.
३. सम्यग्दीप्तं सम्यगिद्धम् Sy.
४. समिन्धनहेतुभूतया, यद्वा समिधा समिद्भिर्वा-रुभिः Sy. ५. स्वयं शुद्धम् Sy.
६. सर्वेषां शोधकम् Sy.
७. पुरस्करोमीति शेषः Sy.
८. यज्ञ P. ९. मेधाविनम् Sy.
१०. देवानामाह्वातारम् Sy.
११. बहुभिर्वरणीयम् Sy.
१२. द्रो० P., D. सर्वेषामनुकूलम् Sy.
१३. क्रान्तदर्शिनम् Sy.
१४. सुखकरैः । यद्वा द्वितीयार्थे तृतीया । सुम्नानि धनानि Sy. १५. सम्भजामहे Sy.
१६. जातानां वेदितारमग्निम् Sy.
१७. ०ग्ने वीतम् P., D. अमरणम् Sy.
१८. कालेकाले । तत्तद्यागानुष्ठानसमये Sy.
१९. हव्यानां हविषां वोढारम् Sy.
२०. विदधिरे । कृतवन्तः Sy.
२१. पालयितारम् Sy.
२२. अपि च त उभयविधाः Sy.
२३. ०रशी० P., D.
२४. व्याप्तम् Sy.
२५. विशां प्रजानां पालयितारं तमग्निम् Sy.
२६. अग्नेन P., D. नमस्कारेण हविर्लक्षणेनान्नेन वा Sy.
२७. निषदन्ति P. उपसेविरे Sy.
२८. ०षं P., D.
२९. वृतेतेषु P. वृतेषु D. व्रतान्यनु कर्मसु यागेषु Sy.
३०. उभयविधान् देवान् मनुष्यांश्च Sy.
३१. विशेषेण भूषयन्नलङ्कुर्वन् Sy.
३२. दूतस्य P. दूतः सन् Sy.

पृथिव्यौ । सञ्[1]चच्छसे दिवः[2] पृथिव्या[3]मागच्छति पृथिव्या दिवम् । यदा[4] । ते[5] । कर्म । सुस्तुतिं[6] च । आभिमुख्येन वृणीमहे[7] । अर्थ[8] । खलु । अस्माकम् । [9]व्यायतनस्त्वम्[10] । शिवः[11] । भव[12] ।[13]

तं सुप्रतीकं सुदृशं स्वञ्चमविद्वांसो विदुष्टरं सपेम ।
स यंत्तद्विश्वा वयुनानि विद्वान्प्र हव्यमग्निरमृतेषु वोचत् ॥ १० ॥

[14]तं सुप्रतीकम्[15] । तम् । शोभनावयवम्[16] । सुदर्शनम्[17] । सुगमनम्[18] । अविद्वासः[19] । अतिशयेन विद्वांसम्[20] । स्तुत्या स्पृशेम[21] । सः[22] । यजतु[23] । विश्वानि[24] । भूतानि[25] । विद्वान्[26] । प्रब्रवीतु[27] च । अग्नि । हव्यम्[28] । देवेषु[29] ।

तमग्ने पास्युत तं पिपर्षि यस्त आनट्कवये शूर धीतिम् ।
यज्ञस्य वा निशितिं वोदितिं वा तमित्पृणक्षि शवसोत राया ॥ ११ ॥

तमग्ने[30] । तम् । अग्ने ! रक्षसि । अपि च । तम्[31] । पारयसि[32] । यः[33] । तुभ्यम्[34] । प्रापयति[35] । हे शूर ![36]

---

१. सञ्चरसि । देवानानेतुं द्युलोकं गच्छसि, हवींषि च नेतुमिमं लोकम् Sy.
२. मवः P. मिवः D.
३. ०थिव्या ग० P. ४. यस्मात् Sy.
५. तुभ्यं त्वदर्थम् Sy.
६. शोभनां स्तुतिम् Sy.
७. वयं सम्भजामहे Sy.
८. अतः कारणात् Sy.
९. स्मेत्येतत्पादपूरणम् Sy.
१०. त्रिस्थानस्त्वम् Sy.
११. सुखकरः Sy. १२. भावः P., D.
१३. VM. ignores अग्ने ।
१४. प्रातरनुवाकाश्विनशस्त्रयोरग्नेये ऋतौ त्रैष्टुभे छन्दसि 'तं सुप्रतीकम्' इत्याद्याः षड्ऋचः । सूत्रितञ्च—'तं सुप्रतीकमिति षट्' (ĀŚS. 4.13.) इति Sy.
१५. अग्निम् Sy., BB.
१६. शोभनाङ्गम् Sy. शोभनोपक्रमं वा BB.
१७. शोभनद्रष्टारम् Sy. सुष्ठु द्रष्टारमभिमतानाम् . . .शोभनदृष्टिं वा BB.
१८. ०मन P., D. सुष्ठ्वञ्चन्तं गच्छन्तम् Sy. शोभनगतिम् BB.
१९. वि० D. वैदुष्यरहिता अल्पमतयो वयम् Sy.
२०. विद्वांस ति० P. विद्वत्तरं सर्वज्ञम् Sy. विद्वत्तमम् BB.
२१. परिचरेम Sy. भजेम वा । षप समवाये BB.
२२. ०स्पृश सम P. तादृशोऽग्निः Sy. स चाग्निः BB. २३. देवान् यजतु Sy. सर्वार्थसाधनो वा यज्ञः BB. २४. सर्वाणि Sy.
२५. भूताभूतानि D. वयुनानि । ज्ञाननामैतत् । इह तु ज्ञातव्ये वर्तते । ज्ञातव्यान्यर्थजातानि Sy. ज्ञानानि BB. वयुनमिति प्रज्ञानाम Ngh. 3.9. २६. जानन्नग्निः Sy.
२७. युष्मदर्थं हविः कल्पितं तदर्थं यूयमागच्छतेत्येवं कथयतु Sy. देवसदसि स्थापयतु वा BB.
२८. अस्मदीयं हविः Sy. मदीयं च हव्यम् BB.
२९. देवे P., D. मरणरहितेषु Sy.
This stanza=TS.2.5.12.5.
३०. पुरुषम् Sy.
३१. भूतः P. अपि भू च तः D.
३२. कामैः पूरयसि Sy. ३३. पुरुषः Sy.
३४. ०भ्यां D. तुभ्यं त्वदर्थम् Sy.
३५. प्राप्नोति । यद्वा 'क्रियाग्रहणं कर्तव्यम्', इति कर्मणः सम्प्रदानत्वाच्चतुर्थी । कविं त्वां धीतिमानट् प्रापयति, तं पासीत्यन्वयः Sy.
३६. हे शौर्यवन्नग्ने ! Sy.

कर्म[1]। यज्ञस्य[2]। वा[3]। सस्तुत[4] हवि। स्तुतिम्[5]। वा[6]। तम्। एव। पूरय[7]। बलेन। अपि च। धनेन[8]।

त्वमग्ने वनुष्यतो नि पाहि त्वमु नः सहसावन्नवद्यात्।
सं त्वा ध्वस्मन्वदभ्येतु पाथः सं रयिः स्पृहयाय्यः सहस्री ॥ १२ ॥

त्वमग्ने[9]। त्वम्। अग्ने[10]! ध्नतोऽस्मान्। निपाहि[11]। त्वम्। एव। अस्मान्। बलवन्[12]! गर्ह्यात्[13]। समभ्येतु[14]। त्वाम्। ध्वसनक्रियायुक्तम्[15]। अन्नम्[16]। धन[17] च। स्पृहणीयम्[18]। सहस्रसङ्ख्याकम्[19] मदीये गृहे वर्तमान त्वामन्नमभ्येतु धनं चेति[20][21]।

अग्निर्होता गृहपतिः स राजा विश्वा वेद जनिमा जातवेदाः।
देवानामुत यो मर्त्यानां यजिष्ठः स प्र यजतामृतावा ॥ १३ ॥

अग्निर्होता[22][23]। अग्नि[24]। होता। गृहपतिः[25]। स[26]। राजा[27]। विश्वानि[28]। जातानि[29] भूतानि। जातप्रज्ञ[30]। देवानाम्[31]। अपि च। यः। मर्त्यानां[32] यः। यष्टृतर[33]। सः। प्रकर्षेण याग करोतु[34]। सत्यवान्[35][36]।

---

१. स्तुतिं वा Sy.
२. यज्ञस्य यागस्य वा तत्साधनभूतस्य हविषो वा Sy. ३. आनट् प्रापयति Sy.
४. निशितिः संस्कारः। तम् Sy.
५. उद्गमनम् Sy.
६. आनट् प्रापयति Sy.
७. पूरयसि Sy. ८. धनेन पूरयसि Sy.
९. VM. ignores कवये and वा ॥ कवये क्रान्तदर्शनाय Sy. १०. हिंसकाच्छत्रोः Sy.
११. नितरामस्मान् रक्ष Sy.
१२. हे बलवन्! अग्ने! Sy.
१३. गर्ह्यात् P., D. पापात् निपाहि Sy.
१४. सम्यगभिगच्छतु Sy.
१५. ध्वंसनवत् ध्वस्तदोषम् Sy.
१६. हविर्लक्षणमस्माभिर्वत्तमन्नम् Sy.
१७. त्वया दत्तं धनम् Sy.
१८. स्पृहणीयः सम्यगभिगच्छतु Sy.
१९. ०क P. सहस्रसङ्ख्यायुक्तः Sy.
२०. ०न P., D.
२१. VM. explains सम् once.
२२. व्यूळ्हे दशरात्रे पञ्चमेऽहन्यग्निमारुते 'अग्निर्होता' इति तृचो जातवेदसनिविद्धानीयः। सूत्रितञ्च 'अग्निर्होता गृहपतिः स राजेति तिस्रः' (ĀŚS. 8.8.) इति। पत्नीसंयाजेषु गृहपतिराद्यानुवाक्या। सूत्रितञ्च 'अग्निर्होता गृहपतिः सः राजा हव्यवाळग्निरजरः पिता न इति पत्नीसंयाजाः' (ĀŚS. 1.10.) इति। आश्विनशस्त्रस्यैषैव प्रतिपत्। सूत्रितञ्च—'अग्निर्होता गृहपतिः स राजेति प्रतिपदेकपातिनी पच्छः' (ĀŚS. 6.5.) Sy.
२३. Omitted by P.
२४. देवानामाह्वाता Sy.
२५. धनप० P. गृहाणां पतिरधिपतिर्भवति Sy.
२६. अग्निः Sy. २७. राजमानः Sy.
२८. सर्वाणि Sy.
२९. जन्मानि जन्मवन्ति भूतजातानि Sy.
३०. जातप्रज्ञः सन् Sy.
३१. इन्द्रादीनाम् Sy.
३२. मनुष्याणां च मध्ये Sy.
३३. अतिशयेन यष्टा भवति Sy.
३४. प्रकर्षेण देवान् यजतु Sy.
३५. ऋतं सत्यं यज्ञो वा। तद्वान् Sy.
३६. VM. ignores वेद ॥ वेद वेत्ति जानाति Sy.

अग्ने यदद्य विशो अध्वरस्य होतः पावकशोचे वेष्टवं हि यज्वा ।
ऋता यजासि महिना वि यद्भूर्हव्या वह यविष्ठ या ते अद्य ॥ १४ ॥

अग्ने[1][2] । अग्ने[3] ! यत्[4] । अद्य[5] । मनुष्यस्य[6] । यज्ञस्य । होतः[7] ! हे शोधकदीप्ते ! जानासि[8] कर्तव्यम् । ततस्त्वम्[9][10] । एव । यज्वा[11] नाज्ञो मनुष्य[12] । काले[13] । यज[14] । महत्वेन[15] । यत्[16] त्वम् । विविध भवसि[17] । ततो[18] हव्यानि[19] । वह[20] । यानि । ते[21] । अद्यास्ये[22] हूयन्ते[23] ।

अभि प्रयांसि सुधितानि हि ख्यो नि त्वा दधीत रोदसी यजध्यै ।
अवा नो मघवन्वाजसाताववग्ने विश्वानि दुरिता तरेम ता तरेम तवावसा तरेम ॥१५॥

अभि प्रयांसि[24] । अभिपश्य[25] । हि[26] । अन्नानि[27] । सुनिहितानि[28] । त्वाम्[29] । द्यावापृथिव्यो[30] । निदधे[31] प्रजापतिः । यज्ञार्थम्[32] । अवेति[33] स्पष्टः ।

---

१. 'अग्ने यदद्य' इति दर्शपूर्णमासयोः स्विष्टकृतो याज्या । सूत्रितञ्च 'अग्ने यदद्य विशो अध्वरस्य होतरित्यनवानं यजति' (ĀSS.1.6.) इति Sy.
२. Omitted by P.
३. एवम्भूत ! हे अग्ने ! Sy.
४. अयम् P. कर्तव्यं तत् Sy.
५. अस्मिन् काले Sy.
६. मनुष्यस्य यजमानस्य Sy.
७. हे निष्पादक ! Sy.
८. कामयस्व Sy.
९. P. reads कर्तः for कर्तव्यं ततः ।
१०. यस्मात्त्वम् Sy.
११. देवानां यष्टा भवसि तस्मात्त्वम् Sy.
१२. ०ष्य P.
१३. यज्ञे Sy.
१४. देवान्यज Sy.
१५. महत्वे P. ०त्त्वेन is suggested for ०त्वेन ॥ महिम्ना स्वमाहात्म्येन Sy.
१६. य P., D. यस्मात् Sy.
१७. विभवसि व्याप्तो भवसि Sy.
१८. अतः कारणात् Sy.
१९. हवींषि Sy.
२०. विह P. स्वकीयां स्विष्टकृदाख्यां तनुं प्रापय Sy.
२१. तुभ्यं त्वदर्थम् Sy.
२२. अद्यस्ये P. इदानीं जुहुमस्तानि Sy.
२३. VM. ignores यविष्ठ ॥ हे यविष्ठ ! युवतमाग्ने ! Sy.
२४. हे अग्ने ! Sy.
२५. अभिपश्यसि Sy.
२६. हि पूरकः Sy.
२७. अन्नानि हविर्लक्षणानि Sy.
२८. वेद्यामासावितानि Sy.
२९. तादृशं त्वाम् Sy.
३०. द्यावापृथिव्यावेतदुपलक्षितान् सर्वान् देवान् Sy.
३१. अयं यजमानो निहितवान् Sy.
३२. यष्टुम् Sy.
३३. By अवेति स्पष्टः VM. refers to the words अवा नः । मघवन् । वाजसातौ । अग्ने । विश्वानि । दुरिता । तरेम । ता । तरेम । तव । अवसा and तरेम ॥ Sy. explains these words in the following manner:—हे मघवन्नग्ने ! नोऽस्मान्वाजसातौ सङ्ग्रामेऽन्नस्य सम्भजने वा निमित्तभूते ! अव रक्ष । वयं च विश्वानि सर्वाणि दुरिता दुरितानि दुःखानि तरेम । अतिक्रामेम । अन्यद्गतम् ।

अग्ने विश्वेभिः स्वनीक देवैरूर्णावन्तं प्रथमः सीद योनिम् ।
कुलायिनं घृतवन्तं सवित्रे यज्ञं नय यजमानाय साधु ॥ १६ ॥

[1]अग्ने[2] । अग्ने ! विश्वे[3] । देवै[4] । हे शोभनज्वालानीक[5] ! ऊर्णास्तुकावन्तम्[6] । मुख्यः[7] । सीद[8] । स्थानमुत्तरवेदिम्[9] [कैः सम्भक्तारो वौतु दवादि ?[10]] कुलायिनम्[12] । घृतवन्तम्[13] । प्रेरयित्रे[14] । यजमानाय[15] । यज्ञम्[16] । नय[17] । कल्याणम्[18] ।

इमम् त्यमथर्ववदग्निं मन्थन्ति वेधसः ।
यमङ्कूयन्तमानयन्नमूरं श्याव्याभ्यः ॥ १७ ॥

इमम्[20] त्यम्[19] । तम्[19] । इमम्[20] । यथाऽथर्वा[21] । निर्मन्थति[22] । ऋत्विज[23] । यम्[24] । अङ्क्नेननामञ्जनमिच्छन्तम्[25] । आनयन्[26] । अमूढम्[27] । श्याववर्णाभ्य ओषधीभ्य[28], देवरात्रिभ्यो वा[29] ।

---

१. अग्निप्रणयने 'अग्ने विश्वेभिः' इत्येषानुवाक्या । सूत्रितञ्च 'अग्ने विश्वेभिः स्वनीक देवैरित्यर्धर्चं आरमेत्' (ĀŚS.2.17.) इति Sy.

२. Omitted by P., D.

३. सर्वैः Sy., BB. ४. देवैः सह Sy.

५. हे सुज्वालाग्ने ! Sy. सुसेनामुखो विश्वैर्देवैः सह BB.

६. ०स्तुकालन्त P. ऊर्णास्तुकया तद्वन्तम् BB.

७. सर्वेषु देवेषु मुख्यस्त्वम् Sy. मुख्यस्त्वम् BB.

८. उपविश Sy. आस्व BB.

९. ०वि P., D. उत्तरवेदिलक्षणं स्थानम् Sy. योनिस्थानम् BB. १०. ०रैः D.

११. The passage within the brackets is doubtful.

१२. कुलायो नीडम् । तत्सदृशं गुग्गुल्वादिसम्भारेणोपेतम् । तथा च श्रूयते 'कुलायमिव ह्येतद्यज्ञे क्रियते तत्पैतुदारवाः परिधयो गुग्गुलूर्णास्तुकाः सुगन्धितेजनानि' (AB.1.28.) इति Sy. सम्भारैस्तद्वन्तम् BB.

१३. व्याघारणाज्ययुक्तम् Sy. व्याघारणभूतेन तद्वन्तम् BB.

१४. एवमुत्तरवेद्यां निषण्णस्त्वं हविषां प्रेरयित्रे Sy. तत्रासीनस्त्वं सवित्र आदित्याय BB.

१५. षष्ठ्यर्थे चतुर्थ्येषा । ईदृशस्य यजमानस्य Sy.

१६. इष्टं हविः BB.

१७. देवान् प्रापय Sy. प्रापय । सर्वमिष्टं कुर्विति यावत् । यथोक्तम् 'अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते' BB.

१८. आर्जवेन Sy. साधु यथा यजमानार्थं साधयेद्यागफलम् । यद्वा यजमानस्य फलावाप्तये यज्ञं साधु सवितारं नय BB.

१९. पूर्वोक्तगुणमग्निम् Sy.

२०. दृश्यमानम् Sy.

२१. अथर्वाख्य ऋषिः पुरामथ्नात् तथा मन्थन्ति Sy.

२२. निरम० P., D. मथ्नन्ति । अरण्योः सकाशाज्जनयन्ति Sy.

२३. कर्मणां विधातारः Sy.

२४. अग्निम् Sy.

२५. अङ्क्न० P. कुत्सितमञ्चनं गमनमङ्कु । तदात्मन इच्छन्तं देवेभ्यो निर्गत्येतस्ततः पलायमानम् Sy.

२६. आनयान् P. अनायन् D. आगमयन् । तं मन्थन्तीत्यन्वयः Sy.

२७. ०ढ D.

२८. श्यावीति रात्रिनाम (Ngh.1.7.) तत्र भवास्तमसः संहतयः श्याव्याः । ताभ्यः सकाशात् Sy.

२९. VM. ignores उ ।

जनिष्वा देववीतये सर्वताता स्वस्तये ।
आ देवान्वक्ष्यमृताँ ऋतावृधो यज्ञं देवेषु पिस्पृशः ॥ १८ ॥

जनिष्व[1] । जायस्व[2] । देवाना भक्षणार्थम्[3] । यज्ञे[4] । अविनाश[5] च । आवह । देवान्[6] । अमृतान्[7] । यज्ञस्य वर्धयितॄन् । अथ[8] तेषु[9] । यज्ञम्[10] । स्पर्शय[11] ।

वयमु त्वा गृहपते जनानामग्ने अकर्म समिधा बृहन्तम् ।
अस्थूरि नो गार्हपत्यानि सन्तु तिग्मेन नस्तेजसा सं शिशाधि ॥ १९ ॥

वयमु त्वा[12] । वयम् । त्वा[13] । जनानाम्[14] । गृहपते[15] । अग्ने । समिन्धनेन[16] । महान्तम् । कुर्म[17] । अस्थूरीणि[18] । अस्माकम्[19] । गार्हपत्यानि[20] । भवन्तु । तीक्ष्णेन । अस्मान्[21] । तेजसा । तीक्ष्णीकुरु[22], अश्वेनैकेन[23] युक्तो[24] रथ. स्थूरिरुच्यते बहुभिर्युक्तोऽस्थूरि[25] बहुभि प्रजापशुभिर्युक्तानि गृहैश्चवर्ण्यस्थूरीण्युच्यन्ते[26] ।[27]

---

१. हे अग्ने ! Sy.
२. प्रादुर्भव Sy.
३. देवकामाय यजमानाय । षष्ठ्यर्थे चतुर्थ्येषा । ईदृशस्य यजमानस्य Sy.
४. सर्वैस्तायमाने यज्ञे मध्यमानस्त्वम् Sy.
५. अविनाशार्थम् Sy.
६. देवानां भूता P., D. जनित्वा चामृतान् मरणरहितान् Sy.
७. तदनन्तरम् Sy.
८. देवेषु Sy.
९. अस्मदीयं यज्ञम् Sy.
१०. स्पर्शय प्रापयेत्यर्थः Sy.
११. त्वाम् Sy.
१२. प्राणिनां मध्ये Sy.
१३. हे यज्ञानां पालक ! Sy.
१४. समिद्धमिन्धनेन P., D.
१५. कृतवन्तः स्मः Sy.
१६. एकाश्वयुक्तः शकटः स्थूरिरित्युच्यते तद्विपरीतो बहुभिरश्वैरुपेतः शकटोऽस्थूरिः । तेन च सम्पूर्णता लक्ष्यते । अस्थूरीणि पुत्रपशुधनादिभि. सम्पूर्णानि भवन्तु Sy.
१७. अतः कारणात् नोऽस्माकम् Sy.
१८. गृहपतित्वानि Sy.
१९. अपि च नोऽस्मान् Sy.
२०. Omitted by P.
२१. सम्यङ् निश्य सम्यक् तीक्ष्णीकुरु । संयोजयेत्यर्थः Sy.
२२. अश्वेने० P.
अश्वनै० D.
२३. यज्ञो P.
२४. ०क्त स्थूरी P. ०रि D.
२५. ०शुर्यु० P.
२६. ०र्यण्य० D.
२७. VM. ignores उ ॥ उ एव Sy.

VI.16.

त्वमग्ने यज्ञानां होता विश्वेषां हितः । देवेभिर्मानुषे जने ॥ १ ॥

[1] त्वमग्ने । त्वम् । अग्ने ! सर्वेषाम् [2] । यज्ञानाम् । होता [3] । देवैः [4] । मानुषे [5] । जने [6] । निहितः [7] ।

स नो मन्द्राभिरध्वरे जिह्वाभिर्यजा महः । आ देवान्वक्षि यक्षि च ॥ २ ॥

स नो मन्द्राभिः [8] । सः [9] । अस्माकम् । मदयित्रीभिः [10] । ज्वालाभिः । यज्ञे । यज [11] । महतः । देवान् तदेवाह—आवह देवान् यज [12] । चेति [13] ।

वेत्था हि वेधो अध्वनः पथश्च देवाञ्जसा । अग्ने यज्ञेषु सुक्रतो ॥ ३ ॥

वेत्था [14] हि । जानासि । मेधाविन् [15] ! अध्वनः [16] । पथः [17] । च, अल्पोऽनयोर्भेदः [18] । देव [19] ! ऋञ्जसा [20] । अग्ने ! यज्ञे स्थितान् [21] । सुप्रज्ञ [22] !

---

१. द्वितीयेऽनुवाकेऽष्ट सूक्तानि । तत्र 'त्वमग्ने यज्ञानाम्' इत्यष्टाचत्वारिंशदृचं प्रथमं सूक्तं भरद्वाजस्यार्षमाग्नेयम् । आद्या षष्ठी च वर्धमाना गायत्री षट्कसप्तकाष्टकाः सा वर्धमानेत्युक्तलक्षणोपेतत्वात् । सप्तविंश्यनुष्टुप् । 'आ ते अग्ने, अग्निं देवासः' इत्येते ऋचावनुष्टुभौ । तयोः पूर्वा 'वीती यो देवम्' इति त्रिष्टुप् । शिष्टा द्वाचत्वारिंशदृचो गायत्र्यः । तथा चानुक्रम्यते—'त्वमग्नेऽष्टाचत्वारिंशद् गायत्रं वर्धमानाद्या षष्ठी च सप्तविंश्यनुष्टुप् त्रिष्टुप्पूर्वे चान्त्ये' (KSA. 29.16. p.22.) इति । प्रातरनुवाकाश्विनशस्त्रयोराग्नेये ऋतौ गायत्रे छन्दसीदं सूक्तमुच्यते । तत्रान्त्यास्तिस्र ऋच उद्धर्तव्याः । सूत्र्यते हि—'त्वमग्ने यज्ञानामिति तिस्र उत्तमा उद्धरेत्' (ĀŚS. 4.13.) इति विश्वजित्यग्निमारुते बृहत्साम यद्यग्निष्टोमसाम स्यात्तदानीमाद्याः षडृचः स्तोत्रियानुरूपार्थाः । सूत्रितं हि—'त्वमग्ने यज्ञानामिति स्तोत्रियानुरूपौ' (ĀŚS.8.7.) इति Sy.

२. सप्तसंस्थारूपेण भिन्नानाम् Sy.

३. होमनिष्पादकोऽसि । यद्वा यज्ञानां सम्बन्धी देवानामाह्वाता भवसि Sy.

४. म० P. कुत इति ? अत आह—यस्मात् त्वं मनोः सम्बन्धिनि मनुष्ये Sy.

५. यजमाने Sy. ६. ०त P. होतृत्वेन निहितोऽसि तस्मादित्यर्थः Sy.

७. हे अग्ने ! Sy. ८. त्वम् Sy.

९. ०भि P., D. मदकरीभिः स्तुत्याभिर्वा Sy.

१०. हविर्भिस्तर्पय कथं तत् ? इत्युच्यते Sy.

११. देवानां P., D. यष्टव्यानिन्द्रादीन् Sy.

१२. ततो यज च हवींषि तेभ्यो देहीत्यर्थः Sy.

१३. यजतेति य चेति P.

१४. पाथिकृत्यामग्ने पथिकृतोऽनुवाक्या 'वेत्था' इत्येषा । सूत्रितञ्च—'वेत्था हि वेधो अध्वन आ देवानामपि पन्थामगन्म (ĀŚS.3.10.) इति Sy. १५. हे विधातः ! Sy.

१६. महामार्गान् Sy.

१७. क्षुद्रमार्गांश्च Sy.

१८. ०ल्पेन० P. The passage 'अल्पोऽनयोर्भेदः' refers to अध्वनः and पथः ।

१९. देवान् P., D. दानादिगुणयुक्ताग्ने ! त्वम् Sy.

२०. आर्जवेन Sy.

२१. यज्ञेषु दर्शपूर्णमासादियागेषु Sy.

२२. VM. ignores हि ॥ हि यस्मादेवं तस्मात्कारणाद्यज्ञमार्गाद् भ्रष्टं यजमानं पुनस्तं मार्गं प्रापयेत्यर्थः Sy.

त्वामी॑ळे॒ अध॑ द्वि॒ता भर॒तो वा॒जिभिः॑ शु॒नम्। ई॒जे य॒ज्ञेषु॑ य॒ज्ञिय॑म्॥ ४॥

त्वामीळे[1]। त्वाम्। अस्तौत्[2]। द्विधावस्थित[3] गार्हपत्याहवनीयरूपेण। दुष्यन्तपुत्रः[4]। ऋत्विग्भिः[5]। सुखावहम्[6]। ईळे[7]। जपयज्ञेषु[8]। यज्ञार्हम्[9]।

त्वमि॒मा वार्या॑ पु॒रु दिवो॑दासाय सुन्व॒ते। भर॒द्वा॑जाय दा॒शुषे॑॥ ५॥

त्वमिमा[11]। त्वम्। इमानि[12]। धनानि[13]। पुरूणि[14]। दिवोदासाय[15]। यजमानाय। भरद्वाजाय[16]। प्रयच्छते[17] देहि[18] दिवोदासकुलजो भरद्वाजोऽपि वोभाभ्या प्रायच्छ[19] इति।

त्वं दू॒तो अम॑र्त्य॒ आ व॑हा दैव्यं॒ जन॑म्। शृ॒ण्वन्वि॒प्रस्य॑ सुष्टु॒तिम्॥ ६॥

त्वं दूतः[20]। त्वम्। देवदूतः[21]। अमर्त्यः[22]। आवह[23]। दिवि भवम्[24]। जनन्[25]। शृण्वन्[26]। भरद्वाजस्य। स्तुतिम्[27]।

त्वाम॑ग्ने स्वा॒ध्यो॑३ मर्ती॑सो दे॒ववी॑तये। य॒ज्ञेषु॑ दे॒वमी॑ळते॥ ७॥

त्वामग्ने[28]। त्वाम्। अग्ने! सुकर्माणः[29]। मनुष्याः। देवाना भक्षणाय[30]। यज्ञेषु। देवम्[31]। स्तुवन्ति[32]।

---

१. हे अग्ने! Sy.
२. ०स्तौ P., D. स्तुतवान् Sy.
३. ०स्थित्व P. द्विविधमिष्टप्राप्त्यनिष्टपरिहाररूपेण द्विधा भिन्नम् Sy.
४. वस्पन्तयु० P. दौष्यन्तिरेतत्संज्ञो राजा Sy.
५. ०भिः P. वाजो हविर्लक्षणमन्नम्। तद्वद्भिः ऋत्विग्भिः सह Sy.
६. सुखमुद्दिश्य Sy.
७. इष्टवान्। तस्मै त्वमुभयविधं सुखं प्रादा इत्यर्थः Sy.
८. जचयज्ञयु P. यज्ञेषु—तृतीयार्थे सप्तमी। यज्ञैः Sy.
९. स्तुत्वा च यज्ञार्हं त्वाम्।
१०. VM. ignores अधः।
११. हे अग्ने! Sy.
१२. इमानि दृश्यमानानि Sy.
१३. वार्याणि वरणीयानि सम्भजनीयानि धनानि Sy.
१४. पुरूणि बहूनि Sy.
१५. दिवोदासाय सुन्वते। लुप्तोपममेतत्। यथा सोमाभिषवं कुर्वते दिवोदासाख्याय राज्ञे प्रादास्तथा Sy.
१६. भरद्वाजाय ऋषये Sy.
१७. हवींषि दत्तवते Sy.
१८. देहीति शेषः Sy.
१९. प्रयच्छ is suggested for प्रायच्छ।
२०. Omitted by P.
२१. दूतो भूत्वा Sy.
२२. अमरणधर्मः Sy.
२३. अस्मद्यज्ञ आनय Sy.
२४. देवसम्बन्धिनम् Sy.
२५. जनम् is suggested for जनन्।
२६. मेधाविनो भरद्वाजस्य Sy.
२७. VM. ignores सु of सुष्टुतिम्॥ शोभनां स्तुतिम् Sy.
२८. Omitted by D.
२९. शोभनाध्यानाः Sy.
३०. देवानां तर्पणार्थम् Sy.
३१. द्योतमानम् Sy.
३२. स्तुवन्ति याचन्ते वा Sy.

तव प्र यक्षि[1] संदृशमुत क्रतुं सुदानवः । विश्वे जुषन्त कामिनः ॥ ८ ॥

तव प्रयक्षि[1] । तव । प्रकर्षेण यजामि[2] । सन्दर्शनम्[3] । अपि च[4] । प्रज्ञाम्[5] । शोभनदानाः[6], दानुर्दानम् । मत्तो[7] व्यतिरिक्ताश्च । कामिनस्तदुभयम्[8] । सेवन्ते[9] ।

त्वं होता मनुर्हितो वह्निरासा विदुष्टरः । अग्ने यक्षि दिवो विशः ॥ ९ ॥

त्वं होता । त्वम् । होता[10] । मनुनाहितः[10] । वोढा हविषाम् । आस्येन[11] । अतिशयेन विद्वान्[12] । अग्ने ! यक्षि[13] । द्युलोकस्य[14] । निवेशयितॄन्[15] देवान् ।

अग्न आ याहि वीतये गृणानो हव्यदातये । नि होता सत्सि बर्हिषि ॥ १० ॥

अग्ने[16] । अग्ने[17] ! आगच्छामुष्मिन्[18] लोके स्थित ! "लोकाना विधृत्यर्थमग्निरमुष्मिन्[19] लोक आसीदादित्योऽस्मिन्" इत्याद्यध्वर्युब्राह्मणम् । "गृणानो[20] हव्यदातय[21] इति यजमानो यजमानायेत्येतदाह[22]" इति विज्ञायते ।

---

१. हे अग्ने ! Sy.

२. प्रयजे प्रकर्षेण पूजयामि Sy.

३. ०र्शम् D. सम्यग्दर्शनीयं यद्वा सम्यग्द्रष्टारं सर्वस्य भासकं तेजः Sy.

४. Omitted by P.

५. ०ज्ञा P.
कर्म प्रज्ञानं वा पूजयामि Sy.

६. सुदानोः शोभनदानस्य तव Sy.

७. अमर्तो P. मर्त्तो D. न केवलमहमेव किन्त्वन्ये सर्वेऽपि यजमानाः Sy.

८. कमि० P., D. त्वदनुग्रहात्तैस्तैः कामैरुपेताः सन्तः Sy.

९. त्वदीयं सन्दृशं क्रतुं च सेवन्ते Sy.

१०. होतृत्वेन मनुनाहितोऽसि Sy.

११. आस्यभूतया ज्वालया Sy.

१२. अग्ने P.

१३. यज Sy.

१४. अतः कारणात्त्वं दिवः द्युलोकसम्बन्धिनीः Sy.

१५. दैवीः प्रजाः Sy.

१६. दर्शपूर्णमासयोः सामिधेनीषु 'अग्न आ याहि' इत्याद्यास्तिस्रः । सूत्रितञ्च 'अग्न आ याहि वीतये गृणान ईळेन्यो नमस्यस्तिरः' (ĀŚS. 1.2.) इति । गार्हपत्याहवनीययोर्मिथः संसर्गेऽग्नये वीतयेऽष्टाकपालः पुरोडाशः । तस्य 'अग्न आ याहि' इत्येषानुवाक्या । सूत्रितञ्च— 'अग्न आ याहि वीतये यो अग्निं देववीतये' (ĀŚS. 3.13.) इति Sy.

१७. अयं सेक्ताऽग्निर्वृष्टिहेतुः BB.

१८. ०आगामु० P.

१९. ०ग्निमम्० P.

२०. स्तूयमानस्त्वम् Sy.

२१. ०व्यादा० P. हव्यानि हवींषि देवेभ्यो दातुम् Sy.

२२. ०मानयेन्येतदाह P. ०मान येन्य तदाह D.

निषीद[1] । बर्हिषि[2] । होता सन् । "अग्न आयाहि वीतय[3] इत्याहानयोर्लोकयोर्वीत्यै" इति च विज्ञायते ।

तं त्वा समिद्भिरङ्गिरो घृतेनं वर्धयामसि । बृहच्छोचा यविष्ठ्य ॥ ११ ॥

तं त्वा समिद्भिः[4] । तम्[5] । त्वा[6] । समिद्भि[7] । अङ्गिरसामेक[8] ! घृतेन[9] च । वर्धयाम[10] । अत्यन्तम्[11] । दीप्यस्व । युवतम[12] !

---

१. निषीद उपविश Sy.

२. आस्तीर्णे दर्भे Sy.

३. हविषां भक्षणार्थम् Sy. हविरूपभोगाय U वीतिः प्रजननशक्तिः- अनयोर्लोकयोः प्रजानां प्रजननार्थमायाहीति वचनात् BB. सोऽन्वाह । प्र वो वाजा अभिद्यव इति तम्नु प्रेति भवत्यग्नऽआयाहि वीतयऽइति तद्वेति भवति ŚB. 1.4.1 7.p.34. तवुहैक आहुः । उभयं वाऽएतत्प्रेति सम्पद्यतऽइति तदु तदातिविज्ञान्यमिव प्र वो वाजा अभिद्यव इति तम्नु प्रेत्यग्नऽआयाहि वीतयऽइति तद्वेति ŚB. 1.4.1.7.p.34. अग्नऽआयाहि वीतयऽइति । तद्वेति भवति वीतयऽइति समन्तिकमिव ह वाऽइमेऽग्रे लोका आसुरित्युन्मृज्या हैव द्यौरास ŚB. 1. 4. 1. 22.p.35. अथापादत्ते । अग्नऽआयाहि वीतयऽइत्यवितवऽइत्येतत्तदेनं ब्रह्मणा यजुषैतत्स्माच्छौद्रादुर्णादपादत्ते ŚB. 6.4.4.9.p.534. This stanza=YV.11.46.=TS.2.5.7.3.

४. ०द्भि D.

५. पूर्वोक्तगुणम् Sy. तं य उक्तगुणस्तथाविधम् Mah. यस्त्वमुक्तगुणस्तम् U. तस्य तवनुवचनं स एव तासामेको वर्णः । तमेवार्थं समर्थयते, तं त्वेति BB.

६. त्वाम् Sy., Mah., U.

७. समिन्धनहेतुभिर्दारुभिः Sy. यज्ञसम्बन्धिकाष्ठैः Mah.

८. ०साकं P. हे अङ्गनादिगुणयुक्त ! अङ्गाररूप ! वाङ्गिरसः पुत्र ! वाग्ने ! Sy. अङ्गतिर्गत्यर्थः । अङ्गिर्गतिरस्यास्तीत्यङ्गिराः । रस्प्रत्ययो मत्वर्थीयः । तत्तद्यागेषु गमनवन्नग्ने ! 'अङ्गिरा उ ह्याग्निः' (ŚB. 1.4.1.25.) इति श्रुतेः कदाचिदपि स्थविरत्वरहित इत्यर्थः । . . . अतिशयेन युवा यविष्ठः . यविष्ठ एव यविष्ठ्यः । Mah. अगतिर्गत्यर्थः । रो मत्वर्थीयः । गमनवन् ! U.

९. आज्येन च Sy. संस्कृताज्येन Mah. घृतेनाभिधेयेन तद्वत्पदं घृतवद् घृतशब्द एव । यद्वा घृतशब्दवत्पदम् .ज्योतिष्मत्त्वमासां घृतसम्बन्धेन क्रियते तेजो घृतमिति BB.

१०. पर्ययामः P. वर्धयामः प्रवृद्धं कुर्मः Mah.

११. महदत्यन्तम् Sy. तथाविधाग्ने ! महत् प्रवृद्धं यथा तथा Mah.

१२. ०मः P., D. अतो हे युवतमाग्ने ! Sy. तं त्वा समिद्भिरङ्गिर इति । समिद्भिर्ह्येतमङ्गिरस ऐन्धताङ्गिर इत्यङ्गिरा उ ह्याग्निर्घृतेन वर्धयामसीति तत्सामिधेनं पदꣳ समेवैनं तेनेन्धे वीर्यमेवास्मिन्दधाति ŚB. 1.4.1.25.p.35. This stanza=YV.3.3.=TS.2.5.8.1.

स नः पृथु श्रवाय्यमच्छा देव विवाससि । बृहद्अग्ने सुवीर्यम् ॥ १२ ॥

स नः पृथुः । अदो गमय[1] । अस्मानिति[2] ।

त्वामग्ने पुष्करादध्यथर्वा निरमन्थत । मूर्ध्नो विश्वस्य वाघतः ॥ १३ ॥

त्वामग्ने । त्वाम् । अग्ने । पुष्करपर्णात्[3] । अधि[4] । अथर्वा[5] ऋषिः । निरमन्थत[6] । मूर्ध्नः[7] । सर्वस्य[8] ।

वोढुं[9] "पुष्करपर्णे[10] ह्येनमुपश्रितमविन्दत्[11]" इति ब्राह्मणम् ।

---

१. गैमय P., D. अभिगमय Sy.

२. VM. does not explain the stanza fully. Sy. explains this stanza in the following manner :— हे देव ! द्योतमानाग्ने ! स पूर्वोक्तगुणस्त्वम् । पृथु विस्तीर्णम् । श्रवाय्यं श्रवणीयं प्रशस्यं बृहन्महत् सुवीर्यं शोभनवीर्योपेतं धनं नोऽस्मान् अच्छ विवाससि । अभिगमय । अत्र वाजसनेयकम्—'अच्छा देव विवाससीति तन्नो गमयेत्येवैतदाह' इति ।

३. अग्निमन्थने 'त्वामग्ने पुष्करादधि' इत्याद्यास्तिस्र ऋचोऽनूच्याः । सूत्रितञ्च—'त्वामग्ने पुष्करादधीति तिसृणामर्धर्चं शिष्ट्वारमेत्' (ĀŚS.2.16.) इति Sy.

४. ०रवर्णात् D. उदकात् Mah.,U.

५. पुष्करादधि पुष्करपर्णे Sy. सकाशात् Mah., U. उपरि BB.

६. अध्यङ्थर्वः P. एतत्संज्ञक ऋषिः Sy. अथर्वा प्राणः 'आपो वै पुष्करं प्राणोऽथर्वा' (ŚB.6.4.2.2.) इति श्रुतेः Mah. अतनवान् प्राणः U.

७. अरण्योः सकाशादजनयत् Sy. निश्शेषेण मथितवान् Mah. निर्जनितवान् U. पुष्करपर्णस्थं मन्थनेन ततो निष्कृष्यालभत । यथोक्तम्—'पुष्करपर्णे ह्येनमुपाश्रितमविन्दत्' (TS.5.1.4.4.) इति BB.

८. मूर्धवद्वारकात् Sy. मूर्ध्नोऽर्थादरणेः शिरसो निरमन्थतेति व्यत्ययः Mah. शिरस्तोऽरण्योर्जनयति U. मूर्धस्थानीयात् प्रधानभूतात् पुष्करपर्णात् BB.

९. सर्वस्य जगतः Sy. सर्वस्य जगतः सम्बन्धिनः । यद्वा विश्वस्येति षष्ठ्येकवचनं प्रथमाबहुवचनार्थे । विश्वे सर्वे वाघत इत्यर्थः Mah. सर्वस्य कर्मणोऽङ्गभूतम् U.

१०. वाहकात् । 'पुष्करपर्णे हि प्रजापतिर्भूमिमप्रथयत् तत्पुष्करपर्णेऽप्रथयत्' (TB. 1.1.3.6.) इति श्रुतेः । भूमिश्च सर्वजगत आधारभूतेति पुष्करपर्णस्य सर्वजगद्धारकत्वम् । अत्र पुष्करशब्देन पुष्करपर्णमभिधीयत इति । एतच्च तैत्तिरीयके विस्पष्टमाम्नातम् । 'त्वामग्ने पुष्करादधीत्याह पुष्करपर्णे ह्येनमुपश्रितमविन्दत् (TS.5.1.4.4.) इति Sy. वाघत इति ऋत्विङ्नामसु (Ngh. 3.18.) पठितम् । ....वाघत ऋत्विजः Mah.,U. ऋत्विक्समुदायस्य (वाहकात्) उदकात् प्राणो निरमन्थदित्येके BB. ११. ०वर्णे D.

१२. ह्यनमुपा० P. ह्यन D.

१३. तै० P. TS.5.1.4.4. यद्वा—ऋचोऽयमर्थः । हे अग्ने ! अथर्वाख्य ऋषिः पुष्करादधि पद्मपत्रस्योपरि त्वां निरमन्थत । कीदृशात्पुष्करात् । मूर्ध्न उत्तमाङ्गवत्प्रशस्ताद् विश्वस्य वाघतः सर्वस्य जगतो वाहकात् पुष्करपर्णमग्निमन्थनयज्ञनिष्पादनद्वारेण सर्वं जगन्निर्वहति Mah. अथैनं परिगृह्णाति । अभ्रघा च दक्षिणतो हस्तेन च हस्तेनैवोत्तरतस्त्वामग्ने पुष्करादध्यथर्वा निरमन्थतेत्यापो वै पुष्करं प्राणोऽथर्वा प्राणो वाऽएतमग्नेऽङ्गुचो निरमन्थन्मूर्ध्नो विश्वस्य वाघत इत्यस्य सर्वस्य मूर्ध्न इत्येतत् ŚB.6.4.2.2.p.531.

This stanza=YV.15.22.=TS. 3.5.11.3.

उत्तरा निगदसिद्धा

तमु त्वा दध्यङ्ङृषिः पुत्र ईधे अथर्वणः । वृत्रहणं पुरंदरम् ॥ १४ ॥

[तमु त्वा ।]

तमु त्वा पाथ्यो वृषा समीधे दस्युहन्तमम् । धनंजयं रणेरणे ॥ १५ ॥

तमु त्वा । तम् । एव । त्वाम् । पथ्यायाः पुत्रः दध्यङ् । वृषा । समीधे । दस्यूनामतिशयेन हन्तारम् । धनस्य जेतारम् । युद्धे युद्धे 'पूर्वमेवोदितमुत्तरेणाभिश्रृणोति' इति ब्राह्मणम् ।

---

१. The *pratīka* is supplied by the Editor.
हे अग्ने ! य उक्तगुणस्तमु तमेव त्वामथर्वणः पुत्रो दध्यङ् एतत्संज्ञ ऋषिरीधे । दीपितवान् । कीदृशम् ? वृत्रहणमावरकाणां शत्रूणां हन्तारं पुरन्दरम् असुरपुराणां दारयितारम् Sy. हे अग्ने ! अथर्वण ऋषेः पुत्रो दध्यङ्नामक ऋषिस्तमु त्वा, उ एवार्थे । तमेव त्वामीधे प्रज्वालितवान् । कीदृशं त्वाम् ? वृत्रहणं वृत्रस्य पाप्मनो हन्तारम् । . . .पुरन्दरं रुद्ररूपेणासुरसम्बन्धिनां त्रयाणां पुराणां विदारयितारम् Mah. अत्राप्युकार एतस्मिन्नर्थे उत्तरेणेत्युकारः, तमेव त्वां दध्यङ्नामा ऋषिर्मन्त्राणां द्रष्टा पुत्र ईधे, अथर्वणः, व्यवहितोऽत्र सम्बन्धः । अथर्वणः पुत्र ईधे । 'इन्धी दीप्तौ' आदीपयति । कथम्भूतं त्वामादीपयति ? वृत्रहणं पाप्मनो हन्तारम् । पुरन्दरमसुरपुरां च दारयितारं वा । दध्यङ्ङाथर्वणः इति श्रुतिः U. तमेव त्वा दध्यङ्नामर्षिरथर्वणः पुत्र ईधे दीपयामास । . . .वृत्रस्यासुरस्य पाप्मनो वा हन्तारं पुरन्दरं पुरामसुरसम्बन्धिनीनां दारयितारम् BB. तमु त्वा दध्यङ्ङृषिः । पुत्र ईधेऽअथर्वण इति वाग्वै दध्यङ्ङाथर्वणः स एनं तत ऐन्ध वृत्रहणं पुरन्दरमिति पाप्मा वै वृत्रः पाप्महनं पुरन्दरमित्येतत् ŚB.6.4.2.3.p.531.

This stanza=YV.11.33.=TS.3.5.11.3.

२. पथि वर्तमानः पाथ्यः सन्मार्गवर्ती, यद्वा पाथस्यन्तरिक्षे हृदयाकाशे भवः पाथ्यः । . . . .मनसा हि ब्रह्मपन्था उपलभ्यतेऽतः पाथ्यः । 'मनसैवानुद्रष्टव्यम्' इति श्रुतेः Mah. मनसा हि मुक्तेः पन्था उपलभ्यते U.
पाथ्यो नामर्षिः BB.

३. पाथ्यो वृषा नाम कश्चिदृषिः Sy. सेक्ता । . . . .'मनसैवाभिलष्य स्त्रियां रेतः सिञ्चति' इति वृषा हि मनः । 'मनो वै पाथ्यो वृषा' (ŚB.6.4.2.4.p.531) इति श्रुतेः Mah., U. वृषा प्रधानभूतः BB.

४. हे अग्ने ! समैन्ध । समदीपयत् Sy. सन्दीपयति Mah., U. दीपितवान् BB.

५. अतिशयेन उपक्षपयितॄणां शत्रूणां हन्तारम् Sy. दस्यून् हन्तीति दस्युहा, अतिशयेन दस्युहा दस्युहन्तमस्तम् . . . .अतिशयेन शत्रूणां हन्तारम् Mah. शत्रुहन्तृतमम् U. दस्यूनां हन्तृतमं हन्तारम् BB.

६. धनानां जेतारम् BB.

७. ०द्ध P. तेषु तेषु सङ्ग्रामेषु Mah. सङ्ग्रामे सङ्ग्रामे U. सङ्ग्रामे BB.
This stanza=YV.11.34.=TS.3.5.11.4.

एह्यू षु ब्रवाणि तेऽग्न इत्येतरा गिरः । एभिर्वर्धास इन्दुभिः ॥ १६ ॥

एहि[1] । आगच्छ । सुष्ठु । ब्रवाणि[2] । ते[3] । स्तुतीः[4] । अग्ने[5] ! असुत्रासुरेषु[6] वर्तमाना[7] भवन्ति । इतरा अदेवजुष्टा अश्रोतव्याः[8] । एभिरस्मदीयैः[9] । स्तोमैः[10] । वर्धस्व, "असुर्या ह वा इतरा गिरः[11]" इति ब्राह्मणम्[12] ।

यत्र क्वं च ते मनो दक्षं दधस उत्तरम् । तत्रा सदः कृणवसे ॥ १७ ॥

[यत्र ।][13] यत्र[14] । क्व[15] । चित्[16] । तव तत्र[17] । पूजा भवति[18] । तत्र[19] । वृद्धिम्[20] । उद्धततराम्[21] । करोषि[22] । तथा तत्र स्थानं च । करोषि स्तोतरि[23] ।

---

१. उक्थ्ये ऋतौ तृतीयसवने मैत्रावरुणस्य 'एह्यू षु' इत्यादिकौ तृचौ स्तोत्रियानुरूपौ । (ĀŚS. 6.1.) आभिप्लविकेषूक्थ्येषु त्वेतौ वैकल्पिकौ स्तोत्रियानुरूपौ । आभिप्लविकेषूक्थ्येषु सूत्रितञ्च--'एह्यू षु ब्रवाणि त आग्निरगामि भारतः' (ĀŚS.7.8.) इति । पौनराधेयिक्यामिष्टावुत्तराज्यभागस्य' एह्यू षु' इत्यनुवाक्या । सूत्रितं च--'एह्यू षु ब्रवाणि त इत्याग्नेयावाज्यभागौ' (ĀŚS.2.8.) इति Sy.

२. ताः स्तुतीः भृण्वित्यर्थः Sy. सुतरां वदानि Mah. ऊकारोऽहेतुरिति चेत्... साधु ब्रवाणि U.

३. तुभ्यं त्वदर्थम् Sy. तव Mah.,U.

४. ०ती D. वाणीः स्तुतिलक्षणाः Mah. गिरो वाचः U.

५. हे भगवन्नग्ने U.

६. ०सुरेषुरेषु D.

७. ०नो D. इत्थमनेन प्रकारेण Sy., Mah. इत्थं त्वदीयैर्नामबन्धकर्मरूपैर्ग्रथिताः U.

८. असुरैः कृताः स्तुतीः भृण्विति शेषः । तथा च ब्राह्मणम् 'अग्ने तथेतरा गिर इत्यसुर्या ह वा इतरा गिरः' (AB.3.49.) इति Sy. इतरा अन्याः Mah. इतराः स्तुतिलक्षणाः । ....यद्वेत्थमुद्गातृस्तोत्रजनिता इतरा अन्या गिरो वा गीयन्ते U.

९. अभ्शृणोतव्या P.

१०. अपि चागतस्त्वम्, एतैः Sy. हेतुं न्यस्यति । एभिश्च U.

११. सोमैः is suggested for स्तोमैः ॥ अध्वर्युणाभिष्तुतैः सोमैः U.

१२. AB. 3.49. The quotation from AB. should immediately follow इतरा ।

१३. VM. ignores उ॥ उ इत्येतत् पूरकम् Sy. अथ यद्यग्नयऽइन्दुमते ध्रियेरन् । अग्नयऽइन्दुमतेऽनुब्रूहीति ब्रूयात्सोऽन्वाहेह्यू षु ब्रवाणि तेऽग्नऽइत्येतरा गिरः । एभिर्वर्धसऽइन्दुभिरिति तथा हाग्नेयो भवति सोमो वाऽइन्दुस्तवु सौम्यादाज्यभागान्नयन्ति जुषाणोऽग्निरिन्दुमानाज्यस्य वेत्विति यजत्येवमु सर्वमाग्नेयं करोति ŚB.2.2.3.23.p.150 This stanza=YV. 26.13.

१४. The *pratīka* is supplied by the Editor.

१५. हे अग्ने ! Sy.

१६. यस्मिन् देशे Sy.

१७. कस्मिंश्चिद्यजमाने Sy.

१८. मनोऽनुग्रहात्मकमन्तःकरणम् Sy.

१९. वर्तते Sy.

२०. तस्मिन् यजमाने Sy.

२१. बलकरमन्नं वा Sy.

२२. उद्धततरं श्रेष्ठम् Sy.

२३. धारयसि Sy.

नहि ते पूर्तमक्षिपद्भुवन्नेमानां वसो । अथा दुवो वनवसे ॥ १८ ॥

नहि ते[1] । नहि । ते[2] । दानम्[3] । अक्षणः पातकम्[4] । भवति[5], अनवरतं प्रवर्तमानं न चक्षुः[6] पतति सन्तत प्रवर्तत इत्यर्थः । हे नेमानाम्[7], वासयित[8]. ! नेमा नमानात्[9] पूजका[10]. । ततश्च । परिचर्याम्[11] । मनुष्येभ्यो भजसे[12] ।

आग्निरगामि भारतो वृत्रहा पुरुचेतनः । दिवोदासस्य सत्पतिः ॥ १९ ॥

आग्निः[14] । आभिमुख्येन गम्यते[15] । अग्निः[16] । 'भारतेत्यहैष हि देवेभ्यो हव्य भरति[17]' इति ब्राह्मणम् । शत्रूणा हन्ता[18] । बहुप्रज्ञः[19] । दिवोदासार्थं[20] मया । सता पतिः[21] ।

स हि विश्वाति पार्थिवा रयिं दाशन्महित्वना । वन्वन्नवातो अस्तृतः ॥ २० ॥

[स हि ।][23] सः[24] । हि[25] । विश्वानि[26] । पार्थिवानि[27] भूतानि । अतिक्रान्त. । रयिम्[28] । प्रयच्छति[29] । महत्वेन[30] । भजमानो हवीषि[31] । अनभिगतः[32] । शत्रुभिरहिंसितश्च[33] ।

---

१. हे अग्ने ! Sy.
२. त्वदीयम् Sy.
३. मानम् P. पूरकं तेजः Sy.
४. अक्ष्णोः पातकं विनाशकम् Sy.
५. भवतु । सर्वदास्माकं दर्शनसामर्थ्यं करोतु Sy.
६. चक्षः P., D.
७. नेमशब्दोऽल्पवाची । मनुष्याणां मध्ये कतिपयानां यजमानानाम् Sy.
८. ०नामपासयितुः P. ०नामवासयितुः D. वासक ! Sy.
९. नमनात् is suggested for नमानात् ।
१०. नेमानामानात् पूजकाश्च P. The passage नेमा....पूजकाः refers to नेमानाम् ।
११. Omitted by P. अतः कारणात् Sy.
१२. पर्यचर्यं P., D. अस्माभिर्यजमानैः कृतं परिचरणम् Sy.
१३. वजसे P. सम्भजस्व Sy.
१४. आनिः P., D.
१५. अस्माभिः स्तुतिभिरगम्यत Sy.
१६. अनिः P. अयमग्निः Sy.
१७. हविषां भर्ता Sy.
१८. वहति P.
१९. वृत्राणां शत्रूणां हन्ता Sy.
२०. पुरूणां बहूनां चेतयिता ज्ञाता । सर्वज्ञ इत्यर्थः Sy.
२१. एतत्संज्ञस्य राज्ञः Sy.
२२. यजमानानां पालयिता Sy.
२३. The *pratika* is supplied by the Editor.
२४. अग्निः Sy.
२५. खलु Sy.
२६. Omitted by P. सर्वाणि Sy.
२७. पातमिवा P. पृथिव्यां भवानि भूतजातानि Sy.
२८. अपिति० P. अतिक्रामन् Sy.
२९. रतिं P. धनम् Sy.
३०. ददातु । यद्वा विश्वं सर्वं पार्थिवं पृथिव्यां विद्यमानं रयिं धनमति अतिशयेन दाशत् ददातु Sy.
३१. ०त्वे० is suggested for ०त्वे० ॥ स्वमहिम्ना Sy.
३२. काष्ठानि शत्रून्वा हिंसन् Sy.
३३. अन्यैः शत्रुभिरप्रतिगतः Sy.
३४. केनाप्यहिंसितः Sy.

स प्रत्नवन्नवीयसाग्ने द्युम्नेन संयता । बृहत्ततन्थ भानुना ॥ २१ ॥

स प्रत्नवत् । सः । पुराणेनेव । नवीयसाधुना प्रादुर्भूतेन । सङ्गच्छमानः । अग्ने ! द्योतमानेन । तेजसा । विस्तृतमन्तरिक्षम् । ततन्थ ।

प्र वः सखायो अग्नये स्तोमं यज्ञं च धृष्णुया । अर्च गायं च वेधसे ॥ २२ ॥

प्र वः सखायः । प्राचत । गायत । च । यूयम् , ये । सखायः । अग्नये । स्तोमम् । यज्ञम् । च । धृष्णवे । विधात्रे ।

स हि यो मानुषा युगा सीदद्धोता कविक्रतुः । दूतश्च हव्यवाहनः ॥ २३ ॥

स हि । सः । हि । यः । मानुषान् । कालान् दर्शपूर्णमासाद्याधारभूतान् । सीदति । होता भूत्वा । कान्तप्रज्ञः । दूतः । च भवतीति । हविषां वोढा ।

ता राजाना शुचिव्रतादित्यान्मारुतं गणम् । वसो यक्षीह रोदसी ॥ २४ ॥

ता राजाना । तौ । मित्रावरुणौ । शुचिकर्माणौ । आदित्यांश्चान्यान् । मरुतां च । गणम् ।

---

१. Omitted by P.
२. तादृशस्त्वम् Sy. स त्वम् BB.
३. प्रत्नेन पुराणेन Sy. पुराणाहंम् । यद्वा प्रागिव । यद्वा पुरातनेनेव BB.
४. निपीयसा P. नवतरेण Sy., BB.
५. सङ्गमनः P. सङ्गमानः D. सङ्गच्छता सम्यग् व्याप्नुवता Sy. त्वामेव सङ्गच्छता ।.... यद्वा त्वयैव संयता धनेन BB.
६. हे अग्ने ! यः पूर्वोक्तगुणविशिष्टः Sy.
७. यशसा धनेन वा BB.
८. ईदृशेन द्युम्नेन भानुना भासनशीलेन BB.
९. महद् अन्तरिक्षम् Sy. महदिदं विश्वम् BB.
१०. ततत्थ P. विस्तारयसि Sy. विस्तारय छान्दसो लिट् । यद्वा विश्वं बृहद् भृशं ततन्थ तथा कुर्वंश्चास्माकं हिरण्यलाभहेतुर्भवेति BB.
११. oय D.
१२. पा० P. प्रयच्छ ? (प्रयच्छत) Sy.
१३. हे सखायः ! समानख्याना ! ऋत्विजः ! Sy.
१४. P. adds च after स्तोमम् ॥ स्तोत्रम् Sy.
१५. यजनसाधनं हविश्च Sy.
१६. पृष्ण० D. शत्रूणां धर्षकाय Sy.
१७. विधोत्रे P.
१८. ति P. १९. अग्निः Sy.
२०. खलु Sy.
२१. मानुषाणि Sy.
२२. युगानि । मनुष्यसम्बन्धिनो यज्ञार्हान् कालविशेषान् तेषु यागा अनुष्ठीयन्ते । अत्यन्तसंयोगे द्वितीया । एतावन्तं कालम् Sy.
२३. सीदतु । अस्मदीये यज्ञे बर्हिष्युपविशतु Sy.
२४. देवानामाह्वाता Sy.
२५. क्रान्त० is suggested for कान्त० ।
२६. देवानां दूतः Sy.
२७. प्रसिद्धौ Sy.
२८. राजमानौ Sy.
२९. शुचिकर्माणौ मित्रावरुणौ Sy.
३०. अदितेः पुत्रान् धात्रादीन् Sy.
३१. मारुताश्च P. मारुतां च D.
३२. सङ्गम् Sy.

वासयितः[1] ! यज । द्यावापृथिवी च ।[2][3]

वस्वी[4] ते अग्ने संदृष्टिरिषयते[5] मर्त्याय । ऊर्जो नपादमृतस्य[6] ॥ २५ ॥

वस्वी ते । प्रशस्या[7] । तव । अग्ने ! सन्दृष्टिः[8] । अन्नमिच्छते[9] । मनुष्याय[10] । अन्नस्य[11] । पौत्र ! अमृतस्य[12] तव ।

क्रत्वा[13] दा अस्तु[14] श्रेष्ठोऽद्य[15] त्वा[16] वन्वन्त्सुरेकणाः[17] । मर्तं[18] आनाश[19] सुवृक्तिम्[20] ॥ २६ ॥

क्रत्वा दाः[21] । कर्मणा[22] । दाता[23] । अस्तु तुभ्यम् । श्रेष्ठः[24] । अद्य[25] । त्वाम् । याचमानः[26] । सुधनः[27] । मनुष्यः[28] । व्याप्नोति[29] । सुप्रवृत्ता[30] स्तुतिम्[31] ।

ते तें[32] अग्ने त्वोतां[33] इषयन्तो[34] विश्वमायुः[35] । तरन्तो[36] अर्यो[37] अरातीर्वन्वन्तो[38] अर्यो[39] अरातीः[40] ॥ २७ ॥

ते ते अग्ने । ते[41] । तव । अग्ने ! त्वया रक्षिताः[42] । विश्वम्[43] । अन्नम्[44] । इच्छन्तः[45] । तरन्ते[46] । गन्तारः[47] । शत्रून्[48] । वन्वन्तश्च[49] भवन्ति वधकर्मा[50] वनिरिति[51] ।

---

१. हे वासकाग्ने ! Sy.
२. द्यावापृथिव्यौ चैतान्देवान् Sy.
३. VM. ignores इह ॥ अस्मिन् यज्ञे Sy.
४. वन्वी D.
५. वासयित्री । प्रशस्येत्यर्थः Sy.
६. दीप्तिः Sy.
७. अन्नमिच्छति । ददातीत्यर्थः Sy.
८. सा मनुष्याय यजमानाय Sy.
९. हे बलस्य पुत्राग्ने ! Sy.
१०. धोतायस्य P. मरणरहितस्य Sy.
११. हे अग्ने ! Sy.
१२. कर्मणा परिचरणात्मना Sy.
१३. कर्मणां दातः P. हवींषि दाता यजमानः Sy.
१४. अतिशयेन प्रशस्योऽस्तु Sy.
१५. इदानीम् Sy.
१६. सम्भजन् Sy.
१७. शोभनधनश्चास्तु Sy.
१८. तथा स मनुष्यः Sy.
१९. प्या P. व्याप्नोतु तव सर्वदा स्तोता भवत्वित्यर्थः Sy.
२०. सुप्रवृत्तक्तंतां P. ०वृक्तां D.
२१. ०तिः P. त्वद्विषयां सुष्टुतिम् Sy.
२२. स्तोतारः Sy.
२३. त्वदीया ये त्वां स्तुवन्ति Sy.
२४. ०क्ष० D. २५. सर्वम् Sy.
२६. अन्नं लभन्त इति शेषः । आयुरेव वा शतवर्षलक्षणमिषयन्त इच्छन्तः प्राप्नुवन्तीति शेषः Sy.
२७. इषमात्मन इच्छन्तः सन्तः Sy.
२८. अतिक्रामन्तः Sy.
२९. ०र P. अरीनभिगन्त्रीः Sy.
३०. काश्चिच्छत्रुसेनाः Sy.
३१. वसन्त० P. हिंसन्तश्च Sy.
३२. मनि० P.
३३. VM. explains अर्यः and अरातीः once only.

अग्निस्तिग्मेन शोचिषा यासद्विश्वं न्यत्रिणम् ।
अग्निर्नो वनते रयिम् ॥ २८ ॥

अग्निः । अग्निः । तिग्मेन । तेजसा । निहन्तु । विश्वम् । रक्षः । अग्निः । अस्मभ्यम् । प्रयच्छतु । धनम् ।

उत्तरा निगदसिद्धा

सुवीरं रयिमा भर जातवेदो विचर्षणे । जहि रक्षांसि सुक्रतो ॥ २९ ॥

[सुवीरम् ।]

त्वं नः पाह्यंहसो जातवेदो अघायतः । रक्षा णो ब्रह्मणस्कवे ॥ ३० ॥

त्वं नः । त्वम् । अस्मान् । पाहि । रक्षसः । जातवेदः । अक्षमिच्छतः । रक्ष । अस्मान् । हे स्तोत्रस्य, कर्तः !

---

१. अस्ति P. अयमग्निः Sy.

२. तीक्ष्णेन Sy. उत्साहवता U. 'तिग्मं तेजतेरुत्साहकर्मणः' N. 10.6.

३. वीप्त्या U.

४. नितरां क्षीणं करोतु । 'यस उपक्षये' लेट् Mah. उपक्षयति U.

५. सर्वम् Sy., Mah., U.

६. अत्तारं राक्षसादिकम् Sy. राक्षसम् ... अत्रादनं भक्षणमस्यास्तीत्यत्री भक्षकस्तम् Mah. नितरामत्त्रिणमत्तारं खादकमुपद्रवकारिणम् U.

७. ०क्षाग्निः P. अग्निश्च U.

८. अपि च नोऽस्मभ्यम् Sy.

९. ददातु Sy., Mah. वनतिर्दानार्थः । ददाति U.
स वै पञ्चगृहीतं गृह्णीते । पञ्चधाविहितो वाऽअयꣳ शीर्षन्प्राणो मनो वाक् प्राणश्चक्षुः श्रोत्रमेतमेवास्मिन्नेतत्पञ्चधाविहितꣳ शीर्षन्प्राणं दधात्यग्निस्तिग्मेन शोचिषेति तिग्मवत्या शिर एवास्यैतया सꣳशꣳस्यति तिग्मतायै ।
ŚB. 9.2.2.5. p. 714.
This stanza=YV. 17.16.

१०. The *pratīka* is supplied by the Editor.
हे जातवेदः ! जातप्रज्ञान ! जातधन ! वा । विचर्षणे विशेषेण द्रष्टरग्ने ! सुवीरं शोभनैर्वीरैः पुत्रपौत्रादिभिरुपेतं रयिं धनमाभर । आहर । तथा हे सुक्रतो ! सुकर्मन्नग्ने ! रक्षांसि च जहि विनाशय Sy.

११. रक्ष Sy. १२. पापात् Sy.

१३. हे जातवेदः ! त्वम् Sy.

१४. अघम् is suggested for अक्षम् ॥ अघमनर्थमस्माकमिच्छतः शत्रोश्च Sy.

१५. हे स्तुतिरूपस्य मन्त्रस्य कवे ! कावयितः ! शब्दयितरग्ने ! अग्निर्हि शब्दमुत्पादयति । तथा च स्मर्यते 'मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् । मारुतस्तूरसि चरन् मन्द्रं जनयति स्वरम्' इति तादृशाग्ने ! Sy.

यो नो अग्ने दुरेव आ मर्तो वधाय दाशति । तस्मान्नः पाह्यंहसः ॥ ३१ ॥

यो[1] **नः**। यः। अस्मान्। अग्ने ! दुष्टागमनः[2] ! मनुष्यः। हन्त्रे[3]। आभिमुख्येन प्रयच्छति[4]। तस्मात्[5]। अस्मान्। रक्ष। आहन्तु[6]।

उत्तरा निगदसिद्धा

त्वं तं देव जिह्वया परि बाधस्व दुष्कृतम् । मर्तो यो नो जिघांसति ॥ ३२ ॥

[त्वं तम्][7]

भरद्वाजाय सप्रथः शर्म यच्छ सहन्त्य । अग्ने वरेण्यं वसु ॥ ३३ ॥

[भरद्वाजाय।] भरद्वाजाय[8]। सहनशील[9] ! सहन्त्रो[10] ? गृहम्[11]। सर्वत पृथुतमम्[12]। धन च। प्रयच्छ[13], अवशिष्ट[14] स्पष्टम्।

अग्निर्वृत्राणि जङ्घनद्द्रविणस्युर्विपन्यया । समिद्धः शुक्र आहुतः ॥ ३४ ॥

अग्निः[15]। अग्निः। शत्रून्[16]। हन्तु[17]। धनमिच्छन्[18] तुभ्यम्[19]। समिद्धः[20]। शुक्लवर्ण[21]।

---

१. न P. २. ०मेनः P. दुष्टाभिप्रायः Sy.
३. हन्तृ D. स्वस्यायुधाय Sy.
४. अभिप्रयच्छति । आयुधेनास्मान्हन्तीत्यर्थः Sy.
५. मनुष्यात् Sy. ६. ०न्तुम् P., D. पापाच्च Sy. ७. The *pratīka* is supplied by the Editor. हे देव ! द्योतमानाग्ने ! त्वं तं वक्ष्यमाणं दुष्कृतं दुष्कर्मकारिणं मनुष्यं जिह्वया ज्वालया परिबाधस्व सर्वतो जहि। यो मर्तो मनुष्यो नोऽस्मान् जिघांसति हन्तुमिच्छति Sy. ८. The *pratīka* is supplied by the Editor.
९. महामृषये Sy. १०. ०शी P. हे सहन्त्य ! शत्रूणामभिभवितरग्ने ! Sy.
११. The reading is doubtful.
१२. शर्म सुखं गृहं वा Sy.
१३. सर्वतः पृथु विस्तीर्णम् Sy. १४. देहि Sy.
१५. By अवशिष्टम् VM. refers to अग्ने and वरेण्यम् ॥ वरेण्यं वरणीयम् Sy.
१६. पौर्णमास्यामाग्नेयाज्यभागस्यानुवाक्या 'अग्निर्वृत्राणि' इत्येषा । सूत्रितञ्च—'अग्निर्वृत्राणि जङ्घनदिति पूर्वस्याज्यभागस्यानुवाक्या' (ĀŚS. 1.5.) इति । इष्टिपशुसोमेषु च यत्र वृधन्वन्तौ पुष्टिमन्तावित्यादिविशेषविधिर्न दृश्यते तत्र सर्वत्रैषैव प्रथमाज्यभागानुवाक्या । उपसद्याग्नेयस्यैषानुवाक्या सायङ्कालीनस्य त्वेषैव याज्या । सूत्रितञ्च—'अग्निर्वृत्राणि जङ्घनद्य उग्रइव शर्यहेति विपर्यासो याज्यानुवाक्यानाम्' (ĀŚS.4.8.) इति Sy.
१७. आवरकाणि रक्षःप्रभृतीनि तमांसि वा Sy. पापानि Mah. यजमानस्य वृजिनानि U.
१८. भृशं हन्तु Sy. अत्यर्थं हन्ति Mah., U.
१९. द्रविणं धनं स्तोतृणामिच्छन्। यद्वा हविर्लक्षणं धनमात्मन इच्छन्नग्निः Sy. द्रविणो धनमिच्छति द्रवणस्यति....हविर्लक्षणं धनमिच्छन् Mah. धनं हविर्लक्षणमिच्छन् U.
२०. सम्यग्दीप्तः Sy. दीप्तः Mah., U.
२१. अत एव शुक्लवर्णः Sy. शुक्रः शुद्धः Mah. शुक्लः U.

आहुतः[1][2] ।

गर्भे मातुः पितुष्पिता विदिद्युतानो अक्षरे । सीदन्नृतस्य योनिमा ॥ ३५ ॥

गर्भे[3] । द्यावापृथिव्योः[4] । गर्भे अन्तरिक्षे[5] । पालयिताग्नि[6] । विद्योतमानः[7] । उदकम्[8] । आच्यावयति[9] ।

ब्रह्म प्रजावदा भर जातवेदो विचर्षणे । अग्ने यद्दीदयद्दिवि ॥ ३६ ॥

ब्रह्म[11] । अन्नम् । प्रजायुक्तम्[12] । देहि[13] । जातवेद[14] । विद्रष्ट[15] ! अग्ने ! यत्[16] । दीप्यते[17] । दीप्ते[18] त्वयि ।

उप त्वा रण्वसंदृशं प्रयस्वन्तः सहस्कृत । अग्ने ससृज्महे गिरः ॥ ३७ ॥

उप त्वा[19] । उप ससृज्महे[20] । त्वाम् । रमणीयसन्दर्शनम्[21] । अन्नवन्त[22] । हे सहसोत्पादित[23] ! अग्ने ! स्तुती[24] ।

उपच्छायामिव घृणेरगन्म शर्म ते वयम् । अग्ने हिरण्यसंदृशः ॥ ३८ ॥

उपच्छायाम् । उपगच्छाम । छायामिव[25] । तेज[26] । सुखम्[27] । अग्ने ! हिरण्यरूपस्य[28] । तव[29] ।

---

१. हविर्भिरभिहुतः Sy. निमन्त्रितः Mah. अभिहुतः सन् U.

२. VM. ignores विपन्यया ॥ स्तुत्या स्तूयमानः Sy. पनतिरर्चतिकर्मा । विविधया पूजया पापं हन्ति Mah. विपनिरर्चतिकर्मा । यजमानपूजया निमित्तभूतया U.
This stanza=YV.33.9.=TS.5.5.6.1. ३. गर्हे P. हे D.

४. अत्र मातृपितृशब्दाभ्यां भूद्यौश्चाभिधीयेते 'द्यौर्मे पिता पृथिवी माता' (RV.1.191.6.) इति श्रुतेः मातुर्भूम्याः Sy.

५. गर्भस्थाने मध्ये Sy.

६. क्षरणरहिते वेद्याख्ये स्थाने Sy.

७. द्युलोकस्य पालयिता हविषां प्रदानेन एवम्भूतोऽग्निः Sy.

८. ०ना P. विशेषेण दीप्यमानः Sy.

९. ०वकेम् P. VM. seems to explain ऋतस्य and योनिम् together as उदकम् ॥ उत्तरवेद्याख्यं धिष्ण्यम् । सप्तम्यर्थे द्वितीया Sy.

१०. ०न्ति P. आ सीदन् उत्तरवेद्यामुपविशन् अग्निर्वृत्राणि जङ्घनदिति सम्बन्धः Sy.

११. ०ह्मा P. १२. पुत्रपौत्रसहितम् Sy.

१३. आहर Sy.

१४. हे जातानां वेदितः ! Sy.

१५. विशेषेण द्रष्टरग्ने ! Sy.

१६. ब्रह्म Sy.

१७. देवेषु मध्ये यत्प्रशस्तमन्नं राजते तदाहरेत्यर्थः Sy. १८. द्युलोके Sy.

१९. प्रति Sy.

२०. सृज्म P. सृज्महे D. विसृजामः । उच्चारयाम इत्यर्थः Sy.

२१. रमणीयसन्दर्शनं स्तोतव्यसन्दर्शनं वा Sy.

२२. हविर्लक्षणान्नवन्तो वयम् Sy.

२३. हे सहसा बलेनोत्पन्न ! Sy.

२४. स्तुहि P.

२५. तत्र दृष्टान्तः । यथा घर्मार्ताः सन्तप्ताश्छायामुपगच्छन्ति तद्वत् Sy.

२६. दीप्तस्य Sy.

२७. शरणमाश्रयणम् Sy.

२८. हितरमणीयतेजसो हिरण्यवद्रोचमानतेजसो वा Sy.

२९. VM. ignores वयम् ।

य उग्रइव शर्यहा तिग्मशृङ्गो न वंसगः । अग्ने पुरो रुरोजिथ ॥ ३९ ॥

[१] य उग्रः । यस्त्वम् [२] । उद्गूर्ण इव वीरः [३] । शातयितव्यानां हन्ता [४] । तीक्ष्णशृङ्गः [५] । इव च । ऋषभः [६] । अग्ने ! शत्रुपुराणि [७] । रुरोजिथ [८], पूर्वत्र सम्बन्ध उत्तरत्र वा [९] ।

आ यं हस्ते न खादिनं शिशुं जातं न बिभ्रति । विशामग्निं स्वध्वरम् ॥ ४० ॥

[१०] आ यम् । यथा [११] । हस्ते [१२] । खादिनमायुधम् [१३] । धारयति [१४] । यथा वा [१५] । जातम् [१६] । शिशुम् [१७] एवम् । य बिभ्रति [१८] । विशाम् [१९] । अग्निम् । सुयज्ञम् [२०], उत्तरत्र सम्बन्धः [२१] ।

---

१. उपसदि प्रातःकालीनस्याग्नेयस्य 'य उग्रइव' इति याज्या । सायङ्कालीनस्य त्वेषवानुवाक्या । सूत्रितञ्च—'अग्निर्वृत्राणि जङ्घनद्य उग्रइव शर्यहा' (ĀŚS. 4.8.) इति Sy.

२. अग्निः Sy. हे अग्ने ! यस्त्वम् BB.

३. ०रा P. उद्गूर्णबलो धन्वीव Sy. उद्गूर्णबलतयोग्र इव भवसि BB.

४. शर्यैर्बाणैः शत्रूणां हन्ता Sy. छान्दसः कर्तरि कृत्यः । 'तत्र साधुः' इति यत् । शर्याणां हिंसकानां हन्ता शर्यहा । छान्दसो ङः । भ्रातृव्याणां हन्ता वृष्टेरुत्पादनेन वा सर्वाभिमतकारी BB.

५. तीक्ष्णज्वालस्तिग्मशृङ्ग इव BB.

६. वननीयगतिर्वृषभ इव Sy. वननीयानि वनानि गच्छति वनसङ्गः । वननीयेषु वनेषु सक्त इति वा वनसङ्गः । पृषोदरादित्वाद्विष्टस्वरूपलाभः BB.

७. आसुरीस्तिस्रः पुरीः Sy. असुराणां पुरीर्मेघान्वा BB.

८. ०थः D. भग्नवानसि । 'रुद्रो वा एष यदग्निः' (TB. 2.1.3.1.) इति श्रुतेः । रुद्रकृतमपि त्रिपुरदहनमग्निकृतमेवेत्यग्निः स्तूयते । यद्वा त्रिपुरदहनसाधनभूते बाणेऽग्नेरनीकत्वेनावस्थानादग्निः पुराणि भग्नवानित्युच्यते । 'देवासुरा वा एषु लोकेषु समयतन्त' (AB. 1.23.) इत्यादिकं ब्राह्मणमनुसन्धेयम् Sy. एवं मृगवत्सौम्यस्वभाव उग्रस्वभावश्च त्वम्. . . . रुरोजिथ, अधाक्षीः BB.

९. इव P.

This stanza=TS. 2.6.11.4.

१०. अग्निमन्थने जायमानेऽग्नौ 'आ यं हस्ते' इत्येषानुवाक्या । सूत्रितञ्च 'आ यं हस्ते न खादिनमित्यर्धर्चं आरमेत्' (ĀŚS.2.16.) इति Sy.

११. पूर्वो नशब्दः पुरस्तादुपचारोऽप्युपमार्थीयः, यद्वा सम्प्रत्यर्थे, सम्प्रतीदानीम् Sy.

१२. हस्तेषु Sy. अञ्जलौ BB.

१३. भक्षकं व्याघ्रादिमिव । यथा तं बिभ्रतः पुरुषा अवहितास्तथाभूता इत्यर्थः । खादिनं हविषां भक्षकम् Sy. 'ससाधनां क्रियामुपसर्ग आह' इत्यागतोऽग्निरुच्यते । आगतमेवाग्निं बिभर्ति, न खादिनं हविर्भुञ्जानं ज्वलदवस्थमित्यर्थः BB.

१४. अभिमुखं धारयन्त्यध्वर्यवः Sy. विभक्तिवचनव्यत्ययः BB.

१५. इव BB.

१६. यथाऽऽहुः—'जातमध्वर्युरञ्जलिना गृह्णाति' BB.

१७. पुत्रम् Sy. यथा मात्रादयो जातमात्रमेव शिशुं हस्ते बिभ्रति BB.

१८. मन्थनोत्पन्नं यमग्निम् Sy. यमग्निमध्वर्यवः BB.

१९. विश्वाम् P., D. जनानाम् Sy. मनुष्याणाम् BB.

२०. शोभनयागस्य निष्पादकं तमग्निं हे ऋत्विजः ! परिचरतेति शेषः Sy. शोभनयज्ञम् । अवितथफलसाधनत्वात् । . . . . सोऽयमग्निरुदजनीति BB.

२१. VM. ignores आ ।
This stanza=TS.3.5.11.4.

प्र देवं देववीतये भरता वसुवित्तमम् । आ स्वे योनौ नि षीदतु ॥ ४१ ॥

प्र देवम्[1]। प्रभरताहवनीये[2]। देवम्[3]। देवानां भक्षणाय[4]। अत्यन्त धनस्य लम्भयितारम्[5]। आनिषीदतु सः[6]। स्वे[7]। स्थाने[8] आहवनीये।

आ जातं जातवेदसि प्रियं शिशीतातिथिम् । स्योन आ गृहपतिम् ॥ ४२ ॥

आजातम्[10]। श्यतिरत्र हरणे दृष्ट. "जात इतरो जातवेदाः" इत्यादिब्राह्मणम्[11]।[12]

अग्ने युक्ष्वा हि ये तवाश्वासो देव साधवः । अरं वहन्ति मन्यवे ॥ ४३ ॥

अग्ने। अग्ने[13]! रथे युक्ष्व[14] तान्। ये। तव[15]। अश्वा[16]। देव[17]! साधयितारः[18]। पर्याप्तम्[19]।

---

१. अग्निमन्थने जातस्याग्नेराहवनीये प्रहरणसमये 'प्र देवं देववीतये' इति द्वचोऽनुवक्तव्यः। सूत्रितञ्च 'प्र देवं देववीतय इति द्वे, अग्निनाग्निः समिध्यते' (ĀŚS.2.16.) इति Sy.

२. हे अध्वर्यवः ! Sy.

३. प्रहरत। आहवनीयेऽग्नौ प्रक्षिपत Sy. सांहितिकं दीर्घत्वम् BB.

४. ०नीयमेवं P. द्योतमानम् Sy. देवमग्निम् U.

५. देवानां भक्षणार्थम्। तथा च ब्राह्मणम् 'प्र देवं देववीतये भरता वसुवित्तममिति प्रह्रियमाणायाभिरूपा यज्ञस्याभिरूपं तत् समृद्धम्' (AB. 1.16.) इति Sy. देवानां यागाय देवा वियन्ति भुञ्जन्तेऽस्मिन्निति BB.

६. वसूनां धनानां वेदयितारं लम्भयितारमग्निम् Sy. धनानां लब्धृतमम् BB.

७. अभिनिषण्णो भवतु Sy. आगत्यास्ताम् BB.

८. चाग्निः Sy. अयम् BB. ९. कारणे स्थान आहवनीये। ब्राह्मणं च भवति—'एष ह वा अस्य स्वो योनिर्यदग्निरग्नेः' (AB.1.16.) इति Sy. योनावाहवनीयस्थान आहवनीये BB. This stanza=TS.3.5.11.4.

१०. ०आहर० P. ११. AB.1.16.

१२. VM. does not explain the stanza. हे अध्वर्यवः ! जातं प्रादुर्भूतमतिथिम्। लुप्तोपममेतत्। अतिथिमिव प्रियम्। अत एव गृहपतिं गृहाणां स्वामिनमग्निं जातवेदसि जातप्रज्ञे स्योने सुखकर आहवनीयेऽग्नावा शिशीत। अन्तर्णीतण्यर्थस्य शीङ एतद्रूपम्। शाययत। स्थापयत। यद्वा 'श्यैङ् गतौ' इत्यस्य छान्दसं रूपम्। गमयत। प्रापयतेत्यर्थः। 'शो तनूकरणे' इत्यस्य वा रूपम्। श्यत तीक्ष्णीकुरुत। संस्कुरत। प्रहरतेति यावत्। द्वितीय आकारः पूरकः। 'जात इतरो जातवेदा इतरः' (AB.1.16.) इत्यादिकं ब्राह्मणमत्रानुसन्धेयम् Sy. जातिममर्माग्नि जातवेदसि, आहवनीयेऽग्नौ। आशिशीत, आनीय तीक्ष्णं कुरुत। अध्यर्थे वाऽऽकारः। आहवनीयस्योपरि तीक्ष्णं कुरुतेति। ज्वालावत्तीक्ष्णत्वं महत्त्वं वा प्रियमतिथिमिव, यथा प्रियमतिथिमागतं पूजया तर्पयन्त्येवममुं गृहपतिं ग्रहाणां पातारमग्निं स्योने स्थाने वा आशिशीत। आकारस्समुच्चये। शेतेर्लोटि शपश्लुः BB. This stanza=TS.3.5.11.4.

१३. युङ्क्ष्व P. युंक्ष्व D. आत्मीये रथे योजय Sy., Mah. १४. तन् D. अश्वान् Sy., Mah.

१५. त्वदीयाः Sy. तव स्वभूताः U.

१६. अश्वा P. हयाः Mah. अश्वा एवाश्वासः U.

१७. हे द्योतमान ! Sy. हे देव ! दीप्यमान ! Mah. हे देव ! दानादिगुणयुक्त ! U.

१८. साधकाः सुशीला वा Sy. साधवो दान्ताः Mah. जातिगुणसमन्विताः प्रशस्ताः U.

१९. अलं पर्याप्तम् Sy. अलमत्यर्थम् Mah.

अपहन्ति[1]। स्तुत्यर्थम्[2]।

अच्छा नो याह्या वहाभि प्रयांसि वीतये। आ देवान्त्सोमपीतये ॥ ४४ ॥

अच्छ[4]। अभिगच्छ[5]। अस्मान्। अभ्यावह[6] च। अन्नानि[7]। भक्षणाय[8]। आवह च। देवान्। सोमपानाय[9]।

उदग्ने भारत द्युमदजस्रेण दविद्युतत्। शोचा वि भाह्यजर ॥ ४५ ॥

उदग्ने। उच्छोच[10]। अग्ने! 'शश्वद्ध वा एष प्राणो भूत्वा प्रजा बिभर्त्ति तस्मादाह भारत[11].' इति वाजसनेयकम्। दीप्तियुक्तम्[12]। अजस्रेण[13] शोचिषा। अत्यन्त दीप्यमान[14]। विभाहि[15] च। जरारहित[16]!

वीती यो देवं मर्तो दुवस्येदग्निमीळीताध्वरे हविष्मान्।
होतारं सत्ययजं रोदस्योरुत्तानहस्तो नमसा विवासेत् ॥ ४६ ॥

वीती[17]। हविषा[18]। य.। देवम्[19]। मर्त[20]। परिचरति[21]। स हविष्मान्[22]। अग्निम्। स्तोतुमर्हति[23]।

---

१. **आवहन्ति** is suggested for **अपहन्ति ॥ वहन्ति** Sy. **प्रापयन्ति देवानिति शेषः** Mah.

२. **मन्यते यष्टव्यत्वेन देवानत्रेति मन्युर्यागः। तवर्थं तानश्वान् रथे युक्ष्वेत्यर्थः** Sy. **यज्ञाय** Mah. **दीप्तये क्रोधाय वा** U.

३. VM. ignores **हि ॥ खलु** Sy. **हिः पादपूरणः** Mah. **हिशब्दः पादपूरणः** U. **अग्ने युक्ष्वा हि ये तव। युक्ष्वा हि देवहूतमानिति युक्तवतीभ्यामिदमेवैतद्द्यावापृथिवी रेतो युनक्ति तस्माद्द्यावापृथिवी रेतो युक्तं न निष्पद्यते** ŚB. 7.5.1.33.p.613.
This stanza=YV.13.36.=TS.5.5.3.1.

४. **हे अग्ने!** Sy.

५. **आभिमुख्येनागच्छ** Sy.

६. **अभिलक्ष्य देवानावह** Sy.

७. **हविर्लक्षणान्यन्नानि** Sy.

८. **तेषां हविषां स्वादनार्थम्** Sy.

९. **सोमपानार्थं च** Sy.

१०. **उद्गततरं दीप्यस्व। तदेव विवृणोति** Sy.

११. **हे भारत! हविषां भर्तः!** Sy.

१२. **द्युमता दीप्तिमता। 'सुपां सुलुक्०' इति तृतीयाया लुक्** Sy.

१३. **अविच्छेदेन तेजसा** Sy.

१४. **भृशं द्योतमानस्त्वम्** Sy.

१५. **विशेषेण प्रकाशस्व। यद्वा भातिरत्रान्तर्णीतण्यर्थः। त्वं प्रथममुद्दीप्यस्व। पश्चादात्मीयेन तेजसा सर्वं जगत् प्रकाशयेति योजनीयम्** Sy.

१६. **रहि०** P. **०तः** D.

१७. **वीतिः** P., D.

१८. **वीत्या कान्तेन हविर्लक्षणेनान्नेन** Sy.

१९. **यङ्कचन देवम्** Sy.

२०. **मनुष्यः** Sy.

२१. **परिचरेत्** Sy.

२२. **हविर्भिर्युक्तो यजमानः** Sy.

२३. **स्तुवीत। सर्वेषु यागेष्वग्निः पूज्यत इत्यर्थः** Sy.

यज्ञे । हविर्वहनाय होतारम्[1] । सत्येन यष्टारम्[2] । द्यावापृथिव्यो.[3] । उत्तानहस्तः[4] यजमान. प्रदानार्थमुत्क्षिप्तहस्त. । अन्नेन[5] । परिचरेदिति ।

आ ते अग्न ऋचा हविर्हृदा तष्टं भरामसि ।
ते ते भवन्तूक्षणं ऋषभासो वशा उत ॥ ४७ ॥

[आ ते ।][6] आभरामः[7] । स्तुत्यम् । अग्ने[8] । ऋचैव[9] । हवि सेयमृक् भवतु हवि[10] सममिति[11] । तच्चेद हविर्हृदयेन । संस्कृतम्[12], हृदयेन हि स्तोत्र क्रियते । ते[13] । ते[14] । भवन्तु । उक्षादयो मदीया स्तुति., उक्षादिसाम[15] भवन्तु इति समुदायार्थः । इत्थमियमाश्वलायनगृह्ये व्याख्यातेति । तत्रोक्षादिभि सामानाधिकरण्यात् तच्छब्दस्य लिङ्गवचनभेदः[16] ।

अग्निं देवासो अग्रियमिन्धते वृत्रहन्तमम् ।
येना वसून्याभृता तूळ्हा रक्षांसि वाजिना ॥ ४८ ॥

अग्निम्[17] । अग्निम् । देवा । मुख्यम् । इन्धते[18] । वृत्रस्य[19] हन्तारम् । येन[20] । धनानि[21] । आहृतानि[22] स्तोतृभ्य. । येन च तूळ्हानि[23] । रक्षांसि[24] । बलिनेति[25] ।

एकोनत्रिंशमध्यायं व्याचकारेति माधवः ।
नदीमाश्रित्य निवसन् कावेरी लोकमाश्रिताम् ।

---

१. आह्वातारम् Sy.
२. सत्येनावितथेन हविषा यष्टारम् Sy.
३. द्यावापृथिव्योर्लोकद्वये वर्तमानानाम् Sy.
४. किञ्चायं यजमानः उत्तानहस्तः कृताञ्जलिपुटः सन् Sy. ५. नमस्कारेण हविषा वा Sy.
६. The *pratika* is supplied by the Editor.
७. अनयाध्ययनं प्रशस्यत इत्याश्वलायनो मन्यते (AGS.1.1.5.) Sy.
८. आहरामः Sy.
९. P. reads अग्न चव for अग्ने ऋचैव ॥ ऋग्रूपेण वर्तमानम् Sy.
१०. ऋचमेव हविः कृत्वा Sy.
११. समन्ति P. १२. संस्तुम् P.
१३. त इति तच्छब्देन प्रकृतमृग्रूपं हविः परामृश्यते। प्रतिनिर्दिश्यमानापेक्षया पुंस्त्वबहुत्वे । ऋग्रूपं तद्वविः Sy. १४. तुभ्यम् Sy.
१५. ०वन्त्राक्षा० D. आदि refers to ऋषभासः and वशाः ॥ उक्षाणः सेचनसमर्थाः, ऋषभाः वशाश्च भवन्तु । ऋषभवशारूपेण परिणतं सत् त्वद्भक्षणाय भवत्विति शेषः Sy.
१६. दयो समां D. उक्षादिसमाः is suggested for उक्षादिसाम ।
१७. VM. ignores उत ॥ अपि च Sy.
१८. इन्धते P. इद्धते D. दीपयन्ति Sy.
१९. अतिशयेन वृत्रस्य हन्तारम् Sy.
२०. अग्निना Sy. २१. असुरैरपहृतानि धनानि हविर्लक्षणान्यन्नानि वा Sy.
२२. असुरसकाशाद्यजमानाद्वाहृतानि Sy.
२३. तृणानि P. तृष्णानि D. तृढानि हिंसितानि तमग्निमिन्धत इत्यन्वयः Sy.
२४. यज्ञविरोधीनि Sy. २५. बलवताग्निना Sy.

[अथ षष्ठोऽध्यायः ॥]

अथ[1] 'पिबा सोममभि[2]' व्याचिख्यासति माधवः ।
पादे समाने वक्तव्यं पूरणेषु प्रदर्शयन् ॥१॥

तस्मिन् पादे यदा पश्येत् तमेवाविकृतं[3] पुनः ।
तं पादपूरणं ब्रूयादिति वृद्धेभ्य आगमः ॥२॥

किमुदाहरणं तत्र न[4] 'याति देवः प्रवता[5]' ।
नापि 'ये चाकनन्त[6]' इति भिन्ने वाक्ये यतस्तयोः[7] ॥३॥

'आ याहि पूर्वीरति[8]' इति पादो[9] नात्र निदर्शनम् ।
दृश्यते[10] पूरणो ह्येष आकारः केवलोऽपि सन् ॥४॥

'त्वमग्ने[11] व्रतपा[12] असि[13]' मन्त्रस्तत्र निदर्शनम् ।
तत्र प्रथम आकारो निरर्थक इति स्थितिः ॥५॥

ननु देवस्त्वमागत्य मर्त्येष्वपि[14] च[15] वर्तसे[16] ।
इति सार्थोऽत्र आकार इदं तस्मिन्निदर्शनम् ॥६॥

'अयं ते[17] अस्तु हर्यतः[18]' 'को वो[19] वर्षिष्ठ[20] आ नरः[21]' ।
निपातव्यतिरेकेण[22] तस्माद्[23] द्वौ च निदर्शनम् ॥७॥

---

१. ०था P.
२. ०मपि D. RV.6.17. 1ª
३. ०श्येन्नमेपापिकृ० P. ०श्येन्नमेवा० D.
४. नः P. ५. प्रपता P. RV.I.35.3.
६. यें पाकन० D. येञ्चाकन० P. RV.V. 31.13.
७. याति देव उद्वतेति भिन्ने वाक्ये यतस्ततः R.
८. ०रिती० RV.III.43.2.
९. पादे नात्र निधानम् P.
१०. दृश्यन्ते P., D.
११. P., D. add स before त्वम् ।
१२. प्रतपा P. प्रतापा D.
१३. P., D. add इति after असि । RV. VIII. 11. 1.
१४. देवस्त्वानत्य D.
१५. अपि is omitted by D.
१६. P. reads ननु देवानेष्विति पूरणं देवस्त्वा ननत्यं मर्त्येषु च वर्तसे for the third and fourth *pādas*.
१७. हर्यन्त P. ०त D. RV.III.44.1.
१८. वर्षी D. १९. ०रा D. RV.I.37.6.
२०. ०तोव्य० P., D. २१. ०स्माद्वाच्च P., D.

स यन्ता विप्र एषां[1] स यज्ञानामथा हि षः[2] ।
पादे द्वितीये तच्छब्द एकस्तर्ह्यस्तु पूरणः ॥८॥

'अस्मा एतन्मह्यांङ्गूषम्[3]' एकोऽस्मा[4] इति पूरणः[5] ।
सर्वनामानि पादेषु समानेष्विति पूरणम् ॥९॥

नास्ति निर्वचनं येषां रूपभेदे ऽपि तान्[6] विदुः ।
पूरणानेव कवय 'एमेनं सृजता सुते[7]' ॥१०॥

'स यंजात्[8] सेदु होता[9]' इति समानार्थाविदू[10] श्रुतौ ।
तत्रैकं पूरणं विद्याद् बहवः सन्ति तादृशाः ॥११॥

अद्धेत्थेति[11] द्वौ पठितौ सत्यनामसु वैदिकैः[12] ।
न तावत्यन्तपर्यायौ सत्येनेति[13] विपश्चितः ॥१२॥

'सत्यमद्धा नकिरन्यः[14]' 'सत्यमित्था[15] वृषेदसि[16]' ।
सत्यं तथा सत्यमित्थमित्यर्थस्तत्र[17] दर्शितः ॥१३॥

'पुत्रिणा ता कुमारिणा[18]' कुमारा अर्भका इति ।
न पौनरुक्त्यमत्रास्ति तेनैको नात्र पूरणः ॥१४॥

उदाहरणविद्विप्रः परिषत्सु न सीदति[20] ।
प्रदर्शितास्ततो ऽस्माभिरित्थं नानाविधा ऋचः[21] । इति[22] ॥१५॥

---

१. स यन्ता विप्र एषां स यन्ता विप्र एषां P. स यन्ता विप्र येषां स यन्ता विप्र एषां D.
२. RV. III.13.3. ३. ०णं P.
४. RV. VI.34.5. ५. ०ह्यावगूषं स्विन्यकास्मा P. ०ह्याव्रषस्मिस्मकास्मा D.
६. तद् P., D. ७. RV.I.9.2.
८. यजान् P., D. ९. RV.X.2.3.
१०. समार्थाविदुः P. समर्थाविदू D.
११. अत्थेत्थेति P., अद्धेत्थेति D. Ngh. 3.10.
१२. वैकः P., D. १३. ०त्यान्त P.
१४. सत्येतेनिहेति P.
१५. Omitted by P., D. RV. I. 52. 13.
१६. RV. VIII.33.10.
१७. ०मित्य इत्यर्थ० P. ०मित्थ इत्यर्थ० D.
१८. निद० D. १९. RV. VIII.31.8.
२०. नि षीदति for न सीदति P.
२१. ०भि इ० P.
२२. Supplied by the Editor.

VI.17.

पिबा॒ सोम॑मभि॒ यमु॑ग्र॒ तर्दः॑ ऊ॒र्वं गव्यं॒ महि॑ गृणा॒न इ॑न्द्र ।
वि यो धृ॒ष्णो॒ वधि॑षो वज्रहस्त॒ विश्वा॑ वृ॒त्रम॑मि॒त्रिया॒ शवो॑भिः ॥ १ ॥

[1]पिबा सोमम् ॥ भरद्वाज ॥ पिव [2]। सोमम् । य सोमम् । अभि [3]य पीत्वा । उग्र [4]! तृण्णवानसि [5]। गव्यम् [6]। सङ्घम् [7]। स्तूयमान [8]। इन्द्र [9]! पणिभिरपहृता [10]। विविध च । अवधी [11]। यस्त्वम् । हे धृष्णो [12]! वज्रहस्त [13]! विश्वम् [14]। उपद्रवम् । अमित्रभवम् [15]। बलै [16][17]।

स ई॑ पाहि॒ य ऋ॑जी॒षी तर॑त्रो॒ यः शिप्र॑वान्वृष॒भो यो म॑ती॒नाम् ।
यो गोत्र॑भिद्व॒ज्रभृ॒तो ह॑रि॒ष्ठाः स इ॑न्द्र चि॒त्राँ अ॒भि तृ॑न्धि॒ वाजा॑न् ॥ २ ॥

[स ईम् ।][18] सः [19]। एन सोमम् । पिव । यः [20]। ऋजीषेण तद्वान् [21] हर्योरस्य स भागो भवति । तरिता

---

१. चतुर्थाष्टके षष्ठोऽध्याय आरभ्यते । षष्ठे मण्डले द्वितीयेऽनुवाके प्रथमं सूक्तं व्याख्यातम् । तत्र 'पिबा सोमम्' इति पञ्चदशर्चं द्वितीयं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभम् । अन्त्या द्विपदा त्रिष्टुप् । तथा चानुक्रान्तम् —'पिब पञ्चोनैन्द्रं त्रैष्टुभं द्विपदान्तम्' (KSA.30.17.p.22.) इति । अभिजिति मरुत्वतीयशस्त्र एतन्निविद्धानम् । सूत्रितञ्च—'पिबा सोमं तमु ष्टुहीति मध्यन्दिनः' (ĀSS.8.5.) इति । समूळ्हे दशरात्रेऽष्टमेऽहनि मरुत्वतीयशस्त्र एतत्सूक्तम् । सूत्रितञ्च—'पिबा सोममभि तमस्य द्यावापृथिवी' (ĀSS.8.7.)इति । सूर्यस्तुत्यान्येकाहे मरुत्वतीय एतत्सूक्तं निविद्धानम् । सूत्र्यते हि—'सूर्यस्तुता यशस्कामः पिबा सोममभि' (ĀSS.9.8.) इति । महाव्रतेऽपि मरुत्वतीय एतत्सूक्तम् । तथैव पञ्चमारण्यके सूत्रितम्—'पिबा सोममभि यमुग्र तर्दः कया शुभा सवयसः सनीळाः' (AĀ.5.1.1.) इति । माध्यन्दिने सवन आद्यास्तिस्रो होतृमैत्रावरुणब्राह्मणाच्छंसिनां प्रस्थितयाज्याः । सूत्रितञ्च 'पिबा सोममभि यमुग्र तर्द इति तिस्रोऽर्वाङेहि सोमकामं त्वाहुः' (ĀSS.5.5.) इति Sy.

२. ०बा P. तं सोमं पानं कुरु Sy.

३. यं सोममुद्दिश्य । पातुमित्यर्थः Sy.

४. उग्र P., D. हे उद्गूर्णबलेन्द्र ! Sy.

५. प्रकाशितवानसि । तृदिर्हिंसाकर्मात्र प्रकाशनार्थः Sy.

६. गोसम्बन्धि Sy.

७. पणिभिरपहृतं समूहम् Sy.

८. अङ्गिरोभिः स्तूयमानस्त्वम् Sy.

९. पणिभिरपहृतम् as an epithet of सङ्घम् is suggested for पणिभिरपहृताः ।

१०. विविञ्च P., D.

११. व्यवधीः, स त्वं सोमं पिबेति सम्बन्धः Sy.

१२. सृष्टो P. स्रष्टो D. हे शत्रूणां धर्षक ! Sy.

१३. वज्रपाणे ! Sy.

१४. उद्र० D. आवरकम् Sy.

१५. अमित्रं शत्रुम् । अमित्रशब्दाद् द्वितीयैकवचनस्येयादेशः Sy.

१६. बलैः सहितः सन् Sy.

१७. VM. ignores महि ॥ महि महत् Sy.

१८. The *pratika* is supplied by the Editor.

१९. त्वम् Sy. २०. यस्त्वम् Sy.

२१. ऋजीषशब्देन गतरसः सोमोऽभिधीयते । तद्वान् Sy.

शत्रूणाम्[1]। यः। महान्[2]। यश्च। स्तोतॄणाम्[3]। वर्षिता[4]। यः[5]। मेघाना[6] भेत्ता[7]। यश्च। हर्योरधिष्ठाता[8]। स त्वम्। इन्द्र[9]! नानारूपान्। पणिभिरपहृतान् अन्नसाधनान्[10] पशून्। अभितृन्धि[11][12]।

एवा पाहि प्रत्नथा मन्दतु त्वा शृधि ब्रह्म वावृधस्वोत गीर्भिः।
आविः सूर्यं कृणुहि पीपिहीषो जहि शत्रूँरभि गा इन्द्र तृन्धि ॥ ३ ॥

एवा पाहि[13]। एवम्। पिबाद्यतन सोमम्। प्रत्नमिव[14]। स सोमस्त्वाम्[15]। मन्दतु[16]। शृणु। स्तुतिम्[17]। अपि च। वर्धस्व। स्तुतिभि[18]। आविष्कुरु[19] च। सूर्यम्[20]। कृत्वा चाप्यायय[21]। अन्नानि[22] गोलक्षणानि। विनाशय[23] च। पणीन्[24]। तैरपहृता गाश्च। अभितृन्धि[25][26]।

ते त्वा मदा बृहदिन्द्र स्वधाव इमे पीता उक्थयन्त द्युमन्तम्।
महामनूनं तवसं विभूतिं मत्सरासो जर्हृषन्त प्रसाहम् ॥ ४ ॥

ते त्वा मदाः[27]। ते[28]। त्वा[29]। सोमा[30]। बृहन्तम्[31]। इन्द्र[32]! अब्रुवन्[33]! इमे[34]। पीता[35]। पूरयामासुः[36]।

---

१. शत्रूणां तारकोऽसि Sy.
२. हमन् P. महन् D. शोभनहनुरसि Sy.
३. मतीनां स्तोतॄणाम्। मन्यतेः स्तुतिकर्मणः कर्तरि क्तिच् Sy.
४. ०त P. कामानां वर्षिता स त्वम् Sy.
५. य P. त्वम् Sy.
६. गोत्राणां पर्वतानां मेघानां वा Sy.
७. भोक्ता P.
८. ०धिष्ठता P. स्थातासि Sy.
९. विचित्रान् Sy.
१०. अन्नानि Sy.
११. अस्मभ्यं प्रकाशय Sy.
१२. VM. ignores वज्रभृत् ॥ वज्रभृत् वज्रधरः Sy.
१३. एव एवमिममस्मदीयं सोमम् Sy.
१४. प्रयमिव P., D. प्रत्नान् पुराणान् सोमान् यथापिबस्तथा Sy.
१५. स च सोमस्त्वया पीतः सन् Sy.
१६. मदयतु Sy.
१७. अस्माभिः कृतं स्तोत्रम् Sy.
१८. स्तुतिरूपाभिर्वाग्भिः Sy.
१९. वयं सूर्यं यथा पश्येम तथा कुर्वित्यर्थः Sy.
२०. सर्वस्य प्रेरकं देवम् Sy.
२१. अस्मभ्यं प्यायय Sy.
२२. ऽनानि P.
२३. नाशय Sy.
२४. अस्मत्सपत्नान् Sy.
२५. पणिभिः Sy.
२६. प्रकाशय Sy.
२७. VM. ignores इन्द्र।
२८. ०दा P., D.
२९. इमे पीताः सोमाः Sy.
३०. त्वाम् Sy.
३१. मदकराः Sy.
३२. अत्यन्तम् Sy.
३३. अपि च हे इन्द्र! त्वाम् Sy.
३४. इयम P., D.
३५. ०ता P.
३६. ०सु P., D. सेचयन्तु Sy.

दीप्तिमन्तम् । महान्तम्[1] । अनूनम्[2] । बलवन्तम्[3] । विविधभूतिम्[4] । मदकराः[5] । अत्यन्तं हर्षयन्ति[6] । प्रकर्षेण शत्रूणामभिभवितारम् ।

येभिः सूर्यमुषसं मन्दसानोऽवासयोऽपं दृळ्हानि दर्द्रत् ।
महामद्रिं परि गा इन्द्र सन्तं नुत्था अच्युतं सदसः परि स्वात् ॥ ५ ॥

येभिः । यै सोमै । मोदमानः[7] । सूर्यम्[8] । उषस च । असूरैति नाशेन स्थाने ? निवासयति[11] । दृळ्हानि तमांस्यसुरोत्पादितानि । अवदारयन्[12] । महान्तम् । मेघ बलम्[13] । गा[14] । परित । सन्तम्[15] । इन्द्र ! स्वस्मात्[16] । स्थानात् । अच्युतम्[17] । प्रेरय[18] [19] ।

तव क्रत्वा तव तदूंसनाभिरामासु पक्वं शच्या नि दीधः ।
और्णोर्दुरं उस्रियाभ्यो वि दृळ्होदूर्वादूगा अंसृजो अङ्गिरस्वान् ॥ ६ ॥

तव क्रत्वा[20] । तव[21] । प्रज्ञानेन[22] । तव[23] । कर्मभिश्च । तत् कृतम् , किं तदित्याह[24] । आमासु[25] गोषु । पक्वं[26] पय. । बुद्ध्या[27] । निहितवानसि[28] । विघटितवानसि[29] । द्वाराणि शिलोच्चयस्य । गवार्थम्[30] [31] । दृढानि । तत उदसृज[32] । ऊर्वात्[33] महत शिलोच्चयात्[34] । पशून्[35] । अङ्गिरोभिर्युक्त ।

---

१. महान्तं प्रभूतम् Sy.
२. सर्वैर्गुणैर्न्यूनतारहितम् । सम्पूर्णगुणमित्यर्थः Sy.
३. प्रवृद्धम् Sy.
४. ०तिः P. विभवन्तम् Sy.
५. मदकराः सोमाः Sy.
६. भृशं हर्षयन्तु Sy.
७. मोदमानस्त्वम् Sy.
८. सर्वस्य प्रेरकं देवम् Sy.
९. उसं P. उषोदेवताम् Sy.
१०. अस्तरैति नाशौ P. The reading is doubtful.
११. स्वस्थाने न्यवासयः । अथवा सूर्योषसौ यथा तमांसि विवासयतस्तथाकार्षीः Sy.
१२. अपदारयन् Sy.
१३. पर्वतम् Sy.
१४. पणिभिरपहृताः Sy.
१५. ०तस्पन्तम् P. विद्यमानम् Sy.
१६. स्वकीयात् Sy.
१७. अविचालितं विनाशरहितम् । स्थिरमित्यर्थः Sy. १८. अनुदः Sy.
१९. VM. explains परि once only.
२०. हे इन्द्र ! Sy.
२१. त्वदीयया Sy.
२२. प्रज्ञया Sy. २३. त्वदीयैः Sy.
२४. प्रसिद्धं पयः Sy.
२५. अपक्वासु Sy.
२६. परिणतम् Sy.
२७. P., D. read बुयो बुध्या for बुद्ध्या ॥ सामर्थ्येन Sy.
२८. नितरां धारयसि Sy.
२९. उद्घाटितवानसि Sy.
३०. अपि च हे इन्द्र ! त्वं गोभ्यः । गा निर्गमयितुमित्यर्थः Sy.
३१. बलेन पाषाणादिभिर्वृढीकृतानीत्यर्थः Sy.
३२. उदगमयः Sy.
३३. उ० D. समूहात् । गोष्ठादित्यर्थः Sy.
३४. ०यान् D.
३५. गाः Sy.

पप्राथु त्वां महि दंसो व्युर्वीमुप द्यामृष्वो बृहदिन्द्र स्तभायः ।
अधारयो रोदसी देवपुत्रे प्रत्ने मातरा यह्वी ऋतस्य ॥ ७ ॥

पप्राथ । विपप्रथे । पृथिवीम् । विस्तीर्णाम् । महता । कर्मणा । इन्द्रः । उपास्तभ्नात् च । द्याम् महतीम् । महानिन्द्रः । अथ प्रत्यक्ष—धारयसि । द्यावापृथिवी । ययोर्देवाः पुत्राः । महत्यौ । पुराणे । यज्ञस्य । मातरौ ।

अधं त्वा विश्वे पुर इंन्द्र देवा एकं तवसं दधिरे भराय ।
अदेवो यदभ्यौहिष्ट देवान्त्स्वर्षाता वृणत इन्द्रमत्रं ॥ ८ ॥

अध । अध । त्वाम् । विश्वे । देवाः समर्थम् । पुरः । दधिरे । एकम् । बलवन्तम् । वृत्र । देवान् । अभ्यौहिष्ट, पदेरिद छान्दस रूपम्, ऊहिर्वा वहिना सम., अभिजगाम । तदा सङ्ग्रामे । अस्मिन् देवा । इन्द्रम् । वृणते ।

---

१. विशेषेण पूरितवानसि । 'प्रा पूरणे' इति धातुः Sy.
२. भूमिम् Sy.
३. कर्मेणा D. दंससा कर्मणा Sy.
४. VM. takes इन्द्रः nom. for इन्द्र voc. हे इन्द्र ! त्वम् Sy.
५. उपस्तभ्नासि । निरालम्बं वितिष्ठन्ती द्यौर्यथा न पततीन्द्रस्तथा करोतीत्यर्थः Sy.
६. दिवम् Sy.
७. बृहतीम् Sy.
८. महांस्त्वम् Sy.
९. पोषणंधारयसि Sy.
१०. अपि च त्वं द्यावापृथिव्यौ Sy.
११. यह्व्यौ महत्यौ । यद्वा विश्वस्य मातरावृतस्य ब्रह्मणो यह्व्यौ पुत्र्यौ Sy. यहुरित्यपत्यनाम Ngh.2.2. यह्व इति महन्नाम Ngh.3.3.
१२. उक्थस्य यज्ञस्य वा Sy.
१३. यातारौ P., D. निर्मात्र्यौ Sy.
१४. अधुनास्मिन्काले Sy.
१५. सर्वे Sy.
१६. वह्व्यावयः Sy.
१७. ०मार्त्यं D. १८. पुरस्तात् Sy.
१९. चक्रिरे Sy.
२०. मुख्यम् Sy.
२१. बलवान् P., D. प्रवृद्धं बलवन्तम् Sy.
२२. पुत्रः P. असुरः Sy.
२३. अद्योविष्ट P. सङ्ग्रामार्थमभिगतवान् । 'ओहतिर्गतिकर्मा' Sy.
२४. ०रिष्टं D. वहेरिदम् is suggested for पदेरिदम् ।
२५. किञ्चास्मिन् काले स्वर्षातौ सङ्ग्रामे Sy.
२६. अस्मिन् काले Sy.
२७. इदं P., D.
२८. सम्भजन्ते स्म मरुत इति शेषः । मरुतो हीन्द्रं देवेषु पलायितेषु समभजन्निति यर्थः । अधुना पुरो दधिर इति सम्बन्धः Sy.
२९. VM. ignores इन्द्र । भराय and यत् ॥ हे इन्द्र ! भराय सङ्ग्रामाय । यद् यदा Sy.

अध द्यौश्चित्ते अप सा नु वज्रादद्रितानंमद्भियसा स्वस्य मन्योः ।
अहिं यदिन्द्रो अभ्योहसानं नि चिद्विश्वायुः शयथे जघान ॥ ९ ॥

[अध ।] अध[२] वृत्रे हते । द्यौ[३] । इव[४] । सा[५] । क्षिप्रम्[६] । द्विधा[७] । अपानमत्[८] । तव[९] । वज्रात् । बिभ्यती[११] । त्वदीयस्य[१२] । क्रोधस्य[१३] । अहिम्[१४] । यदा । इन्द्र । आभिमुख्येन निजघान[१५] । गच्छन्तम्[१६] । सर्वगामी[१७] । पृथिव्या शाययितुम्[१८] [१९] ।

अध त्वष्टा ते महु उग्र वज्रं सहस्रभृष्टिं वृतच्छुताश्रिम् ।
निकाममरमणसं येन नवन्तुमहिं सं पिंणगृजीषिन् ॥ १० ॥

अध त्वष्टा[२०] । अध[२१] । त्वष्टा[२२] । ते[२३] महत । उद्गूर्ण[२४] ! वज्रम् । सहस्रधारम् । शताश्रिम्[२५] । वर्तयामास[२६] प्रदात्[२७] । अथ निर्वर्तितकामम्[२८] । पर्याप्तमनसम्[२९] । येन वज्रेण । अभिगच्छन्तम्[३०] । अहिम् । पिष्टवानसि[३१] । ऋजीषिन्[३२] [३३] !

---

१. The *pratika* is supplied by the Editor.
२. अधुनास्मिन् काले Sy.
३. द्युलोकः Sy.
४. अपि, (द्वितीयः) चिदिति पूरणः Sy.
५. प्रसिद्धा देवानामाश्रयत्वेन Sy.
६. नु इति पूरणः Sy.
७. द्विप्रकारात् Sy.
८. अवनमदत P. अपनमेदेत D. अपननाम Sy.
९. त्वदीयात् Sy.
१०. ०ऋान् D.
११. भयेन Sy.
१२. आत्मीयात् Sy.
१३. क्रोधाच्च Sy.
१४. वृत्रम् Sy.
१५. D. adds न after निजघान ॥ न्यवधीत् Sy. १६. अभिगच्छन्तम् Sy.
१७. बह्वृचः Sy.
१८. शयननिमित्ते । मरणायेत्यर्थः । यदा वृत्रं जघानास्मिन् काले द्यौर्ननामेति सम्बन्धः Sy.
१९. VM. explains चित् once only.
२०. त्वाष्टा D.
२१. अधुना Sy.
२२. देवशिल्पी Sy.
२३. तव Sy.
२४. हे उद्गूर्णबलेन्द्र ! Sy.
२५. शतपर्वाणम् Sy.
२६. प्रावात् is suggested for प्रदात् ॥ न्यवर्तयत् । निष्पन्नं कृतवान् Sy.
२७. नियतः कामो यस्य तम् Sy.
२८. शत्रूणामरमभिगन्तृ मनो यस्य तम् Sy.
२९. शब्दायमानम् Sy.
३०. वृत्रमसुरम् Sy.
३१. सम्पिष्टवानसि । तं वज्रं कृतवानित्यर्थः Sy.
३२. अभिगच्छपिष्टाचाग्नस्यृजनषीन् P. ऋजग्नषीत् D. हे गतरससोमवन् ! इन्द्र ! त्वम् Sy.
३३. VM. ignores सम् ।

वर्धान्यं विश्वे मरुतः सजोषाः पचंच्छतं महिषाँ इंन्द्र तुभ्यम् ।
पूषा विष्णुस्त्रीणि सरांसि धावन्वृत्रहणं मदिरमंशुमंस्मै ॥ ११ ॥

वर्धान्[1] । अवर्धयन्[2] । यम्[3] । विश्वे[4] । मरुत[5]. । सङ्गता । तस्मै तुभ्यं वृत्रवधाय । शतम्[6] । महिषान्[7] । अपचत्[8] । पूषा । विष्णुश्च[9] । तथा त्रीणि । सरासि[10] । अधावयन्[11], तदेवाह—वृत्रहणम्[12] । मदकरम् । अंशुम्[13] । इन्द्राय[14] ।

आ क्षोदो महिं वृतं नदीनां परिष्ठितमसृज ऊर्मिमपाम् ।
तासामनु प्रवतं इन्द्र पन्थां प्रार्दयो नीचीरपसः समुद्रम् ॥ १२ ॥

आ क्षोदः[15] । आसृज[16] । उदकम्[17] । महत् । वृत्रेण[18] । वृत्रादीनाम्[19] । तदेवाह परित स्थितम्[20] । अपाम्[21] । ऊर्मिमादृश सृज इति । तासामपाम्[22] । प्रवणाभिमुखस्य[23] वेगस्य[24] । समुद्रम्[25] । अपगन्तुम्[26] । नीचीनम्[27] । मार्गं[28] च । प्रार्दयः[29] ।

---

१. Omitted by P.
२. वर्धयन् P., D. स्तोत्रैर्वर्धयन्ति Sy.
३. त्वाम् Sy.
४. सर्वे Sy. ५. देवाः Sy.
६. सह प्रीयमाणाः Sy.
७. शतसङ्ख्याकान् Sy.
८. पुंपशून् Sy.
९. पचेत् Sy.
१०. एतन्नामको देवः Sy.
११. अपि चास्मै तुभ्यम् । द्रोणकलशपूतभृदाधवनीयाख्यानि पात्राणि Sy.
१२. अधवयन् P. अधर्षयन् D. अगच्छन् । सोमः पात्राणि पूर्यन्त इत्यर्थः Sy.
१३. वृत्राणां शत्रूणां हन्तारम् । अत्र वृत्रहञ्शब्देन सोमोऽभिधीयते । पीते हि सति वृत्राणि हन्तुमिन्द्रः समर्थो भवतीति यावत् Sy.
१४. सोमम् Sy.
१५. VM. ignores इन्द्र !
१६. आ समन्तात् सृष्टवानसि येन नद्यः पूर्णाः प्रवहेयुस्तदित्यर्थः Sy.
१७. क्षोद इत्युदकनाम Ngh. 1.12.
१८. वृत्रेण परिवृतम् Sy.
१९. ०त्रदी० D. वृत्रेण वृतम् । नदीनाम् । is suggested for वृत्रेण वृत्रादीनाम् ॥ सिन्धूनां सम्बन्धि Sy.
२०. आच्छादितम् Sy.
२१. उदकानाम् Sy.
२२. वृशः seems to be unnecessary. Therefore the reading should be ऊर्मिमासृज इति ॥ समूहं सृष्टवानसि । पुनर्वचनमादरार्थम् Sy.
२३. हे इन्द्र ! तासां नदीनां सम्बन्धिनः Sy.
२४. ०भिमुख्यस्य P. ०भिख्यस्य D. प्रवणानन्वकार्षीरिति शेषः । अन्वित्युपसर्गयोग्यक्रियाध्याहारः Sy. २५. उदधिम् Sy.
२६. ०न्तु P. अप उदकानि । अपस इत्यप एवार्थे वर्तते Sy.
२७. प्रवणाभिमुखीः वेगयुक्ता इत्यर्थः Sy.
२८. पथो मार्गान् Sy.
२९. प्रादुमयः P. प्रादूर्मयः D. प्रागमयः । अत्रार्दयतिर्नयनकर्मा Sy.
३०. VM. ignores अनु and इन्द्र ॥ हे इन्द्र ! त्वम् । अन्वकार्षीरिति शेषः । अन्वित्युपसर्गयोग्यक्रियाध्याहारः Sy.

एवा ता विश्वा चकृवांसमिन्द्रं महामुग्रमजुर्यं सहोदाम् ।
सुवीरं त्वा स्वायुधं सुवज्रमा ब्रह्म नव्यमवसे ववृत्यात् ॥ १३ ॥

एवा ता । एवम् । तानि । विश्वानि कर्माणि । कृतवन्तम् । इन्द्रम् । महान्तम् । उग्रम् । अहिंस्यम् । बलस्य दातारम् । सुवीरम् । त्वाम् । शोभनायुधम् । शोभनवज्रम् । आवर्तयतु । नवतरम् । स्तोत्रम् । रक्षणाय ।

स नो वाजाय श्रवस इषे च राये धेहि द्युमतं इन्द्र विप्रान् ।
भरद्वाजे नृवतं इन्द्र सूरीन्दिवि च स्मैधि पायै न इन्द्र ॥ १४ ॥

स नः । मः । अस्मान् । बलाय । कीर्तये । अन्नाय । धनाय । च । कुरु । दीप्तिमतः । मेधाविनः । तथा भरद्वाजे मयि । मनुष्ययुक्तान् । स्तोतॄन् कुरु । दिवि । च । खलु । पारयितव्ये त्वम् । अस्माकम् । इन्द्र ! पारयितेति ।

अया वाजं देवहितं सनेम मदेम शतहिमाः सुवीराः ॥ १५ ॥

अया । अनया स्तुत्या । अन्नम् । लभेमहि । यच्च देवैर्निहितमस्ति । मदेम । शतहिमा सुवीराः ।

---

१. P., D. repeat एवा ता ।
२. हे इन्द्र ! Sy.
३. एव P., D. उक्तप्रकारेण Sy.
४. प्रसिद्धानि Sy.
५. सर्वाणि कर्माणि Sy.
६. ईश्वरम् Sy. ७. ओजस्विनम् Sy.
८. अजरम् Sy.
९. सहसो बलस्य दातारम् Sy.
१०. स्थिरं P. स्त्वीरं D. शोभना वीरा मरुतो यस्य तम् Sy.
११. शोभनवज्रोपेतम् Sy.
१२. नूतनमन्यैरकृतपूर्वम् Sy.
१३. अस्माभिः कृतं स्तोत्रम् Sy.
१४. अस्माकं रक्षणाय Sy.
१५. त्वम् Sy. १६. कीर्ये D. यशसे Sy.
१७. धारय Sy. १८. ०प्तम० P., D.
१९. ०क्तां P. मनुष्यवतः । परिचारकयुक्तानित्यर्थः Sy.
२०. तव स्तोतॄन् पुत्रपौत्रान् कुर्विति शेषः Sy.
२१. Omitted by P.
२२. विवसे Sy.
२३. म P.
२४. चार० P., D. पारणीये आगामिनि Sy.
२५. अस्माकं रक्षिता खलु भवेत्यर्थः Sy.
२६. VM. explains इन्द्र once only and ignores एधि ।
२७. षष्ठेऽह्नि तृतीयसवने ब्राह्मणाच्छंसिशस्त्रेऽनुरूपतृचस्य 'अया वाजम्' इति तृतीया । सूत्रितञ्च 'अया वाजं देवहितं सनेमेति स्तोत्रियानुरूपौ' (ĀŚS.8.3.) इति Sy.
२८. वयं सम्भजेम Sy.
२९. P., D. read यच्च याच यच्च for यच्च ॥ देवेन द्योतमानेनेन्द्रेण दत्तम् Sy.
३०. हृष्याम Sy.
३१. ०तत्रिमाः D. शतसंवत्सरान् Sy.
३२. शोभनपुत्रोपेता वयम् Sy.

VI.18.

तमु ष्टुहि यो अभिभूत्योजा वन्वन्नवातः पुरुहूत इन्द्रः ।
अषाळ्हमुग्रं सहमानमाभिर्गीर्भिर्वर्ध वृषभं चर्षणीनाम् ॥ १ ॥

तमु ष्टुहि[1] । तम्[2] । एव[3] । स्तुहि । यः[4] । अभिभवितृबल[4] । भजमानः[5] शत्रून् । अनभिगत[6] शत्रुभिः । पुरुहूतः[7] । इन्द्रः । अषाळ्हमिति[8] स्पष्टम् ।

स युध्मः सत्वा खजकृत्समद्वा तुविम्रक्षो नंदनुमाँ ऋजीषी ।
बृहद्रेणुश्यवनो मानुषीणामेकः कृष्टीनामभवत्सहावा ॥ २ ॥

स युध्मः[10] । सः[11] । युद्धशीलः[12] । दाता[13] । सङ्ग्रामकृत्[14] । सङ्ग्रामवान्[15] । बहूनामामर्शक[16] । शब्दवान् । ऋजीषी[17] । बृहद्रेणुः[18] महाधूलि[19] । च्यावयिता[20] । अभवत्[21] । एकः[22] । बह्वीना मानुषीणाम्[23] । प्रजानाम्[24] । बलवान् ।

---

१. 'तमु ष्टुहि' इति पञ्चदशर्चं तृतीयं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैन्द्रम् । तथा चानुक्रम्यते—'तमु ष्टुहि' (KSA.30.18.p.22.) इति । अभिजिति निष्केवल्य एतन्निविद्धानम् । सूत्रितञ्च—'तमु ष्टुहीति मध्यन्दिनः' (ĀŚS. 8.5.) इति । इन्द्राग्न्योः कुलायनाम्न्येकाहेऽपि निष्केवल्य एतन्निविद्धानम् । सूत्रितञ्च—'तिष्ठा हरी तमु ष्टुहीति मध्यन्दिनः' (ĀŚS.9.7.) इति । महाव्रतेऽपि निष्केवल्ये । तथैव पञ्चमारण्यके सूत्रितम्—'तमु ष्टुहि यो अभिभूत्योजाः सुत इत्त्वं निमिश्ल इन्द्र सोम इति त्रीणि' (ĀĀ.5.2.2.) इति Sy.

२. हे भरद्वाज ! तमेवेन्द्रम् Sy.

३. इन्द्रोऽस्तौति शेषः Sy.

४. अभिभावुकतेजाः Sy.

५. शत्रून् हिंसन् Sy.

६. अभिगतः P. शत्रुभिर्हिंसितः । वनोतेर्निष्ठान्तस्य नञ्पूर्वस्य रूपम् । यद्वा वातेर्वातम् । अनभिगतः Sy.

७. बहुभिराहूतः Sy.

८. ०षाढमि P., D. By. अषाळ्हमिति स्पष्टम् VM. refers to the second hemistich of the stanza.

९. अपि चाभिर्वक्ष्यमाणाभिः गीर्भिः स्तुतिरूपाभिर्वाग्भिस्तमिन्द्रं वर्ध । वर्धय । कीदृशम् ? अषाळ्हमनभिभूतम्, उग्रमूदृगूर्णमोजस्विनं वा सहमानं शत्रूनभिभवन्तं चर्षणीनां प्रजानां सम्बन्धिनं वृषभं वर्षितारम् Sy.

१०. यध्म P. युध्म D.

११. इन्द्रः Sy.

१२. योद्धा Sy.

१३. सत्वा दाता । सनोतेरिदं रूपम् Sy.

१४. स्नग्रा० D. खजानां सङ्ग्रामाणां कर्ता Sy. खज इति सङ्ग्रामनाम Ngh. 2.17.

१५. यजमानैः सह मदः समत् तद्वान् Sy.

१६. तुविम्रक्षः, मृक्षतिः संस्नेहनकर्मा । तुवीनां बहूनां वर्षणेन संस्नेहनकर्ता Sy.

१७. ऋजीषशब्देन सवनद्वयाभिषुतः पुनस्तृतीयसवनेऽप्यभिषुतः सोम उच्यते । तद्वान् Sy.

१८. ०णुम् P. बृहतो महतो रेणोः पांसोरुत्थापकः । सङ्ग्रामेष्विति यावत् Sy.

१९. ०ली D.

२०. अभिगन्ता Sy.

२१. आसीत् Sy.

२२. मुख्यः Sy.

२३. मनोः सम्बन्धिनीनाम् Sy.

२४. व्रजानम P. प्रजानां यजमानानाम् Sy.

त्वं ह॒ नु त्यदं॑दमायो॒ दस्यु॑रेकः कृ॒ष्टीर॑वनो॒रार्या॑य ।
अस्ति॑ स्विन्नु वी॒र्य१॒॑ तत्त इन्द्र॒ न स्विद॑स्ति॒ तदु॑तो॒ वि वो॑चः ॥ ३ ॥

त्वं ह नु । त्वम् । खलु । एतत् । दस्यून् । अदमय । असहाय एव । अवधीः । प्रजाः । यजमानाय शत्रुभूता । वीर्यम् । इन्द्र ! इदानीम् । तव । अस्ति । स्वित् । आहोस्वित् । न । अस्ति । तत् । सम्प्रति । विस्पष्टं ब्रूहि ।

सदि॑द्धि ते॒ तुवि॑जातस्य॒ मन्ये॒ सहः॑ सहि॒ष्ठ तु॒रत॑स्तु॒रस्य॑ ।
उ॒ग्रमु॒ग्रस्य॑ त॒वस॒स्तवी॑योऽरं॒ध्रस्य॑ रध्र॒तुरो॑ बभूव ॥ ४ ॥

सदिद्धि । विद्यमानम् । एव । तव । बहुजनस्य । जानामि । बलम् । अतिशयेन बलवन् ! हिंसितः । हिंसकस्य । उद्गूर्णम् । उद्गूर्णस्य । वृद्धस्य । अतिशयेन वृद्ध तत् । भवति । असमृद्धस्य । यजमानस्यार्थम् समृद्ध तच्छत्रु यो हंसि ।

---

१. त्वा D.
२. हशब्दः पूरणार्थः Sy.
३. त्यत् स्य स त्वम् । त्यदिति तच्छब्दपर्यायः । अत्र लिङ्गव्यत्ययः Sy.
४. कर्महीनान् जनान् Sy.
५. दान्तानकरोः Sy.
६. अपि च मुख्यस्त्वम् Sy.
७. अवधाः Sy.
८. प्रजाः P. पुत्रदासादीन् Sy.
९. कर्मकृते जनाय Sy.
१०. एवं स्तुवन्नृषिरिन्द्रं यदा नाद्राक्षीत्तदा तस्य वीर्यसद्भावे विचिकित्समानः परार्धचमाह Sy.
११. तुवीरम् P., D. सामर्थ्यम् Sy.
१२. दानीं P., D. क्षिप्रम् Sy.
१३. भवति Sy.
१४. किंस्वित् । स्विन्निति विचिकित्सायाम् Sy.
१५. अहो० P., D. यद्वा (नास्ति) स्वित् Sy.
१६. बलम् Sy.
१७. काले काले Sy.
१८. विशेषेण ब्रूहि Sy.
१९. VM. explains नु and तत् once only.
२०. पूर्वमन्त्र इन्द्रस्य बलसदसद्भावं सन्दिह्यानया बलमस्त्येवेत्यवधारयन्नाह Sy.
२१. बहुयज्ञेषु प्रादुर्भूतस्य Sy.
२२. अहं मन्ये Sy.
२३. ०वान् P. हे बलवत्तमेन्द्र ! Sy.
२४. हिंसितुं P. अस्मान् हिंसतः Sy.
२५. शत्रूणां हिंसितुर्बलवतो वा Sy.
२६. ओजस्विनः Sy.
२७. प्रवृद्धस्य Sy.
२८. प्रवृद्धतरम् । यतस्त्वं वृत्रादीन् शत्रून् हंस्यतस्ते बलं विद्यत एवेत्यर्थः Sy.
२९. भवत्येव Sy.
३०. शत्रुभिर्वशीकर्तुमशक्यस्य । रधेर्वशीकरणार्थस्य रूपम् Sy.
३१. वशीकरणीयानां सपत्नानां हिंसकस्य Sy.
३२. VM. ignores हि ॥ यस्मादर्थे । यस्मात् कारणात् Sy.

तन्नः प्रत्नं सख्यमस्तु युष्मे इत्था वदद्भिर्वलमङ्गिरोभिः ।
हन्नच्युतच्युद्दस्मेषयन्तमृणोः पुरो वि दुरो अस्य विश्वाः ॥ ५ ॥

तन्नः प्रत्नम् । तत् । अस्माकम् । पुराणम् । सख्यम् । अस्तु । त्वयि स्तोत्रम् । सत्यम् । वदद्भिः । अङ्गिरोभिः । वलम् । हतवानसि । अच्युता च्यावयित ! दर्शनीय ! गच्छन्तम् । विगमितवानसि । तस्य । पुरः । द्वाराणि । सर्वाणि ।

स हि धीभिर्हव्यो अस्त्युग्र ईशानकृन्महति वृत्रतूर्ये ।
स तोकसाता तनये स वज्री वितन्तसाय्यो अभवत्समत्सु ॥ ६ ॥

स हि धीभिः । सः । हि । प्रज्ञाभिः । आह्वातव्यः । भवति । उद्गूर्णः । ईश्वरं कुर्वन् । महति । सङ्ग्रामे । सः । पुत्रभजने । पौत्रभजने च ह्वातव्यः । सः । वज्री । सङ्ग्रामेषु । वितन्तसाय्यः, भवति, अत्यन्तं तान्तैः सेवितव्यो भवति ।

---

१. प्रसिद्धम् Sy.
२. अस्मदीयम् Sy.
३. चिरकालानुवर्तीत्यर्थः Sy.
४. स्तुत्यस्तोतृलक्षणं सख्वित्वम् Sy.
५. P. adds त्वं after त्वयि ॥ हे इन्द्र ! युष्मासु । पूजार्थं बहुवचनम् Sy.
६. त्वां स्तुवद्भिः Sy.
७. सत्यमवदद्भिरंगिरोभिः P. अङ्गिरोभिः सह Sy. ८. एतन्नामानमसुरम् Sy.
९. अच्युतानाम् is suggested for अच्युताम् ।
१०. ०यितृ P. हे अच्युतानामविचलितानां च्यावक ! Sy. ११. हे दर्शनीयेन्द्र ! Sy.
१२. आयुधानि प्रेरयन्तम् Sy.
१३. व्यगमयः वियुक्तान्यकार्षीरित्यर्थः Sy.
१४. बलस्य. Sy.
१५. नगराणि Sy.
१६. पुरीणां द्वारश्च व्यृणोः Sy.
१७. सर्वाः Sy.
१८. इन्द्रः Sy.
१९. हिशब्दः पादपूरणः Sy.
२०. स्तोतृभिः स्तुतिभिर्वा Sy.
२१. जयार्थिभिराह्वातव्यः Sy.
२२. ओजस्वी Sy.
२३. ०रः P. स्तोतॄन् ईशानान् समर्थान् करोतीति ईशानकृत् Sy.
२४. प्रभूते Sy.
२५. वृत्रतूर्य इति सङ्ग्रामनाम Ngh. 2.17.
२६. सु P., D.
२७. तोकस्य पुत्रस्य सातौ लाभे निमित्ते Sy.
२८. व D. तत्पुत्रे निमित्ते सति आह्वातव्योऽस्ति Sy. २९. वज्रवान् Sy.
३०. विशेषेण विस्तार्यः । स्तोत्रैर्वन्दनीयोऽभवत् भवति । यद्वा वितन्तसाय्यः शत्रूणां हिंसकः । तन्तस इति धातुर्हिंसाकर्मा । तस्य कर्तरि रूपम् Sy.
३१. अत्यन्तं D.

स मज्मना जनिम मानुषाणाममर्त्येन नाम्नाति प्र सर्स्रे ।
स द्युम्नेन स शवसोत राया स वीर्येण नृतमः समोकाः ॥ ७ ॥

स मज्मना । सं । बलेन । मनुष्याणाम् । जन्मानि । अमरणधर्मणा । परेषां नमयित्रा । अति-प्रसरति । सं । तेजसा । सं । वेगेन । स धनेन । सं । वीर्येण । नेतृतमः । सञ्जत इति ।

स यो न मुहे न मिथू जनो भूत्सुमन्तुनामा चुमुरिं धुनिं च ।
वृणक्पिप्रुं शम्बरं शुष्णमिन्द्रः पुरां च्यौत्नाय शयथाय नू चित् ॥ ८ ॥

स यः । सः । य इन्द्र । मोहाय । न भवति । न च कदाचित् । मिथ्या । प्रादुर्भवति । सुमन्तुरिति नाम यस्य सः । इन्द्र । पिप्रुप्रभृतीन् । अहन् । पुराम् । च्यावयित्रे । क्षिप्रम् । शयथः शय कृत्स इत्याहुः ।

उदावता स्वच्छसा पन्यसा च वृत्रहत्याय रथमिन्द्र तिष्ठ ।
धिष्व वज्रं हस्त आ दक्षिणत्राभि प्र मन्द पुरुदत्र मायाः ॥ ९ ॥

उदावता । उद्गच्छता । शत्रूणा तनूकरणशीलेन । बलेन सह । वृत्र हन्तुम् । रथम् । इन्द्र !

---

१. इन्द्रः Sy.
२. मज्मनेति बलनाम Ngh. 2.9.
३. मनुष्या P. मनुष्यां D.
४. जानि P., D. जन्म । सङ्गमित्यर्थः Sy.
५. विनाशरहितेन Sy.
६. परेषाम् D. शत्रूणां नमयित्रा Sy.
७. अतिप्रपेदे Sy.
८. तेजता D. यशसा Sy.
९. सा D.
१०. बलेन Sy.
११. सामर्थ्येन च समोका भवति Sy.
१२. नेतृमः P.
१३. समानस्थानः भवति Sy.
१४. VM. ignores उत ॥ अपि च Sy.
१५. य D.
१६. इन्द्रः Sy.
१७. सङ्ग्रामे कदापि न मुह्यति Sy.
१८. यदुच मिथ्या वृथा Sy.
१९. प्रज्ञाननामा । प्रख्यातनामेत्यर्थः Sy.
२०. विप्रु० P., D. प्रभृति refers to चुमुरिम् । धुनिम् । शम्बरम् and शुष्णम् ॥ शम्बरम् एतन्नामकान् त्रीनसुरान् । तथा चुमुरिं धुनिं चैतन्नामकावसुरौ Sy.
२१. वृणक् । 'अवृणक् हिंसितवानसि । वृणक्ति-हिंसाकर्मा । हिंसितवानसि Sy.
२२. शत्रुसम्बन्धिनीनां पुरीणाम् Sy.
२३. च्यवनाय नाशनाय Sy.
२४. Sy. explains नू चित् together as शीघ्रमेव ।
२५. P., D. read शय क्षिप्रं शयथः for क्षिप्रम् । शयथः शयः ॥ शत्रूणां मारणाय च Sy.
२६. If VM. does not explain जनः and भूत् together as प्रादुर्भवति, then he ignores जनः and चित् ॥ जनः जनयिता । एव कर्म कुरुत इति शेषः Sy.
२७. ०त D. उद्गच्छता । अवतिरत्र गतिकर्मा Sy.
२८. शत्रूणां तनूकर्त्रा Sy.
२९. स्तुत्यतरेण बलेन युक्तस्त्वम् Sy.
३०. शत्रुहननाय Sy.
३१. रक्षम् P., D. स्वकीयं रथम् Sy.

प्रातिष्ठ[1]। आधेहि[2]। च। वज्रम्[3]। दक्षिणे। हस्ते[4]। अभिप्रगच्छ[5]। हे पुरुदान[6] ! शत्रूणां मायाः[7]

अग्निर्न शुष्कं वनमिन्द्र हेती रक्षो नि धक्ष्यशनिर्न भीमा।
गम्भीरया ऋष्वया यो रुरोजाध्वानयद्दुरिता दम्भयंश्च ॥ १० ॥

अग्निर्न[8]। अग्निः[9]। इव[10]। हन्ता[11]। शुष्कम्[12]। वनम्[13]। रक्षः[14]। निदह[15]। यथा[16]। अशनिः[17]। भीम[18]। दिवः[19] पतिता विनाशयति[20]। गम्भीरया[21]। महत्या[22]। यः[23]। शक्त्या[24]। शत्रून्[25]। रुरोज[26]। शब्दापयति। च। विनाशयतीति परोक्ष उत्तरार्धः[27]।

आ सहस्रं पथिभिरिन्द्र राया तुविद्युम्न तुविवाजेभिरर्वाक्।
याहि सूनो सहसो यस्य नू चिददेव ईशे पुरुहूत योतोः ॥ ११ ॥

आ सहस्रम्[28]। आयाहि[29]। सहस्रेण[30]। धनेन सह। मार्गैः[31]। बहुधन ! बहुबलैरश्वैः[32]। अभिमुखम्[33]। सहसः[34]। सूनो ! माहेन्द्रबलवत्तया। यस्य[35] यजमानस्य। क्षिप्रम्। असुरः[36]। ईश्वरो भवति। पृथक् कुरु[37] रणस्य

---

१. आरोह Sy.
२. आ is omitted by P. आधत्स्व Sy.
३. स्वकीयमायुधम् Sy.
४. पाणौ Sy. ५. अभिगम्य प्रकर्षेण जहि। अत्र मन्दतिर्वधकर्मा Sy.
६. पुर० P., D. हे बहुधनेन्द्र ! त्वम् Sy.
७. मायया P. मायय D. आसुरीमायाः Sy.
८. अग्निर्न्नः P. अग्निनः D.
९. नशब्द उपमार्थीयः। यथा Sy.
१०. त्वदीयं वज्रं तद्वच्छत्रून् नाशयति Sy.
११. नीरसम् Sy.
१२. व P. वं D. वृक्षसमूहं वहति Sy.
१३. राक्षसम् Sy.
१४. वज्रेण नितरां वह Sy.
१५. यथाशनिर्भीमा भवति तद्वद् भयङ्करस्त्वम् Sy.
१६. यदाशनि P., D.
१७. भिमा D. १८. oव D.
१९. P. and D. add गम्भीरया पतिता विनाशयति after विनाशयति।
२०. शत्रुभिरधर्षणीयया Sy.
२१. ऋष्व इति महन्नाम Ngh. 3.3.
२२. न्नः P., D. इन्द्रः Sy.
२३. Omitted by P., D.
२४. शत्रून् seems to be the explanation of दुरिता ॥ तथा च दुरिता दुरितानि दम्भयच्च भिनत्ति च। स त्वं रक्षो निधक्षीति पूर्वेणान्वयः Sy.
२५. शत्रुप्रोज P. शत्रुपुं राज D. बभञ्ज Sy.
२६. शब्दोप० D. युद्धे गर्जनलक्षणं शब्दं करोति Sy.
२७. VM. ignores इन्द्र।
२८. आगच्छ Sy.
२९. सहस्रेण। बहुभिरित्यर्थः Sy.
३०. सहस्रेण धनेन सहस्रेण धनेन D. धनेन युक्तस्त्वम् Sy.
३१. मार्गे P. पतन्ति गच्छन्त्यमीभिरिति पन्थानो वाहाः। तैः Sy.
३२. बलै० P. बहुलै० D.
३३. मदभिमुखः सन् Sy.
३४. सूनु P., D. हे बलस्य पुत्रन्न ! 'ओजसो जातमुत मन्य एनम्' (RV. X.73.10.) इति निगमान्तरे बलपुत्रत्वं सिद्धम् Sy.
३५. तव Sy. ३६. कश्चिदसुरः Sy.
३७. योतोः बलादिभिः पृथक्कर्तुम् Sy.

यमबाधिमसुर[1] आगच्छति तत आगच्छेति[2]।

प्र तुविद्युम्नस्य स्थविरस्य घृष्वेर्दिवो रर्प्शे महिमा पृथिव्याः।
नास्य शत्रुर्न प्रतिमानमस्ति न प्रतिष्ठिः पुरुमायस्य सह्योः॥ १२॥

प्र तुविद्युम्नस्य। बहुधनस्य[3]। स्थविरस्य[4]। घर्षणशीलस्य[5]। महत्त्वम्[6]। दिव[7]। पृथिव्याश्च[8]। प्ररिरिचे[9], रर्प्शतिर्महद्भावकर्मा[10]। न। अस्य[11]। शत्रु[12] कश्चित्। अस्ति। न च। प्रतिमानम्[13]। न। प्रतिष्ठाता[14]। अभिगन्ता। बहुप्रज्ञस्य। अभिभवत[15]।

प्र तत्ते अद्या करणं कृतं भूत्कुत्सं यदायुमतिथिग्वमस्मै।
पुरू सहस्रा नि शिशा अभि ष्णामुत्तूर्वयाणं धृषता निनेथ॥ १३॥

प्र तत्ते[16]। प्रभवति[17]। इदानीमुत्फुल्ल भवति जनेषु[18]। तत्। ते[19]। कृतम्। कर्म। यत्[20] त्वम्[21]। अस्मै कर्मणे। कुत्सादीनृषीन् रक्ष्यानस्यकरोस्ततस्तैरुक्तैर्मन्त्रैर्दृश्यत इति[22]। तेषां कुत्सादीनां शत्रूणां बहूनि[23]। सहस्राणि[24]।

---

१. यं मार्गमसुरः is suggested for यमबाधिमसुर॥ आ is omitted by P.
२. VM. ignores इन्द्र। चित् and पुरुहूत॥ अत्र नू चिदिति निषेधार्थे वर्तते। हे बहुभिराहूतेन्द्र! Sy.
३. वि० D.
४. बहुयशसो बहुधनस्य वा Sy.
५. प्रवृद्धस्य Sy.
६. शत्रूणां घर्षकस्येन्द्रस्य Sy.
७. ०त्वं P., D.
८. द्युलोकात् Sv.
९. भूमेश्च Sy.
१०. प्रतिरिचे D.
११. ०रज्झतिमहत्० P., D. विरप्शीति महन्नामसु पाठात् नाम्नां च प्रायेण धातुजन्यत्वात् रप्शतिरत्रातिशयवाची Sy.
१२. इन्द्रस्य Sy.
१३. शातयिता नास्ति Sy.
१४. प्रतिनिधिर्नास्ति Sy.
१५. प्रतिप्रतिष्ठाता P. प्रतिष्ठाता D. अस्य प्रतिष्ठाश्रयः। स एव सर्वस्य प्रतिष्ठेत्यर्थः Sy.
१६. ०भवतवं P. ०भवतवन् D. शत्रूणामभिभवितुः Sy.
१७. व्र D.
१८. वत्ते P.
१९. ०भति P., D. प्रभवति प्रकाशते Sy.
२०. इदानीमपि Sy.
२१. Omitted by P. त्वया Sy.
२२. य P., D.
२३. अपि चास्मा अनन्तरोक्तायातिथिग्वाय Sy.
२४. आदि refers to आयम् and अतिथिग्वम्॥ शुष्णाद्राक्षसाद् एतन्नामानमसुरं चायुं शत्रुभ्यः सकाशादेवैतत्संज्ञकं पौरूरवसमतिथिग्वमतिथीनामभिगन्तारं विवोदासं च शम्बराद्ररक्षिथेति यत्करणं तत्प्रभवतीति पूर्वेण सम्बन्धः। ररक्षिथेति द्वितीयाश्रुतेरुचितक्रियाध्याहारः Sy.
२५. ०क्ष्याननस्य D. स्य seems to be unnecessary. The reading should be रक्ष्यानकरोः॥
२६. ०रोततस्तैरुक्तेर्म० D.
२७. पुरूणि Sy.
२८. शम्बरस्य धनानि Sy.

पृथिव्याम् [1]। तनूकृतवानसि [2]। तूर्वयाण [3] च। धृष्टेन [4] बलेन। उदकाद् उन्नीतवानसि [5]।

अनु त्वाहिंम्ने अध देव देवा मदन्विश्वे कवितमं कवीनाम् ।
करो यत्र वरिवो बाधितायं दिवे जनाय तन्वे गृणानः ॥ १४ ॥

अनु त्वा [6]। अन्वमदन् [7]। त्वाम्। अहिहननाय [8]। अथ। सर्वे। देवाः [9]। अत्यन्त कविम्। कृतवानसि [10]। यदा [11]। धनम्। बाधिताय [12]। स्तोत्रे। जनाय। तनूकर्त्रे [13] च। स्तूयमानः [14]।

अनु द्यावापृथिवी तत्त ओजोऽमर्त्या जिहत इन्द्र देवाः ।
कृष्वा कृत्नो अकृतं यत्ते अस्त्युकथं नवीयो जनयस्व यज्ञैः ॥ १५ ॥

अनु। अनुगच्छतः [15]। द्यावापृथिवी। तत् [16]। तव [17]। बलम्। तथामरणाः [18]। देवाश्च। अनुगच्छन्ति। कुरु [19]। हे करणशील [20]! अकृतम्। यदि [21]। ते किंचित्। अस्ति। नवतरम्। स्तोत्रम्। यज्ञैः [22] सह। जनयस्व, कृते हि कर्मणि कृते नवानि च कथयन्त्यृषयो यज्ञेष्विति [23]।

---

१. पृथिवीम् Sy.
२. अददाः। इन्द्रः शम्बरं हत्वा तस्य धनानि दिवोदासाय ददावित्यर्थः Sy.
३. नूर्व० P. पृथिव्यां वर्तमानं त्वरितगमनं दिवोदासम् Sy.
४. धर्षणेन त्वदीयेन वज्रेण शम्बरं हत्वा Sy.
५. आपद्भ्य उदगमयः Sy.
६. VM. ignores अभि ॥ अभिलक्ष्य Sv.
७. अनुक्रीनाम्न्येकाहे मरुत्वतीयशस्त्रे 'अनु त्वाहिहने' इति सूक्तमुखीया—। सूत्रितञ्च 'अनु त्वाहिहने अध देव देवा अनु ते वायि मह इन्द्रियाय' (ĀSS.9.5.) इति Sy.
८ अनुमदन्ति। अनुस्तुवन्ति Sy.
९. मेघहननाय। वृष्टिप्रदानायेत्यर्थः Sy.
१०. अस्मिन् काले Sy.
११. स्तोतारः Sy.
१२. अकरोः अददाः। अथवा हे देवेन्द्र! अधास्मिन् काले विश्वे सर्वे देवाः सुराः। अहिर्वृत्र एवोच्यते। तस्य हननाय कवीनां कवितमं त्वामनुमदन्ति। यत्र यस्मिन् स्तोत्रे सति बाधिताऽसुरैः पीडिताय दिवे द्युलोकनिवासाय जनाय तन्वे शोभायै वृत्रहननेन तव शोभार्थं वरिवश्चकर्थ Sy.
१३. यस्मिन् काले Sy.
१४. दारिद्र्यादिभिः पीडिताय Sy.
१५. तनु is omitted by P., D. स्तोतृणां तनयाय च Sy.
१६. स्तोतृभिः स्तूयमानस्त्वम् Sy.
१७. VM. ignores देव and कवीनाम्॥ हे द्योतमानेन्द्र! कवीनां मेधाविनां मध्ये Sy.
१८. अग० P. अनुजिहाते Sy.
१९. प्रसिद्धम् Sy.
२०. त्वदीयम् Sy.
२१. अमरणधर्माणः Sy.
२२. कुरुष्व Sy.
२३. हे बहूनां कर्मणां कर्तः! Sy.
२४. यत्कर्मास्ति Sy.
२५. त्वदीयम् Sy.
२६. यज्ञेषु Sy.
२७. यज्ञेषि P.
२८. VM. ignores इन्द्र।

VI.19.

महाँ इन्द्रो नृवदा चर्षणिप्रा उत द्विबर्हा अमिनः सहोभिः ।
अस्मद्र्यग्वावृधे वीर्यायोरुः पृथुः सुकृतः कर्तृभिर्भूत् ॥ १ ॥

[1]महान्[2]। यथा शत्रुं विजित्यान्यो[3] महाराजो[4] भवति मनुष्य एवम्-। इन्द्रो[5] वृत्रं हत्वा । महानभवत्[6] । 'इन्द्रो ह वा एष पुरा वृत्रस्य वधादथ वृत्रं जघ्निवान् महेन्द्रो यथा महाराजोऽन्यो विजित्य[7]' इति वाजसनेयकम् । किं[8] च मनुष्याणा पूरयिता[9]। अपि[10] च[11]।

---

१. 'महाँ इन्द्रः' इति त्रयोदशर्चं चतुर्थं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैन्द्रम्। अनुक्रान्तं च 'महान्त्सप्तोना' (KSA.30.19.p.22.) इति । माध्यन्दिने सवने सोमातिरेके शस्त्रं भवति । तत्रेवं सूक्तम् । सूत्रितञ्च—'महाँ इन्द्रो नृवद्विष्णोर्नु कम्' (ĀŚS.6.7.) इति । समूळ्हे द्वितीये छन्दोमे मरुत्वतीयशस्त्र एतत् सूक्तम् । सूत्रितञ्च—'महाँ इन्द्रो नृवदिति मरुत्वतीयम्' (ĀŚS.8.7.) इति Sy. भरद्वाजस्य बार्हस्पत्यस्यार्षम् Dur. भरद्वाजस्य SKN.

२. विजिग्यानो P., D. ३. ०जा P., D.

४. यथा नेता राजा भृत्यादीनां कामानां पूरयिता तद्वत् Sy. तथापि नृवन्मनुष्यवदाहूयमानः आगच्छति । यद्वा नृवन्मनुष्यवत् Mah., U. यथा मनुष्या आराधयितॄन् कामैः पूरयन्ति तद्वत्BB. मनुष्यवत् Dur. मनुष्यवत् । यथा राजा, अन्योऽपि कश्चिदीश्वरो मनुष्यस्तद्वत् SKN.

५. इन्त्रो P., D. ६. प्रभूतः Sy. महाप्रभावः Mah. महान्प्रभावत इन्द्रः U. महानयमिन्द्रः BB. महान् प्रभावतः Dur.

७. महाजोन्यविजि P. महाजोन्यः विजि D.

८. Omitted by P.D. ९. चित् P. D.

१०. चर्षणीनां स्तोतृजनानां कामानां पूरकः Sy. आ समन्ताच्चर्षणीन् मनुष्यान् प्रति अभीष्टकामैः पूरयत्याचर्षणिप्राः । 'प्रा पूरणे' क्विप् । यथा राजा, अमात्यादिमनुष्यान्सेवकानभीष्टकामैः पूरयति तद्वत् Mah. चर्षणयो मनुष्याः । ....आगत्य च चर्षणीनां मनुष्याणां पूरयिता कामैः U. यश्चर्षणिप्राः, चर्षणयो मनुष्यास्तेषां पूरयित. कामैः।....यद्वा चर्षणीनां चर्षणवतामाचारवतां कामैः पूरयिता । समन्तादित्यर्थ आकारः । सर्वत्र पूरयिता तस्मान्महान् । यद्वा नृवद् एकस्मिन्निव नरे सभन्तात् सर्वेष्वपि लोकेषु चरणशीलानां पूरयिता । ततोऽयं महान्, इति । चरेरनिप्रत्ययो बहुलवचनात्सुडागमः । यद्वा 'कृषेरादेश्च चः' इति कृषेरेतद्रूपम् । आङापि कृष्यर्थो विशेष्यते । उदात्तश्रुतेश्चायमसमरत एव कृष्यर्थं विशिनष्टि । हविःप्रदानादिनाऽऽकर्षवतां वशीकुर्वतां कामै. पूरयितेति BB. आपूरयिता चर्षणीनां मनुष्याणां कामैः। यथा हि मनुष्य ईश्वरः परितुष्टः कामैरवश्यं भृत्यमापूरयति, एवमिन्द्रोऽपि स्तोतारम् Dur. चर्षणयो मनुष्याः। 'प्रा पूरणे' आकार उपसर्गश्छान्दसत्वादसमस्तोऽपि प्रातिपदिकेनैव सम्बध्यते । ततः 'आतो मनिन्' (Pā.3.2.74) इत्येवं विच् द्रष्टव्यः । स्तोतॄणां यष्टॄणां मनुष्याणां च पूरयिता कामैः SKN.

११. Omitted by P.

द्वयोः परिवृळ्हः[1]। अहिंसितः[2]। बलैः[3]। सोऽयं मदश्मिमुखम्[4]। वीर्यकरणार्थम्[5]। वर्धते च[6]। अयं शोभनकर्मणः[7]!

---

१. ०बृंळ्हः D. द्वयोर्लोकयोः परिवृढः Sy. 'बृहि वृद्धौ' बर्हणं बर्हो वृद्धिः। असुन्प्रत्ययः। द्वयोः प्रकृतिविकृतिरूपयोः सोमयागयोर्बर्हो यस्य स द्विबर्हाः। यद्वा द्वयोः स्थानयोर्बर्हा वृद्धः परिवृढः प्रभुर्मध्यमे स्थान उत्तमे च Mah. द्वयोः स्थानयोः परिवृढो मध्यमे च स्थान उत्तमे च परिवृढः प्रभुः U. द्वयोर्लोकयोर्बृंहितः प्रवृद्धस्तेजसाऽस्मिन्नमुष्मिंश्च BB. द्वयोः स्थानयोर्मध्यमोत्तमयोः परिवृढः Dur. बृहेर्वृद्ध्यर्थस्येदं रूपम्। द्वयोः स्थानयोर्वीर्येण परिवृद्धोऽपि....। मध्यमे च स्थानेऽन्तरिक्षे, उत्तमे च दिवि। तस्याः सर्वदेवानां साधारणत्वात्। देवराजत्वेन च प्रसिद्धेः। इतिहासपक्षे तु नान्योऽन्तरिक्षे वीर्येण परिवृद्धः शक्नोति वर्धयितुं नापि दिव्यादित्याद् रसान् परिगृहीतुम् SKN.

२. अहिंसनीय इन्द्रः Sy. अमित उपमारहितः। अतोलितबल इत्यर्थः।. . .यद्वा सहोभिः शतबलैरमिनः, अप्रक्षिप्तोऽनुपहिंसित इत्यर्थः। 'डुमिञ् प्रक्षेपे'। 'भीञ् हिंसायाम्' इत्यस्य वा प्रयोगः। पूर्वपक्षे माने सर्वत्र निष्ठानत्वमार्षम् Mah. अमिनोऽमितमात्रः।....अप्राक्तोलितबलः। यद्वा—अनुपहिंसितः शत्रुबलैः U. अमिनोऽपरिच्छेदः। मानं मिनम्। मातेर्निष्ठा छान्दसं निष्ठानत्वम्। तदस्य नास्तीत्यमिनः। न ह्यस्यैतावृग् बलमस्तीति निश्चेतुं शक्यते। यद्वा सहोभिरमिनः सङ्गतः। 'अम गत्यादिषु' BB. अमितमात्रः। अथवा—अनभिहिंसितः केनचित्....एवमत्रामिनशब्देनामितमात्रोऽनभिहिंसितमात्रो वा, इत्युच्यते शब्दसारूप्यादर्थोपपत्तेश्च Dur. अपरिमितः SKN.

३. शत्रुबलैः Sy. केन पुनरमिनः ? इत्युच्यते, सहोभिर्बलैरित्यर्थः। न हीन्द्रस्य बलमात्राः केनचिन्मितपूर्वा इत्यर्थः। अनभिहिंसितपूर्वो वा केनचिदिन्द्रः Dur. शारीरैः सांयोगिकैर्वा बलैर्महाबल इत्यर्थः। अथवा अभ्यमितोऽहिंसितपूर्वैः सहोभिर्बलैः परकीयैः SKN.

४. अस्मदभिमुखं यथा भवति तथा Sy. अस्मात्प्रत्यञ्चतीत्यस्मद्र्यगस्मदभिमुखः Mah. अस्मद्दर्शनोत्सुकः सन् U. अस्मा (अस्मान्) स्वञ्चतीत्यस्मद्र्यक्। ....क्रियाविशेषणत्वान्नपुंसकत्वम् BB. अस्मदनुग्रहायास्मद्दर्शनाय Dur. 'विष्वग्देवयोश्च टेरद्र्यञ्चतौ वप्रत्यये' (Pa.6.3.92) इत्येवमयमस्मदोऽञ्चतावद्र्यादेशः। तत्र कर्माधिकारानस्मान्प्रत्यञ्चित आगतोऽस्मदभिमुख इत्यर्थः SKN.

५. वीरकर्मकरणाय Sy. इन्द्रो वीर्याय वीरकर्मणे Mah. वर्धते वीर्याय वीरकर्मणे य इन्द्रः U. ईदृश इन्द्रो वीर्याय वीर्यार्थम्। यद्वा कर्म पुत्रवधादि तदर्थम् BB. वीरकर्मणे वर्धार्थम् Dur. वीर्यकर्मणे वृष्ट्यादिकाय SKN.

६. ववृधे Mah. वर्धताम्।. . .अस्माभिर्यज्यमानैर्दत्तानि हवींषि गृहीत्वा वर्धतामिति यावत् BB.

७. सुष्ठु परिचरितः Sy. सुकृतः साधुकृतः सत्कृतः पूजित इत्यर्थः Mah. शोभनकृत्यभिप्रायः U. सुष्ठु कृतो वशीकृतश्च BB. सुकृतः स्तुतिभिः Dur. अत्रैकवाक्यताप्रसिद्ध्यर्थं यत्तच्छब्दाध्याहार्यौ। करोतिश्च क्रियासामान्यवचनः। क्रियाविशेषः स्तुतौ द्रष्टव्यः। य ईश्वरः स सुष्ठु स्तुतः SKN.

कर्मभिः[1] । उरुः[2] । पृथुश्च[3] । भवति[4] ।[5]

इन्द्रमेव धिषणा सातये धाद्बृहन्तमृष्वमजरं युवानम् ।
अषाळ्हेन शवसा शूशुवांसं सद्यश्चिद्यो ववृधे असामि ॥ २ ॥

इन्द्रम्[6] । इन्द्रम् । एव । बुद्धेः[7] । लाभाय[8] । निदधाति । महान्तम्[9] । दर्शनीयम् । अजरम्[10] । युवानम्[11] ।
शत्रुभिरसोढेन[12] । बलेन । वर्धमानम्[13] । सद्यो जातः[14] । यः[15] । ववृधे[16] । अन्यूनः[17] ।[18]

---

१. यजमानैः Sy. कर्तृभिर्यजमानैः Mah. सोऽस्मदीयैः कर्तृभिः स्तूयमानः U. कर्तृभिः परिचरद्भिरस्माभिर्यजमानैः BB. एतैः कर्तृभिर्ऋत्विग्भिः Dur.

२. शरीरेण विस्तीर्णः Sy. यशसा विपुलः Mah. उरुः प्रमाणतः U. उरुविस्तीर्णो बलेन BB. महान् परिमाणतः Dur. वीर्येण विस्तीर्णः SKN.

३. गुणैः प्रथितः Sy. पृथुर्बलेन विस्तृतः Mah. पृथुश्च विस्तारेण U. प्रथितः सर्वत्र यशसः BB. विस्तीर्णो यः सोऽस्माकं प्रत्यभिमुखो दानायाभिप्रेतानामर्थानाम् Dur. शरीरेण महाकायः SKN.

४. स वर्धमान इन्द्र ईदृशो भूद् भवतु । लोडर्थे लुङ् । अडभावश्छान्दसः Mah. भूयात् U. भवतु । भवतेर्लुङि पूर्ववच्छपो लुक् । .... यद्वा कर्तृभिरस्माभिस्सुकृतः सम्यक्कृतोऽयमुरु पृथुश्च भवतु BB. भूयादित्यर्थः Dur. लोडर्थे लुङ् । भवतु, इत्याशास्महे SKN.

५. VM. ignores आ ॥ आगच्छतु । आ इत्युपसर्गदर्शनाद् गच्छत्वित्याख्यातस्याध्याहारः Sy. For the explanation of आ by Mah., U., BB., Dur. and SKN. see footnote no. 10. (p. 468.)

अभिनोऽभिमतमात्रो महान्भवत्यभिमितो वा N.6.16.; SKN. II. 445—446. This stanza=YV. 7.39.=TS. 1.4.21.7.

अथातो गृह्णात्येव । महां२॥ऽइन्द्रो नृवदा चर्षणिप्रा उत द्विबर्हा अमिनः सहोभिः । अस्मद्र्यग्वावृधे वीर्यायोरुः पृथुः सुकृतः कर्तृभिर्भूत् । "उपयामगृहीतोऽसि महेन्द्राय त्वैष ते योनिर्महेन्द्राय त्वा' इति सादयति महेन्द्राय ह्येनं गृह्णाति । ŚB.4.3.3.18.p.372.

६. अस्मदीया स्तुतिः Sy.

७. बुद्धिर्ल० P. दानाय Sy.

८. धारयति Sy.

९. गन्तारम् Sy.

१०. जरारहितम् Sy.

११. नित्यतरुणम् Sy.

१२. ०टं P., D. शत्रुभिरनभिभूतेन Sy.

१३. ०ने P. शूशुवांसम्—प्रवृद्धम् । श्वयतेरिदं रूपम् Sy.

१४. जातमात्रः सन् Sy.

१५. इन्द्रः Sy.

१६. वर्धते Sy.

१७. ०ना P. अनल्पमधिकं यथा भवति तथा Sy.

१८. VM. ignores चित् ॥ एव Sy.

---

१. उपयामेत्यादिभागः केवलं यजुर्वेदीयः ।

पृथू करस्ना बहुला गभस्ती अस्मद्र्यक्सं मिमीहि श्रवांसि ।
यूथेव पश्वः पशुपा दमूना अस्माँ इन्द्राभ्या ववृत्स्वाजौ ॥ ३ ॥

पृथू । पृथू । करौ । दीर्घौ । बाहू । स त्वस्मदभिमुखम् । सम्मिमीहि । अन्नानि । पशोः । यूथानीव । पशुपालः । दममनाः । अस्मान् । इन्द्र ! अभ्यावर्तयस्व । आजौ ।

तं व इन्द्रं चतिनमस्य शाकैरिह नूनं वाजयन्तो हुवेम ।
यथा चित्पूर्वे जरितार आसुरनेद्या अनव्द्या अरिष्टाः ॥ ४ ॥

तं वः । तम् । युष्माकम् । इन्द्रम् । शत्रूणां चातयितारम् । अस्य । सहायैर्मरुद्भिः सह । इदानीम् । युद्ध कुर्वन्तः । ह्वयामः । यथा । एव । पूर्वे । स्तोतार । अभूवन् । प्रशस्याः । अनिन्द्याः । अहिंसितास्तद्वद् वयमपि भूयास्मेति ।

धृतव्रतो धनदाः सोमवृद्धः स हि वामस्य वसुनः पुरुक्षुः ।
सं जग्मिरे पथ्या३ रायो अस्मिन्त्समुद्रे न सिन्धवो यादमानाः ॥ ५ ॥

धृतव्रतः । धृतकर्मा । धनस्य दाता । सोमेन वृद्धः । सः । हि । प्रशस्यस्य । धनस्य । बहोर्वक्ता ।

---

१. ०थु P. विस्तीर्णौ Sy.
२. कर्मणां कर्तारौ Sy.
३. बहुप्रदौ Sy. ४. त्वदीयौ बाहू Sy.
५. समीमीहि P. कुरु Sy.
६. अन्नानि । वातुमिति शेषः Sy.
७. पशूनाम् Sy.
८. यूथानिव P. तत्र दृष्टान्तः । यूथानि यथा-वर्तयति तद्वत् Sy. ९. पशूनां पालकः Sy.
१०. दान्तमनास्त्वम् Sy.
११. किञ्च हे इन्द्र ! Sy.
१२. अभ्यावर्तस्व Sy.
१३. सङ्ग्रामे Sy.
१४. व P. त वं D.
१५. प्रसिद्धम् Sy. १६. त्वाम् Sy.
१७. परमेश्वरम् Sy.
१८. ०शात० D. चातकम् । नाशकमित्यर्थः Sy.
१९. तव Sy.
२०. शक्तैः समर्थैः मरुद्भिः सहितम् Sy.
२१. It seems to be the explanation of इह ॥ अस्मिन् यज्ञे Sy.
२२. अन्नमिच्छन्तो वयं स्तोतारः Sy.
२३. स्तुमः Sy.
२४. पुरातनाः Sy.
२५. बभूवुः । हे इन्द्र ! त्वत्प्रसादाद्वयमपि तथैव भवेमेत्यर्थः Sy. २६. अनिन्द्याः Sy.
२७. पापरहिताः Sy.
२८. हिं० P., D.
२९. VM. ignores नूनम् ॥ नूनम् अद्य Sy.
३०. स एव धनप्रदः Sy.
३१. स एव सोमेन प्रवृद्धः Sy.
३२. इन्द्रः Sy. ३३. खलु Sy.
३४. कीदृशस्य धनस्येत्याकाङ्क्षायामुपसर्जनीभूतस्यापि धनस्य विशेषणे वामस्य वसुन इति । वामस्य वननीयस्य वसुनः श्रेष्ठस्य । यद्वा वसुनो धनस्य । स्वामीति शेषः Sy.
३५. बह्वन्नः स एव Sy.

सङ्गच्छन्ते । मनुष्यहितानि[1] । धनानि । अस्मिन्[2] । समुद्रे । इव[3] । सिन्धवः[4] । नानादिग्भ्यः समागता वा पथ्या[5] इति ।

शविष्ठं न आ भर शूर शव ओजिष्ठमोजो अभिभूत उग्रम् ।
विश्वा द्युम्ना धृष्णया मानुषाणामस्मभ्यं दा हरिवो मादयध्यै ॥ ६ ॥

शविष्ठम्[6] । वलवत्तमम् । अस्मभ्यम् । आहर । शूर[7] ! बलम् । ओजस्वितमम् । ओजश्च[8] । उद्गूर्णम्[9] । शत्रूणामभिभवितः[10] ! विश्वानि[11] च । अन्नानि[12] । वर्षणनिमित्तानि[13] । शत्रूणां मनुष्याणामादाय[14] । अस्मभ्यम् । देहि[15] । हे हरिवः[16] ! अस्मान् मादयितुम् ।

यस्ते मदः पृतनाषाळमृध्र इन्द्र तं न आ भर शूशुवांसम् ।
येन तोकस्य तनयस्य सातौ मँसीमहि जिगीवांसस्त्वोताः ॥ ७ ॥

यस्ते । यः । ते । मदः[18] । अभिभविता[19] । अहिंसितः[20] । इन्द्र ! तम्[21] । अस्माकम्[22] । आहर । प्रवृद्धम् । येन मदेन[23] शत्रुजयार्थ त्वया भूतेन लब्धधनाः[24] । पुत्रस्य च । तत्पुत्रस्य[25] । भजने[26], तेन[27] धनप्रदानेन । अर्चयामः[28] । शत्रून् जिगीवांसः[29] । त्वया रक्षिताः ।

---

१. स्तोतॄणां हितानि Sy.
२. इन्द्र एव Sy.
३. तत्र दृष्टान्तः । यथा Sy.
४. नद्यः Sy.
५. यावमाना अभिगच्छन्त्यस्तद्वत् Sy.
६. पत्थ्य P., D.
७. हे विक्रान्तेन्द्र ! Sy.
८. दीप्तिमस्मभ्यमाभर Sy.
९. अप्रसह्यम् Sy.
१०. हे शत्रूणामभिभावुकेन्द्र ! Sy.
११. सर्वाणि Sy.
१२. द्युम्नानि द्योतमानानि यानि धनानि Sy.
१३. सेचनसमर्थानि Sy.
१४. मनुष्याणां भोग्यतया कल्पितानि तानि धनानि Sy.
१५. प्रयच्छ Sy.
१६. हे हरिवन्निन्द्र ! Sy.
१७. त्वया देयः Sy.
१८. हर्षः Sy.
१९. ०देभि० P. शत्रुसेनानामभिभविता Sy.
२०. ०सि D.
२१. म् P. मदम् Sy.
२२. अस्मभ्यम् Sy.
२३. हर्षेण Sy. २४. ०ना P.
२५. तं पु० D.
२६. लाभे निमित्तभूते सति Sy.
२७. तौ P.
२८. त्वां स्तुवीमहि, तमा भरेति पूर्वेणान्वयः Sy.
२९. शत्रुं जिवासः P. ०वासः D. जितवन्तो वयम् Sy.

आ नो भर वृषणं शुष्ममिन्द्र धनस्पृतं शूशुवांसं सुदक्षम् ।
येन वंसाम पृतनासु शत्रून्तवोतिभिरुत जामीरजामीन् ॥ ८ ॥

आ नः । आभर । अस्मभ्यम् । वर्षितृ । बलम् । इन्द्र ! धनस्य स्प्रष्टारम् । वृद्धम् । शोभनोत्साहम् । येन । हनाम । पृतनासु । शत्रून् । तव । रक्षणैः । अपि च । ज्ञातीन् ।

आ ते शुष्मो वृषभ एतु पश्चादोत्तरादधरादा पुरस्तात् ।
आ विश्वतो अभि समेत्वर्वाङिन्द्र द्युम्नं स्ववर्द्धेह्यस्मे ॥ ९ ॥

आ ते । त्वदीयम् । बलम् । अस्मान् । सर्वतः । अभिगच्छतु । इन्द्र ! अन्नम् । अभ्युदययुक्तम् । अस्मासु । धेहि ।

नृवत्त इन्द्र नृतमाभिरूती वंसीमहि वामं श्रोमतेभिः ।
ईक्षे हि वस्व उभयस्य राजन्धा रत्नं महिं स्थूरं बृहन्तम् ॥ १० ॥

नृवत् । मनुष्ययुक्तम् । त्वत्तः । इन्द्र ! नेतृतमैः । रक्षणैः । भजेमहि । वननीय धनम् ।

---

१. आहर Sy. २. वर्षितारम् Sy.
३. सेनालक्षणं बलम् Sy.
४. स्पृष्टारं P., D. धनस्य पालकम् Sy.
५. प्रवृद्धम् Sy. ६. शोभनबलम् Sy.
७. ०नोत्सहायेस P., D. बलेन शत्रून् Sy.
८. सङ्ग्रामेषु Sy. पृतना इति सङ्ग्रामनाम Ngh. 2.17. ९. हे इन्द्र ! त्वदीयाभिः Sy.
१०. रक्षाभिः Sy. ११. उतेत्यत्र भिन्नक्रमः Sy.
१२. जामीन् बन्धून् । उतापि च जामीन् शत्रूंश्च येन शुष्मेण वंसाम तं शुष्ममा भरेति पूर्वेण सम्बन्धः Sy.
१३. VM. ignores अजामीन् ।
१४. अस्मदभिमुखः सन् Sy.
१५. सर्वस्माद्दिग्भागात् Sy.
१६. अस्मान् । अभिलक्ष्यागच्छतु Sy.
१७. धनम् Sy. १८. सुखयुक्तम् Sy.
१९. अस्मभ्यम् Sy. २०. प्रयच्छ Sy.
२१. VM. ignores आ । वृषभः । एतु । पश्चात् । आ । उत्तरात् । अधरात् । आ । पुरस्तात् । आ and सम् ॥ वृषभो वर्षिता । पश्चात् पश्चिमभागात् । आगच्छतु । उत्तरादुत्तरभागादागच्छतु । अधरादक्षिणभागाच्चैतु । पुरस्तात्पूर्वभागाच्चागच्छतु सम्यक् Sy.
२२. भरद्वाजस्यार्षम् Dur. भरद्वाजस्य SKN.
२३. मनुष्यैः परिचारकजनैर्युक्तम् Sy. यथा मनुष्याः केचिदुत्पन्नप्रणयाः कञ्चिदीश्वरं मनुष्यं स्तुतिभिः सम्भजेरन् Dur. मनुष्यमतिथिमन्यं वा कञ्चित् प्रियं मित्रं भ्रातरं वा तद्वत् SKN.
२४. एवं वयं त्वाम् Dur. ते—द्वितीयार्थे षष्ठी, त्वाम् SKN.
२५. नेतृतमाभिः Sy. मनुष्यतमयोग्याभिः Dur. अत्र स्वसम्बन्धियोग्यत्वं लक्षयन् नृतमयोग्या यास्ताभिः प्रकृष्टमनुष्ययोग्याभिरित्यर्थः SKN.
२६. ऊतिभी रक्षाभिः Sy. अवन्तीभिस्तर्पयन्तीभिः स्तुतिभिः Dur. काभिः ? अवतेस्तृप्तिकर्मण ऊतिः । ततस्तृतीयायाः पूर्वसवर्णः । ऊतिभिस्तर्पणैः सोमैः SKN.
२७. वयं सम्भजेमहि Sy. सम्भजेमहि Dur. 'वन षण सम्भक्तौ' सम्भजेमहीत्याशास्महे SKN.
२८. ०न D. प्रशस्यम् SKN.

श्रोतव्यै.[1] । ईशिषे[2] । धनस्य[3] । दिव्यस्योत पार्थिवस्य[4] । राजन्[5] ! धेहि[6] । रत्नम्[7] । महनीयम । परिणाहवत्[8] । बृहितम्[9] ।[10] ११

उत्तरा निगदव्याख्यातेति ।

मरुत्वन्तं वृषभं वावृधानमकवारिं दिव्यं शासमिन्द्रम् ।
विश्वासाहमवसे नूतनायोग्रं सहोदामिह तं हुवेम ॥ ११ ॥

[मरुत्वन्तम्[12] ।]

---

१. श्रोतव्यैर्यशोभिः सहितम् Sy. श्रवणीयतमैः शब्दैः Dur. न केवलाभिरूतिभिः । किं तर्हि ? श्रोमतेभिः, श्रुणातेरयम् 'अन्येभ्योऽपि दृश्यन्ते' (Pa.3.2.75.) इत्येवं कर्मणि विच् । आतिशायिकस्य तमपः प्रथमद्वितीयाक्षरविपर्ययाच्छान्दसत्वाच्छ्रोतव्यतमैरतिशयेन श्रोतव्यैः शस्त्रैरित्यर्थः SKN.

२. केन पुनरर्थेन वंसीमहि ? इतो यस्मा।दीक्षे ईशिषे त्वम् Dur. हिशब्दो यस्मादर्थे । यस्मादीशिषे त्वम् SKN.

३. वसुनः Dur., SKN.

४. उभयलक्षणस्य दिव्यस्य पार्थिवस्य च वसुनः Dur. कतमस्य ? दिव्यस्य च पार्थिवस्य च। कुत एतत् ? 'अध्वर्यवो यो दिव्यस्य वस्वो यः पार्थिवस्य' (RV. II.14.11.) इत्यादौ दर्शनात् SKN.

५. हे राजमानेन्द्र ! त्वम् Sy. त्वं हे राजन् ! Dur. दीप्त ! ईश्वर ! वा SKN.

६. धहि P. यस्मादिति वचनात्तस्मादित्यध्याहार्यम् । तस्माद् धा देहि Dur., SKN.

७. रमणीयं धनम् । अत्र रत्नशब्दः पुँलिङ्गः Sy. धनम् Dur., SKN.

८. तस्मात् कारणात् महान्तम् Sy. कीदृशं पुनर्देहि ? महि महद् वस्तुभूतम् Dur. महत् सारतरम् SKN.

९. विपुलम् Sy. बहु Dur. स्थूलं परिमाणतः SKN.

१०. गुणैः परिवृढम् Sy. बहुकालं यत् स्यात् तद्देहि Dur. नेदं रत्नविशेषणं महीत्यनेन पौनरुक्त्यप्रसङ्गात्पुंल्लिङ्गत्वाच्च । किं तर्हि कालप्रतिनिर्देशार्थमेतत् । 'कालाध्वनोरत्यन्तसंयोगे द्वितीया' (Pa.2.3.5.)। महान्तं कालं यावज्जीवितव्यमित्यर्थः SKN.

११. VM. ignores हि ॥ हि यस्मा।त् कारणात् Sy.
एवमत्र वसुसम्बन्धात् 'ईक्षे' इत्येष शब्दः 'ईशिषे' इत्येवमुपपद्यते Dur. ईक्ष ईशिषे N.6.6.; SKN. II. 409.

१२. The *pratīka* is supplied by the Editor. The stanza has already been explained. See RV.III.47.5. Sy. explains this stanza again in the following manner:—
इहास्मिन् यज्ञे नूतनायाभिनवायावसे रक्षणाय तं प्रसिद्धमिन्द्रं हुवेम । स्तुमः । आह्वयामो वा । कीदृशम् ? मरुद्भिर्युक्तं वृषभं कामानां वर्षितारं ववृधानं प्रवृद्धमकवारिमकुत्सितशत्रुं दिव्यं द्योतमा।नं शासं शासितारं विश्वसहं विश्वस्य लोकस्याभिभवितारमुग्रमोजस्विनं सहोवां बलप्रदम् ।

जनं वज्रिन्महि चिन्मन्यमानमेभ्यो नृभ्यो रन्धया येष्वस्मि ।
अधा हि त्वा पृथिव्यां शूरसातौ हवामहे तनये गोष्वप्सु ॥ १२ ॥

जनम्[1] । अग्रतः स्थित्वा युध्यन्तं जनम् । वज्रिन्[1] ! महान्तम्[2] । मन्यमानम्[3] । एभ्यः । नृभ्यः[4] । वशीकुरु । येषु[5] योद्धृषु । अहमस्मि[6] । अथ[7] । हि । त्वा, दिवः पृथिव्याम्[8] । युद्धे[9] । पुत्राद्यर्थम्[10] । हवामह[11] इति[12] ।

वयं त एभिः पुरुहूत सख्यैः शत्रोःशत्रोरुत्तर इत्स्याम ।
घ्नन्तो वृत्राण्युभयानि शूर राया मदेम बृहता त्वोताः ॥ १३ ॥

वयं त[14] एभिः[15] । वयम्[15] । ते[15] । एभिः[16] स्तोत्रकृतैः । पुरुहूत[17] ! सख्यैः[18] सह । अस्मच्छत्रोः[19] । उत्कृष्टतरः[20] । एव । भवाम[21] । घ्नन्तः[22] । शत्रून्[23] । प्रत्यक्षान् परोक्षांश्च[24] । शूर[25] ! राया[26] । मदेम[27] । बृहता[28] । त्वया रक्षिताः[29] ।

---

१. हे वज्रवन्निन्द्र ! त्वम् Sy.
२. ०न्त P.
महत्यन्तमात्मानम् Sy.
३. बहुमन्यमानमित्यर्थः Sy.
४. मनुष्येभ्यः Sy.
५. येषां नृणां मध्ये Sy.
६. एको भवामि Sy.
७. अधुना Sy.
८. त्वां द्युलोके स्थितम् Sy.
९. भूम्याम् Sy.
१०. युद्धे प्रवृत्ते सति Sy.
११. पृथिव्या युद्धात्यर्थम् P.D. आदि refers to गोषु and अप्सु ॥ पुत्रे निमित्ते च गोषु पशुषु, अप्सूदकेषु च निमित्तेषु Sy.
१२. वयमाह्वयामः Sy.
१३. VM. ignores चित् ॥ चिदिति पादपूरणः Sy.
१४. तं P., D.
१५. तं D. त्वया सह Sy.
१६. प्रसिद्धैः Sy.
१७. हे बहुभिराहूतेन्द्र ! Sy.
१८. सख्ये P.
स्तोत्रलक्षणैः सखिकर्मभिः Sy.
१९. अस्मात् शत्रोः D.
सर्वस्माच्छत्रोः Sy.
२०. अधिकाः Sy.
२१. भवेम Sy.
२२. हिंसन्तः Sy.
२३. अमित्राणि Sy.
२४. उभयानि जामिरूपाण्यजामिरूपाणि Sy.
२५. हे विक्रान्तेन्द्र ! Sy.
२६. या P., D.
धनेन Sy.
२७. हृष्याम Sy.
२८. महता Sy.
२९. वयं त्वया रक्षिताः सन्तः Sy.

VI.20.

द्यौर्न य इन्द्राभि भूमार्यस्तस्थौ रयिः शवसा पप्रु जनान् ।
तं नः सहस्रभरमुर्वरासां दद्धि सूनो सहसो वृत्रतुरम् ॥ १ ॥

द्यौर्न[1] यः[2] । अदित्यः[3] । इव । यः । इन्द्र ! अभितिष्ठति[4] । पृथिवीम्[5] । अरीन्[6] । जनान्[7] । बलेन । रयिः[8] । सङ्ग्रामेषु । तम्[9] । अस्मभ्यम् । सहस्रस्य भर्तारम्[10] । सर्वस्या भूमेर्दातारम्[11] । दद्धि[12] । सहसः सूनो[13] ! शत्रूणा हिसितारम्[14] ।

दिवो न तुभ्यमन्विन्द्र सत्रासुर्यं देवेभिर्धायि विश्वम् ।
अहिं यद्वृत्रमपो वव्रिवांसं हन्नृजीषिन्विष्णुना सचानः ॥ २ ॥

दिवो न[15] । आदित्यस्य । इव । तुभ्यम् । अन्वधायि[16] नू । महद्[17] । बलम्[18] । सर्वम्[19] । देवैः[20] । अहिम्[21] । यदा[22] । वृत्रम्[23] । अपः[24] । निरुन्धानम्[25] । हतवानसि[26] । ऋजीषिन्[27] ! विष्णुना सहायेन । सेव्यमानः[28] ।

---

१. 'द्यौर्न य इन्द्र' इति त्रयोदशर्चं पञ्चमं सूक्तं भरद्वाजस्यार्षमैन्द्रं त्रैष्टुभम्। 'वि पिप्रोः' इत्येषा सप्तमी दशाक्षरचतुष्टययुक्ता विराट्। अनुक्रम्यते च—'द्यौर्न वि पिप्रोर्विराट्' (KSA. 30.20.p.22.) इति। पृष्ठषडहस्य षष्ठेऽहनि तृतीयसवन उक्थ्यस्तोत्राणि यदि द्विपदासु स्तुवीरन्, यदि वाग्निष्टोमसंस्थः स्यात्तदानीं माध्यन्दिने सवनेऽच्छावाकः स्वशस्त्र आरम्भणीयाभ्य ऊर्ध्वमेतत् सूक्तं शंसेत्। सूत्रितञ्च—'द्यौर्न इन्द्रेत्यच्छावाकः' (ĀŚS.8.4.) इति। इदमेव सूक्तमिन्द्राविष्ण्वोरुत्क्रान्तिनाम्न्येकाहे निष्केवल्यनिविद्धानम्। 'द्यौर्न इन्द्रेति मध्यन्दिनः' (ĀŚS.9.7.) इति Sy.

२. ०र्न्र D.

३. तत्र वृष्टान्तः। द्योतमानः सूर्यो यथा Sy.

४. आक्रामेत् Sy.

५. भूतान्याक्रामति तद्वत् Sy.

६. शत्रून् Sy.

७. अरिञ्जनात् D.

८. ०यि P., D. पुत्ररूपं धनम् Sy.

९. पुत्रम् Sy.

१०. सहस्रस्य धनस्य भर्तारम् Sy.

११. ०स्य भूमेर्वा० P. उर्वराणां सस्याढ्यानां भूमीनां सनितारं सम्भक्तारम् Sy.

१२. द्धि P. देहि Sy.

१३. हे बलस्य पुत्रेन्द्र ! Sy.

१४. वृत्राणां शत्रूणां तरितारं तुर्वितारं वा Sy.

१५. सूर्याय Sy.

१६ ०यी D. व्यधायि। अकारि। स्तोत्रैः स्तूयमाना देवता बलवती भवतीत्यर्थः Sy.

१७. असुरत्वं बलम् Sy.

१८. व्याप्तम् Sy.

१९. देवैः स्तोतृभिः Sy.

२०. आगत्य हन्तारम् Sy.

२१. येनासुर्येण Sy.

२२. असुरम् Sy.

२३. उदकानि Sy.

२४. परिवृण्वन्तम् Sy.

२५. अवधीः, तद्बलं व्यधायीति पूर्वेण सम्बन्धः Sy.

२६. हे विगतरससोमेन्द्र ! Sy.

२७. सङ्गच्छमानस्त्वम्। 'षच समवाये' इति धातो रूपम् Sy.

२८. VM. ignores इन्द्र and सत्रा ॥ हे इन्द्र ! सत्यमेव Sy.

तूर्वन्नोजीयान्त्वस्तवीयान्कृतब्रह्मेन्द्रो वृद्धमहाः ।
राजाभवन्मधुनः सोम्यस्य विश्वासां यत्पुरां दर्नुमावंत् ॥ ३ ॥

तूर्वन्नोजीयान् । तरन् । अतिशयेन बलवान् । वृद्धादपि । वृद्धः । कृतस्तोत्रः । इन्द्रः । वृद्धतेजाः । राजा । अभूत् । सोममयस्य । मधोः । विश्वासाम् । पुराम् । यदा । दारयितारं वृत्रम् । अभ्यगच्छत् ।

शृतैरंपद्रन्पणय इन्द्रात्र दशोणये कवयेऽर्कसातौ ।
वधैः शुष्णस्याशुषस्य मायाः पित्वो नारिरेचीत्किं चन प्र ॥ ४ ॥

शतैः । शतैर्वधैस्त्वया कृतैः । युद्धेऽपद्रन् । असुराः । अस्मिन् युद्धे । द्रविर्गतिकर्मा, कस्मिन्नित्याह— दशावासत्वात् कुत्सः कवि., दशोणिस्तन्निमित्तम् । त्वया कृते युद्धे । वधैः । शुष्णस्य । शोषयितुमशक्यस्य । मायाः । अन्नानि । न । किम् । चिदपि । प्रारेचयः सर्वं विनाशितवानिति ।

---

१. ०र्वनोजी० D.
२. हिंसकान् हिंसन् Sy.
३. अतिशयेन ओजस्वी Sy.
४. बलवतः Sy.
५. पृथु P. वृःद्ध D. बलवत्तरः Sy.
६. ०तः स्तो० P. कृतं ब्रह्म स्तोत्रं यस्मै स्तोतृभिः सः । अथवा कृतं वस्तं ब्रह्माभं येन स्तोतृभ्यः सः Sy.
७. ०तेराज D. वृद्धतेजाः । एवम्भूत इन्द्रो राजाभवदिति Sy.
८. राजाम् P. स्वामी Sy.
९. आसीत् Sy.
१०. सोमो P. समोः D. मधुररसस्य Sy.
११. सर्वासाम् Sy.
१२. पुरीणाम् Sy.
१३. ०रः P., D. दारकं वज्रम् Sy.
१४. प्रापत् तदा Sy.
१५. शतसङ्ख्याकैर्बलैः सार्धम् Sy.
१६. युद्धोवद्रन् P., D. अपाद्रवन् । अपलायन्त ? (पलायन्त) Sy.
१७. असुरा असुरा P., D. त्वत्सहायात् कुत्साद् बिभ्यतः पणयः एतन्नामकासुराः Sy.
१८. वदिर्ग० P., D. The passage 'द्रविर्गतिकर्मा' should immediately follow अपद्रन् and precede असुराः ।
१९. कृत्सः P.
२०. कवये—मेधाविनः । पञ्चम्यर्थे चतुर्थी Sy.
२१. ०शोर्णस्त० P., D.
२२. अर्कोऽन्नं प्राप्यतेऽस्मिन्नित्यर्कसातिर्युद्धम् । तस्मिन् Sy.
२३. हननसाधनैरायुधैः Sy.
२४. वधै शुष्ण P., D. एतन्नामकासुरस्य कुत्सस्य शत्रोः Sy.
२५. अशुष्कस्य । सम्पूर्णबलस्येत्यर्थः Sy.
२६. कपटान् Sy.
२७. ०यान्ना P., D. अन्नस्य Sy. पितुरित्यन्ननाम Ngh. 2.7.
२८. प्रातरे० P., D. प्ररिक्तानतिरिक्तान् अकरोत् । तदीयमन्नं सर्वमप्यपाहारयत् Sy.
२९. VM. ignores इन्द्र ।

महो द्रुहो अप विश्वायु धायि वज्रस्य यत्पतने पादि शुष्णः ।
उरु ष सरथं सारथये करिन्द्रः कुत्साय सूर्यस्य सातौ ॥ ५ ॥

महः । महतः । द्रोग्धुः । अपधायि । सर्वगं शरीरम् । वज्रस्य । यदा । पतने । पतितः । शुष्णासुरः । बहु कार्यम् । सः । इन्द्र. । एकं रथमास्थाय । सारथ्यं कुर्वते । कुत्साय । अकरोत् । सूर्यस्य । सम्भजने । "प्रैतशं सूर्ये" इत्युक्तम् ।

प्र श्येनो न मंदिरमंशुमस्मै शिरो दासस्य नमुचेर्मथायन् ।
प्रावन्नमीं साप्यं ससन्तं पृणग्राया समिषा सं स्वस्ति ॥ ६ ॥

प्र श्येनः । यथा । इन्द्राय । श्येन. । मदिरम् । सोममद्रेरमथ्नात् । एवं नमे. । सपपुत्रस्य । स्वपतः । बाधायामुद्युक्तस्य । नमुचेरसुरस्य । शिर. । मथायन् । त प्रकर्षेणारक्षः । ततस्तं नमी धनेन । अन्नेन । स्वस्तिना च । समयोजयत् ।

---

१. ०ह P., D.
२. शुष्णस्य सम्बन्धि Sy.
३. अव D. अपहितमकारि। तिरस्कृतमित्यर्थः Sy.
४. सर्वगतं बलमिति शेषः Sy.
५. वर्जस्य P., D.
६. पनते D. पाते Sy.
७. अगच्छत् । अभ्रियतेत्यर्थः । तदा Sy.
८. स शुष्णोऽसुरः Sy.
९. विस्तीर्णं यथा भवति तथा Sy.
१०. समानरथम् Sy.
११. सारथिभूताय Sy
१२. भजने निमित्तभूते Sy.
१३. RV.I.61.15.
१४. तथा चोक्तम् ।
कुत्सायेन्द्रोऽसुरं शुष्णं जिघांसुः कुत्समात्मनः ।
सारथिं कल्पयित्वास्य शत्रुं शुष्णमहंस्ततः ।
कुत्सस्य रक्षां बहुलां चकारेत्यनयोच्यते । Sy.
१५. ०न P., D.
१६. नेत्ययं शब्दः समुच्चये वर्तते Sy.
१७. सुपर्णश्च Sy.
१८. मदकरम् Sy.
१९. VM. seems to explain नमीम् । साप्यम् and ससन्तम् as नमेः । सपपुत्रस्य and स्वपतः ॥ नमीम् एतत्संज्ञमृषिम् Sy.
२०. सवपु० P. सपस्य पुत्रम् Sy.
२१. ०पदः P. स्वपन्तम् Sy.
२२. बाधायामुद्युक्तस्य seems to be the explanation of दासस्य ॥ किञ्चायमिन्द्रोऽपि दासस्य प्राणिनामुपक्षपयितुः Sy.
२३. एतन्नाम्नोऽसुरस्य Sy.
२४. शीर्षम् Sy.
२५. मन्थनं कुर्वन् Sy.
२६. प्रारक्षत् Sy.
२७. ०स्तनमम् P. ०स्तन्नमिम् D.
२८. पश्वादिधनेन Sy.
२९. अविनाशेन Sy.
३०. ०योचयत D. मयोचयत् P. तमृषिं समयोजयत् Sy.
३१. VM. explains प्र and सम् once only. प्रेति 'आ' इत्यस्यार्थे वर्तते । आहरत् । उपसर्गदर्शनाच्चाख्यातमध्याहृियते Sy.

वि पिप्रोरहिंमायस्य दृळ्हाः पुरो वज्रिञ्छवसा न दर्दः ।
सुदामन्तद्रेक्णो अप्रमृष्यमृजिश्वने दात्रं दाशुषे दाः ॥ ७ ॥

वि पिप्रोः[1]। विदारितवानसि । पिप्रोः[2] । आहन्त्मायस्य[3] । दृढाः[4] । पुरः[5] । वज्रिन्[6] ! बलेन । नेति[7] समुच्चयार्थीयः । शोभनदानम्[8] । पिप्रोस्तत्[9] । धनम् । अन्यैरनभिभवनीयम् । बहुत्वाद्[10] ऋजिश्वने[11] । यजमानाय[12] । दत्तवानसि[13] । बन्धुभ्यो दातव्यम्[14] ।

स वेतसुं दशंमायं दशोणिं तूतुंजिमिन्द्रः स्वभिष्टिसुंम्नः ।
आ तुग्रं शश्वदिभं द्योतनाय मातुर्न सीमुप सृजा इयध्यै ॥ ८ ॥

स वेतसुम्[15] । सः । इन्द्रः । सुष्ठ्वभ्येषणीयसुखः[16] । द्योतमानायर्षये[17] । वेतसुप्रभृतीन्[18] । उपसृष्टानकरोत्[19] । बहूनेतान्[20] । यथा[21] । मातु[22] पुत्राय वशवर्तिने एव वशमनयत् । आकारः[23] समुच्चये । सीमिति परिग्रहार्थीय[24]. । इयध्यै[25] प्रदानाय[26] गन्तुम्[27] ।

---

१. **विप्रोः** P., D.
२. **विप्रोः** P., D. **एतन्नाम्नोऽसुरस्य सम्बन्धिनीः** Sy.
३. **०न्तमा०** P., D. **आहन्त्र्यो माया यस्य** Sy.
४. **दृढानि** Sy.
५. **प्राकारादीनि दुर्गाणि** Sy.
६. **हे वज्रवन्निन्द्र ! त्वम्** Sy.
७. **नेति पादपूरणः । 'त्वं पिप्रोर्नृमणः प्रारुजः पुरः'** (RV.I.51.5.) **'शतं पुरिभिरायसीभिर्नि पाहि'** (RV.VII.3.7.) **इति दर्शनात्** Sy.
८. **हे शोभनदानेन्द्र !** Sy.
९. **तस्य स्वभूतम्** Sy.
१०. **अभि०** D. **केनाप्यबाध्यम्** Sy.
११. **०त्वान्** D.
१२. **एतन्नामकाय राजर्षये** Sy.
१३. **दत्तवते** Sy.
१४. **अदाः । दत्तवानसि** Sy.
१५. The passage beginning with **धनम्** and ending with **दातव्यम्** is omitted by P. **हविर्लक्षणं धनम्** Sy.
१६. **सुष्ठ्वभ्येषणीयान्यभिगम्यानि सुम्नानि सुखानि देयानि येन** Sy.
१७. **एतत्संज्ञाय राज्ञे** Sy.
१८. **प्रभृति** refers to **दशमायम् । दशोणिम् । तूतुजिम् । तुग्रम्** and **इभम् ॥ वेतसुनामानमसुरम् । दशमायं बहुवञ्चनम् । दशोणिमेतन्नामकं च । तूतुंजि तूतुजिनामकं च । आ अपि च तुग्रं तुग्रनामकमसुरं तथेभमेतन्नामकमसुरम्** Sy.
१९. **उपासृजत् । वशीचकार** Sy.
२०. **०हून्येतान्** D.
२१. **तत्र वृष्टान्तः । जनन्या इव पुत्रम् । यथा मात्रे पुत्रो वशीभवति तद्वद्वशं चकार** Sy.
२२. The passage beginning with **सवेतसुं** and ending with **मातुः** is omitted by P.
२३. **एव** P., D.
२४. **अपि च** Sy.
२५. **पादपूरणः** Sy.
२६. **०ध्येकरप्र०** P. **०ध्यैकं प्र०** D.
२७. **एतुम्** Sy.

स ईं स्पृधो वनते अप्रतीतो बिभ्रद्वज्रं वृत्रहणं गभस्तौ ।
तिष्ठद्धरी अध्यस्तेव गतें वचोयुजा वहत इन्द्रमृष्वम् ॥ ९ ॥

स ईम । स । एतान् । शत्रून् । स्वय भजते । शत्रुभिरप्रतिगत । बिभ्रत् । वज्रम् । शत्रूणा हन्तारम् । बाहौ । आतिष्ठति च । अश्वौ । योद्धेव । रथम् । वचोयुजौ तौ । इन्द्रम् । वहत । दर्शनीयम् ।

सनेम तेऽवसा नव्य इन्द्र प्र पूरवः स्तवन्त एना यजैः ।
सप्त यत्पुरः शर्म शारदीर्दर्द्धन्दासीः पुरुकुत्साय शिक्षन् ॥ १० ॥

सनेम । भजेमहि । नवतरं धनम् । तव । रक्षणेन । अनेन धनेन हेतुना । हविर्भि सह । मनुष्यास्त्वाम् । प्रकर्षेण स्तुवन्ति । सप्त । यदा । विशरणीया । शरस्याम्न । पुरी । दारितवान् । तदा हतवान् इन्द्र । पुरुकुत्साय । दासी सेना । वश नयन् धन वा प्रयच्छन् ।

---

१. ईं P. रं D.
२. इन्द्रः Sy.
३. इमान् वृत्रप्रभृतीन् Sy.
४. स्पर्धमानान् Sy.
५. हन्ति Sy.
६. धारयन् Sy.
७. स्वकीयमायुधम् Sy.
८. वृत्राणां शत्रूणां हन्तारम् Sy.
९. हस्ते Sy.
१०. बहावति० P. अति० D. आरोहति Sy.
११. स्वकीयावश्वौ Sy.
१२. योद्धेव P. तत्र दृष्टान्त । यथा क्षेप्ता शूरः Sy.
१३. रथेऽधितिष्ठति तद्वत् Sy.
१४. पवोयु० P. ववोयुजौ D. वचोमात्रेण युज्यमानौ । यद्वा स्तोतृणां स्तुतिभिर्युज्यमानौ Sy.
१५. तावत् P., D. हरी च Sy.
१६. महान्तम् Sy.
१७. VM. ignores अधि ।
१८. वयं स्तोतारो भजेमहि Sy.
१९. नवीयो नवतरं त्वया दीयमानं धनम् Sy.
२०. त्वदीयेन Sy.
२१. अनेन स्तोत्रेण युक्तैः Sy.
२२. मनुष्याः स्तोतारः Sy.
२३. सप्तसङ्ख्याकाः Sy.
२४. दा P.
यस्मात् कारणात् Sy.
२५. विरणी० P. विशणी० D. शर्म शर्मणा वज्रेण Sy.
२६. शरीर्नाम्नः P. शरस्याम्नोऽसुरस्य सम्बन्धिनीः Sy.
२७. विदारितवानसि तस्मात्कारणात्त्वां स्तोतारः स्तुवन्तीत्यर्थः Sy.
२८. घ्नन् हिंसन् Sy.
२९. एतन्नामकाय राज्ञे Sy.
३०. कर्मणामुपक्षपयित्रीः शत्रुप्रजाः Sy.
३१. धनानि प्रयच्छन् Sy.
३२. VM. ignores इन्द्र ।

त्वं वृध इन्द्र पूर्व्यो भूर्वरिवस्यभुशनें काव्याय ।
परा नववास्त्वमनुदेयं महे पित्रे ददाथ स्वं नपातम् ॥ ११ ॥

त्वं वृधः । त्वम् । वर्धयिता । इन्द्र ! मुख्यः । अभूः । धनमिच्छन् । कविपुत्राय । उशनसे । तथा परादत्तवानसि । महते । पित्रे । स्वपुत्रम् युद्धे त्वया गृहीतमहत्त्वयाचनाय । नववास्तुनामानम् । अनुदातव्यम् ।

उत्तरा व्याख्याता ।

त्वं धुनिरिन्द्र धुनिमतीर्ऋणोरपः सीरा न स्रवन्तीः ।
प्र यत्समुद्रमति शूर पर्षि पारया तुर्वशं यदुं स्वस्ति ॥ १२ ॥

[त्वं धुनिः ।]

तव हु त्यदिन्द्र विश्वमाजौ सस्तो धुनीचुमुरी या हु सिष्वप् ।
दीदयदित्तुभ्यं सोमेभिः सुन्वन्दभीतिरिध्मभृतिः पक्थ्यैः ॥ १३ ॥

तव । तव । एव । इन्द्र ! सङ्ग्रामे । एतत् । विश्वं कर्म भवति यत् सूक्त उक्तम् । तथा धुनिश्च

---

१. स्तोतृणां वर्धकः Sy.
२. पुरातनः Sy.
३. ०भूद् P. नवसि Sy.
४. उशनसे भार्गवाय Sy.
५. वरंद० P. तस्य शत्रुं हत्वा प्रकर्षेण वत्तवानसि Sy.
६. पालयितव्यायोशनसे Sy.
७. पुत्रे P. VM. explains स्वं and नपातम् together as स्वपुत्रम् ॥ स्वकीयमौशनसं नपातं युद्धे शत्रुभिर्गृहीतं पुत्रम् Sy.
८. ०त्व० is suggested for ०त्व० ।
९. नवपास्तु० D. एतन्नामकमसुरं पराहृत्य Sy.
१०. अनुदातव्यं धनम् Sy.
११. उत्तर व्याख्यातव्यः P.
१२. The *pratika* is supplied by the Editor. The stanza has already been explained. See RV. I.174.9. Sy. explains it again in the following manner:— हे इन्द्र ! धुनिः शत्रूणां कम्पयिता त्वं धुनिमतीर्धुनिर्नामासुरो यासु निरोधकतया विद्यते ता अप उदकानि सीरा न नदीरिव स्रवन्तीः प्रवहन्तीर्ऋणोः । अगमयः । धुनिं हत्वा तेन निरोधितान्युदकानि प्रवाहयतीत्यर्थः । हे शूर ! वीरेन्द्र ! यद्यदा समुद्रमति अतिक्रम्य प्र पर्षि प्रतीर्णो भवसि तदा समुद्रपारे तिष्ठन्तौ तुर्वशं यदुं च स्वस्ति क्षेमेण पारय । अपारयः । समुद्रमतारयः ।
१३. तादृशम् Sy.
१४. व्याप्तम् Sy. १५. किमु P.

चुमुरिश्चासुरौ[1] । अद्यापि[2] । स्वपतः[3] । त्वं यो[4] । अस्वापयः[5] । दीप्यते[6] । एव[7] । तुभ्यम्[8] । सोमैः[9] । सुन्वन्[10] । दभीतिर्नाम[11] । अग्निमिध्मैर्बिभ्रत्[12] । पचन्[13] पक्तव्यान्[14] । स्तुतिभिः[15] सह[16] ।

VI.21.

इमा उ त्वा पुरुतमस्य कारोर्हव्यं वीर हव्या हवन्ते ।
धियो रथेष्ठामजरं नवीयो रयिर्विभूतिरीयते वचस्या ॥ १ ॥

इमा[17] उ त्वा[18] । इमाः[19] । खलु[20] । त्वा[21] । बहुतमस्य[22] । स्तोतुः[23] । हवाहम्[24] । हवनकुशलाः[25] । स्तुतयः[26] । हवन्ते[27] । रथे स्थितम्[28] । अजरम्[29] । नवतरम्[30] । रयिः[31] । विभूतिश्च[32] । प्राप्यते[33] । तव[34] स्तुत्येति[35] ।

---

१. धुनिश्चासुरौ D. युनिश्वासुरौ P. इत्येतन्नामकावसुरौ Sy.
२. द्वितीयो हशब्दः पादपूरणः Sy.
३. सङ्ग्रामे सुप्तवन्तौ मृतावित्यर्थः । भूतार्थे व्यत्ययेन लट् Sy.
४. यापस्वा० P.
५. धुनिं चुमुरिं तस्मै जघन्थेत्यर्थः । 'त्वं नि दस्युं चुमुरिं धुनिं च' (RV.VII.19.4.) इति वर्शनात् Sy.
६. द्वितीयो हशब्दः पादपूरणः Sy.
७. तदनन्तरं हे इन्द्र ! त्वदर्थम् Sy.
८. सोमानभिषुण्वन् Sy.
९. राजर्षिः Sy.
१०. इध्मैर्वि० P., D. इध्मानां भर्ताऽऽहर्ता वा Sy.
११. वचत् P. पक्ववान् हवींषि पक्तवान् Sy.
१२. वक्तव्यां P. पक्तव्यां D.
१३. हविर्लक्षणैरन्नैः Sy.
१४. सहत् D.
१५. 'इमा उ त्वा' इति द्वादशर्चं षष्ठं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैन्द्रम् । नवम्येकादश्यौ च वैश्वदेव्यौ । तथाचानुक्रम्यते—'इमा उ द्वादश नवम्येकादश्यौ वैश्वदेव्यौ' (KSA. 30.21. p.22.) इति । उपहव्यनाम्न्येकाह इदं सूक्तं मरुत्वतीयनिविद्धानम् । सूत्रितञ्च—'इमा उ त्वा य एक इदिति मध्यन्दिनः' (ĀŚS. 9.7.) इति । इन्द्राविष्ण्वोरुत्क्रान्तिनाम्न्येकाहेऽपीदं मरुत्वतीयनिविद्धानम् । सूत्रितञ्च—'इमा उ त्वा द्यौर्न य इन्द्रेति मध्यन्दिनः' (ĀŚS. 9.7.) इति । तृतीये छन्दोमेऽपि मरुत्वतीय इवं सूक्तम् । सूत्रितञ्च—'प्र मन्दिन इमा उ त्वेति मरुत्वतीयम्' (ĀŚS. 8.7.) इति Sy.
१६. ०मा P.
१७. उ इति पूरणः Sy.
१८. त्वाम् Sy.
१९. पुरुतमस्य बहुलं कामं काङ्क्षतः । 'तमु अभिकाङ्क्षायाम्' इति धातुः Sy.
२०. स्तोतुर्भरद्वाजस्य सम्बन्धिन्यः Sy.
२१. हवाहं P. हव्यम् Sy.
२२. स्तुत्याः प्रशस्याः Sy.
२३. ह्वयन्ति Sy.
२४. जरारहितम् Sy.
२५. नवीयांसम् Sy.
२६. ०यि P. ०यि D. हविर्लक्षणं धनम् Sy.
२७. ०तिश्चाश्व P. जगतो विभवहेतुः Sy.
२८. त्वामभिगच्छति Sy.
२९. अपि च स्तुत्या Sy.
३०. VM. ignores वीर ॥ हे वीर ! शूरेन्द्र ! Sy.

तमु स्तुष इन्द्रं यो विदानो गिर्वाहसं गीर्भिर्यज्ञवृद्धम् ।
यस्य दिवमतिं महा पृथिव्याः पुरुमायस्य रिरिचे महित्वम् ॥ २ ॥

तमु स्तुषे । तम् । एव । स्तौमि । इन्द्रम् । यः । विद्वान् । इन्द्रस्तम् । गीर्भिः । यज्ञे वर्धितम् ।
यस्य । महत्वम् । महत्वेन । दिवम् । अतिरिरिचे । पृथिव्याश्चातिरिक्त भवति । बहुप्रज्ञस्य ।

स इत्तमो ऽवयुनं ततन्वत्सूर्येण वयुनवच्चकार ।
कदा ते मर्ता अमृतस्य धामेयक्षन्तो न मिनन्ति स्वधावः ॥ ३ ॥

स इत्तमः । सः । एव यः । तमः । प्रज्ञानरहितम् । विस्तारवत् । सूर्येण । प्रज्ञानवत् । चकार ।

---

१. स्तुषे Sy.
२. स्तौदीन्द्र P.
३. इन्द्रः Sy.
४. सर्वं विद्वान् सर्वज्ञायमानो वा Sy.
५. यज्ञैः प्रवृद्धम् Sy.
६. यज्ञ P. इन्द्रस्य Sy.
७. ०त्त्व० is suggested for ०त्व० ॥ माहात्म्यम् Sy.
८. ०त्त्वे० is suggested for ०त्वे० ॥ महिम्ना Sy.
९. दिविम् D.· दिवो द्युलोकात् । पञ्चम्यर्थे द्वितीया Sy.
१०. अतिरिच्यते तं स्तुत्र इति सम्बन्धः Sy.
११. भूलोकात् Sy.
१२. ०क्तमतिरति P.
१३. बहुप्रज्ञस्य बहुवञ्चनस्य वा Sy.
१४. VM. ignores गिर्वाहसम् । गिर्वाहसं गीर्भिर्वहनीयम् Sy.
१५. उत्तमः P., D. भरद्वाजस्यार्षम् Dur.; SKN.
१६. अत्रेतिहासमाचक्षते । वृत्रः किल महत्तमस्तानं । तेनावृतं सर्वमप्रज्ञानं बभूव । तं ततन्वत्सूर्यं दिवि, आरोपयाञ्चकारेति । तदेतेनर्धर्चेनोच्यते SKN.
१७. इन्द्रः Sy. स त्वम् Dur. स एव प्रकृत इन्द्रः SKN.
१८. एतत् Dur. इदेवार्थे SKN.
१९. यस्त्वमेवंगुणविशिष्टो हे भगवन्निन्द्र ! यथा गुणं त्वामवोचाम Dur.
२०. स येव य तुमः P.,D. अन्धकारम् Sy. शार्वरं तमः Dur.
२१. अप्रज्ञानम् । प्रज्ञाननाशनमित्यर्थः Sy. अप्रज्ञानलक्षणम् Dur. अकान्तमप्रज्ञानं वा निरुद्धसर्वदृष्टिपथमित्यर्थः SKN.
२२. वृत्रेण विस्तीर्यमाणम् Sy. स एव तं सर्वमेवेनं लोकं....सन्तनोति Dur. अत्यन्तं ततवद् विस्तीर्यमाणमित्यर्थः SKN.
२३. दिव्यारोपितेन देवेन Sy. स्वेन प्रकाशाख्येन रूपेण Dur.
२४. प्रकाशवत् Sy. 'प्राणो ह्येन्द्रः तस्मात्सूर्य उदेति प्राणाद्वेष उदेति, प्राणेऽस्तमेति' इति ह्युक्तम् । तस्मात् प्राण इन्द्रः सूर्यस्योदयहेतुः । स तं सूर्यमुदगमयत् । तेन सूर्येण वयुनवत् प्रज्ञानवत् Dur. कान्तिमत् प्रज्ञानवद्वा SKN.
२५. ०नवय्यका० P. ०नच्च० D. कृतवान् Sy. एतज्जगज्ज्ञानवत्करोति । तस्मात्स एवेन्द्र एवमुच्यते सूर्येण त्वमेतज्जगद्वयुनवत्—प्रज्ञानवच्चकार कृतवानसीत्यर्थः Dur. वृत्रं हत्वा सूर्यं दिवि, आरोपितवान् । कः ? इन्द्रः, प्रातः प्रातश्च सूर्यमुद्गमयन्नस्तं च नयति SKN.
२६. परोऽर्धर्चः प्रत्यक्षकृतः Sy. परोऽर्धर्चः प्रत्यक्षकृतत्वाद् भिन्नं वाक्यम् SKN.

कदाचिदपि[1] । मर्ता[2] । अमृतस्य[3] । तव[4] । धाम[5] । यष्ट्रमिच्छन्त[6] । शत्रुभिर्न । हिंस्यन्ते । अग्नवन्[7]-।[8]

यस्ता चकार स कुह स्विदिन्द्रः कमा जनं चरति कासु विक्षु ।
कस्ते यज्ञो मनसे शं वरायं को अर्क इन्द्र कतमः स होता ॥ ४ ॥

यस्ता चकार[10] । य[11] । तानीमानि कर्माणि । चकार[13] । स । इन्द्र । कुह[14] । स्विद् भवति[15] । क वा । जनपदम्[16] । आभिमुख्येन चरति । कासु वा । प्रजासु[17] । क.[18] । तव । यज्ञः[19] । मनसे[20] । वरणीयाय[21] । सुखकरो भवति । को वा[22] । मन्त्रः[23] । कतमो वा । सः । होतेति[24][25] ।

---

१. D. adds कदापि before कदाचिदपि ॥ सर्वदेत्यर्थः Sy. कस्मिन् काले Dur.; SKN.

२. मनुष्याः Sy., SKN. मरणधर्माणो मनुष्याः Dur.

३. नित्यस्य Sy. अमरणधर्मिणः Dur. अमरण-धर्मणः SKN.

४. त्वदीयम् Sy. यस्त्वमेवम्प्रभावस्तस्य तव Dur. तव स्वभूतम् SKN.

५. स्वर्गाख्यं स्थानम् । तत्रस्थान्देवानित्यर्थः Sy. स्थानम् Dur.
स्थानं वेद्याख्यमभिप्रेतं SKN.

६. इयक्षन्तम् इत्यपि यजतेः सन्नन्तस्यादिलोपेन रूपम् । तव स्थान वेद्याख्यमियक्षन्तः SKN.

७. किमपि प्राणिजातं न हिंसन्ति Sy. न श्रयन्ति Dur. सर्ववाऽनादिसंस्कारैः संस्कुर्वन्तीत्यर्थः SKN.

८. हे बलवन्निन्द्र ! Sy. अग्नवन् ! सर्ववैव तवापरिक्लिष्टं स्थानम् । कृतावकाशस्त्वं यज्ञे-ष्वित्यभिप्रायः Dur. स्वधाऽन्नमुदकं वा तेन तद्वत् SKN.

९. एवमिह 'तमस्ततन्वत् सूर्येण' 'वयुनवच्चकार' इत्यनेन सम्बन्धाद् वयुनशब्देन प्रज्ञानमित्युच्यत इत्युपपत्तिः । कान्त्यर्थत्वमपि क्वचिदुपेक्ष्यमिहैव वा पक्षेण योज्यम् Dur. स तमोऽप्रज्ञानं ततन्वत् । स त सूर्येण प्रज्ञानवच्चकार N.5.15.,II.347.

१०. चकरः D

११. इन्द्रः Sy.

१२. उक्तानि प्रसिद्धानि वृत्रवधादीनि कर्माणि Sy.

१३. अकरोत् Sy.

१४. क्व Sy.

१५. वर्तते Sy.

१६. देशम् Sy.

१७. प्रजासु वर्तत इतीन्द्रस्य विभूतिमहत्त्वान्न निश्चेतु शक्यते Sy.

१८. अथ प्रत्यक्षस्तुतिः । कीदृशः ? Sy.

१९. यज्ञे P., D.

२०. चेतसे Sy.

२१. वरणाय Sy.

२२. को वा को वा P.

२३. मन्त्रः समर्थो भवति Sy.

२४. होति P.D. आह्वाता । तव वरणाय यः समर्थो भवति स होता कतमश्च भवति Sy.

२५. VM. ignores इन्द्र ।

इदा हि ते चेर्विषतः पुराजाः प्रत्नास आसुः पुरुकृत्सखायः ।
ये मध्यमास उत नूतनास उताव मस्य पुरुहूत बोधि ॥ ५ ॥

इदा हि । इदानीम् । खलु । तव । सर्वं जगद् व्याप्नुवानस्य । प्रत्नाः । अभवन् । बहूनां कर्मणां कर्तः ! स्तोतारः । ततः पूर्वे च । ये । मध्यमाः । अपि च । नूतनाः । अपि च । अवमस्य मम स्तुतिम् । पुरुहूत ! बुध्यस्व ।

तं पृच्छन्तोऽवरासः परासि प्रत्ना त इन्द्र श्रुत्यानि येमुः ।
अचामसि वीर ब्रह्मवाहो यादेव विद्म तात्त्वा महान्तम् ॥ ६ ॥

तं पृच्छन्तः । तं त्वा । कीदृश इन्द्र इति पृच्छन्तः । अवराः । तव । पराणि । प्रत्नानि । श्रवणीयानि कर्माणि । अनुयच्छन्ति—स्तुतिभिर्बध्नन्ति । अर्चामः । वीर ! गीर्वाहः । त्वाम् । महान्तम् । यानि । एव चरितानि । जानीमः । तैः, द्वितीयाया आदादेशस्तृतीयायाश्चेति ।

---

१. इदानीमिव । हिशब्द उपमार्थे वर्तते Sy.
२. कर्माणि प्राप्नुवन्तः Sy.
३. पुराणा अङ्गिरःप्रभृतयः Sy.
४. बभूवुः Sy.
५. कर्ता D.
६. पूर्वस्मिन् काले जाताः Sy.
७. मध्यमकालजाः Sy.
८. ये अद्यतना यतस्तेऽपि सर्वे ते स्तोतारो बभूवुः, अतः कारणात् Sy.
९. व० P.D. अर्वाचीनस्य ममापि स्तोत्रम् Sy.
१०. बहुभिराहूतेन्द्र ! Sy.
११. तम D.
१२. उक्तगुणोपेतम् Sy.
१३. अर्चन्तः । पृच्छतिरर्चतिकर्मा Sy.
१४. अपरः P. अपराः D. अर्वाचीना मनुष्याः Sy.
१५. त्वदीयानि कर्माणि Sy.
१६. वरा० P. प्रकृष्टानि Sy.
१७. प्रहनानि P., D. पुराणानि Sy.
१८. श्रोतव्यानि Sy.
१९. अनुयमनं निबन्धनम् । स्तुतिरूपाभिर्वाग्भिर्निबबन्धुः Sy.
२०. अर्चाह P. अर्चाहा D. अर्चामः स्तुमः Sy.
२१. हे शूर ! Sy.
२२. ब्रह्माभिर्मन्त्रैर्वहनीयेन्द्र ! Sy.
२३. गीर्वाहस्त्व P.
२४. ०न्त P. महान्ति D. तथा वयमपि महान्तं प्रभूतम् Sy.
२५. यन्यव P. अव D. कर्माणि Sy.
२६. तैः कर्मभिः स्तुम इति सम्बन्धः Sy.
२७. ०तीयया P.
२८. आवेश० D. द्वितीयायाः . . . याश्च— refers to यात् and तात् ॥
२९. VM. ignores इन्द्र !

अभि त्वा पाजो रक्षसो वि तस्थे महि जज्ञानमभि तस्तु तिष्ठ ।
तवं प्रत्नेन युज्येन सख्या वज्रेण धृष्णो अप ता नुदस्व ॥ ७ ॥

अभि त्वा[1] । अभिवितिष्ठते[1]–अभिभवति । त्वा[2] । रक्षसः[3] । बलम्[4] । महत्[5] । तत्[6] । प्रादुर्भूतम्[7], अवः[8] ? त्वम् । अभिभव[9] । तव[10] । पुराणेन । योग्येन[11] । सख्या[12] । वज्रेण । हे धृष्णो[13] ! तानि रक्षासि । अपनुदस्व[14] [15] ।

स तु श्रुधीन्द्र नूतनस्य ब्रह्मण्यतो वीर कारुधायः ।
त्वं ह्या३पिः प्रदिवि पितृणां शश्वद्बभूथ सुहव एष्टौ ॥ ८ ॥

स तु श्रुधि[16] । सः[17] । तु[18] । शृणु[19] । इन्द्र[20] । सम्प्रतितनस्य[21] । स्तुतिमिच्छतः[22] । वीर ! स्तोतृणा धनः[23] । त्वम् । हि[24] । आप्तः[25] । पुराणे[26] कालेऽस्मभ्यम्[27] । पितृणाम्[28] । सर्वदा[29] । बभूथ[30] । स्वाह्वानः[31] । आभिमुख्येन यागे[32] ।

---

१. ०ष्ठते P.
अभिमुखं प्रतिष्ठते Sy.
२. हे इन्द्र ! त्वाम् Sy.
३. रक्षसां सम्बन्धि Sy.
४. सेनालक्षणं बलम् Sy.
५. महः D.
६. बलम् Sy.
७ प्रादुर्भवत् Sy.
८. अवः is doubtful.
९. अभिमुखः सन् तिष्ठ स्थिरो भव Sy.
१०. त D. त्वदीयेन Sy.
११. नियोज्येन Sy.
१२. पत्न्या D.
नित्यसहायेन Sy.
१३. हे शत्रूणां धर्षकेन्द्र ! Sy.
१४. तद्बलम् Sy.
१५. एवनु P. D. अपगतं प्रेरय। छिन्धीत्यर्थः Sy.
१६. VM. ignores सु ॥ सु सुष्ठु Sy.
१७. ०धिः D.
१८ प्रसिद्धस्त्वम् Sy.
१९. क्षिप्रम् Sy.
२०. शृणीन्द्र P.
२१. इदानीन्तनस्य Sy.
२२. ०मिच्छान्ता P., D. बह्व स्तोत्रं कर्तुमिच्छतो मम स्तोत्रम् Sy.
२३. हे कारूणां स्तोतृणां धारक ! Sy.
२४. यस्मात् कारणात् Sy.
२५. बन्धुः Sy.
२६. पूर्वस्मिन् काले Sy.
२७. कास्म० P.
२८. अङ्गिरसाम् Sy.
२९. चिरकालम् Sy.
३०. बहूथ P., D. अभूः । तस्मात् कारणान्मदीयं स्तोत्रं शृधीति सम्बन्धः Sy.
३१. ०हानः P., D.
शोभनाह्वानः सन् Sy.
३२. आयजनेऽभिकामने वा सति Sy.

प्रोतये वरुणं मित्रमिन्द्रं मरुतः कृष्वावसे नो अद्य ।
प्र पूषणं विष्णुमग्निं पुरंधिं सवितारमोषधीः पर्वतांश्च ॥ ९ ॥

प्रोतये । स्तोतः ! वरुणादीन् । अस्माकम् । रक्षणाय । प्रकुरुष्व । पुनरवस इति पूरणम् । वाक् पुरन्धिः । वरुणादिदेवतेयमिति ।

इम उ त्वा पुरुशाक प्रयज्यो जरितारो अभ्यर्चन्त्यर्कैः ।
श्रुधी हवमा हुवतो हुवानो न त्वावाँ अन्यो अमृत त्वदस्ति ॥ १० ॥

इम उ त्वा । इमे । त्वाम् । बहुधन ! प्रकर्षेण यष्टव्य ! स्तोतारः । अभ्यर्चन्ति । स्तोत्रैः । आश्रुधि । हवम् । हूयमानस्त्वम् । न । त्वत्सदृशः । अन्यः । त्वत्तः कश्चित् । अस्ति । अमृतः ।

नू म आ वाचमुप याहि विद्वान्विश्वेभिः सनो सहसो यजत्रैः ।
ये अग्निजिह्वा ऋतसाप आसुर्ये मनुं चक्रुरुपरं दसाय ॥ ११ ॥

नू म आ वाचम् । क्षिप्रम् । मदीयाम् । वाचम् । उपागच्छ । जानन् । सर्वैः । देवैः । हे बलस्य,

---

१. अस्यामृचि विश्वे देवाः स्तूयन्ते । हे भरद्वाज ! Sy.
२. ०णदीन् P. D. आदि refers to मित्रम् । इन्द्रम् । मरुतः । पूषणम् । विष्णुम् । अग्निम् । पुरन्धिम् । सवितारम् । ओषधीः and पर्वतान् ॥ रात्र्यभिमानिनं च मित्रमहरभिमानिनं चेन्द्रं च प्रसिद्धं मरुतो मरुद्गणांश्च पूषणमेतत्संज्ञकं च विष्णुं सर्वव्यापिनं देवं पुरन्धिं पुरुधियं पुरुकर्माणमग्निम्, सवितारं सर्वस्य प्रेरकं देवमोषधीरोषध्यभिमानिनो देवान् पर्वतांश्चाद्रीनित्येतान् देवानस्माकं तर्पणाय रक्षणाय च प्रकुरुष्व । स्तुत्याभिमुखीकुरु Sy.
३. तर्पणाय Sy.
४. अभिमुखीकुरुष्व Sy.
५. पुनः स P.
६. VM. ignores अद्य ॥ अद्य इदानीम् Sy.
७. इममु D.
८. हे बहुशक्ते ! Sy.
९. हे प्रकृष्टेन यजनीयेन्द्र ! Sy.
१०. अभिष्टुवन्ति Sy.
११. अर्चनीयैः स्तोत्रैः Sy.
१२. अश्रु० P. शृणु Sy.
१३. हवं व P. हवं व D. स्तोत्रम् Sy.
१४. स्तूयमानस्त्वम् Sy.
१५. VM. reads अमृतः for अमृत ॥ हे अमरणशीलेन्द्र ! Sy.
१६. VM. ignores उ and हुवतः ॥ अभिष्टुवतो मम Sy.
१७. P. reads नू for आ ।
१८. इयं च वैश्वदेवीत्युक्तम् Sy.
१९. मदीयाः Sy.
२०. स्तुतिरूपाणि वचांसि Sy.
२१. आगच्छ । एवम्भूतमिन्द्रं प्रार्थयत । ऐन्द्रत्वात्सूक्तस्य Sy. २२. सर्वज्ञस्त्वम् Sy.
२३. सर्वदेवैः Sy.
२४. यजनीयैः Sy.

पुत्र[1] ! ये देवाः । अग्न्यास्याः[2] । यज्ञस्पृशः[3] । भवन्ति । ये[4] वा । मनुष्यम्[5] । कुर्वन्ति[6] । उप्तमवस्थितं शत्रूणाम् । उपक्षपणाय[7] ।

स नो बोधि पुरएता सुगेषूत दुर्गेषु पथिकृद्विदानः ।
ये अश्रमास उरवो वहिष्ठास्तेभिर्न इन्द्राभि वक्षि वाजम् ॥ १२ ॥

स नः[8] । सः अस्माकम् । बुध्यस्व[10] । पुरोगन्ता । सुगेषु[11] । दुर्गेषु[12] । च पथिषु[13] । पथां[14] कर्ता । विद्वान्[15] पथः । ये[16] । अश्रमाः[17] श्रान्तिमगच्छन्तः[18] । वोढृतमा अश्वाः[19] । तेभिः[20] । इन्द्र ! अस्माकम्[21] । सङ्ग्रामम्[22] । अभिवह[23] ।

VI.22.

य एक इद्धव्यश्चर्षणीनामिन्द्रं तं गीर्भिरभ्यर्च आभिः ।
यः पत्यते वृषभो वृष्ण्यावान्त्सत्यः सत्वा पुरुमायः सहस्वान् ॥ १ ॥

य एकः[24] । यः[25] । एकः[26] । एव । आह्वातव्यः[27] । मनुष्याणाम्[28] । इन्द्रम्[29] । तम् । आभिः[30] । स्तुतिभिः[31] ।

---

१. हे सहसः सूनो ! बलस्य पुत्र ! इन्द्र ! Sy.
२. ०स्य P. अग्निर्जिह्वास्थानीयो येषां ते Sy.
३. ऋतं यज्ञं स्पृशन्तः Sy.
४. ये च देवाः Sy.
५. मनुं राजर्षिम् Sy.
६. कृतवन्तः । तैः सहागच्छेति पूर्वेण सम्बन्धः Sy.
७. ०तः P. दस्यूनामुपरिभवम् Sy.
८. ०क्ष(प)णा० D. शत्रूणामुपक्षपणाय Sy.
९. त्वम् Sy.
१०. भव । बोधीति भवतेर्लोण्मध्यमपुरुषैकवचनस्य छान्दसं रूपम् Sy.
११. सुखेन गन्तव्येषु Sy.
१२. Omitted by P. दुःखेन गन्तव्येषु Sy.
१३. D. adds च after पथिषु ॥ मार्गेषु Sy.
१४. पथा D. वर्त्मनाम् Sy.
१५. सर्वं विद्वान् Sy.
१६. अश्वाः सन्ति Sy.
१७. ०मा P., D. श्रमरहिताः Sy.
१८. ०न्तिग० P.
१९. येऽश्वाः सन्ति Sy.
२०. तैरश्वैः Sy.
२१. अस्मभ्यम् Sy.
२२. अन्नम् Sy.
२३. VM. ignores उरवः ॥ उरवः महान्तः Sy.
२४. 'य एक इत्' इत्येकादशर्चं सप्तमं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैन्द्रम् । तथा चानुक्रान्तम्—'य एक एकादश' (KSA.30.22.p.22.) इति । आभिप्लविके प्रथमेऽहनि दशरात्रस्य प्रथमेऽहनि च माध्यन्दिनसवने ब्राह्मणाच्छंसिशस्त्रेऽहीनसूक्तस्य स्थाने त्रीणि सम्पातसूक्तानि । तेष्विदं द्वितीयं सूक्तम् । सूत्रितञ्च—'य एक इद्यस्तिग्मभृङ्गः' (ĀŚS.7.5.) इति । उपहव्यनाम्न्येकाहेऽपीदं निष्केवल्यनिविद्धानम् । 'सूत्रितञ्च—'य एक इदिति मध्यन्दिनः' (ĀŚS.9.7.) इति Sy.
२५. इन्द्रः Sy.
२६. एव P., D.
२७. ह्वातव्यः Sy.
२८. प्रजानामापत्सु Sy.
२९. ०न्द्रः D.
३०. ०भि D. स्तुतिरूपाभिः Sy.
३१. सूतिभिः D. वाग्भिः Sy.

अभिष्टौमि[1]। यः। पतति[2]। स्तोतृषु वर्षिता[3]। वीर्यवान्[4]। सत्यकर्मा[5]। सादयिता[6]। बहुप्रज्ञः। बलवान्[7]।

तमु नः पूर्वे पितरो नवग्वाः सप्त विप्रासो अभि वाजयन्तः।
नक्षद्दाभं ततुरिं पर्वतेष्ठामद्रोघवाचं मतिभिः शविष्ठम् ॥ २ ॥

तमु[8]। तम्[9]। एव[10]। अस्माकम्। पितरः[11]। पूर्वे[12]। सप्त[13]। अङ्गिरसः[14]। अभ्यर्चन्ति। अन्नमिच्छमानाः[15]। व्याप्तानामसुराणां दम्भितारम्[16]। तरणशीलम्[17]। मेघस्थितम्[18]। अनतिक्रमणीयवचनम्[19]। स्तुतिभिः।

---

१. अभिषौमि P., D.
२. वतति D. स्तोतॄनभिगच्छति। यद्वा लोकानामीष्टे Sy.
३. कामानां वर्षिता Sy.
४. बलवान् Sy.
५. अविसम्वादी Sy.
६. शत्रूणां सादयिता कामानां दाता वा। सदेर्वा सनोतेर्वेदं रूपम् Sy.
७. अभिभवनवान्। तमिन्द्रमभिष्टौमीति सम्बन्धः Sy.
८. भरद्वाजस्येदमार्षम् Dur. भरद्वाजस्य SKN.
९. इन्द्रम् Sy., Dur. तं प्रकृतमिन्द्रम् SKN.
१०. उ इति पादपूरणः SKN.
११. एवम्भूताः पितरः अङ्गिरसः Sy. पितृगणाः Dur. अङ्गिरःप्रभृतयः SKN.
१२. प्रत्नाः Sy. पूर्वजाः SKN.
१३. सप्तसङ्ख्याकाः Sy. सप्तसङ्ख्याकाः। ये पुराणेषु पठ्यन्ते। अथवा 'सप्त' सृप्ताः पूर्वतरमस्माल्लोकादमुं लोकं ते च Dur. सप्तसङ्ख्याकाः SKN.
१४. It seems to be the explanation of नवग्वाः ॥ नवभिर्मासैः सत्रमनुष्ठितवन्तः Sy. नवगतयः, अभिनवा हि तेषां गतिः, अर्द्धमासेऽर्द्धमासे भवति पितृयज्ञं प्रत्यागन्तुम्। अथवा नवनीतगतयो नवगतयः। नवनीते हि तेषां मनसो गतिर्भवति 'इदमस्माकं स्यादिति' Dur. पार्वणाङ्गभावेन प्रतिमासमागमनाद् नवगतयः। तथा च 'अङ्गिरसो नः पितरो नवग्वाः' (RV. X.14.6.) इत्यादौ सर्वत्र नवभिर्मासैः सिद्धि गतत्वाद् नवग्वा अङ्गिरस उच्यन्ते SKN.
१५. तुष्टुवुरिति शेषः Sy.
१६. वाजमन्नं हविर्लक्षणमिन्द्रस्य कुर्वन्तः। इन्द्रं वा वाजिनं बलिनं कुर्वन्तः 'तत्करोति' इति णिच् Sy. स्तुवन्त आसते Dur. अभीष्टं ते धनं याचितवन्त इति शेषः। कुत एतद् वाजयन्त इति ? 'लक्षणहेत्वोः क्रियायाः' (Pa 3.2.126.) इति श्रुतेः साकाङ्क्षत्वात् परस्यां चर्चि स्वयं धनस्य याचमानत्वात् SKN.
१७. मसु० P. नक्षद्दाभम्। नक्षतिर्गतिकर्मा। अभिगच्छतां शत्रूणां दम्भितारं हिंसितारम् Sy. किंलक्षणं पुनरिन्द्रं मतिभिरभिवाजयन्त आसत इति ? उच्यते,....योऽभिव्यापनमात्रेणापि दभ्नोति, किमुत वधेन तम्....एवमत्र शब्दसारूप्यादर्थोपपत्तेश्च योऽभ्यशनेन दभ्नोति स नक्षद्दाभ उच्यते Dur. कीदृशम् ? उच्यते,....दभ्नातिर्वधकर्मा। युद्धार्थं नक्षतामभिगच्छतां प्राप्नुवतां वा, केषाम् ? सामर्थ्याच्छत्रूणां हन्तारम् SKN.
१८. तमरण० P. तरितारम् Sy. यश्च त्वरणशीलस्तम् Dur. त्वरितारम् SKN.
१९. मेघे स्थि० P. पर्वतेष्ववस्थितम् Sy. यश्च मेघस्थायी तम् Dur. पर्वतो मेघस्तस्मिन् हन्तव्ये स्थातारम् SKN.
२०. अति० P., D. अद्रोग्धव्यानतिक्रमणीया वागाज्ञारूपा यस्य तम् Sy. यस्य चाद्रोग्धव्या वाक्, अनतिक्रमणीयेत्यर्थः। तम् Dur. अद्रोग्धव्यवचनमनतिक्रमणीयवाचमित्यर्थः SKN.

बलवत्तमम् ।[१] [२]

तमीमहे इन्द्रमस्य रायः पुरुवीरस्य नृवतः पुरुष्चोः ।
यो अस्कृधोयुरजरः स्ववान्तमा भर हरिवो मादयध्यै ॥ ३ ॥

तमीमहे[३] । तम्[४] । याचामहे । इन्द्रम्[५] । इमम् । रयिम्[६] । बहुवीरम्[७] । पुरुषवन्तम्[८] । बहुशब्दम्[९] । यः[१०] । अस्कृधोयु[११], अत्र यास्क· 'नक्षद्दाभम् । अश्नुवानदाभम । अभ्यशनेन दभ्नोतीति[१२]' 'अस्कृधोयुरकृध्वायुः । कृध्वित[१३] ह्रस्वनाम[१४] । निकृत्त[१५] भवति[१६]' इति । अजर[१७]· । स्ववान्[१८] । त रयिम्[१९] । आभर[२०] । हे हरिव[२१] !

---

१. यश्च बलिष्ठस्तम् । य एवंगुणविशिष्ट इन्द्रस्त मतिभिरभिवाजय त आसते । सोऽस्माकमिदं नाम करोत्वित्येवमाशीर्योज्या Dur.

२. VM. ignores विप्रासः ॥ विप्रासः मेधाविनः Sy. विप्राः प्राप्तप्रज्ञाः पितृलोकेऽवस्थिताः Dur. मेधाविनः SKN.
नक्षद्दाभम् । अश्नुवानदाभम् । अभ्यशनेन दभ्नोतीति वा । 'नक्षद्दाभं तर्तुरि पर्वतेष्ठाम्' इत्यपि निगमो भवति N. 6. 3., SKN. II.396.

३. वयमात्मनः पुत्रम् Dur. यमङ्गिरसोऽपि याचितवन्तस्तम् SKN.

४. ईश्वरम् Dur.

५. इदम् Sy. आह यः किंलक्षणः पुत्र इति ? सोऽस्य Dur. अत्र निर्धारणे षष्ठी । अस्य सर्वस्य स्तोत्रभिलषितस्य SKN.

६. धनम् Sy. धनस्य परिपालने भोगे च समर्थः Dur. रायो धनस्य SKN.

७. बहुपुत्रपौत्रयुक्तस्य Sy. बहुवीरैस्तद्वतः Dur. बहुभिर्वीरैः पुत्रैः पौत्रैश्चोपेतस्य SKN.

८. परिचारकजनसहितस्य Sy. दासैस्तद्वतः Dur. परिचारकमनुष्यैस्तद्वतः SKN.

९. बह्वन्नस्य बहुयशसः । द्वितीयार्थे षष्ठी Sy. बहुनिवासस्य, अनेकप्रकारस्येत्यर्थः Dur. 'क्षि निवासगत्योः' प्रहृत्य बहुषु स्थानेषु निवसितुः स्थापयितव्यस्येत्यर्थः । धर्मादिषु वा विनियोग· । गन्तुरेवं हि गुणस्य धनस्य मध्ये SKN.

१०. रयिः Sy. न च परिपालनसमर्थ एव यः केवलमल्पकालस्तमीमहे, किं तर्हि ? यश्च Dur.

११. अविच्छिन्नः Sy. अकृध्वायुर्वीर्घायुरित्यर्थः । एवमत्र 'अस्कृधोयुः' इत्यनेन दीर्घायुरुच्यते तस्याभीष्टत्वाच्च शब्दसारूप्याच्च Dur. चिरस्थायी पुत्रपौत्रानुगत इत्यर्थः । अथवा अन्यथा व्युत्पाद्यते—अस्कृ, इत्येतत्तावत् करोते रूपं न कृन्तनेः । धोशब्दस्तु दधातेर्वा दानार्थस्य । अकृतदानो यादृशो न कस्मैचिदपि त्वया दत्तपूर्व इत्यर्थः । अकृतपानो वाऽभुक्तपूर्वो वा केनचिदित्यर्थः SKN.

१२. नक्षदाभमश्नुवानदभशनेन दभ्नेतीति P. नक्षदाभमश्नवानदभशनेन दभ्नेतीति D.
N.6.3. adds वा after इति । The passage 'नक्षत्...दभ्नोतीति' should be put in the commentary on the previous stanza.

१३. ०रस्कृ० P.

१४. D. adds कृध्वायुः before कृध्वित ।

१५. ०स्वाना० P., D.

१६. निरुक्तं P., D.

१७. भजतीति P. भजतिति D. N.6.3.

१८. जराहानिरहितः Sy. यो दृढशरीर इत्यर्थः Dur. जरा हानिस्तर्द्जितोऽक्षय इत्यर्थः SKN.

१९. सर्वान् P., D. सुखयुक्तः Sy. यः सुष्ठु शत्रूणामीरयिता Dur. सर्वैः सर्वविशेषैर्युक्तं याच्यमानश्च SKN.

२०. य एवंगुणविशिष्टः पुत्रस्तम् Dur. तमेवमर्थम् SKN.

२१. आहर Sy. देहि SKN.

२२. हे हरिवन् ! स्वकीयाश्वोपेतेन्द्र ! त्वम् Sy. हरी अश्वौ ताभ्यां तद्वन् ! SKN.

मादयितुमस्मान्[1][2]।

तन्नो वि वोचो यदि ते पुरा चिज्जरितारं आनशुः सुम्नमिन्द्र ।
कस्ते भागः किं वयो दधर्षि खिद्रः पुरुहूत पुरुवसोऽसुरघ्नः ॥ ४ ॥

तन्नः[3]। तत्[4]। अस्माकम्[5]। विविच्य[6]। ब्रूहि। यदि। ते[7]। पूर्वस्मिन् काले। स्तोतारः। आनशुः। सुखम्। इन्द्र ! कः। तव। सुखहेतुभागः[8]। किं वा। अन्नम्[9]। हे दुर्धर ! खेदयितः[10] ! शत्रूणाम्। पुरुहूत ! बहुधन[11] ! असुराणां हन्तुः।

तं पृच्छन्ती वज्रहस्तं रथेष्ठामिन्द्रं वेपी वक्वरी यस्य नू गीः ।
तुविग्राभं तुविकूर्मिं रभोदां गातुमिषे नक्षते तुभ्रमच्छ ॥ ५ ॥

तं पृच्छन्ती[12][13]। तमिन्द्रम्। पृच्छन्ती[14] क्व वर्तत[15] इति प्रश्नः। वज्रहस्तम्[16]। रथे स्थातारम्[17]। बहूनां ग्रहीतारम्[18]। बहूनां कर्तारम्[19]। बलस्य[20] दातारम्। गन्तव्यम्[21]। इच्छति[22]। अभिगच्छति। प्रेरयितारम्[23] कमित्याह। इन्द्रम्[24]। वेपनशीला[25]। उच्यमाना[26]। स्तुतिः[27]। यस्य[28] स्तोतृभिः[29]। क्षिप्रम्[30]। अभि गच्छतीति[31]।

---

१. अस्माकमात्मनश्च मदनाय तर्पणायेत्यर्थः Dur. मोदनाय तर्पणाय वाऽस्माकम् SKN.

२. अथवा अस्य राय इति द्वितीयार्थे षष्ठी न निर्धारणे । योऽस्कृधोयुरित्यादिरप्यायुस्सम्बन्धात्तद्दीर्घत्वं....मनुष्याणां प्रसिद्धतरत्वात् पुत्रस्य प्रतिनिदेशोऽयं न धनस्य। तेनायमर्थः—अस्य राय इदमभिलषितं धनं पुरुवीरादियुक्तं याचामहे। किञ्च योऽस्कृधोयुर्दीर्घायुर्जरावर्जितः स्ववान्, सर्वैश्च गुणैस्तद्वान्, तद्वतः पुत्रमाहरेति समानम् SKN.
N.6.3., SKN. II. 396–397.

३. तम् P., D. सुखम् Sy.

४. D. adds अपि after अस्माकम् ।

५. विब्रूहि Sy. ६. तव Sy.

७. ०गं P., D. यज्ञेषु को भागः कल्पतः Sy.

८. हविर्लक्षणमन्नं किं कल्पतम् ? यदि केचिच्चिरन्तनाः पूर्वकालेऽपि त्वत्तः सकाशात् सुखं लेभिरे तर्ह्यहमपि तत्सुखं लप्स्य इति विचार्य सुखप्राप्तिविलम्बो ममासोढव्यो भवेदित्यर्थः Sy. ९. हे शत्रूणां खेदयितः ! Sy.

१०. Omitted by P., D. हे पुरुवसो ! इन्द्र ! Sy. ११. ०न्तु P., D.

१२. ०न्ति P.

१३. पूर्वयोपलब्ध इन्द्र ऋषये कामान्प्रायच्छत् ततः स कामपूर्ण ऋषिराह Sy.

१४. ०न्द च्छति P. ०न्ति D. अर्चयन्ती । पृच्छतिरर्चतिकर्मा Sy. १५. वर्तं P.

१६. वज्रपाणिम् Sy. १७. स्थितम् Sy.

१८. गृ० P., D. तुवीनां बहूनां ग्रहीतारम् Sy.

१९. बहुकर्माणम् Sy. २०. रभसो दातारम् Sy.

२१. स यजमानः गातुं सुखम् Sy.

२२. गच्छति Sy.

२३. वव्रेरयि० P. पप्रे० D. म्लापयितारं शत्रुम् Sy.

२४. किमि० P. २५. इन्द्र P., D.

२६. वेपो यागादिलक्षणं कर्म । तद्वती Sy.

२७. उच्चमा० P. गुणानां वक्त्री Sy.

२८. ईदृशी स्तुतिः Sy.

२९. यजमानस्य भवति Sy.

३०. नु इति पूरणः Sy.

३१. अभिमुखं गच्छति Sy.

अया ह त्यं मायया वावृधानं मनोजुवा स्वतवः पर्वतेन ।
अच्युता चिद्वीळिता स्वोजो रुजो वि दृळ्हा धृषता विरप्शिन् ॥ ६ ॥

अया ह । अनया । खलु । तम् । मायया । वर्धमान वृत्रम् । मनोवेगेन । वज्रेण । हे स्वभूतवेग ! वि रुज. । अच्युतानि । दृढानि तस्य पुराणि । च । शोभनबल । अधृष्टेन । दृढानि । महन् !

तं वो धिया नव्यस्या शविष्ठं प्रत्नं प्रत्नवत्परितंसयध्यै ।
स नो वक्षदनिमानः सुवह्नेन्द्रो विश्वान्यति दुर्गहाणि ॥ ७ ॥

तं वो धिया । तम् । यूयम् । स्तुत्या । नवतरया । बलवत्तरम् । प्रत्नम् । यथा प्रत्ना ऋषय पर्यगृह्णन् तथा । परितसयितुमिच्छत । स. । अस्मान् । अतिवहतु । अमात्र । सुष्ठु वोढा इन्द्रः । विश्वानि । दु.खन गाहितव्यानि ।

आ जनाय द्रुह्वणे पार्थिवानि दिव्यानि दीपयोऽन्तरिक्षा ।
तपा वृषन्विश्वतः शोचिषा तान्प्रत्नवद्विधे शोचय क्षामपश्च ॥ ८ ॥

आ जनाय । आदीपय प्रज्वलय । मनुष्याणा द्रोग्धे । राक्षसजनाय । दिव्यानि । अन्तरिक्ष्याणि ।

---

१. प्रसिद्धम् Sy.
२. मनोवद्गच्छता Sy.
३. अनेन बहुपर्वणा स्वकीयेनायुधेन वज्रेण । 'वज्रेण शतपर्वणा' (RV.I.80.6.) इति वर्शनात् Sy.
४. हे स्वभूतबलेन्द्र ! त्वम् Sy
५. विशेषेणाभाङ्क्षीः भग्नवानसि Sy.
६. P., D. read द्युरुच्युतानि for वि रुजः अच्युतानि ॥ विनाशरहितान्यपि Sy.
७. हे शोभनतेजः ! Sy.
८. धर्षकेण वज्रेण Sy.
९. Omitted by P. धृढानि D. वीळितान्यशिथिलीकृतानि Sy.
१०. महत् P., D. हे महन् ! इन्द्र ! त्वम् Sy.
११. त्वाम् Sy.
१२. ०र P., D. बलवत्तमम् Sy.
१३. प्रश्नम् P., D. पुराणम् Sy.
१४. प्रश्ना P., D. चिरन्तना ऋषय इव Sy.
१५. पर्यरितस० P., D. परितो विस्तारयितुम् । अहं प्रवृत्तोऽस्मीति शेषः Sy.
१६. इन्द्रः Sy. १७. अस्मभ्यम् Sy.
१८. ०हतु P. १९. अपरिमाणः Sy.
२०. शोभनवहनः Sy.
२१. समस्तानि Sy. २२. दुर्गाणि Sy.
२३. आसमन्तात्तापय Sy.
२४. आजीवय प्रज्व P.
२५. साधुजनानां द्रोग्धुः Sy.
२६. जनस्य राक्षसादेः । षष्ठ्यर्थे चतुर्थी Sy.
२७. दिवि भवानि Sy.
२८. आन्त० P. अन्तरिक्षे भवानि Sy.

पार्थिवानि[1] च स्थानानि यथा राक्षसजनस्तेषु[2] न तिष्ठेत्[3]। तप[4] च। तान्[5]। वर्षितः[6]! तेजसा[7]। सर्वतः[8]। कर्मद्विषे[9]। शोचय पृथिवीम्। अन्तरिक्षम्[10]। च।

भुवो जनस्य दिव्यस्य राजा[11] पार्थिवस्य जगतस्त्वेषसंदृक्।
धिष्व वज्रं दक्षिण इन्द्र हस्ते विश्वा अजुर्य[16] दयसे वि मायाः॥ ९॥

भुवः। भवसि। जनस्य। दिवि भवस्य। राजा[11]। तथा पार्थिवस्य च। जङ्गमस्य च। हे दीप्त-सन्दर्शन[12]! धारय[13]। वज्रम्। इन्द्र! हस्ते। दक्षिणे। विश्वाश्च[14]। शत्रूणा मायाः। क्षपयेति[15]। [16]

आ संयतमिन्द्र णः स्वस्ति शत्रुतूर्याय बृहतीममृध्राम्।
यया दासान्यार्याणि वृत्रा करो वज्रिन्त्सुतुका[31] नाहुषाणि॥ १०॥

आ संयतम्[17]। आकुरु[18]। अस्माकम्[19]। सङ्ग्रामम्[20]। अविनाशहेतुम्[21]। शत्रूणा तरणाय[22]। महान्तम्[23]। अहिंसितम्[24]। येन[25] सङ्ग्रामेण। असुराश्च[26]। आर्याश्च[27]। नहुषैर्मनुष्यैरस्माकमुपपादितानि[28]। वृत्राणि[29]। सुतु-कानि[31]। करोषि[32]। तुकस्तजतेर्हिंसाकर्मणोऽनायासेन हिंसितानि करोषीति[33]।[34]

---

१. पृथिव्यां भवानि Sy.
२. सज्जन० P. सजन० D.
३. तव P. दह Sy.
४. राक्षसादीन् Sy.
५. हे कामानां वर्षितरिन्द्र ! त्वम Sy.
६. त्वदीययां दीप्त्या Sy.
७. सर्वतो विद्यमानान् Sy.
८. ब्राह्मणद्वेष्ट्रे राक्षसादये। ब्रह्मद्विषं दग्धुमित्यर्थः Sy.
९. दीपय Sy.
१०. आप इत्यन्तरिक्षनाम Ngh. 1.3.
११. ईश्वरः Sy.
१२. हे दीप्तदर्शनेन्द्र ! Sy.
१३. निधेहि Sy.
१४. तेन च वज्रेण विश्वाः सर्वाः Sy.
१५. विबाधसे। 'बय वानाहिंसागतिरक्षणेषु' इति धातुः Sy.
१६. VM. ignores अजुर्य and वि॥ हे जरयितुमशक्येन्द्र ! त्वम् Sy.
१७. भं च तं P. भंयतं D.
१८. आभर Sy.
१९. अस्मभ्यम् Sy.
२०. स्रम् P. स्रमम् D. संयन्तीं सङ्गच्छमानाम् Sy.
२१. क्षेमलक्षणां सम्पदम् Sy.
२२. शत्रूणां तारणाय Sy.
२३. महतीम् Sy.
२४. अहिंसिताम् Sy.
२५. यया स्वस्त्या Sy.
२६. कर्महीनानि मनुष्यजातानि Sy.
२७. सुरैराश्चर्यैश्च P. असुरैरार्याश्चर्यैश्च D. आर्याणि कर्मयुक्तानि Sy.
२८. ०हू० P. मनुष्यसम्बन्धीनि Sy. नहुषा इति मनुष्यनाम Ngh. 2.3.
२९. ०मुपादि० P.
३०. शत्रून् Sy.
३१. सुतानि P., D. शोभनाहिंसोपेतानि Sy.
३२. अकरोः Sy.
३३. ०तेर्हि० P., D.
३४. VM. ignores इन्द्र and वज्रिन्॥ हे वज्रवन्निन्द्र।

स नो नियुद्भिः पुरुहूत वेधो विश्ववाराभिरा गहि प्रयज्यो ।
न या अदेवो वरते न देव आभिर्याहि तूयमा मंद्रयद्रिक् ॥ ११ ॥

स नः । सः । अस्मान् । आगच्छ । अश्वैः । विश्ववरणीयैः । पुरुहूत ! विधातः ! प्रकर्षेण यष्टव्य ! न । या नियुतः । वारयति । असुरः । नापि । देव । आभिर्नियुद्भिः । क्षिप्रम् । आयाहि । मदभिमुखम् ।

VI.23.

सुत इत्त्वं निमिश्ल इन्द्र सोमे स्तोमे ब्रह्मणि शस्यमान उक्थे ।
यद्वा युक्ताभ्यां मघवन्हरिभ्यां बिभ्रद्वज्रं बाह्वोरिन्द्र यासि ॥ १ ॥

सुत इत्त्वम् । सुते । एव । सोमे । त्वम् । इन्द्र । आत्मानमभिमुख श्रयसि । बृहति वा । स्तोमे । गीयमाने । उक्थे वा शस्यमाने । यत् वा युद्धार्थं गच्छसीति वदति, यद्वेति स्पष्टम् ।

---

१ त्वम् Sy.
२. ०श्वैः P.
३. ०वर० P. विश्ववैवरणीयाभिः सम्भजनीयाभिः Sy. ४. प्रकृष्टेन यजनीयेन्द्र ! Sy.
५. न य न याः P., D. यान् Sy.
६. अश्ववान् Sy.
७. ०भिश्नयुद्भिः P. नद्भिः D.
८. आगच्छ Sy.
९. वभि० P. मदभिमुखः सन् । अद्रयागमस्य द्विर्वचनं छान्दसम् Sy.
१०. VM. explains आ once only.
११. 'सुत इत्' इति दशर्चमष्टमं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैन्द्रम् । 'सुत इद्दश' (KSA.30.23. p.22.) इत्यनुक्रान्तम् । विषुवति निष्केवल्य इव सूक्तम् । सूत्रितञ्च—'सुत इत्त्वमेष प्र पूर्वीः' (ĀŚS.8.6.) इति । महाव्रतेऽपि इदमादीनि त्रीणि सूक्तानि । तथैव पञ्चमारण्यके सूत्रितम्—'सुत इत्त्वं निमिश्ल इन्द्र सोम इति त्रीणि' (ĀĀ.5 22.) इति Sy.
१२. इत्वं P., D.
१३. अभिषुते सति Sy.
१४. त्वान्द्र D.
१५. ०त्म० P.
१६. श्रेयसि P. आत्मानमभिमुखं श्रयसि seems to be the explanation of निमिश्लः ॥ निमिश्रः सन् हरी संयोजयन् Sy.
१७. बृहति महति Sy.
१८. स्तोत्रे Sy.
१९. उच्चार्यमाणे सति Sy.
२०. शस्त्रे Sy.
२१. By यद्वा VM. refers to the second hemistich ॥ हे मघवन् ! धनवन्निन्द्र ! त्वं बाह्वोर्हस्तयोर्वज्रं स्वकीयमायुधं बिभ्रद्धारयन् युक्ताभ्यां रथे नियुक्ताभ्यां हरिभ्यामश्वाभ्यां यासि यद्वाऽऽगच्छसीति यच्च तत्सोमेऽभिषुत इति सम्बन्धः Sy.

यद्वा॑ दि॒वि पार्ये॑ सुष्वि॑मिन्द्र वृत्र॒हत्येऽवं॑सि॒ शूर॑सातौ ।
यद्वा॒ दक्ष॑स्य बि॒भ्युषो॒ अबि॑भ्युदर॑न्धयः शर्धत इन्द्र॒ दस्यू॑न् ॥ २ ॥

यद्वा । यदा । वा॑[1] । दिवसे । युद्धस्य[2] । अभिषोतारमेतशं सूर्येण[3] पस्पृधानम्[4] । संग्रामे । रक्षसि । शूरैः[5] सम्भजनीये । यदा । वा॑[6] । दक्षस्य[7] प्रजापनेः । दस्युभ्यो बिभ्युष[8] । अबिभ्यत्[9] । तान्[10] दस्यून्[11] । वेग कुर्वाणान्[12] । वशमनयः[13] तदा च न मिश्रयति[14] ।

पाता॑ सु॒तमिन्द्रो॑ अस्तु॒ सोमं॑ प्रणे॒नीरु॒ग्रो ज॑रि॒तार॑मू॒ती ।
कर्ता॑ वी॒राय॒ सुष्व॑य उ लो॒कं दाता॒ वसु॑ स्तुव॒ते की॒रये॑ चित् ॥ ३ ॥

पाता । सुतम्[15] । सोमम् । इन्द्रः । पाता[16] । भवतु ताच्छील्येन । तथा स्तोतार च । अत्यन्त[17] प्रणयतु । रक्षणेन[18] । उद्गूर्णः[19] । कर्ता[20] । वीराय[21] । सुन्वानाय[22] । लोकम्[23] । दाता[24] । च[25] । अन्नम्[26] । स्तुवते[27] । स्तोत्रेऽस्त्विति[28] ।

---

१. वेति समुच्चये Sy.
२. ०सेन्तिमे P.
३. पार्ये प्राप्तव्ये सति Sy.
४. ०तरम् P. अभिषोतारं यजमानम् Sy.
५. सूर्ये P.
६. वस्पृधान P. वस्पृ० D.
७. भटैः Sy. ८. वेति समुच्चये Sy.
९. यज्ञादिषु समर्थस्य Sy.
१०. ०ष P., D. शत्रुभ्यो बिभ्यतो जनस्य Sy.
११. समभ्यन् P. समभ्यत् D. भीतिरहितः सन् Sy.
१२. Omitted by P.
१३. उपक्षपयितॄन् शत्रून् Sy.
१४. सङ्ग्राम उत्सहमानान् Sy.
१५. शम P., D. वशीकरोषीति यच्च तत्सर्वं सोमेऽभिषुत इति पूर्वेण सम्बन्धः । तथा चोक्तम् ।
यद्वाह्वोर्धारयन् वज्रं हरिभ्यां यासि वृत्रहन् !
यच्च रक्षसि सङ्ग्रामे नृन् सोममभिषुण्वतः ॥
यच्च कर्मसु दक्षस्य यजमानस्यापारयः ।
वशीकरोषि तांस्तस्मै बिभ्यते भीतिवर्जितः ॥
तत्सोमेऽभिषुते स्तोत्रशस्त्रयोश्च प्रवृत्तयोः ।
इति द्वृचोऽप्यमेकार्थः सुत इत्त्वमिति द्वयम् ॥इति.। Sy.
१६. VM. ignores इन्द्र ।
१७. सु P. सुं D. अभिषुतम् Sy.
१८. पानशीलः । तृन्नन्तत्वात् 'न लोकाव्ययनिष्ठा० इति षष्ठीप्रतिषेधः Sy.
१९. प्रकर्षेण नेता Sy.
२०. ऊत्या मार्गेण Sy.
२१. कर्ता । दातेत्यर्थः Sy.
२२. यज्ञादिकर्मसु दक्षाय Sy.
२३. सोमाभिषवं कुर्वते यजमानाय Sy.
२४. स्थानम् Sy.
२५. दा P. २६. चिदिति चार्थे Sy.
२७. धनम् Sy. २८. स्तोत्रं कुर्वते Sy.
२९. कीरिरिति स्तोतृनाम Ngh. 3.16.
३०. VM. ignores उ ॥ उ इति पादपूरणः Sy.

गन्तेयन्ति सवना हरिभ्यां बभ्रिर्वज्रं पपिः सोमं ददिर्गाः ।
कर्ता वीरं नर्यं सर्ववीरं श्रोता हवं गृणतः स्तोमवाहाः ॥ ४ ॥

गन्तेयन्ति । त्रीणि । सवनानि । अश्वाभ्याम् । बभ्रिरिति स्पष्टम् । कर्ता । पुत्रम् । नृहितम् । सर्ववीरम् । श्रोता । आह्वानम् । स्तुवतः । स्तोत्रैरुह्यमानः ।

अस्मै वयं यद्धावान् तद्विविष्म इन्द्राय यो नः प्रदिवो अपस्कः ।
सुते सोमे स्तुमसि शंसदुक्थेन्द्राय ब्रह्म वर्धनं यथासत् ॥ ५ ॥

अस्मै । इन्द्रप्रीत्यर्थम् । वयम् । यदिन्द्र । भजते । तानि । आप्नुम परिगृह्णीम । इन्द्राय । य । पुराण. । उदकानि । करोति । सुते । सोमे । स्तुम इमम् । अथ तदर्थ होता चोक्थानि । शसतु । यथा । इन्द्राय । स्तोत्रम् । वर्धनम् । भवति ।

ब्रह्माणि हि चकृषे वर्धनानि तावत्त इन्द्र मतिभिर्विविष्मः ।
सुते सोमे सुतपाः शंतमानि रान्द्रया क्रियास्म वर्चणानि यज्ञैः ॥ ६ ॥

ब्रह्माणि । स्तोत्राणि । हि । करोषि । आत्मनो वर्धनानि । यावत् तव पर्याप्त भवति स्तोत्र तावत् ।

---

१. It seems to be the explanation of इयन्ति ॥ हवयस्थानि त्रीणि Sy.
२ आश्वा० P., D. हरिभ्यां स्वकीयाभ्याम् Sy.
३. बभ्रीरि० P. By बभ्रिरिति VM. means बभ्रिः । वज्रम् । पपिः । सोमम् । ददिः and गाः ॥ भर्ता धारकः । वज्रं स्वकीयमायुधम् । सोममभिषुतम् । पपिः पाता । गाः । ददिर्दाता Sy. ४. यजमानाय दाता Sy.
५. मनुष्यहितम् Sy.
६. पुत्रेण हितं स्वभूत सर्वं P. पुत्रेण हितं स्वभूत सर्ववीर D. बहुपुत्रोपेतम् Sy.
७. श्रावकः Sy.
८. ०त ह्वानम् P. स्तोत्रम् Sy.
९. स्तोतुः सम्बन्धि Sy.
१०. ०त्रैरुह्यमानं P. ०नं D. स्तोमैः स्तोत्रैर्वहनीयः Sy.
११. VM. ignores गन्ता ॥ इन्द्रः गन्ता गमनशीलो भवतु Sy.
१२. इन्द्र (वेगं कुर्वाणा) प्रीत्यर्थम् D. इन्द्राय S\.
१३. यदिदिन्द्रः P., D. अयमिन्द्रो यत्स्तोत्रादिकम् Sy. १४. कामयते Sy.
१५. त व्याप्नुमः P. व्याप्नुमः कुर्म इत्यर्थः Sy.
१६. योमः P. इन्द्रः Sy.
१७. पोषणादिकं कर्म Sy.
१८. अभिषुते सति Sy.
१९. इन्द्राय स्तोत्राणि कुर्मः Sy.
२०. इमथ P., D. २१. शस्त्राणि Sy.
२२. शंसन्तः । प्रथमाबहुवचनस्य लुक् Sy.
२३. इन्द्रार्थम् Sy.
२४. हविर्लक्षणमन्नम् Sy.
२५. यथा वृद्धिकरं स्यात् तथा कुर्म इत्यर्थः Sy.
२६. VM. ignores नः ॥ नः अस्मदर्थम् Sy.
२७. यस्मात्कारणात् Sy.
२८. कृतवानसि तस्मात्कारणात् Sy.
२९. स्वयमेव वृद्धिकराणि Sy.
३०. तावन्ति तादृशानि स्तोत्राणि Sy.

ते[1] । इन्द्र ! बुद्धिभिः । परिगृह्णीम[2] । सुते । सोमे । सुतस्य[3] पात. ! सुखतमानि[4] । रमणीयानि[5] । कुर्मः[6] । तव वाहकानि[7] ब्रह्माणि[8] । हविर्भिः[9] सह ।

स नो बोधि पुरोळाशं ररांणः पिबा तु सोमं गोऋजीकमिन्द्र ।
एदं बर्हिर्यजमानस्य सीदोरुं कृधि त्वायत उ लोकम् ॥ ७ ॥

स नो बोधि[10] । सः । अस्मदीयम् । बुध्यस्व । पुरोडाशम्[11] । रममाणः । पिब[12] । इन्द्र ! सोमम् । गोमिश्रणमृजुतम[13] पयसा मिश्रितम् । आसीद[14] । इदम् । बर्हिः । यजमानस्य[15] । विस्तीर्णम् । कुरु[16] । त्वत्कामस्य मम । लोकम्[17] ।[18]

स मन्दस्वा ह्यनु जोषमुग्र प्र त्वा यज्ञासं इमे अश्नुवन्तु ।
प्रेमे हवासः पुरुहूतमस्मे आ त्वेयं धीरवस इन्द्र यम्याः ॥ ८ ॥

स मन्दस्व[19] । स[20] । पर्याप्तम्[21] । अनुमन्दस्व[22] । उद्गूर्ण[23] ! त्वाम्[24] । इमे । सोमाः[25] । प्राप्नुवन्तु च । इमानि । स्तोत्राणि[26] । अस्मदीयानि । आयच्छतु[27] । त्वाम् । इन्द्र ! कर्मास्मद्दीयम्[28] । रक्षणायास्माकम्[29] ।[30]

---

१. तुभ्यम् Sy.
२. ०म P. व्याप्नुमः । वर्धनानि स्तोत्राणि मम यथा भवेयुस्त्वं तादृशानि कल्पितवानसि Sy.
३. हे अभिषुतस्य सोमस्य पातः ! त्वाम् Sy.
४. सुखमातमानि P., D. सुखकृत्तमानि Sy.
५. P. adds कुर्वित्यर्थः वयं यदिदिन्द्रो भजते तव् न्याप्नुमः परिगृह्णीम इन्द्राय यो नः पुराण after रमणीयानि। The additional passage in P. has a striking resemblance with the commentary on the previous stanza. रान्द्रधाणि रमणीयानि Sy.
६. करवाम Sy.
७. वाहकानि स्तोत्राणि Sy.
८. ब्राह्मणि D.
९. हविर्भिर्युक्तानि Sy.
१०. त्वम् Sy. ११. एतल्लक्षणं हविः Sy.
१२. पिन्वशीम् P., D. पिबेः Sy.
१३. ०तम P. गामि० ०तम D. गोविकारदध्यादिभिः संस्कृतमभिषुतम् Sy.
१४. अभिविश Sy.
१५. तदर्थं च यजमानस्य सम्बन्धि Sy.
१६. का० P. त का० D. त्वामिच्छतो यजमानस्य Sy. १७. स्थानम् Sy.
१८. VM. ignores तु and उ ॥ तु क्षिप्रम्। उ इति पूरणः Sy.
१९. मन्द्रस्व P., D.
२०. त्वम् Sy.
२१. कामानुगुणं यथा भवति तथा Sy.
२२. मोदस्व Sy.
२३. हे उद्गूर्णबलेन्द्र ! Sy.
२४. P. and D. add प्रा अश्नवन्तु before त्वाम् ।
२५. यज्ञाः सोमाः Sy. २६. हवाः Sy.
२७. आस्म० D. २८. नियच्छतु Sy.
२९. कर्मा० P. स्तुतिः Sy.
३०. VM. ignores हि । प्र । पुरुहूतम् and इयम् ॥ हिशब्दः पादपूरणः । हियोगे मन्द-स्वेत्याख्यातस्य व्यत्ययात्स्वानुदात्तत्वम् । हे बहुभिराहूतेन्द्र ! Sy.

तं वः सखायः सं यथा सुतेषु सोमेभिरीं पृणता भोजमिन्द्रम् ।
कुवित्तस्मा असति नो भराय न सुष्विमिन्द्रोऽवसे मृधाति ॥ ९ ॥

तं वः । तम् । यूयम् । हे सखाय. ! यथान्येषु । सोमेषु । एन पूरयामासुः । एवमेनं भोजयितारम् । इन्द्रम् । सोमैः । सम्पूरयत । बहु । अस्माकम् । विद्यते । इन्द्रस्य । भरणार्थम् । न च । सुष्विम् । इन्द्र । रक्षितुम् । क्लिष्टो भवति अनायासेन रक्षति ।

एवेदिन्द्रः सुते अस्तावि सोमे भरद्वाजेषु क्षयदिन्मघोनः ।
असद्यथा जरित्र उत सूरिरिन्द्रो रायो विश्ववारस्य दाता ॥ १० ॥

एवेदिन्द्रः । एवम् । इन्द्र. । सुते । सोमे । स्तुत । भरद्वाजेषु । निवसन् । एव सोमम् । इन्द्रस्य । भवति । यथा । सूरिः । इन्द्र. । जरित्रे । भवति सः । धनस्य । विश्ववेवरणीयस्य । दाता स्तथान्ताविति ।

---

१. इन्द्रम् Sy.
२. हे स्तोतारः ! Sy.
३. थास्येषु P.
४. सोमेषु अभिषुतेषु सत्सु Sy.
५. एतम् Sy.
६. पूरमा० D.
पूरयिता० P.
७. दातारम् Sy.
८. इन्द्राय Sy.
९. यथाकामं सम्पूरयत Sy.
१०. बहूपकरणम् Sy. कुविविति बहुनाम Ngh.3.1.
११. अस्तु Sy.
१२. भरणाय पोषणाय Sy.
१३. Omitted by P.
१४. अभिषवणशीलं यजमानम् Sy.
१५. सुष्ठ्विन्द्रः P., D.
१६ तर्पणाय Sy.
१७. अक्लिः P., D.
१८. न बाधते Sy.
१९. अभिषुते सति Sy.
२०. स्तुतोऽभूत् Sy.
२१. भरद्वाजे अग्नि Sy.
२२. ग्निववसन् P.
निववसन् D.
ईश्वरः Sy.
२३. धनवतो हविष्मतो यजमानस्य Sy.
२४. सन्मार्गे प्रेरकः Sy.
२५. ०त्रेव P., D.
स्तोत्रे Sy.
२६. भवेत् Sy.
२७. नस्य P. स्य D.
२८. यथा दाता भवेत् Sy.
२९. ०स्ताव० P. तथा स्तावीति is suggested for स्त्थान्ताविति ।
३०. VM. ignores इत् ।

VI.24.

वृषा मद इन्द्रे श्लोक उक्था सचा सोमेषु सुतपा ऋजीषी ।
अर्चन्त्र्यो मघवा नृभ्य उक्थैर्युक्तो राजा गिरामक्षितोतिः ॥ १ ॥

[1]वृषा । [2]वर्षिता । [3]सोम[4] । स्तोत्रम् । उक्थानि च । [6]इन्द्रे । [7]सङ्गच्छन्ते सङ्गता भवन्ति । [9]सोमेषु । [10]सुतस्य पात्रेन्द्रः[11] ! ऋजीषवान्[12] । अर्चनीय[13] । मघवान्[14] । मनुष्येभ्य[15] । शस्त्रै । दीप्त[16] । स्तुतीनाम् । राजा[17] । अक्षीणरक्षण[18]: । अर्चमर्चनन्तदहस्तथोक्त[19]: ?

ततुरिर्वीरो नर्यो विचेताः श्रोता हवं गृणत उर्व्यूतिः ।
वसुः शंसो नरां कारुधाया वाजी स्तुतो विदथे दाति वाजम् ॥ २ ॥

[20]ततुरि[21]: । सङ्ग्रामं ततुरि[22]: । वीर[23]: । नृहित[24]: । विशिष्टचेता[25]: । स्तुवत[26] । स्तोत्रम् । श्रोता । [27]विस्तीर्णरक्षण[28]: । वासयिता । [29]नराम् । शसनीय । स्तोतृणा धर्ता । [31]बलवान् । [32]स्तुत[33]: । यज्ञे । प्रय-च्छति[34] । अन्नम् ।

---

१. तृतीये ऽनुवाके विंशति सूक्तानि । तत्र 'वृषा मदः' इति दशर्चं प्रथमं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैन्द्रम् । 'वृषा' (KSA. 30.24.p. 22.) इत्यनुक्रान्तम् । विष्णुवति निष्केवल्य एतत्सूक्तम् । सूत्रितञ्च—'वृषा मदः प्र मंहिष्ठाय' (ĀŚS.8.6) इति Sy.

२. यजमानस्य कामानां वर्षको भवति । यद्वा सर्वजनह्लादकस्य वर्षणस्य कर्ता भवति Sy.

३. सोमपानजनितो मदः Sy.

४. स्तोत्ररूपः शब्दो वृषा भवति Sy.

५. उक्थेन शस्त्रेण Sy.

६. इन्द्र P., D.

७. सह Sy.

८. सङ्गच्छतो भवति P., D.

९. सोमवत्सु यागेषु Sy.

१०. अभिषुतस्य सोमस्य Sy.

११. पात्रेन्द्रः P., D.

१२. ऋजीषं गतरसमपि सोमं न परित्यजन् Sy.

१३. धनवान् स चेन्द्रः Sy.

१४. स्तुतीनां नेतृभ्यः Sy.

१५. द्युलोकनिवासी Sy.

१६. ईश्वर इन्द्रः Sy.

१७. ०रक्षिणम् P. ०रक्षिणः D. अक्षीणरक्षश्च भवति Sy.

१८. The passage अर्च . . . . थोक्तः should immediately follow अर्चनीयः ॥ तवर्हः is suggested for तदहः ।

१९. ततूरिः D. २०. शत्रूणां हिंसकः Sy.

२१. वीर D. विक्रान्तः Sy.

२२. ०ते P. नरहितः Sy.

२३. ०ष्टचे० P. विविक्तज्ञानः Sy.

२४. स्तुवतः स्तोतृजनस्य Sy.

२५. अस्मदीयं स्तोत्रम् Sy.

२६. विस्तृतरक्षः Sy.

२७. नरा P. नृणां स्तोतृजनानाम् Sy.

२८. स्तोतॄन् P. कारूणां स्तोतृणां धारयिता एवम्भूत इन्द्रो वाजं ददातीति सम्बन्धः Sy.

२९. ०वां P. अन्नवानिन्द्रः Sy.

३०. अस्माभिः स्तुतः सन् Sy.

३१. अस्मभ्यं ददाति Sy.

अक्षो न चक्र्योः शूर बृहन्त्र तें मह्ना रिरिचे रोदस्योः ।
वृत्रस्य नु ते पुरुहूत वया व्यू१तयो रुरुहुरिन्द्र पूर्वीः ॥ ३ ॥

अक्षः । यथा । महान् । अक्षः । चक्रयोर्निगच्छत्येवम् । द्यावापृथिवी भित्वा । तव । महत्वमुभयतः । निर्जगाम । वृक्षस्य । इव । ते । पुरुहूत ! शाखास्तव । ऊतयः । विरुरुहुः । इन्द्र ! बह्वयः ।

---

१. भरद्वाजो बार्हस्पत्यः पारिक्षितोऽस्यास्त्रिष्टुभः पूर्वेणार्द्धर्चेनेन्द्रं स्तुत्वा उत्तरेणोपालब्धवान् Dur. भरद्वाजस्यार्षम् SKN.

२. अत्र वृष्टान्तः Sy. इव Dur.

३. अन्तरेणापि भावप्रत्ययं बृहत्त्वेऽयं बृहच्छब्दः । बृहत्त्वं महत्त्वं देवैश्वर्यलक्षणम् SKN.

४. रथसम्बन्ध्यक्षः यथा चक्राभ्यां बहिर्गतस्तद्वत् Sy.

५. चक्रयोः सकाशात् SKN.

६. द्यावापृथिव्योः Sy. कुतोऽतिरिच्यते ? रोदस्योर्द्यावापृथिव्योः Dur. द्यावापृथिव्योः सकाशात् SKN.

७. भित्त्वा is suggested for भित्वा ॥ विनिर्भिद्य द्यावापृथिव्यौ तयोः परितोऽप्यस्तीत्यर्थः SKN.

८. तव तव D. त्वदीयः Sy.
तव स्वभूतम् SKN.

९. ०स्व० is suggested for ०त्व० ॥ महिमा Sy. महत्त्वेन विभूतिः Dur. मह्ना—अयमपि महत्त्वे महच्छब्दः, महत्त्वेन । अथवा बृहन्नित्यक्षस्य विशेषणम् । मह्नेत्यपि प्रथमार्थे तृतीया । महान् योऽक्षः स यथाऽतिरिच्यते, एवं तव महत्त्वम् SKN.

१०. अतिरिच्यते द्यावापृथिवीभ्यामित्यर्थः Sy. प्रकर्षेणातिरिच्यते Dur. प्रत्येषोऽति, इत्यस्य स्थाने । विरिरिचे, अतिरिच्यते SKN.

११. तत्र वृष्टान्तः । नु यथा Sy.

१२. न्त P. त्वदीयाः Sy. एते तव स्वभूताः SKN.

१३. हे बहुभिराहूतेन्द्र ! Sy.

१४. शाखा विरोहन्ति तद्वत् Sy. तथापि चैवं विभूतियुक्तस्य सतस्तव त्वदुक्तानामेवास्माकं सतां वृक्षस्येव वयाः शाखाः. . . . वयाः शाखाः इति पर्यायवचनः । वेतेर्वया इति निगमप्रसक्तस्य निर्वचनम् । शाखाः खशया इति पर्यायप्रसक्तस्य Dur. 'वयाः शाखाः' वेतेर्गत्यर्थस्य । ता हि वृक्षस्य स्कन्धतो जनित्वा तिरश्चीना अन्तरिक्षे गच्छन्ति । 'वातायना भवन्ति' इति द्वितीयं निर्वचनम् । वातोऽयनो यासां वातेन याश्चाल्यन्त इत्यर्थः । वातायनाः, पृषोदरादित्वाद्वाशब्दस्य ह्रस्वत्वेन तशब्दस्य च लोपेन नकारस्य च वया उच्यन्ते । यथाऽत्रैतदस्माभिर्दर्शितमेव सर्वत्र निर्वाच्येऽर्थे दर्शिते तद्वचनस्य शब्दस्य वर्णानां पृषोदरादित्वाल्लोपविकारविपर्ययाविना यथा रूपसिद्धिस्तद्दर्शयितव्यम् । . . 'शाखाः खशायाः शक्नोतेर्वा' इति । वया इत्यस्यार्थस्य प्रदर्शनार्थमुपात्तस्य शाखाशब्दस्य प्रसङ्गेनैते निर्वचने । शाखा वृक्षस्य स्कन्धतो जनित्वा ख आकाशे शेरते व्यवतिष्ठन्ते । शक्नुवन्ति च पक्षिणः स्वं च पुष्पफलं धारयितुम् SKN.

१५. रक्षाः Sy. अस्मद्यज्ञागमनमार्गाः Dur. त्वयि धनमददति दारिद्र्यादस्मास्वयजत्सु इदानीं तवागमनाद्वृतयोऽस्मद्यज्ञागमनमार्गाः SKN.

१६. पिरु० D. विशेषेण रोहन्ति Sy. खिलीभूतास्तवात्रागमनात् । अहो कष्टं मन्दभागधेयतास्माकम् । येषां नो धनं तवस्ति येन त्वा यजेमहि । किमत्र त्वां यक्ष्याम इति Dur. विरूढास्तृणादिभिराच्छादिता इत्यर्थः SKN.

१७. बाह्वं P. बह्वयं D. पूर्वाः Dur. पूर्वे, यैस्त्वमतीते काल आगतवानसि SKN.

१८. VM. ignores शूर ॥ हे विक्रान्तेन्द्र ! Sy. वृक्षस्येव ते पुरुहूत शाखाः । वयाः शाखाः वेतेः । वातायना भवन्ति । शाखाः खशायाः । शक्नोतेर्वा N. 1.4., SKN. I. 50.,51.

शचीवतस्ते पुरुशाक शाका गवामिव स्रुतयः संचरणीः ।
वत्सानां न तन्तयस्त इन्द्र दामन्वन्ता अदामानः सुदामन् ॥ ४ ॥

शचीवतः । प्रज्ञावतः । ते । बहुसहाय ! सहाया भवन्ति । गवामिव । सञ्चरणाधिकरणभूताः । मार्गा गोभिः परिवृता भवन्ति त्वां यजन्त इति । वत्सानाम् । इव । तन्तय शत्रूणा बन्धनाय । दामन्वन्तः । तव शाकाः । स्वयमबन्धका भवन्ति । शोभनदान ! शोभनबन्धन ! इति ।

अन्यदद्य कवरमन्यदु श्वोऽसच्च सन्मुहुराचक्रिरिन्द्रः ।
मित्रो नो अत्र वरुणश्च पूषार्यो वशस्य पर्येतास्ति ॥ ५ ॥

अन्यत् । अन्यत् । अद्य । कर्म । अन्यत् । एव । श्व । अकल्याणम् । च शत्रुम् । मित्रविषयम् । मुहु. । आभिमुख्येन करोति । इन्द्र. । तस्मिन्नस्मिन् कर्मणि । ईश्वरस्येन्द्रस्य । मित्रादिदेव । ईश्वर.

---

१. त्वदीयाः Sy.
२. हे बहुकर्मन्निन्द्र ! Sy.
३. शक्तयः कर्माणि वा सर्वतः सञ्चरन्तीति शेषः Sy.
४. गवायामिव P. गवयामिव D. तत्र दृष्टान्तः । धेनूनां यथा Sy.
५. सर्वत्र सञ्चारिणो भवन्ति तद्वत् Sy.
६. मार्ग P., D.
७. वत्साहामितिव P. वत्साहामिव D.
८. तन्तिर्नाम दीर्घप्रसारिता रज्जुः । यत्र नियतैर्विशाखदामभिर्बहवो वत्सा बध्यन्ते । तथा तन्तयो बहूनां वत्सानां बन्धकाः Sy.
९. ०णामबन्धनाय P. ०णामबलन्धानाय D.
१०. बन्धनवन्तः । बहूनां शत्रूणां बन्धकाः Sy.
११. स्वदीयाः शाकाः Sy.
१२. स्वयमन्यैरबद्धाः Sy.
१३. बलन्धनवेति P. ०बलन्धनवेति D.
१४. VM. ignores इन्द्र ।
१५. अस्मिन् दिवसे Sy.
१६. कर्म करोति Sy. कर्वरमिति कर्मनाम Ngh. 2.1.7.
१७. उक्तविलक्षणमेव कर्म Sy.
१८. अन्यस्तदे P., D.
१९. परस्मिन् दिने करोति Sy.
२०. एतदेव विन्नियते । असच्चाशुभमशनिपातनादिकम् Sy.
२१. शत्रूमित्रविषय P. ०त्रुमित्रवि० D. वर्षणादिकं शोभनं कर्म च । यद्वा त्रिशिरसो विश्वरूपस्य वधादिकमसत्कर्म लोकोपद्रवकारिणो वृत्रादेरसुरस्य वधादिरूपं सत्कर्म च Sy. २२. पुनः पुनः Sy.
२३. कर्ता भवति । एवं परस्परविलक्षणं कर्म स्वमहिम्ना पुनः पुनरावर्तयन् प्रतिदिवसमन्यदेव परेषामसाधारणं कर्म करोतीत्यर्थः Sy.
२४. एवंविध इन्द्रः Sy.
२५. अस्मिन् यज्ञे Sy.
२६. वशस्य कामयितव्यस्य फलस्य स्वर्गादेः Sy.
२७. आदि refers to मित्रः । वरुणः and पूषा ॥ मित्रः अहरभिमानी देवः । वरुणो रात्र्यभिमानी देवः । पूषा पोषको देवः Sy.
२८. अर्यः प्रेरकः सवितैते चैन्द्रेण नियम्यमाना अस्मदीयस्य कामस्य परिगमयितारः सन्तु । यद्वा मित्रावयोऽप्यत्र स्वप्राधान्येनाभिधीयन्ते। मित्रादय इन्द्रः प्रत्येकमस्मदीयस्य कामस्य पर्येतास्तु । तथा बृहद्देवतायामुक्तम्—'प्रोतयेऽन्यदिति त्वेते वैश्वदेव्यावृचौ स्मृते' इति Sy.
BD. V.106. reads 'प्रोतये नू म इत्येते वैश्वदेव्यावृचौ स्मृते' ।

अभवत्[1] । परितो गन्ता[2] । भवति साहाय्यार्थम्[3] ।

वि त्वदापो[4] न पर्वतस्य पृष्ठादुक्थेभिरिन्द्रानयन्त यज्ञैः[5] ।
तं त्वाभिः सुष्टुतिभिर्वाजयन्त आजिं न जग्मुर्गिर्वाहो[6] अश्वाः[7] ॥ ६ ॥

वि त्वदापः । व्यनयन्[8] । त्वत्तः[9] । कामान्[10] स्तोत्रैः[11] । हविर्भिश्च । उदकानि[12] । इव । मेघस्य[13] । पृष्ठात्[14] । तम्[15] । त्वा । आभिः[16] । सुष्टुतिभिः[17] । बलिन कुर्वाणाः[18] स्तोतारः[19] । गच्छन्ति[20] । सङ्ग्रामम्[21] । इव । अश्वाः[22] । हे गीर्भिरुह्यमान[23] ! [24]

न यं जरन्ति शरदो[25] न मासा[26] न द्याव इन्द्रमवकर्शयन्ति[27] ।
वृद्धस्य चिद्वर्धतामस्य तनूः[28] स्तोमेभिरुक्थैश्च शस्यमाना[29] ॥ ७ ॥

न यम् । न । यम्[30] । जरयन्ति[31] । मासाः[32] । शरदः[33] । च । यम्[34] च । तेजांसि[35] । न । अवकर्षयन्ति[36] । वृद्धस्य[37] । अपि । वर्धताम्[38] । तनूः[39] । स्तोमैः[40] । उक्थैः[41] । च । शस्यमाना[42] ।[43]

---

१. परिगमयिता Sy.
२. ०न्ति P., D. भवतु । अस्ति—अस्तेर्नेटि रूपम् Sy.
३. VM. ignores नः and च ॥ नोऽस्माकम् Sy.
४. स्तोतारः कामान् आत्मनो विविधं प्रापयन्ति Sy.
५. त्वत्सकाशात Sy.
६. कामांस्तो P. कामं स्तो० D. उक्थैः शस्त्रैः Sy.
७. ०कान् P.
८. तत्र दृष्टान्तः । यथा तद्वत् Sy.
९. अग्नेः Sy.
१०. उपरिभागात् Sy.
११. प्रसिद्धम् Sy.
१२. त्वाम् Sy.
१३. पूर्वोक्ताभिः Sy.
१४. ०ष्ठात् त्वत्तान्त्वाभिस्सुष्ठुति० P. ०ष्ठात् त्वत्तस्त्वाभिष्टुति० D. शोभनाभिः स्तुतिभिः Sy.
१५. बलिनं कुर्वन्तः । यद्वा वाजमन्नमिच्छन्तः भरद्वाजाः स्तोतारः Sy.
१६. प्रापुः Sy.
१७. क्षिप्रगमने दृष्टान्तः । यथा शीघ्रं प्रापुस्तद्वत् Sy.
१८. वाहाः Sy.
१९. ०रुह्य P. ०रुह्याः D. गीर्भिः स्तुतिरूपाभिर्वाग्भिर्बहनीयेन्द्र ! Sy.
२०. VM. ignores इन्द्र ।
२१. इन्द्रम् Sy.
२२. अपक्षीणयन्ति Sy.
२३. संवत्सराः Sy.
२४. इन्द्रम् Sy.
२५. दिवसाश्च यमिन्द्रं नावकर्शयन्ति नाल्पीभावयन्ति Sy.
२६. ०कर्हयन्ति P. अपक० D. नाल्पीभावयन्ति Sy.
२७. वृत्रस्य P., D. प्रवृद्धस्य Sy.
२८. पुनर्धातामनु P. पुनर्धातामनु D. for वर्धताम् ॥ प्रवृद्धा भवतु Sy.
२९. तनुः P., D. शरीरम् Sy.
३०. अस्मदीयैः स्तोत्रैः Sy.
३१. शस्त्रैश्च Sy.
३२. ०नाः P. स्तूयमाना सती Sy.
३३. VM. ignores अस्य ॥ अस्य इन्द्रस्य Sy.

न वीळवे नमते न स्थिराय न शर्धते दस्युजूताय स्तवान् ।
अजा इन्द्रस्य गिरयश्चिदष्वा गम्भीरे चिद्भवति गाधमस्मै ॥ ८ ॥

न वीळवे । न । दृढाय । नमते । न च । स्थिराय । न च । उत्सहमानाय । दस्युभिः परिवृताय । स्तवान् स्तूयमान । अवक्षेपणीया । इन्द्रस्य । पर्वता । अपि । महान्तो भवन्ति । अगाधे । अपि तीर्थे । गाधम् । इन्द्राय । भवति, इच्छते ।

गम्भीरेण न उरुणामत्रिन्प्रेषो यन्धि सुतपावन्वाजान् ।
स्था ऊ षु ऊर्ध्व ऊती अरिषण्यन्नक्तोर्व्युष्टौ परितक्म्यायाम् ॥ ९ ॥

गम्भीरेण । हे अमत्रवन् ! अस्मभ्यम् । अगाधेन । विस्तीर्णेन । प्रयच्छ । अन्नानि । सुतस्य पात ! ऊर्ध्वं । तिष्ठ । अहिंसन् । रक्षणायास्माकम् । रात्रेः । व्युष्टौ, अह्नि । परितक्म्यायां रात्रौ च ।

सचस्व नायमवसे अभीक इतो वा तमिन्द्र पाहि रिषः ।
अमा चैनमरण्ये पाहि रिषो मदेम शतहिमाः सुवीराः ॥ १० ॥

सचस्व । सेवस्व । नेतारम् । रक्षणाय । युद्धे । तथेत । च । हिंसितुः । तम् । रक्ष । तथा गृहे ।

---

१. वृद्धगात्राय यजमानाय Sy.
२. नगमते P.D. वशीभवति Sy.
३. Omitted by D.
४. युद्धेऽविचलिताय न नमते Sy.
५. ०त्साह० D.
६. कर्मव्रजितैः प्रेरिताय यजमानाय न वशीभवति । यद्यपि स्तोतारो बहुगुणाः सन्ति तथापीन्द्रस्तेभ्यो न वशीभवतीत्यर्थः Sy.
७. स्तोत्रवान् P., D.
८. अस्माभिः स्तूयमान इन्द्रः Sy.
९. अवाक्षे० P., D. अजाः सुगमनाः क्षेपणीया भवन्ति Sy.
१०. इन्द्रा P. इन्द्र D.
११. स्थाने Sy.
१२. गाथम् P. गाधं स्थानम् Sy.
१३. इन्द्रा P., D.
१४. It is an epithet of इन्द्राय or अस्मै ।
१५. अमत्रं बलम् । तद्वन् ! Sy.
१६. केनापि दुरवगाहेन Sy.
१७. ०र्णे P., D. विस्तीर्णेन मनसा Sy.
१८. प्रा० D. १९. प्राच्छन्नानि P.
२०. हे सुतस्य सोमस्य पातः ! इन्द्र ! Sy.
२१. उद्युक्तः Sy.
२२. ०ष्ठं हिंसन्रक्ष० P. रक्षायै Sy.
२३. ०त्रे D. २४. विवासेऽह्नि Sy.
२५. ०तत्म्यायां P.
२६. VM. ignores वाजान् । उ and सु ॥ वाजान् बलानि च । सु सुष्ठु Sy.
२७. कर्मणां स्तुतीनां च नेतारम् Sy.
२८. सङ्ग्रामे Sy.
२९. अस्मात् सनिकृष्टाच्च रिषः शत्रोः, अमुतो विप्रकृष्टाच्छत्रोश्च Sy.
३०. वा P. वाशब्दोऽनुक्तेन विवक्षितेन समुच्चयार्थः Sy. ३१. शत्रोः Sy.
३२. त P., D. स्तोतारम् Sy.
३३. अमेति गृहनाम Ngh. 3.4.

अरण्ये[1] । च । एनम् । रक्ष । हिंसितुः[2] । मदेमेति[3] गतम्[4] ।

VI.25.

या त ऊतिरवमा या परमा या मध्यमेन्द्र शुष्मिन्नस्ति ।
ताभिरू षु वृत्रहत्येऽवीर्न एभिश्च वाजैर्महान्न उग्र ॥ १ ॥

या ते[5] । अवममध्यमोत्तमानि[6] । यानि[6] । भवन्ति[7] । तव[8] । रक्षणानि[9] । तैः । अस्मान् । सङ्ग्रामे[10] । सुष्ठु[10] । रक्ष[11] । अग्ने[12] । च । एभिः[13] । महान्[13] । अस्मान्[14] । उद्गूर्ण[15] । [16]

आभिः स्पृधो मिथतीररिषण्यन्नमित्रस्य व्यथया मन्युमिन्द्र ।
आभिर्विश्वा अभियुजो विषूचीरार्याय विशोऽवं तारीर्दासीः ॥ २ ॥

आभिः[17] । आभिः[17] स्तुतिभिः[18] । स्पृध[19] । आक्रोशन्तीः[19] । अहिंसन्[20] । अस्मान्[21] । अमित्रस्य[22] । व्यथय[23] । तथा मन्यु च तस्य व्यथय[24] । आभिः[25] । विश्वाः[26] । अभियोक्त्रीः[27] । विष्वगञ्चनाः[28] । आर्याय[29] । विशः[30] । विनाशय । आसुरीः[31] [32] ।

---

१. कानने Sy.
२. हिंसित P. हिंसि D. शत्रोः Sy.
३. By. मदेमेति VM. refers to शतहिमाः and सुवीराः ॥ हृष्याम । सुवीराः शोभनपुत्रा वयम् । शतहिमाः शतसंवत्सरान् Sy.
४. VM. ignores इन्द्र !
५. 'या त ऊतिः' इति नवर्चं द्वितीयं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैन्द्रम् । तथा चानुक्रान्तम्—'या ते नव' (KSA.30.25.p.22.) इति । पृष्ठयाभिप्लवषडहयोर्द्वितीयेऽहनीदं सूक्तं निष्केवल्यनिविद्धानम् । सूत्रितञ्च—'या त ऊतिरवमेति मध्यन्दिनः' (ĀŚS.7.6.) इति Sy.
६. VM. explains अवमा । परमा and मध्यमा together as अवममध्यमोत्तमानि and या as यानि ॥ या अधमास्ति, या परमोत्कृष्टास्ति, या मध्यमास्ति Sy.
७ त्वदीय। Sy. ८. या रक्षा Sy.
९. युद्धे Sy. १०. अत्यन्तं पालय Sy.
११. रक्षणार्थैः P. रक्षणार्थैः D.
१२. भोज्यसाधनैः Sy. १३. महांस्त्वम् Sy.
१४. अस्मान् संयोजयेति शेषः Sy.
१५. VM. reads उग्रः for उग्र ॥ हे उद्गूर्ण ! इन्द्र ! Sy.
१६. VM. ignores इन्द्र । शुष्मिन् and उ ॥ हे शुष्मिन् ! बलवन् ! इन्द्र Sy.
१७. अस्मदीयाभिः स्तुतिभिः Sy.
१८. अस्मदीयाः सेनाः Sy.
१९. ०न्तिः P. शत्रुसैन्यानि हिंसन्तीः Sy.
२०. अहिंसन् । पालयन्नित्यर्थः Sy.
२१. अमस्मान् P., D.
२२. शत्रोः Sy. २३. नाशय Sy.
२४. सङ्ग्रामादिषु विद्यमानं कोपम् Sy.
२५. स्तुतिभिः Sy. २६. सर्वाः Sy.
२७. विश्वाभियोक्त्री P. विश्वाभियोक्त्री D.
२८. सर्वतो विद्यमानाः Sy.
२९. यज्ञादिकर्मकृते यजमानाय Sy.
३०. प्रजाः Sy.
३१. विनायासुरीत् P. ०शायासुरीत् D. कर्मणामुपक्षपयित्रीः Sy.
३२. VM. ignores इन्द्र ।

इन्द्र॑ जा॒मय॑ उ॒त ये॒ऽजा॑मयोऽर्वा॒चीना॑सो॒ व॒नुषो॑ युयु॒ज्रे ।
त्वमे॑षां विथु॒रा शवां॑सि ज॒हि वृष्ण्या॑नि कृणु॒ही परा॑चः ॥ ३ ॥

इन्द्र[1] । इन्द्र ! ज्ञातयः[2] । अपि[3] च । ये[4] । अज्ञातय[5] । अर्वाचीना[6] अभिमुखाः[7] । हिंसाः[8] । योजयन्ति[9] । त्वम् । एषाम्[10] । विथुराणि[11] चालकानि[12] । बलानि[13] । जहि[14] । वीर्याणि[15] च । कुरु च तान् । पराङ्मुखान्[16] ।

शूरो॑ वा॒ शूर॑ वनते शरी॒रैस्तनू॒रुचा॒ तरु॑षि॒ यत्कृ॒णवै॑ते ।
तो॒के वा॒ गोषु॒ तन॑ये॒ यद॒प्सु वि क्रन्द॑सी उ॒र्वरा॑सु॒ ब्रव॑ैते ॥ ४ ॥

शूरः[17] । शूर[18] । एवम् । अङ्ग[19] । भजते[20] । तन्वा[21] रोचमानौ । सङ्ग्रामे[22] । यदा परस्परम् । हिंस्तः[23] । यदा । वा[24] । तोकाद्यर्थम् । क्रन्दमाने[25] परस्परम् । विब्रूत[26] परुषाणि[27] ।

---

१. इन्द्रः P. इन्द्रं D.
२. ज्ञातिरूपाः सन्निकृष्टाः ये शत्रवः Sy.
३. वा D.
४. शत्रवः Sy.
५. P. adds अपि ये ज्ञातयः after अज्ञातयः । D. adds अपि च ये ज्ञातयः after अज्ञातयः ॥ दूरदेशे स्थिताः Sy.
६. अर्वाग्वीचीन P.
७. अस्मदभिमुखाः Sy.
८. हिंसन्तः Sy.
९. उद्युक्ता भवन्ति Sy.
१०. उभयविधानां शत्रूणां सम्बन्धीनि Sy.
११. विधुरा० D.
हीनानि त्वं कुर्विति शेषः Sy.
१२. चलकानि P.
०काणि D.
१३. खलानि P.
१४. नाशय Sy.
१५. एषां वीर्याणि Sy.
१६. किञ्च उभयविधान् शत्रून् पराङ्मुखान् Sy.
१७. त्ववनुगृहीतो वीरः Sy.
१८. अपि । वेत्ययमपीत्यस्यार्थे वर्तते । यद्वा वेत्यनेन विकल्पाभिधायकेनाशूरो वा त्ववनुगृहीतः सन् Sy.
१९. अगैः D.
२०. हन्ति Sy.
२१. तवारोचमानैः P. तवारो D. शरीरेण शोभमानौ परस्परविरोधिनौ Sy.
२२. युद्धे Sy.
२३. सङ्ग्रामं कुर्वाते Sy.
२४. ताका० P. ताकाम्यर्थं D. आदि refers to गोषु । तनये । अप्सु and उर्वरासु ॥ पुत्रनिमित्ते वा, गोषु निमित्तभूतासु वा, तनये पौत्रे निमित्तभूते, वाप्सूदकेषु निमित्तेषु वा, सर्वसस्याढ्यासु भूमिषु उर्वरासु Sy.
२५. क्रन्दमानावाक्रोशन्तौ Sy.
२६. विवदेते । हे इन्द्र ! पुत्रादिलाभजयस्त्ववनुगृहीतस्य भवतीत्यर्थः Sy.
२७. VM. ignores शूरम् ॥ वीरम् Sy.

नहि त्वा शूरो न तुरो न धृष्णुर्न त्वा योधो मन्यमानो युयोध ।
इन्द्र नकिष्ट्वा प्रत्यस्त्येषां विश्वा जातान्यभ्यसि तानि ॥ ५ ॥

किमत इत्याह । [नहीति] नहि । त्वादृशः[1] । शूरः[2] । नापि[3] । तरिता[4] । न च । धृष्णुः[5] । न च । योद्धान्यः[6] । अभिमानं कुर्वन् । युध्यति[7] । इन्द्र ! न कश्चित्[8] । एषामन्यतमः[9] । प्रतिभवति[10] । त्वाम् । विश्वानि । तानि[11] । भूतानि[12] । त्वमभिभवसीति ।

स पत्यत उभयोर्नृम्णमयोर्यदीं वेधसः समिथे हवन्ते ।
वृत्रे वा महो नृवति क्षये वा व्यचस्वन्ता यदि वितन्तसैते ॥ ६ ॥

स पत्यते[13] । सः[14] । गच्छति[15] । द्यावापृथिव्योरुभयोः[16] । बलभूतः[17] । यद्यनम्[18] । दिव्या पार्थिवा वा । स्तोतारः[19] । सङ्ग्रामार्थम्[20] । हवन्ते[21] । उपद्रवे[22] । वा । महति[23] । मनुष्ययुक्ते[24] । वा । यज्ञगृहे[25] । व्याप्तिमत्यौ[26] द्यावापृथिव्यौ । यद्यनम्[27] । विस्तारयितुमिच्छतस्तत्र च पत्यत इति[28] ।

---

१. किमुतमित्याह P. किम् ? अत आह refers to the previous stanza.
२. The *pratika* is supplied by the Editor.
३. ०शाः D. हे इन्द्र ! त्वया सह Sy.
४. विश्रान्तजनः Sy.
५. आपि P., D.
६. तरित P. तरि D. अन्येषां शत्रूणां हिंसकः सः त्वया न युयोध Sy.
७. Omitted by P.
८. धर्षको न युयोध Sy.
९. भटस्त्वया न युयोध Sy.
१०. ०न्येभि० P., D. युद्धे क्रुध्यन् Sy.
११. न युध्यते Sy.
१२. शूरादीनां मध्ये कश्चन Sy.
१३. प्रतिनिधिर्नास्ति Sy.
१४. तव Sy.
१५. शूरादीनि Sy.
१६. प्रादुर्भूतानि Sy.
१७. जनः Sy.
१८. ईष्टे Sy.
१९. ०यो P. उभयोर्मध्ये Sy.
२०. ०भूतेता P. नृम्णं धनम् Sy.
२१. कयोर्मध्ये ? क ईष्टे ? इत्येतदुभयमाह । यस्य जनस्य । यदीति निपातो यस्यार्थे वर्तते Sy.
२२. कर्मणां विधातार ऋत्विजः Sy.
२३. यज्ञे Sy.
२४. इन्द्रं स्तुवन्ति स ईष्ट इति सम्बन्धः Sy.
२५. निरोधे निमित्ते वा Sy.
२६. महति प्रभूते Sy.
२७. परिच्छारकमनुष्ययुक्ते Sy.
२८. गृहनिमित्ते वा Sy.
२९. व्याप्तिमशक्यौ P.
३०. यौ जनौ । यदीति यावित्यर्थे वर्तते Sy.
३१. वियुध्येते तयोर्मध्य इति सम्बन्धः । तसेरुपक्षयकर्मणो विपूर्वाद् वितन्तसैते इति भवति । यद्वा तन्तस इति धातुः कण्ड्वादिषु पठ्यते तस्मादिदं रूपमिति Sy.
३२. VM. seems to explain अयोः as द्यावापृथिव्योः । If not, he ignores it ॥ अयोरनयोः Sy.

अधं स्मा ते चर्षणयो यदेजानिन्द्रं त्रातोत भवा वरूता ।
अस्माकासो ये नृतमासो अर्य इन्द्रं सूरयो दधिरे पुरो नः ॥ ७ ॥

अध[1] । अथ[2] । खलु । मनुष्याः[3] । यदा सङ्ग्रामार्थम् । चलन्ति[4] तदा । तेषा त्राता[5] । भव । सम्भक्ता[6] । च । अस्मदीयाः । ये[7] । नेतृतमा । गन्तारः[8] । इन्द्र[9] ! प्राज्ञा[10] । अस्मान्[11] । पुरः । दधिरे[12] तेषामिति ।

अनु ते दायि मह इन्द्रियायं सत्रा ते विश्वमनु वृत्रहत्यें ।
अनु क्षत्रमनु सहो यजत्रेन्द्रं देवेभिरनु ते नृषह्यें ॥ ८ ॥

अनु[14] ते । अनु[15] । दायि[16] । तुभ्यम् । महत्[17] । बल दृष्ट्वा तदर्थम् देवैः[18] कर । तथा सत्यमेव । सर्व-धनम्[21] । त्वया वृत्रे[22] हते[23] । तुभ्यम्[24] । अन्वदायि[25] । तथा त्वयि बलम्[26] । अभिभवसामर्थ्यं[27] च दृष्ट्वा । अन्वदायि । यजनीय[28] ! देवैः[29] । तथान्वदायि । तुभ्यम् । नृणामभिभवे[30] ।[31]

---

१. अथ P. २. अपि च Sy.
३. पुरुषाः Sy.
४. एजेयुर्भीत्या कम्पेयुः Sy.
५. त्वं तेषां पालकः Sy.
६. सम्भक्ता भव Sy.
७. मनुष्याः Sy.
८. अरयः । प्रापयितार इत्यर्थः । तेषां त्राता भव Sy. ९. हे इन्द्र ! त्वाम् Sy.
१०. ये स्तोतारः Sy.
११. प्रज्ञास्मान् P. प्राज्ञास्मान् D.
१२. चक्रिरे तेषां च त्राता भवेति Sy.
१३. VM. ignores ते and इन्द्र ॥ ते त्वदीयाः । हे इन्द्र ! Sy.
१४. साकमेधेषु माहेन्द्रयामिष्टाविन्दस्य वृत्रघ्नो याज्या । सूत्रितञ्च—'अनु ते दायि मह इन्द्रियाय विश्वकर्मन् हविषा वावृधानः' (ĀŚS. 2.18.) इति । अनुत्रीनाम्येकाहे निष्केवल्य एषैव सूक्तमुखीया । सूत्रितञ्च—'अनु ते दायि मह इन्द्रियाय कथो नु ते परि चराणि विद्वानिति द्वे' (ĀŚS.9.5.) इति Sy.
१५. महदिन्द्रियहेतुभावमनुशब्दो द्योतयति BB.
१६. अन्वदायि । अनुदीयते स्म Sy. दीयते । . . . सामर्थ्याद्धविरिति गम्यते BB.
१७. महते Sy. देवतान्तरेभ्य इन्द्रस्य विशेषानाचष्टे । महे महते BB.
१८. स्तवः P., D. ऐश्वर्यार्थम् Sy. इन्द्रियाय वीर्याय . . .द्वितीयार्थे चतुर्थी . . . महतेन्द्रियेण तद्वानयमिति कृत्वा तुभ्यमेव दीयते BB.
१९. देवैः P. ऋत्विग्भिः BB.
२०. सत्रेषु सर्वेष्वेषु यज्ञेषु सर्वेष्वपि । सप्तम्या आकारः BB. २१. कृत्स्नमपि BB.
२२. सर्वधनं D. समस्तम् Sy.
२३. वृत्रवधे निमित्ते Sy. वृत्रहत्याम् । . . वृत्रं हतवानयमिति कृत्वा BB.
२४. तुभ्यमेव BB.
२५. दीयते । त्वत्प्रधानत्वाद्देवानाम् । यद्वा विश्वं हविस्तुभ्यमेव दीयतां किमन्यैर्देवैः ? छान्दसो लुङ् BB.
२६. येन विश्वं बिभर्ति तद् बलम् Sy. क्षत्रं धनम् । धनवानिति कृत्वा BB.
२७. येन शत्रूनभिभवति तद्गुणविशिष्टं सहो बलम् Sy. सहो बलं बलवानिति कृत्वा BB.
२८. हे इन्द्र ! Sy. हे इन्द्र ! यजत्र ! यष्टव्य ! यजेरत्रः BB. २९. सर्वैर्देवैरेतत्सर्वम् Sy.
३०. युद्धे Sy. नृणां शत्रूणामभिभवितृत्वम् । सर्वेषां नृणामयमभिभवितेति कृत्वा BB.
३१. VM. ignores इन्द्र ॥ This stanza= TS.1.6.12.1.

एवा नः स्पृधः समजा समस्विन्द्रं रारन्धि मिथुतीरदेवीः।
विद्याम वस्तोरवसा गृणन्तो भरद्वाजा उत त इन्द्र नूनम् ॥ ९ ॥

एव। एवम्[1] । अस्माकम्[2] । सम्प्रेरय । शत्रून्[3] । सङ्ग्रामेषु । इन्द्र ! उपरमय[4] । आक्रोशन्तीः[5] । आसुरीः प्रजाः[6]। लभेमहि। धनम्[7]। रक्षणार्थम्[8]। स्तुवन्तः। भरद्वाजाः[9]। तव। इदानीम्[10]। इन्द्रेति[11]।

VI.26.

श्रुधी न इन्द्र ह्वयामसि त्वा महो वाजस्य सातौ वावृषाणाः।
सं यद्विशोऽयन्त शूरसाता उग्रं नोऽवः पार्ये अहन्दाः ॥ १ ॥

श्रुधि[12]। श्रृणु। अस्माकं स्तुतीः[13]। इन्द्र ! ह्वयामसि[14]। त्वाम्[15]। महतः। वाजस्य[16]। लाभार्थम्। वर्धमानाः[17]। सङ्गच्छन्ते। यदा। शूराः[18]। सङ्ग्रामे[19]। तदानीमन्तिमे[20]। अहनि[21]। उद्गूर्णम्[22]। रक्षणम्। अस्माकम्[23]। देहीति[24]।

त्वां वाजी हवते वाजिनेयो महो वाजस्य गध्यस्य सातौ।
त्वां वृत्रेष्विन्द्र सत्पतिं तरुत्रं त्वां क्षेष्टे मुष्टिहा गोषु युध्यन् ॥ २ ॥

त्वां वाजी। त्वाम्। अन्नवान्[25] हविष्मान्। भरद्वाजो वाजिन्याः[26] पुत्रः। हवते[27]। महतः। बलस्य[28]।

---

१. एवं स्तुतस्त्वम् Sy.
२. अस्मदीयाः Sy.
३. शत्रुवधार्थं प्रेरय Sy.
४. शत्रुसेनाः Sy.
५. पर० P. अस्मदर्थं वशीकुरु Sy.
६. हिंसन्तीः Sy.
७. प्रा० D. सेनाः Sy.
८. वासस्य। निवासमित्यर्थः Sy.
९. अन्नेन सह Sy.
१०. भरः P. भरद्वाजा वयम् Sy.
११. अवश्यम् Sy.
१२. VM. ignores उत ॥ अपि च Sy.
१३. 'श्रुधी न इन्द्र' इत्यष्टर्चं तृतीयं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैन्द्रम्। तथा चानुक्रम्यते 'श्रुधी नोऽष्टौ' (KSA. 30.26.p.22.) इति। विनियोगो लैङ्गिकः Sy.
१४. आह्वानम् Sy.
१५. ०यासमि P. आह्वयामः Sy.
१६. त्वा P. १७. अन्नस्य Sy.
१८. सोमैस्त्वां सिञ्चन्तो वयं स्तोतारः Sy.
१९. जनाः Sy. २०. युद्धे Sy.
२१. तदान्तिमे Sy.
२२. दिवसे Sy. २३. अस्मभ्यम् Sy.
२४. अदाः प्रयच्छ Sy.
२५. हविर्लक्षणान्नवान् Sy.
२६. ०न्यां P.
२७. हूतवते P. स्तौति Sy.
२८. अन्नस्य Sy.

अभिकाङ्क्षितस्य[1] । लाभाय[2] । त्वाम् । वृत्रेषु[3] । इन्द्र[4] ! सता पतिम्[5] । तारकम्[6] । पश्यति[7] । तथा त्वामेव पश्यति । मुष्टिभिः[8] शत्रूणां हन्ता । गोनिमित्तम्[9] । युध्यन्[10] ।

त्वं कविं चोदयोऽर्कसातौ त्वं कुत्साय शुष्णं दाशुषे वर्क् ।
त्वं शिरो अमर्मणः पराहन्नतिथिग्वाय शंस्यं करिष्यन् ॥ ३ ॥

त्वं कविम्[11][12] । त्वम् । कवि कुत्सम्[13] । अचोदय.[14] । युद्धे[15] । त्वमथ[16] । कुत्साय[17] । यजमानाय[18] । शुष्णम्[19] । जितवानसि । तथा त्वम् । तिरोहितमर्मस्थानस्य[20] शम्बरस्य । शिर.[21] । पराहतवानसि[22] । दिवोदासाय[23] । शसनीयं[24] सुखम् । करिष्यन् ।

त्वं रथं प्र भरो योधमृष्वमावो युध्यन्तं वृषभं दशद्युम् ।
त्वं तुग्रं वेतसवे सचाहन्त्वं तुजिं गृणन्तमिन्द्र तूतोः ॥ ४ ॥

त्वं रथम्[25] । त्वमेव[26] । रथम्[27] । योद्धारम्[28] । दर्शनीयम्[29] । प्रहृतवानसि । तथा रक्षितवानसि[30] ।

---

१. सर्वैः प्राप्यस्य Sy.
२. लाभे निमित्ते Sy.
३. सु P. उपद्रवेषु निमित्तेषु भरद्वाजो हवते Sy.
४. अपि च हे इन्द्र ! Sy.
५. सज्जनानां पालकम् Sy.
६. दुर्जनानां तारकम् Sy.
७. भरद्वाजस्त्वां प्रतिपालयते Sy.
८. मुष्टिबलेन शत्रूणां हन्ता Sy.
९. गोषु निमित्तभूतासु Sy.
१०. शत्रुभिः सह युद्धं कुर्वन् Sy.
११. P. reads किं for त्वं कविम् ।
१२. हे इन्द्र ! Sy.
१३. भार्गवमृषिम् Sy.
१४. अयो P. अयोदयः D.
प्रैरयः Sy.
१५. अन्नलाभार्थम् Sy.
१६. तमथ P., D.
१७. ०या D.
हविर्वत्तवते Sy.
१८. असुरम् Sy.
१९. छेदितवानसि । वर्गति वृणक्तेश्छेदनार्थस्य लुङि रूपम् Sy.
२०. मर्महीनमात्मानं मन्यमानस्य Sy.
२१. शीर्षम् Sy.
२२. अवधीः Sy.
२३. अतिथीनामभिगन्त्रे दिवोदासाय Sy.
२४. स्तुत्यम् Sy.
२५. हे इन्द्र ! त्वं वृषभसंज्ञकाय राज्ञे Sy.
२६. The words त्वमेव रथम् are omitted by P.
२७. युद्धसाधनम् Sy.
२८. महान्तम् Sy.
२९. स्पृहत० P. प्रापयः Sy.
३०. युद्धादपीपलः Sy.

युध्यन्तम्[1] । वर्षितारम्[2] । दशद्युनामानम्[3] ।[4]

त्वं तदुक्थमिन्द्र बर्हणा कः प्र यच्छता सहस्रा शूर दर्षि ।
अवं गिरेर्दासं शम्बरं हन्प्रावो दिवोदासं चित्राभिरूती ॥ ५ ॥

त्वम्[5] । अवाहन्[6] । प्रकर्षेण[7] रक्षितवानसि । दिवोदास[8] शम्बरभीतम्[9] । चित्रै[10] । रक्षणै[11] ।

त्वं श्रद्धाभिर्मन्दसानः सोमैर्दभीतये[12] चुमुरिमिन्द्र सिष्वप् ।
त्वं रजिं पिठीनसे[13] दशस्यन्पुष्टिं सहस्रा शच्या[14] सचाहन् ॥ ६ ॥

त्वं श्रद्धाभिः । त्वम् । सोमै । मन्दसान[15] । दभीतये[16] । श्रद्धाभि[17] श्रद्धान एव । चुमुरि[18] नाम ।
अस्वापय[19]—अमारय । त्वम्[20] । राज्यम्[21] । पिठीनसनाम्ने । प्रयच्छन्[22] । शत्रूणा षष्टिम्[23] । सहस्राणि[24] । प्रज्ञया ।

---

१. शत्रुभिः सह युद्धं कुर्वन्तम् Sy.
२. एतदाख्यं राजानम् Sy.
३. दश दिवसा युध्यतो यस्य गतास्तम् Sv.
४. VM. ignores the second hemistich of the stanza. Sy. explains this hemistich in the following manner:—
किं च त्वं वेतसव एतन्नाम्ने राज्ञे सचा सहायभूतः सन् तुग्रमसुरमहन् हतवानसि । वेतसुर्नाम कश्चिदसुरः । अत्र तस्मादन्योऽसावुच्यते । यद्वा वेतसव इति तृतीयार्थे चतुर्थी । वेतसुनासुरेण सहितं तुग्रं हतवानसि । तथा च मन्त्रान्तरे श्रूयते 'अहं पितेव वेतसूंरभिष्टये तुग्रं कुत्सायं स्मदिभं च रन्धयम्' (RV.X. 49.4.) इति । हे इन्द्र ! त्वं गृणन्तं त्वा स्तुवन्तं तुजिमेतदाख्यं राजानं तूतोः । अवधयः ।
५. ०हत् P., D. अवावधीः Sy.
६. कर्षेण P. प्रकर्षेण पालयसि Sy.
७. राजानम् Sy.
८. दभीति P. ९. विचित्राभिः Sy.
१०. ऊतिभी रक्षाभिः Sy.
११. VM. ignores त्वम् । तत् । उक्थम् । इन्द्र ! बर्हणा । कः । प्र । यत् । शता । सहस्रा । शूर । दर्षि । गिरेः । दासम् । and शम्बरम् ॥ हे इन्द्र ! बर्हणा बर्हणः शत्रूणां हिंसकस्त्वमुक्थं प्रशस्य तत्कर्म कः अकरोः । किं तत्कर्मेत्युच्यते । हे शूर ! वीरेन्द्र ! त्वं शता शतानि सहस्रा सहस्राणि च शम्बरस्यानुचरान् भटान् प्रदर्षि विदारितवानसि । तथा च निगमान्तरे 'अध्वर्यवो यः शतं शम्बरस्य' (RV.II. 14.6.) इति । तथा त्वं दासं यज्ञाविकर्मणामुपक्षपयितारं गिरेः पर्वताद्गिर्गतं शम्बरमसुरमवहन् अवावधीः । तथापि श्रूयते 'यः शम्बरं पर्वतेषु क्षियन्तम्' (RV. II. 12. 11.) इति Sy.
१२. मोदमानः Sy.
१३. P. adds प्रीयते and D. adds प्रीतये after दभीतये ॥ एतन्नामकाय राजर्षये Sy.
१४. Omitted by P. श्रद्धापुरःसरमादरातिशयेनानुष्ठितैः कर्मभिः यच्छ्रद्धया युक्तं कर्म तत्सारवद्भवति । तथा च श्रूयते 'यदेव विद्यया करोति श्रद्दधोपनिषदा तदेव वीर्यवत्तरं भवति' (Chā U.1.1.10.) Sy.
१५. ०ना P. १६. एतदाख्यमसुरम् Sy.
१७ स्वा० P. अस्वापयः । अवधीरित्यर्थः Sy.
१८. एतदाख्यां कन्यां वा राज्यं वा Sy.
१९ पठिन० P. पठीन D. एतन्नामकाय Sy.
२० ०च्छत P., D.
२१. षष्टिसङ्ख्याकानि Sy.
२२. भटानां सहस्राणि Sy.

सह[1]। हतवान्[2] सहायो वा तस्य भूत्वेति[3]।

अहं चन तत्सूरिभिरानश्यां तव ज्यायं इन्द्र सुम्नमोजः[4]।
त्वया यत्स्तवन्ते सधवीर वीरास्त्रिवरूथेन[5] नहुषा[6] शविष्ठ[7] ॥ ७ ॥

अहम्[8]। अहम्। अपि। तत्[9]। स्तोतृभिः[10] पुत्रपौत्रैः सह। प्राप्नुयाम्। तव। प्रशस्यतरम्[11]। सुखम्। बलं च। त्वया। दृढेन सुखेन[12] दत्तम्। यत्। स्तुवन्ति। वीराः[13] मनुष्याः। वीरैः सहित! बलवत्तम[14]!

वयं ते अस्यामिन्द्र सुम्नहूतौ सखायः स्याम महिन[15] प्रेष्ठाः[16]।
प्रातर्दनिः क्षत्रश्रीरंस्तु[17] श्रेष्ठो घ्ने[18] वृत्राणां सनये[19] धनानाम् ॥ ८ ॥

वयम्[20]। वयम्। तव सम्बन्धिनि। अस्मिन्। अर्थाह्वाने[21]। सखायः। स्याम[22]। पूज्य[23]! प्रियतमाः। प्रतर्दनस्य[24] पुत्रः। क्षत्रश्रीर्नाम[25] राजास्मदीयः। अस्तु[26]। प्रशस्यतम[27]। हनने[28]। शत्रूणाम्। धनाना च[29]। भजन इति[30]।

---

१. युगपदेव Sy.
२. अवधीः Sy.
३. The words सहायो वा तस्य भूत्वा refer to सचा (सह)।
४. VM. ignores इन्द्र।
५. भरद्वाजः Sy.
६. सुम्नमोजः Sy.
७. मदीयैः स्तोतृभिः सह Sy.
८. त्वया दत्तम् Sy.
९. अतिशयेन प्रशस्यम् Sy.
१०. दृढसुखेन D. VM. seems to explain त्रिवरूथेन and नहुषा as दृढेन and सुखेन॥ त्रिवरूथेन त्रीणि वरूथान्यावरकाणि भुवनानि यस्य तेन। नहुषा शत्रूणां बन्धकेन Sy.
११. स्तोतारः Sy.
१२. ०मः P. शविष्ठ! बलवत्तम! इन्द्र! Sy.
१३. VM. ignores इन्द्र!
१४. त्वदर्थम् Sy.
१५. आर्ताह्वा० P. आर्त्य० D. धननिमित्ते स्तोत्रे Sy.
१६. ०य P. स्तोतारः Sy.
१७. भवेम Sy.
१८. हे पूजनीयेन्द्र! Sy.
१९. ०मा D. अतिशयेन प्रियाः Sy.
२०. प्रतर्दनो नाम राजा। तस्य पुत्रः Sy.
२१. एतन्नामको मम याज्यो राजा Sy.
२२. भवतु Sy.
२३. सर्वेषामुत्कृष्टः Sy.
२४. वधाय Sy.
२५. वसूनाम् Sy.
२६. सम्भजनाय च श्रेष्ठोऽस्त्विति सम्बन्धः Sy.
२७. VM. ignores इन्द्र।

VI.27.

किमस्य[1] मदे किम्वस्य पीताविन्द्रः किमस्य सख्ये चकार[2] ।
रणा वा ये निषदि किं ते अस्य पुरा विविद्रे किमु नूतनासः ॥ १ ॥

[किमस्य ।][3] किम् । अस्य सोमस्य । मदे[4] । किम् । वा । अस्य[5] । पीतौ[6] । किं वा । अस्य[7] । सख्ये[8] । इन्द्र । चकार[9] । स्तोतार । वा । ये । निषदने[10] प्रवर्तन्ते[11] । सोमस्य । ते[12] । इन्द्र[13] । किम् । अलभन्त[14] । पुरा पुरातना[15] । किम् । वा सम्प्रति । नूतना इति ।

सदस्य[16] मदे सदस्य पीताविन्द्रः सदस्य सख्ये चकार[17] ।
रणा वा ये निषदि सत्ते अस्य पुरा विविद्रे सदु नूतनासः ॥ २ ॥

प्रश्नस्योत्तरम्[18]—सदस्येति । कल्याणमेव करोतीति ।

---

१ 'किमस्य मद' इत्यष्टर्चं चतुर्थं सूक्तं भरद्वाजस्यार्षम् । अनुक्रान्तञ्च 'किमस्यान्त्या चायमानस्याभ्यावर्तिनो दानस्तुतिः' (KSA.30.27.p.22.) । भरद्वाज ऋषिः । त्रिष्टुप् छन्दः । अन्त्यायास्तु दानस्तुतिरूपत्वात् 'या तेनोच्यते' (KSA. 2.5.p.1.) इति न्यायेन दानमेव देवता । विनियोगो लैङ्गिकः Sy.

२. The *pratīka* is supplied by the Editor.

३. भरद्वाज ऋषिः फलविलम्बनासहिष्णुः सन् अनयेन्द्रमाक्षिपति Sy.

४. मदे सति Sy.

५. सोमस्य Sy.

६. पाने सति Sy.

७ सख्यित्वे Sy.

८. कृतवान् । पानात्पूर्वमिन्द्रः सोमेन सह वसतीत्यर्थः Sy.

९. नतिष P., D. गृहे Sy.

१०. सन्ति Sy.

११. त्वत्तः Sy.

१२. इन्द्रा D.

१३. लेभिरे Sy.

१४. पूर्वम् Sy.

१५. इदानीन्तनाः स्तोतारश्च किमु लेभिरे Sy.

१६. प्रत्नस्यो० D. एवमाक्षिप्त इन्द्रस्तस्मा ऋषय ईप्सितं धनं प्रददौ । तदनन्तरमृषिरिन्द्रसकाशात् सम्पूर्णकामः सन् पुरा यान्युपालम्भप्रतिपादकानि वाक्यान्युवाचेदानीं तानि निराकरोति Sy.

१७. सशस्य P. सदृशस्य D.

१८. VM. explains only सत् । विविद्रे by कल्याणमेव करोतीति ।
इन्द्रोऽस्य सोमस्य मदे सत् शुभं कर्म चकार । अस्य सोमस्य पीतौ पाने सत् शुभं कर्म चकार । अस्य सख्ये सत् शुभं कर्म चकार । ये रणा वा स्तोतारश्च ते निषदि गृहे । यज्ञगृह इत्यर्थः । पुरा पूर्वं हे इन्द्र ! ते त्वत्तः सत् शुभं कर्म विविद्रे लेभिरे । नूतनास इदानीन्तनाः स्तोतारः सदु शुभमेव कर्म लेभिरे Sy.

नहि॑ नु॒ तें महिमनः॑ समस्य॒ न मघ॑वन्मघव॒त्त्वस्य॑ वि॒द्म।
न राध॑सोराधसो॒ नूत॑न॒स्येन्द्र॒ नकि॑र्ददृश॒ इन्द्रि॒यं तें॥ ३॥

नहि। नहि। खलु। सर्वम्। महिमानं वयम्। जानीम। न च सर्वम्। धनवत्वम्। न च। नूतनम्। राधकस्य। न कश्चित्। अपश्यत्। तव। बलम्।

एत॒त्यत्ते॑ इन्द्रि॒यमे॑ति॒ येनाव॑धीर्व॒रशि॑खस्य॒ शेषः॑।
वज्रं॑स्य॒ यत्ते॒ निहि॑तस्य॒ शुष्मा॑त्स्व॒नाच्चि॑दिन्द्र पर॒मो द॒दार॑॥ ४॥

एतत्। तम्। एतत्। बलमिन्द्र। लोके विख्यातमासीत्। येन। हतवान्। वरशिखासुरस्य।

---

१. कलु D. नुशब्दः पूरणः Sy.

२. समस्तस्य Sy.

३. महिम्नः, महिमानम् Sy.

४. ०त्त्वम् is suggested for ०त्वम्॥ तथा त्वदीयस्य धनिकत्वस्य च वयं न जानीमः Sy.

५. स्तुत्यस्य Sy.

६. राधसोराधसः त्वदीयं सर्वं धनं च न जानीमः। सर्वत्र द्वितीयार्थे षष्ठी Sy.

७. केनापि न Sy. ८. दृश्यते Sy.

९. त्वदीयम् Sy. १०. सामर्थ्यम् Sy.

११. VM. ignores ते। मघवन् and इन्द्र॥ ते त्वदीयस्य। हे मघवन्! धनवन्निन्द्र! Sy.

१२. अत्र बृहद्देवता

अभ्यावर्ती चायमानः प्रस्तोकश्चैव साञ्जयः।
आजग्मतुर्भरद्वाजं जितौ वारशिखैर्युधि।१२४।
अभिगम्योचतुस्तौ [a]तु [b]प्रणम्याख्याय नामनी।
युधि वारशिखैर्ब्रह्मन्नावां विद्धि विनिर्जितौ।१२५।
भवत्पुरोहितावावां क्षत्रबन्धून् जयेवहि।
क्षत्रं तदेव विज्ञेयं ब्रह्म यत् पाति सर्वतः।१२६।
ऋषिः स्तुतस्तथेत्युक्त्वा पुत्रं पायुमभाषत[c]।
अधर्षणीयो शत्रूणां कुरुष्वैतौ नृपाविति।१२७।
पितरं स तथेत्युक्त्वा युद्धोपकरणं तयोः।
जीमूतस्येति[f] सूक्तेन पृथक्त्वेनान्वमन्त्रयत्।१२८।
सूक्तेनानेन तुष्टाव सङ्ग्रामाङ्गान्यृषिस्तयोः।
ततः प्रस्थापयामास पुनर्वारशिखान् प्रति।१३६।
[h]एतत्यत्ते चतसृभी राज्ञोः[i] साहाय्यकाम्यया।
भरद्वाजोऽपि[j] तुष्टाव प्रीतस्तेन पुरन्दरः।१३७।
अभ्यावर्तिनमभ्येत्य [k]हर्यूपीयानवीतटे।
सहितश्चायमानेन जघानैनान् [l]शचीपतिः।१३८।
(BD. V. 124.–128., 136–138.)
तुष्ट इन्द्रोऽभ्यावर्तिना सहितोऽरीञ्जघानेति तदर्थं भरद्वाजस्त्रिष्टुभेन्द्रं तुष्टाव DDN.

१३. तत् is suggested for तम्।

१४. इदम् Sy. १५. वीर्यम् Sy.

१६. अस्माभिरज्ञापि Sy.

१७. वीर्येण Sy., DDN.

१८. अहिंसीः Sy., DDN.

१९. वरशिखो नाम कश्चिदसुरस्तस्य Sy., DDN.

---

[a]तम् BD. [b]प्रसाद्य BD. [c]तदपि BD. [d]शाश्वतम् BD. [e]ऋषिस्तौ तु तथेत्युक्त्वा पायुं पुत्रमभाषत BD. [f]RV.VI.75. [g]तु स्तुत्वा BD. [h]RV. VI. 27. 4., 7. [i]राज्ञो? BD. [j]०ऽभितुष्टाव BD. [k]हर्युपीया० BD. [l]०नैनाञ्छची० BD.

पुत्रम्[1] । वज्रस्य[2] । यस्मात् । त्वया । निहितस्य[3] तस्मिन् । बलात्[4] । शब्दात्[5] । धे[6] । उत्कृष्टः[7] सोऽसुरः[8] । दीर्णवानिति[9][10] ।

वधीदिन्द्रो वरशिखस्य शेषोऽभ्यावर्तिने चायमानाय शिक्षन् ।
वृचीवतो यद्धरियूपीयायां हन्पूर्वे अर्धे भियसापरो दर्त् ॥ ५ ॥

वधीत्[11] । वधीत्[12] । इन्द्रः[13] । वरशिखस्य[14] । पुत्रम्[15] । अभ्यावर्तिनाम्ने[16] । चयमानपुत्राय[17] । वश नयन्[18] । हितावतोऽसुरान्[19] । यदा । हरियूपीयाख्यायां[20] नगर्याम् । पूर्वे[21] । अर्धे युद्धार्थ निर्गतो वा[22] । हतवानिन्द्रः[23] । तदानीमपरः[24] परार्धे स्थित वरशिखस्य[25] पुत्रः । दीर्ण इति[26][27] ।

---

१. शेषः शेषांसि पुत्रान् Sy., DDN. शेष इत्यपत्यनाम Ngh.2.2.
२. त्वदीयवज्रस्य Sy.
३. हित० P. प्रेरितस्य Sy., DDN.
४. तस्मि बालत् P. शुष्ममिति बलनाम Ngh. 2.9.
५. ध्वनेः Sy. स्वन इति वाङ्नाम Ngh.1.11.
६. एव Sy.
७. वरशिखस्य पुत्राणां मध्ये बलाद्याधिक्येनोत्कृष्टः कश्चित्पुत्रः Sy.
८. सौसुरः P.
९. अदीर्यत Sy. वज्रशब्दं श्रुत्वा स्वयमेव दीर्णोऽभवदित्यर्थः DDN.
१०. VM. ignores ते and इन्द्र ॥ ते त्वदीयम् । हे इन्द्र ! Sy.
११. पूर्वोक्तमेवार्थमनया विवृणोति Sy. भरद्वाजस्त्रिष्टुभा इन्द्रं तुष्टाव DDN.
१२. अवधीत् । अहिंसीत् Sy. 'बहुलं छन्दस्यमाङ्योगेऽपि' इत्यडभावः । कथमवधीदित्युच्यते DDN.
१३. अयमिन्द्रः Sy.
१४. असुरस्य Sy., DDN.
१५. पुत्रान् Sy. शेषोऽभ्याव०—'एकीभवति पादादिरकारः' (RPR. 2.34.) इत्येकीभावः DDN.
१६. एतन्नामकाय राज्ञे Sy., DDN.
१७. चयमानस्य राज्ञः पुत्राय Sy. चयमानस्य (राज्ञः) पुत्राय DDN.
१८. शश्नयत् P. ईप्सितानि वसूनि प्रयच्छन् Sy. ईप्सितार्थान् प्रयच्छन् DDN.
१९. हितवातो० P. वृचीवान् नाम वरशिखस्य कुलोत्पन्नः पूर्वजः, तद्गोत्रजान् वरशिखस्य पुत्रान् Sy., DDN.
२०. ०पीताया० P. हरियूपीया नाम काचिन्नदी काचिन्नगरी वा तस्याम् Sy. नद्याम् । हरियूपीयायामित्यज्ञानां निवारणार्थम् 'ऊष्मान्तस्था०' इत्यनेन 'हरियोजनाय हरियूपीयायाम्' (RPR.14.40.) इति शौनकेन यत्नः कृतः DDN.
२१. प्राग्भागे स्थितान् Sy., DDN.
२२. ०त P., D.
२३. अवधीत् Sy.
२४. अपरभागे स्थितो वरशिखस्य श्रेष्ठ पुत्रः Sy., DDN.
२५. परः शि० P., D.
२६. दीर्णोऽभूत् Sy.
२७. VM. ignores भियसा ॥ भियसा भीत्या Sy.

त्रिंशच्छतं वर्मिणं इन्द्र साकं यव्यावत्यां पुरुहूत श्रवस्या ।
वृचीवन्तः शरवे पत्यमानाः पात्रा भिन्दाना न्यर्थान्यायन् ॥ ६ ॥

त्रिंशच्छतम्[1] । त्रिंशच्छतम्[2] । कवचिन[3] । इन्द्र[4] ! साकम्[5] । यव्यावत्या[6] नगर्याम्[7] । पुरुहूत[8] ! अन्नेच्छया । वृचीवन्नामानः[9] । युद्धार्थम्[10] । निर्गच्छन्तः[11] । त्वया[12] भिद्यमानानि । न्यर्थानि[13] । पतनानि[14] । प्राप्नुवन्[15] पराङ्मुखा आसन्नित्यर्थः[16] ।

यस्य गावावरुषा सूयवस्यू अन्तरू षु चरंतो रेरिहाणा ।
स सृञ्जयाय तुर्वशं परादाद्वृचीवंतो दैववाताय शिक्षन् ॥ ७ ॥

यस्य[17] । यस्य । अश्वौ । रोचमानौ[18] । शोभन घासमिच्छन्तौ[19] । द्यावापृथिव्योरन्त[20] । सुचरत[21] घासम्[22] । रेरिहाणौ[23] । सः[24] । सृञ्जयाय[25] राज्ञे । तुर्वश नाम[26] । परादात्[27] । वृचीवत[28] । दैववाताय[29] । प्रयच्छन्[30] ।

---

१. इदानीमुक्तमेवार्थं विवृणोति Sy.
२. ०शच्चतं P. ०शश्चतं D. त्रिंशदधिकशतसङ्ख्याकाः Sy.
३. कवचभृतः Sy.
४. युगपदेव Sy.
५. पूर्वोक्तायां हरियूपीयायाम् Sy.
६. हे बहुभिराहूतेन्द्र ! Sy.
७. श्रवोऽन्नं यशो वा, तदाञ्छया युद्धे त्वां जित्वान्नं प्राप्नुयाम यशो वा प्राप्नुयामेति कामयमानाः Sy.
८. पृचीन्ना० P. वृचीन्ना० D. वरशिखस्य पुत्राः Sy.
९. हिंसायै त्वां हिंसितुमित्यर्थः Sy.
१०. निर्गच्छ P. ०न्त D. अभिपतन्तोऽभिगच्छन्तः Sy.
११. त्वयान्य P.
१२. ०माना P., D. भिन्दन्तः Sy.
१३. अर्थशून्यानि Sy.
१४. Omitted by P. पात्राणि यज्ञसाधनानि Sy.
१५. अगच्छन् । विनाशं प्रापुरित्यर्थः Sy.
१६. ०सीदित्य० P.
१७. इन्द्रस्य सम्बन्धिनौ Sy.
१८. अरुषारुषौ रोचमानौ Sy.
१९. शोभनतृणानीच्छन्तौ Sy.
२०. अन्तरः P., D. मध्येऽन्तरिक्षे Sy.
२१. उ सु इतीमौ पूरणौ Sy.
२२. गच्छतः Sy.
२३. रेतिहाणौ P., D. लेलिहानौ पुनः पुनर्घासमास्वादयन्तौ । यद्वा गतिविशेषं कुर्वन्तौ Sy.
२४. इन्द्रः Sy.
२५. एतन्नामकाय राज्ञे Sy.
२६. तुर्वशं राजानम् Sy.
२७. प्रदवौ Sy.
२८. वारशिखान् Sy.
२९. ०वते देवपाताय P., D. देववातवंशोत्पन्नाय Sy.
३०. प्रायच्छत् P. शिक्षन् वशीकुर्वन् । तेषां धनानि प्रयच्छन्निति वा Sy.
३१. VM. ignores उ ।

द्वयाँ अग्ने रथिनो विंशतिं गा वधूमतो मघवा मह्यं सम्राट् ।
अभ्यावर्ती चायमानो ददाति दूणाशेयं दक्षिणा पार्थवानाम् ॥ ८ ॥

द्वयान्[1] । रथवधूयुक्तत्वाद्, द्विविधाः । विंशतिम्[2] । गाम्[3] । धनवान्[4] प्राज्ञः । मह्यम् । सम्राट्[5] । अभ्यावर्ती । चायमानः[6] । अग्ने ! ददाति[7] । दुर्नशा[8] । नाशयितुमशक्या । इयम् । दक्षिणास्तु सर्वदा फलप्रदा । पृथुकुलजातानामित्यभ्यावर्तिनश्चायमानस्य[9] दानस्तुतिः ।

---

१. वारशिखहननानन्तरं यत्कृतं तदुच्यते । तत्र बृहद्देवता

एवं[a] वारशिखाञ्जित्वा ततोऽभ्यावर्तिसाञ्जयौ ।
भरद्वाजाय गुरवे ददतुर्विविधं वसु ॥१३९॥
ऋषिरप्यभितुष्टाव दानं तत्र च तस्य तु ।
ऋचैकया द्वयाँ अग्ने सम्राट् ख्यातिं जगौ तदा[b]
॥१४१॥

भरद्वाजो दानवमभ्यावर्तिनं सम्राजं त्रिष्टुभा अग्नये प्रकथयति । किमस्यान्त्या चायमानस्याभ्यावर्त्तिनो दानस्तुतिरित्यनुक्रमणी । (KSA. 30.27. p.22.) DDN.

२. अधुना भरद्वाजः स्वस्मा अभ्यावर्तिना दत्तं धनजातमग्नये प्रकथयति Sy.

३. ०त्वा P. VM. does not explain रथिनः and वधूमतः but only affords the proof of द्वयान् ।
रथसहितान् स्त्रीयुक्तान् Sy. रथसहितान् स्त्रीसहितान् DDN.

४. मिथुनभूतान् Sy., DDN.

५. विंशतिसङ्ख्याकान् Sy., DDN.

६. ०शून् Sy., DDN.

७. धनवान् प्रभूतदानो वा Sy., DDN.

८. राजसूययाजी Sy.
वाजपेययाजी 'अपरं वै राज्यं परं साम्राज्यम्' इति शातपथी श्रुतिः । सम्राडिति 'रेफोष्मणो०' (RPR.4.15.) इति परिपन्ने प्राप्ते 'सम्राट् शब्दः परिपन्नात्पवादः' (RPR.4.23.) इति न DDN.

९. ०र्ति D.
एतदाह्वयो राजा Sy.

१०. चयमानस्य पुत्रः Sy.
चयमानपुत्रः DDN.

११. प्रायच्छत् Sy.
प्रयच्छति DDN.

१२. दुशा P. केनापि नाशयितुमशक्या भवति Sy.
दूणाशेति 'इठ्यदूणाशदूळभ०' (RPR.5.55.) इति दीर्घणत्वे । 'दूणाशः, उक्थशासश्च०' (RPR.9.36,37.) इति णकारस्य दीर्घः DDN.

१३. ०जातमित्य० P., D. पृथोर्वंशजस्याभ्यावर्तिनो राज्ञः सम्बन्धिनीः । पूजार्थं बहुवचनम् Sy., DDN.

---

[a] तौ तु BD. [b] वत्तं सङ्कीर्तयन् स्वयम् BD.

VI.28.

आ गावो अग्मन्नुत भद्रमक्रन्त्सीदन्तु गोष्ठे रणयन्त्वस्मे ।
प्रजावतीः पुरुरूपा इह स्युरिन्द्राय पूर्वीरुषसो दुहानाः ॥ १ ॥

आ गावः ॥ गव्यसूक्तम् । द्वितीयेन्द्री[2] वान्त्यश्च[3] पादः[4] ॥ आगता[5] अभ्यावर्तिनश्चायमानान् मयि । गावः । अपि च । कल्याणम्[6] । अकुर्वन्[7] । सीदन्तु[8] च । अस्मद्गोष्ठे[9] । रमयन्तु[10] च । अस्मान्[11] । वत्सयुक्ताः[12] । श्वेतैः कृष्णैश्च वत्सैर्बहुरूपाः[13] । इह[14] । स्युः[15] । इन्द्रार्थम् । बह्वीः[16] । उषसः[17] । पयो दुहानाः[18] ।

इन्द्रो यज्वने पृणते च शिक्षत्युपेद्ददाति न स्वं मुषायति ।
भूयोभूयो रयिमिदस्य वर्धयन्नभिन्ने खिल्ये नि दधाति देवयुम् ॥ २ ॥

इन्द्रः । इन्द्र । यज्वने[19] । दरिद्रेभ्य प्रयच्छते[20] । च धन[21] च[22] तस्मै । प्रयच्छति[23] । न कदाचित् । तस्य स्वम्[24] । मुष्णाति[25] । भूयो भूय[26] । रयिम् । एव । अस्य[27] । वर्धयन् । शत्रुभिरभिन्ने[28] । अप्रतिहते[29] च स्थाने[30] ।

---

१. 'आ गावः' इत्यष्टर्चं पञ्चमं सूक्तम् । अत्रेयमनुक्रमणिका—'आ गावो गव्यं द्वितीयेन्द्री वान्त्यश्च पादोऽन्त्यानुष्टुब्जागतस्तृचो द्वितीयादिः' (KSA.30.28.p.22.) इति । भरद्वाज ऋषिः । 'इन्द्रो यज्वने' इत्याद्यस्तृचो जागतः, 'उपेदम्' इत्यन्त्यानुष्टुप्, शिष्टाश्चतस्रस्त्रिष्टुभः । कृत्स्नस्य गौर्देवता द्वितीयायाः सूक्तान्त्यपादस्य च विकल्पेनेन्द्रो देवता । गवामुपस्थान एतत् सूक्तम् । सूत्रितञ्च—'आगावीयमेके' (AGS.2.10.7.) इति Sy.

२. ०न्दि P. D.

३. व्यान्तश्च P.

४. The passage द्वितीयै....पादः is a fragment of KSA.30.28.p.22.

५. अस्मदीयं गृहमागच्छन्तु Sy.

६. भजनीयं शुभम् Sy.

७. कुर्वन् P., D. कुर्वन्तु Sy.

८. उपविशन्तु Sy.

९. अस्मत् P. ०गोष्ठे D. तथास्मदीये गवां स्थाने Sy. १०. रमन्ताम् Sy.

११. रमयन्तु च । अस्मान् is omitted by P. तदनन्तरमस्मासु Sy.

१२. ०क्ता P., D. प्रजावत्यः सन्ततिसहिताः Sy.

१३. नानावर्णा गावः Sy.

१४. अपि चास्मिन् गोष्ठे Sy.

१५. स्वः P. भवेयुः Sy.

१६. बह्वयः Sy.

१७. उषःकालान् प्रति Sy.

१८. ०नः P.

१९. यजनशीलाय Sy.

२०. स्तुतिभिः प्रीणयित्रे च स्तोत्रे Sy.

२१. अपेक्षितं धनम् Sy.

२२. व D.

२३. ददाति Sy.

२४. यज्वनः स्तोतुश्च स्वभूतं धनम् Sy.

२५. अपहरति Sy.

२६. भूयो भूयो भूयः P., D. पुनः पुनः Sy.

२७. धनमात्मना दत्तम् Sy.

२८. अपि च उभयविधस्य Sy.

२९. वृद्धिं प्रापयन् Sy.

३०. शत्रुभिरभेद्ये Sy.

३१. ०भ्येवृहते P.. ०भ्येपूहते D. खिलमप्रतिहतं स्थानम्, तदेव खिल्यम् । स्वार्थिको यत् । अन्यैर्गन्तुमशक्ये स्थले Sy.

स्थापयति[1] । देवकामम्[2] ।

न ता नशन्ति न दभाति तस्करो नासामामित्रो व्यथिरा दधर्षति ।
देवाँश्च याभिर्यजते ददाति च ज्योगित्ताभिः सचते गोपतिः सह ॥ ३ ॥

न ता[4]ः । न । ताः[5] । नशन्ति[6] । न च । ता हिनस्ति[7] । तस्कर[8]. न चोरयति[9] । न । तासा[10]म् । अमित्र-भव[11]. । व्यथि[12]ः । आधर्षण[13] करोति । देवान्[14] । च । आभि[15]. । यजते[16] । याश्च[17] दरिद्रेभ्यः । प्रयच्छति । दीर्घकाल[18]म् । ताभि[19]ः । सह । सचन करोति[20] । गोपति[21]. सर्वदा फलप्रदा भवन्त्यस्मा इति[22] ।

न ता अर्वा रेणुककाटो अश्नुते न संस्कृतत्रमुप यन्ति ता अभि ।
उरुगायमभयं तस्य ता अनु गावो मर्तस्य वि चरन्ति यज्वनः ॥ ४ ॥

न ता अर्वा[23] । कटिर्भेदनकर्मा भिद्यमानरेणु । शत्रूणामश्व[24]ः । न[25] । ता हर्तुम्[26] । प्राप्नोति याभिर्देवान् यजते । नच । सस्कृतत्रम्[27] । उपाभिगच्छन्ति[28] सस्कार त्राण च नापेक्षन्ते । तस्य । यज्वन[29]. । मर्तस्य[30] ।

---

१. निक्षिपति । निवासयतीत्यर्थः Sy.
२. देवमिन्द्रमात्मन इच्छन्तं तं जनम् Sy.
३. VM. ignores उप । इत् and ददाति ॥ न केवलं सकृदेव दानमपि तु सर्वदैवेत्याह, उपेद्दाति उपेत्य सर्वदा ददात्येव Sy.
४. दैवीनां हविःषु 'न ता नशन्ति, न ता अर्वा' इति गोदेवताया याज्यापुरोऽनुवाक्ये' (ĀŚS. 6.14.) । गोस्तोमेऽपि मरुत्वतीयनिष्केवल्ययोरेते सूक्तमुखीये । सूत्रितञ्च—'न ता अर्वा रेणुककाटो अश्नुते न ता नशन्ति न दभाति तस्करः' (ĀŚS.9.5.) इति Sy.
५. गावः Sy.
६. नचन्ति P., D. अस्मत्सकाशात् (न) नश्यन्तु Sy.
७. अस्मदीया गा न हिंस्यात् Sy.
८. Omitted by P. चोरोऽपि Sy.
९. Omitted by P., D.
१०. इमा गाः Sy.
११. अमित्रस्य शत्रोः सम्बन्धि Sy.
१२. शस्त्रम् Sy.
१३. ०ण D. आक्रामतु Sy.
१४. इन्द्रादीनुद्दिश्य Sy.
१५. भिः D. गोभिः Sy.
१६. यजनं करोति Sy.
१७. गा इन्द्रार्थम् Sy.
१८. चिरकालम् Sy.
१९. तादृशीभिर्गोभिः सह Sy.
२०. सङ्गच्छताम् Sy.
२१. एवम्भूतानां गवां स्वामी यजमानः Sy.
२२. VM. ignores इत् ॥ इवेव Sy.
२३. अभिभे० P., D. रेणोः पार्थिवस्य रजस उद्भेदकः । कटिर्भेदनकर्मा Sy.
२४. युद्धार्थमागतोऽश्वः Sy.
२५. र P.
२६. गावः Sy.
२७. हर्तुं D.
२८. प्राप्नुयात् Sy.
२९. संस्कृत्वम् P. संस्कृतत्वत्वम् D. विशसनादि-संस्कारम् Sy.
३०. अभिगच्छन्तु Sy.
३१. यागशीलस्य Sy.
३२. मनुष्यस्य Sy.

बहुभि. स्तोतव्यम्[1]। भयाभावम्[2]। प्रति[3]। गाव[4]। विचरन्ति[5]।[6]

गावो भगो गाव इन्द्रो मे अच्छान् गावः सोमस्य प्रथमस्य भक्षः।
इमा या गावः स जनास इन्द्र इच्छामीद्धृदा मनसा चिदिन्द्रम् ॥ ५ ॥

गावः। गाव[7] एव। भगो[8] देवः। गाव[9] एव। इन्द्र। तादृशो भग इन्द्रश्च माम्[10]। आगच्छतु[11]। गावः। सोमस्य[12] क्रीतस्य। मुख्यस्य[13]। भक्ष[14] 'अत्र राजानमाहृत्य पयसौदनौ पश्चिवेषिष्यन्त्यत्रयात्' इत्युक्तम्[15]। इमाः[16]। या[17]। गावो यज्ञस्य साधयित्र्य[18]। ता[19] एव। हे जना.! इन्द्रो भवति[20]। इच्छामि[21]। हृदयेन[22]। मनसा भूतम्। इन्द्रम्[23]।[24]

यूयं गावो मेदयथा कृशं चिदश्रीरं चित्कृणुथा सुप्रतीकम्।
भद्रं गृहं कृणुथ भद्रवाचो बृहद्वो वय उच्यते सभासु ॥ ६ ॥

यूयम्। यूयम्। गाव.! पीन कुरुथ[25]। कृशम्[26]। अपि। अशोभनावयवम्[27]। अपि[28]। कुरुथ[29]। शोभनावयवम्[30]। भद्र च। गृहम्[31]। कृणुथ[32]। हे भद्रवाचः! महत्[33]! वः। अन्नम्[34]। उच्यते[35]। सङ्घातेषु[36] क्षीरादिकम्।

---

१. स्तोम्यं D. विस्तीर्णगमनम् Sy.
२. ०वः P., D. भयवर्जितं प्रदेशम् Sy.
३. उद्दिश्य Sy.
४. गा P.
५. विशेषेण गच्छन्तु Sy.
६. VM. explains ताः once only.
७. गवा P.
८. भगवो P. धनं भवन्तु Sy.
९. गाः Sy.
१०. इव P.
११. मह्यम् Sy.
१२. ०च्छ P., D. यच्छतु Sy.
१३. ०स्याक्षी० D.
१४. मुखस्य P., D. हविषां श्रेष्ठस्य Sy.
१५. भक्षणं भवन्तु। अभिषुतस्य हि सोमस्य गव्येनाज्यादिना संस्क्रियमाणत्वात् Sy.
१६. ०वेषिष्यन्त्याक्ष० D.
१७. एवम्भूताः Sy.
१८. यां P. गावः सन्ति Sy.
१९. स ता इत्यर्थः, ता एव गावः Sy.
२०. भवन्ति। वधिधृतादिरूपेणेन्द्रस्याप्यायनत्वात् Sy.
२१. कामये। साधनभूताभिर्गोभिरेवंभूतमिन्द्रं यष्टुमिच्छामीत्यर्थः Sy.
२२. श्रद्धायुक्तेन Sy.
२३. एवम्भूतमिन्द्रम् Sy.
२४. VM. ignores इत् and चित्॥ इद् एव। चिदित्यप्यर्थे Sy.
२५. आप्यायनं कुरुथेत्यर्थः Sy.
२६. क्षीणम् Sy.
२७. शो० P. Omitted by D. अश्लीलम् Sy.
२८. Omitted by D.
२९. ०यव P., D. शोभनाङ्गम् Sy.
३०. कल्याणम् Sy.
३१. कृशम् D. अस्मदीयं गृहम् Sy.
३२. गोभिरुपेतं कुरुथ Sy.
३३. हे कल्याणध्वन्युपेताः! गावः! Sy.
३४. युष्माकम् Sy.
३५. सर्वैरीयत इत्यर्थः Sy.
३६. यागपरिषत्सु Sy.

प्रजावतीः सूयवसं रिशन्तीः शुद्धा अपः सुप्रपाणे पिबन्तीः ।
मा वः स्तेन ईशत माघशंसः परि वो हेती रुद्रस्य वृज्याः ॥ ७ ॥

प्रजावतीः[1] । वत्सवती[2] । शोभन घासम्[3] । भक्षयन्ती[4] । शुद्धानि[5] । उदकानि । शोभने तीर्थे[6] । पिबन्ती[7] । व[8] । रुद्रस्य[9] । हेति[10] । परिवृणक्तु[11] । बुभुक्षापिपासाशनिरिति रुद्रस्य हेतय तासा[12] मा[13] । ईशिष्टेति[14] ।

उपेदमुपपर्चनमासु गोषूप पृच्यताम् । उप ऋषभस्य रेतस्युपेन्द्र तव वीर्ये ॥ ८ ॥

उपेदम्[15] । उपपृच्यताम्[16] । इदम् । अन्नस्योपपर्चन[17] पय । गोषु[18] । आसु । तथा उपपृच्यताम्[19] । ऋषभस्य[20] । रेतसि ? पश्वावोऽप्यृषभस्य ते[21] । तथा उपपृच्यताम्[22] । इन्द्र ! तव[23] । वीर्यभूतासु गोष्विति[24] ।

व्याकरोत् त्रिशमध्याय माधवो नाम कश्चन ।
तीरमाश्रित्य निवसन् कावेर्या दक्षिणे[25] सुखम् ।

---

१. ०ती D
२. हे गावः ! यूयम् Sy.
३. प्रजावत्यो वत्साभिर्युक्ता भवतेति शेषः Sy.
४. शोभनतृणम् Sy.
५. रिशन्त्यो भक्षणार्थं हिसन्त्यो भवत Sy
६. निर्मलाः Sy.
७. सुखेन पातव्ये तटाकादौ Sy.
८. तीर्थे पिबन्तीः तीर्थे पिबन्ती P पिबन्त्यश्च भवत Sy.
९. युष्मान् Sy.
१०. कालात्मकस्य परमेश्वरस्य Sy.
११. आयुधम् Sy.
१२. परिहरतु Sy.
१३. तास P. The passage बुभुक्षा तासाम् refers to हेतिः, so it should immediately follow हेतिः ।
१४. ईश्वरो माभूत् Sy.
१५. VM. ignores मा । वः । स्तेनः and अघशंसः ॥ वो युष्मान् । स्तेनस्तस्करः । अघशसः व्याघ्रादिः शत्रुर्मेशत Sy.
१६. ०पवृच्य० D. सम्पृच्यताम् Sy.
१७. ०पवर्चं० D. आप्यायनम् Sy.
१८ गोष् ह्याप्यायितासु सतीषु तत्सम्बन्धिक्षीरादिहविर्द्वारेणेन्द्र आप्यायितो भवतीत्यर्थः Sy.
१९. ०पवृच्य० D.
२०. गवा गर्भमादधानस्य वृषभस्य Sy
२१ ०वो वृष० D
२२. रेतः is suggested for तेः ।
२३. ०पवृच्य० D. उपेति पुनर्वचन पादभेदाना पूरणार्थमिति Sy.
२४. त्वदीये Sy.
२५. वीर्ये निमित्ते Sy.
२६. ०णं P. Ms. D puts the figure ॥२८॥ here to indicate the end of the twenty-eighth hymn. No such number is given in P.

॥ अथ सप्तमोऽध्यायः ॥

'इन्द्रं वो नरः सख्याय'[1] व्याचिख्यासति माधवः ।
मत्वर्थीयेषु वक्तव्यं पूरणेषु प्रदर्शयन् ॥१॥

मत्वर्थीयान्मत्वर्थीयो न तु लोके प्रदृश्यते[2] ।
प्रयुज्यते स वेदे तु पादं पूरयितुं पुनः ॥२॥

'वाजेभिर्वाजिनीवती'[3] 'रक्षोहत्याय वज्रिवः'[4] ।
'मा यातुर्यातुमावताम्' इति पादा निदर्शनम् ॥३॥

मत्वर्थीयो बहुव्रीहेर्नेष्यते शाब्दिकैरिह ।
'अर्यमा सुदानवः'[5] इति दृष्टो वेदेषु तादृशः ॥४॥

'दस्रा दंसिष्ठ'[6] इति पदे तथा 'रथ्या रथीतमा'[7] ।
दस्रा रथ्येति तत्राहुः[8] पूरणे नेति माधवः ॥५॥

स्तुतिर्विरम्याभिधानादर्थाभेदेऽपि गम्यते ।
दर्शनीयाविमौ देवावित्युक्त्वा भाषते[9] पुनः ॥६॥

न दर्शनीयावपि तु दर्शनीयतमाविति ।
तथा न रथ्यावपि तु रथनेतृतमाविति ॥७॥

---

१. Supplied by the Editor.
२. RV.VI.29.1.
३. Omitted by D.
४. Omitted by P.
५. RV.I.3.10.
६. RV.VI.45.18.
७. ०र्यतुमा० P. RV.VIII.60.20.
८. RV.I.141.9.
९. RV.I.182.2.
१०. रथित० P. RV.I.182.2.
११. P. reads रथ्या रेथेति for दस्रा रथ्येति ।
१२. ०त्राह R.
१३. भाषिते P., D.

दूरप्रयुक्तोपसर्गस्मरणार्थं पुनः क्वचित् ।
उपसर्गाः प्रयुज्यन्ते न[1] ते केवलपूरणाः ॥८॥
'आ वामश्वासः[2] शुचय.' 'आ भारती[3] भारतीभि.' ।
पादे चतुर्थ आकार. प्रयुक्त उभयोरपि ॥९॥
'अभि त्वा[4] गोतमा गिरा' बहवः सन्ति तादृशा. ।
प्रागाख्यातात्[5] प्रयुज्यन्ते ततः प्रागपि केचन ॥१०॥
'त्वं नो[6] अग्ने तव देव[7]' 'मरुतो मारुतस्य न[8].' ।
एवंविधेषु मन्त्रेषु पूरणत्व न विद्यते ॥११॥इति॥

VI.29.

इन्द्रं[9] वो[10] नरः[11] सख्याय[12] सेपुर्[13]महो यन्तः[14] सुमतये[15] चकानाः[16] ।
महो हि दाता[17] वज्रहस्तो[18] अस्ति[19] महामु[20] रण्वमवसे[21] यजध्वम्[22] ॥ १ ॥

इन्द्रं वः ॥ भरद्वाज ॥ इन्द्रम्। युष्माकम्। ऋत्विज। सख्याय। स्पृशेयु। महान्तम्। गच्छन्त। इन्द्रस्य सुमतये। कामयमाना। महत। हि। दाता। वज्रहस्त। भवति। महान्तम्। एव। रमणीयम्। रक्षणाय। यजध्वम्।

---

१. Omitted by P.
२. RV.I.181.2. ३. RV.III.4.8.
४. ०रा: D. RV.I.78.1.
५. ०तान् D. ६. RV.I.31.12.
७. RV.VIII.20.23.
८. अथ सप्तमोऽध्याय आरभ्यते । षष्ठस्य मण्डलस्य तृतीयेऽनुवाके पञ्च सूक्तानि व्याकृतानि । 'इन्द्रं वः' इति षडृचं षष्ठं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैन्द्रम् । अनुक्रम्यते च—'इन्द्रं षट्' (KSA.31.29.p.22.) इति । गतो विनियोगः Sy. ९. हे यजमानाः ! Sy.
१०. युष्माकं सम्बन्धिनः Sy.
११. नेतार ऋत्विजः Sy. १२. सखिभावार्थम् Sy.
१३. ०शे P. परिचरन्ति स्पृशन्ति वा Sy.
१४. महान्ति स्तोत्राणि Sy.
१५. उपयन्तः प्राप्नुवन्तः । कुर्वन्त इत्यर्थः Sy.
१६. सुतमयेत P., D. सुमतिः शोभनानुग्रहात्मिका तवीया बुद्धिः । ताम् । 'क्रियाग्रहणं कर्तव्यम्' इति कर्मणः सम्प्रदानसंज्ञा Sy.
१७. ०मंय० D. यद्वा महो महत्कर्म यन्तोऽनुतिष्ठन्तः सुमतये सुमतिं शोभनां स्तुतिं चकानाः शब्दयन्तः । चकाना इति 'कामयतेरछान्दसं रूपम्। यद्वा 'कै गै शब्दे' इत्यस्माल्लिटः कानचि रूपम् Sy.
१८. महतो धनस्य Sy.
१९. यस्मात् Sy. २०. ता P.
२१. वज्रपाणिरिन्द्रः Sy.
२२. तस्मात् हविर्भिः पूजयत Sy.

आ यस्मिन्हस्ते नर्या मिमिक्षुरा रथे हिरण्ययै रथेष्ठाः ।
आ रश्मयो गभस्त्योः स्थूरयोराध्वन्नश्वासो वृषणो युजानाः ॥ २ ॥

आ यस्मिन्[1] । अपि[1] । यस्मिन्निन्द्रे[2] । हस्ते । नृहिता[3] अर्थाः । तिष्ठन्ति[4] । अपि[4] च यः[5] । हिरण्मये[6] । रथे तिष्ठति[7] । अपि[4] च यस्य । स्थूलयोः[8] । बाह्वोः[9] । अश्वग्रहा[10] भवन्ति । अपि[4] च । अध्वनि[11] । अश्वाः । पुमांसः[12] । युज्जाना[13] भवन्ति ।

श्रिये ते पादा दुव आ मिमिक्षुर्घृष्णुर्वज्री शवसा दक्षिणावान् ।
वसानो अत्कं सुरभिं दृशे कं स्वर्ण नृतविषिरो बभूथ ॥ ३ ॥

श्रिये[14] **ते**[15] । श्रयणाय[16] मनुष्याणाम् । तव[17] । पादानि[18] तेजासि । मनुष्याणा परिचर्याम्[19] । कुर्वन्ति[20] प्रकाश कुर्वन्ति गमनाय । धर्षिता[21] । बलेन[22] । वज्री[23] । दानवान्[24] । आच्छादयन् । रूपम्[25] । शोभनगन्धम्[26] । दर्शनाय त्वाम् । आदित्यः[27] । इव । गमनशीलः[28] । भवसि । नेतः[29] । [30] [31]

---

१. VM. explains आ as अपि and अपि च ।
२. इन्द्रे कुत्र ? इति चेत्—तदीये बाहौ । यद्वा एतत्समानाधिकरणमिन्द्रस्य विशेषणम् । हस्ते हन्तर्यस्मिन्निन्द्र इत्यर्थः । यद्वा ईदृशे यस्मिन्निन्द्रे वर्तमानाः रायः आसिञ्चन्ति आपूरयन्ति स्तोतृन् Sy. हस्तो हन्तेः । प्राशृहंनने N. 1.7.
३. नृभ्यो हिता रायः Sy.
४. आसिच्यन्ते आपूर्यन्ते । मिमिक्षुः—व्यत्ययेन कर्मणि कर्तृप्रत्ययः Sy.
५. इन्द्रः Sy.
६. सुवर्णमये Sy.
७. ०न्ति D. VM. explains रथे and रथेस्थाः together as रथे तिष्ठन्ति ॥ रथे स्थाता तत्स्वभावः सन् रथे आतिष्ठति । यद्वा रथेष्ठा रथेऽवस्थिता रायो धनानि हिरण्मये रथे तिष्ठन् आसिञ्चति अभिवर्षति Sy.
८. विस्तृतयोः Sy.
९. गभस्तिरिति बाहुनाम Ngh. 2.4.
१०. अभीशव आयम्यन्ते Sy.
११. अध्वनि मार्गे आ मिमिक्षुः आसिञ्चन्ति आपूरयन्ति । आगच्छन्तीत्यर्थः । तमिन्द्रं स्तुम इति शेषः Sy.
१२. सेक्तारो युवानः Sy.
१३. युजुञ्जाना P. जुयुञ्जाना D. रथे युज्यमानाः Sy.
१४. ०य D.
१५. हे इन्द्र ! Sy.
१६. ऐश्वर्यार्थम् Sy.
१७. त्वदीययोः Sy.
१८. पदा० D. पादयोः Sy.
१९. परिचरणम् Sy.
२०. आसिञ्चन्ति, समर्पयन्ति । भरद्वाजः समर्पयति । व्यत्ययेन बहुवचनम् । यद्वा ते तव पादौ श्रिये श्रयितुं सेवितुम् आ मिमिक्षुः आसिञ्चन्ति अनुतिष्ठन्ति Sy.
२१. शत्रूणां धर्षकः Sy.
२२. यस्त्वं शवसा बलेन Sy.
२३. वज्रवान् Sy.
२४. दक्षिणा स्तोतृभ्यो दातव्यं धनं तद्वान् Sy.
२५. सततगमनशीलमात्मीयं रूपम् Sy.
२६. प्रशस्तम् Sy.
२७. सर्वेषां दर्शनार्थम् Sy.
२८. सूर्यः Sy.
२९. गन्तैषणीयो वा Sy.
३०. हे नेतः ! इन्द्र ! स त्वम् Sy.
३१. VM. ignores कम् ॥ कमिति पूरकः Sy.

स सोम आभिंष्टतमः सुतो मघस्मिन्पक्तिः पच्यते सन्ति धानाः ।
इन्द्रं नरः स्तुवन्तो ब्रह्मकारा उक्था शंसन्तो देववाततमाः ॥ ४ ॥

स सोमः[1] । सः[2] । सोमः[3] । आभिमुख्येनेन्द्रस्य मिश्रयिता[4] । सुतः[5] । अभवत्[6] । यस्मिन्[7] । पुरोडाशः[8] । पच्यते सवनीयः । सन्ति च । धानाः[9] इन्द्रम् । नरः[10] । स्तुवन्तः[11] । स्तोत्रस्य कर्तारः[12] । उक्थानि[13] च[14] । शंसन्तः[15] । देवैरतिशयेनाभिगम्यन्ते[16] स्तोत्रशस्त्रशुश्रूषुभिः ।

न ते अन्तः शवसो धाय्यस्य वि तु बबाधे रोदसी महित्वा ।
आ ता सूरिः पृणति तूतुजानो यथेवाप्सु समीजमान ऊती ॥ ५ ॥

न ते[17] अन्तः[18] । न । तव । अस्य[19] । बलस्य । अन्त[20] । केनचित्[21] क्रियते[22] । महत्त्वेन[23] तच्छवः[24] । द्यावापृथिवी[25] । विबाधते[26] । शीघ्रम्[27] । आप्रयच्छन्ति[28] । तानि धनानि[29] । त्वरमाण[30] । गोयूथानिव[31] गोवृषः[32] । अप्सु[33] । सङ्गच्छमानः[34] । रक्षणार्थम्[35] ।

---

१. ०म D.
२. यः सोमो वक्ष्यते स सोमः Sy.
३. आभिमुख्येन मिश्रतमः भूत् । इन्द्रेणात्यर्थं सङ्गच्छते Sy.
४. अभिषुतः सन् Sy.
५. ०तो भवन् P., D.
६. सोमेऽभिषुते सति Sy.
७. पुरोपाशः P. ०शं D. पक्तव्यः पुरोडाशादिः Sy.
८. हविरर्थं संस्कृता भवन्ति Sy.
९. ध P. धनाः D. भृष्टयवाः Sy.
१०. नेतारः Sy.
११. स्तोत्रैः स्तुवन्तः Sy.
१२. कर्ता नि P. ब्रह्मणोऽन्नस्य हविर्लक्षणस्य कर्तार ऋत्विजः Sy.
१३. उक्थानि शस्त्राणि Sy.
१४. Omitted by P.
१५. शंस्यन्तः P. उच्चारयन्तः Sy.
१६. देवानतिशयेनोपगता भवन्ति स सोम इन्द्रेण सम्मिश्रितोऽभूदित्यन्वयः Sy.
१७. ग P.
१८. हे इन्द्र ! Sy.
१९. उक्तगुणस्य Sy.
२०. अवसानम् Sy.
२१. के D.
२२. अत्र केवलोऽपि दधातिरवपूर्वार्थो द्रष्टव्यः । (न) अवाधायि । अस्माभिः (न) अज्ञायीत्यर्थः Sy.
२३. ०त्त्वे० is suggested for ०त्वे० ।
२४. यद्बलम् Sy.
२५. द्यावापृथिव्यौ Sy.
२६. यस्माद्बलाद् द्यावापृथिव्यौ बिभीत इत्यर्थः Sy.
२७. क्षिप्रम् Sy.
२८. आपूरयति Sy.
२९. तद्बलम् Sy.
३०. धनि P.
३१. त्वरितः सन् Sy.
३२. तत्र दृष्टान्तः । यथा गोपालोऽपः पाययन्गाः स्तर्पयति तद्वत् Sy.
३३. उदकेषु Sy.
३४. ऊत्या तर्पकेण हविषा Sy.
३५. सम्यग्यजन् Sy.
३६. VM. ignores सूरिः ॥ सूरिः स्तोता Sy.

एवेदिन्द्रः सुहवं ऋष्वो अस्तुती अनूती हिरिशिप्रः सत्वा ।
एवा हि जातो असमात्योजाः पुरू च वृत्रा हंनति नि दस्यून् ॥ ६ ॥

एवेत् । एवम् । एव । इन्द्रः । स्वाह्वान. । दर्शनीय । भवतु । रक्षणायास्माकम् । अरक्षणाय च शत्रूणाम् । हरणशीलहनुः । सदनशीलः । एवम् । हि । जात इन्द्र । असमात्योजाः समातिबलो यो भवतः स समात्योजा अतादृश आसीत् । पुरूणि । च । वृत्राणि । हन्ति । नि च हन्ति । असुरानिति ।

VI.३०.

भूय इद्वावृधे वीर्यायँ एको अजुर्यो दयते वसूनि ।
प्र रिरिचे दिव इन्द्रः पृथिव्या अर्धमिदस्य प्रति रोदसी उभे ॥ १ ॥

भूयः । भूयः । एव । वर्धते । वीर्यकरणाय । स्वयमेव । जरयितुमशक्य । प्रयच्छति । धत्तानि । सोऽयमिन्द्रः । पृथिव्याः । दिवश्च । अतिरिक्त आसीत् । अर्धम् । एव । प्रति । अस्येन्द्रस्य । द्यावापृथिवी भवतः ।

---

१. उक्तेन प्रकारेण Sy.
२. इतिति पूरणः Sy.
३. ०न्द्र P., D.
४. सुखेनाह्वातव्यः Sy.
५. महान् Sy.
६. आगमनेन Sy.
७. र० P., D. अनागमनेन वा Sy.
८. शिप्रे हनू नासिके वा । हरितवर्णे शिप्रे यस्य तादृश इन्द्रः Sy.
९. गमयिता भवति धनानाम् । स्वयमागतोऽनागतोऽपि स्तोतृभ्यो धनं प्रयच्छतीत्यर्थः Sy.
१०. प्रादुर्भूतोऽयमिन्द्रः Sy.
११. ०न्द्रे समान्योजाः P. ०न्द्रे स० D. असमात्यसमानमनुपममुत्कृष्टतरमोजो बलं यस्य तादृशः सन् Sy.
१२. य य P. य D.
१३. बहूनि Sy.
१४. आवरकाणि रक्षःप्रभृतीनि Sy.
१५. हिनस्तु Sy.
१६. न P., D. निहन्तु Sy.
१७. उपक्षपयितुन् शत्रूंश्च Sy.
१८. 'भूय इत्' इति पञ्चर्चं सप्तमं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैन्द्रम् । 'भूयः पञ्च' (KSA. 31.30.p.22.) इत्यनुक्रान्तम् । अग्निष्टोमे माध्यन्दिनसवनेऽच्छावाकशस्त्र एतत्सूक्तं शंसनीयम् । सूत्रितञ्च– 'उदिन्वस्य रिच्यते भूय इत्' (ĀSS. 5.16.) इति । महाव्रतेऽपि निष्केवल्य एतत्सूक्तम् । तथैव पञ्चमारण्यके सूत्रितम्—'भूय इद्वावृधे वीर्याय नृणामु त्वा' (AĀ.5.1.6.) इति Sy.
१९. अयमिन्द्रः Sy. २०. बहुतरम् Sy.
२१. प्रवृद्धोऽभूत् Sy.
२२. वीरकर्माणि वृत्रवधादीनि कर्तुम् Sy.
२३. मुख्यः Sy.
२४. जायि० P., D.
२५. स्तोतृभ्यो ददाति Sy.
२६. भूमेश्च Sy. २७. द्युलोकात् Sy.
२८. अतिरिच्यते Sy.
२९. वृति P., D.
३०. अस्येन्द्रस्यार्धो भागो द्यावापृथिव्योः प्रतिनिधिर्भवतीत्यर्थः Sy.
३१. VM. ignores उभे ।

अधा मन्ये बृहदसुर्यमस्य यानि दाधार नकिरा मिनाति ।
दिवेदिवे सूर्यो दर्शतो भूद्धि सद्मान्युर्विया सुक्रतुर्धात् ॥ २ ॥

अध । अत[1] । आनामि[2] । बृहत्[3] । इन्द्रस्य । बलमिति[4] । यान्यसौ[5] । धारयति । न तानि कश्चित् । हिनस्ति व्रतानि । तत्रैतदेकं व्रतम्, अन्वहम्[6] । दर्शनीय । सूर्य[7] । भवति । तथा सुकर्मेन्द्रः[8] । सद्मानि[9] । उरूणि[10] पृथिव्यादीनि । विधारयतीति[11] ।

अद्या चिन्नू चित्तदपो नदीनां यदाभ्यो अरदो गातुमिन्द्र ।
नि पर्वता अद्मसदो न सेदुस्त्वया दृळ्हानि सुक्रतो रजांसि ॥ ३ ॥

अद्या चित्[12] । अद्य[13] । पुरा[14] । चे[15] । तत्रैव[16] । वेगः[17] । नदीनाम्[18] । यत्र[19] । आभ्यः[20] । मार्गम्[21] । वज्रेणारदः[22] ।

---

१. अधुना Sy.
२. स्तौमि । मन्यतिः स्तुतिकर्मा Sy.
३. महत् Sy.
४. असुरहननकुशलं बलम् Sy.
५. स चेन्द्रो यानि कर्माणि Sy.
६. कानि पुनस्तानि ? आवरकस्यासुरस्य वधेन सूर्यं प्रकाशितवानित्येकं कर्म Sy.
७. प्रतिदिनम् Sy.
८. वृत्रेणावृतः सूर्यः Sy.
९. ०न्द्र P. ०कर्म्मेन्द्र० D. शोभनकर्मा स इन्द्रः Sy.
१०. सत्मानि P., D.
भुवनानि Sy.
११. उतूणि P.
विस्तीर्णानि Sy.
१२. व्यधात् । अकार्षीत् । इदमपरं कर्म । एतदादीनि बहूनि कर्माणि कृतवानित्यर्थः Sy.
१३. भरद्वाजस्येदमार्षम् Dur.
भरद्वाजस्य SKN.
१४. हे इन्द्र ! अद्यापि Sy. अद्या, इति सांहितिकं दीर्घत्वम् SKN.
१५. नू पुरा Sy.
१६. अपि Sy., Dur.
१७. तदेव SKN.
१८. कर्म वर्तते Sy. कर्म प्रवर्तते Dur. कर्म SKN.
१९. नदीनां सम्बन्धि Sy., Dur.
२०. यद् आभ्यः व्यत्ययेनैते चतुर्थीद्वितीयार्थयोर्द्वितीयाचतुर्थ्यौ । यस्मै इमाः SKN.
२१. नदीभ्यः Sy., Dur. यदर्थमेता नदीरित्यर्थः SKN.
२२. अत्रापि चतुर्थ्यर्थ एव द्वितीया । यस्मा इत्यनेन सामानाधिकरण्यम् । यस्मै गातवे सर्वत्र प्राणिनामुपकारार्थमुदकपर्णानामासां गमनायेत्यर्थः SKN.
२३. प्रवहणार्थं व्यलिख इति यत् कर्म तत्सर्वदानुपक्षीणं सद्वर्तत इत्यर्थः Sy. प्रवहणार्थं व्यलिख इति यत् कर्म तत्सर्वमनुपक्षीणं वर्तत इत्यर्थः Dur. 'रद विलेखने' । खातवान् वृष्टपुदकद्वारेणाखनस्त्वम् SKN.

इन्द्र ! तथा शिलोच्चयाश्च[1]। आत्मनैव स्वस्थाने सीदन्त[2]। निषीदन्ति[3]। त्वया। दृढा भवन्ति[4]। सुकर्मन्[5]! लोका:[6]।

सत्यमित्तन्न त्वावाँ अन्यो अस्तीन्द्र देवो न मर्त्यो ज्यायान्।
अहन्नहिं परिशयानमर्णोऽवासृजो अपो अच्छा समुद्रम्॥ ४॥

सत्यमित्[8]। सत्यम्[9]। इत्[10]। तत्[11]। न। त्वत्सदृश[12]। इन्द्र[13]! अन्य कश्चित्। अस्ति। देव[14]। मर्त्यो

---

१. अपि च त्वदाज्ञया गिरयः Sy.
अपि च त्वदाज्ञया पर्वता गिरयः Dur.
मेघाः SKN.

२. अश्नादनीयमन्नम्। तदर्थं सीदन्तः पुरुषा इव। यथा ते भोजनार्थं नैश्चल्येनासते तथेत्यर्थः Sy.
अश्नमदनीयमन्नं तदर्थं सीदन्तः पुरुषा इव। यथा ते भोजनार्थं नैश्चल्येनासत इत्यर्थः Dur.
अश्नानामर्थाय निषण्णा औदरिका आत्मम्भरयोऽन्नसदस्त इव SKN.

३. निषण्णाः। उत्पतनं परित्यज्य क्वचिदेव स्थाने नैश्चल्येनोपविष्टा बभूवुः Sy. निषण्णाः। उत्पन्न ? (उत्पतनं) परित्यज्य क्वचिदेव स्थाने नैश्चल्येनोपविष्टा बभूवुः Dur. निशब्दः सेदुरित्यनेन सम्बन्धयितव्यः। त्वया हन्यमाना निषीदन्ति। यथा भोजनप्रधाना दैवपित्र्यकर्मवर्जिता अनन्याः पुरुषा नरकान्नरकं पतन्तोऽधो गच्छन्ति, तद्वत् त्वया हन्यमाना मेघा इत्यर्थः SKN.

४. दृंहितानि स्थिरीकृता आसन् Sy. अतः कारणात्....दृढानि दृढीकृतानीत्यर्थः Dur.
सुस्थितानि SKN.

५. अतः कारणात् हे शोभनकर्मन्निन्द्र ! Sy.
शोभनकर्मन् ! Dur. हे सुकर्मन् ! सुप्रज्ञ ! वा SKN.

६. सर्वे लोकाः Sy., Dur.
लोकाः, अयो लोका अपि त्वामाश्रिता इत्यर्थः SKN.

७. VM. ignores न and explains चित् once only.
अद्य च पुरा च तदेव कर्म नदीनां वर्तते। कतमत् ? यदुद्दिश्य वहनं कर्म, कथं नाम ? अस्य लोकस्योपकारायाजस्रमेता वहेयुरिति। गातुं गमनमार्गमाभ्यो नदीभ्योऽर्थाय त्वमरदः, अखनस्त्वम्। किम् ? गमनम्, गच्छत्यनेनेति गमनम्। हे इन्द्र ! तदेव कर्म, अद्यापि वर्तते तासां नदीनां यथा व्याविष्टमेव त्वया। ताभिरद्यापि तदनुष्ठीयत इत्यभिप्रायः। . एवं तावदयं त्वयैव नद्यधीनेनोपकारेणानुगृह्यते लोकः।....य एते पर्वताः पर्ववन्तो मेघा अश्नसदो निष्पादयितव्यमन्नमस्माभिरित्येतमर्थमुद्दिश्य, अन्तरिक्षलोके सीदन्ति, अव तिष्ठन्ते गच्छन्ति वा तेऽपि युष्मद्वीर्योपमृदिता एवोदकभूता नीचैर्भूम्यामन्ननिष्पत्त्यर्थं सेदुः सीदन्तीत्यर्थः। तदेवं कृत्वा किं बहुना, सर्वथाप्युदकप्रदानद्वारेण त्वयैवैतानि हे सुकर्मन् ! बृळ्हानि दृढीकृतानि रजांसि लोका इत्यर्थः। त्वं चेदेषामेवमन्नमुदकं च न व्यधास्यः सर्व एवैते लोका नाभविष्यन्नित्यभिप्रायः। इहाद्यैतस्य सन्निधौ वर्तमानो नूचिदित्येष पुराणाभिधायी, इत्युपपद्यते Dur.
नू चिदिति निपातः। पुराणनवयोः नू चेति च। 'अद्या चिन्नू चित्तदपो नदीनाम्'। अद्य च पुरा तदेव कर्म नदीनाम्। N.4.17.,SKN. II.243.

८. ०मिव P., D.

९. हे इन्द्र ! Sy.

१०. सम् P.

११. एव। नानृतम् Sy.

१२. वक्ष्यमाणम् Sy.

१३. अन्यो देवः Sy.

१४. त्वत्सदृशोऽन्यो मनुष्योऽपि नैव विद्यते Sy.

वा। न[1] च। ज्यायानिति[2]। हतवानसि[3]। अहिम्[4]। उदकम्। परिवृत्य शयानम्। 'हत्वा च समुद्रम्[5]। प्रति[6]। अवासृज[7]। अप[8]।

त्वमपो वि दुरो विषूचीरिन्द्र दृळहमरुजः पर्वतस्य[9]।
राजाभवो जगतश्चर्षणीनां साकं सूर्यं जनयन्द्यामुषासम्[10] ॥ ५ ॥

त्वमपः[11]। त्वम्। उदकानि। मेघस्य[12]। द्वाराणि[13]। व्यरुज[14]। विष्वगञ्चनानि[15]। इन्द्र ! दृढमपा निर्गमनद्वार[16] च। राजा[17]। अभव। जगत[18]। मनुष्याणाम्। सूर्यम्। दिवम्[19]। उषस[20] च। सह[21]। जनयन्[22]।

VI.31.

अभूरेको[23] रयिपते रयीणामा हस्तयोरधिथा इन्द्र कृष्टीः।
वि तोके अप्सु तनये च सूरेऽवोचन्त चर्षणयो विवाचः ॥ १ ॥

अभूः[24] ॥ सुहोत्रो भरद्वाज ॥ त्वमेवैक[25] । धनानामीश्वर[26] । अभव । तथा तव हस्तयो समीपे ।

---

१. न खल्वस्ति। इति यद् गीयते तत सत्यमेव Sy.
२. ज्यानिति P. जानिति D. अधिकोऽपि देवो मनुष्यो वा Sy.
३. अवधीः Sy. ४. मेघम् Sy.
५. अन्तरिक्षं जलधिं वा Sy.
६. आभिमुख्येन Sy.
७. अवाङ्मुखतया विसृष्टवानसीत्यर्थः Sy.
८. उदकानि Sy.
९. अपः Sy. १०. पर्वतो मेघस्य Sy.
११. वृत्रेणावृताः Sy.
१२. व्यरु D. अभाङ्क्षीः Sy.
१३. विविधमञ्चन्त्यो यथा सर्वतः प्रसृता भवन्ति तथा व्यसृजः Sy.
१४. बन्धकप्रदेशम् Sy.
१५. अधिपतिः Sy. १६. भवसि Sy.
१७. अपि च जगतः सम्बन्धिनीनाम् Sy.
१८. प्रजानाम् Sy.
१९. द्युलोकम् Sy.
२०. तमसा प्रावृतमेतत्त्रितयम् Sy.
२१. युगपदेव Sy.
२२. यत् P.D. प्रादुर्भावयन् प्रकाशयन्नित्यर्थः Sy.
२३. 'अभूरेकः' इति पञ्चर्चमष्टमं सूक्तं भरद्वाजस्य सुहोत्रस्यार्षम्। उपान्त्या शक्वरी शिष्टाश्चतस्रस्त्रिष्टुभः। इन्द्रो देवता। अनुक्रम्यते च—'अभूरेकः सुहोत्रस्तु चतुर्थी शक्वरी' (KSA. 31.31.p.22.) इति। महाव्रतस्य निष्केवल्य इदमादीन्यष्ट सूक्तानि शंसनीयानि। तथा पञ्चमारण्यकम्—'अभूरेको रयिपते रयीणामित्यष्टौ सूक्तानि' (ĀĀ. 5.2.2.) इति। पृष्ठ्यस्य षष्ठेऽहनि निष्केवल्य इदं सूक्तं निविद्धानम्। सूत्रितञ्च—'एन्द्र याह्युप नः प्र धान्वस्याभूरेक इति निष्केवल्यम्' (ĀŚS 8.1.) इति। विश्वजिति माध्यन्दिनेऽच्छावाकशस्त्रे सामसूक्ताख्यमेतच्छंसनीयम्। सूत्रितञ्च—'अभूरेकी रयिपते रयीणामिति सामसूक्तानि' (ĀŚS. 8.7.) इति Sy.
२४. प्रधानभूतस्त्वम् Sy.
२५. स्वामी Sy.
२६. भवसि। यद्वा रयीणां रयिपते ! इति सम्बन्धः। एको रयिशब्दोऽनुवादो यथा 'गवामसि गोपतिरेक इन्द्रः' (RV. VII.98.6.) इति। तदानीमेको मुख्यस्त्वं भवसीति योजनीयम् Sy.
२७. त्वम्, आत्मीययोर्बाह्वोः Sy.

प्रजाः । करोषि । धनकामा । त्वा तनयादिनिमित्तम् । विविधम् । आह्वयन्ते । सूरे सूर्यः ।

त्वद्भियेन्द्र पार्थिवानि विश्वाच्युता चिच्च्यावयन्ते रजांसि ।
द्यावाक्षामा पर्वतासो वनानि विश्वं दृळ्हं भयते अज्मन्ना ते ॥ २ ॥

त्वद् भिया । त्वत्त । भयेन । अच्युतानि । अपि । पार्थिवानि । रजासि लोकाः । स्वस्थानात् च्यवन्ते । द्यावापृथिवी । शिलोच्चया । वनानि । विश्व च । दृढम् । तव । गमने । बिभेति ।

त्वं कुत्सेनाभि शुष्णमिन्द्राशुषं युध्य कुयवं गविष्टौ ।
दशं प्रपित्वे अध सूर्यस्य मुषायश्चक्रमविवे रपांसि ॥ ३ ॥

त्वं कुत्सेन । त्वम् । कुत्सेन सह । अभ्ययोधीः । शोषयितुमशक्यम् । शुष्णमसुरम् । इन्द्र । कुयव चासुरम् । गवामन्वेषणे । दश चासुरान तत्सहायान् । प्रात.काले । सूर्यस्य । चक्रम् ।

---

१. आधत्से । सर्वं जगत्तवाज्ञायां वर्तत इत्यर्थः Sy.
२. VM. seems to explain चर्षणयः as धनकामाः ॥ चर्षणयो मनुष्याः Sy.
३. आदि refers to तोके and अप्सु ॥ तोके पुत्रे । अप्सूदकेषु तनये पौत्रेषु चैतेषु निमित्तभूतेषु सत्सु Sy.
४. आह्वयन्ते seems to be the explanation of अवोचन्त ॥ ब्रुवन्ति Sy.
५. VM. seems to take सूरे as सूरः । Sy. construes सूरे with तनये and explains it as शत्रूणां प्रेरके ।
६. VM. ignores रयिपते । इन्द्र । च and विवाचः ॥ हे रयिपते ! हे इन्द्र ! विवाचः विशिष्टाः स्तुतीः Sy.
७. भीत्वा P.
८. च्यावयितुमशक्यानि Sy.
९. 'पृथिव्यन्तरिक्षनाम' (Ngh. 1.3.) तत्र भवानि Sy.
१०. ०का D. उदकानि Sy. रजो रजतेः । ज्योती रज उच्यते । उदकं रज उच्यते । लोका रजांस्युच्यन्ते । असृगहनी रजसी उच्येते N.4.19.
११. मेघाः प्रच्यावयन्ति । वर्षन्तीत्यर्थः Sy.
१२. द्यावापृथिव्यौ Sv.
१३. गिरयः Sy.
१४. वृक्षाश्च भयं प्राप्नुवन्ति Sy.
१५. वश्वं P. वश्वः D. किम्बहुना ? सर्वम् Sy.
१६. स्थिरं प्राणिजातम् Sy.
१७. आगमने सति Sy.
१८. वि० P.
१९. VM. ignores इन्द्र । विश्वा and आ ॥ हे इन्द्र ! विश्वानि व्यापकानि Sy.
२०. अभ्ययुध्यः । कुत्सस्य साहाय्यार्थं तेनासुरेण सह युद्धं कृतवानसीत्यर्थः Sy.
२१. अशुषं शोषयितुमशक्यं प्रबलम् Sy.
२२. शुष्णासु० P. शुष्णं सर्वस्य शोषकमेतत्संज्ञमसुरम् Sy.
२३. एतत्संज्ञमसुरम् Sy.
२४. गावो बाणा इच्यन्ति गच्छन्तीति गविष्टिः सङ्ग्रामः । तस्मिन् Sy.
२५. P. adds भवो before दश ॥ अदशः हिंसितवानसि । 'दंश दशने' इत्येतस्माच्छान्दसे लोटि रूपम् Sy.
२६. प्रपतने युद्धे Sy.
२७. रथावयवभूतम् Sy.

अमुष्णाः[1]। तेन चक्रेण तान्[2] दश। अविवे.[3], अपागमय[4]। रप[5] शब्दोऽसुरवचन[6]।[7]

त्वं शतान्यव शम्बरस्य पुरो जघन्थाप्रतीनि दस्योः।
अशिक्षो यत्र शच्या शचीवो दिवोदासाय सुन्वते सुतक्रे भरद्वाजाय गृणते वसूनि ॥ ४ ॥

त्वं शतानि[8]। त्वम्। शम्बरासुरस्य[9]। शतानि[10]। पुर[11]। हतवानसि[12]। शत्रुभिरप्रतिगतानि[13]। उपक्षपयितु[14]। प्रायच्छ[15]। यत्र[16]। प्रज्ञावन्[17]! प्रज्ञया। दिवोदासाय। सुन्वते[18]। हे सुतक्रे[19]! सुतमिन्द्रः फलप्रदानेन क्रीणाति[20]। भरद्वाजकुलजाय[21]। स्तुवते। धनानि[22]। तदानीमवजघन्थेति[23]।

स सत्यसत्वन्महते रणाय रथमा तिष्ठ तुविनृम्ण भीमम्।
याहि प्रपथिन्नवसोप मद्रिक्प्र च श्रुत श्रावय चर्षणिभ्यः ॥ ५ ॥

स सत्यसत्वन्[24]। स[25]। सत्यबल[26]! महते। सङ्ग्रामाय[27]। रथम्[28]। आतिष्ठ। बहुबल[29]! भीमम्[30]।

---

१. अमुष्णाः। तदाप्रभृति सूर्यस्य रथ एकचक्रोऽभूत्। तथा चाम्नातम्। 'सप्त युञ्जन्ति रथमेकचक्रम्' (RV.I.164.2.) इति। एतशाख्यस्य ऋषेः सूर्येण सह युद्धे तत्साहाय्यार्थमागत इन्द्रः सूर्यस्य चक्रमपहृतवानित्याख्यातम्। 'सूरश्चक्रं प्र बृहज्जात ओजसा' (RV.I.130.9.) इति निगमान्तरम् Sy.

२. दर्श P. तान् दश refers to असुरान्। It seems to be the explanation of रपांसि ॥ पापकारीणि रक्षःप्रभृतीनि Sy.

३. अपिवेः P. अस्माल्लोकादगमयः। अवधीरित्यर्थः Sy.

४. ०मया D.

५. रवश० P. ०पश० D.

६. The passage रपःशब्दोऽसुरवचनः should immediately follow तान् दश।

७. VM. ignores अध ॥ अपि च Sy.

८. हे इन्द्र! Sy.

९. एतत्संज्ञस्य Sy.

१०. शतसङ्ख्यानि Sy.

११. पुरीः Sy.

१२. अवाहन् Sy.

१३. अप्रतीनि—लिङ्गव्यत्ययः। केनाप्यप्रतिगताः Sy.

१४. ०यितः P. ०यितं D. उपक्षपयितुरसुरस्य Sy.

१५. प्रय० P. धनानि प्रादाः Sy.

१६. यस्मिन् काले Sy.

१७. ०वान् P., D.
हे प्रज्ञावन्! Sy.

१८. सोमाभिषवं कुर्वते Sy.

१९. हे सुतक्रे! अभिषुतेन सोमेन क्रीतेन्द्र! Sy.

२०. तमि० P.

२१. ०कुलाय P., D.

२२. धनानि प्रादाः Sy.

२३. ०घंन्थे० D. तस्मिन् काले। शाम्बरीः पुरोऽवजघन्थेत्यन्वयः Sy.

२४. ०त्वत् P.

२५. Omitted by P. स त्वम् Sy.

२६. हे सत्यसत्वन्! सत्याः सत्वानो भटा यस्य स तथोक्तः Sy.

२७. सङ्ग्रामाय तदर्थम् Sy.

२८. बलम् D. आत्मीयं रथम् Sy.

२९. हे तुविनृम्ण! तुवि बहुलं नृम्णं धनं यस्य स तथोक्तः। हे तादृशेन्द्र! Sy.

३०. भयङ्करम् Sy.

उपयाहि[1] । प्रशस्तमार्ग[2] ! रक्षणार्थम्[3] । मदभिमुखम्[4] । प्रत्यापय[5] चास्मान् । मनुष्येभ्यः[6] । हे विश्रुत !

VI.32.

अपूर्व्या पुरुतमान्यस्मै महे वीराय तवसे तुराय ।
विरप्शिने वज्रिणे शंतमानि वचांस्यासा स्थविराय तक्षम् ॥ १ ॥

अपूर्व्या[7] । नूतनानि[8] । बहुतमानि । अस्मै[9] । महते । वीराय[10] । वृद्धाय[11] । क्षिप्राय[12] । स्तुतिमते[13] । वज्रिणे[14] । सुखतमानि[15] । वचांसि[16] । आस्येन । करोमि[17] । स्थविराय[18] ।

स मातरा सूर्येणा कवीनामवासयद्रुजदद्रिं गृणानः ।
स्वाधीभिर्ऋक्वभिर्वावशान उदुस्रियाणामसृजन्निदानम् ॥ २ ॥

स मातरा[19] । सः । द्यावापृथिवी । सूर्येण । स्तोतॄणामर्थाय[21] । वासयति[22] । भिनत्ति च । मेघम्[24] । स्तूयमानः[25] । सुकर्मभिः[26] । स्तुतिमद्भिर्मरुद्भिः[27] सह । कामयमानः[28] । गवामसुरापहृतानाम्[29] । बन्धनम्[30] । उदसृजत्[31] इति ।

---

१. आगच्छ Sy.
२. हे प्रकृष्टमार्गेन्द्र ! Sy.
३. रक्षणेन सह तेन च रथेन Sy.
४. मदभिमुखः Sy.
५. प्रत्यावय P. प्रश्रावय is suggested for प्रत्यापय ॥ अस्मान् प्रख्यापय च । सर्वासु प्रजासु मध्येऽस्मान् प्रख्यातान् कुर्वित्यर्थः Sy.
६. प्रजाभ्यः Sy.
७. 'अपूर्व्या' इति पञ्चर्चं नवमं सूक्तं त्रैष्टुभमैन्द्रम् । 'अपूर्व्या' (KSA. 31.32.p.22.) इत्यनुक्रान्तम् । द्वितीये छान्दोमिकेऽहनि निष्केवल्य एतत्सूक्तम् । सूत्रितञ्च—'अपूर्व्या पुरुतमानि तां सु ते कीर्तिम्' (ĀSS. 8.7.) इति । महाव्रतेऽपि निष्केवल्येऽस्य सूक्तस्य विनियोग उक्तः Sy.
८. अपूर्व्याणि पूर्वैरकृतानि नूतनानि Sy.
९. इन्द्राय Sy.
१०. विविधं शत्रूणां मारयित्रे Sy.
११. तवस्विने बलवते Sy.
१२. विप्राय P. त्वरमाणाय Sy.
१३. विशेषेण स्तुत्याय Sy.
१४. वज्रवते Sy. १५. सुखकृत्तमानि Sy.
१६. स्तुतिरूपाणि वाक्यानि Sy.
१७. अतक्षं करोमि Sy.
१८. प्रवृद्धाय Sy. १९. इन्द्रः Sy.
२०. मातरौ दिवं च पृथिवीं च Sy.
२१. क्रान्तदर्शनामङ्गिरसामर्थाय । यद्वा कवीनामङ्गिरसामिति तृतीयार्थे षष्ठी । अङ्गिरोभिर्गृणानः स्तूयमान इति सम्बन्धः Sy.
२२. प्राकाशयत् Sy. २३. भञ्जन् Sy.
२४. गवामदर्शनाय बलेन स्थापितं पर्वतम् Sy.
२५. ०नाः P.
२६. अपि च शोभनध्यानैः Sy.
२७. स्तोतृभिरङ्गिरोभिः Sy.
२८. पुनः पुनः काम्यमानः सन् Sy.
२९. बलस्य भृत्यैः पणिभिरपहृतानां गवाम् Sy.
३०. स्तुति महद्भिरङ्गिर्महद्भिश्च बलैः कामानां वर्षितः बन्धनम् P. Cf. the commentary on RV.VI.32.4.
३१. ०जेति P. अमोचयत् Sy.

स वह्निभिर्ऋक्वभिर्गोषु शश्वन्मितज्ञुभिः पुरुकृत्वा जिगाय ।
पुरः पुरोहा सखिभिः सखीयन्दृळ्हा रुरोज कविभिः कविः सन् ॥ ३ ॥

स वह्निभिः । सः[१] । वोढृभिः[२] । मरुद्भिः[३] सह । गोषु[४] । सर्वदा । क्षिप्तजानुभिः[५] विक्षिप्तपादैः । बहुना कर्मणा कर्ता[६] । गच्छति[७] । पुरः[८] । पुरो हन्ता । सखिभि[९] । सखिभिरिच्छन्[१०] । दृढाः[११] । भञ्जयति[१२] । कविभिर्मरुद्भिः सह । कविः[१३] । सन्निति[१४] ।

स नो व्याभिर्जरितारमच्छा महो वाजेभिर्महद्भिश्च शुष्मैः ।
पुरुवीराभिर्वृषभ क्षितीनामा गिर्वणः सुविताय प्र याहि ॥ ४ ॥

स नो व्याभिः[१५] । स त्वम् । पुरुवीराभिः[१६] । बन्धनसमर्थाभिर्नियुद्भिः[१७] । स्तोतारम् । प्रति । महद्भिः[१८] । अन्नैः[१९] । महद्भिः । च । बलैः[२०] । कामानां वर्षितः[२१] ! गीर्भिर्वननीय[२२] ! अभिप्रयाहि[२३] । अभ्युदयाय[२४] । मनुष्याणां[२५] मध्ये जरितारमिति ।

स सर्गेण शवसा तक्तो अत्यैरप इन्द्रो दक्षिणतस्तुराषाट् ।
इत्था सृजाना अनपावृदर्थं दिवेदिवे विविषुरप्रमृष्यम् ॥ ५ ॥

स सर्गेण । उत्साहेन[२६] । बलेन च । सङ्गतः[२७] । अश्वैः[२८] । स्तोत्रलक्षण कर्म युद्ध यज्ञं वा । दक्षिणतः[२९] ।

---

१. इन्द्रः Sy.
२. हविषां वोढृभिः Sy.
३. महद्भिः P. स्तोतृभिः Sy.
४. गोषु निमित्तभूतेषु Sy.
५. सङ्कुचितजानुभिरङ्गिरोभिः सह Sy.
६. र्तः D. बहुकर्मकृत् Sy.
७. असुरान् जितवान् Sy.
८. पुनः P. आसुरीः पुरीः Sy.
९. जित्वा च पुराणां हन्ता स इन्द्रः Sy.
१०. समानख्यानैः Sy.
११. सखीभिरच्छन् P.
सखित्वमात्मन इच्छन् Sy.
१२. स्थिराः Sy.
१३. रुरोज Sy.
१४. क्रान्तप्रज्ञैरङ्गिरोभिः सह Sy.
१५. स्वयमपि क्रान्तप्रज्ञः Sy.
१६. भवन् Sy.
१७. पुरूणां बहूनां वीरयित्रीभिर्वडवाभिः Sy.
१८. ०भिर्न्नियु० P. ०भिर्नियु० D. नव्याभिर्नवतराभिः Sy.
१९. आभिमुख्येन Sy.
२०. वाजेभिः Sy.
२१. हे कामानां वर्षक ! Sy.
२२. हे गिरा स्तुत्या सम्भजनीय ! Sy.
२३. ०भिः प्र० P. ०भिः प्रिया० D. आगच्छ Sy.
२४. शोभनाय । सुखप्राप्त्यर्थमित्यर्थः Sy.
२५. प्रजानाम् Sy.
२६. सर्वदोद्युक्तेन Sy.
२७. सङ्गतः सन् Sy.
२८. अश्वो P. सततगामिभिस्तेजोभिर्वा Sy.
२९. ०द्ध P. अप उदकानि । विसृजतीति शेषः Sy.
३०. दक्षिणायने Sy.

तूर्णमभिभविता[1] सेवते[2]। इत्थम्[3]। स्तुति सृजन्तः[4]। अनपवरणीयम्[5]। धनम्[6]। दिवेदिवे[7]। प्राप्नुवन्ति[8]। शत्रुभिरप्रमृष्यमिति[9][10]।

VI.33.

य ओजिष्ठ इन्द्र तं सु नो दा मदो वृषन्त्स्वभिष्टिर्दास्वान्।
सौवश्व्यं यो वनवत्त्स्वश्वो वृत्रा समत्सु सासहदमित्रान्॥ १॥

य ओजिष्ठः॥[11][12] शुनहोत्रो भरद्वाजः॥ य[13]। ओजस्वितम[14] शुष्म। तम्[15]। इन्द्र[16]। अस्मभ्यम्। सुष्ठु। देहि। माद्यस्व[17] च। वर्षितः[18]। सुष्ठ्वभ्येषणीय[19]. दानवान्[20] प्रदाता। सौवश्व्यस्य[21] युद्धम्। यः[22]। भजते। शोभनाश्वः। युद्धेषु[23]। उपद्रवान्[24]। अमित्राश्च[25]। अत्यन्त सहमान[26]।

त्वां हीन्द्रावसे विवाचो हवन्ते चर्षणयः[27] शूरसातौ।
त्वं विप्रेभिर्वि पणीँरशायस्त्वोत इत्सनिता वाजमर्वा॥ २॥

त्वां हि। त्वाम्। हि[28]। इन्द्र[29]। रक्षणाय[30]। विविधवाचः[31]। हवन्ते[32]। चर्षणयः[33]। युद्धे[34]। त्व च।

---

१. तुराणां हिंसकानां सोढाभिभविता Sy.
२. सेवतेत D.
३. अनेन प्रकारेण Sy.
४. सृजानाः सृज्यमानास्ता आपः Sy.
५. अनववर० P. अनवावर० D. अपवर्तनं पुनरागमनं यथा न भवति तथा Sy.
६. अर्थं गन्तव्यम्। अर्तेस्थन्प्रत्ययान्तस्य रूपमर्थमिति Sy.
७. प्रतिदिनम् Sy.
८. व्याप्नुवन्ति Sy.
९. ०प्रधृष्यं P. ०प्रमिष्य D. अन्यैरक्षोभ्यं समुद्रम् Sy.
१०. VM. ignores सः।
११. 'य ओजिष्ठः' इति पञ्चर्चं दशमं सूक्तं शुनहोत्रस्यार्षं त्रैष्टुभमैन्द्रम्। अनुक्रम्यते च—'य ओजिष्ठः शुनहोत्रस्तु' (KSA. 31. 33. p. 22.) इति। महाव्रतेऽपि निष्केवल्य उक्तो विनियोगः Sy.
१२. आजि० P.
१३. पुत्रः Sy.
१४. ओजिष्ठतमः P., D. बलवत्तमः Sy.
१५. एवङ्गुणविशिष्टं तं पुत्रम् Sy.
१६. तव मादयिता। स्तुतिभिः स्तोतेत्यर्थः Sy.
१७. ०त P. हे कामानां वर्षितः! इन्द्र! त्वम् Sy.
१८. शोभनाभ्येषणः Sy.
१९. हविषां दानं दाः। तद्वान् Sy.
२०. ०वश्यस्य P. शौपश्व्यस्य D. शोभनाश्वानां समूहम् Sy.
२१. भोजत P., D. हिंस्यात् Sy.
२२. सङ्ग्रामेषु Sy.
२३. वृत्रान् वारयितृन् Sy.
२४. शत्रूंश्च Sy.
२५. ०नः P. अत्यर्थमभिभवेत्। तं वा इत्यन्वयः Sy.
२६. एव Sy.
२७. रक्षणार्थम् Sy.
२८. विविधाः स्तुतिरूपा वाचो येषां तादृशाः Sy.
२९. आह्वयन्ति Sy.
३०. ०णशयः P., D. मनुष्याः Sy.
३१. शूरैः सम्भजनीये सङ्ग्रामे Sy.

मरुद्भिः[1] सह। असुरान्[2] युद्धे। विविधं शाययसि[3]। त्वोतः[4]। एव। भजते[5]। गन्ता[6] धोद्धा पुरुषः। सङ्ग्रामम्[7]।

त्वं ताँ इन्द्रोभयाँ अमित्रान्दासा वृत्राण्यार्या च शूर।
वधीर्वनेव सुधितेभिरत्कैरा पृत्सु दर्षि नृणां नृतम ॥ ३ ॥

त्वं तान्[8]। त्वम्। तान्। इन्द्र! उभयान्[9]। अमित्रान्[10]। अवधीः[11], दासान्, आर्यांश्च[12]। तदेवाह—दासा[13]। वृत्राणि[14]। आर्या[15]। च। शूर![16] वधीः[17]। अरण्यानीव[18]। सुतीक्ष्णैः[19]। आयुधैः[20]। आ दर्षि[21] च। नॄन्[22]। युद्धेषु[23]। नेतृतम[24]!

स त्वं न इन्द्राकवाभिरूती सखा विश्वायुरविता वृधे भूः।
स्वर्षाता यद्ध्वयामसि त्वा युध्यन्तो नेमधिता पृत्सु शूर ॥ ४ ॥

स त्वम्[25]। सः। त्वम्। अस्माकम्। इन्द्र! अकुत्सितैः[26]। रक्षणैः[27]। सखा। सर्वान्न[28]। रक्षिता। वर्धनाय। भव। यदा। सर्वैः सम्भजनीये[29]। नेमधितौ[30] सङ्ग्रामे। त्वाम्। ह्वयामः[31]। पृतनासु[32]। युध्यन्तः[33]। शूरेति।

---

१. विप्रैर्मेधाविभिरङ्गिरोभिः सार्धम् Sy.
२. बलस्यानुचरा असुराः पणयः। तान् Sy.
३. विशेषेणाशाययः। हतवानित्यर्थः Sy.
४. त्वया रक्षितः Sy.
५. सम्भक्ता पुरुषः Sy.
६. अभिगन्ता भवति Sy.
७. अन्नम् Sy.
८. तत् P.
९. उभयविधान् Sy.
१०. शत्रून् Sy.
११. अहिंसीः Sy.
१२. दासान् आर्यांश्च refers to उभयान्।
१३. ०वाहासा P. के त उभयविधाः ? दासोपक्षपयितॄन् कर्मविरोधिनो बलप्रभृतीनसुरान् 'सुपां सुलुक्०' इति शस आकारः Sy.
१४. वृत्रस्थाणि P., D. आवरकाणि विश्वरूपादीनि च तानुभयविधान् Sy.
१५. आर्याणि कर्मानुष्ठातृत्वेन श्रेष्ठानि Sy.
१६. हे शूर! त्वम् Sy.
१७. अव P. हतवानित्यर्थः Sy.
१८. निव P. तत्र दृष्टान्तः। वनानीव। यथा वृक्षजातानि कुठारादिभिश्छिनत्ति तद्वत् Sy.
१९. सुष्ठु निहितैः Sy.
२०. आत्मीयैरायुधैः Sy.
२१. ०युर्धर्षरादर्षी D. अन्यानपि शत्रूनादृणासि विदारयसि Sy.
२२. नॄणां मध्ये Sy.
२३. सङ्ग्रामेषु Sy.
२४. नेतृषुतमः P., D. अतिशयेन नेतः! हे इन्द्र! Sy.
२५. तादृशः Sy.
२६. अकुत्सिताभिः Sy.
२७. ऊतिभी रक्षाभिः Sy.
२८. सर्वतो गन्ता त्वम् Sy.
२९. स्वः सुष्ठ्वरणीयं धनं तस्य सम्भजनार्थम् Sy.
३०. नेमशब्दोऽर्धवाची। अर्धाः कतिपयाः पुरुषाः धीयन्त एष्विति नेमधितयः सङ्ग्रामाः। तादृशेषु Sy. त्वो नेम इत्यर्धस्य N. 3.20.
३१. ०मा D. आह्वयामः। तदानीं त्वमविता सखा च भवेत्यर्थः Sy.
३२. सङ्ग्रामेषु Sy.
३३. ०न्तं P., D. युद्धं कुर्वन्तो वयम् Sy.

नूनं न इन्द्रापरायं च स्या भवा मृळीक उत नो अभिष्टौ ।
इत्था गृणन्तो महिनस्य शर्मन्दिवि ष्याम पायेर गोषतमाः ॥ ५ ॥

नूनम् । अस्माकम् । इन्द्र ! अस्मा अह्ने । अपरस्मै । च । स्या अद्य च श्वश्च भव । अपि च । सुखयिता : भव । अस्माकम् । अभ्येषणे । इत्थम् । स्तुवन्तः । महतस्तव । सुखे । अह्नि । पारे भवे उत्तमे । स्याम् । अतिशयेन पशूनां सम्भक्तार ।

VI.34.

सं च त्वे जग्मुर्गिरं इन्द्र पूर्वीर्वि च त्वद्यन्ति विभ्वो मनीषाः ।
पुरा नूनं च स्तुतय ऋषीणां पस्पृध्र इन्द्रे अध्युक्थार्का ॥ १ ॥

सं च । इन्द्र ! त्वयि । बह्वच । स्तुतय. । सङ्गच्छन्ते सहाभिगच्छन्ति । तथा विविधम् । च । त्वयि । गच्छन्त्यैकैकश. । महत्यः स्तुतय । अपि वा त्वत्तः, स्तोतृणाम्, बह्वच., सुमतयो विगच्छन्ते । पुरा । सम्प्रति । च । स्तुतय । ऋषीणाम् । इन्द्रे । स्पर्धन्तेऽहमहमिकयोपतिष्ठन्ति । उक्थैरर्चनीये ।

---

१. अस्मदीयः Sy.
२. VM. seems to explain नूनम् as अस्मा अह्ने ॥ अद्य Sy.
३. अपरस्मिन्नन्यस्मिन्नपि काले Sy.
४. भव Sy.
५. अस्य P., D.
६. इच P.
७. अभिगमने सति Sy.
८. इत्थं D. अनेन प्रकारेण Sy.
९. स्तुवन्तो वयम् Sy.
१०. सम्बन्धिनि Sy.
११. शर्मणि सुखे Sy.
१२. द्योतमाने Sy.
१३. दुःखस्य पारके Sy.
१४. स्याम is suggested for स्याम् ॥ वर्तमाना भवेम Sy.
१५. 'सं च त्वे जग्मुः' इति पञ्चर्चमेकादशं सूक्तं शुनहोत्रस्यार्षं त्रैष्टुभमैन्द्रम् । 'सं च त्वे' (KSA. 31.34. p. 22.) इत्यनुक्रान्तम् । तृतीये छान्दोभिकेऽहनीदमादिके द्वे सूक्ते । सूत्रितञ्च—'सं च त्वे जग्मुरिति सूक्ते' (ĀŚS. 8.7.) इति । महाव्रतेऽपि निष्केवल्य उक्तो विनियोगः Sy.
१६. यथा P.
१७. घिधं D.
१८. ०न्त्यैकै० is suggested for ०न्त्यैकै० ॥ निर्गच्छन्ति Sy.
१९. विभवो विस्तृताः Sy.
२०. मतयश्च Sy.
२१. अपिगच्छन्तः P. ०न्त D. विविधं निर्गच्छन्ति Sy.
२२. शेषः परोक्षकृतः । पूर्वस्मिन् काले Sy.
२३. अद्य च Sy.
२४. स्तोत्राणि Sy.
२५. अतीन्द्रियार्थदर्शिनां भरद्वाजादीनाम् Sy.
२६. अस्पर्धन्त । अहमहमिकयेन्द्रस्य स्तवने त्वरिता बभूवुरित्यर्थः Sy.
२७. ०कयावति० D.
२८. उक्थैर० P., D. उक्थं शस्त्रम् । तद्रूपाण्यर्काण्यर्चनसाधनानि स्तोत्राणि चास्पर्धन्त Sy.
२९. VM. ignores च and अधि ॥ अधि अधिकम् Sy.

पुरुहूतो यः पुरुगूर्त ऋभ्वाँ एकः पुरुप्रशस्तो अस्ति यज्ञैः ।
रथो न महे शवसे युजानोऽस्माभिरिन्द्रो अनुमाद्यो भूत् ॥ २ ॥

पुरुहूतः[1]। बहुभिराहूत । यः[2] । यश्च बहुभिरुद्योजितः[3] । भवति । महान् । एक एव[4] । बहुभिश्च प्रशस्तः[5] । स्वैर्यज्ञैर्हविर्भिर्नुभिः[6]। सोऽयं रथ । इव । महते । बलाय । युञ्जानः[7]। अस्माभिः[8]। इन्द्रः । अनुमदनीयः[9]। भवतु ।

न य हिंसन्ति धीतयो न वाणीरिन्द्रं नक्षन्तीदभि वर्धयन्तीः ।
यदि स्तोतारः शतं यत्सहस्रं गृणन्ति गिर्वणसं शं तदस्मै ॥ ३ ॥

न यम्[10]। न । यम्[11] । हिंसन्ति । कर्माणि[12] । न च । स्तुतिशब्दाः[13] । यमिन्द्रम्[14] । अभिगच्छन्ति । एव[15]। वर्धयन्त्य । यदि । स्तोतार[16] । शतम्[17]। यदि वा । सहस्रम्[18]। स्तुवन्ति । गीर्भिर्वननीयम्[19]। तत् सर्वम्[20]। अस्मै[21]। सुखकरमेव भवति न हिंसकम्, अनाढ्यो हि हिंस्यते स्तुतिरशक्नुवन् दातुमिति ।

अस्मा एतद्दिव्यायेव मासा मिमिक्ष इन्द्रे न्यया सोमः ।
जनं न धन्वन्नभि सं यदापः सत्रा वावृधुर्हवनानि यज्ञैः ॥ ४ ॥

अस्मै[22]। अस्मै[23]। एतत्[24], नियम्यते। दिवि स्थिताः[25]। मासश्चन्द्रमसः[26] सम्बन्धिनी। दीप्तिरिव[27]

---

१. ०त P.D.
२. इन्द्रः Sy.
३. ०भिरद्योतिजितः P. ०भिरद्योजितः D. बहुभिरुद्यमितः Sy.
४. एक P. प्रधानभूत एवङ्गुणविशिष्टः Sy.
५. ०स्त P., D. बहुधा प्रशस्तः स्तुतो भवति Sy.
६. यष्टृभिः पुरुषैर्यजनसाधनैः स्तोत्रैर्वा Sy.
७. अस्मत्स्तुतिभिर्युज्यमानः सन् Sy.
८. स्तोतृभिः Sy.
९. सर्वदा स्तुत्यः Sy.
१०. इन्द्रम् Sy.
११. बाधन्ते। दातुमसमर्थः पुरुषोऽन्यकृतैः परिचरणैः स्तुतिभिश्च भृशं खिद्यतेऽस्य चेन्द्रस्य बहुधनत्वाद्दातृत्वाच्च तस्मिन् प्रयुज्यमानानि परिचरणानि स्तोत्राणि च बाधहेतवो नाभूवन्नित्यर्थः Sy.
१२. कर्मणि D. परिचरणानि Sy.
१३. वाण्यः स्तुतयश्च यं न बाधन्ते Sy.
१४. य न्द्रम् P.
१५. ०च्छन्त्यो P. एच D.
१६. शतसङ्ख्याकाः स्तोतारो गृणन्ति Sy.
१७. सहस्रसङ्ख्याकाः स्तोतारः स्तुवन्ति Sy.
१८. गिरां सम्भक्तारमिन्द्रम् Sy.
१९. स्तोत्रम् Sy. २०. इन्द्राय Sy.
२१. ०तिर० D. स्तुतिभिः, अ० is suggested for स्तुतिर०
२२. विभक्तिव्यत्ययः। अस्मिन्निन्द्रे। यद्वा अस्मा इन्द्राय एतत् स्तोत्रं ब्रवाणीति शेषः Sy.
२३. एवं तत् P. एव तत् D. एतस्मिन् Sy.
२४. नियतोऽभूत् Sy.
२५. दिवसे सौत्येऽहनि Sy.
२६. मानेन 'इन्द्राय त्वा वृत्रघ्ने' इत्यादिमन्त्रसाध्येन युक्तः Sy.
२७. अर्चनसाधनेन स्तोत्रेणेव Sy.

तदेवाह—सिच्यमानः[1]। सोमः। इन्द्रार्थम्[2]। नियम्यत इति। धन्वनि[3] स्थितम्। जनम्[4]। यदा। आपः[5]। न। अभिसङ्गच्छन्ते[6]। तदानीं सत्यमेव। हवनादि[7] इन्द्रविषयाणि। वर्धयन्ति[8]। यज्ञैः[9] सहेति।

अस्मा एतन्महाङ्गूषमस्मा इन्द्राय स्तोत्रं मतिभिरवाचि।
असद्यथा महति वृत्रतूर्य इन्द्रो विश्वायुरविता वृधश्च॥ ५॥

अस्मै[11]। अस्मै। एतत्। महत्। स्तोत्रम्। पुनरस्मा इति पूरणम्। इन्द्राय। स्तोत्रम्[11]। स्तोतृभिः। उक्तमासीत्[14]। भवति[15]। यथा[16]। महति[17]। सङ्ग्रामे। इन्द्रः। विश्वान्न[18]। रक्षिता[19]। वर्धकः[20]। चेति।

VI.३५.

कदा भुवन्नरथक्ष्याणि ब्रह्म कदा स्तोत्रे सहस्रपोष्यं दाः।
कदा स्तोमं वासयोऽस्य राया कदा धियः करसि वाजरत्नाः॥ १॥

कदा[21]॥ नरो भारद्वाज॥ कदा[22]। भविष्यन्ति[23]। रथनिवासानि[24]। अन्नानि[25] बहूनि बहु[26] चेन्द्र[27]! रथ-वाह्यमन्न[28] भवति। कदा वा[29]। स्तोत्रे[30]। सहस्रपोषनिमितं[31] धनम्। दास्यसि। कदा वा। स्तोमम्[32]। अस्य।

---

१. वसतीवर्येकधनाख्याभिरद्भिरासिक्तः Sy.
२. यद्वा दिवि द्युलोकेऽर्चेवार्कः सूर्य इव मासा। लुप्तोपममेतत्। माति परिच्छिनत्तीति मासश्चन्द्रमाः। स इव मिमिक्षो वृष्टचुदकानां सेक्ता य इन्द्रो वर्ततेऽस्मिन्निन्द्रेऽभिषुतो सोमो नियम्यते स्म Sy.
३. ०र्थंमित्त P. निमित्त D. दिवि Sy.
४. धन्वनि मरुदेशे Sy.
५. प्राणिनमिव। यथा मरुदेश उपलभ्यमाना आपः प्राणिनं वर्धयन्ति तद्वत् Sy.
६. आवः D.
७. अभिमुखं सम्यग्गच्छन्त्यः Sy.
८. सार्धं सह Sy.
९. स्तोत्राणि Sy.
१०. अवर्धयन् Sy.
११. यजनसाधनैः पुरोडाशादिभिः Sy.
१२. इन्द्राय Sy.
१३. अस्मा इन्द्राय स्तोत्रमिति पुनरुक्तिरादरार्था Sy. १४. उक्तमभूत् Sy.
१५. भवेत् तथाऽवाचीत्यन्वयः Sy.
१६. येन प्रकारेण Sy.
१७. प्रभूते Sy.
१८. सर्वत्र गन्ता Sy.
१९. अस्माकमविता रक्षकः Sy.
२०. वर्धयिता Sy.
२१. 'कदा भुवन्' इति पञ्चर्चं द्वादशं सूक्तं नरस्यार्षं त्रैष्टुभमैन्द्रम्। तथा चानुक्रान्तम् 'कदा नरस्तु' (KSA. ३१.३५. p.२२.) इति। तृतीये छन्दोमे महाव्रते च निष्केवल्य उक्तो विनियोगः Sy. २२. कस्मिन् काले Sy.
२३. भवेयुः। रथेऽवस्थितं त्वां कदा प्राप्नुवन्तीत्यर्थः Sy. २४. ०वानि P., D.
२५. ब्रह्माणि स्तोत्राण्यस्मदीयानि Sy.
२६. चेद्र D.
२७. रवा० D.
२८. स्तुवते मह्यम् Sy.
२९. सहस्रसङ्ख्याकपुरुषपोषकं गोसमूहं पुत्रं वा Sy.
३०. दाः Sy.
३१. स्तोत्रम् Sy.
३२. मम स्तोतुः Sy.

धनेन[1]। छादयिष्यसि[2]। कदा वा। करिष्यसि[3]। कर्माणि[4]। रमणीयान्नानि[5]।

कहिं[6] स्वित्तदिन्द्र यन्नृभिर्नृन्वीरैर्वीरान्नीळयासे[14] जयाजीन्[15]।
त्रिधातु[16] गा अधि जयासि[17] गोष्विन्द्र द्युम्नं स्वर्वद्धेह्यस्मे॥ २॥

कहि[6]। कदा। स्वित्[7]। तत्। इन्द्र[8]! भवति। यत्[9] त्वम्। परकीयैर्नेतृभि[10]। अस्मदीयान् नेतॄन्[11]। वीरैश्च[12]। वीरान्[13]। सङ्ग्रामयसि[16]। जयसि[17] चाम्मदर्थम्। आजीन्[15]। गोषु[18]। गन्त्री सेनास्त्वम्। त्रिधातु[19]। अधिजयसि[20] त्रिगुण जयसि। तथा सत्यस्मासु। इन्द्र! अन्नम्[21]। सर्वमनुष्ययुक्तम्[22]। धेहीति[23]।

कहिं[24] स्वित्तदिन्द्र यज्जरित्रे[29] विश्वप्सु[30] ब्रह्म[31] कृणवः[32] शविष्ठ।
कदा धियो[33] न नियुतो[34] युवासे[35] कदा गोमघा[36] हवनानि गच्छाः[38]॥ ३॥

कहि[24]। कदा। स्वित्[25]। तत्। इन्द्र! भवति[26]। यस्त्वम्[27]। जरित्रे[28]। विश्वरूपम्[29]। अन्नम्। करोषि[30]। बलवत्तम! कदा। बुद्धि[31]। इव[32]। अश्वा[33]। मिश्रयसि[34] गमनार्थमधितिष्ठसि। कदा वा। गोधनानि[35]। अस्मदाह्वानानि[36]। गच्छसि[38]।

---

१. सनेन P., D.
२. व्यापयेः Sy.
३. कर्ष्यसि D. कुर्याः। एवं स्तोता फलस्य विलम्बमसहमान इन्द्रमनया पृष्टवान् Sy.
४. कर्माणि अग्निहोत्रादीनि Sy.
५. वाजैरन्ने रमणीयाः Sy.
६. फलस्य विलम्बमसहमान ऋषिरनयापीन्द्रं पृच्छति Sy. ७. खलु Sy.
८. भवेत् Sy.
९. य P.
१०. वरणीयैः P. अस्मदीयैः पुरुषैः Sy.
११. शत्रुपुरुषान् Sy.
१२. अस्मदीयैः पुत्रैः Sy.
१३. शत्रुपुत्रांश्च Sy.
१४. संश्लेषयेः संयोजयेः। नीळयतिः संश्लेषणकर्मा। ईदृशं युद्धे यत्संश्लेषणं तत्कदा भवेदिति वितर्कः Sy. १५. यजसि P. जयेः Sy.
१६. सङ्ग्रामान् Sy.
१७. अभिगन्तृषु शत्रुषु विद्यमानाः Sy.
१८. गाः Sy.
१९. त्रिधातूनां क्षीरदधिघृतानां त्रयाणां धारयित्रीः Sy. २०. अधिकं जयेः Sy.
२१. धनम् Sy.
२२. व्याप्तिमत् Sy. २३. धारयेः Sy.
२४. The *pratika* is supplied by the Editor.
२५. अनयापि कतिचित्प्रश्नाः क्रियन्ते Sy.
२६. खलु Sy. २७. भवेत् Sy.
२८. य P. २९. स्तोत्रे Sy.
३०. बहुविधरूपम् Sy.
३१. करोषीति यत् तत्कदा भवेदिति वितर्कः Sy.
३२. बद्धिः P. बुद्धीः is suggested for बुद्धिः॥ कर्माणि Sy.
३३. नेति समुच्चये। च Sy.
३४. स्तुतीः Sy.
३५. आत्मनि योजयेः Sy.
३६. गोमघानि गवां दातॄणि। मंहतेर्दानार्थस्य रूपमुत्तरपदम् Sy.
३७. स्तोत्राणि Sy.
३८. अभिगच्छेः Sy.

स गोमघा जरित्रे अश्वश्चन्द्रा वाजश्रवसो अधि धेहि पृक्षः ।
पीपिहोषः सुदुघामिन्द्र धेनु भरद्वाजेषु सुरुचो रुरुच्याः ॥ ४ ॥

स गोमघाः[1] । सः[2] । गोधनाः[3] । जरित्रे[4] । ह्लादकाश्वा[5] । श्रवणीयबलाः[6] । अधिधेहि[7] । इषः[8] । तथा पयःप्रभृतिकः[9] इषश्च । सुदुघाम्[10] । धेनुम्[11] । पीपिहि[12] क्षारय । भरद्वाजेषु[13] । सुदीप्तिः[14] । रुरुच्याः[15] रोचसीति[16] ।

तमा नूनं वृजनमन्यथा चिच्छूरो यच्छक्र वि दुरो गृणीषे ।
मा निररं शुक्रदुघस्य धेनोरांङ्गिरसान्ब्रह्मणा विप्र जिन्व ॥ ५ ॥

तमा नूनम्[17] । तं स्तोतारं वर्तमानं भवति नाशाभिमुखो भवति सत्योपद्रव इत्यर्थः । यदा त्वमस्य । द्वाराणि[18] । विविध[19] वेदसि[20] । शूरस्त्वम्[21] । शक्र[22] ! मा । निर्गम[23] । उदकस्य दोग्ध्रुस्तव[24] । धेनोः[25] मेघात् । अङ्गिरसकुले जातान्[26] । मेधाविन्[27] ! अन्नेन । प्रीणय[28] ।

---

१. ०घा D. २. त्वम् Sy.
३. गवां दात्रीः Sy.
४. स्तोत्रे Sy.
५. ०काश्चा D. ०काश्वाः is suggested for ०काश्वा ॥ अश्वैराह्लादयन्तीः Sy.
६. वाजैर्बलैः प्रसिद्धा एवम्भूताः Sy.
७. धारय Sy.
८. षः P. पृक्षोऽन्नानि Sy.
९. वयप्रभृतिक D. ०प्रभृतिकाः is suggested for ०प्रभृतिक ॥ तान्यन्नानि Sy.
१०. शोभनदोग्ध्रीम् Sy.
११. गाम् Sy.
१२. वीविहि P. पिपीषि D. प्याययं Sy.
१३. भरद्वाजपुत्रेष्वस्मासु Sy.
१४. दीप्तिः D. सुदीप्तीः is suggested for सुदीप्तिः ॥ अपि च ता इषो गौश्च सुरुचः शोभनदीप्तयो यथा भवन्ति तथा Sy.
१५. दीपयेः । शोभनदीप्तियुक्ताश्च ताः सन्त्वित्यर्थः Sy.
१६. रोचस इति or रोचयसीति is suggested for रोचसीति ।
१७. VM. ignores इन्द्र !
१८. विशेषेण वारयिता शत्रूणाम् । यद्वा दुरो द्वाराणि शत्रुसम्बन्धीनि विघटयंस्त्वम् Sy.
१९. ०ध P. Sy. construes वि with दुरः ।
२०. यस्माद् गृणीषेऽस्माभिः स्तूयसे तस्मात्कारणात् Sy. २१. शौर्योपेतः Sy.
२२. हे सर्वकार्येषु शक्तेन्द्र ! Sy.
२३. निर्गच्छेयम् । अरमित्याख्यातम् 'ऋ गतौ' इत्यस्य रूपम् 'Sy.
२४ शुक्राणां निर्मलानां दोग्धुरिन्द्रस्य Sy.
२५. वाचः स्तोत्रात् । मा निररम् । यद्वा शुक्रस्य पयसो दोग्ध्र्या धेनोस्त्वया दत्ताया गोः सकाशान्मा निर्गच्छेयम् । सा सर्वदाऽस्मासु निवसत्वित्यर्थः Sy.
२६. अङ्गिरोगोत्रजानस्मान Sy.
२७. ०विनः P. हे प्राज्ञेन्द्र ! Sy.
२८. VM's explanation of the first verse seems to be incomplete. He probably explains तं as स्तोतारम्, आ as अभिमुखः, वृजनम् as उपद्रवः, and अन्यथा चित् as नाशः ॥ हे इन्द्र ! त्वं नूनमद्यतनं वृजनं बाधकमस्मदीयं शत्रुमन्यथा चिदन्येनैव प्रकारेण योजय । येन प्रकारेण सर्वे जीवन्ति तद्विलक्षणं प्रकारं मरणाख्यं प्रापयेत्यर्थः । आकारः पूरकः Sy.

VI.36.

सत्रा मदांसस्तव विश्वजन्याः सत्रा रायोऽध ये पार्थिवासः ।
सत्रा वाजानामभवो विभक्ता यद्देवेषु धारयथा असुर्यम् ॥ १ ॥

सत्रा[1] । सत्यमेव[2] । मदा[3] । तव[4] । विश्वजनहिता[5] । सत्यमेव । तव[6] दिव्या रायः[7] । सन्ति पार्थिवाः[8] । च[9] । सत्यमेव । अन्नानाम् । अभव[10] । दाता । यस्मात्[11] । देवेषु[12] । धारयसि[13] । बलम् । [14]

अनु प्र येजे जन ओजो अस्य सत्रा दधिरे अनु वीर्याय ।
स्यूमगृभे दुधयेऽवते च क्रतुं वृञ्जन्त्यपि वृत्रहत्ये ॥ २ ॥

अनु प्र । अनुक्रमेण[15] । प्रकर्षेण च । अस्य । ओजः[16] । देवजनः[17] । ईजे[18] । तथा महत्त्वे[19] । च । अनुदधिरे[20] । वीर्यकरणायैन[21] देवाः । अनुस्यूतं[22] शत्रून् गृह्णते[23] । कम्पयते[24] । अभिगच्छते[25] । प्रज्ञानम् । अपि[26] । व्रजन्ति[27] । वृत्रवधाय[28] तेन सहैकतमसो भवन्तीत्यर्थः[29] ।

---

१. 'सत्रा मदासः' इति पञ्चर्चं त्रयोदशं सूक्तं नरस्यार्षं त्रैष्टुभमैन्द्रम् । 'सत्रा' (KSA. 31.36.p.22.) इत्यनुक्रान्तम् । पृष्ठचस्य पञ्चमेऽहनि निष्केवल्य एतत्सूक्तं शस्यम् । सूत्रितञ्च—'प्रेवं ब्रह्मेन्द्रो मदाय सत्रा मदास इति निष्केवल्यम्' (ĀSS.7.12.) इति । विश्वजिति माध्यन्दिनसवने प्रशास्तुः शस्त्र इदं सामसूक्ताख्यं शंसनीयम् । सूत्रितञ्च—'सत्रा मदासो यो जात एवाभूरेक इति सामसूक्तानि' (ĀSS.8.7.) इति । महाव्रतेऽपि निष्केवल्य उक्तो विनियोगः Sy.

२. हे इन्द्र ! Sy.

३. सत्रेति सत्यनाम Ngh. 3.10.

४. सोमपानजनिता मदाः Sy.

५. त्वदीयाः Sy.

६. सर्वजनहिता भवन्ति । यद्वा सत्रेति महन्नामैतत् । महान्तस्तव मदा इति योज्यम् Sy.

७. धनसमूहाः सन्ति तेऽपि सत्यं विश्वजनहिता भवन्तीत्यन्वयः Sy.

८. पृथिव्युपलक्षिते लोकत्रये भवाः Sy.

९. अपि च Sy. १०. भवसि । यद्वा सत्रा महतां वाजानामिति योज्यम् Sy.

११. यस्म P. १२. देवेषु मध्ये Sy.

१३. धारयथाः । अतः कारणात् त्वमेवं करोषीत्यर्थः Sy.

१४. VM. ignores ये ।

१५. अक्र० D. सन्ततम् Sy.

१६. इन्द्रस्य Sy.

१७. बलम् Sy. १८. यजमानः Sy.

१९. ईजते D. यजते । पूजयति Sy.

२०. ०त्वे is suggested for ०त्वे ॥ सत्यम् । यद्वा महान्तमिन्द्रमिति योज्यम् Sy.

२१. पुरो दधिरे यजमानाः Sy.

२२. अपि च तमिन्द्रं वीरकर्म कर्तुम् Sy.

२३. स्यूम्नः स्यूतानविच्छेदेन वर्तमानान् शत्रून् गृह्णते Sy.

२४. दुधये । दुधिर्हिंसाकर्मा । तेषां हिंसकाय Sy.

२५. शत्रूणामभिगन्त्रे च तस्मा इन्द्राय Sy.

२६. कर्म परिचरणात्मकम् Sy.

२७. अभि P.

२८. व्रजति P. वृञ्जन्ति is suggested for व्रजन्ति ॥ निष्पादयन्ति Sy.

२९. किमर्थम् ? वृत्रहत्ये वृत्रस्य वारकस्य शत्रोर्हननिमित्तम् Sy.

तं सध्रीचीरूतयो वृष्ण्यानि पौंस्यानि निुयुतः सश्चुरिन्द्रम् ।
समुद्रं न सिन्धव उक्थशुष्मा उरुव्यचसं गिर आ विशन्ति ॥ ३ ॥

[तं सध्रीचीः ।] तम् । सङ्गताः । मरुतः । बलकरणानि । वीर्याणि । अश्वाश्च । सङ्गच्छन्ति । समुद्रम् । इव । नद्यः । वक्तव्यवेगाः । बहुव्याप्तिम् । स्तुतयश्च । आविशन्ति । वृत्रवधोद्युक्तम् ।

स रायस्खामुप सृजा गृणानः पुरुश्चन्द्रस्य त्वमिन्द्र वस्वः ।
पतिर्बभूथासमो जनानामेको विश्वस्य भुवनस्य राजा ॥ ४ ॥

स रायः । स । त्वम् । वासयितः ! बहूनामाह्लादकरय । धनस्य । नदीम् । उपवर्तय । स्तूयमानस्तत् तव युक्तमिति । वदति पतिरिति ।

स तु श्रुधि श्रुत्या यो दुवोयुर्द्यौर्न भूमाभि रायो अर्यः ।
असो यथा नः शवसा चकानो युगेयुगे वयसा चेकितानः ॥ ५ ॥

स तु श्रुधि । सः । क्षिप्रम् । शृणु । श्रोतव्यानि स्तोत्राणि । यस्त्व भवसि । परिचर्येच्छुः ।

---

१. The *pratīka* is supplied by the Editor.
२. इन्द्रम् Sy.
३. सहाञ्चन्त्यः सङ्गता भूत्वा । यद्वा सह वर्तमानानि भूत्वा Sy.
४. मरुतः । यद्वा ऊतयस्तर्पकाण्यन्नानि Sy.
५. वीर्याणि Sy.
६. बलानि Sy.
७. रथे युज्यमाना वडवाश्च तमिन्द्रं सेवन्ते Sy.
८. सचन्ते सेवन्ते Sy.
९. तत्र दृष्टान्तः । यथा स्यन्दनशीला नद्यः समुद्रमाविशन्ति, आविश्य च विभक्ततया न दृश्यन्ते एवं सर्वा अपि स्तुतय इन्द्रैणैकीभवन्तीत्यर्थः Sy.
१०. अपि चोक्थशुष्मः । उक्थं शस्त्रं तदेव बलं यासां तादृशाः Sy.
११. विस्तीर्णव्याप्तिकम् Sy.
१२. तमिन्द्रं प्रविशन्ति Sy.
१३. वृत्रवधोद्युक्तम् seems to be the epithet of इन्द्रम् ।
१४. VM. takes वस्वः as Voc. but Sy. and Padapāṭha take it as Gen. ॥ निवासकस्य Sy.
१५. खा इति नदीनाम Ngh.1.13. अत्र तत्सम्बद्धा धारा लक्ष्यते । धाराम् Sy.
१६. विमुञ्च । अस्माभिः संयोजयेत्यर्थः Sy.
१७. अधिपतिः Sy.
१८. VM. ignores इन्द्र । बभूथ । असमः । जनानाम् । एकः । विश्वस्य । भुवनस्य and राजा ॥ हे इन्द्र ! अपि चासमोऽनुपमः सर्वोत्कृष्टस्त्वं जनानां सर्वेषां प्राणिनां पतिरधिपतिर्बभूथ । तथा विश्वस्य सर्वस्य भुवनस्य भूतजातस्यैकोऽसाधारणो राजेश्वरश्च बभूविथ Sy.
१९. हे इन्द्र ! Sy.
२०. त्वम् Sy.
२१. श्रुत्यानि श्रोतव्यानि स्तोत्राणि Sy.
२२. अस्मदीयं परिचरणमात्मन इच्छन् Sy.

अस्मदीयानि धनानि । आदित्य[1] । इव । भूमी[2] । रीन्[3] । अभितिष्ठन्तु[4] । भवसि[5] । अस्माकमेव[6] । यथा[7] त्वम् । बलेन[8] । दीप्यमान[9] । वह[10] हविषा[11] । बुध्यमानस्तथा[12] श्रुधीति ।

VI.37.

अर्वाग्रथं विश्ववारं त उग्रेन्द्र युक्तासो हरयो वहन्तु ।
कोरिश्चिद्धि त्वा हवते स्वर्वानृधीमहि सधमादस्ते अद्य ॥ १ ॥

[13] अर्वाक्[14] ॥ भरद्वाज ॥ अभिमुखम्[15] । रथम् । विश्ववेवरणीयम्[16] । ते । उग्र[17] ! इन्द्र ! युक्ता[18] । अश्वा[19] । वहन्तु । स्तोता[20] । हि[21] । त्वाम् । हवते[22] । कल्याणहविष्का[23] । ऋद्धा[24] भवाम । सह माद्यन्त[25] । त्वया वयम् । अद्येति[26] ।

प्रो द्रोणे हरयः कर्मंग्मन्पुनानास ऋज्यन्तो अभूवन् ।
इन्द्रो नो अस्य पूर्व्यः पपीयाद्द्युद्यो मदस्य सोम्यस्य राजा ॥ २ ॥

[27] प्रो द्रोणे[28] । प्रगच्छन्तु[29] । द्रोणकलशे[30] धनाना खादलक्षणम् । कर्म[31] । हरय[32] । पुनाना[33] सोमा ।

---

१. सूर्यः Sy.
२. भूमिः D. बहुतराणि Sy.
३. रिन् P. अरीन् is suggested for रीन् ॥ अरेः सम्बन्धीनि Sy.
४. अभिभवसि Sy. ५. स्याः Sy.
६. अस्माकमसाधारणोऽसि Sy.
७. येन प्रकारेण Sy.
८. आत्मीयेन बलेन स्तोतव्येन युक्तः Sy.
९. स्तूयमानः Sy.
१०. अन्वहम् is suggested for वहम् । If अन्वहम् is the correct reading then it can be taken as the explanation of युगेयुगे; otherwise युगेयुगे is ignored by VM. Sy. explains युगेयुगे as कालेकाले ।
११. हविर्लक्षणेनान्नेन Sy.
१२. प्रज्ञायमानस्त्वम् Sy.
१३. 'अर्वाग्रथम्' इति पञ्चर्चं चतुर्दशं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैन्द्रम् । 'अर्वाग्रथम्' (KSA.31.37.p.22.) इत्यनुक्रान्तम् महाव्रते निष्केवल्य उक्तो विनियोगः Sy.
१४. अवाक् P. १५. अस्मदभिमुखम् Sy.
१६. त्वदीयम् Sy. १७. हे उद्गूर्णबल ! Sy.
१८. रथेन युक्ताः Sy. १९. आनयन्तु Sy.
२०. स्तोता भरद्वाज ऋषिः Sy.
२१. यस्मात् Sy.
२२. आह्वयति । तस्मात्कारणात्त्वदीयं रथमभिमुखं वहन्त्वित्यर्थः Sy. २३. स्वर्वान् स्वः सुष्ठ्वरणीयं गुणजातम् । तद्वान् Sy.
२४. समृद्धा भवेम Sy. २५. मान्यन्तः P.
२६. अन्येति P., D. इदानीम् Sy.
२७. VM. ignores चित् ।
२८. तृतीये पर्यायेऽच्छावाकस्य 'प्रो द्रोणे' इत्येषा शस्त्रयाज्या । सूत्रितञ्च--'प्रो द्रोणे हरयः कर्मग्मन्निति याज्या' (ĀSS.6.4.) इति Sy.
२९. प्रयच्छन्तु P., D. प्रकर्षेण गच्छन्ति प्राप्नुवन्ति Sy. ३०. धा० P.
३१. यज्ञम् Sy.
३२. हरहरयः P. हरितवर्णाः सोमाः Sy.
३३. ०ना P. प्राप्य च पूयमानाः Sy.

ऋजुगच्छन्तः[1]। भवन्तु[2]। इन्द्रः। अस्माकम्[3]। इमं रसम्[4]। पिबतु। मुख्यः[5]। दीप्तः[6]। मदकरम्[7]। सोमम्[8]। राजेति[9]।

आसस्राणासः शवसानमच्छेन्द्रं सुचक्रे रथ्यासो अश्वाः।
अभि श्रव ऋज्यन्तो वहेयुर्नू चिन्नु वायोरमृतं वि दस्येत् ॥ ३ ॥

आसस्राणासः[10]। आभिमुख्येन सरन्तः[11]। बलमपरं तम्[12]। प्रति[13]। इन्द्रम्। शोभनचक्रे रथे[14]। रथ्याः[15]। अश्वा। सोमलक्षणमन्नम्[16]। अभिवहेयुः[17]। ऋज् गच्छन्तः[18]। क्षिप्रम्[19]। पात्रात्[20]। अमृतम्[21]। इन्द्रपानेऽपि विदस्त[22]

---

१. ऋजूग० D. २. भवन्ति Sy.
३. अस्मदीयम् Sy.
४. सरं P., D. सोमम् Sy.
५. पुरातनः Sy.
६. ०प्ते P., D. दीप्तेर्निवासभूतो द्युस्थानो वा Sy.
७. मदकरस्य Sy.
८. सोयमं P., D. सोमस्य Sy.
९. ईश्वरः Sy.
१०. आसह्राणा P. भरद्वाजस्यार्षम् Dur. भरद्वाजस्य SKN.
११. परितो गच्छन्तः Sy. नित्यमासर्पन्ति ये तान् युक्त्वा रथेऽस्माकमायाहि सोमपानाय यज्ञमिति Dur. अत्रैकवाक्यतायै यत्तदध्याहारः। ... सर्तेः कानजयम्। आगतवन्तः SKN.
१२. बलमिवाचरन्तम् Sy. अभिबलायमानमधिकबलमात्मानं मन्यमानम् Dur. शवःशब्दाद् बलवचनादन्तर्णीतिमत्वर्थात् 'उपमानादाचारे' 'कर्तुः क्यङ् सलोपश्च' (pa. 3.1.10-11.) इति क्यङ्प्रत्ययः। तदन्तात्ताच्छील्ये शानच्। छान्दसत्वादार्धधातुकत्वम्। अतोलोपयलोपौ। शवसानं बलाचरणशीलं तम् SKN.
१३. आभिमुख्येन Sy. अच्छ, अभेरर्थे। अभि प्रति SKN.
१४. शोभनचक्रे रथेऽवस्थितम् Sy. रथे योगार्थम् Dur. रथे योगादात्मन इति SKN.
१५. रथे युक्ताः Sy. रथस्य वोळ्हारस्ते SKN.
१६. श्रवणीयमस्मदीयं हविः Sy. अन्नं सोमाख्यमेतदस्मद्यज्ञे यत् .श्रव इत्येतदन्ननाम। तद्धि सर्वत्र श्रूयते Dur. सोमाख्यमन्नं प्रति .. श्रूयत इति कर्मणि कारके। अन्नं वर्ण्यमानं श्रूयते SKN.
१७. आवहेयुः Sy. अभिः कर्मप्रवचनीयः प्रतिना समानार्थः SKN.
१८. ऋजूग० D. ऋजुगमनाः सन्तः Sy. किमस्माकं ते कुर्वन्तु?.. ऋजुगामिनो भूत्वा Dur.
१९. इदानीम् Sy.
२०. वायोर्हेतोः Sy. अस्य वायोर्गन्तुरिन्द्रस्य स्वभूतम् SKN.
२१. अमरणहेतुभूतं सोमलक्षणं हविः Sy. एष सोमभक्षः Dur. अमृतसदृशं वृष्टं मरणवर्जितं वा सोमाख्यमन्नम् SKN.
२२. ०पिद० P. ०न्द्रपाने विद० D. क्षयं (न) प्राप्नुयात्। पात्रे गृहीतः सोमो वायुना शुष्यति ततः पुरैव तत्पानार्थमश्वा इन्द्रमभिवहेयुरित्यर्थः Sy. अविदस्तेऽनुपक्षीणे, एतस्मिन् सोमभक्षेऽभिवहेयुरित्येतदाशास्महे Dur. विशब्दो विगमे, वस्यतिः क्षयार्थः। विगतक्षयं भवेत् प्राक् प्रदानात् क्षयं मा गमदित्यर्थः। वायोश्चास्य भक्षो यथा न विवस्येत् तथा वहेयुरित्यस्य विवरणम् SKN.

भवतु । वायुदेवत्य पात्रं वायुरुक्तमिति ।

वरिष्ठो अस्य दक्षिणामियर्तीन्द्रो मघोनां तुविकूर्मितमः ।
यया वज्रिवः परियास्यंहो मघा च धृष्णो दयसे वि सूरीन् ॥ ४ ॥

वरिष्ठः । बृहत्तमो महान् । इन्द्रः । सम्बन्धिनीम् । दक्षिणाम् । आत्मनि प्रेरयति प्रापयत्यात्मानमिन्द्र । हविष्मताम् । अत्यन्त बहो कर्ता । अथ प्रत्यक्ष—यया दक्षिणया । स्तोतृणामवर्तिम् । परितो

---

१. वायुरुक्त० P. The passage वायुदेवत्यं पात्रं वायुरुक्तम्, refers to पात्रात्, so it should immediately follow that and precede अमृतम् ।

२. VM. ignores नु and चित् ॥ 'नूचित्' इति निपातो निषेधेऽत्र वर्तते । नैव Sy. नू चित् 'नवं च पुराणं च' तत्पानायैनमिन्द्रमभिवहेयुः । नूचिदिति नवपुराणाभिधायकौ निपातौ । नवं यः सोमो गृहीत्वा तत्कालमेवाहूयते । पुराणं पुनर्यः प्रातःसवने गृहीत्वा माध्यन्दिने सवने हूयते तृतीयसवने वा । एवमेतस्मिन् मन्त्रे, ऐन्द्रसूक्तमध्यपातित्वादिन्द्रप्रधाने यद् वाय्वभिधानं तन्नैघण्टुकमिन्द्रस्यैव विशेषणार्थं व्यञ्जनमात्रम् इत्येके । अपरे पुनः, उभयप्रधानेयमृगिति मन्यन्ते भेदपक्षवादिनः । तत्पुनरयुक्तम्—निष्केवल्ये विनियोगात् Dur. नूशब्दो नववचनः । चिच्छब्दश्चार्थे । अद्या चिन्नूचिदिति यथा । चार्थश्रुतिसामर्थ्याच्च द्वितीयो नुशब्दः पुराणवचनः । यच्चेदानीं गृह्यते तन्नवम् । यत्पूर्वं गृहीतं तत्पुराणम् । तदुभयमपि नवं च पुराणं च । एवमिन्द्रप्रधानेयमृगित्येके मन्यन्ते । निहितमात्रत्वेन वायुकर्म वायुरित्यर्थः । न पृथक्कर्मात्मना वायुः स्तुत्य इत्यभिप्रायः । उभयप्राधान्येन परमन्यद्दर्शनम् । अधिष्ठात्रधिष्ठेयभेदेन । 'अपि वा पुरुषविधानामेव सतां कर्मात्मानः' N. 7. 7. इत्येवं भेदमुररीकृत्याह । वायोश्चास्य द्विरूपोऽपि सोमभक्षः क्षयं मा गादिति SKN. आससूवांसः । अभिबलायमानमिन्द्रम् । कल्याणचक्रे रथे योगाय । रथ्या अश्वा रथस्य वोढारः । ऋज्यन्त ऋजुगामिनोऽन्नमभिवहेयुः । नवं च पुराणं च । श्रव इत्यन्ननाम । श्रूयत इति सतः । वायोश्चास्य भक्षो यथा न विवस्येदिति । इन्द्रप्रधानेत्येके नैघण्टुकं वायुकर्म । उभयप्रधानेत्यपरम् N. 10. 3., SKN. IV. 3.

३. ०न्द्र P.

४. समं बन्धिनि P. सम्बन्धिनीम् is incomplete. Something probably, अस्य is missing here. यजमानस्य Sy.

५. यज्ञे दातव्याम् Sy.

६. P. adds प्रापयति after प्रेरयति ।

७. अविष्मता P. मघवतां हविर्लक्षणधनोपेतानाम् । यद्वा मघोनामित्यस्य (अस्य) इत्यनेन समानाधिकरणम् । वचनव्यत्ययः । मघोनो हविष्मतोऽस्य यजमानस्येत्यर्थः Sy.

८. अतिशयेन बहुविधकर्मा Sy.

९. शेषः प्रत्यक्षकृतः Sy.

१०. यया दक्षिणया दत्तया Sy.

११. पापं यज्ञसम्बन्धि Sy.

हंसि[1], अतिर्वधकर्मा। नानाविधानि धनानि[2]। च। प्रयच्छसि विशिष्टाश्चाकरोः[3]। स्तोतॄनिति[4]।

इन्द्रो वाजस्य स्थविरस्य दातेन्द्रो गीर्भिर्वर्धतां वृद्धमहाः।
इन्द्रो वृत्रं हनिष्ठो अस्तु सत्वा ता सूरिः पृणति तूतुजानः ॥ ५ ॥

इन्द्रः[6]। इन्द्रः। वाजस्य[7]। प्रवृद्धस्य। दाता[8]। इन्द्रः। स्तुतिभिः[9]। वर्धताम्। वृद्धतेजाः[10]। इन्द्रः[11]। वृत्रम्। अतिशयेन हन्तृतमः[12]। अस्तु[13]। सदनशीलः[14] सोऽयम्। आपूरयति[15]। तानि धनानि। सूरिः[16]। त्वरमाणः[17]।

VI.38.

अपादित उदु नश्चित्रतमो महीं भर्षद्द्युमतीमिन्द्रहूतिम्।
पन्यसीं धीतिं दैव्यस्य यामञ्जनस्य रातिं वनते सुदानुः ॥ १ ॥

अपात्[18]। उद्रक्षतु[19]। अस्मान्[20]। इतोऽवर्नेरिन्द्र[21]। पूजनीयतम[22]। महतीम्। बिभर्तु[23]। दीप्तिमतीम्। इन्द्रस्य हूतिम्[24]। स्तुतिम्[25]। इन्द्रः[26] शोभनदानः। स्तुत्यतमाम्[27]। हविश्च दानम्[28]। दैव्यस्य। जनस्य। गमने[29]। स्वयं भजते[30][31]।

---

१. हन्ति P. विनाशयसि Sy.
२. Omitted by P. मघानि धनानि Sy.
३. यया दक्षिणया विदयसे प्रयच्छसि तादृशीं दक्षिणां प्रेरयसीत्यर्थः Sy.
४. ०शिष्टां० D.
५. ०श्च काकोः P.
६. स्तोतॄन् पुत्रांश्च Sy.
७. VM. ignores वज्रिवः and धृष्णो ॥ हे वज्रवन्निन्द्र ! हे धर्षक ! Sy.
८. अयमिन्द्रः Sy.
९. अन्नस्य बलस्य वा Sy.
१०. ०द्धस्याता P., D. दाता भवतु Sy.
११. अस्मदीयाभिः स्तुतिभिः Sy.
१२. वृत्रतेजाः P., D. प्रवृद्धतेजस्कः सन् Sy.
१३. आवरकं शत्रुम् Sy.
१४. ०वान् न् P., D. हन्तृतमः Sy.
१५. भवतु Sy. १६. शत्रूणां शातयिता Sy.
१७. अप्रयति P., D. अस्मभ्यं प्रयच्छतु Sy.
१८. पूरीः P. पूरिः D. प्रेरकः Sy.
१९. त्वमणः P. ०ण D.
२०. 'अपादितः' इति पञ्चर्चं पञ्चदशं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैन्द्रम्। 'अपात्' (KSA. 31.38.p.22.) इत्यनुक्रान्तम्। महाव्रते निष्केवल्य उक्तो विनियोगः Sy.
२१. अवात् P.
२२. सोमं पिबतु। यद्वा इतोऽस्माच्छत्रोर्नोऽस्मान् पातु रक्षतु Sy.
२३. अस्मदीयात् Sy.
२४. अस्माद् ग्रहचमसादेः Sy.
२५. चायनीयतम आश्चर्यतमो वा स इन्द्रः Sy.
२६. बिभर्तु। धारयतु Sy.
२७. भूतिम् P., D. स्तुतिम् Sy.
२८. धीतिं परिचरणरूपां क्रियाम् Sy.
२९. ०न्द्रं P., D. ३०. ०माकं P., D.
३१. ०षाञ्च P. ०षञ्च D.
३२. दे० P. देवसम्बन्धिनो जनस्य दातव्यं हविश्च Sy.
३३. आग० D. यामनि यज्ञे क्रियमाणाम् Sy.
३४. सम्भजतु Sy.
३५. VM. ignores उ ॥ उवुहत्येतौ पूरणौ Sy.

दूराच्चिदा वसतो अस्य कर्णा घोषादिन्द्रस्य तन्यति ब्रुवाणः ।
एयमेनं देवहूतिर्वव्रत्यान्मद्र्यग्गिन्द्रमियमृच्यमाना ॥ २ ॥

दूराच्चित्[1] । इन्द्रस्य । कर्णौ[2] । दूरात्[3] । आगत्य । स्तोतृसमीपे वसतः[4] । तथा[5] । इन्द्रस्तुतिम्[6] । ब्रुवाण[7] पुरुष[8] । सोत्तन्यति उद्घुष्य ब्रूते । आववृत्यात्[9] । इयम् । देवस्येन्द्रस्य स्तुति[10] । एनम् । इन्द्रम् । मदभिमुखम् । मया स्तूयमाना, उच्यमाना[11] । पुनरियमिति पूरणम्[12] ।

तं वो धिया परमया पुराजामजरमिन्द्रमभ्यनूष्यर्कैः ।
ब्रह्मा च गिरो दधिरे समस्मिन्महांश्च स्तोमो अधि वर्धदिन्द्रे ॥ ३ ॥

तं वः[14] । तम्[15] । युष्माकम्[16] । बुध्या[17] । उत्तमयाऽहम्[18] । प्रत्नम्[19] । अजरम्[20] । अभिष्टौमि । मन्त्रैः[21] । अन्नम्[22] । च । स्तुतीश्च[23] । अस्मिन्[24] । सन्दधिरे[25] । महान्[26] । स्तोमः । च । इन्द्रे । अभिवर्धने[27] ।[28]

वर्धाद्यं यज्ञ उत सोम इन्द्रं वर्धाद्ब्रह्म गिरः उक्था च मन्म[29] ।
वर्धाहैनमुषसो यामन्नक्तोर्वर्धान्मासाः शरदो द्याव इन्द्रम् ॥ ४ ॥

वर्धाद्यम्[29] । वर्धयति । यम्[30] । यज्ञः । अपि च । सोम[31] । इन्द्रम् । वर्धयति । हविः । स्तुतयः[32] ।[33]

---

१. ०राच्चि० P., D.
२. कर्णौ D.
३. दूरदेशात् Sy.
४. स्तोत्रश्रवणार्थमागच्छतः Sy.
५. इ पि Sy.
६. VM. seems to explain इन्द्रस्य and घोषात् together as इन्द्रस्तुतिम् ॥ इन्द्रस्य घोषणीयात्स्तोत्राद्धेतोः Sy.
७. स्तुवन् स्तोता Sy.
८. तन्यति शब्दं करोति । यद्वा सर्वत्र विस्ता यति Sy. ९. ०ववर्त्या० P. आवर्तयतु Sy.
१०. देवस्येन्द्रस्याह्वानरूपेयं स्तुतिः Sy.
११. स्वयं प्रेर्यमाणा सती Sy.
१२. पुनरियमिति पूरणः Sy.
१३. VM. ignores चित् ॥ चिद् अपि Sy.
१४. हे इन्द्र ! Sy.
१५. तादृशम् Sy.
१६. वः त्वाम् । व्यत्ययेन बहुवचनम् Sy.
१७. बुद्धया is suggested for बुध्या ॥ स्तुत्या Sy. १८. उत्कृष्टतमया Sy.
१९. पुराजां पूर्वस्मिन् काले जातं चिरन्तनम् Sy.
२०. जरारहितं नित्यम् Sy.
२१. अर्चनसाधनैर्हविर्भिः सार्धम् Sy.
२२. ब्रह्माणि हविर्लक्षणान्यन्नानि Sy.
२३. ०तिश्च D. स्तुतीश्च is suggested for स्तुतींश्च ॥ स्तुतयश्च Sy.
२४. अतः कारणात् अस्मिन् इन्द्रे Sy.
२५. सन्धीयन्ते संश्लिष्यन्ते Sy.
२६. प्रवृद्धः Sy. २७. अधिकं वर्धते Sy.
२८. VM. ignores इन्द्रम् ।
२९. ०म D.
३०. D. omits यम् ।
३१. यागः Sy. ३२. ०ज्ञेपि D.
३३. सोमम् P. तत्साधनभूतः सोमश्च Sy.
३४. हविर्लक्षणमन्नं च पुरोडाशादिकम् Sy.
३५. स्तोत्राणि Sy.

शस्त्राणि । च । मननीयानि[1] । वर्धयन्ति । एव । एनम् । उषसः[2] । रात्रीः[3] । गमने[4] । वर्धयन्ति[5] । मासाः । शरदश्च[6] । दीप्तीः[7] । इन्द्रम् ।

एवा जज्ञानं सहसे असामि वावृधानं राधसे च श्रुतायं ।
महामुग्रमवसे विप्र नूनमा विवासेम वृत्रतूर्येषु ॥ ५ ॥

एवा जज्ञानम्[8] । एवम् । जायमानम् । बलकरणाय[9] । अखण्डितम्[10] । वर्धमानम् । धनाय । च[11] । विश्रुताय । महान्तम् । उद्गूर्णम्[12] । रक्षणाय । मेधाविन्[13] ! इदानीम्[14] । परिचरेम । सङ्ग्रामेषु[15] त्वामिति[16] ।

VI.39.

मन्द्रस्य कवेर्दिव्यस्य वह्नेर्विप्रमन्मनो वचनस्य मध्वः ।
अपां नस्तस्य सचनस्य देवेषो युवस्व गृणते गोअग्राः ॥ १ ॥

मन्द्रस्य[17] । मोदनस्य[18] । कवेः[19] । दिव्यस्य[20] । वोढुः[21] । मेधाविस्तोतृकस्याग्नेः[22] । देवानाम् वक्तुः[23] । सोमम्[24] । यम्[25] । अपिबः[26] । अस्मदीयस्य[27] । हविषा सचनशीलस्य[28] । देव ! अन्नानि[29] । पृ कुरु[30] । स्तुवते[31] । गोमुखानि[32] ।

---

१. मननी P. २. इन्द्रम् Sy.
३. रात्रेः Sy. ४. भमन P. भमने D. यामनि गमने सति Sy.
५. ०न्तीति P. ६. शरश्च P. संवत्सराश्च Sy.
७. दिवसाश्च Sy. ८. ज्ञाय० P. प्रादुर्भवन्तम् Sy.
९. शत्रूणामभिभवार्थम् Sy. १०. बहुलम् Sy. ११. ५ D.
१२. ०र्णः P. उद्गूर्णबलम् Sy.
१३. हे मेधाविन् ! इन्द्र ! Sy. १४. अद्य Sy.
१५. वृत्रतूर्येषु Sy. १६. VM. ignores आ ।
१७. 'मन्द्रस्य कवेः' इति पञ्चर्चं षोडशं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैन्द्रम् । 'मन्द्रस्य' (KSA. 31.39.p-22.) इत्यनुक्रान्तम् । गतो विनियोगः Sy.
१८. मोदनस्य मदकरस्य वा Sy. १९. विक्रान्तस्य Sy.
२०. दिवि भवस्य Sy. २१. ०ढु D.
२२. विप्रा मेधाविनो मन्मान स्तोतारो ऽस्य स तथोक्तः । तस्य Sy.
२३. वचनीयस्य स्तुत्यस्य Sy.
२४. एवम्भूतस्य मधुनो सोमस्य । 'क्रियाग्रहणं कर्तव्यम्' इति कर्मणः सम्प्रदानत्वाच्चतुर्थ्यर्थे षष्ठी Sy.
२५. It seems to be the explanation of तस्य ॥ तस्य सर्वत्र प्रसिद्धस्य Sy.
२६. अपाः पिब Sy.
२७. अस्मिन्नास्म० P. ०बास्म० D. एवम्भूतं नोऽस्मदीयं सोमम् Sy.
२८. सवन० P., D. सेव्यस्य Sy.
२९. हे द्योतमानेन्द्र ! Sy.
३०. Omitted by P. पृथक्कुरु is suggested for पृकुरु ॥ संयोजय Sy.
३१. गृणते स्तुवते । तृतीयार्थे चतुर्थी । स्तुवता मया Sy.
३२. गावोऽग्रे प्रमुखे यासां तादृशाः Sy.

अयमुशानः पर्यद्रिमुस्रा ऋतधीतिमिर्ऋतयुग्युजानः ।
रुजदरुग्णं वि वलस्य सानुं पणीँर्वचोभिरभि योधदिन्द्रः ॥ २ ॥

अयमुशानः । अयम् । कामयमानः । शिलोच्चयम् । प्रति स्थिताः । पणिभिरपहृता गाः । सत्यकर्मभिः । सत्ययुक् । अङ्गिरोभिर्गुज्यमानः । व्यरुजत् । अन्यैररुग्णम् । वलासुरस्य । समुच्छ्रितं देशम् । पणीन् । वचोभिश्च । अभ्ययोधयद् भर्त्सनपरैः ।

अयं द्योतयद्युतो व्यक्तून्दोषा वस्तोः शरद इन्दुरिन्द्र ।
इमं केतुमदधुर्नू चिदह्नां शुचिजन्मन उषसश्चकार ॥ ३ ॥

अयम् । अयम् । व्यद्योतयत् । अचाकृताः । रात्रीः । शरदश्च । अक्तून् इतनैघण्युदकम् । सोम. । इन्द्र ! तथैनं सोमम् । अह्नाम् । केतुम् । अदधुः । पुरा । तथा निर्दोषा । यदोषसः । करोतीति हविषः स्तुतिः ।

---

१. इन्द्रः Sy.
२. वलेन गोपिधानाय निर्मितं शिलोच्चयम् Sy.
३. ०तः D. परितः पर्वतसमीपे विद्यमानाः Sy.
४. ऋतेन तत्कृतेन स्तोत्रेण युक्तश्च भूत्वा Sy.
५. सङ्गच्छमानः Sy.
६. व्यभाङ्क्षीत् Sy.
७. एन्यैः P.
८. उरक्तं P. उरक्णं D. अन्यैरभग्नम् Sy.
९. बलस्यासुरस्य स्वभूतम् Sy.
१०. उच्छ्रितं पर्वतम् Sy.
११. बलानुचरानेतत्संज्ञानसुरान् Sy.
१२. स्तुत्यैरायुधैः सन्तर्जनरूपैर्वाक्यैरेव वा Sy.
१३. अभ्ययोधयत् P. अभ्ययुध्यत् Sy.
१४. भर्त्सभरैः P. भर्त्सनपरैः refers to वचोभिः so it should immediately follow वचोभिः ।।
१५. VM. ignores इन्द्रः ।
१६. व्यदीपयत् Sy.
१७. ०तयच्च कृता P. VM. seems to explain अद्युतः as अचाकृताः ।। अव्याकृताः is suggested for अचाकृताः ।। अद्योतमानान् Sy.
१८. रात्रिम् Sy.
१९. संवत्सरांश्च Sy.
२०. अक्तून् P. इति नैघण्टुकम् is suggested for इतनैघण्युदकम् ।। 'अक्तुरिति रात्रिनाम' (Ngh. 1. 7.) अत्र च तत्सम्बन्धात्पक्षमासादयो लक्ष्यन्ते । पक्षमासादीन् Sy.
२१. त्वया नियम्यमानः पीयमानो वा सोमः Sy.
२२. सोम् D. सोमं चन्द्रात्मना नभसि वर्तमानम् Sy.
२३. दिवसानाम् Sy.
२४. प्रज्ञापकम् Sy.
२५. देवाः यस्मात् व्यदधुः, अकुर्वन् तस्मादनेन पक्षमासादयः सर्वे प्रकाश्यन्ते । चन्द्रगत्यधीनत्वात्तिथिविभागानाम् Sy.
२६. पुरा seems to be the explanation of नू चित् ।
२७. ०षो P. D. निर्दोषाः seems to be the explanation of शुचिजन्मनः ।। आत्मीयेन तेजसा शुद्धोदयान् करोति Sy.
२८. अपि चायं सोमः उषःकालान् Sy.
२९. कारातीति ति D.
३०. VM. ignores वस्तोः ।। वस्तोर्दिवसम् Sy.

अयं रोचयद्रुचो रुचानो३यं वासयद्व्यृतेन पूर्वीः ।
अयमीयत ऋतयुग्भिरश्वैः स्वर्विदा नाभिना चर्षणिप्राः ॥ ४ ॥

अयम् । अयम् । अरोचयत् । अरोचमानान् । स्वयं रोचमानः । अयम् । विवासयति । तेजसा । बह्वीरुषसः । अयम् । गच्छति । सत्येन युक्तैः । अश्वैः । स्वर्गलोकज्ञे । नाभिमता रथेन । मनुष्याणां पूरयिता ।

नू गृणानो गृणते प्रत्न राजन्त्रिषः पिन्व वसुदेयाय पूर्वीः ।
अप ओषधीरविषा वनानि गा अर्वतो नॄन्रुचसे रिरीहि ॥ ५ ॥

नू गृणानः । क्षिप्रम् । स्तूयमानः । स्तुवते । प्रत्न ! राजन् ! अन्नानि । पिन्व । दातव्यधनाय । बहूनि । अपः । ओषधीः रयीणां दातः । वननीयानि धनानि । गाः । अश्वान् । मनुष्यान् । स्तुवते मह्यम् । प्रयच्छ ।

---

१. इन्द्रः Sy.
२. प्रकाशयति Sy.
३. प्रकाशरहितान् । तमसा मलीमसान् सर्वाँल्लोकान् Sy.
४. सूर्यात्मना दीप्यमानः Sy.
५. पियं P.
६. व्यापयति । तत्रत्यानि तमांसि निवर्तयतीत्यर्थः Sy.
७. सत्यभूतेन सर्वत्र गमनशीलेन वा तेजसा Sy.
८. अयमेवेन्द्रः Sy.
९. ऋतेन स्तोत्रेण युज्यमानैः Sy.
१०. ०इवै P.
११. ०लोकज्ञेन is suggested for ०लोकज्ञे ॥ सुष्ठ्वरणीयस्य धनस्य लम्भकेन Sy.
१२. सन्नद्धेन Sy.
१३. चर्षणीनां मनुष्याणां कामैः पूरयिता सन् Sy.
१४. आ P.
१५. Sy. adds त्वम् ।
१६. हे पुरातन ! Sy.
१७. राजान् P. राजमानेन्द्र ! Sy.
१८. पिब P., D. सिञ्च । प्रयच्छेत्यर्थः Sy.
१९. ०तव्यं ध० P. वसूनि धनानि त्वया देयानि यस्मै तादृशाय Sy.
२०. बह्वीः Sy.
२१. वृष्टिलक्षणान्युदकानि Sy.
२२. व्रीह्यादीन् Sy.
२३. अविषा विषरहितानि रक्षकाणि वा वनानि Sy. रयीणां दातः seems to be the explanation of अविषा। VM. seems to derive वा from √ वण् to give and construe it as अवीनां साता, (अवीन् सनोति), i.e. 'giver of sheep.' Wealth was probably counted in sheep also as it was certainly counted in kine. Or अवीनाम् is suggested for रयीणाम् ।
२४. वृक्षजातानि चूतपनसादीनि Sy.
२५. कर्मकरान् Sy.
२६. तपते P. अर्चयित्रे स्तोत्रे Sy.
२७. देहि Sy.

VI.40.

इन्द्र॑ पिब॒ तुभ्यं॑ सु॒तो मदा॑यावं॑ स्य॒ हरी॒ वि मु॑चा॒ सखा॑या ।
उ॒त प्र गा॑य गृण॒ आ नि॒षद्याथा॑ यज्ञा॑य गृणते॒ वयो॑ धाः ॥ १ ॥

इन्द्र पिब । इन्द्र । पिब सोमम् । तुभ्यम् । मदाय । अयं सुतः सोमो ग्रावि विष्य । अथ । सखायौ अश्वौ । रथाद् विमुञ्च । अस्मिन उद्गातृगणे । निषद्य गायतस्तस्य । प्रगाणमुपगायनं कुरु । ततः । यज्ञार्थम् । स्तुवते मह्यम् । अन्नम् । धेहि ।

अस्य॑ पिब॒ यस्य॑ जज्ञा॒न इ॑न्द्र॒ मदा॑य॒ क्रत्वे॒ अपि॑बो विरप्शिन् ।
तमु॑ ते॒ गावो॒ नर॒ आपो॒ अद्रि॑रिन्दुं॑ समु॒द्रन्पी॒तये॒ सम॑स्मै ॥ २ ॥

अस्य पिब । अमुम् । पिब । यम् । जायमान एव । इन्द्र ! मदाय । प्रज्ञानाय । अपिबः । महन् ! तम् । एव । इन्दुम् । गावश्चर्मप्रदाः । अर्यवः । वसतीवर्यः । ग्रावा च । सहागमयन् ।

---

१. 'इन्द्र पिब' इति पञ्चर्चं सप्तदशं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैन्द्रम् । 'इन्द्र पिब' (KSA. 31.40.p.22.) इत्यनुक्रान्तम् । गतः सूक्तविनियोगः । प्रथमे रात्रिपर्यायेऽच्छावाकस्याद्या शस्त्रयाज्या । सूत्रितञ्च—'इन्द्र पिब तुभ्यं सुतो मदायेति याज्या' (ĀŚS.6.4.) इति Sy.

२. तं सोमं पिब Sy.

३. यः सोमः मदार्थम् Sy.

४. ०य यं D. अभिषुतः । यतस्त्वया सोमः पातव्योऽतः कारणात् Sy.

५. ०मे ग्र० P.

६. अवस्थापय Sy.

७. समानख्यानौ मित्रभूतौ वा Sy.

८. अस्मत्स्तोतृसङ्घे Sy.

९. उपविश्य Sy.

१०. अस्माभिः कृतं स्तोत्रमुपश्लोकय Sy.

११. अपि च Sy.

१२. यज्ञाय यजमानाय Sy.

१३. वेहि Sy.

१४. VM. ignores आ ॥ आ आभिमुख्येन Sy.

१५. द्वितीये रात्रिपर्यायेऽच्छावाकस्य 'अस्य पिब' इति शस्त्रयाज्या । सूत्रितञ्च—'अस्य पिबेति याज्या' (ĀŚS. 6.4.) इति Sy.

१६. इमं सोमम् Sy.

१७. य P.
सोमम् Sy.

१८. ज्ञायमाना P. ०ना D. जायमान एव त्वम् Sy.

१९. हर्षाय Sy.

२०. कर्मणे वृत्रवधादिलक्षणं वीर्यकर्म कर्तुं च Sy.

२१. पूर्वं पीतवानसि Sy.

२२. तादृशम् Sy.

२३. सोमम् Sy.

२४. गवि भवाः श्रपणसाधनाः क्षीरादयः Sy.

२५. अध्वर्यवः is suggested for अर्यवः ॥ नेतारोऽध्वर्यवः Sy.

२६. ०तीपयः P.
वसतीवर्याख्याः Sy.

२७. अभिषवार्थो ग्रावा, एते सर्वे Sy.

२८. सह निशमयन् P., D. समगमयन् । 'हि गतौ' इत्यस्यतद्रूपम् Sy.

अंशोः[1] पीतये[2]। अस्मै[3] तुभ्यम्[4]।

उत्तरा निगदसिद्धा।

समिद्धे अग्नौ सुत इन्द्र सोम आ त्वा वहन्तु हरयो वहिष्ठाः।
त्वायता मनसा जोहवीमीन्द्रा याहि सुवितायं महे नः॥ ३॥

[समिद्धे।][5]

आ याहि शश्वदुशता ययाथेन्द्र महा मनसा सोमपेयम्।
उप ब्रह्माणि शृणव इमा नोऽथा ते यज्ञस्तन्वे[6] वयो धात्॥ ४॥

आ याहि। अद्य चागच्छ[7] पुरा च त्वम्। शश्वत्[8]। कामयमानेन[9]। महता। मनसा[10]। पातव्य सोमम्[11]। प्राप्तोऽसि[12] आगतश्च। उपशृणुहि[13]। स्तोत्राणि। इमानि[14]। अस्माकम्[15]। अथ[16] वाऽस्माभिरनुष्ठीयमानः[17]। यज्ञः[18]। पुत्राय[19]। अन्नम्[20]। प्रयच्छतु[21][22]।

---

१. अंशोः is suggested for अशोः।
२. पानार्थम् Sy.
३. ०तयस्मै P. अस्येन्द्रस्य Sy.
४. VM. ignores ते and explains सम् once only॥ ते तव। पुनः समिति पूरकः Sy.
५. The *pratika* is supplied by the Editor. Sy. explains this stanza in the following manner:— अग्नौ समिद्धे दीप्ते सोमे सुतेऽभिषुते सति हे इन्द्र! त्वा त्वां वहिष्ठा वोढृतमा हरयोऽश्वा आ वहन्तु। इमं यज्ञं प्रत्यानयन्तु। अहं च त्वायता त्वां कामयमानेन मनसा जोहवीमि पुनः पुनराह्वयामि। हे इन्द्र! त्वं नोऽस्माकं महे महते सुविताय कल्याणाय आयाहि। आगच्छ।
६. अभिगच्छ Sy.
७. ग P. ८. बहुकृत्वः Sy.
९. ०मान D. अतः कारणात् उशता अस्मान् कामयमानेन Sy.
१०. मनसा सह Sy.
११. Omitted by P. सोमः पीयते यस्मिन् तादृशमस्मदीयं यज्ञम् Sy.
१२. It seems to be the explanation of ययाथ॥ सोमपानार्थं यज्ञं गतवानसि Sy.
१३. उपशृणु Sy.
१४. इदानीं प्रयुज्यमानानि Sy.
१५. अस्मदीयानि Sy.
१६. अथ अनन्तरम् Sy.
१७. अनुतिष्ठी० P.
१८. यजमानः Sy.
१९. शरीराय त्वच्छरीरपोषार्थम् Sy.
२०. अन्नं सोमात्मकम् Sy.
२१. ददातु Sy.
२२. VM. ignores इन्द्र and ते॥ हे इन्द्र! ते तव Sy.

यदिन्द्र दिवि पार्ये यद्वाग्यद्वा स्वे सदने यत्र वासि ।
अतो नो यज्ञमवसे नियुत्वान्त्सजोषाः पाहि गिर्वणो मरुद्भिः ॥ ५ ॥

[यदिन्द्र[1] ।] द्युलोके[2] । पारभवे[3] भवसि । यदि वा[4] । अन्यत्र, ऋधगिति[5] पृथग्भावमाचष्टे । यत् वा[6] । स्वे[7] । गृहे[8] । यत्र[9] । वा[10] । असि[11] । अत[12] । अस्माकम्[13] । रक्षणाय[14] । अश्ववान्[15] । मरुद्भि । सहि आगत्य[16] । पिब[17] । सोमम्[18] । गीर्भिर्वननीय[19] ।[20]

---

१. The *pratīka* is supplied by the Editor. भरद्वाजस्येदमार्षम् Dur. भरद्वाजस्य SKN.

२. के P., D. द्युलोकाख्ये Sy. हे भगवन्निन्द्र ! यद् यदि त्वं दिवि द्युलोके Dur. यदि त्वं हे इन्द्र ! दिवि द्युलोके SKN.

३. वा भरवे P. वारभवे D. पारगे दूरदेशे वर्तसे Sy. पारणीये स्थानेऽवस्थितः Dur. पारयितव्ये दूरवर्तित्वाद् यत्नेन गन्तव्य इत्यर्थः SKN.

४. व्या P., D.

५. ०ऋधनिति P. ०ऋधगिति D. एतत् पृथक् शब्देन समानार्थम् । पृथगन्यस्मिन् देशे वर्तसे Sy.

६. पृथुवा० P. यद्वृधक् पृथग् दिव इत्यर्थः Dur. पृथग् द्युलोकात् SKN. ऋधगिति पृथग्भावस्य प्रवचनं भवति । अथाप्यूष्नोत्यर्थे दृश्यते N. 4.25.

७. यदि Dur.; SKN.

८. स्वे P., D. स्वकीये Sy.

९. अन्तरिक्षलोकेऽवस्थितः Dur. अन्तरिक्षे SKN.

१०. यत्रास्य P. यस्य D. अथवा किमनेन विशेषणेन यस्मिन् देशे Sy. क्वचिदन्यत्रैव स्थानेऽवस्थितः को हि तत्त्वतो वेद तव स्थानं यत्रासीति Dur. क्व चाप्यसि SKN.

११. भवसि Sy. किं बहुना यत्रास्यवस्थितः Dur.

१२. अस्मात्स्थानादागत्य Sy. तत आगत्य Dur. आगत्येति शेषः SKN.

१३. अतोरस्मा० P., D. अस्माकं स्वभूतम् SKN.

१४. रक्षसि Dur. तर्पणायात्मनः SKN.

१५. नियुतोऽश्वाः । तद्वान् Sy. त्वं नियुत्वा वायुभूत्वा Dur. नियुतोऽश्वास्तैस्तद्व SKN.

१६. सह प्रीयमाणस्त्वम् Sy. सह जोषणः सहप्रीति Dur. सम्प्रीयमाणः SKN.

१७. रक्ष, यद्वा पिब Sy. पाहि रक्षआदिभ रक्ष । यद्वा 'पा पाने' इत्यस्येदं छान्दसत्वा पिबादेशाभावे रूपम् SKN.

१८. अस्मदीयं यागम् । यद्वा यज्ञं यजनसाधनमस्म दीयं सोममवसे तर्पणाय Sy. एतं सोम मस्मत्प्रत्तम् Dur.

१९. ०यं P., D. हे गिरां सम्भक्तरिन्द्र ! Sy यस्त्वमेवंप्रभावः । तं त्वां ब्रवीमि हे गिर्व गीर्भिः सम्भजित !, स हि स्तुतीः सम्भजति स्तुतिभिर्वा सम्भज्यते । एवमेके पृथग्भ वोदाहरणमेतामृचं व्याचक्षते । अपरे पुनः एवैष भाव्यकारेण नियमः पठितः 'ऋधगया इति । अत्रैवैतौ द्वावप्यर्थाविति मन्यन्ते Du गीर्भिर्वननीय ! आभिः सहेत्यर्थः SKN ऋधगिति पृथग्भावस्य प्रवचनं भवति । अथ प्यूष्नोत्यर्थे दृश्यते "ऋधगया ऋधगुताशमिष्ठाः (TS.1.4.44.2.) ऋध्नुवन्नयाक्षीः । ऋध्न वन्नशमिष्ठा इति च N.4.25., SKN.I 273.

२०. VM. ignores इन्द्र !

VI.41.

अहेळमान उप याहि यज्ञं तुभ्यं पवन्त इन्दवः सुतासः ।
गावो न वज्रिन्त्स्वमोको अच्छेन्द्रा गहि प्रथमो यज्ञियानाम् ॥ १ ॥

[1] अहेळमानः । अक्रुध्यन्[2] । उपगच्छ । यज्ञं[3] । तुभ्यम्[4] । पवन्ते[5] । इन्द्रवः[6] । अभिषुताः । पाशवः[7] । इव । वज्रिन्[8] ! स्वम्[9] । गृहम्[10] । प्रति[11] । इन्द्र[12] ! आगच्छ । मुख्य[13] । यज्ञाहाणाम्[14] ।

या ते काकुत्सुकृता या वरिष्ठा यया शश्वत्पिबसि मध्व ऊर्मिम् ।
तया पाहि प्र ते अध्वर्युरस्थात्सं ते वज्रो वर्ततामिन्द्र गव्युः ॥ २ ॥

[या ते ।][15] [16] या[17] । ते[18] । जिह्वा काकुत्[19] । उरुतरा वरिष्ठा[20] । अवशिष्ट[21] स्पष्टम् ।

---

१. 'अहेळमानः' इति पञ्चचत्वारिंशदष्टादशं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैन्द्रम् । अनुक्रान्तञ्च 'अहेळमानः' (KSA. 31.41.p.22.) इति । गतो विनियोगः Sy.

२. अक्रुध्यंस्त्वम् Sy.

३. अस्मदीयं यज्ञम् Sy.

४. यतः कारणात् तुभ्यं त्वदर्थम् Sy.

५. वदन्ते P. वपन्ते D. पूयन्ते । दशापवित्रेण शोध्यन्ते Sy.

६. इन्द्रः D. इन्वदः is suggested for इन्द्रवः ॥ सोमाः Sy.

७. पशवः is suggested for पाशवः ॥ स्वकीयं गोष्ठमिव Sy.

८. वज्रवन्निन्द्र ! Sy.

९. स्वकीयम् Sy.

१०. स्थानं द्रोणकलशादिलक्षणम् Sy.

११. आभिमुख्येन । प्राप्नुवन्तीति शेषः Sy.

१२. अतः कारणाद्धे इन्द्र ! Sy.

१३. मुख्यस्त्वम् Sy.

१४. यज्ञार्हाणां देवानां मध्ये Sy.

१५. The *pratika* is supplied by the Editor.

१६. हे इन्द्र ! Sy.

१७. य P., D.

१८. तैः P. तव Sy.

१९. जह्वाकाकव् P.
जह्वा० D.

२०. विरि० P.
उरुतमा विस्तीर्णतमा Sy.

२१. ०ष्ठवशि० D. By अवशिष्टम् VM. refers to सुकृता । या । यया । शश्वत् । पिबसि । मध्वः । ऊर्मिम् । तया । पाहि । प्र । ते । अध्वर्युः । अस्थात् । सम् । ते । वज्रः । वर्तताम् । इन्द्रः and गव्युः ॥ सुकृता—सुष्ठु धात्रा निर्मिता । यया च मध्वो मधुनः सोमस्योर्मिं रसं शश्वद्बहुकृत्वः पिबसि तया जिह्वयास्मदीयं सोमं पाहि । पिब । तदर्थमध्वर्युरुध्वरस्य नेता ऋत्विग्गृहीतसोमः सन् प्रास्थात् । हविर्धानावुत्तरवेदिदेशं प्रत्यगमत् । अपि च हे इन्द्र ! गव्युः शत्रुसम्बन्धिनीर्गा आत्मन इच्छन् ते त्वदीयो वज्रः संवर्तताम् । शत्रुभिः सङ्गतो भवतु । तान् हन्त्वित्यर्थः Sy.

एष द्रप्सो वृषभो विश्वरूप इन्द्रायु वृष्णे समकारि सोमः ।
एतं पिब हरिवः स्थातरुग्र यस्येशिषे प्रदिवि यस्ते अन्नम् ॥ ३ ॥

एषः । द्रप्सो द्रवणशीलः[1]। प्रदिवीति पुराणनामधेयम्[2]। प्रजापतेरिन्द्र सोममात्मनोऽन्नं वव्रे । शिष्टं स्पष्टम्[3] ।

सुतः सोमो असुतादिन्द्र वस्यानयं श्रेयाञ्छिकितुषे रणाय ।
एतं तितिर्व उप याहि यज्ञं तेन विश्वास्तविषीरा पृणस्व ॥ ४ ॥

सुतः[4]। सुतोऽयम् । सोम । असुतात् निहितात्[5] सोष्यमाणान्[6]। वसीयान्[7] भवति । प्रशस्यश्च[8]। अयम्[9]। प्राज्ञाय तुभ्यम्[10]। रक्षणकर्मणे । तमेनम्[11]। सोमम्[11]। उत्तरित[12] ! उपद्रवाणाम्[12]। उपागच्छ[13]। तेन सोमेन पीतेन । विश्वानि[14]। आत्मनो बलानि । आपूरय[15] ।

उत्तरा निगदसिद्धा ।

ह्वयामसि त्वेन्द्र याह्यर्वाङरं ते सोमस्तन्वे भवाति ।
शतक्रतो मादयस्वा सुतेषु प्रास्माँ अव पृतनासु प्र विक्षु ॥ ५ ॥

[ह्वयामसि[16]।]

---

१. विणशीलं P. द्रप्नो पिणशीलं D.
२. Ngh. 3.27.
३. VM. does not explain the stanza except two or three words of it. For full explanation see Sy.'s commentary :—
द्रप्सो द्रवणशीलो वृषभः कामानां वर्षिता विश्वरूपो बहुविधरूपोपेत ईदृग्विध एष सोमो वृष्णे कामानां वर्षित्र इन्द्रायेन्द्रस्य पानार्थं समकारि । अभिषवादिभिः संस्कृतोऽभूत् । हे हरिवः ! हरी अश्वौ । तद्वन् ! हे स्थातः ! सर्वेषामधिष्ठातरुग्रोद्गूर्णबलेन्द्र ! एतमीदृशं सोमं पिब । प्रदिवि । जातावेकवचनम् । प्रभूतेषु दिवसेषु प्रगतेष्वहःसु वा ईशिषे त्वमेवेश्वरो भवसि । यश्च सोमस्ते तवान्नमन्नत्वेन परिकल्पित एतं पिबेत्यन्वयः ।
४. अभिषुतः Sy. ५. ०तान् D.
६. सेव्यमा० P. ०णात् is suggested for ०णान् ॥ अकृताभिषवात्सोमाबन्यदीयात् Sy.
७. वसीयान् वसुमत्तरः प्रशस्यतरः Sy.
८. श्रेष्ठश्च भवति । त्वामतिशयेन रमयितेत्यर्थः Sy.
९. प्र० D. तथा विदुषेऽभिज्ञाय तुभ्यम् Sy.
१०. रमणीयाय तदर्थम् Sy.
११. यजनसाधनं सोमम् Sy.
१२. ०रितत्रद्र० D. हे शत्रूणां तरितरिन्द्र ! Sy.
१३. उपागच्छ Sy.
१४. सर्वाणि Sy.
१५. VM. ignores इन्द्र ।
१६. The *pratika* is supplied by the Editor.
हे इन्द्र ! त्वा त्वां ह्वयामसि । आह्वयामः । अतः कारणात्त्वमर्वाङस्मदभिमुखः सन् आ याहि । आगच्छ । अस्मदीयः सोमश्च ते तन्वे तव शरीरायारं पर्याप्तं भवाति भवतु । त्वदीयं शरीरं यथाभिलाषं तर्पयत्वित्यर्थः । हे शतक्रतो ! बहुविधकर्मन्निन्द्र ! त्वं च सुतेष्वभिषुतेष्वस्मदीयेषु सोमेषु मादयस्व तृप्यस्व । 'मद तृप्तियोगे' । तदनन्तरं पृतनासु सङ्ग्रामेष्वस्मान्प्राव । प्रकर्षेण रक्ष । न केवलं पृतनासु किन्तु विक्षु सर्वासु प्रजास्वस्मान्प्राव । प्ररक्षSy.

VI.42.

प्रत्यस्मै पिपीषते विश्वानि विदुषे भर।
अरंगमाय जग्मयेऽपश्चाद्घ्वने नरे ॥ १ ॥

प्रत्यस्मै[1]। प्रतिभर[2]। अस्मै[3]। पातुमिच्छते[4]। विश्वान्यन्नानि[5]। विदुषे[6] धनादीनि। पर्याप्तगामिने[7]। गमनशीलाय[8]। तदानीमेव दहने[9]। नराय नेता नर[10]।

एमेनं प्रत्येतन सोमेभिः सोमपातमम्।
अमत्रेभिर्ऋंजीषिणमिन्द्रं सुतेभिरिन्दुभिः ॥ २ ॥

एमेनम्[11]। एनमिन्द्रम्[12]। प्रत्यागच्छत[13]। सोमे[14]। सोमपानम्[15]। पात्रे[16]। ऋजीष्यन्तम्[17]। इन्द्रः[18]। सुतैः[19]। सोमै[20]।

---

१. 'प्रत्यस्मै' इति चतुर्ऋचमेकोनविंशं सूक्तं भरद्वाजस्यार्षमैन्द्रम्। चतुर्थी बृहती शिष्टा अनुष्टुभः। तथा चानुक्रान्तम् 'प्रत्यस्मै चतुष्कमानुष्टुभं बृहत्यन्तम्' (KSA.31.42.p.22.) इति। प्रातःसवनेऽच्छावाकस्येदमुन्नीयमानसूक्तम्। सूत्रितञ्च--'प्रत्यस्मा इत्युन्नीयमानायानूच्य' (ĀŚS.5.7.) इति Sy.

२. हे अध्वर्यो ! Sy.

३. अभिहर। सोमं प्रयच्छेत्यर्थः Sy.

४. इन्द्राय Sy.

५. सर्वाणि भोज्यानि Sy.

६. जानते Sy.

७. पर्याप्तगमनाय Sy.

८. यज्ञेषु गमनशीलाय Sy.

९. दधिर्गतिकर्मा। अपश्चाद्गमनाय सर्वेषामग्रगामिने Sy.

१०. नेत्रे यज्ञानाम् Sy.

११. तृतीये स्वरसाम्नि निष्केवल्ये 'एमेनम्' इति स्तोत्रियस्तृचः। सूत्रितञ्च--'एमेनं प्रत्येतनेत्याद्यो वा सर्वेषाम्' (ĀŚS.8.5.) इति Sy.

१२. ०नमा P.

१३. हे ऋध्वर्यवः ! Sy.

१४. ०च्छथ P. आ अभिमुखं प्रतिगच्छत Sy.

१५. सोमैः D. सोमैः करणभूतैः Sy.

१६. ०पान D. अतिशयेन सोमस्य पातारम् Sy.

१७. अमत्रैः सोमपात्रैर्ग्रहचमसादिभिः Sy.

१८. ऋजीषवन्तम् is suggested for ऋजीष्यन्तम्॥ ऋजीषं शत्रूणामुपार्जकं बलम्। तद्वन्तम्। यद्वा ऋजीषिणमित्युत्तरत्र सम्बन्धनीयम्। सुतेभिरभिषुतैरिन्दुभिः सोमैर्ऋंजीषिणम्। गतसारः सोम ऋजीषः। तद्वन्तम्। अथवामत्रेभिरमत्रैरमात्रैरपरिमितैः सोमैर्ऋंजीषिणम्। ऋजेर्गत्यर्थाद्धातोरसाधन ऋजीषशब्दः। ततो मत्वर्थीय इनिः। सङ्गतमित्यर्थः। एवंविधमिन्द्रं प्रतिगच्छतेत्यन्वयः। अन्य आह। अमत्रेभिर्ग्रहचमसादिगतैरभिषुतैः सोमैर्ऋंजीषिणं बलवन्तमेनमिन्द्रं प्रतिगच्छतति Sy.

१९. इन्द्रम् is suggested for इन्द्रः।

२०. VM. ignores ईम्॥ ईमिति निपातोऽनर्थकः Sy.

यदी सुतेभिरिन्दुभिः सोमेभिः प्रतिभूषथ ।
वेदा विश्वस्य मेधिरो धृष्ट्यंतमिदेषते ॥ ३ ॥

यदि[1] । यदि । सुते[2] । दीप्ते[3] । सोमैरिन्द्रम् । प्रतिभवथ[4] । वेत्यभिलषितम्[5] । विश्वम्[6] । प्राज्ञ[7] । धृष्टे[8] । तं[9] तम् । एव । प्रापयति ।

अस्माअस्मा इदन्धसोऽध्वर्यो प्र भरा सुतम् ।
कुवित्समस्य जेन्यस्य शर्धतोऽभिशस्तेरवस्परत् ॥ ४ ॥

अस्मै[11] । अस्मा अस्मै । एव । सोमान्नस्य[12] । सुतम्[13] । अध्वर्यो[14] ! प्रभर[15] । सर्वस्य । जेतव्यस्य शत्रो[16] । वेग कुर्वत[17] । अभिशस्तेरस्मानिन्द्र[18] । बहु[19] । अवस्परति तारयति ।

VI.43.

यस्य त्यच्छम्बरं मदे दिवोदासाय रन्धयः ।
अयं स सोम इन्द्र ते सुतः पिब ॥ १ ॥

यस्य[20] । यस्य पीतस्य[21] । मदे[22] । तत् त्व पुरा[23] । दिवोदासाय[24] । शम्बरम्[25] ।

---

१. हे अध्वर्यवः ! Sy. २. अभिषुतैः Sy.
३. उन्वनशीलदीप्तैर्वा Sy.
४. सोमैः is omitted by D.
५. इन्द्रं प्रति यूयं प्रतिगच्छथ । 'भू प्राप्तौ' इत्यस्यैतद्रूपम् Sy.
६. वेत्य० is suggested for वेत्य ॥ जानाति Sy. ७. स इन्द्रः सर्वं भवदीयं कामम् Sy.
८. प्र० D. तदानीं मेधिरो मेधावी । मेधो यज्ञस्तद्वान् वा Sy.
९. ०ष्टं P. ज्ञात्वा च धृषत् शत्रूणां धर्षकः सन् Sy. १०. त P., D. कामम् Sy.
११. Omitted by P. अस्मा एवेन्द्राय नान्यस्मै Sy.
१२. ०मान० P. सोमलक्षणस्यान्नस्य Sy.
१३. अभिषुतं रसम् Sy.
१४. हे अध्वर्यो ! त्वम् Sy.
१५. भर P. सम्प्रहर प्रयच्छेति यावद् Sy.
१६. उत्सहमानस्य शत्रोः Sy.
१७. अभिशंसनात् तत्कृताद्धिंसनात् Sy.
१८. बहुशः Sy.
१९. अप० D. अस्मान् पालयतु Sy.
२०. 'यस्य त्यत्' इति चतुर्ऋचं विंशं सूक्तं भरद्वाजस्यार्षमौष्णिहमैन्द्रम् । अनुक्रम्यते च— 'यस्यौष्णिहम्' (KSA 31.43. p. 22.) इति । महाव्रतेऽपि निष्केवल्येऽप्याग्निहुत्वा शीतावेतत्सूक्तम् । तथैव पञ्चमारण्यके सूत्रितम्—'यस्य त्यच्छम्बरं मद इति त्रयस्तृचा गायत्र्यः' (AĀ.5.2.5.) इति Sy.
२१. हे इन्द्र ! Sy.
२२. सोमस्य Sy.
२३ पानेन जनिते हर्षे सति Sy.
२४. Omitted by P. त्यदिति क्रियाविशेषणम् । त्यत्तत् प्रसिद्धं यथा भवति तथा रन्धय इत्यर्थः Sy.
२५. राज्ञे Sy.
२६. असुरम् Sy.

वशमनयः[1] । अयमिति[2] सिद्धम् ।

यस्य[3] तीव्रसुतं[4] मदं[5] मध्यमन्तं[6] च[7] रक्षसे[8] ।
अयं स सोमः इन्द्र ते सुतः पिब[9] ॥ २ ॥

यस्य[10] । यस्य[11] । तीक्ष्णसुतम् । मदकर रसम्[12] । वर्जयसि[13] । तथा[14] मध्यमरसम् । नीचरसम्[15] । च वर्जयसि । सम्यक् सुतमेव पिब[16] ।

यस्य गा अन्तरश्मनो मदे[17] दृळ्हा अवासृजः[18] ।
अयं स सोमः इन्द्र ते सुतः पिब[19] ॥ ३ ॥

यस्य गाः । यस्य[20] । मदे[21] । शिलोच्चयस्य[22] । अन्तः[23] । पणिभिरपहृता, दृढा[24] । गा । अवासृज[25] ।

यस्य मन्दानो अन्धसो[26] माघोनं दधिषे[27] शवः[28] ।
अयं स सोमः इन्द्र ते सुतः पिब[29] ॥ ४ ॥

यस्य मन्दानः[30] । यस्य[31] । अन्धस[32] । तृप्यन्[33] । नघवतस्तव[34] सम्बन्धि[35] । बलम्[36] । धारयसि[37] ।

---

१. अहिंसीः । वशीकृतवानसि Sy. रध्यतिर्वश-गमने N.6.32.

२. By अयमिति VM. refers to अयम् । सः । सोमः । इन्द्र । ते । सुतः and पिब ॥ हे इन्द्र ! सोऽयं सोमस्ते त्वदर्थं सुतोऽभिषुतः । अतस्तं पिब Sy.

३. हे इन्द्र ! त्वम् Sy.

४. सोमस्यावयवभूतम् Sy.

५. तीक्ष्णं P. तीक्ष्णं सुतमभिषवो यस्य स तीव्रसुतः प्रातःसवनिकः । तम् Sy.

६. सोमरसम् Sy.

७. रक्षसि Sy.

८. ०यस्ययथा P. मध्यन्दिनसवनगतम् Sy.

९. नीतर० P. तृतीयसवनगतं च सोमरसम् Sy.

१०. सोऽयं सोमस्त्वदर्थमभिषुतस्तं पिब Sy.

११. सोमस्य Sy.

१२. मदकरे रसे पीते सति Sy.

१३. वलासुरेण निहितस्य पर्वतस्य Sy.

१४. मध्ये विद्यमानाः Sy.

१५. दृढपिधानाश्च Sy.

१६. वलस्य बन्धनाद्वयसृजः स सोम इत्यादि गतम् Sy.

१७. हे इन्द्र ! त्वम् Sy.

१८. सोमलक्षणस्यान्नस्य Sy.

१९. पानेन मन्दानो मन्दमानो हृष्टः सन् Sy.

२०. ०वतस्तस्य D. ऐन्द्रम् Sy.

२१. पसंधि P.

२२. असाधारणं बलम् Sy.

२३. धारयसि । येन सोमेन तवेन्द्रत्वं जातमित्यर्थः । सोऽयं सोमः सुतोऽभिषुतस्तं पिब Sy.

VI.44.

यो रयिवो रयिंतमो यो द्युम्नैर्द्युम्नवत्तमः ।
सोमः सुतः स इन्द्र तेऽस्ति स्वधापते मदः ॥ १ ॥

[1] यो रयिवः । ॥ शंयुर्बार्हस्पत्य ॥ यः । [3] धनवन् ! [5] धनवत्तम । यश्च । [7] अन्नैः । अन्नवत्तम । सोमः । [9] सुतः । इन्द्र ! त्वदर्थम् । ततश्च स्वधापते ! तव । अस्ति । [10] मदः । [11] [12]

यः शुग्मस्तुविशुग्म ते रायो दामा मतीनाम् ।
सोमः सुतः स इन्द्र तेऽस्ति स्वधापते मदः ॥ २ ॥

[13] यः शुग्मः । [14] यः । सुखतर । [15] बहुसुख ! [16] ते । धनम् । [17] मतीना स्तोतृविषयाणाम् । दाना ।

येन वृद्धो न शवसा तुरो न स्वाभिरूतिभिः ।
सोमः सुतः स इन्द्र तेऽस्ति स्वधापते मदः ॥ ३ ॥

[19] येन वृद्धः । [20] येन । वृद्धे । [21] न । सेनाबलेन । शत्रून् तरसि । [23] [21] न च । [24] स्वे । मरुद्भिः, [25] अपि तात्मनैव [26] तुरो भवसि ।

---

१. चतुर्थेऽनुवाके षट् सूक्तानि तत्र 'यो रयिवः' इति चतुर्विंशत्यृचं प्रथमं सूक्तं बृहस्पतिपुत्रस्य शंयोरार्षमैन्द्रम् । आदितः षडनुष्टुभः सप्तम्यष्टमीनवम्यो विराजोऽष्टम्येकैव वा विराट्, शिष्टास्त्रिष्टुभ. । तथा चानुक्रान्तम्—'यो रयिवश्चतुर्विंशतिः शंयुर्बार्हस्पत्यो ह्यादौ षळनुष्टुभस्तिस्रश्च विराजो मध्यमैव वासाम्' (KSA. 31.44.p.22.) इति । गतः सूक्तविनियोगः Sy.

२. ०हस्प० P.

३. सोमः Sy.

४. धनं P., D. हे धनवन् ! इन्द्र ! Sy.

५. अतिशयेन रयिमान् धनवान् Sy.

६. श्रोतमानैर्यशोभिः Sy.

७. ०म P. अतिशयेन यशस्वी Sy.

८. अभिषुतः सन् Sy.

९. ०वते P. हे स्वधापते ! स्वधाया अन्नस्य सोमलक्षणस्य पालक ! Sy.

१०. भवति Sy.

११. ०दा P. मदकरः Sy.

१२. VM. ignores मः ॥ सोमः Sy.

१३. सोमः Sy. १४. सुखकरः Sy.

१५. हे बहुसुखेन्द्र ! Sy.

१६. त्वदीयः Sy.

१७. धनस्य दाता भवति । हे स्वधापते ! इन्द्र ! स सोमोऽभिषुतस्तव मदकरो भवति Sy.

१८. धनमृतीनां D. स्तोतृणाम् Sy.

१९. पीतेन सोमेन Sy.

२०. वृद्धः is suggested for वृद्धे ॥ प्रवृद्धश्च सन् Sy.

२१. इमौ नशब्दौ समुच्चयार्थौ Sy.

२२. बलेन Sy.

२३. शत्रूणां हिंसकश्च भवसि Sy.

२४. आत्मीयैः Sy.

२५. मरुद्भिः सार्धम् Sy.

२६. त्वात्मनैव is suggested for तात्मनैव ।

त्यमु वो अप्रहणं गृणीषे शवसस्पतिम् ।
इन्द्रं विश्वासाहं नरं मंहिष्ठं विश्वचर्षणिम् ॥ ४ ॥

त्यमु वः । तम् । एव । युष्माकम् । पहन्तारम् । स्तुहि स्तोतः ! बलस्य पतिम् । इन्द्रम् । सर्वसह । नेतारम् । दातृतमम् । सर्वस्य द्रष्टारम् ।

यं वर्धयन्तीदगिरः पतिं तुरस्य राधसः ।
तमिन्वस्य रोदसी देवी शुष्मं सपर्यतः ॥ ५ ॥

यं वर्धयन्ति । यम् । वर्धयन्ति । एव । स्तुतयः । पतिम् । तारकस्य । धनस्य । तम् । एव । इन्द्रस्य । शुष्ण बलम् । दवी । द्यावापृथिवी । पूजयितः ।

तद्व उक्थस्य बर्हणेन्द्रायोपस्तृणीषणि ।
विपो न यस्योतयो वि यद्रोहन्ति सक्षितः ॥ ६ ॥

तद् वः । सा । युष्माकम् । उक्थस्य । बर्हणा । इन्द्राय । उपस्तरीरणीया. । मेधाविनः । इव

---

१. पृष्ठ्यषडहस्य चतुर्थेऽहनि प्रउगशस्त्रे 'त्यमु वः' इत्यैन्द्रस्तृचः । सूत्रितञ्च—'त्यमु वो अप्रहणमप त्यं वृजिनं रिपुम्' (ĀSS. 7.11.) इति Sy.
२. हे ऋत्विग्यजमानाः ! Sy.
३. इन्द्रम् Sy.
४. युष्मदर्थम् Sy.
५. प्रहस्तारं P. अप्रहन्तारम् is suggested for प्रहन्तारम् ॥ अप्रहन्तारं भक्तानामनुग्राहकम् Sy.
६. स्तौमि । यद्वा वो यूयं गृणीषे गृणीत स्तुत, वचनव्यत्ययः Sy.
७. पालकम् Sy.
८. ०सहम् is suggested for ०सह ॥ विश्वस्य शत्रोरभिभवितारम् Sy.
९. हेतारं P.
१०. इन्द्रसम्बन्धिनम् Sy.
११. ईश्वरम् Sy.
१२. ०कस्येव P. हिंसकस्य शत्रोः Sy.
१३. धनस्य । शत्रुधनानामपहर्तारमित्यर्थः Sy.
१४. शुष्मम् is suggested for शुष्णम् ॥ शोषकं बलम् Sy.
१५. दिवी P. देवी is suggested for दवी ॥ देवनशीले Sy.
१६. द्यावापृथिव्यौ Sy.
१७. ०यतः is suggested for ०यितः ॥ परिचरतः Sy.
१८. VM. ignores नु ॥ क्षिप्रम् Sy.
१९. हे स्तोतारः ! Sy.
२०. युष्मदीयस्य Sy.
२१. उक्थ P. स्तोत्रस्य Sy.
२२. बहुत्वं माहात्म्यम् Sy.
२३. इन्द्रोय P. इन्द्रार्थम् Sy.
२४. उपस्तरणीयाः is suggested for उपस्तरीरणीयाः ॥ उपस्तरणीयम् । उपेत्य विस्तरणीयम् । इन्द्रो यथा स्तोत्रस्य माहात्म्यं जानीयात् तथा विस्तार्यत इत्यर्थः Sy.
२५. मेधाविनः । सर्वकार्यकुशला इत्यर्थः । यद्वा नेति पूरकः । विपो विप्रस्य मेधाविनो यस्येन्द्रस्येति योज्यम् Sy.

भवन्ति । यस्य[1] । रक्षणानि[2] जागरणशीलानि । यस्माच्च[3] । विरोहन्ति[4] । सक्षितः[5] समान इन्द्रे निवसन्तः[6] सप्तान्य आदित्याः 'आ यस्मिन् सप्त वासवाः' इत्युक्तम् ।

अविंदद्दत्तं मित्रो नवीयान्पपानो देवेभ्यो वस्यो अचैत् ।
ससवान्त्स्तोलाभिर्धीतरीभिरुरुष्या पायुरभवत्सखिभ्यः ॥ ७ ॥

अविंदत्[8] । जानाति । प्रवृद्धम्[9] । यजमानस्य[10] मित्रभूत[11] इन्द्रः, पुलिङ्ग[12] मित्रशब्दश्छन्दसीत्युक्तम्[13] । नवतरः[14] । सोमं पिबन् इन्द्रः । देवेभ्यः[15] । अभ्युदयम्[16] । चिनोति[17] । अन्नवान्[18] । स्तरणशीलाभिरश्छादयित्रीभिः[19] । धवन्तीभिरूतिभिर्मरुद्भिः[20] ! रक्षणेच्छायाम्[21] । रक्षकः[22] । भवति । यजमानेभ्यो[23] देवेभ्यो वेति ।

ऋतस्य पथि वेधा अपायि श्रिये मनांसि देवासो अक्रन् ।
दधानो नाम महो वचोभिर्वपुर्दृशये वेन्यो व्यावः ॥ ८ ॥

ऋतस्य[24] । सत्यस्य । मार्गे[25] यज्ञे । सोमः[26] । पीतये[27] । तत्र यणाय[28] । मनांसि[29] । देवाश्च[30] । कुर्वन्ति[31] ।

---

१. इन्द्रस्य Sy.
२. रक्षाः Sy.
३. यस्मिंश्चेन्द्रे Sy.
४. प्रादुर्भवन्ति । तस्मा इन्द्रायेत्यर्थः Sy.
५. समाननिवासाः संहता ऊतयः Sy.
६. ०सतः P.
७. TS.I.6.12.2.
८. स इन्द्रः Sy.
९. वृद्धं P. कर्मसु समर्थं प्रवृद्धं वा यष्टारम् Sy.
१०. ०न D.
११. ०तं P.
१२. पुंलिङ्गिश्च P. पुंल्लिङ्गश्च is suggested for पुल्लिङ्ग ।
१३. मित्रशब्दः is omitted by D.
१४. ०रस्मिन् P., D. कल्याणतरः स्तुत्यतरो वा Sy.
१५. स्तोतृभ्यः Sy.
१६. वसीयः श्रेष्ठं धनम् Sy.
१७. उपचितं करोति । ददातीति यावत् Sy.
१८. हविर्लक्षणान्नोपेतः । यद्वा ससवानिति सनतेः क्वसौ रूपम् । सम्भजमान इति सम्बन्धः Sy. ससमित्यन्ननाम Ngh. 2.7.
१९. स्थूलाभिः प्रवृद्धाभिः Sy.
२०. ०न्तिभिः P. कम्पनकारिणीभिर्वडवाभिरीवृशैर्मरुद्भिर्वा युक्तः सन् Sy.
२१. रक्षणेच्छयाऽऽगत्य Sy.
२२. रक्षणः P.
२३. स्तोतृभ्यः Sy.
२४. यज्ञस्य Sy.
२५. यज्ञ P.
२६. विधाता सर्वस्य द्रष्टा सोमः Sy.
२७. पीयते is suggested for पीतये ॥ इन्द्रेण पीतोऽभूत् । यद्वा वेधा विधातेन्द्रोऽपायि । सोमं पिबतु । व्यत्ययेन कर्तरि क्त्रिण् Sy.
२८. श्रयणाय is suggested for यणाय ॥ श्रयितुम् Sy.
२९. इन्द्रस्य मनांसि Sy.
३०. स्तोतार ऋत्विजः Sy.
३१. कर्माणि कुर्वन्ति Sy.

तस्मिन् यज्ञे स्तुतिभिः[1]। नमनम्[2]। दधानः[3]। महानिन्द्रः[4]। स्वः[5] वपुः[6]। दर्शनाय[7]। कमनीयः[8]। विवृणोति 'छन्दस्यपि दृश्यते' इत्याधाग[9] ?

द्युमत्तमं[11] दधीं[12] धेह्यस्मे[13] सेधा[14] जनानां[15] पूर्वीररातीः[16]।
वर्षीयो[17] वयः[18] कृणुहि[19] शचीभिर्धनस्य[20] सातावस्माँ[21] अविड्ढि ॥ ९ ॥

द्युमत्तमम्[11]। दीप्ततमम्[12]। बलम्। अस्मभ्यम्[13]। धेहि[14]। निषेध[15] च। जनानामस्माकम्[16]। इमा बह्वीः[17]। अरातीं[18]। वृद्धतरम्[19]। अन्नं च। कुरु। प्रज्ञाभि[20]। धनलाभार्थम्[21]। अस्मान्। रक्षेति[22]।

इन्द्र तुभ्यमिन्मंघवन्नभूम वयं दात्रे[25] हरिवो[26] मा वि वेनः[27]।
नकिरापिर्दृदृशे मर्त्यत्रा किमङ्ग रध्रचोदनं त्वाहुः ॥ १० ॥

इन्द्र तुभ्यमित्। इन्द्र ! तुभ्यम्। एव। नवन्[24] ! अभूम। वयम्। दात्रे[25]। हरिवः[26] ! तथा सति

---

१. ०भि P.
२. शत्रूणां नामकम् Sy.
३. धारयन् Sy.
४. ०न्द्र P. महत् Sy.
५. स्वं is suggested for स्वः ॥ आत्मीयम् Sy.
६. शरीरम् Sy.
७. दर्शनार्थम् Sy.
८. वननीयः सम्भजनीयश्च सन् । यद्वा वेन्य इति वेनतेः कान्तिकर्मणो रूपम्, वपुरिति च रूपनाम (Ngh. 3.7.) वेन्यः कमनीयो वपुर्भास्वरं रूपं दृशये दर्शनार्थं व्यावः विवृणोतु वचोभिः स्तूयमानः सन् Sy.
९. Pa.6.4.73. P. reads छन्दस्यचोदकमाहुः माजस्वने मा हिंसित्रे विवृश्यत इत्याग । The additional passage in P. has a striking resemblance with a part of the commentary on RV. VI.44.10.,11. (चोदकम् । आहुः ॥ मा जस्वने । मा । हिंसित्रे)
१०. इत्याद् is suggested for इत्याधाग । This is to explain the formation of the word आवः ।
११. हे इन्द्र ! Sy.
१२. दीप्तिमत्तमम् Sy.
१३. अस्मासु Sy.
१४. धारय Sy.
१५. निषीद P. निवारय Sy.
१६. स्तोतॄणाम् Sy.
१७. ०मं P. ०नामस्मामि० D.
१८. बहीं P.
१९. ०ति P. अरातीः is suggested for अराती ॥ शत्रुसेनाः Sy.
२०. कुरुतरम् P., D.
२१. ०ज्ञाभः P. ०भिः is suggested for ०भि ॥ आत्मीयाभिः प्रज्ञाभिः Sy.
२२. VM. seems to explain धनस्य and सातौ together as धनलाभार्थम् ॥ धनस्य सातौ सम्भजने । यद्वा धनस्य सम्भजनार्थम् Sy.
२३. ०स्मान्रक्षे० P. गमय, रक्ष Sy.
२४. धनवन् is suggested for नवन् ।
२५. वयं शेषभूताः । यद्वा त्वदर्थमेव वर्तमानाः Sy.
२६. कामानां दात्रे Sy.
२७. हे हरिवन्निन्द्र ! Sy.

मा। विगतकामोऽभूः। न कश्चिदन्यस्त्वत्तः। बन्धुः। मर्त्येषु। दृश्यते त्वं च नःगच्छसि। कथम्। त्वाम्। क्षिप्रम्। रन्ध्रस्यापेतस्य चोदकम्। आहुः।

मा जस्वने वृषभ नो ररीथा मा ते रेवतः सख्ये रिषाम।
पूर्वीष्टे इन्द्र निष्षिधो जनेषु जह्यसुष्वीन्प्र वृहापृणतः॥ ११॥

मा जस्वने। मा। हिंसित्रे। वृषभ! अस्मान्। दाः। मा। ते। धनवतः। सख्ये वर्तमानाः। हिंस्या भूम। बहूनि। ते। इन्द्र! निष्षेधनानि, आयुधानि विद्यन्ते। जनेषु। जहि। अयजमानान्। प्रवृह। अप्रयच्छतः।

उदभ्राणीव स्तनयन्नियतीन्द्रो राधांस्यश्व्यानि गव्या।
त्वमसि प्रदिवः कारुधाया मा त्वादामान आ दंभन्मघोनः॥ १२॥

उदभ्राणीव। उदीयर्यति। स्तनयति स्तनयन् इव पर्जन्यः। मेघान्। इन्द्रः। धनानि। अश्वसमूहान्। गोसमूहांश्च। त्वम्। असि। पुराणः। स्तोतृणां धर्ता। मा। त्वा। अदातारोऽयजमानाः।

---

१. विशत० D. विगतकामोऽभूः। अस्मान् सर्वदा कामयस्व Sy. वेनतिः कान्तिकर्मा N. 10. 38.
२. मर्त्येषु मनुष्येषु मध्ये Sy.
३. किमनेन विशेषकथनेन? अङ्ग हे इन्द्र! Sy.
४. ०स्यावेक्षि० P. रध्रस्य राधकस्य समृद्धस्य धनस्य चोदनं चोदयितारम् Sy.
५. मोद० P.
६. कथयन्ति पुराजाः Sy.
७. जसिरुपक्षयकर्मा। उपक्षपयित्रे राक्षसादये Sy.
८. हे कामानां वर्धितरिन्द्र! Sy.
९. अस्यान् D.
१०. तव Sy.
११. सख्ये सखित्वे वर्तमाना वयम् Sy.
१२. हिंसिता मा भूम Sy.
१३. बह्वीः Sy.
१४. त्वदीयाः Sy.
१५. निःशेषा निवारणानि Sy.
१६. शत्रुषु निहिताः सन्ति। यद्वा निष्विधो निश्वेधार्था रज्जवः। ताः शत्रुजनेषु तव बह्व्यो विद्यन्ते। अतः कारणात् Sy.
१७. मारय Sy.
१८. अनभिषोतॄन् अयजमानान् Sy.
१९. उन्मूलय Sy.
२०. हवींष्यप्रयच्छतश्च। 'पृण दाने' इति धातुः Sy.
२१. ०भ्राणि D.
२२. उदियर्यति P. उदीरयति is suggested for उदीयर्यति॥ उद्गमयति स्तोतृभ्यो दातुम् Sy.
२३. गर्जयन् पर्जन्यो यथा मेघानुद्गमयत्येवम् Sy.
२४. अश्वसम्बन्धीनि Sy.
२५. गव्यानि गोसम्बन्धीन्येतत्समूहद्वयरूपाणि Sy.
२६. उत्तरार्धः प्रत्यक्षकृतः। हे इन्द्र! त्वम् Sy.
२७. भवसि Sy.
२८. कारूणां स्तोतृणां धारयिता Sy.
२९. त्वाम् Sy.
३०. हविषामदातारः Sy.

अ॒ग्नं दभन् उदपसर्पन्तु । धनवन्तः ।

अध्वर्यो वीर॒ प्र म॒हे सु॒ताना॒मिन्द्रा॑य भर॒ स ह॑स्य॒ राजा॑ ।
यः पू॒र्व्याभि॑रुत नू॒तना॑भिर्गी॒र्भिर्वा॑वृ॒धे गृ॑ण॒तामृषी॑णाम् ॥ १३ ॥

अध्वर्यो । वीरो वीरयति सोमम् । भर । महते । सोमान् । इन्द्राय । सः । हि । अस्य सुतस्य । राजा भवति । यः । प्रत्नाभिः । अपि च । नूतनाभिः । गीर्भिः । वावृधे । स्तुवताम् । ऋषीणाम् ।

अ॒स्य मदे॑ पुरु॒ वर्पां॑सि वि॒द्वानिन्द्रो॑ वृ॒त्राण्य॒प्रती॑ जघान ।
तमु॒ प्र हो॑षि॒ मधु॑मन्तमस्मै॒ सोमं॑ वी॒राय॑ शिप्रि॒णे पि॑बध्यै ॥ १४ ॥

अस्य मदे । सोमस्य । मदे । बहूनि । वारकाणि । विद्वान् । इन्द्रः । वृत्राणि शत्रून् । अप्रतिगतो-ऽन्यैः । जघान । तम् । एव । अस्मै । मधुमन्तम् । प्रजुहुधि । सोमम् । वीराय । शिप्रिणे । पातुम् ।

---

१. अ P. ०मना (वर्षितृरश्मयो न शीला अस्मदभिमुखा वृषणोभिमुखावृषणो वेग) अ D. The additional passage in D. has a striking resemblance with a part of the commentary on RV. VI.44.19. (०माना॰ । वर्षितृरश्मयः । नशीलाः । अस्मदभिमुखाः । वृषणोऽभिमुखा वृषणो वेग०) अ॰ is suggested for अ ।
२. उदवस० P. हिंसिषुः Sy.
३. धनवन्तः कृपणाः । यद्वा वचनव्यत्ययः । मघवानं धनवन्तं त्वामिति सम्बन्धः Sy.
४. हे हविषां विशेषेण प्रेरयितः ! Sy.
५. प्रहर प्रगमय Sy.
६. सुतानाम् । कर्मणि षष्ठी । सुतानभिषुतान् सोमान् Sy.
७. इन्द्रः Sy.
८. खलु Sy. ९. सोमस्य Sy.
१०. स्वामी Sy.
११. पूर्वकाले कृताभिः Sy.
१२. इदानीं क्रियमाणाभिः Sy.
१३. उभयविधाभिः स्तुतिभिः Sy.
१४. वावृधैः P. ववृधे is suggested for वावृधै ॥ वर्धते । स इन्द्रो यस्मात् सोमस्य राजा तस्मादस्मै सोमः प्रदेय इत्यर्थः Sy.
१५. ऋषीणां सम्बन्धिनीभिः Sy.
१६. VM. ignores अध्वर्यो and प्र ।
१७. प्रथमे रात्रिपर्याये मैत्रावरुणस्य 'अस्य मदे' इति शस्त्रयाज्या । सूत्रितञ्च—'अस्य मदे पुरु वर्पांसि विद्वानिति याज्या' (ĀŚS. 6. 4.) इति Sy.
१८. सोमस्य पानेन Sy.
१९. हर्षे सति Sy.
२०. बहूनि पुरूणि Sy.
२१. आवरकाणि Sy.
२२. अभिज्ञः Sy.
२३. प्र० D. स्वयमन्यैरप्रतिगतः सन् Sy.
२४. हतवान् । यद्वा वर्प इति रूपनाम (Ngh.3.7.)। बहूनि वर्पास्यसुरमायया निर्मितानि रूपाणि विद्वान् जानन्निन्द्रो वृत्राण्यावरकाणि रक्षःप्रभृतीनि इतः पूर्वमन्यैरप्रतिगतानि जघान Sy.
२५. सोमम् Sy.
२६. माधुर्यवन्तम् Sy.
२७. हे अध्वर्यो ! प्रजुहुधि Sy.
२८. शत्रूणां वीरयित्रे इन्द्राय Sy.
२९. शोभनहनुकाय Sy.
३०. पातुम् D.

उत्तरा निगदसिद्धा ।

पातां सुतमिन्द्रो अस्तु सोमं हन्तां वृत्रं वज्रेण मन्दसानः ।
गन्तां यज्ञं परावतश्चिदच्छा वसुर्धीनामविता कारुधायाः ॥ १५ ॥

[पाता सुतम् ।]

इदं त्यत्पात्रमिन्द्रपानमिन्द्रस्य प्रियममृतमपायि ।
मत्सद्यथा सौमनसाय देवं व्यस्मद्द्वेषो युयवद्व्यंहः ॥ १६ ॥

इदं त्यत् । तत् । इदम् । पानीयम् । इन्द्रस्य पानार्हम् । इन्द्रस्य । प्रियम् । सोमात्मकममृतम् । इन्द्रेण पीतमस्तु । मादयेत् । यथा । सुमनस्त्वाय । देवम् । इन्द्रः करोति च । अस्मत्तः । द्वेषः । अंहश्च ।

एना मन्दानो जहि शूर शत्रूञ्जामिमजामिं मघवन्नमित्रान् ।
अभिपेणाँ अभ्या देदिशानान्पराच इन्द्र प्र मृणा जही च ॥ १७ ॥

एना मन्वानः । सोमेन । माद्यन् । जहि । शूर ! शत्रून् । तत्र च जामिम् । अजामिं च ।

---

१. द्वितीये रात्रिपर्याये मैत्रावरुणस्यैव 'पाता सुतम्' इति शस्त्रयाज्या । सूत्रितञ्च—'पाता सुतमिन्द्रो अस्तु सोमं हन्ता वृत्रमिति याज्या' (ĀSS. 6. 4.) इति Sy.

२. The *pratīka* is supplied by the Editor. अयमिन्द्रः सुतमभिषुतं सोमं पातास्तु। साधु पाता भवतु । साधुकारिणि तृन् । अत एव 'न लोकाव्यय०' इति षष्ठीप्रतिषेधात् द्वितीया । एवं हन्तेत्यादावपि द्रष्टव्यम् । तेन च सोमेन मन्दसानो माद्यन् वज्रेणायुधेन वृत्रमावरकं शत्रुं हन्तास्तु भवतु । एतदुभयार्थं परावतश्चित् दूरदेशादपि यज्ञमच्छास्मदीयं यज्ञमभिगन्ता भवतु । दूरदेशस्थोऽपि शीघ्रमस्मद्यज्ञे सोमपानायागच्छत्वित्यर्थः । कीदृश इन्द्रः ? वसुः सर्वेषां निवासयिता । धीनां ध्यातॄणां स्तोतॄणां कर्मणां वाविता रक्षिता । कारुधायाः कारूणां कर्तॄणां यजमानानां धारयिता Sy.

३. तृतीये रात्रिपर्याये प्रशास्तुः 'इदं त्यत्' इति शस्त्रयाज्या । सूत्रितञ्च—'इदं त्यत्पात्रमिन्द्रपानमिति याज्या' (ĀSS.6.4.) इति Sy.

४. पातव्यम् Sy. ५. अनुकूलम् Sy.

६. इन्द्रः पिबतु । व्यत्ययेन कर्तरि क्विप् । यद्वा एतदमृतमपायि । इन्द्रेण पीयताम् Sy.

७. मादयेत् तथा पीयतामित्यर्थः Sy.

८ यथ P. येन प्रकारेण पीतः सोमः Sy.

९. सुमनस्त्वाय D. १०. इन्द्रम् Sy.

११. स पीतसोम इन्द्रश्च Sy.

१२. पृथक् seems to be omitted before करोति ॥ वियोजयतु Sy.

१३. द्वेष्टॄन् Sy.

१४. अंहः is suggested for अहः ॥ पापं च वियोजयतु Sy.

१५. VM. ignores वि ।

१६. एषा D.

१७. एनेन प्रकृतेनानेन सोमेन Sy.

१८. मन्दमानो माद्यन् Sy.

१९. हिंसितान् कुरु Sy.

२०. शौर्यवन्निन्द्र ! Sy.

२१. ज्ञातिम् Sy.

२२. तद्विलक्षणमेवमुभयविधान् Sy.

अमित्रान्[1] । अभिगतसेनान्[2] । अस्मान् प्रति[3] । आयुधान्याभिमुख्येनातिसृजति[4] । पराचः[5] । इन्द्र ! प्रमृणीयाहि[6]—सञ्चूर्णय । चेहि[7] । चेति[8] ।

आसु ष्मा णो मघवन्निन्द्र पृत्स्वस्मभ्यं महि वरिवः सुगं कः ।
अपां तोकस्य तनयस्य जेष इन्द्र सूरीन्कृणुहि स्मा नो अर्धम् ॥ १८ ॥

आसु[9] । एषु । अस्मभ्यम् । सङ्ग्रामेषु[10] । धनम् । कुरु[11] । सुखं च कुरु । उदकानाम्[12] । पुत्रस्य[13] । तत्पुत्रस्य च[14] । जयार्थम्[15] । इन्द्र ! स्तोतॄन् । अस्मान् । अर्धभूतानात्मनः[16] । कुरु[17] ।

आ त्वा हरयो वृषणो युजाना वृषरथासो वृषरश्मयोऽत्याः ।
अस्मत्राञ्चो वृषणो वज्रबाहो वृष्णे मदाय सुयुजो वहन्तु ॥ १९ ॥

आ त्वा हरयः[18] । आवहन्तु[19] । त्वा । हरयः[20] । वर्षितारः[21] । युज्यमानाः[22] । वर्षितृरश्मयः[23] । नशीलाः[24] । अस्मदभिमुखाः[25] । वृषणोऽभिमुखा वृषणो वेगस्य[26] । वोढार आयुधानां पार्श्वनिहितानाम्[27] । वृष्णे । सोमाय[28]

---

१. अस्मत्प्रतिकूलाचरणपरान् Sy.
२. अमित्रंनहिगतासेनन् P. अहिगतसेनान् D. अस्मान्प्रत्यभिगताः सेना येषां तादृशान् Sy.
३. अस्मदभिमुखम् Sy.
४. ०सृजतः is suggested for सृजति ॥ आयुधानि पुनः पुनरादिशतो विसृजतः शत्रून् च Sy.
५. ते यथा पराङ्मुखा भवन्ति तथा Sy.
६. ०णीहि is suggested for ०णीयहि ॥ बाधस्व Sy.
७. जहि is suggested for चेहि ॥ तदनन्तरं तान् जहि च Sy.
८. VM. ignores मघवन् ॥ हे मघवन् ! धनवन् ! Sy.
९. ०सुः P.
१०. पृतनासु सङ्ग्रामेषु Sy.
११. सुखेन प्राप्यम् Sy.
१२. आप्तव्यानां धनानां वा उदकानां वा Sy.
१३. दकानां कुत्रस्य च P.
१४. पौत्रस्य च Sy.
१५. यजार्थम् P.
१६. अस्मा द्धभू० P. अस्मार्द्धभू० D. समृद्धान् । यद्वा अर्धकारिणः शत्रूणां खण्डयितॄन् Sy.
१७. VM. ignores स्म । नः । मघवन् । and महि ॥ स्मेति पूरणः । नः अस्मदीयासु । हे धनवन्निन्द्र ! महि महत् Sy.
१८. हे इन्द्र ! Sy.
१९. त्वाम् Sy.
२०. अश्वाः Sy.
२१. कामानां वर्षितारः Sy.
२२. स्वयमेव रथे युज्यमानाः Sy.
२३. ०षितृर० P. वर्षितारो रश्मयः प्रग्रहा येषां तादृशाः Sy.
२४. अतनशीलाः is suggested for नशीलाः ॥ सततगामिनः Sy.
२५. अस्मान्प्रत्यञ्चन्तो गच्छन्तः Sy.
२६. वृषणोऽभिमुखाः is doubtful.
२७. नित्यतरुणाः Sy.
२८. वज्रादीन्यायुधानि वहन्तः Sy.
२९. वर्षित्रे Sy.
३०. मदकराय सोमाय, ईदृशं सोमं पाययितुम् Sy.

पुमांसं सोमापातुम्[1] । सुयुजः[2] । वहन्तु[3] ।

आ ते वृषन्वृषणो द्रोणमस्थुर्घृतप्रुषो नोर्मयो मदन्तः ।
इन्द्र प्र तुभ्यं वृषभिः सुतानां वृष्णे भरन्ति वृषभाय सोमम् ॥ २० ॥

आ ते । आतिष्ठन्तु[4] । तव[5] । वर्षितः[6] ! अश्वाः[7] । द्रोणकलशम्[8] । उदकबिन्दुक्षारिणः[9] । इव । सिन्धोरूर्मयः[10] । माद्यन्तः[11] । इन्द्र ! प्रभरन्ति[12] । तुभ्यम् । ग्रावभिः[13] । सुतानाम्[14] । वृष्णे[15] । कामानां वर्षित्रे[16] अभिषुतं सोमं नृहितमम्[17] ।

वृषासि दिवो वृषभः पृथिव्या वृषा सिन्धूनां वृषभः स्तियानाम् ।
वृष्णे त इन्दुर्वृषभ पीपाय स्वादू रसो मधुपेयो वरायं ॥ २१ ॥

वृषासि[19] । वर्षिता[20] । भवसि[21] । द्यावापृथिव्यो[22]. । सिन्धूना स्यन्दमानानाम्[23] । स्तियाया सङ्घीभूतानाम्[24]

---

१. सोमं पाययितुम् is suggested for सोमापातुम् ।
२. शोभनयोजनाः Sy.
३. VM. ignores वृषरथासः ॥ वृषरथासः । वृषा कामाभिवर्षको रथो येषां ते तथोक्ताः Sy.
४. आतिष्ठन्त । अतस्त्वमागच्छेति भावः Sy.
५. त्वदीयम् Sy.
६. हे कामानां वर्षितः ! इन्द्र ! Sy.
७. वर्षितारश्च P. सेक्तारो युवानस्त्वदीया अश्वाः Sy.
८. द्रुममयं रथम् Sy.
९. घृतमुदकं सिञ्चन्तः Sy.
१०. ऊर्मं मयः P.
सामुद्रास्तरङ्गा इव Sy.
११. हृष्यन्तः मत्ताः सन्तः Sy.
१२. यस्मादध्वर्यवः प्रहरन्ति होमार्थं प्रणयन्ति तस्मादागच्छेत्यर्थः Sy.
१३. कामानामभिवर्षकैर्ग्रावभिः Sy.
१४. अभिषुतानां सोमानां मध्ये Sy.
१५. यूने नित्यतरुणाय Sy.
१६. कामानां वर्षयित्रे तुभ्यम् Sy.
१७. त्वद्भागरूपं सोमम् Sy.
१८. गृहीतमं P. नृहितम् is suggested for नृहितमम् ।
१९. शंयोर्बार्हस्पत्यस्येदमार्षम् Dur. शंयोराषम् SKN.
२०. हे इन्द्र ! हविर्भिः सेक्ता Sy. हे इन्द्र ! वृषा असि दिवो वर्षितासि Dur. इन्द्र उच्यते वृषा वर्षिता SKN.
२१. त्वमसि SKN.
२२. ०थिव्यो P. द्युलोकस्य भूमेश्च Sy. दिवः, षष्ठीश्रुतेरर्थयेति शेषः । वृषभो वर्षिता पृथिव्या अर्थाय SKN.
२३. स्यन्वनशीलानां च नदीनाम् Sy. स्यन्दनानामपां च वर्षिता Dur. सिन्धवो नद्यः । नदीनामप्यर्थाय । द्यावापृथिव्योर्हि नदीनां च स्थितिर्वृष्टिः (वृष्टौ) प्रसिद्धा । अत एवमुच्यते द्युलोकादीनामर्थाय वर्षितेति SKN.
२४. स्तियानां is suggested for स्तियायाम् ।
२५. स्थावरजङ्गमात्मनां प्राणिनाम् । यद्वा स्तियाः सङ्घीभूता आपस्तासां वर्षितासि Sy.
संहन्त्रीणामपाम् । अथवा—संहतानामात्मनैव हिमभावेन । यावत्किञ्चित् सेचनकर्म, तत्सर्वं त्वदधीनमित्यभिप्रायः Dur.
कस्य पुनर्वर्षिता ? उच्यते, वृषभः स्तियानाम् SKN.

स्थावराणाम्[1]। वृष्णे[2]। त्वुभ्यम्[3]। इन्दुः[4]। वर्षितः[5]! प्यायते[6]। स्वादुः[7]। रसः[8]। मधुवत्पेयः[9]। वरणीयाय[10]।

अयं देवः सहसा जायमान इन्द्रेण युजा पणिमस्तभायत्।
अयं स्वस्य पितुरायुधानीन्दुरमुष्णादशिवस्य मायाः॥ २२॥

अयम्[11]। अयम्[12]। देव इन्द्र[13]। सहसः[14]। जायमानः[15]। इन्द्रेण त्वया। सहायेन[16]। पणिं[17] वलसुरम्। अस्तभात्[18]। अयम्[19]। गोधनस्य। पालयितुः वलस्य। आयुधानि[20]। इन्दुः। अमुष्णात्[21]। अशिवस्य[22]। मायाश्च[23]।

अयमकृणोदुषसः सुपत्नीरयं सूर्ये अदधाज्ज्योतिरन्तः।
अयं त्रिधातु दिवि रोचनेषु त्रितेषु विन्ददमृतं निगूळ्हम्॥ २३॥

अयम्[24]। अयमिन्दुः। करोति, इन्द्रेण पितः[25]। उषसम्[26]। शोभनपतिकाः[27]। अयम्[28]। सूर्ये[29]। ज्योतिः[30]।

---

१. सेक्त्रे Sy. तस्मा एवंगुणविशिष्टाय वृष्णे वर्षित्रे Dur. एवं चोक्तेन रूपेण वृष्णे वर्षित्रे SKN.
२. त्वदर्थम् Sy. तुभ्यमर्थाय SKN.
३. सोमः Sy. SKN. एष इन्दुः सोमः Dur.
४. कामानां वर्षकेन्द्र ! Sy.
५. प्यायते D. प्यायते वर्धते । अतस्त्वमागत्य तं सोमं पिबेति भावः Sy. पुनः पुनराप्याय्यते । अथवा पानाय संस्कृतः Dur. 'ष्फायी ओप्यायी वृद्धौ' आप्यायिता, आप्यायते वा सम्यक् संसारवृद्धया वर्धत इत्यर्थः SKN.
६. ०वु P. मधुरः Sy. स्वादुरससंयुक्तः Dur. कीदृशः ? स्वादुर्मृष्टः SKN.
७. रसनीयः प्रशस्यो रसवान्वा रसात्मको वा Sy. रसरूपो ह्रवः SKN.
८. ०मधुवत् पेयः D. मधुवत्पातव्यः Sy. मधुरपेयः Dur. न मनाक् स्वादुः, किं तर्हि ? मधुपेयो मध्विव यः पीयते स मधुपेयोऽत्यन्तमृष्ट इत्यर्थः SKN.
९. श्रेष्ठाय Sy. तुभ्यं श्रेष्ठायेत्यर्थः Dur. कीदृशाय तुभ्यम् ? वराय वरस्य श्रेष्ठस्य वरणीयस्य वा तवार्थायेत्यर्थः SKN.
१०. स्तिया आपो भवन्ति स्त्यायनात् N.6.17, SKN. II.453.
११. अय P. १२. इन्दुः सोमः Sy.
१३. द्योतमानः Sy.
१४. बलेन Sy. १५. प्रादुर्भवन् Sy.
१६. सख्या सह Sy.
१७. वणिजं गवामादातारं वलाख्यमसुरम् । यद्वा पणीनां स्वामित्वात् पणिरित्युच्यते । तमसुरम् Sy.
१८. ०भ्नात् is suggested for ०भात् ॥ न्यरुधत् Sy.
१९. धनस्य गोरूपस्य Sy.
२०. वज्रादीनि Sy.
२१. ०धानिन्दूरणात् P. अष्णात् D. अपाहरत् Sy.
२२. ०वश्च P., D. असुखकरस्य Sy.
२३. तदीया मायाश्चामुष्णात् । हे इन्द्र ! त्वत्सख्यबलादेतत् सर्वं सोमः कृतवान् । अतस्तव महिमा केन वर्णयितुं शक्यत इतीन्द्रस्तुतिः Sy. २४. दुः D. सोमः Sy.
२५. अकरोत् Sy.
२६. पीतः is suggested for पितः ।
२७. ०सः is suggested for सम् ॥ उषःकालान् Sy.
२८. शोभनः पतिः पालकः सूर्यो यासां तादृशीः Sy.
२९. सूर्यमण्डले Sy. ३०. तेजः Sy.

अदधात्[1]। अन्त[2]। अयम्[3]। दिवि[4]। नक्षत्रेषु[5]। त्रिगुणमदधा ज्योति। अय त्रिस्थानेषु[6]। निहितम्[7]। अमृतम्[8]। अविन्दत्[9]।

अयं द्यावापृथिवी वि ष्कभायदयं रथमयुनक्सप्तरश्मिम्।
अयं गोषु शच्या पक्वमन्तः सोमो दाधार दशयन्त्रमुत्सम् ॥ २४ ॥

अयम्[11]। अयम्[12]। द्यावापृथिवी[13]। विष्कम्भे अकरोद् अन्तरिक्षेण[14]। अयम्[15]। रथम्[16]। युयोज[17]। आदित्य[18] सप्तर्तुरश्मि[19] सवत्सरात्मकम्। अयम्[20]। पशुषु[21]। अन्त, आमेषु[22]। पक्व पय। कर्मणा[23]। सोमोऽकरोत्[24]। अय धारयति। दशयन्त्रम्[25]। उत्समीति शरीरमाह तथान्तरा खैलिकी[26] भवत्यृक्[27]।

---

१. निहितवान् Sy.
२. मध्ये Sy.
३. धातरियि P. ०धातरयं D. लतारूपः सोमः Sy. ४. द्युलोके Sy.
५. रोचमानेषु Sy.
६. ०धाज् is suggested for ०धा P., D. सवनत्रयरूपेण त्रिप्रकारम् Sy.
७. तृतीये स्थाने ततेषु विस्तृतेषु देवेषु Sy.
८. नितरां गूढमदृश्यतया वर्तमानम् Sy.
९. अमृतत्वकारणं पीयूषम् Sy.
१०. अलभत। हे इन्द्र! त्वत्साहाय्यादेवमेवं सोमः कृतवानितीन्द्रस्य स्तुतिरधिगन्तव्या। यद्वा इदंशब्देनेन्द्र एव परामृश्यते। अयमिन्द्र उषसः शोभनपतिका अकरोत्। अयमेव सूर्येऽन्तर्ज्योतिरदधात्। दिवि द्युलोके रोचमानेषु त्रिस्थानगतेषु देवेषु मध्येऽयमेवेन्द्रः त्रिधातुसवनत्रयात्मना त्रिप्रकारं निगूढं पात्रैः संवृतममरणहेतुभूतं सोमम्अविन्दत् Sy. ११. सोमः Sy.
१२. दिवं च पृथिवीं च Sy.
१३. विकम्भे P. विष्कब्धे is suggested for विष्कम्भे ॥ विविधमस्थापयत् Sy.
१४. अपि चायं सोमः Sy.
१५. सूर्यस्य रथम् Sy. १६. अयोजयत् Sy.
१७. आदित्यस्य is suggested for आदित्य।
१८. सप्तभी रश्मिभिः किरणैरुपेतं सप्ताश्वं सप्तचक्रं वा Sy.
१९. गोषु Sy. २०. मध्ये Sy.
२१. आमेषु goes with पशुषु।
२२. निष्पन्नम् Sy.
२३. प्रज्ञया सङ्कल्परूपया Sy. २४. साकम् P.
२५. उत्सस्य हेतुगर्भविशेषणमेतत्। उत्सरणहेतुभूतैर्वशभिश्चक्षुःश्रोत्रादिभिर्यन्त्रैरुपायैर्युक्तम्। इदं च पदं खैलिकेन मन्त्रान्तरेण व्याख्यायते—चक्षुश्च श्रोत्रं च मनश्च वाक्च पाणापानौ देह इदं शरीरम्।
द्वौ प्रत्यञ्चावनुलोमौ विसर्गावेतं तं मन्ये दशयन्त्रमुत्सम् ॥
यद्वा अयमिन्द्रो द्यावापृथिवी विष्कभायत्। स्वे स्वे स्थाने स्थिते अकरोत्। अयमेव सप्तरश्मिं सूर्यस्य रथमयुनक्। अयमेवेन्द्रो गोष्वन्त शच्यात्मीयेन कर्मणा पक्वं पयो धारयति। एवम्भूतेन्द्रार्थं सोमो दशयन्त्रं दशसङ्ख्याकैरेन्द्रवायवादिभिर्ग्रहैर्यन्त्रितैर्गृहीतैरुपेतमुत्समुत्सरणशीलं रसं दाधार। धारयति। प्रातःसवने ऐन्द्रवायवादयो दश ग्रहा गृह्यन्ते। तथा च ब्राह्मणम् 'नव प्रातर्ग्रहा गृह्यन्ते नवभिर्बर्हिष्पवमाने स्तुवते स्तुते स्तोमे दशमं गृह्णाति' (AB. 3. 1.) इति। अन्यत्राम्नातम्। 'वशैतानध्वर्यु' प्रातःसवने ग्रहान् गृह्णाति' इति तदभिप्रायेणेदं दशयन्त्रमिति विशेषणम् Sy.
२६. ०मिति is suggested for ०मीति॥ उत्सरणशीलं पयः Sy.
२७. तथानन्तर P.
२८. लिकि P. २९. भवन्त्युत् P.

चक्षुश्च श्रोत्रं च मनश्च वाक् च प्राणापानौ देह इदं शरीरम् ।
द्वौ प्रत्यञ्चावनुलोमौ विसर्गावेत त मन्ये दशयन्त्रमुत्सम् ॥ इति ॥

VI.45.

य आनयत्परावतः सुनीती तुर्वशं यदुम् । इन्द्रः स नो युवा सखा ॥ १ ॥

य आनयत् । यः । आनीतवान् । दूरात् । सुनयनेन । तुर्वशम् । यदु च । सः । युवा । इन्द्रः । अस्माकम् । सखा ।

अविप्रे चिद्वयो दधदनाशुना चिदर्वता । इन्द्रो जेता हितं धनम् ॥ २ ॥

अविप्रे । विप्रोऽश्वोऽनश्चेति वियुद्धे । अन्नम् । दधान । अनाशुना अत्वरितेन । अपि । अश्वेनान्न प्रयच्छन् । इन्द्रः । जेता भवति । हितम् । धनम्, अपि वा प्रास्सामन्तरहितो विप्र ।

---

१. क्व P. त्व D.
२. ०लोमेवि P.
०लोमेपिस० D.
३. ०यन्तुमु० D.
४. 'य आनयत्' इति त्रयस्त्रिंशदृचं द्वितीयं सूक्तं बृहस्पतिपुत्रस्य शंयोरार्षम् । 'पुरूतमम्' इत्येषातिनिचृत् । 'त्रयः सप्तकाः पादनिचृत्' 'मध्यमः षट्कश्चेदतिनिचृत्' (KSA.4.45. p.23.) इत्युक्तलक्षणात् । त्रयस्त्रिंशयनुष्टुप् शिष्टा गायत्र्यः । 'अधि बृबुः पणीनाम्' इत्यस्मिन्त्र्ये तृचे बृबुर्नाम तक्षा स्तूयते । अतः स तृचस्तद्देवताकः । शिष्टास्त्रिंशदैन्द्र्यः । तथा चानुक्रान्तम्—'य आनयन्त्रयस्त्रिंशद्गायत्रं पुरूतममतिनिचृदन्त्यानुष्टुप् तृचेऽन्त्ये बृबुस्तक्षा दैवतम्' इति । महाव्रतेऽपि निष्केवल्येऽन्त्यतृचवर्जमेतत्सूक्तम् । तथैव पञ्चमारण्यकम्—'य आनयत् परावत इति तिस्र उत्तमा उद्धरति' (AĀ. 5.2.5.) इति Sy.
५. ०यन् D.
६. इन्द्रः Sy.
७. तस्माद्दूरदेशात् Sy.
८. शोभनेन नयनेन Sy.
९. स्तु० P., D.
१०. एतत्संज्ञौ राजानौ शत्रुभिर्दूरदेशे प्रक्षिप्तौ Sy.
११. तरुणः Sy.
१२. सखा भवतु Sy.
१३. अविव्रे P.
१४. विव्रोश्वोनश्वेति P. विप्रः स्तोता । तद्विलक्षणेऽपि पुरुषे Sy.
१५. इन्द्रो धारयति । किमु वक्तव्यं स्तोतरि धारयतीति Sy.
१६. अक्षिप्रगमनेन Sy.
१७. अन्नं शुत्वरित्नितेनाप्यश्वे० P. ०धानाशुत्वरित्नितेनाच्यश्वे० D.
१८. जाता D. जेता is suggested for जना ॥ जयशीलः, जयतेस्ताच्छीलिकस्तृन् । अतो 'न लोकाव्यय०' इति षष्ठीप्रतिषेधः Sy.
१९. शत्रुषु निहितं स्थापितम् Sy.
२०. ०न्नः P.
२१. VM. explains चित् once only.

महीरस्य प्रणीतयः पूर्वीरुत प्रशस्तयः । नास्य क्षीयन्त ऊतयः ॥ ३ ॥

महीरस्य । महनीयानि[1] । अन्नस्य[2] । प्रणयनानि[3] । बहूनि[4] । अपि चास्य । प्रशसनीयानि[5] । न च । अस्य[6] । क्षीयन्ते[7] । रक्षणानि[8] ।

सखायो ब्रह्मवाहसेऽर्चत प्र च गायत । स हि नः प्रमतिर्महीं ॥ ४ ॥

सखायः । हे सखाय[9] ! स्तोत्रवाहाय[10] । शंसत[11] । प्र । च । गायत[12] । स[13] । हि[14] । अस्माकमिन्द्र । प्रमति[15] । भूमिं[16] या प्रकृष्टमतिर्भवति सेति[17] ।

त्वमेकस्य वृत्रहन्त्रविता द्वयोरसि । उतेदृशे यथा वयम् ॥ ५ ॥

त्वमेकस्य । त्वम् । एकस्य[18] । रक्षिता[19] । भवसि । अपि च । द्वयो[20] । अपि चेदृशे[21] रक्षिता भवसि पुरुषाय[22] । यथा । वयम् बहवो भवामस्तादृशाय बहुजनायापीति[23] ।

नयसीद्वति द्विषः कृणोष्युक्थशंसिनः । नृभिः सुवीर उच्यसे ॥ ६ ॥

नयसि । अतिनयसि[24] । शत्रून्[25] । उक्थशसिनश्च जनान्[26] । करोषि[27] । तथा तथा नृभिस्त्वम्[28] । सुवीरः[29] ।

---

१. महो महत्यो भवन्ति Sy.
२. ०नीयान्न० P., D. इन्द्रस्य Sy.
३. प्रकृष्टा नीतयः प्रापणानि Sy.
४. बह्व्यो भवन्ति Sy.
५. प्रकृष्टाः स्तुतयः स्तोतृभिः क्रियमाणा Sy.
६. इन्द्रस्य Sy.
७. (न) अपचीयन्ते । किन्तु सर्वदा वर्धन्त एव Sy. ८. रक्षा Sy.
९. हे समानस्थानाः ! स्तोतारः ! Sy.
१०. ब्रह्माभिमन्त्रैर्वर्धनीयाय प्राप्तव्यायेन्द्राय Sy.
११. शस्त्राणि शंसत Sy.
१२. गाय D. प्रगायत च स्तोत्राणि Sy.
१३. इन्द्रः Sy.
१४. खलु Sy.
१५. ०ति D. प्रकृष्टा बुद्धि । ईदृश्या बुद्धेः प्रदातेत्यर्थः Sy.
१६. महती Sy.
१७. ०ति भ० D. The passage : या प्रकृष्टमतिर्भवति सेति refers to प्रमतिः ।
१८. स्तोतुः Sy.
१९. सर्वेषां स्तोतॄणां रक्षको भवसीत्यर्थः Sy.
२०. स्तोत्रोः Sy.
२१. जनेऽप्यविता भवसि Sy.
२२ यादृशा वयं त्वया रक्षिता बहुविधपुत्रपौत्रा अभूम । ईदृशस्यापि जनस्य त्वमेव रक्षको नान्य इत्यर्थः Sy.
२३. VM. ignores वृत्रहन् ॥ हे वृत्रहन् ! वृत्राणां शत्रूणां हन्तरिन्द्र ! Sy.
२४. अस्मान्नयसि । तारयसि Sy.
२५. शत्रून् is suggested for शत्रू ॥ द्वेष्टॄन् Sy.
२६. तथा उक्थानि शस्त्राणि शंसत स्तोतॄनस्मान् Sy.
२७. समृद्धान् करोषि Sy.
२८. one तथा is redundant.
२९. यस्मात्त्वं स्तुतीनां नेतृभिः पुरुषैः Sy.
३०. शोभनैर्वीरैः पुत्रपौत्रादिभिः स्तोतृभ्यो दातव्यैरुपेत इति Sy.

कथ्यसे[1] ।[2]

ब्रह्माणं ब्रह्मवाहसं गीर्भिः सखायमृग्मियम् । गां न दोहसे हुवे ॥ ७ ॥

ब्रह्माणम्[4] । बृहन्तम् । स्तोत्रवहनम्[5] । स्तुतिभिः । सखाय[6]म् । स्तुत्यम्[7] । गाम् । इव । दोहाय[8] । ह्वयामि[9] ।

यस्य विश्वानि हस्तयोरुचुर्वसूनि नि द्विता । वीरस्य पृतनाषहः ॥ ८ ॥

यस्य विश्वानि । यस्य[10] । द्विविधानि दिव्यानि पार्थिवानि । विश्वानि । वसूनि । हस्तयोर्वसन्तीति[11] । न्यूचुः[12] कवयः । वीरस्य[13] । सेनाया[14] सोढुः, उत्तरत्रान्वयः ।

वि दृळ्हानि चिदद्रिवो जनानां शचीपते । वृह मायाः अनानत ॥ ९ ॥

वि वृळ्हानि । विवृह[16] । दृढानि[17] पुराणि[18] । शत्रूणाम् । वज्रिवन्[19] ! प्रज्ञापते[20] ! मायाश्च[21] । अप्रह्वीश्रुतः[22] [23] ।

तमु त्वा सत्य सोमपा इन्द्र वाजानां पते । अहूमहि श्रवस्यवः ॥ १० ॥

तमु त्वा । तम्[24] । एव । त्वा । स्य[25] [26] ! सोमस्य पातः ! इन्द्र ! अन्नानाम्[27] । पते[28] ! ह्वयाम[29] ।

---

१. स्तूयसे अतस्तानप्यस्मभ्यं प्रयच्छेति शेषः Sy.
२. VM. ignores इत् and उ ॥ इद् एव । उ इति पूरकः Sy.
३. परिवृढम् Sy.
४. ब्रह्मभिः स्तुतिरूपैर्मन्त्रैर्वर्हनीयम् Sy.
५. सखायम् is suggested for सखाय ॥ अस्माकं सखिभूतम् Sy.
६. ऋग्मा ऋचः । तवर्हम् । स्तुत्यर्हमित्यर्थः Sy.
७. एवम्भूतमिन्द्रं दोहसे दोग्धुम् Sy.
८. आह्वयाम्यस्मदीयान् कामान् दोग्धुम् Sy.
९. इन्द्रस्य Sy.
१०. दिव्यपार्थिवरूपेण द्वैधं वर्तमानानि Sy.
११. सर्वाणि Sy.
१२. बाह्वोर्विद्यन्त इति Sy.
१३. ऋषयो नितरां वदन्ति । तमिन्द्रं हुव इति पूर्वत्र सम्बन्धः Sy.
१४. वीर्यवतः Sy.
१५. पृतनाः शत्रुसेनाः । तासामभिभवितुः Sy.
१६ वृ P., D.
१७. विभिन्धि । विविधमुन्मूलयेत्यर्थः । विनाशय Sy.
१८. स्थिराणि पुराणि बलानि वा Sy.
१९. हे अद्रिव ! आदृणात्यननेनेत्यद्रिर्वज्रः । तद्वन् ! Sy. २०. शचीपते ! इन्द्र ! Sy.
२१. मायाश्च शत्रुभिर्निर्मिताः Sy.
२२. प्रहितः P. अप्रह्वीभूतः is suggested for अप्रह्वी श्रुतः VM. does not take it as voc. ॥ हे अप्रह्वीभूत ! सर्वोच्छ्रितेन्द्र ! Sy.
२३. VM. ignores चित् ॥ चित् अपि Sy.
२४. तादृशम् Sy.
२५. त्वामेव Sy.
२६. सत्य is suggested for स्य ॥ हे सत्य ! अवितथस्वभाव ! Sy.
२७. हे पालयितः ! एवम्भूत ! Sy.
२८. आह्वयामः । स्तुम इत्यर्थः Sy.
२९. श्रवोऽन्नमात्मन इच्छन्तो वयम् Sy.

तमु त्वा[1] यः पुरासिथ[2] यो वा नूनं हितो[3] धने[4]। हव्यः स[5] श्रुधी[6] हवम्[7] ॥ ११ ॥

तमु त्वा[1]। तम्। एव। त्वाम्[2] ह्वयामः। यस्त्वम्। पुरा[3]। अभूः[4]। यः। वा। सम्प्रति[5] भवसि। हितम्[6]। धनम्[7]। अद्यद्भिश्च[8] ह्वातव्यः[9]। सः[10]। शृणु। ह्वानम्[11]।

धीभिर्वाद्भिरवितो[12] वाजाँ इन्द्र श्रवाय्यान्[13]। त्वया[14] जेष्म[15] हितं[16] धनम्[17] ॥ १२ ॥

धीभिः। कर्मभिः[12]। अश्वैश्च[13]। शत्रोः[14]। अन्नानि। इन्द्र! श्रवणियानि[15]। त्वया[16]। जेष्म[17]। हितम्[18]। जनम्[19]।

अभूरु वीर गिर्वणो महाँ इन्द्र धने[20] हिते[21]। भरे[22] वितन्तसाय्यः[23] ॥ १३ ॥

अभूः[20]। अभूः। वीर! गीर्भिर्वननीय![21] महास्त्वम्[22]। इन्द्र! धने[23]। हिते[24] तदर्थम्। सङ्ग्रामे। विस्तार्यः[25]। [26]

---

१. D. adds य after त्वा।
२. हे इन्द्र! Sy.
३. त्वा P. त्वां स्तुम इति शेषः Sy.
४. पूर्वस्मिन् काले Sy.
५. ०भू P. बभूविथ धनलाभार्थम् Sy.
६. त्वम् Sy.
७. अद्यापि Sy.
८. शत्रुषु निहिते Sy.
९. धने निमित्तभूते सति Sy.
१०. The reading is doubtful. अद्यापि च is suggested for अद्यद्भिश्च।
११. अस्मदीयं स्तोत्रम् Sy.
१२. स्तुतिभिस्तद्विषयाभिः Sy. धीरिति कर्मनाम Ngh. 2.1.
१३. अस्मदीयैरश्वैः Sy.
१४. शत्रुसम्बन्धिनोऽश्वान् Sy.
१५. श्रवणीयानि is suggested for श्रवणियानि ॥ श्रवणीयान् प्रशस्यान् Sy.
१६. प्रीतेन त्वया अनुगृहीता वयम् Sy.
१७. जेष्म is suggested for जष्म ॥ त्वदनुग्रहाज्जयेम Sy.
१८. शत्रुषु निहितम् Sy.
१९. धनम् is suggested for जनम्।
२०. हे विविधमीरयितः! शत्रूणाम् Sy.
२१. हे गीर्भिर्वननीय! इन्द्र! Sy.
२२. ०नीय (धृतगमः स नः सोस्माकं कामं धवाभिरश्नैश्च युक्तै) म० P. The additional passage in P. has a striking resemblance with a part of the commentary on RV. VI. 45.20., 21. (अधृतगमः॥ स नः सोऽस्माकम्। कामम्। धवाभिः। अश्नैश्च युक्तै) ॥ प्रवृद्धस्त्वम् Sy.
२३. धने निमित्तभूते सति Sy.
२४. शत्रुषु निहिते Sy.
२५. शत्रूणां जेता। तन्तस इति धातुर्जयार्थः कण्ड्वादौ पठ्यते। तस्माद्वषुपसृष्टादौणादिकः कर्तर्याय्यप्रत्ययः Sy.
२६. VM. ignores उ।

या ते ऊतिरभिमत्रहन्मत्क्षूजवस्तमासति । तया नो हिनुही रथम् ॥ १४ ॥

या ते । या । ते । रक्षा । अभिमत्रहन् ! अतिशयेन दीर्घवेगा । भवति । तया । सह । अस्माकम् । रथम् । प्रेरयः ।

स रथेन रथीतमोऽस्माकेनाभियुग्वना । जेषि जिष्णो हितं धनम् ॥ १५ ॥

स रथेन । स त्वम् । रथितमो । रथेन । अभियोक्त्रा । जय । जयशील ! शत्रुषु निहितं पियं वा । धनम् ।

य एक इत्तमु ष्टुहि कृष्टीनां विचर्षणिः । पतिर्जज्ञे वृषक्रतुः ॥ १६ ॥

य एकः । यः । एकः । एव भवति । तम् । एव । स्तुहि । मनुष्याणाम् । विद्रष्टा । पतिश्च । जायते । वृषकर्मा, यः स्वयमेव द्रष्टा पतिश्च तमेव स्तुहीति ।

यो गृणतामिदासिथापिरुती शिवः सखा । स त्वं न इन्द्र मृळय ॥ १७ ॥

यो गृणताम् । यः । स्तुवताम् । एव । असि । रक्षणैरेतैः । कल्याणः । सखा । सः । त्वम् । अस्मान् । इन्द्र ! सुखय ।

---

१. त्वदीया Sy.
२. गतिः Sy.
३. हे अमित्राणां शत्रूणां हन्तः ! इन्द्र ! Sy.
४. अतिशयेन शीघ्रजवा Sy.
५. अस्ति Sy.
६. गत्या Sy.
७. य० is suggested for ०यः ॥ शत्रुजयार्थं शीघ्रं गमय Sy.
८. मः (मो) is suggested for ०मौ ॥ अतिशयेन रथी महारथ Sy.
९. अभियोक्त्रा शत्रूणामभिभवित्रा Sy.
१०. अस्मदर्थं जय Sy.
११. हे जयशीलेन्द्र ! Sy.
१२. VM. ignores अस्माकेन ॥ अस्माकेन अस्मदीयेन Sy.
१३. इन्द्रः Sy.
१४. स्तुति P.
१५. प्रजानाम् Sy.
१६. विशेषेण सर्वस्य द्रष्टा Sy.
१७. अधिपतिः Sy.
१८. अजायत Sy.
१९. वर्षकर्मा Sy.
२०. य D.
२१. त्वम् Sy.
२२. स्तुवतामस्माकम् Sy.
२३. पुरा बभूविथ Sy.
२४. ऊत्या रक्षया Sy.
२५. सुखकरः Sy.
२६. अत एव मित्रभूतश्च सन् Sy.
२७. तादृशः Sy.
२८. इदानीं सुखय Sy.
२९. VM. ignores आपिः ॥ आपिः बन्धुः Sy.

धिष्व वज्रं गभस्त्यो रक्षोहत्याय वज्रिवः । सासह्वाँष्टा अभि स्पृधः ॥ १८ ॥

धिष्व । धारय । वज्रम् । बाह्वोः । वज्रिन् । मत्वर्थीयवृत्तिरन्यत्रापि दृष्टा । रक्षसा हननाय । अत्यन्तमभिभव । स्पर्धितॄन् ।

प्रत्नं रयीणां युजं सखायं कीरिचोदनम् । ब्रह्मवाहस्तमं हुवे ॥ १९ ॥

प्रत्नम् । प्रत्नम् । धनानाम् । योक्तारम् । ना । सखायम् । स्तोतॄणां दातारम् । अतिशयेन स्तोत्रैरुह्यमानम् । ह्वयामि ।

स हि विश्वानि पार्थिवाँ एको वसूनि पत्यते । गिर्वणस्तमो अद्रिगुः ॥ २० ॥

स हि विश्वानि । स । हि । विश्वानि । पार्थिवानि । धनानि । एक एव । पतति गच्छति स्वात्मेन । अतिशयेन गीर्भिर्वननीय । अधृतगमन ।

स नो नियुद्भिरा पृण कामं वाजेभिरश्विभिः । गोमद्भिर्गोपते धृषत् ॥ २१ ॥

स नः । अस्माकम् । कामम् । धवाभि । अश्वैश्च । अश्वयुक्तै । गोयुक्तैश्च । धृष्टम् । आपूरयन् ।

---

१. कुलिशम् Sy.
२. Omitted by D. आत्मीययोर्हस्तयोः Sy.
३. वज्री P. हे वज्रवन्निन्द्र ! Sy.
४. द्रष्टा D. ५. रक्षसां हननार्थम् Sy.
६. VM. construes अभि with सासहीष्ठाः and explains it as अत्यन्तमभिभव but Sy. explains अभि and सासहीष्ठाः separately : अभि as अभिगन्त्रीरामुरीः सेनाः and सासहीष्ठाः as अत्यर्थमभिभव ।
७. द्विनॄन् P. धृत्वा च स्पर्धमानाः Sy.
८. व्रतां P. प्रतां D. चिरन्तनं सर्वेषामाद्यम् Sy.
९. ना is redundant. योजयितारं दातारम् Sy.
१०. मित्रभूतम् Sy.
११. कीरीणां स्तोतॄणां चोदयितारम् Sy.
१२. अतिशयेन ब्रह्माभिर्मन्त्रैर्वहनीयमेवंविधमिन्द्रम् Sy. १३. आह्वयामि Sy.
१४. विश्व P. स नि वाश्वा D.
१५. इन्द्रः Sy.
१६. खलु Sy. १७. सर्वाणि Sy.
१८. पृथिव्यां भवानि Sy.
१९. ईष्टे नान्य कश्चित् Sy. पत्यतिरैश्वर्यकर्मा Ngh. 2. 21.
२०. Omitted by P. स्वात्म्येन is suggested for स्वात्मेन ।
२१. ति० P. अतिशयेन स्तुतिभिः सम्भजनीयः Sy.
२२. ०मः P. अप्रतिहतगतिरित्यर्थः Sy.
२३. त्वम् Sy. २४. अस्मदीय कामम् Sy.
२५. वडवाभिः is suggested for धवाभिः ।
२६. युक्तै P. बहुभिरश्वैरुपेतैः Sy.
२७. ०युक्तश्च P. बहुभिर्गोभिर्युक्तैः Sy.
२८. धृष्टं दारिद्र्यनाशनसमर्थं यथा भवति तथा । यद्वा धृषद्वितीन्द्रविशेषणम् । शत्रूणां धर्षकस्त्वमित्यर्थः Sy.
२९. ०रय is suggested for ०रयन् ।
३०. VM. ignores गोपते ॥ हे गोपते ! गवां पालयितः ! Sy.

तद्वो गाय सुते सचा पुरुहूताय सत्वने । शं यद्गवे न शाकिने ॥ २२ ॥

तद् वो गाय । तत् । यूयम् । गायत । सुते सोमे । सह । पुरुहूताय । सदनं कुर्वते । सुखम् । यत् भवति स्तोत्रम् । गवे । इव । सहायाय ।

न घा वसुर्नि यमते दानं वाजस्य गोमतः । यत्सीमुप श्रवद्गिरः ॥ २३ ॥

न घा वसुः । न । खलु । नियच्छति । वासयितेन्द्रः । गोयुक्तस्य । अन्नस्य । दानम् । यदि । उपशृणोति । स्तुतीः । सीमिति पूरणम् ।

कुवित्सस्य प्र हि व्रजं गोमन्तं दस्युहा गमत् । शचीभिरप नो वरत् ॥ २४ ॥

कुवित्सस्य । कुविन्नाम्नो सस्मच्छत्रोः । गोमन्तम् । व्रजम् । दस्युहेन्द्रः । प्र । भि । गच्छतु । ततः प्रज्ञाभिः । अस्माकं व्रजम् । अपवृणोतु ।

इमा उ त्वा शतक्रतोऽभि प्र णोनुवुर्गिरः । इन्द्रं वत्सं न मातरः ॥ २५ ॥

इमाः । इमा । खलु । त्वा । शतक्रतो ! अभिप्रस्तुवन्ति । स्तुतयः । यथा । वत्स दृष्ट्वा । गावो

---

१. गयः P. गयं D.
२. हे स्तोतारः ! Sy.
३. स्तोत्रम् Sy.
४. अभिषुते सोमे सति Sy.
५. सह संहता भूत्वा Sy.
६. बहुभिर्यजमानैराहूताय Sy.
७. शत्रूणां सादयित्रे धनानां वा सनित्रे दात्र इन्द्राय Sy. ८. सुखकरम् Sy.
९. यथा गवे यवसं सुखकरं तद्वदित्यर्थः Sy.
१०. शक्तिमते इन्द्राय Sy.
११. ०सु P., D.
१२. उपरतं करोति Sy.
१३. बहुभिर्गोभिर्युक्तस्य Sy.
१४. अन्नस्य बलस्य वा Sy.
१५. प्रदानम् Sy.
१६. उवंश्रु० P. उपशृणुयात् । स्तोत्रश्रवणे सति सर्वदा ददातीत्यर्थः Sy.
१७. अस्मदीयाः स्तुतीः Sy.
१८. सीम् अयम् Sy.
१९. कुवित् नाम्नो ममस्मच्छत्रो P. कुवित्सनाम्नोऽस्मच्छत्रोः is suggested for कुविन्नाम्नो सस्मच्छत्रोः D. कुविद्बहुशः स्यति हिनस्तीति कुवित्सो नाम कश्चित् । तस्य स्वभूतम् Sy.
२०. बहुभिर्गोभिर्युक्तम् Sy.
२१. गोष्ठम् Sy.
२२. दस्यूनामुपक्षपयितृणां हन्ता Sy.
२३. प्रकर्षेण Sy.
२४. हि is suggested for भि ॥ यस्मादेवं तस्मात् Sy. २५. गच्छति Sy.
२६. आत्मीयैः कर्मभिः प्रज्ञाभिर्वा Sy.
२७. अस्मान् तं P. अस्माकं ता गाः Sy.
२८. निगूढास्ता अपादृणोत् Sy.
२९. अस्मदीयाः Sy.
३०. त्वाम् Sy.
३१. हे बहुविधकर्मन् ! बहुविधप्रज्ञ ! वा Sy.
३२. प्रकर्षेण पुनः पुनर्गच्छन्ति । नौतिरत्र गतिकर्मा Sy. ३३. तत्र दृष्टान्तः । यथा Sy.
३४. गृहे वर्तमानं वत्सम् Sy.

भिहि[1] कुर्वन्ति[2]।

दुणाशं[3] सख्यं[4] तव[5] गौरसि[6] वीर[7] गव्यते[8]। अश्वो[9] अश्वायते[10] भव[11] ॥ २६ ॥

दुणाशम्[12]। नाशयितुमशक्यम्। तव। सख्यम्। गौस्त्वम्। भवसि। वीर! गामिच्छते[13]। अश्वश्च। भव। मह्यमश्वमिच्छते[14]।

स मन्दस्वा[15] ह्यन्धसो[16] राधसे[17] तन्वा[18] महे[19]। न स्तोतारं[20] निदे[21] करः[22] ॥ २७ ॥

स मन्दस्वा[23]। सः। मन्दस्व। सोमेन। धनाय। महते। शरीरेण। न। स्तोतार निन्दित्रेऽत्र[24]। कार्षी[25]।

इमा उ त्वा सुतेसुते[26] नक्षन्ते[27] गिर्वणो[28] गिरः[29]। वत्सं[30] गावो[31] न धेनवः[32] ॥ २८ ॥

इमा उ त्वा। इमाः। स्तुतयः। सुते सोमे सोमे[33]। त्वाम्। व्याप्नुवन्ति। गीर्भिर्वननीयम्[34]। वत्सम्। इव। धेनवः। गावः[35]।

---

१. हम्भां is suggested for भिहि ॥ शीघ्रमभिगच्छन्ति तद्वत् । यद्वा अस्मदीया वाचस्त्वामभि नोनुवुः । अभितः शब्दयन्ति । स्तुवन्ति । यथा गावो वत्समभिलक्ष्य हम्भारवं कुर्वन्ति तद्वत् Sy.

२. VM. ignores इन्द्र ।

३. दु० P.

४. हे इन्द्र ! Sy.

५. दुर्णाशं नाशयितुमशक्यम् । अतिदृढमित्यर्थः Sy.

६. त्वदीयम् Sy.

७. सख्वित्वम् Sy.

८. गौ० is suggested for गो० ॥ गवां प्रदाता । उपचारात्कारणे कार्यशब्दः Sy.

९. हे वीरयितरिन्द्र ! Sy.

१०. गामात्मन इच्छते Sy.

११. अश्वप्रदो भवसि Sy.

१२. अश्वानात्मन इच्छते Sy.

१३. हे इन्द्र ! Sy.

१४. तादृशस्त्वम् Sy.

१५. मोदस्व Sy.

१६. सोमे P. सोमस्य पानेन हृष्टया (It goes with तन्वा) Sy.

१७. धनार्थम् Sy.

१८. आत्मीयेन शरीरेण Sy.

१९. ०रम् is suggested for ०र ॥ त्वदीयं स्तोतारम् Sy.

२०. निन्दकाय । तस्य वशम् Sy.

२१. निन्द्र त्रे P. अत्र is redundant.

२२. ०र्षीः is suggested for ०र्षी ॥ कुर्याः Sy.

२३. VM. ignores हि ॥ हि पूरणः Sy.

२४. अस्मदीयाः Sy.

२५. Omitted by P. सोमेऽभिषुतेऽभिषुते सति Sy.

२६. ०नीय ! is suggested for ०नीयम् ॥ हे गिर्वणः ! गीर्भिर्वननीय ! इन्द्र ! Sy.

२७. यथा शीघ्रं वत्सं व्याप्नुवन्ति तद्वत् Sy.

२८. दोग्ध्र्यः Sy.

२९. VM. ignores उ ।

पुरूतमं पुरूणां स्तोतृणां विवाचि । वाजेभिर्वाजयताम् ॥ २९ ॥

पुरूतमम् । बहूना शत्रूणाम् । ग्लपयितारम् । स्तोतृणाम् । विविधवाचि यज्ञे सति । वाजैः त्वा दीपयताम्, पूर्वत्र सम्बन्धः ।

अस्माकमिन्द्र भूतु ते स्तोमो वाहिष्ठो अन्तमः । अस्मान्राये महे हिनु ॥ ३० ॥

अस्माकम् । अस्माकम् । इन्द्र ! भवतु । ते । स्तोमः । वोढृतम. । अन्तिकतमः । अस्मान् । महते । धनाय । प्रेरय ।

अधि बृबुः पणीनां वर्षिष्ठे मूर्धन्नस्थात् । उरुः कक्षो न गाङ्गयः ॥ ३१ ॥

अधि बृबुः । भरद्वाय हृत्रे गोसहस्रप्रदातारं बृबु तृचेन शयुः स्तौति । मनुः —

भरद्वाजः क्षुधार्तस्तु सपुत्रो निर्जने वने ।
बह्वीर्गाः प्रतिजग्राह बृबोस्तक्ष्णो महायशाः ॥ इति ॥

---

१. पुरुत० D. २. हे इन्द्र ! Sy.
३. पुरूणां बहूनां शत्रूणां तमयितारं ग्लपयितारं त्वाम् Sy. ४. स्तोतृणामस्माकं स्तुतिः प्राप्नोत्विति शेषः Sy. ५. ०ची P. विविधाः स्तुतशस्त्रात्मिका वाचो यस्मिन् यज्ञे तस्मिन् Sy. ६. वाजोः P. हविर्लक्षणैरन्नैः Sy.
७. वाजवन्तं बलवन्तं वा त्वां कुर्वताम् Sy.
८. VM. ignores पुरु of पुरुतमम् ।
९. तव Sy. १०. स्तोत्रम् Sy.
११. त्वं चास्मान् Sy.
१२. भरद्वाजोऽरण्ये पर्यटन् क्षुधया पिपासया च पीडितः सन् महावने तक्षकर्म कुर्वाणं बृबुं ददर्श । तमुवाच । अतिथिं मामुपागतमवगच्छेति । सोऽभ्युत्थाय प्राञ्जलिर्भरद्वाजमुवाच । अहं तक्षा । तक्ष्णः पतितचाण्डालादिभ्य इव ब्राह्मणा न गृह्णन्तीति मया श्रुतम् । यदि तव धर्मो न पीड्यते तर्हि वद । 'तव दत्तं न प्रत्याख्यास्यामीति' बृबुस्तथेति वदन्तं तं प्रतिपाद्यातिथिधर्मेणोपचचार । स तमुवाच । अहं शूद्रो बहुपशुरमेध्यः । मदीया गावो न पितृदेवातिथिषूपयुज्यन्ते संस्थासु न । भगवता पूर्वमुक्तं तव दत्तं न प्रत्याख्यास्यामीति । तेनात्मानमुद्धरन् स्वर्गभाजः कर्तुमेताः गावः प्रतिगृह्णन्तामिति । एवमुक्त्वा तस्मै गवां सहस्रं ददौ । तद्भरद्वाजः प्रतिजग्राह प्रतिगृह्य च पुत्राय भ्रात्रे शयवे चाचचक्षे । अथ शयुः प्रीतमनाः 'अधि बृबुः' (RV.VI.45.31,33.) इत्यनेन तृचेन गायत्रेण त्रिष्टुबन्तेन बृबुं तुष्टावेति (DDN. describes the metre of the 33rd stanza as त्रिष्टुप् but it is in reality अनुष्टुप् and not त्रिष्टुप् ।) 'ऋचोऽन्त्ये बृबुस्तक्षा वैवतम्' इत्यनुक्रमणी (KSA.31.45.p.22.)'भारद्वाजं चतुर्थं यथा भरद्वाजो बृबो तक्षिण प्रस्तोके च' (ŚŚS. 16.11.10.,11.) इति । पुरुषमेधे नाराशंसमेतत्तृचं विनियुक्तम् DDN.
१३. बृबुर्नाम पणीनां तक्षा । तत्सकाशाल्लब्धधनो भरद्वाजस्तदीयं दानमनेन तृचेनास्तौत् Sy.
१४. ०ज हृत्रे P. भरद्वाजाय भ्रात्रे is suggested for भरद्वाय हृत्रे ।
१५. श० P. १६. ह्वी गाः D.
१७. Manu. reads बृधोः for बृबोः ।
१८. Manu. reads महातपाः for महायशाः ।
१९. Manu. 10.107.

अध्यस्थात्[1]। बृबुरयम्। स्तोतृणाम्[2]। वृद्धतमे। मूर्धनि[3], उच्छ्रिते स्तुत्ये पदे। कक्ष कक्षते। विस्तीर्णः[4] प्रवाह। इव। गङ्गाया[5] अपि वौषधीकक्ष एवाभिप्रेत[6]।

यस्य वायोरिव द्रवद्भद्रा रातिः सहस्रिणी। सद्यो दानाय मंहते ॥ ३२ ॥

यस्य वायोरिव। यस्य। वायोरिव वेग.। द्रवति[7]। भजनीयम्। देयम्[8]। सहस्रसख्याकम्[9]। तनीमेव[10]। दानार्थम्[11]। स्तुवते[12] भरद्वाजाय पूर्वत्र सम्बन्ध।

तत्सु नो विश्वे अर्य आ सदा गृणन्ति कारवः।
बृबुं सहस्रदातमं सूरिं सहस्रसातमम् ॥ ३३ ॥

तत् सु। तत्[13]। सुष्ठ्वाभिमुख्येन वदन्ति[14]। अस्माकम्[15]। विश्वे[16]। अरण्यानाग[17] ? सदा। कारव[18]।

किमित्याह—बृबुम्[19]। सहस्रस्य दातारम्[20]। प्राज्ञम्[21]। सहस्रस्य दातारमिति।

---

१. अधिष्ठितोऽभूत् Sy.
२. पणनात् पणयो वणिज एतत्संज्ञा असुरा वा। तेषां तक्षा Sy.
३. मूच्छनि P.
मूर्धवदुच्छ्रिते स्थले Sy.
४. ०तेः। विस्तीर्णः is suggested for ०ते। विस्तीर्ण ॥ विस्तीर्णः सन्। जातितो हीनोऽपि दातृत्वात् सर्वत्र श्रेष्ठो भवतीत्यर्थः Sy
५. गङ्गाया कूल उन्नते भवः Sy. यथा गङ्गायाः कूले उन्नते भवो वृक्ष इव उरुः विस्तीर्णः सन् जातितो हीनोऽपि दातृत्वात् सर्वश्रेष्ठो भवतीत्यर्थः। तथा च मनुः (Manu. 10. 107)
भरद्वाजः क्षुधार्तस्तु सपुत्रो निर्जने वने।
बह्वीर्गाः प्रतिजग्राह न स पापेन लिप्यते ॥
(यत्पृथिव्यच्च कृणपं यच्च कीटपिपीलिकम्।
सर्वं तदग्निर्वहति देवत्वाच्च न हीयते ॥
एतेनैवोपमानेन यथा वैश्वानरस्तथा।
ब्राह्मणः सर्ववर्णेभ्य आददानो न दुष्यति ॥) DDN.
६. ०त D.
७. बृबोः Sy.
८. भवति P. वायोरिव द्रवत् क्षिप्रगामिनः Sy.
९. कल्याणी Sy.
१०. देय D. दानम् Sy.
११. ०स्रं ख्याकम् P.
सहस्रसङ्ख्यायुक्ता Sy.
१२. ततीमेव P. तदानीमेव is suggested for तनीमेव ॥ स्तुतिसमय एव Sy.
१३. दानकामाय याचमानाय मह्यम् Sy.
१४. मंहतेऽपेक्षितं धनं ददाति तं बृबुमित्युत्तरस्यामृचि सम्बन्धः Sy.
१५. तं बृबुम् Sy.
१६. अभिगृणन्ति। अभिष्टुवन्ति Sy.
१७. अस्मदीयाः Sy.
१८. सर्वे Sy.
१९. अरण्यागः P. The reading is doubtful. It seems to be the explanation of अर्यः ॥ स्तुतीनामीरयितारः Sy.
२०. स्तोतारः Sy.
२१. बृबु D.
२२. अतिशयेन सहस्रसङ्ख्यस्य धनस्य दातारम् Sy.
२३. प्राज्ञं यद्वा प्रेरयितारम् Sy.
२४. अतिशयेन सहस्रसङ्ख्यस्य स्तोत्रस्य धनस्य वा सम्भक्तारम् Sy.

VI. 46.

त्वामिद्धि हवामहे सातौ वाजस्य कारवः ।
त्वां वृत्रेष्विन्द्र सत्पतिं नरस्त्वां काष्ठास्वर्वतः ॥ १ ॥

त्वामिद्धि[1] । त्वाम्[2] । एव[3] । हि[4] । हवामहे[5] । अन्नस्य[6] । लाभार्थम्[7] । कर्तारं[8] सोमानां वयम् । त्वाम् । उपद्रवेषु[9] । इन्द्र । सत्पतिम्[10] । मनुष्या[11] हवन्ते[12] । त्वामेव[13] । अश्वस्य[14] । काष्ठासु[15] ।

१. 'त्वामिद्धि' इति चतुर्दशं तृतीयं सूक्तं बृहस्पतिपुत्रस्य शंयोरार्षमैन्द्रम् । प्रथमातृतीयाद्या अयुजो बृहत्यो द्वितीयाचतुर्थ्याद्या युजः सतोबृहत्यः । तथा चानुक्रान्तम्—'त्वामिद्धि षळूना प्रागाथम्' (KSA. 31.46. p. 23.) इति । सूक्तविनियोगो लैङ्गिकः । यदि ज्योतिः ष्टोमो बृहत्पृष्ठः स्यात्, तदानीं निष्केवल्यस्याद्यः प्रगाथः स्तोत्रियः । सूत्रितञ्च—'यद्यु वै बृहत्त्वामिद्धि हवामहे' (ĀŚS. 5.15.) इति । महाव्रते ऽपि निष्केवल्येऽयं प्रगाथः शंसनीयः । तथैव पञ्चमारण्यके सूत्रितम्—'त्वामिद्धि हवामहे त्वं ह्येहि चेरव इति बृहतः स्तोत्रियानुरूपौ' (AĀ.5.2.2.) इति Sy.

२. इद् एवार्थे Mah. इच्छब्द एवार्थे U.

३. हि निश्चये Mah. हिनिरर्थकः U. यस्माद्वाजस्य लाभाय त्वामेव ह्वयामः BB.

४. स्तुतिभिराह्वयामः Sy.
आह्वयामः Mah., U., BB.

५. अन्नस्य विषये भूते U.

६. सम्भजने निमित्तभूते सति Sy. लाभनिमित्तम् Mah. सातिलाभः । लाभे U. सातिनिमित्तमस्मभ्यं देहि वाजमिति त्वामेवाह्वयामः BB.

७. कर्तारः is suggested for कर्तारम् ॥ स्तोतारो वयम् Sy. कर्तारो यज्ञानाम् Mah. कारवः स्तोतृत्वेन शिल्पिनः BB.

८. आवरकेषु शत्रुषु सत्सु Sy. शत्रुषु शत्रुघातनिमित्तम् Mah. शत्रुषु हन्तव्येषु U. यस्माच्चारिषूपस्थितेषु BB.

९. ०तिः D. सतां पालयितारं श्रेष्ठम् Sy. सतां पालयितारम् । श्रुतिस्मृत्युक्ताचाररता निषिद्धत्यागिनः सन्तः कथ्यन्ते Mah. श्रुतिस्मृतिविहितानुष्ठातारो निषिद्धकर्मपरित्यागिनः सन्तस्तत्पतिम् U. सतां पातारं विदुषां पालयितारं त्वामेवाह्वयामः BB.

१०. अन्येऽपि मनुष्याः Sy. ऋत्विजो वयम् Mah. सर्वेऽपि वयं मनुष्याः BB.

११. आह्वयन्ति तज्जयार्थम् Sy. आह्वयन्ति U. आह्वयामः BB.

१२. त्वांशब्दावृत्तिरादरार्था Mah. त्वामेव U. BB.

१३. अश्वस्य सम्बन्धिनीषु Sy. अश्वप्राप्तिनिमित्तं च । विभक्तिव्यत्ययः Mah. अश्ववतो रथिनो वाऽऽह्वयन्ति । नहि त्वदृते पुरुषाणां किञ्चित्सिद्धयतीत्यभिप्रायः U. अरणवत उदकस्य च सात्यर्थं त्वामेवाह्वयामस्तस्मात्सर्वस्मादभिमतसम्पादनेनेन्द्रियं वीर्यं चास्मभ्यं देहीति BB.

१४. यत्राश्वः क्रान्त्वा तिष्ठति तासु काष्ठासु सङ्ग्रामेषु युद्धकामाश्च त्वामेवाह्वयन्ति, अतो वयं त्वामेवाह्वयाम इत्यर्थः Sy.
दिक्षु दिग्विजयनिमित्तम् Mah.
काष्ठासु जेतव्यासु U.
यस्माच्च त्वां काष्ठासु दिक्षु BB.
This stanza=YV. 27.37=TS.2. 4.14.3.

स त्वं नश्चित्र वज्रहस्त धृष्णुया महः स्तवानो अद्रिवः ।
गामश्वं रथ्यमिन्द्र सं किर सत्रा वाजं न जिग्युषे ॥ २ ॥

स त्वम् । सः । त्वम् । अस्मभ्यम् । पूजनीय ! वज्रहस्त ! धृष्णु । महान् । अद्रिरादृणात्यमित्रानिति तद्वान् । आयुधवान् ! स्तूयमानः । गाम् । अश्वं च । रथस्य वोढारम् । सह देहि । महत् । अन्नम् । इव । सङ्ग्राम जितवतेऽश्वाय ।

यः सत्राहा विचर्षणिरिन्द्रं तं हूमहे वयम् ।
सहस्रमुष्क तुविनृम्ण सत्पते भवा समत्सु नो वृधे ॥ ३ ॥

यः सत्राहा । यः । महतो हन्ता । विचर्षणिः । इन्द्रम् । तम् । हमहे । वयम् । 'इन्द्र पर्वणि पर्वणि

---

१. तादृशः Sy. २. हे चायनीय ! Sy., U. आश्चर्यकारिन् ! Mah.
३. वज्रबाहो ! Sy वज्रं हस्ते यस्य Mah.
४. शत्रूणां धर्षयिता Sy. धृष्णुया प्रागल्भ्येन धृषेः क्नुः । ततो विभक्तेर्यादेशः । धृष्णुना धृष्णुत्वेन भावप्रधानो निर्देशः Mah. प्रसहनेन U.
५. महसा तेजसा । महः विभक्तिलोपः Mah. महत्त्वेन च U.
६. अद्रिः is omitted by P. अदिरादृणात्य० D. अद्रि० is suggested for अदि० ।
७ तद्वन् ! is suggested for तद्वान् ।
८. ०धव D. ०धवन् ! is suggested for ०धवान् ॥ वज्रवन् ! यद्वा, आवृणात्यनेनेत्यद्रिरशनिः । तद्वन् ! एवंभूतेन्द्र ! Sy. अद्रयोऽजेयत्वेन सन्तीत्यद्रिवांस्तत्सम्बुद्धौ Mah. हे अद्रिवन् ! अद्रिसारमयं वज्रं तद्यस्यास्तीति सम्बोध्यतेऽद्रिव इति U.
९. अस्माभिः स्तूयमानः सन् Sy. स्तवान इत्यत्र विकरणव्यत्ययः Mah. स्तूयमान इति विकरणव्यत्ययः U. १०. गवाम् D.
११. रथवाहनम् Sy. रथे साधुं रथवहनसमर्थम् Mah. रथे साधुम् U.
१२. ह P. सम्यक् प्रयच्छ Sy. सम्पूर्वः किरतिर्दानार्थः Mah. सङ्किरतिर्दानातिशये । अनेकदेशप्रकीर्णं देहि U.
१३. महत् प्रभूतम् Sy. त्राणं त्रा रक्षणं तत्सहितम् Mah. सत्रा त्राणसहितम् U.
१४. वाजमन्नं यवं ? (यवसं) वा यथा ददति तथास्मभ्यं देहि Mah. वाजं यवसम् । सस्नेहमपरिमितं सङ्करेयुर्दद्युरेवमस्मभ्यं देहि U.
१५. यथा शत्रून् जितवते भोगार्थं बह्वन्नं प्रयच्छसि तद्वत् Sy. न इवार्थे । यथा Mah. नकार उपमार्थीयः U. १६. जितवते पुरुषाय भोगार्थम् Sy. जिग्युषे जितवतेऽश्वाय हस्तिने वा Mah. जितवतेऽश्वाय हस्तिने वा U.
१७. VM. ignores इन्द्र ! This stanza=YV.27.38.
१८. महान्नते निष्केवल्ये 'यः सत्राहा' इत्यादिसूक्तशेषः शंसनीयः । सूच्यते हि—'यः सत्राहा विचर्षणिरिति शेषोऽयं ते अस्तु हर्यत इति सूक्त' (AĀ.5.2.4.) इति । चातुर्विंशिकेऽहनि माध्यन्दिनसवने 'यः सत्राहा' इति प्रगाथो वैकल्पिकोऽनुरूपः । सूत्रितञ्च—'यः सत्राहा विचर्षणिः स्वादोरित्था विषूवतः' (ĀSS.7.4.) इति Sy. १९. इन्द्रः Sy.
२०. महतां शत्रूणां हन्ता Sy.
२१. पिचर्षणिः P. ०र्षणिः is suggested for ०र्षणिः ॥ विशेषेण सर्वस्य द्रष्टा Sy.
२२. Omitted by P. २३. स्तुतिपदैराह्वयामः Sy. २४. उत्तरार्धः प्रत्यक्षकृतः Sy.

शेवान् कृत्वा कां च स्त्रियं समभवत्' इत्याथर्वणिकम्, सहस्रमुष्क ! बहुधन ! सम्पते ! भव। सङ्ग्रामे। अस्माकम्। वर्द्धनाय वर्द्धनाय।

बाधसे जनान्वृषभेव मन्युना घृषौ मीळ्ह ऋचीषम।
अस्माकं बोध्यविता महाधने तनूष्वप्सु सूर्ये ॥ ४ ॥

बाधसे। बाधसे। शत्रुजनान्। वृषभ इव। क्रोधनकर्म। घर्षणकर्तरि। सङ्ग्रामे। स्तुत्या सम ! अस्माकम्। बुध्यस्व। रक्षिता भवामीति। सङ्ग्रामे भव वर्धक सखीनाम्।

इन्द्र ज्येष्ठं न आ भर ओजिष्ठं पपुरि श्रवः।
येनेमे चित्र वज्रहस्त रोदसी ओभे सुशिप्र प्राः ॥ ५ ॥

इन्द्रः। इन्द्र ! अतिशयेन प्रशस्यम्। नः। आभर। बलवत्तमम्। पूरकम्। बलमन्नन्नेव। य। द्यावापृथिव्यौ। चित्र। वज्रहस्त। आपूरितवानसि। सुहनो !

---

१. शेफान् is suggested for शेवान्।
२. कञ्च P., D.
३. स्त्रियां P.
४. हे सहस्रशेफ ! 'यां कां च स्त्रियं सम्भवन्निन्द्रो भोगलोलुपतया स्वशरीरे पर्वणि पर्वणि शेफान् ससर्ज' इति कौषीतकिभिराम्नातम्। तदभिप्रायेणेदं सम्बोधनम् Sy.
५ संपाते P. सत्पते is suggested for सम्पत ॥ सतां पालयितरिन्द्र ! Sy.
६. सङ्ग्रामेषु Sy.
७. वर्द्धय वर्द्धनाय P. One वर्द्धनाय is redundant.
८. बाधस्व Sy. ९. अस्मदीयान् शत्रून् Sy.
१०. वृषभेणेव बलवता Sy.
११. ०नघर्म P. क्रोधेन Sy.
१२. ०णिक्० P. शत्रूणां घर्षके बाधके Sy.
१३. सह P. सम् D. हे ऋचीषम ! ऋचा सम ! ऋग्यादृशं रूपं प्रतिपादयति तादृग्रूपेन्द्र ! Sy.
१४. बुध्यस्व। रक्षितृत्वेनात्मानं जानीहि। रक्षको भवेति यावत् Sy.
१५. महतो धनस्य निमित्तभूते सङ्ग्रामे Sy.
१६. सवीनां P.
१७. VM. ignores तनूषु। अप्सु and सूर्ये ॥ किमर्थम् ? तनूषु तनयेषु। अप्सु उदकेषु। सूर्ये च लब्धव्येषु सत्स्वेतेषां लाभार्थम्। सूर्यस्य लाभः सन्दर्शनम्। तदर्थमित्यर्थः Sy.
१८. चातुर्विंशिकेऽहनि माध्यन्दिनसवने ब्राह्मणाच्छंसिनः 'इन्द्र ज्येष्ठं न आ भर' इति प्रगाथो वैकल्पिकोऽनुरूपः। सूत्रितञ्च—'इन्द्र ज्येष्ठं न आ भरा त्वा सहस्रमा शतम्' (ĀSS.7.4.) इति Sy.
१९. इन्द्र is suggested for इन्द्रः।
२०. ०स्यः P. प्रशस्यतमम् Sy.
२१. अस्मभ्यम् Sy. २२. आहर प्रयच्छ Sy.
२३. ओजस्वितममतिशयेन बलकरम् Sy.
२४. अन्नम् Sy.
२५. बलमन्नन्नेवा यः D. बलमन्नं वा। येन is suggested for बलमन्नन्नेव यः॥ अन्नेन Sy. २६. हे चायनीय ! Sy.
२७. वज्रबाहो ! Sy.
२८. आपूरयसि तवन्नमाभरेत्यन्वयः Sy.
२९. हे शोभनहनुक ! एवम्भूत हे इन्द्र ! Sy.
३०. VM. ignores इमे and उभे ॥ इमे परिदृश्यमाने उभे Sy.

त्वामु॒ग्रमव॑से॒ चर्ष॑णीसहं॒ राजं॑न्दे॒वेषु॑ हूमहे ।
विश्वा॒ सु नो॑ विथु॒रा पिं॑ब॒दना॑ व॑सो॒ऽमित्रा॑न्त्सुषहा॑न्कृधि ॥ ६ ॥

त्वामु॒ग्रम्[1] । त्वाम् । उद्गूर्णम्[1] । रक्षणाय । मनुष्याणा सोढारम्[2] । राजन्[3] ! देवाना मध्ये । हवामहे[4] । विश्वानि[5] । सुष्ठु । अस्माकम्[6] । कम्पयितॄणि[7] । पिब्दनानि[8] रक्षासि, आरपि[9] शब्दवन्त इत्युपब्दिरिति वाङ्नामसु[10] दृष्टम्[11] । अमित्राश्च[12] । सुष्ठु सोढव्यान्[13] । कुरु[14] ।

यदि॑न्द्र॒ नाहु॑षीष्वाँ॒ ओजो॑ नृ॒म्णं च॑ कृ॒ष्टिषु॑ ।
यद्वा॒ पञ्च॑ क्षि॒तीना॑ द्यु॒म्नमा भ॑र स॒त्रा विश्वा॑नि॒ पौंस्या॑ ॥ ७ ॥

यदि॑न्द्र[15] । यत् । इन्द्र ! मनुष्यजातीयासु[16] । प्रजासु । ओज[17] । धनम् । च भवति[18] । यत् । वा ।
ञ्च[19] । क्षितीनाम्[20] । द्युम्नमन्न[21] भव[22] तत्सर्वम्, अस्मभ्यम् । आभर[23] । महान्ति । विश्वानि[24] च । बलानि[25] ।

यद्वा॑ तृ॒क्षौ म॑घवन्द्रु॒ह्यावा जने॒ यत्पू॒रौ कच्च॒ वृष्ण्य॑म् ।
अ॒स्मभ्यं॒ तद्रि॑रीहि॒ सं नृ॒षाह्येऽमित्रान्पृ॒त्सु तु॒र्वणे॑ ॥ ८ ॥

यद्वा । यत् । तृक्षुप्रभृतिषु[26] । त्रिषु[27] राजसु[28] । बल भवति[29] धनम्[30] । च । अस्मभ्यम्[31] । तत् । सम्प्रयच्छ[32] ।

---

१. उद्गूर्णबलम् Sy.
२. चर्षणीनां शत्रुभूतानां प्रजानामभिभवितारम् Sy. ३. हे राजमानेन्द्र ! Sy.
४. आह्वयामः Sy.
५. सर्वाणि Sy. ६. अस्मदीयान् Sy.
७. पयतॄणि P. व्यथितानि बाधितानि Sy.
८. पिबनानि P., D. पिहितमव्यक्तं शब्दयन्त इति पिब्दनानि । पृषोदरादिः । तानि Sy.
९. आपिरवि P.
१०. ०ब्दा० D. The passage आरपि शब्दवन्तः is doubtful. पिब्दनाः शब्दवन्तः is suggested for it. Ngh. 1.11.
११. इत्युपब्दवति वाङ्मनसु P.
१२. मि० D. ०त्रांश्च is suggested for ०त्राश्च ॥ शत्रूंश्च Sy.
१३. सुखेनाभिभवितुं शक्यान् Sy.
१४. VM. ignores वसो ॥ हे वासकेन्द्र ! Sy.
१५. ०न्द्रः P. १६. 'नहुष इति मनुष्यनाम' (Ngh. 2.3.) तत्सम्बन्धिनीषु Sy.
१७. बलम् Sy. १८. विद्यते Sy.
१९. पञ्च is suggested for ञ्च ॥ पञ्चानाम् Sy.
२०. निषादपञ्चमाश्चत्वारो वर्णाः पञ्च क्षितयः । तेषाम् Sy. २१. द्योतमानमन्नम् Sy.
२२. भवति is suggested for भव ।
२३. आहर । प्रयच्छ Sy. २४. सर्वाणि Sy.
२५. बलानि चास्मभ्यमाहर Sy. २६. VM. ignores आ ॥ आकारः समुच्चयार्थः Sy.
२७. तृषु D. प्रभृति and त्रि refer to तृक्षौ, द्रुह्यौ and पूरौ ॥ तृक्षावेतत्संज्ञे राजनि । द्रुह्यौ चैतत्संज्ञे च जने । पूरावेतत्संज्ञे नृपे च Sy.
२८. It seems to be the explanation of जने ।
२९. खं P. ३०. वृष्ण्यं वीर्यं विद्यते तत्सर्वम् Sy. ३१. स्तोतृभ्यः Sy.
३२. सम्यक् प्रयच्छ Sy.

युद्धे[1] । अमित्रान्[2] । पृतनासु[3] । हिसितुम्[4] ।

इन्द्रं त्रिधातु शरणं त्रिवरूथं स्वस्तिमत् ।
छर्दिर्यच्छ मघवद्भ्यश्च मह्यं च यावया दिद्युमेभ्यः ॥ ९ ॥

इन्द्र त्रिधातु[6] । इन्द्र ! त्रिधातुसन्धानम्[7] । गृहम् । त्रिकक्ष्यम्[8] । अविनाशयुक्तम्[9] । दीप्तम्[10] । यच्छ[11] । हविष्मद्भ्यः[12] पुत्रेभ्यः[13] । मह्यम्[14] । च । पृथक् कुरु । यज्ञम्[15] । एभ्य. पुत्रेभ्यो मत्तश्च[16] ।

ये गव्यता मनसा शत्रुमादभुरभिप्रघ्नन्ति धृष्णुया ।
अधं स्मा नो मघवन्निन्द्र गिर्वणस्तनूपा अन्तमो भव ॥ १० ॥

येन[17] गव्यता[18] । येन[19] । गातामिच्छता[20] । मनसा[21] । शत्रुम्[22] । आदभन्तु[23] वन्ति[24] । अभिभवन्ति[25] । धृष्टाः[26] ।

तेष्वागतेषु[27] । अस्माकम्[28] । मघवन्[29] ! इन्द्र ! गर्वणः[30] ! शरीराणां रक्षकः सन्[31] । अन्तिकतमः[32] । भव[33] ।

---

१. नृभिर्योद्धृभिः सोढव्ये युद्धे प्रवृत्ते Sy.
२. शत्रून् Sy.
३. सङ्ग्रामेषु Sy.
४. तुवितुं हिंसितुम् Sy.
५. VM. explains यत् once only and ignores वा । मघवन् । आ । and कत् ॥ हे धनवन्निन्द्र ! यत्किञ्चन Sy.
६. चातुर्विंशिकेऽहनि निष्केवल्ये 'इन्द्रत्रिधातु' इति वैरूपस्य सामप्रगाथः शंसनीयः । सूत्रितञ्च– 'इन्द्र त्रिधातु शरणं त्वमिन्द्र प्रतूर्तिषु' (ĀŚS. 7.3.) इति Sy.
७. त्रिसं० D.
त्रिप्रकारं त्रिभूमिकम् Sy.
८. त्रिकर्षक्ष्यम् P. त्रयाणां शीतातपवर्षाणां वारकम् Sy.
९. अपिना० P.
१०. VM. seems to explain छर्दिः as दीप्तम् । Cf. VM.'s commentary on RV. VI.46.12.
छर्दिष्मदाच्छादनयुक्तमेवङ्गुणविशिष्टम् Sy.
११. देहि Sy.
१२. मघं हविर्लक्षणं धनम् । तद्भ्यश्चास्मदीयेभ्यः Sy.
१३. भरद्वाजाय Sy.
१४. शत्रुप्रेरितं द्योतमानमायुधम् Sy.
१५. अपि चैभ्यः सकाशात् Sy.
१६. VM. explains च once only.
१७. VM. seems to take ये as येन ।
१८. ०न्ता P.
१९. VM. takes ये as येन ॥ ये जनाः Sy.
२०. गातामिच्छत P. गामि० is suggested for गातामि० ॥ शत्रूणां गा इच्छता Sy.
२१. मनसा युक्ताः सन्तः Sy.
२२. शातयितारं वैरिणम् Sy.
२३. Omitted by P. अर्हितिषुः Sy.
२४. Omitted by D. अस्मानभिलक्ष्य प्रकर्षेण हिंसन्ति Sy.
२५. धृष्णवो धृष्टाः सन्तः Sy.
२६. तेष्वागतेषु seems to be the explanation of अध ॥ अध अस्मिन् काले तेभ्यः सकाशात् Sy.
२७. हे धनवन् ! Sy.
२८. थर्वणः P. गिर्वणः is suggested for गर्वणः ॥ गिरां सम्भक्तः ! Sy.
२९. तनूनां शरीराणां रक्षिता सन् Sy.
३०. VM. ignores स्म ।

अध॑ स्मा नो वृ॒धे भ॒वेन्द्र॑ ना॒यमु॒वा यु॒धि ।
यदु॒न्तरि॑क्षे प॒तय॑न्ति प॒र्णिनो॑ दि॒द्यव॑स्ति॒ग्ममू॑र्धानः ॥ ११ ॥

अध स्मा । [१]अथ । [२]खलु । अस्माकम् । वर्धनाय । भव । इन्द्र ! [३]नेतार स्तुतीनाम् । रक्ष । युद्धे । **यदा ।** अन्तरिक्षे । गच्छन्ति । [६]पत्रयुक्ता । इष. । [८]तिग्मशिरस. ।

यत्र॒ शूरा॑स्त॒न्वो॑ वितन्व॒ते प्रि॒या शर्म॑ पितृ॒णाम् ।
अध॑ स्मा यच्छ त॒न्वे॑ तने॒ च छ॒र्दिर॒चित्तं॑ याव॒य द्वेषः॑ ॥ १२ ॥

यत्र शूरासः । [९]यत्र । [१०]शूराः । शरीराणि । [१२]वितन्वते । [१३]प्रियाणाम् । [१४]आवासस्थानानि । [१५]जनकानाम् । [११]अथ । [११]खलु । [१७]यच्छास्माकम् । [१८]शरीराय च । [१९]पुत्राय । च । [२०]दीप्ति विजयात्मिकाम् । चत्तरहितमचिन्तितो-[२१]वनत झटित्युपस्थितम् । पृथक् [२२]कुरु । [२३]रक्षः ।

यदि॑न्द्र॒ सर्गे॑ अ॒र्वत॑श्चो॒दया॑से महाध॒ने ।
अस॒मने॒ अध्व॑नि वृ॒जि॒ने प॒थि श्ये॒नाँइ॑व श्रवस्य॒तः ॥ १३ ॥

यदिन्द्र । [२४]यत् । [२५]इन्द्र ! [२६]उद्युक्ते प्रवृत्ते । [२७]सङ्ग्रामे । [२८]अश्वान् । [२९]चोदयसि । [३०]असमाने ।

---

१. तदानीम् Sy.
२. नोरा P. अपि च नायं योऽस्माकं नयो नेता । तमपि Sy.
३. युद्ध P. ४. व्योम्नि Sy.
५. शत्रुभिर्विसृष्टाः पतन्ति तदानीं वृधे भवेत्यन्वयः Sy.
६. तदेत्युक्तं कदेत्यत आह । पर्णिनः पक्षवन्तः Sy.
७. दीप्ता बाणाः Sy.
८. तीक्ष्णास्याः Sy.
९. यस्मिन् काले Sy.
१०. शूराः शौर्यवन्तो योद्धारः Sy.
११. स्वकीयानि शरीराणि Sy.
१२. विस्तारयन्ति स्वामिनो जयाय शत्रूणां पुरतो दर्शयन्ति, एतानि च वितन्वते शत्रूणां पुरस्ताद् विस्तारयन्ति । परित्यजन्तीति यावत् Sy.
१३. तथाऽस्मिन् काले प्रियाणि Sy.
१४. शर्माणि स्थानानि Sy.
१५. जनकानां सम्बन्धीनि । तैरर्जितानीति यावत् Sy. १६. अध स्म अस्मिन् काले Sy.
१७. प्रयच्छ । शत्रुज्ञानात्पूर्वमेव देहीत्यर्थः Sy.
१८. D. reads शरीराणां पुत्राय for शरीराय ।
१९. तनयाय Sy.
२०. ०प्ति P. छर्दिश्छादनमायुधानां निवारकं कवचम् Sy.
२१. चत्तरहितमपिचिन्तितोपत P. चित्तरहितमचिन्तितोपनतम् is suggested for चत्तरहितमचिन्तितोवनतम् ॥ शत्रुभिरज्ञातं यथा भवति तथा Sy.
२२. तेभ्यो वियोजय Sy.
२३. रक्षणः P. द्वेष्टॄन् शत्रून् Sy.
२४. ०न्द्रः P. २५. यदा Sy.
२६. उद्योगे सति Sy.
२७. जेतव्यस्य महतो धनस्य निमित्ते महति सङ्ग्रामे Sy. २८. अस्मदीयानश्वान् Sy.
२९. प्रेरयसि Sy.
३०. विषमे Sy.

अद्धेत्यन्तरिक्षनाम, महति, अन्तरिक्षे । मनुष्यैस्तर्तुमशक्ये । पन्थाः पतन्त्यस्मिन्निति । श्येनानिव । आमिषमिच्छतः पततस्तस्मिन् युद्ध इति ।

सिन्धूँरिव प्रवण आशुया यतो यदि क्रोशमनु ष्वणिं ।
आ ये वयो न वर्वृत्त्यामिषि गृभीता बाह्वोर्गवि ॥ १४ ॥

सिन्धूँरिव । सिन्धूनिव । निम्ने । शीघ्रम् । गच्छतस्तवाश्वान् । यद्यहम् । अनुक्रोशामि । तेषां गमननिमित्ते स्वप्ने सति । येऽश्वाः । पक्षिणः । इव । आवर्तन्ते । आमिषार्थं शत्रुजयार्थम् । गमने बाह्वोः । गृहीताः । रश्मिभिः 'ग्रीवाया बद्धो अपिकक्ष आसनि' इत्युक्तम्, पूर्वत्र सम्बन्धः ।

---

१. अध्वेत्य० is suggested for अद्धेत्य० । Ngh. 1.3. The passage: अध्वेत्यन्तरिक्षनाम refers to अन्तरिक्षे ॥ मार्गे Sy.

२. महति is the explanation of असमाने ।

३. The passage तर्तुमशक्ये seems to be the explanation of वृजिने । तरीतुमशक्ये is suggested for it ॥ कुटिले Sy.

४. मार्गेऽन्तरिक्षलक्षणे Sy.

५. यथामिषार्थिनः श्येना अन्तरिक्षे शीघ्रं गच्छन्ति तथास्मदीयानश्वान् यदा त्वं शीघ्रं गमयसि तदानीमस्माकं तन्वे तनयाय छर्दिर्यच्छेति पूर्वस्यामृचि सम्बन्धः Sy.

६. श्रवोऽन्नमामिषरूपमात्मन इच्छतः Sy.

७. If VM. does not explain वृजिने by तर्तुमशक्ये, तर्तुमशक्ये is likely to be the paraphrase of असमाने and महति, then वृजिने is ignored by him.

८. उक्तस्यैवार्थस्यातिशयप्रतिपादनार्थेयम् Sy.

९. स्यन्दमाना नदीरिव Sy.

१०. निम्नदेशे Sy.

११. ०स्तवान् P.

१२. हे इन्द्र ! यदि चोदयसे । प्रेरयसि Sy.

१३. क्रोश इति भयनाम । भयमनुलक्ष्य ।

१४. नम० D.

१५. स्वने is suggested for स्वप्ने ॥ आक्रोशे सति Sy.

१६. व० P.
पुनःपुनरावर्तन्ते Sy.

१७. आमिषे मांसे ग्रहीतव्ये सति वयो न यथा श्येनादयः पक्षिणः पुनःपुनरावर्तन्ते तद्वत् । एवम्भूतानश्वान् भयेन क्रोशे सति यदा त्वं प्रेरयसि तदानीमस्मदीयेभ्यश्छर्दिः प्रयच्छेति सम्बन्धः । यद्यप्यृषेर्युद्धे प्रसक्तिर्नास्ति तथापि राजपुरोहितत्वेन राजकीयानां पुरुषाणां जयः प्रार्थ्यत इति न कश्चिद्विरोधः Sy.

१८. ०त्रु स ज० D.

१९. बाहुमूलयोः Sy.

२०. ०त P. कक्ष्यया बद्धाः Sy.

२१. रश्मिः P.
गोरूपे धने जेतव्ये सति Sy.

२२. बन्धो P.

२३. आसन् P. RV. IV. 40.4.

VI. 47.

स्वादुष्किलायं मधुमाँ उतायं तीव्रः किलायं रसवाँ उतायम् ।
उतो न्वस्य पपिवांसमिन्द्रं न कश्चन सहत आहवेषु ॥ १ ॥

स्वादुः । ॥ गर्गो भारद्वाज ॥ प्रथमा निगदसिद्धा ।

अयं स्वादुरिह मदिष्ठ आसु यस्येन्द्रो वृत्रहत्ये ममाद ।
पुरूणि यश्च्यौत्ना शम्बरस्य वि नवतिं नव च देद्योः हन् ॥ २ ॥

अयम् । अयम् । अद्भुतः । इह । मादयितृतमः । भवति । येन । इन्द्रः । वृत्यहत्ये । ममाद ।

---

१. 'स्वादुः' इत्येकत्रिंशदृचं चतुर्थं सूक्तं भरद्वाजपुत्रस्य गर्गस्यार्षम् । 'प्रस्तोक इमु' इत्येषा त्रिष्टुप्, 'दशाश्वान्' इत्यनुष्टुप्, 'दश रथान्' इति गायत्री, 'महि राधः' इति द्विपदा द्व्यृचैकादशका, 'युजानो हरिता' इत्येषा बृहती, 'दिवस्पृथिव्याः' इति जगती, शिष्टास्त्रिष्टुभः । आदितः पञ्चानामृचां सोमो देवता । 'अगव्यूति क्षेत्रम्' इत्यर्धर्चप्रथमपादे देवा उत्तरस्य भूमिस्तृतीयस्य बृहस्पतिश्चतुर्थस्येन्द्रः । 'प्रस्तोकः' इत्याद्याश्चतस्रः सृञ्जयपुत्रस्य राज्ञो दानस्तुतित्वात्तद्देवताकाः । 'वनस्पते वीड्वङ्गः' इत्ययं तृचो रथदेवत्यः । 'उपश्वासय' इति तृचो वुन्दुभिदेवत्यः । 'समश्वपर्णाः' इत्यर्धर्चं ऐन्द्रः । शिष्टा इन्द्रदेवताकाः । तथा चानुक्रान्तम्--'स्वादुरेकत्रिंशद्गर्गः पञ्चावौ सौम्योऽगव्यूत्यर्धर्चो लिङ्गोक्तदेवतः प्रस्तोकः' (KSA. 31.47.p.23.)इति । त्रिष्टुबनुष्टुब् गायत्री द्विपदा साञ्जयस्य प्रस्तोकस्य दानस्तुतिः परौ तृचौ रथवुन्दुभिदेवत्यावैन्द्रो ऽन्त्योऽर्धर्चौ युजानो बृहती दिवस्पृथिव्या जगती । आग्निमारुत आदितश्चतस्रः शंसनीयाः । सूत्रितं च--'स्वादुष्किलायमिति चतस्रो मध्ये जाह्वानम्' (ĀŚS. 5.20.) इति Sy.

२. नर्गो भ० P.

३. ०द्धाः P. अयमभिषुतः सोमः स्वादुरास्वादनीयः किल भवति । उतापि च मधुमान् माधुर्यवांश्चायं सोमो भवति । तथायं सोमस्तीव्रः किल मदोत्पादने तीक्ष्णः खलु भवति । उतापि चायं सोमो रसवान् सारवांश्च भवति । अनेन वाक्यचतुष्टयेन सोमस्य माधुर्यातिशयत्वं च प्रतिपादितम् । उतोपि चास्य सोमस्य । द्वितीयार्थे षष्ठी । इमं सोमं पपिवांसं पीतवन्तमिन्द्रमाहवेषु सङ्ग्रामेषु न कश्चन न कोऽपि सहते, अभिभवति । नु इति पूरकः Sy. सौमीयमृक् । गर्गस्यार्षम् । स्वादुर्मिष्टः किलायं सोम· । मधुमान् मधु स्वादुविशेषस्तद्वान् । उतायम् उतशब्दोऽप्यर्थे । मधुरोऽपि किलायम् । तीव्रशब्दस्तीक्ष्णवचनः कटुवचनो वा । तिक्तरसोऽपि किलायं कटुकरसो वा । रसवान्, भूम्न्यं मतुप् । बहुरसोऽपि किलायम् । उतो नुशब्दश्चार्थे । अपि चास्य, द्वितीयार्थे एषा षष्ठी । तच्छृतेर्वैकदेशमिति वाक्यशेषः । एनं सोमस्य वा सोमस्यैकदेशं स्वांशलक्षणं पपिवांसं पीतवन्तमिन्द्रं न कश्चिदपि सहतेऽभिभवत्याहवेषु सङ्ग्रामेषु SKN. किलेति विद्याप्रकर्षे N.1.5., SKN. I.62–63.

४. सोमः Sy.

५. उद्भू० D. आस्वादितः पीतः सन् Sy.

६. अस्मिन् यज्ञे Sy.

७. अतिशयेन मदयिता Sy.

८. बभूव Sy.

९. यस्य सोमस्य पानेन Sy.

१०. वृत्रहत्यै is suggested for वृत्यहत्यै ॥ वृत्रहननकाले Sy. ११. मत्तो बभूव Sy.

बहूनि । यः[1] । बलानि[2] । शम्बरस्य[3] । विजघान[4] । नव । नवतिम् । च । उपचिताञ्च[5] पुरीः[6] ।

अयं मे पीत उदियर्ति वाचमयं मनीषामुशतीमजीगः ।
अयं षळुर्वीरमिमीत धीरो न याभ्यो भुवनं कच्चनारे ॥ ३ ॥

अयम्[7] । अयम् । मे[8] । पीतः[9] । ससुद्गमयति[10] । वाचम् । अयम्[11] । बुद्धिम् । कामयमानाम्[12] । जागरयति[13] । अयम् । षट् । उर्वी[14], द्यौश्च ञ्च पृथिवी इवेत्यतः । अमिमीत[15] । प्राज्ञः[16] । न । याभ्यः[17] । भूतजातम् । किम्[18] । चिदपि । दूरे[19] भवति[20] ।

अयं स यो वरिमाणं पृथिव्या वर्ष्माणं दिवो अकृणोदयं सः ।
अयं पीयूषं तिसृषु प्रवत्सु सोमो दाधारोर्वन्तरिक्षम् ॥ ४ ॥

अयम्[21] । अयम्[22] । सः[23] । पृथिव्याः । वरिमणम्[24] उरुताम् । अकरोत्[25] । दिवश्च[26] । वर्ष्माणं[27] घनत्वम्[28] ।

---

१. सोमः Sy.
२. च्यौत्नानि बलानि Sy.
३. असुरस्य Sy.
४. नवोत्तरनवतिसङ्ख्याकाः । यः सोमो वि हन् व्यहन्, अयं सोम इति प्रथमपादेन सम्बन्धः Sy.
५. ०ताश्च is suggested for ०ताञ्च ॥ दिग्धा उपचिताः Sy.
६. ०रीम् D. आसुरीः पुरीः । तदीयान् देहान् वा Sy.
७. सोमः Sy.
८. मम Sy.
९. वीतः P. पीतः सन् Sy.
१०. ससुद्गमयतीति P.
ससुद्ग० is suggested for ससुद्ग० ।
उद्गमयति Sy.
११. ०नान् D. कान्ताम् Sy.
१२. उद्गारयति । प्रकाशयति । 'गृ निगरणे' इत्यस्माण्ण्यन्तात्लुङि चङि रूपम् Sy.
१३. ०वि D. उर्वीः is suggested for उर्वी ॥ षण्मोर्वीरंहसस्पान्तु । द्यौश्च पृथिवी चाहश्च रात्रिश्चापश्चोषधयश्चेति प्रतिपादिता द्युपृथिव्याद्याः षट् Sy.
१४ It seems to be redundant.
१५. अमीत P.
निर्मितवान् Sy.
१६. ०ज्ञा P.
धीमान् सोमः Sy.
१७. उर्वीभ्यः Sy.
१८. किञ्चन Sy.
१९. भू P. दूरे is suggested for दू ॥ विप्रकृष्टे देशे Sy.
२०. भवति । अपि तास्वेव सर्वं भूतजातं वर्तते तादृशीरुर्वीर्निर्मितवान् Sy.
२१. The *pratika* is supplied by the Editor.
२२. सोमः Sy.
२३. स खलु Sy.
२४. परिमणम् P. ०माणम् is suggested for ०मणम् ॥ उरुत्वं विस्तृतत्वम् Sy.
२५. ०रो D.
२६. द्युलोकस्य Sy.
२७. वर्ष्मणम् D.
संहतत्वं बृढत्वम् Sy.
२८. घन० P.

अकरोत् सः। अयम्[1]। अयमेव। प्रकृष्टासु[2]। तिसृषु[3]। सारमकरोत्[4] 'त्वमिमा ओषधीः सोम[5] विश्वाः।' इत्युक्तम्। 'गोजा महिषीषु'। इत्यपरम्। सोम एव। धारयति। विस्तीर्णम्। अन्तरिक्षम्।[6]

अयं विदच्चित्रदृशीकमर्णीः शुक्रसंव्रनामुषसामनीके।
अयं महान्महता स्कम्भनेनोद्द्यामस्तभ्नाद्वृषभो मरुत्वान्॥ ५॥

अयं विदत्[7]। अयम्[8]। लभयति लभते वा[9]। चित्रदर्शनम्[10]। उदकम्[11]। शुक्लावासस्थानाम्[12]। अह्नाम्[13]। अनीके[14]। अहोभ्यः पर्जन्यो वर्षति[15]। अयम्[16]। महान्[17]। महतान्तरिक्षाख्येन[18]। स्कन्दनेन[19]। उदस्तभ्नात्[20]। द्युलोकम्। यज्ञप्रवृत्तैर्ऋत्विग्भिस्तद्वानिति[21]।

धृषत्पिब कलशे सोममिन्द्र वृत्रहा शूर समरे वसूनाम्।
माध्यंदिने सवने[22] आ वृषस्व रयिस्थानो रयिमस्मासु धेहि॥ ६॥

धृषत्[24] पिब। ॥ सौम्यः समाप्ताः॥[25] धृष्टम्[26]। पिब। कलशे स्थितम्[27]। सोमम्। इन्द्र! शत्रुहा[28]। शूर! सङ्ग्रामे[29]। वसूनामर्थाय प्रवृत्ते[30]। माध्यन्दिने। सवने[31]। आसिञ्चस्व जठरे[32] सोमम्। गवां

---

१. अयं सोमः स हि भवति Sy.
२. प्रकृष्टास्वेतासु Sy.
३. प्रकृष्टस्तुतिषु P. ओषधीष्वप्सु गोषु च Sy.
४. रसं धारयति Sy.
५. RV. I.91.22. तथा च मन्त्रान्तरम्—त्वमिमा ओषधीः सोम विश्वास्त्वमपो अजनयस्त्वं गाः। त्वमा ततन्थोर्वन्तरिक्षम्। RV.I.91.22. Sy.
६. ०धीत्यपु P.
७. VM. ignores यः।
८. अयम D. ९. वित् P.
१०. सोमः Sy.
११. लम्भ० is suggested for लभ०।
१२. लंभ० D.
१३. विचित्रदर्शनं यद्वाश्चर्यत्वेन दर्शनीयम् Sy.
१४. सर्वस्य प्रेरकं सौरं ज्योतिः Sy.
१५. ०क्लवा० P. शुक्रं निर्मलमन्तरिक्षं सदा सदनं यासां तासाम् Sy. १६. उषसाम् Sy.
१७. प्रमुखे। उषःकाल इत्यर्थः Sy.
१८. वष० P. VM. seems to explain वृषभः by the passage: अहोभ्यः पर्जन्यो वर्षति॥ वृष्टेर्जनयिता। सोमाहुत्या हि वृष्टिर्जन्यते Sy.
१९. प्रवृद्धः Sy. २०. स्थविष्ठेन Sy.
२१. स्कम्भनेन is suggested for स्कन्दनेन॥ स्तम्भनसाधनेन मध्यवर्तिनान्तरिक्षेण Sy.
२२. ऊर्ध्वमस्थापयत्। यथाधो न पतति तथान्तरिक्षं तस्याधारत्वेन कृतवानित्यर्थः Sy.
२३. ०त्तेः ऋ० P. मरुद्भिर्युक्तः Sy.
२४. धृषयत् D.
२५. The passage सौम्यः समाप्ताः refers to the previous five stanzas, therefore it should come immediately after the fifth stanza.
२६. ०ष्टा P. धृष्टं यथा भवति तथा Sy.
२७. द्रोणकलशेऽवस्थितम् Sy.
२८. शत्रा P. वृत्राणामावरकाणां शत्रूणां हन्ता Sy.
२९. हे शौर्यवन्निन्द्र! Sy.
३०. सङ्ग्रामे निमित्तभूते सति Sy.
३१. धनानाम् Sy. ३२. जठरं सोमेन पूरय। सर्वेन्द्रं हि माध्यन्दिनं सवनम् Sy.

रयिस्थानाभूतस्त्वम् । रयिम् । अस्मासु । धेहि ।

इन्द्र प्र णः पुरएतेव पश्य प्र नो नय प्रतरं वस्यो अच्छ ।
भवा सुपारो अतिपारयो नो भवा सुनीतिरुत वामनीतिः ॥ ७ ॥

इन्द्र । इन्द्र ! प्रपश्य । अस्मान् । पुरोगन्तेव । प्रणय च । अस्मान् । अत्यन्तम् । अभ्युदयम् । प्रति । भव । सुष्ठु पारयिता । अस्माकं यस्त्वम् । अतिपारयो भवसि स्तोतॄणाम्, सोपसर्गेविशच्छान्दसः । भव । सुनयनः । अपि । वननीयनयनम् ।

उरुं नो लोकमनु नेषि विद्वान्त्स्वर्वज्ज्योतिरभयं स्वस्ति ।
ऋष्वा त इन्द्र स्थविरस्य बाहू उप स्थेयाम शरणा बृहन्ता ॥ ८ ॥

उरुं नः । उरु विस्तीर्णम् । स्थानम् । अनुनय । अस्मान् । जनन् । अभ्युदययुक्त ।

---

१. ओभू० P. ०नभू० is suggested for ०नाभू० ॥ रयीणां धनानां स्थानभूतस्त्वम् Sy. २. धनम् Sy.
३. धारय Sy. ४. ०न्द्रः P.
५. प्रकर्षेणेक्षस्व यथा मार्गरक्षकः स्वयं पुरतो गच्छन्ननुगच्छतो रक्षणीयान् पथिकान् पश्यति तथा पश्येत्यर्थः Sy. ६. पुरतो गन्तेव Sy.
७. प्रापय Sy. ८. प्रकृष्टतरमतिशयेन Sy.
९. वसीयः श्रेष्ठं धनम् Sy.
१०. आभिमुख्येन Sy. ११. दुःखेभ्यस्तारयिता Sy. १२. अस्मान् स्तोतॄन् Sy.
१३. शत्रूनतिक्रामय Sy.
१४. सोमवसर्गेविशन् घा० P. ०र्गेऽपि शश्छा० is suggested for ०र्गेविशच्छा० ॥ Cf. 'अनुपसर्गाल्लिम्पविन्दधारिपारिवेद्युदेजिचेतिसातिसाहिभ्यश्च' Pa.3.1.138.
१५. शोभननयनश्च Sy. १६. अवि P.
१७. वनीयनयनं P. ०नयनः is suggested for नयनम् ॥ वामानां वननीयानां धनानां नेता भव । यद्वा अस्मदर्थं श्रेष्ठप्रापणो भव Sy.
१८. ऐन्द्रे पशौ 'उरुं नः' इत्येषा वपाया याज्या । सूत्रितञ्च—'उरुं नो लोकमनुनेषि विद्वान् प्र ससाहिषे पुरुहूत शत्रून्' (ĀSS.3.7.) इति । होत्रकैः सदःप्रसर्पणसमयेऽप्येषा जप्या । सूत्रितञ्च—'उरुं नो लोकमनुनेषि विद्वानिति जपन्तः' (ĀSS.5.3.) इति । चातुर्विंशिकेऽहन्यहर्गणेषु च द्वितीयादिष्वहःसु माध्यन्दिनसवनेऽच्छावाकस्यैषा चारम्भणीया । सूत्रितञ्च—'उरुं नो लोकमनुनेषि विद्वानिति कद्वद्भ्य आरम्भणीयाः' (ĀSS.7.4.) इति Sy. शंयोरार्षम् Dur. गर्गस्यार्षम् SKN.
१९. D. adds अपि after उरुम् ।
२०. असम्बाधम् SKN.
२१. स्थानं स्वर्गाख्यम् Sy. अस्मल्लोकं स्वर्गाख्यमिन्द्रलोकाख्यं वा SKN.
२२. अनुगमय Sy. यस्त्वम्... अनुनयसि । स्वेन सुकृतेन कर्मणा गच्छतां गमनानुग्रहे वर्तसे Dur. अनूपूर्वस्य नयतेर्लोटि रूपम् । आनुपूर्व्येण नयेत्यर्थः । पश्चाद् वा मरणस्य मरणोत्तरकालमित्यर्थः SKN. २३. जानन् is suggested for जनन् ॥ जानंस्त्वम् Sy., Dur. जानन् भक्ततामस्माकम् SKN.
२४. ०युक्तम् is suggested for ०युक्त ॥ सुखवत् Sy. आदित्यसमानं प्रकाशेन लोकम् Dur. स्वकादित्यादिवादित्यर्थः । तेन कर्तृभूतेन तद्वदादित्यकर्तृकमित्यर्थः SKN.

विनाशरहित[1]। द्योतमानम्[2]। अभयं[3] च[4] प्रापय। दर्शनीयौ[5]। तव[6]। इन्द्र! स्थविरस्य[7]। बाहू[8]! वयमुपस्थेयाम[9] समाश्रिता[10] भूत्वा। हिंसकौ[11]। महान्तौ[12]।

वरिष्ठे न इन्द्र वन्धुरे धा वहिष्ठयोः शतावन्नश्वयोरा।
इषमा वच्चीषां वर्षिष्ठां मा नस्तारीन्मघवन्नायोः अर्यः॥ ९॥

वरिष्ठे[13]। उरुतमे[14]। अस्मान्। रथस्य। फलकसघाटे[15]। धारय[16]। तथा वोढृतमयोः[17]। अश्वयोः[18]। च[19]। शतधन! शतप्रज्ञान! वा[20]। अन्नम्[21]। आवह[22]। अन्नानाम्[23]। वर्षीष्ठम्[24]। मा[25]। अस्माकम्। हिंसीः[26]। धानानि[27]। स्वामी[28]।

इन्द्र मृळ मह्यं जीवातुमिच्छ चोदय धियमयंसो न धाराम्।
यत्किं चाहं त्वायुरिदं वदामि तज्जुषस्व कृधि मा देववन्तम्॥ १०॥

इन्द्र मृळ। इन्द्र! सुक्षय[30] माम्। मह्यम्। जीवनम्[31]। इच्छ[32]। चोदय[33] मयि। त्वदीयां बुद्धिम्।

---

१. रहितम् is suggested for रहित॥ क्षेमेण Sy. स्वस्त्ययनाय Dur. अविनाशइत्येवार्थः SKN.
२. ज्योतिश्च अस्माननुगमय Sy. ज्योतिर्लोकविशेषणं वा। लिङ्व्यत्ययेन स्वर्वन्तं सर्वेणाभिलषितेनार्थेन तद्वन्तं लोकम् SKN.
३. भयरहितम् Sy.
४. अस्माननुगमय Sy.
५. ०यो P. ऋज्वावंतौ रेषणौ शत्रूणाम् Dur. ऋज्वो महन्नामैतत्। महान्तौ प्रभावतो रेषणौ वा SKN. ६. सम्बन्धिनौ Sy.
७. स्थूलस्य वृद्धस्य Sy. महतः Dur., SKN.
८. त्वदीयौ हस्तौ Sy. हस्तौ Dur. बाहू यौ तयोः SKN. ९. यम् P.
१०. रक्षकतया उपतिष्ठेम। सेवेमहि Sy. उपतिष्ठेमेत्येतदाशास्महे Dur. उपसमीपे स्थेयाम तिष्ठेम तव समीपे निवसेमेत्याशास्महे। स्तुतिर्वोपस्थानम्। तव बाहू स्तुयामेत्यर्थः। बाहूपस्थानेन च तद्वत उपस्थानं लक्ष्यते SKN.
११. शरणौ रक्षकौ Sy. शरण्यावाश्रयणीयौ नित्यम् Dur. कीदृशौ? शरणा—'शृ हिंसायाम्' शरितारौ शत्रूणां शरण्यौ वा SKN.
१२. सर्वत्राकारो द्विवचनस्य स्थाने। महान्तौ प्रमाणतः SKN. अथापि पौरुषविधिकैरङ्गैः संस्तूयन्ते। 'ऋष्वा त इन्द्र स्थविरस्य बाहू' SKN. N.7.6., SKN. III.4.
१३. ०ष्ठो P. १४. उरुतमे विस्तीर्णतमे Sy.
१५. ०का० P. आत्मीये रथे Sy.
१६. धेहि। धारय Sy.
१७. ०तयोः P. १८. त्वदीययोरश्वयोः Sy.
१९. आकारः समुच्चये Sy.
२०. हे शतसङ्ख्यधनेन्द्र! Sy.
२१. ०ज्ञावह P.
२२. अस्मदर्थमावह। आनय Sy.
२३. अन्नानां मध्ये Sy.
२४. अन्नानन्वर्षिम् P. वर्षिष्ठम् is suggested for वर्षीष्ठम्॥ वृद्धतमामिषमन्नम् Sy.
२५. मह P. २६. हिंसीत् Sy.
२७. धनानि is suggested for धानानि।
२८. धनस्य स्वामी अन्यः कश्चित् Sy.
२९. VM. ignores इन्द्र and मघवन्। हे धनवन्निन्द्र! Sy.
३०. मृळय, अस्मान् सुक्षय Sy.
३१. जीवनौषधम् Sy. ३२. वातुमिच्छ Sy.
३३. ०यं P. स्तुतिविषयां कर्मविषयां वा प्रेरय। तीक्ष्णीकुरु Sy.

असः । इव । धारां तीक्ष्णाम् । यत् । किम् । च । अहम् । त्वत्काम. । इदम् । वदामि स्तोत्रम् । तत् । जुषस्व । कृधि । माम् । ईश्वरवन्तम् ।

उत्तरास्तिस्रो निगदसिद्धा ।

त्रातारमिन्द्रमवितारमिन्द्रं हवेहवे सुहवं शूरमिन्द्रम् ।
ह्वयामि शक्रं पुरुहूतमिन्द्रं स्वस्ति नो मघवा धात्विन्द्रः ॥ ११ ॥

[त्रातारमिन्द्रम् ।]

---

१. अयोमयस्य खड्गादेः Sy.

२. सा यथा सूक्ष्मा तद्वत्सूक्ष्मविषयां धियं चोदयेत्यर्थः Sy.

३. किञ्चन समीचीनमसमीचीनं वा Sy.

४. त्वामात्मन इच्छन् Sy.

५. इदानीम् Sy. ६. कुरु Sy.

७. रक्षकैर्देवैरुपेतम् Sy.

८. आयुकामेष्टयामिन्द्रस्य त्रातुः 'त्रातारम्' इत्यनुवाक्या । सूत्रितञ्च—'त्रातारमिन्द्रमवितारमिन्द्रं मा ते अस्यां सहसावन् परिष्टौ' (ĀSS. 2.10.) इति Sy.

९. The *pratīka* is supplied by the Editor. VM. does not explain the following three stanzas. Sy. explains this stanza in the following manner:—

त्रातारं शत्रुभ्यः पालयितारमिन्द्रमाह्वयामि । तथावितारं कामैस्तर्पयितारमिन्द्रमाह्वयामि । हवे हवे सर्वेष्वाहवनेषु सुहवं सुखेनाह्वातुं शक्यं शूरं शौर्यवन्तं शक्रं सर्वकार्येषु शक्तं पुरुहूतं पुरुभिर्बहुभिः पालनार्थमाहूतमेवंविधमिन्द्रं ह्वयामि आह्वयामि । एवमाहूतो मघवा धनवान् स इन्द्रः स्वस्त्यविनाशं नोऽस्मभ्यं धातु ददातु, यद्वा अस्माकं विदधातु ॥

त्रातारं रक्षितारमिन्द्रमवितारं प्रीणयितारमिन्द्रम् । हवे हवे आह्वान आह्वाने यज्ञे वा सुहवं सुखेन हूयत आहूयत इति सुहवं शूरम् । शक्रं शक्नोति शक्रस्तं समर्थम् । पुरुहूतं पुरुभिर्बहुभिर्हूयते पुरुहूतस्तं बहुभिराहूतम् । ईदृशमिन्द्रं ह्वयामि आह्वयामि । मघवा धनवानिन्द्र आहूतः सन्नोऽस्माकं स्वस्ति, अविनाशं धातु दधातु करोतु । विकरणव्यत्ययः । इन्द्रशब्दावृत्तिरादरार्था Mah.

त्रातारं रक्षितारमिन्द्रं यतः कथयन्ति । अवितारं च यत इन्द्रं कथयन्ति । हवे हवे सुहवम् । आह्वान आह्वाने शोभनाह्वानमिन्द्रं कथयन्ति । शूरं विक्रान्तमिन्द्रं यतः कथयन्ति जनाः । अतो ह्वयामि शक्रं शक्तमिन्द्रं तमहम् । पुरुहूतं बहुभिराहूतम् । स चाहूतः सन् । स्वस्ति नोऽविनाशमस्माकं मघवा धनवान् धातु दधात्विन्द्रः U.

इदि परमैश्वर्ये, इन्द्रः । ऐश्वर्यहेतून् बहून् दर्शयति—त्रातारमवितारं देवानाम् । तस्मादिन्द्रव्यपदेशभाजम् । हवे हवे सुहवं सर्वेष्वाह्वानेषु सुखेन ह्वातव्यं निर्भयैः ।....शूरं महाबलं सर्वजेतारं तथाप्याहूतमात्र एवागच्छन्तमिन्द्रमितोपीन्द्रशब्दाभिधेयं शक्रं सर्वार्थसाधनशक्तं पुरुहूतं बहुभिर्यजमानैराहूतम् । अतोऽप्यासादितेन्द्रत्वं देवेश्वरं हुव आह्वयामि । शपो लुक् । ....नु इति पादपूरणे । स मघवा प्रशस्तैर्धनैरन्नादिभिर्हविरादिभिश्च तद्वान् । अतश्चेन्द्रपदाभिधानार्हो नोऽस्मभ्यं स्वस्ति, अविनाशं धातु ददातु । शपो लुक् । ....यद्वा पुरुषु स्थानेषु हूतः पुरुहूतः ।. .. अत्र पुनः पुनरिन्द्रोक्तिरस्माकं सर्वार्थेषु त्वामेव शरणं नान्य इत्यादरसूचनार्था BB.

This stanza=YV.20.50=TS.1.6.12.5.

इन्द्रः सुत्रामा स्ववाँ अवोभिः सुमृळीको भवतु विश्ववेदाः ।
बाधतां द्वेषो अभयं कृणोतु सुवीर्यस्य पतयः स्याम ॥ १२ ॥

[इन्द्रः सुत्रामा ।][1]

तस्य वयं सुमतौ यज्ञियस्यापि भद्रे सौमनसे स्याम ।
स सुत्रामा स्ववाँ इन्द्रो अस्मे आराच्चिद्द्वेषः सनुतर्युयोतु ॥ १३ ॥

[तस्य वयम् ।][2]

---

१. The *pratīka* is supplied by the Editor. सुत्रामा सुष्ठु त्राता स्ववान् धनवान् स इन्द्रोऽवोभी रक्षणैः सुमृळीकः सुष्ठु सुखयिता भवतु । तथा च विश्ववेदाः सर्वधनः सर्वविद्वान् वा स इन्द्रो द्वेषो द्वेष्टॄन् शत्रून् बाधताम् हिनस्तु । अभयं भयरहितं चास्माकं कृणोतु करोतु । वयं च तत्प्रसादात् सुवीर्यस्य शोभनवीर्यस्य पतयः स्याम भवेम Sy.

इन्द्रः अवोभिरन्नैः सुमृडीकः शोभनसुखकारी भवतु । शोभनं मृडीकं सुखं यस्मात्स सुमृडीकः । कीदृश इन्द्रः ? सुत्रामा सुष्ठु त्रायते रक्षति सुत्रामा ।.. स्ववान् स्वं धनमस्यास्तीति स्ववान् ।... विश्ववेदा विश्वं सर्वं वेदो धनं यस्य सः । स चेन्द्रो द्वेषो दौर्भाग्यं बाधतां निवर्तयतु । अभयं च कृणोतु करोतु । किञ्च, इन्द्रप्रसादाद् वयं सुवीर्यस्य धनस्य पतयः स्वामिनः स्याम भवेम । शोभनाश्च ते वीराश्च सुवीराः पुत्रादयः, तेभ्यो हितं सुवीर्यं तस्य Mah. इन्द्रः सुत्रामा इन्द्रः साधुत्राणः स्ववान् धनवान् । अवोभिरन्नैः सुमृडीकः शोभनसुखकारी भवतु । विश्ववेदाः सर्वधनः । बाधतामपगमयतु द्वेषो दौर्भाग्यम् । अभयं कृणोतु करोतु । त्वत्प्रसादाच्च सुवीर्यस्य धनस्य पतयः स्याम U.

This stanza=YV.20.51.

२. The *pratīka* is supplied by the Editor. यज्ञियस्य यज्ञार्हस्य सुमतौ शोभनायामनुग्रहात्मिकायां बुद्धौ वयं स्याम । तद्विषयभूता भवेम । तथा भद्रे कल्याणे सौमनसे सुमनसो भावेऽपि तदीये स्याम । भवेम । स इन्द्रोऽस्मास्वनुग्रहात्मिकां बुद्धिं सौमनस्यं च करोत्वित्यर्थः । सुत्रामा सुष्ठु त्राता स्ववान् धनवान् स इन्द्रश्चास्मे अस्मत्त आराच्चित् दूरदेश एव द्वेषो द्वेष्टून् सनुतः, अन्तर्हितनामैतत् । अन्तर्हितान्युयोतु । पृथक्करोतु Sy. गर्गस्य भारद्वाजस्यार्षम् । ..तस्येन्द्रस्य यज्ञियस्य यज्ञार्हस्य वयं सुमतौ शोभनेऽध्यवसाये स्याम । अपि चास्य भद्रे भन्दनीये स्तुत्ये । सौमनसे शोभनसङ्कल्पे मनसि नित्यमेव स्याम । स सुत्रामेन्द्रः स्ववान् धनवान् अस्मे, अस्मत्, आराच्चिद् दूरतरमपनीय । द्वेषो, द्वेषं पापं ततः सनुतः स्वन्तर्हितं कृतं यथा तं न पश्येम । तथा युयोतु नाशयत्वित्यर्थः । एवमत्र द्वेषः, इत्यनेन सम्बन्धात्, 'अस्मे' इत्यस्य, अस्मदित्येवं पञ्चम्या विपरिणाम उपपद्यते Dur. तस्य वयं सुमतौ शोभनायां मतौ पालनबुद्धौ । यज्ञियस्य यज्ञार्हस्य । किम् ? स्यामेति, यत् परस्तात् क्रियापदम् । न च केवलायां सुमतौ, किं तर्हि ? अपि भद्रे कल्याणे । सौमनसे, शोभनं मनस्सुमनस्तदेव सौमनसम् । किं पुनस्तत् ? दानबुद्धिः । तत्रापि वयमेव स्याम । पालनबुद्धिषु वयं पाल्या दानबुद्धिषु च सम्प्रदानभूता वयमेव स्यामेत्यर्थः । किञ्च सुत्रामा शोभनस्त्राता स्ववान् धनवानात्मवान् वा । इन्द्रोऽस्मे, अस्मद् अस्मत्त इत्यर्थः । आराच्चित्, आराच्छब्दो दूरवचनः । चिदप्यर्थे । दूरे, अपिशब्दात् सन्निकृष्टेऽपि । यद् द्वेषो द्वेष्यं वाऽस्माकं रक्षआदि । सनुतः, अन्तर्हितनामैतत् । युयोतु पृथक्करोतु, अपनयत्वित्यर्थः SKN.

'अस्मे आराच्चिद् द्वेषः सनुतर्युयोतु' अस्मदित्यर्थः N.6.7., SKN. II. 412.

अव त्वे इन्द्र पृवतो नोर्मिर्गिरो ब्रह्माणि नियुतो धवन्ते ।
उरू न राधः सवना पुरूण्युपो गा वज्रिन्युवसे समिन्दून् ॥ १४ ॥

अव त्वे । अवधवन्ते पतन्ति । त्वयि । इन्द्र ! प्रवणात् । इव । उदकम् । स्तोत्रशस्त्राणि । नियुत इव शीघ्रवेगाः । बहु । च । अन्नम् । सवननानि च । बहूनि धावन्ते । स त्वं यजमानैरभिष्टूयमाणानिन्दून् । उदकानि । गाश्च । सम्मिश्रयसि यजमानेभ्य इत्यर्थः ।

क ईं स्तवत्कः पृणात्को यजाते यदुग्रमिन्मघवा विश्वहावेत् ।
पादाविव प्रहरन्नन्यमन्यं कृणोति पूर्वमपरं शचीभिः ॥ १५ ॥

क ईम् । कः । एनम् । स्तोतु शक्नुयात् । को वास्मै । प्रयच्छति । को वा । यजते । यदयम् । उद्गूर्ण लोके कञ्चिदपि विद्यमान शत्रुम् । सर्वदा शीघ्रम् । वेत्ति । यच्च पादाविव । गमनवेलायां प्रहरन् ।

---

१. अप D.
२. ०धनवन्ते P. अवगच्छन्ति Sy.
३. ०ति P.
४. त्वाम् Sy.
५. त्वदी P.
६. तत्र वृष्टान्तः । प्रवणदेशानिव । यथोच्छ्रितात्स्थलाग्निम्नदेशं शीघ्रं गच्छति तद्वत् Sy.
७. जलसङ्घः Sy.
८. गिरः उक्थात्मिका वाचः, ब्रह्माणि सामरूपाणि स्तोत्राणि च Sy.
९. स्तोतुः Sy.
१०. उरूणि Sy.
११. नशब्दः समुच्चये Sy.
१२. राधांसि हविर्लक्षणानि धनानि Sy.
१३. सवनानि is suggested for संवननानि ॥ सवनानि बहवोऽभिषुताः सोमाश्च Sy.
१४. त्वामेवाभिगच्छन्ति Sy.
१५. ०माणाद् P. ०मानान् is suggested for ०माणान् ।
१६. इन्वुन् D. सोमांश्च Sy.
१७. वसतीवर्याख्याः Sy.
१८. गोविकारान् भृतदध्यादीन् श्रपणार्थान् Sy.
१९. सम्यक् मिश्रयसि । त्वां यष्टु वसतीवरीभिरभिषुत्य तं सोममार्शिरादिभिः श्रपणद्रव्यैः संस्कुर्वन्तीत्यर्थः Sy.
२०. VM. ignores वज्रिन् ॥ हे वज्रवन्निन्द्र! Sy.
२१. ई P., D.
२२. स्तोता Sy.
२३. इन्द्रम् Sy.
२४. स्तुयात् । स्तोतुं शक्नुयात् Sy.
२५. एनम् Sy.
२६. ०न्ति D. प्रीणयेत् Sy.
२७. एनं हविर्भिर्यजेत Sy.
२८. यस्मादयम् Sy.
२९. आत्मानं जानाति । सर्ववोग्र एव भवति तस्मात् कारणात् न कोऽप्येनं स्तोतुं प्रीणयितुं यष्टुं वा शक्नोतीति भावः Sy.
३०. तत्र वृष्टान्तः । यथा Sy.
३१. यथा पादौ प्रहरन् मार्गे प्रक्षिपन् पुरुषः करोति तद्वत् Sy.

अन्यमन्यम् । करोति । पूर्वं पादमपरम् । अपरं च पूर्वम् करोति । कर्मभि. भूयो भूय आश्चर्याणि कर्माणि करोति, तस्मान्न स्तोतुमयं शक्यः इति ।

शृण्वे वीर उग्रमुग्रं दमायन्नन्यमन्यमतिनेनीयमानः ।
एधमानद्विळुभयस्य राजा चोष्कूयते विश इन्द्रो मनुष्यान् ॥ १६ ॥

शृण्वे वीर । श्रूयते । वीरः । उग्रमुग्रं शत्रुम् । नमयन् । अन्यमन्य च । अतिगच्छति, अन्तमति-गच्छन् । एधमानानां मनुष्याणां द्वेष्टाऽऽत्मव्यतिरिक्तानामसुन्वतामिति यास्क. । उभयस्य दिव्यस्य च पार्थि-

---

१. ०मन्य P. परस्परव्यतिहारेण Sy.
२. यः प्रथमभावी मुख्यः स्तोता तं जघन्यं करोति । यश्च जघन्यः स्तोता तं मुख्यं करोति । एतदादिकेन पञ्चचर्चेनेन्द्रस्यातिस्वातन्त्र्यं प्रतिपाद्यते Sy.
३. प्रथमभाविनं सन्तं स्तोतारमपरम् Sy.
४. पश्चाद्भाविनम् Sy.
५. इतोऽपि स्तुत्यादेरविषय इत्याह—यस्माद् आत्मीयाभिः प्रज्ञाभिः Sy.
६. तस्मान्न स्तोमस्तोतुमशक्यम् P.
७. VM. ignores इत् and मघवा ॥ इद् एव । धनवानिन्द्रः Sy.
८. शण्वे P. गर्गस्य बार्हस्पत्यस्यार्षम् Dur. गर्गस्यार्षम् SKN.
९. पिरा D.
१०. अश्रौषमहम् Dur. श्रुणोतेर्व्यत्ययेनात्मनेपदोत्तमैकवचनम् । शब्विकरणः, कर्मणि लट् प्रथमैकवचनस्य स्थाने । श्रूयते प्रख्यायत इत्यर्थः SKN.
११. वीरो वीर्यवानिति Sy. वीरमिन्द्रम् Dur. शूरः SKN.
१२. उद्गूर्णमुद्गूर्णं बलिनं शत्रुं प्रति Sy. उद्गूर्णवज्रम् । आदरार्थो द्विरभ्यासः । आदरे चार्थभूयस्त्वम् । इति हि वक्ष्यति । अथवा—उग्रं शत्रुं प्रत्युद्गूर्णवज्रम् Dur. किं कुर्वन् ? उच्यते.. यावान् कश्चिदुग्रोऽप्रसह्यश्शत्रुस्तं सर्वम् SKN. 'अभ्यासे भूयांसमर्थं मन्यन्ते' N.10.42.
१३. दमः दमनम् । बाधनमिच्छन् Sy. दमयितारं शत्रूणाम् Dur. दमयन् SKN.
१४. प्रथमं नेतव्यमन्यं पश्चान्नेतव्यं चान्यं पूर्वमपरं परस्परव्यतिहारेण स्तोतॄन् Sy. कथं पुनरश्रौषमिति ? अन्यमन्यं देवताविशेषम् Dur. अन्यमन्यं चात्मनः स्तोतारम् SKN.
१५. अत्यन्तं पुनः पुनर्नयन् Sy. अतिशयेन स्वाभीष्टेनैव कामेन तुष्टूषया 'अमुष्मात् सुतात् कामान्प्रेप्सथ' इत्येवं पुनः पुनर्नीयमानः Dur. अतिशब्दः पूजायाम् । अतिपूजितं शोभनमर्थं नयन् । किम् ? सामर्थ्यात्समृद्धिम् । सर्वं च स्तोतारमात्मनः समृद्धं कुर्वन्नित्यर्थः SKN.
१६. वर्धमानानामसुन्वताम् Sy. किंलक्षणं पुनर्वीरमश्रौषमिति ? . .दीप्यमानानपि द्वेष्टि, असुन्वतः सोमाभिषवमकुर्वाणानयज्वन इत्यर्थः । अत एव वैपरीत्येन 'सुन्वतोऽभ्यावधाति' इत्यध्याजहार भाष्यकारः । क्व पुनरावधाति ? 'सुकृतस्य लोके' इति सामर्थ्याद् गम्यते । ये हि सुन्वते त इष्टा इन्द्रस्य, ये न सुन्वन्ति ते द्वेष्या इत्यभिप्रायः Dur.
ऋध्यतो द्वेष्टा । किं सर्वेषाम् ? न, किं तर्हि ? अयष्टॄन् SKN.
१७. असुरन्वताम् P. Cf. N. 6.22.
१८. दिव्यस्य च धनस्येश्वरः पार्थिवस्य च मानुषस्य च Dur. कुत एतत् ? सामर्थ्याद्उभयस्य दिव्यस्य पार्थिवस्य च धनस्य SKN.
१९. Omitted by P.

वस्य च धनस्य । ईश्वरः[1] । अत्यन्तमाह्वयति[2] । विशः[3] । इन्द्रः । मनुष्यान्[4] 'एधमानानसुन्वतो व्युदस्यति[5]' इति यास्कः ।

परा[6] पूर्वेषां सख्या वृणक्ति वितर्तुराणो[7] अपरेभिरेति ।
अनानुभूतीरवधून्वानः[8] पूर्वीरिन्द्रः शरदस्तर्तरीति ॥ १७ ॥

परा[9] । परा । पूर्वेषां संस्तुतानामपि सम्प्रत्ययजमानानाम् । सख्यानि[10] । इन्द्र. परिमार्ष्टि[11] । तथा वृत्राणि वितरन्[12] । अन्यैरधुना यजमानैः[13] । सख्यं गच्छति[14] । आनुकूल्यमगच्छन्तीः[15] प्रजाः । अवधून्वानः[16] । बह्वीः । इन्द्रः[17] । शरदो[18] यजमानानाम् । अत्यन्तं तरति[19] ।

रूपंरूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय ।
इन्द्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य हरयः शता दश ॥ १८ ॥

रूपं रूपम् । तत्तद्रूपमिन्द्रः[20] । भावयति[21] । प्रतिरूपं प्रतियजमानं यो रूपमादत्ते स तथोक्तः । तत् ।

---

१. रक्षणार्थं पुनःपुनराह्वयति Sy. व्युदस्यति यः ... एवमत्र एधमानद्विड्, इत्यनेन सम्बन्धाच्चोत्कूयतिर्व्युदसनार्थ इत्युपपद्यते Dur. स्कुनातिरत्र व्युदसनार्थे । अत्यन्तं व्युदस्यति निराकरोति SKN.

२. निवेशयितॄन् स्वस्य परिचारकान् Sy. एधमानानसुन्वतः Dur. कीदृशान् ? विशः 'विश प्रवेशने' अनुप्रविष्टानात्मीयभूतानाश्रितान् इत्यर्थः SKN.

३. इतरांश्च सुन्वतो मनुष्यानभ्यादधाति सुकृतस्य लोक इति Dur. किं सर्वान् ? न, किं तर्हि ? ऋद्धानयष्टॄन् । कुत एतत् ? एधमानद्विडिति वचनाद् द्विष्यमाणस्य च व्युदस्यमानत्वात् SKN. ४. ०ते D.

५. एधमानाप्युद० P. N.6.22. reads व्युदस्यति । एधमानानहर्द्वेष्टयसुन्वतः । सुन्वतोऽभ्यादधाति । उभयस्य राजा । दिव्यस्य च पार्थिवस्य च । चोष्कूयमाण इति चोष्कूयतेश्चर्करीतवृत्तम् N.6.22., SKN.II.468.

६. ०राः P.

७. पूर्वभाविनां प्रशस्तानां कर्मणां कुर्वतां पुरुषाणाम् Sy. ८. सखित्वानि Sy.

९. वर्जयति Sy.

१०. वितन् P. तान् हिंसन् Sy.

११. अमुष्मैरपरैरप्रशस्तैरपि कर्मानुष्ठातृभिः Sy.

१२. प्राप्नोति Sy.

१३. अपरिचरणाः प्रजाः Sy.

१४. परित्यजन् Sy. १५. अयमिन्द्रः Sy.

१६. ०वे D. संवत्सरान् Sy.

१७. भृशमतिक्रामति । स्तोतृभिः सह सख्यं कुर्वन् चिरकालं वसतीत्यर्थः Sy.

१८. तत्सद्रू० P. अग्न्यादिदेवतास्वरूपम् Sy.

१९. धारयति P. प्राप्नोति । 'भू प्राप्तौ' इति धातुः । इन्द्रः स्वमाहात्म्येन तत्तद्देवतारूपो भवति Sy.

२०. व्रतिरूपः व्रतीय० P. रूपाणां प्रतिनिधिः सन् Sy. २१. प्राप्तमग्न्यादिदेवतास्वरूपम् Sy.

अस्य[1] । रूपम्[2] । प्रतिदर्शनाय[3] भवति । तदेवाह--इन्द्रः[4] । कर्मभिः[5] । बहुरूपः[6] । गच्छतीति[7] तदनुरूपम् । अस्य[8] । अश्वाः[9] । दश, शतानि--सहस्र[10] युक्ताः[11] भवन्तीति ततः सर्व एव मन्यते[12] मा प्रन्युदगादित्यनेनैतत् समानमिति[13] ।[14]

युजानो हरिता रथे भूरि त्वष्टेह राजति ।
को विश्वाहा द्विषतः पक्ष आसत उतासीनेषु सूरिषु ॥ १९ ॥

युजानः । युञ्जानः[15] । हरितावश्वौ । रथे । अत्यन्तम्[16] । दीप्तः[17] । इह[18] । राजति[19] । क इन्द्रव्यतिरिक्तः । शत्रोः । पक्षे[20] । सर्वदा शत्रुमध्ये । आस्ते[21] । अपि च । आसीनेषु[22] । स्तोतृषु[23] ।

---

१. इन्द्रस्य Sy.
२. तथोत्तस्य रूपः P.
३. प्रतिनियतदर्शनायायमग्निरयं विष्णुरयं रुद्र इत्येवमसङ्कीर्णदर्शनाय Sy.
४. तमेवा० D. ५. अयमिन्द्रः Sy.
६. ज्ञानैरात्मीयैः सङ्कल्पैः Sy. मायेति प्रज्ञानाम Ngh.3.9.
७. बहुविधशरीरः सन् Sy.
८. इति is omitted by P. बहून् यजमानान् गच्छति Sy.
९. ननु द्वावेवास्याश्वावेकश्च रथः कथमनेन युगपद्बहून् गच्छतीत्याह । इन्द्रस्य Sy.
१०. ०पस्य श्वाः P. ०पस्याश्वाः D.
११. ०ल्रम् is suggested for ०ल्र ॥ दशसहस्रसङ्ख्याकाः अपरिमिताः Sy.
१२. रथे योजिताः Sy.
१३. P. reads तस्मा एव मन्य सर्वतो P.
१४. VM. ignores हि । यस्मादेवं तस्माद्बहुशरीराणि स्वीकृत्य युगपद्विष्वमतो यजमानान् गच्छतीत्यर्थः । अन्ये मन्यन्ते । 'इदि परमैश्वर्ये' इत्यस्य धातोरर्थानुगमादिन्द्रः परमात्मा । स चाकाशवत् सर्वगतः सदानन्दरूपः । स एवोपाधिभिरन्तःकरणैः प्रतिशरीरमवच्छिन्नः सन् जीवात्मेति व्यपदिश्यते । स एवानादिमायाशक्तिभिर्विषयदादिजगदात्मना विवर्तते शब्दादिविषयहरणशीला इन्द्रियवृत्तयश्च तेनैव सम्बद्धाः । एतत् सर्वं तस्य परमात्मनो यद्वास्तवं रूपं तस्य दर्शनायेति । अयमर्थोऽनया प्रतिपाद्यते । रूपंरूपम् । रूप्यत इति रूपं शरीरादि । प्रतिशरीरं चिद्रूपः सर्वगतः परमात्मा प्रतिरूपः प्रतिबिम्बरूपः सन् सर्वाणि शरीराणि बभूव । प्राप्नोत् । तञ्च प्राप्तं प्रतिबिम्बरूपमस्य परमात्मनः प्रतिचक्षणाय प्रतिनियताकारस्य दर्शनाय भवति । स चेन्द्रः परमेश्वरो मायाभिर्मायाशक्तिभिः पुरुरूपो वियदादिभिर्बहुविधरूपैरुपेतः सन् ईयते । चेष्टते । एतदप्यस्य परमात्मनः प्रतिचक्षणाय भवति । अस्य च दश शता सहस्रसङ्ख्याका हरय इन्द्रियवृत्तयो युक्ता विषयग्रहणायोद्युक्ताः सन्ति । तदप्यस्य वास्तवरूपस्य दर्शनाय भवतीति । एवं स्थूलसूक्ष्मशरीरयोर्वियदादिमहाप्रपञ्चस्य च तत्त्वज्ञानहेतुत्वमनया प्रत्यपादीति Sy.
१५. ०ना P., D. युञ्जन् Sy.
१६. भूरिषु बहुषु प्रदेशेषु Sy.
१७. इन्द्रः Sy. १८. त्रैलोक्ये Sy.
१९. राजेति P. दीप्यते Sy.
२०. इन्द्रादन्यः को नाम ? Sy.
२१. पाचको बाधकः सन् Sy.
२२. इन्द्र एव सर्वदा शत्रून् बाधत इत्यर्थः । यद्वा पक्ष इति सकारान्तं समीपवचनम् । इन्द्रादन्यः को नाम द्विषतः शत्रोः समीप आसते । आस्ते । इन्द्र एव निर्भयः सन् शत्रुसमीपे स्थातुं शक्नोतीति भावः Sy. २३. आसीनेषु सत्सु Sy.
२४. अस्मादृशेषु Sy.

अगव्यूतिं क्षेत्रमागन्म देवा उर्वी सती भूमिरंहूरणाभूत्।
बृहस्पते प्र चिकित्सा गविष्टावित्था सते जरित्र इन्द्र पन्थाम् ॥ २० ॥

[1]अगव्यूति। गोमार्गहरन्तं गुप्तम्। [2]क्षेत्रम्। [3]आगच्छेम। देवाः! विस्तीर्णा। सती। भूमिः। [4]अस्माकमभिगन्तव्या। [5]भवतु। बृहस्पते! [6]तं त्वं चास्मान्। गवामन्वेषणे। [7]प्रजानीहि। त्वं चेन्द्र! सत्यमेव। [8]स्तोत्रे मह्यम्। [9]पन्थानं कुरु। [10]शौनक.—

[11]अगव्यूतिरथ स्तौति देवान् [12]वादौ भूमिमथोत्तरम्।
बृहस्पतिं तृतीयस्तु [13]इन्द्र एवोत्तरे [14]स्तुतयः॥ इति॥

---

१. अ।० D. अत्रोक्तम्।
अरण्ये निर्जने गर्गो देवान् भूमिं बृहस्पतिम्। इन्द्रं चास्तौत्स्वरक्षार्थमृचा मार्गच्युतोऽनयेति।१। Sy.
अत्राख्यानम्—
अगव्यूतीत्यत्र पादे देवान्भूमिं तथोत्तरे।
बृहस्पतिं तृतीये तु इन्द्र एवोत्तमे स्तुतः ॥२॥
'अगव्यूत्यर्धर्चो लिङ्गोक्तदेवतः' इत्यनुक्रमणी (KSA. 31. 47. p. 23.)। गर्गस्त्रिष्टुभा देवांस्तुष्टाव DDN.

२. ०र्गरहितम् is suggested for ०र्गहरन्तम्॥ अगोचरं गोसञ्चाररहितं निर्जनम् Sy. अगोचरं गोसञ्चाररहितम् DDN.

३. देशम् Sy., DDN.

४. आगताः स्मः। अतो मां रक्षतेति शेषः Sy., DDN.

५. ०मिमास्मा० P.

६. ०तव्यं P. अंहव आहन्तारो दस्यवः। तेषाम्, रमणा रमयित्री Sy. अंहूरणा अंहस्विनी अतिभययुक्ता, अतः पापरूपाभूत्, सा रम्या भूत्वाऽस्मान् रक्षतु DDN. अंहुरोऽहस्वान् अंहूरणमित्यप्यस्य भवति N.6.27.

७. भवति। अस्मानतः सापि रक्षतु Sy.

८. Omitted by P. तत् is suggested for त।

९. गवामन्वेषण उपाये Sy.
उपाये DDN.

१०. प्रवेदय Sy. 'चिकित्सा' इति एकावशिनोः (RPR. 8. 26.) इत्यष्टमोक्षरः प्लावितः। गवाष्टाविति ओष्ठयोन्योर्भुग्नमनोष्ठ्ये (RPR. 2. 31.) इत्याविना अनोष्ममत्वाद् वकारागमः DDN.

११. अनेन प्रकारेण Sy. इत्थमनेन प्रकारेण सते भवते दुःखमनुभवते DDN.

१२. मार्गं प्रज्ञापय Sy.

१३. VM. ignores सते॥ भवते दुःखमनुभवते Sy.

१४. ०तिथ P. Omitted by BD.

१५. वादौ is redundant.

१६. बहुस्पतिं तृतीयस्त्वमिन्द्रम् P. ०स्पतिं तृतीयं तमिन्द्रम् D.

१७. स्तुतः is suggested for स्तुतयः॥ BD. reads 'इन्द्रमेवोत्तमं पदम्॥ BD. V.123.

दिवेदिवे सदृशीरन्यमर्धं कृष्णा अभेधदप सद्मनो जाः ।
अहन्दासा वृषभो वस्नयन्तोदव्रजे वर्चिनं शम्बरं च ॥ २१ ॥

दिवेदिवे । दिने दिने । सदृशरूपाम् । अन्यम् । अर्धं यस्मिन्नहन्यहानि वर्तन्ते ततोऽन्यमर्द्धं प्रति । रात्रीः कृष्णवर्णाः । अवसेधन्ति । स्वस्मात् स्थानात् । प्रातर्जायमानः । हतवांश्च । सुरौ । वर्षिता । आत्मनो धनमपहर्तुमिच्छन्तौ । उदव्रजाख्ये आवासे । वर्चिनम् । शम्बरम् । च ।

प्रस्तोक इन्नु राधसस्त इन्द्र दश कोशयीर्दश वाजिनोऽदात् ।
दिवोदासादतिथिग्वस्य राधः शाम्बरं वसु प्रत्यग्रभीष्म ॥ २२ ॥

प्रस्तोकः । प्रस्तोको बहुधनं भरद्वाजेभ्यः प्रददौ तदादाय गृहं प्रति गच्छन् गर्भस्तद्धनमिन्द्राय चतसृभिः

---

१. अयमिन्द्रः Sy. २. प्रतिदिवसम् Sy.
३. तुल्यरूपाः Sy.
४. अर्धं is suggested for अर्त्थं ॥ अन्यमहरर्धमपरं भागं प्रकाशयितुम् । अहोरात्रात्मकस्य दिवसस्य हि रात्रिरेको भागः Sy.
५. अर्धे is suggested for ०अर्त्थे ।
६. अपसे० is suggested for अवसे० ॥ निवर्तयति Sy.
७. सदनात्स्वकीयादन्तरिक्षैकदेशात् स्थानात् Sy.
८. सूर्यात्मना प्रादुर्भवन् Sy.
९. ०वान् इव P.
१०. असुरौ is suggested for सुरौ ॥ दासावुपक्षपयितारौ यज्ञकर्मणाम् Sy.
११. वर्षयिता स इन्द्रः Sy.
१२. ०र्तुं छन्तौ D. वस्नं निवासहेतुभूतं धनम् । तद्विच्छन्तौ Sy.
१३. उदकानि व्रजन्त्यस्मिन्नित्युदव्रजो देशविशेषः । तस्मिन् Sy. १४. वर्मिनम् P. एतत्संज्ञावसुरौ Sy. १५. अत्राख्यानम्—एवं वारशिखाञ्जित्वा प्रस्तोकः साञ्जयो मृधे । भरद्वाजाय गुरवे विविधा दक्षिणा ददौ ॥१॥ ता गृहीत्वा गृहान् गच्छन्निन्द्रं प्रति यदृच्छया । ववर्शाऽभितुष्टाव भरद्वाजः शतक्रतुम् ॥२॥ ऋषेर्दृष्ट्वा विभूतिं स गर्गं पप्रच्छ वृत्रहा । युष्मभ्यं कतमो राजा धनमेतद्ददाविति ॥३॥ अथ विस्तरशो गर्गो यो यस्मै यद्ददौ धनम् । ऋग्भिश्चतसृभिः सर्वं तदिन्द्राय न्यवेदयत् ॥४॥ 'प्रस्तोक इति त्रिष्टुबनुष्टुप् गायत्री द्विपदा साञ्जंयस्य प्रस्तोकस्य दानस्तुतिः' इत्यादि (KSA.31.47.p.23.) 'अधि बृबु प्रस्तोक इति चतस्रः' इति सूत्रे (ŚŚS.16.11.12.) DDN. १६. ०स्तोयः D.
१७. प्रशस्तोत P. प्रस्तोन D.
१८. P. adds प्रति रात्रीः कृष्णवर्णा आवसेधन्ति स्वस्मात् स्थानात् प्रतर्जनाम before बहु । D. adds प्रति रात्रीः कृष्णवर्णा आप सेधन्ति स्वस्मात् स्थानात् प्रतर्जनाम before बहु । The additional passage has a striking resemblance with the commentary on RV.VI.47.21.
१९. गर्भस्तदानीमि० P. गर्गः is suggested for गर्भः ।

कथयति—प्रस्तोकः[1]। एक[2]। क्षिप्रम्[3]। धनादात्मीयात्[4]। तव भूतोऽस्मभ्यम्[5]। दश धनपूर्णाः[6]। कोशीः[7], यकार उपजनः[8]। दश। अश्वांश्च। प्रायच्छन्[9]। दिवोदासस्य[10]। अतिथिग्वस्य[11], षष्ठ्या आदादेशः[12]। तस्य[13] स्वभूत वासयितृ[14]। धनम्[15]। वयं प्रतिगृहीतवन्तः। शम्बरमसुरं जित्वा यस्तस्मात्तेनाहृतम्[16]।

उत्तरा निगदसिद्धा।

दशाश्वान्दश कोशान्दश वस्त्राधिभोजना।
दशो हिरण्यपिण्डान्दिवोदासादसानिषम्॥ २३॥

[दशाश्वान्[17]।]

---

१. एतदाद्यासु चतसृषु सृञ्जयपुत्रस्य प्रस्तोकस्य राज्ञो दानस्तुतिः। स एव दिवोदासोऽश्वथोऽतिथिग्व इति चाख्यायते Sy.

२. ·राजा Sy., DDN.

३. इदिति पूरणः Sy. इत्पूरणः। मिताक्षरेऽनर्थकाः कमीमिद्वितीति यास्कः (N. 1.1.) DDN.

४. नु मङ्क्षु इति क्षिप्रनामनी Ngh. 2.15.

५. धनदा० D. आराधयितुः स्तोतुः। चतुर्थ्यर्थे षष्ठी। त्वां स्तुवते मह्यं गर्गाय Sy. हे इन्द्र! तव आराधयितुः स्तोतुः, चतुर्थ्यर्थे षष्ठी, त्वां स्तुवते मह्यं गर्गाय DDN.

६. स्वभूतो is suggested for भूतो०।

७. ०र्णा D. सुवर्णपूर्णान् दशसङ्ख्याकान् Sy., DD. ८. कोशान् Sy.

९. उपधनः D. कोशयीरित्यत्र शौनकेनान्यथाध्ययनेन यत्नः कृतः—

अकारस्य स्थान ऐकारमाहु-
र्लुम्पन्ति च सयमीकारमुत्तरम्।
बह्वक्षरं द्वयक्षरतां नयन्ति
यथोनयीर्ध्वनयीत्कोशयीरिति॥

RPR. 14.43.

१०. प्रायच्छ P. प्रायच्छन् is suggested for प्रायच्छन्॥ प्रादात्। वाजिनोऽवात्—'अवदवत्रोंऽजनयन्ताव्यत्या०' (RPR. 2. 40.) इत्यभिनिहतः DDN.

११. वयं च तस्माद्दिवोदासादेतत्संज्ञात् प्रस्तोकात् Sy. प्रस्तोकस्य नामचतुष्टयम् DD.

१२. तस्यैव प्रस्तोकस्य Sy., DDN.

१३. ०दशः P., D. The passage: षष्ठ्या आदादेशः, explains the form of दिवोदासात्, therefore it should immediately follow दिवोदासात् and precede अतिथिग्वस्य।

१४. तन्य D.

१५. स्वभूतं is suggested for स्वभूत।

१६. धनम् Sy.

१७. राधो राधकम् Sy., DDN.

१८. शम्बरादसुरादागतम्। शम्बरं हत्वा त्वया दत्तं तदीयमित्यर्थः Sy., DDN.

१९. यत्त० is suggested for यस्त०।

२०. VM. ignores इन्द्र।

एतदेव हि पाण्डित्यमियमेव विदग्धता।
अयमेव परो धर्मः स्वायावल्पतरो व्ययः॥१॥

इत्यत्राप्युक्तम् DDN.

२१. The *pratika* is supplied by the Editor.

उपरि भोजनं च येषां भवति तान्यधिभोजनानीति[1][2][3] ।

दश॒ रथा॒न्प्रष्टि॑मतः श॒तं गा अथ॑र्वभ्यः । अ॒श्व॒थः पा॒यवे॑ऽदात् ॥ २४ ॥

दश रथान्[4] । दश[5] । रथान् । प्रष्टिभिर्युक्तान्[6] । जातं[7] च । गाः । अथर्वकुजातेभ्यः[8] । अश्वथ[9] इति चास्य संज्ञा । पांधनार्थम्[10] । प्रायच्छत्[11] ।

महि॒ राधो॑ विश्वजन्यं॒ दधा॑नान्म॒रद्भ्यो॑ जान्त्साऽर्ज्जयो॒ अभ्य॑यष्ट ॥ २५ ॥

महि । महत् । धनम् । सर्वपुत्रपौत्रजनहितमेतत्[12] । दधानानस्मान्[13] । भरद्वाजान्[14] । सृजयपुत्रः[15] । **ह्यपूजयदित्यर्थमिति** ।

वन॑स्पते वी॒ड्वङ्गो॒ हि भू॒या अ॒स्मत्सखा॒ प्रत॑रणः सु॒वीरः॑ ।
गोभि॒: संन॑द्धो॒ असि वी॒ळय॑स्वास्था॒ता ते॑ जयतु॒ जेत्वा॑नि ॥ २६ ॥

वनस्पते[16] । परौ[17] तृचौ[18] रथदुन्दुहिदेवत्यावैन्द्राऽन्त्योऽर्धर्चः[19][20][21] ।

---

१. येषाम P.
२. इति is omitted by P.
३. VM. explains only one word 'अधिभोजना' of the stanza.॥ भोजनमिति धननाम, अधिकं धनं येषां मूल्यं तादृशानि Sy. Sy. explains the stanza in the following manner :—
दश दशसङ्ख्याकान्, अश्ववान् दशसङ्ख्याकान् हिरण्यपूर्णान् कोशान्। दशसङ्ख्यानि वस्त्राणि च दशो दश च दशसङ्ख्याकांश्च हिरण्यपिण्डान् सुवर्णपिण्डानेतान् सर्वान् दिवोदासात्प्रस्तोकावहमसानिषम् । समभजम् । लब्धवानस्मि ।
४. रथन् D. ५. दशसङ्ख्याकान् Sy.
६. प्रष्टभिर्युक्तं P. प्रष्टिस्त्रिपद आधारः । तद्वद्वहन्तीति प्रष्टयोऽश्वाः। तद्युक्तान् Sy.
७. शतम् is suggested for जातम् ॥ शतसङ्ख्याकाः Sy.
८. अथर्वकुलजातेभ्यः is suggested for अथर्वकुजातेभ्यः ॥ अथर्वगोत्रेभ्य ऋषिभ्यः Sy.
९. अश्वथ P. अश्वथ is suggested for अश्वथ ॥ अश्ववानेतत्संज्ञः प्रस्तोकः Sy.
१०. वान् धनार्थं P. पार्थम् is suggested for पांधनार्थम् ॥ भरद्वाजपुत्रायैतत्संज्ञायास्मद्भ्रात्रे Sy. ११. दत्तवान् Sy.
१२. सर्वजनहितम् Sy.
१३. ०जनपितमैतधनास्मान् P. धारयतः Sy.
१४. भरद्वाजपुत्रानस्मान् Sy.
१५. सृजयच्छत्रो D. सृञ्जयपुत्रः is suggested for सृजयपुत्रः ॥ प्रस्तोकः Sy.
१६. अभ्यपू० is suggested for ह्यपू० ॥ अपूजयत् Sy.
१७. 'वनस्पते' इत्येषा रथारोहणे विनियुक्ता । सूत्रितञ्च—'वनस्पते वीड्वङ्गो हि भूया इत्येतयान्यान्यपि वानस्पत्यानि' (AGS. 2.6. ५.) इति Sy.
१८. पौ P. गर्गस्यार्षम् Dur. गर्गस्य SKN.
१९. तृपौ P.
२०. ०न्दुहिदेवत्यावैं० P. ०न्दुभिदेवत्यावैन्द्रा is suggested for ०न्दुहिदेवत्यावैन्द्रा० ।
२१. ०र्चं P.D. The passage परौ... र्धर्चः is a fragment of KSA.31.47.p.23.

वनस्पते[1] ! दृढाङ्ग[2]ः । भव[3] । अस्मत्सखा[4] । प्रतरण[5]ः । शोभनवीरयुक्त[6]ः । गोविकारैर्वैध्रीभिः । सन्नद्ध[7]ः । असि[8] । स्तब्धो[9] भव दृढाङ्ग ! आस्थाता[11] । ते[12] । जयतु । जेतव्यानि[13] ।[14]

दिवस्पृथिव्याः पर्योज उद्भृतं वनस्पतिभ्यः पर्याभृतं सहः ।
अपामोज्मानं परि गोभिरावृतमिन्द्रस्य वज्रं हविषा रथं यज ॥ २७ ॥

दिवः[15] । द्यावापृथिव्योरिदम् । उद्धृतम्[16] । बलम्[17] । यद्रथस्तथा वनस्पतिभ्यश्च[18] । आहृतम् । सहः,

---

१. हे वनस्पतिविकार ! रथ ! त्वम् Sy. वनस्पतिविकारकाष्ठमयरथ ! 'कृत्सनवश्निगमः' (N.2.5.) Mah. वानस्पत्य ! रथ ! U. वानस्पत्य रथ ! त्वमुच्यसे Dur. हे... वनस्पतिविकाररथ ! SKN.

२. दृढावयवः Sy. वीड्न्यङ्गानि यस्य Mah. वीडुशब्दो दृढवचनः U. दृढाङ्गः Dur. वीळु दृढमङ्गमवयवो यस्य स दृढावयवः। गोभिः सन्नद्ध इत्येतेन सम्बध्यते SKN.

३. भवान् P.

४. वयं सखायो यस्य स तादृशश्च भव Sy. अस्माकं मित्रभूतः Mah. अस्मत्सखा सन् U. अस्मन्मित्रः Dur. एवमस्मत्सखा, अस्माकं सखिभूतो मित्रमिव व्यसनपात इत्यर्थः SKN.

५. ०ण D. प्रवर्धयिता Sy. प्रतरति सङ्ग्रामपारं गच्छति प्रतरणः Mah. प्रतरन्त्यनेन सङ्ग्रामानिति प्रतरणः U. प्रतारणः सङ्ग्रामाणां पारं नेता Dur. सङ्ग्रामाणां निर्वाढेत्यर्थः SKN.

६. शोभनैर्वीरैः शूरभटैः पुत्रादिभिर्वा युक्तश्च भव Sy. शोभनो वीरो रथी यत्र Mah. साधुवीरः U. अविक्लवानवखण्डिताधिष्ठाता भव Dur.

७. चर्मभिः Sy. हे रथ ! यतस्त्वं गोभिर्गोविकारैश्चर्मभिः Mah. श्लेषचर्मभिः U. कृतप्रतीकारस्त्वमस्माभिः. . .गव्येन चर्मणा श्लेष्मणा च Dur. कस्मादेवमुच्यते वृढाङ्गो भवेति ? यस्माद् गोभिर्गोविकारैश्चर्मभिः श्लेष्मणा च SKN.

८. सम्यग्बद्धः Sy. बद्धोऽसि Mah. सन्नद्धोऽस्यतस्त्वां ब्रवीमि U. समन्ततो नद्धो बद्धः Dur. सम्यग्बद्धः SKN. ९. भवसि Sy.

१०. वीडयस्व। अस्मान् दृढीकुरु Sy. अतो वीडयस्वात्मानं स्तम्भय Mah. संस्तम्भय स्वात्मानम् U. स त्वं कृतप्रतीकारमात्मानं मत्वा तेन हेतुना सुतरामात्मानं वीळयस्व संस्तभ्नुहि Dur. तस्माद् वीळयस्व दृढीकुर्वात्मानम् SKN.

११. अवस्थितो रथी च Sy. आरोढा रथी Mah. संस्थाता U. संस्तब्धे च त्वय्यवस्थितः, आस्थाता ते अधिष्ठाता तव योद्धा Dur. त्वया वीड्वङ्गतया, आस्थाता आरोढा च SKN.

१२. त्वयि Sy.

१३. जेयत० P. शत्रुसैन्यानि Sy. जेतव्यानि रिपुधनानि Mah. यानि तेन जेत्वानि जेतव्यानि, आत्मनोऽभीप्सितानि तानि सर्वाणि जयतु Dur. कृत्यार्थे त्वप्रत्ययः। जेतव्यानि जन्यूनां वृन्दानि धनानि वा तेषाम् SKN.

१४. VM. ignores हि ॥ हिः पादपूरणः Mah. हिशब्दो यस्मादर्थे SKN. वनस्पते वृळ्हाङ्गो हि भव। अस्मत्सखा प्रतरणः सुवीरः कल्याणवीरः । गोभिः सन्नद्धो असि । वीळयस्वेति संस्तम्भस्व । आस्थाता ते जयतु जेतव्यानि N. 9.12., SKN. III.154. This stazna=YV.29.52.

१५. नूनमेषोत्तरा च रथदेवत्यस्य हविषो याज्यानुवाक्ये लिङ्गादवगन्तव्ये Sy.

१६. द्युलोकाद् भूमेश्च । वनस्पतिविकारत्वाद्रथस्य । वनस्पतयो हि पृथिव्याः सारभूताः । ते च द्युसम्बन्धिभिरुदकैः प्रवृद्धाः । अतो रथस्य लोकद्वयसारत्वमुपपन्नम् Sy.

१७. ०त P. सारत्वेनोपात्तम् Sy. १८. ०ल D.

१९. येन्द्र० D. २०. वृक्षेभ्यः Sy.

तमिमम्[1] । अपाम्[2] । वेगं[3] तद्वत् शीघ्रं गच्छन्तम् । परितः[4] । गोचर्मभिः[5] । आवृतम्[6] । इन्द्रस्य । वज्रम्[7] । हविषा[8] । रथम्[9] । यज[10] । 'इन्द्रो वृत्राय[11] वज्रमुदयच्छत् स त्रेधा[12] व्यभवत्[13] स्पयस्तृतीयं रथस्तृतीयं[14] यूपस्तृतीयम्' इति ब्राह्मणम्[15] ।

इन्द्रस्य वज्रो मरुतामनीकं मित्रस्य गर्भो वरुणस्य नाभिः ।
सेमां नो हव्यदातिं जुषाणो देव रथ प्रतिं हव्या गृभाय ॥ २८ ॥

[इन्द्रस्य वज्रः ।][16]

---

१. बलरूपम् Sy.
२. ०मां P. अवां D. उदकानाम् Sy.
३. प्रेरकम् । यद्वा ओज्मा वेगः । अपां वेग इव वेगवन्तम् Sy.
४. परि पञ्चम्यर्थानुवादी Sy.
५. चर्मभिः Sy. ६. आवेष्टितम् Sy.
७. वज्रैकदेशम् Sy.
८. पुरोडाशादिना Sy.
९. एवङ्गुणविशिष्टं रथम् Sy.
१०. हे अध्वर्यो ! यज Sy.
११. वृत्रा D.
१२. प्यभ० P. १३. स्प्य० P.
१४. Omitted by P.
१५. Cf. ŚB. 1.2.4.1. P. 16. and also its Kāṇvīya recension. 2.2.2.1. the variant चतुर्धा for त्रेधा is striking.
VM. explains परि once only.
१६. The *pratīka* is supplied by the Editor. VM. does not explain the stanza. It is explained in the following manner:
यो रथ इन्द्रस्य वज्र उक्तप्रकारेण वज्रैकदेशो मरुतामेतत्संज्ञानां देवगणानामनीकमग्रभूतं तद्वच्छीघ्रगामी मित्रस्याहरभिमानिनो देवस्य गर्भो गर्भवदन्तर्वर्तमानः । अहनि हि रथः सञ्चरति । वरुणस्य रात्र्यभिमानिदेवस्य नाभिर्नाभिस्थानीयः । नाभिर्यथा देहमध्ये नैश्चल्येनावतिष्ठते तद्वद्रात्रौ क्वचिदेव स्थितः । हे देव ! द्योतमान ! रथ ! य उक्तगुणः स तादृशस्त्वमिमां नोऽस्मदीयां हव्यदातिं हविर्दानवतीं यागक्रियां जुषाणः सेवमानः सन् हव्या हव्यान्यस्मदीयानि हवींषि प्रतिगृभाय प्रतिगृहाण Sy.
हे रथ ! हे देव ! स त्वं हव्या हवींषि प्रतिगृभाय प्रतिगृहाण । कीदृशस्त्वम् ? इन्द्रस्य वज्रो वज्रोत्पन्नत्वात् । मरुतामनीकं मुखं मुख्यो देवानां जयप्रापकत्वात् । मित्रस्य देवस्य गर्भो गीर्यते स्तूयते गर्भः । गृणातेर्भप्रत्ययः । सूर्येण स्तूयमानः । वरुणस्य नाभिर्नभ्यतेऽरिहिंस्यतेऽनेनेति नाभिः । 'नभ हिंसायाम्' इण्प्रत्ययः । वरुणस्य हननसाधनम् । नोऽस्माकमिमां हव्यदातिं हविषो दानं जुषाणः सेवमानः Mah.
यस्त्वमिन्द्रस्य वज्रोऽसि, मरुतां चानीकं मुखमसि । मित्रस्य च गर्भोऽसि । वरुणस्य च नाभिरसि । स त्वमिमां नोऽस्माकं हव्यदातिं हविषो दानम् । जुषाणः सेवमानः । हे देवरथ ! प्रतिहव्या गृभाय प्रतिगृभाय प्रतिगृहाण हव्या हवींषि U.
This stanza=YV.29.54.

उप श्वासय पृथिवीमुत द्यां पुरुत्रा ते मनुतां विष्ठितं जगत् ।
स दुन्दुभे सजूरिन्द्रेण देवैर्दूराद्दवीयो अप सेध शत्रून् ॥ २९ ॥

[1]उप श्वासय । श्वाससदृशप्रतिशब्द कारय । [2]पृथिवीम् । अपि च । [3]द्याम् । [4]बहुषु देशेषु । [5]त्वाम् । [6]जानातु । इतस्ततः [7]स्थितम् । [8]जगत् । [9]स त्वम् । [10]दुन्दुभे ! [11]सगेकः ? [12]इन्द्रेण । [13]देवैश्च । [14]दूरात् । [15]दूरतरम् ।

१. परेण तृचेन सङ्ग्रामे दुन्दुभिरभिमर्शनीयः । सूत्रितं च—'उप श्वासय पृथिवीमुत द्यामिति तृचेन दुन्दुभिमभिमृशेत्' (AGS.3.12.17.) इति Sy. अत आरभ्य सर्वा एता युद्धोपकरणा ऋचः । भारद्वाजस्यार्षम् Dur. गर्गस्यैव SKN.

२. आत्मीयेन जयघोषेणाश्वासय । यथा लोकद्वयं त्वदीयेन शब्देनापूरितं भवति तादृशं शब्दं कुर्वित्यर्थः Sy. उपशब्दय । श्वसिः शब्दार्थः Mah., U. उपशब्दय, आपूरय शब्देन Dur. उप आङित्येतस्य स्थाने । श्वसिः सामर्थ्यात् पूरणे । आपूरय स्वेन ध्वनिना SKN.

३. एतां च पृथिवीं कृत्स्नाम् Dur.

४. दिवम् Sy. अन्तरिक्षमपि Mah. दिवञ्च SKN. ५. बहुधा Sy., Mah., U., SKN. अपि चैकस्यापि सतस्तव पुरुत्रा बहुत्वे वर्तमानस्य Dur.

६. स्वान् P. त्वदीयं शब्दम् Sy. तवैकस्य सतः U. तव शब्दम् SKN.

७. मन्यताम् । जानातु Sy. जानातु । दुन्दुभिर्नदतीति Mah. घोषं मनुतां मन्यताम् U. शृणोत्वित्यर्थः SKN.

८. विशेषेण स्थितम् Sy. विविधं स्थितम् Mah. विविधं स्थितं स्थावरम् U. यच्चेदं विष्ठितं स्थावरम् Dur. विविधं स्थितं स्थावरमित्यर्थः । अतिशयप्रदर्शनार्थं च विष्ठितशब्देन स्थावरस्येहोपादानम् । इतरथा श्रोत्राभावाद् घोषमननमनुपपन्नं स्यादित्यभिप्रायः SKN.

९. स्थावरं जङ्गमं चोभयविधं प्राणिजातम् Sy. स्थावरजङ्गमात्मकं विश्वम् Mah. जङ्गमं च U., SKN. जगज्जङ्गमं च Dur.

१०. यस्त्वमेवमस्माभिः प्रार्थितः स त्वम् U. यस्यैव तव सामर्थ्यं द्यावापृथिव्यावापूरयितुं सः Dur. य एवमुक्तोऽसि सः SKN.

११. हे दुन्दुभे ! अत्र निरुक्तम् । दुन्दुभिरिति शब्दानुकरणं द्रुमो भिन्न इति वा, दुन्दुभ्यतेर्वा स्याद्दध ? (शब्द)कर्मणः (N.9.12.) इत्यादि Sy. अस्य योऽभिधेयस्तस्य 'शब्दानुकरणम्' आत्मनो नामधेयप्रतिलम्भनिमित्तम् । यथैवासावभिहन्यमानः शब्दं करोति दुन्दुभिरिति तदेव तस्य नाम । 'द्रुमो भिन्न इति वा' द्रुमशब्दात्पूर्वपदम् । भिदेरुत्तरपदम्, तत्सम्भवो हि, असौ द्रुमैकदेशनिष्कुषितश्चर्मणा पिनद्धः Dur. दुन्दुभिः शब्दानुकरणनिमित्तमेतन्नाम । द्रुमशब्दस्य वा रेफलोपः । भिदेश्चाद्यन्तविपर्ययः । उकारश्चोपजन इत्याह । 'द्रुमो भिन्न इति वेति' (N.9.12.) भिन्नो निष्कुषितः । 'दुन्दुभ्यतेर्वा स्यात्' नैरुक्तधातोः । ताडयते ह्यसौ युद्धसमये SKN.

१२. सहितः is suggested for सगेकः ॥ सह Sy. प्रीतियुक्तः Mah. समानप्रीतिः सन् U. सहजोषणः सहप्रीतिः Dur. सम्प्रीयमाण इति SKN. १३. इन्द्रेण सह U.

१४. अन्यैश्च देवैः Dur. देवैश्च सह SKN.

१५. दूरादपि दूरतरम् Sy. अतिदूरम्. . . . अत्यन्तं दूरं दवीयः Mah.

अपसेध[1] । अस्मच्छत्रून्[2] ।

आ क्रन्दय[1] बलमोजो[3] न[4] आ धा[5] निः ष्टनिहि[6] दुरिता[7] बाधमानः[8] ।
अप प्रोथ दुन्दुभे दुच्छुना[9] इत इन्द्रस्य[10] मुष्टिरसि[11] वीळयस्व ॥ ३० ॥

आ क्रन्दय[1] । शब्दापय सेनाम् । बलम्[2] । ओजश्च[3] । अस्मभ्यम्[4] । देहि[5] । निष्टनिहि[6] । दुरितानि[7] । बाधमानः[8] । अपप्रोथ[11] । दुन्दुभे ! राक्षसान्[12] । इतः[13], वाचा हुङ्करणमपप्रोथनम्[14] । इन्द्रस्य[15] । मुष्टिः[16] । वसि[17] । संस्तम्भय[18] शत्रुसेनाम्[19] ।

---

१. अपगमय Sy., SKN. अपकालयापुनरागमनाय Dur.

२. अस्मदीयान् Sy. अस्मच्छत्रूनित्येतदाशास्महे त्वत्तः Dur. तथा नदत एव शब्दं श्रुत्वा तव शत्रवो नश्यन्तीत्यभिप्रायः SKN. उपश्वासय पृथिवीं च दिवं च । बहुधा ते घोषं मन्यताम् । विष्ठितं स्थावरं जङ्गमं च यत् । स दुन्दुभे सहजोषण इन्द्रेण च देवैश्च । दूरादव दूरतरमपसेध शत्रून् N.9.13.,SKN. III. 154.
This stanza=YV 29.55.

३. अस्मच्छत्रूरुद्रोदय Sy. रोदय पलायध्वं मदीया सर्वे हता इत्यादिदीनरवं कारयेत्यर्थः Mah. दीनान् शब्दान् कारय, अहो पलायध्वं पिता मे हतो भ्राता मे हत इति U.

४. सेनारूपम् Sy. शत्रुसैन्यम् Mah. शत्रुसेनाम् U.

५. शरीरबलं च Sy. तेजः Mah., U.

६. अस्माकम् Mah., U.

७. आधेहि । प्रयच्छ Sy. आधेहि U.

८. न० D. नितरां शब्दं कुरु । 'स्तन शब्दे' इति धातुः Sy. शब्दं कुरु । 'स्तन शब्दे' चुरादिरन्तः Mah. निश्चितं शब्दं जयाय कुरु U.

९. दुरितानि दुर्गमनानि Sy. पापानि Mah.

१०. हिंसंस्त्वम् Sy. निराकुर्वन् सन् Mah. अपगमयन् U.

११. ०प्राथ D. बाधस्व Sy. नाशय । प्रोथतिर्नाशनार्थः Mah. अपकृत्यापकृत्य प्रोथ नाशय U.

१२. अस्मद्दुःखहेतुभूतं शुनं सुखं यासां तादृशीः शत्रुसेनाः Sy. दुष्टाश्च ते श्वानश्च दुच्छुवानस्तान् दुष्टाञ् शुनः श्वसदृशाञ्छत्रून् Mah. दुष्टशुन इव याः सेनाः । सुखवचनो वा शुनाशब्दः । दुःसुखाः, विसर्जनीयस्य दत्वम् U.

१३. अस्मात् स्थानात् Sy. अस्मत्सेनायाः सकाशात् Mah. इतः सेनायाः U.

१४. The passage वाचा. ०थनम्, should immediately follow अपप्रोथ and precede दुन्दुभे ।

१५. इन्दस्य P. यतस्त्वमिन्द्रस्य Mah. यतश्च त्वमिन्द्रस्य U.

१६. मुष्टिरिव शत्रूणां हन्ता Sy. मुष्टिवदङ्गभूतोऽसि Mah. मुष्टिरसि, अतो ब्रवीमि U.

१७. भवसि is suggested for वसि ।

१८. अतोऽस्मान् दृढीकुरु Sy. अतो वीडयस्व, आत्मानमस्मान् दृढय Mah. दृढीकुर्वात्मानम् U.

१९. VM. ignores आ ।
This stanza=YV29.56.

आमूरज प्रत्यावर्तयेमाः केतुमद्दुन्दुभिर्वावदीति ।
समश्वपर्णाश्चरन्ति नो नरोऽस्माकमिन्द्र रथिनो जयन्तु ॥ ३१ ॥

आमूः[1] । अस्मदीयाः सेनाः[2] । आज[3] शत्रून् प्रति नय । प्रत्यावर्तय[4] च । इमाः[5] शत्रुसेनाः । थवर्णाक्षम्[6] प्रज्ञानयुक्तम्[7] । दुन्दुभिः । अत्यन्तं शब्दं[8] करोति । सञ्चरन्ति[9] । अस्मदीयाः[10] । योद्धारः[11] । अश्वपतनाः[12] । अस्माकम्[13] । इन्द्र ! रथिनः[14] । शत्रून् जयन्तु[15] ।

इत्थं व्याख्यदेकत्रिंशमध्याय माधवाह्वयः ।
चोलेषु निवसन् ग्रामे गोमत्यार्यः समाहृतः[16] ॥

---

१. अस्याः पूर्वार्धो दुन्दुभिदेवत्य उत्तरार्धश्चेन्द्रः । यद्वा उभावप्यर्धर्चावैन्द्रौ Sy.

२. ०नां P. शत्रुषु स्थितास्ता गाः Sy. शत्रुसेनाः Mah., U.

३. ०जे D. अस्मान् प्रत्यागमय Sy. समन्तात् परिक्षिप । 'अज गतिक्षेपणयोः' Mah. आक्षिप U.

४. प्रतिनिवर्तय Sy.
जयं प्रापय्य प्रत्यानय Mah.
प्रत्यावर्तय जितं जितमिति U.

५. अस्मदीया गाः शत्रुभिर्जिघृक्षिताः Sy. अत इमा अस्मत्सेनाः Mah.
अस्मदीयसेनाः U.

६. ०नाथपर्णाक्षः P. अथ प्रत्यक्षः is suggested for थवर्णाक्षम् D.

७. प्रज्ञानवत् यथा सर्वज्ञायते तथा Sy. यतो दुन्दुभिः केतुमत् प्रज्ञानवत् Mah. प्रज्ञातवान् दुन्दुभिः U.

८. भृशं शब्दं करोति Sy.
अत्यन्तं वदति Mah.
लोडर्थे लट् । अत्यर्थं वदतु जयप्रकाशकम् U.

९. शत्रुभिर्युध्यमाना वर्तन्ते Sy. अत्रापि लोडर्थे लट् । सञ्चरन्तु U.

१०. अस्माकम् Mah.

११. पुरुषाः Sy. योधाः Mah. अस्मदीया मनुष्याः सङ्ग्रामे U.

१२. अश्ववाहाश्च Sy. अश्वस्येव पर्णं पतनं येषां ते Mah.

१३. ०नास्मा० P.
अश्ववतनास्मा० D.

१४. रथारूढाः पुरुषाः Sy.
रथस्थाः Mah.

१५. युद्धे जयं प्राप्नुवन्तु Mah. जयन्तु त्वत्प्रसादादिति शेषः U.

१६. ०माहतः is suggested for ०माहृतः ।

१७. Ms.D. puts the figure ॥४७॥ here to indicate the end of the forty-seventh hymn. No such number is given in P.
This stanza=YV. 29. 57.

चतुर्थाष्टके ऽष्टमोऽध्यायः ।

'यज्ञायज्ञा[1] वो अग्नये[2]' व्याचिख्यासति माधवः ।
आवृत्तेषु[3] वदन् वाच्यमृगर्धर्चपदेष्वर्थः[4] ॥१॥
ऋतोर्द्धर्चश्च[5] पादश्च[6] सूक्तान्तेषु पुनःपुनः ।
आवर्तमाना[7] दृश्यन्ते सूक्तमध्येष्वपि क्वचित् ॥२॥
'ये स्तोतृभ्यः[8]' 'नू ष्टुतः[9]' च 'अस्मभ्यं[10] तद्वसो दानाय[11]' ।
'ब्रह्मणस्पते[12] त्वमस्य' चतस्रा निदर्शन[13] ॥३॥
अथार्धर्चः 'तन्नो[14] मित्रः[15]' सन्त्यप्यन्येऽपि तादृशाः ।
'प्रातर्मक्ष[16]' इति पादः[17] स्यात् सन्त्यन्येऽपि च[18] तादृशाः ॥४॥
स्तुत्वान्यमन्यदेवानां तत्तदाशासते[19] पुनः ।
ऋषयो यद्यदिच्छन्ति तदर्थास्ते[20] न पूरणाः ॥५॥
आवर्तयन्ति सूक्तीश्च[21] यथा 'अर्चन्ननु[22] स्वराज्यम्[23]' ।
आवर्तन्ते[24] विधेयाश्च 'मरुद्भिरग्न[25] आ गहि' ॥६॥
सकृत्प्रदर्शितपदान् मन्त्रान्नाधीयते[26] पुनः ।
अधीयते पुनः कांश्चित् किं नु स्यात् तत्र कारणम् ॥७॥

---

१. यज्ञाय यज्ञ D. २. RV. VI. 48. 1ª.
३. आवृतेषु D. ४. ०ष्वर्त्था P.
०ष्वथ is suggested for ०ष्वर्थः ।
५. ऋचोऽर्धर्चश्च is suggested for ऋतोर्द्धर्चश्च ।
६. पादाश्च is suggested for पादश्च ।
७. ०नो P. ८. RV. II. 1. 16.
९. RV. IV. 16. 21.
१०. ०भ्य इ० P. D.
११. RV. II. 13. 3. १२. RV. II. 23. 19.
१३. चतस्रा निदर्शना D. चतस्रश्च निदर्शनम् is suggested for चतस्रा निदर्शन ।
१४. RV. I. 94. 16. १५. ०न्ये च R.
१६. RV. I. 58. 9. १७. ०क्षीति P.
१८. Omitted by P.
१९. स्तुत्यान्य० P. २०. ०साते D.
२१. ऋषयो यदियच्छन्ति दर्त्था० P.
२२. सूक्ती D. २३. RV. I. 80. 1.
२४. आवर्त P. २५. ०हि P. D.
RV. I. 19. 1. २६. ०न्नाणाधी० P.

'नू[1] मे[2] ब्रह्मण्यग्ने[3]' इति पुनश्चाधीयते पदम् ।
'यज्ञेन[4] यज्ञम्[5]' इति च दशमे[6] मण्डले पुनः ॥८॥
अत्राहुः[7] कारणं वृद्धा तस्मिन्नेव[8] पुनः श्रुता ।
'नू[9] मे[10]' इत्यृगियं सूक्ते नैवमन्यत्र[11] दृश्यते ॥९॥
एवंविधाया आवृत्तेरन्वेष्टव्यं प्रयोजनम् ।
इति वक्तुं पदावृत्तिः[12] काकुर्ह्यावृत्तितो[13] भवेत् ॥१०॥
'यज्ञेन[14] यज्ञम्[15]' इत्यस्याः साध्याः[16] पुत्रमेव[17] ।
तादृशमेव[18] पुरुषं प्राह[19] भेदोऽयं ज्ञाप्यते पदात् ॥११॥
तिलमात्रे भिद्यमाने पुनश्चाधीयते पदम् ।
स सूक्ष्मः शक्यते ज्ञातुं नाप्रज्ञैरिति[20] निर्णयः ॥१२॥
'पुनान[21] इन्दवा[22] भर[23] सोम[24] द्विबर्हसं[25] रयिम्[26]' ।
पुनरागतमर्धर्चं पुनश्चाधीयते पदम् ॥१३॥
आवेष्टय योजना कार्या 'त्वं वसूनि[27] पुष्यसि[28]' ।
द्विबर्हसं[29] रयिं तस्मात् पुनानोऽस्मभ्यमाभर[30] ॥ इति ॥१४॥

---

१. ब्रा० P. ०ण्या० D. RV. VII. 1. 20.
२. RV. I. 164. 50.
३. वमे P.
४. तत्रा० R.
५. तेस्मि० D.
६. RV. VII. 1. 20.
७. ०मत्र D.
८. परावृ० P.
९. काकुह्यावर्तितो P.
१०. RV. I. 164. 50.
११. D. reads साध्याः पूर्वत्रमेव ॥ पुत्रमेव च तादृशम् is suggested for साध्याः पुत्रमेव ।
१२. तादृशं is suggested for तादृशमेव ।
१३. व्रह भेदो भेदोयं P.
१४. नाप्रा० R.
१५. ०ना D.
१६. इन्द्र० D.
१७. इन्द्र पाप भर P.
१८. RV. IX. 40. 6.
१९. P. and D. add ह after वसूनि ।
२०. RV. IX. 100. 2.
२१. ०बर्हं P. D.
२२. ०नोभ्य० P.

जिघृक्षितो यथान्तः स्याद् वको विक्षिप्तमानसः ।
सन्दिग्धे च यथा कामकः शाकल्योऽवहितस्तथा ॥१५॥
पूरणेष्विति वक्तव्यमध्यायादिषु दर्शितम् ।
व्युत्पत्त्यर्थं बह्वृचानां चतुर्थेऽस्माभिरष्टके ॥१६॥इति॥

VI.48.

यज्ञायज्ञा वो अग्नये गिरागिरा च दक्षसे ।
प्रप्र वयमृतं जातवेदसं प्रियं मित्रं न शंसिषम् ॥ १ ॥

यज्ञायज्ञा ।

---

१. ०घृक्षि P. ०घृक्षिति D.
२. यथान्तः is suggested for यथान्तः ।
३. काकः is suggested for कामकः ।
४. ०तस्थाता D. ०ल्योपहितस्थाता P. ०ल्योपहत० R. ५. ०णेस्विति P.
६. अथाष्टमाध्याय आरभ्यते । षष्ठमण्डलस्य चतुर्थेऽनुवाके चत्वारि सूक्तानि व्याख्यातानि । 'यज्ञायज्ञा' इति द्वाविंशत्यृचं पञ्चमं सूक्तं बृहस्पतिपुत्रस्य शंयोरार्षम् । अत्रानुक्रम्यते—'यज्ञायज्ञा द्व्यधिका शंयुस्तृणपाणिकं पृश्निसूक्तं प्रगाथौ बृहती महासतोबृहती महाबार्हतबार्हतौ प्रगाथावित्याग्नेय्यः काकुभः प्रगाथः पुरउष्णिग्बृहत्यतिजगतीति मारुत्योऽन्त्यास्तिस्रो वासां लिङ्गोक्तदेवताः काकुभः प्रगाथः पुरउष्णिग्बृहतीति पौष्ण्यो बृहती महाबृहती यवमध्यान्त्यानुष्टुब्द्यावाभूम्योर्वा पृश्नेर्वा (KSA. 32. 48.p.22.) इति । 'यज्ञायज्ञा वः' इत्येषा बृहती । 'तृतीयो द्वादशकः' (KSA.7.1. p.3.) इति तल्लक्षणसद्भावात् । द्वितीया सतोबृहती 'अयुजौ जागतौ सतोबृहती' (KSA. 8.4.p.4.) इत्युक्तलक्षणोपेतत्वात् । तृतीया चतुर्थी बृहतीसतीबृहत्यौ । पंचमी बृहती षष्ठी महासतोबृहती । अष्टाक्षरास्त्रयः पादा द्वादशाक्षरौ द्वौ पादौ सा महासतोबृहती (Cf. KSA. 10.2. p.4.) सप्तमी महाबृहती अष्टाक्षराश्चत्वारः पादा एको द्वादशाक्षरः सा महाबृहती (Cf. KSA. 99. p. 4.) अष्टमी महासतोबृहती अष्टिनस्त्रयो द्वौ जागतौ सा महासतोबृहती (Cf. KSA. 12.2. p.4.) नवमी बृहती दशमी सतोबृहती । एता दशाग्निदेवत्याः । एकादशी ककुप् 'मध्यमो यदि द्वादशाक्षर उभयतोऽष्टकौ द्वौ पादौ सा ककुप् (Cf.KSA.5.3.p.3.)। द्वादशी सतोबृहती। त्रयोदशी पुरउष्णिक् आद्यो जागतो द्वितीयतृतीयौ गायत्रौ सा पुरउष्णिक् (Cf. KSA. 5.2.p.3)। चतुर्दशी बृहती पञ्चदश्यतिजगती द्वापञ्चाशदक्षरा । एकादश्याद्याः पञ्च मरुद्देवताकाः त्रयोदश्यादीनां तिसृणां लिङ्गोक्ता इन्द्रादयो वा देवताः । षोडशी ककुप् । सप्तदशी सतोबृहत्यष्टादशी पुरउष्णिगेकोनविंशी बृहती । षोडश्यादीनां चतसृणां पूषा देवता । विंशी बृहत्येकविंशी यवमध्या महाबृहती । आद्यौ द्वावष्टकौ तृतीयो द्वादशकश्चतुर्थपञ्चमावष्टकौ सा यवमध्या महाबृहती (Cf. KSA. 9.10.p.4.) । विंश्येकविंश्योः पृश्निसूक्तमित्युक्तत्वान्मरुतां माता पृश्निर्देवता । द्वाविंश्यनुष्टुप् । सा चापि पृश्निदेवत्या द्यावाभूमिदेवत्या वा । सूक्तविनियोगो लैङ्गिकः । आग्निमारुते 'यज्ञायज्ञा वः' इत्ययं स्तोत्रियप्रगाथः । सूत्रितञ्च—'यज्ञायज्ञा वो अग्नये देवो वो द्रविणोदा इति प्रगाथौ स्तोत्रियानुरूपौ' (ĀSS. 5.20.)इति Sy. ७. ०ज्ञां P. यज्ञाययज्ञां D.

॥ शयुः ॥ यज्ञे यज्ञे। तुभ्यम्। अहम्। स्तुत्या स्तुत्या। प्रवृद्धाय। अग्नये। शंसन कृतवानस्मि तदेवाह प्राशंसिषमहम्। अमृतम्। जातवेदसम्। प्रियम्। इव। मित्रमिति।

१. हे स्तोतारः ! Sy.

२. ०ज्ञ D. सर्वेषु यागेषु Sy. यज्ञायज्ञा वीप्सायां द्वित्वम्। सप्तम्येकवचनस्याकारः।...तथा चैवं योजना यज्ञेयज्ञेऽनेकयज्ञेषु Mah. यज्ञेयज्ञ इति सप्तम्येकवचनस्य आआदेशो वीप्सायाम् U.

३. यूयम् Sy. व इति द्वितीयाबहुवचनमेकवचनार्थे यजमानविषयं वा।....वः त्वाम्। यद्वा वो युष्माकमर्थे Mah. व इति यजमानविषयं युष्मदर्थम् U.

४. वयम् Sy. वयमिति प्रथमाबहुवचनमेकवचनार्थे Mah. वयम्, अहमिति विभक्तिव्यत्ययो वाक्यसम्बन्धात् U.

५. स्तुतिरूपया वाचावाचा स्तोत्रं कुरुतेति शेषः Sy. गिरागिरा वीप्सायां द्वित्वम्। अन्यया-ऽन्यया स्तुत्या Mah. तया तया च गिरा वाचा स्तुतिलक्षणया U.

६. दक्षसे। चतुर्थी द्वितीयार्थे। तस्य च शंसिषमिति क्रियया सम्बन्धः।....कीदृशमग्निम्। दक्षसम्। दक्षतेरुत्साहार्थस्य धातोरसुन् प्रत्ययः। दक्षत उत्सहते दक्षास्तमुत्साहिनम्। यद्वा दक्ष इति बलनाम। अन्तर्णीतमत्वर्थं द्रष्टव्यम्। दक्षसं बलवन्तम् Mah. दक्षसमिति सन्नतिः। दक्षवन्तमुत्साहवन्तम्। अग्निविशेषणं चैतत् U.

७. अग्नये चतुर्थ्येकवचनं द्वितीयैकवचनार्थे।.... अग्निम् Mah. अग्निमिति विभक्तिव्यत्ययो वाक्यसम्बन्धात् U.

८. प्र शंसिषम्—'प्रसमुपोदः पादपूरणे' इति प्रशब्दस्य द्विरुक्तिः पादपूरणार्था। व्यत्ययेनैकवचनम्। छान्दसो लुङ्। प्रशंसाम Sy. स्तौमि। 'शंस स्तुतौ' लुङ् अडभाव आर्षः Mah. प्र प्रः शंसिषेत्याख्यातेन सम्बन्धः। प्रशंसिषम् U.

९. मरणरहितम् Sy. अमरणधर्माणम् Mah., U.

१०. ज्ञातानां वेदितारं जातप्रज्ञं जातधनं वा Sy. जातं वेदो ज्ञानं धनं वा यस्मात्तम् Mah. जातप्रज्ञानम् U.

११. अनुकूलम् Sy. प्रीतिजनकम् Mah.

१२. प्रमिव P. नशब्द उपरिष्टादुपचारादुपमार्थीयः। मित्रं न मित्रमिव Mah. मित्रमेव U.

१३. यद्वा व्यत्ययेन त्वमित्यस्य वसादेशः। अग्नय इति च कर्मणि चतुर्थी। 'क्रियाग्रहणमपि कर्तव्यम्' इति कर्मणः सम्प्रदानत्वात्। चशब्दश्चणिति निपातश्चेवर्थे वर्तते। दक्षस इति च दक्षेर्वृद्धिकर्मणोऽन्तर्भावितण्यर्थाल्लटि रूपम्। चणा योगात् 'निपातैर्यद्यदिहन्त०' इति निघातप्रतिषेधः। तत्रायमर्थः। हे स्तोतः ! त्वं यज्ञे यज्ञ इममग्निं गिरा गिरा स्तुत्या दक्षसे च वर्धयसि चेत् वयमप्यमृतत्वादिगुणकं तं प्रशंसाम Sy. यथा कश्चित् प्रियं मित्रं स्तौति तद्वदग्निं स्तुमह इत्याशास्महे Mah. अथ वाक्यार्थवशा सदानुपूर्वी। अहं यज्ञे यज्ञे वो युष्मदर्थेऽग्निं दक्षवन्तं तया तया च स्तुत्या प्रशंसिषम्, अमृतं जातवेदसं प्रियं मित्रमिव U.

१४. VM. explains प्र once only and ignores च ॥ चशब्दो भिन्नक्रमो व इत्यस्मात्परो द्रष्टव्यः। यूयं च स्तोत्रं कुरुत Sy. च पादपूरणः Mah.

This stanza=YV. 27.42.

ऊर्जो नपातं स हिनायमस्मयुर्दाशेम हव्यदातये।
भुवद्वाजेष्वविता भुवद्वृध उत त्राता तनूनाम् ॥ २ ॥

ऊर्जो नपातम्[1]। निपातो हि पर्यायः, ऊर्जः[2]। पुत्र प्राशंसिषम्[3]। स.[4]। अयं[5] खलु[6]। अस्मिन् कामः[7]। तस्मै[8] देवाना[9] हविषा[10] दात्रे[11]। हविर्दाशेम[12]। स भवतु[13]। सङ्ग्रामेषु[14]। अस्माक रक्षिता[15]। भवतु[16]। वर्धयिता[17]। अपि च[18]। त्राता[19]। अङ्गानाम्[20]।

वृषा ह्यग्ने अजरो महान्विभास्यर्चिषा।
अजंस्रेण शोचिषा शोशुचच्छुचे सुदीतिभिः सु दीदिहि ॥ ३ ॥

वृषा हि[21]। वर्षिता[22]। हि[23]। अग्ने[24]। जरारहित[25]। महान्[26]। विभासि[27]। तेजसा[28]। आदित्येन[29]।

---

१. निनेति P., D. यजमानोऽध्वर्युं प्रार्थयते। हे अध्वर्यो! Mah.
२. नपात् is suggested for निपातो।
३. The passage नपात् हि पर्यायः should immediately follow पुत्रम्॥ पौत्रमग्निम्। अद्भ्यो वृक्षा जायन्ते तेभ्योऽग्निरित्यपां पौत्रोऽग्निः Mah. ताभ्य ओषधिवनस्पतयो जायन्ते तेभ्य एष जायत इत्यपां पौत्रोऽग्निस्तम् U.
४. अन्नस्य बलस्य वा Sy. अपाम्।. ऊर्क्शब्देनाप उच्यन्ते Mah. ऊर्जशब्देनाप उच्यन्ते U.
५. प्र शंसिषमित्यनुषङ्गात्प्रशंसामेत्यर्थः Sy.
६. स त्वम् Mah. स त्वं हे अध्वर्यो! U.
७. अग्निः Sy. यतोऽयमग्निः Mah. अयं ह्यग्निः U.
८. हि नेति निपातद्वयसमुदायो हि इत्यस्यार्थे Sy. हिनु तर्पय। 'हि गतौ वृद्धौ' स्वादिर्लोट्। उस्लोपश्छान्दसः Mah. हिन तर्पय U.
९. अस्मिरस्मान्कामस्तकामः D. अस्मत्कामः is suggested for अस्मिन् कामः॥ अस्मान् कामयमानो भवति Sy. अस्मानिच्छत्यस्मयुः Mah. अस्मान् कामयते U.
१०. तमस्मै P. अग्नये Sy.
११. देवेभ्यः Sy.
१२. ०षो D. वयं च हव्याना हविषां देवेभ्यो दात्रे Sy. अतो हव्यदातये हविषो दानाय Mah., U.
१३. हवींषि दद्याम Sy. सङ्कल्पयामः। 'दाभृ दाने' अत्र सङ्कल्पार्थः Mah. अतो वयं च दाशेम सङ्कल्पं कुर्याम U.
१४. स चाग्निर्भवतु Sy. भवति Mah., U.
१५. यतोऽयं वाजेष्वन्नेषु Mah. अन्नेषु विषयभूतेषु U. १६. गोप्ता U.
१७ भवति Mah., U.
१८. वर्धकः Sy. वृद्धौ च Mah. वर्धनाय च U.
१९. रक्षिता Sy., Mah.
२०. तनयानामस्मत्पुत्राणां च Sy. शरीराणाम्। बहुवचनं भार्यादिशरीररक्षार्थमुपात्तम्। अग्निरग्रतनुरक्षिता वर्धयिताऽस्मान् कामयतेऽतो हविर्वनाय तं सङ्कल्पयामः Mah. शरीराणाम्। बहुवचनोपदेशाद्भार्यादिशरीरग्रहणम् यत एवमत ऊर्जो नपातं हिन इति सम्बन्धः। एवमदूरविप्रकर्षेण विषमयन्त्रा व्याख्येयाः U. This stanza=YV. 27.44.
२१. वर्षिता कामानां वृष्टेः कर्ता वा Sy.
२२. खलु Sy.
२३. गुणैरधिक एवम्भूतस्त्वम् Sy.
२४. विभसि D. विशेषेण प्रकाशसे Sy.
२५. दीप्त्या Sy.
२६. अविच्छिन्नेन Sy.

तेजसा । दीप्यमानस्त्वम्[1] । शुचे[2] ! शोभनदीप्तिभिः[3] । दीप्यस्व[4] । शोभनम्[5] ।

महो देवान्यजसि यच्च्यानुषक्तव क्रत्वोत दंसना[6] ।
अर्वाचः सीं कृणुह्यग्नेऽवसे रास्व वाजोत वँस्व ॥ ४ ॥

महः[7] । महतः । देवास्त्वम् । यजसि यजमानानाम्[8] । तथा सति यजास्माकमपि[9] । अनुषक्तम्[10] । तव । प्रज्ञानेन[11] । अपि च । कर्मणा । अभिमुखान्[12] । सर्वान्[13] देवान् । कुरु । रक्षणाय[14] । अग्ने ! देहि[15] । अन्नानि[16] । अपि चास्मत्त । त्वं च सम्भजस्व[17] ।

यमापो अद्र्यो वना गर्भमृतस्य पिप्रति ।
सहसा यो मथितो जायते नृभिः पृथिव्या अधि सानवि ॥ ५ ॥

यमापः[18] । यम्[19] । वसतीवर्यः[20] । ग्रावाणः । काष्ठानि च । यज्ञस्य[21] । गर्भम्[22] । पूरयन्ति[23] । यश्च यज्ञे[24] । ऋत्विग्भिः[25] । मथितः[26] । जायते[27] । पृथिव्याः[28] । उच्छ्रिते[29] वर्षभूते देवयजने[30] ।

---

१. भृशं दीप्यमानस्त्वम् Sy.
२. हे दीप्ताग्ने ! Sy.
३. ०भि D. सुदीप्तिभिः Sy.
४. अस्मान् दीपय । प्रकाशय Sy.
५. Omitted by P. सुष्ठु Sy.
६. The commentary on this stanza is omitted by P.
७. हे अग्ने ! Sy.
८. यजमानानां यज्ञे हविर्भिः पूजयसि Sy.
९. अतोऽस्माकमपि यत्ते तान् देवान् यज Sy.
१०. अनुषक्तं सन्ततं यथा भवति तथा Sy.
११. प्रज्ञया Sy.
१२. अस्मदभिमुखान् Sy.
१३. सीमिति परिग्रहार्थीयः । तान् सर्वान् Sy.
१४. अस्मद्रक्षणार्थम् Sy.
१५. तेभ्यो देवेभ्यो देहि Sy.
१६. वाजान् हविर्लक्षणान्यन्नानि Sy.
१७. तुभ्यं प्रत्तानि हवींषि सम्भजस्व Sy.
१८. The commentary on this stanza is omitted by P.
१९. अग्निम् Sy.
२०. यमवसतिपर्यः D. आपो वसतीवर्याख्याः Sy.
२१. उदकस्य वा Sy.
२२. गर्भवदन्तर्वर्तमानम् Sy.
२३. यद्वा । आपः समुद्रिया अद्रयो मेघा वनान्यरण्यानि च ऋतस्य गर्भं वाडववैद्युतदावरूपेण वर्तमानं यमग्निं पिप्रति पूरयन्ति Sy.
२४. अग्निः Sy.
२५. नेतृभिर्ऋत्विग्भिः Sy.
२६. मथितः सन् Sy.
२७. प्रादुर्भवति स त्वं वंस्वेत्यन्वयः । यद्वा, 'आ यः पप्रौ' (RV. VI.48.6.) इत्यनया सम्बन्धः Sy. २८. पृथिव्या अधि भूमेरुपरि Sy.
२९. समुच्छ्रित उत्कृष्टे देवयजनदेशे Sy.
३०. VM. ignores सहसा and अधि ॥ सहसा बलेन Sy.

आ यः पप्रौ भानुना रोदसी उभे धूमेन धावते दिवि ।
तिरस्तमो ददृश ऊर्म्यासु श्यावास्रुषो वृषा श्यावा अरुषो वृषा ॥ ६ ॥

आ यः । आपूरयति । यः[1] । तेजसा[2] । द्यावापृथिव्यौ । उभे अपि । धूमेन । सोऽन्तरिक्षे । धावते[3] । आदृश्यते[4] स । तिरस्कृत्य । तमांसि[5] । रात्रिषु[6] दृश्यते । श्यावर्णासु[7] । आरोचमान तथा सर्वा एव रात्रीः रोचयन्[8] । आदृश्यते । आरोचमानः[9] ।

बृहद्भिरग्ने अर्चिभिः शुक्रेण देव शोचिषा ।
भरद्वाजे समिधानो यविष्ठ्य रेवन्नः शुक्र दीदिहि द्युमत्पावक दीदिहि ॥ ७ ॥

बृहद्भिः[11] । महतीभि । अग्ने ! दीप्तिभि[12] । शुक्रया[13] च । देव[14] ! ज्वालया । भरद्वाजे मम भ्रातरि[15] । दीप्यमान[16] । युवतम ! त्वम् । अस्माकम्[17] । धनयुक्त[18] च । दीप्यस्व[19] । शोधक[20] ! शोचमान[21] [22] ।

विश्वासां गृहपतिर्विशामसि त्वमग्ने मानुषीणाम् ।
शतं पूर्भिर्यविष्ठ पाह्यंहसः समेद्धारं शतं हिमाः स्तोतृभ्यो ये च ददति ॥ ८ ॥

विश्वासाम्[24] । त्वम् । अग्ने ! सर्वासाम् । मानुषीणाम्[25] । विशाम्[26] । गृहपतिः[27] । असि[28] । स त्वं

---

१. अग्निः Sy.
२. दीप्त्या Sy.
३. गच्छति । धूमो हि मेघात्मना परिणतः सन् धावते गच्छति । कार्यकरणयोरभेदविवक्षया तद्गननमगन्नावुपचर्यते Sy.
४. आदृश्चते D. समन्ताद्दृश्यते Sy.
५. अन्धकारम् Sy.
६. ऊर्म्यासु रात्रिनामैतत् । निशासु Sy. ऊर्म्येति रात्रिनाम Ngh. 1.7.
७. कृष्णासु Sy.
८. It seems to be the explanation of श्यावाः ॥ श्यावर्णाः Sy.
९. रोदयद् D. अरुषो वृषेति पुनरुक्तिरादरार्था Sy.
१०. VM. ignores वृषा । वर्षिता कामानाम् Sy.
११. ०तीः D. महद्भिः Sy.
१२. ०भि D. तेजोभिः Sy.
१३. निर्मलेन Sy.
१४. हे देव ! दानादिगुणयुक्त ! Sy.
१५. तेजसा Sy.
१६. अस्मद्भ्रातरि Sy.
१७. समिध्यमानस्त्वम् Sy.
१८. अस्मदर्थम् Sy.
१९. धनयुक्तं यथा भवति तथा Sy.
२०. The passage beginning with बृहद्भिः and ending with दीप्यस्व is omitted by P.
२१. शोचक P. हे शोधकाग्ने ! Sy.
२२. दीप्यमानः P. It seems to be the explanation of शुक्र Voc. दीप्ताग्ने ! Sy.
२३. VM. ignores द्युमत् and दीदिहि ॥ द्योतमानेन च युक्तं यथा भवति तथा दीप्यस्व Sy.
२४. मनोरपत्यभूतानाम् Sy.
२५. प्रजानाम् Sy.
२६. गृहस्वामी Sy.
२७. भवसि Sy.

शतसङ्ख्याभिः[1]। पुरीभिः[2]। युवतम[3] ! पाहि रक्ष। आहन्तुः[4]। समेधारम्[5]। शतम्। हिमाः[6]। स्तोतृभ्यः। ये। च। ददति तांश्च पासीति[7][8]।

त्वं नश्चित्र ऊत्या वसो राधांसि चोदय।
अस्य रायस्त्वमग्ने रथीरसि विदा गाधं तुचे तु नः॥ ९॥

त्वं नश्चित्रः[9]। त्वम्। अस्मभ्यम्। चित्रा[9]। रक्षणार्थम्[10]। वासयितः[11]। धनानि। चोदय[12]। अस्य[13] दृश्यमानस्य। धनस्य। त्वम्। अग्ने ! नेता[14]। भवसि[15]। लम्भय फलम्। प्रतिष्ठाम्। अपत्यार्थम्[16]। अस्माकम्[17]। शीघ्रम्[18]।

पर्षि तोकं तनयं पर्तृभिष्ट्वमदब्धैरप्रयुत्वभिः।
अग्ने हेळांसि दैव्या युयोधि नोऽदेवानि हुरांसि च॥ १०॥

पर्षि[19] तोकम्। चारय[20]। पुत्रम्[21]। पौत्र च। पारणोपायैः[22]। त्वम्। अहिंसितैः[23]। अजस्रैः[24]। अग्ने ! क्रोधान्[25]। दैवकृतान्[26]। पृथक्कुरु। अस्माकम्[27]। रक्षांसि। च। कुटिलगमनानि[28]।

---

१. शतेन शतसङ्ख्याकैः Sy.
२. पूरीभिः P. पालकैः Sy.
३. युवम P. हे युवतमाग्ने ! Sy.
४. पापाद् आहन्तुः शत्रोर्वा Sy.
५. समेद्धारम् is suggested for समेधारम्॥ त्वां सम्यगिद्धं कृतवन्तं माम् Sy.
६. हेमन्तान् संवत्सरान् Sy.
७. ददति धनं तव समिन्धनस्य कर्तरि प्रयच्छन्ति तांश्च पाहि Sy.
८. पाहीति is suggested for पासीति।
९. चित्रः is suggested for चित्रा॥ दर्शनीयस्त्वम् Sy.
१०. रक्षया सह Sy.
११. ०यितः ! is suggested for ०यितृः॥ हे वासकाग्ने ! Sy.
१२. प्रेरय Sy.
१३. चोदयस्य P. अस्य सर्वत्र लोके परिदृश्यमानस्य Sy.
१४. रथीः रंहिता नेता Sy.
१५. भवसि। अतः कारणादस्मभ्यं धनानि प्रेरयेत्यर्थः Sy.
१६. तुचे। अपत्यनामैतत्। अपत्यायापतनहेतुभूताय पुत्रादये Sy.
तुगित्यपत्यनाम Ngh. 2.2.
१७. अवत्यस्माकम् P.
१८. क्षिप्रम् Sy.
१९. वर्षि P., D.
२०. पार० is suggested for चार०॥ पालय Sy.
२१. तनयम् Sy.
२२. पालनसाधनैः Sy.
२३. केनाप्यहिंसितैः Sy.
२४. अप्रयुत्वभिः। यौतिरत्र पृथग्भावार्थः। अपृथग्भूतैः संहतैः Sy.
२५. ०धात् D.
२६. दवकृतात् D. देवकृतान् is suggested for दैवकृतान्॥ देवसम्बन्धीनि Sy.
२७. अस्मत्तः Sy.
२८. अदेवानि मनुष्यसम्बन्धीनि Sy.
२९. हिंसनानि Sy.

आ सखायः सबर्दुघां धेनुमजध्वमुप नव्यसा वचः ।
सृजध्वमनपस्फुराम् ॥ ११ ॥

आ सखायः । शौनक —आदित्यो वा मरुतः पृश्नयो वा प्रगाथस्तत्रेति । अस्मिन् सूस्तेऽयं प्रगाथ आदित्यदेवतो वा मरुद्देवतो वा पृश्निदेवतो वेत्यर्थस्तत्र पृथिदेवतत्वमृगक्षरेषु दृश्यते । हे सखायः ! अमृतदुघाम् । धेनुं । नवतरेण । स्तोत्रेण । उपाजध्वम् । विसृत्वध्वं च । दाम्नस्तां प्रस्फुरन्तीम् ।

या शर्धाय मारुताय स्वभानवे श्रवोऽमृत्यु धुक्षत ।
या मृळीके मरुतां तुराणां या सुम्नैरेवयावरी ॥ १२ ॥

या शर्धाय । या । मारुताय । वेगाय । स्वभूतदीप्तये । श्रवणीयम् । अमरणं तद्धेतु पयः । धुक्षत्र । या च । मरुताम् । गन्तृणाम् । सुखे वर्तते । या च । सुखैः । सहैव गमनशीला, यदा मारुतः प्रगाथस्तदा मरुता मातृद्वारा स्तुतिः, अथ यदादित्यस्तदा तेषां मातुः । अदितिर्हि पृश्निर्भूत्वा मरुतश्चोत्पादयामास ।

---

१. Cf. KSA. 32.48.p.23.
२. सूक्ते is suggested for सूस्ते ।
३. ०श्निदेवेत्य० P.
४. पृश्नि० is suggested for पृथि० ।
५. हे समानख्यानाः ! अध्वर्यवः ! Sy.
६. ०खाय मृ० P. सबरिति पयसो नाम । अमरणहेतुभूतस्य पयसो दोग्ध्रीम् Sy. अमृतं सबरुरुच्यते BD.
७. धेनुम् is suggested for धेनु ॥ गाम् Sy.
८. केन साधनेन ? नवीयसा Sy.
९. वचसाह्वानरूपेण शब्देन Sy.
१०. अभिगच्छत । प्राप्नुत Sy.
११. ०सृजध्वम् is suggested for ०सृत्वध्वम् ॥ उपसृजध्वं वत्सेनोपसृष्टां कुरुत । मरुद्देवत्यत्वात् मरुतां यागाय पयो दोग्धुमिति शेषः । अथवा मरुतां माता पृश्न्याख्या माध्यमिका वाग्धेनुः । हे सखायः ! स्तोतारः ! सबर्दुघां मरुज्जनहेतुभूतस्य पयसो दोग्ध्रीं धेनुं पृश्निं नव्यसा नवतरेण वचसा स्तोत्रेण उपागच्छत । अनपस्फुरामनपबाधनीयां तां सृजध्वम् । बन्धनाद्विसृजत । मुञ्चत । ईदृशी महती धेनुर्मरुतां माता किमु वक्तव्यं तेषां माहात्म्यमिति मरुत्स्तुतिः Sy.
१२. ०म्नस्तमः P.
१३. अनपस्फुराम्, स्फुरतिर्वधकर्मा । अनपबाध्याम् Sy.
१४. धेनुः Sy.
१५. म० P. मरुत्सङ्घाय Sy.
१६. कीदृशाय ? प्रसहनशीलाय Sy.
१७. ०प्तेये D. स्वायत्तदीप्तये Sy.
१८. अन्नं पयोलक्षणम् Sy.
१९. अमरणहेतु Sy.
२०. वयः P.
२१. अधुक्षत् is suggested for धुक्षत्र ॥ अधुक्षत् Sy.
२२. क्षिप्रकारिणाम् Sy.
२३. सुखे तत्परा वर्तते Sy.
२४. सुखैर्हेतुभूतैः Sy.
२५. गेवन० P. गन्तृभिरश्वैर्मध्यमस्थानैरुदकैर्वा सह यान्त्यन्येषामपि सुखार्थं वृष्टिजलैः सहागच्छन्ती तां धेनुमुपाजध्वमिति पूर्वत्रान्वयः । अत्रापि पूर्ववन्मरुत्स्तुतिरधिगन्तव्या Sy.
२६. मरुतः P.
२७. ०रुतोत्पा० P.

भरद्वाजायाव धुक्षत द्विता । धेनुं च विश्वदोहसमिषं च विश्वभोजसम् ॥ १३ ॥

भरद्वाजाय । ॥ लिङ्गोक्तदेवस्तृचः ॥ भरद्वाजाय मम भ्रात्रे या । अवधुक्षत । द्वैधमिन्द्रादयो वक्ष्यमाणः । कथं द्वैधमित्याह । गाम् । च । विश्वास्य दोग्ध्रीम् । अन्नम् । च । सर्वस्य भोजयितृ ।

तं व इन्द्रं न सुक्रतुं वरुणमिव मायिनम् ।
अर्यमणं न मन्द्रं सुप्रभोजसं विष्णुं न स्तुष आदिशे ॥ १४ ॥

तं वः । तम् । युष्मदर्थम् । इन्द्रम् । च । सुप्रज्ञानम् । वरुण च । प्रज्ञावन्तम् । अर्यमणम् । च । मादयितारम् । गच्छदन्नं प्रदातारम् । विष्णुम् । च । स्तौ । धनामादेशाय ।

त्वेषं शर्धो न मारुतं तुविष्वण्यनर्वाणं पूषणं सं यथा शता ।
सं सहस्रा कारिषच्चर्षणिभ्य आँ आविर्गूळ्हा वसू करत्सुवेदा नो वसू करत् ॥ १५ ॥

त्वेषम् । दीप्तम् । शर्धम् । च । मारुतम् । बहुधनम् । तथान्यस्मिन्नप्रत्यृतम् । पूषण च स्तौमि ।

---

१. ०वस्त्वृचः D. ०वतस्तृचः is suggested for ०वस्तृचः ।
२. हे मरुतः ! Sy.
३. अस्मद्भ्रात्रे Sy. ४. अवाधु० P.
५. द्वितयम् Sy.
६. ०णाः is suggested for ०णः ।
७. यथा P.
८. विश्वस्य is suggested for विश्वास्य ॥ विश्वस्य व्याप्तस्य बहुलस्य दोग्ध्रीम् Sy.
९. सर्वेषां भोगपर्याप्तम् Sy.
१०. च D. ११. हे मरुद्गण ! Sy.
१२. तादृशम् Sy.
१३. वः त्वाम् Sy.
१४. VM. seems to explain न as च ॥ इव Sy. १५. सुकर्माणम् Sy.
१६. P. reads अन्नं च प्रज्ञावन्तमर्यमणमन्नं च for इन्द्रं च सुप्रज्ञानं वरुणं च ॥ वरुणमिव Sy.
१७. D. adds अर्यमणञ्च प्रज्ञावन्तम् after प्रज्ञावन्तम् ॥ मायावन्तम् Sy.
१८. इव Sy. १९. स्तुत्यम् Sy.
२०. प्रसृप्तधनम् । यदा त्वस्या लिङ्गोक्तदेवतास्तदानीं नेवशब्दौ चशब्दार्थे द्रष्टव्यौ Sy.
२१. P. adds दाम्नस्तमः प्रस्फुरन्तीं या शर्धाय मारुताय वेगाय स्वभूतदीप्तेये श्वेतणीयममरणं तद्धेतु पयो धुक्षत्र या च मरुतां गन्तृणां सुखे वर्तते याचन्नञ्च सर्वस्य मादयितारं गच्छदन्नं प्रदातारं विष्णुञ्च after विष्णुम् । च । The additional passage in P. has a striking resemblance with the commentary on RV.VI.48.11,12.
२२. स्तौमि is suggested for स्तौ ।
२३. धनम् P. धनानामा० is suggested for धनामा० ।
२४. मदेशाय P. धनानामतिसर्जनाय प्रदानाय Sy.
२५. शर्धः is suggested for शर्धम् ॥ बलं स्तौमीति शेषः Sy.
२६. नेति सम्प्रत्यर्थे, सम्प्रतीदानीम् Sy.
२७. मरुत्सङ्घरूपम् Sy.
२८. बहुस्वनम् is suggested for बहुधनम् ।
२९. ०न्यन्नप्र० P. शत्रुभिरनभिगतम् Sy.
३०. पोषकम् Sy.

सह करोमि[1]। यथा[2]। गतानि[3]। सहस्राणि[4] च वसूनि[5]। करोति[6]। मनुष्येभ्यस्तथा[7] स्तौमि। स[8] पूषास्माकम्। गूढानि[9]। वसूनि[10]। आविष्करोतु। सुधनः भरद्वाजायेति प्राथे[11] मारुते[12] गणो वा स्तूयते। तत्रोपमार्थीयाः सङ्गच्छन्ते[13] तस्मिन् पक्षेऽयं मन्त्र[14] पौष्ण इति[15]। यथा मारुत[16] शर्धोऽस्तौषमेवं पूषणमपि स्तौमीति[17]।

आ मा पूषन्नुप द्रव शंसिषं नु ते अपिकर्ण आघृणे। अधा अर्यो अरातयः॥ १६॥

आ मा। हे पूषन्! माम्। उपाद्रव[19]। आगतघृणे[20]! क्षिप्रमहम्। शंसामि[21]। तव। कर्णसमीपे[22]। आहन्यमानमाहारा[23] च? अभिगन्तारः[24]। मम शत्रवो[25] भवन्तु भवन्ति वेति।

मा काकम्बीरमुद्बृहो[26] वनस्पतिमशस्तीर्वि हि नीनशः[27]।
मोत सूरो अह एवा चन ग्रीवा आदधते वेः॥ १७॥

मा काकम्बीरम्[28]। मा। काना[29] भर्तरि काकैर्वा निबिडम्[30]। उद्बृहः[31]। वनस्पतिमिति पुत्रपौत्रपरिवृत-

---

१. सं सहैव कारिषत् कुर्यात् तथा स्तौमीति पूर्वत्रान्वयः Sy.
२. येन प्रकारेण Sy.
३. शतानि is suggested for गतानि॥ शतसङ्ख्याकानि धनानि Sy.
४. सहस्रसङ्ख्याकानि Sy.
५. सूनि P. धनानि Sy.
६. मनुष्येभ्योऽस्मभ्यम् Sy.
७. मरुद्गणः Sy.
८. गूढानि संवृतानि Sy.
९. धनानि Sy.
१०. सुवेदा सुलभानि Sy.
११. प्रगाथे is suggested for प्राथे।
१२. ०तो is suggested for ०ते।
१३. सूय० P.
१४. तत्रो व मात्मीयास्सङ्गते P.
१५. हुति D.
१६. मारु D.
१७. शद्धोस्तौ० D.
१८. VM. explains सम्। वसु। करत् once only and ignores आ॥ आकारः समुच्चये। वसूनि धनानि। करोतु। यदा तु लिङ्गाविपं पौष्णी तदा मारुतं शर्ध इव त्वेषं पूषणं पोषकमेतत्संज्ञं देवं स्तौमीति योजनीयम् Sy.
१९. द्रव P. आ द्रव रक्षणार्थमभिगच्छ। उपद्रव बाधस्व। उपपूर्वो द्रवतिर्बाधायां वर्तते। यथा 'प्रजां पशून् यजमानस्योपदोद्राव (TS. 1.5.1.4) इति Sy.
२०. हे आगतदीप्ते! Sy.
२१. प्रशंसामि Sy.
२२. कर्णावपि गते समीपदेशे स्थितः सन् Sy.
२३. The reading is doubtful॥ आहन्त्रीः Sy.
२४. अभिगन्त्रीः Sy.
२५. शत्रुभूताः प्रजाः Sy.
२६. ०वीरं D.
२७. ऋषिः पुत्रपौत्रसहितमात्मानं बहुपक्ष्याश्रयवनस्पतित्वेन रूपयन् तस्यानुद्धारमाशास्ते Sy.
२८. काकानाम् is suggested for कानाम्।
२९. ककै P.
३०. निबडम् P.
३१. उद्धर। बाधस्व। पुत्रपौत्रादिभिः सखिभूतैरुपेतमन्यैश्च बहुभिराश्रितं मां मा हिंसीरित्यर्थः Sy.
३२. वृक्षम् Sy.

स्यात्मनोऽनुद्धारणमाशास्ते तदर्थम् । अरातीः । विनाशय । मा । अपि च । सुवीरो योद्धा । अह्नि । एव । पक्षिणो ग्रहणार्थम् । ग्रीवाः । अधारयतु सुप्तं कण्ठे गृह्णात्वित्यरातिभिरनातभवमाशास्ते ।

दृतेरिव तेऽवृकमस्तु सख्यम् । अच्छिद्रस्य दधन्वतः सुपूर्णस्य दधन्वतः ॥ १८ ॥

दृतेः । दृतेरिव । ते । अहिसकम् । अस्तु । सख्यम् । अच्छिद्रस्य । दधियुक्तस्य । अत्यन्तं पूर्णस्य ।

परो हि मर्त्यैरसि समो देवैरुत श्रिया ।
अभि ख्यः पूषन्पृतनासु नस्त्वमवा नूनं यथा पुरा ॥ १९ ॥

परो हि । मर्त्येभ्यस्त्वम् । परः । हि । भवसि । देवैः । च । समो भवसि । धनेन, 'पूषा वै धनानामशन पणिभ्यामुपनिधाता' इति विज्ञायते । अपिपश्य । अस्मान् । त्वम् । सङ्ग्रामेषु । रक्ष । इदानमपि । यथा । पुरा त्वैमरक्ष ।

---

१. ०ती P. अशंसनीयाः, अशंसनीयस्य दुःखस्य कीर्तयित्रीर्वा शत्रुभूताः प्रजाः Sy.
२. प्रेरकः शत्रुः Sy.
३. VM. takes अहः as a noun but Sy. takes it as a verb माहः । अस्मान्मा हार्षीत् । एवमित्यभिसम्बन्धादाख्यातस्योदात्तत्वात्त्वाच्चाश्रुतोऽपि यथेत्येतद्वाक्येऽध्याह्रियते Sy. ४. एवमचक्षिणो P. एवर्मक्षिणो D. ५. गृहणार्थ P.
६. गिरन्त्यन्तरवस्थापयन्ति बध्नन्तीति ग्रीवा दामानि यथा व्याधा वेः पक्षिणो हरणार्थं दामानि ज्वालारूपाण्यावधते भूम्यां निवधते तैश्च निहितैः पक्षिणो हरन्त्येवमस्मान् बन्धनोपायैः शत्रुर्मा हार्षीदित्यर्थः Sy.
७. आधा० is suggested for अधा० ।
८. कर्णे P.
९. VM. ignores हि and चन ॥ हि शब्दश्चार्थे Sy. १०. Omitted by P.
११. हे पूषन् ! Sy.
१२. दृत्वेरिव P. यथा वृतेस्त्वदीयं सख्यमविच्छिन्नं तद्वत् Sy. १३. तव Sy.
१४. बाधकरहितं सर्ववैकरूप्येण वर्तमानमस्माकम् Sy. १५. सर्ववा भवतु Sy.
१६. सखित्वम् Sy.
१७. छिद्ररहितस्य संश्लिष्टस्य Sy.
१८. दधिमतः Sy.
१९. दध्ना सुष्ठु पूरितस्य Sy.
२०. VM. explains दधन्वतः once only ॥ पुनर्दधन्वत इति दध्नोऽधिकत्वद्योतनार्थः । ईदृशो वृतिः सर्ववा पूष्णो रथे वर्तते । स इव वयमपि सखायो भवेमेत्यृषिराशास्ते Sy.
२१. मर्त्येभ्यो मनुष्येभ्यः Sy.
२२. परस्तात्स्थितोऽसि Sy.
२३. P. reads वभेराभयसि for परः । हि । भवसि ।
२४. सर्वैर्देवैः Sy. २५. समानः Sy.
२६. सम्पदा Sy.
२७. पाणिभ्यामुपनिवासाता P.
२८. अभिपश्य is suggested for अपिपश्य ॥ अनुग्रहदृष्ट्या विलोकय Sy.
२९. दानम० D. इदानीमपि is suggested for इदानमपि ॥ अद्य Sy.
३०. येन प्रकारेण Sy.
३१. रक्ष D. त्वमरक्ष is suggested for त्वैमरक्ष ॥ पूर्वकालीनान् पुरुषान् ररक्षिथ Sy.
३२. VM. ignores पूषन् ।

वामी वामस्य धूतयः प्रणीतिरस्तु सूनृता ।
देवस्य वा मरुतो मर्त्यस्य वेजानस्य प्रयज्यवः ॥ २० ॥

वामी वामस्य ॥ तृचः परो मारुतः ॥ वननीया । भजमानस्यम् । हे कम्पयितारः ! प्रणीतिः । अस्तु । सत्या । देवस्य । वा । मरु ! मर्त्यस्य । वा । यजमानस्य । प्रकर्षेण यष्टव्याः ।

सद्यश्चिद्यस्य चर्कृतिः परि द्यां देवो नैति सूर्यः ।
त्वेषं शवो दधिरे नाम यज्ञियं मरुतो वृत्रहं शवो ज्येष्ठं वृत्रहं शवः ॥ २१ ॥

सद्यश्चित् । तदानीम् । एव । यस्य शवसोऽनुसूयूतम् । रणम् । अन्तरिक्ष परिगच्छति । द्युलोकम् । इव । देव । सूर्य । तद् दीप्तम् । तृणादीनां नामकम् । शव । दधिरे । मरुतः । यज्ञियम् । शत्रूणां हन्तृ । प्रशस्ततरम् ।

सकृद्द्यौरजायत सकृद्भूमिरजायत ।
पृश्न्या दुग्धं सकृत्पयस्तदन्यो नानु जायते ॥ २२ ॥

सकृत् । सकृत् । एव । द्यौः । अजायत जाता सतीतरा नित्या तिष्ठति । तवै भूमिः । तथा पृश्न्याश्च ।

---

१. मामस्य P.
२. प्रशस्ता या वाक् Sy.
३. ०स्या P. ०मानस्य is suggested for ०मानस्यम् ॥ वननीयस्य धनस्य Sy.
४. हे is suggested for ह ।
५. अस्मदर्थं धनानां प्रणेत्री Sy.
६. भवतु Sy.
७. प्रियसत्यात्मिका माध्यमिका युष्मदीया वाक् Sy.
८. मरुतः ! is suggested for मरु ।
९. मर्तस्य P.
मनुष्यस्य Sy.
१०. इष्टवत उभयविधस्य पुरुषस्य Sy.
११. सद्यः Sy.
१२. मरुद्गणस्य Sy.
१३. ०नुसूक्तं P.
१४. करणम् is suggested for रणम् ॥ कर्म Sy.
१५. परितो वर्तते Sy.
१६. विज्यन्तरिक्षे Sy.
१७. VM. seems to take देवः nom. as देव Voc.
द्योतमानः Sy.
१८. त D.
१९. शत्रूणां नमयितृ Sy.
२०. बलम् Sy.
२१. अधारयन् Sy.
२२. तादृशगणात्मका मरुतः Sy.
२३. यज्ञार्हम् Sy.
२४. वृत्रादेरसुरस्य हन्तृ भवति Sy.
२५. सर्वेभ्यः प्रशस्ततमं भवति Sy.
२६. VM. explains वृत्रहम् । and शवः once only.
२७. उदपद्यत । सकृदुत्पन्नैव स्थिता भवति । न पुनस्तस्यां नष्टायामन्या तत्सदृशी द्यौर्जायते Sy.
२८. सतितरा P.
२९. तर्यव is suggested for तवै ।
३०. मरुतां मातुर्गोः Sy.

पयो मरुतां जनकम्। सकृदेव[1]। दुग्धम्[2]। आत्तवीर्यैस्तस्मिन् ततः। अन्यः[3]। न। अनुजायते[4]।

VI.49.

स्तुषे जनं[5] सुव्रतं नव्यसीभिर्गीर्भिर्मित्रावरुणा सुम्नयन्ता[6]।
त आ गमन्तु त इह श्रुवन्तु सुक्षत्रासो वरुणो मित्रो अग्निः ॥ १ ॥

स्तुषे[7]॥ ऋजिश्वा भारद्वाजः॥ चत्वारि वैश्वदेवानि॥ स्तुहि। दैव्य जनम्[8]। सुकर्माणम्। नवतराभिः। स्तुतिभिः। कं जमित्याह—मित्रावरुणौ[9]। सुखमिच्छन्तौ, अग्निं च। ते। आगच्छन्तु। ते[11]। इह[12]। शृण्वन्तु[13]। सुबलाः[14]। वरुणादयः[15]।

विशोविशं[16] ईड्यमध्वरेष्वदंप्रक्रतुमरतिं युवत्योः[17]।
दिवः शिशुं सहसः सूनुमग्निं यज्ञस्य केतुमरुषं यजध्यै[18] ॥ २ ॥

विशोविशः। सर्वस्य[19]। स्तुत्यम्[20]। यज्ञेषु। अमुग्धप्रज्ञानम्[21]। अभिगन्तारम्[22]। द्यावापृथिव्यो[23]।

---

१. एकवारमेव। यस्मात्पयसो मरुतो जज्ञिरे। 'पृश्नियै वै पयसो मरुतो जाताः' (TS. 2.2. 11.4.) इति तैत्तिरीयकम् Sy.

२. यथा द्यावापृथिव्यौ सकृदेवोत्पद्येते एवं पृश्निरपि सकृद्दुग्धेनैव पयसा मरुतोऽजीजनत् Sy.

३. ०र्यं D. The reading is doubtful.

४. अन्या D. पदार्थस्तत्सदृशः Sy.

५. उत्पद्यते Sy.

६. 'स्तुषे जनम्' इति पञ्चदशर्चं षष्ठं सूक्तं भारद्वाजस्य ऋजिश्वन आर्षं वैश्वदेवम्। अन्त्या षट्पञ्चाशदक्षरा शक्वरी शिष्टास्त्रिष्टुभः। तथा चानुक्रान्तम्—'स्तुषे पञ्चोन ऋजिश्वा ह वैश्वदेवं ह शक्वर्यन्तम्' (KSA. 32.49. p. 23.)। व्यूळ्हे दशरात्रे पञ्चमेऽहनीदं वैश्वदेवनिविद्धानम्। सूत्रितञ्च—'ऋभुभिर्भ्वा स्तुषे जनमिति वैश्वदेवम्' (ĀSS. 8.8.) इति। आद्या महानाम्नीव्रते जप्या Sy.

७. अहं स्तुवे Sy.

८. दैव्यं जनं देवसङ्घम् Sy.

९. जनमि० is suggested for जमि०।

१०. मित्रः प्रमीतेस्त्रायकः, वरुणः पापान्निवारयिता। एतावपि देवौ स्तौमि Sy.

११. सुम्नं सुखं स्तोतृणामिच्छन्तौ Sy.

१२. तादृशाः Sy.

१३. अस्मिन् यज्ञे Sy.

१४. ते। इह। शृण्वन्तु is omitted by P. अस्मदीयाः स्तुतीः शृण्वन्तु च। अत्र मित्रादीनां परिगणनमुपलक्षणं सूक्तस्य सर्वदेवताप्रतिपादकत्वात्। अत एव पूर्वं जनमिति सामान्यनिर्देशः Sy. १५. शोभनबलाः Sy.

१६. आदि refers to मित्र and अग्नि॥ सर्वे देवाः Sy.

१७. VM. seems to explain विशोविशः as सर्वस्य॥ सर्वस्याः प्रजायाः Sy.

१८. ऋत्विग्भिः स्तुत्यम् Sy.

१९. अमुग्धप्र० D. दर्परहितकर्माणममूढप्रज्ञं वा Sy.

२०. इतिग० P. अयं स्वामिनम् Sy.

२१. ०थिव्योः is suggested for थिव्यो।

दिवः[1]। सूनुम्[2]। सहसः[3]। पुत्रम्। अग्निम्[4]। यज्ञस्य[5]। पताकास्थानीयम्[6]। आरोचमानम्[7]। यष्टुं[8] स्तुहि[9]।

अरुषस्य दुहितरा विरूपे स्तृभिरन्या पिंपिशे सूरो अन्या।
मिथस्तुरा विचरन्ती पावके मन्म श्रुतं नक्षत ऋच्यमाने ॥ ३ ॥

अरुषस्य[10]। आरोचमानस्य सूर्यस्य। दुहितरौ[11]। विरूपे[12] भवतः। नक्षत्रैः[13]। अन्या[14]। शिष्टा भवति। सूर्यः[15]। अन्यया संसृष्टो भवति। इतरेतरं त्वरमाणे[16]। विचरन्त्यौ[17]। शोधयित्र्यौ[18]। मननीय स्तोत्रम्[19]। व्याप्नुतः[20]। विश्रुतम्[21]। स्तूयमानेऽहोरात्रे[22]।

प्र वायुमच्छा बृहती मनीषा बृहद्रयिं विश्ववारं रथप्राम्।
द्युतद्यामा नियुतः पत्यमानः कविः कविमियक्षसि प्रयज्यो ॥ ४ ॥

प्र वायुम्[23]। प्रगच्छति[24]। वायुम्। प्रतिबुभूषतः[25]। बृहती[26]। बुद्धिः[27]। महाधनम्[28]। सर्ववरणीयम्[29]।

---

१. द्युलोकस्य Sy.
२. ०नू P. पुत्रम्। 'दिवस्परिं प्रथमं जज्ञे अग्निः' (RV. X.45.1.) इति निगमः। यद्वा दिवः स्तोतुः पुत्रभूतम्। तथापि निगमो भवति—'त्वं पुत्रो भवसि यस्तेऽविधत्' (RV. II.1.9.) इति Sy.
३. बलस्य Sy.
४. एवङ्गुणकमग्निम् Sy.
५. यागस्य Sy.
६. प्रज्ञापकम् Sy.
७. ०न P.
८. यष्टुम् is suggested for यष्टु।
९. स्तुष इत्यनुषज्यते। स्तुवे Sy.
१०. इयमहोरात्रयोः स्तुतिः Sy.
११. दुहितारो P. ०तरौ is suggested for ०तरो ॥ सूर्येण ह्यहोरात्रयोर्विभागः क्रियते। अतस्तदधीनात्मलाभत्वात्तस्य दुहितरावित्युच्येते Sy.
१२. शुक्लकृष्णतया नानारूपे Sy.
१३. अनन्या P. एका रात्रिः Sy.
१४. पिष्टा is suggested for शिष्टा ॥ पिश्यते। संश्लिष्यते। 'पिश अवयवे' इति धातुः Sy. १५. सूर्येण Sy.
१६. अन्याहरात्मिका दुहिता संश्लिष्यते। ते च नक्षत्रैः सूर्येण चालङ्कृते भवत इत्यर्थः Sy.
१७. इतरेतरत्वमरणे P. परस्परं बाधयन्त्यौ। अह्ना रात्रिर्निवर्त्यते रात्र्या चाहरिति परस्परं बाधः Sy.
१८. विविधं पृथक् चरन्त्यौ Sy.
१९. सर्वस्य शोधयित्र्यौ Sy.
२०. श्रो P. मननीयं स्तोत्रमस्मत्कृतम् Sy.
२१. व्याप्नुताम् Sy.
२२. श्रोतव्यम् Sy.
२३. एवम्भूते अहश्च रात्रिश्च ऋच्यमाने अस्माभिः स्तूयमाने सत्यौ Sy.
२४. ०माने अहो० is suggested for ०मानेऽहो०।
२५. प्रगच्छतु। उपसर्गश्रुतेर्योग्यक्रियाध्याहारः Sy.
२६. आभिमुख्येन Sy., Mah., U.
२७. ०ति P. महती Sy. महत्या Mah. बृहत्या U.
२८. ०द्धि P. अस्मदीया स्तुतिः Sy. बुद्ध्या कृत्वा Mah. मनीषया U.
२९. बृहन् रयिर्यस्य तं महाधनम् Mah.
३०. विश्वैर्वरणीयं सम्भजनीयम् Sy. विश्वेन ह्रियते तं सर्वस्य वरणीयं, विश्वं वृणोतीति वा सर्वव्यापकम् Mah. सर्वस्य वरणीयम् U.

स्तोतॄणां रथस्य धनेन पूरयितारम्, शरीरेण वा महता रथं पूरयन्तम् । दीप्तगमनः । नियुतः । प्रतिगच्छन् । कविः । कविम् । प्रतिगच्छसि । प्रकर्षेण यष्टव्यः !

स मे वपुश्छदयदश्विनोर्यो रथो विरुक्मान्मनसा युजानः ।
येन नरा नासत्येषयध्यै वर्तिर्याथस्तनयाय त्मने च ॥ ५ ॥

स मे वपुः । सः । मह्यम् । रूपम् । प्रकाशयति । अश्विनोः स्वभूतः । यः । रथः । विरोचनवान् । मनसा । युज्यमानः । येन । हे नेतारौ ! नासत्यौ ! अन्न कर्तुम् । मार्गम् । यथा । पुत्राय । आत्मने पित्रे । च ।

---

१. रथस्यात्मीयस्य प्रातारं पूरयितारम् । यद्वा स्तोतॄणां रथं धनैः पूरयितारम् Sy. रथं प्राति पूरयति रथप्राः तम् । यजमानाय दातुं धनं रथं पूरयति Mah. रथपूरणम् । शत्रुधनैरसौ रथं पूरयति U.

२. अथ प्रत्यक्षस्तुतिः Sy.

३. दीप्ति० P. प्रदीप्तयानः Sy. व्यत्ययः । द्युतद्यामानं, द्युतद् दीप्यमानं याम यमनं नियमनं यस्य तम् Mah. द्योतनं यमनं यस्य स तथोक्तः । द्युतद्यामानमिति विभक्तिव्यत्ययो वायुविशेषणत्वात् U.

४. आत्मीयरथयोज्या वडवास्ताः Sy. नियुतः पत्यमानः । उभयत्र विभक्तिव्यत्ययः । नियुद्भिरश्वैः Mah.

५. अभिपतन्नभिगच्छन् । यद्वा पत्यतिरश्वकर्मा । तासां वडवानामीश्वरः Sy. पत्यमानं गच्छन्तम् Mah. अत्रापि पत्यमानमिति पदयोर्विकारो वाक्यवशात् । . . . . उत्पतन्तम् U.

६. क्रान्तदर्शी । एवम्भूतस्त्वम् Sy. कविर्ज्ञानी Mah. योग्यस्त्वं कविः क्रान्तदर्शनः U.

७. मेधाविनं स्तोतारम् Sy. क्रान्तदर्शिनम् । ईदृशं वायुं यजेत्यर्थः Mah. क्रान्तदर्शिनम् U.

८. धनेन पूजय Sy. प्रकर्षेण यष्टुमिच्छसि Mah., U.

९. ०ष्टव्य is suggested for ०ष्टव्यः ॥ हे प्रकर्षेण यष्टव्य ! वायो ! Sy. प्रकर्षेण यजति प्रयज्युः, हे प्रयज्यो ! अध्वर्यो ! Mah. हे प्रयज्यो ! प्रकर्षेण यजनशील ! अध्वर्यो ! U.
This stanza—YV.33.55.

१०. रथः Sy. ११. मदीयम् Sy.

१२. शरीरम् Sy.

१३. छादयतु । तेजसाच्छादयतु Sy.

१४. ०नो D.

१५. विशेषेण दीप्यमानः Sy.

१६. मनोव्यापारमात्रेण Sy.

१७. अश्वैः सम्प्रयुज्यमानो भवति Sy.

१८. रथेन Sy.

१९. नेतारौ is suggested for नेतारो ।

२०. हे सत्यस्वभावौ ! सत्यस्य नेतारौ ! नासिकाप्रभवौ ! वाश्विनौ ! Sy.

२१. कामान् प्रापयितुम् Sy.

२२. स्तोतृगृहम् Sy.

२३. याथः is suggested for यथा ॥ गच्छथः, स रथ इति पूर्वत्रान्वयः Sy.

२४. तत्पित्रे स्तोत्रे च Sy.

पर्जन्यवाता वृषभा पृथिव्याः पुरीषाणि जिन्वतमप्यानि ।
सत्यश्रुतः कवयो यस्य गीर्भिर्जगतः स्थातुर्जगदा कृणुध्वम् ॥ ६ ॥

पर्जन्यवाता । हे पर्जन्यवायू ! वर्षितारौ ! पृथिव्याः । उदकानि । दुग्धा । अन्तरिक्षस्थान्यपि वाऽपां सम्बन्धीनि पूरकाणि स्तोतानि । परोऽर्धर्चो ऋतः—सत्यस्य श्रोतारः । कवयः । यस्य । गीर्भिर्मम तृप्ता भवथ तस्य ममाभ्युदयार्थम् । जगत् । अलङ्कुरुत ।

पावीरवी कन्या चित्रायुः सरस्वती वीरपत्नी धियं धात् ।
ग्राभिरच्छिद्रं शरणं सजोषा दुराधर्षं गृणते शर्म यंसत् ॥ ७ ॥

पावीरवी । पावीरवी शोधयित्री । कमनीया । पूजनीयान्ना । सरस्वती । वीरपतिका । कर्म । धारयतु । 'छन्दांसि वै' ब्राह्मणम्, ताभिः । सङ्गता । अच्छिद्रम् । गृहम् । दुराधर्षम् । स्तुवते । सुख च । प्रयच्छतु ।

---

१. वृष्टेः कर्तारौ ! Sy.
२. अन्तरिक्षनामैतत् । अन्तरिक्षात् Sy. पृथिवीत्यन्तरिक्षनाम Ngh. 1.3.
३. दुग्धम् is suggested for दुग्धा ॥ प्रेरयतम् Sy.
४. ०न्यपि वावा सम्बन्धी P. आप्तव्यानि Sy.
५. स्तोता P. स्तोत्राणि is suggested for स्तोतानि ।
६. मारुतः is suggested for ऋतः ।
७. हे सत्यस्य स्तोत्रस्य श्रोतारः Sy.
८. मेधाविनो मरुतः Sy. ९. स्तोतुः Sy.
१०. स्तुतिभिर्यूयं स्तुता भवथ तस्य स्तोतुः Sy.
११. स्थावरजङ्गमात्मकं सर्वं प्राणिजातम् Sy.
१२. आभिमुख्येन कुरुत Sy.
१३. VM. ignores जगतः and स्थाता ॥ हे जगतः स्थातः ! गणाभिप्रायमेकवचनम् । स्थावरजङ्गमात्मकस्य जगतोऽवस्थापक ! हे मरुद्गण ! इति योज्यम् Sy.
१४. अन्वारम्भणीयायां सारस्वतस्य हविषो याज्या 'पावीरवी' इत्येषा । सूत्रितञ्च—'पावीरवी कन्या चित्रायुः पीपिवांसं सरस्वतः' (ĀSS. 2.8.) इति । एकादशिने सारस्वते पशावेषैव पुरोडाशस्य याज्या । सूत्रितञ्च—'पावीरवी कन्या चित्रायुर्यस्ते स्तनः शशयोः यो मयोभूः' (ĀSS.3.7.) इति । आग्निमारुते शस्त्रेऽप्येषा । सूत्रितञ्च—'राकामहमिति द्वे पावीरवी कन्या चित्रायुः' (ĀSS. 5.20.) इति Sy. १५. चित्रगमना चित्रान्ना वा Sy.
१६. ०न्वतीका P. वीरः प्रजापतिः पतिर्यस्यास्तादृशी । यद्वा वीराणां पालयित्री । एवम्भूता Sy. १७. अस्मदीयं कर्म यज्ञाख्यम् Sy.
१८. दधातु । धारयतु ददातु वा । शब्देन प्रतिपादितो ह्यर्थोऽनुष्ठीयते Sy.
१९. Something probably ग्नाः and इति is omitted before ब्राह्मणम् ।
२०. ब्र० P. SB. 6.5.4.7.
२१. अपि च ग्नाभिः देवपत्नीभिः । यद्वा ग्ना गायत्र्यादीनि छन्दांसि । 'छन्दांसि वै ग्नाः' (ŚB. 6.5.4.7.) इति श्रुतेः Sy.
२२. सह प्रीयमाणा । तैः सह प्रीयमाणा Sy.
२३. छिद्ररहितम् Sy.
२४. शत्रुभिः शीतवातादिभिश्च धर्षितुमशक्यम् Sy.
२५. स्तुवते is suggested for स्तुवक्रे ॥ स्तुवते मह्यम् Sy.

पथस्पथः परिपतिं वचस्या कामेन कृतो अभ्यानळर्कम् ।
स नो रासच्छुरुधश्चन्द्राग्रा धियंधियं सीषधाति प्र पूषा ॥ ८ ॥

पथस्पथः । सर्वस्य मार्गस्य । स्वामिनम् । स्तोत्रेच्छया । कामेन । वशीकृतो जनः । व्याप्नोतीति । अर्चनीयं पूषणम् । सः । अस्मभ्यम् । प्रयच्छतु । शुचो राधयित्रीः ।

१. एकादशिने पौष्णे पशौ 'पथस्पथः' इति हविषो याज्या । सूत्रितञ्च—'पथस्पथः परिपतिं वचस्या बृहस्पतया परमा परावदिति द्व' (ĀŚS. 3.7.) इति Sy. ऋजिश्वन आर्षम् Dur., SKN.

२. मार्गस्य मार्गस्य सर्वेषां मार्गाणाम् Mah. मार्गस्य U. सर्वमार्गाणामित्यर्थः Dur. स नो रासदिति तच्छुतेर्यदध्याहारः । यम्.... यावान् कश्चित्पन्थास्तस्य सर्वस्य SKN.

३. अधिपतिम् Sy. अधिपतिं स्वामिनम् Mah. अधिपतिमित्युपसर्गव्यत्ययः U. परिपालयितारम् BB. परिपतिं, परीत्येषोऽधीत्येतस्य स्थाने । अधिपतिं स्वामिनम् । पूषा हि महति पथि सम्प्रैतीत्यतः पथोऽधिपतिरुच्यते SKN.

४. स्तुत्या Sy. वचसा वेदोक्तेन Mah. वचनेन वेदोक्तेन U. वचसा स्तोत्ररूपेण । तृतीयैकवचनस्य याजादेशः BB. स्तुत्या Dur. तृतीयैकवचनस्य याजादेशः । स्वार्थिको वा यकारः, वच एव वचस्या । ततस्तृतीयाया अलुक् । तया वचस्यया स्तुतिलक्षणेन वचसेत्यर्थः SKN.

५. काम्यमानेन फलेन Sy. काम्यत इति कामं तेन वाञ्छितेन Mah. कामेनेच्छया U. कामेन स्वेन Dur. अभिलाषे? (णे)च्छया SKN.

६. चशी D. स्तोता Sy. अभिमुखीकृतः Mah. U. पूषणं कामेनैव प्रत्यभिमुखीकृत्य Dur. करोतिः क्रियासामान्यवचनः सामर्थ्यादिह प्रेरणे वर्तते ।....प्रेरितः SKN.

७. अभ्यश्नुताम् । प्राप्नोतु Sy. अभिव्याप्नोति ....व्याप्तिकर्मसु दशस्वयं पठितः Mah. आनशिव्याप्तिकर्मा U. अभिप्राप्नोति तस्मादहमप्यद्य त्वामुपगतोऽस्मीति भावः । अशू व्याप्तौ।.....यद्वा नशेर्गतिकर्मणो लुङि BB. स्तुत्या कामप्राप्त्यर्थमभिव्याप्नोमि Dur. अभिव्याप्नोति स्तौतीत्यर्थः....अभ्यानडित्यस्य व्याख्यानमभ्यापन्न इति SKN.

८. अर्कं देवम् Mah. अर्कं स्तोतव्यम् । 'अर्क स्तवने' कर्मणि घञ् । अर्चतेर्वा घञ् ।... ईदृशं हि पूषणम् BB. देवं पूषणम् SKN.

९. पूषा Sy., Mah., BB. सोऽभिव्याप्तः सन् Dur.

१०. ददातु । 'रा दाने' अस्माल्लेटि रूपम् Sy. ददातु लिङ्व्यत्ययः Mah. ददातु U., BB. रासतिर्दानकर्मा । ददातु Dur., SKN.

११. धारयित्री P. रोधयित्रीः is suggested for राधयित्री ॥ रोधयित्रीर्गाः Sy. शुचं रुन्धन्ति, वर्णनाशात् पृषोदरादित्वाच् शोकनाशकराणि साधनानि Mah. पूर्वपदान्तलोपः । शुचं सन्तापं साधनाभावकृतं यानि रुन्धन्ति साधनानि भवन्ति तानि तथोक्तानि विव्यच्य व्यत्ययेन U. किं ददातु ? शुरुधः शोकस्य रुधो निवारयित्रीः । क्विप् ।....पृषोदरादित्वाद् व्यञ्जनस्य लोपः BB. शुचं संरुन्धन्ति यानि धनानि Dur. अन्यत्र शुरुध आपो भवन्ति शुचं रुन्धन्तीति । इह तु सामर्थ्याद् धनानि शुरुध उच्यन्ते, तान्यपि हि शुचं मनोदुःखमुपभोगसाधनाभावात्कृतं सुतरां संरुन्धन्तीति SKN.

हिरण्यमुखाः पुष्टीः । कर्म कर्म च । प्रसाधयतु । पूषा ।

प्रथमभाजं यशसं वयोधां सुपाणिं देवं सुभगमस्तिमृभ्वम् ।
होतां यक्षद्यजतं पस्त्यानामग्निस्त्वष्टारं सुहवं विभावा ॥ ९ ॥

प्रथमभाजम् । मुख्यम् । यशस्विनम् । अन्नस्य धातारम् । सुपाणिम् । देवम् । शोभनबाहुम् ।

---

१. चन्द्रमिति हिरण्यनाम । हिरण्यप्रमुखा यद्वा स्वर्णभृङ्गाः Sy. चन्द्रमाह्लादकमग्रं यासां ताः । साधने कृत आह्लादो भवति Mah. तान्येव विशिष्यन्ते । चायनीयाग्राणि U. चन्द्राग्रा ओषधीः, चन्द्रो हिरण्यम्, असितजातिर्वा चन्द्रः, सोऽयं प्रधानमीश्वरो वा यासां ता अस्मभ्यं ददातु BB. अभिपूजितागमानि, धर्म्य आगमो येषाम् Dur. कीदृशीः शुरुधः ? चन्द्राग्राः । चन्द्रं चन्दतेः कान्तिकर्मणः । कान्तं प्रियमग्रं यासां ताश्चन्द्राग्राः । आयत्यामपि हि तानि धनानीत्यर्थः SKN.

२. पुष्टिं D.

३. Omitted by D.
सर्वमस्मदीयं कर्म Sy.
पुनः पूषा धियं धियं कर्माणि सर्वाणि Mah. इदानीं प्रज्ञावतामेव धनवत्तया प्रयोजनमिति तां प्रार्थयते धियंधियमित्यादिना चतुर्थेन पादेन। सर्वां धियं प्रज्ञाम् BB. तैर्धनैर्धर्मलुब्धैः.... कर्म कर्म, अस्माकमिष्टिपशुसोमादिलक्षणम् Dur. कर्म कर्म ज्योतिष्टोमादिकं तदपि SKN.

४. प्रकर्षेण साधयतु।... 'साध संसिद्धौ' Mah. साधतिः कर्मवचनः प्रसाधयतु U. स पूषाः प्रकर्षेण....साधयत्वस्माकमिति BB. यागायाविघ्नेनोपनामयत्वित्यर्थः Dur. लोडर्थे पञ्चमो लकारः । व्यत्ययेन विकरणम् । प्रसाधयतु SKN. पथस्पथः । अधिपतिम् । वचनेन । कामेन कृतः । अभ्यानळर्कम् । अभ्यापन्नोऽर्कमिति वा । स नो ददातु चायनीयाग्राणि धनानि । कर्मकर्म च नः प्रसाधयतु पूषेति N.12.18., SKN. IV.117.

तस्यै सप्तदश सामिधेन्यो भवन्ति । सप्तदशो वै प्रजापतिः प्रजापतिरश्वमेधोऽश्वमेधस्यैवाप्त्यै वृधन्वन्ताव्ज्यभागौ यजमानस्यैव वृद्धयै 'पूषंस्तव व्रते वयं' (RV.VI.54.9.) पथस्पथः परिपतिं वचस्ये' (RV.VI.49 8.) त्युपाꣳशु हविषो याज्यानुवाक्ये व्रतवत्यन्या भवति पथन्वत्यन्या वीर्यं वै व्रतं वीर्यस्याप्त्यै वीर्यस्यावरुद्धयाऽथ यत्पथन्वत्यश्वायैवैतत्स्वस्त्ययनं करोत्यनुष्टुभौ संयाज्ये वाग्वाऽअनुष्टुब्वाग्वै प्रजापतिः प्रजापतिरश्वमेधोऽश्वमेधस्यैवाप्त्यै वासःशतं दक्षिणा रूपं वाऽएतत्पुरुषस्य यद्वासस्तस्माद्वासमेव कं च सुवाससमाहुः को न्वयमिति रूपसमृद्धो हि भवति रूपेणैवैनꣳ समर्धयति शतं भवति शतायुर्वै पुरुषः शतेन्द्रियश्चायुरेवेन्द्रियं वीर्यमात्मन्धत्ते । ŚB.13.4.1.15.p.980. This stanza= YV.34.42.=TS.1.1.14.2.

५. त्वाष्ट्रे पशौ 'प्रथमभाजम्' इति हविषो याज्या। सूत्रितञ्च—'प्रथमभाजं यशसं वयोधां सोमापूषणा जनना रयीणाम्' (ĀŚS.3.8.)इति Sy.

६. प्रथम उत्पत्तिकाल एव विभक्तारं जन्तूनाम् । 'यावच्छो वै रेतसः सिक्तस्य त्वष्टा रूपाणि विकरोति तावच्छो वै तत्प्र जायते' (TS.1.5.9.1.) इति श्रुतेः Sy.

७. वयसोऽन्नस्य हविर्लक्षणस्य धातारं धारयितारं यद्वा स्तोतृभ्योऽन्नप्रदम् Sy.

८. हस्तस्य मणिबन्धादूर्ध्वप्रदेशः पाणिः । शोभनपाणिकम् Sy. ९. दानादिगुणयुक्तम् Sy.

१०. गभस्ती इति बाहुनाम Ngh.2.4. शोभनदोर्दण्डम् Sy.

महान्तम्[1]। होता[2]। यजतु[3]। यजनीयम्[4]। गृहाणाम्[5]। अग्निः। त्वष्टारम्। स्वाह्वानम्[6]। दीप्तिमान्[7]।

भुवनस्य पितरं गीर्भिराभी रुद्रं दिवा वर्धया रुद्रमक्तौ।
बृहन्तमृष्वमजरं सुषुम्नमृधग्घुवेम कविनेषितासः॥ १०॥

भुवनस्य। भुवनस्य[8]। पातारम्[9]। स्तुतिभिः[10]। अह्नि[11]। रात्रौ च[12]। रुद्रम्[13]। वर्धय[14]। महन्[15]। दर्शनीयम्। अजरम्[16]। सुसुखम्[17]। अन्येभ्यो देवेभ्यः पृथक्[18]। ह्वयामः[19]। कविना रुद्रेण[20]। प्रेषिताः[21] प्रणीयमानाः[22]।

आ युवानः कवयो यज्ञिया सोमरुतो गन्त गृणतो वरस्याम्।
अचित्रं चिद्धि जिन्वथा वृधन्त इत्था नक्षन्तो नरो अङ्गिरस्वत्॥ ११॥

आ युवानः। कवयः[23]। यज्ञार्हाः[24]! मरुतः! स्तुवतः। वरणीयां स्तुति यूयम्। हि[25]। पूजारहितमयजमानम्[26]। अपि। पूरयथ[27]। वर्धमानाः। अमुत्रान्तरिक्षे[28]। व्याप्नुवन्तः। नेतारः[29]। अङ्गिरस्वत्[30], अङ्गिरसोऽपि नूनमन्तरिक्षेण गच्छन्ति[31]।

---

१. उरु भासमानं महान्तं वा Sy.
२. देवानामाह्वाता Sy.
३. यजत्। अनेन हविषा यजतु Sy.
४. यष्टव्यम्। गृहस्थैर्यजनीयमित्यर्थः Sy.
५. पस्त्यमिति गृहनाम (Ngh.3.4.) तत्स्थानाम् Sy.
६. सुखेनाह्वातुं शक्यम् Sy.
७. दीप्यमानः Sy.
८. भूतजातस्य Sy.
९. पालयितारम् Sy.
१०. स्तुतिः P.
११. अहनि Sy.
१२. रात्र्यां च Sy.
१३. रुद्वुःखम्। तद्द्रावयितारमीश्वरम् Sy.
१४. हे स्तोतः! वर्धय Sy.
१५. महद् P. महान्तम् is suggested for महन्।
१६. जरारहितम् Sy.
१७. शोभनसुखमेवङ्गुणविशिष्टं रुद्रम् Sy.
१८. ऋधक् ऋद्धं समृद्धं यथा भवति तथा Sy.
१९. पृथग्वयामः P. स्तवाम Sy.
२०. वयं च प्राज्ञेन रुद्रेण Sy.
२१. प्रेरिताः सन्तः Sy.
२२. VM. ignores आभिः and explains रुद्रम् once only.
२३. प्राज्ञाः! Sy.
२४. हे मरुतः! Sy.
२५. हीति पूरणः Sy.
२६. ओषधिवनस्पतिभिर्निबिडो देशश्चित्रम्। तद्विलक्षणमोषध्यादिभिर्वियुक्तमपि देशम् Sy.
२७. वृष्ट्या तर्पयथ Sy.
२८. ०त्रा अ० P. इत्थमनेन प्रकारेण Sy.
२९. हे नेतारः! मरुतः! Sy.
३०. अङ्गिरसो गमनशीला रश्मयः। ते यथा शीघ्रं नभस्तलं व्याप्नुवन्ति तद्वत्। यद्वा ऋषय एवाङ्गिरसः। तद्वच्छीघ्रगामिनः Sy.
३१. VM. ignores युवानः। आ and गन्त॥ हे युवानः! नित्यतरुणाः! आगन्त आगच्छत Sy.

प्र वीराय प्र तवसे तुरायाजा युथेव पशुरक्षिरस्तम् ।
स पिंस्पृशति तन्विं श्रुतस्य स्तृभिर्न नाकं वचनस्य विप्रः ॥ १२ ॥

प्र वीराय[1] । प्रेरय[2] स्तुतिम् । वीराय[3] मरुद्गणाय । वृद्धाय[4] । क्षिप्राय[5] । यूथानि यथा[6] । पशुपाल[7]. । रथं प्रति प्रेरयति । स मरुद्गण । स्पर्शं करोति । शरीरे[8] । विश्रुतस्य स्तोतु । नक्षत्रै[9] । इव[10] । द्युलोकम्[11] । वचनशीलस्य[12] । विप्रस्य[13] शरीर स शरीरै[14] । सम्पृषयति[15] ।

यो रजांसि विममे पार्थिवानि त्रिश्चिद्विष्णुर्मनवे बाधितायं ।
तस्य ते शर्मन्नुपदद्यमाने राया मदेम तन्वा तनां च ॥ १३ ॥

यो रजांसि[16] । यः । पार्थिवान्[17] । लोकान्[18] । विममे[19] त्रमणे[20] । त्रिः[21] । च[22] । असुरैर्बाधिताय[23] । मनुष्या मनुष्याणामभ्युदयार्थम्[24] । तस्य[25] । तव[26] स्वभूते । गृहे[27] । तयोपदीयमानेन[28] । मोदेमहि[29] । आत्मना[30] । पुत्रेण[31] । च सहिताः[32] ।

---

१. वीरय P.
२. हे स्तोतः ! स्तुतिं प्रगमय Sy.
३. विक्रान्ताय विविधं शत्रूणामीरकाय वा मरुद्गणाय Sy.
४. बलिने Sy.
५. क्षिप्रगमनाय च तस्मै गणाय प्राज Sy.
६. तत्र दृष्टान्तः । स यथा गोयूथानि सायङ्काले Sy.
७. पशुपालकः Sy.
८. अस्तं गृहं शीघ्रं गमयति तद्वत् शीघ्रं स्तुतिं प्रेरयेत्यर्थः Sy.
९. स्पर्शयतु । संश्लेषयतु । तत्स्तोत्रं हृद्गतं भवत्वित्यर्थः Sy.
१०. ०रो P.
आत्मीये शरीरे Sy.
११. 'क्रियाग्रहणमपि कर्तव्यम्' इति कर्मणः सम्प्रदानत्वाच्चतुर्थ्यर्थे षष्ठी । श्रुतं श्रोतव्यं स्तोत्रम् Sy.
१२. स्पर्शने दृष्टान्तः । यथा Sy.
१३. अन्तरिक्षम् Sy.
१४. वक्तुः Sy.
१५. मेधाविनः स्तोतुः Sy.
१६. संस्पृशति is suggested for संम्पृषयति ॥
स्पर्शयति संश्लेषयति तद्वत् Sy.
१७. VM. explains प्र once only.
१८. पृथिव्या सम्बद्धानि Sy.
१९. त्रींल्लोकानिति यावत् Sy.
२०. परिमितवान् Sy.
२१. ०णे P. त्रिक्रमणेः Sy.
२२. त्रीः P. त्रिभिरेव Sy.
२३. चव् P.
२४. सुरैः D. असुरैर्हिंसिताय Sy.
२५. मनुष्याय is suggested for मनुष्या ॥
मनवे प्रजापतये तदर्थम् Sy.
२६. ०णार्थमभ्युदयं P.
२७. हे विष्णो ! तस्य तादृशस्य Sy.
२८. ते तव, तृतीयार्थे षष्ठी । ईदृशेन त्वया Sy.
२९. शर्मणि गृहे सुखे वा वर्तमानाः सन्तो वयम् Sy.
३०. अस्मभ्यं दीयमाने Sy.
३१. मोद० D.
मोदेम । हृष्टा भवेम Sy.
३२. तन्वा रोगादिरहितेन शरीरेण Sy.
३३. VM. ignores विष्णुः ।

तन्नोऽहिर्बुध्न्यो अद्भिरर्कैस्तत्पर्वतस्तत्सविता चनो धात् ।
तदोषधीभिरभि रातिषाचो भगः पुरंधिर्जिन्वतु प्र राये ॥ १४ ॥

तन्नोऽहिर्बुध्न्यः । तत् । अस्मभ्यम् । अहिः । बुध्न्यः । उदकैः । अर्चनीयैर्धनैश्च सह । अन्नम् । प्रयच्छतु । पर्वतः । सविता च । तदन्नम् । नानाविधाभिरोषधीभिः सह । अभिप्रयच्छन्तु । दानस्य सेविता-रोऽहिर्बुध्न्यादयः । भगः । पुरन्धिश्चास्मान् । धनार्थम् । प्रीणयतु ।

नू नो रयिं रथ्यं चर्षणिप्रां पुरुवीरं मह ऋतस्य गोपाम् ।
क्षयं दाताजरं येन जनान्त्स्पृधो अदेवीरभि च क्रमाम विशु आदेवीरभ्यश्वाम ॥ १५ ॥

नू नः । क्षिप्रम् । अस्मभ्यम् । रथवाह्यम् । मनुष्याणां पूरकम् । बहुभिर्वीरैर्युक्तम् । महत । यज्ञस्य । रक्षकम् । गृहं च । प्रयत । जरारहितम् । येन निवासेन । स्पर्धयितॄन् । मनुष्यान् । अभि । च । क्रमाम । जयार्थं स्पर्धयित्रीश्चासुरीः । विशोऽभिक्रमाम । देवसम्बन्धिनीश्च विशः ।

---

१. लोके प्रसिद्धम् Sy.
२. एत्यन्तरिक्ष इत्यहिः । एतत्(अहिर्बुध्न्यः)पद-द्वयाभिधेयो देवः Sy. अहिरयनादेत्यन्तरिक्षे N. 2.17.
३. बुध्नमन्तरिक्षम् । तत्र भवोऽहिः Sy.
४. उदकैः सार्धम् Sy.
५. ०यैर्द्धश्च P. अर्चनसाधनैर्मन्त्रैः स्तूयमानः सन् Sy.
६. दधातु । विदधातु प्रयच्छतु Sy.
७. पूरयिता । 'पर्व पूरणे' इति धातुः । यद्वा पर्ववद्वज्रं पर्वतः । तद्वान् । पर्वतस्य गिरेः शत्रुरिति वा पर्वतः Sy.
८. स पिता D. प्रेरको देवः Sy.
९. तदन्नान्नावि० P.
१०. ओषः पाक आसु धीयत इत्योषधयस्तिलमाषाद्याः । ताभिः सार्धम् Sy.
११. ०भिः प्र० P.
१२. रातिं दानं सचन्ते सेवन्त इति रातिषाचो विश्वे देवाः Sy.
१३. ०रो हि बु० D.
१४. भजनीय एतत्संज्ञो देवश्च Sy.
१५. बहुधीर्बहुप्रज्ञो वा बहुकर्मा वा Sy.
१६. अस्मान् प्रेरयतु Sy.
१७. VM. ignores तत् । and प्र ।
१८. हे सर्वे देवाः ! Sy.
१९. रथसम्बन्धिनम् । रथयुक्तमित्यर्थः Sy.
२०. चर्षणयो मनुष्याः । तेषां पूरयितारम् Sy.
२१. ०क्त P. वीर्याज्जायन्त इति वीराः पुत्रादयः । बहुभिर्वीरैरुपेतम् Sy.
२२. दक्षिणारूपेण धनेन हि यज्ञो रक्ष्यते । 'मृतो यज्ञस्त्वदक्षिणः' इति वचनात् Sy.
२३. प्रयच्छत is suggested for प्रयत ।
२४. रयिणा क्षयेण च Sy.
२५. ०सेन is suggested for ०सन ।
२६. स्पर्धमानाः Sy.
२७. क्राम P. अभिभवेम Sy.
२८. ०यितृश्च P.
२९. अदेवसम्बन्धिनीः Sy.
३०. सेनाश्च Sy.
३१. ०मम P.
३२. देव० is suggested for दव० ॥ आगता देवा यासु हविःस्वीकारार्थं ता आदेव्यः । तादृशीश्च Sy.
३३. प्रजा यज्ञानुष्ठायिनीः Sy.

अभ्यदनवामाभिमुख्येन प्राप्नुयामेति ।

VI. ५०.

हुवे वो देवीमदितिं नमोभिर्मृळीकाय वरुणं मित्रमग्निम् ।
अभिक्षदामर्यमणं सुशेवं त्रातॄन्देवान्त्सवितारं भगं च ॥ १ ॥

हुवे वः । ह्वयामि । युष्मदर्थम् । अदितिम् । नमस्कारैर्हविर्भिर्वा । वरुणादीश्च । क्षदितिः कलीभावकर्मा, शत्रूणामाभिमुख्येन विशसितारम्, धनाना वा पृथक्कर्तारम् । अर्यमणम् । सुसुखम् । त्रातॄन् सर्वान् । देवान् । उदारम् । भगम् । च 'यो खलु वै ददाति सोऽर्यमा' इति ब्राह्मणम् ।

सुज्योतिषः सूर्य दक्षपितृननागास्त्वे सुमहो वीहि देवान् ।
द्विजन्मानो य ऋतसापः सत्याः स्वर्वन्तो यजता अग्निजिह्वाः ॥ २ ॥

सुज्योतिषः । शोभनज्योतिष्कान् । हे सूर्य ! दक्ष पिता येषा देवानाम् । तान् । अस्माकमभ्युदये

---

१. ०इनु० D. येन धनेन गृहेण च अभिप्राप्नवाम तादृशं धनं गृहं च दातेत्यन्वयः Sy.
२. व्याप्नु० P.
३. VM. ignores रयिम् ॥ रयिं धनम् Sy.
४. पञ्चमेऽनुवाके द्वादश सूक्तानि । तत्र 'हुवे वः' इति पञ्चदशर्चं प्रथमं सूक्तमृजिश्वन आर्षं बहुदेवताकं त्रैष्टुभम् । 'हुवे वः' (KSA.32. 50.p.23.) । इत्यनुक्रान्तम् । गतः सूक्तविनियोगः Sy.
५. हे देवाः ! Sy.
६. ह्वयामि स्तौमि Sy.
७. युष्माकम् Sy.
८. ०तिः P. अखण्डनीयामदीनां वा एतत्संज्ञां देवताम् Sy.
९. हविर्भिः is omitted by P. ०भि वा D. नमस्कारैः स्तोत्रैर्वा Sy.
१०. आदि refers to मित्रम् and अग्निम् ॥ वरुणं वारकं मित्रं प्रमीतेस्त्रायकं देवमग्नि चैतांश्च देवान् नमोभिर्हुवे Sy.
११. क्षभिरिति P. क्षभिति D.
१२. कलि० P. क्षदिर्हिंसाकर्मा । अभिक्षत्तारं शत्रूणां हिंसितारम् Sy.
१३. किम्बहुना ? पालयितॄन् Sy.
१४. सवान् D.
१५. नमोभिः स्तोत्रैर्हुवे स्तौमि Sy.
१६. यः खलु is suggested for यो खलु ।
१७. The passage यो खलु वै ददाति सोऽर्यमा should immediately follow अर्यमणम् ।
१८. VM. ignores देवीम् and मृळीकाय ॥ देवी द्योतमानाम् । मृळीकाय सुखार्थम् Sy.
१९. पूज्यो० P. २०. ०तिष्टां P.
२१. सूर्यः P. सर्वस्य प्रेरक ! Sy.
२२. दक्षदपितायितान् P. दक्षः पितामहो येषां ते दक्षपितरः । पितृशब्दो हि सामान्येन पूर्वपुरुषत्वमात्रं ब्रूते । यथा 'आहं पितॄन्त्सुविदत्राँ अवित्सि' (RV.X.15.3.) इति । एषां दक्षपितृत्वं च--'अदितिर्ह्यजनिष्ट' (RV. X.72.5.) इति मन्त्रादवगम्यते । ईदृशान् Sy. २३. VM. seems to explain देवान् by तान् ।
२४. It seems to be the explanation of अनागास्त्वे ॥ अनपराधत्वे । यथास्माकमपराधं ते न कुर्वन्ति तथा कुर्या इत्यर्थः Sy.

युक्तान्। कामयस्व। द्वयोर्लोकयोर्जन्म[1] येषाम्। ये[2]। यज्ञस्प्रष्टारो[3] भवन्ति। सत्यकर्माणः[4]। अभ्युदययुक्ताः[5]। यष्टव्याः। अग्निजिह्वाः[6]।

उत द्यावापृथिवी त्रुत्रमुरु बृहद्रोदसी शरणं सुषुम्ने।
महस्करथो वरिवो यथा नोऽस्मे क्षयाय धिषणे अनेहः॥ ३॥

उत द्यावापृथिवी। अपि च। द्यावापृथिव्यौ[7]। बहु[8]। बलम्। कुरुतम्। तथा हे रोदसी[9]! सुसुखे[10]। महत्। गृहं कुरुतम्। तथा महत्। धनं च कुरुथः। यथा। अस्माकमपेक्षितम्[12]। किं चास्मै[13]। गृहाय[14]। हे धारयित्र्यौ[15]! अपापं[16] च कुरुतमिति।

आ नो रुद्रस्य सूनवो नमन्तामद्या हूतासो वसवोऽधृष्टाः।
यदीमर्भे महति वा हितासो बाधे मरुतो अह्वाम देवान्॥ ४॥

आ नः। आनमन्ताद्[18]। अस्मान्। रुद्रस्य। पुत्राः। अद्यास्माभिः[19]। भूत्वा[20]। वासयितारः। शत्रुभिरधर्षिता[21]। यत्। एनात्[22]। अल्पे। महति[23]। वा। सङ्ग्रामे। युक्ता[24] वयम्। ह्वयाम[25]। देवान्। मरुतः।

---

१. द्वयोर्लोकयोर्जायमानाः प्रादुर्भवन्तः Sy.
२. ०कयो जयाय माना ये P. ०कयोर्जयाय मानं ये D. देवाः Sy.
३. ०स्पृ० P. ऋतं यज्ञं स्पृशन्तः Sy.
४. अवितथाः सत्यवादिनो वा Sy.
५. धनवन्तः Sy.
६. अग्निर्जिह्वास्थानीयो येषां ते। एवंभूता ये देवाः सन्ति तान् देवान् वीहीत्यन्वयः Sy.
७. VM. ignores सुमहः॥ हे सुमहः! शोभनदीप्ते! Sy.
८. ०थिव्यो P.
९. विस्तीर्णम् Sy.
१०. द्यावापृथिव्यौ Sy.
११. सुसुखे युवाम् Sy.
१२. अस्माकं यथा स्यात्तथा कुरुतमित्यर्थः Sy.
१३. ०मवेक्षितम् P.
१४. अस्मे अस्माकम् Sy.
१५. निवासार्थम् Sy.
१६. अपि च हे धिषणे धारयित्र्यौ! द्यावापृथिव्यौ! Sy.
१७. पापराहित्यम् Sy.
१८. ०मन्त P. ०मन्ताम् is suggested for ०मन्ताद्॥ आनता भवन्तु। आगच्छन्तु Sy.
१९. अस्मिन् काले Sy.
२०. हूताः is suggested for भूत्वा॥ आहूताः सन्तः Sy.
२१. अन्यैरहिंसिताः Sy.
२२. एनान् is suggested for एनात्॥ मरुतो देवान् Sy.
२३. प्रभूते Sy.
२४. निहिताः स्थिताः सन्तः Sy.
२५. आह्वयाम तदानीमद्येत्यन्वयः Sy.

मिम्यक्ष येषु रोदसी नु देवी सिषक्ति पूषा अभ्यर्धयज्वा ।
श्रुत्वा हवं मरुतो यद्ध याथ भूमा रेजन्ते अध्वनि प्रविक्ते ॥ ५ ॥

मिम्यक्ष[1]। सङ्गच्छते। येषु। रुद्रस्य पत्नी मरुतां माता। क्षिप्रम्[5]। देवी। सचते[6] च यान्[4]। पूषा[7]। अभ्यर्धयज्वा अभ्यर्धयन्[8] यजतीति। श्रुत्वा। हवम्[9]। मरुतः[10]। यदा[11]। गच्छत[12] तदा। भूमय[13]। कम्पन्ते[14]।

---

१. ०क्षः P., D. ऋजिश्वा नाम भारद्वाजः। तस्येदमार्षम् Dur. ऋजिश्वन आर्षम् SKN.

२. पुनः पुनरेकनां गच्छति। इयक्षति मियक्षति इति गतिकर्मसु पठितम् Dur. म्यक्षतेर्गतिकर्मणो रूपम्। गच्छति SKN.

३. मरुत्सु Sy. युष्मासु Dur. द्वितीयार्थे एषा सप्तमी। यान् युष्मान् SKN.

४. नु इति पादपूरणः SKN.

५. द्योतमाना माध्यमिका वाक् Sy. देवीर्मरुतः 'रुद्रस्य ये मीळ्हुषः सन्ति पुत्राः' (RV. VI. 66.3.) इति मन्त्रान्तरे दर्शनात्। तेनैषां रोदसी माता सा च स्नेहेन पुत्रान् प्रत्यवश्यं गच्छति। अतस्त एवमुच्यन्ते SKN.

६. यान् मरुतः सेवते Sy. यश्च युष्माकं मध्येऽवस्थितः सिषक्ति सेवते Dur. गच्छति यान् युष्मान् रोदसी देवी याञ्च सिषक्ति रश्म्याहतरसेन प्राणेन सेवते SKN.

७. पूषा is suggested for पुषा॥ पोषको देवश्च Sy. सूर्यः Dur.

८. स्तोतॄनभ्यर्धयन् समृद्धान् कुर्वन् यो यजति धनेन पूजयति तादृशः पूषा Sy. रश्मिभिः ...अभिवृद्धदानः। ....अभ्यर्द्धयन्नभिवर्द्धयन् यो यजति, अभ्यर्द्धयतिरत्र दानार्थः SKN. अल्पानप्यभ्यर्धयन् मरुद्भ्यो ददाति न वाऽस्तोतृभ्यो यो ददाति सः SKN.

९. हू P. अस्मदीयमाह्वानम् Sy. आह्वानम् Dur. येष्विति यच्छब्दश्रुतेस्तच्छब्दोऽध्याहार्यः। ते श्रुत्वा हवमाह्वानम् SKN.

१०. हे मरुतः! ते यूयम् Sy. हे मरुतः! . . . ते यूयमेवङ्गुणयुक्ता उच्यध्वे Dur.

११. यदा SKN.

१२. आगच्छथ तदानीम् Sy. यूयमायाथ, अस्मान्प्रति तदा Dur. गच्छथ। यदेति वचनात् तदेत्यध्याहार्यम्। तदा SKN.

१३. भूमयमयं D. भूतजातानि Sy. बहूनि बलानि ध्वजाग्राणि वा Dur. बहुशब्दाद् विपुलवचनाद् बहुत्ववचनाद्वा इमनिचि छान्दसत्वादाद्युदात्तत्वम्। सामर्थ्याच्चात्रान्तर्णीतमत्वर्थता। बहुवचनस्य लुक् 'शेश्छन्दसि०' (Pa. 6.1.70) इति। तेनायमर्थः—बैपुल्यवन्ति बहुत्ववन्ति वा महान्ति बहूनि वेत्यर्थः। कानि? सामर्थ्याच्छत्रुबृन्दानि SKN.

१४. क्रमञ्जन्ते P. तथा च मन्त्रान्तरम्—'प्र वेपयन्ति पर्वतान्वि विञ्चन्ति वनस्पतीन्' (RV. I.39.5.) इति Sy. कम्पन्ते Dur. भ्यसते रेजत इति भयवेपनयोः (N.3.21. Ngh. 3.29.) अस्मान् मरुतो हन्तुमागच्छन्तीति मन्यमानानि बिभ्यति ध्वजाग्राणि वा कम्पन्ते। पदकारास्तु—भूम रेजन्त इति ह्रस्वत्वं पठन्तीति क्रियाविशेषणमिदमेकवचनान्तमिति मन्यन्ते। तदा च स्वार्थिक इमनिच् द्रष्टव्यः। बहु सुष्ठु रेजन्त इत्यर्थः SKN.

मार्गे[1]। भवद्भिः प्रवित्ते[2], मार्गस्य[3] प्रवेको[4] वनस्पतीनां पृथभावः[5]।

अभि त्यं वीरं गिर्वणसमर्चेन्द्रं ब्रह्मणा जरितर्नवेन[6]।
श्रवद्दिद्धवमुप च स्तवानो रासद्वाजाँ उप मह्यो गृणानः ॥ ६ ॥

अभि[7] त्यं[8] वीरम्। अभ्यर्च[9]। तम्[10]। वीरम्[11]। गीर्भिर्वननीयम्[12]। इन्द्रम्[13]। ब्रह्मणा[14]। स्तोतः[15]! नवेन[16]। उपशृणोतु[17]। अव[18]। ह्वानम्[19]। स्तूयमानः[20]। उपप्रयच्छतु[21]। महान्ति[22]। अन्नानि[23]। शस्यमानः[24]।

ओमानमापो मानुषीरमृक्तं धातं तोकाय तनयाय शं योः।
यूयं हि ष्ठा भिषजो मातृतमा विश्वस्य स्थातुर्जगतो जनित्रीः ॥ ७ ॥

ओमानम्[25]। 'अन्नं वा ओमा'[26] इति ब्राह्मणम्। हे अप.[27]! शत्रुभिरप्रमृष्टम्[28]। प्रयच्छत[29]। पुत्राय[30]।

---

१. ०र्गे: P. गमनार्थं पृथक्कृते सति तत्र विद्यमानानि Sy. एतस्मिन्नध्वन्यन्तरिक्षे Dur. अन्तरिक्षनाम। अस्य च रेजन्त इत्यनेन सम्बन्धो याथ इत्यनेन वा अन्तरिक्षे रेजन्ते, अन्तरिक्षे वा यदा याथेति SKN.

२. प्रविक्ते is suggested for प्रवित्ते ॥ विविक्ते विस्तीर्णे इत्यर्थः। एवमत्र 'पूषा अभ्यर्धयज्वा' स हि स्वरश्मिपोषं पुष्यन् भूतान्याभिमुख्येन वृद्ध्या योजयन्नभिमतानर्थान् भूतेभ्यो ददाति Dur. प्रकर्षेण विविक्ते। . . .दीप्ते विस्तीर्ण इत्यर्थः SKN.

३. भार्गस्य P.

४. प्रवोको P.

५. पृथभावः P. पृथूभावः is suggested for पृथभावः।

६. VM. ignores ह ॥ खलु Sy. हेति पदपूरणः SKN.
अभ्यर्धयज्वा। अभ्यर्धयन् यजति 'सिषक्ति पूषा अभ्यर्धयज्वा' इत्यपि निगमो भवति N.6.6., SKN. II.408.

७. त्यः D.

८. D. omits वीरम्।

९. अभिष्टुहि Sy.

१०. प्रसिद्धम् Sy.

११. वीर्यवन्तं विशेषेण शत्रूणामीरकं वा Sy.

१२. गिरां सम्भक्तारमेवंविधम् Sy.

१३. स्तोत्रेण Sy.

१४. अभिनवेन शोभनेन Sy.

१५. उपशृणुयात् Sy.

१६. एव is suggested for अव।

१७. अस्मदीयं स्तोत्रम् Sy.

१८. स्तूयमानः सन् Sy.

१९. प्रदेयात्। यत एवमतः स्तुहीत्यर्थः Sy.

२०. महतः प्रभूतान् Sy.

२१. अपि च स्तूयमान इन्द्रः Sy.

२२. VM. ignores च।

२३. ०नः D.

२४. अवति रक्षत्योमा रक्षकमन्नम् Sy.

२५. आपः is suggested for अप।

२६. अहिंसितम् Sy.

२७. धत्त। प्रयच्छत Sy.

२८. ०या P.

पौत्राय[1] । शं[2] च । योश्च[3] । यूयम् । हि[4] । भवथ । भिषजः[5] । कल्याण्यो मातरः[6] । विश्वस्य[7] । स्थावरस्य । जङ्गमस्य च । जनयित्र्य[8] ।

आ नो देवः सविता त्रायमाणो हिरण्यपाणिर्यजतो जगम्यात् ।
यो दत्रवाँ उषसो न प्रतीकं व्यूर्णुते दाशुषे वार्याणि ॥ ८ ॥

आ नः[9] । आगच्छतु । अस्मान् । देव । सविता[10] । पालयन्[11] । हिरण्यपाणिः[12] । यष्टव्यः[13] । यः । दानवान्[14] । उषसः । इव । मुख्यम्[15] । तमासि व्यूर्णुते[16] । यजमानाय[17] । धनानि[18] ।

उत त्वं सूनो सहसो नो अद्या देवाँ अस्मिन्नध्वरे वृत्याः ।
स्यामहं ते सदमिद्रातौ तव स्यामग्नेऽवसा सुवीरः ॥ ९ ॥

उत त्वम्[19] । अपि । त्वम् । हे सहसः, सूनो ! अस्माकम्[20] । अद्य[21] । अस्मिन्[22] । यज्ञे[23] । देवान्[24] । आवर्तय[25] । स्याम्[26] । अहम् । ते[27] । सदा[28] । एव । दाने[29] । तव[30] । स्याम्[31] । अग्ने ! रक्षणेन । शोभनवीरः[32] !

---

१. तत्पुत्राय Sy.
२. शमनमुपद्रवाणाम् Sy.
३. यावनं पृथक्करणं पृथक्कर्तव्यानां धत्त प्रयच्छत Sy.
४. Omitted by P.
५. यस्मात् Sy.
६. मातृभ्योऽप्यधिकाः Sy.
७. कथं मातृभ्योऽप्यधिकं भैषज्यमस्तीत्यत आह— विश्वस्य सर्वस्य Sy.
८. जनयित्र्यो भवथ । अतो यूयं भिषजः स्थ Sy.
९. VM. ignores मानुषीः ॥ मानुषीः मनुष्यहिताः Sy.
१०. प्रेरकः Sy.
११. रक्षन् Sy.
१२. सुवर्णहस्तो हितरमणीयपाणिर्वा Sy.
१३. देवः Sy.
१४. धनवान् Sy.
१५. मुख्य D. प्रमुखम् Sy.
१६. ०र्णते P. विवृणोति प्रकाशयति स सवितेत्यन्वयः Sy.
१७. हवींषि दत्तवते यजमानाय Sy.
१८. वरणीयानि धनानि Sy.
१९. अपि च Sy.
२०. हे बलस्य पुत्र ! अग्ने ! Sy.
२१. अस्मदीये Sy.
२२. अस्मिन्काले Sy.
२३. यागे Sy.
२४. यष्टव्यानिन्द्रादीन् Sy.
२५. आवर्तय आगमय Sy.
२६. भवेयम् Sy.
२७. ०र्तं स्यावह्वं त P. ०र्तंस्यावह्वन्ते D. तव Sy.
२८. सर्वदा Sy.
२९. धनस्य दाने Sy.
३०. तप D.
३१. त्वदीयेन रक्षणेन Sy.
३२. शोभनैर्वीरैः पुत्रपौत्रादिभिरुपेतश्च भवेयम् Sy.

उत त्या मे हवमा जग्म्यातं नासत्या धीभिर्युवमङ्ग विप्रा ।
अत्रिं न महस्तमसोऽमुमुक्तं तूर्वंतं नरा दुरितादभीकें ॥ १० ॥

उत त्या । अपि च । तौ । मम । हवम् । आगच्छतम् । हे नासत्यौ ! कर्मभिः । युवाम् । क्षिप्रम् । मेधाविनौ ! अत्रिम् । इव । महतः । तमसः । मोचितवन्तौ । तूर्वन्नामानम् । उपद्रवात् । सङ्ग्रामे ।

ते नो रायो द्युमतो वाजवतो दातारो भूत नृवतः पुरुक्षोः ।
दृशस्यन्तो दिव्याः पार्थिवासो गोजाता अप्या मरुतां च देवाः ॥ ११ ॥

ते नः । ते । अस्मभ्यम् । धनस्य । दीप्तिमतः । अन्नवतः । दातारः । भवत । वीरवतः । बहुभिः कीर्त्यमानस्य । धनानि प्रयच्छन्तः । दिवि भवाः । पार्थिवाश्च पृथिव्यन्तरिक्षनाम्नोः जाताः । गौर्भूमिः सा जननस्थानं येषां ते गोजाताः त्रिस्थाना अपि देवा उच्यन्ते, अपि वा मारुतीयम्, गोजाताः पृश्निमातरः । अप्सु भवाः । सुखयतास्मान् । देवाः ।

ते नो रुद्रः सरस्वती सजोषा मीळ्हुष्मन्तो विष्णुर्मृळन्तु वायुः ।
ऋभुक्षा वाजो दैव्यो विधाता पर्जन्यावाता पिप्यतामिषं नः ॥ १२ ॥

ते नः । ते । अस्मान् । रुद्रः । सरस्वती च । सङ्गताः । सेचनवन्तः । विष्णुः ।

---

१. प्रसिद्धौ Sy.
२. मदीयम् Sy.
३. स्तोत्रम् Sy.
४. ०तां P.
५. सत्यस्वभावौ ! सत्यस्य नेतारौ ! वा Sy.
६. परिचरणकैः कर्मभिरुपेतम् Sy.
७. हे प्राज्ञौ ! Sy.
८. ऋषिम् Sy.
९. यथा Sy.
१०. असुरकृतादन्धकारात् Sy.
११. मा० P. मोचितवन्तौ स्थः Sy.
१२. कूर्व० D. तूर्वतम् अस्मांस्तारयतम् Sy.
१३. दुःखात् शत्रुकृतात् Sy.
१४. अभ्यक्ते प्राप्ते सङ्ग्रामे Sy.
१५. VM. ignores नरा ॥ नरा हे नेतारावश्विनौ ! Sy.
१६. यूयम् Sy. १७. ०स्त० D.
१८. बलयुक्तस्य Sy. १९. ०तो P.
२०. नृवतः नृभिः पुत्रादिभिरुपेतस्य Sy.
२१. बहुभिः कीर्तनीयस्य Sy.
२२. कामान् प्रयच्छन्तः Sy.
२३. दिवि भवा आदित्याः Sy.
२४. पृथिव्यां भवा वसवः Sy.
२५. ०व्या० P.
२६. ०ता D. गौः पृश्निर्माध्यमिका वाक् । तत उत्पन्ना मरुतः Sy.
२७. ०न्ते वि पा D.
२८. ०तरोस्सुभावाः P. अप्सु is suggested for अस्सु ॥ अप्स्वन्तरिक्षे भवा रुद्राश्च ते सर्वे यूयम् Sy.
२९. VM. ignores च ।
३०. देवाः Sy. ३१. ०द्र P.
३२. ०ता P. सह प्रीयमाणाः Sy.
३३. वर्षणवन्तः Sy.

सुखयन्तु । वायुश्च । तथा ऋभुर्विभ्वा च । वाजश्च । सौदेव्यः[2] । विधाता[3] । चन्द्रमाः । पर्जन्यवातौ[4] च । वर्धयन्तु[5] । अस्माकम्[6] । अन्नम् ।

उत स्य देवः सविता भगो नोऽपां नपादवतु दानु पप्रिः ।
त्वष्टा देवेभिर्जनिभिः सजोषा द्यौर्देवेभिः पृथिवी समुद्रैः ॥ १३ ॥

उत स्यः । अपि च । देवः । सविता । भगश्च । अस्मान् । अपां नपाच्च । रक्षतु । दाता[7] । पूरयिता[8] । त्वष्टा[10] । देवैः । देवपत्नीभिश्च[11] । सङ्गतः[12] । द्यौश्च । देवैः । पृथिवी[13] च । समुद्रैः उदधिभिः[14] ।

उत नोऽहिर्बुध्न्यः शृणोत्वज एकपात्पृथिवी समुद्रः ।
विश्वे देवा ऋतावृधो हुवानाः स्तुता मन्त्राः कविशस्ता अवन्तु ॥ १४ ॥

उत[15] नः । अपि[16] च । अस्माकं स्तुतीः[17] अहिर्बुध्न्यः[18] । शृणोतु[19] । तथैकपादाद्[20] । अजः[21] । पृथिवी[22] ।

---

१. ऋभुभिर्वि० P. ऋभुर्विभ्वा वाज इति त्रयः सौधन्वनाः । तेषामाद्य ऋभुश्च वाजोऽन्तिमश्च । उपलक्षणमेतत् । विभ्वा च Sy.

२. सौदेव्यः P. असौ दैव्यः is suggested for सौदेव्यः ॥ देवेभ्यो हितः Sy.

३. प्रजापतिश्च Sy.

४. पर्जन्यश्च वायुश्चोभौ Sy.

५. वर्धयताम् Sy.

६. अस्मभ्यम् Sy.

७. अपां मेघस्थानां पुत्रो माध्यमिकोऽग्निः Sy.

८. वातव्यं धनम् Sy.

९. प्राता पूरयिता । 'प्रा पूरणे' इत्यस्माद् 'आवृगमहन्०' इति किनो लिड्वद्भावात् 'न लोकाव्यय०' इति षष्ठीप्रतिषेधः Sy.

१०. स्त्वष्टा P.

११. तत्पत्नीभिश्च Sy.

१२. ०तौ० D. सहप्रीतिः Sy.

१३. एताश्च सर्वा देवता अस्मानवन्तु Sy.

१४. VM. ignores स्यः ॥ स्यः स यः प्रेरकतया सर्वत्र प्रख्यातः Sy.

१५. आग्निमारुते 'उत नोऽहिः' इत्येषा । सूत्रितञ्च—'उत नोऽहिर्बुध्न्यः शृणोतु देवानां पत्नीरुशतीरवन्तु नः' (ĀŚS. 5.2.) इति Sy. ऋजिश्वन आर्षम् Dur.,SKN.

१६. अपि Dur. उतशब्दोऽप्यर्थे समुच्चयलक्षणे SKN.

१७. स्तोत्रम् Sy. वचांसीति शेषः Mah. वचांसि U.

१८. स्तुतिरहिः P. रुद्रविशेषः Mah. बुध्न्यमन्तरिक्षं तस्मिन् भवः SKN.

१९. अस्मदीयं स्तोत्रं शृणोतु Sy. शृणोत्वाह्वानम् । कुत एतत् ? हुवाना इति परस्ताच्छ्रवणात् । आह्वय माम् SKN.

२०. एकपदाद् D. एकपाद् is suggested for एकपादात् ॥ एकोऽसहाय एव पद्यते गच्छतीत्येकपात् । एतत्पदद्वयाभिधेयो देवश्च Sy. एकः पादो यस्य स एकपात् SKN.

२१. जन्मरहितः Sy. अज एकपाद् रुद्रः प्राणो वा शृणोतु U. ननु चाह्वानस्य श्रूयमाणत्वान्न च केवलोऽहिर्बुध्न्यः । किं तर्हि ? अजश्च SKN.

२२. पृथिवी च शृणोतु Mah. द्यौश्च SKN.

समुद्रश्च[1] । विश्वे च । देवा[2] । सत्यस्य वर्धयितार[3] । हूयमानाः[4] । स्तुताः[5] पूजिताः । कविभिः[6] शस्ताः । रक्षन्तु[7] ।

एवा नपातो[8] मम[9] तस्य[10] धीभिर्भरद्वाजा[11] अभ्यर्चन्त्यर्कैः[12] ।
ग्ना[13] हुतासो[14] वसवोऽधृष्टा[15] विश्वे[16] स्तुतासो[17] भूता यजत्राः[18] ॥ १५ ॥

एवा नपातः[8] । एवम् । तस्य[10] । मम[9] । पुत्राः । कर्मभिः[12] । भरद्वाजकुलजाः[11] । मन्त्रैश्च[14] देवान् । अभ्यर्चन्ति[15] । ग्ना[13] देवपत्न्यः । हुताः[14] । वसवश्च[16] । शत्रुभिरनाधृष्टाः[15] । विश्वे च देवाः[16] । स्तुताः[17] । भवत । हे यष्टव्याः ! इति ।

---

१. समुद्रश्च शृणोतु Mah. पृथिवी च समुद्रश्च शृणोतु । श्रुत्वा चावन्तु U. आदित्यश्चेत्यर्थः SKN.

२. विश्वे देवाश्च शृण्वन्तु Mah. सर्व एते, एवमादयो देवाः Dur. सर्वे देवाः SKN.

३. ऋतस्य यज्ञस्य सत्यस्य वा वर्धयितारः Sy. सत्यवृधो वा Mah. सत्यवृधो यज्ञवृधो वा U. सत्यवृधो यज्ञवृध उदकवृधो वा Dur. सत्यस्योदकस्य यज्ञस्य वा वर्धयितारः SKN.

४. अस्माभिराहूयमानाः Sy. आहूयमानाः Mah., U., Dur. हूयमानाः श्रुत्वा चाह्वानमागताः सन्तः SKN.

५ पूर्वैर्ऋषिभिश्च स्तोत्रैः स्तुताः Sy. स्तुताश्च स्तोत्रैः सामभिः Dur. स्तुता अस्माभिः SKN.

६. मेधाविभिर्ऋषिभिः शस्त्रैः शंसिताः Sy. मेधाविभिः पूजिताः Mah. मेधाविशस्ताः U. कविभिश्च नैघण्टुकत्वेन मेधाविभिः शस्त्रैश्च शस्ताः स्तुतास्ते Dur. अन्यैरपि मेधाविभिर्नित्यमेव स्तुताः SKN.

७. अस्मान् रक्षन्तु Sy. श्रुत्वा च तेऽहिर्बुध्न्यादयो ऽवन्तु पालयन्त्वस्मान् Mah. पालयन्तु U. अस्मानवन्त्वित्येतदाशास्महे Dur. पालयन्तु SKN.

८. VM. ignores मन्त्राः ॥ मन्त्रणीया गुप्तं भाषितव्या मन्त्रप्रतिपाद्या वा Sy. मन्त्रैरिति विभक्तिव्यत्ययः Mah.U. मन्त्रैर्यजुर्मयैः Dur. तृतीयार्थे प्रथमा । मन्त्रैः SKN. अपि च नोऽहिर्बुध्न्यः शृणोतु । अजश्चैकपात् पृथिवी च समुद्रश्च सर्वे च देवाः । सत्यवृधो वा । यज्ञवृधो वा । हूयमाना मन्त्रैः स्तुताः । मन्त्राः कविशस्ताः । अतन्तु । मेधाविशस्ताः N.12.33., SKN. IV.131.
This stanza=YV.34.53.

९. नवातः P., D.

१०. योऽहं देवान् स्तुतवान् । तस्य Sy.

११. ऋजिश्वनः Sy.

१२. स्तोत्रैः Sy.

१३. भरद्वाजगोत्रजाः सुहोत्रादयः Sy.

१४. मन्त्रैश्च is suggested for मन्त्रैश्च ॥ अर्चनसाधनैः Sy.

१५. अभिष्टुवन्ति Sy.

१६. ०त्या P.

१७. पुरोडाशादिभिर्हविर्भिः हुतास्तर्पिताः Sy.

१८. निवासयितारः Sy.

१९. कैरप्यहिंसिताः Sy.

२०. सर्वे यूयम् Sy.

२१. तैः सुहोत्रादिभिः स्तुताः Sy.

VI.51.

उदु त्यच्चर्तृमहि मित्रयोराँ एतिं प्रियं वरुणयोरदब्धम् ।
ऋतस्य शुचिं दर्शतमनीकं रुक्मो न दिव उदिता व्यद्यौत् ॥ १ ॥

उदु[1] त्यत्[2] । आभिमुख्येनोदेति[3] । तदिदम्[4] । महत्[5] । मित्रावरुणः[6] चक्षुः[7] ॥ उषआख्यम् । प्रियम् । अहिंसितं[8] रक्षाभि[9] । आदित्यस्य । शुचि[10] । दर्शनीयम् । रश्मीनामनीक[11] तदि[12] । दिव[13] । रुक्मः[14] । इव । उदये[15] । विद्योतते[16] ।

वेद यस्त्रीणि विदथान्येषां देवानां जन्म सनुतरा च विप्रः ।
ऋजु मर्तेषु वृजिना च पश्यन्नभि चष्टे सूरो अर्य एवान् ॥ २ ॥

वेद[17] यः । जानाति[18] । यः । त्रीणि[19] । स्थानानि । देवानाम्[20] । तेषाम्[21] । जन्म[22] । च । अन्तर्हितम्[23] । मेधावी[24] । स मनुष्येषु । इजूनि[25] । कुलानि[26] । च कर्माणि[27] । पश्यन् । अभिपश्यति[28] । ईश्वरः[29] । सूर्यः[30] । गच्छतो मनुष्यान्[31] ।

---

१. 'उदु त्यत्' इति षोडशर्चं द्वितीयं सूक्तमूर्जिश्वन आर्षं वैश्वदेवम् । त्रयोदश्याद्यास्तिस्र उष्णिहः षोडश्यनुष्टुप् शिष्टास्त्रिष्टुभः । तथा चानुक्रान्तम्—'उदु त्यत्षोळश ऋष्णिगनुष्टुबन्तम्' (KSA.32.51.p.23.) । गतः सूक्तविनियोगः Sy. २. त्य P.,D.
३. सर्वेषामभिमुखमुदेति । उद्गच्छति Sy.
४. तत् प्रसिद्धम् Sy.
५. महद् विस्तृतम् Sy.
६. ०णयोः is suggested for ०णः ॥ VM. seems to explain मित्रयोः and वरुणयोः together as मित्रावरुणयोः ॥ मित्रशब्दो वरुणशब्दश्चेतरेतरयोगान्मित्रावरुणावुभावप्याचष्टे Sy. ७. प्रकाशकम् Sy.
८. प्रियम् (देवास्तत्यस्य वर्धयितारो हूयमानः) अहिंसितम् D. The additional passage resembles with VM.'s commentary on RV. VI.50.14.
९. रक्षोभिः is suggested for रक्षाभिः ।
१०. शुद्धं निर्मलम् Sy.
११. रश्मिनामदीकं P., तेजः Sy.
१२. तदिदम् is suggested for तदि ।
१३. अन्तरिक्षस्य Sy. १४. भूषणम् Sy.
१५. उदितौ सूर्यस्योदये सत्युदितं तत्तेजः Sy.
१६. विद्योतते प्रकाशते Sy.
१७. वेत्ति जानाति Sy.
१८. सूर्यः Sy. १९. त्रिसंख्यानि Sy.
२०. विदथानि वेदितव्यानि स्थानानि त्रींल्लोकान् Sy.
२१. देवानां वसुरुद्रादित्यात्मनाम् Sy.
२२. एषामेतल्लोकत्रयवर्तिनाम् Sy.
२३. P. reads तक्षज्जन्म for तेषाम् । जन्म ॥ जननम् Sy.
२४. ०त P. अन्तर्हितम् D. अप्रज्ञायमानम् Sy. सनुतरित्यन्तर्हितनाम Ngh. 3.25.
२५. मेधावी सूर्यो वेत्ति Sy.
२६. ऋजूनि is suggested for इजूनि ॥ विद्यमानानि शोभनानि कर्माणि Sy.
२७. कुटिलानि is suggested for कुलानि ॥ वृजिनान्यशोभनानि कर्माणि Sy.
२८. साक्षितया जानन् Sy.
२९. अभितः सर्वं जगत् प्रकाशयति Sy.
३०. स्वामी भूत्वा Sy. ३१. एवान् प्राप्तव्यान् कामांश्च मनुष्येषु प्रकाशयति Sy.
३२. VM. ignores आ ॥ आकारः पूरकः Sy.

स्तुष उ॑ वो मह ऋ॒तस्य॑ गो॒पानदि॑तिं मि॒त्रं वरु॑णं सुजा॒तान् ।
अर्य॒मण॑ं भग॒मदब्धधीतीनच्छा॑ वोचे सध॒न्यः पाव॒कान् ॥ ३ ॥

स्तुष उ वः[1] । स्तौम्[2] । एव । युष्मान् । महतः । यज्ञस्य । गोपायितॄन्[3] । अदित्यादीन्[4] । जेजननान्[5] । अहिंसितकर्मणः । अर्यमप्रभृतीश्च[6] । अभिष्टौमि[7] । सधनान्[8] । जोदकान्[9] ।

रि॒शाद॑सः सत्प॒तीँर॑दब्धान्महो राज्ञः॑ सुवस॒नस्य॑ दा॒तॄन् ।
यू॒नः सु॒क्षत्रान्क्षय॑तो दि॒वो नॄनादि॒त्यान्या॒म्यदि॑तिं दुवो॒यु ॥ ४ ॥

रिशादसः[11] । रिशतामसितॄन्[12] । सत्पतीन्[13] । अहितान्[14] । महतः । राज्ञः[15] । शोभननिवासस्य गृहस्य । दातॄन्[16] । यूनः[17] । सुधनान्[18] । सदा गच्छत । द्युलोकस्य । नेतॄन् । आदित्यान्[19] । याचे[20] । अदितिं[21] च । परिचर्यामिच्छन्तीम्[22] ।

द्यौ॒ष्पि॒तः पृथिवि॒ मात॒रध्रु॑गग्ने॒ भ्रात॑र्वसवो मृ॒ळता॑ नः ।
विश्वे॑ आदित्या अदिते स॒जोषा॑ अ॒स्मभ्यं॒ शर्म॑ बहु॒लं वि य॑न्त ॥ ५ ॥

द्यौष्पितः[23] । द्युप्रहृतय[24] ! सुखयत । अस्मान्[25] । सुख च[26] । बहुलम्[27] । विविध यच्छत[28] । द्यौः[29] । पिता[30] ।

---

१. हे देवाः ! Sy. २. स्तौमि is suggested for स्तौम् ॥ स्तुवे Sy.
३. उ इति पूरणः Sy. ४. रक्षकान् Sy.
५. आदि० D. आदि refers to मित्र and वरुण ॥ अदीनां देवमातरं मित्रं वरुणं चैतान् Sy. ६. सुजननान् is suggested for जेजननान् ॥ शोभनजननान् Sy.
७. अयम० P. प्रभृति refers to भगम् ॥ अर्यमणं भगं च Sy.
८. अभिप्रब्रवीमीत्यर्थः Sy.
९. धनसहितान् Sy.
१०. शोधकान् is suggested for जोदकान् ॥ विश्वस्य शोधकान्। ईदृशान् सर्वान् देवान् Sy.
११. रश० P. रिशतां हिंसकानामसितॄन् क्षेप्तॄन्, यद्वा रिशानां हिंसकानामत्तॄन् भक्षयितॄन् Sy.
१२. सतां पालयितॄन् Sy.
१३. अहिता P. अहिंसितान् is suggested for अहितान् ।
१४. राजमानानीश्वरान्वा Sy.
१५. ०नानि P. १६. नित्यतरुणान् Sy.
१७. शोभनधनान् शोभनबलान् वा Sy.
१८. सर्वत्र निवसतः । यद्वा 'क्षयतिरैश्वर्यकर्मा' ईशानान् Sy.
१९. अदितेः पुत्रान् । ईदृशान् सर्वान् देवान् Sy.
२०. प्राप्नोमि । यद्वा यामि । याचामि Sy.
२१. देवमातरम् Sy.
२२. ०च्छतीं D. दुवोयु लुप्तविभक्तिकमेतत्। दुवोयुं दुवोऽस्मदीयं परिचरणं कामयमानाम् Sy.
२३. द्यौष्पित्नह D.
२४. विद्युप्रहृतयः P. ०प्रभृतयः is suggested for ०प्रहृतयः ।
२५. अस्मा P. २६. सुखम्, गृहम् (वा) Sy.
२७. अधिकम्, विस्तृतम् Sy.
२८. प्रयच्छत Sy.
२९. द्यौर्लोक ! Sy.
३०. हे पितः ! पितृस्थानीय ! Sy.

पृथिवी[1] । माता[2] । सा[3] न कस्मैचिद्[4] द्रुह्यति[5] ।

मा नो वृकाय वृक्ये[7] समस्मा अघायते[8] रीरधता यजत्राः[9] ।
यूयं हि ष्ठा रथ्यो[10] नस्तनूनां[12] यूयं दक्षस्य वचसो[15] बभूव ॥ ६ ॥

मा नः । मा । अस्मान् । वृकाय । वृक्यै[6]च । सर्वस्मै च । अघमिच्छते[8] । वशं सन्नयत[9] । हे यष्टव्याः[10] ! यूयम् । हि[11] । भवथ । नेतारः । अस्माकम् । अङ्गानाम्[12] । यूयम्[13] । प्रवृद्धस्य[14] । वचसो[15] भाजनम् । भवथ ।

मा व एनो[16] अन्यकृतं[17] भुजेम[18] मा तत्कर्म[19] वसवो[20] यच्चयध्वे[24] ।
विश्वस्य[25] हि क्षयथ विश्वदेवाः स्वयं[28] रिपुस्तन्वं[30] रीरिषीष्ट[31] ॥ ७ ॥

मा वः । मा । युष्माकम्[16] । अन्यैः[17] कृतम् । पापम् । वयमपि तद्वत् भुजेम[18] अनुपालयेम[19] । तदेवाह— मा । व[20] । कर्म[21] वयम् । हे वसवः[22] ! यद् यूयम् । चयध्वे[24], चयतिर्हिंसाकर्मा । विश्वस्य[25] । हि यूयम् । ईश्वरा भवथ । हे विश्वदेवाः[26] ! तथा सति सोयम्[28] । मदीयो रिपुः[30] । शरीरमात्मीयम् । विनाशयतु[31] ।

---

१. पृथिवि ! Sy.
२. हे मातः ! मातृस्थानीये ! Sy.
३. नु D.
४. चि P. च D. अभ्रुगब्रोग्भि ! Sy.
५. VM. ignores अस्मभ्यम् and includes भ्रातः । वसवः । विश्वे । आदित्याः । अदितेः and सजोषः with प्रभृति of द्युप्रभृतयः ॥ हे भ्रातर्भ्रातृस्थानीयाग्ने ! हे वसवः ! वासयितारः ! देवा ! ते सर्वे यूयम् । हे विश्वे ! आदित्याः ! सर्वेऽदितिपुत्राः ! देवाः ! हे अदिते ! यूयं सजोषाः सङ्गता भूत्वा Sy.
६. हिंसकाय स्तेनाय Sy.
७. वृक्ये P. तस्य स्त्रियं च । यद्वा वृकोऽरण्यश्वा तस्य स्त्री वृकी Sy.
८. अनर्थमस्माकमिच्छते शत्रुजनायास्मान् (मा) वशं नयत Sy.
९. नयत is suggested for सन्नयत ॥ वशं नैष्ट मावशीकुरुत Sy.
१०. हे यष्टव्या देवाः ! Sy.
११. खलु Sy. १२. शरीराणाम् Sy.
१३. यूयमेव Sy. १४. अस्मदीयस्य बलस्य Sy.
१५. वाक्यस्य च नेतारो बभूव । अतः कारणादस्मान् मा रीरधतेत्यन्वयः Sy.
१६. स्वभूता वयम् Sy.
१७. Omitted by P. शत्रुभिरुत्पादितम् Sy.
१८. भुंक्ष्महि Sy. १९. नु० P.
२०. तत् is suggested for व ।
२१. कार्ष्म । कर्म-करोतेर्माङि लुङि 'मन्त्रे घस्०' इति च्लेर्लुक् Sy.
२२. वासयितारो देवाः ! Sy.
२३. येन कृतेन पापेन Sy.
२४. अस्मान्बाधध्वे Sy.
२५. सर्वस्य जगतः Sy. २६. सर्वे देवाः Sy.
२७. अतः कारणात् Sy.
२८. स्वयम् is suggested for सोयम् ॥ स्वयमेव Sy.
२९. ०ये P. अस्मदीयः Sy.
३०. शत्रुः Sy.
३१. ०रमत्मीत्वं D. स्वशरीरम् Sy.
३२. हिंस्यात् । यथैवं भवति तथा कुरुतेति भावः Sy.
३३. VM. ignores तत् ॥ तच्च पापम् Sy.

नम॒ इदु॒ग्रं नम॒ आ वि॑वासे॒ नमो॑ दाधार पृथि॒वीमु॒त द्याम् ।
नमो॑ दे॒वेभ्यो॒ नम॑ ईश॒ एषां कृ॒तं चि॒देनो॒ नम॒सा वि॑वासे ॥ ८ ॥

[1]नम इत् । [2]अन्नम् । एव । उद्गूर्णं[3]महं च । अन्नमेव । परिचरामि । नमः[4] । दाधार[5] । पृथिवीम् । अपि च । द्यम्[6] । नम एव । देवेभ्यो नीयते । नम एव । सर्वेषामीष्टे[7] । तेनानेन[8] । नमसा[9] । कृतम्[10] । चित्[11] । एनोऽहम्[12] । परिचरामि[13] न निन्दामीति स्तुतिरन्नस्य[14] ।

ऋ॒तस्य॑ वो र॒थ्यः पू॒तद॑क्षानृ॒तस्य॑ पस्त्य॒सदो॒ अद॑ब्धान् ।
ताँ आ नमो॑भिरुरुच॒क्षसो॒ नृन्वि॒श्वान्व॒ आ न॑मे म॒हो यज॑त्राः ॥ ९ ॥

[15]ऋतस्य । [16]यजस्य । वः । [17]उन्नेतॄन्[18] । शुद्धबलान्[19] । यज्ञस्य[20] । गृहेषु[21] सीदतः । [22]अहिंसितान् । तान् । [23]वः । [24]हविर्भिः । [25]व्याप्तदर्शनान् । नेतॄन् । सर्वान् । [26]परिचरामि । महतः । हे यष्टव्याः[27] ! [28]

---

१. आस्तां तावद्देवानां माहात्म्यं तवीयो नमस्कारोऽपीत्थं महाभाग इति ब्रुवाणः कैमुतिकन्यायेन देवान् स्तौति Sy.

२. नमस्कारः Sy.

३. ०र्णमयं P. उद्गूर्णबलं सर्वोत्कृष्टम् । तेन हि सर्वं लभ्यते Sy.

४. नमस्कारम् Sy.

५. धारयति । द्यावापृथिव्यौ नमस्क्रियमाणे सत्यौ तदुपभोगाय चिरकालमवतिष्ठेते । अतो देवेभ्य ईदृशं नमः करोमि Sy.

६. द्य P. द्याम् is suggested for द्यम् ॥ द्युलोकं च Sy

७. म P. नमस्कार एव Sy.

८. ईशे । ईष्टे । अतस्तेन ते वशीकृताः Sy.

९. तेनानेन seems to be the explanation of एषाम् । Sy. explains it by देवानाम् ।

१०. नमस्कारेण Sy.

११. आचरितम् Sy.

१२. अपि Sy. १३. पापम् Sy.

१४. विवासो वर्जनम् । वर्जयामि । विनाशयामि Sy.

१५. VM. ignores आ ।

१६. यज्ञस्य is suggested for यजस्य ।

१७. प D.
युष्मदीयस्य Sy.

१८. नेतॄन् is suggested for उन्नेतॄन् ॥ रथ्यः रंहितॄन् Sy.

१९. जूद्ध० D.

२०. यज्ञस्य is suggested for यज्ञस्य ।

२१. यज्ञसम्बन्धिनि पस्त्ये देवयजनलक्षणे गृहे सीदतो निषण्णान् Sy.

२२. ०सातान् P. रक्षःप्रभृतिभिरहिंसितान् Sy.

२३. युष्मान् Sy.

२४. ०भि P. नमस्कारैः Sy.

२५. बहुव्रष्टॄन् Sy.

२६. आनतोऽस्मि Sy.

२७. हे यष्टव्याः ! देवाः ! Sy.

२८. VM. ignores आ ॥ आभिमुख्येन क्रियमाणैः Sy.

ते हि श्रेष्ठवर्चसस्त उं नस्तिरो विश्वानि दुरिता नयन्ति ।
सुक्षत्रासो वरुणो मित्रो अग्निर्ऋतधीतयो वक्मराजसत्याः ॥ १० ॥

ते हि[1] । ते । खलु । श्रेष्ठदीप्तयः[2] । ते । एव । अस्मान्[3] । विश्वानि । दुरितानि[4] । तिरो नयन्ति[5] सुबलाः[6] । वरुणः[7] । मित्रः । अग्निः । सत्यकर्मणिः । पक्षेण[8] ये राजन्ते ते स्तोतारो वक्मराजनस्ते[9] सत्य येषु ते तथोक्ता इति ।

ते न इन्द्रः पृथिवी द्यामं वर्धन्पूषा भगो अदितिः पञ्च जनाः ।
सुशर्माणः स्ववसः सुनीथा भवन्तु नः सुत्रात्रासः सुगोपाः ॥ ११ ॥

ते नः[10] । ते[11] । अस्माकम् । इन्द्रः । पृथिवी च । पृथिवीम्[12] । वर्धयन्तु । यस्यार्थं सुसुखाः[13] । सुरक्षणाः[14] सुनयनाः[15] । अस्माकम्[16] । भजन्तु[17] । सुरक्षणाः[18] । सुगोपना[19]., त्राणगोपनयोरस्त्यल्पो भेदः[20] ।[21]

नू सद्मानं दिव्यं नंशिं देवा भारद्वाजः सुमतिं याति होता ।
आसानेभिर्यजमानो मियेधैर्देवानां जन्म वसूयुर्वन्द ॥ १२ ॥

नू[22] सद्मानम्[23] । क्षिप्रम् । दिव्यम्[24] । स्थानम्[25] । व्याप्तिमत्[26] । हे देवाः ! भारद्वाजोऽयम्[27] । होता[28]

---

१. ये देवा वक्ष्यमाणगुणाः Sy.
२. प्रशस्यतमदीप्तयो भवन्ति Sy.
३. अस्माकम् Sy.
४. सर्वाणि Sy. ५. पापानि Sy.
६. तिरोहितानि यथा भवन्ति तथा नयन्ति । नयन्तु विनाशयन्त्वित्यर्थः Sy.
७. शोभनबलाः शोभनधना वा Sy.
८. वरु D. वरुणादयो देवाः Sy.
९. वक्मेन is suggested for पक्षेण ।
१०. वक्म वचनं स्तोत्रम् । तस्य राजान ईशाना वक्मराजानः स्तोतारः । तेषु सत्या अवितथाः । एवम्भूतास्ते हीत्यन्वयः Sy.
The readings, वक्मराजनः of VM. and वक्मराजानः of Sy. are doubtful. वक्मराजाः is suggested for them.
११. देवाः Sy.
१२. ०वीम P. निवासभूमिम् Sy.
१३. ०णः P. १४. शोभनात्राः Sy.
१५. सुप्रापणाश्च Sy.
१६. अस्मदर्थम् Sy.
१७. अस्मभ्यं शोभनसुखादिकं प्रयच्छन्त्विति भाव Sy. १८. ०णः P. सुष्ठु त्रातारः Sy
१९. शोभनगोपायितारश्च भवन्तु Sy.
२०. उपस्थितेभ्यः शत्रुभ्यो रक्षणं त्राणम् । तेषामुत्पत्तिनिरोधेन रक्षणं गोपनम् Sy.
२१. VM. ignores पूषा । भगः । अदितिः पञ्च and जनाः ॥ अदीना देवमाता च पञ्चजना देवमनुष्याणां गन्धर्वाप्सरसाम् (AB.3.31.) इत्यादिब्राह्मणोक्ता देवमनुष्या दयश्च Sy.
२२. अनया ऋषिरात्मानं परोक्षवदाह Sy.
२३. सम्मानम् D.
२४. दिवि भवम् Sy.
२५. सदनम् Sy. २६. व्याप्नोतु Sy.
२७. भ० P. भरद्वाजगोत्रजः Sy.
२८. स्तोतायमृषिः Sy.

सुमतिं[1] च। याच[2]। आसनस्य[3] प्रयोजकैः। सत्रभूतैः[4]। यजमानैः[5]। देवानाम्। जन्म सर्वं देवजातम्[6]। अस्तकामः[7]। स्तौति[8]।

अप त्यं वृजिनं रिपुं स्तेनमग्ने दुराध्यम्। दविष्ठमस्य सत्पते कृधी सुगम् ॥ १३ ॥

अप[9] त्यम्। अपास्य[10]। तम्। क्षेत्तारम्[11]। रिपुम्[12]। स्तेनम्[13]। दुर्बुद्धिम्[14]। यथा दूरे स्थितो भवति। हे सत्पते[15]! तन्निरसनात्। कुरु चास्माकम्। सुखम्[16]।[17]

ग्रावाणः सोम नो हि कं सखित्वनाय वावशुः।
जही न्यत्रिणं पणिं वृको हि षः ॥ १४ ॥

ग्रावाणः[18]। हे सोम! ग्रावाणः[19]। अस्माकं[20] यजमानानाम्। सखित्वम्[21]। कामयन्ते। तथा[22] सति त्व निजहि[23]। अदनलीलम्[24]। असुरम्[25]। सः[26]। ह्यसुरः[27]। आदानपरो हन्तव्यः[28]।

---

१. शोभनां मतिं युष्मदीयामनुग्रहबुद्धिं च Sy.
२. याचते is suggested for याच ॥ यातिर्याच्ञाकर्मा Sy.
३. ०जनकैः D. आसीनैः सत्रासनं कुर्वद्भिः Sy.
४. मेध्यैर्मेधार्हैरन्ययजमानैः सार्धम् Sy.
५. यागं कुर्वन्नयमृषिः Sy.
६. सव P. जनसङ्घम् Sy.
७. वसूनि धनान्यात्मन इच्छन् Sy.
८. वन्दते स्तौति Sy.
९. दशरात्रस्य चतुर्थेऽहनि प्रउगशस्त्रे 'अप त्यं वृजिनम्' इत्येषा । वैश्वदेवस्तृचः । सूत्रितञ्च—'अप त्यं वृजिनं रिपुमम्बितमे नदीतम इत्यानुष्टुभम्' (ĀŚS.7.11.) इति Sy.
१०. अपक्षिप । 'असु क्षेपणे' इति धातुः Sy.
११. प्रसिद्धम् Sy.
१२. कुटिलम् Sy.
१३. पापकारिणम् Sy.
१४. हिंसकम् Sy.
१५. दुःखस्याध्यातारं दुष्टाभिप्रायम् Sy.
१६. Omitted by P. दूरतरम् Sy.
१७. संपते P. हे सतां पालयितः! अग्ने! Sy.
१८. अस्माकं सुगं शोभनेन गन्तव्यं सुखम् । अत्र सर्वदेवात्मकस्याग्नेः स्तवनाद्वैश्वदेवत्वम् Sy.
१९. VM. ignores अग्ने ॥ हे अग्ने! त्वम् Sy.
२०. अभिषवार्थाः पाषाणाः Sy.
२१. अस्मदीया इमे Sy.
२२. तव सख्यार्थम् Sy.
२३. सथा P.
२४. विनाशय Sy.
२५. अदनशीलम् is suggested for अदनलीलम् ॥ राक्षसादिकम् Sy.
२६. वणिजमवातारम् Sy.
२७. पणिः Sy.
२८. खलु Sy.
२९. सर्वदास्मत्तोऽपहरणशीलः । अतस्त्वं जहीत्यर्थः । 'कुक वृक आदाने' इति धातुः Sy.
३०. VM. ignores कम् and explains हि once only ॥ कमिति पूरकः । हि यस्मादर्थे । यस्मादेवं तस्मात् Sy.

युयं हि ष्ठा सुदानव इन्द्रज्येष्ठा अभिद्यवः ।
कर्ता नो अध्वन्ना सुगं गोपा अमा ॥ १५ ॥

यूयम् । हे मरुतः ! यूयम् । हि । भवथ । हे शोभनदानाः ! इन्द्रज्येष्ठाः । अभिगतदीप्तयः । तथा सति कुरुत । अस्माकम् । मार्गे । सुखम् । गोपयितारः । सहायाः ।

अपि पन्थामगन्महि स्वस्तिगामनेहसम् ।
येन विश्वाः परि द्विषो वृणक्ति विन्दते वसु ॥ १६ ॥

अपि पन्थाम् । पन्थानम् । अपिगन्महि प्राप्नुम । स्वस्ते प्रापयितारम् । अनेहसम् । येन पथा । विश्वाः । द्विषः । परिवृणक्ति पथिकः । विन्दते च । धनम् ।

---

१. हे देवाः ! Sy.

२. खलु Sy.

३. प्रभवथ समृद्धाः स्थ Sy.

४. हे शोभनदानाः ! देवाः Sy.

५. इन्द्रो ज्येष्ठो मुख्यो येषां ते Sy.

६. अध्वनि मार्गे Sy.

७. रक्षितारः सन्तः Sy.

८. सहैव Sy.

९. VM. ignores आ ॥ आकारः समुच्चये Sy.

१०. प्रवासादागमने 'अपि पन्थाम्' इत्येषा यजमानेन जप्या । सूत्रितञ्च—'अपि पन्थामगन्महीति प्रत्येत्य समित्पाणिः' (ĀSS.2.5.) इति Sy.

११. पन्थाः D.

१२. मार्गम् Sy.

१३. पन्थानपमिग० P. अप्यगन्महि is suggested for अपिगन्महि ॥ अपिगताः प्राप्ताः स्मः Sy. सम्प्राप्तास्त्वत्प्रसादेन सोम ! BB.

१४. स्वेस्तेः P. सुखेन गन्तव्यम् Sy. स्वस्ति अविनाशं गम्यते येन तादृशम् । 'गाङ् गतौ' BB.

१५. ०स P. पापरहितम् Sy. अपापं पापफलरहितं पन्थानमगमाम, व्यत्ययेनात्मनेपदम् । यद्वा . . .तमपि पन्थानां गम्यास्म स्वस्तिगामनेहसम् BB.

१६. रथा P. येन पथा गच्छन् Sy. पुनश्च पन्था विशेष्यते येन पथा गच्छन् BB.

१७. विश्वान् P. सर्वाः Sy. विश्वान् BB.

१८. द्वेष्ट्रीः प्रजाः Sy. द्वेष्यान् । लिङ्गव्यत्ययेन स्त्रीत्वम् । यद्वा सम्यवादिलक्षणः स्त्रियां क्विप् BB.

१९. ०रिपृण० P. परिवर्जयति बाधते Sy. परितो वर्जयति BB.

२०. पथिकाविविन्दिते P. लभते तादृशं पन्थानमित्यर्थः Sy. लभते च वसु धनं तमगमाम गम्यास्म वा BB.

This stanza=TS. 1.2.9.1.

VI. 52.

न तद्दिवा न पृथिव्यानु मन्ये न यज्ञेन नोत शमीभिराभिः ।
उब्जन्तु तं सुभ्वः पर्वतासो नि हीयतामतियाजस्य यष्टा ॥ १ ॥

[1] [2] न तद्दिवा । न । तत् कर्म । द्यावापृथिवीभ्याम् । [3] अहन्नानुमन्ये, [4] शफ ? [5] कुरुतं द्यावापृथिव्यौ तत्कर्मेत्यर्थः । न च । [6] यज्ञेन । न । [7] अवि । [8] आभिः । तमिममतियाज [9] [10] महच्छत्रुम् । महान्तः । [11] [12] पर्वताः । उब्जन्तु, उब्जतिर्वधकर्मणा । [13] निहीनो भवतु । इतियाजस्य । [14] यष्टा चाध्वर्युः ।

---

१. 'न तद्दिवा' इति सप्तदशर्चं तृतीयं सूक्तमृजिश्वन आर्षं वैश्वदेवम् । आदितः षट् त्रिष्टुभः सप्तमाद्याः षड् गायत्र्यस्त्रयोदशी त्रिष्टुप् चतुर्दशी जगती शिष्टास्तिस्त्रस्त्रिष्टुभः । तथा चानुक्रान्तम्—'न तत्र्यूना सप्तम्याद्याः षड् गायत्र्यश्चतुर्दशी जगती' (KSA. 32.52. p.23.) इति । गतो विनियोगः ! अतियाजो नाम कश्चिदृषिरस्मादृजिश्वन उत्कृष्टः स्यामहमिति बुद्ध्या देवान् यियक्षुरास । ऋषिस्तदीयं यजनं निराचष्टाद्यया Sy.

उत्कृष्टः स्यामहं वेति बुद्ध्या देवानियाज ह ऋषिस्तदीयं यजनं निराचष्टाद्यया । ऋजिश्वा त्रिष्टुभा विश्वान् देवान् प्रति अतियाजं निन्वन्ति DDN.

२. तदि० D.

३. अतियाजस्य ऋषेस्तद्यजनम् Sy., DDN.

४. द्युलोकेन तत्रत्येन देवगणेन युक्तम् । पृथिव्या पार्थिवेनापि देवगणेन युक्तम् Sy.,DDN.

५. न of नानुमन्ये seems to be redundant. अनुमति न करोमि Sy. नानुमति करोमि DDN.

६. शफं D. the reading is doubtful. सफलम् is suggested for शफम् ।

७. ०ता P.

८. मयानुष्ठितेन सदृशं तवित्यहं नानुमन्ये Sy., DDN.

९. अपि is suggested for अवि ॥ अपि च Sy.

१०. P. reads नभ्याभिः for न । अपि । आभिः ।

११. ऋषिम् Sy.

१२. सुष्ठु भवन्तः Sy., DDN.

१३. पर्वता इन्द्रेण प्रहिताः सन्तः Sy., DDN.

१४. उब्जन् P. हिंसन्तु । उब्जिर्हिंसाकर्मा Sy., DDN.

१५. ०कर्मा is suggested for ०कर्मणा ।

१६. नितरां हीनो भवतु Sy.

१७. अतिया० is suggested for इतिया० ॥ ऋजिश्वनोऽप्यतिशयेनाहं देवान् यजामीति बुद्ध्या युक्तस्य ऋषेः Sy., DDN.

१८. याजकः Sy.

१९. VM. ignores शमीभिः ।

शमीभिरन्यैरपि मया कृतैरेभिः कर्मभिः सदृशमित्यपि नानुमन्ये । मया वशीकृता देवास्तदीयं यजनं नाङ्गीकुर्वन्ति स चानभिज्ञत्वात्सम्यग्यष्टुमपि न शक्नोतीति भावः Sy., DDN.

अति वा यो मरुतो मन्यते नो ब्रह्म वा यः क्रियमाणं निनित्सात् ।
तपूंषि तस्मै वृजिनानि सन्तु ब्रह्मद्विषमभि तं शोचतु द्यौः ॥ २ ॥

अति । यः । वा । अस्मान् । हे मरुतः ! अतिमन्यते । कर्म । वा । अस्माभिः क्रियमाणम् । नन्दतुमिच्छति । तस्मै । रक्षांसि । छेदकानि । भवन्तु । कर्मणा ।

किमङ्ग त्वा ब्रह्मणः सोम गोपां किमङ्ग त्वाहुरभिशस्तिपां नः ।
किमङ्ग नः पश्यसि निद्यमानान्ब्रह्मद्विषे तपुषिं हेतिमस्य ॥ ३ ॥

[किमङ्ग ।] पीड्यमानान् । कर्मद्विषे । तापयितारम् । वज्रम् । प्रेरय ।

---

१. पुरुषः Sy.
२. अस्मान् अति मन्यते अतीत्य स्वस्याधिक्यं मन्यते अस्मत्तोऽपि स्वयमधिक इति बुध्यते Sy.
३. ब्रह्म स्तोत्रं वा Sy.
४. निन्दि० is suggested for नन्द० ॥ निन्दितुमिच्छेत् Sy.
५. तस्मै पुरुषाय Sy.
६. तपूंषि तेजांसि Sy.
७. बाधकानि Sy.
८. कर्मण P. कर्मणा D. The text seems to be incomplete.
९. VM's commentary on the words द्विषम् of ब्रह्मद्विषम् and अभि । तम् । शोचतु and द्यौः seems to be missing ॥ ब्रह्मद्विषं तं शत्रुं द्यौरादित्यश्चाभि शोचतु । अभितपतु । अभिवहतु Sy.
१०. The *pratika* is supplied by the Editor.
११. परैर्वृण्यमाणान् Sy.
१२. ब्राह्मणद्वेष्ट्रे तस्मै Sy.
१३. तापकम् Sy.
१४. आयुधम् Sy.
१५. क्षिप प्रेरय Sy.
१६. VM's commentary on the words किम् । अङ्ग । त्वा । ब्रह्मणः । सोम । गोपाम् । किम् । अङ्ग । त्वा । आहुः । अभिशस्तिपाम् । नः । किम् । अङ्ग । नः and पश्यसि is missing.
Sy. explains these words in the following manner:
किमङ्गेति प्रसिद्धिद्योतकौ निपातौ । हे सोम ! त्वा त्वां खलु ब्रह्मणो मन्त्रस्य कर्मणो वा ब्रह्मजातेर्वा गोपां गोपायितारमाहुः । कथयन्ति पुराविदः । तथा नोऽस्माकमभिशस्तिपामभिशंसकेभ्यः पालयितारं त्वामेव खल्वाहुः । यद्वा अङ्गेत्यभिमुखीकरणे । अङ्ग हे सोम ! किं कारणं त्वां ब्रह्मणो गोपामाहुः ? किं कारणं वा त्वामस्माकमभिशस्तिपामाहुः ? निन्द्यमानान् परैर्वृण्यमाणान्नोऽस्मानङ्ग हे सोम ! किं कारणं पश्यसि ? त्वामेव सर्वे ब्रह्मणो रक्षकं शत्रुभ्यः पालकं च कथयन्ति । अतोऽस्मासु परैर्निन्द्यमानेष्वौदासीन्यं तवानुचितम् ।

अवन्तु मामुषसो जायमाना अवन्तु मा सिन्धवः पिन्वमानाः ।
अवन्तु मा पर्वतासो ध्रुवासोऽवन्तु मा पितरो देवहूतौ ॥ ४ ॥

अवन्तु । रक्षन्तु । माम् । उषसः । प्रादुर्भवन्त्यः । रक्षन्तु । माम् । नद्यः[१] । वहन्त्यः[१] । रक्षन्तु । माम् । पर्वताः । स्थिराः[१] । रक्षन्तु । माम् । पितरश्च[२] । यज्ञे[३] ।

विश्वदानीं[४] सुमनसः स्याम[५] पश्येम[६] नु सूर्यमुच्चरन्तम्[७] ।
तथा करद्वसुपतिर्वसूनां देवाँ ओहानोऽवसागमिष्ठः ॥ ५ ॥

विश्वदानीम्[४] । सर्वदा वयम् । सुमनसः[५] । स्याम । पश्येम[६] । च[१०] । सूर्यम् । उद्यन्तम्[७] । तथा । करोतु[११] । वसुपतिरग्निः[१२] । देवान् । आवहन्[१३] । रक्षणार्थम्[१४] । अतिशयेनागन्ता[१५] ।

इन्द्रो नेदिष्ठमवसागमिष्ठः सरस्वती सिन्धुभिः पिन्वमाना ।
पर्जन्यो न ओषधीभिर्मयोभुरग्निः सुशंसः सुहवः पितेव ॥ ६ ॥

इन्द्रः[१७] । इन्द्रोऽस्माकम्[१८] । रक्षणार्थम्[१८] । नेदिष्ठम्[१९] । अतिशयेनागन्तास्तु[२०] । सरस्वती[२१] च । उदकैः[२२] । महत्यस्तु[२३] । पर्जन्यश्च । अस्माकम् । ओषधीभिः[२४] । सुखस्य भावयिता[२५] । अग्निश्च । शोभनश[२६] स्वाहानोऽस्तु[२७] । पितेव[२८] ।

---

१. स्यन्दनशीला नद्यश्च Sy.
२. तथा पिन्वमाना वर्धमानाः Sy.
३. पर्वकास्थिराः D. निश्चलाः Sy.
४. पितृदेवताश्च मामवन्तु Sy.
५. देवानां हूतिराह्वानमस्मिन्निति देवहूतिर्यागः । तत्र विद्यमानाः Sy.
६. हे देवाः Sy.
७. समनस P. शोभनमनस्काः Sy.
८. भवेम Sy.
९. सर्वदा पश्येम Sy.
१०. च । नुशब्दः समुच्चये Sy.
११. अस्मान् तथाविधानुक्तप्रकारान् करोतु Sy.
१२. वसूनां वसुपतिः उत्कृष्टधनाधिपतिरग्निः Sy.
१३. वहन् । प्रापयन् Sy.
१४. अस्मदीयेन हविषा Sy.
१५. ०न ग० P. आगन्तृतम एवङ्गुणविशिष्टः सन् Sy.
१६. VM. ignores वसूनाम् ।
१७. अयमिन्द्रः Sy.
१८. रक्षणेन सार्धम् Sy.
१९. नेतिष्ठम् P.D. अन्तिकतमं यथा भवति तथा Sy. २०. आगन्तृतमा Sy.
२१. नदीरूपा चागन्तृतमा भवतु Sy.
२२. स्यन्दनैरुदकैः Sy.
२३. महत्यस्तु seems to be the explanation of पिन्वमाना ॥ महत्यस्तु is suggested for महन्त्यस्तु ॥ Sy. explains it by वर्धमाना ।
२४. ओषधीभिः सार्धम् Sy.
२५. सुखस्य भावयिता भवतु Sy.
२६. ०शंसः is suggested for ०शं ॥ सुखेन शंसनीयः Sy.
२७. सुखेनाह्वातव्यश्च भवतु० Sy.
२८. पुत्रस्य जनक इव Sy.

विश्वे देवास आ गत शृणुता म इमं हवम् । एदं बर्हिर्नि षीदत ॥ ७ ॥

विश्वे देवासः । हे विश्वे ! देवाः ! आगच्छत । शृणुत च । मम । इदम् । आह्वानम् । इदम् । बर्हिः । आनिषीदत ।

यो वो देवा घृतस्नुना हव्येन प्रतिभूषति । तं विश्व उप गच्छथ ॥ ८ ॥

यो वः । यः । युष्मान् । हे देवाः ! घृतप्रस्राविणा । हविषा । परिचरति । तम् । सर्व एव । उपगच्छथ ।

उप नः सूनवो गिरः शृण्वन्त्वमृतस्य ये । सुमृळीका भवन्तु नः ॥ ९ ॥

उप नः । उपशृण्वन्तु । अस्माकम् । स्तुतीः । अमृतस्य प्रजापतेः । ये । सूनवो भवन्ति । सुष्ठु सुखयितारश्च । अस्माकम् । भवन्तु ।

विश्वे देवा ऋतावृधं ऋतुभिर्हवनश्रुतः । जुषन्तां युज्यं पयः ॥ १० ॥

विश्वे देवाः । विश्वे । देवा । यज्ञस्य वर्धयितारः । स्वेषु कालेषु आह्वानस्य श्रोतारः । सेवन्ताम् । योग्यम् । ओषधीनां पयः सारमन्नमन्नभूतम् ।

---

१. आग्रयणे वैश्वदेवस्य चरोः 'विश्वे देवास आ गत' इत्यनुवाक्या । सूत्रितञ्च 'विश्वे देवास आ गत ये के च ज्मा महिनो अहिमायाः' (ĀSS. 2.9.) इति Sy.
२. विश्व D. सर्वे Sy.
३. आगत्य च मे मदीयम् Sy.
४. श्रुत्वा चेदमास्तीर्णं बर्हिः Sy.
५. आस्तीर्णे बर्हिषि निषण्णा भवत Sy.
६. जनः Sy. ७. घृतप्रक्षरणेन Sy.
८. अ P.D. जनम् Sy.
९. विश्वे सर्वे यूयम् Sy.
१०. ०थः P. उपगता भवथ Sy.
११. समीपमागत्यावधारयन्तु Mah.
१२. गिरो वाचः U.
१३. मरणरहितस्य प्रजापतेः Sy. मरणहीनस्य प्रजापतेः Mah.
१४. पुत्राः Sy. पुत्रा विश्वे देवास्ते Mah. पुत्राः ....ये विश्वे देवाः U.
१५. सुष्ठु मृडयितार. सुखयितारश्च Sy. श्रुत्वा ....सुखकरा भवन्तु । शोभनं मृडीकं सुखं येभ्यस्ते Mah. अतिशयेन सुखयितारो भवन्तु U.
This stanza=YV. 33.77.
१६. देवासः P. D.
१७. सर्वे Sy.
१८. ऋतस्य यज्ञस्य वर्धकाः Sy. ऋतस्य यज्ञस्य सत्यस्य वा वर्धयितारः । ण्यन्तात्क्विप् BB.
१९. कालविशेषैः Sy. ऋतुभिः कालावयवैः पर्वादिभिः सह BB.
२०. हवनस्य स्तोत्रस्य श्रोतारस्तस्मिंस्तस्मिन्यागकाले स्तूयमाना ईदृशाः Sy. आह्वानप्रयोजनस्य कर्तार इति BB.
२१. आमिक्षारूपम् । श्रूयते हि—'तप्ते पयसि वध्यानयति सा वैश्वदेव्यामिक्षा' इति Sy. पयसि चरुमत एव वचनात् BB.
This stanza=TS. 2.4.14.5.

स्तोत्रमिन्द्रो मरुद्गणस्त्वष्टृमान्मित्रो अर्यमा । इमा हव्या जुषन्त नः ॥ ११ ॥

स्तोत्रम् । स्तोत्रम् । इन्द्रः । मरुद्गणः । त्वष्टायुक्तः । मित्रः । अर्यमा च । इमानि । हवीषि । सेवन्ताम् । अस्माकम् ।

इमं नो अग्ने अध्वरं होतर्वयुनशो यज । चिकित्वान्दैव्यं जनम् ॥ १२ ॥

इमं नः । इमम् । नः । अग्ने ! यज्ञम् । हो । प्रज्ञानेन । यज । मानम् । दैव्यम् । जनम् ।

विश्वे देवाः शृणुतेमं हवं मे ये अन्तरिक्षे य उप द्यवि ष्ठ ।
ये अग्निजिह्वा उत वा यजत्रा आसद्यास्मिन्बर्हिषि मादयध्वम् ॥ १३ ॥

विश्वे देवाः । हे विश्वे ! देवाः ! शृणुत । इमम् । हवम् । मे । ये यूयम् । अन्तरिक्षे । उपभवथ । ये च । दिवि । ये । अग्निजिह्वाः । अपि च । यष्टव्यास्ते सर्वे । अस्मिन् । बर्हिषि । आसद्य । मोदध्वम् ।

---

१. मरुतो गणभूताः परिजनभूता यस्य तादृशः Sy.
२. त्वष्टामित्रोयुक्तः P. त्वष्टृयुक्त is suggested for त्वष्टायुक्तः ॥ त्वष्ट्रसहितः Sy.
३. P. adds च after इमानि ।
४. अस्मदीयम् Sy. ५. हिंसारहितं यज्ञम् Sy.
६. होतः ! is suggested for हो ॥ देवानामाह्वातः ! Sy.
७. ज्ञानक्रमेण यथानुपूर्त्या देवा बुद्धिस्थास्तथा Sy.
८. यागं कुरु Sy.
९. मान D. जानन् is suggested for मानम् । जानंस्त्वम् Sy.
१०. दे० P. देवसम्बन्धिनम् Sy.
११. सङ्गं यजनीयम् Sy.
१२. वैश्वदेवशस्त्रस्य 'विश्वे देवाः' इति याज्या । सूत्रितञ्च—'आश्रुत्यै त्वेति शस्त्वा जपेद्विश्वे देवाः शृणुतेमं हवं म इति याज्या' (ĀSS. 5.18.) इति । वैश्वदेवे पशावेषैव याज्या । सूत्रितञ्च—'विश्वे देवाः शृणुतेमं हवं मे ये के च ज्मा महिनो ऋहिमायाः' (ĀSS. 3.7.) इति Sy.
१३. आह्वानम् Sy., Mah., U., BB.
१४. म P. मदीयम् Sy. मत्कृतम् Mah. मम U. BB.
१५. अन्तरिक्षलोके वर्तमानाः Sy.
१६. तत्समीपस्थे भूलोके भवथ Sy. भवथ Mah. U.
१७. द्युलोके Sy.,U. स्वर्गसमीपे Mah. ये चोप समीपे पृथिव्यां स्थ ये च दिवि द्युलोके स्थ BB.
१८. अग्निर्जिह्वास्थानीयो येषाम् । यद्वा अग्नेर्जिह्वा । तया पोष्यमाणत्वादग्निजिह्वा इत्युच्यन्ते Sy. वह्निमुखाः Mah. अग्निमुखाः U. ये चाग्नेर्जिह्वायां स्थिता हविर्भाजः । तात्स्थ्यात्तच्छब्दम् । यद्वा अग्निर्जिह्वास्थानीयो येषाम् BB. १९. अपि वा Sy., BB.
२०. यजनीयाः Sy. पूजामात्रभाजः BB.
२१. यूयम् Sy. ते सर्वे यूयम् Mah. ते सर्वेऽपि यूयम् BB.
२२. आस्तीर्णेऽस्मिन् बर्हिषि Sy. यज्ञे BB.
२३. उपविश्य Sy., Mah. श्रुत्वा चाह्वानमासद्य स्थित्वा U. आसित्वा BB.
२४. सोमेनात्मानं तर्पयथ Sy. तृप्यध्वम् Mah.,U. तृप्यत । 'मद तृप्तियोगे' चौरादिकः । .... तृप्ताश्चास्माकं ग्रामं साधयतेति BB.
२५. VM. ignores वा ।
This stanza=ṚV. 33.53.=TS. 2.4.14.5.

विश्वे देवा मम शृण्वन्तु यज्ञिया उभे रोदसी अपां नपाच्च मन्म ।
मा वो वचांसि परिचक्ष्याणि वोचं सुम्नेष्विद्वो अन्तमा मदेम ॥ १४ ॥

विश्वे देवाः । यज्ञार्हाः । विश्वे । देवाः । द्यावापृथिव्यौ । अपां नपात् । च । मम[१] । स्तोत्रम्[२] । शृण्वन्तु[३] । मा । युष्माकम्[४] । गर्ह्याणि[५] । वचनानि । वोचम्[६] । युष्माकम् । सन्निकृष्टा वयम्[७] । सुखेषु[८] । ए[९] । मदेम[१०] ।

ये के च ज्मा महिनो अहिंमाया दिवो जज्ञिरे अपां सधस्थे ।
ते अस्मभ्यमिषये विश्वमायुः क्षपं उस्रा वरिवस्यन्तु देवाः ॥ १५ ॥

ये के च[११] । ये । के[१२] । च । पृथिव्याम्[१३] । महान्तं महान्त[१४] । अहन्तव्यप्रज्ञाः[१५] । दिवः[१६] । जाताः[१७] । अन्तरिक्षे च[१८] । ते[१९] । अस्मभ्यम् । इषिरिच्छा तदर्थम्[२०] । सर्वम्[२१] । अन्नम्[२२] । रात्रीः[२३] । अहानि च[२४] । प्रयच्छन्तु । देवाः सर्वदाऽन्नं[२५] प्रयच्छन्त्विति ।

---

१. मध्यमस्थानोऽग्निः Sy.
२. मदीयम् Sy.
३. मननीयं स्तोत्रम् Sy.
४. चित्तेऽवधारयन्तु Sy.
५. अथ प्रत्यक्षकृतः—हे देवाः ! वो युष्मभ्यम् Sy.
६. वर्जनीयानि Sy.
७. वचांसि स्तोत्राणि Sy.
८. ब्रवीमि । अपि तु समीचीनानि Sy.
९. अतः अन्तिकतमाः सन्तो वयम् Sy.
१०. युष्माभिर्वर्त्तेषु सुखेषु वर्तमानाः Sy.
११. एव is suggested for ए ।
१२. मोदेम Sy.
१३. VM. ignores उभे ।
१४. आग्रयणे वैश्वदेवस्य 'ये के च ज्मा' इति याज्या । सूत्रितञ्च—'विश्वे देवास आगत ये के च ज्मा महिनो अहिमायाः' (ĀŚS.2.9.) इति । वैश्वदेवपुरोडाशस्यैवैव याज्या । सूत्रमुदाहृतम् Sy.
१५. केचन देवाः Sy.
१६. ज्मायां पृथिव्याम् Sy. ज्मेति पृथिवीनाम Ngh.1.1.
१७. महान्तम् is redundant.
१८. महाम्महान्तः D.
१९. आहन्तृप्रज्ञाः Sy. मायेति प्रज्ञानाम Ngh. 3.9.
२०. द्युलोकात् Sy.
२१. प्रादुर्बभूवुः Sy.
२२. It seems to be the explanation of both अपाम् and सधस्थे ॥ सहान्तरिक्षे Sy.
२३. सर्वे देवाः Sy.
२४. इष्यत इतीषिः पुत्रादिः । तस्मै च Sy.
२५. सवम् P.
२६. अन्नं जीवनं वा Sy.
२७. सर्वा रात्रीः Sy.
२८. सर्वाण्यहानि च सर्वदा नैरन्तर्येण Sy.
२९. सर्वदा refers to रात्रीः and अहानि ।

अग्नीपर्जन्याववतं धियं मेऽस्मिन्हवे सुहवा सुष्टुतिं नः ।
इळामन्यो जनयद्गर्भमन्यः प्रजावतीरिष आ धत्तमस्मे ॥ १६ ॥

अग्नीपर्जन्यौ[1] । हे अग्नीपर्जन्यौ[2] ! रक्षतम्[3] । कर्म[4] । मे । अस्मिन्[5] । हवे[6] । स्वाह्वानौ[7] ! सुष्टुतिं[8] च । अस्माकं सर्वेषाम्[9] । एतयोरेकोऽग्निः[10] । इळाम्[11] । अजनयत्[12] । अन्यः पर्जन्यः[13] । योषासु गर्भमजनयत्[14] तौ युवां पर्यचरन्ति[15] । यज्ञानि[16] । यजतम्[17] । अस्मासु[18] ।

उत्तरा निगदसिद्धा । इति[19] ।

स्तीर्णे बर्हिषि समिधाने अग्नौ सूक्तेन महा नमसा विवासे ।
अस्मिन्नो अद्य विदथे यजत्रा विश्वे देवा हविषि मादयध्वम् ॥ १७ ॥

[स्तीर्णे बर्हिषि ।][20]

---

१. पर्जन्येन संस्तवः । भरद्वाजस्यार्षम् Dur. भरद्वाजस्य SKN
२. हे अग्नीपर्जन्यौ ! युवामुच्येथे Dur.
३. गच्छतं रक्षतं वा Sy. आगच्छतम् Dur. गच्छतम् SKN
४. यज्ञलक्षणम् Sy. इमां धियमिदं कर्म प्रति Dur. धियं कर्मनामैतत् । कर्म SKN
५. मदीयम् Sy. मम Dur मम शृणुतम् SKN
६. यज्ञे Sy. आह्वाने Dur., SKN.
७. सुखेन ह्वातुं शक्यौ Sy.
८. शोभनां स्तुतिं च रक्षतम् ॥ यद्वा अनुवृत्तोऽवतिः श्रवणार्थः । अवतं शृणुतम् Sy. शोभनामिमां स्तुतिं श्रोतु ? (शृणोतु) Dur. शोभनां च स्तुतिं च SKN.
९. अस्मदीयाम् Sy. अस्माकं स्वभूताम् SKN
१०. सेवता० D. ११. पर्जन्यः Sy. युवयोरेकः Sy.
१२. अन्नम् Sy. आगत्य च श्रुत्वेमामिळामन्नम् Dur. गत्वा चेळामन्नम् SKN.
१३. जनयति । वृष्ट्या ह्योषधिवनस्पतयो जायन्ते तेभ्यश्चान्नं जायते Sy. जनयतु Dur जनयत SKN. १४. अग्निः Sy.
१५. पर्जन्यश्च is suggested for पर्जन्यस्य ।
१६. जनयति । पुरुषेण भुक्तमन्नं जाठरेणाग्निना पक्वं सत् रेतोरूपेण परिणमते तदेव योषित्सु गर्भो भवति Sy.
१७. प्रजाभिर्युक्ताः Sy. तौ युवामेवं प्रतिसंवत्सरं प्रजावतीः प्रजासंयुक्ताः Dur. प्रजासन्निहितान्यन्नानि SKN.
१८. आध० is suggested for अध० ॥ अवस्थापयतम् Sy. आभिमुख्येन स्थित्वा धत्त दत्तम् Dur. आभिमुख्येन स्थापयतम् SKN.
१९. अस्मभ्यमित्यर्थः Dur अस्मे अस्मासु । चतुर्थ्यर्थे वा । शेआदेशः । आभिमुख्येन दत्तमस्मभ्यमित्यर्थः SKN. III. 52.
२०. Omitted by P.
२१. The *pratika* is supplied by the Editor.
Sy. explains this stanza in the following manner: हे विश्वे देवाः ! बर्हिषि दर्भपुञ्जे वेद्यां स्तीर्णे सत्यग्नौ च समिधाने समिद्धे सत्यनेन सूक्तेन स्तोत्रेण च महा महता नमसा नमस्कारेण च । विवासे । पर्यचरम् । हे यजत्राः । यजनीयाः ! विश्व देवाः ! अद्यास्मिन् दिने नोऽस्मदीयेऽस्मिन्विदथे यज्ञे हविषि । तृतीयार्थे सप्तमी । हविषास्माभिर्दत्तेन मादयध्वम् । तृप्यध्वम ।

VI. 53.

वयमु त्वा पथस्पते रथं न वाजसातये । धिये पूषन्नयुज्महि ॥ १ ॥

वयम् ॥ भरद्वाज. ॥ वयम् । उ । त्वा । पथ । पते[१] । रथम् । इव[२] । अन्नभजनाय[३] । कर्मणे[४] । पूषन्[५] । यत्र कर्म[६] ।

अभि नो नर्यं वसु वीरं प्रयतदक्षिणम् । वामं गृहपतिं नय ॥ २ ॥

अभि नः[७] । अभिनय[८] । अस्मान् । नृहितम्[९] । वसु[१०] । शत्रूणा प्रेरकान्[११] । दक्षिणम्[१२], आढ्यो हि प्रयच्छति पशून् । भजनीय[१३] पर्याप्तम्[१४] ।

अदित्सन्तं चिदाघृणे पूषन्दानाय चोदय । पणेश्चिद्वि ब्रदा मनः ॥ ३ ॥

अदित्सन्तम्[१५] । अदित्सन्तम्[१६] । अपि । आगतदीप्ते[१७] ! पूषन् ! दानाय[१८]मभ्यम् । चोदय[१९] । पणे[२०] ।

---

१. 'वयमु त्वा' इति दशर्चं चतुर्थं सूक्तं भरद्वाजस्यार्षं पौष्णम् । 'यां पूषन्' इत्यनुष्टुप्, शिष्टाः गायत्र्यः । तथा चानुक्रान्तम्—'वयं दश पौष्णं तद् गायत्रं वै यां पूषन्ननुष्टुप्' (KSA. 32. 53. p. 23) इति । अर्थार्थिभिः प्रवसद्भिरेतज्जप्यम् । सूत्रितञ्च—'वयमु त्वा पथस्पत इत्यर्थचर्यां चरिष्यन्' (AGS. 3. 7. 8.) इति । जपेदिति शेषः Sy.

२. उ इति पूरकः Sy. एव BB.

३. त्वाम् Sy., BB.

४. हे मार्गस्य पालयितः ! Sy., BB.

५. युद्धे रथमिव Sy. उपरिष्टादुपचारत्वाद् उपमानार्थो नशब्दः BB.

६. अन्नस्य लाभाय Sy. धीर्विशेष्यते ।.... वाजोऽन्नं स सन्यते लभ्यतेऽस्यामिति । अधिकरणे क्तिनि BB.

७. कर्मार्थम् Sy.
कर्मणे कर्मसिद्धयर्थम् BB.

८. युञ्ज्महि । अस्मदभिमुखं कुर्मः Sy. योजयामः ।....ईदृशकर्मसिद्धयर्थं त्वा योजयाम इति BB.
This stanza=TS. 1. 1. 14. 1.

९. हे पूषन् ! Sy.

१०. अभि प्राप्तुम्, नय प्रापय Sy.

११. रहितं P. नृभ्यो हितम् Sy.

१२. सुखं P. धनम् Sy.

१३. प्रेरकम् is suggested for प्रेरकान् ॥ दारिद्र्यस्य विशेषेणेरयितारं गमयितारम् Sy.

१४. दक्षिणान् D. The reading is incomplete. प्रयतदक्षिणं or दत्तदक्षिणम् is suggested for it.
पूर्वमन्येभ्योऽपि दत्तधनम् । यद्वा प्रयतं शुद्धं दक्षिणं धनं यस्य तादृशम् Sy.

१५. वननीयमेवंविधम् Sy.

१६. VM. ignores गृहपतिम् ॥ Sy. explains गृहपतिम् by गृहस्थम् ।

१७. भरद्वाजो गायत्र्या पूषणं स्तुत्वा पणेर्धनं ययाचे DDN.

१८. दातुमनिच्छन्तमपि पुरुषम् Sy., DDN.

१९. ०तं दी० D. आगतदीप्ते ! Sy., DDN.
आघृणिरागतहृणिः N.5.9.

२०. दानायास्म० is suggested for दानास्म० ॥ अस्मद्दानार्थम् Sy., DDN.

२१. प्रेरय Sy., DDN.

२२. वणिजोऽपि वार्धुषिकस्य लुब्धस्यापि Sy., DDN.

अपि । मनः[1] । अदु[2] कुरु दानाय[3] ।

वि पथो वाजसातये चिनुहि वि मृधो जहि । साधन्तामुग्र नो धियः ॥ ४ ॥

वि पथः । विचिनुहि[4] । मार्गान् । अन्नलाभाय । विजहि[5] च । शत्रून्[6] । साधयन्तु[7] । अस्माकम् । कर्माणि[8] । उद्गूर्ण[9] ! सिध्यन्तु[10] वेति ।

परि तृन्धि पणीनामारया हृदया कवे । अथेमस्मभ्यं रन्धय ॥ ५ ॥

परि तृन्धि । विलिख[11] । पणीनाम्[12] । अष्ट्रया[13] । हृदयानि[14] । कवे[15] ! अथ[16] । एनान्[17] । अस्मभ्यम् । वशीकुरु[18] [19] ।

वि पूषन्नारया तुद पणेरिच्छ हृदि प्रियम् । अथेमस्मभ्यं रन्धय ॥ ६ ॥

वि पूषन्[20] । पणेर्हृदयम्[21] । तवारया[22] । वितुद[23] । पणेर्हृदयम्[24] । यथा प्रीत भवति । यथा च कुरु[25] । अथेमिति गतम् ।

---

१. हृदयम् Sy.

२. मृदुकुरु is suggested for अदुकुरु ॥ दानार्थं मृदुकुरु Sy. दानार्थं मृदु कोमलं कुरु । 'अदा मनः' इति 'षष्ठं चाष्टाक्षरेऽक्षरम्' (RPR.8.39.) इति दीर्घः DDN.

३. VM. ignores वि ।

४. शोधितान् कुरु । यैः पथिभिर्गंता धनं लभेमहि तादृशान् पथः पृथक्कुर्वित्यर्थः Sy.

५. बाधस्व Sy.

६. बाधकान् तस्करादींश्च Sy.

७. सिध्यन्तु सफलानि भवन्तु Sy.

८. धियः कर्माणि अन्नलाभार्थं क्रियमाणानि Sy.

९. ०र्ण D. हे उद्गूर्णबल ! पूषन् ! Sy.

१०. सिध्यन्तु वा refers to साधयन्तु । therefore it should immediately follow साधयन्तु and precede अस्माकम् ।

११. परिविध्य । हृद्गतं काठिन्यमपनयेत्यर्थः Sy. DDN.

१२. पणिनाम् P. वणिजां लुब्धानाम् Sy. लुब्धकानां वार्धुषिकाणाम् DDN.

१३. अष्टुया P. सूक्ष्मलोहाग्रो दण्डः प्रतोद इत्यारेति चाख्यायते । तया Sy. सूक्ष्मलोहाग्रो दण्डः प्रतोद आरेति तया DDN.

१४. हृदयानि कठिनानि Sy., DDN.

१५. कंपे D. हे प्राज्ञ ! पूषन् ! Sy., DDN.

१६. अनन्तरम् Sy., DDN.

१७. पणीन् Sy., DDN.

१८. रध्यतिर्वशगमने N. 6.32.

१९. एवमादिभिर्बह्वीभिर्ऋग्भिर्भरद्वाजेन पणेर्मनः स्वयं गृ?(ग्र)हीतुमशक्तेन पूषा देवो याचित इति । अतः कः पणेर्मनो दानवं दाने वा कर्तुं प्रभवतीत्युक्तम् DDN.

२०. हे पूषन् ! Sy. २१. पणेर्वणिजो हृदयम् Sy.

२२. प्रतोदेन Sy. २३. विविध्य Sy.

२४. तस्य पणेर्हृदये Sy.

२५. तथा is suggested for यथा ॥ प्रियमस्मभ्यमनुकूलं धनमिच्छ । दातव्यमितीच्छां जनय । अथानन्तरमस्मभ्यमीमेनानुरध्य । वशीकुरु Sy.

२६. VM. ignores पूषन् and explains इच्छ by तथा च कुरु ।

आ रिख किकिरा कृणु पणीनां हृदया कवे । अथेमस्मभ्यं रन्धय ॥ ७ ॥

आ रिख । आलिख[1] । किकिरा[2] । कर, किकिरति शब्दानुकरणम्, अपि वा विकीर्णानि कुरु । अदातृणाम्[3] । हृदयानि । कवे[4] !

यां पूषन्ब्रह्मचोदनीमारां बिभर्ष्याघृणे । तया समस्य हृदयमा रिख किकिरा कृणु ॥ ८ ॥

यां पूषन् । याम् । पूषन् ! अदातृणां चोदयित्रीम्[5] । आराम् । धारयसि[6] । आगतदीप्ते ! तया । सर्वस्य[7] । हृदयम् । आमारिख्यनि[8] ।

या ते अष्ट्रा गोओपशाघृणे पशुसाधनी[9] । तस्यास्ते सुम्नमीमहे ॥ ९ ॥

या ते । ओपशब्द उपदमित्याह[10], उपदिश्यमाना गावो यस्या विद्यन्ते सा । या । तव[12] । अष्ट्रा[13] । पशुसाधनी[14] भवति । तस्या[15] । तव[16] स्वभूताया । सुम्नं[17] । याचामहे[18] ।

उत नो गोपणिं धियमश्वसां वाजसामुत । नृवत्कृणुहि वीतये ॥ १० ॥

उत नः । अपि च[19] । अस्माकम् । कर्म[20] । गवादि सम्भक्तृ[21] । मनुष्यवत्[22] । आगत्य कुर्वन्ति[23] । अस्माकं गमनाय[24] [25] ।

---

१. आलिख्य च कीर्णानि प्रशिथिलानि कृणु कुरु मृदूनि कुर्वित्यर्थः Sy.

२. The passage किकिरेति .. विकीर्णानि should immediately follow किकिरा च and precede कुरु

३. वणिजाम् Sy.

४. हे कवे ! प्राज्ञ ! पूषन् ! Sy.

५. ब्रह्मणोऽन्नस्य प्रेरयित्रीम् Sy.

६. हस्ते धारयसि Sy.

७. सर्वस्य लुब्धजनस्य Sy.

८. आरि० is suggested for आमारि० ॥ आलिख Sy.

९. VM. has explained किकिरा and कृणु in the previous stanza. किकिराणि कीर्णानि प्रशिथिलानि च । कृणु कुरु Sy.

१०. उपशेरत इत्युपशाः । गाव ओपशा यस्यास्तादृशी Sy.

११. उपप्द० is suggested for उपद० ।

१२. त्वदीया Sy. १३. आरा Sy.

१४. अत एव पशूनां साधयित्री Sy.

१५. तस्याः सम्बन्धि Sy.

१६. त्वदीयायाः Sy.

१७. सुखम् or सुखानि is suggested for सुखा ।

१८. VM. ignores आघृणे ।
हे आगतदीप्ते ! पूषन् ! Sy

१९. हे पूषन् ! Sy.

२०. बुद्धि कर्म वा Sy.

२१. आदि refers to अश्व and वाज । गोषणिं गवां सनित्रीम् । अश्वसाम् अश्वानां सनित्रीम् । वाजसां वाजानामन्नानां सनित्रीम् Sy.

२२. नृवतीं यद्वा नृणां वनित्री दात्रीमेवम्भूताम् Sy.

२३. कुवति D. कुरु is suggested for कुर्वन्ति ।

२४. खादनायोपभोगार्थम् Sy.

२५. VM. explains उत once only.

VI. ५४

सं पूषन्विदुषा नय यो अञ्जसानुशासति । य एवेदमिति ब्रवत् ॥ १ ॥

सं पूषन् । हे पूषन् । सन्नयास्मान् । विदुषा । या विद्वान् अस्मान् नष्ट धनम् । अञ्जसा । ऋजु मार्गेण । यः । एवम् । इदम् । इति । नष्ट ब्रवीति ।

समु पूष्णा गमेमहि यो गृहाँ अभिशासति । इम एवेति च ब्रवत् ॥ २ ॥

समु पूष्णा । पूष्णा प्रणिता । तेन सङ्गच्छेमहि । यो नष्टाना गवाम् । गृहाणि चारम्वभूतानि । अभिशास्ति । मे गाव । एव च हृतम् । इति । च । ब्रवीति ।

पूषणश्चक्रं न रिष्यति न कोशोऽवं पद्यते । नो अस्य व्यथते पविः ॥ ३ ॥

पूषणः । पूषण । आयुधम् । न, रिष्यति, न न्यून भवति । न चास्य । कोष । पतति । नापि । धारा । अस्य । व्यथते ।

---

१. 'सं पूषन्' इति दशर्चं पञ्चमं सूक्तं भरद्वाजस्यार्षं पौष्णं गायत्रम् । 'सं पूषन्' (KSA 32.54 P 23) इत्यनुक्रान्तम् । नष्टधनमन्विच्छता पुरुषेणैतज्जप्यम् । सूत्रितञ्च—'सं पूषन् विदुषेति नष्टमधिजिगमिषन् मूळ्हो वा' (VCS. 3.79.) इति Sy.

२. हे पोषक ! देव ! Sy.

३. सङ्गमय Sy.

४. जानता तेन जनेन Sy.

५. ऋजुमार्गेण Sy.

६. नष्टद्रव्यप्राप्त्युपायमुपदिशति Sy.

७. भवदीयं धनम् Sy.

८ ब्रवीति नष्ट धनं दर्शयतीत्यर्थः । तेन विदुषेत्यन्वयः Sy.

९. समूष्णा D

१०. पूष्णानुगृहीता वयम् Sy.

११. प्रहिताः is suggested for प्रणिता ।

१२. P. reads वन्ते for तेन ॥ जनेन Sy.

१३. जनः Sy.

१४. गृणानि P. येषु गृहेष्वस्मदीया नष्टाः पशवस्तिष्ठन्ति तान् गृहान् Sy.

१५. आभिमुख्येन बोधयति Sy.

१६. इमे is suggested for मे ॥ यश्चेष्टे त्वदीया नष्टाः पशवः Sy.

१७. एवं तिष्ठन्ति Sy.

१८. ब्रूयात् Sy.

१९. VM. ignores उ ।

२०. पूषः P.
पोषकस्य देवस्य Sy.

२१. ०धान् P.

२२. न रिष्यन्न रिष्यति D
विनश्यति Sy.

२३ चक्रस्य Sy.

२४. को. व D काश is suggested for कोषः ।

२५. पतति is suggested for पतति ॥ हीयते Sy.

२६. नैव Sy.

२७. कुण्ठीभवति । तेन चक्रेण चोरान् हत्वास्मदीयं धनं प्रकाशयेति भावः Sy.

यो अस्मै हविषाविधन्न तं पूषापि मृष्यते । प्रथमो विन्दते वसु ॥ ४ ॥

यो अस्मै । यः[1] । अस्मै । हविषा । उपचरणं करोति । न । तम् । पूषा । अपि । मृष्यति स्वेन दत्तधनमाढ्यं दृष्ट्वा स्वयमेवाभ्यसूयति । स सर्वस्मात् प्रागेव । लभते । धनम् ।

उत्तरा निगदसिद्धा ।

पूषा गा अन्वेतु नः पूषा रक्षत्वर्वतः । पूषा वाजं सनोतु नः ॥ ५ ॥

[पूषा गाः ।]

पूषन्ननु प्र गा इहि यजमानस्य सुन्वतः । अस्माकं स्तुवतामुत ॥ ६ ॥

पूषन्ननु । पूषन्[10] ! अनुप्रयच्छ[11] । पशून् । सुन्वतः[12] । यजमानस्य रक्षार्थम् । अपि च । अस्माकम्[13] । सुन्वताम्[14] ।

माकिर्नेशन्माकीं रिषन्माकीं सं शारि केवटे । अथारिष्टाभिरा गहि ॥ ७ ॥

माकिः[15] । मा[16] कश्चित्[17] । नपश्यतु[18] गौः[19] । मा च काञ्चन[20] वृकः[21] । हिनस्तु[22] । मा च काञ्चित्[23] चोरः[24] ।

---

१. अनस्मे D.
२. यजमानः Sy.
३. चरुपुरोडाशादिना Sy.
४. ०षावच० D. परिचरति Sy.
५. यजमानम् Sy.
६. ०वि P. अपिशब्द ईषदर्थे । ईषदपि Sy.
७. हिनस्ति Sy.
८. स च मुख्यः सन् Sy.
९. The *pratīka* is supplied by the Editor. VM. does not explain this stanza. Sy. explains it in the following manner:— पूषा पोषको देवो नोऽस्मदीया गा अन्वेतु । रक्षणार्थमनुगच्छतु । स च पूषार्वतोऽश्ववान्रक्षतु चोरेभ्यः । तथा वाजमन्नं च नो अस्मभ्यं पूषा सनोतु । प्रयच्छतु ।
१०. हे पूषन् ! Sy.
११. रक्षणार्थमनुगच्छ Sy.
१२. सोमाभिषवं कुर्वतः Sy.
१३. अस्माकं गाश्चानुच्छ Sy.
१४. स्तुतां P. त्वद्विषयं स्तोत्रं कुर्वताम् Sy.
१५. नकि P. ०कि D.
१६. हे पूषन् ! अस्मदीयं गोधनम् Sy.
१७. मा । माकिर्माकीमित्येतौ प्रतिषेधमात्रे वर्तेते Sy.
१८. नश्यतु is suggested for नपश्यतु ।
१९. नौः P.
२०. क्ता D.
२१. व्याघ्रादिभिः Sy.
२२. हिंस्यात् Sy.
२३. कं P.
२४. चोर D.

केवट[1] इति[2] रूपनाम[3] तत्र[4]। मशीर्णं[5] करोतु। तथा कृत्वा। अरिष्टाभिस्तोभि[6]। सायम्[7]। आगच्छ।

शृण्वन्तं[8] पूषणं[9] वयमिर्मनष्टवेदसम्[10]। ईशानं[11] राय[12] ईमहे[13] ॥ ८ ॥

शृण्वन्तम्। शृण्वन्तम्। पूषणम्। वयम्। प्रेरम्। अनष्टधनम्। ईशानम्। धनम्। याचामहे।

पूषन्[14] तवं व्रते[15] वयं न रिषेम[16] कदा[17] चन। स्तोतारस्त[18] इह स्मसि[19] ॥ ९ ॥

पूषन्। पूषन्। तव। कर्मणि[20]। वयम्। न। न्यनीभूता भवम धनविनाशात्। स्तोतारः। तव[21] वयम्। इह[22] निवासे सुखम्। भवाम[23]।

परि[24] पूषा परस्ताद्धस्तं दधातु दक्षिणम्[25]। पुनर्नो नष्टमाजतु[26] ॥ १० ॥

परि पूषा। गता गच्छन्तीमगत। पूषा। दक्षिणम्[27]। हस्तम्। परिदधातु[28] धनो नः

---

१. केवाव P.

२. केवभव (पौताद्भूचः पृथिव्यजायत इति ब्राह्मणमागतदीदीप्ते वामवांसं सचावहै संसृष्टौ भवा भनेत यज्ञस्यास्माकं भव रथितमं अतिशयेन रथिनं चूडा कपर्द उच्यते तद्वन्तमीशानं धनस्य महतो धनानि सखायं याचामहे रायः धनस्य दाता त्वमस्या धृणे) इति D. The additional passage in D. has a striking resemblance with the commentary on RV. VI. 55. 1, 2, 3.

३. कूप० is suggested for रूप०। Ngh. 3. 23. कूपे Sy.

४. संशीर्णं भूत्। कूपपातेनापि हिंसितं मा भवतु Sy. ५. एवं सति Sy.

६. ०शिष्टा० P. अहिंसिताभिर्गोभिः सह Sy.

७. सायङ्काले Sy.

८. अस्मत्स्तोत्राणि शृण्वन्तम् Sy.

९. देवम् Sy.

१०. प्रेरकम् is suggested for प्रेरम्॥ दारिद्र्यस्य प्रेरकम् Sy. ११. अविनष्टधनम् Sy.

१२. सर्वस्येश्वरमेवंविधम् Sy. १३. धनानि Sy.

१४. चातुर्मास्येषु वैश्वदेवे पर्वणि पौष्णस्य हविषः 'पूषन्तव व्रते' इत्येषानुवाक्या। सूत्रितञ्च— 'वाममद्य सवितर्वाममु श्वः पूषन्तव व्रते वयम्' (ŚŚS 2.16.) इति Sy.

१५. पूर्वन् P. हे पोषक! देव! Sy. हे पूषन्! Mah. १६. त्वदीये Sy.

१७. कर्मणि वर्तमानाः Sy., Mah., U.

१८. धनेम P. हिंसिता न भवेम Sy. न विनश्येम Mah., U. १९. वि० P.

२०. स्तोरः P. स्तुतिकर्तारः Mah. स्तोतारोऽपि U.

२१. तादृशाश्च वयम् Sy.

२२. अस्मिन् कर्मणि Sy. इह कर्मणि Mah.

२३. स्मः 'इदन्तो मसि' इतीकार उपजनः Sy. भवामः Mah.

२४. VM. ignores कदा and चन॥ कदाचिदपि Sy. कदापि Mah. कदाचिदपि U. This stanza=YV. 34. 41. For ŚB. (13. 4. 1. 15. p. 980). see RV. VI. 49. 8.

२५. गच्छन्तीनाम् is suggested for गच्छन्तीम्॥ परस्तात्—परस्मिन् देशे सुसञ्चारादन्यस्मिन् चोरव्याघ्रादिभिरुषिते देशे गच्छतो गोधनस्य निवारणाय Sy.

२६. पोषको देवः Sy.

२७. स्वकीयं दक्षिणं हस्तम् Sy.

२८. परिधानं निवारकं करोतु Sy.

तान्नोरा हरय । तप्तयपि । गरमान । पनरपि । प्रेरयत

VI.55.

एहि वां विमुचो नपादाघृणे सं सचावहै । रथीऋतस्य नो भव ॥ १ ॥

एहि वाम् । एहि । वाम् । मयस्य । पोः । यहु । पतियजायत इति ब्राह्मणम् । मामतेयो । मामतेयः । ममतायाः । ममायाः । भावम् । इति । यज्ञस्य । मात्रया । मात्रा । भव ।

---

१. न त्वा श्वोरा P
२. अस्मदीयं गोधनम् Sy.
३. Omitted by D.
४. आगच्छतु । आगमयतु Sy.
५. 'एहि वाम्' इति षड्चं षष्ठं सूक्तं भरद्वाजस्यार्षं गायत्रं पोष्णम् । अनुक्रम्यते च—'एहि वा षट्' (KSA. 32. 55. P. 23.) इति । गतो विनियोगः Sy. भरद्वाजस्येदमार्षम् Dut. भरद्वाजस्यार्षम् SKN
६. आगच्छ Sy., Dut , SKN.
७. SKN. takes वाम् for त्वम् and explains its form as त्वशब्दस्याय छान्दसत्वात्तकारलोपः । त्वम् ।
८. विमुञ्चति सृष्टिकाले स्वसकाशात् सर्वाः प्रजा विसृजतीति विमुक् प्रजापतिः । तस्य Sy. विमोचयितः ! प्रजानां तमोभ्यः पूषन् ! सूर्य ! Dut संहारकाले ग्रसित्वा प्रजाः पुनः सृष्टिकाले विमुञ्चतीति विमुक् प्रजापतिः तस्य SKN.
९. पुत्र ! Sy. नप्तः ! अद्भ्योऽग्निर्जायते, अग्नेरादित्यः । इत्यनयापेक्षयाऽपां नपात्त्वं सूर्यस्य । अथवा मनुष्याणामेव नप्ता स्यात् । नृभ्य ऋत्विग्भ्यो मनुष्येभ्यो जायतेऽग्निः । अग्नेरपि च सूर्यो जायते । यदुक्तमप्युपस्थाने—'एष प्रात प्रसुवति' इति Dut नपात् पौत्र ! कथम्पुनः प्रजापतेः पौत्रत्वम् ? उपनिषत्सु कृत्स्नस्य जगतोऽद्भ्य, अपा च प्रजापतिः स्रष्टा, ततस्तदुत्पत्तिश्रुतेः । अपत्यमात्रनाम वा नपाच्छब्दः प्रजापतेरपत्यभूतः SKN.
१०. पूषन् ! Sy. स एवमयमत्र सूर्यसम्बन्धादाघृणिशब्दो दीप्तिवाचकः . दीप्तिकर्मसु च पठित एवायं 'हरो हृणिः' इति । क्रोधेऽपि हृणिरित्युच्यते 'हेळो हरो हृणिः' इति, तदपि प्रकरणवशादुपेक्षितव्यम् Dut आगतदीप्ते पूषन् ! SKN
११. वामपाम् P वामावाम् is suggested for वामवाम् ॥ वाम् । वाति गच्छति स्तुति प्राप्नोतीति वा स्तोता । 'वा गतिगन्धनयोः' इत्यस्मात् 'आतो मनिन्०' इति विच् । वा गन्तारं स्तोतारं माम् Sy. आवां परस्परतः Dut अहं च त्वं च आवाम् SKN.
१२. समयाव सङ्गच्छावहै Sv. संसेवावहै Dut पूषापेक्षं च द्विवचनम् । परस्पर सेवावहै । अहं त्वा हविषा च संसेवे त्वमपि मा सेवस्व सेवितु मामिच्छ SKN
१३. भवाव is suggested for भवाभ ।
१४. नेता is suggested for नेत ॥ रंहिता । नेता Sy. रंहयिता गमयिता प्रोत्सर्पयिता Dut सारथिस्थानीयो नेता SKN.
१५. तथा सति तत्रत्यं हविस्त्वयापि लभ्यत इत्यर्थः Sy. त्वं यज्ञस्य भव । त्वदुदयप्रतीक्ष एवाहं यज्ञप्रारम्भं प्रत्याशासे । स त्वमुदिहि । त्वय्युदिते प्रोत्सर्पतामयं यज्ञ इत्यभिप्रायः Dut
१६. आघृणिरागतहृणिः । 'आघृणे संसचावहै' (RV. VI. 55. 1.) आगतहृणे ससेवावहै N. 5. 9., SKN. II. 326.)

रथीतमं कपर्दिनमीशानं राधसो महः । रायः सखायमीमहे ॥ २ ॥

रथीतमम् । अतिशयेन रथिनम् । चूडा कपर्द उच्यते तद्वन्तम् । ईशानम् । धनस्य । महत । धनानि । सखायम् । याचामहे ।

रायो धारास्याघृणे वसो राशिरजाश्व । धोवतोधीवतः सखा ॥ ३ ॥

रायः । धनस्य । दाता त्वम् । असि । आघृणे । तथा वसोर्धनस्य । राशिश्च त्वमसि । अजाश्व । पूष्णोजाश्च पूष्णोऽजा अश्वा भवन्ति । कर्मवत कर्मवत । सखा ।

पूषणं न्वजाश्वमुप स्तोषाम वाजिनम् । स्वसुर्यो जार उच्यते ॥ ४ ॥

पूषणम् । पूषणम् । क्षिप्रम् । अजाश्वम । उपस्तुम । अन्नवन्तम् । स्वर्नुरुषम । य । जरयिता । उच्यते अपि वोपपतिरेव जार ।

मातुर्दिधिषुमब्रवं स्वसुर्जारः शृणोतु नः । भ्रातेन्द्रस्य सखा मम ॥ ५ ॥

मातुः । माता रात्री तस्या ।

---

१. रथित० P., D.
२. अतिशयेन रथिनम् । यद्वा अतिशयेन रंहितारं नेतारम् Sy.
३. स्वामिनम् Sy.
४. राध्नोत्यनेनेति राधो धनम् । राधसो धनस्य Sy.
५. अस्माकं मित्रमेवंविधं पूषणम् Sy.
६. प्रवाहो भवसि । स्तोतृभ्यो बहुधनं नैरन्तर्येण प्रयच्छसीत्यर्थः Sy.
७. त्वामस्यघृ० P. हे आगतदीप्ते ! पूषन् ! Sy.
८. वसुनो धनस्य Sy.
९. सङ्गश्च भवसि । धनसङ्गश्च त्वय्येव निवसतीत्यर्थः Sy.
१०. अजां च P. अजाश्व ! is suggested for अजाश्च ॥ अजाश्छागा एवाश्वा अश्वकार्यापन्ना यस्य तादृश ! Sy.
११. पूष्णोजाश्च seems to be redundant.
१२. पूष्णोजाश्वा P.
१३. सर्वस्य स्तोत्रवतः पुरुषस्य Sy.
१४. मित्रभूतश्च भवसि Sy.
१५. Omitted by P.
१६. पोषकं देवम् Sy.
१७. क्ष० D. अद्य Sy.
१८. छागवाहनम् Sy.
१९. उपस्तवाम Sy.
२०. अन्नवन्तं बलवन्तं वा Sy.
२१. स्वर्न्नरु० P. ससुरु० is suggested for स्वर्नुरु० ।
२२. पूषा Sy.
२३. जार उपपतिरित्युच्यते तं पूषणमित्यन्वयः Sy.
२४. भरद्वाजस्यार्षम् Dur. भरद्वाजस्य SKN.
२५. रात्रित्वस्याः D. निर्मात्र्या रात्रेः Sy. माता रात्रिरादित्यस्य । स हि भगवान् रात्र्या जघने प्रातरुवेति कुमार इव स्त्रियाः प्रसवकाले । तेन ज्ञायते रात्रेरेवासौ जायत इति । अतो रात्रिर्माता । तस्याः Dur. माता आदित्यस्य रात्रिः । ततोऽनन्तरमुत्पत्तेः । ततोऽस्य जन्मावगमनात् । तस्याः मातुः SKN.

पतिम्[१] । स्तोम्[२] । उषसः[३] । जारः[४] । शृणोतु[५] । अस्मान्[६] । इन्द्रस्य[७] । भ्राता[८] । मम[९] च । सख्यति[१०,११] ।

---

१. पतिं पूषणम् Sy. स एव धारयिता रोद्धा तं मातुर्दीधिषुं धारयितारम् Dur. धारयितारं स्वोदयेन विरोद्धारमित्यर्थः SKN.

२. स्तौमि is suggested for स्तोम् ॥ अहमब्रवम् । उक्तवानस्मि यन्मेऽभिप्रेतम् Dur. ब्रवीम्यहं यद्यद्विवक्षितम् SKN.

३. अस्मिन्मन्त्रे स्वसृशब्देन मन्त्रदृगुषसमाह । केन पुनः सामान्येनेति ? उच्यते, 'साहचर्याद्वा रसहरणाद्वा' भ्राता स्वस्रा साकं बाल्ये नित्यमेव चरति । तथा चोषसा साकमादित्य इत्येतत् सामान्यम् ।....रसहरणाद्वा उषाः स्वसाऽस्यादित्यस्य । भ्रातृस्वस्रोः सह भोजनाभिप्रायं सामान्यम् Dur. एकतो रात्रेर्जातत्वादादित्यस्य स्वसोषाः । भ्राता भगिन्याः सहचारी भवति । तदीयानां च क्रीडनकानामपहर्ता बाल्ये । आदित्यश्चोषसां सहचारी, तदीयानाञ्च रसानामवश्यायानां शोषणेनापहर्ता । अतः साहचर्यसामान्यात्तदीयरसापहरणसामान्याच्चोषा अस्य स्वसोच्यते SKN.

४. पूषा Sy. आदित्यो हि पूषा । 'अथ यद्रश्मिपोषं पुष्यति तत् पूषा भवति' (N.12.16.) इति हि वक्ष्यति । तस्मात् पौष्णे एतस्मिन् मन्त्रे जारत्वमेतदादित्यस्य दर्शितम् ।....अथादित्योऽपि मनुष्यजारः । पारजायिक इत्यपिशब्दः । अयमेवास्मिन् मन्त्रे "उदीरय पितरा जार आ भगम्" (RV. X 11.6ª.) इत्यभिप्रेतो मन्त्रदृशः । नैरुक्तानां वा स्यात् । 'तथा' पुनः सति 'स्त्रीभगः' एव स्यात् । भगः 'भजतेः' सेवनार्थस्य । स हि सेव्यते मैथुनार्थिभिः पुरुषैः । जारो मनुष्यः, स हि परकीयां स्त्रियं भोगेन सार्वाङ्गिकेन निर्वयो भूत्वा जरयति विपरिणामयति म्लानरूपां करोति न तथा निजो भर्ता । तं च दृष्ट्वा तद्दर्शनेनैवोदीरित एव यथा स्त्रियो भग उपस्थः पुरुषशिश्नसम्प्रयोगोत्कण्ठतयाऽऽर्द्रीभवति तथैवमरणियोक्त्रादिहस्तानस्मान् युष्मन्मिमन्थिषून् वृष्ट्वोदीरय त्वमात्मानं हे भगवन्नग्ने ! इत्येवं योज्यं जारशब्दे मनुष्यविषये सति Dur.

स च मयोच्यमानः ...तस्या जरयिता । तदुदये हि सा जीर्यति, अतस्तस्या जारः SKN.

५. स पुनः किं करोतु ? यच्च पूर्वमहमब्रवं तच्च साधयतु । साम्प्रतं च यद् ब्रूमस्तच्च शृणोतु । ....श्रुत्वा च तदपि साधयत्वित्यभिप्रायः Dur.

६. अस्माकं स्तोत्राणि Sy.

७. मध्यमस्य चेन्द्रस्य Dur. उभयोरिन्द्रादित्ययोरेव SKN.

८. सहजातः पूषा Sy. यतः स य एवं मम समानख्यानः, अतः....भ्राता, उदकभागहर्ता । अथवा मध्यमस्यैवोदकेन भर्तव्यः । तेन ह्यसौ दीप्यते Dur.

कस्मात् कारणात् ? मनोर्जातत्वाद् भरणाद्वा । स हि रसान्मध्यमस्य रश्मिभिरादाय तैस्तं बिर्भत्ति SKN.

९. स्तोतुः Sy.

१०. मित्रभूतोऽस्तु Sy. स एव चादित्यः.... सखा समानख्यानः । यथैवाहमेतस्मिन् यज्ञे जगदनुग्राहके कर्मणि अभिप्रवृत्तः । एवमसावपि तापप्रकाशपाकरसादानवर्षादिलक्षणे कर्मणि जगदनुग्राहकेऽभिप्रवृत्तः । इत्येतस्मादावयोः समानख्यानत्वम् Dur. स्तुत्यस्तोतृत्वलक्षणेन सखीभूतः SKN.

११. यद्यपि पौष्णे सूक्ते पठ्यमानत्वात्पौष्णीयमृक् । तथाप्यादित्य एवोत्तरावस्थः पूषा न वस्स्वन्तरमित्यविरोधः SKN. उषसमस्य स्वसारमाह साहचर्यात् । रसहरणाद्वा । अपि त्वयं मनुष्यजार एवाभिप्रेतः स्यात् । स्त्रीभगस्तथा स्याद् भजतेः N. 3. 16., SKN. II. 173.

आजासः पूषणं रथे निशृम्भास्ते जनश्रियम् । देवं वहन्तु बिभ्रतः ॥ ६ ॥

आजासः । आवहन्तु । अजाः । पूषणम् । रथे । 'निश्रथ्य हारिण' इति यास्कः । ते । जातश्रियम् । देवम् । वहन्तु । धारयन्तः ।

VI.५६.

य एनमादिदेशति करम्भादितिं पूषणम् । न तेनं देव आदिशे ॥ १ ॥

य एनम् । यः । एनम् । पूषणम् । सम्प्रदानत्वनादिशति । करम्भस्यात्ता । इ । न । तेनान्यः । देवः । आदेष्टव्यो भवति धनप्रदानाय ।

उत घा स रथीतमः सख्या सत्पतिर्युजा । इन्द्रो वृत्राणि जिघ्नते ॥ २ ॥

उत घा । अपि च । खलु । सः । अतिशयेन रथी । सख्या । सता पतिः ।

---

१. भरद्वाजस्यार्षम् Dur., SKN.

२. आनयन्तु Sy. आकारो वहन्त्वित्यनेन सम्बध्यते SKN.

३. छागाः Sy. अजा अश्वाः Dur. पूष्णोऽश्वाः SKN.

४. रथेऽवस्थितम् Dur. तृतीयार्थ एषा सप्तमी । रथेन SKN.

५. नित्थ्य P. निश्रथ्य सम्बध्य हर्तारः Sy. एवमत्र समानविभक्त्यन्तत्वादजास इत्यनेन 'निश्रृम्भाः' इत्येतदश्वविशेषणम् । सति चाश्वविशेषणत्वे 'निश्रथ्य हारिणः' शीघ्रहारिणः । तस्याभीष्टत्वादागमनस्य Dur. निश्रृम्भाः शीघ्रगामिन इत्यर्थः SKN.

६. निश्रृम्भा निश्रथ्यहारिणः N.6.4.

७. पूष्णो वाहनतया प्रसिद्धाश्छागाः Sy. य एवंलक्षणा अश्वास्ते Dur. तच्छब्दश्रुतेर्यच्छब्दोऽध्याहार्यः । ये SKN.

८. जाहश्रि० P. जनं स्तोतृसङ्घं श्रयति गच्छतीति जनश्रीः । तम् Sy. उद्भूतश्रियमित्यर्थः Dur. कीदृशं पूषणम् ? उच्यते, जनश्रियं दीप्तमित्यर्थः SKN.

९. दानादिगुणम् SKN.

१०. आवहन्तु Dur. आवहन्तु, अस्मान्प्रति SKN.

११. धारयमाणाः Dur. सम्यग्धारयन्तः SKN.

१२. आवहन्त्वजाः पूषणं रथे । निश्रथ्यहारिणस्ते । जनश्रियं जातश्रियम् N. 6.4., SKN. II. 398.

१३. 'य एनम्' इति षड्चं सप्तमं सूक्तं भरद्वाजस्यार्षं पौष्णम् । अन्त्यानुष्टुबादौ पञ्च गायत्र्यः । तथा चानुक्रान्तम्—'य एनमन्त्यानुष्टुप्' (KSA. 32. 56. P. 23.) इति । गतो विनियोगः Sy. १४. स्तोता Sy.

१५. पोषकम् Sy.

१६. ०दानत्वेनादि० is suggested for ०दानं त्वनादि० ॥ अभिष्टौति Sy.

१७. करम्भाणां घृतमिश्राणां यवसूक्तानामत्ता Sy.

१८. ०करंभः स्यात्ते D. इति is suggested for इ Sy.

१९. पुरुषेणान्यः Sy.

२०. आदेष्टव्यः स्तोतव्यो भवति । पूष्ण एव सर्वस्याभिमतस्य धनस्य लाभात् देवतान्तरं न स्तौतीत्यर्थः Sy.

२१. शत्रूणां हन्तृत्वेन प्रसिद्धस्तादृशः Sy.

२२. अतिशयेन रथी महारथः Sy.

२३. मित्रभूतेन पूष्णा Sy.

२४. सतां पालयिता Sy.

सहायेन[1] पूष्ण[2] । असुरान्[3] । अत्यन्त हन्ति[4] ।[5]

उतादः पंरुषे गवि सूर्श्चक्रं हिरण्ययंम् । न्यैरयद्रथीतंमः ॥ ३ ॥

उतादः[6] । अपि[7] च । एतत्[8] । पर्वति[9] । आदित्ये[10] । सुवीर्य पूषा[11] । चक्रम्[12] । हिरण्ययम[13] । नितरामीरयति[14] । नृतमः[15] ।[16][17]

---

१. ०ये P. सहायभूतेन युक्तः सन् Sy.

२. पूषः P. पूष्णा is suggested for पूष्णः ।

३. शत्रून् Sy.

४. हन्ति । इन्द्रस्याप्ययमेव साहाय्यकारीत्यर्थः Sy.

५. VM. ignores इन्द्रः ।

६. भरद्वाजस्येदमार्षम् Dur. भरद्वाजस्यार्षम् SKN.

७. 'उत अपि अथ' इति छन्दसि समानार्थाः । अपि चक्रमीरयति, अपि रसानादत्ते, अपि तमांस्यपहन्ति Dur.
उतोऽप्यर्थे SKN.

८. तत् Sy. अमुष्मिन्नादित्यमण्डले Dur. अद इत्यपि द्वितीया सप्तम्यर्थे । अप्यमुष्मिन् SKN.

९. पर्वति is suggested for पर्वति ॥ परुष्मति पर्वति भास्वति वा Sy. पर्वभिस्तद्वति, अथवा भास्वति भासा तद्वतीति, अहोरात्रादिपर्व तद्वति, इत्यौपमन्यवः Dur. स्वैरवयवैः पर्वभिः कालपर्वभ्यां वा तच्छुताभ्यामहोरात्राभ्यां वा पर्ववति भास्वरे वा SKN.

१०. गच्छतीति गौरादित्यः । तस्मिन् Sy. गमनशीले मुहूर्तमप्यनवस्थायिनि Dur. गन्तर्यादित्यमण्डले स्थित इत्यर्थः SKN.

११. प्रेरकः Sy. सूर्योऽवस्थितः Dur. कोऽसौ ? सूरो धर्ता SKN.

१२. पूषा पुनरादित्यो नैरुक्तानां वृष्टद्या । अन्यत्र 'इयं वै पूषा' इति भूमिरुच्यते, . पूषाऽऽदित्यमण्डलान्तः पुरुषः । तदेव पर्ववद् भास्वद्वा Dur.

१३. रथस्य चक्रम् Sy. चकनं क्रमणं वा गमनशीलं मण्डलम् Dur. चक्राकृतिवेवादित्यमण्डलम् SKN.

१४. सुवर्णनिर्मितम् Sy. तेजोमयं चक्रं चक्राकृति Dur. हिरण्ययमुज्ज्वलवर्णत्वात् । हिरण्मयमेव वा SKN.

१५. नितरां प्रेरयति स्म Sy. नियतगमनवृत्तिना मार्गेण नित्यकालमीरयति । उदयास्तमयमध्यन्दिनकालोपलक्षणार्थम् । अथवा अमुष्मिन् मण्डलेऽवस्थितः पर्ववति मण्डलान्तः पुरुषः सूर्यो भगवान्, चक्रं लवक्षणनिमेषघटिमुहूर्ताहोरात्रार्द्धमासमासर्त्वयनवत्सरलक्षणं कालचक्रं सर्वभूतहारि हिरण्ययं हिरण्मयं सर्वभूतविनाशस्थितिहेतुं न्यैरयन्नित्यमीरयति Dur. नियतमुदयास्तमयाय प्रैरयत् SKN.

१६. अतिशयेन रथी नेतृतमो वा Sy. कीदृशः पुनः स सूर्य ईरयति ? रथीतमः । अन्येऽपि रथिनः सन्ति । अयन्तु मुहूर्तमप्यनवस्थितरथ इत्यतो रथीतमः । य एवङ्गुणयुक्तः पूषा तं वयमभिप्रेतार्थसिद्धये स्तुमः Dur.
अन्येऽपि रथिनः सन्ति । अयन्तु मुहूर्तमप्यनवस्थितरथ इत्यतो रथीतमः । अतिशयेन रथीत्यर्थः SKN.

१७. अथवा ब्राह्मणचक्रमिति दर्शनाच्चक्रशब्दः समूहवचनः । तच्चात्र सामर्थ्यादुदकस्याह न यस्य कस्यचित् । उदकसमूहं पृथिवीतो रश्मिभिरात्मानमुज्ज्वलन्तं प्रति प्रेरयति भौमान् रसानादत्त इत्यर्थः । अथवा हिरण्ययशब्देनोदकमुच्यते 'हिरण्यदा ददत्यन्नमस्मै' (RV. II. 35.10[d].)इति मन्त्रान्तरे दर्शनादुदकात्मकं चक्रमित्यर्थः SKN. आदित्योऽपि गौरुच्यते । 'उतादः पंरुषे गवि' पर्ववति भास्वतीत्यौपमन्यवः N. 2.6., SKN. II.50.

यदद्य त्वा पुरुष्टुत ब्रवाम दस्र मन्तुमः । तत्सु नो मन्म साधय ॥ ४ ॥

यदद्य । यत्[1] । अद्य[2] । त्वा[3] । बहुभि स्तुत[4] । ब्रवाम[5] । दर्शनीय[6] । ज्ञानवन्[7] । तत् । सुष्ठु[8] । साधय[9] । अस्माकम् । स्तोत्र मदीय वा धनम् ।

इमं चं नो गवेषणं सातयें सीषधो गणम् । आरात्पूषन्नसि श्रुतः ॥ ५ ॥

इमं च । इमम् । च । अस्माकम् । गवामेषितारम्[10] । दानाय[11] । मनुष्यगणम्[12] । दूरादेव[13] त्वम् । भवसि । पूषन्[14] । विश्रुत[15] ।

आ तें स्वस्तिमीमहे आरेअघामुपावसुम् । अद्या चं सर्वतातयें श्वश्चं सर्वतातये ॥ ६ ॥

आ ते स्वस्तिम् । आयाचामहे[16] । स्वस्तिम्[17] । त्वदीयाम्[18] । दूरेपापाम्[19] । सन्निकृष्टधनाम्[20] । अद्य[21] । च । श्व[22] । च । सर्वस्य धनस्य[23] विस्तारय[24] ।

---

१. यद् उद्दिश्य Sy.
२. इदानीम् Sy.
३. त्वा is suggested for द्वा ॥ त्वाम् Sy.
४. हे बहुभिर्यजमानैः स्तुत ! Sy.
५. ब्रु० D.
स्तवाम Sy.
६. ज्ञानवन् ! पूषन् ! Sy.
७. सुष्ठुधि D.
८. उत्पादय Sy.
९. मन्म मननीयं तद्धनम् Sy.
१०. गवामेषयितारम् Sy.
११. लाभाय Sy.
१२. मनुष्यसङ्घम् Sy.
१३. दूरदेशेऽपि Sy.
१४. पूषन् is suggested for पूषं ॥
१५. ०तं D. प्रख्यातः Sy.
१६. VM. ignores सीषधः ॥ सीषधः साधय Sy.
१७. हे पूषन् ! Sy.
१८. अभियाचामहे Sy.
१९. P. adds ते before स्वस्तिम् ॥ कल्याणी रक्षाम् Sy.
२०. ०या D.
त्वया देयाम् Sy.
२१. दूरेवद्या P. दूरेऽघं पापं यस्यास्तादृशीम् Sy.
२२. सन्नकृ० P.
उपगतधनाम् Sy.
२३. ईदृशीं स्वस्तिमस्मिंश्च काले Sy.
२४. परस्मिन्नपि दिने Sy.
२५. Omitted by P.
२६. विस्ताराय is suggested for विस्तारय ॥ सर्वैर्ऋत्विग्भिस्तायत इति सर्वतातिर्यज्ञः । तदर्थम् । यद्वा सर्वेषां भोगानां विस्ताराय सर्वदा सर्वतात्यर्थम् Sy.
२७. VM. explains सर्वतातये once only.

VI.57.

इन्द्रा नु पूषणा वयं सख्याय स्वस्तये । हुवेम वाजसातये ॥ १ ॥

इन्द्रा नु । इन्द्रापूषणौ । क्षिप्रम् । वयम् । सख्याय । अविनाशाय । हवामहे । अन्नलाभाय च ।

सोममन्य उपासदत्पातवे चम्वोः सुतम् । करम्भमन्य इच्छति ॥ २ ॥

सोमम् । सोमम् । एकम् । उपासीदद् इन्द्रः । पातुम् । अधिषवणफलकयो । अभिषुतम् । करम्भम् । पूषा । इच्छति ।

अजा अन्यस्य वह्नयो हरी अन्यस्य संभृता । ताभ्यां वृत्राणि जिघ्नते ॥ ३ ॥

[अजाः] । अजा । पूषण । हरी । इन्द्रस्य । सम्भृतौ । स ताभ्याम् । शत्रून् । हन्ति ।

---

१. 'इन्द्रा नु पूषणा' इति षड्ऋचमष्टमं सूक्तं भरद्वाजस्यार्षं गायत्रमैन्द्रापौष्णम् । अनुक्रान्तञ्च —'इन्द्रा न्वैन्द्रं च' (KSA. 32.57. P. 23.) इति । गतो विनियोगः Sy.

२. नुः D. भरद्वाजस्येदमार्षम् Dur. भरद्वाजस्य SKN.

३. इतरेतरयोगादिन्द्रपूषञ्छब्दयोरुभयत्र द्विवचनम् । इन्द्रापूषणौ देवौ Sy. हे इन्द्रापूष्णौ ! Dur. इन्द्रशब्देन पूषा पूषञ्शब्देन चेन्द्रः । कुतः ? द्विवचनस्थानादिकारश्रुतेश्छान्दसत्वाद्विरूपैकशेषो द्रष्टव्यः । इन्द्रापूषणौ युवाम् SKN.

४. अद्य Sy. नु इति क्षिप्रनाम । क्षिप्रम् SKN.

५. वयं नित्यं यज्ञेष्विदमाशास्महे इति Dur.

६. सखित्वाय Sy. समानख्यानाय Dur. सख्याय स्तुत्यस्तोतृत्वलक्षणाय SKN.

७. ०या P. शोभनाय Sy. स्वस्त्ययनाय च Dur.

८. आह्वयाम । स्तवाम Sy. आह्वयामहे युवाम् Dur. नित्यमाह्वयेमेत्याशास्महे SKN.

९. वाजस्यान्नस्य बलस्य वा सातये सम्भजनाय च Sy. अन्नसननाय च Dur. वाजमन्नं सातिः सम्भजनम् । अन्नसम्भजनाय चात्मनो युवयोर्वा SKN. N. 7.10., SKN. III. 57.

१०. एयकम् P. एकः is suggested for एकम् ॥ अनयोरेकतर इन्द्रः Sy.

११. उपसीदति । उपगच्छति Sy.

१२. घृतसिक्तं सक्त्वात्मकं हविर्भक्षयितुम् Sy.

१३. एकतरः पूषा Sy.

१४. The *pratīka* is supplied by the Editor.

१५. आजाः P. छागाः Sy.

१६. एतत्संज्ञावश्वौ वाहकौ Sy.

१७. अपरस्येन्द्रस्य Sy.

१८. सम्यक् पुष्टौ Sy.

१९. स चेन्द्रः Sy.

२०. VM. ignores वह्नयः ॥ अनयोरन्द्रापूष्णोर्वह्नयो वाहका अश्वाः Sy.

यदिन्द्रो॑ अ॒नय॒द्रितो॑ म॒हीरपो॒ वृष॑न्तमः । तत्र॑ पू॒षाभ॑व॒त्सचा॑ ॥ ४ ॥

यदिन्द्रः । यदा । इन्द्र । नयति[1] । गच्छन्ती[2] । महती[3] । अपः[3] । वर्षितृतम[4] । तु[5] । पूषा[6] । भवति । स[7] सहायः ।

तां पू॒ष्णः सु॑म॒तिं व॒यं वृ॒क्षस्य॒ प्र व॒यामि॑व । इन्द्र॑स्य॒ चा र॑भामहे ॥ ५ ॥

तां पूष्णः । ताम्[8] । पूष्णः[9] स्वभूताम । सुमतिम्[10] । वयम् । वृक्षस्य[11] । शाखामिव[12] । प्रकर्षेण[13]श्रयाम. । इन्द्रस्य । च ।

उत्पू॒षणं॑ युवामहेऽभीशूँरि॒व सार॑थिः । म॒घा इन्द्रे॑ स्व॒स्तये॑ ॥ ६ ॥

उत् पूषणम् । पूषण[14] वयम् । उद्युवामहे[15] अभिमुखमानयनमत्रव । अभीशूनिव[16] । सारथि । महते[17] । अविनाशाय[18] । इन्द्र[19] च ।

VI.58.

शु॒क्रं ते॑ अ॒न्यद्य॑ज॒तं ते॑ अ॒न्यद्वि॒षुरू॑पे॒ अह॑नी॒ द्यौरि॑वासि ।
विश्वा॒ हि मा॒या अव॑सि स्वधावो भ॒द्रा ते॑ पूषन्नि॒ह रा॒तिर॑स्तु ॥ १ ॥

शुक्रम् ।[20] शक्रम्[21] । ते[22] ।

---

१. इमं लोकं प्रापयति Sy.
२. गन्त्रीः Sy. ३. वृष्टयुदकानि Sy.
४. अतिशयेन वर्षिता Sy.
५. तत्र is suggested for तु ॥ तत्र तदानीम् Sy. ६. पोषको देवः Sy.
७. सहसा यः P. स seems to be redundant. अस्येन्द्रस्य सहायः Sy.
८. प्रसिद्धाम् Sy. ९. पोषकस्य देवस्य Sy.
१०. कल्याणीं मतिमनुग्रहबुद्धिम् Sy.
११. महीरुहस्य Sy.
१२. प्रकृष्टां वृढां शाखामिव Sy.
१३. अवलम्बामहे । आश्रयामह इत्यर्थः Sy.
१४. पोषकं देवम् Sy.
१५. उद्योजयामः । उद्योजनमाकर्षणम् Sy.
१६. सारथिः सूतोऽभीशूनिव । अभीशून् रश्मीनिवबन्धनार्थान् यथा कर्षति तद्वत् Sy.
१७. महत्यै Sy.
१८. रक्षार्थम् Sy. १९. ०नायन्द्रं P.
२०. 'शुक्रं ते' इति चतुर्ऋचं नवमं सूक्तं भरद्वाजस्यार्षं पौष्णम् । द्वितीया जगती शिष्टास्त्रिष्टुभः । तथा चानुक्रान्तम्—'शुक्रं चतुष्कं द्वितीया जगती' (KSA. 32.58.P.23.) इति । वैश्वदेवे पर्वणि वैश्वदेवस्य हविषः 'शुक्रं ते' इति याज्या । सूत्रितञ्च,—'शुक्रं ते अन्यद्यजतं ते अन्यविहेह वः स्वतवसः' (ĀŚS.2.16.) इति । एकादशिनस्य पौष्णस्य पशोर्वपाया एषैव याज्या । सूत्रितञ्च—'शुक्रं ते अन्यद्यजतं ते अन्यत् प्रपथे पथामजनिष्ट पूषा' (ĀŚS.3.7.) इति । अभिष्टवेऽप्येषा । सूत्रितञ्च—'शुक्रं ते अन्यद्यजतं ते अन्यदपश्यं गोपामनिपद्यमानम्' (ĀŚS.4.6.)इतिSy. भरद्वाजस्यार्षम्Dur. भरद्वाजस्य SKN. २१. हे पूषन् ! Sy.
२२. शुक्लवर्णम् Sy. शुक्रशब्दोऽत्र शुक्लपर्यायः । शुक्लम्SKN. २३. तव Sy. तव रूपम् Dur.

अन्यद्[1] रूपम् । यय[2]जशब्द सामर्थ्यात् कृष्णवचन. स त्वम् । नानारूपे[3] । अहोरात्रे[4] । आदित्य[5] इव च । भवसि यथाहोरात्राभ्या युक्त आदित्य तस्य हि पार्श्वयोरहोरात्रे भवत, यास्कस्त्वाह 'शुक्र[6] ते अन्यत्[7] । लोहित ते अन्यत् यजिय ते अन्यत् इति वा' इति[8] सर्वाणि[9] । प्रज्ञानानि[10] । रक्षसि[11] । अन्न च भन्[12] ।

---

१. एकमहर्भवति वासरात्मकम् Sy. यल्लोहितम् । अन्यत्तव रूप शुक्लेन व्यपदेशात्सामर्थ्याल्लोहितादि Dur. एकम् । कि पुनस्तत् ? सामर्थ्याद्रूपम् SKN.

२. यजत० is suggested for ययज० ॥ यजिरत्र सङ्गतिकरणे वर्तते । यजनीयं प्रकाशेन सङ्गमनीय स्वतः कृष्णवर्णमन्यदेकमहर्भवति रात्राख्यम् Sy. यज्ञार्हम् । अन्यदयजियम्, अयज्ञार्हमन्यत् । भगाशरूपेण हि नायमिज्यते विज्ञायते हि—'तस्मादेतौ भगांशौ यज्ञेन यजन्ते Dur. यजतशब्दोऽत्र शुक्लप्रतियोगित्वाल्लोहितपर्यायः । लोहितं तेऽन्यदपरं रूपम् । पूषाऽप्यादित्यः । तस्य मध्यन्दिने शुक्ल रूपं, लोहितमुदयास्तमययोः । अथवा शुचेर्दीप्त्यर्थस्य शुक्, रो मत्वर्थीयः । शुक्र दीप्तिमदुच्यते । दीप्तिमत् ते तवैकं रूप मण्डलाख्यम् । यजतं यष्टव्यमन्यन्मण्डलस्याधिष्ठायकम् SKN.

३. शुक्लकृष्णतया नानारूपे Sy. विषुरूपे भवतः । एते शुक्लकृष्णे रूपे Dur. ते चैते विषुरूपे परस्परं भिन्नरूपे शुक्लरोहितत्वरूपेण SKN

४. अहनी तव महिम्ना निष्पद्येते । यद्वा हे पूषन् ! त्वदीयमन्यदेकं रूपं शुक्रं निर्मलं दिवसस्योत्पादकम् । त्वदीयमन्यदेकं रूपं यजतं केवलं यजनीय न प्रकाशक रात्रेरुत्पादकम् । अत एव विषुरूपे विषमरूपे अहनी अहश्च रात्रिश्च भवतः । अहोरात्रयोर्निर्माणे सूर्य एव कर्ता कथमत्र प्रसक्तिरिति तत्राह Sy. अहोरात्रे कर्मणोदयेन शुक्लमहः करोषि । अस्तमयेन कृष्णम् Dur. ते वाऽहनी अहोरात्रे एते त्वमसि । तव चैते कर्मणी यतस्त्वत्कर्तृके एते अतस्त्वमसि SKN.

५. यथा द्यौरादित्यः प्रकाशयिता तथा त्व प्रकाशकोऽसि Sy. यथा द्यौरावृत्य सर्वं वर्तत एवं त्वमपि Dur. द्यौरिव च त्वमसि । यथा द्यौर्व्यापिनी तथा त्वमसीत्यर्थः SKN

६. विश्वायोहो० P.

७. शुक्लं D.

८. तेन् P., D.

९. N. 12.17.

१०. सर्वाः Sy., Dur. सर्वाश्च SKN.

११. प्रज्ञाः Sy.
प्रज्ञा प्रज्ञावताम् Dur

१२. रक्षसि । अतः कारणात्त्व सूर्य इव भवसीत्यर्थः Sy. त्वमवसि पालयितृत्वात्पालयसि । उद्यन्नुगृह्णासि Dur. प्रज्ञाहेतुभूतप्रकाशदानेन त्व पालयसि SKN.

१३. अन्न च तत् D. अन्नवन् ! is suggested for अन्न च भन् ॥ हे अन्नवन् ! Sy. स्वधेत्युदकनाम वा रश्म्याहृतेनोदकेन हविर्लक्षणेनान्नेन वा तद्वत् SKN.

भजनवती । ते । पूषन् !, मयि । राति । अस्तु ।

अजाश्वः पशुपा वाजपस्त्यो धियंजिन्वो भुवने विश्वे अर्पितः ।
अष्ट्रां पूषा शिथिरामुद्वरीवृजत्संचक्राणो भुवना देव ईयते ॥ २ ॥

अजाश्वः । अजाश्च । पशूना पालयिता । अन्नगृह । कर्मण. प्रीणयिता । सर्वस्मिन् । भुवने ।
तर्पतः । अष्ट्राम् । अध पतन्तीम् । पुन पुनरुद्धरन् । पश्यन् । भुवनानि । देव । गच्छति ।

यास्ते पूषन्नावो अन्तः समुद्रे हिरण्ययीरन्तरिक्षे चरन्ति ।
ताभिर्यासि दूत्यां सूर्यस्य कामेन कृत श्रव इच्छमानः ॥ ३ ॥

यास्ते । या । ते । पूषन् ! नाव । समुद्रमध्ये । चरन्ति । हिरण्मय्य. । अन्तरिक्षे च ।

---

१. कल्याणी Sy. SKN. भन्दनीया स्तुत्या Dur.
२. तादृशस्य तव Sy. पूषन् ! यं त्वामेवमादिगुणयुक्तमद्राक्ष्म तव तस्य Dur. तुभ्यं हे पूषन् ! SKN.
३. अस्मासु Sy. अस्मिन् कर्मणि Dur. इहास्मदीये यज्ञे SKN.
४. दानम् Sy., Dur. हविषो दानम् SKN.
५. भवतु Sy. अस्मान्प्रत्यस्तु, इत्येतदाशास्महे Dur. कृणु SKN.
६. VM. explains ते । अन्यत् once and ignores हि ॥ हि यस्मात्कारणात् Sy. हिरत्र चार्थे... अथवा—भद्रा ते; इति तेशब्दः 'कर्तृकर्मणो कृतिः' (Pa. 2.3.65.) इति कर्तृलक्षणषष्ठ्यन्तः । कल्याणी ते त्वत्कर्तृका रातिरिहास्तु । कल्याणं दानमिहास्मभ्यं देहीत्यर्थः । द्वितीये व्याख्याने यजतमिह भाष्ये —भाजनं स्वपानपात्रं तेन तद्वती SKN. शुक्रं ते अन्यत् । लोहितं ते अन्यत् । यजतं ते अन्यत् । यज्ञियं ते अन्यत् । विषमरूपे ते अहनी कर्म द्यौरिव चासि । सर्वाणि प्रज्ञानान्यवसि । अन्नवन् ! भाजनवती ते पूषन्निह दक्षिरस्तु N. 12.17., SKN. IV. 116.
७. ०जाश्च D.
८. ०जाश्व च P. ०जाश्वः is suggested for ०जाश्च D. छागवाहनः Sy.
९. वाजा अन्नानि पस्त्ये गृहे यस्य तादृशः Sy.
१०. धियः स्तोतारः कर्माणि वा । तेषां प्रीणयिता Sy.
११. विश्वस्मिन् सर्वस्मिन् Sy.
१२. भुवतेन P. लोके Sy.
१३. अर्पितः is suggested for तर्पतः ॥ प्रजापतिना पोषकत्वेन स्थापितः Sy.
१४. आरां स्वहस्तगताम् Sy.
१५. पा० P. शिथिलां सतीम् Sy.
१६. उद्यच्छन् Sy.
१७. सम्पश्यन् सूर्यात्मना प्रकाशयन् Sy.
१८. सर्वाँल्लोकान् भूतजातानि वा Sy.
१९. नभसि गच्छति Sy.
२०. VM. ignores पूषा ॥ अत एवम्भूतः पूषा पोषको देवः Sy.
२१. पौष्णस्य पशोर्वपापुरोडाशयोः 'यास्ते पूषन्' इत्यादिके द्वे ऋचावनुवाक्ये । सूत्रितञ्च—'यास्ते पूषन्नावो अन्तः समुद्र इति द्वे पूषेमा आशा अनुवेद सर्वाः (ĀŚS. 3.7.) इति Sy.
२२. त्वदीयाः Sy.
२३. उदधौ Sy.
२४. सञ्चरन्ति Sy.
२५. हितरमणीयाः Sy.
२६. हिरण्मर्यान्ति० P. नभसि Sy.

ताभिस्त्वम्[1] । सूर्यस्य । दूत्याम् । गच्छसि देवै सहासुरत्वधार्थं समुद्रस्य पार गत समुद्र[2] स्वभार्यामुत्कण्ठिता प्रति पूषण प्राहिणोत्[3] । हे कामेन[4], स्तोतृभिर्वशीकृत[5] । स्तोतृणामन्नम्[6] । इच्छमान[7] ।

पूषा सुबन्धुर्दिव आ पृथिव्या इळस्पतिर्मघवा दस्मवर्चाः ।
यं देवासो अददुः सूर्यायै कामेन कृतं तवसं स्वञ्चम् ॥ ४ ॥

पूषा । पूषा[8] । शोभनो बन्धु[9] । दिव[10] । च । पृथिव्या । च । अन्नस्य[11] । पद्वति[12] । धनवान्[13] । दर्शनीयतेजा[14] । य पूषणम् । देवा[15] । दत्तवन्त[16] । सूर्यायै[17] । कामेन[18] । कृतम्[19] । महान्तम्[20] । सुगमम्[21] ।

VI.59.

प्र नु वोचा सुतेषु वां वीर्या३ यानि चक्रथुः ।
हतासो वां पितरो देवशत्रव इन्द्राग्नी जीवथो युवम् ॥ १ ॥

प्र नु वोच ।[22] प्रब्रवीमि[23] । क्षिप्रम् । सुतेषु[24] सोमेषु । युवयो[25] । वीर्याणि[26] । यानि युवाम् । चक्रथु[27] ।

---

१. नौभिः Sy.
२. कदाचिद्देवैः सार्धं सूर्येऽसुरवधार्थं प्रस्थिते सति तस्य भार्या स्वभर्तरि सञ्जातौत्सुक्या बभूव तां प्रति सूर्यः पूषणं प्राहैषीत् । तेन चात्र पूषा स्तूयते Sy.
३. सूर्यः is suggested for समुद्रः ।
४. पश्वादिविषयेण Sy.
५. Sy. seems to take कृत voc. sing. as कृतः nom. sing. and explains वशीकृतोऽसि ६. हविर्लक्षणमन्नम् Sy
७ इच्छन् is suggested for इच्छमानः ।
८. पोषको देवः Sy.
९. शोभनो बन्धुर्भवति Sy.
१०. द्युलोकस्य Sy.
११. तथेळाया अन्नस्य Sy.
१२. वर्धतिः P. पतिः is suggested for पद्धतिः ।
१३. 'मघमिति धननाम' (Ngh.2.18.) तद्वान् । यद्वा मंहतेर्दानकर्मणो भावसाधनो मघशब्दः । दानवान् Sy.
१४. वर्च इति रूपनाम । दस्म दर्शनीयं वर्चो यस्य तादृशः Sy. cf. वर्च इत्यन्ननाम Ngh.2.7.
१५. देवान् P. सर्वे देवाः Sy.
१६. ०वन्तः is suggested for ०वन्त ॥ 'पुत्रः पितरावृणीत पूषा' (RV. X.85.14.) इति हि श्रूयते Sy.
१७. सूर्यायै P. सूर्यस्य पत्न्यै यद्वा सावित्र्यै सूर्याख्याया अश्विनोर्वरणाय Sy.
१८. कामेन P. पश्वादिविषयेण Sy.
१९. स्तोतृभिर्वशीकृतम् Sy.
२०. बलवन्तं प्रवृद्धं वा Sy.
२१. स्वञ्चनं सुष्ठु गच्छन्तम् । एवंविधं यं पूषणमददुः स पूषा सुबन्धुरित्यन्वयः Sy.
२२. 'प्र नु वोचा' इति दशर्चं दशमं सूक्तं भरद्वाजस्यार्षमिन्द्राग्निदेवताकम् । सप्तम्याद्याश्चतस्रोऽनुष्टुभः शिष्टाः षट् बृहत्यः । तथा चानुक्रान्तम्—'प्र नु दशेन्द्राग्नं तु बार्हतं चतुरनुष्टुबन्तम्' (KSA. 32.59. P.23.) इति । गतो विनियोगः Sy. २३. ०च D
२४. ०वी P. प्रवोचम् । प्रब्रवीमि Sy.
२५. अभिषुतेषु सोमेषु अस्मद्यज्ञे Sy.
२६. ०यो P.
२७. तानि वीर्याणि वीरकर्माणि Sy.
२८. कृतवन्तौ Sy.

हताः[1]। युवाभ्याम्। पार्वयितार[2] पृथिव्या.। असुरा[3]। हे इन्द्राग्नी! युवा त्वसुरैरहतौ। जीवथ[4]।

बळित्था मंहिमा वामिन्द्राग्नी पनिष्ट आ।
समानो वां जनिता भ्रातरा युवं यमाविहेहमातरा ॥ २ ॥

बळित्था[5]। सत्यमेव[6]। इत्थम्[7]। युवयो[8]। महिमा[9]। इन्द्राग्नी! अतिशयेन स्तोतव्य[10]। एक एव। युवयो[10]। जनयिता[11]। ततश्च भ्रातरौ[12]। युवा भवथ। युगपज्जातौ[13]। इह चह च मातरौ[14] ययोस्तौ तथोक्तौ। अग्नेपरिद्यार्माता[15] ? भवतीन्द्रस्यादिति[16]।

---

१. ०क्रमर्ह० P. हता आसन् Sy.

२. पारयितारः P. पाययितारः is suggested for पावयितारः॥ पितरः हिंसकाः। पीयतिर्हिंसाकर्मा। तस्यैतद्रूपम्। ईदृशा असुराः Sy.

३. तदेव वीर्यं दर्शयति–देवशत्रवः देवाः शत्रवः शातयितारो येषां तादृशाः Sy.

४. ०थ D. The passage beginning with युवां and ending with जीवथः is omitted by P.
जीवनवन्तौ भवथः। असुरैर्न बाधिताविति यावत् Sy.

५. The commentary on this stanza is omitted by P. भरद्वाजस्यार्षम् Dur. भरद्वाजस्य SKN.

६. युष्मद्विषयं यज्जन्ममहत्त्वं प्रतिपाद्यते तत्सर्वं यथार्थमित्यर्थः Sy. बडिति सत्यनाम Dur. बळित्येति द्वे अपि सत्यनामनी। 'अभ्यासे भूयांसमर्थं मन्यन्ते' (N. 10. 42.) इति। अथ भूयस्त्वेनापौनरुक्त्यम् SKN.

७. अनेन प्रकारेण Sy. इत्था सत्यम्। अमुना प्रकारेण यः सूक्ते महाभाग्यप्रकारोऽधिकृतस्तमित्थेत्यभिनयेनोपदिशन् ब्रवीति Dur.

८. महत्त्वम् Sy. महाभाग्यम् Dur माहात्म्यम् SKN.

९. स्तोष्यः D. स्तुत्यतमश्च प्रजापतिः Sy. सर्वतोऽतिशयेन स्तुत्यः Dur. 'पण व्यवहारे स्तुतौ च' अतिशयेन स्तुत्य इत्यर्थः। महत्त्वं चातिशयेन स्तुत्यं च SKN.

१०. यौ युवामेवमतिमहानुभावौ तयोः Dur.

११. जनयिता सूर्यः Dur. जनयिता, आदित्यः प्रजापतिर्वा SKN.

१२. भ्रातरौ स्थः Sy. तौ युवामेवङ्कृत्वैकपितृकौ Dur. ततश्च समानपितृकत्वाद् भ्रातरौ युवाम् SKN. १३. यमलौ सहोत्पन्नौ Sy. एकजन्मानौ Dur. न च क्रमजन्मानौ। किं तर्हि यमौ युगपज्जन्मानौ SKN.

१४. इह चेह च सर्वत्र माता ययोस्तादृशौ स्थः। अदितिर्ह्यनयोर्माता। सेव विस्तीर्णा भूमिरितीहेह मातराविति श्रूयते Sy. इह च पृथिवीलोक इह चान्तरिक्षलोकेऽवस्थितौ Dur. इहेह, इति च वीप्सा सन्निहिताशेषजगत्प्रवेशप्रतिनिर्देशार्था SKN.

१५. सर्वस्य लोकस्य निर्मातारौ। एवमिह मन्त्रे पितृत्वेन सूर्यो व्यपदिष्टः Dur. इह प्रदेशे मातरौ ययोस्ताविहेहमातराविति।....सर्वजगत्प्रदेशमातरावित्यर्थः। माता चेन्द्राग्न्योर्धाना सर्वजगत्प्रकृतित्वात्। अदितिर्वा देवमातृत्वात् SKN. N. 10. 21., SKN. IV. 24.

१६. The reading is doubtful. अग्नेरपि द्यौर्माता is suggested for अग्नेपरिद्यार्माता।

१७. VM. ignores आ॥
आकारः पूरकः समुच्चये वा–'देवेभ्यश्च पितृभ्य आ' (RV. X. 6. ११.) इतिवत्। महिमापेक्षया समुच्चयः SKN.

ओकिवांसा सुते सचाँ अश्वा सप्तीइवादने ।
इन्द्रा न्वग्नी अवसेह वज्रिणा वयं देवा हवामहे ॥ ३ ॥

ओकिवांसा । सङ्गतौ । सुते सोमे । सह । अश्वाविव । सरणशीलौ । घासेऽदनीये । इन्द्राग्नी । क्षिप्रम् । रक्षणार्थम् । इह । आयुधवन्तौ । वयम् । देवौ । हवामहे ।

य इन्द्राग्नी सुतेषु वां स्तवत्तेष्वृतावृधा ।
जोषवाकं वदतः पज्रहोषिणा न देवा भसथश्चन ॥ ४ ॥

य इन्द्राग्नी । यौ । इन्द्राग्नी । सुतेषु सोमेषु । वाम् । स्तौति । तेषु सोमेषु । ऋतस्य यज्ञस्य वर्धयितारौ । तस्य सोममश्नीथ इति वाक्यशेषः । अथ योऽयं जोषवाकं वदति जोषवाकमित्यविज्ञातनामधेयं जोषयितव्यं भवतीति जोषवाकं वदत, समीचीनं वक्तुमशक्तस्य । ऋ 'प्राजितहोषिणौ' इति यास्कः । न । देवौ । तस्य सोममश्नीथ ।

---

१. ओकिवांसौ समवेतौ सङ्गतौ भवतम् । 'उच समवाये' इत्यस्यैतद्रूपम् Sy.
२. अभिषुते Sy.
३. तत्र दृष्टान्तः—अश्वाविव Sy.
४. सर्पणशीलौ Sy.
५. घासदनीये D. भक्षणीये घासे Sy.
६. The passage beginning with ओकिवांसा and ending with इन्द्राग्नी is omitted by P. तादृशाविन्द्राग्नी । इतरेतरयोगादिन्द्रशब्देऽग्निशब्दे च द्विवचनम् Sy. ७. अद्य Sy.
८. रक्षणेन हेतुना Sy.
९. अस्मिन् यज्ञे Sy.
१०. वज्रिणावायुधोपेतौ Sy.
११. दानादिगुणयुक्तौ Sy.
१२. आह्वयामहे Sy.
१३. य इन्द्राग्नी omitted by P.
१४. स्तोता Sy.
१५. अभिषुतेषु Sy.
१६. युवाम् Sy.
१७. कुत्सितं स्तूयात् Sy.
१८. तेषु सोमेषु मध्ये Sy.
१९. हे ऋतस्य सत्यस्य यज्ञस्य वा वर्धयितारौ Sy.
२०. सोमश्रीथ P. न भक्षयथः Sy.
२१. जोवाक P जोषं जोषयितव्यं प्रीतिहेतुत्वेन कर्तव्य स्वयमप्रीतिकरं तादृशं वाकं वाक्यं वदतस्तस्य Sy.
२२. प्राजिहोविणौ P. प्राञ्जिहोवीणौ D.N.5.22. पज्रः प्राजितः प्रसिद्धो होषो घोषः स्तोत्रं ययोस्तादृशौ Sy.
२३. भक्षयथः Sy.
२४. 'जोषवाकमित्यविज्ञातनामधेयम् । जोषयितव्यं भवति । . य इन्द्राग्नी सुतेषु वां सोमेषु स्तौति तस्याश्नीथः । अथ योऽयं जोषवाकं वदति विजञ्जपः प्राजितहोषिणौ न देवौ तस्याश्नीथः । N. 5.22.

इन्द्राग्नी[1] को अस्य वां देवौ मर्तश्चिकेतति[2] ।
विषूचो अश्वान्युयुजान ईयत[3] एकः समान आ रथे ॥ ५ ॥

इन्द्राग्नी[4] । इन्द्राग्नी ! कः[5] । युवयोः[6] । एतत् कर्म[7] । जानाति[8] । हे देवौ[9] ! मनुष्यः[10] । किं तत् कर्मेत्याह— विषूचः[11] । अश्वान्[12] । समाने[13] । रथे[14] । युयुजानः[15] । कको इन्द्रः[16] । गच्छति मानेन यो रथस्तस्य चर्तून्श्वानाह तेषां च विश्वक्त्व केचिद् गच्छन्ति केचिदागच्छन्तीति[17] ।

इन्द्राग्नी अपादियं पूर्वागात्पद्वतीभ्यः[18] ।
हित्वी शिरो जिह्वया[19] वावदुच्चरत्त्रिशत्पदा[20] न्यक्रमीत्[21] ॥ ६ ॥

इन्द्राग्नी[22] । पादवर्जिता[23] । इयम्[24] । वद्वतीभ्यः[25] । पूर्वा[26] । आगच्छति[27] । शीघ्रमुषाः[28] । त्यक्त्वा[29] । शिरः शिरोरहितापीत्यर्थः[30] । मनुष्याणां वयसा च जिह्वया[31] । अत्यन्तं शब्दं कुर्वाणा[32] । चरन्ती[33] । त्रिंशत्[34] ।

---

१. Omitted by P.
२. इदम् Sy.
३. जानीयात् । न कोऽपीत्यर्थः Sy.
४. हे देवौ ! द्योतमानौ ! Sy.
५. नानाञ्चतो गच्छतः Sy.
६. उभयार्थे एकस्मिन् Sy.
७. तादृशानश्वान् योजयन् Sy.
८. एक is suggested for ककौ ॥ सूर्यात्मना वर्तमानः Sy.
९. सर्वं जगदभिगच्छति । यद्वा विषूचो नानारूपानश्वान् व्यापकान् समान एकरूपे रथे संवत्सरात्मके युयुजानो योजयन् युवयोरेकः सूर्यात्मेन्द्र एयते । आगच्छति । एतद्युवयोः कर्म को यथावज्जानीयादित्यर्थः Sy.
१०. VM. ignores आ ।
११. मानुषी वागनयोच्यते । उक्तञ्च 'अथ यन्मानुष्या वाचाह इतीदं कुरुतेतीदं कुरुतेति तदुह तया चीयते' इति U.
१२. वाद० D. पादरहिता Sy. हे इन्द्राग्नी . . . स्वयं° पादरहितापि Mah. पादरहिता गद्या U.
१३. इय P. उषाः Sy. इयमुषाः Mah. इयं वाक् U.
१४. पद्व० is suggested for वद्व० ॥ पादयुक्ताभ्यः सुप्ताभ्यः प्रजाभ्यः Sy. Mah. पादवतीभ्यः सकाशात् U.
१५. प्रथमभाविनी सती Sy., Mah.
१६. आगता U.
१७. प्रेरयित्री Sy. सा च तासां प्रजानां शिरो हित्वी निद्रात्याजनेन प्रेरयित्री । यद्वा शिरो हित्वी हित्वा त्यक्त्वा Mah. हित्वा परित्यज्य शिरः प्रथमं पदमन्यत्करोति । नहि लौकिक्या वाचः कश्चित्पदनियमोऽस्ति U.
१८. प्राणिनां शिरः । यद्वा स्वयमशिरस्का सती Sy. स्वयमशिरस्का सती Mah.
१९. ०तावित्यर्थः P.
२०. प्राणिनाम् Sy.
२१. प्राणिस्थया तदीयेन वागिन्द्रियेण Sy. प्राणिनां वागिन्द्रियेण Mah. जिह्वया विवुषः U.
२२. कुवाणा D. भृशं शब्दं कुर्वती Sy. यङ्लुगन्तम् । भृशं शब्दं कुर्वती सती Mah. वदन्ती U.
२३. चरति प्रसरति । अडभावः । एवं चरन्त्युषा Mah. चरति U.
२४. ०तं D. त्रिंशत्सङ्ख्यानि Mah. कियन्ति तत्र पदानि त्रिंशत्पदानि त्रिंशत्सङ्ख्याकानि U.

मुहूर्तान्[1] । एकेनाह्ना[2] । अतिक्रामति[3] ।

इन्द्राग्नी आ हि तंन्वते नरो धन्वानि बाह्वोः[4] ।
मा नो अस्मिन्महाधने परा वर्क्तं[5] गविष्टिषु ॥ ७ ॥

इन्द्राग्नी । इह, इन्द्राग्नी[6] ! बाह्वोः[7] स्थितानि । धनूषि । योद्धारो मनुष्या । आततज्यानि कुर्वन्ति[8] प्रभायाम् मा । अस्मान् । अस्मिन्[9] । सङ्ग्रामे[10] । परित्यजतम्[11] । गवामन्वेषणेषु शत्रुभ्य आजिहीर्षितासु गोष्विति[12] त्यर्थः ।

इन्द्राग्नी तपंन्ति मा[13] धा अर्यो अरातयः । अप द्वेषांस्या कृंतं[14] युयुतं[15] सूर्यादधि ॥ ८ ॥

इन्द्राग्नी । इन्द्राग्नी[16] ! तवन्ति[17] । मा[18] । हन्तार[19] । अभिगन्तार[20] । शत्रव[21] । तत्र युवामपाकृतम्[22] ।

---

१. अवयवभूतान् त्रिंशत् मुहूर्तान् Sy. पदा पदानि गमनसाधनभूतान् मुहूर्तान् Mah.

२. दिवसेन Sy.
एकदिनेन Mah.

३. एतच्च युवयोः कर्म । तत्को जानीयादिति पूर्वत्रान्वयः Sy. नितरां क्रमते । अहोरात्रेण त्रिंशन्मुहूर्तान्क्रमतीत्यर्थः Mah. अतिक्रामति । नहि परतस्त्राणविषयः U.

४. VM. ignores इन्द्राग्नी ।
यद्वा वाक्यपक्षेऽर्थः । इन्द्रः प्राणोऽग्निः पुरुषः । हे इन्द्राग्नी ! युवयोरेवैतत्कर्म यद् अपात् पादरहिता गद्यात्मिका त्रयीलक्षणेयं वाक् पूर्वा प्रथमभाविनी सती, आ आगात् । पद्वतीभ्यः पादयुक्ताभ्यो रामायणभारताविश्लोकात्मकवाल्मीकिव्यासादिवाणीभ्यः सकाशाद् वेदवाचः प्राथम्यं श्रुत्योक्तम्, ततो ब्रह्मैव प्रथममसृज्यतेति एवं प्रथमजाया वचसोऽविकृतत्वं निर्णीय मानुष्या वाचो विकृतत्वमाह हित्वी शिर इति । शिर इति प्राधान्यादाख्यातपदमुच्यते । अभ्याज गां दण्डेन शुक्लां गां दण्डेनाभ्याजेत्येवं लौकिक्या वाचः पदप्रयोगनियमाभावाच् शिरः शिरःस्थानीयमाख्यातपदं हित्वा त्यक्त्वा जिह्वया विदुषो वागिन्द्रियेण वावदद् अतिवदन्ती सती चरति प्रकाशीभवति । एवं चरन्ती सा त्रिंशत्पदानि न्यक्रमीत् क्रमति । अत्र पदशब्दोऽङ्गुलवचनः । मूलाधारादारभ्य मुखपर्यन्तं त्रिंशदङ्गुलानि क्रामति । एवं वाग्विषयोऽर्थः Mah.
This stanza=YV. 33. 93.

५. इन्द्रा P. हे इन्द्राग्नी ! Sy.

६. बह्वोः P. हस्तयोः Sy.

७. कुर्वते Sy.

८. ०या P. The reading is doubtful.

९. त्वयाऽस्मिन् दीयमान इत्थं कर्तव्यम् BB.

१०. जेतव्येन महाधनेनोपेते सङ्ग्रामे Sy. उत्तमं महत्तमं धनं देहीति तत्र महाधने BB.

११. मा परावर्क् मा परानैषीः । यथा महान्तं भारं वोढुं समर्थो भारं नेति न किञ्चित्परावर्जयति, महान्तमपि भारमानयति । एवं त्वयाऽपि कर्तव्यम् BB.

१२. VM. ignores हि ।
This stanza=TS. 2. 6. 11. 3.

१३. हे इन्द्राग्नी ! Sy.

१४. तपन्ति is suggested for तवन्ति ॥ बाधन्ते Sy.

१५. म P. माम् Sy.

१६. आहन्त्र्यः Sy.

१७. अभिगन्त्र्यः Sy.

१८. शत्रुसेनाः Sy.

१९. अपाकृतम् Sy.

रक्षांसि[1]। पृथक्कुरुतं[2] च तानि। सूर्यात्[3] अस्मान्[4], मारयतमित्यर्थः[5]।

इन्द्राग्नी युवोरपि[6] वसु[7] दिव्यानि[8] पार्थिवा[9]।
आ नं इह प्र यंच्छतं[10] रयिं[11] विश्वायुंपोषसम्[12] ॥ ९ ॥

इन्द्राग्नी[13]। इन्द्राग्नी[14] ! युवयोः। अपि। दिव्यानि[15]। वसूनि[16]। पार्थिवानि[17] च सन्ति। प्रयच्छतम्। अस्मभ्यम्। इह[18]। धनम्। सर्वेषां मनुष्याणां[19] पोषकम्[20]।

इन्द्राग्नी उक्थवाहसा[14] स्तोमेभिर्हवनश्रुता[15]।
विश्वाभिर्गीर्भिरा[16] गंतमस्य[17] सोमंस्य[18] पीतयें[19] ॥ १० ॥

इन्द्राग्नी। हे इन्द्राग्नी[20] ! स्तोत्रवनौ[21]। स्तोमैः[22] सह। मनुष्याह्वानस्य[23] श्रोतारौ। सर्वाभिः। स्तुतिभिः[24] शुश्रूषिताभिः। आगच्छतम्। अमुम्[25]। सोमम्[26]। पातुम्[27]।

VI.60.

श्नथद्वृत्रमुत सनोति[1] वाजमिन्द्रा यो अग्नी सहुरी[2] सपर्यात्।
हरज्यन्ता[3] वसव्यस्य[4] भूरेः सहस्तमा सहसा वाजयन्ता[5] ॥ १ ॥

श्नथत्[21]। हन्ति[22]। उपद्रम्[23]। अपि च। लभते। अन्नम्[24]। यः[25]।

---

१. द्वेष्टॄन् शत्रून् Sy. २. ०ता P.
३. सूर्यदर्शनात्। यथा ते सूर्यं न पश्यन्ति तथा कुरुतम्, मारयतमित्यर्थः Sy.
४. ०दस्मारयतमि० P.
५. VM. ignores अधि ॥ अधिः पञ्चम्यर्थानुवादकः Sy. ६. Omitted by P.
७. हे इन्द्राग्नी ! Sy. ८. दिवि भवानि Sy.
९. D. adds वा after वसूनि ॥ वसूनि हितानि युवयोरेव वर्तन्ते Sy.
१०. पृथिव्यां भवानि लोकद्वयसम्बन्धीनि Sy.
११. अतः कारणात् इह अस्मिन् यज्ञे Sy.
१२. सर्वेषां मनुष्याणां पोषणाय पर्याप्तम्। यद्वा सर्वस्यायुषः पोषणे शक्तम्। छान्दसो वर्णलोपः Sy. आयव इति मनुष्यनाम Ngh.2.3.
१३. VM. ignores आ ॥ अभि Sy.
१४. स्तोत्रवनेन P. स्तोत्रवहनौ is suggested for स्तोत्रवनौ ॥ हे उक्थैः स्तुतिभिर्वहनीयौ ! Sy. १५. स्तोत्रैः Sy.
१६. हवनस्याह्वानस्य श्रोतारौ ! एवम्भूतौ ! Sy.
१७. शस्त्ररूपाभिर्वाग्भिश्च हेतुभूताभिः Sy.
१८. अस्मदीयस्य Sy. १९. सोमस्य Sy. २०. पानार्थम् Sy.
२१. 'श्नथद्वृत्रम्' इति पञ्चदशर्चमेकादशं सूक्तं भरद्वाजस्यैन्द्राग्नम्। आद्यौ तिस्रस्त्रिष्टुभश्चतुर्थ्याद्या नव गायत्र्यस्त्रयोदशी त्रिष्टुप् चतुर्दशी बृहती पञ्चदश्यनुष्टुप्। तथा चानुक्रान्तम्—'श्नथत्पञ्चोना गायत्रं तु त्रिष्टुबादित्रिष्टुब् बृहत्यनुष्टुबन्तम्' (KSA. 32.60. P. 23.) इति। गतः सूक्तविनियोगः। वरुणप्रघासेष्वैन्द्राग्नस्य हविषः 'श्नथत्' इत्येषा याज्या। सूत्रितञ्च—'इन्द्राग्नी अवसा गतं श्नथद्वृत्रमुत सनोति वाजम्' (ĀŚS. 2. 17.) इति Sy.
२२. स पुरुषः हिनस्ति Sy.
२३. उपद्रवम् is suggested for उपद्रम् ॥ आवरकं शत्रुम् Sy.
२४. अन्नं बलं वा Sy. २५. पुरुषः Sy.

इन्द्राग्नी[1]। परिचरति[2]। समानाह्वानौ। ईश्वरौ[3] भवन्तौ। बहोः[4]। वसुसमूहस्य[5]। अतिशयेन बलिनौ[6]। बलेन। युद्धं कुर्वाणौ[7]।

ता योधिष्टमभि गा इन्द्र नूनमपः स्वरुषसो अग्न ऊळ्हाः।
दिशः स्वरुषस इन्द्र चित्रा अपो गा अग्ने युवसे नियुत्वान् ॥ २ ॥

ता[8] योधिष्टम्[9]। तौ युवाम्। इन्द्र! सम्प्रति[10]। गाः। भियोधिष्टम्[11]। हे अग्ने! त्वम्, अव[12]। स्वः[13] उदकानि रक्षसि। उषसश्च[14]। त्वयोढा[15] भवन्ति। हे इन्द्र! त्व च। दिशः[16]। आदित्यम्[17]। उषसः[18]। चित्रवर्णाः[19]। प्रथरोषत्[20] गमयसि। उदकानि[21]। अग्ने! गन्तृणि। त्व च युवसे[22]। नियुत्वानिति[23]।

आ वृत्रहणा वृत्रहभिः शुष्मैरिन्द्रं यातं नमोभिरग्ने अर्वाक्।
युवं राधोभिरकवेभिरिन्द्राग्ने अस्मे भवतमुत्तमेभिः ॥ ३ ॥

आ[24] वृत्रहणा। आयातम्[25]। हे शत्रूणां हन्तारौ! शत्रूणां[26] हन्तृभिः[27]। बलैश्च प्रदित्सितैः। इतेमुखम्[28]

---

१. इन्द्राग्नी इतरेतरयोगादुभयत्र पूर्ववद्द्विवचनम् Sy.
२. परिचरेत् Sy.
३. शत्रूणामभिभवितारौ Sy.
४. ईशानौ स्वामिनौ। इरज्यतिरैश्वर्यकर्मा Sy.
५. प्रभूतस्य Sy.
६. वसव्यस्य वसुसमूहस्य यद्वा स्वार्थिको यत्। धनस्य Sy.
७. अतिशयेनाभिभवितारौ शत्रूणाम् Sy.
८. ०णोहम् P. वाजं हविर्लक्षणमन्नमात्मन इच्छन्तौ। यद्वा वाजं स्तोतृभ्यो दातव्यमन्नं कामयमानौ Sy.
९. त D.
१०. नूनमिति पादपूरणार्थः Sy.
११. P. adds तौ युवामिन्द्र सम्प्रति गा अभियोधिष्टं after अभियोधिष्टम्॥ अभि० is suggested for भि०॥ एतान् गवादीनभिलक्ष्य तैरसुरैर्युद्धं कृतवन्तौ Sy.
१२. अपः is suggested for अव॥ उदकानि Sy.
१३. सूर्यम् Sy.
१४. उषःकालान् Sy.
१५. ऊळ्हाः पणिभिरपहृताः Sy.
१६. प्राच्याद्याः Sy.
१७. अभित्यम् D. सूर्यम् Sy.
१८. चायनीयाः Sy.
१९. पृथ P.
२०. गमयनि P. प्रथरोषत् गमयसि seems to be redundant.
२१. गाश्च पणिभिरपहृतानेतान् Sy.
२२. अनेन लोकेनायोजयः। यद्वा असुरैरावृतान् दिगादीनसुरवधेनावरणमपनीय पृथक् कृतवानसीत्यर्थः Sy.
२३. नियुद्भिरश्वैर्युक्तः सन् त्वमप्येवमकार्षीरित्यर्थः Sy.
२४. ऐन्द्राग्नस्य पशोर्वपायाः 'आ वृत्रहणा' इत्यनुवाक्या। सूत्रितञ्च—'आ वृत्रहणा वृत्रहभिः शुष्मैरा भरतं शिक्षतं वज्रबाहू' (ĀSS.3.7.) इति Sy.
२५. आगच्छतम् Sy.
२६. हे वृत्रस्यासुरस्य हन्तारौ! Sy.
२७. वृत्रस्य हन्तृभिर्वृत्रहननिमित्तैः Sy.
२८. इतोमु० is suggested for इतेमु०॥ अस्मदभिमुखम् Sy.

इन्द्राग्नी[1] ! युवाम्[2] । धनैः[3] । अकुत्सितैः[4] सह । अस्मासु । भवतम्[5] । उत्तमैः[6] ।

ता हुवे ययोरिदं पप्रे विश्वं पुरा कृतम् । इन्द्राग्नी न मर्धतः ॥ ४ ॥

ता[7] हुवे[8] । तौ । ह्वयामि । तयोः । इदम्[9] । स्तूयते[10] । विश्वम्[11] । पुरा[12] । कृतं[13] कर्म । तावित्यौ[14] । न । कञ्चन हिंस्तः[15] ।

उग्रा विघनिना मृधं इन्द्राग्नी हवामहे । ता नो मृळात ईदृशे ॥ ५ ॥

उग्रा[16] । उग्रौ[17] । विशेषेण[18], शत्रून्, हन्तारौ[19] । इन्द्राग्नी । हवामहे[20][21] । तौ[22] । अस्मा[23] । सुखेयेताम्[24] । ईदृशे संग्रामे[25] ।

---

१. हे इन्द्र ! हे अग्ने ! Sy.
२. महद्भिः Sy.
३. आविर्भवतम् Sy.
४. उत्कृष्टतमैः Sy.
५. VM. ignores नमोभिः and explains इन्द्र and अग्ने once only. अस्मभ्यं दातव्यैश्चान्नैश्च सार्धम् Sy.
६. चातुर्विंशिकेऽहनि प्रातःसवनेऽच्छावाकशस्त्रे 'ता हुवे' इति षडहस्तोत्रियस्तृचः । सूत्रितञ्च 'ता हुवे ययोरिदमियं वामस्य मन्मनः' (ĀŚS 7.2.) इति । पृष्ठ्याभिप्लवषडहयोः स्तोमवृद्धौ 'ता हुवे' इत्याद्या नवर्चं आवापार्थाः । सूत्रितञ्च— 'ता हुवे ययोरिदमिति नवेयं वामस्य मन्मन इत्येकादश' (ĀŚS. 7.4.) इति Sy.
७. तावृशाविन्द्राग्नी Sy.
८. आह्वये Sy.
९. ययोरिन्द्राग्न्योः Sy.
१०. पूर्वास्वृक्षु कीर्तितं वीर्यम् Sy.
११. पन्यते ऋषिभिः स्तूयते । तौ इन्द्राग्नी हुव इत्यन्वयः Sy.
१२. सर्वम् Sy.
१३. पूर्वस्मिन् काले Sy.
१४. It refers to. इन्द्राग्नी ।
१५. स्तोतॄन् हिंस्तः । अतोऽस्मानप्याहूतौ रक्षतामिति भावः । मर्धतिर्हिंसाकर्मा Sy.
१६. Omitted by P.
१७. उद्गूर्णबलौ Sy. Mah. उग्रौ, उद्गूर्णौ U.
१८. विषेण D.
१९. P. and D. add हन्ता before शत्रून् ॥ मृधो हिंसकान् Mah. सङ्ग्रामस्य सङ्ग्रामकारिणां वा U.
२०. VM. seems to explain विघनिनौ and मृधः together as विशेषेण शत्रून् हन्तारौ ॥ विशेषेण हतवन्तौ Sy. विशेषेण हतो नाशयतस्तौ विघनिनौ । हन्तेर्घः Mah. विहन्तारौ U.
२१. आह्वयामहे Sy. आह्वयामः Mah. U.
२२. इन्द्राग्नी Sy. तावाहूताविन्द्राग्नी Mah. तौ चाहूतौ U.
२३. अस्मान् is suggested for अस्मा ।
२४. सुखेयताम् P. सुखयेताम् is suggested for सुखेयेताम् ॥ सुखयताम् । यद्वा मूळतिरुपदयाकर्मा । नोऽस्माकं मूळतः उपदयां कुरुताम् Sy. मृडयतः सुखयतः Mah.
२५. ईदृशेऽस्मिन् सङ्ग्रामे Sy. ईदृशे भयानके सङ्ग्रामे कर्मणि वा Mah. ईदृशे कर्मणि U.

This stanza=YV. 33. 61.

हतो वृत्राण्यार्या हतो दासानि सत्पती । हतो विश्वा अप द्विषः ॥ ६ ॥

[हतः १] आर्यकृतानि । उपद्रवाणि । नाशयत । दासकृतानि च । सतामीश्वरौ । तथा विश्वानेव । शत्रून् । अपहतम् ।

इन्द्राग्नी युवामिमे भि स्तोमा अनूषत । पिबतं शंभुवा सुतम् ॥ ७ ॥

इन्द्राग्नी । इन्द्राग्नी ! युवाम् । इम । स्तोमा । अभिष्टुतवन्त । पिबतम् । सुखस्य भावयितारौ । सोमम् ।

या वां सन्ति पुरुस्पृहो नियुतो दाशुषे नरा । इन्द्राग्नी ताभिरा गतम् ॥ ८ ॥

या वाम् । या । वाम् । विद्यन्ते । बहुभि स्पृहणीया । अश्वा । यजमानानुग्रहार्थम् । नेतारौ ! इन्द्राग्नी ! ताभिः । आगच्छतम् ।

उत्तरा निगदसिद्धा ।

ताभिरा गच्छतं नरोपेदं सवनं सुतम् । इन्द्राग्नी सोमपीतये ॥ ९ ॥

[ताभिरागच्छतम् ।]

---

१. The *pratīka* is supplied by the Editor.

२. आर्यैः कर्मानुष्ठातृभिः कृतानि Sy.

३. उपद्रवान् is suggested for उपद्रवाणि ॥ उपद्रवजातानि Sy.

४. ताविन्द्राग्नी हिंस्तः Sy.

५. दस० P. दासाः कर्महीनाः शत्रवः । तैः कृतानि चोपद्रवजातानि हतः Sy.

६. सतां पालयितारावित्रिन्द्राग्नी Sy.

७. सर्वाः Sy.

८. द्वेष्ट्रीः शत्रुभूताः प्रजाः Sy.

९. विनाशयतः । अतोऽस्माकमप्येवमेव कुरुतामिति भावः Sy.

१०. चातुर्विंशिकेऽहनि प्रातःसवनेऽच्छावाकशस्त्रे 'इन्द्राग्नी युवाम्' इति षडृहस्तोत्रियस्तृचः । सूत्रितञ्च 'इन्द्राग्नी युवामिमे यज्ञस्य हि स्थ ऋत्विजेत्यच्छावाकस्य' (ĀŚS.7.2.) इतिSy.

११. सोमाः D. स्तोतारः Sy.

१२. ष्टुव० P. अभिष्टुवन्ति Sy.

१३. हे शम्भुवा सुखस्य भावयितारावित्रिन्द्राग्नी ! Sy.

१४. अभिषुतमस्मदीयं सोमम् Sy.

१५. य D.

१६. युवयोः स्वभूताः Sy.

१७. सन्ति Sy.

१८. पुरुभिर्बहुभिः स्पृहणीयाः Sy.

१९. हवीषि दत्तवते यजमानाय तदर्थमुत्पन्नाः Sy.

२०. नियुद्भिः Sy.

२१. The *pratīka* is supplied by the Editor.
हे नरा ! नेतारावित्रिन्द्राग्नी ! सूयतेऽभिषूयत इति सवनः सोमः । इदं सवनमिमं सोमं सुतमभिषुतमुप प्रति । यद्वा इदं प्रातःसवनमुपास्मिन् सवने सुतमभिषुतं सोमं प्रति ताभिर्नियुद्भिरागच्छतम् । किमर्थम् ? सोमपीतये तस्य सोमस्य पानार्थम् Sy.

तमीळिष्व॒ यो अ॒र्चिषा॒ वना॒ विश्वा॑ परि॒ष्वज॑त्। कृ॒ष्णा कृ॒णोति॑ जि॒ह्वया॑ ॥ १० ॥

तमीळिष्व[1]। तम्[2]। स्तुहि। यः[3]। तेजसा[4]। सर्वाणि। अरण्यानि दावभूत.। व्यानोति[5]। कृष्णानि[6] च। णोति[7]। ज्वालया[8]।

य इद्ध आ॒विवा॑सति सु॒म्नमिन्द्र॑स्य॒ मर्त्यः॑। द्यु॒म्नाय॑ सतरा॒ अपः॑ ॥ ११ ॥

यः[9]। य.। प्रज्वलितेऽग्नौ[10]। सुखम्[11]। इन्द्रस्य। परिचरण करोति[12]। मर्त्य[13]। तस्येन्द्रोऽन्नार्थम्[14]। सुतरणानि[15]। उदकानि[16] प्रयच्छति[17]।

ता नो॒ वाज॑वतीरिषं आ॒शून्पि॑पृ॒तमर्व॑तः। इन्द्र॑मग्निं च॒ वो॑ऽहवे ॥ १२ ॥

ता नः[18]। तौ[19]। नः[20]। बलवन्ति[21]। उदकानि[22]। शीघ्रगामिनश्च[23]। अश्वान्। पूरयतम्[24]। परोक्ष उत्तरोऽर्ध.—इन्द्राग्नी[25]। हविर्भिर्वोढुम्[26][27]।

---

१. Both the Mss. P. and D. repeat the *pratīka*.

२. हे स्तोतः ! तमग्निम् Sy.

३. अग्निः Sy.

४. ज्वालारूपेण तेजसा Sy.

५. व्याप्नोति is suggested for व्यानोति ॥ परिष्वजति। परितो वेष्टयति Sy.

६. यश्च तानि वनानि कृष्णा कृष्णवर्णानि Sy.

७. कृणोति is suggested for णोति ॥ करोति Sy.

८. ज्वालया दग्ध्वा Sy.

९. दीप्ते Sy.

१०. सुखकरं हविः Sy.

११. इन्द्राय। चतुर्थ्यर्थे षष्ठी Sy.

१२. परिचरति प्रयच्छति Sy.

१३. मनुष्यः Sy.

१४. मर्त्यस्य Sy.

१५. द्योतमानायान्नाय तदर्थम् Sy.

१६. सुखेन तरणीयाः Sy.

१७. वृष्ट्यात्मकानि Sy.

१८. करोतीति शेषः Sy.

१९. हे इन्द्राग्नी ! युवाम् Sy.

२०. अस्मभ्यम् Sy.

२१. अन्नवतीः Sy.

२२. इष्यमाणा वृष्टीः। यद्वा वाजो बलम्। तद्वतीरिषोऽन्नानि Sy.

२३. शीघ्रगान् Sy.

२४. अस्मभ्यं प्रयच्छतम् Sy.

२५. इन्द्रमग्निं च युवाम् Sy.

२६. वोढुं हविर्भिः प्रापयितुम् Sy.

२७. VM. ignores च।

उभा वामिन्द्राग्नी आहुवध्या उभा राधसः सह मादयध्यै ।
उभा दातारावि॒षां र॑यी॒णामु॒भा वाज॑स्य सा॒तये॑ हुवे वाम् ॥ १३ ॥

उभा वाम् । उभौ । वाम् । इन्द्राग्नी । घृतेन । आहोतु ह्वयामि । सोमेन । सह । मादयितुम् । उभौ हि युवाम् । दातारौ । अन्नानाम् । धनाना च तथा मति । उभौ । वाम् । अन्नस्य । लाभाय । ह्वयामि ।

---

१. ऐन्द्राग्नस्य पशोर्हविषोऽनुवाक्या 'उभा वाम्' इत्येषा। सूत्रितञ्च—'उभा वामिन्द्राग्नी आहुवध्यै शुचिं नु स्तोमं नवजातमद्य' (ŚŚS 3.7) इति Sy.

२. वा D.

३. संहत्य वर्तमानौ Sy.

४. युवाम Sy., Mah , U., BB

५. हे इन्द्राग्नी ! Sy. इन्द्रशब्देनात्राहवनीयः। तस्य यज्ञसाधकत्वरूपैश्वर्ययुक्तत्वात् । अग्निशब्देन गार्हपत्यः। 'अग्रे नीयते' इत्यग्निरिति यास्कव्युत्पत्तेः (cf.N.7.14. अग्रं यज्ञेषु प्रणीयते) । स हि प्रथममाधीयते। हे इन्द्राग्नी ! Mah.

६. हो० P. आभिमुख्येन होतुम् Sy. आभिमुख्येन होतुम्, आहुतिप्रदानेनाराधयितुम् BB

७. आह्वयामि Sy. आह्वातुमिच्छामीति शेषः । ह्वयतेस्तुमर्थे कध्यैप्रत्ययः Mah. आख्यातोत्तमपुरुषैकवचनस्थान आह्वयामि U. हुव इति वक्ष्यमाणेन सम्बन्धः, युवामाह्वयामि BB.

८. राधकेन हविषा Sy. राधसो धनाद्धविर्लक्षणात् Mah. राधसो धनस्य हविर्लक्षणस्य U. राध ओदनं हविर्लक्षणम् । 'सुपां सुपो भवन्ति' इति तृतीयार्थे षष्ठी। हेतौ वा पञ्चमी BB.

९. युगपदेव Sy. युगपदेककर्मणि Mah. एकस्मिन्नेव प्रदाने U. सहैव यौगपद्येनैव नैकैकश्येन BB.

१०. तर्पयितुम् Sy. युवां मादयितुं हर्षयितुं वेच्छामीति शेषः । 'मदी हर्षे' इति 'मद तृप्तौ' इति धातोर्वा णिजन्तात्तुमर्थे शध्यैप्रत्ययः । गुणः Mah. माद्यतिर्भोजनार्थः । सह भोजनाय U. मादयितुं सहैव तर्पयितुं वाऽऽह्वयामि। मदेर्ण्यन्तात् शध्यैप्रत्ययः BB.

११. पि P. यत उभौ युवाम् Mah. किमर्थं पुनरुभावाह्वयामि सह भोजनायेत्यत आह.... U. अनयोरेवाह्वाने कारणमाह—युवामेव ह्यभौ BB.

१२. दातारौ स्थः Sy. उभावाहुतभुक्तौ सन्तौ दातारौ दानशीलौ U.

१३. धनानां च भवथो युवाम् U. धनाना क्षेत्रपुत्रपश्वादीनाम् BB.

१४. Omitted by D. अतः Mah. यतश्चैवं युवां विशिष्टान्नधनदातारौ, अतः U. तस्माद् BB.

१५. सर्वेषु देवेषु सत्स्वावयोराह्वाने किं कारणमिति चेदुच्यते—उभा उभौ Sy. उभशब्दस्य विभक्तेराकारः Mah. भूयो भूय उभावपि U. तौ तादृशावुभौ युवाम् BB.

१६. सम्भजनाय Sy. सातये दानाय । 'षणु दाने' क्तिन्नन्तो निपातः Mah. लब्धये U.

१७. आह्व० P. आह्वये Sy. आह्वयामि Mah., U., BB.

अथैन्द्राग्नी । उभा वामिन्द्राग्नीऽआहुवध्याऽउभा राधसः सह मादयध्यै । उभा दातारा विषाꣳ रयीणामुभा वाजस्य सातये हुवे वामित्येष वाऽइन्द्रो यꣳ एष तपति स यदस्तमेति तदाहवनीयं प्रविशति तदुभावेवैतत्सह सन्ताऽउपतिष्ठतऽउभौ मे सह सन्तौ धत्तामिति तस्मादैन्द्राग्नी । ŚB.2.3.4.12.p.163.

This stanza=YV. 3. 13.=TS. 1. 1. 14. 1.

आ नो॑ गव्येभिरश्व्यैर्वसव्यै॑रुपं गच्छतम् ।
सखायौ देवौ सख्यायं शंभुवेन्द्राग्नी ता हवामहे ॥ १४ ॥

आ नः[1] । उपागच्छतम् । अस्मान् । गवादिसमूहै[2]. । समानख्यानौ[3] । देवौ[4] । सख्यसिद्ध्यर्थम्[5] ।
सुखस्य भावयितारौ[6] । तम्[7] । इन्द्राग्नी । हवामहे[8] ।

उत्तरा निगदसिद्धेति ।

इन्द्राग्नी शृणुतं हवं यजमानस्य सुन्वतः ।
वीतं हव्यान्या गंतं पिबतं सोम्यं मधु ॥ १५ ॥

[इन्द्राग्नी शृणुतम्[9] ।]

VI.61.

इयमंददाद्रभसमृणच्युतं दिवोदासं वध्यश्वाय दाशुषे ।
या शश्वंन्तमाचखादावसं पणिं ता तें दात्राणि तविषा सरस्वति ॥ १ ॥

इयमददात्[10] । इयम् । प्रायच्छत्[11] । वेगवन्तम्[12] । ऋणस्य[13] व्यावयितार[14] पुत्रम् । दिवोदासनाम[15] ।

---

१. हे इन्द्राग्नी ! आभिमुख्येनोपा गच्छतम् Sy.
२. आदि refers to अश्व्य and वसव्य ॥ गव्येभिः गोसमूहैरश्व्यैरश्वसमूहैर्वसव्यैर्वसुसमूहैश्च सार्धम् Sy.
३. शेषः परोक्षकृतः । सखायौ समानख्यानौ Sy.
४. दानादिगुणयुक्तौ Sy.
५. ०ख्या० P. सखित्वार्थम् Sy.
६. शम्भुवौ सुखस्य भावयितारौ Sy.
७. तौ is suggested for तम् ॥ तादृशाविन्द्राग्नी Sy. ८. वयमाह्वयामहे Sy.
९. The *pratika* is supplied by the Editor.
हे इन्द्राग्नी ! सुन्वतः सोमाभिषवं कुर्वतो यजमानस्य हवमाह्वानं स्तोत्रं शृणुतम् । श्रुत्वा च तदीयानि हव्यानि हवींषि वीतम् । कामयेथाम्[1] । कामयित्वा चागतम् । आगच्छतम् । आगत्य च सोम्यं सोमात्मकं मधु पिबतम् Sy.
१०. 'इयमददात्' इति चतुर्दशर्चं द्वादशं सूक्तं भरद्वाजस्यार्षं सरस्वतीदेवताकम् । आदितस्तिस्त्रो जगत्यस्त्रयोदश्यपि जगती चतुर्दशी त्रिष्टुप् शिष्टा गायत्र्यः । तथा चानुक्रान्तम्—'इयं षळूना सारस्वतं त्रिजगत्यादि जगतीत्रिष्टुबन्तम्' KSA. 32.61.P.23. इति । अत्र शौनकः—'इयमित्येतदाद्यं तु सूक्तं सारस्वतं जपेत् । द्विजः प्रातः शुचिर्भूत्वा वाग्मी भवति बुद्धिमान्' (Rgvidh. 2.23.) इति । पाङ्क्तिके षष्ठेऽहनि प्रउगे 'इयमददात्' इति सारस्वतस्तृचः । सूत्रितञ्च—'इयमददाद्रभसमृणच्युतमिति प्रउगम्' (ĀŚS.8.1.) इति Sy.
११. सरस्वती Sy. १२. दत्तवती Sy.
१३. वेगेतम् P. १४. ऋषणस्य P.
१५. ख्यापयि० D च्यावयि० is suggested for व्यावयि० ॥ वैदिकस्य देवर्षिपितृसम्बन्धिनो लौकिकस्य च ऋणस्य च्यावयितारम् Sy.
१६. दिवोदासनामानम् or. दिवोदासं नाम is suggested for दिवोदासनाम ॥ एतत्संज्ञं पुत्रम् Sy.

वध्रयश्वनाम्ने । यजमानाय । येयम् । बहु । खादनीयम् । असुरम् । आचखाद जघान । प्रत्यक्षस्तुरीय पाद—तादृशा महान्ति । तव । दानानि । प्रवृद्धानि । सरस्वति ।

इयं शुष्मेभिर्बिसखाइवारुजत्सानुं गिरीणां तविषेभिरूर्मिभिः ।
पारावतघ्नीमवसे सुवृक्तिभिः सरस्वतीमा विवासेम धीतिभिः ॥ २ ॥

[इयम् ।] इयम् । वलं । बिसस्य खनितेव । अरुजति । सानु । शिलोच्चयानाम् । प्रवृद्धे ।

---

१. ग्रह्याश्चना० P. एतत्संज्ञाय ऋषये Sy.

२. हवीषि दत्तवते Sy.

३. सरस्वती Sy. ४. बहुलम् Sy.

५. अवसं केवलं स्वात्मन एव तर्पकम् Sy.

६. पणनशीलं वणिजमदातृजनम् Sy.

७. आजघान सेयमददादित्यन्वयः Sy.

८. ०दब्ज० P.

९. अथ प्रत्यक्षीकृत्य स्तौति Sy.

१०. तादृशानि is suggested for तादृशा ॥ तानि पुत्रदानादीनि Sy.

११. त्वदीयानि Sy.

१२. तविषाणि महान्ति भवन्ति Sy.

१३. हे सरस्वति ! देवि ! Sy.

१४. सरस्वती देवतारूपेण नदीरूपेण च वर्तते। देवतारूपा स्तुता । अधुनानया नदीरूपां सरस्वतीं स्तौति Sy. भरद्वाजस्यार्षम् Dur. भरद्वाजस्यार्षम् । यद्यपि चेयं सारस्वतस्य पशोः षड्गृचः । 'आ नो दिवा' (RV. V. 43.11.) 'पावीरवी' (RV VI 49.7.), 'इमा जुह्वाना' (RV. VII.95 5), 'यस्ते स्तनः' (RV. I 164 49.) 'सरस्वत्यभि नो नेषि' (RV III.61 14.), 'इयं शुष्मेभिः' (RV. VI 61.2) इत्युत्तमा याज्या पठिता । तया देवता इज्यते । तथापि चोदनाप्रकरणाद् देवतात्वम् 'ऊर्मिभिः पारावतघ्नीम्' इति नदीरूपत्वलिङ्गात् । प्रकरणाच्च लिङ्गं बलवदिति भाष्यकाराभिप्रायः । अतो नदीरूपेणानेन सरस्वती स्तूयते SKN

१५. The *pratīka* is supplied by the Editor.

१६. नदीरूपा सरस्वती Sy. सरस्वती नदी Dur. सरस्वती SKN.

१७. शोषकैरात्मीयैर्बलैः Sy. बलनामैतत् । सामर्थ्याच्चान्तर्णीतमत्वर्थमूर्मिविशेषणम् । बलवद्भिः SKN.

१८. बिसं खनतीति बिसखाः । स यथा बिसार्थं पङ्कं रुजति तद्वत् Sy. किं करोति ? . यथा बिसखानको बिसमनादरेणैव मृदुत्वात्खनति, एवमियमनादरेणैव Dur. यथा बिसानां खादको मृदुत्वात् हिनस्ति, एवम् SKN.

१९. ०जत् is suggested for ०जति ॥ भनक्ति Sy. बिसखानक इवानादरेणैव रुजति भनक्तीत्यर्थः Dur. 'रुजो भङ्गे' भनक्ति SKN.

२०. सानूनि Sy. यद्यपि सानु भवति समुच्छ्रितं वज्रसङ्घातकल्पम् . शिखरम् Dur. किम् ? समुच्छ्रितं प्रदेशम् । . . शिखरमित्यर्थः SKN.

२१. पर्वतानां तीरसम्बद्धानाम् Sy. पर्वतानाम् SKN.

२२. ०द्धेः P. महद्भिः Sy., Dur., SKN.

ऊर्मिभि.[1]। पारावारघातिनी[2] पारवतघ्नीति यास्क , कूलयोरुभयोर्भङ्क्त्रीमित्यर्थं ताम्। रक्षणाय[3]। स्तुतिभिः[4]। सरस्वतीम्[5]। कर्मभिश्च[6]। परिचरेम[7][8]।

सरस्वति देवनिदो नि बर्हय प्रजां विश्वस्य बृसयस्य मायिनः।
उत क्षितिभ्योऽवनीरविन्दो विषमेभ्यो असवो वाजिनीवति ॥ ३ ॥

सरस्वति। हे सरस्वति ! देवाना निन्दितृनसुरान्[9]। निबर्हय[10]। प्रजा च[11]। व्याप्तस्य। बृसयनाम्नो[12] वृत्रपितु। मायाविन। अपि च[13]। प्रजाभ्य.[14]। क्षेत्राणि[15]। अलम्भय। उदकम्। एभ्य[16]। असवः। अन्नवति[17] !

प्र णो देवी सरस्वती वाजेभिर्वाजिनीवती। धीनामवित्र्यवतु ॥ ४ ॥

प्र णः। प्रावतु[18]। अस्मान्[19]। देवी। सरस्वती। अन्नै[21]। अन्नवती[22]। कर्मणाम्[23]।

---

१. तरङ्गैः Sy. उदकस्य चैवंरूपत्वम् SKN.

२. पारावारघ्नीति D N.2.24. reads 'पारावतघ्नीं पारावारघातिनीम्। परावति दूरदेशे विद्यमानस्यापि वृक्षादेर्हन्त्रीम्। यद्वा पारावतघ्नीं पारावारे पारावाची तीरे। तयोर्घातिनीम् Sy. येयमेवङ्गुणविशिष्टा तामेतां वयम् पारावारघातिनीं, सा हि ऊर्मिभिः परं चावरं चोभे अपि हन्ति Dur. परस्यावरस्य च कूलस्य हन्त्रीम् SKN.

३. रक्षणार्थम् Sy. अवनाय रक्षणायात्मनः Dur. उदकेन तर्पणाय पालनाय वात्मनः SKN.

४. कथं नाम रक्षेदसावस्मानित्येवमर्थं पुरस्कृत्य ....सुप्रवृत्ताभिः स्तुतिभिः स्वरसौष्ठवादियुक्ताभिः Dur. 'वृजी वर्जने' सुष्ठु वर्जिताभिर्दोषैः SKN. ५. ०ती P.

६. स्तुतिभिश्चानेकप्रकाराभिश्चेत्यर्थः। एष समस्तार्थः Dur. कर्मभिः स्तुत्याख्यैः स्तुतिभिरित्यर्थः SKN.

७. आभिमुख्येनावस्थिताः परिचरेम Dur. विवासतिः परिचर्यायाम्। परिचरेम SKN.

८. VM. ignores आ।
इयं शुष्मं॰ शोषणः। शुष्ममिति बलनाम। शोषयतीति सतः। बिसं बिस्यतेर्भेदनकर्मणः। वृद्धिकर्मणो वा। सानु समुच्छ्रितं भवति। समुस्नुस्रमिति वा। महद्भिर्ऊर्मिभिः। पारावतघ्नीं पारावारघातिनीम्। पारं परं भवति। अवारमवरम्। अवनाय सुप्रवृत्ताभिः। (शोभनाभिः) स्तुतिभिः सरस्वतीं (नदीं) कर्मभिः परिचरेम N 2.24., SKN. II. 108

९. देवाननिन्दितृनरसुरा P. देवानां निन्दकानसुरान् Sy. १०. न्यबर्हयः। अवधीः Sy.

११. पुत्रं वृत्रासुरं च न्यवधीः। त्वत्साहाय्यादेवेन्द्रो हतवानित्यर्थः Sy. १२. बृहस्य० P. बृसय इति त्वष्टुर्नामधेयम्। त्वष्टुः Sy.

१३. Omitted by P.

१४. मनुष्येभ्यः Sy.

१५. असुरैरपहृता भूमीः Sy.

१६. अक्षारयः। यद्वा क्षितयोऽसुरजनाः। तेभ्यः सकाशादवनीर्भूमीरविन्दः। लब्धवानसि। तान् हत्वैभ्यश्चासुरेभ्यो विषं मृतिहेतुभूतं गरलमस्रवः Sy.

१७. हे अन्नवति ! सरस्वति ! Sy.

१८. प्रकर्षेण तर्पयतु Sy. प्रकर्षेण रक्षत्वन्नादि दत्त्वा BB. १९. अमस्मान् P.

२०. दानादिगुणयुक्ता Sy.

२१. रसैः BB.

२२. वाजोऽन्नं यस्यां क्रियायां सा वाजिनी। तद्युक्ता Sy. सरस्वती विशेष्यते। वाजिनीवती वाजवत् क्रियावती BB. •

२३. ध्यातृणाम् स्तोतृणाम् Sy. धियाम् BB.

अवित्री ।[1]

यस्त्वा देवि सरस्वत्युपब्रूते धने हिते । इन्द्रं न वृत्रतूर्ये ॥ ५ ॥

यस्त्वा देवी । यः[2] । त्वा । देवि[3] । सरस्वति[4] । उपस्तौति[5] । हितधननिमित्तम्[6] । इन्द्रम्[7] । इव । सङ्ग्रामे त रक्षति[8] ।

त्वं देवि सरस्वत्यवा वाजेषु वाजिनि । रदा पूषेव नः सनिम् ॥ ६ ॥

त्वं देवि । त्वम् । देवि[9] । सरस्वति[10] । रक्ष । सङ्ग्रामेषु । अन्नवति[11] । देहि[12] । पूषेव[13] स्तोतृभ्य[14] । अस्मभ्यम्[15] । धनम्[16] ।

उत स्या नः सरस्वती घोरा हिरण्यवर्तनिः । वृत्रघ्नी वष्टि सुष्टुतिम् ॥ ७ ॥

उत स्या । अपि च[17] । एषा[18] । नः[19] । सरस्वती । घोरा[20] । हितरमणीयमार्गा । शत्रूणां[21] हन्त्री । कामयते[22] । सुष्टुतिम्[23] ।

---

१. रक्षित्री Sy. अभिमतप्रदानेन तर्पयित्री BB.

२. यद्वा धीनेति वाङ्नाम (Cf. Ngh 1. 11. धेनेति वाङ्नाम) अस्माकं धीना वाचं प्रावतु। अभिमतप्रदानेनावित्री पालयित्री तृप्ता वा अस्मदभिमतं शत्रुमारणं करोत्विति । यद्वा अस्मद्दत्तैर्वाजैः पुरोडाशादिभिरन्नैर्देवी प्रकर्षेणावतु BB.
This stanza=TS. 1. 8. 22. 1.

३. स्तोता Sy.

४. त्वाम् Sy.

५. स्तौति तं रक्षेति शेषः Sy.

६. VM. explains धने and हिते together by हितधननिमित्तम् ॥ धने हिते निहिते निमित्तभूते सति Sy.

७. अन्नम् P

८. हे देवि ! दानादिगुणयुक्ते ! Sy.

९. अस्मान्रक्ष Sy.

१०. हे वाजिनि ! वाजोऽन्न बलं वा ! तद्युक्ते ! हे सरस्वति ! Sy.

११. धेहि P.
विलिख। प्रयच्छेति यावत् Sy.

१२. पोषको देव इव Sy.

१३. अपि च नोऽस्मभ्यम् Sy.

१४. सम्भजनीयं धनम् Sy.

१५. प्रसिद्धा Sy.

१६. अस्मदीयाम् Sy.

१७. शत्रूणां भयकारिणी Sy.

१८. वर्ततेऽनेनेति वर्तनी रथः । हिरण्ययो वर्तनिर्यस्याः सा तथोक्ता Sy.

१९. वृत्राणां शत्रूणां हन्त्री । एवम्भूता सा सरस्वती Sy.

२०. कामयताम् Sy.

२१. ष्टुति P.
शोभनां स्तुतिम् Sy.

यस्या अनन्तो अह्रुतस्त्वेषश्चरिष्णुरर्णवः । अमश्चरति रोरुवत् ॥ ८ ॥

यस्याः । यस्या । अपर्यन्त । अनभिभूत । दीप्त । चरणशील । उदकवान् । अम । चरति । शब्दं कुर्वन्, अम इति बलनाम ।

सा नो विश्वा अति द्विषः स्वसॄरन्या ऋतावरी । अतन्नहेव सूर्यः ॥ ९ ॥

सा नः । सा । अस्मान् । विश्वान् । शत्रून् । अतिनयतु । स्वयसारिणी । अन्याश्च प्रजा । उदकवती । गच्छन् सन्ततम् । अहानि यथा । सूर्योऽतिनयति ।

उत नः प्रिया प्रियासु सप्तस्वसा सुजुष्टा । सरस्वती स्तोम्या भूत् ॥ १० ॥

उत नः । अपि च । अस्माकम् । प्रियासु । प्रियाण्यन्त प्रिया । सप्त गङ्गाद्या यस्या स्वसार । सुपर्याप्ता । सरस्वती । स्तोतव्या । भवतु ।

---

१. सरस्वत्याः Sy.
२. पर्वतः P अपर्यन्तोऽपरिमितः Sy.
३. निभिभूते P
अहिंसितोऽकुटिलो वा Sy.
४. सर्वत्राप्रतिहतगतिरित्यर्थः Sy.
५. ०कावान् P उदकप्रद इत्यर्थः । एवम्भूतः सन् Sy.
६. बलम् Sy.
७. वर्तते सा नो विश्वा इत्युत्तरत्र सम्बन्धः Sy.
८. भृशं शब्दं कुर्वन् Sy.
९. The passage: अम इति बलनाम (Cf. N. 10. 21.) should come immediately after अमः and precede चरति ।
१०. सरस्वती Sy.
११. सर्वाः Sy.
१२. द्वेष्ट्रीः प्रजाः Sy.
१३. अतितारयतु Sy.
१४. ०सारि० is suggested for ०सार० ॥ स्वयंसारिणीः सहोत्पन्ना वा Sy.
१५. नदीरस्मानतिनयतु Sy.
१६. ऋतावरीः–ऋतमित्युदकनाम (Ngh.1.12.) तद्युक्ताः । यद्वा । जस्येव 'वा छन्दसि' (Pa. 6.1 106.) इति पूर्वसवर्णदीर्घः । उदकवत्यः स्वसारो भगिन्योऽन्या गङ्गाद्या नद्यश्चास्मान् शत्रूनति नयन्तु Sy.
१७. सततम् Sy.
१८. तत्र दृष्टान्तः । यथाहानि शीघ्रमतिनयति तद्वत् Sy.
१९. धूयो० P.
सर्वस्य प्रेरक आदित्यः Sy.
२०. दशरात्रे तृतीयेऽहनि प्रउगे 'उत नः प्रिया' इति सारस्वतस्तृचः । सूत्रितञ्च––'उत नः प्रिया प्रियास्वित्यौष्णिहं प्रउगम्' (ĀŚS.7.10.) इति । पवित्रेष्टयां 'उत नः प्रिया' इति सारस्वतस्य हविषो ऽनुवाक्या । सूत्रितञ्च––'उत नः प्रिया प्रियास्विमा जुह्वाना युष्मदा नमोभिः' (ĀŚS.2.12.) इति Sy.
२१. प्रियाणां मध्ये Sy.
२२. प्रियतमा Sy.
२३. गायत्र्यादीनि सप्त छन्दांसि स्वसारो यस्यास्तादृशी । नदीरूपायास्तु गङ्गाद्याः सप्त नद्यः स्वसारः Sy.
२४. सुष्ठु पुरातनैर्ऋषिभिः सेविता Sy.
२५. एवम्भूता सरस्वती देवी Sy.

आपप्रुषी[1] पार्थिवान्युरु रजो अन्तरिक्षम्[2] । सरस्वती[3] निदस्पातु[4] ॥ ११ ॥

आपप्रुषी[1] । आपूरयन्ति[1] । पार्थिवानि भूतानि । विस्तीर्णम्[4] । लोकम्[5] । स्वर्गमन्तरिक्षं[6] च । सरस्वती[7] । शत्रो[8] । रक्षतु[9] ।

त्रिषधस्था[10] सप्तधातुः[11] पञ्च जाता[12] वर्धयन्ती[13] । वाजेवाजे[14] हव्या भूत् ॥ १२ ॥

त्रिषधस्था[10] । त्रिस्थाना[10] । सप्तधातु[11] सप्तभिश्छन्दोभि सहिता, सप्तभिर्वा स्वसृभि । पञ्च । जनान्[12] । वर्धयन्ती[13] । सङ्ग्रामे[14] सङ्ग्रामे । ह्वातव्या[15] । भवति ।

प्र या महिम्ना महिनासु[16] चेकिते द्युम्नेभिरन्या[17] अपसामपस्तमा[18] ।
रथइव बृहती[19] विभ्वने[20] कृतोपस्तुत्या[21] चिकितुषा[22] सरस्वती[23] ॥ १३ ॥

प्र या[15] । या[15] । महता[16] । महत्त्वेन[17] लोके । प्रकर्षेण सुष्ठु जायते । अन्ने[18] । अन्या[17] नदी । वेगवतीना[18] नदीना मध्ये । अत्यन्त वेगवती सर्वाभ्योऽपि नदीभ्योऽन्न प्रयच्छतीति प्रज्ञानम् । रथइव । बृहती[19] । महत्त्वाय[20] । कृता[21] । विदुषा[22] । सरस्वतीयम्[23] । उपस्तोतव्यान्नानावहन्त्री[21] ।

---

१. ०षि P.
२. ०यन्ती is suggested for ०यन्ति ॥ स्वतेजसा पूरितवती Sy.
३. पृथिव्याः सम्बन्धीनि Sy.
४. विस्तीर्णानि Sy.
५. रजांसि लोकान् Sy.
६. अन्तरा क्षान्तं नभश्च Sy.
७. सरस्वती देवी Sy.
८. निन्दकाच्छत्रोः Sy.
९. अस्मानक्षतु Sy.
१०. त्रिषु लोकेषु सहावतिष्ठमाना त्रिलोकव्यापिनी Sy.
११. सप्तधातवोऽवयवा गायत्र्याद्या गङ्गाद्या वा यस्याः सा तथोक्ता Sy.
१२. पञ्च जाता जातानि निषादपञ्चमांश्चतुरो वर्णान् गन्धर्वादीन् वा Sy.
१३. अभिवृद्धान् कुर्वती ईदृशी सरस्वती Sy.
१४. युद्धे युद्धे सर्वेषु युद्धेषु Sv.
१५. सरस्वती Sy.
१६. महती Sy.
१७. ०त्त्वेन is suggested for ०त्त्वेन ॥ माहात्म्येन Sy.
१८. द्युम्नैर्द्योतमानैर्यशोभिरन्नैर्वा युक्ता सती Sy.
१९. या चान्या—अन्यासाम् 'सुपा सुलुक्०' इति षष्ठीबहुवचनस्य जस् Sy.
२०. वेगवत्तमा Sy.
२१. परिवृढा गुणैरधिका Sy.
२२. विभुत्वाय Sy.
२३. प्रजापतिना निर्मिता Sy.
२४. जानता स्तोत्रा Sy.
२५. उपस्तोतव्या भवति Sy.
२६. ०हर्त्री P. ०हन्ती is suggested for ०हन्त्री ।
२७. VM. seems to take आसु as आ and सु two separate prepositions and explains सु as सुष्ठु and ignores आ । If not, he ignores आसु ॥ आसु आसां नदीनां देवतानां वा मध्ये Sy.

सरस्वत्यभि नो नेषि वस्यो माप स्फरीः पयसा मा न आ धक् ।
जुषस्व नः सख्या वेश्या च मा त्वत्क्षेत्राण्यरणानि गन्म ॥ १४ ॥

सरस्वति । हे सरस्वति ! अभिनय[1] । अस्मान्[2] । अभ्युदयम् । मा[3] । अप स्फरी[4][5] । उदकेन सेतौ विभिन्नेऽपस्फरणं[6] भवति । मा च । अस्मान्[7] । अधाक्षीरुदकाभावात्[8] । सेवस्व । अस्मान्[9] । सख्यित्वेन[10] । निवेशनेन[11] । च । मा । त्वत्[12] । क्षेत्राणि[13] । उदकाभावाद् अरमणीयानि[14] । गन्मेति[15] ।

ऋगर्थदीपिका सेयं[16] चतुर्थश्चायमष्टक. ।
कर्ता श्रीवेङ्कटार्यस्य तनयो माधवाह्वय[17] ॥
माधवेन कृत भाष्य चतुर्थस्याष्टकस्य यत् ।
नारायणेन लिखित तदन्तो देवशर्मणा[18][19] ॥
वेदो नाम महत् पद जनपदो यत्र द्विजाना तति–
स्साङ्ग वेदमधीत्य वाच्यमखिल मीमासतेऽस्य स्फुटम् ।
तत्र[20] ग्रामवरे क्वचिन्निवसता नाम्ना च नारायणे–
नैतन्माधवभाष्यलेखनवशाद् वैदग्ध्यमाविष्कृतम्[21] ॥

---

१. अभिप्रापय Sy. आभिमुख्येन. प्रापय BB.
२. अस्माम् P.
३. वसीयः प्रशस्तं वसु धनम् Sy. वरिष्ठं प्राणादिकम् BB.
४. Omitted by P. मा चास्मान् BB.
५. अपस्परिः P. अप्रवृद्धान् मा-कार्षीः, स्फारो वृद्धिः । उपसर्गवशात्तद्विपरीते वर्तते Sy. हिंसीः BB.
६. अधिकेन Sy. ७. अवस्फरणं P.
८. अस्मानागत्य BB.
९. अभिवह । बाधस्व Sy. पयसा हविषा च वर्धिता धाक्षीः BB.
१०. अस्माकम् Sy.
११. सख्यानि सखिकर्माणि Sy. अपि तु सख्येनास्मान् BB.
१२. प्रवेशनानि Sy. वेश्यतया, अभिगम्यतया च BB,
१३. त्वत्सकाशात् Sy. त्वत्प्रसादात् BB.
१४. क्षपणशीलानि BB.
१५. वयञ्च त्वत्सकाशाद्, अरमणीयानि निकृष्टानि, अरणीयानि क्षेत्राणि स्थानानि BB.
१६. गम्मेति D (मा) प्राप्नवाम अपि तु रमणीयान्येव Sy.
१७. This stanza=TS. 7. 2. 7. 5.
१८. चेयं D.
१९. MS. D. puts the figure ॥६१॥ here to indicate the end of sixty-first hymn. No such number is given in P.
२०. ०तस्त० P., D.
२१. देवदर्शण P. २२. अत्र P.
२३. श्रीगणपतये नमः । गोपालकृष्णाय नमः । सरस्वत्यै नमः । वेदव्यासाय नमः । गुरवे नमः P.

॥ अथ पञ्चमाष्टके प्रथमोऽध्यायः ॥

पञ्चमोऽथाष्टकस्तस्मिन्नध्यायादिषु वक्ष्यते ।
ऋषिनामार्षगोत्रेषु विज्ञेयमिह वैदिकै. ॥ १ ॥

ऋषिनामार्षगोत्राणा ज्ञानमायुष्यमुच्यते ।
पुत्र्यं पुण्य यशस्यं च स्वर्ग्य धन्यमरिमत्रहम् ॥ २ ॥

ऋषिनामार्षगोत्रज्ञ एकैकस्य भवत्यृषे ।
शरत्सहस्रमतिथिर्दिव्यमर्चितपूजित. ॥ ३ ॥

ततः परं सुविपुल स्वाध्यायफलमश्नुते ।
भवति ब्राह्मणं चापि ज्ञानस्यैतत्प्रयोजनम् ॥ ४ ॥

मन्त्राणां ब्राह्मणार्षेयच्छन्दोदैवतविन्न यः ।
याजनाध्यापनादेति छन्दसां यातयामताम् ॥ ५ ॥

स्थाणु वर्च्छति गर्तं वा पद्यते वा प्रमीयते ।
पापीयान् भवतीत्यर्थमेव ब्राह्मणमाह तम् ॥ ६ ॥

मन्त्राणां ब्राह्मणार्षेयच्छन्दोदैवतवित्तु यः ।
याजनाध्यापनाभ्या स श्रेय एवाधिगच्छति ॥ ७ ॥

---

१. Supplied by the Editor.
२. ऋषिनामा० A., M.
३. विच्छेय० A. ४. ऋषिनामा० A., M.
५. ष्यमुच्यते । पुत्र्यं पुण्यं is missing in M
६. पुत्र यं च यश० A
७. ०ज्ञमेकं० A., M
८. शतं सह० A. शरं सह० M.
९. स विपुलं A.
१०. ०ह्मणत्व ज्ञान० A ०णं च ज्ञान० M
११. ०जकम् A १२. ०यश्छन्दो० A.
१३. यम् A., M.
१४. यात योम० A.
१५. वर्चति गर्तं वा वाक्यते A
१६. मीयते प्रपाम् A. प्र वा मीयते M. Cf. Ārs. B. 1. 1.
१७. ०त्यर्थ एवं A., M.
१८. मा is missing M.
१९. ०यश्छन्दो० A.

एतैः प्रयोजनैः सर्वैः शौनकेन प्रदर्शितैः ।
ऋषयो नामगोत्राभ्यामस्माभिः सम्प्रदर्शिता ॥ ८ ॥

यदुच्यते पदज्ञानमृषिज्ञानमृतेऽपि नः ।
भवत्येवेह मन्त्रेषु किमृषिज्ञानमुच्यते ॥ ९ ॥

ऋषिनामार्षगोत्रेति यदेतच्छौनकोऽब्रवीत् ।
तददृष्टाय कथितं न चादृष्टपरा वयम् ॥१०॥

तदुच्यते स्वसूक्तानामादावन्तेऽथवा पुनः ।
ऋषयो नामगोत्राणि स्थापयन्तीह केषुचित् ॥११॥

'वृष्णे शर्धाय' सूक्तादौ नोधसो नाम दृश्यते ।
अर्चनानाश्च सूक्तान्ते 'बिभ्रतावर्चनानसम्' ॥१२॥

'कण्वं ददत्प्रचेतसः' 'दिवोदासेभिरिन्द्र' च ।
'उतासि मैत्रावरुण' इति गोत्रनिदर्शनम् ॥१३॥

ऋषीणा नामगोत्राणि दृष्ट्वा भ्राम्यन्ति लौकिकाः ।
जिज्ञासमाना मन्त्रार्थमतस्तेषां निदर्शनम् ॥१४॥

नामगोत्राणि मन्त्रेषु न निविष्टानि येषु तु ।
तेषु प्रदर्शनं तेषां विस्पष्टप्रतिपत्तये ॥१५॥

पद ह्यज्ञायमानार्थं दृष्ट्वा भ्राम्यन्त्यपि क्वचित् ।
स्यादृषेः किमिदं नाम गोत्र वाहो भवेदिति ॥१६॥

---

१. ०षिर्ज्ञान० A २. किमृषौ ज्ञान० A., M
३. ०षिर्नामा० A., M
४. ०न्ते च वा A., M ५. RV I 64 1
६. ०नानान्त सू० A ०नानां च M
७. बिभृताव० A. ०तावर्च्चना० M. RV V.64.7.
८. कण्वङ् वृचे० A कण्वन्व प्रचे० M. RV. I.39.9
९. ०सेभ्रेरि० A RV I.130 10
१०. इतासि A., M. ११. RV. 7.33 11
१२. ज्ञासमाना अत्र तेषां A., M.
१३. येषु कृ A. १४. स्यादृष्टे कि० M.

नन्वेवं विनियोगश्च दर्शनीयस्तवाधुना ।
वक्तव्यो वा विशेषोऽत्र विशेषस्तत्र वक्ष्यते ॥१७॥

यज्ञं विगाह्य तत्रत्यानर्थानभिदधत्यतः ।
यजुषामर्थविज्ञान नाकर्मज्ञस्य सिध्यति ॥१८॥

आह शाखाम् 'इषे त्वा' इति न शाखा यजुषि श्रुता ।
न च क्रियापदं दृष्टमपेक्षा जायते यतः ॥१९॥

'इषे त्वे त्याच्छिनत्ति'इति ब्राह्मणं दृश्यते यदा ।
यजुषोऽर्थं तदा स्पष्टमवगच्छन्ति लौकिकाः ॥२०॥

ऋचस्तु परिपूर्णार्था नापेक्षन्ते बहिःस्थितम् ।
विनियोगस्ततस्तासामस्माभिर्न प्रदर्श्यते ॥२१॥

किञ्चर्चो विनियुज्यन्ते न वाक्यार्थानुरूपतः ।
देवता श्रुतिसामान्यं विन्यासः प्रत्ययस्तथा ॥२२॥

छन्दांसि सूक्तसंख्या च शब्दावृत्तिर्ऋषिस्तथा ।
प्रयोजयन्त्यृचस्ते च न वाक्यार्थस्य भेदकाः ॥२३॥

ननु च ब्राह्मणे साम्नामृषयश्चापि दर्शिताः ।
अर्थवादे च सर्वेषां यच्छाटचायनकं विदुः ॥२४॥

ऋचा नैवविधं दृष्टमृषीन् केनाह शौनकः ।
ब्राह्मणादाकृतेरुक्तेस्तथा वृद्धोपदेशतः ॥२५॥

---

१. पिशेषो० \ २. यजुषा० A. ९. किन्त्वर्चो A. १०. विन्यास प्रत्य० A., M.
३. YV. 1.1 ४ ततः A, M. ११. शब्दवृत्तिरुषस्तथा A. ०त्तिरूष० स्तथा M.
५. TB. 3.2.1.3. ६. न वेक्षन्ते A., M. १२. ०देषु सर्वे० A. १३. यश्छा० A.
७. ०हिस्थि० A. ८. प्रदृश्यते M. १४. ०णाराकृ० A., M. १५. वृद्धोप० A.

साण्डके शाट्यायनके तथा चैवैतरेयके ।
अस्माभिरभिदृश्यन्ते ऋचामपि महर्षयः ॥२६॥

माधुच्छन्दसमित्याह 'वायवा याहि दर्शत' ।
आकृत्या दश सूक्तानि तदार्षाण्याह शौनकः ॥२७॥

उक्तिश्च दृष्टा सूक्तेषु 'प्र वत्रेर्वत्रिश्चिकेत' ।
'तमु त्वा गोतमो गिरा' जेतारमपराजितम् ॥२८॥

'त्यान्नु क्षत्रियाँ अव' इति सूक्तं वृद्धोपदेशतः ।
मत्स्यानां जालबद्धानामार्षं यास्कोऽब्रवीदिति ॥२९॥

प्रमाणेष्वपि सन्देहाद् विकल्पोक्तिरपि क्वचित् ।
'चन्द्रमा अप्स्वन्तः' इति सूक्ते कुत्सोऽथवा त्रितः ॥३०॥ इति ॥

VI.62.

स्तुषे नरा दिवो अस्य प्रसन्ताश्विना हुवे जरमाणो अर्कैः ।
या सद्य उस्रा व्युषि ज्मो अन्तान्युर्वृषतः पर्यरू वरांसि ॥ १ ॥

स्तुषे नरा ॥ भारद्वाजः ॥ स्तौमि । नेतारौ । दिवौ । अस्य । प्रभवन्तौ । ह्व(घ)यामि च ।

---

१. चैवेस्मन्वितरे Λ चैवेस्मतरे M चैवास्मदीयके R.
२. मधुच्छन्दः समिच्छत्याह Λ. मधुच्छ० M.
३. दर्शतः Λ., M. RV. I.2.1.
४. वप्रेवंप्रश्चिकेत Λ. वप्रे वृश्चिके ततः M. RV. V.19.1.
५. कत्वा गौतम M. RV. I.78 2.
६. ०रमराजि० Λ RV. I.11.2.,V.25.6.
७. ०यामवेक्तु Λ. ०यामवेत्तु M.RV. 8.67.1.
८. ०प्यदेशकः Λ., M.
९. मध्यप्स्यां ज्ञ ल० Λ. मध्याप्स्यां जाल० M.
१०. या (के) स्का ब्र० Λ. ११. RV. I.105.1.
१२. सूक्ते is missing in Λ., M.
१३. कुंसोऽथ० Λ., M.
१४. अथ पञ्चमाष्टके प्रथमोऽध्याय आरभ्यते । षष्ठमण्डलस्य षष्ठेऽनुवाके चतुर्दश सूक्तानि । तत्र 'स्तुषे नरा' इत्येकादशर्चं प्रथमं सूक्तम् । अत्रेयमनुक्रमणिका—'स्तुष एकादशाश्विनं तु' (KSA.33.62.p.24.) इति । मण्डलद्रष्टा बार्हस्पत्यो भरद्वाज ऋषिः । अनुक्तत्वात्त्रिष्टुप् । अश्विनौ देवता । प्रातरनुवाक आश्विने क्रताविदमादिके द्वे सूक्ते । आश्विनशस्त्रे चैते एव । सूत्रितञ्च—'स्तुषे नरेति सूक्ते' (ĀŚS. 4.15.) इति Sy. १५. स्तुषे प्रगीतमन्त्रसाध्यैः स्तोत्रैः स्तोतुम् Sy. १६. नेतरौ M.
१७. दिवः is suggested for दिवौ ॥ द्युलोकस्य Sy. १८. भुवनस्य Sy.
१९. प्रसन्तौ प्रभवन्तावीश्वरौ Sy.
२०. ह्वयामि Λ. ह्वयामि is suggested for ह्व(घ)यामि ॥ आह्वयामि Sy.

अश्विनौ[1] । स्तुवन्[2] । स्तुतिभि[3] । यो[4] । मद्य एव । उतस्राविणो[6] । पर्यन्तान् । उषसि व्युष्टायाम्[7] । उरूणि[8] । तमांसि । पर्युयूषत[10] पृथक्कुरुतस्तेजसा प्रकाशयत[11] सर्वमित्यर्थ[12] ।

ता यज्ञमा शुचिभिश्चक्रमाणा रथस्य भानुं रुरुचू रजोभिः ।
पुरू वरांस्यमिता मिमानापो धन्वान्यतिं याथो अज्रान् ॥ २ ॥

ता यज्ञम्[14] । तौ । यज्ञम्[14] । आक्रममाणौ[15] । शुचिभि[17] रायैस्तेजोभि[18] । स्वरथस्य[19] । भानुम्[20] । रुरुचतु[21] । पुरूणि[22] । तमसो वारकाणि[23] । अमितानि तेजांसि । मिमानौ[25] । अप[26] । निरुदकाश्च दशाद्[27] । रश्मीश्च[28] । अतियाथ[29] यद्वा—तमांसि हिंसन्तावात्मीयानश्वानतिगमयत इति, रश्मीश्चातियाथाथ[30] ।

ता ह त्यद्वर्तिर्यदरंध्रमुग्रेत्था धियं ऊहथुः शश्वदश्वैः ।
मनोजवेभिरिषिरैः शयध्यै परि व्यथिर्दाशुषो मर्त्यस्य ॥ ३ ॥

ता ह त्यत्[31] । तौ । खलु । यदा । इदम्[32] । वर्तिर्मार्गम्[33] । रक्षोभिरहिंसितमागच्छथ[34] । उग्रौ[35] ।

---

१. **अश्ववैरन्वितौ** Sy.
२. **स्तुवं** \. **स्तुतिं कुर्वन्** Sy.
३. **अर्चनीयमन्त्रसाध्यैः शस्त्रैः** Sy
४. **आ** M **यौ** is suggested for **यो** ।
५. **साद्य** M.
६. **एवोः स्राविणोः** M. **उत्स्राविणौ** is suggested for **उतस्राविणो ॥ शत्रूणां निवारकौ** Sy.
७. **व्युष्टायम्** \ **व्युष्टौ निशायाः समाप्तौ** Sy.
८. **उरुणि** Λ.
९. **रूपस्यावरकाणि तमांसि, अथवा वरांसि तेजांसि** Sy.
१०. **पर्युयु०** Λ. **परियुयूषतः** is suggested for **पर्युयूषतः ॥ पृथक्कुरुत, यद्वा तमोनिवारणात् विस्तारयतः** Sy.
११. **प्रथ क्रू०** Λ.
१२. **श** is missing in A.
१३. VM ignores **ज्मः ॥ ज्मः पृथिव्याः** Sy.
१४. **किञ्च प्रसिद्धावश्विनौ** Sy.
१५. **अस्मदीयं यागम्** Sy
१६. **०क्रमा०** is missing in Λ. **अभिचक्रमाणौ** Sy.
१७. **निर्मलैः** Sy.
१८. **स्वीयैः** is suggested for **रायैः ॥ रजो रजतेः । ज्योती रज उच्यते** N 4 19.
१९. **स्वकीयस्य रथस्य** Sy.
२०. **दीप्तिम्** Sy.
२१. **आरुचतु** Λ. **रोचयेते** Sy.
२२. **बहूनि** Sy.
२३. **०रकनि** Λ **तमोनिवारकाणि तेजांसि** Sy
२४. **अमिता०** \. **अपरिमितानि** Sv.
२५. **निर्ममाणौ** Sy.
२६. **अप उद्दिश्य** Sy.
२७. **०दकाश्च देशान्** is suggested for **०दकाश्च देशाद् ॥ मरुप्रदेशान्** Sy.
२८. **रश्मिश्च** Λ. **स्वकीयानश्वान्** Sy.
२९. **०नश्चनति०** \.
३०. **था** seems to be unnecessary.
३१. **त्या** Λ. **त्य** M.
३२. **तद्** Sy.
३३. **वक्ति** Λ **यजमानस्य गृह समर्धयितुं गच्छथ** Sy. ३४. **असमृद्धम्** Sy.
३५. **उग्रौ** is suggested for **उग्रो ॥ उग्रावश्विनौ यवाम** Sv.

तदानी सत्यमेव[1]। कर्माणि[2]। ऊहतुर्वहथ[3] स्तोतॄणाम्। नित्यम्[4]। अश्वै[5]। तथा मनोजवै[6]। गमनशीलैरश्वै[7]। यजमानस्य[8]। शत्रुर्युवाभ्याम्। परिशयनाय[9] क्रियते[10] हन्यत इत्यर्थः।[11]

ता नव्यसो[12] जरमाणस्य[13] मन्मोपं[14] भूषतो[15] युयुजानसप्ती[16]।
शुभं[17] पृक्षमिषमूर्जं[18] वहन्ता[19] होता[20] यक्षत्प्रत्नो[21] अध्रुग्युवाना॥ ४॥

ता नव्यसः[22]। तेन। नवतरस्य। स्तुवतः। स्तुतिम्। उपभवथ। रथे नियुज्यमानाश्वौ। उदक सवर्चनीयम्। अन्नम्। रस च। वहन्तौ। होता। यक्षत्[23]? पुराण[24]। द्रोहवर्जितौ[25]। युवानौ तावत्[26]। शुभम्[27]।

ता वल्गू[28] दस्रा पुरुशाकतमा[29] प्रत्ना[30] नव्यसा[31] वचसा[32] विवासे[33]।
या शंसते[34] स्तुवते[35] शंभविष्ठा बभूवतुर्गृणते[36] चित्ररातीं॥ ५॥

ता वल्गू[37]। तौ। वल्गनशीलौ वीरौ। दर्शनीयौ[38]। अतिशयेन बहुसहायौ[39]। प्रश्नौ[40]। नवतरेण[41]। वचसा। परिचरामि। यौ। शंसते। स्तुवते च। अतिशयेन सुखस्य भावितारौ[42]। बभूवतु। गृणते मह्य

---

१. इत्थम् Sy.
२. धियः स्तोतॄन् Sy.
३. ०हथुप्तह० Λ. ०हथुर्व० is suggested for ०हतुर्व०॥ स्वर्ग प्रापयथः Sy.
४. सर्वदा Sy.
५. स्वीयैरश्वैः Sy.
६. मनोवेगैः Sy.
७. एषणीयैः काम्यैः Sy.
८. युतेज्यमान० M.
९. यजमानस्य हिंसकः Sy.
१०. परिशयनाय दीर्घनिद्रायै युवाभ्यां क्रियताम् Sy.
११. VM. ignores मर्त्यस्य॥ मर्त्यस्य मनुष्यस्य Sy. १२. नप्य(व्य)सः Λ.
१३. तावश्विनौ Sy.
१४. स्तवत A. स्तुतिं कुर्वतः Sy.
१५. सतिम् Λ. मननीयं स्तोत्रम् Sy.
१६. उपगच्छतः। यद्वा स्तोत्रसमीपे भवतः Sy.
१७. ०मानश्वौ Λ.
१८. पृक्षमन्नम् Sy. पयः पृक्षमित्यन्ननाम्नी Ngh. 2.7. १९. इषं पुष्टिम् Sy.
२०. देवानामाह्वाता Sy.
२१. वहन्तौ। होता। यक्षत् is missing in M. यक्षत् is doubtful॥ यक्षद् यजतु Sy.
२२. पुराणैः M. पुराणोऽग्निः Sy.
२३. अद्रोग्धा प्रियः Sy.
२४. नित्यतरुणौ Sy.
२५. तावत्। शुभम् is missing in A. शोभनम् Sy.
२६. ता वल्गः ओं ता वल्गः Λ. ता वल्गुः M.
२७. वल्गलन० Λ. वल? (ल्ग)नशीलौ रुचिरौ वा Sy. २८. दर्शनीयावश्विनौ Sy.
२९. अतिशयेन बहुकर्माणौ बहुसहायौ वा Sy.
३०. प्रत्नौ is suggested for प्रश्नौ॥ पुराणौ Sy. प्रत्नं प्रदिव इति पुराणनामनी Ngh. 3.27. ३१. नवतीरेणे Λ.
३२. स्तुत्या Sy.
३३. चरामि यौ शंस० is missing in M.॥ शस्त्रैः स्तुतिं कुर्वते Sy.
३४. स्तोत्रैः स्तुतिं कुर्वते जनाय Sy.
३५. भावयितारौ is suggested for भावितारौ॥ अतिशयेन सुखस्य भावयितारावतिशयेन सुखस्वरूपौ वा Sy.

च । चित्रदानौ ।

ता भुज्युं विभिरूद्द्यः समुद्रात्तुग्रस्य सूनुमहथू रजोभिः ।
अरेणुभिर्योजनेभिर्भुजन्ता पतत्रिभिरर्णसो निरुपस्थात् ॥ ६ ॥

ता भुज्युम् । तौ । भुज्युम् । अश्वै । समुद्रमध्यस्थाभ्य । अद्भ्यः । तुग्रस्य । पुत्रम् । ऊहतुर्धर् ? मार्गे तदेवाह रेणुवर्जिते । मार्गे । तुग्रसूनु रक्षन्तौ । अश्वै । उकमध्यात् । निरूप्योहथुरिति ।

वि जयुषा रथ्या यातमद्रिं श्रुतं हवं वृषणा वध्रिमत्याः ।
दशस्यन्ता शयवे पिप्यथुर्गामिति च्यवाना सुमतिं भुरण्यू ॥ ७ ॥

वि जयुषा । जयशीलेन । गोतमस्य ऋषेराहरन्तौ (?) शिरोच्चयमार्गस्य निरोधकम् । भित्त्वा मध्येनागच्छतम् । हे थ्यौ तथा । शृणुत चाश्वौ ।

---

१. गुणते मह्यं त्वं A. स्तोत्रशस्त्रव्यतिरिक्तलौकिकस्तुतिभिः स्तुवते च Sy.
२. विचित्रदानौ Sy.
३. ता भुज्युं is missing in A.
४. अश्विनौ युवाम् Sy.
५. तौ भुज्युम् is missing in M. भुज्युनामकं समुद्रमध्ये भग्ननावम् Sy.
६. ०स्थाभ्योभ्यः M. ०स्थाभ्यः is suggested for ०स्थाभ्यः ॥ समुद्रादद्भ्य इति प्रयोगो मातुर्गृहाद् गच्छतीतिवत् Sy. ७. तूग्रस्य M
८. उगूहक्थु M. The reading is doubtful. ऊहथुः is suggested for it.
९. आन्तरिक्षे रजोभिर्मार्गैः Sy.
१०. आह is missing in M.
११. नणुव० M. रेणुरहितैः Sy.
१२. योजनेभी रथयुक्तैः M. १३. तूग्र० M.
१४. पतत्रिभिः पतनवद्भिरश्वैः Sy.
१५. उदकमध्यात् is suggested for उकमध्यात्। It seems to be the explanation of अर्णसः and उपस्थात् ॥ Sy. explains these two words as जलस्य योनेः ।
१६. रू is missing in A. निरूहथुः निरगमयतम् Sy. १७. शीलौ M. जयशीलेन रथेन Sy.
१८. गौतमस्य कूपमा० M.
१९. शिलोच्चयं मार्ग० is suggested for शिरोच्चयमार्ग० ॥ मार्गे स्थितं पर्वतम् Sy.
२०. वि यातं व्यबाधेथाम् । यातिरत्र वधकर्मा । तथा च निगमान्तरम् 'विभिन्दुना नासत्या रथेन वि पर्वताँ अजरयू अयातम्' (RV. I. 116.20) Sy.
२१. रथ्येन A. रथ्यौ is suggested for थ्यौ ॥ हे रथारूढावश्विनौ ! Sy. २२. यथा M.
२३. चाव्यो M. चाश्विनौ ! is suggested for चाश्वौ ।
२४. There is no commentary on the following words:
हवम् । वृषणा । वध्रिमत्याः । दशस्यन्ता । शयवे । पिप्यथुः । गाम् । इति । च्यवाना । सुमतिम् and भुरण्यौ ॥
Sy. explains these words in the following manner:—
वृषणा कामानां वर्षितारौ । वध्रिमत्याः पुत्रार्थिन्याः । हवमाह्वानम् । दशस्यन्ता स्तोतृभ्यः कामान् प्रयच्छन्तौ । शयवे युवां स्तुवते । गां निवृत्तप्रसवाम् । पिप्यथुः क्षीरेणाप्याययतम् । तथा च निगमान्तरम्—'शयवे चिन्नासत्या शचीभिर्जर्सुरये स्तर्यं पिप्यथुर्गाम्' (RV. 1.116 22.) इति । इतीत्थम् । सुमतिं सुष्टुतिम् । च्यवाना गच्छन्तौ । भुरण्यू सर्वत्र गन्तारौ यज्ञस्य भर्तारौ वा भवतम् ।

यद्रोदसी प्रदिवो अस्ति भूमा हेळो देवानामुत मर्त्यत्रा ।
तदादित्या वसवो रुद्रियासो रक्षोयुजे तपुरघं दधात ॥ ८ ॥

यद्रोदसी[1] । यत् । पुराणमर्त्येषु[2] पापपरेषु[3] । देवानाम्[4] । महत्[5] । हेळ[6] । विद्यते, क्रोधो हेळ[7] । तत्[8] । हे आदित्याः ! वसव. ! रुद्रपुत्राश्च मरुत. ! रक्षो भूत्वा युञ्जानाय । तपनशीलम्[10] । अघम्[11] । कुरुत, अप(घ)माहननादयुधम्[12] । द्यावापृथिव्यावश्विनौ भवत[13] । स्तोत्रस्य स्वाश्च देवान्या च इति(?)[14] ।

य ईं राजानावृतुथा विदधद्रजंसो मित्रो वरुणश्चिकेतत् ।
गम्भीराय रक्षसे हेतिमस्य द्रोघाय चिद्वचंस आनवाय ॥ ९ ॥

य ईं राजानौ[15] । यः[16] । इमौ । राजानावश्विनौ । काले[17] । परिचरति[18] । य च पापान्मुक्तौ भवत्वयमिति मित्रावरुणौ । जानीत[19] । स गहनाय[20] । रक्षसिम[21] । हेतिम्[22] । अस्य विमृजति[23] । अनुरिति मनुष्यनाम[24] तदीयाय[25] । द्रोध्रे[26] । वचसो[27] । चाधर्षणीयो न भवति[28] ।

---

१. The *pratīka* is supplied by the Editor.
२. पुराणम् । is suggested for पुराण ।
३. पापपरेषु is missing in A. It seems to be redundant. मर्त्येष्वश्विनोः परिचारकेषु Sy. ४. देवानामहं धेढः A.
५. महान् Sy. ६. क्रोधः Sy.
७. हेढः A. The passage क्रोधो हेळः, should immediately follow हेळः and precede विद्यते ।
८. हेळः Sy.
९. रक्षोभिर्युक्ताय रक्षसां स्वामिने प्रेरकाय वा । अथवा रक्षोयुजे रक्षोभिर्युक्ताय यज्वने Sy.
१०. ०शीलत्वम् A. तापकम् Sy.
११. It seems to be redundant.
१२. अघम्, आहननादघम् is suggested for अप(घ)माहननादयुधम् ॥ अघमाहन्तृ Sy.
१३. हे द्यावापृथिव्यौ ! Sy.
१४. ०तस्तो तत्रै स्वा० A. The reading is doubtful and unnecessary.
१५. VM. ignores उत ।
१६. राजाना A.,M. १७. नरः Sy.
१८. कालो M. काले काले Sy.
१९. इयं च M. तं मित्रो वरुणश्च Sy.
२०. जानीयात् । मित्रवरुणप्रभृतयो देवा एनं विदुरित्यर्थः Sy.
२१. सस्सः is written twice in A. किञ्चायं परिचारकः Sy.
२२. महाबलाय Sy.
२३. रक्षसे is suggested for रक्षमिस ॥ राक्षसाय Sy. २४. घातकमायुधम् Sy.
२५. अस्य । अस्यति । क्षिपति । प्रथमपुरुषस्य मध्यमपुरुषेण व्यत्ययः Sy.
२६. Cf. Ngh. 2.3.
२७. मनुष्यसम्बन्धिने Sy.
२८. द्रोढ़े A. द्रोग्ध्रे is suggested for द्रोध्रे ॥ अभिद्रोहात्मकाय Sy.
२९. वचसे is suggested for वचसो ॥ वचनाय हेतिमस्यति । मनुष्याणामभिद्रोहायैनमास्कन्दतीति Sy.
३०. वचसाप चा० M. It seems to be the explanation of चित् ॥ चिद् एव Sy.
३१. VM. ignores रजसः ॥ रजसः समस्तस्य लोकस्य Sy. लोका रजांस्युच्यन्ते N. 4.19.

अन्तरैश्वकैस्तनयाय वर्तिर्घुमता यातं नृवता रथेन।
सनुत्येन त्यजसा मर्त्यस्य वनुष्यतामपि शीर्षा ववृक्तम् ॥ १० ॥

अन्तरैः[1]। सन्निकृष्टैः[2]। चरै[3]। पुत्राय। मार्गम्[4]। दीप्तिमता। आगच्छतम्। मनुष्ययुक्तेन। रथेन धनदातुम्[5]। अन्तर्हितेन[6]। क्रोधेन[7]। मर्त्यम्[8]। हिंसता राक्षसानाम्[9]। शीर्षाणि[10]। अपि[11]। ववृक्त[12] छिन्दतम्[13]।

आ परमाभिरुत मध्यमाभिर्नियुद्भिर्यातमवमाभिरर्वाक्।
दृळहस्य चिद्गोमतो वि व्रजस्य दुरो वर्तं गृणते चित्रराती ॥ ११ ॥

आ परमाभिः[15]। आयातम्। अभिमुखम्[16]। त्रिप्रमाणैः[17]। अश्वैः[18]। दृढस्य[19]। अपि। पशुमतः[20]। व्रजस्य[21]। द्वाराणि। विवृतानि कुरुतम्[22]। स्तुवते। हे चित्रदानो[23]! इति[24]।

---

१. हे अश्विनौ! Sy.

२. अनिकृष्टैः Sy.

३. चक्रैः is suggested for चरैः॥ चक्रैर्युक्तेन Sy.

४. तनयं दातुम् Sy.

५. अस्माकं गृहम् Sy.

६. नृवता नेत्रा सारथिना युक्तेन। यद्वा अश्वयुक्तेन Sy. पतङ्गाः। नरः इत्यश्वनामनी Ngh. 1.14.

७. धनं दातुम् is suggested for धनदातुम्।

८. तिरोहितेन Sy.

९. हृणिः त्यज इति क्रोधनामनी Ngh. 2.13.

१०. मनुष्यस्य Sy.

११. बाधमानानाम् Sy. वनुष्यतिर्हन्तिकर्मा N.5.2.

१२. शिरांसि Sy.

१३. अप M.

१४. वृत्तम् M. ववृक्तं is suggested for ववृक्त॥ प्रवृक्तम् Sy.

१५. जिङ्(न्द)तम् Λ.

१६. हे अश्विनौ! Sy.

१७. अस्मदभिमुखम् Sy.

१८. त्रिप्रमाणैः refers to परमाभिः, मध्यमाभिः and अवमाभिः॥ परमाभिरुत्कृष्टाभिः। मध्यमाभिरनुत्कृष्टाभिः। अवमाभिर्निकृष्टाभिश्च Sy.

१९. वाहैः Sy.

२०. दृळहस्य दृळहापिधानस्य Sy.

२१. गोयुक्तस्य Sy.

२२. गोष्ठस्य Sy.

२३. विवृणुतम् Sy.

२४. किञ्च स्तुवते मह्यम् Sy.

२५. विचित्रदानौ भवतम् Sy.

२६. VM. ignores उत॥ उतापि च Sy.

VI.63.

क्व१त्या व२ल्गू पुरुहूताद्य दूतो न स्तोमोऽविद३न्नमस्वान् ।
आ यो अर्वाङ्नासत्या व४वर्त५ प्रेष्ठा ह्यसंथो अस्य६ मन्मन् ॥ १ ॥

१क्व त्या वल्गू । २क्व । ३तु । ४वल्गनशीलौ । बहुभिराहूतौ । ५एद्य । ६राजप्रतिहतो दूत. । इव । मदीयः स्तोम. । ७हविषा सयुक्तः । ८विन्देत् । यः स्तोमः । ९अभिमुखम् । १०नासत्यौ । ११आवर्तयति । तुरीयः पाद. प्रत्यक्ष., प्रियतमौ । हि । १२भवते । १३तथास्य स्तोतु. । १४स्तुतौ ।

अरं१५ मे गन्तं१६ हवनाया१७स्मै गृणाना१८ यथा पिबाथो१९ अन्धः२० ।
परिं ह त्यद्वर्तिर्याथो रिषो२१ न यत्परो२२ नान्तरस्तुतुर्यात् ॥ २ ॥

२३अरं मे गन्तम् । २४अलम् । मे । २५गच्छतम् । इदम् । २६ह्वान श्रोतुम् । २७स्तूयमानो । यथा । २८पिबथः । २९सोमस्तथा वा गच्छतम् । ३०मार्गम् । ३१हिरकान् । ३२परिहरन्तौ । ३३याथ. । न । ३४यद्वर्तिः । ३५दूरस्तः । ३६तिरति ।

---

१. 'क्व त्या' इत्येकादशर्चं द्वितीयं सूक्तं भरद्वाजस्यार्षम् । अत्रेयमनुक्रमणिका—'क्व त्यैकपदान्तं त्रैष्टुभम्' (KSA. 33.63. P. 24.) इति । 'आ वां सुम्ने' इत्येकादश्येकपदा त्रिष्टुप् शिष्टास्त्रिष्टुभः । 'आश्विनं तु' (KSA. 33. 62. P. 24) इत्युक्तत्वादस्यापि सूक्तस्याश्विनौ देवता । प्रातरनुवाकाश्विनशस्त्रयोस्त्रैष्टुभे छन्दसि विनियोगः Sy.
२. कत्वा कत्या वल्गुः A.
३. कुत्र स्थितौ Sy.
४. आ A. तौ is suggested for तु ॥ अश्विनौ Sy.
५. वेत् गनशीलौ A. रुचिरौ Sy.
६. अद्य is suggested for एद्य ।
७. प्रेरितो दूतः Sy.
८. पञ्चदशादिः स्तोमः Sy.
९. ०षा धं युक्तः A. नम आयुरित्यन्ननामनी Ngh. 2.7.
१०. अस्मदभिमुखम् Sy.
११. नास्त्यौ A. अश्विनौ Sy.
१२. आवर्तयत् Sy.
१३. भवथः is suggested for भवते ।
१४. त is missing in A.
१५. हे अश्विनौ ! युवामस्य स्तोतुर्मन्मन् स्तोत्रे Sy.
१६. ये A. मदीयाय Sy.
१७. हे अश्विनौ ! युवाम् Sy.
१८. पर्याप्तम् Sy.
१९. आह्वानाय Sy
२०. ०मानौ is suggested for ०मानो ।
२१. पिबतम् Sy.
२२. सोम is suggested for सोमः ।
२३. गृहम् Sy.
२४. हिंसकात् is suggested for हिरकान् ॥ हिंसकस्य शत्रोः Sy.
२५. परितः Sy.
२६. याथौ M.
२७. य is missing in A. यद्वा त्यद्वर्तिस्तदस्मदीयं गृहं रिषो हिंसकात् परि याथः परितो याथः । अयं भावः । यथास्मदीयं गृहं दूरस्थः सन्निकृष्टोऽपि न हिंस्यात्तथा रक्षां कुरुथ इति Sy.
२८. दूस्पः A. दूरस्थः is suggested for दूरस्तः ॥ विप्रकृष्टः Sy.
२९. हिंस्यात् Sy.

नापि सन्निकृष्टः ।[1]

अकारि वामन्धसो वरीमन्नस्तारि बर्हिः सुप्रायणतमम् ।
उत्तानहस्तो युवयुर्वन्दा वां नक्तन्तो अद्रय आञ्जन् ॥ ३ ॥

अकारि । अकारि[2] । युवयोः[3] । सोमस्य पूर्णं पात्रम् । वरणीये यज्ञे । स्तीर्णं च । वन्हि[5] । शोभन प्रगमन यस्यात्यन्तं भवति[6] । धनदानार्थमुत्तानहस्त[7] । युष्मत्काम[8] । स्तौति । यज्ञ व्याप्नुवद्भिन्तो[9] । ग्रावाणश्च । वं[10] सोमरसैः । रोदन्ति[11] ?

ऊर्ध्वो वामग्निरध्वरेष्वस्थात्प्र रातिरेति जूर्णिनी घृताची ।
प्र होता गूर्तमना उराणोऽयुक्त यो नासत्या हवीमन् ॥ ४ ॥

ऊर्ध्वो वामग्निः[12] । ऊर्ध्वः । युवयोर्होमाय[13] । यज्ञेषु । अग्निः । अस्थादुदतिष्ठत्[14] । प्रगच्छति[15] च । हविषो[16] दात्री । क्षिप्ता[17] । जुहूः[18] । प्रतिष्ठते च । होता । उद्गूर्णमनाः[19] । उरु स्तोत्र कुर्वाणः[20] । यः । हे अश्विनौ[21] ! युक्तावकरोत्[22] । हवने[23] ।

---

१. VM. ignores ह and त्यत् ॥ त्यत् तत् Sy. २. कृतम् Sy.
३. युवयोरर्थे Sy.
४. विस्तृतेऽभिषवादौ यत्कृत्यमस्ति तत् Sy.
५. बर्हिः is suggested for वन्हिः ।
६. मृदुतमम् Sy.
७. कृताञ्जलिः Sy.
८. युवां कामयमानो होता Sy.
९. ०वद्रोन्ता Λ. ०वन्तः is suggested for ०वद्रोन्तो ॥ युवां व्याप्नुवन्तः । 'तृक्ष पृक्ष नक्ष गतौ' इति धातुः Sy.
१०. वाम् is suggested for वम ॥ युवाम् Sy.
११. आ उन्दन्ति=ग्लोन्दन्ति is suggested for रोदन्ति ॥ सोमरसमा समन्ताद् व्यक्तीकृतवन्तः Sy.
१२. ग्रावन्हिः Λ. ग्रावाग्निः M.
१३. युवयोर्यज्ञार्थम् Sy.
१४. ०स्थादूद० Λ.
१५. समिद्ध आहवनीयं गच्छति च Sy.
१६. धनं हविः Sy.
१७. It seems to be the explanation of जूर्णिनी ॥ प्रगामिनी Sy. जूर्णिर्जवतेर्वा । द्रवतेर्वा । दूनोतेर्वा N. 6.4. Sy.
१८. क्षिप्रा जहू Λ. घृतेनाक्ता, उपस्तीर्णाभिघारितेत्यर्थः Sy.
१९. प्रकर्षेणोद्युक्तमना भवति Sy.
२०. होता Sy.
२१. अश्विनौ Sy.
२२. योजयति Sy.
२३. आह्वाने स्तोत्रे वा Sy.

अधिं श्रिये दुंहिता सूर्यस्य रथं तस्थौ पुरुभुजा शतोतिम् ।
प्र मायाभिर्मायिना भूतमत्र नरा नृतू जनिमन्युज्रियानाम् ॥ ५ ॥

अधि श्रिये । अधितष्टौ । श्रयथम् । सूर्यस्य । दुहिता । युवयो रथम् । हे **बहुभोजनौ** ! बहुगमनम् । प्राभवतम् । अत्र । कर्मभि । मनकर्मवन्तौ । हे नेतारौ ! नर्तनशीलौ । प्रादुर्भावे । देवाना स्वयवरे ।

युवं श्रीभिर्दर्शताभिरभिः शुभे पुष्टिमूहथुः सूर्यायाः ।
प्र वां वयो वपुषेऽनु पप्तन्नक्तद्वाणी सुष्टुता धिष्ण्या वाम् ॥ ६ ॥

युवं श्रीभिः । युवम् । श्रीभि । दर्शनीयाभि । आभि । शोभार्थम् । पोषणम् । ऊहथुः । सूर्याया । प्रानुपप्तन् । श्वाश्वा । वाम् । शोभार्थं तदानीम् । व्याप्नोत् । स्तोतृभिः सुष्ठु स्तुता । वाणी । वा । हे धिषणार्हौ ! स्तुत्यौ !

---

१. अध्यतिष्ठत् Sy.
२. श्रियर्थम् A. श्रयितुम् Sy.
३. सूर्या Sy.
४. हे पूर्णभुजौ ! बहूनां रक्षकौ ! वाश्विनौ ! Sy. ५. बहुरक्षकं बहुगमनं वा Sy.
६. भवतम् । यद्वा हे मायिनौ ! प्राज्ञौ ! प्र भूतं प्राज्ञतममन्यादिकं देवं मायाभिः प्रज्ञानैः कौशलैर्वा जितवन्तौ स्थ इत्यर्थः । अयमर्थः 'प्रजापतिर्वै सोमाय राज्ञे दुहितरं प्रायच्छत्सूर्यां सावित्रीम्' (AB 4. 7.) इत्यादिना स्पष्टीकृतः Sy.
७. अपि च अत्र अस्मिन् Sy.
८. प्रज्ञानैः Sy. शची मायेति प्रज्ञानामनी Ngh. 3.9.
९. सौकर्म० A. सत्कर्म० is suggested for सनकर्म० ॥ प्रज्ञावन्तौ Sy.
१०. नेतारौ Sy.
११. नृत्यन्तौ Sy.
१२. जन्मनि प्रादुर्भावे Sy.
१३. स्वयंबरे A.
१४. श्रीभः A युवं श्रीभिः missing in M.
१५. हे अश्विनौ ! युवाम् Sy.
१६. लक्ष्मीभिः कान्तिभिर्वा Sy.
१७. श्रीमतां परिदृश्यमानाभिः Sy.
१८. शोभनार्थम् Sy.
१९. पूषणम् M. पूर्तिम् Sy.
२०. प्रापयथः Sy.
२१. युवयोः पत्न्याः Sy.
२२. प्रकर्षेणान्वपतन् Sy.
२३. It seems to be the explanation of वयः ॥ अश्वाः is suggested for श्वाश्वा ।
२४. युवाम् Sy.
२५. शोभार्थं Sy.
२६. व्याप्नोति Sy.
२७. वाणी ऋषीणां स्तुतिः Sy.
२८. वाम् is suggested for वा ॥ युवाम् Sy.
२९. हे स्तुत्यर्हावश्विनौ ! Sy.

आ वां वयोऽश्वासो वहिष्ठा अभि प्रयो नासत्या वहन्तु ।
प्र वां रथो मनोजवा असर्जीषः पृक्ष इषिधो अनु पूर्वीः ॥ ७ ॥

आ वां वयः । आवहन्तु । वाम् । गन्तारः । अश्वा । वोढृतमा । सोमम् । प्रति । हे नासत्यौ ! पासर्जि । युवयो । वेगौ । रथ । अन्नानि । सवर्चनीयानि । बहूनि सोमादीनि । प्रति । स्तोतृभिरेषणीय ! इषेरिधौ नामकरण इति ।

पुरु हि वां पुरुभुजा देष्णं धेनुं न इषं पिन्वतमसंक्राम् ।
स्तुतंश्च वां माध्वी सुष्टुतिश्च रसाश्च ये वामनु गातिमग्मन् ॥ ८ ॥

पुरु हि वाम् । हे बहुभोजनौ ! बहु । हि । युवयो । दातव्य धन तावत् । अस्मभ्यम् । प्रीणनम् । अन्नम् । असङ्क्रमणमनपायि । क्षरतम । स्तोतारः । च । युवयो सति । सुष्टुति । च । हे

---

१. वां (प) वयः Λ.
२. आ missing in M. प्रापयन्तु Sy
३. वां (पां) Λ. युवाम् Sy.
४. गगन्तोरो Λ. ५. सोमः Λ. सोमरूपमन्नम्
६. प्रासर्ज्जि M. विसृष्टः Sy
७. वेगौ M. मनोवेगः is suggested for वेगौ ।
८. सोमान् Sy
९. सम्पर्च० is suggested for संवर्च० ॥ सम्पर्चनीयाः Sy. १०. बह्वीः Sy.
११. VM. seems to take इषिधः obj. plu. as Voc. sing. इषिध ॥ एषणीयाः Sy
१२. ०रिधो is suggested for ०रिधौ ।
१३. भरद्वाजस्यार्षम् Dur. भरद्वाजस्य SKN.
१४. पूर्णभुजौ बहुपालकौ वा Sy. यस्माद् हे पुरुभुजौ ! बहुभोजिनौ । अश्विनौ ! तस्माद्युवां ब्रूमः Dur. हे पुरुभुजौ ! बहूनां हविषामभ्यवहन्तारौ ! पालयितारौ ! वा यजमानानाम् SKN.
१५. हि भवति Sy. हिशब्दो यस्मादर्थे SKN.
१६. युवाभ्यां यज्ञे Dur.
१७. दान्तव्यं Λ दानम् Dur. दानम् । यस्मात्प्रभूतदायिनौ युवां तस्मात् SKN.
१८. अतः कारणात् तोऽस्मभ्यम् Sy.
१९. प्रीणयित्रीम् Sy. तर्पयित्रीम् Dur. धेनुं दोग्ध्रीं गाम् SKN.
२०. अन्नस्सं क्र० Λ. अन्नम् । यद्वा इषमेषणीयां धेनुमित्यन्वयः Sy. अन्नलक्षणम् Dur.
२१. मत्तोऽन्यत्रासङ्क्रमणीम् Sy. असक्तामसङ्क्रमणीम् N. 6.29. असङ्क्रमणशीलामनपायिनीमस्मत्तः । अथवा—असङ्क्रमणशीलां द्याम्, इषमिड्हेतूदकमस्मदर्थं प्रक्षारयमिति स्यात् ।
एवमत्र शब्दसारूप्यादर्थाविरोधाच्च 'असक्राम्' इत्यस्य शब्दस्य 'असङ्क्रमणीम्' इत्येष विपरिणाम उपपद्यते । इडभिधेयो द्यौर्वा Dur. असङ्क्रामणीं यावज्जीवमनपायिनीम् । यद्वा समेष्वक्रान्तामगतामस्मत्सजातैरप्राप्तपूर्वामित्यर्थः SKN. २२. क्षरतम् is suggested for क्षरतम ॥ प्रयच्छतम् Sy. प्रक्षारयतम् Dur. क्षारयतं दत्तमित्यर्थः SKN.
२३. स्तुवन्तीति स्तुतः स्तोतारः Sy. किं पुनस्तव् युवयोर्बहुदानमिति ? स्तुतश्च स्तुतशस्त्रवांश्च सोमो युवयोरन्नम् Dur. स्तोतारश्च ये केचित् पृथिव्यां ते सर्वे SKN.
२४. सन्ति is suggested for सति ।
२५. सुष्मतिः Λ. शोभना स्तुतिश्च स्तोतृषु भवतिSy. शोभनाभिः स्तुतिभिः सुष्ठु स्तुतः Dur. शोभना च या काचित् स्तुतिः सर्वा युवयोरेव SKN.

मादयितारौ[1] ! तथा रसा[2]सोमा । च[3] सन्ति । ये । युवयो. । धनम्[4] । अनुगच्छन्ति[5] दीयन्त इत्यर्थ ।

उत मं ऋज्रे[6] पुरंयस्य रघ्वी सुमी॰हे[7] शतं पेरुके[8] चं पक्का ।
शाण्डो दार्द्धिरणिनः स्मद्दिष्टीन्दशं वशासो[9] अभिषाचं ऋष्वान् ॥ ६ ॥

उत म ऋज्रे[10] । अपि च । मह्यम् । ऋजुगामिन्यौ[11] । पुरयस्य यज्ञस्यसम्बन्धिन्यौ । शीघ्रगामिन्यौ वसवे[12] । तथा व[13] । सुमिहापेरुकनाम्नः[14] । अश्ववहनि । अन्नानि तत आहृत्य । यश्च शाण्डो नाम राजा । प्रायच्छत्[15] । हिरण्यालङ्कृतान्[16] । शोभनातिदेशानश्वान्[17] । दश[18] च । वशा[19] । शत्रूणामभिमोढ्न्[20] । दर्शनीयान् दासाश्चेत्यपि[21] नो[22] प्रसादलब्धमिदमिति ।

---

१. मदेयि० Λ. मादयितारावश्विनौ Sy. हे माध्वी ! मधुपौ ! Dur. मधुसम्बन्धि मधुनः पूर्णो माधवः, 'तस्येदम्' (Pa. 4 3.120) इत्यणि गुणाभावश्छान्दसत्वात् । कोऽसौ ? वृतिः । कुत एतत् ? 'यो हं वां मधुनो वृतिराहितो रथचर्षणे । ततः पिबतमश्विना' (RV. VIII. 5. 19.) इति मन्त्रान्तरे दर्शनात् । तेन तद्वती माध्वीम् । 'ईवनिपौ छन्दसि' इति मत्वर्थ ईकारः SKN

२. सोमरसाश्च Sy. रसाश्चाज्यादयः Dur. रसाश्च सोमलक्षणाः SKN.

३. रसाः Sy. य एते Dur.

४. दनम् Λ. दानम् Sy., SKN. रातिं पुरोडाशस्य Dur.

५. अनूद्दिश्याग्मन् देवयजनं प्राप्ताः । अयं भावः । सुष्टुतिं श्रुत्वा देवयजनं प्राप्तान् सोमरसान् पीत्वा स्तोतृभ्यः कामान् प्रयच्छतमिति शेषः Sy. अनुगच्छन्ति सर्व एते युवयोरेव, तस्माद् युवां ब्रवीमि पिन्वतमिति Dur. युवाभ्यां ये प्रदीयन्त इत्यर्थः SKN. N. 6.29, SKN. II. 490.

६. ऋज्रेः Λ.

७. अश्विनोः स्तुतिं कुर्वतो ममाभूताम् Sy.

८. ऋजुगा० Λ. ऋजुगमने Sy.

९. याज्ञस्स Λ. यज्ञस० is suggested for यज्ञस्स० ॥ पुरयनामकस्य स्वभूते Sy.

१०. वधव(य)धवे Λ. वडवे is suggested for वसवे ॥ क्षिप्रगामिन्यौ वडवे Sy.

११. च is suggested for व ।

१२. सुमिहापेरुकनाम्नः Λ. सुमीळ्हपेरुकनाम्नोः is suggested for सुमिहापेरुकनाम्नः ॥ VM. explains together सुमीळ्हे and पेरुके ॥ सुमीळ्हे राज्ञि विद्यमानाः सन्तः । पेरुके राज्ञि विद्यमानानि Sy.

१३. शतं गावो ममाभूवन् Sy.

१४. पक्वान्यन्नानि ममासन् Sy.

१५. ददातु Sy.

१६. हिरण्यवतः Sy.

१७. ०नश्वं Λ. प्रशस्तदर्शनान् रथानश्वान् वा Sy.

१८. दशसङ्ख्याकान् Sy.

१९. पराः Λ. वशासोऽनुगुणान् Sy.

२०. ०सोढुं M. शत्रूणामभिभावुकान् Sy.

२१. पुरुषान् Sy.

२२. ०श्चेत्यश्विनोः प्र० or श्चेत्यपि नः प्र० is suggested for ०श्चेत्यपि नो प्र० ॥ अश्विनोः स्तोतृभ्यो दात् Sy.

सं वां शता नासत्या सहस्राश्वानां पुरुपन्था गिरे दात् ।
भरद्वाजाय वीर नू गिरे दाद्धता रक्षांसि पुरुदंससा स्युः ॥ १० ॥

सं वां शता । सम्प्रायच्छन् । युवयो । स्तोत्रे । अश्वानाम् । शतानि । सहस्राणि च । नासत्यौ । पुरुपन्था नाम राजा । भरद्वाजाय । क्षिप्रम् । हे वीरौ । द्विवचन लुप्तम् । हतानि । रक्षासि । भवन्तु । हे बहुकर्माणौ ।

उत्तरैकपदा—

आ वां सुम्ने वरिमन्त्सूरिभिः ष्याम् ॥ ११ ॥

आ वां सुम्ने । युवयोः । सुखे । विस्तृते । स्तोतृभिः पुत्रादिभि सह । आभिमुख्येन स्याम् ।

VI. 64.

उदु श्रिय उषसो रोचमाना अस्थुरपां नोर्मयो रुशन्तः ।
कृणोति विश्वा सुपथा सुगान्यभूदु वस्वी दक्षिणा मघोनी ॥ १ ॥

उदु श्रिये । उत्तिष्ठन्ति । श्रेयसे । उषस । दीप्यमाना । अपाम् । इव । ऊर्मयः । श्वेतवर्णा । अथैकवदाह—करोति । विश्वानि भुवनानि । शोभनमार्गाणि । शोभनगमनानि च प्रादुर्भूतायामुषसि ।

---

१. सन्वदाति Sy.
२. गृणातीति गीः स्तोता तस्मै Sy.
३. हे अश्विनौ ! Sy.
४. गिरे युवयोः स्तोत्रे भरद्वाजाय मह्यमपि दात् ददातु Sy.
५. हे वीरावश्विनौ ! द्विवचनस्य लुक् Sy.
६. हतानि स्युः Sy.
७. हे बहुकर्माणावश्विनौ ! युवयोरनुग्रहात् Sy.
८. VM. explains गिरे and दात् once only.
९. The *pratika* is supplied by the Editor.
१०. हे अश्विनौ ! युवाभ्यां दत्ते Sy.
११. सुखावहे धने Sy. जलाषम् । स्योनम् । सुम्नमिति सुखनामानि Ngh.3.6.
१२. विद्वद्भिः पुत्रादिभिः सह Sy.
१३. आ समन्तात् Sy. १४. भवेयम Sy.
१५. 'उदु श्रिये' इति षड्ऋचं तृतीयं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमुषोदेवताकम्। अनुक्रम्यते च—'उदु श्रिये षळुषस्यं तु' (KSA. 33.64.P.24.) इति। प्रातरनुवाक उषस्ये ऋतौ त्रैष्टुभे छन्दस्याश्विनशस्त्रे चैतदादिके द्वे सूक्ते। सूत्र्यते हि—'उदु श्रिय इति सूक्ते' (ĀSS. 4.14.) इति Sy.
१६. श्रियर्थम् A. जगतः शोभायै जगद् व्याप्तुं वा Sy. १७. उदकसम्बन्धिनः Sy.
१८. अपामिश्रे .मय M. ऊर्मयः is suggested for ऊकर्मयः ॥ तरङ्गाः Sy.
१९. ०वर्णा M. शुक्लवर्णाः Sy. रुशदिति वर्णनाम N. 2. 20.
२०. अनन्तरमेकवच्निगमः Sy.
२१. विश्वानि स्थानानि Sy.
२२. सुमार्गाणि Sy.
२३. सुखेन गम्यानि Sy.
२४. दुर् is missing in A.

भवत्युदाराणाम्[१] । प्रशस्ता॰[२] धनवती[३] । दक्षिणा[४] ।

भद्रा दंदक्ष उर्विया वि भास्युत्ते शोचिर्भानवो द्यामपप्तन् ।
आविर्वक्षः कृणुषे शुम्भमानोषो देवि रोचमाना महोभिः ॥ २ ॥

भद्रा ददृक्षे[५] । भद्रा । ददृश्यसे[६] त्वम् । अमी[७] च । विभासि । तस्यास्ते[८] । शोचि[९] । भानवश्च[१०] । उदपक्तन्[११] । द्यां[१२] प्रति । त्वमाविष्कृणोषि[१३] । वक्ष[१४] । शोभमाना । उष[१५] । देवि[१६] । दीप्यमाना । तेजोभि[१७] ।

वहन्ति सीमरुणासो रुशन्तो गावः सुभगामुर्विया प्रथानाम् ।
अपेजते शूरो अस्तेव शत्रून्बाधते तमो अजिरो न वोळ्हा ॥ ३ ॥

वहन्ति सीम्[१८] । वहन्ति । एनाम्[१९] । समन्ततोऽरुणवर्णा[२०] । ज्वलन्तो[२१] । गाव॰[२२] । सुधनाम् । विस्तीर्णाम् । प्रथमानाम् । अवगमयति[२३] तमासि । शूर[२४] । योद्धेव[२५] । शत्रून् । सेवयन्(?)तम[२६] । बाधते दिगन्त प्रापयति । यथा । क्षिप्र[२७] । भारस्य वोढा[२८] भार देशान्तर प्रापयति ।

---

१. अभूत् Sy.
२. धनवत्युषाः Sy.
३. समर्धयित्री Sy.
४. VM. ignores उ ।
५. कल्याणी Sy.
६. दृश्य॰ is missing in M. दृश्यसे is suggested for ददृश्यसे ।
७. 'उर्वी च' or 'अमिता च' is suggested for अमी च ॥ विस्तीर्णा च Sy.
८. तव Sy.
९. शोचिः शोचिषः । जसो लुक् । दीप्यमानाः Sy.
१०. रश्मयः Sy.
११. ०पत्त. . M. उदपप्तन् is suggested for उदपक्तन् ॥ उत्पतन्ति Sy.
१२. द्यों प्रति A. अन्तरिक्षम् Sy.
१३. प्रकटीकरोषि Sy.
१४. त्वदीयं रूपम् Sy.
१५. दिवि A.
१६. ०मानो A.
१७. If VM. does not explain उर्विया by अमी च (ऊर्वी च or अमिता च) he ignores it.
१८. वहति A.
१९. सीम् एनामुषोदेवताम् Sy.
२०. न्त is missing in A. लोहितवर्णाः Sy.
२१. ज्वलन्तः is suggested for ज्वलन्तौ ॥ दीप्यमानाः Sy.
२२. गा is missing in M. गावो रश्मयः Sy. किरणा गाव इति रश्मिनामनी Ngh. 1.5. सर्वेऽपि रश्मयो गाव उच्यन्ते N.2.6.
२३. अवगाय॰ A. अपगम॰ is suggested for अवगम॰ ।
२४. वीरः Sy.
२५. सेयमुषोदेवता क्षेप्तेव Sy.
२६. सेयम् is suggested for सेवयन् ।
२७. क्षिप्रगामी Sy.
२८. वोळ्हा सेनायाः । शत्रून् यथा बाधते तथा तमांसि बाधते च Sy.

सुगोत तें सुपथा पर्वतेष्ववाते अपस्तरसि स्वभानो ।
सा न आ वंह पृथुयामन्नृष्वे रयिं दिवो दुहितरिषयध्यै ॥ ४ ॥

सुगोत ते । तव तेजसा । अपि च । शिलोच्चयेष्वपि क्षेत्राणि । सुगमानि । सुपथानि च भवन्ति । किञ्च मङ्गमनसाधनवर्जिते निरालम्बने देशे । अन्तरिक्षम् । तरसि । सुभूतदीप्ते ! सा । अस्माकम् । आह । पृथुगमने ! दर्शनीये ! रयिम् । दिव । दुहित ! एषणीयम् ।

सा वंह योक्त्राभिरवातोषो वर वहसि जोषमनु ।
त्वं दिवो दुहितर्या हं देवी पूर्वहूतौ मंहना दर्शता भूः ॥ ५ ॥

सा वह । सा त्वम् । आवह धनम् । या त्वम् । उक्षभिरागन्ता । अवाताऽवस्थिता सती । उष. ! पर स्तोतृभ्य । पहसि । स्तोतृणामिच्छानन्तरम् । या । त्वम् । दिव । दुहिता ! देवनशीला । भवसि । सा त्व पूर्वा याने प्रातरेव । महनीया । दर्शनीया च भवसि ।

---

१. हे उषोदेवि ! Sy.
२. तप ते० A.
३. दुर्गेष्वपि Sy.
४. सुगानि सुखेन गम्यानि Sy.
५. मार्गाणि Sy.
६. यं गमन० A. गमनसाधनरहिते देशे Sy.
७. अन्तरिक्षमाकाशम् । सामुद्रिकीरपो वा Sy. आप इत्यन्तरिक्षनाम Ngh. 1.3.
८. स्वभूत० is suggested for सुभूत० ॥ हे स्वप्रकाशे ! Sy.
९. त्वम् Sy.
१०. अस्मभ्यम् Sy.
११. आवह is suggested for आह ।
१२. पृथुरथे ! Sy.
१३. धनम् Sy.
१४. अन्तरिक्षसुते ! Sy.
१५. वरं धनं मह्यमावह Sy.
१६. अनडुद्भिरश्वैर्वा Sy.
१७. अप्रतिगता Sy.
१८. अपरं M. वरं is suggested for परं ॥ धनम् Sy.
१९. वहसि is suggested for अपहस M. पहसि A.
२०. ०च्छानान्तरा A. प्रीतिमनु Sy.
२१. हे अन्तरिक्षसुते ! Sy.
२२. द्योतमाना Sy.
२३. पूर्वा याने M. पूर्वाह्णाने is suggested for पूर्वा याने ॥ प्रथमाह्वाने प्रातरनुवाके Sy.
२४. पूजनीया Sy.
२५. सा त्वं दर्शता दर्शनीया भूरिति योजना । या दर्शता भूरित्यन्वये यद्वृत्तेन सामानाधिकरण्यात् भूरित्यस्य निघातो न स्यात् Sy.
२६. VM. ignores ह ।

उत्तरा गतेति ।

उत्ते वयश्चिद्वसतेरपप्तन्नरश्च ये पितुभाजो व्युष्टौ ।
अमा सते वहसि भूरि वामम्षो देवि दाशुषे मर्त्याय ॥ ६ ॥

(उत्ते वयः ।)

VI. 65.

एषा स्या नो दुहिता दिवोजाः क्षितीरुच्छन्ती मानुषीरजीगः ।
या भानुना रुशता राम्यास्वञ्जायि तिरस्तमंसश्चिदुक्थैः ॥ १ ॥

एषा स्या । सा । एषा । नः । दिवो जाता । दुहिता । मानुषी । प्रजा । व्युच्छन्ती । उज्जगार, उषसि हि मानुष्य प्रजा निर्गच्छन्ति । या । भानुना । ज्वलता । रात्रिषु । ज्ञायते । तमः । तिरस्कुर्वन्ती । रक्षांसि । चेति ।

वि तद्ययुररुणयुग्भिरश्वैश्चित्रं भान्त्युषसश्चन्द्ररथाः ।
अग्रं यज्ञस्य बृहतो नयन्तीर्वि ता बाधन्ते तम ऊर्म्यायाः ॥ २ ॥

वि तद्ययुः । विगच्छन्ति । तदानीमेव देच्छन्ति । आरुण्ययुक्तैः । अश्वैः । चित्रञ्च । भान्ति ।

---

१. The *pratīka* is supplied by the Editor. VM. does not explain this stanza here because it has already been explained in the first *maṇḍala*. For VM.'s explanation see RV. I. 124. 12. Sy. explains it again in the following manner:— हे उषो देवि ! ते तव व्युष्टौ सत्यां वयश्चित्पक्षिणोऽपि वसतेर्निवासस्थानादुदपप्तन् । उत्पतन्ति । ये पितुभाजो हविषां सम्भक्तारोऽन्नस्योपार्जका वा । पितुरित्यन्ननामसु पाठात् (Ngh 2.7.) । नरः तेऽपि चोत्पतन्ति । किंच हे उषो देवि ! त्वममा समीपे सते वर्तमानाय दाशुषे हविषां प्रदात्रे मर्त्याय भूरि प्रभूतं वामं धनं वहसि ।

२. 'एषा स्या' इति षडृचं चतुर्थं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभम् । अनुक्रम्यते च—'एषा स्या'(KSA. 33.65. P. 24.) इति । 'उषस्यं तु' इति पूर्वसूक्त उक्तत्वादिदमप्युषोदेवताकम् । प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः Sy.

३. अस्मदर्थम् Sy.

४. दुहिता is written twice in A. दिवः पुत्र्युषा Sy. ५. तमांसि वर्जयन्ती Sy.

६. उद्गिरति । जी (जि) गर्तिगिरतिकर्मा वा (N. 6.8.) इति यास्कः । प्रकाशयतीति यावत् Sy.

७. प्राजा A. भानुना युक्ता Sy.

८. दीप्यमानेन Sy.

९. याम्यासु रात्रिषु । रेफयकारयोर्व्यत्ययः Sy.

१०. ज्ञायन्ते M. दृश्यते Sy. ११. तमांसि Sy.

१२. तीर कुर्वती A. तिरस्कुर्वती Sy.

१३. नक्षत्रादितेजांसि च Sy.

१४. विस्तीर्णं यान्ति Sy.

१५. Something, probably य is missing before देच्छन्ति ॥ तदानीं प्रातःकाले Sy.

१६. अरुणवर्णयुक्तैः Sy.

१७. चित्रं यथा भवति तथा Sy. १८. भवन्ति M.

उषस । कान्तरथा[1] । प्रभितस्य[2] । यज्ञस्य । अग्रम्[3] । नयन्त्य[4] । विबाधन्ते[5] । ता उषस । रात्रे[6] । तम[7] ।

श्रवो[8] वाजमिषमूर्जं[9] वहन्तीर्नि[10] दाशुषे[11] उषसो मर्त्याय[12] ।
मघोनीर्वीरवत्पत्यमाना[13] अवो[14] धात[15] विधते[16] रत्नमद्य[17] ॥ ३ ॥

श्रवो वाजम्[8] । कीर्तिम् । बलम् । अन्नम्[9] । रसञ्च । प्रापयन्त्य[10] । निधत्त[11] । दाशुषे[12] । मर्त्याय । उषस ! धनवत्य[13] । वीरपुरुषवत्[14] । गच्छन्त्य[15] । रक्षणम्[16] । रमणीयम्[17] । परिचरते मह्यम् । अद्य[18] ।

इदा[19] हि वो[20] विधते रत्नमस्तीदा वीराय[21] दाशुषे[22] उषासः[23] ।
इदा विप्राय[24] जरते[25] यदुक्था नि ष्म मावते[26] वहथा पुरा[27] चित्[28] ॥ ४ ॥

इदा[19] हि वः[20] । इदानीम् । एव । हवम्[21] । परिचरते । रत्नम्[22] । अस्ति दातुम्[23] । इदानीम् । वीराय[24] । दाशुषे[25] । हे उषस ! इदानीमेव । मेधाविने[26] । स्तुवते । यदा[27] । उत्थानि[28] । भवन्तीदानीमेवति तथा । निवहथ । मावते[29] । स्तोत्रे । धन पुराचित्तदानीमेव[30] ।

---

१. कान्तिरथाः Sy. चन्द्रश्चन्दतेः कान्तिकर्मणः N. 11.5.
२. त्वं हितस्य M. बृहतः or प्रथितस्य is suggested for प्रभितस्य ॥ वृंहणशीलस्य Sy.
३. अग्रं मुखम् Sy.
४. सम्पादयन्तः Sy.
५. सम्यगपनयन्ति च Sy.
६. अक्तुरूर्म्येति रात्रिनामनी Ngh. 1.7.
७. वाजः A.
८. अहम् M.
९. वहन्त्यः Sy.
१०. नितरां धत्त Sy.
११. हविषां दात्रे Sy.
१२. पुत्रपौत्रादिसहितम् Sy.
१३. अन्नम् Sy. सिनमव; यन्ननामनी Ngh.2.7.
१४. धनम् Sy. "वात्रं रत्नमिति धननामनी Ngh. 2. 10
१५. अद्यं A.
१६. नि वः A.
१७. वः is suggested for हवम् ॥ युष्माकम् Sy.
१८. धनम् Sy.
१९. विराय A.
प्रेरयित्रे Sy.
२०. हविषां दाशुषे यजमानाय दातुम् Sy.
२१. हे is missing in A.
२२. प्राज्ञाय दातुं वो रत्नमस्ति Sy.
२३. यथा M.
यस्मिन् विप्रे Sy.
२४. उक्थानि is suggested for उत्थानि ॥ उक्थनामकानि स्तोत्राणि Sy.
२५. विद्यन्ते Sy.
२६. मत्सदृशाय यजमानाय Sy.
२७. पुरापि रत्नं मह्यं दत्तम् Sy.
२८. VM. ignores स्म ।

इदा हि तं उषो अद्रिसानो गोत्रा गवामङ्गिरसो गृणन्ति ।
व्यर्केण विभिदुर्ब्रह्मणा च सत्या नृणामभवद्देवहूतिः ॥ ५ ॥

इदा हि ते । इदानीम् । ते । उष ! आद्यमाणसमुच्छ्रितदेशे । गवामश्वभूतानाम् । नामानि । स्तोत्रपरा अङ्गिरस. । गृणन्ति । विभिदुश्चान्धकारम् । हविषा । स्तोत्रेण । च त्वा परिचरन्तस्तथा त्वय्युदितायाम् । सत्य । भवति । मनुष्याणाम् । यज्ञ ।

उच्छा दिवो दुहितः प्रत्नवन्नो भरद्वाजवद्विधते मघोनि ।
सुवीरं रयिं गृणते रिरीह्युरुगायमधि धेहि श्रवो नः ॥ ६ ॥

उच्छा दिवः । प्युच्छ देशे(?) दिव । दुहितरेकम् ! अस्मभ्यम् । प्रश्नेभ्य इव । तदेवाह—रद्वाजार्हं ? स्तुवते मह्यम् । धनवति ! तथा पुत्रपौत्रयुक्तम् । धनञ्च । मह्य स्तुवते । देहि । तथा बहुभिर्गेयम् । अन्नम् । अस्मभ्यम् । अधिधेहि ।

---

१. सद्यः Sy.
२. तव प्रसादात् Sy.
३. आद्रियमाण is suggested for आद्यमाण ॥ आवृतसानो Sy.
४. स is missing in A.
५. गोत्रा सङ्घान् Sy.
६. उत्सृजन्ति । तथा च निगमान्तरम् । 'गवां गोत्रमुदसृजो यदङ्गिरः (RV. II.23.18.) इति Sy.
७. विभुवश्चा० A तमांसि विदारयन्ति Sy.
८. हविषा seems to be the explanation of अर्केण. Cf. Ngh. 2.7. अर्चनीयेन Sy.
९. सत्यफला Sy.
१०. अभवत् Sy.
११. नेतृणां तेषामङ्गिरसाम् Sy.
१२. देवविषया स्तुतिः Sy.
१३. VM. ignores हि and वि ॥ हि एव Sy.
१४. उच्च M. उच्छ is suggested for प्युच्छ ।
१५. दिवि is. suggested for देशे ॥ तमांसि वर्जय Sy.
१६. ०तरे कृ स्म० A. ०रुषः ! is suggested for ०रेकम् ।
१७. अस्मदर्थम् Sy.
१८. प्रत्नेभ्यः is suggested for प्रश्नेभ्यः ॥ पुरातनेभ्यः Sy.
१९. Something probably भ is missing before रद्वाजा० । भरद्वाज इव is suggested for रद्वाजार्हः ॥ भरद्वाजवदिति वचनादन्योऽप्यस्ति भरद्वाजः । तथा च ब्राह्मणम्—'प्राणो वै भरद्वाजवत्' इति Sy.
२०. स्तुतिं कुर्वते मह्यम् Sy.
२१. धनपति A. हे मघोनि ! Sy.
२२. कल्याणपुत्रपौत्रादियुक्तम् Sy.
२३. बहुभिर्गातव्यम् Sy.
२४. अधिकं प्रयच्छ Sy.

VI. 66.

वपुर्नु तच्चिकितुषे चिदस्तु समानं नाम धेनु पत्यमानम् ।
मर्तेष्वन्यद्दोहसे पीपाय सकृच्छुक्रं दुदुहे पृश्निरूधः ॥ १ ॥

वपुर्नु । रूपम् । क्षिप्रम् । त ज्ञा । तु । प्रादुर्भवतु । समानाकार सदृशा हि मरुत । पदार्थाना नामकम् । प्रीणयितुम् । सदा गच्छत् । कि तदित्याह—मर्त्येषु । अन्यदेकदेश तस्य रूपस्य मर्त्यानाम् । अभिलषितदोहार्थम् । पृश्नि पीवाय । दिवि चान्यदेवेषु सकृत् । पृश्नि । आत्मीयमूध । शुक्र दीप्तरूपम् । दुदुह इति ।

ये अग्नयो न शोशुचन्निधाना द्विर्यत्त्रिर्मरुतो वावृधन्त ।
अरेणवो हिरण्ययास एषां साकं नृम्णैः पौंस्येभिश्च भूवन् ॥ २ ॥

ये अग्नयः । य । अग्नय । इव । काष्ठे समिध्यमाना । दीप्यन्तेऽलङ्कृता । ये च प्रादुर्भूता ।

---

१. 'वपुर्नु तत्' इत्येकादशर्चं पञ्चमं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभं मारुतम् । तथा चानुक्रम्यते—'वपुर्नवैकादश मारुतम्' (KSA. 33.66. P. 24.) इति । व्यूळ्हे दशरात्रे षष्ठेऽहन्याग्निमारुत इदं सूक्तं मारुतनिविद्धानम् । सूत्रितञ्च—'हविष्पान्तं वपुर्नु तत्' (ĀŚS. 8.8) इति । वैश्वदेवे पर्वणि मारुतसप्तकपालस्य 'प्र चित्रमर्कम्' इति याज्या । 'प्र चित्रमर्कं गृणते तुरायेति नवानुयाज्याः' (ĀŚS.2.16.) इति । एकादशिने मारुते पशौ 'प्र चित्रमर्कम्' इत्येषैव याज्या । सूत्रितञ्च—'प्र चित्रमर्कं गृणते तुरायारा इवेदचरमा अहेव' (ĀŚS. 3.7.) इति Sy.

२. नु is missing in A.

३. मरुतां रूपम् Sy.

४. तज्ज्ञः A. तज्ज्ञातम् is suggested for त ज्ञा ॥ तत्प्रसिद्धम् Sy.

५. तै (कै) A. Something seems to be omitted here. स्तोत्रे is suggested for नु ॥ विदुषे स्तोत्रे Sy.

६. ऐकरूपम् । मरुतः सर्वदा समानरूपाः । तथा च निगमान्तरम्—'अज्येष्ठासो अकनिष्ठास एते' (RV. V.60.5.) इति Sy.

७. स्थिराणामपि नामकम् Sy.

८. प्रीणयितृ Sy.

९. सर्वदा गच्छत् Sy.

१०. किञ्च तद्रूपं मर्त्यलोके Sy.

११. अन्यदोषधिवनस्पत्यादिकम् Sy.

१२. मर्तानाम् A.

१३. ०देहार्थ A. कामान् दोग्धुम् Sy.

१४. पीपाय is suggested for पीवाय ॥ आप्याययति Sy.

१५. संवत्सरस्य वर्षासु Sy.

१६. किञ्च मरुतामेव निर्देशात् पृश्निरन्तरिक्षम् Sy.

१७. उदकम् Sy.

१८. शुक्लवर्णम् Sy.

१९. दुन्दुह A. क्षरति Sy.

२०. VM. ignores चित्॥ चिदिति पूरकम Sy.

२१. मरुतः Sy.

द्विद्विगुणम्[1] । त्रिस्त्रिगुणञ्च[2] । मरुतोऽथरुतो[3] । वावृथन्त[4] । रेणुवर्जिता[5] । हिरण्मयाश्च[6] । एषाम्[7] । साकम्[8] । धनैः[9] । बुधैः[10] । च । प्रादुर्भवन्ति[11] ।

रुद्रस्य[12] ये मीळ्हुषः सन्ति पुत्रा यांश्चो नु दाधृविर्भरध्यै[13] ।
विदे हि माता महो मही[14] पा सेत्पृश्निः सुरुचे[15] गर्भमाधात् ॥ ३ ॥

रुद्रस्य[16] । रुद्रस्य । सेक्त[17] । ये[18] । भवन्ति । पुत्रा । यान्[19] । चेव । धारयन्[20] । अङ्गाना हि भरणाय भवन्ति[21] न म्रियते । तेषा माता । प्रत्याख्यातासीत्[22] । महतोऽपि[23] । मही[24] । सा । पृश्नि[25] । स[26] । इव[27] । शोभनाभवनाय मरुद्गणाय । गर्भम्[28] । आहितवती[29] ।

न य ईषन्ते जनुषोऽया न्वन्तः सन्तोऽवद्यानि पुनानाः[30] ।
निर्यदुहे शुचयोऽनु जोषमनु श्रिया तन्वमुक्षमाणाः ॥ ४ ॥

न य ईषन्ते[31] । न । ये[32] । गच्छन्ति । जाता मनुष्यान्[33] । शीघ्रम् । गन्तव्यानि स्थानानि[34] ।

---

१. द्विद्विगु० A.
२. त्रिः is missing in A.
३. मिरुतोऽथरूतो A. अथरुतो seems to be redundant. Only मरुतः । is sufficient.
४. वा प्रथन्त A. वावृधन्त is suggested for वावृथन्त ॥ ववृधन्त इच्छानुरूपं वर्धन्ते । संहितायां दीर्घश्छान्दसः Sy.
५. रेणुरहिताः Sy.
६. हिरण्मयालङ्कारांश्च Sy.
७. मरुतां रथाः Sy.
८. सार्धम् Sy.
९. ते मरुतो धनैः Sy.
१०. वीर्यैः or बलैः is suggested for बुधैः ।
११. तथा च निगमान्तरम् 'ये पृषतीभिर्ऋष्टिभिः (RV.I.37.2.) इति Sy.
१२. रुद्रस्य is missing in A. M.
१३. सेक्तुः is suggested for सेक्तः ॥
१४. मरुतः Sy.
१५. धरित्री Sy.
१६. भवति is suggested for भवन्ति ॥ भर्तुं क्षमा भवति Sy.
१७. सर्वज्ञाता Sy. १८. महताम् Sy.
१९. महती Sy.
२०. सा is suggested for स ।
२१. एव is suggested for इव ।
२२. शोभन० is suggested for शोभना ॥ नृणां सम्यक् भवनाय Sy.
२३. गर्भाम् A. उदकम् Sy.
२४. आदधाति Sy.
२५. VM. ignores नु and हि ।
२६. प्रसिद्धा मरुतः Sy.
२७. जाता मनुष्यात् A. जातान् म० is suggested for जाताम ॥ जनान् स्तोतॄन् प्रति Sy.
२८. अयेन गमनसाधनेन Sy.

शरीरस्यान्त[1] । सन्त[1] । अवद्यानि[2] । पुनाना[3] । निर्दुहन्ति[4] । दीप्ता[5] । यदोदकम्[6] । इच्छायाम्[7] । तदानीमनुगता । श्रिया[8] भवन्ति । विस्तृतमुदकम्[9] । सिञ्चन्त[9] ।

मक्षू॒ न येषु॑ दो॒हसे॑ चि॒दया॒ आ नाम॑ धृ॒ष्णु मारु॑तं॒ दधा॑नाः ।
न ये स्तो॒ना अ॒यासो॑ म॒ह्ना नू चि॑त्सु॒दानु॒रव॑ यासदु॒ग्रान् ॥ ५ ॥

मक्षू न[10] । ये न । देवेषु[11] । धर्षणशीलम्[12] । मारुतम्[13] । नाम[14] । आदधानामुच्चारयन्तो मनुष्या । शीघ्रमुदारेषु[15] । धनस्य[16] दोहार्थम्[17] । गन्तारो भवन्ति[18] । न चे[19] । ये[20] । चोरा[21] । गन्तार[22] । महत्त्वेन । तानुदगूर्णान्[23] । क्षिप्रम् । एव । शोभनदानो[24] यजमान । अवेजते[25] क्रोधरहितान् करोति । तौ[26] नयतिपर्यायस्तौ नयति[26] ।

त इदु॒ग्राः शव॑सा धृ॒ष्णुषे॑णा उ॒भे यु॑जन्त॒ रोद॑सी सु॒मेके॑ ।
अधा॑ स्मैषु॒ रोद॑सी स्व॒शोचि॒रामं॑वत्सु॒ तस्थौ॒ न रोक॑ः ॥ ६ ॥

त इदुग्राः[27] । ते[28] । इत्[29] । शवसा[30] । धर्षणशीलसेना[31] । सयोजयन्ति[32] । उभे । द्यावापृथिव्यौ[33] । अत्यन्त-

---

१. किं तेषां रक्षणीयत्वाभावादगमनाभावो नेत्याह । अन्तः सन्तः सर्वेषां हृदि वर्तमाना एव । तथा च निगमान्तरम्—'प्राणा वै मरुतः स्वापयः' (ΛB 3 16) इति । अतः सर्वप्राणिनां हृदि वर्तमानत्वात्तेषां गमन नास्तीति । अध्यात्मं प्राणरूपेणावस्थानं दर्शित भवति शीघ्रगामित्वं तु तेषामधिदैवतरूपेणेति द्रष्टव्यम् Sy.
२. अपद्यानि Λ. पापानि Sy.
३. शोधयन्तः Sy.
४. निर्वहन्ति M नितरां वुहन्त्युदकम् Sy.
५. दीप्यमाना मरुतः Sy.
६. स्तोतृणां काममनु Sy.
७. दीप्त्या Sy.
८. आत्मीयं शरीरं प्रकाशयन्तः ॥ यद्वा तन्वं विस्तीर्णं यथा भवति तथा Sy.
९. सिञ्चन्तम् M.
भूमि सिञ्चन्तो भवन्ति Sy.
१०. ये is unnecessary.
११. देवेषु M प्रसिद्धेषु मरुत्सु Sy.
१२. धर्षकम् Sy.
१३. मरुत्संज्ञकम् Sy.
१४. शस्त्रम Sy.
१५. ०धाना उच्चा० is suggested for ०धानामुच्चा० ।
१६. क्षिप्रम् Sy.
१७. कामान् दोग्धुं क्षमा भवन्ति Sy.
१८. ०रो न भवति Λ. उपगच्छन्तः स्तोतारः Sy.
१९. च is suggested for चे ॥ नेति सम्प्रत्यर्थे Sy.
२०. ये थे M.
२१. स्तेनास्तिरोहिता वा स्तोतृधनानामपहर्तारः Sy.
२२. महत्त्वेन युक्ता भवन्ति Sy.
२३. तान् क्रुद्धान् Sy.
२४. शोभनहविर्दानो यजमानः Sy.
२५. अवयजते । अपगतक्रोधान् करोति Sy.
२६. स्ते नय० Λ. नौ सम्प्रतिपर्यायौ is suggested for तौ नय०....नयति ।
२७. VM. ignores चित् ।
२८. क(ल)ळ दुग्राः Λ.
२९. ते is missing in A मरुतः Sy.
३०. उत् Λ.
३१. बलेन वेगेन युक्ताः Sy.
३२. धर्षकसेनाः Sy.
३३. वृष्ट्या पृथिवीं तर्पयन्तीत्यभिप्रायः Sy.

मेकचर्यो[1] । अथ[2] । खलु[3] । एषु[4] मरुत्सु । रुद्रस्य पत्नी मरुता माता[5] । स्वभूतदीप्तिस्तिष्ठति । न च । चल[6]सु मरुत्सु । आतिष्ठति[7] । दीप्तिर्भूयोभूय. स्फुरन्ती[8]त्यर्थ. ।[9]

अनेनो वो मरुतो यामो अस्त्वनश्वश्चिद्यमजत्यरथीः ।
अनवसो अनभीशू रजस्तूर्वि रोदसी पथ्या याति साधन् ॥ ७ ॥

अनेनः[11] । पापरहितम्[11] । युष्माकम्[12] । गमनमिह[13] । अस्तु[14] । य यामम् । अश्ववर्जित.[15] । अरथीः[15] । च[16] । प्रेरयति स्तोता स्तोत्रैरवात्मान प्रापयन्ती[17]त्यर्थ । सजित[18] । अभीशुवर्जितश्च[19] । रजस. प्रेरको मरुता गण: । विगच्छति[20] । द्यावापृथिव्यौ । मार्गा[21] । स्तोतृणामभिलषितान् सासय[1] द्यावापृथिव्योर्मध्येन गच्छन्तीत्यर्थः[22] ।

नास्य वर्ता न तरुता न्वस्ति मरुतो यमवथ वाजसातौ ।
तोके वा गोषु तनये यमप्सु स व्रजं दर्ता पार्ये अध द्योः ॥ ८ ॥

नास्य[23] । न । अस्य[24] । गन्ताऽभिगन्ता[25] । न[26] । अपि[27] । तरिता[28] । मनुष्यस्य विद्यते[29] । हे मरुत. ! यम्[30] ।

---

१. ०थिव्यापत्यन्त० A. सुरूपे Sy.
२. अध स्म अपि च Sy.
३. येषु मरुत्सु Sy.
४. रुद्रस्य पत्नी माध्यमिकी वाक् Sy.
५. स्वदीप्तिर्वर्तते Sy.
६. बलवत्सु is suggested for चलं ....सु ।
७. निःसरत्येवेत्यर्थः Sy.
८. दीप्तिर्बाधको वा Sy.
९. स्मरन्ती० M. स्फुरती० is suggested for स्फुरन्ती० ।
१०. VM. ignores उग्रा ।
११. पापरहितं यथा भवति तथा Sy.
१२. युष्माकं सम्बन्धी Sy.
१३. रथः Sy.
१४. प्रादुर्भवतु Sy.
१५. अश्वरहितः Sy.
१६. रथिः सारथिः । न रथिररथीः । असारथिः Sy.
१७. अपि Sy
१८. ०त्रैरपात्मा० A.
१९. प्रापयती० is suggested for प्रापयन्ती० ।
२०. सज्जितः M. अश्ववर्जितः is suggested for सजितः ॥ पथ्यदनरहितः Sy.
२१. पाशरहितोऽपि Sy.
२२. उदकस्य Sy.
२३. अपिगच्छति M. विविधं गच्छति Sy.
२४. मार्गाः M. मार्गान् is suggested for मार्गा ॥ पथोऽन्तरिक्षमार्गान् Sy.
२५. सासायं A. साधयन् is suggested for सासयं ॥ स्तोतॄणां कामान् साधयन् Sy.
२६. गच्छती० is suggested for गच्छन्ती० ।
२७. VM. ignores मरुतः !
२८. अस्य जनस्य Sy.
२९. प्रेरकः Sy.
३०. नास्ति Sy.
३१. It seems to be the explanation of नु ॥ च Sy.
३२. तरुता हिंसिता Sy.
३३. It goes with अस्य ।
३४. विवृते A.

रक्षथ । युद्धे । तोकादिनिमित्तम् । य युद्धध्वसथ । स । शत्रोर्दीप्तस्य । गोव्रजम् । सङ्ग्रामस्य वार्येऽहनि गवामाहरणाय । दत्ता भवति ।

प्र चित्रमर्कं गृणते तुराय मारुताय स्वतवसे भरध्वम् ।
ये सहांसि सहसा सहन्ते रेजते अग्ने पृथिवी मखेभ्यः ॥ ९ ॥

प्र चित्रम् । प्रभरध्वम् । चित्रम् । अन्नम् । स्तूयमानाय । क्षिप्राय । मारुताय । स्वभूतलबलाय गणाय । ये मरुत । बलेन । बलानि । अभिभवन्ति । तेभ्यो महनीयेभ्यः । पृथिवीयम् ।

---

१. सङ्ग्रामे Sy.
२. का is missing in M. आदि refers to गोषु, तनये and अप्सु ॥ पुत्र ! तनये पौत्रे धने वा गोषु वाप्सु वा निमित्तभूतेषु Sy.
३. अवथ is suggested for अवसथ ।
४. दीप्तस्यापि विजिगीषोर्वा शत्रोः Sy.
५. गोवृजं Λ. गवां सङ्घम् Sy.
६. पार्ये is suggested for वार्ये ॥ सङ्ग्रामे Sy. ७. दर्ता भवति is suggested for दत्ता भवति ॥ दारयिता भवति Sy.
८. VM ignores अध ॥ अधापि च Sy.
९. भरद्वाजस्येदमार्षम् Dur. भरद्वाजस्य SKN.
१०. प्रहर Λ. हे अग्ने ! त्वत्सहायभूता ऋत्विजस्त्वं च सर्वे यूयं प्रभरत । यथा लोके बहुष्वेककार्यकरेषु मुख्यमेकं सम्बोध्य यूयमेव कुरुतेति प्रार्थना तद्वदत्रापि मुख्यमग्निमेकमेव सम्बोध्य प्रभरध्वमिति बहुवचनप्रयोगः Sy. प्रहरध्वम् Dur. प्रोपसर्गो भरध्वमित्याख्यातेन । . . प्रहरत प्रापयत प्रोच्चारयतेत्यर्थः । अथवा—अर्कमन्नं हविर्लक्षणं तद्धेतुमाहवनीयं प्रति प्रापयत । ऋत्विजां चायं प्रैषः SKN.
११. दर्शनीयम् Sy. चायनीयम् Dur. विचित्रम् SKN. १२. अन्नं हविः Sy. स्वधार्क इत्यन्ननामसु पाठात् (Ngh. 2.7) स्तोमम् Dur. मन्त्रं स्तुतिलक्षणम् SKN.
१३. शब्दं कुर्वते स्तूयमानाय वा Sy. स्तुवते स्तनयित्नुशब्देन कृत्स्नं जगदुपशब्दायतेDur. कर्मणि शतृप्रत्ययः गीर्यमाणाय स्तोतव्यायेत्यर्थःSKN.
१४. त्वरिताय Sy. त्वरमाणाय Dur. तुर्वतेर्हिंसार्थस्य रूपम् । तुर्वित्रे शत्रूणां हिंसित्र इत्यर्थः । 'त्वर त्वरणे' अस्य वा । त्वरित्रे क्षिप्रकारिणे SKN. १५. मरुतां गणाय Sy. Dur. मरुतां समूहाय SKN. १६. स्वभूतबलाय is suggested for स्वभूतलबलाय ॥ स्वात्मबलावष्टम्भिने Dur. स्वबलाय SKN.
१७. मा तः M. मारुतायेति तद्धितवृत्तावन्तर्भूतानामपि मरुतां बुद्धया प्रविभागात् य इति प्रत्यवमर्शः । यथा महाभाष्ये 'अथ शब्दानुशासनम् । केषां शब्दानाम् ?' (PMBH. 1.1. 1.) इति । यथा वा लोके । राजपुरुषइत्युक्ते कस्य राज्ञः ? इति Sy. कीदृशानां पुनर्मरुतां गणाय यस्मै प्रभरध्वमिति ? ये मरुतः Dur.
१८. स्वेन बलेन Dur. बलेनात्मीयेन SKN.
१९. शत्रूणां बलानि Sy. परेषां बलानि Dur. बलानि शत्रूणां स्वभूतानि SKN.
२०. सहिरभिभवे । अभिभवन्ति SKN.
२१. यच्छुतेस्तच्छ्रुतिः । तेभ्यः SKN.
२२. मंहनीयेभ्यो मरुद्भ्यो भयात् Sy. मरुद्भ्य इत्यर्थः Dur. मख इति महन्नाम । यद्वा मह इत्यस्य महन्नाम्नो हकारस्य खकारः । मरुद्भ्य इत्यर्थः । अथवा महो यज्ञस्तमङ्गभावोपगमनेन वृष्टिप्रदानद्वारेण वा कुर्वन्ति 'तत्करोति०' इति णिच् । ण्यन्तात् 'णेरनिटि' (Pa. 6.4.51.) इति णिलोपः । मखा यज्ञकारिण इत्यर्थः । तेभ्यः SKN.
२३. पृथिव्यपि किमुतान्यानि भूतानि SKN.

अग्ने[1] ! कम्पते[2], मरुता बलमग्नेर्निवेदयति ।

त्विषीमन्तो अध्वरस्येव दिद्युत्तंपुच्यवसो जुह्वो३ नाग्नेः ।
अर्चत्रयो धुनयो न वीरा भ्राजज्जन्मानो मरुतो अधृष्टाः ॥ १० ॥

त्वषीमन्तः[3] । दीप्तिमन्त. । अध्वरस्येव[4] । उत्तरवेद्या द्योतमानानि[5] । क्षिप्रगमनाः । ज्वालाः[6] । इव[7] । अग्नेः[8] । अर्चनीया । शत्रूणा कम्पयितार[9] । इव । वीराः[10] । दीप्यमान प्रादुर्भावा । मरुत. । शत्रुभिरनाधृष्टा[11] ।

तं वृधन्तं मारुतं भ्राजदृष्टिं रुद्रस्य सूनुं हवसा विवासे ।
दिवः शर्धाय शुचयो मनीषा गिरयो नापउग्रा अस्पृधन्न ॥ ११ ॥

तं वृधन्तम्[12] । तम्[13] । वर्धमानम् । मारुतम्[14] । दीप्यमानायुधम्[15] । रुद्रस्य । सूनु[16] गणम् । स्तोत्रेण । परिचरामि । दिव.[17] । वेनाय[18] । शुचीनि[19] । स्तोत्राणि[20] । मेघा.[21] । इव । व्याप्ता.[22] । उद्गूर्णाः[23] । इतरेतर स्पर्धन्ते[24] ।

---

१. अग्ने is suggested for अने ॥ हे अग्ने ! Sy. य एवङ्गुणयुक्ता मरुतस्तेषां यो गणस्तस्मै प्रभरध्वं चित्रमर्कम् । त्वमपि हे अग्ने ! वहैतद् द्रव्यं तेभ्यः । यदा तावन्मारुतमेव केवलं हविस्तदैवमग्निरप्रधानः । यदा पुनराग्निमारुतं तदा भरध्वं चित्रमर्कमग्नये मारुताय च गणायेति स्तोतॄन् सम्बोध्य ततोऽग्निं ब्रवीति हे भगवन्नग्ने ! शृणु त्वमप्येतमर्कमेवङ्गुणयुक्तैर्मरुद्भिः सह गृहाणेति Dur.

२. बिभेति कम्पते वा Dur. बिभेति । भयेन वा कम्पते SKN. भ्यसते रेजत इति भयवेपनयोः N.3.21., SKN. II. 192.

३. यज्ञस्येव Sy.

४. ०मानोनि Λ, द्योतमानाः Sy.

५. रश्मयः Sy.

६. इव is missing in M.

७. अ is missing in M.

८. सपत्नान् कम्पयन्तः Sy.

९. शूराः Sy.

१०. दीप्यमाना प्रा० Λ. ०मानप्रा० is suggested for ०मानं प्रा० ॥ दीप्तशरीराः Sy.

११. परैरनभिभूताश्च भवन्ति Sy.

१२. त प्रधन्त Λ.

१३. प्रसिद्धम् Sy. १४. मरुद्गणम् Sy.

१५. भ्राजमानऋष्टिम् Sy.

१६. पुत्रम् Sy. १७. स्तोतुः Sy.

१८. वेगाय is suggested for वेनाय ॥ मारुताय बलाय Sy. तृक्षः शर्ध इति बलनामनी Ngh.2.9.

१९. निर्मलाः Sy. २०. स्तुतयः Sy.

२१. गिरिर्व्रज इति मेघनामनी Ngh.1.10.

२२. आप्नुवन्तः Sy.

२३. उत् वर्णा Λ. २४. अस्पर्धन्त Sy.

VI. 67.

विश्वेषां वः सुतां ज्येष्ठतमा गीर्भिर्मित्रावरुणा वावृधध्यै ।
सं या रश्मेव यमतुर्यमिष्ठा द्वा जनाँ असमा बाहुभिः स्वैः ॥ १ ॥

विश्वेषाम् । सर्वेषामेव । विद्यमानानाम् । युष्माकम् । अतिशयेन प्रशस्यौ । स्तुतिभिः । मित्रावरुणौ । प्रवृत्तोऽहं वर्धयितुम् । सम येमतु । यौ । मदीनेव । अतिशयेन यन्तारौ । द्वौ....। जनान् । असदृशौ केनचिदपि । बाहुभि । आत्मीयैः ।

इयं मद्वां प्र स्तृणीते मनीषोप प्रिया नमसा बर्हिरच्छं ।
यन्तं नो मित्रावरुणावधृष्टं छर्दिर्यद्वां वरूथ्यं सदानू ॥ २ ॥

इयं मद्वाम् । इयम् । स्तुति । मन्त्रो निर्गता । वाम् । आच्छादिदयति । उपगच्छति । प्रिया । हविषा सह । यज्ञे । यच्छतम् । अस्मभ्यम् । मित्रावरुणौ ! अनभिभूतम् । गृहम् । यत् । युवयोः । वरणीय विद्यते । शोभनदानौ ।

---

१. 'विश्वेषां वः' इत्येकादशर्चं षष्ठं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभं मैत्रावरुणम् । तथा चानुक्रम्यते—'विश्वेषां मैत्रावरुणम्'(KSA.33.67.p.24.) इति । सूक्तविनियोगो लैङ्गिकः । मैत्रावरुणे पशौ 'आ यातं मित्रावरुणा' इति पशुपुरोडाशस्यानुवाक्या । सूत्रितञ्च—'आ यातं मित्रावरुणा सुशस्त्या नो मित्रावरुणा हव्यजुष्टिम् (ĀŚS.3.8.) इति । व्यूळ्हे दशरात्रे सप्तमेऽहनि प्रउगशस्त्रे 'प्र यद्वाम्' इति मैत्रावरुणस्तृचः। सूत्रितञ्च—'प्र यद्वां मित्रावरुणा स्पूर्धन्ना गोमता नासत्या रथेन (ĀŚS. 8. 9.) इति Sy.

२. वेद्यमा० M. सतां मध्ये Sy.

३. वाम् Sy.

४. ज्येष्ठतमौ Sy.

५. प्रवृत्तोऽस्मि Sy.

६. संयेमतुः is suggested for समं येमतुः ॥ संयच्छतः Sy.

७. विन M. रश्मिनेव is suggested for मदीनेव ॥ रश्मिनेवाश्वान् Sy.

८. ०शयौ यन्ता० M. यन्तृतमौ Sy.

९. Something seems to be missing here in the mss. द्वौ सहितौ Sy.

१०. कौचिद० M. विषमौ । 'त्रिरश्मिं हन्ति चतुरश्रिरुग्रः' (RV.I.152.2) इति निगमान्तरेणासाम्यं दर्शितम् Sy.

११. बाहुभिरिति बहुवचनं पूजार्थम् Sy.

१२. मम Sy.

१३. युवाम् Sy.

१४. आच्छादयति is suggested for आच्छादिदयति ॥ प्रच्छादयति Sy.

१५. हे प्रियौ ! युवाम् Sy.

१६. अन्नेन हविषा Sy.

१७. युवयोर्यज्ञम् Sy.

१८. गच्छतम् M. प्रयच्छतम् Sy.

१९. ग्रहम् A.

२०. युवयोः सम्बन्धि युवाभ्यां देयम् Sy.

२१. शीतवातातपानां वारयितृ भवति Sy.

२२. VM. ignores अच्छ ।

आ यातं मित्रावरुणा सुशस्त्युप प्रिया नमसा हूयमाना ।
सं यावप्नःस्थो अपसेव जनाञ्छुधीयतश्चियतथो महित्वा ॥ ३ ॥

आ यातम् । उपागच्छतम् । मित्रावरुणौ[1] ! शोभन शसन शस्त्रम् । प्रियौ[2] । हविषा[3] । हूयमानौ[4] । सङ्गच्छेथे[5] । यौ सर्वैर्जनै[6]. । यथा[7], कर्मस्थितो मनुष्य[8] । कर्मणा जनै. सङ्गच्छते । तौ युवा महत्त्वेन । आत्मन श्रवणमिच्छत[9] । जनान् । प्राप्नुथ[10] इति[11] ।

अश्वा न या वाजिना पूतबन्धू ऋता यद्गर्भमदितिर्भरध्यै ।
प्र या महि महान्ता जायमाना घोरा मर्तीय रिपवे नि दीधः ॥ ४ ॥

अश्वा[12] न या । अश्वौ । इव । यौ । बलिनौ । मुक्तबन्धनौ[13] । सत्यौ । यौ । गर्भभूतौ । अदिति[14] । भर्त्तुमैच्छत्[15] । प्रादुर्भावयतः । यौ । महत्त्वम्[16] । महान्तौ । जायमानौ तौ । घोरौ[17] । रूपं[20] । मनुष्यायादितिः[21] । निदधारेति[22] ।

विश्वे यद्वां भंहना मन्दमानाः क्षत्रं देवासो अदधुः सजोषाः ।
परि यद्भूथो रोदसी चिदुर्वी सन्ति स्पशो अदब्धासो अमूराः ॥ ५ ॥

विश्वे यद्वाम् । विश्वे[23] । यत्[24] । युवाम् । महत्त्वेन । मादयन्ते[25] । युवयोर्देवा[26] । सङ्गताः[27] । बलम् ।

---

१. मित्रः वरु A.
२. विश्वस्य प्रियौ Sy.
३. अन्नेन हविषा स्तोत्रेण वा Sy.
४. स्तूयमानौ Sy.
५. संयच्छथः Sy.
६. सर्वैर्जनैः M.
७. यथा should immediately follow कर्मणा ।
८. मनुष्यः is suggested for मनुष्य ॥ कर्मण्यधिकृतः पुरुषः Sy. अपोऽप्न इति कर्मनामनी Ngh.2.1.
९. ०त्मनश्रव० A. श्रुधिमन्नं यशो वात्मन इच्छतः Sy.
१०. संयच्छथः Sy.
११. VM. ignores चित् ।
१२. अश्वान्नया A.
१३. पूतस्तोत्रौ Sy.
१४. अदितिर्देवी Sy.
१५. बभार Sy.
१६. महतः Sy.
१७. महत्तरौ प्रभूतौ मित्रावरुणौ Sy.
१८. जायमानावेव Sy.
१९. घातकौ Sy.
२०. रिपवे is suggested for रूपे ॥ हिंसकाय Sy.
२१. मर्त्याय Sy.
२२. निदधारादितिः स्वोदरे Sy.
२३. सर्वे Sy.
२४. यौ Sy.
२५. स्तुवन्तः Sy.
२६. युवयोः goes with बलम् ।
२७. परस्परं प्रीतियुक्ताः Sy.

अदधुः[1]। यं[2]। च। विस्तृते[3]। द्यावापृथिव्यौ। परिभवथ। तदानीं युवयोर्भवन्ति। तेजांसि[5]। अहिंसितानि[6]। अमूढानि[7]।

ता हि क्षत्रं धारयेथे अनु द्यून्दंहेथे सानुमुपमादिव द्योः।
दृळ्हो नक्षत्र उत विश्वदेवो भूमिमातान्द्यां धासिनायोः॥ ६॥

ता हि क्षत्रम्। तौ। हि। वलम्। धारयेथे। दिवसेषु[9]। दृंहेथे[10] च। दिव[11]। समुच्छ्रितमादित्यम्[12]। वंशतिव स्थूणा[13]? ततश्च[14]। दृढ। दिवि व्याप्नुवान[15]। विश्वदेव आदित्यो[16] भवति तावेमौ। भूमिम्। दिवञ्च। मनुष्यस्य[18]। हविषा[19] प्रीतौ। आततनुत[20]।

ता विग्रं धेथे जठरं पृणध्या आ यत्सद्म सभृतयः पृणन्ति।
न मृष्यन्ते युवतयोऽवाता वि यत्पयो विश्वजिन्वा भरन्ते॥ ७॥

ता विग्रम्। तौ। मेधाविन[21] यजमानम्। धारयेथे[22]। जठरमात्मीयम्[24]। सोमेन पूरयितुम्। आपूरयन्ति। यदा। यज्ञगृहम्[25]। ऋत्विज[26] उपतिष्ठन्ति। न। अभिभूयन्ते। दिशः[27]। अगच्छन्त्य[28] शत्रुभि। हे

---

१. धत्तवन्तः Sy.
२. यौ Sy.
३. व Λ.
४. विसूते Λ. विस्तीर्णे Sy.
५. तेजसांसि Λ. रश्मयश्चरा वा Sy.
६. अहिंहिंसि० Λ. अहिंसिताः Sy.
७. ०मूढानीं Λ.
८. मित्रावरुणौ Sy.
९. दिवसे दिवसे Sy.
१०. वृढीकुरुतम् Sy.
११. अन्तरिक्षस्य Sy.
१२. समुच्छ्रितप्रदेशं मेघं सूर्यं वा Sy.
१३. ०वस्तुणाः Λ. वत्समिव स्थूणा is suggested for वंशतिव स्थूणा॥ उपमादिव उपमीयते प्रक्षिप्यत इत्युपमात् स्थूणा। सा यथा वत्सं धारयति तद्वदित्यर्थः Sy.
१४. अपि च Sy.
१५. युवाभ्यां वृढीकृतश्च मेघः Sy.
१६. ०प्नुवानः Λ. अन्तरिक्षं व्याप्नुवानः Sy.
१७. आदित्यो is suggested for आदित्यौ॥ सूर्यः Sy.
१८. द्रुह्यव आयव इति मनुष्यनामनी Ngh.2.3.
१९. अन्नेन हविषा आप्यायितः सन् Sy. क्षुत् धासिरित्यन्ननामनी Ngh.2.7.
२०. आततनुतः is suggested for आततनुत॥ आतान् आततनोति युवाभ्यां वृढीकृत एव Sy.
२१. मित्रावरुणौ Sy.
२२. प्राज्ञम् Sy. विप्रो विग्र इति मेधाविनामनी Ngh. 3. 15.
२३. धारयथः Sy.
२४. उदरम् Sy.
२५. ०ज्ञग्रह० Λ. यज्ञसदनम् Sy.
२६. ०त्विजमुप० Λ. सह भ्रियमाणाः ऋत्विजः Sy.
२७. अहि भू० Λ. रजसाऽभिभूयन्ते Sy.
२८. नद्यो दिशो वा Sy.
२९. अवाता अशुष्काश्च Sy.

विश्वस्य प्रीणयितारौ[1] ! यदा । विविधम्[2] । उदकं भवद्भ्यां पृष्ठम्[3] । धारयन्ति ।

ता जिह्वया सदमेदं सुमेधा आ यद्वां सत्यो अरतिर्ऋते भूत् ।
तद्वां महित्वं घृताव्नावस्तु युवं दाशुषे वि चयिष्टमंहः ॥ ८ ॥

ता जिह्वया[5] । तौ[6] । वाचा । सुप्रज्ञ[7] । सदैव[8] । उदकम्[9] । आयाचते[10] । इदमित्युदकनाम[11] । आभिमुख्येन । भवति[12] । यदा[13] । वा प्रति[14] । सत्य[15] । अहिगन्ता । यज्ञे । तदानीम्[16] । हे घृतान्दौ[17] ! युवयो । महत्त्वम्[18] । प्रादुर्भूतमस्तु । युवाम्[19] । दाशुषे[20] । विनाशयतम् । पापम् ।

प्र यद्वां मित्रावरुणा स्पूर्धन्प्रिया धामं युवधिता मिनन्ति ।
न ये देवास ओहसा न मर्ता अयज्ञसाचो अप्यो न पुत्राः ॥ ९ ॥

प्र यद्वाम्[21] । प्रमिनन्ति[22] । यदा । युवयो । हे मित्रावरुणौ ! स्पर्धमानाः[23] । प्रियाणि । स्थानानि[24] । युवयोर्हितानि[25] । न । ये[26] । देवा[27] । युवयोर्वहनसाधनेन स्तोत्रेण युज्यन्ते । नापि । मनुष्याः[28] । यज्ञमसेवमाना[29] । आवयोर्बन्धवः[30] । पुत्रा[31] वा । न युज्यन्ते स्तोत्रेण तान् सर्वान् हथ[32] इति वाक्यशेषः ।

---

१. ०यित्वारौ A. हे विश्वजिन्वानौ ! Sy.
२. विभूतिम् Sy.
३. जलम् Sy.
४. प्रेषितम् or प्रेरितम् is suggested for पृष्ठम् ॥ प्रहितम् Sy.
५. ता is missing in Λ.
६. तौ is missing in M. मित्रावरुणौ Sy.
७. प्राज्ञः Sy. ८. सर्वदा Sy.
९. जलम् Sy.
१०. आयाचते । आ इत्युपसर्गदर्शनाद्योग्यक्रियाध्याहाराद्याचत इत्यध्याह्रियते Sy.
११. The passage इदमित्युदकनाम (Ngh. 1.12.) should immediately follow उदकम् and precede आयाचते ॥ पूर्वस्यामृचि जलस्य प्रकृतत्वात् बुद्धौ विपरिवर्तमानं जलमिदंशब्देन परामृश्यते Sy.
१२. आभवति Sy. १३. युवयोः Sy.
१४. मायारहितः Sy.
१५. अभि० is suggested for अहि० ।
१६. तत् Sy.
१७. घृतादौ M. घृताग्नौ is suggested for घृतान्दौ ।
१८. महित्वं Λ. महित्वम् । अपेक्षितप्रदातृत्वलक्षणम् Sy. १९. युवम् A.
२०. दाशुषो यजमानस्य । षष्ठ्यर्थे चतुर्थी Sy.
२१. ०मिनजि A. हिंसन्ति Sy.
२२. यद् येऽयजन्तो जनाः Sy.
२३. ०मानौ M.
२४. धामानि कर्माणि Sy.
२५. युवाभ्यां विहितानि Sy.
२६. य M.
२७. देव युव० M.
२८. मनुष्याश्चौहसा न युज्यन्ते Sy.
२९. न यज्ञयुक्ताः । वृथा कर्माणि कुर्वन्त इत्यर्थः Sy.
३०. आवये बन्ध Λ. बन्धवः seems to be the explanation of अप्यः ॥ अपः कर्म तद्वन्तः Sy. ३१. ये च न पुत्राः । पृणन्त ति पुत्राः । न पुत्रा अपृणन्त इत्यर्थः Sy.
३२. सर्वा हथ A. तान् सर्वान विचयिष्टमित्यनुषज्यते Sy.

वि यद्वाचं कीस्तासो भरन्ते शंसन्ति के चिन्निविदो मनानाः ।
आद्द्यौ ब्रवाम सत्यान्युक्था नकिर्देवेभिर्यतथो महित्वा ॥ १० ॥

वि यद्वाचम् । विहरन्ते । यत् । वाचम् । मेधाविनः । शसन्ति च । केचिद्बह्वृचाः । निविदः । जानतः । तदानीं तदनन्तरमेव यमणि । युवयोः । ब्रूमः । सत्यानि । उक्थानि । न युवाम् । अन्यैर्देवैः । सङ्गच्छथे । महत्त्वेन ।

अवोरित्था वां छर्दिषो अभिष्टौ युवोर्मित्रावरुणावस्कृधोयु ।
अनु यद् गावः स्फुरानृजिप्यं धृष्णुं यद्रणे वृषणं युनजन् ॥ ११ ॥

अवोरित्था । रक्षकयोः । इत्थम् । युवयोः । सुखस्य । अभ्येषणे । हे मित्रावरुणौ ! तत्सुखम् । अनल्पागमनं भवति । यदा हि । युवयोः । अस्मव ? ऋजुगामिनं स्तोतारम् । अनुस्फुरन्ति । यदा वा । धृष्णुं स्वयजमानम् । सङ्ग्रामे । युञ्जन्ति ।

---

१. पृथक् उच्चारयन्ति Sy.
२. यदा Sy.
३. वाचः A. स्तुतिम् Sy.
४. मेधाविन उद्गातारः Sy. उशिजः कीस्तास इति मेधाविनामनी Ngh.3.15.
५. शंसति च A.
६. केचिद् बह्वृचाः Sy.
७. अग्न्यादीन् स्तुवन्तः Sy.
८. तथा सति Sy.
९. यमणि seems to be redundant.
१०. युवाभ्याम् Sy.
११. स्तोत्राणि Sy.
१२. अन्यैर्देवैः सह Sy.
१३. गच्छथः Sy.
१४. ०रित्था A.
१५. अवतोः Sy.
१६. सत्यमेव Sy.
१७. सुखस्यस्य A., छर्दिषो गृहाय सुखाय वा । चतुर्थ्यर्थे षष्ठी Sy. छर्दिरिति गृहनाम N. 3.4.
१८. अभ्यषेणे M. अभिगमने Sy.
१९. अविच्छिन्नं भवति Sy. अस्कृधोयुरकृध्वायुः । कृध्विति ह्रस्वनाम । निकृत्तं भवति N.6.3.
२०. यदा न्हि M. कदा मित्रावरुणयोरभिगमनमित्यत आह—यद्यदा Sy.
२१. युवामभिगतेषु स्तोतृषु युवयोः सम्बन्धि युवाभ्यां देयं तद् गृहादिकम् Sy.
२२. अस्मव A. स्तवाः is suggested for अस्मव ॥ स्तुतयः Sy.
२३. सोमम् Sy.
२४. अनुस्फुरेयुः Sy.
२५. धृष्य स्वय० M. धृष्णुं is suggested for धृष्य ॥ शत्रूणां धर्षकं सोमम् Sy.
२६. रमणे यज्ञे Sy.
२७. यजमाना युञ्ज्युः Sy.
२८. VM. ignores वृषणम् ॥ कामानां वर्षितारं सोमम् Sy.

VI 68.

श्रुष्टी वां यज्ञ उद्यतः सजोषा मनुष्वद्वृक्तबर्हिषो यजध्यै ।
आ य इन्द्रावरुणाविषे अद्य महे सुम्नाय महे आववर्तत् ॥ १ ॥

श्रुष्टी[1] वाम्[2] । क्षिप्रः[3] । युवयो[4] । उद्यतः[5] । यज्ञः[6] । सप्रीतिः[7] । मनोरिव । यजमानस्य[8] । यागार्थम्[9] । आववर्तत्[10] । यो वा[11] । इन्द्रावरुणौ[12] । अन्दार्थम्[13] । अद्य । वहते[14] च । सुखाय । महति[15] यज्ञे तस्येति[16] ।

ता हि श्रेष्ठा देवताता तुजा शूराणां शविष्ठा ता हि भूतम् ।
मघोनां मंहिष्ठा तुविशुष्मं ऋतेनं वृत्रतुरा सर्वसेना ॥ २ ॥

ता हि श्रेष्ठा[17] । तौ[18] । हि । श्रेष्ठौ । यज्ञे[19] । हिसितारौ शत्रूणाम् । तथा शूराणा मध्ये । अति-शयेनावलिनौ[20] । तौ तौ[21] । हि । अभूतम्[22] । धनवताम्[23] । अतिशयेन वन्तौ[24] । बहुबलौ[25] । सत्येनैव[26] । वृत्रस्य[27]

---

१. 'श्रुष्टी वाम्' इत्येकादशर्चं सप्तमं सूक्तं भारद्वाजस्यार्षं त्रैष्टुभमैन्द्रावरुणम् । तथा चानुक्रम्यते—'श्रुष्टी वामैन्द्रावरुणमुपान्त्ये जगत्यौ' (KSA. 33.68· P. 24) इति 'प्र सम्राजे, इन्द्रावरुणा सुतपौ' इत्येते जगत्यौ शिष्टास्त्रिष्टुभः । इन्द्रावरुणौ देवता । आभिप्लविकेषूक्थ्येषु तृतीयसवने होत्रकशस्त्रेषु स्तोमवृद्धौ मैत्रावरुणस्येदमावापार्थं सूक्तम् । सूत्रितञ्च—'श्रुष्टी वां यज्ञो युवां नरा' (ĀŚS. 7. 9.) इति । तृतीये सवने 'इन्द्रावरुणा सुतपाविमं सुतम्' इति प्रशास्तुः प्रस्थितयाज्या । सूत्रितञ्च—'इन्द्रावरुणा सुतपाविमं सुतमिन्द्रश्च सोमं पिबतं बृहस्पते' (ĀŚS. 5.5.) इति । उक्थ्ये तृतीयसवने 'इन्द्रावरुणा मधुमत्तमस्य' इति मैत्रावरुणस्य शस्त्रयाज्या । सूत्रितञ्च—'इन्द्रावरुणा मधुमत्तमस्येति याज्या' (ĀŚS. 6.1.) इति Sy.

२. क्षिप्रयोः M. तथा च यास्कः । श्रुष्टीति क्षिप्रनाम । आशु अष्टीति N. 6.12.

३. रूवयोः A. युवयोरर्थे Sy.

४. उद्यतौ A. प्रवृत्तः Sy.

५. सोमः Sy.

६. सुप्रीतिः M. ऋत्विग्भिः सहितः Sy.

७. वृक्तबर्हिषः स्तीर्णबर्हिषो यजमानस्य Sy.

८. यष्टुम् Sy. ९. आवर्तयति Sy.

१०. वाम् M. सोमः Sy.

११. मित्रावरु० A. हे इन्द्रावरुणौ ! Sy.

१२. अन्नार्थम् is suggested for अन्दार्थम् ।

१३. महते is suggested for वहते ।

१४. महती A. Sy. construes one महे with इन्द्रावरुणौ and the other with सुम्नाय and explains them as मंहनीयौ and महते respectively.

१५. VM. ignores आ ॥ आ समन्तात् Sy.

१६. हे इन्द्रावरुणौ ! Sy.

१७. प्रसिद्धौ युवाम् Sy.

१८. इष्टिर्देवतातेति यज्ञनामनी Ngh. 3.17.

१९. धनानां प्रेरकौ Sy.

२०. ०येन बलि० is suggested for ०येनाबलि ॥ अतिशयेन बलवन्तौ Sy.

२१. Second तौ is redundant.

२२. भवतम् Sy.

२३. दानवताम् Sy.

२४. Something, probably धन or दान seems to be missing before वन्तौ ॥ दातृतमौ Sy.

२५. बहुलौ M. २६. तस्य नैव M.

२७. शत्रूणां हिंसकौ Sy.

हिंसितारौ । समग्रसेनौ[1] ।

ता गृणीहि नमस्येभिः शूषैः सुम्नेभिरिन्द्रावरुणा चकाना[8] ।
वज्रेणान्यः शवसा हन्ति वृत्रं सिषक्त्यन्यो वृजनेषु विप्रः ॥ ३ ॥

ता गृणीहि[2] । तौ[3] । स्तुहि । नमस्यै[4] । तयोर्बलैरुच्चरितैः । सखेश्च[7] । इन्द्रावरुणौ । दीप्यमानौ[5] । तयोरन्य[9] । वज्रमादाय । बलेन । हन्ति[11] । शत्रुम्[12] । सेवते[13] । अन्य[14] । दुश्चरितेषु नर जिघृक्षुर्वरुणः[15] । मेधावी[16] ।

ग्नाश्च यन्नरश्च वावृधन्त विश्वे देवासो नरां स्वर्गूर्ताः[17] ।
प्रैभ्यं इन्द्रावरुणा महित्वा द्यौश्च पृथिवि भूतमुर्वी ॥ ४ ॥

ग्नाश्च यत्[18] । देवपत्न्य[19]. । देवा. । च । यदा[20] । अवीवृधन्त[21] । मरुत[22]. । च । देवानामर्ध्ये[23] य[23]· । स्वयमेवोद्गूर्ण[24]. । तदैभ्यो देवेभ्यो[25] देवपत्नीभ्यश्च । प्राभवतम्[26] । महत्त्वेन[27] । हे द्यावापृथिव्यौ[28] ! विस्तीर्णे युवाम् । च प्राभूत[29] युद्धे साहाय्याय[30] ।

---

१. कृत्स्नसेनौ च भूतम् Sy.
२. गृह्णीभिः A.
३. हे भरद्वाज ! Sy.
४. इन्द्रावरुणौ Sy.
५. स्तुत्यैः Sy.
६. शूषमिति बलनाम Ngh. 3.6.
७. सखेश्च A. सुखैश्च is suggested for सखेश्च ।
८. चकाना सर्वैः स्तुतौ । कायतिः शब्दकर्मा । तस्य लिटः कानचि रूपमिदम् Sy.
९. तयोरन्य इन्द्रः Sy.
१०. वज्रेण Sy.
११. हस्ति A.
१२. वृत्रनामकमसुरम् Sy.
१३. सङ्गच्छते Sy.
१४. वरुणः Sy.
१५. स्तोतृणामुपद्रवेषु रक्षितुम् Sy.
१६. नरज्जिघृ० A.
१७. प्राज्ञः Sy.
१८. स्त्रियश्च Sy. 'मेना ग्ना इति स्त्रीणाम् N. 3.21.
१९. देवास इत्यत्र 'पुमान् स्त्रिया' (Pa. 1.2.67.) इत्येकशेषात् देव्यश्च देवाश्च देवास इति निर्देशः पुंवन्निर्देशः. Sy.
२०. यतः A.
२१. स्तुतिभिर्वर्धयन्ते Sy.
२२. पुरुषाश्च Sy.
२३. देवानां मध्ये ये is suggested for देवानां मध्ये यः ॥ It seems to be the explanation of नराम् ॥ नृणां मनुष्याणां मध्ये Sy.
२४. स्वयमुद्यताः Sy.
२५. एभ्यः स्तोतृभ्यः Sy.
२६. प्रभवतम् Sy.
२७. महत्त्वयुक्तौ Sy.
२८. हे त्य द्यावा० A. हे द्यौः ! पृथिवि ! उभे Sy.
२९. प्रादुर्भूतं युद्धे सहाया यत् M.
३०. VM. ignores विश्वे and इन्द्रावरुणौ ॥ विश्वे सर्वे Sy.

स इत्सुदानुः स्ववाँ ऋतावेन्द्रा यो वां वरुण दाशति त्मन् ।
हृषा सं द्विषस्तरेद्दास्वान्वंसद्रयिं रयिवतश्च जनान् ॥ ५ ॥

स इत्सुदानुः । सः । एव । शोभनदानः[1] । धनवान् । यज्ञवाश्च[2] । हे इन्द्रावरुणौ[3] ! युवाभ्याम् । यः[4] । आत्मनैव[5] । प्रयच्छति[6] । सः । अन्नेन[7] । शत्रून्[8] । तरति[9] । दानवान् । भजते[10] च । धनम्[11] । धनवतः । च । दासादीन्[12] ।

यं युवं दाश्वंध्वराय देवा रयिं धत्थो वसुमन्तं पुरुक्षुम् ।
अस्मे स इन्द्रावरुणावपि ष्यात्प्र यो भनक्ति वनुषामशस्तीः ॥ ६ ॥

यं युवम्[13] । यम्[14] । युवाम् । दत्तयज्ञाय । हे देवौ[15] ! रयिम्[16] । धत्तः[17] । वासयितृ[18] । पुरुपशुक्त बहुशब्दम्[19] । हे इन्द्रावरुणौ ! स रयिः[20] । अस्मासु । अपि[21] । भवतु । प्रकर्षेण । यः । मृद्नाति[22] । घ्नताम्[23] । बाधाः[24] ।

उत नः सुत्रात्रो देवगोपाः सुरिभ्यं इन्द्रावरुणा रयिः ष्यात् ।
येषां शुष्मः पृतनासु साह्वान्प्र सद्यो द्युम्ना तिरते ततुरिः ॥ ७ ॥

उत नः । अपि च । अस्मभ्यम् । शोभनपालनः[25] । देवा गोप्तारौ[26] यस्य । स्तोतृभ्यः । हे इन्द्रावरुणौ !

---

१. शोभनदानो भवति Sy.
२. यज्ञवांश्च भवति Sy.
३. हे इन्द्रौ ! हे वरुणौ ! इतरेतरयोगादुभयत्र द्विवचनप्रयोगः । वरुणेत्यत्र संहिताया ह्रस्वश्छान्दसः Sy.
४. यजमानः Sy.
५. आत्मन इव A.
६. हवींषि ददाति Sy.
७. अन्नेन जयलब्धेन सह Sy.
८. द्वेष्टुः Sy.
९. प्राप्येत् ? प्राप्येत Sy.
१०. सम्भजेत् Sy.
११. अपि च रयिं धनम् Sy.
१२. दासादि U. पुत्रांश्च Sy.
१३. यं यादृशम् Sy.
१४. न...ज्ञाय M. दत्तहविष्काय Sy.
१५. भेद देवो M. स्तूयमानौ Sy.
१६. धनम् Sy.
१७. धत्थः is suggested for धत्तः ॥ प्रयच्छथः Sy.
१८. वासयितुम् M.
धनानुबन्धिनम् Sy.
१९. बह्वन्नं पूर्णयशस्कं वा Sy.
२०. तादृशो रयिः Sy.
२१. भूयात् Sy.
२२. प्रभनक्ति प्ररुजति Sy.
२३. हिंसकानाम् Sy.
२४. अकीर्तीः । शत्रुकृतान्ययशांसीत्यर्थः Sy.
२५. सुरक्षः Sy.
२६. देवो गोपायितारो A. गोप्तारो is suggested for गोप्तारौ ॥ देवा गोपा गोप्तारो यस्य स तादृशः Sy.

स[1] रयिः। स्यात्[2]। येषामस्माकम्। बलम्[3]। सङ्ग्रामेषु[4]। शत्रूनभिभवत्[5]। सद्य एव। धनानि[6]। प्रवर्धयति[7]। तरणशीलम्[8]।

नू न इन्द्रावरुणा गृणाना पड्क्तं रयिं सौश्रवसाय देवा।
इत्था गृणन्तो महिनस्य शर्धोऽपो न नावा दुरिता तरेम ॥ ८ ॥

नू[9] न इन्द्रावरुणा[10]। क्षिप्रम्। अस्मभ्यम्। हे इन्द्रावरुणौ! स्तूयमानौ। सम्पर्चयतम्[11]। धनमस्माकम्। शोभनान्नत्वाय[12]। देवौ! इत्थम्। युवयोर्महत्त्वस्य[13]। वेगम्। स्तुवन्तो वयम्। उदकानि। इव। नावा। दुरितानि। अतितरेम।

प्र सम्राजे[14] बृहते मन्म नु प्रियमर्चे देवाय वरुणाय सप्रथः[15]।
अयं य उर्वीं महिना महिव्रतः क्रत्वा विभात्यजरो न शोचिषा ॥ ९ ॥

प्र सम्राजे[16]। प्रोच्चारय। सर्वेषा राज्ञे[17]। महते[18]। स्तुतिः[19]। क्षिप्रम्। प्रियाम्[20]। देवाय। वरुणाय। सर्वत[21]. पृथुतमाम्। य[22]. अयम्। महाकर्मा[23]। विस्तीर्णे द्यावापृथिव्यौ। महता[24]। यज्ञेन[25]। भासयति[26]। आदित्य[27]. इव। तेजसा[28]।

इन्द्रावरुणा सुतपाविमं सुतं सोमं पिबतं मद्यं धृतव्रता।
युवो रथो अध्वरं देववीतये प्रति स्वसरमुप याति पीतये ॥ १० ॥

इन्द्रावरुणा। हे इन्द्रावरुणौ! सुतस्य पातारौ[29]! इमम्। सुतम्[30]। सोमम्। मदहेतुम्[31]। पिबतम्[32]।

---

१. सः should immediately follow देवा गोप्तारो यस्य। स रयि M. धनम् Sy.
२. ष्यत् M. भूयात् Sy. ३. युद्धेषु Sy.
४. शत्रूणामभिभविता Sy.
५. यशांसि Sy.
६. सम्यक्तिरस्कुर्यात् Sy.
७. रणशीलम् M. हिंसकश्च सन् Sy.
८. नुन M. ९. युवाम् Sy.
१०. सपच्चय० M. प्रयच्छतम् Sy.
११. ०म्रत्ताय A. सुश्रवसो भावः सौश्रवसम्। तस्मै सुश्रवस्त्वाय Sy.
१२. महतोर्युवयोः Sy. १३. बलम् Sy.
१४. हे स्तोतः! Sy.
१५. आज्ञया राज्ञां शासकाय Sy.
१६. परिवृढाय Sy.
१७. ०तेऽस्तु किं M. स्तुतिम् is suggested for स्तुतिः॥ स्तोत्रम् Sy. १८. अद्य Sy.
१९. प्रियं मनोहरम् Sy. २०. द्योतमानाय Sy.
२१. सर्वतः पृथु Sy. सप्रथाः सर्वतः पृथुः N. 6.7.
२२. अस्माकम् is added after अयम् in M.
२३. ०कर्म A. २४. महिम्ना युक्तः Sy.
२५. प्रज्ञया च युक्तः Sy.
२६. विभासयति Sy.
२७. अजरो जरारहितः Sy.
२८. तेजसा युक्तः Sy.
२९. पातारं M. सोमस्य पातारौ Sy.
३०. अभिषुतम् Sy.
३१. मदकरम् Sy. ३२. पिबन्तं M.

धृतकर्माणौ[1] । युवयो[2] । रथ । यज्ञम् । देवकामाय[3] । अभ्युपगच्छति । सोमपानाय[4] ।[5]

इन्द्रावरुणा मधुमत्तमस्य वृष्णः सोमस्य वृषणा वृषेथाम् ।
इदं वामन्धः परिषिक्तमस्मे आसद्यास्मिन्बर्हिषि मादयेथाम् ॥ ११ ॥

इन्द्रावरुणा । हे इन्द्रावरुणौ ! मधुमन्तम्[6] । वृषणम्[7] । सोमम् । हे वर्षितारौ[8] ! अभिषिञ्चतम्[9] । इदम् । युवाभ्याम्[10] । अन्नम्[11] । अस्माभिः । परित. सिक्त पात्रेषु । आसाद्य[12] । अस्मिन् । बर्हिषि[13] । तृप्यतम्[14] ।

VI. 69.

सं वां कर्मणा समिषा हिनोमीन्द्राविष्णू अपसस्पारे अस्य ।
जुषेथां यज्ञं द्रविणं च धत्तमरिष्टैनैः पथिभिः पारयन्ता ॥ १ ॥

सं वां कर्मणा[15] । सङ्गमयामि[16] । वाम्[17] । स्तोत्रेण[18] । अन्नेन[19] च । हे इन्द्राविष्णू ! अस्य[20] । कर्मणः[21] ।

---

१. हे धृतकर्माणौ ! Sy.
२. यवयोः A.
३. अध्वरमुद्दिश्य Sy.
४. देवानां पानार्थम् Sy.
५. प्रत्युपयाति Sy.
६. युवयोरपि सोमपानार्थम् Sy.
७. VM. ignores रजसरम् ॥ स्वसरं मार्गम् Sy.
८. अतिशयेन मधुमन्तः रसवन्तम् Sy.
९. वर्षितारम् Sy.
१०. कामानां वर्षितारौ ! युवाम् Sy.
११. ०सिञ्चत०A. आसिञ्चतम् is suggested for असिञ्चतम् ॥ अक्षनीतम् । तथा च शतपथब्राह्मणम्—'यथाभागमावृषायध्वमिति यथाभागमक्षनीतेत्येवैतदाह' (ŚB.2.4.2.20.) इति Sy. १२. युवयोरर्थे Sy.
१३. सोमरूपमन्नम् Sy.
१४. उपविश्य Sy. १५. यज्ञे Sy.
१६. मादयेथां सोमपान इति शेषः Sy.
१७. 'सं वां कर्मणा' इत्यष्टर्चमष्टमं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैन्द्रावैष्णवम् । अनुक्रम्यते च—'सं वामष्टावैन्द्रावैष्णवम् (KSA 33.69. P. 24.) इति । उक्थ्ये तृतीयसवनेऽच्छावाकशस्त्र एतत्सूक्तम् । सूत्र्यते हि—'सं वां कर्मणेन्द्राविष्णू मदपती मदानामिति याज्या' (ĀŚS.6.1.) इति । सोमातिरेके प्रातःसवने नैमित्तिके शस्त्रे परिहिते सति गाणगारिमते 'सं वाम्' इति तस्य शस्त्रयाज्या । सूत्रितञ्च—'ऐन्द्रावैष्णव्येति गाणगारिर्दैवतप्रधानत्वात् सं वां कर्मणा समिषा हिनोमि' (ĀŚS. 6.7.) इति । सोमातिरेके माध्यन्दिनसवने 'या विश्ववासाम्' इत्येषा शस्त्रयाज्या । सूत्रितञ्च—'या विश्ववासां जनितारा मतीनामिति याज्या (ĀŚS.6.7.)इति । उक्थ्ये तृतीयसवनेऽच्छावाकस्य 'इन्द्राविष्णू मदपती' इति शस्त्रयाज्या । सूत्रं तूदाहृतम् । तृतीयसवनेऽच्छावाकस्य 'इन्द्राविष्णू पिबतम्' इति प्रस्थितयाज्या । सूत्रितञ्च—'इन्द्राविष्णू पिबतं मध्वो अस्येमं स्तोममर्हते जातवेदसे' (ĀŚS. 5.5.) इति Sy.
१८. सम्यक् प्रेरयामि Sy. सङ्गच्छामि । 'हि गतौ' यद्वा सम्प्रीणयामि । 'हिवि प्रीणने' BB.
१९. युवाम् Sy.,BB.
२०. कर्मणा शारीरेण प्रणिपातादिना, मानसेन भक्त्यादिना, वाचिकेन स्तुतिलक्षणेन BB.
२१. हविषा Sy. अन्नेन हविर्लक्षणेन संहिनोमीत्येव BB. २२. उक्थ्यस्य Sy.

पारे तृतीयसवने[1]। तौ युवा[2] जुषेथाम्[3]। यज्ञम्[4]। घनम्[5]। च। धत्तम्[6]। अहिसितै[7]। अस्मान्[8]। मार्गे। पारयन्तौ[9] युद्धे।[10]

या विश्वासां जनितारा मतीनामिन्द्राविष्णू कलशा सोमधाना।
प्र वां गिरः शस्यमाना अवन्तु प्र स्तोमासो गीयमानासो अर्कैः॥ २॥

या विश्वासाम्। यौ[11]। विश्वासाम्[12]। स्तुतीनाम्। जनयितारौ[13]। इन्द्राविष्णू। सोमस्य[14] निधानौ। कलशावित्यौपनितम[15]। प्रगच्छन्तु[16]। वाम्[17]। शस्यमाना[18]। गिरोऽस्माभि[19]। स्तोमाश्च[20]। गीयमाना[21]। स्तोतृभि[22]।

इन्द्राविष्णू मदपती मदानामा सोमं यातं द्रविणो दधाना।
सं वामञ्जन्त्वक्तुभिर्मतीनां सं स्तोमासः शस्यमानास उक्थैः॥ ३॥

इन्द्राविष्णू। हे इन्द्राविष्णू! सोमानाम्। आयातम्[23]। इम सोमम्। धनान्येव[24]। दधानौ[25]। समञ्जन्तु[26]। वाम्[27]। स्तुतीनाम्[28]। अञ्जन्[29]। स्तोतार समञ्जन्तु[30]। स्तोमा[31]। शस्यमाना[32]। शस्त्रै सह वामिति[33]।

---

१. समाप्तौ Sy. पारनिमित्तम्। पारस्समाप्तिः। अविघ्नसमाप्त्यर्थम् BB. २. युवामपि BB.
३. सेवेथाम् Sy., BB. ४. यज्ञमिमम् BB.
५. सेवित्वा च द्रविणं धनमस्माकम् BB.
६. सत्तम् M. अस्मभ्यं दत्तम् Sy.
७. अनुपद्रवैः Sy. अनुपहिंसितैः BB.
८. अस्मारस्मान् A. ९. ०यन्तो M. पारं नयन्तौ युवाम् Sy. कर्मणः पारं प्रापयन्तौ। 'पार तीर कर्मसमाप्तौ' BB
१०. VM. explains सम् once only. This stanza=TS. 3. 2. 11. 1.
११. प्रसिद्धौ Sy. १२. सर्वासाम् Sy.
१३. ०तारा मिन्द्रा० A. जनितारौ–'जन जनने' इत्यस्माद्धातोस्तृचीवं रूपम्। यद्वा 'जनी प्रादुर्भावे' इत्यस्माद्धातोरेव तृचि 'जनिता मन्त्रे' इति निपातनाण्णिलोपः Sy.
१४. सोमस्य निधानभूतौ च स्याताम् Sy.
१५. ०त्यैपेनितम् A. औपमिकम् is suggested for औपनितम्।
१६. प्राप्नुवन्तु Sy. १७. अथ प्रत्यक्षस्तुतिः। हे इन्द्राविष्णू! वां युवाम् Sy.
१८. ०मानो M. उच्चार्यमाणाः Sy.
१९. शस्त्ररूपा गिरो वाचः Sy.
२०. स्तोमाः स्तोत्राणि च प्राप्नुवन्तु Sy.
२१. गीर्यमाना A.
२२. VM. explains प्र once only.
२३. मायातम् A.
२४. ०न्येव मदधातौ M. द्रविणानि धनान्यपि। 'द्रविणा उ' इति पदद्वयमेकीभूय द्रविणो इति पद निष्पन्नम् Sy.
२५. ददानौ युवाम् Sy.
२६. ०मज्जन्तु M. समर्धयन्तु Sy.
२७. वा M. युवाम् Sy.
२८. ०तीनां मज्जनैः M. स्तोतृणाम् Sy.
२९. तेजोभिः Sy.
३०. ०मज्जन्तु M. समिति द्विरुक्तिरादरार्था Sy.
३१. स्तोताश्वस्य M. स्तोत्राणि 'Sy.
३२. शस्यमा A. उच्चार्यमाणाः Sy.
३३. VM. ignores मदपती॥ मदपती स्वामिनौ। मदपती इत्यत्र मदशब्दोऽनुवादः Sy.

आ वामश्वासो अभिमातिषाह इन्द्राविष्णू सधमादो वहन्तु ।
जुषेथां विश्वा हवना मतीनामुप ब्रह्माणि शृणुतं गिरो मे ॥ ४ ॥

आ वामश्वासः । आवहन्तु । वाम् । अश्वाः । शत्रूणां सोढारः । इन्द्राविष्णू ! सह मदन्तौ । जुषेथाम् । विश्वानि । ह्वानानि । स्तोतॄणाम् । उपश्रृणुतञ्च । शस्त्राणि । गिरश्च । मदीयानि ।

इन्द्राविष्णू तत्पनयाय्यं वां सोमस्य मद उरु चक्रमाथे ।
अकृणुतमन्तरिक्षं वरीयोऽप्रथतं जीवसे नो रजांसि ॥ ५ ॥

इन्द्राविष्णू । हे इन्द्राविष्णू ! तत् । स्तोतव्यम् । युवयोः । सोमम् । मदार्थं युवाम् । उरूणि पदानि । विक्रमेथे । तथेदमन्तरिक्षम् । अकृणुतम् । उरुतरम् । तथा सर्वान् लोकान् । अस्माकम् । जीवनाय । अप्रथतम् ।

इन्द्राविष्णू हविषा वावृधानाग्द्वाना नमसा रातहव्या ।
घृतासुती द्रविणं धत्तमस्मे समुद्रः स्थः कलशः सोमधानः ॥ ६ ॥

इन्द्राविष्णू । हे इन्द्राविष्णू ! हविषा । वर्धमानौ । सोमस्याभिषुतस्य यज्ञमुखेऽत्तारौ । नमस्कारेण सह । यजमानैर्दत्तहविष्कौ । घृतमासूयते ययोर्हूयते तौ । द्रविणम् । धत्तम् । अस्मे । समुद्रवन्ति यस्मात् सोमाः स समुद्रः । कलशः । सोमनिधानः सः । युवां भवथः ।

---

१. युवाम् Sy.
२. ०णाः स्सोढा० A. अभिमातीनां हिंसकानामभिभवितारः Sy. ३. सह माद्यन्तौ Sy.
४. सेवेथाम् Sy. ५. सर्वाणि Sy.
६. स्वनानि M. हवनानि स्तोत्राणि Sy.
७. ०णुतश्च A. ८. स्तोत्राणि Sy.
९. शस्त्ररूपा वाचश्च Sy.
१०. हे is missing in M.
११. स्तत् A. कर्म Sy.
१२. स्तुत्यम् Sy. १३. सोममदा० M. किं तत्कर्मेत्यत आह–सोमस्य Sy.
१४. मदे सति Sy. १५. विस्तीर्णम् Sy.
१६. विचक्रमाथे । यद्यपि विष्णोरेव विक्रमस्तथाप्येकार्थत्वादुभयोरित्युच्यते Sy.
१७. अकुरुतम् Sy.
१८. उरुतरम् is missing in M. उरुतरम् is suggested for उरूतरम् ।
१९. लोका रजांस्युच्यन्ते N.4.19.
२०. अवृथत M. अप्रथयतम् or अप्रथेथाम् is suggested for अप्रथतम् ।
२१. सोमेन Sy.
२२. ०मुखे क्तारौ A. सोमाग्रस्य शुक्रस्यात्तारौ Sy.
२३. ०स्कारौ सह A.
२४. व्रतमासूयते यो हुयते तौ M. घृतान्नौ Sy.
२५. धनम् Sy. २६. प्रयच्छतम् Sy.
२७. अस्मे M. अस्मभ्यम् Sy.
२८. स्तोमाः M.
२९. स is missing in M.
३०. ०मुद्रं M. किञ्च युवां समुद्र उदधिरिव Sy.
३१. यतः सोमनिधानः Sy.

इन्द्राविष्णू पिबतं मध्वो अस्य सोमस्य दस्रा जठरं पृणेथाम् ।
आ वामन्धांसि मदिराण्यग्मन्नुप ब्रह्माणि शृणुतं हवं मे ॥ ७ ॥

इन्द्राविष्णू । इन्द्राविष्णू ! पिबतम् । इदम् । मधु । सोमस्य । दर्शनीयौ ! जठरम् । पूरयेथाम् । आगच्छन्तु । वाम् । अन्नानि । मदकराणि । उपश्रृणुतम् । स्तोत्राणि । ह्वान च । मे ।

उभा जिग्यथुर्न परा जयेथे न परा जिग्ये कतरश्चनैनोः ।
इन्द्रश्च विष्णो यदपस्पृधेथां त्रेधा सहस्रं वि तदैरयेथाम् ॥ ८ ॥

उभा जिग्यथुः । उभौ । शत्रून् जिग्यथुः । न च । पराजयेथे । न च । अनयो । अन्यतर । अपि । पराजिग्ये । विष्णो ! त्वम् । इन्द्र । च । यदासुरै । अपस्पृधेथाम् । तदानी तत् । सहस्र गवाम् । त्रेधा ।

---

१. इमम् Sy.
२. मदकरम् Sy.
३. सोमम् Sy.
४. हे दर्शनीयौ ! युवाम् Sy.
५. उदरम् Sy.
६. सोमेन पूरयेथाम् Sy.
७. अभिगच्छन्तु Sy.
८. हे इन्द्राविष्णू ! युवाम् Sy.
९. सोमात्मकान्यन्नानि Sy.
१०. मदीयमाह्वानम् Sy.
११. मदीयानि Sy.
१२. भरद्वाजस्यार्षम् SKN.
१३. हे इन्द्राविष्णू ! उभौ युवाम् Sy. उभौ तावत्सम्प्रयुक्तौ SKN.
१४. शत्रू जिग्य० M. अजैष्टम् Sy. सर्वदा जयथः BB.
१५. न पुनः कदाचन Sy.
न कदाचिदपि BB.
१६. पराजयेथे अन्येन न जीयेथे BB. न पराजीयेथे केनचित् SKN.
१७. एनयोर्युवयोर्मध्ये Sy. एनयोरिन्द्राविष्णवोः BB. एतयोर्भवतोरिन्द्राविष्णवोः SKN.
१८. एकतरः Sy. एनयोर्मध्ये कतरश्चान्यतरोऽपि BB. नेदं किमो रूपम् । एकतरशब्दस्यायं छान्दस एकारलोपः । . . . एकतरोऽपि SKN.
१९. चनशब्दोऽप्यर्थे SKN.
२०. न पराजैष्ट Sy. न पराजयते । पराजयं न प्राप्तवान् BB.
न पराजीयते SKN.
२१. हे विष्णो ! इन्द्रश्च त्वं च युवाम् Sy. हे विष्णो ! त्वं चेन्द्रश्च युवाम् BB. इन्द्रश्च त्वं च हे विष्णो ! SKN.
२२. त्वं चेति वाक्यशेषः SKN.
२३. समुच्चयार्थश्चशब्दः श्रूयते । समुच्चयस्य द्वितीयेन समुच्चीयमानेन विनाऽनुपपत्तेः . . . एवमत्र चेति समुच्चयार्थः इन्द्रश्चेत्येकेन समुच्चयस्याश्रयणेनेन्द्रेण सह सम्प्रयुज्यते । द्वितीयस्तु विष्णुस्तेनाक्षिप्यते SKN.
२४. ०सुरैः M. यद्यद्वस्तु प्रति . . . . असुरैः सह Sy. शत्रुभिः सह SKN.
२५. अपि स्पृ० A. . . . . अस्पृधेथाम् Sy. स्पर्धेथे SKN.
२६. तदा BB.,SKN.
२७. अमितम् Sy.
सहस्रमपि SKN.
२८. गवाम् is missing in A. दक्षिणाः BB. शत्रूणाम् SKN.
२९. लोकवेदवागात्मना त्रिधा स्थितम् Sy.
त्रिशब्दोऽत्रानेकत्वप्रतिपादनार्थः । अनेकधा SKN.

व्यैरयेथाम्[1]।

VI. 70.

घृतवंती भुवनानामभिश्रियोर्वी पृथ्वी मधुदुघे सुपेशसा।
द्यावापृथिवी वरुणस्य धर्मणा विष्कभिते अजरे भूरिरेतसा ॥ १ ॥

घृतवती[2]। रसवत्यौ[3]। भुवनानाम्[4]। अभिश्रयणीये[5]। उर्वी। पृथ्वी द्यौरुर्वी[6]। उदकस्य क्षारयित्र्यौ[7]। सुरूपे[8]। द्यावापृथिव्यौ[9]। वरुणस्य[10]। धारणेन[11]। विष्क भवत[12]। जरारहिते[13]। बहुरेतस्के[14]।

---

१. व्यक्रमेथामित्यर्थः। तथा च ब्राह्मणम्—'उभा जिग्यथुरित्यच्छावाकस्योभौ हि तौ जिग्यतुर्न पराजयेथे न पराजिग्ये इति न हि तयोः कतरश्चन पराजिग्य इन्द्रश्च विष्णो यदस्पृधेथां त्रेधा सहस्रं वि तदैरयेथामितीन्द्रश्च ह वै विष्णुश्चासुरैर्युयुधाते तान् ह स्म जित्वोचतुः कल्पामहा इति ते ह तथेत्यसुरा ऊचुः। सोऽब्रवीदिन्द्रो यावदेवायं विष्णुस्त्रिरिक्रमते तावदस्माकमथ युष्माकमितरदिति स इमांल्लोकान् विचक्रमेऽथो वेदानथो वाचं तदाहुः किं तत्सहस्रमितीमे लोका इमे वेदा अथो वागिति ब्रूयादैरयेथामैरयेथाम्' (AB. 6.15.) इति। यद्वा तत्सहस्रं गवां सहस्रं त्रेधा व्यैरयेथामित्यर्थः Sy. त्रेधा सहस्रं व्यभजेथाम्। यद्वा यदर्थं युवां स्पर्धेथे तत्सहस्रं बहुमतं हविस्त्रेधा विभजेथाम् 'त्रयः पुरोडाशा भवन्ति' BB. विविधमीरयथस्तारापथ इत्यर्थः SKN. N. 1.4.; SKN. 1. 55. This stanza=TS. 3.2.11.2.

२. 'घृतवती भुवनानाम्' इति षड्चं नवमं सूक्तं भरद्वाजस्यार्षं जागतं द्यावापृथिवीदेवताकम्। तथा चानुक्रम्यते—'घृतवती षट् द्यावापृथिवीयं जागतम्' (KSA. 33.70. p. 24.) इति। आभिप्लविके पञ्चमेऽहनि वैश्वदेवशस्त्र आद्यस्तुचो द्यावापृथिव्यनिविद्धानार्थः। सूत्रितञ्च—'घृतवती भुवनानामभिश्रियेन्द्र ऋभुभिर्वाजवद्भिरिति तृचौ' (ĀŚS. 7.7.) इति। बृहस्पतिसवेऽपि वैश्वदेवशस्त्र एष तृचः। सूत्रितञ्च (ĀŚS. 9.5.)। आभिप्लविके तृतीयेऽहनि वैश्वदेवशस्त्रे, 'घृतेन द्यावापृथिवी' इति तिस्रो द्यावापृथिव्यनिविद्धानार्थाः। सूत्रितञ्च—'घृतेन द्यावापृथिवी इति तिस्रोऽनड्वो जातः' (ĀŚS.7.7.) इति Sy.

३. दीप्तिमत्यावुदकवत्यौ वा. . .भवत इति शेषः Sy. उदकवत्यौ Mah. घृतवत्यावुदकवत्यौU. वनम्, घृतम्, इत्युदकनामनी Ngh. 1. 12.

४. भूतानाम् Sy. भूतजातानाम् Mah. U.

५. अभिश्रयणीये भवत इति सर्वत्रानुसम्बन्धनीयम् Sy. अभिश्रियावाश्रयणीये। कर्मणि क्विप्। विभक्तेराकारः Mah. अभ्याश्रयणीये U.

६. विस्तीर्णे Sy. उर्व्यौ विस्तीर्णे Mah. U.

७. पृथिव्यौ उर्वी M. VM. seems to explain पृथ्वी by द्यौरुर्वी। (Cf. Ngh. 3.30.) बहुकार्यरूपेण प्रथिते च Sy. पृथ्व्यौ पृथुले। आयामविस्ताराभ्यां महत्त्वं विशेषणद्वयेनोक्तम् Mah. पृथुले U. ८. ०यित्रियौ A. मधुन उदकस्य दोग्ध्र्यौ Sy. मधु, उदकं तस्य दोग्ध्र्यौ Mah. U. ९. सुर उभे M.

१०. हे द्यावापृथिव्यौ! Sy. ये द्यावापृथिव्यौ U.

११. सर्वस्य नियामकस्य Sy. आदित्यस्य Mah. ते वरुणस्यादित्यस्यU. १२. धारणशक्त्या Mah.

१३. विष्कऽञ्चयै M. विष्कभिते is suggested for विष्क॥ पृथग्धारिते Sy. स्तम्भिते। स्कभ्नोतिर्वृढीकरणार्थः। वरुणेन स्वशक्त्या वृढीकृते इत्यर्थः Mah. वृढीकृते U.

१४. नित्ये Sy. १५. बहुरेतस्के बहुकार्ये वा। अत्र साक्षात् द्यावापृथिव्योः स्तुतिप्रसङ्गाद्वरुणस्येति द्रष्टव्यम् Sy. भूरि रेतो ययोस्ते भूरिरेतसी बहुरेतस्के सर्वभूतानां हि रेतांसि ताभ्यामेवोत्पद्यन्ते Mah. बहुरेतस्के U. This Stanza=YV. 34. 45.

असश्चन्ती भूरिधारे पयस्वती घृतं दुहाते सुकृते शुचिव्रते ।
राजन्ती अस्य भुवनस्य रोदसी अस्मे रेतः सिञ्चतं यन्मनुर्हितम् ॥ २ ॥

असश्चन्ती । परस्परमसङ्गते । बहुधारे—दिव उदकानि धारा भवन्ति ओषधय पृथिव्या । रसवत्यौ । उदकम् । दुहाते । यजमानाय । शोभनकर्माणौ । राजन्ति । अस्य । भुवनस्य । हे द्यावापृथिव्यौ । अस्माकम् । उदकम् । सिञ्चतम् । यत् । मनुष्येभ्यो हितम् ।

यो वामृजवे क्रमणाय रोदसी मर्तो ददाश धिषणे स साधति ।
प्र प्रजाभिर्जायते धर्मणस्परि युवोः सिक्ता विषुरूपाणि सव्रता ॥ ३ ॥

यो वामृजवे । य । युवाभ्याम् । अकुटिलाय । गमनाय सुख भवत्योर्गन्तुम् । हे रोदसी । मर्त्य ।

---

१ भरद्वाजस्येदमार्षम् Dur. भरद्वाजस्य SKN

२. असज्यमाने व्युदस्यन्त्यौ वा Sy. असज्यमाने असंश्लिष्यमाणे परस्परत एते द्यावापृथिव्यौ ....एवमेतस्मिन् मन्त्रे भूरिधारे इत्येवमादिभिः समानविभक्त्यन्तत्वात् 'असश्चन्ती' इति द्यावापृथिवीविशेषणमुपपद्यते Dur. संश्चतिर्गतिकर्मा । शुद्धोऽपि चात्र सम्पूर्वार्थे द्रष्टव्यः । असङ्गच्छमाने असज्जमाने परस्परेणासम्मिश्रीभवन्त्यौ विक्षिपन्त्यावाश्रितान् SKN.

३. दिवो वृष्टिधाराः पृथिव्याश्चाहुत्युद्भूतरसधाराः । एवमुभयोरपि बहुधारत्वम् Sy. बहूदकप्रक्षरणस्वभावे एव । अथवा बहु भूतं धारयित्र्यौ Dur. भूरिणो भूतजातस्य ज्योतिषां च धारयित्र्यौ SKN.

४. ०वत्वात् M. दकवत्यौ Sy. Dur., SKN

५. सस्यादिसमृद्धिहेतुकमुदकम् Sy. वृष्टिलक्षणमुदकम् SKN.

६. द्वे अप्येते वुहाते प्रपूरयेते इतरेतरसम्भोगेन Dur. क्षरतो वर्षत इत्यर्थः SKN.

७. It seems to be the explanation of सुकृते ॥ शोभनकारिणे यजमानाय Sy. शोभनकृते । अथवा शोभनानां स्वाधिकारप्रयुक्तानां कर्मणां कर्त्र्यौ Dur. तादर्थ्यं एषा चतुर्थी । शोभनयागादिकर्मचारिणो यजमानस्यार्थाय SKN.

८. शुचिव्रते शुचिक्रिये Sy. शुक्लकर्मणी इत्यर्थः Dur. शुद्धकर्माणौ SKN.

९. अथ प्रत्यक्षस्तुतिः Sy. परोऽर्धर्चः प्रत्यक्षकृतत्वाद् भिन्न वाक्यम् SKN.

१०. राजन्ती is suggested for राजन्ति ॥ ईशाने युवाम् Sy. दीप्यमाने स्वैः स्वैस्तेजोभिः Dur. राजतिरैश्वर्यकर्मा । ईशाने SKN.

११. भूतजातस्य Sy., Dur., SKN.

१२. रोधसी रोधयित्र्यौ ये एते एवलक्षणे द्यावापृथिव्यौ ते Dur. द्यावापृथिव्यौ SKN.

१३. अस्मासु Sy. अस्मभ्यम् Dur. अस्मदर्थम् SKN.

१४. प्रजननसमर्थं वीर्यम् Sy. उदकनामैतत् । उदकम् Dur., SKN

१५. सिञ्चन्तः M. सिञ्चतमभिमते काले Dur. क्षारयतम् SKN.

१६. रेतः Sy. यत् सम्पत्करं तदित्यर्थः SKN.

१७. कीदृशम् ? मनुष्येभ्यो हितम् SKN. किंलक्षणं पुनः सिञ्चतम् ? मनुष्यहितम्, अक्षारं सस्यसम्पत्करमित्यभिप्रायः Dur.

१८. असज्यमाने इति वा । अव्युदस्यन्त्याविति वा । बहुधारे उदकवत्यौ N.5.2,. SKN. II.288.

१९. सरलाय M.

२०. युवयोः सुखगमनाय Sy.

२१. मर्त्ये M.

हवीषि प्रयच्छति[1]। सः[2]। धृष्टे[3]। अभिलषितं[4] साधयति। प्रजायते[5] च। प्रजाभिः[6]। भवत्योः कर्मणा[7]। अनन्तरं युवयोः। नानाकृतीनि[8]। समानाशनस्वप्नादीनि[9]। परिषिक्तानि[10] भूतानि।

घृतेन द्यावापृथिवी अभीवृते घृतश्रिया घृतपृचा घृतावृधा।
उर्वी पृथ्वी होतृवूर्ये पुरोहिते ते इद्विप्रा ईळते सुम्नमिष्टये ॥ ४ ॥

घृतेन[11]। उदकेन। द्यावापृथिव्यौ। परिवृते[12]। घृतस्याश्रयभूते[13]। घृतसम्पृक्ते। घृतस्य वर्धयित्र्यौ[14]। उर्वी[15]। पृथ्वी[16]। होतृणां वरणीये यज्ञे। पुरोहिते[17]। ते[18]। एव। विप्राः[19]। स्तुवन्ति[20]। सुखम्। याचितुम्[21]।

मधु नो द्यावापृथिवी मिमिक्षतां मधुश्रुता मधुदुघे मधुव्रते।
दधाने यज्ञं द्रविणं च देवता महि श्रवो वाजमस्मे सुवीर्यम् ॥ ५ ॥

मधु नः[22]। उदकम्[23]। अस्मभ्यम्[24]। द्यावापृथिव्यौ। सिञ्चताम्। उदकस्य क्षारयित्र्यौ[25]। उदकस्य दोग्ध्र्यौ[26]। उदकार्थकर्माणौ[27]। धारयन्त्यौ[28]। यज्ञम्। धनम्। च। देवतानाम्[29]। महत्[30]। श्रवणीयम्[31]। अन्नम्। अस्मभ्यम्[32]। शोभनवीर्यं[33] प्रयच्छताम्।

---

१. हवींषि ददाति Sy.
२. मर्त्यः Sy.
३. स ते सृष्टे M. धृष्टे सर्वस्य भुवनस्य निवासभूते Sy. ४. कामान् साधयति Sy.
५. प्रवृद्धो भवति Sy.
६. किञ्च पुत्रपौत्रादिभिः Sy.
७. कर्मणः is suggested for कर्मणा।
८. नानावर्णानि Sy.
९. समानकर्माणि भूतानि जायन्ते Sy.
१०. VM. seems to explain परि and सिक्ता together as परिषिक्तानि but Sy. explains these words separately: परि as उपरि and सिक्ता as सिक्तानि रेतांसि। He construes परि with धर्मणः कर्मणः and सिक्तानि with जायन्ते।
११. घृतेना Λ. १२. आवृते भवतः Sy.
१३. उदकं श्रयन्त्यौ च Sy.
१४. यद्धरित्र्यौ M. वर्धयित्र्यौ is suggested for वर्धयित्रीयौ॥ घृतं वर्धयन्त्यौ Sy.
१५. विस्तीर्णे Sy.
१६. पृथिवी Λ. प्रथिते च भवतः Sy.
१७. पुरोदिते M. यजमानैः पुरस्कृते च भवतः Sy.
१८. ते is missing in M. द्यावापृथिव्यौ Sy.
१९. प्राज्ञाः स्तोतारः Sy.
२०. याचन्ते। सुखे सति हि यागाः प्रवर्तन्ते Sy.
२१. यज्ञाय Sy. होत्रा, वृष्टिः, इति यज्ञनामनी Ngh. 3. 17.
२२. अधु ना M.
२३. मधु मधुना। तृतीयैकवचनस्य लुक् Sy.
२४. अस्मान् Sy.
२५. ०यित्र्यायौ Λ.
२६. उदकदोग्ध्र्यौ Sy.
२७. ०र्थं कर्माणि M.
२८. ०यन्तौ M. ददत्यौ Sy.
२९. देवताभूते Sy. ३०. महः Λ.
३१. श्रपणीयम् M. यशः Sy.
३२. अस्मासु Sy.
३३. वीर्यः प्र० M. सुवीरत्वं च Sy.

ऊर्जं नो द्यौश्च पृथिवी च पिन्वतां पिता माता विश्वविदा सुदंससा ।
संरराणे रोदसी विश्वशंभुवा सनिं वाजं रयिमस्मे समिन्वताम् ॥ ६ ॥

ऊर्जं नः । उदकम् । अस्मभ्यम् । द्यौः । च । पृथिवी । च । क्षरताम् । पिता द्यौ । माता पृथिवी । सर्वस्य लम्भयित्र्यौ । सुकर्मिणौ । सह रममाणे परस्परोपकार्योपकारकभावेन । सर्वस्य सुखस्य भावयित्र्यौ । पशून् । अन्नम् । धनञ्च । अस्मभ्यम् । सम्प्रापयतम् ।

VI.71.

उदु ष्य देवः सविता हिरण्ययां बाहू अयंस्त सवनाय सुक्रतुः ।
घृतेन पाणी अभि प्रुष्णुते मखो युवा सुदक्षो रजसो विधर्मणि ॥ १ ॥

उदु ष्यः । उद्यच्छति । स । देव. । सविता । हिरण्मयौ । बाहू । यज्ञाय । सुकर्मा । तत उदकेन ।

---

१. अन्नम् Sy.
२. माता धारकत्वेन मातृभूता Sy.
३. क्षुरताम् Λ. यच्छताम् Sy.
४. वर्षस्य सेक्तृत्वेन पितृभूता Sy.
५. ०यित्रियौ Λ. विश्वं जानन्त्यौ विश्वस्य वेदयित्र्यौ वा Sy.
६. ०पकार्ये(णा)र भावेन \.
७. VM. seems to explain सनिम् as पशून् ॥ सनिं सम्भजनीयं पुत्रादिकम् Sy.
८. बलम् Sy.
९. अस्मासु Sy.
१०. सं is missing in M. सम्प्रेरयताम् Sy.
११. VM. ignores रोदसी ॥ रोदसी द्यावापृथिव्यौ Sy.
१२. 'उदु ष्य देवः' इति षडृचं दशमं सूक्तं भरद्वाजस्यार्षं सवितृदेवताकम् । आद्यास्तिस्रो जगत्यश्चतुर्थ्याद्यास्तिस्रस्त्रिष्टुभः । तथा चानुक्रान्तम् —'उदुष्य सावित्रं त्रिष्टुबन्तम्' (KS \. 33. 7१.P.24.) इति । सूक्तविनियोगो लैङ्गिकः । चातुर्विंशिकेऽहनि वैश्वदेवशस्त्र आद्यस्तृचः सावित्रसूक्तस्थान आवपनीयः । सूत्रितञ्च—'उदु ष्य देवः सविता हिरण्ययेति तिस्रस्ते हि द्यावापृथिवी' (ĀSS. 7. 4) इति । बृहस्पतिसवेऽपि वैश्वदेवशस्त्रे सावित्रसूक्तस्थान एष तृचः । सूत्रितञ्च—'उदु ष्य देवः सविता हिरण्ययेत्यनूत्तिष्ठेत्' (ĀSS. 9.5.) इति । ष्यूळ्हे पञ्चमेऽहनि वैश्वदेवशस्त्रे 'उदु ष्य देवः सविता दमूनाः' इति तृचः सावित्रनिविद्धानार्थः । सूत्रितञ्च—'उदु ष्य देवः सविता दमूना इति तिस्रः' (ĀSS. 8.8.) इति । वैश्वदेवपर्वणि सावित्रद्वादशकपालस्य 'वामद्य' इति याज्या । सूत्रितञ्च—'वामद्य सवितर्वाममु श्वः पूषन्तव व्रते वयम्' (ĀSS. 2.16.) इति Sy.
१३. उद ष्युः A.
१४. ०च्छन्ति M.
१५. प्रसिद्धः Sy.
१६. द्योतमानः Sy.
१७. बाहु M. आत्मीयौ बाहू Sy.
१८. सुवनाय दानाय वा Sy.
१९. उदकेन पूर्णौ Sy.

पाणी[1] । अभिप्रक्षालयति[2] । पूजयिताऽध्वर्या[3]. । युपा[4] । शोभनबल. । लोकस्य[5] । विधारणे यज्ञे[6] ।

देवस्य[7] वयं सवितुः[8] सवीमनि[9] श्रेष्ठे[10] स्याम[11] वसुनश्च[12] दावने[13] ।
यो विश्वस्य[14] द्विपदो[15] यश्चतुष्पदो[16] निवेशने[17] प्रसवे[18] चासि[19] भूमनः[20] ॥ २ ॥

देवस्य वयम्[21] । देवस्य । वयम् । सवितु. । प्रसवे । श्रेष्ठे । भवेम[22] । धनस्य । च । दानाय । य.[23] । विश्वस्य । द्विपद । यश्च । चतुष्पदो गवादे. । रात्रौ निवेदने अग्नि । प्रसवे[24] । भवसि । व्यापृत.[25] । बहो.[26] ।

---

१. स्वौ पाणी Sy.

२. अभिप्रेरयति Sy.

३. ध्वर्याः M. ०ध्वर्युः is suggested for ०ध्वर्याः ॥ महनीयः Sy.

४. युवा is suggested for युपा ॥ नित्य-तरुणः Sy.

५. सुप्रज्ञः Sy.

६. रजसो लोकस्य उदकस्य वा Sy.

७. यज्ञो A. विधारणे स्थितः Sy.

८. VM ignores उ ।

९. भरद्वाजस्यार्षम् Dur.
भरद्वाजस्य SKN.

१०. तस्य देवस्य Sy.
दानादिगुणयुक्तस्य SKN.

११. प्रेरकस्य Sy. सर्वार्थप्रसवितुस्तस्य Dur.

१२. अनुज्ञाने Sy. सर्वार्थाभ्यनुज्ञाने....एवमत्र 'सवितुः' इत्यनेन सम्बन्धात् 'सवीमनि' इत्यस्य 'प्रसवे' इत्येवं विपरिणाम उपपद्यते Dur.
प्रसवेऽभ्यनुज्ञाने SKN.

१३. श्रेष्ठा M. अतिशयेन प्रशस्ते Sy. अत्यन्त-प्रशस्ये SKN.

१४. समर्था भूयास्मै Sy. नित्यकालं वयमेव स्याम Dur.

१५. दाने Sy. दाने श्रेष्ठे प्रवृत्ते वयमेव लब्धारः स्याम Dur. दाने त्वं देव ! सवितः ! सर्वकर्मसु नित्यमभ्यनुजानीया धनं च वद्या इत्याशास्महे SKN.

१६. त्वम् Sy. हे सवितः ! यस्त्वम् Dur.
कीदृशः ? उच्यते यस्त्वम् SKN.

१७. सर्वस्य Sy. सर्वस्यास्य Dur.

१८. द्विपादः M. मनुष्यादेः Dur, SKN.

१९. चतुष्पादः M. चतुष्पदो निवेशने प्रसवे स्वतन्त्रोऽसि Sy.

२०. निवेशने is suggested for निवेदने ॥ स्थितौ Sy., Dur. स्वापाय व्यवस्थापने SKN.

२१. वेदनेऽग्नि A. अग्नि seems to be redundant.

२२. सृष्टौ Dur. अभ्यनुज्ञाय च सर्वकर्म SKN.

२३. व्यावृतः A. स्वतन्त्रोऽसि Sy. तस्य तवैवङ्गुण-विशिष्टस्य प्रसवे च दाने च वयमेवाङ्गभूताः स्यामेति Dur. अस्तिर्भवतिना समानार्थः । शुद्धोऽपि चात्र पूर्वार्थे द्रष्टव्यः SKN.

२४. भूरेः Sy. भूम्नः Dur. भूम्नोऽत्यन्तबहुनः SKN. सवीमनि प्रसवे N. 6.7., SKN. II. 415.

२५. VM. explains च once only.

अदब्धेभिः सवितः पायुभिष्ट्वं शिवेभिरद्य परि पाहि नो गयम् ।
हिरण्यजिह्वः सुविताय नव्यसे रक्षा माकिर्नो अघशंस ईशत ॥ ३ ॥

अदब्धेभिः । अहिसितै । सवित । पालनै । त्वम् । शिवै । अद्य । परित । पाहि । अस्माकम् । गृहम् । हिरण्मयजिह्व । सुखाय । नपतराय । रक्ष चास्मान् । मा कश्चित् । स्तेन । अस्माकम् । ईशिष ?

१. अहिसितैः Λ. अनुपहिंसितैः Mah., U. केनाप्यहिंसितैः क्वचिदप्यप्रतिहतैर्वा BB.

२. सर्वस्य प्रसवितः Mah.

३. तेजोभी रक्षणसाधनैर्वा Sy. पालनैः प्रजाना रसानाम् । त्रिभिर्वा रश्मय उच्यन्ते BB.

४. सुखकारिभिः Sy. शान्तैः सुखरूपैः Mah. शान्तैः U.शान्तकलुषैः पावनैरितियावत् BB.

५. अस्मिन्नहनि BB.

६. सर्वतः BB.

७. पां हि A. रक्ष Sy., Mah. परिपालय U. एवमैहिकभोगस्थानगृहस्य रक्षा प्रार्थिता BB.

८. ग्रहम् A. गृहम्, धनं वा Sy., Mah. गयः कुदर (Ngh. 3.4.) इति गृहनामनी । मीळ्हं गय इति धननामनी (Ngh.2.10.) Mah. गयं गृहम् U., BB.

९. ०मयं जिह्वः Λ. हितरमणीयवाक् त्वम् तथा च यास्कः 'हिरण्यं कस्मादित्युपक्रम्य हितरमणं भवतीति वा (N.2.10.) हिरण्यवदविचला जिह्वा यस्य सत्यवाक् । यद्वा हिरण्या हितरमणीया जिह्वा ज्वाला यस्येति वाMah. सत्यवाग् भूत्वा U. हिरण्यजिह्वस्त्वं रसाहरणसाधनतया जिह्वास्थानीया रश्मयो जिह्वा उच्यन्ते । हिरण्यस्वभावाः क्रमणशीला जिह्वा यस्य तादृशस्त्वं रक्ष । 'हर्य गतिकान्त्योः' 'हर्यतेः कन्यन् हिर च' इति कन्यन्प्रत्ययः BB. हिरण्यं कस्मात्? ह्रियत आयम्यमानमिति वा । ह्रियते जनाज्जनमिति वा । हितरमणं भवतीति वा । (हृदयरमण भवतीति वा) । हर्यतेर्वा प्रेप्साकर्मणः N. 2.10.

१०. सु इताय सुखाय Mah. सु प्रसूताय कर्मणे U. आमुष्मिकसुखसाधनमधुना प्रार्थयते—सुविताय सुष्ठु इताय प्राप्ताय स्थानाय । सुकृतेन प्राप्तायेति यावत् BB.

११. नपर तरा० M. नवतराय is suggested for नपतराय ॥ नवीयसे Mah. नवतराय भवेति वाक्यशेषः U. सर्वदाऽभिनवाय BB.

१२. पालय Sy., Mah. रक्ष च सर्वथा U. ईदृशमस्मदीयं स्वर्गस्थानं रक्षेत्यर्थः BB.

१३. मा कं चित् A. मा कश्चन Mah., U. माकिरिति छान्दस उपजनः । निपातान्तरं वा । यथाह गणकारः—'यत्र माकिर्नकिर्नभः' इति BB.

१४. अनर्थमाशंसमानः शत्रुः Sy. पापमाशंसमानः शत्रुः Mah. अघं पापं यः शंसति सोऽघशंसः U. अघे शंसनमभिलाषो यस्य तादृशः BB.

१५. आशिषः M. ईशत or ईशिष्ट is suggested for ईशिषः ॥ ऐश्वर्यं कुर्यात् । त्वत्प्रसादात् पाप्माऽस्माकमीशिता मा भूदित्यर्थः Mah. ईष्टा ? ईशिता भवतु U. मा ईशिष्ट । इत्थं प्रार्थयमानानामस्माकं न कश्चिदप्यनिष्टकृत् स्यादित्यर्थः BB.

This Stanza=YV. 33. 69.=TS. 1. 4. 24. 1.

उद् ु ष्य देवः सविता दमूना हिरण्यपाणिः प्रतिदोषमस्थात् ।
अयोहनुर्यजतो मन्द्रजिह्व आ दाशुषे सुवति भूरि वामम् ॥ ४ ॥

उदु ष्य देवः । उदस्थात् । सः । देवः । सविता । दममनाः । हिरण्यपाणिः । प्रतिरात्रम् । हिरण्मयहनुः । यष्टव्यः । मादनजिह्वः । आ सः । प्रसौति । यजमानाय । बहु । धनम् ।

उदु अयाँ उपवक्तेव बाहू हिरण्ययाँ सविता सुप्रतीका ।
दिवो रोहांस्यरुहत्पृथिव्या अरीरमत्पतयत्कच्चिदभ्वम् ॥ ५ ॥

उदु अयान् । उदयच्छत् । आक्रन्दितेव । बाहुम् । हिरण्मयौ । सविता । शोभनावयवौ । दिवः । उच्छ्रितानि स्थानानि । अधिरोहसि । पृथिव्याः पर्यन्ता दिशः । रमयति । जगत पातयति च । तस्मिन् महत्सुखमिति ।

---

१. देवं A.
२. उत्तिष्ठतु Sy.
३. सः is missing in A.
४. द्योतमानः Sy.
५. दमं मनाः A. दमूनाः M. दमूना दममना वा दानमना वा दान्तमना वा N.4.4.
६. हिरण्मयपाणिः Sy.
७. रात्रेरवसानेऽवसाने Sy.
८. रुक्ममय इति हिरण्यनामनी Ngh. 1.2.
९. ०वनं जि० A.
मोदमानवाक् Sy.
१०. Something, probably मन्तात् is missing after स० । The reading should be आ समन्तात् ।
११. प्रेरयति Sy.
१२. यजमानाय महाम् Sy.
१३. प्रभूतम् Sy.
१४. वामं वननीयं सम्भजनीयमन्नम् Sy. वामं वननीयम् (N 6.31.)
१५. VM. ignores उ ।
१६. अयाः A. अयो M.
१७. उद्यच्छतु Sy.
१८. अस्माकमधिवक्तेव Sy.
१९. वाहूं A.
२०. ०यवो M.
२१. अन्तरिक्षस्य Sy.
२२. उच्छ्रितप्रदेशान् Sy.
२३. आ रोहशि A.
रोहति Sy.
२४. पृथिव्या पर्यन्तादितो A.
पृथिवीपर्यन्तात् Sy.
२५. गच्छत् Sy.
२६. महत्सर्वं वस्तुजातं तिरोहितम् Sy.
२७. VM. ignores उं । कत् and चित् ॥ कच्चित् यत् किञ्चित् Sy.

वाममद्य संवितर्वाममु श्वो दिवेदिवे वाममस्मभ्यं सावीः ।
वामस्य हि क्षयस्य देव भूरेरया धिया वामभाजः स्याम ॥ ६ ॥

वाममद्य[1] । धनम्[2] । अद्य[3] । सवितः[4] ! अस्मभ्यम्[5] । प्रयच्छ[6] । वामम्[7] । एव सावी[8]. । वामस्य[9] । हि[10] ।
वासयितुः[11] । भे[12] देव[13] ! बहोर्वय[14] सम्भक्तारः[15] स्याम[16] । तदेवाह—अनेन[17] । कर्मणा[18] वयम् । वामभाज[19]. । स्याम[20] ।

---

१. ०मद्यः Λ.
२. वननीयं कर्मफलम् Mah. वननीयम् U. वननीयं हिरण्यादिधनम् BB.
३. अस्मिन्दिने Mah. अस्मिन् U. अस्मिन्नहनि BB. ४. सर्वस्य प्रेरयितः ! देव ! Mah.
५. अस्मदर्थं Mah.
६. सुव । प्रसुव Sy. प्रेरय । देहीत्यर्थः । 'षू प्रेरणे' Mah. वाममस्माकं प्रसूयाः । अद्य सावीरिति सम्बधः U. प्रेरयः BB.
७. धनम् Sy.
८. उ अप्यर्थे । श्वोऽपि समनन्तरदिनेऽपि.... दिवे दिवे तत ऊर्ध्वं दिने दिनेऽस्मभ्यं वामं सावीः Mah. उपाशंसनीये काले सावीः । ...किं वा बहुनोक्तेन ? दिवे दिवे...अहन्यहनि U. श्वोऽपि वाममेव सुवः ? किं बहुना ? दिवे दिवे दिने दिने BB.
९. यामस्य A. वामस्य दातासि Sy. किमर्थम् । वामस्य सम्भजनीयस्य Mah.
१०. यस्मात् Sy. हि यस्मात् Mah.
११. निवासभूतस्य Sy. क्षयस्य स्वर्गनिवासस्य सिद्धय इति शेषः । 'क्षयो निवासे' इत्याद्युदात्तत्वात् क्षयशब्दो निवासार्थः । दिवे दिव . इत्यह्नो नामसु पठितम् Mah. क्षयशब्दो निवासवचन आद्युदात्तत्वात् । 'क्षयो निवासे' इति हि पाणिनिराद्युदात्तत्वं स्मरति । वामस्य च निवासस्य U. क्षयस्य निवासस्य BB.
१२. भेदे M. भो देव or हे देव ! is suggested for भे दव ॥ हे देवदानादिगुणयुक्त ! U.
१३. प्रभूतस्य Sy. भूरेर्विस्तीर्णस्य बहुकालस्य Mah. बहुनो धनपूर्णस्य दाता भवेति शेषः U.
१४. भूयास्म Sy.
१५. ०वाहमने० M. अतो वयमनया Sy.
१६. अया अनया नलोपश्छान्दसः Mah. अनयाBB.
१७. स्तुत्या Sy. श्रद्धायुक्तया बुद्धया Mah. धीरिति कर्मनाम । अनेन च सोमाख्येन कर्मणा U. बुद्धया, अहंप्राप्ति (अर्थप्राप्ति) विषयया । यद्वा अनेन कर्मणा यागात्मकेनेति BB.
१८. धनवन्तः Sy. वामं वननीयं यज्ञकर्म भजन्ति वामभाजो यज्ञानुष्ठातारो भवेम Mah. अभिलषितभाजिनः U. यद् वामं तद्भाजः स्याम । यद्वा अद्य श्वः क्रमेण सर्वदा वामभाजो वयं वामस्य क्षयस्य निवासस्यापि सम्बन्धिनो भूयास्म BB.
१९. भूयास्म Sy. भवेम Mah. वयं सम्भवेम U.
२०. VM. ignores श्वः । दिवे दिवे and वामम् । दिवे दिवे प्रतिदिनम् Sy. यद्वा—उत्तरार्धस्यायमर्थः । हे देव ! वामस्य वननीयस्य भूरेर्धनपूर्णस्य क्षयस्य निवासस्य दाता भवेति शेषः । धीरिति कर्मनाम । अनया धिया सोमाख्येन कर्मणा वयं वामभाजोऽभिलषितभागिनो भवेम Mah.

अथातो गृह्णात्येव । वाममद्य सवितर्वाममु श्वो दिवेदिवे वाममस्मभ्य ँ सावीः । वामस्य हि क्षयस्य । देव भूरेरया धिया वामभाजः स्याम-
"उपयामगृहीतोऽसि सावित्रोऽसि चनोधाश्चनोधा असि चनो मयि धेहि । जिन्व यज्ञं जिन्व यज्ञपतिं भगायेति"
ŚB. 4. 4. 1. 6. p. 380.

अत्र " " चिन्हान्तर्गतो भागो यजुर्वेदस्याष्टमाध्यायनवममन्त्रस्यास्ति । तत्र 'वाममद्य' । इत्यादिर्मन्त्रः YV.8.6. पृथक्, ततः 'उपयाम' इत्यादिश्च पृथङ्मन्त्रः । YV.pp.134,135. This stanza=YV. 8. 6.=TS. 2.2. 12. 2.

VI.72.

इन्द्रासोमा महि तद्वां महित्वं युवं महानि प्रथमानि चक्रथुः ।
युवं सूर्यं विविदथुर्युवं स्व१र्विश्वा तमांस्यहतं निदश्च ॥ १ ॥

इन्द्रासोमा[1,2] । हे इन्द्रासोमौ ! महत् । तत् । वाम्[3] । महत्तत्वम्[4] । युवाम्[5] । महान्ति । प्रथनानि व्रतानि[6] । चक्रथुः[7] । युवाम् । सूर्यम्[8] । लम्भयथः[9] । युवाम् । उदकम्[10] । विश्वानि । तमांसि । अहतम्[11] । निन्दितॄन्[12] । च ।

इन्द्रासोमा वासयथ उषासमुत्सूर्यं नयथो ज्योतिषा सह ।
उप द्यां स्कम्भथुः स्कम्भनेनाप्रथतं पृथिवीं मातरं वि ॥ २ ॥

इन्द्रासोमा । इन्द्रासोमौ[13] ! उषसम् । वासयथः[14] स्वे स्थाने[15] । सूर्यञ्च । उन्नयथः । ज्योतिः[16] । सह । द्विलोकञ्च[17] । उपस्तम्भथुः[18] । अन्तरिक्षेण[19] । ह्यप्रथ[20] च । पृथिवीम् । मातरम्[21] ।

---

१. 'इन्द्रासोमा महि' इति पञ्चर्चमेकादशं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमिन्द्रासोमदेवताकम् । 'इन्द्रासोमा पञ्चैन्द्रासोमम्' इत्यनुक्रान्तम् (KSA. 33.72. P. 24.)। सूक्तविनियोगो लैङ्गिकः Sy.

२. ०सोमाः A.

३. युवयोः Sy.

४. महत्तत्वा A. महत्त्वम् is suggested for महत्तत्वम् ।

५. युवा मुहान्ति A.

६. प्रथनानि प्रतानि प्रतानि A. प्रतमानि is suggested for प्रथनानि ॥ प्रतमानि मुख्यानि वा भूतानि Sy. प्रथम इति मुख्यनाम । प्रतमो भवति N. 2.22.

७. अकार्ष्टम् Sy.

८. सूर्यं लम्भ० A.

९. अलम्भयतं च जनान् Sy.

१०. हेम स्वरित्युदकनामनी Ngh. 1.12.

११. अहिंस्तम् Sy.

१२. निन्दित्वून् A.
निन्दितॄनसुरान् Sy.

१३. हे इन्द्रासोमौ ! Sy.

१४. वाथः A. विवासयथः । उषसं व्युच्छन्तीं कारयथ इत्यर्थः Sy.

१५. स्थे स्थाने A.

१६. ज्योति सह A. ज्योतिषा is suggested for ज्योतिः ॥ तेजसा Sy.

१७. द्युलोक० is suggested for द्विलोक० ॥ दिवम् Sy.

१८. अस्तम्भयतम् Sy.

१९. स्तम्भनहेतुनान्तरिक्षेण मध्ये स्थापितेन Sy.

२०. प्य प्रथं च A. व्यप्रथयतञ्च is suggested for ह्यप्रथं च ।

२१. विश्वस्य मातृभूता Sy.

इन्द्रासोमावहिंमपः परिष्ठां हथो वृत्रमनु वां द्यौरमन्यत ।
प्राणांस्यैरयतं नदीनामा समुद्राणि पप्रथुः पुरूणि ॥ ३ ॥

इन्द्रासोमौ[1] । इन्द्रासोमौ[2] । उदकानि[3] । परिवृत्य[4] तस्थिवांसम् । आहन्तारम्[5] । वृत्रम्[6] । हतः[7] । तदानी वाम्[8] । द्यौः । अन्वमन्यत । प्रेरयतञ्च युवाम् । उदकानि । नदीनाम् । तैश्चोदकैः समुद्रात्[9] । बहुन्[10] । आपूरितवन्तौ, लिङ्गभेदश्छान्दसो यद्वा....काद्या[11] पुरुषतादिति(?)[12] ।

इन्द्रासोमा पक्वमामास्वन्तर्नि गवामिदधथुर्वक्षणासु[13] ।
जगृभथुरनपिनद्धमासु रुशच्चित्रासु जगतीष्वन्तः ॥ ४ ॥

इन्द्रासोमा । हे इन्द्रासोमौ ! नपाम्[14] । आमासु[15] य सु । पक्षणासूध. सु[16] । अन्तम्[17] । निदधथुः[18] । पक्व[19] पयः[20] ।....भीथश्च[21] । आपुवक्षणासु[22] । अनपिनद्ध पयो यथा पृथिव्या न पतति[23] । श्वेत[24] । चित्रवर्णासु[25] । गोषु[26] । अत्ताः[27,28] ।

---

१. ०सोमेण A. सोमा M.
२. हे इन्द्रासोमौ ! Sy.
३. मेघस्थान्युदकानि Sy.
४. परिवृत्य स्थितम् Sy.
५. जगत आहन्तारम् Sy.
६. असुरम् Sy. ७. हतम् Sy.
८. वान्द्योरन्यमन्यत A. युवाम् Sy.
९. ०द्रान् is suggested for ०द्रात् ॥ उदकस्थानानि Sy.
१०. बहून् is suggested for बहुन् ॥ पुरूणि बहूनि Sy. तुवि पुवितिं बहुनामनी Ngh. 3.1.
११. उदकैरापूरयतं च । अथवा समुन्दन्त्युदकान्येव समुद्राणि । तानि रसेनापूरयतमित्यर्थः Sy. समुद्रः कस्मात् ? समुद्रवन्त्यस्मादापः । समभिद्रवन्त्येनमापः । सम्मोदन्तेऽस्मिन् भूतानि । समुदको भवति । समुनत्तीति वा N. 2.10.
१२. It refers to समुद्राणि of the text.
१३. ...काद्यापुरूवतादिति M. Something is missing here. समुन्दन्तीति समुद्राण्युदकान्येवापूरयतमिति is suggested for काद्यापुरुपतादिति ।
१४. गवाम् is suggested for नपाम् ।
१५. आसु M. अपक्वासु Sy.
१६. यसु is redundant.
१७. पक्षणासु घसु M. वक्षणा० is suggested for पक्षणा० ।
१८. अन्तः is suggested for अन्तं ॥ मध्ये Sy. १९. निदधुः M.
२०. पक्वं कया M.
२१. ....भिधश्च M. Something is missing here. जगृभथुश्च is suggested for....भीथश्च ॥ यथा पृथिव्यां स्वयं न क्षरति तथा धारितवन्तावित्यर्थः Sy.
२२. आसु is suggested for आपु ।
२३. ०न विन० A. केनाप्यबद्धम् Sy.
२४. श्वेत A. श्वेतम् is suggested for श्वेत ॥ शुक्लवर्णम् Sy.
२५. नानावर्णासु Sy.
२६. इळा जगतीति गोनामनी Ngh. 2.11.
२७. गोष्यता A. अन्तः is suggested for अत्ता ॥
२८. VM. ignores इत् ॥ इदिति पूरकः Sy.

इन्द्रासोमा युवमङ्ग तरुत्रमपत्यसाचं श्रुत्यं ररा॒थे ।
युवं शुष्मं नर्यं चर्षणिभ्यः सं विव्यथुः पृतनाषाहमुग्रा ॥ ५ ॥

इन्द्रासोमा । इन्द्रासोमौ! युवाम् । अङ्ग । तारक धनम् । पुत्रपौत्रभाजम् । श्रवणीयम् । प्रयच्छथः युवाम् । बलम् । नृहितम् । मनुष्येभ्यः । सविव्यथुः । पृतनासहम् । उद्गूर्णो !

VI. 73.

यो अद्रिभित्प्रथमजा ऋतावा बृहस्पतिराङ्गिरसो हविष्मान् ।
द्विबर्हज्मा प्राघर्मसत्पिता न आ रोदसी वृषभो रोरवीति ॥ १ ॥

यो अद्रिभित् । यः । शिलोच्चयभित् । पूर्वजः । यज्ञवान् । बृहस्पतिः । आङ्गिरस । हविष्मान् । स द्विगुणगमनः शीघ्रगन्ता । प्रकृष्टे घर्मे सीदन् । पालयिता । अस्माकम् । द्यावापृथिव्यौ । वृषभः । आरोरवीति ।

---

१. क्षिप्रम् Sy. २. सन्तानयुक्तम् Sy.
३. श्रयणीयम् M.
४. अस्मभ्यं धत्थः Sy.
५. नृभ्यो हितम् Sy.
६. कृष्टयश्चर्षणय इति मनुष्यनामनी Ngh. 2.3.
७. समतनुतम् । परिवेष्टयथो वा Sy.
८. घृतना० A. शत्रुसैन्याभिभावुकम् Sy.
९. उद्गूर्णो A. M. हे उद्गूर्णो ! इन्द्रासोमौ ! Sy.
१०. 'यो अद्रिभित्' इति तृचं द्वादशं सूक्तं बार्हस्पत्यं भरद्वाजस्यार्षं त्रैष्टुभम् । तथा चानुक्रान्तम् 'यो अद्रिभित्तृचं बार्हस्पत्यम्' (KSA. 33. 73. p. 24.) इति । आभिप्लविकेषूक्थ्येषु तृतीयसवने ब्राह्मणाच्छंसिशस्त्रे स्तोमातिशंसनार्थमिदं सूक्तम् । सूत्र्यते हि—'यो अद्रिभिद्यज्ञे दिव इति सूक्ते' (ĀŚS.7.9.) । वाजपेये बार्हस्पत्ये चरौ 'बृहस्पतिः समजयद्वसूनि' इति स्विष्टकृतोऽनुवाक्या । सूत्रितञ्च—'बृहस्पतिः समजयद्वसूनि स्वामीळते अजिरं दूत्याय' (ĀŚS.9.9.) इति Sy.
११. यो आमी भीत् A.....अभी भिः M.
१२. पणिभिर्विरचितानां शिलोच्चयानां भेत्ता मेघानां विदारको वा Sy. अद्रिर्ग्रावेति मेघनामनी Ngh.1.10.
१३. प्रजापतेर्वीर्यात् प्रथमं जातः Sy.
१४. सत्यवानुदकवान्वा Sy.
१५. बहस्प A.
१६. अङ्गिरसः पश्चाज्जातः । तथा च निगमः—'येऽङ्गारा आसंस्तेऽङ्गिरसोऽभवन्यदङ्गाराः पुनरवशान्ता उदवीप्यन्त तद्बृहस्पतिरभवत्' (AB.3.34.) Sy.
१७. यज्ञभागवान् Sy.
१८. द्वयोर्लोकयोर्बृंहितगमनः Sy.
१९. प्रकर्षेण दीप्तस्थाने वर्तमानः Sy.
२०. पालयिता भवति स बृहस्पतिः Sy.
२१. वर्षकः सन् Sy.
२२. अभिगर्जति Sy.

जनाय चिद्य ईवत उ लोकं बृहस्पतिर्देवहूतौ चकार ।
घ्नन्वृत्राणि वि पुरो ददरीति जयञ्छत्रूँरमित्रान्पृत्सु साहन् ॥ २ ॥

जनाय चित् । जनाय । चित् । यः । आत्मान प्रति गच्छते । लोकम् । बृहस्पतिः । यज्ञे । सकार । शत्रुम् । घ्नन् । शत्रुपुराणि । विदारयति । जयजातयितृन् । शत्रून् । अमित्रान् । पृतनासु । अभिभवत् ।

बृहस्पतिः समजयद्वसूनि महो व्रजान् गोमतो देव एषः ।
अपः सिषासन्त्स्वरप्रतीतो बृहस्पतिर्हन्त्यमित्रमर्कैः ॥ ३ ॥

बृहस्पतिः । बृहस्पति. । स्व जयति । धनानि । महतः । व्रजान् । पशुमतश्च । देवः । एष. । उदकानि । सम्भक्तुमिच्छन् । स्वर्लोकस्थितानि । शत्रुभिरप्रतिहत. । बृहस्पति । हन्ति च । अमित्रम् । मन्त्रैः ।

---

१. चिदिति पूरणः Sy.
२. अपि च यो बृहस्पतिः Sy.
३. उपगच्छते स्तोत्रे Sy.
४. स्थानम् Sy.
५. यज्ञे वर्तमानाय Sy.
६. चकार is suggested for सकार ॥ करोति Sy.
७. शत्रू A.
आवरकाणि तमांसि Sy.
८. निवारयन् Sy.
९. आसुरीः पुरीः Sy.
१०. भृशं विदारयति Sy.
११. जय जातपितृन् A. जयन् is suggested for जयजातयितृन् ।
१२. पृतनात्सु A.
युद्धेषु Sy.
१३. ०भवन् is suggested for ०भवत् ।
१४. तपज जयति A, सञ्जयति is suggested for स्वं जयति ॥ समजयत् । तथा च निगमौ 'बृहस्पतिर्गोवपुषो बलस्य निर्मज्जानं न पर्वणो जभार' (RV. 10.68.9.) इति दूरमित पणयो वरीय उद्गावो यन्तु मितनीऋतेन । बृहस्पतिर्या अविन्दन्निगूळ्हाः सोमो ग्रावाण ऋषयश्च विप्राः ॥ (RV. 10.108. 11.) इति Sy.
१५. पणीनामसुराणां बलस्य वा धनानि Sy.
१६. प्रजां A.
१७. गोसहितान् Sy.
१८. द्योतमानः Sy.
१९. प्रसिद्धः Sy.
२०. ०मिच्छत् A.
सम्भक्तुकामः Sy.
२१. स्वल्लोक० A.
स्वर्गस्य Sy.
२२. केनाप्यप्रतिगतः Sy.
२३. असुरम् Sy.
२४. अर्चनसाधनैर्मन्त्रैः Sy.
अर्को मन्त्रो भवति । यदनेनार्चन्ति N.5.4.

VI. 74.

सोमारुद्रा धारयेथामसुर्यं१ प्र वामिष्टयोऽरमश्नुवन्तु ।
दमेदमे सप्त रत्ना दधाना शं नो भूतं द्विपदे शं चतुष्पदे ॥ १ ॥

[1]सोमारुद्रा । हे सोमारुद्रौ ! धारयेथाम् । [2]असुराणा हन्तृबलम् । तथा सति वाम् । पर्याप्तम् [4]। प्राग्रूपन्तु [5]। यज्ञा. । गृहेगृहे [6]। सप्त । रत्नानि । प्रयच्छन्तौ । शङ्करौ [8]। नो [9]। भवत [10]। द्विपदे [11]। चतुष्पदे च [12]।

सोमारुद्रा वि वृहतं विषूचीममीवा या नो गयमाविवेश ।
आरे बाधेथां निर्ऋतिं पराचैरस्मे भद्रा सौश्रवसानि सन्तु ॥ २ ॥

[14]सोमारुद्रा । हे सोमारुद्रौ ! [15]विवृहतम् [16] । विष्वगञ्चना [17] । अमीवा [18] । या । अस्माकम् । गृहम् [20] । आविवेश । [21]आरे । बाधेथाम् [22] । निर्ऋतिम् [23] । पराचीनम् [24] । अस्मासु [25] । भद्राणि । स्वन्ननिमित्तानि [26] । सन्तु [27 28] ।

---

१. 'सोमारुद्रा' इति चतुर्ऋचं त्रयोदशं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभं सोमारुद्रदेवताकम् । अनुक्रम्यते च—'सोमारुद्रा चतुष्कं सोमारौद्रम्' (KSA. 33.74. P. 24.) इति । विनियोगो लैङ्गिकः Sy.
एनस्वी वाभिशस्तो वा कृत्वा वा कर्म गर्हितम् । सोमारौद्रं जपेत्सूक्तं कृत्स्नमेनो व्यपोहति ॥९. जुहुयाद्वा य एताभिर्ऋग्भिर्नित्यं धृतव्रतः । वारुणेभ्यः स पाशेभ्यो मुच्यते शं तथाप्नुयात् ॥
Rgvidh 2. 125, 126.
२. असुरसम्बन्धि बलम् Sy.
३. युवाम् Sy. ४. अलं पर्याप्तम् Sy.
५. प्राश्नुवन्तु is suggested for प्राग्रूपन्तु ॥ प्रकर्षेण व्याप्नुवन्तु Sy.
६. ग्रहे ग्रहे A. सर्वेष्वस्मद्गृहेषु Sy.
७. धारयन्तौ Sy.
८. सुखकरौ सुखरूपौ वा Sy.
९. नः is suggested for नौ ॥ अस्मभ्यम् Sy.
१०. भवतम् is suggested for भवत ।
११. अस्मदीयाय पुत्रादये Sy.
१२. पश्वादये च शं भवतम् Sy.
१३. VM. explains शम् once only.
१४. यो ब्रह्मवर्चसकामः स्यात्तस्मा एतं सौमारौद्रं चरुं निर्वपेत् BB.
१५. पूर्ववदानङ्, आकारश्च ('देवताद्वन्द्वे च' (Pa. 6.3.26.) इत्यानङ् 'सुपां सुलुक्०' (Pa. 7.1.39.) इत्याकारः, BB.
१६. वियोजयतम् Sy. 'वृहू उद्यमने' तौदादिकः BB.
१७. तां विष्वक् सर्वतो गच्छन्तीम् Sy. विश्वग्गमनाम् BB.
१८. रोगः आविवेश ताम् Sy. अमीवा रोगस्तेजोहानिरूपः BB. १९. यः Sy.
२०. गृहगतं प्राणिजातं वा Sy.
२१. दूरे Sy., BB.
२२. निवारयतम् गमयतं गमयित्वा नाशयतम् BB.
२३. अलक्ष्मीम् Sy. निकृष्टां गतिं निकृष्टगमनहेतुं पापम् BB.
२४. पराग्यथा भवति तथा Sy. परावृत्तिभिर्गमनैः पुनरस्मत्पार्श्वं नागच्छति तथा बाधेथाम् । निपातोऽयं यथा उच्चैर्नीचैः BB.
२५. अस्माकम् Sy.
२६. अन्नानि यशांसि च, सुश्रवसो भावः सौश्रवसम् । श्रवोऽन्नं यशश्च Sy. २७. भवन्तु Sy.
२८. The commentary on this stanza is missing in A. This stanza=TS 1.8.22.5.

सोमारुद्रा युवमेतान्यस्मे विश्वा तनूषु भेषजानि धत्तम् ।
अव स्यतं मुञ्चतं यन्नो अस्ति तनूषु बद्धं कृतमेनो अस्मत् ॥ ३ ॥

सोमारुद्रा । हे सोमारुद्रौ[1] ! युवाम् । एतानि[2] । अस्माकम् । विश्वानि[3] । भेषजानि[4] । अङ्गेषु[11] । धत्तम्[5] । यत् । पापम्[6] । अस्माकम् । अस्ति[7] तद्बद्धम्[8] । अवस्यतम्[9] । मुञ्चतञ्च[10] । तदेवाह तनूषु[11] । बद्धम् । कृतम्[12] । पापमस्माकम्[13] । अस्मत्ताऽवस्यत[14] मुञ्चतमिति[15] ।

तिग्मायुधौ तिग्महेती सुशेवौ सोमारुद्राविह सु मृळतं नः ।
प्र नो मुञ्चतं वरुणस्य पाशाद्गोपायतं नः सुमनस्यमाना ॥ ४ ॥

तिग्मायुधौ[17] । तिग्मधनुष्कौ[17] । तिग्महेती[18] । सुसुखौ[19] । सोमारुद्रौ ! युवाम् । इह[20] । अस्मान्[21] । सुष्ठु[22] । सुखयतम् । प्रमुञ्चतञ्च । स्मात्[23] । वरुणस्य । पाशात् । रक्षतम्[24] । स्मात् । सौमनसमिच्छन्तौ[25] ।

---

१. हे सोमारुद्रौ ! युवामुच्येथे Dur.
२. प्रसिद्धानि Sy. यानि लोके सन्ति तानि BB.
३. सर्वाणि Sy., Dur., SKN.
४. रोगोपशमकराणि भेषजान्यौषधानि SKN.
५. धारयतम् Sy. स्थापयतम् । दत्तं वा BB. अरोगशरीरानस्मान् कुरुतमित्यर्थः SKN.
६. यदस्माभिः कृतमेनः पापम् BB.
७. विद्यते Sy.
८. तद्बद्धम् A. पापम् Sy. तत्प्रथमं तावत् BB. तनूषु बद्धं निबद्धम् SKN.
९. बिध्यत A. क्षपयतम् । श्लथयतम् । शिथिलबन्धं कुरुतमित्यर्थः Sy. ततो मुक्त्वा तदवस्यतमवसाययतं विनाशयतम् Sy.
१०. विश्लेषयतम् BB. अपनीय चान्यत्र नीत्वा मुञ्चतम् SKN.
११. अङ्गेषु Sy. शरीरेषु BB. Dur., SKN.
१२. अस्माभिः कृतम् Sy. मनोवाक्कायैः कृतम् Dur. अस्यैव विवरणं कृतम् SKN.
१३. रवाण्वम् A. एनः किञ्चिदस्ति Dur. किं तत् ? एनः पापमस्माभिरिति शेषः SKN.
१४. ०स्माक M.
१५. क्तः A. अस्मत्तः is suggested for अस्मत्त ॥ अस्मत् पञ्चम्यन्तम् । पुरस्तात्कृतसम्बन्धम् SKN.
१६. इत्यस्मानवितुं रक्षितुमिच्छतम् Dur. स्यतिरुपसृष्टो विमोचने । विमुञ्चतमपनयतं वाऽस्मत्त इत्यर्थः SKN. N. 7.10., SKN. III. 61.
This stanza=TS. 1. 8. 22. 5.
१७. दीप्तधनुष्कौ Sy.
१८. ०हेति A. तीक्ष्णशरौ Sy.
१९. शोभनसुखप्रदौ Sy.
२०. लोके Sy. २१. ०स्मात् A.
२२. सुष्ठू A. अत्यन्तम् Sy.
२३. अस्मान् is suggested for स्मात् ।
२४. आपद्भ्यो रक्षतं च Sy.
२५. शोभनं मनः स्तोत्रमिच्छन्तौ सुमनस्यमानौ स्तूयमानौ सुमनसौ वा सन्तौ युवाम् Sy.

VI.75.

जीमूतस्येव भवति प्रतीकं यद्वर्मी याति समदामुपस्थे ।
अनाविद्धया तन्वा जय त्वं स त्वा वर्मणो महिमा पिपर्तु ॥ १ ॥

[1]जीमूतस्येव ॥ [2]वायुर्भारद्वाजः ॥ शौनकः—

१. 'जीमूतस्येव' इत्येकोनविंशत्यृचं चतुर्दशं सूक्तं भारद्वाजस्य पायोरार्षम् । अनुक्रम्यते च— 'जीमूतस्येवैकोना पायुर्भारद्वाजः सङ्ग्रामाङ्गान्यूक्शोऽभितुष्टाव वर्म धनुर्ज्यामार्त्नी इषुधिं जगत्यर्धे सारथिमर्धे रश्मीनश्वान् रथं रथगोपान् जगत्यां लिङ्गोक्तदेवता द्वाभ्यामिषूः प्रतोदं हस्तघ्नं द्वाभ्यामिषूः पराः पङ्क्त्यादयो लिङ्गोक्तदेवताः सङ्ग्रामाशिषोऽन्त्याऽनुष्टुबुजीत आलाक्तेति च द्वे द्वे' (KSA.33.75.P.24.) इति । 'रथे तिष्ठन्' 'ब्राह्मणासः' इति षष्ठी दशम्यौ जगत्यावन्त्या 'यो नः स्वः' इत्येषानुष्टुप् 'ऋजीते' 'आ जङ्घन्ति' 'आलाक्ता' 'अवसृष्टा' 'यो नः स्वः' इति पञ्चानुष्टुभः । 'यत्र बाणाः' इति पङ्क्तिः शिष्टास्त्रिष्टुभः । आद्यया वर्म स्तूयते, द्वितीयया धनुः', तृतीयया ज्या, चतुर्थ्यार्त्नी, पञ्चम्येषुधिः। अतः पञ्चानां वर्माद्या देवताः । षष्ठ्या पूर्वार्धेन सारथिः स्तूयते । अतः सोऽर्धस्तद्देवताकः । उत्तरार्धेन रश्मयः स्तूयन्ते । सप्तम्याश्वाः, अष्टम्या रथः, नवम्या रथगोपाः । अतस्तास्तद्देवताकाः 'ब्राह्मणासः' इत्यस्यां ब्राह्मणपितृसोम्यद्यावापृथिवीपूषाणो लिङ्गोक्तदेवताः । एकादशीद्वादश्याविषुस्तुतिरूपत्वाविषुदेवताके । त्रयोदश्या प्रतोदः, चतुर्दश्या हस्तघ्नः, पञ्चदशीषोडश्याविषुदेवताके । सप्तदश्या युद्धभूमिब्रह्मणस्पत्यदितिरूपा लिङ्गोक्तदेवताः । अष्टादश्याः कवचसोमवरुणा देवताः । अन्त्याया देवा ब्रह्म च देवताः। युद्धेऽनेन सूक्तेन राजानं सन्नाहयेत् । तथा चाश्वलायनः—'सङ्ग्रामे समुपोळ्हे राजानं सन्नाहयेदा त्वाहार्षमन्तरेधीति पञ्चाद्रथस्यावस्थाय जीमूतस्येव भवति प्रतीकमिति कवचं प्रयच्छेत् उत्तरया धनुरुत्तरां वाचयेत्स्वयं चतुर्थीं जपेत्पञ्चम्येषुधिं प्रयच्छेदभिप्रवर्तमाने षष्ठीं सप्तम्याश्वानष्टमीमिषूनवेक्षमाणं वाचयत्यहिरिव भोगैः पर्येति बाहुमिति तलं नह्यमानम्' (AGS. 3.12.) इति । तथा च 'अवसृष्टा परा पत, इतीषून् विसर्जयेद् 'यत्र बाणाः सम्पतन्ति, इति युध्यमानेषु जपेत् संशिष्याद्वा' (AGS.3.12.) इति । अध्यायोपाकरणोत्सर्जनयोर्मण्डलान्त्यहोमे 'यो न स्वः' इत्येषा' (AGS.3.4.) Sy. अत्र बृहद्देवता—

प्रथमा त्वस्य सूक्तस्य योद्धारं स्तौति वर्मणम् ।
धनुः स्तौति द्वितीया[1] च तृतीया ज्याभिमन्त्रिणी १२९
स्तौति चार्त्नी चतुर्थी ऋक्[2] इषुधिं स्तौति पञ्चमी ।
अर्धेन सारथिः थि,षष्ठ्या रश्मयोऽर्धेन तु[3] स्तुताः १३०
अश्वांश्च[4] सप्तमी स्तौति आयुधागारमष्टमी ।
नवमी रथगोपांस्तु दशमी रणदेवताः ॥१३१॥
इषुमे[5]कादशी स्तौति द्वादशी कवचस्तुतिः ।
त्रयोदशी कशां स्तौति हस्तत्राणं चतुर्दशी ॥१३२॥
प्रथमे पञ्चदश्यास्तु पादे पुनरिषुः[6] स्तुतः ।
अयोमुखी द्वितीये तु अर्द्धं चैव वारुणं परम्[7] ॥१३३॥
षोळश्यां त्वस्य सूक्तस्य धनुर्मुक्त इषुः[8] स्तुतः ।
सप्तदश्यां तु युद्धादेः कवचस्य तु बध्यतः ॥१३४॥
स्तुतिरष्टादशी ज्ञेया युयुत्सोः[9] स्तुतिरुत्तमा ।
आशास्ते चोत्तमे पादे ऋषिरात्मन आशिषः ॥१३५॥

'जीमूतस्येवैकोना पायुर्भारद्वाजः सङ्ग्रामाङ्गान्यूक्शोऽभितुष्टाव०' इत्यनुक्रमणी (KSA.33.75.Pa.24)। तथा ऋग्विधाने—सङ्ग्राममभ्युद्यताय राज्ञे चैतत् प्रयोजयेत् । सर्वाण्यङ्गानि रथ्यांश्च सदश्वांश्चानुमन्त्रयेत् ॥ इति ॥ (Rgvidh.2.120. reads 'सङ्ग्रामन्तु प्रयातस्य राज्ञश्चैतत् प्रयोजयेत्') आश्वलायनः—'जीमूतस्येव भवति प्रतीकमिति कवचं प्रयच्छेत् उत्तरया धनुः, उत्तरां वाचयेत्, स्वयं चतुर्थीं जपेत्' (AGS. 3.9.3–6.)। पायुस्त्रिष्टुभा वर्म तुष्टाव DDN.

२. वायुर्भरद्वाजः M. पायुः is suggested for वायुः ॥ एवमग्निं स्तुत्वाश्वरक्षणे योधा युद्धोपकरणानि च स्तूयन्ते । भरद्वाजसुतः पायुः सङ्ग्रामाङ्गानि प्रत्यृचं स्तौति । त्रिष्टुब्भिर्वर्मं स्तूयते Mah. वर्म स्तूयते U.

[1] धनुश्च द्वितीया तु BD. [2] स्तौत्यृगार्त्नी चतुर्थी तु BD. [3] संस्तुताः BD. [4] अश्वांस्तु BD. [5] इषुञ्चैकादशी BD [6] दिग्ध इषु BD. [7] अर्धेऽस्त्रं वारुणं परे BD. [8] इषु BD. [9] युयुत्सो BD.

अभ्यावत्ति[1] वायमान प्रस्तोकश्चैव साञ्छयः[2] ।
अभिजग्मतुर्भरद्वाजौजतौ[3] वारखैर्युधि[4] ॥१२४॥
अभिगम्योचतुस्तौ[5] तु प्रणम्याख्याय नामनी ।
युधि वारशिखैर्ब्रह्मणावां[6] विद्विविनिर्जितौ[7] ॥१२५॥
भवत्पुरोहितावावां[8] क्षत्रबन्धू[9] यजेवहि ।
क्षत्रं धनमपि[10] जेय हि ब्रह्म यत्पाति शाश्वतत्[11] ॥१२६॥
ऋषिस्तु तौ तथेत्युक्त्वा वायुपुत्रमभाषत[12] ।
अधर्षणीयौ शत्रूणां कुरुष्वैनौ[13] नृपाविति ॥१२७॥
पितरं स तथेत्युक्त्वा युद्धोपकरणं तयोः ।
जीमूतीयेन[14] सूक्तेन पृथक्त्वेनान्वमन्त्रयत् ॥१२८॥

जीमूतस्येव[15] घटितम् । अङ्गम्[16] । भवति सन्नद्ध वर्मणाऽयोमयेन[17] । यद्वा[18] । वर्मी[19] । याति[20] । समदां

---

१. अभ्यापत्ति वायमाने A. according to BD. अभ्यावर्ती वायमानः is suggested for अभ्यावत्ति वायमान ।
२. सायः A. साञ्जयः is suggested for साञ्छयः ।
३. ०जञ्छितौ A. ०जञ्जितौ is suggested for ०जजितौ । One syllable is too more in the third *Pāda*. आजग्मतुर्भरद्वाजम् BD.
४. ०गिरवैय्यधि A. वारशिखैः is suggested for वारखैः ।
५. तुं A. तं प्रसाद्याख्याय BD.
६. ब्रह्मप्रावाम् is suggested for ब्रह्मणावाम् ।
७. विद्विनि A. द्विड्भिर्वि० is suggested for विद्विविनि० । आवां विद्धि विनि० BD.
८. ०हितो वा० A.
९. क्षत्रबन्धून् जयेवहि BD.
१०. धमपिजे० A. क्षत्रं तवपि विज्ञेयं BD. One syllable is too more in the third *Pāda*.
११. शाश्वतम् is suggested for शाश्वतत् ।
१२. पायुं पुत्र० is suggested for वायुपु० ।
१३. ०ष्वैनो A. ०ष्वैतौ BD.
१४. जीमूतस्येति सूक्तेन BD. 5. 124—128. (बृ० दे० ५. ११२) १५. मेघस्येव भवति मेघस्य यादृशं रूपं तादृशमस्य भवतीत्यर्थः Sy. मेघस्येव Mah. जीमूतो मेघस्तस्येव U.
१६. प्रतीकं रूपम् Sy. DDN. तदा प्रतीकं सेनामुखम् । ... मेघस्य मुखं विद्युत्स्तनयित्नुधाराभिर्यथाऽसह्यमेवं हस्त्यश्वरथपदात्यस्त्रजालतूर्यनादशरोघैः सेनामुखमसह्यं भवतीत्यर्थः । अतोऽहं ब्रवीमि Mah. यथा मेघस्य मुखं विद्युत्स्फुरितस्तनयित्नुधारानिकरैरसह्यं भवत्यन्तः सरणैरेवं हस्त्यश्वपदातिमुखं निशितास्त्रगम्भीरतूर्यनिनादशरधाराभिरसह्यं भवति U.
१७. लोहमयेन सन्नद्धस्य राज्ञः Sy., DDN.
१८. यदा is suggested for यद्वा ॥ यदायं राजा Sy., DDN. एवं कस्मिन् काले कस्येवेत्यत आह ... यदा U.
१९. वर्मी A. कवची Sy., DDN. कवचवान् Mah. वर्मास्य विद्यत इति वर्मी U.
२०. गच्छति U.

सेनानाम्[1] । उपस्थेऽग्रे[2] योधनाय[3] । अनाविद्धेन[4] शत्रुभिः । शरीरेण । सपत्नान्[5] जय[6] । त्वम्[7] । सः । वर्मणः । महिमा[8] । त्वा[9] । पारयतु[10] ॥

शौनकः—[11]'पुमा[12] त्वस्य सूक्तस्य योद्धारं स्तौति वर्मिणम्[13]' इति ।

धन्वना[14] गा धन्वनाजिं[15] जयेम[16] धन्वना[17] तीव्राः[21] समदो[22] जयेम ।
धनुः[18] शत्रोरपकामं[19] कृणोति[20] धन्वना[14] सर्वाः[23] प्रदिशो[24] जयेम ॥ २ ॥

धन्वना[14] । धनुषा[15] । पशून्[16] शत्रूणाम् । जयेम[17] । धनुषा[15] । सङ्ग्रामम्[18] । धनुषा[15] । तीव्रान्[21] । कलहान्[22] ।

---

१. सेनाम् A. सङ्ग्रामाणाम् Sy., DDN. सङ्ग्रामाणाम् । .... सह माद्यन्ति योधा यासु ताः समदः सङ्ग्रामाः । मदेः क्विप् Mah. सम्माद्यन्ति सह वा माद्यन्त आसु योद्धार इति समदः । समदशब्दः सङ्ग्रामवचनः । समदां सङ्ग्रामाणाम् U. २. उपस्थाने सति Sy. DDN. उत्सङ्गे Mah. उपकण्ठे यत एवमतो ब्रवीमि U. ३. ०नाया M.

४. अबाधितया Sy. DDN. हे वर्मिन् ! अनाविद्धयाऽक्षतया Mah. अरिष्टया U.

५. शत्रून् Sy. शत्रून् हत्वा Mah.

६. जयं प्राप्नुहि Mah. 'धन्वना गाः' (RV. VI. 75. 2.) इत्यादिभिरस्त्रमण्डलं स्तुत्वा ददाविति DDN. ७. त A. हे राजन् ! त्वम् Sy. स त्वा'ऊष्मा परिलुप्यते त्रयाणाम्' (RPR. 2.11.) इत्यूष्मलोपः DDN.

८. सर्वं महो महिमा M. तादृशः Sy. DDN.

९. त्वाम् Sy.

१०. पारयितु A. पालयतु is suggested for पारयतु ।

११. प्रथमा is suggested for पुमा ।

१२. M. adds च after त्वस्य

१३. वर्मिणिति A. BD. 5.129.[a-b]. This Stanza=YV. 39. 38.

१४. धन्व दाना A. धनुः स्तूयते Mah. धनुः स्तूयते त्रिष्टुभा U.

१५. चापेन Sy. धनुषा कृत्वा Mah. केवलस्यापि धनुषश्छान्दसत्वाद्ङ् । धन्वना धनुषः SKN.

१६. गाः Sy. धेनूः Mah. ता गाः Dur. गाः शत्रूणां स्वभूताः SKN.

१७. वयं वशीकरवाम Sy. अरिभ्यो जयेम Dur.

१८. धन्वना Sy. धनुषैव SKN.

१९. आजिं मार्गम् । .... अजन्ति गच्छन्ति यस्मिन्नसावाजिमार्गः Mah. मार्गम् U. इतरेतरस्पर्धया यत्र लक्ष्यवेधायैव केवलमिषवः क्षिप्यन्ते वैतर्क्येण प्रतापार्थं वा तमाजिम्, आजवनं धनुषैव वयं जयेम Dur. यः स्पर्धयैव लक्ष्यवेधफलमात्रं क्रियते तं सङ्ग्रामम् SKN.

२०. धनुषा is missing in M.

२१. तीव्रात् M. उद्धताः Sy. उग्राः Mah. तीव्राः पटव उद्गूर्णायुधाः U. अपि च याः.... दारुणाः Dur. परस्परवधरूपाः SKN.

२२. हात् M. अत्यन्तं मदवतीः शत्रुसेनाः Sy. समदः सङ्ग्रामान् Mah. U. सङ्ग्रामा अनेकशस्त्रसम्पातसङ्कटा अनेकवीरपुरुषकीर्णाः । .... सम्पूर्वस्यात्तेर्भक्षणार्थस्य । भक्षित इव हि तत्र परस्परतः । मदतेर्वा हर्षणार्थस्य द्वितीयं सम्मदो वेति । संहृष्टास्तत्र हि परस्परतो युध्यन्ते Dur. सङ्ग्रामनामैतत्...शत्रुवधफलसङ्ग्रामम् । .... पठिता सा स्वनिगदेनैव व्याख्याता । समद इति बहुवचनान्तं सङ्ग्रामनाम । प्रथमं व्याख्येयत्वेनोपात्तम् । तस्य निर्वचनं द्वितीयम् । सम्पूर्वादत्तेः सम्पदादिक्विपि । सम्भक्षणात्परस्परस्यायुधाम् । समदन्तीति समदः सङ्ग्रामा उच्यन्ते । मदतेर्वा क्विपि हर्षकर्मणः पूर्ववत् । संहृष्यन्ति हि तत्र योद्धारः SKN.

जयेम[1] । धनुः[2] । शत्रोः । अपगतं काममं[3] । करोति[4] । धन्वना[5] । सर्वाः[6] । प्रकृष्टा दिशः । जयेम[7] ।

वक्ष्यन्ती वेदा गनीगन्ति कर्णं प्रियं सखायं परिषस्वजाना ।
योषेव शिङ्क्ते वितताधि धन्वञ्ज्या इयं समने पारयन्ती ॥ ३ ॥

वक्ष्यन्तीव[10] । वक्ष्यन्तीव[11] । आगच्छति[12] । कर्णम्[13] । प्रियम्[14] । सखायं[15] योद्धारम् ।

१. तानपि वयं जयेम Dur.

२. धनुश्च । . . . कर्तृत्वाविवक्षाऽत्र धनुषः U. अपि च किम्बहुना ? समासत एव ब्रूमः, धनुः Dur. धनुरेव च SKN.

३. ०गतका० M. कामस्यापायम् Sy. मनोरथाभावम् । . . . कामस्याभावोऽपकामम् । . . . . अर्थाभावेऽव्ययीभावः Mah. यत्र यत्र शत्रुरस्माञ्जेतुकामः स्यात्ततस्ततोऽपगतकाममस्मत्तो धनुः Dur. मध्यमपदलोपी समासः । अपगतं काममस्मज्जयविषयम् SKN.

४. करोतु Sy. अपनयति कामम् U. लोडर्थे लट् । करोतु Dur., SKN.

५. धनुषा च U. अपगतकामे च तस्मिञ्छत्रौ वयं धन्वना धनुषैव Dur. किम्बहुना ? धनुषैव वयम् Sy. ६. वयं सर्वाः Sy. एताः सर्वा दिशः Dur.

७. सर्वासु दिक्षु वर्तमानान् शत्रून् जयेम । प्रदिक्शब्दो लक्षणया तत्स्थेषु पुरुषेषु वर्तते, मञ्चाः क्रोशन्तीतिवत् । धन्वञ्शब्दस्य जयतेश्चावृत्तिरादरार्था Sy. प्रगतादिभिरवान्तरदिशः SKN.

८. जयेऽश्वम A. ईदृशो धनुःप्रभावः Mah. जयेमेत्येतदाशास्महे Dur.

९. धनुर्धन्वतेर्गतिकर्मणः । वधकर्मणो वा । धन्वन्त्यस्मादिषवः । तस्यैषा भवति. . . . इति सा निगदव्याख्याता । समवः समवो वान्तेः । सम्मवो वा मवतेः N.9.17., SKN. III. 157.

१०. पूर्वत्र ऋग्द्वयेन कवचधनुषी स्तुते । अत्र ज्यास्तुतिः Sy. ज्या स्तूयते Mah. ज्या अभिधेया U.

११. ०क्ष्यन्तिव A. कीदृशी, उत्प्रेक्ष्यते । वक्ष्यन्तीव वक्तुमिच्छन्तीव । अन्योऽपि वक्तुमिच्छन् कर्णं प्रत्यागच्छति Mah. वचनोत्सुकेव योषित् U. येयं योषिदिव काचित् कस्मैचिदिष्टाय पुरुषाय किञ्चिद्रहस्यं वक्ष्यन्तीव कथयिष्यन्तीव ज्या Dur अत्रैकवाक्यतायै यत्तवध्याहारः । या वक्ष्यन्तीव यथा वदिष्यन्ती SKN.

१२. ०च्छन्ति A. अत्यर्थमागच्छति । यङ्लुकि गमे रूपम् Mah. आगच्छन्ति, अत्यर्थमागच्छति वा U. धनुष्मता पुरुषेणेषुं चिक्षिप्सता सव्येन दक्षिणेन वा पाणिना कृष्यमाणा. . . . मध्यमात्मनो निनीयेषुं गनीगन्त्यागच्छति Dur. कञ्चित्काचित् स्त्री आगच्छेत्तद्वत् आगनीगन्ति पुनःपुनरागच्छति, आकृष्यमाणा SKN.

१३. कर्णम A. धन्विनो राज्ञः कर्णप्रदेशम् Sy. आकृष्टा सती योद्धुः कर्णं प्रति Mah. धानुष्ककर्णमूलम् U. सव्यं दक्षिणं वा कर्णं प्रत्याकृष्यते धनुष्मता Dur. कर्णं प्रति SKN.

१४. प्रियकरं वाक्यम् Sy. इष्टम् Mah. या च प्रियमिव U. कथम् ? इति. . . . प्रियमिष्टम् Dur. प्रियमिव SKN.

१५. सर्वा यं A. पतिमिव Sy. मित्रं बाणरूपम् Mah. सखायमिषुम् U. कञ्चित् सखायं समानख्यानमुपजातप्रीतिं स्त्री पुरुषमिवेषुम् Dur. सखायं कञ्चित् काचित् स्त्री SKN.

परिष्वजमाना[1]। योषेव[2]। शब्दं करोति[3]। विततां[4]। अधि[5]। धनुषि[6]। ज्यां[7]। इयम्[8]। सङ्ग्रामे। वारयन्ति[9][10]।

---

१. आलिङ्गन्ती। स्वञ्जेः शानचि शपः श्लौ सति द्वित्वम् Mah. आलिङ्गयन्ती U. सम्प्रत्यर्थ एव सस्वजानेत्यभ्यासोऽनर्थकः। अर्थविशेषाभावात्। यथा हि सा कर्णं प्रत्याकृष्यते धनुष्मता तथा मध्यमात्मनो निनीषेयुं परिष्वजत इव Dur. परिष्वजन्ती। किम्? सामर्थ्याद्विषुं श्लिष्यन्तीत्यर्थः SKN.

२. नारी Sy. का इव, योषेव यथा योषा कामिनी कामुकरञ्जनायाव्यक्तं वदति एवमियमपि Mah.
यथा मुग्धा योषित् U. किमेतावदेव? नेत्युच्यते, या चेयं योषेव.....योषिदिव। विदग्धा काचित् कामिना पुरुषेणात्मानं प्रत्याकृष्यमाणोपजायमानपरितोषा कामिनः पुरुषस्य हर्षमुत्पादयन्ती Dur.

३. शब्दायते Sy. अव्यक्तशब्दं कुरुते Mah. 'शिजि अव्यक्ते शब्दे'....कामुकरञ्जनार्थमव्यक्तं कूजितं करोति, एवमियमव्यक्तं शब्दं करोति U. सुकुमारमव्यक्तशब्दं करोति Dur. सुरतसमये शिङ्क्ते, अव्यक्तं शब्दं करोति SKN.

४. विस्तृता Sy. विस्तारिता सती Mah.
प्रसारिता च U.
आरोपिता Dur.

५. अधीति सप्तम्यर्थानुवादः Sy. उपरि Mah., U., SKN.

६. धन्वनि Sy. धन्वनि धनुषि Mah. निबद्धा U. धनुषः SKN.

७. सा पुनरियं 'जयतेर्वा जिनातेर्वा' धात्वन्यत्वमर्थैकत्वम्। तद्बलेन हि जीयते। स पुनरेष धनुर्गुणः Dur.
ज्या वक्तव्या, जयतेः, जयसाधनत्वात्। जिनातेर्वा, 'ज्या वयोहानौ' इत्यस्य। साभिप्रायेण हेतुभावं प्रतिपद्यमाना वयो भावयति। जवतेर्वा गत्यर्थस्यान्तर्णीतण्यर्थस्य। प्रजावयति प्रगमयति इषूनिति वा पाठान्तरम् SKN. ज्या जयतेर्वा। जिनातेर्वा प्रजावयतीषूनिति वा N. 9.19.

८. सेयम् U. सेयमस्माकमेवमादिगुणयुक्ता ज्या Dur.

९. पारयन्ती is suggested for वारयन्ति॥
पारं नयन्ती Sy. 'पार तीरकर्मसमाप्तौ' अवन्तः। सङ्ग्रामादुत्तारयन्ती विजयं कुर्वतीत्यर्थः Mah. विजयं कुर्वती सङ्ग्रामात्तारयन्ती स्तूयतेऽस्माभिरिति शेषः U. पारयन्ती, अस्तु। पारमन्तं नयन्ती, अस्तु शत्रूणामित्येतदाशास्महे Dur. किम्? सामर्थ्याद्विषून्। इषुगमनेन वा पालयन्ती योद्धारम्। 'इषुरीषतेः' ईषति हन्तीति गतिकर्मणो वधार्थस्य वा। उभयार्थोपपत्तेः SKN.

१०. VM. ignores इत्॥ इतिति पूरणः Sy., SKN. इत् पादपूरणार्थः Mah. इच्छब्दः पादपूरणार्थः U. वक्ष्यन्तीवाऽऽगच्छति कर्णं प्रियमिव सखायमिषुं परिष्वजमाना। योषेव [शिङ्क्ते] शब्दं करोति। विततामधि धनुषि ज्येयं समने सङ्ग्रामे पारयन्ती (पारं नयन्ती) N. 9.19., SKN. III. 158.
This stanza=YV. 29. 40.

ते आचरन्ती समनेव योषा मातेव पुत्रं बिभृतामुपस्थे ।
अप शत्रून्विध्यतां संविदाने आत्नीं इमे विष्फुरन्ती अमित्रान् ॥ ४ ॥

ते आचरन्ती । ते । आचरन्त्यौ । सगमनस्थेव । स्त्री । मातेव । पुत्रम् । बिभृतां योद्धारम् । उपस्थे । अप । शत्रून् । विध्यताम् । सङ्गच्छमाने । आत्न्यौ । इमे । विविधं

---

१. ते आचरन्ती is missing in A. अत्र धनुष्कोटयोः स्तुतिः Sy. धनुःकोटी स्तूयेते Mah. धनुषः कोटी स्तूयेते U. आत्न्योरेवानुमन्त्रणमश्वमेधेऽनेन क्रियते Dur. पायुर्भारद्वाजस्तस्यार्षम् SKN.

२. ते आचरन्त्यौ is missing in M. धनुष्कोट्यौ Sy. ते प्रसिद्धे इमे Mah. आत्न्यौ Dur. ज्यायाऽऽकृष्यमाणयाऽऽकृष्यमाणे SKN.

३. अभितश्चरन्त्यौ Sy. कीदृश्यावात्न्यौ । आचरन्ती आचरन्त्यौ, आगच्छन्त्यौ धानुष्कं प्रति Mah. ते आचरन्ती आगच्छन्त्यौ धानुष्कं प्रति U. एवमाकृष्टारं प्रति नित्यमाचरन्त्यौ भवत आनमत्यौ Dur. आगच्छन्त्यौ ये द्वारं प्रति SKN.

४. गमनस्तेव A. समनस्केव is suggested for सगमनस्थेव ॥ तत्र दृष्टान्तः । समना योषा इव वचनव्यत्ययः । समना समानमेकपतिगतं ययोस्ते समनसौ । विभक्तेर्डादेशः । समचित्ते Mah. समने इति वचनव्यत्ययः । समानभर्तृगतमनस्के योषे इव U. एकभर्तृके Dur. समाने भर्तरि मनो ययोस्ते इव SKN.

५. योषा पतिसमीपं न त्यजति, तद्वदाचरन्ती अभितश्चरन्त्यौ Sy. योषे स्त्रियौ यथा कान्तमागच्छतः Mah. यथा समानभर्तृगतमनस्के योषे पतिमागच्छन्त्यौ तथा U. योषितौ यथैकं भर्तारं प्रत्याचरन्त्यौ भवतः परिष्वक्तुम् Dur. योषितौ स्त्रियौ भर्तारं प्रति SKN.

६. यथा माता पुत्रं धारयति तद्वत् Sy. माता पुत्रमिव, यथा जननी पुत्रमुत्सङ्गे बिभर्ति तथा Mah. यथा माता पुत्रं धारयत्येवम् U. यथा माता SKN.

७. राजानं धारयेताम् Sy. धारयतां शरमिति शेषः Mah. धारयतां शरम् U. रक्षणार्थं ये बिभृतामाकृष्टारम् Dur. एवं बिभृतां धारयताम् SKN.

८. उपसो A. उपस्थाने Sy. उत्सङ्गे मध्यभागे Mah. उपस्थ उत्सङ्गे U. अङ्के धारयेत् SKN.

९. अ वा A.

१०. गत्रून् A.

११. ताडयताम् Mah. 'वध ताडने' अपविध्यतां च शत्रून् U. शत्रूनपविध्यतामित्येतदाशास्महे Dur. ये द्वारमपविध्यतामपनयतां च शत्रून्.... अपपूर्वो व्यधिरपनयने द्रष्टव्यः । अपविद्धो निरस्त उच्यते SKN.

१२. सञ्जानाने विसंवादरहिते Sy. संविदाते ते संविदाने ।....परस्परं सङ्कुतं कुर्वाणेMah. संविदाने सुखमनुभवन्त्यौ U. नित्यमस्माकमनुना प्रकारेण संविदाने संवादमिव कुर्वाणे । परस्परत आकर्षणाभिप्रायमेतत् । आकृष्यमाणयोस्तयोः संवाद एव परस्परतो भवति Dur. सम्यग् जानन्त्यौ स्वकर्म SKN.

१३. आत्यापि मे A. गच्छन्त्यौ 'ऋ गतौ' इति धातोः 'चुर्यंगिभ्यां निः' इति बाहुलकात् निप्रत्ययो धातोरार्तभावश्च । ततः 'कृदिकारादक्तिनः' (Pa. 4.1.45.) इति ङीष् । द्विवचनस्य पूर्वसवर्णः Sy. धनुःकोटी Mah. धनुषः कोटी U. धनुष्कोटी SKN. आत्नीं अर्तन्यौ वा । अरण्यौ वा । अरिषण्यौ वा N. 9.39.

१४. धनुष्कोटयौ Sy.

घ्नन्त्यौ[1] । शत्रून्[2] ।

बह्वीनां पिता बहुरस्य पुत्रश्चिश्चा कृणोति समनावगत्य[3] ।
इषुधिः सङ्काः[4] पृतनाश्च सर्वाः[5] पृष्ठे निनद्धो जयति प्रसूतः[6] ॥ ५ ॥

बह्वीनां[7] पिता । बह्वीनामिषूणाम्[8] । पिता[9] । तदेवाह[10] बहुः । अस्य[11] । पुत्र[12] इति इषूनभिप्रेत्याह । चिश्चेति[13] निपातो[14] हासवचनो हासमिव । करोत्यास्येनोज्ज्वलपुङ्खेन[15] । सङ्ग्रामम्[16] । उपेत्य[17] । इषुधिः[18] । सङ्काः

---

१. विहिंसन्त्यौ Sy. शत्रून् प्रति टङ्कारं कुर्वाणे Mah. विष्फुरन्त्यौ U. अमुना प्रकारेण ये विस्फुरन्त्यौ नित्यममित्रान् भवतः Dur. स्फुरतिर्वधकर्मा । निघ्नन्त्यौ SKN.

२. ते आचरन्त्यौ समनसाविव योषे मातेव पुत्रं बिभृतामुपस्थ उपस्थाने । अपविध्यतां शत्रून्-त्संविदाने आत्न्यविमे विघ्नन्त्यावमित्रान् N. 9. 40. SKN. III. 174.
This stanza=YV. 29. 41.

३. इषुधिरत्र स्तूयते Sy. इषुधिः स्तूयते Mah. इषुधिरभिधेयः U. पायोर्भारद्वाजस्य । पर-तश्च युद्धोपकरणस्तुतयः । अत्रैकवाक्यतायै यत्तदध्याहारः SKN.

४. बह्वीना० A. इषुशब्दस्योभयलिङ्गत्वाद् बह्वी-नामिति प्रयोगः Sy.

५. रक्षणहेतुत्वाद् पितेत्युच्यते Sy. य इषुधिस्तूणः पिता पालकः । यतो बाणान् धरति Mah. पालयिता । तेन सहिताः पाल्यन्ते सहिताः सन्निदधाति U योऽयमिषुधिः.....पाता रक्षि-ता, तदर्थत्वात् Dur. पितृस्थानीयः पालयिता वा SKN. ६. तमेवाह A.

७. बाणसमूहः Mah. बहुरिषुकलापः U. इषु-कलापः Dur. इषुगणः SKN.

८. इषुधेः Sy. अस्येषुधेः Mah. यस्य चास्य U., SKN. यस्य चेषुधेः Dur.

९. इषुर्बहुर्भवति । बहव इषवो हीषुधौ निधीयन्ते । इषूणां निधानत्वादिषुधिः Sy. पुत्रस्थानीयः पाल्यमानत्वात् । पुरून् बहून् त्रायत इति पुत्रः Mah. पुत्रस्थानीयः । स हि तेनेषुकलापेन त्रायते बहु वा तदर्थं हितं करोति U. पुरुणो बहुनस्त्राता, तदर्थं ह्यसौ रक्ष्यत इत्येवं व्युत्पा-द्यम् Dur. पुत्रस्थानीयः । पुत्रवद्रक्ष्यत इत्यर्थः SKN. इषुधिरिषूणां निधानम् N. 9.13.

१०. चिश्चेति शब्दानुकृतिः । इषूद्ध्रियमाणेषु इषु-धिश्चिश्चश्च शब्दं करोति Sy. चिश्चेति शब्दं करोति । शब्दानुकरणमेतत् Mah. शब्दानु-करणमेतत् U.

११. ०पात ह्रास० M. चिश्चेति निपातो हास-वचनः । हासम् SKN.

१२. बाणे तूणाश्निष्क्राम्यमाणे चिश्चेति शब्दो भवति Mah.इषुर्निष्क्रम्यमाणश्चिश्चेत्येवं शब्दं करोति U. प्रकर्षेण स्मयत इवोद्घाट्यमानः । चित्र-पुङ्खत्वात् । अथवा हसतीव शोभया पुङ्ख-दीप्त्या । अस्मिन् पक्षे(ऽर्थे) चिश्चतिरपठि-तोऽपि धातुः कल्प्यत इति । विकारपक्षे तद-र्थान्यधातूपादानमित्यचार्यपरिभाषा । अथवा 'शब्दानुकरणम्' चिश्चिदित्येवं शब्दं करोति Dur. अतिकरोत्युत्साह्यमानः । उज्ज्वलपुङ्ख-त्वात् । शब्दानुकरणश्चिश्चेति । एवंरूपं शब्दं करोति SKN.

१३. युद्धानि Sy. सङ्ग्रामान् Mah.,U. समनानि समराणि SKN.

१४. प्राप्य Sy. ज्ञात्वा Mah., U. अवगत्य प्राप्य Dur. अवेति, उपेत्येतस्य स्थाने । उपगम्य SKN.

१५. च पुनः स इषुधिः ।.....विवक्षातः कारकाणि भवन्तीति वचनादिषुधेः कर्तृत्वम् Mah. स इषुधिः ।.....अत्रेषुधेः कर्तृत्वं, विवक्षातः कारकाणि भवन्तीति वैयाकरणाः U. स एष इषुधिः Dur. स इषुधिः SKN.

सचमानाः[1] प्रजाः। पृतनाः[2] कारिणीः। च। सर्वाः प्रजाः। जयेति[3]। पृष्ठे[4] हिनद्य[5]म्। प्रसूतेषुरिति[6]।

रथे तिष्ठंन्नयति वाजिनः[15] पुरो यत्रंयत्र कामयंते सुषारथिः।
अभीशूंनां महिमानं पनायत मनः पश्चादनु यच्छन्ति रश्मयः॥ ६॥

रथे तिष्ठन्[7]। शौनकः—

'युद्धेन सारथि[8] षष्ठ्या[9] रश्मयोऽर्धेन[10] संस्तुताः' इति। रथे[11]। तिष्ठन्[12]। नयति[13]। वाजिन[14]।

---

१. सह कायन्ति शब्दायन्त इति सङ्काः Sy. 'सङ्काः सचतेः। सम्पूर्वाद्वा किरतेः' (N. 9. 14.) इति यास्कोक्तेः सचतेः किरतेर्वा रूपम्। सचन्ते सम्बध्यन्ते सङ्कीर्यन्ते वा योधा यासु ताः सङ्काः Mah. सन्धत्ते, अस्मिन् योधा इति सङ्काः, सङ्कीर्यन्तेऽस्मिन्नरय इति सङ्काः शत्रुसङ्कटकम् U. सङ्कटान् सम्पृक्तान्वा सङ्ग्रामान् Dur. द्वे अप्येते सङ्ग्रामनामनी। स्पर्धामात्रेण लक्ष्यव्यवधानार्थं यत्रेषवः क्षिप्यन्ते तद्विषयमेकम्। वधार्थं च यत्र तद्विषयमन्यत्। ये स्पर्धया लक्ष्यवेधमात्रार्थाः सङ्ग्रामाः। ये च वधार्थास्तान् सर्वान् योद्धुम् SKN.

२. वृताना A. सर्वाः सेनाः Sy. शत्रुसेनाः Mah. पृतनाः स्पर्धनीयतमाः सङ्ग्रामभक्तीः U स्पर्धमानैरिषव एव केवलमभिलक्ष्य क्षिप्यन्ते पताकार्थं तानेवंविधान् सङ्ग्रामान् Dur.

३. येति A. जयति is suggested for जयेति॥ पराभवति Mah. जयतु SKN.

४. धन्विनः पृष्ठभागे Sy.

५. हिनद्य A. निनद्धः is suggested for हिनद्यम्॥ बद्धः Sy. धानुष्केण पृष्ठे निनद्धो बद्धोऽपि Mah. धानुष्कस्य पृष्ठे बद्धः U. पृष्ठे रथस्य मनुष्यस्य वा....निबद्धः Dur. नितान्तं बद्धः SKN.

६. प्रसूतः, प्रसुवन्। कर्तरि निष्ठा। इषून् प्रेरयन् Sy. अनुज्ञातः सन् Mah. धानुष्केणाभ्यनुज्ञातः सन् जयति U. क्षिप्तो धनुष्मतेत्येतदाशास्महे Dur. प्रेरितः SKN.

७. बह्वीनां पिता बहुरस्य पुत्र इतीषूनभिप्रेत्य। प्रस्मयत इवापाक्रियमाणः। शब्दानुकरणं वा। सङ्काः सचतेः। सम्पूर्वाद्वा किरतेः। पृष्ठे निनद्धो जयति प्रसूत इति व्याख्यातम् N. 9.15., SKN. III.
This stanza=YV. 29. 42.

८. तथे तिष्ठत् A. तिष्ठ M.

९. अत्र पूर्वार्धे सारथिस्तुतिरुत्तरार्धेऽभीशूनां स्तुतिः Sy. अर्धेन सारथिरर्धेन रश्मयः स्तूयन्ते Mah. जगत्या अर्धेन सारथिः स्तूयतेऽर्धेन रश्मयः U.

१०. अर्धेन सारथिः षष्ठ्याः is suggested for it.

११. योद्धेन A. cf. BD. 5.114.

१२. यदेतत् Dur. अत्रैकवाक्यतायै यत्तदध्याहारः। यो रथे SKN.

१३. ति is repeated in A. कीदृशः ? रथे तिष्ठन्, तं स्तुम इति शेषः Mah. वर्तमानः Dur. तिष्ठतिरत्र सत्तायां नोध्वंतायाम्। सङ्ग्रामे तिष्ठतीति यथा। रथ एव सन् SKN.

१४. प्रापयति Mah., U. तत्र तत्र नयति Dur.

१५. वाजिनम A. अश्ववान् Sy.,U. रथस्य वाजिनः Dur. अश्ववान् SKN.

पुरस्तात्[1] । यत्रयत्र[2] । कामयते[3] । कल्याणः सारथिः[4] । अभीशूनाम्[5] । महिमानम्[6] । पूजयत[7] । अश्वानां गच्छतात्मनः[8] । पश्चात्[9] । अनुयच्छन्ति[10] । रश्मयः[11] ।

तीव्रान्घोषान्कृण्वते वृषपाणयोऽश्वा रथेभिः सह वाजयन्तः ।
अवक्रामन्तः प्रपदैरमित्रान् क्षिणन्ति शत्रूँरनपव्ययन्तः ॥ ७ ॥

तीव्रान् घोषान्[13] । अश्वानृक् सप्तमी स्तौति, आयुधागारमष्टमी[14] । उग्रान्[15] । शब्दान्[16] । कुर्वन्ति[17] ।

---

१. पुरस्ताद्वर्तमानान् Sy. तत्र तत्र पुरो वर्तमानान् Mah. पुरतोऽवस्थितान् U. अग्रतः सतो रथयुक्तान्, रथस्य नीडे पश्चात् सम्प्रतिष्ठन् Dur. अग्रतः SKN.

२. यत्र यत्र नेतुं कामयते तत्र तत्र नयति Sy. यत्र यत्र प्रदेशे Mah.

३. इच्छति मयाऽत्र गन्तव्यमिति Mah. कामयते तं वयं स्तुम इति शेषः U. यत्र यत्रेच्छति योद्धा Dur.

४. ०णः सुसार० M. शोभनसारथिः Sy. शोभनः सारथिः Mah. सुशिक्षितोऽपि सारथिर्नेता Dur.

५. ग्रही शू० A. तेषां रश्मीनाम् Sy. इदानीं रश्मयः स्तूयन्ते । हे जनाः, अभीशूनां रश्मीनाम् Mah. ग्रग्रहाणाम् U. तदेतत् किं सारथेर्महाभाग्यम् ? नेत्युच्यते, अनभीशुको हि सारथिः किं कुर्यात् सुशिक्षितोऽपि । एवमभीशूनाम् Dur.

६. महत्त्वम् Sy. महाभाग्यम् Mah., U. एतं महिमानं महाभाग्यम् Dur.

७. पूजयताम् M. हे जनाः ! स्तुत Sy. यूयं पनायत स्तुत ।'...पन स्तुतौ Mah. पूजयत हे जनाः ! U. पूजयामि....सम्बोध्याभावात् पनायतेत्यस्य पूजयामीति पुरुषवचनव्यत्ययः Dur. पनतेः स्तुतिकर्मणः । पनायत स्तुत हे स्तोतारः !....पूजयामीत्यपपाठः SKN.

८. गच्छतां मनः is suggested for ०च्छतात्मनः ॥ अश्वान् मनःसारथेर्मनोऽनुकूलम् Sy. अश्वचित्तम् Mah. ये मनोऽश्वसम्बन्धिचित्तम् U. यन्मनोऽश्वानामतिप्रवृद्धजवानामपि Dur. यच्च मनोऽश्वानाम् SKN.

९. रथस्य पृष्ठभागे विद्यमानाः Sy. ये रश्मयः पश्चाद् वर्तमानाः सन्तः Mah. पश्चात् सन्तः U., Dur., SKN.

१०. नियच्छन्ति Sy. अनुगम्य वशवर्तिनं कुर्वन्तीत्यर्थः Mah. अनुगम्य गृह्णन्ति U. उपरमयन्तीत्यर्थः Dur. अनुबध्नन्ति सारथिमानसम् । सारथीच्छावशेन गमनचित्तमश्वानां कुर्वन्तीत्यर्थः SKN.

११. ये रथे रश्मयोऽश्वग्रीवाभ्यां व्याप्य वर्तमानाः पाशाः Sy. यन्तारः U. येऽश्वेषूपनिबद्धा रश्मयः प्रगृहीताः सारथिना Dur. रश्मयोऽश्वानाम् SKN.

१२. रथे तिष्ठन्नयति वाजिनः पुरस्तात् सतो यत्र यत्र कामयते । सुसारथिः कल्याणसारथिः अभीषूणां महिमानं पूजयन्ति । मनः पश्चात् सन्तोऽनुयच्छन्ति रश्मयः N. 9.16., SKN. III. 156.
This Stanza=YV. 29. 43.

१३. तीव्रात् घोषात् A. अश्वाः स्तूयन्ते Mah. अश्वांस्तु स्तूयन्ते त्रिष्टुभा U.

१४. अश्वांस्तु सप्तमी BD. 5. 11. 4. अत्राश्वस्तुतिः Sy.

१५. उग्रं A. उच्चतरान् Sy. जय जयेत्युग्रान् U.

१६. जब्दत् A. जय जयेति शब्दान् Mah. शब्दान् U.

१७. कुर्वते Sy.

वर्षितृपाणय[१]. पासून्[२]द्वमन्त. पाणिभिः । रथै[३]. । सह । वेगं कुर्वन्त[४]. । अवक्रामन्त[५]. । पादाग्रै[६]: । अमित्रान् । हिंसन्ति[७] । शत्रून् । अनवगच्छन्त[८]. ।[९][१०]

रथवाहनं हविरस्य नाम यत्रायुधं निहितमस्य वर्म ।
तत्रा रथमुप शुग्मं सदेम विश्वाहा वयं सुमनस्यमानाः ॥ ८ ॥

[११]रथवाहनम् । अग्निसदृशस्यायुधागारस्य शत्रुभ्यो रथेनोह्यमान[१२] धनम् । नामकम्[१३] । भुविर्भवति[१४] । अस्येति[१५] राज्ञ पारमार्गप्रकृतस्य स रथवाहनेनायुधागार तर्पयति । यत्रायुधागारे[१६] । अस्य राज्ञ[१७] । आयु[१८] । वर्म[१९] च । निहित[२०] भवति । तस्मिन्नायुधागारे[२१] । सुखकरम्[२२] । रथम्[२३] । वय युद्धान्ते[२४] । उपसदेम[२५] । अविशीर्ण सर्वदा ।

---

१. वर्षी कृपा० A. वृषा अश्वाः पाणौ हस्ते येषां ते वृषपाणयोऽश्ववाराः Mah. वृषा अश्वाः पाणौ येषां सङ्गृहीतृप्रभृतीनां योक्तृणां ते तथोक्ताः, युक्ताः श्वसन्तोऽश्वाः U.

२. ०द्वपन्तः A. पांसूनां वर्षकखुराः Sy. 'वज गतौ' स्वार्थे णिच् Mah.

३. अश्वा अपि रथेभी रथैः सह Mah.

४. वेगमाचरन्तः Sy. गच्छन्तः सन्तस्तीव्रान् घोषाञ्छब्दान् कुर्वन्ति Mah. पूजयन्तो रथिनः, तीव्रानेव घोषान् हेषितादीन् कृण्वते U.

५. आक्रामन्तः Mah.

६. पादाग्रैः खुरैः Mah. खुरैः U.

७. हिंसकान् Sy. रिपून् Mah. शत्रून् U.

८. नाशयन्ति च Mah.
क्षिण्वन्ति हिंसन्ति U.

९. अवग M. ०नपग० is suggested for ०नवग० ॥ अपलायमानाः Sy. 'व्यय क्षये' अदन्तश्चुरादिः । अपव्ययन्ति तेऽपव्ययन्तः, न अपव्ययन्तोऽनपव्ययन्तोऽनश्यन्तः समर्थाः Mah. 'व्यय क्षये' अपपूर्वादस्माच्छतृप्रत्ययः । अपव्ययन्तो नश्यन्तः । न अपव्ययन्तोऽनपव्ययन्तो न नश्यन्तः । अपरित्यजन्तो वा स्वामिनम् U.

१०. VM. ignores अश्वाः ॥
This stanza=YV. 29. 44.

११. शकटद्वारा रथः स्तूयते Mah. रथस्तुतिः U.

१२. शत्रून् जित्वा रथेनोह्यमानं धनं हविर्भवति । अग्नेर्हविरिव वर्धकं भवतीत्यर्थः Sy. रथं वहतीति रथवाहनम् । वाजपेयेऽनसि रथस्यारोप्यमाणत्वात् Mah. रथवाहणं रथवोढ इति नाम । विमुच्य सयन्तृकं रथवाहण करोति, अनस्तत्कर्मेति कात्यायनः । 'तस्मादनस एव पौरोडाशेषु यजूंष्यृषि' इति श्रुतिः U.

१३. नामेति सम्मतिः Sy.

१४. भुवि भ० M. हविर्भ० is suggested for भुविर्भ० ॥ तथाऽस्य हविः, हविर्धानं नाम । पृषोदरादित्वादुत्तरार्धलोपः Mah. हविरिति नाम्नो ऽर्धलोपः । हविर्धानमिति च द्वितीयं नाम U.

१५. अनसः Mah. यस्य स्वनसः U.

१६. रथे Sy. यत्रानसि Mah. यस्मिन् U.

१७. योद्धुः Mah., U.

१८. आयुधम् is suggested for आयुः । धनुःशरादिकम् Sy.

१९. कवचं च Sy. वर्म च सन्नहनम् U.

२०. स्थापितम् Mah., U.

२१. तत्र तम्—तत्रेत्यव्ययस्य सर्वविभक्तित्वात् Sy. तत्रानसि Mah., U.

२२. सुखम् U.

२३. रथम् is missing in M.

२४. पयं उयु० A.

२५. ०सदेम is suggested for ०सदेव ॥ उपगच्छेम Sy. उपसादयामः Mah. उपसादयाम U.

सुमनस्यमानाः ।

स्वादुषंसदः पितरो वयोधाः कृच्छ्रेश्रितः शक्तीवन्तो गभीराः ।
चित्रसेना इषुबला अमृध्राः सतोवीरा उरवो व्रातसाहाः ॥ ९ ॥

स्वादुषंसदः । 'नवमी रथगोप्तृस्तु दशमी रणदेवताः' । शत्रूणामन्ने संसीदन्तः । पालयितारः । अन्नस्य दातारः । कृच्छ्रे सङ्ग्रामे श्रयितारः । बलवन्तः । दुरवगाहाः । विचित्रसेनाः । इषवो बलं येषाम् । हिंसितुमशक्याः । विद्यमानप्रेरकाः । गुरुभाराः । शत्रुसमूहस्य सोढार इम इति ।

---

१. सुखमनसो भवन्तो वयम्, पायवो भरद्वाजाः Sy. शोभनं मनो येषां ते सुमनसः, असुमनसः सुमनसो भवन्ति सुमनस्यन्ते । . . . अनुकूलचित्ता इत्यर्थः Mah. अनुकूलचित्तः U. This stanza=YV. 29. 45.

२. अत्र रथगोपस्तुतिः Sy. रथगोपान् संस्तौति Mah. रथगोपान् स्तौति U.

३. ०गोप्तु स्तु M. ०गोपांस्तु or ०गोप्तॄंस्तु is suggested for ०गोप्तृस्तु ।

४. BD. 5.115..

५. शत्रूणां स्वादुन्यन्ने संसीदन्तः शत्रूणामन्नमवसादयन्तो वा Sy. ईदृशा नरा अस्माकं रथगोप्तारो भवन्त्विति शेषः । कीदृशाः । . . . . स्वादु सुखं यथा तथा संसीदन्ति ते स्वादुसंसदः Mah. स्वादु सुखकरं संसदः संसदनं येषां ते स्वादुसंसदो रथगोप्तारः U.

६. पलायि० M. रथस्य पालयितारः Sy. पान्ति ते पितरो रक्षितारः Mah. पितरः पातारः U.

७. . . तस्य A. वयोऽन्नमायुर्वा दधति धारयन्ति वयोधाः Mah. अन्नस्यायुषो वा धारयितारः U.

८. आपदि श्रयन्तः Sy. कृच्छ्रे श्रित इत्येकं पदम् । कृच्छ्रे कष्टे श्रीयन्ते सेव्यन्ते कृच्छ्रेश्रितः । कर्मणि क्विप्, अलुक् सप्तम्याः । दुःखे सत्याश्रयणयोग्या दुःखनाशकत्वात् । यद्वा सप्तमी द्वितीयार्थे । कृच्छ्रं श्रयन्ति कृच्छ्रेश्रिताः, दुःखं प्राप्यापि स्वामिसेवनपराः Mah. क्लेशाश्रयिणः U.

९. ०वन्तौ A. शक्तिरायुधविशेषः । तद्वन्तः शक्तिवन्तः शक्तिहस्ता इति यावत् । यद्वा शक्तिर्बलम् । तद्वन्तः Sy. शक्तिः सामर्थ्यमायुधं वाऽस्ति येषां ते । अश्वरश्मिमतीत्यादिप्रातिशाख्यसूत्रेण शक्तिशब्दस्य दीर्घः Mah. बलवन्त आयुधवन्तो वा U.

१०. दुरे गवा वा A. अनाधृष्याः Sy. गम्भीरबला गम्भीरप्रज्ञाश्च Mah. गम्भीरप्रज्ञाना वा गम्भीरबला वा U. ११. दर्शनीयसेनाः Sy. चित्रा नानाविधा सेना येषां ते Mah.

१२. इष्टवो वेलं येषां A. बाणबलाः Sy. इषुभिर्बाणैर्बलं येषां ते Mah. इषुषु विशेषतो बलं येषां ते तथोक्ताः U. १३. हितुमश० A. मृध्रा मृदवो न भवन्त्यमृध्राः कठिनाङ्गा उग्रशासना वा Mah. अमृदव उग्रशासनाः U.

१४. प्राप्तवीर्याः Sy. सतोवीरा इत्येकं पदम् । सतोऽश्वमेधयाजिनो वीराः शूराः । यद्वा सतो विद्यमानस्य बलस्य वीराः प्रेरकाः, विविधमीरयन्तीति वीराः षष्ठचा अलुक् Mah. सतो विद्यमानस्य बलस्य विविधमीरयितारो वा U. तिरः सत इति प्राप्तस्य तिरस्तीर्णं भवति । सतः संसृतं भवति N. 3.20.

१५. महान्तः Sy. उरवो विशालाः । पृथुजघनोरस्का इत्यर्थः Mah. पृथुजघनोरस्का वा उदमनसो वा U.

१६. समूहानामभिभवितारो भवन्तीति Sy. व्रातान् शूरसमूहान् सहन्ते ऽभिभवन्ति ते व्रातसाहाः । पचाद्यच् Mah. वाता गणास्तेषामभिभवितारः । य इत्थम्भूताः पुरुषास्ते ऽस्माकं रथगोप्तारो भवन्त्विति शेषः U.
This stanza=YV. 29. 46.

ब्राह्मणासः पितरः सोम्यासः शिवे नो द्यावापृथिवी अनेहसा ।
पूषा नः पातु दुरितादृतावृधो रक्षा माकिर्नो अघशंस ईशत ॥ १० ॥

ब्राह्मणासः । हे ब्राह्मणादयः ! यज्ञस्य वर्धयितारः । अस्माकम् । शिवे । द्यावापृथिव्यौ । अनागतस्ते भवेताम् । पूषा च । नः । पातु । दुरितात् । रक्ष पूषा ऽस्मान् । मा कश्चित् । स्तेनः । अस्माकम् । ईशिष्ट ।

सुपर्णं वस्ते मृगो अस्या दन्तो गोभिः सन्नद्धा पतति प्रसूता ।
यत्रा नरः सं च वि च द्रवन्ति तत्रास्मभ्यमिषवः शर्म यंसन् ॥ ११ ॥

सुपर्णम् ।

---

१. ०णासं A. ऋतावृध इत्यादिः प्रत्यक्षभूतो मन्त्रः । ब्राह्मणास इत्यादिः परोक्षकृतो ऽत एवं व्याख्यायते U.

२. आदि refers to पितरः and सोम्यासः । हे ब्राह्मणाः ! पितरः ! सोमार्हाः ! सोमसम्पादिनः ! वा Sy. रक्षत । रक्षेत्युपरितनमेकवचनान्तं सत्यपि व्यवधाने बहुवचनान्ततया विपरिणतं सदत्र सम्बध्यतेऽध्याहारस्यातिजघन्यत्वात् Sy. ब्राह्मणाः. . . . पान्तु रक्षन्तु । पितरश्च पान्तु । कीदृशाः ? सोम्यासः सोम्याः सोमसम्पादिनः सोमपानयोग्या वेत्युभयोर्विशेषणम् Mah. भवत्प्रसादाच्च ब्राह्मणासो ब्राह्मणाः पितरः सोम्यासः सोमसम्पादिनः । पान्त्वित्यत्रान्वयः U. सोम्याः सोमसम्पादिनः, N.11.18.

३. एवं परोक्षेणोक्त्वा प्रत्यक्षमाह । हे ऋतावृधः ! ऋतं सत्यं यज्ञं वा वर्धयन्ति ऋतवृधो देवाः ! संहितायामृतस्य दीर्घः Mah. हे ऋतावृधः ! सत्यवृधो वा यज्ञवृधो वा । देवा इत्यध्याहारः सामर्थ्यात् U.

४. अस्मान् Sy.,Mah.,U.

५. सुखकृतौ भवताम् Sy. कल्याणकारिण्यौ Mah.,U.

६. द्यावाभूमी Mah.

७. वनागतस्ते M. अनागस्के is suggested for अनागतस्ते ॥ अपापे Sy. अनेहसौ नास्ति एहोऽपराधो ययोस्ते अपराधनिर्वर्तिके Mah. अनुपहिंसिन्यावनपराधिन्यौ वा पाताम् U.

८. पोषको देवोऽपि Sy. सूर्यः Mah.

९. नं A.

१०. पात्वित्यस्यार्थवशाद् वचनव्यत्ययः कार्यःMah.

११. वृष्कृतात् Sy. अशुभात् U.

१२. राक्ष पूषास् A. रक्ष रक्षतास्मान् । वचनव्यत्ययः Mah. रक्ष रक्षतेति वचनव्यत्ययः U.

१३. कंचित् A. मा कश्चन Mah. मा च कश्चन U.

१४. स्तनः A. पापशंसः शत्रुरपि Sy. पापी । . . . . अघं पापं शंसति वक्ति प्रकाशयति वाघशंसो दुष्टः Mah. अघानि पापानि यः शंसति प्रकाशयति सोऽघशंसः U.

१५. ऐशिष्ट ? Sy. ऐश्वर्यं मा करोतु । वयं दुष्टवशा मा भूमेत्यर्थः । . . . . ईशतेति वचनव्यत्ययः Mah. ईशत ईष्ट इति वचनव्यत्ययः U.

This stanza=YV. 29. 47.

१६. ०पर्णः A. अस्यामृचीषवः स्तूयन्ते Sy. द्वाभ्यामिषुं स्तौति Mah. द्वाभ्यां त्रिष्टुबनुष्टुब्भ्यामिषुं स्तौति U.

सुपर्णम्[1] । वस्त[2] वाजानहि[3]प्रेत्य । मृगमयः[4] । अस्याः[5] । दन्तो[6] रुरुशीष्ण्यैः[7] । गोविकारैस्तावत् । अभिसन्नद्धा[8] । पतति[9] । प्रसूता[10] । यत्र[11] । नरः[12] । सद्रवन्ति[13] । च । विद्रवन्ति[14] । च[15] । तत्र[16] ।

१. सुपर्णम् is missing in A. शोभनं वाजम् Sy. सुपर्णं पक्षिपिच्छम् । . . . . शोभनं पर्ण पिच्छं यस्य स सुपर्णः पक्षी तस्य विकारः सौपर्णम् । तत्र 'कृत्स्नवन्निगमा भवन्ति' (N. 2. 5.) इति यास्कोक्तेः सुपर्णशब्देन तत्पिच्छं गृह्यते । बाणपुच्छे पिच्छस्यारोप्यमाणत्वात् Mah. सुपर्णः पक्षी तद्विकारः सौपर्णमिति भवति । तत्र कृत्स्नवन्निगमः U. य एते सुपर्णम् Dur. गृध्रावयवभूतान् वाजानिषुराच्छादयति । इषोर्हि विमयाः पक्षा भवन्ति । तानभिप्रेत्यैतत् सुपर्णं वस्त इत्युच्यते SKN.

२. वस्ते is suggested for वस्त or इति should be added after it. इयमिषुर्धारयति Sy. या इषुः . . . . वस्ते परिधत्ते । 'वस परिधाने' Mah.

३. ०जानहि प्रेत्य A. वाजानभिप्रेत्य is suggested for वाजानहि प्रेत्य ।

४. मृगावयवः शृङ्गम् Sy. मृगयतेऽन्विष्यति रिपून् हन्तुमिति मृगः । 'मृग मार्गणे' चुरादिरदन्तः । पचाद्यच् । . . . शल्यं हि वेध्यं मृगयते Mah. मृगयतेर्मृगः । स हि वेध्यं मृगयते U. येषां चैतेषां . . . . यदि मार्गाणि फलानि । अमार्गेषु वा व्यधनस्वभावान्मार्गयन्तीव, किं नु तद् वेद्धव्यं स्याद् यदहं विध्येयमिति Dur. मृगो रुरुः शबरादिः । तदवयवे शृङ्गास्थीनि वा । प्रकृतिशब्देन च विकारस्याभिधानम् । मृगस्य रुरोः शबरस्य वा यच्छृङ्गमस्थि वा तन्मय इत्यर्थः । 'मृग अन्वेषणे' इत्यस्य वा शत्रुमार्गणशीलो मृगः SKN. मृगो मृगयतेः N. 9. 19.

५. इषोः Sy. अस्या इषोः Mah., SKN. यस्याश्चास्य इषोः U.

६. इषवः काश्चिद्दन्तमुखा भवन्ति हि । अथवास्या दन्तो मृगः शत्रून् मृगयमाणो भवति Sy. दन्तः फलम् Mah., U. SKN.

७. रुरु शीष्ण्यः A.

८. स्नायुभिः । अथवा गौरिति ज्यानाम । तया सम्बद्धा । अत्र वचनव्यत्ययः । तथा च निगमः । वृक्षेवृक्षे नियता मीमयद्गौः (RV:X.27. 22.) इति । अस्यायमर्थः 'वृक्षेवृक्षे धनुषिधनुषि । वृक्षो व्रश्चनात् । वृत्वा क्षां तिष्ठतीति वा । क्षा क्षियतेर्निवासकर्मणः । नियता मीमयद्गौः शब्दं करोति मीमयतिः शब्दकर्मा N. 2. 6. Sy. या इषुः . . . . गोविकारैः स्नायुभिः Mah. गोविकारैः श्लेष्मस्नायुभिः U. ये चेमे . . . . गव्येन स्नाय्वा श्लेष्मणा च Dur. गोविकारैश्च स्नायुभिः श्लेष्मणा च SKN.

९. आभिः स० M. बद्धा Mah. समन्ततो नद्धाः Dur. सम्यग्बद्धा SKN.

१०. शत्रुबलं प्रति गच्छति Mah. पतति शत्रुबलं प्रति U. गच्छन्ति Dur. गच्छति SKN.

११. प्रेरिता सती Sy. धनुष्मता प्रेरिता सती Mah. प्रेरिता धनुष्मता सा इषुः U. धनुष्मता प्रसूताः क्षिप्ताः । त ऐवमादिगुणयुक्ता इषवः Dur. प्रेरिता क्षिप्ता सतीत्यर्थः SKN.

१२. यत्रा A. युद्धे Sy. यस्मिन् सङ्ग्रामे Dur. एवमिषुं स्तुत्वा परेणाशिषमाशास्ते । यत्रा यत्र सङ्ग्रामे SKN.

१३. योद्धारः Mah. मनुष्याः Dur., SKN.

१४. सन्द्रव० is suggested for सद्रव० ॥ चरन्ति सह च द्रवन्ति Sy. सम्यग् गच्छन्ति Mah. सङ्गच्छन्ति ? (न्ते) U. सङ्गच्छन्ति Dur. सङ्गच्छन्ते SKN.

१५. विद्रवन्ति च is missing in A. पृथक् च द्रवन्ति Sy. विविधं प्रसरन्ति Mah विगच्छन्ति U. पुनर्विगच्छन्ति Dur. विगच्छन्ति च । शूराः सङ्गच्छन्ते कातरा विगच्छन्ति SKN. १६. चौ समुच्चये Mah.

१७. तत्र रणे Mah.

अस्मभ्यम्[1]। इषव[2]। शर्म[3]। यच्छन्त्विति[4]।

ऋजीते परि वृङ्धि नोऽश्मा भवतु नस्तनूः।
सोमो अधि ब्रवीतु नोऽदितिः शर्म यच्छतु ॥ १२ ॥

ऋजीते[5]। ऋजितिरिषु ऋजुगमना, इषो[6]! अस्मात्[7]। वर्जय[8]। अश्मा। भवतु। अस्माकम्[9]। अङ्ग[10] कवचेन सन्नद्धम्। सोमश्च। अस्मान्[11] सन्नद्धान्। अधिब्रवीतु[12]। अदितिश्च[13]। शर्म[14]। यच्छतु[15][16]।

---

१. शराः Sy. बाणाः Mah. इषुरिति सन्नतिः U. इषुरीषतेर्गतिकर्मणः। (वधकर्मणो वा) N. 9. 18.

२. सुखम् Sy. Mah. शर्म शरणम् U., SKN. सुखं जयनिमित्तम् Dur.

३. प्रयच्छन्तु Sy. 'यमु उपरमे' सुखं ददातु Mah. यच्छत्विति सन्नतिः U. ददत्वित्येतदाशास्महे Dur. रक्षन्त्वस्मानित्यर्थः SKN.

४. सुपर्णं वस्त इति वाजानभिप्रेत्य। मृगमयोऽस्या दन्तः। मृगयतेर्वा। गोभिः सन्नद्धा पतति प्रसूतेति व्याख्यातम्। यत्र नराः सन्नद्यन्ति च विद्रवन्ति च तत्रास्मभ्यमिषव शर्म यच्छन्तु शरणं सङ्ग्रामेषु N.9.19., SKN. III. 158., 159.
This stanza=YV. 29. 48.

५. ऋषितिरिष्ठ ऋजु गमना A. ऋजीतिरि० is suggested for ऋजितिरि०॥ ऋजु गच्छतीत्यृजीतिरिषुः। हे इषो! Sy. ऋजुः सरला ईतिर्यस्याः सा ऋजीतिः। टिलोप आर्षः। हे ऋजीते! ऋजुगामिनि! Mah. हे ऋजीते! ऋजुगामिनि! U.

६. इषोरस्मात् M. अस्मान् is suggested for अस्मात्।

७. परितो वर्धय Sy. परिवर्जय। अस्मासु मा पतेत्यर्थः Mah. परिवर्जयास्मान् U.

८. अश्मवदभेद्या दृढा Sy. पाषाणतुल्यदृढा Mah. अश्ममयी U.

९. अस्मभ्यम् Sy.

१०. शरीरम् Sy., Mah., U.

११. अस्मात् A. अस्माञ्जीवनाय U.

१२. अपि ब्र A. पक्षपातेन ब्रवीतु Sy. अधिकान् वदतु Mah. आधिक्येन वदतु U.

१३. देवमाता Mah.

१४. सुखम् Sy., Mah. शरणम् U.

१५. ददातु Mah., U

१६. VM. ignores परि॥ परितः Sy.
This stanza=YV. 29. 49.

आ जङ्घन्ति सान्वेषां जघनाँ उप जिघ्नते । अश्वाजनि प्रचेतसोऽश्वान्त्समत्सु चोदय ॥१३॥

आ जङ्घन्ति[1]। आघ्नन्ति[2]। सानूनि[3]। एषामश्वानां सक्थिनी[4] सानूनि। जघनानि[5] च। उपघ्नन्ति[6] त्वया। नगे[7]!

---

१. कशा स्तूयते Mah. कशास्तुतिः U.

२. वचनव्यत्ययः । आघ्नन्ति ताडयन्ति Mah. आजङ्घन्त्यश्वारोहाः U. आजङ्घन्तीति शतरि सम्बोधनम् । हे अश्वाजनि ! आजङ्घन्ति ! Dur. एषामिति श्रुतेर्येषामित्यध्याहारः । येषामेषां रथे नियुक्तानां तोत्रेण जङ्घन्ति, अत्यर्थं पुनः पुनर्वा हन्ति । कः ? सामर्थ्यात् सारथिः SKN.

३. सा M. सानुतुल्यानि मांसोपचिताङ्गानि Mah. मांसोपचितान्यङ्गानि U. समुच्छ्रितानि Dur. समुच्छ्रितमंसप्रदेशम् SKN.

४. हे कशे ! यया त्वयाऽश्वावारा एषामश्वानाम् Mah. येषामेषाञ्च U.

५. सक्षिनि Λ. सक्थीनि is suggested for सक्थिनी ॥ कटिप्रदेशान् SKN.

६. कटिभागान् Mah. जघनानि स्फिग्देशास्तांश्च। जघनं कस्मात् ? तद्धि भृशं हन्यते कशया Dur. जघनप्रदेशांश्च.....जघनं हन्तेर्यङन्तस्य । प्रायेण हि, अश्वाञ्छिक्ष्यान् वा पुत्रादीन् पृष्ठप्रदेशे ताडयन्ति । येषां घनन्त्युपघ्नन्तीति पाठः । केषाम् ? अश्वादीनाम् SKN.

७. निघ्नन्ति । तुरङ्गारोहा ययाऽश्वान् वशयन्ति सा त्वमश्वान् प्रेरयेत्यर्थः Mah. उपघ्नन्तिU. हे अश्वाजनि ! उपजिघ्रति ! इदमपि शतर्येव । रथ्यानां हि कटिप्रदेशमश्वा जघन्यमभिहन्ति पृष्ठधानां स्फिग्देशान् Dur. उपारूढा अत्यर्थं पुनः पुनर्वा घ्नन्ति । अत्रापि सामर्थ्यात् पृष्ठसादिनोऽश्ववाहाः SKN.

८. कशे is suggested for नगे ॥ अश्वानां क्षेत्रि ! यया त्वया Sy. 'अज गतौ क्षेपणे च' अश्वा अज्यन्तेऽक्षिप्यन्ते यया सा अश्वाजनी । हे अश्वाजनि ! कशे ! Mah. अश्वान् जनयतीत्यश्वाजनी तस्याः सम्बोधनं हे अश्वाजनि ! U. अश्वाजनीत्येतत्पदम् । तां पुनरेतां 'कशा' इत्याहुः । अश्वाजनीत्येतन्न निर्वक्तव्यं प्रत्यक्षवृत्तित्वादस्य । अथ 'कशा कस्मात्' सा हि 'प्रकाशयति' प्रख्यापयति 'भयमश्वाय' । 'कृष्यतेर्वाऽणूभावात्' अपकृष्टा हि सा भवति चर्मणोऽण्वी । वागपि कशेत्युच्यते सा 'पुनः प्रकाशयत्यर्थान्' इति । अथवा 'खशया' वाक्, खे मुखाकाशे शेत इति । क्रोशतेर्वा शब्दार्थस्य Dur. अश्वाजनी वक्तव्या। सुबोधत्वादनिर्वचनम् । कशेत्यभिधेयवचनम् । अर्थकथनप्रसक्तमाह—कशा प्रकाशयति, भयमिति विशेषप्रदर्शनं वाच्यव्यवच्छेदाय । कृश्यतेर्वा तनूकरणार्थस्य । अणूभावादित्यर्थः । समन्वयं दर्शयति—साहि श्लेषावयवारम्भणतन्वी भवति। वागपि कशोच्यते । सा कस्मादित्याह—'वाक् पुनः प्रकाशयत्यर्थान्' अर्थविशेषान् व्यवच्छेदाय । 'खशया' मुखाकाशे शेते तत उपलब्धेः । 'क्रोशतेर्वा' शब्दार्थस्य । कशायाश्चर्मयष्टिरूपायाः प्रकृतत्वाच्च । वाचोऽपि हुङ्काररूपाया अश्वाजनीत्यविशेषात् सन्देहे सति वाग्व्यावृत्तये .....व्यवच्छिन्दन्नाह—अश्वकशया एषेति। ननु च हुङ्काररूपायामपि वाचि कशा प्रकाशयति भयमिति प्रवृत्तिनिमित्तस्य तुल्यत्वात् कशाशब्दस्योपपत्तेरश्वाजनीशब्दवदश्वकशाशब्दोऽपि नालं व्यवच्छेदाय ? सत्यम्, तथापि तस्य गुणसम्बन्धस्य रूढ्या प्रच्छादनात् । क्वचित्तु, काचित् प्रसूततरा गतिरिति, अश्वाजनी दर्शनीयपानीयशब्दवन्न व्यवतिष्ठते । निब्रवीति । अश्वकशेति तूक्तेश्चर्मयष्टिः प्रतीयते न हुङ्काररूपा वाक्, तस्माद्युक्तो व्यवच्छेदोऽश्वकशाया एषेति ।.....अथ संविज्ञानपदसम्भूतोऽश्वकशाशब्दः कस्मान्न पठितः। उदाहरणाभावात् SKN. अश्वाजनीं कशेत्याहुः । कशा प्रकाशयति भयमश्वाय । कृष्यतेर्वाणूभावात् । वाक् पुनः प्रकाशयत्यर्थान् । खशया। क्रोशतेर्वा N. 9.19.

प्रकृष्टज्ञानान्[1] । अश्वांस्त्वम्[2] । सङ्ग्रामेषु । चोदय[3] ।

अहिरिव भोगैः पर्येति बाहुं ज्याया हेतिं परिबाधमानः ।
हस्तघ्नो विश्वा वयुनानि विद्वान्पुमान्पुमांसं परि पातु विश्वतः ॥ १४ ॥

अहिरिव[4] । अहिरिव[5] । भोगैः[6] । परिवेष्टयति[7] । बाहुम्[8] । ज्याया[9] । हननम्[10] । परित्रायमाणः[11] ।

---

१. ०ज्ञानन् A. प्रकृष्टज्ञानाः सादिनः सारथयो वा Sy. कीदृशानश्वान् । प्रचेतसः प्रकृष्टं शूरं चेतो मनो येषां ते Mah. परिदृष्टकारिणः प्रकृष्टज्ञानान्वाऽश्वान् U. गमनं प्रति समुत्सुकान् Dur. यच्छुतेस्तदध्याहारः । तानेतान् ...प्रकृष्टज्ञानान् गृहीतशालिहोत्रोपविष्टनयानित्यर्थः SKN.

२. या त्वमेवमभिहंसि सा त्वमेतानश्वान् Dur.

३. प्रेरय Sy., U., SKN. प्रेरय जयाय Mah. तथा चोदय यथा जयेयमित्येतदाशास्महे Dur.

४. सानूनि सक्थीनि तानि पुनः सरणानि तद्वलेन हि सरन्ति सत्तारः । सक्थिः कस्मात् ? 'सचतेः' किमस्मिन् सक्तम् ? 'आसक्तोऽस्मिन्कायः' कृत्स्नं शरीरम् Dur. आजगन्ति सानून्येषामिति वा पाठः । सान्वित्यस्य व्याख्यानं सरणस्वभावानि सक्थीनीति । सचतेरिति धातुनिर्देशः । 'आसक्तोऽस्मिन् कायः' इत्यर्थोपपत्तिवचनम् SKN. आघ्नन्ति सानून्येषां सरणानि सक्थीनि । सक्थि सचतेः । आसक्तोऽस्मिन् कायः । जघनानि चोपघ्नन्ति । जघनं जङ्घन्यतेः । अश्वाजनि (प्रचेतसः) प्रवृद्धचेतसोऽश्वान् समत्सु समरणेषु सङ्ग्रामेषु चोदय N. 9. 20., SKN. III. 160.
This stanza=YV. 29. 50.

५. अत्र धन्विनः प्रकोष्ठे बन्धनीयस्य हस्तघ्नस्य स्तुतिः Sy. हस्तघ्नः स्तूयते Mah., U.

६. सर्प इव Sy. यथाऽहिः सर्पो भोगैः स्वदेहैर्हस्तादिकं वेष्टयति Mah. यो हस्तघ्नः, अहिरिव सर्प इव U. योऽयम्....सर्प इव Dur. यथा सर्पो मुखे गृहीतः SKN.

७. शरीरेण । वचनव्यत्ययः Sy. यो हस्तघ्नो भोगैः स्वशरीरावयवैः कृत्वा Mah. शरीरावयवैः U. कुटिलभावैः Dur भोगास्तस्यैव कुटिलाः शरीरावयवास्तैः SKN.

८. ०रिचेष्ट० A. वेष्टयति Mah. सर्पग्राहकस्य बाहुं सर्पेणैव पर्येति परिवेष्टयति Dur. अर्धर्चयोरेकवाक्यतायै यत्तदध्याहारः कार्यः । यः पर्येति परिगच्छति परिवेष्टयतीत्यर्थः SKN.

९. प्रकोष्ठम् । लक्षणया बाहुशब्दः प्रकोष्ठे वर्तते Sy. हस्तम् Mah. बाहुं धनुष्मतः पुरुषस्य Dur.

१०. ज्यायाः स्वभूताम् SKN.

११. ज्याहेतुकां हिंसाम् Sy. बाणं शत्रुप्रेरितम् Mah. आयुधात् U. ज्याघाताद् बाहुं सर्वतस्त्रायमाणः, तदर्थत्वात्तस्य Dur. हेतिं वधं ताडनं, ज्याकृतं प्रहारमित्यर्थः SKN.

१२. निवारयन् Sy. निवर्तयन् खेटकपक्षे, प्रकोष्ठत्राणपक्षे तु ज्याया हेतिं प्रहारे निवारयञ् ज्याघातस्य निवारकत्वात् Mah. सर्वतो निरुन्धन् SKN.

हस्तघ्नो[1] हस्तत्रायमाणम्[2]। सर्वाणि[3]। प्रज्ञानानि[4]। जानन्[5]। पुमान्[6]। पुमांसम्[7]। परि[8] च। रक्षतु[9]। सर्वतः[10]।

आलाक्ता या रुरुशीष्ण्यथो यस्या अयो मुखम्।
इदं पर्जन्यरेतस इष्वै देव्यै बृहन्नमः॥ १५॥

आलाक्ता[11]। विषाक्ता[12]। या[13]। रुरुशीर्ष्णी[14] रुरुशृङ्गशिरस्का[15]। अपि[16]। यस्याः[17]। अयः[18]। मुख भवत्यथोमुखा[19] काचिच्छृङ्गमुखा काचिदिति[20]। तस्यै नमस्कारः[21]। अयमाहानुया[22] (?) वजत्योत्पादितोदकरेनसा[23]।....ति[24]।

---

१. हस्तं त्रायमाणः is suggested for हस्तत्रायमाणम्॥
हस्ते हस्तसमीपे वर्तिनि प्रकोष्ठे स्थितः सन्। ज्यया हन्यत इति हस्तघ्नः 'घञर्थे कविधानम्' इति कः Sy. हस्ते स्थितो हन्ति हस्तघ्नः खेटकः। यद्वा हस्तं हन्ति प्राप्नोति हस्तघ्नः प्रकोष्ठत्राणम् Mah. हस्त एव स्थितो हन्ति यः स हस्तघ्नः खेटकः प्रकोष्ठादित्राणं वा U. सोऽयमेवंधर्मा हस्तघ्नः Dur. हस्तघ्नो हस्ते हन्यते N. 9.14.

२. विश्वानि Sy. यथा....सर्वाणि. SKN.

३. ज्ञानानि ज्ञातव्यानि Sy. ज्ञानानि Mah. माया वयुनमिति प्रज्ञानामनी Ngh. 3. 9.

४. प्रजानन् परिवृष्टकारी वा U. प्रजानन् SKN.

५. पुरुषोपेतः Sy. पुंस्त्वयुक्तः। शूर इत्यर्थः Mah. शूरोऽक्लीबो वा U. पुरुमना इव कश्चिदाप्तः प्रज्ञानबहुलः...स्त्रियमपेक्ष्यालपमनस्कां पुरुषे बहुतरं मनः। पुंसतेर्वा पुरुषार्थस्य पौंस्यमिति यस्य बलनाम भवति Dur. पुमान् कश्चिदेव..पुमान् 'पातेर्डुमस्न्' (Uṇādi 4. 178.) इति वैयाकरणः। पुरुषमना इति नैरुक्ताः पुंसतेर्वा पौरुषार्थस्य। तथा च पुंसतेः। पौंस्यं बलम् SKN.

६. प्रमांसं A. धन्विनम् Sy. पुमांसं माम् Mah. पुमांसमक्लीबम् U. पुमांसमेतं धनुष्मन्तम् Dur. इमं योद्धारं पुमांसम् SKN.

७. परितः is suggested for परि च॥ सर्वप्रकारम् Dur.

८. रक्षति Sy. पात्वित्येतदाशास्महे Dur.

९. कुर्वतः A.

१०. हस्तघ्नस्यैव वा विशेषणम्। वयुनानि स्वानि कर्माणि जानन् SKN. अहिरिव भोगैः परिवेष्टयति बाहुम्। ज्यायां वधात्परित्रायमाणः। हस्तघ्नः सर्वाणि प्रज्ञानानि प्रजानन्। पुमान् पुरुमना भवति। पुंसतेर्वा 9. 15., SKN. III. 156.
This stanza=YV. 29. 51.

११. सूलाक्ता A.

१२. आलेन विषेणाक्ता Sy.

१३. इषुः Sy.

१४. ०शीर्ष्णि A. हन्तुशिरस्का। अर्तेर्हिंसाकर्मणो रुरुशब्दोत्पत्तिः। शृङ्गशीर्ष्णी वा Sy.

१५. ०शिरस्ता A.

१६. अवि च A. अपि च is suggested for अपि।

१७. इषोः Sy. १८. अयोमयः Sy.

१९. ०त्यधोमु० M. ०त्ययोमुखा is suggested for ०त्यथोमुखा।

२०. ०चिरिति A. २१. क्रियत इति शेषः Sy.

२२. अयम्। महान् is suggested for अयमाहानुयः।

२३. पर्जन्योत्पादितोदकरेतसा is suggested for वजत्योत्पादितोदकरेनसा॥
पर्जन्यो रेतो सा पर्जन्यरेताः। तस्यै पर्जन्यकार्यभूतायै। शरकाण्डस्य पर्जन्यजन्यत्वात् Sy.

२४. VM. ignores इदम्। देव्यै and बृहत्।

अवसृष्टा परा पत शरव्ये ब्रह्मसंशिते ।
गच्छामित्रान्प्र पद्यस्व मामीषां कं चनोच्छिषः ॥ १६ ॥

अवसृष्टा[1] । क्षिप्ता[2] सती । परागच्छ[3] । हे शरणकुशले[4] ! मन्त्रेण तीक्ष्णीकृते[5] ! गच्छ[6] । अमित्रान्[7] । प्रपद्यस्व[8] । मा । अमिषामित्राणाम्[9] । कञ्चिदपि[10] । उच्छिष[11] ।

यत्र बाणाः संपतन्ति कुमारा विशिखाइव ।
तत्रा नो ब्रह्मणस्पतिरदितिः शर्म यच्छतु विश्वाहा शर्म यच्छतु ॥ १७ ॥

यत्र बाणाः । युद्धदेश. स्तूयते । निगदसिद्धेति[12] ।

---

१. युवसृष्टाः Λ.
२. क्षिप्ता वती Λ. त्वम् अस्माभिर्मुक्ता सती Mah. निक्षिप्ता U.
३. वरागच्छ Λ. सहसा परसैन्ये पतिता भव Mah.
४. हिंसाकुशले ! इषो ! Sy. हिंसिका शरमयी हेतिः शरव्या Mah. शरमयीषुः शरव्या U.
५. ब्रह्मणा मन्त्रेण संशिता तीक्ष्णीकृता ब्रह्मसंशिता तादृशि ! Mah. ब्रह्मणाऽभिमन्त्रिते ! अभिमन्त्र्यातितरां तीक्ष्णीकृते ! U.
६. इतो देशाद्गच्छ च Sy. प्राप्नुहि Mah. परापत । गच्छेत्यतिशयार्थम् । एकार्थयोराख्यातयोर्द्विर्वचनम् U.
७. हिंसकान् Sy. पतित्वा चामित्राञ् शत्रून् Mah.
८. ०द्यस्व is suggested for ०द्यस्थ ॥ प्राप्नुहि च इतो देशाद् गच्छ Sy. प्राप्य च प्रपद्यस्व शत्रुशरीरेषु प्रविश Mah.
९. अमीषा० is suggested for अमिषा० ॥ अमीषां मध्ये Sy. प्रविश्य चामीषां शत्रूणां मध्ये Mah.
१०. कञ्चन पुरुषम् Mah.
११. अवशिष्टं (मा) कुरु Sy. अवशिष्टं मा कुरु । सर्वानपि जहीत्यर्थः 'शिष्लृ विशेषणे' Mah. उच्छेषय । उद्धृतमूलान् कुर्वित्यभिप्रायः U. This stanza=YV. 17. 45.
१२. यत्र युद्धे कुमारा विशिखा इव मुण्डिता इव बाणाः सम्पतन्ति तत्र नोऽस्मभ्यं ब्रह्मणस्पतिः शर्म सुखं विश्वाहा सर्वदा यच्छतु । अदितिश्च शर्म यच्छतु । द्विरुक्तिरादरार्था Sy. यत्र यस्मिन् युद्धे बाणाः शत्रुप्रयुक्ताः सम्पतन्ति इतश्चेतश्च सम्भूय पतन्ति । तत्र वृष्टान्तः । कुमारा विशिखा इव विगतां शिखा येषां ते विशिखाः शिखारहिता मुण्डितमुण्डा विकीर्णकवचा वाऽतिबालाश्चपलाः सन्तो यथा इतस्ततो गच्छन्ति तद्वत् । तत् तत्र युद्धे, इन्द्रो नोऽस्मभ्यं शर्म विजयोत्थं सुखं यच्छतु ददातु । कीदृशः इन्द्रः ? बृहस्पतिर्बृहतां मन्त्राणां पतिः पालको विजयोचितमन्त्रज्ञः । अदितिर्नास्ति दितिः खण्डनं यस्याखण्डितशक्तिः । विश्वाहा विश्वान् सर्वान् शत्रून् आ समन्ताद् धन्तीति विश्वाहा । स शर्म यच्छतु । इति पुनरुक्तिरादरार्था । यद्वा तत्रेन्द्रो बृहस्पतिरिन्द्रगुरुः । अदितिरिन्द्रमाता च विश्वाहा सर्वाण्यहानि सर्वदा शर्म यच्छतु । विश्वानि च तान्यहानि च विश्वाहा । विभक्तेराकारः । अत्यन्तसंयोगे द्वितीया Mah. यत्र बाणा इषवः सम्पतन्ति अनिर्मर्यादम् । कथमिव ? कुमारा विशिखा इव । यथा कुमारा अवृष्टपरिकारिणो विगतशिखाः सर्वमुण्डास्तं तमर्थं सन्निपतेयुरेवं सम्पतन्ति तत्रेत्यर्थः । नोऽस्माकमिन्द्रः शर्म शरणं यच्छतु ददातु । बृहस्पतिः शर्म यच्छतु । अदितिः शर्म यच्छतु । विश्वाहा सदा कालं च शर्म यच्छतु । इन्द्रो बृहस्पतिरदितिः U. This stanza=YV. 17. 48.

मर्माणि ते वर्मणा छादयामि सोमस्त्वा राजामृतेनानु वस्ताम् ।
उरोर्वरीयो वरुणस्ते कृणोतु जयन्तं त्वानु देवा मदन्तु ॥ १८ ॥

मर्माणि[1] । मर्माणि[2] । तव[3] । कवचेन[4] । आच्छादयामि[5] । सोमश्च[6] । त्वा[7] । राजा[8] । अमृतेन[9] । अनुच्छादयतु[10] । वरुण । ते[11] । उरोः[12] । उरुतर धनम्[13] । कृणोतु[14] । जयन्त शत्रुम्[15] । त्वाम्[16] । देवा.[17] । अनुमदन्तु[17] ।

यो नः स्वो अरणो यश्च निष्ट्यो जिघांसति ।
देवास्तं सर्वे धूर्वन्तु ब्रह्म वर्म ममान्तरम् ॥ १९ ॥

यो नः । यः । अस्मान् । ज्ञाति. । अरममाण. शत्रु । यः । च । निष्ट्यो[18] बहिर्भूत· । जिघांसति[19] । देवाः[20] । तम् । सर्वे । हिंसन्तु[21] । मन्त्र । कवचश्च[22] । मम । अन्तर शत्रोर्हृदयमध्ये[23] त्राणायावस्थितमिति यद्वा ब्रह्मैव ममान्तर कवचमिति ।

---

१. कर्माणि Λ. महाव्रते यागेऽध्वर्युः क्षत्रियाय सन्नाहं परिधानाय प्रयच्छतीत्यर्थः Mah. कवचं प्रयच्छति U.

२. हे राजन् ! Sy. हे यजमान ! Mah.

३. येषु स्थानेषु विद्धः सद्यो म्रियते तानि मर्माणि Sy. जीवस्थानानि Mah.

४. त्वदीयानि Sy.

५. वेचेन Λ.

६. छादयामि Sy. अहं छादयामि, आवृणोमि Mah.

७. त्वाम् Sy.

८. विप्रादीनामधिपः सोमः Mah.

९. नास्ति मृतं मरणं येन तेन मरणनिवारकेणानेन वर्मणा Mah.

१०. आच्छादयतु M. मर्म च्छादनानन्तरम्.... आच्छादयतु Sy. अन्वाच्छादयतु । 'वस आच्छादने' अदादिर्लोट् Mah. आच्छादयतु U.

११. तु M. तुभ्यम् Sy. तव वर्म Mah. तव कवचम् U.

१२. रोः Λ. पृथोरपि वरीयः Mah. पृथोरपि U.

१३. उरुतरं सुखम् Sy. प्रथीयः । अत्यन्तमुरु वरीयः Mah. प्रथीयः U.

१४. करोतु Sy., U.

१५. जन्तं शत्रून् M. विजयं प्राप्नुवन्तम् Mah.

१६. त्वा Λ.

१७. अनुहृष्यन्तु Sy. अनुकूला भूत्वा हृष्यन्तु उत्साहयन्तु वा Mah. उत्साहयन्तु देवाः U. This stanza=YV. 17. 49.

१८. नित्यो M. निष्टचो is suggested for निष्यो ॥ तिरोभूतो दूरे स्थितः Sy.

१९. हन्तुमिच्छति Sy.

२०. देवांस् Λ. सर्वे देवाः Sy.

२१. हिंसस्तु Λ.

२२. शराणां निवारकं वर्म Sy.

२३. शत्रोर्हृमय मध्ये Λ.

VII. 1.

मैत्रावरुणिर्वसिष्ठः[१] सप्तमर्मण्यलमपश्यत्[२] ॥

---

१. अथ सप्तमं मण्डलमारभ्यते। तस्मिन् मण्डले षडनुवाकाः। प्रथमेऽनुवाके सप्तदश सूक्तानि। तत्र 'अग्निं नरः' इति पञ्चविंशत्यृचं प्रथमं सूक्तम्। अत्रेयमनुक्रमणिका—'अग्निं पञ्चाधिका विराजोऽष्टावशाद्याः'(33. 1. p. 24.) इति। 'षष्ठं मण्डलं वशिष्ठोऽपश्यत्' (KSA. 33. p. 24.) इत्युक्तत्वान्मण्डलव्रष्टा वसिष्ठ ऋषिः। आदितोऽष्टादश विराजः, त्र्येकादशकाः(Cf KSA. 6. 7, 8. p. 3.)। शिष्टा अनावेशपरिभाषया त्रिष्टुभः। (Cf. KSA. 12. 6. p. 5.)मण्डलादिपरिभाषयाग्निर्देवता (Cf. KSA 12. 12. p. 5.)। विश्वजितीदं सूक्तमाज्यशस्त्रम्। सूत्रितञ्च—'विश्वजितोऽग्निं नर इत्याज्यम्' (ĀSS. 8. 7.) इति। अत्रेश्चतुर्वीराख्ये चतूरात्रे चतुर्थेऽहनीदमेव सूक्तमाज्यशस्त्रम्। सूत्र्यते हि—'अग्निं नर इति चतुर्थे'(ĀSS. 10. 2.) इति व्यूळ्हे दशरात्रे चतुर्थेऽहनीदं सूक्तं जातवेदस्यनिविद्धानम्। सूत्रितञ्च—'अग्निं नर इत्याग्निमारुतम्'(ĀSS. 8. 8.) इति। महाव्रतेऽपीदमाज्यशस्त्रम्। तथैव पञ्चमारण्यके सूत्र्यते—'आज्यप्रउगे विश्वजितः'(AA. 5.1. 1.) इति। अविवाक्येऽहनि प्रातरनुवाके 'त्वमग्ने वसून्' (RV. 1. 45. 1.) इत्यादीनामनुष्टुभां स्थान आद्यस्तृचः, प्रक्षेपणीयः। सूत्र्यते हि—'दशमेऽहन्यनुष्टुभां स्थानेऽग्निं नरो दीधितिभिररण्योरति तृचमाग्नेये ऋतौ'(ĀSS, 8.12.) इति। आद्याः षडृचस्तस्मिन्नेवाहन्याग्निमारुते शस्त्रे स्तोत्रियानुरूपार्थाः। सूत्रितञ्च—'अग्निं नरो दीधितिभिररण्योरिति स्तोत्रियानुरूपौ' (ĀSS. 8. 12.) इति। मण्डलादिहोमेऽप्येषा। आधाने तृतीयायामिष्टौ 'प्रेद्धः' इति स्विष्टकृतोऽनुवाक्या। सूत्रितञ्च—'प्रद्धो अग्न इमो अग्न इति संयाज्ये' (ĀSS. 2.1.) इति। एवमन्यत्रापि दीक्षणीयादिषु स्विष्टकृतोऽनुवाक्या। प्रायणीयेष्टौ 'सेदग्निरग्नीन्' इत्यादिके द्वे स्विष्टकृतो याज्यानुवाक्ये। सूत्रितञ्च—'सेदग्निरग्नीँरत्यस्त्वान्यानिति द्वे संयाज्ये' (ĀSS. 4. 3.) इति। आधाने तृतीयायामिष्टौ 'इमो अग्ने' इति स्विष्टकृतो याज्या। सूत्रितञ्च—'इमो अग्न इति संयाज्ये' (ĀSS. 2. 1.) इति। एवमन्यत्रापि दीक्षणीयादिष्वेषा सौविष्टकृति याज्या। प्रातरनुवाक आग्नेये ऋतौ त्रैष्टुभे छन्दस्याश्विनशस्त्रे च 'त्वमग्ने सुहवः' इत्याद्याः पञ्चर्चः। सूत्रितञ्च—'त्वमग्ने सुहवो रण्वसन्दृक्' (ĀSS. 4. 13.) इति Sy. वसिष्ठस्येदमार्षम् Dur. वसिष्ठस्यार्षम् SKN.

पुत्रानायुरथारोग्यं य इच्छेदव्ययं सुखम्।
सोऽग्निं (स 'अग्निं) नरः' इति सूक्तेन जुहुयादाज्यमन्वहम्॥ Ṛgvidh. 2. 130.

२. सप्तमर्मण्यवमप० A. सप्तमं मण्डलमप० is suggested for सप्त मर्माण्यलमप० Cf. KSA. 33. p. 24.

अग्निं नरो दीधितिभिररण्योर्हस्तच्युती जनयन्त प्रशस्तम् ।
दूरेदृशं गृहपतिमथर्युम् ॥ १ ॥

अग्निं नर इति । अग्निम् । ऋत्विजो मनुष्याः । अङ्गुलिभिः । अरण्योः । हस्तप्रच्युत्या । जनयन्त । प्रशस्तम् । दूरे दर्शनम् । गृहपतिम् । अननवन्तमिति ।

तमग्निमस्ते वसवो न्यृण्वन्त्सुप्रतिचक्षमवसे कुतश्चित् ।
दक्षाय्यो यो दम आस नित्यः ॥ २ ॥

तमग्निम् । गृहे । वसवो देवा हविर्वहनार्थः । प्राक्षिपन्नचासयत् (?) सुदर्शनम् । कुतश्चिदपि रक्षसः । रक्षणाय । वर्धनीयः । गृहे । भवति । नित्यः ।

---

१. अग्निर्नर A.
२. ऋत्युजो A. मनुष्या ऋत्विजः SKN.
३. अङ्गुलिभिर्योक्त्रं परिगृह्य, उत्तरारणिं च... 'धीधितयोऽङ्गुलयो भवन्ति' ता हि 'धीयन्ते कर्मसु' अनुष्ठीयमानेषु Dur. अङ्गुलिनामैतत् । अङ्गुलीभिः । युक्त्रमुत्तरारणिं वा परिगृह्य ताभिरिति शेषः...धीयन्ते कर्मसु धीयन्ते वा पुरुषैः कर्मसाधनानि SKN.
४. अरण्योर्विद्यमानम् Sy. प्रतिगत एने अग्निः । तात्स्थ्यादग्नेः । 'समरणाज्जायत इति वा' अरण्योर्हि समरणात् समागमनादग्निर्जायते Dur. अरण्योः सकाशात्...अरणी, यस्मादेते प्रत्यृतो गतोऽग्निः । कुत एतत् ? तत उत्पत्तेः । समरणात् सङ्गमनात् तयोर्जायत इति SKN.
५. ०प्रत्या A. हस्तप्रच्युत्या हस्तगत्या Sy. हस्ताभ्यां प्रच्यावयन्तः Dur. तृतीयायां पूर्वसवर्णः । हस्तच्युत्या हस्तप्रच्यावनेन SKN.
६. ०यत A. जनयन्तेत्यर्थः SKN.
७. प्रकर्षेण स्तुतम् Sy.
प्रशस्यमित्यर्थः Dur.
८. दूरे दृश्यमानम् दूरे पश्यन्तं वा Sy. दूरे यो दृश्यस्तम् । दूरे वसतो वा देवान् पश्यतीति SKN.
९. ग्रहप० A. गृहाणां पालकम् Sy. यज्ञस्वामिनम् SKN.
१०. अतनव० is suggested for अननव० ॥ आगम्यमतनवन्तं वा Sy. गमनवन्तमित्यर्थः । एवमत्रातर्तेर्गत्यर्थस्य सारूप्यादग्न्यधिकाराच्चापि 'अथर्युः' अतनवानित्युपपद्यते Dur. देवान् प्रति गमनवन्तमित्यर्थः SKN.
११. वीधितयोऽङ्गुलयो भवन्ति । धीयन्ते कर्मसु । अरणी प्रत्यृत एने अग्निः । समरणाज्जायत इति वा । हस्तच्युती हस्तप्रच्युत्या । जनयन्त प्रशस्तं दूरे दर्शनं गृहपतिमतनवन्तम् N. 5. 10., SKN. II. 328.
१२. ग्रहे A.
१३. वसवो वासका ये वसिष्ठाः Sy.
१४. हविर्विहनना० M. ०नार्थम् is suggested for ०नार्थः ।
१५. न्य(or अ)वासयन् is suggested for अचासयत् ॥ न्यवधुः Sy.
१६. सुप्रतिदर्शनम् Sy.
१७. कुरु कश्चि० A. सर्वस्मादपि भयहेतोः Sy.
१८. पूजनीयो हविर्भिः समर्धनीयो वा Sy.
१९. बभूव Sy.
२०. अजस्रः Sy.
२१. VM. ignores तम् । अग्निम् and यः ।

प्रेद्धो॑ अग्ने दीदिहि पु॒रो नो॑ऽजस्र॒या सू॒र्म्या॑ यविष्ठ ।
त्वां शश्व॑न्त॒ उप॑ यन्ति॒ वाजाः॑ ॥ ३ ॥

प्रेद्धः । प्रकर्षेद्ध॑ । अग्ने ! दीप्यस्व । पुरतः । अस्माकम् । अनवरतया । सरणशीलया । युवतम ! बहूनि । अन्नानि । त्वाम् । उपगच्छन्ति ।

प्र ते॑ अग्नयोऽग्निभ्यो॒ वरं॑ निः सु॒वीरा॑सः शोशुचन्त द्यु॒मन्तः॑ ।
यत्रा॒ नरः॑ स॒मास॑ते सुजा॒ताः ॥ ४ ॥

प्र ते । प्रकर्षेण नि॑ शोशुचन्त॑ । अन्येभ्यो लौकिकेभ्योऽग्निभ्य॑ । ते । अ॒ग्नयः॑ । व॒रिष्ठम् । शोभनवीराः॑ । दीप्तिमन्त॑ । यत्र । ऋत्विजः॑ । समासते । शोभनजननाः॑ ।

---

१. ०कर्षणे० A. प्रकर्षेण समिद्धस्त्वम् Sy. प्रकर्षेण दीप्तः Mah. प्रकर्षेणेद्धो दीप्तः सन् U.

२. पुरस्तादाहवनीयायतने Sy. अग्ने Mah. अग्रतः . .व्यवस्थितः U.

३. अस्मदर्थम् Sy.

४. अशरणशीलया Sy. अनुपक्षीणया Mah., U.

५. ज्वालया Sy. समित्काष्ठेन । . .सूर्मीशब्दः काष्ठवाचकः । यद्वा लोहमयी ज्वलन्ती स्थूणा सूर्मी । अजस्रया सूर्म्या सूर्मीसमानया ज्वालया दीदिहि । सूर्मीशब्दो ज्वालोपलक्षकः Mah. सूर्म्या समित्काष्ठिकया । सूर्मीशब्दः काष्ठवचनः । 'सूर्मीं ज्वलन्तीं वाऽऽश्लिष्यात्' इति च स्मृतिः U.

६. अतिशयेन युवा यविष्ठः Mah.

७. बहवः Sy. निरन्तरभाविनः Mah. शाश्वतिकाः U.

८. अन्नानि हवींषि Sy., Mah.

९. यतश्च त्वामेव U.

१०. ०गच्छन्ति is suggested for ०गच्छति ॥ प्राप्नुवन्ति, अतो दीप्यस्वेत्यर्थः . Mah. . . .अतो दीदिहीति सम्बन्धः U.

This stanza- YV. 17. 76. अथो॑दुम्बरीमा॒वधाति । ऊर्ग्वै र॒सउदु॑म्बर ऊ॒र्जै॒वैनमेतद्र॒सेन प्रीणाति कृ॒णकवती भवति पशवो वै कृणकाः पशुभि॒रे॒वैनमेतद्र॒सेन प्रीणाति यदि कृ॒णकवतीं न॒ धि॒न्वे॒द्धि॒ध्रप्स॒मुपह॒त्याव॒ध्यास्त॒द्धि॒ध्रप्स उपतिष्ठते तवे॑व पशू॒रूपं॑ "प्रेद्धोऽअग्ने दीदिहि पु॒रो॒न" इति विराजा॒वधा॑त्य॒ग्नं वि॒राड॒ग्नेरे॒वैनमेतत्प्रीणाति तिस्रः स॒मि॒ध आ॒वधाति त्रि॒वृदग्नि॒र्या॒वानग्नि॒र्या॒वत्य॒स्य मात्रा॑ ता॒वते॒वैनमेतद्र॒सेन प्राणाति । ŚB. 9.2.3.40. p. 720.

११. निर्गोशु० A. निः is missing in M.

१२. शोशुचन्त is suggested for शोशुचन्तः ॥ प्रकर्षेण नितरां दीप्यन्ते Sy.

१३. ते । अग्र is missing in M.

१४. परिष्ठम् A. वरमत्यन्तम् Sy.

१५. कल्याणपुत्रपौत्रप्रदाः Sy.

१६. येष्वग्निषु Sy.

१७. कर्मणां नेतारो यजमाना ऋत्विजो वा Sy.

१८. सहासते Sy.

१९. सुजन्मानः Sy.

---

१ " " चिन्हान्तर्गत एव भागोऽस्या ऋचः ।

दा नो अग्ने धिया रयिं सुवीरं स्वपत्यं सहस्य प्रशस्तम् ।
न यं यावा तरति यातुमावान् ॥ ५ ॥

दा नः[1] । देहि । अस्मभ्यम् । अग्ने ! कर्मणा[2] । धनम्[3] । शोभनवीरम्[4] । शोभनपुत्रम्[5] । सहनरूश[6] । प्रशस्तम्[7] । यं रयिम् । अभिगन्ता शत्रूः[8] । न[9] । तरति[10] । हिंसावान्[11] ।

उप यमेति युवतिः सुदक्षं दोषा वस्तोर्हविष्मती घृताची ।
उप स्वैनमरमतिर्वसूयुः ॥ ६ ॥

उप यम् । उपैति[12] । यम्[13] । युवतिः[14] । सुबलम् । रात्रिन्दिवम्[15] । हविष्मती[16] । जुहूः[17] । उप । एन[18] गच्छतु । मदीया[19] । विरामवर्जिता[20] । अर्थकामा[21] स्तुतिः ।

विश्वा अग्नेऽप दहारातीर्येभिस्तपोभिरदहो जरूथम् ।
प्र निंस्वरं चातयस्वामीवाम् ॥ ७ ॥

विश्वाः[22] । सर्वाः । अग्ने ! अचदह[23] । अरातीः[24] । यैः[25] य । तेजोभि । उहः[26] । रक्षः, जतृफ[27] गृणातः इति

---

१. दा ना A.
२. स्तोत्रेण Sy.
३. धन शोभ० A.
४. शोभनपुत्रपौत्रोपेतम् Sy.
५. शोभनपौत्रोपेतम् Sy.
६. सहनकुशल ! is suggested for सहनरूश ॥ अभिभवकुशल ! Sy.
७. श्रेष्ठम् Sy.
८. शत्रून् M. शत्रुः is suggested for शत्रूः ।
९. Omitted by M.
१०. बाधते Sy.
११. यातुमावान्; हिंसाया निर्गतः । नलोपाभाव-श्छान्दसः । यद्वा हिंसायुक्तः । परो वतिर्मत्व-र्थीयः पूरकः Sy.
१२. उपगच्छति Sy.
१३. अग्निम् Sy.
१४. अग्निना नित्ययुक्ता Sy.
१५. रात्रि दिवम् A. VM. explains दोषा and वस्तोः together as रात्रिन्दिवम् ॥ रात्रावहनि च Sy.
१६. ०ष्मति A. हविषा युक्ता Sy.
१७. जुहूः A. घृतमञ्चतीति घृताची जुहूः Sy.
१८. तमेनम् Sy.
१९. मदीयो A स्वा स्वकीया Sy.
२०. दीप्तिः Sy.
२१. स्तोतृणां धनमिच्छन्त्युपैति Sy.
२२. विश्वान् Sy.
२३. अचावह A. अपवह is suggested for अचवह ॥
२४. शत्रून् Sy.
२५. केयः A. यः seems to be redundant.
२६. Both the mss A., M. read here तेजोभिरुहो, which is evidently wrong. अवहः therefore is suggested for उहः । वहसि Sy.
२७. जत्र फं A. जरूथं is suggested for जतृफं ॥ परुषशब्दकारिणं राक्षसम् । गृणातेरूथन्प्रत्यये सति जरूथशब्दनिष्पत्तिः Sy.

यास्कः, परुष्वचशीलमपि चा जरयितृ । प्रचातयस्व । निशब्दम् । रक्ष ।

आ यस्ते अग्न इधते अनीकं वसिष्ठ शुक्र दीदिवः पावक ।
उतो न एभिः स्तवथैरिह स्याः ॥ ८ ॥

आ यः । आभिमुख्येन । अग्ने ! यः । ते । तेजः संघातम् । इन्धे । श्रेष्ठ ! ज्वलत् । दीप्त ! गोधक !
तस्य मम । अपि च । स्तोत्रैः । इह । भव ।

वि ये ते अग्ने भेजिरे अनीकं मर्ता नरः पित्र्यासः पुरुत्रा ।
उतो न एभिः सुमना इह स्याः ॥ ९ ॥

वि ये । विभेजिरे । ये । तव । अग्ने रश्मिसङ्ग समिन्धनेन । मनुष्याः । नेतारम् । पितृहिताः । बहुषु
देशेषु । अपि च तेषाम् । अस्माकम् । एहि स्तोत्रैः । इह । सुमनाः । भवेति ।

इमे नरो वृत्रहत्येषु शूरा विश्वा अदेवीरभि सन्तु मायाः ।
ये मे धियं पनयन्त प्रशस्ताम् ॥ १० ॥

इमे । इमे । नरोऽस्मदीयाः । सङ्ग्रामेषु । शूराः । विश्वाः । आसुरीम् । मायाम् । अभि-

---

१. स्कः is missing in A. N. 6. 17.
२. परुष्व च शी० M. परुषस्वनशी० is suggested for परुष्व च शी० ॥
३. वा is suggested for चा ।
४. प्राचात० A. प्रकर्षेण नाशय । चयतिर्गत्यर्थो वेति भट्टभास्करः Sy.
५. निशवद A निःशब्दम् is suggested for निशब्दम् ॥ न्यक्कृतोपतापं यथा भवति तथा 'स्वृ शब्दोपतापयोः' इति धातुः Sy.
६. रक्षः is suggested for रक्ष । रोगम् Sy.
७. अभिमु० A. ८. तव Sy.
९. ०धातः M.
१०. समेधयति Sy. ११. शुभ्र ! Sy.
१२. मोधक M. शोधक ! is suggested for गोधक ॥
१३. VM. seems to explain नः gen. plu. by मम gen. sing. तस्येव नोऽस्माकम् Sy. १४. अस्मिन् यज्ञे Sy.
१५. VM. ignores एभिः ।
१६. विभजन्ते । आदधुरिति यावत् Sy.
१७. यजमानाः Sy.
१८. अग्ने is suggested for अग्ने ।
१९. तेजः Sy.
२०. मनुष्याः is missing in M.
२१. नेतारः is suggested for नेतारम् ॥ कर्मणां नेतारः Sy
२२. मितृहिता आर्षेया वा Sy.
२३. तेषामिव Sy.
२४ एभिः is suggested for एहि ।
२५. एभिः स्तुतैः सह स्तोत्रैर्वा Sy.
२६. यज्ञे Sy. २७. अनुग्राहकमनाः सन् Sy.
२८. त इमे मयि स्निग्धाः Sy.
२९. मनुष्याः Sy. ३०. पित्र्या A. सर्वाः Sy.
३१. By the testimony of विश्वाः, आसुरीः and मायाः is suggested for आसुरीम् and मायाम् ।

भवन्तु । ये[1] । मे[2] । कर्म[3] । प्रशस्तम् । स्तुवन्ति[4] ।

मा शूने[5] अग्ने नि षदाम[6] नृणाँ[7] माशेषसोऽवीरता[8] परि[9] त्वा ।
प्रजावतीषु दुर्यासु दुर्य[10] ॥ ११ ॥

मा शूने । माम्[5] । नृणाम्[7] । केवलत्वाय[8] । अग्ने ! त्वाम्[9] । परिनिषदाम[6] परिनिषीदन्तस्त्वामाश्रितान् भर्तु[10] शरोमः[11] । मा च । अनपत्यस्य धनस्य । मा चावीरयुक्तस्य[12] धनस्य लाभाय[13] । प्रजायुक्तेषु । गृहेषु[14] भवेम[15] । गृहपतयः[16] ।

यमग्नी[17] यम्[18] यज्ञम्[19] अश्ववानग्निम्[20] । नित्यम् । उपगच्छति[21] । स यज्ञः प्रजायुक्तम्[22] । शोभनापत्यञ्च[23] । गृहम्[24] । अस्मभ्य[25] प्रयच्छत्[26] । औरसेन । पुत्रेण । वर्धमानः[27] ।

पाहि[28] नो अग्ने रक्षसो[29] अजुष्टात्पाहि[30] धूर्तेररुषो[31] अघायोः[32] ।
त्वा युजा पृतनायूँरभि[33] ष्याम्[34] ॥ १२ ॥

[पाहि[28] ।] पाहि । अस्मान् । अग्ने ! रक्षसः[31] । अप्रियात्[32] । पाहि । हिंसितुः[33] । अदातुः[34] ।

---

१. मनुष्याः Sy. २. मदीयाम् Sy.
३. प्रकृष्टां धियं कर्म स्तुतिं वा Sy.
४. स्तुवन्ति ब्रुवन्ति वा Sy.
५. मा is suggested for माम् ।
६. मा नृणा A. नृणामन्येषाञ्च गृहे मा निषदाम Sy.
७. शून्ये पुत्रादिरहिते गृहे Sy.
८. त्वां परिचरन्तः Sy.
९. ०निवदा० M. निवसाम Sy.
१०. ०माप्नुतान् भर्तं A.
११. शरे मो A. शक्नुमः is suggested for शरोमः
१२. नवस्य A. आपुत्राः Sy. तोक्म शेष इति पुत्रनामनी Ngh. 2. 2.
१३. चापिर० A. अवीरतया युक्ताश्च सन्तः Sy.
१४. गृहेषु A. १५. गृहेषु निवसाम Sy.
१६. गृह.....त A. गृहपते ! is suggested for गृहपतयः ॥ गृहेभ्यो हित ! हे अग्ने ! Sy. १७. यमीव A.
१८. यम् is missing in M.
१९. यज्ञाश्रयम् Sy.
२०. अश्ववानग्निं A.. ०नग्निः is suggested for ०नग्निं ।
२१. ०च्छन्ति A. २२. भृत्यादिसहितम् Sy.
२३. ०नावत्य० A शोभनसन्तानोपेतम् Sy.
२४. ग्रहम् M. २५. अभ्यम् A.
२६. हे अग्ने ! देहीति शेषः Sy.
२७. ०मानम् is suggested for ०मानः
२८. The *pratīka* is supplied by the Editor.
२९. रक्ष Sy. ३०. अग्नेः A.
३१. राक्षसात् Sy.
३२. ०यान् A. अप्रीतिविषयीतात् Sy.
३३. हिंसकात् Sy. ३४. किञ्चावातुः Sy.

अघमिच्छतः[1]। त्वया[2]। सहायेन[3]। युद्धकामान्[4]। अहमभिभवेयम्।

सेदग्निरग्नीँरत्यंस्त्वन्यान्यत्र वाजी तनयो वीळुपाणिः।
सहस्रपाथा अक्षरा समेति ॥ १४ ॥

सेदग्निः। सः। एव। अग्नि[5]। अन्यान्[6] परकीयान्। अग्नीन्[7]। अभिभवतु[8]। यस्मिन्[9]। हविष्मान्[10]। मम पुत्रौ[11]। दृढहस्त[12]। बहुरक्षण[13]। स्तोत्राणि[14]। समेति[15]।

सेदग्नियों वनुष्यतो निपातिं समेद्धारमंहस उरुष्यात्।
सुजातासः परि चरन्ति वीराः ॥ १५ ॥

सेदग्निः। स। एव। अग्नि। य। हन्तुः[16]। पररक्षति[17]। यश्च समेद्धारम्[18]। अंहसः[19]। रक्षति[20]। शोभनजननास्तमिमम्[21]। परिचरन्ति। पुत्राः[22]।

अयं सो अग्निराहुतः पुरुत्रा यमीशानः समिदिन्धे हविष्मान्।
परि यमेत्यध्वरेषु होता ॥ १६ ॥

अयं सः। अयम्। सः। अग्नि। आहुत[23]। बहुषु[24] देशेषु। यम्[25]। ईश्वरः[26]। हविष्मान्[27]। सम्। इत्। इन्धे[28]। पर्येति[29] च। यम्[30]। यज्ञेषु[31]। होता[32]।

---

१. पापमिच्छतः Sy. २. अपि च त्वया Sy.
३. सहयेन A. सहायभूतेन Sy.
४. पृतनाकामान् Sy
५. अग्निराहवनीयाविरस्मदीयः Sy.
६. इतरान् अन्यदीयान् Sy. ७. अग्निन् A.
८. अहि भ० A. अतिभवतु Sy.
९. यस्मिन्नग्नौ Sy.
१०. स हविष्ठो A. अशनवान् बलवान् वा Sy.
११. पुत्रः is suggested for पुत्रौ अस्मत् पुत्रः Sy. १२. ०हस्तौ M. वीळु च्यौत्नमिति बलनामनी Ngh. 2.9.
१३. बह्वन्नो बहुस्थानो वा बहूदको वा Sy.
१४. क्षयरहितेन स्तोत्रेण Sy.
१५. सम्यक् परिचरन्ति। समर्थपुत्रवत एवाग्निरन्यदीयानग्नीन् अभिभवतीति भावः Sy.
१६. हिंसकात् Sy. वनुष्यतिर्हन्तिकर्मा N. 5.2.
१७. पररक्षति A. अत्यन्तं रक्षति Sy.
१८. प्रबोधकम् Sy. १९. पापात् Sy.
२०. VM. explains उरुष्यात् by रक्षति but Sy. seems to explain उरुष्यात् by अधिकात्.
२१. यश्च सुजन्मान एव Sy.
२२. वीराः स्तोतारः सुता वा Sy.
२३. आहुतिभिरभिहुतः Sv.
२४. बहुषु देशेषु यज्ञेषु वा Sy.
२५. अग्निम् Sy. २६. समृद्ध ऐश्वर्यमिच्छन् वा Sy. २७. यजमानः Sy.
२८. समे वृद्धे A. सम्यग्दीपयति Sy.
२९. पर्येति A. परिगच्छति Sy.
३०. यम् is missing in M.
३१. हिंसारहितेषु यज्ञेषु Sy.
३२. देवानामाह्वाता Sy.

त्वे अग्न आहवनानि भूरीशानास आ जुहुयाम नित्या ।
उभा कृण्वन्तो वहतू मियेधे ॥ १७ ॥

त्वे अग्ने । त्वयि । अग्ने ! हवीषि । भूरीणि[1] । श्वराणि[2] । आजुहुयाम[3] । नित्यानि[4] । उभौ । वहतू[5] स्तोत्र शस्त्रञ्च । कृण्वन्तोऽपि[6] । यज्ञे[7] ।

इमो अग्ने वीततमानि हव्याजस्रो वक्षि देवतातिमच्छ ।
प्रति न ईं सुरभीणि व्यन्तु ॥ १८ ॥

इमो[8] । इमान्येव । अग्ने ! कान्ततमानि[9] । हवीषि[10] । अनवरतः[11] । वह । देवसङ्घम्[12] । अभि । प्रति-भक्षयन्तु[13] । अस्माकम्[14] । इमानि[15] । सुरभीणि हवीषि देवा ।

मा नो अग्नेऽवीरते परा दा दुर्वाससेऽमतय मा नो अस्यै ।
मा नः क्षुधे मा रक्षस ऋतावो मा नो दमे मा वन आ जुहूर्थाः ॥ १९ ॥

मा नः[16] । मा । अस्मान् । अग्ने ! पुत्रत्वाय[17] । परा[18] दाः[19] । म च[20] । अशोभनवस्त्राय[21] । अमतये[22] । अस्यै[23] । मा च[24] । अस्मात्[25] । क्षुधे[26] । मा च । रक्षसे[27] । यज्ञवन्[28] ! मा । हिसीश्च[29] । अस्मान् । ग्रहे[30] । मा न[31] । वनो[32] ।

---

१. बहूनि Sy.
२. ईश्वराणि is suggested for श्वराणि धनानामीश्वराः सन्तः Sy.
३. आजुहुवाम Sy.
४. नित्यान्यग्निहोत्रादीनि Sy.
५. वहतु M. वहनहेतू स्तोत्रं शस्त्रञ्च Sy.
६. कुर्वन्तः Sy.
७. ०न्तो यि यज्ञे A.
८. अतिशयेन कान्तानि Sy.
९. हव्यानि Sy.
१०. अनवरतः सन् Sy.
११. देवानां समूहम् Sy.
१२. It seems to be the explanation of अच्छ ॥ गच्छ च Sy.
१३. प्रतिव्यन्तु प्रत्येकं कामयन्ताम् Sy.
१४. अस्मदीयानि Sy.
१५. इमाग्नि A. एतानि हव्यानि Sy.
१६. सुरभिर्ग्नि ह०A. शोभनानि Sy.
१७. हन A.
१८. अपुत्रतायै Sy
१९. वरा दा A. देहि Sy.
२०. मा is suggested for म ॥
२१. ०स्त्राया A. दुष्टवस्त्राय Sy.
२२. अमतने A. अभिहान्यै Sy
२३. अस्यै is suggested for यस्यै ॥
२४. मा व A.
२५. अस्मान् is suggested for अस्मात् ।
२६. अशनायायै Sy.
२७. बलिने Sy.
२८. यज्ञवं A. हे सत्यवन् ! अग्ने ! Sy.
२९. जुहूर्थाः 'हुर्च्छा कौटिल्ये' इति धातुः Sy.
३०. गृणिः M. गृहे is suggested ग्रहे ।
३१. माण च A. मा च is suggested for मा न ॥
३२. A. वचनः M. वने is suggested for वनो ।

नू मे ब्रह्मण्यग्न उच्छशाधि त्वं देव मघवद्भ्यः सुपूदः ।
रातौ स्यामोभयास आ ते यूयं पात स्वस्तिभिः सदा नः ॥ २० ॥

नू मे[1] । क्षिप्रम् । मह्यम् । अन्नानि । त्वम् । अग्ने[3] ! इच्छगाधि[4] गृहाणेति ब्रूहि[5] त्वा । हे देव[6] ! हविष्मद्भ्यो[7]ऽन्नानि । क्षासि[8] । वयं तव[9] । दाने । स्याम[10] । उभया[11] हविष्मन्तः स्तुतिमन्तश्च । यूयम्[12] । वात[13] । अविनाशैः[14] । सदा । अस्मानित्यग्निरनुचराश्चेति[15] ।

त्वमग्ने सुहवो रण्वसंदृक्सुदीती सूनो सहसो दिदीहि ।
मा त्वे सचा तनये नित्य आ धङ्मा वीरो अस्मन्नर्यो वि दासीत् ॥ २१ ॥

त्वमग्ने । त्वम् । अग्ने ! स्वाहावः[16] । रमणीयसन्दर्शन[17] । शोभनदीप्त्या[18] । सहसः । पुत्रम्[19] । दीप्य[20] । मा[21] । त्वयि । वर्तमानो रश्मि[22] । औरसे । पुत्रे । आदहन करोतु[23] । मा[24] । वीरः[25] । नृभ्यो[26] हित ।

---

१. नू मे M.
२. मदर्थम् Sy. ३. अन्न Λ
४. इच्छमाधि Λ. M. उच्छशाधि is suggested for इच्छगाधि ॥ उत्कर्षेण शोधितानि कुरु Sy.
५. ब्रू इहि त्वा Λ. वा is suggested for त्वा
६. हि देव Λ. M. हे द्योतमानाग्ने ! Sy.
७. हविष्मद्भ्योऽस्मभ्यम् Sy.
८. रक्षसि or क्षरसि is suggested for क्षासि ॥ प्रेरय Sy.
९. चव Λ. त्वदीयायाम् Sy.
१०. स्याम is suggested for स्योम ॥ भवेम Sy.
११. उभव M. उभया is suggested for उभवा ॥ स्तोत्रिणः शस्त्रिणश्च, अथवा स्तुवन्तो यजमानाश्च वयम् Sy.
१२. त्वत्परिवाराश्च सर्वे Sy.
१३. पात is suggested for वात ॥ रक्षत Sy.
१४. अविनाशैः is suggested for अपिनागैः अविनाशिभिर्मङ्गलैः Sy. स्वस्तीत्यविनाशनाम । अस्तिरभिपूजितः । सु अस्तीति N. 3.21.
१५. ०त्यग्नियंनुचरांश्च हेति Λ. अग्नेरनु० is suggested for अग्निरनु
१६. VM. ignores आ ॥ आ अत्यर्थम् Sy.
१७. ०हापः Λ. स्वाह्वानः Sy.
१८. ०णीया स० Λ.
१९. ०भनादी० Λ. शोभनया दीप्त्या Sy.
२०. पुत्र ! is suggested for पुत्रम् ॥ सुत ! हे अग्ने ! Sy.
२१. दीप्यस्व is suggested for दीप्य M.
२२. माने M.
२३. सहायभूतः Sy.
२४. अभिधाक्षीः Sy.
२५. माप Λ.
२६. पुत्रः Sy.
२७. वृभ्यो Λ. नरहितः Sy.

अस्मत्तः[1]। अपक्षय यातु[2]।

मा नो अग्ने दुर्भृतये सचैषु देवेद्धेष्वग्निषु प्र वोचः।
मा ते अस्मान्दुमतयो भूमाचिद्देवस्य सूनो सहसो नशन्त ॥ २२ ॥

मा नः[3]। मा[4]। अस्मान्। अग्ने! सहायभूतस्त्वम्। एषु। अग्निषु[5]। अशोभनहरणाय[6]। प्रवोचः[7]। देवैरिद्धेषु[8]। मा। तव। अस्मान्। दुर्मतयः[9]। भ्रमणशीलस्वभावाः[10]। देवस्य। हे सहसः[11] सूनो[12]! व्याप्नुवन्तः[13]।

स मर्तो अग्ने स्वनीक रेवानमर्त्ये य आजुहोति हव्यम्।
स देवता वसुवनिं दधाति यं सूरिरर्थी पृच्छमान एति ॥ २३ ॥

स मर्तः[15]। स। मनुष्यः। अग्ने! शोभनज्वालानिक[16]! धनवान्[17] भवति। अमर्त्ये[18] त्वयि। वा[19]।

---

१. अपि चास्मत् पृथग्भूतो ऽस्माकं वा। षष्ठ्यर्थे पञ्चमी Sy.

२. उपक्षीयेत Sy.

३. न Sy.

४. अग्निषु is suggested for अनिषु।

५. एष्यनिष्यशो० A.

६. ०नभर० is suggested for ०नहर०। कृच्छ्रभरणाय Sy.

७. ब्रूहि। त्वत्सहायभूता अग्नयो यथा मामकृच्छ्रेण बिभृयुस्तथा ब्रूहीत्यर्थः Sy.

८. देवेरि० A. ऋत्विग्भिः समिद्धेषु Sy.

९. निग्रहबुद्धयः Sy.

१०. ०लाग्रमणनील० A. भूमात्-भ्रमादपि। अत्र सम्प्रसारणं छान्दसम्। प्रमादादपीत्यर्थः Sy.

११. द्योतमानस्य Sy.

१२. हे बलस्य पुत्राग्ने! Sy.

१३. व्याप्नुवन्तः A. व्याप्नुवन्तु Sy. नशदिति व्याप्तिकर्मा Ngh. 2. 18.

१४. VM. ignores चित्.

१५. वसिष्ठस्त्रिष्टुभाग्निं तुष्टाव। चतुर्थेऽहनि एकविंशस्तोमखण्डे 'अग्निं नरः' RV. 7.1.1. 'इत्याज्यम्' (ŚŚS. 11.15.2.) ऋग्विधाने पुत्रानायुरथारोग्यमिति DDN.

१६. ०लानीक is suggested for ०लानिक॥ सुतेजस्क! हे अग्ने! Sy.

१७. धनवान् is suggested for धनवान्॥ रेवान्-'नकार आकारोपधः'० RPR. 4.65. इति नलोपे प्राप्ते पादान्तत्वान्न DDN.

१८. मनुष्ये देवतात्मनि त्वयि Sy. DDN.

१९. व A. यः is suggested for वा॥ निर्धनो-ऽपि यः DDN.

आजुहोति । हविः । सः[1] । देवतानाम्[2] । धनदानम्[3] । धारयति । यम्[4] । विद्वान्[5] । धनदानार्थम्[6] । प्रच्छन्[7] । एत्युदारम्[8] ।

महो नो अग्ने सुवितस्य विद्वान्रयिं सूरिभ्य आ वहा बृहन्तम् ।
येन वयं संहसावन्मदेमाविक्षितास आयुषा सुवीराः ॥ २४ ॥

महः[10] । महान्तम्[9] । अस्मभ्यम्[11] । अग्ने ! अभ्युदयम्[12] । जानन्[13] । धनम्[14] । स्तोतृभ्यः[15] । आवहम्[16] । महत्[17] । येन, वयम्[18], धनेन[19] । बलवन्[20] ! माद्येम[18] । अक्षिणा[19] । आयुषा[20] । शोभनवीराः[21] ।

नू मे ब्रह्मण्यग्न उच्छशाधि त्वं देव मघवद्भ्यः सुषूदः ।
रातौ स्यामोभयासस आ ते यूयं पात स्वस्तिभिः सदा नः ॥ २५ ॥

नू मे[22] । सेयमेकस्मिन्नपि सूक्ते द्वि पठिता विराट्[23] । द्विरग्नि स्तुत्वा सकृदुपसंहृत्य पुनरप्यन्यैश्च नौति[24] स्तुत्वोपसहार इति[25] ।

कुशिकानां कुले जातो माधव सुन्दरीसुत ।
पञ्चमस्याष्टकस्याद्यमध्यायं व्याकरोदिति ॥

---

१. मर्तो मनुष्यः Sy. स एवापरो देवता DDN.
२. स एव मनुष्यो देवताभ्यः Sy.
३. धनपोषं ददाति Sy. धनसम्भजनम् DDN.
४. मर्त्यम् Sy. मनुष्यम् DDN.
५. प्राज्ञः Sy. DDN.
६. धनार्थम् A. धनादिकामः, अर्थी याचकः DDN.
७. पृच्छन् is suggested for प्रच्छन् ॥ असावुदारः क्वास्त इति पृच्छन् Sy. असावुदारः क्वास्ते, असावुदारा किङ्करोतीति पृच्छन् DDN.
८. अभिगच्छति....यद्वा स देवताग्निर्वसुवनिं यजमानं दधाति धारयति यमग्निं सूरिः स्तोतार्थी प्रयोजनवान् पृच्छमानः ? कोऽसावग्निरिति पृच्छमान ? एति Sy. अभिगच्छति DDN.
९. महतः Sy.
१०. अस्मदीयस्य Sy.
११. ०दय M. कल्याणस्य कर्मणः । अस्मदीयस्य कल्याणं कर्म Sy.
१२. त्वं स्तोतृभ्यो ऽस्मभ्यम् Sy.
१३. ०वहं अहृत् M. आवह is suggested for आवहम् ॥
१४. महान्तम् Sy.
१५. येन....रवयं धनेन A.
१६. स्तोतारः Sy.
१७. हे बलवन् ! अग्ने ! Sy.
१८. हृष्येम Sy.
१९. अक्षीणाः is suggested for अक्षिणा ॥ अविक्षीणाः Sy.
२०. पूर्णायुषा Sy.
२१. कल्याणपुत्रपौत्राश्च सन्तः Sy.
२२. द्विः is suggested for द्वि ।
२३. विरा हिरग्नि स्तु० A.
२४. रप्येन्यैश्छनोति A. स्तौति, Or नौति is suggested for नोति M.
२५. इयमृक् प्रागेव (RV. VII. 1. 20.) व्याख्याता Sy.

॥ अथ पञ्चमाष्टके द्वितीयाध्यायः[1] ॥

अथाध्यायं[2] 'जुषस्व[3] नः' व्याचिख्यासति माधवः ।
गोत्रेष्वृषीणां[4] वक्तव्यमादावेव प्रदर्शयन् ॥ १ ॥

पित्रादिषु[5] प्रसिद्धेन येन[6] नाम विशेष्यते ।
वेदेष्वृषीणां[7] तद्गोत्रं ज्ञातव्यं[8] तत्र वैदिकैः ॥ २ ॥

जेतुः पिता मधुच्छन्दाः श्यावाश्वस्य पितामहः ।
पितामहो गौरिवीतिर्[9]गोत्रत्वेन प्रदर्शितः ॥ ३ ॥

अपालाऽत्रिकुले[10] जाता विश्ववारा च तादृशी ।
दूरस्थोऽत्रिस्तयोर्गोत्रं बहवः सन्ति तादृशाः ॥ ४ ॥

पितरौ[11] मित्रावरुणौ वसिष्ठस्येत्यपि[12] श्रुतम् ।
उतासि मैत्रावरुणः प्रवरेषु पुनस्तयोः ॥ ५ ॥

पुत्रस्थाने समावेशाद् वसिष्ठो[13] मैत्रावरुणिः ।
तत्राहुः कारणं प्राज्ञा विदेहो[14] हि शशाप[15] तम् ॥ ६ ॥

---

१. Supplied by the Editor.
२. A. writes **अथ** separately from **अध्यायः**। M. adds **श्रीः** before **अथ.**
३. **गोप्त्रैष्णुषणां** A.
४. **वित्रा०** A.
५. **०द्धेन नामधेयन विशे०** A.
६. **वैदेष्णुषुणां** A.
७. **०तप्यन्तप वै** A.
८. **वी** is missing in A.
९. **०र्शिता** A.
१०. **०लातिकुले जाजा विश्व०** A.
११. **वितरौ** A.
१२. **०त्यृचि** R. Cf. RV. VII. 33. 11.
१३. **०वेशो वासिष्ठ मैत्रावरुण(णा** M.) A., M. The reading of the Mss. does not give any sense. The reading of R. is adopted therefore.
१४. **०ज्ञा सिषवेहो** A.
१५. **शशप** A. **०ऽभिशशाप** R.

ऋषे[1] भव विदेहस्त्वमृषिः शप्तः समाविशत्[2] ।
अहोरात्रे योगबलात्तौ[3] मित्रावरुणौ स्मृतौ[4] ॥ ७ ॥
ददर्श[5] मन्त्रांश्च तदा पुत्रश्चाभूत्[6] पुनस्तयोः ।
क्रमेणार्षेयवरणमुपपन्नं तयोरिति ॥ ८ ॥
विश्वामित्रजमदग्नी तथा वसिष्ठ[7] एव च ।
इन्द्रो अगस्त्यो[8] मरुतो गोत्रं नैषु[9] प्रदृश्यते ॥ ९ ॥
यद्यप्यृषीणां सप्तानां ब्राह्मणेषु[10] दृश्यते ।
गोत्रं तथापि विज्ञेयमृक्षु गोत्रनिवेशनात्[11] ॥ १० ॥
असगोत्रो भवेच्छ्राद्धे[12] सगोत्रान्तन्तुमाहरेत् ।
न प्रयच्छेद्दुहितरं सगोत्रायेति च स्मृतिः ॥ ११ ॥
किमेतेषु मनुष्याणां गोत्रमित्यभिधीयते ।
वक्तव्यं छान्दसनैतद्धर्मशास्त्रपरैरिव[13] ॥ १२ ॥
कौतूहलनिवृत्यर्थमथ चास्माभिरुच्यते ।
गोत्राणां तु सहस्राणि प्रयुक्तान्यर्बुदानि[14] च ॥ १३ ॥

---

१. ऋषेर्भव A.
२. ०विगत् A.
३. ०लान्तौ A.
४. स्पृतो A.
५. दश म० A.
६. ०श्चाहूत् A.
७. ०ग्नि तवुपासिष्ठमेतेन वा A. ०ग्नि तवु वासिष्ठमैन वा M. The reading of R. is adopted here.
८. इन्द्रो ऽगस्त्यो A.,R.
९. नेषु प्रदर्श्यते A.
१०. गोत्रमेषु R. ०षुदन् दृ० M. R. adds न between ब्राह्मणेषु and दृश्यते ।
११. निदर्शनात् R. १२. दवे० A.
१३. व्यश्छान्दसैनेतं A. छान्वसैनैतत् is suggested for छान्दसनैतत्.
१४. ०स्त्रवरै० A.
१५. ०क्तान्यं वुदा० A.

कुलाख्यानि[1] हितानीह तानि गोत्राणि सन्तु नः ।
ननु[2] स्मरन्ति नैतानि[3] सम्प्रति ब्राह्मणा इमे ॥ १४ ॥
तर्हि गोत्रसहस्राणि प्रयुतान्यर्बुदानि[4] च ।
षश्रुतैः[5] सङ्गृहीतानि कतबोधायनादिभिः[6] ॥ १५ ॥
स्मरन्ति तानि[7] चित्तेषु सम्प्रतित्वेन मानवाः ।
मार्कण्डेयोऽस्मि माण्डूकस्तथा माण्डव्य इत्यपि ॥ १६ ॥
प्रदर्शयन् बहून् पक्षान् न कथञ्चिदपीच्छति ।
इतरेतरसम्बन्धं तदध्यायमिति ब्रुवन् ॥ १७ ॥
यदि ह्येतानि गोत्राणि मार्कण्डेयः समुद्वहेत् ।
माण्डूकस्य दुहितरमसगोत्राऽस्य सा यत. ॥ १८ ॥
तस्माद्वत्सादिकं गोत्रमिति माधवदर्शनम् ।
आपस्तम्बश्च[8] तानेव देवदृष्टानदर्शयत्[9] ॥ १९ ॥

VII. 2.

जुषस्वं नः समिधमग्ने अद्य शोचा बृहद्यजतं धूममृण्वन् ।
उप स्पृश दिव्यं सानु स्तूपैः सं रश्मिभिस्ततनः सूर्यस्य ॥ १ ॥

[10]जुषस्वा । वसिष्ठ ॥ [12]जुषस्व । नः[13] । समिधम् । अग्ने ! अद्य । [14]प्रज्वल च । [15]बृहन्तम् । यष्ट-

---

१. ०ख्या हिता० A. ०ख्याभिमता० R.
२. न तु R. ३. नेतानि A. चैतानि R.
४. ०न्यं बुदा A.
५. षं....श्रुतैः A. षड्भृतैः R.
६. कम्बो धोय० A. काम्बोधोदय० M. the reading of R. is adopted here.
७. रानि चि० M. ८. ०स्तंबंच A.
९. देव दृष्ट न० A. देवदृ० R.
१०. 'जुषस्व नः' इत्येकादशर्चं द्वितीयं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभम् । आप्रशब्दोक्तत्वादिदं तन्नपात्रहितम् । समिद्वाद्या अग्निविशेषाः प्रत्यृचं देवता उक्ताः । तथा चानुक्रम्यते—'जुषस्वैकादशाप्रम्' (KSA. 34. 2. p. 24.) इति । पशाविष्टाविदमाप्रीसूक्तम् । सूत्रितञ्च—'जुषस्व नः समिधमिति वसिष्ठानाम्' (ĀŚS. 3. 2.) । पत्नीसंयाजे त्वाष्ट्र्यागस्य याज्या त्वाष्ट्रे पशावपि पुरोडाशस्यानुवाक्येयमिति पूर्वमुक्तम् Sy.
११. वसिष्ठे A. वसिष्ठः is suggested for वसिष्ठ ।
१२. सेवस्व Sy. १३. अस्माकम् Sy.
१४. दीप्यस्व च Sy. १५. अत्यन्तम् Sy.

व्यम्[1]। धूमम्। उद्गमयन्[2]। उपस्पृश च। दिवि भवम्[3]। समुच्छ्रितम्[4]। आदित्यतेज सङ्घातैः[5]। सङ्गच्छस्व। सूर्यस्य । रश्मिभिरिति[6]।

नराशंसस्य महिमानमेषामुप स्तोषाम यज्ञतस्य यज्ञैः।
ये सुक्रतवः शुचयो धियंधाः स्वदन्ति देवा उभयानि हव्या ॥ २ ॥

नराशंसस्य[7]। नराशसस्य[8]। महिमानम्[9]। एषा[10] यजमानानामर्थावयवम्। उपस्तुम[11]। यष्टव्यस्य[12]।

---

१. यजनीयं प्रशस्तम् Sv

२. प्रेरयन् Sy.

३. भव A. अन्तरिक्षभवम् Sy.

४. तमुच्छ्रू० A.

५. तप्तै रश्मिभिः Sy.

६. तेजोभिः Sv.

७. नरैः प्रशंसनीयस्याग्निविशेषस्य Sv. नरा अस्मिन्नाशंसन्तीति नराशंसोऽग्निः प्रजापतिर्वा, नरैः प्रशस्यो भवतीति वा नराशंसस्य प्रजापतेरग्नेर्वा Mah. नरा अस्मिन्नासीनाः शंसन्तीति नराशंसो यज्ञः। प्रजापतिर्वा ऽग्निर्वा। नरैः प्रशस्यो भवतीति नराशंसः। तस्य U. नराशंसः....कस्मात् ? नरशब्दः पूर्वपदम्। आसेर्निष्ठान्तस्य मध्यम्। शंसतेरुत्तरपदम्। अथ कोऽर्थः ? नराः मनुष्या अस्मिन्नासीना उपविष्टा शंसन्तीति नराशंसः।

योऽयमेषामभिमतफलदाता नराणां नराशंसो यज्ञो द्रव्यदेवतात्यागात्मकः प्रयोगः। तस्याधिष्ठाता तद्धाग्नौ देवताविशेषे जगदुत्पत्स्यनुग्रहबीजम् Dur. नरो होतृप्रभृतयोऽस्मिन् प्रकृत आसीनाः शंसन्तीति यज्ञो ऽन्यपदार्थः। अग्निर्वा ऋत्विग्यजमानैर्नरैः प्रशस्यत्वान्नाराशंसानि । नराशसो यज्ञो ऽग्निर्वा तस्य SKN. नराशंसो यज्ञ इति कात्थक्यः। नरा अस्मिन्नासीनाः शंसन्ति। अग्निरिति शाकपूणिः। नरैः प्रशस्यो भवति N. 8.7.

८. महत्त्वम् Sv. महाभाग्यम् Mah., U. एतस्य महिमानं महाभाग्यं विभूतिम् Dur. माहात्म्यम् SKN.

९. तेषामेषां मध्ये Sy

१०. यजमानाम० A. देवाना मध्ये वयम् Mah. देवगणानां मध्ये U. ऋत्विजां देवानां वा वक्ष्यमाणानां वा। षष्ठीश्रुतेः सम्बन्धिन इति शेषः SKN.

११. उमस्तु० A. वयमुपस्तुमः Sy. उपगम्य स्तुमोऽभिकीर्तयामः Dur.

१२. युष्ट० A. यजनीयस्य Sy. यजतेरतच्प्रत्ययः Mah. कथम्भूतस्य नराशंसस्य। यजतस्य यष्टव्यस्य U. यजनसम्पादयितुः प्रयोक्तुरभिमतफलसम्पादयितुः Dur. यजेरयमर्हार्थे अतप्रत्ययः। यजनार्हस्य SKN.

यज्ञै । ये । सुप्रजा. । शुचय । कर्माणा धारयितारो यजमानास्तेषाम् । उभयानि पाशुकानि सौमिकानि च । हवींषि । स्वदन्ति । देवता नराशस पूजयामास सदैव यज्ञार्थम् ।

---

१. यज्ञैर्हविर्भिः स्तोत्रैर्वा Sv. आहुतिभिः U. कर्मभिर्युक्ता उपस्तुमः । यदेवमेतस्मिन्नुपस्तुत-महिम्नि नराशसे यज्ञे किमप्यस्त्वित्याशास्महे Dur. सप्तम्यर्थे तृतीया। ज्योतिष्टोमादिषु यज्ञेषु। यज्ञपक्षे यज्ञार्हस्य महाफलस्य जगतः स्थितिहेतोर्ज्योतिष्टोमादेः। यज्ञैरिति—'इत्थम्भूतलक्षणे'(Pa. 2. 3. 21)तृतीया। अभ्यासापेक्षं बहुवचनम् । यागाभ्यासैरित्थम्भूतस्य SKN.

२. ये देवाः Sv , Mah तस्य च महिमानमासाद्य ये देवाः U. उपस्तुते चास्मिन्वा ये SKN.

३. सुप्रज्ञाः is suggested for सुप्रजाः॥ सुप्रज्ञाः सुकर्माणो वा Sv. शोभनः क्रतुः कर्म येषां ते Mah. सुकर्माणः U. जगदनुग्रहप्रवृत्ताः Dur. क्रतुरिति कर्मनाम । सुकर्माणः SKN.

४. दीप्तिमन्तः Sy शुद्धा निष्पापाः Mah निषिक्तपाप्मानोऽणिमाद्यैश्वर्ययुक्ताः U. निर्णिक्ततरपापा Dur. दीप्ताः SKN.

५. धियं बुद्धिं कर्म वा दधतीति । अलुगाषः Mah प्रज्ञायाः कर्मणो वा धारयितारः U. स्वाधिकारप्रयुक्तानां कर्मणामनुविधारयितारः प्रज्ञानां यज्ञानां वा Dur. कर्मणः प्रज्ञाया वा तधारयितारः SKN.

६. ०मानस्ते० A. एवमादिगुणयुक्ता देवास्ते Dur. यच्छब्दश्रुतेस्तच्छब्दाध्याहारः । ते SKN.

७. उभयानि सौमिकानि च हविःसंस्थादीनि Sy. सोमम्, इतराणि च Mah. सोमं चेतराणि च हवींषि तान्त्राणि प्रयाज्यभागस्विष्टकृत्प्रभृतीन्यावापिकानि प्रधानान्युभयानीति N. यदि सौमिकः पशुस्तत; ,सोमं च इतराणि पशुपुरोळाशधानाप्रभृतीनि । अथ पृथक् सोमात्ततस्तान्त्राणि प्रयाज्याज्यभागस्विष्टकृत्प्रभृतीनि, आवापिकानि च प्रधानहवींषि इत्येतदाशास्महे Dur. हवींषि सौमिकानि पाशुकानि च । अथवा तान्त्राण्यङ्गहवींषि आवापिकानि च प्रधानहवींषीत्यर्थः SKN.

८. पशुका० A.

९. सौम्यानि M

१०. हव्यानि Sv.

११. स्वदयन्ति भक्षयन्ति Sy. भक्षयन्ति Mah., U. आस्वादयन्त्वेतानि हव्या हवींषि Dur. लोडर्थे पञ्चमः । आस्वादयन्त्वित्यर्थः SKN.

१२. देवाः कर्माङ्गभूताः SKN.

१३. अग्निरिति शाकपूणिमते-योऽयमेषामभिमतोपकारी नराणां प्रशस्यो नराशंसो ऽग्निस्तस्य वयमुपस्तोषाम उपस्तुमो महिमानं यजतस्य यज्ञसम्पादयितुर्यज्ञैः कर्मभिर्दानैर्वा संयुक्ताः, तस्मिन्नुपस्तुतमहिम्नि नराशंसेऽग्नौ हुतानि, ये सुक्रतवो देवाश्शुचयो धियन्धास्ते, एतान्युभयानि हवींष्यास्वादयन्त्वित्येतदाशास्महे Dur. नराशंसो यज्ञ इति कात्थक्यः । नरा अस्मिन्नासीनाः शंसन्ति । अग्निरिति शाकपूणिः। नरैः प्रशस्यो भवति । तस्यैषा भवति . . .नराशंसस्य महिमानमेषामुपस्तुमो यज्ञियस्य यज्ञैः। ये सुकर्माणः शुचयो धियं धारयितारः स्वदयन्तु देवा उभयानि हवींषि। सोमं चेतराणि चेति वा। तान्त्राणि चावापिकानि चेति वा N. 8.7., SKN III. 127. This stanza=YV. 29.27.

ईळेन्यं वो असुरं सुदक्षमन्तर्दूतं रोदसी सत्यवाचम् ।
मनुष्वदग्निं मनुना समिद्धं समध्वराय सदमित्महेम ॥ ३ ॥

ईळेन्यम्[1]—

सपर्यवो भरमाणा अभिज्ञु प्र वृञ्जते नमसा बर्हिरग्नौ ।
आजुह्वाना घृतपृष्ठं पृषद्वदध्वर्यवो हविषा मर्जयध्वम् ॥ ४ ॥

सपर्यवः[2]। परिचरणमिच्छन्तः । अरण्यादाहरन्ते[3] । अभिगतजानुकम्[4] । प्रहरन्ति[5] । हविषा सह । बर्हिः । अग्नौ । अभिमुख जुह्वानाः । घृतपृष्ठम्[6] । नानावर्णं बर्हि[7] । हे अध्वर्यवः[8] ! अग्निं[9] । हविषा[10]। परिचरतः[11]।

स्वाध्यो३ वि दुरो देवयन्तोऽशिश्रयू रथयुर्देवताता ।
पूर्वी शिशुं न मातरा रिहाणे समग्रुवो न समनेष्वञ्जन् ॥ ५ ॥

स्वाध्यः[12]। सुकर्माणः[13]। देवानिच्छन्तः[14]। व्यशिश्रयु[15] । यज्ञद्वाराणि[16] विवृतानि कुर्वन्ति । सङ्ग्राम-जिगमिषया रथमिच्छन्तः[17], जसि पूर्वरूपम्[18]। यज्ञे[19]। अथ विवृतेषु द्वारेषु पूर्वे प्राचीनैर्जुहूपहूतावह्निम्[20]। वत्सम्।

---

१. Neither the *pratika* nor the commentary is found in mss. Sy. explains the stanza in the following manner:
हे अध्वर्यवः ! वो यूयमीळेन्यं स्तुत्यमसुरं बलवन्तं सुदक्षं सुप्रज्ञं रोदसी रोदस्योरन्तर्मध्ये दूतं देवानां हविर्वहनार्थं चरन्तं सत्यवाचं मनुष्वन् मनुष्यवन् मनुना समिद्धं यथेदानीं मनुष्याः समिन्धते तथा पूर्वं मनुना प्रजापतिना समिद्धमग्निमध्वराय यज्ञाय सदमित् सर्वदैव सं महेम। सम्पूजयत मध्यमपुरुषस्य व्यत्ययेनोत्तमपुरुषत्वम् ।

२. **०र्यवम्** A.

३. **रणस्य उदाहरन्तः** A. **पार्वैर्भरन्तः** Sy.

४. **अहित** A. **अभिगत०** is suggested for **अहिगत०**

५. **ह** is missing in A.

६. **घृतसंसिक्तपृष्ठम्** Sy.

७. **स्थूलबिन्दुभिर्युक्तम्** Sy.

८. **बही** A. **बर्हिः** is suggested for **बर्हिः**

९. **०ग्निः** M. **अग्निम्** is suggested for **अग्नि ।**

१०. **हविषा सह** Sy.

११. **०रत** is suggested for **०रतः । अग्निं परिचरत** Sy.

१२. **स्वकर्मणः** A. **स्वकर्माणः** M.

१३. **देवकामा यजमानाः** Sy.

१४. **व्यशीभ्रयुः** A. **आश्रितवन्तः** Sy.

१५. **यज्ञगृहद्वाराणि** Sy.

१६. **रथयुः रथकामाश्च । जसि पूर्वसवर्णो ह्रस्वश्च** Sy. १७. **पूवरू०** A.

१८. **देवतातौ यज्ञे** Sy.

१९. **पूर्वप्राचीनैः** A. The reading is doubtful.

२०. **०तावह्निम्** A. **०पभृतावग्निम्** is suggested for **०पहूतावह्निम् ।**

इव । मातरौ । जिह्वया लिहाने भवतस्तमग्निम् । उपस्थितेषु सङ्ग्रामेषु जिगमिषव. । घृतं समञ्जन्ति । यथा । नद्यो जलेन क्षेत्राण्यञ्जन्तीति ।

उत योषणे दिव्ये मही न उषासानक्ता सुदुघेव धेनुः ।
बर्हिषदा पुरुहूते मघोनी आ यज्ञियें सुवितायं श्रयेताम् ॥ ६ ॥

उत योषणे । अपि च । स्त्रियौ । दिवि भवे । उषासानक्ते । महत्त्वात् । अस्मान् । आश्रयेताम् । यथा सुदुघा । धेनुराश्रयत्येवम् । बर्हिषि सीदन्त्यौ । बहुभिराहूते । धनवत्यौ । यज्ञार्हे । अभ्युदयार्थमिति ।

विप्रा यज्ञेषु मानुषेषु कारू मन्ये वां जातवेदसा यजध्यै ।
ऊर्ध्वं नो अध्वरं कृतं हवेषु ता देवेषु वनथो वार्याणि ॥ ७ ॥

विप्रा यज्ञेषु । मेधाविनौ । यज्ञेषु । मनुष्यकृतेषु । कर्मशीलौ । मन्ये । वा । जातप्रज्ञौ । यजिष्टव्यौ तौ युवाम् । ऊर्ध्वम् । अस्माकम् । यज्ञम् । कुरुतम् । आह्वानेषु । तौ युवा यजमानानाम् । देवेषु । भजथः । धनानि ।

---

१. गावौ Sy.
२. अग्निं लिहाने Sy.
३. यज्ञेषु Sy.
४. घृत A. तद्वत् समञ्जन् अध्वर्यव आज्येन समञ्जन्ति Sy.
५. यथा नद्यः क्षेत्राण्युदकेन Sy.
६. स्त्रौ A. रन्त्यौ M. युवत्यौ स्त्रीरूपे वा Sy.
७. अहोरात्रे Sy.
८. ०हत्वा चास्मा A. महत्यौ Sy.
९. कामधुक् Sy.
१०. रात्रं is written twice in A.
११. नीद० A. धेनुरिव Sy.
१२. बहुभिः स्तुते Sy.
१३. ०वत्येन A.
१४. यज्ञार्हे A.
१५. कल्याणाय Sy.
१६. ०विनो A. हे वंद्या होतारौ ! मेधाविनौ ! Sy.
१७. मनुष्यैः क्रियमाणेषु Sy.
१८. ०शीलेन A. कर्मणां कर्तारौ Sy.
१९. स्तौमि Sy.
२०. वाम् is suggested for वा ॥ युवाम् Sy.
२१. ०प्रज्ञौ is suggested for ०प्रज्ञौ ॥ जातधनौ Sy.
२२. यमृष्टव्यौ A. यष्टव्यौ is suggested for यजिष्टव्यौ ॥ यष्टुम् Sy.
२३. युवात् A.
२४. ऊर्ध्वम् is missing in M. देवाभिमुखम् Sy.
२५. अध्वरमकुटिलं यज्ञम् Sy.
२६. हवनेषु स्तोत्रेषु सत्सु Sy.
२७. देवेषु विद्यमानानि Sy.
२८. ०जथ A. सम्भजथः । तान्यस्मभ्यं सम्प्रयच्छथ इत्यर्थः Sy.

आ भारती भारतीभिः सजोषा इळा देवैर्मनुष्येभिरग्निः ।
सरस्वती सारस्वतेभिरर्वाक् तिस्रो देवीर्बर्हिरेदं सदन्तु ॥ ८ ॥

[आ भारती] उत्तराश्चतस्रो व्याख्याता ।

तन्नस्तुरीपमधं पोषयित्नु देव त्वष्टर्विं ररा॒णः स्यस्व ।
यतो वीरः कर्मण्यः सुदक्षो युक्तग्रावा जायते देवकामः ॥ ९ ॥

[तन्नः ।]—

वनस्पतेऽव सृजोप देवानग्निर्हविः शमिता सूदयाति ।
सेदु होता सत्यतरो यजाति यथा देवानां जनिमानि वेद ॥ १० ॥

[वनस्पते ।]

आ याह्यग्ने समिधानो अर्वाङिन्द्रेण देवैः सरथं तुरेभिः ।
बर्हिर्न आस्तामदितिः सुपत्रा स्वाहा देवा अमृता मादयन्ताम् ॥ ११ ॥

[आ याहि ।]—

---

१. The *pratīka* is supplied by the Editor. These ṛcas have already been explained in the 3rd maṇḍala, see III.4 8-11. एतदाद्यृक्चतुष्टय द्वितीयाष्टकस्याष्टमाध्याये (RV. III 4 8-11) यद्यपि व्याख्यातं तथापि व्यवधानात् संक्षेपतोऽत्रापि व्याख्यायते । भारती भरतस्यादित्यस्य पत्नी भारतीभिः सजोषाः सहितेळा मनुष्येभिर्मनुष्यलोकभवैर्देवैः सार्धमग्निरागच्छतु । सरस्वती सारस्वतेभिः सारस्वतैर्मध्यमस्थानैर्देवैः, सार्धमर्वागस्मदभिमुखमागच्छतु । आगत्य तिस्रो देवीर्देव्यः । प्रथमार्थे द्वितीया । बर्हिरिदमासदन्तु Sy

२. The *pratīka* is supplied by the Editor. देव ! द्योतमान ! हे त्वष्टः ! ररा॒णो रममाणस्त्वं नोऽस्माक तुरीप त्वरितमाप्नुवत् पोषयित्नु पोषकरं तद्रेतो वि स्यस्व । विशेषेणावसान प्रापय । विमोचयेत्यर्थः । यतो रेतसः कर्मण्यः कर्मसु साधुः सुदक्षः सुबलो युक्तग्रावा सोमसुत् देवकामो वीरः पुत्रो जायते Sy

३. The *pratīka* is supplied by the Editor. हे वनस्पते ! देवानुपाव सृज । अथ परोक्षस्तुतिः । अग्निर्वनस्पतिः शमिता शामित्ररूपः सन् हविः सूदयाति प्रेरयतु । सेत्स एव वनस्पतिर्होता देवानामाह्वाता सत्यतरोऽपि सन् यजाति यजतु । देवानां जनिमानि जननानि यथा स्वयं वेद तथा Sy

४. The *pratīka* is supplied by the Editor. हे अग्ने ! समिधान ! अर्वागस्मदभिमुखस्त्वमिन्द्रेण तुरेभिस्त्वरितैर्देवैश्च सरथं समानरथं यथा भवति तथा आ याहि । आगच्छ । नोऽस्माकं बर्हिरध्यास्तामदितिश्च सुपुत्रा कल्याणपुत्रा । स्वाहा देवाश्च सर्वेऽमृताः सन्तो मादयन्तामिति Sy.

VII 3.

अग्निं वो देवमग्निभिः सजोषा यजिष्ठं दूतमध्वरे कृणुध्वम् ।
यो मर्त्येषु निध्रुविर्ऋतावा तपुर्मूर्धा घृतान्नः पावकः ॥ १ ॥

अग्निम् । अग्निम् । यूयम् । देवम् । अन्यैरग्निभि । सहितम् । यष्टृतमम् । दूतम । यज्ञे । कुरुत । य । मनुष्येषु । देवोऽपि सन्नभिमुखो ध्रुवस्तिष्ठति । यज्ञवान् । तापयितृनिरस्त । घृतान्न । शोधक ।

प्रोथदश्वो न यवसेऽविष्यन्यदा महः संवरणाद्व्यस्थात् ।
आदस्य वातो अनु वाति शोचिरध स्म ते व्रजनं कृष्णमस्ति ॥ २ ॥

प्रोथवश्वः । प्रोथति शब्दकर्मा, शब्द कुर्वन् । अश्व । इव । अग्रत स्थिते यवसे । भक्षण करिष्यन्नयमग्निररण्यमनुम् । यदा । महत । सवरणादन्योऽन्यसङ्घट्टिताच्छाकात् काष्ठसङ्घातात् ।

---

१. 'अग्निं वो देवम्' इति दशर्चं तृतीयं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभामाग्नेयम् । अत्रेयमनुक्रमणिका—'अग्निं वो दश' (KSA. 34.3. p. 24.) इति । 'अग्नि वो देवम्' इत्येतदादीनि दश सूक्तानि तृतीयचतुर्थवर्जितानि प्रातरनुवाक आग्नेये क्रतौ त्रैष्टुभे छन्दस्याश्विनशस्त्रे च विनियुक्तानि । सूत्रितञ्च—'अग्नि वो देवमिति दशानां तृतीयचतुर्थे उद्धरेत्' (ĀŚS. 4.13.) इति । व्यूळ्हे दशरात्रेऽष्टमेऽहनीदं सूक्तमाज्यशस्त्रम् । सूत्र्यते हि—'द्वितीयस्याग्नि वो देवमित्याज्यम्' (ĀŚS. 8. 10.) इति Sy.

२. The *pratīka* is supplied by the Editor.

३. हे देवाः ! वो यूयम् Sy.

४. द्योतमानम् Sy.

५. सजोषाः सजोषसं सहितम् । द्वितीयार्थे प्रथमा Sy. ६. दूतम् is missing in A.

७. कौटिल्यरहिते यज्ञे Sy.

८. कुरु A. ९. सह हिमु० A.

१०. वस्तिष्ठ० A. नितरां ध्रुवस्तिष्ठति Sy.

११. यज्ञीयान् A. सत्यवान् वा Sy.

१२. तापयितृशिरस्कः is suggested for तापयितृनिरस्तः ॥ तापकतेजाः Sy

१३. ०न्न शोधक ।

१४. शोधकश्च भवति Sy

१५. ०वश्च । मध्यमानोऽग्निः कथ्यते Mah. मध्यमानोऽग्निरत्रोच्यते U.

१६ ०ति श० A. प्रोथतिः शब्दार्थः Mah. U.

१७. सञ्चरन् वा Sy प्रोथयति शब्दायते Mah. शब्दायतेऽग्निः U.

१८. नं च A. यथा अश्वः प्रोथति Mah.

१९. घासे Sy. घासम् Mah. यवसे घासे विषयभूते U.

२०. ०न्नमयम० A. भक्षयन् Sy. भक्षयिष्यन्,... अविष्यन्नित्यत्तिकर्मसु पठितम् Mah. ग्रसिष्यन् U.

२१. यथा M. यस्मिन् काले Mah. U.

२२. निरोधाद्भावरूपो ऽग्निः Sy. संव्रियतेऽस्मिन्नग्निरिति संवरणमरणिकाष्ठं तस्मात् Mah. संव्रियतेऽस्मिन्नग्निरिति संवरणमग्निकाष्ठमुच्यते । अरणिकाष्ठात् U.

२३. ०णारन्योन्यसङ्घाभिता शुष्का० A. ०न्योन्यसङ्घभीताच्छु० M.

व्यस्थात्[1] । अनन्तरमेव[2] । अस्य[3] । शोचिः[4] । वातः[5] । अनुवाति[6] । अथ[7] प्रत्यक्षोदन्तरम्[8] । तव[9] । मार्गः[10] । कृष्णः[11] । भवति[12] ।

उद्यस्य ते नवजातस्य वृष्णोऽग्ने चरन्त्यजरा इधानाः ।
अच्छा द्यामरुषो धूम एति सं दूतो अग्न ईयसे हि देवान् ॥ ३ ॥

उद्यस्य । उच्चरन्ति[13] । यस्य । ते । नवजननस्य[14] । वर्षितु[15] । अग्ने ! जरारहिताः । दीप्यमानाः[16] । तस्य तदानीं दिवम् । प्रति[17] । आह[18]—आरोचमानः । धूम । एति[19] । त्वं हि । देवानां दूतः सन् । दिवि स्थितान् । समीयसे[20] सङ्गच्छसे देवैरिति[21] ।

---

१. **यस्वा** A. यः स्वा M. सततेषु वृक्षेषु वितिष्ठते Sy. प्रोथदश्वो न यवसे । ऽविष्यन्यदा महः संवरणाद् व्यस्यात् । आदस्य वातो ऽनुवाति शोचिरध स्म ते व्रजनं कृष्णमस्तीति यदा वा ऽएतस्य वातो ऽनुवाति शोचिरथैतस्य व्रजनं कृष्णं भवति त्रिष्टुभोपदधाति त्रैष्टुभो हि वायुराग्नेय्याग्निकर्म ह्यनिरुक्तयानिरुक्तो हि वायुरथ यद्वात इत्याह वातो हि वायुः ।
वितिष्ठते प्रकाशो भवति Mah. व्यत्तिष्ठते प्रकाशीभवति U.

२. **पश्चं तर०** A. **पश्चतर०** M. तदा Sy. अस्यानन्तरं वह्निज्वलनशब्दानन्तरम् Mah. अथानन्तरमेव U.

३. **अग्नेः** Sy. Mah. U.

४. **अर्चिः** Sy. शोचयति ज्वलयति शोचिः, अग्नेः सन्दीपनः । शोचिरिति ज्वलन्नामसु पठितम् । यद्वाऽस्य शोचिर्ज्वालामनुलक्ष्य वातो वाति Mah. शोचिः सन्दीपनः U.

५. **वायुः** Mah.

६. **अनुपादि** A. अग्निमनुलक्ष्य प्रसरति । वाय्वग्न्योः सख्यादिति भावः Mah.

७. **अध** M. अधेति निपातोऽथार्थः । अथ वातेनाग्नौ ज्वलिते सति स्मेति निपातः पादपूरणः Mah. **अध स्म अथ** समानार्थौ छन्दसि । स्मनिपातोऽनर्थकः U.

८. **०त्यक्षोऽनन्त०** or **०त्यक्षः—अनन्त०** is suggested for **०त्यक्षोदन्त०** ।

९. हे अग्ने ! तव Sy. त एतस्याग्नेः ।...श्रुत्या त इति पदमेतस्येति व्याख्यातं परोक्षत्वान्मन्त्रस्य । 'अथैतस्य व्रजनं कृष्णं भवति (8.7.3.12.) इति श्रुतेः Mah. ते, अथैतस्येत्यर्थः । नह्यत्र युष्मदः प्रयोगः परोक्षकृतत्वान्मन्त्रस्य । श्रुतिरप्यमुमर्थं दर्शयति U.

१०. **मार्गम्** A. वर्त्म Sy. व्रजत्यत्रेति व्रजनं गमनस्थानम् Mah व्रजति गच्छत्यनेनेति व्रजनम् U.

११. **कृष्णम्** Sy. कृष्णमस्ति श्यामं भवति । 'कृष्णवर्त्मा हुताशनः' इत्युक्तेः Mah. **कृष्णं भवति** U.

१२. VM. ignores **स्म** । स्मेति पूरणः Sy. This stanza YV. 15. 62.

१३. **उद्गच्छन्ति** Sy.

१४. **नवप्रादुर्भावस्य** Sy.

१५. **वर्षीतुः** A.

१६. **ज्वालाः** Sy.

१७. **प्रति** seems to be the explanation of **अच्छ** ।

१८. **अत आह**—is suggested for **आह** ।

१९ **अभ्येति गच्छति** Sy.

२०. **सम्प्राप्नोषि** Sy.

२१. VM. explains **अग्ने** once only.

वि यस्य ते पृथिव्यां पाजो अश्रेत्तृषु यदन्ना समवृक्त जम्भैः ।
सेनेव सृष्टा प्रसितिष्ट एति यवं न दस्म जुह्वा विवेषि ॥ ४ ॥

वि यस्य । विविध श्रयन्ति । यस्य । ते दापहूतस्य । पृथिव्याम् । तेजः । क्षिप्रम् । यदा । अन्नानि काष्ठलक्षणानि । दन्ते पाज । सपृक्ते । तदानी सेनेव । उद्युक्ता । ज्वाला । ते । एति प्रबन्धनीतिं च । तदानी यथा । यवं पशुरेवम् । दर्शयन्ति यत्त्व । ज्वालयाऽख्यम् । व्याप्नोषीति ।

तमिद्दोषा तमुषसि यविष्ठमग्निमत्यं न मंजयन्त नरः ।
निशिशाना अतिथिमस्य योनौ दीदायं शोचिराहुतस्य वृष्णः ॥ ५ ॥

तमिद्दोषा । तम् । एव । रात्रौ । तम् । असि । यविष्ठम् । अग्निम् । अश्वम् । इव घासैः । परिचरन्ति । मनुष्याः । तीक्ष्णीकुर्वन्त । अतिथिम् । अस्यातिथेः । स्थान आहवनीये तदानीम् । आहुतस्य । वर्षित । शोचिः । दीप्यते ।

---

१. **विश्वस्य** A.
२. **श्रयति** is suggested for **श्रयन्ति** । **विश्रयति** Sy.
३. **वस्य** A. **हे अग्ने ! यस्य दावरूपस्य** Sy.
४. **उपहूतस्य** M. **दावभूतस्य** is suggested for **दापहूतस्य**
५. **भूम्याम्** Sy.
६. **प्रं** is written twice in A.
७. **वाजः** A. **ज्वालाभिरित्यर्थः** Sy.
८. **संपृक्तैः** A. **संवृक्ते** is suggested for **संपृक्ते** । **समवृक्त वृङ्क्ते खादति** Sy.
९. **इद्युक्ता** A.
१०. **एवेति** A. **गच्छति** Sy.
११. **०नीति चं** M. **प्रबध्नाति** is suggested for **प्रबन्धनीतिम्** ।
१२. missing in M.
१३. **वयम्** A.
१४. **दर्शयन्ति यत्त्वज्** M. **दर्शनीयाग्ने ! यस्त्वम्** is suggested for **दर्शयन्ति यत्त्व** ।
१५. **०लधार०** A.
१६. **व्यप्नो०** A. **काष्ठाबीनि भक्षयसि व्याप्नोषि वा** Sy. १७. **तमिदेषा** A.
१८. **दोषायाम्** Sy.
१९. **अग्निः** A. **उषसि** is suggested for **असि** ॥ **वासरेऽपि** Sy.
२०. **युवतमम्** Sy.
२१. **अश्व** M. **सततगमनयुक्तं वोढारमश्वमिव** Sy.
२२. **वासः** A.
२३. **परच०** A.
२४. **दीपयन्तः** Sy.
२५. **तिथिम्** M. **अतिथिवत्पूज्यम्** Sy.
२६. **अस्य तिथेः** A.
२७. **आहवनीयायतने धिष्ण्ये वा** Sy.
२८. **वर्षितुः** is suggested for **वर्षितः** ॥ **कामानां वर्षितुः** Sy.
२९. **शौचिः** A. **ज्वाला** Sy.

सुसंदृक्ते स्वनीक प्रतीकं वि यद्रुक्मो न रोचस उपाके ।
दिवो न ते तन्यतुरेति शुष्मश्चित्रो न सूरः प्रति चक्षि भानुम् ॥ ६ ॥

सुसंदृक् । शोभनसन्दर्शनम् । ते । शोभनज्वालानीक । अङ्गम् । यदा । आदित्यः । इव । मनुष्याणामन्तिके । विरोचसे दावभूतः । तदा द्युलोकात् । इव । अशनिः । एति । ते । शोषक ज्योतिः । स त्व चित्ररूपः । सूर्यः । इव सर्वतः । प्रदर्शयसि । दीप्तीरिति ।

यथा वः स्वाहाग्नये दाशेम परीळाभिर्घृतवद्भिश्च हव्यैः ।
तेभिर्नो अग्ने अमितैर्महोभिः शतं पूर्भिरायसीभिर्नि पाहि ॥ ७ ॥

यथा । यथा । तुभ्यम् । अग्ने यवम् । स्वाहाकारम् । पितरो । मिदाशेम । इळेति गोनाम, पश्वाहुतिभिः तथा घृतवद्भिः । च । पुरोडाशैः तथाऽस्मान् । अग्ने ! तैस्त्वदीयैः । तेजोभिः । बहुभिः । नितराम् । रक्ष । शतेन । पुरैरिव । अयसा निर्मितैरित्यौपमिकमिति ।

या वां ते सन्ति दाशुषे अधृष्टा गिरो वा याभिर्नृवतीरुरुष्याः ।
ताभिर्नः सूनो सहसो नि पाहि स्मत्सूरीञ्जरितॄञ्जातवेदः ॥ ८ ॥

या वा । याः । वा । ते । भवन्ति । यजमानरक्षणार्थम् । रक्षोभिरनभिभूता दीप्तयः । गिरः ।

---

१. सुसदृक: A.
२. Omitted in M. सुसन्दर्शनं भवति Sy.
३. ०लानिक A. हे सुतेजस्क ! अग्ने ! त्वम् Sy.
४. रूपमङ्गं वा Sy.
५. सूर्यः सुवर्णं वा Sy.
६. विशेषेण दीप्यसे Sy.
७. अन्तरिक्षात् Sy.
८. निर्गच्छति Sy.
९. शोषतं जोतिः A.
१०. दर्शनीयः Sy.
११. दीप्तिरिति A. VM. explains भानुम् obj. sing. by दीप्तीः obj. plu. स्वां दीप्तिम् Sy.
१२. The *pratīka* is supplied by the Editor.
१३. येथा A.
१४. अग्नये वयम् is suggested for अग्ने य वम् । अग्नयेऽग्रस्य नेत्रे Sy.
१५. स्वाहुतं हविः Sy.
१६. परितः is suggested for पितरोर् ।
१७. मिदाशेन्म A. दाशेम is suggested for मिदाशेम ॥ परिचरेम Sy.
१८. गोभिर्गोविकारैः क्षीरादिभिः Sy.
१९. पञ्चाहु० A. २०. घृतसहितैः Sy.
२१. पुरोडाशादिभिः Sy.
२२. तथा त्वमपि तेभिः प्रसिद्धैः Sy.
२३. अपरिमितैः Sy.
२४. अपरिमिताभिः Sy.
२५. पुरेरिव A. नगरीभिरेव Sy.
२६. हिरण्मयीभिः Sy. रुक्मम्, अयः, इति हिरण्यनामनी Ngh. 1. 2.
२७. दाशुषः Sy.
२८. ज्वालाः रक्षोभिरप्रधृषि ? (धर्षि)ताः Sy.
२९. गिरयः A.

च मन्त्रात्मिका यास्ते भवन्ति । याभि[1]. । प्रजावती[2] प्रजाः । रक्षसि[3] । ताभि[4] । अस्मानप्यग्ने[5] ! नि पाहि[6] । सहसः सूनो[7] ! अस्मच्छब्द[8] कल्याणवचन. शोभनम्[9] । मेधाविनः[10] । स्तोतिः[11] । जातवेदः !

निर्यत्पूतेव स्वधितिः शुचिर्गात्स्वया कृपा तन्वा३ रोचमानः ।
आ यो मात्रोरुशन्यो जनिष्ट देवयज्याय सुक्रतुः पावकः ॥ ९ ॥

निर्यत्[12] । निर्गच्छति । यदा । पूता शिलाया[13] निशितीकृता, स्वधितिः, इव । दीप्तस्तदा[14] । स्वया[15] । कल्पनया[16] । तया तन्वा[17] । दीप्यमानो भवति । यः । अरण्यो । आ जनिष्ट[18] । कमनीश्चो[19] । देवयागाय[20] । सुप्रज्ञः[21] । शोधकः ।

एता नो अग्ने सौभगा दिदीह्यपि क्रतुं सुचेतसं वतेम ।
विश्वा स्तोतृभ्यो गृणते च सन्तु यूयं पात स्वस्तिभिः सदा नः ॥ १० ॥

एता[22] । एतानि । अस्माकम् । अग्ने ! सौभगानि[23] । प्रज्वलय[24] । अपि च । कर्म[25] । सुशोभनेन ज्ञानेन प्रणीतम्[26] । पतेमे[27], वनतेर्वर्णान्तरावर्ति[28] । विश्वानि धनानि[29] । स्तोतृभ्य.[30] । गृणते[31] । मह्यञ्च । सन्तु । यय-मिति सानुचराभिप्रायमिति[32] ।

---

१. गीर्भिः Sy. २. ०जा पतिः प्र० A. ०वतीः प्र० is suggested for ०वतीं प्र० ॥ पुत्रवतीः प्रजाः Sy. ३. रक्षेः Sy. ४. उभयीभिः Sy. ५. ०नञ्यग्ने A. ६. निवाहि A. नितरां रक्ष Sy. ७. हे बलस्य पुत्र ! Sy. ८. स्मच्छब्दः is suggested for अस्मच्छब्दः । ९. शोभनान् is suggested for शोभनम् । स्मेति प्रशस्तवचनः । प्रशस्तान् Sy. १०. हविषां प्रेरकान् Sy. ११. स्तोत्र... A. स्तोतॄन् is suggested for स्तोतिः । १२. काष्ठान्निर्गच्छति Sy. १३. शीला० A. १४. ०स्तथा M. १५. स्वकीयया Sy. १६. कृपया दीप्त्या Sy. १७. ततया तन्वा is suggested for तया तन्वा । १८. आजायत स देवयज्याय भवतीति Sy. १९. कमनीश्चोयो M, कमनीयश्च is suggested for कमनीश्चो । २०. देवायागायगा A. देवया० is suggested for देवाया० M. २१. सुक्रतुः सुकर्मा Sy. २२. एतानि परिदृश्यमानानि Sy. २३. सौभगा सौभगानि शोभनानि धनानि Sy. २४. दीपय देहि वा Sy. २५. कर्म, यज्ञानां कर्तारं वा Sy. २६. शोभनप्रज्ञानयुक्तं सुप्रज्ञानं पुत्रं वा Sy. २७. वतेम is suggested for पतेमे ॥ सम्भजेमहि । वनतेः सम्भजनार्थस्य वर्णान्तिरागमे सति रूपम् Sy. २८. ०वर्तिनः is suggested for ०वर्ति । २९. धाना० A. ३०. उद्गातृभ्यः Sy. ३१. शंसते च Sy. ३२. The fourth *pāda* has already been explained. Sec RV. VII. 1. 20. त्वत्परिवाराश्च सर्वे यूयं नोऽस्मान् स्वस्तिभिः क्षेमैः सदा सर्वदा पात रक्षत Sy,

VII. 4.

प्र वः शुक्रायं भानवे भरध्वं हव्यं मतिं चाग्नये सुपूतम् ।
यो दैव्यानि मानुषा जनूंष्यन्तर्विश्वानि विद्मना जिगाति ॥ १ ॥

[1]प्र वः । प्रभरध्वम्[2] । यूयम्[3] । ज्वलते[4] । दीप्यमानाय[5] । हव्यम् । स्तुतिम् । च । अग्नये[6] । निर्मलम्[7] । यः[8] । दैव्यानि । मानुषाणि च । जातानि भूतानि देवान् मनुष्याश्च । अन्त.[10] । गच्छति[11] । ज्ञानेन[12], मनुष्येभ्यो देवान्प्रति गच्छति देवेभ्यो मनुष्यानिति[13] ।

स गृत्सो अग्निस्तरुणश्चिदस्तु यतो यविष्ठो अजनिष्ट मातुः ।
सं यो वना युवते शुचिदन्भूरिं चिदन्ना समिदत्ति सद्यः ॥ २ ॥

[15]स गृत्सः । स । मेधावी[16] । अग्नि[17] । सर्वदा युवा[18] । एव[19] । शास्त्वशान्त[20] । यत[21] । प्रभूति । युवतम[22] । अरणे[23] । अजनिष्ट । सयुवते[24] । यो भस्मीकुर्वन्[25] मिश्रयति । वनानि । शुचिदन्त[26] स । बहूनि[27] । अपि । अन्नानि[28] । सह[29] । एव । अत्ति[30] । सद्य एकस्मिन् क्षणे ।

---

१. 'प्र वः शुक्राय' इति दशर्चं चतुर्थं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमाग्नेयम् 'प्रवः' (KSA. 34 4. p.24.) इत्यनुक्रान्तम् । प्रातरनुवाकाश्विनशस्त्रयोर्दशसूक्तमध्ये द्वितीयत्वेनोक्तः सूक्तविनियोगः । एकादशिनि आग्नेये पशौ 'प्र वः शुक्राय' इत्येषा वपाया याज्या । सूत्रितञ्च— 'प्र वः शुक्राय भानवे भरध्वं यथा विप्रस्य मनुषो हविर्भिः' (ĀSS. 3. 7.) इति Sy.

२. प्रहर० A.

३. हे हविषां वोढारः ! वो यूयम् Sy.

४. शुभ्राय Sy.

५. दीप्ताय Sy

६. अनये A.

७. सुशुद्धम् Sy.

८. अग्निः Sy.

९. Omitted in A.

१०. अन्तरा Sy.

११. ०च्छन्ति A.

१२. प्रज्ञानेन मार्गेण वा Sy.

१३. देवान्मनुष्यांश्चान्तरा हवींषि नेतुं वर्तत इत्यर्थः Sy.

१४. VM. ignores विश्वानि ।

१५. स ग्रसम् A.

१६. ०धापी A. Ngh. 3. 15. and गृत्स इति मेधाविनाम N. 9. 5.

१७. अनिः A.

१८. तारको भवति Sy.

१९. एषा A. According to Sy. एव goes with सः ।

२०. शास्त्वशातः A. अस्त्व० is suggested for शास्त्व० ।

२१. तदा यतो यदा Sy.

२२. युवतमः सन् Sy.

२३. अरण्याः Sy.

२४. आत्मना संयोजयति Sy.

२५. अग्निः Sy.

२६. कुर्वभिश्र० A.

२७. ०चिरन्तः M. दीप्तवन्तः Sy.

२८. भूरीणि Sy.

२९. स्वकीयान्यन्नानि Sy.

३०. सम्यक् Sy.

३१. अत्ति A, भक्षयति Sy.

अस्य देवस्य ससद्यनीके यं मर्तासः श्येतं जगृभ्रे ।
नि यो गृभं पौरुषेयीमुवोचं दुरोकमग्निरायवे शुशोच ॥ ३ ॥

अस्य । अस्य । देवस्य । ससदने सति वयम् । अनीके मुखे स्याम । यम् । मनुष्याः कार्यार्थम् । श्वेतवर्णम् । गृह्णन्ति । यं । पुरुषैस्तृप्यमाणम् । हविषो मुष्टिम् । अभिमुख सेवते । सोऽनुनि. । मनष्यार्थम् । दुःसेवम् । दीप्यते ऽत्यन्त प्रज्वलितो भवति ।

अयं कविरकविषु प्रचेता मर्तेष्वग्निरमृतो नि धायि ।
स मा नो अत्र जुहुरः सहस्वः सदा त्वे सुमनसः स्याम ॥ ४ ॥

अयं कविः । अयम् । कान्तप्रज्ञ । प्रकृष्टज्ञानः । अप्रकृष्टज्ञानेषु । निहित । तथा मरणधर्मिषु । अमरणधर्मा । भिधायि । प्रत्यक्ष. शिष्ट.—स त्वम् । मा । अस्मान् । अस्मिन् स्तोत्रे क्रियमाणे । हिंसीः । बलवत् । सदा त्वयि वयम् । सुमनसः । स्यामेति ।

---

१. अग्नेः Sy.
२. स्थाने Sy.
३. मुख्ये Sy.
४. मुख स्या M.
५. य A. M. अग्निम्
६. श्वेतं शुभ्रम् Sy
७. परिगृह्णन्ति Sy.
८. यश्चाग्निः Sy.
९. ०स्तृभ्यमाणः A. पुरुषैरर्प्यमाणम् is suggested for पुरुषैस्तृप्यमाणम् । पुरुषैः क्रियमाणाम् Sy.
१०. It seems to be the explanation of गृभम् ॥ गृभीतम् Sy.
११. अत्र वचिः सेवार्थे वर्तते । निषेवत इत्यर्थः Sy.
१२. सोऽग्निः is suggested for सोऽनुनिः ॥
१३. द्रुह्यव आयव इति मनुष्यनामनी Ngh.2.3.
१४. सपत्नैर्दुःसेवं यथा भवति तथा Sy.
१५. कपि A.
१६. प्रज्ञा A. क्रान्तदृक् Sy.
१७ प्रकाशकः Sy.
१८. अक्रान्तदृक्षु Sy.
१९. मरणधर्मकेषु Sy.
२०. मरणधर्मरहितः Sy.
२१. विधायि A. निधायि is suggested for भिधायि ॥
२२. अथ प्रत्यक्षस्तुतिः Sy.
२३. अस्यान् A.
२४. अस्मिंल्लोके Sy.
२५. बलवन् ! is suggested for बलवत् ॥ बलवन् ! अग्ने ! Sy.
२६. यस्मिन् त्वयि Sy.
२७. ०नस्य A.
सुमतयः Sy.
२८. सामेति A.
२९. VM. ignores अग्निः ।

आ यो योनिं देवकृतं ससाद क्रत्वा ह्यग्निरमृताँ अतारीत् ।
तमोषधीश्च वनिनंश्च गर्भं भूमिश्च विश्वधायसं बिभर्ति ॥ ५ ॥

आ यः । आसीदति[1] । यः[2] । स्थानमोषध्यादिकम् । देवैरेतस्य वासाय कल्पितम् । प्रज्ञानेन[4] । हि[5] । अग्नि. । देवान् दुरितेभ्यः । उत्तरयतीति मद्यपाना. (?)[6] । तम् । ओषध्यः[7] । वृक्षाः । गर्भम्[8] । भूमिः । च । विश्वस्य धर्तारम् । धारयन्ति[9] ।[10][11]

ईशे ह्यग्निरमृतस्य भूरेरीशे रायः सुवीर्यस्य दातोः ।
मा त्वा वयं सहसावन्नवीरा माप्सवः परि षदाम मादुवः ॥ ६ ॥

ईशे । ईशे[12] । हि । अग्नि. । अन्नम्[13] । बहु दातुम्[14] । ईशे । धनम् । शोभनवीर्यम् । दातुम् । अथ प्रत्यक्षः—तादृश त्वाम्[15] । वयम्[16] । बलवन् ! मा । अपुत्राः[17] । परिनिषीदाम[18] । मा च । अप्सवः[19] सोमस्य पातारः[20] । मा च । अपरिचारकः[21] परिष्यदुवः[22] ।

---

१. **अध्यास्ते** Sy.
२. **अग्निः** Sy.
३. **०षध्वादि०** A.
४. **प्रज्ञया** Sy.
५. **किमर्थं देवाः स्थानं कल्पयन्त्यग्नेरित्यत आह—हि यस्मात्कारणात्** Sy.
६. **मद्यपानाः** seems unnecessary.
७. **ओषधयः** Sy.
८. **गर्हम्** A.
गर्भं सन्तम् Sy.
९. **विश्वस्य धारकम्** Sy.
१०. **श्रुतमेव बिभर्तीति पदं बहुवचनान्ततया विपरिणतं सवोषधीभिर्वनिभिश्च सम्बध्यते** Sy.
११. VM. explains **च** once only.
१२. **ई** is missing in A. **ईष्टे** Sy.
१३. **अग्नः** A. It seems to be the explanation of **अमृतस्य** ॥ **उदकं द्वितीयार्थे षष्ठी** Sy.
१४. **बहुः** A. **अधिकम्** Sy.
१५. **०दृश त्वा** A.
०शं त्वा M.
१६. **वसिष्ठाः** Sy.
१७. **पुत्रादिरहिताः सन्तः** Sy.
१८. **पर्युपविशाम** Sy.
१९. **रूपरहिताश्च सन्तः** Sy.
'अप्स इति रूपनाम' Ngh. 3.7., N. 5.13.
२०. **०स्यावाता०** A. **०स्यापाता** is suggested for **०स्य पाता०** It seems to be the explanation of **अप्सवः** ॥
२१. **चारकाः** is suggested for **०चारकः** । **परिचरणहीनाश्च** Sy.
२२. **अपरिष्युद्यः** A. The reading is doubtful. **परिषदाम** or **हि अदुवः** is suggested for **परिष्यदुवः** ।

परिषद्यग्ने अरणस्य रेक्णो नित्यस्य रायः पतयः स्याम ।
न शेषो अग्ने अन्यजातमस्त्यचेतानस्य मा पथो वि दुक्षः ॥ ७ ॥

परिषद्यम्[1] । परिहर्तव्य परिहृत्य गन्तव्य नोपसर्तव्यम्[2] । अरणस्य[3] । धनम्, अरणोऽन्यो भवति न रमत इत्यपि वार्तेररणोऽन्यतो गच्छतीति यदि तस्य धनमुपसीदति तस्मिन्नागते दातव्य तद्भवति ततश्च तदनित्य भवति[4] । ततो वय नित्यस्य[5] । एव[6] । धनस्य[7] । पतय[8] । स्यामेति[9] पुत्रानभिप्रेत्य वदति[10] । तथा चाह[11]- 'न शेषो अग्ने अन्यजातमस्ति' इति[12] । शेष इत्यपत्यनाम[13] शिष्यते मृतस्येति[14] । न[15] । अन्यजात[16] मनुष्यस्यापत्यम् ।

---

१. ०षद्या Λ. वसिष्ठाग्निसंवादे वसिष्ठेन हतपुत्रेणाग्निरभ्यर्थितः पुत्रं मे देहीति । तेन किलासौ प्रत्युक्तः—क्रीतकृत्रिमदत्तकादीनां पुत्राणामन्यतमं कुरुष्व पुत्रमिति । स एवमुक्त एताभ्यामृग्भ्यामन्यजान् पुत्रान् निन्दन्नौरसं पुत्रं ययाचे Dur. वसिष्ठस्यार्षम् । पुरा वसिष्ठो हतपुत्रः पुत्रं याचमानः कृतकादीनामन्यतमं पुत्रं कुर्वित्यग्निनोक्तस्तं प्रत्याह SKN.

२. परिषद्यं पर्याप्तं भवति . यद्वा . . परिहर्तव्यं भवति Sy. परिहरणीयं परित्याज्यमित्यर्थः Dur. परिषद्यं सर्वतः सादनीयं नापत्यत्वेनाङ्गीकर्तव्यम् । .परिहर्तव्यमित्यर्थवचनं न शब्दनिर्वचनम् । न च परेवर्जनार्थता, कर्मप्रवचनीयत्वप्रसङ्गात् । उपसर्गसंज्ञानिमित्तस्य च षत्वस्य दर्शनात् । तस्मादवसादनार्थ एव सदिः SKN.

३. ०णास्य M. अनणस्य Sy. कि पुनस्तत् ? . . . अरणस्यापगतार्णस्य, अपगतोदकसम्बन्धस्य परकुलजातस्य । . . .'रेक्ण इति धननाम' तद्धि 'रिच्यते' अतिरिच्यते, इतो लोकादमुं लोकं प्रयतो म्रियमाणस्येत्यर्थः Dur. किं तत् ? उच्यते. . .अरण इत्यसम्बन्ध उच्यते । स ह्यपार्णो भवति । अपगत ऋणादित्यर्थः । 'पुत्रो हि ऋणमस्मिन् सन्नयेति' (Λ B. 33.1.) इति श्रुतेः । पितुर्यदृणं तस्य प्रतिगृहीता जायमान एव नापगतः (क्रीतकादिरित्यर्थः) ऋणादसम्बन्धस्त्वपगतः । अतोऽसावपार्णत्वादरणस्तस्य. . .रिच्यतेऽवतिष्ठते प्रयतो म्रियमाणस्य पुत्रधनं न तेनैव सह म्रियत इत्यर्थः SKN.

४. रेक्णो यदपत्याख्यं धनं तत्परिहर्तव्यं न पुत्रत्वेन परिकल्पयितव्यमित्यर्थः । न हि तत्पुत्रत्वेन कल्प्यमानमपि पुत्रकार्येष्वतिष्ठते, परकीयत्वात् Dur. रेक्णो धनमपत्याख्यम् SKN

५. वावतेर० Λ.

६. तश्च Λ.

७. अतो नित्यस्यापुनर्देयस्य. . .यद्वा. . .औरसस्य Sy. यत एवमतो ब्रूमो नित्यस्य. . . 'पित्र्यस्येव धनस्य' यथा हि यदेव पित्र्यं धनं पुत्रत्वे भवति तस्यैव ' ह्यपर्यगौणं स्वामित्वं भवति । एवं यदेव स्वयं जातमपत्यं भवति तदेव मुख्यं भवति नेतरत् क्षेत्रजं वा क्रीतकं वा । यत एवमतो ब्रूमो यदेव नित्यमात्मीयमगौणं स्वयमुत्पादितं पुत्राख्यम् Dur. तस्मान्नित्यस्य SKN.

८. It seems to be the explanation of हि ॥ हिशब्दो यस्मादर्थे SKN.

९. पुत्राख्यस्य धनस्य Sy. रा धनम् । तस्यैव Dur. धनस्यौरसपुत्राख्यस्य SKN.

१०. पालयितारः Dur. स्वामिनः SKN.

११. स्याम । मा परकीयस्येत्यभिप्रायः Dur. भवेमेत्याशास्महे SKN.

१२. अग्न जा० Λ.

१३. N. 3. 2. अपत्यम् Sy. कस्मात्पुनरेवं ब्रूमहे ? इतो यस्मात्. . .नास्त्यपत्यम्. . .'शेष इत्यपत्यनाम' तद्धि शिष्यते, इहैव लोकेऽवतिष्ठते पितुरमुं लोकं प्रयतो गच्छत इत्यर्थः Dur. कस्मात् ? यस्मान्न शेषो नापत्यम् SKN.

१४. मृतमिति M.

१५. न भवति Sy.

१६. अनौरसम् Sy.
अन्येन जातम् Dur.

भवति[1] । ततश्चाचेतयमानस्य तत्प्रमत्तस्य भवति[2] । मा[3] । अस्मात्[4] पथः । विवृतुष[5] औरसमेव पुत्रमस्मभ्यं देहीति[6] । अस्योत्तरा भूयसे निर्वचनाय—

नहि ग्रभायारणः सुशेवोऽन्योदर्यो मनसा मन्तवा उ[7] ।
अधा चिदोकः पुनरित्स एत्या नो वाज्यभीषाळेतु नव्यः ॥ ८ ॥

न[8] हीति । न विग्रहितव्यः । अरणो[9] गन्ता जनकगृह[10] प्रति । सुखतमोऽपि[11] । अन्यस्योदराज्जात[12] । ।

---

१. य एव जनयति तस्यैव हि तद् भवति नेतरस्येत्यभिप्रायः Dur.

२. विवृषः Sy. य एव ह्याचेतयमानो भवति, अविद्वान् प्रमादी तस्यैवाचेतयमानस्य प्रमत्तस्याश्रुतवतो धर्मान् Dur. अविवृषः परिचर्यादिनाऽऽराधितस्य SKN.

३. परितोषमात्रं भवति ममेदमपत्यमिति नापत्यकार्येऽवतिष्ठते Dur. अस्तीत्येतदनुषक्तव्यम् . इह लोके प्रीत्यादिमात्रं फलं भवति न पुत्र इत्यर्थः SKN.

४. यत एवमतो ब्रूमः . माऽस्मानेतस्मात् Dur. एतज्ज्ञात्वा नोऽस्माकमेतान् SKN.

५. मार्गान् पुत्रोत्पावनप्रमुखान्मार्गान् Sy. पितृपितामहप्रपितामहानुसन्ततात् पथो मार्गात् Dur.
पितृपितामहादिलक्षणान् पथः SKN.

६. 'वुष वैकृत्ये' इति धातुः Sy. येन केनचित्प्रत्याख्यानद्वारेण विवृवुषस्त्वं देहि नः पुत्रमौरसमित्यभिप्रायः Dur. सन्तानविच्छेदेन . मा विवृवुषः । सन्तानाविच्छेदार्थमौरसं पुत्रं देहीत्यर्थः SKN.

७. VM. ignores अग्ने ।
एवमेतस्यामृचि 'न शेषो' अग्ने अन्यजातमस्ति' (R. V. VII.4.7.) इत्यनेन विशेषलिङ्गेनोपपन्नमेतद् भवति । जनयितुरेव प्रजा भवति न क्षेत्रिणो नापि ऋतुरन्यस्य वा कस्यचिदिति । एवं चैष शब्दार्थ उपपद्यते, यस्मादेवापेत्य ततं भवति तस्यैवापत्यमिति Dur. अपत्यनामान्युत्तराणि पञ्चवश । अपत्यं कस्मात् ? अपतितं भवति । नानेन पततीति वा । तद्यथा जनयितुः प्रजा । एवमर्थीये ऋचा उदाहरिष्यामः । परिहर्तव्यं हि नोपसर्तव्यम् । अरणस्य रेक्णः । अरणोऽपार्णो भवति । रेक्ण इति धननाम । रिच्यते प्रयतः । 'नित्यस्य रायः पतयः स्याम' पित्र्यस्येव धनस्य । 'न शेषो अग्ने अन्यजातमस्ति' । शेष इत्यपत्यनाम । शिष्यते प्रयतः । अचेतयमानस्य तत् प्रमत्तस्य भवति । मा नः पथो विवृवुष इति । तस्योत्तरा भूयसे निर्वचनाय N. 3.2., SKN. 2.121.

८. पूर्वस्यामृच्युक्त एवार्थोऽत्र प्रपञ्च्यते Sy.

९. ग्रभितव्यो M. The reading is doubtful. न ग्रहीतव्य is suggested. पुत्रत्वेन ग्रहणाय Sy. नाङ्गीकर्तव्यः पुत्रो ममायमित्यनेनाभिप्रायेण Dur.
ग्रहेरायः कृत्यार्थे व्यत्ययेन कृत् । न हि ग्रहीतव्य इत्यर्थः SKN.

१०. ०रणा A. रममाणः Sy.
कः पुनरसौ नाङ्गीकर्तव्यः ? अरणोऽपार्णः, अपगतोदकसम्बन्धोऽन्यकुलजः Dur.
असम्बन्धः SKN.

११. ०क ग्रहं A.

१२. सुखतमः सन् Sy. यद्यपि सुशेव एव स्यात् सुखतमः परिचरितो हितैषी Dur. परिचर्यादिना सुसुखोऽपि SKN.

१३. तथापि, अन्योदर्योऽन्येनोदीरितादेतसो जातः । अन्यजायोदरसम्भूतो वा । यो हि स्वस्यां जाय्यायां सम्भवति स स्व एवोदरे सम्भूतो भवति Dur.
'ऋ गतौ' उद्गम्यमानत्वादुदरसामीप्याद्वा रेतोऽत्रोदरमुच्यते । अन्यरेतसो जातः SKN.

मनसा । अपि । न । मन्तव्यो ममायमिति[1] । अथ[2] । अपि । गृह[3] जनकस्य[4] । स[5] । पुनः[6] । एव । गच्छति यद्यप्यय गृह्णाति यदिव मन्यते तस्मात् । ऐतु[7] । न[8] । पाजी[9] वेजनवानौरस[10] । अभिषहमाण सम्पन्नान् । नवजातः[11] स एव पुत्र इति, यास्कस्त्वाह-अरणोऽपार्णो[12] भवतीति ।

त्वमग्ने वनुष्यतो नि पाहि त्वमु नः सहसावन्नवद्यात् ।
सं त्वा ध्वस्मन्वद्भ्येतु पाथः सं रयिः स्पृहयाय्यः सहस्री ॥ ६ ॥

त्वमग्ने । त्वम् । अग्ने ! हन्तु[13] । अस्मान् । नि पाहि । त्वम् । एवास्मात्[14] । बलवन् ! अवद्यधा-

---

१. मन्तव्यो भवति Sy 'अद्धो ह वा एष आत्मनो यज्जायेति विज्ञायते' तस्माद्योऽन्यजायोदरसम्भूतः स मनसापि न मन्तव्यो ममायमिति, किं पुनः पुत्रत्वेन परिकल्पयितव्य इति Dur. ममायं पुत्र इति शेषः SKN.

२. किं कारणं मनसापि न मन्तव्य इति ? .... अधशब्दोऽथशब्दस्यार्थे वर्तते, स च हेत्वर्थः । यस्मात् Dur. यतो यदस्य SKN.

३. ग्रहं A. संस्थानम् Sy. ओकः स्वं निवासस्थान स्वं वशम् Dur. ओकः स्थानं स्वगोत्राख्यम् । 'ओक इति निवासनाम' उच्यतेरिति पाठान्तरम् । आह च 'ओकः उचः के' (Pa. 7.3.64.) इति । तदेतदग्नेरभिधानमधिष्ठात्रभिप्रायम् । अथवा कर्माङ्गत्वेन सगुणत्वार्थे मन्त्रे ग्राववदभिधानं कर्मात्मन एव भविष्यति । सर्वथाऽन्यपरे मन्त्रे जनयितुरपत्यमित्येतत् सूच्यते । एतावता चात्र प्रयोजनम् । एवञ्च सति अपेत्य ततः नानेन पततीत्युभयथापि निर्वचनमौरसाभिप्रायम् । SKN. ४. अन्योवर्यः Sy.

५. बहुनापि कालेन Dur. तदेव पुनः पिण्डदानसन्तानोत्पादनादिना SKN.

६. प्राप्नोति Sy. स एति तद्वंश्य एव भवति । तस्मादपुत्र एवासौ Dur.

७. आगच्छतु Sy. यत एवमतो ब्रवीमि ... आगच्छतु Dur. आकार एतिना परेण सम्बध्यते । त्वत्प्रसादादेतु—आगच्छतु SKN. ८. अतश्च नोऽस्मत् SKN.

९. वाजी is suggested for पाजी । वाज्यन्नवान् Sy. परेभ्यो भयदाता Dur. बली उद्वेजनस्वभावकः कम्पयिता वा दायादानाम् SKN.

१०. शत्रूणामभिभविता Sy. अभिभवन्त्यसपत्नान् Dur. अभिभविता च सपत्नानाम् SKN.

११. नवजातः शिशुरित्यर्थः । स एव पुत्र आगच्छतु न परकीयैः पुत्रैः सङ्कल्पितैरित्यभिप्रायः Dur. औरसः पुत्र इत्येतद् वयमाशास्महे SKN.

१२ ०णो वार्णो भ० A. रणो वर्णो भ० M. The reading gives no sense. The present reading is therefore adopted from the N. 3.2. न हि ग्रहीतव्यो अरणः सुसुखतमोऽपि । अन्योवर्यो मनसापि न मन्तव्यः । ममायं (पुत्रः) इति । अथ स ओकः पुनरेव तदेति यत आगतो भवति । ओक इति निवासनामोच्यते । ऐतु नो वाजी वेजनवान् । अभिषहमाणः सपत्नान् । नवजातः स एव पुत्र इति N. 33.; SKN. II. 123.

१३. हन्तः A. हिंसकात् Sy.

१४. अस्मान् is suggested for अस्मात् ।

निन्दितः[1]। समभ्येतु[2]। त्वाम्। मदीये गृहे वर्तमान इव सन् क्रियायुक्तम्[3]। अन्नम्[4]। धनञ्च। स्पृहणीयम्[5] सहस्रसंख्याकम्[6]।

एता नो अग्ने सौभगा दिदीह्यपि क्रतुं सुचेतसं वतेम।
विश्वा स्तोतृभ्यो गृणते च सन्तु यूयं पात स्वस्तिभिः सदा नः॥ १०॥

[एता नः][7]

VII. 5.

प्राग्नये[8] तवसे भरध्वं गिरं दिवो अरतये पृथिव्याः।
यो विश्वेषामसुरो वावृधे वैश्वानरो वावृधे जागृवद्भिः॥ १॥

प्राग्नये[9]॥ वैश्वानर[10]॥ प्रभरध्वम्[11]। अग्नये[12]। वृद्धाय[13]। गिरम्[14]। पृथिव्याः सकाशात्[15]। दिवं[16] प्रति। गन्त्रे। यः। विश्वेषाम्[17]। देवानाम्। उपस्थे[18] पृथिव्याम्। वैश्वानरः[19]। वर्धते[20]। जागृवद्भिर्[21]यजमानैः[22] समिद्धः।

पृष्टो दिवि धाय्यग्निः पृथिव्यां नेता सिन्धूनां वृषभः स्तियानाम्।
स मानुषीरभि विशो वि भाति वैश्वानरो वावृधानो वरेण॥ २॥

पृष्टो दिवि। सम्पृक्तः[23]। दिवि। निहितः[24]। अग्निः। पृथिव्याञ्च। नेता। नदीनाम्। वर्धिता।

---

१. ०वन्तवद्यां निन्दितः A. अवद्यात् निन्दितुः is suggested for अवद्यधात् निन्दितः।
२. समं ह्येतु A. सम्यक् प्राप्नोतु Sy.
३. त्वामुदीये ग्रहे A.
४. The reading is doubtful. ध्वस्तदोषं पाथोऽन्नम् Sy.
५. हविः Sy. ६. स्पृहणीयः Sy.
७. ०ख्यातम् A. सहस्रसंख्याकः Sy.
८. The *pratika* is supplied by the Editor. The stanza has already been explained. See RV. VII. 3. 11.
९. 'प्राग्नये तवसे' इति नवर्चं पञ्चमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वैश्वानराग्निदेवताकम्। तथा चानुक्रान्तम्—'प्राग्नये नव वैश्वानरीयं तु' (KSA. 34.5. p. 24.) इति। विनियोगो लैङ्गिकः Sy.
१०. प्राग्नये A.
११. हे स्तोतारः! प्रभरध्वम् Sy.
१२. वैश्वानरसंज्ञकायाग्नये Sy.
१३. प्रवृद्धाय Sy.
१४. स्तुतिम् Sy. १५. ०शां A.
१६. अन्तरिक्षस्य Sy.
१७. सर्वेषाम् Sy.
१८. उपस्थाने यज्ञे Sy.
१९. विश्वनरहितोऽग्निः Sy.
२०. स्तुतिभिर्हविर्भिश्च वर्धते Sy.
२१ जाग्रव० A. जागृवद्भिः प्रबुद्धैर्वेदैः सहितः सन् Sy.
२२. यमानैः A.
२३. अर्चितस्तेजसा सम्पृक्तो वा Sy.
२४. अन्तरिक्षे Sy. २५. न्यधायि Sy.

उदकानाम्[1] । सः । मानुषीः । विशः[2] । अभिविभाति[3] । वैश्वानरः[4] । वर्धमानः[5] । वरिष्ठेन तेजसा[6] दीप्त[7] इव ।

त्वद्भिया[8] विशं[9] आयन्नसिक्नीरसमना जहंतीर्भोजनानि[10] ।
वैश्वानर पूरवे[11] शोशुचानः[12] पुरो[13] यदग्ने दरयन्नदीदेः[14] ॥ ३ ॥

त्वद्भिया । त्वत्त । भयेन । विशः । गच्छन्ति । असितवर्णा, रक्षासीत्यर्थः । त्यक्तसङ्ग्रामाः । परित्यजन्तः । अन्नानि[15] । वैश्वानर ! पूरवे राज्ञे । शोशुचानः[16] । तच्छत्रूणां पुराणि । यदा । दारयत्[17] । प्राज्वलः[18] ।

तव त्रिधातु[19] पृथिवी उत द्यौर्वैश्वानर व्रतमग्ने सचन्त[20] ।
त्वं भासा रोदसी[21] आ ततन्थाजस्रेण[22] शोचिषा[23] शोशुचानः ॥ ४ ॥

तव त्रिधातु । तिस्रो देवता अग्निर्वायुः सूर्य इति, तथाभिन्नस्य तव । त्रिधातु । व्रतम्[24] । पृथिव्यन्तरिक्षम् । द्यौः[25] । च । वैश्वानर ! सेवन्ते[26] पृथिव्यग्नेः कर्म, अन्तरिक्ष[27] वायोः, द्यौः सूर्यस्य । त्वम् । भासा[28] । द्यावापृथिव्यौ । आततन्थ[29] । अजस्रेण । तेजसा । दीप्यमानः[30] ।

---

१. अपाम् Sy. 'स्तिया आपो भवन्ति स्त्यायनात् N. 6.17.
२. प्रजाः Sy.
३. अविवि० M.
४. वेश्वा० A. विश्वनरहितोऽग्निः Sy.
५. वर्धमानः सन् Sy.
६. श्रेष्ठेन हविषा तेजसा वा Sy.
७. ०सा दित्य A.
८. त्वत् हियां A.
त्वद्धिया M.
९. भीत्या Sy.
१०. प्रजाः Sy.
११. ०च्छन्त A. आगच्छन् Sy.
१२. सित० A. असिक्नीरसितवर्णा राजस्यः । प्रथमार्थे द्वितीया Sy.
१३. ०त्यर्थमस्यक्तस० A.
१४. परस्परमसमेताः Sy.
१५. धनानि Sy.
१६. दीप्यमानः Sy.
१७. ०यन् is suggested for ०यत् ॥
१८. तथा च निगमः 'अंहो राजन् वरिवः पूरवे कः' (RV. 1.63.7.) Sy.
१९. VM. ignores अग्ने ।
२०. त्वत्प्रीतिकरं कर्म Sy
२१. अपि च इति त्रयो लोकाः Sy
२२. हे वैश्वानर ! विश्वेषां नराणां नेतः ! Sy. वैश्वानरः कस्मात् ? विश्वान्नरान्नयति । विश्व एनं नरा नयन्तीति वा N. 7.21.
२३. त्रैलोक्यवर्तिन्यः प्रजास्त्ववर्थं कर्म कुर्वन्तीत्यर्थः Sy.
२४. कर्म वायोरन्तरिक्षं द्यौः M.
२५. दीप्त्या Sy.
२६. विस्तारयसि Sy.
२७. VM. ignores अग्ने ।

त्वामग्ने हरितो वावशाना गिरः सचन्ते धुनयो घृताचीः ।
पतिं कृष्टीनां रथ्यं रयीणां वैश्वानरमुषसां केतुमह्नाम् ॥ ५ ॥

त्वामग्ने । त्वाम् । अग्ने ! दिशः । कामयमानाः । सेवन्ते । स्तुतयश्च । तथा हविषा कम्पयित्र्यः । स्रुचश्च । पतिम् । प्रजानाम् । नेतारम् । धनानाम् । वैश्वानरम् । उषसाम् । अह्नाञ्च । प्रज्ञापकम् ।

त्वे असुर्यं वसवो न्यृण्वन्क्रतुं हि ते मित्रमहो जुषन्त ।
त्वं दस्यूँरोकसो अग्न आज उरु ज्योतिर्जनयन्नार्याय ॥ ६ ॥

त्वे असुर्यम् । त्वयि । असुराणा हन्तृ वर्णम् । वसवः । प्राक्षिपन् । कर्म । हि । ते । मित्राणा पूजयिषित । जुषन्त । त्वञ्च । तेषा दस्यू । स्व स्वात् स्थानात् । निरगमय । विस्तीर्णं । ज्योति । आर्याय मनुष्याय । जनयन् ।

स जायमानः परमे व्योमन्वायुर्न पाथः परि पासि सद्यः ।
त्वं भुवना जनयन्नभि क्रन्नपत्याय जातवेदो दशस्यन् ॥ ७ ॥

स जायमानः । सः । प्रादुर्भवन् । परमे । व्योम्नि सूर्यात्मना वायु । इव । क्षिप्र यज्ञमुखे ।

---

१. अश्वाः Sy.
२. नृणां स्तुतिरूपा वाचः Sy.
३. ०यित्य A. पापं धुन्वानाः Sy.
४. स्रुच्च A. घृतमञ्चन्त्यः सचन्ते । हविषा सहिता इत्यर्थः Sy.
५. पति A. स्वामिनम् Sy.
६. क्षितयः कृष्टय इति मनुष्यनामनी Ngh. 2.3.
७. ०सुर्यः A.
८. अहं . . . वर्ण A. बलम् is suggested for वर्णम् ॥ बलम् Sy.
९. वसव A. वासका देवाः Sy.
१०. प्रक्षिपत् A. न्यगमयन् Sy.
११. त्वत्प्रीतिकरं कर्म Sy.
१२. ०यिषित M. सूजयितः is suggested for पूजयिषितः ।
१३. जुषन्तं M. असेवन्त Sy.
१४. दस्युः M. दस्यून् is suggested for दस्यू ॥ कर्महीनान् Sy.
१५. विस्तीर्णम् is suggested for विस्तीर्णं ॥ अधिकम् Sy.
१६. तेजः Sy.
१७. कर्मवते जनाय Sy.
१८. ०यत् A.
१९. VM. ignores अग्ने ।
२०. प्रसिद्धस्त्वम् Sy.
२१. ०र्भवत् A.
२२. दूरस्थे Sy.
२३. अन्तरिक्षे Sy.
२४. सूर्यरूपेण Sy.
२५. यथा वायुर्द्विदेवत्यग्रहेषु प्रथमं सोमं पिबति तथा Sy.

सोमलक्षणमन्नम्[1]। पिबसि[2]। त्वम्[3]। उदकानि[4]। जनयन्[5]। अभिक्रन्दसि[6]। पुत्रभूतायास्मै[7] लोकाय[8]। जातवेद[9]! प्रयच्छन्नोषध्यादिकम्[10]।

तामग्ने अस्मे इषमेरयस्व वैश्वानर द्युमतीं जातवेदः।
यया राधः पिन्वसि विश्ववार पृथु श्रवो दाशुषे मर्त्याय ॥ ८ ॥

तामग्ने[11]। ताम्[12]। अग्ने[13]! अस्मभ्यम्[14]। वृष्टिम्[15]। आभिमुख्येन गमय[16]। वैश्वानर[17]! विद्युक्ताम्[18]। जातवेदः[19]! यया वृष्ट्या[20]। क्षरसि[21]। धनम्[22]। हे विश्ववार[23]! पृथु[24] च। अन्नम्[25]। प्रयच्छते[26]। मर्त्याय[27]।

तं नो अग्ने मघवद्भ्यः पुरुक्षुं रयिं नि वाजं श्रुत्यं युवस्व।
वैश्वानर महि नः शर्म यच्छ रुद्रेभिरग्ने वसुभिः सजोषाः ॥ ९ ॥

तन्नः[28]। तम्[29]। अस्मभ्यम्[30]। अग्ने[31]! हविष्यन्स्यो[32]। बहुषु शब्दितम्[33]। रयिम्[34]। नियुवस्व[35] निमिश्रय[36]। अन्नञ्च[37]। श्रवणीयम्[38]। वैश्वानरम्[39]! महच्च। अस्मभ्यम्। सुखम्। प्रयच्छ। रुद्रैः। अग्ने! वसुभिश्च[40]। सङ्गतः[41]।

---

१. सोमम्, यद्वा वायुरिव पाथो जलं परिपासि परिपिबसि शोषयसीत्यर्थः Sy.
२ भूतम्, भुवनम्, इत्युदकनामनी Ngh. 1.12.
३. अहिक्रं० Λ. वैद्युतात्मनाऽभिक्रन्दसि। अभिगर्जसि वा Sy.
४. पुत्रहूतायास्वै Λ. अपत्यवत्पालनीयाय यजमानाय Sy.
५. जातधनाग्ने! Sy.
६. कामान् प्रयच्छन् Sy.
७. VM. ignores परि।
८. एषणीयां वृष्टिम्। यद्वा द्युमतीं तामिषमन्नमेरयस्व। तथा च श्रूयते 'तस्माद्यस्यैवेह भूयिष्ठमन्नं भवति स एव भूयिष्ठं लोके विराजति' (AB. 1. 5.) इति। अथवेषमेषणीयां तां द्युमतीम् Sy.
९. प्रेरयस्व।.वृष्टद्या त्रैलोक्यं द्योतते हि Sy.
१०. वियुक्ताज् M. विद्युद्युक्ताम् is suggested for विद्युक्ता॥ दीप्तिमतीम्। यद्वा भास्वतीं दीप्तिम् Sy.
११. हे जातप्रज्ञ! Sy.
१२. पालयसि Sy.
१३. विश्ववेवरणीय! अग्ने! Sy
१४. विस्तीर्णम् Sy. १५. यज्ञः Sy.
१६. यजमानाय पिन्वसि Sy.
१७. तस्मा Λ.
१८. प्रसिद्धम् Sy. १९. अग्नेः Λ.
२०. ०ष्मन् स M. हविष्मद्भ्यः is suggested for ०ष्यन् स्यो ॥ धनवद्भ्यः हविष्मद्भ्य इत्यर्थः Sy.
२१. बहुश० is suggested for बहुषु श० ॥ बह्वन्नं बहुयशस्कं वा Sy.
२२. नियुस्व Λ. नितरां मिश्रयस्व Sy.
२३. बलं च Sy.
२४. श्रवणी० Λ.
२५. ०नरं A. ०नर! is suggested for ०नरं M. हे विश्वनररहित! अग्ने! त्वम् Sy.
२६. देवैः Sy.
२७. सहितः Sy.

VII. 6.

प्र सम्राजो असुरस्य प्रशस्तिं पुंसः कृष्टीनामनुमाद्यस्य ।
इन्द्रस्येव प्रतवसस्कृतानि वन्दे दारुं वन्दमानो विवक्मि ॥ १ ॥

प्र सम्राजः[1]। प्रवन्दे प्रोच्चारयामि। सर्वेषां सम्राज्ञ[2]। प्राज्ञस्य[3]। प्रशस्तिम्। वृष्णः[4]। मनुष्याणाम्[5]। अनुमोदनीयस्य[6]। यथेन्द्रस्य। वृद्धस्य[7]। कर्माणि। प्रोच्चारयन्ति तद्वत्। किञ्चैन दरणशीलम्। नमस्यन्[10]। स्तुति ब्रवीमि।

कविं केतुं धासिं भानुमद्रेर्हिन्वन्ति शं राज्यं रोदस्योः ।
पुरंदरस्य गीर्भिरा विवासेऽग्नेर्व्रतानि पूर्व्या महानि ॥ २ ॥

कविम्[11]। क्रान्तकर्माणम्[12]। प्रज्ञापकम्[13]। धारयितारम्[14]। दीपयितारम्[15]। आदर्तुः स्तोतुः। प्रीणन्ति[16]। शङ्करम्[17]। रोदस्यो[18], राजानम्, राजतेर्वा नामकरणः। पुरान् दारयितु[19]। अहञ्च स्तुतिभिः। परिचर्यां करोमि[22]। अग्नेर्हि। महान्ति। पूर्वकृतानि[23]। कर्माणीति।

---

१. 'प्र सम्राजः' इति सप्तर्चं षष्ठं सूक्तं वसिष्ठस्यार्षम्। अनुक्रम्यते च—'प्र सम्राजः सप्त' (KSA. 34. 6. p. 24.)। 'वैश्वानरीयं तु' (KSA. 34. 5. p. 24.) इत्युक्तत्वादस्यापि वैश्वानरोऽग्निर्देवता। विनियोगो लैङ्गिकः Sy.

२. ०षां सा रा० Λ. ०षां सम्राज्ञः is suggested for ०सां सं रा० M. सर्वस्य भुवनेश्वरस्य Sy.

३. बलवतः Sy.

४. VM. seems to read वृष्णः for पुंसः ॥ पौंस्यमिति वीर्यमुच्यते। वीरस्य Sy. पुमान् पुरुमना भवति पुंसतेर्वा N. 9. 15.

५. जनानाम् Sy.

६. स्तुत्यस्य Sy.

७. बलवतः Sy.

८. प्रब्रवीमि Sy.

९. पुरां भेत्तारम् Sy.

१०. नमस्य Λ.

११. कविः Λ.

१२. प्राज्ञम् Sy.

१३. विश्वस्य प्रज्ञापकम् Sy.

१४. अद्रेर्धर्तारम् Sy.

१५. भासकम् Sy.

१६. मदीयाः प्रीणयन्ति प्रेरयन्ति वा देवाः Sy.

१७. सुखकरम् Sy.

१८. वैश्वानरमग्निम् Sy.

१९. The passage should immediately follow राजानम्।

२०. द्यावापृथिव्योः Sy.

२१. ०यितुं Λ.....अग्नेः Sy.

२२. परिचरयामि Sy.

२३. पूर्व्याणि पुरातनानि Sy.

न्यक्रतून्ग्रथिनो मृध्रवाचः पणीँरश्रद्धाँ अवृधाँ अयज्ञान् ।
प्र तान्दस्यूँरग्निर्विवाय पूर्वश्चकारापराँ अयज्यून् ॥ ३ ॥

न्यक्रतून् । नितरा प्रगमयति । अकर्मणः । ग्रन्थनकामान् । हिंसकवाचः । पणवानान् ? श्रद्धारहितान् । वर्धयितॄन् । हविर्भिर्विहितानयज्ञान् । तान् । दस्यून् । एतदेवाह—पूर्वं यः सन् । जघन्यान् । चकार । अयज्यून् । अग्निरिति ।

यो अपाचीने तमसि मदन्तीः प्राचीश्चकार नृतमः शचीभिः ।
तमीशानं वस्वो अग्निं गृणीषेऽनानतं दमयन्तं पृतन्यून् ॥ ४ ॥

यो अपाचीने । यः । अपाचिकाः ।

---

१. न्यक्रत्रत् A. वसिष्ठस्त्रिष्टुभा वैश्वानराग्निं तुष्टाव । पञ्चमेऽहनि आग्निमारुते विनियोगः । 'प्र सम्राजः' (RV. VII.6.1.) 'क इं ब्यक्ताः' (RV. VII.56.1.) इति सूत्रम् (SŚS.10.5.24.) DDN.

२. नितरां गमयेत् Sy. अत्यन्तं निवारयति DDN.

३. ग्रन्थत का० A. ग्रथिनो जल्पकान् Sy. अल्पकान् तुच्छान् DDN.

४. हिंसक M. हिंसितवचस्कान् DDN.

५. ०वाना A. The reading is doubtful. पणिनामकान् वार्धुषिकान् Sy. पणीँरश्व० तथा दस्यूँ रग्निः—'ईकारोकारोपहितो रेफमेषु । स्वहेषु च' (RPR. 4.69.70) इति स्वरपरत्वान्नकारस्य रेफः । उपधानुनासिकत्वम्—'नकारस्य लोप रेफ०' (RPR. 4.80.) इति DDN.

६. श्रंधार० A. यज्ञादिषु श्रद्धारहितान् Sy. DDN.

७. वर्धयितृभिः A. अवर्धयितॄन् is suggested for वर्धयिद्भुन् M. स्तुतिभिरग्निमवर्धयतः Sy. स्तुत्या देवानवर्धयतः DDN.

८. पिता हितान० A. अविहितयज्ञान् is suggested for विहितानयज्ञान् ॥ यज्ञहीनान् Sy. यज्ञरहितान् DDN.

९. ग्रस्यून् A. वृथा कालस्य नेतॄन् Sy. देवतस्करान् । तथोक्तं भगवता 'तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः' (Gita 3.12.)

१०. पूर्व वस्सज् A. पूर्वो यः is suggested for पूर्वं यः ॥ मुख्यः सन् Sy. मुख्यः सन्नग्निः DDN.

११. करोति DDN.

१२. अयज्युन् A. अयजमानान् Sy. DDN.

१३. अक्रतूनयज्ञान् Sy. अप्रज्ञान् DDN. केतः केतुः चेतः, चित्तम्, क्रतुः (Ngh. 3. 9.)

१४. अवाची० A. १५. अवाचि० A.

१६. The commentary on this stanza is missing in the mss.
Sy. explained this stanza in the following manner:
नृतमो नेतृतमो योऽग्निरपाचीनेऽप्रकाशमाने तमसि निमग्नाः प्रजाः मदन्तीः स्तुवन्तीः शचीभिस्ताभ्यो दत्ताभिः प्रज्ञाभिः प्राचीश्चकार । यद्वा नेतृतमो योऽग्निरपाचीने तमसि निशायां मदन्तीमाद्यन्तीरुषसः शचीभिः प्रज्ञाभिः प्राचीश्चकारेत्यर्थः । तं वस्वो धनस्येशानमनानतमप्रह्वं पृतन्यून् युद्धकामांश्च दमयन्तमग्निं गृणीषे स्तौमि ।

यो देह्योऽनमयद्वधस्नैर्यो अर्यपत्नीरुषसश्चकार ।
स निरुध्या नहुषो यह्वो अग्निर्विशश्चक्रे बलिहृतः सहोभिः ॥ ५ ॥

यो देह्योः[1]।...उषसः। चकार[2]। सः। निरुध्य[3]। नहुषो राज्ञः। अग्निः। महान। प्रजाः। चक्रे। करप्रदायिनीः[4]। बलै[5]।

यस्य शर्मञ्जुप विश्वे जनास एवैस्तस्थुः सुमतिं भिक्षमाणाः ।
वैश्वानरो वरमा रोदस्योराग्निः ससाद पित्रोरुपस्थम् ॥ ६ ॥

यस्य[6]। यस्य[7]। सुखनिमित्तम्[8]। उपस्थः[9]। विश्वे[10]। जनाः। गमनै[11]। सुमतिमन्तः[12]। भिक्षमाणाः। स वैश्वानरः। वसिष्ठम्[13]। उपस्थम्[14]। आसीदति[15]। द्यावापृथिव्योः। पित्रोः प्रातरादित्यात्मना द्यावापृथिव्योर्मध्ये प्राच्या प्रादुर्भवति[16]।

आ देवो ददे बुध्याऽवसूनि वैश्वानर उदिता सूर्यस्य ।
आ समुद्रादवरादा परस्मादाग्निर्ददे दिव आ पृथिव्याः ॥ ७ ॥

आ देवः[17]। आददे[18]। देवः[19]। आन्तरिक्षाणि[20]। वसून्यन्नानि[21]। वैश्वानरः[22]। उदये। सूर्यस्य। पूर्वा-

---

१. The *pratīka* is supplied by the Editor. २. अकरोत् Sy.
३. निरुध्य is suggested for निरुप्य ।
४. ०यिनी A. करप्रदान् Sy.
५. The explanation of following words is missing in mss.
यः । देह्योः । अनमयत् । वधस्नैः । यः and अर्यपत्नीः ॥
Sy. explains those words in the following manner :—योऽग्निः । देह्यो देहीरुपचिता आसुरीविद्या । वधस्नैर्वधैरायुधैर्वा । अनमयत् हीना अकरोत् । यश्च । आर्यपत्नीः, अर्यः सूर्यः पतिर्यासां ता अर्यपत्न्यः ।
६. वैश्वानरस्य Sy. ७. शर्मणि Sy.
८. उपतस्थुः is suggested for उपस्थः ॥ यमेवोपतिष्ठन्ते Sy.
९. विश्वे is suggested for विश्ये ॥ सर्वे Sy. १०. गनैः A.
११. सुमतिन्तामेव is suggested for ०तिमन्ता । १२. हिक्ष० A. प्रार्थमानाः Sy.
१३. वरिष्ठम् is suggested for वसिष्ठम् । उत्कृष्टम् Sy. १४. मध्यमन्तरिक्षम् Sy.
१५. आसीदिति A. आससाद आगच्छत् Sy.
१६. स वैश्वानरः सूर्यः सन् मातापित्रोः Sy.
१७. VM. ignores अग्निः ।
१८. देवा A. १९. द्योतमानः Sy.
२०. ०रिक्ष्याणि M. बुध्न्यान्यान्तरिक्षाणि । बुध्न्यमन्तरिक्षम् । बद्धा अस्मिन् धृता आप इति वा N. 10.44. Sy.
२१. आच्छादकानि तमांसि 'वस आच्छादने' इति धातुः Sy.
२२. वैश्वनरः A. विश्वनरहितोऽग्निः Sy.

परयोः। समुद्रयोर्मध्ये यानि वसूनि। यानि च द्यावापृथिव्योर्मध्ये तानि सर्वाणि। आदत्ते मनुष्येषु पक्षिषु देवेषु च वर्तमानः सर्वं भक्षयतीति।

VII. 7.

प्र वो देवं चित्सहसानमग्निमश्वं न वाजिनं हिषे नमोभिः।
भवा नो दूतो अध्वरस्य विद्वान्त्मना देवेषु विविदे मितद्रुः॥ १॥

प्र वः। प्रेरयामि। युष्माकम्। देवम्। बलमाचरन्तम्। अग्निम्। अश्वम्। इव। बलिनम्। अग्ने। भवा। नः। दूत। यज्ञम्। जानन्। स्वयमेवाग्निः। देवेषु। प्रयच्छति ज्ञापयते वा। विहिताध्वेति।

आ याह्यग्ने पथ्या अनु स्वा मन्द्रो देवानां सख्यं जुषाणः।
आ सानु शुष्मैर्नदयन्पृथिव्या जम्भेभिर्विश्वमुशधग्वनानि॥ २॥

आ याहि। आगच्छ। अग्ने! मातर्गः। आत्मीयैवम्। मन्द्रः। देवानाम्। सख्यम्। सेवमानः।

---

१. समुद्रावन्तरिक्षात्। अवरात् पृथिव्यास्तमांसि। आददे समुद्रात्परस्माद्दिवोऽपि तमांसि। आददे। तदेव दर्शयति—अग्निर्दिवस्तमांसि। आददे। पृथिव्याश्च तमांस्यादे Sy.

२. VM. ignores अग्निः।

३. 'प्र वो देवम्' इति सप्तर्चं सप्तमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमाग्नेयम्। 'प्र वो देवम्' (KSA. 34.7. p. 24.) इत्यनुक्रान्तम्। प्रातरनुवाकाश्विनशस्त्रयोर्विंशसूक्त उक्तो विनियोगः Sy.

४. हे अग्ने!...प्रहिणोमि Sy.

५. त्वाम् Sy.

६. देवः A. द्योतमानाविगुणयुक्तम् Sy.

७. ०मात्रन्तम् A. राक्षसानभिभवन्तम् बलमाचरन्तं वा Sy. ८. अग्रस्य नेतारम् Sy.

९. वेगवन्तं बलवन्तं वा Sy.

१०. स्तुतिभिर्हविर्भिर्वा Sy.

११. VM. seems to repeat the Vedic word भवा. The classical form should be भव.

१२. अस्माकम् Sy. १३. यज्ञज A.

१४. अथ परोक्षस्तुतिः—त्मनाऽऽत्मना स्वयमेव Sy.

१५. प्रज्ञायते Sy.

१६. ह विहिताध्वेति A. दग्धद्रुमोऽग्निरिव Sy.

१७. VM. ignores चित्॥ चित् एव Sy.

१८. अगच्छ M.

१९. अग्नेः M. हे अग्ने! त्वम् Sy.

२०. मातः जः M. मार्गः is suggested for मातर्गः

२१. आत्मीयैरेव is suggested for आत्मीयैवम्॥ स्वैर्मार्गैरित्यर्थः Sy.

२२. मदयिता स्तुत्यो वा Sy.

२३. देवैः सह Sy.

आ[1] याहि । पृथिव्याः । समुच्छ्रित[2] वनम् । तेजोभि[3]ः । शब्द[4] । दष्ट्राभि[5]. । विश्वव[6]न्, कात्स्न्र्येन । यथाकामं दहन्[7] । काष्ठानी[8]ति ।

प्राचीनो[9] यज्ञः सुधितं[10] हि बर्हिः[11] प्रीणीते[12] अग्निरीळितो[13] न होता[14] ।
आ मातरा[15] विश्ववारे[16] हुवानो यतो[17] यविष्ठ[18] जज्ञिषे[19] सुशेवः[20] ॥ ३ ॥

प्राचीनः । प्राङ्मुख[21] । यज्ञः प्रवृत्त[22]ः । सुनिहित[23] च । बर्हि[24]ः । आप्रीणाति[25] च । अग्निम्[26] । प्रशस्तः इव । होता । द्यावापृथिव्यौ । विश्वैर्वरणीये । हूयमान[27] । ययोस्त्वम्[28] । युवतम[29] ! जायसे । सुसुखम्[30] ।

सद्यो[31] अध्वरे[32] रथिरं[33] जनन्त[34] मानुषासो[35] विचेतसो[36] य एषाम्[37] ।
विशामधायि[38] विश्पतिर्दुरोणे[39] अग्निर्मन्द्रो मधुवचा ऋतावा[40] ॥ ४ ॥

सद्यो अध्वरे । सद्य[41] । यज्ञे । रथवन्तम्[42] । जनयति[43] । मानुषासः[44] । विशिष्टप्रज्ञाः । यः । एषा[45] मनुष्याणा नेता भवति । स विशा[46] पतिः । विशाम्[47] । गृहे[48] । निहितः[49] । अग्नि[50] । मोदनः[51] । मधुवचनः[52] । यज्ञवान् ।

---

१. आकारस्य पुनर्वचनमादरार्थम् Sy.
२. समुच्छ्रितं तृणगुल्मादिकम् Sy.
३. शोषकैर्दाहकैस्तेजोभिः Sy.
४. शब्दायमानः or शब्दयन् is suggested for शब्दं ॥ शब्दायमानः । दह्यमानं हि शब्दायते Sy. ५. ज्वालाभिरित्यर्थः Sy.
६. विश्वं वनं or विश्वम् is suggested for विश्ववन्नं ॥ विश्वानि Sy.
७. वहत् A. कामयमानो वहन् Sy.
८. काष्ठा० A.
९. प्राचीनः । सम्यगनुष्ठीयत इत्यर्थः Sy.
१०. यज्ञ प्रवृत्त A. अयं यज्ञः । यद्वा यज्ञो यष्टा होता प्राचीनः । यद्वा यज्ञो हविः प्राचीनः प्राचीनं प्राङ्मुखमासन्नम् Sy.
११. ०निहत० A. १२. बर्हिः A.
१३. तृप्तश्च भवति Sy.
१४. अनि A. अग्निः is suggested for अग्नि । १५. अगस्त A. स्तुतः Sy.
१६. नेति चार्थे Sy.
१७. VM. seems to take हुवानः nom sing. as Voc. sing.
१८. योस्त्वं A. यतस्त्वम् is suggested for ययोस्त्वम् ॥ यतो यदा Sy.
१९. हे युवतम ! अग्ने ! Sy.
२०. VM. seems to explain सुशेवः nom. sing. as an adverb.
२१. रथिनं नेतारम् Sy.
२२. ०यन्ति is suggested for ०यति ॥
२३. मानुसः A. मानुषाः is suggested for मानुषासः ॥ मनुष्याः Sy.
२४. अपिशि० A.
२५. एषां हविर्वहति Sy.
२६. विशां पतिर्विश्वस्य पतिर्वा Sy.
२७. शग्म् A. मनुष्याणाम् Sy.
२८. ग्रहे A. २९. आहितः Sy.
३०. सोऽयमग्निः Sy.
३१. मदयिता Sy.
३२. मादयितृवचस्कः Sy.

असादि वृतो बर्हिराजगन्वान्नग्निर्ब्रह्मा नृषदने विधर्ता ।
द्यौश्च यं पृथिवी वावृधाते आ यं होता यजति विश्ववारम् ॥ ५ ॥

असादि[1]। स्थापित[2]। वृतो होतृत्वेन। बर्हा[3]। दूरादागत[4]। अग्नि.। महान्[5]। गृहे[6]। विधारक:। यम्। द्यावापृथिव्यौ[7]। वर्धयत। यम्[8]। च। होता[9]। आ यजति, मानुष[10]। विश्ववैवरणीयम्।

एते द्युम्नेभिर्विश्वमातिरन्त मन्त्रं ये वारं नर्या अतक्षन् ।
प्र ये विशस्तिरन्त श्रोषमाणा आ ये मे अस्य दीधयन्नृतस्य ॥ ६ ॥

एते। एते[12]। यशोभि.। सर्वम्[13]। आच्छादयन्ति[14]। ये। वाऽग्नये वैश्वानराय[15]। पर्याप्तम्[16]। मन्त्रम्[17]। कुर्वन्ति[18]। नृहिता:[19]। ये वा। वर्धयन्ति। अन्नार्थिनी: प्रजा वैश्वानराधिष्ठिता:[20]। तदुक्तयाऽऽचावचन[21] शृण्वानो[22]। ये वा। मदीयम्[23]। अमुम्[24]। वैश्वानरम्[25]। आसीदयन्[26] प्राज्वलयन्निति।

नू त्वामग्न ईमहे वसिष्ठा ईशानं सूनो सहसो वसूनाम् ।
इषं स्तोतृभ्यो मघवन्द्धृष्य आनड्यूयं पात स्वस्तिभिः सदा नः ॥ ७ ॥

नू त्वाम्। क्षिप्रम्[27]। त्वाम्। अग्ने ! याचामहे[28]। वसिष्ठा:। ईशानम्। सहस: सूनो[29] ! धनानाम्। तथा सत्यन्नम्। स्तोतृभ्य:[30]। हविष्मद्भ्य:। प्रापयेरिति[31]।

---

१. अस्वादि A. २. उपविष्ट: Sy. ३. हविषां वोढा Sy. ४. द्युलोकादागत आगमनशीलो वा Sy. ५. परिबृढ: Sy. ६. ग्रहे A. होतु: स्थाने Sy. ७. विश्वस्य धारक: Sy. ८. ०थिव्यो: M. ९. अग्निम् Sy. १०. हेतो A. ११. मनुष: A: It should immediatly follow होता ॥ १२. मदीया: पुरुषा: Sy. १३. द्युम्नेभिरन्नै:, अथवा Sy. १४. पोष्यवर्गम्, यद्वा जगत् Sy. १५. आतिरन्त वर्धयन्ति । अथवा...अभ्यगच्छन्नित्यर्थ: Sy. १६. वेति समुच्चये Sy. १७. पर्याप्त A. १८. स्तोत्रं स्तुत्यं वा Sy. १९. समस्कुर्वन् Sy. २०. मनुष्या: Sy. २१. तदूक्तं याज्ञा० A. ०माज्ञावचनं is suggested for यौऽच्चाव० । २२. शृण्वाना: or शृण्वन्त: is suggested for शृण्वानो ॥ श्रोषमाणा:—श्रुणोतेः 'सन्यङो' (Pa. 6.1.9.) इति द्वित्वं 'इको झल्' (Pa. 1.2.9.) इति सनः कित्त्वं च 'सर्वे विधयश्छन्दसि विकल्प्यन्ते' इति न भवतः । 'ज्ञाश्रुस्मृदृशां सनः' (Pa. 1.3.57.) इत्यात्मनेपदम् Sy. २३. मदीया: Sy. २४. इमम् Sy. २५. सत्यमग्निम् । कर्मणि षष्ठी । मनुष्याणामग्नीयादिति वत् Sy. २६. आदीयत् A. आदीपयन् is suggested for आदीसयन्. २७. अद्य वा Sy. २८. वाचा० A. २९. वासिष्ठा: M. वयम् Sy. ३०. बलस्य पुत्राग्ने ! Sy. ३१. अस्मदीयेभ्य: Sy. ३२. ०ये इति A. ०येति M. आनट्—नशेर्व्याप्तिकर्मणोऽन्तर्णीतण्यर्थाल्लुङि 'छन्दस्यपि दृश्यते' इत्याडागम: Sy. ३३. The fourth verse of the stanza has already been explained. See RV. VII.1.20. Sy. explains it again and again. यूयं त्वत्परिवाराश्च सर्वे यूयम् । नोऽस्मान् सदा । स्वस्तिभि: पातेत्येवमीमहे Sy.

VII. 8.

इन्धे राजा समर्यो नमोभिर्यस्य प्रतीकमाहुतं घृतेन ।
नरो ह्व्येभिरीळते सबाध आग्निरग्र उषसामशोचि ॥ १ ॥

इन्धे[1] । समिन्धे[2] तम् । राजा । दीप्तवर[3] । हविर्हि[4] । यस्य । मुखम्[5] । आहुतम् । घृतेन भवति । त मनुष्या[6] । हविर्भि[7]. सह । स्तुवन्ति । बोधासहिता[8] । आदीप्यते । सोमाग्नि[9] । उषसाम् । अग्र इति ।

अयमु ष्य सुमहाँ अवेदि होता मन्द्रो मनुषो यह्वो अग्निः ।
वि भा अकः ससृजानः पृथिव्यां कृष्णप्विरोषधीभिर्वचे ॥ २ ॥

अयम्[10] । अयम । एव । स । सुमहान्[11] । ज्ञायते[12] । होता[13] । मोदमान[14] । मनुष्यस्य । महान् । अग्नि । विकरोति[15] । तेजासि[16] । पृथिव्याम् । अरण्यो सृज्यमान[17] । कृष्णमार्ग । ओष ओषसिभि[18] । उह्यते[19] ।

---

१. 'इन्धे राजा' इति सप्तर्चमष्टमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमाग्नेयम् । 'इन्धे राजा' (KSA. 34.8. p. 24.) इत्यनुक्रान्तम् । प्रातरनुवाकाश्विनशस्त्रयोर्विनियोगः । आतिथ्यायां 'प्र प्रायमग्निः' इति स्विष्टकृतो याज्या । सूत्रितञ्च 'प्र प्रायमग्निर्भरतस्य शृण्व इति संयाज्ये' (ĀSS. 4.5.) इति Sy.

२. समिध्यते Sy.

३. दीप्तः Sy.

४. बीप्तिवश्वरः M. ईश्वरः is suggested for पीश्वरः । स्वामी हविषां प्रेरको वाग्निः Sy.

५. हविः M.
हविर्भिः is suggested for हविर्हि । स्तुतिभिः सह Sy.

६. अग्नेः Sy.

७. रूपम् Sy.

८. यश्च नरोऽस्मदीयाः Sy.

९. हविषः M. हविर्भिः is suggested for हविर्भिः ॥ हव्यैः सार्धम् Sy.

१०. बाधासहिताः is suggested for बोधा सहिता ॥ सबाधः संश्लिष्टाः सञ्जातबाधा वा Sy.

११. सोममग्निः M. सोऽग्निः is suggested for सोमाग्निः

१२. सुमहा Λ.
सुमहत्त्वेन Sy.

१३. प्रज्ञायते Sy.

१४. देवानामाह्वाता Sy.

१५. मदयिता Sy.

१६. विकरोत्यन्तरिक्षे Sy.

१७. बीप्तीः Sy.

१८. ०मानं M. ०मानः is suggested for ०मान ।

१९. ओषसिनिः M.
ओषधिभिः is suggested for ओष ओषसिभिः ।

२०. ऊह्यते Λ. वर्धते Sy.

कया नो अग्ने वि वसः सुवृक्तिं कामं स्वधामृणवः शुस्यमानः ।
कदा भवेम पतयः सुदत्र रायो वन्तारो दुष्टरस्य साधोः ॥ ३ ॥

कया[1] । कया[2] स्वधया । अस्माकम् । अग्ने ! त्वम् । स्तुतिम् । प्रतिवससि[3] । तिम्[4] । अन्न[5] । स्तूयमानस्त्वम्[6] । आत्मानं प्रापयसि[7] । कदा[8] वयम् । भवेम । स्वामिनः । सुखाधन[9] ! रायः[10] । सम्भक्तारः[11] । शत्रुभिस्तरितुमशक्यस्य[12] । साधयितुम्[13] [14] ।

प्रप्रायमग्निर्भरतस्य शृण्वे वि यत्सूर्यो न रोचते बृहद्भाः ।
अभि यः पूरुं पृतनासु तस्थौ द्युतानो दैव्यो अतिथिः शुशोच ॥ ४ ॥

प्र प्रायम्[15] । प्रशृणोति[16] । अयम् । अग्निः । मनुष्यस्य[17] स्तुतिम् । विरोचते[18] । यदा[19] । सूर्यः । इव ।

---

१. कया नो M.

२. स्वधया हविषा Sy.

३. ०तिपस० A.
व्याप्नुषे । आच्छादयसि वा Sy.

४. किम् is suggested for तिम्

५. अन्नम् is suggested for अन्न ॥

६. ०स्त्वामा० A.

७. प्राप्नुयाः Sy.

८. कट A.

९. सुखधन ! is suggested for सुखाधन ॥
हे शोभनदान ! अग्ने ! Sy. सुदत्रः कल्याणदानः N.6.14.

१०. धनस्य Sy.

११. सम्भक्तारश्च कदा भवेम ? Sy.

१२. शत्रुभिर्हिंसकस्य Sy.

१३. साधयितुः is suggested for साधयितुम् ॥
समीचीनस्य Sy.

१४. VM. ignores उ ॥ उ च Sy.

१५. अत्यन्तं प्रथितो भवति Sy.
शृणुत आह्वानमिति शेषः । यजमानकृताह्वानं शृणोतीत्यर्थः । पुरुषव्यत्ययः Mah.
प्रकर्षेण महता.. शृणोति वचनम् U.
प्रकर्षेण शृणोतु । आह्वानप्रयोजनं शीघ्रं करोत्वित्यर्थः BB.

१६. प्रसिद्धः Sy.

१७. यजमानस्य मम Sy.
बिभर्ति हवींषि भरतस्तस्य भरतस्य यजमानस्य Mah.
भरतस्य प्रजापतेः U.
यजमानस्य । भरणाद् भरतः । औणादिको ऽतच्प्रत्ययः BB.

१८. रोचते A.
प्रकाशते Sy.
बृहद्यथा तथा रोचते । अत्यन्तं दीप्यते Mah.
अत्यर्थं दीप्यते BB.

१९. योऽग्निः Mah.
कथमेतदध्यवसीयते यथा प्रजापतेः शृणोति वचनमिति..... यत्समिदाधानसमनन्तरमेव U.
यद् योऽग्निः BB.

अत्यन्तम्[1]। भासमान[2]। हितव्यौ[3]। यम्[4]। पूरुं नामासुरम्[5]। सङ्ग्रामेषु। स दीप्यमान[6]। दैव्यः[7]। अतिथिः[8]। प्रजज्वाल[9]।

असन्निित्वे आहवनानि भूरि शुवो विश्वेभिः सुमना अनीकैः।
स्तुतश्चिदग्ने शृण्विषे गृणानः स्वयं वर्धस्व तन्वं सुजात ॥ ५ ॥

असन्निति[10]। भवन्त[11]। एव। त्वयि। हवींषि[12]। बहूनि। भव त्वम्[13]। सर्वे। रश्मिभिः[14]। सुमनाः। स्तोतुः[15]। अग्ने[16]। शृणोषि[17] स्तुतिम्। स्तूयमान। स्वयम्[18]। वर्धय[19]। आत्मीयमङ्गम्[20]। गोहनजननम्[21]।

---

१. हवास० A. भासत इति भा सूर्यवद् भासमानः सन् Mah. महादीप्तिः U. भासनशीलः BB.

२. हितव्य M. अभितष्ठौ is suggested for हितव्यौ ॥ अभिबभूव Sy. सम्मुखं तिष्ठति Mah. अभितस्थौ...एतया समिधाऽऽप्यायितः U. अभितिष्ठति अधितिष्ठत्याक्रामति BB.

३. यः is suggested for यम् ॥ अग्निः Mah. यश्चाग्निः BB.

४. पुरुनामा० A. पूरुं राक्षसम् Mah. पूरुमसुरराक्षसम् U. पूरुमाप्यायमानं शत्रुम्। 'पूरी आप्यायने' औणादिक उप्रत्ययः। पूरुं महान्तमपि शत्रुम् BB.

५. Omitted by A. दीप्यते। 'दीङ् क्षये' धातूनामनेकार्थत्वादत्र दीप्त्यर्थः, लिटि रूपम् Mah. यस्माच्च...दीप्यते। तस्मात्प्रजापतेर्वचनं शृणोति U. दीप्यते। छान्दसो लिट्।...सोऽस्माकमस्त्विति सामर्थ्याल्लभ्यते BB.

६. देवसम्बन्धी Mah., U. अतिथिविशेष्यते—दैव्यो दिवि भवः BB.

७. देवानामतिथिवत्पूज्यः Sy. अतिथिधर्मा जनानाम् U. योऽस्माकमतिथिर्भूत्वा BB.

८. शिवो मङ्गलरूपः Mah. शान्तः U. शिवः कल्याणगमनः BB.

प्र प्रायमग्निर्भरतस्य शृण्वऽइति। प्रजापतिर्वै भरतः स हीदꣳ सर्वं बिभर्ति वि यत्सूर्यो न रोचते बृहद्भा इति वि यत्सूर्य इव रोचते बृहद्भा इत्येतदभि यः पूरुं पृतनासु तस्थाविति पूरुꣳहं नामासुरराक्षसमास तमग्निः पृतनास्वभितष्ठौ दीदाय दैव्यौऽअतिथिः शिवो न इति दीप्यमानो दैवोऽतिथिः शिवो न इत्येतत्स्थितवत्या वसत्यै ह्येनं तत्स्थापयति SB. 6.8.1.14. p. 565. YV. reads दीदाय for द्युतानो and शिव। नः for शुशोच.

This stanza=YV. 12.34.=TS. 2.5.12.4.

९. भवन् M. भवन्ति is suggested for भवन्त १०. हवींषि आहुतयो वा Sy.

११. भवस्त्वं A.

१२. तेजोभिस्तद्विभूतिभिरग्निभिर्वा Sy.

१३. श्रोतुः M. स्तुतः स्तोतः। स्तौतीति स्तुत् Sy.

१४. अग्ने ! is suggested for अग्नेः ॥

१५. शृणु Sy. १६. स्वयमेव Sy.

१७. वर्धयस्व Sy.

१८. स्वां तनुं मम तनुं वा Sy.

१९. शोभनजनन ! is suggested for गोहनजननम्। कल्याणप्रादुर्भाव ! Sy.

२०. VM. ignores चित्।

इदं वचः शतसाः संसहस्रमुदग्रये जनिषीष्ट द्विबर्हाः ।
शं यत्स्तोतृभ्य आपये भवाति द्युमदमीवचातनं रक्षोहा ॥ ६ ॥

इदं वचः । इदम् । वचः । गोशतस्य सम्भक्तृ । तथा सहस्रधनसम्भक्तृ च । अग्नये । उज्जनिषीष्ट । द्वयो. स्थानयो. परिवृढो वसिष्ठः पृथिव्या मनुष्यो भूत्वा वर्तते दिवि देवः । शङ्करम् । यत् । स्तोतृभ्यः । अचये ज्ञातये पुत्रादिकाय । भवति तत्प्रयच्छति । दीप्तिमत् । रोगतनम् रक्षसा हन्तृ ।

नू त्वामग्न ईमहे वसिष्ठा ईशानं सूनो सहसो वसूनाम् ।
इषं स्तोतृभ्यो मघवन्द्भद्र आनड्यूयं पात स्वस्तिभिः सदा नः ॥ ७ ॥

नू त्वामग्ने ।

VII. 9.

अबोधि जार उषसामुपस्थाद्धोता मन्द्रः कवितमः पावकः ।
दधाति केतुमुभयस्य जन्तोर्हव्या देवेषु द्रविणं सुकृत्सु ॥ १ ॥

अबोधि । प्रबुद्धः । उषसो जारः । उषसाम् । उत्सङ्गात् । होता । मन्द्रः । कवितमः । पावकः ।

---

१. स्तोत्रम् Sy.
२. गोशतस्य is suggested for गोगतस्य ॥
३. संभर्तृ M. गवां शतस्य सम्भक्ता Sy.
४. गवां सहस्रेण च संयुतः Sy.
५. उज्जनि० M. उज्जनिषीष्ट is suggested for उज्जनिषिष्ट ॥ उदजीजनत् Sy.
६. ०वृद्धो A. द्वाभ्यां विद्याकर्मभ्यां बृहन् द्वयोः स्थानयोर्द्युलोकयो र्वा Sy. द्विबर्हा द्वयोः स्थानयोः परिवृढः । मध्यमे च स्थान उत्तमे च N. 6.17. इति
७. सुखदम् Sy. ८. वचः Sy.
९. आपये is suggested for अचये ॥
१०. भवेत् Sy.
११. दीप्तिमत् । यशस्करमित्यर्थः Sy.
१२. रोगचातनम् is suggested for रोगतनम् ॥ रोगाणां निवारकम् Sy.
१३. हन्ता A.
१४. The *Pratīka* is supplied by the Editor. The stanza has already been explained. See RV. VII.7.7.
१५. 'अबोधि जारः' इति षड्चं नवमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमाग्नेयम् । 'अबोधि षट्' (KSA. 34.9. p. 24.) इत्यनुक्रान्तम् । प्रातरनुवाकाश्विनशस्त्रयोर्दशसूक्तमध्य उक्तो विनियोगः Sy. १६. ०धिम् Sy.
१७. अबुध्यत Sy.
१८. सर्वेषां प्राणिनां जरयिता Sy.
१९. ०ङ्गान्धोता A. मध्ये Sy.
२०. देवानामाह्वाता Sy.
२१. मदयिता स्तुत्यो वा Sy.
२२. कपित A. प्राज्ञतमः Sy.
२३. पापकः A. शोधकोऽग्निः Sy.

स करोति । प्रज्ञानम् । दैव्यस्य च मानुषस्य च । जन्तोः । हव्यानि च । देवेषु करोति । धनञ्च । यजमानेषु ।

स सुक्रतुर्यो वि दुरः पणीनां पुनानो अर्कं पुरुभोजसं नः ।
होता मन्द्रो विशां दमूनास्तिरस्तमो ददृशे राम्याणाम् ॥ २ ॥

स सुक्रतुः । सः । सुप्रज्ञः । यः । विश्लथयति । द्वाराणि । पणिनाम् । क्षरम् । प्रयच्छन् । अस्मभ्यम् । बहुरक्षणम् । होता । मोदनः । मनुष्याणाम् । दममना । तिरस्कुर्वन् । तमासि । दृश्यते । रात्रीणाम् ।

अमूरः कविरदितिर्विवस्वान्त्सुसंसन्मित्रो अतिथिः शिवो नः ।
चित्रभानुरुषसां भात्यग्रेऽपां गर्भः प्रस्वः आ विवेश ॥ ३ ॥

अमूरः । अमूढः । कविः । अदीनः । परिचरणवान् । शोभनसदस्कः । मित्रः । अतिथिः । शिवः । नः । चित्रदीप्तिः । उषसाम् । अग्रे । विभर्ति । अपाम् । गर्भः । ओषधीः । आविवेश ।

---

१. विदधाति Sy.
२. उभयस्य द्विपदश्च चतुष्पदश्च दैव्यस्य मानुषस्य वा Sy. ३. प्राणिनः Sy.
४. धनं दधाति Sy.
५. अग्निः Sy.
६. सुकर्मा सुप्रज्ञो वा Sy.
७. अपि ग्लथ० A. विवृतवान् Sy.
८. गवां पिधानानि Sy.
९. वणिनां A. पणीनाम् is suggested for पणिनाम् ॥ असुराणाम् Sy.
१०. क्षीरम् is suggested for क्षरन् ॥ अर्कमर्चनीयम् । गवां सङ्घम् Sy.
११. पुनानः शोधयन् । हरन्नित्यर्थः Sy.
१२. बाहु० M. पुरुभोजसं बहुक्षीरम् Sy.
१३. हेता A.
१४. मदयिता स्तुत्यो वा Sy.
१५. जनानां यजमानानां वा Sy.
१६ दमूना M. दान्तमना दममना दानमना वा Sy. १७. तिरः M.
१८. अन्धकारम् Sy.
१९. यद्वा । तमस्तिरो ददृशे । नाशयतीत्यर्थः Sy.
२०. रात्रीणां रमयित्रीणां वा Sy.
२१. अमूरम् A. २२. प्राज्ञः Sy.
२३. अदीनः is suggested for अदीन ॥
२४. दीप्तिमान् Sy.
२५. शोभजन० A. शोभनसदनः शोभनसंवेदनो वा Sy.
२६. प्रमीतेस्त्राता Sy.
२७. सर्वेषामतिथिवत्पूज्यः Sy.
२८. शिवकरो जगतः Sy.
२९. नं A.
३०. मुखे Sy.
३१. सोऽयमपां गर्भः सन् Sy.
३२. ओषधिः A. प्रस्वो जायमाना ओषधीः Sy.

ईळेन्यो[1] वो[2] मनुषो[3] युगेषु[4] समनगा[5] अशुचज्जातवेदाः[6]।
सुसंदृशं[7] भानुना[8] यो विभाति[9] प्रति[10] गावः समिधानं[11] बुधन्त[12] ॥ ४ ॥

ईळेन्यः[1]। ईड्ये[1]। युष्माकम्[2]। मनुष्यस्य यजमानस्य[3]। यागदिवसेषु[4]। सेनाग्रे गन्ता[5]। प्राज्वलत्[6]। जातप्रज्ञः[7]। शोभनसन्दर्शनेन। तेजसा[8]। यः। विभाति तम्[9]। स्तुतिवाचः[10]। समिध्यमानम्[11]। प्रतिबोधयन्तु[12]।

अग्ने[13] याहि[13] दूत्यं[14] मा[15] रिषण्यो[15] देवाँ[16] अच्छा[16] ब्रह्मकृतः[17] गणेन[17]।
सरस्वतीं मरुतो[18] अश्विनापो[19] यक्षि[20] देवान्[21] रत्नधेयाय[22] विश्वान्[21] ॥ ५ ॥

अग्ने याहि[13]। अग्ने![13] याहि[13]। दूत्यम्[14]। मा चाध्वनि[15]। विनष्टो भूः[15]। देवान्[16] प्रति[16]। स्तोत्रकृता[17] सङ्घेन सहर्षीणाम्[17]। सरस्वतीम्। मरुतः[18]। अश्विनौ[19]। अप[19]। यज[20]। रत्नाना दानाय[22]। सर्वान्[21]। देवानिति[21]।

त्वामग्ने समिधानो वसिष्ठो[23] जरूथं[24] हन्यक्षि[25] राये[26] पुरंधिम्[27]।
पुरुणीथा[28] जातवेदो जरस्व[29] यूयं पात स्वस्तिभिः सदा नः ॥ ६ ॥

त्वामग्ने[23]। त्वाम्। अग्ने![24] प्रज्वलयन्[25]। वसिष्ठः[26]। जरूथ[27] रक्षः। हन्तु[28]। यज[29] त्वम्।

---

१ ईडे M. ईड्यः is suggested for ईड्ये ॥ स्तुत्यः Sy. २. हे अग्ने! वस्त्वम्। अत्र विभक्तिवचनव्यत्ययः Sy. ३ यागकालेषु सर्वेष्वपि दिवसेषु वा Sy. ४. अतः परं परोक्षस्तुतिः Sy. ५. युद्धेषु सङ्गन्ता सन् Sy. ६. प्रज्वालं M. दीप्यते Sy. ७. जातधनः Sy. ८. अग्निः Sy. ९. स्तुतयः Sy. १०. ०मिध्यमा० M. ११. प्रतिबोधयन्ति Sy. १२. वैश्वदेवे पशौ 'अग्ने याहि' इति हविषो याज्या। सूत्रितञ्च—'अग्ने याहि वूत्यं मा रिषण्य इन्द्रं नरो नेमधिता हवन्त इति तिस्रः' (ĀSS 3.7.) इति Sy. १३. Sy. construes अच्छ with याहि and explains them together as अभिगच्छ. १४. वूत्य A. दूतस्य कर्म हविर्वहनादि Sy. १५. मा चा० A. १६. हिंसीः Sy. १७. देवात् Sy. १८. ब्रह्मकृतोऽस्मानस्मदीयांश्च तव स्तोतॄन् Sy. १९. अश्विना A. २०. प A. २१. योज A. २२. रत्नानं A. अस्मभ्यं रत्नदानाय Sy. २३. वसिष्ठस्यार्षम् Dur., SKN. २४. हे अग्ने! Sy. हे भगवन्नग्ने! Dur. २५. ०यत् A. सन्दीपयन् Dur., SKN. २६. ऋषिः Sy. वसिष्ठो नामर्षिः SKN. २७. परुषभाषिणं जरणीयं वा रक्षोगणम् Sy. एवमत्र जरतेः स्तुत्यर्थस्य शब्दसारूप्यादर्थाविरोधाच्च 'जरूथं स्तोत्रम्' इत्युपपद्यते Dur. आत्मन एवायं परोक्षरूपेण जरूथं स्तोत्रम् SKN. जरूथं गरूथं गृणातेः N. 6.17. २८. जहि Sy. गमयंस्त्वां प्रति 'हन्ति सेधति' इति गतिकर्मसु पठितम् Ngh. (2. 14.) Dur. हन्तेरन्तर्णीतण्यर्थस्य लङि अडभावश्छान्दसत्वात्। अहन् गमितवान् गमयति वा स्तुतवान् स्तौति वेत्यर्थः SKN. २९. यजा त्वं A. यजति Dur. एतज्ज्ञात्वा... यज SKN.

धनाय[1] । बहुप्रज्ञ[2] देवगणम् । बहुनयनानि रक्षांसि । जातवेद[4] ! जारय ।

VII. 10.

उषो न जारः पृथु पाजो अश्रेद्विद्युतद्दीद्यच्छोशुचानः ।
वृषा हरिः शुचिरा भाति भासा धियो हिन्वान उशतीरजीगः ॥ १ ॥

उषो न[6] । आदित्य[7] । इव[8] । पृथु[9] । बलम्[10] । श्रयति[11] । द्योतमान[12] । दीप्यमान[13] । प्रज्वलत्[14] । वृषा[15] । हरणशील[16] । शुचि[17] । आभाति[18] । तेजसा[19] । कर्माणि । प्रेरयन्[20] । कामयमाना प्रजास्तमसा तिरोहिता । उज्जगारेति[21] ।

---

१. धनवते यजमानाय Sy. धनप्राप्त्यर्थम् Dur.

२. बहुधियं देवगणम् Sy. बहुकर्मतमं धनसम्बन्धाद्वा बहुदातृतममिति, स्यात् । यस्त्वं वसिष्ठेनैवमिज्यसे तं त्वा वयमपि यजाम एव Dur. बहुकर्माणं बहुप्रज्ञं वा । कम् ? सामर्थ्यादात्मानं देवगणं वा SKN. पुरन्धिर्बहुधीः N. 6. 73.

३. पुरुनीथेन बहुना स्तोत्रेण यद्वा पुरुणीथानेकमार्गाणि Sy.
स त्वं हे पुरुणीथा ! बहुस्तुत ! Dur.
स्तुतिः, ततस्तृतीयाया अलुक् । बह्वृचा च स्तुत्या SKN.

४. हे जातवेदः ! अग्ने ! Sy. जातवेदोऽस्माभिरिज्यमानः Dur. जातधन ! जातप्रज्ञ ! वा SKN.

५. स्तुहि रक्षांसि जरयेत्यर्थः Sy. जुषस्वैतद्धविरस्मत्प्रत्तम् Dur. स्तूयस्व स्तुहि देवान् SKN.

६. किञ्च यूयमस्मान् पात रक्षत । एकस्यैव पूजनार्थे बहुवचनम् । स्वस्तिभिः स्वस्त्ययनैराशीःप्रयोगैः पात नः सदा नित्यमेवेत्यर्थः Dur. किञ्च यूयं पात । एकस्यैव पूजनार्थे बहुवचनम् । पाहि स्वस्तिभिरविनाशैः सर्वदा सर्वकालं नोऽस्मान् SKN., N. 6.17.; SKN. II. 4. 55.

७. 'उषो न जारः' इति पञ्चर्चं दशमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमाग्नेयम् । तथा चानुक्रान्तम्—'उषो न पञ्च' (KSA. 34.10. p. 24.) इति । प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः Sy.

८. VM seems to explain उषः and जारः together by आदित्यः ॥ Sy. also explains the two words together as उषसो जारः सूर्यः ।

९. तद्वत् Sy.

१०. प्रथु A. विस्तीर्णम् Sy.

११. तेजः Sy.

१२ ०मान A.

१३ ०लन् is suggested for ०लत् ॥ किं च दविद्युतत्, दीद्यत्, शोशुचान इति त्रयोऽपि शब्दा यद्यपि दीप्तिकर्माणस्तथापि दीप्तेर्भूयस्त्वज्ञापनाय प्रयुक्ता इति न पुनरुक्तिः । अत्यन्तं दीप्यमान इत्यर्थः Sy.

१४ कामानां वर्षिता Sy.

१५ हविषां प्रेरकः Sy.

१६. शुद्धिकृत् Sy.

१७. राभाति A.
प्रकाशते Sy.

१८. दीप्त्या Sy.

१९. ०माना A.

२०. जागरयति । तमसा तिरोहिताः प्रजा उद्गिरति वा Sy.

स्व१र्ण वस्तोरुषसामरोचि यज्ञं तन्वाना उशिजो न मन्म ।
अग्निर्जन्मानि देव आ वि विद्वान्द्रवद्दूतो देवयावा वनिष्ठः ॥ २ ॥

स्वर्ण वस्तोः । आदित्य । व । अहि । उषसा गमनेऽग्नि. । दीप्यते । यज्ञम् । कुर्वन्तः । ऋत्विजः । इवाग्निरपि । स्तोत्रमुच्चार्यति । अग्निः । देवः । जातानि भूतानि । जानन् । विविधम् । आद्रवति । दूतः । देवान् प्रति गन्ता । दानृतम ।

अच्छा गिरो मतयो देवयन्तीरग्निं यन्ति द्रविणं भिक्षमाणाः ।
सुसंदृशं सुप्रतीकं स्वञ्चं हव्यवाहमरतिं मानुषाणाम् ॥ ३ ॥

अच्छा गिरः । स्तुतय. । मतयश्च । देवानिच्छन्त्यो यन्तम् । अग्निं प्रथमम् । अच्छा यन्ति । धनम् । भिक्षमाणाः । शोभनसन्दर्शनम् । शोभनाङ्गम् । शोभनगमनम् । हव्यवाहम् । मानुषाणाम् । देवान् प्रति गन्तारम् ।

इन्द्रं नो अग्ने वसुभिः सजोषा रुद्रं रुद्रेभिरा वहा बृहन्तम् ।
आदित्येभिरदितिं विश्वजन्यां बृहस्पतिमृक्वभिर्विश्ववारम् ॥ ४ ॥

इन्द्रं नः । इन्द्रम् । न । अग्ने । वसुभि । सङ्गतस्त्वम् । आवह । तञ्च । महान्तम् । रुद्रैः । आदित्यैश्च सह । अदितिम् । विश्वजनहिताम् । बृहस्पतिञ्च । स्तुतिमद्भिरङ्गिरोभि. । विश्ववैवरणीयमिति ।

---

१. स्थाणंवस्तो A.
२. स्वरादित्यो भवति । सु अरणः सु ईरणः । स्वृतो रसान् । स्वृतो भासं ज्योतिषाम् । स्वृतो भासेति वा N. 2.14.
३. इव is suggested for व ।
४. अह्नि is suggested for अहि ॥ अहनि Sy. वस्तोर्द्युरित्यहर्नामनी Ngh. 1.9.
५. ०षसां ग० is suggested for षसा ग० ॥ उषसामग्रे Sy.
६. ०नेनिः A. ७. विस्तारयन्तः Sy.
८. अपि च । नेति सम्प्रत्यर्थे Sy.
९. ०यन्ति A. मन्मानि मननीयानि स्तोत्राणि पठन्तीतिशेषः Sy. १०. दूतो देवानाम् Sy.
११. देवात् A. देवान् प्रति गच्छन् Sy.
१२. वाचः Sy. १३. स्तुतिरूपाः Sy.
१४. निच्छ is written twice in A.
१५. न्ति A. अभिगच्छन्ति Sy.
१६. याचमानाः Sy.
१७. कल्याणसन्दर्शनम् Sy.
१८. ०नाग A. सुरूपं शोभनाङ्गं वा Sy.
१९. सुष्ठु गच्छन्तम् Sy २०. हव्यानां वोढारम् Sy. २१. मनुष्यान् M.
२२. अरतिं स्वामिनम् Sy.
२३. अस्मदर्थम् Sy. २४. देवैः Sy.
२५. स्त्व is missing in A. M.
२६. ०वहन् A.
२७. VM. seems to explain रुद्रम् by तञ्च ।
२८. रुद्रैः A. रुद्रैर्देवैः सङ्गतः Sy.
२९. आदित्यैर्देवैः सङ्गतः Sy.
३०. विश्वजन० A. ३१. ऋक्वभिः स्तुत्यैः Sy.
३२. विश्वैः सम्भजनीयम् Sy.

मन्द्रं होतारमुशिजो यविष्ठमग्निं विशं ईळते अध्वरेषु ।
स हि क्षपावाँ अभवद्रयीणामतन्द्रो दूतो यजथाय देवान् ॥ ५ ॥

मन्द्र होतारम् । मन्द्रम् । होतारम् । ऋत्विज । युवतमम् । अग्निम् । मनुष्या । स्तुवन्ति । यज्ञेषु । स । हि । रात्रिमान् । भवति । धनाना दाता । द्र । ऽतो । देवान् । युष्णु ।

VII 11

महाँ असि ध्वरस्य प्रकेतो न ऋते त्वदमृता मादयन्ते ।
आ विश्वेभिः सरथं याहि देवैर्न्यग्ने होता प्रथमः सदेह ॥ १ ॥

महा असि । महास्त्वम् । असि । अध्वरस्य । प्रज्ञापयिता । न । ऋते । त्वत्त । देवा । माद्यन्ति । आयाहि । सरथम् । विश्वै । देवै । निषीद । अग्न ! होता । स मुख्यस्त्वम् । बर्हिष्यस्मिन् ।

त्वामीळते अजिरं दूत्याय हविष्मन्तः सदमिन्मानुषासः ।
यस्य देवैरासदो बर्हिरग्नेऽहान्यस्मै सुदिना भवन्ति ॥ २ ॥

त्वामीळते । त्वाम् । स्तुवन्ति । गमनशीलम् । दूत्याय । सहृतहविष्का । सदा । इव । मनुष्या ।

---

१. Omitted in M २. स्तुत्यम् Sy.
३. आह्वातारम् Sy. ४. उशिजः कामयमानः Sy. ५. अग्नि स्म A. ६. यागेषु Sy
७. अग्निः Sy ८. यस्मात् कारणात् Sy
९. रात्रौ खल्वग्नयेऽग्निहोत्रं हूयते Sy.
१०. तथा च श्रूयते—'यस्माद्वृतोऽभवत्तस्माद्दिश-स्तमध्वर इळते' इति Sy
११. रयीणा (सूर्यस्य) रयिमतां हविष्मता यजमानानाम् Sy १२. Omitted in M. अतन्द्रः is suggested for द्रः ॥ तन्द्रारहितः Sy १३. Omitted in M. दूतः is suggested for ऽतो ।
१४. Omitted in M. यष्टुम् is suggested for युष्णु ।
१५. 'महाँ असि' इति पञ्चर्चमेकादशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमाग्नेयम् । 'महान्' (KSA. 34.11 p. 24.) इत्यनुक्रान्तम् । प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोग. Sy
१६. अमध्वर० A १७. प्रज्ञापन सन् Sy.
१८. विना Sy १९. त्वया Sy
२०. आधाहि A. २१. सरथ यथा भवति Sy.
२२. Omitted in A. २३. अग्नेः A.
२४. आह्वाता सन् Sy २५. आस्तीर्णे बर्हिषि Sy.
२६. वाजपये बार्हस्पत्यचरोः स्विष्टकृतोऽनुवाक्या । सूत्रितञ्च—'त्वामीळते अजिर दूत्यायाग्नि सुदीति सुदृश गृणन्त.' (ĀSS 9 9) इति Sy वसिष्ठस्त्रिष्टुभाग्निं तुष्टाव । प्रातरनुवाके विनियुक्ता । हे अग्ने ! DDN.
२७. याचन्ते Sy. २८. प्रगामिनम् ॥ Sy अजिरं क्षिप्रम् DDN अजिरं भुरण्युरिति क्षिप्रनामनी Ngh. 2.15. २९. घृतकर्मणे हविर्वहनाय Sy. ३०. सहूत० A यजमानाः Sy.
३१. एव is suggested for एव ।
३२. मानुषाः Sy.

यस्य त्व यजमानस्य[1]। बर्हिः। देवैः[2] सह। आसद[3]। अहानि। अस्मै[4]। शोभनाहानि। भवन्ति[5]।[6]

त्रिश्चिदुक्तोः प्र चिकितुर्वसूनि त्वे अन्तर्दाशुषे मर्त्याय।
मनुष्वदग्न इह यक्षि देवान्भवा नो दूतो अभिशस्तिपावा॥ ३॥

त्रिश्चित्[7]। त्रिः[8]। चित्[9]। अग्नः[10]। प्रवेदयन्ति। हवीषि सवनेषु[11]। त्वयि[12]। यजमानायर्त्विजे[13]। प्रयच्छते[14]। मनोरिव[15]। अग्ने[16]। इहास्मदीये यज्ञे[17]। यज[18]। देवान्[19]। भवा[20]। नः[21]। दूत[22]। अभिशस्तीनां[23] रक्षिता[24]।

अग्निरीशे बृहतो अध्वरस्याग्निर्विश्वस्य हविषः कृतस्य।
क्रतुं ह्यस्य वसवो जुषन्ताथा देवा दधिरे हव्यवाहम्॥ ४॥

अग्निरीशे[25]। अग्नि[26]। ईशे[27]। महत[28]। यज्ञस्य[29]। अग्नि[30]। विश्वस्य[31]। हविषः[32]। सम्पादितस्य[33]। प्रज्ञानम्[34]। हि। अस्य। वसव[35]। सेवन्ते। अथैनम्[36]। देवा[37]। कुर्वन्ति[38]। हविषा पोतारम्[39]।

उत्तरा निगदसिद्धेति--

---

१. मान is written twice in A. किमर्थमित्यत आह यस्य हविष्मतः DDN.
. देवास्सभ M देवैः सार्धम् Sv, DDN.
३. त्वमधितिष्ठसि Sv. असद इति यच्छब्दाश्रिधातोभावः 'निपातैर्यद्यदिहन्तकुविन्नेच्चेच्चण्' Pa. 8.1.30. DDN.
४. हविष्मते Sv. हविष्मते यजमानाय, अयष्टुस्तद्व्यक्तिरिक्तकर्म कुर्वतः सदा दुर्दिनं भवतीत्यवगन्तव्यम्। 'स्वाद्मानं ब्राह्मः सुदिनत्वमह्नाम्' (RV. II.21.6.) इति DDN.
५. शोभनदिनानि Sv. 'सुपां सुलुक्' (Pa. VII.1.39.) इति डादेशः DDN.
६. भवति A.
७. VM. ignores अग्ने।
८. हे अग्ने! Sy.
. त्रिवारम्। त्रिषु सवनेषु। यद्वा.. त्रिस्त्रीनग्निमश्वमजं च त्वय्यन्तर्निहितानि प्र चिकितुः। अधिदधित्यर्थः Sy.
१०. अग्नं M. अह्नः is suggested for अग्नः॥ यद्यप्यक्तुरिति रात्रिनाम तथाप्यत्राज्यन्ते व्यज्यन्ते रूपादीन्यस्मिन्नित्यह्नो नाम। यद्वा...अह्नि Sy. ११. यथि A. यदि M.
१२. ०मानर्त्विजः A. M. मनुष्याय तदर्थमित्यर्थः Sy १३. हविषां प्रदात्रे Sy.
१४. अग्ने! is suggested for अह्नः।
१५. यज्ञे Omitted in A.
१६. भव is suggested for भव।
१७. अस्माकम् Sv.
१८. ०स्तीनां (म्नां) र० A. ०स्तिम्नां र० M. अभिशस्तिभ्यो रक्षिता is suggested. अभिशस्तेरभिशंसकात् शात्रवात् पावा रक्षिता Sv.
१९. VM. ignores अन्तः॥ अन्तर्मध्ये Sy.
२०. ईष्टे Sy.
२१. कौटिल्यरहितस्य यज्ञस्य Sy.
२२. सर्वस्य Sy.
२३. संस्कृतस्य Sy.
२४. कर्म Sy. २५. देवाः Sy. २६. अपि च Sy.
२७. चक्रिर इत्यर्थः Sy.
२८. पोक्त्वारं A. वोढारम् is suggested for पोतारम्॥ हव्यानां वोढारम् Sy.
२९. उक्तरागद० A.

अग्ने वह हविरद्याय देवानिन्द्रज्येष्ठास इह मादयन्ताम् ।
इमं यज्ञं दिवि देवेषु धेहि यूयं पात स्वस्तिभिः सदा नः ॥ ५ ॥

[अग्ने वह ।]

VII. 12.

अगन्म महा नमसा यविष्ठं यो दीदाय समिद्धः स्वे दुरोणे ।
चित्रभानुं रोदसी अन्तरुर्वी स्वाहुतं विश्वतः प्रत्यञ्चम् ॥ १ ॥

अगन्म । गच्छाम । महता । नमस्कारेण । युवतमम् । यः । दीप्यते । काष्ठै समिध्यमान आहवनीये । चित्रभानुम् । द्यावापृथिव्यौ । विस्तीर्णयो । अन्तर वर्तमान । स्वाहुतम् । सर्वत एव । अभिमुख समिद्धो ह्यग्नि सर्वतो दीप्तो भवति भयाऽऽवर्जितः ?

स महा विश्वा दुरितानि साह्वानग्निः ष्टवे दम आ जातवेदाः ।
स नो रक्षिषदुरितादवद्यादस्मान्गृणत उत नो मघोनः ॥ २ ॥

स महा । सः । महत्त्वेन । विश्वानि । दुरितानि । सहमानः । अग्नि । स्तूयते । यज्ञे ।

---

१. The *pratīka* is supplied by the Editor. हे अग्ने ? हविरद्याय हविषां भक्षणाय देवानावह । किमर्थम् ? इत्यत आह—इहास्मिन् यज्ञ इन्द्रज्येष्ठास इन्द्रप्रमुखा देवा मादयन्ताम् । इमं यज्ञमिदं यष्टव्यं हविर्दिवि स्थितेषु देवेषु धेहि । निधेहि । देवान्वेह नयेवं हविर्वा देवेषु नयेति भावः । अन्तिमः पादो व्याख्यातचरः Sy.

२. 'अगन्म महा' इति तृचात्मकं द्वादशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमाग्नेयम् । तथा चानुक्रान्तम्—'अगन्म तृचम्' (KSA. 34.12. p. 24.) इति । प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः । व्यूळ्हे दशरात्रे नवमेऽहन्नीदं सूक्तमाज्यशस्त्रम् । सूत्रितञ्च—'तृतीयस्यागन्म महेत्याज्यम्' (ĀSS. 8.11.) इति Sy. ३. वयमुपगच्छाम Sy. ४. तमिमम् Sy. ५. अग्निः Sy. ६. दीप्यते. A. ७ VM. seems to explain स्वे and दुरोणे together as आवहनीये । स्वे स्थाने आहवनीये Sy. ८. चित्रज्वालम् Sy. ९. ०ब्यौप्तिस्तोर्ण० A. १० अन्तरर्वक्तमान A. ०मानम् is suggested for ०मानः । ०अन्तर्मध्येऽन्तरिक्षे Sy. ११. सुष्ठ्वाहुतिभिर्हुतं सन्तम् Sy. १२. प्रतिगच्छन्तम् Sy. १३. सर्वतो A. १४ भा is the synonym of splendour or light. Thus भयाऽऽवर्जितः means a source of light. १५ मग्ना A. १६. योऽग्निः Sy. १७. अभिभवन् Sy. १८. अस्माभिः स्तूयते Sy. १९. यज्ञगृहे Sy.

जातप्रज्ञः[1]। सः। अस्मान्। रक्षतु। दुरितात्[2]। अवद्याच्च[3] निन्दितु[4]ः ते देवा हि[5], अस्मान्[6]। स्तुवत[7]ः। अपि च। अस्मान्[8]। हविष्मत[9]ः इति[10]।

त्वं वरुण उत मित्रो अग्ने त्वां वर्धन्ति मतिभिर्वसिष्ठाः।
त्वे वसु सुषणनानि सन्तु यूयं पात स्वस्तिभिः सदा नः ॥ ३ ॥

त्वं वरुणः। त्वम्। अग्ने! वरुण[11]ः। अपि च। मित्रश्च[12] भवसि। त्वाम्। वर्धयन्ति। स्तुतिभि। वसिष्ठाः। त्वयि स्थितानि[13]। धनानि। मुदानानि[14]। सन्तु वसिष्ठेष्विति।

VII. 13.

प्राग्नये विश्वशुचे धियंधेऽसुरघ्ने मन्म धीतिं भरध्वम्।
भरे हविर्न बर्हिषि प्रीणानो वैश्वानराय यतये मतीनाम् ॥ १ ॥

प्राग्नये[15]। प्रभरध्वम्[16]। अग्ने[17]। विश्वस्य शोचयित्रे[18]। कर्मणा धारयित्रे[19]। असुराणा हन्त्रे[20]। स्तुतिम्। कर्म चेत्युक्त्वा तथा करोमीति वदति। वहामि[21]। हवि[22]। इदानीम्[23]। यज्ञे[24]। प्रीयमाणः। वैश्वानराय[25]। नियन्त्रे[26]। स्तुतीनाम्[27]।

---

१ जातधनो जातप्रज्ञो वा Sy.
२. पापात् Sy.
३. निन्दिताच्च कर्मणः Sy.
४. ह A. ५. असां A.
६. स्तुवतोऽपि रक्षिषत् Sy.
७. अस्मात् A. ८. VM. ignores अपि.
९. वरुणं A.
१०. जगतः प्रमीतेस्त्रातासि Sy.
११. विद्यमानानि Sy.
१२. सुधनानि M. सुसम्भजनानि सन्तु। स्पष्टमन्यत् Sy.
१३. 'प्राग्नये' इति तृचं त्रयोदशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वैश्वानराग्निदेवताकम्। तथा चानुक्रान्तम्–'प्राग्नये वैश्वानरीयम्' (KSA 34.13. p. 24.) इति। विनियोगो लैङ्गिकः।
१४. हे सखायः! Sy.
१५. प्रहर० A.
१६. अग्नेः A. अग्नये is suggested for अग्ने ॥
१७. विश्वं यो दीपयति तस्मै Sy.
१८. धियां कर्मणां यो धाता तस्मै Sy.
१९. असुराणां यो हन्ता तस्मै Sy.
२० मननीयं स्तोत्रम् Sy.
२१. हामी A. अहं भरामि यद्वा सम्भरामि Sy.
२२. इव। यद्वा नेति सम्प्रत्यर्थे Sy.
२३. यज्ञ A.
२४. प्रय० A. स्तुतिं प्रीयमाणः यद्वा प्रीणयन् Sy.
२५ विश्वनरहितायाग्निविशेषाय Sy.
२६. दात्रे Sy.
२७. अभिमतानां कामानाम् Sy.

त्वमग्ने शोचिषा शोशुचान आ रोदसी अपृणा जायमानः ।
त्वं देवाँ अभिशस्तेरमुञ्चो वैश्वानर जातवेदो महित्वा ॥ २ ॥

त्वमग्ने । त्वम् । अग्ने । ज्वालया । ज्वलन् । आपूरयसि । द्यावापृथिव्यौ । प्रातरादित्यात्मना जायमान । त्वम् । दे । अस्मच्छत्रूणाममुराणामभिशस्तेश्च । मुञ्चसि । वैश्वानर । जातवद । महत्त्वेन ।

जातो यदग्ने भुवना व्यख्यः पशून्न गोपा इर्यः परिज्मा ।
वैश्वानर ब्रह्मणे विन्द गातुं यूयं पात स्वस्तिभिः सदा नः ॥ ३ ॥

जातो यदग्ने । यदा । त्वमग्ने । प्रादुर्भूत । भूतादि । विविध पश्यति । पशून् । इव । गोपाल । स्वामी । परितो गच्छस्तदानीम् । वैश्वानर । स्तोत्राय चास्माकम् । लभस्व । गमनमिति ।

---

१ दीप्त्या Sy, BB

२. दीप्यमानः Sy शुभं दीप्यमानः BB

३. आसि A. आपूरयः Sy शोचिषा, आपालयसि वा 'पॄ पालनपूरणयोः' BB

४. ०थिव्योः A

५. प्राकारा० A अत एव.. जायमान एव BB

६. दे A. देवान् is suggested for दे ॥ ऋत्विजः BB

७. अस्म is omitted in A.

८. अभिशंसकाच्छत्रोः Sy पापात् 'शंस स्तुतौ' अभिपूर्वोऽयं वधकर्मा तंते, क्तिनि... स त्वमभिशस्तेर्मुञ्चेति BB

९. मञ्चसि A अमोचयः Sy

१०. अपि च जातप्रज्ञ ! जातधन ! वा Sy जातानां वेदितः ! BB.

११. माहात्म्येन । तृतीयाया आकारादेशः । यद्वा— महिम्नो मकारनकारयोस्तकारवकारौ वादेशौ भवतः BB.

This stanza=TS. 1.5.11.2.

१२. यस्मादेवं तस्मात् Sy.

१३ सूर्यात्मना जातः Sy.
जातमात्र एव BB.

१४ भूतानि is suggested for भूतादि ॥ भुवनानि भूतजातानि वाँल्लोकान् Sy

१५ पश्यसि is suggested for पश्यति ॥ रक्षार्थं पश्यसि विशेषेण पश्यसि BB

१६ पशून् BB

१७ गोपालः is suggested for गोपाल ॥ यथा गवां पालकः पशून् पश्यति तद्वत् Sy गवां पालयिता BB.

१८ स्वामी प्रेरयन् वा Sy इराऽन्न हविरात्मकं तत्र साधुस्तवर्हो वा BB

९ परितो is suggested for परतो ॥ परितो गन्ता सन् Sy सर्वतो गन्ता । निपातोऽयं मनिन् पत्वयान्तः BB.

२० ब्रह्म स्तोत्रं तदर्थम् । यद्वा ब्रह्मणे ब्राह्मणार्थम् Sy. हविरात्मनेऽन्नाय यागात्मने वा परिवृढाय कर्मणे BB

२१. हविः प्रप्तुं मार्गानाप्नुहि । पुनःपुनर्जातेष्टिं प्रवर्तयेति भावः BB

२२. गतिं फलप्राप्तिम्, येन ब्रह्मगोपब्राह्मिर्गच्छन्ति तं गातुं विन्देत्यर्थः Sy. मार्गम् BB.

२३ स्पष्टमन्यत् Sy. युष्माकमेवार्थे सदा नोऽस्मान् यूयं पात रक्षत स्वस्तिभिरविनाशैः । अविनाशान् प्रापय्यास्मान्पातेति । पूजार्थमेकस्मिन् बहुवचनम् BB.

This stanza=TS. 1.5.11. 2.

VII. 14.

समिधा जातवेदसे देवायं देवहूतिभिः ।
हविर्भिः शुक्रशोचिषे नमस्विनो वयं दाशेमाग्नये ॥ १ ॥

समिधा । समिधा । देवानामाह्वानैश्च सहाग्निमावह सोममावहेत्याह्वानादि देवानाम् । जातवेदसे । देवा । हविर्भिः । दीप्ततेजसे । नमस्कारयुक्ताः । वयम् । दान कुर्मः । अग्नये ।

वयं ते अग्ने समिधा विधेम वयं दाशेम सुष्टुती यजत्र ।
वयं घृतेनाध्वरस्य होतर्वयं देव हविषा भद्रशोचे ॥ २ ॥

वयं ते । वयम् । तुभ्यम् । अग्ने ! समिधा । परिचरण कुर्मः । वय हवीषि च । दाशेम । शोभनया स्तुत्या । यष्टव्या ! वयम् । घृतेन । अध्वरस्य । धात । वयम् । देव ! हविषा । भद्रदीप्ते !

आ नो देवेभिरुपं देवहूतिमग्ने याहि वषट्कृतिं जुषाणः ।
तुभ्यं देवाय दाशतः स्याम यूयं पात स्वस्तिभिः सदा नः ॥ ३ ॥

आ नो देवेभिः । उभायाहि । देवै सह । अस्माकम् । यज्ञम् । अग्ने ! वषट्कारम् । सेवमानः । तुभ्यम् । देवाय वयम् । ददत । स्याम ।

---

१. 'समिधा जातवेदसे' इति तृचं चतुर्दशं सूक्तं वसिष्ठस्यार्षमाग्नेयम् । आद्या बृहती द्वितीयातृतीये त्रिष्टुभौ । तथा चानुक्रम्यते—'समिधा बृहत्याद्यि' (KSA. 34.14. p. 24.) इति । विनियोगो लैङ्गिकः Sy.
२. देवस्तुतिभिः Sy.
३. ०ह्वारि A. ०ह्वानादिभिर्देवानाम् is suggested for ह्वानादिदेवानाम् ।
४. जातवेदसं जातप्रज्ञम् Sy.
५. देवाय is suggested for देवा ॥ स्तुत्यमग्निम् Sy. ६. हविभिः A.
७. शुक्रशोचिषं शुभ्रदीप्तिम् Sy.
८. हविष्मतः Sy. ९. वसिष्ठाः Sy.
१०. परिचरेम Sy.
११. अत्र दाशतियोगात्कर्मणि चतुर्थी । प्रायेण सर्वत्र दाशतियोगे चतुर्थी दृश्यते Sy.
१२. वसिष्ठाः Sy. १३. त्वाम् Sy.
१४. त्वां परिचरेम Sy. १५. गोहनाया A.
१६. यष्टव्य is suggested for यष्टव्य ॥ हे यष्टव्य ! अग्ने ! Sy.
१७. घातः A. होतः is suggested for धातः ॥
१८. देवा A. द्योतमान ! अग्ने ! Sy.
१९. हे कल्याणज्वाल ! Sy.
२०. उपायाहि is suggested for उभायाहि A. उभयाभिः M.
२१. देवैः सार्धम् Sy. २२. स्तोत्रं यज्ञं वा Sy.
२३. ०कार A. हविः Sy.
२४. द्योतमानाय Sy. २५. त्रं M.
२६. ददत A. परिचरन्तः Sy.
२७. भवेम Sy.
२८. सिद्धमन्यत् Sy.

VII. 15.

उपसद्याय मीळ्हुष आस्ये जुहुता हविः । यो नो नेदिष्ठमाप्यम् ॥ १ ॥

उपसद्याय[1] । समाश्रयणीयाय[2] । कामाना दोग्ध्रे[3] । प्रियार्थ तस्यास्ये[4] । जुहुत । हविः[5] । यः[6] । अस्माकम् । अन्तिकतमम्[7] । ज्ञातेय भवति[8] ।

यः पञ्च चषणीरभि निषसाद दमेदमे । कविर्गृहपतिर्युवा ॥ २ ॥

[यः पञ्च ।][9] यः[10] । पञ्च । जनान्[11] । अभिनिषसाद[12] । गृहेगृहे[13] । कविः[14] । गृहपतिः[15] । युवा[16] ।

स नो वेदो अमात्यमग्नी रक्षतु विश्वतः । उतास्मान् पात्वंहसः ॥ ३ ॥

स नो वेदः[17] । सः[18] । अस्माकम् । धनम्[19] । सह भवम[20] । अग्नि । रक्षतु । सर्वतः[21] । अपि च । अस्मान्[22] । रक्षतु[23] । रक्षसः ।

---

१. 'उपासद्याय' इति पञ्चदशर्चं पञ्चदश सूक्तं वसिष्ठस्यार्षं गायत्रमाग्नेयम् । तथा चानुक्रान्तम्--'उपसद्याय पञ्चोना गायत्रम्' (KSA. 34.15. p. 24.) इति प्रातरनुवाकआग्नेये क्रतौ गायत्रे छन्दस्याश्विनशस्त्रे चेदं सूक्तम् । सूत्रितञ्च--'उपसद्याय त्वमग्ने यज्ञानामिति तिस्र उत्तमा उद्धरेत्' (ĀŚS. 4.13.) इति । उपसदि पोर्वाह्णिक्यां 'उपसद्याय' इत्याद्यास्तिस्र ऋचः सामिधेन्यः । सूत्र्यते च--'उपसद्याय मीळ्हुष इति तिस्र एकैकां त्रिरनवानम्' (ĀŚS. 4.8.) इति । पवित्रेष्टयां 'अग्नो रक्षांसि' इत्येषा प्रथमाज्यभागानुवाक्या । सूत्रितञ्च--'पावकवतावाज्यभागावग्नो रक्षांसि सेधति' (ĀŚS. 2.12.) इति । अन्वारम्भणीयायामग्नेर्भगिनो याज्या । सूत्रितञ्च--'आ सत्य सवितुर्यथा सनो राधांस्या भर' (ĀŚS. 2.8.) इति । स्वस्त्ययन्यामिष्टौ "अग्ने रक्षा णः" इति प्रथमाज्यभागानुवाक्या । सूत्रितञ्च--'स्वस्त्ययन्यां रक्षितवन्तावग्ने रक्षा णो अंहसः' (ĀŚS. 2.10.) इति Sy.

२. हे अध्वर्यवः ! Sy.

३. उपसदनीयाय Sy.

४. धत्रें A. कामानां वर्षित्रेऽन्नय तत्प्रीत्यर्थम् Sy.

५ तस्यैव मुखे Sy.

६. अग्निः Sy.

७. अन्तिकतम A. आसन्नतमम् Sy.

८ आसन्नतमो बन्धुर्भवतीत्यर्थः । आप्यमिति स्वार्थिकस्तद्धितः Sy.

९. The *pratīka* is supplied by the Editor. १०. अग्निः Sy.

११. मनुष्यान् Sy.

१२. अभिमुखं निषीदति । उत्तरया वाक्यपरिसमाप्तिः Sy.

१३. ग्रहे ग्रहे A.

१४. प्राज्ञः Sy.

१५. गृहाणां पालयिता Sy.

१६. युवा is suggested for युवां ॥ नित्यतरुणः सन् Sy. १७. स वेद A. M.

१८. सोऽग्निः Sy.

१९. अन्तिके भवम्, सह भूतं वा Sy.

२०. सर्वतो बाधकात् Sy.

२१. अस्मात् A. वसिष्ठान् Sy.

२२. पापात् Sy.

नवं नु स्तोममग्नये दिवः श्येनाय जीजनम् । वस्वः कुविद्वनाति नः ॥ ४ ॥

नवं नु । नवम् । क्षिप्रम् । स्तोमम् । अग्ने । द्युलोकस्य । श्येनभूताय । जनयामि । स ह्यस्मभ्यम् । बहु । धनम् । प्रयच्छति ।

स्पार्हा यस्य श्रियो दृशे रयिर्वीरवतो यथा । अग्ने यज्ञस्य शोचतः ॥ ५ ॥

स्पार्हाः । स्पृहणीयाः । यस्य । श्रियः । दर्शनाय भवन्ति । यथा । पुत्रवतः । रयिर्दर्शनीयो भवति । यज्ञस्य । अग्ने आहवनीये । दीप्यमानस्य ।

सेमां वेतु वषट्कृतिमग्निर्जुषत नो गिरः । यजिष्ठो हव्यवाहनः ॥ ६ ॥

सेमाम् । सः । इमम् । वषट्कारम् । कामयताम् । अग्निः । सेवताम् । गिरश्च । अस्माकम् । यष्टृतमा । हविषा वोढा ।

नि त्वा नक्ष्य विश्पते द्युमन्तं देव धीमहि । सुवीरमग्न आहुत ॥ ७ ॥

नि त्वा । निधीमहि स्थाने । त्वाम् । उपगन्तव्यात् । विशां पतेः । ममतम् । देवम् । सुवीरम् । अग्ने ! आहुतम् ।

---

१. नूतनम् Sy. २. अग्नये is suggested for अग्ने ॥ गन्त्रेऽग्नये Sy.
३. श्येनसदृशाय Sy. ४. स ह्यन्यं M.
५. वस्वो वसु धनम् । कर्मणि षष्ठी Sy.
६. ददात्वित्यर्थः Sy. ७. स्वार्हा A.
८. ०णीय A. स्पृहणीया भवन्ति तस्मै नवं स्तोमं जीजनमित्यनुषङ्गः । उत्तरत्र सम्बन्धो वा Sy. ९. अग्नेः Sy. १०. दीप्तयः Sy.
११. द्रष्टुं चक्षुषे वा Sy. १२. Omitted in A. १३. ०वन्तः A १४. रयः द० M. धनम् Sy. १५. पुरस्ताद् भागे Sy.
१६. शि समाम् A. १७. षट्कारम् A. अस्माभिर्वीयमानामाहुतिम् Sy.
१८. भक्षयतु वा Sy. १९. स्तुतीश्च Sy.
२०. ०तमः is suggested for ०तमा ॥ यजनीयतमो यष्टृतमो वा Sy.
२१. हविरः A. ०वां पोषग् M.
२२. The commentary on the stanza is missing in A. २३. निहितवन्तः Sy.
२४. ०न्तव्य ! is suggested for ०न्तव्यात् ॥ नक्ष्य ! उपगन्तव्य ! नक्षतिर्व्याप्तिकर्मा Sy. २५. पते ! is suggested for पतेः
२६. द्युमन्तम् ! is suggested for मम तं । दीप्तिमन्तम् Sy.
२७. देव ! is suggested for देवम् ॥ द्योतमान ! Sy. २८. कल्याणस्तोतृकम् Sy.
२९. आहुत ! is suggested for आहुतम् ॥ सर्वैर्यजमानैरभिहुत ! Sy.

क्षप उस्रश्च दीदिहि स्वग्नयस्त्वया वयम् । सुवीरस्त्वमस्मयुः ॥ ८ ॥

क्षप[1] उस्रश्च[2] । रात्रीः । अहानि । च सर्वदा त्वम् । दीप्यस्व । स्वग्नयः[3] । त्वया[4] । वयम् । त्वञ्च । सुवीरः[5] । अस्मान्[6] कामः[7] ।

उप त्वा सातये नरो विप्रासो यन्ति धीतिभिः । उपाङ्गिरा सहस्विणी ॥ ९ ॥

उप त्वा[8] । उपयन्ति[9] । त्वाम् । लाभाय[10] । नर[11] मेधाविन[12] । कर्मभिः । उपयाति । वाक्य[13] सहस्रसख्यायुक्ता[14] ।

अग्नो रक्षांसि सेधति शुक्रशोचिरमर्त्यः । शुचिः पावक ईड्यः ॥ १० ॥

अग्नो[15] रक्षांसि । अग्निः । रक्षासि । निषेधति[16] । शुक्रेति स्पष्टम् ।

स नो राधांस्या भरेशानः सहसो यहो । भगंश्च दातु वार्यम् ॥ ११ ॥

स नो राधांसि[17] । स[18] । अस्मभ्यम्[19] । धनानि[20] । आहर । ईशानः[21] । सहसः पुत्र[22] ! भगम्[23] । च देव-स्त्वमनुचरः[24] । प्रयच्छतु[25] । धनम् ।

---

१. The commentary on the stanza is missing in A.
२. हे अग्ने ! Sy
३. शोभनाग्नयो भवाम Sy.
४. दीप्यमानेन त्वया Sy.
५. वसिष्ठाः Sy. ६. सुस्तोतृको भव Sy.
७. अस्मत्कामः is suggested for अस्मान् काम ॥ अस्मान् कामयमानः । 'सुप आत्मनः क्यच्' इति क्यचि कृते 'क्याच्छन्दसि' इत्युप्रत्ययः । दकारलोपश्छान्दसः । Sy. अस्मयुरस्मान् कामयमानः' N. 6.2.
८. हे अग्ने ! Sy.
९. उपगच्छन्ति Sy. १०. त्वा A.
११. धनाय, कामानां लाभाय वा Sy.
१२. नेतारो यजमानाः Sy.
१३. विप्राः Sy.
१४. वाक् is suggested for वाक्य ॥ क्षयरहिता स्तुतिरूपास्मदीया वाक् Sy
१५. ०हस्र ख्या० A. सहस्रसंख्याका Sy.
१६. The *pratika* is supplied by the Editor. १७. बाधताम् Sy.
१८. VM. ignores शुक्रशोचिः । अमर्त्यः । शुचिः । पावकः and ईड्यः ॥ शुक्रशोचिः शुभ्रज्वालः । अमर्त्यो मरणरहितो देवात्मा । शुचिः स्वयं शुद्धः । पावको ऽन्येषामपि शोधकः । ईड्यः स्तुत्यः Sy.
१९ प्रसिद्धस्त्वम् Sy.
२०. रायो राध इति धननाम Ngh. 2.10.
२१. सर्वस्य जगत ईश्वरः सन् Sy.
२२. हे सहसो यहो ! बलस्य पुत्र ! अग्ने ! Sy.
२३. भगः is suggested for भगम् । भगो देवोऽपि भगोऽत्र सूक्ते निपातभागिनी देवता Sy.
२४. ०स्त्वबनु० is suggested for०स्त्वमनु०।
२५. दातु अस्मभ्यं ददातु । अभ्यास लोपश्छान्दसः Sy.

त्वमग्ने वीरवद्यशो देवश्च सविता भगः । दितिश्च दाति वार्यम् ॥ १२ ॥

त्वमग्ने । त्वम् । अग्ने ! वीरवत् । अन्नम् । देवः । च । सविता । भगः । च । अदितिश्च देवी । धनम् । प्रयच्छतु ।

अग्ने रक्षा णो अंहसः प्रति ष्म देव रीषतः । तपिष्ठैरजरो दह ॥ १३ ॥

अग्ने रक्ष । अग्ने ! रक्ष । अस्मान् । रक्षसः । प्रतिदह । देव । हिसतः । तप्ततमैस्तत्तेजोभिः । अहरणु ।

अधा महीन आयस्यनाधृष्टो नृपीतये । पूर्भवा शतभुजिः ॥ १४ ॥

अधा महो । अह । महती । अयसा निर्मिता । अस्माकम् । पुरी । त्व भव । शत्रुभिरनाधृष्टस्त्वम् । नृणा रक्षणार्थम् । शतभुजिर्बहुरक्षकेति ।

त्वं नः पाह्यंहसो दोषावस्तरघायतः । दिवा नक्तमदाभ्य ॥ १५ ॥

त्वं नः पाहि । त्वम् । अस्मान् । रक्ष । रक्षसः । दोषावस्ता । अरमिच्छतः । तदेवोक्तम्—देवा । नक्त रक्ष । अहिंसित ! इति ।

---

१. वीरपत A. पुत्रपौत्रोपेतम् Sy.
२. अन्नं देहीति शेषः Sy. सविता देवोऽपि । सवित्रादिः सूयते निपातभागिनी देवता Sy.
४. Omitted in M. दितिश्च is suggested for अदितिश्च ।
५. वरणीयम् Sy.
६. पाहि । संहितायां दीर्घश्छान्दसः Sy.
७. अंहसः पापात् Sy. ८. भस्मीकुरु Sy.
९. देव ! is suggested for देवे ॥ द्योतमान ! Sy. १०. हिंसितः M. हिंसतः शत्रून् Sy.
११. तृप्ततमै तत्तोजोहिः M. मंसत्वत्तेजोभिः is suggested for मंसस्तेजोहिः ॥ अतिशयेन तापकैस्तेजोभिः Sy.
१२. अहरणुं A. अजरः is suggested for अहरणु ॥ जरारहितस्त्वम् Sy.
१३. VM. ignores स्म ।
१४. Omitted in A. अध मही M.
१५. हे अग्ने ! Sy. १६. अध is suggested for अधाधुना Sy. १७. अय M.
१८. तद्रक्षासाधनभूतप्राकारादिर्वा पूरुच्यते । यथायसा निर्मिता पुरी तद्रक्षासाधनभूतप्राकारादिर्वा शत्रुभ्यो भीतान् रक्षति । तद्वत् राक्षसेभ्यो भीतानस्मान् पाहीत्यर्थः Sy.
१९. अप्रतिधर्षणीयः Sy. २०. नः रक्ष० M.
२१. ०जिव० M. अत्यन्त विस्तृत शतगुणा Sy.
२२. ति is missing in A.
२३. त्वं नः is missing in A.
२४. अग्ने ! त्वम् Sy. २५. पापात् Sy.
२६. ०वस्तः is suggested for ०वस्ता रात्रेराच्छादयितः । तमस. वारयितः । इदमर्थः Sy.
२७. अघमिच्छ० is suggested for अरमिच्छ० । पापमिच्छतः शत्रोश्च Sy.
२८. अहनि Sy. २९. रात्रौ च Sy.
३०. Omitted in M.
३३. हिंसित M. हे...अहिंस्य ! Sy.

VII. 16.

एना वो अग्निं नमसाजो नपातमा हुवे ।
प्रियं चेतिष्ठमरतिं स्वध्वरं विश्वस्य दूतममृतम् ॥ १ ॥

एना[1] वः[2] । अनेन[3] । युष्माकम्[4] । अग्निम्[5] । अन्नेन[6] अन्नस्य[7] । पुत्रम्[8] । आह्वयामि[9] । प्रियम् । अतिशयेन[10] ज्ञातारम्[11] । गन्तारम्[12] । सुयज्ञम्[13] । विश्वस्य यजमानस्य[14] । दूतम्[15] । अमृतम्[16] ।

स योजते अरुषा विश्वभोजसा स दुद्रवत्स्वाहुतः ।
सुब्रह्मा यज्ञः सुशमी वसूनां देवं राधो जनानाम् ॥ २ ॥

स योजते[17] । सः[18] । युनक्ति[19] । आरोचमानाविश्वौ[20] । विश्वस्य भोक्तारौ[21] । सः । अत्यन्त द्रवति

---

१. 'एना वः' इति द्वादशर्चं षोडशं सूक्तं वसिष्ठस्यार्षमग्निदेवताकम् । अयुजो बृहत्यो युजः सतोबृहत्यः । तथा चानुक्रान्तम्—'एना वो द्वादश प्रागाथम्' (KSA. 34.16. p. 24.) इति । प्रातरनुवाक आग्नेयं क्रतौ बार्हते छन्दस्याश्विनशस्त्रे चेदं सूक्तम् । सूत्रितञ्च—'एना वो अग्निं प्र वो यह्वम्' (ĀSS. 4.13.) इति । अग्निमारुतशस्त्रे 'देवो वो द्रविणोदाः' इति प्रगाथोऽनुरूपः । सूत्रितञ्च-'देवो वो द्रविणोदा इति प्रगाथौ स्तोत्रियानुरूपौ, (ĀSS. 5.20.) इति Sy.

२. एनेन । यद्वा—एनेनमित्यग्नेर्विशेषणम् । समानार्षत्वात्पूर्वेषु सूक्तेष्वादिष्टत्वाद्वसिष्ठेनान्वादिश्यते Sy. विभक्तेराकारः । . . एनेन Mah.

३. युष्मदर्थम् Sy. हे ऋत्विग्यजमानाः ! वो युष्माकं सम्बन्धिना Mah. व इति पादपूरणार्थः सम्भवात् U.

४. स्तोत्रेण Sy. अन्नेन हविर्लक्षणेन Mah.

५. बलस्य Sy.
अन्नम् Mah. U.

६. पौत्रम् Mah. U. सूनुर्नपादित्यपत्यनामनी Ngh. 2. 2.

७. वो युष्माकमेनमग्निं नमसाऽऽहुव इति वा Mah.

८ यजमानानां प्रीतिहेतुम् Mah. सर्वजीवप्रियम् U.

९. प्रज्ञापकं वा Sy. अतिशयेन चेतयितारम् Mah.
अतिशयेन चेतनायुक्तम् U.

१०. स्वामिनं वा Sy. अलमिति पर्याप्तमतिम् । यद्वा रतिरुपरमस्तद्रहितम् । सदोद्यमयुतमित्यर्थः Mah.

११. शोभना अध्वरा यज्ञा यस्य तम् Mah. शोभना अध्वरा यज्ञा अस्य विद्यन्त इति स्वध्वरः Sy.

१२. सर्वस्य यजमानस्य Sy. सर्वस्य यजमानजनस्य सर्वस्य जगतो वा Mah. विश्वस्य सर्वस्य यजमानजनस्य U.

१३. दूतवत्कार्यकारिणम् । सर्वस्य हि गृहे दाहपाकादिकार्यकरत्वात् Mah.

१४. नित्यम् Sy. मरणरहितम् Mah. अमरणधर्माणम् U. This stanza=YV. 15.32.

१५. सो योज० A. १६. अग्निः Sy.

१७. रथे युनक्तु यद्वा अयुज्यत Sy.

१८. ०नाश्वो M. ०नावश्वौ is suggested for ०नाविश्वो ॥ यद्वा आरोचमानेन तेजसा Sy.

१९. विश्वस्य पालयितारावश्वौ । . . . विश्वस्य रक्षकेण Sy.

देवलोकं[1] प्रति स्वाहुतः[2]। सोऽय वसूना[3] मध्ये। सुस्तोत्रः[4]। यष्टव्यः। सुकर्मा[5] च। देवनशीलम्[6]। धनं[7] प्रयच्छति। यजमानानाम्[8]।

उदस्य शोचिरस्थादाजुह्वानस्य मीळ्हुषः।
उद्धूमासो अरुषासो दिविस्पृशः समग्निमिन्धते नरः॥ ३॥

उदस्य। उत्तिष्ठति। अस्य[10]। दीप्तिः[11]। आहूयमानस्य[12]। सेक्तुः[13]। उक्थस्थू[14]। धूमाश्च। आरोचमाना[15]। दिविस्पृशः[16]। तमग्निम्। समिन्धते[17]। मनुष्याः।

तं त्वा दूतं कृण्महे यशस्तमं देवाँ आ वीतये वह।
विश्वा सूनो सहसो मर्तभोजना रास्व तद्यत्त्वेमहे॥ ४॥

तं त्वा दूतम्[19]। त्वम्[20]। त्वा। दूतम्। कुर्मः। यशस्वितमम्[21]। देवान्। आवह। अशनाय[22]। हे सहसः सूनो[23]! विश्वान्यपि। मनुष्यभोज्यानि। देहि[24]। तदानीम्। यदा। त्वाम्[25]। याचामहे।

त्वमग्ने गृहपतिस्त्वं होता नो अध्वरे।
त्वं पोता विश्ववार प्रचेता यक्षि वेषि च वार्यम्॥ ५॥

त्वमग्ने। त्वम्। अग्ने! गृहपतिः[26]। त्वम्। होता[27] चासि। अस्माकम्। यज्ञे[28]। त्वम्। पोता च। विश्ववारवरणीयः[29]। प्रकृष्टज्ञानस्तथा सति त्व देवान्[30]। यज। भक्षय[31]। च। हविर्वरणीयम्।

---

१. ०लोक प्रति M. आनेतुं देवान् प्रति भृशं ब्रवतु ब्रवति वा Sy. २. सुष्ठ्वाहुतः Sy. ३. वासकानां जनानां वसिष्ठानाम्...यद्वा वसूनां धनानाम् Sy. ४. सुस्तुतिः शोभनास्तो वा Sy. ५. सुकर्मा च भवति Sy. ६. तमिमं द्योतमानम्, यद्वात्यन्तप्रकाशमानम् Sy. ७. हविरभिगच्छत्विति शेषः Sy. ८ यजमानानां धनवत् प्रियतम इत्यर्थः Sy. ९. उत्तिष्ठ A. अग्नेः Sy. १०. स्य A. अग्नेः Sy. ११. तेजः Sy. १२. अभिहूयमानस्य Sy. १३. कामानां वर्षितुः Sy. १४. उक्त A. उत्तस्थुः is suggested for उक्थ स्थू। अस्यादित्येकवचनान्तं बहुवचनान्ततया विपरिणतं सवत्रान्वेति Sy. १५. आरोचमा A. ०मानाः is suggested for ०माना। १६. अन्तरिक्षस्पृशः Sy. १७. ०न्धने A. १८. कर्मणां नेतार ऋत्विजः Sy. १९. The *pratika* is supplied by the Editor. २०. न्त A. तम् is suggested for त्वम्॥ प्रसिद्धम् Sy. २१. ०स्विनमं A. अतिशयेन यशस्विनम् Sy. २२. अशनाय A. हविषां भक्षणाय Sy. २३. हे स्सहस्सूनो A. हे बलस्य पुत्र! अग्ने! Sy. २४. मनुष्याणां भोग्यानि कल्याणानि धनानि Sy. २५. अस्मभ्यं देहि Sy. २६. यजमानोऽसि Sy. २७. देवानामाह्वाता Sy. २८. यागे Sy. २९. ०णीयं A. VM. explains voc. by nom. ३०. ०कृष्यज्ञा० A. प्रकृष्टमतिः Sy. ३१. कामयस्व भक्षय वा Sy.

कृधि रत्न यजमानाय सुक्रतो त्वं हि रत्नधा असि ।
आ नं ऋते शिशीहि विश्वमृत्विजं सुशंसो यश्च दक्षते ॥ ६ ॥

कृधि रत्नम् । कुरु[1] । रत्नम्[2] । यजमानाय[3] । सुकर्मन्[4] ! त्वम् । हि । रत्नस्य दाता । भवसि । स त्वमाशीर्भिस्तीक्ष्णीकुरु[5] । अस्माकम् । यज्ञे । सर्वम् । ऋत्विजम् । शोभनशसन[6] । य । च होता[7] । सहते तञ्चेति[8] ।

त्वे अग्ने स्वाहुत प्रियासः सन्तु सूरयः ।
यन्तारो ये मघवानो जनानामूर्वान्दयन्त गोनाम् ॥ ७ ॥

त्वे अग्ने । त्वयि[10] । अग्ने[11] ! स्वाहुत ! प्रियाः । सन्तु[12] । प्राज्ञाः[13] । प्रयन्तारः[14] । ये । आढ्याः[15] । जनानाम्[16] । सङ्घातान्[17] । प्रयच्छन्ति[18] । गवा दरिद्रेभ्यः ।

येषामिळा घृतहस्ता दुरोण आँ अपिं प्राता निषीदति ।
ताँस्त्रायस्व सहस्य द्रुहो निदो यच्छा नः शर्म दीर्घश्रुत् ॥ ८ ॥

येषामिळा । येषा जनानाम् । अन्नम्[20] । घृतहस्ता[21] । गृहे[22] । निषीदति । अन्नस्य[23] प्राता[24] प्रदाता च

---

१. कुरु । वेहीत्यर्थः Sy.
२. धनम् Sy. इवात्रं रत्नमिति धननामनी Ngh. 2. 10. ३. यजमानाय मह्यम् Sy. ४. हे शोभनकर्मन् ! अग्ने ! Sy.
५. यस्मात्त्वम् Sy.
६. ०माशिशीभिस्तीक्ष्णिरुरु A.
७. गोहन शं० A. सुस्तुतिरस्मत्पुत्रः.... यद्वा सुशंसो होता Sy.
८. होतात् A. होतुः पृथगुपादानश्चादरार्थम् Sy.
९. वर्धते तं वर्धय Sy.
१०. तव Sy. Mah., U.
११. हे यजमानैः सुष्ठ्वाहुत ! Sy. सुष्ठु हूयते स्वाहुतः हे स्वाहुत ! Mah. साधुना प्रकारेणाभिहुत U. १२. भवन्तु Sy.
१३. प्रेरकाः स्तोतारो वा Sy. पण्डिताः Mah., U.
१४. प्रभातारः A. प्रदातारः Sy. निगृहीतेन्द्रियाः Mah. निगूहितसर्वविषयाः U.
१५. धनवन्तः Sy., Mah. U.
१६. जनानामस्मदीयानाम् Sy. जनानां मध्ये जनाः Mah. जनानां मध्ये U.
१७. ०तात् A. समूहान् Sy. अन्नविशेषान् पूरोडाशादीन् Mah. न केवलं धनवन्त एव, किन्तर्हि ? उर्वान्, अन्नप्रकारान् U.
१८. प्रयच्छन्ति ते च तव प्रियासः सन्त्विति पूर्वेणान्वयः Sy. ददति । 'दय दानगतिहिंसादानेषु Mah. दयतिर्दानार्थः । ददति U.
१९. गवां चोर्वान् Sy. गवां सम्बन्धिभिर्दुग्धदधिघृतैः सह Mah. गवां सम्बन्धिभिरुपसेचनैः सहितान् U.
This stanza=YV. 33.14.
२०. अन्नरूपा हविर्लक्षणा देवी Sy. इरा, इळा, इत्यन्ननामनी Ngh. 2.7.
२१. ०ते ह० A. VM. seems to repeat the Vedic word घृतहस्ता but it should be here घृतहस्तम् nom. sing going with अन्नम् ॥. घृयुक्तो हस्तो यस्या असौ घृतहस्ता । घृतहस्तेनाभिधारितेत्यर्थः Sy.
२२. ग्रहे A. २३. अन्तस्य A.
२४. प्राता पूर्णा Sy.

दासादिः सघृतमन्न प्रयच्छतीत्यर्थः । ताम् । त्रासयस्व । सहसो जात ! द्रोग्धुः । निन्दितुश्च । यच्छ च । अस्मभ्यम् । सुखम् । दीर्घकालं श्रोतव्यम् ।

स मन्द्रया च जिह्वया वह्निरासा विदुष्टरः ।
अग्ने रयिं मघवद्भ्यो न आ वह हव्यदातिं च सूदय ॥ ९ ॥

स मन्द्रया । सः । मन्द्रया वाचा । च । आस्यास्थानीयया । ज्वालया च । हविषो वोढा भवति । विद्वत्तरः । अग्ने ! रयिम् । आढ्येभ्यः । अस्मभ्यम् । आवह । यजमानम् । च । प्रेरय । 'यजमानो वै हव्यदातिः' इति शतपथब्राह्मणम् ।

ये राधांसि ददत्यश्व्या मघा कामेन श्रवसो महः ।
ताँ अंहसः पिपृहि पर्तृभिष्ट्वं शतं पूर्भिर्यविष्ठ्य ॥ १० ॥

ये राधांसि । ये । अन्नानि । प्रयच्छन्ति । अश्वसङ्घान् । धनानि च । कामेन । श्रवसो यशसः । महतो महद्यशस्कामयमानाः । तान् । अंहसः । पालय । पालयितृभिस्तेजोभिः । त्वम् । पुराञ्च । शतेन युवतम ! युवतम !

---

१. ०च्छन्ती० A.
२. स्तास् A. तान् is suggested for तास् ॥ हविष्मतो यजमानान् Sy.
३. त्रायस्व is suggested for त्रासयस्व ।
४. सहसे बलाय हित ! Sy.
५. द्रोदुः A. ६. निन्दकाच्च शत्रोः Sy.
७. देहि Sy. ८. सुख A. सुखं गृहं वा Sy.
९. VM. ignores आ and अपि ॥ अपीति पूरणः Sy. १०. सन्द्रया A.
११. प्रसिद्धस्त्वम् Sy. १२. मोदयित्र्या Sy.
१३. आस्या स्थनीयेन A. आस्य० is suggested for आस्या० स्थानीयेन । देवानामास्य-स्थानीयया Sy. १४. हविषां वोढा Sy.
१५. हे अग्ने ! Sy. १६. धनम् Sy.
१७. हविष्मद्भ्यः Sy.
१८. हव्यानि ददातीति हव्यदातियंजमानः । तथा च वाजसनेयिन आमनन्ति 'यजमानो वै हव्य-दातिः' (ŚB. 1.4.1.24.) इति Sy.
१९. यजमानञ्च प्रेरय is missing in A. कर्मसु प्रेरय च Sy.
२०. ŚB. 1.4.1.24. The quotation of ŚB should immediately follow यजमानम् and precede च ।
२१. ये रासांसि A. ये रोधांसि M.
२२. यजमानाः Sy. २३. साधकानि Sy.
२४. अश्वसं० A. अश्वात्मकानि Sy.
२५. इच्छया । यशस्कामाः सन्त इत्यर्थः Sy.
२६. हमद्यशंशंकाम० A. २७. दातॄन् Sy.
२८. पापात् शत्रोर्वा Sy. २९. रक्षासाधनभूतैः Sy. ३०. च is missing in M. पूर्भिः, नगरीभिश्च Sy.
३१. अपरिमिताभिः Sy.
३२. युवत्वम् A. M. हे यविष्ठ्य ! युवतम ! अग्ने ! Sy.

देवो वो द्रविणोदाः पूर्णां विवष्ट्यासिचम् ।
उद्वा सिञ्चध्वमुप वा पृणध्वमादिद्वो देव ओहते ॥ ११ ॥

देवः[1] । देव[2] । युष्माकम्[3] । धनस्य प्रदाताऽग्निः । पूर्णाम्[4] । कामयते । जुहम्[5] । तथापि[6] सति द्रोण-कलशात् सोममुद् वा, सिञ्चध्वम्[7] । उप वा गृहीत प्रयच्छत, समुच्चयार्थौ[8] वाशब्दौ । अनन्तरम् । एव । युष्मान् । देवः । नयति[10] ।

तं होतारमध्वरस्य प्रचेतसं वह्निं देवा अकृण्वत ।
दधाति रत्नं विधते सुवीर्यमग्निर्जनाय दाशुषे ॥ १२ ॥

तं होतारम्[11] । तम् । ह्वातारम्[11] । अध्वरस्य[12] । प्रचेतसम्[13] । वोढारम् । देवा । यकुर्वन्[14] । शिष्ट[15] स्पष्टमिति ।

VII. 17.

अग्ने भव सुषमिधा समिद्ध उत बर्हिरुर्विया वि स्तृणीताम् ॥ १ ॥

अग्ने भव[16] ॥ द्वैपदमिद सूक्तम् ॥ अग्ने[17] । भव । शोभनया समिधा । समिद्धः[18] । वा[19] चा । उर्विया[20] ऊरु[21] । बर्हिः । विस्तृणातु[22] ।

---

१. देव A. २. युष्मदीयाम् Sy.
३. ०तानि A. धनानां दाता Sy.
४. पूर्णां हविषा Sy. ५. जुहूम् is missing in M. आसिक्तां स्रुचम् Sy.
६. ०था सि स० A. तथा सति is suggested for तथापि सति ।
७. अत उत्सिञ्चध्वं वा सोमेन पात्रम् Sy.
८. ०च्छत् M. उपपृणध्वं वा सोमम् Sy.
९. ०र्थायौ A. वाशब्दौ समुच्चयार्थौ । ध्रुव-ग्रहेण होतृचमसं पूरयत चाग्नये सोमं यच्छत चेत्यर्थः Sy. १०. वहति Sy.
११. होतारम् A. १२. यज्ञस्य Sy.
१३. प्रकृष्टमतिम् Sy.
१४. युंकु० M. अकुर्वन् is suggested for यकुर्वन् ।
१५. By शिष्टम् VM. ' means the second hemistich of the stanza. Sy. explains it in the following manner :—किमर्थमित्यत आह । स चाग्निः । विधते परिचरते । दाशुषे हविषां प्रदात्रे । जनाय । सुवीर्यं शोभनवीर्योपेतम् । रत्नं रमणीयं धनम् । दधाति ददात्वित्यर्थः Sy.
१६. 'अग्ने भव सुषमिधा' इति सप्तर्चं सप्तदशं सूक्तं वसिष्ठस्यार्षमग्निदेवताकम् । सप्तापि द्विपदा-स्त्रिष्टुभः । तथैवानुक्रम्यते—'अग्ने भव सप्त द्वैपदं त्रैष्टुभम्' (KSA. 34.17. p. 25.) इति । अतिरात्रे षष्ठेऽहनि तृतीयसवने मैत्रा-वरुणशस्त्रे 'अग्ने भव' इति तृचोऽनुरूपः । सूत्र्यते हि—'अग्ने त्वं नोऽन्तमोऽग्ने भव सुष-मिधा समिद्ध इति स्तोत्रियानुरूपौ' (ĀSS. 8.2.) इति Sy. १७. अग्ने भव A.
१८. समिन्धो A. सम्यक् दीप्तः Sy.
१९. वाचा A. अपि च is suggested for वाचा
२०. धवयूरुव्र A. विस्तीर्णम् Sy.
२१. वाचा उर्विया उरु बर्हि is missing in M.
२२. उपस्तृणीतामध्वर्युः Sy.

उत द्वारः उशतीर्वि श्रयन्तामुत देवाँ उशत आ वहेह ॥ २ ॥

उत द्वारः । अपि च । द्वारो देव्यः । कामयमाना । विवृता भवन्तु । तत् । देवान् । कामयमानान् । इह । आवह ।

अग्ने वीहि हविषा यक्षि देवान्त्स्वध्वरा कृणुहि जातवेदः ॥ ३ ॥

अग्ने वीहि । अग्ने ! गच्छ हविषा । यज च । देवान् । सुयज्ञाश्च । कुरुताम् । जातवेदः !

स्वध्वरा करति जातवेदा यक्षद्देवाँ अमृतान्प्रियंच्च ॥ ४ ॥

स्वध्वरा । स्वध्वरान् । करोतु देवान् । जातवेदाः । यजतु । देवान् । अमृतान् । प्रीणयतु । च ।

वंस्व विश्वा वार्याणि प्रचेतः सत्या भवन्त्वाशिषो नो अद्य ॥ ५ ॥

वंस्व विश्वा । देहि । विश्वानि । धनानि । प्रचेतः ! सत्यानि । भवन्तु । आशासनानि । अस्माकम् । इदानीम् ।

त्वामु ते दधिरे हव्यवाहं देवासो अग्न ऊर्ज आ नपातम् ॥ ६ ॥

त्वामु ते । त्वाम् । एव । ते । कृतवन्तः । हव्यवाहम् । देवाः । अग्ने ! अन्नस्य । पुत्रम् । आकारः पूरणः ।

---

१. देव्य A. द्वारो यज्ञगृहस्य देव्यो वा Sy. द्वारो जवतेर्वा । द्रवतेर्वा । वारयतेर्वा N.8.9
२. त A. ततः is suggested for तत् ।
३. देवा A. ४. यज्ञं कामयमानान् Sy.
५. इभ A. यज्ञे Sy.
६. देवानभिगच्छ Sy.
७. य is missing in M. शोभनयज्ञांश्च Sy.
८. कुरु is suggested for कुरुताम् ।
९. हे जातवेदः ! जातधन ! Sy.
१०. स्व उपरा A.
११. ०ध्वरा A. शोभनयज्ञान् Sy.
१२. जातधनोऽग्निः Sy.
१३. हविषा यजतु Sy.
१४. मरणरहितान् Sy.
१५. स्तोत्रैः प्रीणयतु Sy.
१६. पित्वा A. M.
१७. अस्मभ्यं देहि Sy.
१८. वरणीयानि Sy.
१९. प्रकृष्टमतिमन् ! अग्ने ! Sy.
२०. सत्या यथार्थाः Sy. २१. आशिषः
२२. उ इत्यवधारणे BB. २३. प्रसिद्धाः Sy.
२४. अकुर्वन् Sy. धारयामासुः । कृतवन्त इत्यर्थः BB.
२५. हविषां वोढारम् । . . . वहतेर्ण्विः BB.
२६. देवेभिरन्वितमित्यत्र प्रकृतत्वात् BB.
२७. बलस्य Sy.
२८. सूनुर्नपादित्यपत्यनामनी Ngh. 2. 2. This stanza=TS. 3.1.4.4.

ते तें देवाय दाशतः स्याम महो नो रत्ना वि दंध इयानः ॥ ७ ॥

ते ते देवाय । ते वयम् । तुभ्यम् । देवाय । हवीषि ददत । स्याम । महांस्त्वम् । अस्मभ्यम । रत्नानि । विधेहि । याच्यमानः ।

VII. 18.

त्वे ह यत्पितरश्चिन्न इन्द्र विश्वा वामा जंरितारो असन्वन् ।
त्वे गावः सुदुघास्त्वे ह्यश्वास्त्वं वसु देवयते वनिष्ठः ॥ १ ॥

त्वे ह यत् । त्वयि । एव । यस्मात् । पितर । अपि । अस्माकम् । इन्द्र ! विश्वानि । धनानि । स्तोतारः । अभजन्त ततो वयञ्च त्वा स्तुम. । त्वय्येव । सुदुघा. । गावः सन्ति । त्वयि । एव । अश्वा. । त्वम् । सु । यजमानाय । अत्यन्त दानशील. ।

राजेव हि जनिभिः क्षेष्येवाव द्युभिरभि विदुष्कविः सन् ।
पिशा गिरो मघवन्गोभिरश्वैस्त्वायतः शिशीहि राये अस्मान् ॥ २ ॥

राजेव । राजेव । हि । जायाभिः । अभ्यवगच्छसि । एव । दीप्तिभि । विद्वान् । क्रान्तः । सन् ।

---

१. हे अग्ने ! Sy.
२. प्रसिद्धाः वसिष्ठा वयम् Sy.
३. द्योतमानाय Sy. ४. हविषि M.
५. ददत A. ६. भवेम Sy.
७. महास्त्वम् A. अतो महो महांस्त्वम् Sy.
८. रमणीयानि धनानि Sy.
९. विधत्स्व Sy.
१०. उपगम्यमानो याच्यमानो वा Sy.
११. द्वितीयेऽनुवाके षोडश सूक्तानि । तत्र 'त्वे ह यत्पितरः' इति पञ्चविंशत्यृचं प्रथमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमिन्द्रदेवताकम् । द्वाविंशाधिभिश्चतसृभिः सुदासनाम्नो राज्ञो दानं स्तूयते । अतस्तास्तद्देवताकाः । अनुक्रम्यते हि—'त्वे ह यत्पञ्चाधिकैन्द्रं सुदासः पैजवनस्य चतस्रोऽन्त्या (०स्यान्त्याश्चात्रो KSA.) दानस्तुतिः' (KSA. 34.18. p. 25) इति । महाव्रत आवितः पञ्चदशर्चः क्रांसनीयाः । तथैव पञ्चमारण्यके सूत्रितम्—'त्वे ह यत्पितरश्चिन्न इन्द्रेति पञ्चदश' (AA. 5.2. 2.) इति Sy. १२. त्वे ह य A.
१३. यस्मात् कारणात् Sy.
१४. वननीयानि धनानि Sy. वामं वननीयं भवति N. 6.31.
१५ स्तोतारः सन्तः Sy. १६. अलभन्त Sy.
१७. तस्माद् वयमपि धनकामाः Sy.
१८. दोग्धुं सुशकाः Sy. १९. भावः A.
२ . वसु is suggested for सु०
२१. देवं त्वामिच्छते यजमानाय Sy.
२२. ०शील M. दातृतमो भवसि Sy.
२३. हे इन्द्र ! त्वम् Sy.
२४. हीति पूरणः Sy.
२५. जायाहिः A.
२६. अभ्युपगच्छसि M. निवसस्येव Sy.
२९. क्रान्तकर्मा क्रान्तप्रज्ञो वा Sy.

विशा[1] प्रजया । स्तुवतः[2] । गोभिः । अश्वैश्च[3] । मघवन्[4] ! त्वत्कामान् । तीक्ष्णीकुरु[5] । धनार्थम् । अस्मान् ।

इमा उ त्वा पस्पृधानासो अत्र मन्द्रा गिरो देवयन्तीरुपं स्थुः ।
अर्वाचीं ते पथ्यां राय एतु स्यामं ते सुमताविन्द्र शर्मन् ॥ ३ ॥

इमा उ त्वा । इमाः । एव । त्वाम् । स्वयमेवेतरेतर स्पर्धमानाः[6] । अस्मिन् यज्ञे[7] । मदयन्तः[8] । स्तुतयः । देवं त्वा कामयमानाः । उपतिष्ठन्ति[9] । तथा सत्यभिमुखी[10] । तव । धनस्य । प्रदात्री वाक् । एतु[11] । स्याम[12] । ते वयम् । सुमतौ[13] । सुखहेतुभूतायाम्[14] ।

धेनुं न त्वा सूयवसे दुदुक्षन्नुप ब्रह्माणि ससृजे वसिष्ठः ।
त्वामिन्मे गोपतिं विश्व आहा न इन्द्रः सुमतिं गन्त्वच्छ ॥ ४ ॥

धेनुं[15] न[16] । धेनुम् । इव । त्वाम्[17] । शोभनवसे[18] गोष्ठे । दोग्धुमिच्छन्[19] । वसिष्ठः । स्तोत्राणि वत्सस्थानानि । उपसृजन्ति[20] । त्वाम् । एव । मे[21] । गोपतिम्[22] । सर्वो जनः । वदति । अथ परोक्ष—आगच्छतु । अस्माकम्[23] । इन्द्रः । सुष्मतिम्[24] । अहीति[25] ।

---

१. VM. seems to read **विशा** for **पिशा** ॥ **रूपेण हिरण्यादिना वा** Sy.
२. **स्तोतॄन्** Sy
३. **अश्वैश्च** A. Sy. does not explain **अव** as a preposition but as a verb and construes **अभि** with it and not with **क्षेषि** । Thus he explains these words as **अभितो रक्ष** ।
४. **हे धनवन्** ! **इन्द्र** ! Sy.
५. **संस्कुरु** Sy.
६. **यज्ञे स्तोतरि वा वर्तमानाः** Sy.
७. **मोदमानाः** Sy.
८. **०ष्ठतस्** A.
९. **अस्मदभिमुखम्** Sy.
१०. **पथ्या सूतिः** Sy.
११. **गच्छतु** Sy.
१२. **स्यामे** A. **भूयास्मे** Sy.
१३. **सुष्टुतौ वर्तमानाः** Sy.
१४. **शर्मणि सुखे** Sy.
१५. VM. ignores **इन्द्र** ।
१६. **धेनुम्** A.
१७. **हे इन्द्र** ! Sy.
१८. **सुहविष्के यज्ञगृहे । वृष्टान्तसामर्थ्याद्दृष्टान्तिकलाभः । वर्तमानं त्वाम्** Sy.
१९. **०न वत्से** M. **शोभनयवसे** is suggested for **शोभनवसे** ॥ **सुतृणे गोष्ठे वर्तमानाम** Sy.
२०. **०च्छन्** A. **बुधुक्षन् । संहितायां व्यत्ययेन वकारः । कामान् दोग्धुमिच्छन्** Sy.
२१. **०जति** is suggested for **०जन्ति** ॥ **उपसृजते** Sy.
२२. **मम** Sy.
२३. **गवां स्वामिनम्** Sy.
२४. **ब्रवीति** Sy.
२५. **अमस्मा०** A.
२६. **सुष्ठु स्तुम्** M. **सुष्टुतिम्** is suggested for **सुष्मतिम्** ।
२७. **अभीति** is suggested for **अहीति** ॥

अर्णांसि चित्पप्रथाना सुदास इन्द्रो गाधान्यकृणोत्सुपारा ।
शर्धन्तं शिम्युमुचथस्य नव्यः शापं सिन्धूनामकृणोदशस्तीः ॥ ५ ॥

अर्णांसि । उदकानि । चित् । प्रथमानानि । सुदासे राज्ञे । इन्द्रः । गोधानि । अकृणोत् । शोभनपराण्यग्राह्याद्युदकानि गाधानि कृत्वा चैजवन गमयामासेति । वर्धमानम् । शिम्न्यु वेद्धार बाधक तूलयो । उचथस्य । स्तोतव्य । शाप इत्युदकनाम तम् । सिन्धूनाम् । अकरोत् । अहिंसित ।

पुरोळा इत्तुर्वशो यक्षुरासीद्राये मत्स्यासो निशिता अपीव ।
श्रुष्टिं चक्रुर्भृगवो द्रुह्यवश्च सखा सख्यायमतरद्विषूचोः ॥ ६ ॥

पुरोळा । पुरोदाता नानाम् तुर्वशो नाम राजा । यक्षु । आसीदिन्द्रप्रियार्थम्, अथ तस्मै मत्स्यदेशस्था । अपि । धनायाभवन् बलिन कर प्रददु । तथा तस्य भृगव । द्रुभ्यव । च । श्रुष्टिम् । चकूट कर्मसु शीघ्रमागमन चक्रुर्यज्ञार्थ भृगव शत्रुवधार्थ द्रुह्यव । सखेन्द्र । सख्याय तुर्वशम् । अतरत् । विषूचुनाम्न. शत्रो ।

---

१. शत्रुभिर्विदारितायाः परुष्ण्या उदकानि Sy.
२. अपि Sy.
३. गाधानि is suggested for गोधानि ।
४. अकृण्णोत् A. अकरोत् Sy.
५. ०पराण्यग्राह्याद्युद० M. ०पाराणि, अगाधान्युद० is suggested for ०पराण्यग्राधाद्युद० ॥ सुपाराणि, पारयितुं तर्तुं योग्यानि Sy. ६. Omitted by M.
७. पैजवनम् is suggested for चैजवनम् ।
८. उत्साह(स)मानम्, Sy. ९. शिम्युं is suggested for शिम्न्युं ॥ बोधमानम् Sy.
१०. तुलयोः A. कूलयोः is suggested for तूलयोः ॥
११. उचस्य M. स्तोतुः Sy. १२. स्तुत्यः Sy.
१३. विश्वरूपोद्भवमात्मनोऽभिशापम् Sy.
१४. नदीनाम् Sy. १५. अकरेत् A.
१६. अभिशस्तीश्च Sy. १७. जनानाम् is suggested for नानाम् ॥ पुरोगामी पुरोदाता वा Sy.
१८. यक्षुर्यज्ञकुशलः । यजेः सम्प्रत्ययो न तु सनन्तः । अतो न द्विर्भावः Sy.
१९. जले निहिता मत्स्या इव मत्स्यजनपदाः Sy.
२०. स तुर्वशो राये धनप्राप्तये इन्द्रस्य सख्यायं सुदासं जगाम Sy. २१. ०वत् बलिनं करं A.
२२. द्रुह्यवः is suggested for द्रुभ्यवः ॥
२३. सुदासस्तुर्वशस्य च श्रुष्टिमाशुप्राप्तिम् Sy.
२४. चक्रुः is suggested for चकूट ॥ योधाश्च Sy. २५. सखा सुदासश्चेन्द्रः Sy.
२६. सुदासम् Sy.
२७. अतारयत् । तुर्वशं चावधीदित्यर्थः । यद्वा यक्षुर्यज्ञशीलः पुरोळाः पुरोदाता तुर्वशो नाम राजासीत् । तेन मत्स्यासो मत्स्यजनपदा निशिता बाधिता आसन् । अपि च भृगवो द्रुह्यवश्च श्रुष्टिं सुखं तुर्वशस्य चक्रुः । विषूचोर्विष्वगञ्चतोरुभयोर्मध्ये सखा तुर्वशस्य सखेन्द्रः सख्यायं राजानमतरत् अतारयत् Sy.
२८. विषूचोर्विष्वगञ्चतोरुभयोर्मध्ये Sy.
२९. VM. ignores इत् । निशिताः । इव of अपीव ॥ इतिति पूरणः । निशिता नियन्त्रिताः. . . . बाधिताः Sy.

आ पक्थासो भलानसो भनन्तालिनासो विषाणिनः शिवासः ।
आ योऽनयत्सधमा आर्यस्य गव्या तृत्सुभ्यो अजगन्युधा नॄन् ॥ ७ ॥

आ पक्थासः । आभिमुख्येन तस्येन्द्रस्य स्वभूता । शब्दमकुर्वन् । पक्वा । भलानसो भलाश्चानसश्च हलो हिनक्तरेरनोऽननेर्गतिकर्मणः, उभयविधाः शरा भवन्ति विवृतमुखा नाराचमुखाश्चेति त उभयेऽप्यग्निपक्वा भवन्ति । शत्रुशरीरेष्वेव लीना शरीर निर्भिद्य शीघ्र गच्छन्त । विषाणिनो रुरूभृङ्गेण तद्वन्त । कल्याणा ऋजव, 'आलोकनाया । रुरुशीर्ष्णी' इति मन्त्र । य इन्द्र । सहमदन । आर्य्यस्य । आनयन् तुर्वशस्य स । शोसवान् । तृत्सुभ्य । अगमयत् तुर्वश प्रति । युद्धेन नेतुम् । तच्छत्रूश्चायत् ।

दुराध्यो३ अदितिं स्तेवयन्तोऽचेतसो वि जगृभ्रे परुष्णीम् ।
महाविव्यक्पृथिवीं पत्यमानः पशुष्कविरंशयुच्चायमानः ॥ ८ ॥

दुराध्यः । दुर्बुद्धय । अदीनाम् । परुष्णीकूलभेदनेन शोषयन्त । अज्ञाना । विविश्र गृहीतवन्त ।

---

१. पत्थासः A. २. ०कुर्वत् A. आ भनन्त । अभिष्टुवन्ति तमिन्द्रम् । भनतिः शब्दकर्मा Sy. नौति भनतीति शब्दकर्माणौ Ngh. 3.14.
३. पक्त्वा A. पक्था हविषां पाचकाः Sy.
४. हलो हिनक्तरेरनेर्गति० A. भलो भनक्तेः, अनोऽनक्तेर्गति० is suggested for हलो हिनक्तरेरनोनतेर्गति० DP. 7.16.,21. भद्रमुखाः । भलेति भद्रवाची Sy.
५. लिवृत० A. ६. त भेये० A.
७. ०पक्त्वा A.
८ ०स्वङ्गुलीनाः A. अलिनाः । तपोभिरप्रवृद्धा इत्यर्थः Sy.
९ ०ना उरु० M. रुरु० is suggested for रूरू० । कण्डूयनार्थं कृष्णविषाणहस्ताः । दीक्षिता इत्यर्थः Sy.
१०. शिवासः शिवा यागादिना सर्वस्य लोकस्य शिवकराः । यागेन हि शिवं भवति लोकस्य Sy.
११. रूरुशीर्ष्णीति A. आलक्ता या M. (RV. VI.75.15.)
१२. ०वनः is suggested for ०वन ॥ सोमपानेन सह माद्यतीति सधमादः । सधमाद एव सधमाः Sy.
१३. आर्य्यस्य M. कर्मशीलस्य Sy.
१४. नयन्यनम् M. आनयत् is suggested for आनयन् ।
१५. ०यनन्तुर्वशस्य स A.
१६. शोसं...M. गोसङ्घान् is suggested for शोसंवाम् ।
१७. missing in M. हिंसकेभ्यः Sy.
१८. अजगत् । स्वयञ्च गोसङ्घान् लेभे Sy.
१९. कुर्वशं A.
२०. नेतुं A. जेतुम् is suggested for नेतुम् ॥
२१. तत् सूञ्च्छयत् A. तच्छत्रूंश्चायत् is missing in M. ०श्चाजयत् is suggested for ०श्चायत् ॥ तान्नन् शत्रून् जघान चेति शेषः Sy.
२२. दूराध्य A. ०ध्य M.
२३. दुष्टाभिसन्धयः Sy. २४. अधीनाम् M.
२५. परूष्णिकुलभेदेनन A.
२६. मन्दमतयः सुदासः शत्रवः Sy.
२७. वि जगृभे । विग्रहः कूलभेदः । तमकुर्वन् । परुष्ण्याः कूलं बिभिदुरित्यर्थः Sy.

परुष्णी[1] नदी सुदासो हि[2] भवाय चायमानस्य राज्ञः सेनिरा[3] ? महत्त्वेन[4] सेनायाः[5]। चायमानः। सर्वां पृथिवीम्। अपिव्यग्[6] व्याप्तवान्[7]। आगच्छन्नथ युद्धे निर्जितः। परशुरिव[8]। भ....यत्[9]। क्रान्तकर्मेति[10]।

ईयुरर्थं न न्यर्थं परुष्णीमाशुश्नेदमिषित्वं जगाम।
सुदास इन्द्रः सुतुकाँ अमित्रानरन्धयन्मानुषे वध्रिवाचः॥ ६॥

ईयुरर्थम्[11]। भिन्ना परुष्णीमिन्द्रः सन्दधे तस्यास्तीरवासिन्यजाः[12], परुष्णीम्[13]। सार्थम्[14]। ईयुः[15]। न। न्यर्थम्[16]। अश्वः[17]। चास्य शत्रूणाम्। अभिप्राप्तिम्[18]। जगाम। सुदासे। इन्द्रः। सुहिंसान्[19]। अमित्रान्[20]। तुकस्तुजतेर्हिंसाकर्मणः[21]। पशमनयत्[22]। मानुषेऽस्मिल्लोके। प्रवृद्धवाचः सुदास इति[23]।

ईयुर्गावो न यवसादगोपा यथाकृतमभि मित्रं चितासः।
पृश्निगावः पृश्निनिषेषितासः श्रुष्टिं चक्रुर्नियुतो रन्तयश्च॥ १०॥

ईयुर्गावः। यथा। गावः। यवसमुद्दिश्य[24]। अरक्ष्यमाणा यथाराम गच्छन्ति तद्वत्। यथाकृत[25]

---

१. परुष्णिर्नदी M.
२. ०सोऽभिभ० is suggested for ०सो हि भ०॥
३. सैनिकाः is suggested for सेनिरा०।
४. स सुदासो महेन्द्रप्रसादलब्धेन महिम्ना Sy.
५. सुदासः शत्रुश्चयमानस्य पुत्रः Sy.
६. अपि व्याप्तवान् M अविव्यग् is suggested for अपिव्यग्ः।
७. व्याप्नोत् पुनरुदकेनाबाध्यत Sy.
८. पलायमानः Sy.
९. पशु० is suggested for परशु०॥ यागे संज्ञप्तः पशुरिव Sy.
१०. Missing in M. अशयत् is suggested for भ...यत्॥ अशेत सुदासा निहत इत्यर्थः Sy. ११. कविनामा Sy.
१२. नुं यु अथ Λ. १३. ०स्यास्तिर० Λ.
१४. ०सिन्यः प्रजाः is suggested for ०सिन्यजाः।
१५. सार्धम् M.
१६. ईयुः। परुष्ण्या, विच्छिन्नानि पर्वाणि सन्दधे। ततः परुष्ण्या आपो यथापूर्वमर्थं गन्तव्यमेव प्रवणदेशं प्रति परुष्णीमीयुः। आययांचक्रुः। 'इण् गतौ' इति धातोरन्तर्भावितण्यर्थात् लिटी-युरिति। अतो द्विकर्मकमाख्यातम् Sy.
१७. व्यर्थम् M. अगन्तव्य परुष्ण्याः पार्श्वयोः स्थितं निम्नं देशं प्रति परुष्णीं नेयुः Sy.
१८. राज्ञः सुदासोऽश्वः Sy.
१९. अभिप्राप्तव्यमेव Sy. २०. अथेन्द्रः Sy.
२१. सुतोकान् Sy. तुक् तोकमित्यपत्यनामनी (Ngh. 2.2.)
२२. अमित्रा M.
२३. ०जते हिंसा० M. D.P. 1.244. It refers to सुहिंसान् which it should immediately follow.
२४. पशम० Λ. वशमानयत् is suggested पशमनयत्।
२५. जल्पकान् Sy.
२६. VM. ignores इत्। इत्...एव Sy.
२७. यवसात् निमित्तार्थे पञ्चमी। यवसं निमित्तीकृत्य Sy. २८. गोपालेनारक्षिताः Sy.
२९. इन्द्रस्य साहाय्यं करवामेति यथापूर्वं समयः कृतस्तं समयमनतिक्रम्य Sy.

संविदनुरूपम् । अभ्यगच्छन् । मित्रमिन्द्रं प्रति । चेतयमानाः । पृश्निगावः पृश्निवर्णाश्वाः । पृश्निप्रसूताः । आशु-व्याप्तिम् । चक्रुः । नियुतः । रन्तयः । चेति मरुत उच्यन्ते नियच्छन्तीति नियुतो रमयन्तीति रन्तयः, सुदास्सं प्रतिगच्छन्तमिन्द्रं मरुतश्चाभ्यगच्छन्नित्यर्थः ।

एकं च यो विंशतिं चं श्रवस्या वैकर्णयोर्जनात्राजा न्यस्तः ।
दस्मो न सद्मन्नि शिशाति बर्हिः शूरः सर्गमकृणोदिन्द्र एषाम् ॥ ११ ॥

एकञ्च । एकम् । च । यः । विंशतिम् । च । अश्नेच्छया । वैकर्णयोर्जनपदयोः । जनानधिपतीन् । राजा सुदा वैजवनः । न्यस्तारि । दस्म कर्मशीलः । इवाध्वर्युः । यज्ञे । निवृश्चति बर्हिः सुदाः पैजवनः शत्रुम् । तदानीं शूरः । इमन्द्र । एषाम् । संस्थानं विनाशं मारणम् । अकरोद्युद्ध इति ।

अध श्रुतं कवषं वृद्धमप्स्वनुं द्रुह्युं नि बृणग्वञ्चबाहुः ।
वृणाना अत्र सख्याय सख्यं त्वायन्तो ये अमदन्ननु त्वा ॥ १२ ॥

अध श्रुतम् । अनन्तरमेव । विश्रुतम् । कवषनामानम् । अप्सु । वृद्धम् । अनुक्रमेण । द्रुह्युञ्च ।

---

१. अभिजग्मुः Sy.
२. संहता जानन्तो वा Sy.
३. ०गावम् A. पृष्णिवर्णा गावो येषां ते पृश्निगावो मरुतः Sy.
४. यदेन्द्रः सुदासो रक्षणार्थमागच्छति तदा पृश्नि-निप्रेषिताः पृश्न्या मात्रा नितरां प्रहिताः Sy.
५. ०व्याप्तिः A. आशुप्राप्तिम् Sy.
६. तस्मिन् युद्धे इन्द्रसाहाय्यार्थमभ्यगच्छन्नित्यर्थः Sy.
७. निधतः A. मरुतामश्वाश्च Sy.
८. रन्तरया A. M. रममाणाः Sy.
९. यन्यः A. The passage मरुतः... रन्तयः refers to नियुतः and रन्तयः ।
१०. सुदस्सं० M. सुदासं is suggested for सुदास्सम् ।
११. सुदासो राजा Sy.
१२. विशति M.
१३. यशस इच्छयाश्नेच्छया वा Sy.
१४. ०योजन० M.
१५. ०पनीन् A.
१६. ०दाः पैज० is suggested for ०दा वैज० ।
१७. अन्यस्तारि M. न्यस्तः is suggested for न्यस्तारि ॥ आत्मनाहन् Sy.
१८. दस्मः is suggested for दस्म ॥ दर्शनीयो युवा Sy.
१९. ०ध्वर्य A.
२०. यज्ञगृहे Sy.
२१. यस्मिन् युद्धे सपत्नान्निशिशाति नितरां लुनाति
२२. तस्मिन् युद्धे शूरः Sy.
२३. इन्द्रः is suggested for इमन्द्र ॥
२४. एषा M. एषां मरुताम् Sy.
२५. सर्गं प्रसवमकृणोत् । सुदासः साहाय्यार्थमकरोत् Sy.
२६. अय श्रुतम् A. २७. अपि च Sy.
२८. उदकेषु Sy. २९. च त्रीन् Sy.
३०. आनुपूर्व्येण Sy.
३१. द्रुह्युं च Sy.

निवृणवान्[1]। वावाहुः[2]। अथ प्रत्यक्षः—प्राणानाः[3]। अत्र त्वावि[4]। सख्यसिद्धयर्थम्[5]। च या सख्यम्[6]। तत्कामा[7]। ये त्वाम्। अन्वमदन्ति[8], एषां प्रीत्यर्थं सुदासः सैनिकैः स्तुतः कवष द्रुह्युञ्च न्यहनदित्यर्थः[9][10]।

वि सद्यो विश्वा दंहितान्येषामिन्द्रः पुरः सहसा सप्त दर्दः।
व्यानवस्य तृत्सवे गयं भाग्जेष्मं पूरुं विदथे मृध्रवाचम् ॥ १३ ॥

वि सद्यः[11]। विदारयत्[12]। सद्य एव। विश्वान्यपि। दृंहितानि दृढानि प्राकारादीनि[13]। एषां सुदासः शत्रूणाम्[14]। इन्द्रः। पुरीश्च[15]। अन्वाजेन[16] ? सप्त[17]। व्यभच्च[18]। अनो पुत्रस्य[19]। पुरन्तद् गत्वा[20]। तृत्सवे[21]। तमेनं स्तुवन्तो वयं जयेम[22]। पूरुम्[23]। सङ्ग्रामे[24]। चरुष् वाचमिति[25]।

नि गव्यवोऽनवो द्रुह्यवश्च षष्टिः शता सुषुपुः षट् सहस्रा।
षष्टिर्वीरासो अधि षड् दुवोयु विश्वेदिन्द्रस्य वीर्या कृतानि ॥ १४ ॥

नि गव्यवः[26]। निसुषुपुर्मृताः[27]। सुदासो गा अपहर्तुमिच्छन्तः[28]। अनवः[29]। द्रुह्यवः[30]। च। षष्टिः। शता[31]। षट्। सहस्राणि। पुनश्च षष्टिः। वीराः[32]। पुनश्च षट्[33]। परिचरणमिच्छतः[34] सुदासः। इन्द्रस्यैतानि[35]। वि-

---

१. ०वृक्ण० is suggested for ०वृण०॥ न्यमज्जयदित्यर्थः Sy.
२. प बाहुः A. वज्रबाहुः is suggested for वा बाहुः॥
३. प्राणानां A. वृणानाः is suggested for प्राणानाः॥ सख्यं लेभिर इति शेषः Sy.
४. त्वयि is suggested for त्वावि॥ अस्मिन्नवसरे ५. सख्यार्थम् Sy.
६. त्वया is suggested for च या॥
७. तत्काम M. त्वत्कामाः is suggested for तत्कामा॥
८. ०मवयन्त्येषां A. ०वन्, एषां is suggested for ०वन्त्येषां॥ अस्तुवन् Sy.
९. ०ष द्रुह्यं च M. ०षं द्रु० is suggested for ०ष द्रु०।
१०. न्यहन्नित्य० is suggested for न्यहनदित्य०। ११. वि उन्य A. १२. व्यदार० is suggested for विदार०॥ विदारयामास Sy. १३. दुर्गाणि Sy. १४. कविषाढीनाम् Sy. १५. सुदाः स श० A. १६. पुरिश्च A नगरीश्च Sy. १७. न्वजेन A. बलेन Sy. १८. तद्रक्षासाधनभूतान् सप्त प्रकारांश्च Sy. १९. व्यजनच्च M. व्यभजच्च is suggested for व्यभच्च॥ अवदादित्यर्थः Sy.
२०. अनोः पु० is suggested for अनो पु०॥ अपि चानोः सम्बन्धिनो बलस्यानोः पुत्रस्य वा Sy. २१. ०न्तं ग० A. गयं गृहं धनं वा Sy.
२२. तृत्सवे is missing in M. तृत्सुनामकाय राज्ञे तृत्सूनां गणाय वा Sy. २३. ०नमस्तु० A. इत्यभिन्द्रं स्तुवन्तो वयम् Sy. २४. पुरं M. पूरं मनुष्यम् Sy. २५. चरुष्याच० A. परुषवा० is suggested for चरुष्वा०॥ बाधवाचम् Sy. २६. नि गप्यवः A.
२७. निषुसुपुसमृ० A. निषुषुपुर्मृ० is suggested for निसुषुपुर्मृ० नितरां शेरते निहता इत्यर्थः Sy. २८. गोकामाः Sy. २९. अनोः सम्बन्धिनः Sy. ३०. द्रुह्यो सम्बन्धिनः Sy.
३१. षट् A. ३१. प पुन० A. ३३. विरा A.
३४. ०च्छन्तः M. दुवोयवे। चतुर्थी लुक्। परिचरणकामाय सुदासे Sy. नमस्यति दुवस्यतीति परिचरणकर्मणो Ngh. 3.5.
३५. ०स्येता० M.

ष्वानि । कर्माणीति दुपोष्विति षष्ठ्यन्तमिति ।

इन्द्रेणैते तृत्सवो वेविषाणा आपो न सृष्टा अधवन्त नीचीः ।
दुर्मित्रासः प्रकलविन्मिमाना जहुर्विश्वानि भोजना सुदासे ॥ १५ ॥

इन्द्रेण । इन्द्रेण । एते । तृत्सवः । व्याप्नुवन्तः । आपः । इव । गमनोद्युक्ताः । नीचिना । अधावत् पराजिताः । दुर्मित्रासः । प्रकलविदः कलाश्च जानन्तो वणिज । परिच्छेदं परिच्छिन्नन्तस्तृत्सपौ नूनं वणिजस्ते । जहुः । विश्वानि । अन्नानि । सुदासे राज्ञे ।

---

१. दुपो इति M. दुवो ष्विति is suggested for दुपोष्विति ॥ The passage दुवोष्विति षष्ठ्यन्तम् should immediately follow परिचरणमिच्छतः ।

२. VM. ignores इत् and वीर्या ॥ इत् एव । वीर्या वीर्याणीति Sy.

३. कदाचिदिन्द्रेण रक्षिता अप्यन्यदा तेनैव बाध्यन्ते Sy. वसिष्ठस्यार्षम् Dur. वसिष्ठस्य SKN. ४. तृत्सपः A. दारयितव्या मेघाः Dur. तृदेर्हिंसार्थस्यार्थे असुन् प्रत्ययो द्रष्टव्यः । तर्वनार्हा मेघाः SKN.

५. युद्धार्थं सङ्गताः Sy. पुनः पुनर्व्याप्यमानाः Dur. 'विष्लृ व्याप्तौ' व्याप्यमानाः SKN.

६. यथा SKN.

७. ०नोन्मुक्ताः A. पलायनार्थमुद्युक्ताः Sy. सृष्टाः केनचित् Dur. केनचित्सृष्टाः SKN.

८. वीचिना M. नीचीनाः is suggested for नीचिना A. नीचैरित्यर्थः । उच्चैर्गतय एते सन्त इन्द्रबलादेषां नीचैर्गतयः संवृत्ता इत्यभिप्रायः Dur. नीचैः SKN.

९. ०वन् is suggested for ०वत् ॥ अधावन्त Sy. अगच्छन् Dur. गच्छन्ति... एवमन्तरिक्षस्याधो भवन्तीत्यर्थः SKN.

१०. दुमि० A. सुमित्राण्यपि सन्तो येऽतिसन्धानपरास्ते पुनर्दुर्मित्राः Dur. अधोभूय च ये दुर्मित्रासः कुत्सितान्यनिशं धनपराणि मित्राणि SKN.

११. वणिजं M. वणिजः is suggested for वणिज ॥ अजानन्त Sy. के पुनस्ते प्रकलविदो वणिज इत्यर्थः... एवमल्पोदकाल्पदानोपमासम्बन्धात् प्रकलविद् वणिगित्युपपद्यते । अवयवप्रत्ययवयवादिकलाः प्रकलाशब्देनोच्यन्ते । तेषु च वणिगेव निपुणो भवति गणितकुशलत्वात् । न तथान्य इति Dur. कतमानि ? उच्यन्ते..प्रथमाबहुवचनस्यात्र लुग् द्रष्टव्यः । प्रकलाविदः प्रकृष्टानां कलानां वेदितारो वणिजः SKN.

१२. परिच्छिन्दन्तः is suggested for परिच्छिन्नन्तः ।

१३. ०न्तस्तृत्सत्वो M. ०स्तृत्सवो is suggested for ०स्तृत्सपौ ॥ सुदासा बाध्यमानाः Sy. ते यथाभिद्रोहबुद्धया किञ्चिद् द्रव्यमल्पं ददति Dur. किञ्चित्स्वर्णमुक्ताप्रबालादि महता यत्नेन मिमते, एवं मिमाना यावन्ति यदा यत्र योग्यानि तावन्ति तदा तत्र त्यजन्तः SKN. १४. एवमेते मेघाः पूर्वमल्पोदकवातारो भूत्वाऽधुनेन्द्रबलोद्यताः सन्तो जहुः Dur. जहति त्यजन्ति SKN.

१५. सर्वाण्यशेषाणि Dur. सर्वाणि SKN.

१६. भोग्यानि धनानि Sy. भोजनान्युदकानि Dur. भोजनानि भोग्यार्हाण्युदकानि SKN.

१७. सुदासे राजनि, यजमाने वा कल्याणदाने Dur. सुदा यजमानस्तस्मै, कल्याणदानस्य यजमानस्यार्थायेत्यर्थः SKN.

१८. प्रकलविद् वणिग् भवति । कलाश्च वेद प्रकलाश्च N. 6. 6., SKN. II. 408.

अर्धं वीरस्य शृतपामनिन्द्रं परा शर्धन्तं नुनुदे अमि क्षाम् ।
इन्द्रो मन्युं मन्युम्यो मिमाय भेजे पथो वर्तनिं पत्यमानः ॥ १६ ॥

अर्धं वीरस्य[1] । भगानामर्धम्[2] । वीरस्याभ्यावर्तिः नश्वायमानस्य । श्रुतस्य[3] पातारमयष्टव्य इन्द्र इति स्वस्मिन्नास्ये श्रित[4] प्रक्षिपन्तः, स्वधाभिर्यैरधिगुप्ता जुहृतेत्युक्तम् । इन्द्रवर्जितम्[5] । पराणुनुदे । शर्धंतम्[6] पृथिव्यां सुदासो युद्धे । तदानीमिन्द्र । क्रोधम्[11] । मन्युना हिंसितुश्चायमानस्य[12] । अबाधत[13] । स च चायमानः पथो युद्धमार्गात्[14] । वर्तनिं वर्तनयोग्यं परोक्षं देशम्[15] । भेजे[16] । युद्धदेशादपगच्छन्निति[17] ।

आध्रेण चित्तद्वेकं चकार सिंह्यं चित्पेत्वेना जघान[18] ।
अव स्रक्तीर्वृश्चदृश्रदिन्द्रः प्रायच्छद्वृश्चा भोजना सुदासे ॥ १७ ॥

आध्रेण[19] । तम्[20] । खल्विन्द्रः । दरिद्रेण[21] । धनानामेकं गमनं दानम्[22] । चकार[23] । तथाजेन[24] । सिंहम्[25] । अपि । जघान[26] । तथा वास्यावतक्षणीया यूपादेः स्रक्तिः[27] । वेश्या । अवावृश्चत्[28], एशीसूची । यथैतेऽर्था दुःशका

---

१. अर्द्धं वीरस्य A.
२. अर्धं हिंसाकर्मणोऽर्धशब्दस्य निष्पत्तिः
३. Sy. ०र्वातिनश्चाय० is suggested for ०र्वातिः नश्वाय० ॥ वीरयुक्तस्य सुदासः Sy.
४. भृतस्य is suggested for श्रुतस्य ॥ भृतस्य क्षीरादेर्हविषः पातारम्
५. श्रितं प्रक्षिपन्त A. भृतं is suggested for श्रित
६. ०गुप्ता वज्रं हूते० A. स्ववीर्यैरधिगुप्ता वा जुह्वतेत्युक्तम् is suggested for स्वधाभिर्यैरधि...त्युक्तम् ।
७. यस्य बुद्धाविन्द्रो नास्त्यसावनिन्द्रः । तमिन्द्रमगणयन्तमित्यर्थः
८. शद्धन्तं A. शर्धन्तम् is suggested for शर्धंतं ॥ उत्सहमानम्
९. भूमिमभि, भूम्यामित्यर्थः Sy.
१०. इन्द्रः is suggested for इन्द्र ॥
११. क्रोधः A.
१२. मन्युकर्तुर्मन्युना भिनतो हिंसतो वा शत्रोः Sy.
१३. बबाधे Sy.
१४. अथ सुदासः शत्रुः Sy.
१५. वर्तनीं A. पलायनमार्गम् Sy.
१६. प्राप Sy.
१७. वप is missing in A. गच्छन् Sy.
१८. तत् खलु is missing in M. तत् is suggested for तम् ।
१९. दरिद्रेणापि सुदासा Sy.
२०. मुख्यं दानकर्म च Sy.
२१. गमनं is redundant.
२२. कारयामास Sy.
२३. छागेन Sy.
२४. प्रवयाः सिंहः सिंह्यस्तम् Sy.
२५. घातयामास Sy.
२६. ०दे सूक्तीः A. स्रक्तीः is suggested for स्रक्तिः ।
२७. अववृक्तवान्, तान्येतानि त्रीणि कार्याण्यसम्भावितानि नाशङ्कनीयानीन्द्रस्य महिम्नोऽधिकत्वात् Sy.
वेशी is suggested for एशी ॥
२८. The passage वेशी सूची should immediately follow वेश्या and precede अवावृश्चत् । वेश्यादेः कृत्यं सूच्यै वाकरोदित्यर्थः Sy.

एव दुःशकोऽयमर्थो यत्—सुदासे[1]। शत्रूणां सर्वाणि। अन्नानि[2]। इन्द्रः[3]। प्रायच्छदिति[4]।

शश्वन्तो हि शत्रवो रारधुष्टे भेदस्य चिच्छर्धतो विन्द रन्धिम्[5]।
मर्ता एनः स्तुवतो यः कृणोति तिग्मं तस्मिन्नि जहि वज्रमिन्द्र ॥ १८ ॥

शश्वन्तः। बहवः। हि। शत्रवः[6]। तव। वशीभूताः[7]। तथा सति भेदस्य[8] चायमानस्य। अपि। वर्धमानस्य[9]। वशम्[10]। लम्भय[11] तमपि लशम्भय[12]। मर्तान्[13]। एनः[14]। त्वां[15] स्तुवन्तः[16]। यः[17]। करोति चायमानः। तिग्मम्[18]। तस्मिन्[19]। निजहि[20]। वज्रम्[21]। इन्द्र !

आवदिन्द्रं यमुना तृत्सवश्च प्रात्रं भेदं सर्वताता मुषायत्[22]।
अजासश्च शिग्रवो यक्षवश्च बलिं शीर्षाणि जभ्रुरश्यानि ॥ १९ ॥

आवदिन्द्रम्[22]। यमुना[23] नदी। तृत्सवः[24]। च योद्धारः तृत्सून् प्रति युद्धाय गच्छद्[25] यमुनायां तृत्सुभिः[26] संजग्मे इन्द्र इति। ततः प्र मुषायत्[27]। यमुनायाम्। युद्धे। चायमानं जघान[28] तदानीम्। अजासः[29]। शिग्रवः।

---

१. दुःशका एव is missing in A.
२. राज्ञे Sy.
३. भोजनानि भोग्यानि धनानि Sy.
४. इन्द्र प्रयच्छ० A.
५. VM. ignores चित्।
६. अरयः Sy. ७. वशमीयुः Sy.
८. ०स्याचा० A. भनक्ति मर्यादा इति भेदो नास्तिकस्तस्य। यद्वा भेदो नाम सुदासः शत्रुः कश्चित्। तस्येत्यर्थः Sy.
९. उत्सहमानस्य Sy. १०. वशीकरम् Sy.
११. लभस्व Sy.
१२. ०मविलश० M. वशम् is suggested for लशम्।
१३. मर्त्यान् १४. एननः A. पापम् Sy.
१५. त्वां is missing in M.
१६. स्तुवतः is suggested for स्तुवन्तः॥
१७. भेदः Sy.
१८. निशितं योद्धारमुत्साहयन्तम् Sy. तिग्मं तेजतेः। उत्साहकर्मणः N. 10. 6.
१९. भेदे Sy.
२०. वज्रेण भेदं प्रहरेत्यर्थः Sy.
२१. वजति गच्छत्येव शत्रुं न प्रतिहन्यत इति वज्रः तम्। वज्रशब्दो वजेः 'ऋज्रेन्द्राग्रवज्रविप्र०' इत्यादिना रन्प्रत्ययान्तो निपातितः Sy.
२२. आपदीन्द्रम् A.
२३. तमिन्द्रं यमुनावत्। अतोषयत्। तत्तीरवासी जनः सर्वोऽप्यतोषयदित्यर्थः Sy.
२४. तृत्सवयः A. तृत्सोः पुरुषाश्चावन्। आव दित्येकवचनं बहुवचनान्ततया विपरिणतं सवत्र सम्बध्यते Sy.
२५. गच्छन् is suggested for गच्छद्॥
२६. तत्सुहिः M.
२७. आवत्—अतोषयत्। तत्तीरवासी जनः सर्वोऽप्यतोषयदित्यर्थः Sy.
२८. ०ष्णात्यत् A. अवधीदित्यर्थः Sy.
२९. भेदं नास्तिकं भेदनामकं वा सुदासः शत्रुम् Sy.
३०. जघान should immediately follow प्र मुषायत् and precede यमुनायाम्।

यक्षवः । च जनपदनामान्येतानीति तत्र जाताः । इन्द्राय भेदस्य अश्वानाम्[1] । शीर्षाणि[2] च्छित्त्वा । बलिम्[3] । जह्रुरग्रतः[4] प्राक्षिपन्नश्वशिरांसीत्यर्थः ।

न तं इन्द्र सुमतयो न रायः संचक्षे पूर्वा उषसो न नूनाः ।
देवकं चिन्मान्यमानं जघन्थाव त्मना बृहतः शम्बरं भेत् ॥ २० ॥

न त इन्द्र । न । ते[5] । इन्द्र ! सुमतयः[6] । न च । धनानि[7] । संख्यातुं शक्यन्ते[8] । न गताः[9] । उषसः[10] । नापि[11] । भूतना इत्यौपमिकम्[12] । देवकनामानमसुरम्[13] । मन्यमानस्य पुत्रम्[14] । जघन्थः[15] । अपाभैत्सीः[16] । स्वयमेव बृहतः[17] शिलोच्चयात्[18] ।

प्र ये गृहादमदुस्त्वाया पराशरः शतयातुर्वसिष्ठः ।
न ते भोजस्य सख्यं मृषन्ताधा सूरिभ्यः सुदिना व्युच्छान् ॥ २१ ॥

प्र ये गृहात्[19] । ये[20] । प्रममदुः[21] प्रकर्षेण तृप्यन्ति । गार्हस्थ्याश्रमात्[22] । त्वत्कामनया यस्मिन्नाश्रम इज्यसे[23]

---

१. अश्वसम्बन्धीनि Sy.
२. युद्धे हतानामश्वानां शिरांसीत्यर्थः । यद्वा अश्व्यानि शीर्षाणि युद्धे गृहीतान्मुख्यानश्वान् Sy.
३. बलं M. उपहारम् Sy. ४. उपजह्रुः Sy.
५. तव Sy. ६. शोभनमतयः Sy.
७. धानि A. ८. संख्यातुं शक्याः Sy.
९. पुरातनाः Sy. १०. इव Sy.
११. भूतना इत्युप० A. नूतना is suggested for भूतना ॥
१२. ०क नं मान० A. देवकनामानं शत्रुम् Sy.
१३. जघञ्वा A. अवधीः Sy.
१४. पा भैत् स्वीसी A. अवाभैत्सीः is suggested for अपाभैत्सीः ॥
१५. महतः शैलात् Sy.
१६. VM. ignores चित् and शम्बरम् ।
१७. प्र गे ग्रहात् A.. वसिष्ठस्येदमार्षम् Dur. वसिष्ठस्यार्षम् SKN.
१८. हे इन्द्र ! एवमादयो ये ऋषयः Sy. एवमादयः SKN. इत्येवमादयः Dur.
१९. प्रममदु A. प्राममदुः is suggested for प्रममदुः । प्रतुष्टुवुः प्रकर्षेण तर्पितवन्तो वा Sy. प्रकर्षेण . . . तृप्तवन्तः सोमेन हृष्टवन्तो वा यज्ञेषु Dur. प्रेत्ययममदुरित्येतेन सम्बध्यते । . . . प्राममदुः मदेस्तृप्तिकर्मणः स्तुतिकर्मणो वा रूपम् । प्रकर्षेण तर्पितवन्तः स्तुतवन्तो वा SKN.
२०. ०स्था० A.
२१. ०श्रमत्वात् M. गृहात् गृहं प्राप्य गृहाद् गृहे त्यब्लोपे द्वितीयार्थे पञ्चमी (Cf PM. 2. 3. 28. 1) सप्तम्यर्थे पञ्चमी Sy. गृहादिति सप्तम्याः स्थान एषा पञ्चमी । गृहे तस्य यज्ञगृहे त्वामिन्द्रम् SKN.
२२. तत्काम० M. त्वदिच्छया Sy. त्वया सह Dur. युष्मद इच्छाक्यचि त्वामिच्छति त्वायतीति ततः क्विपि त्वाय् । ततः 'अ प्रत्ययात्' इति चाकारे टापि तृतीयैकवचने लुकि छान्दसमेतद्रूपम् । त्वायया त्वत्काम्यया त्वदिच्छयेत्यर्थः SKN.
२३. ०सो ते A. ते is suggested for से

तौ च । पराशरः । शतयातुशक्तिर्बहुभिर्यातुधानैस्तद्वानिति । वसिष्ठश्चाहम् । तेषामस्माकं भोजयितुः । तव । सख्यम् । शत्रवो न । मृष्यन्ति । तथा सति । स्तोतृभ्योऽस्मभ्यम् । सुदिनान्यहानि । व्युच्छन्त्यः ।

द्वे नप्तुर्देववतः शते गोर्द्वा रथा वधूमन्ता सुदासः ।
अहंभग्ने पैजवनस्य दान होतेव सद्म पर्येमि रेभन् ॥ २२ ॥

द्वे नप्तुः । वैजवनस्य चतस्रोऽन्त्या दानेस्तुतिः । देववतः । नप्तुः पौत्रस्य वैजवनस्य । गवाम् । द्वे ।

---

१. एवमत्र ऋषिः पराशरो वसिष्ठसम्बन्धात् । 'इन्द्रोऽपि पराशर उच्यते' स हि . . . परितः शातयिता यातूनां यातयितव्यानामसुरावीनामिति Dur. . पराशरश्च SKN.

२. Missing in M. ०यातुः is suggested for यातु ॥ शतयातुर्बहुरक्षाः । बहूनि रक्षांसि बाधितुं यं कामयन्ते स शतयातुर्बहूनां रक्षसां शातयिता वा Sy. बहूनां रक्षसां यातयिता तेन हि रक्षोघ्नं सत्रमाहृतमासीदिति भारते श्रूयते Dur. बहूनां शातयिता तेन हि रक्षोघ्नं शस्त्रमाहृतमासीदिति स्मर्यत इतिहासे SKN

३. ते पराशरप्रभृतयो भोजस्य भोजकस्य पालकस्य Sy. किं तेषामिति ? . . . ते भोजस्य भोगिनस्तव Dur. भोजनस्य दातुः SKN.

४. सख्युः कर्म स्तोत्रं यजनं वा Sy. सखिभावम् Dur. स्तुत्यस्तोतृलक्षणं यष्टृयष्टव्यत्वलक्षणं च सख्यम् SKN.

५. नेत्ययं प्रतिषेधो मृषन्तेत्येतेन सम्बध्यते SKN.

६. मृष्यन्ति A. न विस्मरन्ति । 'मृष मर्षे' मर्षां मर्षणं तत्(न)कुर्वन्त्वित्यर्थः Sy. अमार्जयन्त नाशयन्तीत्यर्थः Dur. य इति श्रुतेः साकाङ्क्षत्वात् त इत्यध्याहार्यम् । . . . मृषन्ति 'मृष आमर्षे' आमर्षा विस्मरणम् । न विस्मरन्ति विच्छेदे वा, न विच्छिन्दन्ति न विनाशयन्तीत्यर्थः SKN.

७. यतो न विस्मरन्त्यतो हेतोः Sy. एतदर्थांशब्दश्रुतेर्यस्मादित्यध्याहार्यम् । यस्मान्न मृषन्ति, अथा एतस्मात् कारणात् SKN.

८. सूरीणां स्तोतृणामेषाम् । अत्र विभक्तिव्यत्ययः Sy.
एवङ्गुणयुक्तेभ्यस्तेभ्यः सूरिभ्यः Dur.
व्यत्ययेनैषा षष्ठ्यर्थे पञ्चमी । सूरीणां स्तोतृणाम् SKN.

९. सुदिना शोभनानि दिनानि Dur. SKN.

१०. व्युच्छन्ति is suggested for व्युच्छन्त्यः ॥ व्युच्छन्ति विशसन्ति । उपगच्छन्तीत्यर्थः Sy. विभान्तीत्यर्थः । तेषामेव सुप्रभाता रात्रय इत्यभिप्रायः Dur. व्युच्छन्ति विवसन्त्यवगच्छन्तीत्यर्थः SKN. पराशरः पराशीर्णस्य वसिष्ठस्य स्थविरस्य जज्ञे । इन्द्रोऽपि पराशर उच्यते परा शातयिता यातूनाम् N. 6. 30. SKN. II 494.

११. द्वे नस्तु A.

१२. पैजव० is suggested for वैजव० । पिजवनपुत्रस्य Sy.

१३. A fragment of (KSA. 34. 18. p. 25) KSA. reads पैजवनस्यान्त्याश्चतस्रो दानस्तुतिः Sy..

१४. देवनतः M.
देववतो राज्ञः Sy.

१५. नप्तृपौ० M.

१६. गवा A.

शते। द्वौ च। रथौ। वधूयुक्तौ। सुदासु[1]। पूजयन्। अग्ने[2]! वैजवनस्यैवं[3] रूपम्। दत्तं[4] धनम्। परिगच्छामि। स्तुवन्[5]। होतेव[6]। होतृषदनमिति[7]।

चत्वारो मा पैजवनस्य दानाः स्मद्दिष्टयः कृशनिनो निरेके।
ऋज्रासो मा पृथिविष्ठाः सुदासस्तोकं तोकाय श्रवसे वहन्ति ॥ २३ ॥

चत्वारः[8]। चत्वारः। मा। वैजनस्य[9]। देया[10] अश्वाः। प्रशस्तजनात्मसर्जनाः[11]। सुवर्णालङ्कृताः। गमनवेलायाम्[12]। ऋजुगामिनम्[13]। पृथिव्यां सुसंस्थिताः[14]। सुदासो राज्ञः[15]। पुत्रमृतम्[16]। पुत्रस्य। अन्नार्थम्[17]। वहन्तीति। पुनर्मेति पूरणम्।

यस्य श्रवो रोदसी अन्तरुर्वी शोष्णेशीष्णे विबभाजा विभक्ता।
सप्तेदिन्द्रं न स्रवतो गृणन्ति नि युध्यामधिमंशिशादभीके ॥ २४ ॥

यस्य श्रवः[18]। यस्य। यशः[19]। द्यावापृथिव्योः[20]। महत्योः। मध्ये भवति सर्वमन्तरिक्षमस्य यशसा व्याप्तम्। यश्च शीर्ष्णि[21]। धनं विभजति[22]। धनस्य विभक्ता सर्वेभ्यः पुरुषेभ्यः प्रयच्छतीत्यर्थस्तम्[23]। सर्वं च लोकाः[24]। उदारमिन्द्रम्। इव। नद्यः। स्तुवन्ति। सोऽयं सङ्ग्रामे। युध्यामधिनामि[25] शत्रुम्। न्यशिशाज्जघानेत्यर्थः[26]।

---

१. रथेन वधूयुक्तौ Λ. च देयं दानम्, दानभूतान् Sy.
२. सुदासः is suggested for सुदासु ॥ राज्ञः Sy. ३. अर्हन् योग्योऽहं वसिष्ठः Sy.
४. अग्नाग्नेः सम्बोधनं सर्ववेदमुख्यत्वप्रतिपादनार्थं न तु देवतात्वज्ञापनार्थमतद्देवताकत्वादस्य सूक्तस्य Sy. ५. पैजव० is suggested for वैजव० । पिजवनपुत्रस्य Sy.
६. धत्तं M. ७. स्तुन्वन् M.
८. वषट्कर्तेव Sy. ९. यज्ञगृहम् Sy.
१०. पैजवनस्य is suggested for वैजनस्य पिजवनपुत्रस्य Sy. ११. देयभूताः Sy.
१२. ०स्तधनानित्मिसर्ज० Λ. ०धनातिसर्ज० is suggested for ०जनात्मसर्ज० ॥ श्रद्धादिदानाङ्गयुक्ताः Sy.
१३. हिरण्यालङ्कारवन्तः Sy.
१४. दुर्गतौ सत्याम् Sy.
१५. ऋजगामिनं Λ° ०मिनः is suggested for ०मिनम्
१६. ०स्थितं Λ. पृथिव्यां सुप्रतिष्ठिताः Sy.
१७. राज्ञं M.
१८. पुत्रं मृतं M. पुत्रवत्-पालनीयं मां वसिष्ठं रथे स्थितम् Sy.
१९. तोकाय-तोकस्य पुत्रस्य । षष्ठ्यर्थे चतुर्थी Sy.
२०. यशसे वा Sy. २१. सुदासः Sy.
२२. शशः Λ. २३. द्यावापृथिव्यौ Sy.
२४. विस्तीर्णे Sy. २५. यशश्च M.
२६ शार्ष्णी Λ. श्रेष्ठाय श्रेष्ठाय Sy.
२७. धनं प्रदत्ते Sy. २८. प्रदाता Sy.
२९. ०च्छन्ती Λ.
३०. सप्त च is suggested for सर्वं च । तं सुदासं सप्तैव लोकाः
३१. अध्यामधिनाम शत्रु Λ. युध्यामधिनामशत्रुम् is suggested for युध्यामधिनामशत्रुम् ।
३२. न्यशिगाज्जनेत्यर्थः Λ.
३३. VM. ignores इत् ॥ इत्...एव Sy.

इमं नरो मरुतः सश्चतानु दिवोदासं न पितरं सुदासः ।
अविष्टना पैजवनस्य केतं दुणाशं चुत्रमजरं दुवोयु ॥ २५ ॥

इमं नरः । इमं पैजवनम् । हे नेतारः ! मरुतः ! अनुसेवध्वमस्य रक्षार्थम् । दिवोदासम् । इव । अस्य सुदासः । पितरम् । रक्षत च । पैजवनस्य । गृहम् । दुणाशमस्तु । अस्य बलम् । जरारहितम् । परिचरणकामस्येति ।

VII.19.

यस्तिग्मशृङ्गो वृषभो न भीम एकः कृष्टीश्त्यावयति प्र विश्वाः ।
यः शश्वतो अदाशुषो गयस्य प्रयन्तासि सुष्विंतराय वेदः ॥ १ ॥

यस्तिग्मशृङ्गः । यः । तिग्मशृङ्गः । वृषभः । भयानकः । एकः । प्रजाः । प्रत्यावयति । यश्च त्वम् । बहो । अदाशुषोऽयजमानस्य । गृहस्य सम्बन्धि धनमाहरसि । स त्वमाहृतं तत् धनम् । प्रयच्छसि । अतिशयेन सोमाभिषव कुर्वते यजमानायेति ।

---

१. वैजवनं A. सुदासं राजानम् Sy.
२. दिवोदास इति पिजवनस्यैव नामान्तरम् Sy.
३. सुदासः is suggested for सुदास ॥ सुदासो राज्ञः Sy.
४. वैजव० A. ५. मन्त्रं गृहं वा Sy.
६. दूणाशाम A. The commentary after दुर्नाशम् missing in A. दूणाशम० is suggested for दुणाशम० M. अविनाशि Sy. ७. अशिथिलं चास्तु Sy.
८. दिवोयु परिचरणकामस्य । षष्ठ्या लुक् Sy.
९. 'यस्तिग्मशृङ्गः' इत्येकावशर्चं द्वितीयं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमैन्द्रम् । तथा चानुक्रान्तम् 'यस्तिग्मशृङ्ग एकादश' (KSA. 34. 19. P. 25.) इति । आभिप्लविके पञ्चमेऽहन्येतन्निविद्धानम् । सूत्रितञ्च—'कया शुभा यस्तिग्मशृङ्ग इति मध्यन्दिनः' (ĀSS. 7. 7.) इति । विषुवति निष्केवल्यशस्त्रेऽप्येतत्सूक्तम् । सूत्रितञ्च—'यस्तिग्मशृङ्गो ऽभि स्यं मेषम्' (ĀSS. 8. 6.) इति । महाव्रते निष्केवल्येऽप्येतत्सूक्तम् । सूत्रितञ्च 'यस्तिग्मशृङ्गो वृषभो नभसि न भीम उग्रो जज्ञे वीर्याय स्वधावन्' (AA. 5. 2. 2.) इति । आयुष्कामेष्टयां 'मा ते अस्याम्' इतीन्द्रस्य त्रातुर्याज्या । सूत्रितञ्च—'मा ते अस्यां सहसावन् परिष्टौ पाहि नो अग्ने पायुभिः' (ĀSS. 2. 10.) इति Sy.
१०. इन्द्रः Sy. ११. तीक्ष्णशृङ्गः Sy.
१२. भयङ्करः सन् Sy. १३. एव M. असहाय एव Sy. १४. शत्रुजनान् Sy. १५. स्थानात् प्रत्यावयति Sy. १६. धनस्य वापहर्ता भवतीति शेषः Sy. १७ The commentary up to प्रजाः is missing in A.
१८. VM. seems to explain प्रयन्ता and असि by प्रयच्छ ॥ प्रदातासि तृप्नन्तत्वा. अत्र षष्ठ्या अभावः । आसीदित्यस्याख्यातस्यानुदात्तत्वाद्यद्वृत्तयोगाच्चानुदात्तत्वासम्भवाद् यद्वृत्तयुक्तमाख्यातान्तरमध्याहृत्य योजना कृता Sy. १९. कुर्वति A.
२०. VM. ignores न and विश्वाः ॥ न इव । विश्वाः सर्वान् Sy.

त्वं ह॒ त्यदि॑न्द्र कु॒त्समा॑वः शुश्रूषमा॑णस्तन्वा॑ सम॒र्ये ।
दास॑ं यच्छुष्ण॑ं कु॒यव॑ं न्य॑स्मा॒ अर॑न्धय आर्जुने॒याय॒ शिक्ष॑न् ॥ २ ॥

त्वं ह त्यत्। त्वम्[1]। खलु। एतत्[2]। इन्द्र ! कुत्सम्[3]। अरक्षः। परिचर्यमाणः[4]। तव पुत्रेण[5] कुत्सेन। सङ्ग्रामे[6]। यदा[7]। अस्मै कुत्साय। अर्जुन्याः[8] पुत्राय। कुयवम्[9]। उपक्षयितारम्[10]। शुष्णञ्च। अरन्धयो वशमानय[11] इत्यर्थः। कर्तव्यमिति शिक्षन्निति।[12]

त्वं धृ॑ष्णो धृषता॒ वीत॑हव्यं॒ प्राव॒ो विश्वा॑भिरू॒तिभि॑ः सु॒दास॑म् ।
प्र पौरु॑कुत्सिं त्र॒सद॑स्युमाव॒ः क्षेत्र॑साता वृत्र॒हत्ये॑षु पु॒रुम् ॥ ३ ॥

त्वं धृष्णोः[13]। त्वम्। धृष्णो ! बलेन[14]। दत्तहव्यम्[15]। प्रावः[16]। विश्वैः। पालयितृभिः[17]। सुदासम्[18]। प्रापुश्च[19]। पुरुकुत्सपुत्रम्। त्रसदस्युम्। प्रावश्च। क्षेत्र सम्भजने[20]। सङ्ग्रामेषु[21]। पं च[22] राजानमिति।

त्वं नृभि॑र्नृमणो दे॒ववी॑तौ॒ भूरी॑णि वृ॒त्रा ह॑र्यश्व हंसि ।
त्वं नि दस्यु॑ं चुमु॒रिं॑ धुनिं॒ चास्वा॑पयो द॒भीत॑ये सु॒हन्तु॑ ॥ ४ ॥

त्वं नृभिः। त्वम्। मरुद्भिः। हे नेतृशीलमनस्त[23] ! यज्ञार्थम्[24]। बहूनि। वृत्राणि। हर्यश्व ! नाशय[25]।

---

१. त्व A. २. तदा Sy. ३. A. reads रुत्स for कुत्स ४. उपाचरन् Sy. ५. शरीरेण Sy. ६. मर्यैर्मर्त्यैर्योद्धृभिः सहिते युद्धे Sy. ७. यद्वा M. ८. अजन्या पु० A. ९. कयं A. The commentary after कुयवम् is missing in A. १०. दासनामकमसुरम् Sy. ११. ०नयेत्यर्थः M. १२. इतिकर्तव्यं is suggested for कर्तव्यमिति। १३. धनं प्रयच्छन् Sy. १४. VM. ignores नि ॥ नि नितराम् Sy. १५. त्वं धृष्णो is missing in M. १६. हे शत्रूणां धर्षक ! इन्द्र ! Sy. १७. धर्षकेण वज्रेण बलेन वा Sy. १८. दत्तहविष्कं प्रजनितहविष्कं वा Sy. १९. प्रकर्षेणारक्षः Sy. २०. रक्षाभिः Sy. २१. राजानम् Sy. २२. प्रावश्च is suggested for प्रापुश्च। २३. The commentary up to सम्भजने is missing in A. क्षेत्रस्य भूमेर्भजने निमित्ते Sy. २४. ०मेरि M. युद्धेषु २५. पूंश्च M. पुरुंच is suggested for पूं च। २६. अनेन नेतृशीलं मनस्त A. ०नस्क ! is suggested for ०नस्त ॥ हे नृभिर्यज्ञानां नेतृभिः स्तोतृभिर्मननीय ! स्तोतव्येन्द्र ! नृषु मनो यस्येति बहुव्रीहिर्वा Sy. २७. यज्ञे क्रियमाणे सति सङ्ग्रामे वा। देवा विजिगीषवो यस्मिन् वियन्ति गच्छन्ति इति सङ्ग्रामो देववीतिः Sy. २८. पुत्राणि A. शत्रून् Sy. २९. मारितवानसि Sy.

नि[1]। त्वम्[2]। यस्वापयः[3]। उपक्षपयितारम्। चुमुरिम्। धुनिम्। च। दभीतये[4] राज्ञे तत्प्रीत्यर्थम्। शोभन-हननेनायुधेनेति।

तव[6] त्यौत्नानि वज्रहस्त तानि[7] नव[8] यत्पुरो[9] नवतिं[10] च सद्यः।
निवेशने शततमाविवेषीरहंश्च वृत्रं नमुचिमुताहन्[11] ॥ ५ ॥

तव त्यौत्नानि। तव[12]। बलानि। वज्रहस्त! तानि[13]। नव[14]। यत्। पुरः। नवतिम्[15]। च। सद्य[16] एवाशनयः। स त्वं शतानि[17] पुराणाम्। भगेषु जाग्रत्स्वन्तर्निविष्टेष्वेव[18]। व्याप्तवानसि[19] तदा[20]। अहिम्। नमुचिम्। च जघाद्धेति[21]।

सना[22] ता[23] ते[24] इन्द्र भोजनानि रातहव्याय[25] दाशुषे[26] सुदासे[27]।
वृष्णे[28] ते हरी[29] वृषणा युनज्मि[30] व्यन्तु ब्रह्माणि पुरुशाक[31] वाजम्[32] ॥ ६ ॥

सना ता[33] ते[34]। सनातनानि। तानि[35]। इन्द्र! तव भोजनान्यन्नानि[36]। दत्तहविष्काय। धनानि प्रयच्छते[37]। सुदासेऽभूवन्[38]। वृष्णे[39]। तुभ्यम्[40]। हरी। वर्षितारौ। युनज्मि[41]। प्राप्नुवत्वम्[42]। मदीयानि स्तोत्राणि। बहुसहाय[43]! अन्नम्[44]।

---

१. नितराम् Sy.
२. त्वम् is suggested for त्वन्॥
३. अस्वा० is suggested for यस्वा०॥ मारितवानसीत्यर्थः Sy.
४. दभीतिनामकाय राजर्षये तदर्थमित्यर्थः Sy.
५. सहन्तुना वज्रेण Sy.
६. वव A.
७. तादृशानि Sy.
८. नप A.
९. पुरः विदारितवानिति शेषः Sy.
१०. युगपदेव Sy.
११. शततमीं पुरम् Sy.
१२. ०न्तणिविष्टे० A. निवेशनार्थम् Sy.
१३. व्याप्तेवा०. A. व्याप्नोः Sy.
१४. तथा भिन्न A. तदा seems to be the explanation of उत॥ उत अपि च Sy.
१५. जगन्थ M. जघानेति is suggested for जगाद्धेति।
१६. ते is missing in M.
१७. सना is missing in A. सनानि सनातनानि बभूवुरिति शेषः Sy.
१८. त्वया दत्तानि Sy.
१९. भोग्यानि धनानि Sy.
२०. यजमानाय Sy.
२१. सदा० A.
२२. हुवन् M.
२३. कामानां वर्षित्रे Sy.
२४ त्वामानेतुमित्यर्थः Sy.
२५. युनस्मिन् A. रथे योजयामि Sy.
२६. ०वन्तु is suggested for ०वत्वं॥ गच्छन्तु Sy.
२७. न्तु मदीयानि is missing in M.
२८. बहु स० A. हे बहुकर्मन्निन्द्र! Sy.
२९. न्नम् is missing in M. बलिनं त्वाम् Sy.

मा ते अस्यां सहसावन्परिष्टावघाय भूम हरिवः परादै ।
त्रायस्व नोऽवृकेभिर्वरूथैस्तव प्रियासः सूरिषु स्याम ॥ ७ ॥

मा ते । अस्मिन् । अन्वेषणे क्रियमाणे वयम् । अघाय । परादै । भूम मास्मानाहन्त्रे परादा इत्यर्थः । त्रायस्व । अस्मान् । वृकरहितैः । गृहैः । तव । प्रियासो वयम् । स्याम । स्तोतृणां मध्ये ।

प्रियास इत्ते मघवन्नभिष्टौ नरो मदेम शरणे सखायः ।
नि तुर्वशं नि याद्वं शिशीह्यतिथिग्वाय शंस्यं करिष्यन् ॥ ८ ॥

प्रियासः । प्रियासः । एव । ते । मघवन् ! अभ्येषणे । नेतारः । माद्येम । गृहे । समानख्यानास्तव ।

---

१. मा ये A. The commentary up to अस्मिन् is missing in A. and up to अन्वेषणे in M. probably the missing words are मा । तव । हे सहसावन् बलवन् ! इन्द्र ! सह एव सहसं बलं तद्वान् 'अन्येषामपि दृश्यते' इति दीर्घत्वम् । यद्वा अवतुप्रत्ययश्छान्दसः BB.

२. स्तोत्रेणास्माभिः क्रियमाणायाम् Sy. अस्याम् BB.

३. अन्वेषमाणायाम् Sy. परितस्सर्वतस्सर्वस्यामिष्टौ । छान्दसं ह्रस्वत्वम् । शकन्ध्वादित्वात् पररूपत्वम् BB.

४. कीय० A.

५. आहन्त्रे Sy.
पापाय कर्मवैगुण्यलक्षणाय BB.

६. परादानाय Sy. परादानाय च मा भूम प्रत्याख्यानाय । अन्येभ्यो दानं परादाः । चतुर्थ्येकवचन आकारलोपाभावश्छान्दसः । यद्वा तुमर्थे कैप्रत्ययः । यथा 'प्रियै' इति । परादातुं च वयं मा भूम । कदापि त्वया त्याज्या मा भूमेत्यर्थः BB.

७. हूममस्मा० A. मा भूम विगुणकारिणो न भवेम । सर्वेणापि प्रकारेणाविगुणो यज्ञोऽस्त्विति यावत् BB.

८. पाहि Sy. तस्मात्...त्रायस्व रक्ष BB.

९. अवाधैः Sy. चोरादिहिंसकरहितैः BB.

१०. वरयन्त्युपव्रवेभ्य इति वरूथानि रक्षणानि तैः Sy. गुप्तियुक्तैर्गृहैः । ईदृशगृहवासिनः कृत्वा त्रायस्वेति

११. प्रियाः BB.

१२. भूयास्म Sy. वयमेव...भवेम BB.

१३. The commentary from परादा up to the end of this stanza is missing in M. किं बहुना ? सूरिषु मेधाविषु मध्ये BB.

१४. VM. ignores हरिवः ।
हे हरिवन् ! इन्द्र ! Sy. हे हरिवो हरिवन् हरिभिर्हर्यैस्तद्वन् ! BB.
This stanza=TS. 1. 6. 12. 5.

१५. हे धनवन्निन्द्र ! Sy.

१६. अभ्येषणे is suggested for अप्येषणे !

१७. स्तोत्राणां नेतारः Sy.

१८. मोदेम Sy.

१९. The commentary beginning with प्रियासः and ending with समान० is missing in A. वयं समानख्यातयः Sy.

निशिशीहि[1] । याद्वञ्च[2] । तुर्वशञ्च[3] । दिवोदासायातिथिग्वाय[4] । शसनीय धनम्[5] । करिष्यंस्तनूकृविति[6] ।

सद्यश्चिन्नु तें मघवन्नभिष्टौ नरः शंसन्त्युक्थुशासं उक्था ।
ये ते हवेभिर्वि पणीरदाशन्नस्मान्वृणीष्व युज्याय तस्मै ॥ ९ ॥

सद्यश्चित्[7] । सद्यः । एव । क्षिप्रम्[8] । तव । मघवन्[9] ! अन्वेषणार्थम्[10] । अर्थाना शसिता[11] तु । उक्थानि[12] । शंसन्ति । ये । तव । स्तोत्रैः । पणीनपि[13] । धनानि प्रदापयन्ति[14] । तानस्मास्त्वम् । वृणीष्व[15] । सख्याय[16] । तस्मै[17] त्वदीयायेति[18] ।

एते स्तोमा नरां नृतम तुभ्यमस्मद्रयश्चो ददतो मघानि ।
तेषामिन्द्र वृत्रहत्यै शिवो भूः सखा च शूरोऽविता च नृणाम् ॥ १० ॥

एते स्तोमाः । नेतृणामस्माकम्[19] । एते । स्तोमाः[20] । नेतृतम ! तुभ्यमस्माभिः क्रियन्ते । तथा सत्यस्मदभिमुखा भवेयुः[21] । धनानि[22] । ददत उदाराः । तेषामुदाराणाम्[23] । इन्द्र ! सङ्ग्रामेषु । कल्याणः[24] । भूः[25] । सखा । च । शूरः । रक्षिता । च । नृणामिति[26] ।

---

१. निधिशीहि A. वशं कुरु Sy.
२. यदुं च A. याद्वं is suggested for याद्वं M. राजानम् Sy.
३. तुवशुं च A.
४. ०यतिथिवाय A. पूजयातिथीन् गच्छतीत्यतिथिग्वः । तस्मै दिवोदासाय वास्मदीयाय राज्ञे Sy.
५. शंसनीयं सुखम् Sy.
६. ०व्यं तनू कुर्वति A. कुर्वन् Sy.
७. अद्य Sy.
८. हे धनवन् ! Sy.
९. अभ्येषणार्थम् is suggested for अन्वेषणार्थम् ॥ अभ्येषणेSy.
१०. उक्थानां is suggested for अर्थानाम्
११. शंसितारः is suggested for शंसिता तु.
१२. ०तारुत्थानि A. शस्त्राणि Sy.
१३. अप्रदानशीलान् वणिजोऽपि Sy.
१४. धनानि विशेषेणादापयन्नित्यर्थः Sy.
१५. परिगृहाण Sy.
१६. सख्याय is suggested for संख्याय । तत्सख्यमनुवर्तयितुम् Sy.
१७. तास्मै A.
१८. VM. ignores नरः ।
१९. नेतृणा०-A.
२०. स्तोमे A. सङ्घाः Sy.
२१. अभूवन्निति शेषः Sy.
२२. मंहनीयानि हवींषि Sy.
२३. ०दारेणाम् A. नृणाम् Sy.
२४. कल्याणकृत् Sy.
२५. भव Sy.
२६. तृणामीति A.

नू इन्द्र शूर स्तवमान ऊती ब्रह्मजूतस्तन्वा वावृधस्व ।
उप नो वाजान्मिमीह्युप स्तीन्पुयं पांत स्वस्तिभिः सदा नः ॥ ११ ॥

नू इन्द्र । क्षिप्रम् । इन्द्र ! शूर ! स्तूयमानः । रक्षणाय । स्तोत्राकृष्टः । शरीरेण । वृद्धा तव । उपमिमीहि च । अस्माकम् । अन्नानि । उपमिमीहि च गृहानिति ।

व्याख्यद्द्वितीयमध्यायं पञ्चमस्याष्टकस्य सः ।
गाधिनेयकुले जातो माधवो वेङ्कटात्मजः ॥

॥ पञ्चमाष्टके तृतीयाध्यायः ॥

'उग्रो जज्ञे वीर्याय व्याचिख्यासति माधवः ।
अमितेषु मितर्षीणामागमे कारणं वदन् ॥ १ ॥
'जातवेदसे' इत्येतत् प्रसङ्गात् सूक्तमागतम् ।
कुत्समध्ये कश्यपार्ष कुत्सेन बहवः स्तुताः ॥ २ ॥
औषसो द्रविणोदाश्च शुचिर्वैश्वानरस्तथा ।
जातवेदसमप्यग्निमथ तुष्टाव काश्यपः ॥ ३ ॥

---

१. अद्य Sy. २. शूरः M.
३. अस्माभिः Sy. ४. रक्षणेन Sy.
५. ब्रह्मणा स्तोत्रेण प्रेरितः Sy.
६. वृद्धो भव is suggested for वृद्धा तव ॥
७. अपमीहि A. प्रयच्छेत्यर्थः Sy.
८. अस्मभ्यम् Sy.
९. गृहान्विति A.
१०. व्याख्याद्वितीo A.
११. oनेयः कुले A.
१२. supplied by the Editor.
१३. श्रीः is added before उग्रो जज्ञे in A.
१४. The reading is adopted from R. पदम् A. M.
१५. RV. 1.99. 1.
१६. रसमध्ये A.
१७. रत्सेन A. RV. 1. 94-98.
१८. औषधो M. ओषधो A. The reading is adopted from R. RV. 1. 113.
१९. कश्यपः

स्तुतो मरुत्वान्[1] कुत्सेन ततः इन्द्रः[2] 'प्र मन्दिने'[3]।
वार्षागिरैस्तत्प्रसङ्गात्[4] 'स यो वृषा इति[5] स स्तुतः ॥ ४ ॥
कुत्सस्त्रितश्च[6] पतितौ कूपे[7] तुष्टुवतुश्च तौ।
तेन त्रितस्यागमनं 'चन्द्रमा अप्स्व[8]' न्तः इति ॥ ५ ॥
मध्ये गृत्समदस्यागादृषिः[9] सोमाहुतिस्तथा।
तत्रेदं कारणं प्राहुरग्निः सूक्तैस्त्रिभिः स्तुतः ॥ ६ ॥
जागताभ्यां[10] त्रैष्टुभेन 'त्वमग्ने द्युभिस्त्वम्' इति[11]।
'वाजयन्निव नू रथान्'[12] गायत्रं[13] सूक्तमन्ततः ॥ ७ ॥
गायत्रात्प्राक् सोमाहुतिः 'हुवे वः'[14] इति दृष्टवान्।
क्रमेण त्रीणि छन्दाँसि त्रिष्टुबादीनि[15] भार्गवः ॥ ८ ॥
अन्यस्मिन् पुनरध्याये छान्दसोऽन्यस्य दर्शनम्।
'नि होता होतृषदने'[16] इति गृत्समदोऽकरोत् ॥ ९ ॥
पुनर्गृत्समदस्यैव[17] मध्ये[18] कूर्मोऽभ्यगादृषिः[19]।
इमा गिरः आदित्येभ्यः'[20] त्रीणि सूक्तानि दृष्टवान् ॥ १० ॥

---

१. ०त्वात् कुत्सेन A.
२. इन्द्र A. M.
३. RV. 1. 101 1.
४. पार्षागिरै० A. M. The reading is adopted from R.
५. RV. 1. 100. 1.
६. रत्स A.
७. कूपे तुष्टपतु० A. RV. 2. 13., 2. 8.26
८. अप्स्वान्त० A. RV. 1. 105. 1.
९. ०स्य गाद् A. ०स्यागा ऋषिः M.
१०. सोममा० A. RV. 2. 4.
११. ०भ्यन्त्रैष्वभेन A.
१२. RV. 2. 1.
१३. रथाद् A. M. RV. 2. 8.
१४. गात्रं A.
१५. हुवे व इव वृ० A. RV. 2. 4. 1.
१६. त्रिष्वस्मादीनि A.
१७. (RV. II. 9. 1.)
१८. ०नर्गत्स० A.
१९. कूर्मो० M.
२०. RV. 2. 27-29.

बहुदेवस्य[1] सामान्यात् सूक्तं हि बहुदैवतम्[2]।
ऋतं देवाय[3] कृण्वते[4] तद्द्रक्ष्यत्यमित ऋषिः[5] ॥ ११ ॥
विश्वामित्रो द्वादशभिः[6] स्तुत्वानग्निमादितः।
सूक्तेष्वेष्वनुवाकं[7] च समाप्तं शौनकोऽब्रवीत् ॥ १२ ॥
अग्निमेव पुनश्चास्तौत्[8] अग्ने सहस्व[9] पृतनाः।
मध्ये विरामो[10] विस्पष्टस्तत्रान्येषां समागमः ॥ १३ ॥
मण्डलादौ 'सोमस्य'[11] इति सूक्तेऽग्निः[12] प्रथमं स्तुतः।
वैश्वानरीय[13]सूक्तेन ततो वैश्वानरः स्तुतः ॥ १४ ॥
उपक्रम्य पुनश्चापि तावेव क्रमशः स्तुतौ[14]।
ऋषीणामृषभादीनामतो मध्ये[15] समागमः ॥ १५ ॥
आग्नेयत्वाच्च सूक्तानामाग्नेयेषु समागमः।
ऐन्द्रात्प्राक्स्तूयते ह्यग्निः 'सोमस्य' इति प्रधानतः ॥ १६ ॥
'इच्छन्ति[16] त्वा' इति द्व्यधिकं सूक्तमैन्द्रं[17] तथोत्तरम्।
छन्दोदैवतसङ्ख्यानां समत्वात् कुशिकागतिः[18] ॥ १७ ॥

---

१. ०दैवतसा० suggested for ०देवस्य सा०
२. ०देवत० A. ०दैनत० M. RV. 2. 20., 30.
३. रुण्वते A. रुण्वते RV. 2. 301.
४. तं द्रक्षत्य० A.
५. इत्यृषिः A. M. The reading is adopted from R. RV. 2.30-43.
६. द्वादभिः A. RV. 3. 1. 12
७. सूक्तैस्तैरनु R.
८. ०स्तौ अग्ने A.
९. RV. 3. 24.
१०. विरामो A.
११. RV. 3. 1.
१२. सूक्तेनि A.
१३. ०नरायसू० A. M. RV. 3. 2, 3.
१४. स्तुतो M. RV. 3. 26, 27.
१५. RV. 3. 13-23.
१६. RV. 3. 30-32.
१७. ०मैन्द्र तथो० A.
१८. ०गति M. RV. 3. 31.

'इन्द्रापर्वता बृहता' विश्वामित्रार्षमुच्यते ।
अनुवाकः समाप्तश्च तन आगात्प्रजापतिः ॥ १८ ॥

इमं महे विदथ्याय' त्रीण्यपश्यत्प्रजापतिः ।
वैश्वदेवानि सूक्तानि वैश्वदेवमथामितः ॥ १९ ॥

'इन्द्रा को वां वरुणा' इति सूक्तमाहुर्द्विदैवतम् ।
'एष स्य भानुः' इति च वामदेवस्तयोर्ऋषिः ॥ २० ॥

त्रसदस्युस्तयोर्मध्ये सौहात्रावपि चागतौ ।
द्विदैवत्यत्वात् सामान्यादावापस्तत्र युज्यते ॥ २१ ॥

तत्राजगाम प्रथमं त्रसदस्युः 'मम द्विता' ।
'इन्द्रा कों वाम्' इतीन्द्रस्य प्रसङ्गादिति निश्चयः ॥ २२ ॥

ऋषिर्नास्त्यमितोऽत्रीणां किन्त्वत्रिः पुनरागतः ।
ददर्श 'अबोध्यग्निः' इति सूक्तं च तत उत्तरम् ॥ २३ ॥

द्विदैवत्येषु सूक्तेषु यान्यासन्नाश्विनानि च ।
छन्दश्चानुगुणं तत्र तस्मात्स पुनरागतः ॥ २४ ॥

---

१. ०त बृह A. RV. 3. 53.
२. विवध्याय A. M. RV. 3. 45.
३. RV. 54-56.
४. कोपारुणेति A. M. RV. 4. 41. 1.
५. हानु० A. RV. 4. 45. 1.
६. तुसद० A. RV. 4. 42.
७. RV. 4. 43., 44.
८. ०त्वा सा० A. . त्वसा०
९. RV. 4. 42.
१०. कोपामि० A., M. RV. 4. 41. 1.
११. ०मितोऽत्रीणां A., M. Cf. BD 5. 2.
'अत्रीणां पञ्चमम् Cf. आर्षानुक्रमणी
'अबोध्यग्निरुपक्रम्य पञ्चमं मण्डलं प्रति ।
पुत्राद्यैः सह भौमोऽत्रिर्मुनिरित्यवगम्यताम् ॥'
'अत्र त्वनुक्तगोत्रा ये ज्ञेयास्त्वत्रिसुता इति'
१२. दर्शभान्यग्नि० A. ०र्शाहान्यग्नि० M. RV. 1. 157.
१३. ०नाश्चितानि A. ०नास्थितानि M. RV. 5. 73-78.
१४. RV. 5. 76. 77.

अमितषौ[1] भरद्वाजे वीतहव्योऽभ्यगादृषिः ।
आद्यानुवाकसंस्थान[2] 'इममू[3] षु वो[4] अतिथिम्' ॥ २५ ॥
'अभूरेको[5] रयिपते' सुहोत्रः सूक्तयोर्ऋषिः[6] ।
तद्भ्रातरौ ददृशतुश्चत्वारि[7] क्रमशस्ततः ॥ २६ ॥
शुनहोत्रो नरश्चेति[8] भरद्वाजस्ततोऽमितः[9] ।
सर्वाणि त्रैष्टुभान्येव सूक्तानीन्द्रश्च देवता ॥ २७ ॥
स्थितानि चानुवाकस्य मध्ये नाद्यन्तयोः पुनः ।
'भूय इद्वावृधे[10]' सूक्तं पञ्चर्चं[11] तत्प्रसङ्गतः ॥ २८ ॥
पञ्चर्चानामावपनं[12] तत्रेति कवयो विदुः ।
बार्हस्पत्यस्य[13] 'यो रयिव.'[14] शं योरातृणपाणिकात् ॥ २९ ॥
'स्वादुष्किल'[15] इति तन्मध्ये[16] मितो गर्गः[17] समागतः ।
शयुरस्तौत्[18] त्रिभिः सूक्तैरिन्द्रं गर्गस्तदाभ्यगात्[19] ॥ ३० ॥

---

१. RV. I. 15.
२. ०नमिम० A., M. ०कावसान
३. RV. 6. 15.
४. अभूदेको A. RV. 6. 31. 1.
५. ०योषितः A., M. RV. 6. 31., 32.
६. RV. 6.33-36.
७. The passage beginning with भरद्वाजो वीतहव्योऽभ्य० and ending with नरश्चेति is missing in A. ०होत्रानरं श्चेति M.
८. RV. 6. 37.
९. हूय उद्वावृ० A. RV. 6. 30.
१०. पञ्चवं A.
११. ०ञ्चपर्वाना० A. ०मावननं M. The reading is adopted from R.
१२. ०त्यस्तयो० A.
१३. यो रेवः A. M. RV. 6. 44.
१४. वाणि A. M. RV. 6. 48.
१५. स्याद्वुदुकुले० A. M. RV. 6. 47. 1.
१६. ०ति ततन्म० A.
१७. गर्भः स० A.
१८. ०स्तौ त्रिभिः A. ०स्तौ तिभिः M. RV. 6. 44.-46.
१९. ०रिन्द्रं गर्भस्तु तद्धपि A. ०रिन्द्र गर्गस्तु तद्धविः M. The reading is adopted from R. RV. 6. 47.

'यज्ञायज्ञा' वैश्वदेवमुत्तराण्यप्यृजिश्वनः ।
सूक्तानि वैश्वदेवानि पायुरन्ते व्यवस्थितः ॥ ३१ ॥
आगच्छन्ति तत्कुलीनास्तस्य मध्ये मितर्षयः ।
छन्दोदैवतसंख्यार्थजन्मक्रमविरामतः ॥ ३२ ॥
इमां सूक्ष्मेक्षिकां कुर्वन्न मन्त्रार्थेषु मुह्यति ।
बहुभिर्होतृभिः कुर्यात् तां सर्वत्रैव पण्डितः ॥ ३३ ॥ इति ॥

VII. 20.

उग्रो जज्ञे वीर्याय स्वधावाञ्चक्रिरपो नर्यो यत्कर्तरिष्यन् ।
जग्मिर्युवा नृषदनमवोभिस्त्राता न इन्द्र एनसो महश्चित् ॥ १

उग्रो जज्ञे ॥ वसिष्ठः ॥ उग्रः । अजायत । वीर्यकरणायैव । बलवान् । यत् । शत्रुवधादिक कर्म । करिष्यामीति मन्यते । तस्य कर्मणस्ताच्छील्येन कर्ता । नृहितः । तथा युवा । नराणां गृहम् । रक्षणैः प्रदित्सितैः सह । गन्ता । रक्षिता । अस्माकम् । इन्द्रः । दारिद्र्यात् । अपि । महते ।

---

१. RV. 6. 48.
२. ०मुत्तराप् गजिश्चन A. ०मुक्तारान्य गजिश्चन M. The reading is adopted from R. RV. 6. 49-52.
३. वायुरन्ते (श्रे M.) A. M. RV. 6. 75.
४. ०लीना तस्य A. ५. सूक्ष्मेक्षिकां A.
६. ०र्होतृभिः A. ०र्होतृभिः M.
७. सर्वत्रेषु पठ A. M.
८. अथ तृतीयोऽध्याय आरभ्यते । 'उग्रो जज्ञे' इति दशर्चं तृतीयं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमैन्द्रम् । तथा चानुक्रम्यते—'उग्रो दश' (KSA. 35. 20. p. 25.) इति । आभिप्लविके चतुर्थेऽहनि निष्केवल्य एतत्सूक्तं निविद्धानम् । सूत्रितञ्च—'चतुर्थस्योग्रो जज्ञ इति निष्केवल्यम्' (ĀŚS. 7. 7.) इति । महाव्रतेऽपि निष्केवल्य एतत् सूक्तम् । तथैव पञ्चमारण्यके सूत्रितम्—'उग्रो जज्ञे वीर्याय स्वधावानुदु ब्रह्माण्यैरत श्रवस्या' (AA. 5. 2. 2.) इति । सौमिकचातुर्मास्येषु वैश्वदेवस्य स्थाने प्रथमं पृष्ठ्यमहः । तत्रापि निष्केवल्य एतत्सूक्तं निविद्धानम् । सूत्रितञ्च—'जनिष्ठा उग्र उग्रो जज्ञ इति मध्यन्दिनः' (ĀŚS. 9. 2.) इति Sy. ९. ओजस्वी, उद्गूर्णो वा Sy.
१०. बभूव Sy. ११. वीर्यं कर्तुम् Sy.
१२. बलावन् A. १३. कर्म Sy.
१४. ०धादिन्द्रोऽस्माकं कर्म A.
१५. करिष्यन् भवति Sy.
१६. कर्तैव । चक्रिरिति किन्प्रत्ययस्य लिङ्वद्भावात् 'न लोकाव्ययनिष्ठाखलर्थतृनाम्' इति षष्ठीप्रतिषेधः Sy. १७. नित्यतरुणः सन् Sy.
१८. ग्रहं A. यज्ञगृहम् Sy. १९. रक्षणैः सार्धम् Sy.
२०. रक्षिता च भवेति Sy.
२१. पापात् Sy.
२२. महतः is suggested for महते ॥

हन्ता वृत्रमिन्द्रः शूशुवानः प्रावीन्नु वीरो जरितारमूती ।
कर्ता सुदासे अह वा उ लोकं दाता वसु मुहुरा दाशुषे भूत् ॥ २ ॥

हन्ता वृत्रम् । हन्ता । गन्तुम् । इन्द्रः । वर्धमानः । प्रयच्छति । क्षिप्रम् । वीरः । जरितारम् । रक्षणाय । कर्ता । शोभनदानायैव यजमानाय । आलोकनमुत्तमम् । दाता । धनम् । यजमानाय । मुहुर्मुहुः । आहवत्यागच्छति ।

युध्मो अनर्वा खजकृत्समद्रा शूरः सत्राषाड्जनुषेमषाळ्हः ।
व्यास इन्द्रः पृतनाः स्वोजा अधा विश्वं शत्रूयन्तं जघान ॥ ३ ॥

युध्मः । योधनशीलः । अभिगन्तृरहितः । सङ्ग्रामकृत् । कलहवांश्च । शूरः । बहूना सोढा । जन्मना । एव । शत्रुभिरसोढः । इन्द्र । पृतनाः । व्यस्यति । सुबलः । अथ । विश्वमपि । शातनमिच्छन्तम् । हन्ति ।

उभे चिदिन्द्र रोदसी महित्वा पप्राथ तविषीभिस्तुविष्मः ।
नि वज्रमिन्द्रो हरिवान्मिमिक्षन्त्सन्मन्धसा मदेषु वा उवोच ॥ ४ ॥

उभे चित् । उभे । अपि । इन्द्र । द्यावापृथिवी । महत्त्वेन । आपूरितवानसि । बलैः । वृद्धिमन् !

---

१. हन्ता भवति । तृन्नन्तत्वादत्र षष्ठ्यभावः Sy.
२. गन्तुम् M. शत्रुम् is suggested for गन्तुम् ॥ असुरम् Sy. ३. वर्धमानः सन् Sy.
४. प्रारक्षच्च Sy. ५. स्तोतारम् Sy.
६. ऊत्या रक्षया Sy.
७. सुदासे राज्ञे यद्वा कल्याणदानाय यजमानाय Sy.
८. उत्तमं लोकनम् A. ९. भूयोभूयः Sy.
१०. आवहत्या० M. आभवत्या० is suggested for आहवत्या० ॥ आ इति चार्थे । अभूत् Sy.
११. VM. ignores अह । वै and उ ॥ अह वा उ इति त्रयः पूरणाः Sy.
१२. योद्धा Sy.
१३. अभिगन्तृरहित A. ०हितः is suggested for ०हित ॥ अभिगन्तृरहितो युद्धेष्वपराङ्मुखो वा Sy.
१४. युद्धकृत् खले खज इति युद्धनामनी Ngh. 2. 17.
१५. ०वाञ्च A.
१६. रूपः A. शौर्योपेतः Sy.
१७. बहूनामभिभविता
१८. The words between जन्मना and सोढः are missing in M. स्वभावत एव Sy. १९. अयमिन्द्रः Sy.
२०. स्वयञ्च केनाप्यनभिभूतः Sy.
२१. इन्द्रः is suggested for इन्द्र ॥
२२. शत्रूणां सेनाः Sy.
२३. प्यस्यति A. विक्षिपति Sy.
२४. सर्वम् Sy.
२५. शात्रवमाचरन्तम् Sy.
२६. द्यावापृथिव्यौ is suggested for द्यावापृथिवी ।
२७. वृद्धि M. हे बहुध ।
२८. अथ परोक्षस्तुतिः Sy. नेन्द्र ! Sy.

नितराम् । संसेवते[1] । इन्द्रः । हरिवान्[2] । सोमेन । जनितेषु[3] । वज्रम् । पृथिवीं[4] सेक्तुमिच्छन् । उचतिः सेवकर्मा[5] ।

वृषा जजान वृषणं रणाय तमु चिभारी नर्यः सस्रुव ।
प्र यः सेनानीरध नृभ्यो अस्तीनः सत्वा गवेषणः स धृष्णुः ॥ ५ ॥

वृषा[6] जजान । वृषा[7] प्रजापतिः । वृषणमिन्द्रम्[8] । जनयामास[9] । बुद्धार्थम्[10] । तम् । एव । नारी मातादितिः[11] । असूत[12] । नृहितम्[13] । प्रभवति । यः[14] । सेनानीः । नृभ्यो योद्धृभ्यः[15] । सः । ईश्वरः[16] । शत्रूणां सदनशीलः[17] । गवामेषणशीलः[18] । शत्रूणां धर्षको भवति[19] ।

नू चित्स भ्रेषते जनो न रेषन्मनो यो अस्य घोरमाविवासात् ।
यज्ञैर्य इन्द्रे दधते दुवांसि क्षयत्स राय ऋतपा ऋतेजाः ॥ ६ ॥

नू चित्सः[20] । क्षिप्रम्[21] । सः । भ्रंशयति शत्रुम्[22] । जनः । न च रिष्यति[23] । मनः । यः । अस्य । घोरम् ।

---

१. संसेव्य ? (व)ते सङ्गच्छते वा । 'उच समवाये' इति धातुः Sy.
२. अश्ववान् Sy.
३. Something, probably मदेषु is missing after जनितेषु ॥ यज्ञेषु निवित्सु वा Sy.
४. ०वीं से० is suggested for ०वी से० ॥ शत्रुषु प्रापयन् Sy.
५. सेककर्मा M. सेवाकर्मा is suggested for सेवकर्मा । The passage उचतिः सेवकर्म् should immediately follow संसेवते and precede इन्द्रः ।
६. VM. ignores वै ॥ वा इति पूरणः Sy.
७. वृषो ज० A.
८. सेक्ता पिता कश्यपः Sy.
९. कामानां वर्षितारमिन्द्रम् Sy.
१०. 'जन जनने' इति धातुः Sy.
११. वृद्धार्थम् A. युद्धार्थम् is suggested for बुद्धार्थम् ।
१२. सुषुवे Sy.
१३. ०हितः M. ०हितं is suggested for हित ।
१४. सेनाग्री A. सेनानां नेता सन् Sy.
१५. नृणाम् Sy.
१६. सर्वस्य जगत ईश्वरो भवति Sy. नियुत्वान्, इनः, इतीश्वरनामनी Ngh. 2. 22.
१७. शत्रूणां सादकः Sy.
१८. गवामन्वेष्टा Sy.
१९. VM. ignores चित् and अध ॥ चित् अपि । अद्यापि च Sy.
२०. नृ चित्सम A.
२१. नु इति प्रतिषेधे वर्तते । न Sy.
२२. शत्रूज A. स्थानात् न भ्रश्यति Sy.
२३. क्षीयेत Sy.

परिचरति[1]। यज्ञैः। यो जनः[2]। इन्द्रे। परिचरणानि[3]। धारयति[4]। स जनः। धनाय[5]। निवसति धनं प्राप्नोति। यज्ञस्य रक्षकः[6]। यज्ञे जायमानः[7]।

यदिन्द्र पूर्वो अपराय शिक्षन्नयज्ज्यायान्कनीयसो देष्णम्।
अमृत इत्पर्यासीत दूरमा चित्र चित्र्यं भरा रयिं नः ॥ ७ ॥

यदिन्द्र। यदि धनम्[8]। इन्द्र। पूर्वः पिता[9]। अपराय पुत्राय[10]। प्रयच्छन् भवति[11]। गमयति[12]। ज्यायान्[13]। कनीयसः। धनम्[14]। ततः पुत्रः कनीयाञ्चामृतः[15]। एव। पर्यासीत[16]। चिरं तथा सति। पूजनीयम्[17]। धनम्। आहर। अस्मभ्यम् पूजनीय[18]! इति

यस्त इन्द्र प्रियो जनो ददाशदसन्निरेके अद्रिवः सखा ते।
वयं ते अस्यां सुमतौ चनिष्ठाः स्याम वरूथे अघ्नतो नृपीतौ ॥ ८ ॥

यस्त[19] इन्द्र। यः तुभ्यम्। इन्द्र! प्रियः[20]। जनः। प्रयच्छति[21]। स सखा यजमानो जनः। तव धनस्य। निरेके[22] निर्गमने भवति वज्रं पात्रम्[23]! वयम्[24]। ते। अस्याम्। सुमतौ। चनिष्ठाः[25]। स्यामातिशये-

---

१. चरति is written twice in A.
२. यो या जनः A.
३. परिचरणसाधनानि स्तोत्रशस्त्राणि Sy.
४. विधत्ते Sy.
५. धनः प्रा० A. भवेदित्यर्थः Sy.
६. यज्ञपाता Sy.
७. यज्ञे जातः Sy.
८. VM. ignores चित् ॥ चिदित्येवकारार्थे Sy.
९. यद्धनम् Sy.
१०. पूर्व A. पूर्वं M. पिता ज्येष्ठो भ्राता वा Sy.
११. कनीयसे वा Sy.
१२. ०च्छत् A. शिक्षतिर्दानकर्मा। प्रीणाति शिक्षतीति दानकर्माणौ Ngh. 3. 20.
१३. प्राप्नुयात् Sy.
१४. ज्यायात् A. ज्येष्ठः Sy.
१५. देयं धनम् Sy.
१६. कनीयसः। धनं is added after ततः by M.
१७. ० यां इव A. यच्चापि धनं पितृतो लब्ध्वा पुत्रोऽमृत एव सन् Sy.
१८. परियासित A. आस्ते Sy.
१९. पितृगृहं विहाय दूरम् Sy.
२०. तत् त्रिविधं चायनीयम् Sy.
२१. हे चायनीय! इन्द्र! Sy.
२२. यस्तु इन्द्र A.
२३. प्रयोजनं M.
२४. पृच्छति M. हवींषि दद्यात् Sy.
२५. दाने Sy.
२६. वज्रवन् is suggested for वज्रं पात्रं।
२७. वसिष्ठाः Sy. २८. तव Sy.
२९. अनुग्रहबुद्धौ वर्तमानाः Sy.
३०. स्तुतिमत्तरा अतिशयेनान्नवन्तो वा। चनोऽन्नम् Sy.
३१. स्याम ति० A. वसेम भवेम वा Sy.

नान्तवन्तो[1] भवेम स्याम च गृहे[2] अहन्तुस्तव स्वभूते त्वया ब दत्ते[4]। बहुधनत्वान्मनुष्याणां पालके[5]।

एष स्तोमो अचिक्रद[6]द्वृषा त उत स्तामु[7]र्मघवन्नक्रपिष्ट[8]।
रायस्कामो जरितार[9]ं त आगन्त्वमङ्ग शक्र[10] वस्व आ शको नः॥ ६ ॥

एषः। अयम् स्तोता[6]। वृषा वसिष्ठः। त्वाम्[7]। अचिक्रददस्तौत्[8]। अपि च। स्तामुः[10]स्तभिग्लानकर्मा सकारः उपजनः। मघवन्[11]। क्लृप्तो[12] भवतु। धनस्य[13]। आमः[14]। जरितारम्[15]। तव। आगच्छतु[16]। यद्यद्धन[17] कामयते तदागच्छतु त्वम् अङ्ग[18]! शक्र! धनस्य[19]। प्रयच्छ[20]। अस्मभ्यम्।

स न इन्द्र[21] त्वयताया इषे धास्मना[23] च ये मघवानो जुनन्ति[24]।
वस्वी षु[25] ते जरित्रे अस्तु शक्तिर्यूयं पात स्वस्तिभिः[26] सदा नः॥ १० ॥

स न इन्द्र[21]। सः[22]। अस्मा न्द्र[23]! त्वया प्रदेयाय[24]। अन्नाय[25]। धेहि[26]। येऽमी। हविष्मन्तः। स्वयमेव तुभ्यं हविः। प्रेरयति[27]। अथैकवदाह—कल्याण[28]। तप[29]। दानम्[30]। स्तोत्रे मह्यम्[31]। भवत्विति[32]।

---

१. ०नान्नवन्तो is suggested for ०नान्तवन्तो ॥ अतिशयेनान्नवन्तः refers to चनिष्ठाः।
२. गृहे चरणीये वा धने Sy.
३. अर्हसतः Sy.
४. न धत्ते M. वा दत्ते is suggested for ब दत्ते।
५. पालकः A. नृणां रक्षके Sy.
६. सोमः सूयमानः Sy.
७. सेक्ता Sy. ८. त्वदर्थम् Sy.
९. ०दस्तेत् A. क्रन्दति Sy.
१०. ०मि ग्ला० A. स्तामुस्त० is suggested for स्तामुः स्त० ॥ स्तोता Sy.
११. मघवान् A. हे धनवन्! इन्द्र! Sy.
१२. अस्तौत् Sy.
१३. जनस्य M.
१४. कामः is suggested for आमः। अभिलाषः Sy.
१५. स्तोतारं माम् Sy.
१६. आगतः Sy.
१७. यद्यन्धनं A.
१८. क्षिप्रम् Sy.
१९. धनम्। कर्मणि षष्ठी Sy.
२०. धेहि Sy.
२१. स इन्द्र A.
२२. त्वम् Sy.
२३. इन्द्र is missing in M. अस्मान्। इन्द्र! is suggested for अस्मा। न्द्र!
२४. त्वया दत्तम् Sy.
२५. अन्नं भोक्तुम् Sy.
२६. धारय Sy.
२७. प्रेरयन्ति is suggested for प्रेरयति। तानपि त्वयताया इषे धाः Sy.
२८. ०कपदा० A.
२९. कल्याणाम् M. कल्याणम् is suggested for कल्याण। अपि च वस्वीष्वत्यन्तं प्रशस्तासु स्तुतिषु Sy.
३०. प M. तव is suggested for तप।
३१. दानाम् M. शक्तिः सामर्थ्यम्। यद्वा जरित्रे मह्यं ते तव वस्वी षु प्रशस्ता शक्तिर्धनमस्तु Sy.
३२. VM. ignores च and स

VII. 21.

असावि देवं गोऋंजीकमन्धो न्यस्मिन्निन्द्रो जनुषेमुवोच ।
बोधामसि त्वा हर्यश्व यज्ञैर्बोधा नः स्तोममन्धसो मदेषु ॥ १ ॥

[1]असावि[2] । सुतम्[3] । देवनशीलम्[4] । मूज्रवयस्करम्[5] (?) अन्धः[6] । सुते चास्मिन् सोमे[7] । इ[8] । ख्येन[9] सेवामकरोत्[10] । बोधयाम । त्वाम् । हर्यश्व[11] ! यज्ञैः[12] । बुध्यस्व[13] । न[14] । स्तोमम्[15] । सोमस्य । मदेषु[16] ।

प्र यन्ति यज्ञं विपयन्ति बर्हिः सोममादो विदथे दुध्रवाचः ।
न्यु ध्रियन्ते यशसो गृभादा दूरउपब्दो वृषणो नृषाचः ॥ २ ॥

प्र यन्ति[17] । प्राहरन्ते[18] । यज्ञम् । कम्पयन्ति[19] । बर्हि । सोमेन मादयन्त ऋत्विज[20] । यज्ञे । दुर्धरमन्त्रवाच[21] । आभिमुख्येन[22] । हूयन्ते[23] । सुतान्यन्नानि । हविर्धानात्[24] । किञ्च-दूरे श्रूयमाणा. शब्दो भवन्ति[25] । श्रावाण[26] । नृभिः सेव्यमानाः प्रवृत्ता एषा वै[27] । [28]

---

१. 'असावि देवम्' इति दशर्चं चतुर्थं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमैन्द्रम् । तथा चानुक्रान्तम्—'असावि' (KSA. 35. 21.P. 25.) इति । माध्यन्दिनसवने मैत्रावरुणस्योक्षीयमानमिदं सूक्तम् 'असावि देवमिहोप यातेत्यनुसवनम्' (ĀSS. 5.5.) इति । इन्द्रस्य वृत्रघ्नः पशौ 'अभिक्रत्वा' इति वपाया अनुवाक्या । सूत्रितञ्च —'अभि क्रत्येन्द्र भूरथ ज्यन् त्वं महाँ इन्द्र तुभ्यं ह क्षाः' (ĀSS 3. 8.) इति

२. असावि: A.

३. अभिषुतम् Sy.

४. दीप्तम् Sy.

५. मूज्रवयस्करम् P. मिश्रितपयस्कम् or ऋजुपयस्कम् is suggested for ऋजुवयस्करम् ॥ गोभिः संस्कृतं गव्येन मिश्रितमित्यर्थः Sy.

६. सोमरूपमन्नम् Sy.

७. अभिषुते सोमरूपेऽन्धसि Sy.

८. श M. इन्द्रः is suggested for इ ॥

९. ०स्वाभाव्येन is suggested for ख्येन ॥ स्वभावत एव Sy.

१०. सङ्गतो भवति Sy.

११. हर्यश्च A. अथ प्रत्यक्षस्तुतिः हे हर्यश्व ! Sy.

१२. स्तोत्रैर्हविर्भिर्वा Sy.

१३. अस्माकम् Sy.

१४. स्तोत्रम् Sy.

१५. सो is written twice in A.

१६. VM. ignores नि and ईम् ॥ नि नितराम् । ईम्—अयम् Sy.

१७. यज्ञं प्रयन्ति यष्टारः Sy.

१८. स्तृणन्ति । विपिः स्तरणकर्मा Sy.

१९. यज्ञैः M.

२०. दुर्धरवाचः Sy. २१. आ इति चार्थे Sy.

२२. भूयन्ते A. अभिषववेलायां निगृह्यन्ते Sy.

२३. यशस्विनः Sy.

२४. गृहात् । गृहमध्यमग्रावा । तस्मात् Sy.

२५. श्रूयमाणशब्दाः is suggested for माणाः शब्दो ॥ दूर उपब्दिः शब्दो येषां ते दूर–उपब्दः Sy.

२६. नेतृनृत्विजः सचन्त इति नृषाचः Sy.

२७. एष वै A. प्रवृत्ता एषा वै seems to be redundant.

२८. VM. ignores नि and उ ॥ उ इति पूरणः Sy.

त्वमिन्द्र स्रवितवा अपस्कः परिष्ठिता अहिना शूर पूर्वीः ।
त्वद्वावक्रे रथ्यो३ न धेना रेजन्ते विश्वा कृत्रिमाणि भीषा ॥ ३ ॥

त्वमिन्द्र । त्वम् । इन्द्र ! स्रवितुम् । उदकानि । परोषि । परिष्ठितानि । अहिना । शूर ! बहूनि । त्वत्तः । निर्गच्छन्ति । रथिनः । इव । नद्यः । तथा सर्वाणि । कृत्रिमाणि रक्षाणि । कम्पन्ते । त्वद्भयेन ।

भीमो विवेषायुधेभिरेषामपांसि विश्वा नर्याणि विद्वान् ।
इन्द्रः पुरो जर्हृषाणो वि दूधोद्वि वज्रहस्तो महिना जघान ॥ ४ ॥

भीमः । भीमः । व्याप्नोति । आयुधैः कृत्रिमाणि । एतानि । कर्माणि । विश्वानि । नृहितानि जानन् वर्षादीनि । इन्द्रः । शत्रुपुराणि । हृष्यन् । वि दोधवीति । विहन्ति च । वज्रहस्तः । महत्त्वेन पुराणीति ।

न यातवं इन्द्र जूजुवुर्नो न वन्दना शविष्ठ वेद्याभिः ।
स शर्धदर्यो विषुणस्य जन्तोर्मा शिश्नदेवा अपि गुर्ऋतं नः ॥ ५ ॥

न यातवः । न । राक्षसाः । इन्द्र ! अपिगच्छेयुः । अस्मान् । न च । वन्दना बहुवचनस्याकारः ।

---

१. करोषि is suggested for परोषि ॥ अकार्षीः Sy. २. आक्रान्ताः Sy.
३. वृत्रेण Sy. ४. बह्वीः Sy.
५. त्वत्तः A. त्वत्तो हेतोः Sy.
६. 'वकि कौटिल्ये' इति धातुः Sy.
७. रक्षांसि is suggested for रक्षाणि ॥ भुवनानि Sy.
८. त्वत्तो भयेन Sy.
९. हीमः A. भयङ्करः सन् Sy.
१०. व्याप्तवान् Sy.
११. एषाम् । कर्मणि षष्ठी । एतानसुरान् Sy.
१२. ०दीन् M. वर्षादीनि should immediately follow कर्माणि ।
१३. हृष्यत् A.
१४. विरोध० A. अकम्पयत् Sy.
१५. तान् विजघान Sy.
१६. महिम्ना युक्तः Sy.
१७. वसिष्ठस्येदमार्षम् Dur. वसिष्ठस्य SKN.
१८. न is missing in M. तथा कुरु यथा नेममस्मज्जम् Dur. नशब्दोऽत्र माशब्दार्थे SKN.
१९. यातयितारो यज्ञविघ्नकर्तारः Dur. उत्तरपदलोपोऽत्र द्रष्टव्यो भीमभामावत् । यातुधाना राक्षसाः SKN.
२०. हे इन्द्र ! Sy. हे भगवन्निन्द्र ! Dur.
२१. हिंस्युः । जूजुवुरिति हिंसाक्रियः पृथक्करणक्रियो वा Sy. केचिदपि. आगच्छेयुरित्यर्थः Dur. जवतिर्गतिकर्मा । मा गमन्नित्यर्थः SKN.
२२. अस्माकं स्वभूतं यज्ञम् SKN.
२३. अयमपि नशब्दो माशब्दस्यैवार्थे । मा च SKN.
२४. रक्षांसि Sy. य एते वन्दना वन्दितारो लाङ्गौडादयः Dur. तृतीयैकवचनेऽयमाकारः । तच्छ्रुतेश्च युक्ता इति शेषः । वन्दनया स्तुतिवचनजीविनो नटनर्तकप्रस्थापकप्रभृतय इत्यर्थः SKN.

बलवत्तम ! निवेद्याभिः स्तुतिभिः। सः। उत्सहताम्। स्वामी। विषमस्य। जन्तोः प्रशास्ता। मा। शिश्नदेवाः शिश्नेन क्रीडन्तः। अस्माकम्। यज्ञम्। अपिगच्छेयुः।

---

१. हे शविष्ठ बलिष्ठ ! Dur. अतिशयेन बलवन् ! SKN.

२. वेद्याभ्यः प्रजाभ्यो नोऽस्मान्न जूजुवुः । न पृथक्कुर्वन्तु Sy. जानपदीभिर्वेद्याभिराकृतिभिर्युक्ताः। किं ब्राह्मणा एते स्युः, उतान्यजातीयाः केचिदिति । अथवा—आवेदितव्याभिः प्रवृत्तिभिर्युक्ताः । न हि तासां प्रवृत्तीनामन्तोऽस्ति याभिस्ते प्रवर्तन्ते चपलत्वात् Dur. वेद्या वेदितव्याः कुहकप्रभृतय ईश्वरप्रतारणोपायभूतास्ताभिर्वा युक्ताः SKN.

३. इन्द्रः Sy. आह कीदृशास्तर्हि यज्ञमागच्छन्त्विति ? उच्यते...स एव Dur. कस्तर्हि ? सः SKN.

४. उत्सहेत Sy. उत्सहतामिममस्मद्यज्ञमागन्तुम् Dur. शर्धतिरुत्साहार्थः। उत्सहतामागन्तुम् SKN.

५. य एवार्य ईश्वर आत्मीयानामिन्द्रियाणां जितेन्द्रिय इत्यर्थः Dur. 'ऋ गतौ' इत्यस्य शुद्धस्याप्यधिपूर्वार्थे वर्तमानस्येदं नेश्वरतायाम् । बाहुलकत्वाच्च कर्तरि कृत्प्रत्ययः । स इति तच्छब्दश्रुतेर्यच्छब्दोऽध्याहार्यः । अर्योऽधिगन्ता ज्ञातेत्यर्थः SKN.

६. विषमस्य यज्ञविध्वंसयितुः ।...एवमेतस्मिन्मन्त्रे यातवो वन्दनाः शिश्नदेवाश्च मा आगच्छन्तु—इति प्रतिषिद्धेष्वेतेषु, अनिष्टत्वादेतेषां स शर्द्धवर्य इति श्रूयमाणमर्यवृत्तमनुष्याभ्यागमनविषयमेतद् भवति, तस्येष्टत्वात् । स चाभ्यागतः सन्नवद्यं विषुणस्य विषमस्य मनुष्यस्य निग्रहं करोति । तस्मात् 'विषुणस्य' इति शब्दो 'विषमस्य' इत्युपपद्यते Dur.

७. जन्तो प्र० A. प्राणिनः शासने Sy. जन्तोर्मनुष्यस्य निग्रहाय समर्थः । येन परिपाल्यमाना एतं यज्ञमविघ्नेन समापयेमहीत्यभिप्रायः Dur. जननधर्मिण आत्मनो यज्ञस्य वा SKN.

८. अथ च शिश्नदेवाः । शिश्नेन दीव्यन्ति क्रीडन्त इति शिश्नदेवाः । अब्रह्मचर्या इत्यर्थः Sy. किञ्च येऽपि चैते श्रोत्रिया अपि सन्तः शिश्नदेवा शिश्नेन नित्यमेव प्रकीर्णाभिः स्त्रीभिः साकं क्रीडन्त आसते । श्रौतानि कर्माण्युत्सृज्य तेऽपि Dur. शिश्नेन ये च नित्यं दीव्यन्ति क्रीडन्ति ब्रह्मचर्यवर्जितास्तेऽपि । शिश्नं इनथतेस्ताडनार्थस्य । ताड्यते हि तेन स्त्री सम्भोगकाले SKN.

९. यज्ञं वा सत्यं वा Sy. युष्मदनुग्रहादिदमस्माकमृतं यज्ञम् । '..यदा तु ऋतशब्दस्य 'सत्यं वा' इत्येवर्थवचनं भवति तदाऽस्माकमृतं सत्यम् Dur. अथवा' ऋतमत्र सत्यमुच्यते । ऋ, गुरइत्येतावपि शुद्धावधिपूर्वार्थे द्रष्टव्यौ । सत्यं परमार्थमस्माकमधिगमनमज्ञासिषुरित्यर्थः SKN.

१०. अपिगमन् Sy. मा आगच्छन्तु । नास्माकं तैरपि यज्ञमभिगच्छद्भिरर्थोऽस्तीत्यभिप्रायः । ...एवंलक्षणाः पापकर्माणो मा अपिगुरित्येवं योज्यम्। अपि गुरिति चैष गमिस्तदा ज्ञानार्थः। एवमप्युपपद्यत इत्यतो भाष्यकारेणोक्तम् 'सत्यं वा यज्ञं वा' इति Dur. मा च...गमन् SKN.

११. स उत्सहतां यो विषुणस्य जन्तोर्विषमस्य । मा शिश्नदेवा अब्रह्मचर्याः । शिश्नं इनथतेः । 'अपि गुर्ऋतं नः' सत्यं वा यज्ञं वा । N. 4.19., SKN. II. 256.

अभि क्रत्वेन्द्र भुरध जमन्न तेऽविव्यङ्महिमानं रजांसि ।
स्वेना हि वृत्रं शवसा जघन्थ न शत्रुरन्तं विविदद्युधा ते ॥ ६ ॥

अभिक्रत्वा । आह्याभूः । प्रज्ञया । इन्द्र ! पृथिव्यां सर्वाणि भूतानि । न । तेऽ । व्याप्नुवन्ति । महिमानम् । लोकाः, व्यतिर्व्याप्तिकर्मा । स्वेन । हि । बलेन । वृत्रम् । त्वं हतवानसि । न । शत्रुः कश्चित् । तव । अन्तम् । अविन्दत् । योधनेन ।

देवाश्चित्ते असुर्याय पूर्वेऽनु क्षत्राय ममिरे सहांसि ।
इन्द्रो मघानि दयते विषह्येन्द्रं वाजस्य जोहुवन्त सातौ ॥ ७ ॥

देवाः । देवाः । च । तुभ्यम् । असुराणां हन्त्रे । पूर्वे । अनुमेनिरे । क्षतात् त्रात्रे । बलानीन्द्रस्य बलकरणानि साहाय्यकरणेनानुमन्यन्ते । इन्द्रः । धनानि । प्रयच्छति । शत्रूनभिभूय । इन्द्रम् । सङ्ग्रामस्य । सम्भजने । मृगमाह्वयन्ति ।

---

१. अहुः A. अभ्यभूः is suggested for आह्याभूः ॥
२. कर्मणा Sy.
३. पृथिव्यां वर्तमानान् जन्तून् वा Sy.
४. तैः M.
५. व्याप्नुवन्नित्यर्थः Sy. ६. सर्वे लोकाः Sy.
७. प्य...व्याप्ति० A. व्यचि० is suggested for. व्यति० ॥ The passage व्यचिर्व्याप्तिकर्मा should immediately follow व्याप्नुवन्ति and precede महिमानम् ।
८. आत्मीयेन Sy. सांहितिकं दीर्घत्वं छान्दसम् BB.
९. त्वमवधीः Sy.
१०. शत्रू क० A.
११. तप A.
१२. हिंसाम् Sy. विनाशम् BB.
१३. लब्धवान् Sy. न वेत्तु न लभतां वा । वेत्तेर्विन्दतेर्वा BB.
१४. युद्धेन Sy. युद्धेनापि BB.
१५. VM. ignores अध ॥ अपि च Sy. This stanza=TS. 7. 4. 15. 1.
१६. असुराः Sy. १७. अपि Sy.
१८. बलाय Sy.
१९. अनु ममिरे—'हीने' (Pa. 1.4.86.) इत्यनुः कर्मप्रवचनीयः । तव बलेभ्यो हीना ममिर इत्यर्थः । तथा च निगमान्तरम्—'अनु ते द्यौर्बृहती वीर्यं ममे' (RV. 1. 57. 5.) इति Sy.
२०. क्षतां त्राते A. क्षत्राय । क्षदिर्हिंसाकर्मा । बलं हिंसां चोभे कर्तुमित्यर्थः Sy.
२१. अथ परोक्षस्तुतिः Sy.
२२. मंहनीयानि Sy.
२३. ०च्छन्ति A. भक्तेभ्यः प्रयच्छति Sy.
२४. अन्नस्य Sy. २५. लाभार्थम् Sy.
२६. मृगं is doubtful. भृशम् is suggested for मृगम् ॥ स्तुवन्ति स्तोतार आह्वयन्ति वा Sy.

कीरिश्चिद्धि त्वामवसे जुहावेशानमिन्द्र सौभगस्य भूरेः ।
अवो बभूथ शतमूते अस्मे अभिष्टुत्स्त्वावतो वरूता ॥ ८ ॥

कीरिश्चित्[1]। स्तोता[2]। चित्। हि। त्वाम्। रक्षणाय। आह्वयन्ति[3]। ईश्वरम्। इन्द्र! भूरिणः[4]। धनस्य[5]। हे बहुरक्षण! रक्षकः[6]। भव[7]। अस्माकम्। क्षदिः शकलीभावकर्मा शत्रूणामभिहिंसितुः[8]। त्वावतः[9]। सर्वो जनो वरीता[10] भवति।

सखायस्त इन्द्र विश्वहा स्याम नमोवृधासो महिना तरुत्र ।
वन्वन्तु स्मा तेऽवसा समीके ३ भीतिमर्यो वनुषां शवांसि ॥ ९ ॥

सखायः। सखायः। ते। इन्द्र! वयम्। सर्वदा। भवेम। हविषो वर्धयितारः[11]। महत्त्वेन[12]। हे तारक[13]! अभिभवन्ताम्[14]। तव। रक्षणेन सह। सङ्ग्रामे। अर्योऽरेः शत्रोः। अभिगमनम्। तव सम्भक्तॄणामस्माकम्[15]। बलानि[16]।

स न इन्द्र त्वयताया इषे धास्मनो च ये मघवानो जुनन्ति ।
वस्वी षु ते जरित्रे अस्तु शक्तिर्यूयं पात स्वस्तिभिः सदा नः ॥ १० ॥

[स न इन्द्र[17]]

---

१. किरीश्चित् A.
२. वसिष्ठः Sy. कारुः, कीरिः, इति स्तोतृनामनी Ngh. 3. 16.
३. चिवितिं पूरणः Sy.
४. यति is suggested for ·यन्ति ॥ स्तौति ह्वयति वा Sy.
५. प्रभूतस्य Sy.
६. रक्षः A.
रक्षा Sy.
७. बभूविथ Sy.
८. अभिहिंसकस्य Sy.
९. तावत A.
त्वत्सदृशस्य Sy.
१०. परीता A.
वारयिता च भव Sy.
११. स्तुत्या हविषा वा वर्धयितारः Sy.
१२. महिम्ना Sy.
१३. अत्यन्तं तारकः! इन्द्र! Sy.
१४. भवतां M. ०भवन्तु is suggested for ०भवन्ताम्। स्तोतारो हिंसन्तु Sy.
१५. ०मे योऽरेः M.
१६. ०भर्तृणा० M.
वनुषां हिंसकानाम् Sy.
१७. VM. ignores स्म।
१८. The *pratika* is supplied by the Editor.
The stanza has already been explained. See RV. 7. 20. 10.

VII. 22.

पिबा सोममिन्द्र मन्दतु त्वा यं ते सुषाव हर्यश्वाद्रिः ।
सोतुर्बाहुभ्यां सुयतो नार्वा ॥ १ ॥

पिबा सोमम् । पिब । सोमम् । इन्द्र ! स त्वाम् । मादयतु । यम् । तुभ्यम् । सुषाव । हर्यश्व ! ग्रावा । सोऽनु । प्रसवितुरश्वारोहस्य । बाहुभ्याम् । सुसङ्गृहीतः । इव । अश्वः ।

यस्ते मदो युज्यश्चारुरस्ति येन वृत्राणि हर्यश्व हंसि ।
स त्वामिन्द्र प्रभूवसो ममत्तु ॥ २ ॥

यस्ते मदः । यः । ते । सोमः । सहायः । चारुः । भवति । येन । शत्रून् । हयश्व ! हंसि । सः । त्वाम् । इन्द्र ! प्रभूतधन ! मादयतु ।

---

१. 'पिबा सोममिन्द्र मन्दतु त्वा' इति नवर्चं पञ्चमं सूक्तम् । अनुक्रम्यते च—'पिब नव वैराजमृतेऽन्त्याम्' (KSA. 35. 22. p. 25.) इति । वसिष्ठ ऋषिः । आदितोऽष्टौ विराजो नवमी त्रिष्टुप् । इन्द्रो देवता । दशरात्रे चतुर्थेऽहनि निष्केवल्यशस्त्रे 'पिबा सोममिन्द्र' इति षट् स्तोत्रियानुरूपौ । सूत्रितञ्च—'वैराजं चेत्पृष्ठं पिबो सोममिन्द्र मन्दतु त्वेति षट् स्तोत्रियानुरूपौ' (ĀŚS. 7. 11.) इति। महाव्रतेऽपि निष्केवल्य आद्याः षडृचः । सूत्रितञ्च—'पिबा सोममिन्द्र मन्दतु त्वेति षट्' (AA. 5. 3.) इति । आद्या निष्केवल्यशस्त्रयाज्या । सूत्रितञ्च—'पिबा सोममिन्द्र मन्दतु त्वेति याज्या' (ĀŚS. 5. 15.) इति । चतुर्थेऽहनि माध्यन्दिनसवने होत्रकशस्त्रेषु सप्त विराजस्त्रींस्तृचान् कृत्वैकैकस्तृचः शंसनीयः । तत्र 'न ते गिरः' इत्याद्याश्चतस्र ऋचः । सूत्रितञ्च—'न ते गिरो अपि मृष्ये तुरस्य प्र वो महे महिवृधे भरध्वम्' (ĀŚS. 7. 11.) इति Sy.

२. इन्द्रः A.

३. पीतश्चायं सोमः BB.

४. त्व A. त्वम् Sy.

५. मादायतु A. मन्दतु तर्पयतु । 'मदि स्तुतिमोद-मदस्वप्नकान्तिगतिषु' व्यत्ययेन परस्मैपदम् BB.

६. सोमम् BB. ७. त्वदर्थम् Sy., BB.

८. अभिषुतवान् Sy.

९. हर्यश्च A. हरिततुरङ्ग ! BB.

१०. सोतुः is suggested for सोऽनु ॥ अभिषवकर्तुः Sy. किं स्वयमेव ? नेत्याह, सोतुरभिषोतुर्ऋत्विजः । साधुकारिणि तृन् । तस्य बाहुभ्यां सह, अद्रिः सुषाव । यद्वा सोतुर्बाहुभ्याम् BB. ११. द्रप्सिभ्याम् Sy.

१२. सुष्ठु परिगृहीतः Sy. सुयतः सुष्ठु यन्त्रितः BB.

१३. अश्व A. अत एव नार्वा नारणशीलः स्वकार्यकरणे सुप्रतिष्ठितः । यद्वा, अतो न अर्वा न पापः, कार्यविरोधित्वमेव पापम् । अर्तेः 'अन्येभ्योऽपि दृश्यते' इति वनिप् । ततस्तुष्टस्त्वमस्मभ्यमभिमतं वेहीति BB. This stanza=TS. 2. 4. 14. 3.

१४. मद A. १५. तव Sy.

१६. मदकरः सोमः Sy. १७. अनुगुणः Sy.

१८. चारुः A. समीचीनः Sy.

१९. विद्यते Sy. २०. येन च पीतेन सोमेन Sy.

२१. हत् सी A. २२. ईन्द्र A.

२३. ०धनं M. २४. मादायतु A.

बोधा सु मे मघवन्वाचमेमां यां ते वसिष्ठो अर्चति प्रशस्तिम् ।
इमा ब्रह्म सधमादे जुषस्व ॥ ३ ॥

बोधा सु मे । बुध्यस्व । मघवन् ! सुष्ठु । आभिमुख्येन । मदीयाम् । इमाम् । स्तुतिम् । याम् । ते । वसिष्ठः । उच्चारयन्ति । प्रशस्ताम् । इमानि च । हवींषि । यज्ञे । सेवस्व ।

श्रुधी हवं विपिपानस्यादेर्बोधा विप्रस्यार्चतो मनीषाम् ।
कृष्वा दुवांस्यन्तमा सचेमा ॥ ४ ॥

श्रुधी हवम् । शृणु । घोषम् । सोमं विशेषेण पिबतः । ग्राणः । बुध्यस्व च । मेधाविनः । ब्रुवत । स्तुतिम् । कुरु च । परिचरणानि । अन्तिकतमानि । त्वया सहितानीति ।

न ते गिरो अपि मृष्ये तुरस्य न सुष्टुतिमसुर्यस्य विद्वान् ।
सदा ते नाम स्वयशो विवक्मि ॥ ५ ॥

न ते गिरः । ग । त्वदीयाः । स्तुतीरहम् । अपि मृष्ये सोढुं न शक्नोमि क्षिप्रमुच्चारयामि । क्षिप्रकारिणस्तथा । सुष्ठुतिश्च । न मृष्यामि । असुराणां हन्तुः । जानन् । सर्वदैव । तव । नाम । हे स्वभूत-यशः । ब्रवीमि ।

---

१. हे धनवन् ! इन्द्र ! Sy. २. सुष्व A.
३. वसिष्ठस्य सम्बन्धिनीम् Sy.
४. याम् is suggested for या ॥
५. इचोइच्चोरयन्ति A. उच्चारयति is suggested for उच्चारयन्ति ॥ वदति Sy.
६. स्तुतिरूपाम् Sy.
७. हविषो A. ब्रह्माणि Sy. ८. श्रुधी भव A.
९. शृणु तथा च निगमान्तरम् 'ग्रावभ्यो वाचं ववता वदद्भ्यः'(RV. 10.94.1.)इति Sy.
१०. आह्वानम् Sy.
११. हे इन्द्र ! विपिपानस्य विपीतवतो विपिबतो वा मम Sy.
१२. ग्राणः M. ग्राण्णः is suggested for ग्राणः ॥
१३. प्राज्ञस्य वसिष्ठस्य Sy.
१४. ब्रुवतः is suggested for ब्रुवत ॥ स्तुवतः Sy.
१५. बुद्धिस्थानि Sy.
१६. सचा सह सहायभूतः सन् Sy.
१७. VM. ignores इमा ॥ इमानि क्रियमाणानि Sy. १८. Missing in M. न is suggested for ग ।
१९. स्तुतिरहम् A.
२०. मृषिर्मार्जनकर्मा मार्जयामि । परित्यजामीत्यर्थः । मृषेर्मार्जनकर्मत्वमन्यत्रापि दृश्यते । तद्यथा— 'मा नो' अग्ने सख्या पित्र्याणि प्र मर्षिष्ठाः' (RV. 1. 71. 10.) इति Sy.
२१. शत्रूणां हिंसकस्य Sy.
२२. सुष्ठु किञ्च M. सुष्टुति० is suggested for सुष्ठुति० ॥ शोभनां स्तुतिम् Sy.
२३. हन्तु A. असुर्यस्य । द्वितीयार्थे षष्ठी । त्वदीयमसुर्यं बलम् Sy. २४. ज्ञानन् A.
२५. स्तोत्रम् Sy.
२६. किन्तु स्वयशोऽसाधारणयशः Sy.

भूरि हि ते सवना मानुषेषु भूरि मनीषी हवते त्वामित् ।
मारे अस्मन्मघवञ्ज्योक्कः ॥ ६ ॥

भूरि हि ते । भूरीणि । ते । सवनानि[1] सन्ति । मनुष्येषु[2] । भूयिष्ठञ्च[3] । हवते[4] । मेधावी[5] । त्वाम् । एव । अस्माकम्[6] । दूरे । मघवन् ! चिरम्[7] । कार्षि[8] ।

तुभ्येदिमा सवना शूर विश्वा तुभ्यं ब्रह्माणि वर्धना कृणोमि ।
त्वं नृभिर्हव्यो विश्वधासि ॥ ७ ॥

तुभ्येदिमा[10] । तुभ्यम् । एव । इमानि । सर्वाणि । सवनानि[11] । शूर ! करोमि । तुभ्यमेव[12] । स्तोत्राणि च । वर्धनानि । त्वं हि । मनुष्यैः[13] । हव्यः[14] । भवसि । सर्वदेति[15] ।

नू चिन्नु ते मन्यमानस्य दस्मोदंश्नुवन्ति महिमानमुग्र ।
न वीर्यमिन्द्र ते न राधः ॥ ८ ॥

नू चिन्नु[16] । क्षिप्रम् । एव[17] । तव । स्तूयमानस्य । दर्शनीय ! महिमानम । उदश्नुवन्ति[18] । उग्र[19] ! न । त्वां साधयन्ति पुरुषस्य बलम्[20] । नाभि[21] । धानमिति[22] ।

ये च पूर्व ऋषयो ये च नूत्ना इन्द्र ब्रह्माणि जनयन्त विप्राः ।
अस्मे ते सन्तु सख्या शिवानि यूयं पात स्वस्तिभिः सदा नः ॥ ९ ॥

ये च । ये । च । पूर्वे[24] । ऋषयः । ये । च । नूतनाः[25] । इन्द्र ! स्तोत्राणि तव । अजनयन्[26] ।

---

१. सोमाभिषवणानि Sy.
२. अस्मासु वर्तन्त इति शेषः Sy.
३. नितराम् Sy.
४. भवते A. ह्वयति स्तौति Sy.
५. स्तोता Sy. ६. अस्मत्तः Sy.
७. चिरकालम् Sy.
८. कार्षिम् A. कार्षीः is suggested for कार्षि ॥ क्षिप्रमात्मानमस्मदासन्नं कुर्वित्यर्थः Sy.
९. VM. ignores हि and मा ।
१०. तुभ्येमिमा A.
११. सोमाभिषवणानि मया क्रियन्त इति शेषः Sy.
१२. त्वदर्थमेव Sy.
१३. मनुष्यैः A. यज्ञानां नेतृभिः Sy.
१४. ह्वातव्यः स्तुत्यो वा Sy.
१५. विश्वधा सर्वप्रकारैः Sy.
१६. चिन्नुं A.
१७. नू चिदिति प्रतिषेधार्थः Sy.
१८. केचन प्राप्नुवन्ति Sy.
१९. उग्रं M. हे उद्गूर्ण ! Sy.
२०. ०यति is suggested for ०यन्ति ।
२१. नापि is suggested for नाभि ।
२२. धनमिति is suggested for धानमिति ।
२३. VM. ignores नु । इन्द्र and ते ।
२४. प्राक्तनाः Sy.
२५. भूतनाः A.
२६. अजनयन्त Sy.

मेधावान[1] । स्वेष्विवास्मास्वपि[2] । तव । सङ्ख्यानि[3] । शिवानि[4] । भवन्त्वानि[5] ।

VII. 23.

उदु ब्रह्माण्यैरत श्रवस्येन्द्रं समर्ये महया वसिष्ठ ।
आ यो विश्वानि शवसा ततानोपश्रोता म ईवतो वचांसि ॥ १ ॥

उदु[7] ब्रह्माणि । उदीयति[7] । प्रेरयति । अन्नानि[8] । श्रवणीयानि[9] । तथा सतीन्द्रम् । यज्ञे । पूजयसि[10] । वसिष्ठ[11] ! यः । सर्वाण्येव भूतानि[12] । बलेन । आततान । स इद्रुपश्रोता[13] भवतु । मम । अभिगमनवतः । वचांसि[14] [15] ।

अयामि घोषं इन्द्र देवजामिरिज्यन्त यच्छुरुधो विवाचि ।
नहि स्वमायुश्चिकिते जनेषु तानीदंहांस्यति पर्ष्यस्मान् ॥ २ ॥

अयामि[16] । अयामि नियत[16] । स्तुतिशब्दः[17] । इन्द्र[18] ! देवानां देवश्च बन्धुरुदीरयामीत्यर्थः[19] । यस्मान्[20] ।

---

१. मेधाविनः is suggested for मेधावान ॥ मेधाविन ऋषयः Sy.
२. स्त्वेष्विवास्माकं स्वपि A.
३. सख्यानि is suggested for सङ्ख्यानि ॥
४. शिर वानि A. भद्राणि Sy.
५. न्त्वानि is missing in M. भवन्त्विति is suggested for भवन्त्वानि ॥
६. 'उदु ब्रह्माणि इति षडृचं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमैन्द्रम् । अनुक्रम्यते च 'उदु षट्' (KSA. 35. 23. p. 25.) इति । अग्निष्टोमे माध्यन्दिने सवने ब्राह्मणाच्छंसिशस्त्र एतत्सूक्तम् । सूत्रितञ्च 'उदु ब्रह्माण्यूजीषी वज्री वृषभस्तुराषाळिति याज्या' (ĀŚS. 5. 16.) इति । चातुर्विंशिकेऽहनि माध्यन्दिनसवने ब्राह्मणाच्छंसिशस्त्र एतदहरहः शस्यसंज्ञकं सूक्तम् । सूत्रितञ्च—'उदु ब्रह्माण्यभितष्टेवेतीतरावहरहःशस्ये' (ĀŚS. 7. 4.) इति । अहर्गणेषु द्वितीयादिष्वहःस्वेतदेव सूक्तम् । महाव्रतेऽपि निष्केवल्य एतत्सूक्तम् । सूत्रितञ्च—'उदु ब्रह्माण्यैरत श्रवस्या ते मह इन्द्रोऽत्युग्रेति पञ्च सूक्तानि' (AA. 5. 2. 2.) इति Sy.
७. उदियति M. उदीरयति is suggested for उदीयति ॥ इन्द्रार्थमुदैरत सर्व ऋषय इति शेषः ।
८. स्तोत्राणि हवींषि च Sy.
९. अन्नेच्छया Sy.
१०. स्तोत्रेण हविषा च पूजय Sy.
११. हे वसिष्ठ ! त्वमपि Sy.
१२. भुवनानि Sy.
१३. इन्द्रूपः श्रोता M. इन्द्र उपश्रोता is suggested for इद्रुप श्रोता ॥
१४. स्तुतिरूपाणि वाक्यानि Sy.
१५. VM. ignores उ ॥ उ इति पूरणः
१६. नियतः is suggested for नियत ॥ अकारि Sy.
१७. स्तुतिरूपः शब्दो घोषः Sy.
१८. हे इन्द्र ! त्वदर्थम् Sy.
१९. देवश्च...वीर० M. देवानां बन्धुरुदीर० is suggested for देवश्च...न्धुरुदीर
२०. यस्याम् M. यस्मात् is suggested for यस्मान् ॥ यदा Sy.

विविधवाचि स्तोतरि। अचो[2] रोधयित्र्य ओषधयः[3]। वृद्धा भवन्ति[4]। स्तुतिहेतु[5] नहि। स्वजीवनान्[6]। अस्मदेषु[7] केनचिदपि। ज्ञायते[8] तथा सति येन वय दीर्घमायुः प्राप्नुयाम। तथा अस्मदीयानि। तानि[9]। उपद्रवाणि[10] रोग-भयादीनि। अतिपारयेति[11]।

युजे रथं गवेषणं हरिभ्यामुप ब्रह्माणि जुजुषाणमस्थुः।
वि बाधिष्ट स्य रोदसी महित्वेन्द्रो वृत्राण्यप्रती जघन्वान् ॥ ३ ॥

युजे रथम्। युनज्मि[12]। रथम्[13]। गवामेषणशीलम्[14]। अश्वाभ्याम्[15]। उपास्थुश्च[16]। स्तोत्राणि। रथसमीपं सेवमानं माम्[17]। ततोऽयमिन्द्रस्तं रथमधितिष्ठन्[18]। द्यावापृथिव्यौ। महत्त्वेन[19]। पिबाधते[20]। शत्रून्। इन्द्र। अप्रतिगतः[21]। अहिंसन्[22]।

आपश्चित्पिप्युः स्तर्यो[23] न गावो नक्षन्नृतं जरितारस्त इन्द्र।
याहि वायुर्न नियुतो नो अच्छा त्वं हि धीभिर्दयसे वि वाजान् ॥ ४ ॥

आपश्चित्। आपः[24]। चित्[25]। पिप्युः[26] प्रवृद्धा अभवन्[27]। यथा सङ्गवकाले[28] भुवम्। स्तृणन्त्यः[29]। गाव[30]

---

१. इमथ वाचिः M.
२. शुचो रो० is suggested for अचो रो० ॥
३. एषधयौ A. शुचं सरुन्धन्तीति शुरुध ओषध्यः Sy.
४. वर्धन्ते Sy.
५. स्तुतिहेतु is suggested for स्तुत-हेतुः। It seems to be redundant.
६. स्वजीवान् A. स्वजीवनम् is suggested for स्वजीवनान् ॥ स्वजीवितम् Sy.
७. अस्मदीयेषु is suggested for अस्मदेषु ॥ जनेषु मध्ये केनापि Sy.
८. ०ते स तथा M. ९. अस्मानि A.
१०. यैरायुः क्षीयते तानि सर्वाणि Sy.
११. पापानि Sy.
१२. VM. ignores इत् ॥ इत् एव Sy.
१३. युनज्मि A. स्तोत्रैरहं युनज्मि Sy.
१४. इन्द्रस्य Sy. १५. गवां प्रापकम् Sy.
१६. इन्द्रवाहाभ्याम् Sy. १७. उपातिष्ठन्त Sy.
१८. परिवारैः सेव्यमानमिन्द्रम् Sy.
१९. ०मिन्द्रस्थस्तं A. सोऽयमिन्द्रः Sy.
२०. ०त्वेना A.
२१. Missing in M. बिबा० is suggested for पिबा० ॥ व्यबाधिष्ट च Sy.
२२. अप्रतिद्वन्द्वानि Sy.
२३. अहिनत् is suggested for अहिंसन् ॥ हतवान् Sy.
२४. आपः. . . निम्नाभ्यारूपाः Mah.
२५. अपि च Mah., U.
२६. विव्युः A. वर्धन्ताम् Sy.
२७. आप्याययन्ति। सोमं वर्धयन्ति। 'ओप्यायी वृद्धौ' लिटि 'प्यायः पी' आदेशः Mah. पाय-येयुर्निग्राह्य सोमे U.
२८. संगप० A.
२९. वशाः Sy. स्तृण्वन्ति सुन्वन्ति याभिस्ता स्तर्यः Mah. सुन्वन्त्यभिषुण्वन्ति याभिर्वाग्भिः सोमं ता स्तर्यः U.
३०. याभिः सोमः सूयते ता गावो वाचो वेदरूपा इव Mah. सोमाभिषवे हि त्रयीलक्षणा वाचो व्याप्रियन्ते U.

प्रवृद्धा[1] भवन्ति । व्याप्नुवन्[2] । उदकम्[3] । स्तोतारः[4] । तव । इन्द्र[5] ! आयाहि[6] । अस्मान् । अभि[7] । वायुः[8] । आत्मीया इव । विधवाः[9] । त्वम् । हि[10] । कर्मभिः[11] । विविधम्[12] । प्रयच्छसि[13] । अन्नानि ।

ते त्वा मदा इन्द्र मादयन्तु शुष्मिणं तुविराधसं जरित्रे ।
एको देवत्रा दयसे हि मर्तानस्मिञ्छूर सवने मादयस्व ॥ ५ ॥

ते त्वा मदाः[14] । ते[15] । त्वा । सोमाः[16] । इन्द्र ! मादयन्तु[17] । बलिनम्[18] । स्तोत्रे ददतम्[19] । बहुधनम्[20] । त्वमेक एव । देवान्[21] । मनुष्यांश्च । विविधम्[22] । गच्छसि[23] । अस्मिन्निति स्पष्टम्[24] ।

---

१. अप्रसृता गावो मांसला भवन्ति हि Sy.
ता यथा सोममाप्यायन्ति तथाऽऽप्योऽपि Mah.

२. व्याप्नुवन्ति । नक्षतिर्व्याप्तिकर्मा Mah. एवमनेन प्रकारेण...व्याप्नुवन्ति U.

३. यज्ञम् Mah., U.

४. स्तोतार ऋत्विजः Mah.

५. हे इन्द्र ! त्वत्प्रसादात् Sy.

६. आ is missing in A.
अत एव...याहि आगच्छ Mah.
एतच्च ज्ञात्वा याहि...अच्छ अभियाहि U.

७. अभिमुखम् Mah.

८. वायुर्यथा Mah., U.

९. विवधवाः A. वडवाः, as the explanation of नियुतः, in the sense of the horses of वायु is suggested for विधवाः ॥ स्वानश्वानभियाति Mah.
अश्वान् याति U.

१०. यतः Mah.
यस्मात् पुनस्त्वमेवमुच्यसे U.

११. कडमभि A. प्रज्ञाभिः कर्मभिर्वा Sy.
बुद्धिभिः कर्मभिर्वा Mah.
स्वकीयाभिर्बुद्धिभिः U.

१२. वाविविधं A.

१३. स्तोतृभ्यः प्रयच्छसि Sy. विविधं ददासि । 'दय दानादौ' अत एवागच्छ Mah.
This stanza=YV. 33. 18.

१४. एते Sy.

१५. त्वाम् Sy.

१६. मदकराः सोमाः Sy.

१७. मादयन्तु A.

१८. बलवन्तम् Sy.

१९. ददित्त A. M.

२०. ०धनः M.
पुत्रं प्रयच्छतीति शेषः Sy.

२१. देवेषु Sy.

२२. VM. seems to read वि for हि ॥

२३. दयतिरनुकम्पार्थः Sy.

२४. VM. ignores शूर । स्मिन्ने and मादयस्व ॥ हे शूर त्वम् अस्मिन् सवने यज्ञे ! मादयस्व Sy.

एवेदिन्द्रं वृषणं वज्रबाहुं वसिष्ठासो अभ्यर्चन्त्यर्कैः ।
स नः स्तुतो वीरवद्धातु गोमद्यूयं पात स्वस्तिभिः सदा नः ॥ ६ ॥

उत्तरा निगदसिद्धेति । [एवेदिन्द्रम् ।]

VII. 24.

योनिष्ट इन्द्र सदने अकारि तमा नृभिः पुरुहूत प्र याहि ।
असो यथा नोऽविता वृधे च ददो वसूनि ममदश्च सोमैः ॥ १ ॥

योनिष्टे । आसनस्थानम् । तव । इन्द्र ! सदनार्थम् । कृतम् । तद्योनिम् । आप्रयाहि । पुरुहूत ! मरुद्भिः । भवसिसि । यथा । अस्माकम् । रक्षिता । वर्धनाय । च । ददासि । धनानि । माद्यसि । इव । सोमैः ।

---

१. उक्तमरा निगमसिद्धेति A.

२. The *pratika* is supplied by the Editor. The stanza is very easy. VM. does not explain it. This is explained in the following manner :—
वसिष्ठासो वसिष्ठाः । वज्रबाहुं वज्रकल्पबाहुम् । वर्षणं कामानां वर्षितारम् । इन्द्रम् । एवेदुक्तेन प्रकारेणैव । अर्कैरर्चनीयैः स्तोत्रैः । अभ्यर्चन्ति अभिपूजयन्ति । स्तुतः स इन्द्रः । नः अस्मभ्यम् । वीरवत् पुत्रादियुक्तम् । गोमद् गोयुक्तम् । च धनं धातु । ददातु । स्पष्टमन्यत् Sy. वसिष्ठा वसिष्ठापत्यानि मुनयोऽर्कैर्मन्त्रैः, एव इत् एवमेवेन्द्रमभ्यर्चन्ति पूजयन्ति । कीदृशमिन्द्रम् ? वृषणं वर्षितारं वज्रं बाहौ यस्य तम् । स इन्द्रः स्तुतः सन् वीरवद् वीरा विद्यन्ते यत्र तत्पुत्रयुक्तम् । गोमद् गावो विद्यन्ते यत्र तद् गोसंयुक्तं धनम् । नोऽस्मभ्यं धातु दधातु । विकरणव्यत्ययः । एवं पादत्रयेणेन्द्रं स्तुत्वा ऋत्विज आह । हे ऋत्विजः ! यूयं स्वस्तिभिरविनाशैः सदा सर्वदा नोऽस्मान् पात रक्षत Mah. इत् पादपूरणः । इन्द्रं वृषणं वर्षितारं वज्रबाहुं वसिष्ठासो वसिष्ठापत्यानि बहूनि वस्तृतमा ऋषयः । अभ्यर्चन्ति अभिष्टुवन्ति । अर्कैर्मन्त्रैः स नः सोऽस्मभ्यं स्तुतः वीरवत् साधुपुत्रसंयुक्तं धातु दधातु धनम् । गोमच्च गोसंयुक्तम् । एवं त्रिभिः पादैरिन्द्रमभिष्टुत्य अथेदानीं ये याजयन्ति तानाह । यूयं पात पालयत स्वस्तिभिरविनाशैः सदाकालं नोऽस्मान् U.
This stanza=YV. 20. 54

३. 'योनिष्ट इन्द्र सदने अकारि' इति षड्चं सप्तमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमैन्द्रम् । अनुक्रम्यते च—'योनिः' (KSA. 35. 24. P. 25.) इति । महाव्रते निष्केवल्य एतत्सूक्तम् । सूत्रितञ्च—'योनिष्ट इन्द्र सदने अकारीत्येतस्य चतस्रः शस्त्वोत्तमामुपसन्तत्योपोत्तमया परिदधाति' (AA. 5. 3. 1.) इति Sy.

४. तं योनिम् is suggested for तद्योनिम् ।

५. मरुद्भिः सार्धम् Sy.

६. मरुद्भिः भवसि is missing in M. One सि is redundant.

७. अस्मभ्यं देहि Sy.

८. मादयस्व Sy.

९. च is suggested for इव ।

१०. अस्मदीयैः Sy.

गृभीतं ते मन इन्द्र द्विबर्हाः सुतः सोमः परिषिक्ता मधूनि ।
विसृष्टधेना भरते सुवृक्तिरियमिन्द्रं जोहुवती मनीषा ॥ २ ॥

गृभीतम् । गृहीतमस्माभिः । तव । इन्द्र ! मन. । द्वयोः स्थानयोः परिवृढम् । सुतश्च । सोमः । तत परितः पात्रेषु च सिक्तानि । मधूनि । विसृष्टवाक् । इन्द्राय हविर्विभक्ती । सुप्रवृत्ता । इयम् । इन्द्रम् । भृशमाह्वयन्ती । स्तुतिर्वापि देवेभ्यो हव्य वहति ।

आ नो दिव आ पृथिव्या ऋजीषिन्निदं बर्हिः सोमपेयाय याहि ।
वहन्तु त्वा हरयो मद्रयञ्चमाङ्गूषमच्छा तवसं मदाय ॥ ३ ॥

आ नो दिवः । आयाहि । अस्माकम् । इदम् । बर्हि । पृथिव्या. । दिवो वा । सोमपानाय । तृतीयसवनस्येव .ऋजिषेण .द्वत् । वहन्तु । त्वा । हरय. । मदभिमुखम् । स्तोमम् । प्रति । प्रवृद्धम् । तव मदार्थम् ।

आ नो विश्वाभिरूतिभिः सजोषा ब्रह्म जुषाणो हर्यश्व याहि ।
वरीवृजत्स्थविरेभिः सुशिप्रास्मे दधद्वृषणं शुष्ममिन्द्र ॥ ४ ॥

आनः । आ याहि । अस्मान् । विश्वे. । मरुद्भिः । सङ्गत. । स्तुतिम् । सेवमान. । हर्यश्व ! हिसन् । स्थविरैर्मरुद्भिः शत्रून् । सुमनो । अस्मासु । दधत् । कामाना वर्षितृ । बलम् । इन्द्र. !

---

१. गृहीतम् A. M.
२. द्विबर्हाः—षष्ठ्यर्थे प्रथमा । द्विबर्हसो द्वयोः स्थानयोः परिवृढस्य Sy.
३. अभिषुतः Sy.
४. विसृष्टवान् M. विसृष्टजिह्वा मध्यमस्वरेणोच्चार्यमाणा Sy.
५. हविषितिः भक्ति A. विभजति is suggested for विभक्ती । सम्भ्रियते च Sy.
६. सुसमाप्तिः Sy.
७. The passage, वापि (अपि वा) देवेभ्यो हव्यं वहति, seems to refer इन्द्राय हविर्विभजति ।
८. आगच्छ Sy. ९. इमं यज्ञम् Sy.
१०. अन्तरिक्षाच्च Sy. आपः, पृथिवी, इत्यन्तरिक्षनामनी Ngh. १. १३. ११. स्वर्गात् Sy.
१२. द्वत् is missing in M. ०स्थेन ऋजीषेण तद्वन् ! is suggested for ०स्थेवऋजिषेण द्वत् ।
१३. त्वाम् Sy. १४. अश्वाः Sy.
१५. स्तोत्रम् Sy. १६. बलवन्तं वा Sy.
१७. सर्वाभिः Sy. १८. रक्षाभिः Sy.
१९. स्तोत्रम् Sy.
२०. हर्यश्वं M. हे हर्यश्व ! हरिनामकाश्व ! Sy.
२१. शत्रून् भृशं हिंसन् Sy.
२२. ०विरेः म० A. वृद्धैः Sy.
२३. सुहनो ! is suggested for सुमनो ॥ शोभनहनो ! इन्द्र ! Sy.
२४. अस्मानु A. अस्मभ्यम् Sy.
२५. प्रयच्छन् Sy. २६. कामानां वर्षितारम् Sy.
२७. बलवन्तं पुत्रम् Sy.
२८. VM. seems to explain इन्द्र voc. by इन्द्रः nom.

एष स्तोमो महे उग्राय वाहे धुरीव वात्यो न वाजयन्नधायि ।
इन्द्रं त्वायमर्क ईट्टे वसूनां दिवीव धामधिं नः श्रोमतं धाः ॥ ५ ॥

एषः । एषः । स्तोमः । महते । उद्गूर्णा । वेहनार्थम् । रथस्य धुरीव । अश्वः । वाजयन् जयं कुर्वन् । अधायि युक्तः । इन्द्र ! त्वा । अयं । स्तोता । स्तौति । धनोनामर्थाय दिविव । आदित्यम् । अस्मान् । अधिश्रयणीयमन्नम् । धेहि ।

एवा न इन्द्र वार्यस्य पूर्धि प्र ते महीं सुमतिं वेविदाम ।
इषं पिन्व मघवद्भ्यः सुवीरां यूयं पात स्वस्तिभिः सदा नः ॥ ६ ॥

एवा नः । एवम् । अस्माकम् । इन्द्र ! वरणीय धनम् । पूरय । प्रकर्षेण । जानीमो वयम् । त्वदीयाम् । सुमतिम् । प्रयच्छ । अन्नम् । हविष्मद्भ्यः । सुपुत्रमिति ।

VII. 25.

आ ते मह इन्द्रोत्युग्र समन्यवो यत्समरन्त सेनाः ।
पतति दिद्युन्नर्यस्य बाह्वोर्मा ते मनो विष्वग्यग्वि चारीत् ॥ १ ॥

आ ते महः । आसमरन्त । तव । महतः । मनः । शत्रुदर्शनेन विष्वगञ्चनम् ।

---

१. उद्गूर्णाय is suggested for उद्गूर्णा ॥ ओजस्विनो वा Sy.
२. ये हना० M. वहना० is suggested for वेहना० ॥ विश्वस्य वोढ़ इन्द्राय Sy.
३. व्य स जयत् कु० A. बलं कुर्वन् Sy.
४. व्यधायि Sy. ५. अथ प्रत्यक्षस्तुतिः, हे इन्द्र ! Sy. ६. यं त्वाम् Sy.
७. अयम् is suggested for अय ॥
८. याचते Sy.
९. धनं नाम० A. धनानामर्थाय is suggested for धनो नामार्थाय ॥ वसूनि धनानि Sy.
१०. य is written twice in A.
११. विवीव is suggested for दिविव ।
१२. स त्वं नोऽस्मासु Sy.
१३. Sy. explains श्रोमतम् only as श्रवणीयमन्नं and construes अधि with धाः । १४. अधिधेहि Sy.
१५. VM. ignores न ॥ न इव Sy.
१६. अस्मान् Sy.
१७. वार्यस्य—तृतीयार्थे षष्ठी। वरणीयेन धनेन Sy.
१८. ०नीम व० A. भृशं लभेमहि Sy.
१९. च वी० A. २०. अनुग्रहबुद्धिम् Sy.
२१. अन्नः A. २२. ०द्भ्य A. अस्मभ्यम् Sy.
२३. शोभनपुत्रादियुताम् Sy.
२४. VM. ignores महीम् ॥ महीं महतीम् । स्पष्टमन्यत् (चतुर्थं चरणम्)
२५. 'आ ते मह इन्द्र' इति षड्ऋचमष्टमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमैन्द्रम् । 'आ ते' (KSA. 35. 25. P. 25.) इत्यनुक्रान्तम् । महाव्रते निष्केवल्य इदमादीनि पञ्च सूक्तानि । सूत्रितञ्च—'आ ते मह इन्द्रोत्युग्रेति पञ्च सूक्तानि (AA. 5. 2. 2.) इति Sy.
२६. युध्यन्ते सङ्गच्छन्ते वा Sy. आ समरन्त सर्वाः सम्भूयागताः BB.
२७. आ समन्ततः M. किञ्च ते तव मनः BB.
२८. विष्वग्गन्तु Sy. विश्वद्रियग् विष्वग् गतम् BB.

विचरतु ।[1] [2]

नि दुर्ग इन्द्र श्रथिह्यमित्रान्नभि ये नो मतीसो अमन्ति ।
आरे तं शंसं कृणुहि निनित्सोरा नो भर संभरणं वसूनाम् ॥ २ ॥

नि दुर्गे । दुर्गे युद्धे । नितराम् । श्नथिहि । अमित्रान् । अभिहिंसन्ति । ये । अस्मान् । मनुष्याः । दूरे । तत् । अभिशंसनम् । कुत्र । निन्दितुमिच्छतः । आहर । अस्मभ्यम् । वसूनाम् । सम्भर्तारम् ।

शतं ते शिप्रिन्नूतयः सुदासे सहस्रं शंसा उत रातिरस्तु ।
जहि वधर्वनुषो मर्त्यस्यास्मे द्युम्नमधि रत्नं च धेहि ॥ ३ ॥

शतं ते । शतम् । ते । शिप्रिन् ! ऊतयः । शोभनदानाय । सहस्रं च । शंसनीया ऊतयः । सन्तु ।

---

१. (मा) विचारीद् । अस्मास्वेव स्थिरं भवतु Sy. स मा वि चारीद् विचलितं मा भूत् । अस्मज्जयायैव भवतु BB.

२. The commentary on the following words is missing : इन्द्र । ऊती । उग्र । समन्यवः । यत् । सेनाः । पतति । विद्युत् । नर्यस्य । बाह्वो and ते ॥ हे उग्र ! उद्गूर्ण ! ओजस्विन् ! इन्द्र ! यद्यदा समन्यवः समो मन्युरभिमानो यासां ताः समन्यवः । सेनाः समरन्त . . . । तदा नर्यस्य नरहितस्य महो महतस्ते तव बाह्वोः स्थिता विद्युदायुधम् । विद्युद्धेतिरिति वज्रनामसु पाठात् (Ngh. 2. 20.) । ऊत्यूत्यास्मद्रक्षाया आ पतति । आपततु Sy. हे इन्द्र ! उग्र उद्गीर्णायुध ते तव महः महती ऊती गतिः प्रभावः । . . . यद्वा ते तव महो महतः प्रभावस्य । . . . ऊत्या प्राप्त्या । तृतीयायाः पूर्वसवर्णः । समन्यवः सामर्थास्सेनाः । सामर्थ्यात परकीया । यद्यस्माद्, . . . तस्य ते नर्यस्य नरेभ्यो हितस्य बाह्वोर्विद्युद् दीप्यमानः शत्रुः पतति पतेद् अग्नौ शलभ इव । लेटयाडागमः । यद्वा विद्युद् आयुधविशेषस्तव बाह्वोः सम्बन्धी इतश्चेतश्च पततु BB.

३. निजहि Sy. ४. तान् शत्रून् Sy.

५. अहिंहि० A. ०हिंसन्ति is suggested for ०हिंसति०। अभिमुखाः सन्तः . . . अभिभवन्ति Sy. ६. आशंसनम् Sy.

७. कुत्र is suggested for कुत्र ॥

८. अपि चास्मान् निन्दितुमिच्छतो नरस्य Sy.

९. असुभ्यं A. १०. धनानाम् Sy.

११. समूहम् Sy.

१२. VM. ignores इन्द्र ।

१३. वसिष्ठस्येदमार्षम् Dur. १४. त्वदीयाः Sy.

१५. शीघ्र A. हे उष्णीषिन् ! इन्द्र ! Sy. हे शिप्रिन्निन्द्र Dur. शिप्रे हनू नासिके वा ताभ्यां तद्वन् SKN.

१६. तयः A. रक्षाः Sy. आगमनानि सन्तु Dur. ऊतयस्तर्पणानि धाम्नो गमनानि वा सन्तु अस्मिन् यज्ञे नित्यप्राप्तत्वं नित्यागमनं वेत्याशास्महे SKN. आगमनानि सन्तु Dur.

१७. शोभनदानाय मह्यम् Sy. सुदाने कल्याणदान एतस्मिन् यजमाने । तथैनमनुगृहाण यथानित्याज्येऽयं यजमानः स्यादित्यभिप्रायः Dur. सुदाः कल्याणदानो यजमानस्तस्मै सुदासे कल्याणदानस्य यजमानस्यानुग्रहार्थमित्यर्थः SKN.

१८. सहसं A. आगतस्य च सतस्तव सहस्रं . . . बहूनि Dur. न च केवलं बहूनि तर्पणान्येव गमनानि वा । किं तर्हि ? सहस्रम् SKN.

१९. कामाश्च सन्तु Sy. स्तोत्राणि सन्तु Dur. स्तुतयः SKN.

२०. VM. seems to explain अस्तु sing. as सन्तु plu. going with ऊतयः ॥ अस्तु भवतु, अस्मिन्यज्ञे SKN.

अपि च । वानम्[1] । जहि[2] । आयुधम्[3] । हन्तुः[4] । मनुष्यस्य[5] । अस्मासु[6] । अन्नम्[7] । रत्नम्[8] । च । अनिरेहि[9] ।

त्वावतो हीन्द्र क्रत्वे अस्मि त्वावतोऽवितुः शूर रातौ ।
विश्वेदहानि तविषीव उग्रँ ओकः कृणुष्व हरिवो न मर्धीः ॥ ४ ॥

त्वावतः[10] । त्वत्सदृशस्य । हि । इन्द्र[11] ! कर्मणो[12] । भवामि न न्यूनगुणस्य । तथा त्वावतः । रक्षितुः[13] । शूर ! दाने ह्वामि[14] । विश्वानि । एव । अहानि । बलवन् ! तूद्गूर्ण[15] ! सेवाम्[16] । कुरुष्व । हरिवः[17] ! मास्मान्[18] । हिंसि[19] ।

---

१. रातिर्धनमस्तु Sy. हविर्ददातिरस्त्वित्येतदेवानुवर्तते Dur. दानं सवनीयपुरोडाशादेः SKN.

२. यद् वीर्यं तज्जहि Dur. विनाशय SKN.

३. हिंसासाधनमायुधम् Sy. एवञ्च त्वमागत उपसृप्तः सञ्छृणु यत् कुरुष्व हे वधो वधयितः ! Dur. वधः वज्रनामेदमायुधमाञ्चोपलक्षणं चेह द्रष्टव्यम् । सर्वमायुधमित्यर्थः SKN.

४. हर्तुः M. हिंसकस्य Sy. योऽस्मान् हन्तुमिच्छति Dur. अस्मान्...हिंसितुः SKN.

५. मर्त्यो मनुष्यस्तस्य Dur. मनुष्यस्य स्वभूतम् SKN.

६. हत्वा च तस्य वीर्यं निरुद्यमं कृत्वा, अस्मे अस्मासु Dur. अस्माकम् SKN.

७. अन्न A. दीप्तिमदन्नं यशो वा Sy. अन्नं यशो वा:...एवमेतस्मिन् मन्त्रे शत्रुवधसम्बन्धाद् द्युम्नशब्देन यशो वा अन्नं वा उच्यत इत्युपपत्तिः। हते हि शत्रौ यशोऽन्नं च भवतीति । 'द्युम्नं द्योततेः' अन्नमेव हि भुञ्जानस्य दीप्तिर्भवतीति द्युम्नमन्नम् । श्रोतयितृ च यशस्तु दीप्तं प्रकाशस्वभावत्वादिति Dur. ...यशोऽन्नं वा SKN.

८. रक्षं A. रत्नं च धनम् Dur. रत्नं चानेकप्रकारं पद्मरागादि SKN.

९. अधिधेहि is suggested for अनिरेहि ॥ निधेहि देहीत्यर्थः Dur. अधिनीत्यस्य स्थाने ।...निधेहयस्मभ्यमित्यर्थः SKN.

१०. द्युम्नं द्योततेः । यशो वान्नं वा । 'अस्मे द्युम्नमधि रत्नं' च धेहि' अस्मासु द्युम्नं च रत्नं च धेहि N. ५. ५. SKN. II. 317.

११. इन्द्रस्य A. हे इन्द्र ! Sy.

१२. कर्मणः A. कर्मणे is suggested for कर्मणो ॥

१३. ०तु A. विश्वस्य रक्षितुः Sy.

१४. भवामि is suggested for ह्वामि ॥ दाने चास्मीति शेषः Sy.

१५. ०वत्तूद्गू० M. उद्गूर्ण is suggested for तूद्गूर्ण ॥ ओजस्विन् ! Sy.

१६. अस्माकं स्थानम् Sy.

१७. हे हरिवन् ! Sy.

१८. मांस्मात् A. अस्मान् न Sy.

१९. हिंसीः is suggested for हिंसि ॥ हिंस्याः Sy.

कुत्सा[1] एते हर्यश्वाय[2] शुष्मिन्द्रे[3] सहो[4] देवजूतमियानाः[5] ।
सत्रा[6] कृधि सुहना[7] शूर वृत्रा[8] वयं तरुत्राः[9] सनुयाम[10] वाजम् ॥ ५ ॥

कुत्साः । स्तोमाना कर्तारः । एते । हर्यश्वायेन्द्राय । सुखकरं स्तोममुच्चारयन्ति । इन्द्रे । बलम् । देवेन[11] प्रेरितम् । गच्छन्तः । बहूनि । वृत्राणि । सुहनानि । कुरु । हे शूर ! वयम् । दुःखादुत्तीर्णाः[12] । लभेमहि । अन्नम्[13] ।

एवा[14] नः इन्द्र वार्यस्य पूर्धि[15] प्र ते महीं सुमतिं[16] वेविदाम[17] ।
इषं पिन्व मघवन्द्रुयः[18] सुवीरां[19] यूयं पात स्वस्तिभिः[20] सदा नः ॥ ६ ॥

(एवा नः ।)[21]—

VII. 26.

न सोम[22] इन्द्रमसुतो[23] ममाद[24] नाब्रह्माणो[25] मघवानं[26] सुतासः[27] ।
तस्मा उक्थं जनये[28] यज्जुजोषन्नृवन्नवीयः[29] श्रुणवद्यथा[30] नः ॥ १ ॥

न सोमः[31] । न[32] । सोमः । इन्द्रम् । असुः[33] । तर्पयन्ति[34] । न । अमहन्तः[35] । मघवानम्[36] । सुता[37] अपि मदयन्ति[38] । तस्मै[39] । उक्थम् । जनयामि[40] । यदि । सेवते[41] । मनुष्यराजवत्[42] । नवतरमुक्थम्[43] । शृणुयात् । यथा । अस्मदीयम् ।

---

१. ०ना क० A. कुत्साः कुर्वाणाः । करोतेः कुत्सशब्दनिष्पत्तिः Sy.
२. वसिष्ठाः Sy.
३. ०र्यश्वाये० A. हरिनामकाश्वायेन्द्राय Sy.
४. स्तोत्रम् Sy. ५. देवैः प्रेरितम् Sy.
६. याचमानाः Sy. ७. सत्रा सर्वदा Sy.
८. पुत्राणि A. शत्रून् Sy.
९. हन्तुं सुशक्यानि Sy.
१०. दुर्गाणि तीर्णाः सन्तः Sy.
११. बलम् Sy.
१२. The *pratika* is supplied by the Editor, The stanza has already been explained. See RV. 7. 24. 6.
१३. 'न सोम इन्द्रम्' इति पञ्चर्चं नवमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमैन्द्रम् । तथा चानुक्रम्यते —'न सोमः पञ्च' (KSA. 35. 26. p. 25.) इति । महाव्रत उक्तो विनियोगः
१४. न स्सोम A. न सोम M. १५. ने A.
१६. असुतः is suggested for असुः ॥ नाभिषुतः Sy.
१७. ०यति is suggested for ०यन्ति ।
१८. ०हान्तः is suggested for ०हन्तः ॥ स्तोत्रहीनाः Sy. १९. धनवन्तम् Sy.
२०. अभिषुता अपि सोमाः Sy.
२१. ममदुः । ममादेत्येतदाख्यातं बहुवचनान्ततया विपरिणतं सदत्र सम्बध्यते । अतएव त्रिष्वपि सवनेषु पवमानैः स्तोत्रैः स्तुता एव सोमा हूयन्ते Sy.
२२. तस्माथ जन० A. इन्द्राय Sy.
२३. पठामीत्यर्थः Sy. २४. सेवेत Sy.
२५. ०जवं A. राजेवाचरेण Sy.
२६. शस्त्रम् Sy.

उक्थउक्थे सोम इन्द्रं ममाद नीथेनीथे मघवानं सुतासः ।
यदीं सबाधः पितरं न पुत्राः समानदक्षा अवसे हवन्ते ॥ २ ॥

उक्थउक्थे[1] । शस्त्रेशस्त्रे । सोमः । इन्द्रम् । मान्ति[2] । नयनेनयेन[3] । मघवानम्[4] । सुतास्तर्पयन्ति[5] । यदि[6] । एनम्[7] । बाधासहिताः[8] । पितरम्[9] । इव । पुत्राः । समानोत्साहाः[10] सङ्गताः । रक्षणाय[11] । वहन्ते[12] ।

चकार ता कृणवच्छूनमन्या यानि ब्रुवन्ति वेधसः सुतेषु ।
जनीरिव पतिरेकः समानो नि मामृजे पुर इन्द्रः सु सर्वाः ॥ ३ ॥

चकार ता[13] । चकार[14] । तानि । कर्माणि वृत्रवधादीनि । करोति च[15] । सम्प्रति[16] । अन्यानि । यानि । ब्रुवन्ति । विधातारः[17] । सुतेषु सोमेषु । यथा[18] । एकः[19] । साधारणः[20] । पतिः[21] । बह्वीर्जाया उपगच्छत्येवम् । सुष्ठु[22] । निर्मार्ष्टि[23] विनाशयति[24] । शत्रूणां धुरीः एक एव[25] । सर्वा इति[26] ।

---

१. गस्त्रे गस्त्रे । A. शस्त्रेशस्त्रे क्रियमाणे Sy.
२. मा M. मादयति is suggested for मान्ति ॥ तर्पयति BB.
३. ०यनेन A. ०नयने is suggested for ०नयेन ॥ स्तोत्रेस्तोत्रे क्रियमाणे Sy. BB.
४. महाधनमिन्द्रम् BB.
५. सुतां ता० A. अभिषुताः सोमा मादयन्ति Sy. अभिषुताः सोमाः BB.
६. यस्मात् Sy. यदा खलु BB.
७. तस्मादेनमिन्द्रम् Sy. ईमित्यवधारणे BB.
८. बाधा सहिता A. परस्परं मिलिताः Sy. शत्रवादिभिर्बाधिता भवन्ति पुरुषाः BB.
९. पितारम्० A. तदा तेऽपि...पितरमिव BB.
१०. ०त्साहा A. समानोत्साहा ऋत्विजः Sy. दक्षः पिता, समानपितृका इत्यर्थः । इन्द्र एव सर्वेषां समानः पितेति BB.
११. तर्पणाय स्वरक्षणाय वा Sy.
१२. हवन्ते is suggested for वहन्ते ॥ शस्त्रैः स्तोत्रैश्च स्तुवन्ति Sy. इन्द्रमेव ह्वयन्ति । पूर्ववत् सम्प्रसारणम् BB.

This stanza=TS. 1. 4. 46. 1.

१३. पूर्वस्मिन् काले चकार Sy.
१४. कुर्यात् Sy.
१५. सम्प्रत्यपि Sy.
१६. स्तोत्राणां विधातारः Sy.
१७. VM. seems to explain इव (of जनीरिव) separately from जनीः ।
१८. असहायः Sy.
१९. ०रण A. समवृत्तिः Sy.
२०. वति A.
२१. सम्यक् Sy.
२२. निर्मार्ष्टि is suggested for निर्मार्ष्टि ॥ शोधयेत् Sy.
२३. विन्दाश० A.M.
२४. धरीः A. पुरीः is suggested for धुरीः ॥ सर्वाः शत्रुनगरीः Sy.
२५. VM. seems to explain इन्द्र as एक एव ॥ अपि च स इन्द्रः Sy.
२६. सर्व इति M.

एवा तमाहुरुत शृण्व इन्द्र एको विभक्ता तरणिर्धनानाम् ।
मिथस्तुरं ऊतयो यस्य पूर्वीरस्मे भद्राणि सश्चत प्रियाणि ॥ ४ ॥

एवा[1] तम्[2] । एवम्[3] । तम्[4] । आहुः[5] । अपि[6] च[7] । श्रूयते[8] । इन्द्रः[9] । एक एव[10] । विभक्ता[11] । धनानाम्[12] । तारकः[13] । मिथस्तुर इतरेतरं बाधमानानि[14] । बिडा ऊतयः[15] पालनानि[16] । यस्य[17] । बहूनि तस्य[18] । प्रियाणि[19] । भद्राणि[20] । अस्मासु[21] । सक्तानीति[22] ।

एवा वसिष्ठ इन्द्रमूतये नून्कृष्टीनां वृषभं सुते गृणाति ।
सहस्रिणं उप नो माहि वाजान्यूयं पात स्वस्तिभिः सदा नः ॥ ५ ॥

एवा वसिष्ठः[23] । एवम्[24] । वसिष्ठ.[25] । इन्द्रम्[26] । रक्षणाय[27] । नृणाम्[28] । मनुष्याणाम्[29] । वर्षितारम्[30] । सुते सोमे[31] । स्तौति[32] । सहस्रसंख्यानि[33] । अन्नानि[34] । अस्माकम्[35] । उपमिमीहि[36] समीपे कुरु ।

VII 27.

इन्द्रं नरो नेमधिता हवन्ते यत्पार्या युनजते धियस्ताः ।
शूरो नृषाता शवसश्चकान आ गोमति व्रजे भजा त्वं नः ॥ १ ॥

इन्द्रं[37] नरः[38] । इन्द्रम्[39] । मनुष्याः[40] । सङ्ग्रामे[41] । हवन्ते[42] । यदा[43] । युद्धतरणनिमित्तानि[44] । कर्माणि ।

---

१. एषा तम् A. २. उक्तगुणम् Sy. ३. आहुः पूर्व ऋषयः Sy. ४. अद्यापि Sy. ५. वातेति Sy. ६. मंहनीयानां धनानाम् Sy. ७. आपदस्तारयितेति Sy. ८. मिथः परस्परं तुरो बाधमानाः संश्लिष्टा वा Sy. ९. बिडा seems to be redundant. १०. रक्षाः सन्ति Sy. ११. इन्द्रस्य Sy. १२. पूर्व्या बह्व्यः Sy. १३. सु is written twice in A. तस्य च प्रसादाद् अस्मान् Sy. १४. सेवन्ताम् Sy. १५. वसिष्ठो A. १६. उक्तप्रकारेण Sy. १७. रक्षायै Sy. १८. नून् नृणाम् । षष्ठ्यर्थे द्वितीया Sy. १९. प्रजानाम् Sy. २०. कामानां वर्षितारम् Sy. २१. सामे A. २२. अथ प्रत्यक्षस्तुतिः । हे इन्द्र ! २३. सहस्रसंख्याकान् Sy. २४. नि । अ is missing in M. २५. ०ख्यान्यान्यस्मा० A. अस्मभ्यम् Sy. २६. उपमाहि is suggested for उपमिमीहि । प्रयच्छेत्यर्थः Sy. २७. 'इन्द्रं नरः' इति पञ्चर्चं दशमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमैन्द्रम् । 'इन्द्रं नरः' (KSA. 25. 27. p. 25.) इत्यनुक्रान्तम् । महाव्रते निष्केवल्य एतत्सूक्तमुक्तं तृतीयत्वेन । ऐन्द्रे पशौ वपापुरोडाशहविषामाद्यास्तिस्रः ऋमेणानुवाक्याः । सूत्रितञ्च—'इन्द्रं नरो नेमधिता हवन्त इत्युरु नो लोकमनु नेषि विद्वान्' (ĀSS. 3. 7.) इति Sy. २८. इन्द्वन्नर A. २९. नेतारः Sy. नेतारो यस्य दातारो यजमाना (यजना) धीनबलत्वात् BB. ३०. कीदृशम् ? नेमधिता, नेम इत्यर्धस्य नाम 'यत्सर्वेषामर्धमिन्द्रः प्रति' इति सर्वेषां भागार्धे नेन्द्रो धीयते धार्यत इति नेमधितः । निष्ठायाम् 'सुधितवसुधितनेमधितं०' इति धिभावो निपात्यते । 'सुपां सुलुक्०' इति द्वितीयैकवचनस्याकारः । 'तृतीया कर्मणि' इति पूर्वपदप्रकृतिस्वरत्वम् BB. ३१. भवन्ते A. ह्वयन्ति Sy. आह्वयन्ति BB. ३२. कदा पुनरसौ नेमेन धार्यत इत्याह—यद् यदा । तेनैव (सुपां सुलुक्०') सप्तम्या लुक् BB. ३३. युद्धभरणनिमित्ता Sy. पार्याः परलोके साधवः । छान्दसो ञ्यः । यद्वा दुःखानां पारं समाप्तिः । तत्र साध्वीः, ताः BB.

युञ्जते[1]। तानि[2] तानि। शूरः[3]। नृषु सम्भक्ता[4]। बलस्य[5]। तृप्तः[6]। प्रापय[7]। गोमति[8]। व्रजे[9]। अस्मान्। त्वमिति।

य इन्द्र शुष्मो मघवन्ते अस्ति शिक्षा सखिभ्यः पुरुहूत नृभ्यः।
त्वं हि दृळ्हा मघवन्विचेता अपा वृधि परिवृतं न राधः॥ २॥

य[10] इन्द्र। यत्। इन्द्र! बलम्। मघवन्! तव। अस्ति। तत् प्रयच्छ[11]। सखिभ्यः[12]। नृभ्यः[13]। पुरुहूत[14]! त्वम्। हि[15]। दृढान्यपि पुराणि[16] शत्रूणां मृत्नानि[17]। मघवन्! विचेताः[18] तथासति, अपावृधि[19] विवृत-द्वारं कुरु। परिवृतम्[20]। ।[21] इवापवरकादिकम्। धनं शत्रुपुरेषु स्थितम्।

इन्द्रो राजा जगतश्चर्षणीनामधि क्षमि विषुरूपं यदस्ति।
ततो ददाति दाशुषे वसूनि चोदद्राधो उपस्तुतश्चिदर्वाक्॥ ३॥

इन्द्रः[22]। इन्द्रः। राजा[23]। चतुष्पदः[24]। द्विपदाञ्च[25]। पृथिव्याम्[26]। नानारूपम्[27]। यत्। अस्ति[28] तस्य

---

१. प्रयुञ्जन्ते Sy. यदा....अनुतिष्ठन्ति तदा नेमधितेति। 'छन्दस्युभयथा' इत्यार्धधातुकत्वेन इनमो ङित्त्वाभावात्, 'श्नसोरल्लोपः' इति न प्रवर्तते BB.

२. प्रसिद्धाः Sy. यदर्थमिन्द्रमाह्वयन्ति ताः BB.

३. अथेन्द्रः प्रत्यक्षमुच्यते—शूरो वीरः BB.

४. संभ(ह) र्ता M. नृभिर्मनुष्यैः साता सातः सम्भक्त आश्रितो नृषातः। पूर्ववदाकारः। ....सुषामादित्वात्वत्वम्। यद्वा नरो मनुष्याः सनितारः सम्भक्तारो दातारो वा यस्य नृषाता। छान्दसमात्वम् 'ऋतश्छन्दसि' इति कबभावः। यद्वा नृभ्यो दाता। छान्दसमात्वं पूर्वपद-प्रकृतिस्वरत्वं च BB.

५. तृप्त A. बलं कामयमानश्च सन् Sy. तृप्ति-शीलः। 'चक तृप्तौ' भौवादिकः, उदासेत्। ताच्छीलिकश्चानश् 'बहुलं छन्दसि' इति शपो लुक्

६. आभिमुख्येनास्मान् योजय, पशुमन्तं मां कुरु। 'द्व्यचोऽतस्तिङ' इति संहितायां दीर्घत्वम् BB.

७. गोसमूहे Sy. ईदृशस्त्वं नोऽस्मान् गोमति ।... गोजाविमनुष्यादिमति BB.

८. गोष्ठे Sy. व्रजे....सङ्गते। यद्वा व्रजे गोष्ठे भूयिष्ठगोभिर्युक्ते BB.

This stanza=TS. 1. 6. 12. 1.

९. इन्द्रश्च A. १०. अस्मि A.

११. देहि A.

१२. स्तोतृभ्यः Sy.

१३. नृभ्य A. स्तोतृभ्यो नृभ्यः Sy.

१४. हे बहुभिराहूत! इन्द्र! Sy.

१५. यस्मात् Sy.

१६. बृढानि पुरां द्वाराणि बिभेदिथेति शेषः Sy.

१७. मृद्नासि is suggested for मृत्नानि॥

१८. तस्मात्स त्वं विविक्तप्रज्ञः सन् Sy.

१९. अवावृधि A. अस्मभ्यमपवृणु Sy.

२०. तिरोहितम् Sy.

२१. नेति सम्प्रत्यर्थे Sy.

२२. इन्द्रं A.

२३. ईश्वरो भवति Sy.

२४. जङ्गमस्य पश्वादेः Sy.

२५. मनुष्याणां च राजा भवति Sy.

२६. क्षमायाम् Sy.

२७. नानारूपं यद्धनमस्ति। तस्यापि राजा भवति Sy.

२८. अस्मि A.

च सर्वस्य राजा। ततः। प्रयच्छति। दाशुषे[1]। वसूनि सम्प्रति च। चोदयति[2]। उपस्तुतः[3]। अस्मदभिमुखम्[4]।

नू चिन्न इन्द्रो मघवा सहूती दानो वाजं नि यंमते न ऊती।
अनूना यस्य दक्षिणा पीपाय वामं नृभ्यो अभिवीता सखिभ्यः ॥ ४ ॥

नू चिन्नः[5]। क्षिप्रम्। अस्माकम्। इन्द्रः। धनवन्[6]। मरुद्गणेन[7] सहित। ददान। अन्नम्। नियमेन प्रयच्छतु। अस्माकम्[8]। रक्षणाय[9]। अन्यूनम्[10]। यस्य[11]। दानम्। वर्धयति[12]। वनीय[13] कामम्। नृभ्यः। अहिकान्तम्[14]। सखिभ्यः[15]।

नू इन्द्र राये वरिवस्कृधी न आ ते मनो ववृत्याम मघाय।
गोमदश्वावद्रथवद्दधन्तो यूयं पात स्वस्तिभिः सदा नः ॥ ५ ॥

नू इन्द्र। क्षिप्रम्। अस्माकम्[16]। परिचरणम्[17]। धनाय[18]। कुरु[19] परिचरणेन प्रीतो धन प्रयच्छ। तव। मनो वयम्। धनाय[20]। आवर्तयामः। गोमत्। अश्ववत्। रथवच्च धनम्। कामयमानाः[21]।

VII. 28.

ब्रह्मा ण इन्द्रोप याहि विद्वानर्वाञ्चस्ते हरयः सन्तु युक्ताः।
विश्वे चिद्धि त्वा विहवन्त मर्ता अस्माकमिच्छृणुहि विश्वमिन्व ॥ १ ॥

ब्रह्मा णः[22]। स्तोत्रम्[23]। इन्द्र[24]! अस्माकम्। उपगच्छ[25]। जानन्। अभिमुखाः[26]। ते[27]। अश्वाः। सन्तु।

---

१. यजमानाय Sy. २. धनानि Sy.
३. प्रेरयति Sy. ४. उपस्थितः M. स इन्द्रोऽस्माभिरुपस्तुत एव सन् Sy.
५. VM. ignores राधः and चित्॥ राधो धनम्। चित् एव Sy.
६. चिश्च A. M.
७. धनं A. धनवान् is suggested for धनवन्।
८. न is written twice in A. सहूत्या मरुद्भिः सहाह्वानेन Sy.
९. अस्मभ्यम् Sy. १०. ऊत्यै रक्षायै Sy.
११. न्यूनं सम्पूर्णम् Sy.
१२. इन्द्रस्य Sy. १३. वोग्धि Sy.
१४. वनीयं काम A. वननीयं is suggested for वनीयं॥ धनम् Sy.
१५. अभिका० is suggested for अहि का०॥ अभिप्राप्ता Sy. १६. स्तोतृभ्यः Sy.
१७. VM. ignores चित्॥ चित् एव
१८ अस्मभ्यम् Sy.
१९. धनम् Sy. वेदो वरिव इति धननामनी Sy. Ngh. 2. 10. २०. धनप्राप्त्यये Sy.
२१. वेहि Sy. २२. मंहनीयायै स्तुत्यै Sy.
२३. VM. ignores इन्द्र।
२४. 'ब्रह्मा ण इन्द्र' इति पञ्चर्चमेकादशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमैन्द्रम्। 'ब्रह्मा णः' (KSA. 35. 28. p. 25.) इत्यनुक्रान्तम्। महाव्रते निष्केवल्ये पञ्चमत्वेनास्य सूक्तस्य विनियोग उक्तः। अष्टमेऽहनि प्रउगशस्त्र आद्यस्तृचः ऐन्द्रः (ĀSS 8.1.10.) इति Sy.
२५. ब्राह्मण A. २६. स्तोतम् A.
२७. हे इन्द्र! त्वम् Sy. २८. गच्छन् M.
२९. अस्मदभिमुखाः Sy. ३०. तव Sy.

रथे युक्ताः । सर्वे । अपि । त्वा । विविधमाह्वयन्ति । मनुष्याः । अस्माकम् । एव स्तुतिम् । शृणु । विश्वस्य प्रीणयितः ।

हवं त इन्द्र महिमा व्यानड् ब्रह्म यत्पासि शवसिऋषीणाम् ।
आ यद्वज्रं दधिषे हस्त उग्र घोरः सन्क्रत्वा जनिष्ठाः अषाळ्हः ॥ २ ॥

हवं त इन्द्र । ह्वानम् । ते । इन्द्र ! महिमा । व्याप्नोति स्तोता महिमानमेतीत्यर्थः । यस्मात्त्वम् । बलवन् । ऋषीणाम् । स्तोत्रं धनप्रदानेन । रक्षसि । यस्माच्च शत्रूणा हननाय । वज्रम् । धारयसि । हस्ते । उद्गूर्ण । स त्वम् । घोरः । सन् । कर्मणैव । शत्रुभिरसोढा । जातः ।

तव प्रणीतीन्द्र जोहुवानास्तं यज्ञं रोदसी निनेथ ।
महे क्षत्राय शवसे हि जज्ञेऽतूतुजिं चित्तूतुजिरशिश्नत् ॥ ३ ॥

तव प्रणीती । तव । प्रणयनेन । इन्द्र ! स्तोतून् सदा त्वम् । सन्नयसि । नरान् । इव वृष्टयान्नप्रदानेन । द्यावापृथिव्यौ तदानीं सोऽयमिन्द्रः । महते । बलाय । वेगाय च । प्रादुर्भूतः । च । अप्रयच्छन्तमयजमानम् । श्नथयति । स्वयं स्तोतृभ्यः प्रयच्छन्निति ।

---

१. यद्यपि Sy.
२. त्वाम् Sy.
३. पृथग् हवन्ते Sy.
४. तथाप्यस्माकम् Sy.
५. प्रणयिता A. हे विश्वप्रणयितः ! इन्द्र ! Sy.
६. VM. ignores हि ।
७. हवः स्तोता । तम् Sy.
८. यदा Sy.
९. स्तोत्रस्य रक्षणं नाम फलप्रदानम् Sy.
१०. यदा Sy.
११. पाणौ Sy.
१२. ओजस्विन् Sy.
१३. गूर्ण स त्वम् is missing in M.
१४. शत्रुवधादिना कर्मणा Sy.
१५. शत्रुभिरनभिभूतः Sy.
१६. जाता A. अजनिष्ठा अभवः
१७. तव प्रणीती is missing in A.
१८. प्रणीत्या प्रणयनेन Sy.
१९. स्तोतृ A. भृशं स्तुवतः Sy.
२०. सङ्गमयसि । दिवि पृथिव्यां च स्तोतॄन् प्रतिष्ठापयसीत्यर्थः Sy.
२१. पृष्ठयान्न० A.
२२. धनाय Sy. रविः क्षत्रमिति धननामनी Ngh. 2. 10.
२३. बलाय च । यजमानेभ्यो महद्धनं बलं च दातुमित्यर्थः Sy.
२४. ०तुद्भूतः A. जज्ञिषे Sy.
२५. चिदित्येवकारार्थे ।
२६. अप्राय० M.
अदातारम् Sy.
२७. मयजमानम् । इन is missing in M.
२८. अश्नथ० A. हिनस्ति । श्नथतिर्हिंसाकर्मा । तस्माल्लडर्थे लुङ् Sy.
२९. दाता यजमानः Sy.
३०. VM. ignores यद् and हि ॥ हीति हेत्वर्थे । यत एवमतः कारणात् Sy.

एभिर्नो इन्द्राहभिर्दशस्य दुर्मित्रासो हि क्षितयः पर्वन्ते ।
प्रति यच्चष्टे अनृतमनेना अवं द्विता वरुणो मायी नः सात् ॥ ४ ॥

एभिः[1]। एभिः[2]। अस्मभ्यम्। इन्द्र[3]! अहोभिः[4] प्रीतः। प्रयच्छ[5] धनं विजयाय। बाधकाः[6]। हि। मनुष्याः[7]। अभिगच्छन्त्यस्मान्[8]। यत्। अनृतमस्मास्विन्द्र[9]! प्रतिपश्यति। तदस्माकमनृतम्। प्रज्ञावान्। वरुणः। वैधम्[10]। अस्यतु[11] विश्रथयत्विति[11]।

वोचेमेदिन्द्रं मघवानमेनं महो रायो राधसो यद्ददन्नः ।
यो अर्चतो ब्रह्मकृतिमविष्ठो यूयं पात स्वस्तिभिः सदा नः ॥ ५ ॥

वोचेम[12]। स्तुयाम। इव[13]। धनवन्तम्। इन्द्रम्[14]। महत्[15]। धनम्[16]। अन्नं च। यस्मात्[17]। अस्मभ्यम्। प्रयच्छति[18]। यः। स्तुवत[19]। स्तोत्रकृतिम्[20]। अतिशयेन रक्षिता[21,22]।

VII. 29.

अयं सोम इन्द्र तुभ्यं सुन्वे आ तु प्र याहि हरिवस्तदोकाः ।
पिबा त्वस्य सुषुतस्य चारोर्ददो मघानि मघवन्नियानः ॥ १ ॥

अयं सोमः[24]। अयम्[25]। सोमः। इन्द्र! तुभ्यम्[26]। सुन्वे[27]। क्षिप्रम्। आप्रयाहि। हरिवः[28]! सोम-

---

१. The *pratika* is supplied by the Editor. २. एहिः A. सात्त्विकैः Sy. ३. हे इन्द्र! त्वत्प्रसादात् Sy. ४. अहेभिः A. एभिः सात्त्विकैरहभिरहोभिः Sy. ५. तेभ्यो धनमाच्छिद्यास्मभ्यं देहि Sy. ६. दुष्टमित्रभूता बाधकाः Sy. ७. जनाः Sy. ८. अभिगच्छन्ति ॥ पवतिर्गतिकर्मा Sy. ९. ०मस्वास्वि० M. १०. वैधवम् M. द्वैधम् is suggested for वैधम् ॥ द्विधा Sy. ११. अवस्यतु is suggested for अस्यतु ॥ विमोचयतु Sy. स्यतिरुपसृष्टो विमोचने N. 1. 17. १२. VM. ignores अनेनाः ॥ एनसां निहन्ता Sy. १३. स्तुवेम Sy. १४. वै M. एव is suggested for इवै। १५. इन्द्रम M. १६. महतः Sy. १७. अन्ना..स्मा० A. रायो धनस्य। द्वितीयार्थे षष्ठी। संराधकं...धनम् Sy. १८. यः Sy. १९. प्रायच्छत् Sy. २०. स्तुवतः is suggested for स्तुवत ॥ २१. स्तोतृ कृतम् A. क्रियमाणं ब्रह्म स्तोत्रम् Sy. २२. अतिशयेन रक्षिता गन्ता भवति Sy. २३. VM. ignores एनम्। २४. 'अयं सोम इन्द्र' इति पञ्चर्चं द्वादशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमैन्द्रम्। 'अयं सोमः' (KSA. 35. 29. p. 25.) इत्यनुक्रान्तम्। व्यूल्हे दशरात्रे नवमेऽहनि 'अयं सोम इन्द्र' इति प्रउगशस्त्रे ऐन्द्रस्तृचः। सूत्रितञ्च—'अयं सोम इन्द्र तुभ्यं सुन्व आ तु प्र ब्रह्माणः' (ASS. 8. 11.) इति। षोडशिशस्त्रे 'ब्रह्मन् वीर' इत्येषा त्रिष्टुप्। सूत्रितञ्च—'ब्रह्मन् वीर ब्रह्मकृतिं जुषाण इति त्रिष्टुप्, (ĀSS. 6. 2.) इति Sy. २५. एवः Sy. २६. स्वदर्थम् Sy. २७. सन्वे A. अभिषुतोऽभवत् Sy. २८. हे हरिवन्निन्द्र! Sy.

निलयः[1] । पिब । क्षिप्रम् । अमुम्[2] । सुतम्[3] । चारोः[4] । प्रयच्छ[5] । धनानि । मघवन्[6] ! अभिगम्यमान[7] ।

ब्रह्मन्वीर[8] ब्रह्मकृतिं जुषाणोऽर्वाचीनो हरिभिर्याहि[9] तूयम्[10] ।
अस्मिन्[11] षु सवने[12] मादय[13]स्वोप[14] ब्रह्माणि[15] शृणव[16] इमा[17] नः ॥ २ ॥

ब्रह्मन्वीर[18] । परिवृढ ! वीर[19] ! स्तोत्रकृतिम्[20] । सेवमानः । अभिमुखः[21] । अश्वैः । याहि । क्षिप्रम् । अस्मिन्[22] । सवने[23] । सुष्ठु मादायस[24] । उपशृणु । ब्रह्माणि[25] । च[26] । इमानि । अस्माकम्[27] ।

का ते अस्त्यरंकृतिः सुकृतैः कदा नूनं[28] ते मघवन्दाशेम[29] ।
विश्वा[30] मतीरा ततने त्वायाधा म इन्द्र शृणवो[31] हवेमा ॥ ३ ॥

का ते अस्ति[32] । का[33] । ते[34] । भवति । सूक्तैः[35] । अलङ्कृतिः । कदा । क्षिप्रमेव[36] । मघवन्[37] । तुभ्यं[38] हवीषि । दाशेम[39] । विश्वाः[40] । स्तुतीः[41] । विस्तारयामि[42] । त्वत्कामय[43] । था[44] । मे[45] । इन्द्र ! शृणुहि[46] । हवानि[47] । इमानि ।

उतो घा ते पुरुष्या[48] इदासन्येषां पूर्वेषामृणोर्ऋषीणाम्[49] ।
अधाहं त्वा मघवञ्जोहवीमि त्वं न इन्द्रासि प्रमतिः पितेव[50] ॥ ४ ॥

उतो घ । अपि च । खलु[51] । ते । पुरुषहिताः[52] । एवं प्रवृत्तयः[53] । आसन् । येषाम् । सर्वेषाम्[54] ।

---

१. तदोकाः सवनीयो यस्यासौ तदोकाः Sy.
२. अस्य सोमस्य । द्वितीयार्थे षष्ठी । सम्यगभिषुतं शोभनमित्यर्थः Sy.
३. सम्यगभिषुतस्य Sy.
४. चारां A. चारुम् is suggested for चारोः ॥ शोभनस्य Sy. ५. अस्मभ्यं देहि Sy. ६. अपि च हे मघवन् ! Sy.
७. ०मानः is suggested for ०मान ॥ उपगम्यमानो याच्यमानो वा Sy.
८. ब्रह्मद्विर A. ९. विर A. हे . . . इन्द्र ! Sy.
१०. क्रियमाणं स्तोत्रम् Sy.
११. ०मुखं A. अस्मदभिमुखः सन् Sy.
१२. यज्ञे Sy.
१३. मादाय M$_{0}$ मादयस्व is suggested for मादायस ।
१४. स्तोत्राणि Sy. १५. एव Sy.
१६. अस्मदीयानि Sy. १७. कीदृशी Sy.
१८. तव Sy.
१९. अस्माभिः क्रियमाणैः स्तोत्रैः Sy.
२०. नूनं खलु Sy. २१. तव Sy.
२२. प्रीतिमुत्पादयेम Sy.
२३. सर्वाः Sy. २४. स्तुतिः Sy.
२५. मिस् is missing in M. करोमि Sy.
२६. त्वात्कामय A. त्वत्कामनया is suggested for त्वत्कामय ॥ त्वत्कामनयैव Sy.
२७. अथ is suggested for था ॥ अतः कारणात् Sy. २८. मदीयानि Sy.
२९. शृणु is suggested for शृणुहि ।
३०. स्तोत्राणि ३१. धेति पूरणः Sy.
३२. पूर्वं ऋषयः Sy.
३३. ०हितं M. पुरुषेभ्यो हिताः Sy.
३४. एवा A.
३५. आर्षेषाम् A. पूर्वेषाम् is suggested for सर्वेषाम् ॥

ऋषीणां स्तुती.[1]। अश्नुणोः[2]। अथ[3]। अहम्। त्वाम्। अघवंश्च[4] मघवन्! जोहवीमि[5]। त्वम्। अस्माकम्। इन्द्र[6]! भवसि। प्रकृष्टमतिः[7]। पितेव[8] पुत्राणाम्।

वोचेमेदिन्द्रं मघवानमेनं महो रायो राधसो यद्ददन्नः।
यो अर्चतो ब्रह्मकृतिमविष्ठो यूयं पात स्वस्तिभिः सदा नः॥ ५॥

(वोचेम[9]।)—

VII. 30.

आ नो देव[10] शवसा याहि शुष्मिन्भवा वृध[11] इन्द्र रायो अस्य।
महे नृम्णाय नृपते सुवज्र महि क्षत्राय[12] पौंस्याय[13] शूर॥ १॥

आ नो[14] देव[15]। आयाहि। देव[16]। बलेन सह। अस्मान्[17]। बलवान्[18]। भव। वर्धकः[19]। इन्द्र! धनस्य। अस्य[20]। महते। धनाय[21]। नृणां पते! सुवज्र! महते। बलाय[22]। वीर्यकरणाय[23] च[24]। शूरः[25]।

हवन्त उ त्वा हव्यं विवाचि तनूषु[26] शूरा[27] मघवन्तनूषु[28]।
त्वं विश्वेषु सेन्यो जनेषु त्वं वृत्राणि रन्धया सुहन्तु॥ २॥

हवन्ते[29]। हवन्ते[30]। एव[31]। त्वा[32]। हवनीयम्[33]। विविधवाचि सङ्ग्रामे[34]। तनूनां रक्षणार्थम्[35]। शूराः[36]।

---

१. स्तुतिः A. २. अतः Sy.
३. अघवंश्च seems to be redundant.
४. भृशं स्तौमि Sy.
५. अपि च हे इन्द्र! त्वम् Sy.
६. बन्धुः Sy. ७. जनक इव Sy.
८. The *pratika* is supplied by the Editor.
The stanza has already been explained. See RV. 7. 28. 5.
९. 'आ नो देव' इति पञ्चर्चं त्रयोदशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमैन्द्रम्। 'आ नो देव' (KSA. 35. 30. p. 25.) इत्यनुक्रान्तम्। प्रथमे छन्दोमे प्रउगशस्त्रे 'आ नः' इत्ययमैन्द्रस्तृचः। सूत्र्यते हि—'आ नो देव शवसा याहि शुष्मिन् प्र वो यज्ञेषु देवयन्तो अर्चन्' (ĀSS. 8. 9.) इति Sy. १०. आ नः M.
११. हे द्योतमान! Sy. १२. स्म Sy.
१३. बलवान् is missing in M. बलवन्! is suggested for बलवान्।
१४. वर्धयिता Sy. १५. इन्दे A.
१६. अस्य is suggested for अयं॥ अस्मभ्यं देयस्य Sy.
१७. बलाय च भव Sy. बाधो नृम्णमिति बलनामनी Ngh. 2. 9.
१८. शत्रूणां हिंसकाय क्षविंहिंसाकर्मा Sy.
१९. वीर्याय च भव Sy.
२०. VM. seems to explain शूर voc. as शूरः nom.
२१. हे इन्द्र! ...ह्वयन्ति Sy.
२२. त्वाम् Sy. २३. ह्वातव्यम् Sy.
२४. वाचि सह संग्रामे A. विविधा वाचो यस्मिन् प्रादुर्भवन्ति तस्मिन् युद्धे Sy.
२५. अङ्गेषु रक्षणीयासु Sy.
२६. शूरो A. शूराः पुरुषाः Sy.

सूर्यस्य[1] । भजनार्थञ्चामरणार्थञ्च[2] । त्वम् । विश्वेष्वपि[3] । जनेषु । सेनार्हः[4] । त्वम्[5] । शत्रून् । वशीकुरु[6] । शोभनहननेन[7] वज्रेण ।

अहा यदिन्द्र सुदिना व्युच्छान्दधो यत्केतुमुपमं सुमत्सु ।
न्य१ग्निः सीददसुरो न होता हुवानो अत्रं सुभगाय देवान् ॥ ३ ॥

अहा यत्[8] । अहानि । यदा । इन्द्र ! सुदिनानि । व्युच्छन्ति[9] । करोषि च । यदा । प्रज्ञानमुदितः सन् स्वतेजसा । अन्तिकम् । सङ्ग्रामेषूदित आदित्ये सङ्ग्रामा. प्रवर्तन्ते । तदानी सङ्ग्रामे विजयार्थं कर्म कुर्वाणां[11] यजमानानाम् । अग्निं[12] । निषीदति[13] यज्ञेषु । प्राज्ञः[14] । इव । होता । ह्वयन् । अस्मिल्लोके[15] । सौभगतित्वाय[16] युद्धे जयार्थम् । देवान् ।

वयं ते त इन्द्र ये च देव स्तवन्त शूर ददतो मघानि ।
यच्छा सूरिभ्य उपमं वरूथं स्वाशुवो जरणामश्नवन्त ॥ ४ ॥

वयं ते[18] । ते[19] । वयम् । तव स्वभूताः[20] । इन्द्र ! ये[21] । च । देव ! स्तुवन्ति[22] । शूर ![23] ददतस्तव[24] । हवींषि[25] । तेभ्योऽस्मभ्यमुभयेभ्यः । प्रयच्छ । स्तोतृभ्यः । उपमानभूतम्[26] । गृहम्[27] । शोभनभवनाः[28] । तव स्तुतिम्[29] । व्याप्नुवन्तु[30] ।

---

१. सरति गच्छतीत्यायुरत्र सूर्यो विवक्षितः । तस्य Sy.
२. सम्भजने चिरकालं प्राप्त्यर्थम् Sy.
३. सर्वेषु Sy.
४. त्वमेव सेनार्हो ऽसि Sy.
५. अपि च त्वम् Sy.
६. वशीन् कुरु A. अस्मभ्यं वशीकुरु Sy.
७. सुहन्तुनाम्ना वज्रेण Sy.
८. यत् A.
९. ०च्छन्ती M. व्युच्छेयुः Sy.
१०. धारयेः Sy.
११. कुर्वाणा M. कुर्वाणानां is suggested for कुर्वाणा
१२. अग्निं M. अग्निः is suggested for अग्नि ।
१३. न्यसीदत् Sy.
१४. बलवान् Sy.
१५. देवानामाह्वाता Sy.
१६. अस्मिन् यज्ञे Sy.
१७. सौगतित्वाय A. सौभगत्वाय is suggested for सौभगतित्वाय ।। शोभनधनप्राप्तये Sy.
१८. ते is missing in M.
१९. वसिष्ठाः स्वभूताः Sy.
२०. तत्स्व० A.
२१. जना मदीयपुत्रपौत्रादयः Sy.
२२. देवा A.
२३. शूरा A.
२४. प्रयच्छन्तः Sy.
२५. मंहनीयानि हवींषि Sy.
२६. उपमं श्रेष्ठम् Sy.
२७. ग्रहं A.
२८. सुसमृद्धाः सन्तः Sy.
२९. तप स्तुवति M. जराम् Sy.
३०. प्राप्नुवन्तु Sy.

बोचेमेदिन्द्रं मघवानमेनं महो रायो राधसो यद्ददन्नः ।
यो अर्चतो ब्रह्मकृतिमविष्ठो यूयं पात स्वस्तिभिः सदा नः ॥ ५ ॥

(बोचेम[1] ।)—

VII. 31.

प्र व इन्द्राय मादनं हर्यश्वाय गायत । सखायः सोमपाव्ने ॥ १ ॥

प्र व इन्द्राय । प्रगायत[2] । यूयम् । इन्द्राय । मदकर स्तोत्रम् । हर्यश्वाय[3] । सखायः ! सोमपाव्ने[4] ।

शंसेदुक्थं सुदानव उत द्युक्षं यथा नरः । चकृमा सत्यराधसे ॥ २ ॥

शंसेत्[5] । शंस[6] । एव[7] । उक्थम्[8] । शोभनदानाय । अपि य[9] । दीप्तं स्तोत्रम्[10] । यथास्मै । नरः कुर्वन्ति[11] । तथा कुर्म[12] । सत्यधनाय[13] ।

त्वं न इन्द्र वाजयुस्त्वं गव्युः शतक्रतो । त्वं हिरण्ययुर्वसो ॥ ३ ॥

त्वं न इन्द्र । त्वम् । अस्माकम् । इन्द्र[14] ! अन्नकामः[15] । त्वम् । गोकामश्च[16] । शतक्रतो[17] ! त्वम् । हिरण्यकामश्च[18] । यासयितः[19] ।

---

१. The *pratika* is supplied by the Editor.
The stanza has already been explained. See RV. 7. 28. 5.

२. 'प्र व इन्द्राय' इति द्वादशर्चं चतुर्दशं सूक्तं वसिष्ठस्यार्षं गायत्रमैन्द्रम् । दशम्याद्यास्तिस्रो विराजः शिष्टा गायत्र्यः । तथा चानुक्रान्तम्—'प्र वो द्वादश गायत्रं त्रिविराळन्तम्' (KSA. 35. 31. P. 25.) इति । सूक्तविनियोगो लैङ्गिकः । प्रथमे रात्रिपर्याये मैत्रावरुणशस्त्रे 'प्र व इन्द्राय' इत्याद्यस्तृचः स्तोत्रियः । सूत्रितञ्च—'प्र व इन्द्राय मादनं प्र कृतान्यृजीषिणः (ĀSS. 6. 4.) इति । अतिरात्रे प्रथमे पर्याये ब्राह्मणाच्छंसिशस्त्रे 'वयमिन्द्र त्वायवोऽभीत्यनुरूपस्तृचः । तथा च सूत्रितम्—'वयमिन्द्र त्वायवोऽभि वात्रंहत्यायेत्युत्तमामुद्धरेत्' (ĀSS. 6. 4.) इति । चतुर्थेऽहनि माध्यन्दिनसवने होत्रकशस्त्र आरम्भणीयाभ्य ऊर्ध्वं वैराज एकस्तृच आहवनीयः । तदर्थाः 'प्र वो महे महिवृधे भरध्वम्' इत्याद्यास्तिस्रः । सूत्रितञ्च—'प्र वो महे महिवृधे भरध्वमिति चतस्रस्तिस्रश्च विराजः' (ĀSS 7. 11.) इति Sy. ३. ०यक A. ४. वीर्यत्वाय A. ५. सोमवाप्ने A. सोमानां पात्रे Sy.

६. शंसन् M. ७. हे स्तोतः ! त्वमपि उच्चारय Sy. ८. इत् M. इदिति पूरणः Sy.

९. उत्थम् A. स्तोमम् Sy.

१०. अपि यत् M. अपि च is suggested for अपि य ।

११. दीप्तेः साधनभूतं स्तोत्रं शंसन्ति तद्वत् Sy.

१२. अन्ये स्तोतारः Sy. १३. कुर्म A. वयञ्च स्तोत्रं करवाम Sy. १४. सत्यधनायेन्द्राय Sy.

१५. इन्द्र A. १६. अन्नकामो भव Sy.

१७. गोकामो भव Sy. १८. ०क्रतोः A.

१९. हिरण्यकामोऽपि भव । 'छन्दसि परेच्छायामपि वृश्यते क्यच्' इति क्यच् Sy.

२०. या सहितः A. वासयितः ! is suggested for यासयितः ॥ हे वासयितः ! इन्द्र ! Sy.

वयमिन्द्र त्वायवोऽभि प्र णोनुमो वृषन् । विद्धी त्वस्य नो वसो ॥ ४ ॥

वयमिन्द्र । वयम् । इन्द्र ! त्वत्कामाः । त्वामभिष्टुमः । वर्षित । द्वि । क्षिप्रम् । वासयितः ! तत् । नः स्तोत्रम् ।

मा नो निदे च वक्तवेऽर्यो रन्धीरराव्णे । त्वे अपि क्रतुर्मम ॥ ५ ॥

मा नः । मा । अस्मान् । निन्दित्रे । पुरुषं वक्त्रे । च । अर्यस्त्वम् । वशं तयो । अदात्रे च । त्वयि । एव च । मम । दानादिकं कर्म भवतु ।

त्वं वर्मासि सप्रथः पुरोयोधश्च वृत्रहन् । त्वया प्रति ब्रुवे युजा ॥ ६ ॥

त्वं वर्म । मम त्वम् । कवचम् । भवसि । सर्वतः पृथुतमम् । पुरोयोधः । च । शत्रुहन् ! त्वया । सहायेन । शत्रूनहं प्रतिब्रुवे ।

महाँ उतासि यस्य तेऽनु स्वधावरी सहः । मन्नाते इन्द्र रोदसी ॥ ७ ॥

महाँ उत । अपि च त्वम् । महान् । भवसि । यस्य । तव । बलम् । बलवत्यौ । द्यावापृथिव्यौ । अनुमन्येते ।

तं त्वा मरुत्वती परि ध्रुवद्राणी सयावरी । नक्षमाणा सह द्युभिः ॥ ८ ॥

तं त्वा । तम् । त्वाम् । मरुद्भिस्तद्वती । पर्यवसन् । स्तुतिः । स्तोतृभ्यः । सह निर्गच्छन्ती । व्याप्नुवन्ती । त्वदीप्तैर्मरुद्भिः । सह ।

---

१. The *pratika* is supplied by the Editor. २. वसिष्ठाः Sy.
३. अहिष्मम A. स्तुमः Sy.
४. वर्षितः ! is suggested for वर्षित । हे कामानां वर्षितः ! Sy. ५. विद्धि is suggested for द्वि ॥ अवधारय Sy.
६. विद्धि क्षिप्रम् is missing in M.
७. इदम् Sy. ८. अस्मदीयं स्तोत्रम् Sy.
९. VM. ignores प्र ॥ प्र प्रकर्षेण Sy.
१०. निन्दिते A. ११. परुषं वक्त्रे is suggested for पुरुषं वक्त्रे ॥ परुषवाक्यानां वक्त्रे Sy. १२. यं is missing in A. हे इन्द्र ! स्वामी त्वम् Sy.
१३. तयोः M. नय is suggested for तयो ॥ वशं कार्षीः Sy. १४. अपि च Sy.
१५. मदीयं स्तोत्रलक्षणं कर्म गच्छत्विति शेषः । अस्मदीयं स्तोत्रं भवच्चित्ते प्रविशत्वित्यर्थः Sy.
१६. अस्माकं कवचवद्रक्षकोऽसीत्यर्थः Sy.
१७. सर्वतः पृथुः Sy. १८. पुरो योद्धा Sy.
१९. चासि Sy. २०. हे शत्रूणां हिंसकेन्द्र ! Sy.
२१. प्रतिब्रवीमि । प्रतिहन्मीत्यर्थः Sy.
२२. सर्वाधिकः Sy. २३. तौ A. अन्नवत्यौ Sy.
२४. त्वदीयं सहः सर्वाधिकमित्यत्रोभावपि लोकौ त्रिसंवादं न कुरुत इत्यर्थः Sy.
२५. VM. ignores इन्द्र
२६. हे इन्द्र ! उक्तगुणविशिष्टम् Sy.
२७. मरुतः स्तोतारः तद्वती Sv. २८. त्वा A.
२९. ०वसत् is suggested for ०वसन् ॥ परिभवतु परिभवतिरत्र परिग्रहार्थीयः । परिगृह्णात्वित्यर्थः Sy. ३०. स्तुति A.
३१. ०च्छन्ति A. त्वया सह गन्त्री । यत्र यत्र त्वं यासि तत्र तत्र यान्तीत्यर्थः Sy.
३२. व्यप्नुवन्ति A. ३३. दीप्तैः is suggested for त्वदीप्तैः ॥ तेजोभिः Sy.

ऊर्ध्वासस्त्वान्विन्दवो ध्रुवन्दुरुप बर्हिः । सं ते नमन्त कृष्टयः ॥ ९ ॥

ऊर्ध्वासः । उन्मुखा. । त्वाम् । प्रति । दस्मम् । सोमा. । अभवन् । उपबर्हि दीप्तस्याहवनीयस्य समीपे । सन्नमन्ते । तुभ्यम् । मनुष्या ।

प्र वो महे महिवृधे भरध्वं प्रचेतसे प्र सुमतिं कृणुध्वम् ।
विशः पूर्वीः प्र चरा चर्षणिप्राः ॥ १० ॥

प्र वो महे । प्रभरध्वम् । यूय हवि । महते । महता वर्धयित्रे । प्रकृष्टज्ञानाय । यूय सुमतिम् । प्रकृणुध्वम् । त्वञ्चेन्द्र पूर्वीरभ्यस्ता । विश प्रति । प्रचर गच्छ । मनुष्याणा कामै पूरयिता ।

उरुव्यचसे महिने सुवृक्तिमिन्द्राय ब्रह्म जनयन्त विप्राः ।
तस्य व्रतानि न मिनन्ति धीराः ॥ ११ ॥

उरुव्यचसे । बहुव्याप्तये । महते । स्तुतिम् । सुप्रवृत्ताम् । इन्द्राय । जनयन्ति । मेधाविन । तत्र । कर्माणि । न । हिसन्ति । प्राज्ञा अन्येऽपि देवा ।

इन्द्रं वाणीरनुत्तमन्युमेव सत्रा राजानं दधिरे सहध्यै ।
हर्यश्वाय बर्हया समापीन् ॥ १२ ॥

इन्द्रं वाणीः । इन्द्रम् । स्तुतय. । अनुवतक्रोधम् । सत्यम् । एव । राजानम् । पुरोदधिरे । शत्रूणा सहाय । त्वञ्च हर्यश्वाय । ज्ञातीन् । सम्प्रोत्साहय होत. ! इति ।

---

१. ऊर्ध्वाः Sy. २. उद्दिश्य Sy. ३. दर्शनीयम् Sy. ४. अस्मदीयाः सोमाः Sy.
५. भवन्ति Sy. ६. आभवन्तु यद्यपि दीप्त० M.
७. ०हवीयस्य समीपे A. हे इन्द्र ! द्युलोकसमीपे स्थितम् Sy.
८. भुवि सोमास्त्वदर्थमेव जायन्ते प्रजाश्च त्वामेव प्रणमन्तीन्द्रस्तुतिः Sy. ९. मनुष्यां A. प्रजाश्च
१०. प्रवर० A. हे मदीया: पुरुषाः ! . सोमान् प्रणयत Sy. ११. हवीः A.
१२. महत इन्द्राय Sy. १३. महतां धनानां वर्धयित्रे Sy. १४. प्रकृष्टमतये Sy.
१५. सुष्टुतिम् Sy. १६. प्रकृत Sy
१७. अथ प्रत्यक्षस्तुतिः । हे इन्द्र ! Sy
१८. पूर्वीर० A. हवीषां पूरयित्रीः Sy.
१९. विश प्रति A. प्रजाः Sy.
२०. प्रचारं गच्छन् M. प्रचर गच्छ is suggested for प्रचर गच्छ ॥ अभिगच्छ Sy.
२१. प्रजानां पूरयिता Sy. २२. पृथुव्याप्तये Sy.
२३. ये महते is missing in M.
२४. ब्रह्मान्नं हविश्च Sy. २५ सुवृक्ति स्तुतिम् Sy. २६. यस्मा इन्द्राय Sy.
२७. प्राज्ञाः Sy. २८. तस्येन्द्रस्य Sy.
२९. रक्षणादीनि कर्माणि Sy. ३०. देवा अपि Sy.
३१. केनाप्यनुत्तोऽबाधितो मन्युः क्रोधो यस्य स तम् Sy. ३२. सत्रा सर्वजगतः Sy.
३३. ईश्वरम् Sy.
३४. शत्रूणां सहाय probably means शत्रूणां अभिगवित्रे । सहाय is dative from सह with अच्प्रत्यय ॥ स्तोत्राणि शत्रूणामभिभवितुम् Sy. ३५. हर्यश्वमिन्द्रं स्तोतुमित्यर्थः Sy. ३६. ज्ञातीन् is suggested for ज्ञातीन् ॥ बन्धून् Sy.
३७. य is missing in A. उत्साहय Sy.
३८. अतो हेतोर्हे स्तोतः ! त्वमपि Sy.

VII. 32.

मो षु त्वा वाघतश्चनारे अस्मन्नि रीरमन् ।
आरात्ताच्चित्सधमादं न आ गहीह वा सन्नुप श्रुधि ॥ १ ॥

[1] मो षु ।

---

१. मो षु त्वा' इति सप्तविंशत्यृचं पञ्चदशं सूक्तम् । अत्रेयमनुक्रमणिका–'मो षु सप्ताधिका प्रागाथं तृतीया द्विपदा सौदासैरग्नौ प्रक्षिप्यमाणा शक्तिरन्त्यं प्रगाथमालेभे सोऽर्धर्चं उक्तेऽह्यत । तं पुत्रोक्तं वसिष्ठः समापयतेति शाट्यायनकं वसिष्ठस्यैव हतपुत्रस्यार्षमिति ताण्डकम्' (KSA. 35. 32. p. 25.) इति । मण्डलद्रष्टा वसिष्ठ ऋषिः, 'इन्द्र क्रतुं नः' इति प्रगाथस्यार्धर्चस्य च वसिष्ठपुत्रः शक्तिर्वसिष्ठो वा । इन्द्रो देवता । अयुजो बृहत्यो युजः सतोबृहत्यः । तृतीया तु द्विपदा विराट् । महाव्रते निष्केवल्ये बार्हततूचाशीतावेतत्सूक्तम् । तत्र द्विपदां 'अभि त्वा शूर' इत्येतं राथन्तरं प्रगाथं 'नकिः सुदासः' इति प्रगाथञ्च वर्जयेत् । तथैव पञ्चमारण्यके सूत्रितम्—'मो षु त्वा वाघतश्चनेत्येतस्य द्विपदां चोद्धरति राथन्तरं प्रगाथमथ हास्य नकिः सुदासो रथमित्येतं प्रगाथमुद्धृत्य त्वामिदा ह्यो नर इत्येतं प्रगाथं प्रत्यवदधाति (AA. 5. 2. 4.) इति । चातुर्विंशिकेऽहनि पञ्चमे ऽहनि च निष्केवल्ये 'मो षु त्वा वाघतः' इति प्रगाथः सद्विपदः । सूत्रितञ्च—'मो षु त्वा वाघतश्चनेति सद्विपद उपसमस्येद्द्विपदाम्' (ĀŚS. 7. 3.) इति चातुर्विंशिकेऽहनि मरुत्वतीये प्राकृतान्मरुत्वतीयात् प्रगाथादनन्तरं 'नकिः सुदासः इति प्रगाथं शंसेत् । पृष्ठ्याभिप्लवषडहयोस्तृतीये षष्ठेऽहनि चायं प्रगाथः । तथैव सूत्रितम्—'नकिः सुदासो रथमिति मरुत्वतीया ऊर्ध्वं नित्यादिति । एवं स्थितान् प्रगाथान् पृष्ठ्या भिप्लवयोरन्वहं पुनः पुनरावर्तयेयुः (ĀŚS. 7. 3.) इति । अग्निष्टोमे माध्यन्दिनसवनेऽच्छावाकशस्त्रे 'उदिन्वस्य रिच्यते' इति प्रगाथः । तथा च सूत्रितम्—'उदिन्वस्य रिच्यते भूय इत्' (ĀŚS. 5. 16.) इति । अग्निष्टोमे माध्यन्दिनसवने मैत्रावरुणशस्त्रे 'कस्तमिन्द्र' इति प्रगाथः । सूत्रितञ्च—'कस्तमिन्द्र त्वावसुं सख्यो ह जातः' (ĀŚS. 5. 16.) इति । चातुर्विंशिकेऽहनि माध्यन्दिनसवने मैत्रावरुणशस्त्रस्यायं प्रगाथः । अहर्गणेऽपि द्वितीयाद्विष्वहःसु । सूत्रितञ्च–'कस्तमिन्द्र त्वावसुं कञ्चन्यो अतसीनाम्' (ĀŚS. 7. 4.) इति । 'आरम्भणीयाः पर्यासान् कदुतोऽहरहःशस्यानीति होत्रकाः' (ĀŚS. 7. 1.) इति । पृष्ठ्यषडहस्य तृतीयेऽहनि निष्केवल्ये वैरूपसामपक्षे 'यदिन्द्र यावतः इत्यन्रूपरतूचः । सूत्रितञ्च—'यदिन्द्र यावतस्त्वमिति प्रगाथौ स्तोत्रियानुरूपौ' (ĀŚS. 7. 10.) इति । अग्निष्टोमे चातुर्विंशिकेऽहनि माध्यन्दिनसवनेऽच्छावाकशस्त्रे 'तरणिरित्सिषासति' इति वैकल्पिकस्तृचः । सूत्रितञ्च—'तरोभिर्वो विदद्वसुं तरणिरित्सिषासति' (ĀŚS. 7. 4.) इति । अग्निष्टोमे निष्केवल्यशस्त्रे रथन्तरसामपक्षे 'अभि त्वा शूर' इति प्रगाथः स्तोत्रियः । सूत्रितञ्च 'अभि त्वा शूर नोनुमो ऽभि त्वा पूर्वपीतय इति प्रगाथौ स्तोत्रियानुरूपौ' (ĀŚS. 5. 15.) इति । आश्विनशस्त्रेऽप्यं प्रगाथः । तथैव सूत्रितञ्च—'अभि त्वा शूर नोनुमो बहवः सूरचक्षस इति प्रगाथाः' (ĀŚS. 6. 5.) इति । महाव्रते निष्केवल्ये दक्षिणपक्षेऽयं प्रगाथः । तथैव पञ्चमारण्यके सूत्रितम्—'अभि त्वा शूर नोनुमोऽभि त्वा पूर्वपीतय इति रथन्तरस्य स्तोत्रियानुरूपौ प्रगाथौ' (AA. 5. 8.) इति । आश्विनशस्त्रे 'इन्द्र क्रतुं नः' इति प्रगाथः । सूत्रितञ्च—'इन्द्र क्रतुं न आ भरामि त्वा शूर नोनुमः' (ĀŚS. 6. 5.) इति । चातुर्विंशिकेऽहनि माध्यन्दिनसवने ब्राह्मणाच्छंसिशस्त्रे ऽयं वैकल्पिकः स्तोत्रियः प्रगाथः । सूत्रितञ्च—'इन्द्र क्रतुं न आ भरेन्द्र ज्येष्ठं न आ भर' (ĀŚS. 7. 4.) इति Sy.

२. मोष्ठं A.

मैव[1]। त्वाम्[2]। अश्वाः[3]। दूरे[4]। अस्मत्ताः। निरमयन्तु[5]। दूरादस्मत्[6]। अपि[7]। अस्माकम्[8]। यज्ञम्। आगच्छ। इह[9]। एव[10]। सत्[11]। स्तोत्रमुपभृण्विति[12]।

इमे हि ते ब्रह्मकृतः सुते सचा मधौ न मक्ष आसते।
इन्द्रे कामं जरितारो वसूयवो रथे न पादमा दधुः ॥ २ ॥

इमे हि ते। इमे। हि[13]। ते[14]। स्तोत्रकृतः[15]। सुते सोमे। सह। मधूनि[16]। व[17]। मक्षिकाः। पर्युपविशन्ति[18]। इन्द्रे। अभिलषितकामम्[19]। धनकामाः। स्तोतारः। रथे। इव। पादम्। आदधुः[20]।

रायस्कामो वज्रहस्तं सुदक्षिणं पुत्रो न पितरं हुवे ॥ ३ ॥

रायस्कामः। धनकामः सन्नहम्। वज्रहस्तम्[21]। शोभनदक्षिणं शोभनदानम्। पुत्रः। इव। पितरम्। ह्वयामीति, सेयत्त्विवदा[22] विराडिति।

इम इन्द्राय सुन्विरे सोमासो दध्याशिरः।
ताँ आ मदाय वज्रहस्त पीतये हरिभ्यां याह्योक आ ॥ ४ ॥

इम इन्द्राय[23]। इमे। इन्द्राय[24]। सुताः[25]। सोमाः। दधिमिश्रणाः[26]। तान्[27]। आयाहि[28]। मदाय[29]। पातुम्[30]। वज्रहस्त[31]! अश्वाभ्याम्। यज्ञम्[32]। प्रति[33]।

---

१. न Sy. २. हे इन्द्र ! त्वया Sy.
३. यजमानाः Sy. ४. नितराम् Sy.
५. अतस्त्वं दूरे वर्तमानः Sy. ६. अवि A.
७. अस्मदीयम् Sy. ८. अत्र Sy.
९. अपि वा Sy. १०. सन् is suggested for सत् ॥ विद्यमानः Sy.
११. ०भृण्वति M. अस्मदीयं स्तोत्रमुपभृणु Sy.
१२. VM. ignores सु and चन ॥ चन अपि Sy. १३. ते is missing in M. हे इन्द्र ! त्ववर्थम् Sy.
१४. The rest of the commentary from स्तोत्रकृतः up to शोभनदानम् in RV. 7. 32. 3. is missing in A.
१५. अभिषुते Sy.
१६. मधुनि is suggested for मधूनि ।
१७. इव is suggested for ब ।
१८. अथ परोक्षस्तुतिः Sy. १९. इष्टम् Sy.
२०. समर्पयन्ति Sy. २१. वज्रहस्तमिन्द्रम् Sy.
२२. सेयत्त्विवदा A. सेयं द्विपदा is suggested for सेयत्त्विवदा। २३. इव इन्द्राय A.
२४. इन्द्राय तुभ्यम् Sy. २५. सुता बभूवुः Sy.
२६. वासिमिश्रणाः A. २७. सोमान् Sy.
२८. आगच्छ Sy. २९. मदार्थम् Sy.
३०. पातम् M. पानाय Sy. ३१. ०हस्ता M.
३२. यज्ञसदनम् Sy.
३३. अभि Sy.

श्रवच्छत्कर्णईयते वसूनां न चिन्नो मर्धिषद्गिरः ।
सद्यश्चिद्यः सहस्राणि शता ददन्नकिर्दित्सन्तमा मिनत् ॥ ५ ॥

श्रवत् । श्रवत् । श्रृण्वत्कर्णः । आगच्छति । वसूना लाभाय सः । क्षिप्रम् । अस्माकं शत्रून् । परुषस्य वक्तृन् । हिनस्तु । सद्यः । एव । यः । सहस्त्राणि । शतानि च । प्रयच्छति । तत्र कश्चित् । दित्सन्तम् । आहिनस्तु निरुणद्धु इति ।

स वीरो अप्रतिष्कुत इन्द्रेण शूशुवे नृभिः ।
यस्ते गभीरा सवनानि वृत्रहन्त्सुनीथा च धावति ॥ ६ ॥

स वीरः । सः । वीरः । अप्रतिकृतः सन् । इन्द्रप्रसादात् । नृभिः पुत्रादिभिः । वर्धते । यः । ते । गम्भीराणि । सवनानि । वृत्रहन् । अभिषुणोति । आधावति । च त्वामिति

भवा वरूथं मघवन्मघोनां यत्सूरजांसि शर्धतः ।
वि त्वाहतस्य वेदनं भजेमह्या दुणाशो भरा गयम् ॥ ७ ॥

भवा वरूथम् । भव । कवचम् । मघवन् । धनवतामस्माकम् । यदा । वेगं कुर्वाणानस्मान् युद्धे । सम्प्रेरयसि । विभजेमहि वयम् । त्वया हतस्य । धनम् । आहर । केनचिदपि नाशयितुमशक्यस्त्वम् । गृहमस्माकम् ।

---

१. The *Pratika* is supplied by the Editor. २. शृणोतु Sy.
३. त् is missing in A. याच्ञाश्रवणरूपकर्ण इन्द्रः Sy: ४. याचते Sy ५. वसूनि Sy. ६. नैव Sy. ७. अस्मदीयाः Sy.
८. पुरुष० A. याच्ञा is वाक्यानि Sy.
९. हिनस्तु अश्रवणेन याच्ञावाक्यानि निष्फलानि (न) करोत्वित्यर्थः Sy.
१०. अपि चेन्द्रः याच्ञानन्तरमेव Sy.
११. ०च्छति A. प्रयच्छेत् Sy.
१२. कश्चि A. कश्चिदपि Sy.
१३. दातुमिच्छन्तं तमिन्द्रम् Sy.
१४. ०नस्तु न निरु० M. हिंस्यात् । Sy. १५. VM. ignores वित् ॥
१६. ति is missing in M कदाप्यप्रतिगतोऽप्रतिज्ञस्वितो वा भवेत् Sy.
१७. इन्द्रेण हेतुना Sy. १८. परिचारकैः Sy.
१९. उपगम्यते । इवयतिर्गतिकर्मा Sy.
२०. पुमान् Sy. २१. त्ववर्थम् Sy.
२२. सोमान् Sy. २३. त्वां स्तुतिभिरुपधावति च Sy. २४. भवा रूपम् A. २५. उपद्रवाणां वारकं वर्म Sy. २६. हे धनवन्निन्द्र ! Sy. २७. धनेव० A. हवि मताम् Sy.
२८. त्वम् Sy. २९. उद्यतहमानाञ्छत्रून् Sy.
३०. सम्प्रेरयेः Sy. ३१. विशेषेण लभेमहि Sy.
३२. अपि च त्वयाहतस्य शत्रोः Sy.
३३. अस्मभ्यमाहर Sy.
३४. The passage beginning with धनम् and ending with ०शक्यस्त्वम् is missing in M. यितुम० is suggested for यितम०
३५. ग्रह० A.

सुनोता सोमपाव्ने सोममिन्द्राय वज्रिणे ।
पचता पक्तीरवसे कृणुध्वमित्पृणन्मित्पृणते मयः ॥ ८ ॥

सुनोत । सुनुत । सोमस्य पात्रे । सोमम् । इन्द्राय । वज्रिणे । पचत । पक्तव्यांश्चरून् पुरोडाशांश्च । रक्षणाय । कृणुध्वम् । एवैतत् । प्रयच्छन् । एवेन्द्र । प्रयच्छते । सुख भवति ।

मा स्रेधत सोमिनो दक्षता महे कृणुध्वं राय आतुजे ।
तरणिरिज्जयति क्षेति पुष्यति न देवासः कवत्नवे ॥ ९ ॥

मा स्रेधत । मा । क्षीणा भवत । महे, सोमिनः । अपि तर्हि, उत्साह कुरुत । महते धनाय । कृणुध्वं कर्म । धनाय । शत्रूणामाहन्तृणे । क्षिप्रकारी । एव पुरुषः । शत्रून् जयति । सुखञ्च निवसति । पुष्यति च प्रजया पशुभिः । यः कुत्सितं कर्मातनोति स कपर्तुरित्याहुः, न, तस्मै । देवा अभ्युदयमावहन्ति ।

नकिः सुदासो रथं पर्यास न रीरमत् ।
इन्द्रो यस्यांविता यस्य मरुतो गमत्स गोमति व्रजे ॥ १० ॥

नकिः । नकि ह कश्चित् । शोभनदानस्य पैजवनस्य राज्ञः । रथम् । पर्यस्यति । न च रथ युद्धे प्रवृत्ते ।

---

१. हे मदीयाः पुरुषाः ! अभिषुणुत Sy.
२. वचत A.
३. वक्तव्यां चरून् A.
४. अवसे इन्द्रं तर्पयितुम् Sy.
५. इन्द्रप्रियकराणि कर्माणि च कुरुतैव Sy.
६. यजमानाय प्रयच्छन् Sy.
७. एवेन्द्रः is suggested for एवेन्द्र ।
८. पृणते हवींषीति शेषः Sy.
९. इन्द्रो हि मयः सुखम् Sy.
१०. क्षिणा भवतं A. हे मदीया जनाः ! . . हिंसिष्ट Sy.
११. महे is explained a little further as महते । It should come immediately before महते ।
१२. सोमानोऽपि A. सोमवतो यागात् Sy.
१३. तहि A.
१४. यागादि कर्तुमुत्सहध्वं च Sy.
१५. कर्माणि कुरुत च Sy.
१६. धनलाभार्थम् Sy.
१७. ०महन्त्रिणे M. ०हन्त्रे is suggested for ०हन्तृणे ॥ तुर्जिहिंसाकर्मा दानकर्मा वा शत्रूणामभिहिंसकाय धनानां प्रदात्रे वा Sy.
१८. कर्मसु त्वरित एव Sy.
१९. पुष्टो भवति Sy.
२०. यत्कुत्सि० M.
२१. कलर्तुरि० M. कवत्नुरि० is suggested for कपर्तुरि० ॥ कवत्नवे कुत्सितक्रियायै । कवोपसृष्टस्यातेः सातत्यगमनकर्मणो रूपं कवत्नुरिति Sy.
२२. ०वहति A. देवा भवन्तीति शेषः । सुखप्राप्तये भवन्तीत्यर्थः Sy.
२३. कि A.
२४. नकिर्न क० is suggested for नकि ह क० ।
२५. वैजव० A. शोभनदानस्य यजमानस्य Sy.

मुपरमयति। इन्द्रः। यस्य। रक्षिता भवति। यस्य च। मरुतः। गच्छतु। सः। गोमन्तम्। व्रज शत्रूणामिति।

गमद्वाजं वाजयन्निन्द्र मर्त्यो यस्य त्वमविता भुवः।
अस्माकं बोध्यविता रथानामस्माकं शूर नृणाम् ॥ ११ ॥

गमद्वाजम्। गच्छति। अन्नम्। युद्धं कुर्वन्। इन्द्र! मर्त्यः। यस्य। त्वम्। रक्षिता। अभवः। तथा सत्यस्माकम्। रथानाम्। नृणाञ्च। अपिता भवामीति। शूर! बुध्यस्व बुधेरन्त्यस्य धकारस्य लोपश्छान्दसः।

उदिद्धवस्य रिच्यतेऽशो धनं न जिग्युषः।
य इन्द्रो हरिवान्न दभन्ति तं रिपो दधे दधाति सोमिनि ॥ १२ ॥

उदित्। उद्रिच्यते। इन्द्रस्य त्रिष्वपि सवनेष्वन्वितस्य। अंशः। धनम्। इव। शत्रु जयतः। यः। इन्द्रः। हरिवान्। नॄ। हिंसन्ति। तम्। रिपवः। किञ्चाय बलम्। निदधाति। यजमाने।

---

१. नुपर० ॥ M. उपर० is suggested for मुपर० ॥ आत्मार्थं न कश्चिदेनं गृह्णातीत्यर्थः Sy.
२. मरुतोवितारः Sy.
३. गच्छेत् Sy.
४. गोयुक्ते Sy.
५. गोष्ठे Sy.
६. गच्छेत् Sy.
७. स्तोत्रेण त्वां बलिनं कुर्वन् Sy.
८. मर्त्यस्य Sy.
९. भवेः Sy.
१०. वसिष्ठानाम् Sy.
११. पुत्रादीनां च Sy
१२. पिता M.
अविता is suggested for अपिता ॥ रक्षिता Sy.
१३. अपि च हे शूर! Sy.
१४. बोधि भव। भवतेर्लोटि रूपम्। भकारस्य बकारश्छान्दसः Sy.
Both VM. and Sy. are wrong in explaining the formation of बोधि which is an aorist form of बुध् and is used in the sense of the imperative Cf. VM's commentary on RV. 7. 32. 25. लोडर्थे लुङ्
१५. बुद्धेर० M. The reading is doubtful.
१६. VM. explains अस्माकम् once only.
१७. उदि A.
१८. विच्यते A. अतिरिच्यतेऽन्येभ्यो ऽपि देवेभ्यः। इन्द्रस्य त्रिष्वपि सवनेषु सोमपानमस्ति माध्यन्दिनं हि सर्वमैन्द्रमिति Sy.
१९. तृष्वपि A.
२०. सवनेष्वन्वि० is suggested for सवनेऽन्वि०
२१. यज्ञे सोमस्य भागः Sy.
२२. शत्रून् M.
जितवतः Sy.
२३. न् नॄ is missing in A. न is suggested for नॄ।
२४. किं M.
२५. सन्दधाति Sy.
२६. VM. ignores इत् and नु ॥ उदिन्विति त्रयः पूरणाः Sy.

मन्त्रमखर्वं सुधितं सुपेशसं दधात यज्ञियेष्वा ।
पूर्वीश्चन प्रसितयस्तरन्ति तं य इन्द्रे कर्मणा भुवत् ॥ १३ ॥

मन्त्रमखर्वम्[1] । स्तोत्रम् । अन्यूनम्[2] । हृदये सुष्ठु निहितम्[3] । सुरूपम्[4] । आधत्त[5] स्तोतारः ! देवेष्विन्द्रे[6] तदनुचरेषु । बह्वः[8] । अपि । प्रसिद्धयः[9] । तम् । न[10] । तरन्ति[11] । यः[12] । इन्द्रे[13] । कर्मणा[14] । भवति कर्म कुर्वन्निन्द्रसमीपं गच्छति, 'प्रसिति प्रसयन्नात्[16] तन्त्रिर्वा[18] जालं वा' इत्युक्तमिति[19] ।

कस्तमिन्द्र त्वावसुमा मर्त्यो दधर्षति ।
श्रद्धा इत्ते मघवन्पार्ये दिवि वाजो वाजं सिषासति ॥ १४ ॥

कस्तमिन्द्र । त्व वासयिता यस्य स त्वावसु[20] कः[21] । तम् । इन्द्र[22] ! त्वावसुम्[23] । आधर्षयति[24] । मर्त्य[25] । श्रद्धया[26] । एव । तुभ्यम्[27] । मघवन् ! पारभवे[28] । अह्नि यस्मिन्नहनि युद्धं सन्तिष्ठते तस्मिन्[29] । हविष्मान्[30] । अन्नम्[31] । प्रदातुमिच्छति[32] यदहरेव शत्रुं जित्वा युद्ध सस्थापयति तदहर्पार्यमुच्यत[33] इति ।

---

१. मन्त्रमर्वम् A.
२. हे जनाः ! अनल्पम् Sy.
३. सुविहितम् Sy.
४. शोभनरूपम् Sy.
५. विधत्त Sy.
६. रः देवेषु is missing in M.
७. यजनीयेषु देवेषु मध्ये इन्द्राय Sy.
८. बह्वोऽपि A.
९. प्रसिद्धतयः A. प्रसितयः M. is suggested for प्रसिद्धयः ॥ पाशादीनि बन्धनानि Sy.
१०. चनेति समुदायो नेत्यर्थे वर्तते Sy.
११. तरन्ति । व्याप्नुवन्तीत्यर्थः Sy.
१२. जनः Sy.
१३. नन्द्रे A. इन्द्रस्य चित्ते Sy.
१४. स्तुत्याविरूपेण Sy.
१५. भवेत् Sy.
१६. ०तिः प्र० is suggested for ०ति प्र०
१७. ०सयन्नाक् A. ०सयनात् is suggested for ०सयन्नात्
१८. तन्तिर्वा A. तन्तुर्वा N.
१९. N. 6. 12. The passage प्रसितिः प्रसयनात् तन्त्रिर्वा जालं वा should immediately follow प्रसिद्धयः (प्रसितयः) and precede तम्
२०. ०वसुः कः is suggested for ०वसु कः ॥ The passage त्वं वा०...वसुः should immediately follow कः and precede तम् २१. मर्त्यः Sy.
२२. हे इन्द्र ! तव चित्ते यो भवेत् Sy.
२३. त्वं वसुर्व्यापको यस्येति बहुव्रीहिः । ततं जनम् Sy. २४. आधर्षेत् Sy.
२५. मर्त्यः is suggested for मर्त्य ।
२६. यः श्रद्धया युक्तः सन् Sy.
२७. त्वदर्थम् Sy.
२८. पराभवे M. पारभावे is suggested for पारभवे ॥ सौत्ये Sy.
२९. पार्ये दिवि सौत्येऽहनि Sy.
३०. हविष्मान् भवेत् Sy.
३१. बलं वा Sy.
३२. ०तु मच्छ० A. सेवते Sy.
३३. ०ह वार्य० A. ०हः पार्यम् is suggested. The passage यदहः...मुच्यते should immediately follow पारभवे and precede अह्नि

मघोनः[1] स्म वृत्रहत्येषु चोदय[2] ये ददति प्रिया वसु[3]।
तव प्रणीती हर्यश्व सूरिभि[4]र्विश्वा[5] तरेम दुरिता[6] ॥ १५ ॥

मघोनः। धनवतः[1]। युद्धेषु। चोदय[2]। ये[3]। प्रियाणि। धनानि। तेभ्यो युष्मभ्यं प्रयच्छन्ति। तव। प्रणयनेन। हर्यश्व ! वयं सूरिभिः[4] पुत्रादिभिः सह। विश्वानि[5]। दुरितानि[6]। अतितरेम[7]।[8]

तवेदिन्द्रा[9]वमं वसु त्वं पुष्यसि मध्यमम्।
सत्रा विश्वस्य परमस्य राजसि नकिष्ट्वा[14] गोषु वृण्वते ॥ १६ ॥

तवेदिन्द्र[9]। तव। एव। इन्द्र[10] ! अवमम्[11]। धनं पार्थिवम्। त्वमेव। आन्तरिक्ष[12] वसु। पुष्यसि। त्वमेव दिव्यस्य[13] धनस्य। ईशिषे। सत्यमेव। सर्वस्य[14]। न केचित्[15]। त्वा शत्रूणाम्। गोषु प्रवृत्तम्। वारयन्ति।

त्वं विश्वस्य धनदा असि श्रुतो य इ भवन्त्याजयः[16]।
तवायं विश्वः पुरुहूत पार्थिवोऽवस्युर्नाम[17] भिक्षते ॥ १७ ॥

त्वं विश्वस्य[16]। त्वम्[17]। सर्वस्य[18]। धनस्य दाता। भवसि। विश्रुत[19]। ये[20]। इमे। सङ्ग्रामाः[21]। भवन्ति तेषु प्रवृत्तस्य विश्वस्येति। तव[22]। अयम्। विश्व[23]। पुरुहूत ! पार्थिवो जन[24]। रक्षणमिच्छन्[25]। नमनम्[26]। याचते[27]।

---

१. हे इन्द्र ! धनवतस्ते त्वदर्थमित्यर्थः Sy.
२. तान् जनान् प्रेरय Sy.
३. जनाः Sy.
४. स्यरिभिः Λ. स्तोतृभिः पुत्रादिभिः सार्धम्Sy.
५. विश्वादि A.
६. दुरितान् Λ.
७. अतरेमेति A.
८. VM. ignores स्म.
९. दिन्द्रम् A.
१०. इन्द्रो वमं A.
११. अधमं त्रपुसीसादिकम्। यद्वा भौमं वस्ववमम्
१२. रजतहिरण्यादिकमान्तरिक्षं वा Sy.
१३. द्रव्यस्य M. उत्तमस्यापि रत्नादेर्दिव्यस्य वा वसुनः Sy.
१४. केऽपि न Sy.
१५. अपि च त्वाम् Sy.
१६. गोष्ठ Λ. गोषु निमित्तेषु
१७. हे इन्द्र ! त्वम् Sy.
१८. सर्वस्य स्तोतुर्यजमानस्य वा Sy.
१९. प्रसिद्धः Sy.
२०. एते Sy.
२१. युद्धानि Sy.
२२. तेष्वपि धनदाः श्रुतो ऽसि Sy.
२३. त्वत्त इत्यर्थः Sy.
२४. विश्वः is suggested for विश्व ॥ सर्वः Sy.
२५. रक्षमिच्छन् Sy.
२६. अन्नमुदकं वा Sy. बर्हिः नाम इत्युदकनामनी Ngh. 1. 12.
२७. याचते। त्वामेवेति शेषः

यदिन्द्र यावतस्त्वमेतावदहमीशीय ।
स्तोतारमिद्दिधिषेय रदावसो न पापत्वाय रासीय ॥ १८ ॥

यदिन्द्र[1] यावतः[2] । यदि । अहम् । इन्द्र ! यावतो धनस्य । त्वमीशिषे । तावक[3] । ईशिय[4] । ततो मां यः स्तौति तम्[5] । एव धनप्रदानेन । अह धारयेयम्[6] । रुतिर्विलेखनकर्मा[7] । 'इन्द्रोऽस्माकमरदद्वज्रबाहुः[8]' इति मन्त्रः, शत्रूणा धनानि यो विलिखति स दरावसु[9] । तम्[10] । पापत्वाय[11] । अह दत्यमिति[12] ।

शिक्षेयमिन्महयते दिवेदिवे राय आ कुहचिद्विदे ।
नहि त्वदन्यन्मघवन्न आप्यं वस्यो अस्ति पिता चन ॥ १९ ॥

शिक्षेयम्[13] । प्रयच्छेयम्[14] । एव । त्वा स्तुवते[15] । अन्वहम्[16] । धनानि । क्वचिदपि ज्ञानाय[17] । नहि[18] । त्वत्तः । अन्यत् । मघवन्[19] ! अस्माकम् । अस्ति । बान्धवन्[20] । त्वदतिरिक्त[21] प्रशस्यतर[22] । पिता । चास्माकं नास्ति यस्मात्त्वमेव पालयसि[23] ।

---

१. ०न्द्रा या० M. २. यद्यतः Sy.
३. तावकम् M. तावतः is suggested for तापक ॥ एतावत् । षष्ठ्या लुक् । एतावतो धनस्य Sy.
४. ईशि M. ईशीय is suggested for ईशिय ॥ ईश्वरो भवेयम् Sy.
५. अस्मदीयं स्तोतारम् Sy.
६. ०येय Λ.
७. तिर्विले० Λ. रदिः is suggested for रुतिः ।
८. ०मरुद्वज्र० Λ. ०मरुर्वज्रं बाहुः M.
९. रदवसु is suggested for दरावसु । रदति ददाति वसूनीति रदवसुः Sy.
१०. न is suggested for त ।
११. पापं त्वया M.
१२. दत्तमिति M. दद्यामिति is suggested for दत्यमिति ।
१३. दद्याम् Sy.
१४. पूजयते जनाय Sy. १५. प्रतिदिनम् Sy.
१६. Λ. adds 'कामास्त्वामभिष्टुमो वर्धितद्धि क्षिप्रं वासयितस्तन्न स्तोत्रम् ॥ मान । मरमा त्रिन्दिते परुषं वक्रे चर्यस्त्वं शं त्यो दात्रे च त्वय्येव च मम दानादिक कर्म भवतु' and M. कामास्त्वामभिष्टुमो वर्धितर्हि क्षिप्रं पितर after धनानि, Cf. the commentary on 7. 31. 4., 5.
१७. ज्ञाताय is suggested for ज्ञानाय ॥ कुत्रचिद्विद्यमानः कुहचिदित्, तस्मै यत्र क्वापि विद्यमानायेत्यर्थः Sy.
१८. एवमिन्द्रस्य वाक्यं श्रुत्वा सन्तुष्ट ऋषिर्वदति Sy.
१९. बान्धवम् is suggested for बान्धवन् ॥ ज्ञातेयम् Sy. २०. तद्व्यतिरिक्त Λ.
२१. The passage beginning with ज्ञाताय and ending with प्रशस्यतरः is missing in M. प्रशस्यः Sy.
२२. पालयिता च त्वदन्यो नास्तीत्यर्थः Sy.
२३. VM. ignores आ ॥ आकारः पूरणः Sy.

तुरणिरित्सिषासति वाजं पुरंध्या युजा ।
आ व इन्द्रं पुरुहूतं नमे गिरा नेमिं तष्टेव सुद्रवम् ॥ २० ॥

तरणिः । क्षिप्रकारी । एवेन्द्रः । सम्भक्तुमिच्छति । सद्ग्रामम् । प्रज्ञया । सहायभूतया । तथा सति युष्मदर्थमहम् । आनयामि । पुरुहूतम् । इन्द्रम् । स्तुत्या । नेमिम् । तक्षेव । शोभनकाष्ठम् ।

न दुष्टुती मर्त्यो विन्दते वसु न स्रेधन्तं रयिर्नशत् ।
सुशक्तिरिन्मघवन् तुभ्यं मावते देष्णं यत्पार्ये दिवि ॥ २१ ॥

न दुष्टुतिः । न । दुष्टेन स्तोत्रेण मर्त्यः । विन्दते । धनम् । स्रेधतिरुपक्षयकर्मा, न, उपक्षीयमाणमुपहरत स्तोत्रम् । धनम् । व्याप्नोति । शोभनदानम् । एव । मत्सदृशाय स्तोत्रे देष्णं धनम् । यत् । पारभावे । दिवि भवत्यनायासेन त्वं देय धन स्तोत्रे प्रयच्छसीति ।

अभि त्वा शूर नोनुमोऽदुग्धाइव धेनवः ।
ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः ॥ २२ ॥

अभि त्वा । अभिष्टुमः । त्वाम् । शूर ! यथाऽदुग्धाः । धेनूर्दोग्धारमर्थमुपस्तुवन्ति तस्मात्प्रादा--

---

१. तक्षिरि A. २. स्तुत्यादौ कर्मणि त्वरित एवपुमान् Sy. ३. सम्भजते Sy. ४. अन्नम् Sy. ५. महत्या धिषा Sy. ६. ०भूताय A. ७. वस्त्वाम् Sy. ८. बहुभिरुहूतम् Sy. ९. चक्रवलयम् Sy. १०. यथा वर्धकिर्दारुनेमिमानमयते तद्वदित्यर्थः Sy. ११. शोभनदारुम् Sy. १२. नुष्ठनी A. १३. नुष्टेन A. दुष्टुत्या Sy. १४. मनुष्यः Sy. १५. इन्द्रं स्तुवन्नेव वसु लभते इत्यर्थः Sy. १६. सेधति० M. १७. ०रुक्षयकुर्मा A. The passage स्रेधति . कर्मा should immediately follow उपक्षीयमाणम् १८. अपहरन्तम् is suggested for उपहरत ॥ हिंसन्तमिन्द्रविषयस्तुत्यादिकर्माण्यकुर्वन्तमित्यर्थः Sy. १९. सुकर्म विन्दत इति व्यवहितमप्यनुषज्यतेऽभ्याहारस्यान्तिकत्वात् Sy. २०. दैप्तव्यम् Sy. २१. सौत्ये Sy. २२. दिवि is missing in M. दिवि is suggested for दिचि ॥ दिवसे Sy. २३. त्वदेयं (त्वदीयं) M. २४. VM. ignores मघवन् and तुभ्यम् ॥ हे मघवन् ! त्वया तुभ्यं त्वत्तः Sy. २५. भृशमभिष्टुमः Sy. आभिमुख्येनात्यन्तं स्तुमः । 'नु स्तुतौ' यङ्लुगन्तम् Mah. आभिमुख्येन. नोनुमो नमामः U. आभिमुख्येनात्यर्थं नुमः स्तुमः । नोतेर्यङ्लुगन्ताल्लट् प्र६. रे शूर इन्द्र ! Mah. U. हे शूर विक्रान्त इन्द्र BB. २७. क्षीरपूर्णोधस्त्वेन वर्तन्ते तद्वत् सोमपूर्णचमसत्वेन वर्तमाना यूयम् Sy. तत्र दृष्टान्तः । यथा अदुग्धाः Mah. अदुग्धा धेनव इव BB. २८. गावः Mah. यथा वत्सान् प्रत्यदुग्धा धेनवः U. २९ वत्सान् स्तुवन्ति Mah. नमन्ति, एवं त्वा प्रति हविर्भिः स्तोत्रैः शस्त्रैश्चाभिमुख्येन नमामः । यद्वा 'णु स्तुतौ' अप्रमत्र धातुः शब्दसारूप्यात् । अभिनोनुमोऽभिष्टुमस्त्वां कृत्यकृत्याः सन्तः स्तुतस्तोत्राः कृतशस्त्रा उद्यतहविष्काः । कथमिव ? अदुग्धा इव धेनवः । यथा अदुग्धा अकृतकृत्या धेनवो वत्समभितुष्टुवुरेवम् U. यथा तावद् वत्से, आभिमुख्येन शब्दयन्ति BB. ३०. तस्मा प्रदा ०A.

दित्यृशीय वन्दमाना उपस्तुवन्तः पशून् दुहन्ति' इति ब्राह्मणम्[1]। ईशानम्[2]। अस्य। जङ्गमस्य। सर्वस्य द्रष्टारम्[3]। ईशानम्[4]। इन्द्र ! तस्थुषश्च[5]।

न त्वावाँ अन्यो दिव्यो न पार्थिवो[6] न जातो[7] न जनिष्यते[8]।
अश्वायन्तो मघवन्निन्द्र वाजिनो गव्यन्तस्त्वा हवामहे॥ २३॥

न त्वावान्[9]। न। त्वत्सदृश.। अन्यः। दिव्यः। पार्थिवो[10] वा सम्प्रत्यस्ति। नापि। जातः। नापि। जनिष्यते[11]। अश्वादीनिच्छन्तः। तं त्वा। वय हवामहे[12]। हविष्मन्त.[13][14]।

अभी षतस्तदा भरेन्द्र ज्यायः[15] कनीयसः[16]।
पुरूवसुर्हि मघवन्त्सनादसि भरेभरे च हव्यः॥ २४॥

अभी षतः[17]। अभ्याभर[18]। सत प्रशस्तस्य वसिष्ठस्य। तत्[19]। इन्द्र ! धनम्। ज्यायान्[20]। कनीयसो मम। बहुधन.। हि। मघवन्[21] ! चिरादारभ्य त्वम्। भवसि। सङ्ग्रामेसङ्ग्रामे[22]। च। ह्वातव्य[23]।

---

१. णाम् A.
२. प्रभुम् Mah. कथम्भूतं त्वामभिनोनुमः ? ईशानम् U. कीदृशम् ? ईशानमीश्वरम् BB.
३. दृष्टा० A. सर्वदृशम् Sy. पश्यतीति स्वर्दृक् तम्। यद्वा स्वरादित्य इव दृश्यते स्वर्दृक् Mah. स्वः पश्यतीति स्वर्दृक् तं स्वर्दृशम्। यद्वा स्वरादित्यः, तद्वद्यो दृश्यते स स्वर्दृक् तं स्वर्दृशम् U. स्वर्गाख्यस्य परमसुखस्य द्रष्टारम् BB.
४. ईशानमिति पदस्यावृत्तिरादरार्था Sy.
५. स्थावरस्य च Sy. स्थावरस्येशानं, विश्वनियन्तारमित्यर्थः Mah स्थितवतः स्थावरस्येत्यर्थः U. स्थावरस्य च। .ण त्वमिन्द्रियं वीर्यं चास्मभ्यं देहीति BB.
This stanza=YV. 27. 35.= TS. 2. 4. 14. 2. ६. त्वत्सदृशः A. त्वत्सदृशोऽस्तीति त्वावान्। सादृश्यार्थे वतुप्रत्ययः Mah.
७. न जायते Sy. अस्तीति शेषः Mah.
८. दिवि भवः Sy., Mah., U.
९. पृथिव्यां भवोऽपि Sy. पृथिवीभवश्च Mah. न च पार्थिवोऽस्तीति शेषः U.
१०. पृथिव्यां दिवि च त्रिष्वपि लोकेषु त्वत्सदृशः कश्चिन्नास्तीत्यर्थः Sy. उत्पत्स्यते Mah. U.
११. ०दीनीच्छ० A. आदि refers to गव्यन्तः॥ अश्वानिच्छन्तः, गा इच्छन्तश्च Sy. अश्वान्कामयमानाः। . .गा इच्छन्ति गव्यन्तो गोकामाः। गवाश्वान्देहीत्यर्थः Mah. अश्वान्कामयमानाः . .गाः कामयमानाः U.
१२. ह्वयामः Sy. आह्वयामः U.
१३. वाजमिच्छन्तः। इच्छायामिनिप्रत्ययः हविष्मन्तो वा Sy. अन्नवन्तो हविर्युताः Mah. वाजोऽन्नं तद्येषामस्ति ते वाजिनो हविषा संयुक्तःसन्तः U.
१४. VM. ignores मघवन् and इन्द्र॥ हे धनवन्निन्द्र ! Sy., Mah., U.
This stanza=YV. 27. 36.
१५. अभिषदः A. १६. अभ्याहर M.
१७. त M. सतः is suggested for सत॥
१८. प्रसिद्धम् Sy.
१९. हे ज्यायन्निन्द्र ! 'आमन्त्रितं पूर्वमविद्यमानवत्' इतीन्द्रपदस्याविद्यमानवद्भावात् ज्याय इत्यस्य सर्वानुदात्तत्वाभावः। नकारस्य रुत्वं व्यत्ययप्राप्तुमभावो वा Sy.
२०. त्वं नीयसो मं म A. कनीयसः सतो मम Sy.
२१. सङ्ग्रामे यज्ञे वा Sy.
२२. ह्वातव्यः is suggested for ह्वातव्य॥ हविष्यश्चासि Sy.

परा णुदस्व मघवन्नमित्रान्त्सुवेदा नो वसू कृधि ।
अस्माकं बोध्यविता महाधने भवा वृधः सखीनाम् ॥ २५ ॥

परा णुदस्व[1] । पराणुदस्व[2] । मघवन् ! शत्रून् । सुलभान्[3] । अस्माकम्[4] । धनानि । कुरु । अस्माकम् । बुध्यस्व[5] । रक्षिता भवामीति । सङ्ग्रामे[6] । भव । वर्धक[7] । सखीनाम्[8] ।

इन्द्र क्रतुं न आ भर पिता पुत्रेभ्यो यथा ।
शिक्षा णो अस्मिन्पुरुहूत यामनि जीवा ज्योतिरशीमहि ॥ २६ ॥

इन्द्र[10] । अत्र शाटचायनकम्—'शक्तिं ह वासिष्ठं सौदासा अग्नौ प्रासुः स ह प्रास्यमानोऽनूवाच[11]—इन्द्र क्रतुं[12] न आ भर पिता पुत्रेभ्यो यथा'—इति एतावद्धैवास्य[13] व्याहृतमास । अथ ह तमग्नौ प्रासुः । अथ

---

१. णुदस्य A.
२. VM. explains परा as उपसर्ग but Sy. explains it as a noun. परा पराचीनान् Sy. ३. प्रेरय Sy.
४. सल० A. सुलभानि is suggested for सुलभान् ५. अस्मभ्यम् Sy.
६. भव Sy.
७. वाजसातौ, महाधनः, इति सङ्ग्रामनामनी Ngh. 2. 17.
८. धर्क् A. वर्धकः is suggested for वर्धक ॥ वर्धयिता च भव Sy.
९. स्तोतॄणामस्माकं वसिष्ठानाम् Sy.
१०. तत्राख्यानम् SVD. p. 130, 131.
वसिष्ठस्य सुतः शक्तिः पुष्पार्थं वनं ययौ ।
राज्ञः सुदासो दासास्तु वासिष्ठं ददृशुश्च तम् ॥१॥
विश्वामित्रप्रयुक्तैस्तु रक्षोभिर्वेष्टिताश्च ते ।
वनाग्नौ प्राक्षिपंश्चैनं देवभक्तोऽयमित्युत ॥२॥
आस्तिकोऽयं वसिष्ठस्य पुत्र इत्येव चावदन् ।
प्रक्षिप्यमाणः सोऽपश्यद्विन्द्र क्रतुमिति ह्रचम् ॥३॥
अर्धदग्धमुक्तवानार्तं ततोऽवहात वह्निना ।
चिरायमाणे पुत्रे तु पुत्रस्नेहपरिप्लुतः ॥४॥
मार्गविक्षिप्तनयनो वसिष्ठोऽभ्यागमद्वनम् ।
दग्धं पुत्रमथ श्रुत्वा भूतेभ्यो शोककर्शितः ॥५॥
दृष्ट्वा तु दग्धशेषं तु शिश्राणाद्रि समापयत् ।
अथार्धचैत्रयं शिष्टमवक्ष्यन् मम वै सुतः ॥६॥
अजीविष्यदयं सम्यक् स सुखी शरदां शतम् ।
इन्द्रक्रतुं ह्रचे शक्तिरार्द्योऽर्धचैं विकल्पितः ॥७॥
ऋषिर्वसिष्ठः सूक्तस्य देवता त्विन्द्र एव हि ।
इत्युक्त्वा धृतिमालम्ब्य प्रययावाश्रमं पुनः ॥८॥
एवं तु शाटचायनकं वदन्ति ब्राह्मणं किल ।
आद्यार्द्धचैमेव शक्तिर्दृष्टवान् दग्ध एव सः ॥९॥
द्वृचं सर्वं वसिष्ठस्तु दृष्टवानिति ताण्डकम् ।
इति ब्राह्मणवैमत्यं विकल्पाय प्रदर्शितम् ॥१०॥
'सौदासैरग्नौ प्रक्षिप्यमाणः शक्तिरन्त्यं प्रगाथम्
इति सर्वानुक्रमणी (KSA. 35. 32. p. 25.
वसिष्ठोऽकामयत प्रजायेयं प्रजया पशुभिरभिसौदासान् भवेयमिति (SSS. 4. 8.)
आश्विने सौर्ये क्रतौ 'उदिते सौर्याणि' उदु त्यं जातवेदसमिति नव (SSS. 9. 20, 20. 21.)
तथा 'प्रगाथं शंसति' इति ब्राह्मणे (KB. 18. 2.) विनियोगः DDN.
११. ०वाचे M. १२. क्रतुर्न A. M.
१३. ०वर्धेहास्य A.
१४. मासाद्य हूतामग्नौ M.

ह वसिष्ठ आजगाम। स होवाच किं मे पुत्रः प्रास्यमानोऽब्रवीदिति। तस्मै होचुः—'इन्द्र क्रतुं न आ भर पिता पुत्रेभ्यो यथा' इति, एतावदेवास्य व्याहृतमासीदथैनमग्नौ प्रास्यन्निति। स होवाच—'शिक्षा णो अस्मिन् पुरुहूत यामनि जीवा ज्योतिरशीमहि'—इति। यन्म एतमुत्तरमर्धर्चं मे पुत्रः प्रास्यमानो वक्ष्यति न चैवैनमग्नौ प्रासिष्यन् सर्वमायुरेष्यत्' इति ॥ ताण्डके पुनः—सर्व एव प्रगाथो वासिष्ठ उक्तस्तत्र कात्यायनः—'सौदासैरग्नौ प्रक्षिप्यमाणः शक्तिरन्त्य प्रगाथमारेभे सोऽर्धर्चं उक्त्वेदं ह्यत। तं पुत्रोक्तं वसिष्ठः समापयत'—इति शाट्यायनकम्। 'वसिष्ठस्यैव हतपुत्रस्यार्षम् इति [ताण्डकम्]

इन्द्र ! प्रज्ञानम्। अस्माकम्। आभर। यथा। पिता। पुत्रेभ्यो धनं प्रयच्छति। प्रयच्छ। अस्मभ्यम्। पुरुहूत ! अस्मिन्। प्रयाणे। जीवन्तो वयम्। सूर्यम्। अन्वहं प्राप्नुयाम।

मा नो अज्ञाता वृजना दुराध्यो३ माशिवासो अव क्रमुः।
त्वया वयं प्रवतः शश्वतीरपोऽति शूर तरामसि ॥ २७ ॥

मा नो अज्ञाताः। मा। अस्मान्। अज्ञाताः। पापकृतः। दुर्बुद्धयः। मा च। अशिवाः शत्रवः। अवक्रमुरवक्रमणमभिभवः। त्वया। वयम्। प्रवणाभिमुखानि। बहूनि। उदकानि। शूर। अतितराम।

---

१. क्रतुर्न Λ. २. आत्यादायदे० Λ.
३. ०वथेन० Λ.
४. ०र्धर्चमें Λ.
५. ०वक्ष्य Λ.
६. न् is missing in M.
७. रान्विके Λ. ताण्टके M.
८. ०दासेर० Λ. M.
९. ०गाधमा० M. ०मारेके Λ.
१०. उक्तेदं Λ. ०उक्तेऽद्ह्यत KSA. 35. 32. p. 25.
११. ०पयन्त A.
१२. ०यनक Λ.
१३. KSA. 35. 32. p. 25.
१४. कर्म प्रज्ञानं वा Sy., DDN. प्राज्ञां कर्म वा तद्विषयं कर्मैव वा BB.
१५. अस्मभ्यम् Sy., DDN., BB.
१६. अंहर A. 'हृग्रहोः' इति भत्वम् DDN.
१७. आहरति BB.
१८. धनं देहि Sy. शिक्षाण इत्यदादित्वाद् RPR 7. 33. दीर्घे कृते प्लुताकारान्तम् RPR. 5. 28. इति णत्वम् DDN. शक्तान् कुरु BB.
१९. अस्मान् BB.
२०. हे बहुभिराहूत Sy., DDN. हे पुरुहूत त्वत्प्रसादाद् वयम् BB.
२१. यज्ञे Sy., BB.
२२. ज्योतिष्मन्तं मनुष्यलोकम् BB.
२३. प्रतिदिनं प्राप्नुयाम Sy., DDN. प्राप्नुयाम अश्नोतेश्शपो लुक् BB. This stanza=TS. 7. 5. 74.
२४. मा। अस्मान्। अज्ञाताः is missing in A.
२५. हे इन्द्र ! अज्ञातगमनाः Sy.
२६. वावक्रतः A. हिंसकाः Sy.
२७. अवचक्रमुः Sy. २८. वसिष्ठाः Sy.
२९. प्रवणकाः सन्तः Sy. ३०. बहूनीः Sy.

VII. 33.

श्वित्यञ्चो मा दक्षिणतस्कपर्दा धियंजिन्वासो अभि हि प्रमन्दुः ।
उत्तिष्ठन्वोज्रे परि बर्हिषो नॄन्न मे दूरादवितवे वसिष्ठाः ॥ १ ॥

श्वित्यञ्च[2]. । कात्यायन[3]:—'सस्तवो वसिष्ठस्य सपुत्रस्येन्द्रेण[4] वा संवाद[5]:' इति । शौनक:—

'वसिष्ठाय सपुत्राय श्वित्यञ्चो[6] मेति सस्तव. ।
ऐन्द्र सूक्तमिद चैषा[7] सवादमपरे विदु.' ॥इति॥

तत्रादितो नवभिर्वसिष्ठेन पुत्रा: सस्तयन्ते । तत्र नूनं वसिष्ठ. सपुत्रो दाशराज याजया[9]ञ्चकार ततो यज्ञान्ते गन्तुमुद्युक्त: पुत्रानिदमाह—श्वित्यञ्चो[10] श्वेतिमानमञ्चन्त: श्वेतवर्णा[11]., काश्मीरजा हि तथावर्णा भवन्ति । माम् । दक्षिणतस्कपर्दा[12]:, अत्र चूडाकरणे लोकाक्षिगृह्यम्[13]—'दक्षिणतो वसिष्ठानाम्[14]' इति । कर्मणोऽस्य प्रीणयितार[15]:। अभि । हि । प्रमन्दु[16] । तत: प्रयाणाय यज्ञात् । उत्तिष्ठन्नहम् । नेतॄन्[17] पुत्रान् । परित[18]:। ब्रवीमि । न[19] न । मत्त. । दूरात् । गन्तुमर्हन्ति । वसिष्ठा[20], अपि तु समीपे स्थिता वचनमिद श्रोतुमर्हन्तीति[21] ।

---

१. 'श्वित्यञ्च:' इति चतुर्दशर्चं षोडशं सूक्तम् । अत्रेयमनुक्रमणिका—'श्वित्यञ्च: षळूना संस्तवो वसिष्ठस्य सपुत्रस्येन्द्रेण वा संवाद: (KSA. 35. 33. p. 25.) इति । आदितो नवानां वसिष्ठ ऋषि: । वसिष्ठपुत्राणां स्तूयमानत्वात्त एव देवता । 'त्रिधातो ज्योति:' इत्यादिभिर्वंशस्याविभि: स्वपुत्रैर्वसिष्ठ: स्तूयते। अतो वसिष्ठो देवता । त एव ऋषय:। 'या तेनोच्यते' (KSA. 2. 5. p. 1.) इति न्यायात् । अनुष्कान्तत्वात्त्रिष्टुप् । (Cf. KSA. 12. 6. p. 5.) Sy.

२. श्चित्यं च A.
श्चित्यश्च M.

३. कार्त्यायन A.

४. सुपुत्र० A.

५. संपाद A. A fragment of KSA. 35. 33. p. 25.

६. श्चित्यश्चो A. श्वित्यञ्च: is suggested for श्वित्यश्चो ।

७. वैषां संपाद० A.

८. BD. V 163. Cf. 'संवादं सूक्तमैन्द्रं तु श्वित्यञ्चस्तु प्रचक्षते'

९. य: जया० A.

१०. श्चित्यं चश्चेति० A.

११. श्वित्यं श्वेतवर्णमञ्चन्तीति श्वित्यञ्च: श्वेतवर्णाइत्यर्थ: Sy.

१२. दक्षिणे शिरसो भागे कपर्दाश्चूडा येषां ते दक्षिणतस्कपर्दा: Sy.

१३. लोकाक्षिग्रह्य A. लौगाक्षिगृह्यम् is suggested for लोकाक्षिगृह्यम्

१४. Sy. attributes the quotation to some Smṛti which he does not specify. चूडाकर्मणि 'दक्षिणतो वसिष्ठानाम्' इति स्मर्यते ।

१५. कर्मणां पूरयितार: Sy.

१६. विद्याबलेनाभिप्राहर्षयन् Sy.

१७. नेत्रून् A.

१८. परीति पञ्चम्यर्थानुवाद: Sy.

१९. One न is redundant.

२०. वसिष्ठस्य मम पुत्रा: Sy.

२१. ०न्ती हि A.

दूरादिन्द्रमनयन्ना सुतेन तिरो वैशन्तमति पान्तमुग्रम् ।
पाशद्युम्नस्य वायतस्य सोमात्सुतादिन्द्रोऽवृणीता वसिष्ठान् ॥ २ ॥

दूरादिन्द्रम् । दाशराजस्य सुतेन । दूरस्थितम् । इन्द्रम् । तत आनयन् । यथा तत्रत्यानां तिरोहितो भवति तथा । अत्यानयन् । वैशन्तं देशं तस्य गृहस्य स्वामिनम् । रक्षन्तम् । उद्गूर्णम् । इन्द्रश्च । पाशद्युम्नाख्यस्य । वयतः पुत्रस्य । यज्ञात् । वसिष्ठान् दाशराजस्य याजकान् । अवृणीत् ।

एवेन्नु कं सिन्धुमेभिस्तारेवेन्नु कं भेदमेभिर्जघान ।
एवेन्नु कं दाशराज्ञे सुदासं प्रावदिन्द्रो ब्रह्मणा वो वसिष्ठाः ॥ ३ ॥

एवेन्नु कम् । पूर्वार्धः परोक्षः ॥ एवम् । एव । क्षिप्रम् । एभिर्वसिष्ठपुत्रैः स्तोतृभिः । इन्द्रः पाशद्युम्नस्य

---

१. यदा वसिष्ठस्य पुत्राः सुदासं राजानमयाजयन् तदैव पाशद्युम्नाख्योऽपि राजा सोमान् यष्टुमुद्यमं चकार । तदा ते वसिष्ठपुत्राः पाशद्युम्नं तिरस्कृत्य तदीये यागे सोमं पिबन्तमिन्द्रं मन्त्रबलेन तस्मादाच्छिद्य सुदासो यज्ञे स्थापयामासुरिति तदेतद्वृत्तान्तं कीर्तयन् वसिष्ठः स्वसुताननेन मन्त्रेण स्तौति । 'श्वित्यञ्चः षळूना संस्तवो वसिष्ठस्य सपुत्रस्य' इत्यनुक्रमणी (KSA. 35. 33. p. 25.) DDN.

२. स्य is missing in M.

३. सुदासो यज्ञेऽभिषुतेन सोमेन हेतुना Sy. DDN.

४. वसिष्ठा मन्त्रबलेनानीतवन्तः Sy. अनयन्नासुतेन-इत्यत्र 'पदान्तीयो ह्रस्वपूर्वो' (RPR. 6. 15.) इति नकारस्य द्वित्वम् DDN.

५. भवन्ति A. पाशद्युम्नं तिरस्कृत्य Sy. DDN.

६. ०नयत् A. दूरान्मन्त्रबलेनानीतवन्तः DDN.

७. वैशन्तः पल्वलम् । अत्र वेशन्तशब्देन सोमाधारश्चमसो लक्ष्यते तत्स्थं सोमम् Sy. तत्रस्थं सोमं वैशन्तं । 'वेशन्तहिमवद्भूचामण्' (Pa. 4. 4. 112.) तत्र भव इत्यर्थे DDN.

८. ग्रहस्य A. ९. पिबन्तम् Sy.

१०. इन्द्रं च A. ११. जा शद्यु० A.

१२. वयतः पुत्रस्य पाशद्युम्नस्य । द्वितीयार्थे षष्ठी । वायतं पाशद्युम्नम्, अतिहाय Sy. DDN.

१३. सुदासो यज्ञेऽभिषुतात्सोमाद् हेतोः Sy. DDN.

१४. वसिष्ठस्य पुत्रान् अवृणीत पाशद्युम्नस्य सोमयागे चमसस्थं सोमं पिबन्निन्द्रस्तं पाशद्युम्नं तिरस्कृत्य मन्त्रसामर्थ्यबलेन सुदासो यज्ञ आहवनकाले वसिष्ठानाजगामेत्यर्थः Sy. वसिष्ठस्य पुत्रान् 'अत्रिभृगुकुत्सवसिष्ठ' (Pa. 2. 4. 65.) इति बहुत्वे अणो लुक् DDN.

१५. इन्द्रोऽवृणीता-इति 'यकाराद्यक्षरं परं वकाराद्यपि०' (RPR. 2. 35.) इति वकारपरत्वाबभिनिहितः । 'एकादशिद्वादशिनोः०' (RPR. 8. 36.) इति । अष्टमत्वाद्दीर्घः DDN.

१६. VM. ignores सुतात् ॥ सुदासो यज्ञेऽभिषुतात्..हेतोः Sy. १७. एवेसु कम् A.

१८. यथा पाशद्युम्नस्य सवार्थ्यं सोमयागे चमसस्थं सोमं पिबन्तमिन्द्रं वसिष्ठैः सुदासः प्राप्तवान् एवमेव Sy. १९. न्विति पादपूरणः Sy.

यज्ञादागन्तुम्[1]। नदीः[2]। ततार[3]। अथैवम्। एव। भेदकमेषां[4] रक्षोवर्गम्। जघान। एवम्[5]। एव। दाशराजाय[6]। सुदासं नाम रक्षणीयम्। प्रवत्[7]। हे वसिष्ठाः! युष्माकम्[8]। स्तोत्रेण, दाशराजः सुदासः परिरक्षणाय च तत्र भेदकानीन्द्रो[9] जघानेति[10]।

जुष्टी नरो ब्रह्मणा वः पितॄणामक्षमव्ययं न किलारिषाथ।
यच्छक्वरीषु बृहता रवेणेन्द्रे शुष्ममदधाता वसिष्ठाः॥ ४॥

जुष्टी[12] नरः। प्रीतिर्भवति। हे नेतारः! युष्माकम्[13]। स्तोत्रेण। पितॄणामिति, वसिष्ठ आत्मानम्परोक्षयन्नाह[14] प्रीतो भवामीति[15]। अथ स्याक्षम्[16]। अप्ययं[17] चलयामि। न। किल यूयं कदाचित्[18] इष्यथ[19]। यस्मात्[20]। ऋक्षुप्रयुक्तेन[21]। महता[22]। रवेण[23]। इन्द्र। बलम्। निहितवन्तो[24] यूयम्। हे वसिष्ठाः! इति।

---

१. ०दागन्तुः A.
२. नदीम् Sy.
३. तीर्णं आसीत्, तथा च निगमान्तरम् 'अर्णा सि चित् पप्रथाना सुदासे' (RV. 7. 18. 5:) इति Sy.
४. भेदकनामकं शत्रुम् Sy
५. म्। एव is written twice in A. अथ प्रत्यक्षस्तुतिः एवमेव Sy.
६. दशभी राजभिः सह युद्धे प्रवृत्ते सति Sy.
७. प्रव (वृ) र्त् A. प्रावत् is suggested for प्रवत्॥ प्रारक्षत्। तथा च निगमान्तरम्—'दश राजानः समिता अयज्यवः सुदासमिन्द्रावरुणा न युयुधुः' (RV. 7 83. 7.) इति। 'दाशराज्ञे परियत्ताय विश्वतः' (RV. 7 83. 8.) इति च Sy.
८. युष्मदीयेन Sy.
९. ज A.
१०. भेदकानिन्द्रः is suggested for भेदकानीन्द्रः।
११. VM. explains नु and एभिः once and ignores कम्॥ कं सुखेन Sy.
१२. जुष्टी नर A.
१३. युष्मदीयेन Sy.
१४. It goes with प्रीतिः। पितॄणामित्यनेन पारोक्ष्येण वसिष्ठस्यैव कीर्तनम्। अहं प्रीतो भवामीत्यर्थः Sy.
१५. ०रोक्षणाह A. परोक्षयन् or परोक्षवद् is suggested for अपरोक्षयन्॥
१६. भवमिति M.
१७. Something probably रथं is missing in the mss. अथेदानीं स्वमाश्रमं गन्तुमुद्यतोऽहमक्षं रथस्याक्षम् Sy.
१८. ०स्याक्षयव्ययरमं M. अव्ययं is suggested for अप्ययं॥ व्ययामि, लडर्थे लङ्। चालयामीत्यर्थः Sy.
१९. रिष्यथ is suggested for इष्यथ। क्षीणा भवथ Sy. २०. अस्मात् A.
२१. प्रयुक्तेन is missing in M.
२२. श्रेष्ठेन Sy.
२३. साम्ना Sy.
२४. इन्द्रे is suggested for इन्द्र।
२५. अधारयत Sy.

उद्यामिवेत्तृष्णजो नाथितासोऽदीधयुर्दाशराज्ञे वृतासः ।
वसिष्ठस्य स्तुवत इन्द्रो अश्रोदुरुं तृत्सुभ्यो अकृणोदु लोकम् ॥ ५ ॥

उद्यामिवेत्[1] । उद्गीर्थैरस्तुवन्[2] । आदित्यमिव । जाततृष्णाः । वृष्णिं[3] याचमानाः । दाशराजेन[4] वृताः । तस्मा इन्द्रम् । तथा वसिष्ठस्य च । स्तुवतः स्तुतिम्[5] । इन्द्रः । अश्रौषीत्[6] । विस्तीर्णम् । लोकं शत्रुहननेन । त्रित्सु-भ्यः[7] । च । अकरोत्[8] तृत्सवो दाशा इति[9] ।

दण्डाइवेद्गोअजनास आसन्परिच्छिन्ना भरता अर्भकासः ।
अभवच्च पुरएता वसिष्ठ आदित्तृत्सूनां विशो अप्रथन्त ॥ ६ ॥

दण्डा[10] इव । यथा[11] । गोअजनाः[12] । दण्डाः । परिच्छिन्नशाखा[13] भवन्त्येवं निरस्तपरिचरणाः[14] । भरतकुलजाताः[15] अर्भका[16] विश्वामित्रा अस्माक सपत्नाः । अभवन् । तेषामेषामभवत् । च । पुर एता[17] । वसिष्ठः[18] । अनन्तरम्[19] । एव[20] । त्रित्सूनाम्[21] । प्रजा निहितशत्रुकाः । प्रथिता अभवन्निति[22] ।

त्रयः कृण्वन्ति भुवनेषु रेतस्तिस्रः प्रजा आर्या ज्योतिरग्राः ।
त्रयो घर्मास उषसं सचन्ते सर्वाँ इत्ताँ अनु विदुर्वसिष्ठाः ॥ ७ ॥

त्रयः कृण्वन्ति[23] । अत्र शाटचायनकम्[24] "त्रयः कृण्वन्ति[25] हि भुवनेषु रेत.' इत्यग्निः पृथिव्या रेतः । कृणोति[26]

---

१. उद्यामिषेत् Λ. उद्यामि० M.
२. उद्गीर्थैः (यैः) Λ.
३. उवदीधयन् Sy.
४. वृष्टि is suggested for वृष्णि ॥ वृष्टि याचमाना वसिष्ठाः Sy.
५. दशानां राज्ञां सङ्ग्रामे Sy.
६. तृत्सुभी राजभिर्वृताः Sy.
७. स्तोत्रम् Sy.
८. अशृणोत् Sy.
९. तृत्सुभ्यः is suggested for त्रित्सुभ्यः ॥ तृत्सुभ्यो राजभ्यः Sy.
१०. अकरोत् । अददाच्चेत्यर्थः Sy.
११. VM. ignores इत् ।
१२. दण्डा इव Λ.
१३. VM. seems to explain इव of दण्डा-इव separately.
१४. गो जनाः M. गवां प्रेरकाः Sy.
१५. परिच्छिन्नपत्रोपशाखा भवन्ति तद्वत् भरताः, शत्रुभिः परिच्छिन्नाः Sy.
१६. ०चरनाः Λ.
१७. तृत्सूनामेव राज्ञां भरता इति नामान्तरेणोपादानम् Sy. १८. अत्पाः Sy.
१९. पुरोहितः Sy.
२०. परिच्छिन्नत्वादनन्तरम् Sy.
२१. एवं Λ.
२२. तृत्सूनाम् is suggested for त्रित्सूनाम् । तेषां तृत्सूनाम् Sy.
२३. तत्पौरोहित्यसामर्थ्यात् Sy.
२४. अवर्धन्त Sy.
२५. VM. ignores इत् ।
२६. त्रयः कृण्वन्ति is missing in Λ.
२७. ०यनिकम् Λ.
२८. RV. and Sāṭ. B. do not read हि,
२९. Saṭ. B reads करोति

वायुरन्तरिक्ष आदित्यो दिवि । 'तिस्रः प्रजा आर्या ज्योतिरग्राः' इति वसवो रुद्रा आदित्यास्तेषां तज्ज्योतिर्यदसावादित्यः । 'त्रयो घर्मास उषसं सचन्ते' इत्यग्निरुषसं सचन्ते वायुरुषसमादित्य उषसं सचते" इति । सर्वान् । एव । तान् । अनुविदुः । वसिष्ठाः ।

सूर्यस्येव वक्थो ज्योतिरेषां समुद्रस्येव महिमा गभीरः ।
वातस्येव प्रजवो नान्येन स्तोमो वसिष्ठा अन्वेतवे वः ॥ ८ ॥

सूर्यस्य । यथा सूर्यस्य । अश्वः सञ्चरत्येवम् । एषामपि । ज्योति सर्वतोदिक्कं विसरति । उदधेरिव । महिमा । गम्भीर । वातस्यैव । प्रजप । अन्येन केनचित् । युष्माकम् । स्तोम । हे वसिष्ठ ! न । अन्वेतु शक्यत

---

१. प्रजा is written twice in A.
२. र is missing in A. ०तिरग्राः M.
३. रुद्रा is missing in M.
४. त्रे यां वर्मास A. त्रे वर्मसि M.
५. Sy. explains this stanza in the following manner :—भुवनेषु पृथिव्यन्तरिक्षद्युषु त्रयोऽग्निवायुसूर्या यथाक्रमेण रेतो विश्वस्य धारकमुदकं कृण्वन्ति कुर्वन्ति । तेषां त्रयाणां ज्योतिरग्रा आदित्यप्रमुखा आर्याः श्रेष्ठास्तिस्रः प्रजा भवन्ति । ते च त्रयोऽग्निवायुसूर्या घर्मासो दीप्यमाना उषसं सचन्ते समवयन्ति । दुर्ज्ञानात् सर्वान्नित् सर्वानेव तान् वसिष्ठा अनुविदुः । अभिजानन्ति । तेषां रहस्यविज्ञानादियमपि वसिष्ठानामेव स्तुतिः, Sy. also quotes here the passage of above—said Brāhmaṇa
६. इन्द्रस्यार्षम् Dur. SKN.
७. प्रकाशोऽस्ति Sy. यथा सूर्यस्य दीप्तिरवभासिकाऽर्थानामेवम्
८. अश्वः A. वचनस्य Dur. SKN.
९. एषां युष्माकं स्तोमो महिमापि वा Sy. एषां वसिष्ठानाम् Dur. युष्माकं वसिष्ठानाम् SKN.
१०. दीप्तिरधिदेवादिगतानामर्थानामसन्देहेनावभासिका वाच्यैर्ऋग्भिः । अपि च न केवलमेषामसन्दिग्धार्थानि वचांसि गम्भीराणि च । महार्थवन्ति गम्भीरार्थतया दुरवगाहानि Dur. प्रकाशः SKN. ११. ०तो ब्रिकं A.
१२. यथोदकमपरिमेयं समुद्रे, एवमपरिमेयार्थानि Dur. १३. महिमा स्तोमोऽपि वा Sy. माहात्म्यम् SKN १४. महिम्नो विशेषणं गम्भीर इति । गम्भीरमोजस्विदुरवगाहार्थं च युष्माकं वचनमित्यर्थः SKN.
१५. वातस्येव is suggested for वातस्यैव सत्यपि च महार्थत्वे नैते विलम्बितस्तुतयः । किं तर्हि ? वातस्येव Dur.
१६. प्रजया M. प्रजवः is suggested for प्रजपः ॥ प्रवेगः Sy. प्रकृष्टो जव आशु प्रतिपत्तिः । तुष्टूषतां वर्णपदवाक्येषु निर्मलमनोवाग्वृत्ती शब्दार्थावसङ्गेन प्रतिपद्येते । अपि चैवमतिमहानुभावा एते नैतेषामन्यः स्तोता वचनपदवीमनुगन्तुं शक्तः Dur. प्रकृष्टो जवो वेगो यस्य SKN.
१७. यतो ब्रवीमि नान्येन केनचित् स्तोत्रा Dur.
१८. युष्माकं स्वभूतः SKN.
१९. ऋक्समूहो महिमापि वा Sy. एष स्तोमः इयं स्तुतिर्भवत्को, अतन्दिग्धार्था गम्भीराऽविलम्बिता च Dur. किम् ? अयं स्तोमः SKN.
२०. ते is missing in A. यथान्वेतुं न शक्यस्तथान्वेतुं न शक्यः Sy. नानुगन्तुमन्येन शक्या । क एनामनुकरिष्यतीति स्तुतिपरितुष्ट इन्द्रो वसिष्ठान् अस्तौत् । एवमृषयोऽपि स्तूयन्त इति प्रदर्शनमप्यस्तीति मन्त्राणां विषय इति Dur. आनुपूर्व्येण, तुमर्थे तवेन्प्रत्ययः । अनुगन्तुं शक्यत इति शेषः SKN.

इत्युत्तरार्थः[1] प्रत्यक्षः[2]।

त इन्निण्यं[3] हृदयस्य प्रकेतैः[4] सहस्रवल्शमभि सं चरन्ति।
यमेनं ततं परिधिं[5] वयन्तोऽप्सरस उप सेदुर्वसिष्ठाः[6] ॥ ९ ॥

ते इन्निण्यम्[7]। ते। एव। अन्तर्हितम्[8]। हृदयस्य। प्रज्ञानैः। बहुशाखं कर्म[9]। अभिसञ्चरन्ति। तेऽस्मान् उर्वश्यामपुत्रान्[10]। ईश्वरेण[11]। कृतम्[12]। परिधिकर्म[13] तन्तुम्[14]। वमन्तः[15]। उपसेदुरिति। वसिष्ठपुत्राः[16]।

विद्युतो[17] ज्योतिः[18] परि संजिहानं[19] मित्रावरुणा[20] यदपश्यतां त्वा।
तत्ते जन्मोतैकं वसिष्ठागस्त्यो यत्त्वा विश आजभार[21] ॥ १० ॥

[17]विद्युतो ज्योतिः[18]। वसिष्ठ! अन्तरिक्षे विद्युतः[19]। ज्योतिर्भूत्वा। सञ्चरन्तम्[20]। त्वाम्। मित्रावरुणा[21]।

---

१. ०त्युक्तारो० A. त्तरोऽर्धर्चः is suggested for ०त्तरार्थः॥ प्रत्यक्षीकृत्योत्तरेण पादेन ब्रवीति Dur.

२. अपरे पुनः—'सूर्यस्येव वक्षथः' सूर्यतेजःसमानदोप्तोरस एते वसिष्ठास्तेजस्विनः समुद्रोपगम्भीरस्वभावाश्च शीघ्रगतयश्च सर्वत्राप्रतिहतजवाः। न तेषामन्येन गतिरनुगन्तुं शक्येति वर्णयन्ति Dur. N. 11. 20., SKN. IV. 70. अथाप्यृषयः स्तूयन्ते....इति यथा—

३. तः इन्निन्य A.

४. तिरोहितं वर्ज्ञानम् Sy. निण्यम्, सस्वः इत्यन्तर्हितनाम Ngh. 3. 25.

५. संसारम्Sy.

६. ०श्याःपुत्रान् is suggested for ०श्यामपुत्रान्। अप्सरसो जननीत्वेन Sy.

७. स्वस्वाच्छन्द्येनाभिसञ्चरन्तस्ते वसिष्ठाः कारणात्मना सर्वनियन्त्रा Sy. ८. विस्तृतम् Sy.

९. वस्त्रम्। परिधिरित्यनेन जन्माविप्रवाहो विवक्षितः Sy.

१०. वयन्तः is suggested for वमन्तः॥

११. अत्र वसिष्ठा इति बहुवचनं पूजायाम्। वसिष्ठः पूर्वं प्रजापतेरुत्पन्नं देहमुत्सृज्याप्सरःसु जायेयेति बुद्धिमकरोदिति भावः Sy.

१२. एतास्वृक्षु वसिष्ठस्यैव देहपरिग्रहः प्रतिपाद्यते। एताश्चेन्द्रस्य वाक्यमित्येके, वर्णयन्त्यपरे वसिष्ठपुत्राणामिति Sy. एवमस्यामृचि, उतशब्देन समुच्चयार्थदर्शनाद् मित्रावरुणयोः सकाशाद् यज्जन्म प्रदर्शितं तस्यैवोत्तरयर्चा प्रकारोपवर्णनं क्रियते SKN.

१३. वसिष्ठपुत्राः is written after the *pratika*, which should really come before the *pratika*

१४. वासिष्ठाः M.

१५. विद्युत इव Sy विशेषेण द्योतते देवोप्यत इति विद्युर्वर्चोनि अस्मात् Dur.

१६. स्वीयं ज्योतिर्देहान्तरपरिग्रहार्थम् Sy प्रकाशः Dur.

१७. परित्यजन्तम्। छान्दसमात्मनेपदम्। यद्वा जिघृक्षितदेहार्थं स्वीयं ज्योतिः परि सञ्जिहानं परिजिघृक्षन्तमित्यर्थः। अस्मिन् पक्षे जहातेर्गत्यर्थत्वादात्मनेपदं छान्दसं न भवति Sy. तस्मात् परि परितोऽधिकं सञ्जिहानमुत्तिष्ठन्तं जायमानमित्यर्थः Dur. सङ्गच्छमानमेकीभवत् पिण्डीभूतं तेजःशरीरमित्यर्थः SKN.

१८. मित्रावरुणौ देवौ Dur.

यदा। पर्यपश्यताम्[1]। तदानीम्। तव। एकम्। जन्माभूत्। अगस्त्यः[2]। यदा[3]। त्वाम्। मनुष्यान् प्रति। आहूतवान्[4]-गस्त्यवसिष्ठौ[5] नूनं सम्मन्त्र्यै[6] मानुष्यकमास्थितावितिं[7]।

उतासि[8] मैत्रावरुणो वसिष्ठोर्वश्या ब्रह्मन्मनसोऽधि[9] जातः।
द्रप्सं स्कन्नं ब्रह्मणा दैव्येन विश्वे देवाः पुष्करे त्वाददन्त ॥ ११ ॥

उतासि[10]। अपि च। भवसि[11]। मित्रावरुणयोः पुत्रस्त्वम्[12]। वसिष्ठ! उर्वश्याः[13]। ब्रह्मन्[14]। मनसः[15]। अधिजातः[16], मित्रावरुणयोर्दीक्षितयोरुर्वशीमप्सरसं दृष्ट्वा वास्तीपरे कुम्भे रेतः[17] स्कन्नमासीत्[18] ततोऽगस्त्यवसिष्ठौ समजायेतामुर्वशीगतो मित्रावरुणयोर्मनसोऽपि जात इत्यल्पो[19] भवति। मित्रावरुणयोः स्कन्नम्[20]। रेतः[21]। दैव्येन[22]। ब्रह्मणा मन्त्रेण[23]।

---

१. ०यन्त्यताम् A. आवाभ्यामयं जायेतेति समकल्पताम्इत्यर्थः Sy. दृष्टवन्तौ SKN.

२. अगस्त्य ऋषिः Dur. उत अप्यन्यद्द्वितीयम्। कतमत्? उच्यते मित्रावरुणयोः सकाशात्। कथम्? अगस्त्य ऋषिः SKN. ३. यदाऽगमत् SKN. ४. निवेशनान् मित्रावरुणावावां जनयिष्याव इत्येतस्मात्पूर्वावस्थानात् Sy. ५. आभूतवागस्त्यवसिष्ठो A. आजहार Sy. आहूतवांस्तत्ते तव द्वितीयं जन्म Dur. अतः सहागमनादगस्त्यो वसिष्ठमाहूतवानित्युच्यते SKN. ६. समर्त्यं M. सम्मन्त्र्यैव is suggested for सम्मन्त्र्यै।

७. ०स्थितमितिवति A.

८. VM. ignores उत।

९. वसिष्ठस्य सपुत्रस्येदमार्षम्। तस्यैव स्तुतिरिन्द्रस्य वा Dur. वसिष्ठस्य स्तुतिरिन्द्रस्यार्षं संवादो वा तयोः SKN १०. उतेत्ययमपिशब्दार्थे वर्तमानोऽधस्तन्यामृचि ये जन्मनी वसिष्ठस्योक्ते ते सम्भावयति।..अपि चासि Dur. उतशब्दोऽप्यर्थे। अप्यर्थश्च समुच्चयः।..अन्ये तु पूर्वगंपेक्षं समुच्चयं मन्यन्ते।..तत्र चोतशब्दोऽपि चेत्यस्यार्थे SKN.. ११. अपि चानेन द्वितीयेन जन्मप्रकारेणासि SKN.

१२. मित्रावरुणयोरपत्यमित्यर्थः SKN.

१३. अप्सरसः Sy.कथं पुनर्मित्रावरुणयोरुत्पन्नोऽसि। किं सङ्कल्पेन? नेत्युच्यते, उर्वश्याः सकाशात्।...एवमेतस्मिन् 'द्रप्सं स्कन्नम्' इत्येवमादिना सम्बन्धेन उर्वशीशब्देनाप्सरा उच्यत इत्युपपद्यते Dur. हे वसिष्ठ! कतमेन?. उच्यते, उर्वश्याः अप्सरसः SKN.

१४. हे वसिष्ठ! Sy. १५. ममायं पुत्रः स्यादितीदृशात्संकल्पात् Sy. मनसोऽधिजातो न संघर्षणेन Dur. यन्मनश्चित्तमभिलाष इत्यर्थः। कस्य? तन्निर्देशसामर्थ्यान्मित्रावरुणयोः, ततः SKN. १६. तस्मादधिजातोऽसि। तथा च वक्ष्यते 'सत्रे ह जातौ' (RV. 7.33. 13.) इत्यृचि Sy. १७. ०तीवरे is suggested for ०ती परे। १८. रेतस्तन्न० A.

१९. इत्युक्तो is suggested for इत्यल्पो।

२०. मित्रावरुणयोरुर्वशीदर्शनात् स्कन्नमासीत् Sy. उर्वशीदर्शनात्स्कन्नम् Dur. २१. किञ्च निर्बीज एवासि मनोऽभिध्यानमात्रादुत्पन्नः? नेत्युच्यते। किं तर्हि, द्रप्सं शुक्रम्।..आह रेतः कस्माद् द्रप्स इत्युच्यते? स हि रेतःसञ्ज्ञको रसः पुरुषस्याङ्गादङ्गात् सम्भूतः स्त्रीयोनेःसानीयो भवति भक्षणीयो भरणीयश्च। एवं प्सातेर्भरतेश्च यथासम्भवं द्रप्स इत्येष शब्दो द्रष्टव्यः Dur. तस्यावर्शनात्तयोः सम्भूतं द्रप्सम्। द्रप्सशब्देनात्यन्तच्छन्नं बहुलमुदकमुच्यते। तच्चेह सामर्थ्याद्रेतः।..द्रप्सः सम्भृत उपचितार्थः तन् प्सानीयः 'प्सा भक्षणे' भक्षणेन चात्र सम्भोगहेतुकं लक्ष्यते। सम्भोगहेतुमित्यर्थः। भक्षणीय एव वा स्त्रीयोन्याः। सम्भरतेः प्सातेश्च द्रप्स इत्यर्थः SKN. २२. दैव्येनं A. देवसम्बन्धिनम् Sy. देवानां स्वभूतेन Dur., SKN.

२३. वेदराशिनाहम्भृवा युक्तम् Sy. ऋग्यजुसामाख्येन स्तुवन्तः Dur. ऋगादिलक्षणेन। तृतीयाश्रुतेः स्तुवन्त इति शेषः SKN.

विश्वे । देवा. । पुष्करे कुम्भस्थान्तरिक्षे । त्वाम् । अधारयन् ।

---

१. सर्वे SKN. २. मा एतद् भूमौ पतेदिति कुम्भस्योपरि पुष्करे, उदकेऽन्तरिक्षे वा।..पुष्करशब्दोऽनेकार्थः। तमिह प्रसक्तं व्याचष्टे–'पुष्करमन्तरिक्षम्' तद्धि..पुष्णात्यवकाशदानेनोपकुर्वत्। उदकमपि पुष्करं तेन हि पूजा क्रियते । देवादिभ्यस्तत् पूजाकारकत्वात् पुष्करम् । अथवा 'पूजयितव्यम्' पूजनार्हमात्मन एवेति पुष्करम्। इदमपि...पुष्करं पद्म 'एतस्मादेव' कारणात् पुष्करमित्युच्यते, तदपि हि...पूजयितव्यं च शोभनत्वात्तस्य । अथवा पुष्कर तदिति 'वपुष्करम्' आबद्धे हि तस्मिन् वपुष्मान् भवति Dur. पुष्करेऽन्तरिक्षे भूमावपतितमेव।... पुष्करस्यान्तरिक्षनामसु पठ्यमानस्यैव निर्विवक्षयाऽनेकार्थत्वप्रदर्शनाय चोपक्षेपः। पोषयति भूतान्यवकाशदानेनोदकधारणादिना चोपकारेण । उदकमपि पुष्करं, देवपितृमनुष्याणां पूजाकरत्वात् । पूजयितव्यं वा देवतारूपत्वात् । 'आपो वै सर्वा देवताः' (AB 2. 16.) इति श्रुतेः । पूजयितव्यं पुष्करमित्यर्थः । इदमपीतरत्पद्मं पुष्करमेतस्मादेव धातोः । तेनाप्युच्यते पूज्यते वा तदेव शोभनत्वात् । वपुष्करं वा सद् वकारलोपेन पुष्करं शोभाकरमित्यर्थः । अक्षरवर्णसामान्यात् सुमनस्सामान्याद्वा प्रयुक्तं पुष्पं निराह—पुष्पं पुष्पतेः, तद्विकसितं भवति । एवमितिहापपक्षे SKN.

३ त्वां तेन शुक्रेण सहैकतामुपगतम् Dur. त्वत्कारणभूतं बीजमित्यर्थः SKN.

४ ०रयत् Λ. अधारयन्त । तथा वावितेमित्रावरुणौ जज्ञाते इति प्रकृत्य पठ्यते—

तयोरादित्ययोः सत्रे वृष्ट्वाप्सरसमुर्वशीम् ।
रेतश्चकन्द तत्कुम्भे न्यपतद्वासतीवरे॥१४९॥
तेनैव तु मुहूर्तेन वीर्यवन्तौ तपस्विनौ। अगस्त्यश्च वसिष्ठश्च तत्रर्षी समभूवतु ॥१५०॥
बहुधा पतितं रेतः कलशे च जले स्थले । स्थले वसिष्ठस्तु मुनिःसम्भूत ऋषिसत्तमः ॥१५१॥
कुम्भे त्वगस्त्यः सम्भूतो जले मत्स्यो महाद्युतिः । उदियाय ततोऽगस्त्यःशम्यामात्रो महातपाः ।१५२।
मानेन सम्मितो यस्मात्तस्मान्मान्य इहोच्यते। यद्वा कुम्भावृषिर्जातः कुम्भेनापि हि मीयते ।१५३।
कुम्भ इत्यभिधानं च परिमाणस्य लक्ष्यते । ततोऽप्सु गृह्यमाणासु वसिष्ठःपुष्करे स्थितः ।१५४॥ सर्वतः पुष्करे तं हि विश्वेदेवा अधारयन् ॥ ।१५५॥ इति BD. 5. 149—155. Sy. अधारयन्तेत्यर्थः Dur. दधिर्धारणार्थः, धारितवन्त इत्यर्थः । चतुर्मुखेन वा ब्रह्मणा सह विश्वे देवा इत्यर्थः । अथवा त्वदीयेनैवान्तरात्मना ब्रह्मणा क्षेत्रज्ञेन निमिशापाद् विशीर्णशरीरेण वा धृतमिति शेषः SKN.

५ रौद्रेण किल तेजसा निर्बन्धो वसिष्ठो मित्रपरिगृहीतायामुर्वश्यामुत्पन्नो वरुणतेजसो जात इति श्रूयते । तदप्युपेक्षितव्यम् । अनेकविधो हि मन्त्राणां विषयः । वसिष्ठस्येदमार्षं युष्मदश्चात्र प्रयोगः। उतासीति, तदेतद्विरुद्धार्थमिवोपलक्ष्यते नैतद्विरुद्धम्, नित्यत्वान्मन्त्राणां भवति Dur. नित्यपक्षे तु-उर्वशी विद्युत्, वसिष्ठोऽप्याच्छादित उदकसङ्घातः। वसुनिमित्तत्वाद् वा वसुमत्तमः। मित्रावरुणावपि वाय्वादित्यौ, विश्वेदेवा रश्मयः। एकवाक्यतायै चात्र तच्छब्दाध्याहारः कर्तव्यः। तेनायमर्थः—यत् पूर्वं तावत् पृथिव्यां भवः पार्थिवः। उत, अप्यसि मैत्रावरुणो मित्रावरुणाभ्यां वाय्वादित्याभ्यामाकृष्टः संस्तत्सम्बन्धान्मैत्रावरुणो मित्रावरुणसम्बन्धीत्यर्थः । हे वसिष्ठ ! आच्छादयितृतम ! वसुनिमित्ताद्वा वसुमत्तम ! उदकसङ्घात् ! उर्वश्या उर्वन्तरिक्षव्यापिन्या विद्युतः । अधि धात्व—र्थानुवादी।जात उत्पन्न । हे ब्रह्मन् ! परिवृढ ! उपचाराद्वा ब्रह्मणोऽन्यस्य हेतुभूत ! मनसः निमित्तलक्षणा चैषा पञ्चमी । मनसोऽवसम्बन्धात् सङ्कल्पो लक्ष्यते।...द्रप्सं सम्मितं भक्षयितव्यं चोदकसंघातं स्कन्नं मुक्तं ब्रह्मणा दैव्येन दिविभवेनादित्येन विश्वेदेवा रश्मयः प्रावृषि पुष्करेऽन्तरिक्षे त्वां धारितवन्तः। एवं सिन्ध्वादीनामपि, उर्वशीत्वे मन्त्रा यथासम्भवं योजनीया इति SKN. उर्वश्यप्सरा। उर्वभ्यश्नुते । ऊरुभ्यामश्नुते । ऊरुर्वा वशोऽस्याः । अप्सरा अपसारिणी अपि वाऽप्स इति रूपनाम । अप्सातेः अप्सानीयं भवति । आदर्शनीयम् । व्याप्नीयं वा । स्पष्टं दर्शनायेति शाकपूणिः । 'यदप्सः' । इत्यभक्षय्य । 'अप्सो नाम' इति व्याप्तिनः। तद्रा भवति रूपवती। तदनयात्तमिति वा। तदस्यै दत्तमिति वा। तस्या दर्शनान्मित्रावरुणयो रेतश्चस्कन्द । तदभिवादिन्येवर्गर्भवति । ...अप्यसि मैत्रावरुणो वसिष्ठः । उर्वश्या ब्रह्मन् मनसोऽधिजातः। द्रप्सं स्कन्नम् । ब्रह्मणा दैव्येन । द्रप्सः सम्भृतः। प्सानीयो भवति । सर्वे देवाःपुष्करे त्वाधारयन्त । पुष्करमन्तरिक्षम् । पोषति भूतानि। उदकं पुष्करम् । पूजाकरम् पूजयितव्यम् । इदमपीतरत् पुष्करमेतस्मादेव । पुष्करं वपुष्करं वा। पुष्पं पुष्पतेः N. S. 13., 14. SKN. II. 344—346.

स प्रकेत उभयस्य प्रविद्वान्त्सहस्रदान उत वा सदानः ।
यमेन ततं परिधिं वयिष्यन्नप्सरसः परि जज्ञे वसिष्ठः ॥ १२ ॥

स प्रकेतः । वसिष्ठः । प्रज्ञाता[1] । पार्थिवं दिव्यञ्च[2] लोकम् । प्रजानन्[3] । गोसहस्रदानः[4] । यत्[5] । वा । सर्वदा दानयुक्तो[6] न सहस्रदान एव । यमेन[7] । ततम्[8] । कर्मतन्तुम्[9] । वयिष्यन्[10] । अप्सरसः[11] । पर्यजायत[12] । वसिष्ठः ।

सत्रे ह जातावि॑षिता नमो॑भिः कु॒म्भे रेतः॑ सिषिचतुः समा॒नम् ।
ततो॑ ह मान॒ उदि॑याय॒ मध्या॒त्ततो॑ जा॒तमृषि॑माहुर्व॒सिष्ठ॑म् ॥ १३ ॥

सत्रे ह जातौ[13] । सत्रे[14] । प्रादुर्भूतौ[15] मित्रावरुणौ यज्ञे प्रवृत्तौ । हविर्भिर्मानुषैः[16] स्वेषु स्वेषु यज्ञेषु । अध्येषितौ[17] । कुम्भे[18] । रेतः । सिषिचतुः[19] । समानम्[20] । ततः कुम्भस्य[21] । मध्यात् । अगस्त्यः[22] । उदियाय[23] । ततवे[24] । जातम् । ऋषिम् । आहुः[25] । वसिष्ठम्[26] ।

उक्थभृतं साम॒भृतं॑ बिभर्ति॒ ग्रावा॑णं॒ बिभ्र॒त्प्र वं॑दात्य॒ग्रे ।
उपै॑नमाध्वं सुमन॒स्यमा॑ना॒ आ वो॑ गच्छाति प्रत॒दो॒ वसि॑ष्ठः ॥ १४ ॥

उक्थभृतम्[27] । होता उक्थभृत्[28] । उद्गाता[29] सामहृत्[30] तौ वसिष्ठोऽध्वर्युः । सन्धारयन्ति[31] । तथाभिषवण-[32]

---

१. प्रकृष्टज्ञानः Sy.
२. दिव्यं दीव्यं च A. उभयं दिवञ्च पृथिवीञ्च Sy.
३. प्रकर्षेण जानन् Sy.
४. गो is missing in A.
५. अपि वा Sy.
६. किमनेन सहस्रदान इति विशेषणेन सर्वदानसहितः Sy.
७. कारणात्मना सर्वनियन्त्रा Sy.
८. ततः M. विस्तृतम् Sy.
९. वस्त्रम् Sy.
१०. पयिष्यन् A.
११. उर्वश्याः Sy.
१२. परीति पञ्चम्यर्थानुवादः । जज्ञे जातः Sy.
१३. बहुकर्तृके यागे Sy.
१४. दीक्षितौ मित्रावरुणौ Sy.
१५ मानुषे A. स्वयमन्यैर्जनैः स्तुतिभि· Sy.
१६ वासतीवरे कलशे Sy.
१७. असिञ्चतम् Sy.
१८ एकवैव Sy.
१९. ततो वासतीवरात्कुम्भात् Sy.
२०. शमीप्रमाणः Sy. २१. प्रादुर्बभूव Sy.
२२. तन्तवे M. ततः is suggested for ततवे ॥
२३ वसिष्ठः A.
२४. VM. ignores ह । हेति पूरणः Sy.
२५. उत्थभृतम् A.
२६. होतात्थभृत् A. शस्त्राणां सम्भक्तारम् Sy.
२७. उद्गता A. उद्गातारम्
२८ सामभृत् is suggested for सामहृत्
२९. ०रयति is suggested for रयन्ति
३०. कथमभिष० M. अभिषवणम् Sy.

ग्रावाणम्। धारयन्[1]। प्रथममेव यजूषि[2]। प्रवति[3]। उपविशत[4]। एनम्[5]। सुमनसो भवन्तः[6]। आगच्छन्ति[7]। युष्मासु[8]। हे पुत्रदस्तृनृत्सव[9][10] ! वसिष्ठ इति।

VII. 34.

प्र शुक्रैतु देवी मनीषा अस्मत्सुतर्ष्टो रथो न वाजी ॥ १ ॥

प्र[11] शुक्रा[12]। वसिष्ठो वैश्वदेवम् ॥ प्रैतु[13]। ज्वलन्ती[14]। देवी[15]। स्तुतिवाक्[16]। अस्मत्तः। सुतष्टः[17]। रथः। इव। वेगवानिति।

विदुः पृथिव्या दिवो जनित्रं शृण्वन्त्यापो अध क्षरन्तीः ॥ २ ॥

विदुः[18] पृथिव्याः। ओषधी. पुष्यन्त्या अस्याः। द्युलोकात्[19]। जनितमुदकमागच्छतीति[20]। विदुः[21]। एतदेवाह[22]-तदनन्तरम्। शृण्वन्ति[23]। आपः[24]। स्वर्गात्. क्षरन्ति[25]।

---

१. बिभ्रतमध्वर्यु च बिभर्ति Sy.
२. आगतश्चासौ वसिष्ठो यज्ञेऽस्मे पुरोहितो ब्रह्मा सन् Sy.
३. यज्ञंषि A.
४. ०वदति is suggested for ०वति ॥ यज्ञे यत्प्रवदितव्यं श्रेषादिनिमित्ते कर्तव्यमस्ति तदपि ववतीति तृत्सून् प्रतीन्द्रो ब्रवीति Sy.
५. उपतिष्ठत Sy.
६. वसिष्ठम् Sy.
७. सुमनसः सन्तः Sy.
८. ०च्छति is suggested for ०च्छन्ति।
९. युष्मास A. युष्मान् Sy.
१०. प्रतुस्थूत्सवः M. प्रतूदः ! तृत्सवः ! is suggested for पुत्रदस्तृनृत्सवः ॥ प्रतूद इति तृत्सव एवाभिधीयन्ते नामान्तरेण Sy
११. तृतीयेऽनुवाके द्वाविंशति सूक्तानि। तत्र 'प्र शुक्र' इति पञ्चविंशत्यृचं प्रथमं सूक्तम्। अत्रेयमनुक्रमणिका—'प्रशुक्रा पञ्चाधिका वैश्वदेवं हाद्या एकविंशतिद्विपदा 'अब्जाम्' अहेरर्धर्च उत्तरोऽहिर्बुध्न्याय' (KSA. 35. 34. p. 25.) इति वसिष्ठऋषिः। आद्या एकविंशतिद्विपदा विंशत्यक्षरा विराजो द्वाविंशाद्याश्चतस्त्रिष्टुभः। विश्वे देवा देवता। व्यूळ्हे वशरात्रे चतुर्थेऽहनि वैश्वदेवशस्त्र इदं सूक्तं वैश्वदेवनिधिद्धानम्। सूत्रितञ्च—'प्र शुक्रैतिवति वैश्वदेवम्' ĀSS. 8. 8. इति। 'षोडशिन्या धूर्ष्वस्मा इति द्विपदा' (ĀSS. 6. 2.) इति। महाव्रतेऽप्येषा द्विपदा। तथैव पञ्चमारण्यके सूत्रितम्—'आधूर्ष्वस्मा इत्येका सूदवेहाः' (ĀA. 5. 8.) इति Sy.
१२. शुक्र M.
१३. अस्मिन् सूक्ते स्तोष्यमाणान् देवान् प्रैतु प्रगच्छतु Sy. १४. दीप्ता Sy.
१५. सर्वेषां कामानां प्रदात्री Sy.
१६. स्तुतिवाक् A.
१७. सुसंस्कृतः Sy.
१८ अस्यामृच्यापः स्तूयन्ते Sy.
१९. पृथिव्याश्च Sy.
२०. उभयोरपि लोकयोरित्यर्थः Sy.
२१. उत्पत्तिम् Sy.
२२. जानन्ति Sy.
२३. ०देवाहं A.
२४. शृण्वन्ति स्तोत्राणीति शेषः
२५. उप M. आपः nom. plur. subject of the verb शृण्वन्ति is suggested for अपः ॥
२६. सर्गात् क्षरन्ति A. M. स्वर्गात् क्षरन्त्यः is suggested for सर्गात् क्षरन्ति ॥

आपश्चिदस्मै पिन्वन्त पृथ्वीर्वृत्रेषु शूरा मंसन्त उग्राः ॥ ३ ॥

[1]आपश्चित् । आपः । चित् । अस्मा इन्द्राय । अक्षरन् । विस्तीर्णाः । युद्धेषु चैनम् । शूराः । स्तुवन्ति । उग्राः ।

आ धूर्ष्वस्मै दधाताश्वानिन्द्रो न वज्री हिरण्यबाहुः ॥ ४ ॥

आ धूर्षु । आदधात । इन्द्राय । रथस्य धूर्षु । अश्वान् । इन्द्रः । इदानीम् । वज्रवान् । हिरण्यबाहुरागच्छतु ।

अभि प्र स्थाताहेव यज्ञं यातेव पत्मन्त्मना हिनोत ॥ ५ ॥

अभि प्र स्थात । यथाहानि सूर्योऽभिप्रतिष्ठते तथा यूयम् । यज्ञम् । अभिप्रतिष्ठत । याताऽध्वगेरा यथा । मार्गे पादं प्रेरयति यथा यज्ञम् । स्वयमेव । प्रेरयत इत्यस्योत्तरा भूयसे निर्वचनाय ।

---

१. इन्द्रोऽस्मिन् द्यूचे स्तूयते Sy.
२. अपि Sy.
३. अक्षरत् A.
प्यायन्ते Sy.
४. पृथ्व्यः प्रथमानाः Sy.
५. उपद्रवेषु सत्सु Sy.
६. योद्धारोऽपि Sy.
७. इममेवेन्द्रं स्तुवन्ति Sy.
८. उद्ग्रा A.
उद्गूर्णास्तेजस्विनो वा Sy.
९. धूषु A.
१०. अस्मै-षष्ठ्यर्थे चतुर्थी । अस्येन्द्रस्यागमनाय Sy.
११. Ngh. 3. 13. नेत्युपमार्थीयः N. 1. 4. अस्त्युपमानस्य सम्प्रत्यर्थे प्रयोगः N. 7. 31. नेति चार्थे Sy.
१२. ०ण्यपाणिरा० M. हिरण्यहस्तश्च भवति Sy.
१३. षोडशिनि शस्यमानत्वादस्या ऐन्द्रत्वं गम्यते । 'आ धूर्ष्वस्मै' इत्यत्रास्मा इत्यस्य पदस्यानुदात्तत्वं पूर्वस्यामिन्द्रस्य प्रकृत्वात् । अत एव पूर्वार्ध्येन्द्रीति विज्ञायते । पूर्वस्यामप्यृच्यस्मा इत्यत्रानुदात्तत्वमल्पीयसोऽर्थतरमनुदात्तमिति । तथा च यास्कः—'अस्या इति चास्येति चोदात्तं प्रथमादेशे । अनुदात्तमन्वादेशे । तीव्रार्थतरमुदात्तम् अल्पीयोऽर्थतरमनुदात्तम्' N. 4. 25. इति । अल्पीयस्त्वं चेदंशब्दप्रवृत्तिनिमित्तस्य सन्निधानस्य दूरस्थत्वेनेत्यवगन्तव्यम् Sy.
१४. यज्ञस्तुतिरियम् Sy.
१५. स्थाता M.
१६. अहेवेति पूरणौ Sy.
१७. हे जनाः ! अभिक्रमत Sy.
१८. ०ध्वगो यथा is suggested for ०ध्वगेरा यथा ॥ गन्तेव Sy.
१९. अपि च पत्मनि यज्ञमार्गे Sy.
२०. तथा is suggested for यथा ।
२१. गच्छत । 'हि गतौ' इति धातुः Sy.
२२. इत्यस्या उत्तरा is suggested for इत्यस्योत्तरा ।
२३. हूयसे A.

त्मना॑ स॒मत्सु॑ हि॒नोत॑ य॒ज्ञं द॑धा॒त के॒तुं जना॑य वी॒रम् ॥ ६ ॥

त्मना॑ । समत्सु॑ । स्वय॑म् । एषु॑ सङ्ग्रामेषु॑ प्रवृत्तेषु॑ । निष्क्रमयत॑ । यज्ञम् । पुरो॑ दधत॑ । शत्रुजनाय॑ । युद्धे-नात्मनो॑ ज्ञापयितार॑म् । वीर॑म् ।

उद॑स्य॒ शुष्मा॒द्भानु॑र्ति॒ बिभ॑र्ति॒ भा॒रं पृ॑थि॒वी न भूम॑ ॥ ७ ॥

उदस्य॑ शुष्मात्॑ । तुच्छस्य॑ तु॑ यज्ञस्य॑ । बला॑त् । आदित्य॑ । इव श॒त्रून् प्रति । वीरः सोऽयं यज्ञो॑ विभर्ति॑ । भा॒र॑म् । यथा । भूमि॑ । भूतजात॑मिति ।

ह्व॒या॒मि दे॒वाँ अ॑यातुर॒ग्ने साध॑न्नृ॒तेन॒ धिय॑ं दधामि ॥ ८ ॥

ह्व॒या॒मि दे॒वान्॑ । ह्व॒यान् । देवान् । अ॒च्छ॒अ॒हिंसको॑ वाम्॑ । अग्ने॑ ! साधयन् यज्ञम् । सत्येनाहम् । कर्म॑ । धारयामि ।

---

१. उक्तस्यैव विवरणम् । हे मदीया जनाः ! Sy.
२. धीमत्सु A.
३. स्वयमेव Sy.
४. गच्छत Sy.
५. पुरो धत A. विधत्त Sy.
६. शत्राजनाय A. लोकाय । तद्रक्षार्थमित्यर्थः Sy.
७. युद्धेष्वात्म० is suggested for युद्धेनात्म०
८. अपि च प्रज्ञापकम् Sy.
९. पापानां वारयितारम् । नाशकमित्यर्थः Sy.
१०. शुष्मान् A.
११. तु (कु) च्छस्य तु A.
The reading is doubtful. Something seems to be missing here. उद्गच्छतु, as the explanation of उदार्त, is suggested for तुच्छस्य तु
१२. बलोत् A.
१३. सूर्यः Sy.
१४. बिभर्ति is suggested for बिभक्ति ।
१५. भारं लोकस्य Sy.
१६. भूमिः is suggested for भूमि ।
१७. भूत जा० A. भूतानि Sy.
१८. VM. ignores उत and आर्तं ॥ उदार्तं उद्गच्छति Sy.
१९. अस्मिंस्तृचे देवाः स्तूयन्ते Sy
२०. देवान् is missing in A.
२१. ह्वयामि is suggested for ह्वयान ।
२२. अगच्छअहिंसको वा is suggested for अच्छअहिंसको वाम् ॥ अहिंसादिनियमयुक्तेन Sy.
२३. अग्नेः M.
२४. कामान् साधयन् Sy.
२५. यज्ञेन Sy.
२६. अपि च देवानां परिचरणात्मकं कर्म Sy.
२७. ०याहि A. करोमीत्यर्थः Sy.

अभि वो देवीं धियं दधिध्वं प्र वो देवत्रा वाचं कृणुध्वम् ॥ ९ ॥

अभि वः[1]। अभिधारयत[2]। यूयम्[3]। देवनशीलम्[4]। कर्म[5]। देवेषु च। वाचम्[6]। यूयम्[7]। प्रधारयतेति[8]।

आ चष्ट आसां पाथो नदीनां वरुण उग्रः सहस्रचक्षाः ॥ १० ॥

आ चष्टे[9]। आसाम्। नदीनाम्[10]। उदकम्[11]। आचष्टेऽभिपश्यति[12]। वरुण[13]। उग्र[14]। सहस्रदर्शनः[15]।

राजा राष्ट्रानां पेशो नदीनामनुत्तमस्मै बलं विश्वायु ॥ ११ ॥

राजा। राजमानानामन्येषां प्रभूणामपि[16]। राजा, अपि वा जनपदा राष्ट्राणि, णवाहावच्छान्दसः[17]। रूपम्[18]। नदीनाम्। अनुत्र[19] शत्रुभिः[20]। अस्मै[21]। बल भवतु[22]। सर्वगामि[23]।

---

१. अहिव A. वसिष्ठस्यार्षम् Dur., SKN.

२ हे जनाः! . . देवानुद्दिश्य Sy हे ऋत्विजः! अभिवदामि Dur. अभीत्युपसर्गश्रुतेर्योग्यक्रियापदमध्याहार्यम्। अभिवदामि SKN.

३. VM. explains अभि and दधिध्वम् together but Sy. Dur. and SKN explain them separately. धिषत्त Sy. कुरुतेत्यर्थः SKN.

४ युष्मानृत्विजः SKN.

५ दीप्ताम् Sy. एतां देवीम् Dur. देवसम्बन्धिनीमित्यर्थः SKN.

६ कडम A. कर्म यागाख्यम् SKN.

७. एतान् विश्वान् देवान्प्रति Dur. देवान्प्रति SKN.

८ स्तुतिरूपाम् Sy. देवत्रा देवगामिनीमेतां वाचं स्तुतिलक्षणां कृणुध्वम् Dur. वाचं स्तुत्याख्याम् SKN.

९. अपि च यूयम् Sy. युष्मानेव SKN.

१०. प्रकर्षेण कुरुध्वम् Sy. प्रब्रवीमि चैतत् Dur. प्रोपसर्गश्रुतेः पूर्ववदध्याहारः। प्रब्रवीमि SKN. Dur. and SKN. explain प्र and कृणुध्वम् Separately.

११. अविष्टः M.,

१२. नदीनां स्वभूतम् Dur. नदीनां सम्बन्धि SKN.

१३. जलम् Sy. एवमत्र पाथःशब्देनोदकमित्युच्यते, नदीसम्बन्धात् Dur.

१४. ०ष्टे हि प० A. आचष्ट इव प्रकथयतीव जनानार्घम् Dur. कस्मात्पुनरेवमुच्यते यागं स्तुतिं च देवानां कुरुतेति ? उच्यते, यस्मादाचष्टे, सामर्थ्याल्लुप्तोपममेतत्। तदिदं कर्तव्यमित्याचष्ट इव जनेभ्यो ददत् SKN.

१५. वरुणोऽपि देव आदित्यः Dur. कोऽसौ ? वरुणो मध्यमस्थान उत्तमस्थानो वा SKN.

१६. उद्गूर्ण ओजस्वी वा Sy. किंलक्षणः पुनर्वरुणः? .उग्र उद्गूर्णःDur. अप्रसह्य SKN.

१७. दर्शन A. बहुचक्षुः Sy बहुदर्शन इत्यर्थः Dur. विद्युद्रूपो रश्मिभिर्वा बहुदर्शनः SKN.

१८. पाथोऽन्तरिक्षम्। पथा व्याख्यातम् . उदकमपि पाथ उच्यते पानात्. . ,अन्नमपि पाथ उच्यते पानादेव N. 6. 7., SKN. II. 414. Dur. and SKN. take the two stanzas : RV. 7. 34.9., 10. as one

१९. ईश्वराणामपि Sy २०. ईश्वरः भवति Sy.

२१. णवाहावच्छान्दसम् M. णत्वाभावश्छान्दसः is suggested for णवाहावच्छान्दसः।

२२. रूपकृदपि भवतीत्यर्थः Sy.

२३. अन्यैरबाधितम् Sy.

२४. अस्मै षष्ठ्यर्थे चतुर्थी। अस्य वरुणस्य Sy.

२५. भजति A.

२६. सर्वतो गन्तृ भवतीति Sy.

अविष्टो अस्मान्विश्वासु विक्ष्वधुं कृणोतु शंसं निनित्सोः ॥ १२ ॥

[1]अविष्टो[2]। रक्षत्येव[3]। अस्मान्[4]। सर्वासु। प्रजासु[5] सः। निन्दितुमिच्छतः शत्रोः। शंसनम्। अद्योतमानम्[6]। करोतु[7]।

व्येतु दिद्युद्द्विषामशेवा युयोतु विष्वगप[8]स्तनूनाम् ॥ १३ ॥

व्येतु। अपगच्छतु[9]। आयुधम्। शत्रूणाम्। असुखम्[10]। पृथक् करोतु[11]। विष्वक्। पापम्। तनूनाम्[12]।

अवीन्नो अग्निर्हव्यान्नमोभिः प्रेष्ठो अस्मा अधायि स्तोमः ॥ १४ ॥

अवीन्नः[13]। रक्षतु। अस्मान्। अग्निः। हविषोऽत्ता[14]। नमस्कारैः[15]। प्रियतमः[16]। अस्मा अग्नयेऽस्माभिः। स्तोमा[17]। कृताः[18]।

सजूर्देवेभिरपां नपातं सखायं कृध्वं शिवो नो अस्तु ॥ १५ ॥

सजूः। अपां नपादेवैः[19]। सङ्गतो भवति। तमपान्नपातम्[21]। सखायम्[22]। कुरुध्वम्[23]। स शिवः[24]। अस्माकम्[25]। अस्तु[26]।

---

१. अयं द्वृचो वैवः Sy
२. अविष्ट A आविष्टः M.
३. हे देवाः ! अविष्ट उ ॥ इति समुदितमविष्टो इति । अविष्ट रक्षत Sy
४. अस्मात् A
५. प्रजासु is missing in A.
६. अदीप्तिम् Sy.
७. कुरुत च Sy.
८. अवग० A.
९. असुखकरी Sy.
१०. प्रथक्क० A. देवा युयोत अस्मत्तः पृथक्कुरुत Sy.
११. सर्वतः Sy.
१२. अङ्गानाम् Sy.
१३. अपीह M.
१४. ०षोक्ता M. हव्यानामत्ता Sy.
१५. अस्मदीयैर्नमस्कारैः Sy.
१६. प्रियतमः सन् Sy.
१७. स्तोमा A.
१८. कृत A. अस्माभिर्व्यधायि Sy.
१९. नपादेवैः A
२०. सह Sy.
२१. नपातः A. उदकानां पुत्रमग्निम् Sy. सूनुर्नपादित्यपत्यनामनी Ngh.
२२. मित्रम् Sy.
२३. हे स्तोतः ! (स्तोतारः) स्तुतिभिः कुरुध्वम् Sy.
२४. स चापान्नपात् सुखकरः Sy.
२५. अस्मभ्यम् Sy.
२६. भवतु Sy.

अ॒ब्जामु॒क्थैरहिं॑ गृणीषे बु॒ध्ने न॒दीना॑ रज॑स्सु षी॒दन् ॥ १६ ॥

अब्जाम्[1]। अप्सु[2] जातम्। शस्त्रैः[3]। रहितम्[4]। गृणीषे[5]। नदीनाम्[6]। बुध्ने[7]। उदकेषु[8]। सीदन्तं[9] निरुक्तं[10] द्रष्टव्यम्।

मा नोऽहिं॑र्बु॒ध्न्यो॑ रिषे धान्मा य॒ज्ञो अ॑स्य स्रिधदृता॒योः ॥ १७ ॥

मा नः[11]। मा। अस्मान्। अहिर्बुध्न्यो[12] देवः। विनाशाय[13]। दधातु[14]। मा च[15]। अस्य। यज्ञोरवा[16]। अवस्रवन्तु[17]। यज्ञकामस्येति[18][19]।

---

१. वासिष्ठस्य पराशरस्यार्षम् Dur. वसिष्ठस्य SKN.

२. इममग्निम् Sy हे स्तोतः ! त्वमेतम्.. उदकजन्मानम् Dur. अप्शब्द उपपदे जनेः 'जनसनखनक्रमगमो विट्' (Pa. 3. 2. 67.) इति विटि 'विड्वनोरनुनासिकस्यात्' (Pa. 6. 4. 41.) इत्यात्वे द्वितीयैकवचनमब्जामिति। यः कर्मत्वेना वृष्टिलक्षणास्वप्सु जायते तमब्जाम् SKN. ३. स्तोत्रैः Sy. SKN.

४. अभि M. अहिम् is suggested for रहितम्॥ मेघानामाहन्तारम् Sy. मध्यमस्थानमहिम् SKN. ५. शृणीषे A. स्तौषि Dur. गृणातेः स्तुतिकर्मण आत्मनेपदमध्यमो व्यत्ययेन परस्मैपदोत्तमयोः स्थाने। गृणीषे गृणामि स्तौमीत्यर्थः SKN.

६. उदकानाम् Sy. नदनानामपाम् Dur. नदीशब्देन शब्दकारिणीनामपां स्थाने SKN.

७. धुध्नः A. स्थाने। बुध्नमन्तरिक्षं बद्धा अस्मिन् धृता आप इति व्युत्पत्तेः, तस्मिन् Sy. बन्धने, एतस्मिन्नन्तरिक्षे वर्तमानम् Dur. बन्धने... अन्तरिक्षे ..बद्धा अस्मिन् धृता आपः। इदमपीतरद् बुध्नं शरीरमुच्यते। 'बद्धा अस्मिन् धृताः प्राणा इति' SKN.

८. उदकेषु लब्धव्येषु निमित्तभूतेषु Dur.

९. एतस्मिन् कर्मण्यङ्गभावमुपगच्छन्तम् Dur. मनसोदकानि ध्यायन्कामयमान इत्यर्थः SKN.

१०. अप्सुजमुक्थैरहिं॒ गृणीषे बुध्ने नदीनां रजस्सु [उदकेषु] सीदन् बुध्नमन्तरिक्षम्। बद्धा अस्मिन् धृता आप [इति वा] इदमपीतरद् बुध्नमेतस्मादेव। बद्धा अस्मिन् धृताः प्राणा इति N. 10 44. SKN. IV. 49.

११. पूर्वया समानं सर्वमिति Dur. वसिष्ठस्यैव भिन्नस्तुतित्वादर्धर्चयोरुदाहरणम् SKN.

१२. अहिर्बुध्न्यो is suggested for अहिर्धुन्यो। बुध्नेऽन्तरिक्षे भवो बुध्न्यः। अहिश्चासौ बुध्न्यश्चेत्यहिर्बुध्न्योऽग्निः Sy. 'योऽहिः स बुध्न्यः'। एतावांस्तु विशेषः 'बुध्नमन्तरिक्षं तन्निवासादहिर्बुध्न्यः' Dur. योऽहिः स एव बुध्न्यः। इयांस्तु विशेषः बुध्नमन्तरिक्षं तत्र भवो बुध्न्यः। अहिश्चासौ बुध्न्यश्चेति समानाधिकरणावहिर्बुध्न्यशब्दावसमस्तौ। तथापि, अहिं बुध्नियं शंसतीति श्रुतौ लिङ्गं भवति। बुध्नमन्तरिक्षं तन्निवासादिति भावार्थप्रदर्शनं भाष्ये SKN योऽहिः स बुध्न्यो बुध्नमन्तरिक्षं तन्निवासात् N. 10. 45.,

१३. हिंसकाय Sy. रेषणाय हिंसकाय Dur. SKN. १४. मा ..कस्मैचिद् धात् Dur. कस्मैचिदपि मादादिति सम्बन्धः SKN.

१५. अस्य यजमानस्य Dur. अस्य सम्बन्धी SKN. १६. अस्माभिः क्रियमाणो यज्ञः। ..उखापीठकिकायज्ञ एवोखारूपकमेतत्कल्पितं भाष्ये स्रवतेरौचित्यादिति SKN.

१७. मा सुस्रवत् नित्यमविनाशेन वर्ततामिति Dur. मा विनशदित्यर्थः SKN.

१८. कोदृशस्याहिर्बुध्न्यस्य.. यज्ञकामस्य SKN.

१९. यद्वा-अस्याहिर्बुध्न्यस्येममहिर्बुध्न्युमुद्दिश्य ऋतायोर्यज्ञकामस्य यो यज्ञः स न क्षीयेतेत्यर्थः Sy. मा च नोऽहिर्बुध्न्यो रेषणाय धात्। मास्य यज्ञोखा च स्रिधत्। यज्ञकामस्य N.10 45. SKN. IV. 49. 50.

उत नं एषु नृषु श्रवो धुः प्र राये यन्तु शर्धन्तो अर्यः ॥ १८ ॥

उत[1] नः । अपि च । अस्माकम्[2] । एषाम् । नृणां मध्ये । अन्नम्[3] । ददतु[4] । प्रयच्छन्तु[5] च । धनाय[6] । शर्धति-रुत्साहकर्मा शर्धन्तः[7] । गमनशीला[8] देवाः ।

तपन्ति शत्रुं स्वर्ण भूमा महासेनासो अमेभिरेषाम् ॥ १९ ॥

तपन्ति[10] । तपन्ति[11] । शत्रुम्[12] । आदित्यः । इव । भूमिस्[13] । हासेना[14] स्तोतारः[15] । बलैः । देवानाम्[16] ।

आ यन्नः पत्नीर्गमन्त्यच्छा त्वष्टा सुपाणिर्दधातु वीरान् ॥ २० ॥

[17]आ यन्नः । यदि[18] । अस्मान् । देवपत्न्यः[19] । आगच्छन्ति । यदि च सुपाणिः[21] । त्वष्टा[22] । वीरान्[23] । धारयति[24] पूर्वत्र सम्बन्धः[25] ।

प्रति नः स्तोमं त्वष्टा जुषेत स्यादस्मे अरमतिर्वसूयुः ॥ २१ ॥

प्रति नः । प्रतिसेवेत[26] । अस्माकम् । स्तोम[27]. । त्वष्टा[28] भवतु । अस्मासु[29] । पर्याप्तमतिस्त्वष्टा[30] । धनकामः ।

---

१. अयं दृवृचो दैवो मारुतो वा Sy.
२. अस्मदीयेषु Sy.
३. पुरुषेषु Sy.
४. अन Λ.
५. दत्त Λ. देवा मरुतो वा धारयन्तु Sy
६. प्रगच्छन्तु । श्रियन्तामित्यर्थः Sy.
७. धनार्थम् Sy.
८. शर्धतीरुत्साहकर्मा गन्धंतः Λ. उत्सहमानाः प्रियमाणा वा Sy.
९. अरयः Sy.
१०. पतन्ति A.
११. बाधन्ते Sy.
१२. शत्रुं स्वकीयम् Sy.
१३. भूमिम् is suggested for भूमिस् ॥ भुवनानि Sy.
१४. मभासेना A. महासेना is suggested for थहासेना
१५. राजानः Sy.
१६. मरुतां देवानां वा महान्तोऽपि राजानोऽमैर्बलैः शत्रून् बाधन्ते । तानि बलानि देवानामेवेत्यर्थः Sy.
१७. अस्या देवपत्न्यस्त्वष्टा वा देवता Sy.
१८. यदा Sy.
१९. देवानां पत्न्यः Sy.
२०. तदा Sy.
२१. शोभनहस्तः Sy.
२२. त्वष्टा देवः Sy.
२३. वीरं M.
पुत्रान् Sy.
२४. अस्मभ्यं ददातु Sy.
२५. VM. ignores अच्छ. Sy. explains it by अभि ।
२६. सेवत M.
२७ सोमः M. स्तोमम् is suggested for स्तोमः । अस्माकं स्तोमस्त्वष्टा is written twice in A. अस्माकं सोमस्त्वष्टा भवतु is written twice in M. स्तोत्रम् Sy.
२८. भूयात् Sy.
२९. अस्मदर्थम् Sy.
३०. सर्वविषयव्याप्तबुद्धिर्वा Sy.

ता नो रासत्रातिषाचो वसून्या रोदसी वरुणानी शृणोतु ।
वरूत्रीभिः सुशरणो नो अस्तु त्वष्टा सुदत्रो वि दधातु रायः ॥ २२ ॥

ता नः । तानि । अस्मभ्यम् । ददतु । दानस्य सम्भक्त्यः । धनानि । आशृणोतु । द्यावापृथिव्यौ तदनुगच्छेताम् । तथा वरुणानि च स्तुतिः । देवपत्नीभिः सह । सुगृहः । अस्माकम् । अस्तु । त्वष्टा । सुधनः । करोतु च । अभिमतं धनं हितम् ।

तन्नो रायः पर्वतास्तन्न आपस्तद्रातिषाच ओषधीरुत द्यौः ।
वनस्पतिभिः पृथिवी सजोषा उभे रोदसी परि पासतो नः ॥ २३ ॥

तन्नो रायः । तदित् स्तोत्रम् । अस्माकम् । त्वष्टृप्रभृतयः । परिरक्षन्त्विति ।

---

१. वसिष्ठस्यार्षम् Dur. वसिष्ठस्य SKN.
२. यान्यस्माकमभीष्टानि तानि Sy. ता देव्यः Dur. तच्छब्दश्रुतेर्यच्छब्दोऽध्याहार्यः । यानि वयमर्थितवन्तस्तानि SKN.
३. प्रयच्छन्तु Sy. ददात्वित्यर्थः Dur. पूर्वेषुकालेषु रासन्, रासतेर्वानकर्मणो लङि, अडभावश्छान्दसत्वात् । अरासन् दत्तवन्तः SKN.
४. सम्भक्ता M. सम्भक्त्र्यः is suggested for सभक्त्यः ॥ दानसमवेता देवपत्न्यः Sy. हविर्दानं या सचन्ते सेवन्ते Dur. हविषो दानं रातिस्तां याः सचन्ते । अथवा रातिषाचो हविर्दानस्य सेवित्र्य इत्यर्थः SKN.
५. अशृणोतु A. अस्मदीयं स्तोत्रमभिशृणोतु Sy. आभिमुख्येन स्थित्वा शृणोतु Dur. यत एवमतो ब्रवीमि । इदानीमपि आकारः, शृणोत्वित्यनेन सम्बध्यते ।...आश्रवः प्रतिज्ञा । अतिदास्याम इति प्रतिजानन्तु । अभ्युपगच्छन्त्वित्यर्थः SKN.
६. द्यावापृथिव्यौ चाभिशृणुताम् Sy. रुद्रस्य पत्नी Dur. ७. तिदनुगच्छेत् A.
८. ०णानी च is suggested for ०णानि च ।
९. स्तुतिम् is suggested for स्तुतिः ।
१०. उपद्रवाणां वारयित्रीभिर्देवपत्नीभिः सह Sy. वरयितव्याभिः सहितः Dur. वरयितव्याभिरेताभिर्देवीभिः सह SKN.
११. सु शरणप्रदः Sy स्वाश्रयणः Dur. साश्रयः SKN १२. कः ? त्वष्टा नाम देवः SKN.
१३ सुधनं M. सुधनः is suggested for सुधन ॥ कल्याणदानः Sy. एवमत्र रायः—सम्बन्धात्. सुदत्रः कल्याणदान इत्युपपद्यते Dur. कीदृशः ? सुदत्रः सुदानः स्वाश्रयणश्च भूत्वा SKN. सुदत्रः कल्याणदानः N. 6. 14. १४. विविधं दधातु SKN.
१५. धनानि Sy.
१६. हितः A. धनमित्यर्थः Dur. धनानि SKN. N. 6. 14., SKN. II. 434
१७. त्वष्टु प्रभूतयं A
१८. Sy. explains this stanza in the following manner :—
नोऽस्माकम् । तदित्यव्ययम् । ता रायो धनानि पर्वताः परिपान्तु । नोऽस्माकं तत्ता राय आपश्च परिपान्तु । तद्रातिषाचो दानसहिता देवपत्न्यश्च परिपान्तु । ओषधीरोषधयश्च तत्परिपान्तु । उतापि च द्यौस्तत्परिपातु । वनस्पतिभिः सजोषाः सहिता पृथिव्यन्तरिक्षं च तत् परिपातु । आपः पृथिवीत्यन्तरिक्षनामसु पाठात् (Ngh 1. 3.) । नोऽस्माकं तदुभे रोदसी द्यावापृथिव्यावग्निं परि पासतः परिरक्षताम् ।

अनु॒ तदु॒र्वी रोद॑सी जिहाता॒मनु॒ द्युक्षो वरु॑ण॒ इन्द्र॑सखा ।
अनु॒ विश्वे॑ मरुतो॒ ये सहा॑सो रा॒यः स्या॑म धरु॒णं धि॒यध्यै॑ ॥ २४ ॥

अनु॒ तत् । विस्तीर्णे । द्यावापृथिव्यौ । तत् । अनुगच्छेताम् । तथा वरुणश्च । दीप्तेः । अनुगच्छताम् इन्द्रसुखा । अनुगच्छन्तु । विश्वे च । मरुतः । ये । सहनशीलाः । धनस्य । गृहं वयम् । स्याम । श्रितानां धारणार्थमिति ।

तन्न॒ इन्द्रो॒ वरु॑णो मि॒त्रो अ॒ग्निरा॒प ओष॑धीर्व॒निनो॑ जुषन्त ।
शर्म॑न्त्स्याम मरुता॒मुप॒स्थे यू॒यं पा॑त स्व॒स्ति॒भिः सदा॑ नः ॥ २५ ॥

तन्न॒ इन्द्र । तदिदम् । अस्माकम् । इन्द्रादयः । सेवन्ताम् । वृक्षा वनिनः । तथा वयं मरुताम् । उपस्थाने सति । सुखे । स्यामेति ।

VII. 35.

शं न॑ इन्द्राग्नी भवता॒मवो॑भिः॒ शं न॒ इन्द्रा॑वरु॒णा रा॑तह॒व्या ।
शमिन्द्रा॑सोमा सुवि॒ताय॒ शं योः शं न॒ इन्द्रा॑पू॒षणा॒ वाज॑सातौ ॥ १ ॥

शन्न॒ इन्द्राग्नी । शमयितारावुपद्रवाणाम् । इन्द्राग्नी । भवताम् । रक्षणैरिति इन्द्रस्य प्राधान्यात् सर्वे-

---

१. वक्ष्यमाणम् Sy. २. अनुमन्येतामित्यर्थः Sy.
३. दीप्तेर्निवासभूतः Sy.
४. अनुगच्छतु is suggested for अनुगच्छताम् ॥ द्विवचनस्यैकवचनान्ततया विपरिणामः Sy.
५. इन्द्रसखा is suggested for इन्द्रसुखा इन्द्रः सखा यस्येति बहुव्रीहिः Sy.
६. अत्र बहुवचनान्ततया विपरिणामः Sy.
७. मरुता A.
८. शत्रूणामभिभवितारः । ते मरुतोऽपि Sy.
९. ग्रहम् A. धाम स्थानम् Sy.
१०. स्यामा A. भवेमेति Sy.
११. श्रितां धार० A. यदनुमन्तव्यं तदाह-भरणीयं धारयितुम् Sy.
१२. स्तोत्रम् Sy.
१३. आदि refers to वरुणः । मित्रः । अग्निः । आपः and ओषधीः ।
१४. उपस्थाने वर्तमानाः Sy.
१५. शर्मणि सुखे गृहे वा Sy.
१६. भवेम । सिद्धमन्यत् Sy.
१७. 'शं न इन्द्राग्नी' इति पञ्चदशर्चं द्वितीयं सूक्तम् अत्रेयमनुक्रमणिका—'शं नः पञ्चोना शान्तिः' (35. 35. p. 25.) इति । वसिष्ठ ऋषिः । त्रिष्टुप् छन्दः । 'वैश्वदेवं ह' (KSA. 35. 34. p. 25.) इत्युक्तत्वादिदमपि वैश्ववैवम् । महानाम्नीव्रत एतत् सूक्तं जप्यम् । तथा च सूत्रितम्—'भद्रं कर्णेभिः शृणुयाम देवाः शं न इन्द्राग्नी भवतामवोभिः' (ĀŚS. 8. 14.) इति. .Sy. इन्द्राग्नी इन्द्रात्तरुणौ इन्द्रापूषणौ इन्द्रासोमौ देवताः Mah.
१८. शान्त्यै Sy. सुखरूपौ Mah. सुखरूपौ च U.
१९. पालनैः कृत्वा Mah. पालनैः सह U.

ष्वनुषङ्गः । शम्[1] । अस्माकम्[2] । इन्द्रावरुणौ । मनुष्यैर्दत्तहविष्कौ[3] । शम्[4] । इन्द्रासोमौ । अभ्युदयार्थम्[5] । अस्माकम् । शम्[6] । योश्च[7] भवताम्[8] । शमीति[9] पुनः पूरणं शम् । अस्माकम् । इन्द्रापूषणौ[10] । युद्ध इति ।

शं नो भगः शमु नः शंसो अस्तु शं नः पुरंधिः शमु सन्तु रायः ।
शं नः सत्यस्य सुयमस्य शंसः शं नो अर्यमा पुरुजातो अस्तु ॥ २ ॥

शन्नो भगः । शम्[11] । अस्माकम् । भगो देवः । शम्[11] । एव । अस्माकम् । नराशंसः । भवतु । शम्[11] । अस्माकम् । प्रज्ञा[12] । शम्[11] । एव । भवन्तु । धनानि । शम्[11] । नः सत्यस्य[13] । सयमस्य[14] । शसनम्[15] । शम्[11] । नः । अर्यमा[16] । बहुजनः[17] । भवतु ।

शं नो धाता शमु धर्ता नो अस्तु शं न उरूची भवतु स्वधाभिः ।
शं रोदसी बृहती शं नो अद्रिः शं नो देवानां सुहवानि सन्तु ॥ ३ ॥

शन्नो धाता । शम्[18] । नः[19] । धाता[20] । भवतु । शम्[18] । एव । धर्ता[21] । शम्[18] । नः[19] । विस्तीर्णा[22] पृथिवी । अग्नेः[23] । भवतु । शम्[24] । द्यावापृथिव्यौ । महत्यौ । शम्[18] । पर्वतः । शम्[18] । नः[19] । देवानाम् । स्वाह्वानानि[25] स्तोत्राणि । भवन्तु[26] ।

---

१. शान्त्यै Sy. सुखरूपौ Mah. सुखरूपौ च U.
२. अस्माकमस्मभ्यं वा Sy.
३. रातहव्यैः यजमानैः Sy. रातं दत्तं हव्यं ययोस्तौ रातहव्यौ हविस्तृप्तौ Mah. दत्तहविष्कौ भवताम् U.
४. शान्त्यै भवताम् Sy. सुखरूपौ भवताम् Mah.
५. कल्याणाय च भवताम् Sy. सुष्ठु इतं सुवितं साधुगमनाय साधुप्रसवाय वा Mah. U.
६. शान्त्यै सुखाय च । पुनरुक्तिरादरार्था । अथवा शं शमनहेतुकं सुखम् Sy. रोगाणां शमनाय Mah. शमनाय रोगाणाम् U.
७. न्वयोश्च M. The passage beginning with रक्षणैरितीन्द्रस्य and ending with योश्च भवताम् is missing in A. योर्विषययोगनिमित्तं सुखमित्यपुनरुक्तिः Sy. यवनाय पृथक्करणाय च भयानाम् । रोगं भयं च निवर्त्य सुखरूपौ भवतामित्यर्थः Mah. पृथक्करणाय च भयानाम् U.
८. शमिति is suggested for शमीति ॥ इन्द्रसोमौ देवौ शं सुखरूपौ भवताम् Mah. सुखरूपौ चेन्द्रासोमौ भवताम् U
९. ०पूषणौ M. इन्द्रपूषसञ्ज्ञौ देवौ. सुखरूपौ भवताम् Mah.
१०. अन्नलाभे निमित्ते वा Sy. वाजस्यान्नस्य सातौ दाने निमित्तभूते सति Mah. अन्नसम्भजने निमित्तभूते U.
This stanza=YV. 36. 11.
११. शान्त्यै Sy. १२. बहुधीरप्यस्तु Sy.
१३. त्वस्य M.
१४. सुयमस्य is suggested for सयमस्य ॥ शोभनयमयुक्तस्य Sy. १५. वचनम् Sy.
१६. देवोऽप्यस्तु Sy. १७. बहुप्राबुर्भावः Sy.
१८. शान्त्यै Sy. १९. अस्माकम् Sy.
२०. देवः Sy.
२१. पुण्यपापानां विधारयिता वरुणो देवोऽप्यस्तुSy.
२२. विवर्तगमना पृथिव्यपि Sy.
२३. अग्नेः सह Sy.
२४. शम् is missing in A. शम्भवताम् Sy.
२५. स्वाह्वानि A. सुष्टुतयः Sy.
२६. भवतु A.

शं नो अग्निर्ज्योतिरनीको अस्तु शं नो मित्रावरुणावश्विना शम् ।
शं नः सुकृतां सुकृतानि सन्तु शं नः इषिरो अभि वातु वातः ॥ ४ ॥

शन्नः । शम् । अस्माकम् । अग्निः । ज्योतिर्मुखः । भवतु । शम् । अस्माकम् । इन्द्रावरुणौ[1] । अश्विनौ[2] च । शम् । नः । सुकृताम्[3] । सुकृतानि कर्माणि[4] । भवन्तु[5] । तथा सुखम् । अस्माकम् । गमनशीलः[6] । वातः । आवातु[7]

शं नो द्यावापृथिवी पूर्वहूतौ शमन्तरिक्षं दृशये नो अस्तु ।
शं न ओषधीर्वनिनो भवन्तु शं नो रजसस्पतिरस्तु जिष्णुः ॥ ५ ॥

शन्नः । शम्[8] । अस्माकम् । द्यावापृथिव्यौ । प्रथमाह्वाने[9] । सुखम् । अन्तरिक्षम्[10] । दर्शनाय[11] । अस्माकम् । भवतु । शम् । नः । ओषधयः[12] । वृक्षाश्च । भवन्तु । शम् । नः[13] । लोकस्य । पतिः[14] । अस्तु । जिष्णुरादित्यः[15] ।

शं न इन्द्रो वसुभिर्देवो अस्तु शमादित्येभिर्वरुणः सुशंसः ।
शं नो रुद्रो रुद्रेभिर्जलाषः शं नस्त्वष्टा ग्नाभिरिह शृणोतु ॥ ६ ॥

शन्न इन्द्रः । शम्[16] । नः । इन्द्रः । वसुभिः सह[17] । देवः[18] । भवतु । तथादित्यैः[19] । वरुणस्य । श भवतु । सुष्टुति[20] । शम् । नः । रुद्रः[21] । रुद्रैः । सुखकरः, जलाष इति सुखमावः[22] । शम् । नः । त्वष्टा । देवपत्नीभिः सह । स्तोत्रं शृणोतु[23] ।

शं नः सोमो भवतु ब्रह्म शं नः शं नो ग्रावाणः शमु सन्तु यज्ञाः ।
शं नः स्वरूणां मितयो भवन्तु शं नः प्रस्वः[24] शम्वस्तु वेदिः ॥ ७ ॥

शन्नः सोमः[25] । शम्[26] । नः[27] । सोमः । भवतु । ब्रह्म च[28] । अस्माकम् । शङ्करम्[29] । शम् । नः । ग्रावाणः । शम् ।

---

१. मित्रावरुणौ is suggested for इन्द्रावरुणौ । मित्रावरुणावपि. भवताम् Sy.
२. अश्विनावपि शम्भवताम् Sy.
३. पुण्यकर्मणां पुरुषाणाम् Sy.
४. पुण्यकर्माण्यपि Sy. ५. भवतु A.
६. वायुरपि Sy.
७. शन्नम् A. शान्त्यं Sy.
८. ०मां ह्वा० A. ९. ०रिक्ष M.
१०. दर्शनाय A.
११. ओषधयोऽपि भवतु Sy.
१२. अस्माकम् Sy.
१३. पतिरिन्द्रोऽपि Sy.
१४. जयशीलः Sy.
१५. शान्त्यं भवतु Sy.
१६ ने A. अस्माकम् Sy.
१७. देवैः सार्धम् Sy.
१८. दानादिगुणयुक्तः Sy.
१९. वरुणश्च is suggested for वरुणस्य ।
२०. सुष्ट्विति M. शोभनस्तुतिः Sy.
२१. दुःखद्रावको देवः Sy.
२२. ०माव A. जलाशमिति सुखनाम Ngh. 3. 6.
२३. VM. ignores इह ॥ इह यज्ञे Sy.
२४. सोमं A. २५. शान्त्यं Sy.
२६. अस्माकम् Sy. २७. स्तोत्रमपि Sy.
२८. शान्त्यं भवतु Sy.
२९. अभिषवसाधनभूताः पाषाणा अपि Sy.

एव । सन्तु । यज्ञाः । शम् । नः । यूपानाम् । मानानि[1] । भवन्तु । शम् । नः । बर्हींषि[2] । शम् । एव । अस्तु । वेदिः[3] ।

शं नः सूर्य उरुचक्षा उदेतु शं नश्चतस्रः प्रदिशो भवन्तु ।
शं नः पर्वता ध्रुवयो भवन्तु शं नः सिन्धवः शमु सन्त्वापः ॥ ८ ॥

शन्नः । कल्याणम्[4] । अस्माकम् । सूर्यः । उदेतु[5] । बहूनां द्रष्टा[6] । शम् । नः । चतस्रः । मुख्या दिशः[7] । भवन्तु । शम् । नः । पर्वताः । निश्चलं तिष्ठन्तः[8] । भवन्तु । शम् । नः । सिन्धवः[9] । शम्[10] । एव । सन्तु[11] । आप इति ।

शं नो अदितिर्भवतु व्रतेभिः शं नो भवन्तु मरुतः स्वर्काः ।
शं नो विष्णुः शमु पूषा नो अस्तु शं नो भवित्रं शम्वस्तु वायुः ॥ ९ ॥

शन्नः[12] । शम् । अस्माकम् । अदितिः[13] । भवतु । कर्मभिः[14] । शम् । नः । भवन्तु । मरुतः[15] । स्वञ्चनाः[16] । शम् । नः विष्णुः[17] । शम् । एव । पूषा[18] । नः । अस्तु । शम् । अस्माकमस्तु । भवित्र यत्किञ्चन[19] पृथिव्यां[20] भवति । शम् । एव । अस्तु । वायुः[21] ।

शं नो द्यावः सविता त्रायमाणः शं नो भवन्तूषसो विभातीः ।
शं नः पर्जन्यो भवतु प्रजाभ्यः शं नः क्षेत्रस्य पतिरस्तु शंभुः ॥ १० ॥

शन्नः । शम्[22] । नः । देवः[23] । सविता[24] । रक्ष[25] । ज । नः । भवन्तु[26] । उपस । व्युच्छन्त्यः । शम् । नः । पर्जन्यः । भवतु । प्रजाभ्यः । शम् । अस्माकम् । अस्तु । क्षेत्रस्य । पतिः । सुखस्य भावयिता ।

---

१. उन्मानान्यपि Sy.
२. ओषधयोऽपि Sy.
३. वेदिं A.
४. शान्त्यै Sy.
५. उदयं प्राप्नोतु Sy.
६. वृष्टा A. विस्तीर्णतेजाः Sy.
७. महादिशोऽपि Sy.
८. निश्चलास्तिष्ठन्तः M. ध्रुवाः Sy.
९. नद्योऽपि Sy.
१०. सम् A.
११. शन्तु A.
१२. शान्त्यै Sy.
१३. देवी Sy.
१४. व्रतैः कर्मभिः सार्धम् Sy.
१५. मरुतोऽपि Sy.
१६. शोभनस्तुतयः Sy.
१७. व्यापकः Sy.
१८. पूषा-देवोऽपि Sy.
१९. भुवनमन्तरिक्षमुदकं वा Sy.
२०. किञ्चिन्न पृ० A.
२१. शान्त्यै भवतु Sy.
२२. अस्माकम् Sy.
२३. क्रीडनादिगुणयुक्तः Sy.
२४. रक्षन् is suggested for रक्ष ।
२५. शम् is suggested for ज ।
२६. भवन्ति A.

शं नो देवा विश्वदेवा भवन्तु शं सरस्वती सह धीभिरस्तु ।
शमभिषाचः शमु रातिषाचः शं नो दिव्याः पार्थिवाः शं गो अप्याः ॥ ११ ॥

शन्नः । विश्वे देवा नाम । देवताः । अस्माकम् । शम् । भवन्तु । शम् । सरस्वती । सह । कर्मभिः । अस्तु । शम् । अभिगन्तारः । शम् । एव । धनस्य सेवितारः । शम् नः । दिवि भवाः । शम् । पार्थिवाः । आन्तरिक्ष्याः ।

शं नः सत्यस्य पतयो भवन्तु शं नो अर्वन्तः शमु सन्तु गावः ।
शं न ऋभवः सुकृतः सुहस्ताः शं नो भवन्तु पितरो हवेषु ॥ १२ ॥

शन्नः सत्यस्य । अग्निर्यमो वरुण इति सत्यस्य । पतयः । अस्माकम् । शम् । भवन्तु । शम् । नः । अश्वाः । शम् । एव । भवन्तु । गावः । शम् । नः । ऋभवः । सुवर्माणः । कुशलहस्ताः । शम् । अस्माकम् । भवन्तु । पितरः । ह्वानेषु ।

शं नो अज एकपादेवो अस्तु शं नोऽहिर्बुध्न्यः शं समुद्रः ।
शं नो अपां नपात्पेरुरस्तु शं नः पृश्निर्भवतु देवगोपा ॥ १३ ॥

शन्नः । शम् । अस्माकम् । अजः । एकपान्नाम । देवः । भवतु । शम् । अस्माकम् । अहिर्बुध्न्यः । शम् । अन्तरिक्षम् । शम् । अस्माकम् । अपान्नपात् । रक्षकः । भवतु । शम् । नः । पृश्निः । भवतु । देवा गोपनीया यस्या गोपयितारो वा ।

---

१. बहुस्तोत्रका देवाः Sy.
२. शान्त्यै Sy.
३. भवतु M.
४. स्तुतिभिः कर्मभिर्वा Sy.
५. ०गन्ताः M. यज्ञमभितः सेवमानाश्च Sy.
६. शरम् A.
७. दानं सेवमानाः Sy.
८. पृथिव्यां सम्भूताश्च Sy.
९. अप्या अप्स्वन्तरिक्षे भवाश्च Sy. आकाशमाप इत्यन्तरिक्षनामनी Ngh. १. ३.
१०. पालकाः सत्यशीला देवाः Sy.
११. शान्त्यै Sy.
१२. सुकर्माणः is suggested for सुवर्माणः
१३. शोभनहस्ताः Sy.
१४. पितरोऽपि Sy.
१५. स्तोत्रेषु सत्सु Sy.
१६. शान्त्यै Sy.
१७. ०वान्नाम A.
एकपान्नामधेयः Sy.
१८. अहि बुध्न्यः A.
१९. समुद्रोऽपि Sy.
२०. अपान्नपान्नामधेयोऽपि देवः Sy.
२१. उपद्रवेभ्यः पारयिता Sy.
२२. मरुतां माता Sy.
२३. य is written twice in A. देवा गोपायितारो यस्यां सा Sy.

आदित्या रुद्रा वसवो जुषन्तेदं ब्रह्म क्रियमाणं नवीयः ।
शृण्वन्तु नो दिव्याः पार्थिवासो गोजाता उत ये यज्ञियासः ॥ १४ ॥

आदित्याः । आदित्यादयः[1] । वसिष्ठेन[2] क्रियमाणम् । नवतरम्[3] । स्तोत्रम् । सेवन्तु[4] । शृण्वन्तु । अस्माकम् । दिव्या[5] देवाः । पार्थिवाश्च । अपि च । येऽति[6] । गाजाता[7] मरुतः । यज्ञियाश्चादित्याः[8] । [9]

ये देवानां यज्ञिया यज्ञियानां मनोर्यजत्रा अमृता ऋतज्ञाः ।
ते नो रासन्तामुरुगायमद्य यूयं पात स्वस्तिभिः सदा नः ॥ १५ ॥

ये देवानाम्[10] । ये । देवानामपि । यज्ञियानाम्[11] । यज्ञिया भवन्तीति प्राणानाहेन्द्रादीन् वा[12] । मनुष्यस्य[13] । यष्टव्याः[14] । अमृताः । सत्यज्ञाः[15] । ते[16] । न । प्रयच्छन्तु । बहूना गेय[17] धनम् । अद्य यूयम् । पात । स्वस्तिभिः । सदा । नः[18] ।

व्याख्यत्तृतीयमध्यायं[19] पञ्चमस्याष्टकस्य सः ।
विश्वामित्रकुले जातो माधवः सुन्दरीसुतः ॥

[अथ पञ्चमाष्टके चतुर्थोऽध्यायः][20]

'प्र ब्रह्मैतित्यथाध्यायं[21] व्याचिख्यासति माधवः[22] ।
अनेकर्षिषु[23] सूक्तेषु[24] वक्तव्य सम्प्रदर्शयन् ॥ १ ॥

---

१. आदि refers to रुद्र and वसवः । आदित्याः दिव्याः 'अदितिर्द्यौः' (RV. 1. 89. 10.) इति श्रुतेः । रुद्रा आन्तरिक्ष्याः, वसवः पार्थिवाश्च Sy.
२. अस्माभिः क्रियमाणम् Sy. ३. नवतारम् A.
४. सेवन्ताम् is suggested for सेवन्तु ॥ जुषन्ताम् Sy.
५. अन्ये दिव्या दिवि भवाः Sy.
६. येऽपि is suggested for येऽति ।
७. गोजाता is suggested for गा जाता गोः पृश्नेर्जाताः Sy. नाकः गौः इति (द्युपृश्नि)-साधारणनामनी Ngh. 14.
८. यज्ञार्हास्ते सर्वेऽपि नोऽस्माकं हवं शृण्वन्तु Sy.
९. VM. ignores इदम्
१०. ये देवाः सन्ति Sy. ११. यजनीयानाम् Sy.
१२. यजनीयाः Sy. १३. ०णानां हेन्द्रा० A.
१४. प्रजापतेश्च Sy. १५. मरणरहिताः Sy.
१६. ते सर्वे Sy
१७. नः is suggested for न । अस्मभ्यम् Sy.
१८. बहुकीर्ति पुत्रम् Sy. १९. सिद्ध एवोत्तमः पादः Sy. २०. व्याख्या तृती० Sy.
२१. Supplied by the Editor.
२२. प्र ब्रह्मैत्यथा० A. अस्मात्पूर्वं 'श्रीः' इत्यधिकं वर्तते A.
२३. R. reads प्र ब्रह्मैतु सवध्यायम्
२४. RV. 7. 36. अनेक० is suggested for अग्नेक० A. अग्नेकर्षीषु M. अनेकर्षीषु R.
२५. सूत्रेषु A.

ऋषयः[1] सूक्तमेकं[2] सदपश्यन् बहवः कथम् ।[3]
सङ्घीभूय तपस्तप्त्वा[4] सर्व एव सहापठन्[5] ॥ २ ॥
इति केचन मन्यन्ते माधवस्य न तन्मतम् ।
नाग्नि सूक्ते[6] श्रूयमाणे शक्यमेवं[7] प्रभाषितुम् ॥ ३ ॥
'एना[8] वयं पर्यसेति संवादे यन्नदीवचः[9] ।
तत्रैवं शक्यते वक्तुं नाम ह्यत्र निवेशितम्[10] ॥ ४ ॥
'यमग्ने[11] वाजसातम्[12] सूक्ते नाम च कीर्त्यते ।
'प्रयस्वन्तो[13] हवामहे' शक्यं तत्रापि[14] भाषितुम् ॥ ५ ॥
'एवाँ अग्निं[15] वसूयवः' सूक्ते सामान्यतः कृतः ।
वसूयुनामनिर्देशः[16] सन्त्यन्येऽपि च तादृशाः ॥ ६ ॥
'अबोध्यग्निः समिधा[17], इति सूक्तं बुधगविष्ठिरौ[18] ।
सहैकं द्वौ ददृशतुरेकः[19] सूक्ते तु कीर्त्यते ॥ ७ ॥

---

१. ऋषयः is missing in M.
२. ०कं स पदप० A. M. The reading is adopted from R.
३. ०यस्तस्तप्त्वा A.
४. स is missing in A. M. The reading is adopted from R.
५. सूक्तो A.
६. वाक्यमेव A. वाक्यमेवं प्रभाषत M.
७. येना वयं A. [RV. 3. 33. 4.]
८. ०दो यं नदीव च A. M.
९. ०त्रानिवैशिनम् A. ०त्रानिवेशनम् M. The reading is adopted from R.
१०. ग्रयम० A. M.
११. नामव A. मावकी० M.
१२. The quotation is up to वाजसातम
१३. पयस्व० M. [RV. 5. 203.]
१४. ०त्राविभा० A. ०त्राभिभा० M. The reading is adopted from R.
१५. एवमग्नि A. M. [RV 5. 25. 9.]
१६. वसुयुगामनिर्देशः (श्य M.) A. M. The reading is adopted from R.
१७. समीधेति M. [RV. 5. 1. 1.]
१८. बुधाग० A. १९. ०रेकसूक्ते A. M. The reading is adopted from R.

'गविष्ठिरो नमसा, इति बुधस्तत्र न कीर्तितः ।
'यदिन्द्राहं यथा त्वम्,' च सूक्तमार्षं द्वयोर्मतम् ॥ ८ ॥
'अहं यथा त्वमीशीय, स्तोता मे' इति दृश्यते ।
एकवत्तत्र निर्देशो न त्वावामिति दृश्यते ॥ ९ ॥
'आ यदिन्द्रश्च दद्वहे सहस्रं वसुरोचिषः ।
एकवत्तत्र निर्देशः 'तिष्ठं वनस्य मध्य आ' ॥ १० ॥
मत्स्यानां जालबद्धानां 'त्यानु'इत्यार्ष विदुर्बुधाः ।
तत्रापि दृष्टो निर्देश 'उत त्वामदिते महि' ॥ ११ ॥
एवंविधेषु सूक्तेषु तस्मादेक ऋषिर्मतः ।
प्रधानोऽन्ये त्वप्रधाना इति मन्यामहे वयम् ॥ १२ ॥
स च प्रधानो निर्देशादस्माभिर्ज्ञायते क्वचित् ।
'गविष्ठिरो नमसा' इति प्राधान्यं ह्यवगम्यते ॥ १३ ॥
'यदिन्द्राहं' यथेत्यत्र न विशेषः प्रतीयते ।
गोसूक्ती वाश्वसूक्ती वा नैकोऽपि ह्यत्र कीर्त्यते ॥ १४ ॥

---

१. ०ष्ठितो मन० M. मन० A. [RV. 5. 1. 12.]
२. ०स्त्वत्र R.
३. [RV. 8. 14. 1.]
४. त्वमशीय० M. [RV. 8. 14. 1.]
५. स्तोनाम A. M.
६. ग्रायमिन्द्रस्य A. ग्रयमिन्द्रस्य M.
७. [RV. 8. 34. 16.]
८. ०वन्तत A.
९. ०ष्ठन् A. M.
१०. [RV. 8. 34. 18.]
११. यन्धानां A. '०वद्धा' इति वा पाठः स्यात्
१२. त्यान्वि (त्यानु इ०) त्यार्षम् A. M. त्यानित्यार्षम् [RV. 8. 67. 1.]
१३. त्वमहिते A. त्वमभिते (०मदिते) M. [RV. 8. 67. 10.]
१४. इन्द्रोहं यथेत्यत M. [RV. 8. 14. 1.]
१५. इन्द्रोऽहं यथेत्यत न विशेषः प्रतियतो A.
१६. गोष्ठूक्ती वाश्चसूक्तीवानैको विन्यत्र A. गोषूक्ती R.

'तं प्रत्नथेत्यवत्सारः काश्यपोऽन्यैः सहर्षिभिः ।
तस्मिन् सूक्ते समुद्दिष्टैर्ददर्शेत्यवगम्यते ॥ १५ ॥
'ऋज्राश्वः प्रष्टिभिः' इति विस्पष्टमृषिराह च ।
कर्तृमात्मनो दृष्टौ भ्रातॄणां चाप्रमाणताम् ॥ १६ ॥
प्रह्वाः प्राञ्जलयः सर्व इन्द्रं तुष्टूषवः स्थिताः ।
उपश्रृण्वन् सुतेष्विन्द्रमृज्राश्वः स्तुतवान् स्वयम् ॥ १७ ॥
ऋषिरेकां ददर्शर्चमृषिरेकामथापरः ।
इति केचन मन्यन्ते तदयुक्तमिति स्थितिः ॥ १८ ॥
शतं वैश्वानसान् प्राहुः सहस्रं वसुरोचिषः ।
न तावत्य ऋचस्तेषां वृद्धेष्वस्तु विनिर्णयः ॥ १९ ॥

VII. 36.

प्र ब्रह्मैतु सदनाद्ऋतस्य वि रश्मिभिः ससृजे सूर्यो गाः ।
वि सानुना पृथिवी संस्र उर्वी पृथु प्रतीकमध्येधे अग्निः ॥ १ ॥

प्र ब्रह्म ॥ वसिष्ठं वैश्वदेवम् ॥ प्रैतु । स्तुति श्रोत्यं ब्रह्मादित्यः । उदकस्य । सदनाद्वः ।

---

१. तं प्रत्नथा [RV. 5. 44. 1.]
२. प्रकृतथेत्यत त्सारं A. ०त्यतत्सारं M. The reading is adopted from R.
३. द्दिष्टे ददं० A. ०ष्टैर्ददृशेत्य० M. The reading is adopted from R.
४. ऋज्राश्च प्रष्टि० A. ०श्वप्रुष्टि० M. [RV. 1. 100. 17]
५. कतृ....स्मनो दृष्टौ M. प्राधान्यञ्चात्मनो R. कर्तृत्वमात्मनो is suggested for कर्तृमात्मनो० ॥
६. ०णाम प्रधानताम् R.
७. प्रह्वाः A. ८. कृष्टूषव A.
९. ०जाश्चस्तु० A., ०जाश्वः The reading is adopted from R.
१०. ०र्शच्च ऋ० A. ११. ०चिषम् A.
१२. 'अथ पञ्चमाष्टके चतुर्थोऽध्याय आरभ्यते । तत्र षडनुवाकात्मकस्य वसिष्ठस्य सप्तमस्य मण्डलस्य तृतीयेऽनुवाके द्वाविंशति सूक्तानि । तत्र 'प्र ब्रह्म' इति नवर्चं तृतीयं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं पूर्ववद्वैश्वदेवम् । अनुक्रान्तञ्च— 'प्र ब्रह्म नव' (KSA. 36. 36. p. 25.) इति । विनियोगो लैङ्गिकः Sy.
१३. वधिष्ठं A. वासिष्ठं is suggested for वसिष्ठम् ।
१४. स्तुत्यान् सूर्यादीन् प्रकर्षेण गच्छतु Sy.
१५. स्तोत्रं is suggested for श्रोत्यं ॥
१६. ०वित्यम् A. १७. यज्ञस्य Sy.
१८. स्थानाद् देवयजनदेशात् Sy.

विहृति[1] उदकानि[2]। सूर्यः[3]। रश्मिभिः[4]। ततः उच्छ्रितेनौषधिवनस्पतिसन्नहन[5]। विस्तृतासि[6]। पृथिवी[7]। महती[8] सञ्जातेषु चौषधिषु वनस्पतिषु। प्रतीतम्[9]। प्रतीकमुत्तरवेदिलक्षणमङ्गम्[10]। अधिप्रज्वाल्यते[11]। अग्निः[12]।

इमां वां मित्रावरुणा सुवृक्तिमिषं न कृण्वे असुरा नवीयः।
इनो वामन्यः पदवीरदब्धो जनं च मित्रो यतति ब्रुवाणः॥ २॥

इमां वाम्। इमाम्[13]। वाम्[14]। हे मित्रावरुणौ[15]! स्तुतिम्। अन्नम्[16]। इव। करोमि[17]। हे बलिनौ[18]! नवतरम्[19]। ईश्वरः[20]। युवयोः। अन्यः[21]। पादानां सर्वावासानां ज्ञाता वरुणः। अहिंसितः[22]। मित्रस्य[23]। जनम्[24]। यातयति रार्येषु[25] व्यापारयति। स्तूयमानः[26]।

---

१. विसृजति is suggested for विहृति॥ विमुञ्चति प्रवर्षति। श्रूयते हि—'यमभिरादित्यस्तपति रश्मिभिस्ताभिः पर्जन्यो वर्षति' इति। स्मृतिश्च भवति 'आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः' इति। अत ईदृशं माहात्म्यं सूर्यस्यैव विद्यते नान्यस्य। चिदित्यनेन पावेन सूर्यः स्तूयते Sy.

२. अपो वृष्ट्युदकानि Sy.

३. किं तद् ब्रह्म? इति तदाह—सर्वस्य प्रेरकः शोभनवीर्यो वा देवः Sy.

४. आत्मीयैः किरणैः Sy.

५. सन्नघन A. सन्नाहेन is suggested for सन्नहन। समुच्छ्रितेन पर्वतादिना Sy.

६. ०तासी A. ०तास्ति is suggested for ०तासि॥ विसरति। व्याप्नोति Sy.

७. अपि च पृथिवी प्रथिता भूमिः Sy.

८. महतीं A. विस्तीर्णा सती Sy.

९. पतितं M. प्रथितम् is suggested for प्रतीतं॥ विस्तीर्णम् Sy.

१०. ०रवैदि० A. पृथिव्या अवयवं वेदयजनलक्षणं स्थानम् Sy.

११. अधि—'अधिपती अनर्थकौ' इत्यधेः कर्मप्रवचनीयसंज्ञायां 'कर्मप्रवचनीययुक्ते' इति सप्तम्यर्थे द्वितीया। ईदृशे स्थाने Sy.

१२. ०ल्यतो M. आदीप्यते Sy.

१३. अग्निम् M.

१४. इमामस्मदीयां पुरोवर्तिनीम् Sy.

१५. वा A. युवाभ्याम् Sy.

१६. हेति मित्रा० A.

१७. हवीरूपमन्नम् Sy.

१८. अहं स्तोता करोमि Sy.

१९. बलिने A. हे असुरौ! बलवन्तौ! Sy.

२०. नेवतारम् A. नवतराम् is suggested for नैवतराम्। नवीयसीम् Sy.

२१. प्रभुः Sy. २२. अन्यतरः Sy.

२३. पदानाम् is suggested for पादानाम्॥ पदस्य स्थानस्य प्रजनयिता। वरुणो हि धर्माधर्मयोर्धारयितेति पदवीरित्युच्यते Sy.

२४. शत्रुभिरहिंसितो वरुणः Sy.

२५. मित्रः or मित्रश्च is suggested for मित्रस्य।

२६. सर्वं प्राणिजातम् Sy.

२७. राप्येषु M. कार्येषु is suggested for रार्येषु॥ प्रवर्तयति। तथा च श्रूयते 'मित्रो जनान्यातयति ब्रुवाणः' (RV. 3. 59. 1.) इति Sy.

२८. अस्माभिः स्तूयमानः Sy.

२९. VM. ignores च।

आ वातस्य[1] ध्रजतो रन्त इत्या अपीपयन्त धेनवो[2] न सूदाः[3]।
महो दिवः सदने[4] जायमानोऽचिक्रदद्वृषभः सस्मिन्नूधन् ॥ ३ ॥

आ वातस्य[1]। आरमन्ते[2]। वायोः। गच्छन्तः[3]। इत्या गमनानि वायोर्विविधा गतय इतस्ततः प्रादुर्भवन्ति। वर्धन्ते च। धेनवः[5]। इव[6]। सूदा[7]—'सूद इति कूपनाम[8]'। महतः। दिवः[9]। सदने[10]ऽन्तरिक्षे। जायमानः[11]। न्यक्रन्दि[12] ? पर्जन्यः[13]। सर्वस्मिन्[14]। ऊधनि[15] यत[16] उदकं निर्गच्छति दूतो[17] मेघसङ्घः।

गिरा य एता युनजद्धरी त इन्द्र प्रिया सुरथा शूर धायू[18]।
प्र यो मन्युं रिरिक्षतो मिनात्या सुक्रतुमर्यमणं[19] ववृत्याम्[20] ॥ ४ ॥

गिरा[14] य[15] एता। हे इन्द्र! स्तोत्रेण[16]। यः[17]। एतौ। हरी[18]। युनक्ति[19]। तव। प्रियौ। शोभनरंहणौ[20]। हे शूर[21]! धारकौ। सोऽह[22] प्रहिनस्ति[23]। यो मन्युर्माम्। हिंसितुमिच्छत. शत्रोः[24]। त त्वाम्[25]। आववृत्याम्[26]। सुकर्माणम्। अर्यमणमुदारम्।

---

१. वाकस्य A.
२. आरभन्ते M. अभितो रमन्ते Sy.
३. गच्छतः is suggested for गच्छन्तः N.
४. प्यायन्ते Sy.
५. गावश्च Sy.
६. च M. नेति चार्थे Sy.
७. सूदा सूद A. 'सूद प्रेरणे' इति धातुः। क्षीरस्य प्रेरयित्र्यः Sy.
८. कृप० A. Ngh. 3. 2 3.
९. द्योतमानस्यादित्यस्य Sy.
१०. स्थानेऽन्तरिक्षे Sy.
११. उत्पद्यमानः Sy.
१२. ०न्दि A. न्यक्रन्विष्ट or न्यक्रन्दीत् is suggested for न्यक्रन्दि। अचिक्रदत् Sy.
१३. वर्षणशीलः पर्जन्यः Sy.
१४. तस्मिन् Sy.
१५. अन्तरिक्षे Sy.
१६. यक्ष A.
१७. तदूधो is suggested for दूतो ॥
१८. अस्याः पूर्वोऽर्धर्चः इन्द्रस्तुतिरपरोऽर्यम्णः स्तुतिः Sy.
१९. निरा य A.
२०. स्तुतिरूपया वाचा Sy.
२१. यः is missing in A. जनः Sy.
२२. हरि A. त्वदीयावश्वौ Sy.
२३. रथे युञ्ज्यात्। हे इन्द्र! त्वमस्य यागमायाहीति शेषः Sy.
२४. सुष्ठुरंहणौ Sy.
२५. हे विक्रान्त! Sy.
२६. सोऽयं is suggested for सोऽहं।
२७. प्रकर्षेण हिनस्ति Sy.
२८. योऽयमा Sy.
२९. हिंसितुमिच्छतः शत्रोः सम्बन्धिनम् Sy.
३०. त त्वाम् A. कोपम् Sy.
३१. ०वृत्या M. स्तुत्यावर्तयामि Sy.

यजन्ते अस्य सख्यं वयश्च नमस्विनः स्व ऋतस्य धामन् ।
वि पृक्षो बाबधे नृभिः स्तवान इदं नमो रुद्राय प्रेष्ठम् ॥ ५ ॥

यजन्ते । पूजयन्ति । इन्द्रस्य । सख्यम् । पक्षिणः । च । अन्नवतः । स्वस्मिन् । उदकस्य । स्थाने ऽन्तरिक्षे वर्तमानस्य । पिबधने च शत्रूणाम् । अन्नम् । मनुष्यैः । स्तूयमानः यद्वा पिबस्तोनृषदनम् । तस्मा इन्द्रा-मेधाविने । इदम् । हविः । प्रियतमं क्रियत इति ।

आ यत्साकं यशसो वावशानाः सरस्वती सप्तथी सिन्धुमाता ।
याः सद्मयन्त सुदुघाः सुधारा अभि स्वेन पयसा पीप्यानाः ॥ ६ ॥

आ यत्साकम् । आनयामास । या । सह । कीर्तिम् । कामयमाना । सरस्वती । षण्णा नदीना सप्तमी । सिन्धूना माता । या नद्यो हि । सुष्वयन्त, स्वपि. ष्वञ्जिपर्याय , अभ्यषजन्त सरस्वतीम् । सुदुघाः । शोभनधारा स्वेन । पयसा । प्यायमाना, य वा यदिति यदेत्यर्थ उत्तरत्र सम्बन्धः ।

---

१. अनया रुद्रः स्तूयते Sy.
२. पूजयन्तु Sy. ३. रुद्रस्य Sy.
४. सखित्वमुद्दिश्य Sy.
५. गन्तारः कर्माणि कुर्वाणा यजमानाः Sy.
६. हविर्लक्षणान्नवन्तः Sy.
७. स्वकीये Sy.
८. यज्ञस्य Sy.
९. वर्धमा० A. धामनि स्थाने स्वकीये यज्ञगृहे स्थिता इत्यर्थः Sy.
१०. विह्वधने च A. विबाधते is suggested for पिबधने । विबध्नाति ददातीत्यर्थः Sy.
११. मनुष्ये A. नेतृभिः Sy.
१२. विबध्नाति is suggested for पिब ।
१३. इन्द्रा मेधाविने A. इन्द्राय is suggested for इन्द्रा । रुद्राय Sy.
१४. रुद्रस्य प्रियतमम् Sy.
१५. अ यत् A.
१६. आगच्छन्तु । आ इत्युपसर्गस्य योग्यक्रिया-ध्याहारः Sy.
१७. यासां गङ्गादीनां नदीनां मध्ये Sy.
१८. युगपदेव Sy.
१९. अन्नवत्यः Sy.
२०. ०यमना A.
२१. एतदाख्या नदी Sy.
२२. सप्तमी भवति Sy.
२३. अपां मातृभूता Sy.
२४. स्नुष्व० A. सुष्वयन् is missing in M. सुष्वयन्ते । गतिकर्मैतत् । प्रवहन्ति Sy.
२५. ०विष्वर्जाज प० A. स्वयिः is suggested for स्वविः ।
२६. ०ष्वजन्त is suggested for ०षजन्त ।
२७. कामान् दोग्धुं सुशक्याः Sy.
२८. शोभनधारोपेताश्च Sy.
२९. स्वकीयेन Sy. ३०. उदकेन Sy.
३१. व्याय० A. अभिवर्धयन्त्यः Sy.
३२. यद्वा is suggested for य वा ।

उत त्ये नो मरुतो मन्दसाना धियं तोकं च वाजिनोऽवन्तु ।
मा नः परि ख्यदक्षरा चरन्त्यवीवृधन्युज्यं ते रयिं नः ॥ ७ ॥

उत त्ये । अपि च । तया सरस्वत्या सहागमी च । मरुतः । मोदमानाः । अस्माकम् । पुत्रम् । च । बलवन्तः । रक्षन्तु । मा । अस्मान् । वर्जय त्वम् । माता । चरन्ति सरस्वती च । वर्धयन्तु । योग्यम् । रयिम् । अस्माकम् । मरुतः सरस्वती चेति ।

प्र वो महीमरमतिं कृणुध्वं प्र पूषणं विदथ्यं न वीरम् ।
भगं धियोऽवितारं नो अस्याः सातौ वाजं रातिषाचं पुरंधिम् ॥ ८ ॥

प्र वः । कृणुध्वम् । यूयम् । पृथिवीम् । पर्याप्तमतिम् अपि वा विरामो रमतिः, अपर्यन्ताम् । प्रकृणुध्वम् । पूषणञ्च । गृहार्हम् । इव । वीरम् । भगञ्च । अस्माकम् । अस्य । कर्मणः । रक्षितारम् । रथमथ तं धनस्य दातारम् । बहुप्रज्ञं भगम् । अन्न याचध्वम् । सातौ सत्यां भजते यदा युष्मान् भगस्तदेति यद्वा सत्यर्थं वाजं बलिन भगञ्च प्राकृणुध्वमिति ।

---

१. ते Sy.
२. अस्मदीयम् Sy.
३. वेगवन्तः Sy.
४. VM. seems to explain the words परि and ख्यत् together as वर्जय ॥ परित्यक्तवास्मद् व्यतिरिक्तानन्यान्मा ख्यत् मा द्राक्षीत् Sy.
५. ०यध्वं M.
६. ता is missing in M. It seems to be the explanation of अक्षरा ॥ व्याप्ता Sy.
७. चरन्ती is suggested for चरन्ति । वाग्देवता च Sy.
८. युक्तमपि Sy.
९. धनम् Sy.
१०. अस्मदीयम् Sy.
११. ते पूर्वोक्ता मरुतो वाक् च Sy.
१२. VM. ignores धियम् ॥ धियं यज्ञाख्यं कर्म Sy.
१३. हे स्तोतारः ! ... आह्वयत Sy.
१४. महतीं भूमिम् Sy.
१५. ०मतिमर्तामपि M.
१६. रमयति रमप० A. उपरतिरहिताम् Sy.
१७. एतन्नामकं देवम् Sy.
१८. ग्रहा० A. यज्ञार्हम् Sy.
१९. च Sy.
२०. सर्वेषां प्रेरकम् Sy.
२१. देवञ्च आह्वयत Sy.
२२. अस्मदीयस्य Sy.
२३. missing in M. अथ is suggested for ०रथमथ ।
२४. दानसेवकम् Sy.
२५. पुराणां धारयितारम् Sy.
२६. भगम् A.
२७. वाजमभूणामन्यतमं देवमाह्वयत Sy.
२८. अस्मदीये यज्ञे युद्धे वा Sy.
२९. तथेति M.
३०. सत्यर्थः A. सात्यर्थं is suggested for सत्यर्थं ।

अच्छायं वो मरुतः श्लोक एत्वच्छा विष्णुं निषिक्तपामवोभिः ।
उत प्रजायै गृणते वयो धुर्यूयं पात स्वस्तिभिः सदा नः ॥ ६ ॥

अच्छायम्[1] । अभिगच्छतु । अयम्[2] । युष्मान्[3] । मरुतः ! श्लोकः[4] । तथा निषिक्तस्य सोमस्य पातारम्[5] । विष्णुञ्च[6] । अभिगच्छतु । रक्षणार्थम्[7] । अपि च मरुतः सर्वे वा देवाः[8] । प्रजायै[9] । गृणते च मह्यम्[10] । अन्नम्[11] । प्रयच्छन्तु[12] ।

VII.37.

आ वो वाहिष्ठो वहतु स्तवध्यै रथो वाजा ऋभुक्षणो अमृक्तः ।
अभि त्रिपृष्ठैः सवनेषु सोमैर्मदे सुशिप्रा महभिः पृणध्वम् ॥ १ ॥

आ[13] वः । आवहतु[14] । युष्मान् । अत्यन्तं वोढ[15] । स्तोतुः[16] । रथः[17] । हे सौधन्वनाः[18] ! वाजाः[19] ! ऋभुक्षण इत्यृभूषा[20] ज्येष्ठकनिष्ठाभ्यां व्यपदेशः । शत्रुभिरपरिमृष्टः[21] । अभिप्रयच्छत[22] धनानि । त्रयाणां देवगणानां पृष्ठभूतैः[23] । सवनेषु[24] । सोमैर्जनीते[25] । मद[26] । हे सुहनवः[27] ! महद्भिः ।

---

१. यज्ञपुच्छे 'अच्छायं वः' इति चमसिनः स्वं स्वं चमसमभिमृशेयुः । सूत्रितञ्च—'अच्छायं वो मरुतः श्लोक एत्वित्येतयाभिमृशन्ति' (ĀŚS. (6. 12.,) इति Sy.
२. अच्छायम् is missing in A.
३. अस्मदीयमिदम् Sy.
४. युष्माकम् A.
५. शोकः M. स्तोत्रम् Sy.
६. वाता० A. निषिक्तस्य गर्भस्य रक्षितारं यद्वा चमसे निषिक्तस्य सोमस्य पातारम् Sy.
७. विषुं च A.
८. अस्मदीयं स्तोत्रमच्छेतु Sy.
९. अस्मद्विषयरक्षणैर्युक्तम् Sy.
१०. मरुतो विष्णुश्च Sy.
११. प्रजाये ग्रहते च A.
पुत्ररूपां प्रजाम् Sy.
१२. स्तुवते मह्यम् Sy.
१३. ०च्छती A. अधुः वधतु Sy.
१४. हे मरुतः ! हे विष्णो ! यूयं स्वस्तिभिरविनाशैर्नोऽस्मान् सदा सर्वदा पात । रक्षत Sy.
१५. 'आ वो वाहिष्ठः' इत्यष्टर्चं चतुर्थं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वैश्वदेवम् । अनुक्रम्यते च—'आ वोऽष्टौ' (KSA. 36 37. p. 25.) इति विनियोगो लैङ्गिकः । अनेन वृचेनभवः स्तूयन्ते Sy.
१६. आ समन्तावस्मदीयं यज्ञं प्रापयतु Sy.
१७. वोढुः M. वोढा is suggested for वोढ ॥ वोढृतमः Sy.
१८. स्तोतुम् is suggested for स्तोतुः स्तोतुमर्हः Sy.
१९. युष्मदीयो रथः Sy.
२०. ०धवना A.
हे ऋभवः ! Sy.
२१. विस्तीर्णस्य तेजसो निवासभूताः ! Sy.
२२. इत्यृभूणां is suggested for इत्यृभूषा ।
२३. केनाप्यहिंसितः Sy.
२४. युष्मदीयं जठरमभिपूरयत । स रथो युष्मानावहत्विति पूर्वेणान्वयः Sy.
२५. ०भूतेः A. क्षीरवधिसक्तुमिश्रैः Sy.
२६. अस्मदीययज्ञेषु Sy.
२७. जनिते is suggested for जनीते ।
२८. मदं A. मदे is suggested for मद ॥ मदनिमित्ते
२९. हे शोभनहनवः ! यूयं तेन रथेनागत्य Sy.

यूयं ह रत्नं मघवत्सु धत्थ स्वर्दृशं ऋभुक्षणो अमृक्तम् ।
सं यज्ञेषु स्वधावन्तः पिबध्वं वि नो राधांसि मतिभिर्दयध्वम् ॥ २ ॥

यूयं ह । यूयम् । ह । रत्नम् । हविष्मन्सु । दत्थ । सर्वस्य द्रष्टारः । हे ऋभवः ! अहिंसितम् । सम्पिबध्वम् । यज्ञेषु । हे अन्नवन्तः ! विविधं प्रयच्छत च । अस्मभ्यम् । धनानि । स्तुतिभिः ।

उतोचिथ हि मंघवन्देष्णं महो अर्भस्य वसुनो विभागे ।
उभा ते पूर्णा वसुना गभस्ती न सूनृता नि यंमते वसव्या ॥ ३ ॥

उतोचिथ । सेवसे । हि । मघवन् ! वृद्धस्य । बालस्य च । वसुनः । विभागार्थम् । उभौ । ते । पूर्णौ धनेन । बाहू । न । तव वाक् । नियच्छति । वसुत् मूहानहि तर्हि भूयो भूयो विसृजति ।

त्वमिन्द्र स्वयंशा ऋभुक्षा वाजो न साधुरस्तमेष्यूर्का ।
वयं नु ते दाश्वांसः स्याम ब्रह्म कृण्वन्तो हरिवो वसिष्ठाः ॥ ४ ॥

त्वमिन्द्र । त्वम् । इन्द्र ! स्वभूतकीर्तिः । महान् । अश्वः । इव । साधयिता । गृहम् । एषि । स्तोत्रवान् । वयमिति स्पष्टम् ।

---

१. एव Sy. २. रमणीयम् Sy.
३. ०ष्मत्सु is suggested for ०ष्मन् सु । हविर्लक्षणान्नवत्स्वस्मासु निमित्तेषु Sy.
४. धर्थ A. धारयथ Sy. ५. दृष्टारः A. स्वर्गं पश्यन्तः Sy. ६. ऋषभः A.
७. चोरादिभिर्नापहृतमित्यर्थः Sy.
८. सम्यक् सोमं पिबत Sy. ९. अस्मदीययज्ञेषु Sy. १०. तदनन्तरं बलवन्तस्ते Sy.
११. विबध्वं पृच्छथ त च A. विशेषेण वत्त Sy.
१२. अपि च यूयं धनहेतुभिः Sy. १३. उपोचिथ A. 'उतोचिथ' इत्याद्याः पञ्चर्चं इन्द्रदेवताकाः Sy.
१४. उचतिः सेवाकर्मा Sy. १५. खलु Sy.
१६. हे धनवन् ! इन्द्र ! त्वम् Sy.
१७. महतः Sy. १८. अल्पस्य च Sy.
१९. धनस्य Sy. २०. अपिभागा० A. परिचरणानुकूले दाननिमित्ते Sy. २१. स्वदीयौ Sy.
२२. सम्पूर्णौ भवतः Sy. २३. स्वदीया Sy.
२४. क् is missing in A.
२५. वसुसमूहान् वसुत् मूहानहि तर्हि भूयो A.
The reading is doubtful. वसूनि धनानि यद्वा वसव्या वसुषु धनेषु साधुः सूनृता वाग्धनेन सम्पूर्णौ त्वदीयौ बाहू न नियच्छति । नाल्पं प्रदापयतीत्यर्थः Sy. २६. VM ignores देष्णम् ॥ देष्णं धनम् Sy.
२७. स्वमिन्द्र A. २८. स्वम् A. २९. स्वभूत० is suggested for स्यभूत० Sy. असाधारणकीर्तिः Sy. ३०. ऋभुनिवासक ऋभूणामीश्वरो वा Sy. ३१. अश्वः A. अन्नम् Sy.
३२. साधकः Sy. ३३. प्राप्नुहि Sy.
३४. स्तोतुमंम Sy.
३५. VM. ignores नु । ते । दाश्वांसः । स्याम । ब्रह्म । कृण्वन्तः । हरिवः and वसिष्ठाः । Sy. explains these words in the following manner :—
नु अद्य । ते त्वदर्थम् । दाश्वांसः हविर्लक्षणान्नं दत्तवन्तः । स्याम भवेम । ब्रह्म स्तोत्रम् । कृण्वन्तः कुर्वन्तः । हे हरिवः ! स्वकीयाश्वोपेत ! इन्द्र ! वसिष्ठा एतत्संज्ञका ऋषयो वयम् Sy.

सनितासि प्रवतो दाशुषे चिद्याभिर्विवेषो हर्यश्व धीभिः ।
वव॒न्मा नु ते युज्याभिरूती कदा न इन्द्र राय आ दशस्येः ॥ ५ ॥

सनिता[1] । प्रदानशीलः । भवसि । मुख्यस्य[2] । यजमानाय[3] । यादृशीभिः[4] । बुद्धिभिः[5] । व्याप्नोषि त्वं यजमानात्[6] । हर्यश्व[7] ! सम्भक्तारो भूयास्म[8] । क्षिप्रम्[9] । तव । योग्यैः[10] । रक्षणैः[11] । कदा[12] । अस्मभ्यम् । इन्द्र[13] ! धनानि । आप्रयच्छेः[14] ।

वासयसीव वेधसस्त्वं नः कदा न इन्द्र वचसो बुबोधः ।
अस्तं तात्या धिया रयिं सुवीरं पृक्षो नो अर्वा न्युहीत वाजी ॥ ६ ॥

वासयसि[15] । वासयसीदानीम्[16] । परिचरतः । त्वम् । अस्मान्[17] । कदा[18] । अस्माकम्[19] । इन्द्र ! वचनम्[20] । बुध्ये[21] ग्रहम्[22] । तमानेन[23] । कर्मणा ततया[24] वा स्तुत्या[25] । रयिम्[26] । सुवीरम्[27] । अन्नञ्च प्रति । वेगवान्[28] । अश्वः[29] । अस्मान्[30] । निहितेतीन्द्रं परोक्षेणाह गृहादिष्वस्मान्[31] प्रापयस्विति[32] ।

---

१. दाता Sy.
२. प्रवणस्य धनस्य Sy.
३. हविर्वत्तवते यजमानाय Sy.
४. अस्मदीयाभिः Sy.
५. स्तुतिभिः Sy.
६. ०मानान् is suggested for ०मानात् ।
७. हे हरिनामकाश्व ! इन्द्र ! त्वम् Sy.
८. सम्भजेम Sy.
९. अद्य Sy.
१०. योग्याभिः Sy.
११. रक्षाभिः Sy.
१२. कस्मिन् काले Sy.
१३. अपि च हे इन्द्र ! त्वम् Sy.
१४. VM ignores चित् ॥ चित् अपि Sy.
१५. वायससि A.
१६. इवेदानीमर्थे । स्वकीये स्थानेऽवस्थापयसि Sy.
१७. तथा च त्वं स्तौतॄन् Sy.
१८. अस्मात् A.
१९. कस्मिन् काले Sy.
२०. अस्मदीयम् Sy.
२१. वचोरूपं स्तोत्रम् Sy.
२२. बुद्धे M. The use of परस्मैपद is doubtful ॥ अवगच्छेः Sy.
२३. गृह्य M. गृहम् is suggested for ग्रहम् ।
२४. माणेन M. ततमानेन is suggested for तमानेन ॥ तात्या-तनोतेरिदं रूपम् । सन्ततया-ऽस्मत्प्रेरितया Sy.
२५. व A. ततया वा should immediately follow ततमानेन ।
२६. स्तुत्या हेतुभूतया Sy.
२७. त्वदीयं धनम् Sy.
२८. शोभनपुत्रोपेतम् Sy.
२९. बलवान् Sy.
३०. वेगवांस्त्वदीयोऽश्वः Sy.
३१. निहितीन्द्रं A न्युहीतेतीन्द्र is suggested for निहितेतीन्द्रं ॥ निवहेत् Sy.
३२. ग्रहा० A.
३३. ०यस्विति is suggested for ०यस्विति ॥

अभि यं देवी निर्ऋतिश्चिदीशे नर्वन्त इन्द्रं शरदः सुपृक्षः ।
उप त्रिबन्धुर्जरदष्टिमेत्यस्ववेशं यं कृणवन्त मर्ताः ॥ ७ ॥

अभि यम् । यमिन्द्रम् । अभि । देवी । पृथिवी । प्राणिनामीष्टे । व्याप्नुवन्ति । इन्द्रम् । शरदः । शोभनाः । आसः । उपैति । त्रयाणां लोकानां बन्धुः । जरदष्टि यो देवैर्दत्तमशनं जरयति यज्ञेन स जरदष्टिरिति । यदिन्द्रम् । मर्ताः । अस्ववेगं स्वस्मिन्नायतने यः कदाचिदपि नास्ते सोऽस्ववेशस्तथा । कारयितस्तत आह्वानमिति ।

आ नो राधांसि सवितः स्तवध्या आ रायो यन्तु पर्वतस्य रातौ ।
सदा नो दिव्यः पायुः सिषक्तु यूयं पात स्वस्तिभिः सदा नः ॥ ८ ॥

आ नः । आनयन्तु । अस्मान् । अन्नानि । त्वा स्तोतुम् । सवितः ! आयन्तु च । धनानि । मेघस्य दाने । सदा । अस्यान् । दिवः । रक्षकः पर्जन्यः । सिषक्त्विति ।

---

१. यः A.
२. यमीन्द्रम् M.
३. द्योतमाना Sy.
४. भूमिः Sy.
५. इष्टो A. कृत्यार्थे केन्प्रत्ययः । ईशितव्या स्वभूता सती व्याप्नोति Sy.
६. ०वन्ती A.
७. शरभः M. संवत्सराश्च Sy.
८. शोभनाश्नाः is suggested for शोभनाआसः ॥ शोभनाऽन्नैरुपेताः Sy.
९. उपगच्छति Sy.
१०. त्रयाणां लोकानां बन्धको विधारकः स इन्द्रः Sy.
११. जरज्जीर्णमष्टिरशनं यस्य बलस्य हेतुभूतं तद्बलम् Sy.
१२. देवैर्दत्तमशनज्जर० Sy.
१३. यमिन्द्रम् is suggested for यविन्द्र ॥
१४. मरणधर्माणः स्तोतारो वयम् Sy.
१५. आस्ववेगं M. अस्ववेशं is suggested for अस्ववेगम् ॥ स्वकीये स्थानेऽनुपविशन्तम् Sy.
१६. स्ते is written twice in A.
१७. ०स्ते स्वावेश० M.
१८ करणमिस्तत The reading is doubtful कुर्वन्ति ? (कुर्मः) Sy.
१९. VM. ignores चित् ॥ चित् अपि Sy.
२०. आगच्छन्तु Sy.
२१. धनानि Sy.
२२. स्तोतुं योग्यानि Sy.
२३. ०तारयन्तु A. हे सर्वस्य प्रेरक ! देव ! त्वत्सकाशात् Sy.
२४. पर्वत इति कश्चिदिन्द्रस्य सखा । एतत्संज्ञकस्य देवस्य Sy.
२५. सर्वदा Sy.
२६. अस्मान् is suggested for अस्यान्
२७. दिव्यः is suggested for दिवः ॥ दिवि भवः स इन्द्रः Sy.
२८. पायुः सर्वस्य पालकः Sy.
२९. रक्षकत्वेन सेवताम् Sy.
३०. अस्मिन् सूक्ते ये प्रतिपादिता देवास्ते सर्वे यूयं नोऽस्मान् स्वस्तिभिः कल्याणैः । सदा । पात पालयत Sy.

VII. 38.

उदु ष्य देवः सविता ययाम हिरण्ययीममतिं यामशिश्रेत् ।
नूनं भगो हव्यो मानुषेभिर्वि यो रत्ना पुरूवसुर्दधाति ॥ १ ॥

उदु ष्यः । सोऽयम् । सविता । देवः । उद्ययाम । हिरण्मयम् । रूपम् । यद्रूपमयम् । श्रयति, प्रादुर्भूदित्यर्थः । सम्प्रति । भजनीयः । ह्वातव्यः । मनुष्यैर्भवति । विदधाति । यः । रत्नानि । बहुधानः ।

उदु तिष्ठ सवितः श्रुध्यस्य हिरण्यपाणे प्रभृतावृतस्य ।
व्युर्वीं पृथ्वीममतिं सृजान आ नृभ्यो मर्तभोजनं सुवानः ॥ २ ॥

उदु तिष्ठ । उत्तिष्ठ । तदनु च । शृणु च । स्तोत्रमिदम् । हिरण्यपाणे ! सोमस्य । हरणे । उरुतमम् । पृथुतमम् । रूपम् । विसृजन् । आसुवान इव । मनुष्येभ्यः । मनुष्ययोग्यमशनम् ।

---

१. 'उदु ष्य देवः' इत्यष्टर्चं पञ्चमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं सवितृदेवताकम् । सप्तम्यष्टम्यौ वाजिदेवताके । 'भगमुग्रोऽवसे' इत्यर्धर्चो भगदेवत्यः सावित्रो वा । तथा चानुक्रमणिका—'उदुष्य सावित्रमन्त्ये वाजिन्यौ भगमिति भागो वार्धर्चः' (KSA. 36. 38. p 25) इति । गतः सूक्तविनियोगः Sy.

२. सर्वस्य प्रेरकः Sy.

३. उद्यच्छति उद्गमयतीति Sy.

४. हिरण्यम् A. सुवर्णमयीम् Sy.

५. प्रभामित्यर्थः Sy. अमतिमिति रूपनाम Ngh. 3. 7.

६. प्रादुरभूदित्यर्थः is a paraphrase of उद्ययाम; it should therefore immediately follow उद्ययाम ।

७. अद्य Sy. ८. हवनीयः स्तोतव्यः Sy.

९. मनुष्यैः स्तोतृभिः Sy.

१०. करोति । स सविता देवस्तामममतिमुद्ययामेति पूर्वेण सम्बन्धः Sy.

११. सविता Sy.

१२. रत्नानि रमणीयानि धनानि Sy.

१३. ०धान A. ०धनः is suggested for ०धानः ॥ बहुधनो यो देवः स्तोतृभ्यः Sy.

१४. VM. ignores उ ॥ उ इति पादपूरणः Sy.

१५. ऊर्ध्वं गच्छ Sy.

१६. तदनूचः M. उ इति पूरणः Sy

१७. शृण्वत M.

१८. हे सुवर्णहस्त ! त्वमस्मदभीप्सितप्रदानाय Sy

१९. यज्ञस्य Sy २०. प्रणयने Sy.

२१. विस्तीर्णम् Sy.

२२. प्रथिताम् Sy

२३. रूपं प्रभाम् Sy.

२४. ०नं च A. इव seems to be redundant. प्रेरयन् । एवम्भूतस्त्वमिदं स्तोत्रं शृण्विति सम्बन्धः Sy.

२५. नेतृभ्यः स्तोतृभ्यः Sy.

२६. मनुष्याणां भोगयोग्यं धनम् Sy.

२७. VM. ignores सवितः ॥ हे सवितः ! सर्वस्य प्रेरयितः ! देव ! त्वम् Sy.

अपि ष्टुतः सविता देवो अस्तु यमा चिद्विश्वे वसवो गृणन्ति ।
स नः स्तोमाँअमस्य ध्रुवो धाद्विश्वेभिः पातु पायुभिर्नि सूरीन् ॥ ३ ॥

अपि ष्टुतः[1] । अपि[2] । अस्तु[3] स गच्छताम् । स्तुतः[4] । सविता । देवः[5] । यम्[6] । विश्वे[7] । अवि[8] । वत्सवः[9] । आस्तुवन्ति[10] । सः[11] । अस्माकम्[12] । स्तोमान्[13] । हविश्च[14] धारयतु[15] । नमस्यः[16] । विश्वैश्च[17] । रक्षणैः[18] । नितराम् । रक्षतु । स्तोतॄन्[19] ।

अभि यं देव्यदितिर्गृणाति सवं देवस्य सवितुर्जुषाणा ।
अभि सम्राजो वरुणो गृणन्त्यभि मित्रासो अर्यमा सजोषाः ॥ ४ ॥

अभि यम्[20] । अभिष्टौति[21] । यम्[22] । देवी[23] । अदितिः[24] । प्रसवम्[25] । देवस्य । सवितुः । सेवमाना । अभिगृणन्ति[26] ततः । सम्राजः[27] । वरुणश्च[28] । अभिगृणन्ति । मित्रासो मित्रो देवस्तदनुचराश्च । अर्यमा च[29] । अभिगृणन्ति सङ्गताः[30] ।

---

१. अविष्मतं A.
२. च Sy.
३. अह्यास्तु A. अस्मदीयाः स्तुतीः शृणोत्वित्यर्थः Sy.
४. अस्माभिः स्तुतः Sy.
५. अयम् M. सवितारम् Sy.
६. सर्वे Sy.
७. अपि is suggested for अवि ।
८. वत्सपः A. वसवः is suggested for वत्सवः ॥ देवाः Sy.
९. अभिष्टुवन्ति Sy.
१०. देवः Sy.
११. अस्मदीयानि Sy.
१२. स्तोमं M. स्तोत्राणि Sy.
१३. हविश्च A.
१४. अन्नं धात् । दधातु । अन्नफलानि करोतु Sy.
१५. सर्वैर्नमस्करणीयः Sy.
१६. धारयतु नमस्यो विश्वैश्च is written twice in A. M. सर्वैः Sy.
१७. पालनैः Sy
१८. पालयतु Sy.
१९. सोऽत्र इन् A. स्तोतॄनस्मान् Sy.
२०. अभिषौति A.
२१. From यम् onwards the whole commentary is missing in A. सवितारम् Sy.
२२. द्योतमाना Sy.
२३. अदीना देवमाता Sy.
२४. अनुज्ञाम् Sy.
२५. अभिष्टुवन्ति Sy.
२६. सम्यग्राजमानाः Sy.
२७. उपलक्षणमेतत् । वरुणाद्यो देवाः Sy.
२८. मित्रादयश्च Sy.
२९. एतत्संज्ञको देवः Sy.
३०. समानप्रीतिः स नः स्तोमांश्च नो धादिति पूर्वर्चा सम्बन्धः Sy.

अभि ये मिथो वनुषः सपन्ते रातिं दिवो रातिषाचः पृथिव्याः ।
अहिर्बुध्न्य उत नः शृणोतु वरूत्र्येकधेनुभिर्नि पातु ॥ ५ ॥

अभि ये । अभिस्पृशन्ति[1] । ये[2] । सम्भक्तारः । इतरेतरजीवा[3]। राति[4] दातारम् । देवलोकस्य । रातिं भजन्तः । पृथिव्या मनुष्याणामभिलषितानि प्रयच्छन्तो देवास्ते सर्वेऽस्माकं स्तोतृ[6] शृण्वन्ति[7] । शृणोतु[8] । अपि च । अहिर्बुध्नः[9] । प्रकृति[10] च । एकधेनुभिर्नाम स्वानुचरीभिः[11] । अस्मान् । निपातु[12] ।

अनु तन्नो जास्पतिर्मंसीष्ट रत्नं देवस्य सवितुरियानः[13] ।
भगमुग्रोऽवसे जोहवीति भगमनुग्रो अध याति रत्नम् ॥ ६ ॥

अनु तत् । अनुमन्यताम् । तत् । अस्माकम् । जास्पतिस्त्वष्टा[15] । रत्नम्[16] । देवस्य । सवितुः[17] स्वभूतं तेन प्रत्नम् । इहागच्छन्[18] । सवित्रा भजनीयं सवितारम् । उद्गूर्णा[20] । आभ्यो[21] रक्षणाय । आह्वयति[22] । भगम्[23] । अनुद्गूर्णः[24] । याचतो[25] । रत्नम्, 'भगो वायमर्धर्चः' इति[26] ।

---

१. अभि ये is missing in A.
२. सवितारमभिलक्ष्य सपन्ते परिचरन्ति Sy.
३. यजमानाः Sy
४. जीवाः is suggested for जीवो । परस्परं संहता भूत्वा Sy.
५. मित्रभूतम् Sy.
६. वानसेविनः Sy.
७. ०व्यां मनु० M. भूमेश्च Sy.
८. स्तोत्रं is suggested for स्तोतृ ।
९. शृणन्ति A. गृणन्ति M.
१०. शृणोतु is missing in A. सवितृविषयं स्तोत्रं शृणोतु Sy.
११. अहि ब बुध्नो A. बुध्न्यः is suggested for ० बुध्नः ॥ बुध्नेऽन्तरिक्षे भवो बुध्न्यः । एतीत्यहिः । एतत्पदद्वयाभिधो मध्यमस्थानोऽग्निरहिर्बुध्न्य इत्युच्यते । सवितृभूतः सोऽपि Sy.
१२. वरूत्री is suggested for प्रकृति ॥ वाग्देवी च सवितृसहिता सती Sy.
१३. ०रीहिः A. मुख्याभिर्गोभिः Sy.
१४. नितरां पालयतु Sy.
१५. जानां पति० A. प्रजानां पालकः सविता देवः Sy. १६. रमणीयं तत्प्रसिद्धं धनम् Sy.
१७. स्वस्य सम्बन्धि Sy.
१८. अस्माभिर्याच्यमानः Sy.
१९. भगसंज्ञकं देवं वा Sy.
२०. उद्गूर्णः is suggested for उद्गूर्णा ॥
२१. आपद्भ्यो is suggested for आभ्यो ॥ ओजस्वी स्तोता Sy.
२२. ०यन्ति इति A. भृशं ह्वयन्ति Sy.
२३. भनम् A. एतत्संज्ञकं सवितारं वा Sy.
२४. असमर्थः स्तोता Sy.
२५. याचते is suggested for याचतो ॥
२६. ०र्चं मिति M. A. fragment of KSA. 36. 38.p. 25
२७. VM. ignores अर्ध॥ अध अपि च Sy.

शं नो भवन्तु वाजिनो हवेषु देवताता मितद्रवः स्वर्काः ।
जम्भयन्तोऽहिं वृकं रक्षांसि सनेम्यस्मद्युयवन्नमीवाः ॥ ७ ॥

शन्नः । सुखाः । भवन्तु । वाजिनः । ह्वानेषु । देवतातौ यज्ञे । मितद्रवो मितगमना अध्वानं विमाय गच्छन्त. । स्वञ्चनाः । हिंसन्तः । अहिञ्च । वृकञ्च । रक्षांसि च । क्षिप्रम् ।

---

१. वैश्वदेवे पर्वणि वाजिनस्य हविषः 'शं नो भवन्तु' इत्यादिके द्वे याज्यानुवाक्ये । सूत्रितञ्च— 'शं नो भवन्तु वाजिनो हवेषु वाजेवाजेऽवत वाजिनो न इत्यूर्ध्वज्ञुरनवानं याज्याम्' (ĀŚS. 2. 16.) इति Sy. 'शं नः' इति ऋक्त्रयेणाज्यहोमोऽश्वाभिमन्त्रणं वा Mah. उत्तरेण तूचेनैतानेवाश्वान्स्तौति U. वसिष्ठस्येदमार्षम् Dur. वसिष्ठस्य SKN.

२. सुखाय Sy. सुखकराः Mah. शमिति सुखनाम । सुखरूपाः U. सुखहेतवः BB. सुखाः सन्तु Dur. शं सुखम् SKN.

३. एतदभिधायका देवाः Sy. अश्वाः Mah U. BB. रश्मयो देवाश्वा वा SKN.

४. अस्मदीयेषु स्तोत्रेषु Sy. आह्वानेषु सत्सु Mah. आह्वानेषु U. Dur., SKN. आह्वानेषु । पूर्ववदप् BB.

५. देवानां कर्म देवतातिः ।....देवतातौ यज्ञे Mah. U. देवास्तायन्ते विस्तीर्यन्ते पृथक् पृथगाराध्यन्तेऽस्मिन्निति देवतातिर्यज्ञः BB. एतस्मिन्.. .यज्ञे Dur. देवताता यज्ञनाम । यज्ञे SKN.

६. मितद्रवणा मितमार्गाः Sy. मितं परिमितं द्रवन्ति गच्छन्तीति मितद्रवः । क्विपि नुगभाव आर्षः Mah. ते हि मितं द्रवं ? (न्ति) गच्छन्ति सुखकरम् U. मितमल्पमिव महान्तमपि पन्थानं द्रवन्ति गच्छन्ति मितद्रवः । यद्वा मितं शीघ्रं गच्छन्तीति मितद्रवः ।....मितं द्रवणं येषामिति वा बहुव्रीहिः BB. किं लक्षणाः ?.... श्लिष्टं शोभनं ये द्रवन्ति Dur. मितं त्रैलोक्यमात्रं शिक्षितत्वात् पथ्यानुदेश एव पवं न्यस्यन्तो द्रवन्ति गच्छन्ति ये ते मितगामिन इत्यर्थः SKN.

७. सञ्चनाः M. शोभनाज्ञाः Sy. शोभनोऽर्को येषां ते सुरुचः स्वञ्चना वा Mah. सुरोचनाः स्वञ्चना वा U. शोभनगमनाः शोभनस्तुतयो वा BB. ये....शोभनमञ्चन्ति गच्छन्ति स्वर्चनाः शोभनं वाऽर्चनं येषां स्तुतिः । स्वर्चिषो वा । येषां शोभना अर्चिषो दीप्तयस्त आगच्छन्तु Dur. अञ्चतेरर्चतेर्वा ।.. स्वञ्चनाः सुगमना इत्यर्थः । स्वर्चना वा सुष्ठु स्तुतयः । स्वर्चिषो वा सुदीप्तयः SKN.

८. हिंसन्तः is missing in A. हिंसन्तो वाजिनो देवाः Sy. नाशयन्तः Mah. क्षोभयन्तः U. भञ्जयन्तः BB. आह्वानेष्वस्माकं जम्भयन्तः Dur. स्तम्भयन्तः प्रतिबध्नन्तः । हिंसाकर्मा वा, जम्भयन्तो हिंसन्तो विनाशयन्तः SKN.

९. आगत्य हन्तारम् Sy. सर्पम् Mah. U. आगत्य हन्तारम् BB. यश्चास्मानाहन्ति Dur.

१०. भक्तञ्च M. वसूनामदातारम् । चोरमिति शेषः Sy. अरण्यश्वानम् Mah. अपहर्तारम् । कुक वृक आदाने' इगुपधात्कः BB. यश्च वृकस्तस्करो मुष्णाति Dur. व्याघ्रं रक्षांसि च SKN.

११. राक्षसान् Mah. रक्षांसि धर्मविघ्नकारीणि BB. रक्षांसि च येऽस्मान् रहसि क्षिण्वन्ति, तांश्चास्मत्तो जम्भयन्तो हिंसन्तः Dur.

१२. क्षिप्रमम् A. पुरातनाः Sy. सनेमीति पुराणनाम । इह तु क्षिप्रवाचकः Mah. सनेमीति पुराणनाम । इह तु क्षिप्रवचनो वाक्यवशात् U. क्षिप्रमित्येके, पुराणमित्यन्ये BB. सामर्थ्यादिह सनेमीति क्षिप्रनाम Dur. पुराणनामान्यत्र । इह तु पदान्तरसम्बन्धसामर्थ्यात् । क्षिप्रार्थमित्याह । क्षिप्रम् SKN. सनेमि पुराणनामैतत् Ngh. 3.7.

अस्मत्तः[1]। यावयन्तु[2]। अमीवाः[3]।

वाजेवाजेऽवत वाजिनो नो धनेषु विप्रा अमृता ऋतज्ञाः।
अस्य मध्वः पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैः॥ ८॥

वाजेवाजे[4]। सङ्ग्रामेसङ्ग्रामे। रक्षत[5]। हे अश्वाः[6]! अस्मान्। धनेषु[7] शत्रुभ्यः आजिहीर्षितेषु[8]। मेधाविनः[9]। अमृता[10] वाजिनोभ्यश्च[11] रूपं? केचन[12] देवाः। सत्यज्ञाः[13]। अमुम्[14]। सोमम्। पिबत[15]। माद्यत[16] च। अथ

---

१. तेऽश्वाः.... अस्मत्सकाशात् Mah. अस्मत्सकाशादपनयन्त्वित्यर्थः SKN.

२. यावयन् M. पृथक्कुर्वन्तु Sy. पृथक्कुर्वन्तु। 'यु पृथग्भावे' Mah. पृथग्भावे, पृथक् कुर्वन्तु U. यावयन्तु पृथक् कुर्वन्तु BB. सामर्थ्यादपेत्याध्याहृत्य, अपयावयन्तु। अपमिश्रयन्तित्यर्थः। इष्टं च रक्षसां नाशनं न मिश्रणमिति Dur. यौतिरत्र पृथग्भावार्थेऽन्तर्णीतण्यर्थश्च। पृथग्भावयन्तु SKN.

३. रोगान् Sy. व्याधीन् Mah. U. रोगांश्च युयवन्नित्येव। आगत्य हिंसन्तीत्यमीवाः। मीयतेराङ्पूर्वाद् वप्रत्ययः। उपसर्गस्य च ह्रस्वत्वं निपात्यते BB. न च सर्पादीनेव केवलान्। किं तर्हि? अमीवा रोगान् हिंसितव्यान्। स्त्रीलिङ्गनिर्देशो जात्यभिप्रायः। रोगजातीश्च हिंसितृजातीश्चेत्यर्थः Dur.

४. VM. ignores नः॥ नोऽस्माकम् Sy. सुखा नो भवन्तु वाजिनो ह्वानेषु देवतातौ यज्ञे। मितद्रवः सुमितद्रवः। स्वर्काः स्वर्चना इति वा। स्वर्चना इति वा। स्वर्चिष इति वा। जम्भयन्तोऽहिं च वृकं च रक्षांसि च। क्षिप्रमस्मद्यावयन्तु। अमीवा देवाश्वा इति वा N. 12. 44., SKN. IV. 144. सोऽनुमन्त्रयते। शं नो भवन्तु वाजिनो हवेषु देवताता मितद्रवः स्वर्काः। जम्भयन्तोऽहिं वृकं रक्षांसि सनेम्यस्मद्युयवन्नमीवा This stanza=SB. 5. 1. 5. 22. p. 431. YV. 9. 16.=TS. 1.7. 8.2

५. वाजे is missing in A.

६. सर्वेषु युद्धेषु Sy. सर्वस्मिन्नग्ने समुपस्थिते सति Mah. अग्नेऽग्ने, उपस्थिते सति U. अग्नेऽग्ने साध्ये BB. ७. पालयत Sy. Mah. U. रक्षत तल्लम्भयित्वा BB.

८. अश्वो A. हे एतन्नामकाः देवाः! Sy.

९. धननिमित्तेषु Sy. धनेषु चोपस्थितेषु सत्सु Mah. धनेषु चोपस्थितेषु U. धनेष्ववतेति धनानि चास्मांल्लम्भयत BB.

१०. ०जिहिर्षि० A. ११. किम्भूता यूयम्?... परिदृष्टकारिणः Mah. U. यथा तद्वागिणः BB. १२. अमरणधर्माणः Sy. Mah. U. अमरणाः BB. १३. ०जिनेभ्य० A.

१४. के न च M. The passage वाजिनोभ्यश्च रूपं केचन देवाः, is an explanation of वाजिनः; therefore it should immediately follow हे अश्वाः। The reading of the above passage is doubtful. वाजिन ऋभुविभ्वा वाज इत्येवंरूपाः केचन देवाः or वाजिनो ऽश्वरूपाः केचन देवाः is suggested for the passage. १५. सत्यं जानन्त एवम्भूताः सन्तो यूयम् Sy. सत्यज्ञा वा यज्ञज्ञा वा U. सत्यज्ञाः सत्यवन्तः BB.

१६. ततो यूयमिमं सोमम् Sy. कर्मणि षष्ठी। इदम् Mah. अस्य नैवारचरुलक्षणस्य U.

१७. मधुरोपेतम् Sy. धावनात्पूर्वं पश्चाच्चावघ्रायमाणं नैवारचरुलक्षणं मधुरं हविः Mah. मधुनः U. मधुसदृशस्य घृतस्य। पूर्ववत् कर्मणि षष्ठी। नुमभावश्छान्दसः BB.

१८. पिबतः A.

१९. सोमपानानन्तरं यूयं तृप्ता भवत Sy. पीत्वा च....तृप्ता भवत Mah. तृप्यध्वम्। नैवारं चरुमवजिघ्रन्त्यश्वस्य तदभिप्रायमेतत् U. पीत्वा च....तृप्यत। 'मद तृप्तियोगे' चुरादिरनुदात्तेत् BB.

तृप्ताः[1] । गच्छत[2] । पथिभिः[3] । देवयानैः[4] ।

VII. 39.

ऊर्ध्वो अग्निः सुमतिं वस्वो अश्रेत्प्रतीची जूर्णिर्देवतातिमेति ।
मेजाते अद्री रथ्येव पन्थामृतं होता न इषितो यजाति ॥ १ ॥

ऊर्ध्वः[5] । ऊर्ध्वः[6] । अग्निः[7] । सुष्टुतिमस्माकम्[8] । वस्वो दानाय[9] । श्रयति[10] । पृथिवी[11] क्षिप्ता ? उषा[12] । यज्ञम्[13] । एति[14] । भेजाते[15] । शत्रूणामाहर्तारः[16] विद्रवा यूयं[17] आजूं[18] रथ्येव पन्थानं[19] महान्तमस्मिन् काले । यक्षम्[20] । होता । अस्माकम्[21] । प्रेषितः[22] । यजति[23] ।

---

१. यूयम् Sy. ततस्तृप्ताः सन्तः Mah. तृप्ताश्च सन्तः U. तृप्ताश्च BB.

२. गच्छति A. ३. मार्गैः Sy. Mah. U.

४. देवगमनसाधनैः Sy. देवाधिष्ठितैः Mah. देवाध्यासितैः U. देवा यैर्गच्छन्ति तैर्मनोहरैः BB. वाजे-वाजेऽवत । वाजिनो नो धनेषु विप्रा अमृता ऋतज्ञाः । अस्य मध्वः पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैरिति । SB. 5. 1. 5. 24. p. 431. This stanza=YV. 9. 18.=TS. 1.7. 8. 2

५. 'ऊर्ध्वो अग्निः' इति सप्तर्चं षष्ठं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वैश्वदेवम् । 'ऊर्ध्वः सप्त वैश्वदेवं तु' इत्यनुक्रमणिका (36. 39. p. 25.) । सूक्तविनियोगो लैङ्गिकः । द्वितीये छन्दोमे प्रउगशस्त्रे 'ऊर्ध्वो अग्निः' इति वैश्वदेवस्तृचः । सूत्रितञ्च—'ऊर्ध्वो अग्निः सुमतिं वस्वो अश्रेदुत स्या नः सरस्वती जुषाणेति प्रउगम्' (ĀSS. 8. 10.) इति Sy.

६. उद्गमनः सन् Sy.

७. अङ्गनादिगुणविशिष्टः Sy.

८. ष्टिः सुष्मति० A. सुष्ठुति० M. अस्मदीयां शोभनां स्तुतिम् Sy.

९. वासकस्य स्तोतुः Sy.

१०. श्रयतु, सेवताम् Sy.

११. प्रतीची is suggested for पृथिवी ॥ अभिमुखी Sy.

१२. सर्वासां प्रजानां जरयित्री उषोदेवता Sy.

१३. गच्छति Sy.

१४. भोजाते M. सेवेते Sy.

१५. अद्री आद्रियन्तौ श्रद्धावन्तौ पत्नीयजमानौ Sy.

१६. माहर्तारावद्री युवामाजिम् is suggested for ०माहर्तारः विद्रवा यूयम् आजूम् ॥

१७. रथ्ये इव M. रथिनाविव Sy.

१८. यज्ञमार्गम् Sy.

१९. The passage beginning with वस्वो दानाय and ending with अस्माकम् is missing in A. अस्मदीयम् Sy.

२०. तथा सम्प्रेषितः Sy.

२१. यजतु । करोत्यित्यर्थः Sy.

प्र वावृजे सुप्रया बर्हिरेषामा विश्पतीव बीरिट इयाते ।
विशामक्तोरुषसः पूर्वहूतौ वायुः पूषा स्वस्तये नियुत्वान् ॥ २ ॥

प्र वावृजे । प्रवृत्तमासीत् । सुप्रयाणम् । एषाम् । बर्हिः । आगच्छतो वायुः पूषा च । अन्तरिक्षे । राजानाविव णे । मनुष्याणाम् । रात्र्याः ।

---

१. अथ चतुर्थमहो वैश्वदेवस्तुत् Mah. वैश्वदेवस्तुतिः U. वसिष्ठस्यार्षम् Dur.

२. प्रवृक्तमासीत् is suggested for प्रवृत्तमासीत् ॥ प्रवृज्यते आसाद्यत इत्यर्थः Sy. एषां केषाम् ? येषां बर्हिः प्रवावृजे, प्रवृज्यते प्रस्तीर्यते, 'वृजी वृत्तित्यागयोः' ? लिट् Mah. प्रवृज्यते प्रच्छिद्यते U. बर्हिः प्रस्तीर्यत इत्यर्थः Dur. व्रजिस्तरणार्थः । ततः कर्मणि लट् । प्रवृज्यते प्रस्तीर्यते SKN.

३. सु प्रायणम् A. शोभनाग्रेन युक्तम् Sy. कीदृशं बर्हिः ? सुप्रयाः शोभनं प्रयः प्रगमनं प्रस्तरणं यस्य तत् सुप्रयः । दीर्घश्छान्दसः । सम्यग्विधिना प्रस्तीर्णमित्यर्थः Mah. सुप्रयाणं सुगमनम् U. सुप्रगमनं यत्सुखमभिगच्छन्ति देवताः Dur. सुखं गम्यते यस्मिन् देवताभिः SKN. ४. यजमानानां सम्बन्धि Sy. एषां यजमानानाम् Mah. येषामिति सर्वनामव्यत्ययः । येषां यजमानानाम् U. एषामृत्विग्यजमानानां स्वभूतम् SKN.

५. कुशमयम् Sy. किं पुनस्तत् ? बर्हिर्वेदिरास्तरणाद्बर्भात्मकस्य SKN.

६. आगच्छताम् Sy. 'ई कान्त्यसनगतिव्याप्त्यादौ' व्यत्ययेन तङ् Mah. आगच्छतमश्विनौ U. प्रास्तीर्णे तस्मिन्... आ इयाते Dur. विस्तीर्णे च तस्मिन् । आकार 'इयाते' इत्यनेन सम्बध्यते । . .ततो बीरिटाद्यङ्गं प्रति आ इयाते, आगच्छतम् SKN. ७. वायु यूषा A.

८. अन्तरिक्षे यद्वा गणे Sy. अन्तरिक्षे वर्तमानौ । ....बीरिटशब्दो गणवाचकः Mah. बीरिटशब्दो गणवचनः U. क्व पुनरवस्थितावेयाते ? इत्युच्यते, बीरिटेऽन्तरिक्ष इत्यर्थः । ....अन्तरिक्षेणैव हि देवता आगच्छन्तीति बीरटमन्तरिक्षमित्युपपद्यते Dur. बीरिटेऽन्तरिक्षे सप्तमीश्रुतेः स्थितौ सन्तौ । पञ्चम्यर्थे वा सप्तमी SKN.

९. Missing in M. ग seems missing before णे । गणे should therefore be the proper reading. गणे seems to be another meaning of बीरिटे ! So it should follow immediately अन्तरिक्षे ॥ इदेतीदानीमर्थे । इदानीमस्मदीयानां प्रजानां पालकौ, यद्वा विश्पतीवेत्युपमा । राजानौ यथा । .... अस्मिन्पक्षे विशामित्युभयत्र सम्बध्यते Sy. तत्र दृष्टान्तः—काविव ? विश्पतीव यथा विशां पती द्वौ राजानौ....आगच्छतस्तद्वत्तावपि तेषां स्वस्तय इयाते Mah. सर्वस्य पती इव । ....यथा विशां मनुष्याणां पतौ राजानौ ...अवस्थितौ U. विश्पती सर्वस्य जगतः 'पातारौ वा पालयितारौ वा' धात्वन्यत्वमर्थे कत्वम् । इव पादपूरण एवेत्येतस्यार्थे वा । ....'अपि वा' अयमिवशब्दः 'उपमार्थे' एव स्यात् । विश्पती इवेति सर्वपती इवेति । 'सर्वपती इव राजानौ बीरिटे गणे' अवस्थितौ । ....यस्मिन्नपि पक्षे गणो बीरिटशब्देनोच्यते तस्मिन्नपि पक्षे विश्पती राजानौ सर्वदा गणमध्यगतावेवागच्छत इत्युपपद्यत एव Dur. इव सम्प्रत्यर्थत्वात्पदपूरणः । विश्वशब्दस्य वलोपेन च विश्पती सर्वस्य स्वामिनौ पातारौ । ....अथवा विशां पती विश्पती राजानौ कौचित् । बीरिटोऽपि मनुष्यगण इव स्वार्थ एव । यथा कौचिद् विशां पती राजानौ बीरिटे स्वस्मिन् सैनिके मनुष्यगणे स्थितौ ततो वाऽऽगच्छेतां तद्वदागच्छतम् । विशामित्येतत् पूर्वहूतावित्येतेन व्यवहितेनापि सामर्थ्यात्सम्बध्यते SKN.

१०. प्रजानाम्, मनुष्याणां वा Sy. मनुष्याणां गणे Mah. U. आह कस्य पुनरेयाते ? कस्मिन् काल एयाते ? कौ वा, एयाते ? कं वाऽर्थं पुरस्कृत्यैयाते ? इत्युच्यते—एषां....मनुष्याणां तासु तासु क्रियास्वाहूयमानौ Dur. विशां मनुष्याणामृत्विग्यजमानानाम् SKN.

११. रात्रेः सम्बन्धिन्याः Sy. रात्रेः Mah. रात्र्या अवसाने U. रात्र्या अपगमे सति Dur. कस्मिन् काल आगच्छतम् ? उच्यते । अक्तो रात्रिनामैतत् । रात्रेः SKN.

विवषवासेइच्च । पूर्वस्यामभिभूतौ । वायुः । नियुत्वान् । पूषा च । अस्माकं स्वस्तये, निरुक्तं द्रष्टव्यम् ।

ज्मया अत्र वसवो रन्त देवा उरावन्तरिक्षे मर्जयन्त शुभ्राः ।
अर्वाक्पथ उरुज्रयः कृणुध्वं श्रोता दूतस्य जग्मुषो नो अस्य ॥ ३ ॥

ज्मयाः । पृथिव्याः । अस्मिन् देवयजने । अरमयन्त । पार्थिवाः । देवाः । उरौ । अन्तरिक्षे च तत्रत्याः ।

---

१. विवासे उषसश्च is suggested for विवषवासेइच्च ॥ उषसः सकाशात् Sy. उषसो दिनस्य Mah.
उषस आगमनकाले U.
उषसश्चागमनकाले Dur. उषसश्चापि वा स काल इति SKN.

२. ०भिभूतौ is suggested for ०भिभूतौ ॥ पूर्वस्मिन्नाह्वाने सति Sy. पूर्वा चासौ हूतिश्च पूर्वहूतिस्तस्याम् । प्रथमाह्वानकाले । अग्निहोत्रहोमकाल इत्यर्थः । उषसः पूर्वाह्वाने पूषा रविरायाति रात्रौ वायुः Mah. पूर्वस्मिन्नाह्वानकाले U.
प्रथम एवाह्वानकाले Dur.
पूर्वस्मिन्नाह्वाने SKN.

३. वायुना वायुसख्यत्वादग्निर्लक्ष्यते, रात्रिहोमस्याग्निदेवत्यत्वात् Mah.

४. नियुच्छब्देन वडवा उच्यन्ते । तद्वान् वायुः, पूषा च Sy. नियुतो नियुत्संज्ञा अश्वाः सन्त्यस्य सः । नियुतो वायोरित्युक्तेः Mah. अश्ववान् U. आह नियुत्वान् कस्मात् ? इत्युच्यते 'नियुतोऽस्याश्वाः' अथ 'नियुतः कस्मात् ? उच्यते, 'नियमनात्' नीचैर्हि ते नियम्यन्ते । 'नियोजनाद्वा' नियोज्यन्ते हि रथे । 'नियुतो वायोः' इत्येतस्मात्कारणात् विप्रकृष्टोऽपि नियुत्वच्छब्दो वायुशब्देनैव संयोजितो भाष्यकारेण, नहि पूष्णो नियुद्भिः सम्बन्धोऽस्ति Dur.
नियुतो वायोरित्यादिष्टोपयोजनत्वान्नियुत्वानिति व्यवहितमपि वायुना सम्बध्यते । वायुश्च नियुत्वान् SKN.

५. प्रजानां स्वस्तये क्षेमाय Sy. कल्याणाय Mah. स्वस्त्ययनाय, अविनाशाय U. किमर्थमागच्छतम् ? स्वस्तये, अविनाशाय यज्ञस्यास्माकं चेत्यभिप्रायः । सर्वस्याऽऽत्मानौ पालयितारौ वा कृत्स्नस्य नियुक्तत्वात् । कस्मान्नियुज्यन्ते ? अस्याश्चादिष्टोपयोजनं दर्शयति--नियुक्तः कस्मात् ? नियमनाद्वा युजेर्वा SKN.
स्वस्त्ययनार्थमेयाते यजमानस्य Dur.

६. बीरिटं तैटीकिरन्तरिक्षमेवाह पूर्वं वयतेः उत्तरमिरतेः । वयांसीरन्त्यस्मिन् भांसि वा । तदेतस्यामृच्युदाहरन्ति । अपि निगमो भवति ...प्रवृज्यते सुप्रायणं बर्हिरेषाम् । एयाते सर्वस्य पातारौ वा पालयितारौ वा । बीरिटमन्तरिक्षम् । भियो वा भासो वा ततिः । अपि वोपमार्थे स्यात् । सर्वपती इव राजानौ । बीरिटे गणे मनुष्याणाम् । रात्र्या विवासे पूर्वस्यामभिभूतौ । वायुश्च नियुत्वान् । पूषा च स्वस्त्ययनाय । नियुत्वान् नियुतोऽस्याश्वाः । नियुतो नियमनाद्वा । नियोजनाद्वा N. 5. 28., SKN. II.383.

७. वसिष्ठस्यार्षम् dur वसिष्ठस्य SKN.

८. पृथिव्यां भवाः Sy. 'ज्मा पृथिवी' । तस्यां भवा ये नित्यं भजन्ति ते ज्मयाः dur. ज्मेति पृथिवीनाम । ज्मयेति तृतीया सप्तम्याः स्थाने । ...ज्मायाम् SKN.

९. यज्ञे Sy. एतस्मिन् कर्मण्यस्मिन्वा लोके dur. अत्रैव पृथिव्याम् SKN.

१०. रमयन्ताम् Sy

११. वसुसंज्ञकाः Sy. त्रिस्थान्यनां वसूनां पार्थिवास्तु वसवः SKN.

१२. विस्तीर्णे Sy. विस्तृते dur. विस्तीर्णे SKN.

१३. अन्तरिक्षे स्थिताः Sy.

गच्छन्ति[1] । शोभनाः[2], ष्टीन्[3]गतिकर्मसु[4] पठितः[5] । अर्वाचीनानधोमुखान्[6] । कुरुध्वम्[7] । युष्माकं मार्गानित[8] आ-गच्छत[9] । हे महावेगाः[10] । शृणुत[11] च । युष्माकं जग्मुषः[12] । अस्माकम्[13] । अस्य[14] । दूतस्याग्नेर्वचं[15] ।

ते हि यज्ञेषु यज्ञियासु ऊमाः सधस्थं विश्वे अभि सन्ति देवाः ।
ताँ अध्वर उशतो यक्ष्यग्ने श्रुष्टी भगं नासत्या पुरंधिम् ॥ ४ ॥

ते हि[16] । तेषु[17] । यज्ञेषु । यज्ञार्हाः[18] । अविकारम्[19] । आसनम्[20] । अभि । हि[21] । भवन्ति[22] । सर्वे ।

---

१. परिचर्यन्ते Sy. माष्टिर्गत्यर्थः । गमयन्तो यद्यत्तेषां गमयितव्यम् । अथवा वर्तमानाः dur. माष्टीति गतिकर्मा रमणार्थे वा । . . प्रकृतत्वाद् वृष्टिलक्षणा आपो गमयन्ति वाऽऽत्मानमित्यर्थः SKN.

२. दीप्यमानाः मरुतश्च Sy.

३. ष्टीन् A. माष्टि० is suggested for ष्टीन् ।

४. गतिकर्मसु is missing in M.

५. पठितो A. The passage माष्टिर्गतिकर्मसु पठितः should immediately follow गच्छन्ति and precede शोभनाः ॥

६. ०नातो मुखात् A. अस्मदभिमुखं यथा भवति तथा Sy. एवमनयोः स्थानयोर्वंसून् विभज्याधुना द्युस्थानांस्तान्कृत्वा ब्रवीति । ये यूयमेवं त्रिस्थानास्तान्वो ब्रवीमि. श्रुत्वा चास्मानर्वागाभिमुख्येन Dur. प्रत्यक्षकृतत्वान्मन्त्रस्यामन्त्रितश्रवणाभावाच्चैकवाक्यतायै यत्तदध्याहारः । य ईदृग्गुणस्थितास्तेऽर्वाक् । लिङ्गवचनयोर्व्यत्ययः । अर्वाचोऽस्मदभिमुखान् SKN.

७. कुरुत Sy. मार्गान् प्रहतान् कुरुध्वमित्येतदाशास्महे Dur. कुरुत । नित्यमस्मद्यज्ञेष्वागच्छत येनास्मान् प्रत्यागमनमार्गाः प्रहता भवन्तीत्यर्थः SKN.

८. युष्मदीयान् मार्गान् Sy. बहुप्रकारं शतसहस्रमागमनेनैव पथो मार्गान् Dur.

९. हे प्रभूतगमनाः ! वसवः ! मरुतः ! च यूयम् Sy. हे उरुजवाः SKN.

१०. शृणुत च यदयं ब्रवीति Dur., SKN.

११. ज is written twice in A. युष्मान् प्रति गतवतः Sy.; Dur. गतवतो युष्मान् प्रति SKN.

१२. अस्मदीयस्य Sy. अस्मद्दूतस्य Dur. कस्य दूतस्य ? . . . अस्माकं स्वभूतस्य SKN.

१३. अग्नेः SKN.; Dur.

१४. ग्नेः पच M. ०ग्नेर्वचः is suggested for ०ग्नेर्वचं ॥ दूतस्याग्नेराह्वानम् । अग्निर्हि यजमानानां दूतः सन् देवानाह्वयतीत्यर्थः Sy. अर्वाक् पथ इत्यादिना त्रिस्थानानामध्येषणा । द्युस्थानो देवगण इत्यादिरपपाठः । केचित्तु श्रोता दूतस्येति चतुर्थेन पादेन द्युस्थानेषु वसुषु भाष्यं योजयन्ति SKN.

१५. ज्मया अत्र वसवोऽमन्त देवाः । ज्मा पृथिवी । तस्यां भवा उरौ चान्तरीक्षे मर्जयन्त गमयन्त रमयन्त । शुभ्राः शोभमानाः । अर्वाच एनान्पथो बहुजवाः कुरुध्वम् । शृणुत इत्यस्य जग्मुषो नोऽस्याग्नेः N. 12. 43., SKN. IV. 143—144.

१६. ते प्रसिद्धाः Sy. १७. यज्ञसम्पादिनः Dur.

१८. अवितारः is suggested for अविकारम् ॥ रक्षकाः Sy. अवितारो रक्षितारोऽवनीया वा तर्पणीयाः Dur. अवितारोऽवनीयास्तर्पणीयाः SKN.

१९. सह स्थानम् Sy. वैश्वदेवं समानं स्थानम् Dur. सधं स्थीयते यत्र तत्स्थानं वेद्याख्यम् । सधस्थम्—'सध मादस्थयोः' (Pa. 6. 3. 96.) इति सहस्य सधादेशः SKN.

२०. अहि A. खलु Sy. २१. हिशब्दो यस्मादर्थे, यस्मात् SKN.

२२. आक्रामन्ति Sy. अभितिष्ठन्ते Dur. अभिभवन्ति SKN.

देवाः[1] । तान्[2] । यज्ञे । कामयमानान्[3] । यज[4] । अग्ने ! क्षिप्रम्[5] । भगवम्[6] । बहुप्रज्ञम्[7] । अश्विनौ च[8] ।

१. देवा A.

२. तव् M. देवान् Sy. किं तेषामिति ? तान् विश्वान् देवान् Dur. यस्मादिति श्रुतेस्तस्मादित्यध्याहारः । तस्मात्तान् SKN.

३. अस्मदीये यज्ञे Sy. एतस्मिन्नध्वरे यज्ञे Dur.

४. स्वमंशं कामयमानान् Dur.

५. यजामहे SKN.

६. अविलम्बमानः. . . एवमत्र यागस्य विघ्नभयात् क्षिप्रस्येष्टत्वात् 'श्रुष्टीति क्षिप्रनाम' इत्युपपद्यते । अन्यत्र हि वक्ष्यति 'श्रुष्टीवरीः सुखवतीः' इति तस्मादेतदनेकार्थमपि भवति Dur. श्रुष्टीति क्षिप्रनाम Ngh. 4. 3. N. 6. 13.

७. भगवन् M. भगम् is suggested for भगवम् ॥ एतत्संज्ञं देवम् Sy.

८. पुरूणां ध्यातारमिन्द्रम् Sy. पुरन्धिशब्दोऽत्र गुणपदत्वात् सन्विह्यते, इति विचार्यते तत्कः पुरन्धिरिति ? . . . अत्र पुरस्तात् 'श्रुष्टी भगम्' इति तस्यार्यमन्वादेश इत्येकमाचार्यमतम् । नासत्यावनन्तरावपि सन्तौ न सन्विह्येते, द्विवचनवाच्यत्वात्तयोः । एकवचनान्तत्वात्पुरन्धिशब्दस्य च । इन्द्र उक्तः स्यात् पुरन्धिशब्देन इत्यपरं मतम् । किं कारणम् ? स हीन्द्रो बहुकर्मतमः अन्येभ्यो देवेभ्यः । धीरिति कर्मनामसु पठितम् । तद्यस्य पुरु बहु स पुरन्धिः स चेन्द्रः । तस्मात् पुरन्धिरिन्द्र इत्युपपद्यते । अथवा—अन्येन पुरन्धित्वमिन्द्रस्य स्यात्. . . मेघपुरो ह्यसावेव वारयति Dur. पुरन्धीति धीशब्दस्य धीकर्मसु पठितत्वात्, बहुकर्मा बहुप्रज्ञो वोच्यते । अतोऽसंविज्ञानपदत्वाभावाद् गुणपदत्वे सति प्रकृतस्यैव कस्यचिद् गुणपदमाहोस्विदपूर्वस्येति सन्देहाद्विचारार्थः प्रश्नः । तदिति वाक्योपन्यासार्थः । कोऽयं पुरन्धिर्नाम ? . . . आश्विनेन सत्यप्यानन्तर्ये द्विवचनान्तत्वात् सम्बन्धानुपपत्तेर्भगस्यान्वादेशादिह भग इत्येकमतम् । सधेरयं सम्बन्ध इत्युक्तम् । सामर्थ्यादप्रकृतेनापि सम्बन्धो भवतीत्याह 'इन्द्र इत्यपरम्' तत् सामर्थ्य दर्शयति । देवराजत्वादतिशयेनासौ प्रकृष्टश्च बहुकर्मा । व्युत्पत्त्यन्तरसामर्थ्याद्वा पुरामसुरसम्बन्धिनीनामतिशयेन दारयितेन्द्रः SKN.

९. सत्यावेव नासत्यावित्यौर्णवाभ आचार्यो मन्यते । तौ हि सत्यमेव ब्रूतो न कदाचिदप्यसत्यम् । तस्मान्नासत्यावित्युच्येते । द्विःप्रतिषेधः प्रकृतिमापादयति । अथवा सत्यस्योदकस्य यज्ञस्य वा प्रणेतारौ नासत्यौ, तथा हि आग्रायण आचार्यो मन्यते Dur. नासत्यौ चाश्विनौ । . . द्वौ प्रतिषेधौ प्रकृतमर्थं गमयतः । अविसंवादकावित्यर्थः, और्णवाभो मन्यते । नित्यपक्षे . . . सत्यस्याविसंवादिनोऽर्थस्य प्रणेतारौ । तस्मिन् हि काले मनसः प्रसादः । . . . सत्यशब्दाश्रयतेश्च नासत्या इत्याग्रायणो मन्यते । नासिकाप्रभवावित्यैतिहासिकाः । नासिकाशब्दात् प्रभवार्थे त्यपि नसादेशो द्रष्टव्यः । नासिकातः प्रतिलब्धः सन् SKN.

१०. श्रुष्टीति क्षिप्रनाम । आशु अष्टीति. . . तानध्वरे यज्ञे । उशतः कामयमानान् । यजाग्ने । श्रुष्टी भगम् । नासत्यौ चाश्विनौ । सत्यावेव नासत्यावित्यौर्णवाभः । सत्यस्य प्रणेतारावित्याग्रायणः । नासिकाप्रभवौ बभूवतुरिति वा । पुरन्धिर्बहुधीः । तत्कः पुरन्धिः ? भगः पुरस्तात्तस्यान्वादेश इत्येकम् । इन्द्र इत्यपरम् । स बहुकर्मतमः । पुरां च दारयितृतमः । वरुण इत्यपरम् । तं प्रज्ञया स्तौति N. 6. 12. 13., SKN: II 431.

आग्ने गिरो दिव आ पृथिव्या मित्रं वह वरुणमिन्द्रमग्निम् ।
आर्यमणमदितिं विष्णुमेषां सरस्वती मरुतो मादयन्ताम् ॥ ५ ॥

[आग्ने ।] अग्ने ! दिवः । पृथिव्याश्च । आह । अस्माकं स्तुतिः प्रति । देवता मित्रादिकाम् । एषां वसिष्ठानाम् । तथा सरस्वती । मरुतश्च । माद्यन्तु च ।

ररे हव्यं मतिभिर्यज्ञियानां नक्षत्कामं मर्त्यानामसिन्वन् ।
धाता रयिमविदुस्यं सदासां सश्चीमहि युज्येभिर्नु देवैः ॥ ६ ॥

ररे हव्यम् । दीरयते । हविः । स्तुतिभिः सह । देवानाम् । व्याप्नोतु । अभिलषितानाम् । मनुष्याणां मध्ये । स्वं धनमबुध्यन् यजमानः । प्रयच्छत । धनम् । अक्षयम् । सदा दीयमानमप्यविदासम् । सङ्गता भवाम । भवायैः । क्षिप्रम् । देवैः ।

---

१. The *pratika* is supplied by the Editor.

२. हे अग्ने ! त्वम् Sy. ३. द्युलोकात् सकाशात् Sy. ४. अन्तरिक्षाच्चावह Sy.

५. आवह is suggested for आह ॥ आह्वानं कुरु Sy.

६. स्तुति A. स्तुतीः is suggested for स्तुतिः ॥ गरणीयान् स्तुत्यान् देवान् अस्मदीयं यज्ञं प्रति Sy.

७. मित्रादिकाः is suggested for मित्रादिकाम् । आदि refers to वरुणम् । इन्द्रम् । अग्निम् । अर्यमणम् । अदितिम् and विष्णुम् । मित्रमेतत्संज्ञकम् । वरुणम् । इन्द्रं च । देवेषु देवतास्वरूपेणावस्थितं चाग्निम् । अर्यमणमेतत्संज्ञकम् । अदितिमदीनां पृथिवीं च । विष्णुञ्च । एवम्भूतान् देवान् Sy.

८. अस्माकं यजमानानामर्थायावह Sy.

९. वाग्देवता चु Sy.

१०. माद्यन्तु A. च is missing in M. अस्मदीयैः स्तोत्रैर्हविर्भिश्च माद्यन्तु Sy.

११. रे रे M.

१२. दीयते is suggested for दीरयते ॥ अस्माभिर्दीयते Sy.

१३. अस्मदीयाभिः स्तुतिभिः Sy.

१४. यज्ञियानाम्-चतुर्थ्यर्थे षष्ठी यज्ञार्हेभ्यो देवेभ्यः Sy.

१५. अस्मदीयं यज्ञं व्याप्नोतु Sy.

१६. अभिलषितम् is suggested for अभिलषितानाम् ॥ अभिलाषाम् Sy.

१७. मर्त्यानां मनुष्याणामस्माकम् Sy.

१८. अवुधन् M. अबध्नन् is suggested for अबुध्यन् ॥ अप्रतिबध्नन्नग्निः Sy.

१९. हे देवाः ! अस्मभ्यं दत्त Sy.

२०. अनुपक्षपणीयम् Sy.

२१. सदा सम्भजनीयम् Sy.

२२. अप्यविदस्यम् is suggested for अप्यविदासम्. It refers to अक्षयम्

२३. सहायैः is suggested for भवायैः ॥ सहायभूतैरिह यज्ञे समागतैर्देवैः, यद्वा, बन्धुभिर्देवैः Sy.

२४. क्षिपम् A. नु अद्य वयम्...यद्वा न्वित्युपमार्थे । इव Sy.

नू रोदसी अभिष्टुते वसिष्ठैर्ऋतावानो वरुणो मित्रो अग्निः ।
यच्छन्तु चन्द्रा उपमं नो अर्कं यूयं पात स्वस्तिभिः सदा नः ॥ ७ ॥

नू रोदसी । क्षिप्रम् । द्यावापृथिव्यौ । अभिष्टुतौ । वसिष्ठैः । यज्ञवन्तः । वरुणादयश्च । प्रयच्छन्तु । उपमाः । उपवासभूतम् । नः । अन्नम्, यद्वाह्लादका देवा इति ।

VII. 40.

ओ श्रुष्टिर्विदथ्या३ समेतु प्रति स्तोमं दधीमहि तुराणाम् ।
यदद्य देवः सविता सुवाति स्यामास्य रत्निनो विभागे ॥ १ ॥

ओ श्रुष्टिः । समायातु । क्षिप्रम् । विदर्थहितोषा । प्रतिधीमहि । स्तोममागताया त्वयि । देवानाम् । यदि । अद्य । देवः । सविता । अस्मात् प्रसौति । तत्स्तुत्या युक्ता वयं धनिनः । भवेम । अस्य सवितुः । धनविभाजनैः ।

---

१. आरोदसि A. २. अद्य Sy.
३. ०थिव्योवभि० A.
४. ०ष्टुते is suggested for ०ष्टुतो ॥ अभितः सर्वतः स्तुते अभूताम् Sy.
५. वसिष्ठैरस्माभिः । पूजार्थं बहुवचनम् Sy.
६. ०वन्तौ M. तथा-ऋतावानः अस्माभिः क्रियमाणैर्यज्ञैरुपेताः Sy.
७. आदि refers to मित्रः and अग्निः । वरुणो मित्रोऽग्निश्चैवम्भूता देवा अस्माभिरभिष्टुता आसन् Sy.
८. ०च्छन्ति A. ददतु Sy.
९. उपमानभूतम् is suggested for उपवासभूतम् ॥ सर्वोत्कृष्टम् Sy.
१०. अन्नः A. अस्मभ्यम् Sy.
११. अर्चनीयमन्नम् Sy.
१२. यद्वाह्लादका देवाः seems to be another explanation of चन्द्राः ; therefore it should immediately follow उपस. and precede उपवा०
१३. सूक्ते प्रतिपादिता ये देवास्ते सर्वे यूयं नोऽस्मान् स्वस्तिभिरविनाशैः सदा सर्वदा पात पालयत Sy.
१४. 'ओ श्रुष्टिः' इति सप्तर्चं सप्तमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वैश्वदेवम् । 'ओ श्रुष्टिः' इत्यनुक्रान्तम् (KSA. 36. 40. p. 25.) । विनियोगो लैङ्गिकः Sy.
१५. ओ श्रुष्टिः is missing in A.
१६. हे देवाः ! . . . अस्मानागच्छतु Sy.
१७. सुखम् . . अथवा श्रुष्टिर्वेगवती Sy.
१८. ०दर्धाहतो M. ०दर्थाहितो० ०दथ्य हितो० is suggested for ०दर्थाहतो० A. विदथेन त्वदीयेन चित्तेन सम्पाद्या . . अथवा. विदथे यज्ञे क्रियमाणास्मदीया स्तुतिः Sy.
१९. प्रतिवनीडी धीमहि A. प्रतिदधीमहि is suggested for प्रतिधीमहि ॥ कुर्वीमहि Sy.
२०. स्तोत्रम् Sy. २१. त्वधि A.
२२. वयं तुराणां वेगवतां देवानाम् Sy
२३. यद्धनम् Sy. २४. इदानीम् Sy.
२५. अस्मभ्यं प्रेरयेत् Sy.
२६. तत् is missing in M.
२७. रमणीयधनवतः Sy.
२८. ०भजनैः A. ०भाजने is suggested for ०भाजनैः ॥ तस्य धनस्य विभागे दाने Sy.

मित्रस्तन्नो वरुणो रोदसी च द्युभक्तमिन्द्रो अर्यमा ददातु ।
दितेष्टु देव्यदितीं रेक्णो वायुश्च यन्नियवैते भगश्च ॥ २ ॥

मित्रस्तन्नः । मित्र. । तत् । अस्मभ्यम् । वरुणादि । च । दीप्तान्न धनम् । प्रयच्छतु । दिशतु । देवी । अदितिः । धनम् । वायुः । भगः । च । यद्धनम् । पृथक्कुरुतम् ।

सेदुग्रो अस्तु मरुतः स शुष्मी यं मर्त्यं पृषदश्वा अवाथ ।
उतेमग्निः सरस्वती जुनन्ति न तस्य रायः पर्येतास्ति ॥ ३ ॥

सेदुग्रः । सः । एव । उद्गूर्णः । भवतु । मरुत ! सः । बलवान् । नः । मर्त्यम् । हे पृषदश्वा. ! रक्षथ । अपि च । एनम् । अग्निम् । सरस्वती च तदनुचराश्च । प्रीणयन्ति धनेन । न च । तस्य । धनस्य । परिगन्ता । अस्ति कश्चिदिति ।

अयं हि नेता वरुण ऋतस्य मित्रो राजानो अर्यमापो धुः ।
सुहवा देव्यदितिरनर्वा ते नो अंहो अतिं पर्षन्नरिष्टान् ॥ ४ ॥

अयं हि । अयम् । हि । नेतारः । वरुणः । सत्यस्य । मित्र । अर्यमा च । राजानः । कर्म । धारयन्ति ।

---

१. स्त is missing in A.
२. तत् प्रसिद्धं धनम् Sy.
३. आदि refers to वरुणः । रोदसी । इन्द्रः and अर्यमा । Sy. explains these words as follows :—तथा वरुणो ददातु। रोदसी च द्यावापृथिव्यौ च दत्ताम् । तथेन्द्रः ददातु । अर्यमा च ददातु Sy.
४. ०त्पान्न ध० A. द्युभिर्द्योतमानैः स्तोतृभिः सेवितं तद्धनम् Sy.
५. तेऽपि M.
६. अतिथिः M.
७. अस्मान्नितरां योजयेताम् । तद्धनमिति पूर्वेण सम्बन्धः Sy.
८. ओजस्वी Sy.
९. हे रुद्रपुत्राः! देवाः! यूयम् Sy.
१०. अ M. यम् is suggested for न ।
११. मरणधर्माणं यं यजमानम् Sy.
१२. वृषद्वाश्चा A. पृषच्छब्देन केचिन्मृगविशेषा, उच्यन्ते । त एवाश्वा वाहा येषां ते। एवम्भूताः Sy.
१३. रक्षत A. पालयेत Sy.
१४. यजमानम् Sy.
१५. अनि A. अग्निः is suggested for अग्निं ॥ अङ्गनादिगुणयुक्तो देवः Sy.
१६. वाग्देवता चेत्याद्याः सर्वे देवाः Sy.
१७. प्रवर्तयन्ति Sy.
१८. यजमानस्य सम्बन्धिनः Sy.
१९. नाशकः Sy.
२०. भवतीत्यर्थः Sy.
२१. खलु Sy.
२२. नेतार A. नेता is suggested for नेतारो ॥ प्रापयिता Sy.
२३. यज्ञस्य सत्यस्य वा Sy.
२४. एते समर्था देवाः Sy.
२५. अकर्म A. अस्मदीयं प्रज्ञाविलक्षणम् Sy.
२६. अधुः । दधति Sy.

तथा[1] स्वाह्वाना[2] । देवी[3] । अदितिश्च[4] । प्रत्युताऽन्यस्मिन्[5] । ते[6] सर्वे[7] । अस्मान्[8] । अंहसः[9] । अतिपारयन्तु[10] । अहिंसिसानिति[11] ।

अस्य देवस्य मीळ्हुषो वया विष्णोरेषस्य प्रभृथे हविर्भिः[12] ।
विदे हि रुद्रो रुद्रियं महित्वं यासिष्टं वर्तिरश्विनाविरावत् ॥ ५ ॥

अस्य देवस्य[13] । अस्य । देवस्य । सेक्तुः[14] । शाखाभूता[15] अन्ये देवाः । विष्णोः[16] । हविर्भिः[17] । एषणीयस्य[18] । यज्ञे । तथा रुद्रः स्तोता[19] । तुभ्यं[20] महत्त्वम् । अश्विनोः[21] । हि[22] । जानाति[23] । तथासत्यन्नयुक्तम्[24] । मार्गम्[25] । यासिष्टमिति[26] ।

मात्र पूषन्नाघृण इरस्यो वरूत्री यद्रातिषाचश्च रासन् ।
मयोभुवो नो अर्वन्तो नि पान्तु वृष्टिं परिज्मा वातो ददातु ॥ ६ ॥

मात्र[27] पूषन्[28] । मा । अत्र[29] । पूषन्[30] ! आगतदीप्ते[31] ! जरामिच्छो[32] कृतृ ? विवारयित्र्यस्माकं[33] प्रजा । तथा । रात्रिषाचो[34] रातिं[35] भजन्तोऽस्मदीयं धनमपहरन्तश्च । यत्र[36] तुभ्यम् । प्रयच्छन्ति[37] । सुखस्य भावयितारः[38] ।

---

१. तथा is missing in M.
२. स्वाह्वाना A. शोभनाह्वाना भवति Sy.
३. द्योतमाना Sy.
४. अदीना देवमाता Sy.
५. अप्रत्युस्तुता० A. अप्रत्युद्गता is suggested for प्रत्युता० ॥ केनाप्यप्रतिगता Sy.
६. तैः सर्वे A. वरुणादयो देवाः Sy.
७. वुरितम् Sy.
८. चारयतु A.
९. अबाधितान् सतः Sy.
१०. कामानां सेक्तुः Sy.
११. शाखा इव भवन्ति Sy.
१२. सर्वदेवात्मकस्य । 'विष्णुः सर्वा देवताः' (AB. 1. 1.) इति श्रुतेः Sy.
१३. हवीरूपैरन्नैः Sy.
१४. प्रापणीयस्य Sy.
१५. रुद्रस्तोता A. रुद्रो देवः Sy.
१६. स्तुभ्यं A.
१७. हे अश्विनौ ! देवौ ! युवाम् Sy.
१८. खलु Sy.
१९. अस्मान् प्रापयति Sy.
२०. हविर्लक्षणान्नयुक्तम् Sy.
२१. अस्मदीयं गृहम् Sy.
२२. यासिष्ठमिति M. आगच्छतम् Sy.
२३. VM. ignores सत्रियम् ॥ रुद्रसम्बन्धि सुखम् Sy.
२४. मातृ पूषत् A. २५. अस्मिन् दाने Sy.
२६. पूषण A. एवम्भूत ! हे देव ! Sy.
२७. दीप्त A. हे प्राप्तदीप्ते ! Sy.
२८. ०मिच्छे कृत्रि M. The reading is doubtful. इरस्यः विघातं (मा) कृथाः Sy.
२९. ०यित्र्यस्मा० A. सर्वैर्वरणीया सरस्वती Sy.
३०. रातिषा० is suggested for रात्रिषा० । रातिदानं तस्य सम्भवत्र्यो देवपत्न्यश्च Sy.
३१. ०न्ता स्म० A.
३२. यद्धनम् Sy.
३३. अस्मभ्यं प्रयच्छेयुः । अत्र मा कृथा इति पूर्वेण सम्बन्धः Sy.
३४. सुखस्य भावकाः Sy.

अस्मान् । अनश्वराः । रक्षन्तु । वृष्टिम् । परितो गन्ता । वायुः । ददातु ।

नू रोदसी अभिष्टुते वसिष्ठैर्ऋतावानो वरुणो मित्रो अग्निः ।
यच्छन्तु चन्द्रा उपमं नो अर्कं यूयं पात स्वस्तिभिः सदा नः ॥ ७ ॥

(नू रोदसी)

VII. 41.

प्रातरग्निं प्रातरिन्द्रं हवामहे प्रातर्मित्रावरुणा प्रातरश्विना ।
प्रातर्भगं पूषणं ब्रह्मणस्पतिं प्रातः सोममुत रुद्रं हुवेम ॥ १ ॥

प्रातः । 'प्रातर्भागमाद्या लिङ्गोक्तदेवतान्त्योषस्या' इति कात्यायनः । सेय निगदसिद्धा ।

---

१. अस्मान् is missing in M.
२. अश्वश्चराः A. गच्छन्तो देवाः Sy.
३. पालयन्तु Sy. ४. वृष्टिलक्षणमुदकम् Sy.
५. प्रयच्छत्वस्मभ्यम् Sy.
६. VM. ignores नि ॥ नितराम् Sy.
७. The *pratīka* is supplied by the Editor. This stanza has already been explained, see RV. 7. 39. 7 Sy. explains this stanza in the following manner:—पूर्वं व्याख्यातेयम् । अक्षरार्थस्तु—द्यावापृथिव्यौ वरुणादयो देवाश्च वसिष्ठैरस्माभिरभिष्टुता भवन्ति । एवम्भूता आह्वावका देवाः सर्वोत्कृष्टमन्नमस्मभ्यं ददतु । अस्मिन् सूक्ते प्रतिपादिताः सर्वे देवा यूयं कल्याणैरस्मान् सर्वदा पालयत Sy. ८. 'प्रातरग्निम्' इति सप्तर्चमष्टमं सूक्तम् । अत्रानुक्रमणिका—'प्रातर्भागं जगत्याद्या लिङ्गोक्तदेवतान्त्योषस्या'(KSA. 36. 41. p. 25.) इति वसिष्ठ ऋषिः । आद्या जगती । शिष्टास्त्रिष्टुभः । आद्याग्नीन्द्रादिदेवत्या द्वितीयाद्याः पञ्च भगदेवत्याः सप्तम्युषोदेवत्या । अत्र केचिदाहुः—
'निवेष्टुकामो रोगार्तो भग सूक्तं जपेत्सदा ।
निवेशं विशति क्षिप्रं रोगैश्च परिमुच्यते' ॥
(Rgvidh. 25.) इति
९. KSA. reads प्रातर्भागं जगत्याद्याः ।
१०. KSA. 36. 41. p. 25.
११. सोऽयं निगदसिद्धः M.
१२. VM. does not explain the stanza because it is very easy. Sy. explains it in the following manner: प्रातरुषःकालेऽग्निं देवं हवामहे । वयं स्तोतार आह्वयामः । तथा प्रातः काल इन्द्रं हवामहे । तथामित्रावरुणामित्रावरुणावहोरात्राभिमानिनौ देवौ प्रातर्वयं हवामहे । तथाश्विनौ देवानां भिषजौ प्रातर्वयं हवामहे । तथा प्रातर्भगं देवं पूषणं देवं ब्रह्मणस्पतिं मन्त्राभिमानिनमेतत्संज्ञकं चाह्वयामः । तथा प्रातः सोममेतत्संज्ञकं देवमुतापि च रुद्रं देवं च हुवेम । आह्वयामः ॥ प्रातः शब्दो वीप्सावचनः । वयं प्रातःप्रातः पुनः पुनरेतान् देवान् हवामहे, आह्वयाम इति प्रत्येकं सम्बध्यते । कान् ? अग्निम्, इन्द्रं, मित्रावरुणौ, अश्विनौ, भगं, पूषणं, ब्रह्मणस्पतिं सोमम्, उत अपि च रुद्रं हुवेम आह्वयाम । हवामहे हुवेम । ह्वयतेः सम्प्रसारणे रूपद्वयम् Mah. प्रातःशब्दो वीप्सावचनः । प्रातःप्रातः पुनःपुनः । अग्निं चेन्द्रं च मित्रावरुणौ चाश्विनौ च । हवामह इति प्रत्येकमभिसम्बध्यते । प्रातर्भगं च पूषणं च ब्रह्मणस्पतिं च । प्रातः सोमम् । उतापि च रुद्रं हुवेम आह्वयामः U.
This stanza=YV. 31. 34.

प्रातर्जितं भगमुग्रं हुवेम वयं पुत्रमदितेर्यो विधर्ता ।
आध्रश्चिद्यं मन्यमानस्तुरश्चिद्राजा चिद्यं भगं भक्षीत्याह ॥ २ ॥

[1]प्रातर्जितम् । प्रातर्जयितम् । भगम् । उग्रम् । वयं ह्वयेम । वयम् । पुत्रम् । अदितेः । यः । विधारयिता सर्वस्य । आवृद्धिद्यमन्यढधामानः [10]आध्र [11]आलुर्दरिद्रः । [12]सन् । यम् । [13]स्तुवन् [14]भक्षीयेत्याह । तथा तुरः ।

---

१. वसिष्ठस्यार्षम् Dur.

२. ०तर्ज० A. Sy. explains प्रातर्जितम् separately as two words but padapāṭha reads it as one word. जितं जयशीलम्....प्रातःकाल एव Sy. प्रातर्जयतीति प्रातर्जित् तं प्रातर्जयशीलम् Mah. प्रातः प्रातस्तमांसि यो जयति स भवति प्रातर्जित् तं प्रातर्जितम् Dur. सम्पदादित्वात्क्विप् । प्रातस्तमांसि जयति यस्तं प्रातरेव तमसां जेतारमित्यर्थः SKN.

३. तं भगं प्रातरेव वयं हुवेमेति सम्बन्धः Sy. तं भगमादित्यम् Mah. सूर्यम् Dur. भगमुक्तावस्थं ज्योतिः SKN.

४. उद्गूर्णम् Sy. उत्कृष्टमुद्गूर्णवानं वा Mah. उग्रमुद्गूर्णवानम् U. अभ्युद्यतम् Dur. अप्रसह्यम् SKN.

५. आह्वयामः Sy. U. आह्वयाम Mah. उदयाय आह्वयामहे Dur. उद्गरणायोत्सर्पणाय हुवेम ह्वयेम SKN. ६. तनयम् Mah.

७. देवमातुः प्रातस्तन्या वा सन्ध्यायाः SKN.

८. भगो देवः Sy.

९. विश्वस्य जगतो धारकः Sy. जगतो धारयिता Mah. विधारयिता सर्वस्य जगतः U. विधारयिता सर्वस्य जगतः स्वेनानुग्रहेण Dur. कीदृशं भगम् ? यो विधर्ता धारयिता सर्वस्य जगतः स्वेनानुग्रहेण Dur.

१०. This seems to be the fragment of this stanza. Therefore 'आध्रश्चिद्यं मन्यमानः' is suggested for आवृद्धिद्यमन्य० । Cf. N .12. 14.

११. आवृद्धिद्यमुन्यमा·आर्ष आ० A. न ध्रायति, 'ध्रै तृप्तौ' न तृप्यति सोऽध्रः । नञो दीर्घश्छान्दसः । यद्वा आ समन्ताद् ध्र आध्रः । यद्वा अध्र एवाध्रः स्वार्थे तद्धितः । आध्रोऽतृप्तो बुभुक्षितो दरिद्रो वापि Mah. प्रतिषेधस्य दीर्घत्वं छान्दसम् । आध्रः—'ध्रै तृप्तौ' । अतृप्तो बुभुक्षितः । अथवा ध्रियतेराध्रो दरिद्रः । दरिद्रोऽपि U. आढ्यानां स्पृहयिता Dur. आढ्यालुराढ्यत्वकामो दरिद्रः । दरिद्रश्च ....'आढ्यालुर्दरिद्रः' इति वाक्यार्थे पदवचनमाध्र आढ्यालुरिति । 'आढ्याच्चालुच उपसंख्यानम्' अस्मादेव विशिष्टप्रयोगात् SKN.

१२. दरिद्रोऽपि स्तोता Sy.

१३. स M. अपि Sy. चिच्छब्दोऽप्यर्थे Mah. U. चिच्चार्थे SKN.

१४. स्तुन्वन् A. पूजयन् स्वार्थसिद्धये । मन्यतिरर्चतिकर्मा । स हि सूर्योदये भिक्षादिना किञ्चिल्लभते तत उदयं वाञ्छति Mah. मन्यतिरर्चतिकर्मा । पूजयन् स्वार्थसिद्धये U. यं मन्यमान आकाङ्क्षन्नहन्यहनि पूजयन्नास्ते, अपि नामोदियाद् भागः, ततो वाञ्छार्थं पर्यटेयमिति Dur. मन्यतिः कान्तिकर्मा । यं कामयमानम्, किम् ? सामर्थ्याद्धनार्थं पर्यागमनम् SKN.

१५. भक्षि भज विभज सह्यं देहीत्याह ब्रवीति Sy.

चित् तुरः प्रेरको धनस्याढ्यः । राजा । चित् । यम् । भगमहम् । भजेय । इति । वदति ।

भग प्रणेतर्भग सत्यराधो भगेमां धियमुदवा ददन्नः ।
भग प्र णो जनय गोभिरश्वैर्भग प्र नृभिर्नृवन्तः स्याम ॥ ३ ॥

भग प्रणेतः । भग ! प्रणेतः ! स्तोतॄणाम् । भग ! सत्यधन ! भग ! इदम् । कर्म । उदव

---

१. अपि Sy.

२. The passage तुरः प्रेरको धनस्याढ्यः should immediately follow तुरः and precede चित् ॥ तुरतिर्गतिकर्मा । प्राप्तधनः Sy. आतुरोऽपि यं भगं मन्यमानः । ....दिवसे तस्य सुखोदयाद् रोगिणो रात्रिः कष्टेन याति, अद्वा तुरो यमः, स हि मरणाय दिनानि गणयति Mah. आङोऽध्याहारः । आतुरोऽपि यं भगं मन्यमानो भक्षीत्याह, उदयं भक्षयस्वेत्याह । यद्वा तुरशब्देन यमोऽभिधीयते । स हि तूर्णं प्राणिनो हन्ति । यमोऽपि यं भगं मन्यमानो भक्षीत्याह, उदयं भक्षयस्वेत्याह । स हि दिवसान् प्राणिनो गणयति U. तुरोऽपि । 'यमस्तूर्णगतिः' सर्वान्प्राणिन आभिमुख्येनोपसंहाराय तूर्णगतिस्त्वरितगतिर्यं मन्यमान आस्ते प्रेताधिपतिः । तदुदयाद्धि कालातिक्रमेणासावुपसंहरति प्राणिनः Dur. तूर्णगतिश्च । कोऽसौ ? सामर्थ्याद्यम इत्याह । प्राणिनामायुषः क्षयार्थम्....तुरस्त्वरण इत्यस्य तरतेर्वा प्लवनार्थस्य, त्वरतेर्वा शीघ्रार्थे वर्तमानस्य तुरः। तुरोऽपि यं भगमाहेति संबंधः SKN.

३. समर्थोऽपि Sy. राजाऽपि यं भगं भक्षीत्याह । तदुदये हि राज्ञां व्यवहारदर्शनाविना सर्वेष्टसिद्धिः Mah. राजाऽपि यं भगं मन्यमानो भक्षीत्याह, उदयं भक्षयस्व भजस्वेत्याह । तदुदये हि राज्ञां वार्तासिद्धिः U. राजाऽपि चार्थिनां कार्यचिकीर्षया Dur. राजा च प्रजानां व्यवहारादिदर्शनाद्यर्थम् ।....यमो राजा च स्वकार्यप्रसिद्धये समुद्यतमिच्छतीत्यर्थः SKN.

४. देवम्, भजनीयं धनम् Sy. तमुदयम् ।.... तं वयं भगमाह्वयामहे Dur. ज्योतिर्भग उच्यते, इत्यस्यैवार्थस्य द्रढिम्नः कारणमाह—अन्धो भग इत्याहुर्ब्रह्मवादिनः । तत्कथम् ? नास्मिन् द्रष्टृणां ध्यानं दर्शनमस्तीत्यर्थः । 'अनुत्सृप्तः' सूर्यभावमनागतो मण्डलाकारतया न दृश्यत इत्यर्थः SKN.

५. महां भक्षि वेहीत्याह Sy. भजस्व, अर्थाद्धनम् । इत्याह ।....भक्षि भजतेः Mah. उदयं भक्षयस्व भजस्वेत्याह U. इत्येवमाह Dur.

६. ऋषिरात्मानमाह U.

७. प्रातर्जितं भगमुग्रं ह्वयेम वयं पुत्रमदितेर्यो विधारयिता सर्वस्य । आध्रश्चिद्यं मन्यमान आढ्यालुर्दरिद्रः । तुरश्चित् । तुर इति यमनाम । तरतेर्वा । त्वरतेर्वा । त्वरया तूर्णगतिर्यमः । राजा चिद् यं भगं भक्षीत्याह । 'अन्धो भग इत्याहुरनुत्सृप्तो न दृश्यते । प्राशित्रमस्याक्षिणी निर्जघान (Cf. KB. VI. 13.) इति च ब्राह्मणम् । जनं भगो गच्छति (Cf. MS. 1.6.12.) इति (वा) विज्ञायते । जनं गच्छत्यादित्य उदयेन N. 12.14., SKN. IV. 11.2. This stanza=YV. 34.35.

८. हे देव ! Sy.

९. त्वं प्रणेता प्रकर्षेण नेतासि Sy. प्रकर्षेण नयति प्रापयति धनमिति प्रणेता तस्य सम्बोधने हे प्रणेतः ! Mah. प्रकर्षेण नयस्य कर्तः ! U.

१०. तादृश ! प्रणेतर्हे भग ! त्वं सत्यराधः सत्यधनो वा Sy. आदरार्थं पुनः सम्बोधनम् ।.... सत्यमनश्वरं राधो धनं यस्य स सत्यराधास्तत्सम्बुद्धौ हे सत्यराधः ! Mah. सत्यमविनाशि राधो धनं यस्य स तथोक्तः U.

११. अस्मदीयम् Sy १२. कम A. स्तुतिम् Sy. प्रज्ञां कर्म वा Mah. प्रज्ञाम् U.

रक्ष[1]। प्रयच्छन्[2] धनम्। अस्माकम्[3]। भग। प्रजनय। अस्मान्[4]। गोभिः। अश्वैश्च[5]। भग[6]। प्रभवेम[7]। नृभिः[8]। नृपते[9]।

उतेदानीं भगवन्तः स्यामोत प्रपित्व उत मध्ये अह्नाम्।
उतोदिता मघवन्त्सूर्यस्य वयं देवानां सुमतौ स्याम ॥ ४ ॥

उतेदानीम्। अपि च। इदानीम्। वयं भगेन देवेन युक्ताः[11]। स्याम[12]। अपि च। अह्नाम्। प्रपित्वे[13] प्राप्तौ प्रातः[14]। मध्ये। च। अपि च। उदये[15]। सूर्यस्य। मघवन्ति[16] इन्द्र! भगस्यैव[17] वा सम्बोधनम्। वनम्[18]। सर्वेषामेव देवानाम्[19]। सुमनसः[20]। स्याम[21]।

---

१. उन्नक्ष सफलयुक्तां कुरु Sy. उद्गमय। यथा सूक्ष्मार्थान् पश्यामस्तथा कुर्विति भावः Mah. यथा सूक्ष्मानर्थान् पश्यामस्तथा कुर्वित्यभिप्रायः U.

२. तादृश ! सत्यराधो हे भग ! त्वं कामान् प्रयच्छन् Sy. धनं प्रयच्छन् सन् Mah. देहि धनम् U.

३. अस्मभ्यम् Sy. U.

४. प्रोज्जूतान् कुरु Sy. प्रवर्धय Mah.

५. अस्मात् A.

६. अश्वैः इव A. गा अश्वांश्च बहून् देहीत्यर्थः Mah.

७. हे भग ! त्वत्प्रसादाद्वयम् Sy.

८. प्रकर्षेण स्याम भवेम Mah. भवेम U.

९. नेतृभिः पुत्रादिभिः Sy. पुत्रादिभिः Mah. मनुष्यैः U.

१०. नृपत A. नृवन्तः is suggested for नृपते ॥ मनुष्यवन्तः Sy., Mah.
This stanza=YV 34. 36.

११. भगेन त्वया स्वामिना युक्ताः, यद्वा भगवन्तो धनवन्तः Sy.
भगवन्तो ज्ञानवन्तो वा Mah.

१२. भवेम Mah. स्याम आदित्यप्रसादात् U.

१३. प्रापित्वा A. प्राप्ते पूर्वाह्णे भगवन्तः स्याम Sy. सूर्यस्य....प्रपतनेऽस्तमये Mah. प्राप्तेऽस्तमनकाले भगवन्तः स्याम U.

१४. मध्यन्दिने Mah. मध्यन्दिनेऽह्नाम् U.

१५. उदितौ उदये सति Sy. उदयसमये Mah. उदयकाले U.

१६. सर्वस्य प्रेरकस्य देवस्य Sy.

१७. ०वन्तीन्द्र M. भगवन्निन्द्र ! is suggested for ०वन्तिन्निन्द्र ॥ हे धनवन् ! भग ! देव ! Sy. धनवन् रवे ! Mah.

१८. भगनस्यैव A.

१९. वयं त्वदनुग्रहात् Sy.

२०. इन्द्रादीनाम् Sy.

२१. सुमनो A. सुमतौ is suggested for सुमनसः ॥ अनुग्रहबुद्धयैव Sy. कल्याण्यां बुद्धौ Mah. सूर्यस्य भगवतः प्रसादादेव वयं . . .कल्याण्यां मतौ U.

२२. भवेम Sy. देवा अस्मासु शोभनामनुग्रहविषयां बुद्धिं दवत्वित्यर्थः। किं बहुना सर्वदाऽस्माकं धनवत्तास्त्वित्यर्थः Mah.
This stanza=YV. 34. 37.

भग एव भगवाँ अस्तु देवास्तेन वयं भगवन्तः स्याम ।
तं त्वा भग सर्व इज्जोहवीति स नो भग पुरएता भवेह ॥ ५ ॥

भग एव । भगः । एव[1] देवोऽस्मदर्थम् । भाग्ययुक्तः[2] । भवतु प्रापयत्वस्माङ्भाग्यम्[3] । हे देवाः ! तेन[4] । वयम् । भगवन्तः[5] । स्याम[6] । तम्[7] । त्वा[8] । भग ! सर्वः[9] । एव[10] । आह्वयन्ति[11] । सः[12] । नः[13] । भग ! पुरएता[14] । भव[15] । अतः[16] ।

समध्वरायोषसो नमन्त दधिक्रावेव शुचये पदाय[17] ।
अर्वाचीनं वसुविदं भगं नो रथमिवाश्वा वाजिन आ वहन्तु ॥ ६ ॥

समध्वराय[18] । सन्नमन्त[19] । यज्ञार्थम्[20] । उषसः[21] । अश्व इव[22] । प्रतिष्ठिताय[23] । युद्धदेशाय[24] । अभि-

---

१. किमन्यैरदातृभिर्धनिभिर्वैरिति भावः Mah. किमन्यैर्देवताविशेषैर्धनयुक्तैरदातृभिरित्यभिप्रायः U.

२. धनवान् Sy, Mah. U.;

३. ०स्यान्भा० M. अस्मद्भाग्यम् is suggested for अस्माद्भाग्यम् ॥

४. भगेन देवेन धनेन वा Sy. भगदत्तेन धनेन Mah. भगप्रदत्तेन धनेन U.

५. धनवन्तः Sy. U.

६. भवेम Sy., U.

७. प्रसिद्धम् Sy. एवं देवानुक्त्वाथ भगमाह । ... तं प्रसिद्धम् Mah. द्वितीयेनार्धर्चेन द्वितीयम् । एकवाक्यताया असम्भवात् । .... उपरि तदः श्रवणाद् यदोऽत्र वृत्तिः U.

८. त्वाम् Sy.

९. भिः A.

१०. जनः Sy., Mah.

११. ०यति is suggested for ०यन्ति ॥ भृशं पुनः पुनर्वाह्वयति Sy. अत्यन्तमाह्वयतीष्टसिद्धये Mah. आह्वयति कामसिद्धये U.

१२. अस्माकम् Sy., U. स त्वमिह नोऽस्माकं कर्मणि Mah.

१३. हे भग ! देव ! त्वाम् Sy.

१४. पुरा एता A. पुरो गन्ता Sy. पुरोऽग्र एतीति पुरएता अग्रयायी भव Mah. अग्रयायी सर्वकार्येषु भव इह U.

१५. अग्रेसरो भूत्वा सर्वकार्याणि साधयेत्यर्थः Mah

१६. अत्र is suggested for अतः ॥ अस्मिन् यज्ञे Sy.

This stanza=YV. 34. 38.

१७. सुमध्व० A.

१८. सन्नवन्त A. सङ्गच्छन्तु Sy. सन्नमन्ते प्रह्वीभवन्ति Mah., U.

१९. अस्मदीयाय यागाय Sy. यज्ञायाग्निहोत्रादिकर्मणे U.

२०. तयोषसः Sy. प्रातःकालाधिष्ठातारो देवाः Mah. या उषसः U.

२१. अश्व A. अश्वो यथा Sy.

२२. शुद्धाय गमनयोग्याय Sy. अग्न्याधानार्थं शुचिपदम् Mah. शुचिपदमग्न्याधानार्थं कर्तव्यमिति सन्नमन्ते U.

२३. स्थानाय. Sy.

मुखम्[१] । धनस्य लम्भयितारम्[२] । भगम्[३] । नः[४] । रथमिव[५] । अश्वाः । वेगवन्तः[६] । आवहन्तूषसः[७] ।

अश्वावतीर्गोमतीर्न उषासो वीरवतीः सदमुच्छन्तु भद्राः ।
घृतं दुहाना विश्वतः प्रपीता यूयं पात स्वस्तिभिः सदा नः ॥ ७ ॥

अश्वावतीः[८] । अश्ववत्यः[९] । गोमत्यः । अस्माकम्[१०] । उषसः[११] । वीरवत्यश्च[१२] । सदम्[१३] । उच्छन्तु[१४] । मुजनीयाः[१५] । उदकम्[१६] । दुहानाः[१७] । विश्वत एव । पुष्टाः[१८] ।

VII.42.

प्र ब्रह्माणो अङ्गिरसो नक्षन्त प्र क्रन्दनुर्नभन्यस्य वेतु ।
प्र धेनव उदप्रुतो नवन्त युज्यातामद्री अध्वरस्य पेशः ॥ १ ॥

प्र ब्रह्माणः[२२] ॥ वैश्वदेवम् । प्रव्याप्नुवन्तु[२३] । ब्राह्मणाः । अङ्गिरसः[२४] आगच्छन्तु । प्रकामयताम्[२५] । पर्जन्यः ।

---

१. अस्मदभिमुखम् Sy. एवं ता उषसः । अर्वाचीनमन्यगतमनस्कम् U.

२. धनस्य प्रापकम् Sy. वसु धनं विन्वतीति वसुविदः Mah. वसु धनं विन्वतीति वसुवित्तं वसुविदम् U. ३. देवम् Sy. आदित्यम् Mah., U. ४. अस्मान् प्रति Sy., U. अस्माकम् Mah ५. यथा....अश्वा रथमावहन्ति तद्वत् Mah. ६. अन्नवन्तो वेगवन्तो वा Mah. वेजनवन्तोऽन्नवन्तो वा U.

७. आपो ह वृषसः A. आवहन्तूषसः is suggested for आवहवृषसः ॥ आनयन्तु Sy. आगमयन्तु Mah., U.
This stanza=YV. 34. 39.

८. अश्वा विपतिः A. ९. अश्वसहिताः सत्यः Sy. १०. अस्मभ्यम् Sy. अस्मान् Mah.

११. उषोदेवताः Sy.

१२. पुत्रादिजनोपेताश्च भवन्त्यः Sy.

१३. सर्वदा Sy. सदाकालम् Mah., U.

१४ व्यच्छन्तु तमो विवासयन्तु Sy. विवासयन्तु । अज्ञानलक्षणं पाशं मोचयन्तु । 'उछी विवासे' Mah. विवासयन्तु तमः U.

१५. मृज० M. भजनीयाः is suggested for मुजनीयाः ॥ कल्याणरूपाः Mah. भन्वनीयाः U. १६. अवश्कायजलम् Mah., U.

१७. सिञ्चन्त्यः Sy. क्षरन्त्यः Mah.

१८. सर्वैर्गुणैः Sy. सर्वतः Mah., U.

१९. पृष्टाः M. प्रवृद्धाः । एवम्भूता उषसस्तम उच्छन्तु Sy. धर्मार्थकामैराप्यायिताः Mah. आप्यायिता धर्मार्थकामैः U.

२०. अस्मिन् सूक्ते प्रतिपादिता हे सर्वे देवाः ! यूयं नोऽस्मान् सदा सर्वदा स्वस्तिभिः कल्याणैः पात पालयत Sy. एवं परोक्षं प्रार्थ्य प्रत्यक्षमाह । हे उषसः ! यूयं स्वस्तिभिरविनाशैः सदा नोऽस्मान् पात पालयत Mah. इदानीमृत्विग्विषयः प्रश्नः । यूयं पात पालयत स्वस्तिभिरविनाशैः सदा नोऽस्मान् U.
This stanza=YV. 34. 40.

२१. 'प्र ब्रह्माणः' इति षडृचं नवमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वैश्वदेवम् । अत्रानुक्रान्तम् 'प्र ब्रह्माणः षड् वैश्वदेवं तु'(KSA. 36. 42.p. 25.) इति । सूक्तविनियोगो लैङ्गिकः । तृतीये छन्दोमे प्रउगशस्त्रे 'प्र ब्रह्माणः' इति वैश्वदेवस्तृचः । सूत्रितञ्च—'प्र ब्रह्माणो अङ्गिरसो नक्षन्त सरस्वतीं देवयन्तो हवन्ते' (ĀSS. 8. 11.) इति Sy.

२२. ब्राह्मण A. २३. सर्वत्र व्याप्नुवन्तु Sy.

२४. एतन्नामका ऋषयः Sy.

२५. प्रकर्षेणेच्छतु Sy.

वायुदेशार्थम्[1] । सञ्चन्तु[2] । उदप्रुतः[3] । धेनव इति मेघान् । आयुज्येतां[4] रथेऽश्वानागमार्थम्[5] । आहर्तारौ[6] शत्रूणाम् । पातपर्जन्यौ[7] । अध्वरस्य । रूपभूतौ[8] ।

सुगस्ते[9] अग्ने[10] सनवित्तो[11] अध्वा युक्ष्वा[12] सुते[13] हरितो[14] रोहितश्च[15] ।
ये वा[16] सञ्चरुषा वीरवाहो[17] हवे देवानां[18] जनिमानि[19] सत्तः[20] ॥ २ ॥

सुगस्ते[10] । शोभनगमनम् । तव । अग्ने[11] ! सम्भक्तधनः[12] । मार्गः । योजय । सुते[13] सोमे । हरितः[14] । रोहितः[15] । चान्[16] । यद्[17] । वा[18] । तव सदने[19] । आरोचमानाः[20] । वीरस्य तव वोढारस्तान्[21] वा युक्ष्य[22] । धयाम्यहम्[23] । देवानाम्[24] । जनिमानि देवानित्यर्थः[25] । सत्तो[26] निषण्णः[27] ।

---

१. देशार्थम् A. स्तोत्रस्यास्मदीयं स्तोत्रम् Sy.
२. सर्पन्तु Sy.
३. उदबुतः A. उदकानि सिञ्चन्त्यः Sy.
४. प्रीणयित्र्यो नद्यः Sy.
५. योजयेताम् Sy.
६. आगमनार्थम् is suggested for आगमार्थम् ।
७. आदत्तारौ A. आदर्तारौ is suggested for आहर्त्तारौ M. आद्रियन्तौ पत्नीयजमानौ Sy.
८. पातः पर्ज० A. वातपर्ज० is suggested for पातपर्ज० ।
९. रूपम् Sy.
१०. सुशस्ते M.
११. ०मनः is suggested for मनं ॥ सुष्ठु गन्तव्यो भवतु Sy.
१२. त्वदीयः Sy.
१३. अग्नेः A.
१४. सनाच्चिरकालादारभ्य लब्धः Sy.
१५. सते A. Sy. divides सुते into सु and ते construing सु with युक्ष्व and explaining it as सुष्ठु संयोजय and ते as त्वदीयाः taking it with अश्वाः । VM. following *padapāṭha* construes सुते as one word.
१६. हरीतः A. किञ्च श्यामवर्णाः Sy.
१७. लोहितवर्णाश्चेत्युभयविधाः Sy.
१८. चाश्वान् is suggested for चान् ।
१९. य A. ये is suggested for यद् ।
२०. च Sy.
२१. सद्मनि यज्ञगृहे Sy.
२२. आराच० A. भवन्ति Sy.
२३. वीरं शूरं त्वां वहन्तः Sy.
२४. युक्ष्व is suggested for युक्ष्य ॥ त्वदीये रथे सुष्ठु संयोजय Sy.
२५. ह्वयाम्य० is suggested for धयाम्य० ॥ आह्वयामि Sy.
२६. इन्द्रादीनाम् Sy.
२७. जनान् सङ्गान् Sy.
२८. सक्तो A. Sy. also divides जनिमानि into जनिमा and नि । He explains जनिमा as जनान् सङ्गान् and takes नि with सत्तः explaining it as निषण्णाः । VM. following the *padapāṭha* construes जनिमानि as one word. यज्ञगृहे निषण्णोऽहं होता सन् Sy.
२९. ०षण्णाः M.

समु वो यज्ञं महयन्नमोभिः प्र होता मन्द्रो रिरिचे उपाके ।
यजस्व सु पुरुवणीक देवाना युज्ञियाममृरमतिं वृत्याः ॥ ३ ॥

समु वः । समपूजयन् । युष्माकम् । हविः । नमस्कारैः सह । प्ररिरिचेऽत्यन्तमुज्ज्वले । भवत्यन्तिके । होता । मोदनः । इत्यग्निमुक्त्वा तं प्रत्यक्षमाह—यजस्व । सुष्ठु । हे बहुज्वालानीक ! देवान् । आवर्तय च । यज्ञार्हाम् । सन्ततां ज्वालाम् ।

यदा वीरस्य रेवतो दुरोणे स्योनशीरतिथिराचिकेतत् ।
सुप्रीतो अग्निः सुधितो दम आ स विशे दाति वार्यमियत्यै ॥ ४ ॥

यदा वीरस्य । यदा । वीरस्य । आढ्यस्य । गृहे । सुखशायी । अतिथिः । आभिमुख्येन स्तोत्रैर्बुध्यते । सुप्रीतः । अग्निः । सुनिहितः । दमे स्व आयतने । स वीरो मनुष्यः । विशे । प्रयच्छति । धनम् । आत्मानमभिगच्छन्त्यै ।

इमं नो अग्ने अध्वरं जुषस्व मरुत्स्विन्द्रे यशसं कृधी नः ।
आ नक्तां बर्हिः सदतामुषासोशन्ता मित्रावरुणा यजेह ॥ ५ ॥

इमं नः । इमम् । नः । अग्ने ! यज्ञम् । सेवय । मरुत्सु । इन्द्रे च । अस्माकम् । यशस्विनं पुत्रम्

---

१. हे देवाः । . . . . सम्यक् पूजयन्ति Sy.
२. यज्ञम् Sy.
३. नमस्कारैर्युक्ता इमे स्तोतारो वा यजमाना वा Sy.
४. अन्येभ्यो होतृभ्योऽतिरिच्यते Sy.
५. भवदन्तिके is suggested for भवत्यन्तिके ॥ अस्माकं समीपे स्थितोऽस्मदीयो होता Sy.
६. स्तुतिशीलः Sy.
७. हे यजमान ! त्वम् . . . . यजस्व Sy.
८. हे बहुतेजस्विन् ! अग्ने ! त्वम् Sy.
९. ०ता ज्वालम् A. अरमतिं भूमिम् .... तथा च निगमान्तरम् 'आ नो महीमरमतिं सजोषाः' (RV.5. 43. 6.) इति Sy.
१०. VM. ignores उ ॥ उ इति पूरकः Sy.
११. वीरकस्य स्तोत्रृणां प्रेरयितुः Sy.
१२. हविष्मतो यजमानस्य Sy.
१३. सुखेन शयनीयः Sy.
१४. सर्वेषामतिथिभूतोऽग्निः Sy.
१५. प्रज्ञायते Sy.
१६. यदा सुप्रीतो भवति तदा Sy.
१७. सुष्ठु निहितः सन् Sy.
१८. गमे A. यज्ञगृहे Sy.
१९. विशो A. प्रजायै Sy.
२०. ददाति प्रयच्छति Sy.
२१. वरणीयं धनम् Sy.
२२. उपगच्छन्त्यै Sy.
२३. VM. ignores आ ॥ आकारश्चार्थः Sy.
२४. अस्मदीयम् Sy.
२५. सेवयस्व M. सेवस्व Sy.
२६. इन्द्रस्य सखिभूतेषु देवेषु Sy.
२७. इन्द्रो च A.
२८. यशोयुक्तं हविर्लक्षणान्नवन्तम् Sy.

कुर्वन्[1] । असीदाताम्[2] । नक्ता[3] । उषासा[4] । बर्हि[5] । कामयमानौ[6] । मित्रावरुणौ । यज । अतम्[7] ।

एवाग्निं संहस्यं[8] वसिष्ठो रायस्कामो विश्वप्स्न्यस्य स्तौत् ।
इषं रयिं पप्रथद्वाजमस्मे यूयं पात स्वस्तिभिः सदा नः ॥ ६ ॥

एवाग्निम्[9] । एवम् । अग्निम् । सकुशलम्[10] । वसिष्ठः[11] । धनकामः । विश्वप्स्न्यस्य[12] राज्ञः । अस्तौत् सोऽग्निः । अन्नम्[13] । बलञ्च । अस्मासु[14] । प्रथयतु[15] ।

VII. 43.

प्र वो यज्ञेषु देवयन्तो अर्चन्द्यावा नमोभिः पृथिवी इषध्यै ।
येषां ब्रह्माण्यसमानि विप्रा विष्वग्वियन्ति वनिनो न शाखाः ॥ १ ॥

प्र[16] वो यज्ञेषु । प्रार्चन्[17] । युष्मान् हे देवाः ! यज्ञेषु । देवकामाः[18] । द्यावापृथिव्यौ[19] च । नमस्कारैः[20] इषध्यै[21] याचितुमन्नम् । येषां विप्राणाम्[22] । स्तोत्राणि । असमानि । विष्वक्[23] विविधं गच्छन्ति[24] । वृक्षस्य । इव । शाखाः[25] ।

---

१. कुरु is suggested for कुर्वन् ॥ कृधि कुरु स्थापयेत्यर्थः Sy.
२. असि दाता M. आसीदताम् is suggested for असीदाताम् ॥ उपविशताम् Sy.
३. रात्रिः Sy.
४. दिवसश्च । अहर्निशे इत्यर्थः Sy.
५. बर्हीं M. बर्हिः is suggested for बर्हि ॥ बर्हिषि कुशमये Sy. ६. अपि च हे अग्ने ! उशन्ता उशन्तौ यज्ञमिच्छन्तौ Sy.
७. अत्र is suggested for अतं ॥ इह अस्मिन् यज्ञे Sy. ८. एवम् उक्तप्रकारेण Sy. ९. सहकुशलम् A. सबलम् is suggested for सकुशलम् ॥ सहो बलं तस्य पुत्रं तद्वन्तमिति वा Sy.
१०. एतदाख्य ऋषिः Sy. ११. पश्वादिधनानीच्छन् Sy. १२. विश्वप्न्यस्य A. विश्वस्य M. पुरुरूपस्य धनस्य लाभाय Sy.
१३. अस्माकं सुप्रथ० A. अस्मभ्यम् Sy.
१४. विस्तारयतु ददात्वित्यर्थः Sy.
१५. VM. ignores रयिम् ॥ रयिं धनम् ॥ अस्मिन् सूक्ते प्रतिपादिताः सर्वे देवा यूयमस्मान् कल्याणैः सर्वदा पालयत Sy.
१६. 'प्र वो यज्ञेषु' इति पञ्चर्चं दशमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वैश्वदेवम् । 'प्र वः पञ्च' इत्यनुक्रान्तम् KSA. 36.43. p. 25. सूक्तविनियोगो लैङ्गिकः । प्रयमे छन्दोमे प्रउगशस्त्रे 'प्र वो यज्ञेषु' इति वैश्वदेवस्तृचः । सूत्रितञ्च—'प्र वो यज्ञेषु देवयन्तो अर्चन् प्र क्षोदसा धयसा सप्त एतेति प्रउगम्' (ĀŚS 8. 9.) इति Sy. १७. प्राक् चन् A. प्रार्चयन्ति प्रकर्षेण स्तुवन्ति Sy. १८. देवान्कामयमानाः Sy. १९. दिवञ्च भूमिञ्च प्रस्तुवन्ति Sy. २०. स्तुतिभिर्हविर्भिर्वा Sy.
२१. इषध्ये A. M. अभि प्राप्तुम् Sy.
२२. मेधाविनाम् Sy. २३. विश्वतः Sy.
२४. विशेषेण गच्छन्ति ते विप्राः प्रार्चन्निति पूर्वेण सम्बन्धः Sy.
२५. VM. ignores विप्राः ।

प्र यज्ञ एंतु हेत्वो न सप्तिरुद्यच्छध्वं समनसो घृताचीः ।
स्तृणीत बर्हिरंध्वराय साधूर्ध्वा शोचींषि देवयून्यस्थुः ॥ २ ॥

प्र यज्ञः[1]। प्रेतु[2]। यज्ञः[3]। गमनकुशलः[4]। अश्वः[5]। च[6]। उद्यच्छध्वम्[7]। समनस्काः[8] सन्तः। स्रुचः[9]। स्तृणीत[10]। बर्हिः[11]। यज्ञार्थम्[12]। कल्याणम्[13]। उत्तिष्ठन्त[14]। देवकामानि[15]। शोचीषि[16] ज्वलत्वं[17] नयेत्यर्थः।

आ पुत्रासो न मातरं विभृत्राः सानौ देवासो बर्हिषः सदन्तु ।
आ विश्वाचीं विदथ्यामनक्त्वग्ने मा नो देवतातां मृधस्कः ॥ ३ ॥

आ पुत्रासः। आसीदन्तु[18]। मातर। इव। विशेषेण भरणीया[19] बालाः। पुत्राः। बर्हिषः[20]। समुच्छ्रिते[21] देशे। देवाः। आभिमुख्येनानक्तु[22]। विश्वाची[23] गौः। यज्ञे वर्तमाना[24] तव ज्वालाम्[25], जुहूरेव वा विश्वाची[26][27]। अग्ने[28]। अस्माकम्। यज्ञे[29]। मा। कार्षीः। हिंसाम्[30]।

---

१. यज्ञं A. M.
२. देवान् प्रति गच्छतु Sy.
३. अयमस्मदीयो यज्ञः Sy.
४. शीघ्रगामी Sy.
५. च seems to be the explanation of न ॥ यथा तद्वत् Sy.
६. उध्वश्चध्वं A. हस्त उद्यम्य धारयत Sy.
७. हे ऋत्विजः ! सर्वे यूयं सदृशमनस्काः सन्तः Sy.
८. तृचः M. स्रुचः is suggested for स्रुचः ॥
९. वेद्यां च्छादयत Sy.
१०. कुशमयम् Sy.
११. यागं कर्तुम् Sy.
१२. साधकम् Sy.
१३. उत्तिष्ठु A. उत्तिष्ठन्तु is suggested for उत्तिष्ठन्त ॥ ऊर्ध्वमुखानि तिष्ठन्तु Sy.
१४. कासानि M. हे अग्ने ! देवान् कामयमानानि Sy.
१५. शोचिषि A. स्वदीयान्यर्चींषि Sy.
१६. ज्वलय is suggested for ज्वलत्वं नय।
१७. उपविशन्तु Sy.
१८. मात A. मातरम् is suggested for मातर ॥ जननीम् Sy.
१९. भर्तव्या Sy.
२०. कुशमयस्य वेद्यामास्तीर्णस्य Sy.
२१. उन्नते देशे Sy.
२२. तद्वदस्माकं भरणीया देवाः Sy.
२३. आ समन्तात् सिञ्चन्तु Sy.
२४. विश्वं सर्वं हविरञ्चति गच्छतीति विश्वाची जुहुः ? (हूः) Sy.
२५. यज्ञयोग्यां त्वदीयां ज्वालाम् Sy.
२६. ज्वला A. ज्वलां M.
२७. The passage जुहूरेव वा विश्वाची should immediately follow विश्वाची गौः।
२८. अग्ने is suggested for अग्ने।
२९. देवतातौ युद्धे । यज्ञवाचके देवतातिशब्दोऽत्र सङ्ग्रामे वर्तते Sy.
३०. हिंसा A. हिंसकान् Sy.

ते सीषपन्त जोषमा यजत्रा ऋतस्य धाराः सुदुघा दुहानाः ।
ज्येष्ठं वो अद्य महः आ वसूनामा गन्तन समनसो यति ष्ठ ॥ ४ ॥

ते सीषपन्त[१] ते[२] । आस्पृशन्तु । प्रीतिम् । यष्टव्याः । उदकस्य । धाराः । सुदोहाः[५] । दुहानाः[६] । प्रशस्ततमम्[७] । अद्य । युष्माकम् । वसूनाम् । महत्त्वमस्मान्[८] । आगच्छतु देवा. ! आगच्छत । समानमनस्काः[९] । यावन्तः । भवथ ।

एवा नो अग्ने विक्ष्वा दशस्य त्वया वयं सहसावन्नास्क्राः ।
राया युजा संधमादो अरिष्टा यूयं पात स्वस्तिभिः सदा नः ॥ ५ ॥

एवा नः[१०] । एवम् । अस्मभ्यम् । अग्ने ! प्रजासु । आभिमुख्येन । देहि[१२] । त्वया[१३] । वयम् । बलवन् ! आस्कन्दितारः[१४] । धनेन । सहायेन[१५] । सहमाद्यन्तः । अहिंसिताः[१६] ।

VII.44.

दधिक्रां वः प्रथममश्विनोषसमग्निं समिद्धं भगमूतये हुवे ।
इन्द्रं विष्णुं पूषणं ब्रह्मणस्पतिमादित्यान्द्यावापृथिवी अपः स्वः ॥ १ ॥

दधिक्रां[१७] वः । एता[१८] देवताः[१९] । युष्माकम् । रक्षणाय । प्रथमम् । ह्वयामि[२०] । त्रीश्च[२१] लोकान् । आदित्यांश्च[२२] ।

---

१. ०षवन्त A. M. २. इन्द्रादयो देवाः Sy. ३. सपतिः परिचरणार्थः । स्तुतिभिरा समन्तात्पर्यचीचरन् । अस्मान् परिचरणं कुर्वन्तु । स्वीकुर्वन्त्विति यावत् Sy. ४. पर्याप्तं यथा भवति तथा Sy. ५. सुखेन दोग्धुं शक्याः Sy. ६. वर्षन्तः Sy. ७. श्रेष्ठम् Sy. ८. महनीयं धनम् Sy. ९. ०मानं मन० A. तुल्यमतयः सन्तः Sy. १०. नम् A. M. ११. एवं स्तुतस्त्वम् Sy. १२. धनमभि प्रयच्छ Sy. १३. त्वाया A. १४. अस्कन्दि० A. अस्कन्नाः Sy. १५. सहावेन A. नित्ययुक्तेन Sy. १६. अहिंसिता भवेम । अस्मिन् सूक्ते प्रतिपादिताः सर्वे देवा यूयं नोऽस्मान् कल्याणैः सर्वदा पालयत Sy. १७. 'दधिक्रां वः' इति पञ्चर्चमेकादशं सूक्तं वसिष्ठस्यार्षं दधिक्राख्यदेवताकम् । आद्या जगती सा तु दधिक्रादिलिङ्गोक्तदेवताका शिष्टाश्चतस्रस्त्रिष्टुभः । अनुक्रम्यते हि—'दधिक्रां दाधिक्रं जगत्याद्या लिङ्गोक्तदेवता' (KSA. 36. 44. p. 25.) इति । गतो विनियोगः Sy. १८. एताः refers to दधिक्राम् । अश्विना । उषसम् । अग्निम्, समिद्धम् । भगम् । इन्द्रम् । विष्णुम् । पूषणम् । ब्रह्मणस्पतिम् and अपः ॥ Sy. explains these words in the following manner :— दधिक्रामश्वाभिमानिनीं देवताम् । अश्विदेवौ । उषोदेवताम् । सम्यग्दीप्तमग्निञ्च । भगमेतदाख्यं देवञ्च । इन्द्रम् । विष्णुम् । पूषणम् । ब्रह्मणस्पतिम् । अप उदकदेवता इत्येतान् देवान् । आह्वयामि । १९. देवात् A. २०. आह्वयामि Sy. २१. त्रिंशच्च A. त्रीन् लोकान् refers to द्यावापृथिवी and स्वः ॥ But Sy. explains स्वः as सूर्यम् । २२. आदित्यांश्च is suggested for आदित्यश्च ।

दधिक्रामु नमसा बोधयन्त उदीराणा यज्ञमुपप्रयन्तः ।
इळां देवीं बर्हिषि सादयन्तोऽश्विना विप्रा सुहवा हुवेम ॥ २ ॥

दधिक्राम्[1] । दधिक्राम्[2] । एव । हविषा[3] । बोधयन्तः[4] । उद्यच्छन्तः[5] । यज्ञम्[6] । उपप्रयन्तः[7] । इलाम्[8] । देवीम् । हविर्बर्हिषि[9] । सादयन्तः[10] । अश्विनौ । मेधाविनौ । स्वाहानौ[11] । हुवेम[12] । दाधिक्रं[13] सूक्तं[14] साहचर्यादन्येषां स्तुतिः[15] ।

दधिक्रावाणं बुबुधानो अग्निमुप ब्रुव उषसं सूर्यं गाम् ।
ब्रध्नं मंश्चतोर्वरुणस्य बभ्रुं ते विश्वास्मद्दुरिता यावयन्तु ॥ ३ ॥

दधिक्रावाणम्[16] । बुबुधानः[17] । अग्निम्[18] । उपब्रुवे[19] । अग्निम् । उषसम् । सूर्यम्[20] । गाञ्च[21] । मंश्चतुरित्यश्वनाम[22], मन्यमानामनभिगच्छतीति ह तु वरुणविशेषणम्, मंश्चतोः[23] । वरुणस्य । महान्तम् । वभ्रुमश्वम्[24] । ते सर्वे । विश्वानि[25] । अस्मत्तः । दुरितानि[26] । पृथक्कुर्वन्तु ।

---

१. दधिक्रा M.
२. दधिक्राव M. एतन्नामकमश्वविशेषं देवम् Sy.
३. उ इति पूरणः Sy.
४. हविषं A. स्तोत्रेण Sy.
५. प्रज्ञापयन्तः Sy.
६. प्रेरयन्तः Sy.
७. यज्ञ M.
८. उपक्रममाणाः Sy.
९. हवीरूपाम् Sy.
१०. बर्हिषि A. ११ आस्थापयन्तः Sy.
१२. स्वाह्वानौ is suggested for स्वाहानौ ॥ शोभनाह्वानौ Sy.
१३. आह्वयाम Sy.
१४. दाधिक्रं is suggested for दाधिकं ।
१५. सूर्युक्तं A.
१६. The passage दाधिकं (क्रं) . . . . स्तुतिः should be placed at the beginning of the hymn.
१७. स्तोत्रेण बोधयन् Sy.
१८. अजानस् A. अश्वम् is suggested for अग्निम् ॥ दधिक्रावाणम् अश्वविशेषम् Sy.
१९. अहमुपस्तौमि Sy.
२०. सर्वस्य प्रेरकम् Sy.
२१. गां चमसं M. भूमि वाग्देवतां वा, एवम्भूतान् देवानहमुपस्तौमि Sy.
२२. ०त्यश्व ना० A. मांश्चत्व इत्यश्वनाम (Cf. Ngh. 1. 14. Sarup's ed. p. 6.
२३. ० ०नानभि० is suggested for ०ना मनभि० ॥ मन्यमानान् स्तुवतो जनांश्चेतयते जानातीति, यद्वाभिमन्यमानांश्चातयते नाशयतीति मंश्चतुः । तस्य Sy.
२४. ह is missing in M. इह is suggested for ह ॥
२५. ह्याश्चतोः A.
२६. ०मश्वन् A. पिङ्गलवर्णमश्वम् । तस्यानयनार्थमहमुपब्रुवे Sy.
२७. सर्वाणि Sy.
२८. पापानि Sy.

दधिक्रावा प्रथमो वाज्यर्वाग्रे रथानां भवति प्रजानन् ।
संविदान उषसा सूर्येणादित्येभिर्वसुभिरङ्गिरोभिः ॥ ४ ॥

दधिक्रावा । दधिक्रावा । प्रथमः । बलवान् । गन्ता । रथानाम् । अग्रे । भवति । गन्तव्यं देश प्रजानन् । उष.प्रभृतिभिः । संविदान ऐकमत्यं गतः ।

आ नो दधिक्राः पथ्यामनक्त्वृतस्य पन्थामन्वेतवा उ ।
शृणोतु नो दैव्यं शर्धो अग्निः शृण्वन्तु विश्वे महिषा अमूराः ॥ ५ ॥

आ नः । आभिमुख्येन । अनक्तु । अस्माकम् । दधिक्राः । पन्थानमुदकेन । यज्ञस्य । पन्थानम् । अविच्छेदेनानुष्ठातुम् । शृणोतु । अस्मान् । दैव्यम् । बलम् । अग्निः । शृण्वन्तु । विश्वे । महान्तः । अमूढा देवा अस्मानिति ।

VII. 45.

आ देवो यातु सविता सुरत्नोऽन्तरिक्षप्रा वहमानो अश्वैः ।
हस्ते दधानो नर्या पुरूणि निवेशयंश्च प्रसुवञ्च भूम ॥ १ ॥

आ देवः । आयातु । देवः । सविता । शोभनरत्नः । अन्तरिक्षस्य पूरयिता । अश्वैः । उह्यमानः ।

---

१. अश्वरूपो देवः Sy. २. सर्वेषामश्वानां मुख्यः Sy. ३. शीघ्रगामी Sy. ४. अर्वा गमनशीलः Sy. ५. प्रमुखः Sy. ६. भवन्ति A. ७. रथसंयोजनीयांस्तांस्तान्-इत्यानधिष्ठाय ज्ञातव्यानि सम्यग्जानन् Sy. ८. प्रभृति refers to उषसा । सूर्येण । आदित्येभिः । वसुभिः and अङ्गिरोभिः ॥ Sy. explains these words in the following manner :— उषोदेवतया । सर्वस्य प्रेरकेण देवेन । आदित्येभिरादित्यैश्च । वसुभिश्चाङ्गिरोभिर्ऋषिभिश्च सह स्तोतव्यैर्ऋषिभिश्च ॥ ९. एक० A. संविदानः सम्यग्जानन् । ऐकमत्यं प्राप्त इत्यर्थः Sy. १०. उदकेनासिञ्चतु Sy. ११. अमस्माकम् A. १२. अश्वरूपो देवः Sy. १३. वन्धनमु० M. पथ्यां पदवीम् Sy. १४. It goes with अनक्तु । १५. अनुगन्तुं प्रवृत्तानाम् Sy. १६. शृणोति A., M. १७. अस्मदीयं हवम् Sy. १८. देव्यम् A. देवसम्बन्धि Sy. १९. VM. ignores उ ॥ उ इति पूरणः Sy. २०. 'आ देवो यातु' इति चतुर्ऋचं द्वादशं सूक्तं वसिष्ठस्यार्षं सवितृदेवताकं त्रैष्टुभम् । 'आ देवश्चतुष्कं सावित्रम्' इत्यनुक्रान्तम् (KSA. 36. 45. p. 25.)। व्यूळ्हे दशरात्रे चतुर्थेऽहनि वैश्वदेवशस्त्र इदं सावित्रनिविद्धानम् । सूत्र्यते हि—'चतुर्थेऽहन्या देवो यातु....' (ĀSS. 8. 8.) इत्येषा वपानुवाक्या । सूत्रितञ्च—'आ देवो यातु सविता सुरत्नः स घा नो देवः सविता सहावा' (ĀSS. 3. 7.) इति । अश्वमेधेऽनुसवने तिस्रः सावित्र्य इष्टयः' तत्र द्वितीयस्यामिष्टौ याज्येयम् । सूत्रितञ्च—'य इमा विश्वा जातान्या देवो यातु' (ĀSS. 10. 6.) इति Sy. २१. आगच्छतु Sy. २२. सर्वस्य प्रेरकः Sy. २३. रक्तः A. शोभनरत्नोपेतः Sy. २४. स्वकीयेन तेजसान्तरिक्षस्य पूरयिता Sy. २५. स्वकीयैर्वाहैः Sy.

हस्ते[1]। प्रयच्छन् धारयन्[2] वा। बहूनि। धनानि[3]। रात्रौ निवेशयन्[4]। प्रातः प्रसुवन्[5]। च। भूतजातम्[6]।

उदस्य बाहू शिथिरा बृहन्ता हिरण्ययी दिवो अन्ताँ अनष्टाम्।
नूनं सो अस्य महिमा पनिष्ट सूरश्चिदस्मा अनु दादपस्याम् ॥ २ ॥

उदस्य[7]। उद्व्याप्नुवतः[8]। अस्य[9]। बाहू[10]। शिथिलौ[11] प्रेर्यमाणौ। महान्तौ। हिरण्मयौ[12]। दिवः[13]। पर्यन्तानि[14]। नूनम्[15]। सः। अस्य। महिमा। सूयते[16]। सवितुर्यत्। सूर्यः। अपि। अस्मै सवित्रे। अनुददाति। अपस्या[17] कर्मेच्छमुपबृंहयतीत्यर्थः, सविता कर्माणि लौकिकानि चिकीर्षति साहाय्यं सूर्यः करोति।

स घा नो देवः सविता सहावा सांविष्टद्वसुपतिर्वसूनि।
विश्रयमाणो अमतिमुरूचीं मर्तभोजनमध रासते नः ॥ ३ ॥

स घ[20][21]। सः[22]। खलु[23]। अस्मभ्यम्। देवः। सविता। सहनवान्[24]। आभिमुख्येन। सुवतु[25]। वसुपतिः[26]। वसूनि। विविधं श्रयमाणः[27]। रूपम्[28]। बह्वञ्चनम्[29]। मनुष्यभोजनमन्नम्[30]। इदानीम्[31]। प्रयच्छतु[32]। अस्मभ्यम्।

---

१. पाणौ Sy.
२. दातुं धारयन् Sy.
३. नर्या नर्याणि मनुष्यहितानि... धनानि Sy.
४. दिवशयन् A.
रात्रिषु स्वे स्थाने स्थापयंश्च Sy.
५. अहःसु प्रेरयन् Sy.
६. भूतानि Sy.
७. VM. explains च once only.
८. उद्याप्नुतः A. वद्व्याप्नुतः is suggested for उद्व्याप्नुवतः ॥ ऊर्ध्वौ सन्तौ व्याप्नुवताम् Sy.
९. सवितुः सम्बन्धिनौ Sy.
१०. हस्तौ Sy.
११. शिथिलौ दानार्थं प्रसारितौ Sy.
१२. हरिस्मयौ A.
हिरण्ययौ सुवर्णमयौ Sy.
१३. अन्तरिक्षस्य Sy.
१४. ०न्ताग्निना M. ०न्तान् is suggested for ०न्तानि ॥
१५. नानि A. अद्य Sy.
१६. स्तूयते is suggested for सूयते ॥ अस्माभिः स्तूयते Sy.
१७. वद्याति A.
१८. अवस्थां M.
१९. ०च्छामुप० is suggested for ०च्छमुप० ।
२०. सावित्रे पशौ पुरोडाशस्य हविषोः 'स घा नः' इति द्वे अनुवाक्ये । सूत्रं पूर्वमुदाहृतम् । आश्वमेधिकीषु सावित्रेष्टिषु तृतीयस्यामिष्टाविमे एव याज्यानुवाक्ये । सूत्रितञ्च— 'स घा नो देवः सविता सहावेति द्वे' (ĀŚS. 10. 6.) इति Sy.
२१. सं घ A.
२२. सं A.
२३. घेति पूरणः Sy.
२४. तेजोऽन्तराण्यभिभावुकं तेजो यस्य सः Sy.
२५. आ समन्तात् प्रेरयति Sy.
२६. धनानां पालकः Sy.
२७. निषेवमाणः सन् Sy.
२८. रूपं दीप्तिमित्यर्थः Sy.
२९. विस्तीर्णगमनाम् Sy.
३०. मनुष्याणां भोगयोग्यं धनम् Sy.
३१. अधुना Sy.
३२. ववातु Sy.

इमा गिरः सवितारं सुजिह्वं पूर्णगभस्तिमीळते सुपाणिम् ।
चित्रं वयो बृहदस्मे दधातु यूयं पात स्वस्तिभिः सदा नः ॥ ४ ॥

इमा गिरः । इमाः[1] । गिरः[2] । सवितारम् । शोभनवाचम् । धनपूर्णमाहुः[3] । स्तुवन्ति । शोभनपाणिम् । सञ्चितम्[4] । अन्नम् । बृहत्[5] । अस्मासु[6] । दधातु[7] ।

VII. 46.

इमा रुद्राय स्थिरधन्वने गिरः क्षिप्रेषवे देवाय स्वधाव्ने[8] ।
अषाळ्हाय सहमानाय वेधसे तिग्मायुधाय भरता शृणोतु नः ॥ १ ॥

इमाः[9] । इमाः[10] । रुद्राय[11] । स्थिरधन्वने[12] । गिरः[13] । क्षिप्रेषवे[14] । देवाय[15] । अन्नवते[16] । शत्रुभिरसोढाय[17] ।

---

१. ईदृग्भूताः Sy.

२. गृणन्ति स्तुवन्तीति गिरः स्तोत्र्यः प्रजाः । यद्वा इमाः स्तुतिरूपाः वाचः Sy.

३. धनपूर्णबाहुम् is suggested for धनपूर्णमाहुः ॥ सम्पूर्णधनहस्तम् Sy.

४. चायनीयम् Sy.

५. महत् Sy.

६. अस्मे अस्मासु यद्वा अस्मे अस्मभ्यम् Sy.

७. दधातु (यद्वा) प्रयच्छतु । हे सवितृप्रमुखाः ! देवाः ! यूयं नोऽस्मान् स्वस्तिभिः कल्याणैः सदा सर्वदा पात पालयत Sy.

८. 'इमा रुद्राय' इति चतुर्ऋचं त्रयोदशं सूक्तं वसिष्ठस्यार्षं रुद्रदेवताकम् । अन्त्या त्रिष्टुप् शिष्टा जगत्यः । तथा चानुक्रमणिका—'इमा रौद्रं त्रिष्टुबन्तम्' (KSA 36. 46. p. 25.) इति । शूलगवाविषु रौद्रयज्ञेष्वनेन सूक्तेनोदीची दिगुपस्थेया । सूत्र्यते हि—'इमा रुद्राय स्थिरधन्वन इति सर्वरुद्रयज्ञेषु दिशामुपस्थानम्' (AGS. 3. 6. 21.) इति Sy.
वसिष्ठस्यार्षम् । उत्तरा च Dur.
वसिष्ठस्य परा च SKN.

९. हे अस्मदीया स्तोतारः ! यूयमिमाः Sy.
हे स्तोतारः ! यूयमुच्यध्वे, इमाः Dur
इमा वक्ष्यमाणाः SKN.

१०. एतन्नामकाय Sy.
रुद्रायेत्याद्याः सर्वास्तावर्थ्यचतुर्थ्यः । रुद्राय रुद्रस्य SKN.

११. दृढधनुष्काय Sy.
किंलक्षणाय ?....दृढधनुषे Dur.
दृढधनुषः SKN-

१२. स्तुतीः Sy., Dur., SKN.

१३. शीघ्रगामिबाणाय Sy.
शीघ्रेषवे Dur.

१४. द्रुवाय A.
दानादिगुणयुक्ताय Dur.
देवस्य SKN.

१५. अन्नवते A. स्वधावते Dur. स्वधा, अन्नं तेन तद्वान् स्वधावान् । ततश्चतुर्थी । अन्नवत इत्यर्थः SKN.

१६. केनाप्यनभिभूताय Sy. अनभिभूताय केनचित् Dur.
सहिरभिभवे। अनभिभूतैस्त्यान्यैः SKN.

तत्सहमानाय[1] । विधात्रे[2] । तिग्मधनुष्काय[3] । भरत[4] मनुष्याः[5] । सः[6] शृणोतु[7] । अस्मानिति[8] ।

स हि क्षयेण क्षम्यस्य जन्मनः साम्राज्येन दिव्यस्य चेतति ।
अवन्नवन्तीरुप नो दुरश्चरानमीवो रुद्र जासु नो भव ॥ २ ॥

स हि क्षयेण[10] । सः । हि[10] । क्षयेण[11] निवासत्वेन । पार्थिवस्य[12] । भूतजातस्य[13] । ज्ञायते[14] । साम्राज्येन[15] च । दिवि भवस्य देवगणस्य चेति । अथ प्रत्यक्षः—रक्ष[16] च[17] । अस्माकम् । रक्ष[18] । दुर्[19] । उर[20] । अमिवार-हितौ[21] । रुद्र[22] ! प्रजासु । भव । अस्माकम्[23] ।

---

१. शत्रूणामभिभवित्रे Sy. नित्यमभिभवते शत्रून् Dur. अभिभवतोऽन्यान् SKN.

२. विधातुः SKN.

३. तीक्ष्णास्त्राय Sy. तीक्ष्णायुधाय Dur. तीक्ष्णायुधस्य चार्थाय....तीक्ष्णं ह्यायुधं योद्धारमुत्साहयति । आभिमुख्येन युध्यतेऽनेनेत्यायुधम् SKN.

४. हर मनु० A. धारयत Sy. प्रहरत प्रापयत कुरुतेत्यर्थः SKN.

५. मनुष्याय शृणो० M.

६. स is suggested for सः ।

७. इमा गिर उच्यमाना शृणोतु Dur.

८. अस्मदीयाः स्तुतीः Sy.
अस्माकमित्येतदाशास्महे Dur.
अस्माकं स्वभूताः SKN.

९. रुद्रो रोतीति सतः । रोरूयमाणो द्रवतीति वा । रोदयतेर्वा । 'यदरुदत्तद्रुद्रस्य रुद्रत्वम्' इति काण्वम् । 'यदरोदीत्तद्रुद्रस्य रुद्रत्वम्' इति हारिद्रविकम् । तस्यैषा भवति....इमाः । रुद्राय । बृहद्धन्वने । गिरः । क्षिप्रेषवे । देवाय । अप्नवते । अषाळ्हायान्यैः । सहमानाय । विधात्रे । तिग्मायुधाय । भरत शृणोतु । नः ।[1] तिग्मं तेजतेरुत्साहकर्मणः । आयुधमायोधनात् N. 10. 6.; SKN. IV. 8.

१०. खलु Sy.

११. ऐश्वर्येण Sy.

१२ क्षम्यस्य क्षमायां पृथिव्यां भवस्तस्य Sy.

१३. जनस्य Sy.

१४. प्रज्ञायते Sy.

१५. सम्रा A.
ऐश्वर्येण प्रज्ञायते Sy.

१६. शेषः प्रत्यक्षकृतः Sy.

१७. रक्ष ररमा० A. रक्षन् is suggested for रक्ष च ॥ पालयन् Sy.

१८. रक्षन्तीः is suggested for रक्ष ॥ त्वां स्तोत्रैस्तर्पयन्तीनोऽस्मदीयाः प्रजाः Sy.

१९. दुरः is suggested for दुर् । दुर्गाण्यस्मदीयानि गृहाणि Sy.

२०. ऊर M. उपचर is suggested for उर ॥ उपगच्छ Sy.

२१. अमिवहितौ A. अमीवारहितः is suggested for अमिवारहितौ ॥ अमीवा रोगस्तामकुर्वन् Sy.

२२. हे रुद्र ! देव ! त्वञ्च Sy.

२३. अस्मदीयासु Sy.

या तें दिद्युदवसृष्टा दिवस्परि क्ष्मया चरति परि सा वृणक्तु नः ।
सहस्रं ते स्वपिवात भेषजा मा नस्तोकेषु तनयेषु रीरिषः ॥ ३ ॥

या ते । यत् । ते । आयुधम् । त्वयावसृष्टम् । अन्तरिक्षात् । पृथिवीम् । लक्षीकृत्य । चरति । तत् । परिवर्जयतु । अस्मान् । सहस्रम् । ते । स्वाप्तवनेति रास्को । भेषजानि । मा । अस्माकम् । पुत्रेषु । पौत्रेषु च । हिंसि ।

---

१. हे रुद्र ! Sy. हे भगवन् रुद्र ! Dur.

२. वैद्युतात्मनस्तव सम्बन्धिनी Sy. तव स्वभूता SKN.

३. अशनिरूपा हेतिः Sy. आयुधं ज्वरातिसारादिरोगाख्यं येन प्राणिनो हंसि. . . . द्युतेर्वाऽवखण्डनार्थस्य द्युतेर्वा बोप्त्यर्थस्य Dur. वज्रनामैतत् । लुप्तोपमं चात्र द्रष्टव्यम् । विद्युदिव वज्रमिव. . . . प्राणिघातिनी । कासौ ? पुरस्ताद् भेषजश्रुतेः सामर्थ्यात्, रोगजातिः . . . . द्युतेः खण्डनार्थस्य, द्युतेर्वोज्ज्वलत्वात् SKN.

४. विमुक्ता Sy. त्वयैवाधः क्षिप्ता SKN.

५. अन्तरिक्षसकाशात् Sy. द्युलोकादधि. . . सर्वैव हि देवता द्युस्थानेति गम्यते, दिवस्परीति लिङ्गात् । कर्माधिकारस्थानानि तु विशिष्टानि —इति तिसृणां त्रीणि कर्माधिकारस्थानानि नियतानि भवन्ति । अत एवोक्तमग्न्यधिकारे द्युस्थानो भवतीति Dur. दिव उपरि सती SKN.

६. क्षित्या क्षितौ वा Sy. कथं था चरति विद्युत् ? क्ष्मया पृथिव्या व्रीह्यादिभावमुपगतया । हिंसन्ती चरतीति वा Dur. सप्तम्यर्थे तृतीया सहार्थे वा । पृथिव्यां पृथिव्या वा सह । अथवा 'क्ष्मायी विधूनने' इत्यस्य । क्ष्मा हिंसा तया सह, क्ष्मापयती घ्नती प्राणिन इत्यर्थः SKN. ७. रक्षी० A. लक्ष्यी० is suggested for लक्षी० ॥ तस्यां व्रीह्यादिभावमुपागतायां पृथिव्यामनुप्रविश्य Dur.

८. वर्तते Sy. अम्बुपानसमुद्भूता तत्प्रभवत्वात्सर्वरोगाणाम् Dur.

९. सा विद्युत् Sy. तस्याः किम् ? विद्युतः सा घ्नती Dur.

१०. परित्यजतु Sy. परिवर्तयतु Dur. परिवर्जने । परिवर्जयतु साऽस्मान् SKN.

११. अस्मात् A. प्राणिनोऽस्मान् Dur.

१२. बहूनि Sy. किमन्यदस्तु त्वत्तोऽस्माकम् ? सहस्रम् Dur. सहस्रसङ्ख्याकानि SKN.

१३. तव स्वभूतानि SKN.

१४. रारको M. स्वाप्तवचनेति यास्कः is suggested for स्वाप्तवनेति रास्को ॥ कस्यचिदप्यनतिक्रमणीयाज्ञ Dur. हे स्वाप्तव वन ! SKN. १५. यान्यौषधानि सन्ति तान्यस्मभ्यं प्रयच्छेति शेषः Sy. यैर्बहुभिर्बहुप्रकारं भेषजं करोषि भक्तानां तान्यस्मान्प्रति सन्तु Dur. औषधानि तान्यस्मभ्यं देहीति शेषः SKN.

१६. तोकमिति पुत्रः । स हि नित्यं पित्रा विनयता तुद्यते, इदं कुर्विदं मा कार्षीरिति Dur. तुद्यते हि तत् तनयमात्मन एव विकाररूपम् SKN.

१७. पौत्रम् । तद्धयतितरां पितुः सकाशात् ततं भवति । सत्यप्यपत्यनामत्वाविशेषे, इहाजामितैव विशेषः Dur. अपौनरुक्त्याय विषयभेदप्रदर्शनं पुत्रेषु पौत्रेषु चेति SKN.

१८. हिंसीः is suggested for हिंसि ॥ हिंसां मा कृथाः Sy. हिंसां नो मा प्रयुङ्क्ष्वेत्येतदाशास्महे Dur.

१९. आयुधमायोधनात् । तस्यैषाऽपरा भवति. . . . या ते विद्युदवसृष्टा । दिवस्परि दिवोऽधि । द्विद्युद् द्युतेर्वा (द्योततेर्वा) । क्ष्मया चरति । क्ष्मा पृथिवी । तस्यां चरति । तया चरतिं । विक्ष्मापयन्ती चरतीति वा । परिवृणक्तु नः सा । सहस्रं ते स्वाप्तवचन । भैषज्यानि । मा नस्त्वं पुत्रेषु (च) पौत्रेषु च रीरिषः । तोकं तुद्यतेः । तनयं तनोतेः N. 10. 7; SKN. IV. 9.

मा नो वधी रुद्र मा परा दा मा ते भूम प्रसितौ हीळितस्य ।
आ नो भज बर्हिषि जीवशंसे यूयं पात स्वस्तिभिः सदा नः ॥ ४ ॥

मा नः । मा । अस्मान् । वधीः । रुद्र ! मा च शत्रुभ्यः । परा दाः । मा । ते । भ्रम । बन्धने । कुद्धस्य, प्रसितिः प्रसयनाक् तन्तिर्वा जालं वेत्युक्तम् । आहजाप्रापय । अस्मिन् । यज्ञे । जीवानां शंसनीये ।

VII. 47.

आपो यं वः प्रथमं देवयन्त इन्द्रपानमूर्मिमकृण्वतेळः ।
तं वो वयं शुचिमरिप्रमद्य घृतप्रुषं मधुमन्तं वनेम ॥ १ ॥

आपः । हे आपः ! यम् । युष्माकम् । प्रथमम् । यजमानाः । इन्द्रस्य पानम् । ऊर्मिम् । अकृण्वत स्तोतार इति वसतीवर्यभिप्रायम् । तम् । वः । वयम् । शुचिम् । अपापम् । अद्य । घृतस्य स्रष्टारम् । मधुमन्तम् । भजेम ।

---

१. अस्मात् A.
२. हिंसीः Sy.
३. A. reads वारा for परा वाः ॥ त्राक्षीः Sy.
४. भूम is suggested for भ्रम ।
५. प्रकर्षेण बन्धने Sy.
६. कति वा M. ०नात्तन्तिर्वा or०नात्तन्तुर्वा A. is suggested for ०नाक्तन्तिर्वा A. प्रसितिः प्रसयनात् । तन्तुर्वा । जालं वा N. 6. 12.
७. The passage प्रसितिः. . . . वेत्युक्तम् should immediately follow बन्धने ।
८. आभंजा० is suggested for आह जा०॥ भागिनः कुरु । हे रुद्रप्रमुखाः ! देवाः ! यूयं नोऽस्मान् कल्याणैः सर्वदा पालयत Sy.
९. अस्मान् is suggested for अस्मिन् ।
१०. किञ्च जीवैराशंसनीये Sy.
११. 'आपो यं वः' इति चतुर्ऋचं चतुर्दशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमब्देवताकम् । 'आपो यमापम्' इत्यनुक्रान्तं च (KAS. 36. 47, p. 25.) । गतो विनियोगः
१२. आपो ह A. हे अब्देवताः ! Sy.
१३. युष्माकं कार्यभूतम् Sy.
१४. पुरा Sy.
१५. देवानिच्छन्तोऽध्वर्यवः Sy.
१६. इन्द्रेण पातव्यम् Sy.
१७. ऊर्मिकं A. सोमाख्यं यं रसम् Sy.
१८. कृण्वन्त A. अभिषवणवचनादिभिः समस्कुर्वत Sy.
१९. स्तो is written twice in A.
२०. ०ती पर्य० A. इळाया भूम्याः सम्भूतम् Sy.
२१. तमूर्मिम् Sy.
२२. युष्मदीयम् Sy.
२३. शुद्धम् Sy.
२४. अवापम् A. पापरहितम् Sy.
२५. इदानीम् Sy.
२६. वृष्टिलक्षणमुदकं सिञ्चन्तम् Sy.
२७. मयुमन्तं A. मधुररसोपेतम् Sy.
२८. सम्भजेमहि Sy.

तमूर्मिमापो मधुमत्तमं वोऽपां नपादवत्वाशुहेमा ।
यस्मिन्निन्द्रो वसुभिर्मादयाते तमश्याम देवयन्तो वो अद्य ॥ २ ॥

तमूर्मिम् । तम् । ऊर्मिम् । हे आपः ! मधुमत्तमम् । युष्माकम् । अपान्नपाद् देवः । रक्षतु । आशुगमनः । यस्मिन् । इन्द्रः । वसुभिर्देवैः सह । माद्यति । तम् । युष्माकमूर्मिम् । अद्य वयम् । अश्याम । देवकामाः ।

शुतपवित्राः स्वधया मदन्तीर्देवीर्देवानामपि यन्ति पाथः ।
ता इन्द्रस्य न मिनन्ति व्रतानि सिन्धुभ्यो हव्यं घृतवज्जुहोत ॥ ३ ॥

शतपवित्राः । अनेकभवनसाधनाः । स्वधया मनुष्यान् । तर्पयन्त्यः । देव्यः । देवानाम् । अभि गच्छन्ति । स्थानम् । ताः । इन्द्रस्य । न । हिंसन्ति । कर्माणि । ताभ्यः सिन्धुभ्यः । हव्यम् । घृतवत् । जुहुत ।

---

१. The *pratika* is supplied by the Editor.
२. तमूर्मिं प्रसिद्धं सोमाख्यं रसम् Sy.
३. हे एतत्संज्ञका देवाः ! Sy.
४. रसवत्तमम् Sy. ५. युष्मदीयम् Sy.
६. एतदाख्यो देवः Sy. ७. पालयतु Sy.
८. शीघ्रगतिः Sy. ९. ऊर्मौ Sy.
१०. वासकैर्देवैः सह Sy. ११. माद्येत् Sy.
१२. अद्य is suggested for अध्य ॥ अस्मिन् दिने Sy. १३. प्राप्नुयाम Sy.
१४. वसिष्ठस्यार्षम् Dur., SKN.
१५. ०पवन० is suggested for ०भवन० ॥ शतं बहूनि पवित्राणि पावनानि रूपाणि यासां ताः Sy. बहुपावयित्र्यो या देव्यः.... एवमत्रापः पवित्रशब्देनोच्यन्ते, अब्दैवतत्वान्मन्त्रस्य बहून्यवयवानि पवित्राण्युदकानि यासु ताः शतपवित्राः, बह्वय इत्यर्थः।..शतपवित्रा इत्यस्यार्थस्य कथनं बहूदका इति । SKN.
१६. स्वकार्यभूतेनान्नेन Sy. अन्नेन सहिता भूत्वा Dur. अन्नेन सह SKN. १७. जनान् मादयन्त्यः Sy. 'मद तृप्तौ' 'वा च्छन्दसि (Pa. 6. 1. 105.)इति पूर्वसवर्णः। सर्वप्राणिनस्तर्पयन्त्य इत्यर्थः SKN. १८. द्योतमानाः आपः Sy. दानादिगुणयुक्ताः Dur. देव्य आपः SKN. १९. इन्द्रादीनाम् Sy. दानादिगुणयुक्तानामेव Dur.
२०. प्रविशन्ति Sy. अपि गच्छन्ति Dur. गच्छन्ति SKN. २१. पानं सोमाख्यम् Dur. अन्नं सोमाख्यम् SKN. २२. तादृश्य आपः Sy. ता एवंलक्षणा आपः Dur. ता इति तच्छब्दश्रुतेर्यच्छब्दोऽध्याहार्यः । यास्ताः SKN.
२३. इन्द्रस्य प्रीणनानि Sy. इन्द्रस्य स्वभूतानि SKN. २४. नि A. २५. उत्पादयन्तीत्यर्थः Sy. येनाभ्रवधानन्तरमविलम्बमाना वर्षभावेन प्रक्षरन्तीत्यभिप्रायः Dur. मेघहननादनन्तरमेव क्षरन्तीत्यर्थः। अक्षरन्तीषु हि तासु तद्धिंसतः कर्मणो निष्फलत्वात् Sy.
२६. यज्ञादीनि Sy. कर्माणि मेघवधान्यानि SKN
२७. या एता एवङ्गुणयुक्ता आपस्ताभ्योऽङ्घ्रयः Dur. अतस्ताभ्यः SKN.
२८. अद्भ्यः Sy. स्पन्दमानाभ्यः Dur.
२९. पुरोडाशादिकं हविः Sy. हविः Dur., SKN.
३०. हुत० A. उपस्तरणाभिघारणलक्षणाज्ययुक्तम् Sy. घृतमिश्रम् Dur. घृतसंयुक्तम् SKN.
३१. जुहोत M. वज्रेण मेघांस्ताडयन् प्रयच्छति Sy. जुहोत हे ऋत्विजः ! अर्हन्ति ता हविरित्यभिप्रायः Dur.
३२. आपः पवित्रमुच्यन्ते 'शतपवित्राः स्वधया मदन्तीः' बहूदका N. 5. 6.; SKN. II. 320

याः सूर्यो रश्मिभिरातताने याभ्य इन्द्रो अरदद्गातुमूर्मिम् ।
ते सिन्धवो वरिवो धातना नो यूयं पात स्वस्तिभिः सदा नः ॥ ४ ॥

यः सूर्यः । याः । सूर्यः । रश्मिभिः । अन्तरिक्षे विस्तारयति । याभ्यश्च । इन्द्रः । विलिखत् । गमनशीलम् । ऊर्मिम्, गमनकामार्गं चकारेत्यर्थः 'इन्द्रो अस्माकमरदद्वज्रबाहुः' इति मन्त्रः । ते यूयम् । हे सिन्धवः ! धनम् । अस्मभ्यम् । धत्त, सिन्धुसमानाधिकरण्यात्तच्छब्दस्य लिङ्गभेदः ।

VII. 48.

ऋभुक्षणो वाजा मादयध्वमस्मे नरो मघवानः सुतस्य ।
आ वोऽर्वाचः क्रतवो न यातां विभ्वो रथं नयं वर्तयन्तु ॥ १ ॥

ऋभुक्षणः । हे ऋभवः ! वाजा इति ज्येष्ठकनिष्ठाभ्यां व्यपदेशः । मादयध्वम् । अस्मासु । हे नरः ! मघवन्तः । सोमेन । गच्छताम् । युष्माकम् । अमितो मुखा अश्वाः । रथम् । आवर्तयन्तु । नृहितम् । यथा मनुष्याणाम् । कर्माणि भवतां रथमावर्तयति । हे महान्तः !

---

१. अपः Sy. २. स्वकीयैः किरणैः Sy.
३. विस्तारयति । सूर्यो हि रश्मिभिरुदकसारमादाय वर्षतीत्यर्थः Sy. ४. अद्भ्यः Sy.
५. व्यलिखत् is suggested for विलिखत् ।
६. मेघेभ्यो निर्गमनसाधनं मार्गम् Sy.
७. ऊर्मिम्—अर्तेरिदं रूपम् । गमनयोग्यम् Sy.
८. गमनिका० M. गमनकामो मार्गम् is suggested for गमनकामार्गम् ॥
९. ०स्मानरद० A.
१०. M. reads हे before यूयम् ।
११. आपः ! Sy. १२. स्म is missing in A.
१३. धत्तं A. प्रयच्छत Sy. १४. ०मान्याधि० A.
१५. The passage : सिन्धु....लिङ्गभेदः refers to ते यूयम्, therefore it should immediately follow ते यूयम् ॥... ते इति सिन्धुशब्देन समानाधिकरणत्वात् पुंल्लिङ्गत्वम् । हे अब्देवताः ! यूयं सर्वदा नोऽस्मान् कल्याणैः पालयत Sy.
१६. 'ऋभुक्षणः' इति चतुर्ऋचं पञ्चदशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमृभुदेवताकम् । अन्त्याया विकल्पेन विश्वेदेवा देवता । तथा चानुक्रान्तम्—'ऋभुक्षण आर्भवमन्त्या वैश्वदेवी वा (KSA. 36. 46. p. 25.) इति । दशमेऽहनि वैश्वदेवशस्त्र आर्भवनिविद्धानम् । सूत्र्यते हि—'ऋभुक्षण इत्यार्भवम्' (Ā SS. 8. 12.) इति Sy.
१७. ऋभुक्षवो A. ऋभुक्षेत्यृभूणां ज्येष्ठाख्या वाज इति तु कनिष्ठस्य । अत्रर्भुक्षणो वाजा इति बहुवचनेनर्भवस्त्रयो गृह्यन्ते....हे ऋभवः । यूयम् Sy. १८. तृप्ता भवत Sy.
१९ अस्मासु स्थितेन Sy. २० नेतारः Sy.
२१. धवन्तः A. धनवन्तः Sy.
२२. अभिषुतेन सोमेन Sy.
२३. गच्छन्ताम् A. २४. युष्मदीयाः Sy.
२५. अमितो० is suggested for अमितो० ॥ अस्मदभिमुखाः Sy. २६. आगमयन्तु Sy.
२७. नेति सम्प्रत्यर्थे । इदानीम् Sy.
२८. कर्मणां कर्तारः Sy.
२९. ०यन्ति is suggested for यति ।
३०. विभवः समर्था अश्वाः Sy.

ऋभुर्ऋभुभिरभि वः स्याम विभ्वो विभुभिः शवसा शवांसि ।
वाजो अस्माँ अवतु वाजसातावि न्द्रेण युजा तरुषेम वृत्रम् ॥ २ ॥

ऋभुर्ऋभुभिः[1]। ऋभुभिः[2]। युष्माभिः[3]। ययमप्तृभवः[4]। शत्रूनभिभवेम[5], तृतीयायामपि 'बहुवचनस्य वस्नसौ' इति दृष्टम् ऋभुरिति जसः स्वादेशः[6] तथा वि भुर्हिर्भवद्भिः[7]। वयं च विद्यो[8] महान्तः[9]। बलेन[10]। बलान्यभिभवेम[11]। वाजो[12] वाजनीयान्[13] युष्माकम्[14]। अस्मान्[15]। सङ्ग्रामे[16]। रक्षतु[17]। तेषां सहायभूतेन[18]। इन्द्रेण तरेम[19]। शत्रुम्[20]।

---

१. वसिष्ठस्येदमार्षम् Dur. वसिष्ठस्य SKN.

२. ऋभुभिः is missing in M.

३. हे शत्रवः ....ऋभव उरुभासो वयम् Dur. ऋभुरिति मेधाविनाम । व्यत्ययेन चात्रैकवचनं बहुवचनस्य स्थाने । ऋभवो मेधाविनो वयम् SKN.

४. उरुभाभिः....देवैः सहिताः Dur. ऋभुविभ्वा वाज इत्येते देवैः सह SKN.

५. यमभिभवः M. वयमृभवः is suggested for ययमप्तृभवः ॥ उरु भवन्तीत्यृभवः । प्रायेणभर्वोऽपि इन्द्रेण सह स्तूयन्ते Sy.

६. ०भवेत् A. ७. Pa 8. 1. 21.

८. The passage : तृतीयाया० ...वृष्टम् explains the form of वः (युष्माभिः). It should therefore follow immediately युष्माभिः ।

९. ०भुभिरिति M. The passage ऋभु ... स्वादेश : refers to ऋभुः of the text. It should follow immediately ऋभवः and precede शत्रून० ।

१०. ऋभुभिर्भ० M. विभुभिर्भ० is suggested for वि भुर्हिर्भ० ॥ प्रभूतबलैर्युष्माभिः सहिताः Dur. निग्रहानुग्रहसमर्थैर्विभुप्रभृतिभिर्वा तैरेव देवैः सह SKN.

११. विभ्वो is suggested for विद्यो ॥ विभवश्च Sy. हे विभ्वः ! Dur. न च केवला मेधाविनः । किं तर्हि ? विभुर्बलवत्त्वान्निग्रहे चानुग्रहे च समर्थो विभुरुच्यते । तेनायमर्थः—विभवो वयम् SKN.

१२. युष्मदीयेन Sy. स्वेन बलेन Dur. बलेन सेनाख्येन SKN.

१३. शत्रूणां बलानि Sy. एतेषामभिभवितॄणां शवांसि बलान्यभिभवेम Dur. युष्माकं स्वभूतानि बलानि सेनाख्यानि, अभि स्यामेति सम्बन्धः SKN.

१४. वाजो is missing in A. एतत्संज्ञक ऋभुः Sy.
अश्वाः Dur. वाजश्च देवः SKN.

१५. वर्जनीयान् A. वाजो वा कनीयान् is suggested for वाजो वाजनीयान् ।

१६. पालयतु Sy. रक्षन्तु Dur.

१७. संयुक्ताः सन्तो वयम् Dur. युज्यत इति युक् सहायः । इन्द्रेण सहायेन SKN.

१८. हनाम Sy. हन्म एनम् ।....अभिभवाधिकारात् तरुष्यतिर्हन्त्यर्थ उपपद्यते Dur. हन्याम SKN.

१९. शत्रुमित्यर्थः Dur. तरुष्यतिरप्येवङ्कर्मा (हन्तिकर्मा) इन्द्रेण युजा तरुषेम वृत्रम् इत्यपि निगमो भवति N. 5. 2. SKN. II. 291.

ते चिद्धि पूर्वीरभि सन्ति शासा विश्वाँ अर्य उपरताति वन्वन् ।
इन्द्रो विभ्वाँ ऋभुक्षा वाजो अर्यः शत्रोर्मिथत्या कृणवन्वि गृभ्णम् ॥ ३ ॥

ते चित् । ते । हि । खलु । बह्वीः सेनाः । अभिभवन्ति । शासेनासीनापि च । सर्वानेव । अरीन् । उपरताति । घ्नन्ती, स्वार्थिकस्तातिल् प्रत्ययः, मूलत एव घ्नन्तीति । इन्द्रः । विभ्वा मध्यमाः । ऋभुक्षाश्च ज्येष्ठः । कनीयान् वाजश्च । ईश्वरः । शत्रोः । धनम् । विकृण्वन्तु । मिथत्येति निवातो मिथापर्यायः सङ्गता इति ।

नू देवासो वरिवः कर्तना नो भूत नो विश्वेऽवसे सजोषाः ।
समस्मे इषं वसवो ददीरन्यूयं पात स्वस्तिभिः सदा नः ॥ ४ ॥

नू देवासः । क्षिप्रम् । भे देवाः । धनम् । कुरुत । अस्मभ्यम् । भवत च । सर्वे । अस्माकम् रक्षणाय । सङ्गताः । सन्नदीरन् सम्प्रयच्छन्तु । अस्मभ्यम् । अन्नम् । वसवो देवाः ।

---

१. तादृशा इन्द्र ऋभवश्च Sy.
२. चिद्धीतोमौ पूरणौ Sy.
३. अस्मच्छत्रुसेनाः Sy
४. शोभनासीनापि M. शासनेनापि is suggested for शासेनासीनापि ॥ स्वकीययाज्ञया । यद्वा विशस्यते हिंस्यतेऽनेनेति शासशब्द आयुधवाची । तेन Sy.
५. समस्तान् Sy.
६. अर्यः शत्रून् Sy.
७. उप ताति । सप्तम्या लुक् । उपरैरुपलैः पाषाणसदृशैरायुधैस्तायते विस्तीर्यते इत्युपरत ति युद्धम् । तस्मिन् Sy.
८. घ्नन्ति is suggested for घ्नन्ती ॥ हिंसन्ति Sy.
९. स्वार्थीकस्थातिल प्र० A.
१०. VM. seems to explain the form of उपरताति by स्वार्थिस्तातिल् प्रत्ययः and मूलत एव seems to be the explanation of उपरताति । Therefore the passage स्वार्थिक. . एव should immediately follow उपरताति ॥
११. बिल्हा (ल्हा M.) मध्यमः is suggested for मध्यमा ।
१२ ऋभुक्षाश्च is suggested for ऋभुक्षा च
१३. शत्रूणामभिगन्तारः सन्तः Sy.
१४. शत्रोः सम्बन्धि नृम्णं बलम् Sy.
१५ विकण्व A. विकुर्वन्तु विनाशयन्त्वित्यर्थः Sy.
१६. मिथत्या मेथतेरिदं रूपम्, मिथतिर्हिंसा तया Sy.
१७. निपातो मिथः प० is suggested for निवातो मिथाप०
१८. भू देवासा A.
१९. त्वद्य Sy.
२०. भे is missing in M. हे is suggested for भे ॥ द्योतमाना ऋभवः ! Sy.
२१. कर्तन कुरुत प्रयच्छत Sy.
२२. भवत्र A.
२३. सह प्रीयमाणाः Sy.
२४. सन्वदीरन् is suggested for सन्नदीरन् ।
२५. ०च्छतु A.
सम्प्रयच्छेयुः Sy.
२६. वसवे A. अपि च वसवः प्रशस्या ऋभवः । हे ऋभवः ! यूयमस्मान् सर्वदा कल्याणे रक्षत Sy.

VII. 49.

समुद्रज्येष्ठाः सलिलस्य मध्यात्पुनाना यन्त्यनिविशमानाः ।
इन्द्रो या वज्री वृषभो ररादं ता आपो देवीरिह मामवन्तु ॥ १ ॥

समुद्रज्येष्ठाः । समुद्रप्रथमाः । अन्तरिक्षस्य । मध्यात् । शोदयन्त्यः । गच्छन्ति । अनिविशमानाः । इन्द्रः । या आपः । वज्री । वर्षिता । व्यलिखद् वज्रेण भित्त्वा निरगमयत् । ताः । आपः । देवीः । इह । माम् । रक्षन्तु ।

या आपो दिव्या उत वा स्रवन्ति खनित्रिमा उत वा याः स्वयंजाः ।
समुद्रार्था याः शुचयः पावकास्ता आपो देवीरिह मामवन्तु ॥ २ ॥

या आपः । याः । आपः । अन्तरिक्ष्याः । याश्च ततः । स्रवन्ति । खनित्रिमाः कुप्याः । उत । वा । यास्तु । अयज्ञाज्जाता निम्नेषु देशेषु । समुद्रो गन्तव्यो यासां समुद्रार्था नादेयीं । ज्वलन्त्यः । शोधयित्र्यः ।

---

१. 'समुद्रज्येष्ठाः' इति चतुर्ऋचं षोडशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमब्देवताकम् । तथा चानुक्रान्तम्—'समुद्रज्येष्ठा आपम्' (KSA. 36.. 49. p. 25.) इति । गतो विनियोगः Sy
२. समुद्रोऽर्णवो ज्येष्ठः प्रशस्यतमो यासामपां ताः Sy.
३. सलिलस्य—अन्तरिक्षनामैतत् । अन्तरिक्षस्य Sy. सलिलस्य is explained both by Sy. and VM. as अन्तरिक्षस्य but according to the Ngh. 1. 3. सलिल is not a synonym of अन्तरिक्ष ।
४. माध्यमिकात् स्थानात् Sy.
५. शोदयन्त्यो A. शोधयन्त्यः is suggested for शोदयन्त्यः ॥ विश्वं शोधयन्तः Sy.
६. अविश० A. अः विश० M. सर्वदा गच्छन्त्यः Sy.
७. अपः is suggested for आपः ॥ या निरुद्धा अपः Sy.
८. वज्रभृत् Sy.
९. कामानां वर्षिता Sy.
१०. देव्यः Sy.
११. अस्मिन् प्रदेशे स्थितम् Sy.
१२. अवन्तु रक्षन्तु अभिगच्छन्तु वा Sy.
१३. आन्त M.
अन्तरिक्षभवाः सन्ति Sy.
१४. VM. seems to explain उत वा as याश्च ततः ।
१५. गच्छन्ति Sy.
१६. ०त्रमाः A. खननेन निवृत्ताः ? (निर्वृत्ताः) Sy.
१७. आप्याः A. कूप्याः is suggested for कुप्याः ।
१८. याः स्वयञ्ं जज्ञाता M. याः । स्वयं जाताः is suggested for यास्तु । अयज्ञाज्जाताः ॥ स्वयमेव प्रादुर्भवन्त्यः Sy.
१९. यासा स्स० A. यासां तास्समु० is suggested for यासां समु० ।
२०. नादेयाः is suggested for नादेयीं ।
२१. शुचयो दीप्तियुक्ताः Sy.
२२. शोधियित्र्यः A. शोधयित्र्यश्च भवन्ति । ता आपो मामवन्त्विति Sy.

उत्तरा निगदसिद्धा ।—

यासां॑ राजा॒ वरु॑णो॒ याति॒ मध्ये॑ स॒त्यानृ॑ते अव॒पश्य॒ञ्जना॑नाम् ।
मधु॑श्चुतः॒ शुच॑यो॒ याः पा॑व॒कास्ता आपो॑ दे॒वीरि॒ह मा॑मवन्तु ॥ ३ ॥

[यासां राजा]

यासु॒ राजा॒ वरु॑णो॒ यासु॒ सोमो॒ विश्वे॑ दे॒वा या॒सूर्जं॒ मद॑न्ति ।
वै॒श्वा॒न॒रो या॒स्वग्निः प्रवि॑ष्टस्ता आपो॑ दे॒वीरि॒ह मा॑मवन्तु ॥ ४ ॥

यासु॑ राजा । यासु॑ । राजा । वरुण । यासु॑ च । सोम॑ । विश्व एव॑ च । देवा. स्थिताः । यामु॑ ।
ऊर्जम्॑ । प्रतिमाद्यन्ति । वैश्वानर. । यासु । अग्निः । प्रविष्टः ।

VII. ५०.

आ मां॑ मित्रावरुणे॒ह र॑क्षतं कु॒लाय॑यद्वि॒श्वय॒न्मा न॒ आ ग॑न् ।
अ॒ज॒का॒वं दु॒र्दृशी॑कं ति॒रो द॑धे॒ मा मां प॒थेन॒ रप॑सा विद॒त्सरुः॑ ॥ १ ॥

आ माम्॑ । आभिमुख्येन । माम्॑ । इह॑ । मित्रावरुणे॑ । रक्षितम्॑ । कुलाय कुर्वत्॑ । विविधं वर्धमान

---

१. The *pratīka* is supplied by the Editor. The stanza is explained in the following manner :—
वरुणो यासामपां राजा स्वामी मध्ये मध्यमलोके याति गच्छति । किंकुर्वन् ? जनानां प्रजानां सत्यानृते सत्यं चानृतं चावपश्यन्, जानन्नित्यर्थः । या आपो मधुश्चुतो रसं क्षरन्त्यः शुचयो दीप्तियुक्ताः पावकाः शोधयित्र्यः । ता आपो देव्यो मां रक्षन्त्विति Sy. यासां मध्ये वरुणो राजा वरणीयो वाऽऽदित्यो याति सत्यानृते जनानामवपश्यन्, अवहितः पश्यन्, मधुश्चुतो मधुरस्य क्षारयित्र्यः शुचय इत्यादि BB.
This stanza=TS. ५. ६. १. १.

२. The *Pratīka* is supplied by the Editor.

३. यासु अप्सु वर्तते Sy. ४. अपां राजा Sy.

५. विश्वैः व च A. सर्वे Sy.

६. यासु is suggested for यामु ॥
यासु अप्सु स्थिताः Sy.

७. ऊर्ज्जं A. अन्नम् Sy. ८. मदन्ति Sy.

९. ता आपो देव्य इह स्थितं मामवन्तु Sy.

१०. 'आ मां मित्रावरुणा' इति चतुर्ऋचं सप्तदशं सूक्तं वसिष्ठस्यार्षम् । चतुर्थ्यतिजगती व्यूहेन शक्वरी वादितस्तिस्रो जगत्यः । प्रथमा मैत्रावरुणी द्वितीयाग्नेयी तृतीया वैश्वदेवी चतुर्थी गङ्गाविनदीदेवताका । तथा चानुक्रमणिका—'आ मां मैत्रावरुण्याग्नेयी वैश्वदेवीनदीस्तुतिर्जागतमन्त्यातिजगती शक्वरी वा' (KSA. ३६. ५०. p. २५.) इति । अस्य सूक्तस्य प्रत्यृचं विषादिहरणे विनियोगो लिङ्गादवगन्तव्यः Sy. ११. अस्मिंल्लोके Sy.

१२. ०रुणो is suggested for ०रुणे ॥ हे मित्रावरुणौ ! युवाम् Sy.

१३. रक्षतम् is suggested for रक्षितम्० ॥ पालयतम् Sy. १४. इ कुर्वन्त् M. कुलायं कुर्वत् is suggested for कुलाय कुर्वत् ॥ कुलायं स्थानं तत्कुर्वत् Sy.

१५. विदं वर्ध० M. विशेषेण वर्धमानं विषम् Sy.

विविधं वा, भाषमाण भूतम् । मा । अस्मान् । आगच्छत्विति स्वाभिप्रायं स्वाभिभूम्यां कुलाना करोति । अजकावमजशब्दयुक्तम् । दर्शयन् । तिरः । भवतु । मा । माम् । पदभवने । शब्देन । जानातु । छद्म-गतिश्चेति ।

यद्विजाम॒न्परुषि॒ वन्दं॑नं भुवंदष्ठीवन्तौ॒ परि॑ कुल्फौ॒ च॒ देहत् ।
अ॒ग्निष्च्छोच॒न्नप॑ बाधताम्॒तो मा मां॑ पद्ये॒न॒ रप॑सा विदु॒त्सरुः॥ २ ॥

यद्विजामन् । यत् । विविधजन्मनि । सन्धौ । भवति । वन्दन नामक विषमविषम् । अष्ठीवन्तौ । गुल्फौ । च । परितः । उपचित करोति । अग्निः । तद्विष । ज्वलन् । अपबाधताम् । इतः । उत्तरा निगदसिद्धा—

यच्छ॑ल्म॒लौ भव॑ति॒ यन्न॒दीषु॒ यदोष॑धीभ्यः॒ परि॒ जाय॑ते॒ वि॒षम् ।
विश्वे॑ दे॒वा निरि॑तस्तत्सु॑वन्तु॒ मा मां॑ पद्ये॒न॒ रप॑सा विदु॒त्सरुः॥ ३ ॥
[यच्छल्मलौ]

---

१. मा is missing in A.
२. अग० A.
३. स्वाऽपि भूम्यां or स्वाधि भूम्याम् is suggested for स्वाभिभूम्याम् ।
४. कुलायम् is suggested for कुलानाम् ।
५. अजका नाम रोगविशेषस्तद्वत् Sy.
६. दुर्दर्शनं is suggested for दर्शयन् ॥ दुर्दर्शनं विषम् Sy. ७. तिरौ A.
८. धत्ताम् । नश्यत्वित्यर्थः Sy.
९. ०भवेन is suggested for ०भवने ॥
१०. रपिः शब्दकर्मा । शब्देन Sy.
११. छद्मगामी । जिह्मगः । सर्प इत्यर्थः Sy.
१२. ०जाम A. १३. ०धं मन्मनि A.
१४. परुषि वृक्षादीनां पर्वणि Sy.
१५. उद्भवेत् Sy.
१६. वन्दकं A. वन्दुलनामकम् is suggested for वन्दनं नामकम् ॥ एतत्संज्ञकं यद्विषम् Sy.
१७. एषम A.
१८. यच्च विषं जानुनी Sy.
१९. गुल्फौ A.
२०. 'विह उपचये' । उपचितं कुर्यात् Sy.
२१. देवः Sy.
२२. तद्विषम् is suggested for तद्विष ॥
२३. दीप्यमानः सन् Sy.
२४. ०तान् A. अपहन्तु Sy.
२५. इम A. अस्माज्जनात् । शिष्टं व्याख्यातम् Sy.
२६. The *pratika* is supplied by the Editor. Sy. explains this stanza in the following manner :—यद्विषं शल्मलावेतत्संज्ञके वृक्षे भवति यद्विषं नदीषु तत्रस्थास्वप्सु प्रादुर्भवति । परीति पञ्चम्यर्थानुवादी । ओषधीभ्यः सकाशाद्यद्विषं जायत उत्पद्यते । विश्वे सर्वे देवास्तद्विषमितोऽस्माज्जनादेशाद्वा निःसुवन्तु । निःशेषेण प्रेरयन्तु । मा मामिति शिष्टं व्याख्यातम् ।

याः प्रवतो निवत उद्वत उदन्वतीरनुदकाश्च याः ।
ता अस्मभ्यं पयसा पिन्वमानाः शिवा देवीरशिपदा भवन्तु
सर्वा नद्यो अशिमिदा भवन्तु ॥ ४ ॥

याः प्रवतः[1]। या नद्यः। विस्तारवत्यो[2] विस्तृतेन देशेन गच्छन्त्यः। याश्च निवतः[3]। याश्चोद्वत्याः[4]। याश्चोदन्वत्यः[5]। अनुदकाः[6]। च। याः[7]। ताः[8]। अस्मभ्यम्। वयसा[9]। वर्धमानाः[10]। शिवाः[11]। देव्यः[12]। अन्नस्य स्थानभूता अशिवदास्ताः[13]। सर्वाः[14]। नद्यः। अन्नस्य वर्धयित्र्योऽशिमिदाः[15]।

VII. 51.

आदित्यानामवसा नूतनेन सक्षीमहि शर्मणा शंतमेन ।
अनागास्त्वे अदितित्वे तुरास इमं यज्ञं दधतु श्रोषमाणाः ॥ १ ॥

आदित्यानाम्[16]। आदित्यानाम्[17]। रक्षणेन[18]। नवततरेण[19]। सङ्गता भवेम[20]। सुखे च[21]।

---

१. या प्रवत A.

२. It seems to be the explanation of प्रवतः ॥ प्रवणदेशे गच्छन्त्यः Sy.

३. निवसतो M. निम्नदेशे गच्छन्त्यः Sy.

४. उद्वत्वो A. उन्नतदेशे गच्छन्त्यः Sy.

५. उदकयुक्ताः Sy.

६. उदकरहिताः Sy.

७. याः is omitted by M. नद्यो यान्ति Sy.

८. तादृश्यो नद्यः Sy.

९. पयसा is suggested for वयसा ॥ उदकेन Sy.

१०. विश्वमाप्याययन्त्यः Sy.

११. कल्याण्यो भवन्तु Sy. १२. द्योतमानाः Sy.

१३. अशिपदा० is suggested for अशिमिदा० ॥ शिपवो नाम रोगविशेषः । तदकुर्वत्यः Sy.

१४. अपि च सर्वास्ताः Sy.

१५. ०शिपादाः M. अहिंसाप्रदा भवन्तु Sy.

१६. VM. ignores भवन्तु ।

१७. 'आदित्यानाम् ईति तृचमष्टादशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमादित्यदेवताकम् । अनुक्रम्यते च —'आदित्यानां तृचमादित्यं तु' (KSA. 36. 51. p. 25.) इति । गतः सूक्तविनियोगः । आदित्यदेवताके पशौ 'आदित्यानामवसा' इति वपाया अनुवाक्या । सूत्रितञ्च—'आदित्यानामवसा नूतनेनेमा गिर आदित्येभ्यः' (ĀSS. 3. 8.) इति । आदित्यग्रहस्यैवानुवाक्या । सूत्रितञ्च—'आदित्यानामवसा नूतनेन होता यक्षदादित्यान्' (ĀSS 5. 17.) इति Sy.

१८. अदितेः पुत्राणामेतत्संज्ञाकानां देवानाम् Sy.

१९. तद्धेतुभूतेनेत्यर्थः Sy.

२० नवतरेण is suggested fo नवततरेण ॥ अद्यतनेन Sy. अभिनवेन BB.

२१ सक्षीमहि वयं सङ्गच्छेमहि Sy. युक्ता भूयास्म BB.

२२. सुखेन is suggested for सुखे च ॥ गृहेण Sy. शर्मेति गृहनाम Ngh. 3. 4.

२३. ०तमेन्ति M. शं सुखमतिशयेन तत्कारणेन Sy. शाश्ततमेन वा BB.

अपापत्वे[1] । अखण्डत्वे च[2] । क्षिप्राः[3] । इमम्[4] । यज्ञम्[5] । स्थापयन्तु, यज्ञमपापमखण्डिनञ्च कुर्वन्तु । स्तुतीः शृण्वन्तः[6] ।

आदित्यासो अदितिर्मादयन्तां मित्रो अर्यमा वरुणो रजिष्ठाः ।
अस्माकं सन्तु भुवनस्य गोपाः पिबन्तु सोममवसे नो अद्य ॥ २ ॥

आदित्यासः[7] । आदित्याः । अदितिश्च[8] माता । न्तु[9] । मित्रः । अर्यमा च । वरुणश्च[10] । अत्यन्तमृजवः[11] । अस्माकम् । भवन्तु[12] । भुवनस्य[13] । गोपयितारः[14] । पिबन्तु । सोमम्[15] । रक्षणाय । अस्माकम् । अद्य[16] ।

आदित्या विश्वे मरुतश्च विश्वे देवाश्च विश्वं ऋभवश्च विश्वे ।
इन्द्रो अग्निरश्विना तुष्टुवाना यूयं पात स्वस्तिभिः सदा नः ॥ ३ ॥

आदित्याः । एते[17] । सर्वे । स्तूयमाना भवन्त्वस्माभिरिति[18] ।[19]

---

१. अनपराधत्वे Sy. निरपराधित्वे BB.

२. अदीनत्वे Sy. खण्डनरहितत्वे च BB.

३. त्वरिता आदित्याः Sy. त्वरमाणाः 'तुर त्वरासम्भ्रमयोः' BB. ४. इममस्मदीयम् BB.

५. यष्टारमिमं जनम् Sy.

६. अस्मदीयानि स्तोत्राणि शृण्वन्तः Sy. अस्माकं स्तुतीः शृण्वन्तः । श्रोषमाणाः—शृणोतेर्विकरणौ सिप्शपौ लेटो वा व्यत्ययेन शानच् श्रोषतिर्वा धात्वन्तरं द्रष्टव्यम् BB.

७. 'आदित्यासो अदितिः' इत्यादित्यग्रहस्य याज्या । सूत्रितञ्च—'आदित्यासो अदितिर्मादयन्तामिति नैतं ग्रहमीक्षेत हूयमानम्' (ĀŚS. 5. 17.) इति Sy.

८. अदितिस्तेषां (देवानाम्) माता । यद्वा अदितिरिति देवविशेषणम् । अदितिरदितयोऽदीनाः Sy.

९. Missing in M. Something probably माद्य is missing immediately before न्तु ॥

तृप्ताः सन्तु Sy.

१०. एतत्संज्ञकाः Sy. ११. अतिशयेनर्जवः Sy.

१२. रक्षका भवन्त्वित्यर्थः Sy. १३. भुव० is suggested for भव० ॥ सर्वस्य जगतः Sy.

१४. गोपायि० A. रक्षका एवम्भूता देवाः Sy.

१५. अस्माभिरभिष्तुतम् Sy. १६. अस्मिन् दिने Sy. १७. एते refers to आदित्याः । मरुतः देवाः । ऋभवः । इन्द्रः । अग्निः and अश्विना । १८. ०वन्त्यस्मा० A.

१९. VM. explains this stanza very briefly. Sy. explains this stanza in the following manner :— आदित्या अदितेः पुत्रा विश्वे सर्वे द्वादशसंख्याका अर्का विश्वे मरुतश्च सर्व एकोनपञ्चाशत् संख्योपेताश्च विश्वे देवाश्च ऋभवश्चेन्द्रोऽग्निरश्विनाश्विनावेतत्संज्ञका एवम्भूता ये देवास्तुष्टुवाना अस्माभिः स्तुता बभूवुः । सर्वे ते देवा यूयं सदा सर्वदा नोऽस्मान् स्वस्तिभिः कल्याणैः पात रक्षत ।

VII. 52.

आदित्यासो अदितयः स्याम पूर्देवत्रा वसवो मर्त्यत्रा ।
सनेम मित्रावरुणा सनन्तो भवेम द्यावापृथिवी भवन्तः ॥ १ ॥

[1]आदित्यासः । आदित्यानां स्वभूतावयव[2] । मण्डनीयाः[3] । भवेम । हे वसवः[4] । अस्माकं देवेषु । मर्त्येषु[5] च । निवासस्थानं भवतु । हे मित्रावरुणौ ! भजेमहि[6] धनम् । भजमाना अप्युपर्युपरि । तथा भवेम[7] । द्यावापृथिवी[8] । भवन्तोऽप्युपर्युपरि[9] प्रजाभिः । पशुभिरन्यैश्चाभिलषितैः[10] ।

मित्रस्तन्नो वरुणो मामहन्त शर्म[11] तोकाय तनयाय गोपाः ।
मा वो भुजेमान्यजातमेनो मा तत्कर्म[12] वसवो यच्चयध्वे ॥ २ ॥

मित्रस्तत्[12] । मित्रः[13] । तत्[14] । अस्मभ्यम् । वरुणोऽन्ये चादित्याः । प्रयच्छन्तु[15] । सुखम् । पुत्राय[16] । पौत्राय च । गोपायितारः[17] । युष्माकम्[18] । अन्येषु[19] जातम्[20] । एना[21] यद्यूयमन्येषु जनयथ तद्वयम्[22] । मा । भुजेम[23] भोग प्राप्तिः[24] । मा च । तत्[25] । कर्मः[26] । वसवः[27] । यद्यूयम्[28] । चयध्वे हृदये स्थापयत[29] ।

---

१. 'आदित्यासो अदितयः' इति तृचात्मकमेकोनविंशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमादित्यदेवताकम् । 'आदित्यासः' इत्यनुक्रमणिका (KSA. 36. 52. p. 26.) । गतो विनियोगः Sy.

२. ०यवाः is suggested for ०यव ॥ हे आदित्या देवाः ! व्यत्ययेनाद्युदात्तत्वाभावः । यद्वा आदित्यानामिम आदित्याः, तस्येदमित्यर्थे प्राग्दीव्यतीयो ण्यप्रत्ययः । आदित्यानां शेषभूताः Sy.

३. अखण्डनी० is suggested for मण्डनी०॥ वयमखण्डनीयाः Sy.

४. वासका देवाः Sy.

५. मनुष्येष्वस्मासु Sy.

६. ०वात स्था० A. युष्मदीयं पूः पालनम् Sy.

७. युवाभ्यां दत्तं धनं सम्भजेमहि Sy.

८. सम्भजन्तो वयम् Sy.

९. स्याम Sy.

१०. हे द्यावापृथिव्यौ ! युवयोः प्रसादात् Sy.

११. भवेन्तो० A. वयं भूतिमन्तः Sy.

१२. मित्रो वरुणोऽहर्निशाभिमानिनौ देवावेतदाख्याः सर्वं आदित्याः Sy.

१३. प्रसिद्धम् Sy.

१४. मंहतिर्दानकर्मा । ददतु Sy.

१५. अस्मदीयाय तनयाय Sy.

१६. तत्पुत्राय च शर्म प्रयच्छन्तु Sy.

१७. गोपयि० A. विश्वस्य रक्षकास्ते देवाः Sy.

१८. अथ प्रत्यक्षस्तुतिः—हे देवाः ! वो युष्मदीया वयम् Sy. १९. अन्वेषु A.

२०. जायम् M. अन्येनोत्पादितम् Sy.

२१. आनां M. एनः is suggested for एना॥ पापम् Sy.

२२. कृद्वयं A.

२३. हुजेम A. मा भुक्तवन्तः स्याम Sy.

२४. भोगः is suggested for भोगम् ।

२५. तादृशं कार्यम् Sy.

२६. काष्मं । लुडि करोतेरुत्तमस्य बहुवचनम् । मन्त्रेघसह्वर०' इत्यादिना च्लेर्लोपः Sy.

२७. हे वासकाः ! देवाः ! Sy.

२८. येन युष्मदप्रियेण कर्मणा Sy.

२९. ०पत्त A. यूयमस्मान्नाशयत Sy.

तुरण्यवोऽङ्गिरसो नक्षन्त रत्नं देवस्य सवितुरियानाः।
पिता च तन्नो महान्यजत्रो विश्वे देवाः समनसो जुषन्त ॥ ३ ॥

तुरण्यवः। त्वरमाणाः। अङ्गिरसः। प्राप्नुवन्। रत्नम्। देवस्य। सवितुः। याचमानाः। पिता। च। तत्। अस्माकं वरुणः। महान्। यष्टव्यः। विश्वे च। देवाः। सङ्गताः। प्रायच्छन्नङ्गिरस आदित्यान-जायन् तेभ्य आदित्या दक्षिणामनयन् तामङ्गिरोयस्सविता प्रायच्छत् तदिदमत्रोक्तमिति।

VII. ५३.

प्र द्यावा यज्ञैः पृथिवी नमोभिः सबाधं ईळे बृहती यजत्रे।
ते चिद्धि पूर्वे कवयो गृणन्तः पुरो महो दधिरे देवपुत्रे ॥ १ ॥

प्र द्यावा। प्रकर्षेण। स्तौमि। द्यावापृथिव्यौ। यज्ञैः। नमस्कारैश्च। बाधाय सहित। महत्यौ।

---

१. यज्ञादिकर्मसु त्वरिताः Sy.
२. एतन्नामका ऋषयः Sy.
३. आप्नुवन्त Sy.
४. नूक्त नूक्तं A. रमणीयं यद्धनम्। उत्तरार्ध-गततच्छब्दापेक्षया यच्छब्दोऽत्राध्याह्रियते Sy.
५. प्रेरकस्य देवस्य सम्बन्धि Sy.
६. सवितारं याचमानाः सन्तः Sy.
७. वसिष्ठस्य पितृभूतो वरुणश्च। यद्वा सर्वेषां पिता प्रजापतिः Sy.
८. तादृशं रत्नम् Sy.
९. अस्मान् Sy.
१०. महात् A.
प्रभूतः Sy.
११. यजनशीलः Sy.
१२. सर्वे Sy.
१३. समानमनस्काः Sy.
१४. सेवयन्तु यद्वा नोऽस्मभ्यं ददतु Sy
१५. ०रिस A.
१६. ०नयाजयन् is suggested for ०नजायन्।
१७. ०रोद्यस्स० A. ०रोभ्यस्स० is suggested for ०रोयस्स० M.
१८. 'प्र द्यावा यज्ञैः,' इति तृचात्मकं विंशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं द्यावापृथिव्यम्'। अनुक्रम्यते च- 'प्र द्यावा द्यावापृथिव्यम्, (KSA. 36. ५३. p. 26.) इति। चतुर्थेऽहनि वैश्व-देवशस्त्र इदं द्यावापृथिव्यनिविद्धानम्। सूत्रितञ्च—'आ देवो यातु प्रद्यावेति वासिष्ठम्' (ĀSS. 3. 8.) इति। द्यावापृथिव्ये पशो वपापुरोडाशयोः 'प्रद्यावा' इति द्वे ऋचौ याज्ये। सूत्रितञ्च—'प्र द्यावा यज्ञैः पृथिवी नमोभिरिति द्वे' (ĀSS. 3. 8.) इति Sy.
१९. यागैः Sy.
२०. स्तोत्रैश्च Sy.
२१. बाधया is suggested for बाधाय।
२२. सहितौ M. अहं स्तोता बाधासहितः! ऋत्विजां सम्बाधयुक्त इत्यर्थः Sy.
२३. महत्यौ is missing in M. बृहत्यौ महत्यौ Sy.

यष्टव्ये[1]। ति[2]। चित्[3]। हि[4]। पूर्वे[5]। कवयः। गृणन्तः[6]। पुरो दधिरे[7]। महत्यौ। ययोर्देवाः[8] पुत्राः।

प्र पूर्वजे पितरा नव्यसीभिर्गीर्भिः कृणुध्वं सदने ऋतस्य[9]।
आ नो द्यावापृथिवी दैव्येन[10] जनेन यातं[11] महि[12] वां वरूथम्[13] ॥ २ ॥

प्र[14] पूर्वजे। प्रकृणुध्वम्[10]। पूर्वजे वा[11]। पित्र्यौ[12]। नवतराभिः। स्तुतिभिः[15]। यज्ञस्य। आधारभूते[16]। आयातम्[17]। अस्मान्। हे द्यावापृथिव्यौ! दैव्येन[18]। जनेन सह। महद्धि। युवयोः[19]। वरणीयं धनम्[20]।

उतो हि वां रत्नधेयानि[21] सन्ति पुरूणि[22] द्यावापृथिवी सुदासे[23]।
अस्मे धत्तं यदसदस्कृधोयु[24] यूयं पात स्वस्तिभिः[25] सदा नः ॥ ३ ॥

उतो हि। अपि च। युवयो.। धनदानादि[21]। विद्यन्ते[22]। बहूनि। द्यावापृथिव्यौ! सुदासे पैजवनाय[23] राज्ञो[24]। अस्मभ्यं च। धत्त[25] तत्। यत्[26]।

---

१. यजनीये Sy.

२. ते is suggested for ति ॥ तादृश्यौ द्यावापृथिव्यौ Sy. ३. अपि Sy.

४. खलु Sy. ५. पुरातनाः Sy.

६. स्तुवन्तः Sy.

७. पुरस्तात् स्थापयामासुः Sy. ८. ययोः A.

९. आग्रयणे द्यावापृथिव्यैकपालस्य 'प्र पूर्वजे' इति याज्या। सूत्रितञ्च—'महो द्यौः पृथिवी च नः प्र पूर्वजे पितरा नव्यसीभिः' (ĀŚS. 2.9.) इति Sy.

१०. हे अस्मदीयाः स्तोतारः! यूयं... प्रकृणुध्वं तुर ? (पुर-)स्कुरुत Sy.

११. वा is missing in A. पूर्वं प्रजाते Sy.

१२. पितरौ is suggested for पित्र्यौ ॥ विश्वस्य मातापितृभूते Sy.

१३. व is missing in A..

१४. स्तुतिरूपाभिर्वाग्भिः Sy. १५. व्यज्यस्य A.

१६. स्थानभूते Sy. १७. आगच्छतम् Sy.

१८. अथ प्रत्यक्षस्तुतिः—हे द्यावापृथिव्यौ! युवाम् Sy. १९. देवसम्बन्धिना Sy.

२०. किमर्थमायातम्? इत्युच्यते वां युवयोः Sy.

२१. वरूथं वरणीयं यद्धनमस्तीति शेषः। तद्धनमस्मभ्यं दीयतामित्यर्थः Sy.

२२. ०दानानि is suggested for ०दानादि॥ रमणीयानि धनानि Sy.

२३. भवन्ति Sy.

२४. वैज० A. शोभनहविर्दानाय यजमानाय देयानि Sy.

२५. राज्ञे is suggested for राज्ञो ।

२६. प्रयच्छतम् Sy.

२७. तेषां मध्ये यद् धनम् Sy.

२८. VM. does not explain the fourth verse of this stanza and ignores हि। असत् and अस्कृधोयु ॥ हि खलु। असद् भवेत्। अस्कृधोयु। कृधुको ह्रस्वः। अह्रस्वमनल्पम्। हे द्यावापृथिव्यौ! यूयं युवां नोऽस्मान् सर्वदा। कल्याणैः पात पालयतम् Sy.

VII. 54.

वास्तोष्पते प्रति जानीह्यस्मान्त्स्वावेशो अनमीवो भवा नः ।
यत्त्वेमहे प्रति तन्नो जुषस्व शं नो भव द्विपदे शं चतुष्पदे ॥ १ ॥

[वास्तोष्पते]...यत् । त्वाम् । याचामहे । तत् । अस्मभ्यम् । प्रयच्छ । शङ्करः । भव । अस्माकम् । द्विपदे । चतुष्पदे च ।

वास्तोष्पते प्रतरणो न एधि गयस्फानो गोभिरश्वेभिरिन्दो ।
अजरासस्ते सख्ये स्याम पितेव पुत्रान्प्रति नो जुषस्व ॥ २ ॥

वास्तोष्पते । वास्तोः । पते ! प्रणेता । भव । अस्माकम् । गृहाणां वर्धयिता । गोभि. । अश्वैश्च । इन्दो ! ईश्वरास इति स्पष्टम् ।

---

१ 'वास्तोष्पते' इति तृचात्मकमेकविंशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वास्तोष्पत्यम् । तथा चानुक्रम्यते—'वास्तोष्पते वास्तोष्पत्यम्' (KSA 36. 54. p. 26.) इति । स्मार्ते गृहनिर्माणे 'वास्तोष्पते' इति चतसृभिः प्रत्यृचं जुहुयात् । सूत्रितञ्च—'वास्तोष्पते प्रति जानीह्यस्मानिति चतसृभिः प्रत्यृचं हुत्वा'(AGS. 2. 9. 9.)इति Sy. २ The *pratīka* is supplied by the Editor. Omission is shown here by some dots in the mss.

३ यद्धनम् Sy. ४ ०महते A. किञ्च वयम् . . .याचामहे Sy. ५ नोऽस्मान् BB.

६ प्रतियच्छ M. प्रतिप्रापय। प्रत्येकं वा प्रापय। यद्वा तत्तत्प्रति तत्प्रदानार्थं नोऽस्माञ् जुषस्व । प्रतिगृहाण वाऽस्मान् BB.

७. सुखकरः Sy. सुखं सुखहेतुः BB.

८. पुत्रपौत्राविजनाय Sy. द्वित्रिभ्यां पाद्दन्०' इति द्विपद इत्यत्रोत्तरपदान्तोदात्तत्वम् BB.

९. अस्मदीयाय गवाश्वादिवर्गाय Sy.

१०. VM. ignores वास्तोः । पते । प्रति । जानीहि । अस्मान् । स्वावेशः । अनमीवः । भव । प्रति and शम् ।
These words are explained in the following manner :—
हे वास्तोष्पते ! गृहस्य पालयितः ! देव ! त्वमस्मान् । त्वदीयान् स्तोतॄन् इति प्रति जानीहि प्रबुध्यस्व । तदनन्तरं नोऽस्माकं स्वावेशः शोभननिवेशोऽनमीवोऽरोगकृच्च भव Sy. वास्तोर्गृहस्य पालयितः ! 'रुद्रः खलु वै वास्तोष्पतिः' इति ब्राह्मणम् ।....अस्मान् प्रति जानीहि, आत्मीयत्वेन बुद्धयस्व । प्रत्येकं वा अस्माञ् जानीहि, अनुध्यातुमर्हसि । ततश्च स्वावेशः सुखावासः सुखं वासयिताऽस्माकं भव। अनमीवोऽरोगोऽरोगहेतुश्चास्माकं भव । 'द्व्यचोऽतस्तिङः' इति संहितायां दीर्घत्वम् BB. This stanza=TS. 3. 4. 10. 1.

११. हे गृहस्य पालयितः ! देव ! त्वम् Sy.

१२. प्रनेता A. प्रवर्धकः Sy. १३. अस्मदीयस्य धनस्य स्फाययिता प्रवर्धकः Sy. १४. गोभिः पशुभिरश्वेभिरश्वैश्च सहिताः Sy. १५. हे सोमवदाह्लादक ! Sy. १६. इन्दविश्वरास A. VM. seems to read ईश्वरासः for अजराजः ॥ जरारहिताः । विनाशरहिता इत्यर्थः Sy.

१७. VM. ignores ते । सख्ये । स्याम । पितेव । पुत्रान् । प्रति । नः and जुषस्व । Sy. explains these words in the following manner :—
ते त्वया सह । सख्ये सति वयम् । स्याम भवेम । पितेव, यथा पिता । पुत्रान् रक्षकत्वेन सेवते तथा त्वमपि नोऽस्मान् । प्रति जुषस्व सेवस्व

वास्तोष्पते शुग्मया संसदा ते सचीमहि रण्वया गातुमत्या ।
पाहि क्षेमं उत योगे वरं नो यूयं पात स्वस्तिभिः सदा नः ॥ ३ ॥

[वास्तोष्पते ।] वास्तोः । पते ! सुखकरेण । तप । उवसदनेन । रमणीयेन । गतिमता । ससक्ता भवेम । रक्ष । अस्मान् । योगक्षेमयोः । कल्याणम् ।

VII. 55.

अमीवहा वास्तोष्पते विश्वा रूपाण्याविशन् । सखा सुशेव एधि नः ॥ १ ॥

अमीवहा ।

---

१. The *pratika* is supplied by the Editor.

२. सुखकर्या Sy. सर्वार्थसाधनशक्त्या । छान्दसं जश्त्वम् BB. ३. तव is suggested for तप ॥ त्वया देयया Sy.

४. उपसद० is suggested for उवसद०॥ स्थानेन Sy. सन्तत्या श्लेषणेन, एतद्धोमनिमित्तेन सम्बन्धेन BB.

५. रमणीयया Sy. रण्वया गन्तव्यया । 'रवि गतौ' घञ् । पचाद्यजेव वाऽकर्तरि । रमणीयया वा । रमेरक्षरविकारश्छान्दसः, श्रोणादिको यज्प्रत्ययः BB.

६. धनवत्या Sy. गतिमत्या सर्वत्राप्रतिहतगत्या BB.

७. वयं सञ्जच्छेमहि Sy. अभिभवेम शत्रून् । यद्वा त्वया संसक्ता भूयास्म । सञ्जेराशिषि लिङ् । छान्दसोऽनुनासिकलोपः BB.

८. अवतेश्छान्दसो लुङ् BB.

९. अस्मदीयं धनम् Sy.

१०. त्वमपि क्षेमे प्राप्तस्य रक्षणे उतापि च योगेऽप्राप्तस्य प्रापणे Sy. क्षेमे, उतापि च योगक्षेमार्थं योगार्थं च । . . . . लब्धपरिपालनं क्षेमः, अलब्धलाभो योगः BB.

११. वरणीयं नोऽस्मदीयं धनं पाहि । हे वास्तोष्पते ! यूयं त्वं नोऽस्मान् सर्वदा कल्याणैः पात पाहि Sy. वरमुत्कृष्टं रक्षेति यूयमित्यादि । . . . . पूजार्थमेकस्मिन् बहुवचनम् । वचनव्यत्ययो वा BB. This stanza=TS. 3.4.10.1.

१२. VM. ignores उत ॥

१३. 'अमीवहा' इत्यष्टर्चं द्वाविंशं सूक्तम् । आद्या गायत्री, पञ्चमाद्याश्चतस्रोऽनुष्टुभः, द्वितीयाद्यास्तिस्र उपरिष्टाद्बृहत्यः । त्र्यष्टका चतुर्थद्वादशकी बृहती (Cf. KSA. 7. 1.4. p. 3.) इति तल्लक्षणयोगात् । आद्या वास्तोष्पतिदेवताका शिष्टा ऐन्द्र्यः । तथा चानुक्रान्तम्— 'अमीवहाष्टौ वास्तोष्पत्याद्या गायत्री शेषास्त्र्युपरिष्टाद् बृहत्यादयोऽनुष्टुभः प्रस्वापिन्य उपनिषद्' (KSA. 36. 55. p. 26.) इति । गतो विनियोगः । बृहद्देवतायां यदुक्तं तदिह लिख्यते—

वरुणस्य गृहान् रात्रौ वसिष्ठः स्वप्नमाचरन् ।
प्रविवेशाथ तं तत्र श्वा नदन्नभ्यवर्तत ॥
क्रन्दन्तं चारमेयं स धावन्तं दष्टुमुद्यतम् ।
यदर्जुनेति च द्वाभ्यां सान्त्वयित्वा ह्यसूषुपत् ॥
एवं प्रस्वापयामास जनमन्यं च वारुणम् ।
इति ॥ BD. 6. 8 19. 821.

अत्र केचित्पुनरेवमाहुः—

आसां प्रस्वापिनित्वं तु कथासु परिकल्प्यते ।
वसिष्ठस्तृषितोऽन्नार्थी त्रिरात्रालब्धभोजनः ॥
चतुर्थरात्रौ चौर्यार्थं वारुणं गृहमेत्यनु ।
कोष्ठागारे प्रवेशाय पूर्वकश्वादिसुप्तये ॥
यदर्जुनेति सप्तर्चं ददर्श च जजाप च ॥ इति (See VD. p. 133.) Sy. वसिष्ठस्यार्षम् Dur. वसिष्ठस्य SKN.

रक्षोहा[1]। वास्तो[2]:, पते ! विश्वानि[3]। रूपाणि[4]। आविशन्[5]। सखा। सुसुखः[7]। भव। अस्माकम्।

१. रक्षोभ A. अमीवानां रोगाणां नाशकस्त्वम् Sy. त्वमस्माकममीवहा भव। अमीवा रोगस्तस्य हन्ता Dur. अमीवा हिंसिता सर्पादी रोगो वा तस्य हन्ता। 'बहुलं छन्दसि' (Pa 3. 2. 88.) इति क्विप्।....अमीवाभ्यमनमिति पर्यायवचनम् SKN.

२. ०शत् A. हे गृहस्य पालक ! एतत्संज्ञक ! देव ! Sy. हे भगवन्! वास्तोष्पते ! Dur.

३. बहूनि Sy. ४. यस्यास्मद्दुःखहेतोर्यः प्रतिपक्षः सर्पादिर्नकुलादिः Dur. यैः स हन्यते नकुलबिडालादिरूपैरोषध्यादिरूपैर्वा SKN.

५. प्रविशन् Sy. 'यद् यद् रूपं कामयन्ते तत्तद्देवा विशन्ति' N. १०. १७. इति यास्कः Sy. तस्य तस्य रूपमाविशंस्तं तमस्माकममीवानं जहि।....'सर्वाणि रूपाण्याविशन्' इत्यतः प्रसक्तमुच्यते। शक्नोति पुनर्वास्तोष्पतिः सर्वाणि रूपाण्यावेष्टुमित्युच्यते 'यद् यद् रूपं कामयते तत्तद् देवता भवति'। अस्त्येतदैश्वर्यं देवताया यद्यदिच्छति रूपं तत्तत्करोति Dur. तान्याविशन्, आविशमानो जहि तमित्यर्थः SKN. ६. मित्रभूतः Sy. अमुना प्रकारेण ऽनन्नस्मदुपद्रवान् सखा मित्रम् Dur.

७. सुष्ठु सुखकरः Sy. सुष्ठु सुखो भव। 'शेवै इति सुखनाम' तत् कस्मात्? 'शिष्यतेर्वकारो नामकरणः' शिषिर्धातुः। वकारः प्रत्ययः। शिष इत्यस्य स पुनः 'अन्तस्थान्तरोपलिङ्गी' अन्ते तिष्ठति धातोर्यो वर्णः सोऽन्तस्थः। न संज्ञा, यथा 'अन्तस्था यरलवाः'। कश्च पुनरसौ षकारः? तस्यान्तरमवकाशस्थानमुपलिङ्गयत्युपगच्छति यः स भवत्यन्तस्थान्तरोपलिङ्गी। कश्च पुनरसौ वकारः? स षकारस्य स्थानमुपगच्छति ततो गुणे कृते शेव इति भवति। स च पुनरेव धातुर्विभाषितगुण इति। 'शिवमित्यप्यस्य भवति' अगुणपक्षे Dur. सुसुखः।....शेवः शिष्यतेर्वकारो नामकरणः। शिष इत्यस्य पुनरन्तस्थान्तरोपलिङ्गी। अस्य धातोरन्ते स्थितः षकारस्तस्यान्तरं स्थानं लिङ्गी, एवंशीलः। षकारस्थाने वकारः प्रविशतीत्यर्थः। विभाषितगुणत्वाच्च शिवोऽपि सिद्धः।....अन्तस्थशब्दः क्रियावाची न यरलवबवाची SKN. वास्तोष्पतिः। वास्तुर्वसतेर्निवासकर्मणस्तस्य पाता वा पालयिता वा।.... अभ्यमनहा वास्तोष्पते ! सर्वाणि रूपाण्याविशन् सखा नः सुसुखो भव। शेव इति सुखनाम। शिष्यतेर्वकारो नामकरणः। अन्तस्थान्तरोपलिङ्गी। विभाषितगुणः। शिवमित्यप्यस्य भवति। यद्यद्रूपं कामयते तत्तद्देवता भवति N. १०. १७., SKN. IV. २०-२१.

यदर्जुन सारमेय दृतः पिशङ्ग यच्छसे ।
वीव भ्राजन्त ऋष्टय उप स्रक्वेषु बप्सतो नि षु स्वप ॥ २ ॥

यदर्जुन[1] । यदा त्वम् । अर्जुनवर्ण ! सारमेय[2] ! पिशङ्गवर्ण[3] ! दन्तान्[4] । यच्छसि[5] विवृतान् करोषि । तदानी विभ्राजन्त[6] इव । तत्रष्टय[7], ऋष्टिसदृशा भवन्ति दन्ता. । सृक्वयोः[8] । उपबप्सतो[9] लेलिहानस्य । स त्वं सुष्ठु । निष्वापय[10] । शौनक.—[11]

वरुणस्य गृहान्[12] रात्रौ वसिष्ठा[13] स्वप्नमाचरन् ।
प्रविवेशाथ ता[14] तत्र श्वा नेदन्नभ्यभाषत[15] ॥
क्रन्दन्त सारमेय त[16] धावन्तं द्रष्टुमुद्यतम्[17] ।
यदर्जुनेति च द्वाभ्यां[18] सा च पीत्वा[19] न्यसुष्टुवत्[20] ॥

---

१. तद्दर्शनायेतिहासपूर्वा ऋचः प्रस्वापिन्यः 'बृहत्यादयोऽनुष्टुभः प्रस्वापिन्यः' इत्युक्तत्वात् (KSA. 7. 55. p. 26.) तत्रेतिहासः— वसिष्ठः कृशितोऽन्नार्थी त्रिरात्राल्लब्धभोजनः । चतुर्थरात्रौ चौर्याय वारुणं गृहमेत्य तु ॥ कोष्ठागारे प्रवेशाय पालकश्वादिसुप्तये । यदर्जुनेति सप्तर्चं ददर्श च जजाप च ॥२॥ हे श्वेतवर्ण ! DDN.

२. सरमा नाम देवशुनी तस्याः कुलोद्भव ! Sy. सरमा नाम देवशुनी तस्याः पुत्र ! 'स्त्रीभ्यो ढक्' (Pa. 4. 1. 120.) DDN.

३. Missing in M. Something probably पिशं is missing before ग ॥ केषुचिदङ्गेषु पिङ्गलवर्ण ! Sy. एवम्भूत ! DDN.

४. 'पदन्नो०' (Pa. 6. 1. 63.) इति दतादेशः DDN.

५. विवृणोषि DDN.

६. ०तात् A. अस्मान् दष्टुमित्यर्थः Sy. DDN.

७. विभुजन्त A. विशेषेण भासन्ते तथा Sy. यथायुधानि विशेषेण भ्राजन्ते तथा DDN.

८. तत्र य इष्टि स० M. तत्र ऋष्टयः or ऋषयः is suggested for तत्रष्टयः ॥ आयुधानि Sy. उप अस्मत्समीपे भक्षयतः । तव दन्ताः DDN.

९. स्रक्वासु स्रक्वाशब्द ओष्ठप्रदेशविशेषवाचीत्यर्थः Sy. स्रक्वासु ओष्ठप्रदेशेषु भासन्ते। स्रक्वाशब्द ओष्ठप्रदेशवाची DDN.

१०. ऊप० A. उपभर्त्सतो M.

११. निष्यापय A. नितरां निद्रां कुरु Sy. तथाभूतस्त्वमिदानीं सुष्ठु नितरां निद्रां कुरु DDN.

१२. BD. (6.11-14.)

१३. गृहारान् A.

१४. वसिष्ठः is suggested for वसिष्ठाः ॥

१५. तम् is suggested for ताम् ।

१६. नदन्नभ्यभाषत is suggested for नेदन्नभ्यभाषत ॥

१७. तत् A.

१८. दष्टु० is suggested for द्रष्टु० ।

१९. त्रिभिः DDN.

२०. सान्त्वयित्वा is suggested for सां च पीत्वा ।

२१. न्यष्पवत् सत् A. न्यसुष्टुवत् M. न्यसूषुपत् is suggested.

एवं प्रस्थापयामास[1] जनमन्यं च वारुणम् ।
ततस्तु[2] वरुणो राजा स्वान्पाशान्प्रत्यमुञ्चत ॥
बद्धः[3] स वारुणैः पाशैर्ध्रुवासु त्वेति दृश्यते ।
स बुध्वा[4] पितरं सूक्तैश्चतुर्भिरथ उत्तरैः ॥
अभितुष्टाव[5] धीरेति मुमोचैनं ततः पिता[6] ॥ इति ॥

स्तेनं राय सारमेय तस्करं वा पुनःसर ।
स्तोतृनिन्द्रस्य रायसि किमस्मान्दुच्छुनायसे नि षु स्वप ॥ ३ ॥

स्तेनम्[7] । स्तेनं प्रति । सम्भ्रमे । सारमेय तस्करम्[8] । वा[10] । पुनस्तत्[11] प्रतिसर[12] तस्करस्तेनयोरल्पो भेदः । स्तोतॄन् । इन्द्रस्य । अस्मान्[13] । भवसि[14] तच्चायुक्तमिति वदति । किमस्मान् । बाधसे[15] ?

---

१. प्रस्तत्रापयामास A. प्रस्वापयामास DDN.
२. ततः स इति DDN.
३. DDN. omits the hemistich.
४. DDN. reads स बद्धः पितरं सूक्तैश्चतुर्भिरित उत्तरैः ।
अभितुष्टाव धीरेति मुमोचैनमथान्यथा ॥
and adds after it—तथा ऋग्विधाने (श्लो० ३११.) अमीवहेति सूक्तेन भूतानि स्वापयेन्निशि । नहि प्रस्वापनं किञ्चिदीदृशं विद्यते क्वचित् । वसिष्ठस्त्र्यनुपरिष्टाद् बृहत्यादिभिः स्त्र्यष्टकद्वादशवतीभिः अनुष्टुब्भिः । सारमेयं वारुणं च जनं तुष्टाव इति ।
५. अर्हितु० A.
६. (बृह० ६. ११.—)
७. प्रच्छन्नधनापहारी स्तेनस्तम् Sy.
८. सौष A. स भवन् M.
९. तस्क० M. प्रत्यक्षधनापहारी तस्करः । तम् Sy.
प्रच्छन्नधनापहारी स्तेनस्तं वा DDN.
१०. वा is missing in M.
११. ०स्त्वत् प्र० A. M. गतमेवं देशं पुनः सरतीति पुनःसरः । तादृग्भूत ! Sy. आतमेव देशं पुनः सरतीति हे पुनःसर तादृग्भूत हे सारमेय ! DDN.
१२. तरतर० A. तस्कर is missing in M.
प्रत्यक्षधनापहारी तस्करः । तम् Sy.
१३. अस्मन् M.
१४. भवसि A. M. गच्छसि Sy. DDN.
१५. VM· ignores नि षु स्वप । नितरां निद्रां कुरु Sy. दुष्टशुनक इव किं धावसे, अत्यन्तं निद्रां कुरु DDN.

त्वं सूकरस्य दर्दृहि तव दर्दर्तु सूकरः ।
स्तोतृनिन्द्रस्य रायसि किमस्मान्दुच्छुनायसे नि षु स्वप ॥ ४ ॥

त्वं सूकरस्य । त्वम् । सूकरस्य । दर्दृहि जहि सूकरम् । त्वाम् । सूकरः । हन्तु । स्तोतॄन् । इन्द्रस्यार्हिंसकांस्तव । किम् । बाधस इति ।

सस्तु माता सस्तु पिता सस्तु श्वा सस्तु विश्पतिः ।
ससन्तु सर्वे ज्ञातयः सस्त्वयमभितो जनः ॥ ५ ॥

सस्तु माता । सर्वः । जनः । स्वपित्विति यथाकाममात्मनः प्रवेशार्थं प्रस्वापयति ।

य आस्ते यश्च चरति यश्च पश्यति नो जनः ।
तेषां सं हन्मो अक्षाणि यथेदं हर्म्यं तथा ॥ ६ ॥

य आस्ते । तेषां सर्वेषाम् । अक्षाणि । संहन्मः, सहननं सर्वेषां हिंसनं दण्डादिना मथनं तथा कृते ।

---

१. हे सारमेय ! DDN.
२. त्वं सूकरस्य is missing in M.
३. सूकरस्य वराहस्य । द्वितीयार्थे षष्ठी Sy. DDN.
४. ददृहि A. विदारय Sy. 'दृ विदारणे' DDN.
५. सूक्तरं A. सूकरोऽपि तव विदारयतु DDN.
६. विदारयतु युवयोर्नित्यवैरित्वात् । अस्मान् मा दशेत्यर्थः Sy. DDN.
७. स्तोतॄन् इत्यर्धर्चः पूर्वस्यामृचि व्याख्यातः DDN.
८. हे सारमेय ! माता त्वदीया जननी सस्तु । स्वपतु पिता च सस्तु । श्वा सारमेयो भवान् सस्तु । विश्पतिर्जामाता यद्वा विशां जनानां पालको गृही सस्तु । सर्वे ज्ञातयो बन्धवोऽपि ससन्तु । स्वपन्तु । अभितः परितः स्थितोऽयमपि सर्वो जनः सस्तु । स्वपतु Sy. हे वरुण ! त्वदीया जननी DDN.
९. स्थवित्विति A. M. स्वपितु DDN.
१०. VM. ignores सस्तु । माता । सस्तु । पिता । सस्तु । श्वा । सस्तु । विश्पतिः । ससन्तु । सर्वे । ज्ञातयः । अयम् । He does not explain this stanza word for word, although he gives general explanation. पिता च स्वपितु—अन्यो यः शुनकः स्वस्तु । जामाता सस्तु । सर्वे बान्धवाः ससन्तु । परितः स्थितोऽयमपि सर्वो जनः स्वपितु । स्वपितिसस्ती इति द्वौ स्वपितिकर्माणौ (निघण्टु ३. २२) DDN.
११. जनः । अस्मिन् प्रदेशे उपविशति । यो गच्छति योऽस्मान् पश्यति DDN.
१२. येषां A. एषां M. एवम्भूतानां तेषां जनानाम्, अक्षीणि DDN. १३ इन्द्रियाणि Sy.
१४. वह सं० A. वहर M. संहनाम । संहतिनिमीलनम् । निमीलयामेत्यर्थः Sy. DDN.

यथा । इदम् । हर्म्यमविचलत् तिष्ठति । तथा सर्वो जनोऽविचलस्तिष्ठतु सुप्तः ।

सहस्रशृङ्गो वृषभो यः समुद्रादुदाचरत् ।
तेना सहस्येना वयं नि जनान्त्स्वापयामसि ॥ ७ ॥

सहस्रशृङ्गः । सहस्रतेजाः । वर्धिता । योऽयम् । समुद्रात् । उत्तिष्ठति । तेन । अभिभवनकुशलेन निष्वापयामः । वयम् । इमान् जनान्, इति ।

प्रोष्ठेशया वह्येशया नारीर्यास्तल्पशीवरीः ।
स्त्रियो याः पुण्यगन्धास्ताः सर्वाः स्वापयामसि ॥ ८ ॥

प्रोष्ठेशयाः । खट्वाशयाः । वह्येशयाः वह्या शिबिकादि, याश्च । नार्यः । तल्पशायिन्यः । स्त्रियः । याश्च । पुण्यगन्धाः । ताः । सर्वाः । प्रस्वापयामः ।

---

१. प्रत्यक्षेणोपलभ्यमानम् Sy. DDN.
२. ०मपि च० M. ०मपिचलन् A. प्रासादादि-स्थावरात्मकं वस्तुजातम् Sy.
३. तिष्ठन्विति A. तिष्ठत्विति M.
४. यथा निश्चलं भवति तथेमे सर्वे जना निश्चला भवन्त्वित्यर्थः Sy.
५. VM ignores यः । आस्ते । यः । च । चरति । यः । च । पश्यति । नः । जनः । यो जन आस्ते, अस्मिन् प्रदेशे तिष्ठति । यश्च चरति गच्छति । यश्च जनो नोऽस्मान् पश्यति । एवम्भूतानां तेषां जनानाम् Sy.
६. शृंगम् A. ७. सहस्रकिरणः Sy. DDN.
८. कामानां वर्धिता यः सूर्यः Sy., DDN.
९. अम्बुधेः सकाशात् Sy.
१०. उदागच्छति Sy., DDN.
११. अहिभ० A. अभिभवित्रा तेन सूर्येण Sy., DDN.
१२. निष्पाप० A. नितरां स्वापयामः Sy., DDN
१३. वयं स्तोतारः Sy., DDN.
१४. जनान् सर्वान् Sy.
१५. तेना—इति 'सहस्येन शुभवसं०' (RPR. 7. 37.) इति दीर्घः । सहस्येना इति 'षष्ठं चाष्टाक्षरेऽक्षरम्' (RPR. 8. 39.) इति दीर्घः । जनान्त्स्वाप० टकारनकारयोस्तु-आहुः०' (RPR. 4. 17.) इति तकारागमः । DDN.
१६. खट्वायया A. M. प्राङ्गणे शयानः Sy., DDN.
१७. वह्येशया is missing in A. M. वह्यं वाहनं तस्मिन् शयानाः Sy.
१८. शिपिकादौ A. १९. यादृश्यः स्त्रियः । तल्पे शयानाः स्त्रियः Sy. DDN.
२०. पुण्यगन्धाः कर्पूरादिपवित्रगन्धाः भङ्गल्यगन्धा Sy. DDN.
२१. ०पयाम् A. ०पय M. वयं निद्रां कारयाम Sy. ताः सर्वाः स्त्रीः, वयं स्वापयामः, निद्रां कारयामः । तस्माद् वसिष्ठः कुटुम्बार्थं तस्करी बभूवेति सिद्धम् । तथा मनुः—(म० स्मृ० १०. १०४.)
ब्राह्मणः सर्ववर्णेभ्य आददानो न दुष्यति ।
जीविकात्ययमापन्नो योऽन्नमत्ति यतस्ततः ॥
आकाशमिव पङ्केन न स पापेन लिप्यते । इति DDN.

VII. 56.

क ईं व्यक्ता नरः सनीळा रुद्रस्य मर्या अधा स्वश्वाः ॥ १ ॥

[1] क ईं व्यक्ताः । [2] के । इमे । व्यक्ता भवन्ति । मनुष्याः । [3] सरथाः । [4] रुद्रस्य । [5] पुत्राः । अपि च । [6] स्वश्वा इति मरुतो दृष्ट्वा [7] विस्मितो वदति ।

नकिर्ह्येषां जनूंषि वेद ते अङ्ग विद्रे मिथो जनित्रम् ॥ २ ॥

[8] नकिः । न कश्चित् । हि । एषाम् । जन्मानि । वेत्ति । [9] ते । एव । [10] परस्परस्य । जन्मभूमीः । [11] जानन्ति ।

अभि स्वपूभिर्मिथो वपन्त वातंस्वनसः श्येना अस्पृध्रन् ॥ ३ ॥

[12] अभि स्व । स्वभूतैरुदकैः । परस्परं सर्व एव पृथिव्याम् । [13] अभिवचनं कुर्वन्ति पपन्त्युदकान् । [14] निर्गच्छन्स्वनाः । [15] गमनशीलाः । स्पर्धन्ते निबिडा भवन्ति ।

---

१. अथ चतुर्थे ऽनुवाके पञ्चदश सूक्तानि । तत्र 'क ईं व्यक्ताः' इति पञ्चविंशत्यृचं प्रथमं सूक्तं वसिष्ठस्यार्षं मरुद्देवताकम् । आद्या एकादश द्विपदा विंशत्यक्षरा विराजः शिष्टाश्चतुर्दश त्रिष्टुभः । तथा चानुक्रान्तम्--'क ईं पञ्चाधिका मारुतं हाद्या एकादश द्विपदा' (KAS. 36. 56. p. 26.) इति दशरात्रे चतुर्थेऽहन्यग्निमारुते शस्त्र इदं मारुतैर्निविद्धानम् । सूत्र्यते हि--'वैश्वानरस्य सुमतौ क ईं व्यक्ता नरः' (ĀŚS 8. 8.) इति Sy.

२. के भवन्तीति रूपातिशयादृषिराञ्चर्येणाह Sy.

३. एवम्भूताः Sy.

४. कान्तियुक्ताः Sy.

५. नेतारः Sy.

६. समानौकसः Sy.

७. महादेवस्य पुत्राः Sy.

८. VM. seems to explain मर्याः as पुत्राः but Sy. explains मर्याः as मर्येभ्यो नृभ्यो हिताः ।

९. शोभनवाहाः Sy.

१०. दृष्टवा A. ११. कश्चिदपि न Sy.

१२. खलु Sy.

१३. ०श्चिद्येषां M. मरुताम् Sy.

१४ तादृशा मरुतः Sy,

१५. अङ्ग स्वयमेव Sy. १६. परस्परम् Sy.

१७. ०भूमिः A. जनित्रं रुद्रपृश्निभ्यां सकाशात् प्रादुर्भूतं स्वकीयं जन्म Sy.

१८. विदन्ति Sy.

१९. मरुतः स्वकीयैः पवनैः सञ्चरणैः स्वयमेव सञ्चरन्तः Sy.

२०. वपनं is suggested for ०वचनं ।

२१. वपन्त्यु० is suggested for पपन्त्यु० ॥ सङ्गच्छन्ते Sy.

२२. ०कानिर् A. ०कानि निर० is suggested for ०काग्निर्० ।

२३. ०च्छत्स्व० is suggested for ०च्छन् स्व० ॥ वायुवत्स्वनन्तः शब्दायमानाः Sy.

२४. श्येनाः--'श्यैङ् गतौ' इति धातो रूपम् । गमनशीलाः । यद्वा श्येना इति लुप्तोपममेतत् । श्येनाः पक्षिणस्तद्वद् गच्छन्तः Sy.

२५. भन्ति A. परस्परं रूपसौन्दर्यादिभिः स्पर्धन्ते Sy.

एतानि धीरो निण्या चिकेत पृश्निर्यदूधो मही जभार ॥ ४ ॥

एतानि[1]। एतानि भूतानि। प्राज्ञे[2]। अन्तर्हितानि[3]। जानन्ति[4]। पृश्निः[5]। महती। यानि। आत्मीये[6] ऊधसि[7]। जहार[8], 'पृश्नि यै[9] वै पयसो मरुतो जाताः' इति ब्राह्मणम्।

सा विट् सुवीरा मरुद्भिरस्तु सनात्सहन्ती पुष्यन्ती नृम्णम् ॥ ५ ॥

सा विट्[10]। सा[11]। विट्[12]। सुप्रजा[13]। मरुद्भिः[14]। भवतु। चिरम्[15]। अभिभवन्तु शत्रून्। पुष्यन्ति[16] चेत्[17]। धनं[18] याविवेतानि[19] निण्यानि वेदेति।

यामं येष्ठाः शुभा शोभिष्ठाः श्रिया संमिश्ला ओजोभिरुग्राः ॥ ६ ॥

यामम्[20]। नियातव्यम्[21]। अत्यन्तं यान्तः[22]। उदकेन। अत्यन्तं शोभितारोऽलङ्कारैर्वा[23] शोभमान[24]। श्रिया[25]। सङ्गताः[26]। बलैः। उद्गूर्णाः[27]।

---

१. एयानि A.
२. प्राज्ञः is suggested for प्राज्ञे ॥ धीमान् शास्त्रज्ञो जनः Sy.
३. श्वेतवर्णान्येतानि मरुदात्मकानि भूतानि Sy.
४. जानन्ती M. जानाति is suggested for जानन्ति । जानीयात्, किन्तु न सर्वे जना जानन्तीत्यर्थः Sy.
५. वृश्चिः A. मरुतां जननी Sy.
६. ०न्यान्मीये A.
मरुदात्मकानि भूतानि Sy.
७. ऊध ऊधनि अन्तरिक्षे स्वकीये जठरे वा Sy.
८. जभार is suggested for जहार ॥ बभार। एतानि चिकेतेति पूर्वेण सम्बन्धः Sy.
९. ये वै वयसो A.
१०. सा विट् is missing in M.
११. सा प्रजा मरुतः परिचरति Sy.
१२. शोभनपुत्रयुक्ता Sy.
१३. सा प्रजा मरुद्भिर्हेतुभिः Sy.
१४. चिरात् Sy.
१५. ०वन्तो is suggested for ०वन्तु ।
१६. ०न्ति चे A. ०न्ती च is suggested for ०न्ति चेत् ॥ लभन्ती ? लभमाना Sy.
१७. धनं बलं वा Sy.
१८. या विषेता० A. ग्रापि वैता० is suggested for या विवेता० ।
१९. नित्यानि M.
२०. यातम् A.
२१. मरुतो यातव्यं गन्तव्यं देशम् Sy.
२२. यातृतमाः । अतिशयेन गन्तारः Sy.
२३. ०लंकरै० A. अलङ्कारैः is the other explanation of शुभा ।
२४. ०माना: is suggested for ०मान ॥ अतिशयेन शोभायुक्ताः Sy.
२५. कान्त्या Sy.
२६. संगतैः M. सङ्गच्छमानाः Sy.
२७. एवम्भूता भवन्तीति शेषः Sy.

उ॒ग्रं व॒ ओजः॑ स्थि॒रा शवां॑स्यधा म॒रुद्भि॑र्गृ॒णस्तुविष्मान् ॥ ७ ॥

उग्रं व॑[1] । उग्र॑म्[2] । यु॒ष्माक॑म्[3] । ओजः॑[4] । स्थि॒राणि[5] च । बलानि । अपि च । सोऽयं मरुद्भि॑रारख्यः[6] । स॒ङ्का[7] वा । वृद्धिमान्[8] ।

शु॒भ्रो व॒ः शुष्मः॑ क्रु॒ध्मी मनां॑सि धुनि॒र्मनि॑रिव॒ शर्ध॑स्य धृ॒ष्णोः ॥ ८ ॥

शुभ्रो व॑ः[10] । शोभनशील॑ः[11] । यु॒ष्माक॑म्[12] । शुष्म॑[13] । क्रोधनशीलानि[14] । मनासि मनांसि[15] । कम्पयिता मरुद्गणः । मुनिरिव[16] । वेगस्य[17] शारीरस्य[18] । धृष्ण्योर्ध्रुवस्य[19] स्थावरादेर्यथा मुनिरुत्थित वेगमुन्मूलयति तद्वद्-वृक्षादीनिति ।

सने॑म्यस्मद्युयोत दि॒द्युं मा वो॑ दुर्म॒तिरि॒ह प्रणङ्नः॑ ॥ ९ ॥

सनेमि । पुराणम् । भवतामायुधम् । अस्मत्तः । पृथक्कुरुत । मा । वो[20] युष्माकम् । दुर्मति॑ः[21] । इ॒ह[22] । अस्मान्[23] । प्रणक्तु[24] ।

---

१. वा A. ओजः is missing in M.

२. उग्रम् is missing in M. उद्गूर्णं भवतु Sy.

३. हे मरुतः ! युष्माकम् Sy.

४. तेजः Sy.

५. कैश्चिदनपहर्तव्यानि भवन्तु Sy.

६. मरुताम् Sy.

७. ०ध्यः is suggested for ०ख्यः ।

८. संघर वा A. संयो is suggested for संघा ।

९. वृद्धिमान् भवतु Sy.

१०. शुभो व A.

११. हे मरुतः ! सर्वतः शोभमानम् Sy.

१२. शुष्मः is suggested for शुष्म ॥ बलम् Sy.

१३. ०शीलांसि A.
सङ्ग्रामेषु शत्रुहननार्थं क्रोधनशीलानि Sy.

१४. मानांसि A. One मनांसि is redundant.

१५. मननान्मुनिः स्तोता । स यथा बहुविधं शब्द-मुत्पादयति एवं बहुविधशब्दस्योत्पादक इत्यर्थः Sy.

१६. बलवतो युष्मदीयस्य गणस्य Sy.

१७. शरी० M.

१८. Omitted in M. धृष्णोः is suggested for धृष्ण्योः ।

१९. ध्रुवस्य is missing in A. धर्षणशीलस्य Sy.

२०. मा A. युष्मदीया Sy.

२१. क्रूरमतिः Sy.

२२. अस्मिन् कर्मणि Sy.

२३. अस्मात् A.

२४. प्रणक्तुः M. The reading is doubtful. प्रणक् is suggested for प्रणक्तुः ॥ व्याप्नोतु Sy.

प्रिया वो नाम हुवे तुराणामा यत्तृपन्मरुतो वावशानाः ॥ १० ॥

प्रिया[1] वः । त्वरमाणानाम्[2] । युष्माकम् । प्रियमाणाम्[3] । ह्वयामि[4] । हे मरुतः ! यन्मान[5] । कामयमानाः[6] प्रजाः । आभिमुख्येन[8] । तर्पयति[7] ।

स्वायुधास इष्मिणः सुनिष्का उत स्वयं तन्वः शुम्भमानाः ॥ ११ ॥

स्वायुधासः[10] । स्वायुधाः । एषणशीलाः[11] । शोभनमरणाः[12] । अपि च । स्वयमेव । अङ्गानि[13] । शोभना[14] भवन्ति मरुत आभरणैः ।

शुचीं वो हव्या मरुतः शुचीनां शुचिं हिनोम्यध्वरं शुचिभ्यः ।
ऋतेन सत्यमृतसाप आयञ्छुचिजन्मानः शुचयः पावकाः ॥ १२ ॥

शुची[15] वः । शुचीनि । युष्माकम् । हव्यानि[16] । मरुतः ! शुचीनाम्[17] । शुचिम्[18] । प्रेरयामि[19] । यज्ञम[20] । शुचिभ्यो[21] भवद्भ्यः । सत्येनैव । सत्यम् । सत्यस्पृशो[22] मरुतः । आयन्[23] । शुचिजन्मानः[24] । शुचयः[25] । शोधकाः[26] ।

---

१. प्रियां ब A.
२. शत्रूणां हिंसकानां त्वरावतां वा Sy. कार्यं प्रति त्वरमाणानाम् BB.
३. प्रियमाणा M. The reading is doubtful. प्रियम् । नाम is suggested for प्रियमाणाम् ॥ प्रियेण नाम्ना Sy. प्रियाणि नामानि 'सुपां सुलुक्०' इति लुक् BB.
४. आह्वयामि Sy. आह्वयामि । पूर्ववत्सम्प्रसारणम् BB. ५. ०मानः A. नाम is suggested for ०मान ॥ यद्येनानेन Sy. आगमनं विशिनष्टि । यद् यस्मिन्नागमने BB.
६. कामयमानाः सन्तः Sy. ग्रामादिकं कामयमानाः BB. ७. यजमाना : BB.
८. अभि० A. आ इति आङ्पदश्रवणाद्योग्यं क्रियापदमध्याहार्यम् । आगच्छतेत्यर्थः BB.
९. तृप्तिं गच्छन्ति Sy. तृपेयुरिति । लेटि वचनव्यत्ययः । तृपतिस्तौदादिकः । यद्वा तृप्तिस्तृपन् । औणादिको निप्रत्ययः । यद्यस्माद्यूयं तृप्ति वावशानाः कामयमानाः स्थ तस्मादा॰ गच्छतेति, यजमानस्य वा तृप्ति वावशाना यस्मात्तस्मादागच्छतेति । वशेर्यङ्लुगन्ताद् व्यत्ययेनात्मनेपदम् BB.
This stanza=TS. 2. 1. 11. 1.
१०. शोभनास्त्राः Sy. ११. गन्तारः Sy.
१२. ०नहर० M. ०नाभर० is suggested for नमर० ॥ शोभनालङ्काराः Sy.
१३. स्वकीयानि शरीराणि Sy.
१४. शोभमानाः is suggested for शोभनाः । शोभयन्तः Sy.
१५. मारुते पशौ 'शुची वो हव्या' इति वपाया अनुवाक्या । सूत्रितञ्च 'शुची वो हव्या मरुतः शुचीनां नू ष्ठिरं मरुतः' (ĀŚS. 3. 7.) इति Sy. १६. हवींषि भवन्तु Sy.
१७. शुद्धानाम् Sy. १८. शुद्धम् Sy.
१९. अहं प्रेरयामि Sy.
२०. यज्ञम्is suggested for यज्ञम ॥ यागम् Sy. २१. प्रकाशमानेभ्यो युष्मभ्यम् Sy.
२२. उदकं स्पृशन्तो मरुतः Sy.
२३. आपण् A. गच्छन्ति Sy.
२४. याचिज० A. शोभनजननाः Sy.
२५. दीप्यमानाः Sy.
२६. शोकाः A. एवम्भूता गच्छन्तीत्यर्थः Sy.

अंसेष्वा मरुतः खादयो वो वक्षःसु रुक्मा उपशिश्रियाणाः ।
वि द्युतो न वृष्टिमी रुचाना अनु स्वधामायुधैर्यच्छमानाः ॥ १३ ॥

अंसेषु[1] । युष्माकम् । अंसेषु[2] । खादयः[3] । भवन्ति[4] । वक्षस्सु[5] च । रुक्माः[6] । उपश्रियमाणा भवन्ति[7] । विद्युतः[8] । इव । वृष्टिभिः[9] । विरोचमानाः[10] । मरुतो भवन्त्यलङ्कृतास्ते[11] । स्वधामुदकम्[12] । आयुधैः[13] । अनुनियच्छन्ति[14] ।

प्र बुध्न्या व ईरते महांसि प्र नामानि प्रयज्यवस्तिरध्वम् ।
सहस्रियं दम्यं भागमेतं गृहमेधीयं मरुतो जुषध्वम् ॥ १४ ॥

प्र बुध्न्या[16] वः[15] । प्रेरयन्ति[17] । अन्तरिक्षभवान्युदकानि[18] । भवताम्[19] । बलानि[20] । ते यूयं प्रकर्षेण यष्टव्याः[22] । उदकानि[23] । वर्धयन्तः[24] । सहस्रसम्मितम्[25] । गृहभवम्[26] । भागम्[27] । एतम्[28] । गृहमेधीयाख्यम्[29] । जुषध्वम्[30] । मरुतः ।

---

१. हे मरुतः ! युष्मदीयेषु Sy.
२. स्कन्धप्रदेशेषु Sy.
३. अलङ्कारविशेषाः Sy.
४. भवन्ति seems to be the explanation of आ ॥ आ मुक्ता भवन्तीति शेषः Sy.
५. रुग्माः A. Sy. seems to read वक्षः for वक्षःसु and सुरुक्माः for रुक्माः in the padapāṭha. He explains वक्षः as उरःप्रदेशम् and सुरुक्माः as सुष्ठु रोचमाना हाराः Sy.
६. ०शिश्रिय० A. आश्रिताः Sy.
७. तडितः Sy.
८. यथा Sy.
९. वर्षैः सार्धम् Sy.
१०. ०मानो A.
११. मरुतः is missing in A. हे मरुतः ! Sy.
१२. ०स्ते मि A.
१३. ०कम् A.
१४. मेघताडनैः Sy.
१५. प्रयच्छन्तो विचरथेति शेषः Sy.
१६. गृहमेधीये 'प्रबुध्न्या वः' इति प्रधानस्य याज्या। सूत्रितञ्च—'प्र बुध्न्या व ईरते महांसीति पुष्टिमन्तौ विराजौ संयाज्ये' (ĀSS. 2. 18.) इति Sy.
१७. बुध्या A.
१८. प्रकर्षेण गच्छन्ति Sy.
१९. ०वात्युद० A. अन्तरिक्षे भवानि Sy.
२०. युष्मदीयानि Sy.
२१. तेजांसि Sy.
२२. किञ्च हे प्रकर्षेण यष्टव्याः ! मरुतः ! यूयम् Sy.
२३. पांसूनयन्तीति नामान्युदकानि Sy.
२४. ०यत is suggested for ०यन्तः ।
२५. सहस्रसंख्याकम् । एकं भागं सहस्रियमिति । कथमाह । तथा च श्रूयते—'यावदेका देवता कामयते यावदेका तावदाहुतिः प्रथते नहि तवास्ति यत्तावदेत्र स्याद्यावज्जुहोति' इति Sy.
२६. ग्रह० A.
२७. वमे गृहे भवम् Sy.
२८. एतादृशम् Sy.
२९. गृहमेधिगुणेभ्यो युष्मभ्यं देयम् Sy.
३०. सेवध्वम् Sy.

यदि[1] स्तुतस्य[2] मरुतो अधीथेत्था विप्रस्य[3] वाजिनो[4] हवीमन्[5] ।
मक्षू[6] रायः सुवीर्यस्य[7] दात[8] नू[9] चिद्यमन्य[10] आदभदरावा[11] ॥ १५ ॥

यदि स्तुतस्य । यदि[1] । स्तुतम्[2] । हे मरुतः ! जानीथ[3] । इत्थम्[4] । मेधाविनः[5] । हविष्मतः[6] । आह्वाने[7] । शीघ्रम्[8] । धनम्[9] । सुवीर्यम्[10] । दत्त[11] । क्षिप्रम्[12] । यं रयिम्[13] । अन्यः[14] । आदभदादत्त[15] । अरावणीनां[16] धनमाहृत्यास्मभ्यं[17] दत्तेत्यर्थो भवति[18] ।

अत्यासो[14] न ये मरुतः स्वञ्चो[15] यक्षदृशो[16] न शुभयन्त[17] मर्याः[18] ।
ते हर्म्ये[19]ष्ठाः शिशवो[20] न शुभ्रा वत्सासो[21] न प्रक्रीळिनः[22] पयोधाः[23] ॥ १६ ॥

अत्यासः[14] । अश्वाः[15] । इव । ये । मरुतः । स्वञ्चनाः[16] । यक्षा[17] इव दृश्यमाना यक्षदृशो यक्षा इवालङ्कारङ्गानि ये । शुभयन्त[18] । मर्याः[19] । ते । प्रासादस्थाः[20] । इव । शिशवो[21] रथस्थाः । शोभमानाः । वत्साः[22] । इव च । प्रकर्षेण[23] क्रीडितः[24] । उदकस्य दातारः[25] ।

दृशस्यन्तो[24] नो मरुतो मृळन्तु वरिवस्यन्तो[25] रोदसी सुमेके[26] ।
आरे गोहा नृहा वधो वो[27] अस्तु सुम्नेभिरस्मे[28] वसवो नमध्वम्[29] ॥ १७ ॥

दृशस्यन्तः । प्रयच्छन्तः[26] । अस्माकम्[27] । मरुतः । सुखयन्तु[28] । परिचरन्तः[29] । द्यावापृथिव्यौ ।

---

१. यस्मात् कारणात् Sy.
२. मदीयं स्तोत्रम् Sy.
३. अवगच्छथ Sy.
४. अनेन प्रकारेण Sy.
५. मेधाविनो मम सम्बन्धिनि Sy.
६. हविर्लक्षणान्नवतः Sy.
७. हविष्मति हविषा युक्ते स्तोत्रे क्रियमाणे सति Sy.
८. रायः रायं धनम् । द्वितीयार्थे षष्ठी Sy.
९. स्तवी० A. तस्मात् कारणात्, हे मरुतः ! यूयं शोभनपुत्रोपेतस्य Sy.
१०. आरणध्य(द्यु M.)दात A., M. अभिहन्यात्
११. अरातीनाम् is suggested for अरावणीनाम् ॥ शत्रुभूतोऽन्यो जनः Sy.
१२. धनामा० A.
१३. VM. ignores चित् । Sy. explains नू चित् together as नैव ।
१४. मरुद्भ्यः क्रीळिभ्यः सप्तकपालमित्यस्य अत्यासः इति याज्या । सूत्रितञ्च—'अत्यासो न ये मरुतः स्वञ्चो जुष्टो दमूनाः' (ĀSS 2. 18.) इति Sy.
१५. सततगामिनोऽश्वाः Sy.
१६. सुष्ठु गच्छन्तः Sy.
१७. यक्षस्योत्सवस्य द्रष्टारो मनुष्या इव Sy.
१८. शोभन्ते Sy.
१९. हर्म्ये स्थिताः Sy.
२०. कुमाराः Sy. २१. ०र्षणे A.
२२. ०डिनः is suggested for ०डितः ॥ क्रीडमानाः Sy.
२३. धारयितारो दातारो वा भवन्ति Sy.
२४. धनानि प्रयच्छन्तः Sy.
२५. अस्मभ्यम् Sy.
२६. मृळयन्तु । अस्मान् सुखयुक्तान् कुर्वन्तु Sy.
२७. स्वमहिम्ना पूरयन्तः Sy.

शोभमाने[1]। दूरे[2]। गोर्हन्ता[3]। मनुष्यस्य हन्ता च। वधः[4]। युष्माकम्[5]। भवतु। सुखैः[6]। अस्मासु। हे वासयितारः[7][8] नमध्वम्[9]।

आ वो होता जोहवीति सत्तः सत्राचीं रातिं मरुतो गृणानः।
य ईवतो वृषणो अस्ति गोपाः सो अद्रयावी हवते व उक्थैः॥ १८॥

आवः[10]। आभिमुख्येन। भृशं ह्वयति[11]। होता[12]। होतृषदने निषण्णः[13]। युष्मान्। बहुत्वमञ्चन्तीम्[14]। भक्तां रातिं[15] दानम्। मरुतः[16]! ब्रुवाणः। यो यजमानः[17]। गमनवतो जङ्गमस्य[18]। हे वर्षितारः[19]! भवति। गोपायिता[20], यज्ञेन भि[21] जगद् वर्धते[22]। स होता। अद्रयावी[23]। युष्मान्। उक्थैः[24], द्वयरहितोऽद्रयान्[25] मरुत एवाह्वयति[26][27][28]।

इमे तुरं मरुतो रामयन्तीमे सहः सहस आ नमन्ति।
इमे शंसं वनुष्यतो नि पान्ति गुरु द्वेषो अरंरुषे दधन्ति॥ १९॥

इमे तुरम्[29]। इमे[30]। त्वरमाणं स्तोतारम्। मरुतः[31]। रमयन्ति[32][33]। इमे हि[34]। भक्तान्[35]। अभिभवितारः[36]।

---

१. शोभनमाना A. सुरूपे Sy.
२. अस्मत्तो दूरे भवतु Sy.
३. गवां मेघस्थानामुदकानां भेदकः Sy.
४. नृणां शत्रूणां हन्ता Sy.
५. आयुधम् Sy.
६. युष्मदीयम् Sy.
७. यूयमपि सुन्नैः सुखैः सह Sy.
८. हे वासकाः! मरुतः! Sy.
९. स्वयमेवाभिमुखा भवत Sy.
१०. मारुते पशौ 'आ वो होता' इत्येवानुवाक्या सूत्रितञ्च—'आ वो होता जोहवीति सत्तः प्र चित्रमर्कं गृणते तुराय' (ĀSS. 3. 7.) इति Sy.
११. भृशमाह्वयति Sy.
१२. अस्मदीयो होता Sy.
१३. हातृष० A.
१४. सर्वतो गमनशीलम् Sy.
१५. स्वदीयं दानम् Sy.
१६. स्तुवन् Sy.
१७. होता Sy.
१८. गच्छतो व्यापारवतो यजमानस्य Sy.
१९. हे कामानां वर्षितारः! Sy.
२०. गोपायिता A. युष्मदाह्वाननिमित्तेन रक्षको भवति Sy.
२१. Missing in M. हि is suggested for भि।
२२. वन्धते A. २३. मायारहितः सन् Sy.
२४. Missing in M.
२५. भवन्ततः उक्त्वै A. स्तोत्रैः Sy.
२६. ०द्वया A. M. The passage द्वयरहितोऽद्रयान् should immediately follow अद्रयावी २७. ०यती A.
२८. VM. ignores हवते॥ हवते स्तौति Sy.
२९. तरम् A. ३०. ईदृशः Sy.
३१. स्वर० A. कर्मसु क्षिप्रवन्तं यजमानम् Sy.
३२. मरुतो A. ३३. क्रीडयन्ति Sy.
३४. इमे is missing in M. ३५. हे M.
३६. भवतारम् A. बलवताम् is suggested for भवताम्॥ सहः सहसा बलेन Sy.
३७. अहि हविर्द्वारः A. सहसो बलवतो जनान् Sy.

विधेयीकुर्वन्ति । इमे कुर्वन्तीमे[1] । आशसतम्[2] । भजमानस्य[3] । परिरक्षन्ति[4] । गुरु च । द्वेषः[5] । अयजमानाय[6] । कुर्वन्ति ।

इमे रुद्रं चिन्मरुतो जुनन्ति भूमिं चिद्यथा वसवो जुषन्त ।
अपं बाधध्वं वृषणस्तमांसि धत्त विश्वं तनयं तोकमस्मे ॥ २० ॥

इमे रुद्रं[8] चित् । यथास्मान् । धनानि[9] । सेवन्ते । तथेमे । मरुतः । प्रेरयन्ति[10] । बाधकम्[11] । भ्रमणशीलम्[12] । च रक्ष[13] । प्रत्यक्षः शिष्ट', अपबाधध्वम्[14] । हे वृषणः[15] ! तमांसि । धत्त[16] । विश्वम्[17] । धनं[18] तनयम्[19] । तोक[19] च । अस्मासु[20,21] ।

मा वो दात्रान्मरुतो निररम मा पश्चाद्घ्म रथ्यो विभागे ।
आ नः स्पार्हे भजतना वसव्ये यदीं सुजातं वृषणो वो अस्ति ॥ २१ ॥

मा[22] वः । मा । वः । मानात्[23] । हे[24] मरुतः[24] ! निररम । निर्गमाम[25] । मा[25] च । पश्चात् । गच्छेम[26] । हे[26] रथवन्तः ! भवतां धनविभागे[27] । आभजत[28] । अस्मान् । स्पृहणीये । धनसमूहे । यत् । शोभनजननम्[31] । हे वृषणः ! युष्माकम् । विद्यते पसव्यम्[32,33] ।

---

१. कुर्वन्तीमे is redundant.
२. ०सकम् is suggested for ०सतम् ॥ स्तोतारम् Sy.
३. भाजमा० A. हिंसकात्पुरुषात् Sy.
४. परिरक्षन्ति । गुरु च । द्वेषः । अ are missing in M. नितरां पालयन्ति Sy.
५. महत् Sy. ६. अप्रियम् Sy.
७. हविरप्रयच्छते जनाय Sy.
८. रुद्रं A. समृद्धमपि जनम् Sy.
९. वसवो वासका देवा युष्मान् यथा जुषन्त कामयेरन् Sy. १०. प्रर० A.
११. समृद्धमपि जनम् Sy.
१२. भ्रमणशीलमपि वरिद्रं जुनन्ति प्रेरयन्ति Sy.
१३. रक्षः is suggested for रक्ष ।
१४. ०वासध्वम् A. ०नाशयत Sy.
१५. हे कामानां वर्षितारः ! ते यूयम् Sy.
१६. प्रयच्छत Sy. १७. बहुलम् Sy.
१८. धनयं A. धनं is redundant. पौत्रम् Sy.
१९. पुत्रम् Sy. २०. अस्मभ्यम् Sy.
२१. VM. ignores चित् twice ॥ चित् अपि Sy. २२. युष्माकम् Sy.
२३. दानात् is suggested for मानात् ।
२४. मानान् । धे A.
२५. वयं मा निर्गमाम । यूयमस्मान् परित्यक्त्वाऽन्येभ्यो धनं मा दत्तेत्यर्थः Sy.
२६. मा is omitted by A.
२७. दध्यतिर्गतिकर्मा । वयं पश्चाद्भागिनो मा भूम । यूयं प्रथममस्मभ्यमेव दत्तेति यावत् Sy.
२८. हे is missing in A.
२९. युष्मदीयस्य धनस्य दाने Sy.
३०. भागिनः कुरुत Sy.
३१. शोभनजनम्, यद्वसव्यमस्ति तस्मिन् भागिनः कुरुतेति सम्बन्धः Sy.
३२. ०सव्यम् A. वसव्यम् is suggested for पसव्यम् ॥ तस्मिन् भागिनः कुरुतेति सम्बन्धः
३३. VM. ignores ईम् ॥ ईमिति पूरणः Sy.

सं यद्ध॑नन्त म॒न्युभि॒र्जनासः॒ शूरा॑ य॒ह्वीष्वोष॑धीषु वि॒क्षु ।
अध॑ स्मा नो मरुतो रुद्रियासस्त्रा॒तारो॑ भूत पृत॒नास्व॒र्यः ॥ २२ ॥

सं यद्धनन्त । सङ्गच्छन्ते । यदा । क्रोधैः । जनाः । शूराः । महतीषु । ओषधीषु । निवेशयित्रीषु । ओषधीनां हि पक्षाणां लाभार्थं युध्यन्ते । सः । स्म । नः । मरुतः ! रुद्रपुत्राः ! रक्षितारः । भवत । सङ्ग्रामेषु । अभिगन्तारः ।

भूरिं॑ चक्र मरुत॒ः पित्र्या॑ण्यु॒क्थानि॒ या वः॑ शस्यन्ते॒ पुरा॑ चित् ।
म॒रुद्भि॑रुग्रः पृत॒नासु॒ साळ्हा॑ म॒रुद्भि॒रित्सनि॑ता॒ वाज॒मर्वा॑ ॥ २३ ॥

भूरि चक्र । भूरीणि । अहं कृतवान् । पितृभिः कृतानि । उक्थानि । यानि । वः । शस्यन्ते । गतेऽपि काले । मरुद्भिः । उद्गूर्णो वीरः । पृतनासु । शत्रूणां सोढा भवति । मरुद्भिः । एव । सम्भक्ता । सङ्ग्रामम् । अश्वः स्तोतुः ।

---

१. कोपैरभिमानैर्वा Sy.
२. जजाना A.
३. विक्रान्ता : Sy.
४. ०धीष्ठ Sy.
५. विक्षु प्रजासु च जेतव्यासु Sy.
६. पक्षानां A.
७. The reading is quite unsatisfactory. अध is suggested for it ॥ तदानीम् Sy.
८. स्म is suggested for स्मा ।
९. अस्माकम् Sy. १०. हे मरुतः ! यूयम् Sy.
११. रक्षकाः Sy.
१२. युद्धेषु Sy.
१३. ०न्तारम् A.
अर्योऽरेः शत्रोः सकाशात् Sy.
१४. भूरिणि A. बहूनि Sy.
१५ अहंकृ० A.
१६. कृतवन्तो भवत Sy.
१७. अस्मत्पितृसम्बन्धीनि धनदानादीनि कर्माणि Sy.
१८. उत्थानि A. प्रशस्यानि यानि कार्याणि Sy.
१९. कर्माणि Sy.
२०. वः is omitted by M. युष्माकम् Sy.
२१. प्रशस्यन्ते प्रस्थापयन्ते तानि चक्रेति सम्बन्धः Sy.
२२. VM. seems to explain पुराचित् as गतेऽपि काले Sy. explains पुरा चित् as पूर्वकालेऽपि ।
२३. युष्माभिर्हेतुभिः Sy.
२४. उद्गीर्णो M. ओजस्वी Sy.
२५. पृतनानां A. The commentary on this stanza from here is missing in M. युद्धेषु Sy.
२६. अभिभविता Sy.
२७. वाजमन्नम्, युद्धं वा Sy.
२८. स्तोत्रैरभिगन्ता यद्वाश्वः Sy.
२९. VM. ignores मरुतः ।

अस्मे वीरो मरुतः शुष्म्यस्तु जनानां यो असुरो विधर्ता ।
अपो येन सुक्षितये तरेमाध स्वमोकोऽभि वः स्याम ॥ २४ ॥

अस्मे वीरः । अस्माकम् । वीरः । हे मरुतः ! बलवान् । अस्तु । जनानाम् । यः । बलवान् । विभर्ता भवति । व्याप्तः । येन । शोभनाय । निवासाय । वीरेण तरेम युद्धम् । अथ । युष्माकम् । स्वभूतम् । ओकः । वयमभिभवेम यज्ञगृहं प्राप्नुयामेति ।

तन्न इन्द्रो वरुणो मित्रो अग्निरापः ओषधीर्वनिनो जुषन्त ।
शर्मन्त्स्याम मरुतामुपस्थे यूयं पात स्वस्तिभिः सदा नः ॥ २५ ॥

[तन्न इन्द्रः] ।

VII. 57.

मध्वो वो नाम मारुतं यजत्राः प्र यज्ञेषु शवसा मदन्ति ।
ये रेजयन्ति रोदसी चिदुर्वी पिन्वन्त्युत्सं यदयासुरुग्राः ॥ १ ॥

मध्वो वः । स्तोतारः । युष्माकम् । मारुतम् । नाम मरुच्छब्दमित्यर्थः । हे यष्टव्याः ! प्रमदन्ति ।

---

१. The passage beginning with अस्मे वीरः and ending with जनानाम् is missing in A.
२. पुत्रः Sy. ३. भवतु Sy.
४. शत्रूणाम् Sy.
५. प्रज्ञावान् यः Sy.
६. विभक्ता A. विधारकः Sy.
७. अप आप्नुवतः शत्रून् Sy.
८. पुत्रेण Sy.
९. सुष्ठु निवासाय Sy.
१०. स बलवानस्त्विति पूर्वेणान्वयः Sy.
११. अपि च Sy.
१२. युष्मदीया वयम् Sy.
१३. आत्मीयम् Sy.
१४. स्थानम् Sy.
१५. अभितिष्ठेम Sy.
१६. ग्रहं A.
१७. The *pratika* is supplied by the Editor. This stanza has already been explained, see RV. 7. 34. 25. पूर्वं व्याख्यातेयम् । अक्षरार्थस्तु । इन्द्रादयो देवा अस्मदीयं स्तोत्रं सेवन्ताम् । महतामुपस्थाने वर्तमाना वयं सुखे स्याम । हे मरुतः ! यूयं सर्वदास्मानविनाशैः पालयत Sy.
१८. 'मध्वो वः' इति सप्तर्चं द्वितीयं सूक्तं वशिष्ठस्यार्षं त्रैष्टुभं मरुद्देवताकम् । 'मध्वः सप्त' इत्यनुक्रान्तम् (KSA. 36. 57. p. 26.) । दशरात्रे षष्ठेऽहन्याग्निमारुत इदं मारुतनिविद्धानम् । सूत्रितञ्च—'मध्वो वो नाम सं प्रत्नथेत्याग्निमारुतम्' (ĀSS. 8.8.) इति Sy.
१९. मादयितारः स्तोतारः Sy.
२०. युष्मदीयम् Sy.
२१. मरुतम् A. मरुत्सम्बन्धि Sy.
२२. नाम ममरु० A. नामधेयम् Sy.
२३. हे यजनीयाः ! मरुतः ! Sy.
२४. प्रकर्षेण स्तुवन्ति । उच्चैः स्तुवन्तीत्यर्थः Sy.

यज्ञेषु[1]। बलेन सह स्तुवन्ति। ये[2]। कम्पयन्ति। द्यावापृथिव्यौ। अपि। विस्तीर्णे। पिन्वन्ति[3] च। मेघम्। यदा[4]। गच्छन्ति[5]। उद्गूर्णाः, उत्तरोऽर्धः परोक्षः।

निचेतारो हि मरुतो गृणन्तं प्रणेतारो यजमानस्य मन्म।
अस्माकमद्य विदथेषु बर्हिरा वीतये सदत पिप्रियाणाः ॥ २ ॥

निचेतारः। स्वस्मिन्नायतने स्थापयितारः[6]। हि[7]। मरुतः। स्तुवन्तो[8] द्वितीया च व्रष्टा[9]। प्रणेता[11]। अस्य यजमानस्य। अभिलषितम्[12]। अस्माकम्[13]। अद्य[14]। यज्ञेषु[15]। बर्हिः[16]। आसीद[17]। सोमपानाय[18]। प्रीयमाणाः[19]।

नैतावदन्ये मरुतो यथेमे भ्राजन्ते रुक्मैरायुधैस्तनूभिः।
आ रोदसी विश्वपिशः पिशानाः समानमञ्जिमञ्जते शुभे कम् ॥ ३ ॥

नैतावत्। न। एतावत्। ये केचन राजन्ते। मरुतः। यथा[21]। इमे[20]। भ्राजन्ते[21]। रुक्मैराभरणैः[22]। अञ्जिभिश्च[23]। द्यावापृथिव्यौ। विश्वान् विशः[24]। आभिमुख्येन। पिशानाः, पिपिशिराश्लेषकर्मा; द्यावापृथिव्यौ

---

१. यागेषु Sy.
२. मरुतः Sy.
३. विद्वन्ति A. विदन्ति M. किञ्च वर्षयन्ति Sy.
४. ये मरुतः Sy.
५. यान्ति सर्वत्र गच्छन्ति। तेषां मरुतां युष्माकं नाम प्रमदन्तीति पूर्वेणान्वयः Sy.
६. उत्तरोऽर्धर्चः is suggested for उत्तरोऽर्धः।
७. मृगयमाणाः Sy.
८. भि M. खलु Sy.
९. ये मरुतः गृणन्तं स्तुवन्तं जनम् Sy.
१०. व्रष्टा A. भ्रष्टा M. वृष्टा is suggested for व्रष्टा।
११. ०तारस्य A. प्रणेतारः is suggested for प्रणेता।
१२. अपि च यजमानस्य मन्म अभिमतं कामम् Sy.
१३. अपरोऽर्धर्चः प्रत्यक्षकृतः। हे मरुतः! यूयम् Sy.
१४. अस्मिन् दिवसे Sy.
१५. बहि A. बर्हिषि कुशमये Sy.
१६. आसीदत is suggested for आसीद ॥ उपविशत Sy.
१७. सोमस्य भक्षणाय Sy.
१८. त्रियमाणा M. प्रीयमाणाः सन्तः Sy.
१९. यत्परिमाणं धनादिकं ददति अन्ये मरुद्व्यतिरिक्ता देवा एतावद्धनादिकं न दद्युरित्यर्थः Sy.
२०. ईदृशाः Sy.
२१. सर्वदा भासन्ते। कश्चिदेकवाक्यतामाह। यथेमे मरुतो रुक्मादिभिर्भ्राजन्ते नैतावदेतद्व्यतिरिक्ता भ्राजन्त इति Sy.
२२. रुग्मैः A. रोचमानैराभरणैः Sy.
२३. आत्मीयैः केवलैरञ्जिभिः Sy.
२४. विश्वंत्विशः A. विश्वान् पिशः is suggested for विश्वान् विशः ॥ व्याप्तदीप्तयः। एवम्भूता मरुतः Sy. २५. प्रकाशयन्तः Sy.
२६. विशाना विविशि० A. पिशि० is suggested for पिपिशि० ॥

सर्व एव व्याप्नुवाना इत्यर्थस्त इमे । समानम् । आभरणमात्मशरीरेषु । अञ्जन्ते । शोभनार्थम् ।

ऋधक्सा वो मरुतो दिद्युदस्तु यद्व आगः पुरुषता करिम ।
मा वस्तस्यामपि भूमा यजत्रा अस्मे वो अस्तु सुमतिश्चनिष्ठा ॥ ४ ॥

ऋधक्सा वः । पृथगस्मत्तो दूरे । तत् । वः । मरुतः ! दिद्युदायुधम् । भवतु । यद्यपि वयम् । युष्माकम् । पुरुषत्वेन बलानिश्चयेन । आगः । कूर्मः । मा । युष्माकम् । तस्या दिद्युतिः । अपिभिभूमाविभवोऽप्ययः ? हे यष्टव्याः ! अस्मासु । युष्माकम् । अस्तु । सुमतुम् । अतिशयेनान्नवती ।

कृते चिदत्र मरुतो रणन्तानवद्यासः शुचयः पावकाः ।
प्र णोऽवत सुमतिभिर्यजत्राः प्र वाजेभिस्तिरत पुष्यसे नः ॥ ५ ॥

कृते चित् । कृते । चित् । अत्र स्तोमे । मरुतः । रमन्त । अनवद्याः । शुचयः । पावकाः । प्रापत । अस्मान् । सुमतिभिः । हे यष्टव्याः ! प्रवर्धयत । अस्मान् । अन्नैः । पोषणाय ।

---

१. सदृशरूपम् Sy.
२. आहर० A.
३. अञ्जते is suggested for अञ्जन्ते ॥ स्वकीयावयवेष्वभिव्यक्तीकुर्वन्ति Sy.
४. शोभायै Sy.
५. VM. ignores आयुधः and कम् ॥ आयुधः स्वकीयास्त्रैः । कमिति पूरणः Sy.
६. ०धत्सा A.
७. ०त्ते A.
८. प्रसिद्धा Sy.
९. युष्मदीया Sy.
१०. दिव्युदा० A. हेतिः Sy.
११. पुरुषतया मनुष्यत्वेन । मनुष्याणां हि प्रमादः सुलभ इत्यर्थः Sy.
१२. बलानिश्चेन A. बलानिश्चयेन is suggested for बलानिश्चेन ॥
१३. आगः is suggested for आग ॥ अपराधम् Sy.
१४. कुर्मः is suggested for कूर्मः ।
१५. युष्मदीयायाम् Sy.
१६. ं दिद्युति । अ is omitted by M.
१७. ०भिभ्रमा विभ० A. The reading is doubtful. ईषदपि(मा)भूम Sy.
१८. हि M. हे यजनीयाः ! Sy.
१९. अस्मासु अस्तु Sy.
२०. सुमतिः is suggested for सुमतुम् ॥ अनुग्रहबुद्धिः Sy.
२१. अन्नवत्तमा । अतिशयेनान्नप्रदेत्यर्थः Sy.
२२. अस्मदीये यज्ञकर्मणि Sy.
२३. एव Sy.
२४. अस्मिन् Sy.
२५. अरमन्त M. रमन्ताम् Sy.
२६. अवदवद्याः A. अनिन्दिताः Sy.
२७. दीप्तियुक्ताः Sy.
२८. शोधकाः एवम्भूता इति Sy.
२९. प्रावत is suggested for प्रापत ॥ प्रकर्षेण पालयत Sy.
३०. अनुग्रहबुद्धिभिः सुष्टुतिभिर्हेतुभिर्वा Sy.
३१. किञ्च हे मरुतः ! यजनीया यूयम् Sy.
३२. पोषार्थम् Sy.

उत स्तुतासो मरुतो व्यन्तु विश्वेभिर्नामभिर्नरो हुवींषि ।
ददात नो अमृतस्य प्रजायै जिगृत रायः सूनृता मघानि ॥ ६ ॥

उत स्तुतासः । अपि च । स्तुताः । मरुतः । भक्षयन्तु । सर्वैः । नामभिरीदृङ् न चान्यां दृष्टे चेत्या-दिभिः स्तुताः । नेतारः । हवीषि । दत्त । अस्माकम् । अन्नम् । प्रजार्थम् । उच्चारयतः । सूनृतानि च वचनानि । मंहनीयानि ।

आ स्तुतासो मरुतो विश्व ऊती अच्छा सूरीन्त्सर्वताता जिगात ।
ये नस्तमना शतिनो वर्धयन्ति यूयं पात स्वस्तिभिः सदा नः ॥ ७ ॥

आ स्तुतासः । आगच्छत । स्तुताः । हे मरुतः ! सर्वेऽपि यूयम् । रक्षणार्थम् । स्तोतॄन् । प्रति । सर्वस्मिन्नपि काले । ये । अस्मान् । आत्मनैव । बहुधनाः । वर्धयन्ति त इति ।

VII. ५८.

प्र साकमुक्षे अर्चता गणाय यो दैव्यस्य धाम्नस्तुविष्मान् ।
उत क्षोदन्ति रोदसी महित्वा नक्षन्ते नाकं निर्ऋतेरवंशात् ॥ १ ॥

प्र साकम् । प्रोच्चारयत स्तुतीः । सहोक्षणं कुर्वते । गणाय । यः । दैव्यस्य । स्थानस्य । बल-

---

१. एवमस्माभिः स्तुताः Sy.
२. उदकैः सहिताः Sy.
३. ०दृग् न चान्यां दृष्टे च त्या० A. चान्यो दृष्ट-इचेत्या० is suggested for चान्यां दृष्टे चेत्या० ।
४. शेवः प्रत्यक्षस्तुतः । हे मरुतः ! न अस्मदीयायै Sy.
५. अमृतमुदकम् Sy.
६. सन्ततये Sy.
७. उच्चारयत A. ०यत is suggested for ०यतः ॥ उद्गिरत प्रयच्छतेत्यर्थः Sy.
८. सूनृतानि सुष्ठु नृत्यन्ति शोभनयोग्यानि Sy.
९. VM. ignores रायः ॥. Sy.explains रायः probably as तथा हविषो दातुर्यज-मानस्य Sy.
१०. मघानि धनानि Sy. ११. अ A.
१२. एवमस्माभिः स्तुताः Sy.
१३. सर्वेति पी A. १४. रक्षया सहिताः Sy.
१५. अभिलक्ष्य Sy. १६. सर्वतातौ यज्ञे Sy.
१७. शतसङ्ख्याकान् । यथा वयं पुत्रपौत्रादिभिः शतिनो भवेम तथा वर्धयन्तीत्यर्थः । ते यूयमा जिगातेति पूर्वेण सम्बन्धः । एवम्भूता मरुतो यूयं सर्वदास्मान् पालयत Sy.
१८. 'प्र साकमुक्षे' इति षड्ऋचं तृतीयं सूक्तं वसिष्ठ-स्यार्षं त्रैष्टुभं मरुद्देवताकम् । अनुक्रान्तञ्च— 'प्र साकमुक्षे षट्' (KSA. 36. 58. p. 26.) इति । गतो विनियोगः Sy.
१९. हे स्तोतारः ! यूयम् Sy.
२०. सभोक्षणं A. सन्ततं ऋत्विजे Sy.
२१. मरुत्समूहाय Sy.
२२. देव्यस्य A. देवसम्बन्धिनः Sy.
२३. स्वर्गास्थस्य स्थानस्य Sy.

वान्[1] । सर्वेभ्यो देवेभ्यो बलवत्तरः । अपि[2] च । शकलीकुर्वन्ति[3] । द्यावापृथिव्यौ । महत्त्वेन[4] । व्याप्नुवन्ति च । नाकं[5] लोकम् । अस्याः[6] पृथिव्या आरभ्य[7] । वंशरहितेनान्तरिक्षेण[8] ।

जनूश्चिद्वो मरुतस्त्वेष्येण भीमासस्तुविमन्यवोऽयासः ।
प्र ये महोभिरोजसोत सन्ति विश्वो वो यामन्भयते स्वर्दृक् ॥ २ ॥

जनूश्चित्[9] । जन्मानि । युष्माकम्[10] । मरुतः[11] ! दीप्तेन रुद्रेण[12] । हे भीमाः[13] ! बहुक्रोधाः[14] ! गमनशीला[15]! प्रभवन्ति । ये । महद्भिस्तेजोभिः[16] । बलेन च सह । तेषां युष्माकम्[17] । गमने । सर्वः[18] । अपि[19] । स्वदृक्[20] । बिभेति दिवो दर्शनात् वनस्पति स्वगूह्वन्[21], वनस्पते याह्यूर्ध्वं[22] पश्यन्त्युत्तिष्ठत[23] ?[24]

बृहद्वयो मघवद्भ्यो दधात जुजोषन्निन्मरुतः सुष्टुतिं नः ।
गतो नाध्वा वि तिराति जन्तुं प्र णः स्पार्हाभिरूतिभिस्तिरेत ॥ ३ ॥

बृहद्वयः[25] । बृहत्[26] । अन्नम् । हविष्मद्भ्यः[27] । प्रयच्छत ऋत्विजः ! सेवन्ते[28] । एव । अस्माकम्[29]

---

१. बुद्धिमान् भवति । सर्वेभ्यो देवेभ्यः प्रवृद्ध इत्यर्थः । तस्मै गणायेति पूर्वेण सम्बन्धः Sy.
२. अपि च मरुतः Sy.
३. भञ्जन्ति Sy.
४. स्वकीयेन महत्त्वेन सहिताः Sy.
५. स्वर्गम् Sy.
६. ०भ्या A. तथा भूमेः Sy.
७. अन्तरिक्षात् Sy.
८. ज आदित्वत् A.
९. जन्म Sy.
१०. ०क A.
११. मुरतः A. एवम्भूता हे मरुतः ! Sy.
१२. दीप्तेन रुद्रेण बभूवेति शेषः Sy.
१३. हीमाः A.
१४. प्रवृद्धमतयः Sy.
१५. गन्तारः, इति त्रीणि सम्बोधनानि Sy.
१६. मरुद्भिः M.
१७. ०र्कं व A.
१८. अपि seems to be an explanation of चित् ।
१९. स्वर्दृक् is suggested for स्वदृक् ॥ सूर्यस्य द्रष्टा सर्वो जीवसमूहः । यद्वा स्वरन्तरिक्षम्, तत्पश्यतीति वृक्षः स्वर्दृक् । सर्वबोत्तिष्ठन्नित्यर्थः Sy.
२०. विभेति दिवो A.
२१. ०ति स्रग्वन् M. ०तिः स्वर्दृग् is suggested for ०ति स्वगूह्वन् ॥ The passage दिवो . . . . स्वर्दृक् should immediately follow स्वर्दृक् and precede बिभेति
२२. र्धां A.
२३. त्तिष्ठतः M. The passage is doubtful. It seems to be a quotation. or वनस्पतिर्ह्यूर्ध्वं पश्यत्युत्तिष्ठन्निति is suggested for वनस्पते याह्यूर्ध्वं पश्यन्त्युत्तिष्ठत ।
२४. VM. ignores उत ॥ उत अपि च Sy.
२५. ०यम् A.
२६. महत् Sy.
२७. ०द्भ्यः is suggested for ०द्भ्याम् ॥ हविर्लक्षणान्नवद्भ्योऽस्मभ्यम् Sy.
२८. सेवन्ताम् Sy.
२९. अस्मदीयाम् Sy.

मरुतः । सुष्ठुतिम् । सोऽयं-मरुद्गणो यथा । गतः । अध्वा । विरमयति । जन्तुमेवं विरमयति लब्धकाम-मजिगमीषुं करोति । सोऽस्मात् । स्पृहणीयैः । रक्षणैः । प्रवर्धयेदिति ।

युष्मोतो विप्रो मरुतः शतस्वी युष्मोतो अर्वा सहुरिः सहस्री ।
युष्मोतः सम्राळुत हन्ति वृत्रं प्र तद्वो अस्तु धूतयो देष्णम् ॥ ४ ॥

युष्मोतः । युष्माभी रक्षितः । हे मरुतः ! स्तोता । बहुधनो भवति । युष्मोत. । अश्व । सहन-शीलः । सहस्रमाहरति शत्रुभ्यः । युष्मोतो नशी रजा । अपि च । भवन्ति । शत्रुम् । सम्राट् भवन् । प्रास्तु । त । युष्माकम् । दानमस्मासु । हे कम्पयितारः !

ताँ आ रुद्रस्य मीळहुषो विवासे कुविन्नंसन्ते मरुतः पुनर्नः ।
यत्सुस्वर्ता जिहीळिरे यदाविरव तदेनं ईहहे तुराणाम् ॥ ५ ॥

ताँ आ रुद्रस्य । तान् । परिचरामि । सुरुद्रस्य सूनून् । सेक्तून् । बहु । अस्माकम् ।

---

१. शोभनं स्तोत्रम् Sy. २. न । यद्वा नेति चार्थे Sy. ३. मरुद्भिः प्राप्तः Sy. ४. अध्वा A. मार्गः Sy. ५. वि तिराति आहन्ति, उदकेनाप्याययत्येव । यद्वा वितिरतिर्वर्धनार्थः । मरुद्भिर्गतो मार्गश्च जन्तुं वर्धयति Sy.
६. प्राणिनम् Sy. ७. ०मिषु A.
८. अस्मात् M. अस्मान् is suggested for अस्मात् ॥ तथा नोऽस्मान् Sy.
९. स्पृहणीयाभिः Sy. १०. रक्षाभिः Sy.
११. प्रवर्धयते Sy. १२. ०ता A. १३. शतसङ्ख्योपेतधनवान् भवति Sy. १४. युष्मातः M.
१५. अश्वः A. अश्वः is suggested for अश्व ॥ अभिगन्ता Sy. १६. शत्रूणामभिभविता स्तोता Sy. १७. सहस्रधनवान् भवति Sy.
१८. युष्मतो न शी रता M. ०तोऽनश्वो राजा is suggested for ०तो न शी रजा ॥
१९. हन्ति is suggested for भवन्ति ॥ युष्मद्रक्षको हिनस्ति Sy.
२०. साम्राज्ययुक्तो भवति Sy.
२१. प्रस्तु A. प्रभूतं भवतु Sy.
२२. तत् is suggested for त ॥ प्रसिद्धम् Sy.
२३. युष्माभिर्दत्तम् Sy. २४. धनम् Sy.
२५. हे धूतयः ! कम्पयितारो मरुतः ! Sy.
२६. वसिष्ठस्येदमार्षम् Dur. वसिष्ठस्यार्षम् SKN. २७. तां M. तान् is suggested for तात् ॥ तान् प्रकृतान् SKN.
२८. अहं होता परिचरामि Sy. आभिमुख्येन स्थित्वा परिचरामि Dur. विवासतिः परिचर्याकर्मा ॥ आभिमुख्येन परिचरामि SKN.
२९. सु seems to be unnecessary.
३०. सुनून् A. ईश्वरस्य पुत्रान् Sy. किंलक्षणान् पुनर्मरुत आविवासे ? रुद्रस्य, इन्द्रस्य स्वभूतान्प्राप्तान्वा । अथवा मीळहुष इति रुद्रविषयं षष्ठ्येकवचनान्तं स्यात् । मीळहुषो रुद्रस्य स्वभूतानिति Dur.
३१. सेक्तून् A. कामानां वर्षितुः Sy. अहं मीळहुषो मरुतो वर्षस्य सेक्तॄन् धनवतो बलवतो वा Dur. सेक्तुर्धनवतो वा पुत्रानिति शेषः । कुत एतत् ? ऋग्वेदे 'रुद्रस्य ये मीळुषः सन्ति पुत्राः' (RV. VI. 66. 3) इत्यादौ मन्त्रान्तरे दर्शनात् SKN.
३२. बहुकृत्वः Sy. कस्मात् ? यस्मात् कुविद् बहुवचनान्तम् SKN. अस्मभ्यम् Sy. अस्मान् प्रति Dur.

नमयन्ति[1] । मरुतः[2] । पुनः[3] । सस्वरितामित्यन्तर्हितनामात्र तु नु स्वर्ते त्रि दृष्ट[4] ? यत्[5] । अन्तर्हितं पापम् । क्रुध्यन्ति[6] मरुतः यच्च । आपिभूतम्[7] । अवेमहे[8] । तत्[9] । एनः[10] । मरुतां क्षिप्राणां[11] हृद्गतमवगच्छन्त्विति[12] याचामहे[13] ।

प्र सा वाचि सुष्टुतिर्मघोनामिदं सूक्तं मरुतो जुषन्त ।
आराच्चिद्द्वेषो वृषणो युयोत यूयं पात स्वस्तिभिः सदा नः ॥ ६ ॥

प्र[14] सा[15] । प्रोक्ता[16] । सेयम् । सुष्टुति[17] । हविष्मताम्[18] । इदम्[19] । सूक्तम् । मरुतः । सेवन्ताम्[20] । अस्मत्तो दूरे[21] । वृषणः[22] ! पापम्[23] । पृथक्कुरुत[24] ।[25]

---

१. अभिमुखीभवन्तु Sy. वर्षाद्युपकारेण . नमन्ते प्रह्वीभवन्ति Dur. नमन्ते, वर्षाद्युपकारेण प्रह्वीभवन्ति SKN.

२. कस्मात् पुनस्तानहं परिचरामि ? यस्मात्ते मरुतः Dur.

३. भूयः । कुविच्छब्देनैव पुनःशब्दार्थस्य लब्धत्वात् पुन.शब्दग्रहणं किमर्थम् ? आदरार्थम् Sy. अन्तर्णीतवीप्सार्थोऽयं पुनःशब्दः । पुनः पुनः SKN.

४. ०मातृ तु नु स्पर्ते त्रिदृष्टं A. सस्वरित्यन्तर्हितनाम, अत्र तु स्वरतेस्तृचि रूपम् or अत्र तु सस्वर्तेति दृष्टम् is suggested and it refers to अन्तर्हितं पापम् । It should therefore, come immediately before अन्तर्हितं पापम् ।

५. यद्येनेनसा Sy.

६. अन्तर्हितेनाप्रकाशेन Sy. यच्छरीरगतमेनः Dur. सस्वरित्यन्तर्हितनाम । तां इति 'तनु विस्तारे' एतस्य रूपम् । अन्तर्हितमेव तापमानमप्रकाशमानमेवेत्यर्थः SKN.

७. क्रुध्य A. क्रुध्येयुः Sy. लज्जयन्ति Dur. SKN. ८. आविर्भूतम् is suggested for आपिभूतम् ॥ प्रकाशेन Sy. यच्च प्रकाशम् Dur., SKN.

९ स्तोत्रेण वयमुपनयामः Sy. उभयलक्षणमपि, अवयजेमहि, निर्णुदेमहि, इत्येतत् 'ईमहे' अनेन परिचारेणार.ध्यैतान् मरुत इति Dur. अवेत्येतोऽपेत्येतस्य स्थाने । ईमह इति 'इण् गतौ' इत्यस्यान्तर्णीतण्यर्थस्य रूपम् । अपगमयेम नाशयेमेत्यर्थः SKN.

१० एवम्प्रकारमुभयलक्षणमपि Dur. तदुभयमपि SKN. ११. अपराधम् Sy.पापम् SKN.

१२. ०णा A. तदेषां मरुतां तुराणां त्वरमाणानां प्रसादेन Dur. सर्वस्य स्वशत्रोस्तृणां ? त्वरमाणानां मरुतां प्रसादेनेति शेषः SKN.

१३. न्त्वि is missing in A. ०मपगच्छन्त्विति is suggested for ०मवगच्छन्त्विति ।

१४. The passage हृद्गत.... याचामहे refers to अवेमहे. Therefore it should immediately follow. अवेमहे । N. 4. 15.; SKN. II. 233, 234.

१५. प्र सा is written twice in M.

१६. अस्माभिः प्रोक्तासीत् Sy.

१७. सुष्ठुतीः A. या शोभना स्तुतिरस्मिन् सूक्ते कृता सा स्तुतिः Sy.

१८. धनवतां मरुतां सम्बन्धिनीम् Sy.

१९. ईदृग्भूतम् Sy.

२०. The commentary from म्, अस्मं onwards is missing in A.

२१. दूरात् Sy.

२२. हे कामानां वर्षितारः ! यूयम् Sy.

२३. द्वेषांसि शत्रून् Sy.

२४. अस्मत्तः पृथक्कुरुत । यूयं नोऽस्मान् स्वस्तिभिः सर्वदा रक्षत Sy.

२५. VM. ignoers चित् ॥ एव Sy.

VII. 59.

यं त्रायध्व इदमिदं देवासो यं च नयथ ।
तस्मा अग्ने वरुण मित्रार्यमन्मरुतः शर्म यच्छत ॥ १ ॥

यं त्रायध्वे[1] । यम्[2] । रक्षत[3] । इत्थमित्थम् । देवासः ! यम्[4] । च । नयथ[5] । तस्मै[6] मह्यम् । अग्न्या-दयः ! सुखम् । प्रयच्छत[7] ॥ मारुतं[8] सूक्तम्[9] ।

युष्माकं देवा अवसाहनि प्रिय ईजानस्तरति द्विषः ।
प्र स क्षयं तिरते वि महीरिषो यो वो वराय दाशति ॥ २ ॥

युष्माकम्[10] । युष्माकम्[11] । हे देवाः ! रक्षणेन । प्रिये[12] दिवसे[13] । ईजानः[14] । तरति[15] । शत्रून् । प्रवर्ध-यति च[16] । सः । गृहम्[17] । विविधं च वर्धयति । महान्ति[18] । अन्नानि[19] । यः । युष्मभ्यम्[20] । प्रयच्छति । आत्मीय-मभिलषितमुद्दिश्य[21] ।

---

१. 'यं त्रायध्वे' इति द्वादशर्चं चतुर्थं सूक्तम् । अत्रेयमनुक्रमणिका—'यं त्रायध्वे द्वादश त्रिप्र-गाथादि नवम्याद्यास्तिस्रो गायत्र्योऽन्त्यानुष्टु-ब्भौ त्री मृत्युविमोचनी' (KSA. 36. 59. p. 26.) इति । आद्यातृतीयापञ्चम्यो बृहत्यो द्वितीया-चतुर्थीषष्ठ्यः सतो बृहत्यः सप्तम्यावनु-क्तत्वात्त्रिष्टुभौ नवमीदशम्येकावश्यो गायत्र्यः । द्वादश्यनुष्टुप् सा च रुद्रदेवताका । शिष्टा मारुत्यः । सूक्तविनियोगो लैङ्गिकः Sy.

२. The commentary on this stanza is missing in A.

३. स्तोतारम् Sy.

४. पालयध्वे Sy.

५. ईतो भयहेतोः Sy.

६. हे देवाः ! Sy.

७. ०था M. सन्मार्गं प्रापयत Sy.

८. स्तोत्रे Sy.

९. आदि refers to वरुण ! मित्र ! अर्यमन् ! and मरुतः !

१०. दत्त Sy. ११. ०त M.

१२. The passage मारुतं सूक्तम् should immediately follow the *pratīka*. यं त्रायध्वे ।

१३. युष्मा is omitted in M.

१४. युष्मदीयेन Sy.

१५. सर्वेषां देवानां प्रियभूते सुत्याभिधाने Sy.

१६. ०सं A.

१७. राजानः A. इष्टवान् जनः Sy.

१८. आक्रामति Sy. १९. यजमानः Sy.

२०. स्वकीयं निवासम् Sy.

२१. विशेषेण ददाति । अतएव स स्वकीयं निवासं वर्धयतीत्यर्थः Sy. २२. महाति A.

२३. हविर्लक्षणानि Sy. २४. अस्मभ्यं M.

२५. ०त्यामीय० A. वराय °निवारणाय । यूयं नान्यत्र गच्छतास्मदीयान्येव हवींषि स्वीकुरुतेति निरोधनं कर्तुम् Sy.

नहि वश्चरमं चन वसिष्ठः परिमंसते ।
अस्माकमद्य मरुतः सुते सचा विश्वे पिबत कामिनः ॥ ३ ॥

नहि वः । नहि । व. । चरमम् । अपि यो भवता जघन्यमागच्छति तमव्ययम् । वसिष्ठः । परिबुध्यते परिवर्जयति । तथा सत्यस्माकम् । अद्य । हे मरुतः ! सुते । सहिनाः । विश्वे । पिबत । कामिनः

नहि व ऊतिः पृतनासु मर्धति यस्मा अराध्वं नरः ।
अभि व आवर्त्सुमतिर्नवीयसी तूयं यात पिपीषवः ॥ ४ ॥

नहि वः । नहि । युष्माकम् । रक्षणम् । पृतनासु । बाध्यते । अस्मै यजमानाय । तामूतिम-राध्वम् । नरः ! रातिर्दानकर्मा । तथा सति युष्माकम् । नवतरी । तिः । अस्मानभ्यावृणोतु । क्षिप्रम् । आगच्छत । सोमं पातुकामः ।

---

१. युष्माकं मध्ये Sy.
२. अवरम् Sy.
३. ०मव्ययं is suggested for ०मव्ययं ।
४. ऋषिः Sy.
५. वर्जयित्वा न स्तौति किन्तु सर्वानेव युष्मान् स्तौतीत्यर्थः Sy.
६. अस्मदीये Sy.
७. अस्मिन् दिने Sy.
८. सोमेऽभिषुते सति Sy.
९. सङ्गत्य Sy.
१०. यूयम् Sy.
११. पानं कुरुत Sy.
१२. सोमं कामयमानाः Sy.
१३. न खलु Sy.
१४. हे मरुतः ! अः युष्मदीया Sy.
१५. रक्षा Sy.
१६. युद्धेषु Sy.
१७. हिनस्ति । शत्रुभिः कृतां हिंसां (न) सहत इत्यर्थः Sy.
१८. यस्मै जनाय Sy.
१९. ति is written twice in A.
२०. इतराध्वम् M.
कामानदध्वं तं जनं न हिनस्तीति सम्बन्धः Sy.
२१. हे नेतारः ! यूयम् Sy.
२२. The passage रातिर्दानकर्मा refers to अराध्वम् । therefore it should immediately follow that.
२३. ०तरा is suggested for तरो० ।
२४. Something probably मुम is missing in the mss. अनुग्रहबुद्धिः Sy.
२५. अस्मानभ्यावर्तताम् Sy.
२६. ०कामात् A. ०कामाः is suggested for कामः ॥ हे सोमपानकामाः ! यूयमपि Sy.

ओ षु घृष्विराधसो यातनान्धांसि पीतये ।
इमा वो हव्या मरुतो रारे हि कं मो ष्व१ न्यत्र गन्तन ॥ ५ ॥

ओ[1] षु । आयात । ये युष्वीराधसः[2] ! इतरेतर संहन्यमानधनान्[3] ! सोमान्[4] । पातुम्[5] । इमानि । युष्मभ्यम् । हवीष्यहम् । हि[6] । प्रयच्छामि[7] । मा । गच्छत । अन्यत्र तथा सति[8] । सु पूरणे[9] ।

आ चं नो बर्हिः सदतावितं चं नः स्पार्हाणि दातवे वसुं ।
अस्रेधन्तो मरुतः सोम्ये मधौ स्वाहेह मादयाध्वै ॥ ६ ॥

आ च नः । आसीदत[11] । च । अस्माकम्[12] । बर्हिः[13] । रक्षत[14] । च । अस्मान्[15] । वर्णन्यित्वं च्छान्दसम्[16] । स्पृहणीयानि । धनानि । दातुम् । अक्षीणा[17] भवन्तः । मरुतः । सोममयं[18] । मधुनि[19] । स्वाहाकारेण । इह[20] । माद्यत[21] ।

सस्वश्चिद्धि तन्व१ः शुम्भमाना आ हंसासो नीलपृष्ठा अपप्तन् ।
विश्वं शर्धो अभितो मा नि षेद् नरो न रण्वाः सवने मदन्तः ॥ ७ ॥

सस्वश्चित् । अन्तर्हिताः । अङ्गानि[22] । शोभयन्त[23] आभरणैः[24] । नीलपृष्ठाः[25] केचन । हंसाः[26] । आपप्तन्नि[27]ति

---

१. ओष्ठः A.
२. ये युष्युरा० A. हे घुष्वि० is suggested for ये युष्वीरा० ॥ परस्परघृष्टानि सुसंहतानि राधांसि येषां ते हे मरुतः ! यूयम् Sy.
३. ०मा धनात् A. ०धनाः is suggested for ०धनान् ।
४. सोमात् A. सोमलक्षणानि हवींषि Sy.
५. भक्षणार्थम् Sy. ६. यस्मात् कारणात् Sy.
७. ददामि Sy.
८. अतः कारणाद्यूयमन्यत्र Sy.
९. सुष्ठु Sy.
१०. VM. ignores मरुतः । कम् ।
११. उपविशत Sy.
१२. हे मरुतः ! यूयं नः अस्मदीये Sy.
१३. कुशमये बर्हिषि Sy.
१४. आगच्छत च Sy.
१५. अस्मात् पर्णान्यित्व A.
१६. The passage वर्णन्यित्वं छान्दसम् refers to अवित in the text. It should therefore immediately follow रक्षत and precede च.
१७. अहिंसन्तो यूयम् Sy.
१८. सोमात्मके हविषि Sy.
१९. मदकरे Sy.
२०. अस्मिन् यज्ञे Sy.
२१. मद्यत A. मादयध्वम् माद्यत Sy.
२२. मरुतः स्वकीयान्यङ्गानि Sy.
२३. ०यत आ० M.
२४. अलङ्करणैः शोभयन्तः Sy.
२५. ०स्पृष्ठाः A.
२६. हंसा इव Sy.
२७. आपतन्तु, आगच्छन्तु Sy.

मरुदभिप्रायम्, ते नूनं नीलपृष्ठा भवन्ति । माम् । अहितः । विश्वम् । शर्धः । निषीदत्विति मारुतं शर्धोऽभिप्रेत्याह । मनुष्याः । इव । रमणीयाः । यज्ञे । मदन्तो भवन्ति मरुतः ।

यो नो मरुतो अभि दुर्हृणायुस्तिरश्चित्तानि वसवो जिघांसति ।
द्रुहः पाशान्प्रति स मुचीष्ट तपिष्ठेन हन्मना हन्तना तम् ॥ ८ ॥

यो नः । यः । अस्मान् । हे मरुतः ! अभिजिघांसति । दुर्हृणायुर्दुष्टभावो हृणायुः क्रुध्यन् । तिरस्कुर्वन् । बुद्धिः । हे वासयिता ! सः मुद्रोद्धन् । पाशान् युष्मदीयान् । प्रतिमुञ्चतु । तप्ततमेन । आयुधेन । तम् । हत ।

---

१. ०पृष्ठो A. The passage ते नूनं नीलपृष्ठा भवन्ति refers to नीलपृष्ठाः केचन । It should therefore immediately follow नीलपृष्ठाः केचन and precede हंसा ॥ असितवर्णाः Sy.
२. अभितः is suggested for अहितः ॥ समन्तात् Sy.
३. व्याप्तः Sy.
४. शर्धा A. मरुद्गणः Sy.
५. मा निषी० M.
६. तद्वत् Sy.
७. हृष्यन्तः Sy.
८. ०रुतं A.
९. VM. ignores चित् and हि.
१०. साकमेधेषु मरुद्भ्यः सान्तपनेभ्यः इत्यस्य 'यो नो मरुतः' इति पूर्वानुवाक्या । 'सान्तपना इदम्' इति याज्या । 'सान्तपना इवं हविर्यो नो मरुतो अभि दुर्हृणायुः' (ĀŚS 2. 18.) इति Sy. वसिष्ठस्येदमार्षम् Dur.
११. अस्मदीयानि Sy. अस्माकम् Dur., SKN.
१२. आभिमुख्येन हन्तुमिच्छति Sy. ततो हन्तुमस्मानिच्छति Dur. अभीत्ययं जिघांसतीत्येतेन सम्बध्यते।...अभिहन्तुमिच्छन्ति SKN.
१३. क्रुधं M. अशोभनं क्रुध्यन् Sy. पापक्रोधः Dur. हृणिः क्रोधः । कुत्सितो हृणिर्दुर्हृणिर्वैरानुबन्धिनी प्रणयपूर्वं इत्यर्थः । तं यच्छति । यद्वा स दुर्हृणायुः SKN.
१४. सर्वैस्तिरस्कृतः Sy. अन्तर्हितानि Dur. 'तिरोऽन्तर्धौ' (Pa. 1. 4. 71.) इत्येवमस्य गतिनाम । गतीनां च क्रियासम्बन्धात् क्रियाशब्दोऽत्राध्याहार्यः । तिरस्कृतात्मनोऽन्तर्हितानीत्यर्थः SKN.
१५. बुद्धीः is suggested for बुद्धिः । चित्तानि कृत्वा सम्मोह्य Dur. अभिप्रायाः SKN.
१६. ०यितारः is suggested for ०यिता ॥ हे प्रशस्याः ! Sy. हे वसवः ! सर्वभूतवासयितारः Dur. 'वस आच्छादने' छादयितारः । केन कस्य ? सामर्थ्याद् वृष्ट्या जगतः SKN.
१७. मुद्रोद्धून् A. अस्मद्द्रोग्धुः or द्रोग्धुः is suggested for मुद्रोद्धन् । पापानां द्रोग्धुर्वरुणस्य Sy. तस्यैवंलक्षणस्य द्रुहोऽस्मद्द्रोग्धुरुपरि Dur. मूलविभुजादित्वाद्, द्रोग्धा SKN.
१८. यष्म० A.
१९. बध्नीयात् Sy. प्रतिसम्मोचयत Dur. प्रतिमुञ्चत्वात्मनि स युष्मदीयैः पाशैर्बध्यतामित्यर्थः SKN.
२०. नपूतमेन A. पाशैरेवं बद्ध्वा तपिष्ठेन तापयितृतमेन Dur. बद्धं च सन्तं तपिष्ठेनातिशयेन तापयित्रा दुःखयित्रेत्यर्थः SKN.
२१. हननसाधनेनायुधेन Sy. हननेन वधेनेत्यर्थः Dur. अनेनायुधेन SKN.
२२. हत हिंस्त Sy. हतेत्यर्थः Dur. हत आ यूयम् SKN. N. 4. 7.; SKN. II. 215.

सांतपना इदं हविर्मरुतस्तज्जुजुष्टन । युष्माकोती रिशादसः ॥ ९ ॥

सान्तपनाः । हे सन्तपनकुशलाः ! शत्रूणाम् । तत् । इदम् । हविः । मरुतः ! सेवध्वम् । यौष्माकीणेन । रक्षणेन सह । हे हिंसितॄणां निरसितारः !

गृहमेधास आ गत मरुतो मापभूतन । युष्माकोती सुदानवः ॥ १० ॥

गृहमेधासः । गृहमेधाः गृहे विद्यमानयज्ञाः । आगच्छत । मरुतः ! मा च । अपभवत । युष्माक । ऊती । सुदानाः ।

इहेह वः स्वतवसः कवयः सूर्यत्वचः । यज्ञं मरुत आ वृणे ॥ ११ ॥

इहेह । इह चेह च । युष्माकम् । हे स्वभूतबलाः ! कवयः ! सूर्यसदृशरूपाः । यज्ञम् । मरुतः । आभिमुख्येन सम्भजे ।

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ॥ १२ ॥

त्र्यम्बकम् । अत्र वाजसनेयकम्-एष ते रुद्र भागः सह स्वविकया ते जुषस्व स्वाहेत्यम्बिका ह वै नामा

---

१. हे शत्रूणां सन्तापकाः ! मरुतः ! Sy.
२. तादृशम् Sy. ३. प्रत्यक्षेणोपलभ्यमानम् Sy.
४. युष्मभ्यं कल्पितमिति शेषः Sy.
५. ०ष्मा किणे० A. युष्माकम् Sy.
६. रक्षया Sy. ७. ०सित्रूणां A. हिंसतामसितारो रिशानामत्तारो वा यूयम् Sy.
८. 'गृहमेधासः' इति गृहमेधीयस्य हविषोऽनुवाक्या। सूत्रितञ्च—'गृहमेधास आ गत प्र बुध्न्या व ईरते महांसि' (ĀSS. 2. 18.) इति Sy.
९. ग्रहमे० A. १०. ग्रहे A.
११. ०मानाय० A. गृहे क्रियमाणो यज्ञो येषां ते Sy.
१२. अस्मदीयं यज्ञं प्रत्यागच्छत Sy.
१३. अपगता (मा) भवत। 'भू प्राप्तौ' इति धातुः Sy. १४. युष्माकम् Sy.
१५. रक्षया युक्ताः Sy. १६. शोभनदानाः Sy.
१७. वैश्वदेवे पर्वणि मारुतस्यानुवाक्या 'इहेह वः' इत्येषा। सूत्रितञ्च—'इहेह वः स्वतवसः प्र चित्रमर्कं गृणते तुराय' (ĀSS.2.16.) इति Sy.
१८. इहैवास्मदीयं यज्ञम् Sy.
१९. हे स्वायत्तबलाः ! स्वयं प्रवृद्धाः ! वा Sy.
२०. हे क्रान्तदर्शिनः ! Sy. २१. सूर्यवर्णाः Sy.
२२. आभजामि कल्पयामि Sy.
२३. त्रियम्ब० A. २४. अत्र शौनकः—
त्रिरात्रं नियतोऽपोष्य श्रपयेत्पायसं चरुम् ।
तेनाहुतिशतं पूर्णं जुहुयाच्छुंसितव्रतः ॥
समुद्दिश्य महादेवं त्र्यम्बकं त्र्यम्बकेत्यृचा ।
एतत् पर्वशतं कृत्वा जीवेद्वर्षशतं सुखी;
(Rgvid 2. 27.) इदानीं मृत्युञ्जयमाशास्ते BB.
२५. स्वत्राम्बिकया is suggested for स्वविकया ।
२६. ते जुष्टस्व स्याहे० A. तं is suggested for ते ।
२७. ०त्याम्बि० M. A. fragment of YV. 3. 57.

स्वसा तयास्यैष स भागः सदस्यैष स्त्रिया सह भागस्तस्मात् त्र्यम्बको नामेति तं वयम् । यजामहे । शोभन-गन्धम् । पुष्टेर्वर्धयितारम् । अथैकवदाह—यथोर्वारुकं पक्त्वा । बन्धनात् स्वयमेवानायासेन मुक्तं भवत्येव-महम् । मृत्योः । मुक्षीय । मा । अमृताज्जीवितममृतमिति ।

---

१. The passage स भागः सदस्यैष seems to be unnecessary.

२. त्रियम्ब० A. त्रयाणां ब्रह्मविष्णुरुद्राणामम्बकं पितरम् Sy.

३. नेत्रत्रयोपेतं रुद्रम् Mah. त्रीण्यम्बकानि लोचनानि यस्य । यद्वा 'अबि शब्दे' अम्बका वेदाः, त्र्यम्बको वेदत्रयीप्रतिपाद्यः । अथवा 'अम गत्यादिषु' अम हेतवोऽम्बाः, द्यौरापः पृथिवी चेति, तदाराधनीयत्वात् । त्रयो वाऽग्नयः, तिस्रो वा गतयः, त्रीणि वा ज्योतींषि । छान्दस इयङ्डादेशः । तस्मादेवं महानुभावं देवं त्र्यम्बकम् BB. ४. शिष्टसमाहितो वसिष्ठो ब्रवीति Sy. पूजयामः Mah., U.

५. दिव्यगन्धोपेतम्, मर्त्यधर्महीनम् Mah. नित्य-शोभनं यशोगन्धि सर्वसुकृतमयत्वात् BB.

६. जगद्बीजम् । उक्तशक्तिमित्यर्थः । उपा ाकस्य वर्धनम्, अर्यमादिशक्तिवर्धनम् Sy. धनधान्यादिपुष्टेर्वर्धयितारम् Mah. पोषस्य वर्धयितारम् U. गोभूमिवित्तविद्यादिपुष्टिहेतुमीदृशं देवं यजामहे BB.

७. यथा कर्कटीफलं मुच्यते तद्वन्मरणात् संसारात्, वा मोचय Sy. मृत्योर्मोचने दृष्टान्तः । . . . यथोर्वारुकं कर्कन्ध्वादेः फलमत्यन्तपक्वं सत् Mah. उर्वारुकः फलविशेषः । स यथा पक्वः U. यथोर्वारुकं फलं . . . अपुसमुर्वारुकमिति केचित् । हिममित्यन्ये BB.

८. बन्धनात् स्वस्य वृन्तात् Mah. स्वबन्धनात् U. प्रसबबन्धनात् BB.

९. प्रमुच्यते तद्वत् Mah. वियुज्यते U. पक्वं स्वयं मुच्यते BB.

१०. संसाराद्वा Sy. ततो रुद्रप्रसादान्मृत्योः . . . अपमृत्योः संसारमृत्योश्च Mah. एवमहमपि मृत्योरनेन BB.

११. अतस्त्वत्प्रसादादेव मृत्योर्मरणात् संसाराद्वा मोचय Sy. मुक्तो भूयासम् Mah., BB. मोचय मोचयतु । पुरुषव्यत्ययश्छान्दसः U.

१२. मुक्तो मा भूयासम् । एकवचनं बहुत्वे । मुक्ता मा भूयास्मेत्यर्थः । अभ्युदयनिःश्रेयसरूपात्फलद्वयान्मम भ्रंशो मा भूदित्यर्थः Mah. मा कदाचित् . . मोचयतु U.

१३. किं मर्यादीकृत्य ? अमृतात्—सायुज्यान्मोक्षपर्यन्तमित्यर्थः Sy. स्वर्गरूपान्मुक्तिरूपाच्च Mah. अमरणो भूयासम् । . . . अन्य आहुः पुरुषेण बाह्यात्काष्ठादिभारात्, यद् भारातिक्तं तदुर्वारुकमिति तद्यथा बन्धनव्यवसायान्मुच्यते न बाहकवशं भवति एवमहं मृत्योर्मुक्षीय मृत्युवशं मा गां मां मृत्युर्मा गादिति । उरोभाराद्वारणीयमुर्वारुक मिति BB.

अथ तैत्तरीयभाष्ये 'शोभनः शरीरगन्धः पुष्टिगन्धो वा यस्यासौ सुगन्धिः । यथा वृक्षस्य सम्पुष्पितस्य दूराद्गन्धो वात्येवं पुण्यस्य कर्मणो दूराद् गन्धो वाति' (TS. 1. 8. 6. 2.) इति श्रुतेः । पुष्टिं शरीरधनादिविषयां वर्धयतीति पुष्टिवर्धनः । तादृशं त्र्यम्बकं यजामहे । पूजयामः । लोके यथोर्वारुकफलानि बन्धनाद् वृन्तात् स्वयमेव मुच्यन्ते तद्वदहं त्र्यम्बकप्रसादेन मृत्योर्मुक्षीय । मोचनयुक्तो भूयासम् । अमृताच्चिरजीवितात् स्वर्गविर्वा मा मुक्षीय । चतुर्थपादार्थमन्त्रस्य तात्पर्यातिशयं दर्शयति । त्र्यम्बकं यजामह इत्याह मृत्योर्मुक्षीय मामृतादिति वावैतदाहेति Sy.

अथापसत्यवि त्रिः परियन्ति । सव्यानूरूनुपाधानास्त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् । उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात्स्वाहा शीरेवैवैतस्य कर्मण आशिषमेवैतदाशास्ते तद्ध्येव शमिव यो मृत्योर्मुच्यातैनामृतात्तस्मादाह मृत्योर्मुक्षीय मामृतादिति । SB. 2. 6. 2. 12. p. 197.

व्याख्यात्तुरीयमध्यायं पञ्चमस्याष्टकस्य सः।
अष्टकस्य कुले जातो माधवो वेङ्कटात्मजः ॥•

[अथ पञ्चमाष्टके पञ्चमोऽध्यायः]

'यदद्य सूर्यत्यध्यायं व्याचिख्यासति माधवः।
अष्टकादिषु वक्तव्यमादितः सम्प्रदर्शयन् ॥ १ ॥
अष्टकाध्यायविच्छेदः पुराणैर्ऋषिभिः कृतः।
उद्ग्राहार्थं प्रदेशानामिति मन्यामहे वयम् ॥ २ ॥
वर्णानामपि विच्छेद आर्ष एवेति निश्चयः।
ब्राह्मणेष्वभिदृश्यन्ते वर्गसंशब्दनादि च ॥ ३ ॥
विभज्यन्ते च सूक्तानि समधा तत्र वर्गशः।
अन्ताल्लोपोऽपि वृद्धिश्च क्रियते तु गुणाविति ॥ ४ ॥
अध्यापनाय शिष्याणां विभागो वर्गशः कृतः।
सुग्रहो हि भवत्यल्पः शक्यो धारयितुं ततः ॥ ५ ॥

Sy.'s commentary on this stanza is doubtful.

१. ०ख्या तु० A.

२. Supplied by the Editor.

३. RV. VII. 60. ४. ०नां मति A.

५. ०'ष्वपि दृ०' R. ०वृश्यन्ते plu. is doubtful.

६. ०शब्दनादयः is suggested for शब्दनादि च।

७. ०न्तेऽथ R.

८. क्रियेतेऽनुगुणाविति R. As क्रियेते is dual, Sandhi should not take place. So. R's reading is defective. क्रियेते अनुगुणाविति is suggested for क्रियते तु गुणाविति। In the suggested reading one syllable is too many.

९. विभागे A. १०. सुगृहो A.

सङ्क्षीभूयाभवत्सर्वमेकं मण्डलमादितः ।
आसीदृषिर्मधुच्छन्दा मधुमत्तममन्त्रदृक् ॥ ६ ॥
तस्मादग्रे प्रादुरभूत् काण्वो मेधातिथिस्ततः ।
शौनश्शेपानि च्छन्दांसि मधुराणि ततोऽभवन् ॥ ७ ॥
हैरण्यस्तूपच्छन्दांसि काण्वानि च ततः परम् ॥ ८ ॥

अत्र शाट्यायनकम्—वैश्वामित्रो मधुच्छन्दा अकामयत मुख्ये ब्रह्मवर्चसे स्यामिति ॥

अमहान्ति निवेश्यान्तर्मण्डलानि महर्षिभिः ।
कृतो महद्भ्यां रक्षार्थमथ तेषां परिग्रहः ॥ ९ ॥
समानमेतद्यज्ञस्यैव तद्वसेने ह्यतीति ।
सामिधेनीप्रभृतीषु ब्राह्मणैस्तद् विधीयते ॥ १० ॥
भूयिष्ठा यज्ञसंयुक्तमुत्तमं मण्डलं विदुः ।
पितृमेधादिकं तस्मादन्ततस्तन्निवेशितम् ॥ ११ ॥
मध्यस्थानां मण्डलानां क्रमो योऽयं व्यवस्थितः ।
तस्य कारणमन्वेष्टुं सङ्ख्यास्माभिः प्रदर्श्यते ॥ १२ ॥

---

१. संप्प भू० A.
२. सर्व एकमुण्डमादि० A. सर्व ए० M. The reading is adopted from R.
३. ०वृष्टिमं० A.
४. मधुरोत्तम० R.
५. काञ्चो A., M. The reading is adopted from R.
६. ०शेवानि A.
७. छन्दांसि R.
८. ०वत् A, R.
९. ०चिन्दासी कण्वा० A. चिन्दांसि M. ०च्छन्दां सि is suggested for ०छन्दांसि ।
१०. मुख्यौ A मुख्यौ ब्रह्मवर्चसी M. The reading is adopted from R.
११. ०न्तं म० A. M. The reading is adopted from R.
१२. ०द्वसने A. The reading of 2nd pāda is omitted in R. The reading is doubtful.
१३. ०प्रभृतिषु is suggested for ०प्रभृतीषु ।
१४. ०णैरद् वि० A. ०णैर्यद् R.
१५. भूयिष्ठं R. १६. ०तश्च नि० R.

आद्यन्तयोर्मण्डलयोर्नवोने द्वे शते विदुः ।
द्विचत्वारिंशद् द्विषष्टिद्वर्चूना षष्टिरनन्तरम् ॥ १३ ॥
सप्ताध्यशीतिः पञ्चाधिसप्ततिस्तदनन्तरम् ।
चतुरधिकं च शतमष्टोनं च शतं ततः ॥ १४ ॥
चतुर्दशकं च शतं सूक्तानां क्रमशो विदुः ।
मध्यस्थानां मण्डलानामिति संख्या यथाक्रमम् ॥ १५ ॥
रक्षार्थमथ वाक्यानि कळायो लवनं ततः ।
रातिनाश्च दमूनाश्च सदनं मथनं तथा ॥ १६ ॥
वनाय क्रोधतो द्वे च भयकृद्युद्धकृत्तथा ।
क्रमेण दशवाक्यानि प्रच्छन्नं स्यात् समन्वये ॥ १७ ॥
वामदेवस्तृतीयश्चेद् भरद्वाजश्च पञ्चमः ।
कण्वश्च सप्तमः सूक्तैः क्रमवृद्धैर्भवेत् क्रमः ॥ १८ ॥

---

१. नपोने A.

२. गते A. गतौ M. There are one hundred and ninety-one sūktas in the 1st and 10th maṇḍalas.

३. त्रिच० is suggested for द्विच० ॥ 43 sūktas in the 2nd maṇḍala.

४. ०ष्टिद्वूनां A. ०ष्टि यूनां M. 62 sūktas in the third maṇḍala. 58 sūktas in the 4th maṇḍala.

५. सप्ताधीशि A. ०प्ताधिशी...M. सप्ताशीतिः R.

६. ०धिकास० A. ०धिकस० R. 75 sūktas in the 6th maṇḍala. 87 sūktas in the 5th maṇḍala.

७. च is missing in A. 104 sūktas in the 7th. maṇḍala.

८. 92 sūktas in the 8th maṇḍala.

९. गतं A. चतुर्दशं च शतकं R. 114 sūktas in the 9th maṇḍala.

१०. कानयोगवनं A. M.

११. ०ना च A. ०नश्च R.

१२. ०नो R.

१३. नि च्छन्नस्याः सम० A. सायाह्नं R.

१४. ०यश्च R.

न च क्रमेण वर्धन्त ऋचो गार्त्समदादिषु ।
तस्मादुक्तोऽपि नैतेषामष्टानां सिध्यति क्रमः ॥ १९ ॥
वाक्यैरेतैर्विजानीयान् मण्डलानामृचः क्रमात् ।
दशानां दशभिः प्राज्ञस्तथाधेयो धरावनिः ॥ २० ॥
साध्यं च नो धेहि मेन्नं शूरसूनुर्मतोऽसिनः ।
गुरुदाने युगान्तस्य सिद्धान्नस्य निशीथके ॥ २१ ॥
शतैश्चतुर्भिरधिकमयुतं गणितं मया ।
द्वे चर्चावतिरिच्येते द्विपदाश्चात्र सङ्गताः ॥ २२ ॥
पृथग्पदा[1]तु [2]गणनं [3]द्विपदानां तदाधिका ।
चतुश्शतादशीतिश्च वाक्यं च ग्रहवानयम् ॥ २३ ॥
एकर्च्चं [4]एकवर्गः स्याद् [5]द्वृचौ द्वौ नवकावुभौ ।
[6]एकोनं [7]स्यात् त्रिकशतं [8]चतुष्कं पञ्चसप्ततिः ॥ २४ ॥
[9]अधिकं च शतं [10]तस्याश्चतुःपञ्चाशदष्टकाः ।
[11]एकविंशशतं प्राहुः सप्तकानां च वैदिकाः ॥ २५ ॥
शतानि त्रीणि षट्कानां चत्वारिंशत्त्रयस्तथा ।
पञ्चकानां सहस्रं च द्वे शते नवकं तथा ॥ २६ ॥

---

१. गात्रसमदा० A. ०त्रसदा० M. The reading is adopted from R.
२. ०तो विनै० M.
३. तदाधे० M. तथा देयो R.
४. युगं तस्य M.
५. सिद्धान्यस्य R.
६. गणिकं A.
७. च यावति M. च यान्यति० R.
८. ०ग्यतदा A. ०क्तदा M. The reading is adopted from R.
९. एकच्च एकं वर्ग A. एतच्च एक० M. The reading is adopted from R.
१०. चौ A.
११. स्वा A. M. The reading is adopted from R.
१२. ०ष्कां A.
१३. वर्गाश्च० R.
१४. एकं वि०

ऋचां दश सहस्राणि ऋचां पञ्च शतानि च[1] ।
ऋचामशीतिपादश्च[2] पाठोऽयं न समञ्जसः[3] ॥ २७ ॥
अपहायाथ पापस्य क्षादानाय[4] च पण्डितः ।
ऋचः[5] कालेन गणयेत् तन्तु[6] शुद्धिर्भविष्यति ॥ २८ ॥
मण्डलं वामदेवस्य तृतीयं चेत्तथाष्टमम्[7] ।
स्यान्मण्डलं पावमानं क्रमावृद्धे[8] क्रमो भवेत्[9] ॥ २९ ॥
विश्वामित्रो वामदेवात्[10] सम्पन्नो[11] व्यतिरिच्यते ।
अतिरेकश्च विज्ञेयो गायत्रीकरणाद्[12] बुधैः ॥ ३० ॥
अत्र ब्रूमो गृत्समदः क्षत्रियो ब्राह्मणोऽभवत्[13] ।
इन्द्रप्रसादादस्यासन् वाचश्च हृदयङ्गमाः ॥ ३१ ॥
अग्रे[14] तस्मात् प्रादुरभूद् विश्वामित्रस्ततोऽभवत् ।
तस्यापि मधुरा मन्त्रा ब्राह्मण्यमपि लब्धवान् ॥ ३२ ॥
दृष्टवेदेनतोऽपश्यत्[15] पुनश्च तपसान्विताः[16] ।
मण्डलं नवमं तेन तदन्ते[17] सन्निवेशितम् ॥ ३३ ॥

---

१. दशानि A. शतानि वै R.
२. The reading is adopted from R.
३. पापस्य..क्षानदाय M. पापस्य क्षादनाय च R. पादुस्याक्षराण्यादाय is suggested for पापस्य क्षादानाय च ॥
४. ऋचः is missing in A.
५. तन्तु शु० R.
६. च तथा० R.
७. क्रमवृद्धे R. क्रमाद् वृद्धेः is suggested for क्रमावृद्धे ।
८. ०मोद्भवेत् A.
९. ०वान् M.
१०. ०ओऽप्यति० R.
११. ०त्रीतर० A.
१२. णो भवेत् A., M. The reading is adopted from R.
१३. अग्रेरस्मात् A., M. The reading is adopted form R.
१४. ०वास्ततोऽपश्यन् पुनञ्च R. दृष्टवेदस्ततो० is suggested for दृष्टवेदेनतो०
१५. ०न्विता A. ०न्वितः is suggested for ०न्वितः ।
१६. तं तो A.

प्रगाथे[1] मण्डले बह्व्यो नाराशंस्य[2] ऋचस्ततः ।
सन्निवेशोऽन्ततस्तस्य मध्यस्थेष्विति मन्यते[3] ॥ ३४ ॥
अन्येषां क्रमवृद्धानां सन्निवेशः[4] क्रमादभूत् ।
चतुर्णां वामदेवादेर्मण्डलानामिति स्थितिः ॥ ३५ ॥
अथानुवाकविच्छेदो बहुभिर्हेतुभिः कृतः ।
सुरूपकृत्नुमित्यैन्द्रात् प्रागेकः कल्पितो बुधैः[6] ॥ ३६ ॥
ऐन्द्राण्यथाष्टौ सूक्तानि विभक्तानि समन्वितैः[8] ।
षट् सूक्तावनुवाकौ द्वौ समौ मेधातिथेरपि ॥ ३७ ॥
शौनश्शेपोऽनुवाकस्तु शुनश्शेपेन कल्पितः ।
हैरण्यस्तूपकाण्वौ च प्रास्कण्वाद्याश्च[11] सप्तकाः ॥ ३८ ॥
गोतमस्योप[12]प्रयन्त' सूक्तानां विंशतिं विदुः ।
एकादशकनवकावनुवाकौ च कल्पितौ ॥ ३९ ॥
ऐन्द्रमेकादशं सूक्तमैन्द्रैः[14] पूर्वसमन्वितम्[15] ।
इति सर्वानुवाकेषु[16] कार्या सूक्ष्मेक्षिका बुधैः ॥ ४० ॥ इति ॥

---

१. प्रागाथ A.
२. ऽन्वह्यो नराशंसस्य A. नरा० M. The reading is adopted from R.
३. ०शोद्धत० A.
४. ति संस्थितिः R.
५. ०वेशक० A., M. The reading is adopted from R.
६. ०कृत्तुमि० A. ०कृणुमि० M. The reading is adopted from R.
७. ०म्विजैः A. समन्विधा R.
८. ०वसुवा० A. ९. ०शेकोनु० A.
१०. कास्त्वौ A. कास्त्वौ M. The reading is adopted from R.
११. प्रस्कन्द्या (न्धा M.) स्याश्च A. M. The reading is adopted from R.
१२. ०स्यामव A. गोतमस्यां व प्रियन्त M. The reading is adopted from R. उपप्र-यन्तो' अध्वरम्' (RV. I. 74. 1.)
१३. (RV. 1. 74–93.)
१४. ०श सूक्तमैन्द्रः A.
१५. पूर्वैः स० R.
१६. ०वाते (दे) षु A.

VII. 60.

यद॒द्य सू॑र्य॒ ब्रवोऽनागा॒ उद्यन्मि॒त्राय॒ वरु॑णाय स॒त्यम् ।
व॒यं दे॑व॒त्रादि॑ते॒ स्याम॒ तव॑ प्रि॒यासो॑ अर्यमन्गृ॒णन्तः॑ ॥ १ ॥

यदद्य ॥ वसिष्ठो मैत्रावरुणं सूक्तमाद्या सौ । यत् । अद्य । सूर्य ! ब्रूवाः । अस्मान् अनागसः । उद्यन् । मित्रावरुणयोः । सत्यमेव, नैते पापं कृतमिति ब्रवीषि । ततो वयम् । हे अदीन ! सूर्य ! देवेषु । साम । क । प्रियासः । अर्यमन् ! त्वां स्तुवन्तः ।

एष स्य मि॑त्रावरुणा नृ॒चक्षा॒ उ॒भे उदे॑ति॒ सूर्यो॑ अ॒भि ज्मन् ।
विश्व॑स्य स्था॒तुर्ज॒गत॑श्च गो॒पा ऋ॒जु मर्ते॑षु वृ॒जि॒ना च॒ पश्य॑न् ॥ २ ॥

एष स्यः । सः । एषः । मित्रावरुणौ ! मनुष्याणां द्रष्टा । द्यावापृथिवी । लक्षीकृत्य । उदेति ।

---

१. तत्र 'यदद्य सूर्य' इति द्वादशर्चं पञ्चमं सूक्तम् । अत्रानुक्रमणिका—'यदद्य मैत्रावरुणं तु वै सौर्याद्या' (KSA. 37. 60. p. 26.) इति । मण्डलद्रष्टा वसिष्ठ ऋषिः । अनुक्तत्वात्त्रिष्टुप् छन्दः । 'तु वै' इत्युक्तत्वादेतदादीनि सप्तसूक्तानि मित्रावरुणदेवत्यानि । आद्या सूर्यदेवत्या । विनियोगो लैङ्गिकः Sy.

२. Something probably यां is omitted in the mss.

३. यदि Sy.

४. अस्मिन्ननुष्ठानकाले Sy.

५. सूर्यो M. हे सर्वस्य प्रेरक ! एतन्नामक देव ! Sy.

६. ब्रुवा M. ब्रूयाः is suggested for ब्रूवाः ।

७. एते अपापा इति यदि देवेषु मध्ये ब्रूयाः Sy.

८. उदयंस्त्वम् Sy.

९. अवितथम् Sy.

१०. नैतैः is suggested for नैते ।

११. तर्हि Sy.

१२. हे is missing in M.

१३. देवानां मध्ये Sy.

१४. स्याम is suggested for साम ॥ अनागसो भवेम Sy.

१५. तव is suggested for क ॥

१६. प्रियाः Sy.

१७. यद्वा उत्तरार्धं एकवाक्यम् । हे अदिते ! हे अर्यमन् ! उक्तलक्षण ! देव ! वयं देवेषु मध्ये त्वां गृणन्तस्तवैव प्रियाः स्याम । यदि मां देवेष्वपापं ब्रूयास्तर्हि तैरयमनपराधीत्यनुगृहीतस्त्वां स्तुत्वा तव प्रियो भवेयमित्यर्थः Sy.

१८. सर्वैः स्तुत्यत्वेन प्रसिद्धः Sy.

१९. पुरतो दृश्यमानः Sy.

२०. दृष्टा A.

२१. द्यावापृथिव्यौ Sy.

२२. अभिलक्ष्य Sy.

२३. इवेति A.

सूर्यः। गच्छन्[1]। विश्वस्य[2]। स्थावरस्य। जङ्गमस्य। च। गोपायिता[3]। ऋजूनि[4]। मनुष्येषु[5]। कुटिलानि[6] च कर्माणि। पश्यत्[7]।

अयुक्त सप्त हरितः[8] सधस्थाद्या[9] ईं वहन्ति[10] सूर्यं[11] घृताचीः[12]।
धामानि मित्रावरुणा युवाकुः[13] सं यो युथेव[14] जनिमानि[15] चष्टे[16] ॥ ३ ॥

अयुक्त। रथे युक्तवान्। सप्त। वडवाः[17]। स्यस्थानो[18]। याः। एनम्। वहन्ति। सूर्यम्। उदकमञ्चन्त्यो[19] वृष्टिमुत्पादयन्त्यः। धामानि[20] स्थानानि त्रील्लोकान्। हे मित्रावरुणौ[21]! यः। युवां कामयमानः। सम्पश्यति[22]। तेषु जातानि च भूतानि। यूथानिव[23] गवां गोपालः।

उद्वां[24] पृक्षासो[25] मधुमन्तो[26] अस्थुरा सूर्यो[27] अरुहच्छुक्रमर्णः[28]।
यस्मा आदित्या अध्वनो[29] रदन्ति मित्रो अर्यमा[30] वरुणः सुजोषाः ॥ ४ ॥

उद्वाम्[31]। उदस्थुः[32]। युवाभ्याम्[33]। अन्नानि[34]। आज्यवन्ति[35]। आरुहत्[36]। अन्तरिक्षं तस्थम्[37]। शुक्रमुदकम्[38]। सूर्यः, तत्रस्थानां ह्युदकानां मध्येन सूर्यो गच्छत्यत एवाप इत्यन्तरिक्षनाम भवति[39]। यस्मै सूर्याय[40]।

---

१. गच्छत् A. अन्तरिक्षे गच्छन् Sy.
२. सर्वस्य Sy. ३. गोपयिता A.
४. ऋजु ऋजूनि सुकृतानि Sy.
५. किंकुर्वन्? मर्त्येषु मनुष्येषु स्थितानि Sy.
६. पापानि Sy.
७. पश्यन् is suggested for पश्यत्।
८. सर्पणस्वभावान् तत्संख्याकान् वा Sy.
९. पट्वा A. पटवा M. हरिद्वर्णानश्वान् Sy. 'हरित आदित्यस्य' (Ngh. 1. 15.) (N. 4. 11.)
१०. स्येस्थानो A. सहस्थाने is suggested for स्यस्थानो ॥ सहस्थानादन्तरिक्षादन्तरिक्षे Sy.
११. हरितः Sy.
१२. सूर्यं देवम् Sy.
१३. तादृश्यः सत्यो वहन्ति ता अयुक्त Sy.
१४. घृताञ्चना उदकवत्यः, उदकप्रदा इत्यर्थः Sy.
१५. उदितः सन् स्थानानि लोकान् Sy.
१६. ०रुणो A. हे मित्रावरुणौ! युवयोरागमनाय Sy.
१७. देवः Sy.
१८. सम्यक् पश्यति Sy.
१९. जनिमानि जन्मानि। जन्मभाजः प्राणिन इत्यर्थः। तांश्च Sy.
२०. गोयूयानीव यूथपाः। स यथा सर्वयूथं तदवान्तरगोव्यक्तिं च सम्यक् पश्यति तद्वल्लोकान् प्राणिनश्च पश्यति Sy.
२१. हे मित्रावरुणौ! Sy.
२२. सम्पादितान्यासन् Sy.
२३. यवा० A. युवयोरर्थाय Sy.
२४. अणानि A. अन्नानि चरुपुरोडाशादीनि Sy.
२५. अज्य० A. माधुर्योपेतानि तत्साधनान्योषध्यादीनि Sy.
२६. आरोहति Sy.
२७. ०क्षन्ति स्थम् A. तत्स्थम् is suggested for तस्थम् ॥ अर्णवमन्तरिक्षम् Sy.
२८. शुकम्० A. शुक्रं दीप्तम् Sy.
२९. Ngh. 1. 3.
३०. तद्गमनार्थम् Sy.

अन्ये आदित्याः[1]। मार्गात्[2]। विलिखन्ति[3]। मित्रः[4]। अर्यमा। वरुणश्च। ताभ्यां सङ्गतः[5] सूर्यः, आदित्या दरन्तीति[6]।

इमे चेतारो अनृतस्य भूरेर्मित्रो अर्यमा वरुणो हि सन्ति[7]।
इम ऋतस्य वावृधुर्दुरोणे शग्मासः पुत्रा अदितेरदब्धाः[8]॥ ५॥

इमे[9]। इमे[10]। ज्ञातारः[11]। पापस्य। बहिनः[12]। मित्रः। अर्यमा। वरुणः। हि। भवन्ति। म[13] एव च। यज्ञस्य। गृहे। वर्धन्ते[14]। शक्ताः[15]। अदितेः। पुत्राः। अहिंसिताः[16]।

इमे मित्रो वरुणो दूळभासोऽचेतसं चिच्चितयन्ति दक्षैः[17]।
अपि क्रतुं सुचेतसं वतन्तस्तिरश्चिद्अंहः सुपथा नयन्ति[18]॥ ६॥

इमे[19]। इमे[20]। मित्रः[21]। वरुणं चार्यमा च। तदङ्कितमशक्याः[22]। अज्ञम्[23]। अपि पुरुषम्। चेतयन्ति[24]। स्वसामर्थ्यैः[25]। अपि च। कर्म[26]। सुप्रज्ञानम्[27]। भजमानाः[28]। तिरः[29]। नयन्ति[30]। च[31]। पापम्[32]। स्तोतॄन् शोभनेन मार्गेण।

---

१. अदितेः पुत्रा देवाः Sy.
२. मार्गान् is suggested for मार्गात्।
३. साधयन्ति Sy.
४. मन्त्र A.
५. समानप्रोतयः सन्तः। स देव आरुहदिति Sy.
६. रवन्तीति is suggested for दरन्तीति।
७. मित्रोऽर्यमा वरुणश्च त्रयोऽपि Sy.
८. हन्तारः Sy.
९. बहिनों M. बहुनः is suggested for बहिनः। प्रभूतस्य Sy.
१०. स एव च M. इम एव is suggested for म एव। मित्रादयः Sy.
११. वर्धन्ते हविषा स्तुत्या च Sy.
१२. सुखकराः Sy.
१३. ०सितां A.
१४. इम आदित्याः ..एते Sy.
१५. मित्रा M.
१६. ०णश्चा० is suggested for ०णं चा०। एतद्द्वयमर्यम्णोऽप्युपलक्षणम् Sy.
१७. दम्भितुमशक्याः is suggested for तदङ्कितमशक्याः॥ दुर्वभा अनभिभाव्याः Sy.
१८. आज्ञम् A. अप्रज्ञानमनुष्ठानविषयज्ञानरहितमपि Sy.
१९. चेदयन्ति A.
२०. कर्तारं कर्मानुष्ठानवन्तम् Sy.
२१. ०ज्ञानां A.
प्रकृष्टज्ञानवन्तं पुरुषम् Sy.
२२. गच्छन्तः Sy.
२३. प्रापयन्त्यभिमतं यज्ञं स्वर्गादिकं वा Sy.
२४. च is missing in A.
२५. दुष्कृतम् Sy.

इमे दिवो अनिमिषा पृथिव्याधिक्रित्वांसो अचेतसं नयन्ति ।
प्रव्राजे चिन्नद्यो गाधमस्ति पारं नो अस्य विष्पितस्य पर्षन् ॥ ७ ॥

इमे दिवः । इमे । द्युलोकस्य । अनिमेषेण पश्यन्तः । अस्याश्च पृथिव्याः । ज्ञातारः । अज्ञं मनुष्यं स्तोतारम् । नयति । प्रव्राजो गमनमार्ग उदकस्य तत्र । चास्याः । नद्याः । स्थलम् । विद्यते तस्मात् सुतरेन्नदीं भवतां तथा सति । परम् । अस्य । प्रवृद्धस्योदकस्य । नयन्त्युन्त्विति काञ्चन नदीमुत्तितीर्षुराहेति ।

---

१. वसिष्ठस्य SKN. इत्येतस्मिन् सूक्ते, अस्य पुनः सूक्तस्य प्रथमा सौरीति प्रतिजज्ञे शौनकः । अन्या सर्वा मैत्रावरुण्य इति । इमे इति द्वयोरेव मित्रावरुणयोः । पूजार्थे बहुवचनम् । अर्थमा वा तृतीयः स्यात् । असावपि ह्यस्मिन् सूक्ते श्रूयते । शौनकाभिप्रायस्त्वेवं सति परीक्ष्यः Dur.

२. मित्रादयः Sy. मित्रावरुणार्यमाणः Dur. इमे प्रकृता मित्रो वरुणोऽर्यमा च SKN.

३. दिव एत्य Dur. द्युलोकात् SKN.

४. अनिमिषेण M. सर्वदा जानन्तः Sy. आवरवन्तः Dur. महता यत्नेनेत्यर्थः SKN.

५. पृथिव्याः सम्बन्धिनः Sy. पृथिवीलोकादित्यर्थः Dur. पृथिवीलोकाच्च SKN.

६. जानन्तः Sy. सुकृतदुष्कृतानि कर्माणि प्राणिनां जानन्तः Dur. इदमप्यस्य कर्म अत्रानेन गन्तव्यमित्येतज्जानन्तः SKN.

७. अज्ञानम् Sy. अचेतयमानं प्राणिनं कर्मानुरूपेण Dur. अज्ञं कं देशं केन वा यास्यामीत्येतदजानन्तमित्यर्थः SKN.

८. नयन्ति is suggested for नयति ॥ प्रापयन्ति कर्माणि Sy. अमुं लोकं नयन्ति । यत एवमतस्तानहं ब्रवीमि Dur. प्राणिनं नयन्ति यत्रानेन परिपक्वस्वकर्मवशाद् गन्तव्यम् । यत एनान् मित्रादीन् ब्रवीमि SKN.

९. प्रवणे-अत्यन्तनिम्ने देशे Sy. प्रकृष्ट एतस्मिन् व्रजने मरणाख्ये मृत्युकाल उपस्थिते यदि Dur. प्रकर्षेण व्रज्यते यस्मिन्त्स प्रव्राजो मरणकालस्तस्मिन् । चिच्छब्दो यद्यर्थे । यदि SKN. १०. अपि Sy.

११. नद्याः गाधमस्ति भवति युष्मत्सामर्थ्यात् Sy. नद्या इव Dur. अस्याः संसारनद्याः SKN.

१२. संसारगाहनसमर्थं कर्म विज्ञानं वा Dur. प्रतिष्ठास्थानं येनास्मिन् संसारनदीश्वभ्रे निमज्जन्तो धारयामहे तज्ज्ञानं कर्म वा किञ्चिदस्ति SKN. १३. भवति युष्मत्सामर्थ्यात् Sy. १४. ०दो M.
पारं कूले SKN.

१६. व्याप्तितस्य ? (विप्राप्तस्य) कर्मणः Sy. संसाराध्वनः । . . एवमत्र शब्दसारूप्यादर्थाविरोधाच्च विष्पितो विप्राप्तः संसाराध्वा, इत्युपपद्यते Dur. विप्राप्तस्य विस्तीर्णस्य संसारनदीश्वभ्रस्य SKN.

१७. ०यन्ति ऋत्विति M. नयन्त्विव० is suggested for नयन्त्युन्त्वि० । पारयन्तु । नयन्तु Sy. पारं यन्त्वित्यर्थः Dur. नोऽस्मान् . . . पारयन्तु गमयन्तु प्रापयन्त्वित्यर्थः । अनादिश्च संसारः श्लिष्यतेऽन्तवांश्चापवर्गेण । अतः पारमपवर्गं इहाभिप्रेतः SKN.

१८. ०त्तितिष्ठरा० A. विष्पितो विप्राप्तः N. 6. 20.; SKN. II. 463.

१९. VM. ignores नः ॥ नोऽस्माकम् Sy.

१५. पारम् is suggested for परम् ॥ ततः

यद्गोपावददितिः शर्म भद्रं मित्रो यच्छन्ति वरुणः सुदासे ।
तस्मिन्ना तोकं तनयं दधाना मा कर्म देवहेळनं तुरासः ॥ ८ ॥

यद् गोपावत्[1] । यदि[2] । गोपनवत्[3] । पृथिवी[4] । गृहम्[5] । भजनीयम्[6] । मित्रः[7] । वरुणश्च । प्रयच्छन्ति । सुदासे[8] राज्ञे । तस्मिन्[9] । वयं पुत्रम् । तत्पुत्रं[10] च । धारयन्तो निदधाना[11] वा[12] । लब्धधनाश्चौर्यादिकं देवानां तधन[13] । मा । कुर्म[14] । हे त्वरमाणाः[15] । इत्युत्तरोऽर्धः प्रत्यक्षः[16] ।

अव वेदिं होत्राभिर्यजेत रिपुः काश्चिद्वरुणध्रुतः सः ।
परि द्वेषोभिरर्यमा वृणक्तूरुं सुदासे वृषणा उ लोकम् ॥ ९ ॥

अव[18] वेदिम्[19] । याः काश्चिद्दिवः[20] । रिपूभूताः । वरुणस्य दोग्ध्र्यः[22] प्रजा भवन्ति । तासां वेदिम्[21] । स[23] वरुणः । ऋत्विग्भिः[25] । पृथक् करोतु[26] यज्ञोन्मुखानसुरान् विश्लथयतु[27] वा[28] । अर्यमा[29] च । परिवृणक्तु[30] । द्वेषोभिः[31] क्रोधैः । विस्तीर्णम् । स्थानम् । पैजवनाय[32] । वर्षितारौ[33] मित्रावरुणौ कुरुतमिति[34] ।

---

१. गोवाचत् A. २. यत् Sy.
३. ०पवन० A. रक्षणोपेतम् Sy.
४. अदीनोऽर्यमादितिर्वा Sy.
५. सुखं गृहं वा Sy. ६. स्तुत्यम् Sy.
७. एते त्रयो देवाः Sy.
८. सुदासो M. सुदानाय मह्यम् Sy.
९. शर्मणि Sy.
१०. तत्पुत्रादिकम् । अथवा तनयशब्दोऽपत्यसामान्यवचनः । तोकं बलवन्तं पुत्रम् Sy.
११. ०यतो A.
१२. वा is missing in M.
१३. क्रोधनम् is suggested for त धन । देवानां मित्रादीनां कोपनम् Sy.
१४. करवाम or कार्ष्म is suggested for कुर्म ।
१५. हे गमनाय त्वरमाणाः ! Sy.
१६. ०रोऽर्धवः A. रोऽर्धवः is suggested for ०रोऽर्थः ॥
१७. VM. ignores आ ॥ आ सर्वतः Sy.
१८. अप A. १९. हे मित्रावयः ! Sy.
२०. या कश्चिदिवः A.
२१. हिंसाः प्राप्नुयादिति शेषः Sy.
२२. द्राग्ध्य A. द्रोग्ध्र्यः is suggested for दोग्ध्र्यः ॥ वरुणेन त्वया हिंसितः सः Sy.
२३. यागसाधनम् Sy.
२४. अस्मद्द्वेषी Sy.
२५. ऋत्युभिः A.
२६. वाग्रूपाभिः स्तुतिभिः सार्धम् Sy. वाङ्नामैतत् Ngh.
२७. वेद्यां कर्माणि कुर्वन् देवान्न स्तुत्यादित्यर्थः । अवपूर्वो यजतिस्त्यागार्थः Sy.
२८. वा is suggested for ना ।
२९. अतर्यमा. A अस्मांस्त्वर्यमा देवः Sy.
३०. वर्जयतु Sy.
३१. द्वेष्ट्भी रक्षःप्रभृतिभिः Sy.
३२. वैजव० A. शोभनदानाय मह्यं प्रयच्छतम् Sy.
३३. हे वर्षकौ ! कामानां मित्रावरुणौ ! Sy.
३४. VM. ignores उ ।

सस्वश्चिद्धि समृतिस्त्वेष्येषामपोच्येन सहसा सहन्ते ।
युष्मद्भिया वृषणो रेजमाना दक्षस्य चिन्महिना मृळता नः ॥ १० ॥

सस्वश्चित् । एषामसुराणां जलैः पुरैर्वा । तिरोहिता । समृतिः सङ्गतिः सङ्घः । त्वेषी दीप्तिमती भवति । तथान्तर्हितेन । बलेन । अभिभवन्ति सर्वाः प्रजाः । युष्मत् । भयेन । हे वर्षितारः ! कम्पमानाः । अपि च्छिद्रेषु प्रहरन्ति । बलस्य । महत्त्वेन । तत्रास्मान् । सुखयतेति ।

यो ब्रह्मणे सुमतिमायजाते वाजस्य सातौ परमस्य रायः ।
सीक्षन्त मन्युं मघवानो अर्य उरु क्षयाय चक्रिरे सुधातु ॥ ११ ॥

यो ब्रह्मणे । यः । ब्राह्मणाय मह्यम् । सुमतिम् । अन्नस्य । परस्य च । धनस्य । लाभार्थम् । आप्रयच्छन्ति सुदा पैजवनः । तस्य शत्रोः । क्रोधम् । तस्य भगाः सहन्ताम् । धनवन्तः । तथा विस्तीर्णम् । शोभनं सन्धानं च स्थानम् । आवासाय । कुर्वन्त्विति ।

---

१. एषां मित्रादीनाम् Sy.
२. अन्तर्हिता निगूढा Sy.
३. सङ्घः A. सङ्गतिः संहतिर्वा Sy.
४. ०मति A. दीप्ता Sy.
५. अपीच्यमित्यन्तर्हितनाम Ngh. 3. 25.
६. अहि भ० A. ७. अस्मद् द्वेष्टून् Sy.
८. युष्मत्तः Sy. ९. भीत्या Sy.
१०. हे अभिमतवर्षका मित्रादयः ! Sy.
११. कम्पमाना भवन्ति विरोधिनः Sy.
१२. ०रन्ती A.
१३. यस्मादेवं तस्माद् युष्माकं बलस्य Sy.
१४. अस्मभ्यम् Sy.
१५. उपदयां कुरुत Sy.
१६. VM. ignores चित् and हि ।
१७. यजमानः Sy.
१८. परिवृढस्वकर्मणो युष्मत्स्तोत्ररूपायSy.
१९. शोभनां बुद्धिम् Sy.
२०. उत्कृष्टस्य Sy.
२१. अन्नार्थम् A. दाने निमित्ते Sy.
२२. ०च्छति is suggested for ०च्छन्ति ॥ यजतिरत्र दाने । ददाति करोति Sy.
२३. सुदा वेज० A. सुदाः is suggested for सुदा ॥
२४. तस्यार्यः, ईरयति स्तुतीः प्रेरयतीत्यरिः स्तोता Sy. २५. स्तोत्रम् Sy.
२६. दानवन्तोऽर्यमादयः Sy.
२७. सचन्ते Sy.
२८. ०र्णाम् Sy.
२९. ०ना स० A. ०नस० is suggested for ०नं स० ॥ सुधाम शोभनस्थानम् Sy.
३०. मा वा० A. Sy. explains उरु and क्षयाय together as a compound word but padapāṭha and VM. mean उरु and क्षयाय as two words. सेवित्वा च तस्य विस्तीर्णनिवासाय Sy.
३१. कुर्वते ।

इ॒यं दे॒व पु॒रोहि॑तिर्युवभ्यां य॒ज्ञेषु॑ मित्रावरुणावकारि ।
विश्वा॑नि दु॒र्गा तं पि॑पृतं ति॒रो नो॑ यू॒यं पा॑त स्व॒स्तिभि॒: सदा॑ नः ॥ १२ ॥

इयम्[1] । हे देवौ ! मित्रावरुणौ ! युवाभ्याम् । इयम् । पुरोहितिः[2] पुरोनिधानयोग्या स्तुतिः । यज्ञेषु । अकारि[3] । विश्वानि[4] । दुर्गाणि[5] । अतिवारयतम्[6] । तस्मात्[7] ।

VII. 61.

उद्वां॑ चक्षु॒र्वरु॑ण सु॒प्रती॑कं दे॒वयो॑रेति॒ सूर्य॑स्तत॒न्वान् ।
अ॒भि यो विश्वा॒ भुव॑नानि॒ चष्टे॒ स म॒न्युं मर्त्ये॑ष्वा चिकेत ॥ १ ॥

उद्वां चक्षुः[8] । उदेति[9] । युवयोः[10] । देवयोः[11] । तेजः[12] । सुखम्[13] । अन्तरिक्षे विस्तारयन् । सूर्यः । हे मित्रावरुणौ । यः सूर्यः[14] । सर्वाणि । भुवनानि[15] । अभिपश्यति[16] । सः । मनशीलस्थम्[17] । मनः[18] । आचिकेत[19] तेजसा प्रज्ञापयति ।

प्र वां॑ स मित्रावरुणावृ॒तावा॒ विप्रो॒ मन्मा॑नि दी॒र्घश्रु॑दियर्ति ।
यस्य॒ ब्रह्मा॑णि सु॒क्रतू॑ अवा॒थ आ यत्क्रत्वा॒ न श॒रद॑: पृ॒णैथे॑ ॥ २ ॥

प्र वां सः । प्रेरयति[20] प्रेरयति[21] । वाम्[22] । सः । मेधावी । बहुश्रुतो वसिष्ठः । हे मित्रावरुणौ !

---

१. अनया स्तुतिमुपसंहरति Sy.
२. पुरस्क्रिया पूजा स्तुतिलक्षणा Sy.
३. कृताभूत् Sy.
४. तां सेवयित्वा सर्वाणि Sy.
५. दुःखेन गन्तव्यान्यापदः Sy.
६. ०यतः M. ०पारय० is suggested for ०वारय ॥ तिरस्कुरुतम् । तथा कृत्वा पारयतम् । शिष्टो गतः Sy.
७. अस्मान् is suggested for तस्मात् ।
८. 'उद्वा चक्षुः' इति सप्तर्चं षष्ठं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं मैत्रावरुणम् । 'उद्वां सप्त' इत्यनुक्रमणिका (KSA 37. 31. p. 26.) । विनियोगो लैङ्गिकः Sy.
९. उद्गच्छति Sy. १०. द्योतमानयोः Sy.
११. प्रकाशकं तेजः Sy.
१२. शोभनरूपम् Sy.
१३. अथोदितो यो देवः Sy.
१४. भव० M. भूतजातानि Sy.
१५. देवः Sy.
१६. मानशीलस्थं M. मरणशीलेषु is suggested for मनशीलस्थम् ॥ मर्त्येषु प्रवृत्तम् Sy.
१७. स्तोत्रं कर्म वा Sy.
१८. आजानाति Sy.
१९. प्रेरयति । वाम् । सः । is written twice in A. One प्रेरयति seems to be redundant.
२०. युवयोः Sy. २१. प्रसिद्धः Sy.
२२. चिरकालं श्रोतां । एवमुक्तलक्षणो वसिष्ठः Sy.

यज्ञवान्[1]। स्तोत्राणि[2]। यस्य[3]। स्तोत्राणि[4]। हे सुप्रज्ञानौ[5] ! रक्षथः[6]। यानि च स्तोत्राणि। कृष्यादिना कर्मणा[7]। शरदः[8]। इवोषधिभिः कामैः[9]। आपूरयथ[10]।

प्रोरोर्मित्रावरुणा पृथिव्याः प्र दिव ऋष्वाद्बृहतः सुदानू[11]।
स्पशो[12] दधाथे ओषधीषु विक्ष्वृधग्यतो अनिमिषं रक्षमाणा ॥ ३ ॥

प्रोरोः[13]। प्रकर्षेण[14]। दधाथे[15]। हे मित्रावरुणौ[16] ! सुदानौ[17]। विस्तीर्णायाः। पृथिव्याः। दिवश्च[18]। महतः[19]। दर्शनीयादुदितौ[20]। तेजांसि[21]। ओषधीषु[22]। मनुष्येषु[23] च। पृथक् पृथक्[24]। स्तुतिभिरभिगच्छतो मनुष्यान्[25]। अनिमेषम्[26]। रक्षमाणाविति।

शंसा मित्रस्य वरुणस्य धाम शुष्मो रोदसी बद्बधे महित्वा[27]।
अयन्मासा अयज्वनामवीराः प्र यज्ञमन्मा वृजनं तिराते ॥ ४ ॥

शंसा मित्रस्य[28]। स्तुहि। मित्रावरुणयोः। तेजः[29]। योर्बलमेतयोः। महत्त्वेन[30]। द्यावापृथिव्यौ[31]। बाधते[32]। गच्छन्तु[33]। मासाः[34]। अयज्वनाम्[35]। अनुत्पादितपुत्राः[36]। प्रवर्धयतु[37]। यज्ञबुद्धिं[38]। बलमिति।

---

१. मननीयानि स्तोत्राणि Sy.
२. ऋषेः Sy.
३. परिवृढानि स्तोत्राणि Sy.
४. प्रज्ञानौ M. हे शोभनकर्माणौ ! Sy.
५. कृष्यादीनां कर्मणां M. यत्कर्म Sy.
६. शरदे A. बहून् संवत्सरान् Sy.
७. ०यथः is suggested for ०यथ॥ आपूरयेथे स उदियर्ति Sy.
८. प्ररिरिचाथे। 'अस्येदेव प्र रिरिचे' (RV. 1. 61. 9.) इत्यादिषु प्रशब्दस्य रिरिचे इत्यनेन सह सम्बन्धदर्शनादत्राप्युचितक्रियाध्याहारेण रिरिच इति योज्यम् Sy.
९. धारयेथे। According to Sy. दधाथे goes with स्पशः in the text.
१०. हे मित्रावरुणौ ! युवाम् Sy.
११. हे शोभनदानौ ! Sy.
१२. द्युलोकादपि प्ररिरिचाथे Sy.
१३. स्वरूपतोऽतिमहतः Sy.
१४. गुणैर्महतः Sy. १५. रूपम् Sy.
१६. ओष० is suggested for ओष०।
१७. प्रजासु निमित्तभूतासु प्रजासु चेति वा Sy.
१८. सत्येन Sy.
१९. विवेकात् सत्येन गच्छतो जनान् Sy.
२०. अव्यवधानेन सर्वदा Sy.
२१. पालयन्तौ Sy.
२२. हे ऋषे ! Sy.
२३. तेजः। ययो० is suggested for तेजयोः॥ तेजःस्थानम् Sy.
२४. स्वमहत्त्वेन Sy. २५. सह वर्तमाने Sy.
२६. बा(पा)धते A बध्नाति पृथक् पृथक् स्थापयति। इयं पृथिवीयं द्यौरिति पृथक् करोति। 'द्यावापृथिवी सहास्ताम्' इति श्रुतेः Sy.
२७. कालावयवाः Sy.
२८. अयं ज्व० A. अननुष्ठातृणाम् Sy.
२९. अपुत्राः Sy.
३०. प्रपूर्वस्तिरतिर्वर्धनार्थः Sy.
३१. यज्ञबल बुद्धिमिति M, तद्विपरीतो यज्ञार्थं मतिमान् यज्वा Sy.

अमूरा[1] विश्वा वृषणाविमा वां न यासु[2] चित्रं दर्दृशे[3] न यक्षम्[4] ।
द्रुहः सचन्ते अनृता[5] जनानां न वां निण्यान्युचितें[6] अभूवन् ॥ ५ ॥

अमूरा[1] । युवयोः[2] । इमानि विश्वानि भूतानि[3] । अमूढानि[4] । इमाश्च दिशः[5] । यासु दिक्षु[6] स्थितम्[7] । चित्रं[8] नानारूपमुद्भूतं च । भूतम्[9] । मनुष्यैर्न । दृश्यते । जनानाम् । द्रोग्धारः[10] । पापानि[11] । सेवन्ते[12] । तत्र[13] न । युवयोः[14] । अन्तर्हितानि[15] कानिचित् पापानि । अभवन्[16] । अप्रज्ञाते[17] देशे[18] ।

समु[1] वां यज्ञं महयं[2] नमोभिर्हुवे[3] वां मित्रावरुणा सबाधः[4] ।
प्र वां मन्मान्यचसे[5] नवानि कृतानि[6] ब्रह्म जुजुषन्निमानि[7] ॥ ६ ॥

समु[1] वाम् । सम्पूजयामि[2] । युवयोः । यज्ञमहम् । हविर्भिः[3] । हुवे[4] च । वाम् । मित्रावरुणौ ! बाधासहितः[5] । प्रसेवन्ताम्[6] । वाम्[7] । मननीयानि । अर्चनार्थम्[8] । नवानि[9] । कृतानि[10] । स्तोत्राणि[11] । इमानि[12] ।

इयं देव पुरोहितिर्युवभ्यां यज्ञेषु मित्रावरुणावकारि[1] ।
विश्वानि दुर्गा पिपृतं तिरो नो यूयं पात स्वस्तिभिः सदा नः ॥ ७ ॥

(इयं देव[1] ।)

---

१. आमूरा A. २. युवाभ्याम् Sy.
३. हे व्याप्तौ !
४. अमूह्य(ल्ह)नी० A. हे अमूढो ! Sy.
५. इमानि स्तुतिवचांसि क्रियन्ते Sy.
६. विशे A. ७. यासु स्तुतिषु Sy.
८. स्थितः A. ९. आश्चर्यम् Sy.
१०. न यक्षं न पूजा दृश्यते युवाभ्यां महिम्नोऽपि महत्त्वात् प्रयत्नेन क्रियमाणमपि स्तोत्रं न चमत्करोतीत्यर्थः Sy.
११. द्रोग्धार A.
१२. स्तुत्यविषयाणि स्तोत्राणि Sy.
१३. न महान्तः Sy.
१४. युवाभ्यां क्रियमाणानि Sy.
१५. अन्तर्हितानि रहस्यान्यपि स्तोत्राणि Sy.
१६. भवन्ति Sy. १७. अज्ञानाय Sy.
१८. VM. ignores वृषणौ ॥ हे वर्षितारौ Sy.
१९. सुः पूज० A.
२०. नमस्कारैः स्तुतिभिः Sy.
२१. भुवे A. आह्वयामि बाधापरिहाराय Sy.
२२. वासा सहित A. बाधायुक्तोऽहम् Sy.
२३. प्रीणयन्तु Sy.
२४. वा A. युवाम् Sy.
२५. स्तोत्राणि प्रभवन्त्वित्यध्याहारः Sy.
२६. सेवितुम् Sy.
२७. नूतनानि स्तुत्यानि वा Sy.
२८. मया समूहीकृतानि Sy.
२९. परिवृढानि स्तोत्राणि Sy.
३०. इदानीं क्रियमाणानि Sy.
३१. VM. ignores उ ।
३२. This *pratīka* is supplied by the editor. The stanza has already been explained. See RV. VII. 60. 12.

VII. 62.

उत्सूर्यो बृहदर्चीँष्यश्रेत्पुरु विश्वा जनिम मानुषाणाम् ।
समो दिवा ददृशे रोचमानः क्रत्वा कृतः सुकृतः कर्तृभिर्भूत् ॥ १ ॥

[1]उत्सूर्यः । उदश्रेत् [2]प्राप । [3]सूर्यः । महान्ति । [4]अर्चींषि । [5]पुरुणि च । [6]जातानि । [7]सर्वाणि । [8]मानुषाणाम् । [9]समा । [10]एव वा । दृश्यते । [11]दीप्यमानः । 'तस्मात् सर्व एव मन्यते मां प्रत्युदगात्' [12]इति ब्राह्मणम् । उदिते च सूर्ये [13]कर्तृभिः । [14]कृतः । [15]अथ [16]प्रज्ञानेन तेजसा वा प्रादुर्भूतेन । [17]सुकृतः । भवति, रात्रौ हि कृतं दुष्कृतं भवति ।

स सूर्य प्रति पुरो न उद्गा एभिः स्तोमेभिरेतशेभिरेवैः ।
प्र नो मित्राय वरुणाय वोचोऽनागसो अर्यम्णे अग्नये च ॥ २ ॥

[18]स सूर्य । [19]सः । [20]सूर्य ! [21]त्वम् । [22]अस्माकम् । [23]पुनः । [24]प्रत्युदगात् । एभिः । [25]स्तोमेभिर्मया क्रियमाणैः ।

---

१. 'उत्सूर्यः' इति षड्ऋचं सप्तमं सूक्तम् । अत्रानुक्रमणिका—'उत्सूर्यः षळाद्यास्तिस्रः सौर्यः' (KSA. 37. 62. p. 26.) इति । वसिष्ठऋषिः । त्रिष्टुप् छन्दः । आद्यास्तिस्रः सूर्यदेवत्याः । शिष्टा मित्रावरुणदेवत्याः । सूक्तविनियोगो लैङ्गिकः Sy.

२. ऊर्ध्वं श्रयति Sy.

३. सर्वस्य प्रेरको देवः Sy.

४. अत्यधिकम् Sy.

५. तेजांसि Sy.

६. बहूनि Sy.

७. जनिमानि जनान् । जनशब्दः सङ्घवचनः । तान् प्रत्युदश्रेत् Sy.

८. मनुष्याणाम् Sy.

९. समः is suggested for समा ॥ एकरूपः प्रतिनियतः सन् Sy.

१०. दिवा is suggested for एव वा ॥ स देवोऽहनि Sy.

११. रोचमानः सन् Sy.

१२. ०वकादि० A.
'तस्मात् पुरुषं पुरुषं प्रत्यादित्यो भवति' इति हि श्रुतिः Sy.

१३. स्तुतिकर्तृभिः Sy.

१४. सर्वस्य कर्ता Sy.

१५. अथ is suggested for अत्थ ॥ सम्पादितः प्रजापतिना Sy.

१६. सर्वस्य कर्ता Sy.

१७. स्तुत्या तीक्ष्णीकृतः Sy.

१८. सू A. प्रसिद्धस्त्वम् Sy.

१९. हे सूर्य ! Sy.

२०. ०र्यस्त्व० M.

२१. अस्मान् प्रति Sy.

२२. पुरः is suggested for पुनः ॥ पुरस्तात् Sy.

२३. ०त्युदका M. ०त्युदगाः is suggested for ०त्युदगात् ॥ उद्गच्छ Sy.

२४. स्तोमैः is suggested for स्तोमेभिः ॥ स्तुत्यैः Sy.

एतशैः[1] श्वाश्चैः[2]। गन्तृभिः सह। अदितिश्च[3] सन्, अस्मान्। मित्रादिभ्यः[4]। प्रब्रूहि। अपापान्[5][6]।

वि नः सहस्रं शुरुधो रदन्त्वृतावानो वरुणो मित्रो अग्निः।
यच्छन्तु चन्द्रा उपमं नो अर्कमा नः कामं पूपुरन्तु स्तवानाः॥ ३॥

वि नः सहस्रम्[7]। विलिखन्तु[8]। भिन्नाग्राः कुर्वन्तु[9]। अस्माकम्[10]। बह्वीः[11]। ओषधीः शुचो रोचयित्रीः। यज्ञवन्तः[12]। वरुणः[13]। मित्रः। अग्निः। प्रयच्छन्तु च। ल्हादकाः[14]। अस्मभ्यम्[15]। उपमानभूतम्[16]। अन्नम्[17]। आपूरयन्तु[18] च। अस्माकम्। स्तूयमानाः[19]। कामम्[20]।

द्यावाभूमी अदिते त्रासीथां नो ये वां जज्ञुः सुजनिमान ऋष्वे।
मा हेळे भूम वरुणस्य वायोर्मा मित्रस्य प्रियतमस्य नृणाम्॥ ४॥

द्यावाभूमी[21]। उभे[22] द्यावाभूमी[23]! रक्षेथाम्[24]। अस्मान्, तत्र विशेषेण भूमिमा त्रायते[25][26]। अदिते[27]! इति त्वं

---

१. एतशोश्चाभि M. एतशैश्चाश्वैः is suggested for एतशैः श्वाश्चैः॥ एतवर्णः। स्वार्थिकः शकारः। 'या जरन्ता युवशा ता' (RV. 1. 161. 7)। 'पुरुषः कृष्णशवास्युत्तरतः' (AB. 5. 14.) इत्यादिवत् Sy.

२. गमनशीलैरश्वैरुद्गाः Sy.

३. अथ ब्रह्मा कृत्वास्माभिः स्तुतः सन् नोऽस्मान् Sy.

४. आदि refers to वरुणाय। अर्यम्णे and अग्नये॥ अत्र सौर्य इतरेषां मित्रादीनां सङ्कीर्तनं तेषामपि निपातभाक्त्वादविरुद्धम्। एवं पूर्वत्रोत्तरत्र च मैत्रावरुणेऽर्यमादीनां सङ्कीर्तनमपि न विरुध्यते Sy.

५. ०पात् A.

६. VM. ignores च।

७. ०ल्हा A.

८. वितरन्तु Sy.

९. कुर्वंस्त्रम् M.

१०. अस्मभ्यम् Sy.

११. सहस्रसंख्याकं धनम्। यद्वा सहस्रसंख्याकाः Sy.

१२. तु(कृ)चो A. शुचेर्दुःखस्य प्रतिरोद्धारः—अथवा, उक्तलक्षणा ओषधीः Sy.

१३. सत्यवन्तो वरुणादयः Sy.

१४. वरुणे मित्रे अग्निम् M.

१५. आह्लादकारिणः Sy.

१६. स्तुत्यम् Sy.

१७. अर्चनीयम् Sy.

१८. पूरयन्तु हे सूर्य! त्वयानुज्ञाता इति सूर्यस्य स्तुतिः Sy.

१९. मानं A. अस्माभिः स्तूयमानाः Sy.

२०. कामं A. अपेक्षितम् Sy.

२१. ०भूमिम् A. २२. भे A.

२३. ०भूमि A.
हे द्यावापृथिव्यौ! Sy.

२४. रक्केथाम् A. रक्षतम् Sy.

२५. भूमिमा A. भूमिर्माम् is suggested for भूमिमा॥

२६. त्रयते A.

२७. हे अखण्डनीये! एतद्द्यावाभूम्योरेवैकवचनेन सम्बोधनम् Sy.

विशेषेण त्रायस्वेति । ये[1] । वाम्[2] । ज्ञातवन्तः[3] । शोभनजन्मानः । दर्शनीये[4] । मा । क्रोधे । भूम[5] । वत्रणस्य[6] । वायोश्च । मित्रस्य । नृणाम्[7] । प्रियतमस्येति ।

प्र बाहवा सिसृतं जीवसे नु आ नो गव्यूतिमुक्षतं घृतेन ।
आ नो जने श्रवयतं युवाना श्रुतं मे मित्रावरुणा हवेमा ॥ ५ ॥

प्र[8] बाहवा[9] । प्रसारयतम्[10] । बाहू[11] । जीवनाय[12] । अस्माकम्[13] । गोमार्गं[14] च । अस्माकम्[15] । उदकेन[16] । आसिञ्चतम्[17] । आश्रावयत[18] च । अस्मान्[19] । जनेषु[20] । युवानौ[21] ! शृणुतं[22] च । हे मित्रावरुणौ[23] ! मम । इमानि[24] । स्तोत्राणि[25] ।

---

१. वयम् Sy. २. युवाम् Sy. ३. ज्ञातवन्तः स्म Sy. ४. हे महत्यौ ! Sy. ऋत्व इति महन्नाम Ngh. 3.3. ५. भ्रम A.

६. वतृणस्य M. वरुणस्य is suggested for वत्रणस्य ॥ किञ्च वयं वरुणस्य Sy.

७. स्तुतिनेतृणां मनुष्याणाम् Sy.

८. मित्रस्य हेले ना भूम Sy.

९. 'प्र बाहवा' इति पञ्चमी मैत्रावरुणे पशौ पशुपुरोडाशस्य याज्या। सूत्रितञ्च—'प्र बाहवा सिसृतं जीवसे नो यद्वंहिष्ठं नातिविधे सुदानू' (ĀŚS 3. 8.) इति Sy.

१०. ०यत M. प्रसारयतं हविःस्वीकाराय धनप्रदानाय वा Sy. अन्तर्भूतण्यर्थः । प्रसारयतम् । जीवनविघ्ननिवारणाय बाहुप्रसारणं कुरुतमित्यर्थः Mah. आगच्छतम् । यद्वा बाहवा बाहुबलेन सह बाहुबलवन्तावागच्छतम् BB.

११. बाहोर्बलं बाहुशब्देनोच्यते । अर्शआदित्वाद्वच् । बाहवा बाहवौ बाहुबलवन्तौ युवाम्, . . . तृतीयैकवचनस्य नाभावाभावे गुणश्छान्दसः BB.

१२. जीवहाय A. चिरं जीवनाय Ngh बाहुप्रसारणं जीवनहेतुप्रतिपक्षनिराकरणायेत्यर्थः U. जीवयितुम् । . . . . अस्माकं वा जीवसे जीवनाय BB. १३. अस्मान् BB.

१४. गावो यान्ति गच्छन्त्यत्रेति गव्यूतिर्गोमार्गभूमिः, तां तृणाविप्ररोहाय Sy. गव्यूतिं क्षेत्रम् Mah. गवि पृथिव्यामूतिमवनम् । जीवनहेतुभूतानि क्षेत्राण्यत्राभिप्रेतानि । तदर्थं हि वृष्टिः प्रार्थ्यमाना दृष्टार्था भवति । गोजातिविषयभूतां वेतिमवनमार्गम् । भक्षणमार्गाभिप्रायतो गो प्रवाहमिति यावत् U. गव्यूतिं गोप्रचारम् । गावो यूयन्ते मिश्र्यन्तेऽस्यामित्यधिकरणे क्तिन् BB. १५. जलेन Mah. अक्षारोदकेन U. आगत्य च . . . घृतेन BB.

१६. समन्तात् सिञ्चतम् Sy. सिञ्चतम् Mah. आभिमुख्येन सिञ्चन्तम् U. समन्ताद्रक्षतम् BB.

१७. विश्रुतं कुरुतम् Sy. इत्थमदाद् इत्थमयाक्षीदिति लोके मां कथयतमित्यर्थः । वृद्धयभाव आर्षः Mah. प्रकथयतमित्थमदादित्थमयाक्षीदिति U. समन्ताच्छ्रावयतम् । यद्वा—अस्माकं जनपदेषु युवयोर्बाहुबलं ख्यापयतम् । शृणोतेर्णिचि वृद्धयभावश्छान्दसः BB.

१८. भवत्सिक्तक्षेत्रनिष्पन्नधान्यैर्यज्ञिनं मा माम् Mah. सिक्तधान्यनिष्पत्तिहेतुना यज्ञं कुर्वाणं मा माम् U.

१९. अस्मत्समाने मनुष्यसमूहे वा Sy. जनपदे Mah., U. जनेषु जनपदेषु BB.

२०. युवाना A. हे नित्ययुवानौ ! सर्वत्र व्याप्तौ वा युवाम् Sy. तरुणौ छिन्नजरसौ Mah. उच्छिन्नजरसौ U. नित्यतरुणौ मिश्रितौ वा । पूर्ववदाकारः BB.

२१. श्रुत्वा पूर्वोक्तं कुरुतमित्यर्थः । शृणोतेः शपो लुक् Mah. आशृणुतं मम । . . . . श्रुत्वा चातिष्ठतमित्यभिप्रायः U.

२२. ०रुणो A. हे मित्रावरुणौ ! देवौ ! युवाभ्याम् Sy. २३. इमानस्मदीयान् BB.

२४. आह्वानानि Sy., Mah., U. हवान् आह्वानानि BB.

This stanza=ŸV. 21. 9=TS 1. 8. 22. 3.

नू मित्रो वरुणो अर्यमा नस्त्मने तोकाय वरिवो दधन्तु ।
सुगा नो विश्वा सुपथानि सन्तु यूयं पात स्वस्तिभिः सदा नः ॥ ६ ॥

नू मित्रः । क्षिप्रम् । मित्रः । वरुणः । अर्यमा च । अस्माकम् । आत्मने । पुत्राय च । धनम् । प्रयच्छन्तु । सुगानि । अस्माकम् । विश्वानि । स्थानानि । भवन्तु ।

VII. 63.

उद्वेति सुभगो विश्वचक्षाः साधारणः सूर्यो मानुषाणाम् ।
चक्षुर्मित्रस्य वरुणस्य देवश्चर्मेव यः समविव्यक्तमांसि ॥ १ ॥

उद्वेति । उदेति । एव । सुभगः । विश्वस्य द्रष्टा । समानः । सूर्यः । मनुष्याणाम् । मित्रावरुणयोः । चक्षुः । देवः । यः । चर्मेव विस्तृतान्तरिक्ष्याणि । तम तमांसि । तत् पिण्डयति ।

उद्वेति प्रसवीता जनानां महान्केतुरर्णवः सूर्यस्य
समानं चक्रं पर्यावृत्सन्यदेतशो वहंति धूर्षु युक्तः ॥ २ ॥

उद्वेति । उदेति । प्रेरयिता । जनानाम् । महत् । प्रज्ञापयिता रश्मिः । उदकवान् । सूर्यस्य ।

---

१. अद्य Sy. २. एते त्रयो देवाः Sy.
३. आत्महिताय Sy. ४. सुगमनानि Sy.
५. सर्वाणि गन्तव्यानि Sy. ६. स्वानानि A.
७. 'उद्वेति' इति षड्ऋचमष्टमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभम् । आद्याश्चतस्रः पञ्चम्याः पूर्वार्धश्च सूर्यदेवत्या शेषशिष्टास्त्रयोऽर्धर्चा मित्रावरुणदेवत्याः । तथा चानुक्रान्तम्—'उद्वेतीति चार्धपञ्चमाः' (KSA. 37. 63. p. 26.) इति । विनियोगो लैङ्गिकः Sy.
८. उद्गच्छति Sy. ९. अव A.
१०. शोभनभाग्यः सुष्ठु भजनीयो वा Sy.
११. दृष्टा A. सर्वस्य द्रष्टा Sy.
१२. साधारणत्वप्रतिपादकश्रुतिः पूर्वमुदाहृता cf. RV. VII. 62. 1. 'तस्मात्पुरुषं पुरुषं प्रत्यादित्यो भवति' ।
१३. अयं सूर्यः Sy. १४. सर्वेषां मनुष्याणाम् Sy.
१५. प्रकाशकः Sy. १६. द्योतमानः Sy.
१७. य इवमेव M. चर्मेव is suggested for चमेव ॥ चर्माणीव
१८. ०तमान्त० A. विस्तृतान्यान्त० is suggested for विस्तृतान्त० ।
१९. मम तमांसि M. तम seems to be redundant.
२०. तं पिण्डति A. सम् is suggested for तत् ॥ सह विचति । संवेष्टयति । स महानुभावो देव उदेति Sy. २१. उद्गच्छति Sy.
२२. सर्वेषु कर्मस्वनुज्ञाता Sy.
२३. महान् is suggested for महत् ॥ पूज्यः Sy.
२४. सर्वस्य प्रज्ञापकः Sy.
२५. उदकप्रदः Sy.
२६. अयं सूर्यस्य सूर्यः विभक्तिव्यत्ययः Sy.

समवृत्तम्[1] । चक्रम्[2] । पर्यावर्तयितुमिच्छन् । यस्मिन्[3] काले । विनशः[4] । वहति । रथस्य सूक्षु[5] । युक्तः ।

विभ्राजमान उषसामुपस्थाद्रेभैरुदेत्यनुमद्यमानः[6] ।
एष मे देवः सविता चच्छन्द यः समानं न प्रमिनाति धाम ॥ ३ ॥

[विभ्राजमानः[7]] विभ्राजमानः[8] । उषसाम् । उत्सङ्गात्[9] । स्तोतृभिः । उदेति । अनुमाद्यमानः[10] । एषः । मे[11] । देवः[12] । सविता । उपच्छन्दनं करोति[13] । यः । समानं सर्वेषाम्[14] । तेजः[15] । न । हिनस्ति[16] ।

दिवो रुक्म उरुचक्षा उदेति दूरेअर्थस्तरणिर्भ्राजमानः[17] ।
नूनं जनाः सूर्येण प्रसूता अयन्नर्थानि कृणवन्नपांसि ॥ ४ ॥

दिवः[18] । दिवः[19] । रोचमानः[20] । महातेजाः । उदेति । दूरे गमनं यस्य भवत्युदितमात्रस्य[21] । क्षिप्रगतिः[22] । भ्राजमानः[23] । इदानीम्[24] । जनाः[25] । सूर्येण[26] । प्रसूताः[27] । प्राप्नुवन्ति । गन्तव्यानि स्थानानि[28] । कुर्वन्ति च । कर्माणि[29] ।

---

१. किं कुर्वन्नुदेति ? इत्युच्यते । सर्वेषामेकरूपमेकमेव Sy.
२. रथाङ्गम्, चरणशीलं रथं वा Sy.
३. काले is suggested for काल ॥ यद्रथचक्रम् Sy.
४. विनाशः M. एतशः is suggested for विनशः ॥ एतशवर्णो हरितवर्णोऽश्वः 'एको अश्वो वहति सप्तनामा' (RV. 1. 164. 2.) इत्युक्तम् Sy.
५. सुष्ठु M. धूर्षु is suggested for सूक्षु ॥
६. The *Pratika* is supplied by the Editor.
७. अयं सूर्यो विशेषेण दीप्यमानः Sy.
८. उपस्थे मध्ये Sy.
९. अरमा० A. अनुमद्यमानः सन् Sy.
१०. मह्यम् Sy. ११. द्योतमानः Sy.
१२. इदच्छ० A. उपच्छन्दयति कामान् Sy.
१३. देवः Sy.
१४. सर्वेषां प्राणिनामेकरूपम् Sy.
१५. तेजः A. स्वीयं तेजः स्थानम् Sy.
१६. हिनस्ति सङ्कोचयति स देव उदेति Sy.
१७. मिव A. M.
१८. अन्तरिक्षात् यद्वा अन्तरिक्षस्य Sy.
१९. अयं सूर्यः रुक्मो रोचमानः । यद्वा रुक्म आभरणस्थानीयः Sy.
२०. प्रभूततेजाः सन् Sy.
२१. दूरे गन्ता । अर्थोऽर्तेः । दूरे प्रार्थ्यमानो वा Sy.
२२. यस्य भवन्त्युदि० A.
२३. तारकः Sy.
२४. दीप्यमानः सन् उदेति Sy.
२५. निश्चयम् Sy.
२६. सर्वे प्राणिनः Sy.
२७. प्रेरकेण देवेन Sy.
२८. अनुज्ञाताः प्रेरिताः सन्तः Sy
२९. अनुष्ठेयानि Sy. ३०. ०णिः A.

यत्रा चक्रुरमृता गातुमस्मै श्येनो न दीयन्नन्वेति पाथः ।
प्रति वां सूर उदिते विधेम नमोभिर्मित्रावरुणोत हव्यैः ॥ ५ ॥

[1]यत्रा [2]चक्रुः । [3]यत्र । [4]चक्रुः । [5]देवाः । [6]मार्गम् । [7]अस्मै [8]तत् । [9]अन्तरिक्षम् । [10]श्येनः । [11]इव । [12]गच्छति । [13]अनुगच्छन्ति । [14]प्रतिविधेम । [15]युवयोः । [16]सूर्येऽस्मिन् । [17]उदिते । [18]नमोभिः । [19]अपि च । [20]हव्यैश्च । [21]मित्रावरुणौ ! इति ।

---

१. वसिष्ठस्यार्षम् । अस्याः प्रथमोऽर्धर्चः सौर्य इति प्रतिजज्ञे शौनकः । मैत्रावरुणयोर्द्वितीय इति Dur. वसिष्ठस्यार्षम् । अस्याश्च प्रथमोऽर्धर्चः सौरो द्वितीयो मैत्रावरुणः । तेन भिन्ने एवैते वाक्ये SKN.

२. यस्मिन्नन्तरिक्षे Sy. यदा Dur. यस्मिन्नभसः प्रदेशे SKN.

३. अकुर्वन् Sy. कृतवन्तः Dur., SKN.

४. अमरणधर्माणः पूर्वे देवाः Sy.

५. गातुं गमनमार्गमुदयादारभ्य यावदस्तमय इति Dur. गंस्यते येन मार्गेण गातुं गमनमार्गम् SKN.

६. सूर्याय Sy., Dur. सूर्यायेति निर्देशः । अस्य सूर्यस्येत्यर्थः SKN.

७. अन्तरिक्षं तेन मार्गेण....'श्येनो न दीयन्नन्वेति पाथः' (VII. 63. 5.) इत्यनेन सम्बन्धात् 'पाथोऽन्तरिक्षम्' इत्युपपद्यते । अपठितमप्येतदन्तरिक्षनाममु । इत्यप्रतीतार्थम् Dur.

८. शंसनीयगमनो गृध्रः Sy. यदा चायमारब्धः सूर्यः श्येनो न श्येन इव Dur. तेनैवायं मार्गेणानतिक्रामन् मर्यादां श्येनो न श्येन इव SKN.

९. गच्छन् is suggested for गच्छन्ति ॥ दीयमानो गच्छन् Dur. दीयतिरिति गतिकर्मा । गच्छन्नुदयात्प्रभृत्यास्तमयात् SKN.

१०. अनुगच्छति is suggested for अनुगच्छन्ति ॥ अथ तदारभ्य प्रति .. प्रतीत्य चेतसा Dur. किञ्च प्रतीत्ययं धात्वर्थानुवादी SKN. ११. अयमर्धर्चः सौर्य इत्युक्तम् (cf. RV. VII. 63. 1.) पञ्चम्याः पूर्वार्धश्च सूर्यदेवत्यः Sy.

१२. प्रधिवि० A. परिचरेम Sy. परिचरेम वयम् Dur. विधतिः परिचर्यायाम् । परिचरेमेत्याशास्महे SKN.

१३. युवाम् Sy., Dur., SKN.

१४. सूर्ये उदिते सति प्रातःसवने Sy.

१५. अदिते A. अहन्यहनीत्यर्थः SKN.

१६. नमस्कारैः स्तुतिभिः Sy. नमस्कारैः Dur. स्तुतिभिः SKN.

१७. हविर्भिश्च Sy. न शुष्केण हस्तेन । किं तर्हि ? ....हविर्भिश्च पुरोडाशादिभिः SKN.

१८. अथवैवमन्यथा स्यात्प्रथमस्यार्द्धर्चस्यार्थः सूर्यप्रधानत्वात् । उत्तरोऽर्धर्चो निराकाङ्क्ष एव । यत्र यस्मिन्नभसः प्रदेशे गातुं कृतवन्तोऽमृता देवाः सूर्यश्च । तेनैव प्रदेशेन श्येन इव दीयन्नन्वेति, अनुगच्छति पाथ. । न तां मर्यादामीश्वरोऽपि सन्नतिक्रामतीत्यर्थः Dur. ; N. 6. 7; SKN. II. 413., 414.

नू मित्रो वरुणो अर्यमा नस्त्मने तोकाय वरिवो दधन्तु।
सुगा नो विश्वा सुपथानि सन्तु यूयं पात स्वस्तिभिः सदा नः ॥ ६ ॥

[नू मित्रः]

VII. 64.

दिवि क्षयन्ता रजसः पृथिव्यां प्र वां घृतस्य निर्णिजो ददीरन्।
हव्यं नो मित्रो अर्यमा सुजातो राजा सुक्षत्रो वरुणो जुषन्त ॥ १ ॥

दिवि क्षयन्ता। दिवि। निवसन्तौ। उदकस्यार्थम्। पृथिव्यां च। वाम्। आज्यस्य हूयमानस्य। निर्णिजस्तोकाः। प्रकर्षेण। धारयेयुः। हव्यम्। अस्माकम्। मित्रः। अर्यमा च। शोभनजननः। राजा। सुधनः। वरुणश्च। सेवन्ताम्।

आ राजाना महऋतस्य गोपा सिन्धुपती क्षत्रिया यातमर्वाक्।
इळां नो मित्रावरुणोत वृष्टिमवं दिव इन्वतं जीरदानू ॥ २ ॥

आ राजाना। आयातम्। राजानौ। हे महतः! सत्यस्य, गोपायितारौ! सिन्धूनां स्वामिनौ।

---

१. The *pratika* is supplied by the Editor.
This stanza has already been explained. See. RV. VII. 62. 6.

२. 'दिवि क्षयन्तः' इति पञ्चर्चं नवमं सूक्तं वसिष्ठस्यार्षं मैत्रावरुणम्। 'दिवि पञ्च' इत्यनुक्रमणिका(KSA. 37. 64. p. 26.)। तृतीये छन्दोमे प्रउगशस्त्रे आद्यास्तृचो मैत्रावरुणस्य। सूत्रितञ्च—'दिवि क्षयन्ता रजसः पृथिव्यामा विश्ववाराश्विना गतं नः' (ĀŚS. 8. 11.) इति Sy. ३. द्युलोकेऽन्तरिक्षे Sy.

४. क्षयतिरैश्वर्यकर्मा। स्वामिनौ भवथः Sy.

५. ०स्यार्थः M.

६. पृथिव्यां च वर्तमानस्य Sy.

७. हे मित्रावरुणौ! युवाभ्यां प्रेरिता मेघाः Sy.

८. उदकस्य Sy. ९. भूय० A.

१०. नि (श) णृजन्तो० A. नि र्णिजः is suggested for निर्णीज०॥ रूपाणि.... अथवा वां युवाभ्यां घृतस्य निर्णिजो रूपाणि, घृतानीत्यर्थः, तानि ददीरन् दीयन्ते Sy.

११. ददते प्रयच्छन्ति Sy.

१२. अध्यमा A.

१३. सुष्ठु प्रादुर्भूतः Sy.

१४. सर्वस्य स्वामी Sy.

१५. सुधानः A. शोभनबलः Sy.

१६. आयान्तम् A. आगच्छतम् Sy.

१७. सर्वस्य स्वामिनौ Sy. १८. मरुतः M.

१९. ऋतस्योदकस्य यज्ञस्य Sy.

२०. गोपा गोपायितारौ। 'सुबामन्त्रिते पराङ्गवत्स्वरे' इति पराङ्गवद्भावात् षष्ठ्यामन्त्रितसमुदायस्य निघातत्वम् Sy.

२१. हे नद्याः पालयितारौ! Sy.

जातितः क्षत्रियाद्[1]। अभिमुखम्। अन्नम्। नः[2]। मित्रावरुणे[3]। वचि च[4]। विष्टि[5]। द्युलोकात्[6]। अपक्षारयितम्[7]। क्षिप्रदानौ[8]।

मित्रस्तन्नो वरुणो देवो अर्यः प्र साधिष्ठेभिः पथिभिर्नयन्तु[9]।
अवद्यथा न आदरिः सुदास इषा मदेम सह देवगोपाः॥ ३॥

मित्रस्तन्नः। मित्रादयः[10]। अस्मान्[11]। साधुतमैः[12]। मार्गैः[13]। तथा[14]। प्रणयन्तु[15]। ब्रूयात्[16]। यथा। अस्मान्[17]। अभिगमनानन्तरमेव।...गन्ता[18] द्वाराधिकृतः। अन्तःपुरस्थिताय सुदासे[19] प्राप्तान्[20]। अन्नेन[21]। मदेम[22]। पुत्रपौत्रैः सह[23]। देवैः[24] रक्ष्यमाणाः[25]।

यो वां रथं मनसा तत्वदेतमूर्ध्वां धीतिं कृणवद्धारयच्च।
उच्चेथां मित्रावरुणा घृतेन ता राजाना सुक्रतूस्तर्पयेथाम्॥ ४॥

यो वाम्[26]। यः। वाम्[27]। रथम्[28]। एतं[29]। मनसा स्तोत्रपरेण[30]। संस्तौतीत्यर्थः[31]। उन्मुखाम्[32]। बुद्धिम्[33]।

---

१. क्षत्रियो is suggested for क्षत्रियाद्॥ हे बलवन्तौ! युवाम् Sy.
२. अस्मभ्यम् Sy.
३. मित्रावरुणौ is suggested for मित्रावरुणे॥
४. वचि चि A. अपि च is suggested for वचि च॥
५. वृष्टिम् is suggested for विष्टि।
६. अन्तरिक्षात् Sy.
७. ०रयतम् is suggested for ०रयितं। प्रेरयतम् Sy.
८. आदि refers to वरुणः। देवः and अर्यः॥ अर्यः अर्यमा चैते त्रयोऽपि Sy.
९. अस्मात् A.
१०. साधकतमैः Sy.
११. तवा यदास्माकमपेक्षितं तवा Sy.
१२. प्रापयन्तु Sy.
१३. असावनुकम्प्य इति ब्रूयात्। तथा कुर्वन्तु Sy. अरिः अर्यमा....
१४. ....गन्ता is missing in M. Omission is shown by the dots. अरिर्गन्ता is suggested for गन्ता। अर्यम्णः पुनरभिधानमादरार्थम् Sy.
१५. शोभनदानाय जनाय Sy.
१६. युष्माभिर्दातव्येन Sy.
१७. मदम A. हृष्येम Sy.
१८. पुत्रादिसहिताः Sy.
१९. देवा यूयं गोपायितारो येषां ते वयम् Sy.
२०. युवयोः Sy.
२१. एतः A. एतम् is suggested for एत।
२२. स्तोमेन Sy.
२३. संस्तरोति A. सङ्कल्पयेत् Sy.
२४. ०खा A. तथा कृत्वोर्ध्वाम् उन्नताम् Sy.
२५. कर्म स्तुतिरूपम् Sy.

करोति[1] स्तुत्यर्थम्। धारयति[2]। च निश्चलां करोति। तस्य स्वभूताः सुनिवासाः[3] प्रजाः। उदकेक्षेथाम्[4]। उक्षेथाम्[5]। तौ[6]। राजानौ[7]। तर्पयेथां च[8]।

एष स्तोमो वरुण मित्र तुभ्यं सोमः शुक्रो न वायवेऽयामि।
अविष्टं धियो जिगृतं पुरंधीर्यूयं पात स्वस्तिभिः सदा नः॥ ५॥

एषः[9]। अयम्। स्तोमः[10]। वरुण! मित्र! तुभ्यमहमुखे[11]। सोमः[12]। इव[13]। दीप्तः[14]। वायवे[15]। अस्माभिरयामि[16] यत[17] कृतः। अवशिष्ट[18]। मियः[19]। जिगृतम्[20]।

VII. 65.

प्रति वां सूर उदिते सूक्तैर्मित्रं हुवे वरुणं पूतदक्षम्।
ययोरसुर्यमक्षितं ज्येष्ठं विश्वस्य यामन्नाचिता जिगत्नु॥ १॥

प्रति वाम्[21]। प्रतिभुवे[22]। वाम्[23]। उदिते[24]। सूर्ये। सूक्तैः। मित्रम्। वरुणं च। शुद्धबलम्। ययोः[25]। असुराणां हन्तृ बलम्। अक्षीणम्। प्रशस्तम्[26]। विश्वस्यापि[27]। अभिगमने[28]। संख्ये[29] च। जयशीलं[30] भवति।

---

१. कुर्यात्। उच्चैः स्तुयात् Sy.
२. एवं कृत्वा धारयच्च यागे धारयेत् Sy.
३. तस्मै शोभननिवासाः प्रजाः। यथा सुक्षितयो भवन्ति तथा Sy.
४. उदकेन is suggested for उदकेक्षेथाम्।
५. उक्षेधाम् A. M. जनं सिञ्चतम् Sy.
६. युवाम् Sy. ७. हे स्वामिनौ! Sy.
८. VM. ignores मित्रावरुणौ।
९. अनया स्तुतिमुपसंहरति। हे वरुण! मित्र! Sy. १०. स्तवः Sy.
११. युवयोः Sy. १२. ०महं मुखे A.
१३. सोम न M. युष्मभ्यं प्रीतिकरः सोमो यथा दीयते तद्वत् Sy.
१४. दीप्तः is missing in M.
१५. वायुर्गन्तादित्यः। स एवार्यमा। तस्मै Sy.
१६. अकारि Sy.
१७. य M. यतः is suggested for यत।
१८. अविष्टम् is suggested for अवशिष्ट॥ रक्षतम् Sy.
१९. धियः is suggested for मियः॥ कर्माण्यस्मदीयानि Sy.
२०. तिकृतम् A. M. प्रबुध्यतम् Sy.
२१. VM ignores पुरन्धीः॥ पुरन्धीः स्तुतीः। अन्यद्गतम् Sy.
२२. 'प्रति वां सूरः' इति पञ्चर्चं दशमं सूक्तं वसिष्ठस्यार्षं मैत्रावरुणम्। 'प्रति वाम्' इत्यनुक्रान्तम् (KSA. 37.65. p. 26.)। द्वितीये छन्दोमे प्रउगशस्त्रेऽप्येष तृचः। सूत्रितञ्च—'प्रति वां सूर उदिते सूक्तैर्धेनुः प्रत्नस्य' (ASS. 8. 10.) इति Sy.
२३. प्रतिब्रुवे M. प्रति हुवे is suggested for प्रतिभुवे॥ आह्वये Sy.
२४. प्रातःसवने Sy.
२५. The rest of the commentary from ययोः onwards is missing in M. मित्रावरुणयोः Sy.
२६. अत एव ज्येष्ठम् Sy. २७. शत्रुसङ्घस्य Sy.
२८. यामनि सङ्ग्रामे Sy.
२९. उपचिते शूरसङ्घैरुपेते Sy.
३०. जेतृ भवति Sy.

ता हि देवानामसुरा तावर्या ता नः क्षितीः कर्तमूर्जयन्तीः ।
अह्यामं मित्रावरुणा वयं वां द्यावा च यत्र पीपयन्नहा च ॥ २ ॥

ता हि देवानाम् । तौ । हि । देवानाम् । बलिनौ । तौ । ईश्वरौ । तौ । नः । प्रजाः । कुरुतम् । बलं कुर्वाणाः । प्राप्नुयाम । हे मित्रावरुणौ ! वयम् । वाम् । यस्यां प्राप्तौ सत्यामस्मान् । द्यावाः पृथिव्यौ । अहानि । च । वर्धयन्ति ।

ता भूरिपाशावनृतस्य सेतू दुरत्येतू रिपवे मर्त्याय ।
ऋतस्य मित्रावरुणा पथा वामृषो न नावा दुरिता तरेम ॥ ३ ॥

ता । तौ । बहुतन्ती । पापस्य । बलन्धकौ । हिंसितुम् । मर्त्यानां मनुष्यस्य । आक्रमितुमशक्यौ सर्वथा बध्नीथ इत्यर्थः । तथाविधौ हे मित्रावरुणौ ! युवयोः । सत्यस्य । मार्गेण । उदकानि । नावा । इव । तरेम । दुरितानि ।

---

१. देवौ Sy.
२. खलु Sy.
३. देवानां मध्ये Sy.
४. बलवन्तौ Sy.
५. तावुवरी A.
६. अया सर्वरयेश्वरौ Sy.
७. अस्माकम् Sy.
८. पुत्रादिरूपाः प्रजाः Sy.
९. The commentary on this stanza from the beginning upto बलम् is missing. in M. प्रवृद्धाः Sy.
१०. व्याप्नुयाम Sy.
११. ०रुणा M.
१२. युवाम् Sy.
१३. यस्यां युवयोर्व्याप्तौ Sy.
१४. द्यावा द्यावापृथिव्यौ । सर्वदा तयोः सहभावादयमर्थो लभ्यते Sy.
१५. एतन्त्रात्रेरुपलक्षणम् । अहोरात्राणि च Sy.
१६. अस्मान् व्यापयेयुः Sy.
१७. मित्रावरुणौ Sy.
१८. ०तन्ति A. प्रभूतबन्धनसाधनपाशोपेतौ Sy.
१९. यागरहितस्य Sy.
२०. बन्धकौ is suggested for बलन्धकौ ॥ सेतुवद्बन्धकौ Sy.
२१. This seems to be the explanation of रिपवे । Sy. explains it with मर्त्याय as वैरिजनाय
२२. रिपवे मर्त्याय वैरिजनाय Sy.
२३. This seems to be the explanation of दुरत्येतू । Sy. explains it as दुरतिक्रमौ भवतः ।
२४. सर्वाथा A.
२५. ०ध्नीथ M.
२६. यज्ञस्य युवयोरर्थायानुष्ठीयमानस्य यागस्य Sy.
२७. प्रभूतान्युदकानि Sy.
२८. दुःखानि Sy.

आ नो मित्रावरुणा हव्यजुष्टिं घृतैर्गव्यूतिमुक्षतमिळाभिः ।
प्रति वामत्र वरमा जनाय पृणीतमुदगो दिव्यस्य चारोः ॥ ४ ॥

आ नः । आसिञ्चतम् । अस्माकम् । मित्रावरुणौ ! युवाभ्याम् । यत्र हव्यानि सेवन्ते तमित्येतद्देवाह । उदकै. । गोमार्गम् । इळाभिरन्नैर्घृतैः । प्रतियच्छतं च । युवाम् । वरणीयमुदकम् । जनाय तदेव । इह । प्रयच्छतम् । उदकम् । दिव्यम् । चार्विति प्रतिभवति युवयोः स्वस्वभूतमुदक जनायेति वा ।

एष स्तोमो वरुण मित्र तुभ्यं सोमः शुक्रो न वायवेऽयामि ।
अविष्टं धियो जिगृतं पुरंधीर्यूयं पात स्वस्तिभिः सदा नः ॥ ५ ॥

[एष स्तोमः ।]

VII. 66.

प्र मित्रयोर्वरुणयोः स्तोमो न एतु शूष्यः । नमस्वान्तुविजातयोः ॥ १ ॥

प्र मित्रयोः । प्रैतु । मित्रावरुणयोः । अस्मदीयः । स्तोमः । सुखावहः । हविष्मान् ।

---

१. मैत्रावरुणे पशौ 'आ नो मित्रावरुणा' इत्येषा चतुर्थ्यनुवाक्या । सूत्रितञ्च—'आ नो मित्रावरुणा हव्यजुष्टिं युवं वस्त्राणि पीवसा वसाथे, (ĀSS. 3. 8.) इति Sy.
२. VM. explains आ and उक्षतम् together as आसिञ्चतम् but Sy. explains आ and उक्षतम् separately आ as आगच्छतमिति शेषः and उक्षतम् as सिञ्चतम् ।
३. हविः सेवनवन्तं यज्ञं गच्छनमिति शेषः Sy.
४. अस्मदीयां भूमिम् Sy.
५. ०घृतैः is doubtful. पृतैः is suggested for आगतस्य चारोः सह Sy.
६. It seems to be the explanation of प्रति ॥ क आ यच्छेदिति शेषः Sy.
७. उत्कृष्टं हविः स्तोत्रं वा Sy.
८. अस्मिल्लोके Sy.
९. उदकस्य। कर्मणि षष्ठी। उक्तलक्षणमुदकम् Sy.
१०. अतः केवलं कृपयैव विभिन्नस्य Sy.
११. चार्वति A. चरणीयस्य Sy.
१२. One स्व seems to be redundant.
१३. VM. ignores आ ।
१४. The *pratīka* is supplied by the Editor.

The stanza has already been explained. See. RV. 7. 64. 5.
१५. 'प्र मित्रयोः' इत्येकोनविंशत्यृचमेकादशं सूक्तं वसिष्ठस्यार्षम् । अत्रेयमनुक्रमणिका—'प्रमित्रयोरेकोना गायत्रं दशम्याद्यास्त्रयः प्रगाथाः पुरउष्णिक् चतुर्थ्याद्या दशावित्यास्तिस्रः सौर्यः' (KSA. 37. 66. p. 26.) इति । दशमी बृहत्येकादशी सतोबृहती द्वादशी बृहती त्रयोदशी सतोबृहतो चतुर्दशी बृहती पञ्चदशी सतोबृहतो षोडशी पुरउष्णिक् शिष्टा गायत्र्यः । चतुर्थ्याद्यास्त्रयोदश्यन्ता आदित्यदेवताश्चतुर्दश्याद्यास्तिस्रः सूर्यदेवत्याः । आद्यन्तौ तृचौसपूर्ववन्मैत्रावरुणौ । अग्निष्टोमे माध्यन्दिनाधाने मैत्रावरुणशस्त्र आदितो नवर्चः शस्याः 'प्र मित्रयोर्वरुणयोः' इति नव, (ASS. 5. 10.) इति सूत्रितत्वात् । पृष्ठ्याभिप्लवषडहयोः स्तोमवृद्धिनिमित्तमावापार्था आद्या षडृचः । सूत्रितञ्च—'प्र मित्रयोर्वरुणयोरिति षट्' (ASS 7. 5.) इति Sy.
१६. प्रेतु A. गच्छतु Sy.
१७. मित्रव० A. मित्रावरुणयोरित्यर्थः । उभयत्र प्रतियोगापेक्षया द्विवचनत्वम् Sy. १८. दीये A. १९. स्तोत्रम् Sy. २०. सुखकरः Sy.
२१. अन्नवान् । हविर्भिर्युक्तः Sy.

बहुजननयोः[1]।

या धारयन्त देवाः सुदक्षा दक्षपितरा। असुर्याय प्रमंहसा ॥ २ ॥

या धारयन्त। यौ। अवधारयन्। देवाः। शोभनबलौ। दक्षपितरौ बलं रक्षकं ययोस्तौ। असुर्यायासुराणां स्वभूतया बलाय तत् प्रतिहन्तुम्। प्रकृष्टतेजसाविति।

ता नः स्तिपा तनूपा वरुण जरिणाम्। मित्र साधयतं धियः ॥ ३ ॥

ता नः। तौ। अस्माकम्। तूनां गृहाणां च रक्षकौ। हे वरुण! स्तोतृणाम्। मित्र! च। साधयतम्। कर्माणि।

यदद्य सूर उदितेऽनागा मित्रो अर्यमा। सुवाति सविता भगः ॥ ४ ॥

यदद्य। यत्। अद्य। उदिते। सूर्ये। अनागसोऽस्मान्। मित्रादयः। प्रेरयन्ति ततः सुख जीवाम इति वाक्यशेषः।

---

१. बहून् जननयः M. बहुप्रादुर्भावयोर्द्वयोः। 'अहोरात्रं वै मित्रावरुणौ' इति श्रुतिः। अनयोरहोरात्रापेक्षत्वात्तयोः पुनःपुनरागमनादनयोस्तुविजातत्वम्। अथवा बहूनामुपकारायानयोः प्रादुर्भावात्तुविजातत्वम् Sy.

२. या M. युवाम् Sy.

३. अद्धार० A. अधारयन् is suggested for अवधार०।

४. आदिकर्तारः Sy.

५. रक्षतं A. बलस्य पालकौ स्वामिनौ वा बलप्रदावित्यर्थः Sy.

६. ०भूतये M. ०भूताय is suggested for ०भूतया॥ बलकरणाय Sy.

७. प्रकृष्टतेजस्कौ। तौ साधयतमित्युत्तरत्रान्वयः Sy.

८. नां A. तनूनाम् is suggested for तूनां॥ तन्वः पातारौ Sy.

९. प्रहा० A. स्त्यायन्त इति स्तयो गृहाः। तान् पात इति स्तिपौ Sy.

१०. VM. seems to explain स्तिपा and तनूपा together as तनूनां गृहाणां च रक्षकौ।

११. उक्तलक्षणौ युवाम् Sy.

१२. साधकं A. सफलयन्ति कुरुतम् Sy.

१३. स्तुतिरूपाणि Sy.

१४. यद्धनमस्माकमपेक्षितम् Sy. यत्कर्म U.

१५. तदस्मिन् काले Sy. अस्मिन् ह्यहि U.

१६. उदिते सति प्रातःसवने Sy. उदिते सति Mah. उद्गते U.

१७. अनग० A. अनागाः पापहन्ता Sy. नास्ति आगोऽपराधो यस्य सोऽनागा इति चतुर्णां विशेषणम् Mah. अनपराधः U.

१८. आदि refers to अर्यमा। सविता and भगः। मित्रोऽर्यमा सविता भगश्चैते प्रत्येकम् ....अथवा अनागा मित्रोऽर्यमा दाता भवतु। भगो भजनीयः Sy. मित्रोऽर्यमा सविता भगश्च Mah. मित्रः....एवमर्यम्णः सवितुर्भगस्य च वाक्यान्यविशेषात् U.

१९. प्रेरयेत्, प्रेरयतु Sy. प्रेरयति तत्कर्म कुर्यादिति शेषः Mah. प्रसौति तत्कर्म कुर्यादिति शेषः U.

This stanza=YV. 33. 20.

सुप्रावीरस्तु स क्षयः प्र नु यामन्त्सुदानवः। ये नो अंहोऽतिपिप्रति ॥ ५ ॥

सुप्रावीः। शोभनरक्षणम्। प्रभवतु। तत्। गृहम्। हे शोभनदानाः! भवतां गमने। ये। अस्माकम्। अंहसो वृत्तेः। अतिपारयन्ति।

उत स्वराजो अदितिरदब्धस्य व्रतस्य ये। महो राजान ईशते ॥ ६ ॥

उत स्वराजः। अपि च। स्वराजो मित्रादयः। अमितिश्च। अहिंसितस्य। व्रतस्य, ये, वर्षणादेः। प्रणेतारस्ते। महान्तः। राजानः। सर्वेषामीश्वरा भवन्ति।

प्रति वां सूर उदिते मित्रं गृणीषे वरुणम्। अर्यमणं रिशादसम् ॥ ७ ॥

प्रति वाम्। प्रति स्तौमि द्विविकरणानां छान्दसौ। वाम्। उदिते। सूर्ये। मित्रावरुणौ। अर्यमणं च। हिंसितृणामसितारम्।

---

१. सुष्ठु प्रकर्षेण रक्षिता Sy.
२. प्रशब्द आवरार्थः। प्रकर्षेण Sy.
३. सः Sy. ४. ग्रहम् A. निवासः Sy.
५. हे सुदानाः! युष्माकम् Sy.
६. ये is missing in M. यूयमागत्य Sy.
७. अंहसोर्वर्तेः M. पापम् Sy.
८. अतिपारयथ तेषां गमने Sy.
९. VM. ignores नु ॥ नु क्षिप्रं भवत्विति शेषः Sy.
१०. स्व is missing in M. सर्वस्य स्वामिनः Sy.
११. अदिति० is suggested for अमिति०॥ तेषां माता च सन्ति Sy.
१२. अस्य कर्मणा Sy.
१३. ये is missing in M. ये मित्रावयस्त्रयः Sy.
१४. वर्षणा० A.
१५. महतः Sy.
१६. From राजानः onwards the rest of the commentary is missing in A.
१७. समर्था भवन्ति। अभिमतं वातुमिति शेषः। अयमेवं योज्यम्। ये मित्रावयोऽदितिश्चाव-ब्धस्य व्रतस्य स्वराज ईश्वरास्ते महो महतो-ऽस्मदभिमतधनस्य राजानः स्वामिनः सन्त ईशतेऽस्मभ्यं तद्दातुम् Sy.
१८. 'प्रति वाम्' इत्येष तृचश्चातुर्विंशिकेऽहनि प्रातः-सवने मैत्रावरुणस्य पर्यासार्थः। सूत्रितञ्च—'प्रति वां सूर उदिते व्यन्तरिक्षमतिरत्' (ĀSS. 7. 2.) इति Sy.
The commentary on this stanza is missing in A.
१९. प्रत्येकं स्तुवे Sy.
२०. The root गृ is in the *parasmaipada* in the classical sanskrit but is used in the Veda in the *ātmanepada* also. गृणीषे is the 2nd person sing. but is to be construed as the 1st person sing.
२१. Addition of सिद्धिः after छान्दसौ is suggested.
२२. प्रातरित्यर्थः Sy.
२३. हे मित्रावरुणौ! मित्रं त्वां वरुणञ्च युवाम् Sy.
२४. शत्रूणामत्तारम् Sy.

राया हिरण्ययया मतिरियमवृकाय शवसे । इयं विप्रा मेधसातये ॥ ८ ॥

राया[1] । धनेन हेतुना[2] । हिरण्येच्छया[3] च । इयम्[4] । स्तुतिः[5] । स्तेनवर्जिताय[6] । बलाय[7] च । इयम्[8] । प्राज्ञयोर्मित्रावरुणयोः[9] । यज्ञभजनाय[10] चेति[11] ।

ते स्याम देव वरुण ते मित्र सूरिभिः सह । इषं स्वश्च धीमहि ॥ ९ ॥

ते स्याम[12] । ते वयम् । भवाम समृद्धाः । हे देव ! वरुण ! ते[13] । मित्र ! स्तोतृभिः[14] पुत्रैः । सह स्याम । अन्नम्[15] । च । सर्वम्[16] । धारयेम[17] ।

बहवः सूरचक्षसोऽग्निजिह्वा ऋतावृधः ।
त्रीणि ये येमुर्विदथानि धीतिभिर्विश्वानि परिभूतिभिः ॥ १० ॥

बहवः[18] । बहवः[19] । सूर्यदर्शनाः[20] मित्रादयस्तेषां हि सूर्यश्चक्षुः । अग्निर्जिह्वा[21] । यज्ञस्य वर्धयितारः । ये[22] । त्रीणि । विदधानि[23] त्रींल्लोकान् । यच्छन्ति[24] । कर्मभिः । विश्वानि[25] च भूतानि च[26] । परिभवनैः[27] ।

---

१. राया । धनेन हेतुना is missing in A.
२. धनेन सहिताय Sy.
३. हितरमणीयेन । हिरण्यया—इत्यत्र 'सुपां सु लुक्०' इति तृतीयैकवचनस्य याजादेशः Sy.
४. इदानीं क्रियमाणा Sy.
५. मतिः स्तुतिर्भवत्विति शेषः Sy.
६. अवृकाय means free from theft or thieves. वृकः is a synonym of theft. Ngh. 3. 24. अहिंस्याय Sy.
७. अस्माकं बलाय Sy.
८. इयम्मे च स्तुतिः Sy. १०. ०अव० A.
११. यज्ञलाभाय च भवतु Sy. १२. तस्योम A.
१३. तव स्तोतारः Sy. १४. मित्रः A.
१५. न केवलं वयमेव यजमानाः किन्तु सूरिभिः स्तोतृभिर्ऋत्विग्भिः सह Sy.
१६. अन्नम् A. १७. उदकम् Sy.
१८. धारयामः M. धारयामहे Sy.
१९. आश्विनशास्त्रे 'बहवः सूरचक्षसः' इति प्रगाथः । सूत्रितञ्च——'बहवः सूरचक्षस इति प्रगाथाः' (ĀŚS. 6. 5.) इति । दशरात्रे पञ्चमेऽहनि प्रउगशस्त्रेऽप्ययं प्रगाथः । सूत्रितञ्च—'बहवः सूरचक्षस इमा उ वां दिविष्टयः' (ĀŚS. 7. 12.) इति Sy.
२०. महान्तः Sy.
२१. ०न मि० A. सूर्यसदृशप्रकाशाः । सूरः प्रकाशको येषामिति वा Sy.
२२. अग्नि जिह्वा A. अग्निजिह्वा is suggested for अग्निर्जिह्वा ॥ अग्निरेव जिह्वादनसाधनो येषां तादृशाः Sy.
२३. वि ये M.
२४. ०दथानि is suggested for ०दधानि ॥ क्षित्यादिस्थानानि क्षित्यादीनि Sy.
२५. प्रयच्छन्ति । 'ते क्षत्रमाशत' इत्युत्तरत्र सम्बन्धनीयम् । अथवात्रैव । ये त्रीणि स्थानानि प्रयच्छन्ति ते बहुत्वादिगुणोपेता आगच्छन्तु । इत्यध्याहार्यम् Sy.
२६. व्याप्तानि Sy.
२७. च seems to be unnecessary.
२८. परिभावुकैः Sy.

वि ये दधुः शरदं मासमादर्हर्यज्ञमक्तुं चादृचम् ।
अनाप्यं वरुणो मित्रो अर्यमा क्षत्रं राजान आशत ॥ ११ ॥

वि ये । आकुर्वन् । येऽत्र । संवत्सरम् । मासम् । अहश्च । आवृत्तिभिर्यज्ञम् । आज्यम् । स्तुतिम् । च । तथा । अन्यैराप्तुमशक्यम् । धनं च सोमात्मकम् । मित्रादयः । राजानः । व्याप्नुवन् ।

तद्वो अद्य मनामहे सुकृतैः सूर उदिते ।
यदोहते वरुणो मित्रो अर्यमा यूयमृतस्य रथ्यः ॥ १२ ॥

तद्वः । तत् । वः । अद्य । स्तुमः । सुकृतैः । उदिते । सूर्ये । यद्धनम् । प्रापयति । वरुणे । मित्रः । अर्यमेति पादः परोक्षः । यूयम् । सत्यभूतस्य मनुष्यस्य प्रापयथ । हे नेतारः ! रथवन्तो वेति ।

ऋतावान ऋतजाता ऋतावृधो घोरासो अनृतद्विषः ।
तेषां वः सुम्ने सुच्छर्दिष्टमे नरः स्याम ये च सूरयः ॥ १३ ॥

ऋतवानः । सत्यवन्तः । सत्याज्जाताः । सत्यस्य वर्धयितारः । घोराः । अनृतस्य द्वेष्टारः ।

---

१. ई ये M.
२. आकु० is suggested for आकु० ।
३. ये त्रा A. मित्रादयः Sy.
४. मां सम् A. ५. अहःसाध्यं यज्ञम् Sy.
६. रात्रिम् Sy. ७. मन्त्राश्च Sy.
८. अनन्तरम् । आत् अनन्तरमेव । यद्वा सर्वत्रादित्ययमपीत्यर्थे वर्तते । तथा सति क्रमोऽविवक्षितः Sy.
९. अन्यैरप्राप्तम् Sy. १०. क्षत्रं बलम् Sy.
११. आदि refers to अर्यमा and वरुणः । वरुणः मित्रोऽर्यमा च त्रयः Sy.
१२. त्रयो राजमानाः Sy. १३. व्याप्तवन्तः Sy.
१४. VM. ignores वि ।
१५. प्रसिद्धम् Sy. १६. युष्मान् Sy.
१७. अस्मिन् यागकाले Sy. १८. याचामहे Sy.
१९. उदितः A. प्रातःकाल इत्यर्थः Sy.
२०. सूर्ये is missing in M.
२१. यन्धनम् A.
२२. यूयमित्यनेन सामानाधिकरण्याद्वोहत इत्यत्र पुरुषव्यत्ययः । ओहध्व इत्यर्थः । तद्धनं मनामह इति Sy.
२३. वरुणः is suggested for वरुणे ।
२४. मित्रे M. २५. अप्यमेति A.
२६. यूयं वरुणादयः Sy. २७. ऋतस्योदकस्य Sy.
२८. ये यूयम् ऋतवन्तो यज्ञवन्त उदकवन्तो वा Sy.
२९. ०त्यज्जा० A.
३०. ऋतजाताः । उक्त ऋतशब्दार्थः । तदर्थमुत्पन्नाः । अथवा ऋतात्प्रजापतेः सकाशादुत्पन्नाः Sy.
३१. उक्तार्थस्यर्तस्य वर्धयितारः Sy.
३२. ०यिता A. ३३. घो is missing in A.
३४. अयष्टृद्वेष्टारः Sy.

तेषाम्। युष्माकम्। सुखे। अतिशयेन शोभनगृहयुक्ते। नेतारः। स्याम वयम्। सन्तु च ये। च। अन्ये स्तोतारः।

उदु त्यद्दृशतं वपुर्दिव एति प्रतिह्वरे।
यदीमाशुर्वहति देव एतशो विश्वस्मै चक्षसे अरम् ॥ १४ ॥

उदु त्यत्। दिवः। उदेति। तदिदम्। दर्शनीयम्। रूपमादित्याख्यम्। अस्मत्समीपे ॥ यत्। एनम्। अश्वः। वहति। देवनशीलः। एतशवर्णः। विश्वस्मै। चक्षसे सर्वेषां दर्शनाय। पर्याप्तमिति।

शीर्ष्णःशीर्ष्णो जगतस्तस्थुषस्पतिं समया विश्वमा रजः।
सप्त स्वसारः सुविताय सूर्यं वहन्ति हरितो रथे ॥ १५ ॥

शीर्ष्णः। उच्छ्रितादुच्छ्रितादेशात्। जगतीत इति। स्थावरस्य च। स्वामिनम्। सर्वस्य। लोकस्य। समीपे। सप्त। स्वयं सारिण्यः। अभ्युदयाय। सूर्यम्। आवहन्ति। हरितः। रथे।

---

१. वृहे A. धने Sy.
२. सुखतमे....अत्यन्तरमणीयगृहयुक्ते सुखे वा Sy. ३. नतार A.
४. ते सर्वे भवेम Sy.
५. सोमातिरेके माध्यन्दिनसवने नैमित्तिके शस्त्रे 'उदु त्यद्' इत्ययं प्रगाथोऽनुरूपः। सूत्रितञ्च—'बण्महां असि सूर्योदु ग्रदृशतं वपुरिति प्रगाथौ स्तोत्रियानुरूपौ' (ĀSS 6. 7.) इति। चातुर्विंशिकेऽहनि माध्यन्दिनसवनेऽयमेव वैकल्पिकः स्तोत्रियस्तृचः। सूत्रितञ्च—'उदुत्यद्दृशतं वपुरुदु त्ये मधुमत्तमाः' (ĀSS. 7. 4.) इति Sy. ६. अन्तरिक्षस्य Sy.
७. मण्डलम् Sy. ८. ०ख्याम् A.
९. अश्वत्० A. प्रतिह्वरे समीपे Sy.
१०. एतन्मण्डलम् Sy. ११. शीघ्रगामी Sy.
१२. धारयति Sy. १३. ०शीलं M.
१४. सर्वस्मै Sy.
१५. सर्वलोकदर्शनाय Sy. १६. सम्यक् Sy.
१७. VM. ignores उ ॥ उ इति पूरणः Sy.
१८. सर्वस्यापि शिरसः। तृतीयार्थे पञ्चमी। स्वस्वशिरसेत्यर्थः। सूर्यं वहन्तीत्यनेन सम्बध्यते। अथवा शिरःशब्देन तद्वान् पदार्थो लक्ष्यते। वीप्सया तस्य कात्स्न्र्यमुच्यते। सर्वस्य श्रेष्ठमित्यर्थः Sy.
१९. ०शा जजदिति A. जगतः is suggested for जगतीतः॥ जङ्गमस्य Sy.
२०. स्वाव० A. २१. च is omitted by M.
२२. सप्तस्य M.
२३. 'अभितः परितः समया' इत्यादिना (VPa. 2. 3. 2. 1.) समयाशब्दयोगाद् द्वितीया Sy. २४. सप्तसंख्याकाः Sy.
२५. अन्यनिरपेक्ष्येण स्वयमेव सरन्त्यः Sy.
२६. कल्याणाय Sy. २७. हरितवर्णा अश्वाः Sy.
२८. रथे वर्तमानम् Sy.

तच्चक्षुर्देवहितं शुक्रमुच्चरत् । पश्येम शरदः शतं जीवेम शरदः शतम् ॥ १६॥

तच्चक्षुः । तत् । प्रकाशकम् । देवैर्निहितम् । ज्वलत् । उदुद्यत् । पश्येम । शरदः । पश्यन्तश्च जीवेम । शरदः । शतम् ।

काव्येभिरद्भ्या यातं वरुण द्युमत् । मित्रश्च सोमपीतये ॥ १७ ॥

काव्येभिः । स्तोत्रैः । हे अहिसितौ ! आगच्छत । दीप्तियुक्तम् । वरुण ! मित्र । च । सोमपानाय ।

दिवो धामभिर्वरुण मित्रश्चा यातम द्रुहा । पिबतं सोममातुजी ॥ १८ ॥

दिवः । दिवः । स्थानेभ्यः । मित्रावरुणौ । आगच्छतम् । अद्रोग्धारौ । पिबतम् । च । सोमम् । आहन्तारौ शत्रूणाम् ।

---

१. तं A. प्रसिद्धम् Sy. एतैर्यन्नैर्यो महावीरोऽस्माभिः स्तुतस्तत् Mah. योऽयं महावीरोऽस्माभिः स्तुतस्तत् U.

२. सर्वस्य प्रकाशकम् Sy. जगतां नेत्रभूतमादित्यरूपम् Mah. आदित्यरूपं चक्षुः U.

३. ०हित A. देवानां हितम् । तेषां हविःस्वीकारस्यैतदधीनत्वात् । अथवा देवेन हितम् Sy. देवैर्हितं स्थापितम् । यद्वा देवानां हितं प्रियम् Mah. देवैर्निहितं स्थापितं देवानां वा हितम् U.

४. निर्मलं सूर्यमण्डलम् Sy. शुक्लं पापासंसृष्टं शोचिष्मद्वा Mah. असंसृष्टं पाप्मभिः शोचिष्मद्वा U.

५. उत् M. उद्यत् is suggested for उदुद्यत् ॥ उद्गच्छति Sy. पुरस्तात्पूर्वस्यां दिशि । उच्चरद् उच्चरति, उदेति Mah. प्राच्यां दिशि....उदितम् U.

६. तस्य प्रसादात्....वयं पश्येम, शतवर्षपर्यन्तं वयमव्याहतचक्षुरिन्द्रिया भवेम । प्रार्थनायां लिङ् Mah तत् प्रसादाच्च पश्येम U.

७. शतसंवत्सरम् Sy. वर्षाणि ।.....अत्यन्तसंयोगे द्वितीया Mah.

८. अपराधीनजीवना भवेम । शतं शरदः शृणुयाम स्पष्टश्रोत्रेन्द्रिया भवेम । शतं शरदः प्रब्रवाम, अस्खलितवागिन्द्रिया भवेम । शतं शरदोऽदीनाः स्याम न कस्याप्यग्रे दैन्यं कुर्याम । शताच्छरदः शतवर्षोपर्यपि भूयश्च बहुकालं पश्येमेत्यादि योज्यम् Mah. .... अस्खलितवागिन्द्रिया भवामः ।....भूयश्च बहुतरं कालं च शरदः शतात् U. This stanza= YV. 36.24. ९. पुनः श्रुतिरादरार्था Sy.

१०. पृष्ठ्याभिष्लवषडहयोः स्तोमनिमित्त आवापे 'काव्येभिरदाभ्येति तृचः' (ĀŚS. 7. 5.) इति हि सूत्रितम् Sy. ११. काव्ये हि A.

१२. स्तोत्रैः A. अस्मत्कृतैः स्तोत्रैः Sy.

१३. हि M. अदम्भनीयौ Sy.

१४. ०च्छतम् is suggested for ०च्छत ।

१५. ०युक्त ! is suggested for ०युक्तं ॥ द्युतिमन्तौ युवाम् Sy. १६. द्युलोकसम्बन्धिभ्यः Sy. १७. धामभिर्धामभ्यः स्थानेभ्यः। पञ्चम्यर्थे तृतीया। अथवा धामभिस्तेजोभिर्विभूतिभिः सार्धम् Sy. १८. हे वरुण ! त्वं मित्रश्च Sy. १९. अस्मद्यज्ञम्..Sy. २०. ०रौ A.

२१. आवह० M. शत्रूणां सर्वतो हिंसकावादातारौ वा घातानाम् । एवंरूपौ सन्तौ 'तुजि पिजि हिंसाबलादाननिकेतनेषु' अत्र हिंसायामादाने वा वर्तते Sy.

आ यातं मित्रावरुणा जुषाणावाहुतिं नरा । पातं सोममृतावृधा ॥ १६ ॥

उत्तरा निगदसिद्धाः—

(आ यातम्)

VII. 67.

प्रति वां रथं नृपती जरध्यै हविष्मता मनसा यज्ञियेन ।
यो वां दूतो न धिष्ण्यावजीगुरच्छा सूनुर्न पितरा विवक्मि ॥ १ ॥

प्रति वाम् । प्रतिगच्छामि । युवयोः । रथम् । हे नृपती ! स्तोतुम् । हविष्मता । मनसा । यज्ञोपयुक्तेन । यो रथः । वाम् । इति । वा । धिषणाहविषीमं लोकम् । प्रापयति । किं च पुत्रः । इव । पितरावश्विनावहम् । अभिष्टौमि ।

---

१. उत्तराणिगदसिद्धाः A. ०सिद्धा is suggested for ०सिद्धाः ॥

२. The *pratika* is supplied by the Editor. VM. does not explain this stanza because it is very easy. Sy. explains this stanza in the following manner:— हे मित्रावरुणा ! मित्रावरुणौ ! हे नरा ! यागनेतारौ ! आहुतिं सोमलक्षणं जुषाणौ प्रियमाणौ सन्तावायातम् । आगच्छतं यज्ञम् । आगत्य च । हे ऋतावृधा ! यज्ञस्य वर्धकौ युवां सोमं पातं पिबतम् ।

३. 'प्रति वां रथम्' इति दशर्चं द्वादशं सूक्तम् । 'प्रति वां दशाश्विनं तु तत्' इत्यनुक्रमणिका (KSA. 37. 67. p. 26) । ऋषिर्वसिष्ठः । छन्वस्त्रिष्टुप् । तुह्यादिपरिभाषयैतदादीन्यष्ट सूक्तान्यश्विदेवत्यानि । प्रातरनुवाक आश्विने क्रतौ त्रैष्टुभे छन्वस्येतदादिसूक्तसप्तकं द्वितीयवर्जं शंस्यम् । तथा च सूत्रम्—'प्रति वां रथमिति सप्तानां द्वितीयामुद्धरेत्' (ĀŚS. 4. 15.) इति

४. यवयोः A.

५. हे नृणामृत्विग्यजमानानां स्वामिनौ ! अश्विनौ ! Sy. ६. जरा स्तुतिः । स्तोतुम् Sy.

७. केन साधनेन ? इति तदुच्यते, हविर्युक्तेन Sy.

८. स्तोत्रेण Sy.

९. यज्ञार्हेण Sy.

१०. यो omitted in A.

११. युवाम् Sy.

१२. इतिव A. दूतः । इव is suggested for इति वा ॥

१३. धिषणा स्तुतिः Sy.

१४. जागरयति प्रबोधयति Sy.

१५. मातापितरौ Sy.

१६. VM. seems to explain अच्छ and विवक्मि together as अभिष्टौमि ॥ अस्मान् प्रति गन्तुं तं रथमच्छा विवक्मि आवक्मि .... अथवात्र यो रथो युवामजीगस्तेन रथेन गन्तुं बुध्यमानौ युवामच्छा विवक्मीति वा योज्यम् Sy.

अशोच्यग्निः समिधानो अस्मे उषो अदभ्रन्तमसश्चिदन्तात् ।
अचेति केतुरुषसः पुरस्ताच्छ्रिये दिवो दुहितुर्जायमानः ॥ २ ॥

अशोचि । प्रजज्वाल । अग्निः । समिध्यमानः । अस्मासु । उषसि तथोपदृश्यन्ते औषसैस्तेजोभिः । अन्धकारस्य । अन्तान् । अचेति । च । तेषाम् । उषसः । प्राच्यां दिश्यन्तरिक्षे । श्रयणाय । दिवः । दुहितुः । प्रादुर्भवति ।

अभि वां नूनमश्विना सुहोता स्तोमैः सिषक्ति नासत्या विवक्वान् ।
पूर्वीभिर्यातं पथ्याभिरर्वाक्स्वर्विदा वसुमता रथेन ॥ ३ ॥

अभि वाम् । अभिसेवते । अस्मिन् काले । इमावश्विनौ । कल्याणस्तोता । स्तोमैः । वचनकुशलः । पुनरातनैः । यात । मार्गैः । अभिमुखम् । सर्वज्ञः । युवाम् । धनवता । रथेन ।

अवोर्वां नूनमश्विना युवाकुर्हुवे यद्वां सुते माध्वी वसूयुः ।
आ वां वहन्तु स्थविरासो अश्वाः पिबाथो अस्मे सुषुता मधूनि ॥ ४ ॥

अवोर्वाम् । रक्षकयोः । युवयोः । इदानीम् । अश्विनौ ! युवां कामयमानोऽहमस्मि । ततो ह्वयामि । यदा । वाम् । सुतसोमे । मधुमन्तौ ! वसुकामः । तदानीमावहन्तु । वाम् । दृढाः । अश्वाः । पिबतम् । अस्मासु । सुष्ठु तान् । सोमान् ।

---

१. दीप्यते Sy. २. अनि A.
३. समिध्यमानः सन् Sy. ४. अस्माभिः Sy.
५. उषद्दृश्यन्ते सर्वैः Sy.
६. अन्तानि A. अन्ताः is suggested for अन्तान् ॥ पर्यन्ताः प्रदेशाः Sy.
७. पवेति M. ज्ञायते । यस्मादेवं तस्माद्युवयोरागमनसमयः । अतः आगच्छतमिति शेषः Sy. ८. सर्वस्य प्रज्ञापकः सूर्य Sy.
९. पूर्वस्यां दिशि Sy. १०. शोभायै Sy.
११. अभिद्रां A. १२. हे अश्विनौ ! Sy.
१३. स्तोता is missing in A. सुष्ठु देवानां स्तोता Sy. १४. स्तुतीनां वक्ताहम् Sy.
१५. पुनरातनैः A. पुरातनैः is suggested for पुनरातनैः ॥ पूर्वैर्मुनिभिः Sy.
१६. यातम् is suggested for यात ॥ गच्छतम् Sy. १७. अस्मदभिमुखम् Sy.
१८. स्वर्गमुदकं वा जानता स्वरणवता वा Sy.
१९. VM. ignores नासत्या ॥ हे नासत्या ! सत्यभूतौ ! Sy. २०. युवां A. २१. रक्षित्रोः Sy. २२. अत्र स्वभूतौ भवामीति शेषः Sy.
२३. अश्विनं A. २४. स्तौमि Sy.
२५. यद्यस्मात् Sy. २६. युवाम् Sy.
२७. अभिषुते सोमे Sy. २८. हे मधुरस्य सोमस्यार्हौ मधुविद्यासम्बन्धिनौ ! वा Sy.
२९. स्थूलाः प्रवृद्धाः । एतयोरतिप्रवृद्धत्वाच्छीघ्रगतयोरपेक्षितत्वाच्च स्थविरैरेव भाव्यम् Sy.
३०. आगमनानन्तरमस्माभिः Sy.
३१. सुष्ठुतात् A. सुष्ठु सुतान् is suggested for सुष्ठु तान् ॥ सुष्ठ्वभिषुतानि Sy.
३२. सोमान् is missing in A. मधुररसान् Sy.

प्राचीभु देवाश्विना धियं मेऽमृधां सातये कृतं वसुयुम् ।
विश्वा अविष्टं वाज आ पुरंधीस्ता नः शक्तं शचीपती शचीभिः ॥ ५ ॥

प्राचीम्[1] । उन्मुखम् । एव । हे देवौ[2] ! अश्विनौ ! मदीयम्[3] । कर्म । रक्षोभिरहिंसितम्[5] । भजमानाय[6] । कुरुतम्[7] । धनकामं मदीयं कर्म भजत । विश्वाश्च । रक्षध्वमस्माकम् । अन्ने[8] । प्रवृत्ता बुद्धिः[9] । तौ[10] । अस्मान् । शक्तान्[11] कुरुतम् । प्रज्ञावती[12] । प्रज्ञाभिः[13] ।

अविष्टं धीष्वश्विना न आसु प्रजावद्रेतो अहूयं नो अस्तु ।
आ वां तोके तनये तूतुजानाः सुरत्नासो देववीतिं गमेम ॥ ६ ॥

अविष्टम्[14] । रक्षत[15] । कर्मसु । अश्विनौ । अस्मान् । एषु । प्रजायुक्तम्[16] । रेतः । अभूयमुन्मुखम्[17] । अस्माकम् । अस्तु । आगमे[18] । युवयोः[19] । यज्ञम्[20] । पुत्रे[21] । तत्पुत्रे च तयोर्लोभाय[22] । त्वरमाणाः । शोभनधनाः । प्रजार्थमुपगच्छाम[23] इत्यर्थः ।

---

१. ऋज्वीम् Sy.
२. देवा A.
३. मम Sy.
४. बुद्धिं स्तुतिं कर्म वा Sy.
५. अहिंसिताम् Sy.
६. लाभाय Sy.
७. उचितां कुरुतम् Sy.
८. धनमिच्छन्तीम् Sy.
९. सङ्ग्रामेऽपि Sy.
१०. बुद्धीः is suggested for बुद्धिः ॥ अस्मदीया बुद्धीः Sy.
११. तौ A. युवाम् Sy.
१२. शक्तात् Sy. प्रयच्छतं धनमिति शेषः Sy.
१३. प्रज्ञापती is suggested for प्रज्ञावती ॥ हे कर्मणां पालकौ ! शमीति कर्मनाम Ngh. 2. 11.
१४. अस्मदीयैः स्तुत्यादिरूपैः कर्मभिः Sy.
१५. VM. ignores आ ॥ Sy. explains आ as अभि ।
१६. आवि० M.
१७. रक्षतम् is suggested for रक्षत ।
१८. पुत्राद्युपेतं पुत्रोत्पादनसमर्थम् Sy.
१९. अहूयम् is suggested for अभूय० ॥ अक्षीणम् Sy.
२०. आगन्मे A. आगमेम is suggested for आगं मे ॥ आगच्छेम Sy.
२१. युवयोरनुग्रहाल्लब्धे Sy.
२२. देवानां वीतिः प्राप्तिर्यस्मिंस्तादृशं यज्ञम् Sy.
२३. तत्पुत्रे is missing in A.
२४. तयोर्लोभाय is suggested for तयोर्लोभाय ।
२५. अभिमतं धनं प्रयच्छन्तः Sy.
२६. The passage प्रजार्थमुपगच्छाम इत्यर्थः refers to आगमेम and तयोर्लोभाय ।

एष स्य वां पूर्वगत्वेव सख्ये निधिर्हितो माध्वी रातो अस्मे ।
अहेळता मनसा यातमर्वागश्नन्ता हव्यं मानुषीषु विक्षु ॥ ७ ॥

एष स्यः । सः । एषः । वाम् । पूर्वगत्वेव यो वयोः सन्धानाय प्रथमं गच्छति । स्वसख्यसिद्धयर्थम् । सोममयो निधिः । निहितः । अस्माकम् । अभिप्रत्तः । हे मधुमन्तौ ! अहे इति स्पष्टम् ।

एकस्मिन्योगे भुरणा समाने परि वां सप्त स्रवतो रथो गात् ।
न वायन्ति शुभ्वो देवयुक्ता ये वां धूर्षु तरणयो वहन्ति ॥ ८ ॥

एकस्मिन् । युवयोर्द्वयोः समाने । एकस्मिन् । उद्योगे । हे क्षिप्रकारिणौ ! वाम् । परिगमयति । सप्त । नदीः । रथः सप्त हि नदीरतिक्रम्याश्विनावागच्छतः । न । शुष्यन्ति । शोभनभवनाः । देवैर्युक्ताः । ये । वाम् । धूर्षु युक्ताः । अश्वाः । वहन्ति ।

---

१. युवयोः प्रियत्वेन प्रसिद्धः सोमः Sy.
२. पुरतो धीयमानः Sy. ३. युवयोः Sy.
४. पुरतो गन्ता दूत इव । स यथा प्रियं जनयन् स्वामिनः पुरतो वर्तते तद्वदित्यर्थः Sy.
५. ०गस्त्वेव तयोः M. यो द्वयोः is suggested for यो वयोः ॥
६. गच्छन्ति A ७. सख्यार्थम् Sy.
८. सोमयोः M.
९. न्निधिः A. निधिस्थानीयः Sy.
१०. पुरतः स्थापितः Sy.
११. अस्माभिः Sy.
१२. ०प्रेतः M. ०प्रत्तः is suggested for ०प्रक्तः ॥ दत्तः सङ्कल्पितः । सन्निहितः Sy.
१३. ०मन्तः M. हे मधुप्रियौ ! अश्विनौ ! Sy.
१४. अक्रुध्यता Sy.
१५. अहे इति ते स्पष्टः A. अहेळतेति स्पष्टम् is suggested for अहे इति स्पष्टम् ॥ VM. ignores मनसा । आ । यातम् । अर्वाक् । अश्नन्ता । हव्यम् । मानुषीषु and विक्षु ॥ Sy. explains these words in the following manner :— मनसानुग्रहयुक्तेन चेतसार्वागस्मदभिमुखमा यातम् । आगच्छतम् । अश्नन्ता हव्यं हविः सोमादिकमश्नन्तावभ्यवहरन्तौ । कुत्र ? मानुषीषु विक्षु मनुष्यरूपासु प्रजासु वर्तमानम् ।
१६. समानं A. उभयसाधारणे Sy.
१७. योगे अस्मद्विषये सति Sy.
१८. हे सर्वस्य भर्तारौ ! Sy. १९. युवयोः Sy.
२०. परग० A. परिगच्छति शीघ्रमागच्छतीत्यर्थः Sy.
२१. सप्त । नदीः । रथः is missing in A. सर्पणस्वभावाः सप्तसंख्याकाः वा गङ्गाद्याः Sy.
२२. ०वंग० A.
२३. शीघ्रगमने (न) श्राम्यन्ते Sy.
२४. तद्रथानुकूलाः सुभवनाः Sy.
२५. देवाभ्यां युवाभ्यां युक्ताः Sy.
२६. अश्वाः Sy. २७. युवाम् Sy.
२८. रथस्य तरणयस्तारकाः शीघ्रगन्तारः Sy.

असश्चता मघवद्भ्यो हि भूतं ये राया मघदेयं जुनन्ति ।
प्र ये बन्धुं सूनृताभिस्तिरन्ते गव्या पृञ्चन्तो अश्व्या मघानि ॥ ९ ॥

असश्चता । असमवर्जितौ । हविष्मन्द्यः । हि युवाम् । भवतम् । येन । धनेन । मंहनीयं देवमन्नम् । प्रेरयन्ति । ये च । बन्धुमागतं दरिद्रम् । वाग्भिः । वर्धयन्ति । मंहनीयानि । गवाम् । अश्ववृन्दानि । सम्पर्चयन्त इति ।

नू मे हवमा शृणुतं युवाना यासिष्टं वर्तिरश्विनाविरावत् ।
धत्तं रत्नानि जरतं च सूरीन्युयं पात स्वस्तिभिः सदा नः ॥ १० ॥

नू मे । क्षिप्रम् । मम । आह्वानम् । आशृणुतम् । युवां तौ । प्राप्नुतम् । मार्गम् । अन्नयुक्तं तम् । अश्विनौ ! धत्तम् । रत्नानि । वयसा जरयन्तम् । च । स्तोतृन् ।

---

१. समव० A. असंवर्जितौ is suggested for असमव० ॥ कुत्राप्यसज्यमानौ युवाम् Sy.
२. ०ष्मद्भ्यः is suggested for ०ष्मन्द्यः ॥ धनवद्भ्यो हविष्मद्भ्यो यजमानेभ्यस्तेषामर्थाय Sy.
३. तेभ्य एव अनुरक्तौ भवतम् Sy.
४. धनेन निमित्तेन राया युक्ता वा Sy.
५. देयम० is suggested for देवम० ॥ दातव्यं मघं धनं हविर्लक्षणं वा Sy.
६. प्रेरयन्ति यच्छन्ति Sy.
७. स्नेहेन बध्नातीति बन्धुः । तं स्वसम्बन्धिनम् । अथवा फलेन बध्नातीति बन्धुरध्वर्यादिः । तम् Sy.
८. ०मागं A.
९. वाभि A.
प्रियसत्यात्मिकाभिः Sy.
१०. प्रवर्धयन्ति । प्रपूर्वस्तिरतिर्वर्धनार्थः Sy.
११. धनानि Sy.
१२. The addition of वृन्दानि after गवाम् is suggested. गोरूपाणि Sy.
१३. अश्वरूपाणि च Sy.
१४. संवर्च० A. अर्थिभ्यः प्रयच्छन्तः । तेभ्यो मघवद्भ्यो भूतम् Sy.
१५. अद्य Sy.
१६. अस्मदीयम् Sy.
१७. स्तुतिम् Sy.
१८. युवा तौ A. युवानौ is suggested for युवां तौ ॥ हे नित्ययुवानौ ! युवाम् Sy.
१९. प्राप्नुत M. आगच्छतम्
२०. गृहम् Sy.
२१. हविर्युक्तम् Sy.
२२. ०ना A.
श्रुत्वा च हे अश्विनौ ! Sy.
२३. दत्तम् Sy.
२४. आगत्य च रमणीयानि धनानि Sy.
२५. पयसा M.
२६. जरतं वर्धयतम् । धातूनामनेकार्थत्वात् । शिष्टं स्पष्टम् Sy.

VII. 68.

आ शुभ्रा यातमश्विना स्वश्वा गिरो दस्रा जुजुषाणा युवाकोः ।
हव्यानि च प्रतिभृता वीतं नः ॥ १ ॥

आ शुभ्रा[2] । आयातम्[3] । शोभनौ[4] ! अश्विनौ । शोभनाश्वौ । स्तुतिः[6] । दर्शनीयौ । सेवमानौ[7] । युष्मत्कामस्य[9] । हव्यानि[10] । च । प्रतिसम्भृतानि । खादतम्[11] । नः[12] ।

प्र वामन्धांसि मद्यान्यस्थुरर गन्तं हविषो वीतये मे ।
तिरो अर्यो हवनानि श्रुतं नः ॥ २ ॥

प्र वाम्[14] । प्रस्थितानि[15] । युवयोः[16] । मदकराणि[17] । अन्नानि हविर्धानात् । पर्याप्तम्[19] । गच्छतम्[20] । मम[21] । हविषः[22] । पानाय । तिरस्कृत्य । शत्रून्[24] । हवनानि । श्रुतम्[25] । अस्माकम्[26] ।

प्र वां रथो मनोजवा इयर्ति तिरो रजांस्यश्विना शुतोतिः ।
अस्मभ्यं सूर्यावसू इयानः ॥ ३ ॥

प्र वाम्[27] । प्रेरयति[28] । वाम्[28] । मनोवेगः । रथः । तिरस्कुर्वन्[29] । लोकान् । अश्विनौ ! शतरक्षणः[30] । अस्मदर्थम्[31] । हे सूर्यायावासयितारौ ! गच्छन्[32] ।

---

१. 'आ शुभ्रा यातम्' इति नवर्चं त्रयोदशं सूक्तं वसिष्ठस्यार्षमाश्विनम् । आदितः सप्त विराजोऽष्टमीनवम्यौ त्रिष्टुभौ । अनुक्रम्यते च— 'आ शुभ्रा नव सप्ताद्या विराजः' (KSA. 37. 68. p. 26.) इति । सूक्तविनियोगो लैङ्गिकः Sy. २. शुभ्राः A. M.

३. अस्मद्यज्ञमागच्छतम् Sy.

४. हे दीप्तौ ! Sy. ५. शोशना० A.

६. स्तुतीः is suggested for स्तुतिः ॥

७. शत्रूणामुपक्षपयितारौ युवाम् Sy.

८. सेवमानौ भवतमिति शेषः Sy.

९. युवां कामयमानस्य मम Sy.

१०. हवींषि Sy. ११. भक्षयतम् Sy.

१२. नः is suggested for न ॥ न केवलं स्तुतिः किन्तु नोऽस्मदीयानि Sy.

१३. 'प्र वामन्धांसि' इत्येषाश्विनशस्त्रयाज्या । सूत्रितञ्च 'प्र वामन्धांसि मद्यान्यस्थुरुभा पिबतमश्विना' (ĀSS. 6. 5.) इति Sy.

१४. हे अश्विनौ ! Sy.

१५. प्रास्थिषत । गृहीतान्यासन्नित्यर्थः Sy.

१६. युवाभ्याम् Sy. १७. मदजनकानि Sy.

१८. सोमलक्षणानि अन्नानि Sy.

१९. अत्यर्थं शीघ्रम् Sy. २०. आगच्छतम् Sy.

२१. अतो युवां मम Sy. २२. हर्ष A

२३. अरेरस्मद्विरोधिनः Sy. २४. भुव० A.

२५. शृणुतम् । श्रुतमित्यस्य वाक्यादित्यादिनिघातः Sy. २६. अस्मदाह्वानमित्यर्थः Sy.

२७. आगच्छतमद्यज्ञम् । अथवा वां प्रेरयति गमनाय Sy.

२८. वाङ् A. युवयोः Sy.

२९. तिरस्तिरस्कृत्य अतिक्रम्य Sy.

३०. अपरिमितास्मद्विषयरक्षणः Sy.

३१. वस० A. हे सूर्यायाः सह रथे वसन्तौ Sy.

३२. याच्यमानः सन् Sy.

अयं ह यद्वां देवया उ अद्रिरूध्वो विवक्ति सोमसुद्युवभ्याम् ।
आ वल्गू विप्रो ववृतीत हव्यैः ॥ ४ ॥

अयं ह । अयम् । ह । यदा । वाम् । देवौ कामयमानः । ग्रावा । उन्मुखशब्दं करोति । सोमसत् । युवाभ्याम् । तदानीं वल्गनशीलौ । मेधावी स्तोता । आववृत्याद् युष्मन् । हविर्भिः ।

चित्रं ह यद्वां भोजनं न्वस्ति न्यत्रये महिष्वन्तं युयोतम् ।
यो वामोमानं दधते प्रियः सन् ॥ ५ ॥

चित्रं ह । पूजनीयम् । ह । यत् । युवयोः । अन्नम् । अस्ति तत्सर्वम् । ममत्वयुक्तम् । अत्रय ऋषये । नियुयोतं प्रायच्छतम् । यः । वामम् । रक्षणम् । अधारयत् । प्रियः । भवन्नप्रिः ।

उत त्यद्वां जुरते अश्विना भूत्यवानाय प्रतीत्यं हविर्दे ।
अधि यद्वपुरितऊति धत्थः ॥ ६ ॥

उत त्यत् । अपि च । तत् । वाम् । स्तुवते । अश्विनौ ! अभवत् । च्यवानाय । प्रतित्यं

---

१. युवां प्रति Sy.
२. देवौ युवां कामयमानः Sy.
३. अभिषवग्रावा Sy.
४. उन्मुखः is suggested for उन्मुख ॥ उन्नतः सन् Sy.
५. विवक्ति उच्चैः शब्दयति Sy.
६. ०सुत् is suggested for ०सत् ॥ सोमम् अभिषुण्वन् Sy.
७. युवाभ्यामर्थायाभिषुण्वन्निति सम्बन्धः । एवं कुर्वन् Sy.
८. तदानीम् is written twice in M.
९. सुन्दरौ Sy.
१०. यजमानः Sy.
११. आवर्तयति Sy.
१२. युवाम् is suggested for युष्मन् ॥
१३. VM. ignores उ ॥ उ इति पूरणः Sy.
१४. हे अश्विनौ ! Sy. १५. चायनीयम् Sy.
१६. खलु Sy. १७. धनम् Sy.
१८. अस्ति तदस्मभ्यं दत्तमित्यर्थः Sy.
१९. ममहत्त्व० A. महत्त्व० is suggested for ममत्व० ॥ ऋबीसम् Sy.
२०. अथ तयोः स्तुतिः । अत्रय एतन्नामकाद्वेः । पञ्चम्यर्थे चतुर्थी । तस्मात् Sy.
२१. युयोतं M. पृथक्कुरुतम् Sy.
२२. अत्रिः Sy.
२३. वाम् is suggested for वामं ॥ युवभ्यामेव कृतम् Sy.
२४. रक्षणं सुखम् Sy.
२५. धारयति Sy.
२६. स्तोतृत्वाद् युवाभ्यां प्रियभूतः सन् Sy.
२७. VM. ignores नु ॥ न्विति पूरणः Sy.
२८. युवयोः कर्म कुर्वते Sy.
२९. जूर्णाय Sy.
३०. अभूत् Sy.
३१. चपाना० M. च्यवानाय is suggested for च्यपानाय ॥ एतन्नामकाय महर्षये Sy.
३२. प्रतीत्यं is suggested for प्रतित्यं ॥ तस्य रूपस्य प्रत्यापत्यै Sy.

प्रतिगमनं वृद्धस्य पुनर्युवत्वं प्रति गमनम्। हविषो दात्रे। अधिधस्थः। अयमस्मात्। रूपं जीर्णस्य। इधोमुखम्।

उत त्यं भुज्युमश्विना सखायो मध्ये जहुर्दुरेवासः समुद्रे।
निरीं पर्षदरावा यो युवाकुः ॥ ७ ॥

उत त्यम्। अपि च। तम्। भुज्युम्। अश्विनौ! सखायः। समुद्रमध्ये। त्यक्तवन्तः। दुर्गमनाः। तमेनम्। पारं प्रति निष्पर्षत। अरावाश्वो गमनवाद्रथो वा। यः। युष्मत्कामः। अरणं गमनं तद्वानरावेति।

वृकाय चिज्जसमानाय शक्तमुत श्रुतं शयवे हूयमाना।
यावध्न्यामपिन्वतमपो न स्तर्यं चिच्छक्त्यश्विना शचीभिः ॥ ८ ॥

वृकाय। वृकाय। अवि। जसमानाय। विमोचने शक्तावभवतम्। अपि च। अवृणुतम्। शयवे।

---

१. यस्थः A. ०धत्थः is suggested for ०धस्थः M. अध्यधत्तम्। 'युवं च्यवानमश्विना जरन्तं पुनर्युवानं चक्रथुः शचीभिः' (RV. 1. 117. 13.) इत्यादिषु च्यवानस्य युवयोर्नवीकरणं प्रसिद्धम् Sy.

२. यस्मात् is suggested for अयमस्मात्।

३. अधोमु० M. इतोमुखम् is suggested for इधोमुखम्॥ इतो गमनाख्यं मृत्योः सकाशादितः प्राप्तिरूपम् Sy.

४. एतन्नामानम् Sy.

५. भुज्युसखिभूताः Sy.

६. VM. seems to explain together समुद्रे and मध्ये as समुद्रमध्ये॥ समुद्रोदकस्य मध्ये Sy. ७. दुष्टगमनाः Sy

८. ईमेनं समुद्रमध्ये क्षिप्तम् Sy.

९. निरपारयतम् Sy.

१०. ०वश्वो A. अरणशानभिगन्ता च तमेनं निरपारयतम् Sy.

११. ०वान्रथो is suggested for ०वाद्रथो।

१२. यः is missing in M. भुंज्युः Sy.

१३. युवां कामयिता Sy.

१४. The passage अरणं गमनं तद्वानरावा should immediately follow निष्पर्षत् and precede अरावाश्वो०

१५. अत्राश्विनेषु सूक्तेषु कथाः सूच्यन्ते। अश्रिभुज्वादीनामग्निजलादिभ्यो रक्षणरूपास्ताः सर्वा महता प्रपञ्चेनास्माभिः 'नासत्याभ्यां बर्हिरिव' (RV. 1. 116. 1.) इत्यत्र प्रपञ्चिताः। तास्तत्र द्रष्टव्याः Sy.

१६. धनावात्रे। अभिलषत इत्यर्थः...अथवा परेभ्यो धनानि प्रयच्छते। यद्वा वृकाय वृकवद्धिंसकाय। एतन्नामकाय Sy.

१७. अपि is suggested for अवि। चिदिति पूरणः Sy.

१८. कर्मभिरुपक्षीयमाणायर्षये Sy.

१९. गक्ता० A. अभिमतं धनमवत्तम्। शकेर्दानार्थस्य लुङ्येतद्रूपम्। अडभावश्छान्दसः Sy.

२०. तृणुतं A. अभ्रृणुतम् is suggested for अवृणुतम्।

२१. एतन्नामकायर्षये Sy

हूयमानः[1] । शयोर्गाम् । अपिन्वतक्षारयतं[2] पयः[3] । उदकानि[4] । इव । निवृत्तप्रसवा[5] । अपि । आत्मीयया[6] शक्त्या[7] । प्रज्ञाभिश्च[8] ।

एष स्य कारुर्जरते सूक्तैरग्रे[9] बुधान उषसां सुमन्मा[10] ।
इषा तं वर्धदघ्न्या पयोभिर्यूयं पात स्वस्तिभिः सदा नः ॥ ६ ॥

एष स्यः । एषः । स्तोता[11] । स्तौतिः[12] । सूक्तैः । उषसाम् । अग्रे[13] । बुध्यमानः । शोभनमननः[14] । त शयुम् । आत्मीया गौः । पयसा । अवर्धयदिति[15] ।

VII. 69.

आ वां रथो रोदसी बद्बधानो हिरण्ययो वृषभिर्यात्वश्वैः[16] ।
घृतवर्तनिः पविभी रुचान इषां वोळ्हा नृपतिर्वाजिनीवान् ॥ १ ॥

आ वाम्[17] । आयातु[18] । युवयो । द्यावापृथिव्यौ । वाधमान । हिरण्मय । पुम्भि[19] । अश्वैः[20] । उदक-युक्तमार्गः[21] । पविभिः[22] । दीप्यमानः । अन्नानाम्[23] । वोळ्हा । नृणा[24] पालयिता । बलवानिति[25] ।

---

१. भूयमानोः A. ०मानौ is suggested for ०मानः M. आहूयमानौ युवाम् Sy.
२. ०पिबत० M. ०न्वतमक्षार० is suggested for ०न्वतक्षार० ॥ अपूरयतं क्षीरेण Sy.
३. यः A. ४. अद्भिरिव नद्यः[4] । तां यथोदकेन पूरयतस्तद्वत् Sy.
५. ०सवाम् is suggested for ०सवा॥ वृद्धामपि Sy. ६. अध्यात्मी० A.
७. शक्ती शक्त्या सामर्थ्येन दोहनलक्षणेन युक्तां कृत्वा Sy. ८. युष्मदीयैः कर्मभिः Sy.
९. VM. ignores यो and अश्विना ॥ यो युवाम् । हे अश्विनौ ! 'शश्वे चिन्नासत्या शचीभिर्नव्यं रयिं पिप्यथुर्गाम्' (RV. 1, 11 6. 22.)इत्यादि ह्युक्तम् Sy.
१०. स्तोता A.
११. स्तौति is suggested for स्तौतिः ।
१२. प्रातःसवने Sy.
१३. शोभनमतिः सुष्टुतिर्वा Sy.
१४. ०र्धयिवि० A. वर्धयतम् । वचनव्यत्ययः । अघ्न्या हन्तव्या गौश्च वर्धत वर्धयतु । अथवैकमेव वाक्यम् । अघ्न्या गौर्वसिष्ठस्य प्रतिनियताग्निहोत्रार्था गोरिषाऽन्नेन घृतादिनेत्यर्थः। पयोभिश्च त वसिष्ठं वर्धत् वर्धयतु । एवमात्मानं परोक्षेण निर्दिदेश । शिष्टं स्पष्टम् Sy. १५. VM. ignores स्यः and इषा ॥ स प्रसिद्धो वसिष्ठः । इषा अन्नेन Sy.
१६. 'आ वां रथः' इत्यष्टर्चं चतुर्दशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमाश्विनम् । अनुक्रम्यते च—'आ वां रथोऽष्टौ' (KSA. 37. 69. p. 26.) इति । प्रातरनुवाकाश्विनशस्त्रयोर्विनियोग उक्तः Sy. १७. हे अश्विनौ ! Sy.
१८. आयातु यज्ञमस्मदीयम् Sy. १९. पुं हिः A. युवभिः Sy. २०. अश्वैर्युक्तः सन् Sy.
२१. मार्गं M. घृतमुदकं वर्तन्यां यस्य तादृशः Sy.
२२. रथनेमिभिर्मधुपात्रैर्वा Sy.
२३. यजमानैर्दत्तानां हविषां 'वाहको वातव्यानां वाऽन्नानाम् Sy. २४. यजमानानां स्वामी Sy.
२५. अन्नवान् Sy. २६. VM. ignores रथः

स पंप्रथानो अभि पञ्च भूमा त्रिबन्धुरो मनसा यातु युक्तः।
विशो येन गच्छथो देवयन्तीः कुत्रा चिद्यामंमश्विना दधाना ॥ २ ॥

सः पप्रथानः। पञ्च। जनान्। धनप्रदानेन विस्तारयन्। त्रिबन्धुरः। मनसा। युक्तः। अभ्यायातु। मनुष्यान्। येन। अभिगच्छथः। देवकामान्। यत्र कुत्र। चिदपि। गमनम्। अश्विनौ। कुर्वन्तौ।

स्वश्वा यशसा यातमर्वाग्दस्रा निधिं मधुमन्तं पिबाथः।
वि वां रथो वध्वा३ यादमानोऽन्तान्दिवो बाधते वर्तनिभ्याम् ॥ ३ ॥

स्वश्वा। शोभनाश्वौ। यशस्विनौ। आगच्छतम्। अभिमुखम्। हे दस्रौ! सोमवन्तम्। निधिं प्राग्रम्। पिबतम्। विबाधते। युवयोः रथः। उषसा हस। अभिगच्छन्, यदिरभिक्रमणकर्मा। दिवः। पर्यन्तान्। चक्रपविभ्याम्।

---

१. It seems to be the explanation of भूम ॥ भूतानि सर्वप्राणिनः Sy.

२. प्रथमानः Sy.

३. त्रि वसुन्धरो M.
वन्धुरमुच्चावचं सारथ्यवस्थानं काष्ठमयं तादृशैस्त्रिभिर्युक्तः Sy.

४. अस्मत्स्तुत्या युक्तः Sy.

५. युक्तम् M.

६. यजमानान् प्रति Sy.

७. रथेन Sy.

८. अनाभि० M.

९. यत्र क्वापि Sy.

१०. धारयन्तौ येन विशो गच्छथः स यात्विति Sy.

११. VM. ignores सः ॥ 'स रथः Sy.

१२. हे देवौ! शोभनाश्वेन Sy.

१३. यशसा च Sy.

१४. अस्मदभिमुखम् Sy.

१५. हे शत्रूणामुपक्षयितारौ! Sy.

१६. मधुररसोपेतम् Sy.

१७. निधिवन्निहितं सोमम् Sy.

१८. पिबा० A.
शीघ्रगमनेन पीडयति Sy.

१९. सह is suggested for हस। सूर्यया सह Sy.

२०. गन्तव्यान् प्रति गच्छन्। गमयन्नित्यर्थः। एवं कुर्वन् Sy.

२१. पर्यन्तप्रदेशान् Sy.

२२. वविभ्यम् A.
स्वचक्राभ्याम् Sy.

युवोः श्रियं परि योषावृणीत सूरो दुहिता परितक्म्यायाम् ।
यद्देवयन्तमवथः शचीभिः परि घ्रंसमोमना वां वयो गात् ॥ ४ ॥

[युवोः ।] युवयो । श्रियतम् । पर्यवृणीत । सूर्यदुहिता । युवतिः । परितक्ष्येति रात्रिनाम तस्याः पश्चिमे भागे युवयो. काले । यत् । देवकामम् । रक्षथ । प्रज्ञाभिः । अत्र यास्कः 'पर्यागाद्वा घ्रंसहरवसानेऽह्नम् इति । यजमानाना रक्षणार्थम् । अग्निर्हविर्भूतमनम् । अश्विनौ । परिगच्छतीत्यर्थः ।

---

१. The *pratika* is supplied by the Editor.
वसिष्ठस्येदमार्षम् Dur. वसिष्ठस्य अश्विनावुच्येते SKN.

२. श्रियत M. श्रियम् is suggested for श्रियतम् ॥ श्रयत इति श्री रथः । तं सेवामेव वा Sy. या श्रीस्ताम् Dur.

३. सर्वतः सम्भजते Dur. परि सर्वतः वृणीते युवयोर्दीप्त्या दीप्तिमती भवतीत्यर्थः SKN.

४. VM. explains सूरः and दुहिता together as सूर्यदुहिता ॥ सूर्यस्य दुहिता Sy. योषा, आह कतमेति ? उच्यते, सूरो दुहिता सूर्यस्य दुहिता Dur. सूर्येण दिवि जन्यमानत्वात् सूर्यस्य दुहिता SKN. ५. सर्वदा मिश्रयन्ती योषित् Sy. येयमुषःसञ्ज्ञिका, इयमवृणीत Dur. स्त्री उषआख्या SKN.

६. ०तक्म्येति is suggested for ०तक्ष्येति cf. Ngh. 4. 1. ॥ परितस्तकनवति सङ्ग्रामे यज्ञे वागन्तव्ये Sy. कदा तां श्रियमुषःसञ्ज्ञिकामियमवृणीत ? .रात्र्यामूर्ध्वमर्धरात्रात् । स ह्यश्विनोः कालः Dur. कदा वृणीत ? रात्रौ । ऊर्ध्वमर्धरात्रादश्विनोः काल इति वक्ष्यति । तस्मिन् काले रात्रेः पश्चिमे भाग इत्यर्थः SKN. परितक्म्या रात्रिः । परित एनां तक्म । तक्मेत्युष्णनाम । तकत इति सतः N. 11. 25. ७. तस्या वश्चिमे A.

८. य A, यदा Sy. यस्मात् Dur., SKN.

९. यजमानं प्रज्ञं वा Sy. देवान् यष्टुमिच्छन्तं यजमानम् Dur. देवान् यष्टुमिच्छन्तम्। इच्छयाऽत्र तत्पूर्वकत्वादनुष्ठानं लक्ष्यते । देवानां यष्टारमित्यर्थः SKN. १०. रक्षत M. रक्षथः is suggested for रक्षथ ॥ रक्षथो युवाम् SKN. ११. ०ज्ञाहि A. युवयोर्गमनादिलक्षणैः कर्मभिः Sy. स्वैः कर्मभिः Dur. कर्मभिः स्वैः प्रज्ञाभिर्वा SKN.

१२. VM. seems to explain घ्रंसम् by the quotation of N. only. तदानीं घ्रंसं दीप्तम् Sy. परि प्रति, अहनि प्राप्त इत्यर्थः । पूर्वाह्णो ह्यश्विनोर्यागकालः Dur. यस्मादिति श्रुतेस्तस्मादित्यध्याहारः । तस्मात् परीत्ययं प्रतीत्यस्य स्थाने । घ्रंसमध्यह्नः । अहनीत्यर्थः SKN.

१३. पर्यागाद्वां घ्रंसमहरवनायान्नम् is suggested for पर्यागाद्वां घ्रंसहरवसानेऽह्नमिति A. M. N. 6. 4.

१४. अवनेन रक्षणेन निमित्तेन Sy. कमर्थं पुरस्कृत्य वयोऽन्नं गच्छति ? तर्पणायेत्यर्थः । एवमत्राश्विनोर्हविःसम्प्रदानसम्बन्धात् 'ओमना' इत्यस्य शब्दस्य 'अवनाय' इत्येव विपरिणाम उपपद्यते Dur. अवनायावनेन वा निमित्तभूतेन । तर्पणार्थमित्यर्थः SKN.

१५. आनि हवि० A.

१६. ०न्नम् is suggested for ०नम् । सोमादिलक्षणम् Sy. सर्वासु दिक्षु यजमानैर्दीयमानं युवां प्रति वयोऽन्नं हविर्लक्षणम् Dur. वयोऽन्ननामेदम् । अन्नं हविर्लक्षणम् SKN.

१७. अश्विनौ seems to be the explanation of वाम् ॥

१८. पर्यगात् Sy. तेन कारणेन वां . .परिगच्छति Dur. अगाद् गच्छति युवाभ्यां दीयत इत्यर्थः। उदिते, अश्विनोर्याग उच्यते । अहः प्रत्यहमगादिति, तस्माद्यजमानं रक्षथः । तस्मात् प्रातरेवेज्येथे इत्यर्थः SKN. N. 6. 4.; SKN. II 40 3., 40 4.

यो ह॒ स्य वां॑ रथिरा॒ वस्त॑ उ॒स्रा रथो॑ युजा॒नः प॑रि॒यात्य॒र्वतिः॑
तेन॑ नः॒ शं योरु॒ष्सो व्यु॑ष्टौ॒ न्यश्विना वहतं य॒ज्ञे अ॒स्मिन् ॥ ५ ॥

यो ह । खलु । एषः । युवयोः । हे रथवन्तौ ! वस्ते । तेजांसि । रथः । युज्यमानः । परिगच्छन्ति च । मार्गम् । तेन । अस्माकम् । श च । योश्च । उषस । व्युच्छते । निवहतम् । अश्विनौ ! अस्मिन् । यज्ञे ।

नरा॑ गौ॒रेव॑ वि॒द्युतं॑ तृषा॒णास्माकं॒मद्य सव॒नोप॑ यातम् ।
पु॒रु॒त्रा हि वां॑ म॒तिभि॒र्हव॑न्ते॒ मा वा॑म॒न्ये नि य॑मन्दे॒वय॑न्तः ॥ ६ ॥

नरा गौरेव । हे नेतारौ ! गौराविव मृगौ । विद्युतम् । मृगतृष्णावन्तौ । अस्माकम् । अद्य । सवनादि । उपगच्छतम् । बहुषु । हि देशेषु । वा । स्तुतिभिः । हवन्ते । तत्र मा । वाम् । अन्ये । नियच्छन्तु । देवकामाः ।

यु॒वं भु॒ज्युम॑वविद्धं समु॒द्र उदू॑हथु॒रर्ण॑सो॒ अस्रि॑धानः ।
प॒तत्रि॑भिर॒श्रमै॑र॒व्यथि॑भि॒र्दंसना॑भिरश्विना पा॒रय॑न्ता ॥ ७ ॥

युवम् । युवम् । भुज्युः । सखिभिः समुद्रमध्ये । अवविद्धम् । पारं प्रत्युदूहतु । उदकात् ।

---

१. हेति पूरणः Sy.
२. एषु A. स प्रसिद्धो रथः Sy.
३. हे रथिनौ ! मत्वर्थीयो रः Sy.
४. आच्छादयति Sy. ५. ते is omitted by M. ६. अश्वैर्युक्तः सन् Sy.
७. ०च्छति is suggested for ०च्छन्ति ॥
८. यजमानगृहं वा Sy.
९. रथेन Sy.
१०. शमनाय पापानाम् Sy.
११. मिश्रणाय च सुखानाम् Sy.
१२. ०च्छन्ते M. प्रातः काले Sy.
१३. नितरां प्राप्नुतम् Sy. १४. अश्विना M.
१५. अस्मिन् is missing in M.
१६. VM. ignores यः ॥ यो रथः Sy.
१७. नेकारौ A. हे नरा नेतारौ । अश्विनौ ! Sy.
१८. ०पिव A. गौरा मृगीव Sy.
१९. विशेषेण दीप्यमानं सोमं प्रति Sy.
२०. तृष्णावन्तौ Sy.
२१. ०नानि is suggested for ०नादि ।
२२. उवग० A. उपागच्छतम् Sy.
२३. यज्ञेषु Sy.
२४. वाम् is suggested for वा युवाम् Sy.
२५. भवन्ते Sy. यजमानाः स्तुवन्ति
२६. अतो यष्टारः Sy.
२७. देवौ कामयमानाः Sy.
२८. युवम् is omitted by A.
२९. भुज्युम् is suggested for भुज्युः ॥ हे अश्विनौ ! युवं भुज्युम् एतन्नामकम् Sy.
३०. समुद्रे तन्मध्ये निमग्नम् Sy.
३१. अपवि० M. विक्षिप्तम् Sy.
३२. उवुह० A. ०हथुः is suggested for ०हतुः ।

अक्षिणैः[1]। अश्वैः[2]। व्यथारहितैः। श्रमवर्जितैः। कर्मभिः[3]। अश्विनौ तम्। वारयन्तौ[4]।

नू मे हवमा शृणुतं युवाना यासिष्टं वर्तिरश्विनाविरावत्[5]।
धत्तं रत्नानि जरतं च सूरीन्यूयं पात स्वस्तिभिः सदा नः॥ ८॥

[नू मे हवम्[6]]

VII. 70.

आ विश्ववाराश्विना गतं नः प्र तत्स्थानमवाचि[7] वां पृथिव्याम्।
अश्वो न वाजी शुनपृष्ठो अस्थादा यत्सेदथुर्ध्रुवसे न योनिम्॥ १॥

[8]आ विश्ववारा। हे विश्ववैर्वरणीयौ ! आगच्छतम्। अस्मान्[9]। अश्विनौ ! प्रावाचि[10] प्रोक्तमस्माभिः[11]। तत्। स्थानम्। अस्यां पृथिव्याम्। युवयोरस्माभिः[12]तच्च स्थानं स्तीर्णबर्हिर्वामन्विक्ष[13], अश्वः[14] इव। बलवान्। सुखपृष्ठः। तिष्ठति। आसिदथः[15]। यत् स्थानम्। यथा मनुष्यः। ध्रुवावस्थानाय[16]। युग्महासीदति[17]।

---

१. अक्षीणैः is suggested for अक्षिणैः॥ अक्षीयमाणैः Sy.

२. पतनवद्भिर्गमनवद्भी रथ्ये नियुक्तैरश्वैः Sy.

३. शारीरैः कर्मभिश्च Sy.

४. पार० is suggested for वार०॥ पारयन्तौ समुद्रम् अर्णस उदूहथुरिति। 'नासत्या भुज्युमूहथुः पतङ्गैः' (RV. 1. 116. 4.) इति ह्युक्तम् Sy.

५. The *pratika* is supplied by the Editor. The stanza has already been explained. See RV. VII. 67. 10.

६. 'आ विश्ववारा' इति सप्तर्चं पञ्चदशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमाश्विनम्। अनुक्रम्यते च—'आ विश्ववारा सप्त' (KSA. 37. 70. p. 26.) इति। प्रातरनुवाक आश्विनशस्त्रे च विनियोग उक्तः। आद्यास्तृचस्तृतीये छन्दोमे प्रउगशस्त्रे विनियुक्तः। 'आ विश्ववाराश्विना गतं नोऽयं सोम इन्द्र' (ĀSS 8. 11) इति सूत्रितत्वात् Sy. ७. सर्ववैर्वरणीयौ ! Sy. ८. अस्माकं यज्ञं यागम् Sy.

९. प्रोवाचि M. प्रोच्यते Sy. १०. वेद्याम् Sy.

११. One अस्माभिः is redundant.

१२. स्थान A. १३. ०मन्वीक्ष्य is suggested for ०मन्विक्ष

१४. अश्वः is suggested for अश्वः।

१५. श्व M. १६. वेगवान् Sy.

१७ तदर्थं सुखकरपृष्ठभागः। अत्यन्तविपुलत्वादारूढानां सुखकरपृष्ठभाग इत्यर्थः Sy.

१८. तिष्ठतु युवयोः समीपे Sy.

१९. आसिदथः M. आसीदथः is suggested for आसिदथः॥ आसीदथः, तत्स्थानमश्व आश्रयत्वितो गमनाय Sy.

२०. यत्। यमित्यर्थः। यमश्वम्...यद्वा यत्स्थानम् Sy. २१. ध्रुवावस्थाना० A. ध्रुवावस्थाना० is suggested for ध्रुवावस्थाना०॥ ध्रुवाय निवासाय Sy.

२२. It seems to be an explanation of योनिम्॥ युग्मम् is suggested for युग्महम्॥ योनिं स्थानमिव Sy.

सिषक्ति सा वां सुमतिश्चनिष्ठातापि घर्मो मनुषो दुरोणे ।
यो वां समुद्रान्त्सरितः पिपर्त्येतग्वा चिन्न सुयुजा युजानः ॥ २ ॥

सिषक्ति । सेवते । सा । वाम् । सुमतीः । अतिशयेनान्नवती । तप्तश्च । घर्मः । मनुष्यस्य । गृहे । यो घर्मः । वाम् । समुद्रात् । सरितः । पारयन्ति गमयन्तीत्यर्थः । अश्वौ । इव । सुयुक्तौ यज्ञे युज्यमानः ।

यानि स्थानान्यश्विना दधाथे दिवो यह्वीष्वोषधीषु विक्षु ।
नि पर्वतस्य मूर्धनि सदन्तेषं जनाय दाशुषे वहन्ता ॥ ३ ॥

यानि । यानि । आवासस्थानान्यात्मनः । अश्विनौ ! कुरुतः । दिव आगतौ । महीषु । ओषधीषु । पजासु च । पर्वतस्य । मूर्ध्नि । निवसन्तौ । यजमानाय । अन्न च । वहन्तावुत्तरत्र सम्बन्धः ।

चनिष्टं देवा ओषधीष्वप्सु यद्योग्या अश्नवैथे ऋषीणाम् ।
पुरूणि रत्ना दधतौ न्यस्मे अनु पूर्वाणि चक्र्यथुर्युगानि ॥ ४ ॥

चनिष्टम् । चन इच्छतम् । हे देवौ ! तास्वोषधीषु । अप्सु च । यदा । व्याप्नुथः । योग्याः

---

१. युवाम् Sy.
२. ०तिः is suggested for ०तीः ॥ अस्माभिः क्रियमाणा शोभना स्तुतिः Sy.
३. कमनीयतमातिशयेनान्नवती वा Sy.
४. तप्तोऽभूत् । 'यद्घ्रां इत्यपतत्तद्घर्मस्य घर्मत्वम्'(T. A. 5. 1. 5) इति श्रुतिः Sy.
५. प्रवर्गश्च Sy. ६. यजमानस्य Sy.
७. यागगृहे Sy.
८. घर्मः is suggested for घर्मे ॥ यज्ञस्य शिरःस्थानीयत्वादस्य यो घर्मः Sy.
९. युवां प्राप्नुवन्निति शेषः Sy.
१०. ०द्रान् is suggested for ०द्रात् ।
११. ०यति गमयती० is suggested for ०यन्ति गमयन्ती० ॥ पूरयति वृष्टिद्वारा Sy.
१२. नेत्युपमार्थे, तद्वत् Sy.
१३. सुष्ठु युक्तौ रथे भवतस्तथेत्यर्थः Sy.
१४. योजयन् यज्ञः स एव करोति Sy.
१५. VM. ignores चित् ॥ चिदिति पूरणः Sy.
१६. यावि A. १७. ०नाद्या० A.
१८. ०नः M. हे अश्विनौ ! युवाम् Sy.
१९. कुरुथः Sy. २०. द्युलोकादागत्य Sy.
२१. महतीषु is suggested for महीषु ।
२२. यजमानेषु Sy. २३. तौ युवां मेघस्यान्तरिक्षस्य Sy. २४. स्थाने Sy.
२५. ०सन्तौ is suggested for ०सन्तो ॥ निषीदन्तौ २६. प्रापयन्तौ भवतमिति शेषः Sy.
२७. उत्तरत्र is missing in M.
२८. VM. ignores दाशुषे ॥ दाशुषे हविर्दात्रे Sy.
२९. अत्यन्तं कमनीयतमं कामयेथामित्यर्थः Sy.
३०. हे देवा देवौ ! युवाम् Sy.
३१. ओषधिविकारांश्चरुपुरोडाशादिकान् सोमरसान् Sy. ३२. यस्मात् Sy.
३३. व्याप्नुथस्तस्मादस्मदीया अपि कामयेथामित्यर्थः । यद्वा ऋषीणामिति पूजार्थं बहुवचनम् । यद्यस्मादोषधीष्वप्सु च चनिष्टं योग्याः स्तुतीश्चाश्नवैथे तस्मात् Sy.
३४. युवयोरुचिता ओषधीरपश्च Sy.

स्तुतीः । ऋषीणाम् । बहूनि । रत्नानि । अस्मासु । निदधानौ । अनुचख्यथुः । गतान् दिवसाननुख्यानमनुमननुं दिवसा गता निरर्थका इति बुद्धिमधुना धनं प्रयच्छन्तौ कुरुतः ।

शुश्रुवांसा चिदश्विना पुरूण्यभि ब्रह्माणि चक्षाथे ऋषीणाम् ।
प्रति प्र यातं वरमा जनायास्मे वामस्तु सुमतिश्चनिष्ठा ॥ ५ ॥

शुश्रुवांसा । शुश्रूषमाणौ । एव । अश्विनौ ।

यो वां यज्ञो नासत्या हविष्मान्कृतब्रह्मा समर्यो भवाति ।
उप प्र यातं वरमा वसिष्ठमिमा ब्रह्माण्यृच्यन्ते युवभ्याम् ॥ ६ ॥

[यो वां यज्ञः ।]

---

१. ऋषीणां सम्बन्धिनीः Sy.

२. रमणीयानि धनानि Sy.

३. तिद० A.

४. चखपृथुः A. ०चख्यथुः is suggested for ०चख्यपृथुः ॥ ख्यातवन्तौ । अनुकृष्टवन्तावनुग्रहार्थम् Sy.

५. युगानि मिथुनानि जायापतिरूपाणि Sy.

६. ०मनमननं A. ०मनुमननम् is suggested for ०मनुमनुं ॥

७. ०तोऽकुरुत A.

८. The commentary on the rest of this stanza as well as on VII. 70. 6. and up to स्तुतिः in VII. 70. 7. is missing in all mss. Sy. explains this stanza in the following manner :—

हे अश्विनाश्विनौ ! चिदिति पूरणः । युवां शुश्रुवांसा श्रुतवन्तौ सन्तौ पुरूणि बहूनि ब्रह्माणि परिवृढानि कर्माणि स्तुतिलक्षणान्यृषीणामस्माकं सम्बन्धीन्यभि चक्षाथे । अभिपश्यथो युवाम् । अतो जनाय जनस्य यजमानस्य मम वरं यज्ञं प्रति प्र यातम् । वां युवयोश्चनिष्ठोक्तलक्षणा सुमतिरनुग्रहमतिरस्मे अस्मास्वस्तु भवतु ।

९. The *pratika* is supplied by the Editor. Sy. explains this stanza in the following manner :—

हे नासत्यावश्विनौ ! वां युवयोर्यो यज्ञो यजमानः समर्य ऋत्विग्रूपैर्मर्त्यैः सहितः सन् हविष्मान् हविषा युक्तः कृतब्रह्मा कृतस्तोत्ररूपकर्मा भवाति भवति तं वरं वरणीयं वसिष्ठमोप प्रयातं प्रकर्षेणोपागच्छतम् । इमेमानि ब्रह्माणि मन्त्रजातानि युवभ्यां युवाभ्यामर्थायागमनायर्च्यन्ते स्तूयन्ते क्रियन्त इत्यर्थः ।

इयं मनीषा इयमश्विना गीरिमां सुवृक्तिं वृषणा जुषेथाम् ।
इमा ब्रह्माणि युवयून्यग्मन्यूयं पात स्वस्तिभिः सदा नः ॥ ७ ॥

[इयं मनीषा] . . . । स्तुतिः । इमां च । स्तुतिम् । वर्षितारौ । सेवेथाम् । इमानि च । इच्छसि । युवां कामयमानानि । गच्छन्तु वामिति ।

VII 71.

अप स्वसुरुषसो नग्जिहीते रिणक्ति कृष्णीरुषाय पन्थाम् ।
अश्वामघा गोमघा वां हुवेम दिवा नक्तं शरुमस्मद्युयोतम् ॥ १ ॥

अप । स्वसुः । उषस आगमनाय । नन् नगिति रात्रिमाह सा । अवगच्छति 'रुशद्वत्सा रुशती श्वेत्या-यात्' इत्युक्तम् । रेचयति । पन्थानम् । रात्रिः । आरोचमानायादित्याय । अस्मिन् काले वयमश्विनौ ! गोधनौ ! वाम् । हवेम । दिवा । नक्तं च । अस्मत्तः । हिंसकम् । पृथक् कुरुतम् ।

---

१. The *pratīka* is supplied by the Editor.
२. स्तुतिः कृता Sy. ३. अस्मत्कृताम् Sy.
४. शोभनां स्तुतिम् Sy.
५. कर्माणि स्तुतिरूपाणि Sy.
६. Sy. explains the rest of words in the following manner :— हे अश्विनाश्विनौ ! इयं मनीषा स्तुतिर्युवयोः कृतेति शेषः । तदेवादरार्थं पुनरुच्यते । इयं गीः स्तुतिः कृता । हे वृषणा कामानां वर्षकौ ! यूयं पातेति सिद्धम् Sy.
७. पञ्चमेऽनुवाक एकोनविंशतिसूक्तानि । तत्र 'अप स्वसुः' इति षडृचं प्रथमं सूक्तं त्रैष्टुभमाश्विनम् । अनुक्रम्यते च—'अप स्वसुः षट्' (KSA. 37. 71. p. 26.) इति । गतो विनियोगः Sy. ८. आव A.
९. सुषुरुषस M. स्वसृस्थानीयायाः Sy.
१०. उषसः सकाशात् Sy.
११. नग्व A. नक्तम् is suggested for नन् ॥
१२. ०मंह A.
१३. अपग० is suggested for अवग० ॥ तस्या अवकाशं दत्वा स्वयमपगतेत्यर्थः । 'स्वसा स्वले ज्यायस्यै योनिमारैक्' (RV. 1. 124. 8.) इत्युक्तम् Sy.
१४. श्वेत्या० A. M.
१५. ०त्युक्ता M. (RV. 1. 113. 2.)
१६. रिणक्ति रेचयति । यस्मादेवं तस्माद्युवयोरागमनसमयत्वात् Sy. १७. मार्गम् Sy.
१८. कृष्णवर्णा रात्रिः Sy.
१९. आरोचमानायाह्ने सूर्याय वा Sy.
२०. अश्विनौ A. अश्वधनौ is suggested for अश्विधनौ ।
२१. ०नौ is suggested for ०नो ॥ उभयोः प्रदातारावित्यर्थः Sy.
२२. युवाम् Sy.
२३. हुवेम is suggested for हवेम ॥ स्तुमः आह्वयामः Sy.
२४. श्वाम् A. दिवा नक्तं सर्वदा Sy.

उपायातं दाशुषे मर्त्याय रथेन वामम्श्विना वहन्ता ।
युयुतमस्मदनिरामम्ीवां दिवा नक्तं माध्वी त्रासीथां नः ॥ २ ॥

उपायातम् । उपगच्छतम् । दाशुषे । यजमानाय । रथेन । धनम् । अश्विनौ ! वहन्तौ । पृथक् कुरुतम् । अस्मत्त. । अनिरामनतिप्राणनकर्माश्वासकारिण्यशक्तिरनिरा । अमीवा च रोगविशेष औदरः । दिवा । नक्तं च । हे वसुमन्तौ ! अस्मान् । रक्षतम् ।

आ वां रथमवमस्यां व्यृष्टौ सुम्नायवो वृषणो वर्तयन्तु ।
स्यूमंगमस्तिमृतयुग्भिरश्वैराश्विना वसुमन्तं वहेथाम् ॥ ३ ॥

आ वां रथम् । आवर्तयन्तु । वाम् । रथम् । अवमस्याम् । उषसि अवमाद्यतनी । सुखमिच्छन्तः । पुमांस ऋत्विज । अनुसूतरश्मिम् । यजुयोगिभि. । अश्वै । आवहेथौ । अश्विनौ ! वसुमन्तं रथम् ।

यो वां रथो नृपती अस्ति वोळहा त्रिवन्धुरो वसुमाँ उन्नयामा ।
आ न एना नासत्योप यातमभि यद्वां विश्वप्स्न्यो जिगाति ॥ ४ ॥

यो वाम् । य. । वाम् । रथ. । नृपती ! भवन्ति । वोळ्हा । वन्धुर फलकासघाटस्त्रिबन्धुरः । वसुमान् । उत्सरणशीलगमन. । तेनानेन । अस्मान् । उपायातम् । नासत्यौ । अभिगच्छति । यस्मात् । वा वसिष्ठः । विश्वरूपो नानाविधस्तुतिकरणाद्वैश्वरूप्य यद्वा विश्वस्य व्यापको विश्वस्येति ।

---

१. The *pratika* is supplied by the Editor. २. अस्मदाह्वानं प्रति Sy. ३. हविषा दात्रे Sy. ४. अननीयं धनम् Sy. ५. हे अश्विनौ ! युवाम् Sy. ६. ०प्राणान० A ७. इदन्नम् । तदन्नदारिद्र्यमित्यर्थः Sy. ८. अमिवा A. रोगाश्च Sy. ९. सर्वदा Sy. १०. मधुमन्तौ is suggested for वसुमन्तौ । हे मधुमन्तौ ! युवाम् Sy. ११. ऋक्ष० A. १२. युवयोः Sy. १३. आसन्नायाम् Sy. १४. ०वमवाद्य० A. अवमा० is suggested for ०प्रावमा० ॥ अवमाद्यतनी should immediately follow अवमस्याम् ॥ व्युच्छने उषसि Sy. १५. सुखेन योजयन्तोऽश्वाः Sy. १६. वर्षकाः Sy. १७. सुखरश्मिम् Sy. १८. यजु० A, यज्ञयोगिभिः is suggested for यजुयोगिभिः ॥ उदकयुक्तैरश्वैरुदकप्रदैः Sy. १९. ०थाम् is suggested for ०थौ ॥ २०. प्रदेयधनयुक्तम् Sy. २१. युवयोः Sy. २२. ०तीः A. हे नृणां यजमानानां पालकौ ! Sy. २३. भवति is suggested for भवन्ति । सर्वदा सन्निहितो वर्तते Sy. २४. वोळ्हु A. युवयोर्वाहिकः Sy. २५. वोधु० A. ०वन्धु० is suggested for ०बन्धु० ॥ सारथ्यधिष्ठानस्थानत्रयोपेतः Sy. २६. धनवान् Sy. २७. उत्तं दिवसं प्रति गन्ता Sy. २८. रथेन Sy. २९. अभिगच्छति । अथवाह यस्मात्तिश्वप्स्न्यो वसिष्ठो वां जिगाति स्तौति, अत उपा यातम् Sy. ३०. यद्रथो यश्च रथः Sy. ३१. वं A. ३२. व्याप्तरूपः Sy. ३३. यद्वां A. ३४. विश्वस्य seems to be unnecessary.

युवं च्यवानं जरसोऽमुमुक्तं नि पेदवं ऊहथुराशुमश्वंम् ।
निरंहसस्तमसः स्पर्तमत्रिं नि जाहुषं शिथिरे धातमन्तः ॥ ५ ॥

युवम्[1] । युवम् । च्यावानम् । जरया[2] । मोचितवन्तौ । वैवे[5] च राज्ञे । शीघ्रगन्तारम्[6] । अश्वमात्मीयम् । न्यूहथुः[7] । निष्पमुत्थापितवन्तौ[8] । अंहन्तु[9] । तमसः[10] । अत्रि शतदूरेषु यन्त्रगृहेष्वसुरे[11] प्रक्षिप्तम्[12] । चाहुषं[13] च राजानम्[14] । शिथिले[15] । तस्य राष्ट्रे[16] पुनः । निहितवन्तौ[17] ।

इयं मनीषा इयमश्विना गीरिमां सुवृक्तिं वृषणा जुषेथाम् ।
इमा ब्रह्माणि युवयून्यंग्मन्युयं पात स्वस्तिभिः सदा नः ॥ ॥ ६ ॥

[इयं मनीषा[18]]

---

१. हे अश्विनौ ! Sy.

२. च्यावा० A. च्यवा० is suggested for च्यावा० ॥

३. जीर्णाद्रूपात् Sy.

४. मोऽच्युत० M. ०वन्तौ is suggested for ०वन्तौ । अमुञ्चतम् । 'युवं च्यवानमश्विना जरन्तं पुनर्युवानम्'(RV. 1. 117. 13.) इति ह्यन्यत्र Sy.

५. एव च M. पेदवे च is suggested for वै वे च ॥ पेदवे एतन्नामकाय राज्ञे Sy.

६. शीघ्रगामिनः Sy.

७. न्यूहथुः M. न्यवहतं युद्धे । 'युवं श्वेतं पे॒वे' (RV. 1. 118. 9.) इति निगमः Sy.

८. Missing in M. निष्पतितमु० is suggested for निष्पमु० ॥ निपारयतम् 'युवमू॒बीसंमृत॒ तप्तमत्रंय॒ ओमन्वंन्तं चक्रथुः' (RV. 10. 39. 9.) इति निगमः Sy.

९. अहं तु M. आहन्तुः is suggested for अहन्तुः । ऋबीसावग्ने सकाशात् Sy.

१०. तुम० A. गुहान्तःस्थिताच्च सकाशात् Sy.

११. महर्षिम् Sy.

१२. ०ष्वश्वैः सुरैः M. ०सुरैः is suggested for ०सुरे ।

१३. जाहु० is suggested for चाहु० ।

१४. राजावं A.

१५. भ्रष्टे Sy.

१६. तस्या A. स्वराष्ट्रेऽन्तर्मध्ये पुनः Sy.

१७. ०वन्तः M. वन्तौ is suggested for ०वन्तौ ॥ न्यधातम् ।'परिविष्टं जाहुषं विश्वतः सीम्' (RV. 1. 116. 20.) इति ह्युक्तम् Sy.

१८. The *pratika* is supplied by the Editor.
The stanza has already been explained. See RV. 7. 70. 7.

VII. 72.

आ गोमता नासत्या रथेनाश्वावता पुरुश्चन्द्रेण यातम् ।
अभि वां विश्वा नियुतः सचन्ते स्पार्हया श्रिया तन्वा शुभाना ॥ १ ॥

आ गोमता[1] । आयातम्[2] । गोमता[3] । हे नासत्यौ[4] ! रथेन । अश्ववता[5] । बहुसुवर्णेन[6] । अभिसचन्ते[7] विश्वाः[8] । विधवा[9] । स्पृहणीयया । श्रिया[10] । अङ्गेन[11] च । शोभमानौ[12] ।

आ नो देवेभिरुपं यातमर्वाक्सजोषसा नासत्या रथेन ।
युवोर्हि नः सख्या पित्र्याणि समानो बन्धुरुत तस्य वित्तम् ॥ २ ॥

आ[14] नः[15] । उपायातम्[16] । अस्मान्[17] । देवैः[18] सह । सङ्गतौ[19] । हे नासत्यौ ! रथेन । युवोः[20] । हि[21] । नः[22] ।

---

१. 'आ गोमता' इति पञ्चर्चं द्वितीयं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमाश्विनम् । अनुक्रम्यते च—'आ गोमता पञ्च' (KSA. 37. 72. p. 26.) इति । विनियोगः प्रातरनुवाकाश्विनशस्त्रयोरुक्तः । आश्विने पशावाद्याश्चतस्रो याज्यानुवाक्याः । सूत्रितञ्च—'आ गोमता नासत्या रथेनेति चतस्रः' (ĀSS. 3. 8.) इति Sy.

२. आयतम् A. आगच्छतम् Sy.

३. गोयुक्तेन . . . यद्वा गोमता गोप्रदेन Sy.

४. हे अश्विनौ ! Sy.

५. अश्ववता A. अश्वयुक्तेन । अश्वैर्वृषभैश्चोढेनेत्यर्थः Sy.

६. धनप्रदेनेत्यर्थः Sy.

७. अहि स० A. सेवन्तेऽस्मत्प्रेरिताः Sy.

८. बह्वयः Sy.

९. विधवा: seems to be the explanation of नियुतः ।
वडवाः is suggested for विधवाः ॥
स्तुतयः Sy. १०. शोभया Sy.

११. शरीरेण च Sy.

१२. दीप्यमानौ Sy.

१३. VM. ignores वाम् ॥ युवाम् Sy.

१४. वसिष्ठस्त्रिष्टुभाऽश्विनौ तुष्टाव । नासत्यौ अश्विनौ । युवाम् । इतरैर्देवैः सह । समानप्रीतौ परस्परं सन्तौ । अस्माकम् । अभिमुखम् । समीपे आगच्छतम् DDN.

१५. आगच्छतम् Sy. १६. अस्माकम् Sy.

१७. इतरैर्देवैः सह Sy.

१८. समानप्रीतौ परस्परं सन्तौ Sy.

१९. युवयोः Sy.

२०. हि is suggested for ही ।

२१. आगमने बन्धुत्वातिशयमाह—युवयोः, अस्माकञ्च Sy., DDN.

सख्यानि। पित्र्याणि क्रमागतानि। तथा। बन्धुश्च। समानस्तुतिर्बन्धुः पितरश्च वां स्तुवन्ति वयं चेत्यर्थः। तं बन्धुम्। वित्तमिति।

उदु स्तोमासो अश्विनोरबुध्रञ्जामि ब्रह्माण्युषसश्च देवीः।
आविवासन्नोदसी धिष्ण्येमे अच्छा विप्रो नासत्या विवक्ति ॥ ३ ॥

उदु स्तोमासः। उदबुध्यत। अश्विनो.। स्तोमा.। भवति। इमे। अश्विनेति।

---

१. पितृतः प्राप्तानि। नेदानीं स्तुत्याद्युपाधिना प्राप्तानि भवन्तीत्यर्थः। तदेवाह Sy.,DDN.

२. अपि च युवयोर्मम च Sy. DDN.

३. बन्धकः पितामहः Sy.

४. एक एव। विवस्वान् वरुणश्चोभावपि कश्यपादवितेर्जातौ विवस्वानश्विनोर्जनकः वरुणो वसिष्ठस्येति एवं समानबन्धुत्वम्। अभवन् मिथुनमिति। तथा च बृहद्देवतायां—'यमश्विना ववथुः' इत्यस्यां (RV. 1. 116. 6.) स्पष्टमुक्तम् DDN. (B D. VI. 162. 163. 7. 1-6)

अभवन्मिथुनं त्वष्टुः सरण्यूस्त्रिशिराः सह।
स वै सरण्यूं प्रायच्छत् स्वयमेव विवस्वते॥१६२॥
ततः सरण्ववां जाते ते यमयम्यौ विवस्वतः।
तावप्युभौयमावेव ह्यास्तांयम्याश्चवैयमः॥१६३॥
सृष्ट्वा भर्तुः परोक्षं तु सरण्यूः सदृशीं स्त्रियम्।
निक्षिप्य मिथुनं तस्यामश्वा भूत्वा प्रचक्रमे॥
अविज्ञानाद्विवस्वांस्तु तस्यामजनयन् मनुम्।
राजर्षिरासीत् स मनुर्विवस्वानिव तेजसा॥
स विज्ञाय अपक्रान्तां सरण्यूमात्मरूपिणीम्।
त्वाष्ट्रीं प्रतिजगामाशु वाजी भूत्वा सलक्षणः॥
सरण्यूस्तु विवस्वन्तं विज्ञाय हयरूपिणम्।
मैथुनायोपचक्राम तां च तत्रारुरोह सः॥
ततस्तयोस्तु योगेन शुक्रं तदपतद्भुवि।
उपाजिघ्रच्च सा त्वश्वा तच्छुक्रं गर्भकाम्यया।
आघ्राणमात्राच्छुक्रं तत्कुमारौ सम्बभूवतुः।
नासत्यश्चैव दस्रश्च यौ स्तुतावश्विनावपि॥

५. स्तुन्वन्ति A.

६. तस्येति कर्मणि षष्ठी। तं बन्धुम्। तद्बन्धुत्वं वा Sy.

७. तस्य वित्तं ज्ञापितं तस्मादेवमुक्तम्। वित्तं जानीतम्। इति वसिष्ठेन सुहृत्सख्यम् DDN.

८. VM. ignores अर्वाक्॥ अर्वागभिमुखम् Sy.

९. उत्कृष्टं बोधयन्ति। चेदयोगादनिघातः Sy.

१०. ०नौ M.

११. मा is written twice in A.
स्तवाः Sy.

१२. विवक्ति is suggested for भवति॥ स्तौति Sy.

१३. The rest of the commentary is missing. Sy. explains the stanza in the following manner: स्तोमासः स्तोमाः स्तवा अश्विनाश्विनावबुध्रन् उत्कृष्टं बोधयन्ति। उ इति पूरणः। जामि। बन्धुनामैतत्। बन्धुस्थानीयानि ब्रह्माणि परिवृढानि कर्माणि देवीर्द्योतमाना उषसः। दकारादश्विनौ च। अबुध्रन् विप्रो मेधावी वसिष्ठ इमे रोदसी द्यावापृथिव्यौ धिष्ण्ये धिषणार्हे स्तुत्ये आविवासन् परिचरन् नासत्याश्विनावच्छाभिमुखम्, विवक्ति स्तौति।

वि चेदुच्छन्त्यश्विना उषासः प्र वां ब्रह्माणि कारवो भरन्ते ।
ऊर्ध्वं भानुं सविता देवो अश्रेद्बृहद्गायः समिधा जरन्ते ॥ ४ ॥

वि चेत् । व्युच्छन्ति । च । इत् । अश्विनौ ! उषसः । प्रहरन्ते । युवयोः । स्तोत्राणि । स्तोतारः । ऊर्ध्वम् । रश्मिम् । देवः । सविता । श्रयति । महान्तः । अग्नयः । समिन्धनेन सहास्मिन् काले युवयोर्यागे । स्तूयन्ते ।

उत्तरा निगदसिद्धेति—

आ पश्चातान्नासत्या पुरस्तादाश्विना यातमधरादुदक्तात् ।
आ विश्वतः पाञ्चजन्येन राया यूयं पात स्वस्तिभिः सदा नः ॥ ५ ॥

[आ पश्चातात्]

VII. 73.

अतारिष्म तमसस्पारमस्य प्रति स्तोमं देवयन्तो दधानाः ।
पुरुदंसा पुरुतमा पुराजामर्त्या हवते अश्विना गीः ॥ १ ॥

अतारिष्म । नैशस्यास्य । तमसः । पारम् । तीर्णवन्तम् । प्रतिदधानाः । स्तोमम् । देवकामा अस्मिन् काले । पुरुकर्माणौ । बहुक्षपणौ शत्रूणाम् । पुराणजातौ । अमर्त्यौ । ह्वयति । वाक् । अश्विनौ ।

---

१. तमांसि विवासयन्ति Sy. २. चेदिति पूरणश्चार्थे वा । स च वक्ष्यमाणसूर्याद्यपेक्षकः Sy.
३. प्रभर० is suggested for प्रहर० ॥ प्रकर्षेण सम्पादयन्ति Sy. ४. स्तुतिसमयत्वात् Sy.
५. रश्मिव A. तेजः Sy. ६. अतिमहत् Sy.
७. ०र्यागे M. ८. 'आ पश्चातात्' इति पञ्चम्याश्विने पशौ वपाया अनुवाक्या । सूत्रितञ्च—'आ पश्चाताग्नासत्या पुरस्तादा गोम ता नासत्या रथेन' (ĀŚS. 3.8.) इति Sy.
९. VM. does not explain the stanza. Sy. explains it in the following manner :
हे नासत्याश्विनौ ! पश्चातात् पश्चादेशादा यातम् । तथा पुरस्तात् पूर्वस्मादेशात् तथाधरावधस्तनादेशादक्षिणतउदक्तादुदग्देशात् । सर्वत्रायातमिति सम्बन्धः । किम्बहुना विश्वतः सर्वस्मादेशात् पाञ्चजन्येन पञ्चजनहितेन राया धनेन सहा यातम् । निषादपञ्चमाश्चत्वारो वर्णाः पञ्चजनाः Sy.
१०. 'अतारिष्म' इति पञ्चर्चं तृतीयं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमाश्विनम् । 'अतारिष्म' इत्यनुक्रमणिका (KSA. 37. 73. p. 26.)। प्रातरनुवाकाश्विनशस्त्रयोरुक्थतो विनियोगः
११. अज्ञानस्य तत्कार्यस्य जननमरणवतः संसारदुःखस्य अथवा प्रकृतत्वात् प्रयोगविषयज्ञानस्य Sy.
१२. ०वन्तः is suggested for ०वन्तं ॥ तीर्णाः स्म Sy.
१३. देवेषु कुर्वाणाः Sy.
१४. स्तुतिं प्रति Sy. १५. बहुकर्माणौ Sy.
१६. प्रभूततमौ Sy. १७. पूर्वजातौ Sy.
१८. अत एवामरणधर्माणौ Sy.
१९. ०ती A. स्तौति । आह्वयति वा Sy.
२०. गरिता स्तोता वसिष्ठः Sy.

न्यु प्रियो मनुषः सादि होता नासत्या यो यजते वन्दते च ।
अश्नीतं मध्वो अश्विना उपाक आ वां वोचे विदथेषु प्रयस्वान् ॥ २ ॥

न्यु प्रियः । निषण्णो होतृषदने । प्रियः । होता । मनुष्यस्य । नासत्यौ । यः । यजति ते । स्तौति । च । विवतम् । सोमम् । अश्विनौ ! अन्तिके । आभिमुख्येन ब्रवीमि । वामहम् । यज्ञेषु । हविष्मान् ।

अहेम यज्ञं पथामुराणा इमां सुवृक्ति वृषणा जुषेथाम् ।
श्रुष्टीवेव प्रेषितो वामबोधि प्रति स्तोमं जरमाणो वसिष्ठः ॥ ३ ॥

अहेम । प्रेरयामः । यज्ञम् । उषसि । पतत्तामागच्छतां देवानाम् । उरुकर्मणा उरु कर्म कुर्वाणाः । इमाम् । स्तुतिम् । वृषणौ । सेवेथाम् । क्षिप्रवानिव प्रषितो दूतः । वाम् । प्रत्यबोधि । स्तोमैः । स्तुव । वसिष्ठः ।

उप त्या वह्नी गमतो विशं नो रक्षोहणा संभृता वीळुपाणी ।
समन्धांस्यग्मत मत्सराणि मा नो मर्धिष्टमा गतं शिवेन ॥ ४ ॥

उप त्या । तौ । वोढारौ । अस्माकम् । प्रजाम् । उपगच्छतः । रक्षोहणौ । हविर्भिः सम्भृतौ ।

---

१. द्यु A.
२. निषण्णो भवति । युवयोः कर्माणि वर्तत इत्यर्थः Sy. ३. युवयोः प्रियभूतः Sy.
४. देवानामाह्वाता स्तोतायम् Sy.
५. मानुषो मनुषः सकाशाज्जातो वा Sy.
६. जयति ते M. यागं करोति Sy.
७. ते seems to be unnecessary.
८. विपतं A. पिबतम् is suggested for विवतम् ।
९. स्तोमम् M. तस्य सम्बन्धिनं मधुरं सोमरसम् Sy. १०. अन्तिक एव । समीपे स्थित्वैव Sy.
११. आह्वये Sy. १२. युवाम् Sy.
१३. अन्नवान् सन् Sy.
१४. VM. ignores उ. १५. वर्धयेम Sy.
१६. यागम् । तत्साधनं हविर्वा Sy.
१७. ०ततमा० A.
१८. पतत्तामागच्छतां देवानामर्थाय Sy.
१९. ०कर्माणः is suggested for ०कर्मणा A. M. उरु स्तोत्रं कुर्वाणाः स्तोतारो वयम् Sy.
२०. शोभनस्तुतिम् Sy.
२१. हे वर्षकौ ! कामानाम् Sy.
२२. श्रुष्टीति क्षिप्रनाम । क्षिप्रगन्ता Sy.
२३. प्रेरितो M. २४. बोधयति शीघ्रं गन्तव्यमिति Sy. २५. स्तोत्रैः Sy.
२६. स्तुवन् is suggested for स्तुव ॥
२७. उपेत्य A.
२८. हविषां वोढारौ . . . यद्वा अयमर्धर्चोऽश्वपरतया व्याख्येयः । तथा सति तौ रथस्य वोढारौ दृढपादावश्विनोरश्वावुपगच्छताम् । इति तस्यार्थः Sy. २९. रक्षसां हन्तारौ Sy.
३०. भृत्संभृतौ A. सम्भृतौ is suggested for सम्भृतौ ॥सम्यग्भृतौ॰। पुष्टाङ्गौ Sy.

दृढपाणी[1] । समगच्छन्त । युवयोर्मदकानि[2] । सोमाऩानि । मा । अस्मात्[3] । हिंसिष्टम्[4] । आगच्छतम् । सुखेन[5] प्रदित्सितेन सहेति ।

आ पश्चातान्नासत्या पुरस्तादाश्विना यातमधरादुदक्तात् ।
आ विश्वतः पाञ्चजन्येन राया यूयं पात स्वस्तिभिः सदा नः ॥ ५ ॥

[आ पश्चातात्[6]]

VII. 74.

इमा उ[7] वां दिविष्टय[8] उस्रा हवन्ते[9] अश्विना ।
अयं वामह्वेऽवसे शचीवसू[10] विशंविशं हि गच्छथः ॥ १ ॥

इमा उ[11] वाम्[12] । इमा । उ[13] । वाम्[14] । दिविष्टय[15] उषसो विवमिच्छन्तीति । उत्सरणशीलो[16] । हवन्ते[17] । हे अश्विनौ ! अयं[18] च । वाम्[19] । ह्वयामि[20] । रक्षणाय[21] । प्रज्ञावसू[22] युवाम् । हि[23] । विशविशम्[24] । गच्छथ. सर्वाः प्रजा अभिगच्छत[25] ।

---

१. ०वाणी A.
२. मदकराणि । सोमाः Sy.
३. अस्मात् A. ४. हिंस्तम् Sy.
५. मङ्गलेन धनेन सार्धम् Sy.
६. The *pratika* is supplied by the Editor. The stanza has already been explained. See RV. 7. 72. 5.
७. 'इमा उ वाम्' इति षड्चं चतुर्थं सूक्तमाश्विनं वसिष्ठस्यार्षम् । आद्यातृतीयापञ्चम्यो बृहत्यः शिष्टाः सतोबृहत्यः । तथा चानुक्रान्तम्—'इमा उ वां षट् प्रगाथम्' (KSA. 37. 74. p. 26.) इति । प्रातरनुवाक आश्विने क्रतौ बार्हते छन्दस्याश्विनशस्त्रे च सूक्तम् । सूत्रितञ्च—'इमा उ वामयं वाम्' (ĀSS. 4. 15.) इति । दशरात्रे पञ्चमेऽहनि प्रउगशस्त्रे-'इमा उ वाम्' इत्ययमाश्विनस्तृचः । सूत्रितञ्च—'इमा उ वां विविष्ठयः पिबा सुतस्य रसिनः' (ĀSS 7. 12.) इति Sy.
८. उ is omitted by A.
९. उ is omitted. by M. उ इति चार्थे Sy.
१०. दिवमिच्छन्त्यः प्रजा ऋत्विजोऽपि Sy.
११. ०शीलो is suggested for ०शीलो ॥ वासको Sy.
१२. भवन्ते A. आह्वयामि Sy.
१३. वसिष्ठोऽपि Sy.
१४. युवाम् Sy. १५. आह्वयामि Sy.
१६. अस्मद्रक्षणाय युवयोस्तर्पणाय वा Sy.
१७. हे कर्मधनौ ! Sy.
१८. यस्मात् कारणात् Sy.
१९. किमर्थमेवं प्रजा अप्यहूयमानेत्यावरोधितरिति तत्राह-प्रजां प्रजां प्रति Sy.
२०. ०च्छतम् is suggested for ०च्छत ।

युवं चित्रं ददथुर्भोजनं नरा चोदेथां सूनृतावते ।
अर्वाग्रथं समनसा नि यच्छतं पिबतं सोम्यं मधु ॥ २ ॥

युवम् । युवाम् । पूजनीयम् । ददतुः । अन्नम् । हे नरौ ! मह्यं च । चोदयम् । स्तुतिमते । अवागिति स्पष्टम् ।

आ यातमुप भूषतं मध्वः पिबतमश्विना ।
दुग्धं पयो वृषणा जेन्यावसू मा नो मर्धिष्टमा गतम् ॥ ३ ॥

आ यातम् । आगच्छतम् । उप च । भवतम् । सोमं च । पितम् । अश्विनौ ! दुग्धम् । पयश्च । हे वृषणौ ! जेतव्यं शत्रुधनौ ! मा । अस्मान् । हिंसिष्टम् । आगच्छतम् ।

---

१. हे अश्विनौ ! युवं युवाम् Sy.
२. चायनीयम् Sy.
३. ददथुः is suggested for ददतुः ॥ धारयेथे Sy.
४. धनम् Sy.
५. चोदयतम् is suggested for चोदयं ॥ प्रेरयतम् Sy.
६. तद्धनं स्तुतिवते स्तोत्रे Sy.
७. अर्वागि० is suggested for अवागि० ।
८. VM. ignores the words रथम् । समनसा । नि । यच्छतम् । पिबतम् । सोम्यम् and मधु ।
Sy. explains these words in the following manner :—तदर्थं समनसा समानमनस्कौ सन्तौ रथं युवयोः सम्बन्धिनमर्वागस्मदभिमुखं नि यच्छतम् । नियमयतम् । तथा कृत्वा सोम्यं सोमसम्बन्धिनं मधु मधुररसं पिबतम् Sy.
९. यज्ञं प्रत्यागच्छतम् Sy.
१०. हव० M.
आगत्योप समीपे भूषतं भवतम् Sy.
आगत्य चोपभूषतमलङ्कुरुतं यज्ञम् Mah.
अलङ्कुरुतं च यज्ञम् U.
११. मधुरं सोमरसम् Sy. मधुरं सोमम् ।... कर्मणि षष्ठी, नुमभावश्छान्दसः Mah. मधुरूपस्य स्वमंशम् U.
१२. वितम् M. पिबतम् is suggested for पितम् ॥
१३. हे अश्विनौ ! युवाम् Sy.
१४. दूग्धं M. अन्तरिक्षाद्दुग्धम् Sy. अन्तरिक्षात् प्रक्षारयतम् Mah. दुग्धं पयो महावीरसेचनार्थम् U.
१५. वृष्टचुदकम् Sy., Mah.
१६. णो M. पीत्वा च हे वर्षकौ ! Sy. वर्षकौ ! यज्ञफलस्य सेक्तारौ ! Mah. हे वृषणौ ! सेक्तारौ ! U.
१७. ०व्यशत्रुधनौ is suggested for ०व्यं शत्रुधनो ॥ हे जेतव्यधनौ ! जितधनावित्यर्थः Sy. जेन्यं जेतव्यं जितं वा आ समन्ताद् वसु धनं याभ्यां तौ जेन्यावसू वशीकृतधनौ तादृशौ Mah. जितं स्वीकृतं वसु धनं याभ्यां तौ जेन्यावसू U.
१८. हिंस्तम् । ईदृशप्रार्थनाकरणमेव हिंसा Sy. मा हिंस्तम् । मृधिर्हिंसार्थः लुङ् Mah. मा च मर्धिष्टं सम्प्रहारं कुरुतं नोऽस्मान् प्रति U.
१९. आगच्छनं शीघ्रम् Sy. किं बहुना ? युवामागच्छतम् । आदरार्थं पुनर्वचनम् Mah. अवश्यं चागच्छतम् U, This stanza= YV. 33. 88.

अश्वासो ये वामुप दाशुषो गृहं युवां दीयन्ति बिभ्रतः ।
मक्षूयुभिर्नरा हयेभिरश्विना देवा यातमस्मयू ॥ ४ ॥

अश्वासः । अश्वासः[1] । ये । युवयोः[2] । उपगच्छन्ति[3] । यजमानस्य[4] । गृहं[5] प्रति । युवां रथे । धारयन्तस्तैः । क्षिप्रगमनकारिभिः । हे नरौ[6] ! अश्वैः । अश्विनौ ! देवौ ! आयातम् । अस्मत्कामौ[7] ।

अधा ह यन्तो अश्विना पृक्षः सचन्त सूरयः ।
ता यंसतो मघवद्भ्यो ध्रुवं यशश्छर्दिरस्मभ्यं नासत्या ॥ ५ ॥

अधा । अथ । खलु[11] । अभिगच्छन्तः[12] । अश्विनौ । अन्नम् । सचन्ते[13] । स्तोतारः[14] । तौ[15] । प्रयच्छतः । हविष्मद्भ्यः[16] । ध्रुवम्[17] । अन्नम्[18] । अस्मभ्यं च । गृहं[19] प्रयच्छतमिति[20] ।

प्र ये ययुरर्वृकासो रथाइव नृपातारो जनानाम् ।
उत स्वेन शवसा शुशुवुर्नर उत क्षियन्ति सुक्षितिम् ॥ ६ ॥

प्र ये । प्रयच्छन्ति[21] । ये[22] । वृकवर्जिताः[23] शीघ्रम् । रथाइव[24] । नृणा[25] रक्षितारः । जनाना[26] मध्येऽश्विनौ । स्तोतारः[27] । स्तेन[28] स्वेन । बलेन । वृद्धा भवन्ति[29] । अपि[30] च । निवसन्ति[31] । सुनिवासम् ।

---

१. अश्वाः Sy.
२. युवयोः स्वभूताः Sy.
३. गमयन्तीत्यर्थः Sy.
४. हविर्दातुः Sy.
५. गृहं A.
६. ०मन गामिभिः A. शीघ्रगन्तृभिः Sy.
७. हे is missing in M.
८. नेतारौ ! Sy.
९. अस्मद्यज्ञमागच्छतम् Sy.
१०. अस्मान् कामयमानौ Sy.
११. अपि च Sy.
१२. स्तुतिभिर्गच्छन्तो यजमानाः Sy:
१३. प्रभूतं सेवन्ते । संयन्ति वा Sy.
१४. मेधाविनः स्तोतारः Sy.
१५. युवाम् Sy.
१६. अन्नवद्भ्योऽस्मभ्यम् Sy.
१७. अविचलितम् Sy.
१८. अन्नं यश एव वा Sy.
१९. गृहं Sy.
२०. VM. ignores नासत्या ॥ हे नासत्यावश्विनौ
२१. युवां प्रापयन्ति हविर्भिः Sy.
२२. यजमानाः Sy.
२३. प्रकव० A. परकोयधनस्यानादातारः Sy.
२४. व्रीह्यादिपूर्णा रथा यथा प्राप्नुवन्ति स्वामिगृहम् Sy.
२५. ऋत्विग्रूपाणां नृणां रक्षितारः सन्तः Sy.
२६. मनुष्याणाम् Sy.
२७. स्तेन स्वन A. स्वेन is suggested for स्तेन ॥ स्वीयेन Sy.
२८. वर्धन्ते Sy.
२९. उतेत्ययमुत्तरवाक्यापेक्षः । अपि च Sy.
३०. गच्छन्ति प्राप्नुवन्ति Sy.
३१. सुनीवा० A.

VII. 75.

व्युषा आवो दिविजा ऋतेनाविष्कृण्वाना महिमानमागात् ।
अप द्वहस्तमा वरजुष्टमङ्गिरस्तमा पथ्या अजीगः ॥ १ ॥

व्युषा[1]। विविधम्। गच्छति। दिवि जाता। सत्येन प्रकाश्येन सहान्धकारापनयनात् सत्यस्य प्रकाशनम्। प्रकाशयन्ती। महिमानम्। आजगामागता च। रक्षांसि। तमश्चात्मनः। अपर्याप्तम्। अपगमयति सेयम्। अङ्गिरस्तमा, पुरोषा अङ्गिरस्सु जज्ञे। मार्गान् तमसा तिरोहितान्। तदपनयनेनोज्जहारेति, तेजांसि वा पथ्या इति।

---

१. 'व्युषा आवः' इत्यष्टर्चं पञ्चमं सूक्तं वसिष्ठस्यार्षम्। अत्रानुक्रमणिका—'व्युषा अष्टावुषस्यं तु वा' (KAS. 37. 75. p. 26.) इति।

'तु वा' इत्युक्तत्वात्तुह्यादिपरिभाषयेदममादीनि सप्तसूक्तान्युषोदेवत्यानि। प्रातरनुवाक उषस्येऽतो त्रैष्टुभे छन्दस्याश्विनशस्त्रे चेदमादीनि षट् सूक्तानि। तथा च सूत्र्यते—'व्युषा आवो विविजा इति षडिति त्रैष्टुभम्' (ĀŚS. 4. 14.)इति। ऋग्विधान आख्यातो विनियोगोऽत्र लिख्यते—

रात्र्या अपरकाले य उत्थाय प्रयतः शुचिः।
व्युषा इत्युपतिष्ठेत षड्भिः सूक्तैः कृताञ्जलिः॥
प्राप्नुयात्स हिरण्यानि नानारूपं धनं बहु।
गा अश्वान् पुरुषान् धान्यं स्त्रियो वासांस्यजाविकम्' (Rgvid. 2. 28.) इति Sy.

२. व्यूषा A.

३. व्यौच्छत्। विभानं कृतवतीत्यर्थः। वसिनिवासवाच्यत्र विपूर्वो व्युच्छने भवेत्। 'छन्दस्यपि दृश्यते' pa. 6. 4.73. इत्याद्। दृशिग्रहणस्य विध्यन्तरोपसङ्ग्रहणार्थत्वाद्वनजादेरप्याडागमः। 'हल्ङ्याब्भ्यः०' (Pa. 6. 1. 68.) इति लोपः Sy.

४. विश्यन्तरिक्षे प्रादुर्भूता सती Sy.

५. तेजसा Sy.

६. ०रावनयतात् A.

७. स्वमहस्त्वम् Sy.

८. ०तानि च M. ०ता च is suggested for ०तां च ॥ आगतवती Sy.

९. आगत्य चास्मद्द्वेषिणः Sy.

१०. सर्वेषामप्रियम् Sy.

११. अपवृणोति Sy.

१२. अङ्गेर्गत्यर्थाद्विङ्गिराः। गन्तृतमा Sy.

१३. ०रोष M.

१४. ०रः स A.

१५. पदवीः Sy.

१६. ०नेनेज जहा० A.

उद्गिरति। प्राणिनां व्यवहाराय प्रकाशयतीत्यर्थः Sy.

१७. The passage तेजांसि वा पथ्या इति should immediately follow तमसा तिरोहितान् and precede तदपनयनेन.

१८. VM. ignores व्युषाः। इयमुषाः Sy.

महे नो अद्य सुविताय बोधुषो महे सौभगाय प्र यन्धि ।
चित्रं रयिं यशसं धेह्यस्मे देवि मर्तेषु मानुषि श्रवस्युम् ॥ २ ॥

महे नः । महते । अस्माकम् । अद्य । अभ्युदयाय । प्रवृद्धा भव । तथोषः ! महते । सौभाग्याय । धनमस्मभ्यं प्रयच्छ । चित्रम् । रयिम् । यशस्विनम् । प्रयच्छ । अस्मभ्यम् । देवि ! मर्त्येषु मां प्रथितं कुरु धनप्रदानेन । मनुष्यहिते ! कीर्तिमिच्छन्तम् ।

एते त्ये भानवो दर्शतायाश्चित्रा उषसो अमृतास आगुः ।
जनयन्तो दैव्यानि व्रतान्यापृणन्तो अन्तरिक्षा व्यस्थुः ॥ ३ ॥

एते । एते । इमे । रश्मयः । दर्शनीयायाः । चित्राः । उषसः । मरणवर्जिताः । प्रादुरभवन् । जनयन्तः । यज्ञान् । पूरयन्तश्च । अन्तरिक्षम् । वितिष्ठन्ते ।

---

१. अद्य is missing in A.
२. सुखप्राप्तये सुखगमनाय वा Sy.
३. भवत M.
४. सेभ्योगाय A.
५. प्रयच्छास्मान् Sy.
६. चायनीयम् Sy.
७. धनम् Sy.
८. यशोयुक्तम् Sy.
९. धारय Sy.
१०. अस्मासु Sy.
११. मर्तेषु A.
अस्मासु Sy.
१२. ०त A.
१३. गच्छन्तं A. अन्नवन्तं पुत्रं धेहीत्यनुषङ्गः Sy.
१४. Missing in M. ते is suggested for एते ॥ ते प्रसिद्धाः Sy.
१५. पुरो दृश्यमानाः Sy.
१६. रश्वयोः A.
१७. प्रकाशयुक्तायाः Sy.
१८. पूज्या आश्चर्यभूता वा Sy.
१९. अमरणा अनश्वराः Sy.
२०. ०वत् A. आगच्छन्ति Sy.
२१. उत्पादयन्तः । तदनुकूलप्रकाशप्रदानात्तदुत्पादकत्वमेषाम् Sy.
२२. VM. seems to explain दैव्यानि and व्रतानि together as यज्ञान् ॥ देवानां सम्बन्धीनि व्रतानि कर्माणि Sy.
२३. आपूरयन्तः Sy.
२४. अन्तरिक्षाणि । एकस्यैवान्तरिक्षस्य वायुमेघपक्षिणामालम्बनोपाधिना विविधत्वम् । अतो बहुवचनमुपपन्नम् Sy.
२५. चिति० A.
सरन्ति विविधं तिष्ठन्ति Sy.

एषा स्या युंजाना परांकात्पञ्च क्षितीः परि सद्यो जिगाति ।
अभिपश्यन्ती वयुना जनानां दिवो दुहिता भुवनस्य पत्नी ॥ ४ ॥

एषा । सा । एषोषाः । युञ्जाना । दूरात् । पञ्च । जनान् । सद्य एव । परीच्छति । दर्शनीय । मार्गान् । जनानाम् । दिवः । दुहिता । भवनस्य । पालयित्री ।

वाजिनीवती सूर्यस्य योषा चित्रामघा राय ईशे वसूनाम् ।
ऋषिष्टुता जरयन्ती मघोन्युषा उच्छति वह्निभिर्गृणाना ॥ ५ ॥

वाजिनीवती । अन्नवती । सूर्यस्य । योषा । चित्रधना । धनस्य । ईशे । वसूना च, वसूनि वोसयन्तीति रश्मयः । ऋषिष्टुताः । सर्व भूतजातं जनयन्ती । धनवती । उषाः । उच्छति । वोढृभिः स्तोतृभिः । स्तूयमाना ।

प्रति द्युतानामरुषासो अश्वाश्चित्रा अदृश्रन्नुषसं वहन्तः ।
याति शुभ्रा विश्वपिशा रथेन दधाति रत्नं विधते जनाय ॥ ६ ॥

प्रति द्युतानाम् । प्रत्यदृश्यन् । द्योतमानाम् । आरोचमानाम् । अश्वाः । चित्राः । उषसम् । हवन्तः । याति । शोभमाना । विश्वरूपा । रथेन । दधाति । रत्नम् । परिचरते । जनाय ।

---

१. उद्योगं कुर्वाणा प्रकाशय Sy.
२. दूरदेशात् दूरे स्थितापि Sy.
३. निषादपञ्चमांश्चतुरो वर्णान् Sy.
४. परिच्छती A.
५. Missing in M. दर्शयन्ती is suggested for दर्शनीय ॥ साक्षित्वेनावलोकयन्ती Sy. ६. मार्गज् Â. प्रज्ञानानि Sy.
७. प्राणिनाम् Sy. ८. दुहितृस्थानीया Sy.
९. भूतजातस्य Sy.
१०. पालयित्री परिजिगातीत्यन्वयः Sy.
११. ०वति A. बह्वृचा । यद्यप्युषोनामैतत् तथापि चित्रामघेत्यस्याप्युषोनामकस्य पृथग्विद्यमानत्वादत्रैको योगरूढोऽवगन्तव्यः Sy.
१२ योषित् Sy.
१३. विचित्रधना विचित्ररश्म्याख्यधना व. Sy.,
१४. अविशिष्टस्य तस्य Sy.
१५. वसूनां च is missing in A. देवमनुष्यादिसर्वाश्रयाणाम्. . .धनानाम् । अथवा वसवो वासका रश्मयः, तेषामपि Sy.
१६. वासय० is suggested for वोसय० ॥
१७. ०ष्मता A. ०ष्टुता is suggested for ०ष्ठुताः ॥ ऋषिभिः स्तुता Sy.
१८. जरय० is suggested for जनय० ॥ प्राणिजातानि । उषाः खलु पुनः पुनरावर्तमाना प्राणिनामायुः क्षपयति Sy. १९. विभानं करोति Sy. २०. कर्मवोढृभिर्यजमानैः Sy.
२१. Missing in M. ०दृश्रन् is suggested for ०दृश्यन् ॥ प्रतिदृश्यन्ते Sy.
२२. आरे चाचमाना A. आरोचमानाः Sy.
२३. चायनीयाः Sy. २४. हवन्ते M. वहन्तः is suggested for हवन्तः ॥ धारयन्तः Sy.
२५. सर्वत्र गच्छति Sy. २६. सा चोषा दीप्यमाना Sy. २७. बहुरूपेण Sy. २८. धनाति A. ददाति च Sy. २९. रमणीयं धनम् Sy.

सत्या सत्येभिर्महती महद्भिर्देवी देवेभिर्यजता यजत्रैः ।
रुजद्दृळ्हानि दददुस्रियाणां प्रति गावं उषसं वावशन्त ॥ ७ ॥

सत्या[1]। सत्या[1]। सत्यैः। महती[1] च। महद्भिः। देवी[4]। देवैः[5]। यष्टव्या[6]। यष्टव्यैः[6] सह। विनाशयति। दृढानि[9] तमांसि। ददाति[10] च[11]। रश्मीन्[12]। रश्मयश्च[11]। श्रोषुसम्[14]। अत्यन्तं प्रतिकामयन्ते[15]।

नू नो गोमद्वीरवद्धेहि रत्नमुषो अश्वावत्पुरुभोजो अस्मे ।
मा नो बर्हिः पुरुषता निदे कर्ग्रयं पात स्वस्तिभिः सदा नः ॥ ८ ॥

नू[16] नः। क्षिप्रम्। अस्मभ्यम्। गोमत्[17]। वीरवच्च[18]। धेहि[19]। रत्नम्[20]। उषः! अश्ववत्। बहुप्रकार[21] भोक्तव्यम्। अस्माभिः[22]। मा। अस्माकम्। यज्ञम्। जनतायाम्[23]। निन्दायै[24]। कार्षीः[25]।

---

१. सत्या is missing in A.

२. अन्यैरबाध्या Sy.

३. ०हनी च A. पूजनीया प्रवृद्धा वा गुणैः Sy.

४. देवं A. द्योतमाना Sy.

५. किरणैर्निपातभाग्भिरन्यैर्देवैर्वा सहिता सतीSy.

६. यजनीया Sy.

७. उक्तलक्षणैः Sy

८. भिनत्ति Sy.

९. बृंह्हाति A. अत्यन्तं स्थिराणि तमांसि Sy.

१०. ववाति सामर्थ्यात्प्रकाशमित्यर्थः। यद्वा ववाति स्तोतृभ्यः Sy.

११. च is missing in M.

१२. उस्रियाणाम्। गोनामैतत्। उस्त्राविण आसां भोगा इति तद्व्युत्पत्तिः। तासां सञ्चाराय। अथवोस्रिया गा ववत् Sy.

१३. किं च गावः। उपलक्षणमेतत्। सर्वेऽपि तमोऽवरुद्धाः प्राणिनः।...विशेषेण गवां प्रभाते सञ्चारार्थमुषसोऽपेक्षितत्वात्तासां प्राधान्येनोक्तिः Sy.

१४. श्चोषसम् is suggested for ०श्चोषुसम्।

१५. उशन्ति कामयन्ते Sy.

१६. नूनं A.

१७. बहुभिर्गोभिर्युक्तम् Sy.

१८. वीरैः पुत्रैरुपेतम् Sy.

१९. देहि Sy.

२०. रमणीयं धनम् Sy.

२१. ०कार भो० A. बह्वन्नम् Sy.

२२. पादभेदादस्मे इति पुनरभिधानम् Sy.

२३. पुरुषतायाम्। पुरुषसमूहेषु। अस्मत्सदृशेष्वित्यर्थः Sy.

२४. यथा ते निन्दन्ति तथा मा कुर्वित्यर्थः Sy.

२५. षु A. कार्षीः is suggested for कार्षी॥

VII. 76.

उदु ज्योतिरमृतं विश्वजन्यं विश्वानरः सविता देवो अश्रेत् ।
कृत्वा देवानामजनिष्ट चक्षुरा विरकृणोद्भुवनं विश्वमुषाः ॥ १ ॥

उदु । यास्कः—'उदशिश्रयत् । ज्योतिः । अमृतम् । सर्वजन्यम् । विश्वानरः । सविता । देवः । कृत्वा रश्मिना । उषआख्यं चक्षुः । अजनिष्ट । आविष्करोति । भवनम् । सर्वम् । उषा इति ।

---

१. 'उदु ज्योतिः' इति सप्तर्चं षष्ठं सूक्तं त्रैष्टुभमुषस्यम् । तथा चानुक्रान्तम् 'उदु सप्त' इति । प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः Sy. वसिष्ठस्यार्षम् Dur. SKN.

२. N. 11. 10. VM. explains the first hemistich of this stanza by the quotation of the N. only.

३. उदग्निश्रयं A. उदशिश्रयत् is suggested for उदगिश्रयत् ॥ ऊर्ध्वं श्रयति Sy. उच्छ्रयत्यूर्ध्वमुपनयति Dur. उच्छब्दोऽश्रेदित्यनेन सम्बध्यते।...उदश्रयदुच्छ्रितं कृतवान् करोति वा उद्गमयतीत्यर्थः । कृत एतत् ? निष्क्रियत्वात् सर्वज्योतिषां वायुना प्रेर्यमाणानामुद्गमनात् । वायोश्च विश्वानरत्वात् SKN.

४. सूर्याख्यम् Dur. आदित्याख्यम् SKN.

५. अमृतत्वसाधकमविनाशि वा Sy. मरणवर्जितम् SKN.

६. विश्वेषां जनानां हितकरम् Sy. सर्वगन्तृणां वायुपूर्वकत्वात्, गमनस्योपपद्यते विश्वजन्यं सर्वलोकहितम् Dur. विश्वस्मै जनाय हितम् SKN.

७. सर्वेषां नेता Sy. मध्यमो वायुः...एवमत्र विश्वानरो ज्योतिरुच्छ्रयतीति व्यपदेशान्मध्यमो विश्वानरः । एवं चाभिप्रेत्योक्तम्—'कर्मण्यं मध्यमादेवमवक्ष्यत्' इति Dur. मध्यमस्थानः SKN.

८. सविता स एव सर्वस्याभ्यनुज्ञानात् SKN.

९. दानादिगुणयुक्तः SKN.

१०. कृत्वा A. कर्मणा निमित्तेन यागानुष्ठानमित्यर्थः Sy. भाष्यकारो नाधिजज्ञे । प्रसङ्गतस्तु निर्ब्रूमः । यदा तज्ज्योतिः द्युस्थानमुपनीयते विश्वानरेणाथ तदा कृत्वा तत्कर्मणा Dur. कथं ज्ञायते ? यतः कृत्वादिकर्मणः SKN.

११. चक्षुःस्थानीयमौषसं तेजः Sy. ख्यानं प्रकाशः Dur.

१२. प्रादुरभूत् Sy. जायते Dur. जातम् SKN.

१३. प्रादुरकरोत् । सर्वं जगदाविष्कृतवती Sy.

१४. हवनं M. भुवनम् is suggested for भवनम् ॥ भूतजातम् Sy. Dur. SKN.

१५. उत्पन्ना ओषाः सर्वम् Sy.

१६. VM. ignores उ and देवानाम् ॥ देवानां व्यवहर्तृणां स्तोतॄणां वा यजमानानाम् Sy. देवानां रश्मीनाम् Dur. उकारः पदपूरणः SKN., N. 11. 10. ; SKN. IV. 60.

प्र मे पन्था देवयाना अदृश्रन्नमर्धन्तो वसुभिरिष्कृतासः ।
अभूदु केतुरुषसः पुरस्तात्प्रतीच्यागादधि हर्म्येभ्यः ॥ २ ॥

प्र मे । प्रादृश्यन्त[1] । ममाग्रे । पन्थानः । देवयाना[2] रश्मयः । अर्हिंसन्तः[3] । वसुभिर्देवैः । इष्कृताः[4] । भवति[5] । केतु[6] प्रज्ञानं रश्मिः । उषसः । पुरस्तात्[7] । अभिमुखम्[8] । आगच्छत्युषा । उच्छ्रितेभ्यो[9] देशेभ्यः[10] ।

तानीदहानि बहुलान्यासन्या प्राचीनामुदिता[11] सूर्यस्य ।
यतः परि जारइवाचरन्त्युषो दृक्षे न पुनर्यतीव[12] ॥ ३ ॥

तानि[13] । तानि । एव । अहानि[14] । विस्तृतानि । भवन्ति । यान्यहानि । सूर्यस्योद्द्योतः[15] । प्रागेव[16] । उदितान्यासन्[17] । यस्मात् त्वम् । जारइव[18] । आचरन्ती[19] । उषः[20] । न । परिदृश्यसे[21] । न क्षणमात्रं तिष्ठसि । यथा[22] यतीति देशान्तरं गच्छन्ती । काचिदागता तदानीमेव गच्छति यथा वा जारस्तद्वत्[23] त्वं च गता ततोनि प्रादुर्भवन्तीति[24] ।[25]

---

१. प्रदृश्यन्ते Sy.
२. मया Sy.
३. देवप्रापकाः Sy.
४. हिंसन्तः M.
५. तेजोभिः Sy.
६. इषष्कृता A. संस्कृताः Sy.
७. अचेति ज्ञायते Sy.
८. केतु पज्ञा० A. केतुः प्र० is suggested for केतु प्र० ॥ प्रज्ञापकं तेजः Sy.
९. पूर्वस्यां दिशि Sy.
१०. प्रत्यगञ्चनास्मदभिमुखी Sy.
११. उच्छ्रितेभ्यः प्रदेशेभ्यः । हर्म्यशब्द उन्नतप्रदेशोपलक्षकः Sy.
१२. VM. ignores उ and अधि ॥
१३. तव तेजांसि Sy.
१४. उषःप्रकाशयुक्तस्यैव कालस्याहःशब्दव्यवहारात् Sy.
१५. ०स्याद्यत A. ०स्योद्यतः is suggested for ०स्योद् द्योतः ॥
१६. तस्य प्राग्देशं प्रत्युदयन्ति । यद्वा सूर्यस्य प्राचीने देशे या यान्युदितेदितानि तानीत्यर्थः Sy.
१७. उदिते सति Sy.
१८. यं समा A. यैश्च तेजोभिः Sy.
१९. तव A. पत्याविव Sy.
२०. समीपे सञ्चरन्ती साध्वी नारीव । जारे रात्रेर्जरयितरि सूर्ये सञ्चरन्ती त्वं दृश्यसे । यथा लोके दुष्टं भ्रमणशीलमपि पतिमत्यज्यैव ? (मत्यक्त्वैव) साध्वी सञ्चरति तद्वत् तमविमुञ्चती त्वमित्यर्थः Sy. Sy. seems to take जारइव as जारेइव and not as जारःइव as padapāṭha takes it.
२१. उषसो न A.
२२. ०वृश्य० A.
२३. यती is suggested for यसीति ॥ न पुनर्यतीव यती पतिं परित्यज्येतस्ततः सञ्चरन्ती व्यभिचारिणीव सूर्यमपरित्यजन्ती त्वम् Sy.
२४. स्त is written twice in A.
२५. ततोऽपि is suggested for ततो नि ॥
२६. ०वन्तीति is suggested for ०वन्तीति ॥
२७. VM. ignores पुनः ॥ पुनरित्ययं वैलक्षण्यद्योतनार्थः । एवं यैस्तेजोभिर्युक्ता परिदृश्यसे तान्येवाहान्यासन्निति सम्बन्धः Sy.

त इद्देवानां सधमादः आसन्नृतावानः कवयः पुर्व्यासः ।
गूळ्हं ज्योतिः पितरो अन्वविन्दन्त्सत्यमन्त्रा अजनयन्नुषासम् ॥ ४ ॥

त इद्देवानाम् । ते । खलु । देवानाम् । सधमादः । अभवन् । यज्ञवन्तः । कवयः । पुराणाः कर्माण्यनुतिष्ठन्ति । गूढम् । ज्योतिरुषआख्यम् । पालयितारो देवाः । अन्वविन्दन् । सत्यमन्त्राः सत्यस्तुतयः । जनयन्तु । उषसं यद्वा वसिष्ठस्य पितरः स्तुतिभिरुषसमविन्दन्नजनयंश्चेति ।

समान ऊर्वे अधि संगतासुः सं जानते न यंतन्ते मिथस्ते ।
ते देवानां न मिनन्ति व्रतान्यमर्धन्तो वसुमिर्यादमानाः ॥ ५ ॥

समाने । समाने साधारणे । ऊर्वे वाडवेऽग्नावुषसो निद्रानभूते ? सङ्गताः । सञ्जानते । न च । मिथः । यतन्ते सयत्नाः । ते रश्मयः । ते । देवानाम् । यज्ञाख्यानि कर्माणि । न । हिंसन्ति । अहिंसन्तः । वसुभिर्देवैः । प्रेर्यमाणाः ।

---

१. तेऽङ्गिरसः Sy.
२. एव ऋषीणां मध्ये Sy.
३. सह माद्यन्तः Sy.
४. सत्यवन्तः Sy.
५. ०या A. अनूचानाः 'ये वा अनूचानास्ते कवयः' (AB. 2. 38.) इति श्रुतेः Sy.
६. पूर्वकालीनाः Sy.
७. तमसावृतम् Sy.
८. सौर्यं तेजः Sy.
९. पालयितारः सर्वस्याङ्गिरसः Sy.
१०. लब्धवन्तो मन्त्रसामर्थ्यात् Sy.
११. त्य is missing in A.
१२. प्रादुरकुर्वन् । 'तुरीयेण ब्रह्मणाविन्ददत्रिः (RV. 5. 40. 6.) 'अत्रयस्तमन्वविन्दन् (RV. 5. 40. 9.) इति निगमौ । अत्राङ्गिरसां स्तुत्योषस एव स्तुतिर्ज्ञातव्या Sy.
१३. ०मपविन्द० M.
१४. सर्वेषां साधारणे Sy.
१५. गोसमूहे पणिभिरपहृते पुनर्लब्धे सति Sy.
१६. ०वेह्ना उष० A.
१७. निद्रानभूते is suggested for निद्रानभूते ॥
१८. मिलिताः सन्तः Sy.
१९. एकबुद्धयो भवन्ति Sy.
२०. ०न्ते न सं य० M. सहैव साधनमनुतिष्ठन्तीत्यर्थः Sy.
२१. अङ्गिरसः Sy.
२२. कर्माणि न is missing in A. यागलक्षणानि Sy.
२३. (न) हिंसन्ति । किन्तु परिपालयन्तीत्यर्थः Sy.
२४. अः हिंस० A.
२५. वासकैरुषसां तेजोभिः Sy.
२६. गच्छन्तः Sy.
२७. VM. ignores अधि ॥ अधीत्यनर्थकः Sy.

प्रति त्वा स्तोमैरीळते वसिष्ठा उर्वुधः सुमगे तुष्टुवांसः ।
गवां नेत्री वाजपत्नी न उच्छोषः सुजाते प्रथमा जरस्व ॥ ६ ॥

प्रति त्वा । प्रतिष्टुवन्ति । त्वाम् । स्तोमैः । वसिष्ठाः । उषसि प्रबुध्यमानाः । सुधने ! स्तुवन्तः । पशूनाम् । नेत्री । अन्नस्य पालयित्र्यन्नवतीका वा । अस्मदर्थम् । व्युच्छ । उषः ! शोभनजनने ! मुख्या । स्तूयस्व स्तुता भवेति ।

एषा नेत्री राधसः सूनृतानामुषा उच्छन्ती रिभ्यते वसिष्ठैः ।
दीर्घश्रुतं रयिमस्मे दधाना यूयं पात स्वस्तिभिः सदा नः ॥ ७ ॥

एषा । एषा । अन्नस्य । वाचा च नेत्रभ्युषा । व्युच्छन्ती । स्तूयते । वसिष्ठे । दीर्घकाल श्रूयमाणम् । धनम् । अस्मभ्यम् । दधानेति ।

VII. 77.

उषो रुरुचे युवतिर्न योषा विश्वं जीवं प्रसुवन्ती चरायै ।
अभूदग्निः समिधे मानुषाणामकर्ज्योतिर्बाधमाना तमांसि ॥ १ ॥

उषो रुरुचे । उषैव । रुरुचे । युवतिः । इव । स्त्री । विश्वम् । जीवम् । प्रेरयन्ती । चरणार्थं

---

१. ०ष्टुव० M. २. स्त्वां A.
३. स्तोत्रैः Sy. ४. उषसि बुध्यन्तः Sy.
५. ०नैः M. ६. प्रापयित्री Sy.
७. ०अन्नभवतिका A. ०अन्नपतिका is suggested for ०अन्नवती का ॥ अन्नस्य वात्रीत्यर्थः
८. बिभाहि Sy. ९. सुप्रादुर्भावे ! Sy.
१०. इतरदेवेभ्यो मुख्यभूता Sy.
११. राधसः स्तोतुः Sy. १२. स्तुतीनाम् Sy.
१३. नेत्री । उषाः is suggested for नेत्र्यषा ।
१४. प्युच्छन्ति A. तमो विबाधयन्ती Sy.
१५. वसिष्ठैः is suggested for वसिष्ठे ॥ वसिष्ठगोत्रोत्पन्नैः Sy.
१६. दीर्घं श्रूयमाणम् । सर्वत्र प्रसिद्धम् Sy.
१७. अस्मासु Sy. १८. धारयन्ती Sy.
१९. 'उषो रुरुचे' इति षड्चं सप्तमं सूक्तं वसिष्ठस्यार्षमुषस्यम् । तथा चानुक्रान्तम्—'उषो रुरुचे षट्' (KAS. 37. 77. p. 26.) इति । प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः Sy.
२०. उषो रुरुचे A.
२१. उषैव रुरुचे is missing in A. इयमुषाः समीपे एव सूर्यस्य दीप्यते Sy.
२२. यौवनोपेता Sy.
२३. योषिदिव सा यथा वस्त्राभरणादिना पत्युः समीपे प्रदीप्यते तद्वत् Sy.
२४. सर्वम् Sy.
२५. जीवसङ्घम् Sy.
२६. सञ्चाराय Sy.

तस्मिन्[1] काले। अभूत्[2]। अग्निः[3]। समिन्धनाय[4]। मानुषाणाम्[5]। करोति[6]। ज्योतिः[7]। बासमाना[8]। तमांसि[9]।

विश्वं प्रतीची सुप्रथा उदस्थाद्द्रुशद्वासो बिभ्रती शुक्रमश्वैत्।
हिरण्यवर्णा सुदृशीकसंदृग्गवां माता नेत्र्यह्नामरोचि ॥ २ ॥

विश्वम्[10]। विश्वं भूतम्। अभिमुखी। सर्वतः पृथुतमा। उदतिष्ठत्[11]। श्वेतम्[12]। वासः[13]। बिभ्रती[14]। दीप्तमिति ज्योतिः[15]। आवर्धयते[16]। हिरण्यवर्णा[17]। सुदृशीकसन्दर्शना[18]। ज्योतिषाम्[19]। माता[20]। अह्नाम्[21]। नेत्री[22]। दीप्यते[23]।

देवानां चक्षुः सुभगा वहन्ती श्वेतं नयन्ती सुदृशीकमश्वम्।
उषा अदर्शि रश्मिभिर्व्यक्ता चित्रामघा विश्वमनु प्रभूता ॥ ३ ॥

देवानाम्[24]। देवानाम्। चक्षुरादित्यमाह्निकं वा तेजः। वहन्ती[25]। सुधना[26]। श्वेतम्[27]। सुदर्शनमात्मीयम्। अश्वम्[28]। नयन्ती। उषाः। अदर्शि[29]। रश्मिभिः[30]। व्यज्यमाना। चित्रधना[31]। सर्वं भूतजातम्[32]। लक्ष्मीकृत्य[33]। प्रादुर्भूतेति[34]।

---

१. ते० A. २. अभ्र इत् A. अभवत् Sy.
३. समिधे समिन्धनीयः। कृत्यार्थे केन्। समिद्धः सन्। Sy. ४. मनुष्याणामर्थाय Sy.
५. अकार्षीत्।...अकरोत् Sy.
६. तेजःसङ्घम्। अथवा ओषसं ज्योतिस्तमांसि Sy.
७. बाधमानम् is suggested for बासमाना॥ बाधमानं बाधकम् अथवा बाध्यमानानि Sy. ८. अन्धकारान् Sy.
९. विश्वभू० A. कृत्स्नं जगत् प्रति Sy.
१०. उदगच्छत् Sy. ११. उदिता च दीप्तम् Sy.
१२. वसनीयं तेजःसमूहम् Sy.
१३. विभूती A. धारयन्ती Sy.
१४. दीप्ति मि० A. तेजोमयम् Sy.
१५. ०वतंय० M. वर्धते Sy.
१६. ०पर्णा A. हितरमणीयवर्णोपेता Sy.
१७. सन्दर्शयतीति सन्दृक् तेजः। सुष्ठु दर्शनीयं सन्दृक् तेजो यस्याः सा तादृशी Sy.
१८. ०षा A. वाचां गवामेव वा अथवा रश्मीनाम् Sy. १९. माता निर्मात्री। उषःकाले हि पक्षिमनुष्यादीनां वाचो निर्गच्छन्ति। गवामपि तस्मिन् काले सञ्चाराभिर्मातृत्वम् Sy.
२०. अनान् A. दिवसानाम् Sy.
२१. प्रापयित्री Sy. २२. रोचते Sy.
२३. ०त्यमह्नि० A. चक्षुःस्थानीयं तेजः Sy.
२४. ०न्ति A. धारयन्ती Sy.
२५. शोभनधना Sy.
२६. श्वेतवर्णोपेतं सूर्यं प्रकाशयुक्तं कुर्वतीत्यर्थः Sy.
२७. सर्वदागन्तारमादित्यम् Sy.
२८. प्रापयन्ती Sy. २९. वृश्यते च Sy.
३०. रश्मिभिः स्वकीयैः Sy.
३१. धाना A. विचित्रधना Sy.
३२. जगत् Sy. ३३. लक्षी० M. अनुलक्ष्य Sy.
३४. प्रवृद्धा, सर्वजगद्व्यवहारायेत्यर्थः Sy.

अन्तिवामा दूरे अमित्रमुच्छोर्वीं गव्यूतिमभयं कृधी नः ।
यावय द्वेष आ भरा वसूनि चोदय राधो गृणते मघोनि ॥ ४ ॥

अन्तिवामा । सन्निकृष्टधना[1] । अमित्रम्[2] । दूरेऽस्माकम्[3] । व्युच्छ[4] यथाऽमित्रो दूरे भवति तथा व्युच्छेत्यर्थः[5] । विस्तीर्णम् । गोमार्गम् । अभयं च । अस्माकम् । कुरु । पृथक्[6] कुरु च । शत्रुम्[7] । आहर । धनानि[8] । चोदय[9] । अन्नम्[10] । स्तुवते मह्यम् । उषः[11] !

अस्मे श्रेष्ठेभिर्भानुभिर्वि भाह्युषो देवि प्रतिरन्ती न आयुः[12]
इषं च नो दधती विश्ववारे गोमदश्वावद्रथवच्च राधः ॥ ५ ॥

अस्मे । अस्माकम्[13] । श्रेष्ठैः[14] । भानुभिः[15] । व्युष्टा[16] भव । उषः[17] ! देवि ! वर्धयन्ती । अस्माकम् । आयुः[18] । अन्नम् । च । नः[19] । प्रयच्छन्ति[20] । विश्ववैरणीये[21] ! गवादियुक्तम्[22] । धनम् । च ।

उत्तरा निगदसिद्धेति—

यां त्वा दिवो दुहितर्वर्धयन्त्युषः सुजाते मतिभिर्वसिष्ठाः ।
सास्मासु धा रयिमुष्वं बृहन्तं यूयं पात स्वस्तिभिः सदा नः ॥ ६ ॥

[यां त्वा दिवः][24]

---

१. अस्मदन्तिके वामं वननीयं धनं यस्याः सा त्वम् Sy.
२. मित्रान् A. अस्मच्छत्रुम् Sy.
३. अस्मत्तो विप्रकृष्टदेशे वर्तमानं कृत्वा Sy.
४. व्यच्छ A. विभाहि Sy.
५. यथा...दूरे is missing in A.
६. प्युच्छे० A.
७. भूमिम् Sy.
८. पृथु० A. अस्मत्तः पृथक् कुरु Sy.
९. अस्मद्द्वेष्टॄन् Sy.
१०. शत्रूणां धनानि Sy.
११. प्रेरय Sy.
१२. धनम् Sy.
१३. हे मघोनि ! धनवति ! Sy
१४. अस्मभ्यम् Sy.
१५. प्रशस्यैः Sy.
१६. रश्मिभिः प्रकाशैः Sy.
१७. प्रकाशय Sy. १८. उषसः A.
१९. आयुष्यम् Sy.
२०. न A. अस्मभ्यम् Sy.
२१. ०च्छन्ती is suggested for ०च्छन्ति ॥ विभाहीति Sy.
२२. ०र्वरणीये is suggested for ०वै रणीये ॥ हे विश्वैः सम्भजनीये ! देवि ! Sy.
२३. आदि refers to अश्ववत् and रथवत् ॥ गोभिर्बहुभिरुपेतमश्वैश्चोपेतं रथैरुपेतम् Sy.
२४. The *pratīka* is supplied by the Editor. VM. does not explain this stanza. Sy. explains it in the following manner :— हे दिवो दुहितरुषः ! सुजाते ! शोभनजनने ! यां त्वा त्वां मतिभिः स्तोत्रैर्वसिष्ठा वर्धयन्ति सा त्वमस्मासु वसिष्ठेष्वृष्वं प्रदीप्तं बृहन्तं महान्तं रयिं धनं धाः । धेहि Sy.

VII. 78.

प्रति केतवः प्रथमा अदृश्रन्नूर्ध्वा अस्था व्यज्जयो वि श्रयन्ते ।
उषो अर्वाचा बृहता रथेन ज्योतिष्मता वाममस्मभ्यं वक्षि ॥ १ ॥

[1]प्रति केतवः । प्रत्यदृश्यन् [2] । मुख्याः [3] । रश्मयः [4] । ऊर्ध्वाः [5] । उषसः । अञ्जयः [6] । विविधम् [7] । सेवन्ते [8] जरा अञ्जयो [9] रश्मयः । हे उषः ! आभिमुख्येन [10] । महता । रथेन । ज्योतिष्मता [11] । धनम् [12] । अस्मभ्यम् । वह [13] ।

प्रति षीमग्निर्जरते समिद्धः प्रति विप्रासो मतिभिर्गृणन्तः ।
उषा याति ज्योतिषा बाधमाना विश्वा तमांसि दुरितापा देवी ॥ २ ॥

प्रति षोम् । सर्वतः । समिद्धः । अग्निः प्रति स्तूयते [14] । तथा [15] विप्राश्च । स्तुतिभिरुष [16] । स्तुवन्तो जनैः । प्रति-ष्टूयन्ते [17] । उषाः । गच्छति [18] । विश्वानि । तमांसि । दुरितानि च । ज्योतिषा । अपबाधमाना । देवीति ।

एता उ त्याः प्रत्यदृश्रन्पुरस्ताज्ज्योतिर्यच्छन्तीरुषसो विभातीः ।
अजीजनन्त्सूर्यं यज्ञमग्निमपाचीनं तमो अगादजुष्टम् ॥ ३ ॥

[19]एता उ त्याः । [20]ताः । एताः । पुरस्तात् [21] । प्रतिदृश्यन्ते । ज्योतिः [22] । यच्छन्त्यः [23] । उषसः । व्युच्छ-

---

१. 'प्रति केतवः' इति पञ्चर्चमष्टमं सूक्तं अत्रिष्ठ-स्यार्षं त्रैष्टुभमुषस्यम् । 'प्रति पञ्च' इत्यनु-क्रमणिका (KSA. 37. 78. p. 26.) । उक्तो विनियोगः Sy.

२. प्रति दृश्यन् M. प्रत्यदृश्यन्त is suggested for प्रत्यदृश्यन् ॥ प्रतिदृश्यन्ते Sy.

३. प्रथमोत्पन्नाः Sy.

४. प्रज्ञापका रश्मयः Sy.

५. ऊर्ध्वमुखाः Sy.

६. व्यञ्जका रश्मयः Sy.

७. ०धं A. विविधं सर्वत्र Sy.

८. श्रयन्ति Sy.

९. न्जयोरश्म० A. The passage अञ्जयो रश्मयः should immediately follow अञ्जयः and precede विविधम्.

१०. अस्मदभिमुखेनागच्छता Sy.

११. तेजोवता Sy.

१२. वननीयं धनम् Sy.

१३. वहसि Sy

१४. अभिवर्धते Sy.

१५. पि प्राञ्चः M. विप्रा मेधाविन ऋत्विजश्च Sy.

१६. ०रुषः M. The addition of सम् after उष is suggested.

१७. जरन्ते Sy.

१८. ऊर्ध्वं गच्छति Sy.

१९. एका A. २०. प्रसिद्धाः Sy.

२१. उरस्तान् M. पूर्वस्यां दिशि Sy.

२२. तेजः Sy.

२३. इच्छ० M. प्रयच्छन्त्यः Sy.

[1]त्यः । [2]ता इमा अजीजनन् । [3]सूर्यम् । यज्ञम् । अग्निं च । [4]अवाचीनम् । तमः । [5]अगच्छदागतायामुषसि । [6]अशोभनम् ।[7]

अचेति दिवो दुहिता मघोनी विश्वे पश्यन्त्युषसं विभातीम् ।
आस्थाद्रथं स्वधया युज्यमानमा यमश्वासः सुयुजो वहन्ति ॥ ४ ॥

[8]अचेति । [9]ज्ञायते । दिव । दुहिता । [10]उषाः । [11]विश्वे । पश्यन्ति । उषसम् । [12]अव्युच्छन्तीम् । [13]सेयमातिष्ठति । रथम् । [14]बलेन । युज्यमानम् । रथम् । [15]आवहन्ति । अश्वा । [16]सुयुक्ता ।

प्रति त्वाद्य सुमनसो बुधन्तास्माकासो मघवानो वयं च ।
तिल्विलायध्वमुषसो विभातीर्यूयं पात स्वस्तिभिः सदा नः ॥ ५ ॥

[17][18]प्रति त्वाद्य । प्रतिबुध्यन्त । अद्य । त्वामागताम् । [19]सुमनस स्तोतार । [20]अस्मदीया । [21]हविष्मन्त[22]: । वयम् । च । हे उषसः ![23] तिल्विलापापक्त[24]। व्युच्छन्त्य[25], यथा भद्रे क्षेत्रे निमिता[26] तिल्विला प्ररोहति तथा बहुशाखाः प्रादुर्भवतेति ।

---

१. विभात्यो विभानं कुर्वत्यः Sy.
२. अप्युच्छन्त्यस्मा Λ. ता उषसः Sy.
३. अजोजनन् प्रादुरकुर्वन् । उषस उदयानन्तरं नेषां सम्भवात्तज्जनकत्वमुपचर्यते Sy.
४. सूर्यं Λ.
५. अपाची० is suggested for अवाची० ॥ नीचीनम् Sy.
६. अपगतमभूत् Sy.
७. अप्रियम्, सर्वेषां दृष्टिनिरोधकत्वादप्रियत्वम् । तादृशम् Sy.
८. VM. ignores उ ॥ उ इति पूरणः Sy. ९. सर्वैर्ज्ञायते Sy.
१०. धनवत्युषाः Sy.
११. सर्वेऽपि प्राणिनः Sy.
१२. अप्यु० Λ. व्युच्छन्तीम् is suggested for अव्युच्छन्तीम् ॥
१३. तादृशी देवी .आस्थात् आतिष्ठत् । आरोहति Sy.
१४. अन्नेन Sy.
१५. अभिमतदेशं प्रापयन्ति । तं रथमास्थाविति Sy.
१६. शोभनयोजना Sy.
१७. ०ध्यन्त्य Λ. प्रत्यबोधयन् स्तुतिभिः Sy.
१८. अस्मिन् काले Sy.
१९. शोभनस्तुतिका. Sy.
२०. ०सस्ताता० Λ.
२१. अस्मदीयाः पुरुषा ऋत्विजः Sy.
२२. हविर्लक्षणान्नवन्तः । यद्वा मघवान इत्येतद्वयमित्येतस्य विशेषणम् । हविष्मन्तो वयम् Sy.
२३. हे उषसः । यूयम् Sy.
२४. ०वाचरत is suggested for ०पापक्त ॥ जगत् स्निग्धभूमिकं कुरुत । 'तिल स्नेहने' इत्यस्मात्तिलुः । तिलुरिला भूमिर्यस्य तत्तादृक्केवलम् । तत्कुरुत । शिष्टं स्पष्टम् Sy.
२५. व्युच्छन्त्यः सत्यः Sy.
२६. न्युप्ता is suggested for निमिता ।

VII. 79.

व्युषा आवः पथ्या३ जनानां पञ्च क्षितीर्मानुषीर्बोधयन्ती ।
सुसंदृग्भिरुक्षभिर्भानुमश्रेद्रि सूर्यो रोदसी चक्षसावः ॥ १ ॥

व्युषाः[1]। विगमयति[2]। उषा[3]। मार्गान्[4]। जनानां रश्मीन्[5] वा[6]। पञ्च। क्षितीः[7]। मानुषीः[8]। बोधयति[9]। सुसन्दृशं[10]। सेक्तृभिः[11] रश्मिभिः। दीप्तम्। श्रयति[12]। व्यावृणोति[13]। सूर्यम्। द्यावापृथिव्यौ। तेजसा[14]।

व्यञ्जते दिवो अन्तेष्वक्तून्विशो न युक्ता उषसो यतन्ते ।
सं ते गावस्तम् आ वर्तयन्ति ज्योतिर्यच्छन्ति सवितेव बाहू ॥ २ ॥

व्यञ्जते। प्रकाशयन्ति[15]। अन्तरिक्षस्य। पर्यन्तेषु[16]। अञ्जनसाधनान्[17] रश्मीन्। मनुष्याः[18]। इव। युक्ताः[19] कार्येषु। उषसम्[20]। प्रयत्नं कुर्वन्ति[21]। समावर्तयन्ति पिण्डीकुर्वन्ति[22]। तव। रश्मयः। तम[23]। ज्योतिश्च[24]। यच्छन्ति। यथा सवितोद्यन्[25]। आत्मीयौ बाहुभ्यां यमितः[26]।

---

१. 'व्युषा आवः' इति पञ्चर्चं नवमं सूक्तं वसिष्ठस्यार्षमुषस्यं त्रैष्टुभम्। 'व्युषाः' इत्यनुक्रमणिका (KSA. 37. 79. p. 26) प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः Sy.

२. व्यूहा A.

३. व्योच्छत्, यद्वा जनानां हिताय व्योच्छदिति योज्यम् Sy.

४. पथि हिता Sy.

५. सर्वप्राणिनाम् Sy.

६. वा is suggested for पा ॥ The passage 'रश्मीन् वा' should immediately follow मार्गान् and precede जनानाम्।

७. क्षितिः M. निषादपञ्चमांश्चतुरो वर्णान् Sy.

८. ०षीः is suggested for ०षी ॥ मनुष्यरूपाः Sy.

९. बोध्[illegible] A. बोधयन्ती is suggested for बोधयति।

१०. सन्दृश्यते सन्दर्शयति वा सन्दृक् तेजः। सुतेजोभिः Sy.

११. गोभिः Sy

१२. श्रयति A. 'अरुणैरुषा आजिमधावत्' (AB. 4 9) इति हि श्रुतिः। 'अरुण्यो गाव उषसाम्' इति निरुक्तम् (Ngh 1 15) Sy.

१३. विवृणोति Sy.

१४. प्रकाशकेन तेजसा Sy.

१५. व्यक्तीकुर्वन्तीत्यर्थः Sy.

१६. पर्यन्तप्रदेशेषु Sy.

१७. तेजांसि Sy.

१८. प्रजा इव सेना इव Sy.

१९. परस्परं संयुक्ताः Sy

२०. उषसः is suggested for उषसम्।

२१. तमो नाशनायात्र गमनाय वा Sy

२२. ०न्ती A.
नाशयन्ति Sy.

२३. अन्धकारम् Sy.

२४. तेजः Sy.

२५. प्रयच्छन्ति Sy.

२६. सवितो० A.

२७. बाहभ्यं यमिति A. The reading is doubtful. बाहू यच्छतीति is suggested for बाहुभ्यां यमिति।

अभूदुषा इन्द्रतमा मघोन्यजीजनत्सुविताय श्रवांसि ।
वि दिवो देवी दुहिता दधात्यङ्गिरस्तमा सुकृते वसूनि ॥ ३ ॥

अभूदुषाः । अभूत् । उषा । ऐश्वरतमा । धनवती । अजीजनत् । अभ्युदयाय । अन्नानि । दिवः । दुहिता । देवी । विदधाति । अङ्गिरस्तमा वसिष्ठा । सुकर्मणे । धनानि ।

तावदुषो राधो अस्मभ्यं रास्व यावत्स्तोतृभ्यो अरंदो गृणाना ।
यां त्वा जज्ञुर्वृषभस्या रवेण वि दृळ्हस्य दुरो अद्रेरौर्णोः ॥ ४ ॥

तावत् । तावत् । उषः । अन्नम् । अस्मभ्यम् । हि । यावत् । स्तोतृभ्यः । प्रादाः । स्तूयमाना । या । त्वामागताम । जानन्ति । वृषभस्योपमं शब्दायन्त । रवेण सा व्यौर्णो । दृढस्य । शिलोच्चयस्य । द्वाराणि पणिभिरपहृतानां गवामानयनाय ।

देवदेवं राधसे चोदयन्त्यस्मद्र्यक्सूनृता ईरयन्ती ।
व्युच्छन्ती नः सनये धियो धा यूयं पात स्वस्तिभिः सदा नः ॥ ५ ॥

देवदेवम् । सर्व देव । धनाय । चोदयन्ती । अस्मदभिमुखम् । वाचश्च । प्रेरयन्ती । व्युच्छन्ती

---

१. अभूमुषा ।
२. अभूत् । उषाः is missing in A. प्रादुरभूत् Sy ३. सर्वस्येश्वरतमा Sy.
४. अर्जीजन् A उदपादयत् प्रकाशितवतीत्यर्थः Sy. ५. कल्याणाय Sy.
६. देवि A. ७ करोति Sy.
८. गन्तृतमा । यद्वा अङ्गिरोगोत्रैर्भारद्वाजैः सह रात्रेरप्युत्पत्ते रात्र्यवसानस्योषारूपतादङ्गिरस्तमेत्युच्यते । भारद्वाजे रात्रेः सहोत्पत्तिरनुक्रमण्यामुक्ता—'रात्री कुशिकः सौभरो रात्रिर्वा भारद्वाजी' (KSA. 10. 127.) Sy.
९. वरिष्ठा is suggested for वसिष्ठाः ।
१०. यजमानाय Sy ११. धनम् Sy.
१२. अस्मभ्यमपि Sy. १३. दत्तवत्यसि Sy
१४. याम् is suggested for या ।
१५. जानन्ति प्राणिनः । अथवा जज्ञुः ज्ञापयन्ति Sy.
१६. वृषभस्य रवेण । लुप्तोपमैषा । वृषभस्येति कर्मणि षष्ठी वृषभं रवेणेव । प्रकाशेन । अथवा वृषभस्य प्रवृद्धस्य स्तोत्रस्य रवेण शब्देन Sy.
१७. ०ब्द य० A.
१८. प्योर्णो A. व्योर्णोः is suggested for व्यौर्णो ॥ विवृतान्यकरोः Sy.
१९. दूळ्हस्य A. २०. शीलो० A.
२१. वणिभिरवभृता० A.
२२ ०नायं A. द्वाराणि पणिभिर्गाः प्रवेश्य पिहितानि Sy.
२३. देवः A. सर्वमपि स्तोतारम् Sy.
२४. देवम् is suggested for देव ।
२५. लाभाय is suggested for सनयम् ।
२६. प्रेरयन्ती Sy
२७. वचांसि Sy.
२८. व्युच्छनं कुर्वती Sy.

अस्माकम् । लानायम्[1] । बुद्धिम्[2] । देहि[3] ।

VII 80

प्रति स्तोमेभिरुषसं वसिष्ठा गीर्भिर्विप्रासः प्रथमा अबुध्रन् ।
विवर्तयन्तीं रजसी समन्ते आविष्कृण्वतीं भुवनानि विश्वा ॥ १ ॥

प्रति । प्रत्यबोधयन्[5] । स्तोमै[6] । उषसम् । वसिष्ठा[7] । गीर्भिश्च । मेधाविन । अन्येभ्य स्तोतृभ्य. पूर्वमेव[9] । अन्धकारापनयनेन पृथक्कुर्वन्तीम्[10] । द्यावापृथिव्यौ । सङ्गतान्ते[11] । सर्वाणि । भुवनानि[12] । प्रकाशयन्तीम्[13] ।

एषा स्या नव्यमायुर्दधाना गृहवी तमो ज्योतिषोषा अबोधि ।
अग्रं एति युवतिरह्नयाणा प्राचिकितत्सूर्यं[14] यज्ञमग्निम् ॥ २ ॥

एषा स्या । सा[15] । एषा[16] । नवतरम् । आयु[17] । दधाना[18] । तिरोहित कृत्वा[19] । तम[20] । ज्योतिषा[21] । उषा । प्रबुद्धा भवति[22] । अग्रे च सर्वेषा देवानाम्[23] । युवति[24] । एति । अणीभूतयाना[25] । प्रज्ञापयति च । सूर्यम् । यज्ञम् । अग्निम् ।

---

१. दानाय धनलाभाय Sy.
२. बुद्धिः Λ.
३. धेहि । शिष्टं स्पष्टम् Sy
४. 'प्रति स्तोमेभिः' इति तृचात्मकं दशमं सूक्त वसिष्ठस्यार्ष त्रैष्टुभमुषस्यम् । 'प्रति तृचम्' इत्यनुक्रमणिका (KSA 37 80. p 26)। प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः Sy
५. ०धनयम् Λ. प्रतिबोधयन्ति Sy
६. स्तोतृभिः प्रयुज्यमानाः Sy
७. वसिष्ठाः is suggested for वरिष्ठा. ॥ वसिष्ठगोत्राः Sy. ८. स्तुतिभिः Sy.
९. इतरयजमानेभ्यः पूर्वभूता सन्तः Sy.
१०. ०रविनयन्नेन Λ.
११. व्यावर्तयन्तीम् Sy.
१२. समानपर्यन्ते एकीभूतप्रान्ते Sy.
१३. भूतजातानि Sy.
१४. प्रकाशयन्तीम् Λ प्रकटीकुर्वती स्वभासा Sy.
१५ गतदिवसेषु प्रसिद्धाः Sy.
१६ दृश्यमाना Sy
१७ आयुष्य यौवनमित्यर्थ. Sy
१८ धारयन्ती Sy.
१९ गूढम् Sy
२० अन्धकारम् Sy
२१. स्वतेजसा निवारयन्ती Sy
२२. बुध्यते Sy
२३. पुरोदेशे, सूर्यस्य पुरस्तात्, देवानामग्रे वा । इतरदेवेभ्यः पूर्वमित्यर्थः Sy.
२४. नित्यतरुणी सर्वत्र मिश्रयन्ती वा Sy
२५ अहृणीभूतयाना is suggested for अणीभूतयाना । लुप्तोपमैषा । अलज्जा युवतिरिव । सा यथा पत्युरग्रे सञ्चरति तद्वत्सूर्यस्य पुरस्तादेति Sy.

अश्वावतीर्गोमतीर्न उषासो वीरवतीः सदमुच्छन्तु भद्राः ।
घृतं दुहाना विश्वतः प्रपीता यूयं पात स्वस्तिभिः सदा नः ॥ ३ ॥

[अश्वावती[1]]

व्याख्यात्पञ्चममध्याय पञ्चमस्याष्टकस्य[2] सः ।
लोहितस्य कले जातो माधव सुन्दरीसुतः ॥

[अथ पञ्चमाष्टके षष्ठोऽध्यायः]

'प्रत्यु अदर्श्यायतीति व्याचिख्यासति माधव ।
कारण[5] सूक्तभेदस्य मुखत सम्प्रदर्शयन् ॥१॥
ऋषिच्छन्दो देवतार्थं[6] सूक्तभेदस्य हेतव. ।
मन्यन्ते बह्वृचा केचिदर्थमेव विभेदकम् ॥२॥
नवमे मण्डले भेद सूक्तानामृषिभि कृतः ।
'स्वादिष्ठया मदिष्टया' चत्वार्याहुर्निदर्शनम् ॥३॥
गायत्र्याण्येव[10] चत्वारि सोम एव च देवता ।
मधुच्छन्दः[11] प्रभृतयश्चत्वार ऋषयोऽभवन् ॥४॥

---

१. The *pratīka* is supplied by the Editor.
This stanza has already been explained See RV. 7. 41. 7 Sy. explains this stanza here again in the following manner :— **अश्वावतीर्बहुभिरस्मभ्य प्रदेयैरश्वैस्तद्वत्यस्तथा गोमतीर्गोमत्यो गोप्रदा वीरवतीर्वीरवत्यः पुत्रदा अत एव भद्राः स्तुत्या उषासः उषसः सदं सर्वदोच्छन्तु । पुनः कीदृश्यः ? घृतमुदकं दुहाना दोग्ध्र्यो विश्वतः प्रपीताः सर्वतः प्रवृद्धाः । यूयं पातेति गतम् ।**

२. **पञ्चम०** A.

३. supplied by the Editor.

४. **०श्यात्यन्ती** A. **०र्श्यायन्ती** M. **अदर्शि आयती** R.

५. **करण** A., M. The reading is adopted from R.

६. **ऋषिच्छन्दोदेवतार्थाः** R.

७. **वामे** A. ८. RV 9. 1. 1.

९. **चतुर्थाहुः** M., A. The reading is adopted from R

१०. **०श्याण्ये०** A.

११. **०धुश्छ०** A. (1) Madhucchandas. (2) Medhātithi. (3) Śunaḥśepa: (4) Hiraṇyastūpa.

छन्दोदेवतयोः साम्ये सन्ति सूक्तानि मण्डले ।
ऋषिभेदेन भिन्नानि पावमानाभिशब्दिते ॥५॥
'इन्द्रं विश्वा अवीवृधन्' छन्दोभेदेन भिद्यते ।
देवताभेदभिन्नानि 'वायवा याहि दर्शत' ॥६॥
आत्मदृष्टेषु सूक्तेषु क्वचित् सयोजयन्ति च ।
दृष्टानुगेन ऋषिणा मन्त्रानिह महर्षय ॥७॥
आङ्गिरसेन घोरेण दृष्टामेकामिमामृचम् ।
'अस्मे प्र यन्धि मघवन्' विश्वामित्रस्तथाऽकरोत् ॥८॥
आन्त्यं तृचं मण्डलस्य सूक्तान्ते च न्यवेदयत् ।
'आ नो मित्रावरुणेति जामदग्न्य वदन्ति हि ॥९॥
सहासनकृता तत्र सम्प्रीति कारणं विदु ।
आत्ममन्त्रसमांश्चैते मन्त्रान् पश्यन्ति सङ्गता ॥१०॥
बहव सन्ति ननु च द्रष्टारो द्वैपदस्य ये ।

---

१. देव० M.
२. ०मानिभिः शब्दितैः A. ०नीभि० M.
३. ०धच्छ A. धच्छ M. (RV. I. 11. 1.)
४. वायावाहि A.
५. ०ता A., M. (RV. I. 2. 1.)
६. आंगीर० M.
७. दृष्ट्वामे० A.
८. प्र न्ध A. प्रवृद्ध M. The reading is adopted from R
९. RV. II. 36. 10.
१०. आन्त्यच तृचं A. अन्त्यं तृचं R. RV. III. 62. 16—18.
११. न्यवेशयत् R
१२. RV. III 62. 16.
१३. ०दग्नि A.
१४. हि is missing in A The second and Fourth verses are interchanged in R.
१५. ०सनकृत A. ०सन कृतं M. The reading is adopted from R.
१६ सप्रीत A.
१७. ०तमा श्चैते A. ०तमाश्चं० M.
१८. द्रष्टारो A., M. The reading is adopted from R.

बन्धु सुबन्धुरित्येते सत्यं ते भ्रातरोऽभवन् ॥११॥

द्विपदाश्च समानीता सूक्तमेकमतोऽभवत् ।

ददृशु काल एकस्मिन् सर्वे च सह सङ्गताः ॥१२॥

तदेतच्छाटचायनके विस्पष्टं प्रतिपादितम् ।

यथा दृष्टमिदं सूक्तं तत्तत्रैवावधार्यताम् ॥१३॥

ऋष्यादिभेद प्रायेण सूक्तभेदस्य कारणम् ।

कारणान्तरमप्यस्ति दृश्यते यत्क्वचित् क्वचित् ॥१४॥

कर्मानुरोधादपि च सूक्तानां भेद इष्यते ।

ऋषिच्छन्दोदैवतेषु समानेष्वपि च क्वचित् ॥१५॥

तत्रोदाहरणान्याहुर्नवमे मण्डले बुधाः ।

एकर्पिकाणि सूक्तानि 'मन्द्रया सोम धारया' ॥१६॥

'सुरूपकृत्नु मूतये' इति सूक्तेषु सप्तसु ।

देवतेन्द्र ऋषिश्चैको भिद्यते केन हेतुना ॥१७॥

छन्दश्च पण्णां गायत्री सप्तमेऽनुष्टुबागता ।

'गायन्ति त्वा गायत्रिण' कामं तत्तेन भिद्यताम् ॥१८॥

---

१. ०मेकतमोऽभवन् A. ०मेकतमोऽभवत् M. RV V. 24.
२. Cf. JB III 168—170
३. ०दृष्टि० A ४. ०भेदेस्य A
५. दृश्यन्ते A, M
६ अर्थानुरो० R
७. ०षिश्छ० A
८. ०र्न च मे A.
९. बुधाम् A.
१०. ०कानि R. RV. IX. 6.—24
११. मन्त्रया A.
१२. RV. IX. 6. 1.
१३. त्नु मूतय is missing in M. RV. I 4.—10
१४. भिद्यन्ते A M. १५. ०ष्टु० A.
१६. सुष्ठुगा० A., M. The reading is adopted from. R.
१७. ०त्रिण A. RV. I. 10. 1.

नोपपादयितु शक्यं मनुष्यैरत्र कारणम् ।
अथापि वासना काचित् कथ्यमानामिमा शृण् ॥१९॥
सुरूपकृत्नुसूक्तेषु यज्ञ आगन्तुमिच्छति ।
आगते सति कर्तव्यमा त्वेतेति च भाषते ॥२०॥
'युञ्जन्ति ब्रध्नमित्यस्मिन् यथा वै सहकारिभि ।
यस्मिंश्च काल आयाति तत्सर्वं कथित विदु ॥२१॥
'इन्द्रमिद्गाथिनो' बृहदिति सूक्तेन भाषते ।
अनेकाह्वातृसङ्घावमिन्द्रमाहात्म्यमेव च ॥२२॥
बहवो यद्यपीन्द्र त्वा विह्वयन्त इमे जना ।
तान् सर्वानपहाय त्वमस्माक भव केवलम् ॥२३॥
'एन्द्र सानसिमित्यत्र स्तुतादिन्द्रात् स हीच्छति ।
धनमात्माभिलषित सञ्जिहीर्षति च स्तुतिम् ॥२४॥
स्तुतमिन्द्र जिगमिषुमृषिमित्यक्तुमशक्नुवन् ।
'इन्द्रेहीति पुन स्तौति याचते च धन पुन ॥२५॥

---

१. तथापि कारणं किंचित् कथ्यमानमिम शृणु R
२. ०कत्नु M. 'आ त्वेता' RV. I. 4. 1.
३. यजू आग० A.
यजुराग० M.
४. RV. I. 5. 1.
५. प्रा ध्नमि० A. RV. I. 6. 1.
६. शूदमि० M.
७. ०मिनो A. RV. I. 7. 1.
८. ०कां ह्वात्रस० A.
९. ०हाजवे च \
१०. ०वीन्द्र \
११. ०नवहा० \.
१२. ०ल. R. Cf. RV. I 7. 10
१३ समि० M RV. I. 8. 1.
१४. ०विन्द्रा A. M. The reading is adopted from R.
१५. R. reads अभीप्सति for स हीच्छति ।
१६. ०षुः ऋषि० A. ०षुरषि० M.
१७. 'इन्द्रेहि' RV. I. 9. 1.

उक्तमर्थमिमं सर्वं सप्तमेनानुभाषते ।
आनुष्टुभेन सूक्तेन 'गायन्ति त्वेत्यृषिः पुनः ॥२६॥
कवित्वस्यानुरोधाय तमेवार्थं पुनः क्वचित् ।
अन्यं प्रकारमाश्रित्य पश्यन्ति च महर्षयः ॥२७॥
भेदस्तत्रापि सूक्तानां भवतीति विनिश्चयः ।
'नासत्याभ्यां बर्हिरिव' सूक्तान्याहुर्निदर्शनम् ॥२८॥
स्तौत्यश्विनावृषिस्तेषु सङ्गृह्य च विगृह्य च ।
कक्षीवान् दैर्घतमसः कवित्वं सम्प्रदर्शयन् ॥२९॥
पश्यन्ति तांस्तानुद्दिश्य कामानपि महर्षयः ।
ये ये सूक्तेषु दृश्यन्ते ते च भेदस्य हेतवः ॥३०॥
तथा दर्शनकालस्य भेदश्चैषां विभेदकः ।
स च भेदो ब्राह्मणेषु मन्त्रेष्वपि च दृश्यते ॥३१॥
महावाक्यानुसारेण सैषा सूक्ष्मेक्षिका बुधैः ।
कार्या भिन्नेषु सूक्तेषु शुद्धमर्थमभीप्सुभिः ॥३२॥

---

१. अनु० A.

२. ०त्वृषिः A. RV I. 10. 1.

३. क्वचि त्वस्यावरोधाय A.

क्वापि तस्यानुरोधाय M.

The reading is adopted from R.

४. ०याः A

५. ०रेव M. RV. I. 116 1.

६. ०हु निद० A. RV. I. 116.—119.

७. सो श्विनौ वृषि० A.

सोश्विनौ च ऋषि० M.

The reading is adopted from R.

८. दैवत० A. M.

९. कामानिह R.

१०. ०नुरोधेन R.

११. सैषां A.

VII. 81.

प्रत्यु॑ अदर्श्यायत्य्१॒॑च्छन्ती दुहि॒ता दि॒वः ।
अपो॒ महि॒ व्यय॑ति॒ चक्ष॑से॒ तमो॒ ज्योति॑ष्कृणोति सू॒नरी॑ ॥ १ ॥

प्रत्यु॑ ॥ सिष्ठ॑ ॥ प्रति॑ । एषे॑ । दृश्ये॑ । आऽयन्ती॑ । व्यु॑च्छन्ती । दि॒वः॑ । दुहि॒ता॑ । इ॒व॑ । नयति । महत् । तयः॑ । दर्श॑ने॑ । ज्योतिः॑ । कृ॒णो॒ति॒ । उषाः॑ ।

उदु॒स्रिया॒ः सृज॑ते॒ सूर्यः॑ स॒चा उद्यन्न॒क्षत्र॑मर्चि॒वत् ।
तवेदु॒षो व्यु॒षि सूर्य॑स्य च॒ सं भ॒क्तेन॑ गमेमहि ॥ २ ॥

उदु॒स्रिया॒ः । उदे॑व । सृज॑ते । सूर्यः॑ । स॒चा । उद्यन् । न॒क्षत्र॑म् । अ॒र्चि॒वत् । तव॑ । इ॒त् । उ॒षः॑ । व्यु॒च्छ॑ते । सूर्य॑स्य । च॒ । सम् । भ॒क्तेन॑ । गमेमहि । अने॑ ।

---

१. अथ षष्ठो व्याख्यायते । सप्तमे मण्डले ऽनुवाके दश सूक्तानि व्याकृतानि । 'प्रत्यु अदर्शि' इति षडृचमेकादशं सूक्तं वसिष्ठस्यार्षमुषस्यम् । प्रथमाद्या अयुजो बृहत्यो द्वितीयाद्या यु.. सतोबृहत्यः । तथा चानुक्रान्तम्—'प्रत्यु षड् प्रागाथम्' (KSA. 38 80 p. 26) इति । प्रातरनुवाक उषस्ये कृतो बार्हते छन्दस्यार्चिक-शस्त्रे चेदं सूक्तम् । सूत्रितं च—'प्रत्यु अदर्शि सह वामेनेति बार्हतम्' (ŚŚS. 4 14) इति Sy.

२. सिष्ठः is omitted by M. वसिष्ठ. is suggested for सिष्ठ. ।

३. उ इति पूरकः Sy.

४. सर्वैः प्रतिदृश्यते Sy.

५. ०च्छन्ती is suggested for ०च्छन्ति ।

६. तमांसि विवासयन्ती वर्जयन्ती Sy.

७. द्युलोकस्य सूर्यस्य वा Sy.

८. पुत्री, एवम्भूतोषाः Sy.

९ वश्च M. अप उ इति विपादङ्गत्वमुदायोऽप्येत्यस्यार्थे । अपो व्ययति । अपवृणोति Sy.

१०. तयोः M. तमः is suggested for तयः ॥ सेषा नैशमन्धकारम् Sy

११ ०नाय \ दर्शनाय is suggested for दर्शना ॥ दर्शनार्थम् Sy.

१२ तेजसाम् Sy.

१३ करोति Sy.

१४. सूर्य इत्थं चलाना सुरु नेत्युषा Sy.

१५ उदेत्य M.

१६. उद्गच्छति Sy

१७ सर्वस्य प्रेरक आदित्यः Sy

१८. युगपदेव Sy.

१९. अभवत् \ उद्गच्छत् प्रादुर्भवत् Sy.

२०. नभसि दृश्यमान ग्रहनक्षत्रादिकम् Sy.

२१. तेजस्वि is suggested for तेजस्वी ॥ दीप्तिमत्करोति । सारेण तेजसा हि नक्तं चन्द्रप्रभृतीनि नक्षत्राणि भासन्ते । 'सुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्वः' (YV. 18. 40.) इति हि निगमः Sv.

२२. इच्छब्दः पूरकः Sy

२३ एवं च सति हे उषोदेवते ! Sy.

२४. विवासने प्रकाशने सति Sy.

२५ सङ्गच्छेमहि is suggested for संगतेमभि हि ॥ सङ्गच्छेमहि Sy.

२६. अक्तेन is suggested for अने ।

प्रति त्वा दुहितर्दिव उषो जीरा अभुत्स्महि ।
या वहसि पुरु स्पार्हं वनन्वति रत्नं न दाशुषे मयः ॥ ३ ॥

प्रति त्वा । प्रतिबोधयामः । त्वाम् । दिव । दुहितः । उषः । क्षिप्रा । या त्वम् । वहसि । वह । स्पृहणीयम् । धनवति । रत्नम् । यजमाना । सुखभय प्रयच्छसीति ।

उच्छन्ती या कृणोषि महिना महि प्रख्यै देवि स्वर्दृशे ।
तस्यास्ते रत्नभाज ईमहे वयं स्याम मातुर्न सूनवः ॥ ४ ॥

उच्छन्ती । व्युच्छन्ती । या । करोषि । महत्त्वेन । महति । सर्व भूतदर्शनाय । प्रकथनाय च तमसोऽपनयनाय । तस्या । तव । रत्नप्रापणानि । याचामहे । तथा कुर्वाणा । स्याम । मातुः । इव । पुत्रास्तव प्रिया ।

---

१. प्रति is written twice in A, M

२. प्रतिबोधद्वारेण भवेम Sy.

३. हे अन्तरिक्षाज्जायमाने ! Sy.

४. हे उषोदेवते ! Sy

५. क्षिप्रकारिण्यः वयम् Sy.

६. त्वाम् A.

७. प्रापयसि Sy.

८. स्पृहणीयं धनम् Sy.

९. °वती M. वननं सम्भजनं सम्भक्तव्य धनं वा तद्वति ! Sy.

१०. रत्न A. रमणीयं धनम् Sy

११. यजमानाय is suggested for यजमाना ॥ हवीषि दत्तवते यजमानाय Sy.

१२. मयं सुखं is suggested for सुखभयं ।

१३. VM. ignores न ॥ इव Sy.

१४. उच्छति A.

१५. तमांसि वर्जयन्ती Sy

१६. महिम्ना युक्ता । यद्वा 'गहतिर्दानकर्मा' दानयुक्ता वा Sy

१७. सर्वभूत० is suggested for सर्वं भूत० ॥ VM. explains स्वः and दृशे together as सर्वभूतदर्शनाय. But Sy. explains स्वः and दृशे separately स्वः as सर्वं जगत् and दृशे as दर्शनार्थम्.

१८ °नाय च A. प्रबोधनार्थम् Sy.

१९ °पयनय० A.

२० तव प्रियतमाः Sy.

२१ प्रापणानि A रमणीयानां धनानां भाजयित्र्याः सेवयित्र्याः Sy.

२२. याचामहे, किम् ? रत्नभाज इति समभिव्याहाराद्रत्नानीति गम्यते Sy.

२३. भवेम Sy.

२४. जनन्याः Sy

२५. पुत्राः प्रियतमा भवन्ति तद्वत् Sy.

२६. VM. ignores देवि ॥ हे देवि ! दानादिगुणयुक्ते ! उषोदेवते ! Sy.

तच्चित्रं राध आ भरोषो यद्दीर्घश्रुत्तमम् ।
यत्ते दिवो दुहितर्मर्तभोजनं तद्रास्व भुनजामहै ॥ ५ ॥

तच्चित्रम् । तत् । चायनीयम् । धनम । आहर । ओ ! यत् । अत्यन्त दीर्घकालं श्रूयते । यच्च । ते । दिव । दुहितः ! मनुष्याणा भोजनसाधनं भवति । तदस्मभ्यम् । प्रयच्छ । तद्वय भुनजामहै ।

श्रवः सूरिभ्यो अमृतं वसुत्वनं वाजाँ अस्मभ्यं गोमतः ।
चोदयित्री मघोनः सूनृतावत्युषा उच्छदप स्रिधः ॥ ६ ॥

श्रवः सूरिभ्यः । श्रवणीयम् । स्तोतभ्य । अन्नम् । वसुमत्त्व च । अस्मभ्य च । अन्नानि । गोयुक्तानि । चोदयित्री । धनवत । शब्दवती । उषा । प्रवोच्छतु । शत्रून् प्रदापयन्त्वाहृत्यास्माक धनम्, विनाशयतु च शत्रूनिति ।

VII. 82

इन्द्रावरुणा युवमध्वरायं नो विशे जनाय महि शर्म यच्छतम् ।
दीर्घप्रयज्युमति यो वनुष्यति वयं जयेम पृतनासु दूढ्यः ॥ १ ॥

इन्द्रावरुणा । इन्द्रावरुणौ ! युवाम् अस्माकम् । यज्ञाय । विश दासभृत्याय । जनाय च पुत्राय

---

१. चायनी० A. चायनी० is suggested for चापनी० ।
२. आहार A अस्मभ्य प्रयच्छ Sy
३. उषः ! is suggested for ओ ।
४. ०न्तद्दीर्घं का० A. देशकालयोर्विप्रकर्षेऽप्यतिशयेन श्रोतव्यम् Sy.
५. तव त्वया देयम् Sy. ६. ०तं M.
७. मर्तानां मनुष्याणां भोगयोग्य यदन्नमस्ति Sy.
८. वयञ्च त्वद्दत्तं धनमन्न चाभ्यवहरेम Sy.
९. हे उषः ! Sy. १०. यशो रारबेत्यनुषङ्ग Sy. ११. मरणरहितं नित्यम् Sy
१२. ०मत्यं M. वासक वसुत्वयुक्तं वा Sy
१३. बहुभिर्गोभिर्युक्तान् Sy. १४. प्रेरयित्री Sy
१५. शिष्टः परोक्षकृतः हविष्मतो यजमानस्य Sy.
१६. निःसत्यात्मिका वाक्सूनृता । तद्वती Sy.
१७. अपोच्छ० is suggested for अवोच्छ० अपगमयतु Sy. १८. शोषकान् शत्रून् Sy.
१९ 'इन्द्रावरुणा' इति दशर्चं द्वादशं सूक्तं वसिष्ठस्यार्षं जागतम् । इदमादीनि चत्वारि सूक्तानीन्द्रावरुणदेवतानि । तथा क्रमेक्रमन्तम्—'इन्द्रावरुणा दशैन्द्र वरुण ह जागत चु' (KSA. 38. 82 p 26)इति । तृतीये सवन उक्थ्ये प्रशास्तुः शस्त्र एतत्सूक्तम् । सूत्रितञ्च—'इन्द्रावरुणा युवमा वां राजानो' (ĀŚS 6. 1) इति Sy वसिष्ठस्येदमार्षम् Dur. वसिष्ठस्य SKN. २०. ०णा A.
२१. युवाम् A. २२. अस्मभ्यम् BB.
२३ यज्ञानुष्ठानार्थम् Sy दर्शपूर्णमासादियज्ञनिर्वहण यथा भवेत् BB.
२४. ०तायै M ०ताय is suggested for ०तायै ॥ निवेशयित्रे परिचारकाय Sy. यथा पुत्रादिका प्रजा मां न निवर्तते BB. मनुष्याय SKN.
२५. पुत्रपौत्रादिलक्षणाय Sy. अन्यस्मै सुहृदादये स यथा मां न त्यजेत् BB. सर्वस्मै मनुष्यजनाय, अस्मत्सर्वकामाय Dur. पुत्रादिकाय जनाय च परिचारकाय SKN.
२६. च is missing in A.

च । महत् । सुखम् । दत्त । दीर्घप्रततयज्ञम् । अतिहिनस्मि । य । तादृशान् दुर्बुद्धीन् । वयम् । सङ्ग्रामेषु । जयेम ।

१. गृहं सुख वा Sy. पापयक्ष्माभावप्रभृम् BB.

२. दत्तम् is suggested for दत्त ॥ प्रयच्छतम् Sy.

३. दीर्घप्रततयज्ञमस्मदीयं जनम् Sy यदुक्तमध्वराद्यर्थमिति तदेव प्रकटीकरोति-दीर्घप्रयज्युर्दीर्घकालं यावज्जीवं प्रकर्षेणानतिपत्त्या कर्तव्यो दर्शपूर्णमासादियज्ञो दीर्घप्रयज्युः । यजेरोणादिको युप्रत्ययः । दासीभारादिर्द्रष्टव्यः । वचनव्यत्ययो वा । दीर्घकालकर्तव्या दर्शपूर्णमासादयः प्रकृष्टा यागा येषां तानस्मान् BB. नित्ययाययूकम्, अग्निहोत्रिणम् Dur. दीर्घप्रवृत्तयज्ञमग्निहोत्रसमयादिकमस्माकम् SKN.

४. अतिजिघांसति Sy. अतिक्रम्य यो वनुष्यत्यभिभवति पापयक्ष्मा । त तावद् वय जयेम त तेन वयं जीयेमहि BB यो निहन्तुमिच्छति एवमत्रापि प्रकरणाद् वनुष्यतिर्हन्त्यर्थः । अल्पप्रयोगविषयत्वाद् भाष्यकारेण निगमद्वय पठितम् Dur. अनोत्यद्ययमभीत्येतस्य स्थाने । योऽभिवनुष्यति, अभिजिघांसति । यजमानविशेषणं चैतत् । दीर्घप्रततयज्ञं नित्यानामग्निहोत्रादीनां कर्मणां कर्तारं यजमानमभिवनुष्यति SKN.

५. यच्छब्दश्रुतेस्तच्छब्दोऽध्याहार्यः । तम् SKN.

६. दुर्धियः, दुष्टाभिसन्धीस्ताञ्छत्रून् Sy. दुर्धियश्च BB. पापया धिया हि दीर्घप्रततयज्ञमभिजिघांसति । व्याख्यानप्रसक्तमुच्यते-- 'पापः पाताऽपेयानाम्' अपेयान्यलेह्यानि यानि तान्यसौ पिबति विषयप्रसक्त इत्यर्थः । पुनः-पुन. पापत्यमानः, तेनैव पापेन कर्मणा । नरकमेव प्रति पतत्यसौ । तस्माद्वा पापः Dur. दूढ्यो जयकर्मा तच्छब्दसामानाधिकरण्योपपत्तेर्विभक्तिविपरिणामः । दूढ्यं दुर्धीक पापबुद्धिमित्यर्थ. । निर्वचनप्रसक्तमाह--पाणः पाता रक्षिताऽपेयानामरक्षितव्यानां त्याज्यानाम् । पिबतेर्वाकृत्यः।अपातव्यानां प्रतिषिद्धानां सुरादीनाम् । अकार्यमात्रोपलक्षणं चैतत् । अकार्याणां कर्तेत्यर्थ : 'पापत्यमानः' अथवा विषयासक्त्याऽत्यर्थं पात्यमानः । अवाङेव अधो नरकमेव पतति प्रायश्चित्ताकरणाद् नोर्ध्वमिति पापः । अधोभावनिष्ठाकः पततेः पाप इत्यर्थः । अथवा किं न एतेनावाङ्नाम्नेति, पापत्यतेरेव पापो विहिताकरणात्. प्रतिषिद्धसेवनाच्च । नित्यमत्यर्थं श्रेयसः पततीति पततेर्यङ्लुगन्तात् पचाद्यचि तलोपः । डप्रत्ययो वा छान्दसत्वात् । एवं पाते पिबतेर्वा पापः SKN

७ अभिभवेम Sy. जयेमेत्येव कैश्चिद् दुर्बुद्धिभिर्न वयं जीयेमहि । पृषोदरादित्वादभीष्टस्वररूपसिद्धिः BB.

८ वनुष्यतिर्हन्तिकर्मा । अनवगतसस्करो भवति।

दीर्घप्रततयज्ञमभिजिघांसति यो वयं त जयेम पृतनासु । दूढ्यं दुर्धिय पापधियम् । पापः पाताऽपेयानाम् । पापत्यमानोऽवाङेव पततीति वा । पापत्यतेर्वा स्यात् N. 5. 2. SKN. 11. 289.--290

This stanza=TS. 2.5. 12. 2.

सम्राळन्यः स्वराळन्य उच्यते वां महान्ताविन्द्रावरुणा महावसू ।
विश्वे देवासः परमे व्योमनि सं वामोजो वृषणा सं बलं दधुः ॥ २ ॥

सम्राट्[1] । सम्राडिति । अन्य[4] । स्वराट्[5] । अन्य[6] । उच्यते । युवयो[7], सर्वेषा राजा[8] सम्राट् स्वयमेव राजन् स्वराडिति वरुणमाह । महान्तौ[9] । इन्द्रावरुणौ[10] । महाधना[11] । विश्वे[12] । देवा[13] । परमे[14] । स्थाने स्थितयो[15] । युवयो[16] । सर्वे देवा[17] । बलम्[18] । ओजश्च[19] । सन्दधु[20] । हे वृषणौ[21] ! इति ।

अन्वपां खान्यतृन्तमोजसा सूर्यमैरयतं दिवि प्रभुम् ।
इन्द्रावरुणा मदे अस्य मायिनोऽपिन्वतमपितः पिन्वतं धियः ॥ ३ ॥

अन्वपाम्[22] । मेघस्थानामपाम्[23] । द्वाराणि[24] । बलेन । अन्वतृन्तम्[25] । दिवि च । सूर्यम्[26] । आरोहयत

---

१. द्वितीयः पादः परोक्षकृतः, शिष्टाः प्रत्यक्षकृताः Sy.

२. सम्यग्राजमान इति 'ता सम्राजा घृतासुती' (RV. 2. 41. 6.) इत्यादिषु कीर्त्यते Sy.

३. एको वरुणः Sy.

४. स्वरा इन्यः A. स्वयमेवान्यनिरपेक्षयैव राजमान इति 'स्वराळिन्द्रो दमे' (RV. 1. 61. 9.) इत्यादिषु कीर्त्यते Sy.

५. अन्य इन्द्रः Sy.

६. युवयोर्मध्ये Sy.

७. राज्ञः A. राज्ञां M.

८. ०णा याह A. The passage सर्वेषा . माह seems to be the explanation of सम्राट् and स्वराट्. It should, therefore, immediately follow सम्राट् and स्वराट् ।

९. तथाविधाविन्द्रावरुणौ गुणैरधिकौ Sy.

१०. ०धनौ is suggested for ०धना ॥ महाधनौ च भवतः Sy.

११. सर्वे Sy. १२. देवासः A.

१३. परमे व्योमन्युत्कृष्टे आकाशे Sy.

१४. स्थितयोः A.

१५. युवाम् Sy

१६. सर्वे देवाः A. सर्वे देवाः seems to be unnecessary

१७. बल वृत्रवधादेः कार्यस्य हेतुभूतं सामर्थ्यं च युवाभ्यां च सन्दधुः समयोजयन् शरीरबाढर्थाय Sy.

१८. तद्धेतुभूतं तदोज इत्युच्यते । स्मर्यते च । ओजः साप्तमी दशेति Sy.

१९. हे कामानां वर्षितारावित्रावरुणौ ! Sy.

२०. ०न्ववाम् A.

२१. ०मवा A उदकानाम् Sy.

२२. द्वाराणि वृत्रेण पिहितानि Sy.

२३. तृप्यन् M. ०तृन्तम् is suggested for ०तृप्तम् ॥ अन्वविध्यतम् । आवरकस्य वृत्रस्य वधेन वृष्टिप्रतिबन्धं निराकृतवन्तावित्यर्थः Sy.

२४. अन्तरिक्षे Sy.

२५. तथा सर्वस्य प्रेरकमादित्यम् Sy.

२६. अभ्यगमयतम् । स्वभानुनावृतं सूर्यं तद्वधेन प्रकाशितवन्तावित्यर्थः Sy.

प्रापयतम्। प्रभम्। इन्द्रावरुणौ ! मदे। अस्य सोम। प्रज्ञावत्। परित उदकानि। अपिन्वत्त च। कर्माण्यपि। शब्दपरिचर्यायै।

युवामिद्युत्सु पृतनासु वह्नयो युवां क्षेमस्य प्रसवे मितज्ञवः।
ईशाना वस्व उभयस्य कारव इन्द्रावरुणा सुहवा हवामहे ॥ ४ ॥

युवामित्। युवाम्। एव। युद्धेषु। सेनासु च। वोढारः। हवामहे। युवामेव। क्षेमस्य। प्रसव-निमित्ते। मितजानका अभिगच्छन्तो भवामहे। ईशाना। दिव्यस्य च पार्थिवस्य। स्तोतारः। इन्द्रावरुणौ ! स्वाह्वाना भवामहे।

इन्द्रावरुणा यदिमानि चक्रथुर्विश्वा जातानि भुवनस्य मज्मना।
क्षेमेण मित्रो वरुणं दुवस्यति मरुद्भिरुग्रः शुभमन्य ईयते ॥ ५ ॥

इन्द्रावरुणा। इन्द्रावरुणौ ! यत्। इमानि। चक्रतुः। विश्वान्यपि। जातानि। भुवनस्यास्य। बलेन। तयोरेकः। वरुणस्य। क्षेमार्थम्। मित्रो देवस्तम्। परिचरति। मरुद्भिः। उद्गूर्णैः। कल्याणम्। अन्य इन्द्र। गच्छति।

---

१. प्रभूतं सन्तम Sy.
२. ०न्द्रव० A ३ हर्षे सति Sy
४. अस्य A. सोमस्य पानेन Sy
५. स्तोमः M. सोमस्य is suggested for सोम।
६. प्रज्ञाकरस्य Sy ७ जलरहिता नदीः Sy
८. तथा च निवित्पदमाम्नायते 'अस्य मदे जरितरिन्द्रोऽजिन्वदजुवोऽपिन्वदपितः' इति Sy.
९. अस्माभिरनुष्ठितानि कर्माणि Sy.
१०. The reading is doubtful. सिञ्चतम् फलेन पूरयतम् Sy. ११. शत्रुसेनासु रक्षणार्थम् Sy १२. हविषा स्तोत्राणा वा वोढार ऋत्विजः Sy १३. भवा० M. आह्वयन्ति Sy. १४ युव० A. १५. रक्षणस्य Sy
१६. निमित्तम् is suggested for ०मित्त। उत्पादने निमित्तभूते सति Sy.
१७. मितजा० is suggested for ०मिव जा॥ सङ्कुचितजानुका अङ्गिरसोऽपि Sy.
१८. हवा० is suggested for भवा० ॥ हूयन्ते Sy. १९. ईश्वरौ Sy.
२०. स्तोतारो वयमपि Sy.
२१. स्वा० A. सुखेन ह्वातव्यौ Sy.
२२. हवा० is suggested for भवा० ॥ आह्वयामहे Sy. २३. VM. ignores वस्वः॥ वस्वो वसुनो धनस्य Sy.
२४. यत्नौ युवाम् Sy. २५. परिदृश्यमानानि Sy.
२६. कृतवन्तौ Sy. २७. सर्वाणि Sy.
२८. जातिमन्ति भूतजातानि Sy.
२९. लोकस्य सम्बन्धीनि Sy.
३०. न is written twice in M. आत्मीयेन बलेन Sy. ३१. युवयोर्मध्ये एक वरुणम् Sy.
३२. रक्षणहेतुना Sy ३३. मित्रावरुणौ हि परस्पर प्राप्तसख्यौ। अत एव सहचरौ दृश्येते Sy. ३४. रुद्रैः A मरुद्गणैः साधम् Sy.
३५. उद्गूर्णबलः सन् Sy. ३६. शोभनमलङ्कारम् Sy. ३७. प्राप्नोति । यद्वा मरुद्भिर्मध्यस्थानेवेगगणैः सार्धमुग्र ओजस्वीन्द्रः शुभमुदकमीयते प्रेरयति Sy.

महे शुल्काय वरुणस्य नु त्विष ओजो मिमाते ध्रुवमस्य यत्स्वम् ।
अजामिमन्यः क्षथयन्तमातिरद्भ्रेमिरन्यः प्र वृणोति भूयसः ॥ ६ ॥

महे । महते । बन्धनाय । वरुणस्य । क्षिप्रम् । दीप्ताय । वृत्रम । उपबृंहत कुरु कुरुतमिन्द्रावरुणौ । यत् । अस्य वरुणस्य । ध्रुवम् । स्वभृत भवति बल पापकृता बन्धनाय वरुणबलमिन्द्रश्चोपबृंहयतीत्यर्थ । इन्द्रावरुणयोरेते । अजामिमबन्धुम् । व्रतानि क्षणयन्तम् । आति चरन्तिनाशकर्मा मिनातयति । स्वल्पं । अन्य उपायं । प्रवारयति । बहून् शत्रून् दभतिश्चित् समुताहो भूयस इत्युक्तम् ।

न तमंहो न दुरितानि मर्त्यमिन्द्रावरुणा न तपः कुतश्चन ।
यस्यं देवा गच्छथो वीथो अध्वरं न तं मर्तस्य नशते परिह्वृतिः ॥ ७ ॥

न तमंह. । न । तम् । अंहः । न च । दुरितानि । मर्त्यम् । हे इन्द्रावरुणो ! नावि । तावकमन्यन्त । कुतः । चिदागच्छति । यस्य । देवौ ! अभिगच्छथः । वीथश्च । पज्रम् । न च । मनुष्यस्य । व्याप्नोति । परिबाधा ।

---

१. धनाय । ईदृशस्य धनस्य लाभार्थम् Sy
२. उपलक्षणमेतत् । इन्द्रस्य वरुणस्य च Sy
३. दीप्त्यर्थम् Sy. ४. कुरु is redundant.
५. कुरु is written twice in A. कुरुत M स्तोत्रेण निर्मिमाते यजमानपत्न्यौ । स्तोत्रेण हि बलं जायते Sy.
६. यत् । अस्य is written twice in A
७. अस्येन्द्रस्य वरुणस्य च Sy. ८. नित्यम् Sy.
९. स्वं स्वकीयमसाधारणं यदोजो विश्वते सदोजो मिमाते इत्यन्वयः Sy.
१०. वापकृ० A. ११. ०मिन्द्र इवो० A
१२. इन्द्रावरुणयोरेते seems to be the explanation of अन्यः therefore इन्द्रावरुणयोरेकः is suggested for इन्द्रावरुणयोरेते ।
१३. अस्तुवन्तम् Sy. १४. वृता० A
१५. हिंसन्त' कर्माण्यकुर्वन्तमस्तोतारमयजमानम् । Sy.
१६. आतिरति is suggested for आति । अभिहन्ति Sy.
१७. ०शनक० A. १८. एक इन्द्रः Sy.
१९. उपायैः goes with स्वल्पैः ।
२०. प्रवारयति । बहून् । शत्रून् दभतिश्च is missing in M अकर्वणावृतान् करोति । यद्वा अवज्ञानुत्कृष्टान् करोति Sy
२१. बहुवराच्छत्रून् यद्वा भूयसो यजमानात् Sy.
२२. पापम् Sy
२३. न व्याप्नोति Sy
२४. दुर्गमनानि पापफलानि च प्राप्नुवन्ति Sy
२५. मनुष्यम् Sy.
२६. नावि is suggested for नावि ।
२७. तावकम० M. तापक० is suggested for तावक० ॥ A सन्तापश्च तं न प्राप्नोति Sy:
२८. कस्मादपि निमित्तात् Sy
२९. हे दानादिगुणयुक्तौ ! इन्द्रावरुणौ ! Sy.
३०. ०थं A. ०थः is suggested for ०थ ॥ प्राप्नुथः Sy.
३१. ०थेथे A. कामयेथे च यस्य हवींषि Sy.
३२ उक्तप्रकारेण न प्राप्नोति Sy.
३३. ०धम् A.
३४. VM. ignores तम् ॥ तं मनुष्यम् Sy.

अर्वाङ्नरा दैव्येनावसा गतं शृणुतं हवं यदिं मे जुजोषथः ।
युवोर्हि सख्यमुत वा यदाप्यं माडीकमिन्द्रावरुणा नि यच्छतम् ॥ ८ ॥

अर्वाङ्नरा । अभिमुखम् । आगच्छतम् । नरौ ! देवयोर्युवयोरुचितेन । रक्षणेन । शृणुतं च । ह्वानम् । यदि । मे । प्रीयेथे । युवयोः । हि । सख्यम् । अपि । च । यत् । ज्ञातेयं सह भवतस्तथा सति । सुखकरम् । इन्द्रावरुणौ ! तदुभयमस्मासु कुरुतमिति ।

अस्माकमिन्द्रावरुणा भरेभरे पुरोयोधा भवतं कृष्टयोजसा ।
यद्वां हवन्त उभये अधि स्पृधि नरस्तोकस्य तनयस्य सातिषु ॥ ९ ॥

अस्माकम् । अस्माकम् । इन्द्रावरुणौ ! सङ्ग्रामे । पुरो योद्धारौ । भवतम् । हे कर्षणशीलबलौ ! तदा । वाम् । हवन्ते । उभये सैनिकाः । सङ्ग्रामे । मनुष्याः । पुत्रस्य । तत्पुत्रस्य च । लाभेष्विति ।

अस्मे इन्द्रो वरुणो मित्रो अर्यमा द्युम्नं यच्छन्तु महि शर्म सप्रथः ।
अवध्रं ज्योतिरदितेर्ऋतावृधो देवस्य श्लोकं सवितुर्मनामहे ॥ १० ॥

अस्मे । अस्मभ्यम् । इन्द्रादयः । अन्नम् । यच्छन्तु । महच्च । सुखम् । सर्वतः पृथुतमम्

---

१. आर्वाजरा Λ.
२. अस्मदभिमुखम् Sy.
३. हे नेतारौ ! Sy.
४. From देवयोः onwards the rest of the commentary is missing in A. देवसम्बन्धिना Sy.
५. मदीयं स्तोत्रम् Sy.
६. मम Sy.
७. प्रियेथे M. मयि प्रीतिरस्ति चेत् युवाभ्यामागन्तव्यं मदीयं स्तोत्रं श्रोतव्यं च भवतीत्यर्थः Sy.
८. खलु Sy.
९. सखित्वम् Sy. १०. बान्धवम् Sy.
११. मृडीकस्य सुखस्य साधनम्, तदुभयम् Sy.
१२. अस्मभ्यं प्रयच्छतम् Sy.
१३. कम् A.
१४. सङ्ग्रामे सङ्ग्रामे Sy.
१५. हे शत्रूणां कर्षकमोजो बलं ययोस्तादृशौ ! हे इन्द्रावरुणौ ! Sy.
१६. यदा is suggested for तदा ॥ यद्यौ Sy.
१७. तावस्माकं पुरोयोधा भवतमित्यन्वयः Sy.
१८. उभयविधाः पूर्वकालीना इदानीन्तनाश्च Sy.
१९. नेतारः स्तोतारः Sy.
२०. पौत्रस्य Sy.
२१. सम्भजनीयेषु निमित्तभूतेषु Sy.
२२. VM. ignores अध ॥ अध अपि च Sy.
२३. इन्द्रोव० A. आदि refers to वरुणः मित्रः । अर्यमा ।
२४. द्योतमानं धनम् Sy.
२५. प्रयच्छन्तु Sy.
२६. गृहं च प्रयच्छन्तु Sy.
२७. सर्वतः पृथु विस्तीर्णम् Sy.

बाधकरहितम्[1]। ज्योति:[2]। अदिते[3]। यज्ञस्य वर्धयित्र्या भवतु। देवस्य[5] च। सवितु[6]। श्लोकम[7]। ब्रूमो युवयोः प्रसादादिति।

VII. 83.

युवां नरा[9] पश्यमानास[10] आप्यं[11] प्राचा[12] गव्यन्तः[13] पृथुपर्शवो[14] ययुः।
दासा[15] च वृत्रा[16] हतमार्याणि[17] च सुदासमिन्द्रावरुणावसावतम्॥ १॥

युवां[18] नरा। युवाम[19]। नरौ[20]। पश्यमानाः[21]। ज्ञातेय युवयोर्यज्ञार्थम्। प्राच्यगर्व[22] गन्तुम्। अगा[23] इच्छन्त। पृथु पृथु पशव[24] आक्त पृथश्च पशवः। यान्ति। दासानुपक्षपयितॄन्[25]। त्रीण्युपद्रवान्[26]। च। आर्यैरपि कृतान्[27]। विनाशयतम्[28]। पैजवनं[29] सुदासम्। मित्रावरुणौ[30]। रक्षतम्[31]।

---

१. आहंसकम् Sy.
२. तेजः Sy.
३. उदितेः A.
अदीनाया देवमातुः Sy.
४. य is written twice in A.
५. दानादिगुणयुक्तस्य Sy.
६. सर्वस्य प्रेरकस्य Sy.
७ शोक० A.
स्तोत्रम् Sy.
८. जानीमः। कुर्म इत्यर्थः। यद्वा देवेन सवित्रास्मभ्यं देयं श्लोकं यशो मनामहे याचामहे Sy.
९. 'युवां नरः' इति दशर्चं त्रयोदशं सूक्तं वसिष्ठस्यार्षं जागतमैन्द्रावरुणम्। 'युवा नरा' इत्यनुक्रान्तम् (KSA. 38. 83. p. 26.) आभिप्लविकेषूक्थ्येषु स्तोमवृद्धौ प्रशास्तुरिदं सूक्तमावापार्थम्। सूत्रितञ्च 'युवां नरा पुनीषे वाम्' (ĀSS. 7. 9) इति Sy.
१०. षष्ठ्यर्थे द्वितीया। युवयोः Sy.
११. हे नेतारौ! इन्द्रावरुणौ! Sy.
१२. पश्यन्तः is suggested for पश्यमानाः॥ युष्मद्ज्ञानबलाभार्थिनः Sy.
१३. ०यं is suggested for ०य
१४. प्राचीनम् Sy.
१५. आगच्छन्तः M. गा० is suggested for अगा०॥ गा आत्मन इच्छन्तो यजमानाः Sy.
१६. प्रथु प्रगिव पशव आक्त प्रथश्च पशवो A. The reading is doubtful. पृथुविस्तीर्णाः पर्शुः पार्श्वास्थि येषा ते तथोक्ताः। विस्तीर्णास्थिपर्शुहस्ताः सन्तः Sy.
१७ बर्हिराहरणार्थं गच्छन्ति। पर्शवो हि बर्हिराच्छिद्यते तथा च तैत्तिरीयकम् 'अश्वपर्शवो बर्हिराच्छद्यति' इति Sy.
१८. उपक्षपयित्रीणि च Sy.
१९. उपद्रवान् is suggested for उपद्रव०॥ आवरकाणि शत्रुजातानि Sy.
२० कर्मानुष्ठानपराणि च शत्रुजातानि Sy.
२१. हिस्तम् Sy.
२२. वैजवनं A. अस्मद्राज्यमेतत्संज्ञं राजानम् Sy.
२३. इन्द्राव० is suggested for मित्राव०।
२४. आगच्छतम् Sy.
२५. VM. ignores च and अवसा॥ अव ०ा रक्षणेन सार्धम् Sy.

यत्रा नरः समयन्ते कृतध्वजो यस्मिन्नाजा भवति किं चन प्रियम् ।
यत्रा भयन्ते भुवना स्वर्दृशस्तत्रा न इन्द्रावरुणाधि वोचतम् ॥ २ ॥

यत्रा नरः । यत्र । मनुष्या । सङ्गच्छन्ते । उच्छ्रितपताका ध्वजतेरुच्छ्रयकर्मण ।. यस्मिन् । सङ्ग्रामे । भवति । यत्किंचिदपि मनुष्यस्याभिमतमन्नादिकम् । यत्र । बिभ्यति । भूतानि । स्वर्दृशश्च देवा हिंसासम्भावाद्भयम् । तत्र । अस्माकम् । इन्द्रावरुणौ ! अधिवोचतमेत एव राज जयन्त्विति ।

सं भूम्या अन्ता ध्वसिरा अदृक्षतेन्द्रावरुणा दिवि घोष आरुहत् ।
अस्थुर्जनानामुप मामरातयोऽर्वागवसा हवनश्रुता गतम् ॥ ३ ॥

सं भूम्याः । भूम्या । अन्ता । ध्वसनशीला । सन्दृश्यन्ते ध्वसयन्ति चतस्रो दिश. सैनिकाधिष्ठिता. । तथेन्द्रावरुणौ ! दिव । सैनिकाना शब्द । आरोहण करोति । जनानाम् । अरातयश्च । माम् । उपावतिष्ठन्ति । अभिमुखम् । रक्षणार्थम् । हवनश्रुतौ । आगच्छतम् ।

इन्द्रावरुणा वधनाभिरप्रति भेदं वन्वन्ता प्र सुदासमावतम् ।
ब्रह्माण्येषां शृणुतं हवीमनि सत्या तृत्सूनामभवत्पुरोहितिः ॥ ४ ॥

इन्द्रावरुणा । हे इन्द्रावरुणौ ! वधैः । अप्रतिगतशत्रुकम् । भेत्तारं कुलस्य चाद्यमानम् । हिंसन्तौ ।

---

१. यस्मिन् सङ्ग्रामे Sy.
२. ०च्छन्तः A. युद्धार्थं सङ्गच्छन्ते Sy.
३. उच्छ्रितध्वजाः Sy.
४. ०यतक० A.
५. युद्धे Sy.
६. (न) भवति, अपि तु सर्वं दुष्करं भवति Sy.
७. चनेति निपातद्वयसमुदायो विभज्य योजनीयः । किञ्च किमपि Sy.
८. अनुकूलम् Sy.
९. युद्धे Sy.
१०. भुवनानि भूतजातानि Sy.
११. शरीरपातादूर्ध्वं स्वर्गस्य द्रष्टारो वीराश्च Sy.
१२. ०तम्भवा० is suggested for ०तम्भावा० ।
१३. तादृशे सङ्ग्रामे Sy.
१४. अस्मान् Sy.
१५. अस्मत्पक्षपातवर्धनौ भवतम् Sy.
१६. एतमेवरराजं जयन्त्विति M. राजानं is suggested for राजम् ।
१७. पर्यन्ता Sy. १८. सैनिकैर्ध्वस्ताः Sy.
१९. ०ता तथा A. २०. इन्द्रो वरुणो M.
२१. Missing in M. दिवि is suggested for दिव ॥ द्युलोके Sy.
२२. आरूढोऽभूत् Sy.
२३. धना० M. अस्मदीयानां भटानाम् Sy.
२४. ०रताय० A. शत्रवः Sy.
२५. उपति० is suggested for उ अव ति० ॥ उपस्थिताः Sy.
२६. अस्मदभिमुखम् Sy.
२७. ०नः श्रुतौ A. एवं प्रवर्तमानेऽस्मिन् युद्धे हे आह्वानशीलौ ! इन्द्रावरुणौ ! Sy.
२८. वधकरैरायुधैः Sy.
२९. अप्राप्तम् Sy.
३०. भेदमेतत्संज्ञं सुदासः शत्रुम् Sy.

प्रावतम्[1]। सुदासम्[2]। ब्रह्माणि[3] च। एषाम्[4]। अशृणुतम्[5]। हवनं[6]। सत्यभरा[7]। भवतु। तृत्सूनाम्[8]। पुरोहिति-रिति च यदस्मानेते पुरोदधुस्तृत्सवस्तत् फलत्वेषामिति[9][10][11]।

इन्द्रावरुणावभ्या तपन्ति माघान्यर्यो वनुषामरातयः।
युवं हि वस्व उभयस्य राजथोऽध स्मा नोऽवतं पार्ये दिवि ॥ ५ ॥

इन्द्रावरुणौ। हे इन्द्रावरुणौ! माम्। अभ्यातपन्ति[12]। शत्रवः[13]। अघान्याहन्तृणि[14] प्रहरणानि हिंसिता[15] शत्रूणाम्। करादीनामप्रदानानि[16]। युवाम्। हि[17]। दिव्यस्य पार्थिवस्य च। धनस्य। राजथ[18]। तथा सति[19]। अस्मान्। रक्षतं[20]। पार्ये[21]। दिवमेऽन्तिमे सङ्ग्रामस्यास्मि[22]।

युवां हवन्त उभयास आजिष्विन्द्रं च वस्वो वरुणं च सातये।
यत्र राजभिर्दशभिर्निबाधितं प्र सुदासमावतं तृत्सुभिः सह ॥ ६ ॥

युवाम्[25]। युवाम्। हवन्ते[26]। उभये[27] सैनिकाः। सङ्ग्रामेषु। इन्द्रम्। वरुणम्[28]। च। धनस्य।

---

१. प्रापतम् A. प्रकर्षेणारक्षतम् Sy.
२. शोभनं ददातीति सुदाः। एतत्संज्ञम। मम याज्यं राजानम् Sy.
३. स्तोत्राणि Sy.
४. एषाव A. तृत्सूनाम् Sy.
५. अश्रृणुतम् Sy.
६. आहूयन्तेऽस्मिन् युद्धार्थं परस्परमिति हवीमा सङ्ग्रामस्तस्मिन् Sy.
७. सत्यफलम् Sy.
८. एतत्संज्ञानां मम याज्यानाम् Sy.
९. ति is missing in A: मम पुरोधानम् Sy.
१०. ०वधुस्तृ० A.
११. तेषु यन्मम पौरोहित्यं तत् सफलं जातमित्यर्थः Sy.
१२. अह्यात्[ृ]० A. अभितो बाधन्ते Sy.
१३. अरेः शत्रोः सम्बन्धीनि Sy.
१४. न्या is written twice in A.
१५. ०रिणाभिः A.
आयुधानि Sy.
१६. missing in M. हिंसतां is suggested for हिंसितां ॥ हिंसकानां मध्ये Sy.
१७. अभिगमनशीलाः शत्रवः Sy.
१८. खलु Sy.
१९. ईशाथे। राजतिरैश्वर्यकर्मा Sy.
२०. अतः कारणात् Sy.
२१. रक्षतम् is suggested for रक्षत।
२२. पार्ये दिवसे ऽन्तिमे is missing in M. तरणीये Sy.
२३. युद्धदिने Sy.
२४. VM ignores स्म।
२५. युवा A.
२६. हन्ते A. आह्वयन्ते Sy.
२७. उभयविधाः सुदाःसंज्ञो राजा तत्सहायभूतास्तृत्सवश्चैवं द्विप्रकारा जनाः Sy.
२८. वर A.
२९. युवाम् Sy.

भजनाय[1] । यस्मिन्[2] सङ्ग्रामे । शत्रुभिरदर्शनी[3] । राजभिः[4] । नितरां बाधितम्[5] । प्रापतम्[6] । सुदासं राजानम्[7] । सर्वैस्तृत्सुभिः । सह[8] ।

दश[9] राजानः[10] समिता[11] अयज्यवः[12] सुदासमिन्द्रावरुणा[13] न युयुधुः[14] ।
सत्या[15] नृणामभवद्दासदाग्[16]वपस्तुतिर्देवा[17] एषामभवन्देवहूतिषु[18] ॥ ७ ॥

दश राजानः । दश । राजानः । सङ्गताः । अयष्टारः । सुदासम् । इन्द्रावरुणौ ! न । युयुधुः । अभवद्भया परिगृहीतम् । सत्या । नृणम् । हविषि सीदन्ताम् । अपस्तुतिं फलं प्रयच्छति । एषाम् । प्रादुर्भवन्ति[19] । देवानमाह्वानेषु[20] । देवाश्चाहूतास्तानुपगच्छन्ति[21] ।

दाशराज्ञे[22] परियत्ताय[23] विश्वतः[24] सुदासं इन्द्रावरुणावशिक्षतम् ।
श्रित्यश्वो यत्र नमसा कपर्दिनो धिया धीवन्तो असपन्त[25] तृत्सवः[26] ॥ ८ ॥

दाशराज्ञे । दाशराज्ञे । परीतौ युद्धार्थं यतमानाय । सर्वत एव । सुदासे । हे इन्द्रावरुणौ ! बल

---

१. सम्भजनार्थम् Sy.
२. येष्वाजिषु Sy.
३. दशभिः । राजभिः । नितरां is missing in M. ०र्दशभिः is suggested for दर्शनी ॥ दशसंख्याकैः Sy.
४. शत्रुभूतैर्नृपैः Sy.
५. बाधिकम् A. हिंसितम् Sy.
६. प्रापतम् is suggested for प्रापतं ॥ प्रकर्षेणारक्षतम् Sy.
७. सह वर्तमानम् Sy.
८. दश राजानः is missing in A.
९. दशसंख्याकाः Sy.
१०. सुदासः शत्रवः Sy.
११. परस्परं समवेताः Sy.
१२. अयजमाना एवम्भूतास्ते Sy.
१३. एतत्संज्ञमेकमपि राजानम् Sy.
१४. सम्प्रजहुः युवाभ्यामनुगृहीतं तं प्रहर्तुं न शेकुः Sy.
१५. सफलाभूत् Sy.
१६. नृणाम् is suggested for नृणं ॥ यज्ञस्य नेतॄणाम् Sy.
१७. अद्यान्यस्मे हविषि सीदन्तीत्यप्यसव ऋत्विजः । हविर्भिर्युक्तानाम् Sy.
१८. अपस्तु० A उपस्तु० is suggested for अपस्तु० ॥ स्तोत्रम् Sy.
१९. एवां एवा A.
२०. युष्मदनुग्रहात् प्रादुर्भवन्ति Sy.
२१. देवाना० is suggested for देवान० ॥ अपि चैषां देवहूतिषु देवा हूयन्ते एष्विति देवहूतयो यज्ञाः । तेषु Sy.
२२. सर्वे च देवाः Sy.
२३. दश राज्ञे M. दशशब्दस्य छान्दसो दीर्घः । विभक्तिव्यत्ययः । दशभी राजुभिः शत्रुभूतैः Sy. २४. परीतो M.
२५. परिवेष्टिताय Sy.
२६. राज्ञे Sy.

प्रायच्छतम् । इवेतिमानमञ्चन्तः[1] । यत्र[2] । हविषा[3] सह । कपर्दिनः[4] । कर्मणा[5] । कर्मवन्तः[6] । देवानस्पृशन्[7] । तृत्सवश्च[8] 'त्यञ्चो[9] मा दक्षिणतः[10] कपर्दा' इत्युक्तम् ।

उत्तरा निगदसिद्धेति—

वृत्राण्यन्यः समिथेषु जिघ्नते व्रतान्यन्यो अभि रक्षते सदा ।
हवामहे वां वृषणा सुवृक्तिभिरस्मे इन्द्रावरुणा शर्म यच्छतम् ॥ ९ ॥

[वृत्राण्यन्य.][11]

अस्मे इन्द्रो वरुणो मित्रो अर्यमा द्युम्नं यच्छन्तु महि शर्म सप्रथः ।
अवध्रं ज्योतिरदितेर्ऋतावृधो देवस्य श्लोकं सवितुर्मनामहे ॥ १० ॥

[अस्मे इन्द्रः][12]

---

१. इवेतिमानां म० A. इवेतिमा० is suggested for इवेतिमा० ॥ शिक्षतं श्वैत्यं नैर्मल्यमञ्चन्तो गच्छन्तः Sy.

२. यस्मिन् देशे Sy.

३. हविर्लक्षणेनान्नेन Sv

४ जटिलाः Sy. ५. स्तुत्या Sy.

६ कर्मभिर्युक्ताः Sy.

७. पर्यचरन् । तस्मिन् देशे युवां तस्मै राज्ञे बलम् प्रायच्छतमित्यर्थः Sy.

८. त्यत्स० M. वसिष्ठशिष्या एतत्संज्ञा ऋत्विजः Sy.

९. शित्यञ्चो is suggested.

१०. ०तः स्कप० A.

११. The *pratika* is supplied by the Editor. Sy. explains this stanza in the following manner :—

हे इन्द्रावरुणौ ! युवयोरन्य एक इन्द्रो वृत्राणि शत्रून् समिथेषु सङ्ग्रामेषु जिघ्नते हन्ति । अन्य एको वरुणः सदा सर्वदा व्रतानि कर्माण्यभि रक्षते । अभितः सर्वतो रक्षति । हे वृषणौ ! कामानां वर्षितारौ ! इन्द्रावरुणौ ! तथाविधौ ! वां युवां सुवृक्तिभिः सुप्रवृत्ताभिः स्तुतिभिर्हवामहे । आह्वयामहे । आहूतौ च युवामस्मे अस्मभ्यं शर्म सुखं यच्छतम् । दत्तम् Sy.

१२. The *pratika* is supplied by the Editor. This stanza has already been explained. See RV. VII. 82. 10. Sy. explains this stanza in the following manner :—

व्याख्यातेयम् । अक्षरार्थस्तु-इन्द्रादयोऽस्मभ्यं द्योतमानं धनं प्रयच्छन्तु सर्वतो विस्तीर्णं महद् गृहं च । यज्ञस्य वर्धयित्र्या अदीनाया देवमातुस्तेजश्चास्माकमबाधकं भवतु । वयञ्च प्रेरकस्य देवस्य स्तोत्रं मनीमहे कुर्महे ।

VII. 84.

आ वां राजानावध्वरे वंवृत्यां हव्येभिरिन्द्रावरुणा नमोभिः ।
प्र वां घृताची बाह्वोर्दधाना परि त्मना विषुरूपा जिगाति ॥ १ ॥

आ[1] वाम्[2] । आवर्तयामि । वाम्[3] । राजानौ[4] । यज्ञे[5] । हव्यै[6] । नमस्कारैश्च[7] । इन्द्रावरुणौ ! परिगच्छति[8] । वां[9] । जुहू[10] । बाह्वोः[11] । धियमाणा[12] । स्वयमेव । नानाविधैर्हविर्भिर्नानारूपा[13] ।

युवो राष्ट्रं बृहदिन्वति द्यौर्यौ सेतृभिररज्जुभिः सिनीथः ।
परि नो हेळो वरुणस्य वृज्या उरुं न इन्द्रः कृणवदु लोकम् ॥ २ ॥

युवोः[14] । युवयोः[15] । महत् । राष्ट्रम्[16] । द्यौः[17] । वर्षेण प्रीणयति[18] । यौ युवाम् । रज्जुर्वर्जितै[19] । सेतुभिर्बन्धकैः[20] । बध्नीथ[21] पापकृतस्ते हि रोगादिनाभिभूयन्ते । वरुणस्य[22] । क्रोध । अस्मान्[23] । वर्जयतु[24] । विस्तीर्णम् । लोकम्[25] । अस्माकमस्माकम्[26] । इन्द्रः । च । करोतु[27] ।

---

१. 'आ वाम्' इति पञ्चर्चं चतुर्दशं सूक्तं वासिष्ठं त्रैष्टुभमैन्द्रावरुणम् । अनुक्रान्तञ्च—'आ वां पञ्च' (KSA. 38. 84. p. 26.) इति । उक्थ्ये तृतीयसवने । मैत्रावरुणशस्त्र इदं सूक्तम् । सूत्रितञ्च—'आ वां राजानावि द्रावरुणा मधुमत्तमस्येति याज्या' (ĀSS. 6. 1.) इति Sy.

२. युवाम् Sy.

३. ०नो M. हे राजमानौ ! ईश्वरौ ! वा Sy.

४. हिंसारहितेऽस्मिन् यागे Sy.

५. हविर्भिः Sy.

६. स्तोत्रैश्च Sy.

७. अभिप्रगच्छति Sy.

८. वाम् is suggested for वा ।

९. जुहूः A. घृतमञ्चती जुहूः Sy.

१०. वो M. बाह्वोः is suggested for बाह्वो ॥ हस्तयोः Sy.

११. द्धीय० A. धार्यमाणा Sy.

१२. रूप्यत इति रूपं हविः । विविधहविर्युक्ता । यद्वा विषुरूपा नानाविधरूपौ वामिति योज्यम् Sy.

१३. VM. ignores प्र ।

१४. हे इन्द्रावरुणौ ! Sy

१५. युवोः A.

१६. राज्यम् Sy

१७. त्यौः A. द्युलोकरूपम् Sy.

१८. वृष्ट्या सर्वान् प्रीणयति Sy.

१९. ०तेः A. रज्जुरहितैः रोगादिभिः Sy.

२०. ०भिबबन्ध० A. सेतृभि० is suggested for सेतुभि० ॥ 'मिञ् बन्धने' इति धातुः Sy.

२१. बबध्नीथः A.

२२. तयोर्मध्ये वारयितुर्वेवस्य Sy.

२३. अस्मात् A.

२४. परिवृणक्तु । परित्यज्यान्यत्र गच्छतु Sy.

२५. स्थानम् Sy.

२६. One अस्माकम् is redundant.

२७. VM. ignores परि.

कृतं नो यज्ञं विदथेषु चारुं कृतं ब्रह्माणि सूरिषु प्रशस्ता ।
उपो रयिर्देवजूतो न एतु प्र णः स्पार्हाभिरूतिभिस्तिरेतम् ॥ ३ ॥

कृतं नः । कुरुतम् । अस्माकम् । यज्ञम् । गृहेषु । चारुम् । कुरुत च । स्तोत्राणि । स्तोतृषु । प्रशस्ता हि । उपगच्छतु । अस्मान् । रयिं । देवप्रेरित । प्रवर्धयतम् । अस्मान् । स्पृहणीये । रक्षणे ।

अस्मे इन्द्रावरुणा विश्ववारं रयिं धत्तं वसुमन्तं पुरुक्षुम् ।
प्र य आदित्यो अनृता मिनात्यमिता शूरो दयते वसूनि ॥ ४ ॥

अस्मे । अस्मासु । इन्द्रावरुणौ । विश्ववैवरणीयम् । रयिम् । धत्तम् । वासयितृभिः पुरुषैस्तद्वन्तम् । बहुना शब्दनीयम् । प्रमिणाति । यः । अदिते पुत्र । अनतानि भूतानि सर्वजोऽस्मभ्य धनानि प्रयच्छत्विति वाक्यशेषः । एवममितानि । धनानि । शूर इन्द्रश्च । प्रयच्छतीति ।

इयमिन्द्रं वरुणमष्ट मे गीः प्रावत्तोके तनये तूतुजाना ।
सुरत्नासो देववीतिं गमेम यूयं पात स्वस्तिभिः सदा नः ॥ ५ ॥

इयम् । इयम् । मदीया । स्तुतिः । इन्द्रावरुणौ । अश्नुते । प्रागच्छन् । पुत्रार्थम् । पौत्रं च । त्वरमाणा । शोभनधनाः । यज्ञं वयम् । प्राप्नुयामेति ।

---

१. हे इन्द्रावरुणौ ! Sy.
२. गृहेषु क्रियमाणम् Sy.
३. शोभनं फलसहितम् Sy.
४. परिवृढानि स्तोत्राणि Sy.
५. स्तोतृषु अस्मासु विद्यमानानि Sy.
६. प्रशस्तान्युत्कृष्टानि फलभाञ्जि Sy.
७. प्राप्नोतु Sy. ८. धनम् Sy.
९. देवपरीतं M. देवाभ्यां युवाभ्यां प्रेरितः Sy.
१०. युवां वर्धयेथाम् । प्रपूर्वस्तिरतिर्वर्धनार्थः Sy.
११. अस्मात् A. १२. स्पृहणीयाभिः Sy.
१३. रक्षाभिः Sy. १४. अस्मभ्यम् Sy.
१५. विश्वैः सर्ववैरणीयं सम्भजनीयम् Sy.
१६. प्रयच्छतम् Sy.
१७. निवासयुक्तम् Sy.
१८. बह्वन्नं पुरुभिर्बहुभिः प्रशस्यं वा Sy.
१९. प्रहिनस्ति । 'मीङ् हिंसायाम्' इति धातुः Sy.
२०. वरुणः Sy.
२१. अनृता० is suggested for अनता० ॥ सत्यरहितानि भूतानि Sy.
२२. omitted by M. सर्वतोऽस्म० is suggested for सवजोऽस्म० A.
२३. ०ममि० A. अपरिमितानि Sy.
२४. शौर्यवान् स वरुणः Sy.
२५. स्तोतृभ्यो ददाति Sy.
२६. स्तुतिव् A.
२७. अश्नुताम् । व्याप्नोतु Sy.
२८. प्रागच्छन् M: प्रागच्छत् is suggested for प्रागच्छन् ॥ प्ररक्षत्वस्मान् Sy.
२९. पुत्रे पौत्रे च विषये Sy.
३०. ०माणाः M. मया प्रेर्यमाणा सा Sy.
३१. शोभनधनाः सन्तः Sy.
३२. देवैः कामयितव्यं यज्ञम् Sy.
३३. हे इन्द्रावरुणावयः ! सर्वे देवाः ! यूयं स्वस्तिभिः कल्याणैर्नोऽस्मान् सदा सर्वदा । पात रक्षत Sy.

VII. 85.

पुनीषे वामरक्षसं मनीषां सोममिन्द्राय वरुणाय जुह्वत् ।
घृतप्रतीकामुषसं न देवीं ता नो यामन्नुरुष्यताम्भीके ॥ १ ॥

पुनीषे वाम् । शोधयामि । युवयोरहम् । बाधकरहिताम् । स्तुतिं न ह्यनयो. स्तोतार कश्चिद् बाधते । सोमम् । इन्द्रावरुणाभ्याम् । जुह्वत् । घृतावयवां घृतसहिता स्तुतिम् । उषसम् । इव । देवनशीलम् । तव । अस्मात् । गमने । रक्षताम् । सङ्ग्रामे ।

स्पर्धन्ते वा उ देवहूये अत्र येषु ध्वजेषु दिद्यवः पतन्ति ।
युवं ताँ इन्द्रावरुणावमित्रान्हतं पराचः शर्वा विषूचः ॥ २ ॥

स्पर्धन्ते । अस्मिन् । देवह्वाने । जनाः स्पर्धन्तेऽहमिका वा ह्वयन्ते । येषु जनेषु । साङ्ग्रामिकेषु ध्वजेषु । आयुधानि । पतन्ति, येषा सङ्ग्रामः प्रादुर्भवतीत्यर्थ । युवाम् । तान् । इन्द्रावरुणौ ! अमित्रान् । हतम् । प्राङ्मुखान् । आयुधेन ! नानादिक्कान् ।

---

१. 'पुनीषे वाम्' इति पञ्चर्चं पञ्चदशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमैन्द्रावरुणम् । 'पुनीषे' इत्यनुक्रान्तम् (KSA. 38. 85. p. 26.)। आभिप्लविकेषूक्थ्येषु तृतीयसवने स्तोमवृद्धौ प्रशास्तुरिदमावापार्थम् । सूत्रितञ्च—'युवां नरा पुनीषे वाम्' (ĀŚS. 7. 9.) इति Sy.

२. योध० A.

३. युवाभ्यां युवयोरर्थम् Sy.

४. रक्षोरहितां राक्षसैरसंस्पृष्टाम् Sy.

५. इन्द्रं वरुणञ्चोद्दिश्य Sy.

६. जुह्वत् is suggested for जुह्वन् ॥ अग्नौ प्रक्षिपन् Sy. ७. दीप्तावयवाम् Sy.

८. ०शीलाम् is suggested for ०शीलम् ॥ द्योतमानम् Sy.

९. तौ is suggested for तव । इन्द्रावरुणौ Sy.

१०. अस्मान् is suggested for अस्मात् ॥

११. युद्धार्थं गमने सति Sy.

१२. सङ्ग्रामे is suggested for सङ्ग्रामः । अभिगते युद्धे Sy.

१३. देवा विजिगीषवो योद्धारो हूयन्ते युद्धार्थं परस्परमाहूयन्ते इति देवहूयः सङ्ग्रामाः । सङ्ग्रामे Sy.

१४. शत्रवोऽस्माभिः Sy. अहमहमिकया ह्व० is suggested for अहमिका वां ह्व०

१५. हतमिका वां हूयते A.

१६. सङ्ग्रामेषु Sy.

१७. सङ्ग्रा० A.

१८. पताकासु Sy.

१९. शत्रुक्षिप्तानि आयुधानि Sy.

२०. ०वन्तो० A.

२१. तेषु सङ्ग्रामेषु विद्यमानान् Sy.

२२. अमिन्द्रान् A. शत्रून् Sy.

२३. हिंस्तम् । यथा ते शत्रवः पराङ्मुखा इतस्ततः पलायमानाश्च भवन्ति तथा तान् बाधेथामित्यर्थः Sy.

२४. आयुधे A. शरुणा हिंसकेनायुधेन Sy.

२५. ०विक्तात् A. विविधगतींश्च Sy.

२६. VM. ignores वै and उ ॥ वै खलु, उ इति पूरकौ Sy.

आपश्चिद्धि स्वयशसः सदःसु देवीरिन्द्रं वरुणं देवता धुः ।
कृष्टीरन्यो धारयति प्रविक्ता वृत्राण्यन्यो अप्रतीनि हन्ति ॥ ३ ॥

आपश्चित्[1] । आपः[2] । चित्[3] । चान्तरिक्ष्याः[4] । स्वभूतयशसः[5] । स्वेषु स्थानेषु[6] । देवीः । इन्द्रावरुणौ । देवते । धारयन्ति[7] मध्यमे स्थाने पठितावित्यवरुणावन्तरिक्षे धारयतीत्यर्थः, अन्तरिक्षनाम च भवत्याप इति । मनुष्यान्[8] । एको[9] वरुणः । धारयति[10] । प्रकर्षेण[11] व्याप्तान्[12] । शत्रून्[13] । अन्यः । अप्रतिगतानि[14] इन्द्रः । हन्ति[15] ।

स सुक्रतुर्ऋतचिदस्तु होता य आदित्य शवसा वां नमस्वान् ।
आववर्तदवसे वां हविष्मानसदित्स सुविताय प्रयस्वान् ॥ ४ ॥

स सुक्रतुः[16] । सः । सुप्रज्ञः । भवतु सुकर्मा[17] वा[18] । सत्यज्ञः । होता[19] । [20] । हे आदित्यो[21] ! वेगेन[22] । नमस्कारयुक्तम्[23] । आवर्तयति[24] । वाम् । रक्षणार्थम्[25] । पुनर्वामिति पूरणम् । हविष्मान् । भवति[26] । एव । सः[27] । अभ्युदयाय[28] । अन्नवान्[29] हविष्मानिति ।

---

१. आवश्चित् A.
२. आव A. अभिवकाराः सोमश्च Sy.
३. वित् A.
४. छान्त० A.
५. स्वायत्तयशस्काः Sy.
६. सदनेषु स्थानेषु Sy.
७. द्योतमानाः सन्तः Sy.
८. अवस्थापयन्ति सोमेनाप्यायिता हि देवताः स्वे स्वे स्थानेऽवतिष्ठन्ते । यद्वा वसतीवर्याख्या आप एव सोमाभिषवद्वारा सदनेष्विन्द्रं वरुणं धारयन्ति Sy. ९. ०प्रजाः Sy.
१०. तयोरिन्द्रावरुणयोरेकः Sy.
११. असाङ्कर्येण धारयति Sy.
१२. पृथक्कृताः पुण्यापुण्यविवेकेन विचित्रफलभोक्त्रीः Sy. १३. शत्रुजातानि Sy.
१४. ०ति °हता० M. अन्यैरप्रतिगतानि Sy.
१५. हिनस्ति Sy.
१६. सुकृत् A.
१७. शोभनकर्मा शोभनप्रज्ञो वा Sy.
१८. भि भवतु A.
१९. सुकर्मा वा refers to सुप्रज्ञः, therefore सुकर्मा वा should immediately follow सुप्रज्ञः ।
२०. ऋतस्योदकस्य यज्ञस्य वा चेता निचेता Sy.
२१. स्तोता Sy.
२२. ०त्य M. ०त्यौ is suggested for ०त्यो ॥ A. हे अदितेः पुत्रावित्यवरुणौ ! छान्दसः सांहितिको ह्रस्वः Sy
२३. बलेन युक्तौ Sy.
२४. ०युक्तः is suggested for युक्तम् ॥ नमसा नमस्कारेण स्तोत्रेण वा युक्तः सन् Sy.
२५. आवर्तयेत् Sy. २६. तर्पणार्थम् Sy.
२७. भवेत् Sy. २८. एवम् A.
२९. नः A. यजमानः Sy.
३०. सुष्ठु प्राप्तव्याय फलाय Sy.
३१. अन्नवान् भूत्वा Sy.

इयमिन्द्रं वरुणमष्ट मे गीः प्रावत्तोके तनये तूतुजाना ।
सुरत्नासो देववीतिं गमेम यूयं पात स्वस्तिभिः सदा नः ॥ ५ ॥

[इयमिन्द्रम् ।]

VII. 86

धीरा त्वस्य महिना जनूंषि वि यस्तस्तम्भ रोदसी चिदुर्वी ।
प्र नाकमृष्वं नुनुदे बृहन्तं द्विता नक्षत्रं पप्रथच्च भूमं ॥ १ ॥

धीरा । स्थिराण्यविचलानि । वरुणस्य । महत्त्वेन । सर्वाणि जातानि भूतानि । यः । विस्तीर्णे । द्यावापृथिव्यौ । व्यस्तद्विध्मान् । प्रणुनुदे च । तृतीय लोकमादित्य वा । दर्शनीयम् । महान्तं सोम वरुणो दिवा । नक्षत्रम् । पृथिव्याम् । च भूतजातं । द्वैधम् । वप्रथ उभयत्र प्रथितं करोति ।

उत स्वया तन्वा३ सं वदे तत्कदा न्वन्तर्वरुणे भुवानि ।
किं मे हव्यमहृणानो जुषेत कदा मृळीकं सुमना अभि ख्यम् ॥ २ ॥

उत स्वया । अपि च । आत्मीयेन । पुत्रेण । सहाहम् । एतत् । वदामि । कदाहम् । वरुणस्य ।

---

१. The *pratīka* is supplied by the Editor. The stanza has already been explained. See RV. VII. 84. 5.

२. 'धीरा त्वस्य' इत्यष्टर्चं षोडशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वरुणदेवत्यम् । तथा चानुक्रान्तम्—'धीराष्टौ वरुण ह' (KSA. 30. 86. p. 26.) इति । गतो विनियोगः Sy.

३. धीरां A.

४. ०विचालीनि A. ०विचालीनि is suggested for ०विचलानि ॥ धीराणि धैर्यवन्ति भवन्ति Sy. ५. महिम्ना Sy.

६. जातानि is omitted by A. जन्मानि Sy.

७. वरुणः Sy.

८. व्यष्टभनात् is suggested for व्यस्तद्विध्मान् ॥ विविधं स्तब्धे स्वकीये स्थाने स्थिते अकरोत् Sy.

९. प्रेरयति स्म Sy. १०. ०त्या वा A.

११. ०जातम् is suggested for ०जात ॥ भूमिम् Sy.

१२. द्वैतम् A. अहनि सूर्यं दर्शनीयं प्रेरयति । रात्रौ नक्षत्रं तथेति द्विप्रकारः Sy.

१३. थ उभयमुभ० M. पप्रथदुभयत्र is suggested for वप्रथ उभयत्र ॥ अप्रथयत् विस्तारितवान् Sy.

१४. VM. ignores तु and चित् ॥ तु क्षिप्रम् । चिद् अपि Sy.

१५. वरुणं शीघ्रं विवृक्षमाण ऋषिरनया वितर्कयति Sy.

१६. उतेति विचिकित्सायाम् । उत किम् Sy.

१७. स्वीयेन शरीरेण Sy.

१८. सहववनं करोमि Sy.

१९. आहोस्वित् तत्तेन वरुणेन सह सं वदे Sy.

२०. वरुण्य A. वरुणे देवे Sy.

अन्तः[1]। भवानीति। किञ्च। मे। हव्यं वरुणः। अक्रुद्ध[5]। जुषे[6] च। कदा[7] चाहम्[8]। खशयितारम्[9]। अहं च सुमना[10]। अभिपश्यामि[11]।

पृच्छे तदेनो वरुण दिदृक्षूणो एमि चिकितुषो विपृच्छम्[12]।
समानमिन्मे[20] कवयश्चिदाहुरयं[23] ह[24] तुभ्यं[25] वरुणो हृणीते[26] ॥ ३ ॥

पृच्छे[12] तत्। पृच्छामि। वरुण! तत्। पापमहम्। दिदृक्षु[13] सर्वं भूत यो मा[14] मद्दिदृक्षयागच्छति त पृच्छामि तथाहमेवान्यान्। चिकितुषो[15] जना[16]। अपगच्छामि[17]। विविध च[18] पृच्छामि। तत्र च सर्व एव। कवयः[19]। समानम्[20]। एवम्[21]। मम[22]। आहुः[23]। अयम्। ह[24]। तुभ्यम्[25]। वरुणम्। क्रुध्यतीति[26]।

---

१. अन्तर्भूतो भवानि। वरुणस्य चित्ते संलग्नो भवानीत्यर्थः Sy.

२. कं च A.
केन हेतुना Sy.

३. मदीयम् Sy.

४. स्तोत्रम्, हविर्वा Sy.

५. ०द्धः is suggested for ०द्ध॥ अक्रुध्यन् Sy.

६. जजुषेत A. जुषेत is suggested for जुषे च॥ सेवेत Sy.

७. कस्मिन् काले Sy.

८. सुखयि० is suggested for ०खशयि०॥ वरुणम् Sy.

९. चाहं च सुम० M. अहं च seems to be redundant. शोभनमनस्कः सन्नहम् Sy.

१०. अभिपश्येयम् Sy.

११. VM. ignores नु॥ नु खलु Sy.

१२. त्वां पृच्छामि। येन पापेन हेतुना त्वदवयैः पाशैर्बद्धोऽस्मि पृष्टः संस्तत्पापं कथय Sy.

१३. ०क्षु सम्भूतं A.
दिदृक्षु। छान्दसः सुलोपः। द्रष्टुमिच्छन्नहम् Sy.

१४. मा मद्दिदृ० A. मां is suggested for मा॥

१५. विदुषो जनान् Sy.

१६. जनान् is suggested for जना।

१७. उप० is suggested for अप०॥ उपागाम् Sy.

१८. च is omitted by A.
विविधं प्रष्टुम् Sy.

१९. ते क्रान्तदर्शिनो जनाश्च Sy.

२०. एकरूपमेव Sy.

२१. एव M.
चित् च Sy.

२२. मम is missing in A.

२३. अकथयन् Sy.

२४. ह is missing in A. एव Sy.

२५. वरुणः is suggested for वरुणम्।

२६. हृणीते क्रुध्यतीति। अतः क्रोधं परित्यज्यास्मान्प क्षेभ्यो मोचय Sy.

किमागं आस वरुण ज्येष्ठं यत्स्तोतारं जिघाँससि सखायम् ।
प्र तन्मे वोचो दूळभ स्वधावोऽवं त्वानेना नमसा तुर इयाम् ॥ ४॥

किमागः[1] । किम् । मम प्रवृद्धतरम्[2] । पापम्[3] । आस[4] । वरुण ! यत्त्वम्[5] । स्तोतारम् । जिघाससि[6] पाशैर्बध्नन्[7] । सखायम्[8] । प्रब्रूहि । तत् पापम् । मम[9] । हे दुर्दर्भ[10] ! बलवन् ! उक्ते तस्मिन् पापे प्रायश्चित्तं कृतवानेना[11] स[12] । त्वम्[13] । अभिमुख गच्छामि[14] । हविषा सह[15] । त्वरमाणः[16] । अत्र शौनकः—

वरुणस्य गृहान्[17] रात्रौ वसिष्ठः स्वप्नमाचरन् ।
प्रविवेशाथ न तत्र श्वा नदन्नभ्यभाषत ॥
स तं प्रस्वापयामास जनमन्य च वारुणम्[18] ।
ततस्तु वरुणो राजा स्वैः पाशैः प्रत्यबध्यत[19] ॥
स[20] बुद्धा पितरं सूक्तैश्चतुर्भिरथ उत्तरैः ।
अभिनुष्टाव धीरेति मुमोचैनं ततः क्वचित्[21] ॥
ध्रुवा स[22] त्वेति चोक्ताभ्यां पाशान्मुमुचिरे सुतम् ॥ इति ।

अवं द्रुग्धानि पित्र्या सुजा नोऽव या वयं चकृमा तनूभिः ।
अवं राजन्पशुतृपं न तायुं सृजा वत्सं न दाम्नो वसिष्ठम् ॥ ५ ॥

अव द्रुग्धानि । पितुरागतान्[23] । अस्माकम्[24] । द्रोहात्[25] । गर्भस्तेष्वस्मासु[26] यदेन[27] पिता चकार ततोऽ-

---

१. कि A. कः Sy. २. अधिकम् Sy.
३. पा वाचम् A. अपराधो मया कृतः Sy.
४. बभूव Sy. ५. येनागसा Sy.
६. हन्तुमिच्छसि Sy.
७. मित्रभूतं सन्तम् Sy. ८. मह्यम् Sy.
९. हे अन्यैर्बाधितुमशक्य ! Sy.
१०. तेजस्विन् ! Sy.
११. कृत्वा is suggested for कृत वा ।
१२. अनेन सं M. अनेनाः सन् is suggested for अनेना स M. ॥ अपापः Sy.
१३. त्वाम् is suggested for त्वम् ।
१४. अवेयाम् उपगच्छेयम् Sy.
१५. नमस्कारेण हविषा वा Sy.
१६. शीघ्रः Sy. १७. ग्रहान् A.
१८. ०मं च रु वारु० A. १९. त्यबुध्य ० M.
२०. सं A. २१. ०चिता A.
२२. सस्त्वेति A.
२३. पितृतः प्राप्तानि Sy. २४. अस्मदीयानि Sy.
२५. द्रोहान् is suggested for द्रोहात् ॥ बन्धनहेतुभूतान् Sy.
२६. ०स्थेष्व० is suggested for ०स्तेष्व० ।
२७. ०देनं M. ०देनः is suggested for देन ।

स्मासु संक्रान्तानि पापानि । अवसृज[1] । तथा वयम् । एव[2] । यानि[3] । कृतवन्तः । शरीरैः[4] । तथा । स्तेनः[5] प्रायश्चित्तं कुर्वाणः । तृप्तपशुरोऽवसृज्यते यवसे प्रदर्शिते यदि पशवो भक्षयन्ति ततोऽवसृज्यते । तथा अव सृज । वत्सम् । ईव[6] च । दाम्नः[7] । वसिष्ठम्[8] ।

न स स्वो दक्षो वरुण ध्रुतिः सा सुरा मन्युर्विभीदको अचित्तिः ।
अस्ति ज्यायान्कनीयस उपारे स्वप्नश्चनेदनृतस्य प्रयोता ॥ ६ ॥

न सः[10] । न । तत् । स्वम् । बलम्[11] । वरुण ! अपि तर्हि ध्रुतिः[12] । सा भवति ध्रुतिरिति ध्रुवां[13] निरुक्तिमाह न पुरुषः स्वैरं तदनुतिष्ठति दैवाभिपन्नोऽनुतिष्ठतीत्यर्थः । सुरा[14] । मन्युश्च[15] ब्राह्मणादीनां हननहेतुभूतः । विभेदकश्च[16] देवनहेतुः । अन्वक्तिश्च[17] मान्यामान्यहेतुः[18] । अस्ति । ज्यायान्[19] देव नाम । कनीयः[20] । समीपे[21] तथा । स्वप्नः । अपि पुरुषस्य । अनिरर्थकस्य[22] । मिश्रयिता[23] भवति[24] ।

---

१. अस्मत्तो विश्लेषय Sy.
२. अव is suggested for एव ।
३. द्रोहजातानि Sy.
४. स्त्री A.
५. तृप्तपशु is omitted by M. स्तेनस्य-प्रायश्चित्तं कृत्वावसाने घासादिभिः पशूनां तर्पयितारं स्तेनमिव Sy.
६. इव च is suggested for ईव च ।
७. धाम्नः A. रज्जोः बन्धकात् Sy.
८. माम् Sy.
९. VM. ignores राजन् ॥ हे राजन् राजमान ! Sy.
१०. स न तः A.
११. पुरुषस्य स्वभूतं तद्बलं पापप्रवृत्तौ कारणं न भवति Sy.
१२. स्थिरोत्पत्तिसमय एव निर्मिता दैवगतिः कारणम् । 'ध्रु गतिस्थैर्ययोः' इति धातुः Sy.
१३. ध्रुवं A.
१४. सा च ध्रुतिर्वक्ष्यमाणरूपा सुरा प्रमादकारिणी Sy.
१५. क्रोधः गुर्वादिविषयः सन्ननर्थहेतुः Sy.
१६. द्यूतसाधनोऽक्षः । स च द्यूतेषु पुरुषं प्रेरयन्ननर्थहेतुर्भवति । अत ईदृशी दैवक्षिप्तिरेव पुरुषस्य पापप्रवृत्तौ कारणम् Sy.
१७. अचित्तिश्च is suggested for अन्वक्तिश्च ॥ अज्ञानमविवेककारणम् Sy.
१८ मान्या is omitted by A.
१९. देवः is suggested for देवम् ॥ नियन्तृत्वेन स्थितो ज्यायानधिक ईश्वरोऽस्ति । स एव तं पापे प्रवर्तयति तथा चाम्नातम्—'एष ह्येवासाधु कर्म कारयति तं यमधो निनीषते' (Kau. 3 8) इति Sy.
२०. कनीयसः is suggested for कमनीयः ॥ अल्पस्य हीनस्य पुरुषस्य Sy.
२१. अपि च पापप्रवृत्तावुपारे उपागते समीपे Sy.
२२. अनिनर्थ० A. निरर्थ० is suggested for अनिरर्थ० ॥ पापस्य Sy.
२३. प्रयोता प्रकर्षेण मिश्रयिता भवति । ... स्वप्ने कृतैरपि कर्मभिर्बहूनि पापानि जायन्ते किमु वक्तव्यं जाग्रति कृतैः कर्मभिः पापान्युपद्यन्त इति । अतो ममापराधो दैवगत इति हे वरुण ! त्वया क्षन्तव्य इति भावः Sy.
२४. VM. ignores इत् ॥ इतिति पूरकः Sy.

अरं॑ दा॒सो न मी॑ळ्हुषे॑ कराण्यहं दे॒वाय॒ भूर्ण॑येऽनागाः ।
अचे॑तयदचि॒तो दे॒वो अ॒र्यो गृत्सं॑ रा॒ये कवि॑तरो जुनाति ॥ ७ ॥

अर दासः । पर्याप्तं[1] कर्म । दासम्[2] । इव[3] स्वामिने[4] । हे[5] । सेक्त्रे[6] वरुणाय । करोमि[7] । देवाय[8] । क्षिप्रकारिणे[9] । अपापः[10] । ज्ञापयतु[11] । अज्ञान्[12] । देव[13] । स्वामिम्[14] । स्तोतारम्[15] । धनाय[16] । अत्यन्तं प्राज्ञ[17] । प्रेरयति[18] ।

अ॒यं सु तु॒भ्यं॑ वरुण स्वधावो हृ॒दि स्तोम॒ उप॑श्रितश्चिदस्तु ।
शं नः॒ क्षेमे॒ शमु॒ योगे॑ नो अस्तु यू॒यं पा॑त स्व॒स्तिभिः॒ सदा॑ नः ॥ ८ ॥

अ॒यं सु तु॒भ्य॑म्[19] । अ॒यम्[20] । तु॒भ्य॑म्[21] । वरुण[22] । बलवत्[23] । हृ॒दि[24] । स्तोमः[25] । सुष्ठु[26] । उपश्रितः[27] । भवतु[28] । शङ्करश्चायम्[29] । अस्माकम्[30] । क्षेमे[31] । भवतु[32] । शम्[33] । एव[34] । अस्मदीये[35] । योगे[36] ।

---

१. परिचरणम् Sy.
२. दासः is suggested for दासम् ॥ भृत्यः Sy.
३. यथा स्वामिने सम्यक् परिचरति तद्वत् Sy.
४. अहम् is suggested for हे ।
५ ०क्त्रेः A कामानां वर्षित्रे Sy.
६. करवाणि Sy.
७. दानादिगुणयुक्ताय वरुणाय Sy.
८. तत्प्रसादादपापः सन्नहम् Sy.
९. जगतो भर्त्रे Sy.
१०. चेतयतु प्रज्ञापयतु Sy.
११. आज्ञान् A. अजाननतोऽस्मान् Sy.
१२. स्वामिस् M. स्वामी is suggested for स्वामिम् ।
१३. स्तोरम् A.
१४. धनप्राप्त्यर्थम् Sy.
१५. प्राज्ञ M. प्राज्ञः is suggested for प्राज्ञ ॥ प्राज्ञतरः Sy.
१६. जुनातु प्रेरयतु Sy.
१७. एकादशिने वारुणे पशौ 'अयम्' इति पुरोडाशस्यानुवाक्या । सूक्तितञ्च 'अयं सु तुभ्यं वरुण स्वधाव एवा वन्दस्व वरुणं बृहन्तम्' (ĀSS. 3.7.) इति Sy.
१८. एतत्सूक्तात्मकम् Sy.
१९. तु is written twice in A. त्वदर्थं क्रियमाणाः Sy.
२०. वरुण is written twice in M.
२१. बलवन् ! is suggested for बलवत् ॥ हे अन्नवन् ! Sy.
२२. त्वदीये हृदये Sy.
२३. स्तोत्रम् Sy.
२४. पश्रितः A. समवेतः Sy.
२५. उपद्रवाणां शमनम् Sy.
२६. प्राप्तस्य रक्षणं क्षेमः Sy.
२७. इम् M. उपद्रवाणां शमनमस्तु Sy.
२८. अस्मदीयो M.
२९. अप्राप्तस्य प्रापणं योगः । योगे च नोऽस्मदीये प्रापणे शमु शमनमेवास्तूपद्रवाणाम् । हे वरुणादयो देवाः नोऽस्मान् सर्वदा स्वस्तिभिरविनाशैः पात रक्षत Sy.
३०. VM. ignores चित् ॥ चिदिति पूरकः Sy.

VII. 87.

रदत्पथो वरुणः सूर्याय प्रार्णांसि समुद्रियो नदीनाम् ।
सर्गो न सृष्टो अवँतीर्ऋतायञ्चकार महीरवनीरहभ्यः ॥ १ ॥

रदत्पथः[1]। बलिरिवान्तरिक्षे मार्गान्[2]। वरुणः[3]। सूर्याय 'उरुं हि राजा वरुणश्चकार' इत्युक्तम्[4]। प्रामृजच्च[5]। उदकानि। अन्तरिक्षस्थानि[6]। नदी पूरयितुम्[7]। उत्सृष्टः[8]। इव[9]। अश्व[10]। उद्युक्ता[11] वडवा। गन्तुमिच्छन्[12]। करोति[13]। महतीः। गतीर्वरुणः[14]। अहोभ्यः[15], अन्वहमुदितः शीघ्रं गच्छतीत्यर्थः।

आत्मा ते वातो रज आ नवीनोत्पशुर्न भूर्णिर्यवसे ससवान् ।
अन्तर्महि बृहती रोदसीमे विश्वा ते धाम वरुण प्रियाणि ॥ २ ॥

आत्मा ते। शरीरम्[16]। ते[17]। अवगच्छन्[18]। सर्वलोकम्[19]। नव करोति[20]। पशुः। इव। भर्ता[21]। यवसे[22]।

---

१. 'रदत्पथः' इति सप्तर्चं सप्तदशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वारुणम्। अनुक्रान्तञ्च—'रदत्सप्त'(KSA. 38 87. p. 26.)इति। गतो विनियोगः Sy.

२. रुत्पथम् A.

३. ०रवा० A.

४. अन्तरिक्षप्रदेशान् Sy.

५. ०ण M. अयं वरुणो देवः Sy.

६. सर्वस्य प्रेरकायादित्याय Sy.

७. ऊरु A.

८. RV.1.24.8.

९. प्रायच्छत् Sy.

१०. समुद्र उदधौ भवानि। यद्वा समुद्रवन्त्यस्मादाप इति समुद्रमन्तरिक्षम्। तत्र भवानि Sy.

११. सृज्यते युद्धभूमौ सादिना प्रेर्यत इति सर्गोऽश्वः Sy.

१२. ०क्तो वडवां M. स यथा वडवाः प्रति शीघ्रं गच्छति तद्वत् Sy.

१३. ऋतं गमनमात्मन इच्छन् Sy.

१४. भेदेन कृतवान्। अस्तं गच्छन् सूर्य एव वरुण इत्युच्यते। स हि स्वगमनेन रात्रीर्जनयति Sy.

१५. गतिर्व० A. रात्रीः Sy.

१६. ०सोऽन्व० A.
अहोभ्यः सकाशात् Sy.

१७. आत्मा सर्वस्य प्राणिजातस्य प्राणरूपेण धारयिता Sy.

१८. त्वदीयस्त्वयान्तरिक्षे प्रेर्यमाणः Sy.

१९. गच्छन् M. अवगच्छन् seems to be the explanation of 'आ'।

२०. सर्वं A. स च रज उदकम् Sy.

२१. तवं A. समन्तात् प्रेरयति। वातेन हि वृष्टिर्जायते Sy.

२२. जगतो भर्ता Sy.

२३. घासे प्रक्षिप्ते सति यथा पशुरन्नवान् भवति तद्वत् Sy.

सम्भजनवान्[1] भक्षितः[2] सस्य इत्यर्थः । अन्तः[3] । महती[4] । बृंहिते[5] । द्यावापृथिव्यौ । इमे । यानि भवानि[6] स्थानानि तानि[7] । सर्वाणि[8] । तव । प्रियाणि[9] । वरुण ! इति[9] ।

परि स्पशो[10] वरुणस्य स्मदिष्टा उभे पश्यन्ति[11] रोदसी सुमेके[12] ।
ऋतावानः कवयो यज्ञधीराः प्रचेतसो य इषयन्त[13] मन्म[14] ॥ ३ ॥

परि स्पशः[10] । परिपश्यन्ति[11] । चाराः[12] । वरुणस्य[13] । शोभनगमनाः[14] । उभे । द्यावापृथिव्यौ । शोभमाने[15] । सत्यवन्तौ[16] । क्रान्तकर्माणः[17] । सम्पूजनीयधैर्याः[18] । येन[19] वरुणस्य । पूजां[20] मनुष्यैः क्रियमाणाम् । ऐच्छन्निति[21] ।

उवाचं मे वरुणो मेधिराय त्रिः सप्त नामाघ्न्या बिभर्ति[22] ।
विद्वान्पदस्य गुह्या न वोचद्युगाय विप्र उपराय शिक्षन् ॥ ४ ॥

उवाच । उवाच[22] । मह्यम् । वरुणः । मेधाविने । त्रि., सप्तैकविंशति[23] । नामानि । काचिद् गौः[24] ।

---

१. ससमित्यन्ननाम । तद्वान् भवति । हविर्लक्षणमन्नमपि तस्मै प्रयच्छन्तीत्यर्थः । यद्वा सनोतेः क्वसौ रूपम् । सस्तवान् सम्भक्तवान् वातो घासे सति पशुर्यथा भारवाही भवति तद्वज्जगतो भर्ता Sy.

२. भक्षितसस्यः is suggested for भक्षितः सस्यः ।

३. मध्ये । द्यावापृथिव्योर्मध्य इत्यर्थः Sy.

४. महत्यौ Sy.

५. परिवृढे Sy.

६. धामानि भवनानि is suggested for भवानि तेजांसि वा Sy.

७. तानि is missing in A.

८. सर्वेषां प्रीतिकराणि भवन्ति Sy.

९ VM. ignores वातः ॥ वातः वायुः Sy.

१०. स्पर्शः A.

११. परित ईक्षन्ते, उभयोर्लोकयोर्वर्तमानान्पुण्यापुण्यकारिणो जनान् पश्यन्तीत्यर्थः Sy.

१२. स्पशन्ति स्पृशन्तीति स्पशश्चराः Sy.

१३. वरुणस्य Sy.

१४. स्मदित्येतत् प्रशस्यार्थे सहार्थे च वर्तते प्रशस्तगतयः । यद्वा सह प्रेषिताः सन्तः Sy.

१५. ०भनमा० A. शोभनमेहने सुरूपे वा Sy.

१६. यस्मादेवं तस्माद् भीत्या कर्मवन्तः Sy.

१७. क्रान्तदर्शिनः Sy.

१८. समपूज० A. यज्ञेषु कृतबुद्धयः Sy.

१९. प्राज्ञाः Sy.

२०. प्रजां A. पूजाम् is suggested for पूजा ॥ मन्मानि स्तोत्राणि Sy.

२१. गमयन्ति वरुणं प्रापयन्ति । तानपि परिपश्यन्तीत्यर्थः । अतोऽस्मानपि स्तोतॄन् ज्ञात्वा पापान्मुञ्चन्त्वित्यृषिराशास्ते Sy.

२२. उक्तवान् Sy.

२३. ०ति M. एकविंशतिसंख्याकानि Sy.

२४. वागत्र गौरुच्यते । सा चोरसि कण्ठे शिरसि च बद्धानि गायत्र्यादीनि सप्त छन्दसां नामानि बिभर्ति । यद्वा वेदात्मिका वागेकविंशतिसंस्थानां यज्ञानां नामानि बिभर्ति । धारयति । अपर आह । गौः पृथिवी । तस्याश्च गौर्म्मा ऽमेति पठिता एकविंशति नामानीति Sy.

विभक्तीति[1] पृथिवीमाह तस्या हि यास्कपठितान्येकविंशतिनामानि[2]। किं च विद्वान्[3] वरुणः। पदस्य[4]। गुह्यानि[5]। च मह्यम्। अब्रवीत्[6]। युक्ताय[7]। मेधाव्याप्नुहि[8]। उत्कर्षाय[9] दृढमवस्थिताय। शिक्षण कुर्वन्[10], नकारः[11] समुच्चयार्थियः[12], पदानां गुह्यानर्थांश्च व्याकरोदित्यर्थः।

तिस्रो द्यावो निहिता अन्तरस्मिन्तिस्रो भूमीरुपरा षड्विधानाः।
गृत्सो राजा वरुणश्चक्र एतं दिवि प्रेङ्खं हिरण्ययं शुभे कम्॥ ५॥

तिस्रः[13]। तिस्रो द्यावो भवन्तीति[14] तिस्रश्च भूमयस्तिस्रो भूमीर्धारयन्तीरुत[15] द्यूनित्युक्तम्, तिस्रः[16]। द्याव[17]। अस्मिन् वरुणे[18]। अन्त[19]। निहिता। तथा तिस्रश्च[20]। भूम्यः। अस्मिन्नेवोक्ता[21]। तथा षड्विधाश्च[22] षट् कार्याणि

---

१. भक्तीति A. बिभर्ति is suggested for विभक्ति॥ धारयतीति Sy.

२. यास्तप० A.

३. ०तिर्ना० A.

४. जानन् Sy.

५. उत्कृष्टस्य स्थानस्य ब्रह्मलोकलक्षणस्य सम्बन्धीनि Sy.

६. रहस्यानि। उपदेशे गम्यानि Sy.

७. न शब्दश्चार्थे Sy.

८. एवो A. उक्तवान्, अतोऽहं वरुणस्य शिष्योऽस्मि। तस्मात्स वरुणोऽस्मान्पापान्मोचयत्विति्यर्थः Sy.

९. ०प्नुनि A. आप्नुहि is redundant मेधावी स वरुणः Sy.

१०. उक्ताय A. उप समीपे रममाणायान्तेवासिने मह्यम् Sy.

११. उपदिशन् Sy.

१२. अका० M.

१३. ०च्चयश्चार्थी० M. ०यार्थी० is suggested for ०यार्थि०॥ The passage नकारः समुच्चयार्थीयः should immediately follow च and precede मह्यम्।

१४. The passage पदानां व्याकरोदित्यर्थः should immediately follow अब्रवीत् and precede युक्ताय।

१५. तिस्रः is missing in A.

१६. ०वन्ति तिसृश्च भ्रमय०A.

१७. ०मिर्धा० A.

१८. ०न्तिरु० A.

१९. त्रिप्रकारा, उत्तममध्यमभावेन त्रिविधाः। लोकानां त्रित्वं च 'त्रयो वा इमे त्रिवृतो लोकाः, इत्यादिना ब्राह्मणेनावगम्यते। 'तिस्रो भूमीर्धारयन्' (RV. 2.27. 8.) इति निगमश्च भवति। इमौ लोकावावृत्य वरुणस्तिष्ठतीत्यर्थः Sy.

२०. द्युलोकाः Sy.

२१. ०णं तर्नि० A.

२२. मध्ये Sy.

२३. पूर्ववत्त्रिविधाः Sy.

२४. उक्तस्त० A. उप्ताः is suggested for उक्ताः॥ वरुणेऽन्तर्भूताः Sy.

२५. ०विधानाश्च is suggested for ०विधाश्च॥ विधानं विधा। वसन्ताद्यृतुभेदेन षड्विधाः प्रकारा यासु तादृश्यः Sy.

येषामृतूना ते षड्विधानाः । मेधावी[1] । राजा[2] । वरुणः । चक्रे[3] । एतत्[4] । दिवि[5] । प्रेङ्खमित्यादित्यमाह । हिरण्मयम्[6] । शोभार्थम्[7] । तमिति पूरणम्[8] ।

अव॒ सिन्धुं॑ वरु॒णो द्यौरि॑व स्याद्दृ॒प्सो न श्वे॒तो मृ॒गस्तु॑वि॒ष्मान् ।
ग॒म्भी॒रशं॑सो॒ रज॑सो वि॒मानः॑ सु॒पा॒रक्ष॑त्रः स॒तो अ॒स्य राजा॑ ॥ ६ ॥

अव सिन्धुम्[10] । समुद्रम् । वरुणः । अवस्थापयति[11] यथा वेलां नातिक्रामति । यथा द्यौः[12] सर्वाणि भूतान्यधः[13] स्थापयति । द्रविणशीलः[14] । श्वेतवर्णो[15] गौरः । इव[16] । मृगः । तुविष्मान्[17] प्रवृद्धिमान्, वेगवान् । गम्भीरः[18] स्तोता । अन्तरिक्षस्य[19] । परिच्छेत्ता[20] । सुद्वारबलोऽस्य[21] बलं सुष्ठु पारयति[22] । सत्ये[23] । अस्य[24] सर्वस्य लोकस्य । राजा[25] ।

---

१. स्तुत्यः Sy.

२. ईश्वरः Sy.

३. कृतवान् 'दिवि सूर्यमदधात्सोममद्रौ' (RV. 5. 84. 2.) इति हि श्रूयते Sy.

४. एतम् is suggested for एतत् ॥ सूर्यम् Sy.

५. अन्तरिक्षे Sy.

६. वोलावद्दिग्द्वयसंस्पर्शिनम् Sy.

७. हितरमणीयं वा Sy.

८. दीप्त्यर्थम् Sy.

९. कमिति is suggested for तमिति ।

१०. वारुणे पशौ 'अव सिन्धुम्' इति वपाया अनुवाक्या । सूत्रितञ्च—'अव सिन्धुं वरुणो द्यौरिव स्यादयं सु तुभ्यं वरुण स्वधावः' (ĀŚS 3. 7.) इति Sy.

११. वेलायामवस्थापयति वेलां नातिक्रामति तथा करोतीत्यर्थः Sy.

१२. यथा यथा द्यो A. सूर्य इव दीप्तः Sy.

१३. ०न्यथ A.

१४. द्रविशी० A. द्रवण० is suggested for द्रविण० ॥ उदबिन्दुः Sy.

१५. श्वेतवर्णो मृगः लुप्तोपममैतत् । गौरमृग इव Sy.

१६. श्व M.

१७. बलवान् प्रवृद्धो वा Sy.

१८. ०र स्तोत्रा A. गम्भीरो महाञ्छंसः स्तोत्रं यस्य स तथोक्तः Sy.

१९. उदकस्य Sy.

२०. निर्माता Sy.

२१. सुपार० is suggested for सुद्वार ।

२२. ०लोजस्य A. सुष्ठु दुःखात्पारकं क्षत्रं बलं धनं वा यस्य तादृशः Sy.

२३. सतः is suggested for सत्ये ॥ विद्यमानस्य Sy.

२४. अस्य जगतः Sy.

२५. राजा भवति Sy.

यो मृळयाति चक्रुषे चिदागो वयं स्याम वरुणे अनागाः ।
अनु व्रतान्यदितेर्ऋधन्तो यूयं पात स्वस्तिभिः सदा नः ॥ ७ ॥

यो मृळयाति । यः । सुखयति । पापम् । चक्रुषे । अपि स्तोत्रे । तस्मिन् वरुणे । वयम् । स्याम । अनान्यस । अनुक्रमेण । अदीनस्य वरुणस्य । सन्ध्यावन्दनादीनि । वर्धयन्तम् ।

VII 88.

प्र शुन्ध्युवं वरुणाय प्रेष्ठां मतिं वसिष्ठ मीळ्हुषे भरस्व ।
य ईमर्वाञ्चं करते यजत्रं सहस्रामघं वृषणं बृहन्तम् ॥ १ ॥

प्र शुन्ध्युवम् । प्रभरस्व । शोधयित्री पापकृताम् । वरुणाय । प्रियतमाम् । स्तुतिम् । वसिष्ठ ! सेक्त्रे । यम् । एनमादित्यम् । अभिमुखम् । कुरुते ! यष्टव्यम् । बहुधनम् । वृषणम् । महान्तम् 'दिवि सूर्यमदधात्' इत्युक्तम् ।

---

१. मृळायाति A. मृडयति M.

२. सुखेति A. उपदयां करोति Sy.

३. अपराधम् Sy.

४. कृतवते स्तोत्रे Sy.

५. वर्तमाना भवेम Sy.

६. नान्यस्य M. अनागसः is suggested for अनान्यस ॥ अनपराधाः सन्तः Sy.

७. आनुपूर्व्येण Sy.

८. अदीनस्य वरुणस्य सम्बन्धीनि Sy.

९. It seems to be the explanation of व्रतानि ॥ कार्याणि Sy.

१०. ध्यन्तः is suggested for ०यन्तं ॥ समर्धयन्तः । हे वरुणादयो देवाः ! यूयमस्मान् सर्वदा कल्याणैः पालयत Sy.

११. 'प्र शुन्ध्युवम्' इति सप्तचंमष्टादशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वारुणम् । 'प्र शुन्ध्युवम्' इत्यनुक्रान्तम् (KSA. 38. 30. p. 26) । गतो विनियोगः Sy.

१२. शुध्यु० A.

१३. प्रहर प्रापय Sy.

१४. ०यित्री A. शोधयित्रीं यद्वा स्वत एव शुद्धाम् Sy.

१५. मननीयामीदृशीं स्तुतिम् Sy.

१६. हे वसिष्ठ ! ऋषिरात्मानमेव प्रत्यक्षीकृत्य स्तुतौ नियुङ्क्ते Sy.

१७. यः is suggested for यम् ।

१८. सूर्यम् Sy.

१९. अखिमु० A. अस्मदभिमुखम् Sy.

२०. अन्तरिक्षेक रोति, तस्मै वरुणात्येयन्वयःSy.

२१. कामानां वर्षकम् Sy.

२२. ०धातीत्यु० A. RV. 5. 85. 2.

अधा न्वस्य संदृशं जगन्वानग्नेरनीकं वरुणस्य मंसि ।
स्व१र्यदश्मन्नधिषा उ अन्धोऽभि मा वपुर्दृशये निनीयात् ॥ २ ॥

अधा नु । अस्य । सन्दर्शनम् । प्राप्तोऽहम् । अथ । क्षिप्रं तस्य यागार्थम् । वरुणस्य । अग्नेः । ज्वालालक्षणमनीकम् । सामिधेनीभिः स्तौमि । कल्याणम् । अभिषवग्राव्णि निधीयमानम् । यदा । अन्धः सोमलक्षणम् । वरुणोऽधिपाता भवति । तदानीमात्मीय रूपम् । माम् । प्रति । नयतु । मम दर्शनाय ।

आ यद्रुहाव वरुणश्च नावं प्र यत्समुद्रमीरयाव मध्यम् ।
अधि यदपां स्नुभिश्चराव प्र प्रेङ्ख ईङ्खयावहै शुभे कम् ॥ ३ ॥

आ यत् । आरुहाव । यद्यहम् । वरुणः । च । नावम् । आरोहानन्तरम्, च तां मध्यस्थितम् । समुद्र प्रति । यदि । प्रेरयाव । समुद्रमध्यस्थानामपाम् । उपरि । स्थितैः समुत्थितैरूर्मि भिः । यदि । चराव तं तेता वरुणगृहं प्रति नेतुम् ।

---

१. गतवानहम् Sy.
२. अधुना Sy.
३. ०र्थं A.
४. ज्वालासङ्घम् Sy.
५. स्तवानि तं वरुणं यष्टुमिति शेषः Sy.
६. सुखकरम् Sy.
७. अर्षव ग्राव्णी A. अभिषवार्थं पाषाणेऽवस्थितम् । अभिषुतमित्यर्थः Sy.
८. ०धीयुमा० A.
९. सोमः ल० A. सोमलक्षणमन्नम् । छान्दसः षष्ठ्यभावः Sy.
१०. ०वाता A.
अधिकं पाता भवेत् Sy.
११. शरीरं स्वकीयम् । प्रशस्तं रूपं वा Sy. वपुरिति रूपनाम Ngh. 3. 7.
१२. अभिप्रापयेत् Sy.
१३. दर्शनार्थम् Sy.
१४. VM. ignores उ ॥ उ इति पूरकः Sy.
१५. उभावारूढावभूव Sy.
१६. यद्यदा वरुणे प्रसन्ने सत्यहम् Sy.
१७. द्रुममयीं तरणसाधनभूताम् Sy.
१८. ०हावान० M.
१९. समुद्रस्य मध्यं प्रति Sy.
२०. प्रकर्षेण गमयाव Sy.
२१. उदकानाम् Sy.
२२. समुच्छ्रितैः रश्मिभिः A.
२३. गन्त्रीभिरन्याभिर्नौभिः Sy.
२४. पराव M. वर्तावहै Sy.
२५. तां ततो is suggested for तं तेता ।
२६. ग्रहं A.
२७. VM. ignores प्र । प्रेङ्खे । ईङ्खयावहै । शुभे and कम् ॥ तदानीं शुभे शोभार्थं प्रेङ्खे नौरूपायां दोलायामेव प्रेङ्खयावहै । निम्नोन्नतैस्तरङ्गैरितश्चेतश्च प्रविचलन्तौ सङ्क्रीडावहै । कमिति पूरकम् । यद्वा क्रियाविशेषणम् । कं सुखं यथा भवति तथेत्यर्थः Sy.

वसिष्ठं ह वरुणो नाव्याधादृषिं चकार स्वपा महोभिः ।
स्तोतारं विप्रः सुदिनत्वे अह्नां यान्नु द्यावस्ततनन्यादुषासः ॥ ४ ॥

[वसिष्ठं ह] [1]. [2]ऋषिम् । [3]चकार । [4]शोभनकर्मा । [5]तेजोभिः । [6]स्तोतारम् । [7]मेसापी । [8]अह्नाम् । [9]सुदिनत्वे सुदिनान्यहान्यस्मै चकारेत्यर्थः । [10]योन्यहानि । [11]द्यावः । [12]ततनन् । [13]यानि च । [14]उषसस्तेषामित्यह्नां मैत्री जनित्री प्रजानामित्यौषसो मन्त्रः, द्यावो दीप्तो देव, [15]यादिति द्वितीयावहुवचनस्यादेश [16] [17] [18] ।

क्व त्यानि नौ सख्या बभूवुः सचावहे यदवृकं पुरा चित् ।
बृहन्तं मानं वरुण स्वधावः सहस्रद्वारं जगमा गृहं ते ॥ ५ ॥

[19]क्व त्यानि । हे वरुण ! [20]क्व । [21]तानि । [22]आवयो । सख्यानि । [23]अभवन्निति वरुणमपश्यन् । आभि-

---

१. एवं वसिष्ठेनात्मनोक्ते यद्वरुणेन कृतं तद्दर्शयति Sy.

२. The *pratīka* is supplied by the Editor.

३. Explanation of **वसिष्ठम् । ह । वरुणः । नावि । आ । अधात् ।** missing in the mss. Sy. explains these words in the following manner: **वसिष्ठं खलु वरुणो नावि स्वकीयायामाधात् । आरोहयत्** Sy. ४. **तथा तमृषिम्** Sy.

५. **वरुणः कृतवान्** Sy. ६. **शोभनकर्माणम्** Sy.

७. Sy. seems to take **स्वपा महोभिः** as **स्वपाम्, अवोभिः** and explains **स्वपाम्** as **स्वपसं शोभनकर्माणम् ।** and **अवोभिः** as **रक्षणैः ।**

८. **०र** M.

९. **मेधावी** is suggested for **मेसापी ॥ मेधाव्वी वरुणः** Sy. १०. **दिवसानां मध्ये** Sy.

११. **यत्फलत्वेन शोभनदिनत्वं तत्र स्तोतारमस्थापयदिति शेषः** Sy.

१२. **०कारस्य०** A.

१३. **यान्य०** is suggested for **योन्य० ॥ यातो गच्छतः** Sy.

१४. **दिवसान्** Sy.

१५. **सूर्यात्मना विस्तारयन्** Sy.

१६. **यातीः** Sy.

१७. **याद्यातीरुषस उषसोपलक्षिता रात्रीश्च** Sy.

१८. **०जाना (ना) मि०** A.

१९ **देवा** M. The passage **द्यावो दीप्तो देवः** should immediately follow **द्यावः** and precede **ततनम्.**

२०. **०र्तिद्वि०** M.

२१. **०स्यादादेशः** is suggested for **०स्यादेशः ।**

२२. The passage **यादिति...देशः** refers to **यानि, यात्** in the text. It should therefore immediately follow **यानि च** and precede **उषस०**

२३. VM. ignores **नु ॥ नु क्षिप्रम्** Sy.

२४. **क्वा** A.

२५. **कुत्र** Sy.

२६. **पुरातनानि** Sy. २७. **तान्य** A.

२८. **सखित्वानि** Sy. २९. **इयन्ना भग०** A.

गच्छेवहि[1] । यद्यावाम्[2] । स्तेनवर्जितम्[3] । यथा पुरम्[4] । चिदित्युमार्थे[5] । बृहन्त बहूनर्थान् । सम्भवन्तम्[6] । वरुण ! बलवत्[7] । सहस्रद्वारम्[8] । गच्छाव[9] । गृहम् । तव[10] ।

य आपिर्नित्यो वरुण प्रियः सन्त्वामागाँसि कृणवत्सखा ते ।
मा त एनस्वन्तो यक्षिन्भुजेम यन्धि ष्मा विप्रः स्तुवते वरूथम् ॥ ६ ॥

य आपिः[11] । यः[12] । ज्ञातिः । नित्यमौरसे[13] । वरुण ! प्रियः[14] । सन्त च[15] । त्वाम् । अनासि[16] । करोति[17] तवानिष्टानि करोतीत्यर्थ. । समानख्यान[18] । ते । अथ बहुवदाह तेऽनागसा[19] वय तव सभूताः । मा । एन स्वन्तः[20] । भुजेम[21] पापफलम् । पूजावत्[22] । प्रयच्छ । मेधावी त्वम् । स्तुवते मह्यम् । ध्रुव[24] गृहम्[25] ।

ध्रुवासु त्वासु क्षितिषु क्षियन्तो व्य१स्मत्पाशं वरुणो मुमोचत् ।
अवो वन्वाना अदितेरुपस्थाद्यूयं पात स्वस्तिभिः सदा नः ॥ ७ ॥

ध्रुवासु[26] । आसु[27] । ध्रुवासु निर्गन्तुमशक्यासु[28] । त्वेति सप्तमीबहुवचनस्याकार कासुचित्[29] । निवसन्तो[30]

---

१. आवां सेवावहे Sy.
२. यदावाम् is suggested for यद्यावाम् ।
३. अहिंस्यमात्यन्तिकं सख्यम् Sy.
४. पुरा is suggested for पुरम् ॥ पूर्वस्मिन् काले Sy
५. ०दि सुपमा० M. ०त्युपमार्थे is suggested for ०त्युमार्थे ॥ चिदिति पूरकः Sy.
६. मान्त्यस्मिन् सर्वाणि भूतानीति मानम् । सर्वस्य भूतजातस्य परिच्छेदकमित्यर्थः Sy.
७. बलेवत् A. ०वन् ! is suggested for ०वत् । हे अन्नवन् ! Sy.
८. बहुद्वारम् Sy. ९. गच्छानि । लोडर्थे लिट् Sy. १०. त्वदीयम् Sy.
११. आवि A.
१२. यः । ज्ञातिः is written twice in A. वसिष्ठः Sy.
१३. ०रसः is suggested for ०रसे ॥ नित्यो ध्रुवः । औरसः पुत्र इत्यर्थः Sy.
१४. प्रयः A.
१५. सन् is suggested for सन्त च ॥
१६. अनासि A. आगांसि is suggested for अनांसि ॥ अपराधान् Sy. १७. अकरोत् Sy.
१८. स इदानीं ते तव सखा समानख्यानः प्रियोऽस्तु Sy.
१९. अनागसः is suggested for अनागसा ।
२०. एनसा पापेन युक्ताः सन्तः Sy.
२१. मा भुञ्महि, त्वत्प्रसादात् पापरहिता एव सन्तो भोगान् भुनजामहै Sy.
२२. ०वन् ! is suggested for ०वत् ॥ हे यजनीय ! Sy.
२३. स्तोत्रं कुर्वते वसिष्ठाय Sy.
२४. ध्रुवं is missing in A.
२५. अनिष्टनिवारकं वरणीयं वा गृहम् Sy.
२६. VM. ignores स्म ॥ स्मेति पूरकः Sy.
२७. अत्र ऋग्विधानम्—'ध्रुवासु त्वासु क्षितिषु जपन् बन्धात्प्रमुच्यते । तिष्ठन्नात्रौ जपेदेतां पिशाचस्तं न गच्छति' (Rg. Vid. 2. 28) इति Sy.
२८. दृश्यमानासु Sy. २९. नित्यासु Sy.
३०. ०कारः कासु० is suggested for कार-कासु० ।
३१. निवसन्तो वयं त्वां स्तुम इति शेषः Sy.

वयमिदानी भवामः । विमुमोक्तु[1] । अस्मत्त[2] । पाशम् । वरुणः । गमनम् । याचमाना[3] वयम् । अदितेः[4] । उपस्थानिदानीम्[5], बध्वो[6] दितेरुपस्थे तिष्ठति विमुक्तः स्वैर गच्छतीति[7] ।

VII. 89.

मो षु वरुण मृन्मयं[10] गृहं[11] राजन्नहं[12] गमम्[13] । मृळा सुक्षत्र मृळय[14] ॥ १ ॥

मो[15] षु । मैव । मृन्मयम् । गृहम् । राजन् ! अहम् । गच्छेय[16] किं तर्हि सौवर्णमेव । स्विति[17] पूरणम् । सुखितो[18] भव । अस्माश्च सुधन[19] मृळयः[20] ।

यदेमि[19] प्रस्फुरन्निव[21] दृतिर्[22] ध्मातो[23] अद्रिवः । मृळा सुक्षत्र मृळय[20] ॥ २ ॥

यदेमि । यत् । गच्छामि । प्रस्फुरन्निव चोरः सभादर्शने । दृतिम् । इव । चोदकेन भयेनास्मातः[24] । आयुधवान्[24] ।

---

१. विमुमोक् is missing in A. मोचयेत् Sy.

२. बन्धकं पापम् Sy.

३. रक्षणं वरुणेन दत्तम् Sy.

४. सम्भजमाना Sy.

५. अखण्डनीयायाः पृथिव्याः Sy.

६. ०स्थानिदोनीं A. ०स्थादिदा० is suggested for ०स्थानिदा० ॥ उपस्थादुपस्थानात् Sy.

७. बध्वोऽभ्यदि० A. बद्धोऽदिते० is suggested for बध्वोदिते० ।

८. तितिष्ठती A.

९. VM. ignores क्षितिषु ॥ क्षितिषु भूमिषु Sy.

१०. 'मो षु वरुण' इति पञ्चर्चमेकोनविंशं सूक्तं वारुणम् । अन्त्या जगती शिष्टाश्चतस्रो गायत्र्यः । तथा चानुक्रान्तम्—'मो षु पञ्च गायत्रं जगत्यन्तम्' (KSA. 38. 89. p. 26.) इति० । गतो विनियोगः Sy.

११. त्वदीयं मृदादिभिर्निर्मितम् Sy.

१२. हे ईश्वर ! Sy.

१३. गतोऽस्मि । अपि तु सुशोभनं सुवर्णमयमेव त्वदीयं गृहं प्राप्नवानि Sy.

१४. त्वि (श्वि) ति A.

१५. स त्वं मां मृळ सुखय Sy.

१६. हे शोभनधन ! Sy.

१७. ०य is suggested for ०यः ॥ उपदयां च कुरु Sy.

१८. VM. ignores वरुण ।

१९. यदा Sy.

२०. गच्छामि तदानीं मृळ । सुखय हे सुक्षत्र ! सुधन ! मृळय उपदयां कुरु Sy.

२१. प्रस्थुरणिव A. शैत्येन प्रविचलन्निव त्वद्भयाद्वेपमानः Sy.

२२. धृतिम् M. दृतिः is suggested for दृतिम् ॥

२३. स्मातः M. आध्मातः is suggested for आस्मातः ॥ वायुना पूर्णः सन् त्वया बद्धोऽहम् Sy.

२४. वत् M. ०वन् ! is suggested for ०वान् ।

क्रत्वः[1] समह[2] दीनतां[3] प्रतीपं[4] जगमा[5] शुचे[6]। मृळा[7] सुक्षत्र[8] मृळय[9] ॥ ३ ॥

क्रत्वः समह। हे पूजासहित! कर्मणः। दीनतायाम्। प्रतीपम्। गच्छेम। शिवचे दीनं कर्म मास्मानुपतिष्ठत्वित्यर्थः।

अपां[10] मध्ये[11] तस्थिवांसं[12] तृष्णाविदज्जरितारम्[13]। मृळा[14] सुक्षत्र मृळय[15] ॥ ४ ॥

अपाम्। समुद्रमध्यस्थानामपाम्। मध्ये। तस्थिवासम्। स्तोतार माम्। अविन्दत्। मृळा। तथा सति मृळ। सुक्षत्र! मृळयेति।

यत्किं[16] चेदं[17] वरुण[18] दैव्ये[19] जनेऽभिद्रोहं[20] मनुष्याश्चरामसि[21]।
अचित्ती[22] यत्तव[23] धर्मा[24] युयोपिम[25] मा[26] नस्तस्मादेनसो[27] देव रीरिषः[28] ॥ ५ ॥

यत्किं चेदम्। यत्। किम्। च। इदम्। वरुण! दैव्ये। जने। मनुष्याः सन्तो वयम्। अभिद्रोहम्। चरामो देवदृष्टानि व्रतानि न तथा कुर्म इत्यर्थः। अज्ञानेन। यच्च। तव। धर्माणि। युयोपिम शुभानामशुभाना च समीकरणं योपनम्। मा। अस्मान्। तस्मात्। पापे। देव! हिंसीः।

---

१. क्रयः सम A.
२. हे सधन! Sy.
३. कर्तव्यत्वेन विहितस्य श्रौतस्मार्तादिलक्षणस्य Sy.
४. दीना कायां A. दीनतया शक्ततया Sy.
५. प्रतीवं A. प्रतिकूलमनुष्ठानम् Sy.
६. प्राप्तवानस्मि। अतएव त्वया बद्धः। तादृशं मां मृळ। सुखय। अन्यद्गतम् Sy.
७. चिचे M. शुचे is suggested for शिवचे॥ हे स्वभावतो निर्मल! Sy.
८. अवात् A. ९. समुद्राणामुदकानाम् Sy.
१०. स्थितवन्तमपि Sy.
११. स्तोत।० A. तव स्तोतारं माम् Sy.
१२. आप्तवती लवणोत्कटस्य सामुद्रजलस्य पानानर्हत्वात् Sy.
१३. पिपासा Sy.
१४. तृष्णा is suggested for मृळा।
१५. मिळ० A. अतस्तादृशं मां मृळ सुखय। अन्यद्गतम् Sy.
१६. देवसुवां हविःषु वारुणस्य हविषो 'यत्किं चेदम्' इति याज्या। सूत्रितञ्च—'यत्किं चेदं वरुण दैव्ये जन उप ते स्तोमान् पशुपा इवाकरमिति द्वे' (ĀŚS. 4. 11.) इति Sy.
१७. तद्विषये किञ्चित् स्वल्पमपि वा BB.
१८. इदमिति क्रियाविशेषणम् BB.
१९. हे वरुण! देव! Sy.
२०. दैव्ये A. देवसमूहरूपे Sy. देवप्रभवे BB.
२१. मनुष्यस्वभावात्सम्भाव्यमानप्रमादाः BB.
२२. अपकारजातम् Sy. अभितो द्रोहम् BB.
२३. निर्वर्तयामः Sy.
२४. ज्ञानेन M. २५. त्वदीयम् Sy.
२६. यद्धारकं कर्म Sy.
२७. वयं विमोहितवन्तः Sy. विनाशयामः। 'युपु विमोहने' BB.
२८. योवनं A.
२९. पापैः M. पापादेः is suggested for पादेः॥ अभिद्रोहलक्षणाद्धर्मविलोपलक्षणाच्च हेतुभूतात् BB.
३०. अपि त्वनुगृहाणैव BB. This stanza TS. 3. 4. 11. 6.

VII 90

प्र वीरया शुचयो दद्रिरे वामध्वर्युभिर्मधुमन्तः सुतासः ।
वह वायो नियुतो याह्यच्छा पिबा सुतस्यान्धसो मदाय ॥ १ ॥

प्र वीरया । प्रकर्षेण । आद्रियन्ते । युवयो । वीर्यकरणेच्छया । शुचय । अध्वर्युभि । मधुमन्त । सुताः सोमाः । वह । वायो ! त्व प्रापयात्मान तदर्थम् । नियुत । अभियाहि । पिब । सुतम् । सोमम् । मदार्थमिन्द्रेण सहेति ।

---

१. षष्ठेऽनुवाके पञ्चदश सूक्तानि । तत्र 'प्र वीरया' इति । सप्तर्चं प्रथमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वायव्यम् । यासु पञ्चम्याद्यासु द्विवचनमस्ति ता ऐन्द्रवायव्यः । तथा चानुक्रान्तम्—'प्र वीरया सप्त वायव्यं ह्यैन्द्रवश्च या द्विवदुक्ताः' (KSA. 38. 90. p. 26.) इति । तृतीये छन्दोमे प्रउगशस्त्रे 'प्र वीरया' इति वायव्यस्तृचः । सूत्रितं च—'प्र वीरया शुचया दद्रिरे वां ते सत्येन मनसा दीध्यानाः' (ĀSS. 8. 11.) इति Sy.

२. प्रवीयन्ते—'दद दाने' इत्यस्यैतद्रूपम् Sy. विदीर्णाश्चूर्णीभूताः । 'द्रु विदारणे' कर्मकर्तरि लिट् Mah. 'दृ विदारणे' विदीर्णाः कणीभूताः U.

३. ते । व्यत्ययेन द्विवचनम् । तुभ्यम् Sy. वामिति द्विवचनं पत्नीयजमानविषयम् । हे पत्नीयजमानौ ! वां युवयोः स्वभूताः सोमाः Mah. वां युवयोः सम्बन्धिनः, हे यजमानौ ! जायापती ! U.

४. वीराय विविधमीरयित्रे 'सुपां सुलुक्०' इति चतुर्थ्या याजादेशः Sy. प्रकृष्टा वीरा ज्ञानोद्भूवा ऋत्विजो येषां सोमानां ते प्रवीराः Mah. प्रवीरया बहुवचनस्य स्थाने यादेशः । प्रकृष्टवीराः सोमाः U.

५. ०ये A. शुद्धाः Sy. निर्मलाः Mah. स्वभावादेव शुद्धाः U.

६. अध्वर्युभिः A. ऐतरेयिभिर्नवमेऽहनि प्रउगेऽध्वर्युभिरध्वरस्य नेतृभिर्ऋत्विग्भिः Sy. 'ग्रावभिर्द्रवीभावमापादिता अभिषुण्वन्ति चत्वारः पर्युपवेशनसामर्थ्यात्' (9. 5. 1.) इति कात्यायनस्मरणादध्वर्युभिरिति बहुवचनम् । अध्वरनेतृभिर्ऋत्विग्विशेषैः सुता इत्यर्थः Mah.

७. माधुर्योपेताः Sy. मधुनिष्पाद्यारूपमुदकम्, तद्वन्तः Mah. उदकवन्तः U.

८. अभिषुताः Sy. सुता अभिषवधर्मेण Mah. अभिषुता ग्रावभि U.

९. सह A. रथं प्रापय Sy. देवयजनदेशं प्रापय Mah. प्रापय U.

१०. अत एवमतः कारणाद् हे वायो ! Sy. एवं पूर्वार्धे पत्नीयजमानौ सम्बोध्य वायुमाह । वाति सर्वत्र गच्छति वायुः, हे वायो ! Mah. एवमनेनार्धचेन यजमानौ सम्बोध्याथेदानीं सम्बोधयति वायुम् U.

११. वडवाः Sy. नियुतोऽश्वान् Mah. नियुद्गणकानश्वान् U.

१२. तेन रथेनाच्छ याहि अस्मद्यज्ञमभिगच्छ Sy. अच्छाभेरर्थे, आप्तुमिति वा सोमाभिमुखं सोमप्राप्तुं वा याहीत्यर्थः Mah. सोमं वाप्राप्तुम् U.

१३. अभिगत्य चाभिषुतस्य Sy. अभिषुतस्य Mah. U.

१४. अन्नस्य सोमलक्षणस्य स्वकीयं भागम् Sy. सोमस्य स्वमंशम् Mah. सोमस्य U.

१५. तृप्तये मत्तायै वा Mah. तृप्तये मदजननार्थं वा U. This stanza=YV. 33. 70.

ईशानाय प्रहुति यस्त आनट् शुचिं सोमं शुचिपास्तुभ्यं वायो ।
कृणोषि तं मर्त्येषु प्रशस्तं जातोजातो जायते वाज्यस्य ॥ २ ॥

ईशानाय । ईशानाय[1] । प्रकर्षेण । होतव्यं प्रमुखे वा होतव्यम्[2] । य । तुभ्यम्[3] । प्रापयति । शुचि सोमम्[4] । शुद्धस्य सोमस्य पात[5] । तुभ्यम् । वायो ! करोषि[6] । तम्[7] । मनुष्येषु[8] । प्रशस्तम्[9] । जातोजातः[10] पुत्र । अस्य[11] । बलवान्[12] । जायते[13] सर्व. पुत्रो बलवान् भवति[14] ।

राये नु यं जज्ञतू रोदसीमे राये देवी धिषणा धाति देवम् ।
अधं वायुं नियुतः सश्चत स्वा उत श्वेतं वसुधितिं निरेके ॥ ३ ॥

राये[15] नु । धनार्थम्[16] । यत्[17] । जनयत[18] । इमे । द्यावापृथिव्यौ । तं देवम्[19] । धनार्थम्[20] । मदीया

---

१. शुनासीरीये पर्वणि वायव्यस्य हविषः 'ईशानाय' इति याज्या । सूत्रितं च—'स त्वं नो देव मनसेशानाय प्रहुति यस्त आनट्' (ĀŚS. 2. 20) इति । वायव्ये पशावेवैष पशुपुरोडाशस्य याज्या । सूत्रितञ्च—'ईशानाय प्रहुति यस्त आनट् प्र वो वायुं रथयुजं कृणुध्वम्' (ĀŚS. 3. 8.) इति Sy.

२. ईश्वराय Sy.

३. हेतव्यं M. प्रकृष्टामाहुति चरुपुरोडाशादिसाध्याम् Sy. ४. यजमानः Sy.

५. त्वदर्थम् Sy. ६. प्राप्नोत् वद्यादित्यर्थः Sy.

७. शुचिम् is suggested for शुचि ॥ शुद्धम् Sy. ८. यः प्रयच्छति Sy.

९. ०स्या पातः A. १०. यजमानम् Sy.

११. मनुष्येषु मध्ये Sy. १२. मुख्यम् Sy.

१३. सर्वत्र प्रादुर्भूतः प्रख्यातः सन् Sy.

१४. Sy. seems to take वाज्यस्य as one word and explain वाजस्य प्राप्तव्यस्य धनस्य प्राप्तये but according to *pathapātha* VM. takes them as two words वाजी and अस्य ।

१५. जायते सर्वः पुत्रो बलवान् is missing in A. जायते अवकल्पते सर्वं धनं लभत इत्यर्थः Sy.

१६. नियुत्स्वद्गुणविशिष्टवायुदेवताके पशौ 'राये नु यम्' इति पुरोडाशस्य याज्या । सूत्रितञ्च—'राये नु यं जज्ञतू रोदसीमे प्र वायुमच्छा बृहती मनीषा' (ĀŚS. 3. 8.) इति Sy.

१७. राये धनायोदकरूपाय Mah. धनायोदकलक्षणाय U.

१८. यम् is suggested for यत् ॥ वायुम् Sy., Mah., U.

१९. जनयताम् is suggested for जनयत ॥ जनयामासतुः Sy. उत्पादयामासतुः । नु क्षिप्रम्....रोदस्योः सद्भावेऽपि वायुं विना जगद्धारणाशक्तेर्वायुरुत्पादितः Mah. नु क्षिप्रम्...जनयामासतुः ।....अनयोर्द्यावापृथिव्योः संयोगेऽपि सति वायुमन्तरेण जगद्धारणं नोपपद्यत इति जनितवत्यौ द्यावापृथिव्यौ U.

२०. दानादिगुणयुक्तं वायुम् Sy. वायुम् Mah. दानादिगुणयुक्तम् U.

२१. धनाय Mah. धनायोदकलक्षणाय U.

बुद्धिः[1] धारयति[2] । तदनन्तरमेव[3] । मया[4] गमनार्थं वायुः[5] । नियुतः[6] । सवन्ते[7] । स्वाः[8] । अपि च[9] । श्वेतवर्णम् । दत्तं[10] धनम् । निर्गमने[11] दारिद्र्ये[12] वा स्तोतृणामिति[13] ।

उच्छन्नुषसः सुदिना अरिप्रा उरु ज्योतिर्विविदुर्दीध्यानाः ।
गव्यं चिदूर्वमुशिजो वि वव्रुस्तेषामनु प्रदिवः ससृरापः ॥ ४ ॥

उच्छन्[14] । व्युच्छन्ति[15] । उषसः[16] । सुदिनाः[17] । अवापाः[18] । उरु[19] । ज्योतिश्च[20] । लेभिरे[21] । दीप्यमानाः अग्नयः । गव्यम्[22] । च[23] । संघातम्[24] । कामयमाना देवाः[25] । विवृतद्वारमकुर्वन्[26] । तान्[27] । आपश्च । दीप्ताः पुरातनाः[28] वा । अनुससृः ।

---

१. बुद्धिं A. स्तुतिः Sy. धियं सनोति ददाति धिषणा वाग्देवी । ...धिषणेति ह्रस्वमार्षम् Mah. धियं बुद्धिं कर्म वा सनोति सम्भजत इति धिषणा वाङ् मध्यस्थाना U.

२. धनं यथा लभते तथा प्रेरयतीत्यर्थः Sy. धारयति । शपो लुक् Sy.

३. अधुनैव स्तुतौ प्रवृत्तायाम् Sy. अथोत्पत्त्यनन्तरमेव Mah. अथ अयेत्यर्थः । समनन्तरमेव U.

४. मर्याग० A. ममागमनार्थम् suggested for मयागमनार्थम्.

५. वायुम् is suggested for वायुः ॥ तं वायुम् U.

६. नियुतः is suggested for नियुत ॥ वडवा रथवाहाः...अस्मद्यज्ञं प्रापयन्तीत्यर्थः Sy. निजाश्वाः Mah. अश्वः U.

७. सेवन्ते । 'षच् सेवने' पुरुषव्यत्ययः Mah. सरन्तः सेवन्तः U.

८. स्वकीयाः Sy.

९. निश्चितम् Mah.

१०. धत्त० M. वसूनां धातारं प्रदातारं वा तं वायुम् Sy. वसुनो धनस्य धितिर्धारणं यत्र तं धनस्य धारयितारम् Mah. वसुनो धनस्योदकलक्षणस्य धारयितारम् U.

११. नितरां रेको रिक्तता निरेकः । दारिद्र्यमित्यर्थः । तस्मिन् सति Sy. निर्गतो रेको रेचनं रेकः शून्यता यस्मात्तादृशे बहुजनाकीर्णे स्थाने Mah. जनैराकीर्णप्रदेशेऽवस्थितं वायुम् U.

१२. ०द्र्यो वा पास्तो० A. वा पास्तो नृणा० M.

१३. VM. ignores नु and देवी ॥ नु क्षिप्रम् । देवी द्योतमानः Sy.
This stanza=YV. 27. 24.

१४. द्वितीये छन्दोमे प्रउगशस्त्रे वाय्वयनूचस्य 'उच्छन्नुषसः' इति तृतीयः । सूत्रितं च—'उच्छन्नुषसः सुदिना अरिप्रा इत्येकपात्निन्यः' (ĀŚS. 8. 10) इति Sy.

१५. औच्छन्, व्यवासयन् Sy.

१६. ऊषसः A.

१७. शोभनदिनस्य हेतुभूताः सन्तः Sy.

१८. अपापाः is suggested for अवापाः ॥ येऽङ्गिरसो वायुमस्तोषत तेषामरिप्राः पापरहिताः Sy.

१९. विस्तीर्णम् Sy.

२०. सूर्यात्मकम् Sy.

२१. वायोः प्रसादबलभन्त Sy.

२२. गोसङ्घरूपम् Sy.

२३. धनं पणिभिरपहृतम् Sy.

२४. अपि च कामयमानास्तेऽङ्गिरसः Sy.

२५. व्यवृण्वन् । अलभन्त Sy.

२६. तथा तेषामङ्गिरसामर्थाय Sy.

२७. पुराण्यः Sy.

२८. अनुबसलु A. अन्वसरन् हिताहिताचरणपरा आसन्नित्यर्थः । आवरकस्यासुरस्य वायुना हननादसुरेणाहतानपः प्रभृतीन् पनर्लब्धवन्तः Sy.

ते सत्येन मनसा दीध्यानाः स्वेन युक्तासः क्रतुना वहन्ति ।
इन्द्रवायू वीरवाहं रथं वामीशानयोरभि पृक्षः सचन्ते ॥ ५ ॥

ते सत्येन । ते । सत्येन । मनसा । दीध्यमाना अमुग्धमनसः । स्वेन । प्रज्ञानेन । युक्ताः । वहन्ति । हे इन्द्रवायू ! वीरयोर्युवयोर्वोढारम् । रथम् । वणी (पणि) जेतु तथेश्वरयोः । भवतोः सतोः । पणिभ्यो गोलक्षणमन्नं च । सचन्ते ।

ईशानासो ये दधते स्वर्णो गोभिरश्वेभिर्वसुभिर्हिरण्यैः ।
इन्द्रवायू सूरयो विश्वमायुरवर्द्धिवीरैः पृतनासु सह्युः ॥ ६ ॥

ईशानासः । हे इन्द्रवायू ! शक्ता ये । धारयन्ति । सर्वम् । अस्माकम् । गवादिभिः सह धनं ते । सूरयः स्तोतारोऽस्मदीयाः । विश्वम् । अन्नम् । अश्वैः । वीरैश्च । सङ्ग्रामेषु । अभिभवन्तु ।

अर्वन्तो न श्रवसो भिक्षमाणा इन्द्रवायू सुष्टुतिभिर्वसिष्ठाः ।
वाजयन्तः स्ववसे हुवेम यूयं पात स्वस्तिभिः सदा नः ॥ ७ ॥

अर्वन्तः । अश्वाः । इव । धासमन्नम् । भिक्षमाणाः । इन्द्रवायू ! शोभनाभिः स्तुतिभिः ।

---

१. तृतीये छन्दोमे प्रउगशस्त्रे 'ते सत्येन' इत्यैन्द्रवायवस्तृचः । सूत्रितञ्च—'ते सत्येन मनसा दीध्याना दिवि क्षयन्ता रजसः पृथिव्याम्' (ĀSS. 8. 11.) इति Sy. २. The *Pratika* is supplied by the Editor.
३. प्रसिद्धाः Sy. ४. यथार्थेन Sy.
५. मननीयेन स्तोत्रेण Sy. ६. स्वकीयेन Sy.
७. कर्मणा नित्यनैमित्तिकात्मना Sy.
८. युक्ता एवम्भूता यजमानाः Sy.
९. स्वं स्वं यज्ञं प्रापयन्ति Sy.
१०. ०धारं A. वीरैर्विशेषेणेरयितृभिः स्तोतृभिर्वहनीयं प्रापणीयं यद्वा वीरैरश्वैर्वहनीयम् Sy.
११. रथम् is omitted by M.
१२. वणीं जेतु A. पणीन् is suggested for वणीं [पणिं] ।
१३. ०तेः स० A. युवयोः स्वभूतम् Sy.
१४. तत्र च पृक्षोऽन्नानि हविर्लक्षणानि Sy.
१५. युज्ञामभिसेवन्ते Sy.
१६. VM. ignores अभि ।
१७ ०न सः M. १८. ईश्वराः प्रभवः Sy.
१९. जनाः Sy. २०. ददति प्रयच्छन्ति Sy.
२१. सुष्ठ्वरणीयं सुखम् Sy.
२२. आदि refers to अश्वेभिः । वसुभिः and हिरण्यैः ॥ अश्वेभिरश्वैः । वसुभिर्निवासकैः । हिरण्यैश्च सहितम् । यद्वा हिरण्यव्यतिरिक्तानि धनानि वसूनि । तैर्हिरण्यैश्च सहेत्यर्थः Sy.
२३. दातारः Sy. २४. व्याप्तम् Sy.
२५. अन्नं जीवनं वा शत्रूणां स्वभूतम् Sy.
२६. सूरभटैश्च साधनभूतैः । यद्वा सहार्थे तृतीया । अर्वद्भिर्वीरैः पुत्रैश्च सहितं शत्रूणामायुरभिभवेयुरित्यर्थः Sy. २७. अभिभवेयुः Sy.
२८. अवन्त A. २९. हविषां वोढारः Sy.
३०. अवसः अन्नस्य । द्वितीयार्थे षष्ठी । अन्नम् Sy.
३१. याचमानाः Sy. ३२. इन्द्रं वायुञ्च Sy.

वसिष्ठाः[1] । अन्नमिच्छन्तः[2] । सुष्ठु[3] । आह्वयेम । रक्षणार्थमिति[4] ।

VII. 91.

कुविदङ्ग[5] नमसा[6] ये वृधासः[7] पुरा[8] देवा[9] अनवद्यास[10] आसन्[11] ।
ते वायवे मनवे[12] बाधितायावासयन्नुषस[13] सूर्येण[14] ॥ १ ॥

कुविदङ्ग[15] । बहु[6] । क्षिप्रम्[7] । हविषा[8] । वृद्धाः[9] । पुरा[8] । ये । देवाः[9] । अनवद्याः[10] । अभवन्[11] । ते । शत्रुभिर्बाधिताय[12] । मनवे[12] राज्ञे तद्धविर्भि[13] प्रीता यजमुखे । वायुमग्न यजत्विति मन्यमानास्तद्यागार्थम्[4] । सूर्येण[14] सह । उषसम्[13] । अवासयन्निति[15] ।

उशन्ता[16] दूता न दभाय[17] गोपा मासश्च[18] पाथः[19] शरदश्च[20] पूर्वीः[21] ।
इन्द्रवायू सुष्टुतिर्वामियाना मादीकमींद्वे सुवितं च[22] नव्यम्[23] ॥ २ ॥

उशन्ता[16] । कामयमाना[17] । दूतौ । न । हिंसायै[18] भवथः[19] । गोपयितारौ[20] । मासान्[21] । च । रक्षथः[22] ।

---

१. वसिष्ठा वयम् Sy. २. अग्निमि० A. बलमात्मन इच्छन्तः Sy.
३. सुष्ट्वतां [पां] ह्वये० M. आह्वयेमहि । अन्यद्गतम् Sy.
४. Sy. seems to take सु and अवसे as one word स्ववसे and explain as शोभनरक्षणाय सुष्ठुतर्पणाय वा Sy.
५. 'कुविदङ्ग' इति सप्तर्चं द्वितीयं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वायव्यम् । 'कुविदङ्ग' इत्यनुक्रान्तम् (KSA. 38. 91. p. 26) । गतः सूक्तविनियोगः । वायव्ये पशौ 'कुविदङ्ग' इति वपाया याज्या । सूत्रितं च—'कुविदङ्ग नमसा ये वृधासः ईशानाय प्रहुति यस्त आनट्' (ĀŚS 3. 8.) इति Sy.
६. कुविदिति बहुनाम Ngh. 3.1.
७ क्षिप्रं कृतेन Sy. अङ्गेति क्षिप्रनाम N. 5. 17.
८. वायुविशेषेण स्तोत्रेण नमस्कारेण वा Sy.
९. पूर्वस्मिन् काले Sy.
१०. कोऽयन्ति स्तुवन्तीति देवाः स्तोतारः Sy.
११. ०पद्याः A. अवद्यरहिताः Sy.
१२. बाधितानां पुत्रादीनां रक्षणार्थमित्यर्थः । यद्वा मनवे बाधितायेति षष्ठ्यर्थे चतुर्थी । बाधितस्य मनोः प्रजापतेर्यागे वायवे हवींषि दातुमित्यन्वयः Sy.
१३. मनुष्याणाम् Sy. १४. ०विभीः प्री० A.
१५. सूर्येण is omitted by A.
१६. उषसो व्युष्टे सूर्योदयं च वायुयागार्थं कुर्वन्तीत्यर्थः Sy.
१७. द्वितीये छन्दोमे प्रउगशस्त्रे ऐन्द्रवायवतृचस्य 'उशन्ता' इत्येषा प्रथमा । सूत्रितञ्च—'उशन्ता दूता न दभाय गोपा यावत्तरस्तन्वो यावदोज इत्येका द्वे च' (ĀŚS 8. 10) इति Sy.
१८. ०मानौ is suggested for ०माना ॥
१९. देवतेर्गतिकर्मणो दूतशब्दः । गन्तारौ Sy.
२०. ०यै प भव० A. भवतम् Sy.
२१. गोपारयि० A. गोपायि० is suggested for गोपयि० ।
२२. मासः A. २३. रक्षतम् Sy.

शरदः[1]। च। बह्वीः। हे[2] इन्द्रवायू। सुष्टुतिः[3]। वाम्[4]। गच्छन्ती[5]। सुखम्। इच्छति[6]। शोभनं, च, गमनम्[7]। नवतरम्[8], पुत्रो वा सुपित[9] इति।

पीवोअन्नाँ रयिवृधः सुमेधाः श्वेतः सिषक्ति नियुतामभिश्रीः।
ते वायवे समनसो वि तस्थुर्विश्वेन्नरः स्वपत्यानि चक्रुः॥ ३॥

पीवोअन्नान्[10]। स्थूलान्नान्[11]। नया[12] वृद्धान्[13]। सुप्रज्ञ.[14]। श्वेतवर्णः[15]। सेवते[16] वायुः। नियुताम्[17]। अभिगन्ता[18]। ते[19] चायमेव यष्टव्य[20] इति। सङ्गतमनसः[21]। वायवे[22]। तिष्ठन्ति[23]। विविधम्। विश्वानि[24]। एव[25]।

---

१. संवत्सरांश्च, चिरकालम् Sy.

२. हे is missing in A.

३. अस्मदीया शोभना स्तुतिः Sy.

४. युवम् Sy.

५. न्ती। सुखम्। इच्छ is missing in A. गच्छन्ती प्राप्नुवन्ती Sy.

६. याचते। यद्वा सुखं यथा स्यात्तथा स्तौति Sy.

७. सुपितं सुष्ठु प्राप्यं धनम् Sy.

८. तथा प्रशस्यम् Sy.

९. सुवित is suggested for सुपित। The passage पुत्रो वा सुपि(वि)तः Should immediately follow गमनम् and precede नवतरम्।

१०. नियुत्वद्वायुदेवताके पशौ 'पीवोअन्नान्' इति वपाया याज्या। सूत्रितं च—'पीवोअन्नां रयिवृधः सुमेधा राये नु यं जज्ञतू रोदसीमे' (ĀSS 3. 8.) इति। तथा द्वितीये छन्दोमे प्रउगशस्त्रे वायव्यतृचस्यैषैव द्वितीया। सूत्रितञ्च—'पीवोअन्नां रयिवृधः सुमेधा उच्छन्नुषसः सुदिना अरिप्राः' (ĀSS. 8. 10) इति Sy.

११. ०न्नात् A.

१२. रय्यांसि स्थूलानि प्रभूतान्यन्नानि येषां तान् Sy. पीवः पुष्टमन्नं येषां तान्।...पीवोअन्नानित्यत्र सन्ध्यभावः Mah. पीवः पुष्टमन्नं येषामिति पीवोअन्नान् U.

१३. तर्या A. रय्या is suggested for नया॥ रय्या धनेन वृद्धान् एवम्भूतानाढ्यजनान् Sy. रयिं धनं वर्धयन्ति तान् Mah. रयिं धनं ये वर्धयन्ति ते रयिवृधः U.

१४. शोभनप्रज्ञः Sy. शोभना मेधा बुद्धिर्यस्य Mah. कल्याणप्रज्ञानो वायुः U.

१५. 'शुक्लो हि वायुः' इति श्रुतेः श्वेतो वायुः Mah. श्वेतो वायोर्वर्णवचनम् U.

१६. यान् नियुतोऽश्वान् सिषक्ति सेवते Mah. सेवति U.

१७. वडवानां स्ववाहानाम् Sy. अश्वानाम् Mah.

१८. अभिश्रयणीयः Sy. आश्रयणीयः Mah. अभ्याश्रयणीयः U.

१९. ते नियुतः Mah. ते नियुतोऽश्वाः U.

२०. पाय० A.

२१. समानमनस्काः सन्तः Sy. सममनस्काः सन्तः Mah. समनस्काः सन्तः U.

२२. वायुमुद्दिश्य यष्टुम् Sy. वायवेऽर्थाय Mah.,U.

२३. तिषष्ठन्ति A. अवतिष्ठन्ते Sy. विशेषेण तिष्ठन्ति Mah.

२४. सर्वाणि Sy. Mah.

२५. इत् पादपूरणे U.

मनुष्याः[1] । कर्माणि वायवे चक्रुः[2] । शोधनान्यपतननिमित्तानि येषु तानि स्वपत्यानीति[3] ।

यावत्तरंस्तन्वो[4] यावदोजो यावद्बलमुश्चसा दीध्यानाः[5] ।
शुचिं सोमं शुचिपा पातमस्मे इन्द्रवायू सदतं बर्हिरेदम् ॥ ४ ॥

यावत्तरः[6] । यावत्प्रमाणः । वेग[7] । शरीरस्य । यावच्च[8] । ओजः[9] । यावच्च । मनुष्याः । चक्षुषा[10] पश्यन्ति युवयोः शरीरम् । दीप्यमानाः[11] युवानः । तौ. वात शरीरेणागतौ ? शिष्ट स्पष्टमिति[12] ।

नियुवाना[13] नियुतः[14] स्पार्हवीरा इन्द्रवायू सरथं यातमर्वाक् ।
इदं हि वां प्रभृतं मध्वो अग्रमधं प्रीणाना वि मुमुक्तमस्मे ॥ ५ ॥

नियुवानाः[15] । निमिश्रयन्तौ । नियुतः[16] । स्पृहणीय[17] बलाः । इन्द्रवायू ! समानरथम्[18] । आगच्छतम् ।

---

१. कर्मणां नेतारो जनाः Sy. एवमश्वयोगे वायुना कृते नरो मनुष्या ऋत्विजः Mah. मनुष्या ऋत्विग्यजमानाः U.

२. कुर्वन्ति Sy. चक्रुः कर्माणीति शेषः Mah. कुर्वन्ति । एतदुक्तं भवति । वाय्वश्वसंयोगे सति सर्वमिदं यज्ञादि प्रवर्तत इति U.

३. शोभना० is suggested for शोधना० ॥ शोभनापत्यहेतुभूतानि यद्वा सुष्ठ्वपतनकारणानि वायुदेवत्यानि कर्माणि Sy. शोभनापत्यप्राप्तिकाणि Mah. शोभनानामपत्यानां यानि कर्माणि तानि U.

४. प is written twice in A. This stanza=VV. 27. 33.

५. द्वितीये 'छन्दोमे प्रउगशस्त्र ऐन्द्रवायवतृचस्य 'यावत्तरः' इत्यादिके द्वे ऋचौ । सूत्रं तु पूर्वमेवोदाहृतम् Sy.

६. ०त्तरं A. ७. ०वर्चं A.

८. बलम् Sy.

९. कर्मणां नेतार ऋत्विजः Sy.

१०. ज्ञानेन Sy.

११. दीप्यमाना भवन्ति Sy.

१२. ताः मवताशरी० A. तौ पातं or तावतं is suggested for ताः वात शरी० ।

१३. पष्ट० A.

१४. VM. ignores शुचिम् । सोमम् । शुचिपा । अस्मे । इन्द्रवायू । सदतम् । बर्हिः । आ and इदम् । Sy. explains this stanza in the following manner:— हे इन्द्रवायू ! युवयोः...तस्य सर्वस्यानुरूपं शुचिपा शुचेः सोमस्य पातारावित्रवायू शुचिं शुद्धं सोममस्मे अस्मदीयं पातं पिबतम् । इदं वेद्यां स्तीर्णं बर्हिश्चा सदतम् । पानार्थमासीदतम् । बर्हिष्युपविशतमित्यर्थः ।

१५. निमिगूयन्तो A. ०यन्तौ is suggested for ०यन्तो ।

१६. आत्मीयाश्वान् Sy.

१७. बला is missing in M. ०णीयब० is suggested for णीयं ब० ॥ स्पृहणीयस्तोतृकान् Sy.

१८. उभयोः समानमेकं रथम् Sy.

अभिमुखम्[1] । इदम् । ति[2] । वाम्[3] । प्रभृतम्[4] । ऐन्द्रवायवाख्यमध्वः[5][6] । अग्रम्[7] । अर्थ[8] । प्रियमाणा[9] । अस्मान् । पाशबन्धाद् विमुञ्चत्[10][11] ।

या वां शतं नियुतो याः सहस्रमिन्द्रवायू विश्ववाराः सचन्ते ।
आभिर्यातं सुविदत्राभिरर्वाक्पातं नरा प्रतिभृतस्य मध्वः ॥ ६ ॥

या[12] वाम् । याः । वाम्[13] । सेवन्ते । शतम्[14] । नियुतः । याश्च । सहस्रम्[15] । इन्द्रवायू । सर्वेषां वासयित्र्यः[16] । आयातम्[17] । आभिः[18] । सुमनाभिः[19] । अभिमुखम्[20] । पात च । नरेण[21][22] । सम्भृतम्[23] । सोमम्[24] ।

अर्वन्तो न श्रवसो भिक्षमाणा इन्द्रवायू सुष्टुतिभिर्वसिष्ठाः ।
वाजयन्तः स्ववसे हुवेम यूयं पात स्वस्तिभिः सदा नः ॥ ७ ॥

[अर्वन्तः[25] ।]

---

१. अस्मदभिमुखम् Sy.
२. हि is suggested for नि ॥ खलु Sy.
३. वां A. युवयोरर्थम् Sy.
४. प्रकर्षेण हृतं होमार्थमुत्तरवेदिं प्रति नीतम् Sy.
५. ०वाख्यय A.M.
६. मु [मू] ध्वः A. मधुरस्य सोमस्य Sy.
७. ग्रहेष्वाद्यमैन्द्रवायवाख्यं ग्रहम् Sy.
८. तादृशस्य सोमस्य पानानन्तरम् Sy.
९. प्रीयमाणौ is suggested for प्रिय माणा ।
१०. ०बद्धान् M.
११. ०ञ्चतम् is suggested for ०चत् ॥ पापाद् विमोचयतम् Sy.
१२. प्रथमे छन्दोमे प्रउगशस्त्र ऐन्द्रवायव्यतृचस्य 'या वां शतम्' इति तृतीया । सूत्रितञ्च 'या वां शतं नियुतो याः सहस्रमित्येकपातिन्यः, (ĀŚS 8. 9.) Sy.
१३. ष्वाम् Sy.
१४. शतसंख्याकाः सत्यः Sy.
१५. सहस्रसंख्याकाः सत्यो यवां सचन्ते Sy.
१६. विश्ववैवरणीयाः Sy.
१७. आयतम् A. आगच्छतम् Sy.
१८. नियुद्भिः Sy.
१९. सु is written twice in A. शोभनधनप्रदाभिः Sy.
२०. अस्मदभिमुखम् Sy.
२१. पिबतम् Sy.
२२. हे नरा ! नेतारौ Sy.
२३. प्रभृतस्य उत्तरवेदिं प्रति नीतस्य Sy.
२४. मधुरस्य सोमस्य द्वितीयार्थे षष्ठी । ईदृश सोमम् Sy.
२५. The *pratīka* is supplied by the Editor. This stanza has already been explained. See RV. 7. 90. 7. Sy. mentions here the following. व्याख्यातेयम् । अक्षरार्थस्तु-अश्वा इव हविषां वोढारोऽन्नं याचमाना बलं कामयमाना वसिष्ठा वयं शोभनरक्षणाय शोभनैः स्तोत्रैरिन्द्रवायू आह्वयेमहीति ।

VII. 92.

आ वायो भूष शुचिपा उप नः सहस्रं ते नियुतो विश्ववार ।
उपो ते अन्धो मद्यमयामि यस्य देव दधिषे पूर्वपेयम् ॥ १ ॥

[1] आ वायो । उपागच्छ । [2] अस्मान् । वायो ! सोमस्य पान ! [3] सहस्रं हि । ते । सन्ति नियुतः ।

---

१. 'आ वायो' इति पञ्चर्चं तृतीयं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वायव्यम् । अनुक्रान्तञ्च—'आ वायो पञ्च' (KSA. 38. 92. p. 26.) इति । शुनासीरीये पर्वणि वायोर्नियुत्वतः यागस्य 'आ वायो' इत्यनुवाक्या । सूत्रितञ्च—'आ वायो भूष शुचिपा उप नः प्र याभिर्याहि दाश्वां समच्छ' (ĀŚS 2. 20) इति । नियुत्वद्वायुदेवताके पशावेवैव वपाया अनुवाक्या (ĀŚS. 3. 8.)। प्रथमे छन्दोमे प्रउगशस्त्रे वायव्यतृचस्यैवैवाद्या । सूत्रितञ्च—'समुद्रादूर्मिरित्याज्यमा वायो भूष शुचिपाः' (ĀŚS 8. 9.) इति Sy.

२. उप समीपे आ भूष आगच्छ । 'भू प्राप्तौ' इत्यस्यैतद्रूपम् Sy. उप समीपे, आभूष आक्रमस्वाऽऽगच्छेत्यर्थः । 'भूष अलङ्कारे' इह गत्यर्थः Mah. आ अभूष अभ्याक्रमस्व । उप समीपे . . . अभ्याक्रमस्वेति सम्बन्धः U. उपेत्युपसर्गश्रुतेर्योग्यं क्रियापदमध्याह्रियते । नोऽस्मानुपेत्य, इममस्मदीयं सोमं पानेनाभूष आ समन्तादलङ्कुरु । यद्वा—अस्मदीयं यज्ञभागमनेनालङ्कुरु । 'भूष अलङ्कारे' भौवादिकः BB.

३. अस्माकम् Sy., Mah., U.

४ हे शुचेः शुद्धस्य सोमस्य पातः ! Sy. शुचि पवित्रं प्रथमं वषट्कृतमप्राप्तमन्यदेवैरदृशं सोमं पिबतीति शुचिपाः पवित्रसोमपान ! Mah. पवित्रं सोमं प्रथमवषट्कारवषट्कृतमप्राप्तमन्यैर्देवताविशेषैः पिबतीति शुचिपाः U. शुचेः शुद्धस्य पातः ! BB.

५. बहवः U.

६. सति Λ. विद्यन्ते U.

७. केनाहमाक्रमे ? इति चेत् ते तव सहस्रं नियुतः सन्ति । 'नियुतो वायोः' इत्युक्तेर्नियुच्छब्देन वायुवाहनभूता मृगा उच्यन्ते । तवास्ड्व्याता वाहनभूता मृगास्तैरागच्छेत्यर्थः Mah. नियुद्गुणयुक्ता अश्वाः U. नियुतोऽश्वाः, अतस्तवैवागमनं भूषणाय भवति । हे वायो ! नियुतोऽश्वा अस्मानुपयान्तु । यद्वा वायो आभूषय यज्ञम् । तदर्थं किं क्रियतामित्याह—तव सहस्रं नियुतोऽस्मानुपागच्छन्तु । यद्वा भूषेत्यमन्त्रितमेव, भूषयतीति भूषोऽलङ्कर्ता । कस्य ? तस्य यत्र यत्र गच्छतीति, हे एवङ्गुणक ! वायो ! तव सहस्रं नियुतोऽस्मानुपयन्तु, तैः सहितस्सन्, अस्मत्सकाशमागच्छेत्यर्थः BB.

विश्ववेर्वरणीय ! तुभ्यम् । उपगमयामि । मदकरम् । सोमम् । यस्य । देव ! करोषि ! पूर्वयानम् ।

प्र सोता जीरो अध्वरेष्वस्थात्सोममिन्द्राय वायवे पिबध्यै ।
प्र यद्धा मध्वो अग्रियं भरन्त्यध्वर्यवो देवयन्तः शुचीमिः ॥ २ ॥

प्र सोता । प्रास्थात् । अभिषोताऽध्वर्युः । क्षिप्र. । यज्ञेषु प्रागवयम् । सोमम् । इन्द्राय । वायवे

---

१. विश्वं सर्वं वृणोति व्याप्नोति, विश्वैर्वा ह्रियते प्राप्यते इति विश्ववारस्तत्सम्बोधनं हे विश्ववार सर्वव्यापक ! Mah. विश्वं सर्वं वृणोति, विश्वैः सर्वैर्वा ह्रियते प्राणिभिरिति विश्ववारस्तत्सम्बोधनं हे विश्ववार ! U. कथमनेनागमनेन यज्ञोऽलङ्क्रियते ? इत्याह, विश्ववार ! निजबलेन विश्वस्यावरक ! विश्वेषां वा वरणीय ! BB.

२. तव Sy., Mah. तव स्वभूतम् U. अहं तुभ्यमागताय BB.

३. उपायामि । उपयतं पात्रे गृहीतमासीत् Sy. उप समीप एव, अयामि गमयामि । सोमं ते समर्पयामीत्यर्थः Mah. उपसर्गद्वयेन क्रियापदमध्याह्रियते । उपो इत्युपशब्दस्यार्थे वर्तते । उपो अयामि समीपं प्रापयामि । किम् ? सोममुपहरामि । 'इ गतौ' भौवादिकः । अन्तर्भावितण्यर्थः । णिलुग्वा BB.

४. मदनीयं तृप्तिजनकम् Mah. मदनीयम् U.

५. सोमलक्षणमन्नम् Sy., Mah. अन्नम् U. अदनीयम् BB.

६. सोमस्य Sy., Mah., U. पुनश्च सोमो विशेष्यते । . . . . यस्य BB.

७. हे देव ! दीप्यमान ! वायो ! Mah. हे देव ! वायो ! BB.

८. दधासि धारयसि Sy. त्वं धारयसि । दधातेर्लिटि रूपम् Mah. U. दधासि, आचरसि । यं लब्ध्वा प्रथमं पिबसि, अन्यमग्रे पिबतं न क्षमसे यागेषु BB.

९. पूर्वयानम् is suggested for पूर्वयानम् ॥ प्रथमपानम् । ऐन्द्रवायवग्रहे प्रथमे वषट्कारे केवलाय वायवे हूयते द्वितीये त्विन्द्रवायुभ्यामिति वायोः प्रथमपानम् । तादृशमन्ध उपोयामीत्यन्वयः Sy. प्रथमवषट्कारलक्षणं पूर्वपानम् Mah. पूर्वपेयं प्रथमवषट्कारलक्षणम् । पूर्वयानं प्रथमवषट्कार एव ते सोमस्य राज्ञ इत्याशयः U. प्रथमपानम् BB.

This stanza=YV. 7. 7. =TS. 1. 4. 4. 1.

अथातो गुह्यात्येव । आ वायो भूष शुचिपा उप नः सहस्रं ते नियुतो विश्ववार । उपो तेऽअन्धो भद्यमयामि यस्य देव दधिषे पूर्वपेयं वायवे त्वेति ŚB. 4. 1. 3. 18. p. 348.

१०. प्रथमे छन्दोमे प्रउगशस्त्र ऐन्द्रवायवतृचस्य 'प्रसोता' इत्याद्या । सूत्रितञ्च—'प्र सोता जीरो अध्वरेष्वस्थाद्ये वायव इन्द्रमादनासः' (ĀŚS. 8. 9.) इति Sy.

११. प्रस्थातात् A. प्रतिष्ठितवत् । पुरस्तादुत्तरवेदिं प्रापितवान् Sy.

१२. ०ध्वर्य A.

१३. क्षिप्रा M. क्षिप्रकारी Sy.

१४. यागेषु Sy.

१५. प्रागेव यम् or प्रापयत् is suggested for प्रागवयम् and प्रापयत् can be the explanation of प्रास्थात् ।

च । पानाय[1] । प्रहरन्ति[2] । यत् । मुख्यम् । सोमस्य । वाम्[3] । अध्वर्यवः । देवकाम्याः । कर्मभिः[4] ।

प्र याभिर्यासि दाश्वांसमच्छा[5] नियुद्भिर्वायविष्टये दुरोणे[6] ।
नि नो रयिं सुभोजसं युवस्व नि वीरं गव्यमश्व्यं च राधः[7] ॥ ३ ॥

प्र याभिः[8] । प्रयच्छसि[9] । याभिः । यजमानम्[10] । प्रति । नियुद्भिः[11] । वायो[12] । यज्ञार्थम्[13] । गृहे[14] । ताभिर्नियुवस्व[15] । अस्माकम्[16] । रयिम्[17] । शोभनभोजनम्[18] । गव्यम्[19] । अगव्यम्[20] । च । धनम्[21] । निमिश्रयेति[22] ।

---

१. पानार्थम् Sy.

२. प्रकर्षेण भरन्ति सम्पादयन्ति तेऽध्वरेष्वित्यन्वयः Sy.

३. येषु यज्ञेषु Sy.

४. अग्रभवम् । प्रथमभागम् Sy.

५. युवयोरर्थम् Sy.

६. अभिषवादिलक्षणैः Sy.

७. शुनासीरीये पर्वणि नियुत्वद्वायोर्यागस्य 'प्रयाभिः' इति याज्या । सूत्रितञ्च—'प्र याभिर्यासि दाश्वांसमच्छा स त्वं नो देव मनसा' (ĀŚS, 2. 20) इति । तद्देवत्ये पशावेवैष पुरोडाशस्यानुवाक्या । सूत्रितं च—'प्र याभिर्यासि दाश्वांसमच्छा नो नियुद्भिः शतिनीभिः' (ĀŚS. 3. 8.) इति । प्रथमे छन्दोमे प्रउगशस्त्र एवैष वायवतृचस्य द्वितीया । सूत्रितञ्च—'आ वायो भूष शुचिपा उप नः प्र याभिर्यासि दाश्वासमच्छा' (ĀŚS. 8. 9.) इति Sy.

८. The *Pratīka* is supplied by the Editor.

९. अभिगच्छसि । ताभिरस्मान् प्रत्यागच्छेति शेषः Sy. गच्छसि Mah. प्रयासि U. गच्छसि BB.

१०. ०नवव A. हविषां दातारं यजमानम् Sy हविर्दत्तवन्तं यजमानम् Mah. हवींषि दत्तवन्तं यजमानम् U. हविर्दत्तवन्तम् BB.

११. अभिमुखम् Mah. अच्छाभेराप्तुमिति शाकपूणिः । अभि U. अभिगन्तुम् BB.

१२. युवत् भिः A. वडवाभिः Sy. अश्वाभिः कृत्वा Mah. नियुच्छब्द उभयलिङ्गः स्त्रियां पुंसि च U. वडवाभिर्नियुत्संज्ञाभिः BB.

१३. यागाय Sy. Mah. एवंगाय वा U. पुनरपि यागं प्रवर्तयितुम् BB.

१४. यज्ञगृहे स्थितम् Sy, यज्ञगृहे वर्तमानम् Mah. यज्ञगृहे वर्तमानं यजमानम् U. यज्ञगृहे BB.

१५. नियुद्भिरागत्या Mah. U. ताभिरागत्यैहास्मद्यज्ञगृहे BB.

१६. नितरां मिश्रय प्रयच्छ Sy. देहि । नियौतिर्दानार्थः, ण्यन्तयेन शब्दत्यन्तः Mah. निपूर्वो यौतिर्दानार्थः । देहि U. शोभनभुक्तिकं धनमस्माभिर्मिश्रय BB.

१७. आगत्य चास्मभ्यम् Sy. अस्मभ्यम् Mah., U

१८. रथ A.

१९. शोभनान्नयुक्तम् Sy. सुष्ठु भुज्यत इति सुभोजास्ताम् । भुजेरसुन्प्रत्ययः Mah. साधु भुज्यत इति सुभोजास्तं सुभोजसम् U. शोभनभोजनम् BB.

२०. गोसङ्घम् Sy. वीरं पुत्रं गोसम्बन्धि Mah. वीरवत् पुत्रपौत्रादिवत्, गव्यं गोसमृद्धिनिमित्तम् । यद्वा गव्यैः क्षीरादिभिस्तद्वत् BB.

२१. अश्व्यम् is suggested for अगव्यम् । अश्वसङ्घमेतदुभयात्मकम् Sy. अश्वसम्बन्धि Mah. अश्वसमूहवत् । यद्वा अश्वयोगस्यापि निमित्तभूतम् । छान्दसो यत् BB.

२२. गोऽश्वरूपं रायो धनं च Mah. नियुवं च रायो धनम् BB.

२३. प्रयच्छ Sy.

२४. VM. ignores वीरम् ॥ वीरं युवम् Sy. This stanza = YV. 27. 27. = TS. 2. 2. 12. 7.

ये वायवं इन्द्रमादनास आदेवासो नितोशनासो अर्यः ।
घ्नन्तो वृत्राणि सूरिभिः ष्याम सासह्वांसो यथा नृभिरमित्रान् ॥ ४ ॥

ये वायवे । अश्वाः । इन्द्रवायुभ्याम्, मदहेतव । इन्द्रवायू देवावभिमुखाः । हन्तारः । शत्रोः । तैः सूरिभिः प्राज्ञैरश्वैरिन्द्रवायू गमयद्भिः । शत्रून् । घ्नन्तो वयम् । स्याम । अभिभवन्तः । युद्धेन । भगैश्च । अमित्रान् ।

आ नो नियुद्भिः शतिनीभिरध्वरं सहस्रिणीभिरुप याहि यज्ञम् ।
वायो अस्मिन्त्सवने मादयस्व यूयं पात स्वस्तिभिः सदा नः ॥ ५ ॥

उत्तरा निगदसिद्धेति--

[आ नः]

---

१. प्रथमे छन्दोमे प्रउगशस्त्र ऐन्द्रवायवतृचस्य 'ये वायव इन्द्र' इति द्वितीया । सूत्रितञ्च--'ये वायव इन्द्रमादनासो या वां शतं नियुतो याः सहस्रम्' (ĀŚS 8. 9) इति Sy.

२. अश्वाः is missing in M. ये सूरयः स्तोतारः Sy.

३. मुद० A. VM. seems to explain वायवे and इन्द्रमादनासः together as इन्द्रवायुभ्यां मदहेतवः ॥ स्तोत्रैरिन्द्रस्य तर्पयितारस्तथा वायवे वायोश्च मादनास्तर्पका भवन्ति Sy.

४. जागतैरुपेताः Sy.

५. निहन्तारः Sy.

६. अत एवार्योऽरेः शत्रोः Sy.

७. तैरस्मदीयैः स्तोतृभिः Sy.

८. ०वायु A.

९. घ्नतो M. हिंसन्तः Sy.

१०. भवेम Sy.

११. मभि० A.

१२. युद्धेभिः Sy.

१३. The reading is doubtful.

अस्मदीयैः पुरुषैः Sy.

१४. मित्रान् A.
शत्रुभटान् Sy.

१५. नियुत्वद्वायुदेवताके पशौ 'आ नो नियुद्भिः' इति हविषोऽनुवाक्या । सूत्रितञ्च—'आ नो नियुद्भिः शतिनीभिरध्वरं पीवोअन्नां रयिवृधः सुमेधाः' (ĀŚS. 3. 8.) इति । प्रथमे छन्दोमे प्रउगशस्त्रे वायवतृचस्यैषैव तृतीया । सूत्रितञ्च--'आ नो नियुद्भिः शतिनीभिरध्वरं प्र सोता जीरो अध्वरेष्वस्थात्' (ĀŚS. 8.9. इति Sy.

१६. The *Pratika* is supplied by the Editor. VM. does not explain the stanza VII 92.5. Sy. explains this stanza in the following manner: हे वायो ! नोऽस्माकमध्वरं हिंसारहितं यज्ञं शतिनीभिः शतसंख्यावतीभिः सहस्रिणीभिः सहस्रसंख्यावतीभिश्च नियुद्भिर्वडवाभिरुषा याहि । उपागच्छ । तदनन्तरमस्मिन् सवने प्रातःसवने मादयस्व सोमेन तृप्यस्व । अन्यद् गतम् ।

VII.93.

शुचिं नु स्तोमं नवजातमद्येन्द्राग्नी वृत्रहणा जुषेथाम् ।
उमा हि वां सुहवा जोहवीमि ता वाजं सद्य उशते धेष्ठा ॥ १ ॥

शुचिम्[1][2] । निरवद्यम्[3] । क्षिप्रम् । स्तोमम्[4] । नवजननम्[5] । अद्य । हे इन्द्राग्नी ! शत्रूणा हन्तारौ ! वेथाम्[6] । उभा[7] । हि[8] । वामहम् । स्वाह्वानौ[12] । भृशमाह्वयामि[13] । तौ[14] युवाम् । अन्नम्[15] । सद्य एव । कामय मानाय[16][17] मह्यम् । दातृतमौ[18] ।

ता सानसी शवसाना हि भूतं साकंवृधा शवसा शशुवांसा ।
क्षयंन्तौ रायो यवसस्य भूरेः पृङ्क्तं वाजस्य स्थविरस्य घृष्वेः ॥ २ ॥

ता सानसी[20][21] । तौ । सम्भजनीयौ[22] । बलमाचरन्तौ[23] । हि[24] । भवतम्[25] । सहवृद्धौ[26] । बलेन । वर्धमानौ

---

१. 'शुचिं नु' इत्यष्टर्चं चतुर्थं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमैन्द्राग्नम् । अनुक्रम्यते हि—'शुचि न्वष्टावैन्द्राग्नं तु' (KSA. 38. 93. p. 26.) इति । गतः सूक्तविनियोगः । ऐन्द्राग्नस्य पशोर्वपायाः 'शुचिम्' इत्येषा याज्या । सूत्रितञ्च—'शुचिं नु स्तोमं नवजातमद्य गोर्भिर्विप्रः प्रमतिमिच्छमानः' (ĀSS 3. 7.) इति Sy.

२. शुचि A.

३. शुद्धम् निरवद्यम् Sy. निर्दोषम् BB.

४. सोमं M. अस्मदीयं स्तोत्रम् Sy. स्तोत्रम् BB.

५. इदानीमुत्पन्नम् Sy. नवमभूतपूर्वं जातं जननमस्येति BB.

६. अस्मिन् काले Sy. अस्मिन्नहनि BB.

७. हे वृत्राणां शत्रूणां हन्तारौ ! Sy. वृत्रस्य पापस्य हन्तारौ ! युवाम् BB.

८. भवेथां M. सेवेथाम् is suggested for वेथाम् ।

९. उभौ Sy., BB.

१०. यस्मात् Sy. BB.

११. युवाम् BB.

१२. स्वां० A. सुखमाह्वातुं शक्यौ Sy. आहूय मानावप्यरोषौ BB.

१३. ०मां० A. पुनः पुनराह्वयामि । अत आगत्य सेवेथामित्यर्थः Sy. ईदृशौ वां युवां जोहवीमि भृशमाह्वयामि BB.

१४. तथाविधौ युवाम् Sy. तौ तादृग्गुणौ युवां यस्माज्जोहवीमि तस्मादिमं स्तोमं जुषेथाम् अस्मिन्निन्द्रियादिकं च धनम् BB.

१५. बलं वा ईदृशमन्नम् Sy.

१६. तदानीमेव शीघ्रम् Sy. तदानीमेव BB.

१७. कामयमानाय यजमानाय BB.

१८. कामयमानाय यजमानाय Sy.

१९. धातृतमौ भवतम् Sy. धातृतमौ । 'धानकर्मण दधातेस्तृचि BB.

This stanza=TS. 1. 1. 14. 1.

२०. हे इन्द्राग्नी ! Sy. २१. तादृशौ Sy.

२२. सर्वैः सम्भजनीयौ युवाम् Sy.

२३. शवो बलम् । तद्वदाचरन्तौ Sy.

२४. खलु Sy.

२५. बलमिव शत्रूणां भञ्जकावास्तामित्यर्थः Sy.

२६. वृद्धौ is missing in A. सहप्रवृद्धौ Sy

ईश्वरौ भवन्तौ । धनस्य । यवसस्य च । बहुनः । तथा सति सम्पर्चयतं प्रयच्छतं वा । अन्नम् । वृद्धम् । वर्षणशील शत्रूणामिति ।

उपो॑ ह॒ यद्वि॒दथं॑ वा॒जिनो॒ गुर्धीभिर्विप्राः॒ प्रम॑तिमि॒च्छमा॑नाः ।
अर्व॑न्तो॒ न काष्ठां॑ नक्ष॒माणा॒ इन्द्रा॑ग्नी॒ ओहु॑वन्तो॒ नर॒स्ते ॥ ३ ॥

उपो ह । उपगच्छन्ति । यदा । गृहम् । हविष्मन्तः । कर्मभिः । मेधाविनः । इन्द्राग्न्योः प्रमतिम् । इच्छमानाः । अश्वाः । इव । काष्ठाम् । व्याप्नुवानाः । तदानीमिन्द्राग्नी । भृशमाह्वयन्तो भवन्ति । ते । मनुष्या इति ।

गीर्भिर्विप्रः॒ प्रम॑तिमि॒च्छमा॑न॒ ईट्टे॒ र॒यिं य॒शसं॑ पू॒र्वभा॑जम् ।
इन्द्रा॑ग्नी वृत्रहणा सुवज्रा॒ प्र नो॒ नव्ये॑भिस्तिरतं दे॒ष्णैः ॥ ४ ॥

गीर्भिः । गीर्भिः । विप्रः । प्रमतिम् । इच्छमानः । याचते धनमिच्छति वा । यशसा युक्तम् । पूर्वमेव भजनीयम् । हे इन्द्राग्नी ! शत्रूणां हन्तारौ ! स्वायुधौ । प्रवर्धयतम् । अस्मान् । नोतरैः । धनैः ।

---

१. अन्नस्य Sy. २. व A. ३. बहुलस्य Sy.
४. ०प्रच्चय० A. संयोजयतम् । अस्मभ्यं प्रयच्छतम् Sy.
५. अन्नस्य 'क्रियाग्रहणमपि कर्तव्यम्' इति कर्मणः सम्प्रदानत्वाच्चतुर्थ्यर्थे षष्ठी । ईदृशमन्नम् Sy.
६. स्थूलस्य Sy.
७. घर्षण० is suggested for वर्षण० ॥ शत्रूणां घर्षकस्य Sy.
८. Sy. takes उपो as two words उप and उ He construes उप with गुः and उ as उ इति पूरकः ।
९. ये यजमानाः Sy.
१०. ग्रहम् A. विदन्ति जानन्ति देवांस्तत्र यष्टव्यत्वेनेति विदथो यज्ञस्तम् Sy.
११. कर्मभिर्बुद्धिभिर्वा Sy.
१२. प्रमतिम् M. प्रकृष्टां मतिमिन्द्राग्न्योरनुग्रहबुद्धिम् Sy.
१३. इच्छतः is suggested for इच्छमानाः ॥ आत्मन इच्छन्तः Sy. १४. यथा Sy.
१५. शीघ्रं युद्धभूमिं व्याप्नुवन्ति तथा Sy.
१६. ऐन्द्राग्नानि कर्माणि व्याप्नुवन्तः Sy.
१७. इन्द्रमग्निञ्च Sy.
१८. पुनः पुनराह्वयन्तो भवन्ति Sy.
१९ कर्मणां नेतारो जनाः Sy.
२०. अमावास्यापार्मेन्द्राग्नस्य हविषो 'गीर्भिः' इत्येषा याज्या । सूत्रितञ्च—'इन्द्राग्नी अवसा गतं गीर्भिर्विप्रः प्रमतिमिच्छमानः' (ĀŚS. 1. 6.) इति । ऐन्द्राग्ने पशौ पुरोडाशस्यैषैव याज्या । सूत्रं तूवाहृतम् Sy.
२१. स्तुतिभिः Sy. २२. मेधावी वसिष्ठः Sy.
२३. युवयोरनुग्रहबुद्धिम् Sy.
२४. इच्छ् is suggested for इच्छमानः ।
२५. युवां स्तौति Sy. २६. धनमुद्दिश्य Sy.
२७. पूर्वमेव सम्भजनीयम् Sy. २८. वृत्रस्य Sy.
२९. शोभनायुधौ Sy. ३०. ०यन्तम् A.
३१. नेतरैः M. नवतरैः is suggested for नोतरैः ॥ नवतरैः प्रशस्तैः Sy.
३२. वर्तव्यैर्धनैः Sy.

सं यन्महो मिथती स्पर्धमाने तनूरुचा शूरसाता यतैते ।
अदेवयुं विदथे देवयुभिः सत्रा हतं सोमसुता जनेन ॥ ५ ॥

सं यत् । सङ्गच्छते । महत्यौ । सयुज्यमाने । स्पर्धमाने । दीप्तशरीरे सेने । सग्रामे । तदानीमयजमानम् । देवयुवभि । हत सग्रामगृहे । तदेवाह सत्यमेव । हतम् । यजमानेन । जनेन चेति ।

इमामु षु सोमसुतिमुप न एन्द्राग्नी सौमनसाय यातम् ।
नू चिद्धि परिमन्नाथे अस्माना वां शश्वद्भिर्वृतीय वाजैः ॥ ६ ॥

इमामु षु । इमाम् । एव । अस्मदीयाम् । सोमसुतिम् । हे इन्द्राग्नी ! अस्मासु सौमनसं कर्तुम् । सुष्ठु । उपागच्छतम् । क्षिप्रम् । अस्मान् । परिमग्नाथे आत्मीया एत इति बुद्धि. परिमननम् । तथा सति । बहुभिः । अन्नै. । वाम् । आवर्तयेयम् ।

सो अग्न एना नमसा समिद्धोऽच्छा मित्रं वरुणमिन्द्रं वोचेः ।
यत्सीमागश्चकृमा तत्सु मृळ तदर्यमादितिः शिश्रथन्तु ॥ ७ ॥

सो अग्ने । स त्वम् । अग्ने ! अनेन । हविषा । समिद्धः । मित्रादीन् । अभिब्रूहि यदस्माकमभि-

---

१. ०ज्येतमा० A. परस्परं हिंसन्त्यौ । यद्वा मेथतिराक्रोशकर्मा परस्परमाक्रोशन्त्यौ Sy.
२. स्पर्धां कुर्वन्त्यौ Sy.
३. ०प्तः श० A.
४. देवायुवभिः A. ०युभिः is suggested for. ०युवभिः ।
५. हिंस्तम् Sy.
६. ०ग्रहे A.
७. सोममभिषुण्वता Sy.
८. यजमानसङ्गेन सोमसुतं जनं हिंस्तम् Sy.
९. VM. ignores यतैते ॥ Sy.'s commentary on this stanza is partly missing.
१०. अस्वदीया A.
११. सोमाभिषवक्रियाम् Sy.
१२. सुमनसो भावाय Sy.
१३. न Sy.
१४. परित्यज्य अन्यान्न मन्येथे । अस्मानेव सर्वदा बुध्येथे Sy.
१५. अन्नैर्हविर्लक्षणैः Sy.
१६. युवाम् Sy.
१७. ०र्तयेयम् म A. आवर्तयामि Sy.
१८. VM. ignores चित् and हि ॥ चिद् एव । हि यस्मादेवं तस्मात् Sy.
१९. अन्नेनास्मदीयेन हविषा Sy.
२०. ०न्धः A. सन्दीप्तः सन् Sy.
२१. आदि refers to वरुणम् and इन्द्रम् ।
२२. अभिब्रूयाः । अयमस्मदीयो रक्षणीय इति कथय Sy.

लषितम्[1]। यद्वयम्। सर्वतः। पापम्[2]। कृतवन्तः। तत्पापम्[3]। सुष्ठु[4]। सुखय। तयत्[5]। अर्यमा। अदिति-इत्यन्ये च मित्रादयः[6]। श्रथयन्तु।

एता अग्न आशुषाणास इष्टीर्युवोः सचाभ्यश्याम वाजान्।
मेन्द्रो नो विष्णुर्मरुतः परि ख्यन्यूयं पात स्वस्तिभिः सदा नः॥ ८॥

एताः। एताः[7]। इष्टीः[8]। अग्ने। व्यापयन्त[10]। अपि च ये स्वभूतान्यन्नानि[11]। सह। प्राप्नुयाम[12]। युवायोः[13] स्वभूतान्[14]। अस्मान्। इन्द्रादयः[15]। मा। परिख्यन्[16], परिख्यान[17] त्याग[18]।

VII.94.

इयं वामस्य मन्मन इन्द्राग्नी पूर्व्यस्तुतिः। अभ्राद्वृष्टिरिवाजनि॥ १॥

इयं वाम्[19]। इयम्। युवयोः[20]। अस्य[21]। स्तोतृ[22]। हे इन्द्राग्नी[23]! पूर्वस्तुतिर्मुख्ये काल प्रादुर्भूता स्तुतिः[24]। अभ्रात्[25]। वृष्टिरिव[26]। अजनि[27]।

---

१. सीमिति परिग्रहार्थीयः। सर्वतो वाङ्मनःकायैश्च Sy. २. अपराधम् Sy.
३. तस्मादागसः Sy. ४. अस्मान् सुष्ठु रक्ष Sy.
५. तद्यत् is suggested for तयत्॥ तच्चागः Sy. ६. अस्मत्तो वियोजयन्तु Sy.
७. इमाम् Sy. ८. इष्टिः A. यज्ञान् Sy.
९. उपलक्षणमेतत्। हे इन्द्राग्नी! Sy.
१०. व्यावयन्तो० A. आशु शीघ्रं सम्भजमाना भवम् Sy. ११. यो A.
१२. युगम् चैत्र Sy. १३. अभिप्राप्नुयाम् Sy.
१४. युवा यः युवयोः is suggested for युवायो।
१५. आदि refers to विष्णुः and मरुतः।
१६. परि परिख्य A.
१७. अस्मान् परित्यज्यान्यान् मा द्राक्षुः। सर्वदास्मानेव पश्यन्तु। अन्यद्गतम् Sy.
१८. त्यागं A.
१९. 'इयं वाम्' इति द्वाविंशर्चं पञ्चमं सूक्तं वसिष्ठस्यार्षमैन्द्राग्नम्। द्वादश्यनुष्टुप् शिष्टा गायत्र्यः। तथा चानुक्रान्तम् 'इयं वां द्वादशगायत्रमन्त्यानुष्टुप्' (K.SA. 38. 94. p. 26.) इति। ज्योतिष्टोमे प्रातःसवनेऽच्छावाकशस्त्र आदितो नवर्चः शस्यन्ते। सूत्र्यते हि—'इयं वामस्य मन्मन इति नव (ĀSS 5. 10) इति। आभिप्लविकेषूक्थ्येषु स्तोमेषु वृद्धावच्छावाकस्य प्रातःसवन इदंसूक्तमावापार्थमुत्तमावर्जम्। सूत्रितञ्च—'इयं वामस्य मन्मन इत्येकादश' (ĀSS 7. 5.) इति। चातुर्विंशिकेऽहनि प्रातःसवने तस्यैवाद्यस्तृचः। सूत्रितञ्च—'इयं वामस्य मन्मन इन्द्राग्नी युवामिमे' (ĀSS. 7. 2.) इति Sy.
२०. युवाभ्यां युवयोरर्थम् Sy.
२१. अस्माद्वसिष्ठात् Sy.
२२. स्तोतुः is suggested for स्तोतृ।
२३. ०ग्नि A.
२४. पूर्वस्तुस्तुति० A. मुख्या स्तुतिः Sy.
२५. मेघात् Sy. २६. वृष्टिरिव बह्वी सती Sy.
२७. प्रादुर्भूता। तां शृणुतमित्युत्तरत्र सम्बन्धः Sy.

शृणुतं जरितुर्हवमिन्द्राग्नी वनतं गिरः । ईशाना पिप्यतं धियः ॥ २ ॥

शृणुतम्[1] । शृणुतम्[1] न स्तोत्राह्वानम्[2] । इन्द्राग्नी । भजतम्[3] । स्तुतिः[4] । ईश्वरौ[5] । पूजयन[6] । कर्माणि[7] ।

मा पापत्वाय नो नरेन्द्राग्नी माभिशस्तये । मा नो रीरधतं निदे ॥ ३ ॥

मा पापत्वाय[8] । हे नरा[9] ! हे नेतारौ ! अस्मान्[10] । न । पापत्वाय[11] । विधेयान् कुरुतम्[12] । इन्द्राग्नी ! मा च । अभिशस्तये[13] । मा च । निन्दित्रे[14] शत्रवे ।

इन्द्रे अग्ना नमो बृहत्सुवृक्तिमेरयामहे । धिया धेना अवस्यवः ॥ ४ ॥

इन्द्रे[15] । वयमिन्द्राग्न्योः[16] । महत्[17] । हविः[18] । सुप्रवृत्तम्[19] । आभिमुख्येन प्रापयामः[20] । कर्मणा[21] । स्तुतीश्च[22] । रक्षणमिच्छन्तः[23] ।

---

१. युवां शृणुतम् Sy.

२. स्तोतृह्वा० A. VM. seems to explain जरितुः and हवम् together as स्तोत्राह्वानम् ॥ जरितुः स्तोतुर्हवमाह्वानम् Sy.

३. सम्भजतम् Sy.

४. स्तुतीः is suggested for स्तुतिः ॥ श्रुत्वा च तदीयाः स्तुतीः Sy.

५. ईश्वरी M. ईश्वरौ is suggested for ईश्वरौ । तथेशानेश्वरौ युवाम् Sy.

६. पूजायां M. पूरयतम् is suggested for पूजयन् । तत्स्थैः फलैः पूरयतम् Sy.

७. कर्मणि M. अनुष्ठितानि कर्माणि Sy.

८. पापत्वा० A.

९. हे नरा is missing in A.

१०. अस्मा M.

११. हीनभावाय Sy.

१२. ० यात् A. यशीकृतम् Sy.

१३. शत्रुभिः कृतायाभिशंसनाय Sy.

१४. शत्रवे Λ. निन्दकाय जनाय Sy.

१५. VM. explains नः once only.

१६. चातुर्विंशिकेऽहनि प्रातःसवनेऽच्छावाकस्य 'इन्द्रे अग्ना' इत्ययं षडहस्तोत्रियसंज्ञकस्तृचः । सूत्रितञ्च—'इन्द्रे अग्ना नमो बृहत्ता हुवे ययोरिदम्' (ĀŚS. 7. 2.) इति Sy.

१७. इन्द्रे Λ.

१८. VM. explains इन्द्रे and अग्ना together as इन्द्राग्न्योः ॥ इन्द्रे देवेऽग्नौ च Sy.

१९. बृंहणं वर्धकम् Sy.

२०. हविर्लक्षणमन्नम् Sy.

२१. सुप्रवृत्तां स्तुतिम् Sy.

२२. अभिप्रेरयामः Sy.

२३. कर्मणा युक्ताः Sy.

२४. अप्रगीताः स्तुतिवाचश्चाभिप्रेरयामः Sy. धेना वाङ्नामैतत् Ngh. 1. 11.

२५. रक्षणकामा वयम् Sy.

ता हि शश्वन्त ईळत इत्था विप्रास ऊतये । सबाधो वाजसातये ॥ ५ ॥

ता हि शश्वन्तः[1]। तौ[2]। हि[3]। बहवः। स्तुवन्ति। यथा वयमित्थम्[4]। मेधाविनः[5]। रक्षणाय। बाधात्सहिताः[6]। युद्धप्राप्तये[7] च।

ता वां गोभिर्विपन्यवः प्रयस्वन्तो हवामहे । मेधसाता सनिष्यवः ॥ ६ ॥

ता वाम्[8]। तौ। वाम्[9]। गीर्भिः। स्तोतारः। हविष्मन्तः। हवामहे[10]। यज्ञे[11]। धनकामाः[12]।

इन्द्राग्नी अवसा गतमस्मभ्यं चर्षणीसहा । मा नो दुःशंस ईशत ॥ ७ ॥

इन्द्राग्नी[13]। इन्द्राग्नी! रक्षणेन[14]। आगच्छतम्। अस्मदर्थम्[15]। हे शत्रूणां सोढारौ[16]! मा। अस्माकम्[17]। शत्रुः। ईशिष्ट[18]।

मा कस्य नो अरंरुषो धूर्तिः प्रणङ्मर्त्यस्य । इन्द्राग्नी शर्म यच्छतम् ॥८॥

मा कस्य[19]। मा। कस्यचिदपि[20]। अदातुः[21]। हिंसा[22]। अस्मान्[23]। प्राप्नोतु। मनुष्यस्य। तथास्माकं सुखम्। प्रयच्छतम्[24]। इन्द्राग्नी!

---

१. खलु Sy. २. अनेन प्रकारेण Sy.
३. मेधाविनो जनाः Sy.
४. बाधासहिताः is suggested for बाधात् सहिताः ॥ तथा समानं बाधमानाः परस्परं बाध्यमानाः जनाः Sy.
५. अन्नलाभाय । यद्वा वाजसातिरिति सङ्ग्रामनाम । सङ्ग्रामार्थम् Sy.
६. हे इन्द्राग्नी! तौ युवाम् Sy.
७. स्तुतिभिः Sy. ८. स्तोत्रमिच्छन्तः Sy.
९. हविर्लक्षणेनान्नेनोपेताः Sy.
१०. आह्वयामहे Sy.
११. मेधानां यागानां सातौ सम्भजने निमित्तभूते सति Sy.
१२. सनि धनमात्मन इच्छन्तो वयम् Sy.
१३. अमावास्यायामैन्द्राग्नस्य हविषः 'इन्द्राग्नी 'अवसा' इत्यनुवाक्या। सूत्रितञ्च—'इन्द्राग्नी अवसा गतं गीर्भिर्विप्रः प्रमतिमिच्छमानः' (ĀŚS 1. 6.) इति Sy.
१४. The *Pratīka* is supplied by the Editor.
१५. देयेनावसान्नेन सह Sy.
१६. अस्मभ्यं स्तोतृभ्यः Sy.
१७. हे चर्षणीनां मनुष्याणां शत्रुभूतानामभिभवितारौ! Sy. १८. अस्मान् Sy.
१९. दुष्टाभिशंसनः पारुष्यवादी शत्रुश्च Sy.
२०. इशिष्ट A. ईशत ईशिष्ट। अस्मान् बाधितुं (मा) शक्नोतु Sy.
२१. का A. २२. मस्यचिदपि A.
२३. अररुषः अरेर्मर्त्यस्य मनुष्यस्य सम्बन्धिनी Sy.
२४. भिः सा A.
२५. अस्मात् A.
२६. दत्तम् Sy.

गोमद्धिरण्यवद्वसु यद्वामश्वावदीमहे । इन्द्राग्नी तद्वनेमहि ॥ ९ ॥

उत्तरा निगदसिद्धेति—

[गोमत्]

यत्सोमं आ सुते नर इन्द्राग्नी अजोहवुः । समीवन्ता सपर्यवः ॥ १० ॥

यत् सोमे । यदा । सोमे । अभिषुते । मनुष्याः । इन्द्राग्नी ! भृशमाह्वयन्ति । अश्ववन्तः । पूजाकामाः पूर्वत्र वाक्यसमाप्तिः ।

उक्थेभिर्वृत्रहन्तमा या मन्दाना चिदा गिरा । आङ्गूषैराविवासतः ॥ ११ ॥

उक्थेभिः । शस्त्रैः । वृत्राणां हन्तारौ । यौ । स्तुत्या । मोदमानौ । आङ्गूढैः आ घोषैरुच्चैः शब्दितैः शस्त्रैः । आभिमुख्येन वसतोर्यजमानेषूत्तरत्र सम्बन्धः ।

---

१. The *Pratīka* is supplied by the Editor.
हे इन्द्राग्नी ! गोमद्गोभिर्युक्तं हिरण्यवद्धिरण्यैः सुवर्णैर्युक्तमश्वावदश्वैश्चोपेतं यद्वसु वां युवामीमहे याचामहे । तद्वसु युवयोः प्रसादाद्वयं वनेमहि सम्भजेमहि Sy.

२. चातुर्विंशिकेऽहनि प्रातःसवनेऽच्छावाकशस्त्रे—'यत्सोम आ सुते' इत्यारम्भणीयाहर्गणेषु च द्वितीयादिष्वहःस्वेषा प्रातःसवने तेनैव शंसनीया । सूत्रितञ्च—'यत्सोम आ सुते नर इत्यारम्भणीयाः शस्त्वा' (ĀSS. 7. 2.) इति Sy. ३. अहिषु० A. अभिषुते सति Sy.

४. कर्मणां नेतार ऋत्विजः Sy.

५. इन्द्रमग्निञ्च Sy.

६. अभिह्वयन्ते तदा युवामागच्छतमिति शेषः Sy.

७. अश्मवन्तो A. अश्ववन्तौ is suggested for अश्ववन्तः ॥ प्रशस्ताश्वौ Sy.

८. परिचरणकामाः सन्तः Sy.

९. उक्थैः Mah. उक्थैः स्तुतौ सन्तौ Sy.

१०. ०रा A. वृत्राणामावरकाणां हन्तृतमौ Sy. वृत्राणामावरकाणां पाप्मनां हन्तृतमौ Mah. वृत्रस्यातिशयेन हन्तारौ स्तः U.

११. यावाविवासतः परिचर्येते तौ युवामागच्छतमिति शेषः Sy. इन्द्राग्नी Mah., U.

१२. स्तोत्रात्मिकया स्तुत्या Mah. वाचा स्तुतौ U.

१३. ०वनमा० A. मोदमानौ स्वभावतः Mah. मोदमानौ स्तः U.

१४. आङ्गूषैः is suggested for आङ्गूढैः ।

१५. ०च्चेश० M. आघोषैरन्यैश्च स्तोत्रैः Sy. लौकिकवाक्यस्तोमैरपि स्तुतौ, आ आगच्छतः Mah. स्तोमैः स्तुतौ U. आङ्गूषः स्तोम आघोषः N. 5. 11.

१६. ०ख्यैन A.

१७. विवासतो य० or वसतो य० is suggested for वसतोर्य० ॥ परिचर्येते । व्यत्ययेन कर्मणि कर्तृप्रत्ययः Sy. आविवस्येते परिचर्येते यजमानैरिति शेषः । व्यत्ययेन कर्तरि लट् Mah. परिचरतः स्तोतॄन् तौ, उक्थैर्गिरः आङ्गूषैश्च स्तुमः सर्वकामाप्त्यर्थम् U. विवासतिः परिचर्यायाम् (N. 11. 23.)

१८. VM. ignores चित् ।
This stanza=YV. 33. 76.

ताविद्दुःशंसं मर्त्यं दुर्विद्वांसं रक्षस्विनम् ।
आभोगं हन्मना हतमुदधिं हन्मना हतम् ॥ १२ ॥

ताविद्दुःशंसम् । तौ । एव युवाम् । दुःशंसम् । मनुष्यम् । दुर्विद्वांसं दुर्बुद्धिमित्यर्थः । रक्षो बलं तद्वन्तम् । अभिभूय भोक्तारमिमम् । आयुधेन । हतम् । उदधिमिव धाम्, एनायासेन । हतमिति ।

VII.95.

प्र क्षोदसा धायसा सस्र एषा सरस्वती धरुणमायसी पूः ।
प्रबाबधाना रथ्येव याति विश्वा अपो महिना सिन्धुरन्याः ॥ १ ॥

प्र क्षोदसा । प्रसरस्यति । उदकेन वा । पानार्हेण सहिता । एषा । सरस्वती । धारयती लोकस्य ।

---

१. ताविद्दुः शंस A.

२. हे इन्द्राग्नी ! तौ युवाम् Sy.

३. दमुः शंसन् A. दुष्टाभिशंसनम् Sy.

४. मनुष्यन् A. शत्रुम् Sy.

५. ०द्धिमित्य० is suggested for ०द्धि-मत्य० ॥ दुर्विज्ञानम् Sy. ६. बलवन्तम् Sy.

७. आहृत्यास्मत्तोऽपहृत्य भोक्तारम् Sy.

८. हननसाधनेनायुधेन Sy. ९. हिंस्तम् Sy.

१०. उक्तमेवार्थं दृष्टान्तेन द्रढयति--उदधिम् । लुप्तोपममेतत् । उदधानं कुम्भमिव । यथा कुम्भोऽनायासेन भिद्यत एवमनायासेनैव शत्रु-मायुधेन युवां हिंस्तम् Sy.

११. घगाम् A. घटम् is suggested for घाम् ॥

१२. एनायसेन M. अना० is suggested for एना० ।

१३. 'प्र क्षोदसा' इति षड्चं षष्ठं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं सरस्वतीदेवताकम् । तृतीया तु सरस्व-देवताका । अनुक्रम्यते च—'प्र क्षोदसा षट् सारस्वतं तु तृतीया सरस्वतः' (KSA. 38. 95. p. 26.) इति । गतः सूक्तविनियोगः । प्रयमे छन्दोमे प्रउगशस्त्रे 'प्र क्षोदसा धायसा सस्र एषेति प्रउगम्' (ĀŚS. 8. 9.) इति । सारस्वते पशौ 'प्र क्षोदसा' इति वपाया याज्या । सूत्रितञ्च—'प्र क्षोदसा धायसा सस्र एषा पावीरवी कन्या चित्रायुः' (ĀŚS. 3. 7.) इति । .....सरस्वत्या एषा नदीवन्निगमा Sy. वाङ्नामान्युत्तराणि सप्तपञ्चाशत् । वाक् कस्मात् ? वचेः । तत्र सरस्वतीत्येतस्य नदी-वद्देवतावच्च निगमा भवन्ति N. 2. 23.

१४. ०रस्युति A. प्रसरति is suggested for प्रसरस्यति ॥ प्रधावति शीघ्रं गच्छति Sy.

१५. धारकेण Sy.

१६. दृश्यमाना नदीरूपा Sy

१७. स is written twice in A.

१८. धारयन्ती is suggested for धारयति ॥ धरुणम्—लिङ्गव्यत्ययः । धरुणा धारयित्री Sy.

लोकमयी च[1]। नगरीत्यौपमिकम्[2]। प्रकर्षेण बध्नन्त्यात्मन्येकीकुर्वन्ति[3]। राजमार्गवत्[4]। गच्छति। सर्वाण्येव[5] अन्यानि। उदकानि[6]। महत्त्वेन[7] प्रवाहधाना[8]। सिन्धुरिति[9]।

एकाचेत्तत्सरस्वती नदीनां शुचिर्यती गिरिभ्य आ समुद्रात्।
रायश्चेतन्ती भुवनस्य भूरेर्घृतं पयो दुदुहे नाहुषाय ॥ २ ॥

एकाचेतत्[11]। एका[12]। बुबुधे[13]। सरस्वत्येव[14]। नदीना[15] मध्ये। शुचिः[16]। गच्छन्ती। पर्वतेभ्यो[17] निस्सृता। यावत्[18] पश्चिमं समुद्रम्[19]। धनम्[20]। बहु। प्रज्ञापयन्ती[21]। भुवनस्य[22] गौर्भूत्वा[23]। घृतम्। पयश्च। दुदुहे[25]। नहुषपुत्राय[26] नाहुषोक्त वचन नान्याः शुश्रुवुर्नद्यः[27] सरस्वती तु शुश्रावेति[28]।

---

१. लोहम० is suggested for लोकम०।
२. ०यो य च Λ. अयसा निर्मिता Sy.
३. पुरीव Sy.
४. ०न्तीन्ति Λ ०न्ती is suggested for ०न्ति।
५. प्रतोलीव विस्तीर्णा सती. .यद्वा रथ्येव रथिनेव यथा रथी रथेन मार्गस्थं तरुगुल्मादिकं चूर्णीकृत्य गच्छति तद्वत् स्वकीयेन वेगेन सर्वं सम्पिषती गच्छतीत्यर्थः Sy.
६. सर्वाः Sy. ७. आपगाः Sy.
८. महिम्ना Sy.
९. स्यन्दनशीला नदीरूपा सा Sy.
१०. सारस्वत एव पशौ वपायाः 'एकाचेतत्' इत्यनुवाक्या। सूत्रितं च—'एकाचेतत्सरस्वती नदीनामुत स्या नः सरस्वती जुषाणा'(ĀŚS.3.7.) इति सहस्रसंवत्सरेण क्रतुना यक्ष्यमाणो नाहुषो नाम राजा सरस्वतीं नदीं प्रार्थयामास। सा च तस्मै सहस्रसंवत्सरपर्याप्तं पयो घृतञ्च प्रवव्रौ। अयमर्थोऽत्र प्रतिपाद्यते Sy. DDN. adds वसिष्ठस्त्रिष्टुभा सरस्वतीं तुष्टाव before Sy.'s quotation.
११. ०तम् Λ.
१२. एकां Λ.
१३. नाहुषस्य प्रार्थनामज्ञासीत् Sy, नाहुषस्य प्रार्थनामचेतीत्। 'चिती संज्ञाने' DDN.
१४. सरस्वती नदी Sy. DDN.
१५. नदीनामन्यासां मध्ये Sy., DDN.
१६. शुद्धा Sy. पवित्रा DDN.
१७. गिरिभ्यः सकाशात् Sy., DDN.
१८. ०मां Λ. समुद्रपर्यन्तम् Sy, DDN.
१९. धनानि Sy., DDN.
२०. बहुलस्य Sy., DDN.
२१. प्रयच्छन्ती Sy., DDN.
२२. भूतजातस्य Sy., DDN.
२३. गोः भूत्वा Λ.
२४. सहस्रसंवत्सरपर्याप्तम् Sy., DDN.
२५. दुग्धवती, दत्तवती Sy., DDN.
२६. न भूषु० M. नाहुषाय राज्ञे Sy., DDN.
२७. ०श्रुवन्नद्यः Λ.
२८. 'तत्र सरस्वतीत्येतस्य नदीवद्देवताऽऽख्या च निगमा भवन्ति' (N. 2. 23.) इत्युक्तत्वादत्र सरस्वती नदीवत् स्तूयते DDN.

शौनकः—

राजा वर्षसहस्राय वीक्षिष्यन्नाहुषः[1] पुरा ।
चचारैकरथेनेमां[2] वदन् सर्वाः समुद्रगाः ॥
यक्ष्ये वहत मा[3] सर्वा द्वन्द्वशो वाथवैकशः[4] ।
प्रत्यूचुस्तं नृपं नद्यः स्वल्पवीर्याः[5] कथं वयम् ॥
वहेम सर्वान् भोगांस्ते[6] सत्रे वार्षसहस्रिके[7] ।
सरस्वती प्रपद्यस्व सा त्वा वक्ष्यति नाहुष[8] ! ॥
तथेत्युक्त्वा जगामाश्वामापगां[9] च सरस्वतीम् ।
प्रतिजग्राह सा चैनं पयः सर्पिश्च दुह्यती[10] ॥
एतदत्यद्भुतं[11] कर्म सरस्वत्या नृपं प्रति ।
वारुणिः[12] कीर्तयामास सूक्तस्यास्य द्वितीयया[13] ॥ इति[14] ।

स वावृधे नर्यो योषणासु वृषा शिशुर्वृषभो यज्ञियासु ।
स वाजिनं मघवद्भ्यो दधाति वि सातये तन्वं मामृजीत ॥ ३ ॥

[15]स वावृधे[16] । स[17] सरस्वान् । वावृधे[18] । नृहितः । नदीषु[19] । पुमान्[20] । शिशुः । सेक्ता[21] । यज्ञार्हासु[22] ।

---

१. वीक्षिष्यन् DDN.
२. ०रेकरथेनेथमां A. ०रथेनेताम् DDN.
३. मा सर्वान् M. 'मे भोगान्,, द्वन्द्वशोऽप्यथवैकशः DDN.
४. ०ल्पा A.
५. भोगान् सर्वांस्ते यज्ञे वर्षसहस्रके DDN.
६. पार्ष० A.
७. नहुष A. सा ते वक्ष्यति DDN.
८. जगामाशु श्रा० is suggested for जगामाश्वामा० ॥ जगामाथ पावनीं स सरस्वतीम् । सा चैनं प्रति जग्राह DDN.
९. पय सर्पिश्चश्च A.
१०. दुह्वती A. दुह्वती M. दुदुहे च पयोघृतम् ॥२३॥ DDN.
११. ०त्यद्भु० A.
१२. ०णो A.
१३. प्रथमस्य द्वितीयया Sy. DDN.
१४. इति is omitted by M. BD. VI. 20—24.
१५. सरस्वद्देवताके पशौ 'स वावृधे' इति पुरोडाशस्य याज्या । सूत्रितञ्च—'स वावृधे नर्यो योषणासु यस्य व्रतं पशवो यन्ति सर्वे' (ĀŚS. 3. 8.) इति Sy.
१६. स is omitted by A.
१७. ववृधे वर्धते Sy.
१८. योषित्स्वात्मनः कलत्रभूतासु मध्यमस्थानास्वप्सु मध्ये Sy.
१९. पुमां श्चिच्छुः A. सेचनसमर्थः Sy.
२०. अल्पः प्रादुर्भावसमयेऽल्पत्वया दृश्यमानः Sy.
२१. वर्षिता Sy.
२२. ०र्हाः सु M.

सः[1] । बलिनम्[2] । हविष्मभ्यम्[3] । प्रयच्छति[4] । विशोधयतु[5] । सोऽस्मदीयां तनुम्[6] । लाभाय[7] । संश्यतु[8] ।

उत स्या नः सरस्वती जुषाणोप श्रवत्सुभगा यज्ञे अस्मिन् ।
मितज्ञुभिर्नमस्यैरियाना राया युजा चिदुत्तरा सखिभ्यः ॥ ४ ॥

उत स्या[9] । अपि च । सा । सरस्वती । अस्मान्[10] । सेवमाना[11] । स्तुतीरुपश्रृणोतु[12] । सुधना[13] । अस्मिन् यज्ञे । प्रमाणार्थं[14] मितजानुकैः । नमस्कारं[15] कुर्वद्भिः । अभिगम्यमाना[16] । धनेन[17] । सहायवर्गेण[18] सहायवर्षेण[19] च । अन्याभ्यो नदीभ्यः सखिभ्यः । उत्कृष्टो[20] स्तोतृभ्यो वा सुप्रशस्तेति ।

इमा जुह्वाना युष्मदा नमोभिः प्रति स्तोमं सरस्वति जुषस्व ।
तव शर्मन्प्रियतमे दधाना उप स्थेयाम शरणं न वृक्षम् ॥ ५ ॥

इमा[21] जुह्वानाः[22] । इमानि हवीषि[23] । जुह्वाना[24] वयम् । भवाम[25] नमस्कारैः[26] । प्रतिसेवस्व[27] त्वम् । स्तोमम्[28] ।

---

१. तादृशः सरस्वान् Sy. २. पुत्रम् Sy.
३. ०ष्मद्भ्यः is suggested for ०ष्मभ्यम् ॥ हविष्मद्भ्यो यजमानेभ्यः Sy.
४. ददाति Sy.
५. ०यितु A.
६. तनूं A. तेषां शरीरम् Sy.
७. लाभार्थम् Sy.
८. संश्यतु ॥ 'शो तनूकरणे' ॥ विमार्ष्टि । लाभार्थं संस्करोतीत्यर्थः । यद्यप्येषा सरस्वतः स्तुतिस्तथापि सरस्वत्याः प्रीणनार्थं तत्सवनमिति छान्दोमिके सारस्वते तृचेऽस्या उक्तो विनियोगो न विरुध्यते Sy.
९. दशरात्रेऽष्टमेऽहनि प्रउगे 'उत स्या नः' इति सारस्वतः सप्तमस्तृचः । सूत्रितञ्च—'उत स्या नः सरस्वती जुषाणेति प्रउगम्' (ĀŚS. 8. 10) इति । सारस्वते पशौ पुरोडाशस्य 'उत स्या नः' इत्यनुवाक्या । सूत्रितञ्च—'उत स्या नः सरस्वती जुषाणा सरस्वत्यभि नो नेषि वस्यः' (ĀŚS. 3. 7.) इति Sy.
१०. अस्माकम् Sy.
११. प्रीयमाणा Sy.
१२. इवभृ० A.
१३. शोभनधना Sy.
१४. प्रणामार्थं is suggested for प्रमाणार्थं ॥ प्रह्वैर्जानुभिः Sy.
१५. नमस्कारैः Sy.
१६. अभि is omitted by A. देवैरियाना उपगम्यमाना Sy.
१७. धनेन सङ्गता Sy.
१८. सहायवर्गय A. This seems to be redundant. नित्ययुक्तेन Sy.
१९. चिच्छब्दश्चार्थे Sy.
२०. ०ष्ट M. ०ष्टा is suggested for ०ष्टो ॥ उत्कृष्टतरा । ईदृशी । अस्मदीयाः स्तुतीरुपश्रृणोत्वित्यन्वयः Sy.
२१. पवित्रेष्टयां सारस्वतस्य हविषः 'इमा जुह्वानाः' इति याज्या । सूत्रितञ्च—'इमा जुह्वाना युष्मदा नमोभिर्दधिक्राव्णो अकारिषम्'(ĀŚS, 2. 12.) इति Sy.
२२. ०नां A.
२३. अस्मदीयानि हवींषि Sy.
२४. तुभ्यं जुह्वतो वयम् Sy.
२५. ०म यि A.
२६. त्वद्विषयैर्नमस्कारैः Sy.
२७. अस्मदीयं स्तोत्रम् Sy.

सरस्वति ! तव[1] । सुखे । प्रिये[2] । निधीयमानाः[3] त्वामुपस्थेयाम[4] । प्रतिश्रयभूतं[5] महान्तम् । इव । वृक्षम्[6] ।

अयमु[7] ते सरस्वति[8] वसिष्ठो द्वारावृतस्य[9] सुभगे व्यावः[10] ।
वर्धा[11] शुभ्रे स्तुवते[12] रासि[13] वाजान्युर्यं पांत स्वस्तिभिः[14] सदा नः ॥ ६ ॥

अयमु ते । अयम् । उ[15] । ते[16] । सरस्वति ! वसिष्ठः । ऋतस्य यज्ञस्य[17] पूर्वापरौ । व्यावः[18] । द्वारौ संस्तपयागार्थम्[19] । सुभगे ! वर्धं[20] । शोभमाने ![21] स्तुवते[22] च । प्रयच्छ[23] । अन्नानीति[24] ।

VII 96.

बृहदु[25] गायिषे[26] वचोऽसुर्यां[27] नदीनाम्[28] ।
सरस्वतीमिन्महया सुवृक्तिभिः स्तोमैर्वसिष्ठ[29] रोदसी ॥ १ ॥

बृहदु[30] गायिषे[31] । हे वसिष्ठ ! महत् । वर्चस्त्वम्[32] । ब्रवीषि[33] । बलवती[34] । नदीनां[35] सरस्वतीति ताम् ।

---

१. त्वदीये Sy.
२. वयञ्चातिशयेन प्रिये Sy.
३. ०नां त्वां M.
४. त्वामुपतिष्ठेम सङ्गच्छेमहि Sy.
५. आश्रयभूतम् Sy.
६ VM. ignores युष्मत् and आ ॥ युष्मत् सकाशात् । आ । उपसर्गश्रुतेर्योग्यक्रियाध्याहारः । आददीमहि धनानीति शेषः Sy.
७. उ इति पूरकः Sy.
८. त्वां यन्तुः Sy.
९. यज्ञस्य सम्बन्धिन्यौ पूर्वापरे Sy.
१०. ह्याव A. विवृणोति Sy.
११. सप्तप A. संस्तव० is suggested for संस्तप० ।
१२. हे शोभनधने Sy.
१३. वर्धस्व Sy.
१४. हे शुभ्रवर्णे ! देवि ! Sy.
१५. स्तोत्रं कुर्वते वसिष्ठाय Sy.
१६. न च A. १७. प्रदेहि । अन्यद् गतम् Sy.
१८. अन्नानिति M.
१९. 'बृहदु गायिषे' इति षड्चं सप्तमं सूक्तं वसिष्ठस्यार्षम् । आद्या बृहती द्वितीया सतोबृहती तृतीया प्रस्तारपङ्क्तिः शिष्टास्तिस्रो गायत्र्यः । आद्यस्तृचः सरस्वतीदेवताकोऽन्त्यश्च सरस्वद्देवताकः । तथा चानुक्रान्तम्—'बृहद् प्रगाथः प्रस्तारपङ्क्तिः परास्तिस्रो गायत्र्यः सरस्वतः' (KSA. 38. 96. p. 27.) इति । पञ्चमेऽहनि प्रउगशस्त्र आद्यः प्रगाथः सरस्वतस्तृचः । सूत्रितं च—'बृहदु गायिष इति बार्हतं प्रउगं प्रगाथानेके' (ASS. 7. 12.) इति । .... अनर्वाक्तनमात्मानं सम्बोध्य सरस्वत्याः स्तुतौ प्रेरयति Sy.
२०. गाधिषे A.
२१. वच्च० A. वचः is suggested for वर्च० ॥ स्तोत्रम् Sy.
२२. गायसि Sy.
२३. असुर्या—असुराशब्दाच्चतुर्थ्येकवचनस्य ङयादेशः । असुरायै बलवत्यै नदीरूपायै सरस्वत्यै । अस्याः प्रीणनार्थमित्यर्थः Sy.
२४. नदीनां मध्ये Sy.

एव । सरस्वतीम् । पूजय । स्तुतिभिः । सुप्रवृक्ताभिर्वसिष्ठ ! द्यावापृथिव्योरुपश्रृण्वतोः ।

उभे यत्ते महिना शुभ्रे अन्धसी अधिक्षियन्ति पूरवः ।
सा नो बोध्यवित्री मरुत्सखा चोद राधो मघोनाम् ॥ २ ॥

उभे यत्ते । उभे । यस्याः । ते । महत्त्वेन । हे शोभमाने ! अन्ने दिव्य पार्थिव च यद्वा कृष्टपच्य अकृष्टपच्यं च । अधिगच्छन्ति । मनुष्याः । सा । अस्माकम् । बुध्यस्व अ वित्री भवामीति । यस्यास्ते मरुतः सखायः । चोदय । धनम् । हविष्मताम् ।

भद्रमिद्भद्रा कृणवत्सरस्वत्यकवारी चेतति वाजिनीवती ।
गृणाना जमदग्निवत्स्तुवाना च वसिष्ठवत् ॥ ३ ॥

भद्रमित् । भद्रम् । एव । भद्रा । कृणोतु । सरस्वती । अकुत्सितगमना । बुध्यवताम् । अन्नवती । स्तूयमाना । जमदग्निनेवर्षिणा । तथा यथा वसिष्ठ स्तौति तद्वत् । च । स्तूयमानेत्यात्मानं परोक्षमाह ।

---

१. पूजय । सर्वदा सरस्वतीमेव स्तुहि नान्यां देवतामिति भावः Sy.
२. स्तोत्रैः Sy.
३. सुवृक्तिभिः सुष्ठु दोषवर्जितैः Sy.
४. द्यावापृथिव्योः स्थितां दिवि देवतारूपेण भूम्यां वाग्रूपेण निवसन्तीम् Sy.
५. ०भृण्वत्योः is suggested for ०भृण्वतोः ।
६. VM. ignores उ ॥ उ एव Sy.
७. य धते A.
८. उभ A. उभयविधं दिव्यं पार्थिवं चाग्निं ग्राम्यमारण्यं वा Sy.
९. तव Sy.
१०. महिम्ना Sy.
११. हे शुभ्रवर्णे ! सरस्वति ! Sy.
१२. अन्नैः A.
१३. चाकृष्टपच्यं is omitted by A.
१४. पूरवः पूरयितव्याः मनुष्याः Sy.
१५. सा त्वम् Sy.
१६. अस्मान् Sy.
१७. बुध्यास्व A.
१८. रक्षित्री सती Sy.
१९. अपि च मरुत्सखा-मरुतो माध्यमिका देवगणाः, ते सखायो यस्याः माध्यमिकाया वाचस्तादृशी त्वम् Sy.
२०. प्रेरय Sy.
२१. हविर्लक्षणधनोपेतानाम् Sy.
२२. कल्याणम् Sy.
२३. भद्रं A. कल्याणी भजनीया वा Sy.
२४. अस्माकं करोतु Sy.
२५. ०स्वत्यः कुत्सि० A.
२६. बुध्यताम् is suggested for बुध्यवताम् ॥ चेतयतु, अस्मान् प्रज्ञापयतु । यद्वा मदीयं स्तोत्रं चेतति जानातु Sy.
२७. ०दग्नीग्नि० A.
२८. ०णो A. जमदग्निनर्षिणेव मया Sy.
२९. वसिष्ठवत्-अर्हार्थे वतिप्रत्ययः । वसिष्ठार्हं वसिष्ठस्यानुरूपम् Sy.
३०. स्तूयमाना च भवं Sy.

जनीयन्तो न्वग्रवः पुत्रीयन्तः सुदानवः । सरस्वन्तं हवामहे ॥ ४ ॥

जनीयन्तः । जायामात्मन इच्छन्तः । क्षिप्रम् । गमनशीलाः । पुत्रीयन्तश्च वयम् । शोभनदानाः । सरस्वन्तम् । हवामहे ।

ये ते सरस्व ऊर्मयो मधुमन्तो घृतश्चुतः । तेभिर्नोऽविता भव ॥ ५ ॥

ये ते सरस्वः । ए । ते । सरस्वः । ऊर्मय सिन्धुरूपस्य । मधुरसवन्तः । उदकच्युतः । तेभिः । नः । अविता । भव ।

पीपिवांसं सरस्वतः स्तनं यो विश्वदर्शतः । भक्षीमहि प्रजामिषम् ॥ ६ ॥

पीपिवांसम् । वर्धमानम् । सरस्वतः । स्तनम् । भजामहे । प्रजाम् । अन्नं च ततो धुक्षीमहीत्यर्थः ।

---

१. सरस्वद्देवताके पशौ 'जनीयन्तः' इति तिस्रः पुरोडाशहविषां क्रमेणानुवाक्याः । सूत्रितञ्च—'जनीयन्तो न्वग्रवः । इति तिस्रो दिव्यं सुपर्णं वायसं बृहन्तम्' ĀŚS. 3. 8.) इति Sy. २. जायमा० A. जायन्त आस्वपत्यानीति जनयो जायाः । ता इच्छन्तः Sy. ३. अद्य Sy. ४. अङ्गन० A. उपगन्तारो वयम् Sy. ५. पुत्रान् कामयमानाः Sy. ६. देवम् Sy. ७. हवामहे स्तुमहे । आह्वयामहे वा Sy. ८. वसिष्ठस्यार्षम् Dur. वसिष्ठस्य SKN. ९. ये is suggested for ए । १०. त्ववीया Sy. तव BB. ११. हे सरस्वन् देव ! Sy. सरस्वन् ! उदकवन् ! BB. हे भगवन् ! सरस्वन् ! Dur. १२. ०स सिन्धू० A. जलसङ्घाः Sy. उदकसङ्घाताः BB. कल्लोला उदकस्य सामर्थ्यात् SKN. यैरूर्णोषि नभो मेघैश्छादयसि Dur. १३. ०वत्त A. रसवन्तः Sy. मधुररसाः BB. उदकवन्तः Dur. स्वादयुक्ताः SKN. १४. घृतस्य वृष्टेरुदकस्य क्षारिणो भवन्ति Sy. उदकं क्षारयन्त्यः । यद्वा ऊर्मयोऽरणशीला गावो मधुमन्तो घृतश्चुतः BB. घृतवन्त उदकप्रक्षराः Dur. घृतमिव क्षरितारः । अथवा ऊर्णोतेरूर्मयो मेघाः । ये ते तव हे सरस्वन् ! ऊर्मय आच्छादयितारोऽनर्थानामभावहेतवः कृत्स्नस्य नभसो मेघाः, मधुमन्तो मधूदकवन्तः । घृतमित्युदकनाम । उदकस्य क्षरितारः SKN. १५. तेभिन् A. तैः is suggested for तेभिः ॥ तैरूर्मिभिः Sy. १६. अस्माकम् Sy., Dur., SKN. १७. अपिता A. रक्षिता Sy. तर्पयिता Dur. वर्धिता रक्षिता वा SKN. १८. भवेत्येतदाशास्महे Dur. N. 10. 24, SKN. IV. 28. This stanza=TS. 3. 1. 11. 3. १९. अन्वारम्भणीयायां सरस्वतो यागस्य 'पीपिवांसम्' इत्यनुवाक्या । सूत्रितञ्च—'पीपिवांसं सरस्वतो दिव्यं सुपर्णं वायसं बृहन्तम्' (ĀŚS. 2. 8.) इति Sy. २०. वीचीवांसं A. २१. प्रवृद्धम् Sy. वर्धितवन्तम् ।....वर्धयन्तमित्यर्थः BB. २२. देवस्य Sy. सरस्वान्वाग्देवताविशेषस्तस्य BB. २३. शब्दायमानं स्तनवद्रसाधारं वा मेघम् Sy. स्तनस्थानीयं यागं, यथा स्तनो बालान् वर्धयति, एवं सर्वलोकं वर्धयन्तम् BB. २४. भजेमहि प्राप्नुयाम Sy. २५. पुत्रादिरूपाम् Sy. वयमपि प्रजां पुत्रादिकाम् BB. २६. सरस्वतः प्रसादाद्भक्षीमहि Sy. तस्याश्च जीवनार्थमिषमन्नं च BB.

यः स्तनः । विश्वेषां दर्शनीयः ।

VII. 97.

यज्ञे दिवो नृषदने पृथिव्या नरो यत्र देवयवो मदन्ति ।
इन्द्राय यत्र सवनानि सुन्वे गमन्मदाय प्रथमं वयश्च ॥ १ ॥

यज्ञे ॥ ऐन्द्राग्न्याद्या सूक्तं बार्हस्पत्यमन्त्यैन्द्री च ॥ यज्ञे । दिव आगत्य निषीदतु । पृथिव्याः । नृषदने मनुष्याणा सदनस्थाने तदेवाह । नर ऋत्विजः । यस्मिन् यज्ञे । देवकामा । मदन्ति । इन्द्राय । यस्मिन् यज्ञे । त्रीणि सवनानि । सुषुविरे । तत्रेन्द्रो मदाय । गच्छतु । प्रथममेव । तस्याश्चा । वा गच्छन्तु ।

आ दैव्या वृणीमहेऽवांसि बृहस्पतिर्नो मह आ सखायः ।
यथा भवेम मीळ्हुषे अनागा यो नो दाता परावतः पितेव ॥ २ ॥

आ दैव्या । आवृणीमहे । दैव्यानि । रक्षणानि । बृहस्पतिः । अस्मान् । आ पूजयति । हे सखायः !

---

१. यस्तनः A.

२. ०यं A. विश्वैः सर्वैर्दर्शितो भवति दृश्यमानो भवति । तं स्तनं मेघमित्यर्थः Sy. विश्वं दर्शनीयं यस्य । दृशेरौणादिकोऽतच्प्रत्ययः । तावृशो योऽसौ सरस्वांस्तस्य स्तनस्थानीयं विश्वं वर्धयितुं पर्याप्तं यागम् BB.
This stanza=TS. 3. 1. 11 2.

३ 'यज्ञे दिवः' इति दशर्चमष्टमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभम् । प्रथमैन्द्री तृतीयानवम्योरिन्द्राबार्हस्पत्यौ देवता दशम्या इन्द्राबृहस्पती शिष्टानां तु बृहस्पतिः । तथा चानुक्रान्तम्–'यज्ञे दशैन्द्रयादि बार्हस्पत्यमन्त्यैन्द्री च तृतीयानवम्यावैन्द्राबार्हस्पत्ये (KSA. 38. 97. p. 27) इति । आभिप्लविकेषूक्थ्येषु तृतीयसवने स्तोमवृद्धौ ब्राह्मणाच्छंसिन इदमुत्तरं च सूक्तमावापार्थम् । सूत्रितञ्च—'यज्ञे दिवः' (ĀŚS. 7. 9.) इति Sy. ४. ०न्द्राश्चाद्या A.

५. ०त्यैन्द्रि च A. Cf KSA. 38. 97. p. 27.

६. बीप A. द्युलोकात् Sy.

७ पृथिव्या सम्बन्धिनि Sy.

८. नृणां नेतृणां सदनभूते तस्मिन् यज्ञे Sy.

९. नरर्त्विजः A. नेतार ऋत्विजः Sy.

१० देवान् कामयमानाः Sy.

११. हृष्यन्ति Sy. १२. इन्द्रार्थम् Sy.

१३. अभिषोतव्याः सोमाः Sy. १४. अभिभूयन्ते Sy. १५. मदार्थम्, सोमं पातुमित्यर्थः Sy. १६. आगच्छत् Sy.

१७. सर्वेभ्यो देवेभ्यः पूर्वम् Sy.

१८. अश्वाः is suggested for अश्वाः ॥ गन्तारस्तदीया अश्वाश्च Sy.

१९. व A. आगच्छन्तु Sy.

२०. अभिभजामहे प्रार्थयामहे Sy.

२१. देवसम्बन्धीनि Sy.

२२. बृहतां पालयिता देवः Sy.

२३. अस्माकं हविः Sy.

२४. आ महे-महतिर्दानार्थः । आमहते आदत्त 'लोपस्त आत्मनेपदेषु' इति तलोपः Sy.

२५. हे समानस्थानाः ! स्तोतारो वयम् Sy.

यथा। भवेम वयम्[1]। कामाना सेक्त्रे। अनागसः। यः। अस्मान्। दाता परावतो दूरात्। पितेवागच्छति।

तमु ज्येष्ठं नमसा हुविर्भिः सुशेवं ब्रह्मणस्पतिं गृणीषे।
इन्द्रं श्लोको महि दैव्यः सिषक्तु यो ब्रह्मणो देवकृतस्य राजा॥ ३॥

तमु। तम्। एव। ज्येष्ठम्[10]। नमस्कारेण[11]। हविर्भिश्च[12]। सुसुखम्। ब्रह्मणस्पतिम्[13]। स्तुहि[14]। इन्द्र च[15]। श्लोकः[16]। महान्तम्[17]। देवाहेः[18]। सेवताम्[19]। यः[20]। अन्नस्य[21]। देवैरुत्पादितस्य सर्वस्य राजा[22]।

स आ नो योनिं सदतु प्रेष्ठो बृहस्पतिर्विश्ववारो यो अस्ति।
कामो रायः सुवीर्यस्य तं दात्पर्षन्नो अति सश्चतो अरिष्टान्॥ ४॥

स आ नः। सः। अस्माकम्। बर्हिः[23]। आसीदतु[24]। प्रियतमः। बृहस्पतिः[25]। विश्ववैवरणीयः[26]। यः भवति। सुवीर्यस्य[27]। धनस्य। योऽस्माकं कामः[28]। तम्[29]। प्रयच्छतु[30]। अतिपारयतु[31]। नः[32]। शत्रुभिः[33] संसक्तान्। अहिंसितानेव[34]।

---

१. यथा वयं भवेम तथा यूयं परिचरतेति शेषः Sy.
२. बृहस्पतये Sy.
३. अनपराधाः Sy.
४. बृहस्पतिः Sy.
५. अस्मभ्यम् Sy.
६. दाता भवति Sy.
७. वरा० A. दूरदेशाद्धनान्याहृत्य Sy.
८. पुत्रेभ्यः पितेव Sy.
९. देवम् Sy.
१०. प्रशस्यतमम् Sy.
११. ०मस्कारे० A.
१२. चरुपुरोडाशादिभिश्च सार्धम् Sy.
१३. ब्रह्मणो मन्त्रस्य पतिं पालयितारमेतत्संज्ञम् S.
१४. गृणे स्तुव Sy.
१५. इन्द्रश्च A.
१६. अस्मदीयः स्तावको मन्त्रः Sy.
१७. रूपि च महान्तम् Sy.
१८. सेवन्ताम् A.
१९. य इन्द्रो ब्रह्मणस्पतिर्वा Sy.
२०. अन्नस्य मन्त्रस्य वा Sy.
२१. देवैः स्तोतृभिः कृतस्य Sy.
२२. ईश्वरो भवति। तमिन्द्रं तं ब्रह्मणस्पतिमिति सम्बन्धः Sy.
२३. बर्हिः A. स्थानं वेदिलक्षणम् Sy.
२४. आगत्योपविशतु Sy.
२५ बृहस्पतिः Sy.
२६. वीर्यस्य A. शोभनवीर्यस्य Sy.
२७. अपि च धनस्य Sy.
२८. अभिलाषोऽस्ति Sy.
२९. कामम् Sy.
३०. अस्मभ्यं ददातु। काम्यमानं प्रयच्छत्विस्यर्थः Sy.
३१. इति वार० A. अतिपारयति शत्रून् Sy.
३२. अस्मान् Sy.
३३. उपद्रवैः Sy.
३४. अहिंसितान् कृत्वा Sy.

तमा नो अर्कममृताय जुष्टमिमे धासुरमृतासः पुराजाः ।
शुचिक्रन्दं यजतं पस्त्यानां बृहस्पतिमनर्वाणं हुवेम ॥ ५ ॥

तमा नः । तत् । अन्नम् । अस्मभ्यम् । आप्रयच्छन्तु । अमरणाय । पर्याप्तम् । इमे । देवाः । पुराणाः । शुद्धस्तोत्रम् । यष्टव्यम् । गृहाणाम् विश पस्त्या इति च ब्राह्मणम् । बृहस्पतिम् । आप्रत्युतमन्यस्मिन् । भूमयः ।

तं शुग्मासो अरुषासो अश्वा बृहस्पतिं सहवाहो वहन्ति ।
सहस्रियस्य नीलवत्सधस्थं नभो न रूपमरुषं वसानाः ॥ ६ ॥

तं शग्मासः । तम । शक्ताः । आरोचमानाः । अश्वाः । बृहस्पतिम् । सह वहन्तः । वहन्तु । सहः शरीर सहनाच्छरीरम् । यस्य । नीलवर्णयुक्तम् । 'आवेधसं नीलपृष्ठम्' इत्युक्तम् । रथे सह स्थितम् । नभः, न आदित्य इव । रूपम् । आरोचमानाम् । आच्छादयन्तः ।

स हि शुचिः शतपत्रः स शुन्ध्युहिरण्यवाशीरिषिरः स्वर्षाः ।
बृहस्पतिः स स्वावेश ऋष्वः पुरू सखिभ्य आसुतिं करिष्ठः ॥ ७ ॥

स हि शुचिः । सः । हि । शुचिः । शतपतनः । स हि । शोधकः । हितरमणीयं वचनमायुर्धं वा

---

१. सर्वत्र भोक्तव्यतया प्रसिद्धम् Sy.
२. अर्चनसाधनमन्नम् Sy.
३. प्रदद्युः Sy.
४. अरमाणाय A. अमरणत्वाय जीवनाय Sy.
५. इम A.
६. अमरणा देवा ब्रह्मणस्पतेराज्ञया Sy.
७. पुरा जातः Sy.
८. ०द्धः स्तो०
९. पस्त्यमिति गृहनाम । तेन तद्वन्तो लक्ष्यन्ते । गृहिणाम् Sy.
१०. विंशत्या M.
११. बृहतां पालकं देवम् Sy.
१२. अप्रयुत० M. अप्रत्यृत० is suggested for आप्रत्युत० ॥ केनाप्यप्रतिगतम् Sy.
१३. भूर्य A. हुवेभ is suggested for भमयः॥ आह्वयामः स्तुयाम वा Sy.
१४. शमास A.
१५. शग्माः सुखकराः शक्ता वा Sy.
१६. संहत्य वाहका अश्वाः Sy.
१७. बलं च भवति Sy.
१८. बृहस्पतेः Sy.
१९. नीलं निलयो निवासः । तद्युक्तम् Sy.
२०. RV. V. 43. 12.
२१. सहस्थानं च यस्य तं बृहस्पतिमित्यन्वयः Sy.
२२. आदित्यमिव Sy.
२३. ०मानम् is suggested for ०मानाम् ।
२४. धारयन्तः Sy.
२५. VM. ignores चित्.
२६. सह शुचि A.
२७. बृहस्पतिः Sy.
२८. खलु Sy.
२९. शुद्धः Sy.
३०. बहुविधवाहनः Sy.
३१. सर्वेषां शोधयिता Sy.

पावनी[1] । गमनशील[2] । स्वर्गस्य[3] सम्भक्ता । बृहस्पतिः । स. । शोभनावेशः[4] । दर्शनीयः[5] । स्तोतृभ्यः । महतीम्[6] । आसुति धनस्य[7] प्रसवम् । अत्यन्तं तत्कर्ता[8] ।

देवी देवस्य[9] रोदसी[10] जनित्री[11] बृहस्पतिं[12] वावृधतुर्महित्वा[13] ।
दक्षाय्याय दक्षता सखायः[14] करद्ब्रह्मणे[15] सुतरा[16] सुगाधा[17] ॥ ८ ॥

देवी[10] । देव्यौ[11] । देवस्य । जनयित्र्यौ । द्यावापृथिव्यौ । बृहस्पतिम्[12] । वर्धयामासतुः[13] । महत्त्वेन[14] । पूज्याय[15] । पूजां कुरुत । हे सखायः[17] ! करोतु[16] । ब्राह्मणाय[15] मह्यम् । सुतराणि[16] । सुगाधानि चोदकानि[17] ।

इयं वां ब्रह्मणस्पते सुवृक्तिर्ब्रह्मेन्द्राय[18] वज्रिणे[19] अकारि[20] ।
अविष्टं धियो जिगृतं पुरंधीर्जजस्तमर्यो[21] वनुषामरातीः[22] ॥ ९ ॥

इयं वाम् । इयम् । वां[21] युवयोः । ब्रह्मणस्पते[22] ! सुवृक्ति[23] । इन्द्राय । वज्रिणे[24] तुभ्यं च । अकारि[25] हविश्च[26] । अविष्टमिति गतम्[27] ।

---

१. वाशी is suggested for पावनी ॥ हितरमणीयवाक् । यद्वा 'वाशीभिस्तक्षताश्मन्मयीभिः' (RV. 101. 10. 10.) इति निगमाद् वाश्ययायुधम् । स्वर्णमयायुधः Sy. वाशीति वाङ्नाम (Nagh. 1. 11.)

२. शीलः is suggested for ०शील ॥ गन्ताऽभ्येषणीयो वा Sy.

३. स्वर्गः स्वर्गस्य सम्भक्ता । यद्वा सरणशीलस्योदकस्य सनिता दाता Sy.

४. सुनिवासः Sy. ५. ईदृशो देवः Sy.

६. बहुलम् Sy.

७. ०तीं A. अन्नम् Sy.

८. ०न्तत् कर्ता A. कर्तृतमो दातृतमो भवति Sy.

९. A adds मदेव० after देवी ।

१०. दानादिगुणयुक्ते ! Sy.

११. बृहस्पतेः Sy.

१२. ०तीम् A.

१३. ०मास तं M.

१४. महत्त्वेन युक्तम् Sy.

१५. वर्धनीयाय । द्वितीयार्थे चतुर्थी । वर्धनीयं तं बृहस्पतिम् Sy.

१६. वर्धयत Sy.

१७. हे सखायः ! यूयमपि Sy.

१८. बृंहिताय प्रभूतायान्नाय तदर्थम् Sy.

१९. सुतरणानि सुखेन तरणीयानि Sy.

२०. ०नि वेचि चाद० A. सुखेनावगाहनीयान्युदकानि Sy.

२१. वां युवाभ्याम्, तादर्थ्ये चतुर्थी Sy.

२२. बृह्मण० A.

२३. सुप्रवृत्ता स्तुतिः Sy.

२४. वज्रवते Sy. २५. मया कृताभूत् Sy.

२६. मन्त्ररूपेयम् Sy.

२७. VM. ignores अविष्टम् । धियः । जिगृतम् । पुरन्धीः । जजस्तम् । अर्यः । वनुषाम् and अरातीः । Sy. explains these words in the following manner : तौ युवां धियाऽस्मदीयानि कर्माणि । अविष्टं रक्षतम् । तथा पुरन्धीः पुरुधीर्बह्वीः स्तुतीर्जिगृतम् । निगिरतम् । भृणुतमिति यावत् । अर्योऽरीरभिगन्त्रीः । वनुषां सम्भक्तृणामस्माकम् । अरातीः शत्रुसेनाः । जजस्तमुपक्षपयन्तम् Sy.

See RV. VII. 64. 5.

बृहस्पते युवमिन्द्रश्च वस्वो दिव्यस्येशाथे उत पार्थिवस्य ।
धत्तं रयिं स्तुवते कीरये चिद्यूयं पात स्वस्तिभिः सदा नः ॥ १० ॥

बृहस्पते[1]। बृहस्पते[2] ! त्व च[3]। इन्द्रः। च। युवाम्। धनस्य। दिव्यस्य[4]। चोभयस्य। ईश्वरौ[5] भवतः। तथा सति प्रयच्छत[6] यत्। तद् धनम्। स्तुवते। स्तोत्रे[7]।

VII.98.

अध्वर्यवोऽरुणं दुग्धमंशुं जुहोतन वृषभाय क्षितीनाम् ।
गौराद्वेदीयाँ अवपानमिन्द्रो विश्वाहेद्याति सुतसोममिच्छन् ॥ १ ॥

अध्वर्यवः[8]। अध्वर्यवः[9]। आरोचमानम्। दुग्धम्[10]। अंशुम्[11]। जुहुत। क्षितीनाम्[12]। वर्षित्रे[13]। गौरा-दपि[14] मृगात्। अतिशयेन दूरस्थ विन्दन्[15]। अधोमुखेन पातव्यम्[16]। इन्द्रः। सर्वदा[17]। इव। गच्छति। सुतसोमं यजमानम्। इच्छन्[18]।

---

१. तृतीयसवन उक्थ्ये ब्राह्मणाच्छंसिनः 'बृहस्पते युवम्' इति शस्त्रयाज्या। सूत्रितञ्च—'बृहस्पते युवमिन्द्रश्च वस्व इति याज्या' ĀŚS. 6. 1.) इति। वाजपेयेऽतिरिक्तोक्थस्यैवैव परिधानीया। सूत्रितञ्च—'बृहस्पते युवमिन्द्रश्च वस्व इति परिधानीया' (ĀŚS. 9. 9.) इति Sy.

२. बृहस्पते is missing in M.

३. ततश्च M. From च। इन्द्रः onwards the rest of the commentary is missing in A.

४. दिवि भवस्य Sy.

५. ०रौ is suggested for ०रो।

६. ०च्छतम् is suggested for ०च्छत यत्॥ दत्तम् Sy.

७. अतः कारणात् स्तोत्रं कुर्वते Sy.

८. कीरिः स्तोतृनामैतत् (Ngh. 3. 16.)

९. VM. ignores पार्थिवस्य and चित्॥ चिदिति पूरणः। अन्यद्गतम् Sy.

१०. 'अध्वर्यवः' इति सप्तर्चं नवमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमैन्द्रम्। सप्तम्यैन्द्राबार्हस्पत्या। तथा चानुक्रान्तम्—'अध्वर्यवः सप्तोक्तदेवतान्त्या' (KSA. 38. 98. p. 27). इति। पूर्वसूक्तेन सहोक्तो विनियोगः Sy.

११. हे अध्वरस्य नेतारः ! ऋत्विजः ! Sy.

१२. अभिषुतम् Sy.

१३. अंशं M. सोमम् Sy.

१४. जनानां मध्ये Sy.

१५. श्रेष्ठायेन्द्राय Sy.

१६. ०रामपि A. From the beginning upto गौ०, the commentary is missing in A.

१७. ०स्थ A. विद्वानिन्द्रः Sy.

१८. अवक्रम्य स्थितं दूरस्थं पातव्यं सोमम् Sy.

१९. विश्वान्यहानि सर्वदा Sy.

२०. गच्छति। अतस्तस्मा इन्द्राय सोमं जुहुतेत्यन्वयः Sy.

२१. अन्विच्छन् Sy.

यद्धिषे[1] प्रदिवि चार्वङ्ग[2] दिवेदिवे पीतिमिदस्य वक्षि[3] ।
उत हृदोत मनसा जुषाण उशन्निन्द्र प्रस्थितान्पाहि सोमान् ॥ २ ॥

यद्धिषे[1] । यत् । धारयसि । गते काले[4] । चारु[5] त्वम् । अन्नम् । तस्य[6] । इदानीमपि[7] । अन्वहम्[8] । पानम् । वह पिब तमधुना । अपि च । हृदयेन । मनसा । अपि च । सेवमानः[9] । कामयमानः[10] । इन्द्र[11] ! प्रस्थितान्[12] । पिब । सोमान् ।

जज्ञानः सोमं सहसे पपाथ[14] प्र तें माता महिमानमुवाच[15] ।
एन्द्रं पप्राथोर्वन्तरिक्षं[16] युधा देवेभ्यो वरिवश्चकर्थ[17] ॥ ३ ॥

जज्ञानः[13] । प्रादुर्भवस्त्वम् । सोमम् । पपाथ[14] । पालय । प्रोवाच[15] । ते[16] । महिमानम्[17] । माता पृथिवी त्वया पाल्यमाना । आपप्राथ[18] च । विस्तीर्णम् । अन्तरिक्षम् । इन्द्र[19] ! युधा[20] । देवेभ्यस्त्वम्[21] । धनम् । चकर्थ[22] ।

---

१. ०षेम A.

२. सोमलक्षणम् Sy.

३. पानेनोदरे धारयसि Sy.

४. काले गते M. प्रगतेषु दिवसेषु पूर्वस्मिन् काले Sy.

५. शोभनम् Sy.

६. सोमस्य Sy.

७. प्रतिदिवसमिदानीमपि Sy.

८. वक्षि-कामयसे 'वश कान्तौ' इत्यस्य सिपि शपो लुकि षत्वकत्वषत्वेष्वेतद्रूपम् Sy.

९. उतशब्दश्चार्थे Sy.

१०. ०माना A.

११. कामयमानः is missing in A. अस्मान् कामयमानस्त्वम् Sy.

१२. पुरस्ताज्जीतान् उत्तरवेदिस्थान् Sy.

१३. ०व त्वम् A. जायमान एव Sy.

१४. पीतवानसि Sy.

१५ बलाय is suggested for पालय ॥

१६. प्रोक्तवती । संवारसूक्ते 'अयं पन्थाः' (RV.4.18.) इत्यादिके 'नही न्वस्य' (RV.4.18.4) इत्यर्धर्चादारभ्यादित्येन्द्रमहत्त्वस्योक्तत्वात् Sy.

१७. तव Sy.

१८. महत्त्वम् Sy.

१९. त्वदीया जनन्यदितिः Sy.

२०. स्वतेजसापूरितवानसि Sy.

२१. अतः कारणात् हे इन्द्र ! त्वम् Sy.

२२. युद्धेन Sy.

२३. स्तोतृभ्यो देवेभ्य एव वा Sy.

२४. कृतवानसि Sy.

यद्योधया महतो मन्यमानान्त्साक्ष्म तान्बाहुभिः शाशदानान् ।
यद्वा नृभिर्वृत इन्द्राभियुध्यास्तं त्वयाजिं सौश्रवसं जयेम ॥ ४ ॥

यद्योधयाः । यम् । अयोधयस्त्वम् । महतोऽस्मान् । अभिमन्यमानान् । सहेमहि । तान् । बहुभिः । अस्मान् हिंसितशत्रून्, 'शदिः शातनकर्मा' यत् । वा त्वम् । मरुद्भिः । इन्द्र ! परिवृत । त्वम् । अभियुध्याः । ततस्त्वया यम् । सङ्ग्रामम् । कीर्तिनिमित्तम् । जयेम ।

प्रेन्द्रस्य वोचं प्रथमा कृतानि प्र नूतना मघवा या चकार ।
यदेददेवीरसहिष्ट मायाऽथाभवत्केवलः सोमो अस्य ॥ ५ ॥

प्रेन्द्रस्य । प्रावोचम् । इन्द्रस्य । पुरातनानि । कर्माणि । प्रावोच च । नूतनानि । मघवा । यानि । चक्रे । यदा । इवेन्द्राः । सूरिः । मायाः । असहिष्ट । अनन्तरमेव । अस्य । अभवत् । असाधारणः । सोमः ।

---

१. यद्यदा Sy.
२. ०ध्वं त्व० A. अस्माभिर्योधयेः । तैः सह योद्धुं बलं प्रयच्छेरित्यर्थः Sy.
३. प्रभूतान् Sy.
४. ०मान्य० A. शत्रून् Sy.
५. त्वत्प्रसादात् सहेम ? (सहेमहि) अभिभवेम Sy.
६. बहु० M. बाहुभिः is suggested for बहुभिः ॥ आयुधनिरपेक्षैर्हस्तैरेव Sy.
७. हिंसतस्तान् शत्रून् Sy.
८. हृदि A.
९. यदि Sy.
१०. नेतृभिर्मरुद्भिः Sy.
११. तम् is suggested for त्वम् ।
१२. अस्मदीयान् शत्रूनभियुध्येः Sy.
१३. ०तः A.
१४. त्वं त्वया M. त्वया वयम् is suggested for त्वया यम् ॥ त्वया सहायेन वयम् Sy.
१५. श्रवोऽन्नं यशो वा शोभनस्य श्रवसो हेतुम् Sy.
१६. प्रोवाचम् A. प्रब्रवीमि Sy.
१७. प्यरा० A.
१८. वीर्यकर्माणि Sy.
१९. अभिनवानि भुवि Sy.
२०. मघवानिन्द्रः Sy.
२१. कृतवान् Sy.
२२. एवेन्द्रः is suggested for एवेन्द्राः ।
२३. आसुरीः is suggested for सूरिः ।
२४. तैः कृतानि Sy.
२५. अभ्यभूत् Sy.
२६. इन्द्रस्य Sy.
२७. तदाप्रभृत्येव सोमस्येन्द्रस्य चासाधारणः सम्बन्धो जात इत्यर्थः Sy
२८. केवलः Sy.
२९. स्तोमः M.

तवेदं विश्वमभितः पशव्यं यत्पश्यसि चक्षसा सूर्यस्य ।
गवामसि गोपतिरेक इन्द्र भक्षीमहि ते प्रयतस्य वस्वः ॥ ६ ॥

तवेदं विश्वम् । तवैव । इदम् । सर्वम् । अभितो दृश्यमानम् । पशव्यं पशूना सुखस्व भवति । यदा त्वम् । सूर्यस्य । तेजसा । पशून् पश्यसि । ततश्च गवाम् । असि । गोपतिस्त्वम् । एक एव इन्द्र ! भजेमहि । त्वया । प्रवृत्तम् । धनम् ।

बृहस्पते युवमिन्द्रश्च वस्वो दिव्यस्येशाथे उत पार्थिवस्य ।
धत्तं रयिं स्तुवते कीरये चिद्यूयं पात स्वस्तिभिः सदा नः ॥ ७ ॥

[बृहस्पते]

VII.99.

परो मात्रया तन्वा वृधान न ते महित्वमन्वश्नुवन्ति ।
उभे ते विद्म रजसी पृथिव्या विष्णो देव त्वं परमस्य वित्से ॥ १ ॥

परः । परस्त्वम् । मानसाधनेन । शरीरेण त्रील्लोकान् । हे वर्धमान ! वामनो हि भूत्वा ववृधे

---

१. तवैव स्वभूतम् Sy.
२. विश्वं सर्वं जगत् Sy.
३. सर्वतो विद्यमानम् Sy.
४. पशवो द्विविधा द्विपादश्चतुष्पादश्च । तेभ्यो हितम् Sy.
५. सख स्वं A. सुसुखम् is suggested for सुख स्वं ॥
६ प्रेरकस्यादित्यस्य Sy.
७. विश्वम् Sy. ८. प्रकाशयति Sy.
९. न केवलमेकस्या एव गोपतिरपितु सर्वासामित्याह गवामिति Sy.
१०. प्रयतस्य प्रतस्य । द्वितीयार्थे षष्ठी । प्रत्तम् Sy.
११. The *Pratika* is supplied by the Editor.
This stanza has already been explained. See VII. 97. 10.
Sy. explains this stanza again in the following manner:—
व्याख्यातेयम् । अक्षरार्थस्तु हे बृहस्पते ! त्वं चेन्द्रश्च युवां दिव्यस्य पार्थिवस्य चोभयविधस्य धनस्येश्वरौ भवथः । तौ युवां स्तुवते स्तोत्रे धनं दत्तमिति ।
१२. 'परो मात्रया' इति सप्तर्चं दशमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभम् । 'उरुं यज्ञाय' इत्याद्यास्तिस्र ऐन्द्रावैष्णव्यः शिष्टाः केवलविष्णुदेवताकाः । तथा चानुक्रान्तम्—'परो वैष्णवं तूरुमित्यन्द्यश्च तिस्रः'(KSA. 38. 99. p. 27.) इति । गतः सूक्तविनियोगः । विष्णुदेवताके पशौ 'परो मात्रया' इति पुरोडाशस्य याज्या । सूत्रितञ्च—'परो मात्रया तन्वा वृधानेरावती धेनुमती हि भूतम्' (ĀŚS. 3. 8.) इति Sy.
१३. पर इति सकारान्तं परस्तादित्यस्यार्थे । परशब्दाच्छान्दसोऽसि प्रत्ययः । 'परो दिवा पर एना पृथिव्या' (RV. 10. 82. 5.) इति यथा । मात्रयेति व्यत्ययेन तृतीया । मात्रया परः परस्ताद्वर्तमानयापरिमितया Sy.
१४. मन० A.

विष्णुः । तव शरीरस्य । महत्त्वम् । नान्ये केचन । व्याप्नुवन्ति[1] । तव[2] स्वभूतो[3] । द्यावेव । लोको[4] । वय जानीमः[5] । पृथिवीमन्तरिक्षं[6] च । हे देव[7] ! विष्णो ! त्वमेव । तृतीयं[8] लोकम् । जानासि[9] ।[10]

न ते[11] विष्णो[13] जायमानो[14] न जातो[16] देव[17] महिम्नः[18] परमन्तमाप[19] ।
उदस्तभ्ना[21] नाकमृष्वं[22] बृहन्तं दाधर्थ[24] प्राचीं[26] ककुभं[27] पृथिव्याः ॥ २ ॥

न[11] ते विष्णो[13] । न । ते[12] । विष्णो[13] ! जायमान[14] । नापि[15] । जातः[16] । देव[17] ! महिम्नः[18] । परम्[19] । अन्तम्[20] । प्राप[21] । ऊर्ध्वम्[22] । अभिवानसि[23] । तृतीय[25] लोकम् । दर्शनीयम् । महान्तम् । अधारयश्च[24] । पृथिव्या[26] । प्राचीम् । दिशम्[27] ।

---

१. त्रैविक्रमसमये यत्तव माहात्म्यं तत्सर्वैरपि जनैर्ज्ञातुं न शक्यत इत्यर्थः Sy.

२. Something probably तव is missing in the mss.

३. ०तौ is suggested for ०तो ।

४. ०का पयं A.

५. जानी उ A. वयं चक्षुषोपलभामहे नान्यत् Sy.

६. अन्तरिक्षं च is written twice in A. पृथिव्या आरभ्य पृथिवीमन्तरिक्षञ्च Sy.

७. हे द्योतमान ! Sy.

८. अस्य स्वर्गादिरुत्कृष्टलोकस्य । द्वितीयार्थे षष्ठी । परमं लोकम् Sy.

९. अतस्तव महत्त्वं न केनापि व्याप्तुं शक्यमिति भावः Sy.

१०. VM. ignores अनु.

११. पूर्वोक्त एव पशौ 'न ते विष्णो' इति वषाया अनुवाक्या । सूत्रितञ्च—'न ते विष्णो जायमानो न जातस्त्वं विष्णो सुमतिं विदेवजन्याम्' (ĀŚS. 3. 8.) इति Sy.

१२. तव Sy.

१३. विष्णो is missing in A.

१४. प्रादुर्भवन् जनः Sy.

१५. नापी A.

१६. तथा प्रादुर्भूतोऽपि जनः नैव प्राप्नोति तव महत्त्वस्यावसानं नास्ति । अत एव सर्वैर्न ज्ञायत इति भावः Sy.

१७. हे वानाविगुणयुक्त ! Sy.

१८. महत्त्वस्य Sy.

१९. विप्रकृष्टम् Sy. २०. अवसानम् Sy.

२१. प्राव A. प्राप्नोति Sy.

२२. ऊर्ध्वम् is suggested for ऊर्ध्वम् ।

२३. Something probably धारित is missing in the mss. between अभि and वानसि ।

२४. ०सि M. अधारयः । यथाधो न पतति तथा Sy.

२५. द्युलोकम् Sy.

२६. धारितवानसि । उपलक्षणमेतत् सर्वस्य भूतजातस्य । तथा च मन्त्रान्तरम्—'य उ त्रिधातु पृथिवीमुत द्यामेको दाधार भुवनानि विश्वा' (RV. 1. 154. 4.) इति Sy.

२७. दिश A.

इरावती धेनुमती हि भूतं सूयवसिनी मनुषे दशस्या।
व्यस्तभ्ना रोदसी विष्णवेते दाधर्थ पृथिवीमभितो मयूखैः ॥ ३ ॥

इरावती। अन्नवत्यौ। पशुमत्यौ च। हि। अभवतम्। शोभनयवसे सर्वस्मै। मनुष्या मनवे राज्ञे। दानीमिच्छन्त्यौ। त्वं चैने। रोदसी। हे विष्णो! व्यस्तभ्नाः। दाधर्थ च। इमां पृथिवीम्। परितः।

---

१. पूर्वोक्त एव पशो 'इरावती' इति हविषो याज्या। सूत्रितञ्च—'इरावती धेनुमती हि भूतं विश्वकर्मन् हविषा वावृधान इति द्वे' (ĀŚS. 3. 8.) इति Sy.

२. सस्यवत्यौ Mah. हे विष्णो! यस्मात्तव प्रशासनमनुकुर्वत्यौ द्यावापृथिव्यौ सस्यवत्यौ U. द्यावापृथिव्यात्मना स्तूयेते। हे हविर्धानात्मिके! द्यावापृथिव्यौ! इरावती इरावत्यावन्नवत्यौ BB.

३. बहुधेनुयुक्ते Mah. धेन्वादिभिः पशुभिस्तद्वत्यौ U. धेनुमत्यौ च भवतम् BB.

४. हिशब्दः प्रसिद्धौ। विष्णुना विक्रान्तत्वाद्युवामेवमेव खलु पूर्वभूतमित्यर्थः Sy. हिशब्दो यस्मादर्थे व्याख्यातः U. हिशब्दश्चार्थे, इरावती धेनुमती च भवतमिति BB.

५. अभूतम् Sy. हे रोदसी! द्यावापृथिव्यौ! युवामीदृश्यौ भूतं भवतम् Mah. एवम्भूतं भूताम्, अभूतामिति पुरुषव्यत्ययः। संवृत्ते इत्यर्थः U. भवतं यज्ञसाधनद्वारेण BB.

६. ०नाय० A. सुष्ठु यवसानि विद्यन्ते ययोस्ते सुयवसिनी, यवसशब्देनात्राभ्यवहार्याणि वस्तूनि Mah. शोभनयवसवत्यौ सुसस्यवत्यौ U. शोभनैर्यवसैरभ्यवहार्यैस्तद्वत्यौ सूयवसिन्यौ च भवतम्। सोस्सांहितिको दीर्घः BB.

७. मनुष्याय is suggested for मनुष्या ॥ स्तुवते मनुष्याय Sy. मनुते जानातीति मनुर्ज्ञानवान् यजमानस्तस्मै Mah. यजमानाय U. मन्त्रवते मननवते यजमानायेत्थं भवतम् BB.

८. दासीमि० M. दातुमि० or दानमि० is suggested for दानीमि० ॥ दित्सया युक्ते युवाम् Sy. दाश्वौ यज्ञसाधनानाम्। 'दाशृ दाने' दाशतस्ते दशस्या Mah., U.

९. इमे Sy. कस्मादेवमुच्यते? इति चेत्, शृणुतां युवयोर्महाभाग्यम्। एते युवाम् BB.

१०. द्यावापृथिव्यौ Sy. रोदस्सञ्ज्ञां भजमाने BB.

११. एवं द्यावापृथिव्यौ सम्प्रार्थ्य विष्णुमाह। हे विष्णो Mah. विष्णुरेव प्रजापत्यात्मा स्वयम् BB. १२. ०स्तना A. विभज्य स्तम्भितवानसि Mah. अतः कारणात्।.... स्कभ्नोतिः स्तम्भनार्थः। स्तम्भितवानसि U. विभज्य स्थापितवान्, अध उपरि च।.... तदानीं युवां रोदस्सञ्ज्ञे चाभूतमिति भावः BB.

१३. दाधर्म A. विविधमधारयः। पृथ्वीमूर्ध्वमुखत्वेन द्यामधोमुखत्वेनेति विविधत्वम् Sy. धारितवानसि Mah. धारयसि U. इमां च विष्णुर्धिधार, अविचलितां स्थापयामास BB.

१४. अपि च पृथिवीं प्रथितामिमां भूमिम् Sy. पृथिवीं द्यां चेत्यध्याहारः U. विस्तीर्णां वा पृथिवीमन्तरिक्षं च। पृथिवीशब्देन प्रथि? (पृथु)त्वात् त्रयो लोका उच्यन्ते। यथा 'यो द्वितीयस्यां तृतीयस्यां पृथिव्याम्' इति BB.

१५. सर्वत्र स्थितैः Sy. सर्वतः Mah. इतश्चेतश्च U. अधस्तादुपरिष्टाच्च BB.

तेजोभिः शङ्कुभिः ।

उरुं यज्ञाय चक्रथुरु लोकं जनयन्ता सूर्यमुषासमग्निम् ।
दासस्य चिद्वृषशिप्रस्य माया जघ्नथुरु तृतनाज्येषु । ४ ॥

उरुम् । उरुम् । यज्ञाय । चक्रथुः । उ । लोकम् स्थानम् । जनयन्तावित्रावित्रौ ! सूर्यम् । उषसम् । अग्निं च । दासस्य । चित् । वृषशिप्राख्यस्य युवाम् । जघ्नथुः । मायाः । सङ्ग्रामेषु । नेतारौ ।

---

१. पर्वतैर्दार्ढ्यं धारितवानसि । यथा न चलति तथा दृढीकृतवानित्यर्थः । पर्वता हि विष्णोः स्वभूताः । 'विष्णुः पर्वतानामधिपतिः' इति श्रुतेः (TS. 3. 4. 5. 1.) Sy. स्वतेजोरूपेणानाजीवैर्वराहाद्यनेकावतारैर्वा Mah. रश्मिभिः । यस्मात्त्वमेवम्प्रभावस्तस्मात्त्वा स्तुम इति शेषः U. अंशुभिः BB.

२. एवंमहाभागधेयाभ्यां युवाभ्यां किन्नाम कर्तुं न शक्यते । तस्माद्यथोक्तं भवतमिति । आदित्यपक्षे व्यस्कभ्नाद् रोदसी विष्णुरादित्य एते युवां विविधं स्थापयति । तत एते एवं स्थापिते दाधार धारयति पृथिवीमभितः पृथिव्यामन्तरिक्षस्याधस्तावुपरिष्टाच्च । 'अभितः परितः' इति द्वितीया । मयूखैं रश्मिभिरधोमुखैः पृथिवीम्, ऊर्ध्वमुखैश्च दिवम्, स्वयं मध्येऽन्तरिक्षे वर्तमान इति । तस्मादनयाऽऽहुत्या युवामन्नादिमत्यौ भवतम् । युवां युवयोरन्तरालं च विष्णुरपि वृढीकरोत्विति BB.

चतुर्गृहीतमाज्यं गृहीत्वा । प्रतिप्रस्थातोत्तरस्य हविर्धानस्य दक्षिणायां वर्त्तन्यामश्विभ्यां निधाय जुहोतीरावती धेनुमती हि भूतꣳसूयवसिनी मनवे दशस्या । व्यस्कभ्ना रोदसी विष्णवेते दाधर्थ पृथिवीमभितो मयूखैः स्वाहेति स्रुक्शुल्वं पत्न्यै पाणावानयति साक्षस्य सन्तापमुपानक्षित देवश्रुतौ देवेष्वाघोषतमिति तच्छुल्वं जुहोति SB. 3. 5. 3. 14. p. 274.

ऋचि 'मनुषे' परं यजुषि (5. 16. p. 84.) 'मनवे' इति (YV. 5. 17. p. 85.) मन्त्रस्यापि कियान् पूर्वो भागोऽत्रैव 'देवश्रुतौ देवेष्वाघोषतम्' इति निहितः ।

This stanza=YV. 5.16.=TS. 1. 2. 13. 2.

३. उरु A. ४. विस्तीर्णम् Sy.

५. यजमानाय Sy.

६. कुः M. कृतवन्तौ युवाम् Sy.

७. खलु Sy. ८. लोकं स्वर्गास्थम् Sy.

९. पुनः प्रादुर्भावयन्तौ Sy.

१०. सर्वस्य प्रेरकमादित्यम् Sy.

११. तमोनिवारकमुषःकालम् Sy.

१२. असुरैरावृतम् Sy.

१३. उपक्षयितुरसुरस्य Sy. १४. चि A.

१५. कोषचिप्रा० A. एतत्संज्ञस्य Sy.

१६. जिहिंसथुः । युवां सूर्यादिकं जनयन्तावित्युच्यते Sy. १७. नेतरौ A. हे इन्द्राविष्णू ! Sy.

इन्द्राविष्णू दंहिताः शम्बरस्य नव पुरो नवतिं च श्नथिष्टम् ।
शतं वर्चिनः सहस्रं च साकं हथो अप्रत्यसुरस्य वीरान् ॥ ५ ॥

इन्द्राविष्णू । हे इन्द्राविष्णू ! शिलाभिर्दृंहिताः । शम्बरासुरस्य । नव । पुरः । नवतिम् । च । श्नथिष्टम् । तथा वर्चिनोऽसुरस्य । शतम् । सहस्रम् । च पुर । साकम् । हथः । शत्रुभिरप्रतिहतान् असुरस्य । वीराश्च ।

इयं मनीषा बृंहती बृहन्तोरुक्रमा तवसा वार्धयन्ती ।
रेरे वां स्तोमं विदथेषु विष्णो पिन्वतमिषो वृजनेष्विन्द्र ॥ ६ ॥

इयं मनीषा । इयम् । स्तुतिः । महती । महान्तौ । उरुक्रमणाविति विष्णुसाहचर्यादुपावाह ।

---

१. विष्णुना संस्तवः । वसिष्ठस्यार्षम् Dur. वसिष्ठस्य SKN.

२. हे इन्द्राविष्णू ! युवाम् BB. Dur.

३. बंहिताः A. बृढीकृताः Sy. SKN. दृढाः BB. स्थिरीकृताः Dur.

४. शम्बरस्यासुरस्य BB. मेघस्यासुरस्य वा स्वभूताः Dur. शम्बरस्य स्वभूताः SKN.

५. नर A.

६. पुराणि Sy. नगरीः BB.

७. ०तीं चा A. नवोत्तरनवतिसंख्याकाः Sy.

८. श्नष्टे A. अहिंसिष्टम् । 'श्नथ अहिंसायाम्' Sy. नाशितवन्तौ । 'श्नथ हिंसायाम्' BB. श्नथतिर्वधकर्मा । हतवन्तौ स्थः Dur,SKN.

९. तासु वर्चिनो दीप्तिशीलान् BB. तांश्च हत्वा मेघान्तर्गताः.....वर्चिनो दीप्तिमतोऽभवतो वा Dur. तांश्च श्नथन्तौ तत्रस्थान्..... वर्चिनो दीप्तिमतोऽभवतो वा SKN.

१०. तथा साकं सह सद्य एव Sy. एकेन प्रहारेण BB. अवस्थितान् सहभावेनैकनिश्चयान् Dur. सह SKN.

११. हथ A. अहिंसिष्टम् । 'यो वर्चिनः शतमिन्द्रः सहस्रम्' (RV. 2. 14. 6.) इति हि निगमान्तरम् Sy. नाशितवन्तौ युवाम् BB. हतवन्तौ स्थः Dur. SKN.

१२. प्रतिद्वन्द्विनो यथा न भवन्ति तथा Sy. अप्रतिपक्षौ यथा भवतस्तथा BB. अप्रतीकारान् Dur. प्रतीत्युपसर्गः । उपसर्गाश्च पुनरेवमात्मकाः यत्र क्रियावाची शब्दः प्रयुज्यते तत्र क्रियाविशेषमाहुः । यत्र न प्रयुज्यते तत्र ससाधनां क्रियामाहुः । तेनात्र प्रतिशब्दः ससाधनक्रियावचनत्वात् प्रत्यवतिष्ठमानशब्दस्यार्थे । अप्रत्यवतिष्ठमानान् SKN.

१३. शम्बरस्य BB. SKN. शम्बरस्य स्वभूतान् Dur. SKN.

१४. यौ युवामेतदतिदुष्करमकार्ष्टम्, तावस्माकमपि शत्रून् हतमिति BB. हथ इत्येतदाशास्महे Dur. वीरान् प्रधानभूतान् ।....एवं महाप्रभावौ युवामस्मदभिप्रेतं साधयत पुत्रान् पौत्रांश्च SKN, N. 7. 10.SKN. III. 60. This stanza=TS. 3. 2. 11. 3.

१५. मननीया स्तुतिः Sy.

१६. बृहन्तौ महन्तौ Sy.

१७. विस्तीर्णविक्रमौ । विष्णुना सहेकार्थीभावादिन्द्रस्याप्युरुक्रमत्वम् Sy.

१८. ०वुपावह M. ०वुभावाह is suggested for वुपावाह ।

वर्धनेन । वर्धयन्ती भवति । तथा प्रयच्छामि च । स्तोमम् । युवाभ्याम् । यज्ञेषु । विष्णो ! तथासति । इन्द्र ! त्वं च विष्णुश्च । अन्यान्यस्मभ्यम् । पिन्वतम् । सङ्ग्रामेषु ।

वषट् ते विष्णवास आ कृणोमि तन्मे जुषस्व शिपिविष्ट हव्यम् ।
वर्धन्तु त्वा सुष्टुतयो गिरो मे यूयं पात स्वस्तिभिः सदा नः ॥ ७ ॥

वषट् ते । वषट्कारम् । तव । हे विष्णो ! आस आस्यादि । आभिमुख्येन । करोमि । तथा वषट्कृतम् । मम । हव्यम् । हे शिपिविष्ट ! सेवस्व । शिपिविष्टो यज्ञ इति द्वे यज्ञनामनी इत्युक्तम् । वर्धयन्तीति स्पष्टम् ।

---

१. तव इति बलस्य वृद्धेर्वा नामधेयम् (Ngh. 2. 9. 33.) । तद्वन्तौ एवम्भूतौ युवाम् Sy.

२. प्रवृद्धौ कुर्वत्यस्माभिः कृता Sy.

३. ररे ददे । 'रा दाने' इति धातुः Sy.

४. स्तोम A. उक्तलक्षणं स्तोत्रम् Sy.

५. पिबतं A. M. अस्मभ्यं वर्धयतम् Sy.

६. अभ्युदयेष्टौ विष्णोः शिपिविष्टस्य 'वषट् ते' इत्येषानुवाक्या । सूत्रितञ्च—'भद्रा ते हस्ता सुकृतोत पाणी वषट् ते विष्णवास आ कृणोमि' (ĀŚS 3. 13.) इति Sy.

७. के A.

८. तुभ्यम् Sy.

९. हे विष्णो ! व्यापनशील ! BB.

१०. आस्यात् is suggested for आस्यादिः ॥ किम् ? आसः, अस्यते क्षिप्यत इत्यासोऽग्नौ क्षिप्यमाणं हविरुच्यते । कर्मणि घञ् । वचनव्यत्ययः । 'कर्वादिवतः' इत्यन्तोदात्तत्वम् । यद्वा अस्मुनि । सवर्णव्यत्ययः BB.

११. ०खेन A. अभिमुखम् Sy. आङ् मर्यादायाम् BB.

१२. वषट्कारेण हविर्हावयामि Sy. ददामि BB.

१३. From ०कृतम् onwards the rest of the commentary is missing in A.

१४. मदीयम् Sy.

१५. हविः Sy. BB.

१६. शिपयो रश्मयस्तैराविष्ट ! Sy. शिपयो रश्मयस्तैर्वेष्टितः प्रविष्टो वा । पृषोदरादित्वादभीष्टं रूपं सिद्धम् BB.

१७. N. 5. 7. reads 'शिपिविष्टो विष्णुरिति विष्णोर्द्वे नामनी भवतः' ।

१८. किञ्च—मम सुष्टुतयः शोभनस्तुतिकारणभूता गिरस्त्वां वर्धन्तु वर्धयन्तु स्तुवन्त्विति यावत् । स्तुत्या हि स्तोतव्यो वर्धते । 'बहुलं सञ्ज्ञाछन्दसोः' इति णिलुक् । 'छन्दस्युभयथा' इति वा शप आर्धधातुकत्वम् । यूयं च मया स्तुता नोऽस्मान् स्वस्तिभिरविनाशैः पात रक्षत, सदा सर्वदा । पूजार्थमेकस्मिन् बहुवचनम् BB.

१९. VM. ignores वर्धन्तु । त्वा । सुष्टुतयः । गिरः । मे । यूयम् । पात । स्वस्तिभिः । सदा and नः ।
Sy. explains these words in the following manner :
सुष्टुतयः शोभनस्तुत्यात्मिकाः । गिरो वाचश्च । त्वाम् । वर्धन्तु वर्धयन्तु । अन्यद् गतम् । Sy.
This stanza=TS 2. 2. 12. 4.

VII.[1]100

नू मर्तो[2] दयते सनिष्यन्यो विष्णव उरुगायाय[3] दाशत्[4] ।
प्र यः सुत्राचा[5] मनसा[6] यजात एतावन्तं[7] नर्यमाविवासात्[8] ॥ १ ॥

नू[9] मर्तः[10]। क्षिप्रम्। मनुष्यः[11]। प्रयच्छति हविः। धनं तद्द्वारेण स सनिष्यन्[12]। यः[13]। विष्णवे। उरुकीर्तये[14]। हविः प्रयच्छति नान्येभ्यश्च देवेभ्यो विडम्बते[15]। यः। महत्त्वमञ्चता[16]। मनसा[17]। विष्णु प्रयजते[18]। यश्चैनावन्तम्[19]। नर्यम्[20]। आविवासति[21], एत्यधितिष्ठति, एतावन्तमिति महान्तमित्यर्थः।

त्वं विष्णो सुमतिं विश्वजन्यामप्रयुतामेवयावो मतिं दाः[22] ।
पर्चो यथा नः सुवितस्य भूरेरश्वावतः पुरुश्चन्द्रस्य रायः ॥ २ ॥

त्वं[23] विष्णो। त्वम्। विष्णो ! सुमतिम[24]। विश्वजनहिताम्[25]। अप्रमत्ताम्[26]। हे एवयावः[27] ! एवन्[28]

---

१. 'नू मर्तः' इति सप्तर्चमेकादशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वैष्णवम्। 'नू मर्तः' इत्यनुक्रान्तम् (KSA. 38. 100. p. 27.)उक्थ्येऽच्छावाकशस्त्र इदं शंसनीयम्। सूत्रितञ्च–'ऋतुर्जनित्री नू मर्तो भवा मित्रः' (ĀSS. 6. 1.) इति Sy. २. स मनुष्यः Sy.

३. धनमावत्ते। दयतिराङ्पूर्वो दानार्थे वर्तते Sy.

४. धनमिच्छन्. यद्वा सनिष्यन्निति सनतेर्लृभार्थस्य लृटि रूपम्। धनादीनि लप्स्यमानो भवन्नेव Sy.

५. मनुष्यः Sy.

६. The commentary from the beginning upto कीर्तये is missing in A. बहुभिः कीर्तनीयाय Sy.

७. ०भ्यः इव A.

८. विद्धं बते A.

९. सहाञ्चता Sy.

१०. मननेन स्तोत्रेण Sy.

११. प्रकर्षेण पूजयेत् Sy.

१२. एतावत्परिमाणं महान्तम् Sy.

१३. नरेभ्यो हितं विष्णुम् Sy.

१४. आपिपास० A. नमस्कारादिभिः परिचरेत्। मर्तो दयत इत्यन्वयः Sy.

१५. The passage: एतावन्तमिति महान्तमित्यर्थः should immediately follow एतावन्तम् and precede नर्यम्।

१६. विष्णुदेवत्ये पशौ पुरोडाशस्य 'त्वं विष्णो' इत्यनुवाक्या। सूत्रितञ्च––'त्वं विष्णो सुमतिं विश्वजन्यां विचक्रमे पृथिवीमेष एताम्' (ĀSS 3. 8.) इति Sy.

१७. अनुग्रहबुद्धिम् Sy.

१८. सर्वजनहिताम् Sy.

१९. दोर्वेवियुक्ताम् Sy.

२०. याव M. एवाः प्राप्तव्याः कामाः। तान् यापयति प्रापयति स्तोतृनित्येवयावः। हे एवयावन् ! Sy.

२१. एव नू M. एवान् is suggested for एर्वन्।

गच्छति । देहि[1] । वर्चः[2] । यथा । नः[3] । शोभनगमनस्य । बहोः[4] । अश्ववतः[5] । बहुसुवर्णस्य । धनस्य भवेत् वर्चः[6] सम्पर्क[7] इति[8] ।[9]

त्रिर्देवः पृथिवीमेष एतां वि चक्रमे शतर्चसं महित्वा ।
प्र विष्णुरस्तु तवसस्तवीयान्त्वेषं ह्यस्य स्थविरस्य नाम ॥ ३ ॥

[10][त्रिर्देवः][11] त्रिः[12] । देवः[13] । पृथिवीम्[14] । एषः । एताम् । विचक्रमे[15] । बहुस्तुतिकाम्[16] । महत्त्वेन । प्रभवतु[17] । विष्णुः[18] । वृद्धोदपि[19] । वृद्धतरः[20] । हि[21] अस्य । स्थविरस्य[22] । नाम[23] विष्णुरिति[24] ।

वि चक्रमे पृथिवीमेष एतां क्षेत्राय विष्णुर्मनुषे दशस्यन् ।
ध्रुवासो अस्य कीरयो जनास उरुक्षितिं सुजनिमा चकार ॥ ४ ॥

[25]वि चक्रमे । विचक्रमे[26] । पृथिवीम्[27] । एष । एताममुरैराक्रमन्तान्[28] । निवासार्थमसुरानवजित्य पृथि-

---

१. अस्मभ्यं देहि Sy.
२. पर्चः is suggested for वर्चः ॥ सम्पर्को यथा भवति तथा देहीत्यन्वयः Sy.
३. अस्माकम् Sy.
४. सुष्ठु प्राप्तव्यस्य Sy.
५. बहुलस्य Sy. ६. अश्वयुक्तस्य Sy.
७. पुरूणां बहूनामाह्लावकस्य Sy.
८. वर्चं A. पर्चः is suggested for वर्चः ॥ VM. seems to read वर्चः for पर्चः in the text.
९. The passage वर्चः सम्पर्कः should immediately follow वर्चः and precede यथा ।
१०. VM. ignores मतिम् ।
११. वैष्णव्यस्योपांशुयाजस्य 'त्रिर्देवः' इति याज्या । सूत्रितञ्च—'इदं विष्णुर्वि चक्रमे त्रिर्देव पृथिवीमेव एताम्' ĀŚS. 1.6.) इति । वैष्णव्ये पशावप्येषैव वपाया याज्या । सूत्रितञ्च—'त्रिर्देवः पृथिवीमेष एतां परो मात्रया तन्वा वृधान' (ĀŚS. 3. 8.) इति Sy.
१२. The *pratīka* is supplied by the Editor
१३. त्रिभिः पदैः Sy.
१४. दानादिगुणयुक्तो विष्णुः Sy.
१५. उपलक्षणमेतत् । पृथिव्यादीस्त्रींल्लोकान् Sy.
१६. विक्रान्तवान् Sy.
१७. शतसंख्यान्यर्चींषि यस्यास्तादृशीम् Sy.
१८. अस्माकं प्रभवतु । स्वामी भवतु Sy.
१९. विष्णो M.
२०. वृद्धोऽपि M. वृद्धादपि is suggested for वृद्धोदपि ॥ तवस्विनो वृद्धादपि Sy.
२१. तवस्वितरः Sy.
२२. यस्मात् तस्मात् कारणात् स विष्णुः प्रभवत्वित्यर्थः Sy. २३. वृद्धस्य Sy.
२४. नामकं रूप विष्णुरित्येतन्नामैव वा Sy.
२५. रिव A. विष्णुरित्येतन् नामैव वा Sy.
२६. VM. ignores त्वेषम् ॥ त्वेषं दीप्तम् Sy.
२७. पूर्वोक्त एव पशौ 'विचक्रमे' इति वपाया अनुवाक्या । सूत्रितञ्च—'वि चक्रमे पृथिवीमेष एतां त्रिर्देवः पृथिवीमेष एताम्' (ĀŚS. 3. 8.) इति Sy.
२८. विक्रान्तवान् Sy.
२९. पृथिवीम्—उपलक्षणमेतत् । पृथिव्यादीस्त्रींल्लोकान् Sy.
३०. ०रैः माक्रमन्तान् A. ०राक्रान्तान् is suggested for ०राक्रमन्तान् ।

वीम् । मनुष्याय[1] । दातुमिच्छन्[2] । स्थिताः[3] । अस्य[4] स्तोतारः । जना अयमेव स्तोतव्य इत्येकमनसस्तिष्ठन्ति सोऽयम् । शोभनजन्मा[5] । विस्तीर्णमन्निवासमसुरापनयनेन[6] । चकार[7] ।

प्र तत्ते[8] अद्य शिपिविष्ट[9] नामार्यः[10] शंसामि[11] वयुनानि[12] विद्वान्[13] ।
तं त्वा[14] गृणामि तवसमतव्यान्क्षयन्तमस्य[15] रजसः पराके[16] ॥ ५ ॥

प्र[17] तत्ते[18] । प्रशंसामि[19] । तत्[20] । ते[21] । अद्य[22] । शिपिविष्ट[23] ! नाम[24] । अर्यः[25] स्तोमानामीश्वरो

---

१. स्तुवते देवगणाय Sy.
२. असुरेभ्योऽपहृत्य दास्यन् Sy.
३. निश्चला भवन्ति। ऐहिकामुष्मिकयोर्लाभेन स्थिरा भवन्तीत्यर्थः Sy.
४. अस्य च विष्णोः Sy.
५. शोभनानि जनिमानि कीर्तनस्मरणादिना सुखहेतुभूतानि यस्य तादृशो विष्णुः Sy.
६. ०र्णनिवा० is suggested for ०र्णमन्निवा० ।
७. स्तोतृभ्यः करोति Sy.
८. VM. ignores विष्णुः ॥ देवो विष्णुः Sy.
९. तृतीयसवनेऽतिरात्रादूर्ध्वं सोमातिरेके सति नैमित्तिके होतुः शस्त्रे 'प्र तत्ते अद्य इति स्तोत्रियस्तृचः' (ĀŚS 6. 7.) । अभ्युदयेष्टौ विष्णोः शिपिविष्टस्य 'प्र तत्ते अद्य' इति याज्या । सूत्रितञ्च—'वषट् ते विष्णवास आ कृणोमि प्र तत्ते अद्य शिपिविष्ट नाम' (ĀŚS. 3. 13.) इति Sy.
१०. प्रकर्षेण स्तौमि Sy. प्रशंसामि । प्रशस्तगुणाभिधाय्येवेदं नाम न तु निन्दितं मन्तव्यम् । ....कोऽभिप्रायः ? एषोऽभिप्रायः, केचिदाहुः—शेप इव निर्वेष्टितः संयतरश्मिश्शिपिविष्ट इति । अन्ये तु ब्रुवते निर्विष्टशेपश्शिपिविष्ट इति । अपरे त्वाचक्षते—विवृत्तरश्मिश्शिपिविष्ट इति । नैतेषु त्रिष्वपि पक्षेषु, अनेन पदेन कश्चिद् गुणोऽभिधीयते, अपि तु निन्दैव । ततश्चानेन पदेन निर्वापादि क्रियमाणमुपालम्भमस्यावहेत् । अत इमं दोषमपनेतुमिदमुक्तमिति । तत्कथमिति चेत् ? उच्यते—नात्र शेपशब्दोऽस्ति न च केवलोऽपि विशिनिरुपसृष्टस्यार्थमभिधातुमीष्टे । तस्माच्छ्मयो रश्मयः, श्यतेश्शिपयस्तैक्ष्ण्यात् । तेषु प्रविष्टश्शिपिविष्ट इति प्रशंसापरमेतत् । अतोऽहमप्येतत् प्रशंसामीति BB. यदन्ये कुत्सितार्थीयं पश्यन्ति Dur. अनामन्त्रितत्वाच्चैकवाक्यभावाय यस्मात्तस्मादित्यध्याहारः कर्तव्यः यस्मादयं ईश्वरस्त्वमसि तस्मात् प्रशंसामि SKN.
११. प्रसिद्धम् । विष्णुरिति प्रख्यातम् Sy.
१२. तव Sy.
१३. इदानीम् Sy.
अस्मिन् कर्मणि BB.
१४. हे रश्मिभिराविष्ट ! Sy. हे शिपिविष्ट ! विष्णो ! Dur. हे शिपिविष्टाख्य ! SKN.
१५. विष्णुरिति प्रख्यातं नाम Sy. शिपिविष्टेत्येवंरूपम् BB. तत्ते नामेति विस्फुटतरं प्रशंसानामत्वमिति Dur.
१६. स्वामी स्तुतीनां हविषां वा Sy. अज्ञस्त्वमिति न वक्तव्यमित्याह—अर्यः, अरणीयोऽहम् । 'अर्यः स्वामिवैश्ययोः' इति BB. यस्मादीश्वरः स्तुतीनामुदीरणे युष्मद्गुणाभिज्ञस्तस्मादहं प्रशंसामि तत्ते नाम । अथवा—अर्यस्त्वमसि । अर्यं ईश्वरो मदनुग्रहाय समर्थस्तस्मात् प्रशंसामि Dur. ईश्वरोऽहं स्तोमानां करणे समर्थ इत्यर्थः । अथवा शिपिविष्टस्यैव तद्विशेषणमयं इति SKN.

महीश्वरस्त्वमस्तीति वा । प्रज्ञानानि । जानन् । त्वाम् । स्तौमि । तवसम् । अतव्यान् तवस इति महतो नामधेयं भवति । निवसन्तम् । अस्य । लोकस्य । पराक्रान्ते दूरे देशे ।

१. हविषामीश्वरः is suggested for महीश्वरः ।

२. त्वसस्तीति A. ०मसीति is suggested for ०मस्तीति ।

३. ज्ञातव्यान्यर्थजातानि Sy. युष्मद्विषयाणि प्रज्ञानानि Dur. प्रकाशरूपाणि कान्तिलक्षणानि ज्ञानानि वा सर्वार्थविषयाणि तावकीयानि SKN.

४. जानन्नहम् Sy. जानानः Dur.

५. त्वां विष्णुम् Sy. यस्त्वं सर्वगुणसम्पन्न ईश्वरस्तं त्वा त्वाम् Dur. तमिति तच्छुतेर्यच्छब्दाध्याहारः । यतश्चैतन्नामासि तं त्वां सर्वावस्थम् SKN.

६. स्तौमि Sy. ईदृशमहं गृणामि स्तौमि BB. अहं . स्तौमि Dur.

७. स्तव० A. प्रवृद्धम् Sy. तन्नामानं तवसं तपस्विनं महान्तम् । 'तु' इति वृद्धिकर्मा । असुअन्तादुत्पन्नो मत्वर्थीयो लुप्यते । अत एव प्रत्ययान्तरसङ्क्रान्त्या नञ्विषयत्वाभावादाद्युदात्तत्वाभावः BB. महान्तम् Dur., SKN.

८. सम अत is written twice in A. अवृद्धतरोऽहम् Sy. अतिशयेन तपस्वी तवीयान् ततोऽन्योऽतवीयान् । यद्यप्यहं विद्यामहिम्ना तवीयान्, तथापि त्वदपेक्षयाऽतवीयान्। तावृशोऽपि त्वत्प्रसादेन त्वां स्तौमीति। विन्मतोर्लुक्, तपस्विशब्दादीयसुन्प्रत्ययः। अत एवातिशय्यमानोऽपि 'तपस्वीति गम्यते । द्वयोर्हि तपस्विनोरन्यतरस्तपीयान् भवति BB. अमहानहम् । आत्मनिन्दया स्तूयते Dur. तवतेर्वृद्ध्यर्थस्य 'तुश्छन्दसि' (Pa. 5. 3. 59.) इति तृन्नन्तादीयसुनि 'तुरिष्ठेमेयस्सु' (Pa. 5. 4. 154.) इति तृनो लोपेन तव्यानिति रूपम् । अतव्यानतिशयेनावर्धितः प्रज्ञया । अत्यन्तमहन्मत्पप्रज्ञ इत्यर्थः SKN.

९. निवसन्तं तथापि सर्वलोकप्रकाशकं त्वां स्तौमि । इदं तव शिपिविष्टत्वमतः प्रशंसामीति 'क्षि निवासगत्योः' व्यत्ययेन शप् BB.

१०. इदानीमुक्तं शिपिविष्टपदार्थं समर्थयितुमाह— अस्य BB. क्व वर्तमानं निवसन्तम् ? अस्य Dur.

११. अन्तरिक्षस्य BB. अन्तरिक्षलोकस्य Dur. सोमलोकस्य द्विसञ्ज्ञस्य SKN.

१२. दूरदेशे Sy. परागते दूरे प्रदेशे BB. पराक्रान्तिस्थाने दूराद् दूरतरे निवसन्तं स्तौमि Dur. षष्ठीश्रुतेरेकदेशमते पराके दूर इत्यर्थः। पराके दूर इत्यस्य निर्वचनं पराक्रान्ते गत इत्यर्थः SKN.

१३. VM. ignores तम् ।

तत्तेऽद्य शिपिविष्ट ! नामार्यः प्रशंसामि । अर्योऽहमस्मीश्वरः स्तोमानाम् । अर्यस्त्वमसीति वा । तं त्वा स्तौमि तवसमतव्यान् । तवस इति महतो नामधेयम् । उदितौ भवति । निवसन्तमस्य रजसः । पराके पराक्रान्ते N. 5. 9.; SKN. II. 326.

This stanza=TS. 2.2.12.5.

किमित्ते विष्णो परिचक्ष्यं भूत्प्र यद्ववक्षे शिपिविष्टो अस्मि ।
मा वर्पो अस्मदपं गूह एतद्यदन्यरूपः समिथे बभूथ ॥ ६ ॥

किमित्ते । यास्कः—'शिपिविष्टो विष्णुरिति विष्णोर्धयनामनी भवतः । कुत्सितार्थीय पूर्वं भवतीत्यौपमन्यवः । किम् । इत् । ते । विष्णो ! प्रख्यापनीयमेतत् । भवत्यप्रख्यापनीयम् । यन्नः । प्रब्रूषे । शेप इव निर्वेष्टितः । अस्मीत्यप्रतिपन्नरश्मिः ।

---

१. पुरा खलु विष्णुः स्वं रूपं परित्यज्य कृत्रिमं रूपान्तरं धारयन् सङ्ग्रामे वसिष्ठस्य साहाय्यं चकार तं जानन्नृषिरनया प्रत्याचष्टे । अत्र निरुक्तम्. . . Sy. वसिष्ठस्यैते आर्षे Dur. वसिष्ठस्य । परा च SKN.

२. ०क्ते A.

३. ०ष्णोद्वेना० is suggested for ०ष्णोर्धयना० ॥

४. पूर्व A.

५. N. 5.7.

६. किंरूपस्त्वम् ? इति पृष्टः शिपिविष्टोऽस्मीत्युक्ते, अनन्तरं प्रक्रियते किमित् Dur. किं क्षेपे SKN.

७. इत् is not read in the Nirukta किमेतदेवैकं विगतरश्मिरूपम् Dur. इत् पदपूरणः SKN.

८. इदानीं तदेव परिसङ्ख्येयतया सम्भाव्यमानं दर्शयति—हे शिपिविष्ट BB.

९. N reads अप्रख्यातम् for प्रख्यापनीयम् गूहनीयं वर्जनीयमेव भूद् भवति नैवेतद् वर्जनीयम् । चक्षेश्छान्दसो यत् BB. परिख्यापनीयम् Dur. परीत्ययं प्रशब्दस्यार्थे, चक्षिङ् ख्यापनायाम्, प्रख्यापनीयमेतद्रूपम्. . . . भवति । अश्लीलोपमायोगान्नैतत्प्रख्यापनीयमित्यभिप्रायः अथवा परिपूर्वः ख्यातिः । परि वर्जने अवक्षिप्तमवशीतमुक्तादेव कारणात् परिवर्जनीयमित्यर्थः SKN.

१०. ०त्या प्र० A. नान्यानि रूपाणि तव सन्ति Dur.

११. यन्न A. M. येनैवम् Dur. कतमद्रूपम् ? यत् SKN.

१२. शिपिविष्टोऽस्मीति यद् ववक्षे किमिदं तदेव परिचक्ष्यं भवति । नैतदेवम् । तस्माच्छिपिविष्टोऽस्मीति ब्रुवन्नेव विश्वव्यापी वर्तस्वेति । वक्तेर्व्यत्ययेनात्मनेपदम् । 'बहुलं छन्दसि' इति शपश्लुः BB. पुनःपुनर्ब्रूषे, अस्माकमग्रतः Dur. प्रशब्दो ववक्षे इत्यनेन सम्बध्यते । . . . प्रब्रवीषि प्रदर्शयसीत्यर्थः । कस्मै ? सामर्थ्यादस्मदादिभ्यः SKN.

१३. सामर्थ्यादन्तर्णीतोपमानमेतत् । शिपिविष्ट इव यादृशः शेपो निर्वेष्टितस्तादृशः SKN.

१४. अप्रतिपन्नरश्मिर्हि सूर्य उदयकाले निर्वेष्टितः शेपस्वरूपो भवति । तस्य तद्रूपगुणयोगित्वमकुत्सितार्थमित्युपपद्यते Dur. अस्मीति, उदितमात्रादप्रतिपन्नरश्मिरस्यामवस्थायामारक्तत्वं प्रतिपन्नः SKN.

अपि वा प्रशंसानामैवाभिप्रेतं स्यात्—किम् । ते । विष्णो प्रख्यातमेतत् । भवति । प्रख्यापनीयम् । यदुत प्रब्रूषे । शिपिविष्टः । अस्मीति प्रतिपन्नरश्मिः, शिवयोऽत्र रश्मय उच्यन्ते तैराविष्टो भवति । मा । वर्पः । अस्मत् । अपगूहः । एतदित् । वर्प इति नं रूपनाम वृणोतीति सत । यत् । अन्यरूपः । समिधे

---

१. नामेवा० M. अपि वा प्रशंसायुक्तगुणमेवैतन्नाम स्याच्छिपिविष्ट इति । आह कथम् ? इत्युच्यते, शिपयोऽत्रास्मिन्प्रशंसानामपक्षे रश्मय उच्यन्ते। स च सूर्यो मुहूर्तोदितस्तैः शिपिसंज्ञैर्बालरश्मिभिराविष्टो भवति तस्माच्छिपिविष्ट इत्युच्यते । एवमेतद् व्युत्पाद्यमानं प्रशंसानामैव भवति । नाश्लीलोपमासम्बद्धमित्यभिप्रायः । हे विष्णो ! किमेतदेवैकं रूपं तव परिचक्ष्यं प्रख्यापनीयमस्ति, यदेतदुदयकाले प्रतिपन्नमात्रेषु रश्मिषु नान्यानि रूपाणि प्रख्यापनीयानि सन्ति। 'यदुत प्रब्रूषे शिपिविष्टोऽस्मीति प्रतिपन्नरश्मिः' प्रतिपन्नमात्रेषु रश्मिष्विति । विजानीमस्तवैतद्रूपद्वयम् Dur. आचार्यमतेन यदा तु शिपयो बालरश्मय उच्यन्ते तैराविष्ट इति एवमेतत् प्रशंसानामैवाभिप्रेतं स्यात् । तदप्येवं व्याख्येयम्—किं प्रश्ने । इदेवार्थे । मा वर्पो अस्मदिति परस्तादृद् रूपश्रुतेरिहाप्येतद्रूपमित्यध्याहार्यम् । तेनायमर्थः । किमेतदेव रूपं तव हे विष्णो ! अप्रख्यातमिव परिचक्ष्यं प्रख्यापनीयं भूद् भवति। युक्ततममुच्यते । उदयोत्तरकालभाविनी या अवस्था तस्यां वर्तमानो यत् तद् ब्रवीषि शिपिविष्टोऽस्मि, बालरश्मिभिराविष्टोऽस्मीत्यर्थः किमेतदेव रूपं ते ? नेत्युच्यते । अन्यदप्यस्ति रूपं तन्मापगूहेत्यादि समानं पूर्वेण । भाष्ये तु परिपूर्वश्चक्षिर्वर्जनार्थः। किमित् ते तव विष्णो ! अप्रख्यानं भवति । परिचक्ष्यं परिवर्जनीयम् । अश्लीलोपमायोगादप्रख्यापनीयं प्रब्रूम इति । प्रशंसानामत्वे तु किं ते विष्णो ! अप्रख्यातमेतद् भवति । अप्रख्यातमेवेत्यर्थः । परिचक्ष्यं भूत् प्रख्यापनीयं सद् यदुत प्रब्रूष इति वा पाठः SKN.

२. शिक्ष्यो० M. शिपयो० is suggested for शिवयो०

३. अल्पः A. इदानीं प्रशस्तगुणाभिधाय्येतन्नाम न परिसङ्ख्येयम्, अपि तु . . . . 'वर्प गतौ' असुन् प्रत्ययः लोके ख्यापयितव्यमिति दर्शयितुमाह—वर्पो वरितव्यमिदमुच्छ्रितं नाम BB. अतो ब्रूमः मा एतद् वर्पो रूपम् Dur. वर्प इति रूपनाम तद्धि आश्रयमावृत्य तिष्ठति SKN.

४. अस्माकमग्रतः प्रख्यापय Dur. अस्माकमित्यर्थः SKN.

५. अवजूह A. मापगूहः नेदमस्माकं गूहनीयमपि तु लोके श्लाघमानेन त्वयाऽऽघोषणीयमेव . गूहतेश्छान्दसोऽङ्प्रत्ययः BB. किं तर्हि ? संवृतं कुरुष्व Dur. 'गुहू संवरणे' मा संवरणं प्रकटय SKN.

६. एतत् is suggested for एतदित् ॥ एतच्छिपिविष्टशब्दवाच्यमुपमेयं रूपम्। अथवा बालरश्मिसंयुक्तम् Dur. प्रख्यापयैतदित्यभिप्रायः SKN.

७. न is not read in the *Nirukta*.

८. रूपना M. ९. वृणोती० A.

१०. येनान्येन रूपेण Dur. युक्ततममुच्यते यदन्यरूप एव कोऽप्यत्यन्तदीप्तः SKN.

११. N. reads समिथे for समिधे ॥ अथ यदि ब्रूया नापगूहामिति, मृषैतत्, यस्मात् त्वं समिथे सङ्ग्रामे उदयकाले रश्मिभिस्सह तव यस्सङ्ग्रामस्तत्र BB. सङ्ग्रामे । केन सह ? सामर्थ्यात् तमोभिः SKN.

सङ्ग्रामे । भवसि संयतरश्मिः' इति ।

औपमन्यवपक्षेऽयमर्थः—प्रच्छन्नरूपः सन् युद्धे वसिष्ठस्य विष्णुः साहाय्यमकरोत् तं वसिष्ठः प्रच्छन्नरूपमाह किमित्त इति । यद्यपि त्वम् । परित्यक्तरश्मि प्रच्छादनार्थमिह वर्तमानः । प्रब्रवीषि । शेप इवाऽहं वेष्टितः । अस्मीति न तत्तव ब्रीळमावहति महतस्तथा सति । मा । वर्पः । अस्मत् । अपगूहनाय । तत् । यत् त्वमिदमस्मिन् । सङ्ग्रामे । अन्यरूपः । भवसीति ।

---

१. अन्यरूपो बभूव भवसि न मध्याह्न एव महातेजा भवसि । तन्नूनं लज्जया शत्रुजनसमवाये उदयकाल एतदात्मीयं रूपं छादयसीति संल्लक्ष्यते । तस्माच्चैवमिदं गूहनीयमिति । 'बभूथात तन्थ' इतीडभावो निपात्यते BB. तदेव नो माध्यन्दिनं रूपमनेकरश्मिविकचं प्रकाशयस्वेत्यभिप्रायः । तद्धि, अनाधृष्यं सङ्ग्रामेषु भवति Dur. भवति मध्यन्दिनसमय एवमित्ययमौपमन्यवो मन्यते SKN.

२. संयित० A. सम्बद्धानेकरश्मिजालः Dur. संयतरूपो भवसीति द्रष्टव्यम् । सङ्गृहीतरश्मिर्वा । उपात्तरश्मिभिराविष्टः । कोमलमयूखादिभिरुदयोत्तरकालभाविन्यामवस्थायां वर्तमानस्य यत् कुत्सितार्थीयमिव दृश्यते SKN.

३. ०र्थं A. M. ४. प्रयच्छ० A. M.

५. त्वं वसिष्ठं A. M.

६. ०त्तमिति A. ०त्थमिति M.

७. ०श्मिःप्र० is suggested for ०श्मिप्र०।

८. व्रीडामा० is suggested for व्रीळमा०।

९. ववो A. अत उक्तरूपविलक्षणं प्रद्वेष्णवरूपमस्त्येतद्वर्पो रूपम् Sy.

१०. अस्मात्मम् Sy.

११. ०हना A. अपगूढं संवृतं (मा) कुरु । 'गुह संवरणे' अपि तु तदेव रूपं प्रकटय Sy.

१२. वैष्णवस्य रूपस्य गूहने का प्रसक्तिरिति चेत् ? यद्यस्मात् Sy.

१३. रूपान्तरमेव धारयन् Sy.

१४. अस्माकं सहायो भवसि तस्मादिदं गूहनं न कार्यमिति Sy.

१५. Sy. explains the first two verses of the stanza in the sense of contempt as follows:—तत्र कुत्सितार्थपक्षे योजना। हे विष्णो ! ते तव तन्नाम किं परिचक्ष्यं प्रख्यापनीयं भूद् भवति किंशब्दः क्षेपे, अप्रख्यापनीयमेव तद्भवति । यन्नामास्मभ्यं प्रवक्षे प्रब्रूषे शिपिविष्टोऽस्मीति । अन्तर्णीतोपमानमेतत् । शेप इव । निर्वेष्टितस्तेजसानाच्छादितो भवामीति । तदश्लीलत्वादिदं नाम न प्रशस्तमित्यर्थः । तन्नाम किं परिचक्ष्यं वर्जनीयं परित्याज्यम्, विरुद्धार्थप्रतिपादकत्वात् स्वत एव परित्यक्तं हि तत् । शिष्टं समानं हि पूर्वेण । अन्य आहुः—उक्तं शिपिविष्टोऽस्मीति नेदं परिसङ्ख्येयमिति । अथापि यत्त्वं लज्जयेव समिथे सङ्ग्राम उदयकालेऽन्यरूपो भवसि, इदमेव वर्पः प्रशस्ततरं रूपं तस्मादेतं मापगूहः सर्वावस्थास्वपोदमेव रूपं तव भवत्विदमेव शोभनमिति । अत्र निरुक्तादिषु बहुधा व्याख्यानानि कृतानि, अत्र युक्तरूपमिदमस्माभिरुक्तम् BB. This stanza=TS. 2.2.12.5.

प्रशंसानामपक्षे तु—मानुषे युद्धे समागतस्य स्वरूपप्रच्छादनार्थमात्मीयं तेजोऽपगूहितुमिच्छतो विष्णो-रनुशासनम्—किमित्त इति ।

वषट् ते विष्णवास आ कृणोमि तन्मे जुषस्व शिपिविष्ट हव्यम् ।
वर्धन्तु त्वा सुष्टुतयो गिरो मे यूयं पात स्वस्तिभिः सदा नः ॥ ७ ॥

[वषट् ते]

व्याकरोत् षष्ठमध्यायं पञ्चमस्याष्टकस्य सः ।
तस्य कुले जातो माधवो वेङ्कटात्मजः ॥

[अथ पञ्चमाष्टके सप्तमोऽध्यायः]

'तिस्रो वाचोऽधुनाध्यायं व्याचिख्यासति माधवः ।
ऋषौ चार्षे च वक्तव्यं प्रागनुक्तं प्रदर्शयन् ॥१॥
मनुष्यत्वे मन्त्रकृत ऋषयः परिकीर्तिताः ।
आर्षेयवरणं येषां तथा च ब्राह्मणं शृणु ॥२॥

---

१. Sy. explains this stanza in the sense of praise as follows:—हे विष्णो ! ते तव तन्नाम किं परिचक्ष्यं भूत् । किं प्रख्यापनीयं भवति ? न प्रख्यापनीयम् । किं तन्नाम ? शिपिविष्टो रश्मिभिराविष्टोऽस्मीति यन्नाम प्रब्रूषे । यत एवंप्रख्यातरूपस्त्वमतोऽस्माकमेतद्वैष्णवं रूपं संवृतं मा कार्षीः । इदानीं गूढरूपोऽपि यद्यस्मास्त्वं समिथे सङ्ग्रामेऽन्यरूपः कृत्रिमरूपं यदन्यद्वैष्णवं रूपं शौर्यादिलक्षणं तादृग्रूप एव बभूथ भवसि तस्मात्त्वं गूढोऽपि ज्ञायस एवेति व्यर्थमेव तस्य रूपस्य गूहनम् । अतो बहुतेजस्कं यद्वैष्णवं रूपं तदस्माकं प्रदर्शयेति तात्पर्यार्थः ।

२. The *pratika* is supplied by the Editor. The stanza has already been explained. See VII. 99. 7. Sy. explains it again in the following manner:—
व्याख्यातेयम् । अक्षरार्थस्तु—हे विष्णो ! तुभ्यमास्यादास्येन वषट्करोमि । वषट्कृतं तन्मदीयं हविर्हे शिपिविष्ट ! सेवस्व । शोभनस्तुतिरूपा मदीया वाचश्च त्वां वर्धयन्त्विति । शिष्टः पादः सिद्धः ।

३. supplied by the Editor

४. ०चो मधु० A. 'तिस्रो वाचः प्र वद' RV VII. 101. 1

५. ०षिवा० A. ०षिर्वा० M. The reading is adopted from R.

६. ०यत् A. The hemistich is written twice in A.

७. तेषां R.

'न देवैर्न मनुष्यैरार्षेय वृणीत ऋषिभिरेवार्षेयं वृणीत' इति ।
न मन्त्रदर्शनात् पूर्वमृषित्वं प्रत्यपद्यत ।
श्यावाश्व इत्यवोचाम पञ्चमे मण्डले वयम् ॥३॥
तेषामृषीणां ज्ञातव्यं गोत्रमित्याह शौनकः ।
देवा देव्योऽप्सरो नद्यो गन्धर्वाश्च स्वयम्भुवः ॥४॥
कार्याण्युद्दिश्य जायन्ते यदि देवादयोऽपि च ।
मानुषेषु कुलेष्वंशैर्गोत्रं ज्ञेयमिति स्थितिः ॥५॥
विपाट्छुतुद्र्योरिन्द्रस्य मरुतामदितेस्तथा ।
नोवाच शौनको गोत्रमिति तत्र निदर्शनम् ॥६॥
इच्छन्निन्द्रसमं पुत्रमभ्यधादङ्गिरा ऋषिः ।
अभूदिन्द्रः स्वयं तस्य तनयः सव्यनामकः ॥७॥
इच्छन्निन्द्रसमं पुत्रं चचार कुशिकः पुरा ।
ऐषीरथिर्ब्रह्मचर्यं गाधिनोऽस्य सुतोऽभवत् ॥८॥

---

१. ०तं A.
२. ĀP. ŚS. 24. 5. 3.
३. ०वॉ० A. Cf. VM.'s commentary on RV. V. 61.1. and also DDN's commentary on the same stanza 'तदाभवदृषिः सूक्तद्रष्टा श्यावाश्वनामकः'
४. देव्यो परो A. M. The reading is adopted from R.
५. ०वा A.
६. रार्या० A. रायां निर्विश्य M. The reading is adopted from R.
७. ०शोः गो० A.
८. द्विपाश्नुतुद्यो० A. M.
९. ०मन्विते० A.
१०. प्रोवाच is suggested for नोवाच ।
११. ०के M.
१२. ०धा अंगि० A.
१३. अपो दि० A. M. Cf. BD. III. 115 स्वयमिन्द्रसमं पुत्रमिच्छतोऽङ्गिरसो मुनेः । वज्रेण सव्यो भूत्वर्षेर्योगित्वात्पुत्रतां गतः ॥
१४. ०न्द्रस्य स्वयं A.
१५. तस्य omitted in A.
१६. ०थी ब्र० A. M.
१७. गाधीन्द्रो० M. गाधीन्द्रोऽ० A. Cf. KSA. 16. p. 14. कुशिकस्त्वैषीरथिरिन्द्रतुल्यं पुत्रमिच्छन् ब्रह्मचर्यं चचार तस्येन्द्र एव गाधी पुत्रो जज्ञे गाधिनो विश्वामित्रः । स तृतीयं मण्डलमपश्यत् and also Cf. ṣaḍvedārthadīpikā p. 104.

ज्ञातव्यमनयोर्गोत्रं विद्यमानमिति स्थितिः ।
नामार्षयोस्तु विज्ञानं कार्यं सर्वत्र पण्डितैः ॥९॥
ऋषिः शाक्त्यो गौरिवीतिस्त्रीणां मण्डले कथम् ।
आजगाम परित्यज्य वासिष्ठं मण्डलं स्वकम् ॥१०॥
'समिद्धो अग्निर्दिवीति विश्ववारार्षमुच्यते ।
तस्याः पतिर्गौरिवीतिरपश्यत् सूक्तमुत्तरम् ॥११॥
'सञ्जोस्पुत्यमिति ब्रूते विश्वावारा ततो वयम् ।
मन्यामहे पतिं तस्या गौरिवीतिमिहागतम् ॥१२॥
मध्येऽत्रीणामाङ्गिरसो धरुणो नाम कश्चन ।
सूक्तं 'प्र वेधसे' इति प्रसङ्गाद् दृष्टवानृषिः ॥१३॥
तेनाभिषज्य सूक्तेन धरुणोऽत्रिमृषिं पुरा ।
तथैव तत्रात्रिमस्परिति सूक्तान्तत श्रुतम् ॥१४॥
वर्तमाना मातृकुले तत्रत्यैर्ऋषिभिः सह ।
तादृशा ददृशुर्मन्त्रानिति केचिदव स्थिताः ॥१५॥

---

१. ज्ञातमनयोः A.
२. ना चौतिरपश्यत् मार्ष० A.
३. ऋषिशक्त्योः M. शक्त्यो A.
४. ०रिचीरित्री० A, M. RV. V. 29.
५. मण्डलं is omitted in A.
६. RV. V. 28.1. ०दिति A. दिवीति is missing in M.
७. ०रि चौति० A. M. The reading is adopted from R.
८. RV. V. 28.3.
९. पतितं A. १०. तस्य M.
११. RV. V.15.1.
१२. ०गा दुष्ट० A.
१३. ०षिज्य A. ०षज्यत् R.
१४. वरुणोऽत्रि मृषि A. वरुणो० M. The reading is adopted from R.
१५. ०मप्सरि० A., M. RV. V.15.5
१६. सूक्तं तता A. सूक्तं तथा M.
१७. ०शान् R.
१८. ०दिति A.

समानोदकसामान्याच्छ्यावाश्वः कण्वमण्डले ।
'अग्निनेन्द्रेण सूक्तानि* ददर्श पुनरागतः ॥१६॥
ऊह्यानि कारणान्येवं मण्डलान्तरसङ्क्रमे ।
अन्येषामपि दृष्टानामिति वृद्धेभ्य आगमः ॥१७॥
ऋषयो बहवश्चैत्थं स्मर्यन्ते सामगैरपि ।
स्मरन्त्यध्वर्यवे नैवं तत्र किं कारणं भवेत् ॥१८॥
प्रजापतिश्च सोमश्च तृतीयोऽग्निस्तथैव च ।
विश्वे देवाः स्वयम्भूश्च तेषां काण्डर्षयो मताः ॥१९॥
यजुष्यृचश्च बहुभिर्दृष्टा ह्येतैर्महर्षिभिः ।
काण्डान्यकुर्वन्नृषयः स्मर्यन्तेऽध्वर्युभिश्च ते ॥२०॥
पठन्त्यवान्तरानादौ ब्राह्मणानां कथाः पुनः ।
ऋषीन् व्याख्यानभूतानामनेकान् यजुषामपि ॥२१॥
काण्डर्षिस्मरणादेव भवत्यभ्युदयस्तथा ।
स्मरन्त्यवान्तरान्नैत इति वृद्धेभ्य आगमः ॥२२॥
ब्राह्मणान्नामधेयाच्च शाखास्वन्यास्वपि द्विजाः ।
तानेवर्षीन् विजानन्ति य ऋग्वेदे व्यवस्थिताः ॥२३॥

---

१. ०वर्कसा० M. २. RV. VIII. 35.1. *RV. VIII. 35-38
३. ग्रौह्यानि A. M.
४. ०न्येव A. ५. ०चे० A.
६. सागमेर० A. सागमैर० M.
७. ०न्तध्वर्यवे A. ०न्त्याध्वर्यवेः R. ०न्त्यध्वर्यवः is suggested for ०न्त्यध्वर्यवे ।
८. नैव M. ९. ववेत् R. १०. विदुः R.
११. यजूष्टृ च० A. यजुष्टृच M.
१२. द्रष्टा A.
१३. नेते मह० A., M. सन्ति मह० R.
१४. नृषयः स्मर्युः स्तेऽध्व० A. काण्वान्यकर्मसृ० M.
१५. पठ्यवा० A., M. १६. कठाः R.
१७. काण्डर्षि० A., M. १८. ततः M., R.
१९. ०याश्च A., M.
२०. तनेर्षीन् A., M.

साम्नां रथन्तरादीनां भिन्नैवात्यन्तमाकृतिः ।
ताण्डक शाट्यायनके भिद्यन्त ऋषयो न तु ॥२४॥
भरद्वाजोऽकामयत वसिष्ठोऽकामयतेति ।
उभयत्रार्थवादानां पश्यामो ह्येकरूपताम् ॥२५॥

अध्वर्यूणां ब्राह्मणानि—'कणुष्व पाजु'* इत्यत्र वामदेवस्यर्चो याज्यानुवाक्या भवन्तीत्युक्तम् । 'दिवस्परि प्रथमम्'† इत्यत्रैतेन वै वत्सप्रीर्भालन्दन इत्युक्तम् । 'अयं सो अग्निः' इति विश्वामित्रस्य सूक्तं भवतीत्युक्तम् । ऋषेर्ऋषेर्वा एता निर्मिता यत् सामिधेन्य इत्युक्तम् ।

एवमैक्ये रूपभेदः पाठभेदश्च किङकृतः ।
साम्नामृचां च विविधं कथयन्त्यत्र वैदिकाः ॥२६॥
भूयोभूयस्तपस्तप्त्वा वेदान्नानाविधानिति ।
ऋषयो ददृशुः पूर्वे तं तमर्थमभीप्सवः ॥२७॥
यजुष्वृक्षु च वैरूप्ये रूपस्वरकृते बुधाः ।
अर्थद्वैरूप्यमपि च कारणं प्रतिजानते ॥२८॥
ऋग् 'विश्वो देवस्य नेतुः' भवेत् तत्र निदर्शनम् ।
विश्वे बहुवचनान्तं पठन्त्यध्वर्यवः पदम् ॥२९॥इति॥

---

१. भिन्नेहस्य० A., M.
२. ०टचायंन० A.
३. ०र्थपादा० A.
४. ह्याक० A.
५. ०र्यूणान् ब्रा० R.
*RV. 4.4.1.
६. स्य चो A.
७. ०क्ता० A. ०वती० M.
†RV. 10.45.1.
८. वै is omittd in A.
९. यत् स प्रीर्हाल० A.
१०. अयसो A. RV. III. 22.1
११. निमिता A.
१२. विदान्ताना० A. वेदान्ताना० M.
१३. ददृशुं A.
१४. ०रूपे A.
१५. ऋग्वि (त्वि) श्चो A. ऋग्विदो M.
१६. देवस्य गेतु० A. देव्यस्य हेतु० M. RV. V. 50.1
१७. पठत्यध्वर्यव A. पठन्त्याध्व० R. TS. 2.2.1

VII. 101.

तिस्रो वाचः प्र वद ज्योतिरग्रा या एतद्हे मधुदोघमूर्धः ।
स वत्सं कृण्वन्गर्भमोषधीनां सद्यो जातो वृषभो रोरवीति ॥ १ ॥

तिस्रो वाचः । आग्नेय कुमारो नाम सूक्तयोर्वसिष्ठ एव वा वृष्टिकाम. ॥ तिस्रः । वाचः प्रवद । विद्यन्मुखास्तस्यैते वषट्कारा यत् स्तनयति यद् विद्योतति ततो यदवस्फूर्जते यद्वातो वायतीति ब्राह्मणम् । याः । एत । दुहते । मधुक्षरि । मेघस्योध य । स । आत्मीय वत्समुदनम् । औषधीनाम् । गर्भम् । कृण्वन् अपि वाग्निर्वत्स पर्जन्यस्य तमोषधीना गर्भ कृण्वन् । सद्य । जात. । वृषभ । शब्दायते ।

---

१. अथ सप्तमो व्याख्यास्यते । सप्तममण्डलस्य षष्ठेऽनुवाके, एकादश सूक्तानि व्याख्यातानि । 'तिस्रो वाचः' इति षडृचं द्वादशं सूक्तम् ॥ अत्रानुक्रम्यते--'तिस्रः षट् पार्जन्यं तु'(KSA. 39. 101. p 27.)इति । 'एते कुमार आग्नेयोऽपश्यद्वसिष्ठ एव वा' (KSA. 39. 101. p. 27.) इति । वक्ष्यमाणत्वादग्निपुत्रः कुमार ऋषिर्वसिष्ठो वा । अनुक्तत्वात्त्रिष्टुप् । इदमुत्तरं च पर्जन्यदेवत्यम् ।
अत्र शौनकः--
आस्यद घनं विगाह्यापः प्राङ्मुखः प्रयतः शुचिः ।
सूक्ताभ्यां तिस्र आदिभ्यामुपतिष्ठेत भास्करम् ॥
अनश्नतैतज्जप्तव्यं वृष्टिकामेन यत्नतः ।
पञ्चरात्रेऽप्यतिक्रान्ते महतो वृष्टिमाप्नुयात् ॥
(Rgvidh. 2. 30.) ऋषिरात्मानं स्तुतौ प्रेरयति Sy.

२. आग्नेय A. (Cf. KSA. 39. 102. p.27)

३. सूक्तं यो M. ४. हे ऋषे ! त्रिविधाः Sy.

५. वाच A. ऋग्यजुसामात्मिकाः स्तुतिरूपाः Sy.

६. प्रावद M. प्रब्रूहि । यद्वा वदेति व्यत्ययेन मध्यमः । तिस्र इति द्रुतविलम्बितमध्यमभेदेन त्रिविधा ज्योतिरग्रा विद्युत्प्रमुखा वाचः प्रवदेतेति । या गर्जितलक्षणा वाचो वृष्टिप्रदमेतं मेघं वृहं उदकानि बृहन्ति Sy.

७. द्यमु० A. विद्युन्मु० is suggested for विद्यन्मु० ज्योतिर्द्योतमानः प्रणवोऽग्रे प्रमुखो यासां तादृशीः Sy.

८. यय A. ९. व्यद् M.

१०. ०दः प्रम्पूर्ज० M. ११. यद्वौतो A.

१२. या is missing in M

१३. एतत् is suggested for एत ॥ नभसि वृश्यमानम् Sy.

१४. वुहेर्लेटि 'लोपस्त आत्मनेपदेषु' इति तलोपः । बाहुलको रुट् । स्तोत्रैः प्रीतो हि पर्जन्यो मेघैर्वर्षयति । अतो वाच एव दुहन्तीत्युपचर्यते Sy.

१५. मधुन उदकस्य दोहकं वृष्टयुदकस्य कर्तारम् Sy.

१६. ऊयः A. ऊधः यः M. यः seems to be redundant. उद्धृतं मेघम् । यद्वा लुप्तोपममेतत् । ऊध इव पयस आश्रयभूतं मेघम् Sy.

१७. एवम्भूतः स पर्जन्यः Sy.

१८. ०दकम् is suggested for ०दतम् ॥ सह निवसन्तं वैद्युताग्निम् Sy.

१९. ओष० is suggested for औष० ॥ व्रीह्यादीनाम् Sy. २०. प्रादुष्कुर्वन् Sy.

२१. ०ल्प वा० M. २२. शरीरम् Sy.

२३. प्रादुर्भूतः Sy. २४. वर्धिता Sy.

२५. भृशं शब्दायते Sy.

यो वर्धन ओषधीनां यो अपां यो विश्वस्य जगतो देव ईशे ।
स त्रिधातु शरणं शर्म यंसत्त्रिवर्तु ज्योतिः स्वभिष्टयेस्मे ॥ २ ॥

यो वर्ध[1] : । यः । ओषधीनाम् । अपां च । वर्धनः[2] । यश्च । विश्वस्य । जगतः[3] । ईष्टे[4] । सः । त्रिबन्धनम्[5] । गृह च । सुख च । यच्छतु । त्रिवर्तु[6] च । ज्योति[7] । स्वभ्येषणम्[8] । अस्मभ्य प्रयच्छतु, त्रिवर्तन भवत्यादित्याज्ज्योतिर्वा 'वसन्ता प्रातर्ग्रीष्मे मध्यन्दिने शरद्यपराह्णे'[9] त्रिप्रकार[10] तप्यमानमिति[11] ।

स्तरीरु त्वद्दुदुवति सूत उ त्वद्यथावशं तन्वं चक्र एषः ।
पितुः पयः प्रति गृभ्णाति माता तेन पिता वर्धते तेन पुत्रः ॥ ३ ॥

स्तरीरु[12] त्वत् । तृवृत्तप्रसवम् । एकम्[13] । भवति[14] । सूते[15] । अन्यत्[16] । यथाकामम् । आत्मीय शरीर-मुभयो[17] । करोति । एष देव पर्जन्यो दिवि च पृथिव्या चात्मीयमुदक विस्तारयति तत्र पृथिव्यौषधी[18] जनय-

---

१. ये ओष० A. पर्जन्यः Sy.
२. उदकानाम् Sy.
३. वर्धयिता Sy.
४. सर्वस्य Sy.
५. कर्मणि शेषत्वेन विवक्षिते षष्ठी Sy.
६. 'लोपस्त आत्मनेपदेषु' इति तलोपः 'अधीगर्थ०' (Pa. 2. 3. 52.) इति । अनुदात्तेत्त्वाल्लसार्व-धातुकानुदात्तत्वे धातुस्वरः 'यदवृत्तान्नित्यम्' इति निघातप्रतिषेधः Sy.
७. त्रिभूमिकम् Sy.
८. अस्मभ्यं ददात्वित्यर्थः । प्रमेलेऽधडागमः 'सिब्बहुलम्' इति सिप् । 'इतश्च लोपः' इतीकारलोपः Sy.
९. त्रिष्वृतुष्वतिशयेन वर्तमानम् Sy.
१०. तेजः Sy.
११. अभ्येषणम् M.
१२. ०त्यं ज्यो० A.
१३. TS. 2. 1 2. 5.
१४. तिप्रकारं तप्यम्नामिति A.
१५. The passage त्रिवर्तनम् .तप्यमानम् should immediately follow त्रिवर्तु च and precede ज्योतिः ।
१६. VM. ignores देवः ॥ देवः द्योतमानः Sy.
१७. ०रू त्वं A.
१८. त्रिवृतः M. निवृ० is suggested for तृवृ० ॥ स्तरीर्निवृत्तप्रसवा गोः सा यथा न दोग्ध्री तद्वद्वर्षुकं न भवति Sy.
१९. त्वदिति तकारान्तोऽन्यशब्दपर्यायोऽनुदात्तः सर्व-नामसु पठितः । अस्य पर्जन्यस्य त्वद् अन्यद्रूपम् Sy.
२०. ०ती A.
२१. धेनुवत्प्रसूते । उदकानि प्रवर्षति Sy.
२२. स्तरीत्वेन धेनुत्वेन च Sy.
२३. ०व्योषधीर्ज० is suggested for ०व्यो-धधीं ज०

तीत्यर्थः । पितुः[1] । पय[2]. । प्रतिगृह्णाति[3] । माता द्युलोकात् पृथिव्युदकम् । तेनोदकेन । पिता[4] च । वर्धते[5] । पुत्रश्चाय[6] लोकः पितृप्रदान हि देवाश्चोपजीवन्ति[7] ।

यस्मिन्विश्वानि भुवनानि तस्थुस्तिस्रो द्यावस्त्रेधा सस्रुरापः[8] ।
त्रयः कोशास उपसेचनासो मध्वः श्चोतन्त्यभितो विरप्शम् ॥ ४ ॥

यस्मिन्[9] । यस्मिन्[10] । विश्वानि[11] । भूतानि[12] । तिष्ठन्ति[13] । त्रयश्च । लोकाः[14] । यस्माच्च त्रेधा[15] । स्रवन्ति[16] । आप आज्योषधिसोमरूपा[17] । त्रय[18]. । कोशा[19] अग्निवायुसूर्याख्याः[20] । पर्जन्यस्योपसेचनाः[21] । उदकानि[22] । क्षरन्ति[23] । परितः । महान्तं पर्जन्यम् ।

इदं वचः पर्जन्याय स्वराजे हृदो अस्त्वन्तरं तज्जुजोषत् ।
मयोभुवो वृष्टयः सन्त्वस्मे सुपिप्पला ओषधीर्देवगोपाः ॥ ५ ॥

इदं वचः[24] । इदम् । वचः[25] । पर्जन्याय[26] । स्वराजे[27] । हृदयस्य[28] । अन्तरङ्गम्[29] । अस्तु[30] । तत् । स[31]

---

१. दिवः सकाशात् Sy.
२. वृष्टद्युदकम् Sy.
३. 'हृग्रहोर्भः' इति भत्वम् Sy.
४. प्रतिगृहीतेन तेन हविरात्मना परिणतेन पिता द्युलोकः Sy.
५. तेनैवोदकेन पुत्रः पृथिव्यां भवः प्राणिसङ्घोऽपि वर्धते Sy.
६. पितृप्र० M.
७. The passage beginning with विस्तारयति and ending with देवाश्चोप is missing in A.
८. VM ignores उ twice ॥ उ इति पूरकः । द्वितीय उशब्दश्चार्थे Sy.
९. यस्मिन् is missing in A.
१०. पर्जन्ये Sy.
११. सर्वाणि Sy.
१२. भूतजातानि Sy
१३. यदधीनवृत्तीनि भवन्तीत्यर्थः Sy.
१४. यस्मिंश्च द्युप्रभृतयो लोका अवतिष्ठन्ते Sy.
१५. प्राच्यः प्रतीच्योऽवाच्यश्च सत्यः Sy.
१६. ०वति A. निर्गच्छन्ति Sy.
१७. आज्योष० A.
१८. ०रूपः M.
१९. पौरस्त्यः प्रतीच उदीच्यश्चेति त्रिप्रकाराः Sy.
२०. मेघाः Sy.
२१. अग्निः वायुः सू० A.
२२. उपसेक्तारः Sy.
२३. मध्वः-कर्मणि षष्ठी । मधु उदकम् Sy.
२४. क्षारयन्ति । वर्षन्ति Sy.
२५. वचनं स्तोत्रम् Sy.
२६. अप० A. पर्जन्याय क्रियते Sy.
२७. ०जो A. स्वायत्तदीप्तये Sy.
२८. तदीयस्य हृदयस्य Sy.
२९. अन्तर्गतम् Sy.
३०. अस्त A.
३१. स्तोत्रम् Sy.

सेवताम् । सुखस्य भावयित्र्य । वृष्टयः । अस्मासु । सुबला । ज्योषध्यः । देवेन पर्जन्येन गुप्ताः ।

स रेतोधा वृषभः शश्वतीनां तस्मिन्नात्मा जगतस्तस्थुषश्च ।
तन्म ऋतं पातु शतशारदाय यूयं पात स्वस्तिभिः सदा नः ॥ ६ ॥

स रेतोधाः । पर्जन्यः । रेतसो निधाता । वर्षिता च । बह्वीनामपाम् । तस्मिन् । आत्मा । जङ्गमस्य । स्थावरस्य । च यद्वा बह्वीनामोषधीना पर्जन्यः । तत् । उदकम् । अस्मान् । रक्षतु । शतशरदाय जीविताय ।

VII. 102.

पर्जन्याय प्र गायत दिवस्पुत्राय मीळ्हुषे । स नो यवसमिच्छतु ॥ १ ॥

पर्जन्याय । पर्जन्याय । प्रगायत । अन्तरिक्षे । प्रादुर्भूताय । सेक्त्रे । सः । अस्माकम् । यवसम् । इच्छतु ।

---

१. जुजोषत्–'जुषी प्रीतिसेवनयोः' लेटचडागमश्छान्दसः । शपः श्लुः Sy.
२. सख० A.
३. वष्ट० A.
४. अस्माकम् Sy.
५. लभला A. सुफलाः is suggested for ०बला M. सुफला अस्माकं भवन्तु Sy.
६. ज्योष० A. आज्योष० is suggested for ज्यौष० ॥ ओषधयश्च Sy.
७. तथा देवः पर्जन्यो गोपायिता रक्षिता यासां तथाविधाः Sy.
८. VM. ignores सन्तु ॥ त्वत्प्रसादात् सन्तु भवन्तु Sy.
९. उदकस्य बीजभूतस्य धाता विनिधाता भवति Sy.
१०. वृषभ इत्युपमा । यथा कश्चिद्वृषभो बह्वीनां गवां गर्भस्याधाता भवति तद्वत् Sy.
११. ओषधीनाम् Sy.
१२. पर्जन्ये Sy.
१३. देहो वर्तते Sy.
१४. र is missing in A.
१५. ०नामोष० A.
१६. तत्पर्जन्येन दत्तम् Sy.
१७. उकम् Sy.
१८. माम् । मा शब्दस्य 'ऋत्यकः' इति प्रकृतिभावो ह्रस्वत्वं च । अन्यद्गतम् Sy.
१९. शतसंवत्सरजीवनार्थम् Sy.
२०. 'पर्जन्याय' इति तृचं त्रयोदशं सूक्तं गायत्रम् । पूर्ववद्विदेवते । तथा चानुक्रान्तम्––'पर्जन्याय तृचं गायत्रम्' (KSA. 39. 102. p. 27. adds after it: एते कुमार आग्नयोऽपश्यद्वसिष्ठ एव वा वृष्टिकामः इति ।) वैश्वानरपार्जन्यायामन्वारम्भणीयायां पर्जन्यस्य चरोः 'पर्जन्याय' इत्यनुवाक्या । सूच्यते हि––'पर्जन्याय प्र गायत प्र वाता वान्ति पतयन्ति विद्युतः' (ĀŚS 2. 15.) इति Sy.
२१. हे स्तोतारः ! . .प्रकर्षेण स्तोत्रमुच्चारयत Sy.
२२. अन्तरिक्षस्य Sy.
२३. पुत्राय, तत्र हि पर्जन्यः प्रादुर्भवति Sy.
२४. तादृशः पर्जन्यः Sy.
२५. अस्मभ्यम् Sy.
२६. यवस A. ओषध्यादिलक्षणमन्नम् Sy.
२७. गच्छतु A.M. दातुमिच्छतु Sy.

यो गर्भमोषधीनां गवां कृणोत्यर्वताम् । पर्जन्यः पुरुषीणाम् ॥ २ ॥

उत्तरे निगदसिद्धे--

[यो गर्भम्]

तस्मा इदास्ये हविर्जुहोता मधुमत्तमम् । इळां नः संयतं करत् ॥ ३ ॥

[तस्मा इत] । .अस्रम् । सम्यग्गतम् । करोत्विति ।

VII. 103.

संवत्सरं शशयाना ब्राह्मणा व्रतचारिणः ।
वाचं पर्जन्यजिन्वितां प्र मण्डूका अवादिषुः ॥ १ ॥

संवत्सरम् । सवत्सरम् । शिश्याना. । ब्राह्मणा । व्रतचारिणोऽजग्मन्त । वाचम् । पर्जन्यप्रीताम् ।

---

१. As VM. does not explain the stanzas VII. 10.2—3 and a few words of his commentary on this stanza are preserved, the reading should be उत्तरा निगदसिद्धा

२. The *Pratīka* is supplied by the Editor. This stanza is not explained by VM. Sy. explains it in the following manner:— यः पर्जन्य ओषधीनां व्रीह्यादीनां गवामर्वतामर्वतीनां पुरुषीणां नारीणां च यः पर्जन्यो गर्भं प्रसूतिहेतुं बीजमुदकरूपं कृणोति करोति तस्मै पर्जन्यायेत्युत्तरत्र सम्बन्धः Sy.

३. The *Pratīka* is supplied by the Editor.

४. अन्न Λ. ५. सम्यगंतं Λ.

६. तस्मा इत्तस्मा एव पर्जन्यायास्ये देवाना-- मास्यभूतेऽग्नौ मधुमत्तमं रसवत्तमं हविर्जुहोत जुहुत हे ऋत्विजः ! स च पर्जन्यो नोऽस्मभ्यमिळामन्नं संयतं सम्यग्नियतं यथा भवति तथा करत् करोतु । ददात्विति यावत् Sy.

७. 'संवत्सरम्' इति दशर्चं चतुर्दशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभम् । आद्या त्वनुष्टुप् । मण्डूका देवता । तथा चानुक्रान्तम्--'संवत्सरं दश पर्जन्यस्तुतिः संहृष्टान्मण्डूकांस्तुष्टावाद्यानुष्टुप्' (KSA. 39.103. p. 27.) इति । वृष्टिकामेनैतत् सूक्तं जप्यम् Sy. वसिष्ठस्यार्षम् Dur. वसिष्ठस्य SKN.

८. शरत्प्रभृत्यावर्षर्तोरेकं संवत्सरम् Sy.

९. वर्षणार्थं तपश्चरन्त इव बिले एव सन्तः Sy. निर्वाचः संवत्सरं सुप्ता इव स्थित्वा Dur. अत्रैकवाक्यतायै यत्तच्छब्दाध्याहारः । ये शयितवन्तः । लुप्तोपममेतत् । सुप्ता इव वाऽष्टौ मासान् निश्शब्दा बभूवुरित्यर्थः SKN.

१०. लुप्तोपममेतत् । एवम्भूता ब्राह्मणा इव Sy. सर्वथा सन्तो वक्तुम् Dur. ब्रुवतेरेतद्रूपम् । वचनसमर्था अपि सन्तः SKN.

११. वृतपारिणे० A व्रतं संवत्सरसत्रात्मकं कर्माचरन्तः Sy. कृतवाक्संयमाः । ततः प्रावृट्कालं प्राप्याभिवृष्टाः Dur. अथवा व्रतमिति कर्मनाम । स्वस्य कर्मणश्चरितारो गन्तार इत्यर्थः । ते SKN

१२. वर्षासु वाचम् SKN.

१३. पर्जन्येन प्रीताम् । यया वाचा पर्जन्यः प्रीतो भवति तादृशीं वाचम् Sy. पर्जन्येन तर्पिताम् Dur. जिन्वतिः प्रीतिकर्मा । पर्जन्येन प्रीताम् SKN.

प्रावादिषुः[1]। मण्डूकाः[2], अत्र यास्कः—'ब्राह्मणाः प्रवणाद्[3], अपि। वोपमार्थे स्याद् ब्राह्मणा इव व्रतचारिण[4] इति'[5]

दिव्या आपो अभि यदेनमायन्दृतिं न शुष्कं सरसी शयानम्।
गवामह न मायुर्वत्सिनीनां मण्डूकानां वग्मुरत्रा समेति ॥ २ ॥

दिव्याः आपः। दिव्याः[6]। आपः। अभ्यायन्[7]। यत्[8]। एन मण्डूकम्[9]। दृतिम्। इव। शुष्कम्[10]। सलिले महति सरसि[12]। शयानम्[11]। गवाम्। इव। शब्द। वत्सयुक्तानाम्। मण्डूकानाम्। शब्दः। अत्र[14] पर्जन्ये वर्षासु वा। सङ्गच्छते[15]। अहेति[16] पूरणम्।

---

१. प्रवदन्ति Sy. प्रशब्दोऽवादिषुरित्येतेन सम्बध्यते। . .प्रावादिषुः, वर्तमाने लुङ्। प्रवदन्ति SKN.

२. अथवा न युक्तो रूढिपरिवादो ब्राह्मणशब्दस्येति लुप्तोपमः प्रकल्प्यते 'ब्राह्मणा इव व्रतचारिणः' इति। यथा ब्राह्मणा उपाकृत्य प्रावृषि पवित्रपाणयो मेखलिनो नियतकालां तां वैदिकीं वाचं वदन्ति, एवं प्रावादिषुरिति Dur. ब्राह्मणा इति लुप्तोपमम्। ये संवत्सरं शयितवन्तस्ते यथा ब्राह्मणाः कृतस्वाध्यायोपकरणा व्रतवारिणः स्वाध्यायमेवं वाचं पर्जन्येन प्रीतां मण्डूकाः प्रवदन्तीति SKN.

३. N. reads व्रतचारिणोऽब्रुवाणाः for प्रवणात्।

४. वोवमा० A. ५. ०णा A.

६. मण्डूका मञ्जूका मज्जनात्। मदतेर्वा मोदतिकर्मणः। मन्वतेर्वा तृप्तिकर्मणः। मण्डयतेरिति वैयाकरणाः। मण्ड एवामोक इति वा। मण्डो मदेर्वा मुदेर्वा। तेषामेषा भवति ....संवत्सरं शिश्याना ब्राह्मणा व्रतचारिणोऽब्रुवाणाः। अपि वोपमार्थे स्यात्। ब्राह्मणा इव व्रतचारिण इति। वाचं पर्जन्यप्रीतां प्रावादिषुर्मण्डूकाः।

वसिष्ठो वर्षकामः पर्जन्यं तुष्टाव। तं मण्डूका अन्वमोदन्त। स मण्डूकाननुमोदमानान् वृष्ट्वा तुष्टाव N. 9.5.6. SKN. III. 147.

७. विवि भवाः Sy.

८. ०यत् A. अभिगच्छन्ति Sy.

९. यदि A. यदा Sy.

१०. मण्डूकगणम् Sy. ११. नीरसम् Sy.

१२. महत्सरः सरसी। सरस्याम्। 'सुपां सुलुक्०' इति सप्तम्या लुक्। 'ईद्बहौ च सप्तम्यर्थे' इति प्रगृह्यसंज्ञा। महति सरसि निर्जले घर्मकाले Sy. १३. निवसन्तम् Sy.

१४. अस्मिन् वर्षणे पर्जन्ये वा सति Sy.

१५. ०च्छते A. यथा वत्सैः सङ्गतासु गोषु महान् घोषो जायते तद्वद्वृष्टे पर्जन्ये महान् कलकलशब्दो जायत इत्यर्थः Sy.

१६. ०णाय A. अहेति पूरकः Sy.

यदीमेनाँ उशतो अभ्यवर्षीत्तृष्यावतः प्रावृष्यागतायाम् ।
अरखलीकृत्या पितरं न पुत्रो अन्यो अन्यमुप वदन्तमेति ॥ ३ ॥

यदीमेनान्[1] । यदि[2] । एनान्[3] । कामयमानानुदकम् । अभिवर्षति[4] पर्जन्यः[5] । तृष्णायुक्तान् । प्रावृषि । आगतायाम्[6] । अरखलीकृत्येति शब्दानुकरणमाहुः । पितरम् । इव । पुत्रः । अन्यः[7] । अन्यम्[8] । उपगच्छति[9] । वदन्तं शब्दायमानमिति[10] ।

अन्यो अन्यमनु गृभ्णात्येनोरपां प्रसर्गे यदमन्दिषाताम् ।
मण्डूको यदभिवृष्टः कनिष्कन्नृष्निः संपृङ्क्ते हरितेन वाचम् ॥ ४ ॥

अन्यो अन्यम्[11] । अन्यः[12] । अन्यम्[13] । अनयोर्मण्डूकयोः । अनुगम्य । गृह्णाति । अपाम्[14] । प्रसर्गे[15] । यदा । अमन्दिषाताम्[16] । मण्डूकः । यदा मण्डूकः[17] । अभिवृष्टः[18] । शब्दं कुर्वन्[19] । पृष्निवर्णः[20] । सम्पृङ्क्ते[21] । हरितवर्णेनान्येन[22] । आत्मीया वाच सम्मिश्रयति[23] ।

---

१. यवि मेनात् A.

२. यदा Sy.

३. एनात् A. मण्डूकान् Sy.

४. ०न्ति A. जलैरभिषिञ्चति Sy.

५. वर्षतो Sy.

६. ०यन्म् A. आगते सति Sy.

७. तदानीमखलशब्दं कृत्वा Sy.

८. मण्डूकः Sy.

९. मण्डूकम् Sy.

१०. प्राप्नोति Sy.

११. VM. ignores ईम् ॥ ईमिति पूरणः Sy.

१२. अन्योन्यं A.

१३. मण्डूकः Sy.

१४. मण्डूकम् Sy.

१५. उदकानाम् Sy.

१६. प्रसर्जने वर्षणे सति Sy.

१७. ०मदि० M. हृष्टावभूताम् Sy.

१८. यदा च Sy.

१९. It seems to be redundant.

२०. पर्जन्येनाभिषिक्तः Sy.

२१. कनिष्कन्---स्कन्दतेर्यङ्लुगन्तस्य रूपम् । भृशं स स्कन्दप्लुत्प्लवं कुर्वन् Sy.

२२. वृश्चिव० A. पृश्निवर्णो मण्डूकः Sy.

२३. संयोजयति । उभावप्येकं शब्दं कुरुते तदानीमन्योऽन्यमनुगृभ्णातीत्यन्वयः Sy.

२४. ह is written twice in A. हरितवर्णेनान्येन मण्डूकेन Sy.

२५. सम्मिश्रयति seems to be the explanation of सम्पृङ्क्ते, it should therefore immediately follow that.

यदेषामन्यो अन्यस्य वाचं शाक्तस्येव वदति शिक्षमाणः ।
सर्वं तदेषां समृधेव पर्व यत्सुवाचो वदथनाध्यप्सु ॥ ५ ॥

यदेषाम्[1] । यत्[2] । येषाम्[3] । अन्य[4] । अन्यस्य[5] । वाचम् । वदति । शक्तियुक्तस्येव[6] । शिष्यस्य शिष्यन्नाचार्यस्य[7] । सर्वम्[8] । तत् । एषा भवताम् । समृद्धमिव[9] । पर्वाङ्गानामुदकाप्यायितम्[10] । यत्[11] । सुवाचो[12] यूयम् । अप्सु[13] । स्थिताः[14] । श कृरुतेति[15] ।

गोमायुरेको अजमायुरेकः पृश्निरेको हरित एक एषाम् ।
समानं नाम बिभ्रती विरूपाः पुरुत्रा वाचं पिपिशुर्वदन्तः ॥ ६ ॥

गोमायुः[16] । गोशब्दः[17] । एक[18] । अजशब्द[19] । एकः[20] । पृश्निवर्ण[21] । एक । हरितवर्णः । एकः[22] । एषां मण्डूकानाम्[23] । समानं[24] मण्डूकाख्यम् । नाम । बिभ्रत[25] । नानारूपाः । बहुदेशेषु[26] । वाचम्[27] । मिश्रयन्ति[28] । शब्दायन्तः[28] ।

---

१. हे मण्डूकाः ! यदा Sy.
२. युष्माकं मध्ये Sy.
३. अनः A. मण्डूकः Sy.
४. मण्डूकस्य Sy.
५. अनुवदति अनुकरोति Sy.
६. ०स्येव M. शक्तिमतः शिक्षकस्य वाचं यथानुवदति तद्वत् Sy.
७. शिष्यन्नाचार्य A. शिष्य आचार्यस्य is suggested for शिष्यस्य शिष्यन्नाचार्यः ॥ आचार्यस्य goes with शक्तियुक्तस्य ॥ शिक्ष्यमाणः शिष्यः Sy.
८. युष्माकम् Sy.
९. समृद्धमेवाविकलावयवमेव भवति । इवशब्दोऽवधारणे । घर्मकाले मृद्भावमापन्ना मण्डूकाः पुनर्वर्षणे सत्यविकलाङ्गाः प्रादुर्भवन्तीत्यर्थः Sy.
१०. पर्याङ्गना० A. पर्व परुष्मच्छरीरम् Sy.
११. यद्ध Sy.
१२. शोभनवाचो यूयं सर्वे Sy.
१३. वृष्टेषूदकेषु Sy.
१४. अध्युपरि प्लवन्तः Sy.
१५. शब्दम् is suggested for शं ॥ वदत Sy.
१६. ०थेति A.
१७. गोर्मायुरिव मायुःशब्दो यस्य तादृशः Sy.
१८. मण्डूकः Sy.
१९. अजस्य मायुरिव मायुर्यस्य तादृशो भवति Sy.
२०. अन्यः Sy.
२१. ०वर्ण A.
२२. कः A. अपरः Sy.
२३. मध्ये Sy.
२४. एकं मण्डूका इति Sy.
२५. विभूतः A. धारयन्तः Sy.
२६. बहुरूपु A. पुरुत्रा पुरुशब्दाद् 'देवमनुष्य०' (Pa. 5. 4. 56.) इत्यादिना त्राप्रत्ययः Sy.
२७. VM construes वाचम् with पिपिशुः and explains वदन्तः as शब्दायन्तः but Sy. explains these words as शब्दं कुर्वन्तः ।
२८. अवयवीभवन्ति प्रादुर्भवन्ति । 'पिशु अवयवे' Sy.

ब्राह्मणासो अतिरात्रे न सोमे सरो न पूर्णमभितो वदन्तः ।
संवत्सरस्य तदहः परि ष्ठ यन्मण्डूकाः प्रावृषीणं बभूव ॥ ७ ॥

ब्राह्मणासः । ब्राह्मणाः । इव । अतिरात्रे । सोमे भूयिष्ठस्तोत्रशस्त्रे । सरः । इव । पूर्णम् । अभितः स्तोत्रशस्त्राणि । वदन्तः, सरश्शब्दः स्तोमवचन. । सवत्सरस्य । तत् । दिनम् । परितः भवथ । यद्दिनम् । हे मण्डूकाः । प्रावृषेण्यम् । भवति प्रादुर्भवति चेति ।

ब्राह्मणासः सोमिनो वाचमक्रत ब्रह्म कृण्वन्तः परिवत्सरीणम् ।
अध्वर्यवो घर्मिणः सिष्विदाना आविर्भवन्ति गुह्या न के चित् ॥ ८ ॥

ब्राह्मणासः । ब्राह्मणासः । सोमिन इत्यौपमिकम् । कर्म । कृण्वन्तः । संवत्सरान्तर्भवम् । वाचम् । अकुर्वन् । अध्वर्यवः । धर्मेण चरन्तः । स्विद्यच्छरीराः । आविर्भवन्ति । गुह्याः । इदानीम् । केचिद् बिलादुत्थिता मण्डूकाः । नेति सम्प्रत्यर्थः ।

---

१. रात्रिमतीत्य वर्तत इत्यतिरात्रः । अतिरात्रे Sy.

२. यथातिरात्राख्ये सोमयागे ब्राह्मणासो ब्राह्मणा रात्रौ स्तुतशस्त्राणि पर्यायेण शंसन्ति Sy.

३. ०यिष्णु० A.

४. यथा । द्वितीयो नशब्दः सम्प्रत्यर्थे । न सम्प्रति Sy. ५. सर्वतः Sy.

६. रात्रौ शब्दं कुर्वाणाः यूयम् Sy.

७. सराः श० A.

८. सोम० is suggested for स्तोम० ॥ The passage सरश्शब्दः सोमवचनः should immediately follow सरः and precede इव ।

९. प्रावृषि भवं बभूव तस्मिन्नहनि सर्वतो वर्तमाना भवथेत्यर्थः Sy.

१०. ०णास्सा A. ब्राह्मणासः is omitted by M.

११. ०णः स A. ब्राह्मणा इव Sy.

१२. सोमयुक्ताः Sy.

१३. स्तुतशस्त्रात्मकम् Sy.

१४. कृत् तः A. कृत् M. कुर्वन्तः Sy.

१५. ०न्तभव A. ०र्भव M. सांवत्सरिकं गवामयनिकम् Sy.

१६. शब्दम् Sy.

१७. अकृर्व A. अकृत M. अकृषत is suggested for इमे मण्डूकाः Sy.

१८. अध्वरस्य नेतार ऋत्विजः Sy.

१९. प्रवर्गेण Sy.

२०. स्विद्यद्गात्राः Sy.

२१. जायन्ते Sy.

२२. घर्मकाले बिलेऽभिगूढाः Sy.

२३. केचन Sy.

२४. It should immediately follow इदानीम् ॥ सम्प्रति वृष्टौ सत्याम् Sy.

देवहितिं जुगुपुर्द्वादशस्य ऋतुं नरो न प्र मिनन्त्येते ।
संवत्सरे प्रावृष्यागतायां तप्ता घर्मा अंश्नुवते विसर्गम् ॥ ९ ॥

देवहितिम्[1] । द्वादशमासस्य संवत्सरस्य[2] । देवहितिं हवीरूपम्[3] । एते[4] । रक्षन्ति[5] । तदेवाह न । हिंसन्ति[6] । वार्षिकमृतुम्[7] । नेतार इति प्रकाशीभवन्त ऋतु प्रकाशयन्तीत्यर्थ. । संवत्सरे[8] । प्रावृषि[9] । आगतायाम्[10] । तप्ताः[11] केचन[12] । घर्माः[13] । बिलात् विसर्गम्[14] । प्राप्नुवन्ति तप्ता घर्मा इत्यौपमिकम् ।

गोमायुरदादजमायुरदात्पृश्निरदाद्धरितो नो वसूनि ।
गवां मण्डूका ददतः शतानि सहस्रसावे प्र तिरन्त आयुः ॥ १० ॥

गोमायुः[15] । गोमायुः[16] । अदादेवमन्ये च । धनानि । अस्मभ्यम् । गवाम्[17] । शतानि[18] । प्रयच्छन्तः मण्डूकाः[19] । सहस्रसावे[20] बहूनां प्रसवे वर्षद्धनम्[21] । प्रवर्धयन्ति । आयुरन्नमिति[22] ।

---

१. देवहितिम् । द्वादशमासस्य संवत्सरस्य is missing in A.

२. अत एव द्वादशमासात्मकस्य संवत्सरस्य Sy.

३. ०हितं हवि० A. देवैः कृतं विधानमस्यर्तोरयं धर्म इत्येवंरूपम् Sy.

४. मण्डूकाः Sy.

५. गोपायन्ति कालेकाले रक्षन्ति Sy.

६. पर्जन्यस्तुतेरनुमोदनेन तत्तत्काले वृष्टिहेतवो भवन्तीत्यर्थः Sy.

७. तं तं वसन्तादिकम् Sy.

८. संवत्सरे सम्पूर्णे Sy.

९. वर्षतौ Sy.

१०. आगते सति Sy.

११. तापेन पीडिताः Sy.

१२. केचा A.

१३. कर्मा वि० A.
पूर्वं घर्मकाले वर्तमानाः Sy.

१४. सम्प्रति विसर्जनं बिलाद्विमोचनम् Sy.

१५. वसिष्ठः पर्जन्यस्तुतिसंहृष्टान् मण्डूकाँस्त्रिष्टुभा तुष्टाव। 'वसिष्ठो वर्षकामः पर्जन्यं तुष्टाव तं मण्डूका अन्वमोदन्तेति यास्कः' (N.9.6.) वृष्टिकामेनैतत् सूक्तं जप्तव्यम् DDN.

१६. गोरिव मायुः शब्दो यस्य तादृशः Sy. गोरिव मायुः शब्दो यस्य तादृशोऽयं मण्डूकः DDN. वग्नुः, उपब्दिः, मायुः, इति वाङ्नामानि Ngh. 1. 11.

१७. अन्ये refers to अजमायुः । पृश्निः and हरितः ॥ तथा अजस्येव मायुर्यस्य सोऽप्यवात् । तथा पृश्निवर्णः अदात् । हरितवर्णः अवात् । एते अस्मभ्यं धनं दत्तवन्तः । तथा मण्डूका एते सर्वे DDN.

१८. अपरिमिता गाः Sy. DDN.

१९. सहस्रसंख्याका ओषधयः सूयन्त उत्पद्यन्ते इति वर्षर्तुः सहस्रसावः । तस्मिन् सति Sy. DDN.

२०. वर्ष धन A.

२१. प्रवर्धयन्तु Sy. प्रवर्द्धयन्तु । प्रपूर्वस्तिरतिर्वर्धनार्थः । असुनीते मनो अस्मास्वित्यत्र यास्कदर्शनात् (Cf N. 10. 40.) DDN.

२२. जीवनम् Sy.

VII.104.

इन्द्रासोमा तपतं रक्ष उब्जतं न्यर्पयतं वृषणा तमोवृधः ।
परा शृणीतमुचितो न्योषतं हतं नुदेथां नि शिशीतमत्रिणः ॥ १ ॥

इन्द्रासोमा । शौनकः--

संवत्सरं तु मण्डूकमैन्द्रासोमं परं तु यत् ।
ऋषिर्ददर्श राक्षोघ्नं पुत्रशोकपरिप्लुतः ॥
'ये पाकशंसमृग्घौम्या आग्नेयी तत उत्तरा ।
एकादशी वैश्वदेवी सौम्यस्तस्मात् परो द्वचः ॥
'यदि वाहमृगाग्नेयी ऐन्द्रचौ'यं मे तु स्मृतौ ।
नृष्णी'प्र या जिगातीति'वि तिष्ठध्व'तु मारुती ॥

---

१. 'इन्द्रासोमा' इति पञ्चविंशत्यृचं पञ्चदशं सूक्तं वसिष्ठस्यार्षम् । आद्या षड् जगत्यः सप्तमी जगती त्रिष्टुब्बाष्टादश्येकविंशीत्रयोविंश्यो जगत्योऽन्त्या 'प्रति चक्ष्व' इत्यनुष्टुप् शिष्टाश्चतुर्दश त्रिष्टुभः । नवमीद्वादशीत्रयोदश्यः सोमदेवत्या एकादशी देवदेवत्याष्टमीषोडश्याविन्द्रदेवताके सप्तदशी ग्रावदेवत्याष्टादशी मरुद्देवताका दशमीचतुर्दश्यावग्निदेवताके 'प्र वर्तय' इत्याद्याः पञ्चर्च इन्द्रदेवताकाः । 'मा नो रक्षः' इति त्रयोविंश्याः पूर्वोऽर्धर्चो वसिष्ठस्य प्रार्थनापरः, अतस्तद्देवताकः । उत्तरोऽर्धर्चो पृथिव्यन्तरिक्षदेवत्यः । शिष्टानां रक्षोहणाविन्द्रासोमौ देवता । तथा चानुक्रान्तम्--'इन्द्रासोमा पञ्चाधिकैन्द्रासोमं राक्षोघ्नं शापाभिशापप्रायं षट् सप्त वाद्या जगत्य एकविंशोत्रयोविंश्यौ चाष्टादशी मारुती च दशमीचतुर्दश्यावाग्नेय्यौ वैश्येकादश्यन्त्यानुष्टुम्नवमी, द्वादशीत्रयोदशी सौम्यः सप्तदशी ग्राव्ण्यष्टमीषोळश्यावैन्द्र्यौ 'प्र वर्तय' इति पञ्चैन्द्र्यो मा नो रक्ष इत्यृषेरात्मन आशीस्तरोऽर्धर्चः पृथिव्यन्तरिक्षदेवतः'(KSA 39. 104. p. 27.) इति । अत्र बृहद्देवतायामनुक्रम्यते--

'संवत्सरं तु मण्डूकानैन्द्रासोमं परं तु यत् ।
ऋषिर्ददर्श रक्षोघ्नं पुत्रशोकपरिप्लुतः ।
हते पुत्रशते क्रुद्धः सौदासैर्दुःखितस्तदा'
BD. इति रक्षोनिबर्हणार्थमेतत्सूक्तं जप्यम् Sy.

२. मण्डूकान् BD. ३. ०रिच्छत· A.
४. BD VII 28 p. 67. adds one hemistich after ऋषिर्ददर्श... as 'हते पुत्रशते तस्मिन् सौदासैर्दुःखितस्तदा ।
५. वाक० A. M.
६. ०मद्वोद्यानेयि A. ०मृक् सौम्या is suggested for ०मृग्घौम्या ।
७. तस्याः is suggested for तस्मात् ।
८. ऐन्द्री is suggested for ऐ द्रचौ ।
९. स्मृता is suggested for स्मृतौ ।
१०. Missing in M. ग्राव्णी is suggested for नृष्णी ।
११. गजिगातीत A. यो गजि०, M.
१२. 'पि ति० A. वि ति० is missing in M.
१३. 'ंशति A.

'प्र क्रतयेति पञ्चैन्द्रय ऐन्द्रासोमीत्यृगुत्तरा[1] ।
ऋषिस्त्वाशिषमाशास्ते 'मा नो रक्ष' इति द्रुचे[2] ॥
पञ्चदश्या तु सूक्तस्य अष्टम्यां चैव वारुणी[3] ।
दुःखशोकपरीतात्म शपथे[4] विलपन्निव ॥ इति ॥

हे इन्द्रासोमौ[5] ! तेजोभिस्तपतम्[6] । रक्ष[7]. । उब्जत[8] च, उब्जतिर्वधकर्मा । न्यर्पयतमधो[9] नयतम् । वर्षितारौ[10] ! तमसा वर्धयितॄन् राक्षसान्[11] । पराञ्चौ[12] पराङ्मुखं नीत्वा विशीर्णान् कुरुतम्[13] । अजञ्ञन्[14]। निर्दहन[15] च । हतम्[16]। नुदेथाम्[17]। नितरा च तनूकुरुतम्[18]। अदनशीलानिति ।

---

१. एन्द्रासोमी प्रदगु० A.

२. BD. reads त्वृगुत्तमा for इत्यृगुत्तरा०

३. BD. reads त्वृचि for द्रुचे and adds the following stanza after this:
दिवि चैव पृथिव्यां च तथा पालनमात्मनः ।
उलूकयातुं जह्योतान् नानारूपान्निशाचरान् ।

४. ०स्याष्ट० A. ०स्याथाष्ट० is suggested for ०स्याथाष्ट० ।

५. वरुणी A. वारुणीः is suggested for वारुणी ॥

६. शपते is suggested for शपथे ।

७. BD. 6. 27—33.

८. सोमौः० A.
इन्द्रश्च सोमश्चेन्द्रासोमौ । 'देवताद्वन्द्वे च' इति पूर्वपदस्यानङ् । आमन्त्रिताद्युदात्तत्वम् Sy.

९. युवां सन्तापयन्तम् । 'आमन्त्रितं पूर्वमविद्यमानवद्' इत्यविद्यमानवत्त्वात् तपतमिति तिङन्तस्य निघाताभावः Sy.

१०. रक्षांसि । जातावेकवचनम् Sy.

११. इब्ज० A.
हिंस्तम् । उब्जतिर्हिंसाकर्मा । तिङः परत्वान्निघाताभावः Sy.

१२. ०धोः A.
रक्षांसि नीचैष्ट्वं प्रापयतम् Sy.

१३. हे कामानां वर्षितारौ ! Sy.

१४. ०यिवू स्त्राक्ष० A. तमसावरकेणान्धकारेण मायारूपेण वर्धमानान् तमसि रात्रौ वर्धमानान् वा Sy.

१५. ०णितं A.

१६. ०रतं M. पराङ्मुखा यथा भवन्ति तथा हिंस्तम् Sy.

१७. अज्ञा M. अज्ञान् is suggested for अजञ्ञन् ॥ ज्ञानरहितान् गूढान् राक्षसान् Sy.

१८. निवह० M. तथा न्योषतं नितरां वहतम् । 'उष दाहे' Sy.

१९. हतं तान् मारयतम् Sy.

२०. नुदधा M.
अस्मत्तो हतांस्तान् प्रेरयेथाम् Sy.

२१. अदनशीलान् तान् राक्षसान् Sy.

इन्द्रासोमा समघशंसमभ्यं[1]घं तपुर्यंयस्तु चरुरग्निवाँइव ।
ब्रह्मद्विषे क्रव्यादे घोरचक्षसे द्वेषो धत्तमनवायं किंमीदिने ॥ २ ॥

इन्द्रसोमा[1] । इन्द्रासोमौ । अघस्य शंसितारम्[2] । समभिभवतम्[3] । अघमाहत्य । तापको राक्षसः[4] । युवयोस्तेजसाऽभ्यस्तो[5] भवतु । यथाऽग्निना तप्यमानाः[6] । चरुः[8] । ब्राह्मणद्वेषिणे । क्रव्यादे । घोराख्यानाय[10] ।

---

१. इन्द्रासोमा is missing in M. वसिष्ठस्यार्षम् Dur. वसिष्ठस्य SKN.

२. अघस्यानर्थस्यशंसितारम्Sy.पापस्यशंसितारम् Dur. पापं परेभ्यः शंसतीत्यघशंसः, तं पापस्यास्माकं शंसितारम् SKN.

३. सं सहैव । अभीति श्रुतेर्योग्यक्रियाध्याहारः । अभिभवतम् Sy. सन्तापयन्तं भवन्तौ Dur. अभ्युपसर्गस्तच्छ्रुतेश्च योग्यक्रियापदाध्याहारः कार्यः । तेनाभिसन्तापयतमिति शेषः SKN.

४. आगत्य हन्तारं राक्षसम् Sy. पापमेव कर्तुमाभिमुख्येन नित्यकालमेव योऽवस्थितस्तं सन्तापयन्तम् Dur. अन्तर्णीतमत्वर्थमेतत् । अघवन्तमघात्मकं वा, अघं केवलं पापकमित्यर्थः ....अघं हन्तेः पूर्वस्याऽऽ ह्रस्वश्चेन । आभिमुख्येन हन्ति श्रेयसे विनाशयतीत्यर्थः SKN.

५. पक्वौ राक्षसोः A. युवयोस्तेजसा तप्यमानो राक्षसः Sy. युवाभ्यां सन्ताप्यमानः Dur. स च तपुः । तपेः कर्मण्युप्रत्यये । अभिसन्तप्यमान इत्यर्थः SKN.

६. यस्तु 'यसु प्रयत्ने' केवलोऽप्ययमाङ्पूर्वार्थे द्रष्टव्यः । आयासं प्राप्नोतु । उपक्षीयतामित्यर्थः Sy. क्षयं यात्वित्यर्थः Dur. 'यसु प्रयत्ने' आयस्यतु क्षीयतामित्यर्थः SKN.

७. ०मानः is suggested for ०मानाः ॥ अग्नियुक्तोऽग्नौ प्रक्षिप्तः Sy. तप उच्यते । अग्निसंयुक्त इत्यर्थः Dur SKN.

८. चरू ब्राह्मण० A. 'चरुर्मृच्चयो भवति' मृदाविसञ्चितो भवति Dur. चरुशब्दो मृन्मय्यां स्थाल्यामधिकरणे, आधेये चरावपीति द्रोणादिशब्दवदुभयत्र प्रसिद्धोऽविशेषात् । मुख्यं चरतेरर्थसमवायं दर्शयति समुच्चरन्त्यस्मात्पदाप इति SKN.

९. अपि च ब्राह्मणेभ्योऽस्मभ्यं द्वेष्ट्रे Sy. क्षीणाय . .तस्मै ब्राह्मणद्विषे SKN.

१०. क्रव्यादे घोरख्या० A. क्रव्यं मांसं भक्षयित्रे Sy. पृष्ठमांसभक्षयित्रे Dur. क्रव्यं मांसं तदत्तीति क्रव्यात्, तस्मै पृष्ठमांसादिने परोक्षाक्रोशकायेत्यर्थः । लोकेऽपि यः परोक्ष आक्रोशति स उच्यते पृष्ठमांसानि खादतीति । . . . लोकस्तु समुदायप्रसिद्ध्या संस्मरन् क्रव्यादमाचष्टे SKN.

११. घोरदर्शनाय परुषभाषिणे वा Sy. चक्षिर्दर्शने । घोरदर्शनाय Dur. SKN.

द्वेषः[1]। धत्तम्[2]। अव्यपेयमनवयवं[3] वा यदन्ये न व्यपेयु[4] 'किमीदिनं[5] किमिदानीमिति चरते[6]। इदं किमिदमिति वा पिशुनाय चरते' इति यास्कः[7]।

इन्द्रासोमा दुष्कृतो[8] वज्रे अन्तरनारम्भणे तमसि प्र विध्यतम्।
यथा नातः पुनरेकश्चनोदयत्तद्वामस्तु सहसे मन्युमच्छवः॥ ३॥

इन्द्रासोमा। इन्द्रासोमौ! दुष्टस्य कर्मणः कर्तृन्[10]। वारके[11]। अन्त[12]। अनालम्बने[13]। तमसि[14]। प्रवर्धतं[15] प्रक्षिपतम्[16]। यथा[17]। न। अतस्तमसः[18]। पुनः। एकः[19]। अपि राक्षसो[20] न। उदगच्छत्[21]। तत्। युभयो[22]। अस्तु[23]। अभिभवाय[24] रक्षसाम्[25]। धियुक्तम्[26]। बलम्।

---

१. द्वेष्यभावम् Sy. सर्वलोकद्वेष्यताम् Dur. सर्वलोकस्य द्वेष्यबन्धस्तम् SKN.

२. दत्तम् Sy. धत्तं युवाम् Dur.

३. अप्यपेयमा० A.

४. ०वायंवा M. अथवा यदन्येऽतद्द्वहस्तत्सुहृदोऽद्वेषसोऽद्वेष्टारो न व्यवेयुर्व्यवेतुं वियोजयितुं घटमाना अपि न शक्नुयुस्तादृशं द्वेषो धत्तम्। ....एवमत्र 'अनवायम्' इत्यस्यानवयवमवियोजनं वा, इत्यर्थप्रतीतिस्तथाभीष्टत्वात् Dur. सकलमित्यर्थ। अव्यवेयं वा, अनवगमनीयं वा। अनवगमनीयं यदद्वेषसः सन्तः सुहृदो नेतुं न शक्नुयुरित्यर्थः SKN.

५. व्यापयेयुः M. व्यपेयुः is suggested for व्यपेयु।

६. किमिदि० M. पिशुनाय SKN. पिशुनायेत्यर्थः। ....किमीदी च पिशुनः। स हि किमिदानीं वर्तत इत्येवमन्वेषणश्चरते, अथवा किमिदं वर्तत इत्येवमन्वेषमाणश्चरते। स हि तस्य स्वभावः Dur.

७. ०ते रिमिमं कि० A. चरते। इदं is suggested for चरतेरिमम्।

८. N. adds किम् before इदम्॥ इन्द्रा सोमाऽघस्य शंसितारम्। अधं हन्तेर्। निर्हंसितोपसर्गः। आहन्तीति। तपुस्तपतेः। चरमुच्चयो भवति। चरतेर्वा। समुच्चरन्त्यस्मा—दापः। ब्रह्मद्विषे (ब्राह्मणद्वेष्ट्रे। क्रुध्यते) क्रुध्यमवते। (घोरचक्षते) घोरख्यानाय। क्रव्यं विकृताज्जायत इति नैरुक्ताः। द्वेषो धत्तम्। अनवायमनवयवम्। यदन्ये न व्यवेयुः द्वेषस इति वा। किमीदिने। किमिदानीमिति चरते। किमिदं किमिदमिति वा। पिशुनाय चरते। पिशुनः पिशतेः विपिशतीति' N. 6. 11; SKN II. 425.

९. ०सोमा A.

१०. कृतून् A. कर्तृन् is suggested for कर्तृन्।

११. वारके is missing in M.

१२. अन्तन् A. मध्ये Sy.

१३. आलम्बनरहिते Sy. १४. अन्धकारे Sy.

१५. प्रवर्धत A. The reading is doubtful. प्रविध्यतम् is suggested for प्रवर्धतम्॥ प्रवेश्य ताडयतम् Sy.

१६. येन प्रकारेण Sy.

१७. ०तप्त० M. अस्मात्तमसः Sy.

१८. एवां मध्ये एकः Sy.

१९. न seems to be unnecessary.

२०. उद्गच्छेत् तथाविध्यतमित्यर्थः। एतेलँटघञागमः। 'इतश्च लोपः०' इतीकारलोपः। गुणायादेशौ Sy. २१. तत् प्रसिद्धम् Sy.

२२. उभयोः M. युवयोः is suggested for युभयोः।

२३. भवतु Sy. २४. अभिभवनाय Sy.

२५. रक्षांसि M.

२६. युक्तम् M. क्रोधयुक्तम् is suggested for धियुक्तम्।

इन्द्रासोमा वृतर्यतं दिवो वधं सं पृथिव्या अघशंसाय तर्हणम् ।
उत्तक्षतं स्वर्यं१ पर्वतेभ्यो येन रक्षो वावृधानं निजूर्वथः ॥ ४ ॥

इन्द्रासोमा । इन्द्रासोमौ ! द्युलोकात् । वज्रम् । संवर्तयतम् । पृथिव्याः । अघशंसाय रक्षसे । हिंसकम् । उत्तक्षत पृथक्कुरुतम् । स्वरणकुशलमशनम् । मेघेभ्यो यथा काष्ठेभ्य. शकलमुत्वक्षन्ति । येन वज्रेण । रक्षः । वर्धमानम् । निहथ ।

इन्द्रासोमा वृतर्यतं दिवस्पर्यग्नितप्तेभिर्युवमश्मंहन्मभिः ।
तपुर्वधेभिरजरेभिरत्रिणो नि पर्शाने विध्यतं यन्तु निस्वरम् ॥ ५ ॥

[इन्द्रासोमा] इन्द्रासोमौ ! परिवर्तयतम् । अन्तरिक्षादागच्छथः । अग्निना तप्तास्यैः । व्याप्तहननैः । तापनशीलप्रहारैः । अदनशीलान् राक्षसान् । शस्त्रैः । निविध्यतम् । परिशाने पार्श्वस्थे । अपि नियन्तु राक्षसाः । निस्वर शब्दायमानाः ।

---

१. ०सोमा दुष्टस्य कर्मण मे A.
२. अन्तरिक्षाद् वा Sy.
३. हननसाधनमायुधम् Sy.
४. उत्पादयतम् Sy.
५. अस्मदीयलोकात् Sy.
६. अघशंसम् । अनर्थस्याशंसकम्, राक्षसं हन्तुम् Sy. ७. आयुधम् Sy.
८. उक्तक्षतत् A. उद्धृतं कुरुतम् Sy.
९. ०रुत A. M.
१०. अशनिम् is suggested for अशनम् ॥ 'स्वृ शब्दोपतापयोः' उपतापकमशनिम् Sy.
११. पर्ववद्भ्यो मेघेभ्यः सकाशात् Sy.
१२. ०लं भक्ष० M. ०मुत्तक्ष० is suggested for ०मुत्वक्ष० ।
१३. अशनिना Sy.
१४. राक्षसम् Sy.
१५. वर्धनम् M. वर्धमानं प्रवृद्धं वा Sy.
१६. निहथः is suggested for निहथ । निजूर्वथः निहथः । 'जुर्वी हिंसायाम्' ? तमशनिमुत्तक्षतमित्यर्थः Sy.
१७. VM'S commentary on this stanza is missing in M. The *pratika* is supplied by the Editor.
१८. ०सोमो A.
१९. इवर्त यम् A. सर्वत आयुधानि प्रेरयतम् Sy.
२०. अग्निना सन्तप्तैः Sy.
२१. ०ननैः A. अश्मसारभूतस्यायसो विकारैर्हननसाधनैरायुधैः Sy.
२२. तापकप्रहारैः Sy.
२३. राक्षसस्य Sy.
२४. ०स्त्रैः A. जरारहितैर्बलैः Sy.
२५. ०बध्य० A. निहितम् Sy.
२६. पार्श्वस्थाने Sy.
२७. अपयन्तु निर्गच्छन्तु Sy.
२८. न्यतस्वरं A. निःशब्दम् Sy.
२९. VM. ignores युवम् ॥ नौ युवाम् Sy.

इन्द्रासोमा परि वां भूतु विश्वत इयं मतिः कक्ष्याश्वेव वाजिना ।
यां वां होत्रां परिहिनोमि मेधयेमा ब्रह्माणि नृपतीव जिन्वतम् ॥ ६ ॥

इन्द्रासोमा । इन्द्रासोमौ ! परिभवतु । वाम् । सर्वतः । इयम् । स्तुतिः । अश्वाविव । बलौ कक्ष्या । याम् । युवयोरहम् । प्रेरयामि । प्रज्ञया । अतो युवामिमानि । स्तोत्राणि । राजमानाविव कामप्रदानेन । प्रीणयतम् ।

प्रति स्मरेथां तुजयद्भिरेवैर्हतं द्रुहो रक्षसो भङ्गुरावतः ।
इन्द्रासोमा दुष्कृते मा सुगं भूद्यो नः कदा चिदभिदासति द्रुहा ॥ ७ ॥

प्रति स्मरेथाम् । अस्मात् प्रतिस्मरेथामागच्छतमित्यर्थः । क्षिप्रमाचरद्भिः । गमनैः । हत च । दोग्धून् । राक्षसान् । भङ्गुरावतो भञ्जनशीलकर्मयुक्तान् । हे इन्द्रासोमौ ! दुष्कर्मणे । मा । सुगम् । भवतु सुगमिति सुखनाम । यः । नः । कदा । चिदपि । अभिहिनस्ति । द्रोहेण ।

---

१. इन्द्रासोमौ is missing in A.

२. परिगृह्णातु व्याप्नोतु वा Sy.

३. अस्माभिः क्रियमाणा Sy.

४. मननीया स्तुतिः Sy.

५. सबलौ or बलिनौ is suggested for बलौ ॥ बलवन्तौ वां युवाम् Sy.

६. कक्ष्या कक्षबन्धनी रज्जुरश्वेव यथाश्वं परिगृह्णाति तद्वत् Sy.

७. युवाभ्याम् Sy.

८. प्रेरयामि सेयं मतिरिति सम्बन्धः Sy.

९. अस्माभिः कृतानि Sy.

१०. धनैः Sy.

११. फलेन पूरयतम् Sy.

१२. VM. ignores होत्राम् ॥ होत्रां वाचम् Sy.

१३. प्रत्यस्मान् स्म० M. •अस्मान् is suggested for अस्मात् ॥ प्रति स्मरेथाम् अभिगच्छतम् । •उपसर्गवशेन स्मरतिरत्रार्थान्तरे वर्तते। यथा प्रस्मरणं प्रस्थानमिति Sy.

१४. त्वरमाणैः Sy.

१५. गन्तृभिरश्वैः Sy.

१६. हितं M. हिस्तम् Sy.

१७. द्राढून् A. द्रोग्धून् is suggested for दोग्धून् ।

१८. भञ्जनकर्मवतः Sy.

१९. ०क्तन् A.

२०. पापकारिणे राक्षसाय Sy.

२१. ना A.

२२. सुखम् Sy.

२३. सुभमि० A.

२४. ०नमे A. The passage सुगमिति सुखनाम should immediately follow सुगम् ।

२५. अभिहन्ति तस्मै दुष्कृत इत्यन्वयः Sy.

२६. द्रोहेण युक्तः Sy.

यो मा पाकेन मनसा चरन्तमभिचष्टे अनृतेभिर्वचोभिः ।
आपेइव काशिना संगृभीता असन्नस्त्वासत इन्द्र वक्ता ॥ ८ ॥

यो मा[1]। यः। माम्। पक्वेन[3] त्यक्तानृतेन। मनसा। चरन्तमजुभिः। वदति। अनृतैः[6]। वचोभिः[7]। ऊकानीक[8]। आकाशवता पात्रेण। सङ्गृहीतानि, यद्वा काशिर्मुष्टिः[9]। असन्[12]। भवतु। असत्यस्य। इन्द्र! वक्ता[13] यो मोघं[14] गातुधानेत्याहेति वक्ष्यति।

ये पाकशंसं विहरन्त एवैर्ये वा भद्रं दूषयन्ति स्वधाभिः ।
अहंये वा तान्प्रददातु सोम आ वा दधातु निर्ऋतेरुपस्थे ॥ ९ ॥

ये पाकशंसम्[15]। ये। पक्वानां[17] वचसां शसितारम्। विविधं हरन्ति[18]। गमनैः[19]। ये। वा। भद्रं माम्। दूषयन्ति[21]। बलैः[22]। तान्[23]। सर्पाय[24]। वा। परिददातु[25]। सोमः। आदधातु[26]। वा। निर्ऋतेः[27]। उपस्थे[28]।

---

१. ये माम् A.
२. राक्षसः Sy.
३. पक्त्वेन त्यक्तानृतन A. शुद्धेन Sy.
४. वर्तमानं सत्यवादिनम् Sy.
५. अभिशंसति। मय्यसत्यवचनमारोपयति Sy.
६. असत्यैः Sy. ७. वचनैः Sy.
८. उतानीक M. उदकानीव is suggested for ऊकानीक ॥ यथापो विशीर्णा भवन्ति Sy.
९. वाका० A. मुष्टिना Sy.
१०. सम्यग्गृहीता Sy.
११. The passage यद्वा काशिर्मुष्टि should immediately follow आकाशवता पात्रेण and precede सङ्गृहीतानि।
१२. असत् M. अविद्यमानो भवतु। नश्यत्वित्यर्थः Sy.
१३. स राक्षसः Sy.
१४. माँघं A.
An addition of मा before मोघं is suggested.
१५. वाक० A.
१६. राक्षसाः Sy.
१७. पक्त्वानां A. सत्यभाषिणं माम् Sy.
१८. विशेषेण हरन्ति। उपक्षयन्ति। यथा कामं परिवदन्तीत्यर्थः Sy.
१९. ०ने A. एतव्यैः प्राप्तव्यैरात्मीयैः कामैर्हेतुभूतैः Sy.
२०. कल्याणवर्तनं माम् Sy.
२१. दुष्टं कुर्वन्ति Sy.
२२. बलैर्युक्ताः Sy.
२३. सर्वान् Sy.
२४. सर्वाय A.
२५. वरि० A. प्रददातु Sy.
२६. ०ददातु M. प्रक्षिपतु Sy.
२७. पापदेवतायाः Sy.
२८. उत्सङ्गे Sy.

यो नो॒ रस॑ं दिप्स॑ति पि॒त्वो अ॑ग्ने॒ यो अश्वा॑नां॒ यो गवां॒ यस्त॒नूना॑म् ।
रि॑पुः॒ स्तेन॒ः स्तेय॑कृद॒भ्रमे॑तु॒ नि ष हीयतां त॒न्वा॑३ तना॑ च ॥ १० ॥

यो नः । यः । अस्माकम् । अन्नस्य । रसम् । विनाशयति । अग्ने ! यश्च । अश्वादीनाम् । रिपुः । स्तेनः । स्तेयस्य कर्ता भवति सः । दभ्रम् । एतु दभ्रत्व प्राप्नोत्वल्पो भवतु । निहीयता च । सः । आत्मना । पुत्रेण । च यद्वा पुत्रेण धनेन चति ।

प॒रः सो अ॑स्तु त॒न्वा॑३ तना॑ च ति॒स्रः पृ॑थि॒वीर॒धो अ॑स्तु॒ विश्वा॑ः ।
प्रति॑ शुष्यतु॒ यशो॑ अस्य देवा॒ यो नो॒ दिवा॒ दिप्स॑ति॒ यश्च॒ नक्त॑म् ॥ ११ ॥

परः सः । परस्तात् । भवतु । सः । आत्मना । पुत्रेण । तथा । तिस्रश्च । पृथिवीः । सर्वाः । अधस्तात् । अस्तु । प्रतिशुष्यतु च । अस्य । यशः । देवाः ! कीर्तिरन्नं वा । यः । न इति स्पष्टम् ।

सु॒वि॒ज्ञा॒नं चि॑कि॒तुषे॒ जना॑य॒ सच्चास॑च्च॒ वच॑सी पस्पृधाते ।
तयो॒र्यत्स॒त्यं य॑त॒रदृ॒जीय॒स्तदित्सोमो॑ऽवति॒ हन्त्यास॑त् ॥ १२ ॥

सु विज्ञानम् । सुविज्ञानम् । चिकितुषे । जनायेति विद्वांसमात्मानमाह तस्मै मह्यम् । सत्यम् ।

---

१. राक्षसः Sy. २. सारम् Sy.
३. जिघांसति Sy.
४. आदि refers to गवाम् and तनूनाम् ॥ अश्वानामस्मदीयानां रसं दित्सति । यश्च गवां रसं दिप्सति । यश्च तनूनामस्मदीयानां शरीराणां रसं दिप्सति Sy. ५. बाधकः Sy.
६. चौरः Sy. ७. धनस्यापहर्ता स सर्वो जनः Sy. ८. दभूम् A. हिंसाम् Sy.
९. प्राप्नोतु Sy. १०. दभूत्वं A.
११. ०त्यल्पो भवतु A. १२. निहीनो भवतु Sy.
१३. बाधकः Sy. १४. स्वकीयेन शरीरेण Sy.
१५. तनयेन च Sy.
१६. वर्तमानो भवतु । उभाभ्यां वियुक्तो भवत्वित्यर्थः Sy. १७. राक्षसः Sy.
१८. तन्वा तना च । व्यत्ययेन तृतीया । तन्वाः शरीरस्य तनयस्य च Sy.
१९. पृथिवीस्त्रींल्लोकान् Sy. २०. व्याप्ताः Sy.
२१. भवतु । लोकत्रयादपि प्रच्युतो भवत्वित्यर्थः Sy. २२. शत्रोः Sy. २३. अन्नं कीर्तिर्वा Sy.
२४. पा A. The passage : कीर्तिरन्नं वा should immediately follow यशः ।
२५. VM. ignores दिवा । दिप्सति । यः । च and नक्तम् ॥ यो राक्षसो नोऽस्मान् दिवा हनि दिप्सति जिघांसति यश्च नक्तं रात्रौ जिघांसति अस्योभयविधस्य यशः प्रति शुष्यत्विति सम्बन्धः Sy.
२६. प्रायेणेदमादिभिर्ऋग्भो राक्षसेन सहर्षिणा शपथः क्रियते । अत्र केचिदाहुः–
हत्वा पुत्रशतं पूर्वं वसिष्ठस्य महात्मनः ।
वसिष्ठं राक्षसोऽसि त्वं वासिष्ठं रूपमास्थितः ॥
अहं वसिष्ठ इत्येवं जिघांसू राक्षसोऽब्रवीत् ।
अत्रोत्तरा ऋचो दृष्टा वसिष्ठेनेति नः श्रुतम् ।
इति Sy.
२७. विज्ञातुं सुशकं भवतु Sy.
२८. चितितु० A. विदुषे जनाय Sy.
२९. ०त्मन० A.

असत्यम् । च । वचसी । स्पर्धमाने भवतः केचिन्मा यातुधान इति वदन्ति न तथेत्यपरे ते वचने मिथः स्पर्धयते[2] किमिद सत्यमुतेदमिति । तयोर्वचसोः[5] । यत्[7] । सत्यम् । यतरच्चानृतमेव[8] । अपाजितम्[9] । तत्[10] । एव । सोमः । रक्षति तथा स्थापयति । हन्ति[11] । असत्यमिति[12] ।

न वा उ[13] सोमो वृजिनं हिनोति[14] न क्षत्रियं[15] मिथुया धारयन्तम्[16] ।
हन्ति[17] रक्षो हन्त्यासद्वदन्तमुभाविन्द्रस्य[18] प्रसितौ[19] शयाते ॥ १३ ॥

न वा[20] उ । न । एव[21] । सोमः । पापकारिणम्[22] । विसृजति[23] । नापि । क्षत्रियम्[24] । असत्यम्[25] । धारन्त[26] कि तर्हि करोति । हन्ति[27] । रक्षः[28] । हन्ति च । असत्यम् । वदन्तम्[29] । उभौ[30] । इन्द्रस्य[31] । जालेन परिगृहीतौ[32] तदन्तः[33] । शयाते[34] ।

यदि[35] वाहमनृतदेव[36] आस[37] मोघं[38] वा देवाँ अप्यूहे[39] अग्ने[40] ।
किमस्मभ्यं[41] जातवेदो हृणीषे[42] द्रोघवाचस्ते[43] निर्ऋथं[44] संचन्ताम्[45] ॥ १४ ॥

यदि[46] । यदि । वा । अहम[47] । अनृतदेवः[48] । भवाम्यसत्येन यः क्रीडति सोऽनृतदेवः[49] । मोघम्[50] । वा[51] ।

---

१. सत्यासत्यरूपे वचने Sy.
२. मिथः स्पर्धेते Sy. ३. म A.
४. ०येते is suggested for ०यते ।
५. तयोर्मध्ये Sy. ६. युत् A.
७. यथार्थवचनम् Sy.
८. एव is missing in M. यत् Sy.
९. The reading is doubtful ॥ ऋजुतममकुटिलम् Sy.
१०. अकुटिलं सत्यभाषणम् Sy.
११. हिनस्ति । एवं सत्यानृतयोर्मध्ये कतरोनृतभाषीति विद्वद्भिः सुविज्ञानमित्यर्थः Sy.
१२. असदुक्तविलक्षणमसत्यम् Sy.
१३. उ वे A. १४. खलु Sy. १५. देवः Sy.
१६. वाप० A. पापकारिणं राक्षसम् Sy.
१७. प्रेरयति गच्छ त्वमिति न मुञ्चति Sy.
१८. क्षत्रं बलम् । तद्वन्तम् Sy.
१९. मिथ्याभूतं वचनम् Sy.
२०. विभ्रतमसत्यवादिनं पुरुषं० (न) च हिनोति विसृजति Sy.
२१. हिनस्ति Sy. २२. राक्षसम् Sy.
२३. राक्षसानृतवादिनौ तौ सोमेन हतौ Sy.
२४. यद्वा इन्द्रस्येति तृतीयार्थे षष्ठी । इन्द्रेणेश्वरेण सोमेन प्रसितौ बद्धौ । 'षिञ् बन्धने' अस्मात् कर्मणि निष्ठा । 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वम् Sy.
२५. इन्द्रस्य सम्बन्धिनि बन्धने Sy.
२६. ०र्हीतो A. २७. निवसतः Sy.
२८. VM. ignores उ ।
२९. वाम् A.
३०. अनृते० A. अनृता असत्यभूता देवा यस्य तादृशाः Sy
३१. यद्युक्तरूपोऽस्मि Sy.
३२. या A. The passage यः...देवः should immediately follow अनृतदेवः
३३. मोघम् A. M. निष्फलम् Sy.
३४. पा A.

देवान् । अपिनयानि । अग्ने ! सत्य निवेदयामि देवेभ्यस्तत्त्वं जानामीति वाक्यशेषो नाह तथाविधः । तथा सति किम् । अस्मभ्यम् । जातवेद ! क्रुध्यसि । द्रोघवाचो राक्षसा । तव । निर्ऋथम् । सेवन्ता या त्व निर्ऋतिमुल्पायसि तां प्राप्नुवन्तीति ।

अद्या मुरीय यदि यातुधानो अस्मि यदि वायुस्ततप पूरुषस्य ।
अधा स वीरैर्दशभिर्वि यूया यो मा मोघं यातुधानेत्याह ॥ १५ ॥

अद्या मुराय । अद्यैवाहम् । म्रियेय । यद्यहम् । यातुधान । अस्मि । यदि । वा राक्षसो भूत्वा । पुरुषस्य । आयुर्जीवितमहम् । ततप । अथ । स च । वीरै पुत्रै । दशभि । पृथक्कृतो भवतु । य । मा ।

---

१. ०यामि is suggested for ०यानि ॥ उपगच्छामि Sy. २. हे अग्ने ! तर्हि मां बाधस्व नह्यहं तथाविधोऽस्मि Sy.
३. एवं सति किं कारणम् ? Sy.
४. ०दस A. ०दशः M. हे जातानां वेदितः! Sy.
५. तव क्रोधोऽस्मासु न जायतामित्यर्थः Sy.
६. द्रोहवा० M. अनृतवाचः Sy.
७. निर्ऋथ निष्पूर्वोऽतिर्हिंसायां वर्तते । निःशेषेणार्तिं हिंसाम् Sy.
८. ०मल्पायसि M. ०मुत्रदयसि is suggested for ०मुल्पायसि ।
९. इयमपि शपथरूपैव Sy. 'ऋषिर्ददर्श रक्षोघ्नं पुत्रशोकपरिप्लुतः' ॥ (BD.6.28.) 'इन्द्रासोमेति सूक्तं तु जपेच्छत्रुनिबर्हणम्' इति ऋग्विधानम् (Rgvidh.2.163) DDN. वसिष्ठः किल राक्षसस्त्वमित्यभियुक्तः । सोऽनयर्चा शपथं प्रतिपेदे परं चाभिशशाप Dur. विश्वामित्रप्रयुक्तैः कैश्चित् (शब्दैः) राक्षसस्त्वमित्यभिप्रयुक्तो वसिष्ठ आह SKN.
१०. ०रीव A.
११. अहं वसिष्ठः, अस्मिन्नेव दिने Sy. तर्हि अस्मिन्नेव दिने । पादादित्वाददद्येति दीर्घः । RPR.7.33DDN.
१२. ०यैय A. म्रियेय DDN, Dur. SKN.
१३. राक्षसः Sy., SKN.
१४. स्याम Dur. भवामि SKN.
१५. रक्ष० A.
१६. मनुष्यस्य Sy. पूरुषस्येति 'अर्धर्चान्ते तु पूरुषः' (RPR.9.39.) इति दीर्घः DDN. कस्यचिदपि पुरुषस्य Dur. पुरुषस्य कस्यचित् SKN.
१७. जीवितलक्षणम् SKN.
१८. तव A. M. हिंसितवानस्मि । तह्यप्यद्यैव म्रियेयेत्यन्वयः Sy. 'तप सन्तापे' हिंसितवानस्मि । तर्हि, अद्य म्रिये DDN. तप्तवानहम् Dur. तपि अत्र विनाशोपलक्षणार्थः । विनाशितवानपहृतवानित्यर्थः SKN.
१९. अथार्थैवं स्यात्, अहं वसिष्ठस्त्वं राक्षस इति तर्हि स त्वम् Sy. अथ एवं न स्यात् तर्हि यो दुर्जनः मां मोघं यातुधानः राक्षस इति सम्बोधनं कृत्वाऽऽह DDN. अथ पुनः Dur.
२०. उपलक्षणमेतत् । सर्वैर्बन्धुजनैः Sy.
२१. प्रथ कृ० A. वियुक्तो भवतु छान्दसो मध्यमपुरुषः Sy. DDN. वियुक्तो भवेः Sy. वियुयाद् वियुज्यतामित्यभिप्रायः Dur. वियूयाः, मध्यमः प्रथमस्य स्थाने यौतिर्मिश्रणार्थः । . . पृथग्भवेद् वियुज्येतेत्यर्थः SKN.
२२. यो राक्षसः Sy.

अनृतमेव[1] । यातुधानः[2] । इति । वदति[3] ।

यो मायातुं यातुधानेत्याह यो वा रक्षाः शुचिरस्मीत्याहं ।
इन्द्रस्तं हन्तु महता वधेन विश्वस्य जन्तोरधमस्पदीष्ट ॥ १६ ॥

यं[4] मा । यः । माम् । अहिंसकम्[5] । यातुधान[6] ! इति वदति । यः । वा स्वैरम्[7] । राक्षसः[8] । शुचि-

---

१. मृषैव Sy. अयातुधानमेव मां सन्तं यो योऽयमनृतम् Dur. वृथैव SKN.
२. राक्षसः Sy. यातुधानस्त्वम् Dur. हे राक्षस SKN.
३. हे राक्षस ! इति सम्बोध्य Sy.
४. इत्येवमाह Dur. इत्येवमाह पूर्वार्धेन शपथः । उत्तरार्धेनाभिशापः SKN.
५. मिथ्यापवादभङ्गेषु यत्नं कुर्याद्विचक्षणः ।
कृष्णोऽपि रथमानीय यदुवर्गेऽभवत्सुखी ॥
इति चारुचर्याप्रसङ्गादाह DDN. अथापि शपथाभिशापौ N.7.3. SKN. III.16
६. तत्र बृहद्देवता—
प्राजापत्यो मरीचिर्हि मरीचेः कश्यपोऽभवत् ।
तस्य देव्योऽभवन् जाया दाक्षायण्यस्त्रयोदश ॥१४३॥
अदितिर्दितिर्वनुष्ठीला दनायुः सिंहिकाविगौ ।
गोधा वृधा वरिष्ठा च सुरभिर्विनता तथा ॥१४४॥
कद्रूश्चैवेति दुहितुः कश्यपाय ददौ स च ।
तासु देवासुराः सिद्धाः गन्धर्वोरगराक्षसाः ॥१४५॥
वयांसि च पिशाचाश्च जज्ञिरेऽन्याश्च जातयः ।
तत्रैका त्वदितिर्नाम द्वादशाजनयत् सुतान् ॥१४६॥
मित्रश्चैवार्यमांशश्च भगो वरुण एव च ।
धाता चैव विधाता च विवस्वांश्च महाद्युतिः ॥१४७॥
त्वष्टा पूषा तथैवेन्द्रो द्वादशो विष्णुरुच्यते ।
द्वन्द्वं तस्यास्तु जज्ञेऽथ मित्रश्च वरुणश्च ह ॥१४८॥
तयोरादित्ययोः सत्रे दृष्ट्वाऽप्सरसमुर्वशीम् ।
रेतश्चस्कन्द तत्कुम्भे न्यपतद् वासतीवरे ॥१४९॥
तेनैव तु मुहूर्तेन वीर्यवन्तौ तपस्विनौ ।
अगस्त्यश्च वसिष्ठश्च तत्रर्षी सम्बभूवतुः ॥१५०॥
बहुधा पतिते शुक्रे कलशेऽथ जले स्थले ।
स्थले वसिष्ठश्च ऋषिः सम्बभूवर्षिसत्तमः ॥१५१॥
कुम्भे त्वगस्त्यः सम्भूतो जले मत्सो महाद्युतिः ।
उत्थाय ततोऽगस्त्यो शम्यामात्रो महातपाः ॥१५२॥
मानेन सम्मितो यस्मात् तस्मान्मान्य इहोच्यते ।
यद्वा कुम्भावृषिर्जातः कुम्भेनापि हि मीयते ॥१५३॥
कुम्भ इत्यभिधानं तु परिमाणस्य लक्ष्यते ।
ततोऽप्सु गृह्यमाणासु वसिष्ठः पुष्करे स्थितः ॥१५४॥
सर्वतः पुष्करं तच्च विश्वे देवा अधारयन् ।
उत्थाय पलिलात्तस्मात् तेपेऽथ सुमहत्तपः ॥१५५॥
नामास्य गुणतो जज्ञे वसतेः श्रेष्ठ्यकर्मणः ।
अदृश्यमृषिभिर्हीन्द्रं सोऽपश्यत्तपसा पुरा ॥१५६॥
सोमभागानथो तस्मै प्रोवाच हरिवाहनः ।
ऋषयो वा इन्द्रमिति ब्राह्मणात्तद्धि दृश्यते ॥१५७॥
वसिष्ठश्च वसिष्ठाश्च ब्राह्मणा ब्रह्मकर्मणि ।
सर्वकर्मसु यज्ञेषु दक्षिणीयतमास्तथा ॥१५८॥
तस्माद्योऽद्यापि वासिष्ठाः सदस्याः स्युस्तु कर्हिचित् ।
अर्हयेद्दक्षिणाभिस्तान् भाल्लवेयी श्रुतिस्त्वियम्॥१५९॥
'उर्वश्यप्सरा' इत्यादि (N. 5. 13.) BD.5. 143-159.
तस्या दर्शनान्मित्रावरुणयो रेतश्चस्कन्द (N. 5. 14) इति यास्कः । 'मित्रावरुणयोर्दीक्षितयोर्वर्वशीमप्सरसं दृष्ट्वा' (KSA. 12. 166.) इत्यनुक्रमणी । एवं वसिष्ठस्य कुम्भयोनित्वम् । वसिष्ठः पूर्वोक्तया त्रिष्टुभा यातुधानत्वं परिहरति DDN.
७. राक्षसः Sy.
८. अराक्षसं सन्तम् Sy. यो दुर्जनः । माम् । अयातुधानम् । अराक्षसं सन्तम् DDN.
९. ०धानं M. The rest of the commentary is missing in M. हे राक्षस ! इति सम्बोध्य Sy.
१०. ब्रूते DDN.
११. चा स्वरम् A.
वा अथवा यो दुष्टः Sy.
१२. ०सं A. रक्षाः सन् DDN.

रहम्[१] । अस्मि[२] । इति । वदति । इन्द्रः[४] तम्[५] । हन्तु[६] । महता[७] । वधेन[८] । स[९] विश्वस्य[१०] । जन्तोः । अधम[११] । पततु[१२] सर्वस्याद्[१३] भवन्तिवति[१४] ।

प्र या जिगाति[१५] खर्गलेव[१६] नक्तमप[१७] द्रुहा[१८] तन्वं[१९] गूहमाना[२०] ।
वव्राँ अनन्ताँ अव[२१] सा पदीष्ट[२२] ग्रावाणो[२३] घ्नन्तु[२४] रक्षस[२५] उप[२६]दे[२७]ः ॥ १७ ॥

प्र या जिगाति । प्रयच्छति । या । नक्तम् । खर्गलेत्युलूकीमाहुरुलूकीमिव नक्तम् । द्रोहार्थं मनुष्याणाम् । शरीरम्[२१] । अपगूहमाना[२०] । सा । अपर्यन्तान्[२२] । कृपन्[२३] । अवपदीष्ट कूपेष्ववाक्पतत्वगाधेषु[२४] । ग्रावाणः[२५] । घ्नन्तु[२६] । राक्षसान् । शब्दै[२७] ।

---

१. (ऋ) रुचिरमहम् A. शुद्ध. Sy अहं वसिष्ठः शुचिः DDN.

२. भवामि Sy

३. The rest of the commentary is missing in M. हे राक्षस ! इति सम्बोध्य Sy.

४. देवः । वज्रेण । 'सृकः, वृकः, वधः' इति तन्नाम (वज्रनाम) (Ngh. 2. 20) हिनस्तु । स व सर्वस्य जनस्य DDN.

५. उभयविधं राक्षसम् Sy ६. हिनस्तु Sy.

७. प्रौढेन Sy ८. आयुधेन वज्रेण Sy

९. सर्वस्य Sy १०. जनस्य Sy

११. अत्सम A. निकृष्टः सन् Sy., DDN.

१२. यतनु A. अधमस्पदीष्ट इति 'दिवस्पृथिव्या अधमस्पदीष्ट०' (RPR. 4. 57.) इति निपातनात् सत्वम् ।

१३. सर्वस्याधो भवत्विति is suggested for सर्वस्याद् भवन्तिवति ।

१४. तथा स्मृतिः—
दह्यमानाः सुतीव्रेण नीचाः परयशोऽग्निना ।
अशक्तास्तत्पदं गन्तुं ततो निन्दां प्रकुर्वते ॥
DDN.

१५. जिगाति A. प्र या जिगाति is missing in M.

१६. प्रगच्छति is suggested for प्रयच्छति ॥

१७. राक्षसी Sy.

१८. रात्रौ Sy.

१९. खङ्गले० A. The passage from the beginning upto नक्तम् is missing in M.

२०. द्रोहेण युक्ता Sy.

२१. स्वकीयं शरीरम् Sy.

२२. आवृण्वती प्रकाशयन्ती Sy.

२३. कृपन् A. कूपान् is suggested for कूपन् ॥ गर्तान् Sy.

२४. कूपेष्ववत्य पतत्वगार्थेषु M. अवाङ्मुखी पतंतु Sy.

२५ सोमाभिषवार्थाः पाषाणाः Sy.

२६. हिंसन्तु Sy.

२७. अभिषवशब्दैः Sy.

वि तिष्ठध्वं मरुतो विक्ष्विच्छत गृभायतं रक्षसः सं पिनष्टन ।
वयो ये भूत्वी पतयन्ति नक्तभिर्ये वा रिपो दधिरे देवे अध्वरे ॥ १८ ॥

वि तिष्ठध्वम् । विविधम् । गच्छत । हे मरुतः ! प्रजासु । हविरिच्छत । तदनन्तरं रक्षांसि । गृह्णीत । सं च तानि । चूर्णयत । परिक्षीणः । भूत्वा । ये । रात्रिभ्यः । पतन्ति । ये । वा प पादे । उत्पादयन्ति । देवनशीले । यज्ञे तान् राक्षस इति ।

प्र वर्तय दिवो अश्मानमिन्द्र सोमंशितं मघवन्त्सं शिशाधि ।
प्राक्तादपाक्तादधरादुदक्तादभि जहि रक्षसः पर्वतेन ॥ १९ ॥

प्र वर्तय । प्रवर्तय । दिव. । अश्मानम् । इन्द्र ! वज्रम् । इन्द्र । पीतेन सोमेन शीतमात्मीयं बलम् । निशीती कुरु । वज्रेण । प्राच्याः । प्रतीच्याः । अधरात् । उदक् । अभिजहि । राक्षसान् ।

---

१. गच्छ A. गच्छत is suggested for गच्छथ ॥ यूयं तिष्ठत Sy.

२. तत्र गूढान्राक्षसान् हन्तुमिच्छत Sy.

३. तदन्तरम् M.

४. तान्राक्षसान् Sy.

५. गृहीत M.

६. पक्षिणः is suggested for परिक्षीणः ।

७. रात्रीभी रात्रिषु Sy.

८. आगच्छन्ति Sy.

९. पा A.

१०. पापदि A. पापानि is suggested for पापादि ॥ हिंसाः Sy.

११. उत्पा॰ A. विदधिरे । तान् राक्षसान् संपिनष्ट-नैरन्वयः Sy.

१२. दीप्ते Sy.

१३. नक्ते A. रात्रौ Sy.

१४. राक्षसान् हन्तुं प्रेरय Sy.

१५. अन्तरिक्षात् Sy.

१६. अग्निम् Sy.

१७. यजमानम् Sy.

१८. हे धनवन् ! इन्द्र ! Sy.

१९. पितेन A.

२०. ०शित० is suggested for शीत० ॥ सोमे तीक्ष्णीभूतं यजमानम् Sy.

२१. निशीति० A. निशिती० is suggested for निशीती० ॥ संस्कुरु Sy.

२२. प्राच्या A.

२३. अवाच्याः Sy.

२४. उत्तरतश्च A. उदक्ताच्च or उत्तरतश्च is suggested for उदक् च ॥ सर्वस्मादपि दिग्भागात् Sy.

२५. अभिजहि मारय Sy.

एत उ त्ये पतयन्ति श्वयातव इन्द्रं दिप्सन्ति दिप्सवोऽदाभ्यम् ।
शिक्षीते शक्रः पिशुनेभ्यो वधं नूनं सृजदशनिं यातुमद्भ्यः ॥ २० ॥

एते । ते । एते । पङ्क्ति । श्वयातव. । इन्द्र च । दिप्सन्ति । दम्भितुमिच्छन्त । शत्रुभिर-भिभवितुमशक्यम । अथेन्द्रश्च । तीक्ष्णीकरोति । शक्र. । राक्षसेभ्य. । वज्रम् । स क्षिप्रम् । विसृजतु । अशनिम् । अहिंसावद्भ्यः ।

इन्द्रो यातूनामभवत्पराशरो हविर्मथीनामभ्याविवासताम् ।
अभीदु शक्रः परशुर्यथा वनं पात्रेव भिन्दन्त्सत एति रक्षसः ॥ २१ ॥

इन्द्रः । 'इन्द्रोऽपि पराशर उच्यते (परा) शातयिता यातूनाम् इति यास्कः । इन्द्र । यातूनाम् हविर्मथीनाम् । आभिमुख्येन सञ्चरताम् । अभिभवम् । करोति । अभि । एव । गच्छति । शक्र । परशुः । यथा । वनमभिगच्छति । पात्राणीव । भिन्दन् मृन्मयान्यपक्वानि । विद्यमानान् प्रादुर्भूतान् राक्षसान्, पुल्लिङ्गश्च रक्षःशब्दो दृष्ट इति ।

---

१. राक्षसाः Sy.
२. पतन्ति is suggested for पंक्ति ।
३. श्वभिः परिकरभूतैर्हिंसन्तः श्वभिः सह यान्तो वा Sy.
४. इन्द्र M.
५. जिघांसन्ति Sy.
६. जिघांसवः सन्तः Sy.
७. शत्रुम् M.
८. भवतुम० A.
अहिंस्यम् Sy.
९. तीक्ष्णिक० A.
१०. पिशुनान् कपटान् हन्तुम् Sy.
११. हन्तुं शक्तः Sy.
१२. तेभ्यः पिशुनेभ्यः पिशुनान् कपटान् Sy.
१३. अप्रतिहतमशनिरूपम् Sy.
१४. विसृजतु हननार्थम् Sy.
१५. अहिंसाप (त्य) भ्य० A., हिंसा० is suggested for अहिंसा० । राक्षसेभ्यः Sy.
१६. वराशरुच्य० A.
१७. हिंसिता Sy.
१८. यातुना० A. (N. 6. 30)
१९. नूना A. हिंसकानां राक्षसानाम् Sy.
२०. ०थिनाम् A.
हवींषि मथ्नताम् Sy.
२१. अभिमुखमागच्छताम् Sy.
२२. इदु पूरणे Sy.
२३. शक्रा A.
२४. कुठारः Sy.
२५. छिन्दन् यथा.. इव Sy.
२६. न्वन० A. वृक्षजातम् Sy.
२७. हिंसन् Sy.
२८. मृय त्यपत्वानि A. मृन्मयानि पात्राणि भिन्दन् मुद्गर इव Sy.
२९. सतः प्राप्तनामैतत् यदीह यास्कः 'तिरः सत इति प्राप्तस्य' N. 3 20.
३०. ०ताद्भक्ष० M. प्राप्तान् Sy.

उलूकयातुं शुशुलूकयातुं जहि श्वयातुमुत कोकयातुम् ।
सुपर्ण्यातुमुत गृध्रयातुं दृषदेव प्र मृण रक्ष इन्द्र ॥ २२ ॥

उलूकयातुम् । उलूकादयो रात्रि-चरा प्राणिना हिंसका येषा हिंसासाधनानि भवन्ति ते तथोक्ता इत्येतान् । दृषदुपलाभ्यामिव बीजादिकम् । सञ्चूर्णयेति ।

मा नो रक्षो अभि नड्यातुमावतामपोच्छतु मिथुना या किमीदिना ।
पृथिवी नः पार्थिवात्पात्वंहसोऽन्तरिक्षं दिव्यात्पात्वस्मान् ॥ २३ ॥

मा नो रक्षः । रक्षो रक्षितव्यमित्यस्मादित्युक्तम् । अस्मान् । अभिव्याप्नोतु । हिंसावता बलम् । पृथक् करोतु । मिथुनानि । किमिद किमिदमित्याचरन्ति । राक्षसाना तानिन्द्रोऽपोहतु । पृथिवी न इति स्पष्टम् ।

---

१. ०ना A. ०नो M.
२. हिंसा० A. ३. दृषदु० A.
४. VM. explains the stanza briefly and not word by word. Sy. explains this stanza in the following manner:—
उलूकयातुम् । उलूकैः परिकरभूतैः सह यातयति हिनस्तीति याति गच्छतीति वोलूकयातुः । यद्वा—उलूकरूपो यातीत्युलूकयातुः । हे इन्द्र ! तादृशं राक्षसं जहि विनाशय । तथा च बृहद्देवतायाम् उक्तम्—'उलूकयातु जह्येतान् नानारूपान् निशाचरान् । स्त्रीपुंरूपांश्च तिर्यञ्चो जिघांसून्निन्द्र मे जहि ॥' (BD. 6. 32.) एवमुत्तरत्रापि योज्यम् । शुशुलूकयातुम्, उलूकाद्विविधाः बृहदुलूका अल्पोलूकाश्चेति । तत्रोलूकयातुमिति बृहदुलूकाभिप्रायेणोक्तम् । शिशुरल्प उलूकः शिशुलूकः, तद्रूपेण वर्तमानं राक्षसं श्वयातुं श्वरूपेण वर्तमानं राक्षसम् । उतापि च कोकयातुम् । कोकश्चक्रवाकः, तद्रूपेण वर्तमानं राक्षसम् । सुपर्णयातुम्, सुपर्णः श्येनः तदाकारं यातुधानमुतापि च गृध्रयातुं गृध्ररूपं च यातुधानमेतान् सर्वान् नानाकारान् हे इन्द्र जहि । किं बहुना ? दृषदेव पाषाणेनेव वज्रेण रक्षो राक्षसमात्रं प्र मृण मारय ।
५. राक्षसजातिः Sy.
६. स्मोदि० A. रक्षोजातिः Sy.
७. नट्—नशतेर्व्याप्तिकर्मणो लुडि 'मन्त्रे घस०' च्लेर्लुक् । 'न माड्योगे' इत्यडभावः Sy.
८ यातनावतां राक्षसानाम् Sy.
९. उत अपि विनाशयतु अपवर्जयतु Sy.
१०. मिथुनानि स्त्रीपुंरूपाणि युगलानि Sy.
११. ०मत्या० A. किमीदिना किमीदिनानि किमिदं किमिदमिति जिघांसया वर्तमानानि भवन्ति Sy.
१२. वोह० A.
१३ अपि च पृथिवी प्रथितेयं भूमिश्च Sy.
१४. अस्मान् Sy.
१५. VM. ignores मा । पार्थिवात् । पातु । अंहसा । अन्तरिक्षम् । दिव्यात् । पातु । अस्मान् ॥ पौर्थिवात् पृथिव्या अन्तरिक्षस्य सम्बधिनोंऽहसः पापात् पातु रक्षतु । अन्तरिक्षं च दिव्यात् दिवि भवात् पापादस्मान् पातु रक्षतु Sy.

इन्द्रं जहि पुमांसं यातुधानमुत स्त्रियं मायया शाशदानाम् ।
विग्रीवासो मूरदेवा ऋदन्तु मा ते दृशन्त्सूर्यमुच्चरन्तम् ॥ २४ ॥

इन्द्र जहि[1]। इन्द्र ! जहि[2]। पुमांसम्[3]। यातुधानम्[4]। अपि च। स्त्रियम्[5], तेन सहागच्छन्तीम्। मायया[6]। प्रजा पीडयन्तीम्[7]। विगतश्रीवा[8]। मूरदेवा[9] मरणक्रीडा राक्षसा[10]। ऋदितिर्गमनकर्मा नाशकर्मा वा गच्छन्तु नश्यन्तु वेति। मा। ते[11]। द्राक्षुः। सूर्यम्[12]। उद्यन्तम्।

प्रति[13] चक्ष्व वि चक्ष्वेन्द्रश्च सोम जागृतम् ।
रक्षोभ्यो वधमस्यतमशनिं यातुमद्भ्यः ॥ २५ ॥

प्रति चक्ष्व[14]। प्रतिपश्य। विपश्य[15]। इन्द्र। त्वम्। च। सोम[16]! युवाम्। जागरणं कुरुत[17]। रक्षोभ्यः[18]। हन्तारम्[19]। अस्यतम्[20]। अशिनम्[21]। हिसावद्भ्य इति।

[इति सप्तम मण्डल समाप्तम्[22]]

---

१. इन्द्रः सहि A.

२. मारय Sy.

३. पुंरूपधारिणम् Sy.

४. यातुधानम् Sy.

५. राक्षसी च जहि Sy.

६. वञ्चनया Sy.

७. हिंसन्तीम् Sy.

८. श्रीर्वा० M. ग्रीवाः is suggested for ०श्रीवा ॥ विच्छिन्नग्रीवाः सन्तः Sy.

९. मारणक्रीडाः Sy.

१०. नाशकर्मा is missing in A.

११. तेऽविधा राक्षसाः Sy.

१२. आदित्यम् Sy.

१३. उपाकरणोत्सर्जनयोर्मण्डलाद्यन्तहोमे 'प्रति चक्ष्व' इत्येषा । सूत्रितञ्च—'यो नः स्वो अरणः प्रति चक्ष्व' (ĀGS. 3.5.7.) इति Sy.

१४. प्रत्येकं पश्य राक्षसान् Sy.

१५. विपश्च A. विविध पश्य यथास्मान्न बाधेरंस्तथा पश्येत्यर्थः Sy.

१६ युवा संहतौ Sy.

१७. कुरुतम् is suggested for कुरुतः ॥ जागरूको रक्षोवधोद्युक्तौ भवतम् Sy.

१८. राक्षसेभ्यः Sy.

१९. अशनिरूपम् Sy.

२०. क्षिपतम् Sy.

२१. आयुधम् Sy.

२२. Supplied by the Editor.